॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

( ग्रन्थ-संख्या १०२ )

श्रीश्वेतायनव्यासविरचिता

# श्रीलक्ष्मीनारायणसंहिता

## द्वापरयुगसन्तानाख्यः तृतीयः खण्डः

रचयिता

न्यायाचार्यः

**स्वामी श्रीकृष्णवल्लभाचार्यः शास्त्री**

( नवानगर, सौराष्ट्र )

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९७३

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : प्रथम, वि० सं० २०३०
मूल्य : ५०-०० ( तृतीय खण्ड )

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी-१ ( उ० प्र० )
भारतवर्ष
फोन नं० ६३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
( WORK NO. 102 )

# ŚRĪLAKṢMĪNĀRĀYAṆASAṂHITĀ

OF

ŚRĪ ŚVETĀYANA VYĀSA

## VOL. III

## ( DVĀPARAYUGASĀNTĀNA )

BY

NYĀYĀCĀRYA
SWĀMĪ SRĪKṚṢṆAVALLABHĀCĀRYA, ŚĀSTRĪ

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-1 ( India )
1973

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi-1
Printer : The Vidya Vilas Press, Varanasi-1
Edition : First Edition, 1973
Price : Rs. 50-00 ( Vol. III )

© The Chowkhamba Sanskrit Series Office
Publishers and Oriental & Foreign Book-Sellers
P. O. Chowkhamba, Post Box 8,
Varanasi-1 ( India )
1973
Phone : 63145

ओम्

श्रीलक्ष्मीनारायणसंहितायाः

# तृतीयखण्डस्य द्वापरसन्तानाख्यस्याऽनुक्रमणिका


| अध्यायाः | पृष्ठाः |
|---|---|
| १. नारायणीश्रीकृता श्रीपुरुषोत्तमस्तुतिः, पुरुषोत्तमदर्शिता सृष्टिकालगणना चेति । | १ |
| २. वेधसो द्वापञ्चाशद्वर्षनामानि वर्तमानकल्पीयचतुर्दशमनुनामानि द्वापञ्चाशद्वर्षीयाऽन्तिमचत्वारिंशत्कल्पनामानि श्रीपुरुषोत्तमकिरणपोष्यं सृष्टित्रयमिति विभूत्यादिकथनम् । | ४ |
| ३. वेधसः प्रथमे वर्षे रोह्विणासुरनिगलितस्वर्गरक्षार्थम् अनादिश्रीद्युनारायणस्य, द्वितीये वर्षे तु स्वभारेण निमज्जतो मेरोर्धारणार्थम् अनादिश्रीमेरुनारायणस्य, तृतीये वर्षे तु दाहयतो रवेः शातनार्थम् अनादिश्रीविष्णुनारायणस्य प्राकट्यदर्शनमिति । | ७ |
| ४. वेधसश्चतुर्थवत्सरे धूम्रासुरनाशार्थं चन्द्ररक्षार्थम् अनादिश्रीदेवनारायणस्य, पञ्चमवत्सरे त्वध्वरतन्तुसम्पादनार्थम् अनादिश्रीयज्ञनारायणस्य प्राकट्यदर्शनमिति । | १० |
| ५. वेधसः षष्ठवत्सरे रुद्रशासनार्थम् अनादिब्रह्मनारायणस्य, सप्तमवत्सरे देवानां धिष्ण्यनियमार्थम् अनाद्यादित्यनारायणस्य प्राकट्यमिति । | १३ |
| ६. वेधसोऽष्टमवत्सरे सर्पाणां शासनार्थं भूमावनादिश्रीगरुत्मन्नारायणस्य प्राकट्यमिति । | १६ |
| . वेधसो नवमवत्सरे चलदेववंशे ध्रुवदेवस्याऽचलतार्थम् अनाद्यार्षनारायणस्य, दशमवत्सरे च ध्रुवदेवपुत्रस्य पुरानन्दस्य दानवैर्वर्धितस्य पराभवार्थम् अनादिप्राज्ञनारायणस्य प्राकट्यं ज्योत्स्नाकुमारिकालक्ष्म्याः स्वयंवरश्चेत्यादि । | १८ |
| . ज्योत्स्नाश्रीसमर्पिताऽनादिप्राज्ञनारायणकण्ठे वरमाला, ततो राज्ञां युद्धम्, दैत्यदानवादीनां नाशः, थुरानन्दस्य मोक्षणम्, मानवदेवादीनां निष्कण्टकराज्यानि, वेधसश्चैकादशे वत्सरे नैष्ठिकसाधुधर्मस्थापनार्थम् अनादिनैष्ठिकवीरनारायणस्य प्राकट्यमिति । | २१ |
| ९. वेधसो द्वादशे वत्सरे शोणभद्रयज्ञे दग्धानां मोक्षार्थम् अनादिभद्रनारायणस्य, त्रयोदशे वत्सरे तुंगभद्रासनायोगिन्या कृतसूर्यादिगतिरोधे परमेशप्रार्थनेत्यादि । | २४ |
| १०. अक्षराच्छ्रीहरेर्देवैः सह तुंगभद्रासनागृहमागमनम्, ग्रहाणां गत्यर्थमभ्यर्थनम्, तुंगभद्रासनाया हरेः स्वपुत्रीलक्ष्मीग्रहणार्थं गृहजामातृतया वरणम्, विवाहोत्सवः, ग्रहाणां गत्यरोधः, प्रकटाऽनादिश्रीहरिनारायणकृतधर्मादिव्यवस्था राक्षसनिराकरणं चेति । | २७ |
| ११. वेधसश्चतुर्दशे वत्सरे कोशस्तेनाऽभिधराक्षसकृतस्य नष्टबीजस्य स्वर्गस्य रक्षणार्थम् अनादिश्रीबीजनारायणस्य प्राकट्यं, ततो बीजस्तेनस्य निवासस्थानमर्यादाकरणमित्यादि । | ३० |
| १२. वेधसः पञ्चदशे वत्सरे धर्मव्रतविप्रगृहे दशाधिकशतपुत्राणां मोक्षोत्तरं साग्रजस्याऽनादिश्रीवरनारायणस्य प्राकट्यमित्यादि । | ३३ |
| १३. वेधसः षोडशे वत्सरे आर्षकुमारशिष्यया ब्रह्मचारिण्या सुदर्शन्या स्वप्रधर्षणकारिणां शुक्रादीनां दोषेण तेषां दैत्यदानवमानवादीनां भूस्थानामन्यत्रस्थानामपि शापद्वारा स्त्रीकरणमित्यादि । | ३६ |
| १४. स्त्रीभूतानां भूतलादिवासिप्रजानां रक्षणार्थं प्रार्थनयाऽनादिश्रीस्त्रीपुंनारायणस्य, वेधसः सप्तदशे तु वत्सरे च माकरादिदैत्यनाशार्थम् अनादिश्रीजलनारायणस्य प्राकट्यमित्यादि । | ३९ |
| १५. वेधसोऽष्टादशे वत्सरे साधुशीलधर्मादिस्थापनार्थम् अनादिश्रीशीलनारायणस्य प्राकट्यमित्यादि । | ४२ |
| १६. वेधस एकोनविंशे वत्सरे रौद्रस्य व्याघ्रानलासुरस्य नाशार्थम् अनादिश्रीवार्धिनारायणस्य प्राकट्यमित्यादि । | ४५ |

| अध्यायाः | पृष्ठाः |
| --- | --- |
| १७. वेधसो विंशतितमे वत्सरे सृष्टिसद्दशस्याऽनादिचतुर्मुखनारायणस्य प्रभाक्षिकीरमासहितस्य प्राकट्यमित्यादि । | ४८ |
| १८. वेधसश्चैकविंशे वत्सरे सर्वभूमिदेहिमोक्षार्थं तपतोः राधनिका-पुण्यव्रातविप्रयोर्मन्वन्तरकाले गते वाञ्छापूरणार्थं श्रीपुरुषोत्तमनारायणस्य सर्वेश्वरदेवर्षिसहितस्याऽऽगमनमिति । | ५१ |
| १९. वेधसो द्वाविंशे वत्सरे तीर्थानां पावनार्थं चारण्यक्षेऽनादिश्रीतीर्थनारायणस्य प्राकट्यमित्यादि । | ५४ |
| २०. वेधसस्त्रयोविंशे वत्सरे भक्तेः प्रार्थनयाऽनादिश्रीजीवन्नारायणस्य प्राकट्यं शंकरद्वारा भक्तिमार्गप्रवर्तनं चेत्यादि । | ५६ |
| २१. वेधसश्चतुर्विंशे वत्सरेऽनादिश्रीमदर्धश्रीशनारायणस्य, पञ्चविंशे वत्सरेऽनादिश्रीमदर्धपितृनारायणस्य, षड्विंशे वत्सरेऽनादिश्रीप्लक्षनारायणस्य प्राकट्यमित्यादि । | ५९ |
| २२. वेधसः सप्तविंशे वत्सरे नरमेधे भक्तरक्षार्थम् अनादिश्रीपुंस्त्व( शालग्राम )नारायणस्य प्राकट्यं नरमेधादितात्पर्यं चेत्यादि । | ६२ |
| २३. वेधसोऽष्टाविंशे वत्सरे सूर्यवर्चानृपद्वारा मन्दिरेऽनादिश्रीश्याम( शिंशपा )नारायणस्य वटश्रीसहितस्य प्राकट्यमित्यादि । | ६५ |
| २४. वेधसो नवविंशे वत्सरे मायूरकाऽसुरनाशार्थम् अनादिश्रीराजनारायणस्य राजराज्ञीश्रीसहितस्य प्राकट्यमित्यादि । | ६८ |
| २५. वेधसस्त्रिंशे वत्सरे देवसख्यादिभक्त्या समायातया लक्ष्म्या कृतप्रस्नवणासुररतिकामवसन्तबाणादिभस्मीभावोत्तरं नैष्ठिकव्रतरक्षार्थम् अनादिश्रीब्रह्मचारिनारायणस्य नैष्ठिकीश्रीयुतस्य प्राकट्यमिति । | ७० |
| २६. वेधस एकत्रिंशे वत्सरे हल्लकाऽसुरस्य ब्रह्मवरदानाद् विजययात्रायां शंभोश्शिरश्छेदे उज्जीवनार्थम् अनादिश्रीशिवनारायणस्य प्राकट्यमित्यादि । | ७३ |
| २७. वेधसो द्वात्रिंशे वत्सरे यमेन मारितस्य कुबेरस्योज्जीवनार्थम् अनादिश्रीस्वर्णनारायणस्य कानकीश्रीसहितस्य प्राकट्यमित्यादि । | ७६ |
| २८. वेधसस्त्रयस्त्रिंशद्वत्सरे ज्वालरुगाच्चलवह्निरसैर्दह्यमानानां स्वामिनगरतद्देशप्रजानां रक्षार्थम् अनादिश्रीस्वामिनारायणस्य श्रीस्वामिनीश्रीसहितस्य, चतुस्त्रिंशद्वत्सरे च निर्वाणिकाविप्राण्या अष्टादशोत्तरशतनामभिराराधितया लक्ष्म्या साकम् अनादिश्रीसावननारायणस्य प्राकट्यं चेत्यादि । | ७८ |
| २९. वेधसः पञ्चत्रिंशद्वत्सरेऽशुक्रमथनृपतेर्भक्त्याऽनादिश्रीसाधुनारायणस्य साध्वीनारायण्या लक्ष्म्या सह प्राकट्यमित्यादि । | ८१ |
| ३०. वेधसः षट्त्रिंशद्वत्सरे हरिप्रथभक्तस्य शापेन मृतस्य वर्णिशालमनोरुज्जीवनार्थम् अनादिश्रीभक्तनारायणस्य कुंभिकाश्रीसहितस्य प्राकट्यमित्यादि । | ८४ |
| ३१. वेधसः सप्तत्रिंशे वत्सरेऽजहारितर्षिशापेनाऽश्वीभूतस्य वर्मधरनृपस्य मोक्षार्थं तत्पुत्रकृताश्वमेधेऽनादिश्रीमेधनारायणस्य मेधावतीलक्ष्म्या सहितस्य प्राकट्यमित्यादि । | ८६ |
| ३२. वेधसोऽष्टात्रिंशे वर्षेऽनलादमहासुरविनाशार्थम् अनादिश्रीवह्निनारायणस्य पार्थिवीश्रिया सहितस्य, तथा नवत्रिंशे वर्षे इलोदरस्य रसादासुरस्य विनाशार्थम् अनादिश्रीरसनारायणस्य श्रीरसलक्ष्म्या सहितस्य च प्राकट्यमित्यादि । | ८९ |
| ३३. वेधसश्चत्वारिंशे वत्सरे दैत्यानां नाशार्थं अनादिश्रीचक्रनारायणस्य सुधाक्षिणीश्रीसहितस्य, एकचत्वारिंशे वत्सरे सत्ययुगधर्मस्थापनार्थम् अनादिश्रीसत्यनारायणस्य विजयाश्रीसहितस्य, द्वाचत्वारिंशे वत्सरे च पर्वतानां स्थित्यर्थम् अनादिश्रीहिरण्यनारायणस्य हिरण्याश्रीसहितस्य प्राकट्यमित्यादि । | ९२ |
| ३४. वेधसस्त्रिचत्वारिंशे वत्सरे भक्ताऽर्थम् अनादिश्रीनैरञ्जनिनारायणस्य नैष्किञ्चनीश्रीसहितस्य, चतुश्चत्वारिंशे वत्सरे ब्रह्मणः पुण्यवतीशापनिवृत्त्यर्थम् अनादिश्रीपुण्यनारायणस्य कल्याणिकाश्रीसहितस्य च प्राकट्यमित्यादि । | ९५ |

अध्यायाः पृष्ठाः

३५. वेधसः पञ्चचत्वारिंशे वत्सरेऽप्सरसां मानुषीभूतानाम् मनोरथपूरणार्थम् अनादिश्रीबृहद्ब्रह्मनारायणस्य रुक्मवतीश्रीसहितस्य, षट्चत्वारिंशे वत्सरे च महर्षिभ्यो ब्रह्मविद्यादिदानार्थम् अनादिश्रीगुरुनारायणस्य सुविद्याश्रीसहितस्य, सप्तचत्वारिंशे वत्सरे च हरिभक्तस्य बृहद्धर्मनृपतेः राजसूययज्ञे सर्वस्वदानोत्तरं साधवीमहादीक्षार्थम् प्रार्थितस्याऽनादिश्रीमदाचार्यनारायणस्याऽऽचार्याणीश्रीसहितस्य च प्राकट्यमित्यादि। ९८

३६. वेधसोऽष्टचत्वारिंशे वत्सरे विद्युत्स्थावराक्षसादीनां विनाशार्थम् अनादिश्रीमहाविद्युन्नारायणस्य वैद्युतीशानीश्रीसहितस्य, नवचत्वारिंशे वत्सरे मधुभक्षादिदैत्यनाशार्थम् अनादिश्रीमधुनारायणस्य माधवीश्रीसहितस्य, पञ्चाशत्तमे वत्सरे च गोवृषादिहन्तॄणां तिष्ये दैत्यानां नाशार्थम् अनादिश्रीनाथनारायणस्य धेनुमतीश्रीसहितस्य च प्राकट्यमित्यादि। १०२

३७. वेधस एकपञ्चाशत्तमे वत्सरे सुवर्णोत्सवेऽनादिश्रीविभुनारायणस्य बिम्बीश्रीसहितस्य, द्वापञ्चाशत्तमे वत्सरेऽनादिश्रीमोक्षनारायणस्य मुक्तिश्रीसहितस्य च प्राकट्यमित्यादि। १०५

३८. वेधसस्त्रिपञ्चाशत्तमे वत्सरेऽनादिश्रीकृष्णनारायणस्य श्रीशिवराजीश्रीसहितस्य प्राकट्यम्, कोट्यर्बुदाब्जमहिषीकान्तस्य प्राकट्यम्, लक्ष्मीनारायणयुगलद्वादशोत्तरसहस्रनामस्तवनं चेत्यादि। १०८

३९. बदर्यां तपोऽर्थं गतानां महर्षीणां नरनारायणे परब्रह्मरूपदर्शनात् तृप्तानां मानवेभ्यश्चोपदेशनमित्यादि। ११६

४०. वधूगीतायां श्रीकृष्णनारायणोपदिष्टगृहस्त्रीकर्तव्यतादि। ११८

४१. वधूगीतायां वधूटीधर्मादिसदाचारवर्णनम्। १२१

४२. वधूगीतायाम् अधिकसदाचारवर्णनम्। १२४

४३. वधूगीतायां वधूपाल्याचारादिवर्णनम्। १२७

४४. वधूगीतायां सतीसत्यसामर्थ्यनिरूपणम्। १३०

४५. वधूगीतायां निर्गुणभक्तियोगनिरूपणम्। १३३

४६. वधूगीतायां साक्षात्पुरुषोत्तमयोगनिरूपणम्। १३६

४७. वधूगीतायां साक्षात्परब्रह्मयोगनिरूपणम्। १३९

अध्यायाः

४८. वधूगीतायां अक्षरातीततादात्म्ययोगनिरूपणम्। १४२

४९. वधूगीतायां पापोद्धारकलक्ष्मीनारायणव्रतश्रीहरिगुरुगुर्वीतीर्थमहिमवर्णनम्। १४५

५०. वधूगीतायां गुरुतीर्थे दिव्यादेवीमोक्षणमित्यादि। १४७

५१. वधूगीतायां गुरुतीर्थे तीर्थानां पापनाशकं गुरुपदम्, अदत्ताऽन्नजलदानकस्य सुबाहुनृपतेः स्वशवभक्षकस्य वामदेवाख्यगुरोर्योगाग्नितृप्तिर्मोक्षावाप्तिश्चेत्यादि। १५०

५२. वधूगीतायां गुरुतीर्थे नहुषकथानकं कुंजलशुककथानकं कामोदा (तुलसी) कथानकं च्यवनकथानकं चेत्यादि। १५४

५३. वधूगीतायां गुरुतीर्थे गुरुरहस्यसदाचारकथनमित्यादि। १५७

५४. वधूगीतायां गुरुतीर्थे ऋषिधर्ममहर्षेर्योगेन लीलावत्याः सुशीलादीनां च पापानां विगमे ब्रह्मप्रियात्वप्राप्त्यादि। १६०

५५. वधूगीतायां गुरुतीर्थे चैतन्यशीलगुरोः प्रतापात् सुमरपत्न्याः रक्षाश्वपच्याः पतिना सह गुरुणा च सह मोक्षप्राप्तिरित्यादि। १६३

५६. वधूगीतायां गुरोः श्रेष्ठतमत्वे श्रीहरिस्वरूपात्मकलाहेतुनिरूपणादि। १६५

५७. वधूगीतायां ध्येयस्य श्रीहरेः सर्वार्पणस्तोत्रादि। १६८

५८. वधूगीतायां कौशिकादिगायकदृष्टान्तेन वैष्णवोत्तमत्वनिरूपणम्। १७१

५९. वधूगीतायां श्रेष्ठभक्तनिदर्शने नारदस्य गानशिक्षार्जनं नारदगुरोरुलूकस्य गानबन्धोर्गरुडताप्राप्तिरित्यादि। १७४

६०. वधूगीतायां महाभागवतभक्तचिह्नानि, चिदम्बराराज्ञ्याः परीक्षणं भक्तिश्चेत्यादि। १७७

६१. वधूगीतायां चिदम्बराराज्ञ्या भगवद्दया कृतं भद्रकादिरक्षःसंघाद्रक्षणमित्यादि। १८०

६२. वधूगीतायां बहुविधानां दिव्यमन्त्राणां गुरोर्बलस्य च निरूपणम्। १८२

६३. वधूगीतायाम् अनावरणसेवादास्यसाधुसाध्वीश्रैष्ठ्यदमनकव्रतादिनिरूपणम्। १८५

६४. वधूगीतायां सर्वतिथिषु हरेर्भिन्नरूपस्य पूजा गुरुरूपस्य हरेः सदा पूजा चेत्यादि। १८८

६५. वधूगीतायां भगवद्भक्तभक्तिमाहात्म्योत्कृष्टत्वम्। १९१

६६. वधूगीतायां वधूभक्तिरहस्यनिरूपणम्। १९४

| अध्यायाः | पृष्ठाः |
|---|---|
| ६७. वधूगीतायां हरेः कृपासर्वस्वफलनिरूपणम् । | १९७ |
| ६८. महामन्त्ररहस्ये मन्त्रतदर्थन्यासादिनिरूपणम् । | २०० |
| ६९. महामन्त्रादिगायत्र्यादिसचन्द्रकोर्ध्वपुण्ड्रादिमहिमनिरूपणम् । | २०३ |
| ७०. महामन्त्रगूढार्थज्ञानप्राप्त्यादिनिरूपणम् । | २०६ |
| ७१. त्रिपाद्विभूतिः, मायाप्रार्थनया कृतैकपादलीलाविभूतावपि दिव्यतादि । | २०९ |
| ७२. भगवन्नाममन्त्रभजनेन ययातेः प्रभावेण सर्वप्रजावैष्णवत्वादि । | २११ |
| ७३. ययातेः स्वर्गतः पृथिव्यामधिकभक्तिलाभइतिमन्यमानस्य पृथिव्यास्त्याजनार्थम् इन्द्रकृतबिन्दुमत्याः प्रदानं पुत्रतो यौवनप्राप्तिश्चान्ते राज्ञः सप्रजस्य वैकुण्ठप्राप्तिरित्यादि । | २१४ |
| ७४. अनादिश्रीकृष्णनारायणभक्तस्य महिमकथने हरेस्तुष्टिसाधनानां वर्णनं, कदर्यस्य परशुचन्द्रकस्य विप्रस्य स्वल्पदानस्याऽनन्तफलप्राप्तिश्चेत्यादि । | २१७ |
| ७५. वह्निप्रकाशतिरोभावौ, विविधसाधनैर्विविधफलप्राप्तिः साधुप्रतापः साधुसंगमे श्रीहरेर्मम प्राप्तिश्चेत्यादि । | २२० |
| ७६. ब्रह्मिष्ठत्वसाधुत्वप्रापकसाधनानि, धामगमनसाधनानि, अकषायसत्पथसाधनानि, दिव्यदानादीनि हरेर्योगश्चेत्यादीनि । | २२३ |
| ७७. सतीसाध्वीनां पातिव्रत्यपराकाष्ठादिविज्ञाननिरूपणम् । | २२६ |
| ७८. सुचन्द्रिकाऽभिधगोप्याः पातिव्रत्येन हरिपातिव्रत्यभक्त्या च सपतिकायाः स्वर्गसत्यवैकुण्ठगोलोकाऽक्षरधामगमनमितिसाध्वीचमत्कार - कथनम् । | २२९ |
| ७९. साध्व्याः कर्तव्ये पूजादानादिः, हरिप्रथमनोः पत्न्या ब्रह्मप्रथायाः साध्व्याः स्वर्गे स्थित्युत्तरं साधुसाध्वीसेवाफलं चाऽक्षरधामप्राप्तिरित्यादि । | २३२ |
| ८०. दीर्घायुःप्रदसाधनं मोक्षसाधनं साधुतीर्थसेवनादिकमिति । | २३५ |
| ८१. साधुसंगत्या शतग्राणां मोक्षो जीवटकीटस्य मोक्षो विनोदिन्याःपञ्चशतपुत्राणां साधुत्वं चेत्यादि । | २३७ |
| ८२. स्वैरिणीकामिनीपुँश्चलीनां गणिकानां काश्यां साधुवात्स्यायनसमागमेन पापनाशोत्तरं मुक्तिश्चेत्यादि । | २४० |
| ८३. साधुत्वे विविधप्रयोजककारणादि, साधुस्तवनाऽस्तवनफलादि चेति । | २४३ |
| ८४. साधुसमागमरहितस्यापि मोक्षोपायाः साधुलाभः साधुत्वलाभस्तद्विविधता चेत्यादि । | २४६ |
| ८५. साधोर्मुख्यधर्मो नारायणः, तेन साधुत्वम्, साधवे नारायणनतयः, वृषायनेन साधुना चटकाभारमांसं श्येनाय दत्वा चटका रक्षितेत्यादि । | २४९ |
| ८६. धनमदिबलगर्विराज्यपालिप्रभृतीनां परमश्रेयसि चित्रकेतोर्मालत्या दृष्टान्तेन साधुप्रतापफलादि । | २५२ |
| ८७. विप्रगृहिभ्यः साधवः सर्वथा श्रेष्ठतमा इत्यर्थे विष्णोर्निदर्शनं दुर्गाया अपि साधुसेवानिदर्शनं चेत्यादि । | २५५ |
| ८८. सहधर्मस्वरूपवर्णनं चाऽसहधर्मे सति निरयगामित्वमित्यादि । | २५८ |
| ८९. प्रत्यक्षनिरयाणां निदर्शनम्, कर्षुकभृत्यदृष्टान्तेन द्रव्यादयः प्रत्यक्षनिरयाः, प्रत्यक्षस्वर्गं चेत्यादि प्रदर्शितम् । | २६१ |
| ९०. स्वर्गगामिनः, अघातयित्वाऽपि घातकिनः, कृपया क्रमोद्धारः, सत्सेवयोद्धारश्चेत्यादि । | २६३ |
| ९१. घातकिनां तीर्थयोगेन पावनत्वम्, जंगमतीर्थे साधुजनादयः, पुराऽश्वपट्टसरोवरे द्विजायाः पुत्रस्य कृशांगस्य वृषलोद्भवस्य चाण्डालत्वेऽपि तपोभिश्चेन्द्रवरेण ब्रह्मिष्ठत्वं कृष्णानुत्वं ह्यभवदित्यादि । | २६६ |
| ९२. अन्यजातीनामपि गुणव्रताऽऽचारदीक्षावरशापलग्नादियोगेन तत्तज्जातिपरिवर्तनं ब्राह्मण्यं च जायतेऽत्राऽर्थेऽनेकनिदर्शनानि भंगास्वननृपस्य नारीत्वे निदर्शनम् । | २७० |
| ९३. सर्वबलाधिके ब्रह्मयोगबले रुचिब्राह्मण्याः शीलरक्षणे विपुलाख्यशिष्यस्य योगनिष्ठस्य विजयः, इन्द्रस्य पराजयः, लोममर्षणकपर्दकराक्षसयोर्विनाशः, गुरोः प्रसन्नताऽऽशीर्वादः, साधुत्वगौरवं चेत्यादि । | २७३ |
| ९४. परशुरामाश्रयेण सिंहारण्यवासिनां सागरमग्नस्य गोकर्णतीर्थस्य पुनर्लाभः, उत्तंकर्षेः कृपया कुवलाश्वस्य धुन्धुमारत्वम्, विश्वामित्रस्य कृपया सत्यव्रताख्यत्रिशंकोः सदेहस्वर्गगामित्वमित्यादि सतां महिमा चेति । | २७५ |

अध्यायाः | पृष्ठाः

९५. पूजनीयनमस्करणीयसाधुजनमाहात्म्ये प्रणद्ब्रह्माख्यसाधोराशीर्वादेन सेवया च कश्यपस्याऽदितेश्च देवतामात्रपितृत्वादिसृष्टिमात्रपितृत्वादि चेति । २७८

९६. श्रीहरिसत्पुरुषधर्मसतीजनमोक्षतत्साधनभक्त्यादिषु प्रमाणानां गतिः साधूनां समागमो बलवत्प्रमाणं चमत्कारो बलवत्तमं चेत्यादि । २८१

९७. लोकव्यायामशालिभिरपि सत्संगेन मुक्तिर्लभ्यते तापसैरपि तथेत्यर्थे आलम्बायनसाधोः समागमेन लक्षाधिलक्षमानवानां गोकर्णे मुक्तिप्राप्तिरित्यादि । २८४

९८. आपद्गतस्यापि साधुसंगतिः कल्याणदेत्यर्थे गृध्रश्वपचयोः शबरस्य च स्वर्गाद्युत्तरं मोक्षणमित्यादि । २८७

९९. साधुपुरुषेषु सदा लक्ष्मीनिवासो लक्ष्मीनिवासस्थानानि चेति । २९०

१००. भगवदवताराणां सृष्टावागमने कृपा वा भृगोः शापो निमित्तं, दैत्यानां द्वादशसंग्रामाः, पार्वतीयुगलदेवीकुटुम्बस्य प्राग्वृत्तान्तश्चेत्यादिकथानकम् । २९३

१०१. साधुयोगहीनस्य प्रेतस्योद्धरणे गोदानं हेतुरिति गोमाहात्म्यादि । २९७

१०२. गवाराधननामव्रतं, गोशकृन्मूत्रयोर्लक्ष्मीवासः, गोदानस्य विविधफलानि, भारुण्डप्रेतोद्धारकाणि, साध्वाश्रयः सर्वोद्धारकश्चेत्यादि । ३००

१०३. विविधदानैः प्रेतोद्धारो भवति, दानपात्रं श्रेष्ठं साधुजनश्चेत्यादौ वृषादर्भेः सूर्यस्य च निदर्शनम् । ३०३

१०४. गार्हस्थ्यधर्मसारे नरशायतस्करस्य श्रीचक्रभाससाधुयोगेन दिव्यलक्ष्मीद्वारा मुक्तिः, पूर्वधनिनामपि मुक्तिर्ब्रह्मसत्रविज्ञानं चेत्यादि । ३०६

१०५. सर्वधर्मकर्मणां मूलं विवाहिता पत्नीति जांघलामखस्य क्षत्रियस्य कुन्दधर्मापत्न्याः सहधर्मे चमत्कारः, कन्यादानयोग्यता वरयोग्यता दायभागयोग्यता बीजशुद्धिरित्यादि । ३०९

१०६. विविधपुत्रा विविधपत्न्यो विविधपतयः, साधुयोगेन मुक्तिः, सूतजातीयस्य शंभलवारस्य साधुभक्तस्य भक्त्या तपसा राज्यसुतपशुपक्ष्यादिप्राप्त्युत्तरं सप्रजस्य मुक्तिरिति । ३१२

१०७. कल्याणदेवानीकभक्तस्य सेवापरीक्षा, श्रीकृष्णनारायणवंशमूलपरम्परानिर्देशश्चेत्यादि । ३१५

अध्यायाः | पृष्ठाः

१०८. सर्वबाधानाशकं सर्वेष्टप्रदं श्रीपुरुषोत्तमसामाख्यम् अनादिश्रीकृष्णनारायणनामसहस्रस्तोत्रनिरूपणमित्यादि । ३१८

१०९. दानफलभोगोत्तरं पुरुषोत्तमसामजपफलम् अक्षरधामस्थशाश्वतानन्दात्मकं भुंक्ते दातेत्यादि । ३२२

११०. दानपात्रे दानफलं भूदानफलमन्नदानफलं पुरुषोत्तमसामफलमित्यादि । ३२५

१११. जलदानभूदानविविधदानकर्तुः पुरुषोत्तमसामजापकस्य दीर्घशीलस्याऽऽस्तिकस्य दीर्घशीलस्य नास्तिकस्यापि यमद्वारोपदेशो मोक्षणं चेत्यादि । ३२८

११२. गोदानगोकल्पदानविविधव्रताचारार्पणफलनिरूपणे ब्रह्मसत्या योगिन्या देहदाननिदर्शनं मोक्षणं चेत्यादि । ३३१

११३. विविधतपसां फलानि, तान्येव भक्तियुक्तानि मोक्षदानि, वैवर्त्तनृपस्य नास्तिक्येन गत्यभावे निजपत्न्यां देवरात् पुनर्जन्म तत आस्तिककर्मभिर्भक्त्या च मोक्ष इत्यादि । ३३४

११४. साध्वाश्रयेण रोमपादपशुपालस्य मोक्षणं, नग्नभंगाख्यचौरस्य साधुसमागमेन राजभयाद् रक्षणं, आम्रवणवृक्षादीनां दावदग्धानां भागवतायनसाधुसहवासेन पुनरुज्जीवनमित्यादि । ३३७

११५. कामदेवभस्मत उत्पन्नस्य भण्डासुरस्य विनाशार्थमिन्द्रप्रस्थप्रदेशाऽऽगतदेवानां मखे प्रादुर्भूतललितामहालक्ष्मीसैन्यसन्नाहादिनिरूपणम् । ३४०

११६. महालक्ष्म्याः सैन्यानि भण्डनाशार्थं निर्ययुः, भण्डासुरस्य मन्त्रणा, भण्डसैन्यानां विनाशः, भण्डस्य कैकसादिस्मरणमित्यादि । ३४३

११७. महालक्ष्म्याः सैन्यैर्भण्डसैन्यानां नाशोत्तरं भण्डासुरनाशादि । ३४६

११८. श्रीललितामहालक्ष्म्या विजयनिमित्तकपूजनं महालक्ष्मीस्तोत्रं विजेत्रीणां पारितोषिकादि, कामस्य रूपाणि, महालक्ष्म्याः षोडशमन्दिराणि, तत्रत्यशोभाशक्तिसेवावर्णनमित्यादि । ३४९

११९. चिन्तामणिगृहस्थिताभिर्दिव्यसेविकाभिः कृतसेवनं, महालक्ष्मीमन्त्रस्तजपस्तत्फलं चेत्यादि । ३५३

१२०. महालक्ष्म्या मन्त्रान्तरं काञ्चीपुर्यां महालक्ष्म्या द्वेधारूपता, ब्रह्मविष्णुमहेशानां तत्र निवासो दीक्षाविधानं चेत्यादि । ३५६

अध्यायाः पृष्ठाः

१२१. ललितामहालक्ष्म्याः पञ्चत्रिंशदुत्तरशतनामानि गुरुतीर्थमाहात्म्यं चेत्यादि । ३५९
१२२. पुत्रीप्राप्त्यर्थं कन्यादानं लक्ष्मीदानं पुत्रीव्रतं चेत्यादि । ३६०
१२३. सर्वव्रतोत्तमव्रतं साधुसेवामानतात्मकम् । ३६३
१२४. सुखदुःखादौ साधुदेवादिसेवाव्रतमानतादि । ३६६
१२५. महादानषोडशकेषु तुलापुरुषदानविधिनिरूपणम् । ३६९
१२६. महादानेषु हिरण्यगर्भदानस्य ब्रह्माण्डदानस्य च विधिकथनम् । ३७२
१२७. कल्पवृक्षमहादानस्य गोसहस्रमहादानस्य च विधिकथनम् । ३७५
१२८. महादानेषु स्वर्णकामधेनुमहादानस्य हिरण्याश्वमहादानस्य हिरण्यरथमहादानस्य च विधिकथनम् । ३७८
१२९. हेमहस्तिरथमहादानस्य पञ्चलाङ्गलकमहादानस्य हेमधरामहादानस्य च विधिकथनम् । ३८०
१३०. विश्वसुदर्शनमहाचक्रदानस्य मालिकामहाचक्रदानस्य वारक्षकदानस्योर्मिकांगुलीयकांगदकटकशृंखलाबिंगडीकंकणवलयनथिकादिमहादानानां निरूपणम् । ३८३
१३१. महाकल्पलतासुवर्णवल्लीदानस्य कल्पप्रियादानस्य स्वर्णकान्तदानस्य पुण्यदानस्याऽभयादिदानानां गुरुदेवदेवीमहादानानां मन्दिरक्षेत्रवाष्यलंकारादिमहादानानां च निरूपणम् । ३८६
१३२. सप्तसागरमहादानस्य रत्नधेनुमहादानस्य महाभूतकलशदानस्य लक्ष्मीमहादानस्य तथाऽन्यमहादानानां च निरूपणम् । ३८९
१३३. पुण्यतमदिनप्रदर्शनं ग्रहशान्तिपूजादिप्रदर्शनं चेति । ३९२
१३४. ग्रहमखे लक्षजपहोमकोटिजपहोमादिविधिः, लोहांगारवैश्यस्य सर्वस्वनाशोत्तरं ग्रहशान्त्या पुनर्लब्धिरित्यादि । ३९४
१३५. दक्षप्रजापतये महालक्ष्म्युक्तानि स्वीयानि शतद्वयनामरूपाणि, लक्ष्मीमखे शान्तिपूजा, महालक्ष्मीप्रतिमातन्मण्डलादि चेति । ३९७
१३६. लक्ष्मीशतद्वयनामजपेन पितृकन्यकादीनां स्वेष्टफलावाप्तिः, लक्ष्मीसौभाग्यशयनव्रतविधिश्चेत्यादि । ४००
१३७. घटलक्ष्मीव्रतस्याऽगस्त्यकृतस्य सर्वमंगलमांगल्यलक्ष्मीव्रतस्य, सांख्ययोगलक्ष्मीव्रतस्य च निरूपणम् । ४०३
१३८. रसकल्याणललिताव्रतस्य, आर्द्रानन्दरमानारायणव्रतस्य, शारदेयव्रतस्य, कल्याणीकमलाव्रतस्य च निरूपणम् । ४०५
१३९. विशोकललिताद्वादशीव्रतस्य विभूतिललिताकृष्णलालनव्रतस्य च निरूपणम् । पुष्करवाहनाख्यस्य पुष्करद्वीपचक्रवर्तिनृपस्य दृष्टान्ते चक्रवर्तिचिह्नानि चेत्यादि । ४०८
१४०. प्रकीर्णकानामेकषष्टिव्रतानां संक्षेपतो वर्णनम् । ४११
१४१. कुंकुमवापिकातीर्थस्मरणदर्शनादिभिरपि पापिनां मोक्षणमित्यादि । ४१४
१४२. कालमृत्युस्वरूपतद्बलप्रदर्शनं तज्जयार्थं तत्तन्मन्त्रजपस्य परमेश्वरादिपूजनप्रकारस्य च निरूपणम् । ४१७
१४३. द्वापरयुगधर्मस्वभावास्तथाविधमानवानां मोक्षार्थं मन्त्रादिप्रदर्शनमिति । ४२०
१४४. युगधर्माणां परिवर्तनविवेचनादिकम् । ४२३
१४५. संकीर्तने संगीतिकास्वरग्राममूर्छनोद्देशो लक्ष्म्याः संगीतशालादिव्यदर्शनं चेत्यादि । ४२६
१४६. दैवान्तरिक्षभौमोत्पातानां भिन्नशान्तिकर्मादिकथनम् । ४२९
१४७. बहुविधोत्पातानां शान्तिकर्मादिनिरूपणम् । ४३२
१४८. दुःस्वप्नाद्युपघाततच्छान्त्यर्थग्रहयज्ञादिनिरूपणम् । ४३४
१४९. यात्रायां प्रयाणे शुभशकुनस्वप्नादीनि, विपरीतानां निवृत्त्यर्थं पूजाशान्तियज्ञादीनि चेति । ४३७
१५०. हनुमन्मन्त्रप्रतिष्ठादिनिरूपणम् । ४४०
१५१. सर्वमहापापादिनाशोपायानां निरूपणम्, नवनिधीनां धनविनियोगादि चेति । ४४३
१५२. धर्मवंशवर्णनम् अधर्मवंशवर्णनम् । तत्र दुःसहस्य निवासस्थानानि दुःसहवंशस्योपद्रवादि चेति । ४४५
१५३. नक्षत्रयोगिनीतिथियोगदशाशकुनहिक्कास्थानलग्नघटिकाविशेषे कार्याऽकार्यफलाफलानीति । ४४९

अध्यायाः पृष्ठाः

१५४. कुंभकारपुत्र्याः सरोजिन्याः प्राग्जन्मपापेन चतुष्पतिमरणोत्तरं श्रीसतीश्वरीसाध्व्याश्रमे गमनं, तत्र गुरुसेवया लक्ष्मीनारायणभक्त्या तपसा च ग्रहदोषशारीरदोषनाशोत्तरं श्रीलक्ष्मीनिवासरूपकमलिनीवल्लीत्वं पद्मिनीरमात्वं चेत्यादि । ४५२
१५५. अष्टमनूनां जन्मादिनिरूपणम् । ४५५
१५६. नवमादित्रयोदशमनूनां जन्मादिनिरूपणम् । ४५८
१५७. रुचिप्रजापतेः पितृदर्शनं स्तवनं गार्हस्थ्यं चेत्यादि । ४६१
१५८. चतुर्दशस्य मनोराख्यानम् । ४६४
१५९. ब्रह्मप्रियादिभिः सहितोऽनादिश्रीकृष्णनारायणो विमानेन पृथ्वीं पश्यन् हिमालयगृहं ययावित्यादि । ४६६
१६०. हिमाद्रिकृतपूजां प्रगृह्य केदारकैलासमानससरोहनूमत्पर्वतकाशीविन्ध्यसप्तपुटभृगुकच्छगोपनाथादीन् वीक्ष्य हरेः कुंकुमवापीगमनम्, ब्रह्मप्रियाणां भौतिकहीरकाद्युत्पत्तिजिज्ञासा चेत्यादि । ४६८
१६१. बलाख्यपार्षदस्य श्रीपुराधाम्नो जयादिसखीभिः परस्परशापेन पतनं, बलदैत्यस्य यज्ञे समित्स्वरूपिणः कायतत्त्वेभ्यो रत्नानामुत्पत्तिरित्यादि । ४७१
१६२. वज्रमणेर्मुक्तामणेश्चोत्पत्तिमूल्यश्रैष्ठ्यादिनिरूपणम् । ४७४
१६३. पद्मरागमरकतेन्द्रनीलवैदूर्यपुष्परागकर्केतनभीष्मपुलकरुधिरस्फटिकविद्रुमादिमणिसमुद्भवगुणादि - निरूपणम् । ४७६
१६४. चतुर्दशमन्वन्तरेषु हरेश्चतुर्दशावतारप्रयोजनादिनिरूपणम् । ४७९
१६५. जीवच्छ्राद्धविधिनिरूपणम् । ४८२
१६६. संसारविषाणां तन्निवर्तकोपायानां च निरूपणम् । ४८५
१६७. सर्वाऽऽपत्पापबन्धनादिनाशार्थकं व्यपोहनस्तोत्रम् । ४८८
१६८. यज्ञे कन्यादानं कृष्णार्पणं सन्न्यासग्रहणं विनायकोपसर्जनं पापदुःखसुखपुरुषाणां प्रपूजनं चेत्यादिमहाफलदमिति । ४९१
१६९. मृत्युप्रदकारणानि तद्विनाशसाधनं साधुभावायनर्षिदृष्टान्तं चेत्यादि । ४९४
१७०. मुक्तिधर्मेषु विविधधाम्नां निर्देशः श्रीमानस-सच्चिदानन्दयोगिनोर्मिथः प्रश्नाश्चेत्यादि । ४९७
१७१. मुक्तिधर्मे देहक्षयकारणानि देहप्राप्तिकारणानि देहान्मुक्तिकारणानि चेत्यादीनि । ४९९
१७२. मुक्तिधर्मे मायाविलयनसाधनं परब्रह्मधामप्रापणं चेत्यादि । ५०२
१७३. मुक्तिधर्मे श्रुतिफलापत्न्याः सद्विद्यायनर्षिं पतिं प्रतिकृतस्य स्वलोकगमनादिप्रश्नस्य नैष्कर्म्यसर्वसमर्पणविधया परब्रह्मलोकगतिरित्याद्युत्तरमित्यादि। ५०४
१७४. मुक्तिधर्मे यथादेहप्राप्तिः, शुभाऽशुभभोगः, ब्रह्मावाप्तिः, कर्मप्रतिष्ठानं, फलार्पणं, दिव्यतालाभः, नित्यमुक्तता, अक्षरवासिता, सारूप्याद्यवगमश्चेत्यादि । ५०७
१७५. मुक्तिधर्मे संसारवारिधितरणविज्ञानादिनिरूपणम् । ५१०
१७६. संक्षिप्तमुक्तिधर्माणां देहधर्माणां मायिकादीनां च निरूपणम् । ५१३
१७७. अध्यात्माऽधिभूताऽधिदैवदैवाधिदेवादिनीरूपणम्। ५१६
१७८. भिक्षायनर्षेरयाचिताञ्जलिनामभार्याया गार्हस्थ्येऽपि श्रीहर्यर्पणक्रियादिभिर्मुक्तिर्भिक्षामहिमा चेत्यादि । ५१९
१७९. अनाथाया नित्याश्रयायास्तत्पुत्रस्य केशिनश्च भागवत्या भक्त्या श्रीहरेर्दर्शनं मोक्षणं चेत्यादि । ५२१
१८०. कुष्ठिनो व्याघ्राख्यस्य स्वर्णचौरस्य चारणभक्तस्य कुष्ठनाशनम्, उत्तमाख्यस्य ग्रामयाजकविप्रस्य भक्तस्य जलोदरस्य नाशनम् भगवद्दर्शनं मुक्तिश्चेत्यादि । ५२३
१८१. विरालनामकस्य वैश्यस्य प्राग्जन्मकथा, कुंकुमवापिकाक्षेत्रे श्रीहरेः प्राप्तिः, तस्य राजयक्ष्मनाशः, मुक्तिश्चेत्यादि । ५२५
१८२. पृथ्वीधराभिधनृपतेर्जन्मान्धस्य पुत्रस्य प्राग्जन्मवृत्तान्तम्, भगवता कृतसद्दृष्टिकत्वं चेत्यादि । ५२८
१८३. सागराख्यशूद्रस्य भग्नपादस्य भगवत्कृतनीरुजपादत्वं तत्पूर्ववृत्तान्तश्चेत्यादि । ५३१
१८४. वृक्णदेवस्य भक्तस्य भक्त्या वृक्णतानाशो भक्तयोगेन भावशूरनृपतेर्मोक्षणं प्राग्जन्मवृत्तान्तादि चेत्यादि । ५३३
१८५. मञ्जुलकेशाख्यभक्तविप्रशापेनोन्मत्ततां प्राप्तस्य पाशुपतेशाख्यविप्रस्य भगवता शापमोक्षणं मोक्षणं च कृतमित्यादि । ५३६

| अध्यायाः | पृष्ठाः |
|---|---|
| १८६. बाणांगणाख्यस्य मद्यविक्रेतुः साधुसमागमेन भगवता मोक्षः कृतः साधोर्मूर्तौ विभूतयश्चेत्यादि । | ५३९ |
| १८७. मृतादननाम्नश्चर्मकारस्य धेनुप्राणरक्षणेन मांसादनादिपापनाशः पुण्यप्राप्तिः साधुसमागमः स्वर्गं मोक्षश्चेत्यादिलाभः । | ५४२ |
| १८८. शंकुधरनाम्नश्चौरस्य सुमन्तुकर्षेर्योगेन पापनाशो यज्ञकरणं मोक्षणं चेत्यादि । | ५४५ |
| १८९. साधुसमागमेन भगवच्चिन्तामणिलब्ध्या सर्वकामनापूर्त्यादि । | ५४८ |
| १९०. महासौराष्ट्रीयसंघस्य लुण्टकजनप्रधर्षितस्य स्तवनम् । | ५५० |
| १९१. लुण्टकेभ्यो रक्षार्थं स्त्रीबालिकास्तुत्युत्तरं राजभटादिरूपधारिणा हरिणा लुण्टका हताः, भक्ताश्च रक्षिताश्चेत्यादि । | ५५३ |
| १९२. युद्धपुरनृपतिना सह धनिष्ठकोशस्य श्रेष्ठिनो वारांगनाव्यसनिनः स्वस्त्रीकृतभक्तिव्रताराधनादिभिः श्रीहरिणा मोक्षः कृत इत्यादि । | ५५५ |
| १९३. वाटासीनारनृपतेर्ब्रह्मघ्नस्य राक्षसाभिभूतस्य हृतराज्यस्य कुन्दनदेवीराज्ञ्याः परमभक्त्या भगवद्दर्शनं सर्वदुःखमोक्षणं चेत्यादि । | ५५८ |
| १९४. चक्रधरनृपाज्ञया देवविश्रामाख्याऽमात्यस्य काण्डिकायोगिनीस्त्रीहत्यापापस्य यज्ञे श्रीहरिणा कृतं निवारणमित्यादि । | ५६१ |
| १९५. हर्षुलाख्यभक्तस्य ज्येष्ठया भार्यया द्वितीयपत्नीजन्यपुत्रस्य नाशे भगवता साधुरूपेण पुत्रोज्जीवनं बालहत्यापापनाशनं च कृतमित्यादि । | ५६४ |
| १९६. हर्षुलादिभ्य उपदेशस्तथा ज्येष्ठपत्न्या अपि पुत्रलाभश्चेत्यादि । | ५६७ |
| १९७. शाणधराख्यकर्षुकस्य प्राग्जन्मकर्मभिर्जातगलत्कुष्ठरोगस्य भयेन पुत्रैः समुद्रे क्षिप्तस्य भगवता रोगनाशो रक्षणं पापनाशनं च कृतमित्यादि । | ५७० |
| १९८. निम्बदेवाख्यभक्तस्य गोहत्यापापं भगवता निवारितमित्यादि । | ५७३ |
| १९९. श्रीहरिणा स्वैकान्तिकभक्तानां ब्रह्मनिष्ठतैश्वर्यादीनि निरूपितानीति । | ५७६ |
| २००. भाण्डीरग्रामस्थस्य कालीन्दरभाण्डस्य नर्तक्यादिसहितस्य परमभक्त्या मोक्षणं कमलायनमहर्षेरुपदेशश्चेत्यादि । | ५७९ |
| २०१. रायणदेवस्य नर्तकस्य बोधायनोपदेशेन गर्भस्थस्य विज्ञानं भक्तिश्च हरिदर्शनं मोक्षश्चेत्यादि । | ५८२ |
| २०२. व्रतर्दिनामकगायकभक्तस्य योगेन पुण्ड्रवर्मनृपस्य सप्रजस्य वैष्णवत्वं मोक्षणं चेत्यादि । | ५८५ |
| २०३. तूल्वायिनामकस्य सूत्रवायकस्य भक्त्या भगवाँस्तस्य तत्कर्मचाराणां च रक्षां कृत्वा दर्शनं दत्वा मोक्षे नीतवानित्यादि । | ५८८ |
| २०४. जंगलदेवादिकाष्ठहाराणां भक्त्या साधुरूपेण श्रीहरेर्दर्शनं चान्ते मोक्षणं चेत्यादि । | ५९१ |
| २०५. पण्यकृतो वात्सल्यधीराख्यभक्तस्य तत्पत्न्याश्च मञ्जुलिकाया अतिभक्त्या प्रसन्नः प्रभुर्दर्शनं ददौ साधूभूतौ तौ तु वर्तेते इत्यादि । | ५९३ |
| २०६. तिलकरंगाख्यस्य वनपालस्य शिवभक्तस्य साधुरूपशिवोक्तभक्त्या नारायणोपासनया परममुक्तिरित्यादि । | ५९६ |
| २०७. क्षेत्रपस्य नाञ्जभक्तस्य महामयभक्तस्य कर्षुकाणां च रक्षणं भगवता लुण्टकेभ्यः कृतमित्यादि । | ५९९ |
| २०८. सागराख्यकिरातस्य भक्तस्य भक्त्या प्रसन्नेन श्रीहरिणा श्रेष्ठिरूपेण गोधूमपुञ्जोऽर्पितः कुसुलस्थोऽक्षयश्च कृतः, तत्पोलिकाभाजाजलपात्राण्यक्षयाणि कृतानि मोक्षश्च कृत इत्यादि । | ६०२ |
| २०९. सारंगनामकस्य हूणभक्तस्य महिषीपशुधनस्याऽरण्ये सिंहकृतापदः श्रीहरिणा रक्षणं कृतं मोक्षश्चेत्यादि । | ६०५ |
| २१०. यज्ञराधनामकपुल्कसस्य सकुटुम्बस्य ब्रह्मायनर्षिसाधोः समागमेन श्रीहरिभक्त्या मोक्षप्राप्तिरित्यादि । | ६०७ |
| २११. कपिक्षयाख्यस्य चाण्डालस्य वानररूपदेवोपदेशेन श्रीहरौ भक्त्या सकुटुम्बस्य मोक्षणमित्यादि । | ६१० |
| २१२. नालीकरस्य लोहकारस्य भक्त्या श्रीलक्ष्मीनारायणगरुडदत्तदर्शनं भक्तस्य मोक्षणं चेत्यादि । | ६१३ |
| २१३. मंगलदेवाख्यचर्मकारभक्तस्य भक्त्या साक्षाद्भगवता समागत्य विषवारणं कृतमित्यादि । | ६१६ |

| अध्यायाः | पृष्ठाः |
|---|---|
| २१४. हरिदासाख्यस्य रथकारस्य भक्त्या सकुटुम्बस्य भगवता मोक्षः कृतइत्यादि । | ६१९ |
| २१५. शिलाहारस्य दामशिलादनामकभक्तस्य भृत्यानां रक्षणं दामशिलादादेश्चान्ते मोक्षणं च भगवता कृतमित्यादि । | ६२२ |
| २१६. शिल्पकारस्य सञ्जश्रदेवस्य भक्त्या भगवता गजतो रक्षणं मोक्षणं च कृतमित्यादि । | ६२४ |
| २१७. संभरदेवाख्यचित्रकारस्य भक्त्या भगवता दत्तं दर्शनं मोक्षणं च कृतमित्यादि । | ६२७ |
| २१८. मौक्तिकेशिनाम्नो भक्तस्य शिलांगारखनिस्वामिनो भक्त्या भगवता मोक्षणं कृतमित्यादि । | ६३० |
| २१९. लुब्धकस्य चक्रधराख्यस्य पौतिमाष्यर्षिसंगमेन हिंसादिपापनाशे भक्त्युत्तरं मुक्तिरित्यादि । | ६३३ |
| २२०. वाटघरस्य विशुनखवासस्य भक्तस्य तथा द्वैपीराज्ञ्याश्च सुतारसिंहनृपतेर्दण्डाद् भगवता रक्षणं मोक्षणं च कृतमित्यादि । | ६३४ |
| २२१. वृषपर्वनामर्षियोगेन प्रासादकारस्य शिवजयस्य मोक्षणमित्यादि । | ६३७ |
| २२२. संगरयादस्कभक्तस्य जालकार्यं त्याजयित्वा शुक्रायनसाधुना भगवत्प्राप्तिः कारितेत्यादि । | ६४० |
| २२३. उद्यमश्रीप्रभृतिभरवाटानां सतीश्वरीसाध्वीसत्संगेन कृष्णे भक्तिर्मोक्षणं चेत्यादि । | ६४३ |
| २२४. रामायनाख्यसाधुयोगेन दीर्घरवादीनामुष्ट्रपालानां मोक्षणमित्यादि । | ६४६ |
| २२५. रत्नप्रभाख्यभक्तस्य रासभपालस्य नरसिंहस्वामियोगेन मोक्षणादि । | ६४९ |
| २२६. गदार्दनेश्वरनामकवैद्यस्य पापैर्दुःखानि तत्पत्न्या मुकुन्दिन्या भक्त्या तु मोक्षणमित्यादि । | ६५२ |
| २२७. देदयावनस्य कीशपालस्य सुधामरसाधोः प्रसंगेन मोक्षणमित्यादि । | ६५४ |
| २२८. स्वर्णधन्वनृपतेर्भृत्यस्य हर्षधर्मनापितस्य पत्न्या निगमिकाया भक्त्या कल्याणधामादिसाधुसेवायां स्थितायाः सेवया च प्रसन्नो भगवान् निगमिकारूपधरो भूत्वा राज्ञीसेवामकरोत्, नापितकुटुम्बस्य रक्षणं मोक्षणं चाकरोदित्यादि । | ६५७ |
| २२९. पूर्वजन्मनि धीवर्या रुटाणक्या आभीरीभक्तायाः साध्वीनां च दैत्याद् रक्षणं मोक्षणं चेत्यादि । | ६६१ |
| २३०. पूर्वजन्मनि मत्स्यमाराणां धीरपर्वादीनां याम्यया-तनोत्तरं पूर्वपुण्येन नौपतिजन्मानि तत्र भजनं मोक्षणं चेत्यादि । | ६६३ |
| २३१. शूलीप्रदस्य तारकादर्शस्य तत्पत्न्याश्च कृतशल्याया भक्त्याऽभ्युदयो मोक्षणं चेत्यादि । | ६६६ |
| २३२. ज्वालाप्रसादाख्यस्यांऽगाराग्निकृतो भगवद्भक्त्या नारायणायनसाधुयोगेन तस्य तत्पत्न्याः सहस्रादिदेहिनां च भगवता मोक्षणं कृतमित्यादि । | ६६९ |
| २३३. लवादनाख्यप्रधानस्य राज्ञे गरदस्य भगवद्भक्त्या किंशुकायनसाधुसेवया च तस्य तद्राज्ञीनां च प्रजानां च मोक्षणमित्यादि । | ६७२ |
| २३४. निर्मोहनायनसाधुप्रसंगेन विखण्डलाख्यशस्त्रधरस्य तत्पत्न्या हरसत्याश्च भगवद्दर्शनं मोक्षणं चेत्यादि । | ६७५ |
| २३५. जीर्णोद्भवनामककृषीवलस्य चैतन्यकायनिसाधुयोगेन मोक्षणं स्त्रीसौन्दर्यादिप्रदव्रतदानवर्णनं चेत्यादि । | ६७८ |
| २३६. अनादिश्रीकृष्णनारायणस्य सप्तदशजन्मदिन-जयन्त्युत्सवो द्वापरसन्तानकथाश्रवणदानमन्त्रजपमहिमा चेत्यादि । | ६८१ |
| २३७. द्वापरसन्तानस्य कथाविषयसंक्षेपो द्वापरसन्तानविशेषमाहात्म्यं चतुर्युगसन्तानानां प्रत्यक्षागमः कलेर्मोक्षार्हत्वप्रार्थना तिष्यसन्तानप्रस्ताव आशीर्वादश्चेत्यादि । | ६८४ |


इतिश्रीलक्ष्मीनारायणीयसंहिताया द्वापरसन्तानाऽऽत्मक-तृतीयखण्डस्याऽध्यायाऽनुक्रमणिका ।

( अध्यायाः २३७, श्लोकाः २५१६२ )

॥ अनादिश्रीकृष्णनारायणाय नमः ॥

॥ श्रीगणेशाय नमः ॥

# ॐ श्रीलक्ष्मीनारायणसंहिता

## तृतीयः—

## ॥ द्वापरयुगसन्तानः ॥

श्रीनारायणीश्रीरुवाच—

ओं नमः श्रीपरब्रह्माऽक्षरातीताय चक्रिणे ।
परेशाय ध्वजशूलधनुश्चिह्नाय शार्ङ्गिणे ॥ १ ॥
सर्वकान्ताय कान्ताय सर्वान्तर्यामिणे नमः ।
मुक्तबन्धाय हृद्याय नमः सर्वावतारिणे ॥ २ ॥
यस्मात् सर्वमिदं जातं येन पुष्टिं प्रयाति च ।
यत्र स्थितं भवेदन्ते तस्मै कान्ताय ते नमः ॥ ३ ॥
यस्मात् सर्वे ह्यवताराः श्रीकृष्णाद्या भवन्त्यपि ।
कालो माया यदंशाश्च तस्मै कान्ताय ते नमः ॥ ४ ॥
याऽहं वै सुखदालक्ष्मीः विश्वेश्वरसुता तव ।
प्रिया भूत्वाऽभवं नारायणीश्रीस्ते नमो नमः ॥ ५ ॥
अनन्ताः कन्यका जाता नारायण्यो हरेः प्रियाः ।
अनादिश्रीकृष्णनारायणाय ते नमो नमः ॥ ६ ॥
लक्ष्मीकान्ताय कान्ताय राधाकान्ताय ते नमः ।
माणिक्यावाहिने रमापतये ते नमो नमः ॥ ७ ॥
श्रीशायते पद्मावतीपतये च नमो नमः ।
ब्रह्मप्रियाशनाद्यानां पतये ते नमो नमः ॥ ८ ॥
षष्ठी या मनसा देवी तद्धवाय च ते नमः ।
दीपावलीनां पतये तलाजापतये नमः ॥ ९ ॥
कामधेनुप्रगोपायाऽऽर्जन्तीनां पतये नमः ।
क्रोधनेशाय च धरापुत्रीणां पतये नमः ॥१०॥
सूचीकान्ताय च वनदेवीजेशाय ते नमः ।
दामनीपतये कंकतालिकेशाय ते नमः ॥११॥
पितृकन्याप्रकान्ताय जनपितृसुतेशिने ।
पितृदासीश्वरायाऽपि बालकृष्णाय ते नमः ॥१२॥
रासातलीनां कान्ताय वासन्तिकेश ते नमः ।
सालमालीयनारीणामीश्वराय च ते नमः ॥१३॥
स्वस्तिकीनागकन्यानां पतये ते नमो नमः ।
नागिनीनां च पतये परमेशाय ते नमः ॥१४॥
शावदीनीप्रकान्ताय परेशाय च ते नमः ।
ऐन्द्रजालिककान्तानां पतये ते नमो नमः ॥१५॥
विद्यानाथाय च सरस्वतीशाय च ते नमः ।
लाक्ष्मणीशाय देवाय नाडिकेशाय ते नमः ॥१६॥
गान्धर्वीणां च पतये जुम्मसेम्लीश ते नमः ।
सान्तपनीवरायाऽपि सौरतीपतये नमः ॥१७॥
महाबालेश्वरीशाय चैलबीलेश ते नमः ।
दाक्षजावंगरीशाय चौष्णीशाय च ते नमः ॥१८॥
प्राचीनीनां पतये ते पिशंगीपतये नमः ।
सान्ताणरीश्वर कृष्ण शैबीनां पतये नमः ॥१९॥
थार्कूटस्थीप्रमदेश वीरजारीश ते नमः ।
शाक्त्यक्षीप्रमदानाथ पिशाचीश्वर ते नमः ॥२०॥
कालिमाशीश्वर कृष्ण दीनबन्धो च ते नमः ।
औरलकैतवीशाय क्राथकीपतये नमः ॥२१॥

पृथुपुत्रीस्वामिने ते च्योष्ट्रालीपतये नमः ।
ह्रांकारीस्वामिने जयकाष्ठजेशाय ते नमः ॥२२॥
तीराणीपतये नाथ च्याल्वीनारीश ते नमः ।
जीनवर्द्धिसुतेशायाऽनाथानाथाय ते नमः ॥२३॥
प्रकीर्णप्रमदेशाय परमेशाय ते नमः ।
आल्पकैतवीकान्ताय पारीशानीश ते नमः ॥२४॥
इन्दुरायसुतेशाय मुद्राण्डीपतये नमः ।
गण्डभूपसुतेशाय लीनोर्णापतये नमः ॥२५॥
बार्ह्च्छारीस्वामिने ते बाललीनीश ते नमः ।
वारसिंहीस्वामिने ते रायगामीश ते नमः ॥२६॥
फैनतान्तवीकान्ताय स्तोकहोमीश ते नमः ।
काष्ठयानीस्वामिने ते कोलकीपतये नमः ॥२७॥
दैनमानीस्वामिने ते मम कान्ताय ते नमः ।
परेशाय नमो रायकिन्नटीपतये नमः ॥२८॥
रायकोटीस्वरीशाय नमस्ते परमात्मने ।
रायरणजित्पुत्रीश नमस्ते हरये नमः ॥२९॥
रायवाकक्षिकेशाय रायमारीशकेशिने ।
रायचालेश्वरीशाय रायलम्बारिकेशिने ॥३०॥
नमस्ते रायनवारिकेश श्रीपरमात्मने ।
रायहूण्डेशिकेशाय रायकूपेशिकेशिने ॥३१॥
कालीमण्डीस्वामिने ते वनजेलेशिकेशिने ।
पारावारपित्रीशाय कोटिशेशाय ते नमः ॥३२॥
सतीशीशाय देवाय त्रेताकर्कशिकेशिने ।
आण्डजरास्वामिने ते बाल्यराजसीस्वामिने ॥३३॥
रायसोमनीस्वामिने ते सर्वेशाय नमो नमः ।
उरुगवाक्षिकेशाय पराङ्व्रतनिकेशिने ॥३४॥
रायस्वस्त्रीश ते कृष्णनारायण प्रभो नमः ।
ऐशानपानीश कान्त राजारायीश ते नमः ॥३५॥
मंगलादिप्रकान्ताय च्याजनाभीश्वराय च ।
नमः कौबेरिकेशाय माहेन्द्रीपतये नमः ॥३६॥
यमीनां स्वामिने कृष्ण वायवीशाय ते नमः ।
वैश्वकर्मीस्वामिने ते वार्क्षीणां पतये नमः ॥३७॥
रौद्रीणां पतये वह्निपुत्रीणां पतये नमः ।
श्रावणीनां च पतये खानिजीशाय ते नमः ॥३८॥
सांवत्सरीस्वामिने ते गोपीनां पतये नमः ।
प्राचीनीनां स्वामिने ते पिशंगीस्वामिने नमः ॥३९॥
राशियानीश्वर रोमायनीश्वर च ते नमः ।
पारशीपतये कृष्ण धीवरीपतये नमः ॥४०॥
किन्नरीपतये कृष्णाऽमरीणां पतये नमः ।
गौरीणां पतये परीपतये ते नमो नमः ॥४१॥
आब्रिक्तीस्वामिने हारितीशाय ते नमो नमः ।
पातालीपतये स्वर्गीपतये ते नमो नमः ॥४२॥
अप्सरसां दिनेशाय ब्रह्मसरोऽधिशासिने ।
गान्धर्वीणां पतये ते कुशलेशाय ते नमः ॥४३॥
विद्युन्मणिस्वामिने ते भौमीनां पतये नमः ।
दानवीनां पतये ते शक्तीनां पतये नमः ॥४४॥
काशिकाकन्याकानाथ वेनुपालीश ते नमः ।
कान्ताकान्तेश सर्वेश मम प्राणेश ते नमः ॥४५॥
नमः श्रीकंभरापुत्र सन्तुष्टाऽनुज ते नमः ।
त्वया व्याप्तमिदं सर्वं सर्वान्तर्यामिणे नमः ॥४६॥
श्रीकृष्णायविष्णवेस्वामिने मत्पतये नमः ।
लक्ष्मीशेशस्त्वमेवर्षिसत्तमस्त्वं नृपोत्तमः ॥४७॥
त्वं यज्ञस्त्वं जाठरश्च तृप्तिदस्त्वं परेश्वरः ।
प्राप्य त्वां त्वर्बुदायाश्च नार्यो मुक्तिं गतास्त्विह ॥४८॥
मुक्ताश्च मुक्तिमापन्ना नरा जाताः परार्धगाः ।
त्वां भजित्वा स्वः प्रयान्ति जनं सत्यं प्रयान्ति च ॥४९॥
त्वां भजित्वा च वैकुण्ठं वैराजक्ष्मां प्रयान्ति च ।
त्वां भजित्वाऽमृतलोकं गोलोकं च प्रयान्ति वै ।
अक्षरं परमं धाम त्वां भजित्वा प्रयान्ति हि ॥५०॥
भवता भगवन् सर्वं समाधौ दर्शितं हि नः ।
मे तदारभ्य जिज्ञासा वर्तते कालगोचरा ॥५१॥
आत्यन्तिके लये मुक्तमण्डलेषु विराजसे ।
प्राकृते पुनरारब्धे सर्गे कालेन नोदिते ॥५२॥
प्रधानपुरुषे जाते महाविष्णौ तथोद्गते ।
वैराजे च ततो जाते तथा जाते च वेधसि ॥५३॥
इदानींपरिपर्यन्तं कालः कियान् गतो वद ।
ज्ञातव्यं चाप्यधिकं चेद् विद्येत वद मे हरे ॥५४॥
यद्यहं ज्ञानपात्रं चेद् वद मे प्राणरक्षक ।
पृथ्व्यामिदानीं कालोऽपि कियानस्तीति मे वद ॥५५॥
पुरुषोत्तम एवाऽसि सर्वज्ञः साक्षगोचरः ।
त्वां विनाऽन्यो न वै शक्तो वक्तुं भवेन्नरायण ॥५६॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कालसंख्यानमादरात् ।
वक्तुमशक्यमन्येन ज्ञातुं चाऽशक्यमित्यपि ॥५७॥
यदा नासीन्महामाया सृष्टिरूपा गुणत्रया ।
लीना मदिच्छारूपा सा यदासीदक्षरे पदे ॥५८॥

यदा नासीन्महाकालः पुरुषस्तत्प्रयोजनः ।
लीनश्चासीन्मदैश्वर्यरूपो मुक्तः स चाऽक्षरे ॥५९॥
तदाऽक्षरं परं धाम ममैवाऽऽसीन्न चेतरत् ।
ब्रह्मसृष्टिः केवला सा नैश्वरी जीवनी कुतः ॥६०॥
महाप्रलय एवाऽसौ बोध्यस्त्वया नरायणि ! ।
मया चेक्षा कृता ह्येको बहु स्यां माययान्वितः ॥६१॥
तदा त्विच्छास्वरूपा सा माया प्रकाशमागता ।
दिव्या मुक्तानिका शक्तिर्मम सा तु गुणात्मिका ॥६२॥
कालाख्यः पुरुषश्चापि मया प्रकाशितस्ततः ।
ममैश्वर्यस्वरूपः स मुक्तो तयाऽन्वयं गतः ॥६३॥
युगलं तत्तु प्रकृतिपुरुषौ मदपत्यकौ ।
जातौ ताभ्यां मया त्वाज्ञा दत्ता सृष्ट्यर्थमेव ह ॥६४॥
ताभ्यां च जातमात्राभ्यां सृष्ट्यारंभः कृतः प्रगे ।
एकं सुयुगलं सृष्टं प्रधानपुरुषात्मकम् ॥६५॥
तेन सृष्टिः कृता महाविष्णुकोट्यर्बुदात्मिका ।
प्रधानपुरुषः सोऽयं सायं च व्यशनत्ततः ॥६६॥
रात्र्यन्ते च प्रगे कालप्रकृतिभ्यां पुनर्नवम् ।
युगलं सृष्टमेवाऽन्यत् प्रधानपुरुषात्मकम् ॥६७॥
सृष्टिं कृत्वा च सायं तद्विनष्टं पुनरेव ह ।
दिवसोऽयं महाकालकल्पः संप्रोच्यतेऽक्षरे ॥६८॥
सहस्रं तु महाकालकल्पानां वर्षमेककम् ।
प्रकृतेश्चापि कालस्य विद्यते तत्र सर्वथा ॥६९॥
एतादृशानि वर्षाणि पञ्चाशद् विगतानि वै ।
प्रकृतिपुरुषस्यैवैकपञ्चाशत्तु वत्सरम् ॥७०॥
वर्ततेऽद्याऽद्यदिवसं तावत्यः सृष्टयो गताः ।
ते पञ्चाशत्सहस्राणि प्रधानपुरुषा मृताः ॥७१॥
एकपञ्चाशत्सहस्राऽऽद्यः प्रधानपुरुषोऽस्ति वै ।
शृणु चाग्रेऽपि कालं वै नारायणीश्रि सर्जनम् ॥७२॥
अयं प्रधानपुरुषः प्रातरेव नवं नवम् ।
महाविष्णु जनयति वैराजीसृष्टिकारकम् ॥७३॥
महाविष्णुः स वै सायं नश्यत्येव दिनान्तके ।
एवं सहस्रदिवसात्मकं वर्षे प्रधानकृत् ॥७४॥
प्रधानपुरुषस्याऽस्य वै पञ्चाशत्समा गताः ।
तत् पञ्चाशत्सहस्राणि ते महाविष्णवो मृताः ॥७५॥
एकपञ्चाशत्तमेऽब्दे चाद्यस्य दिवसस्य वै ।
एकपञ्चाशत्सहस्राऽऽद्यो महाविष्णू राजते ॥७६॥
शृणु चाग्रेऽपि कालं वै नारायणीश्रि ! सर्जनम् ।
महाविष्णुश्चाऽयमत्र प्रातरेव नवं नवम् ॥७७॥
वैराजं जनयत्येव वैधसीसृष्टिकारणम् ।
वैराजश्च स वै सायं नश्यत्येव दिनान्तके ॥७८॥
एवं सहस्रदिवसात्मकं वर्षं प्रविद्यते ।
महाविष्णोर्मम पितुर्गोपालकृष्णकस्य वै ॥७९॥
महाविष्णोश्चास्य तत्र वै पञ्चाशत्समा गताः ।
वै पञ्चाशत्सहस्राणि वैराजास्तत्सुता मृताः ॥८०॥
एकपञ्चाशत्तमेऽब्दे चाद्यस्य दिवसस्य वै ।
एकपञ्चाशत्सहस्राद्यो वैराजो विराजते ॥८१॥
शृणु चाग्रेऽपि कालं वै नारायणीश्रि ! सर्जनम् ।
वैराजश्चाऽप्ययमत्र प्रातरेव नवं नवम् ॥८२॥
ब्रह्माणं जनयत्येव विष्णुरुद्रसमन्वितम् ।
स ब्रह्माऽपि सदा सायं नश्यत्येव दिनान्तके ॥८३॥
एवं सहस्रदिवसात्मकं वर्षं विराट्कृतम् ।
अस्य वैराजपुंसश्च पंचाशद्वै समा गताः ॥८४॥
ते पञ्चाशत्सहस्राणि ब्रह्माणस्तत्सुता मृताः ।
एकपञ्चाशत्तमेऽब्दे चाद्यस्य दिवसस्य वै ॥८५॥
एकपंचाशत्सहस्राद्यो वेधाश्च विराजते ।
शृणु चाग्रेऽपि कालं वै नारायणीश्रि ! सर्जनम् ॥८६॥
वेधाश्चाप्ययमेवाऽत्र प्रातरेव नवं नवम् ।
आस्वर्गान्तं सृजत्येव सुरर्षिमानवादिकम् ॥८७॥
आस्वर्गान्तं च सायं वै नित्यं नश्यति तत्तथा ।
एवं सहस्रदिवसात्मकं वर्षं हि वैधसम् ॥८८॥
एकं कल्पसहस्रं तद् ब्रह्मणोऽब्दः प्रकीर्तितः ।
वेधसोऽस्य गताश्चापि तत्पञ्चाशत्प्रवत्सराः ॥८९॥
तत्पञ्चाशत्सहस्राणि त्रैलोक्यानि मृतानि वै ।
एकपञ्चाशत्तमेऽब्दे त्वाद्यस्य दिवसस्य वै ॥९०॥
एकपञ्चाशत्सहस्राद्यः कल्पो वाराहसंज्ञकः ।
वर्तते दिवसः सोऽयं चाद्यं युगचतुष्टयम् ॥९१॥
अयं चतुर्मुखश्चास्ते ब्रह्मा लोकपितामहः ।
ब्रह्मणो दिवसः कल्प इति नाम्ना कृतो मया ॥९२॥
वैराजस्य तु दिवसो महाकल्पः कृतो मया ।
महाविष्णोस्तु दिवसो महामहाख्यकल्पकः ॥९३॥
प्रधानपुंसो दिवसः कृतः प्राकृतकल्पकः ।
मायाकालस्य दिवसो महाकालाख्यकल्पकः ॥९४॥
तन्नाशे च महान् प्रोक्तो महाप्रलय एव ह ।
ब्रह्मा वर्षशतं चास्ते विराजोऽपि तथा निजम् ॥९५॥
महाविष्णुर्निजं वर्षशतं जीवति चेश्वरः ।
प्रधानपुरुषश्चापि निजं वर्षशतं तथा ॥९६॥

प्रकृतिपुरुषश्चापि निजं वर्षशतं ततः ।
तादृग्वर्षशतं महाप्रलयो वै निशात्मकः ॥९७॥
पुनः सृष्टिः पुनर्महाप्रलयश्चैवमेव ह ।
कृतं तन्त्रं मया श्रीनारायणीश्रि ! प्रशाश्वतम् ॥९८॥
पुनर्महासृष्टिरेव महाप्रलयकः पुनः ।
ब्रह्मणो दिवसे चैके मनवश्च चतुर्दश ॥९९॥
उत्पद्यन्ते विलीयन्ते का तेषां गणना प्रिये ! ।
एकं कल्पसहस्रं तु ब्रह्मणोऽब्दश्च यो मतः ॥१००॥
तदब्दाष्टसहस्रं तु ब्रह्मणस्तद्युगं स्मृतम् ।
एकं युगसहस्रं तु सवनं ब्रह्मणो मतम् ॥१०१॥
लक्षैकवारं त्रैलोक्यनाशे ब्रह्मा विनश्यति ।
लक्षैकवारं चाजस्य नाशे विराड् विनश्यति ॥१०२॥
लक्षवैराजनाशे च महाविष्णुर्विनश्यति ।
महाविष्णुलक्षनाशे प्रधानपुंविनाशनम् ॥१०३॥
प्रधानपुंलक्षनाशे प्रकृतिपुंविनाशनम् ।
इत्येवं कालगणना बोध्या त्वया नरायणि ! ॥१०४॥
तासु तासु च सर्वासु सृष्टिष्वहं त्वया सह ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥१०५॥
प्रादुर्भवाम्यवतारी श्रीपतिः परमेश्वरः ।
अवतारा ह्यसंख्याता मे तत्र संभवन्त्यपि ॥१०६॥
अहं वेद्मि न चान्यस्तान् सर्वज्ञोऽहं न चेतरः ।
विदन्ति नाऽप्यवताराः पूर्वसृष्टिविदो हि ते ॥१०७॥
मा सन्देहं विधेह्यत्र मम दैर्घ्ये दुरन्तकम् ।
अधिकं पृच्छ जिज्ञास्यं कथयामि समासतः ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने नारायणीश्रीकृता पुरुषोत्तमस्तुतिः सृष्टिकालगणना चेत्यादिनिरूपणनामा प्रथमोऽध्यायः ॥ १ ॥

### श्रीनारायणीश्रीरुवाच—

वेधसोऽस्य हरेकृष्ण पुरुषोत्तम मत्पते ! ।
द्वापञ्चाशद्वत्सराणां नामानि वेत्तुमेव मे ॥ १ ॥
इच्छा प्रजायते तस्माद् वद श्रीपुरुषोत्तम ! ।
मनूनां चापि च चतुर्दशानां नाममात्रकम् ॥ २ ॥
वेत्तुमिच्छामि भगवन् कल्पे वाराहके त्वहम् ।
एकपञ्चाशत्तमेऽब्दे ये कल्पाश्चान्ततो गताः ॥ ३ ॥
तानपि वेत्तुमिच्छामि तव प्राकट्ययोगिनः ।
संक्षेपाद् वद मे कान्त ! यदि भारो न विद्यते ॥ ४ ॥

### श्रीपुरुषोत्तम उवाच—

ब्रह्मणोऽस्य वत्सरस्तु प्रथमः पद्मवत्सरः ।
नालक्रमो द्वितीयश्च नालोर्ध्वगस्तृतीयकः ॥ ५ ॥
तुर्यं स्तावनवर्षं च व्योमवार्णं तु पञ्चमम् ।
षष्ठं तपोवत्सरं च सप्तमं यमवत्सरम् ॥ ६ ॥
नियमं चाष्टमं चापि वर्षं नवममासनम् ।
दशमं प्राणरोधाख्यं चैकादशं प्रतिहृतिः ॥ ७ ॥
द्वादशं धारणं वर्षं ध्यानवर्षं त्रयोदशम् ।
चतुर्दशं तु मननं पञ्चदशं समाधिकम् ॥ ८ ॥
षोडशं प्रज्ञातवर्षं ब्रह्मणः परिकीर्तितम् ।
अप्रज्ञातं सप्तदशं चाष्टादशं तु लीनता ॥ ९ ॥
नवदशं वत्सरं तु साक्षात्काराभिधं ततः ।
विंशतितमवर्षं च सृष्टिभानाभिधं ततः ॥१०॥
एकविंशतितमं वै वेदवत्सरसंज्ञकम् ।
रुद्रवत्सरनाम्ना च द्वाविंशो वत्सरस्ततः ॥११॥
सनातनस्त्रयोविंशश्चतुर्विंशस्तथाऽऽर्षकः ।
धर्मवर्षं पञ्चविंशं षड्विंशोऽनङ्गवत्सरः ॥१२॥
सप्तविंशोऽधर्मसंज्ञोऽष्टाविंशोऽनलवत्सरः ।
नवविंशं पितृवर्षं त्रिंशस्तु देववत्सरः ॥१३॥
एकत्रिंशं मानवाख्यं द्वात्रिंशं कल्पपादपम् ।
त्रयस्त्रिंशं सस्यसंज्ञं चतुस्त्रिंशं तु पाशवम् ॥१४॥
पञ्चत्रिंशं याक्षवर्षं षट्त्रिंशं राक्षसाभिधम् ।
सप्तत्रिंशं चाण्डजाख्यमष्टात्रिंशं तु धर्मजम् ॥१५॥
नवत्रिंशं नागवर्षं चत्वारिंशं तु यादसम् ।
अध्वराख्यश्चैकचत्वारिंशो वै वत्सरस्ततः ॥१६॥
हिरण्यवत्सरं द्वाचत्वारिंशं च ततः परम् ।
राजतं त्रिचत्वारिंशं कापालकं ततः परम् ॥१७॥
अप्सरोवत्सरं पञ्चचत्वारिंशं ततोऽभवत् ।
ब्रह्मसरोवत्सरं च स्वर्धूनीवत्सरं ततः ॥१८॥
अर्चिमार्गाऽभिधमष्टचत्वारिंशं च वत्सरम् ।
अब्धिमन्थं ततो वर्षं नारदाख्यं च वत्सरम् ॥१९॥
एकपञ्चाशत्तम सोमनाथवत्सरं ततः ।
द्विपञ्चाशत्तमं वर्षं वैष्णवाख्यं भविष्यति ॥२०॥
गायत्रीवत्सरं त्रिपञ्चाशत्तमं प्रवर्त्स्यते ।
एकपञ्चाशत्तमेऽयं वाराहो नाम कल्पकः ॥२१॥
मया वाराहरूपेण क्षितिर्जलात् समुद्धृता ।
अत्र वै मनवो भूपा भविष्यन्ति चतुर्दश ॥२२॥

स्वायंभुवो मनुः पूर्वस्ततः स्वारोचिषो मनुः ।
उत्तमश्च तामसश्च रैवतश्चाक्षुषस्ततः ॥२३॥
वैवस्वतश्च सावर्णी चाष्टमो मनुरेव ह ।
नवमो दक्षसावर्णी ब्रह्मसावर्णिकस्ततः ॥२४॥
ततश्च धर्मसावर्णिः रुद्रसावर्णिकस्ततः ।
ततश्च देवसावर्णिश्चेन्द्रसावर्णिकस्ततः ॥२५॥

चतुर्दशैते मनवश्चेन्द्राश्चापि चतुर्दश ।
दिवसे सम्प्रजायन्ते रात्रौ तावान् लयो मतः ॥२६॥
कल्पे कल्पे भवाम्येव पृथिव्यां पुरुषोत्तमः ।
ते पञ्चाशत्सहस्राणि कल्पास्तु ब्रह्मणो गताः ॥२७॥
नारायणि ! ह्यवतारी तावत्संख्योऽभवं क्षितौ ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥२८॥

युगे युगे त्ववतारा मे भवन्ति यथाक्रियम् ।
तेषां संख्या न चास्त्येव जानाम्यहं न चेतरे ॥२९॥
तत्र नामान्यनन्तानि भवन्ति गुणकर्मभिः ।
किन्तु कल्पे त्वेकवारं भवामि पुरुषोत्तमः ॥३०॥
अनादिश्रीकृष्णनारायणोऽहं बालकृष्णकः ।
अवतारी कोटिभक्तभक्तानीपतिरीशपः ॥३१॥
यत्र कल्पे समारंभे योऽवतारो भवेन्मम ।
तेन नाम्नाऽपि च मया स वै कल्पः प्रकाश्यते ॥३२॥

तस्मात् कल्पाभिधानानि मद्विज्ञानकृतानि वै ।
न शक्यमानुपूर्व्येण तेषां वक्तुं प्रविस्तरम् ॥३३॥
अनादित्वाद्धि कालस्य ह्यसंख्यानाच्च वेधसाम् ।
आभूतसम्प्लवो ह्येतदहोरात्रं स्मृतं ततः ॥३४॥
त्रैलोक्ये यानि सत्त्वानि गतिमन्ति ध्रुवाणि च ।
आभूतेभ्यः प्रलीयन्ते तस्मादाभूतसम्प्लवः ॥३५॥
चतुर्युगसहस्रान्ते दिवसे ब्रह्मणो गते ।
सुषुप्सुर्विश्वसृट् नैजां रात्रिं वै कुरुते ततः ॥३६॥
ततः स वसति रात्रिं तमस्येकार्णवे जले ।
प्रातः सिसृक्षया युक्तो यथापूर्वं करोति च ॥३७॥

वत्सरारंभदिवसे ब्रह्मा यद्यत् करोति हि ।
प्रधानं कर्म तन्नाम्ना वत्सरो वापि जायते ॥३८॥
तत्पञ्चाशत्तमे वर्षे वेधसः कल्पकेष्वहम् ।
बहुवारं समुत्पन्नो नारायण्या त्वया समम् ॥३९॥
ब्राह्मकल्पे पाद्मकल्पे वैराजकल्पके तथा ।
श्वेतकल्पे लोहिते च कृष्णकल्पेऽभवं तथा ॥४०॥
सनत्कल्पे भवकल्पे भुवः कल्पेऽभवं तथा ।
तपःकल्पे भावकल्पे रंभकल्पे ऋतौ तथा ॥४१॥

ऋतुकल्पे वह्निकल्पे हव्यवाहनकेऽपि च ।
अनादिश्रीकृष्णनारायणश्चाहं तदाऽभवम् ॥४२॥
सावित्रकल्पे भुवःकल्पे चोशिककल्पके ।
कुशिके चापि गान्धारे ऋषभे षट्जकल्पके ॥४३॥
मार्जालीये मध्यमे च वैराजे कल्पकेऽपि च ।
निषादे प्राणके चापि मेघवाह्येऽभवंस्तथा ॥४४॥

चिन्तके चाऽऽकूतिके विज्ञातौ मानसेऽपि च ।
भावे रथन्तरे श्वेतलोहिते रक्तवाससि ॥४५॥
पीते च सितकल्पे च विश्वरूपेऽभवंस्तथा ।
तदन्येषु च कल्पेषु यथाकार्यं नरायणि ! ॥४६॥
अभवंश्चाऽभवंश्चापि मेऽवतारा असंख्यकाः ।
कल्पे कल्पेऽपि बहुधा श्रीस्त्वं बह्वी प्रजायसे ॥४७॥

मम पत्नी यथा त्वच्च विवाह्या मम जायसे ।
तव नामान्यनन्तानि तेऽवतारा असंख्यकाः ॥४८॥
जानाम्यहं तु तत्सर्वं नारायणीश्वि ! सर्वथा ।
नारायणि ! त्विदं सर्वं व्याप्तं ममैव तेजसा ॥४९॥

मम लक्ष्म्या ममैश्वर्यैर्मद्गुणैर्मद्विभूतिभिः ।
मदंशैर्मम सामर्थ्यैर्मम सम्पत्समृद्धिभिः ॥५०॥
पतंगे चापि मत्तेजः प्रदीपेऽपि च मामकम् ।
विद्युति ग्रहनक्षत्रतारासु शशिसूर्ययोः ॥५१॥

मम तेजो हि सर्वत्र तेजस्विनो मया हि ते ।
मण्योषधिषु द्युमार्गे स्वर्गे जने तपस्यपि ॥५२॥
महर्लोके सत्यलोके मेरौ तेजो हि मामकम् ।
लोकालोके शंकरे च विष्णौ चाजे विराजके ॥५३॥
महाविष्णौ प्रधानेशे प्रकृतीशेऽक्षरेऽपि च ।
मुक्तेषु चापि सर्वेषु चावतारेषु सर्वथा ॥५४॥
ऐश्वर्यगुणतेजांसि ममैव सन्ति तानि वै ।
मम मूर्तेः किरणैस्ते पुष्टिं तृप्तिं विदन्ति च ॥५५॥
पुरुषोत्तममूर्तेश्च किरणानां विचित्रता ।
पुष्णाति मुक्तजातानि विभिन्नतृप्तिदानतः ॥५६॥

सदा षोडशवर्षोऽहं चैकमानोऽक्षरे परे ।
पोषयामि मुक्तजनान् महानन्दादिदानकैः ॥५७॥
मम तेजांसि सर्वाणि महानन्दभृतानि वै ।
शान्तिशीतलतातृप्तिसुधाभृतानि सन्ति च ॥५८॥
तद्भोक्तारो मुक्तजना मुक्तान्यश्च त्वया सह ।
शाश्वतानन्दपूर्णास्ते नित्यतृप्ता भवन्ति हि ॥५९॥
रोम्णां मूर्तेः किरणानि निर्यान्ति रसभृन्ति वै ।
सृष्टित्रयस्यौषधयः पुष्णन्ति तद्रसैः सदा ॥६०॥

मुक्ताश्च तद्रसैः पुष्टाः सर्वदैकप्रमाणिनः ।
एषां तेजांसि नेत्राभ्यां निर्यान्ति भास्कराणि वै ॥६१॥
तत्प्रभाभिः प्रपश्यन्ति सृष्टित्रयस्य देहिनः ।
दक्षनेत्रकिरणेभ्यः सूर्या भवन्ति सर्वशः ॥६२॥
वामनेत्रकिरणेभ्यश्चन्द्रा भवन्ति सर्वशः ।
मस्तकस्य च परिधेर्भवन्ति स्तनयित्नवः ॥६३॥
सृष्टित्रयस्य वै विद्युत्प्रवाहाश्च भवन्त्यपि ।
मुखमाधुर्यतेजांसि निस्सरन्त्यभितो हरेः ॥६४॥
तन्माधुर्यमधुभिश्च तृप्यन्ति मुक्तकोटयः ।
तृप्तिमद्भिर्हि किरणैः सृष्टित्रयस्य देहिनः ॥६५॥
कपोलाभ्यां मम मूर्तेर्निर्यान्ति मोहिनीप्रभाः ।
ताभिर्मुक्तास्तथेशाद्या मुग्धा मूर्तौ भवन्ति वै ॥६६॥
ओष्ठाभ्यां चामृतभृन्ति निर्यान्ति किरणानि वै ।
तद्रसामृतपानेन तृप्यन्ति त्रिसृजिस्थिताः ॥६७॥
नेत्रप्रान्तात् प्रभवन्ति तेजांसि प्रेमभृन्ति च ।
तैश्चाकृष्टाः प्रेमभागा जायन्ते त्रिसृजिस्थिताः ॥६८॥
सुधाभृतानि दन्तेभ्यो जायन्ते किरणानि वै ।
सुधापानैः सृष्टयो वै सर्वास्तृप्यन्ति सर्वदा ॥६९॥
पीयूषाणां किरणानि भालमध्याद् भवन्ति वै ।
पीयूषपानतृप्ताश्च जायन्ते त्रिसृजिस्थिताः ॥७०॥
कर्णाभ्यां संप्रजायन्ते तारतेजःस्वरात्मकाः ।
तेजःप्रवाहास्तैः सर्वे शृण्वन्ति दिव्यकर्णकाः ॥७१॥
मूर्तेरभितो जायन्ते मिष्टस्पर्शाः सुखावहाः ।
स्पार्शनैः किरणैः स्पृष्टा भुञ्जते सुखमाच्युतम् ॥७२॥
जिह्वातः किरणानीष्टमिष्टरसानि यान्ति हि ।
सर्वसृष्टिजनास्तैस्तु रस्यन्तेऽदन्ति तद्रसम् ॥७३॥
नासिकातः किरणानि गन्धवन्ति प्रयान्ति च ।
तद्गन्धैः सर्वसृष्टिस्था जिघ्रन्ति वै सुगन्धिकम् ॥७४॥
श्रीहरेर्मे हृदयात्तु निस्सरन्त्यभितः खलु ।
शाश्वतानन्दपूर्णानि किरणानि सुखानि वै ॥७५॥
तैर्महानन्दमग्नाश्च वर्तन्ते त्रिसृजिस्थिताः ।
मम मूर्ध्नश्चिदाकाशात्मकब्रह्माख्यरन्ध्रतः ॥७६॥
प्रभवन्ति महानन्दा मिष्टा वाणी परा तथा ।
ताभ्यः सृष्टित्रयस्थाश्च व्याहरन्ति वचांसि हि ॥७७॥
मद्वाचा वाग्मिनः सर्वे मत्कृतार्थानुयोगिनः ।
मद्धस्ताभ्यां किरणानि क्रियावन्ति प्रयान्ति च ॥७८॥
तैश्च सृष्टित्रयस्था वै भवन्ति यत्नशीलिनः ।
ममोदरात् किरणानि निर्यान्ति परितस्तथा ॥७९॥
प्राणदानि च तैः सर्वे जीवन्ति त्रिसृजिस्थिताः ।
मम प्रजननाद् यान्त्यानन्दाढ्यकिरणानि वै ॥८०॥
तन्मात्रेऽऽनन्दवन्तः सृष्टित्रयस्थदेहिनः ।
मन्मूर्तेः पादयोर्यान्ति विहारकिरणानि वै ॥८१॥
तैर्भवन्ति सगतिकाः सृष्टित्रयस्य देहिनः ।
मन्मूर्तेः कटिभागाच्च प्रयान्ति किरणानि ह ॥८२॥
सबलानि च तैः सर्वे बलवन्तो भवन्ति हि ।
पृष्ठदण्डात् किरणान्याधारवन्ति प्रयान्ति च ॥८३॥
तेन लोकाण्डकोट्यश्चाऽऽधारस्तंभाश्रिताः सदा ।
मम पायूत्सर्जभासो यान्ति वै सृष्टिकोटिषु ॥८४॥
ताभिर्भाभिः समुत्सर्गा जननानि भवन्ति च ।
मम नितम्बभागाभ्यां किरणानि प्रयान्ति च ॥८५॥
आस्यशक्त्याऽऽसनबद्धाः सर्वे लोका भवन्ति तैः ।
ममाऽऽन्तरगता भासः प्रयान्ति सर्वसृष्टिषु ॥८६॥
ताभिर्भाभिर्मननं च बोधनं माननं तथा ।
चिन्तनं निर्णयं साक्षाद्विज्ञानं यान्ति देहिनः ॥८७॥
मम कौस्तुभकिरणैः प्रदीपाः संभवन्ति च ।
मम सौन्दर्यकिरणैः सुन्दर्यः सृष्टयस्त्विमाः ॥८८॥
मम लक्ष्म्याश्च किरणैर्गृहिण्यः सर्वसृष्टिषु ।
गृहलक्ष्म्यो भवन्त्येव सर्वसौभाग्यशोभिताः ॥८९॥
मम वात्सल्यकिरणैः स्नेहबद्धा हि सृष्टयः ।
ममौदार्यप्रभाभिश्चौदार्ययुक्ता हि सृष्टयः ॥९०॥
ममाऽभिरूपकिरणैः सर्वं रूपान्वितं सदा ।
मम कल्पाख्यकिरणैः कामावसायितादिकाः ॥९१॥
सिद्धयः सम्प्रवर्तन्ते कल्पपादपवल्लयः ।
मम धर्मप्रदरश्मिभिश्च तृप्यं सृजित्रयम् ॥९२॥
पाकं च परिणामं च प्रयान्ति तैश्च सृष्टयः ।
मम रौद्रैश्च किरणैस्तिरोभावं प्रयान्त्यपि ॥९३॥
स्थैर्यशक्तिमयैश्चापि किरणैः सर्वमण्डलम् ।
सृष्टित्रयात्मकं स्वस्वक्रमस्थैर्यं प्रवर्तते ॥९४॥
ममाऽऽपूरककिरणैरापूर्यन्ते हि सृष्टयः ।
मम पुण्यककिरणैः पूयन्ते चेश्वरादयः ॥९५॥
मम विज्ञानकिरणैः सार्वज्ञ्यं यन्ति देहिनः ।
मम कृपाप्रभाभिश्च समुद्यन्ति हि देहिनः ॥९६॥
मम शोभाप्रभाभिश्च शोभन्ते सृष्टिनायकाः ।
मम गुप्तप्रतेजोभिर्निगूढैश्वर्ययोगिनः ॥९७॥
मम मूर्तेर्निदिध्यासैर्मन्मयाः साधवः सदा ।
सदिति मम चाख्यास्ति तद्वन्तो ये भवन्ति वै ॥९८॥

ममाऽऽत्यन्तसयुजास्ते सन्तो मन्मूर्तयः प्रियाः ।
भवत्यः काशिकाक्षेत्रे विधायाग्निं प्रदक्षिणम् ॥९९॥
मम सायुज्यमापन्नाः सत्यो मन्मूर्तयः प्रियाः ।
मामाराध्य मम योगं गतास्ते मूर्तयो मम ॥१००॥
मुक्ताश्चेशाः सुरा विप्राः सन्तो गावश्च कन्यकाः ।
कुमारा ब्रह्मशीलाश्च सत्यश्च मूर्तयो मम ॥१०१॥

मम मूर्तेः किरणैश्च सत्तावद्भिः सृजित्रये ।
प्रजायन्ते तु राजानो मद्योगान्मूर्तयो मम ॥१०२॥
इन्द्रः स्वायंभुवो ब्रह्मा वैराजस्तत्पिताऽपि च ।
तत्पितुश्च पिता चापि सर्वास्ता मम मूर्तयः ॥१०३॥
शची शतस्वरूपा सावित्री वैराजिका तथा ।
महालक्ष्मीः प्रधाना च प्रकृतिर्मम मूर्तयः ॥१०४॥

वासुदेवादयो व्यूहाः श्रीकृष्णाद्याश्च मूर्तयः ।
नारायणास्तथा सन्तः साध्व्यश्च मम मूर्तयः ॥१०५॥
अग्निर्विष्णुः सुवर्णं च हृदयं चेतनं गुरुः ।
युगलं तुलसी सत्यं सर्वदा मम मूर्तयः ॥१०६॥
वेदः सूर्यो व्यवसायो दण्डः स्नेहोऽतिथिः सुखम् ।
अर्भकश्चाश्रितोऽनाथो विद्यार्थी मम मूर्तयः ॥१०७॥
राजाऽऽचार्यः प्रधानश्चोपदेष्टा व्यास आर्तिहाः ।
रक्षकः पालकः स्वामी शरण्यो मम मूर्तयः ॥१०८॥

यज्ञः श्राद्धं पूजनं च स्वागतं मधुपर्ककम् ।
दक्षिणा हव्यकव्यादि मन्मयं मम मूर्तयः ॥१०९॥
कण्डनी पेषणी चुल्ली जलकुम्भी च मार्जनी ।
मदर्थं तूपयुक्तास्ताः पावन्यो मम मूर्तयः ॥११०॥
शय्या यानं वाहनं च गोधनाद्यं गृहादिकम् ।
मदर्थं चोपयुक्तं चेत् सर्वं मन्मूर्तिरूपि तत् ॥१११॥
सर्वं मदन्वितं नारायणीश्रि ! त्वं यथा मम ।
मदर्थं चेत् कृतं सर्वं मम सायुज्यदं भवेत् ॥११२॥
इत्येवं कथितं तेऽत्र भोजनं मूर्तिरूप्यहम् ।
सर्वेषां पृच्छ मे चान्यजिज्ञासितं तु ते यदि ॥११३॥

पठित्वेमं तथा श्रुत्वा मद्भावं चाप्नुयात् प्रिये ।
भुक्तिं मुक्तिं लभेत् तीर्थफलं योगफलं लभेत् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो द्वापञ्चाशद्वत्सरनामानि, वर्तमानकल्पीयचतुर्दशमनुनामानि, पञ्चाशद्वर्षीयाऽन्तिमचत्वारिंशत्कल्पनामानि, पुरुषोत्तमकिरणपोष्यं सृष्टित्रयादीतिविभूतिवर्णनमित्यादिनिरूपणनामा द्वितीयोऽध्यायः ॥ २ ॥

श्रीनारायणीश्रीरुवाच—

भगवन्मे कृपासिन्धो वद जिज्ञासितं त्विदम् ।
द्वापञ्चाशद्वत्सरेषु ब्रह्मणो यत्र वत्सरे ॥ १ ॥
मुख्यावतारी त्वं जातो नामकर्मगुणान्वितः ।
तत्सर्वं श्रोतुमिच्छामि त्वल्लीला मुक्तिदा यतः ॥ २ ॥

नान्तोऽस्ति तेऽवताराणां तद्वारं न ददामि ते ।
अवतारिस्वरूपस्य प्राकट्यं तत्पुराभवम् ॥ ३ ॥
श्रोतुमिच्छामि भगवन् यन्मेऽपि स्मरणं भवेत् ।
पुरुषोत्तमप्राकट्यमात्रं मे वद वत्सल ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं कथयामि निबोध मे ।
भुक्तिमुक्तिप्रदं तत्तच्चरित्रं मम भामिनि ! ॥ ५ ॥
वेधसो वत्सरे पाद्मे कल्पाऽष्टमेऽष्टमे मनौ ।
वेधसो नालखण्डाद्वै रोहिणाऽण्डोदरोऽसुरः ॥ ६ ॥
जज्ञे ब्रह्माण्डतुल्यो वै शरीरेण बलेन च ।
तेजसा तामसेनापि त्रिलोकिभक्षकोऽभवत् ॥ ७ ॥

रुद्रेण गदया चापि त्रिशूलेन प्रताडितः ।
दुद्राव जलमध्ये स रुद्रस्तमन्वगात्तदा ॥ ८ ॥
पृथिव्यावरणं भित्त्वा प्रविवेशाऽण्डमण्डलम् ।
सत्यं तपो जनं त्यक्त्वा महर्लोकमुपाययौ ॥ ९ ॥
मेरोः स गह्वरे सूक्ष्मो भूत्वा गुप्तोऽवसत्ततः ।
रुद्रः स्वर्गं वीक्षितुं वै महेन्द्रालयमाययौ ॥१०॥
देवाश्च पितरश्चापि महर्षयः समाययुः ।
इन्द्रसभा प्रपूर्णाऽभूत् सूर्यचन्द्रादिभिस्तदा ॥११॥
रोहिणाण्डोदरो ज्ञात्वाऽवसरं ववृधे तदा ।
मेरुतुल्योदरो भूत्वा मुख्यं व्यादाय तां सभाम् ॥१२॥
सस्वर्गां सूर्यचन्द्रेन्द्ररुद्रनक्षत्रसंयुताम् ।
न्यगिलत् सहसा सर्वं स्वर्गं तस्योदरेऽभवत् ॥१३॥

हाहाकारो महाञ्जातश्चुक्षुभुर्भूतलानि च ।
महर्जनादिलोकाश्चाऽकस्माद्वै प्रचकम्पिरे ॥१४॥
सत्यलोके महान् कम्पस्तदा जातोऽतिदारुणः ।
लोकालोकाचलश्चापि मुहुः कम्पमगात्तदा ॥१५॥
अकस्मात् प्रलयं ज्ञात्वा स्वर्गलोकस्य देवताः ।
सरुद्रेन्द्रार्कशशिनो रोहिणाण्डोदरे स्थिताः ॥१६॥
तुष्टुवुर्भयमापन्ना मां तदा पुरुषोत्तमम् ।
परब्रह्म कृपासिन्धो सर्वरक्षक माधव ॥१७॥

नमस्ते भगवन् सर्वान्तर्यामिन् परमेश्वर ।
त्वां विना रक्षको नान्यश्चाकस्मिकलयादिह ॥१८॥
विद्यते प्राणनाथ त्वं रक्ष रक्ष महालयात् ।
केवयं स्वर्गवासाश्च कुत्राऽत्र गह्वरे गताः ॥१९॥
न जानीमो वयं कृष्णनरायण जगद्गुरो ।
स्वर्गं दिव्यं सर्वतेजोमयं महति गह्वरे ॥२०॥
पतितं किं च वा भूतं सत्त्वं वा न्यगिलद्धि नः ।
अकाले प्रलयः प्राप्तस्तस्माद् रक्षय रक्षय ॥२१॥
शरणं तव याताः स्मः समर्पिताः स्वयं सुराः ।
आत्मनिवेदिनस्तेऽत्र यथेष्टं कुरु नः कृते ॥२२॥
इत्येवं संस्तुतश्चाऽहं ब्रह्मणाऽपि च संस्तुतः ।
त्वया साकं तदा नारायणीश्रि ! रोहितोदरे ॥२३॥
इन्द्रस्य मानसः पुत्रः सचक्रश्चाऽभवं द्रुतम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥२४॥
त्वं तदा मानसी पुत्री रुद्रस्याऽप्यभवः प्रिये ।
देवाः प्रत्यक्षतां प्राप्तं मां तदा पुरुषोत्तमम् ॥२५॥
विलोक्य मग्नहृदयाः पुपूजुर्हृदयाऽर्पणैः ।
मया तूर्णं तदा सुदर्शनं चक्रं महत् कृतम् ॥२६॥
कोट्यरं कर्तनं रोहिताण्डोदरस्य वर्ष्मणः ।
मया मुक्तं करात्तूर्णं न्यकर्तयत् तदाऽसुरम् ॥२७॥
परितो बहुधा गत्वा भ्रमित्वा च मुहुर्मुहुः ।
चक्रोत्पन्नो महानग्निश्चासुरवर्ष्मखण्डकान् ॥२८॥
कोटिधा तत्कर्तितांश्च भस्मसात् प्रचकार ह ।
तच्च भस्म तदा स्वर्णं रोहिताख्यं ह्यभूत्तदा ॥२९॥
रोहिताण्डोदरनाशे जाते स्वस्थाः सुरादयः ।
मां विदित्वाऽक्षरेशं श्रीमहेन्द्रबालकं प्रभुम् ॥३०॥
रक्षकं परमेशानं चेन्द्रालये सुरालये ।
महोत्सवं परं कृत्वा रुद्रो वै देवसाक्षिके ॥३१॥
मण्डपे त्वां निजां पुत्रीं मानसीं मे ददौ तदा ।
**रमणीं** दैवविधिना प्राप्तवाँस्त्वां तदाऽप्यहम् ॥३२॥
मम संज्ञा तदा चासीद्**दनादिद्युनरायणः** ।
तदा स्वर्गं तथा देवा यथावत् स्थापिता मया ॥३३॥
मम योगबलेनैव विकृतं सुकृतं कृतम् ।
अवतारी स्वयं सोऽहं योऽहं चाऽत्राऽस्मि सोऽभवम् ॥३४॥
स्मर रौद्रि प्रिये तत्र लीला मे तव योगिनीः ।
मेऽवतारास्तत्र वर्षे प्रत्यहं बहवोऽभवन् ॥३५॥
इत्येवं कथितं चाऽद्यं जन्म मे मानसं तदा ।
**अथ** द्वितीयं जन्माऽपि द्वितीये वत्सरे शृणु ॥३६॥

नाल्कमाभिधे वर्षे ब्रह्मणः प्रथमेऽहनि ।
तृतीयस्य मनोरन्ते मेरुर्नाम्ना हि पर्वतः ॥३७॥
चतुर्दशस्तराणां वै भारेण महता तदा ।
आक्रान्तोऽभूत्तदा पातालाऽधो विवेश वै मनाक् ॥३८॥
चतुर्दशस्तरैर्युक्तः सुराऽसुरालयान्वितः ।
निम्नभावं गते मेरौ भुवनानि चतुर्दश ॥३९॥
भग्नानि मेरुणा साकं चाधोभावं गतानि वै ।
भुग्नानि मेरुपार्श्वेषु चाकृष्टानि समन्ततः ॥४०॥
प्रजातानि तदा सत्यं स्वर्गं भूश्च रसातलम् ।
सर्वं वै भुग्नभावं च गतं चाभूत् समन्ततः ॥४१॥
लोकालोकाचलश्चापि प्राकारोऽण्डस्य सर्वतः ।
आन्तराभिमुखं कृष्टो ह्रस्ववलयतां ययौ ॥४२॥
तथापि तस्य बलतो भुग्नान्यपि स्थिराणि वै ।
भुवनान्यभवँस्तत्र क्षणं संकुचितान्यपि ॥४३॥
ब्रह्मविष्णुमहेशाद्याः स्तंभनाशं विलोक्य च ।
ब्रह्माण्डनाशं मत्वा तद्रक्षार्थं परमेश्वरम् ॥४४॥
परब्रह्म हरिं कृष्णनारायणं प्रभुं तु माम् ।
अस्तुवन् परया भीत्या रक्षार्थं मेरुभूभृतः ॥४५॥
ब्रह्माण्डस्याऽस्य रक्षार्थं लोकानामवनाय च ।
त्वमाधारोऽसि सर्वेषां ब्रह्माण्डानां परेश्वर ॥४६॥
सर्वसृष्टिस्थैर्यशक्तिस्त्वय्येव वर्तते प्रभो ।
तवान्तर्वर्तमानत्वात् स्थिरं सर्वं प्रविद्यते ॥४७॥
भगवन् भवदुत्पन्नं त्वदाधारं समस्तकम् ।
त्वया हीनं लयं चेयात् त्राहि नाशाभिसन्निधेः ॥४८॥
विना स्तंभं गृहं नैव तिष्ठेदण्डं तथा त्विदम् ।
मेरुं विना भुवनानि तिष्ठेयुर्नैव चाम्बरे ॥४९॥
मेरुर्मूले विशत्येव भाराक्रान्तः स्तरान्वितः ।
वयं नाशगताः स्याम रक्ष मेरुं तदाश्रयम् ॥५०॥
इतिस्तुत्वा क्षणं ध्यानं चक्रुर्मम सुरेश्वराः ।
अहं लक्ष्मि ! त्वया साकं तूर्णं चाक्षरधामतः ॥५१॥
समाययौ सत्यलोके वेधसः सन्निधौ द्रुतम् ।
सुराणां पश्यतां तत्र वेधसोऽङ्केऽर्भकोऽभवम् ॥५२॥
उज्ज्वलः कोटिसूर्याभः सजटः सर्वभूषणः ।
हसन्नङ्के समुवाच वेधसं पितरित्यहम् ॥५३॥
स मां पुत्रेति सम्बोध्य मायया चाऽग्रहीत् सुतम् ।
देवा नत्वा हरिं मत्वा पुष्पाद्यैः परमेश्वरम् ॥५४॥
मामानर्चुः स्तवं चक्रुः रक्षेत्यूचुः पुनः पुनः ।
अनादिश्रीमेरुनारायणनामा सुतोऽप्यहम् ॥५५॥

तूर्णं त्वां परमां शक्तिं कृत्वा मेरोः प्रधारिणीम् ।
मम रूपेऽतिसम्पन्नां लीनां कृत्वाऽतिसत्वरम् ॥५६॥
देवान् ब्रह्मादिकान् नीत्वा सह पातालमाययौ ।
मेरुमूलं पृथिव्यां यन्निहितं तदपूजयम् ॥५७॥
त्वां प्रपूज्य महानारायणीश्रि ! चादिदेश ह ।
अत्र शक्तिस्वरूपा त्वं विशेति सहसा तदा ॥५८॥
त्वं प्रविष्टा महाशक्तिर्मया सृष्टा मयाऽन्विता ।
मया मेरुस्तदा देवैः साकं मूले समुद्धृतः ॥५९॥
उत्तोलितोऽतिबलिभिः साकं ब्रह्मादिभिः सह ।
यथापेक्षं ततो मेरुश्चोन्नतिं प्रगतोऽभवत् ॥६०॥
भुवनानि समस्तानि समसूत्रतलानि च ।
बभूवुर्वासयोग्यानि देवाद्याः सुखिनोऽभवन् ॥६१॥
त्वया लक्ष्मि ! निजच्छायात्मिकया धृतिसंज्ञया ।
तदारभ्य धृतश्चायं मेरुर्मूले चिरं सदा ॥६२॥
अहं विवेश च तत्र मेरौ धारणरूपवान् ।
अम्बराकर्षणरूपोऽन्तरात्मा मेरुगर्भगः ॥६३॥
एवं मेरौ परं कृत्वा स्थैर्यं ततः सुरादिभिः ।
सह मूलानि लोकानां मेरुलग्नानि वीक्ष्य च ॥६४॥
सुलग्नानि तदा कृत्वा स्थिराण्यास्थाय वै क्रमात् ।
रसातलात्तथा महातलात् तलातलात्तथा ॥६५॥
सुतलाद् वितलाच्चापि तथाऽतलाद् भुवं प्रति ।
आजगाम त्वया साकं भुवः स्वश्च महर्जनम् ॥६६॥
तपः सत्यं परं गत्वा चाजपुत्रः स्थिरोऽभवम् ।
अनादिश्रीमेरुनारायणोऽहं वेधसः सुतः ॥६७॥
मेरुपुत्र्या त्वया साकं सुरादिभिर्विवाहितः ।
आकल्पान्तं तदा चासं सर्वरक्षणहेतवे ॥६८॥
अवतारी स्वयं कृष्णनारायणः परेश्वरः ।
अवतारास्तदा वर्षे कल्पे कल्पे ममाऽभवन् ॥६९॥
अनेके कार्यवशगा यत्पारो नैव विद्यते ।
महानारायणीश्रि ! त्वं स्मर त्वत्संभवं तदा ॥७०॥
ममापि संभवं मेरुनारायणात्मकं शुभम् ।
अथाऽन्ये वत्सरे लक्ष्मि ! तृतीये वेधसोऽपि च ॥७१॥
कथयामि जनुर्मेऽत्र शृणु कृष्णनरायणि ! ।
नालोर्ध्ववत्सरे चाद्ये कल्पे मनौ तृतीयके ॥७२॥
नारायणि ! तदा स्वर्गे भूतले सूर्यमण्डलम् ।
अशातितं तु लोकानां भस्मसात् कारकं ह्यभूत् ॥७३॥
लक्षरश्मियुतं चासीद् दाहकं सर्वतोमुखम् ।
दिशां विदिशां लोकानां ग्रहाणां सृष्टिदेहिनाम् ॥७४॥

भूतलानां च सर्वेषां समुद्राणां च दाहकम् ।
भुवःस्थानां वायवीयसृष्टीनां दाहकं ह्यभूत् ॥७५॥
लोकालोकस्यापि मेरोर्दाहकं वनवासिनाम् ।
नक्षत्राणां च ताराणां दाहकं जनवासिनाम् ॥७६॥
महर्लोकनिवासानां तथोर्ध्ववासिनामपि ।
समन्ततोऽभवच्चापि दाहकं भस्मसात्करम् ॥७७॥
तद्दाहदुःखमासाद्य मनवो देवतास्तथा ।
सर्वलोकनिवासाश्च तुष्टुवुर्वेधसं तदा ॥७८॥
ब्रह्मा स्तुतिं समाकर्ण्य ययौ सूर्यस्य शान्तये ।
सोऽपि दग्धः परावृत्य सत्यलोकं ययौ तदा ॥७९॥
शंकरो वै महाशान्तिं कर्तुं ययौ रविं प्रति ।
सोऽपि दग्धो नमस्कृत्य परावृत्याऽक्रियोऽभवत् ॥८०॥
ततो विष्णुस्तथा देवा मिलित्वा परमेश्वरम् ।
तुष्टुवुर्मां कृष्णनारायणं श्रीपुरुषोत्तमम् ॥८१॥
सूर्यतेजःप्रशान्त्यर्थं नमश्चक्रुः पुनःपुनः ।
कोटिसूर्यप्रणेतस्त्वं भगवन् परमेश्वर ॥८२॥
जगच्चक्षुर्जगत्प्रभाप्रद सूर्यात् प्ररक्षय ।
वयं त्रिलोकवासाश्च तथाऽन्ये चोर्ध्ववासिनः ॥८३॥
दग्धा भवामः सूर्यस्याऽनलैर्लक्षप्रसर्पिभिः ।
त्वया कृतं जगत् सर्वं सप्रकाशं सुखार्थकम् ॥८४॥
तद्यदि स्याद् दग्धभस्म किं सूर्यस्य प्रयोजनम् ।
तस्माद् रक्षय देवेश तप्तान् शान्तान् विधेहि नः ॥८५॥
इत्युक्त्वा प्रददुः पूजां बह्वीं मेऽर्पणरूपिणीम् ।
अनादिश्रीकृष्णनारायणाय परमात्मने ॥८६॥
तदाऽहं कमले ! साकं त्वया तूर्णं नरायणः ।
अक्षरादाययौ सत्यं ब्रह्मस्थानं ततः परम् ॥८७॥
देवैः सम्पूजितश्चाहं विष्णोरंकेऽभवं सुतः ।
सहस्रहस्तकः सौम्यः किरीटकुण्डलादिमान् ॥८८॥
शाणशस्त्रादियुक्तश्च सुधामृतघटादिमान् ।
सुदर्शनं मया तत्र शाणात्मकं क्षणात् कृतम् ॥८९॥
सर्वाग्निशामकं सुधामृतं शातनशक्तिकम् ।
मया लक्ष्मि तदाऽऽज्ञप्ता त्वं देवी **शातनी** भव ॥९०॥
सूर्ये प्रविश्य च तत्राऽमृतं धारय शातनि ! ।
औष्ण्यं यद्वद् भवेन्न्यूनं तथा विधेहि सत्वरम् ॥९१॥
त्वं चाज्ञां मे समादाय तूर्णं वह्निस्वरूपिणी ।
महातेजोमयी भूत्वाऽर्बुदतापकरी सती ॥९२॥
अमृतं च समादाय प्रविष्टा सूर्यमण्डलम् ।
शनैः सुधां च तद्गर्भे सन्निहितवती ततः ॥९३॥

शनैः शनैः किरणानि शान्तिमाप्तानि वै रवेः।
त्वं च शनैः शनैस्तत्र स्वं तेजः समुपाहरः ॥९४॥
ततश्चाऽहं तव रूपे शाणे यन्त्रे रविं तदा।
धृत्वा तेजोऽतितीक्ष्णाँश्च प्रदेशानप्यशातयम् ॥९५॥
सर्वान् विभिद्य तद्देशान् देवादिभ्यस्तदाऽददम्।
ते चक्रुश्चायुधान्येव चाव्याहतानि वै तदा ॥९६॥
सूर्यो मया कृतस्तत्र सहस्रांशुः सुखप्रदः।
अन्येंऽशवस्त्वया लक्ष्मि! लीनीकृताः स्ववर्ष्मणि ॥९७॥
तत आरभ्य सूर्यः स लोकसम्पत्करोऽभवत्।
सा त्वं ततश्च तत्पुत्री सौरी शातनिकाऽभिधा ॥९८॥
अभवः सा मया विष्णुपुत्रेण सूर्यशातिना।
अनादिश्रीकृष्णनारायणेनापि विवाहिता ॥९९॥
कल्पान्तं चाऽवसस्तत्र स्मर त्वं तन्मया सह।
आसीन्नारायणीश्रि! यत् सूर्यकर्माऽभवं प्रभुः ॥१००॥
परब्रह्म स्वयं सूर्यकर्माऽहं चाऽभवं प्रिये।
एवं तत्रापि वर्षे चाऽवतारा मम कोटिशः ॥१०१॥
सञ्जाता धर्मगुप्त्यर्थं रक्षार्थं देहिनां तथा।
अवतारी स्वयं प्रोक्तोऽनादिविष्णुनरायणः ॥१०२॥
तृतीयं मम वै लक्ष्मि प्राकट्यं तत्र वत्सरे।
जानाम्यहं च तत्सर्वं हस्ताऽऽमलकवत् प्रिये ॥१०३॥
मां भजित्वा तदा मुक्तिं गता ह्यसंख्यदेहिनः।
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिर्भवेत्तथा ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः प्रथमे वर्षेऽनादिश्रीधुनारायणस्य रोहिणाण्डोदराऽसुरनिगलितस्वर्गरक्षार्थम्, द्वितीये वर्षे स्वभारेण निमज्जतो मेरोर्धारणार्थम् अनादिमेरुनारायणस्य, तृतीये वर्षे दाहयतो रवेः शातनार्थम् अनादिविष्णुनारायणस्य, च प्राकट्यमितिनिरूपणनामा तृतीयोऽध्यायः ॥ ३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि! त्वं चतुर्थं मम वर्तनम्।
चन्द्ररक्षाकरं स्वर्गे गायतां मोक्षदं परम् ॥ १ ॥
स्तावने वत्सरेऽजस्य कल्पे चतुर्थके तदा।
द्वादशे च मनौ वर्तमानेऽसुरोऽतिदारुणः ॥ २ ॥
धूम्रो नाम्नाऽभवद् रौद्रः शंभोर्मस्तकपृष्ठतः।
समुत्पन्नो व्योमदेहोऽन्तरीक्षगो भयंकरः ॥ ३ ॥
शंभोर्ललाटे भावन्तं दृष्ट्वा कान्तिमयं मणिम्।
स्पर्धां कृत्वा ययौ व्योम्नि चावाप्तुं वै निशामणिम् ॥ ४ ॥
चन्द्रमसं समाहर्तुं यत्नं तदाऽकरोद् बहुम्।
चन्द्रेण वार्यमाणः स निशितैः शस्त्रहेतिभिः ॥ ५ ॥
निपपाताऽम्बरादद्रौ श्वेतशृंगाभिधे तदा।
शंभुमुद्दिश्य च तपः शंभुपुत्रोऽकरोत्ततः ॥ ६ ॥
निराहारोऽभवत्त्वेकयुगं ततो हि शंकरः।
प्रसन्नः प्राह धूम्रं तं पुत्रं मस्तकपृष्ठजम् ॥ ७ ॥
वद किं रोचते तेऽद्य कथं तपसि वर्तसे।
वदेष्टं प्रददाम्येव मा कृथास्तप उग्रकम् ॥ ८ ॥
इत्युक्तश्चाऽसुरः प्राह वरं देहि जयावहम्।
चन्द्रं जेष्याम्ययत्नेन तथेच्छामि न चेतरत् ॥ ९ ॥
तथाऽस्त्विति हरः प्राह ददौ धूम्राय शूलकम्।
अप्रधृष्यमविनाश्यं चक्राच्चापि बलेऽधिकम् ॥१०॥
तदादाय तु धूम्रः स मेर्वद्रिं प्रथमं ययौ।
सार्वभौमजयं कर्तुं तृष्णातन्तुप्रप्रेरितः ॥११॥
मेरुवासान् सुरान् जित्वा पृथ्व्यां जेतुं नृपान् ययौ।
जित्वा भूमौ भूभृतश्च पातालान् प्रययौ ततः ॥१२॥
दैत्यान्नागान्कच्छपाँश्च मकरान्मत्स्यकाँस्तथा।
नक्रान् जित्वा फणाग्राँश्च जित्वा ययावरण्यकम् ॥१३॥
विद्याधराँश्च गन्धर्वान् जित्वा च किन्नराँस्ततः।
गुह्यकान् चारणान् जित्वा ययौ संयमनीं पुरीम् ॥१४॥
यमदूताँस्तदा जित्वा युयुधे स यमेन वै।
यमो दण्डेन कालेनाऽसुरः शूलेन वै मिथः ॥१५॥
युयुधाते तु नैकस्य पराजयोऽत्र विद्यते।
यमेन संस्मृतो रुद्रोऽसुरेण संस्मृतो हरः ॥१६॥
हररुद्रौ समायातौ मध्यस्थौ सम्बभूवतुः।
वारयामासतुस्तौ च ययतुः शंसितौ गृहम् ॥१७॥
अथाऽसुरो गर्वयुक्तो ययौ चेन्द्रं दिवस्पतिम्।
इन्द्रो ज्ञात्वा महादेवदत्तं शूलमजय्यकम् ॥१८॥
उत्थाय सौम्यभावेन सत्कारं कृतवान् शुभम्।
असुराय ददौ रम्यं हारं मण्यभिनिर्मितम् ॥१९॥
पूजयामास च शंभोः शूलं बहुविधानतः।
असुरोऽपि विना रोषं मृदुर्भूत्वा विलोक्य तत् ॥२०॥
ययौ सूर्यं विजेतुं च सूर्यश्चास्तं द्रुतं ययौ।
ययौ तदाऽसुरोऽजं च विजेतुं परमेष्ठिनम् ॥२१॥
ब्रह्मा ज्ञात्वा शांभवं तत् त्रिशूलं सम्पुपूज ह।
मधुपर्कं ददौ चाप्यसुराय मानन्नं ददौ ॥२२॥

धूम्रस्त्वासनमासाद्य सौवर्णं बहुशोभनम् ।
मुमुदे च मृदुर्भूत्वा नत्वाऽजं प्रययौ दिवम् ॥२३॥
चन्द्रं दृष्ट्वा पूर्णभासं ययौ तं प्रति सत्वरम् ।
सदा चन्द्रस्तत्र चासीन्नीरोगः सकलः सदा ॥२४॥
एकरूपः क्षयवृद्धिवर्जितः शाश्वतः सुखः ।
ग्रहग्रासादिहीनश्च पूर्णकलः समन्ततः ॥२५॥
तादृशं पूर्णपीयूषं गत्वा धूम्रो भयानकम् ।
शतचन्द्रायतं रूपं कृत्वा जग्राह पाणिना ॥२६॥
स्पर्शैः सुधाऽमृतानां तु किरणानां महासुरः ।
सुखं महानन्दभृतं ह्यवापाऽपूर्वमुत्तमम् ॥२७॥
अतश्चन्द्रे जातलोभो जग्रास शशिनं मुखे ।
हाहाकारो महानासीत् स्वर्गे पृथ्व्यां समन्ततः ॥२८॥
अमृतस्य निधानं वै शीततेजोभृतं मणिम् ।
तज्ज्योत्स्नामनवाप्यैवौषधयोऽतिविजीवनाः ॥२९॥
मृतप्राया अभवँश्च देवाश्चाऽमृतवर्जिताः ।
किरणाधारजीवाश्च सर्वे मरणशालिनः ॥३०॥
तदा जाताश्चाथ देवाः स्वगुरोः शरणं ययुः ।
सदस्पतिर्देवगुरुश्चाऽस्तौत् मां परमेश्वरम् ॥३१॥
चन्द्रस्य रक्षणार्थाय लोकरक्षणहेतवे ।
नमो देवाधिदेवाय सूर्यचन्द्रप्रचक्षुषे ॥३२॥
सर्वान्तर्यामिणे रक्षाकराय परमात्मने ।
पुरुषोत्तमसंज्ञाय सुधाप्रदाय शार्ङ्गिणे ॥३३॥
ग्रहनक्षत्रताराणां भास्कराय महात्मने ।
नमश्चान्तरवेद्याय चाऽभक्तक्षयकारिणे ॥३४॥
समायाहि हरे शीघ्रं रक्षां त्वं शशिनः कुरु ।
महादेवो ध्यानमग्नश्चिरकारी विराजते ॥३५॥
शीघ्रं धूम्राद् रक्ष मुक्तपते श्रीपरमेश्वर ।
स्तुतश्चैवं तदा चाहं नारायणीश्रि ! सत्वरम् ॥३६॥
त्वया साकं स्वाजगाम देवगुरोर्गृहं दिवि ।
द्रागेवाऽदृश्यरूपोऽपि तदङ्गे मानसः सुतः ॥३७॥
समभवं सुबालोऽहं सर्वभूषणभूषितः ।
शंखचक्रगदापद्मशूलशक्तिशराऽऽयुधः ॥३८॥
वज्रधनुर्दण्डपाशखड्गचर्मविराजितः ।
त्वं तदा तु मयाऽऽज्ञप्ता प्रविष्टा चाऽसुरोदरे ॥३९॥
चन्द्रमसि स्थिरा जाता चान्द्री कलाप्ररक्षिणी ।
त्वद्बलाद्वै तदा लक्ष्मि ! चन्द्रो मूर्च्छां न चाप्तवान् ॥४०॥
नापि तेजोविहीनश्च नापि चामृतवर्जितः ।
नापि संपाचितो गर्भे धूम्रासुरेण वह्निना ॥४१॥

एवमेवाऽभवद्गर्भे यथापूर्वं तथाऽभवत् ।
अथाऽहं पूजितो देवैर्देवगुर्वेकशोभितः ॥४२॥
प्रार्थितोऽसुरनाशार्थं जगामाऽहं महासुरम् ।
देवसैन्येन सहितो युयुधे चन्द्रघातिना ॥४३॥
तदा लक्ष्मि ! मयाऽऽज्ञप्ता कन्यारूपाऽभवः क्षणम् ।
असुरो धूम्रसंज्ञोऽपि त्वां विलोक्य मुमोह च ॥४४॥
शूलं विसृज्य च क्षणं त्वां धर्तुं यत्नमाचरत् ।
त्वया शूलं तदा ग्रस्तं ममाज्ञया हि शांकरम् ॥४५॥
मया चक्रेण वै शीघ्रं हतोऽसुरः सहस्रधा ।
धूम्रो विनाशमापन्नो भस्मसादभवत्तदा ॥४६॥
चन्द्रः पूर्णकलस्तत्र निर्जगामोदराद् बहिः ।
त्वं च शूलधरी चान्द्री कन्या नाम्ना तु कौमुदी ॥४७॥
वर्धिता सर्वदेवाद्यैः पूजिता परमेश्वरी ।
अहं सर्वैः पूजितश्च वर्धितो वन्दितस्तथा ॥४८॥
देवगुरोः सुतश्चाऽहं भगवान् पुरुषोत्तमः ।
चन्द्रमसा हरिर्ज्ञात्वा वन्दितः पूजितस्तथा ॥४९॥
कन्या त्वं कौमुदीनाम्नी दत्ता मह्यं तदा प्रिये ।
मया विवाहिता त्वं च देवगुरोर्गृहोषिणा ॥५०॥
अनादिश्रीदेवनारायणनाम्ना नरायणि ! ।
ततः सस्मार शंभुं च देवगुरोर्गृहेऽप्यहम् ॥५१॥
शंभुस्तूर्णं समायातो ज्ञात्वा मां परमेश्वरम् ।
धूम्रासुरं विनष्टं च ज्ञात्वा मुमोद वै हरः ॥५२॥
त्रिशूलं प्रददौ शंभुश्चन्द्रमसे हि शाश्वतम् ।
पिता तुभ्यं ददौ शूलं यौतकं शाश्वतं शिवम् ॥५३॥
त्वया मह्यं प्रदत्तं च मया हस्ते सुरेखकम् ।
कृतं धृतं सर्वदैव पश्य दक्षे करे मम ॥५४॥
त्रिशूलं रेखितं चास्ते प्राकट्यं याति चेच्छया ।
स्मर लक्ष्मि ! तव प्राकट्यं च मेऽपि तदाऽभवम् ॥५५॥
अवतारी स्वयं चाऽऽसं तदा देवनरायणः ।
अवतारास्तदा मेऽप्यासँश्च कोटिसहस्रशः ॥५६॥
आकल्पान्तं चाऽभवं वै त्वया साकं गुरोर्गृहे ।
अथाऽजस्य पञ्चमे वत्सरे योऽहं तदाऽभवम् ॥५७॥
आद्ये कल्पे चाद्यमनौ त्वं चाऽभवः कथां शृणु ।
व्योमबाणाभिधे वर्षे प्राक्कल्पे प्रथमे मनौ ॥५८॥
विद्यमाने ब्रह्मपुत्रा महर्षयोऽजसंसदि ।
संहताश्च प्रचक्रुर्वै विचारं वेदवादिनः ॥५९॥
ब्रह्माण्डे भूतलं कर्मभूमिः फलप्रदाऽस्ति यत् ।
तत्र कृतं देहिभिर्वै दत्तं दानं वृषादिकम् ॥६०॥

अन्यलोकगतैः सर्वैः प्राप्यते भोजनादिकम् ।
भूतले यत्प्रदत्तं च जलान्नाम्बरभूषणम् ॥६१॥
क्षेत्रवाटीरूप्यकन्यासुवर्णगृहसाधनम् ।
हव्यं कव्यं बलिः पुण्यं व्रतं श्राद्धं सहायकम् ॥६२॥
सर्वं लोकान्तरे दात्रा कर्त्राऽऽप्यतेऽयुतोत्तरम् ।
यथा जीवन्ति सन्न्यासा दानप्रस्थाश्च नैष्ठिकाः ॥६३॥
गार्हस्थ्यमुपसंलभ्य तथाऽऽलभ्य क्षितौ कृतम् ।
जीवन्ति स्वर्गदेवाश्च पितरश्च महर्षयः ॥६४॥
सुकृतं तद् यज्ञकार्यं जीवनं सर्वदेहिनाम् ।
विप्राणां भोजनं यत्र देवानां हव्यमित्यपि ॥६५॥
श्राद्धं च पितृदेवानामृषीणां पुण्यमित्यपि ।
सोमं सुधाऽमृतं भोज्यं यज्ञे सर्वं हि लभ्यते ॥६६॥
तस्माद् यज्ञः प्रकर्तव्यः शिक्षणीयः क्रियात्मकः ।
मानवेभ्यो भूदेवेभ्यः क्रियासन्तानहेतवे ॥६७॥
क्रतुतन्तौ समारब्धे सन्धिते योजिते कृते ।
यज्ञानां सम्प्रचारेण जीवनं स्यान्निरामयम् ॥६८॥
तस्माद् गच्छाम एवाऽद्य महर्षयो हि भूतलम् ।
देवान् पितॄन् सह नीत्वाऽऽचरिष्यामः क्रतूत्तमम् ॥६९॥
इतिसम्मन्त्र्य मुनयः पितरश्च सुरेश्वराः ।
आययुर्भूतलं लक्ष्मि ! यज्ञार्थं मेरुसन्निधौ ॥७०॥
पालाशाऽऽरण्यके सर्वे स्वर्गंगायास्तटे स्थिताः ।
प्रयतन्ते स्म यज्ञार्थं भिन्नकर्मनियोजिताः ॥७१॥
प्रथमोऽयं यतो यज्ञः क्रमं जानन्ति नैव ते ।
न कश्चित् सर्वयज्ञानामभ्यासी कर्मगोचरः ॥७२॥
यथाक्रमविनिर्योक्ता देवे पितरि भूसुरे ।
महर्षौ वा तदा तत्राऽभवत् कर्मक्रमाभिवित् ॥७३॥
ततस्ते मोहमापन्नाः कर्मकाण्डाऽप्रवेदिनः ।
इदं पूर्वमिदं पूर्वमेवमाग्रहिणोऽभवन् ॥७४॥
अनिश्चिते क्रतुक्रमे तदंगानां क्रमेऽपि च ।
वेधःपुत्रो ब्रह्मकुमाराख्यो नैष्ठिकशीलवान् ॥७५॥
यजमानं चाह तत्र ज्योतिष्मन्नामकं मनुम् ।
वयं सर्वे कर्मकाण्डे ह्यपूर्वगोचराः खलु ॥७६॥
विगुणे तु फलं यज्ञे विपरीतं भवेदिति ।
यज्ञद्रष्टा यज्ञवक्ता नान्यो नारायणं विना ॥७७॥
परब्रह्माऽक्षरातीतं श्रीहरिं पुरुषोत्तमम् ।
तमेवाऽऽराधयामोऽत्र संहृत्य क्रमहेतवे ॥७८॥
स चाऽऽगत्य क्रतुं सर्वं शिक्षयिष्यति यज्ञकृत् ।
यज्ञदेवः स यज्ञात्मा यज्ञज्ञो यज्ञकारकः ॥७९॥

इत्युक्तो वै मनुश्चान्ये स्वीचक्रुस्तद्वचस्ततः ।
परमेशं मिलित्वैवाऽऽराधयामासुरुत्सुकाः ॥८०॥
महर्षयश्च पितरो देवता भूसुरादयः ।
ओं नमो यज्ञरूपाय परमेशाय कर्मिणे ॥८१॥
यज्ञदेवाय यज्ञाय यज्ञज्ञाय क्रतुकृते ।
यज्ञशास्त्रेऽध्वरकार्यकारिणे परमात्मने ॥८२॥
नमोऽन्तर्यामिणे नश्च साहाय्यदाय शार्ङ्गिणे ।
इत्यस्तुवन् सुराद्या मां यज्ञार्थं पुरुषोत्तमम् ॥८३॥
तदाऽहं तु त्वया साकं श्रुत्वाऽक्षरेऽपि चार्थनाम् ।
अगच्छं गांगतीरं वै मेरोः पालाशकृद्वनम् ॥८४॥
ब्रह्मकुमारनिकटे बालोऽहमृषिवेषधृक् ।
सर्वविद्यामयः सर्वमन्त्रद्रष्टा नियोगवान् ॥८५॥
यावद्विधिप्रवीणोऽहं यावत्पात्रधरो द्विजः ।
सर्वक्रमाभिवेत्ता च सर्वद्रव्यादिबोधवान् ॥८६॥
द्वितीयो वै यथा ब्रह्मा तथा प्रकटितोऽभवम् ।
सर्वे दृष्ट्वा तु मां विप्रं कोटिभास्करभासुरम् ॥८७॥
सहसोत्थाय नेमुर्मां कस्त्वं पप्रच्छुरुत्सुकाः ।
अध्वरोऽहं हि भगवान् भवदाराधनाफलम् ॥८८॥
इत्युक्त्वाऽहं बालरूपो ब्रह्मकुमारकाऽङ्कगः ।
अभवं पुत्रभावेनाऽभावयत् सोऽपि मां तथा ॥८९॥
त्वं तदा चाविशो ज्योतिष्मन्मनौ भूयसी सती ।
अथाऽहं च समाश्वास्य सर्वान् यज्ञार्थकर्मसु ॥९०॥
नियुज्य क्रमवारं तान् प्रावर्तयं क्रतुं तदा ।
अनादिश्रीकृष्णनारायणोऽहं परमेश्वरः ॥९१॥
अनादिश्रीयज्ञनारायणो भूत्वा व्यधापयम् ।
अवभृथान्तं यज्ञं तं वैष्णवं सार्वभौमिकम् ॥९२॥
अध्वरोऽहं मनोस्तस्माद् ययाचे दक्षिणां तदा ।
भूयसीं यज्ञभूमौ वै मण्डपे वेदिकान्तिके ॥९३॥
तदा त्वं कन्यका नाम्ना भूयसी दक्षिणाऽभिधा ।
प्रादुरभवः कल्याणि ! कन्यका वै मदर्थिनी ॥९४॥
मनोर्ज्योतिष्मतः पुत्री नारायणी हि भूयसी ।
अध्वरेऽम्बरभूषाढ्या कोटिस्वर्णधनान्विता ॥९५॥
मद्योग्या याच्यमानाय मह्यं वै मनुनाऽर्पिता ।
तत आरभ्य तद्वर्षे सहस्रकल्पकात्मके ॥९६॥
मयाऽऽदिष्टप्रकारेणाऽध्वराः सर्वे प्रवर्तिताः ।
कल्पायुश्चाऽभवँस्तत्र त्वया साकं महाध्वराः ॥९७॥
यज्ञनारायणः सोऽहं चानादिः पुरुषोत्तमः ।
अवतारी स्वयं स्वामी परब्रह्म परेश्वरः ॥९८॥

भूयसी दक्षिणानाम्नी त्वं मे पत्नी तदाऽभवः।
स्मर नारायणीश्रि ! त्वं तत्कल्पं तं च वत्सरम् ॥९९॥
ततोऽन्ये मेऽवताराश्च तत्राऽभवन् हि कोटिशः।
वेद्मि सर्वानहं लक्ष्मि ! नान्ये स्मरन्ति तानपि ॥१००॥
सर्वयज्ञस्वरूपोऽस्मि सर्वे यज्ञा मयि स्थिताः।
सर्वयज्ञा मूर्तयो मे सर्वयज्ञप्रवर्तकः ॥१०१॥
भोक्ता सर्वेषु यज्ञेषु सर्वोऽध्वरफलप्रदः।
सर्वक्रियाकलापज्ञश्चाऽहं भवामि चाध्वरे ॥१०२॥
त्वां विना नैव तिष्ठामि दैवे पैत्र्ये तथाऽऽर्षके।
मानवे वा विधौ लक्ष्मि ! दानेऽर्हणे च पूजने ॥१०३॥
जपे व्रते क्रमे ज्ञाने साकं त्वया वृषेऽपि च।
उपतिष्ठामि देवेशि ! शिवेश्वरि ! न चान्यथा ॥१०४॥
इत्येवं चाध्वरं जन्म कथितं वै त्वया सह।
पठनाच्छ्रवणाच्चापि महाध्वरफलं भवेत् ॥१०५॥
तवापि स्मरणाल्लक्ष्मि ! भूयसीदक्षिणाफलम्।
सम्पत्सिद्धिर्भवेदत्र परत्र मोक्षणं भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसश्चतुर्थवत्सरे धूम्रासुरनाशार्थं चन्द्ररक्षार्थम् अनादिदेवनारायणस्य, पञ्चमवत्सरेऽध्वरतन्तुसम्पादनार्थम् अनादियज्ञनारायणस्य च, प्राकट्यमितिनिरूपणनामा चतुर्थोऽध्यायः ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं षष्ठे तापसवत्सरे।
वेधसोऽस्य द्वितीये कल्पके च प्रथमे मनौ ॥ १ ॥
प्राकट्यं तव रुद्राच्च ममाऽपि ब्रह्मतोऽभवत्।
प्रतिकल्पं त्रिलोकीनामुत्पत्तिस्तत्र जायते ॥ २ ॥
उत्पादकोऽत्र वै ब्रह्मा सायं संहारको हरः।
पोषणस्य प्रकर्ता तु विष्णुस्तत्र सदा मतः ॥ ३ ॥
किन्तु तं नियमं त्यक्त्वा रुद्रो देवो महेश्वरः।
ब्रह्माणमाह मा सृष्टिं कुरु त्वं यत् करोम्यहम् ॥ ४ ॥
सायंकालस्य कार्यं त्वं गृहाण लोकसंहृतिम्।
न मे तद् रोचते ब्रह्मन् संहाराख्यं हि कर्म यत् ॥ ५ ॥
योगिनां मादृशानां तन्महद् दुःखं विवेकिनाम्।
संहृतिर्नहि योग्या मे हिंसात्मिकाऽतिनिर्घृणा ॥ ६ ॥
सतां धर्मो न वै हिंसा परदुःखप्रदावृता।
परदुःखाऽसहिष्णुत्वे मम हिंसा न रोचते ॥ ७ ॥
अपि कायेन मनसा नेच्छामि परहिंसनम्।
कुतश्च कर्मणा कुर्वे पापकृत् कर्म भीषणम् ॥ ८ ॥
अपदेभ्यः सपदानां हिंसा पापाऽधिकान्विता।
सपदेष्वपि लिक्षाणां मक्षिकाणां ततोऽधिका ॥ ९ ॥
चटकानां च गृध्राणां गरुडानां ततोऽधिका।
श्वादीनां गोमहिषाणामुष्ट्राणां करिणां ततः ॥१०॥
नागानां च पिशाचानां भूतानां च ततोऽधिका।
दैत्यानां रक्षसां हिंसा दानवानां ततोऽधिका ॥११॥
सूतमागधबन्दीनां भृत्यानां च श्वपाकिनाम्।
मानवानां च विप्राणां नारीणां च ततोऽधिका ॥१२॥
कन्यकानां कुमाराणां बालानां च सतां तथा।
योगिनां चापि भक्तानां साधूनां ब्रह्मचारिणाम् ॥१३॥
सगर्भाणां सूतिकानां सतीनां च ततोऽधिका।
तीर्थानां चापि चैत्यानां प्रतिमानां ततोऽधिका ॥१४॥
मन्दिराणामृषीणां च देवानां च ततोऽधिका।
मुमुक्षूणां तापसानां हिंसा पापाधिका तथा ॥१५॥
यज्ञीयानां नृपाणां च गुरूणां च ततोऽधिका।
वेदानां चापि शास्त्राणां हिंसनं सर्वतोऽधिकम् ॥१६॥
ह्रयैशानां विभूतीनां हिंसनं च ततोऽधिकम्।
इत्येषां पापविस्तारो हिंसात्मा मे न रोचते ॥१७॥
करिष्येऽहं सर्जनं वै कुरु त्वं वै विसर्जनम्।
चिरं मया कृतं विसर्जनं त्वया प्रसर्जनम् ॥१८॥
आयतौ त्वं विधेह्येव विसर्जनं न सर्जनम्।
अहं सदा करिष्ये सर्जनं न तु विसर्जनम् ॥१९॥
इत्युक्तश्च तदा लक्ष्मि ! ब्रह्मा लोकपितामहः।
शंकरं प्राह मा मैवं त्वादृशो हिंसकोऽस्मि न ॥२०॥
श्रेष्ठं कार्यं विहायैव कः कनिष्ठे विशेज्जनः।
ब्राह्मणोऽहं न तत्कर्तुं शक्नोम्यत्र कदाचन ॥२१॥
रुद्रस्य तव कार्यं तत् क्रूरस्य निर्घृणस्य च।
ब्राह्मणा दयया युक्ता न निषादाः कदापि वै ॥२२॥
मया नैषादिकं कार्यं मनसाऽपि न मन्यते।
जालं पाशो घातनं च कर्तनं कूर्चनं तथा ॥२३॥
विदलनं रोधनं च नैषादिकं हि तद्भवेत्।
दाहनं भेदनं चापि पेषणं प्राणकर्षणम् ॥२४॥
मारणं पापकर्मैतन्मे न शंभो प्ररोचते।
नाहं तत्र कृतप्रज्ञो भवाँस्तत् कर्तुमर्हति ॥२५॥
इत्युक्तः शंकरो लक्ष्मि ! रौद्रभावमुपागतः।
असहमानो वाक्यानि जग्राह वेधसं गले ॥२६॥

न्यपातयत् क्षितौ तत्रोत्तानं वै वेधसं हरः ।
पादं दत्वा बलाद् वक्षस्येव शूलं गले न्यधात् ॥२७॥
हाहाकारो महानासीत्तदा त्रैलोक्यवासिषु ।
ब्रह्मणोऽस्य विनाशो वै भविष्यतीति मेनिरे ॥२८॥
ऋषयः पितरो देवा जडाश्च चेतना अपि ।
चकम्पिरे रुद्ररोषान्मध्यस्थः कोऽपि नाऽऽगमत् ॥२९॥
भयं गतोऽपि विष्णुश्चाऽन्यस्य तत्र तु का कथा ।
ब्रह्मा सस्मार मां तत्र त्रातारं परमेश्वरम् ॥३०॥
अक्षरान्मम वै स्थानात्तूर्णं तत्र समाययौ ।
त्वया सार्धं तदा लक्ष्मि ! शूलं जग्राह पाणिना ॥३१॥
त्वमादिष्टा प्रवेष्टुं च हरे शान्तिकरी सती ।
हररोषोऽभवच्छान्तस्तवाऽऽवेशात्तदा प्रिये ॥३२॥
विवेदाऽकार्यमेवैतन्नम्रो मां वीक्ष्य लज्जितः ।
शंखचक्रगदापद्मधरं श्रीपुरुषोत्तमम् ॥३३॥
कोटिसूर्यसमाभासं सर्वाभूषणभूषितम् ।
सर्वेश्वरं धृतशूलं ब्रह्मरक्षाकरं प्रभुम् ॥३४॥
अकस्मादागतं शान्तं सर्वान्तरनिवासिनम् ।
अनादिश्रीकृष्णनारायणं श्रीपरमेश्वरम् ॥३५॥
ब्रह्मणो वक्षसि न्यस्तः शंभुपादो मया तदा ।
शूलं च मम हस्ताभ्यामुद्धृतौ लीलया प्रिये ॥३६॥
शंभुः पपात वेगेनोत्तानो मम बलात्तदा ।
पार्श्वे पतन्तं शंभुं तं देवाश्चालम्बनं ददुः ॥३७॥
रक्ष रक्ष हरेकृष्ण बालकृष्ण परेश्वर ।
अजं रक्ष हरं रक्ष रक्ष नः शरणागतान् ॥३८॥
सर्वे वयं तव बालाः पोष्या रक्ष्याः सदा त्वया ।
इत्युक्त्वा ते निपेतुर्मे पादयोर्दण्डवत् तदा ॥३९॥
पुष्पाद्यैर्मानसैर्भावैः पुपूजुर्मां दयाश्रुतम् ।
परब्रह्माऽक्षरातीतं ब्रह्मवक्षोगतं हरिम् ॥४०॥
शंकरोऽपि च मे भक्तो प्रययाचे क्षमापनम् ।
मया शंभुर्बोधितश्च संहारे दूषणं न ते ॥४१॥
मम शक्तिस्वरूपोऽसि कर्ताऽहं तव रूपवान् ।
मया सृष्टमिदं सर्वं विश्ववेधःस्वरूपिणा ॥४२॥
मया सम्पुष्यते सर्वं दातृविष्णुस्वरूपिणा ।
मया संह्रियते सर्वं हर्तृहरस्वरूपिणा ॥४३॥
योऽहं सोऽहं हरो विष्णुर्ब्रह्मा भिन्नाभिधान्वितः ।
पृथग्भावो न भवतां मम माया दुरासदा ॥४४॥
तथा भेदं गतश्चाऽहं ममेच्छयैव मायया ।
करोमि भेदवत् सर्वं विभिन्नं चेतरो यथा ॥४५॥
अज्ञानिवच्चेष्टयामि लीला मे सार्वकालिकी ।
तत्र ते दूषणं शंभो हिंसादोषात्मकं न वै ॥४६॥
उत्पन्नं स्याद् विनष्टं वै स्वभाव एषो वस्तुनः ।
तत्र द्रष्टा भवान् रुद्रो विनाशे न्यायतो मम ॥४७॥
निमित्तानि प्रलयाद्याः कालो युगा निशास्तथा ।
कालसीमा निमित्तं वै मया मर्यादया कृता ॥४८॥
तस्मात्ते दूषणं शंभो संहारे नास्ति सर्वथा ।
इत्युक्तः शंकरो लक्ष्मि ! मया स्वास्थ्यमुपागतः ॥४९॥
कलहं तं परित्यज्य सदा संहारमानसः ।
सेवते मन्नियोगं वै हरतेऽन्ते यथोदितम् ॥५०॥
अथाऽहं संविनीयैव शंभुं ब्रह्मसुतोऽभवम् ।
अनादिश्रीब्रह्मनारायणः श्रीपुरुषोत्तमः ॥५१॥
त्वं च लक्ष्मि हरदेहान्निष्क्रान्ता कन्यका ततः ।
वैष्णवी रुद्रपुत्री वै मह्यं हरेण चार्पिता ॥५२॥
इत्येवं मम वै तत्र प्राकट्यं च तवाऽप्यभूत् ।
आकल्पान्तं ततश्चाऽहं ब्रह्मनारायणोऽवसम् ॥५३॥
त्वया साकं हि वैष्णव्या नारायणीश्रि ! तत्स्मर ।
एवमन्येऽप्यवतारा: कोटिशस्तत्र मेऽभवन् ॥५४॥
न तान् शक्ताः प्रसंख्यातुं चान्ये मामन्तरा प्रिये ।
अथाऽन्ये वत्सरे चापि प्राकट्यं मम संश्रृणु ॥५५॥
यमाख्ये वत्सरे चाद्ये कल्पे चाद्ये मनौ तथा ।
देवतानां विवादोऽभूद् धिष्ण्यार्थे स्वर्गवासिनाम् ॥५६॥
एकः प्राह महेन्द्रस्य पदं भोक्ष्येऽहमेव ह ।
चाऽपरश्च तदा प्राह सूर्योऽहं नाऽपरो भवेत् ॥५७॥
तृतीयः प्राह चन्द्रोऽहं तुर्यः प्राह धनी त्वहम् ।
कश्चित् प्राह जलेशोऽहं कश्चित्प्राह मरुत्त्वहम् ॥५८॥
वसुश्चाऽहं देवगुरुश्चाऽहं चेशानदेवता ।
अहमग्निर्गणेशोऽहं सेनान्यहं ध्रुवोऽप्यहम् ॥५९॥
मेरुर्मम दिवं मेऽपि मरुच्चाऽहं भवाम्यपि ।
यमश्चाऽहमहं विष्णुर्भवामि शंकरोऽप्यहम् ॥६०॥
दिक्पालोऽहं लोकपालः साध्योऽहं संभवामि वै ।
विश्वदेवपदं चाऽहं भोक्ष्ये पितृपदं त्वहम् ॥६१॥
इत्येवं वदमानानां सुराणां कलहो मिथः ।
वरिवर्ति महानेवाऽशाम्यः केनापि शासिना ॥६२॥
परस्परं तदा लक्ष्मि ! बलिनो देवसत्तमाः ।
प्रसह्येष्टपदान्येव स्वायत्तीकृत्य सर्वथा ॥६३॥
स्थितवन्तो निर्बलाश्च निराधारास्तदाऽभवन् ।
अन्धराज्यं यथा स्वर्गे तत्राऽभवद् बलार्जितम् ॥६४॥

सात्त्विका देवताश्चेन्द्रवसुचन्द्राद्यस्तदा ।
आन्ध्यस्य वारणार्थं वै मिमिलुर्वै गुरोर्गृहे ॥६५॥

कथमान्ध्यं निवर्तेतेत्येवं विचारणां व्यधुः ।
ब्रह्मणो वापि शंभोर्वा विष्णोर्वा वचनानि वै ॥६६॥

अमर्यादा न मन्यन्ते देवा गर्वप्रवेगिताः ।
तस्मादत्र प्रकर्तव्यः सर्वेषां हितकृद् विधिः ॥६७॥

यथा सुरगुरुर्मार्गं दर्शयेत् कुर्म एव तम् ।
श्रुत्वैवं तु तदा देवानाह सुरगुरुः स्वयम् ॥६८॥

द्यौः सदा देवमाता वै देवान् गर्भे प्ररक्षति ।
सेयं मूर्तिमती चास्ते कुर्मस्तत् सा वदेच्च यत् ॥६९॥

विष्णुर्नाम तथाऽऽदित्यो राजतेऽत्र सदस्यपि ।
यथा वदेत् तथा सर्वे कुर्मस्तद्वचनं हितम् ॥७०॥

इत्युक्तौ तौ नमस्कृत्य देवान् सर्वानुपस्थितान् ।
प्राहतुर्निर्णये चान्ध्ये योग्यौ नाऽऽवां तथापि वः ॥७१॥

सूचयावो हरिं कृष्णं परं ब्रह्म सनातनम् ।
आराधयामश्चाऽत्रैवाऽविकारपददं प्रभुम् ॥७२॥

स एव निर्णयं नश्च दास्यत्येवाऽक्षराधिपः ।
येन सम्पालितं सर्वं येन सन्नोदितं त्विदम् ॥७३॥

येन सञ्चालितं याति स नो दास्यति निर्णयम् ।
येन ऋद्धिः प्रदत्ता च यथाकर्म यथागुणम् ॥७४॥

यथास्थानं यथैश्वर्यं यथाधिष्ण्यं पदानि च ।
आराधितः समागत्य स नो दास्यति निर्णयम् ॥७५॥

इत्युक्ताः सर्वदेवास्ते प्रसह्य बलवादिनाम् ।
शासनार्थं सस्मरुश्च परब्रह्म सनातनम् ॥७६॥

अक्षरेशं भगवतां भगवन्तं परेश्वरम् ।
तूर्णं चाऽक्षरधाम्नोऽहं समायातो महाप्रभुः ॥७७॥

त्वया साकं तदा नारायणीश्रि ! परेश्वरः ।
देवगुरोः सभायां वै विष्ण्वाख्याऽऽदित्यसन्निधौ ॥७८॥

दिव्यो दिव्याम्बरभूषो दिव्यैश्वर्यसमन्वितः ।
कोटिचन्द्रार्करूपश्च सभामध्ये व्यवस्थितः ॥७९॥

त्वमादिष्टा तदा लक्ष्मि ! द्युतनौ समवस्थिता ।
अदृश्या शासयित्री त्वं सर्वेषां हितकारिणी ॥८०॥

सुरा दृष्ट्वा तु मां सर्वेश्वरेश्वरेश्वरेश्वरम् ।
प्रणताश्चासनं चापि मधुपर्कं ददुस्ततः ॥८१॥

कुशलं पृष्टवाँश्चाऽहं तेभ्यस्तेऽप्यनिवेदयन् ।
आन्ध्यं स्वर्गे प्रधिष्ण्यार्थं तच्छान्तिं चार्थयन्नपि ॥८२॥

मया नारायणीश्रि ! वै तदा सुदर्शनानि मे ।
समर्थमुक्तरूपाणि शासकानि समन्ततः ॥८३॥

क्रूराणि सायुधान्येव प्रहितानि दिवि प्रिये ! ।
यत्र यत्र सुराः सन्ति परधिष्ण्यस्थितास्तदा ॥८४॥

ताँस्तानाहूय सर्वान् वै मम युक्ताः सुदर्शनाः ।
धृत्वा धृत्वा गुरोर्द्वारं समानिन्युर्मदन्तिके ॥८५॥

मया पृष्टाश्चान्ध्यप्रवर्तयितारश्च वै तदा ।
नोचुस्ते लज्जिताः किञ्चित् क्षमां मत्तो ययाचिरे ॥८६॥

दण्डिता वै मया सर्वे यमिताश्च निजे पदे ।
स्थापिताश्च यथायोग्ये पदे देवा दिवि स्थिताः ॥८७॥

सर्वेषामधिकारे वै व्यवस्था च मया कृता ।
तदा त्वं च मयाऽऽदिष्टा सर्वनियामिका सती ॥८८॥

परधिष्ण्याऽयोग्यपात्रनिरोधिनी तदाऽभवः ।
ऐश्वर्यं च मया लक्ष्मि ! तदा तुभ्यं समर्पितम् ॥८९॥

धिष्ण्ये धिष्ण्ये त्वया तत्र स्थातव्यं सर्वदा प्रिये ।
अयोग्यश्चेत् समागच्छेत् प्रसह्य पदमुत्तमम् ॥९०॥

अन्यस्याऽन्यस्तदा लक्ष्मि ! त्वया क्षेप्यो विदूरतः ।
तदारभ्य हि देवेषु चाऽन्यपदेऽपरः क्वचित् ॥९१॥

उपविष्टं समर्थो वै जायते क्षिप्यते द्रुतम् ।
एवं सर्वपदेष्वेव त्वं तदा संस्थिता प्रिये ॥९२॥

अहं पुत्रोऽभवं विष्णोरादित्यस्य तदा प्रियः ।
त्वं ततः कन्यका जाता द्युगर्भा श्रीर्नरायणी ॥९३॥

द्यावा तदाऽर्पिता मह्यं तदा त्वं द्युनरायणी ।
अहमासं तदा कल्पेऽनाद्यादित्यनरायणः ॥९४॥

अनादिश्रीकृष्णनारायणः श्रीपतिरच्युतः ।
आकल्पान्तं तदादित्यगृहेऽवसं सुतः सदा ॥९५॥

द्युपुत्री त्वं मम पत्नी देववीथी तदाऽभवः ।
अहं स्मरामि तत्सर्वं स्मर त्वं देववीथिकाम् ॥९६॥

परब्रह्म स्वयं चाहमभवं तत्र वै सदा ।
असंख्या मेऽवताराश्च तत्र वर्षेऽभवन्नपि ॥९७॥

एवं धिष्ण्यविवादं वै त्यक्त्वा देवा यथोदितम् ।
स्वस्वधिष्ण्यं गताः सर्वे विवादपदवर्जिताः ॥९८॥

तदारभ्य पुनर्नैव पदार्थं योधनं क्वचित् ।
बभूव तत्र वर्षे वै तथा कल्पान्तरेऽपि च ॥९९॥

मया नियमितं सर्वं यथेष्टं स्थापितं यथा ।
तथैव याति सुखतो विपरीतं न वै क्वचित् ॥१००॥

इत्येवं ते शिवपुत्रि ! प्राकट्यं कीर्तितं मम ।
पठनाच्छ्रवणाचापि भुक्तिमुक्तिफलप्रदम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः षष्ठवत्सरे रुद्रशासनार्थम् अनादिब्रह्मनारायणस्य, सप्तमवत्सरे देवानां धिष्ण्यनियमार्थम् अनाद्यादित्यनारायणस्य, प्राकट्यमिति निरूपणनामा पञ्चमोऽध्यायः ॥ ५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं ततोऽपि चाऽष्टमे पुनः ।
अजस्य नियमाख्ये वत्सरे कल्पे तु पञ्चमे ॥ १ ॥
सप्तमे तु मनौ वर्तमाने तत्र तदाऽप्यहम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥ २ ॥
मानवानां सुखार्थं वै तदा प्रकटितोऽभवम् ।
पाताले त्वेकदा नागाः कामरूपधराः प्रिये ! ॥ ३ ॥
संकर्षणं प्रीणयितुं महारुद्रं प्रचक्रिरे ।
यज्ञे तत्र महारुद्रे फणाभ्राणां कुलानि वै ॥ ४ ॥
द्वापञ्चाशत्सहस्राणि संहतानि तदाऽभवन् ।
कृष्णा रक्तास्तथा चित्राः श्वेताः श्वित्राश्च कर्बुराः ॥ ५ ॥
नीलाः पीताश्च हरिताः स्वस्तिकाश्चन्द्रकास्तथा ।
पट्टिशा द्विफणाश्चापि त्रिफणाश्च चतुःफणाः ॥ ६ ॥
शताननास्तथा नागाः सहस्रफणिनोऽपरे ।
नागराजाः कर्कटकाः शीतला डिण्डिमास्तथा ॥ ७ ॥
भूफिण्डाद्याः कोडिफाश्च पाण्डुराः पण्डकास्तथा ।
शूलका दण्डकाश्चापि द्विमुखा दिव्यचाक्षुषाः ॥ ८ ॥
ओंकारास्तिलवर्णाश्च पारडङ्काः कणाशनाः ।
तिर्यग्धाराः सूत्रधारा मुद्रपृष्ठा द्विपृष्ठकाः ॥ ९ ॥
द्विजिह्वा बहुजिह्वाश्च बहुदंष्ट्रा विषालयाः ।
कालकूटाः समणयः कार्दमिकाश्च वार्शयाः ॥१०॥
आनलिकाश्चानिलका मारुच्छ्रयाः सपक्षकाः ।
उग्रकाः शान्तदासाश्च माहालस्या विडम्बिनः ॥११॥
इत्येवं बहुजातीयाः कणाभ्राः संहतास्तदा ।
संकर्षणं यज्ञदेवं निजेष्टं चानलाननम् ॥१२॥
ईजिरे तोषयामासुर्मिष्टाहुतिभिरुत्सुकाः ।
सहस्रदिवसं नैजं यज्ञं नियमतो व्यधुः ॥१३॥
गुरुस्तेषां स्वस्तिकोऽभूत् शेषोऽभून्नृपतिस्तदा ।
अग्रगण्यो यजमानश्चान्ये पुण्याश्च ऋत्विजः ॥१४॥
पातालीयानि मिष्टानि सामुद्राणि रसानि च ।
फलान्यारण्यजन्मानि पार्थिवान्यदनानि च ॥१५॥
कणाँश्च सस्यजाँश्चापि कन्दाँश्चौषधिशाखिनः ।
समिधश्च विविधा वै गुन्द्राणि विविधानि च ॥१६॥
भूविकाराणि सर्वाणि भोज्यानि हव्यकानि च ।
व्रताऽऽदनानि योग्यानि जुहुवुस्तत्र चाध्वरे ॥१७॥
संकर्षणो महादेवो निजमण्डलमण्डितः ।
पातालीयसुराढ्यश्च गारुडैः सुरकोटिभिः ॥१८॥
सुराणीभिश्च सहितस्तृप्तिं परां मखे ययौ ।
प्रत्यक्षोऽभूद् रुद्ररूपधरस्तत्रान्तिमे दिने ॥१९॥
पूर्णाहुतौ पायसाद्यैर्घृतैस्तिलैश्च पिष्टकैः ।
मिष्टरसैः क्रियमाणायां कट्वोषधिभिस्तदा ॥२०॥
प्रसन्नोऽस्मीत्याह सर्पान् तृप्तोऽस्मीति पुनः पुनः ।
वरं वृणुध्वं सुखिनो भवन्त्वित्याह तान्पुनः ॥२१॥
तदा राजा प्रजाद्यास्ते सर्पा ययाचिरे ततः ।
वयं वै मानवे लोके भवामो राज्यभागिनः ॥२२॥
कर्म कृत्वा प्रयास्यामो मुक्तिं स्वर्गं परं लयम् ।
देह्येवं वरदानं चेत् प्रसन्नोऽसि सुकर्षण ॥२३॥
वरयोग्याः स्म च विष्णो संकर्षण निजेष्टद ! ।
संकर्षणो विचार्यैव क्षणान्तरे जगाद तान् ॥२४॥
आरण्यवासाः सततं महारण्यनिवासिनः ।
भवन्तु राज्यभोक्तारः पृथ्व्यां सुरसभोगिनः ॥२५॥
मा मानवान् भूनिवासानुद्वेजयन्तु वै क्वचित् ।
इत्येवं नियमं कृत्वा वरं ददामि वो द्विजाः ॥२६॥
एवं वै वर्तमानेषु भवत्सु सुखमुत्तमम् ।
भविष्यति सुखं यान्त्वभ्युदयं सततं द्विजाः ॥२७॥
इत्युक्त्वा च हविष्यान्नं पूर्णाहुतिस्वरूपकम् ।
लब्ध्वा संकर्षणो देवः ससुरोऽदृश्यतां ययौ ॥२८॥
अथ नारायणीश्रि ! वै ततस्ते फणिनोऽपि वै ।
बलिनो वरदानेन सतृष्णा मानवे गुणे ॥२९॥
मानवेषु च भोगेषु गृध्द्रिनो मोहमारिताः ।
आययुर्वायुविवरैर्भूलोकं वै समन्ततः ॥३०॥
कामरूपधराः सर्वे नरा नार्यो हि मानवाः ।
सर्पाकृतयो नैवैषां सन्ति यदाऽऽगता भुवि ॥३१॥
प्रच्छन्नास्ते मानवेषु वर्तन्ते च वसन्ति च ।
हर्तुं राज्यानि भोगाँश्च काप्टयभृत्यकर्मिणः ॥३२॥
सर्वत्र भूतले ते वै रूपसौन्दर्यशालिनः ।
नागाश्चापि च नागिन्योऽभवन् भृत्यक्रियापराः ॥३३॥

राजसु श्रेष्ठिषु विप्रवर्गेष्वमात्यसेविषु ।
सत्तावत्सु प्रधानेषु गृहिष्वप्यवसँश्च ते ॥३४॥
भृत्या दासास्तथा दास्यो भूत्वा वर्णानुकारिणः ।
विवाहिताश्च कन्या वै मिथो मानवयोनिभिः ॥३५॥
समूहुर्मानवकन्या नागाश्च नररूपिणः ।
एवं सम्बन्धमापन्ना लब्ध्वाऽवसरमेव ते ॥३६॥
दशन्ति स्म नरान् रात्रौ निद्रावशान् क्वचित् क्वचित् ।
म्रियन्ते संदंशिताश्च नृपा राज्यश्च सर्वथा ॥३७॥
श्रेष्ठिनश्च धनाढ्याश्च सर्वे वर्णेषु सत्तमाः ।
रिक्तं स्थलं च सम्पत्तिं निजां कृत्वा च ते ततः ॥३८॥
भुंजते स्मोरगाः कामरूपश्चाः पृथिवीश्वराः ।
संकर्षणस्य वचनं नानुष्ठितं हि तामसैः ॥३९॥
स्वार्थपरैश्छद्मधरैः प्रच्छन्नभोगतत्परैः ।
एवं तैर्मानवी सृष्टिः प्रायशो वै विनाशिता ॥४०॥
प्रच्छन्नदंशदोषैश्च निजस्वार्थपरायणैः ।
नागजातीयुगताऽपि निजसृष्टिर्विवर्धिता ॥४१॥
मानवानां क्रियाः सर्वा देवाराधनमित्यपि ।
लुप्तं लुप्तं यज्ञकार्यं सन्ध्या लुप्ता तथाऽऽहुतिः ॥४२॥
श्राद्धं लुप्तं तथा दानं दमो लुप्तश्च मानुषः ।
ऋषीणां गोत्रसंकल्पास्तथा लुप्ताः समन्ततः ॥४३॥
संस्कारा मानवा लुप्ता उद्भूताश्चोरगक्रियाः ।
व्रतानि चापि लुप्तानि लुप्तमावाहनादिकम् ॥४४॥
अर्घं लुप्तं रवेश्चापि वैश्वदेवो लयं गतः ।
प्रेतकार्यं तथा लुप्तं देवालया निरर्हणाः ॥४५॥
कथांशाश्च लयं प्राप्ता विप्रा नृपा मृताः खलु ।
ब्रह्मचारिनिवासाश्च गुरुवासा लयं गताः ॥४६॥
सत्यः साध्व्यो मृताश्चापि मारिता नागकोटिभिः ।
साधवोऽपि मृताश्चाप्यावासा ग्रामाः पुराणि च ॥४७॥
अमानवास्तु ते जाता नागकोपैः समन्ततः ।
प्रवराणां च नामानि लयं गतानि वासिषु ॥४८॥
न ज्ञायन्ते जनैश्चैतत् कुत एवं व्यजायत ।
अथ देवा यज्ञहीनाः पितरस्तृप्तिवर्जिताः ॥४९॥
शतवर्षे गते कालेऽविचारयन् समाहिताः ।
कुत एवं कथं जातं नास्तिक्यं भूतलेऽशुभम् ॥५०॥
मानवानां शतं वर्षाणां गतं भूतलेऽपि नः ।
आमन्त्रणावाहनादि नैव भवति वै कथम् ॥५१॥
दृष्ट्या तु दिव्यया वीक्ष्य ज्ञातवन्तो नरा मृताः ।
सर्पा राज्यानि कुर्वन्ति प्रजाः सर्पात्मिका अपि ॥५२॥
कामरूपधराः सर्पा नागिन्यो योषितस्तथा ।
इष्टरूपप्रधारिण्यो भुञ्जते भूमिसम्पदः ॥५३॥
एतज्जातमनिष्टं वै धर्मकर्मविवर्जितम् ।
तिर्यञ्चस्तामसाः सर्पाः प्रच्छन्नछद्मकारिणः ॥५४॥
भुञ्जते मानवान् भोगान् देवर्ष्युन्नतिघातिनः ।
मानवानां बहुधा वै घातो जातः पुरादिषु ॥५५॥
वसत्यादौ न विद्यन्ते मानवाः फणिनोऽन्तरा ।
अरण्यादौ प्रविद्यन्ते मानवा विरलाः क्वचित् ॥५६॥
ते त्वस्माभिश्चेतनीया नागेभ्यो मरणं प्रति ।
नागानां मारणोपायान् बोधनीयाश्च प्रत्यपि ॥५७॥
इत्यभिमन्त्र्य कमले ! आययुस्ते भुवस्तलम् ।
इलावृत्तं मध्यखण्डं चारण्यानीसमन्वितम् ॥५८॥
यत्राऽऽसते द्विजाः शुद्धास्त्वरण्ये सर्पवर्जिताः ।
गारुडाश्चाप्यथर्वज्ञा होमकर्मपरायणाः ॥५९॥
ऋषीन् देवान् प्रविलोक्य द्विजाः स्वागतमाचरन् ।
मधुपर्कं प्रदायैवाऽऽगमने हेतुमित्यपि ॥६०॥
जिज्ञासवः समपृच्छन् देवास्तदाऽवदन्नभि ।
विजानन्तु द्विजाः सर्वे मानवा नागकोटिभिः ॥६१॥
मृताः सर्वे विषयोगैर्म्रियन्तेऽपि दिने दिने ।
नागा मानवरूपास्ते संकर्षणवराद् भुवि ॥६२॥
समागत्य हि वर्तन्ते मारयित्वा तु मानवान् ।
भुञ्जाना मानवान् भोगान् मोदन्ते छद्मवर्तिनः ॥६३॥
धर्मकर्माराधनावाहनार्हणाऽर्पणादिकम् ।
दैवं पैत्र्यं तथा सौर्यं विनिष्टं कर्म जातकम् ॥६४॥
भवन्तोऽरण्यवासाश्च जीवन्तीति हरेः कृपा ।
यत्र नागा न चायता दिष्ट्या यूयं हि जीवथ ॥६५॥
नागानां मारणोपायानाथर्वणगतान् मनून् ।
जपित्वा नागसृष्टीनां भूमौ कुर्वन्तु संक्षयम् ॥६६॥
नागयज्ञं प्रकुर्वन्तु सार्वभौमा द्विजास्त्विह ।
आराधयन्तु लोकेशं परमेशं क्रतौ तथा ॥६७॥
परब्रह्माऽक्षरातीतं श्रीपतिं पुरुषोत्तमम् ।
निजरक्षां प्रकुर्वन्तु द्रावयन्तूरगानितः ॥६८॥
इत्युक्त्वा पितरो देवाः प्रययुर्निजमन्दिरम् ।
विप्रास्त्वेराव्रतख'डस्थिता यज्ञं प्रचक्रिरे ॥६९॥
तत्र गारुडसंज्ञो वै निष्णातोऽथर्वकर्मसु ।
होताऽभवत् तदा यज्ञेऽन्ये विप्रा हवनं व्यधुः ॥७०॥
अथ सर्पाः पतन्त्येव न च यज्ञे विकर्षिताः ।
असमर्थास्तु ते मन्त्रा उचुर्विप्रान् समाहिताः ॥७१॥

आराधयन्तु देवेशेश्वरेश्वरेश्वरेश्वरम् ।
स वै युष्मद्धितं विप्राः करिष्यति परेश्वरः ॥७२॥
इत्युक्तास्ते द्रुतं लक्ष्मि ! ब्रह्मसत्रं प्रचक्रिरे ।
गारुडाख्यद्विजस्यैव गृहे सहस्रभूसुराः ॥७३॥
तत्र तूर्णं हरिश्चायादक्षराधिपतिः प्रभुः ।
योऽहं सोऽहं त्वया साकं श्रीपतिः पुरुषोत्तमः ॥७४॥
गारुडस्य गृहमध्ये पश्यतां द्विजयोगिनाम् ।
शंखचक्रगदापद्मधरो मन्त्रैः प्रसेवितः ॥७५॥
मूर्तिमद्भिस्तथा वेदैर्युक्तस्तत्राऽभवं पुरः ।
वीक्ष्योत्थाय द्विजा मह्यं नेमुः स्वागतमाचरन् ॥७६॥
आसनं मधुपर्कं च ददुः पाद्यं समर्हणम् ।
सर्वं निवेदयामासुः कष्टं मानवनाशनम् ॥७७॥
अहं स्वस्तीत्युवाचैतान् गतं भयं च वोऽधुना ।
कुर्वन्तु सर्पसत्रं वै नियुञ्जन्तु मनूनिमान् ॥७८॥
इत्युक्ता गारुडा विप्रा मम वाक्येन नोदिताः ।
नागसत्रं व्यधुस्तूर्णं जगुर्मन्त्रान् फणाहनः ॥७९॥

ओम्मामर्त्त्यसदोव्विमर्त्त्यसदोब्विस-
र्पिणोऽथाप्यसर्पिणोग्गरसञ्जुषः ।
ओम्मिषम्मृतङ्कल्मषिणोऽम्भुजुषिणोऽन्वभुजिनो-
ऽवपतन्त्विह हवींषि जुह्व ओम् ॥८०॥
ओम्व्विषसिणो दन्तग्गारिणो न्नृहणिनो-
ऽनृजुसरिणोद्धर्महणो व्वप्पतन्त्विह ।
ओं शतस्त्रविणोऽग्धिरस्त्रविणोऽप्यनुग्क्षरन्न्त्विह
रौद्रद्रकार्चिषु व्वापतन्न्त्विह ॥८१॥
ओं शम्मृतिजुषोऽतिम्मृतिजुषोतिफ्फणिजुषो-
ऽतिप्पुष्टिजुषोव्वाभिप्पतन्न्त्विह ।
ओम्भूतिञ्जुषोऽतिन्नतिञ्जुषोऽश्छझञ्जुषो-
ऽधिप्पतिञ्जुषोम्मितष्पतन्न्त्विह ॥८२॥

इतिमन्त्राञ्जगुस्तत्र गारुडा भूसुरास्तदा ।
जुहुवुः क्रूरबीजाद्यैर्नागानामन्त्र्य मन्त्रकैः ॥८३॥
आसमुद्रान्तभूभागादागत्यागत्य चाम्बरात् ।
नागाः पतन्ति कुण्डे वै तदा क्ष्वेडानलोल्बणे ॥८४॥
सहस्रशो मृता दग्धाः शेषा बद्धाश्च रज्जुभिः ।
मन्त्रबद्धा न वै शक्ताश्चात्मानं मोक्तुमेव ते ॥८५॥
अथ बद्धोऽनन्तशेषस्तुष्टाव मां परेश्वरम् ।
रक्ष नाथ कृपासिन्धो मोचयाऽस्मान् महानलात् ॥८६॥
स्थास्यामो न क्षितौ कृष्णनारायण परेश्वर ।
शरणे पतितान् रक्ष जीवदानं प्रदेहि नः ॥८७॥
अनन्तशेषो भक्तोऽस्मि सदा तेऽहं जनार्दन ।
इत्युक्तोऽहं तदा प्राहाऽनन्तं भूस्थान् फणाधरान् ॥८८॥
सर्वजातीयनागांस्त्वं नीत्वा याहि ह्यधस्तलम् ।
मा पुनश्चात्र वै लोके मानवे स्वपदं कुरु ॥८९॥
इत्युक्तः स्वीचकारैव सर्वं मया प्रमोचितः ।
सर्पाः सर्वे मोचिताश्च मृत्युमुखाद्धि गारुडात् ॥९०॥
अनन्तो मम भक्तश्च पुपूज मां परेश्वरम् ।
तदा त्वं जानकीजन्ये शेषपुत्री तदाऽभवः ॥९१॥
आनन्ती त्वं च शेषेणाऽर्पिता मह्यं हि दक्षिणा ।
तदाऽऽथर्वणगारुडद्विजपुत्राय शार्ङ्गिणे ॥९२॥
रक्षिणे नागसर्पाणां श्रीशाय परमात्मने ।
अथ यज्ञो नियमितो मया परिहृतस्तदा ॥९३॥
शेषः सर्पकुलान्येव सर्वभूतलगानि वै ।
नीत्वा ययौ बिलान्येव पातालाख्यानि वै तदा ॥९४॥
मानवोऽयं ततो लोको गरहीनो मया कृतः ।
अथेलावृत्तखण्डस्थान् मानवान् सर्वभूमिषु ॥९५॥
अवासयं चाऽकरवं बहुवंशयुतांस्तथा ।
पुनर्वै मानवं वर्षं मानवैः संभृतं ततः ॥९६॥
दैवपैत्र्यपराः सर्वे मम योगेन भूसुराः ।
बभूवुर्बहुविज्ञाश्च स्वस्तिमन्तश्च देवताः ॥९७॥
अनादिश्रीगरुत्मन्नारायणोऽहं तदाऽभवम् ।
आनन्ती त्वं मम पत्नी शेषकन्या तदाऽभवः ॥९८॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
अवतारी स्वयं तत्र प्राकट्यं कृतवान् मम ॥९९॥
ततोऽवतारा बहवस्तद्वर्षे ब्रह्मणोऽभवन् ।
वेद्म्यहं सर्वमेवैतत् स्मराऽऽनन्ति ! पुराभवम् ॥१००॥
भूलोके मानवानां वै तदा रक्षा मया कृता ।
त्वया साकं ततश्चाकल्पान्तं स्थिरोऽभवँस्ततः ॥१०१॥
पठनाच्छ्रवणाच्चास्य कीर्तनात्स्मरणादपि ।
नागभीर्जायते नैव भुक्तिर्मुक्तिर्भवेत्तथा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽष्टमवत्सरे सर्पाणां शासनार्थम् भूमावनादिगरुत्मन्नारायणस्य प्राकट्यमिति निरूपणनामा षष्ठोऽध्यायः ॥ ६ ॥

श्रीपुरुषोत्तम उवाच—

अथ नारायणीश्रि ! त्वं समाकर्णय मत्कथाम् ।
दैत्यानां पावनीं रम्यां सुतलाभिनिवासिनाम् ॥ १ ॥

ब्रह्मणश्चासनाख्ये वत्सरे वै नवमे पुरा ।
कल्पे चतुर्दशे चाद्ये मनौ सुतलके तले ॥ २ ॥
आसीद् राजा चलवर्मा सार्वभौमो महाबलः ।
अतलस्य वितलस्य सुतलस्य जनेश्वरः ॥ ३ ॥
त्रिलोक्यां यस्य वै यानं व्योमगं त्वभवत्तदा ।
अतलस्य वितलस्य सुतलस्य प्रजा जनाः ॥ ४ ॥
चलदेवं पुपूजुर्वै प्रत्यक्षं रक्षकं नृपम् ।
राजाऽपि धर्मवानासीत् प्रजापालनतत्परः ॥ ५ ॥
मम भक्तो शिवकन्ये ! देवपूजापरायणः ।
अनाथाऽतिथिनारीणां शरण्यः शीलशोभनः ॥ ६ ॥
दिनार्धं यस्य नित्यं वै याति देवस्य पूजने ।
तदर्धं च ततो याति राज्यावलोकने ततः ॥ ७ ॥
शेषार्धं निजलोकेषु प्रवासे याति सर्वदा ।
एवं कृतवतस्तस्य जिज्ञासाऽभूत्तपोमयी ॥ ८ ॥
कर्मभूमौ तपः शीघ्रं फलत्ययुतधा यतः ।
पृथ्व्यां गत्वा तपः कार्यं विचार्येति विमानगः ॥ ९ ॥
ऋष्यार्षं सद्गुरुं पृष्ट्वा राज्यं सर्वं ततः स च ।
कृत्वा तु गुरुसाद् राजा प्राययौ मानवीक्षितौ ॥१०॥
कुमुदाचलमासाद्य शीतव्याप्ते वने सदा ।
तपस्तेपे निराहारः सहस्रवत्सराणि सः ॥११॥
तत्र तपसि राजाऽसौ दिव्यदृष्ट्या व्यलोकयत् ।
नारायणं परेशानं देवं श्रीपुरुषोत्तमम् ॥१२॥
मामेव परमात्मानं नत्वोवाच मनोगतम् ।
नमस्ते परमेशाय तपःफलप्रदायिने ॥१३॥
भक्तमानसपूराय हरये परमात्मने ।
इत्युक्त्वा दण्डवच्चक्रे पपौ मच्चरणामृतम् ॥१४॥
ययाचे प्रेर्यमाणश्च मया चलनृपस्तदा ।
अचलत्वं देहि मेऽत्र चलं तु नाशमेति वै ॥१५॥
चलं राज्यं चलं वित्तं चलं कुटुम्बकं तथा ।
चलं च जीवनं कृष्ण सुतलादि चलं ततः ।
अचलत्वं वृणे त्वत्तो भक्तोऽहं देहि मे मतम् ॥१६॥

**श्रीपरमेश्वर उवाच—**

शृणु राजन् ! चलं सर्वं ब्रह्माण्डं चलमित्यपि ।
कालश्चलश्चला माया चलं मनश्च जीवनम् ॥१७॥
चले भवेत् चलं सर्वं ह्यचलं ते मतं वद ।

**श्रीचलदेव उवाच—**

चलं चित्तं चला लक्ष्मीश्चलं शासनमित्यपि ॥१८॥
अचला तव भक्तिर्हि तां वृणे देहि मे प्रभो ।
अचलायास्ततः पात्रमचलं स्यां च केशव ॥१९॥

**श्रीपरमेश्वर उवाच—**

अचला मे प्रेमभक्तिः सेवा सा प्रेमपूर्विका ।
तत्पात्रमचलं त्वं चेद् भवितुं वै समिच्छसि ॥२०॥
तदा मुक्तिर्मम लोके ते ददाम्यचलां ध्रुवाम् ।
गृहाण शीघ्रं मे मन्त्रं याहि धामाऽक्षरं मम ॥२१॥

**श्रीचलदेव उवाच—**

चलोऽहं चाऽचलो जातश्चेदानीं कृपया तव ।
अचलस्याऽचलो वंशो भवेदेवं विधेहि मे ॥२२॥

**श्रीपरमेश्वर उवाच—**

यथा त्वमचलो जातो मत्कृपांशात्तथा तव ।
वंशोऽप्यचलतां राजन् मद्योगात् सम्प्रयास्यति ॥२३॥
अनपत्यो भवानास्ते सापत्यो भव भूपते ।
मां विना तु चलं सर्वं तवाऽपत्यं भवाम्यहम् ॥२४॥
अचलोऽहं तवाऽपत्यं भवाम्यत्र विलोकय ।
इत्युक्त्वाऽहं तदा लक्ष्मि ! तस्य वै मानसः सुतः ॥२५॥
अभवं त्वार्षदेवाख्यो राजाऽतितोषणं ययौ ।
तपः समापयित्वैव नीत्वा नृपं मया सह ॥२६॥
सुतलं तत्र ऋष्यार्षो गुरुर्मां ज्ञातवान् प्रभुम् ।
मदाज्ञयाऽपि लक्ष्मि ! त्वम् ऋष्यार्षस्य सुताऽभवः ॥२७॥
राजा स्वं मानसं पुत्रं त्वार्षदेवं विधानतः ।
राज्येऽभ्यषेचयत् ऋष्यार्षोऽपि सुतां ददौ स मे ॥२८॥
आर्षपद्माभिधा त्वं चाऽसेवयः श्रीपतिं च माम् ।
आर्षदेवं चावतारिप्रभुं श्रीपुरुषोत्तमम् ॥२९॥
पालनार्थं वचनस्य मयाऽपि मानसः सुतः ।
विष्णुरेव स्वयं पुत्ररूपेण प्रकटीकृतः ॥३०॥
दृढध्रुवाऽभिधः शंखचक्रगदाम्बुजायुधः ।
जातमात्रो युवा विष्णुरैश्वर्यादिशोभनः ॥३१॥
अचले वै पदे चोर्ध्वे स्वर्गान्ते विनियोजितः ।
पदाधारं जगतां वै ग्रहाणां ज्योतिषां तथा ॥३२॥
नक्षत्राणां तारकाणामृषीणां मण्डलानि च ।
भ्रमन्ति स्म दिशां ध्रौव्याद् ध्रुवनाम्ना दृढीकृतः ॥३३॥

चलदेवो मया नारायणीश्रि ! प्रेषितोऽक्षरम् ।
अचलं चाऽव्ययं धाम पालितं मद्वचो मया ॥३४॥
अचलोऽहं तथाऽनादिकृष्णनारायणः सुतः ।
परब्रह्म स्वयं चाऽनाद्यार्षनारायणाऽभिधः ॥३५॥
मम पुत्रः स्वयं विष्णुर्दृढध्रुवाऽभिधस्तथा ।
आकल्पान्तं त्वचलोऽपि मया कृतो वचोबलात् ॥३६॥
एवं वै भूतले लक्ष्मि ! प्राकट्यं मे पुराऽभवत् ।
राज्यं च सुतले लोके पुत्रस्य तु दिवोपरि ॥३७॥
तदा त्वम् ऋष्यार्षपुत्रीं चाऽऽर्षपद्मां निजां स्मर ।
प्राकट्यं कथितं चार्षनारायणि ! प्रभोर्मम ॥३८॥
ततः परं प्रवक्ष्यामि प्राकट्यं मे शृणु प्रिये ।
अथ लक्ष्मि ! मम वंशे दृढध्रुवस्य वै सुतः ॥३९॥
थुरानन्दात्मकश्चासीद् भक्तराट् तापसो मुनिः ।
तपश्चचार विपुलं वैष्णवो मनुकालिकम् ॥४०॥
प्रसन्नो भगवान् ब्रह्मा वरदानं ददौ तदा ।
मा तपः कुरु राजेन्द्र वरं वृणु यथेप्सितम् ॥४१॥
इत्युक्तो ब्रह्मणा प्राह तव वर्षद्वयाऽऽयुषम् ।
सहस्रद्वयकल्पात्मजीवनं मां चिरं कुरु ॥४२॥
तथाऽस्त्विति ददौ वेधा वरदानं थुराय ह ।
थुरानन्दोऽपि बुभुजे सत्यलोके यथायथम् ॥४३॥
दिवारात्रिविमिश्रं वै वर्षद्वयाऽऽयुरेव ह ।
नवमे वत्सरे द्वेधा वर्षद्वयाऽऽयुरिद्रितम् ॥४४॥
सहस्रकल्पा दिवसा निशाः सहस्रकल्पिकाः ।
अथैवं दशमे प्राप्ते वत्सरे प्राणरोधने ॥४५॥
वेधसश्चापि दिवसे कल्पे चतुर्दशे तदा ।
मनौ च प्रथमे तत्र थुरानन्दस्य वै प्रिये ॥४६॥
ब्रह्मवर्षद्वयकालो गतो रात्रिदिवादिभिः ।
सोऽपि जातिस्मरस्तत्र पुनश्चारब्धवाँस्तपः ॥४७॥
त्रिलोकीनां हि राज्यार्थं स च देवैर्निवारितः ।
सत्यलोकादृषिभिश्च जनादिभ्यश्च पितृभिः ॥४८॥
दिवः सुरैर्मानवैश्च भूतलाद् विनिवारितः ।
ययौ तपोऽर्थमतलं सत्कृतो दानवैस्तदा ॥४९॥
दैत्यैश्च सत्कृतश्चापि सत्कृतश्चासुरैरपि ।
तपश्चचार रौद्रं वै रुद्रमाराधयन्मखे ॥५०॥
मस्तकं नेत्रसहितं जुहाव कुण्डगेऽनले ।
रुद्रस्तावत्तत्र साक्षादभवद् दिव्यभासुरः ॥५१॥
वद किं रोचते तेऽत्र वृणु सर्वं ददामि ते ।
थुरानन्दस्तदा प्राहाऽवध्यत्वं देहि मे प्रभो ॥५२॥
हरः प्राह विना कृष्णं परब्रह्म सनातनम् ।
अवध्यत्वं तव जातं लग्नं भवतु ते शिरः ॥५३॥
इत्युक्तः स थुरानन्दो ध्रुवपुत्रोऽतिहर्षितः ।
परिहारं तपसश्च प्रचक्रे स्वाऽध्वरस्य च ॥५४॥
अथ राजाऽपि चाऽऽदातुं प्रस्थानं दानवान्वितः ।
चक्रे भुवं दिवं सत्यं दैत्यासुरसमन्वितः ॥५५॥
यत्र यत्राऽभवद्राज्याभिषिक्तं पदमुत्तमम् ।
सत्ताश्रितं नृपाणां च सुराणां चाऽन्यलोकिनाम् ॥५६॥
ताँस्तान् सत्तावतः सर्वान् विजित्य युद्धदुर्मदः ।
निजाश्रितान् वशान् कृत्वा तत्तत्पदेषु दानवान् ॥५७॥
दैत्यानसुरान् स्ववशान् नृपतीनभ्यषेचयत् ।
भूतले सर्वखण्डेषु नृपा दैत्याश्च दानवाः ॥५८॥
सत्ताधीशा असुराश्चाऽभवन् प्रजाप्रपीडकाः ।
धर्मकर्मविहीनाश्च भ्रष्टाचारसमन्विताः ॥५९॥
अशीलाः कामकाराश्च हिंसादौरात्म्यसंभृताः ।
अयज्ञशीलाः भोक्तारोऽभवन् प्रजाधनस्य ते ॥६०॥
तीर्थदानार्हणरिक्ता विपथा ब्रह्मवर्जिताः ।
सुरा अपि च पितरो महर्षयश्च तद्भयात् ॥६१॥
दुःखिता अभवन् सर्वे मानवा राक्षसाऽर्दिताः ।
थुरानन्दोऽपि सर्वेषु लोकेषु त्वसुरान्वितः ॥६२॥
विमानेन प्रयात्येवोद्घोषयत्येव सर्वथा ।
मां यजन्तु मानयन्त्वाराधयन्तु जनाधिपम् ॥६३॥
परमेशं च मां साक्षान्मत्वाऽर्पयन्तु चोपदाः ।
यज्ञे मां पूजयन्त्वेव देवतायतनेष्वपि ॥६४॥
गणेशस्य स्थले मां च पूजयन्तु सदा जनाः ।
आहरन्तु करं मह्यं कीर्तयन्तु गुणान्मम ॥६५॥
पश्यन्तु मत्प्रतिमां चोपचारानर्पयन्तु मे ।
प्रातर्गृह्णन्तु मन्नाम विष्णुश्चाऽहं न चेतरः ॥६६॥
थुरानन्दो थुरानन्दो थुरानन्दो रटन्त्विति ।
थुरानन्दे महानन्दो ब्रह्मानन्दो मिलिष्यति ॥६७॥
थुरोऽहं ब्रह्मसंज्ञोऽस्मि थुरे माया न विद्यते ।
थुरं प्राप्य च संसेव्य कष्टं नष्टं भवेत् सदा ॥६८॥
मां थुरं माथुरं लब्ध्वा भवन्तु सुखिनः सदा ।
अस्म्यहं योगिनां राजा पितॄणां द्युसदां तथा ॥६९॥
मानवानामृषीणां च दैत्यानां रक्षसां तथा ।
वसूनां च निधीनां च दिक्पालानां नृपोऽस्म्यहम् ॥७०॥
समुद्राणामरण्यानां गन्धर्वाणां नृपोऽस्म्यहम् ।
इत्यजस्य प्राणरोधाख्ये वर्षे दशमे तथा ॥७१॥

कल्पे चतुर्दशे तत्र मनौ च प्रथमे नृपः ।
बलवानभवद् राजा दैत्यदानवपूजितः ॥७२॥
अथ भक्ताः प्रजा देवाः पितरो मुनयः स्त्रियः ।
सत्यश्च साधवो मामाराधयामासुरीश्वरि ! ॥७३॥
प्रच्छन्नाः स्वगृहे स्वस्वहृदयेषु समाहिताः ।
तुष्टुवुः श्रीहरिं मां च रक्षार्थं मानवादयः ॥७४॥
हरे नाथ कृपासिन्धो दीनबन्धो जनार्दन ।
अधर्मार्दन दैत्यानामन्तकृत् परमेश्वर ॥७५॥
रक्ष रक्ष हरे कृष्णाऽनादिनारायण प्रभो ।
परब्रह्माऽन्तरात्मँस्त्वं रक्ष नो दानवार्दितान् ॥७६॥
इत्येवं प्रार्थनां चक्रुर्बहुधा सर्वदेहिनः ।
तदाऽहं संविचार्यैव थुरानन्दस्य कर्म तत् ॥७७॥
वरदानान्तमेवाऽपि त्वया सार्कं समागमम् ।
भूतले मानवे लोके मेरोः पश्चिमखण्डके ॥७८॥
नाम्ना भामन्तके खण्डे सम्प्रज्ञानद्विजालये ।
विशोकानामपत्न्यास्तु सन्निधौ दर्शनात्तदा ॥७९॥
प्राविरासं बालरूपः शंखचक्रगदाधरः ।
चक्रवज्रशक्तिशूलदण्डपाशधरः प्रभुः ॥८०॥
अष्टबाहुर्हरिः सोऽहं परब्रह्मनरायणः ।
उज्ज्वलः कोटिकामोर्ध्वप्रभावान् कुशलो मृधे ॥८१॥
सर्वाऽस्त्रमन्त्रविद्विज्ञो ब्रह्मभावपरायणः ।
तदा त्वं च समादिष्टा मया लक्ष्मि ! द्रुतं गता ॥८२॥
थुरानन्दालये नैजं प्राकट्यमाप्तुमीश्वरी ।
थुरानन्दस्य पुत्री त्वं जातमात्रा तु मानसी ॥८३॥
ज्योत्स्नाकुमारिकानाम्नी सर्वलक्षणलक्षिता ।
अभवश्च स्वयंवरयोग्या नृपालये तदा ॥८४॥
राजा स्वयंवराख्यं च समाजं कृतवान् क्षितौ ।
भामन्तके महाखण्डे त्रिलोक्याह्वानमाचरत् ॥८५॥
स्वयंवरस्य तत्रैव मण्डपो देवमण्डपः ।
इन्द्रपुरीसमस्तेन नृपेण कारितस्तदा ॥८६॥
निर्णीते दिवसे तत्राऽऽययुर्दैत्याश्च दानवाः ।
राजानः पार्थिवाः पातालाधिपाश्च दिवोऽधिपाः ॥८७॥
चतुर्दशभुवनानां दिक्पाला लोकपालिनः ।
आययुर्मण्डपे तत्र ज्योत्स्नाकुमारिकाऽऽक्षया ॥८८॥
समाजोऽभूच्चार्बुदानां राज्ञां तत्र नृपालये ।
ज्योत्स्ना शृंगारिता श्रेष्ठे मुहूर्ते वरमालिकाम् ॥८९॥
नीत्वा बन्धुभिरुत्कृष्टायुधवेदिभिरान्विता ।
यथार्थज्योत्स्निका कन्या सर्वाकर्षणकारिणी ॥९०॥
सुपरिचारयित्र्या च कुलशुद्धिज्ञयोषिता ।
गुरुणा चापि विप्रेण युक्ता मण्डपमाययौ ॥९१॥
लोकोत्तरस्वरूपा त्वं समाजजाड्यकारिणी ।
मुग्धः सर्वः समाजस्त्वां विलोक्याऽक्षरवासिनीम् ॥९२॥
न दृष्टा न श्रुता क्वापि कन्येदृशी ममाऽस्त्वियम् ।
इत्येवं भूभृतां तत्र हृदयान्यभवन् क्षणम् ॥९३॥
अपूर्णरूपयोगानां भग्नान्यासन् मनांसि वै ।
पूर्णानामपि सन्देहास्पदान्यासन् मनांसि वै ॥९४॥
तव कान्त्या तदा लक्ष्मि ! समाजोऽर्बुदभूभृताम् ।
निस्तेजा इव निकटेऽभवत्तत्र क्षणान्तरे ॥९५॥
स्वर्गस्यापि तु राजानो प्रभग्नाशास्तदाऽभवन् ।
नाऽस्मान् वरिष्यतीयं वै स्वाऽयोग्यान् रूपवर्जितान् ॥९६॥
इत्येवं चैषणाहीनास्तदाऽन्येषां तु का कथा ।
अथ त्वं गोपुरं गत्वा नत्वा गोपुरदेवताम् ॥९७॥
प्रविष्टा मण्डपं दिव्यमार्गेण स्वर्णशोभिना ।
दृष्टवती च राजन्यं श्रुतवती च वृद्धया ॥९८॥
अलब्धहृच्छया तत्राऽलग्नचित्ता पुनः पुनः ।
वारत्रयं भ्रमित्वैव मण्डपं वीक्ष्य सर्वतः ॥९९॥
अदृष्ट्वा मां वरमालायुता गोपुरमागता ।
तत्राऽहमभवं विप्रोऽलब्धप्रवेश एव ह ॥१००॥
दरिद्रः पीतधौत्रश्च पीतकञ्चुक एव च ।
सवेष्टनशिरा विप्रः षोडशवार्षिको युवा ॥१०१॥
रूपसौन्दर्ययुक्तश्च सूक्ष्मसर्वाऽऽयुधान्वितः ।
दैत्यसंहारकृत्सूक्ष्मं रूपं प्रच्छाद्य चागतः ॥१०२॥
कृतचन्द्रस्तथा भाले करे तु जपमालिकः ।
पादयोः पादुके बिभ्रन् लोकविलक्षणोऽभवम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो नवमवत्सरे चलदेववंशे ध्रुवस्याऽचलतार्थम् अनाद्यार्षनारायणस्य, दशमवत्सरे ध्रुवदेवपुत्रस्य थुरानन्दस्य दानवर्षितस्य पराभवार्थम् अनादिप्राज्ञनारायणस्य प्राकट्यं ज्योत्स्नाकुमारिकालक्ष्म्याः स्वयंवरश्चेत्यादिनिरूपणनामा सप्तमोऽध्यायः ॥ ७ ॥

श्रीपुरुषोत्तम उवाच—

त्वया लक्ष्मि ! ततो वीक्ष्य कान्तं पुरातनं निजम् ।
वरमाला मम कण्ठेऽर्पिता राज्ञां प्रपश्यताम् ॥ १ ॥

सर्वः समाजश्चकितो महाश्चर्यपरोऽभवत् ।
अहो विप्रो राजकन्यां प्राप्तवानित्यभूत् स्वनः ॥ २ ॥
दरिद्राय गता कन्या भाग्यहीनाय भिक्षिणे ।
असमानसमस्ताय गता कन्या तु मृत्यवे ॥ ३ ॥
अहो राजगृहे जन्म भाग्यं दारिद्र्यदुःखदम् ।
कल्पवल्ली कांचनाभा भल्लुककरगाऽभवत् ॥ ४ ॥
सौवर्णपद्मिनी रम्या पतिता शुष्ककर्दमे ।
स्थलपद्मात्मिका माला वानरस्य गले गता ॥ ५ ॥
स्वातिसलिलयुग्विद्युत् पतिता शुष्कपर्वते ।
लक्ष्मीर्दिव्या राजयोग्या दरिद्रे पतिताऽधुना ॥ ६ ॥
कौमुदी चन्द्रमुत्सृज्य क्षुद्रतारकमाश्रिता ।
प्रभा सूर्यं परित्यज्य शून्यमम्बरमाश्रिता ॥ ७ ॥
विद्या सन्तं विहायैव वैतण्डिकमधिश्रिता ।
द्यौर्महेन्द्रं परित्यज्य नैर्ऋतं समुपाश्रिता ॥ ८ ॥
कान्तिः कान्तं परित्यज्य भ्रान्तिवद् भ्रान्तमाश्रिता ।
सती सत्यं विहायैव मायया मायिनं गता ॥ ९ ॥
जटा शंभुं परित्यज्य वटस्तम्बं प्रवल्गिता ।
गंगा विष्णुपदं त्यक्त्वा क्षारसागरमागता ॥१०॥
भक्तिधर्मं परित्यज्य दुःशीलं समुपागता ।
शय्या युगलं सन्त्यज्य विधुरं समनुसृता ॥११॥
सिंहिका सिंहमुत्सृज्य शूकरं समुपागता ।
करिणी हस्तिनं त्यक्त्वा गेण्डुकं पशुमाश्रिता ॥१२॥
सरीसृपं गता त्यक्त्वा शेषं नागं हि नागिनी ।
कलिगैवैं मुकुटं त्यक्त्वा याता चिर्पटवेटनम् ॥१३॥
अहो भाग्यस्य बलिता राज्ञी वाग्घरिमाश्रिता ।
नैवं दृष्टं पुरा क्वापि दृश्यन्ते न जनैः क्वचित् ॥१४॥
दिव्या चिन्तामणिमाला कुक्कुरकण्ठमाहिता ।
मन्यामहे जनाश्चैतद् दैवेनाऽस्याः कृतं किल ॥१५॥
यद्वा समाजमालक्ष्याऽभिभूता कन्यका यतः ।
तेजोभिर्वै समाजस्य मानहीनाऽकरोदिदम् ॥१६॥
अनभीष्टं हि तज्जातं कन्यया नेष्यते खलु ।
यद्वा कन्या न जानाति मालेयं वरमालिका ॥१७॥
साधारणीं समालक्ष्य दरिद्राय समर्पिता ।
वरमाला हरिकाणां द्वितीया वा भविष्यति ॥१८॥
इयं तु विप्रपूजार्थं मता वा कन्यका न्विति ।
तस्मात् कन्या दरिद्राय न देया सत्सु राजसु ॥१९॥
यद्वा राजा ददत्वस्मै हरिष्यामो वयं तु ताम् ।
स्वयंवरेऽपि सम्पन्ने युद्धाधीना हि कन्यका ॥२०॥
योधयित्वा सती रत्नं प्राप्स्यामो नाऽत्र संशयः ।
इत्येवं बहुधा तत्र वदन्ति स्म नृपादयः ॥२१॥
कन्याया जनकश्चापि क्षणं शोकं जगाम ह ।
वीक्ष्य कन्या दरिद्राय गतेति ज्वरमाप ह ॥२२॥
नोवाचापि तदा किञ्चिद् भाग्यं मत्वा सुताकृते ।
राजा तु विधिवद् दातुं समिच्छति वराय वै ॥२३॥
तावद् राज्ञी गुरुश्चापि वृद्धा न्यषेधयन्नृपम् ।
राजन् मा क्षिप्रकार्यत्र भवान् भवतु मण्डपे ॥२४॥
अयोग्यं चेदमापन्नं कन्या भ्रान्ता यतोऽस्ति वै ।
यद्वा विचित्तभावाऽस्ति मानसस्थैर्यवर्जिता ॥२५॥
तस्मान्माला पुनर्देया स्वयंवरार्थमेव ह ।
राजा वाक्यं समाहृत्य तथाऽस्त्विति जगाद तान् ॥२६॥
अथ राजन्यवर्गोऽपि मेने योग्यं तु तत्तथा ।
कन्या पृष्टा मुहुश्चैतद्विषये जनकादिभिः ॥२७॥
नोवाच सा तदा किञ्चिद् रमेशेङ्गितवेदिनी ।
विप्रं राजा तदा गत्वा कृत्वा दूरं च कन्यकाम् ॥२८॥
नीत्वाऽऽययौ मण्डपं च दत्वा मालां परां पुनः ।
कन्या विहृत्य सर्वत्र मण्डपे करमालिका ॥२९॥
एवमेव समास्ते सा कस्मैचिन्नार्पयत्यपि ।
न सा वक्ति न वाऽन्यं सा पश्यति नापि चेच्छति ॥३०॥
आसुराणां विनाशस्य मिषं चिन्तयतीव सा ।
अथाऽहं तु तदा लक्ष्मि ! गोपुरं त्वां समागताम् ॥३१॥
समालां मामकीं मत्वा करे गृहीतवान् बलात् ।
त्वां नीत्वा वाटमालम्ब्य यावत्प्रयामि चैकलः ॥३२॥
तावद् दूता भृत्यवर्गा योद्धारो मामुपागताः ।
अताडयँश्च ते मां वै जगृहुस्त्वां वियोजिताम् ॥३३॥
तदा कोलाहलो जातः समाजः क्षुभितोऽभवत् ।
बललभ्या खलु कन्या भृत्यैर्वै नीयते सती ॥३४॥
मारयन्तु योधयन्तु चाहरन्तु च कन्यकाम् ।
इत्येवं रणमूलं वै तदारब्धं क्षणादभूत् ॥३५॥
अहं तेषां पश्यतां वै शीघ्रं स्कन्धे निधाय च ।
त्वां गृहीत्वा प्रदुद्राव शरवर्षा तदाऽभवत् ॥३६॥
मया स्मृतं विमानं स्वं चाऽक्षराख्यं महोज्ज्वलम् ।
दीप्यमानं समन्ताद्वै महातेजोभिरुत्तमम् ॥३७॥
पार्षदैर्मुक्तसंघैश्च श्वेतगजैर्विराजितम् ।
सर्वशस्त्रभृतं लक्ष्मि ! दिव्यमुक्तानिकाऽन्वितम् ॥३८॥
तन्मध्ये स्थापयित्वा त्वां युद्धार्थं दानवैः सह ।
सन्नद्धश्चाऽभवँस्त्वेको विप्रोऽहं क्षात्ररूपधृक् ॥३९॥

आजगत्कलनं नैजं धनुर्धृत्वा महत्तमम् ।
छेदयामास सर्वान् वै शरान् शरैः शिलीमुखैः ॥४०॥
भेदयामास कवचान् योद्धॄणां कानकान्यपि ।
परिवार्य समस्ताश्च राजानो दैत्यपुंगवाः ॥४१॥
आसुरा दानवाश्चापि निजघ्नुर्मां समन्ततः ।
मया तेषां प्रसंहारः कर्तव्येश्चेति वै तदा ॥४२॥
शक्त्या केचिद्धतास्तत्र भूशुण्ड्या च हताः परे ।
अन्ये च तोमरैश्चान्द्रैर्बाणैश्च विनिपातिताः ॥४३॥
परे तु गदया भग्ना भेदिताश्च परेऽष्टिभिः ।
दण्डेनाऽन्ये मारिताश्च परश्वधेन भेदिताः ॥४४॥
खण्डिता वज्रवेगैश्चाऽपरे प्रासैर्विभेदिताः ।
शूलैश्च व्यसवश्चान्ये कृतास्तत्र रणांगणे ॥४५॥
खड्गैर्निषूदिताश्चान्ये गोलकैः कच्चरीकृताः ।
चूर्णीकृतानि वर्ष्माणि मुद्गलैर्योधिनां तदा ॥४६॥
एवं लक्ष्मि मया तत्रैकलेन कोटिशोऽसुराः ।
प्राणैर्वियुज्य नाकं वा प्रापिता वा यमक्षयम् ॥४७॥
आक्षरं स्थानमेवाऽपि वैकुण्ठं चामृतं तथा ।
अव्याकृतं च गोलोकं प्रापिता बलिनः खलु ॥४८॥
अथ सहस्रहस्तो वै राजा कपालहेतुकः ।
सुतलस्याऽऽययौ योद्धुं मया सार्धं तदा मया ॥४९॥
सुदर्शनेन चक्रेण कर्तिताः सर्वबाहवः ।
नत्वा भूत्वा मम भक्तो जगाम स रणाद् बहिः ॥५०॥
मया तस्मै प्रदत्तौ वै हस्तौ द्वौ नाधिकौ तदा ।
उद्गतौ स्कन्धदेशेऽस्य क्षमां वृत्वा ययौ गृहम् ॥५१॥
अथ राजा शतमूर्द्धो वितलस्य मया सह ।
युयुधेऽर्धचन्द्रबाणैर्नाम्ना सारङ्गवाहनः ॥५२॥
सोऽपि सूर्याभबाणैर्वै मया कण्ठेषु कृन्तितः ।
पतितोऽस्य कबन्धो वै भूतले प्रममार सः ॥५३॥
अतलस्य तदा राजा सामरायोधनाभिधः ।
सहस्रपाद् योधनार्थे मत्समीपमुपाययौ ॥५४॥
मया निकृन्तिताः पादास्तस्य चक्रेण वै तदा ।
कबन्धस्तस्य च तदा पपात च ममार च ॥५५॥
अथ राजा भुवस्तत्र नवखण्डेश्वरो महान् ।
महेन्द्रभीषणो नाम्ना योद्धुं मां प्रति चाययौ ॥५६॥
शूलान् चिक्षेप बहुशः कण्ठं मे कर्तितुं हि सः ।
मया शूलेन दक्षोऽस्य बाहुः स्कन्धाद् विदारितः ॥५७॥
एकहस्तस्तदा शूरश्चादाय खड्गमुत्तमम् ।
दुद्राव मां तदा चाऽहं जहार तच्छिरोऽसिना ॥५८॥

अथ स्वर्गे च ये दैत्या राज्याधिकारयोजिताः ।
आययुर्व्योममार्गेण योद्धुं मया विहायसि ॥५९॥
मया रूपसहस्रैश्च योधिता विविधायुधैः ।
सुदर्शनेन चक्रेण नैकचक्रैर्विदारिताः ॥६०॥
एवं तत्राऽर्बुदाः शूरा मम हस्तैस्तथाऽऽयुधैः ।
गमिताः प्रेतभावं वै मोचिता अपि बन्धनात् ॥६१॥
शुरानन्दः सार्वभौमो जीवग्राहेण वै मया ।
पाशैश्च रश्मिभिस्तत्र रणे बद्धो वशीकृतः ॥६२॥
अरुदस्त्वं तदा लक्ष्मि ! पितृस्नेहवशंगता ।
मा मेवं चेत्यवोचाश्च मया राजा प्रमोचितः ॥६३॥
ननाम मम चरणे शरणं प्राप्य भूपतिः ।
मयाऽभयप्रदानेन योजितोऽचलभक्तराट् ॥६४॥
अथाऽन्यानि दानवानां सैन्यानि दुद्रुवुस्तदा ।
तलादिषु गतानेव त्यक्त्वा भुवं दिवं भुवः ॥६५॥
एवं निष्कण्टकं कृत्वा भूतलं स्वर्गमित्यपि ।
विरराम ततो युद्धादहं मे श्वशुरगृहे ॥६६॥
राजा मां स्वालयं निन्ये मध्ये विवाहमण्डपे ।
विधिना दत्तवान् पुत्रीं ज्योत्स्नाश्रीं त्वां च मे तदा ॥६७॥
यौतकं प्रददौ राजा ह्यसंख्यस्वर्णरत्नकम् ।
विमानानि च यानानि गजवाजिवृषादिकान् ॥६८॥
दासान् दासीर्नगराणि कल्पवल्लीः सुधाह्रदान् ।
रथान् स्वर्णान् नरयानान् नीत्वा त्वां च ततस्त्वहम् ॥६९॥
कारयित्वा मृतानां च क्रियास्ततो निजं गृहम् ।
आजगाम त्वया साकं सम्प्रज्ञानद्विजालयम् ॥७०॥
ततो मया पृथिव्यां वै राजानो ब्राह्मणाः कृताः ।
विप्राऽधीनाऽऽभवत् पृथ्वी दैवपैत्र्यक्रियावती ॥७१॥
भुवः स्वर्गं जनाद्यं च तत्तद् धिष्ण्यं यथाभवत् ।
पुरा तथैव तत्तेभ्यो दत्तवान् विधिना पुनः ॥७२॥
एवं मया तदा लक्ष्मि ! खलैर्मोचायितं जगत् ।
अनादिश्रीकृष्णनारायणेन परमात्मना ॥७३॥
पुरुषोत्तमकृष्णेन सर्वेषामवतारिणा ।
अनादिश्रीप्राज्ञनारायणोऽहं वै तदाऽभवम् ॥७४॥
आकल्पान्तं स्थितवाँश्च खण्डे भामन्तके तदा ।
शुरानन्दस्ते जनको भक्तो मे त्वात्मवेदनः ॥७५॥
आयुषोऽन्ते ययौ धामाऽक्षरं मे शुद्धभक्तिमान् ।
स्मर ज्योत्स्नां श्रियं स्वां त्वं सर्वं मे गोचरं हितत् ॥७६॥
एवमन्येऽप्यवतारा असंख्या मे ततोऽभवन् ।
अथ चान्यच्च मे प्राकट्यं वदामि शृणु प्रिये ॥७७॥

वेधसो वत्सरे प्रत्याहाराख्ये दशकोत्तरे ।
नवमे कल्पके चापि मनौ चापि द्वितीयके ॥७८॥
पूर्वकालबलाल्लोके नास्तिक्यं सर्वतो ह्यभूत् ।
तिष्ययुगप्रभावेण नष्टा चोपासना मम ॥७९॥
मन्दिराणि विनष्टान्यायतनानि गतानि च ।
प्रतिमाश्च लयं यातास्तीर्थानि नाशितानि च ॥८०॥
मानवेषु तदा व्यासोऽभवद् वै पाशवो वृषः ।
मां व्यस्मरन् चाल्पविदः स्वल्पायुषो जनास्तदा ॥८१॥
गर्तवासा विवस्त्राश्च सस्यधान्यादिजीविनः ।
स्वल्पमानाः स्वल्पजीवास्तिष्यनास्तिक्यसंभृताः ॥८२॥
वेदा मे विलयं प्राप्ताः कर्मकाण्डो लयं गतः ।
पूजनं रटनं मेऽपि कीर्तनाद्यं लयंगतम् ॥८३॥
अभूतमिव संजातं तदाऽहं ब्रह्मणाऽर्थितः ।
धर्मभक्तिस्थापनार्थे कृपया गोचरोऽभवम् ॥८४॥
वीरशरमनृपतेर्गृहे चतुर्भुजः प्रभुः ।
प्राविरासं महाशीलव्रती साधुवृषान्वितः ॥८५॥
मम प्रादुर्भावकाले देवाः पुष्पादिवर्षणम् ।
चक्रुर्दुन्दुभयश्चापि देवानां व्यनदँस्तदा ॥८६॥
तस्य राज्ञी सौरभेयी शय्यायां मां ददर्श ह ।
अगर्भजं सर्वदिव्यगुणोपेतं सुवाञ्छितम् ॥८७॥
न्यवेदयद्धि सा राज्ञे पश्य बाल ममाऽन्तिके ।
राजा प्राह मया देवि ! संकल्पितोऽयमर्भकः ॥८८॥
अयोनिजस्तव पुत्रो वर्तते तं प्रपालय ।
तावत्पुत्रो जातमात्रो युवा तत्र व्यदृश्यत ॥८९॥
सर्वविद्यागुणयुक्तः सर्वविज्ञानशेवधिः ।
योगसिद्धिसुसंसिद्धः सर्वभाषाप्रपारगः ॥९०॥
सर्वकलाप्रपूर्णश्च भक्तिमार्गाऽवबोधकः ।
यज्ञोपवीतयुक्तश्च ब्रह्मचारिवृषान्वितः ॥९१॥
उपादिदेश सद्धर्मान् मानवेभ्योऽतिहर्षतः ।
ब्रह्मचर्यमहिंसां च सत्यमस्तेनवर्तनम् ॥९२॥
शौचं सन्तोषमेवापि परेशाराधनं सदा ।
व्रतं सन्तोषमेवापि क्षमां वैराग्यमित्यपि ॥९३॥
वृद्धसेवां सतां सेवां परात्मसुखवर्तनम् ।
दानं दयां च हवनं सत्कारं पूजनं हरेः ॥९४॥
तपश्चेन्द्रियवेगानां निग्रहो मोहवर्जनम् ।
सर्वात्मदर्शनं स्नेहं परमेशे परात्मनि ॥९५॥
श्रवणं कीर्तनं कृष्णस्मरणं वन्दनं तथा ।
आत्मनिवेदनं कृष्णे हरेः सम्बन्धमुत्तमम् ॥९६॥
इत्येवं मोक्षधर्मांश्चाप्युपादिदेश वै तदा ।
वृत्तिं पारमहंसी च जग्राह जीवनाऽन्तिकाम् ॥९७॥
त्वं च लक्ष्मि ! मयाऽऽदिष्टा शार्दूलर्षेस्तु कन्यका ।
मानसी तत्र संभूता जातमात्रा च वाग्मिनी ॥९८॥
युवती ब्रह्मरूपा च सर्वैश्वर्यसमन्विता ।
ब्रह्मचर्यपरा साध्वी सतीधर्माऽवबोधिका ॥९९॥
साध्वीधर्ममाश्रिता च मम व्रतपरायणा ।
नित्यपूजापरा भक्तिमती मोक्षकरी तथा ॥१००॥
पित्रा मात्राऽर्पिता मह्यं साध्वीदीक्षार्थमेव ह ।
मया दीक्षा प्रदत्ता ते त्वं सदा ब्रह्मचारिणी ॥१०१॥
गुर्वी सर्वसतीनां चाऽभवः शिक्षणदायिनी ।
तव शास्त्रं तदा साध्वीधर्मात्मकं ह्यभूत् प्रिये ॥१०२॥
शार्दूलिकाश्रीसंहितात्मकं कल्पान्तगं तदा ।
आवाभ्यां च तदा सर्वलोकेभ्यो भूतले खलु ॥१०३॥
उपदिष्टा नैष्ठिकानां धर्मा भक्तिर्हरेस्तथा ।
असंख्यास्तारिता जीवा अक्षरं प्रति चापिताः ॥१०४॥
एतत् स्मर तदा लक्ष्मि ! शार्दूलिकाश्रियं निजाम् ।
स्वां तथा मामनादिश्रीवीरनारायणं हरिम् ॥१०५॥
एवमन्येऽवतारा मे तदाऽभवन्नसंख्यकाः ।
सर्वानहं प्रजानामि स्मरणान्मोक्षदा हि ते ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ज्योत्स्नाश्रीसमर्पिताऽनादिप्राज्ञनारायणकण्ठे वरमाला, ततो राज्ञां युद्धम्, दैत्यदानवाऽसुराणां सुदर्शनादिभिर्हरिणा कृतो विनाशः, शुरानन्दस्य मोक्षणम्, पृथ्वीस्वर्गादिराज्यानां मानवेषु देवादिषु चार्पणम्, वेधसश्चैकादशे वत्सरे नैष्ठिकसाधुधर्मस्थापनार्थम् अनादिवीरनारायणस्य प्राकट्यमितिनिरूपणनामाऽष्टमोऽध्यायः ॥ ८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं द्वादशे तु प्रधारणे ।
वत्सरे ब्रह्मणस्तत्र षष्ठे कल्पेऽष्टमे मनौ ॥ १ ॥
शोणभद्रोऽभवद्वैश्यो मम भक्तो जितेन्द्रियः ।
सर्वयज्ञपरः सर्वदानदाताऽतिथिप्रियः ॥ २ ॥
लक्षगोधनयुक्तश्च कृषिव्यापारसंभृतः ।
क्रयविक्रयकुशलो राजेव राजमानितः ॥ ३ ॥
सत्यप्यनन्तविभवे सम्माने च प्रजोत्तरे ।
व्यवसायेष्वसंख्येषु सहस्रेष्वनुगेष्वपि ॥ ४ ॥

भगवन्तं स मां नैव विस्मरत्येव वै क्वचित् ।
प्रातर्ब्राह्मे मुहूर्ते स समुत्थाय हरेर्मम ॥ ५ ॥
ध्यानं नित्यं करोत्येव सर्वांगानां मुहुर्मुहुः ।
ध्यानतृप्तस्ततस्तालीवादनैः सह मेऽभिधाः ॥ ६ ॥
हरेकृष्ण हरे कृष्णनारायण प्रभो हरे ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥ ७ ॥
इत्येवं कीर्तयत्येव ततः स्नात्वा नदीजले ।
पैतृकानञ्जलीन्दत्वा कृत्वा सन्ध्यां ममाऽर्चनम् ॥ ८ ॥
मम सौवर्णमूर्तौ स विधत्ते सर्ववस्तुभिः ।
आवाहनं चासनं च पाद्यमर्घ्यं तथाऽऽचमम् ॥ ९ ॥
दन्तधावनमेवाऽपि गण्डूषान् मुखशोधनम् ।
शौचं मृदा तथा शुद्धिं जलशौचं ततः परम् ॥१०॥
तैलसुगन्धिभिश्चांगाभ्यंगनं चांगमर्दनम् ।
दुग्धेन दध्ना चैवाऽपि सर्पिषा मधुना तथा ॥११॥
शर्करया तीर्थवार्भिश्चाभिषेकाऽऽप्लवं तथा ।
वस्त्रामार्जनमेवाऽपि चामूल्याम्बरधारणम् ॥१२॥
सुगन्धिसत्त्वदानं च शोभाद्रव्यार्पणं तथा ।
कज्जलं नेत्रयोश्चापि भाले तिलकमुत्तमम् ॥१३॥
चन्द्रकं शिरसि तैलं रञ्जनं करपत्तले ।
भूषणानि समस्तानि पादुके पुष्पमालिकाः ॥१४॥
कुंकुमं चाबीरकं च गुलालं चन्दनं शुभम् ।
अक्षतान् कुसुमान्येव धूपं दीपं निवेदनम् ॥१५॥
भोजनानि विचित्राणि ताम्बूलकं जलानि च ।
तुलसीमञ्जरीपत्रं स्वर्णहीरकमालिकाः ॥१६॥
आरार्त्रिकं दण्डवच्च स्तवनं च प्रदक्षिणम् ।
दक्षिणां च नमस्कारं चापराधक्षमापनम् ॥१७॥
पुष्पाञ्जलिं ततः पूजापरिहारं विधाय सः ।
साधुजनानतिथींश्च विप्रान् नमस्करोत्यपि ॥१८॥
गाः सतीर्बालिकान् दीनाननाथान् भिक्षुकानपि ।
समागतान् प्रसम्मान्य पूजयत्येव नित्यशः ॥१९॥
भोजनादि कारयित्वा यथापेक्षं ददाति च ।
वर्षे वर्षे नवधान्यागमे सत्रं महत्तमम् ॥२०॥
वैष्णवं प्रकरोत्येव भुञ्जते सुरमानवाः ।
एवं तेन कृतो यज्ञो नवधान्यक्रतुः शुभः ॥२१॥
लक्षशः साधवो यत्र विप्राद्याश्चापि चागताः ।
सप्ताहे तत्र वै यज्ञे मम भक्तस्य नित्यशः ॥२२॥
अहमदृश्यरूपेणागत्यार्पितं निवेदनम् ।
गृहीत्वा शिवसत्त्वेश्रि ! भुक्त्वा प्रयामि धाम मे ॥२३॥

एवं यज्ञे सम्प्रवृत्ते विप्राणां बहुशास्त्रिणाम् ।
भिन्नदेशाऽऽगतानां च भिन्नक्रियाप्रवेदिनाम् ॥२४॥
कर्मकाण्डेऽज्ञवैमत्ये विगुणे रुद्रकर्मणि ।
यज्ञांगकर्मवैगुण्ये जाते वह्नेः प्रकोपनात् ॥२५॥
अकस्मान्मण्डपस्योर्ध्वे विताने वह्निमण्डलम् ।
कुण्डादुल्लुत्य सहसा लग्नं दाहकरं तदा ॥२६॥
प्रसारणं च त्वरितं सज्वालं समभूद् द्रुतम् ।
मण्डपो ज्वलितस्तूर्णं वह्निश्चापि समन्ततः ॥२७॥
सज्वालः सम्प्रसरितो वायुना सुप्रवर्धितः ।
हव्येषु चापि सर्वत्र निवासेषु गृहेषु च ॥२८॥
वस्त्रेषु यज्ञशालासु मानवेष्वपि वै तदा ।
क्रूरश्च क्रूरकर्मा च वह्निर्व्यवर्धतोल्बणः ॥२९॥
काली कराली विकराली च नीला च लोहिता ।
पिशंगी चार्जुना हरिद्वर्णा ज्वाला विचित्रिकाः ॥३०॥
ज्वालाभिस्तत्र पञ्चाशत्सहस्राणि तु मानवाः ।
भस्मीभूता अभवँश्च हाहाकारोऽभवत्ततः ॥३१॥
शोणभद्रो मम भक्तः परं शोकमवाप ह ।
मृतानां सर्वकार्याणि कृतवाँस्तत्र भक्तराट् ॥३२॥
अथ तेषां बहुहत्यापातकेषु निमित्तवान् ।
वैश्योऽयं यजमानः स महच्छोकेन पीडितः ॥३३॥
शान्तिं नाऽवाप निद्रां वा नाऽवाप चिरमेव ह ।
आराधनां मम चक्रे मृतोद्धारचिकीर्षया ॥३४॥
अन्नं जलं परित्यज्याऽनशनं व्रतमाचरत् ।
रात्रिन्दिवं भजनं मे चक्रे मद्व्रतमानसः ॥३५॥
भगवँस्त्वं स्वयं पुत्रो भूत्वोद्धारं कुरु प्रभो ।
यज्ञध्वंसकलंकं च निवारय जनार्दन ॥३६॥
एवं मां प्रार्थयतश्च गतं वर्षं विनाऽदनम् ।
विना जलं गतं वर्षं मरणार्थकयोगिनः ॥३७॥
ततोऽहं दत्तवाँस्तस्मै वरं पुत्रो भवामि ते ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥३८॥
इत्युक्त्वा मानसः पुत्रस्तस्याऽग्रे समुपस्थितः ।
तत्पत्नी शीलव्रतिनी नाम्ना भद्रश्वरी सती ॥३९॥
दृष्ट्वा मां बालकं रम्यं सर्वतेजोभिवर्धितम् ।
सर्वसिद्धिप्रदं सौम्यं सर्वाभरणभूषितम् ॥४०॥
दिव्यं दिव्यगुणोपेतं जग्राहोत्सवमानिनी ।
तदाऽम्बराद् बभूवापि दिव्यकुसुमवर्षणम् ॥४१॥
मुक्ता देवा ईश्वराश्च व्यवर्धयन्त मां सुमैः ।
जयध्वानैर्वाद्यघोषैश्चन्दनाक्षतपूजनैः ॥४२॥

जन्मोत्सवो जनकेन कृतो मे सर्वतोऽधिकः ।
अनशनं परित्यज्य भोजयामास कोटिशः ॥४३॥
साधून् भक्तान् दीनवर्गाननाथान् द्विजसत्तमान् ।
कन्यका बालकाँश्चापि शोणभद्रस्तदा दिने ॥४४॥
दानानि सर्ववस्तूनां श्रेष्ठानि प्रददौ पिता ।
गृहे गृहे तदा कृष्णजन्मना वै समुत्सवाः ॥४५॥
अभवन् शिवकन्येश्रि ! तदा त्वं मां समर्थयः ।
मया जन्म ग्रहीतव्यं यद्याज्ञां देहि मे प्रभो ॥४६॥
मया तथाऽस्त्विति प्रोक्ता त्वं तदा वैश्यपुत्रिका ।
सरयूकासतीनाम्न्याः स्त्रियाः पुत्री शुभानना ॥४७॥
मानसी वै सरोभद्राश्रीनाम्नी त्वं व्यजायथाः ।
सर्वलक्षणसम्पन्ना हरिवत्साविन्वता हृदि ॥४८॥
दीपज्योतिःसमं स्वर्णरेखाचिह्नं हृदन्तरे ।
तदूर्ध्वे च हरेश्चिह्नं चतुर्भुजं सुमूर्तिकम् ॥४९॥
स्वर्णवर्णे च ते तत्राऽऽसीद् विलोक्य च तत् प्रसूः ।
तव वै पितरं नाम्ना सारवत्सं जगाद ह ॥५०॥
पुत्रीयं सर्वशोभाढ्या वर्तते कमला ननु ।
हृदयेऽस्या हरिश्चास्ते स्वर्णरेखाढ्यमूर्तिमान् ॥५१॥
तस्माद् देया भगवते श्रीकृष्णपरमात्मने ।
नाऽन्यस्मै चेति वैश्योऽपि तत्सत्यं चाभ्यमन्यत ॥५२॥
जातमात्रा युवती च मात्रा पित्रा सुसद्गुणा ।
श्रुत्वा पुत्रं शोणभद्रवैश्यस्य परमेश्वरम् ॥५३॥
संकल्पेन प्रदत्ता त्वं मह्यं श्रीपतये तदा ।
मया कृतस्ततो यज्ञो मृतोद्धारकृते पुनः ॥५४॥
तत्रारंभे समागत्य पित्राभ्यां तव पद्मजे ।
अर्पिता विधिना मह्यं गृहीता मण्डपे मया ॥५५॥
आध्वरे एव विधिना ततोऽध्वरमकारयम् ।
त्वया साकं सरोभद्रे ! मया यज्ञः प्रवर्तितः ॥५६॥
आहूताः प्रेतवर्गास्ते यथावद् विधिना ततः ।
श्राद्धैः पैत्र्यैः पिण्डदानैर्हवनैर्दैवकर्मभिः ॥५७॥
तारिताः सर्वे एवैते हव्यप्रसादभोजनैः ।
सर्वे चतुर्भुजाः पञ्चाशत्सहस्राणि ते तदा ॥५८॥
प्रेता विहृत्य च तदा भूत्वा चतुर्भुजाः सुराः ।
पार्षदा मण्डपे तत्र विमानवरमास्थिताः ॥५९॥
प्रेषिताश्च मया सर्वे वैकुण्ठं धाम चोत्तमम् ।
मोचितास्ते ततः पित्रोः सेवायां सर्वदाऽभवम् ॥६०॥
अनादिश्रीभद्रनारायणः श्रीपुरुषोत्तमः ।
अन्येऽपि चावतारा मे बहवस्तत्र कल्पके ॥६१॥
कार्यवशात् प्रजाता वै वेद्मि तान् सर्वशः प्रिये ।
स्मर तां त्वां सरोभद्रां श्रीभद्रस्य तु मे प्रियाम् ॥६२॥
अथाऽन्यं मे प्रकटं च भावं शृणु शिवात्मजे ! ।
वेधसो वत्सरे त्रयोदशे प्रध्यानसंज्ञके ॥६३॥
तृतीयकल्पके तुर्ये मनौ मेरोस्तु दक्षिणे ।
अघमर्षणखण्डे वै भूतले ब्रह्मचारिणी ॥६४॥
योगिनी योगसामर्थ्या तुंगभद्रासनाऽभिधा ।
बभूव बहुसामर्थ्या मम भक्तिपरायणा ॥६५॥
दिनार्धं मम पूजायां यापयत्येव निर्जने ।
मध्याह्ने फलमूलादि चाहृत्याऽऽरण्यवृक्षजम् ॥६६॥
निवेद्य मह्यं चाश्नाति पैत्र्यं करोति तत्परम् ।
सायं मां भजते नित्यं परमेशं जगद्गुरुम् ॥६७॥
रात्रौ ध्यात्वा स्वपित्येव प्रातर्ध्यानं करोत्यपि ।
स्नाने ध्याने जपे होमे तर्पणे भजने स्थले ॥६८॥
जलेऽम्बरे दिवा रात्रौ मां स्मरत्येव योगिनी ।
दीर्घाभ्यासवशादेषा सर्वसिद्धिनिधानिका ॥६९॥
अभवत् त्वं यथा लक्ष्मि तथैश्वर्यसमन्विता ।
आत्मज्ञानपरा वाणीसिद्धा संकल्पसिद्धिका ॥७०॥
देहसिद्धा द्वन्द्वस्पर्शरहिता सर्वतोऽधिका ।
व्यजायत महासाध्वी चर्तुमकर्तुमन्यथा ॥७१॥
समर्था व्योमगा चापि परकायप्रवेशिनी ।
ग्रहनक्षत्रताराणां गतिरोधबलान्विता ॥७२॥
हरिव्रता सदा कृष्णपतिव्रता हि भामिनी ।
भक्तरक्षाकरी दीनाऽनाथरक्षाकरी सदा ॥७३॥
सतां सेवाकरी चापि धर्मकर्मपरायणा ।
एवं सा वर्तमाना च महारण्ये सदा निशि ॥७४॥
अन्धकारे निर्गतानाहारार्थे राक्षसाँस्तथा ।
भूतप्रेतपिशाचादीन् व्यलोकयति हिंसकान् ॥७५॥
सुप्तपक्षिपशुव्रातभक्षकान् पापकारिणः ।
अन्धकारे पशवश्च भीता अपि च जाग्रताः ॥७६॥
अदृष्टिपातवशगाः शक्नुवन्ति न धावितुम् ।
धावमानाँश्च गृह्णन्ति प्रसह्य बलिराक्षसाः ॥७७॥
क्रन्दमानान् देहिनश्च प्रतिरात्रि च सा सती ।
परदुःखनिवारार्थं व्यचारयन्मुहुर्मुहुः ॥७८॥
सार्वदिकं महादुःखं यथा नश्येद्धि देहिनाम् ।
तथा दीर्घं विचार्यैव राक्षसानां विनाशिनीम् ७९॥
महालक्ष्मीं प्रसस्मार त्वां क्रूरां दुःखहारिणीम् ।
मयाऽऽज्ञप्ता भवती च तस्याः प्रत्यक्षतां गता ॥८०॥

कन्यका षोडशभुजा सर्वशस्त्रप्रधारिणी ।
सा च प्रसन्नवदना ययाचे त्वां स्वपुत्रिकाम् ॥८१॥
मानसी त्वं तदा पुत्री भूत्वा तदाश्रमे स्थिता ।
सर्वराक्षसभूतानां हन्त्री पश्वादिरक्षिणी ॥८२॥
नाम्ना कार्यवशात् सर्वभद्राश्रीरिति शोभना ।
यतिनीधर्मवशगा सर्वसामर्थ्यशालिनी ॥८३॥
कल्याणकारिणी साध्वी युवती योगिनी शुभा ।
अथैवं वर्तमानायास्तस्या आरण्यकं स्थलम् ॥८४॥
विहाय राक्षसाः सर्वे ययुश्चान्यदरण्यकम् ।
तत्रैवं हिंस्यमानाश्च प्राणिनो राक्षसादिभिः ॥८५॥
विवशास्त्वन्मातरं च रक्षयित्रीं हि देहिनाम् ।
आश्रुत्य चागताश्चाप्यार्थयँस्त्वामवनार्थिकाम् ॥८६॥
माता त्वां प्रददौ तेभ्यो रक्षार्थं त्वं गता ततः ।
त्वद्भयात्तदरण्याश्च राक्षसाश्चेरयद् गताः ॥८७॥
अरण्यं तत्र वै चापि हिंसनं तादृशं ह्यभूत् ।
राक्षसैस्ते पशवश्च प्रार्थयन् सर्वभद्रिकाम् ॥८८॥
इत्येवं सर्वतः सर्वभद्रिकाह्वानमेव ह ।
अजायत हि लोकेषु ख्याता रक्षाकरी यतः ॥८९॥
माता विचारयामास नैवं पारो भविष्यति ।
पुत्री मे न गृहे चास्ते चरतेऽरण्यके सती ॥९०॥
राक्षसानां विनाशार्थं सेवालाभो न मेऽस्त्यपि ।
ततोऽहं तादृशं कुर्वे पुत्री मे गृहमावसेत् ॥९१॥
राक्षसानां बलं चापि स्वभावान्नाशमाव्रजेत् ।
रात्रिर्यथा भवेन्नैव तथा कुर्वे समन्ततः ॥९२॥
रात्रौ बलं पिशाचानां भूतानां रक्षसां तथा ।
तस्माद् रात्रिर्मा भवतु चेत्येवं त्वत्प्रसूस्तदा ॥९३॥
हस्ते जलं गृहीत्वैव विचार्य्याऽञ्जलिवारि तत् ।
अभिमन्त्र्याऽम्बरे प्राक्षिपत् पुनः पुनरेव सा ॥९४॥
ज्योतिषां च ग्रहाणां च सूर्यादीनां गतिः स्थिरा ।
अगतिश्चास्तु वै येन दिवा वै सर्वदा भवेत् ॥९५॥
नोपेयाच्च निशा चास्तमनं सूर्यस्य मा भवेत् ।
इति प्रक्षिप्तसलिलबिन्दवः स्वर्गमारुहन् ॥९६॥
प्रतिबन्धकरा देवाः सर्वसामर्थ्यरश्मयः ।
सूर्यगतिस्तदा रुद्धा रुद्धं नक्षत्रमण्डलम् ॥९७॥
सर्वं वै ध्रुवतां प्राप्तं सर्वदा दिवसोऽभवत् ।
अस्तमनं गतं चास्तं पुनर्नायातमेव तत् ॥९८॥
सायं सन्ध्या ततो लुप्ता दिनं दीर्घतमं ह्यभूत् ।
सर्वे सायं प्रतीक्षन्ते कदा सायं भवेदिति ॥९९॥
आकुलं व्याकुलं सर्वं देवमानवमण्डलम् ।
तेन जातं तदाऽस्तौच्छ्रीपतिं मां पुरुषोत्तमम् ॥१००॥
प्रातर्मध्याह्नकार्याणि समस्तानि गतानि वै ।
बुभुक्षिताः सुराद्याश्च जनाश्च ऋतुवर्जिताः ॥१०१॥
सर्वं सातत्यसूर्यस्य रश्मिभिस्तापसेचितम् ।
दग्धभावोन्मुखं जातं चन्द्रकान्तिर्न लभ्यते ॥१०२॥
अमृतं प्राप्यते नैवौषधिभिश्चाप्यरण्यके ।
शुष्कायन्ते द्रुमाद्याश्च तापधर्मप्रसेचिताः ॥१०३॥
एकलाभे च महती हानिश्चैवं समापतत् ।
उष्मणा मानवाद्याश्चोन्मत्ततां तु तदाऽऽन्नुवन् ॥१०४॥
जलानि सरसां तत्र शुष्काणि लीनतां ततः ।
गतानि सर्वतश्चैवं दुःखमुग्रमवर्तत ॥१०५॥
राक्षसानां बलं नष्टं पातालं विविशुश्च ते ।
भूतप्रेतपिशाचाद्या विविशुर्गह्वराणि च ॥१०६॥
तेभ्यो दुःखं न चाऽस्त्येव किन्तु तापेन तापनम् ।
दुःखमसह्यमापन्नं तस्माद् रक्ष परेश्वर ॥१०७॥
रक्ष रक्ष कृपासिन्धो त्रिलोकी स्तब्धतां गता ।
अक्रिया ग्रहताराश्च दिनमानं लयं गतम् ॥१०८॥
रात्रिर्लयं गता कृष्णनारायण जगच्छया ।
चन्द्रोदयस्तथा नास्ति मासावधिर्लयं गतः ॥१०९॥
ऋतवो नैव जायन्ते फलन्ति नौषधिव्रजाः ।
शैत्यं लयं गतं सर्वं वह्निश्चोत्पद्यते वने ॥११०॥
रक्ष रक्ष कृपासिन्धो दिनबन्धो प्रतापनात् ।
अस्तुवन्निति त्रैलोक्यां देहिनो मां तदा प्रिये ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो द्वादशे वत्सरे शोणभद्रयज्ञे दग्धानां मोक्षार्थमनादिभद्रनारायणस्य, त्रयोदशे प्रध्यानवत्सरे तुंगभद्रासनायोगिन्या कृतसूर्यादिगतिनिरोधे परमेशप्रार्थनादीतिनिरूपणनामा नवमोऽध्यायः ॥ ९ ॥

श्रीपुरुषोत्तम उवाच—

ततो वै शिवसत्येश्रि ! कृष्णनारायणि प्रिये ! ।
अहं विमानमारुह्याऽक्षरधाम्नः समागतः ॥ १ ॥
देवतानां सभायां वै देवाः पुपूजुरुत्सुकाः ।
तथा निवेदयाञ्चक्रुः सर्वे गतेर्निरोधनम् ॥ २ ॥
तज्जन्यं सुमहत्कष्टं मानवा अपि तापनम् ।
मया तत्कारणं तत्र सभायां समुदाहृतम् ॥ ३ ॥

राक्षसानां बलं लोके रात्रौ भवति सर्वदा ।
भूतप्रेतपिशाचानां बलं रात्रौ भवत्यपि ॥ ४ ॥
ते रात्रौ सुप्तभूतानि भक्षयन्ति वनेषु वै ।
तत्रत्याः प्राणिनस्तुंगभद्रासनां तु योगिनीम् ॥ ५ ॥
आर्थयन् वै प्ररक्षार्थं सा तु लक्ष्मीं समार्थयत् ।
लक्ष्मीर्नारायणी तस्याः पुत्रीत्वे वर्ततेऽधुना ॥ ६ ॥
तथा वै रक्षिताः सर्वे रक्षोभिर्देहिनः खलु ।
तथापि सर्वखण्डेषु राक्षसाः सन्ति भूरिशः ॥ ७ ॥
लक्ष्म्यास्तेषु गमने तु माता भवति चैकला ।
पुत्री भ्रमति लोकेषु पुत्र्याः सुखं न चाप्यते ॥ ८ ॥
तस्माद् रात्रिर्भवेन्नैव तथा कार्यं विचार्य सा ।
ग्रहचक्रं स्वबलेनाऽरोधयत् तुंगभद्रिका ॥ ९ ॥
मम भक्ता महासाध्वी योगिन्यैश्वर्यशेवधिः ।
एतद्वै कारणं गतेः रोधस्य विद्यते परम् ॥१०॥
तस्मात्तत्रैव यामोऽत्र यथा गतिर्निरोधिता ।
इत्येवं संविचार्यैव सदेवोऽहं नरायणि ! ॥११॥
आययौ यत्र ते माता तुंगभद्रासनाऽस्ति च ।
सा विमानानि संवीक्ष्य योगदृष्ट्या महासती ॥१२॥
वनमध्ये स्वागतार्थं स्वर्गं त्वन्यद् व्यधात् हृदा ।
उद्यानानि विचित्राणि कल्पद्रुमान्निजेष्टदान् ॥१३॥
जलामृतानां सुहृदान् सरितो जलसंभृताः ।
स्नानादिश्रेष्ठशालाश्च प्रासादान् देवयोग्यकान् ॥१४॥
स्वर्णकलशशोभाढ्यान् धवलान् चन्द्रसन्निभान् ।
यज्ञशालाः पाकशालाः शय्याशालाः सुशोभनाः ॥१५॥
विहारशाला योग्याश्च स्त्रीशाला मध्यशालिकाः ।
वेषाणां सुकपाटाँश्च भूषणानां च पेटिकाः ॥१६॥
रत्नानां हीरकाणां च सुवर्णानां सुकोशिकाः ।
घृतकुल्या दधिकुल्याः पयःकुल्याः सुसंभृताः ॥१७॥
अमृतानां रसानां च मिष्टान्नानां महानसान् ।
दोलानां दर्पणानां च भोग्यानां भित्तिकोटरान् ॥१८॥
वासनां सुनिवासानां गृहाणि शोभनानि च ।
चकार सा तथा विद्युत्प्रवाहाणां प्रदीपकान् ॥१९॥
पवनानां निसर्गोत्थतरंगान् सा तदाऽकरोत् ।
चन्दनानां सुपुष्पाणां हीरकाणां च मालिकाः ॥२०॥
मधुपर्कादिपात्राणि धृत्वा स्थिताश्च दासिकाः ।
कन्यकाः कोटिसंख्याश्च प्रचकार हि योगिनी ॥२१॥
वादित्रवादिकाश्चापि नृत्यकीर्तनकारिकाः ।
ध्वजधर्त्रीस्तथा कन्या दुग्धकाञ्चनसन्निभाः ॥२२॥
संकल्पेनाऽकरोत्तत्र तुंगभद्रासनां सती ।
अक्षयार्थानि पात्राणि कुंकुमाऽक्षतपात्रिकाः ॥२३॥
पादसंवाहनाद्यर्थं साऽकरोत् कन्यका नवाः ।
स्वर्गान्न्यूनं न यत्रास्ते तादृशं नगरं नवम् ॥२४॥
स्वर्गाख्यं सा व्यरचयन्निजैश्वर्यबलेन ह ।
तूर्णं सा स्वागतार्थं च गोपुराऽग्रे ह्युपस्थिता ॥२५॥
देवाः सर्वे विभूतीस्ता वीक्ष्याऽऽश्चर्यं परं गताः ।
तूर्णमाकाशमार्गाद्वै वयं वनेऽवतेरिम ॥२६॥
गोपुराग्रेऽसंख्यकन्यास्त्वाजग्मुः स्वागतार्थिकाः ।
सम्मानं सर्वदेवानां चक्रिरे मालिकाऽर्पणैः ॥२७॥
कुंकुमाऽक्षतपुष्पाद्यैर्जयघोषैः प्रचक्रिरे ।
निन्यिरे सर्वदेवाँश्च वासान् योग्यान् यथाकृतान् ॥२८॥
ददुस्ता मधुपर्कादि भोज्यामृतसुधादिकम् ।
जलपानं सेवनादि चक्रुर्देहप्रमर्दनम् ॥२९॥
तृप्ता देवा वयं सर्वे कन्याभिस्तोषिताः क्षणम् ।
स्वर्गे स्वर्गे चापरं च तदभून्न्यूनमेव न ॥३०॥
देवा विसस्मरुर्नैजान् भोगान् क्षणं तु मोहिताः ।
अथ क्षणान्ते साध्वी सा तुंगभद्रासना सती ॥३१॥
देवानामागमे हेतुं जिज्ञासितवती ह्यभूत् ।
सा च तूर्णं सभासौधे समागत्य सुरान् सती ॥३२॥
आहूय निजभाग्यं वै न्यवेदयत् सुरान्तिके ।
अहो मे पावितं सर्वं कुलं वनं च पावितम् ॥३३॥
पावितं भूतलं चैतदाश्रमो मम पावितः ।
भवद्भिर्भगवद्भिश्च समागत्य मम गृहम् ॥३४॥
स्वर्गमेवाऽपरं त्वद्य कृतं धन्याऽस्मि सर्वथा ।
यद्गृहे कोटिपुण्यानां पुञ्जाः स्युर्वै पुराऽर्जिताः ॥३५॥
तत्र देवाः समायान्ति साक्षान्नारायणान्विताः ।
उपस्थिताऽस्मि सेवायां चाज्ञायां ह्युनिवासिनाम् ॥३६॥
एषा दासी भवतां वै वर्ते विज्ञापयन्तु माम् ।
इत्युक्त्वा प्रणतिं कृत्वा स्वर्णासनस्थितान् सुरान् ॥३७॥
सूर्यं चन्द्रं च शुक्रं च ग्रहान् सप्तर्षिसत्तमान् ।
नक्षत्राणि महेन्द्रं च गुरुं चागस्त्यमित्यपि ॥३८॥
वीक्ष्य वीक्ष्य नमश्चक्रे कृष्णनारायणं मुहुः ।
मां प्रवीक्ष्य पुनर्नेत्राश्रुभृता तत्र सन्निधौ ॥३९॥
चाययौ तूर्णमेवाऽपि पतिता पादयोः सती ।
अर्पिताऽस्मीत्युवाचाऽपि मां हरिं पुरुषोत्तमम् ॥४०॥
बृहस्पतिस्तदा तत्र त्वाज्ञापितो मया द्रुतम् ।
व्यजिज्ञपत् सतीं तत्र मातरं ते शृणु प्रिये ॥४१॥

वयं भक्ताऽनुगाः सर्वे देवा नारायणाश्रिताः ।
भक्तानामपराधे तु भयं यामोऽतिदूरतः ॥४२॥
भवती भक्तिसम्पन्ना पूज्या मान्या सती च नः ।
एते देवा नमस्कुर्मः प्रसन्ना भव योगिनि ॥४३॥
राक्षसानां बलहानिकृते त्वया तु भामिनि ।
ग्रहचक्रगतिः रुद्धा रात्रिनाशार्थमेव ह ॥४४॥
किन्तु लोकविनाशोऽयं तापेन समुपस्थितः ।
धर्मकार्याणि रुद्धानि ऋतवोऽपि लयं गताः ॥४५॥
ग्रहाणां गत्यधीनं वै सर्वं जगत् प्रमोदते ।
तस्माद् देवि गत्यरोधं भिक्षयामस्तवाऽग्रतः ॥४६॥
एष नारायणो देवः श्रीपतिः पुरुषोत्तमः ।
भिक्षार्थं त्वागतश्चात्र देवकोटिभिरन्वितः ॥४७॥
वयं चातिथयस्ते स्मो नान्यमर्थं परं ह्यपि ।
रोचयामस्तवाग्रेऽत्र देहि भिक्षां शुभक्रिये ॥४८॥
श्रुत्वा नारायणि लक्ष्मि तव माता तदा सती ।
प्राह देवानहं चापि भिक्षयामि शुभास्पदम् ॥४९॥
परमेशं चाक्षरेशं श्रीपतिं पुरुषोत्तमम् ।
यदर्थं योगिनी चास्मि यं भजामि पुमुत्तमम् ॥५०॥
देवा यद्यर्पयन्त्येनं परमेशं सनातनम् ।
परब्रह्म प्रभुं मह्यं ददाम्यरोधनं गतेः ॥५१॥
मम श्रेयः परं स्याच्च भवतां श्रेय इत्यपि ।
लोकानां श्रेय एवाऽपि भवेत् सर्वं शुभास्पदम् ॥५२॥
अथ देवास्तदा प्राहुः स्वतन्त्रः पुरुषोत्तमः ।
न नियोज्यः स चाऽस्माकं शृणोत्येव स्वयं प्रभुः ॥५३॥
यथेष्टं सर्वसौख्यार्थं करिष्यति जनार्दनः ।
श्रुत्वैवं देववाक्यानि तदाऽहं शिवशंजिके ॥५४॥
अपृच्छं मातरं ते तु किमिच्छसि सुयोगिनि ! ।
सा प्राह भगवँस्तेऽत्र दासी लक्ष्मीः सुता मम ॥५५॥
वर्तते त्वत्प्रतीक्षायां तां गृहाण निजप्रियाम् ।
नवं स्वर्गमिदं सर्वं यौतकं त्वत्कृते कृतम् ॥५६॥
कन्याश्च कोटिशश्चेमास्त्वदर्थं परिकल्पिताः ।
विवाहविधिना सर्वा गृहाण पुरुषोत्तम ॥५७॥
जामाता मे गृहे भूत्वा वसाऽत्र शाश्वतीः समाः ।
इत्यर्थये ततो रात्रिर्दिवा सर्वं भविष्यति ॥५८॥
भक्ताऽहं च भवान् भक्तवत्सलः ख्यायते प्रभो ।
देवानां हितकृच्चास्ते लोकानां च ममापि च ॥५९॥
समर्थोऽसि तथाकर्तुं प्रयत्नस्ते न विद्यते ।
सर्वं गृहाण भगवन् देहि मे वचनं शुभम् ॥६०॥

जलं गृहाण हस्ते च गृहीतं वद मां त्विह ।
ततोऽहं सर्वदेवानां गत्यरोधं करोमि वै ॥६१॥
हरिश्चाऽहं हसँस्तस्यै ओमित्येवं जगाद ह ।
जलं करे प्रजग्राह देवा जयं प्रचक्रिरे ॥६२॥
अथ वाद्यान्यवाद्यन्त प्रसन्ना देवतास्तदा ।
पुष्पवर्षाणि देवीनां तदा सदसि चाऽभवन् ॥६३॥
प्रसन्नाः कन्यकाः सर्वास्तत्राभिजिन्मुहूर्तके ।
तुंगभद्रासना पुत्रीं क्षणेनाऽऽभूषणान्विताम् ॥६४॥
शृंगारितां च युवतीमर्पयामास पश्यताम् ।
वरमाला गले मे च त्वया तत्र निधापिता ॥६५॥
मम हस्ते तव हस्तस्तदा मात्रा समर्पितः ।
मम सिंहासने त्वं च तत्रैवार्धे निषादिता ॥६६॥
अथाऽन्याः कन्यकास्तूर्णं यथाशाश्चागताः पुरः ।
वरमाला ददुस्ताश्च कोटिरूपधरस्य मे ॥६७॥
कण्ठे शीघ्रं तदा तत्र बृहस्पतिः स्वयं गुरुः ।
वेदमन्त्रान् लग्नयोग्यान् जगौ कुण्डं प्रकल्पितम् ॥६८॥
संकल्पेन च शीघ्रं वै कारयामास योगिना ।
विश्वकर्मप्रकर्त्रा च स्थापयामास चानलम् ॥६९॥
हवनं कारयामास दापयामास कन्यकाः ।
त्वं मुख्या चापराः कोटिकन्यका मम पत्निकाः ॥७०॥
सर्वाः प्राप्ता मया तत्र पुरुषोत्तमयोगिना ।
तव मात्रा प्रदत्तास्ता इमाः सन्त्यत्र याः स्त्रियः ॥७१॥
तव सपत्निका वर्गास्तास्ता मम पुरा स्त्रियः ।
शिवस्वामिगृहे याश्च मया काश्यां विवाहिताः ॥७२॥
तत्र कोटिस्त्रियस्ताश्च भवन्ति कन्यकास्तु ताः ।
स्मर सर्वं पुरावृत्तं लक्ष्मि ! दिव्यं चरित्रकम् ॥७३॥
अथाऽहं शीघ्रमेवैव कृत्वा वह्निं प्रदक्षिणम् ।
आसने संस्थितस्तत्र वर्धितं युगलं तदा ॥७४॥
युगलानि समस्तानि वर्धितानि शुभाशिषा ।
कुंकुमाऽक्षतपुष्पाद्यैः परिहारोऽभवत्ततः ॥७५॥
भोजनानि विचित्राणि पेयानि विविधानि च ।
उपभोग्यानि सर्वाणि त्वन्माता प्रददौ ततः ॥७६॥
सर्वे तृप्तास्तदा जाता मध्याह्नो नातिवर्तते ।
एक एव क्षणः सोऽयमभिजिन्नामनामकः ॥७७॥
वर्तते तत्र वै लक्ष्मि विनाऽर्कस्य गतिं तदा ।
अथाऽऽज्ञप्ताः पूजिताश्च देवाः सर्वे ततस्तया ॥७८॥
अपराधक्षमां याचित्वा सती देवकोटिकान् ।
प्रणम्य चोपदा दत्वा व्यसर्जयत् तदा दिवम् ॥७९॥

अहं साकं त्वया चान्याभिः सहोवास सर्वदा ।
पुरुषोत्तमपुराख्यं स्वर्गाख्यं नगरं च तत् ॥८०॥
तदा प्रसिद्धिमापन्नं समासीत् कल्पकान्तगम् ।
देवानां गतयस्तूर्णं व्यजायन्त तदा प्रिये ॥८१॥
मध्याह्नोत्तरवेला च प्रवर्तते शनैस्तदा ।
एवं चाऽहं सर्वभद्राश्रीपतिः पुरुषोत्तमः ॥८२॥
तदाऽभवं तुंगभद्रापुत्रीपतिः परेश्वरः ।
तत्र सर्वासु मे पुत्राः शतं शतं च शोभनाः ॥८३॥
पुत्रिका विंशतिर्विंशतिश्चाऽभवन् सुशोभनाः ।
कल्पायुषश्च ते सर्वे सन्तीदानीं च तेऽक्षरे ॥८४॥
धाम्नि मुक्ता मम सर्वे स्मर पश्य सुभद्रिके ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥८५॥
सत्याः प्रकार्यसिद्ध्यर्थं तदृहं न्यवसं तथा ।
भक्ता मदक्षरं साध्वि ! भक्तगृहं मम गृहम् ॥८६॥
यत्र त्वं तत्र मे वासो भवत्येव सदा प्रिये ।
तव योगेन चान्यासां मम योगो भवत्यपि ॥८७॥
दुःखहरः सुखकरः सर्वासां चाभवँस्तदा ।
ख्यातोऽभवमनादिश्रीहरिनारायणः प्रभुः ॥८८॥
त्वं च नाम्ना सर्वभद्राश्रीर्महाराजभामिनी ।
अन्याः सर्वास्तदा ख्यातिं गता वै श्रीहरिप्रियाः ॥८९॥
प्राकट्यं तत्र चैवैवं परस्य मेऽवतारिणः ।
अवताराश्च मे तत्राऽसंख्या जातास्तदा प्रिये ॥९०॥
जानाम्येतत्सर्वमेव करन्यस्तसुरत्नवत् ।
स्मर त्वं दिव्यरूपाणि चमत्काराँस्तदा कृतान् ॥९१॥
अथ रात्रौ प्रजातायामन्धकारे च संवृते ।
राक्षसा ये क्वचिच्चासन् तेषामुपद्रवोऽभवत् ॥९२॥
अनादिश्रीहरिनारायणः सोऽहं स्थलं तु तत् ।
गत्वा गत्वा हतवाँस्तान् राक्षसान् सर्वभूमितः ॥९३॥
ते चातलादिलोकेषु गता विवासिता मया ।
रक्षा कृता मानवानां हरिणा वै स्थले स्थले ॥९४॥
ऋषिभ्यस्तापसेभ्यश्चारण्यानि च वनानि च ।
गह्वराणि प्रदत्तानि निवासार्थं मया तदा ॥९५॥
गृहस्थधर्माः स्वर्गादिप्रदाः संस्थापिता मया ।
भक्तिश्च मुक्तिमार्गश्च स्थापितौ परमात्मना ॥९६॥
ह्याधवश्च तथा साङ्ख्यस्तत्र मया प्रदीक्षिताः ।
कोटिशः सर्वभद्राश्रि ! मोक्षमार्गः प्रवर्तितः ॥९७॥
मात्रे तं तुंगभद्रायै मोक्षपदं मयाऽर्पितम् ।
असंख्येभ्यो मानवेभ्यो मुक्तपदं तथाऽर्पितम् ॥९८॥
त एते मम वर्तन्ते पार्षदाः पूर्वकल्पगाः ।
तीर्थानि भूतले तत्र तदा कृतानि वै मया ॥९९॥
यज्ञमार्गास्तथा मोक्षकरास्तदा प्रवर्तिताः ।
इत्येवं मम वै सर्वभद्रे ! प्राकट्यमीरितम् ॥१००॥
पठनाच्छ्रवणादस्य स्मरणान्मम कीर्तनात् ।
भुक्तिर्मुक्तिर्भवेच्चापि मम धामगतिर्ध्रुवा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वपरसन्तानेऽक्षरात्पुरुषोत्तमस्य देवैः सह तुंगभद्रासनागृहागमः, पूजनं, ग्रहाणां गत्यर्थमभ्यर्थनम्, तुंगभद्रासनाया हरेः स्वपुत्रीग्रहणार्थं गृहजामातृतया स्थित्यर्थं प्रार्थना, हरेः स्वीकारो विवाहोत्सवो ग्रहादीनां गतिः । अनादिश्रीहरिनारायणरूपेण कृतधर्मस्थापनादीत्यादिनिरूपणनामा दशमोऽध्यायः ॥ १० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं चतुर्दशे तु वत्सरे ।
माननाख्ये वेधसो वै तत्र कल्पे च सप्तके ॥ १ ॥
पञ्चमे तु मनौ चाऽहं यथा प्राकट्यमाप्तवान् ।
तत्र वै वेधसश्चाग्रजघनस्य प्रदेशतः ॥ २ ॥
कोशस्तेनाऽभिधो नाम जज्ञे राक्षसपुंगवः ।
वेधसं भक्षितुं सोऽपि जातमात्रः समापतत् ॥ ३ ॥
ब्रह्मा प्राह अरे मूढ वृथा भक्षितुमिच्छसि ।
वद ते क्षुन्निवारार्थं ददामि वृणु मा चिरम् ॥ ४ ॥
इत्येवं बोधितश्चाश्वासितः क्षणं स्थिरीकृतः ।
कोशस्तेनो विचार्यैव समुवाच पितामहम् ॥ ५ ॥
यद्येवं मे बलार्थं वै बीजं भक्ष्यं प्रदेहि वै ।
सर्वव्यापित्वमेवाऽपि सूक्ष्माऽसंख्यकरूपिताम् ॥ ६ ॥
ब्रह्मा प्राह वृथा बीजं प्रसंभक्षय देहिनाम् ।
सर्वे त्वदभिप्रेतं च तत्राऽस्तु भव तृप्तिमान् ॥ ७ ॥
इत्युक्तो ब्रह्मपुत्रोऽसौ राक्षसो ब्रह्मणो गृहात् ।
विनिष्क्रम्य ययौ तत्र ब्रह्मचारिषु चाविशत् ॥ ८ ॥
कोशभागेषु तेषां वै प्रविश्य बीजसञ्चयम् ।
अभक्षयत् तदा ते च वैराजा ब्रह्मचारिणः ॥ ९ ॥
निर्बला अभवन् सर्वे विना कारणमुत्तमम् ।
अथ ते ज्ञातवन्तश्च निर्बलत्वे तु कारणम् ॥१०॥
समाधिना प्रवेशं वै राक्षसस्याऽजदाद् वरात् ।
ततस्ते योगपाशैश्च बबन्धुस्तं तु राक्षसम् ॥११॥

शरीरकोशेष्वेवात्र राक्षसोऽपि भयान्वितः ।
पराधीनोऽतिदीनश्च भूत्वाऽऽर्थयद्विमोचनम् ॥१२॥
नाऽहं चात्र निवत्स्यामि ब्रह्मचारिषु वै क्वचित् ।
सत्यलोकं तथा वैराजकान् लोकान् विहाय च ॥१३॥
अधोलोकान् गमिष्यामि दीनं मां मोचयन्त्वितः ।
इत्यर्थिताः शीलधर्मा वैराजा ब्रह्मचारिणः ॥१४॥
मुमुचुस्तं पाशबन्धेभ्यश्च सोऽपि द्रुतं तदा ।
विनिर्ययौ सत्यलोकात् ऋषीन् त्यक्त्वा समन्ततः ॥१५॥

पितृलोकान् तथा त्यक्त्वा स्वर्गलोकमुपाययौ ।
कोशस्तेनः समव्याप्नोद् देवदेहेषु सर्वतः ॥१६॥
वृथाबीजं हि देवानां यतोऽपत्यानि सन्ति न ।
न जायन्ते तत्र गर्भा न च शीलं प्रवर्तते ॥१७॥
भोगमात्रावसानं हि बीजं वृथा तु तन्मतम् ।
विचार्येत्थं स देवेषु प्रविश्य कोशगोऽभवत् ॥१८॥
निर्भयस्तत्र तत्रैव भक्षयामास बीजकम् ।
न जानन्त्यपि ते देवा बीजभक्षणमेव ह ॥१९॥
राक्षसः सर्वकोशेभ्यो नित्यमश्नाति बीजकम् ।
इन्द्रो नपुंसको जातो बृहस्पतिर्नपुंसकः ॥२०॥
सूर्यो नपुंसको जातश्चन्द्रः शुक्रो नपुंसकः ।
बुधश्च मंगलश्चापि शनिर्नपुंसकोऽभवत् ॥२१॥

वसवश्च तथा रुद्रा आदित्या मरुतोऽपि च ।
ईशानानागिवरुणाः कुबेरयमनिर्ऋताः ॥२२॥
वायुरश्वीकुमारौ च नपुंसकाश्च तेऽभवन् ।
निधयश्चापि ऋषयो ध्रुवः कामो मनुस्तथा ॥२३॥
साध्या देवा विश्वदेवा लोकपालगणास्तथा ।
अन्येऽपि देववर्याश्च गन्धर्वाः किन्नरास्तथा ॥२४॥
किंपुरुषाश्च दूताश्च सुरा जाता नपुंसकाः ।
कोशबीजदरक्षो वै कृतवाँस्तु नपुंसकान् ॥२५॥

स्वर्गं सर्वं तदा जातं निर्वीर्यं हि नपुंसकम् ।
निस्तेजस्कं कामशून्यं गार्हस्थ्यं विलयं गतम् ॥२६॥
देवाः शोकं परं जग्मु विसामर्थ्या विसत्त्वितः ।
कारणं मार्गयामासुर्ब्रह्माणं शरणं ययुः ॥२७॥
सर्वे निवेदयामासुर्निजां निःसत्त्वतां तदा ।
वैद्योऽप्ययं हि देवानां निःसत्त्वोऽपि व्यजायत ॥२८॥
क्व यामो विश्वसृट् चाद्यौषधार्थं सत्त्वलब्धये ।
यो हि बलप्रदाताऽस्ति सोऽपि निर्बलतां गतः ॥२९॥
कल्पवृक्षाः कल्पलता कल्पचिन्तामणिस्तथा ।
कल्पपात्राणि सर्वाणि तथा च कामधेनवः ॥३०॥

कल्पकन्याः कल्पदेवाश्चिन्तिता कल्पबुद्धिकाः ।
धातूनां लब्धये चाति तथापि निष्फलता हि ते ॥३१॥
नाऽत्र केपि प्रवर्तन्ते धातुक्षये महोल्बणे ।
अकार्यकारिणः सर्वे कल्पाभिधा भवन्ति वै ॥३२॥
तस्मात् पितामह तेऽत्र शरणं वयमागताः ।
किं कारणं कथं वा वै जाता वयं नपुंसकाः ॥३३॥
अमृतं सर्वथा भक्ष्यं जातं मृतमिवाऽपि नः ।
किं कुर्मः क्व प्रयास्यामो मरिष्यामः पितामह ॥३४॥

इत्यसत्त्वाः सर्वदेवा न्यपतत् ब्रह्मपादयोः ।
ब्रह्मा विचारयामास बीजस्तेनस्य कर्म तत् ॥३५॥
यथाबीजं सदा स्वर्गे देवानां विद्यते यतः ।
देवबीजस्य वै भक्षयिता स सफलोऽधुना ॥३६॥
वरदानप्रदानेन बीजस्तेनो जयं गतः ।
स्वर्गे विघ्नं कृतं तेन स्वर्गं चाऽस्वर्गतां गतम् ॥३७॥
सत्सु धवेषु देव्यश्च विधवा इव तत्कृताः ।
तदुपायं मार्गयामि येन रक्षः क्षयं व्रजेत् ॥३८॥
क्षणं ब्रह्मा हृदयस्थो ध्यानमग्नोऽभवत्तदा ।
हृदयेऽस्य विचारोऽभूद् विना श्रीपुरुषोत्तमम् ॥३९॥
नाऽस्य कश्चिद् विहन्ता स्याद् यतो नपुंसकाः सुराः ।
मया दत्तो वरश्चास्मै सोऽहं हन्तुं न च क्षमः ॥४०॥

तस्मान्मया सुरैः सार्धं प्रस्मर्तव्यो हरिः स्वयम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥४१॥
राजाधिराजः सर्वात्माऽन्तरात्मा परमेश्वरः ।
स एवाऽस्य बीजहस्य परं पारं नयिष्यति ॥४२॥
पितामहेन वै तूर्णं देवेभ्यो विनिवेदितम् ।
हरेः सत्रं करिष्यामः साहाय्यं स विधास्यति ॥४३॥
इत्युक्त्वा देवताव्राताः सत्यलोके तु संहताः ।
ब्रह्मसत्रं व्यधुस्तत्र ममाऽनुष्ठानतत्पराः ॥४४॥

मम भक्तिपराः सर्वे मम कीर्तनतत्पराः ।
मम पूजास्तवनादिजापध्यानपरायणाः ॥४५॥
केचिच्चक्रुः पुरश्चर्यां स्तोत्राणां मम वै तदा ।
अन्ये च हवनं चक्रुर्बृहस्पतिपुरोगमाः ॥४६॥
परे मालाजपं चक्रुश्चान्ये पूजां प्रचक्रिरे ।
तथाऽन्ये च व्यधुर्ध्यानं विदधुश्चेतरे स्मृतिम् ॥४७॥
अपरे त्वर्चनं चक्रुर्मम मूर्तेश्च वै तदा ।
एवं सर्वे देवगणाश्चक्रुराराधनां मम ॥४८॥
अनादिश्रीहरेस्तत्र सत्यलोकेऽजमन्दिरे ।
वन्दनं चक्रिरे मे ते समायाहि नरोत्तम ॥४९॥

सर्वबीजस्वरूपस्त्वं कारणानां हि कारणम् ।
सर्वशक्तिस्वरूपस्त्वं सर्वसामर्थ्यशोभनः ॥५०॥
सर्वसृष्टिप्रमूलं त्वं सर्वानन्दप्रदो भवान् ।
सर्वसत्त्वमयस्त्वं वै चान्तरात्मन् समाव्रज ॥५१॥
त्वया सर्वं युगलाख्यं रचितं परमात्मना ।
त्वया रक्ष्यं युगलाख्यं दयालुना हि शार्ङ्गिणा ॥५२॥
त्वां विना न समर्थोऽन्यो रक्षितुं चावतारिणम् ।
समायाहि निजान् त्राहि रक्ष पोषय सेवय ॥५३॥
कुर्वानन्दभृतान् देवान् शरणागतवत्सल ।
त्वमन्नं त्वं जीवनं च त्वं गर्भस्त्वमसुस्तथा ॥५४॥
त्वमेव माता जनको रक्षकः पोषकः प्रभुः ।
त्वं ब्रह्मा त्वं विराड् विष्णुर्महान् कालः पुमान्परः ॥५५॥
त्वं देवस्त्वं च नारीणां प्रियः पतिः प्रभुः परः ।
त्वं सुखस्त्वं महानन्दः समायाहि प्ररक्ष नः ॥५६॥
इत्यस्तुवन् सुरा मां च तदाऽहं च त्वया सह ।
तूर्णं सत्यं ब्रह्मवासं समाययौ हरिः स्वयम् ॥५७॥
देवानां सन्निधौ साक्षादहं तत्राऽभवं यदा ।
मया देवाः कृष्णवर्णाः सत्त्वहीना विलोकिताः ॥५८॥
यथा वै मृतका यद्वा रुग्णा वा क्षयशालिनः ।
तथा सर्वे मया दृष्टाः सुराः सूर्यादयोऽपि च ॥५९॥
मया पृष्टाः कारणं ते जगदुः सत्वहीनताम् ।
केन कृतां न जानीमो भगवँस्त्वं प्रवेत्सि तत् ॥६०॥
रक्षां कुरु हरे कृष्ण कृष्णनारायण प्रभो ।
अमृतान्मृतिमापन्नान् रक्षयाऽत्र जनार्दन ॥६१॥
अथ तत्र मयोक्तं वै मम शक्त्याऽन्वितोऽप्यहम् ।
प्रविशामि भवत्स्वेव विद्रावयामि राक्षसम् ॥६२॥
कोशस्तेनं महाक्रूरं वेधसो जाघनं सुतम् ।
इत्युक्ते मयि तत्रैव देवाः प्राञ्जलयोऽभवन् ॥६३॥
ध्यानपराः क्षणं तावत्तेष्वहं चाविशं द्रुतम् ।
त्वया साकं शिवकन्ये ! सर्वदेवेषु सर्वथा ॥६४॥
पतिदेवस्वरूपोऽहं भूत्वा संस्तभ्य राक्षसम् ।
गृहीतवान् गले तं च सूक्ष्मातिसूक्ष्मरूपिणम् ॥६५॥
राक्षसस्य स्वरूपाणि नाशितानि मया तदा ।
मूलरूपो महेन्द्रोऽपि वर्तमानो मया धृतः ॥६६॥
प्रार्थयन् जीवनार्थं स स्वर्गाद् गन्तुमरण्यकम् ।
फलपुष्पादिहीनेषु चोद्भिज्जेषु निवासनम् ॥६७॥
प्रार्थयत् स मयाऽऽदिष्टो ययौ तृणादिके तदा ।
अथ देवाः सत्त्ववन्तोऽभवँस्तत्र हि पूरुषाः ॥६८॥
सतेजस्काः प्रभावन्तो यथापूर्वाः सुदेहिनः ।
सानन्दाः सर्व एवैते जाता महोत्सवान्विताः ॥६९॥
चक्रुर्महोत्सवं स्वर्गे चेन्द्रालये हि संहिताः ।
मम मूर्तिं विधायैव स्वर्णमयीं च ते तदा ॥७०॥
लक्ष्म्या साकं प्रशृंगार्य पुपूजुर्युनिवासिनः ।
पायसानि चामृतानि नैवेद्यानि ददुश्च ते ॥७१॥
आरार्त्रिकं व्यधुः सर्वे तदाऽहं स्वेच्छया प्रभुः ।
त्वया साकं तदा लक्ष्मि ! प्रत्यक्षश्चाऽभवं हरिः ॥७२॥
शंखचक्रगदापद्मस्वस्तिकध्वजशूलवान् ।
यथाऽहं त्वक्षरे धाम्नि वर्ते तथाऽभवं शुभः ॥७३॥
स्वतन्त्रो भगवान् श्रीशः श्रीपतिः पुरुषोत्तमः ।
अपितृजश्चाऽमातृजो धृतरूपो बभूव ह ॥७४॥
अनादिश्रीबीजनारायणः सर्वेश्वरेश्वरः ।
देवैः स्थातुं सदा स्वर्गे प्रार्थितः परमेश्वरः ॥७५॥
सदा महेन्द्रभवने व्यराजं पुरुषोत्तमः ।
आकल्पान्तं त्वया साकं श्रियाऽवतारकारणम् ॥७६॥
अन्ये तथाऽवतारा मे बहवोऽप्यभवँस्तथा ।
जानाम्यहं तु तान् सर्वान् स्मर लक्ष्मि ! निजां तदा ॥७७॥
राक्षसो यस्तृणरूपः स तु कल्पान्तरे प्रिये ।
बीजस्तेना ओषधयोऽभवन् सत्त्वविनाशिकाः ॥७८॥
तानि तृणानि चाऽश्नाश्च पशवो मानवा अपि ।
पृथिव्यां पक्षिणश्चापि ये केऽप्यभक्षयन् क्षितौ ॥७९॥
ते सर्वे बीजहीनाश्च बभूवुर्वै तदा जनाः ।
अथ वै मानवे लोके दुःखं तत् पुनरेव ह ॥८०॥
सञ्जातं सर्वथा बीजहीनताख्यं च देहिषु ।
तदाऽहं मानवैश्चाऽभ्यर्थितश्चागत्य वै भुवि ॥८१॥
बीजस्तेनं राक्षसं तं जग्राह पाशबन्धने ।
सोऽपि मृत्युभयोद्विग्नस्तुष्टाव मां तु दीनवत् ॥८२॥
तदा मया कृता तस्य मर्यादा स्थानदायिना ।
ये प्रसह्य परदारागामिनो वै नरा भुवि ॥८३॥
तेषु वासो मया दत्तस्तत्र षण्ढत्वमावह ।
स्वपत्न्यै दुःखदातारो व्रतखण्डनकारिणः ॥८४॥
प्रसह्य भोगकर्तारस्तेषु षण्ढत्वमावह ।
स्वपत्न्यै तृप्त्यदातारो व्यभिचारपरायणाः ।
वृषणोच्छेदकर्तारस्तेषु षण्ढत्वमावह ॥८५॥
नार्यर्थं घातकर्तारो मन्त्रैः रतिविनाशिनः ।
गर्भस्तम्भनकर्तारः ऋतुस्तम्भनकारिणः ॥८६॥

वन्ध्यामन्त्रप्रकर्तारो गर्भस्रावप्रकारिणः ।
स्तनदुग्धविहन्तारो मूत्रस्तम्भप्रकारिणः ॥८७॥
लिंगपातप्रकर्तारो भगबन्धनकारिणः ।
पुरीषस्तंभकर्तारो दुर्भगत्वप्रकारिणः ॥८८॥
क्लीवप्रयोगकर्तारो वीर्याऽनुद्भवकारिणः ।
ये रतिद्वेषकर्तारस्तेषु षण्ढत्वमावह ॥८९॥
कामधर्मप्रसक्तानां पशूनां कामनाशकाः ।
घातकाः स्वार्थिदुष्टा ये गार्हस्थ्यनाशकारिणः ॥९०॥
तेषां तथाविधानां च षण्ढत्वं समुपाचर ।
बीजस्तेन ! भवानास्ते ब्रह्मपुत्रो हि राक्षसः ॥९१॥
आज्ञायां वर्तमानश्चेद् वर्तते तर्हि तेऽक्षयन् ।
अन्यथा तव नाशः स्यान्मा विमार्गे प्रयाहि वै ॥९२॥
अधार्मिकाणां पापानां क्षीणं धातुं प्रभक्षय ।
इत्येवं ते मया लोके मानवे चातलादिषु ॥९३॥
लोकेष्वपि प्रदत्तानि स्थानानि तेषु चाविश ।
इत्येवं वै मया लक्ष्मि ! मर्यादा रक्षसः कृता ॥९४॥
तत आरभ्य वै लोका नरा नार्यश्च सर्वथा ।
धर्मवन्तो व्रतिनश्च प्रोक्तदोषाद्यकारिणः ॥९५॥
सर्वेऽत्यन्तं सुखिनश्च बभूवुर्गृहधर्मिणः ।
अहं च मानवैश्चापि पूजितो यक्षराक्षसैः ॥९६॥
न्यवसं बहुधा भूमौ पुरुषोत्तम एव ह ।
अनादिश्रीबीजनारायणः श्रीपरमेश्वरः ॥९७॥
स्वतन्त्राश्रीश्च वै लक्ष्मि ! त्वं मया न्यवसः सह ।
इत्येवं मानवे लोकेऽवतारा मे ह्यनन्तकाः ॥९८॥
कार्यवशात्तदा जाताः सर्वे ममावतारिणः ।
अक्षराधिपतेः श्रीमन्नारायणस्य शार्ङ्गिणः ॥९९॥
श्रीमन्नारायणं मां ये पूजयिष्यन्ति भूतले ।
तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ॥१००॥
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ।
उपासितोऽत्र यैर्लोकैस्तेषां दुःखलवोऽपि न ॥१०१॥
विवाहितोऽपि यैर्लोके लक्ष्मीविवाहकर्मभिः ।
ते यास्यन्ति चतुर्वर्गसिद्धिं चाऽऽनन्दपूरणीम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसश्चतुर्दशे वत्सरे कोशस्तेनाऽभिधराक्षसकृतस्य नष्टबीजस्य स्वर्गस्य रक्षणार्थम् अनादिश्रीबीजनारायणस्य प्राकट्यं, ततो बीजस्तेनस्य निवासस्थानमर्यादाकरणं चेत्यादिनिरूपणनामैकादशोऽध्यायः ॥ ११ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं प्राकट्यं मे ततः परम् ।
वेधसो वै समाध्याख्ये पञ्चदशे तु वत्सरे ॥ १ ॥
दशमे कल्पके षष्ठे मनौ वै ब्राह्मणगृहे ।
भूतले च पर्वतस्य मेरोः पूर्वे सुधार्मिके ॥ २ ॥
वार्तिकाऽऽख्ये महाखण्डे भक्ताऽऽशापूरकोऽभवम् ।
शृणु लक्ष्मि ! वार्तखण्डे धर्मव्रतोऽभवद् द्विजः ॥ ३ ॥
ब्राह्मणो ब्रह्मवित् साक्षाद् धर्मदेवाऽवतारकः ।
षट्कर्मनिरतो नित्यं द्वात्रिंशद्गुणवाँस्तथा ॥ ४ ॥
नवधाभक्तियुक्तश्च षोडशवस्तुपूजकः ।
नित्यं त्रिषवणस्नायी क्वचित्पञ्चाग्नितापनः ॥ ५ ॥
शीलव्रतपरश्चापि तपोव्रतपरायणः ।
पञ्चयज्ञपरश्चापि सर्वसाधनशोभनः ॥ ६ ॥
साधुधर्मपरो नित्यपत्नीव्रतपरायणः ।
सतां सेवापरश्चापि पुरुषार्थपरायणः ॥ ७ ॥
आत्मनिवेदनवृत्तिः सत्त्वप्रकर्षशोभितः ।
शास्त्रज्ञः श्रुतसम्पन्नः सत्रधर्मक्रियापरः ॥ ८ ॥
एवं गुणैः सदा युक्तः परमेशप्रपूजकः ।
अथाऽभवत्तस्य पत्नी भक्तिव्रताऽभिधा सती ॥ ९ ॥
पातिव्रत्यपरा नित्यं श्रीभगवत्परायणा ।
गृहकार्यपरा चापि गृहधर्माभिशालिनी ॥१०॥
शीलव्रतोज्ज्वला साध्वी रागद्वेषविवर्जिता ।
सदा कृष्णे हरौ भक्तिमती चात्मनिवेदना ॥११॥
व्रतकर्त्री हरेः पूजाकर्त्री चातिथिपूजिका ।
कीर्तने नित्यमेवाऽभिमग्ना कार्येषु सर्वथा ॥१२॥
अन्यवाणीविहीना च नामजापपरायणा ।
स्नानशुद्धिपरा साध्वी साधुसेवापरायणा ॥१३॥
कार्ये प्रभोजने दाने व्रते कृष्णार्पणान्विता ।
दोषदृष्टिविहीना च गुणमात्राभिधारिणी ॥१४॥
प्रातर्ध्यानं करोत्येव हरेर्मे भजनं तथा ।
पूजां पाठं स्तवनं च मालाजापं निवेदनम् ॥१५॥
आरार्त्रिकं च मध्याह्ने नैवेद्यं च जलार्पणम् ।
ताम्बूलकं ततः सायं तत्तत्सेवापरायणा ॥१६॥
एवं सा कार्तिके सर्वव्रतानि प्रकरोति हि ।
माघस्नानं तथा वैशाखेऽपि दानं करोति वै ॥१७॥
परमेशे तथा पत्यौ पातिव्रत्यक्षतौ क्वचित् ।
प्रायश्चित्तं करोत्येव द्रागेव भक्तिसुन्दरी ॥१८॥

साक्षात् सा भक्तिदेवी वै यथा तथा हि वर्तते ।
भक्त्युज्ज्वला सदा चास्ते मम भक्तिसुजीवना ॥१९॥
एवं सा यौवने भावे पतिदेवात् शनैरिह ।
लोके प्राप्तवती पुत्रं शंखचक्रादिचिह्नितम् ॥२०॥
उज्ज्वलं तापशमनं दृष्टिशान्तिकरं शिशुम् ।
ललाटे तिलकं चन्द्रं बिभ्राणं च निसर्गजम् ॥२१॥
प्राप्य पुत्रं पिता चक्रे पुत्रजन्ममहोत्सवम् ।
विप्रोऽपि भगवद्भक्त्या राज्यसम्पत्प्रपूरितः ॥२२॥
महत्पुत्रोत्सवं चक्रे स्वर्णगोदानकर्मभिः ।
हीरकादिप्रदानानि रत्नान्नदानकान्यपि ॥२३॥
क्षेत्रवाटीप्रदानानि गृहदानं तथाऽकरोत् ।
धनानि च ददौ दाने पुत्रजन्ममहोत्सवे ॥२४॥
वर्षमध्ये सुसंस्कारान् सर्वांश्चक्रे यथाविधि ।
वर्षे पूर्णे जन्मदिनोत्सवं पिता चकार ह ॥२५॥
मासे त्रयोदशे पूर्णे विमानं चाम्बरात्तदा ।
समायातं हि वैकुण्ठाद् दिव्यपार्षदशोभितम् ॥२६॥
ज्वरव्याप्तं च तं बालं सेवितं रक्षितं तथा ।
मात्रा पित्रा भालितं च निन्युस्तं पार्षदा द्रुतम् ॥२७॥
दिव्यदेहो दिव्यकान्तिर्दिव्यहस्तचतुष्टयः ।
हारमुकुटसंशोभोऽभवत् शवस्य सन्निधौ ॥२८॥
क्षणं स्नेहाद् रुरोदापि माता तथा पिताऽपि च ।
बन्धुसुहृत्पार्श्ववासा रुरुदुर्मरणात्तथा ॥२९॥
पार्षदाः पुत्रपितरौ प्राहुः क्षणं निवृत्य वै ।
मा रोदनं चास्य कृते कर्तव्यं भक्तिशालिना ॥३०॥
मनुष्यजन्मसाफल्यं येनाऽऽप्तिः पादयोर्हरेः ।
प्राप्तव्यं यत् तदाप्तं वै चानेन चाऽक्षरं पदम् ॥३१॥
तस्मादस्योत्सवः कार्यः शोकः कार्यो न सर्वथा ।
बहूनां जन्मनामन्ते हरेर्भक्तिः प्रजायते ॥३२॥
बहुपुण्यप्रतापेन भक्तौ तु पितरौ तथा ।
तादृशौ पितरौ पुत्रमोक्षदौ स्थोऽत्र भूतले ॥३३॥
ताभ्यां जन्म समासाद्य प्रयात्ययं हि मोक्षणम् ।
मायायां पतने शोको मोक्षणे शोचनं न वै ॥३४॥
पुत्रो भूत्वा समायाच्चेद् भगवत्पदमुत्तमम् ।
लाभश्चेतादृशो नान्यः पित्रोर्मोक्षप्रदो हि सः ॥३५॥
यो वै जन्म समासाद्य याति जनार्दनालयम् ।
पितरौ तारितौ तेन तरता भवसागरम् ॥३६॥
स पुत्रः पुत्र एवाऽस्ति तार्यते तरति स्वयम् ।
न स पुत्रो मतो यश्च निमज्जयति मज्जति ॥३७॥
तस्मादेनं समादाय यास्यामो भगवत्पदम् ।
भगवत्कृपया साध्यं सर्वस्य भगवत्पदम् ॥३८॥
इत्युक्ता पार्षदैः साध्वी भक्तिव्रता जगाद तान् ।
कथं बाल्ये तनु त्यक्त्वा प्रयात्ययं वदन्तु मे ॥३९॥
श्रुत्वा वै पार्षदाश्चाहुः शृणु सौभाग्यसुन्दरि ! ।
योगभ्रष्टा योगिनो वै जायन्ते भक्तमन्दिरे ॥४०॥
पूर्वदेहस्य वै त्यागसमयो वासनाबलात् ।
पुनर्जन्मधारणं वै जायते भक्तिमद्गृहे ॥४१॥
धने वाञ्छा पृथिव्यां वा क्षेत्रेऽम्बरे च भोजने ।
पाने याने जीवने वा नार्यां पुत्रे च मन्दिरे ॥४२॥
पुत्र्यां पत्यौ जने बन्धौ भृत्ये दासे सुहृज्जने ।
विद्यायां वा कलायां वा कीर्तौ शत्रौ सुखे कुले ॥४३॥
विरक्तौ वापि संसक्तौ कामे लोभे विनाशने ।
कलहे चापि वा वैरे रूपे रसे विहारके ॥४४॥
देशे ग्रामे स्वर्गसुखे गन्धे स्पर्शे श्रवस्यपि ।
भोगे रोगे तथा राज्ये सम्पत्तौ वा प्रधानके ॥४५॥
धिष्ण्येऽधिकारे माने वा गुरुतायां च पूजने ।
यादृशी वासना यस्य तत्र जन्तुः प्रजायते ॥४६॥
भजने श्रीहरेः प्रसादने सेवादिकर्मसु ।
जनन्यां जनके वापि देवे गुरौ च साधुषु ॥४७॥
यादृशी भावना यस्य तदर्थं तत्र जायते ।
पुत्रस्तेऽयं हरेर्भक्तः पूर्वजन्मनि सेवकः ॥४८॥
सतां सेवापरश्चापि देवसेवापरायणः ।
आसीद् विप्रो वैष्णवश्च शिष्यो धर्मव्रतस्य च ॥४९॥
प्राप्तेऽस्य निधने जातः शोकस्तं शृणु सुन्दरि ! ।
गुरुं ज्ञानप्रदं त्यक्त्वा प्रयामि मरणं गतः ॥५०॥
धर्मव्रतं परित्यज्य क्व गमिष्यामि चाधुना ।
तावत्प्राणा वियुक्ताश्च तव जाठरमाश्रिताः ॥५१॥
पुत्रोऽयं तव जातोऽस्ति प्राज्ञायनो महानृषिः ।
स च जन्म समागृह्य जातिस्मरो हि वर्तते ॥५२॥
सर्वं विलीय चात्रैव प्रयाति धाम चाक्षरम् ।
तव गृहे धृतं जन्म पावनं भगवत्प्रदम् ॥५३॥
प्रसादो भक्षितोऽनेन पावनोऽयं प्रवर्तते ।
क्षीणोऽस्याऽपीह संकल्पो रागद्वेषमयोऽपि च ॥५४॥
भक्तोऽयं पावनश्चास्ते धाम प्रयाति शार्ङ्गिणः ।
योगभ्रष्टाः प्रजायन्ते स्वल्पायुषो हि बालकाः ॥५५॥
भक्तानां मुक्तनारीणां चापत्यानि भवन्ति ते ।
वर्षे वर्षद्वये वापि कृत्वा संकल्पपूर्तिकाम् ॥५६॥

अवशेषं विधायैव पूर्णं यान्ति परं पदम् ।
एवं प्राज्ञायनो विप्रस्तव पुत्रो व्यजायत ॥५७॥
पूर्णं कृत्वा निजं भावं वैकुण्ठं सम्प्रयाति ह ।
शंखचक्रादिचिह्नोऽसौ याति धाम हरेः शुभम् ॥५८॥
अभयं तत्पदं याति मा शुचो भक्तिवृत्तिके ! ।
सर्वदानान्यभयस्य कलां नार्हन्ति षोडशीम् ॥५९॥

इत्युक्त्वा पार्षदा नत्वा मातरं भक्तिवृत्तिकाम् ।
पितरं धर्मव्रतकं नत्वा वैकुण्ठमाययुः ॥६०॥
पितरौ शोकविगतौ धर्मभक्तिपरायणौ ।
प्रसन्नौ मुक्तिलाभेन तौ सुतस्य व्यजायताम् ॥६१॥
अथ कालान्तरे जातः पुत्रस्तयोर्द्वितीयकः ।
सोऽपि वर्षद्वये याते तथैव निधनं गतः ॥६२॥
पार्षदाश्चाययुस्तं च नेतुं विमानसंस्थिताः ।
तथैव शोकं व्यनुदन् पित्रोः पुनस्तथैव ते ॥६३॥
अथ कालान्तरे जातस्तयोः पुत्रस्तृतीयकः ।
सोऽपि वर्षद्वये याते तथैव निधनं गतः ॥६४॥

चतुर्थोऽपि पंचमोऽपि वर्षत्रयाऽन्तरे तथा ।
एवं तेषामनुजाश्च दशोत्तरशतं मृताः ॥६५॥
त्रिशतेषु वत्सरेषु बालकाः सर्व एव ते ।
मृताश्च पार्षदैर्नीताः सर्वे पदं हरेर्हि ते ॥६६॥
लोका अज्ञाः प्रवदन्ति पापफलं सवासनाः ।
भक्ता विज्ञाः प्रवदन्ति पुण्यं हरेः कृपा हि सा ॥६७॥
यत्कुक्षौ जन्म चासाद्य परंधाम प्रयान्ति यत् ।
साधुतुल्या स्थितिः पित्रोर्मोक्षदत्वं हि देहिनाम् ॥६८॥

यद्गृहे जन्म सम्पाद्य मोक्षद्वारमपावृतम् ।
तद्गृहं तत्पितरौ च दिव्यौ स्तः श्रीनरायणौ ॥६९॥
पुत्राणां मोक्षणं वीक्ष्य पितरौ मोदमाप्नुतः ।
परं लोकव्यवहारे निम्नता दृश्यते यतः ॥७०॥
भक्तिव्रता धर्मपत्नी वाञ्छां चक्रे सुतार्थिनी ।
एकपुत्रो दीर्घजीवी भवेन्मे चेति पूजने ॥७१॥
सदैवं चार्थयत् पुष्पाञ्जल्यन्ते भक्तिवृत्तिका ।
मयोक्तं च तथाऽस्त्वेवं दीर्घजीवी भविष्यति ॥७२॥

सुतस्ते त्वेकादशश्च द्वादशोऽहं हरिस्तथा ।
इत्युक्त्वा विररामाऽहं सा तु प्राह निजं पतिम् ॥७३॥
मुदितौ दम्पती जातौ ततो वर्षान्तरेऽग्रजः ।
मम भ्राता तत्र जातः संकर्षणो जनार्दनः ॥७४॥
वर्षद्वयोत्तरे चाऽहं श्रीमत्कृष्णनरायणः ।
अभवं तत्र देवानां पुष्पवृष्टिर्बभूव ह ॥७५॥

पितरौ नन्दितौ जातौ प्रसन्नौ सुखभागिनौ ।
अथ लक्ष्मि ! त्वया चापि स्वावतारः समीहितः ॥७६॥
ममाऽऽज्ञां सम्प्रगृह्यैव देवीव्रतां हि मातरम् ।
देवव्रतं च पितरं विप्रं धर्मपरायणम् ॥७७॥
पवित्रं सर्ववेदानां ज्ञातारं ब्रह्मवेदिनम् ।
परब्रह्मपरं दास्ये वर्तमानं हरेः सदा ॥७८॥

भजन्तं मां यज्ञनारायणं सर्वात्मदर्शिनम् ।
समाविश्य पूर्वजन्मयोगिनं शुद्धसद्व्रतम् ॥७९॥
त्वं तत्र सर्वचिह्नाढ्या लक्ष्मीः स्वयं व्यजायथाः ।
तदा पुष्पादिवृष्टिश्चाऽम्बराद् बभूव सर्वतः ॥८०॥
देवदुन्दुभयो नेदुः सुराण्यस्त्वामपूपुजन् ।
त्वं वै यज्ञोपवीतादिसर्वसंस्कारशोभना ॥८१॥
विवाहयोग्या ह्यभवश्चक्रिषे मद्व्रतं तदा ।
कान्तप्रयोव्रतं रम्यं सर्वसौभाग्यदं शुभम् ॥८२॥
मया स्वप्ने तु ते मात्रे पित्रे च दर्शनं निजम् ।
वरयान्या च सहितं दत्वोक्तं देहि मे सुताम् ॥८३॥

पितरौ ते जाग्रतौ च मत्वा स्वप्नं यथार्थकम् ।
आहूय मे प्रदत्ता त्वं विधिना वह्निसाक्षिणा ॥८४॥
जयालक्ष्मीं तदा नाम्ना देवव्रतस्य पुत्रिकाम् ।
अनादिश्रीवरनारायणोऽहं परिणीतवान् ॥८५॥
देवानां च महर्षीणां समाजोऽभूत्तदा महान् ।
महोत्सवस्तदाऽभूच्च सर्वत्र भूतले दिवि ॥८६॥
संकर्षणो मम भ्राता तत्रैव ज्येष्ठिकां सुताम् ।
देवव्रतस्य वै पुत्रीं सरोजिनीमुवाह च ॥८७॥

विवाहे तत्र सम्पन्ने पितरौ शोभनौ तव ।
यौतकं ददतुः श्रेष्ठममूल्यं रत्नहीरकम् ॥८८॥
गजानश्वान् गोवृषभान् क्षेत्रं विमानमुत्तमम् ।
वाटिकां दासदासीश्च धनानि कनकानि च ॥८९॥
स्वर्णपात्राणि बहूनि भूषाऽम्बराणि चापि वै ।
अथाऽहं मद्गृहं यातः सर्वं नीत्वा सुखास्पदम् ॥९०॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
परब्रह्माऽक्षरातीतः परमेशः सनातनः ॥९१॥

आकल्पान्तं त्वया साकमहं तत्राऽभवँस्तदा ।
संकर्षणोऽपि मे भ्राता विजयाख्यश्रियाऽन्वितः ॥९२॥
आकल्पान्तमतिष्ठद्वै भूतले धर्मरक्षकः ।
स्मर लक्ष्मि ! तव जन्म मम जन्माऽपि वै तदा ॥९३॥
अहं वेद्मि न चान्ये वै कालह्रासेन कर्षिताः ।
अन्ये तथाऽवतारा मे सहस्रायुतकोटयः ॥९४॥

तत्र वर्षे मम जाता मोक्षदाः सुखदाः शुभाः ।
इत्येतत् कथितं सर्वं प्राकट्यं मम वै तदा ॥९५॥
स्मरणाच्छ्रवणाच्चापि मननान्मोक्षदं हि यत् ।
अपुत्रो लभते पुत्रं निर्धनो धनवान् भवेत् ॥९६॥
दुःखिनां दुःखनाशः स्यात् सिद्धिं लभेत् प्रपाठकः ।
वंशो भवेत् प्रभक्तश्च भार्यां पतिं च विन्दते ॥९७॥
राज्यं स्वर्गं समृद्धिं च वाचको लभते ध्रुवाम् ।
मम भक्तिप्रकर्तॄणां मायालेपो न जायते ॥९८॥
न वापि पतनं लक्ष्मि ! सर्वदाऽभ्युदयो भवेत् ।
भुक्तिर्मुक्तिर्भवेच्चापि लभेद्वै शाश्वतं सुखम् ॥९९॥
सर्वयज्ञफलं चापि सर्वतीर्थफलं लभेत् ।
साधुसेवाफलं चापि पातिव्रत्यफलं लभेत् ॥१००॥
सर्वपूजाफलं चापि सर्वव्रतफलानि च ।
सर्वदानफलं चापि श्रवणादस्य संलभेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः पञ्चदशे वत्सरे धर्मव्रतविग्रहे दशाऽधिकशतपुत्र-मोक्षोत्तरं साग्रजस्याऽनादिश्रीवरनारायणस्य प्राकट्य-मित्यादिनिरूपणनामा द्वादशोऽध्यायः ॥ १२ ॥

### श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि ! ततश्चापि प्रज्ञाताख्ये तु षोडशे ।
वेधसो वत्सरे चैकादशे तु कल्पके तथा ॥ १ ॥
नवमे च मनौ तत्र प्राकट्यं तु यथा मम ।
पृथ्व्यामासीत्तदा धर्मो ब्रह्मकुमारयोगिनः ॥ २ ॥
ब्रह्मणश्चाऽभवत्पुत्रो ब्रह्मकुमारसंज्ञकः ।
आबाल्याद् ब्रह्मचार्येव सत्यलोके पुराऽभवत् ॥ ३ ॥
तस्य शिष्या नैष्ठिकाश्च सत्यलोकेऽभवंस्तदा ।
स्वर्गे पृथ्व्यां विचरन्ति स्मोपदेशपरायणाः ॥ ४ ॥
आर्षकुमारसंज्ञश्च शिष्यः पृथ्व्यामुपादिशत् ।
मनुष्येभ्यः शीलधर्मं नैष्ठिकं ब्रह्मचर्यकम् ॥ ५ ॥
नरा नार्यश्च ये देहधारिणः पुण्यशालिनः ।
पापा वा ब्रह्मचर्यस्था वर्तन्ते नैष्ठिका यदि ॥ ६ ॥
ते तु मुक्ता भवन्त्येव मायापाशविवर्जिताः ।
ब्रह्मचर्यं कामदाहः कामजयो हि देहिना ॥ ७ ॥
शीलव्रतेन कर्तव्यो मोक्षदं साधनं परम् ।
नार्या चाऽक्षतया स्थेयं नरेणाऽस्खलितेन च ॥ ८ ॥
एवं शीलव्रतिनाऽत्र भाव्यमाजीवनं सदा ।
ब्रह्मचर्यं ब्रह्मरूपं परब्रह्माप्तिकारणम् ॥ ९ ॥
परब्रह्मणि सम्प्राप्ते ऋणं पापं न विद्यते ।
अशुद्धिस्तत्र नास्त्येव साध्व्यां साधौ च नैष्ठिके ॥१०॥
ब्रह्मचर्यं महादीक्षा ब्रह्मचर्यं परं बलम् ।
ब्रह्मचर्यं मोक्षमार्गो ब्रह्मचर्यं परं पदम् ॥११॥
यज्ञदानव्रतां लोके जन्मानि तु बहून्यपि ।
जायन्ते च ततो ब्रह्मव्रतेन मोक्षणं भवेत् ॥१२॥
ब्रह्मव्रतस्य मोक्षः स्यादेकेनैव तु जन्मना ।
ब्रह्मव्रतस्य तु सदा प्रसन्नः परमेश्वरः ॥१३॥
अग्नयो देवताद्याश्चाऽभियन्ति ब्रह्मचारिणः ।
अव्याहता गतिर्मोक्षेऽन्यत्राऽपि ब्रह्मचारिणः ॥१४॥
ब्रह्मचारी महापापान् पवित्रयति तत्क्षणात् ।
ब्रह्मचारिस्नातवारि पिबन्ति पितरोऽपि च ॥१५॥
ब्रह्मचारी स्वयं देवो देवता ब्रह्मचारिणी ।
हर्येशा अवतारा वै ब्रह्मचर्यपरा जनाः ॥१६॥
ब्रह्मचारिप्रसंगेन ब्रह्मभूया भवन्ति वै ।
दर्शनं स्पर्शनं चापि वन्दनं सेवनादिकम् ॥१७॥
पादजलं माननं च स्वागतं भोजनादिकम् ।
तत्क्षणात् पावयत्येव कृतं यद् ब्रह्मचारिणः ॥१८॥
गुरवो बहवो लोके ज्ञानदाः शुष्कयत्निनः ।
गुरवः शीलयुक्ता ये सत्यास्ते तारकाः पराः ॥१९॥
नारी शीलव्रता साक्षाद् बोध्या नारायणी सती ।
नरः शीलव्रती साक्षाद् बोध्यो नारायणः प्रभुः ॥२०॥
एवमार्षकुमारेण सम्प्रदायो हि नैष्ठिकः ।
आसीत्पृथ्व्यां तदानीं वै स्थापितो ब्रह्मचारिणः ॥२१॥
कोटिशो वै नरा नार्यो ब्रह्मचर्यपरायणाः ।
नैष्ठिकाश्च बभूवुर्वै तदा पृथङ्निवासिनः ॥२२॥
साध्व्यः पृथङ्निवसन्ति स्त्रीणामेवाऽऽश्रमेषु ताः ।
नराः पृथङ् निवसन्ति नराणामाश्रमेषु ते ॥२३॥
परस्पराश्रमान्नैव प्रविशन्ति स्त्रियो नराः ।
परस्परं न स्पृशन्ति नरान्नारीश्च शीलिनः ॥२४॥
शृणु त्वं शिवराज्ञि ! त्वेवं शीलप्रतापिनाम् ।
देवाश्च पितरश्चापि दर्शनार्थं प्रयान्ति हि ॥२५॥
ब्रह्मशीलाश्च ताः साध्व्यः प्रकाशन्ते च चन्द्रवत् ।
सूर्यवच्च प्रकाशन्ते तेजोभिः शीलजैस्तदा ॥२६॥
एवं तेजोमयान् देहान् दृष्ट्वा देवा नरास्तथा ।
दूराद्आश्रमतोऽप्येवाऽम्बराद् वा च वनादपि ॥२७॥
मोहं प्रयान्ति बहवः सतीषु धैर्यवर्जिताः ।
अथ दैत्या दानवाश्च राक्षसाश्च सुरा नराः ! ॥२८॥

मानवा नृपवर्गाश्च सत्तावन्तो नरा अपि ।
सतीवर्गान् ब्रह्ममग्नान् ब्रह्मशीलान् स्थले स्थले ॥२९॥
वनेऽरण्ये नदीतीरे विलोक्य तीर्थवासगान् ।
मुग्धा मोहं परं गत्वा चक्रुर्वै धर्षणं क्वचित् ॥३०॥
उद्धता नियमं भंक्त्वा प्रविशन्त्याश्रमाँस्तथा ।
शीलसाध्वीर्धर्षयन्ति चापहरन्ति वाऽऽश्रमात् ॥३१॥
ब्रह्मव्रतात् पातयन्ति ह्यसुरा नृपिशाचकाः ।
नृपाश्च नृपभृत्याश्च स्तेनाश्च योधिनस्तथा ॥३२॥

प्रसह्याऽऽविश्याऽऽश्रमाँश्च भ्रंशयन्ति सतीः व्रतात् ।
एवं वै बहुधा जाते त्वेकदा शुक्रकोऽसुरः ॥३३॥
दैत्यैः सार्कं समायातो मन्दाकिन्यास्तटे तदा ।
आश्रमे तत्र वै ब्रह्मचारिणीनां सुरक्षिते ॥३४॥
व्योममार्गेण सहसाऽवतीर्णो योगिनीगणे ।
नार्यश्चाश्रमवासिन्यो ब्रह्मचर्यपरायणाः ॥३५॥
सशुक्रकाँस्तदा दैत्यान् विलोक्य दुद्रुवुर्भयात् ।
इतस्ततोऽप्यधावँश्चाश्रमवृक्षेषु भीवशाः ॥३६॥
साध्व्यस्त्रासं ययुस्तत्र धर्षिता व्रतखण्डिताः ।
तत्र चैकाऽभवत् साध्वी नाम्ना सुदर्शिनी सती ॥३७॥

अखण्डिताऽक्षता ब्रह्मचर्यपरोर्ध्वराजसी ।
वाक्सिद्धा दिव्यरूपा च कल्पलतेव योगिनी ॥३८॥
चमत्कारपरा वाचा सर्वभस्मविधायिनी ।
सूर्योज्ज्वला सुपुष्टा च युवती ब्रह्मचारिणी ॥३९॥
अग्निः सूर्यस्तथा वायुः यत्स्पर्शे भयमेति च ।
तां वृक्षाधो ध्यानमग्नां ब्रह्मलग्नामवस्थिताम् ॥४०॥
विलोक्य शुक्रकः शीघ्रं धर्षितुं समुपागतः ।
स्प्रष्टवाँस्तां बलाद् यावत् तावत् साध्वी विलोक्य तम् ॥४१॥

शशाप व्रतविघ्नोऽसौ भस्मीभवतु तत्क्षणम् ।
शुक्रको दैत्यपूज्योऽपि तत्क्षणाद् भस्मतां गतः ॥४२॥
अथाऽन्या ब्रह्मचारिण्यो न्यवेदयन् व्रतक्षतिम् ।
तदा क्रुद्धा पुनः साध्वी सुदर्शनी शशाप ह ॥४३॥
अद्यावधि सतीनां ये प्रधर्षणप्रकारिणः ।
भूतले वा तथा स्वर्गेऽन्यत्र ये संवसन्त्यपि ॥४४॥

तत्र ते द्रुतमेवाऽद्य भवन्तु भस्मसात् क्षणात् ।
इत्युक्त्वा सा सती हस्तगतं वारि मुमोच ह ॥४५॥
तावत् सर्वे ब्रह्मव्रतविनाशकास्तु येऽभवन् ।
यत्र यत्र तु लोकेषु दग्धास्तत्र च तत्र च ॥४६॥
अथापि रोषमापन्ना सुदर्शनी महासती ।
विचारमकरोत् तत्र नरेभ्यो विघ्नशान्तये ॥४७॥

नराः पृथ्व्यां समागत्य स्वर्गादिलोकवासिनः ।
प्रधर्षयन्ति ये साध्वीः प्रधर्षणेच्छुका अपि ॥४८॥
नार्यो भवन्तु ते चात्र सर्वदा न नराः पुनः ।
ये तु भूतलवासाश्च नरा नृपादयोऽपि च ॥४९॥
धर्षयन्ति सतीः साध्वीर्बलात् तेऽपि सदा भुवि ।
नार्यो भवन्तु सततं न वै ते तु नराः पुनः ॥५०॥
पृथिव्यां नरवर्गोऽयं मानवो व्रतभंगकृत् ।
मास्तु सर्वे भवन्त्वेव नार्यो मा सन्तु ते नराः ॥५१॥

बालका अपि वृद्धा वा युवानो वा नरा जनाः ।
सर्वे भवन्तु नार्यो वै सतीव्रतभयाऽप्रदाः ॥५२॥
इत्युक्त्वा हस्तगं वारि मुमोच सा सुदर्शिनी ।
तावत् सत्याः प्रभावाद्वै भूलोकोऽयं समन्ततः ॥५३॥
नारीमात्रोऽभवत्तूर्णं नराः सर्वे स्त्रियोऽभवन् ।
एकोऽपि मानवो वर्गो नररूपो न शिष्यते ॥५४॥
बालकाः कन्यकारूपा वृद्धा वृद्धस्त्रियोऽभवन् ।
युवानश्च युवत्यो वै तदाऽभवन् गृहे गृहे ॥५५॥
नगरे नगरे खण्डे खण्डे चावार्धि सर्वथा ।
नौकास्वपि स्थिता नार्योऽभवँस्तदा प्रवासिनः ॥५६॥

हाहाकारो महानासीदाश्चर्यं परमं च तत् ।
चतुर्दशसु लोकेषु पृथ्व्यां तत्तु विशेषतः ॥५७॥
सर्वे नराः प्रपश्यन्ति निजचिह्नानि वै रहः ।
देहांगानां विवृत्तिं वै नारीचिह्नमयीं तदा ॥५८॥
लज्जामवापुः परमां मुखं न दर्शयन्ति ते ।
अश्मश्रुलाः सकेशाश्च सस्तनाः सभगास्तथा ॥५९॥
सर्वे नरा अभवँश्च क्षितौ नारीस्वरूपिणः ।
जातिस्मराश्च ते सर्वेऽवापुर्दुःखं परं तदा ॥६०॥

अन्यलोकेषु दैत्याद्याः स्वस्वबान्धवमण्डले ।
परां लज्जामवापुश्च ययुस्ते हास्यतां तदा ॥६१॥
सुरा अपि तथाकार्या विघ्नकर्तार एव ते ।
स्त्रीरूपा अभवँश्चापि देवेषु हास्यतां गताः ॥६२॥
स्वस्वपत्नीसन्निधौ ते चावमानं गतास्तदा ।
धिक्कारतां गताश्चापि शीलधर्षणकारिणः ॥६३॥

चमत्कारो महाञ्जातस्त्रिलोक्यां नरयोषिताम् ।
नरा नैव हि विद्यन्ते भूतले कोपपात्रकाः ॥६४॥
नारीराज्यं समस्तं वै भूतलं सर्वतोऽभवत् ।
नारीप्रजात्मकं सर्वं भूतलं वै तदाऽभवत् ॥६५॥
अथ वै वेधसः पुत्रः कामदेवो नरोऽपि च ।
नारीरूपस्तदा जातः साध्वीदेहस्थितो हि यः ॥६६॥

स च पत्नीं रतिं प्रीतिं त्यक्त्वा नारीस्वरूपवान् ।
सत्यलोकं ययौ तूर्णं पश्यन् स्वर्गेऽपि सदृशीम् ॥६७॥
नार्यापत्तिमयीं देवस्थितिं सत्येऽपि तादृशीम् ।
शुक्रस्य दग्धतां चापि शुश्राव तत्र वै पथि ॥६८॥
सुदर्शन्याः प्रकोपस्य कारणं सर्वसृष्टिषु ।
धर्षणं च सतीनां यत् तन्मूलं नरनाशनम् ॥६९॥
स्थले स्थले तथा सर्वलोके वार्ता च साऽभवत् ।
सुदर्शिन्या महाकोपान्नरा नार्योऽभवन् भुवि ॥७०॥
कामदेवो ब्रह्मणे तु गत्वा सभाजनेषु वै ।
ब्रह्मकुमारकायाऽपि न्यवेदयद् यथायथम् ॥७१॥
स्त्रीरूपं चाऽप्यनङ्गं च वीक्ष्यते जहसुस्तदा ।
आश्चर्यचकिताः सर्वेऽप्यहो सत्या बलं त्विति ॥७२॥
ब्रह्मचर्यबलं श्रेष्ठं बलेभ्यो बलवत्तमम् ।
ब्रह्मचर्याद्बलं श्रेष्ठं समं वाऽन्यन्न विद्यते ॥७३॥
साधनानि समस्तानि समस्तानि तपांसि च ।
व्रतान्यपि समस्तानि तिष्ठन्ति ब्रह्मचर्यके ॥७४॥
मोक्षस्य साधनं चैतद् रक्षायाः साधनं परम् ।
ऐश्वर्यसाधनं श्रेष्ठं ब्रह्मचर्यं विशिष्यते ॥७५॥
अथ नारायणीश्रि ! त्वं शृणु पश्चात् स्त्रियो भुवि ।
विना पतिं च ताः सर्वा ममाराधनमाव्यधुः ॥७६॥
दुःखिताः प्रमदाः सर्वा गर्भवत्योऽपि बालिकाः ।
असूयन्त न वै बालान् ततश्चाऽभ्यधिदुःखिताः ॥७७॥
वंशबीजानि नष्टानि कथं कुलप्रवाहणम् ।
भविष्यतीति ताः सर्वा जातिस्मरा नरास्तथा ॥७८॥
मां समाराधयामासुः श्रीहरिं पुरुषोत्तमम् ।
एतादृशस्य शापस्य वारयिता न चापरः ॥७९॥
सुरा अपि तथा प्राहुर्विना मां पुरुषोत्तमम् ।
ततो ब्रह्मा हरश्चापि तथा प्राहतुरेव ह ॥८०॥
विना नारायणं ब्रह्मपरं श्रीपरमेश्वरम् ।
नास्य शापस्य शान्तेस्तु कर्ताऽन्यो विद्यते प्रभुः ॥८१॥
भक्ताया ब्रह्मचारिण्याः सत्याः शापो दुरन्तकः ।
नित्यनैष्ठिकधर्मात्मा समर्थोऽत्र पुमुत्तमः ॥८२॥
इति निर्णीय सर्वेषु लोकेषु प्रमदागणाः ।
भक्त्या चाराधयामासुर्मां हरिं पुरुषोत्तमम् ॥८३॥
स्त्रीराज्यं केवलं भूमौ स्त्रीप्रजाः सन्ति तास्तथा ।
ये चागच्छन्ति वा भूमौ ते भवन्ति हि योषितः ॥८४॥
ते सर्वे वै प्रचक्रुश्च भक्त्या त्वाराधनं मम ।
शतवर्षाणि वै भूमौ स्त्रीसृष्टिरेव केवला ॥८५॥
न वा सृष्टिर्न जाता च प्राचीना वर्तते हि सा ।
चतुर्दशनिवासाश्च स्त्रीभावभयतस्तदा ॥८६॥
पृथ्व्यां केऽपि नचाऽऽयान्ति पूजायामपि देवताः ।
गणेशो न समायाति नायान्ति ऋषयोऽपि तु ॥८७॥
पूजने च व्रतोद्याने सुरा नायान्ति वै भयात् ।
शापोऽयं दारुणश्चाति विष्णुश्चापि बिभेति यत् ॥८८॥
नारीभवनभीत्या तु ब्रह्मा नायाति वै तथा ।
ब्रह्मकुमारकश्चापि नायाति पृथिवीं तदा ॥८९॥
सतीशापनिवारार्थं केऽपि नायान्ति वै सुराः ।
ये चायान्ति प्रजायन्ते भूतले प्रमदा हि ताः ॥९०॥
एवं रोधो महाञ्जातोऽसह्यस्त्रीभवनात्मकः ।
अज्ञाता ये समायान्ति तेऽपि स्त्रियो भवन्ति यत् ॥९१॥
नारीवर्गान्मृतान्नेतुं येऽपि विष्णोस्तु पार्षदाः ।
यमदूताश्च वा भूमावागतास्ते स्त्रियोऽभवन् ॥९२॥
एवं ते पार्षदा गत्वा स्त्रीस्वरूपा हरेः पुरः ।
आश्चर्यकारिणो जाताः शापः सत्या दुरासदः ॥९३॥
यमदूताः स्त्रियो भूत्वा हास्यभावमुपागताः ।
परलोकेऽपि नेतॄणामागमो तेन रोधितः ॥९४॥
मुक्ता अपि तथा दूता अपि भवन्ति वै स्त्रियः ।
का कथा तत्र चान्येषां मृत्युर्नायाति तद्भयात् ॥९५॥
मरणं जायते नैवायुष्यक्षयेऽपि वै तदा ।
अमृता पृथिवी जाता नारी वैकुण्ठसदृशी ॥९६॥
अहो सामर्थ्यमेवाऽत्र ब्रह्मचारिवलस्य वै ।
अन्यथाकर्तृता नारायणस्येव तदाऽभवत् ॥९७॥
कालो नारीभावभयान्नायाति वै क्षितौ तदा ।
पुंवर्गो वै न चायाति सतीशापभयाद् भुवि ॥९८॥
अथाऽहं श्रीहरिश्चापि स्त्रीभिश्चाराधितस्तदा ।
नारीरूपभयाद् भूमावागन्तुं नेष्टवाँस्तदा ॥९९॥
किन्त्वविचार्यं धाम्नि कलया शापवारणम् ।
कर्तव्यमिति धाम्नैव नार्मी भूत्वा समाययौ ॥१००॥
दिव्या दिव्यस्वरूपा च दिव्यमुक्ताश्च पार्षदाः ।
सर्वे नारीस्वरूपा च भूत्वा भुवं समागताः ॥१०१॥
हसन्त्यो वै वयं सर्वा लक्ष्म्यादिभिः सुनर्मिताः ।
परस्परं प्रमोदिन्यः सर्वा वयं त्वया सह ॥१०२॥
आयाता भूतलं रम्यं यत्र सुदर्शनी सती ।
देवाश्च ऋषयश्चापि मुक्ताश्चान्ये तथाऽपरे ॥१०३॥
कुतूहलभृताः सर्वे भूत्वा नार्यस्ततो हि ते ।
द्रष्टुं समागताः सर्वाः सुरा भूत्वा च योषितः ॥१०४॥

नारीब्रह्माण्डकश्चायं समुत्सवो जगत्त्रये ।
अव्याप्नोत् सर्वथा कर्णाकर्णीभावेन सर्वतः ॥१०५॥
परस्परं प्रपश्यन्ति नार्यो नारीर्नराः पुरा ।
जातिस्मराश्च ते सर्वे प्रमोदन्ते हसन्त्यपि ॥१०६॥
श्रीकृष्णोऽपि समायातो गोलकाद् राधया सह ।
सोऽपि राधासखी जाता राधिका वै द्वितीयका ॥१०७॥
नारायणोऽपि वैकुण्ठाल्लक्ष्म्या साकं समाययौ ।
सोऽपि नारायणी जाता लक्ष्मीसखी सुशोभिता ॥१०८॥
नरनारायणश्चापि नरी नारायणी तदा ।
अभवतां भुवि नार्यौ तापस्यौ शोभिते तदा ॥१०९॥
शंकरः शांकरी जाता सत्या तत्र विलोकिता ।
एवमन्ये च ये तत्र समायाताः कुतूहलात् ॥११०॥
सर्वे नार्यः समभवन् महाखेलोऽभवद्धि सः ।
परस्परं प्रपश्यन्ति स्पृशन्ति स्त्रीस्वभाववत् ॥१११॥
हसन्ति च प्रमोदन्ते स्त्रीकृतं हि स्त्रिया जगत् ।
नारायणं चकारैषा नारायणीं सुदर्शनी ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः षोडशो वत्सरे आर्षकुमारशिष्यया ब्रह्मचारिण्या सुदर्शन्या स्वप्रधर्षणकारिणां शुक्रादीनां दोषेण तथा भूलोकनरादीनां शापद्वारा स्त्रीकरणमित्यादि-निरूपणनामा त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीपुरुषोत्तम उवाच—

एवं नारायणीश्रि ! स्वसदृशं च परेश्वरम् ।
स्त्रीभूतं समलोक्यैवाऽऽश्चर्यं नार्यो गतास्तदा ॥ १ ॥
दृष्ट्वा नारायणीद्वन्द्वं राधाद्वन्द्वं समानकम् ।
सेवाऽर्हं स्पृश्यमेवापि सिषेविरे सतीस्त्रियः ॥ २ ॥
सर्वास्ता ब्रह्मचारिण्यस्तत्रोत्सवे हरिं स्त्रियम् ।
सर्वभावैर्योग्यसेवाप्रकारैर्वै सिषेविरे ॥ ३ ॥
समायाताः स्त्रियः सर्वा नरपूर्वाः समन्ततः ।
समाजश्चाऽभवन्मन्दाकिन्यास्तीरे ह्यसंख्यकः ॥ ४ ॥
स्त्रीसमाजे स्त्रीस्वरूपश्चाऽहं तत्र विराजितः ।
नारीभिश्चार्थितश्चाहं स्त्रीभावमोचनं प्रति ॥ ५ ॥
वयं नार्यो नरपूर्वाः सुदर्शन्याः प्रशापतः ।
जाताः स्मोऽत्र विना दोषं दुष्टदैत्यादिदोषतः ॥ ६ ॥
दुष्टराजन्यदोषैश्च सतीधर्षणपापकैः ।
निर्दोषा अपि भूवासा नरा नारीत्वमागताः ॥ ७ ॥
सुदर्शन्या भक्त्या ते दण्डोऽतिक्रमितः कृतः ।
तस्मात् कृत्वा कृपां कृष्ण पतीन्नो देहि पुंतनुम् ॥ ८ ॥
नार्योऽपि नैसर्गसिद्धा अर्थयामासुरित्यपि ।
पतीन्नो देहि भगवन् बालान् बालात्मकान् कुरु ॥ ९ ॥
पूर्वनरान् विधेह्यत्र नरान्नृलोकवासिनः ।
हरिश्चाहं च तच्छ्रुत्वा जगाद स्त्रीसमाजके ॥१०॥
भक्ताऽग्रेऽहं पराधीनो भक्तोक्तं लंघयामि न ।
सुदर्शनीं याचमानो मिलित्वा स्त्रीजना वयम् ॥११॥
इत्यहं समुपादिश्य समाजे चोत्थितोऽभवम् ।
समाहूतां समाजे च सुदर्शनीं तदाऽवदम् ॥१२॥
भक्ते ब्रह्मपरे साध्वि ! महैश्वर्यसमन्विते ! ।
दुष्टानां दण्डनं युक्तं रक्षणं स्वव्रतस्य च ॥१३॥
अयुक्तं दण्डनं यद्वै निरपराधदेहिनाम् ।
बालकानां च वृद्धानां यूनां धर्मवतामपि ॥१४॥
तस्माद् याचे स्वयं चाहमनादिः पुरुषोत्तमः ।
नारीरूपस्तव वाक्याद् वारितं वचनं कुरु ॥१५॥
शापनिवारणं सर्वलोकानां कुरु भामिनी ।
नारीमयं जगत् सर्वं विना नरं न यास्यति ॥१६॥
विचार्य शापसंहारं कुरु भक्ते मदर्थितम् ।
श्रुत्वा सुदर्शनी देवी विचार्य तूर्णमाह माम् ॥१७॥
शापस्य कारणं कृष्ण देवदैत्यनरादिभिः ।
प्रधर्षणं सतीनां वै क्रियते चाश्रमेष्वपि ॥१८॥
तन्मा भूदिति कृत्वैव सदा नार्यो मया कृताः ।
यदि त्वं चेद् रक्षणस्य कर्ता नो दुष्टनाशकृत् ॥१९॥
आकल्पान्तं वस भूमौ तदा शापं हराम्यहम् ।
इत्युक्त्वा सा सती सुदर्शनी मे पादयोस्तदा ॥२०॥
पतिता दण्डवत् पूजां प्रचकार सुमादिभिः ।
मालिकां प्रददौ कण्ठे स्त्रीत्रजे स्त्रीस्वरूपिणः ॥२१॥
अहं भक्ताप्ररक्षार्थं ओं तथास्त्वित्युवाच ताम् ।
सती सुदर्शनी पश्चाजलं हस्ते निधाय च ॥२२॥
शापनिमित्तेन प्रापितः परमेश्वरः ।
भूतले धन्यभाग्योऽयं लोको यत्र पुमुत्तमः ॥२३॥
हरिश्चात्र निजावासं त्वाकल्पान्तं करिष्यति ।
रक्षां ब्रह्मव्रतिनीनां करिष्यति कुसंगितः ॥२४॥
एवं विनिमयेनाऽहं मम शापं महोल्बणम् ।
संहरामि जगत्साम्ये श्रीहरेः सन्निधाविह ॥२५॥
इत्युक्त्वा करतोयं सा मुमोच कृष्णपादयोः ।
भूमौ तावत् समाजे चाऽन्यत्र लोके स्थलान्तरे ॥२६॥

सत्ये स्वर्गे मानवे च पातालादौ च येऽभवन् ।
नरपूर्वा नारिकास्ता द्राङ्नरा अभवँस्तदा ॥२७॥
त्रिलोकीयं यथापूर्वा तदाऽऽसन् युगलात्मिका ।
कृष्णः कृष्णस्वरूपोऽभून्नारायणो निजात्मकः ॥२८॥
पुरुषोत्तम एवापि पुरुषोत्तमरूपधृक् ।
तथैव च यथापूर्वं सर्वं तत्र व्यजायत ॥२९॥
नारायणः स्वयं प्राह समाजेऽहं तदा पुनः ।
सतीधर्षणकृन्सेऽत्र वध्यः सुदर्शनेन वै ॥३०॥
भविष्यति न सन्देहो देहान्ते स्त्री भविष्यति ।
दैत्याश्च दानवाश्चापि नृपाश्च सुरकोटयः ॥३१॥
सतीधर्षणकर्तारो वीक्ष्य दुष्टाः सुदर्शनम् ।
निकृन्तनं तैजसं च दुःसहं दारुणं ततः ॥३२॥
क्षमामयाचिरे तत्र विवासिताश्च ते तदा ।
दूरं ते प्रययुः सर्वे दुःखिता वै वनान्तरे ॥३३॥
अथापि दुष्टभावा ये ते चक्रेण निकृन्तिताः ।
निषूदिताः परे लोके दुष्टभावाऽन्विताश्च ये ॥३४॥
साध्व्यः सत्यश्च वै सर्वा ब्रह्मचर्यपरायणाः ।
अपि धर्षणमापन्ना या यास्ता हरिसन्निधौ ॥३५॥
समागत्य हरेर्वारि पादयोस्ताः पपुः शुभम् ।
पावनं सर्वपापानां तेन वै शुद्धतां ययुः ॥३६॥
संसेव्य नवधा भक्त्या प्रत्यक्षं पुरुषोत्तमम् ।
पावन्यस्ता हि संजाता मुक्तान्यस्त्वैश्वरार्थिकाः ॥३७॥
अहं लक्ष्मि ! त्वया साकं श्रीपतिः पुरुषोत्तमः ।
न्यवसं चाप्यनादिश्रीस्त्रीपुंनारायणाभिधः ॥३८॥
अयोनिजः स्वतन्त्रश्च प्राकट्यं समुपाश्रितः ।
भक्तनाम्ना प्रसिद्धिस्ते लक्ष्मि ! सुदर्शनी यथा ॥३९॥
तथा सुदर्शनीश्रीस्त्वं प्रसिद्धा परमेश्वरी ।
जाता सुदर्शनीयोगात् शीलव्रतस्य पोषिणी ॥४०॥
इत्येवं शिवसुक्तेश्रि प्राकट्यं मम वै पुरा ।
कथितं स्मर सर्वं तत् स्त्रीमयं जगदद्भुतम् ॥४१॥
अथाऽन्येऽपि मेऽवतारास्तत्राऽभवन् हि कोटिशः ।
सर्वान् जानाम्यहं लक्ष्मि ! यथाकार्यं मया कृतान् ॥४२॥
शृणु त्वन्यन्मम चापि प्राकट्यं चान्यवत्सरे ।
सप्तदशे वत्सरे चाऽप्रज्ञाताख्ये तु वेधसः ॥४३॥
कल्पे त्रयोदशे चापि मनौ तु दशमे तदा ।
आसीज्जगन्महादैत्यकुलेनाऽतीव पीडितम् ॥४४॥
तिमिंगिलो महादैत्यो माकरो वरुणाकरे ।
अभूत् पुरा तदा कामरूपधृग् जलसञ्चरः ॥४५॥
श्रीशीलिके जलव्याप्ते द्वीपे यस्याऽभवद् गृहम् ।
तज्जातिकास्तथा चान्ये कामरूपधरा अपि ॥४६॥
माकराश्च वसन्ति स्माऽयुतसाहस्रसंख्यकाः ।
नरा नार्यो भवन्ति स्म विनिर्यान्ति जलाद् बहिः ॥४७॥
निवसन्ति महाद्वीपे श्रीशीलिके गृहेषु च ।
बहिर्यान्त्यपि देशेषु मांसादास्ते नरान् पशून् ॥४८॥
अपहृत्य जलमध्ये द्वीपे वा भक्षयन्ति तान् ।
नररूपाश्च ते भूमौ प्रयान्ति नगरादिषु ॥४९॥
अपहरन्ति नारीश्च बालकान् बालिकास्तथा ।
व्योम्ना यान्ति महाभूभृत्सानुष्वपि च माकराः ॥५०॥
वनस्थान् पर्वतस्थाँश्च गह्वरस्थान् हि तापसान् ।
ऋषीन् द्विजान् पशून् पक्षिगणान् हरन्ति वै बलात् ॥५१॥
द्वीपे नीत्वा भक्षयन्ति नरमांसादमाकराः ।
समुद्रे जलमध्ये च मत्स्यान् जलेचरानपि ॥५२॥
नौकागान्मानवाँश्चापि भक्षयन्ति स्म वै बलात् ।
इत्येवं शतवर्षाणि भक्षिता मानवादयः ॥५३॥
लोकेषु सर्वखण्डेषूद्घोषो महानजायत ।
पर्वतेषु गह्वरेषु तापसेष्वपि सर्वतः ॥५४॥
माकराणां भयं चास्ते त्रसन्ति स्म च देहिनः ।
बलिनां सन्निधौ केऽपि प्रयान्ति नैव रक्षणे ॥५५॥
राजानोऽपि भयोद्विग्नास्तदा जाताः समन्ततः ।
चक्रवर्ती महाराजस्तदासीद् धर्मवाहनः ॥५६॥
योद्धुं ययौ समुद्रान्ते व्योम्ना रणे तु माकरैः ।
बहुरूपधरैर्व्योम्ना मायावृष्ट्या निपातितः ॥५७॥
समुद्रे च मृतः सोऽपि राजा वै धर्मवाहनः ।
ततो लोके भयं यान्ति चान्ये माकरयुद्धतः ॥५८॥
माकराणां बलं पुष्टं जातो राज्ञो विनाशतः ।
प्रसह्याऽब्धितटस्थानामाहरन्ति धनस्त्रियः ॥५९॥
बालाँश्च बालिका गाश्चाभूषणाम्बरसम्पदः ।
भुञ्जते निर्भयाश्चापि चैधिताश्च समन्ततः ॥६०॥
अथ ये खण्डराजानस्तेऽपि तैश्च शनैः शनैः ।
पृथक् पृथक् हताश्चापि माकरैर्मांसभोजनैः ॥६१॥
द्वीपाश्च द्वीपकल्पाश्च भूभागा वशगाः कृताः ।
भुञ्जते स्म यथेष्टं ते मायारूपप्रधारिणः ॥६२॥
अत्याचारो महान् खण्डे खण्डे स्म जायते तदा ।
रुदन्ति निर्बला लोका नरा नार्यः प्रधर्षिताः ॥६३॥
भक्षिता बालका येषां पत्न्यश्च पतयस्तथा ।
निर्वंशा बहवो जाता माकरोपद्रवैस्तदा ॥६४॥

एवं ते शतवर्षान्ते वृद्धिमाप्ता हि माकराः ।
कोटिसंख्याः प्रजाता वै राक्षसा इव सर्वतः ॥६५॥
जलप्रान्ते वसन्त्येते सबला अपि वै क्वचित् ।
निर्बलत्वक्षणे वार्धौ प्रविशन्ति स्म तत्क्षणम् ॥६६॥
युद्धेष्वेभिर्जयं नैव लभन्ते मानवा नृपाः ।
मायामन्त्रकरा नैकरूपधृगोऽतिदारुणाः ॥६७॥
नृपान् विजित्य राज्यानि चक्रुर्वशानि खण्डशः ।
अथ प्रजास्तदा त्वात्याचारं माकरकासुरैः ॥६८॥
कृतं नैव सहन्ते स्मोऽसह्यं सर्वविनाशनम् ।
यज्ञाः सर्वत्र नाश्यन्ते व्योममार्गेण तैस्तदा ॥६९॥
उत्सवा देवनिलया नाश्यन्तेऽपि समन्ततः ।
उद्यानानि विनाश्यन्ते फलपुष्पमयान्यपि ॥७०॥
सस्यानि च कणाढ्यानि नाश्यन्तेऽपि समन्ततः ।
यद्यद् रत्नमयं लोके ह्रियन्ते सर्वमेव तैः ॥७१॥
एवं तूपद्रवे जाते मानवाः परमेश्वरम् ।
परब्रह्माऽक्षरातीतं तदा मां चार्थयन्मुहुः ॥७२॥
समस्तैर्हृज्जन्यभावैः पूजयन्ति स्म मां हृदि ।
प्रार्थयन्ति स्म रक्षार्थं दीनाऽनाथाऽबलादिकाः ॥७३॥
ततो मया श्रुतं तेषामाराधनं तदाऽक्षरे ।
माकराणां विनाशार्थं धर्मरक्षणहेतवे ॥७४॥
मानवानां रक्षणार्थं त्वया साकं तदा द्रुतम् ।
अहं सायुध एवापि विमानेन भुवं प्रति ॥७५॥
आजगामाऽम्बरात् तूर्णं द्वारद्वीपमुपाश्रितः ।
विमानं वै मया तत्राऽदृश्यभावं कृतं क्षणात् ॥७६॥
आरण्यकं मया रूपं त्वयाऽप्यारण्यकं कृतम् ।
तापसं चापि तद्रूपं धृत्वाहं व्यचरं वने ॥७७॥
अथ ते माकरा लोका द्वीपादागत्य मां त्वया ।
साकं जह्नुर्निजे द्वीपे तपस्विनं ततो मया ॥७८॥
दृष्टो द्वीपः सन्निवेशग्रामपत्तनशोभितः ।
मां खादितुं माकरास्ते त्वायाताः सोत्सवास्ततः ॥७९॥
मया सुदर्शनं चक्रं प्रहितं तत्क्षणान्मनु
तच्च व्यापादयद् वह्निज्वालया चाऽदहत्तथा ॥८०॥
घटिकाकालमात्रेण द्वीपो निर्माकरः कृतः ।
दद्रुवुर्माकरा माकर्यश्च सरीसृपा झषाः ॥८१॥
यादांसि च तथा भूत्वा विविशुर्मकरालयम् ।
द्वीपमध्ये तापसोऽहं त्वया साकं तदाऽवसम् ॥८२॥

पत्तनानि तु शून्यानि वर्तन्ते स्म तदा खलु ।
अथ दैत्यो माकरेशो युद्धार्थं जलमध्यतः ॥८३॥
सन्नद्धश्च परो भूत्वा ससैन्यः समुपाययौ ।
मया सुदर्शनेनैव निकृन्तिता हि माकराः ॥८४॥
दैत्यः पराजयं वीक्ष्य प्राणत्राणपरायणः ।
दुद्राव सहसा चाब्धौ विवेश गहनं तलम् ॥८५॥
सहस्रहस्तवान् दैत्यः सहस्रमस्तकस्तथा ।
सहस्रपादसम्पन्नः पुनर्युद्धार्थमाययौ ॥८६॥
मया पुनः प्रेरितं च चक्रं सुदर्शनं मम ।
निकृत्ता बाहवश्चास्य बहवो वै तदा हि सः ॥८७॥
पुनर्विवेश जलधिमथाऽहमपि वै तदा ।
खण्डे खण्डे स्थितान् मार्गयित्वा तान् माकराऽसुरान् ॥८८॥
सुदर्शनेन चक्रेण व्यापादयं समन्ततः ।
पृथ्व्यां यत्र च यत्रैते ह्यासन् माकरदानवाः ॥८९॥
तान् सर्वानहनं चक्रधारेणाऽवसरे तदा ।
अथ वै माकरो दैत्योऽयुतहस्तसमन्वितः ॥९०॥
अयुतानन एवाप्ययुतपात् समुपाययौ ।
मे मतं च विनाशोऽस्य कर्तव्योऽवश्यमेव ह ॥९१॥
ततः शान्तिं माकराणामुपद्रवः प्रयास्यति ।
अथाऽहं सङ्गरं चक्रे माकरेण दुरात्मना ॥९२॥
हता हस्ताः सहस्राणि त्रीणि त्रीण्याननानि च ।
यदा तदा माकरेशो दुद्राव जलधिं ययौ ॥९३॥
अहं साकं त्वया लक्ष्मि ! चाऽभवं जलमानवः ।
लक्षहस्तो लक्षमुखो लक्षपाल्लक्षहेतिकः ॥९४॥
लक्षजालसमायुक्तः प्राविशं माकरालयम् ।
स मां दृष्ट्वा महद्रूपं चक्रे वाशु पलायनम् ॥९५॥
अब्धितश्चाऽन्यमब्धिं च ततोऽब्ध्यन्तरमित्यपि ।
पृष्ठे यान्तं तु मां वीक्ष्य प्राणत्राणपरायणः ॥९६॥
भयोद्विग्नो बभूवाऽति क्षीरसागरमाविशत् ।
मया सुदर्शनं चक्रं प्रहितं तस्य मृत्यवे ॥९७॥
पुच्छलग्नं प्रजज्वाल ददाह तं समन्ततः ।
चुक्षोभ सागरः सर्वश्चकम्पे पृथिवी मुहुः ॥९८॥
अथ ज्ञात्वा निधनं स्वं युद्धार्थं सम्मुखोऽभवत् ।
मया युद्धं न्यायसारं दत्तं तस्मै महात्मने ॥९९॥
यथा यथाऽहं तं हन्मि तथा स नूतनः ।
उत्पद्यते माकरोऽपि मायया कोटिरूपधृक् ॥१००॥

मासान्ते स मया वार्धौ युद्धं दत्वा हतोऽसुरः ।
सुदर्शनेन चक्रेण लक्षकण्ठा निकृन्तिताः ॥१०१॥
तदा व्योम्नि निनेदुर्वै दुन्दुभयो सुवासिनाम् ।
पुष्पाणां वर्षणं जातं समुद्रो मामपूजयत् ॥१०२॥
पार्षदाः सर्वधाम्नां च मुक्ताश्चेशाः समाययुः ।
सुराश्च मानवाश्चापि पुपूजुर्मां पुमुत्तमम् ॥१०३॥
जलमानवरूपं मां श्रीपतिं पुरुषोत्तमम् ।
लक्षाननं लक्षहस्तं लक्षहेतिसमन्वितम् ॥१०४॥
लक्षपादं श्वेतवर्णं कोमलं चन्द्रभासनम् ।
जलावासं जलदेवीदेवैः प्रपूजितं हि माम् ॥१०५॥
दुःखमुक्ता देहिनश्चाऽऽनर्चुर्मां परमेश्वरम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥१०६॥
जलमानवरूपं मां स्वयं श्रीपरमेश्वरम् ।
अनादिश्रीजलनारायणाह्वयं तदा प्रिये ! ॥१०७॥
त्वामनादिजलनारायणीं चानर्चुरेव ते ।
अथ जलाद् विनिर्गत्य श्रीशीलिके भुवस्तले ॥१०८॥
द्वीपे वासं चकाराऽहं माकराणां हि पत्तने ।
ततो मे पार्षदास्तत्र त्वायाता बहवस्तदा ॥१०९॥
श्रीद्वीपो मेऽभवद् द्वीपः समुद्रतटवर्तनः ।
तापसानां च मुक्तानां तपोऽर्थं तत्र कल्पके ॥११०॥
ब्रह्मणो वत्सरे सप्तदशे लक्ष्मि ! च तं स्मर ।
श्वेतद्वीपो यथा चाद्यस्तथा श्रीद्वीपनामकः ॥१११॥
श्रीशीलद्वीप एवाऽभून्मम ते वासकारणात् ।
जलद्वीपस्तथा श्वेतनारायणालयोऽपि सः ॥११२॥
तदा लोकाश्च शास्त्राणि कथयन्ति स्म नैकधा ।
स्मर सर्वं हि तल्लक्ष्मि ! पुरातनात्पुरातनम् ॥११३॥
चकत्कारमयं स्थानं दिव्यं मया पुरार्जितम् ।
पठनाच्छ्रवणादस्य स्मरणान्मोक्षमाव्रजेत् ॥११४॥
अन्ये तथाऽवतारा मे जाताश्चापि सहस्रशः ।
तानहं वेद्मि सर्वान् वै प्रत्यक्षज्ञानवानहम् ॥११५॥
ततो भक्ता मया पृथ्व्यां पार्षदैर्मम योगिभिः ।
ऋषिभिर्मुनिभिश्चापि साधुभिर्वैष्णवाः कृताः ॥११६॥
प्रजाः सर्वास्ततो जाता वैष्णव्यो मम चाश्रिताः ।
मुक्तिमार्गः प्रवृत्तश्च यज्ञयागादयोऽभवन् ॥११७॥
प्रजाश्च सुखिता जाता मानवा निर्भया अपि ।
दृश्यन्ते वैष्णवा भूमौ मम पूजापरायणाः ॥११८॥
नरा नार्यो व्योमगाश्चाऽऽयान्ति मद्दर्शनाय ह ।
सर्वाभ्यः खलु दिग्भ्यश्च श्रीद्वीपो मोक्षदोऽभवत् ॥११९॥
आकल्पान्तं ततश्चाऽहं न्यवसं श्रीसुशीलिके ।
द्वीपे तत्र ततश्चाऽहं स्वाऽक्षरं प्रययौ प्रिये ! ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने स्त्रीभूतानां भूतलवासिप्रजानां रक्षणार्थं प्रार्थनयाऽनादिस्त्री-पुंनारायणस्य, सप्तदशे वेधसो वत्सरे च माकरादि-दैत्यनाशार्थम् अनादिश्रीजलनारायणस्य, च प्राकट्यमित्यादिनिरूपणनामा चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवजन्ये ! श्रि ! वेधसो वत्सरे ततः ।
अष्टादशे लयभावाऽभिधे द्वादशकल्पके ॥ १ ॥
एकादशे मनौ तत्र युगह्रासबलात् खलु ।
विनाशे साधुधर्माणां साधुदीक्षाक्षये तथा ॥ २ ॥
मोक्षमार्गस्य रोधे च दैवपैत्र्यविधौ गते ।
पुनस्तत्स्थापनार्थं च त्वया सार्कं हरिः स्वयम् ॥ ३ ॥
प्राविरासं चाऽग्रजस्य वषड्विप्रस्य सद्गृहे ।
वषट्कारोऽभवन्नाम्ना विप्रो व्रतपरायणः ॥ ४ ॥
तापसो हृतसर्वस्वो दुष्टनास्तिकमानवैः ।
पीडितो मम भक्तोऽसौ त्यक्त्वा ग्रामं वनं ययौ ॥ ५ ॥
भजते स्म सदा मां श्रीकृष्णनारायणं हरिम् ।
फलैर्मूलैर्दलैः पुष्पैर्भावनैर्मानसैस्तथा ॥ ६ ॥
नित्यं मां प्रातरेवाऽसौ पूजयत्येव वस्तुभिः ।
भार्या तस्य तथा साध्वी जपसेवापरायणा ॥ ७ ॥
नित्यं त्वां श्रीसतीं लक्ष्मीं नारायणीं सनातनीम् ।
पूजयत्येव विधिना भोजयत्येव सत्फलम् ॥ ८ ॥
जलं पुष्पं दलं चापि समर्पयति सादरम् ।
कीर्तनं भजनं मे च तौ चोभौ कुरुतः सदा ॥ ९ ॥
मध्याह्ने च तथा सायं मम ध्यानपरायणौ ।
अरण्यवासौ नित्यं च तावास्तां वै विदेहिनौ ॥१०॥
देहार्थं वैभवा भोगा यस्य नैव क्वचित् खलु ।
हर्यर्थं वैभवा यस्य विदेहः स भवेत् प्रिये ॥११॥
एवं वै वर्तमानौ तावनपत्यौ सुखाश्रयौ ।
वार्धक्यं किञ्चिदापन्नौ वने वृक्षनिवासिनौ ॥१२॥
तयोरेवं हि वसतोः पुत्रपुत्र्येषणाऽभवत् ।
वषट्कारस्य मनसि पुत्रैषणा व्यजायत ॥१३॥
स्वधावत्याश्च मनसि पुत्र्येषणा व्यजायत ।
माता त्विच्छति कन्यां वै सर्वकार्ये सहायिनीम् ॥१४॥

पिता प्रेच्छति पुत्रं वै सर्वकार्ये सहायकम् ।
पुत्रपुत्र्येषणावन्तौ गृहधर्मपरायणौ ॥१५॥
उभौ तौ मां प्रार्थयतः पूजनान्ते मनोरथम् ।
लोके लक्ष्मि ! जनानां वै त्र्येषणा जायते मुहुः ॥१६॥
लोकैषणा तथा वित्तैषणा पुत्रैषणा खलु ।
नारायणस्य भक्तानां लोकैषणा प्रशाम्यति ॥१७॥
यतो भक्त्या परं धाम भक्ताः प्राप्स्यन्ति वै ध्रुवम् ।
साधूनां तोषिणां चापि वित्तैषणा प्रशाम्यति ॥१८॥
जलाऽन्नाऽम्बरलाभश्च यात्रामात्रः सतां यतः ।
पुत्रैषणा सपुत्राणां ज्ञानिनां च प्रशाम्यति ॥१९॥
उत्तमर्णा धनाप्त्यर्थे जायन्तेऽपत्यरूपिणः ।
तादृशानामपत्यानामसत्त्वे सुखमेव यत् ॥२०॥
अपत्यानां गर्भकेऽपि जनने पालने तथा ।
पोषणे लग्नकरणे व्यये रोगे हि दुःखकम् ॥२१॥
तथापि लोकवाक्यानां स्पर्शो येषां प्रजायते ।
विधुरोऽयं ह्यपुत्रोऽयं निर्वंशोऽयं तथैकलः ॥२२॥
एवंविधानां वाक्यानां येषां नास्ति सहिष्णुता ।
तेषां मायाभिभूतानामेषणाद्दुः प्रजायते ॥२३॥
ज्ञानहीनस्य भक्तस्य मूल्यं भवति लौकिके ।
ज्ञानिनो मम भक्तस्य दग्धं मामन्तराऽखिलम् ॥२४॥
यस्य दग्धं हि सर्वं वै मायिकं तस्य किं न्विह ।
पुत्रेण लोककार्येण राज्येन वैभवेन वा ॥२५॥
भौतिकस्य तु पुत्रस्यैषणा बन्धाय कल्प्यते ।
वषट्कारस्य विप्रस्य पुत्रैणषा ह्यभूत् किल ॥२६॥
किन्तु सा मद्गोचराऽभूत् हरिर्मे सुततां व्रजेत् ।
स्वधावत्याश्चैषणाऽपि लक्ष्मीर्मे बालिका भवेत् ॥२७॥
एवं मद्योगसंकल्पौ तयोरास्तां शुभाश्रयौ ।
तौ संकल्पौ सदा दिव्यौ मायाबन्धनवर्जितौ ॥२८॥
आस्तां तयोः शुभौ तस्मान्मया ध्यानं कृतं तयोः ।
पितरौ तौ विधातव्यो धर्मस्थापनहेतवे ॥२९॥
तयोस्तु भक्तयोश्चापि संकल्पयोः प्रपूर्तये ।
अनादिश्रीकृष्णनारायणोऽहं च त्वया सह ॥३०॥
विमृश्य तद्वनं यातो गोचरस्तापसोऽभवम् ।
अतिथीभूतश्चाहं त्वं मम सार्था च भिक्षुकी ॥३१॥
गतवन्तौ तयोर्वासं वने वै भक्तयोः पुरम् ।
तापसौ सजटौ चीरवल्कलौ रूक्षवेषिणौ ॥३२॥
विप्रौ नारायणं नाम रटन्तौ मालिकान्वितौ ।
साधुधर्मौ भिक्षुकौ वै मध्याह्ने समुपस्थितौ ॥३३॥
तदा तौ हृष्टमनसौ चक्रतुः स्वागतं शुभम् ।
पाद्यमर्घ्यं चासनं च मधुपर्कं फलादिकम् ॥३४॥
सलिलं शुभवचनं ददतुस्तौ तदा हि नौ ।
मया भिक्षा स्वीकृता च त्वयाऽपि स्वीकृता ततः ॥३५॥
पादसंवाहनं तौ चक्राते नौ च प्रसेवणम् ।
धन्यौ स्वो यत् सतोः सेवा साध्वोश्चाद्य प्रपद्यते ॥३६॥
साधुसेवापापहन्त्री दिव्यपुण्यप्रदायिनी ।
भुक्तिदात्री मुक्तिदात्री सर्वसंकल्पपूरणी ॥३७॥
कल्पवल्लीसमा कल्पद्रुमतुल्या फलप्रदा ।
चिन्तामणिसमा सेवा कामधेनुसमा सताम् ॥३८॥
साधवो यस्य वै गेहे समायान्ति हरिप्रियाः ।
तद्गृहं सर्वदा तीर्थं वनं वा पत्तनं च वा ॥३९॥
अन्यतीर्थानि कालेन पावयन्ति यथाबलम् ।
साधुतीर्थं तूर्णमेव पुनन्ति सेविनो जनान् ॥४०॥
यत्र साध्वागमस्तत्रागमो वै श्रीहरेर्ध्रुवः ।
यत्र हर्यागमस्तत्र मुक्तानामागमो ध्रुवः ॥४१॥
यत्र मुक्तागमस्तत्र मुक्त्यागमश्च वै तथा ।
मुक्तेर्यत्रागमस्तत्र भक्त्यागमोऽपि वै ध्रुवः ॥४२॥
यत्र भक्त्यागमस्तत्र धर्मागमोऽपि वै ध्रुवः ।
ज्ञानवैराग्ययोश्चाप्यागमश्च सम्पदां ध्रुवः ॥४३॥
यत्र नारायणः कृष्णः सद्भिः सहोपपद्यते ।
तत्र लक्ष्मीश्च कमला श्रीः सिद्धिः शाश्वती ध्रुवा ॥४४॥
यत्र नारायणः कृष्णस्तत्र यज्ञा व्रतानि च ।
तपांसि चापि सर्वाणि सुराः सर्वेऽपि तत्र च ॥४५॥
यत्र नारायणः सद्भिर्भुंक्ते फलजलादिकम् ।
तत्र वै भुंजते देवाः पितरश्च जगत्त्रयम् ॥४६॥
अद्य वै वनवासो नौ साध्वोरागमकारणात् ।
सफलः खलु सञ्जातो राज्याधिकोऽपि मोददः ॥४७॥
अद्य नौ त्वनपत्यत्वं विलीनं सत्प्रसेवनात् ।
अद्य नौ निर्धनत्वं च महत्यर्थे फलप्रदम् ॥४८॥
अद्य नौ जीवनं जातं सार्थकं सुप्रजीवनम् ।
अद्य नौ मानसौ भावौ पूरितौ निश्चितौ त्विह ॥४९॥
मन्यावहेऽद्य कालोऽपि पवित्रतां प्रयास्यति ।
शकुनानि शुभान्येव जायन्ते भवदागमात् ॥५०॥
स्फुरन्ति शुभबोधानि चाङ्गानि नौ त्वदागमात् ।
वसतामत्र पूज्यौ वै सेवयिष्याव आदरात् ॥५१॥
सतां सेवाप्रसंगेन तरन्ति देहिनोऽभवम् ।
वने च निर्जने चात्र भवद्वासेन शोभनः ॥५२॥

सत्संगो मोदजनको नः प्रत्यहं भविष्यति ।
एषा बकुलवृक्षाऽधोभागे वै पर्णशालिका ॥५३॥
भवद्भ्यामर्पिता रम्या शीतातपनिवारणी ।
आवां त्वन्यां करिष्यावः कुटिं स्वाश्रयदायिनीम् ॥५४॥
इत्युक्त्वा विप्रयुगलं पतितं पादयोर्हि नौ ।
मयोक्तं च तदा ताभ्यां कुशलं भवतोः सदा ॥५५॥
निरामयं चाभ्युदयः सुखमस्तु च शाश्वतम् ।
आवां वनेचरौ स्वोऽत्र नैकस्थाननिवासिनौ ॥५६॥
निर्बन्धनौ सर्ववासौ गुप्तकुटिनिवासिनौ ।
भवद्विधानां विप्राणां भक्तानां तु समागमे ॥५७॥
दैवेच्छया जायमाने तिष्ठावो गोप्रदोहनम् ।
तथापीश्वरभक्तानां निर्मलानां तपस्विनाम् ॥५८॥
गृहे सञ्जायते क्वापि पक्षपातो हि नौ मुधा ।
प्रेम्णाऽऽतिथ्यं गृहीतं च गृहीतं स्वागतं तथा ॥५९॥
आज्ञां प्राप्य गमिष्यावो वनान्तरं च वोऽस्तु शम् ।
तदा तौ चाश्रूणि मुक्त्वा ग्राहतुर्नौ मुदान्वितौ ॥६०॥
कुटिर्यत्र सतां संगः सा कुटिर्न तु पार्णिकी ।
वासो यत्र सतां योगः स वासो न तु भूमिगः ॥६१॥
जीवनं च सह सद्भिर्जीवनं न तु भोजनम् ।
सुखं सेवा सतां नित्यं कर्तव्यं नाऽपरं शुभम् ॥६२॥
आवां साधुस्वरूपौ स्वो यास्यावोऽनुभवत्पदम् ।
यद्वाऽत्र कुरुतां वासं सेवालाभो हि नौ भवेत् ॥६३॥
भवदागमने वृक्षा मोदन्ते वनपक्षिभिः ।
भवदागमने वल्ल्यो विकासन्ते सुपुष्पकैः ॥६४॥
भवदागमनेऽङ्गानि हृदयाख्यानि सर्वथा ।
अनुभवन्त्यपूर्वाणि सुखान्यानन्दकानि च ॥६५॥
तिष्ठतं च ततोऽत्रैव दासौ स्वो भवतोरिह ।
मयोक्तौ च तदा तौ वै कथमीदृक् पराऽऽग्रहः ॥६६॥
क्रियतेऽत्र भवद्भ्यां वै वदतं हार्दमेव नौ ।
तावुभावाहतुस्तत्र वने त्वेकाकिनौ सदा ॥६७॥
आवां वासं प्रकुर्वश्च भवतां तु स्थिताविह ।
सार्थवासो भवेदेव सतां संगो हि दुर्लभः ॥६८॥
सपत्नीकगृहस्थस्य वासस्त्वेकाकिनो वने ।
भयदो वै ततः स्थेयं गृहस्थेन सहायिना ॥६९॥
द्वयोर्गृहस्थयोर्वासः शोभनो वै वनान्तरे ।
त्रयाणां चाधिकानां च वासो वै चातिशोभनः ॥७०॥
नारीणां तु सतीधर्मान्वितानां धर्मपालने ।
साहाय्यं स्यात् प्रमदा हि साध्व्यः साध्व्यः सुखाश्रयाः ॥७१॥
तस्माद् वां रोचयावोऽत्र वासं साधुप्रधर्मिणोः ।
विना वै भवतोर्वासं शान्तिर्नौ न भविष्यति ॥७२॥
तदा मयोक्तं च तथाऽस्त्वित्योमित्यभिनोदितौ ।
सुखं चावापतुस्तूर्णं हर्षान्वितौ बभूवतुः ॥७३॥
आवां सुखस्थितौ तयोश्चावासे कृतपूजनौ ।
मुदा सायं गतं वार्तालापैः सद्धर्मबोधनैः ॥७४॥
सन्ध्यां कृत्वा निशायां च हरेर्वार्तां विधाय च ।
सुषुपुश्चापि चत्वारो निशान्ते च द्वयोरपि ॥७५॥
ब्राह्ममुहूर्ते पूर्वे वै समये शोभने तदा ।
विप्रस्य चापि विप्राण्याः स्वप्ने चावामुपागतौ ॥७६॥
लक्ष्मीनारायणौ साक्षात्तापसौ समुपागतौ ।
पुत्ररूपोऽप्यहं जातस्त्वं स्वप्ने पुत्रिकाऽभवः ॥७७॥
यमलं च द्विजाभ्यां वै प्राप्तं बालस्वरूपि तत् ।
प्राप्य विप्रौ सुमुदितौ ततः स्वप्नं न्यवर्तत ॥७८॥
आवामदृश्यतां प्राप्तौ तौ तु जागरितौ तदा ।
अभवतां ततो द्रष्टुं तौ स्वकुट्यां तु नावुभौ ॥७९॥
अदृष्ट्वा सुमहाश्चर्यं प्राप्तौ च मुदितौ ततः ।
आवां तत्र तदा लक्ष्मि ! वायुदेवं हि गर्भगम् ॥८०॥
समाहूय ददतुश्च गर्भाज्ञां गर्भदर्शनम् ।
प्रकारय यथा गर्भवती वै प्रमदा भवेत् ॥८१॥
वायुश्चैवं चकाराऽपि गर्भकुक्षौ वसन् सदा ।
यथा गर्भवती नारी तथौदरमदर्शयत् ॥८२॥
आवामदृश्यरूपेण वर्तमानौ तदाश्रये ।
प्रतिमायां समये स्वागते यमलमेव ह ॥८३॥
प्रादुर्भूतौ यदा वायुर्गर्भद्वाराद् विनिर्ययौ ।
शंखचक्रगदापद्मधारिणौ यमलात्मकौ ॥८४॥
कन्याकुमारकौ चोभावजायेवहि तत्पुरः ।
अयोनिजावपि यद्वद् योनिजाविव वै तदा ॥८५॥
आकाशात्पुष्पवृष्टिश्च देवमुक्तकृताऽभवत् ।
दुन्दुभयो निनेदुश्च वने जातो महोत्सवः ॥८६॥
ऋषयश्च समाजग्मुस्तत्र दर्शनहेतवे ।
मंगलं बहुधा तत्र जातं जनैस्तदाऽऽवयोः ॥८७॥
कृतसंस्कारकौ सर्वविधौ च यमलात्मकौ ।
आवां वृद्धिं गतौ तत्राऽरण्ये च ब्रह्मचारिणौ ॥८८॥
साधुधर्मपरौ साधुदीक्षायुक्तौ स्वयंकृतौ ।
अजायेवहि तत्रैव ब्रह्मसूत्रान्वितावपि ॥८९॥
अथाऽरण्यनिवासेभ्यो ग्रामवासेभ्य इत्यपि ।
उपादिशावः साधूनां धर्मान् त्यागाश्रमार्थिनाम् ॥९०॥

कामदेवस्य वै त्यागो जिह्वारासनवर्जनम् ।
मोहदर्शनसन्त्यागः स्नेहस्पार्शनवर्जनम् ॥९१॥
चलशब्दादिसन्त्यागो विकृतिगन्धवर्जनम् ।
परिग्रहस्याऽसंगश्च रागद्वेषविवर्जनम् ॥९२॥
यात्रामात्राऽन्नसलिलग्रहणं चाऽनिकेतनम् ।
मौनं कर्मपरित्यागो हरौ सर्वार्पणात्मना ॥९३॥
तपोधर्मो निग्रहश्च वासनात्यजनं सदा ।
ममाऽहंत्याजनं चापि देहाद्भिन्नप्रबोधनम् ॥९४॥
सर्वद्रोहाकरणं च क्षमा सहिष्णुता दया ।
अध्यात्मचिन्तनं नित्यं परमेशस्य पूजनम् ॥९५॥
ब्रह्मस्थित्या वर्तनं च शोकमोहविवर्जनम् ।
अयाचिते च सम्प्राप्ते सन्तोषश्चार्जवं तथा ॥९६॥
काषायाम्बरधारित्वं करपात्रकता तथा ।
यथाऽपेक्षाऽम्बरग्राहो यथासुखं वने स्थितिः ॥९७॥
ओं नमः श्रीशीलनारायणाय परमात्मने ।
इतिमात्रजपश्चापि भक्तिश्च परमात्मनि ॥९८॥
इत्येवं वै नराणां च नारीणां साधुवृत्तिता ।
शिक्षिता वै तदाऽऽवाभ्यां मानवेभ्यः सुखावहा ॥९९॥
अनादिश्रीकृष्णनारायणेन परमात्मना ।
मया त्वया तदाऽनादिसाधुधर्माः प्रवर्तिताः ॥१००॥
अनादिश्रीशीलनारायणेन परमात्मना ।
अनादिस्वामिनीनारायण्या त्वयाऽन्वितेन ह ॥१०१॥
सहोदरेण वै भ्रात्रा मया साधुस्वरूपिणा ।
सहोदर्या च वै स्वस्रा त्वया साध्व्या सुयोषिता ॥१०२॥
कोटिशो मानवा जाताः साधवः शीलवर्तनाः ।
साध्व्यश्च कोटिशो जाताः शीलव्रतपरायणाः ॥१०३॥
ततो यज्ञाश्च संजाता व्रतानि विविधानि च ।
भजनं पूजनं चापि मन्दिराणि ममापि च ॥१०४॥
शीलस्य नियमश्चापि दैवपैत्र्यक्रियास्तथा ।
तीर्थसेवा साधुसेवा सर्वे धर्माः प्रवर्तिताः ॥१०५॥
अनादिश्रीशीलनारायणेन वै मया तदा ।
सर्वं जानाम्यहं लक्ष्मि ! स्मर प्राकट्यमेव यत् ॥१०६॥
अन्येऽपि च तदा तत्राऽवतारा मम नैकशः ।
अभवन् कार्यवशगा जानाम्यहं न चेतरः ॥१०७॥
इत्येवं कथितं मे ते प्राकट्यं शीलहेतवे ।
स्मरणाच्छ्रवणाच्चापि पाठनाद्भुक्तिमुक्तिदम् ॥१०८॥
आकल्पान्तं त्वावयोश्च तदाऽभवं निवासनम् ।
धर्मार्थं साधुरूपेण कोटिभिः साधुभिः सह ॥१०९॥
शिष्यप्रशिष्यशाखाश्च व्यवर्धन्त तदा क्षितौ ।
मात्रे पित्रे ततो मुक्तिं दत्वा गतौ निजाक्षरम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽष्टादशे वत्सरे साधुधर्मस्थापनार्थम् अनादिश्रीशीलनारायणस्य प्राकट्यमित्यादिनिरूपण-नामा पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं ब्रह्मणो वत्सरे ततः ।
साक्षात्कृन्नामके षष्टिकल्पे त्रयोदशे मनौ ॥ १ ॥
कैलासवासो रुद्रो वै तीर्थार्थमगमत् क्षितौ ।
पर्यटन् चाट्टलाद्रौ स विष्णुतीर्थमुपाययौ ॥ २ ॥
तत्र वै पर्वते रम्या शारदाख्या सरिद्वरा ।
ब्रह्मपुन्यवहत् तस्यास्तटे श्रान्तः शुभं जलम् ॥ ३ ॥
पीत्वा प्रोक्ष्य निषसाद ध्यानमग्नोऽभवत् क्षणम् ।
विष्णुं नारायणं सर्वेश्वरं दध्यौ परेश्वरम् ॥ ४ ॥
तावद्वनात् समायातो वाराहो मत्तवेगवान् ।
मस्तकेन हरं शंभुं धावन् वल्मीकबद्धि सः ॥ ५ ॥
उच्चखानाऽविलोक्यैवाऽस्पष्टं भस्मावृतं हरम् ।
ध्यानात्तूर्णं समुत्तस्थौ वाराहं वीक्ष्य शंकरः ॥ ६ ॥
रोषं चकार सहसा भ्रुकुटिः रक्ततां गता ।
तस्या व्याघ्रानलो वह्निज्वालामालासमाकुलः ॥ ७ ॥
समुत्पन्नस्तामसो वै महाऽसुरोऽद्रिसदृशः ।
वाराहं क्षणमात्रेणाऽनाशयच्छंभुनोदितः ॥ ८ ॥
वाराहचर्म संगृह्य व्याघ्रानलो हराज्ञया ।
जाठरानलशान्त्यर्थं ययाचे भोजनं हरात् ॥ ९ ॥
शंभुस्त्वाह समुद्रान्तर्वर्तिनां यादसां कुलम् ।
भोजनं वै मया दत्तं तव याहि जलान्तिकम् ॥१०॥
व्याघ्रानलोऽतिबलवान् कामरूपधरो गणः ।
निर्भयः क्षुत्प्रशान्त्यर्थमब्धितीरमुपाययौ ॥११॥
भक्षयामास यादांसि मकरान् कच्छपान् तिमीन् ।
यथायथा भोजनं स चक्रे तथा तथाऽस्य ह ॥१२॥
जाठराग्निः प्रदीप्तश्च पाचकः सन् व्यवर्धत ।
शरीरं च तथा तस्य वृद्धिं जगाम शैलवत् ॥१३॥
दशयोजनविस्तारो भूत्वाऽब्धिं स विवेश ह ।
भक्षयामास बहुशो यादांसि प्रत्यहं स च ॥१४॥
मासान्ते च बभूवापि शतयोजनविस्तृतः ।
वर्षान्ते स बभूवापि सहस्रयोजनाऽऽयतः ॥१५॥

महासमुद्रमाविश्य जलं पिबति श्वासतः ।
झषाद्याः कोटिशो यान्ति तस्योदरे पचन्ति च ॥१६॥
जलं सर्वं चानलेन दग्धं प्रजायतेऽपि च ।
अथ काले व्यतीते सोऽयुतयोजनविस्तृतः ॥१७॥
व्याघ्रानलोऽभवद् वार्धौ पिबत्यपि दिवानिशम् ।
सहस्रयोजनं वार्धिं शुष्कं करोति निर्जलम् ॥१८॥
एवं सर्वे समुद्राश्च पीतास्तेन क्रमात् खलु ।
महाजलं क्रमात् सर्वं पीतं भूपरितोऽब्धिजम् ॥१९॥
विना जलं न वै मेघा प्रजायन्तेऽब्धिमण्डलात् ।
अब्धिष्वग्निस्तस्य व्याघ्रानलस्य प्रसृतोऽभवत् ॥२०॥
समुद्रविवराश्चाग्निमयाः पृथ्वी तथाऽभवत् ।
शुष्का जलेन हीना च गर्भजलमदह्यत ॥२१॥
शुष्कं च भूतलं सर्वं वृष्टिरोधो व्यजायत ।
मग्नश्च देहिनः प्रायो योगिनस्तु विलोक्य तत् ॥२२॥
समाधौ प्रविलीना वै ऋषयस्तु दिवं ययुः ।
अकालः प्रलयो भूमौ जातो व्याघ्रानलेन वै ॥२३॥
जलाऽलाभे कर्दमादीन् व्याघ्रानलोऽत्ति वै तलात् ।
सर्वतो जलहान्या च पृथ्वी रूक्षगतिं गता ॥२४॥
वार्धयस्तु मृतप्रायाः श्रीहरिं शरणं ययुः ।
रक्ष रक्ष कृपानाथ व्याघ्रानलान्महोल्बणात् ॥२५॥
भक्षयत्येव यादांसि कर्दमानि जलानि च ।
अकालप्रलयो जातो मृता इव वयं ततः ॥२६॥
रौद्रोऽयं वर्तते चाद्याऽयुतयोजनविस्तृतः ।
आयतौ वर्धमानोऽयं ब्रह्माण्डं निगलिष्यति ॥२७॥
तदन्तो भवता कार्यो भवतः शरणं गताः ।
क्षारः पीतो हि सर्वस्वश्चान्ये पीताश्च खण्डशः ॥२८॥
भवन्तमन्तरा नास्यासुरस्यान्तकरोऽपरः ।
भवता रक्ष्यते सर्वं चापत्यमिव सर्वदा ॥२९॥
वयं समुद्राः सर्वे वै राधापुत्रा जलात्मकाः ।
पिता नः श्रीकृष्ण एव भगवान् राधिकापतिः ॥३०॥
अनादिश्रीकृष्णनारायणावतार एव यः ।
गोलोकाधिपतिर्गोपीपतिः श्रीपतिरीश्वरः ॥३१॥
ततः पुत्रा वयं ते स्मो रक्ष कः पुरुषोत्तम ।
इत्येवमर्थितश्चाऽहं समुद्रैः सप्तभिस्तदा ॥३२॥
त्वया साकं महालक्ष्मि ! वार्धीनां गोचरोऽभवम् ।
शंखचक्रगदापद्मस्वस्तिकध्वजशूलवान् ॥३३॥
पूजितो वन्दितस्तैश्च **मिष्टोदेनाभिवन्दितः** ।
**मिष्टोदस्यैव** पत्न्यां **पुष्करिण्यां** तु तदाऽभवम् ॥३४॥

बालोऽहं जातमात्रोऽपि युवाऽब्धिपुत्र एव ह ।
त्वं तदा शिवसत्येश्रि ! पुण्डरीकस्य पुत्रिका ॥३५॥
भूभृतश्चाऽभवः सर्वैश्वर्यसौन्दर्यलक्षिता ।
नाम्ना **श्रीपुण्डरीकश्रीः** सर्वकल्याणकारिणी ॥३६॥
अथाऽहं च प्रसस्मार वाहनं जलगाम्यपि ।
तदा मिष्टोदकात्प्राप्तो जलतुरंगमोऽद्भुतः ॥३७॥
सपक्षः शुण्डवाँश्चापि सजालपादवानपि ।
कामरूपधरश्चापि श्वासरोधसमाधिमान् ॥३८॥
बलेऽब्धिसदृशश्चापि गत्या विद्युत्समोऽपि च ।
अधृष्यः पर्वतप्रायः श्वेतवर्णस्तुरंगमः ॥३९॥
भूवार्यम्बरगमनः स्थूलसूक्ष्मादिसिद्धिमान् ।
सर्वभाषाप्रवक्ता च दिव्यदेहोऽविभेद्यकः ॥४०॥
स्वम्बालिकायुतश्चापि युद्धकौशल्यशेवधिः ।
चिन्तामण्यभियुक्तश्च मणिमौक्तिकभूषणः ॥४१॥
जलान्तर्दीपकान्तिश्चाऽन्धकारे सुप्रकाशवान् ।
नैसर्गदृढवर्माढ्यः शस्त्रप्रसवतूणवान् ॥४२॥
सुधास्राविकेसराढ्यो मृत्युहृत्कलिगशोभितः ।
पुष्टः सर्वांगताम्राढ्यश्चागत्य मां ननाम सः ॥४३॥
पत्खुरैर्हर्षणशब्दैः स्तवनैः पक्षविस्तरैः ।
उच्चाग्रैर्जवकम्पैश्च स्वागतं स ममाऽऽचरत् ॥४४॥
मया वाहनरूपोऽसौ निर्विघ्नाय प्रपूजितः ।
विजयाय च तत्पृष्ठे दत्तो दक्षः करो मया ॥४५॥
अमृतं पायितश्चापि भाले तिलकितस्तथा ।
यात्रार्थं बोधितश्चापि संगरार्थं प्रहेषितः ॥४६॥
हेषाशब्दोऽस्य वै लक्ष्मि ! दिक्पालानां गृहान् ययौ ।
चकम्पे द्यौः समस्ता वै पृथिव्यास्तत्र का दशा ॥४७॥
पर्वताश्च समुद्राश्च जलदेवाश्च मातरः ।
वरुणश्च नदा नद्यो युद्धार्थं मिलिता मया ॥४८॥
स्वस्ववाहनसंयुक्ताश्चाकारिता मयाऽऽययुः ।
विष्णुहस्ततलोत्पन्नं श्वेतवर्णं महागजम् ॥४९॥
चाऽधिरुह्य देवराजस्तत्र लक्ष्मि ! समाययौ ।
रुद्रौजःसंभवं कृष्णवर्णं च पौण्ड्रकाभिधम् ॥५०॥
महिषं धर्मराजश्च समारुह्याऽऽययौ तदा ।
ब्रह्मकर्णमलोद्भूतं श्यामं जलधिनामकम् ॥५१॥
शिशुमारमधिरुह्य वरुणस्तत्र चाययौ ।
तथा शकटचक्राक्षं शैलाकारं नरं शुभम् ॥५२॥
सपक्षं चाऽम्बिकापजमारुह्य धनदः स्थितः ।
गन्धर्वान् भुजगेन्द्राँश्चारुह्य श्वेतवृषाँस्तथा ॥५३॥

रुद्रा रौद्रासुरनाशार्थं तत्र समुपाययुः ।
अर्धसहस्रहंसाढ्यरथमारुह्य चन्द्रमाः ॥५४॥
आययौ च तथाऽऽदित्या हयोष्ट्ररथवाहनाः ।
कुंजरस्था वसवश्च यक्षाश्च नरवाहनाः ॥५५॥
किन्नरा भुजगारूढा हयारूढौ तथाऽश्विनौ ।
सारंगाधिष्ठिताश्चापि मरुतश्चाययुर्बलाः ॥५६॥

गन्धर्वाश्च खरारूढा अग्निर्मेषस्य पृष्ठगः ।
समुद्रा मकरारूढाः सुरा यानविमानगाः ॥५७॥
ब्रह्मा हंससमारूढो विष्णुर्गरुडवाहनः ।
ऋषयश्चासनस्थाश्च पितरः पुण्यवाहनाः ॥५८॥
पृथिवी शेषवाहा च शेषः कच्छपवाहनः ।
कच्छपा मेघवाहाश्च मेघाश्च वायुवाहनाः ॥५९॥

पर्वताः पक्षवाहाश्च विद्यतो मेघवाहिताः ।
नदा नद्यस्तरंगस्थाः सशस्त्राः समुपाययुः ॥६०॥
तदा वाद्यान्यवाद्यन्त देवानां तानरोहिणः ।
बलदा निनदाश्चाप्यश्रूयन्त द्युसदां तदा ॥६१॥
व्याघ्रानलः प्रशुश्राव निनादान् वै दिगन्तगान् ।
रुष्टश्चाप्यसहमानस्तूर्णमास्फोटयन् मुहुः ॥६२॥
ऊरून् करतलैश्चाप्यमोचयच्चाट्टहासकान् ।
ऊर्ध्वं चोड्डीय संवीक्ष्य युद्धसन्नाहसंस्थितान् ॥६३॥

सुरान् शीघ्रं गदां गुर्वीमुद्गृह्य गर्वमोहितः ।
आकाशं पूरयन् तन्वा मां सुरान् प्रति चाययौ ॥६४॥
उच्छ्रये गगनस्पर्शी दीर्घश्चायुतयोजनः ।
विशालो वार्धिवद् व्याघ्रानलो युद्धार्थमाययौ ॥६५॥
इन्द्रेण धर्मराजेन समं युद्धं चकार सः ।
वरुणेन धनदेन समं युद्धं चकार सः ॥६६॥
चन्द्रमसा तथा रुद्रैरादित्यैर्युयुधेऽपि सः ।
मूर्छां प्राप्य पुनर्युद्धं चक्रे बली पुनः पुनः ॥६७॥
यक्षैश्च किन्नरैश्चापि मरुद्भिर्युयुधे बली ।
अग्निना ब्रह्मणा साकं विष्णुना युयुधे मुहुः ॥६८॥

पर्वतैश्चापि विद्युद्भिर्युयुधे चातिदारुणः ।
सहस्ररूपधृग्भूत्वा युयुधे च सुरैः सह ॥६९॥

प्रधावन् व्योममार्गेणाऽऽकर्षयन् ग्रहमण्डलम् ।
नक्षत्राणि पातयंश्च दुद्राव युयुधेऽपि च ॥७०॥
स्थिरं तदाऽम्बरं चापि सकम्पं वै व्यलक्ष्यत ।
वायुस्तरा व्यमुञ्चन्त धृतिशक्तीः प्रकम्पिताः ॥७१॥
पृथ्वी कम्पेन च तदा संस्थानानि व्यसर्जयन् ।
नक्षत्राणां च गतयोऽपि सव्याहतयोऽभवन् ॥७२॥

विजयस्यापि विश्वासश्चागाद् द्वयोर्हि संशयम् ।
प्रलयो मुमुदे चाति पुष्टिं वीक्ष्याऽऽयतौ निजाम् ॥७३॥
आयुधानि समस्तानि प्रविश्य वर्ष्म चासुरम् ।
विनिर्यान्ति परं पारं मार्गगानीव रोमतः ॥७४॥
नास्य देहे गर्भभागे स्पर्शोऽपि शस्त्रकृत्तदा ।
जायते तादृशश्चास्ते युद्ध्यत्यत्यन्तमोजसा ॥७५॥

प्राणान् ग्लहाँस्तदा कृत्वा पणं कृत्वा विनाशने ।
नाशे वा निश्चयं कृत्वा वृकानलः प्रयुद्ध्यति ॥७६॥
गदया तोमरेणापि शक्त्या पाशेन चासिना ।
खड्गेन क्षेपणैश्चापि पर्वतैश्चोपलादिभिः ॥७७॥
शूलेन चापि चक्रेण दण्डेन च शरैस्तथा ।
वक्षसा बाहुना चापि हस्त्यादिभिश्च ताडनैः ॥७८॥

एवं युद्धं चकाराऽसौ वृकानलोऽसुरस्तदा ।
देवाश्च बलवन्तोऽपि प्रापुर्महापरिश्रमम् ॥७९॥
अथाऽहं च तदा लक्ष्मि ! विनिश्चित्य दुरासदम् ।
चक्रं सुदर्शनं चास्मै मुमोच लक्षधारवत् ॥८०॥
प्रलयाऽग्निसमं घोरं स्वर्गपातालदाहकम् ।
वर्धमानं महद्रूपं ददाहैनं समन्ततः ॥८१॥
व्याघ्रानलशरीराद्वै खण्डास्तदा तु कोटिशः ।
पृथग्भूताः कर्तिता ये तेऽपि व्याघ्रानलाः पुनः ॥८२॥

भवन्ति ह्यसुरास्तेन तुल्यास्तत्र हि सङ्गरे ।
चक्रं तूर्णं मयाऽऽज्ञप्तं दहत्येव च तानपि ॥८३॥
अन्तरीक्षं समस्तं च तदा वह्न्यम्बरं ह्यभूत् ।
प्रलयाग्निसमाव्याप्तं ब्रह्मास्त्रमिव वा ह्यभूत् ॥८४॥
तदा मया त्वमाज्ञप्ता महामायास्वरूपिणी ।
मोहिनीरूपमास्थायाऽसुरस्य जडतासये ॥८५॥
सन्निधावम्बरे प्राप्ताऽसुरो मोहमुपागतः ।
युद्धं चाऽसंख्यरूपाणि त्यक्त्वा त्वां धर्तुमागतः ॥८६॥
समाश्लिक्षच्च यावत् त्वां तावत् त्वया स्ववह्निना ।
व्याघ्रानलस्य वह्निर्वै समस्तोऽपि हृतोऽन्तरात् ॥८७॥

व्याघ्रानलो विना भानं विनाऽनलं च तैजसम् ।
जडीभूतोऽभवत्तावत् सुदर्शनेन भेदितः ॥८८॥

पपात शतधा चापि सहस्रधा महार्णवे ।
खड्गशृंगाणि जातानि वार्धौ तद्देहखण्डकाः ॥८९॥
निर्जीवाश्च जलमध्ये पर्वता इव तेऽभवन् ।
एवं व्याघ्रानले लक्ष्मि ! नाशिते मेघगर्जनाः ॥९०॥
आकाशे चाऽभवँस्तत्र समुद्राश्चार्द्रतां ययुः ।
मम देहात्तदा धारा जलानां च परिश्रमात् ॥९१॥

अभवन् वर्धमानास्ताः समुद्रानभ्यपूरयन् ।
आकाशादभवद् वृष्टिर्जयपुष्पाक्षतात्मिका ॥९२॥
सुरा मुदं ययुश्चापि पुपूजुर्मां श्रियाः पतिम् ।
मयाऽपि सत्कृता देवाः कृतकार्या निजालयम् ॥९३॥
ययुर्लक्ष्मि ! तदा त्वं चादृश्यभावमुपागता ।
ममापि वाहनं चाश्वस्त्वया साकं पितुस्तव ॥९४॥
गृहं प्रापय्य च त्वां तु मिष्टोदं समुपागतः ।
अहं सुरान्नमस्कृत्य मिष्टोदं समुपागतः ॥९५॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
अनादिश्रीवार्धिनारायणनाम्ना क्षितौ ततः ॥९६॥
प्रसिद्धश्चाऽभवं मह्यं पुण्डरीकः पिता तव ।
ददौ पुत्रीं तु विधिना योग्याय मेऽन्तरात्मने ॥९७॥
सुरादिवन्दितायेशेश्वराय परमात्मने ।
त्वां समुद्वाह्य विधिना पुण्डरीकश्रियं ततः ॥९८॥
अश्वं च वाहनं लब्ध्वाऽविचरं भुवनत्रये ।
आकल्पान्तमतिष्ठँश्च धर्मरक्षणहेतवे ॥९९॥
अनादिश्रीहरिः सोऽहं परब्रह्म सनातनः ।
वेद्म्यहं सर्वमेवैतत् मम प्राकट्यमुत्तमम् ॥१००॥
एवं जाता ह्यवतारा मम तत्राऽप्यसंख्यकाः ।
पठनाच्छ्रवणाद्वापि कीर्तनात्स्मरणादपि ॥१०१॥
भुक्तिमुक्तिप्रदाः सर्वे चमत्कारपरायणाः ।
स्मर नारायणीश्रि ! त्वं शिवपुत्रि ! चमत्कृतिम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः एकोनविंशे वत्सरे रौद्रस्य व्याघ्रानलासुरस्य नाशनार्थम् अनादिश्रीवार्धिनारायणस्य प्राकट्यमिति-निरूपणनामा षोडशोऽध्यायः ॥ १६ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं च ततो मम ।
वेधसः सृष्टिमानाख्ये वत्सरे चाद्यकल्पके ॥ १ ॥
आद्ये मनौ संप्रवृत्ते ब्रह्मा निद्रां विहाय च ।
प्रभाते देवनद्यां वै स्नातुं ययौ विचिन्तयन् ॥ २ ॥
अद्य सृष्टिं कीदृशीं च कुर्वे त्रिलोकिशोभनाम् ।
मादृशीं सर्वथा कुर्वे भेदभावविवर्जिताम् ॥ ३ ॥
इति संकल्प्य वै सस्नौ सन्ध्यां कृत्वा गृहं ययौ ।
नैत्यकं पूजनं कृत्वा सृष्टिशालां समाविशत् ॥ ४ ॥
सृष्टियन्त्रे स परपर्श गर्भयन्त्रं व्यलोकयत् ।
चतुर्मुखा समस्ता च सृष्टिरद्य प्रजायताम् ॥ ५ ॥
इतिसंकल्पयामास तावन्महर्षयस्ततः ।
स्वतुल्या अभवन् सर्वे चतुर्मुखा द्विजातयः ॥ ६ ॥
देवाः सर्वेऽपि च तथाऽभवँश्चतुर्मुखाः शुभाः ।
मानवाश्चापि गन्धर्वाः किन्नराः साध्यदेवताः ॥ ७ ॥
किंपुमांसः पशवश्च पक्षिणश्च सरीसृपाः ।
स्वेदजा अण्डजाद्याश्च जरायूजाश्च देहिनः ॥ ८ ॥
कल्लोलोत्थाश्च यादांसि मृजन्याः पत्रसंभवाः ।
तृणोत्था विवरोत्थाश्च पातालादिसमुद्भवाः ॥ ९ ॥
सर्वे वेधःप्रसंकल्पाज्जाताश्चतुर्मुखा ननु ।
दैत्याश्च दानवाश्चापि राक्षसा आसुरास्तथा ॥१०॥
यक्षाः पिशाचका भूताः सर्वेऽभवँश्चतुर्मुखाः ।
वेधसा पितृभिर्देवैर्मानवैर्भक्तपुंगवैः ॥११॥
कथाप्रसंगे सर्वत्र वर्णितोऽहं चतुर्मुखः ।
सर्वे चतुर्मुखाः सन्तीत्येवं वेदा वदन्त्यपि ॥१२॥
मुक्ताश्चतुर्मुखाः सर्वे ईश्वराश्च चतुर्मुखाः ।
इत्येवं कल्पनां चक्रुर्निजवत् कथका जनाः ॥१३॥
अथ ब्रह्मर्षयः साध्याः साधवो ब्रह्मचारिणः ।
यत्र यत्र कथाशाला विवदन्ति च मत्कृते ॥१४॥
केचिद् वदन्ति भगवानास्ते सहस्रमस्तकः ।
अन्ये वदन्ति भगवानास्तेऽप्यसंख्यमस्तकः ॥१५॥
सर्वत्राननवानास्ते प्रवदन्ति परे तदा ।
अपरे च तदा श्रीशो वर्तते ह्येकमस्तकः ॥१६॥
चतुरानन एवं चेतरे स्म प्रवदन्ति च ।
यथा वयं तथा सोऽपि यथा हरिस्तथा ह्यजः ॥१७॥
यथा ब्रह्मा तथा सर्वे महर्षयस्तथा सुराः ।
तथा च मानवाः सर्वे वयं यथा तथा हरिः ॥१८॥
एवं तत्राऽवदन् केचिदेवमासीद् विवादनम् ।
एतन्निर्णयलाभार्थं विवादा बहवोऽभवन् ॥१९॥
अथर्षिभिर्मानिवैश्च देवैः संहत्य भूतले ।
तटे सुवर्णगंगायाश्चोत्तरे परिषत् कृता ॥२०॥
तत्र द्विजाग्रणीः श्रौतवृषर्षिः प्राह कीदृशः ।
भगवान् वै परब्रह्म यः समुपास्यते प्रभुः ॥२१॥
वैदिकास्तु तदा प्राहुर्वेदप्रामाण्यगामिन ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥२२॥
अन्ये प्राहुश्च तं देवेश्वरेश्वरं हरिं तदा ।
सर्वतः पाणिपादोऽयं सर्वतोऽक्षिशिरोमुखः ॥२३॥
सर्वतः श्रुतिमान् श्रीशः सर्वात्मा स प्रतिष्ठति ।
परे प्राहुर्हरिं तत्र परमेशं सनातनम् ॥२४॥

निर्गुणं च निराकारं निष्क्रियं रूपवर्जितम् ।
अन्ये तदा तु तं प्राहुश्चतुर्मुखं निजादृशम् ॥२५॥
ब्रह्मा प्राह हरिश्चास्तेऽक्षरे धाम्न्येकमस्तकः ।
द्विभुजश्च द्विपाच्चापि द्विचक्षुश्च द्विकर्णकः ॥२६॥
अथाऽपरे तदा प्राहुर्नैवं नैवं कदापि वै ।
त्रिनेत्रः स हरिश्चास्ते सर्वदा परमेश्वरः ॥२७॥

एवं विचारे जाते च निर्णयस्तत्र नाऽभवत् ।
अथ ब्रह्मा तदा प्राहाऽऽराधनं प्रति शार्ङ्गिणः ॥२८॥
हरिर्वै कीदृशश्चेत्याराधनागोचरो भवेत् ।
वयमाराधयामस्तं चिरकालं जनार्दनम् ॥२९॥
अथास्ते भगवान् दिव्यस्तथा दृश्यो भविष्यति ।
अथ सर्वे मिलित्वैव स्वर्णनदीतटे च ते ॥३०॥
जपयज्ञात्मिकां मुख्यां बहुभक्त्युपबृंहिताम् ।
आरेभिरे गोचरोऽस्त्वित्याराधनां प्रिये मम ॥३१॥

सहस्रदिव्यमानां ते चक्रुराराधनां मम ।
ततस्तं हवनं चक्रुरुद्यापनात्मकाऽर्हणम् ॥३२॥
उत्सवं सुमहान्तं सम्प्रचक्रुः कीर्तनात्मकम् ।
दानभोजनरूपं च नृत्यगीतपुरःसरम् ॥३३॥
तेषां तु भावनापूर्त्यै मद्रूपनिर्णयाय च ।
भक्तेः फलं प्रदातुं च गोचरोऽहं तदाऽभवम् ॥३४॥
चिदाकाशात्मकं तेजस्तेजोराश्यात्मकं परम् ।
प्रथमं सर्वतस्तत्र निबिडं समदृश्यत ॥३५॥

अपारं चाऽप्यदृश्यं चाप्रवेश्यं चैकरूपकम् ।
अनन्तसूर्यचन्द्राग्निग्रहतेजोऽभिभावकम् ॥३६॥
ततस्तत्राऽसंख्यताना असंख्यभिन्नभास्वराः ।
एकदेशाद् विनिर्यान्तः परार्धकिरणव्रजाः ॥३७॥
अदृश्यन्ताऽभितश्चाधश्चोर्ध्वे पार्श्वेषु सर्वतः ।
तत्स्थले पारदृश्यं च निर्मलं शीतलं सुखम् ॥३८॥

हृद्यं तथाऽनवद्यं च सर्वतेजःपटात्मकम् ।
मूलं परिधिरूपं वै पटलं समदृश्यत ॥३९॥
यन्मध्ये मन्दहास्याढ्या स्नेहप्रेमखनिस्तथा ।
दिव्या ह्यसंख्यकामानां रूपगर्वाभिभाविनी ॥४०॥

मूर्तिस्त्वेकानना नेत्रद्वयकर्णद्वयान्विता ।
एकमूर्धा द्विहस्ता च द्विपादा चोज्ज्वला द्युति ॥४१॥
समदृश्यत रम्या चानन्दपूर्णा मनोहरा ।
वक्रस्निग्धचाकचक्योज्ज्वलतान्वितमूर्द्धजा ॥४२॥
स्वर्णचञ्चत्तारकलिंगसंशोभन्मुकुटान्विता ।
रत्नबद्धसुसौवर्णमकराकारकुण्डला ॥४३॥

कोटिचन्द्रप्रभाभास्वन्मन्दहास्यानना शुभा ।
स्वर्णहारालिसंराजत्पुष्टवक्षःस्थलान्विता ॥४४॥
भुजंगभुजशोभाढ्या कौस्तुभहारराजिता ।
श्रीवत्सचिह्नयुक्ता च भुजबन्धसुशोभिता ॥४५॥
सौवर्णकटकाढ्या च शंखचक्रादिशोभिता ।
पीताम्बरा पीतरक्तप्रावरणाढ्यकञ्चुका ॥४६॥

सौवर्णरशनायुक्ता स्वर्णकटकशोभना ।
सौवर्णशृंखलायुक्ता स्वर्णनुपूरराजिता ॥४७॥
स्वर्णोर्मिकान्विताऽङ्गुलीयकयुक्तकराग्रजा ।
मीनशूलध्वजधनुर्बाणस्वस्तिकराजिता ॥४८॥
पक्वबिम्बफलतुल्यौष्ठद्वयराजिता शुभा ।
मीनचञ्चलनेत्राढ्या पद्मपत्रायतेक्षणा ॥४९॥
तिलपुष्पोपमनासा द्विचन्द्राभकपोलिका ।
कोटिकामनिवासार्हभ्रूकुटिद्वयकर्षिका ॥५०॥

ऊनषोडशवर्षीया श्मश्रुरेखाविराजिता ।
पुष्टस्कन्धा स्थलपद्ममृदुसत्करपत्तला ॥५१॥
अलक्तरंगवद्धाऽऽढ्या हस्तिशुण्डोरुशोभना ।
शिरीषपुष्पवन्मृद्वी नखचन्द्रसमुज्ज्वला ॥५२॥
त्रिवल्युदरनाभ्याढ्या सर्वानन्दपरिप्लुता ।
राजीवलोचना शान्ता पद्मप्रकोष्ठशोभना ॥५३॥
सुष्ठुवर्तुलजान्वाढ्या समवृत्तोर्ध्वजंघिका ।
सर्वकामनिवासाढ्यजघनातिमनोहरा ॥५४॥

सर्वसौगन्ध्यसौन्दर्यसर्वमाधुर्यसंभृता ।
सर्ववात्सल्यसौशील्यौदार्यसौहार्दपूरिता ॥५५॥
सर्वैश्वर्यगुणशक्तिचमत्कारनिधानिका ।
सर्वाभरणभूषाढ्यलक्ष्म्या त्वया विराजिता ॥५६॥
अनेकपार्षदैर्युक्ता सेविता मुक्तमण्डलैः ।
मुक्तानीभिर्वन्दिता च मूर्तिर्मे समदृश्यत ॥५७॥
एकमस्तकया लक्ष्म्या सर्वश्रृंगारशोभया ।
व्यजनेन सुदिव्येन वीजिता वामसंस्थया ॥५८॥

कमलानां सुमालाभिर्युक्तया रम्यया श्रिया ।
आलोकिता तु नेत्राभ्यां नेत्रयोश्चान्तरज्ञयोः ॥५९॥
वीक्षिता सर्वदेवाद्यैः साश्चर्यं सा ह्यपूर्विका ।
अनादिश्रीकृष्णनारायणमूर्तिः सनातनी ॥६०॥
पुपूजुस्ते तदा सर्वे नत्वा मां तादृशं प्रभुम् ।
निर्णयं ते परं जग्मुर्दृष्ट्वा मामेकमस्तकम् ॥६१॥
तुष्टुवुश्च सुराद्या वै नीराजनं व्यधुस्ततः ।
अहं चोपादिदेशैतान् साक्षाद् यथा भवामि च ॥६२॥

देवाद्या यद् भवन्तोऽत्र शृण्वन्तु मां स्वरूपिणम् ।
द्विभुजोऽहं सदा चास्म्यक्षरे धाम्नि परात्परे ॥६३॥
एकाननो दिव्यरूपः स्वेच्छानैकवपुर्धरः ।
चतुर्भुजोऽथवा शतभुजः सहस्रहस्तकः ॥६४॥
तथाविधाननश्चापि भवामि कार्यरोधगः ।
विभिन्नानि स्वरूपाणि भवन्ति तु मदिच्छया ॥६५॥
कार्यं योग्यं विनिर्वर्त्य तिरोदधामि तां तनूम् ।
आराधितो भवद्भिश्च निर्णयार्थं परेश्वरः ॥६६॥
सोऽहं यथास्वरूपोऽस्मि तथाऽस्मि चात्र गोचरः ।
एतन्मम स्वरूपं चोपासितव्यं निरन्तरम् ॥६७॥
अनन्तसृष्टिनाशेऽपि यन्न लयं प्रयाति वै ।
नाप्यदृश्यत्वमाप्नोति तद्रूपं मम चैव हि ॥६८॥
धारयन्तु हृदयेषु भजन्त्वेतन्निरन्तरम् ।
पूजयन्तु स्तुवन्त्वेतद्रूपं मे शाश्वतं शुभम् ॥६९॥
अथाऽदृश्यो भवाम्येव पश्यतां भवतामिह ।
विवादं सम्परित्यज्य भजन्तु मां सदेदृशम् ॥७०॥
एवमुक्तेषु देवेषु मानवेषु महर्षिषु ।
मानसान्यभवँस्तेषां क्षितौ मत्स्थापनाय ह ॥७१॥
प्राहुस्ते परमेशं मां देहिनां मोक्षणाय वै ।
निवासं मानवे लोके विधेहि भगवन् सदा ॥७२॥
धर्ममार्गस्तथा मुक्तिः सेवया ते हि देहिनाम् ।
भविष्यति कृपामेतां कुरु श्रीपुरुषोत्तम ॥७३॥
अथाऽहं चिन्तयामास कृपया देहिनां हितम् ।
आत्यन्तिकं च कल्याणं मत्प्रसंगाद् भवेदिति ॥७४॥
मम योगेन भक्ता मे भविष्यन्ति युगे युगे ।
सन्तश्चापि भविष्यन्ति धर्ममोक्षप्रसाधकाः ॥७५॥
तेषां योगेन जीवानां मोक्षणं च भविष्यति ।
तस्मान्मया क्षितौ स्थेयं मानवैः सह पावनैः ॥७६॥
कृत्वा मानवरूपं च चतुर्मुखं यथाप्रजम् ।
लक्ष्म्या चापि तथा चतुर्मुखया स्थेयमेव ह ॥७७॥
इतिनिश्चित्य चाहं वै तदा लक्ष्मि ! जनान् मुनीन् ।
तथाऽस्त्विति प्रावदं च सर्वे तुष्टास्तदाऽभवन् ॥७८॥
पुपूजुः परया प्रीत्या पुष्पाक्षतसुचन्दनैः ।
अथाऽहं पितरौ भूमौ व्यचिन्तयं चतुर्मुखौ ॥७९॥
त्वया साकं तदा लक्ष्मि ! चाऽदृश्यतामुपाययौ ।
देवाश्च मानवाः सर्वे स्वस्वलोकं ययुस्तदा ॥८०॥
अथाऽहं कृष्णयशसं विप्रं धर्मयुतं शुभम् ।
पितरं चाकल्पयं च तस्याऽहं मानसः सुतः ॥८१॥
भार्यया तु प्रभावत्याऽध्यासितश्च चतुर्मुखः ।
आविरभवं तत्रैव प्रभावत्यंकगः सुतः ॥८२॥
अष्टभुजः पित्राकृतिश्चतुर्मुखोऽतिशोभनः ।
देवदुन्दुभयो नेदुस्तदा कुसुमवर्षणम् ॥८३॥
जयशब्दा अभवँश्चर्षीणां तदाऽऽशिषोऽभवन् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥८४॥
जातमन्त्रो युवाऽनादिचतुर्मुखनरायणः ।
स्वयमेवाऽभवं सर्वेष्टस्य पूरणहेतवे ॥८५॥
त्वं ततश्च मयाऽऽदिष्टा मधुविप्रस्य वै गृहे ।
विप्रस्य माक्षिकीसत्या भार्याया मानसी सुता ॥८६॥
चतुर्मुखाऽष्टहस्ता च व्यजायथाः स्वयं रमा ।
सर्वलक्षणसम्पन्ना सर्वसद्गुणशालिनी ॥८७॥
जातमात्रा युवती त्वं मानसी युगधर्मतः ।
त्वत्पितृभ्यां मदर्थं त्वं कल्पिता परमेश्वरी ॥८८॥
विवाहविधिना च त्वां परिणेमेऽहमुत्तमाम् ।
कुमारिकां पूर्वसर्वस्मरामैश्वर्यशालिनीम् ॥८९॥
तदा सृष्टिश्चतुर्वक्त्रवती चासाद्य मां हरिम् ।
त्वां चासाद्य समानां चाऽसेवयत् समशीलिनी ॥९०॥
आकल्पान्तं तदा चाऽऽसं साकं त्वया शुभानने ।
चतुराननसृष्टीनां सेवाग्रहणहेतवे ॥९१॥
असंख्याताश्चावतारा मम साकं त्वया प्रिये ! ।
तेषु तेषु च वर्षस्य कल्पेष्वासन् तथाविधाः ॥९२॥
सर्वकल्याणकर्त्तारः सर्वसंकल्पपूरकाः ।
वेद्म्यहं सर्वमेवैतन्नान्ये जानन्ति सर्वशः ॥९३॥
स्मर नैजं शिवदेविश्री ! जन्म स्वं चतुर्मुखम् ।
प्रमाक्षिकीरमानाम्नी तदा ख्यातिमगाः खलु ॥९४॥
तदा कल्पे तव मूर्तिर्मम मूर्तिश्चतुर्मुखी ।
आसीद् देवालयेष्वत्र स्वर्गादिष्वपि तादृशी ॥९५॥
पृथ्व्यां गृहे गृहे चासन् तथाविधा हि मूर्तयः ।
मां भजित्वा ययुर्धाम जना ये ते द्विहस्तकाः ॥९६॥
दिव्यरूपास्तदा भूत्वा त्यक्त्वा शवं चतुर्मुखम् ।
अष्टहस्तं परित्यज्य भूत्वा चैकानना द्रुतम् ॥९७॥
प्रापुर्मत्पार्षदैर्नीता धामाऽक्षरं परात्परम् ।
मुखानां चाभिधानानि दिङ्नामभिस्तदाऽभवन् ॥९८॥
विप्राणां तु वृषज्ञानविरागभक्तिभाञ्जि वै ।
मुखान्यासन् प्रसिद्धानि भुक्तिमुक्तिप्रदानि वै ॥९९॥
क्षत्रियाणां सान्त्वदामभेददण्डाभिभाञ्जि च ।
वैश्यानां तु च धर्मार्थकाममोक्षाभिभाञ्जि च ॥१००॥

सर्वेषां च सत्यदयायज्ञतपोमयानि च ।
सुखान्यासन् प्रसिद्धानि तत्तत्फलप्रदानि ह ॥१०१॥
दासानां तु व्यवसायदास्यतुष्टिस्तवाऽऽश्रि च ।
एवमासन् सुखान्येव फलदानि तदा सृजौ ॥१०२॥
इत्येवं श्रीशिवस्वामिसुते ! प्राकट्यमेव मे ।
त्वया साकं तदा जातमुदीरितं सुखास्पदम् ॥१०३॥
पठनाच्छ्रवणाच्चास्य स्मरणात्पापनाशनम् ।
यथेष्टर्द्धिप्रापणं च मोक्षलाभः प्रजायते ॥१०४॥
सर्वतीर्थफलान्येव सर्वयज्ञफलान्यपि ।
सर्वव्रतफलान्येव जायन्ते नात्र संशयः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो विंशतितमे वत्सरे सृष्टिसहस्राख्याऽनादिचतुर्मुखनारायणस्य प्रमाक्षिकीरमासहितस्य प्राकट्यमित्यादिनिरूपणनामा सप्तदशोऽध्यायः ॥ १७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं सत्कथां परमां मम ।
एकविंशे वेधसो वै वत्सरे वेदवत्सरे ॥ १ ॥
कल्पेऽशीतितमे चापि मनौ द्वादशके पुरा ।
अभूद् भक्तः पुण्यरातो द्विजो भक्तिपरायणः ॥ २ ॥
पत्नी तस्य राधनिकानाम्नी चाभूत् पतिव्रता ।
दम्पती चक्रतुर्नित्यं स्नानं ध्यानं ममाऽर्हणम् ॥ ३ ॥
भजनं चक्रतुश्चापि जपयज्ञं च संघशः ।
अखण्डनामधुन्यं च प्रचक्रतुः क्वचित्क्वचित् ॥ ४ ॥
लक्षतुलसिकापत्रैः पूजनं चक्रतुश्च मे ।
कार्तिके च मदर्थं वै व्रतान्युद्यापनानि च ॥ ५ ॥
नवान्नानां सुमिष्टानां नैवेद्यानि प्रचक्रतुः ।
माघे वासन्तिकं चाप्युत्सवं प्रचक्रतुस्तथा ॥ ६ ॥
पुष्पदोलोत्सवं चापि वैशाखस्य व्रतानि च ।
चातुर्मास्ये नियमाँश्च भक्तियुक्तान् प्रचक्रतुः ॥ ७ ॥
नित्यं प्रचक्रतुः साधुसाध्वीसेवां समुत्सुकौ ।
ताभ्यां साधुमुखादाकर्णितं कथाप्रसंगतः ॥ ८ ॥
अन्नदानात्परं दानं वस्त्रदानं प्रकीर्त्यते ।
वस्त्रदानात् परं दानं धनदानं प्रकीर्त्यते ॥ ९ ॥
धनदानात्परं दानं गोदानं सम्प्रकीर्त्यते ।
गोदानाच्च परं दानं कन्यादानं प्रकीर्त्यते ॥१०॥
कन्यादानात् परं दानं पुत्रदानं सुवंशकृत् ।
पुत्रदानात् परं दानं क्षेत्रदानं प्रकीर्त्यते ॥११॥
क्षेत्रदानात्परं दानमारोग्यस्य प्रदानकम् ।
आरोग्यदानतः श्रेष्ठं सवृत्तिगृहदानकम् ॥१२॥
सवृत्तिगृहदानाच्च पुण्यदानं परं मतम् ।
पुण्यदानाद्धर्मकर्मप्रदानं परमं मतम् ॥१३॥
धर्मकर्मप्रदानाच्च ज्ञानदानं सदाऽधिकम् ।
ज्ञानदानाद् भक्तिदानं सर्वेभ्यश्चातिरिच्यते ॥१४॥
भक्तिदानात् स्वर्गदानं शाश्वतानन्ददायकम् ।
श्रेष्ठं भक्तियुतं चेत्तत् ततोऽभयप्रदानकम् ॥१५॥
सर्वदानानि रम्याणि परलोकप्रदानि च ।
ब्रह्माण्डदानतुल्यानि यानि यानि च सन्ति वै ॥१६॥
जीवाऽभयप्रदानस्य नाऽर्हन्ति षोडशीं कलाम् ।
अभयं कालतो मायातश्चापि कर्मतस्तथा ॥१७॥
पापतो यमदूताच्च कुहृद्भ्यः शत्रुतस्तथा ।
वासनातश्च बन्धेभ्यो मुक्तिश्चाभयदानकम् ॥१८॥
अपुनरावृत्तिरूपा मुक्तिर्या साऽधिका ततः ।
सालोक्या तत्र वै श्रेष्ठा साष्टर्याख्याऽतो गरीयसी ॥१९॥
सारूप्याख्या ततः श्रेष्ठतरा प्रोक्ता सुखान्विता ।
सामीप्याख्या सर्वश्रेष्ठतमा ततोऽपि वै तदा ॥२०॥
सायुज्याख्या चातिश्रेष्ठतमा यत्परमा न वै ।
विद्यतेऽन्याऽभयदानात्मिका मूर्द्धन्यशालिनी ॥२१॥
तस्मात् सर्वप्रदानेभ्योऽभयदानं विशिष्यते ।
अन्यैर्वै पूर्वकाले यद् यादृशं नाऽर्पितं कृतम् ॥२२॥
तादृशं दानमेवाऽत्र दातव्यं चाभयात्मकम् ।
इत्येवं च सतां वक्त्राच्छ्रुत्वा कथामृतं ततः ॥२३॥
पुण्यरातस्तथा पत्नी विचारं चक्रतुर्मुहुः ।
दानं ददत्यत्र लोके धनाढ्याश्च धनादिकम् ॥२४॥
आवाभ्यां तु प्रदातव्यं पूर्वं कैश्चिन्न यत् कृतम् ।
यादृशं न प्रदत्तं च तादृशं देयमेव नौ ॥२५॥
अथैवं तौ संविचार्य कुरुतो भक्तिदानकम् ।
ज्ञानं भक्तिं ददतश्च कुरुतश्च स्वयं सदा ॥२६॥
एवं यातेषु मासेषु वर्षेष्वपि च वै ततः ।
प्राणायामपरौ जातौ योगक्रियापरायणौ ॥२७॥
प्राणरोधसमर्थौ च समाधिस्थितिवर्तिनौ ।
तापसौ ब्रह्मपरमौ त्यक्तदेहसुखौ ततः ॥२८॥
विदेहौ जीवनमुक्तौ मायासंगविवर्जितौ ।
क्षपितबन्धकर्माणौ दग्धैषणौ च योगिनौ ॥२९॥
अन्येषामभयदानधर्ममात्रपरायणौ ।
विचारयन्तौ सततं कथं मोक्षश्च देहिनाम् ॥३०॥

आत्यन्तिको भवेच्चात्र कर्तव्यं दानमेव तत् ।
अभीदानसमं दानं नान्यद् भवति वै ततः ॥३१॥
दातव्यं चाभयदानं सर्वजीवेभ्य एव ह ।
एकैकस्मै मोक्षदानं चोपदेशाद् भवेदिह ।
मन्त्रदानैः शतानां च सहस्राणां भवेदिह ॥३२॥
यत्नश्च बहुलस्तत्र साधनस्याऽवलम्बिनोः ।
आवयोर्वै भवेदेव तस्मात् साध्ये स्वयं हरौ ॥३३॥
यत्नः सम्यग् विधातव्यः प्रापणीयः परेश्वरः ।
भूलोकस्थमनुष्याणां तत्सम्बन्धवतां तथा ॥३४॥
तिरश्चामपि मोक्षः स्यादेवमर्थ्यः परेश्वरः ।
युगे वा युगदशके मनौ वाऽन्यमनौ स्थिते ॥३५॥
प्रत्यक्षः श्रीहरिश्चायाद् दद्यान्मुक्तिं च शाश्वतीम् ।
सर्वेभ्यो मानवेभ्यश्च यथा यत्नस्तथाऽत्र वै ॥३६॥
देहेनाऽनेन कर्तव्यो महान् स्वल्पस्तु नैव ह ।
इत्यानिश्चित्य कमले तावुभौ भक्तिसंयुतौ ॥३७॥
मम मूर्तेः समीपस्थौ जग्रहतुर्व्रतं इदम् ।
'अद्याऽऽरभ्य जपयज्ञः कर्तव्यः श्रीहरेः शुभः ॥३८॥
रात्रिंदिवं व्योमवासं कृत्वा भुक्तवैककालिकम् ।
फलं चैकविधं वारि पातव्यं चैकवारकम् ॥३९॥
यावद्धरिर्मिलेन्नैव कर्तव्यं तावदेव हि ।
शीलं व्रतं सदा रक्ष्यं वने वस्तव्यमेव च ॥४०॥
इत्येवं व्रतनियमं गृहीत्वा दम्पती हि तौ ।
युगादिदिनमारभ्य चक्रतुस्तप उत्तमम् ॥४१॥
देहस्य धारणे शक्तौ यथेष्टं त्यजनेऽपि च ।
कालस्य रोधने शक्तौ मृत्युञ्जयौ बभूवतुः ॥४२॥
अनिशं मां भजमानौ नारायणपरायणौ ।
बभूवतुः प्रियौ मेऽपि मम भक्तिपरायणौ ॥४३॥
मया त्वहस्यरूपं च तद्रक्षार्थं सुदर्शनम् ।
स्थापितं तद्वने पार्श्वे कालादिभयनुत्तये ॥४४॥
दावानलोऽतिवृष्टिश्च झंझावातोऽतिशीतता ।
हिमवृष्टिश्च वा क्रूरप्राणिविघ्नादिकं सदा ॥४५॥
निवार्यते हि चक्रेण भक्तरक्षाकरेण मे ।
अधैर्यसंभृतोर्द्वयोर्युगचतुष्टयम् ॥४६॥
व्यतीतं च ततश्चाऽहं विप्ररूपो ययौ पुरः ।
भिक्षां देहीति मध्याह्नेऽवोचं तयोः समीपतः ॥४७॥
शीघ्रमुत्थाय विप्राय जलं फलं तथाऽऽसनम् ।
पाद्यं च मधुपर्कं च नमस्कारः क्षमापनम् ॥४८॥

नारायणः प्रसन्नोऽस्तु चेत्युक्त्वाऽर्पितमेव मे ।
लब्ध्वा मयोक्तौ तौ भक्तौ श्रेयो वामस्तु सर्वदा ॥४९॥
ओमित्युक्त्वाऽऽहतुर्मां तौ हि सर्वेषां देहिनामिह ।
श्रेयो यथा भवेत् श्रेष्ठमाशीर्वादान् प्रदेहि नौ ॥५०॥
मयोक्तं पापिनो जीवा भवन्ति वासनामयाः ।
तेषां श्रेयो भवेच्चापि तपोयोगसमाधिभिः ॥५१॥
बहुकालानुष्ठितैश्च नाल्पकालेन वै खलु ।
तावाहतुर्हरिश्चात्र नौ कदा वै मिलिष्यति ॥५२॥
सर्वमानवमोक्षार्थं कदा साक्षान्मिलिष्यति ।
सर्वदेहिप्रमोक्षार्थं कदा कृष्णो मिलिष्यति ॥५३॥
मया श्रुत्वा तदोक्तं वै वां हरिर्मिलितोऽस्ति वै ।
सर्वमानवमोक्षार्थमर्धमन्वन्तरे गते ॥५४॥
मिलिष्यति हरिः साक्षात्तपोभक्तिबलादिह ।
पूर्णे मन्वन्तरे याते तिरश्चामपि मुक्तये ॥५५॥
मिलिष्यति प्रभुश्चात्र यथाबुद्धि वदाम्यहम् ।
इत्याश्रुत्य सीमवाक्यं प्रहृष्टौ तावुभावपि ॥५६॥
पादयोः पतितौ मे च पुपूजतुः पुनः पुनः ।
नेमतुश्च मुहुः पादरजः स्म लिहतस्तदा ॥५७॥
अयं नारायणश्चेति विज्ञाय तौ समुत्सुकौ ।
दर्शनं निजरूपस्य देहीति वदतः स्म माम् ॥५८॥
अहं तदा प्रसन्नश्च ददौ दिव्यं स्वदर्शनम् ।
शंखचक्रगदापद्मधरं प्रसन्नतान्वितम् ॥५९॥
अनेककोटिचन्द्रभाननं चाभरणान्वितम् ।
पादसंवाहनं चक्रतुश्च विविधपूजनम् ॥६०॥
वरार्थं कथितौ तौ च प्रार्थयामासतुस्तदा ।
मानवानां क्षितिस्थानां तत्सम्बन्धवतां तथा ॥६१॥
प्राणिनां परमां मुक्तिमिच्छावो युगपत् प्रभो ।
वरं वराणां श्रेष्ठं तं सर्वाभयप्रदानकम् ॥६२॥
देहि नाथ कृपासिन्धो प्रसन्नो भव केशव ।
इतिनारायणीश्रि ! प्रार्थयतां तौ वरं परम् ॥६३॥
मयोक्तौ भवतोर्मोक्षकरणार्थमहं त्विह ।
समायातोऽस्मि तूर्णं चागच्छतां वै मया सह ॥६४॥
तावाहतुः प्रभो मोक्षो नौ ते योगान्न संशयः ।
जात एव च जीवानां मानवानां तु मोक्षणम् ॥६५॥
विनाऽऽवां न प्रयास्यावो यथेष्टं कुरु वत्सले ।
हरिः प्राह तथेच्छाऽपि पूर्णा कालेन वै क्वचित् ॥६६॥
भविष्यति तपोभक्त्या यामि वां कुशलं भवेत् ।
इत्युक्त्वाऽहं तिरोभावं तूर्णं जगाम पद्मजे ॥६७॥

तौ प्रसन्नौ पूर्णकामौ वर्धमानप्रहर्षणौ ।
चक्रतुर्मम भक्तिं च स्मरन्तौ विग्ररूपिणम् ॥६८॥
नित्यं नवोत्साहवन्तौ चत्वारिंशद्युगावधिम् ।
चक्रतुश्च तपोभक्तिं तदाऽहं पुनराययौ ॥६९॥
शंखचक्रगदापद्मधरः श्रीभगवान् स्वयम् ।
तापसौ मम भक्तौ तु शुष्कदेहौ जगाद ह ॥७०॥
मनुष्यान् भूस्थितान् सर्वान् नीत्वा यातं ममाऽक्षरम् ।
एवं फलं तपसो वां प्रदातुं समुपागतः ॥७१॥
स्वीकुरुतं तपःसिद्धिं मनुष्याणां प्रमुक्तिदाम् ।
ततस्तौ मां प्रपूज्यैव संसेव्य परमादरात् ॥७२॥
आहतुर्भगवन्नत्र मनुष्याणां गृहे गृहे ।
गावोऽश्वाःकरिणश्चोष्ट्रा अजाश्चाश्वतरा मृगाः ॥७३॥
ऊरणाः श्वापदाश्चापि सिंहाश्च गवयादिकाः ।
ये ये वै पशवः सन्ति शुकाद्याः पक्षिणश्च ये ॥७४॥
सरीसृपाद्या ये चापि ये मनुष्योपयोगिनः ।
सर्वे ते मानवैः साकं मुक्तिमीयुस्तथा कुरु ॥७५॥
तान् विहाय मनुष्याणां मुक्तिं नेच्छाव एव ह ।
श्रुत्वाऽहं चाऽवदं ताभ्यां चिरेणैव भविष्यति ॥७६॥
ततस्तौ हर्षसम्पन्नौ जातौ कालावधिं गतौ ।
पूजां प्राप्य ततस्तूर्णमहमदृश्यतां ययौ ॥७७॥
अथ भक्तौ च तौ तद्वत् तपोभक्तिपरायणौ ।
अजायतां मयि स्निग्धौ जलान्नरहितौ ततः ॥७८॥
तपः पूर्णं तयोर्जातं भक्तिः पूर्णाऽभवत् तदा ।
तृणच्छन्नौ मृत्तिकाख्यौ तपसा जातविग्रहौ ॥७९॥
मन्वन्तरे गते काले मदर्थे तौ बभूवतुः ।
देहिनामुपकारार्थं मुक्त्यर्थं पशुदेहिनाम् ॥८०॥
अभीदानप्रदानार्थं त्यक्तसौख्यौ बभूवतुः ।
मम योगप्रदानार्थं जीवानां सर्वथा हि तौ ॥८१॥
पाषाणमृत्तिकाकल्पौ तपोभक्तौ बभूवतुः ।
ततोऽहं सहसा तत्र लक्ष्म्या च पार्षदैः सह ॥८२॥
सर्वपूजादिसामग्रीयुक्तो वै समुपाययौ ।
ईश्वराश्चाथ मुनयो देवाश्च ऋषयोऽपि च ॥८३॥
आययुः सर्वतीर्थानि तत्र स्थले नु मां तदा ।
दुन्दुभयश्च देवानामवाद्यन्त तदाऽम्बरे ॥८४॥
चन्दनानां सुवृष्टिश्चाऽमृतवृष्टिस्तदाऽभवत् ।
जयनादाश्च भूतानामभवन्परितोऽभितः ॥८५॥
विमानान्यप्यसंख्यान्यायातानि स्वर्गिणां तदा ।
मदिच्छया च मुक्तानां कोटयः समुपागताः ॥८६॥
कोटिकोटिविमानानि कोटिकोटीश्वरास्तथा ।
कोटिकोटिसुराश्चापि कोटिकोटिमहर्षयः ॥८७॥
अम्बरं सर्वथा व्याप्तमभवन् तद्विमानकैः ।
अनादिश्रीकृष्णनाराणोऽहं पुरुषोत्तमः ॥८८॥
अवतीर्य विमानाच्च ब्रह्महृदजलं स्थले ।
तयोस्तपसो भूमौ वै मृत्तिकायां निकुञ्जके ॥८९॥
अञ्जलिनाऽक्षिपं तत्र तावद् भूमेर्महानलः ।
दिव्यतेजोमयः प्राविरासीत् स्वर्गाधितैजसः ॥९०॥
तेजोमध्यः ततो जाता दिव्या तनुर्द्विजस्य ह ।
शंखचक्रगदापद्मधरा मूर्तिः सुशोभना ॥९१॥
आक्षरमुक्तसदृशी तत्पत्नी च तथाविधा ।
मुक्तानिकास्वरूपा चाऽभवत् तत्र रमादृशी ॥९२॥
उभौ मयाऽऽभाषितौ च क्षेमं मोक्षं सुखं प्रति ।
आहतुस्तौ कृपयैव पारं यातौ तवाऽऽश्रितौ ॥९३॥
मुक्तियोग्यौ समनुजैः सतत्सम्बन्धिदेहिभिः ।
पशुपक्ष्यादिभिः साकं जातौ चेदभिधारितौ ॥९४॥
तदा नारायणकृष्ण परमेश परात्पर ।
मुक्तिं देहि मनुः कालो व्यतीतो वचनात्तव ॥९५॥
अभीप्रदानकं देहि परमेश्वर माधव ।
विमानानि ह्यसंख्यानि समायातानि यानि च ॥९६॥
नमस्तेभ्यो भवताऽत्र सहितेभ्योऽपि कोटिधा ।
नमः समस्तभूतात्मन् परमेश नमोऽस्तु ते ॥९७॥
अक्षराधिपते चान्तर्यामिन् भक्तार्थपूरक ।
कुरु मुक्तिं देहिनां वै मदर्थितां तु सत्वरम् ॥९८॥
क्षमाऽपराधं भगवन् मनुकालेन वै मया ।
तपोभक्त्या निरुद्धस्त्वं सर्वेषां मोक्षहेतवे ॥९९॥
अपराधपरार्धानि मया कृतानि केशव ।
क्षान्त्वा धामानि सर्वान् वै देहिनो नय माधव ॥१००॥
यथायोग्यानि धामानि नय स्वतन्त्रकोऽसि यत् ।
नाऽऽग्रहो भगवन्मेऽत्र स्वर्गे सत्ये तथाऽक्षरे ॥१०१॥
इत्यर्थितं मम सर्वं विधेहि परमेश्वर ।
असंख्याऽभयदानेच्छा पूरिता स्वामिना त्वया ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसश्चैकविंशे वर्षे सर्वभूमिदेहिमोक्षार्थं तपस्यतो राधनिकापुण्यरातविप्रयोर्मन्वन्तरकाले गते वाञ्छापूरणार्थं श्रीपुरुषोत्तमनारायणस्य सर्वेश्वरदेवादिसहितस्यसमागमनमित्यादिनिरूपणनामाऽष्टादशोऽध्यायः ॥ १८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं ततोऽहं पुरुषोत्तमः ।
पुण्यं भक्तिं तपो दृष्ट्वा भक्तयोर्मनुकालजम् ॥ १ ॥
योगिनोः पात्रयोर्ममानुग्रहस्य च दिव्ययोः ।
ईश्वरीभूतयोर्हार्दं पूरयितुं पुराऽर्थितम् ॥ २ ॥
भूलोके मानवा ये ये नरा नार्यो नपुंसकाः ।
बाला वृद्धा युवानश्च विधुरा गृहिणस्तथा ॥ ३ ॥
त्यागिनो वनवासाश्च तान् सर्वान् वै समन्ततः ।
युगपद् दिव्यदेहाँश्च कृत्वा विमानसंस्थितान् ॥ ४ ॥
काँश्चिद्प्रेषयं श्वेतद्वीपं काँश्चित् क्षीरोदधिम् ।
काँश्चित् स्वर्गे च विविधं काँश्चिज्जनं महस्तपः ॥ ५ ॥
काँश्चिद्वै सत्यलोकं च काँश्चिद् वैकुण्ठमावृतौ ।
काँश्चिद् वैराजलोकाँश्च काँश्चिद् वैष्णवसत्पदम् ॥ ६ ॥
काँश्चित्तु नित्यकैलासं काँश्चिदव्याकृतं पदम् ।
अमृतं धाम काँश्चिच्च काँश्चिद् वैकुण्ठमुत्तमम् ॥ ७ ॥
काँश्चिद् गोलोकमेवाऽपि काँश्चिदक्षरमुत्तमम् ।
काँश्चिद्धामान्यनेकानि येषां योग्यानि यानि च ॥ ८ ॥
तानि तान् प्रापयामास चाहं श्रीपुरुषोत्तमः ।
अथ ये पशवश्चापि पक्षिणश्च मृगादयः ॥ ९ ॥
सरीसृपादयश्चापि मानवाधारजीवनाः ।
मानवापेक्षकाः सर्वे ग्रामारण्यनिवासिनः ॥१०॥
दिव्यदेहाः कृतास्तूर्णं द्विभुजा देवकोटयः ।
तान् सर्वानपि दिव्येषु विमानेषु निधाय च ॥११॥
स्वर्गं जनं महः सत्यं सौर्यं चान्द्रं च वारुणम् ।
आग्नेयं तापसं चार्षं वैराजं धाम इत्यपि ॥१२॥
अप्रेषयं यथायोग्यान् जीवान् भक्तेच्छया त्वहम् ।
दग्ध्वा जन्यानि कर्माणि भूस्थान् जीवानमोचयम् ॥१३॥
अप्रापयं दिव्यलोकान् यथापेक्षमनुग्रहात् ।
लक्ष्मि ! कृपा मया चेयं कृता भक्तानुसारिणी ॥१४॥
भूलोकः प्रायशः श्रेयोलोकेषु प्रेषितोऽभवत् ।
पृथ्वी रिक्ता च सञ्जाता विना मानवरूपकैः ॥१५॥
तथा तद्योगयुक्तानां पश्वादीनां च रूपकैः ।
रिक्ता जाता मही सर्वा भक्तयोस्तपसो बलात् ॥१६॥
पुरैवं मोचिता जीवा अभीदानप्रदानकैः ।
मम भक्तेन विप्रेण पुण्यरातेन योगिना ॥१७॥
मद्भक्तान्या तथा राधनिकया द्विजयोषिता ।
सर्वसृष्टौ कृपालुश्चाऽहं तदा ख्यातिमाप ह ॥१८॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
भक्ताधीनः प्रभूत्वैवाऽकरवं श्रेय उत्तमम् ॥१९॥
ततोऽभवं ह्यनादिश्रीकृपा नारायणः प्रभुः ।
शृणु लक्ष्मि ! ततो भक्तं पुण्यरातं तथा सतीम् ॥२०॥
राधनिकां दिव्यदेहौ कृत्वा विष्णुस्वरूपिणौ ।
विमाने स्वे स्थापयित्वाऽप्रेषयं तौ निजाऽक्षरम् ॥२१॥
अथ ब्रह्मादयो देवा भूतलं वीक्ष्य निर्जनम् ।
प्रार्थयामासुरत्यर्थं पुनर्मानवसृष्टये ॥२२॥
पश्वादीनां च सृष्ट्यर्थं स्थातुं चाकल्पमेव माम् ।
ततोऽहं भूतले लोके न्यवसं दिव्यरूपवान् ॥२३॥
त्वया दिव्यस्वरूपिण्या लक्ष्म्या साकं पुमुत्तमः ।
पुनः सृष्टिमकरवं यथापूर्वां तु मानसीम् ॥२४॥
मानवानां पशूनां च पक्षिणां सर्वदेहिनाम् ।
इच्छया वेधसश्चापि न्यवसं कल्पकान्तकम् ॥२५॥
एवं मुक्तिः कृता चापि पुनः सृष्टिः कृताऽपि च ।
स्मर सर्वं शिवराशि ! परे जानन्ति नैव तत् ॥२६॥
अवतारा ह्यसंख्याता जाता मे कार्यतोऽपि च ।
वत्सरे तत्र कल्पेषु वेद्मि सर्वानहं प्रिये ॥२७॥
कृपावतीरमा त्वं च तदाऽभवो मया सह ।
इत्येवं कथितं लक्ष्मि ! प्राकट्यं मम वै तदा ॥२८॥
अथाऽन्यवत्सरे चापि कथयामि निबोध मे ।
ब्रह्मणो वै रुद्रवत्सराख्ये द्विशतकल्पके ॥२९॥
बभूव चारणो भक्तो रक्षालयाऽभिधानकः ।
चारणी तस्य भार्या च नाम्ना तु सन्तयोगिनी ॥३०॥
योगभ्रष्टौ पूर्वभक्तौ जातिस्मरौ बभूवतुः ।
भजमानौ च मां भक्त्या नारायणं परेश्वरम् ॥३१॥
स्नानभक्तिपरौ साधुसाध्वीसेवापरायणौ ।
निवसतः स्म महिषीगोव्रजे द्रुमसंकुले ॥३२॥
पल्ल्यां खर्वटनिकटे तृणघासादिशोभने ।
अन्तरीक्षप्रकाशे वै कामकल्पानदीतटे ॥३३॥
चारयतः पशून्नित्यं दधिघृतादिजीवनौ ।
ऊर्णवस्त्रौ हरे कृष्ण नारायणेति संस्मरौ ॥३४॥
अनिवेद्य च मे स्थालीं पोलिकादधिपूरिताम् ।
प्रातर्नैव न मध्याह्ने भुञ्जाते न तथा निशि ॥३५॥
जलं पत्रं फलं पुष्पं वन्यद्रुमेभ्य एव च ।
आहृत्य सुन्दरं श्रेष्ठं हृद्यं चार्पयतो मम ॥३६॥
साधवोऽतिथयश्चाप्यायान्ति ये तु निजोटजाम् ।
तेभ्योऽर्पयतो दुग्धान्नं घृतं दधि च पोलिकाः ॥३७॥

सन्तस्तृप्ताः प्रकुर्वन्ति नाम संकीर्तनं हरेः ।
दिवानिशं च वा यान्ति यथेष्टं वा वसन्त्यपि ॥३८॥
साध्व्यश्चापि समायान्ति योगिन्यः सत्यदेवताः ।
ब्रह्मचारिण्य एवाऽपि प्रसिद्धं चारणालयम् ॥३९॥
देवालयो यथा तद्वद् पल्ली सा गोत्रजात्मिका ।
सतीसाध्वीसतां वासाद् देवालयसमाऽभवत् ॥४०॥

यत्र मद्भजनं नित्यं यत्र मत्पूजनं सदा ।
यत्र मत्कीर्तनं नित्यं तत्र देवालयो मम ॥४१॥
इत्यहं चाऽगोचरोऽपि न्यवसं तत्र पद्मजे ।
भक्तानां हृदये नित्यं गृहे चापि च मण्डले ॥४२॥
तीर्थे चापि वसाम्येव भक्तकल्याणहेतवे ।
भुञ्जे स्वपिमि नृत्यामि पिबामि च रमेऽन्वहम् ॥४३॥
विहरामि विहसामि सहयामि विशामि च ।
यत्ते वदामि गायामि प्रसीदामि भजामि च ॥४४॥

स्नामि शौचामि संकुर्वे चिन्तयामि च रौम्यपि ।
भक्तैः सह मिलित्वैवाऽऽचरामि विविधां क्रियाम् ॥४५॥
लीलां मोक्षकरीं सर्वां दिव्यामानन्दयाम्यपि ।
रासभावेन गोपैश्च गोपीभिश्च भ्रमेऽपि च ॥४६॥
मद्भक्तानां निवासेषु तथा वसामि सर्वदा ।
एवं चारणवासेऽहं न्यवसं भक्तमण्डले ॥४७॥
सर्वथा सर्वदाऽदृश्यो न जानन्ति यथा हि ते ।
तथाऽवसं तयोः कुत्र्यां गोत्रजे मूर्तिरूपवान् ॥४८॥

अथैकदाऽभवत् कामकल्पानद्यास्तटे शुभः ।
साधूनां वै समाजश्च महोत्सवोऽन्नसत्रकः ॥४९॥
तत्र याताश्चारणाश्च साधवोऽपि समुत्सवे ।
अन्नसत्रमये यज्ञे भोजयितुं जनानपि ॥५०॥
अन्नदानं दुग्धदानं वस्त्रदानं घृतार्पणम् ।
क्रियते च यथाशक्ति भिक्षुकेभ्यो नदीतटे ॥५१॥
दानोत्सव इतिख्यातिः सत्रस्याऽस्य ततोऽभवम् ।
तत्र सर्वे चारणा वै गताश्चाथ तु चारणी ॥५२॥

एकाकिनी गृहरक्षाकृते गेहे स्थिताऽभवत् ।
वत्सानां पालनाद्यर्थे गृहकार्यार्थमित्यपि ॥५३॥
अथ देवाः समायान्ति व्योममार्गात् तदा भुवि ।
दानस्थले महातीर्थे महाश्चर्यपरास्तदा ॥५४॥
विप्राश्च भिक्षुका भूत्वा भूत्वा साधुस्वरूपिणः ।
किंचिद्दानं स्वीकुर्वन्ति कामकल्पफलप्रदम् ॥५५॥
दातुर्ग्रहितुस्तुल्यं वै जायते तत्र तत्फलम् ।
अतः पुण्यप्रलोभेन देवा गृह्णन्ति दानकम् ॥५६॥

वैचित्र्यं दानसत्रेऽत्रोभयतः फलदं यतः ।
अथाऽम्बरात्तदा देवो वैमानिकोऽल्पपुण्यवान् ॥५७॥
निर्ययौ व्योममार्गेण पल्लीं पश्यन् नदीं प्रति ।
तेन मोहदृशा दृष्टा सुरूपा चारणी सती ॥५८॥
उज्ज्वला पुष्टदेहा च युवती स्वल्पवस्त्रिका ।
निर्जने प्रभया व्याप्ता सुघट्टांगसुशोभना ॥५९॥

मिष्टस्वरं समुद्भाव्य कीर्तने मग्नमानसा ।
स्नानार्द्रसर्वदेहा च सिञ्चमाना जलं तनौ ॥६०॥
स्वर्णचम्पकवर्णाभा रतिमूर्तिरिवाऽपरा ।
एवं विलोक्य मुग्धोऽसौ वैमानिको हि निर्जने ॥६१॥
चकमे तां सतीं देवीमवातरत् तदन्तिकम् ।
भूत्वा देवोऽपि च युवा सुरूपश्चारणोत्तमः ॥६२॥
सर्वाभरणसंशोभः पुष्टश्च नवयौवनः ।
काममूर्तिरिव तत्र शोभते तेजसा द्युति ॥६३॥

आययौ सन्निधौ तस्या हसन् स्प्रष्टुं यथेष्टकम् ।
साऽपि भक्ता नवं दृष्ट्वा जनं तूर्णं सकामुकम् ॥६४॥
शीघ्रमुत्थाय कुत्र्यां सा ययौ शीलावनाय वै ।
मां देव मा प्रपश्य त्वं कुदृष्ट्या शीलशालिनीम् ॥६५॥
पूजयामि नमस्कुर्वे प्रयाहि याहि शक्तिमान् ।
प्रधर्षणमकामाया निकृष्टफलदं यतः ॥६६॥
मान्याः पूज्याः सदा देवाः स्वल्पे ताड्या न वै मया ।
याहि सत्रं सुखं त्यक्त्वाऽऽशां दुरन्तां विमानवन् ! ॥६७॥

एष दुग्धाञ्जलिं तुभ्यमर्पयाम्यर्हणार्थकम् ।
मम वाक्यं सुसम्मान्य प्रयाहि त्वं यथागतम् ॥६८॥
साधो पतिव्रतायाश्च तपस्विनां गवां तथा ।
अनिवार्यो भवेद् दण्डो यमस्य ब्रह्मचारिणाम् ॥६९॥
देवो वा सार्वभौमो वा विप्रो वा चेश्वरोऽपि वा ।
भवेत् कुपथगो दण्ड्यः पथि तिष्ठन् प्रपूज्यकः ॥७०॥
इत्युक्तोऽपि सतीं तां चारणीं स्प्रष्टुं च धर्षितुम् ।
उपाययौ स शालायां खिन्ना सती जगाद तम् ॥७१॥

देवो भूत्वा दिव्यभोगान् भुक्त्वापि मानवे तनौ ।
मोहं यातो भवानत्र भस्मसाद् भव कामुक ! ॥७२॥
मा देवाश्चाग्रतः पृथ्व्यां समायान्तु विमानगाः ।
येऽभियास्यन्ति भूभागे भविष्यन्ति हि भस्मसात् ॥७३॥
इत्युक्तमात्र एवाऽसौ भस्मसादभवत्तदा ।
दानसत्रे च ये देवाः पृथिवीस्थास्तदाऽभवन् ॥७४॥
तेऽपि तूर्णं शापमात्रादभवन् भस्मसात् प्रिये ।
हाहाकारस्तदा जातश्चारणीशापतः क्षितौ ॥७५॥

ज्ञात्वा देवा दिव्यबुद्ध्या कारणं स्वविनाशकम् ।
द्रुतं च दुद्रुवुर्व्योम्ना दानं त्यक्त्वा निजालयान् ॥७६॥
देवागमोऽभवद् रुद्धो ब्रह्मविष्णुमहेश्वराः ।
इन्द्रचन्द्रादयश्चापि भुवं नाऽऽयान्ति भीवशाः ॥७७॥
देवता न समायान्ति तीर्थदेवा ययुर्दिवम् ।
पतिव्रतायाः शापेन भयमाप्ता दिवं गताः ॥७८॥
अथ ये मानवा लोके पापास्ते तीर्थगामिनः ।
पापं प्रक्षालयन्त्येव तीर्थेषु भूमिगेषु वै ॥७९॥
तानि पापानि तीर्थानां दग्धुं नायान्ति देवताः ।
कुंभे पर्वणि संक्रान्तौ चावभृथेऽपि भीवशाः ॥८०॥
अथ तीर्थानि सर्वाणि पापाक्रान्तानि पापिनाम् ।
दुःखितान्यभवँश्चाऽप्याराधयामासुरच्युतम् ॥८१॥
सतीशापात् सुरा नैवायान्ति भूमण्डलं भयात् ।
अस्मन्नाशो भवेदेवाऽचिरेण पापसंग्रहात् ॥८२॥
तस्मादागत्य भगवन्नुद्धारं कुरु नो भुवि ।
परब्रह्म स्वयं चाऽहं देवानां स्तवनैस्ततः ॥८३॥
अनादिश्रीकृष्णनारायणोऽहं भुवमागतः ।
चारणीगृहमागत्य तदङ्के पुत्रतां गतः ॥८४॥
तीर्थैर्देवैः पूजितश्च शंखचक्रादिचिह्नवान् ।
त्वं तदा चाभवो रत्नधनाख्यचारणात्मजा ॥८५॥
तेन विज्ञाय चिह्नैस्त्वं रमा **रत्ननरायणी** ।
रत्ननारायणीश्रीस्त्वमर्पिता विधिना च मे ॥८६॥
**अनादिश्रीतीर्थनारायणोऽहं** परमेश्वरः ।
सर्वतीर्थैश्चारणैश्च प्रख्यापितः परेश्वरः ॥८७॥
ततः साकं त्वया चाऽहं पितृभ्यां सहितस्तथा ।
तीर्थान्यकरवं सर्वाण्यभिगत्वा पुनः पुनः ॥८८॥
अथान्यदहं तेषां चाऽकरवं शापमोक्षणम् ।
देवानामागमार्थं वै पृथ्व्यां मातृनिदेशतः ॥८९॥
ततो देवा आययुश्च शापसंहरणोत्तरम् ।
अथाऽहं कल्पपर्यन्तं तीर्थनारायणोऽभवम् ॥९०॥
न्यवसं धर्ममास्थाय नीत्वा च पितरौ सह ।
भक्तान्नीत्वा निजं धाम ततो ययौ पुरातनम् ॥९१॥
इत्येतन्मम भूभागे चारणीशापनुत्तये ।
प्राकट्यं यत्पुरा जातं कथितं कमले च ते ॥९२॥
जानाम्यहं च तत्सर्वं नान्ये जानन्ति विस्मराः ।
स्मर त्वं चारणीं जातां रत्ननारायणीं प्रिये ! ॥९३॥
अन्ये तदाऽवतारा मे पृथ्व्यां जाता अनेकशः ।
साकं त्वया शिवराज्ञि ! तान् जानामि समस्तकान् ॥९४॥
ततो मया कृता लोके चारणा देवजातयः ।
यथा सन्तस्तथा सर्वे यथा विप्राश्च भूसुराः ॥९५॥
पठनाच्छ्रवणाच्चाऽस्य श्रावणात् स्मरणात्तथा ।
मननान्मम प्राकट्यस्यापि स्यान्मोक्षभाग् जनः ॥९६॥
धनवान् धर्मवान् स्याच्च पुत्रवान् सर्वशक्तिमान् ।
नारी सौभाग्यसौख्याद्यैश्वर्यवती भवेदपि ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो द्वाविंशे वत्सरे तीर्थपावनार्थे चारण्या अंकेऽनादि-तीर्थनारायणस्य प्राकट्यमित्यादिनिरूपणनामा नवाधिकदशमोऽध्यायः ॥ १९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं मे ततः परम् ।
सर्वेश्वरेश्वरेशानां विनियन्तुः परात्मनः ॥ १ ॥
त्रयोविंशे वेधसश्च सनातनाख्यवत्सरे ।
द्विपञ्चाशत्तमे कल्पे प्रथमे च मनौ पुरा ॥ २ ॥
पृथिव्यां सुरनद्याश्च तटे कालादने वने ।
मधुमच्छृंगवत्पार्श्वे क्ष्मासुराः स्म वसन्ति वै ॥ ३ ॥
तापसा ध्यानपरमा यज्ञयागपरायणाः ।
ब्रह्मकार्यपराश्चापि परमार्थपरायणाः ॥ ४ ॥
गृहधर्मे स्थिताः कर्मज्ञानमुख्याः विभक्तिकाः ।
मन्वते न बहुभक्तिं स्म ते मोक्षस्य साधनम् ॥ ५ ॥
धर्मयुक्तं हि विज्ञानं विवेकं बहु मन्वते ।
जडाजडविवेका ये निजधर्मपरायणाः ॥ ६ ॥
तरन्ति सर्वभोगाढ्या अपि ज्ञानेन बन्धनम् ।
अकर्ताऽऽत्मा चाप्यभोक्ता नित्यशुद्धोऽस्ति वर्ष्मसु ॥ ७ ॥
अहंममत्वरहितो रागद्वेषविवर्जितः ।
सुखदुःखविमुक्तश्च मुक्त एव न संशयः ॥ ८ ॥
वासनाऽऽशयहीनश्च क्रियायत्नविवर्जितः ।
बहिर्बुद्धिविहीनश्च मुक्त एव न संशयः ॥ ९ ॥
रजोभावविहीनश्च कामक्रोधादिवर्जितः ।
वृथाचेष्टाविहीनश्च मुक्त एव न संशयः ॥१०॥
स्त्रीपुत्रगृहयुक्तोऽपि वनवाटीसमन्वितः ।
महिषीगोवृषयुक् च निर्बन्धो मुक्त एव सः ॥११॥
लोकाचारयुतो नित्यं शास्त्राचारपरायणः ।
मर्यादायां वर्तमानो मुक्त एव न संशयः ॥१२॥
इत्येवं वृषमुख्यास्ते क्ष्मासुरा मखकर्मिणः ।
सुस्त्रीपुत्रीपुत्रयुक्ता वर्तन्ते स्म सरित्तटे ॥१३॥

फलमूलदलाहाराः सूर्यपक्वाशनास्तथा ।
ऋतुपक्वाशनाश्चापि वर्तन्ते स्म निराशयाः ॥१४॥
ब्रह्मशीलपराश्चापि चीरवल्कलधारिणः ।
जटाभस्मादियुक्ताश्च पर्णकुट्यादिवासिनः ॥१५॥
ब्रह्मचर्यं यथायोग्यं पालयन्ति व्रतानि च ।
यज्ञोत्सवान् प्रकुर्वन्ति स्मोत्सवान् ज्ञानिनामपि ॥१६॥
एवं वै वर्तमानास्ते जनेषु भूतलादिषु ।
स्थापयन्ति स्म वै ज्ञानं सकर्म मोक्षसाधनम् ॥१७॥
भक्तिं स्मरन्ति नैवैते धर्मं समाश्रयन्ति च ।
ततो वै चैकदा भक्त्या पत्न्याऽतिकृशया पतिः ॥१८॥
धर्मदेवोऽर्थितः पुष्ट्यै निजायाः प्राणरक्षकः ।
कान्त रक्षक लोकानां पत्नीव्रतोऽस्ति वै भवान् ॥१९॥
तव पुष्टिं प्रकुर्वन्ति क्ष्मासुराः कल्पकेऽत्र च ।
मम स्थानं न तत्राऽस्ति मृतिं यास्यामि वै ततः ॥२०॥
मां विहाय त्वया नाथ न गन्तव्यं कदाचन ।
तव पुष्टिर्मम हानिर्नैतद् युक्तं कदाचन ॥२१॥
यथा पुष्टिर्मम स्याच्च तथा पाल्या तव प्रिया ।
अप्रिया चेत् तवाऽहं वाऽस्त्रीति त्याज्या सदा खलु ॥२२॥
येन मे मरणं श्रेयःकरं स्यान्न तु जीवनम् ।
इत्युक्तो धर्मदेवो वै शुशोच क्षणमान्तरे ॥२३॥
भक्तिपुष्टिं हृदि कृत्वा निर्णयामास तत्कृतिम् ।
ययौ नारायणं विष्णुं परब्रह्म सनातनम् ॥२४॥
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ।
अक्षराख्ये परे धाम्नि चागत्य च पुपूज माम् ॥२५॥
प्रार्थयद् भक्तिदेव्यास्तु स्थापनार्थं क्षितौ वृषः ।
परब्रह्म हरेकृष्ण नारायण परेश्वर ॥२६॥
अद्य कल्पे क्षितौ लोका धर्ममात्रपरायणाः ।
कर्मकाण्डपराश्चापि भक्तिहीना विवेकिनः ॥२७॥
जडचेतनभेदज्ञाः कैवल्यार्था भवन्ति वै ।
उपासना न चैवास्ति नारायणस्य ते प्रभो ॥२८॥
अर्चागन्धोऽपि नैवाऽस्ति क्ष्मायां क्वापि हरेस्तव ।
ततश्चार्चास्वरूपस्याऽर्हणमुपासनादिकम् ॥२९॥
प्रवर्तयितुं भगवन् भक्तिं पोषयितुं तथा ।
जीवयितुं भक्तिभेदान् प्रयासं बहु माधव ॥३०॥
श्रुत्वैवं प्रार्थनां धर्मदेवस्य भक्तिपोषिणीम् ।
द्रुतं लक्ष्मि ! सदायुक्तयोगिनं हि सदाशिवम् ॥३१॥
प्रेरयामास पृथ्व्यां वै गन्तुं खण्डयितुं तथा ।
केवलं कर्मवादं च ज्ञानवादं च केवलम् ॥३२॥
भक्तिं विना निष्फलं वै कर्म ज्ञानं न मोक्षदम् ।
इत्येवमुपदेशार्थं प्रेषयामास शंकरम् ॥३३॥
स च भूमौ द्रुतं गत्वा दृष्ट्वा लोकाँश्च कर्मठान् ।
भक्तिहीनान् क्ष्मासुरादीन् रचयामास कौतुकम् ॥३४॥
दिगम्बरो युवा भूत्वोज्ज्वलो मोहकविग्रहः ।
देव्या युक्तो हरः पुष्टो ययौ क्ष्मासुरखर्वटम् ॥३५॥
यत्र वसन्ति सर्वे ते कर्मठाः क्ष्मासुरादयः ।
तत्पत्न्यश्चापि तत्कन्याः कुमाराश्च द्विजोद्भवाः ॥३६॥
कर्मठाः सर्व एवैते भेदज्ञानपरा अपि ।
भक्तिहीना दिव्यदृष्टिविहीना देहमानिनः ॥३७॥
कामक्रोधपराश्चापि देवमाहात्म्यवर्जिताः ।
योगिसाधुप्रतिमादिमाहात्म्यवर्जितास्तथा ॥३८॥
आतिथेयविहीनाश्च आह्लादशाविवर्जिताः ।
संसारदृष्टियुक्ताश्च दोषभृद्धृदयान्विताः ॥३९॥
एवंविधाः क्ष्मासुरास्ते यत्र वसन्ति संहृताः ।
नरा नार्यो ग्रामवासाः पर्णकुट्यादिवासिनः ॥४०॥
तत्राऽयं शंकरो नग्नो ययौ चेष्टां तु कामिनः ।
कुर्वन् गृहं गृहं याति कन्यास्तथा कुमारकाः ॥४१॥
युवत्यश्च तथा नार्यो मत्तं विलोक्य देहिनम् ।
प्रमत्तं सुन्दरं पुष्टं मोहकं तमनुद्रुताः ॥४२॥
नर्मवाक्यानि जगदुर्वीक्षयामासुरीश्वरम् ।
कामुकं हसमानाश्च चिक्षिपुर्धूलिकादिकम् ॥४३॥
काश्चित्तु ताडयामासुर्नितम्बे दण्डयष्टिभिः ।
मोहिताः क्ष्मासुरपत्न्योऽनुजग्मुर्भानवर्जिताः ॥४४॥
परस्पर्शुः सुखालोभेन निन्युर्निर्जनकुंजके ।
विप्रा वीक्ष्य तथा श्रुत्वा कर्मकाण्डपरायणाः ॥४५॥
मृषाविवेकध्वजिनोऽनुपेतुर्हननाय तम् ।
प्राप्य दण्डैर्यष्टिभिश्च ताडयामासुरत्यति ॥४६॥
शंकरो युक्तयोग्येव दुःखं जानाति नैव ह ।
ताडनं बलवत् प्राप्य ममार पतितो भुवि ॥४७॥
शवीभूतोऽभवत् तत्र श्वासं गृह्णाति नैव ह ।
समाधौ वर्तते यद्वन्मृतो यथाऽभवत्तदा ॥४८॥
ते च सन्त्यज्य पतितं विप्राः स्वस्वालयान् ययुः ।
सती देवी ततः क्रुद्धा शशाप तान् प्रताडकान् ॥४९॥
यतो मिथ्याज्ञानकरा विवेकध्वजिनो द्विजाः ।
आत्मसत्ताविहीनाश्च निजाऽकर्तृत्वमानिनः ॥५०॥

८

अकर्तृत्वमभोक्तृत्वं नित्यशुद्धत्वमात्मनि ।
अंशमात्रं न मन्वाना वागाडम्बरवेदिनः ॥५१॥
कर्मठा देहरूपाश्च कामक्रोधपरायणाः ।
योगिनां च सतां दिव्यमाहात्म्यस्याऽविदस्तथा ॥५२॥
कामक्रियापरा यूयं स्ववत्परेऽभिशंकिनः ।
निर्दया ब्रह्महत्याका मृतिं यान्तु यथा हरः ॥५३॥
इति सत्या चाभिहिते खेटे खर्वटके वने ।
क्ष्मासुरा नरवर्गास्ते द्रुतं क्रमान्मृतिं ययुः ॥५४॥
शवा गृहे गृहे जाता नराणां वसतिष्वपि ।
हाहाकारो महान् जातो विप्रावासेषु चाभितः ॥५५॥
विप्रा मृतिं प्रयान्त्येव नग्ननार्याः प्रशापनात् ।
किं कर्तव्यं क्व गन्तव्यं रक्षणार्थमिहाऽद्य वै ॥५६॥
नार्यो रुदन्ति परितो बालाः कन्या रुदन्त्यपि ।
मानवाश्चापि संश्रुत्वा रुदन्ति च स्थले स्थले ॥५७॥
आत्मभावविहीनाश्च विवेकज्ञानवर्जिताः ।
वाङ्मात्रज्ञानकर्तारो भेदज्ञानविवर्जिताः ॥५८॥
कर्मठाः क्रोधकामादिदोषयुक्ताः शुचान्विताः ।
सर्वत्र मानवे लोके क्षितौ देशेषु वै तदा ॥५९॥
क्ष्मासुरा गतमानाश्च गतासवोऽभवँस्तदा ।
दिनमध्ये तु सर्वस्यां पृथिव्यां कमले तदा ॥६०॥
कोट्यर्बुदशवानां वै श्मशानान्यभवँस्तदा ।
गृहे गृहे शवस्तत्र क्षणे क्षणे प्रजायते ॥६१॥
कोपोऽयं कश्चिदेवाऽपि महत्तम इतिस्त्रियः ।
अन्ये जना अविप्राद्या मेनिरे सर्वनाशकः ॥६२॥
यत्र यत्राऽभवन् विप्राः कर्मठा भिन्नवादिनः ।
भक्तिहीनाश्च ते सर्वे शवतां भेजिरे तदा ॥६३॥
हाहाकारे तथा जाते नरा नार्योऽवशेषिताः ।
आराधनां परेशस्य चक्रुर्मे परमात्मनः ॥६४॥
त्वं प्राणस्त्वं जीवनं च त्वं रक्षाकर माधव ।
त्वं स्त्रीणां शरणं नाथ जीवयाऽस्मत्पतीन् जनान् ॥६५॥
इत्येवं स्तवनं श्रुत्वा निमित्तं चागमे मम ।
अहं साकं त्वया लक्ष्मि ! चाययौ पुरुषोत्तमः ॥६६॥
सुवं शीघ्रं शंखचक्रगदापद्मादिशोभितः ।
स्वर्णभूषाम्बरशाली दिव्यतेजोऽभिराजितः ॥६७॥
यत्र हरशवश्चास्ते यत्र द्विजशवास्तथा ।
तत्र प्रदर्श्य मद्रूपं समाश्वास्य च योषितः ॥६८॥
तथा नरान् द्विजभिन्नानहं धैर्यं परं ददौ ।
कर्मठा ज्ञानकर्तारो विवेकाचारवर्जिताः ॥६९॥
शुष्कज्ञाना भक्तिहीनाः साध्वपराधकारिणः ।
सद्यः फलमिमे प्राप्ताश्चाऽविदित्वाऽपराधिनः ॥७०॥
शुष्कज्ञाने महत्पापं ज्ञातुश्चाचारवर्जिनः ।
ज्ञायते यत् प्रोच्यतेऽपि नाचर्यते न धार्यते ॥७१॥
तत्पापसदृशं पापं नान्यद् भवति देहिनाम् ।
कर्मकाण्डरताश्चेमे विवेकध्वजिनस्तथा ॥७२॥
रागद्वेषविहीनत्वं पालयन्ति न सर्वथा ।
मारितस्त्ववधूतोऽयं योगी विवेकवाँश्च तैः ॥७३॥
साधोर्भक्तिविहीनैश्च मृतिश्चामन्त्रिता निजा ।
अथ लोका जना नार्यः पप्रच्छुः परमेश्वरम् ॥७४॥
कथमेषा महापत्तिर्विलीयेत प्रशाधि नः ।
अहं तदाऽवदं तेभ्यो लक्ष्मि ! तत्पूजनाय वै ॥७५॥
शवं तं मारितं गत्वा पूजयन्तु प्रतिष्ठितम् ।
प्राणप्रतिष्ठां कुर्वन्तु तन्मूर्तिं पूजयन्तु च ॥७६॥
षोडशाद्युपचारैर्वै नैवेद्यार्पणसेवनैः ।
नीराजनादिभिश्चापि स्तवनैः पूजयन्तु तम् ॥७७॥
तदा प्रयास्यति ध्वंसं मृत्योरुपद्रवस्त्वयम् ।
श्रुत्वा नार्यो नराश्चापि मृषाविवेकवर्जिताः ॥७८॥
सर्वे नीत्वा सुसामग्रीश्चन्दनाक्षतमालिकाः ।
धूपदीपसुनैवेद्यवस्त्रालंकारपादुकाः ॥७९॥
आवाहनादिकं कृत्वा प्रपूज्य सर्ववस्तुभिः ।
प्राणप्रतिष्ठां चक्रुस्ते मत्पूर्वाः स्त्रीनरादयः ॥८०॥
नीराजनं प्रचक्रुश्च तावच्छंभुः सचेतनः ।
भूत्वा नेत्रे समुन्मिल्योत्थितोऽभवत् क्षणान्तरे ॥८१॥
नैवेद्यं च ददुस्तस्मै जलपानं ददुस्ततः ।
हरस्तदा प्रसन्नश्चाऽभवद् वरार्थमाह तान् ॥८२॥
सर्वे तदाऽर्थयामासुर्मृतानां जीवनं पुनः ।
हरः प्राह प्रपूज्यैनां देवीं लब्ध्वा शुभाशिषः ॥८३॥
जीवितास्ते भविष्यन्ति नान्यथा तु कदाचन ।
अथ देवीं पुपूजुस्ते लक्ष्मि ! नार्यो नरास्तथा ॥८४॥
अर्थयामासुरेवाऽपि मृतानां जीवनं पुनः ।
शिवा प्राह यथा चात्र पूजिता शंकरान्विता ॥८५॥
तथा लक्ष्मीमिमां श्रीमन्नारायणसमन्विताम् ।
पूजयन्तु ततः सर्वे मृता यास्यन्ति जीवनम् ॥८६॥
इत्युक्ताश्च नरा नार्यः पुपूजुर्मां त्वयाऽन्वितम् ।
ततः सर्वे चोत्थिताश्चाऽपराधमृतिवर्जिताः ॥८७॥
ते जीवं प्राप्य मां जीवन्नारायणेति वै जगुः ।
ख्यातिं प्राप्तस्तदाऽनादिजीवन्नारायणोऽप्यहम् ॥८८॥

त्वया सार्कं मम मूर्तिं भक्तिनारायणात्मिकाम् ।
सर्वदा तु ततो भक्त्या मत्प्रदर्शितया जनाः ॥८९॥
सेवयामासुरत्यर्थं त्यक्त्वा शुष्कं विवेचनम् ।
कर्मकाण्डं च वै सर्वसमर्पणात्मकं व्यधुः ॥९०॥
शंकरस्तान् समस्तांश्चोपादिदेश मदर्पणम् ।
सर्वविधं कर्मकाण्डं मम भक्त्यात्मकं ततः ॥९१॥
धर्मयुक्तं भक्तियुक्तं ज्ञानं तु वेदनं मम ।
ततः प्रवर्तितं तत्र कल्पे मोक्षप्रदं शुभम् ॥९२॥
भक्तेरुज्जीवनं जातं भक्तिमार्गः प्रवर्तितः ।
मूर्तयो मम शंभोश्च सशक्तिकाश्च भूतले ॥९३॥
ततस्तैर्जीवमापन्नैः स्थापिता दर्शिता यथा ।
पूजिताश्चापि सर्वत्र भक्तिः पुष्टिं जगाम ह ॥९४॥
एवं शंभुः सतीयुक्तः कृत्वा कौतुकमुत्तमम् ।
स्थापयित्वा क्षितौ मूर्तिपूजां भक्तिं तथोत्तमाम् ॥९५॥
यथावद्दृश्यतां चाऽहं जीवनारायणः प्रभुः ।
त्वया सार्कं क्षितौ कल्पान्तकं कालमुवास ह ॥९६॥
इत्येवं शिवराज्ञीश्रि ! प्राकट्यं कीर्तितं मम ।
अनादिश्रीकृष्णनारायणस्य परमात्मनः ॥९७॥
धर्मस्य भक्तियुक्तस्योपासनायाश्च पुष्टये ।
पूजाया मम मूर्तेश्च मूर्तेश्च शंकरस्य च ॥९८॥
नासील्लिंगं च तत्कल्पे मूर्तिरासीद्धरस्य वै ।
मम मूर्तिस्तदैवासीन्नासीद्विष्णुशिला तदा ॥९९॥
एवं पूर्वं तु यज्जातं वेद्म्यहं सर्वमेव तत् ।
स्मर त्वं मम पूजादि तदा प्राकट्यमित्यपि ॥१००॥
पठनाच्छ्रवणाच्चास्य स्मरणाच्चिन्तनादपि ।
मम पूजाफलं लक्ष्मि ! भवेदेव न संशयः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसस्त्रयोविंशे वत्सरे भक्तेः प्रार्थनयाऽनादिश्रीजीवनारायणस्य प्राकट्यं शंकरद्वारा भक्तिमार्गप्रवर्तनं चेत्यादिनिरूपणनामाविंशोऽध्यायः ॥ २० ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु त्वं शिवराज्ञीश्रि ! प्राकट्यं चापरं मम ।
चतुर्विंशे वत्सरे च वेधसस्त्वार्षसंज्ञके ॥ १ ॥
कल्पे शततमे षष्ठे मनौ यथाऽभवत् पुरा ।
तदानीं वेदविद्वांसो ब्राह्मणा यतयस्तथा ॥ २ ॥
देवताः ऋषयश्चापि पितरश्चाऽजनिर्मिते ।
सर्वमेधात्मके यज्ञे मिमिलुर्मोक्षदातटे ॥ ३ ॥
विचारास्तत्र सर्वेषामभवन् मत्परायणाः ।
कीदृशोऽयं हरिः सेव्यश्चैकलो वापि युग्मकः ॥ ४ ॥
निर्गुणो वा सगुणो वा मूर्तो ह्यमूर्त एव वा ।
अग्निरूपोऽथवाऽऽदित्यस्वरूपो वाऽप्यरूपकः ॥ ५ ॥
अथ तत्र स्वयं ब्रह्मा जगाद युगलात्मकः ।
अन्ये महर्षयः प्राहुश्चैक एव परात्परः ॥ ६ ॥
देवाः प्राहुः सगुणोऽयं यतयो निर्गुणः स्वयम् ।
सेवनीयो यथायोग्यो मूर्तिमानपरे जगुः ॥ ७ ॥
कर्मठाः प्राहुरेवाऽयं सेवनीयो ह्यमूर्तकः ।
अग्निरूपो हरिः साक्षात् परे प्राहुर्हि भास्करः ॥ ८ ॥
सेवनीयो ब्रह्ममूर्तिश्चेत्येवं वादमाचरन् ।
निर्णयो नैकरूपोऽभूत् तदा विष्णुर्जगाद ह ॥ ९ ॥
शंभुश्चायं यथा त्वस्मान् वदेन्निर्णय एव सः ।
शंभुः श्रुत्वा हरेर्वाक्यं प्रजगाद सभाजनान् ॥१०॥
ध्यानं क्षणं प्रकुर्वन्तु स्वयं दास्यति निर्णयम् ।
इत्युक्तं शंकरवाक्यं सर्वमेधाऽध्वरे तदा ॥११॥
ध्यानमग्ना अभवँश्च देवर्षिपितृमानवाः ।
तावद् व्योम्नो दिव्यतेजोमयोऽद्रिः समुपाययौ ॥१२॥
अव्याप्नोदम्बरं सर्वं दिवं भुवं दिगन्तरम् ।
तन्मध्ये सुविमानं चाऽक्षराऽभिधं मम प्रियम् ॥१३॥
अदृश्यत तदा लक्ष्मि ! तत्राऽहं च त्वया सह ।
अनादिश्रीकृष्णनारायणोऽर्धकमलातनुः ॥१४॥
प्रत्यक्षः पुरतस्तेषां ध्याने ततश्च गोचरः ।
अर्धे शिखा शिरस्यास्तेऽर्धे श्रीकेशात्मधम्मिलः ॥१५॥
अर्धभाले सुतिलकं चार्धभाले सुचन्द्रकः ।
दक्षे कर्णे कुण्डलं च वामे कुण्डलिकैरिणी ॥१६॥
दक्षे तु निर्मलं चूर्णं वामे नेत्रे तु कज्जलम् ।
दक्षे श्मश्रुस्तथा रिक्ता नासा वामे सनित्थका ॥१७॥
दक्षं वक्षश्चोन्नतं च वामं स्तनसमन्वितम् ।
दक्षहस्तौ शंखचक्रयुतौ सुकटकान्वितौ ॥१८॥
वामहस्तौ पद्ममालाशृंखलाव्यजनान्वितौ ।
दक्षे श्रीवत्सचिह्नार्धं वामे मूर्त्यर्धकं च मे ॥१९॥
दक्षोदरेऽर्धत्रिवली वामे समोदरात्मता ।
दक्षेऽर्धे नरलिंगं च वामेऽर्धायोनिरित्यपि ॥२०॥
दक्षे त्वेको हि वृषणो वामे तु गुप्तग्रन्थिका ।
दक्षपादः सरोमा चाऽरोमा वामः समुज्ज्वलः ।
नरवद्दीर्घफणकः नारीवद्ध्रस्वसत्फणः ॥२१॥

दक्षार्धं श्यामसौन्दर्यं वामार्धं कनकोज्ज्वलम् ।
दक्षार्धं पीतधौत्रादिस्वर्णार्धमुकुटान्वितम् ॥२२॥
वामार्धं कञ्चुकीशाटीस्वर्णमुकुटिकान्वितम् ।
दक्षार्धं नरभूषाढ्यं वामं नारीविभूषणम् ॥२३॥
दक्षं पुंबलसंयुक्तं वामं नारीसुमार्दवम् ।
एवं भूत्वा चैक एव तथापि द्विस्वरूपवान् ॥२४॥
प्रत्यक्षः पुरतस्तेषामर्धश्रीशनरायणः ।
ददृशुस्ते चान्तरे मां च तादृशं द्व्येकरूपिणम् ॥२५॥
पुपूजुर्मानवा देवाः ऋषयः पितरोऽपि माम् ।
ब्रह्माद्याः प्रार्थयामासुरत्र क्षितौ सदा वस ॥२६॥
एवमेवस्वरूपस्त्वं लोककल्याणहेतवे ।
ततोऽहं मोक्षदानद्यास्तटे मेरोस्तु पश्चिमे ॥२७॥
आध्वरे भूतले नित्यमवसं सर्वगोचरः ।
आकल्पान्तं परमेशः शिक्षयन् प्रतिमाऽर्हणम् ॥२८॥
अनादिश्रीमदर्धश्रीश्वरनारायणः प्रभुः ।
तथैव मन्दिरादौ च गृहे गृहे च सर्वथा ॥२९॥
मूर्तिश्चैकविधा मेऽभूदर्धश्रीशनरायणी ।
तथैवोपासना ध्यानं पूजनं वेषधारणम् ॥३०॥
सर्वं मे तादृशं ह्यासीद् भक्तैः संसेवितं वपुः ।
मदिच्छया मया लक्ष्मि ! तत्र कल्पे तथा कृतम् ॥३१॥
धृतं रूपं यथेष्टं वै यथाऽक्षरे विशिष्टकम् ।
अथ देवादयो मां च ततः परं तथाविधम् ॥३२॥
पूजयन्त्युपासयन्ति स्म च मुक्तिं व्रजन्ति च ।
इत्येवं मे तत्र कल्पे प्राकट्यमुदितं तव ॥३३॥
इत्येवं स्मर युग्मैक्यं निजप्राकट्यमीश्वरि ! ।
सर्वं जानाम्यहं लक्ष्मि ! तथा नैकाऽवतारकान् ॥३४॥
अथाऽग्रे चेतरन्मे च प्राकट्यं प्रवदामि ते ।
पञ्चविंशे वेधसश्च धर्माख्ये वत्सरे तदा ॥३५॥
कल्पे पञ्चशते चाद्ये मनौ पितृगणाः पुरा ।
पृथ्व्यामागत्य वंशेभ्यो जगृहुः श्राद्धभोजनम् ॥३६॥
तत्तद्वंशोद्भवा लोका विद्यावन्तो व्यधुश्च तत् ।
श्रद्धया पितृसंघानुद्दिश्य पिण्डादिकं ददुः ॥३७॥
ते सर्वे पितरश्चापि विनिर्गत्याऽर्धदेहिनः ।
प्रसारितकराभ्यां वै पिण्डान् प्रजगृहुर्मुदा ॥३८॥
प्रसन्नवदनाश्चापि समुज्ज्वलकरास्तथा ।
नाभ्यूर्ध्वदृश्यदेहाश्च पिण्डान् प्राप्यैव तस्थिरे ॥३९॥
करस्थभोजनाः सर्वे एवमेव स्थिरास्तदा ।
अभुञ्जाना अभवँश्च मौनाः शान्ता निरुत्सुकाः ॥४०॥
तदा वंशजविप्राद्यैरभुञ्जाना विलोकिताः ।
पृष्टाश्च पितरः सर्वे कथं भुङ्ध्वे न चार्पितम् ॥४१॥
ते प्राहुश्च हरेः प्रासादिकं नास्त्येतदेव यत् ।
तदभक्ष्यं सदाऽस्माकं यतश्च वैष्णवा वयम् ॥४२॥
अथ वंश्याः पृष्टवन्तः कथं प्रासादिकं भवेत् ।
यदत्र दृश्यते नैव न चाऽस्ते च नरायणः ॥४३॥
तदा ते पितरः प्राहुर्हरिसूक्तं जपन्त्विह ।
हरिस्त्वागत्य पिण्डादि पायसान्नं ग्रहीष्यति ॥४४॥
अथ ते हरिसूक्तेनाऽऽराधयन्मां तदा क्षणे ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥४५॥
अहं साकं त्वया लक्ष्मि ! पितॄणां भक्तिरोधतः ।
प्रत्यक्षस्तत्र वंश्यानामग्रे नाभ्यूर्ध्वदेहवान् ॥४६॥
पितृभिः सह तत्रैव निषद्य भुक्तवान् पयः ।
पायसं चापि मिष्टान्नं फलं दलं च मूलकम् ॥४७॥
त्वं च नारायणीश्रि ! स्वनाभ्यूर्ध्वदृश्यविग्रहा ।
शृंगारिता मया साकं भुक्तवती च पायसम् ॥४८॥
अथ ते पितरः सर्वे जलान्नादिकमेव तु ।
प्रासादिकं मया दत्तं भुक्तवन्तः सुखोत्सुकाः ॥४९॥
तृप्ताः सर्वे ययुर्मुक्त्वा पितृलोकान् निजालयान् ।
अहं सञ्जोऽभवं यावत्तावद् विप्रादिभिः क्षितौ ॥५०॥
प्रार्थितौ नित्यवासार्थं नाभ्यूर्ध्वदेहधारिणौ ।
अर्धदृश्यौ दिव्यरूपौ सुन्दरौ सौम्यविग्रहौ ॥५१॥
तथाऽस्त्वित्युचितं मत्वा स्थितवन्तौ सदा क्षितौ ।
आकल्पान्तं च नाभ्यूर्ध्वार्धमूर्तिधारिणौ सदा ॥५२॥
मूर्तयश्चापि तादृश्यो गृहे वने च मन्दिरे ।
ध्यानेऽर्हणे चोत्सवे चाऽभवँस्तथाऽर्धविग्रहाः ॥५३॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
अनाद्यर्धपितृनारायणाख्यः प्रथितोऽभवम् ॥५४॥
स्मर लक्ष्मि ! त्वया साकं मम मूर्तिं तदाऽर्धिनीम् ।
अथाऽन्येऽप्यवतारा मेऽभवँस्तदाऽपि कोटिशः ॥५५॥
जानाम्यहं समस्तांस्तान्नान्ये जानन्ति वै गतान् ।
स्मरणाद्वन्दनाच्चापि भुक्तिमुक्तिप्रदान् शुभान् ॥५६॥
नाभ्यधो मायिको भागो नारको जन्मसम्प्रदः ।
नाभ्यूर्ध्वं पावनो भागो मोक्षदो दर्शितो मया ॥५७॥
अर्धोर्ध्वमूर्तिरूपेण तदा ज्ञानं तथाऽभवत् ।
एवं विज्ञाय सम्पूज्य याता धामाऽक्षरं जनाः ॥५८॥
अथ वक्ष्ये वेधसश्च षड्विंशेऽनङ्गवत्सरे ।
कल्पे सप्तशते मनौ सप्तमेऽहं परेश्वरः ॥५९॥

प्राविरासं प्लक्षमध्येऽनादिप्लक्षनरायणः ।
तत्र कल्पे महात्मानो ह्यात्मज्ञानपरायणाः ॥६०॥
आसन् वै साधवो धीरा नारायणपरायणाः ।
जटावल्कलवस्त्राश्चाऽयाचितान्नादिकाऽशनाः ॥६१॥
यदृच्छालाभसन्तुष्टा लोककल्याणकारिणः ।
यज्ञोपवीतयुक्ताश्च तिलकान्वितविग्रहाः ॥६२॥
कण्ठीमालादिशोभाश्च ध्यानभजनकारिणः ।
एकदा मिलिताः सर्वे विष्णुनद्यास्तटे शुभे ॥६३॥
भक्त्यरण्ये तपोऽर्थं वै भक्त्यर्थं परमात्मनः ।
संवादं ते प्रचक्रुश्च परस्परं सुसंहताः ॥६४॥
तपः श्रेयःप्रदं किं वा भक्तिः श्रेयःप्रदा द्विजाः ।
यद्वोभयं मतं श्रेयःप्रदं चेदुत्तमं नु किम् ॥६५॥
इत्येवं प्रश्नसारे च जाते कल्याणयोगिषु ।
एके प्राहुस्तपः श्रेष्ठं परे प्राहुर्न तत्तथा ॥६६॥
तपसा क्षीयते पापं पुण्यं प्रजायते शुभम् ।
तेन भोगोपलब्धिश्च स्वर्गे च मरणं क्षये ॥६७॥
ततो वै लौकिकं श्रेयस्तपश्चान्ते न तत्तथा ।
तस्माद् भक्तिः परा श्रेष्ठा श्रेयःप्रदा हि शाश्वती ॥६८॥
अन्ये प्राहुः सकामा सा नाऽत्यन्तश्रेयसः प्रदा ।
निष्कामा श्रेयसी श्रेष्ठा परश्रेयःप्रदा हि सा ॥६९॥
परे त्वाहुर्यदि भक्तिर्निष्कामा कामनां विना ।
फलहीना वृथा सा हि प्रयासमात्ररूपिणी ॥७०॥
तस्मात् सकामा सा कार्या स्वेष्टसत्फलदायिनी ।
इत्येवं वदमानेषु महर्षिषु तदा वृषः ॥७१॥
धर्मदेवो विप्ररूपः समाजस्थोऽब्रवीदिदम् ।
सर्वेषामन्तरात्मा यः सर्वसाक्षी विराजते ॥७२॥
स देवोऽत्र द्रुमे प्लक्षमये धर्म्ये विराजते ।
तस्य पूजां प्रकृत्वैव प्रश्नभारोऽत्र पिप्पले ॥७३॥
न्यसनीयश्चोत्तरं च तत्स्थः कृष्णः प्रदास्यति ।
इत्येवं त्वेकमत्यं वै कृत्वा महर्षयस्तदा ॥७४॥
पिप्पलं तत्र सम्पूज्याऽश्रावयन् परमेश्वरम् ।
किमत्यन्तं परं श्रेयस्तपो भक्तिश्च वा प्रभो ॥७५॥
इति संश्राव्य तस्थुश्च वर्षशतं तपोऽन्विताः ।
तथाऽपि लब्धवन्तो नोत्तरं प्लक्षात्तपोधनाः ॥७६॥
तावद् व्योमगिरा देवः परेश्वरो जगाद तान् ।
तपसा न भवेच्छ्रेय आत्यन्तिकं तपोधनाः ॥७७॥
आराधयन्तु मां ब्रह्मपरमं सर्वसाक्षिणम् ।
निष्कामभक्त्या तुष्टोऽहं भवामि सततं द्विजाः ॥७८॥
भक्त्या चात्यन्तिकं श्रेयश्चात्यन्तिकमवाप्स्यथ ।
इत्युक्तास्तेजगदुश्च कथं भक्तिर्विना हरिम् ॥७९॥
साक्षाद्धरिं विना भक्तिः प्रेमसेवा कथं भवेत् ।
वयं चेत् तपसा पूताः पात्रभूताः स्म माधव ॥८०॥
अस्मन्मध्ये समागत्य शश्वत्तिष्ठ कृपालय ।
भक्ताः प्रियाश्च ते नित्यं यदर्थं चाम्बरे स्थितः ॥८१॥
अदृश्योऽपि भक्तपक्षी व्योमवाण्याऽपि वत्सलः ।
करोषि शासनं श्रेयःप्रदं मत्वा निजाङ्गनान् ॥८२॥
यथा शब्देन च तथा स्वरूपेणाऽपि शाधि नः ।
प्रत्यक्षेण निजानस्मान् समानन्दय माधव ॥८३॥
इत्युक्तोऽहमवदँस्तान् भावयन्तु समाहिताः ।
प्राप्ते चाराधनापाके भविष्यामि हि गोचरः ॥८४॥
अथ नारायणीश्रि ! स्वभाग्यानि चोत्तमानि वै ।
मन्यमाना द्विजास्तत्र शतवर्षाणि संस्थिताः ॥८५॥
आराधयन्तो देवेशेश्वरेश्वरेश्वरेश्वरम् ।
साधवस्ते निराशाश्च ब्रह्माशामात्रतत्पराः ॥८६॥
ब्रह्मरूपा ब्रह्मभूताः प्लक्षछायामुपाश्रिताः ।
जेपुर्नारायणं मां च भेजुर्मां नामकीर्तनैः ॥८७॥
आनर्चुर्मां तुलस्याद्यैर्दध्युर्मां मानसे गृहे ।
गतेषु शतवर्षेषु सतामभ्यासिनां मम ॥८८॥
सन्निधावभवं साक्षात् प्लक्षमूलसमाश्रितः ।
त्वया लक्ष्म्या सहितः श्रीप्लक्षनारायणः स्वयम् ॥८९॥
प्लक्षस्तम्बे गर्भभागे दिव्ये तेजोऽभिमिश्रिते ।
सावकाशे चिदाकाशे प्लक्षब्रह्मणि संस्थितः ॥९०॥
वामे सार्कं त्वया पद्मे चतुर्भुजो नरायणः ।
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ॥९१॥
स्वेच्छयैव समुद्भूतः साधुवाञ्छाप्रपूर्तये ।
शंखचक्रगदापद्मस्वस्तिकध्वजशूलवान् ॥९२॥
सर्वदिव्याभरणश्च स्वर्णमुकुटकुण्डलः ।
दिव्यचम्पकवर्णाभो दिव्याम्बरधरस्तथा ॥९३॥
दिव्यतेजोभिसंव्याप्तो युगलात्मा परेश्वरः ।
साधिवच्छापूरकस्तत्र प्रत्यक्षः श्रेयसां प्रदः ॥९४॥
अथ दिव्यनयनास्ते व्यपश्यन्मां द्रुमान्तरे ।
दिव्यगृहाम्बरे तत्र द्रुमाऽभिन्नं पुमुत्तमम् ॥९५॥
नेमुश्चक्रुर्दण्डवच्च तुष्टुवुः परमेश्वरम् ।
पुपूजुस्तत्र मिलितैश्चोपचारादिभिस्तदा ॥९६॥
स्नेहभक्त्या सदा भेजुर्मां प्ररक्ष्य च मण्डले ।
इत्येवं सर्वलोकानां श्रेयःप्रदोऽभवं प्रिये ॥९७॥

अनादिश्रीकृष्णनारायणः स्वयं सनातनः ।
पुरुषोत्तम एवाऽहं स्वेच्छया साधुमण्डले ॥९८॥
अनादिश्रीप्लक्षनारायणात्मा चाऽभवं स्थितः ।
वेद्म्यहं सर्वमेवेति स्मर त्वं प्लक्षवासिनीम् ॥९९॥
तव मूर्तिं शुभां लक्ष्मीस्वरूपिणीं सनातनीम् ।
अन्येऽपि चावतारा मेऽभवन् शतसहस्रशः ॥१००॥
ईश्वरा नापि जानन्ति कुतः सुराश्च मानवाः ।
पठनाच्छ्रवणादस्य श्रावणात्स्मरणादपि ॥१०१॥
सेवनात्प्लक्षवासिन्यास्ते च मे सेवनादपि ।
भुक्तिश्चापि भवेन्मुक्तिर्मुक्तिः श्रेष्ठा च वै भवेत् ॥१०२॥
पिप्पलश्रीं त्वर्चयेद् यः पिप्पले श्रीनरायणम् ।
तस्य लक्ष्म्या अनपायो मोक्षाऽवाप्तिर्ध्रुवा भवेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसश्चतुर्विंशे वत्सरेऽनादिश्रीमदर्धश्रीशनारायणस्य, पञ्चविंशे वत्सरेऽनादिश्रीमदर्धपितृनारायणस्य, षड्विंशे वत्सरे चाऽनादिश्रीप्लक्षनारायणस्य प्राकट्यमित्यादिनिरूपणनामैकविंशतितमोऽध्यायः ॥ २१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं प्राकट्यं मम चापरम् ।
अवृषाख्ये वेधसश्च सप्तविंशे तु वत्सरे ॥ १ ॥
कल्पे चतुःशते मनौ तृतीये भूतलेऽभवन् ।
भूसुरा यज्ञकर्तारश्चक्रुस्ते चाध्वरान् बहून् ॥ २ ॥
अग्निहोत्रं दर्शहोमं पूर्णमासं प्रयाजकम् ।
स्विष्टकृद्यजनं पितृयज्ञं च वैश्वदेवतम् ॥ ३ ॥
चातुर्मास्यं साकमेधं सोमं चाग्रायणेष्टिकम् ।
अवभृथेष्टिं तथा चातिरात्रं वाजपेयकम् ॥ ४ ॥
अग्निष्टोमं तथा सौत्रामणिं च राजसूयकम् ।
अश्वमेधं सर्वमेधं पुंमेधं च सवान् बहून् ॥ ५ ॥
बृहस्पतिसवं वैश्यसवं सोमसवं तथा ।
गोसवं ब्राह्मणसवं तथौदनसवं शुभम् ॥ ६ ॥
पृथिसवं मरुत्स्तोमं पुत्रेष्टिं च तथाऽपरान् ।
यज्ञान् व्यधुश्चैकदा ते प्रारेभिरे नृमेधकम् ॥ ७ ॥
पश्चाहं तत्र वै यज्ञे द्व्यूनद्विशतपूरुषान् ।
देवताभ्यो हि विधिनोपाकृत्य च ततः परम् ॥ ८ ॥
पुरुषाणां विशसनं कर्तुमारेभिरे द्विजाः ।
वपार्थं हवनार्थं च भ्रान्तास्तत्त्वविदो द्विजाः ॥ ९ ॥
शृणु नारायणीश्रि ! त्वं ये नृपशवश्चाऽभवन् ।
न्यूनद्वादशवर्षास्ते यज्ञोपवीतधारिणः ॥१०॥
भक्ता अभक्ता विप्राद्या आसन् यज्ञार्थकल्पिताः ।
तत्रैकस्त्वभवद् योगी मम भक्तिपरायणः ॥११॥
कालमायाद्यसंगी च देहादौ निस्पृहो नरः ।
शुभ्रवर्णः सुन्दराऽऽख्यः कोमलो मुदमृन्मुखः ॥१२॥
पावितः प्रथमो विप्रैरुपाकृतः समाहृतः ।
विशसनस्य शालायां यथाविधि समर्चितः ॥१३॥
नारायणहरे कृष्णान्तरात्मन्निति मानसः ।
आत्मनिवेदनो नित्यं मदर्थसर्वचेष्टकः ॥१४॥
एतादृशं मम भक्तं ज्ञात्वा विशसनार्थकम् ।
तूर्णं चाहं समायातः पश्चे विशसनगृहे ॥१५॥
अदृश्यः कर्मठानां वै दृश्यो भक्तस्य मे तदा ।
अदृश्यीकृत्य मद्भक्तं स्थितोऽहं तत्स्थले स्फुटः ॥१६॥
तदाकारश्च मौनश्च भक्तरक्षार्थमित्यपि ।
भ्रान्तिनाशार्थमेवापि हिंसायाश्च विच्छित्तये ॥१७॥
धर्मरक्षार्थमेवापि मृषाकर्मविच्छित्तये ।
विप्रेभ्यो बोधदानार्थं यथार्थताप्रवृत्तये ॥१८॥
तामसानां पापकर्मनाशार्थं शसनालये ।
प्राविरासं तदा लक्ष्मि! प्रत्यक्षः स्वीयरक्षकः ॥१९॥
अथ ते यागदीक्षाप्ता द्विजा मन्त्रान् जगुस्तदा ।
प्रोक्ष्य सर्वं सुविधिना पूरुषं मां प्रजगृहुः ॥२०॥
मुखबन्धं निर्दयाश्च प्रचक्रुर्यवपूरणैः ।
वृषणौ मर्दयामासुश्छेदयामासुरुत्सुकाः ॥२१॥
जीवतो मे भ्रमयुक्ता भ्रान्त्यात्मविधिना खलाः ।
विशसनं प्रचक्रुश्च तदाऽहं पापिनाशकृत् ॥२२॥
कर्तिताभ्यां वृषणाभ्यां वज्राऽऽभाभ्यां तु सत्वरम् ।
कर्मठानां कपालानि ब्रह्मरन्ध्राण्यताडयम् ॥२३॥
वज्रमणिनिभाभ्यां साग्निभ्यां प्रताडिता द्विजाः ।
जज्वलुश्चापि मम्रुश्च भिन्नमूर्धकपालकाः ॥२४॥
सहस्रशः समुत्पन्ना महान्तो वर्तुलाश्च ते ।
महाशिलास्वरूपाश्च प्रलयानलसन्निभाः ॥२५॥
दाहयामासुरेवेमे पृथ्वीं नभश्च तारकान् ।
भेदयामासुरेवेमे शैलप्रायास्तदाऽखिलम् ॥२६॥
नाशयामासुः परितो यज्ञं यज्ञीयकान्यपि ।
हाहाकारो महाञ्जातः स्वर्गप्रलयवाहकः ॥२७॥
पृथिव्यां पत्तनानां च दह्यन्ति बहुलर्द्धयः ।
अरण्यानि चार्षवासा दह्यन्ति वृषणानलात् ॥२८॥

शाला ग्रामा आवसथा दग्धास्तैर्वृषणानलैः ।
अथ विप्रा जीववन्तः प्रार्थयाञ्चक्रिरे सुरान् ॥२९॥
रक्षयन्तु सुराश्चास्मान् मृत्युमुखसमावृतान् ।
प्रायश्चित्तं करिष्यामो व्युत्क्रमादेरवन्तु नः ॥३०॥
नैवं पुनः करिष्यामो भ्रान्तिं त्यक्ष्याम एव नः ।
रक्ष रक्ष कृपापारावारपारीणमाधव ! ॥३१॥
इत्येवं म्रियमाणास्ते निपेतुः पादयोर्हरेः ।
मन्नियुक्तास्तदा यज्ञाधिदेवा जगदुर्द्विजान् ॥३२॥
शालायां वृषणाभ्यां वै तयोर्ग्रामा हि निर्गताः ।
दिव्या दिव्यचमत्काराः शालग्रामा हि ते हरेः ॥३३॥
भक्तरक्षाकृतेऽनादिकृष्णनारायणः स्वयम् ।
उपस्थितः शासितुं वः पुंपशुरूपवान् हरिः ॥३४॥
तस्य त्विमे वृषणा वै शालग्रामा भवन्ति हि ।
अग्निरूपा वज्ररूपाः शास्तारो भवतां द्विजाः ॥३५॥
यूयमकार्यकरणा हिंसाभ्रान्ता विमार्गगाः ।
देवानां नो हव्यमिष्टं न मांसं वै कदाचन ॥३६॥
पायसान्नं चेष्टतमं तेन कुर्वन्तु चाऽध्वरान् ।
फलानि शर्कराश्चापि बीजानि कमलानि च ॥३७॥
कणा व्रीहियवाश्चापि शालयश्च दलानि च ।
तिला मिष्टान्नमपि च मधु रसाश्च शोभनाः ॥३८॥
समिधश्च प्रिया नित्यं देवानां न तु मांसकम् ।
द्विजा भ्रान्ता भवन्तो वै हिंसां कुर्वन्तु मा त्विह ॥३९॥
वयं पवित्रा देवा मा ह्यशुद्धे योजयन्तु नः ।
पापफलं तु वै दुःखं भवतां तद् भविष्यति ॥४०॥
पुंस्त्वप्रणाशनं चचाऽध्वरेऽनुष्ठीयते द्विजाः ।
भवद्भिः स्वस्य पुंस्त्वस्य विनाशः क्रियते दिवि ॥४१॥
स्वर्गस्यापि विनाशो वो हिंसादोषेण जायते ।
वयं शुद्धिविहीनाश्च मांसदोषेण चाऽध्वरे ॥४२॥
प्रायश्चित्तीयकर्माणो भविष्यामो द्विजास्त्विह ।
स्वर्गे प्रायश्चित्तकर्म त्वकृत्वा स्वस्वमन्दिरम् ॥४३॥
संप्रवेष्टमशक्ता हि हिंसां कुर्वन्तु नो ततः ।
शालग्राममहाग्नेश्च शान्तिर्यथा भवेदिह ॥४४॥
तथा विष्णुं हरिं कृष्णं नारायणं परेश्वरम् ।
आराधयामस्त्वत्रैव सुरर्षिपितृमानवाः ॥४५॥
स्वयमेव हरिश्चाग्नेः शान्तिं तत्र करिष्यति ।
अयं चाऽवृषणो देवो नारायणः स्वयं नरः ॥४६॥
भवद्भिर्होमकार्यार्थे योजितः संस्कृतस्त्विह ।
तमेनं परमात्मानं शरणं सम्पतन्तु च ॥४७॥
स हि रक्षां रक्षको वै क्षमां कृत्वा करिष्यति ।
इत्युक्तास्ते सुरा लक्ष्मि ! तदा तुष्टुवुरीश्वराः ॥४८॥
पितरो मानवा विप्रा मामेवाऽवृषणं हरिम् ।
त्वं परब्रह्म भगवान् मूलश्रीपुरुषोत्तमः ॥४९॥
एकमेवाऽद्वितीयस्त्वं सर्वेश्वरपरेश्वरः ।
त्वमेवाऽक्षरमुक्तानामक्षरस्याऽपि कारणम् ॥५०॥
अवताराऽवताराणां कारणं शक्तिसञ्जुषाम् ।
शक्तीनां कारणं सर्वेश्वराणां कारणं भवान् ॥५१॥
यज्ञानां कारणं त्वं च मन्त्राणां कारणं भवान् ।
विधीनां च निधीनां च द्रव्याणां कारणं भवान् ॥५२॥
सर्वेषां कर्मकाण्डानां देवानां कारणं भवान् ।
कर्ता प्रेरयिता त्वं च वेत्ता तृप्तिस्त्वमेव च ॥५३॥
द्विजाश्च कर्मठाश्चापि यजमानस्त्वमेव च ।
द्रव्याणि सर्वहव्यानि त्वमेव भगवन्नसि ॥५४॥
अर्थज्ञानं विधेर्ज्ञानं मन्त्रज्ञानं च वैदिकम् ।
त्वां विना च क्रियाज्ञानं कोऽन्यो दर्शयितुं क्षमः ॥५५॥
क्षमां कृत्वा हरे नाथ दह्यमानं जगत् त्विह ।
रक्ष रक्ष कृपासिन्धोऽपराधांश्च क्षमस्व नः ॥५६॥
अज्ञातमन्त्रतत्त्वाश्च वयं विशसनं तु यत् ।
कृतवन्तो नरस्यैतत् क्षमस्व कृपया प्रभो ॥५७॥
अज्ञानिनामपराधान् क्षमन्ते ज्ञानिनो जनाः ।
त्वं पिता जननी रक्षाकरो विभो महेश्वरः ॥५८॥
त्वं प्रभुः सर्वकर्ता च सर्वशास्ता सुखप्रदः ।
यथार्थबोधकश्चासि शाधि नः पुरुषोत्तम ॥५९॥
एते त्वच्छरणं प्राप्तास्त्राहि नः शरणागतान् ।
इत्येवं प्रार्थितश्चाऽहं तदा लक्ष्मि ! पुमुत्तमः ॥६०॥
उपादिदेश तान् सर्वान् वेदार्थं मम भाषितम् ।
द्विजत्वं दयया श्रेयोविधानेनाप्यहिंसया ॥६१॥
शुद्धया भक्त्या रागद्वेषराहित्येन प्रजायते ।
अलोभेनाऽप्यकामेनाऽतृष्णया तपसा तथा ॥६२॥
सदाचारेण धर्मेण सन्तोषेण प्रजायते ।
सत्येन दैववृत्त्या चेश्वरार्पणेन विप्रता ॥६३॥
अद्रोहेणाऽभयदानमोक्षदानेन जायते ।
तद् ब्राह्मण्यं विद्यया च वेदेनाऽधिप्रकाशते ॥६४॥
प्राप्य तद् द्रोहकरणं द्विजानां वृष एव न ।
हिंसा द्रोहो महानत्र स्वर्गमोक्षनिरोधकृत् ॥६५॥
परदुःखकरश्चात्मा दुःखं भुंक्तेऽपि तादृशम् ।
जीवतः शसने दुःखमपारं तत्र जायते ॥६६॥

एवं दुःखं प्रदायैव धर्मोऽधर्मत्वमृच्छति ।
अन्यच्चापि च विप्रेन्द्राः शृण्वन्तु सुविवेकवत् ॥६७॥
शुद्धं स्वादु सुगन्धं च परमान्नं मुखे गतम् ।
उच्छिष्टं जायते तत्तूदरे मलत्वमृच्छति ॥६८॥
तद्विकाराः पेशिकामांसाद्या मलस्वरूपिणः ।
देवादिभिः कथं सत्त्वमयैः शुद्धैः सुधादनैः ॥६९॥
भुज्यन्ते तादृशं विप्रा विचारयन्तु तात्त्विकम् ।
तामस्यो मक्षिका यत्र व्याकुलिता भवन्ति हि ॥७०॥
अशुद्धं चापि दुर्गन्धं तामसं मलिनं हि तत् ।
कथं देवा द्विजास्तद्वै समिच्छेयुर्हि भोजनम् ॥७१॥
दुग्धं सुगन्धं श्रेष्ठं वै रसात्मकं घृतान्वितम् ।
सात्त्विका यत् समिच्छन्ति पवित्रं भोजनं पयः ॥७२॥
मक्षिका यत् समिच्छन्ति सुगन्धं मिष्टकं मधु ।
रसांश्च विविधान् मिष्टाँस्तान् समिच्छन्ति देवताः ॥७३॥
तस्माद्धिंसात्मकं यज्ञं मा कुर्वन्तु द्विजोत्तमाः ।
पशूनां बन्धनं संज्ञपनं विशसनं तथा ॥७४॥
वपोद्धरणं होमादि सर्वं हिंसात्मकं हि तत् ।
हिंसा क्वापि न वै कार्या चेत्येवं वैदिकी श्रुतिः ॥७५॥
सर्वार्पणं हरौ कार्यं चेति मे वैदिकी श्रुतिः ।
पत्रं पुष्पं फलं तोयं वस्त्रं गृहं धनं सुतः ॥७६॥
सुता पत्नी पतिर्गावश्च क्षेत्रं सम्पत् स्वयं तथा ।
नारायणाय दातव्यं चेत्येवं वैदिकी श्रुतिः ॥७७॥
नारायणात्मना ध्यात्वा कृत्वा नारायणेऽर्पणम् ।
यथार्हमुपयोक्तव्यं न तु घातो विधीयते ॥७८॥
उपाकृत्यैव तु तत्तद्देवताभ्यो यथाऽर्पितम् ।
सर्वं प्रासादिकं कृत्वा योक्तव्यं वैष्णवो वृषः ॥७९॥
सर्वं नारायणस्येति ध्यात्वैवं च ततः परम् ।
ग्रहीतव्यं नान्यथेति सर्वं स्वं प्रार्पयेद्धरौ ॥८०॥
वैश्यसवे चतुर्वर्षस्त्रीपशुश्च तथाऽर्पितः ।
उत्स्रष्टव्यो हरेः सा च भोक्तव्या नैव सर्वथा ॥८१॥
पूजनीया देविका सा चेति वै वैदिकी श्रुतिः ।
गोसवेऽपि तथा गावोऽर्पणीयाः परमेश्वरे ॥८२॥
दक्षिणाश्चाऽयुतसंख्यागावो मताः प्रपूजिताः ।
उत्स्रष्टव्याः पूजनीया दातव्या दुग्धलब्धये ॥८३॥
मरुत्स्तोमेऽपि च सप्तदशापि पञ्चवत्सराः ।
पुंपशवस्तथाऽस्पृष्टगर्भा वर्षत्रयात्मकाः ॥८४॥
स्त्रीपशवश्चार्पणीयाः परमेशे परात्मनि ।
साधवस्ते तथा साध्व्यो भवेयुर्ब्रह्मबोधदाः ॥८५॥
प्रथमे च द्वितीये च तृतीये वत्सरेऽपि च ।
चतुर्थे पञ्चमे वर्षे तथासंख्या नराः स्त्रियः ॥८६॥
त्यागाश्रमे प्रदातव्या अच्युतगोत्रका इति ।
वैष्णवास्ते प्रकर्तव्या इत्येवं वैदिकी श्रुतिः ॥८७॥
अश्वमेधेऽपि दैवः स नोपयोक्तव्य एव ह ।
अश्वो योऽर्पित एवाऽपि देवाय देवतायनः ॥८८॥
कुष्माण्डाख्यं फलं देयं वह्नये देवताजुषे ।
पुरोडाशाः प्रदातव्याश्चरवोऽपि यथोचितम् ॥८९॥
एवमेतन्न सन्देहो विधेयो ब्राह्मणैरिह ।
वेदवक्ताऽप्यहं चाऽस्मि यज्ञात्माऽप्यहमेव च ॥९०॥
मन्त्रेऽहमेव तिष्ठामि हार्दं विदन्तु मे द्विजाः ।
प्रतिज्ञां सम्प्रकुर्वन्तु हन्तव्यो जन्तुरेव न ॥९१॥
पूजनं मे वृषणयोः शालग्रामस्वरूपयोः ।
कुर्वन्तु तेन शान्तिर्वै भविष्यत्यनलस्य ह ॥९२॥
नान्यथा स्यादग्निशान्तिर्जगद् भस्मीभविष्यति ।
शालासु कर्तितौ मे वै वृषणौ पुंस्त्वसंभृतौ ॥९३॥
ताभ्यां ग्रामाः समूहाश्चोत्पन्नाः कोट्यर्बुदाधिकाः ।
शालग्रामा हि ते सर्वे मत्स्वरूपा मदात्मकाः ॥९४॥
जगद्भस्मकराः सर्वे तानर्चयन्तु वै द्विजाः ।
इत्युक्ताः क्ष्मासुराः सर्वे बहुभिश्चोपचारकैः ॥९५॥
वैष्णवैः साममन्त्रैश्च पुंसूक्तैश्च पुनः पुनः ।
पुपूजुश्चाऽपि नाप्येताः शान्ताः शालशिलास्तदा ॥९६॥
अहं विप्रानकथयं संशृणुध्वं वै समाहिताः ।
विना योग्यासनं नैव शान्तिं यास्यन्ति ताः शिलाः ॥९७॥
प्रार्थयन्तु श्रियं लक्ष्मीं योग्यं सा संविधास्यति ।
अथ विप्रैरर्चिता त्वं लक्ष्मीसूक्तादिभिस्तदा ॥९८॥
पूजिता वन्दिता चापि शान्त्यर्थं विनिवेदिता ।
ततस्त्वं पिप्पलपत्राकारपीठात्मिकाऽभवः ॥९९॥
दिव्यासनात्मिका जाता दिव्यसौवर्णरूपिणी ।
सिंहासनाभिधाना वै धृतवत्यपि ताः शिलाः ॥१००॥
अथ शान्तिं तथा स्थैर्यं शिलाः प्रापुश्च निष्क्रियाः ।
उपद्रवविहीनाश्च शान्तोऽग्निः सर्वतो दिशि ॥१०१॥
सुरैश्च पितृभिः सर्वैर्मानवैर्मुनिभिस्तदा ।
पूजिता बहुभावाद्यैः शालग्रामाश्च चन्दनैः ॥१०२॥
सुगन्धिभिश्चोपचारैर्दिव्यास्ते हरयोऽभवन् ।
हर्यात्मका हरेरंशा हर्यर्चारूपिणः सदा ॥१०३॥
हरेर्मेऽङ्गमया मदात्मका मोक्षप्रदायिनः ।
श्रीयुक्तास्ते भगवन्तोऽभवन्पाषाणमूर्तयः ॥१०४॥

अथ मूलौ वृषणौ मे मया धृतौ यथास्थले।
लग्नितौ च यदा तौ मे तदाऽहं पुंस्त्वसंयुतः ॥१०५॥
पूर्णमूर्तिरभवं वै भक्ता मया हि रक्षिताः।
नरमेधे पुरा यज्ञे भूत्वा प्रत्यक्षरूपिणा ॥१०६॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः।
अनादिश्रीशालपुंस्त्वनारायणोऽभवं तदा ॥१०७॥
सौम्यः शालग्राममूर्तिः पीठिकाश्रीशुभासने।
आकल्पं चाऽभवं लक्ष्मि ! स्मर मां त्वं तथाविधाम् ॥१०८॥
अवसंश्च त्वया सार्कं मूर्तिमान् श्रीपतिः पुमान्।
अन्ये मे तेऽवताराश्च तत्र कल्पेऽभवन् प्रिये ! ॥१०९॥
सर्वान् वेद्मि यथाकार्यमवतारान् हि मे प्रिये ! ।
पठनाच्छ्रवणाचापि भुक्तिर्मुक्तिः प्रजायते ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽवृषाख्ये सप्तविंशे वत्सरे नरमेधे भक्तरक्षार्थम् अनादिश्रीपुंस्त्वनारायणस्य प्राकट्यं नरमेधादिय-ज्ञार्थज्ञानादिकं चेत्यादिनिरूपणनामा द्वाविंशति-तमोऽध्यायः ॥ २२ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं कथां मे चातिपावनीम्।
प्राकट्यरूपां दिव्यां च वेधसोऽनलवत्सरे ॥ १ ॥
अष्टाविंशे त्वष्टशते कल्पे च प्रथमे मनौ।
राजाऽऽसीत् सूर्यवर्चाख्यो ब्रह्मणा त्वनुबोधितः ॥ २ ॥
वेदमार्गरतः सर्वस्तराणां मण्डलेश्वरः।
व्योमचारिविमानेन देवानां सदसि स्थितः ॥ ३ ॥
पातालेषु तथा मेरौ ग्रहेषु गतिमान् व्रती।
मम पूजापरो नित्यं सिद्धानां सेवको युवा ॥ ४ ॥
प्रजानां मम भक्त्यर्थे यत्नवान् साधुसद्गुणः।
स त्वेकदाऽचिन्तयद्धि राज्ञ्या समं निजालये ॥ ५ ॥
मानवोऽयं मम देहः प्रिये नृपाऽभिबोधितः।
नॄन्पातीतियथार्थे वै कदा प्रवर्तते प्रिये ! ॥ ६ ॥
राज्ञी प्राह मनुष्याणां देहोऽयं मोक्षसिद्धये।
नॄणां मोक्षप्रदातृत्वे नृपः स्वार्थे प्रवर्तते ॥ ७ ॥
नृपशब्दोऽन्यथा नैव सार्थकः शासने मतः।
भूत्वा भूत्वा विलीयन्ते मानवाः कर्मसंहृताः ॥ ८ ॥
तेषां पालनकार्ये च कृतेऽपि यान्ति संक्षयम्।
देहरक्षा न वै रक्षा देहपत्वं न पालनम् ॥ ९ ॥

अन्नानि च जलं वह्निर्वायुः पान्ति स्वभावतः।
राज्ञां तत्राऽऽवश्यकता नास्ति स्वभावपालिते ॥१०॥
श्रेष्ठयुगे न वै चौर्ये न छद्म नाऽपहर्तृता।
तेन युगः प्रयात्येव राज्ञां तत्र न पालिता ॥११॥
कृते युगे सत्यधर्मे राजा निरर्थको यतः।
सार्थकत्वं नृपत्वं तु मार्गणीयं भवेद् यदि ॥१२॥
मम बुद्धौ मोक्षदानप्रदानेन नृपालिता।
सार्थकेति प्रजानाथ ! प्रतिभात्येव तत्कुरु ॥१३॥
राजा भक्त्या स्वयं मोक्षं प्रयात्येव यथा तथा।
प्रजाश्चापि पराभक्त्या मोक्षमाप्नुयुरेव चेत् ॥१४॥
नृपतित्वं कृतं तेन सार्थकं जन्मवेदिना।
एतादृशं नृपत्वं त्वं राजन् कुरु प्रमुक्तिदम् ॥१५॥
श्रुत्वैवं महिषीवाक्यं नृपो मुमोद च्चान्तरे।
श्रुतितुल्यां सतीं मत्वा पत्नीं मोक्षसहायिनीम् ॥१६॥
पुनः पप्रच्छ तां मुद्रायनीनाम्नीं निजां प्रियाम्।
कया रीत्या नृणां मोक्षकरणं स्यात् प्रशाधि मे ॥१७॥
मुद्रायनी तदा प्राह ऋषीन् सिद्धान् तपस्विनः।
साधुन् साध्वीः समाहूय लोकान्तरेभ्य इत्यपि ॥१८॥
मन्दिरं कारयित्वा च मोक्षदां पारमेश्वरीम्।
प्रतिमां स्थापयित्वा त्वं सदा कुरु महोत्सवान् ॥१९॥
प्रजाः सेवां पूजनं च दर्शनं स्मरणं तथा।
कीर्तनं श्रवणं भृत्यं दास्यं च वन्दनं स्तवम् ॥२०॥
करिष्यन्ति भजनं च नर्तनं भावनाऽर्पणम्।
अन्नवस्त्रार्पणं पात्राऽर्पणं च चन्दनार्पणम् ॥२१॥
शृंगाराणामर्पणं च सुगन्धानां तथाऽर्पणम्।
पञ्चामृताऽर्पणं चापि गीतार्पणं जपाऽर्पणम् ॥२२॥
आत्मार्पणं करिष्यन्ति गमिष्यन्ति परं पदम्।
मार्जनं लेपनं चापि दीपार्पणं ध्वजार्पणम् ॥२३॥
वाद्यार्पणं वादनं च फलपुष्पार्पणं तथा।
कुंकुमाऽक्षतहाराणामर्पणं धूपकाऽर्पणम् ॥२४॥
नैवेद्यार्पणमेवापि तथा नीराजनार्पणम्।
प्रदक्षिणं स्तुतिं नमो दण्डवच्च तथाऽञ्जलिम् ॥२५॥
हावं भावं च वै हरेरालोचनं च चिन्तनम्।
मननं निर्णयं चापि करिष्यन्ति जनाः कथाम् ॥२६॥
घनं स्वर्णं तथा रौप्यं ताम्रं वा यष्टिकां च वा।
आभरणानि दिव्यानि मणीन् रत्नानि हीरकान् ॥२७॥
मञ्जरीः पुष्पमालाश्च गुच्छान् वेषान् सुशोभनान्।
मुकुटं कटकं मालां शृंखलां मेखलां तथा ॥२८॥

ऊर्मिकां चापि हेतींश्च शंखचक्रादिकानि च।
नक्तकं सुखशय्यां च पादुके यानमुत्तमम् ॥२९॥
वाहनं च विमानं च गोधनं च रसादिकम्।
सुमिष्टं शर्कराद्यं च मधु घृतं कणादिकम् ॥३०॥
घटं सुकलशं स्थालीं पूजापात्राणि वर्त्तिकाः।
उत्सवोपकरणानि दास्यन्ति मानवाः खलु ॥३१॥
हरये त्वर्पणं कृत्वा यास्यन्ति परमं पदम्।
कर्मठा अपि सत्राणि कृत्वा वै मन्दिरे हरेः ॥३२॥
भिक्षुकाश्च प्रसादान्नं भुक्त्वा यास्यन्ति तत्पदम्।
अपराधकृतः क्षमां याचित्वाऽपि हरेः पुरः ॥३३॥
पापाः पापं निवेद्याऽपि यास्यन्ति परमां गतिम्।
व्रती व्रतानि प्राप्यैव गमिष्यति परं पदम् ॥३४॥
नार्यो नारायणं देवं भजित्वा परमेश्वरम्।
कान्तं सर्वेश्वरं तं च यास्यन्ति परमं पदम् ॥३५॥
बाला वृद्धाः सधना वा निर्धना अपि सर्वथा।
भजित्वा भगवन्तं तं यास्यन्ति परमं पदम् ॥३६॥
तस्माद् राजन्नृणां मोक्षमार्गस्योद्घाटनाय वै।
नृपतिस्त्वं सार्थकं वै कर्तुं श्रीहरिमन्दिरम् ॥३७॥
प्रकारय शुभं श्रेष्ठं सहस्रैकवटान्वितम्।
सहस्रशिखरं रम्यं सौवर्णकलशान्वितम् ॥३८॥
गगनस्पर्शि शोभाढ्यं तत्रैव विधिना हरिम्।
भगवन्तं प्रभुं देवं प्रतिष्ठापय कानकम् ॥३९॥
प्रतिमारूपिणं देवं देवर्षिगणबोधितम्।
सुरूपं सुन्दरं जगत्कर्तारं परमेश्वरम् ॥४०॥
निजशक्तियुतं निजैश्वर्यपार्षदसेवितम्।
निजाऽऽयतनसंयुक्तं प्रतिष्ठापय तत्र च ॥४१॥
सर्वदृश्यं सर्वसेव्यं सर्वपापप्रणाशकम्।
सर्वशान्तिप्रदं देवं श्रीपतिं पुरुषोत्तमम् ॥४२॥
इत्युक्त्वा स्वामिने राज्ञी तूष्णीमास क्षणं ततः।
राजा पथ्यं च तथ्यं च मेने मोक्षप्रदं वचः ॥४३॥
जपसत्रं चकाराऽसौ मासिकं कीर्तनान्वितम्।
आह्वयामास सिद्धांश्च ऋषीन्देवांश्च मानवान् ॥४४॥
अखण्डनामभजनं कारयामास मासिकम्।
"हरे कृष्ण हरे कृष्ण श्रीपते पुरुषोत्तम ॥४५॥
अन्तरात्मन् प्रभो विष्णो परमेश नमोऽस्तु ते"।
इत्येवं भजनं राजा कारयामास चानिशम् ॥४६॥
भोजनानि विचित्राणि सुधास्वादूनि वै ददौ।
सेवां सर्वविधां सर्वसत्रिणां विदधे मुदा ॥४७॥
नित्यमायान्ति लोकेभ्यः प्रयान्ति च सुरादयः।
भजनं सततं तत्र जायतेऽविरतं प्रिये! ॥४८॥
एवं मासे श्रावणे वै व्यतीते चान्तिमे दिने।
पूर्णातिथौ सभामध्ये प्रश्नं चकार भूपतिः ॥४९॥
मानुषाणां मोक्षगतिरखण्डिता भवेदिह।
यथा तथा सुराद्या मे दर्शयन्तु प्रथां शुभाम् ॥५०॥
अथ सिद्धास्तदा प्राहुर्मन्दिरं त्वत्र कारय।
ऋषयश्च सुराश्चापि मानवा जगदुस्तथा ॥५१॥
मन्दिरेण परा पुष्टिर्मोक्षस्याऽत्र भविष्यति।
तत्प्रकारय राजेन्द्र प्रतिष्ठापय तत्र च ॥५२॥
श्रीपतिं परमात्मानं परब्रह्म परेश्वरम्।
प्रतिमारूपिणं देवं सर्वमोक्षप्रदं प्रभुम् ॥५३॥
ओमित्युक्त्वा जपयज्ञं पूर्णं कृत्वा ततो नृपः।
कारयामास सौवर्णं सहस्रशिखरान्वितम् ॥५४॥
नक्षत्रस्पर्शि सुदृश्यं मन्दिरं प्रथमं भुवि।
सांगोपांगसमस्तं वै जातं पूर्णं ततः परम् ॥५५॥
चिन्तयामास मूर्त्यर्थं कुतः कस्माद् भवेदिति।
रात्रौ राजाऽचिन्तयच्च निर्विण्णो मानसेऽभवत् ॥५६॥
सस्मार मां परब्रह्म श्रीपतिं पुरुषोत्तमम्।
अहं भक्तस्मृतिं ज्ञात्वा साकं त्वया तु पद्मजे! ॥५७॥
गतवान् यत्र राजाऽसौ प्रत्यक्षतां गतोऽभवम्।
सूर्यवर्चास्तदा दृष्ट्वा नत्वा मां गोचरं पुरः ॥५८॥
प्रणनाम मधुपर्कं ददौ चकार दण्डवत्।
आसनं प्रददौ मह्यं सर्वाभरणशालिने ॥५९॥
सर्वतेजोऽभिदीप्ताय सर्वैश्वर्यान्विताय च।
सर्वप्रसन्नतावृष्टिकारकायाऽऽन्तरात्मने ॥६०॥
प्रददौ भोजनं पानं पूजनं च निजार्पणम्।
सर्वस्वाऽर्पणमेवाऽपि चक्रे भक्त्यान्वितो नृपः ॥६१॥
प्रार्थयामास मां तत्र निर्मिते मन्दिरे शुभे।
नित्यवासस्य योग्ये वै महोद्यानाभिसंवृते ॥६२॥
प्रत्यक्षं भगवन्नत्र वस स्थिरः सदा भव।
सलक्ष्मीकः पार्षदाद्यैश्चोपकरणैरन्वितः ॥६३॥
मया लोकस्य मोक्षार्थं तथाऽस्त्वेवं समीरितम्।
अथोक्तं याहि राजेन्द्र! वनान्ते शिंशपाद्रुमम् ॥६४॥
ऋषीणामाश्रममध्ये स्थितं महान्तमुत्तमम्।
तत्पार्श्वस्थं वामगं च वटवृक्षं शुभोत्तमम् ॥६५॥
मन्दिरेऽत्र यथावासो मम तत्र तथैव च।
तौ वृक्षौ तव राज्येऽत्र नौ मूर्तिरूपिणौ नृप! ॥६६॥

स्वेच्छयैव मया लक्ष्म्या चोभाभ्यां कल्पितौ कृतौ ।
नित्यौ दिव्यौ मम रूपौ प्राचीनौ बहुवत्सरौ ॥६७॥
नित्यपुष्टौ देवपूज्यौ वर्तेते श्रीनरायणौ ।
तावुभौ नृप चावां स्वो याहि पूजय मानय ॥६८॥
ऋषिभिः पूजितौ नित्यौ वर्तामहे द्रुरूपिणौ ।
अथ मूर्तिस्वरूपौ वै ताभ्यां प्रकाशिताविह ॥६९॥
स्थास्यावश्चात्र विधिना प्रतिष्ठितौ स्वयं नृप ।
इत्युक्तः स ययौ राजा महोद्याने वटान्तिकम् ॥७०॥
शिंशपाद्रुमसंयुक्तं दिव्यं दिव्यरसान्वितम् ।
वटं शुभ्रं समालोक्य नृपस्त्वाश्चर्यमाप्तवान् ॥७१॥
ऋषीन् प्रणम्य विधिवन्महर्षिगणकारिताम् ।
पूजां चक्रे द्रुमयोः संयुक्तयोश्च नृपः स्वयम् ॥७२॥
धूपं दीपं जलदानं नैवेद्यं कुसुमाञ्जलिम् ।
दत्वा चारात्रिकं चक्रे तदाऽहं शिंशपाद्रुमे ॥७३॥
स्तम्बे नारायणः साक्षात्परमात्मा सनातनः ।
शंखचक्रगदापद्मधारी श्रीपुरुषोत्तमः ॥७४॥
श्यामलः श्यामवर्णश्च दिव्यरूपोऽभवं पुरः ।
शिंशपास्तम्ब एवाऽहं चाऽहं स्तम्बो न वै पृथक् ॥७५॥
शाखा मे पार्षदाः सर्वे पार्षदाण्यश्च वै तदा ।
मद्देहयोगवन्तस्ते ह्यदृश्यन्त मदात्मकाः ॥७६॥
अथ वृक्षे वटे स्तम्बे भवतीगोचरा प्रिये ! ।
स्तम्बाऽभिन्ना स्तम्बगर्भा वटकारणरूपिणी ॥७७॥
शाखाश्च तव सख्यश्च मुक्तान्यः शोभनाः प्रियाः ।
अदृश्यन्त त्वदभिन्नास्त्वद्योगिन्यस्त्वदात्मिकाः ॥७८॥
एवं मां त्वां वीक्ष्य राजा सूर्यवर्चा मुदान्वितः ।
प्रकृत्वा दण्डवत्पूर्णं संप्रोक्ष्य वेदमन्त्रकैः ॥७९॥
मां त्वां सम्मानपूर्वं चारोहयामास वै रथे ।
सौवर्णे शतकलशे विमानवत्सुशोभिते ॥८०॥
शतैकहस्तिवाह्ये च महोत्सवसमन्वितः ।
आनीय मन्दिरभूमौ मण्डपे विधिवत्तदा ॥८१॥
संस्थाप्य विधिना कृत्वा प्रतिष्ठां सर्वकर्मभिः ।
मन्दिरे मां त्वां तथा च पार्षदान् त्वत्सखीस्तथा ॥८२॥
संप्रतिष्ठापयामास दिव्यं प्रत्यक्षमागतम् ।
आकल्पं न्यवसं नैजे मन्दिरे वै त्वया सह ॥८३॥
दिव्यरूपो दिव्यनेत्रवतां भक्तिजुषां कृते ।
मूर्तिरूपश्चर्मचक्षुष्मतां मायाजुषां कृते ॥८४॥
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ।
**अनादिश्रीशिंशपानारायणः** श्यामलोऽभवम् ॥८५॥
अनादिश्रीश्यामनारायणेतिख्यातिमाप्तवान् ।
त्वं वटश्रीख्यातिमाप्ता मम पार्श्वेऽतिसुन्दरी ॥८६॥
गौरश्वेतसुवर्णा वै दिव्यदेहा मनोरमा ।
मानवास्तु ततो नित्यं सुरा महर्षयोऽपि च ॥८७॥
पितरश्चाऽसुराश्चापि मां त्वां प्रसेव्य मुक्तिगाः ।
बभूवुस्तत्र कल्पे वै लक्ष्मि ! नृपता सार्थिका ॥८८॥
राज्ञा तेन कृता राड्युपदेशेन प्रमोक्षदा ।
सर्वाभयप्रदानं वै कृतं राज्ञा मदर्पणात् ॥८९॥
एतज्जानाम्यहं लक्ष्मि ! श्यामलं मम रूपकम् ।
गौरं रूपं तव लक्ष्मि ! स्मर तन्मन्दिरं ह्यपि ॥९०॥
स्मर तं पार्षदं चापि राजानं च सखीं नृपीम् ।
स्मराऽसंख्यॉंस्तदा जातान्मुक्तान् कोट्यर्बुदाब्जकान् ॥९१॥
अन्ये तदाऽप्यवतारा मम जाता ह्यनेकशः ।
यथाकार्यानुरूपा वै जानाम्येतानहं प्रिये ! ॥९२॥
एवं श्यामलरूपेण भक्तानां भक्तिमुत्तमाम् ।
श्रवणं कीर्तनं पादसेवनं वन्दनं तथा ॥९३॥
अर्चनं सख्यमेवाऽपि तथा चात्मनिवेदनम् ।
लेपनं मार्जनं पादसंवाहनं च भोजनम् ॥९४॥
जलपानं वस्त्रभूषादानं शृंगारकं तथा ।
आराधनं नमस्कारं सहयानं च नर्तनम् ॥९५॥
गायनं रमणं वार्त्तां विहारं हसनं तथा ।
सर्वं त्वंगीचकाराऽहं भूत्वा प्रसन्न एव तान् ॥९६॥
निनाय मम धामाऽपि त्वक्षराख्यं परं पदम् ।
वैष्णवी पृथिवी सर्वा नरा नार्यश्च वैष्णवाः ॥९७॥
पशवः पक्षिणश्चापि मद्योगान्मुक्तिमाययुः ।
श्यामलः श्यामलश्चेति नारायणः परेश्वरः ॥९८॥
गायन्तो जीववृन्दा मामीयुः कल्पे तदा प्रिये ! ।
पापिनोऽपि हरे श्याम वन्दतो धर्मिणोऽभवन् ॥९९॥
पठनाच्छ्रवणाच्चास्य स्मरणान्मुक्तिमाप्नुयात् ।
अन्ते राजा सदेशश्च सगोत्रः सप्रजाजनः ॥१००॥
साश्रितः सभृत्यकश्च सस्त्रीको मुक्तिमाप ह ।
अपि गोऽश्वप्रभृतयश्चापि मुक्तिं ययुः पराम् ॥१०१॥
तस्मान्मन्दिरनिर्माणं प्रतिमास्थापनं मम ।
श्रेष्ठमभयदानं तज्जीवानां जायते क्षितौ ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽष्टाविंशे वत्सरे सूर्यवर्चानृपद्वारा मन्दिरेऽनादिश्री-शिंशपा(श्याम)नारायणस्य वटश्रीसहितस्य प्राकट्यमित्यादि-निरूपणनामा त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

श्रीपुरुषोत्तम उवाच

शृणु त्वं शिवराज्ञीश्रि ! ब्रह्मणः पितृवत्सरे ।
नवविंशे नवत्यात्मकल्पे च सप्तमे मनौ ॥ १ ॥
आसीद्वै मम लोकेऽत्र प्राकट्यं शृणु पद्मजे ! ।
ब्रह्मणो गुप्तरोमभ्यश्चाऽसुरश्चित्ररूपवान् ॥ २ ॥
मयूरनामको जज्ञे सपक्षपिच्छचञ्चुकः ।
पादयुक्तः कामरूपधरः पर्वतसन्निभः ॥ ३ ॥
डयमानोऽम्बरे त्वाकर्षयति ग्रहमण्डलम् ।
पृथ्व्यां गच्छन् ग्रामकूटान् पर्वतान् समकर्षति ॥ ४ ॥
जलेऽन्तः सम्प्रविष्टः सन् संक्षोभयति वारिधीन् ।
कम्पयत्येव पृथिवीं देवाँस्त्रस्तान् करोति च ॥ ५ ॥
मानुषान्नागसर्पांश्च सहस्रशो हरत्यपि ।
क्वचिद् भवति देवः स महेन्द्राभः स्वरूपवान् ॥ ६ ॥
क्वचिच्च मानवं रूपं सम्राण्णिभं बिभर्त्ति च ।
क्वचिन्महर्षितुल्यश्च तेजःपरिधिशोभनः ॥ ७ ॥
जायते कामरूपो वै मोहको बलवानपि ।
तपश्चचार राजस्य लोभाद् वर्षसहस्रकम् ॥ ८ ॥
ब्रह्मा तुष्टो वरं प्रादान्मृत्युर्हरिं विना न ते ।
स त्वेवं प्राप्य वचनं तुष्टो निःशंक एव ह ॥ ९ ॥
सत्ये लोके जने स्वर्गे मानवे चातलादिषु ।
तत्तद्रूपधरो भूत्वा याति भुंक्ते प्रहृष्यति ॥१०॥
क्वचिद् देवगृहान् गत्वाऽमृतं भुक्त्वा प्रयाति च ।
देवीं वा मानवीं नारीं हृत्वा याति स्थलान्तरम् ॥११॥
यक्षिणीं राक्षसीं नीत्वा स्मृद्धिं नीत्वा प्रयाति वा ।
दानवीं वा सतीं नागीं नीत्वा याति वनान्तरम् ॥१२॥
गा वत्सतरीरश्वान् गजान्नीत्वा प्रयाति च ।
मेरोर्द्रोण्यां वनाढ्यायां शतयोजनविस्तरे ॥१३॥
अरण्ये स्वालयं चक्रे स्मृद्धं सुभोगशोभनम् ।
हृत्वा हृत्वा नरान्नारीर्देवीर्वा राक्षसीश्च वा ॥१४॥
सर्वं नैजं स कृत्वैव भुंक्ते भोगमयं च तत् ।
युद्धे न मरणं याति ब्रह्मणो वरदानतः ॥१५॥
सर्वत्र गतिमत्वाच्च विजयं लभते सदा ।
एवं सम्राट्समो जातः पृथिव्यां स्वबलाद्धि सः ॥१६॥
नृपानन्यान् शनैर्जित्वा नृपेश्वरोऽभवत्ततः ।
साम्राज्यं मम सर्वत्र पार्थिवं चेति वक्ति च ॥१७॥
उद्घोषणां कृतवाँश्च चक्रवर्त्यहमेव यत् ।
बली सर्वत्र गत्वैव जयत्याक्षितिमण्डलम् ॥१८॥
नृपान् राज्येऽसुरान् प्रतिष्ठाप्य राज्यं करोति च ।
एवं शनैः समभवच्चक्रवर्ती मयूरकः ॥१९॥
प्रधर्षितुमथैन्द्राणीं स्वर्गलोकं जगाम सः ।
उद्धृत्य तां चाम्बरेणोड्डीय यावद् भुवं प्रति ॥२०॥
प्रयाति तावदेवेन्द्रो वज्रेणैनं जघान ह ।
वज्रं चाऽनलप्रख्यं तज्जग्रास चञ्चुसंधृतम् ॥२१॥
अथ त्रासं जगामेन्द्रो वीक्ष्य मायूरकं बलम् ।
निववृते निजं स्थानं दिक्पालेभ्यो न्यवेदयत् ॥२२॥
सज्जाः सर्वेऽपि दिक्पाला युद्धार्थं समुपाययुः ।
यमः कुबेरश्चेशानो वरुणो निर्ऋतोऽनिलः ॥२३॥
अनलोऽर्कश्च रुद्रश्च पृथ्व्यां सर्वे समाययुः ।
सबलाः सज्जशस्त्राश्च विनेदुश्चाम्बरे च ते ॥२४॥
श्रुत्वा नादान् समरार्थान् गर्जना द्युसदां तथा ।
मयूरो निर्ययौ शीघ्रं युद्धार्थं बलसंयुतः ॥२५॥
दशसाहस्रसेनानीसहितोऽब्जभटान्वितः ।
युयुधे घोरसंग्रामं सम्वत्सरं हि मानवम् ॥२६॥
हतं सैन्यं हि बहुधा स्वस्य तदप्यजीवयत् ।
आसुर्या विद्यया मिथो युयुधे द्युसदीश्वरैः ॥२७॥
मायूरका महाक्रूरा आसुरा वै समन्ततः ।
साकं देवगणैः सर्वे युयुधिरेऽतिनिर्भयाः ॥२८॥
नान्तो युद्धस्य भवति मायूरो नापि नश्यति ।
विरामो न सुराणां च मनुष्या दुःखिनोऽभवन् ॥२९॥
मानव्यश्च सुराण्यश्च सत्यो नागिन्य इत्यपि ।
दैत्यान्यश्चापि वै त्रस्ता निर्यान्ति स्म न वै बहिः ॥३०॥
त्रैलोक्यां सर्वलोकेषु प्रजासु चापि राजसु ।
उद्वेजनं च दुःखं च वर्ततेऽस्य सदा तदा ॥३१॥
निर्विण्णाश्चाऽथ वै देवाः परिश्रमं गता बहुम् ।
निस्तेजस्को रविर्जातो महेन्द्रो भग्नमानसः ॥३२॥
वरुणः क्षीणशक्तिश्च यमो विभ्रमतां गतः ।
निर्ऋतोऽपि क्षीणसैन्योऽभवत्तत्र रणे तथा ॥३३॥
ईशानोऽपि हतोत्साहः कुबेरः क्षीणसत्त्वकः ।
अग्निस्तैक्ष्ण्यविहीनश्च मरुद्रोदनमाचरम् ॥३४॥
अन्ये देवा गताशाश्चाऽभवन्नृपास्तु तद्वशाः ।
एवं काले समापन्ने दुःखे च सर्वतोऽधिके ॥३५॥
देवा रणं विहायैव ययुस्ते ब्रह्मणो गृहम् ।
प्रार्थयामासुरत्यर्थं जगदुः स्वापकृष्टताम् ॥३६॥
आसुरस्य बलं चापि रक्षार्थं चान्वरोधयन् ।
ब्रह्मा श्रुत्वा तु तानाह यतिष्ये भवतां कृते ॥३७॥

सर्वे चैवाऽत्र तिष्ठन्त्वाराधयन्तु हरिं परम् ।
हरिं विना न वै तस्य नाशकोऽन्योऽस्ति मद्वरात् ॥३८॥
इत्युक्त्वा देवताद्याश्चाराधयामासुरुत्सुकाः ।
मामनादिश्रीशनारायणं श्रीपुरुषोत्तमम् ॥३९॥
अहं साकं त्वया लक्ष्मि ! गजाऽऽरूढोऽक्षराद् द्रुतम् ।
उपाययौ सत्यलोकं तदा ब्रह्मसभास्थलम् ॥४०॥
ब्रह्माद्याः स्वागतं पूजां मम चक्रुस्ततः परम् ।
जगदुर्निजदुःखं चाऽसुरनाशं प्रवव्रिरे ॥४१॥
तदाऽहं चाऽसुरनाशं पद्मजे ! समचिन्तयम् ।
यान्तु नैजान् प्रदेशानित्यवदं च सुरानहम् ॥४२॥
शीघ्रं सुरा ययुर्नैजान् देशानहं च मानवम् ।
रूपं धृत्वाऽऽजगाम क्ष्मां यत्राऽऽलयोऽसुरस्य वै ॥४३॥
क्षात्रं रूपमहं धृत्वा सशरं धनुषा युतम् ।
गत्वा च गोपुरे तस्य भिक्षायात्रां व्यधापयम् ॥४४॥
मयूरश्च तदा दूतैर्विज्ञप्तः स्वयमेव तु ।
आतिथ्यार्थं गोपुरं स्वं चाऽऽजगाम समुत्सुकः ॥४५॥
नत्वा मां किन्नु भिक्षायां याचसे त्विति चाऽऽह सः ।
युद्धभिक्षां देहि मेऽत्र याचेऽहं नाऽपरामिति ॥४६॥
याचितः स ददौ भिक्षां जलं धृत्वा करे तदा ।
शस्त्रेण शस्त्रं संयुज्य धनुषाऽऽप्ता मयाऽपि सा ॥४७॥
तत्रैव युद्धं ह्यभवद् गोपुराऽग्रे वनोत्तमे ।
घोरं तेनैव साकं वै मासान्तं सुभयंकरम् ॥४८॥
सुराणां मानवानां च पितॄणां शीलसञ्जुषाम् ।
राज्ञां चापि प्रवीराणां रोमहर्षणकारकम् ॥४९॥
देवा आकाशमार्गेण ज्ञात्वा युद्धप्रवर्तनम् ।
पश्यन्त्यागत्य तत्रैव जयं वदन्ति मे तदा ॥५०॥
एकोऽहं वै मयूरेण युद्धं करोमि नाऽपरः ।
मासान्ते मम बाणैश्च शस्त्रैरस्त्रैर्गदादिभिः ॥५१॥
भिन्नपिच्छोऽभवत्तूर्णं निराशोऽप्यभवत्तदा ।
मायूरकान्निजयोद्धॄन् योजयामास संयुगे ॥५२॥
ते साहाय्यकरास्तस्य मामावृत्य समन्ततः ।
युयुधिरेऽतिवेगेन चाऽर्बुदास्ते मयूरकाः ॥५३॥
मायारूपधराश्चापि मायाद्यस्त्रधरास्तथा ।
मायावेषधराश्चापि मायायुद्धकरास्तथा ॥५४॥
मृषादेहधराश्चापि मृषासैन्यनिरूपिणः ।
सर्वे मया हतास्तत्र सुदर्शनेन वै क्रमात् ॥५५॥
दग्धा मृता मयूरास्ते सुदर्शनस्य तेजसा ।
मायूरकी पुरी दग्धा भक्ता मया सुरक्षिताः ॥५६॥

शच्यादिकाः प्रिया याश्च मानव्यश्चापि मानवाः ।
नरा नार्यो देवताश्च मया तत्रैव रक्षिताः ॥५७॥
आसुरास्ते हताः सर्वे मायूरवंशयोगिनः ।
सर्वे निरवशेषास्ते कृताः सुदर्शनेन वै ॥५८॥
मायूरकस्तथा दृष्ट्वा विनाशं स्वस्य सर्वथा ।
अन्धो भूत्वा महाखड्गं धृत्वा करे विहायसा ॥५९॥
अद्रिप्रायं वपुः कृत्वा पपात मम मस्तके ।
हन्तुं मां खड्गधारेण तावन्मया सुदर्शनम् ॥६०॥
अधस्तात्प्रेरितं तस्मै ददाह तं तदाऽम्बरे ।
भस्मीभूतः समस्तो वै व्योम्न्येव समपद्यत ॥६१॥
देवदुन्दुभयो नेदुः पुष्पवृष्टिर्ममोपरि ।
चन्दनाऽक्षतवृष्टिश्च जयघोषास्तथाऽभवन् ॥६२॥
मायूरवंशजा नार्यो रुरुदुर्वै तदा मुधा ।
देवानाहूय च तदाऽवातरं तत्र पत्तने ॥६३॥
मायूरके महारम्ये सर्वसमृद्धिसुशोभने ।
कारागारं विलोक्याऽपि तत्स्थानमोचयं जनान् ॥६४॥
देवानमोचयं तूर्णं तथा देवीरमोचयम् ।
शचीमुख्यादेवताश्चाऽमोचयं मानवीस्तथा ॥६५॥
तद्राज्ये देवताः सर्वा देवाश्च मानवा अपि ।
मां क्षत्रं परमात्मानं श्रीहरिं पुरुषोत्तमम् ॥६६॥
तीर्थजलैरभिषिच्य पुपूजुर्हि विधानतः ।
प्रतिष्ठापयामासुश्च श्रिया साकं समुत्सुकाः ॥६७॥
अनेकाः कन्यका नार्यो मयूरवंशजास्तदा ।
अनाथा मां परं नाथं प्राप्य ता वव्रिरे मुदा ॥६८॥
मया यज्ञे पाविताश्च गृहीता विधिना करे ।
ब्रह्माद्यैरर्पिताः सर्वा मम पत्न्यस्तदाऽभवन् ॥६९॥
एवं मया मयूराख्यो महासुरो हतः पुरा ।
मां विना तस्य वै नाशो नान्येन निर्मितो यतः ॥७०॥
तस्य तेजो निर्गतं तु मय्येव शान्तिमाप ह ।
मुक्तिंगतोऽसुरः सोऽपि तथाऽन्येऽपि च ये हताः ॥७१॥
सर्वे मोक्षं गता मे यत् सुदर्शनेन वै हताः ।
मोचिताश्चापि राजानो मां प्रपूज्य परेश्वरम् ॥७२॥
ययुस्ते वै निजदेशान् सुराश्च त्रिदिवं गताः ।
नागपत्न्यश्च मानव्यस्तथा देव्योऽप्यनाथिकाः ॥७३॥
मां विवाह्य स्थिता सर्वा मम पत्न्यस्तदा प्रिये ।
त्वं सर्वासां राजराज्ञीनाम्नी श्रीरभवस्तदा ॥७४॥
अयोनिजा क्षात्ररूपधर्त्री मत्पार्श्वशालिनी ।
अथ पिच्छान्मयूरस्य संगृह्य मार्जनी त्वया ॥७५॥

कृता भूमार्जनार्थे वै तथा मत्पार्षदैरपि ।
मार्जनिकाः कृताः सर्वाः सुरूपाः शोभना अपि ॥७६॥
अथाऽहं स्वविमानेन भूतले सर्वतो दिशि ।
यत्र यत्राऽसुराश्चासन् मयूरेण नृपीकृताः ।
तत्र तत्रैव गत्वा च हत्वा तान् मूलतः प्रिये ! ॥७७॥
ददौ राज्यानि सर्वाणि क्षत्रियेभ्यो यथायथम् ।
एवं मया मम सर्वं साम्राज्यं भूतलेऽभितः ॥७८॥
स्थापितं च तदा श्रेष्ठं वैष्णवं परमात्मना ।
अनादिश्रीकृष्णनारायणेन चक्रधारिणा ॥७९॥
अनादिश्रीक्षत्रनारायणरूपेण रक्षता ।
अनादिश्रीराजराज्ञीसहितेन स्मर प्रिये ! ॥८०॥
मया क्षात्रनृपाः सर्वे पालिताः क्षितिमण्डले ।
सर्वे यज्ञाः कृताश्चापि रक्षिताश्च प्रजा अपि ॥८१॥
देवता रक्षिताश्चाऽपि धर्ममार्गाः प्रवर्तिताः ।
सत्रप्रथाः कृताश्चापि वेदमार्गाः प्रपोषिताः ॥८२॥
नीतयः स्थापिताश्चापि साधवो रक्षितास्तदा ।
सन्मठाः कारिताः श्रेष्ठा देवादयाश्च कारिताः ॥८३॥
तीर्थानि रक्षितान्येव भिक्षुकाश्चापि रक्षिताः ।
कथा नारायणस्याऽपि सर्वा नित्यं प्रवाचिताः ॥८४॥
सत्यः साध्व्यः पालिताश्च धर्मे सदा प्ररक्षिताः ।
भक्तिश्च मम ते चापि सर्वक्ष्मायां प्रवर्तिता ॥८५॥
वैदिकश्चाप्यात्मबोधः कल्पे तदा मयोदितः ।
सभायां मे तदा लक्ष्मि ! दशसाहस्रसाधवः ॥८६॥
दशसाहस्रविप्राश्च दशसाहस्रसाध्विकाः ।
दशसाहस्रवटवो दशसाहस्रवैदिकाः ॥८७॥
दशसाहस्राऽतिथयो दशसाहस्रभिक्षुकाः ।
दशसाहस्राऽनाथाश्च दशसाहस्रजापकाः ॥८८॥
दशसाहस्रमखिनो दशसाहस्रसत्रिणः ।
दशसाहस्रयमिनो दशसाहस्रतापसाः ॥८९॥
व्रतिनो दशसाहस्रा दशसाहस्रपण्डिताः ।
दशसाहस्रदासाश्च दशसाहस्रदासिकाः ॥९०॥
दशसाहस्रयोगज्ञा दशसाहस्रचारणाः ।
नित्यं तिष्ठन्ति सत्त्वस्था ज्ञानयोगपरायणाः ॥९१॥
मम भक्तियुताः सर्वे मम सत्रे प्रभोजिनः ।
मम मूर्तेश्च धर्तारो ध्यानमार्गे कृतादराः ॥९२॥
बभूवुः कृतवासाश्च सदा स्वात्मनिवेदिनः ।
मया पृथ्व्याः कृतं राज्यं साप्तसामुद्रसंवृतम् ॥९३॥
मानवानां हि मोक्षार्थं देवानां सुखलब्धये ।
पातालादिनिवासाश्च स्वर्गादिकनिवासिनः ॥९४॥
अन्वसरँश्च मां सर्वे भेजुर्मां सकलेश्वरम् ।
आकल्पं तु तदा चाहं न्यवसं भूतलेऽनिशम् ॥९५॥
वैकुण्ठतुल्या पृथिवी निरातंका तदा ह्यभूत् ।
कल्पद्रुमास्तथा कामधेनवः कामवल्लिकाः ॥९६॥
चिन्तामणयः सर्वत्र तदाऽऽसन् मम योगतः ।
सदा कृतयुगश्चापि कालश्चैकविधोऽभवत् ॥९७॥
मानस्यश्चापि च स्पार्शन्यश्च दार्शनिकास्तथा ।
तथा च सहवासिन्यश्चासन् वै सृष्टयस्तदा ॥९८॥
स्मर सर्वं राजराज्ञीश्रि ! त्वं राजाधिराजताम् ।
जानाम्यहं तु तत्सर्वं नान्ये जानन्त्यबुद्धयः ॥९९॥
अवताराः परे चापि तदाऽऽसन्मे यथोचिताः ।
देवमानवरूपाश्च तत्तत्कार्यनिवर्तकाः ॥१००॥
इत्येवं कथितं तेऽत्र प्राकट्यं मम पद्मजे ।
पठनाच्छ्रवणाद्वाऽपि भुक्तिमुक्तिफलप्रदम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो नवविंशे वत्सरे मायूरकासुरनाशार्थम् अनादिश्रीराजनारायणस्य राजराज्ञीश्रीसहितस्य प्राकट्यमित्यादिनिरूपणनामा चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं मम वै ततः ।
त्रिंशत्तमे वेधसस्तु देववत्सरसंज्ञके ॥ १ ॥
वर्षे कल्पे दशशते मनौ चतुर्दशे पुरा ।
चमत्कारं तव लक्ष्मि ! वदामि हि मया सह ॥ २ ॥
प्राकट्यं वै तदा लोके यदासीद् भूतले शृणु ।
प्रान्ते कृतेऽभवन् भक्ताः सुराष्ट्रे पञ्च चाऽऽवयोः ॥ ३ ॥
देवसखश्च कीर्तिश्च चिक्लीतः कर्दमस्तथा ।
जातवेदश्च ते विप्राः सहोदराश्च सात्त्विकाः ॥ ४ ॥
तापसा धर्मनियताः सन्तुष्टा ब्रह्मवादिनः ।
शौचे तपसि सन्तोषे स्वाध्याये भजने रताः ॥ ५ ॥
अद्रोहे सत्यभावे चाऽस्तेये शीलेऽपरिग्रहे ।
कृताभ्यासाः शमे चापीन्द्रियाणां निग्रहे रताः ॥ ६ ॥
तितिक्षायां क्षमायां च मार्दवे श्रेयसि स्थिताः ।
योगे विवेकजे ज्ञाने सत्त्वोत्कर्षे सदा स्थिताः ॥ ७ ॥

ध्याने होमे जपे पूजायां च सत्कारसेवने।
आत्मब्रह्मात्मविज्ञाने चात्मनिवेदने स्थिताः ॥ ८ ॥
सिद्धयष्टकं तथा त्वेषां निधीनां नवकं सदा।
कल्पवाणी च सेवायां वर्तन्ते कामधेनवः ॥ ९ ॥
आकाशशायिनश्चैते दिग्वस्त्राः फलभोजनाः।
जलाऽमृतादिपानाश्च प्रभादीपाः समाधिगाः ॥१०॥
आत्मानला ब्रह्मगृहाश्चान्तरात्मसहायिनः।
भक्तियुक्ताः साधुसंगाः सतीसत्कारतत्पराः ॥११॥
अतिथिपूजकाः सर्वे निरीहाश्च विदेहिनः।
अनावरणभावाश्च तथाऽव्याहतसञ्चराः ॥१२॥
भूतस्पर्शादिहीनाश्च देहदोषादिवर्जिताः।
वज्रतुल्या दिव्यदेहा दिव्यानन्दपरायणाः ॥१३॥
संकल्पप्राप्तसर्वस्वभोगयोगादियात्रिकाः।
वाक्सिद्धा दुःखहन्तारः शरणागतवत्सलाः ॥१४॥
ब्रह्मा विष्णुर्महेशोऽर्कश्चन्द्र इवाऽपराः सुराः।
ख्याताः क्षितौ भुवःस्वर्गमहर्जनतपस्सु च ॥१५॥
सत्ये लोके तथा मेरौ पातालेष्वपि सर्वथा।
ऐश्वर्यशालिनः सर्वे ईश्वरा अपरा इव ॥१६॥
देववद् दुःखहर्तारो योगिवदात्मदर्शकाः।
श्रेष्ठिवद्धनदातारः पतिवत्पुत्रदायिनः ॥१७॥
रक्षकाः स्वामिवच्चापि दातारो विष्णुवत्तथा।
ज्ञाने ब्रह्मसभाः सर्वे पूरणे कल्पपादपाः ॥१८॥
ब्रह्मचर्योज्ज्वला देहेष्वपि क्ष्माभा धृतौ तथा।
सहस्रे साधवश्चेमे पूर्णकामाश्च मुक्तवत् ॥१९॥
एतादृशान् प्रसिद्धान् वै ज्ञात्वा लोकास्तु दुःखिनः।
समायान्ति निजार्तीनां विनाशार्थं दिवानिशम् ॥२०॥
रोगिणो भोगिनश्चापि दीना दारिद्र्यभागिनः।
कदर्याः शत्रुदुःखाश्च विधुराश्च विपुत्रिणः ॥२१॥
अनन्नाम्बरसौधाश्चेषणावन्तो बुभुक्षवः।
मुमुक्षवो मुमूर्षवश्चायान्ति शरणं सदा ॥२२॥
तेषां क्लेशान्नाशयन्ति ह्याशीर्वादपरायणाः।
दातारः सर्ववस्तूनां सुखानां धनसम्पदाम् ॥२३॥
मानवाश्च नरा नार्यो यान्ति पूर्णमनोरथाः।
आनन्दिताः पूर्णकामाः पूर्णाशाः पूर्णमानसाः ॥२४॥
धनार्थिभ्यो ददत्येते धनानि सिद्धिजानि वै।
पुत्रार्थिभ्यो ददत्येतेऽपत्यान्यभीष्टकानि च ॥२५॥
पतिं पत्नीं गृहं राज्यं क्षेत्रं गजं च गास्तथा।
आरोग्यं वंशविस्तारं सम्पदश्च ददत्यपि ॥२६॥

तापत्रयादिराहित्यं कुर्वन्ति शरणार्थिनः।
एवं सर्वे चमत्कारभृता ईश्वरसदृशाः ॥२७॥
भवन्ति स्म क्षितौ लक्ष्मि ! भक्तास्ते मेऽपि सर्वथा।
अथैकदाऽऽलये तेषां लक्ष्मीवाञ्छापरायणः ॥२८॥
असुरस्त्वाययौ नाम्ना प्रसविष्णुर्महाबलः।
विप्ररूपधरः सोऽयं तापसः कामवासनः ॥२९॥
नारायणस्य या पत्नी सा मे पत्नी भवेदिति।
लक्ष्म्यास्ते कामनायुक्तो भक्तानां पुर आययौ ॥३०॥
ययाचे स्वेप्सितां भिक्षां पञ्चभ्योऽपि तदाऽसुरः।
लक्ष्मीं नारायणपत्नीं मह्यं ददतु दानिनः ॥३१॥
भक्तास्त्वयोग्यभिक्षां तां श्रुत्वैव मेनिरे तदा।
किन्त्वदातृत्वगणनाऽस्पर्शार्थं प्राहुरोमिति ॥३२॥
हरिर्वै बलवानेनं लक्ष्मीर्वा संहरिष्यति।
इतिविचार्य दानेन्द्राः सस्मरुः श्रीं मम प्रियाम् ॥३३॥
भक्तेच्छानुसारिणा च मयाऽऽज्ञप्ता च वै द्रुतम्।
आक्षरात्त्वं हि पञ्चानां पुरतः समुपस्थिता ॥३४॥
कुमारिका सुरूपा च द्वादशाऽधिकवत्सरा।
सर्वाभरणशोभाढ्या स्वर्णचम्पकविग्रहा ॥३५॥
शोभनां मोहिनीरूपां त्वां विलोक्य तदाऽसुरः।
मेने स्वार्थस्य वै सिद्धिं मुमुदे हृदि तामसः ॥३६॥
अथ देवसखाद्यास्ते दृष्ट्वा पुपूजुरीश्वरीम्।
नारायणीं समर्थां च विज्ञप्यापि क्षमार्थनम् ॥३७॥
आसुरे दानरूपाऽर्थे कार्यं निवेद्य वै जलम्।
करेष्वादाय च ददुश्चासुराय प्रिये ! तदा ॥३८॥
त्वामासाद्य प्रसविष्णुश्चासुरो विप्ररूपधृक्।
ययौ गृहं निजं तत्र त्वया व्रतं धृतं परम् ॥३९॥
ब्रह्मचर्याभिधानं वै नैष्ठिकं पाल्यमेव तत्।
अविप्लुतं तापसं च स्प्रष्टव्यो नाऽसुरः क्वचित् ॥४०॥
अथ त्वं तद्गृहं प्राप्ता त्वां स स्प्रष्टुं समीच्छति।
किन्तु प्रलयानलभां ज्वालामालासमावृताम् ॥४१॥
त्वां विलोक्य त्रस्तमना यथागतो निवर्तते।
अथ विचार्य बहुभिर्दिवसैः कारणान्तरम् ॥४२॥
तव स्पर्शस्य सिद्ध्यर्थं पुनर्भक्तान् हि पञ्च तान्।
प्रत्याययौ सुभिक्षार्थं रतिं मूर्तिमतीं तथा ॥४३॥
कामं सुमूर्तं बाणांश्च वसन्तं मे ददत्विति।
पञ्च भक्तास्तु ते तत्र सस्मरुस्तान् तथाकृते ॥४४॥
कामाद्या आययुस्तूर्णं संकल्पितास्तदा पुरः।
अथ ददुस्ते दानेऽपि महासुराय तांस्तदा ॥४५॥

असुरस्तानुपादाय ययौ नैजालयं प्रति ।
तान् कामादीनादिदेश प्रवेष्टुं कमलातनौ ॥४६॥
यैः सा सम्पीडिता लक्ष्मीर्मां स्वयं समुपेष्यति ।
इत्येवं सोऽसुरश्चापि प्रतीक्षां प्राकरोदपि ॥४७॥
अथ कामो निचिक्षेप बाणानुन्मादकादिकान् ।
वसन्तः सुमनोभिर्वै परितः सुमनोहरः ॥४८॥
प्रफुल्लितः श्रियास्तत्र प्रफुल्लतां नयत्यपि ।
रतिस्ततः स्वयं मूर्तिमती लक्ष्म्यां शनैः शनैः ॥४९॥
प्रवेशं चेहमाना तु सहास्या समुपाययौ ।
लक्ष्मीर्विज्ञाय तां दुष्टां कामपत्नीं दुराशयाम् ॥५०॥
सद्यो रोषं समापन्ना त्वं तदा परमेश्वरी ।
नेत्राभ्यां प्रलयाग्निं वै चोत्पादितवती स्वयम् ॥५१॥
दृष्टवती रतिं कामं वसन्तं च शरानपि ।
असुरं चेति तान् सर्वान् क्षणमात्रेण भस्मसात् ॥५२॥
कृतवत्येव देवेशि ! नैष्ठिकव्रतशालिनी ।
हाहाकारस्तदा जातो देवेषु मानवेष्वपि ॥५३॥
रतेर्नाशात् कामनाशाद् वसन्तादेर्विनाशनात् ।
ऋत्वभावे वनारण्योद्यानाद्याः पुष्पवर्जिताः ॥५४॥
नवांकुरविहीनाश्च लक्ष्मीशून्यास्तदाभवन् ।
सत्यामपि तु लक्ष्म्यां वै निर्लक्ष्मीकं जगद्धयभूत् ॥५५॥
नारीणां च नराणां च प्रमोदा विलयं गताः ।
आनन्दा नाशमापन्नाः प्रसविष्णुविनाशनात् ॥५६॥
एवं लक्ष्मि ! त्वया दग्धा रत्याद्या नेत्रवह्निना ।
जगत् सर्वं नैष्ठिकं च सञ्जातं त्वद्व्रतेन वै ॥५७॥
देवाश्च मानवाश्चापि महर्षयश्च देहिनः ।
सर्वे विचार्य किमिदं कथं चेति समन्विताः ॥५८॥
ययुः सत्ये वेधसं च प्राहुः कष्टं तु षाण्ढिकम् ।
रतिर्नास्ति न कामोऽस्ति वसन्तो नास्ति वै क्वचित् ॥५९॥
किमिदं च कथं जातं निवारयार्तिमुल्बणम् ।
इत्युक्तस्तु तदा ब्रह्मोवाच क्षणं विचार्य वै ॥६०॥
पूर्वं ये पञ्चदेवाश्च पञ्चेन्द्रास्ते ततः परम् ।
पञ्च भक्ता हि कल्पेऽस्मिन् भजन्ते परमेश्वरम् ॥६१॥
देवसखादयः सर्वे दातारश्चार्थिसम्पदः ।
ईश्वराः पञ्च ते दातुं समर्थाः सर्वसम्पदः ॥६२॥
तेभ्यश्चाऽर्पितवान् लक्ष्मीं प्रसविष्णुर्महासुरः ।
मम लिंगमलोत्पन्नो बली खलोऽतिदोषभृत् ॥६३॥
ते विप्रा वै समाहूय लक्ष्मीं तस्मै ददुस्ततः ।
असुरस्तां समादाय ययौ नैजं गृहं प्रति ॥६४॥
लक्ष्मीर्व्रतं दधाराऽपि नैष्ठिकीं ब्रह्मचारिताम् ।
असुरः कामवेगेन स्प्रष्टुं लक्ष्मीमुपागतः ॥६५॥
वीक्ष्य तां प्रलयोत्पन्नाग्निभां त्रस्तो महासुरः ।
पुनर्गत्वा च विप्रेभ्यो ययाचे तु रतिं तथा ॥६६॥
कामं वसन्तं बाणांश्च मूर्तिमतश्च ते द्विजाः ।
ददुस्तस्मै सर्वमूर्तान् नीत्वाऽसुरो ययौ गृहम् ॥६७॥
प्रेरयामास तान् सर्वान् लक्ष्मीं कर्तुं हि चञ्चलाम् ।
लक्ष्मीः क्रुद्धा स्वचक्षुर्भ्यामुत्पाद्य प्रलयानलम् ॥६८॥
भस्मीचकार तान् सर्वान् जगत् तेन तथैव च ।
कामबाणवसन्तैश्च रत्या हीनं निरर्थकम् ॥६९॥
निरानन्दं प्रसंजातं कारणं त्वेतदेव यत् ।
कथितं तत्र वै नान्यस्तूपायोऽस्त्यत्र वारकः ॥७०॥
लक्ष्मीक्रोधेन कामोऽपि रतिश्चासुरकोऽपि च ।
प्रसवस्ते तथा बाणा वसन्तश्च मृताः सदा ॥७१॥
लक्ष्मीश्चेत् तान् पुनः सर्वानुत्पादयेत् प्रसादिता ।
नैष्ठिकं व्रतमेवाऽपि प्रसमाप्य हरेः पुरः ॥७२॥
परमेशस्याऽऽज्ञया च सर्वानुज्जीवयेद् यदि ।
तदा षण्ढत्वदोषोऽयं त्रैलोक्याद् विगमिष्यति ॥७३॥
नान्यथेति तदर्थं श्रीहरिं प्रति यतामहे ।
आराधनां प्रकुर्मोऽत्र हरिः स्वयं सुतोषितः ॥७४॥
समायास्यत्यत्र शीघ्रं दुःखं निवारयिष्यति ।
इत्युक्तास्ते सत्यलोके चक्रुः प्राराधनां मम ॥७५॥
लक्ष्म्या त्वया वियोगेन दुःखितया स्मृतोऽपि च ।
समायातः सत्यलोकं ब्रह्मादीनां पुरः स्थितः ॥७६॥
दृष्टवन्तश्च ते मां वै दिव्यरूपं सनातनम् ।
शंखचक्रधरं कृष्णनारायणं परेश्वरम् ॥७७॥
सर्वाभरणशोभाढ्यं प्रसन्नवदनेक्षणम् ।
आनर्चुस्ते प्रचक्रुश्च स्वागतं तुष्टुवुस्ततः ॥७८॥
सर्वदुःखप्रशान्त्यर्थं मां हरिं पुरुषोत्तमम् ।
श्रुत्वा तेषां प्रार्थनां चाऽवोचं तेभ्यस्तदा प्रिये ! ॥७९॥
लक्ष्म्या कृतं न चाऽहं तद् विकर्तुं प्रभुरत्र ह ।
तस्माद् यामो यत्र देवी लक्ष्मीर्वने विराजते ॥८०॥
स्थिता सा ब्रह्मचर्ये वै प्रसविष्णुवने सती ।
तापसी नैष्ठिकधर्मे वर्तते सा महेश्वरी ॥८१॥

अथ सर्वे वयं तत्राऽऽयाता यत्र तव स्थली ।
विलोक्य मां प्रसन्ना त्वं पपात मम पादयोः ॥८२॥
स्वागतं देवतानां च कृतवत्यतिभावतः ।
रत्यादिनाराजन्यं च दुःखं प्रति निवेदिता ॥८३॥
स्तुता सर्वैश्च देवाद्यैः प्रसादिता पुनः पुनः ।
त्वमात्थ सर्वदेवादीन् दिनान्तोऽयं प्रविद्यते ॥८४॥
श्वः प्रातस्ते तु कामाद्या ब्रह्मणो देहजाः सुताः ।
भविष्यन्ति हि रत्याद्याः समर्था देहधारिणः ॥८५॥
प्रस्रवाख्योऽसुरश्चाऽपि स्वावात्मा संभविष्यति ।
अद्य सन्ध्यासमये वै तेषां नास्ति प्रयोजनम् ॥८६॥
नैष्ठिकं व्रतमास्थाय भजन्तां परमेश्वरम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥८७॥
अहं भजामि चात्रैवाऽऽमन्वन्तं स्वामिना सह ।
भगवान् मम कान्तश्च नैष्ठिकोऽप्यत्र तिष्ठतु ॥८८॥
मया व्रतं धृतं त्वेतन्नैष्ठिकं प्रलयान्तिकम् ।
सर्वेऽपि वै व्रते तत्र तिष्ठन्तु श्रेयसां प्रदे ॥८९॥
त्वयोक्तास्ते तदा देवा मानवाः ऋषयस्तथा ।
सर्वे स्थिता व्रते तत्र नैष्ठिकेऽन्यदिनाऽवधिम् ॥९०॥
अहं तवेच्छयाऽरण्ये भूमौ लक्ष्मि ! तदाऽवसम् ।
अनादिश्रीब्रह्मचारिनारायणाभिधस्त्वया ॥९१॥
सह त्वं व्रतमापन्ना सदैव तपसि स्थिता ।
साध्वी धर्मवती लक्ष्मि ! नैष्ठिकीश्रीरिति प्रिये ! ॥९२॥
अथ सृष्टिस्तदा चान्ते मनौ रुद्धा समन्ततः ।
मृता वृद्धाश्च संभूय प्रजाः शनैः शनैस्तदा ॥९३॥
तावत्प्रलयकालश्चाऽऽययौ सर्वं निशामुखे ।
यथाक्रमं नित्यवच्च संहृतं परमेष्ठिना ॥९४॥
त्वं व्रतं स्वं समाप्यैव देवसखाश्रमं प्रति ।
मया साकं गता लक्ष्मि ! तानादाय ततो दिवम् ॥९५॥
प्रापय्य तान् पञ्चभक्तान् भाविमहेन्द्रविग्रहान् ।
महर्लोकं जनलोकं सत्यलोकं ततः परम् ॥९६॥
प्रापय्य ब्रह्मणेऽर्प्य वैकुण्ठं च मया सह ।
गत्वा ततः परं मेऽपि धामाऽक्षरं गताऽभवत् ॥९७॥
इत्येवं मम ते चापि प्राकट्यं कथितं प्रिये ।
स्मर तत्तापसं रूपं नैष्ठिकं चाऽक्षरेश्वरि ॥९८॥
अन्येऽवतारास्तद्वर्षे मम ते चाऽप्यसंख्यकाः ।
जातास्तान् वै समस्तांश्च वेद्म्यहं नेतरे सुराः ॥९९॥
अथ कल्पान्तरे रत्यादयो जाता अजात्मजाः ।
सदेहा अजसाहाय्यप्रदास्ते वचनात् खलु ॥१००॥
पठनाच्छ्रवणाच्चाऽस्य नैष्ठिकस्य फलं भवेत् ।
भुक्तिर्मुक्तिर्भवेच्चापि यथेष्टमाप्नुयात्तथा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसस्त्रिंशे वत्सरे देवसखादिभक्त्या प्राप्तलक्ष्म्या कृतप्रस्रवणासुररतिकामवसन्तबाणादिभस्मीभावोत्तरं नैष्ठिकतापालनार्थम् अनादिश्रीब्रह्मचारिनारायणस्य नैष्ठिकीश्रिया सह प्राकट्यमित्यादिनिरूपणनामा पञ्चविंशोऽध्यायः ॥ २५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं मे ततः परम् ।
वेधसो मानवाख्ये वै चैकत्रिंशे तु वत्सरे ॥ १ ॥
कल्पे तु षट्शते त्रयोदशे मनौ तदा पुरा ।
ब्रह्मणः पृष्ठनिम्नाऽधोभागान्मलिमसोऽसुरः ॥ २ ॥
हल्लकाऽऽख्यो बभूवाऽपि शवभक्षो भयंकरः ।
तपस्तेपे महाघोरं चार्धकल्पं हि दारुणम् ॥ ३ ॥
ब्रह्मा तुतोष च ततो गोचरोऽस्याऽभवद् भुवि ।
असुरो मृत्तिकाभूतो वल्लीवृक्षाधिरोहितः ॥ ४ ॥
अस्थिमृदस्तितामात्रो यत्राऽऽसीत् तत्र विश्वसृट् ।
गत्वा जलेनाऽभिषिच्य द्रुमानुत्सार्य पार्श्वतः ॥ ५ ॥
मृत्तिकाद्रुमूलभागात् हल्लकं चाऽभ्यजीवयत् ।
वल्लीपादशरीरश्च हरिद्वर्णोऽतिदुर्बलः ॥ ६ ॥
श्मश्रुलो वेधसः पुत्रस्तूत्तस्थौ मूलजालकात् ।
वेधसं जीवयन्तं स्वं वीक्ष्य नेमेऽतिभावतः ॥ ७ ॥
ययाचेऽपि वरं श्रेष्ठं कालसंहारकारकम् ।
कालं वा कालरूपं वा संहारकं हि देहिनाम् ॥ ८ ॥
संहारयाम्यहं चैवं वरं देहि पितामह ।
ब्रह्मा प्राह वरश्चाऽयं मे बलादतिरिच्यते ॥ ९ ॥
नाऽहं दातुं समर्थोऽस्मि कालाधीनोऽस्म्यहं यतः ।
हल्लकस्तु तदा प्राह देहि चेत् तं न चाऽपरम् ॥१०॥
तपः करिष्ये सततं तदर्थं वै पितामह ।
कालं हन्तुं समर्थो वै कश्चिदेव हरिं विना ॥११॥
नैवाऽस्ति सृष्टिजो व्यक्तिविशेषोऽपि कथंचन ।
अतो हल्लक ! यद्ब्रवीमि शृणु ते यदि रोचते ॥१२॥
कालस्य खलु रूपाणि बहूनि सन्ति सृष्टिषु ।
तेष्वेकस्यैव रूपस्य सकृत् हन्ता भविष्यसि ॥१३॥
यदि ते रोचते त्वेतत्तदा गृहाण मे वरम् ।
इत्युक्तो मोहवशगो हल्लको वै तदा वरम् ॥१४॥

जग्राह तत्तपस्त्यक्त्वा ययौ मेरुगुहां प्रति ।
ब्रह्मणो वरदानेन गर्विष्ठो वर्तते सदा ॥१५॥
सुरान् दैत्यान् राक्षसांश्च दानवान् किन्नरादिकान् ।
तामसान् राजसान् देवान् यक्षान् किंपुरुषादिकान् ॥१६॥
गन्धर्वांश्चारणांश्चापि गणयत्येव नैव सः ।
अवमानं करोत्येव युद्धयत्येव स्थले स्थले ॥१७॥
ब्रह्मणो वरदानस्याऽनर्थं प्रकाशयत्यपि ।
कालनाशक एवेति निजं प्रख्यापयत्यपि ॥१८॥
स्वर्गे जयं समासाद्य पातालेषु ययौ ततः ।
तत्रापि विजयं प्राप्य लोकालोकं ययौ हि सः ॥१९॥
सर्वत्र विजयं प्राप्य यमलोकं ततो ययौ ।
यमस्तं पूजयामास ज्ञात्वा कालविनाशकम् ॥२०॥
हल्लकोऽयं ततो ज्ञात्वा निजं विजयिनं परम् ।
ययौ कैलासलोकं स जेतुं रुद्रं शिवं हरम् ॥२१॥
गणाः कैलासवासा वै जङ्गभद्रादयस्तु तम् ।
न्यवारयन् गोपुराद् वै ततोऽसौ हल्लको रुषा ॥२२॥
युयुधे द्वारपालैश्च विजित्य तान् गणान् परान् ।
गणेशान् भूतमूर्धन्यान् भैरवादींस्ततः परम् ॥२३॥
शंभुगृहं ययौ क्रूरो दुष्टो मलिनवासनः ।
कैलासं वै निजं कर्तुं वशे कर्तुं सतीं तथा ॥२४॥
गणान् भृत्यांस्तथा कर्तुमियेष वीक्ष्य सम्पदः ।
प्राह शंभुं भव भृत्यो मम शंभोऽन्यथा तव ॥२५॥
विधास्येऽहं विनाशं वै देहि सतीं तु मे तव ।
कैलासराज्यं मे दत्वा याहि त्वं मेरुपर्वतम् ॥२६॥
पुनः कालान्तरे दास्ये तृप्तोऽहं ते यथायथम् ।
शंभुर्विचारयामास बलं त्वस्य भवेत् कियत् ॥२७॥
योत्स्येऽनेन तु बलिना ब्रह्मणो वरयोगिना ।
नाशयिष्ये क्षणादेनं वरदानयुताऽसुरम् ॥२८॥
विचार्यैवं कालरूपं रौद्रं दधार शंकरः ।
त्रिशूलं त्वन्तिमलयकर्तृ दधार तैजसम् ॥२९॥
सांकर्षणं भीमरूपं कृत्वा शीघ्रं समाययौ ।
युद्धार्थं तस्य सान्निध्यं तावत् हल्लक इत्यपि ॥३०॥
जग्राह पार्वतं रूपं भयकृच्च विनाशकृत् ।
सशूलचन्द्रकशस्त्रं करे दधार चाऽऽयसम् ॥३१॥
कालकालो यथा भाति तथा भात्यत्र हल्लकः ।
युद्धदुन्दुभयो नेदुः कैलासे गणताडिताः ॥३२॥
देवा देवेश्वरास्तत्राऽऽययुः कौतुककर्षिताः ।
शंभोः साहाय्यकाः सर्वे दिक्पालाश्च समाययुः ॥३३॥
युद्धं हल्लकहरयोर्जातं प्रलयकारकम् ।
मेघा नष्टाः फणाकैश्चाऽद्रयो नष्टाश्च हेतिभिः ॥३४॥
क्षितिः शीर्णा पदाघातैः कम्पैश्चुक्षुभिरेऽब्धयः ।
वेगैर्निपेतुस्ताराश्च जगर्जुर्नादैर्दिशः ॥३५॥
गणा गणेश्वरास्तत्र आसमापुर्मृतिं प्रति ।
भग्नाः केचित् कटिभागात् केचित् स्कन्धप्रदेशतः ॥३६॥
अन्ये गलात्परे जान्वोर्भागाद् भग्ना मृतिं ययुः ।
भूतप्रेतपिशाचादीन् कालभैरवभैरवान् ॥३७॥
हस्तेनैकेन संगृह्य मुखे न्यस्याऽत्ति हल्लकः ।
शूरभद्रं वीरभद्रं जङ्गभद्रं सुभद्रकम् ॥३८॥
वामहस्तेन युगपन्मुखे न्यस्य चखाद तान् ।
एतादृशो महानास्ते कालकालो महासुरः ॥३९॥
शंकरः संशयमाप्तो जये त्रिशूलसंस्रवात् ।
शंभोर्हस्तगतं शूलं संभ्रमते स्म पुनः पुनः ॥४०॥
वृषभश्च तथा सिंहो द्वावेतावपि वै तदा ।
हल्लकस्य प्रचक्रेण निकृत्तौ मृत्युमापतुः ॥४१॥
सती संशयमापन्ना जीवने शंकरस्य तु ।
शीघ्रं शंभोः शरीरे सा तिरोभावमुपागता ॥४२॥
शंभुर्विज्ञाय कैलासं छिन्नं भिन्नं मृतानुगम् ।
त्यक्त्वा च जीवनाऽऽशां स दुद्राव हल्लकाऽन्तिकम् ॥४३॥
पुरश्चागत्य शीघ्रं स्वं त्रिशूलं प्रलयानलम् ।
मारयामास मूर्ध्न्यस्य हल्लकस्य गलोपरि ॥४४॥
हस्ताद् वियुज्य वेगेन हल्लकस्य गले गतम् ।
प्रविष्टं चाऽनलप्रख्यं त्रिशूलं तदुदरस्य यत् ॥४५॥
निगलितं गतं तत्र रसभावमुपागतम् ।
पथ्यं जातं हल्लकस्योदरेऽमृतमिवाऽभवत् ॥४६॥
अत्यद्भुतमिदं जातं कालशूलं हि जीर्णितम् ।
एवमन्यानि शूलानि त्रिशूलानि च हेतयः ॥४७॥
सर्वे हल्लकचर्मांऽऽप्य रसभावमुपागताः ।
अहेतिः शंकरो जातस्तदा विष्णुं तथा ह्यजम् ॥४८॥
प्रसस्मार शिवस्तूर्णं विष्णुस्तत्र ह्युपाययौ ।
चक्रं ददौ निजं तस्मै हराय च हरोऽपि तत् ॥४९॥
चक्रं मुमोच कण्ठेऽस्य हल्लकस्य रसं ह्यभूत् ।
अथाऽन्यच्चक्रमाधत्तं मुक्तं तद् रसतां गतम् ॥५०॥
एवं चक्राणि सर्वाणि गतानि रसतां तदा ।
ब्रह्मा त्वागत्य च तत्र यावत्पश्यति शंकरम् ॥५१॥
तावत् सशूलचन्द्रेण मुक्तेन वेगगामिना ।
शंकरस्य शिरः कण्ठाच्छिन्नकृतं हल्लकेन वै ॥५२॥

हाहाकारो महान् जातो रौद्रो रुद्रोऽपि वै हतः।
शोकमापुः सर्वदेवा मानवाश्च महर्षयः ॥५३॥
अथापि सर्वभूतानि बभूवुः शोकभाञ्जि च।
हल्लकस्यापि सामर्थ्यं शूलचन्द्रायुधेन वै ॥५४॥
सहैव तु गतं सर्वं ब्रह्मणो वरदानतः।
असामर्थ्यो बभूवाऽपि विज्ञातः सर्वयोद्धृभिः ॥५५॥
ब्रह्मणोदितमेवाऽथ विज्ञाय तु सुरास्ततः।
गणाश्चाभिप्रदुद्रुवुर्मारणायाऽसुरस्य वै ॥५६॥
तावत्त्रिशूलचक्राणि सर्वाण्यपि च यानि वै।
गलितान्यभवँस्तानि निर्गत्य चाऽऽययुर्द्रुतम् ॥५७॥
विष्णुं प्रति समस्तानि शंकरस्य शवं प्रति।
विष्णुश्चक्रं मुमोचाऽस्मै यावत् तावत्स हल्लकः ॥५८॥
हरे विष्णो हरे कृष्ण त्राहि मां शरणागतम्।
उक्त्वा पपात सहसा पादयोः शाङ्गिणोऽसुरः ॥५९॥
न हन्तव्यो व्रतं विष्णोः शरणागतरक्षणम्।
अतश्चक्रं नाऽहनत्तं विष्णो विष्णो प्रवादिनम् ॥६०॥
ब्रह्मणो वरदानाच्च तथानिमित्तशालिनम्।
ब्रह्मणः पृष्ठपुत्रं च भक्तं तापसयोगिनम् ॥६१॥
बबन्ध तं हरिः पाशैः शंकरस्याऽपराधिनम्।
वदन्तं च हरे विष्णो नारायण प्रपाहि माम् ॥६२॥
रटन्तं मनसा मां च स्मरन्तं च हृदा हि माम्।
एतादृशं हरघ्नं तं देवहत्या सुरासदा ॥६३॥
ववल्गे क्रूररूपा सा शतचक्रकरा हरा।
प्राणानां ग्राससामर्थ्या विकृता विकृतानना ॥६४॥
घोरां च वल्गितां त्वेनां हल्लको वीक्ष्य दुःखदाम्।
चुक्रोश बहुधा तत्र रणांगणे सुरान्तिके ॥६५॥
हत्यया ताडितो देवैस्ताडितो गणकोटिभिः।
मृतप्रायो मरन् वव्रे हरेः शरणरक्षिणः ॥६६॥
देहि मे भक्तरूपाय शरणस्थाय माधव।
अग्र्यं पदं महैश्वर्यं द्वेषिणे शंकरस्य वै ॥६७॥
ब्रह्मणो वरदानाच्च महाकालस्य चैककम्।
रूपं मया हृतं लाभं विना वै शांकरं त्विदम् ॥६८॥
हत्वा हतोऽस्मि सञ्जातो मायया गर्वनोदितः।
तपः सर्वं क्षिप्तवाँश्च तामसे कर्मणि प्रभो ॥६९॥
अतः कृपया विष्णो त्वं सुखं देहि कृपां कुरु।
देवहत्या दहत्येषा तां निवारय केशव ॥७०॥
इत्युक्त्वाऽतिरुरोदाऽपि मरणाऽन्तिकतां ययौ।
विष्णुः प्राह मनोः कालं तया रात्रिः प्रपूर्णिका ॥७१॥
देवहत्याकृतं पापं भुंक्ष्व हल्लक रौरवे।
पञ्चदशमनूनां वै कालान्ते दिवसान्तरे ॥७२॥
यावद् दुःखानि संभुक्त्वा मलिनो म्लेच्छकर्मवान्।
म्लेच्छेश्वरो भवान् भक्तो ब्रह्मणो मे भविष्यति ॥७३॥
अनेकसंख्यलोकानामासुराणां गुरुर्महान्।
इत्युक्त्वा भगवान् विष्णुर्यमदूतैश्च हल्लकम् ॥७४॥
प्रेषयामास पापं तं सहत्याकं यमालयम्।
अथ देवाः ऋषयश्च पितरो मानवा द्विजाः ॥७५॥
पार्षदाश्च गणाश्चापि भक्ता देव्यः सतीस्त्रियः।
योगिन्यो मातरश्चापि ग्रहाद्या वसवोऽपि च ॥७६॥
भक्ताः सर्वे च कैलासे संगता हरिणा स्मृताः।
विष्णुस्तेभ्यस्तथा ताभ्यः शंभोरुज्जीवनाय वै ॥७७॥
प्रोवाचाऽऽराधनां कर्तुं मम सर्वावतारिणः।
अनादिश्रीकृष्णनारायणस्य स्वामिनः सतः ॥७८॥
सर्वाऽन्तर्यामिणस्तेऽथाऽऽराधयामासुरुत्सुकाः।
मां सदाऽक्षरधामस्थं श्रीपतिं पुरुषोत्तमम् ॥७९॥
द्रागेवाऽहं त्वया साकं श्रुत्वाऽऽराधनमागतः।
कैलासे गोचरश्चक्षुष्मतां दिव्यसुमूर्तिमान् ॥८०॥
वीक्ष्य मामभवन् सर्वे विशोकाश्चार्थयँस्ततः।
शंभुजीवनदानार्थं ततोऽहं प्राविशं तनौ ॥८१॥
शंकरस्य कबन्धेऽपि मस्तकेऽपि च योगतः।
प्राणशक्तिं प्रदायैवाऽजीवयं चाऽप्यसन्धयम् ॥८२॥
कबन्धे मस्तकं शंभोश्चार्चयं देवकोटिभिः।
पितृभिर्मानवैश्चाऽपि महर्षिभिस्ततः परम् ॥८३॥
शूरभद्रादयो ये च चर्विताश्च मृतास्तदा।
ये च लक्ष्मि ! मृताः सर्वे हता ये च गणाश्च ते ॥८४॥
मया स्मृता मनोजन्या अभवन् जीवनान्विताः।
आगत्य पुरतः शंभोस्तस्थुस्ते नवसृष्टयः ॥८५॥
वृषभाद्या मृताश्चाप्युज्जीवितास्तत्र वै मया।
गणानां कोटयः सर्वा देवानां कोटयस्तथा ॥८६॥
सर्वा मया प्रसंकल्प्य स्वस्थाश्चोज्जीवितास्तदा।
शंकरस्य पुनर्जीवोत्सवः कैलासके कृतः ॥८७॥
सती शंभोः स्वरूपाच्च तदोज्जगाम गोचरा।
प्रत्यक्षा वै महादेवी प्रसन्ना चाऽभवत्ततः ॥८८॥
आर्थयन्मां नित्यमेव कैलासे भूतलोपरि।
स्थातुं साकं त्वया लक्ष्म्या शंभुश्चाऽऽर्थयदेव तु ॥८९॥
देवाश्च मानवाश्चाप्यार्थयन्मां पुरुषोत्तमम्।
स्थातुं कैलासके क्षेत्रे देहिनां श्रेयसेऽपि च ॥९०॥

ततोऽहं शिवराजीश्रि ! त्वया साकं सदाऽवसम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥९१॥
**अनादिश्रीशिवनारायणनाम्ना** शिवेश्वरः ।
त्वं तदा चाऽभवस्तत्र **शिवनारायणी** प्रिये ! ॥९२॥
अथ देवा ययुः सर्वे मानवाः पितरस्तथा ।
स्वस्वलोकान् मुनयश्च कैलासेऽहं ततोऽवसम् ॥९३॥
आकल्पान्तं शिवराज्ञि ! जानाम्यहं न चेतरे ।
स्मर ते मेऽपि दिव्यं तत्प्राकट्यं कमले ! प्रिये ! ॥९४॥
भद्राद्रौ शीतले रम्ये विशालेऽयुतयोजने ।
तत्र स्थिते तु कैलासे भूभागे त्ववसं सदा ॥९५॥
वैष्णवी पृथिवी सर्वा तदा प्राऽभून्मया कृता ।
देवाश्च वैष्णवाः सर्वे त्वासन् भक्तिपरा मम ॥९६॥
मम भक्ते फलं लक्ष्मि ! राजसे तामसेऽपि च ।
असुरे वा सुरे वाऽपि प्राप्ते कालेऽङ्कुरायते ॥९७॥
तस्माद् भक्तिः सर्वश्रेष्ठा भुक्तिमुक्तिफलप्रदा ।
स्थाप्यते वै मया धर्मयुता काले युगे दिने ॥९८॥
कल्पान्ते वा समारम्भे स्थापयामि सदा हिताम् ।
पठनाच्छ्रवणाचाऽस्य मुक्तिर्मुक्तिर्भवेदपि ॥९९॥
स्मृद्धिसम्पत्पुत्रवाँश्च भवेदानन्दशेवधिः ।
महैश्वर्ययुतश्चापि परमेशसरूपवान् ॥१००॥
सर्वविघ्नविनाशश्च सर्वाऽमृतनिषेवणः ।
भवेच्छाश्वतवासश्च ब्रह्मसायुज्यवान् भवेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधस एकत्रिंशे वत्सरे हलकाऽसुरस्य ब्रह्मणो वरदानाद् विजययात्रायां शंभोश्शिरश्छेदे समुज्जीवनार्थम् अनादिश्रीशिवनारायणस्य प्राकट्यमित्यादिनिरूपणनामा षड्विंशोऽध्यायः ॥ २६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं परं तस्मात् कथामृतम् ।
प्राकट्यं मे यथा ते च द्वात्रिंशे परमेष्ठिनः ॥ १ ॥
कल्पद्रुवत्सरे षट्पंचाशत्कल्पेऽष्टमे मनौ ।
एकदा वै कुबेरस्य यक्षः सुवर्णमालिकः ॥ २ ॥
ययौ स्वर्गे विहर्तुं च ततो विष्णुपुरं ययौ ।
सत्यलोकं ततो वीक्ष्य दिक्पालानां तथालयान् ॥ ३ ॥
वीक्ष्य यमालयं द्रष्टुं ययौ संयमनीं पुरीम् ।
तावत्तस्याऽऽयुषश्चाऽन्तो जातो मृत्युं गता हि सः ॥ ४ ॥
यक्षस्य यमराजः प्राऽकारयच्चान्तिमां क्रियाम् ।
ज्ञात्वा कुबेरो यक्षस्य मरणं वै यमालये ॥ ५ ॥
यमदूतैर्मारितश्चेत्यमन्यत ततो रुषा ।
ज्वलन् सैन्येन सहितो यमस्थल्यां स्वयं ययौ ॥ ६ ॥
योधयामास बहुधा यमेन सह वै तदा ।
यमं जित्वा स्वर्णमालं निनाय स्वगृहं प्रति ॥ ७ ॥
अथ राजा यमस्तूर्णमाह्वयामास निर्ऋतिम् ।
राक्षसं सैन्यसहितं निर्ऋतोऽपि तलस्थितान् ॥ ८ ॥
पातालादिनिवासाँश्च राक्षसान् युद्धशालिनः ।
कोट्यर्बुदाऽब्जसंख्यानाह्वयामास स्वपक्षगान् ॥ ९ ॥
कुबेरं तस्य राज्यं च जेतुं ययुश्च ते ततः ।
युद्धवाद्यान्यवाद्यन्ताऽलकायाः सन्निधौ हि खे ॥१०॥
ज्ञात्वा कुबेरकस्त्वेतन्निर्ययौ यक्षकोटिभिः ।
युद्धं त्वाकस्मिकं तत्राऽभवत् सर्वविनाशकम् ॥११॥
याम्यदूतैर्हता यक्षाः कोटिशो राक्षसैस्तथा ।
कुबेरोऽपि हतः कण्ठाद् द्वेधा यमेन वै तदा ॥१२॥
कुबेरराज्यं सर्वं त्वायत्तीकृतं यमेन तु ।
निर्ऋतेन तथा राज्ये राक्षसा नियतीकृताः ॥१३॥
अथ यक्षाः परे केचित् त्रस्ताः श्रीशानदिक्पतिम् ।
इन्द्रं वरुणं वायुं च गत्वा न्यवेदयन्हि तत् ॥१४॥
ते सर्वे त्वाययुस्तूर्णं कुबेरनगरीं प्रति ।
दृष्ट्वा ते धर्मराजं वै तथा निर्ऋतमित्यपि ॥१५॥
ईशानो निजशिष्यस्य कुबेरस्य च पक्षगः ।
वैरनिर्यातनार्थं वै युद्धं चक्रे हि दारुणम् ॥१६॥
महेन्द्रोऽपि तथा वह्निर्वायुर्वरुण इत्यपि ।
कुबेरपक्षमादाय युद्धं चक्रुर्यमेन ते ॥१७॥
अथ सूर्यः स्वपुत्रस्य यमस्य पक्षमावहन् ।
स्वर्भानुश्च तथा शनिश्चरश्चान्येऽपि राक्षसाः ॥१८॥
यमपक्षं परिगृह्य युद्धं ददुर्महोल्बणम् ।
कोटिशश्च गणास्तत्र सुरा यक्षा हताः पुनः ॥१९॥
अभ्यस्तयुद्धकर्माणो याम्या जयं गताः पुनः ।
राक्षसा लेभिरे युद्धे विजयं याम्यपक्षगाः ॥२०॥
क्रूराश्च क्रूरकर्माणो लोहघृष्टकरादयः ।
लोष्ठाऽग्निशस्त्रयन्त्रास्त्रकोविदा निर्घृणा यमाः ॥२१॥
मारयामासुरत्यर्थं वायुं चेन्द्रं जलाधिपम् ।
ईशानं चानलं चापि भग्नास्ते नष्टसैन्यकाः ॥२२॥
हाहाकारो महानासीज्जगत्यां सर्वशस्तदा ।
देवास्त्रस्ता ययुः सत्यं गह्वराण्यपरे तथा ॥२३॥

पृथ्व्यां स्वर्गे च सर्वत्र बलं पातालवासिनाम् ।
दिक्पालानां प्रदेशेषु त्वभवद् वर्धितं तदा ॥२४॥
लक्ष्मि ! तदाऽन्तरीक्षं वै चकम्पे सर्वतो दिशः ।
दिक्पालानां विवादेषु भृत्यकोट्यो हता मृताः ॥२५॥
यमराजोऽभवद् राजा चाऽलकायाः समन्ततः ।
अस्तित्वं वै कुबेरस्य निष्कासितं समन्ततः ॥२६॥
निर्ऋताः राक्षसाः सर्वे यमाश्चार्कः शनिस्तथा ।
राहुश्चाऽन्ये परे चापि बभूवुः स्वबलैधिताः ॥२७॥
स्वतन्त्रा इव त्रैलोक्यां घ्नन्ति विरोधशालिनः ।
निष्कासयन्ति चाऽनम्रान् देवादीन् निजवासतः ॥२८॥
एवं जातं स्वर्गलोके चाऽव्यवस्थं मिथोऽपि च ।
दिक्पालानां बलं नष्टं यमदण्डस्य सन्निधौ ॥२९॥
इन्द्राशायां न वर्तन्ते सूर्यचन्द्रादयोऽपरे ।
सुरास्तदाश्रिताश्चापि स्वर्गं वै परगं ह्यभूत् ॥३०॥
अथैवं वीक्ष्य कमले ! ईशानेन्द्रानलानिलाः ।
वरुणश्च परे देवा महेन्द्रगृहमाययुः ॥३१॥
चक्रुश्च मन्त्रणां तत्र किंकर्तव्यविहीनकाः ।
ब्रह्माणं सस्मरुश्चापि विष्णुं सस्मरुरीश्वराः ॥३२॥
शेषं प्रसस्मरुश्चाप्याययुस्ते परमेश्वराः ।
शुश्रुवुस्ते कुबेरस्य नाशं चान्यपराजयम् ॥३३॥
विजयं धर्मराजस्य शोकं चक्रुः क्षणं तदा ।
धर्मराजगृहे तत्राऽन्यायो नैव भवेदिति ॥३४॥
कारणं सर्वमेवाऽपि ज्ञात्वा यक्षस्य वै मृतिम् ।
न्याय्यामन्यायमालम्ब्य कुबेरस्य तु योधनम् ॥३५॥
कम्पयित्वा शिरांस्येते मेनिरे न जयं पुनः ।
यत्राऽन्यायो न विजयस्तत्र संभवति क्वचित् ॥३६॥
कुबेरस्याऽन्यायभाक्त्वे मृत्युश्चाऽयं न संशयः ।
चतुर्दशानां लोकानां देहिनां नायको यमः ॥३७॥
आयुष्यान्ते नयत्येव तत्र का परिदेवना ।
इन्द्रं वायुं जलेशं चेशानं वह्निं तथेश्वरान् ॥३८॥
नयत्येव यमेशो वै का कथाऽन्यस्य वै मृतेः ।
तस्माद् यमाय देवाय देवो वै विजयोऽत्र ह ॥३९॥
अस्माभिस्तु प्रमन्तव्यः पराजयोऽत्र कर्मणि ।
कुबेरो दिक्पतिर्भूत्वा त्वन्यायं कुरुते यदि ॥४०॥
तत्पक्षाणां हि सर्वेषां दुःखं स्याद् वर्धितं पुनः ।
तस्मादत्र न विष्णोश्च शेषस्य वेधसोऽपि च ॥४१॥
अन्येषामपि चातुर्यं जयमेष्यति वै सुराः ।
अतस्तत्र न गन्तव्यं यत्राऽऽस्ते यमराट् स्वयम् ॥४२॥
अलकायां विशेषेण सर्वनाशाय भो सुराः ।
किन्तु देवाधिदेवानामीश्वराणां महेश्वरः ॥४३॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
अक्षराधिपतिः श्रीशः श्रीहरिः परमेश्वरः ॥४४॥
स्मर्तव्यस्त्वत्र वादे वै निर्णयं स विधास्यति ।
इन्द्रगृहे महासत्रं कुर्वन्तु प्रजयात्मकम् ॥४५॥
परमेशस्य भो देवाः स्वयमायास्यति प्रभुः ।
इत्युक्तास्ते हराद्याश्च देवा इन्द्रालये तदा ॥४६॥
जपसत्रं प्रचक्रुश्च देवेश्वराश्च सर्वशः ।
'हरेकृष्ण हरेविष्णो परमेश परात्पर ॥४७॥
अनादिश्रीकृष्णनारायण रक्ष परेश्वर' ।
सततं कीर्तनं चक्रुर्देवानां पूर्णवत्सरम् ॥४८॥
इन्द्रस्य वत्सरान्ते श्रीहरिश्चाऽहं समाययौ ।
गोचरः सर्वदेवानां शंखचक्रादिमान् प्रभुः ॥४९॥
त्वया साकं तदा लक्ष्म्या सर्वभूषाढ्यया प्रिये ! ।
देवा मामनुसंवीक्ष्याश्चर्यपराः सुसत्वरम् ॥५०॥
उत्थाय नेमुर्बहुधा चक्रुश्च पूजनं मम ।
मधुपर्कं ददुश्चापि सत्कारं च व्यधुस्ततः ॥५१॥
महासनं ददुस्तत्रोपाविशं च त्वया सह ।
न्यवेदयँश्च ते सर्वमुदन्तं धनरक्षिणः ॥५२॥
यक्षाणां नाशनं चापि निजानां च पराजयम् ।
यमस्य विजयं चापि स्वर्गे स्वतन्त्रतां तथा ॥५३॥
अव्यवस्थां च देवेषु शुश्रावाऽहं च पद्मजे ।
क्षणं ध्यानं तदा कृत्वाऽवोचं दिक्पालकानिदम् ॥५४॥
भवद्भिर्वै मया साकं गन्तव्यं यत्र वै यमः ।
कुबेरस्य नगर्यां हि सर्वं सौख्यं भविष्यति ॥५५॥
साम्ना वादस्य सर्वस्य नेष्येऽन्तं प्रमुखावहम् ।
इत्युक्त्वाऽहं त्वया साकं सर्वैर्देवगणैः सह ॥५६॥
अगच्छं त्वलकाभूमौ यमनैर्ऋतसन्निधौ ।
श्रुत्वा मां स तु तूर्णं वै त्रस्तमना उपाययौ ॥५७॥
पद्भ्यां मत्सन्निधौ लक्ष्मि ! भयं प्रापाऽप्यचिन्तयम् ।
पादप्रक्षालनं चक्रे पपौ वार्यमृतं मम ॥५८॥
स्वागतं प्रददौ चाप्यासनं वाद्यान्यवादयत् ।
दासवत् सर्वदेवानां पश्यतां प्रजगाद माम् ॥५९॥
अपराद्धं मया कृष्ण ! कुबेरो मारितो मया ।
नगरीयं कृता वश्यां क्षमस्व पुरुषोत्तम ॥६०॥
अन्यायमार्गिणां दण्डोऽवश्यं भवति केशव ।
यद्यहं स्यां तथा तर्हि दण्डो मय्यपि धीयताम् ॥६१॥

इत्युक्त्वा शरणं प्राप्य पपात पादयोर्मम ।
अन्यायेन विहीनस्य दण्डो नैव हि युज्यते ॥६२॥
कुबेरोऽयं मारितो यत् तन्न योग्यं भवेदिह ।
यक्षेश्वरो जीवनीयो जीवनीया गणा अपि ॥६३॥
सुराद्या जीवयितव्या ये हता आहवे यम ।
कुबेरस्य पुरी तस्मै दातव्या पुनरेव ह ॥६४॥
त्वया धर्मं प्रगन्तव्यं यमराजपुरीं प्रति ।
संयमनीं सदा रक्ष माऽन्यगृध्नां समाचर ॥६५॥
इत्युक्तश्च मया धर्मराजोऽयाचत वै क्षमाम् ।
पदं कौबेरकं त्यक्त्वा प्रस्थानमकरोत् ततः ॥६६॥
मया लक्ष्मि ! कुबेरस्याऽऽवाहनं तत्र वै पुनः ।
कृतं मानसपुत्रो मे जज्ञे धनाधिपस्ततः ॥६७॥
वैष्णवः परमो भक्तो यक्षाश्च जज्ञिरे पुनः ।
अन्ये मृताः सुराः सर्वे जज्ञिरे मानसा मम ॥६८॥
सुता देवादयस्ते वै मामानर्चुर्मुदान्विताः ।
मयाऽर्पितं कुबेराय मानसाय पदं पुनः ॥६९॥
तेनाऽर्थितस्तदा चाऽहं नित्यवासार्थमेव ह ।
स्वर्णवत्यां नगर्यां वै न्यवसं स्वर्णवर्णवान् ॥७०॥
शंकराद्याः पूजयित्वा ययुस्ते स्वपदानि हि ।
यमो ययौ याम्यपदं चाऽन्ये ययुर्निजालयान् ॥७१॥
कुबेरस्य नवीने तूद्भवे तस्य महोत्सवः ।
मया कृतः स्वर्णपुर्यां पूजितो वर्धितस्तथा ॥७२॥
त्वं सदा कानकीलक्ष्मीर्मया साकं विराजिता ।
अनादिश्रीस्वर्णनारायणेन सार्धमीश्वरी ॥७३॥
आकल्पान्तं न्यवसं वै स्वर्णवत्यां परेश्वरः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥७४॥
सर्वेषां लोकपालानां दिक्पालानां नियामकः ।
सर्वरक्षाकरः साक्षाच्छ्रीपतिः परमेश्वरः ॥७५॥
स्मर लक्ष्मि सुवर्णे त्वं प्राकट्यं मे च ते तदा ।
राजराजेश्वरीरूपं सर्वानन्दपरिप्लुतम् ॥७६॥
अथ सूर्यादयश्चान्ये देवा यमानुगा अपि ।
क्षमाप्य मां भजन्ते स्म स्वर्णनारायणं ततः ॥७७॥
हिरण्यवर्णं पुरुषं स्वर्णश्मश्रुं यमार्दनम् ।
दिक्पालानां नियन्तारं विनेतारं विरोधिनाम् ॥७८॥
क्लेशानां शान्तिकर्तारं दातारं सम्पदां तथा ।
दग्धारं पापपुञ्जानां हर्तारं विपदां च माम् ॥७९॥
पूजयन्ति हि देवाद्याः परमेशं सनातनम् ।
परब्रह्माऽक्षरातीतं सत्पतिं मुक्तसेवितम् ॥८०॥
पठनाच्छ्रवणाच्चास्य स्मरणादपि मुक्तिभाग् ।
भुक्तिभागपि जायेत स्वर्णश्रि ! नाऽत्र संशयः ॥८१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसो द्वात्रिंशे वत्सरे यमेन मारितस्य कुबेरस्यो-जीवनार्थम् अनादिश्रीस्वर्णनारायणस्य कानकी-श्रीसहितस्य प्राकट्यमित्यादिनिरूपणनामा सप्तविंशतितमोऽध्यायः ॥ २७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीलक्ष्मि ! प्राकट्यं मे ततः परम् ।
वेधसो वत्सरे त्रयस्त्रिंशे सस्याऽभिधे पुरा ॥ १ ॥
कल्पे त्रिंशत्तमे त्वेकादशे मन्वन्तरे तथा ।
मेरोः पूर्वे श्वेतखण्डेऽरुणाचलोऽभवद्गिरिः ॥ २ ॥
योजनोत्सेध एवायं दशयोजनविस्तृतः ।
ज्वालागर्भः सदा चास्ते वह्निरसाढ्यकन्दरः ॥ ३ ॥
न पार्श्वे मानवाः सन्ति नाऽरण्यानि वनान्यपि ।
नद्यस्तूष्णप्रवाहा वै भूमिस्त्वंगारसन्निभा ॥ ४ ॥
वर्षे वर्षद्वये वर्षाऽष्टकोत्तरे शताब्दके ।
ज्वालारुणाचलो ज्वालामयो भवति सर्वतः ॥ ५ ॥
वह्निरसाः प्रवर्तन्ते देशेषु च सरित्स्वपि ।
तत्प्रतापात्प्रदह्यन्ति दूरदेशा अपि प्रिये ॥ ६ ॥
मानवाः पशवश्चापि पक्षिणो व्योमचारिणः ।
तापोष्मणा प्रमूर्छाऽऽप्ता व्यसवः संभवन्ति वै ॥ ७ ॥
सस्यानां च वनानां च वह्निसेकेन भर्जनम् ।
दूरस्थानां भवत्येव फलपुष्पादिनाशकम् ॥ ८ ॥
यां दिशां प्रति वायूनां प्रवाहा यान्ति साऽनलाः ।
शतयोजनपर्यन्ता देशा भवन्ति भर्जिताः ॥ ९ ॥
वह्निसेकमृता जीवाः प्रलयस्था भवन्ति वै ।
एकदा तु महाझंझावातो बभूव चाऽम्बरे ॥१०॥
ज्वालारुणाऽचलश्चापि वह्निरूपो बभूव ह ।
वह्निज्वालोष्मपूराण्यावहन् प्रवायुणोदिताः ॥११॥
अतिवेगेन पूर्वस्यां शतयोजनवेगिनः ।
मेरोः पार्श्वे वसतयो लक्षशो देहिनोऽभवन् ॥१२॥
उष्मणा दग्धदेहास्ते मृताश्चिरप्रवाहिणा ।
कोटिशो गजगोऽश्वाद्या नगराणि सहस्रशः ॥१३॥
तत्राऽऽसीन्नगरं स्वामिनगरं योजनायतम् ।
प्रायशो मम भक्तैश्चाधिष्ठितं पावनैर्जनैः ॥१४॥

मठाश्च साधुसाध्वीनां यतीनाममवन् शुभाः।
ब्रह्मचर्यव्रतानां च सतीनां धर्मयोषिताम् ॥१५॥
आश्रमा बहवश्चासन् जपयज्ञकृतां तथा।
वैष्णवानां योगिनां च कर्मठानां महालयाः ॥१६॥
बभूवुर्यत्र देवार्था देवालयाः प्रसेविनाम्।
मदर्थे तपसा भक्ता यत्राऽऽसन् वै विदेहिनः ॥१७॥
मम लक्ष्यपरास्त्यक्तमदर्थसर्वभोगकाः।
मदालम्बनमात्राश्च मदाराधनतत्पराः ॥१८॥
मद्भक्तानां मण्डलानां सेवाधर्मपरायणाः।
आत्मसर्वस्वसम्पत्सन्निवेदिनो मदात्मकाः ॥१९॥
साध्यभक्तिपराः सर्वे साधनस्थास्तु चाल्पकाः।
एवंविधेऽत्र नगरे ज्वालानलोष्मणा द्रुतम् ॥२०॥
योगाभ्यासविहीनास्तु भक्ताः समन्ततो मृताः।
योगज्ञाः साधवः सत्यो ब्रह्मभावविभाविताः ॥२१॥
सस्मरुर्मां यत्र तत्राऽनादिकृष्णनरायणम्।
परब्रह्माऽक्षराऽतीतं श्रीकान्तं पुरुषोत्तमम् ॥२२॥
तुष्टुवुः रुद्धमरुतश्चैकतानेन योजिताः।
'रक्ष रक्ष परब्रह्माऽऽन्तरात्मन् पुरुषोत्तम ॥२३॥
सर्वस्वामिन् समागच्छ रक्ष ज्वालानलादसून्'।
इत्येवं त्वेकतानैश्चाभ्यर्थितस्तीव्रभक्तिभिः ॥२४॥
तूर्णं साकं त्वया लक्ष्म्या जीवोद्धारणहेतवे।
गोचरोऽहमभवं वै गृहे गृहे जने जने ॥२५॥
मम ब्रह्महृदस्यैवाऽमृतबिन्दुं समक्षिपम्।
अहं ज्वालाऽनलाद्रौ च व्योममार्गेण वै द्रुतम् ॥२६॥
वह्निर्लयं गतश्चापि ज्वाला शैत्यं समावहन्।
औष्ण्यं परिणतं शैत्ये दाहशान्तिकरं तदा ॥२७॥
शैत्यामृतं तु वातेन यान् यान् मृतान् हि देहिनः।
स्थावरान् जंगमाँश्चापि समस्पृशत्तदा च ते ॥२८॥
नवजीवनमासाद्याऽऽनन्दिता जीविनोऽभवन्।
ज्वालारुणाऽचलः सोऽपि ब्रह्महृदामृताऽन्वयात् ॥२९॥
शीतामृताचलो जातः क्षणात्परिणतोऽभवत्।
आकल्पान्तं तथैवाऽऽसीत् पर्वतोऽमृतशीतलः ॥३०॥
भक्तैश्चयोगिभिः सर्वैर्यतिभिर्ब्रह्मशीलिभिः।
साधुभिश्च सतीभिश्च साध्वीभिस्त्यागिभिस्तथा ॥३१॥
वैष्णवैर्मानवैश्चापि ह्यग्रेऽहं निभालितः।
प्रार्थितस्तत्र वै नित्यं स्थातुं भक्तेषु रक्षकः ॥३२॥
पूजितो वन्दितश्चापि न्यवसं वै त्वया सह।
तस्मिन् वै स्वामिनगरेऽनादिस्वामिनरायणः ॥३३॥
स्वामिन्या च त्वया लक्ष्म्या सहितः पुरुषोत्तमः।
इत्येवं स्वामिनीश्रि! स्वं प्राकट्यं कथितं तव ॥३४॥
स्मर त्वं स्वामिनी लक्ष्मि! स्वामिपत्तनरक्षकम्।
अनादिश्रीस्वामिनारायणं श्रीपुरुषोत्तमम् ॥३५॥
सार्धं त्वया रक्षयित्र्या ह्यनादिस्वामिनीश्रिया।
पठनाच्छ्रवणाचापि ह्यापद्भ्यो रक्षणं भवेत् ॥३६॥
अथाऽन्यस्मिन् पाशवाख्ये चतुस्त्रिंशे तु वत्सरे।
वेधसः सप्तषष्ट्यूर्ध्वत्रिशते कल्पके पुरा ॥३७॥
द्वादशे च मनौ भूमौ युगले द्विजजातिकम्।
पावनं भक्तिमल्लक्ष्म्या आसीत् कौशेयके पुरे ॥३८॥
अनपत्या द्विजपत्नी नाम्ना निर्वाणिका सती।
द्विजं क्षमाचोलकाख्यं स्वं पतिं प्राह सुखार्थिनी ॥३९॥
दारिद्र्यं वर्तते नित्यं चुल्ली चान्द्रायणे स्थिता।
दन्ता व्रतं निरशनं प्रकुर्वन्ति निरामयाः ॥४०॥
गृहे धूम्रो न चायाति यात्रायां प्रगतो यथा।
वह्निर्लज्जान्वितो भूत्वा दर्शनं न ददात्यपि ॥४१॥
गता तीर्थे जन्तवश्च गृहात् पिपीलिकादयः।
कपाटस्य पिधानेऽपि प्रयोजनं न विद्यते ॥४२॥
द्वारं चोद्घाटितं नित्यं स्वर्गद्वारं यथा शुभम्।
शालाऽऽस्ते मालिकायुक्ता केवला रागवर्जिता ॥४३॥
अपादोऽपि समायातो मोक्षो विप्र! गृहे तव।
अहं मायास्वरूपाऽपीदानीं जंजालवर्जिता ॥४४॥
निर्गुणे त्वद्गृहे चास्मि नैर्गुण्यं समुपाश्रिता।
जीवतोऽपि निरालम्बा स्थितिस्ते वर्तते द्विज! ॥४५॥
सालम्बाऽहं निरालम्बा जाताऽस्मि निष्परिग्रहा।
अहो भाग्यस्य माहात्म्यं सगुणो निर्गुणायते ॥४६॥
भूत्वा भूत्वा विलीयन्ते चाशा निर्वाणदर्शनाः।
काकाः कपोताश्चटकाः श्वानो मृगाश्च मूषिकाः ॥४७॥
बिडालाद्या न चायान्ति गृहं नौ वै क्वचित् पते।
निरस्तसर्वसौभाग्ये को निवसेत् सवासनः ॥४८॥
कण्डनी पेषणी नास्ति मार्जनी नास्ति खट्विका।
सूर्यभासा दिवा दीप्तं निशि चन्द्रग्रहादिभिः ॥४९॥
ब्रह्मधामसमं विप्र! गृहं स्वर्गं प्रभासते।
जटा नैसर्गिकी नौ च द्योतते योगिनीजटा ॥५०॥
अहो दैवस्य दौरात्म्यं संसारे चाप्यसारता।
सत्यामपि गृहलक्ष्म्यां भाग्यलक्ष्मीर्न विद्यते ॥५१॥
अलक्ष्मीकगृहं सत्यं ब्रह्मधामायते सदा।
एतादृशं गृहं विप्र! चावयोर्विद्यतेऽचलम् ॥५२॥

भालं भाग्यं भोगजातं भक्ष्यं भासा न सन्ति वै ।
ततोऽवश्यं योगिसेव्यं गृहं ते राजते द्विज ! ॥५३॥
गृहिसेव्यं न चैवाऽऽस्ते लक्ष्म्या हीनं च निर्गुणम् ।
तन्मया चिन्त्यते नित्यं लक्ष्मीर्यथा गृहे मम ॥५४॥
समागच्छेत्तथा लक्ष्म्या आराधना पते ! मया ।
कर्तव्या व्रतयोगिन्या सम्पद्वन्मे गृहं भवेत् ॥५५॥
इत्यर्थितो निजस्वामी तथाऽस्त्वेवं जगाद तम् ।
साऽपि लक्ष्मीव्रतं चक्रे वार्षिकं दुग्धभोजना ॥५६॥
शेते पृथ्व्यां ब्रह्मचर्यपरायणा निरासना ।
करोति जागरं चार्धरात्रिं यावत् ततः सुखम् ॥५७॥
निद्राति भजते लक्ष्मि लक्ष्मि लक्ष्मीति वै हृदा ।
प्रातर्नद्यां सदा स्नाति साऽऽर्द्रवस्त्रा गृहं प्रति ॥५८॥
समागत्याऽर्चनं लक्ष्म्याः करोति पद्मपुष्पकैः ।
अष्टोत्तरशतैर्नित्यं धूपदीपादिभिस्तथा ॥५९॥
नीराजनं करोत्येव सुगन्धं चार्पयत्यपि ।
नैवेद्यं दुग्धपाकादि समर्पयति पोलिकाः ॥६०॥
अष्टोत्तरशतप्रदक्षिणानि भ्रमति श्रियम् ।
मृन्मूर्तिं श्रीं नमस्कृत्यावर्तयत्येव मालिकाः ॥६१॥
"लक्ष्मि श्रि कमले पद्मे रमे नारायणीन्दिरे ।
हिरण्मयि महालक्ष्मि ईश्वरि परमेश्वरि ॥६२॥
कृष्णे हरिणि द्रव्याख्ये वैष्णवि पुरुषोत्तमि ।
सम्पद्रूपे भगवति हरिदासि हरिप्रिये ॥६३॥
ब्राह्मि वैकुण्ठिके स्मृद्धे शालग्रामि त्रयोदशि ।
चक्रिणि पद्मिनि बिन्दि चाब्धिजे स्वर्णरूपिणि ॥६४॥
गोशकृद्वासिनि ब्रह्महृदयस्थे धनेश्वरि ।
ऋतम्भरे प्लक्षवासे माये मे मात ईश्वरि ॥६५॥
अमाये मेरुपुत्रि त्वं धृते रौद्रि प्रशातनि ।
कौमुदि भूयसि देववीथि चाऽऽनन्तिके कले ॥६६॥
आर्षि ज्योत्स्ने शिवे शार्दूलिके सरःप्रभद्रिके ।
सर्वभद्रे स्वतन्त्रे च जये सुदर्शनि भृते ॥६७॥
जलनारायणि स्वधात्मजे च माक्षिकि सति ।
पुण्डरीकि रत्निके च कृपावति च भक्तिजे ॥६८॥
अर्धश्रि पिप्पले चाऽधोर्ध्वे वटि पीठिकेऽच्युते ।
राजराज्ञि नैष्ठिकीश्रि शैवि स्वामिनि कानकि ॥६९॥
निर्वाणिके ब्रह्मशक्ति चात्मात्मिकेऽन्तरात्मिके ।
चञ्चद्रूपे चञ्चले च सत्त्वप्रकर्षिणि प्रभे ॥७०॥
श्रीवत्से यन्त्रिके चैन्द्रि जयन्ति मण्डलात्मिके ।
सर्वतोभद्रिके पद्मशिले प्रशे तथाऽक्षरि ॥७१॥
श्रांगारिकै भाग्यरूपे सिद्धे शान्तेऽवतारिणि ।
अंशे परे च विभवि कलेऽर्चे भूम्नि धामिनि ॥७२॥
जननि कारिणि रम्ये देवीश्वरीश्वरीश्वरि ।
मुक्तानिके परब्रह्मपत्नि प्रपोषिके क्रिये ॥७३॥
अनादिश्रीकृष्णनारायणपत्नि ह्यनादिनि" ।
एवं त्वष्टादशयुक्तशताभिधानिके मयि ॥७४॥
कृपां कृत्वा समायाहि मद्गृहे वैभवेश्वरि ।
सर्वगन्धे सर्वरसे सर्वरूपे सुरूपिणि ॥७५॥
सर्वस्पर्शे सर्वशब्दे समागच्छ गृहे मम ।
सर्वानन्दे सर्वसौख्ये सर्वदे स्मृद्धिवर्धिनि ॥७६॥
अनन्तोद्धारसंशक्ते समायाहि गृहे मम ।
दारिद्र्यदुःखसंहन्त्रि ह्यलक्ष्मीदूरकारिणि ॥७७॥
कीर्तितेजोवर्धयित्रि सुखयित्रि स्वसञ्जुषाम् ।
भक्ताया मे गृहे लक्ष्मि श्रि समायाहि शोभने ॥७८॥
इत्येवं सा प्रार्थयत्त्वां निर्वाणिका द्विजप्रिया ।
श्रुत्वा त्वं वीक्ष्य भक्तिं च प्रसन्नाऽचिन्तयः प्रिये ॥७९॥
तद्गृहे गन्तुमेवाऽपि दातुं च दर्शनं ह्यपि ।
मदाज्ञां त्वं समादाय याता निर्वाणिकालयम् ॥८०॥
गोचरा पुरतः स्थित्वाऽभवस्तत्र ततोऽवदः ।
नारायणं विना नैव स्थास्याम्यत्र गृहे तव ॥८१॥
तमाराधय मातर्वै माधवश्चागमिष्यति ।
इत्युक्त्वा त्वं तिरोभावं गता तस्यास्तु वर्ष्मणि ॥८२॥
पुत्रीरूपा सुरूपा त्वमजायथाः सुकन्यका ।
तया चाराधितश्चाहं सवनाख्यद्रुमात्ततः ॥८३॥
प्राविरासं युवा दिव्यस्वरूपः परमेश्वरः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥८४॥
शंखचक्रगदापद्मधरश्चोज्ज्वलकान्तिमान् ।
अनादिश्रीसावनद्रुनरायणाभिधानकः ॥८५॥
भिक्षां ययाचे तस्याश्च माता ते मे ददौ तदा ।
विवाहविधिना त्वां वै सर्वसौभाग्यसुन्दरीम् ॥८६॥
ततो निर्वाणिका मां च त्वां च ररक्ष सर्वदा ।
निजे गृहे सेवमाना क्ष्माचोलस्याऽऽज्ञया प्रिये ! ॥८७॥
अहं पृथ्व्यां ततो वासं चाकल्पं प्रचकार ह ।
नैर्वाणिकीश्रीसमेतो धर्ममस्थापयन् क्षितौ ॥८८॥
निर्वाणिकागृहं सम्यग्भृतं ततो ह्यजायत ।
विवाहे देवदेवेशैरर्पितानि बहून्यपि ॥८९॥
रत्नानि कल्पपात्राणि धेनवः कल्पवल्लिकाः ।
विमानानि मन्दिराणि विभूषणानि वै तदा ॥९०॥

अम्बराणि विचित्राणि शय्याः सास्तरणास्तथा ।
सौवर्णासनपर्यंकप्रेंखादोलादिकास्तथा ॥९१॥
घनानि मणिमाणिक्यमौक्तिकानि शुभानि च ।
हारान् क्षेत्राणि वाटीश्च महोद्यानानि वै तथा ॥९२॥
हस्त्यश्ववृषभाँश्चापि दासदासीशतानि च ।
एवं स्मृद्धं गृहं ते च्चागमेनाऽभून्महोदयम् ॥९३॥
सौवर्णकलशैः राजच्छृंगं यथेन्द्रमन्दिरम् ।
एवं तव निमित्तेन प्राकट्यं मम वै तदा ॥९४॥
अभूल्लक्ष्मि स्मर सर्वं प्राकट्यं सुखसम्पदः ।
अन्येऽप्यंशाऽवताराद्या ममाऽभवन्नसंख्यकाः ॥९५॥
सर्वान् जानाम्यहं नारायणीश्रि नाऽपरे जनाः ।
यद्गृहेऽहं निवसामि तद्गृहं धामसदृशम् ॥९६॥
मुक्तेश्वरादिगम्यं च तीर्थाऽऽवासं भवत्यपि ।
सुपावनं सतां क्षेत्रं तद्भवत्येव सर्वदा ॥९७॥
यज्ञानामवताराणां वासरूपं भवत्यपि ।
धामान्यपि च सर्वाणि मन्निवासे वसन्त्यपि ॥९८॥
इत्येवं मम वासेन मुक्तिर्भुक्तिः करे स्थिता ।
वर्तते तत्र लोकानां पठनाच्छ्रवणादपि ॥९९॥
स्मरणात् सर्वसिद्धिश्च जायते नात्र संशयः ।
व्रतानां पुण्यमुत्कृष्टं यावतामपि जायते ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसस्त्रयस्त्रिंशद्वत्सरे ज्वालाऽरुणाचलवह्निरसैर्दह्यमानानां स्वामिनगरस्थानां प्रजानां रक्षार्थम् अनादिश्रीस्वामिनारायणस्य स्वामिनीश्रीसहितस्य प्राकट्यं, चतुस्त्रिंशद्वत्सरे निर्वाणिकाविप्राण्या लक्ष्म्या अष्टादशोत्तरशतनामभिराराधितया लक्ष्म्या साकम् अनादिश्रीसावननारायणस्य प्राकट्यमिति चेतिनिरूपणनामाऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं वेधसो याक्षनामके ।
पञ्चत्रिंशे वत्सरे च कल्पेऽष्टाशीतियुच्छते ॥ १ ॥
तृतीये च मनौ जातं प्राकट्यं मे शृणु प्रिये ।
अंशुक्रमथो राजर्षिस्तदासीद् दक्षिणे व्रती ॥ २ ॥
मेरोः सन्निहिते देशे नालवेयप्रजाधिपः ।
समस्तस्य नल्वस्य भूखण्डस्य नियामकः ॥ ३ ॥
अन्ये सहस्रभूपाश्च करदास्तस्य चाऽभवन् ।
दानी ध्यानी व्रती भक्तः साधुसेवी श्रवी मखी ॥ ४ ॥
हरिन्यासी निवेदी च विश्वासी पूजको मम ।
नृपोंऽशुक्रमथो लक्ष्मि महावैष्णवसत्क्रियः ॥ ५ ॥
यथाऽभवत्तथा तस्य पत्न्योऽपि हरिदीक्षिताः ।
वैष्णव्यः शतसंख्याश्चाऽभवन् हरिपरायणाः ॥ ६ ॥
दान्यो ध्यान्यो व्रतिन्यश्च भक्ताः साधुप्रसेविकाः ।
श्रविण्यश्च मखिन्यश्च हरिन्यासिन्य इत्यपि ॥ ७ ॥
आत्मनिवेदिकाः सर्वा विश्वासिन्यश्च पूजिकाः ।
पातिव्रत्यपराश्चापि मयि सर्वकृतादराः ॥ ८ ॥
मदर्चायां लग्नचित्ता मत्साधुदिव्यदृष्टिकाः ।
पत्यौ हरौ सत्सु नित्यं समसेवासमादराः ॥ ९ ॥
राज्ञः पुत्रास्त्रिशतानि पुत्र्यः शतद्वयं तथा ।
पितृवत् मातृवत् सत्सु हरौ सेवापरायणाः ॥ १० ॥
मनसा वस्तुभिर्देहैः सेवन्ते भगवत्कुलम् ।
सर्वे च्चासन् दिव्यभावा विदेहाः सिद्धपुंगवाः ॥११॥
नैषां राज्ये कदाऽप्यासन् नीतयो दुःखविप्लवाः ।
नाऽवग्रहो नातिवृष्टिर्न युद्धं भूमिकम्पनम् ॥१२॥
न शैत्याभिभवश्चौष्ण्योपद्रवोऽपि न वै क्वचित् ।
न रोगाश्चाऽभवन् राष्ट्रे नाऽकालमृत्यवो जनाः ॥१३॥
अन्नवस्त्रादिमोदिन्यः प्रजा भूषामहोत्सवाः ।
परस्परप्रसन्नाऽनुरागिण्यश्च सदाऽभवन् ॥१४॥
परस्परसहायाश्च नित्यमत्पूजनान्विताः ।
महामपर्य्य खादिन्यो भोगिन्योऽर्पय्य मेऽखिलम् ॥१५॥
हृष्टपुष्टा नरा नार्यो द्वेषहिंसादिवर्जिताः ।
न स्तेना न कदर्याश्च राज्ये तेषां तदाऽभवन् ॥१६॥
सर्वरसप्रदा पृथ्वी ऋतवः फलपुष्पदाः ।
वृक्षा वल्लीविरुधश्चाऽऽस्तम्बात् फलसुमप्रदाः ॥१७॥
असत्यं मानवे नासीत् कापट्यं न प्रजास्वपि ।
तृष्णा नासीद् भोगवृत्तिः सन्तोषः संव्यवर्तत ॥१८॥
देवा महर्षयः सन्तः सिद्धाः साध्योऽप्यहर्निशम् ।
यतयो ब्रह्मशीलाश्च भुंजतेऽस्य सहस्रशः ॥१९॥
अन्नसत्राणि राज्येषु कृतानि तेन भूभृता ।
भुंजते लक्षशो विद्यार्थिनो विद्यार्थकन्यकाः ॥२०॥
प्रतिखेटं प्रतिग्रामं प्रतिपत्तनमस्य वै ।
अन्नसत्रेऽतिथयश्च गृह्णन्ति भोजनं वरम् ॥२१॥
प्रातर्नित्यं प्रतिग्रामं देवानां सर्वसम्पदाम् ।
पूजनं नृपतेरेव धनादिभिः प्रजायते ॥२२॥
घटिकाकालपर्यन्तं कृत्वा संकीर्तनं हरेः ।
भुंजतेऽतिथिवर्गाश्चाऽनाथाद्या अस्य सत्रके ॥२३॥

सायं भजन्ते मां लोका रात्रौ संकीर्तयन्त्यपि ।
दिवा मत्कार्यपरमास्ततः स्वार्थपरा जनाः ॥२४॥
एवंविधाः प्रजास्तस्य देहाऽनादरतत्पराः ।
तापस्यो भक्तिमत्यश्च साधुसेवापरायणाः ॥२५॥
साधुरूपो हि भगवान् चेतनोऽत्र क्षितौ सदा ।
कोटिरूपो राजते वै प्रजानां श्रेयसां करः ॥२६॥
साधुरेव हि भगवान् साधुरेव हि तारकः ।
साधुः सद्गतिदाता च साधुमूर्तिः स्वयं प्रभुः ॥२७॥
साधुर्यन्मानवं रूपं दृश्यतेऽस्मत्समं ह्यपि ।
दिव्यं तत् तत्क्रिया दिव्या मोक्षदो भगवान् स्वयम् ॥२८॥
दर्शनं स्पर्शनं पादसंवाहनं प्रसेवनम् ।
भोजनं बहुधा सेवा सर्वं साधोः प्रमुक्तिदम् ॥२९॥
साधूनां परिचर्या या सकृद्वा बहुधापि वा ।
पापनाशकरी सर्वा ब्रह्ममुक्तिप्रदायिनी ॥३०॥
ये पुत्रा दीक्षिता दिव्या हरेरेव हि वंशिनः ।
भवन्ति जन्मभूत्यागास्त एव हरिरूपिणः ॥३१॥
तत्क्रियायां ब्रह्मचर्यं व्रतं दानं च दक्षिणा ।
तपो धर्मो विवेकश्च भक्तिः सर्वं प्रतिष्ठितम् ॥३२॥
साधोर्हस्तौ हरेर्हस्तौ सत्पादौ चरणौ हरेः ।
सतां मुखं कृष्णमुखं त्वक् श्रीहरेः सतां त्वचम् ॥३३॥
नेत्रे द्वे श्रीहरेर्नेत्रे सज्जिह्वा जिह्विका हरेः ।
सन्मस्तकं हरेर्मूर्धा सन्नासा नासिका हरेः ॥३४॥
सत्कर्णौ श्रीहरेः कर्णौ सद्दन्ता दशना हरेः ।
सतां कण्ठो हरेः कण्ठो हरेर्वक्षः सतामुरः ॥३५॥
सतां तुन्दं हरेस्तुन्दं सत्कटिः श्रीहरेः कटिः ।
सतां दृष्टिर्हरेर्दृष्टिः सतां स्पर्शो हरेर्हि सः ॥३६॥
सतां प्रसन्नता या सा हरेरेव प्रसन्नता ।
सुखं सतां तु सेवोत्थं हरेरेव सुखं मम ॥३७॥
मोदः प्रमोदश्चानन्दश्चोत्सवा ये सतां मताः ।
ते सर्वे श्रीहरेरेव ममानन्दाः पृथङ् न वै ॥३८॥
सतां सन्तोषणं सर्वं मम सन्तोषणं हि तत् ।
सतामिन्द्रियवर्गो यो ममेन्द्रियाणि तानि वै ॥३९॥
सतां बुद्धिर्मम बुद्धिः सन्तोऽहं सर्वदा भुवि ।
अहं सन्तः सदा लोके भवामि बहुरूपवान् ॥४०॥
अपरिग्रहधर्माणः सन्तो मे ब्रह्ममूर्तयः ।
सतां धर्मार्थकामा ये ते मे सर्वे मताः सदा ॥४१॥
इत्येवं कमले राजा राज्ञ्यश्च निर्मलान्तराः ।
कुमाराश्च कुमार्यश्च प्रजा भृत्यास्तथेतराः ॥४२॥
सर्वे सतां प्रसंगैस्ते ह्यासन् मम परायणाः ।
सिद्धयः कल्पलतिकाः कल्पपात्राणि तद्गृहे ।
चिन्तामणय एवापि कामगावः सदाऽवसन् ॥४३॥
लक्षशः साधवश्चापि साध्व्यश्च कृतभक्तयः ।
भजन्ते मामाश्रमस्था निष्कामा मत्परायणाः ॥४४॥
अथ तेषां परां भक्तिं विलोक्याऽऽत्मनिवेदिताम् ।
कृपयाऽहं तदेयेषोषितुं साध्वीसतां गणे ॥४५॥
माधवाख्ये मम मासे राजा चकार कीर्तनम् ।
मासिकं चाऽखण्डितं च त्रिंशद्दिनं मखात्मकम् ॥४६॥
"हरे नारायण विष्णो कृष्ण केशव माधव ।
परब्रह्म प्रभो श्रीश पुरुषोत्तम सत्पते" ॥४७॥
"नमोऽनादिकृष्णनारायणाय परमात्मने ।
नमोऽन्तरात्मने साधुस्वरूपायाऽखिलात्मने" ॥४८॥
"नमः साध्वीस्वरूपाय श्रीकान्ताय सदात्मने ।
नमो भक्तिप्रलभ्याय सेवासाध्याय चक्रिणे" ॥४९॥
"स्वतन्त्रस्त्वं चाऽक्षरेशो वर्तसे मुक्तकोटिषु ।
तथाऽत्राऽऽयाहि साक्षाद्वै दिव्यमूर्तिर्यथाऽसि नः" ॥५०॥
इत्येवं भजनं चक्रुः राजा प्रजाश्च साधवः ।
तैः सहाऽयं कीर्तयामि नृत्यामि च हसामि च ॥५१॥
भुञ्जे तिष्ठामि संयामि निषीदामि वदामि च ।
पिबामि चापि जिघ्रामि रसयामि स्वपिम्यपि ॥५२॥
प्रमोदे चानन्दयामि विहरामि नमामि च ।
प्रसेवे साधुवेषोऽहं साधुषु तन्मखोत्सवे ॥५३॥
गूढरूपं च मां ते तु नैव जानन्ति माधवम् ।
साधुं कंचित् प्रजानन्ति केचनैव समाजके ॥५४॥
त्वं तदाऽभूः सती साध्वी बाला शीलपरायणा ।
काषायाऽम्बरवेषा च प्रत्यक्षा गूढसद्गुणा ॥५५॥
गूढरूपा गूढचिह्ना साध्वीसेवापरायणा ।
साध्वीनां मण्डले तत्र व्यचरः समवर्तना ॥५६॥
न ताः साध्व्यः प्रजानन्ति लक्ष्मीं त्वां गोचरामपि ।
मम माया तथा चास्ते स्वतन्त्राऽऽवरणात्मिका ॥५७॥
अन्नसत्रं मखसत्रं तथा कीर्तनसत्रकम् ।
माधवान्ते प्रपूर्णे च जातं वै पूर्णचन्द्रके ॥५८॥
दिने सायं कथां चक्रुर्मम माहात्म्यबोधिनीम् ।
साधवश्चापि सत्यश्च राजा प्रजा महोत्सवे ॥५९॥
मम पूजां ततश्चक्रुर्निशि मूर्तौ सुवस्तुभिः ।
नीराजनं ततश्चक्रुः पुष्पाञ्जलीर्ददुस्ततः ॥६०॥

भोजनानि प्रददुश्च ततः सवाद्यनर्तनम् ।
कीर्तनं तालमानाद्यैः सुस्वरैस्तालिकादिभिः ॥६१॥
किंकिणीघुर्घुरशब्दैश्चकृजागरणान्विताः ।
तदाऽहं कीर्तनाऽऽकृष्टः प्राविरासं हि नर्तकः ॥६२॥
नर्तकी त्वं बालिका वै बालोऽहं षोडशाब्दिकः ।
चतुर्दशाऽऽब्दिकी त्वं च सुवेषाभूषणान्विता ॥६३॥
मायूरपिच्छमुकुटा दिव्यकुण्डलशोभना ।
नृत्याईसर्ववेषाढ्या प्रसन्ना नाट्यकोविदा ॥६४॥
अहं चापि तथारूपः सर्वयोग्यपरिग्रहः ।
सभायां रङ्गमध्ये चागतोऽलक्ष्यप्रदेशतः ॥६५॥
न वै कैश्चिदहं ज्ञातो ज्ञाता वा च कुतो न्विमौ ।
चकिता नौ विलोक्याऽऽसन् राजाद्यास्ते सभाजनाः ॥६६॥
आवयोर्वै महत्तेजः सभायां प्रासरत्तदा ।
आनन्दमोदसौख्यानि प्रासरन् वै समाजके ॥६७॥
मिष्टं स्वेष्टं कामितं च महासौख्यं तदाऽभवत् ।
जनानां त्वावयोर्योगान्नृत्यगीतिप्रतालनैः ॥६८॥
अस्मल्लीनास्तदा सर्वे प्रत्ययैकप्रतानिताः ।
चाक्षुषमात्रवेगाश्च श्रवणाकृष्टमानसाः ॥६९॥
व्यपश्यन् निर्निमेषा मां त्वां दिव्यां श्रीं श्रियःपतिम् ।
अनन्तकोटिसूर्याभमसंख्यचन्द्रशोभनाम् ॥७०॥
मां त्वां व्यलोकयन् लोकाः कृपालुं च कृपान्विताम् ।
कीर्तनं स्नेहभजनं कारणं सत्प्रसेवनम् ॥७१॥
दिव्यभावः सदा सत्सु हेतवो दर्शने हि नौ ।
अथाऽनृत्यन्त भक्तान्यो भक्ताश्चाकृष्णमानसाः ॥७२॥
परमानन्दमग्नाश्च देहातिभानवर्जिताः ।
सर्वेषां देहिनां तत्र दर्शनं चावयोः शुभम् ॥७३॥
दिव्यं यथाऽक्षरे धाम्नि तथाऽभवत् क्षणं तदा ।
अथानन्तरमेवाऽहं तेजस्तिरो व्यधापयम् ॥७४॥
आकृष्टा वृत्तयस्तेषां स्वास्थ्यमाप्ता यथेन्द्रियम् ।
ततो नौ निजतुल्यौ ते व्यलोकयन्नुपस्थितौ ॥७५॥
विनिवृत्ता द्रुतं नृत्याद् गायनात् कीर्तनादपि ।
महाश्चर्यभरा नेमुर्दण्डवत्त्वां च मां जनाः ॥७६॥
ददुर्मुख्यासनं स्वर्णसिंहासनं नृपादयः ।
आवां सिंहासनस्थौ च पुपूजुस्ते कृतादराः ॥७७॥
चन्दनैरक्षतैश्चापि पुष्पैर्हारैः सुगन्धिभिः ।
राजाद्या रत्नहारैश्च सौवर्णरशनादिभिः ॥७८॥
मुकुटाद्यैश्च भूषाभिर्धूपैर्नैवेद्यभोजनैः ।
मिष्टपानैश्च ताम्बूलैर्नीराजनेन संस्तवैः ॥७९॥
नमस्कारैश्च ते सर्वे दण्डवद्भिः पुनः पुनः ।
जयशब्दैर्हर्षनादैर्वैत्रघुग्घोषणैस्तथा ॥८०॥
सर्वे प्रसदयामासुरत्यर्थं त्वां च मां तदा ।
तुष्टुवुः परया प्रीत्या ज्ञात्वा वै परमेश्वरम् ॥८१॥

साधव ऊचुः—

यत्र क्वापि भवेज्जन्म पश्चात्पुण्यप्रतापतः ।
भवच्छरणमापन्नाः पुत्राः स्मो भगवँस्तव ॥८२॥
अच्युतो वै पिता यस्य ते त्वच्युता भवन्ति वै ।
वयं चाऽच्युततां प्राप्ताः कृपैषा श्रीहरे तव ॥८३॥
सुपुत्रेषु च दिव्येषु कृपया त्वं समागतः ।
स्नेहपात्राणि संवीक्ष्य प्रत्यक्षः सा कृपाऽपरा ॥८४॥
अथाऽतोऽपि सदा सत्सु वासो यथा तनौ तथा ।
सतां मध्ये वस कृष्ण कृपेयं पारमार्थिकी ॥८५॥
यथा धाम्नि तथा सत्सु मण्डलेषु निवासनम् ।
सदा साधुस्वरूपेण करोतु परमां कृपाम् ॥८६॥

साध्व्य ऊचुः—

मातर्लक्ष्मि महामातस्त्वां वयं शरणागताः ।
मोक्षार्थिन्यो ब्रह्मसाध्व्यो भवत्याः पुत्रिका वयम् ॥८७॥
मातृवात्सल्यमत्यन्तं सुतासु तु निसर्गजम् ।
तत्पुरस्कृत्य जननि ददासि दर्शनं हि नः ॥८८॥
अबलानां बलोपेतं भाग्यमद्य प्रवर्तते ।
दिव्यतां प्राप्य ते योगान्मुक्ततां याम एव ह ॥८९॥
करुणा तेऽप्यतुल्याऽस्ति यत्साध्वीषु विभावनम् ।
तत्रापि चातिकारुण्यं यदि वासं प्ररोचयेः ॥९०॥
प्रार्थनामुररीकृत्य यथेष्टं प्रकरोत्विह ।
अनादिश्रीकृष्णनारायणाज्ञयाऽक्षरेश्वरि ॥९१॥

राज्ञी प्रोवाच—

धन्याहं मम पुत्र्यश्च पुत्रा राज्यं नृपस्तथा ।
प्रजा धन्या मम लक्ष्मि यदत्र दर्शनं तव ॥९२॥
कुरु वासं सदा चाऽत्र तव सर्वे भवत्यपि ।
दास्यहं सर्वदा तेऽस्मि वस लक्ष्मि कृपां कुरु ॥९३॥
संसारे लाभ एवाऽत्र प्राप्तः साध्वीसमागमः ।
भवत्या दर्शनं साक्षात् स एवानन्यलाभकः ॥९४॥

**राजोवाच—**

कुलं राज्यं धनं वंशः सर्वं कृष्ण भवत्कृते ।
मयाऽर्पितं कृतं कृत्स्नं त्वदात्मकं त्वदर्थकम् ॥९५॥
कृपेयं दर्शनं साक्षात्तवाऽत्र सत्समागमात् ।
प्राप्तव्यं सर्वमेवाऽद्य प्राप्तं चात्यन्तिकं फलम् ॥९६॥
सर्वदा वस मे गेहे कृपां कृत्वा परेश्वर ।
इत्युक्त्वा प्रणनामैव पपात पादयोर्नृपः ॥९७॥
तथास्त्वोमिति तं प्रोक्त्वा न्यवसं साधुमण्डले ।
अनादिश्रीसाधुनारायणः साकं त्वया प्रिये ! ॥९८॥
आकल्पान्तं ततः साध्वीनारायण्याऽवसं क्षितौ ।
स्मर त्वां मां तथा सर्वं चावतारान् परानपि ॥९९॥
पठनाच्छ्रवणाच्चापि स्मरणान्मुक्तिमाव्रजेत् ।
प्राकट्यं मे तवोक्तं वै मोक्षदं कृपयाऽन्वितम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः पञ्चत्रिंशद्वत्सरेंऽशुक्रमथनृपतेर्भक्त्याऽनादिश्रीसाधुनारायणस्य साध्वीनारायण्या लक्ष्म्या सह प्राकट्यमित्यादिनिरूपणनामा नवविंशतितमोऽध्यायः ॥ २९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि ! ततो राज्ञा सेवितोऽहं सदा हरिः ।
साधुसेवाफलं श्वेतद्वीपं ददौ नृपाय वै ॥ १ ॥
कुटुम्बसहितः सौख्यं भुक्त्वा स्वर्गं ययौ ततः ।
तत्र सौख्यानि भुक्त्वैव वैराजदेवतात्मकः ॥ २ ॥
भूत्वा सुखानि भुक्त्वैव सत्यलोकं ययौ पुनः ।
ततो वैकुण्ठमासाद्य सुखं भुक्त्वा दिवं पुनः ॥ ३ ॥
मदिच्छयैव सम्प्राप्तो भक्तेः प्रवर्तनाय ह ।
ततः कोट्यखिलोकानामीश्वरः स भविष्यति ॥ ४ ॥
नारायणस्वरूपः सोऽसंख्यलोकान् स्वकाश्रितान् ।
नीत्वा भक्तियुतान् धामाऽक्षरं मे सम्प्रयास्यति ॥ ५ ॥
अंशुक्रमथ एवाऽयं भक्तो मे यादृशोऽभवत् ।
तादृशा नाऽपरे लोके भविष्यन्ति निवेदिनः ॥ ६ ॥
पुत्राः पुत्र्यश्च राज्ञ्यश्च राजा प्रजास्तथाऽनुगाः ।
सर्वे सर्वाणि राष्ट्राणि मदर्थसर्वसम्पदाम् ॥ ७ ॥
कृतोपयोगा आसँस्ते वैष्णवाः सर्वतोमुखाः ।
अथाऽन्यत्ते कथयामि प्राकट्यं शृणु माधवि ! ॥ ८ ॥

वेधसो राक्षसाऽऽख्ये षट्त्रिंशे वर्षे ततः पुनः ।
कल्पे षण्णवतिसंख्ये सप्तमे च मनौ प्रिये ॥ ९ ॥
प्राकट्यं मे यथा जातं प्रवदामि निबोध मे ।
अनादिश्रीकृष्णनारायणस्यैवाऽवतारिणः ॥१०॥
कृते युगे पञ्चदशे योगी नाम्ना हरिप्रथः ।
कुंभकारोऽभवत् पृथ्व्यां विष्णुपद्यास्तटे शुभे ॥११॥
आबाल्यात्साधुयोगेन बभूव भक्तराट् मम ।
माता श्रेणीमती तस्मै ददात्यपि सुशिक्षणम् ॥१२॥
अंके स्तन्यप्रदाने च प्रेंखायां कटिवासने ।
खट्विकायां तथा योगे बालानां खलनेऽपि च ॥१३॥
वद पुत्र हरेर्नाम कृष्ण कृष्ण नरायण ।
वद पुत्र श्रिया नाम लक्ष्मि लक्ष्मि नरायणि ॥१४॥
एवं माता निजं पुत्रं शिक्षयत्येव मुक्तये ।
श्रेयसे पापनाशाय जन्मसार्थक्यहेतवे ॥१५॥
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ।
परब्रह्माऽक्षरातीत श्रीपते परमेश्वर ॥१६॥
एवं स्वयं च तन्माता करोति कीर्तनं मम ।
सदैव सर्वकार्येषु भक्तिमती हि सद्गुणा ॥१७॥
कुंभकारोऽपि विरणो नाम्ना मे भक्तिमान् सदा ।
सर्वकार्ये स्मरत्येव मां सतां सेवकोऽपि सन् ॥१८॥
भजत्येव हरिं नित्यं स्मरत्येव जनार्दनम् ।
करोत्येवाऽर्पणं मह्यं ततो भुंक्ते यथोचितम् ॥१९॥
सायं नित्यं मम मालामावर्तयति मन्मनाः ।
करोत्यपि सदा सेवां सतां भक्तिमतां शुभाम् ॥२०॥
गृहकार्ये पात्रकार्ये ग्रामसेवादिकं तथा ।
यदा करोति तत्रापि गृणाति श्रीनरायण ॥२१॥
करे मालां गले मालां सदा रक्षति कुंभकृत् ।
हरेर्नाम जपन् कालं सार्थकयति सर्वदा ॥२२॥
शृणु लक्ष्मि प्रभक्तस्य भक्तिर्नास्त्येव दुर्लभा ।
सर्वदा सर्वकार्येषु सुलभाऽऽत्मनिवेदिनः ॥२३॥
विरणः प्रातरुत्थाय नारायणेति संवदन् ।
घटं नीत्वा नदीं याति स्नाति रटति मां हरिम् ॥२४॥
जलं भृत्वा गृहं याति पिप्पलस्य तु मूलके ।
स्मृत्वा मां सलिलं तत्र सिञ्चत्यपि ततः स च ॥२५॥
सूर्यं नत्वा मृत्तिकायाः कृतं मां च प्रणम्य च ।
रटन् खादति मह्यं चार्पितं प्रातर्हि रोटकम् ॥२६॥
तथैव कुंभिकृत् पत्नी भुंक्ते भुंक्ते सुतोऽपि च ।
अथाऽऽदातुं मृदो यान्ति कीर्तयन्तो हरिं त्रयः ॥२७॥

खरपृष्ठे मृदो योग्या आहरन्ति यदा तदा ।
हरेः कीर्तनकर्तारस्त्रयो यान्ति गृहं प्रति ॥२८॥
गर्धप्यै गर्धपायाऽपि तृणादि च जलादि च ।
हरिप्रसादसलिलैः संप्रोक्ष्य तद् ददत्यपि ॥२९॥
जलैर्मृदश्चार्द्रयन्ति कीर्तयन्ति हरिं तदा ।
मर्दयन्ति मृदश्चापि कीर्तयन्ति तदापि माम् ॥३०॥
चक्रं च कीलके धृत्वा भ्रामयन्ति स्मरन्ति माम् ।
पिंडं चक्रे स्थापयन्ति मां स्मरन्ति जनार्दनम् ॥३१॥
घटशरावपात्राणि रचयन्ति स्मरन्ति माम् ।
तन्तुना च पृथक् कृत्वाऽवतारयन्ति चाप्यधः ॥३२॥
स्मरन्तो मां टीप्पयन्ति पात्राणि टीप्पसाधनैः ।
वह्निभ्राष्ट्र्यां क्लसयन्ति पक्वयन्ति स्मरन्ति माम् ॥३३॥
विक्रीणन्ति च पात्राणि पक्वानि च स्मरन्ति माम् ।
लब्धद्रव्यैरन्नशाकादिकं क्रीणन्ति चापणात् ॥३४॥
रन्धयन्ति भोजनानि स्मरन्ति च रटन्ति माम् ।
स्थाल्यां भृत्वाऽर्पयित्वा मे भुञ्जते मन्निवेदितम् ॥३५॥
एवं यात्रां कुटुम्बस्य निर्वर्तयन्ति मत्पराः ।
सायं कथां प्रशृण्वन्ति सतां मुखान्ममालये ॥३६॥
रात्रौ श्रुतं स्मरन्त्येव विचारयन्ति मुक्तये ।
न विना भोजनं मोक्षो भक्तिर्न पुण्यमन्तरा ॥३७॥
पुण्यं सेवां विना नैव सेवा कृपां विना च न ।
कृपा दास्यं विना नैव दास्यं श्रद्धां विना न वै ॥३८॥
श्रद्धा ज्ञानं विना नापि ज्ञानं न श्रवणं विना ।
श्रुतिर्विना न सत्संगं सत्संगो न सतो विना ॥३९॥
सन्तो भावं विना नैव भावो विना न भावनाम् ।
भावनाख्यस्तु संस्कारो न विना प्रागुपार्जितम् ॥४०॥
प्रागुपार्जितमत्रैव भुज्यते फलरूपि तत् ।
अद्योपार्जितमन्यत्र भोक्ष्यते श्रेयसां पदे ॥४१॥
श्रेयः सर्वविधं साध्यं श्रेयः परं नरायणः ।
तस्य चरणे मोक्षोऽस्ति प्राप्तव्यः प्रेमतन्तुना ॥४२॥
प्रेमपात्रं हरेर्मूर्तिश्चेतना साधुसंज्ञिका ।
सन्तः प्रसादयितव्याः सेवाभिः श्रेयइच्छुभिः ॥४३॥
अन्नं जलं च वस्त्रं च त्रेधा निर्वाहसाधनम् ।
गृहं कान्ता च धेनुश्च त्रेधा त्वालम्बनं मतम् ॥४४॥
उद्यमः पुत्र आरोग्यं त्रेता धैर्यस्य साधनम् ।
आयः कोशो बान्धवाश्च त्रेधा बलस्य साधनम् ॥४५॥
मैत्र्यं मानं यशश्चेति त्रेधा स्थितेर्हि साधनम् ।
विद्या वृत्तिर्वशित्वं च त्रेधा वैतृष्ण्यसाधनम् ॥४६॥

तृप्तिर्विराग ऐश्वर्यं त्रेधा शान्तेः प्रसाधनम् ।
धर्मः क्षमा तितिक्षा च त्रेधा सुखस्य साधनम् ॥४७॥
सन्तो हरिश्च शीलं च त्रेधा मुक्तेः प्रसाधनम् ।
दुःखं विवेकोऽवमानं त्रेधा वैराग्यसाधनम् ॥४८॥
कर्म तृष्णा वासना च त्रेधा संसारकारणम् ।
द्रोहो निन्दा च नास्तिक्यं त्रेधा निरयसाधनम् ॥४९॥
प्रमादो मोह ईहा च त्रेधा मृत्युनिमन्त्रणम् ।
नैष्कर्म्यमर्पणं भक्तिस्त्रेधा मोक्षस्य साधनम् ॥५०॥
तस्मान्मोक्षार्थमेवेह यतितव्यं निरन्तरम् ।
अन्यानि सम्परित्यज्य निर्वाणकारणेष्विह ॥५१॥
घटा यथा विभिन्ना वै प्रजायन्ते तथात्विह ।
प्रजा लोकाश्च कर्माणि सुखानि प्रत्यहं हताः ॥५२॥
कालवेगेन नश्यन्ति देहदैहिकसम्पदः ।
का नारी को नरः पुत्रः पुत्री वा कृत्रिमं त्विह ॥५३॥
सम्बन्धा नामसंज्ञाश्च यथा मृदां भवन्त्यपि ।
तथा षाट्कौशिकादीनां नामसंज्ञाश्च कृत्रिमाः ॥५४॥
कृत्रिमं देहमासाद्य ज्ञात्वा मोक्षस्य साधनम् ।
यदि साध्येत् मोक्षो न वृथा जन्म हि मानवम् ॥५५॥
सर्वत्र विषयाः सन्ति क्षुधा तृषा प्रमोदनम् ।
ऐहिकं सर्वमेवेति क्षणिकं जीवबन्धम् ॥५६॥
नवं नवं बन्धनं च नित्यं नित्यं प्रजायते ।
न चाऽन्तोऽस्ति बन्धनानां नवे वर्षे नवा घटाः ॥५७॥
घटकर्ता मृतिं यान्ति चान्यस्तत्र प्रवर्तते ।
घटानां घटकर्तॄणां प्रवाहो न निवर्तते ॥५८॥
प्रवाहपतिता जीवा ममाऽहंपाशपाशिताः ।
घटे नष्टेऽपि खण्डेषु बध्यन्ते मोहपाशिताः ॥५९॥
कालेन नाशः सर्वेषामवश्यं जायते त्विह ।
पश्यन्तश्चेति मोक्षार्थं यतन्ते न मृता हि ते ॥६०॥
पुनः पुनर्मरिष्यन्ति विना शाश्वतसेवनम् ।
तस्मान्नारायणो विष्णुः श्रीमत्कृष्णनरायणः ॥६१॥
परब्रह्मान्तरात्मा श्रीहरिः सेव्यः सदा भुवि ।
भजन्तु परमात्मानं रटन्तु हरिनाम च ॥६२॥
ध्यायन्तु च हरिकृष्णं प्राप्नुवन्तु परेश्वरम् ।
एवं नित्यं निशायां वै विरणाद्या निजं हितम् ॥६३॥
विचारयन्ति सत्यार्थं भजन्ते स्म च मां सदा ।
एवं याते स्वल्पकाले त्रयस्ते कुंभकर्मिणः ॥६४॥
साधुसेवापराः साध्वाश्रयाश्च सर्वथाऽभवन् ।
तद्गृहं मन्दिरं जातं मम साधुनिषेवणात् ॥६५॥

साधवो नित्यमेवाऽत्र कुर्वन्ति मत्कथादिकम् ।
विरणस्य कुंभकृतः पुत्रो हरिप्रथः स्वयम् ॥६६॥
आनन्दब्रह्मगुरुतो दीक्षां जग्राह साधवीम् ।
साधुर्भूत्वा प्रभुं नित्यं भजते मां दिवानिशम् ॥६७॥
वाक्सिद्धिस्तस्य सम्पन्ना यथा वक्ति प्रजायते ।
अथैकदा सतां तत्र सभायां भजने मम ॥६८॥
जायमाने तानमिश्रेऽम्बरात्तत्र मनुः स्वयम् ।
स्वसमो वर्णिशालाख्यो विमानेन हि निर्ययौ ॥६९॥
साधवः कुंभकाराद्याः साध्व्यश्च भजनोत्तरम् ।
विष्णुपद्यास्तटे स्नानाद्यर्थं ययुः सकीर्तनाः ॥७०॥
स्नान्ति केचित्तथान्ये च कीर्तयन्ति परेश्वरम् ।
तावद् घट्टेऽम्बरं दूरं भ्रमित्वा मनुरेव सः ॥७१॥
यदृच्छया विष्णुपद्यास्तटं चावातरद्धि सः ।
राजरूपो भृत्ययुक्तो जलावतारमाययौ ॥७२॥
यत्र ते भजने मग्नाः साध्वाद्याः स्नानहेतवे ।
तिष्ठन्ति मां भजन्तश्च रटन्तो हरिकीर्तनम् ॥७३॥
वर्णिशालो मनुस्तत्र भृत्यानाह सगर्वकः ।
इमान् वै मानवानत्र सर्वान्नारीनरादिकान् ॥७४॥
निष्कासयन्तु रुन्धन्तु दूरमेव नदीतटात् ।
यावदहं जले नद्याः स्नानं कृत्वा न यामि च ॥७५॥
तावद् भृत्याः करैर्धृत्वा निष्कासयन्तु दूरतः ।
इत्युक्त्वा भृत्यवर्गास्ते प्रत्युद्गम्य समन्ततः ॥७६॥
दूरयामासुरेवैतान् वारयामासुरेव च ।
साधवोऽपि विनिवृत्ता आनन्दब्रह्मनोदिताः ॥७७॥
हरिप्रथः साधुभक्तः प्राह दूतान् कथं त्विदम् ।
रोधनं वारणं स्नाने भवद्भिः संविधीयते ॥७८॥
दूताः प्राहुश्च ते किं वा प्रयोजनं विभावने ।
गच्छ दूरं यान्तु सर्वे नाऽत्राऽऽवेशो भविष्यति ॥७९॥
एवं वदन्तो दूताश्च जगृहुर्भुजमेव च ।
दूरं निष्कासयामासुर्हरिप्रथं तथाऽपरान् ॥८०॥
हरिप्रथस्तदोवाच मृतिं यातु नृपो हि वः ।
एवमुक्ते मनुस्तत्र क्षणे ममार जीवतः ॥८१॥
व्यसुः शवोऽभवच्छीघ्रं पपात भुवि पद्मजे ।
प्रसारितकरपादः प्राक्रोशन् चोग्रवेगतः ॥८२॥
हाहाकारस्तदा जातश्चाकृत्यं समजायत ।
दूतास्तूर्णं गताः पार्श्वेऽसेवयन् पवनार्पणैः ॥८३॥
पादसंवाहनैर्वारिपानदानैस्तथापि सः ।
मनुर्ययौ विहायैव प्राणान् धर्मालयं तदा ॥८४॥
हाहाकारोऽभवत् सर्वप्रजापालेषु वै तदा ।
दिक्पालेषु समस्तेषु देवेषु सत्यवासिषु ॥८५॥
महर्षिषु महेन्द्रादौ मनुर्मृतोऽभवद्धि शुक् ।
अथ सर्वेऽजशंभ्वाद्याश्चाययुर्यत्र स मृतः ॥८६॥
जीवनार्थं तदा सर्वे चक्रुश्चाराधनं हरेः ।
अनादिश्रीकृष्णनारायणस्य मम पद्मजे ॥८७॥
अहं तत्र समायातस्त्वया साकं नरायणि ।
शंखचक्रगदापद्मधरः श्रीपुरुषोत्तमः ॥८८॥
प्रार्थितस्तैर्जीवनार्थं मया ते बोधितास्तदा ।
मद्भक्तस्य कृतं नाऽहं परावर्तयितुं क्षमः ॥८९॥
प्रसादनीयो भक्तो मे स वै श्रेयो विधास्यति ।
ततो भक्तं सुरा नेमुश्चार्थयामासुरेव च ॥९०॥
जीवनं च क्षमां चाप्यर्थयामासुः पुनः पुनः ।
पूजयामासुरेवाऽपि साधून् हरिप्रथस्तदा ॥९१॥
ज्ञात्वा मां परमात्मानं नत्वाऽभ्यर्च्य शवोपरि ।
जलं चिक्षेप तावद्वै मनुः प्राणयुतोऽभवत् ॥९२॥
उत्तस्थौ च हरिं मां स तुष्टाव सम्पुपूज च ।
साधून्नत्वा क्षमां लब्ध्वा ययौ नैजं पदं पुनः ॥९३॥
साधुभिश्चार्थितश्चाऽहं हरिप्रथस्य मन्दिरे ।
न्यवसं सर्वदा लक्ष्मि ! साकं त्वया सतां गृहे ॥९४॥
**अनादिश्रीभक्तनारायणनाम्ना** स्वयं प्रभुः ।
त्वं तदा श्री**कुंभिकाश्री**रितिख्यातिं गताऽभवः ॥९५॥
वेद्मयहं सर्वमेवैतन्मनोर्नाशं च जीवनम् ।
स्मर सर्वं विष्णुपदीतटादिकं सतीजनान् ॥९६॥
चतुर्युगं पूर्णमेव न्यवसं साधुभिः सह ।
अन्येऽपि च ततो जाताः सम्प्रदायास्तदा मम ॥९७॥
अन्येऽवताराः संभूता लोकरक्षणहेतवे ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेदपि ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः षट्त्रिंशद्वत्सरे हरिप्रथभक्तस्य शापेन मृतस्य वर्णिशाल-मनोरुज्जीवनार्थम् अनादिश्रीभक्तनारायणस्य कुंभिकाश्रीसहितस्य प्राकट्यमित्यादिनिरूपण-नामा त्रिंशोऽध्यायः ॥ ३० ॥

**श्रीपुरुषोत्तम उवाच—**

श्रृणु चान्यां कथां लक्ष्मि मम प्राकट्यशोभनाम् ।
सप्तत्रिंशेऽण्डजाख्ये वत्सरे वै वेधसः पुरा ॥ १ ॥
एकोननवतिकल्पे षष्ठे मनौ समुद्भवाम् ।
ऋषिर्नाम्नाऽजहारितो बभूव तापसो महान् ॥ २ ॥

वेदविज्ञः साधुधर्मश्चैकलोऽपि वने वसन् ।
अध्यापयति विप्रादीन् सत्करोति समागतान् ॥ ३ ॥
अतिथीनर्चयत्यन्यान् ददात्येभ्यः समाश्रयम् ।
आश्रमे पर्णशालायां वसति वृक्षमण्डले ॥ ४ ॥
फलकन्ददलपत्रमूलाढ्यान् पादपान् स च ।
वृत्त्यर्थे जलमादत्त्वा पोषयत्यपि सर्वदा ॥ ५ ॥
देवानां च सतां चाभ्यागतानां स्वागतादिकम् ।
करोति फलमूलाद्यैः पक्वैर्मिष्टैर्निवेदितैः ॥ ६ ॥
अथ राजा सैन्ययुक्तो विद्रवाधिपतिस्तदा ।
यात्रार्थमभिगच्छन् वै मार्गेणाऽऽश्रममाययौ ॥ ७ ॥
विश्रान्तिं प्राप मध्याह्ने न च जानाति तमृषिम् ।
समर्थं चाश्रमवासं मत्वा किंचिद् वनेचरम् ॥ ८ ॥
राजा नेमे न विप्रं तं साधुं साधुस्वभावकम् ।
प्रत्युताऽस्य द्रुमस्तम्भादिषूष्ट्रान् करिणो वृषान् ॥ ९ ॥
तुरंगमान् मुमोचैते भक्षयामासुरेव च ।
भञ्जयामासुरामूलान्नाशयामासुरित्यपि ॥१०॥
पुष्पितान् फलितान् वृक्षान् ऋषिर्दृष्ट्वाऽवदन् नृपम् ।
मा राजन् मम वृक्षाणां नाशं विधेहि मूलतः ॥११॥
निष्कासय पशून् दूरे पार्श्वेऽरण्ये द्रुमान्विते ।
राजोवाच वनं मेऽस्ति सर्वं राज्ञो भवत्यपि ॥१२॥
पशवो मे क्षुधाव्याप्ता भक्षयिष्यन्ति वै द्रुमान् ।
याहि त्वं दूरतश्चास्मात् स्थानाद्वनेचरोऽसि यत् ॥१३॥
ऋषिर्गर्विष्ठनृपतेर्दण्डं व्यचिन्तयद् द्रुतम् ।
जलमादाय हस्ते च शशाप भव घोटकः ॥१४॥
तूर्णं राजाऽभवत्तत्र तुरंगमोऽतिशोभनः ।
सैन्यं दुःखं प्राप सर्वं प्रार्थयामास तमृषिम् ॥१५॥
तस्य राज्ञो विमोक्षार्थं राज्ञी चाप्यार्थयन्मुहुः ।
ऋषिस्तस्यै तदा प्राह पतिस्तेऽश्वोऽयमुत्तरे ॥१६॥
कालेऽश्वमेधयज्ञे त्वत्पुत्रनिष्पादिते पुनः ।
स्नात्वा नारायणयोगादवभृथे नृपो नरः ॥१७॥
भविष्यति न सन्देहश्चेदानीं यातु वै गृहम् ।
इत्युक्ता स्वपतिं चाऽश्वं नीत्वा सा स्वगृहं ययौ ॥१८॥
ससैन्या सा गृहं गत्वाऽऽराधयत्परमेश्वरम् ।
राज्ञ्या यशोवराख्यायाः पुत्रो धर्मधराभिधः ॥१९॥
पितुर्वर्मधराख्यस्य मोक्षार्थं यज्ञमारभत् ।
दीक्षितः सज्जयामास यज्ञीयं वस्तुजातकम् ॥२०॥
शुद्धपृथ्व्यां चतुष्प्रान्ते वाजिमेधीयमण्डपे ।
यज्ञकार्ये वर्तमाने गुरुणा देवसत्रिणा ॥२१॥
सर्वस्याऽऽप्त्यै सर्वजित्यै सर्वशापविच्छित्तये ।
सर्वपापोपशान्त्यै च हूयमानेऽनले घृते ॥२२॥
देवाः साक्षात् समायँश्च ब्रह्मविष्णुमहेश्वराः ।
अन्ये देवाश्चाययुर्वै भागधेयाऽधिकारिणः ॥२३॥
देवसत्री गुरुर्विप्रोऽपूजयत्तं तुरंगमम् ।
पूर्वभागे कृष्णवर्णं पश्चार्धे श्वेतरूपिणम् ॥२४॥
ललाटे शकटाकारपुण्ड्रयुतं शुभाकृतिम् ।
प्रागसंकृत्प्रपायितसोमरसाऽश्वयुग्मजम् ॥२५॥
जातमात्रं प्रपायितसोमरसं च वर्धितम् ।
चैत्र्यां सांग्रहणीष्टिकृद् वैशाख्यां च नृपस्ततः ॥२६॥
प्रजापतिदेवताकयागकृच्च ततः परम् ।
अमावस्येष्टिकृच्चापि कारितवपनस्तथा ॥२७॥
धृतनूत्नाऽम्बरो मौनी कृताऽग्निहोत्रसत्क्रियः ।
परेऽह्नि मण्डपे गत्वा कृतैकादशकाहुतिः ॥२८॥
ब्रह्मौदनं च ऋत्विग्भ्यश्चाशयित्वा सुकल्प्य तान् ।
यज्ञीयाऽश्वं यजमानः श्वानं च चतुरक्षकम् ॥२९॥
तडागादिजले नीत्वा सर्त्विक् तौ समप्रोक्षयत् ।
अध्वर्युश्चाऽप्रोक्षयच्च श्वानमुत्सृज्य वै ततः ॥३०॥
अश्वं चावासृजत् पृथ्व्यां भ्रमणार्थं नृपः स्वयम् ।
रक्षकैर्धन्विभिः शूरैश्चतुःशतैर्युतं ततः ॥३१॥
नृपः प्रत्यहमेवापि विष्णुक्रमणसंज्ञकान् ।
होमान् सायं च प्रातश्च कुर्वन् वीणाप्रगाथिनौ ॥३२॥
ब्रह्मक्षत्रौ समाहूय गापयत्येव वै यशः ।
पारिप्लवं शृणोत्येव प्रतीक्षतेऽश्वकाऽऽगमम् ॥३३॥
आश्वपदिकमार्गेषु योग्यहोमानकारयत् ।
मुख्यं दन्तान् हनूं चोरु पादौ लिंगं च वाजिनः ॥३४॥
संस्मृत्य हवनं चाऽप्यकारयन् नृपतिः स्वयम् ।
गमनं धावनं चाक्रन्दनं हेषणमित्यपि ॥३५॥
शयनं चाऽप्यवघ्राणं लुण्ठनं वाजिनो गुणान् ।
संस्मृत्य देवतीकृत्य तेभ्यो होमान् ददौ नृपः ॥३६॥
अथ कृत्वा विजयं चागतमश्वं तु पावनम् ।
प्रपूज्याऽस्थापयत् स्थाने सुत्यामकारयन्नृपः ॥३७॥
सुत्यात्रये द्वितीयेऽह्नि चोद्गातुः स्थानकेऽश्वकम् ।
उद्गातारं व्यधाद् राजा वडवाभिः समन्वितम् ॥३८॥
हेषां चकार तुरगश्चोद्गीथः स व्यजायत ।
अखातयत्ततो यूपानेकविंशतिसंख्यकान् ॥३९॥
मध्ये चोत्तरदक्षिणकोणयोः सुव्यवस्थितान् ।
पूर्वेऽह्नि तुरगं तं बबन्ध राज्जुदालजे ॥४०॥

यूपेऽस्य पार्श्वयोर्देवदारुजौ द्वौ च यूपकौ ।
तत्पार्श्वयोस्त्रयस्त्रयो बिल्ववृक्षविनिर्मिताः ॥४१॥
तत्पार्श्वयोस्त्रयस्त्रयः खादिरास्तत्पार्श्वयोः ।
पालाशाश्च त्रयस्त्रयो यूपास्तान् समपूजयत् ॥४२॥
अश्वं रशनयाऽऽवेष्ट्य त्रयोदश पशून् परान् ।
रशनायां रज्जुबन्धैरबन्धयच्च पार्थिवः ॥४३॥
अश्वललाटे चाग्नेयं पश्चभागे तु पौष्णकम् ।
उपर्यैन्द्रापौष्णपशुमबन्धयच्च पार्थिवः ॥४४॥
बाह्वोराग्नेयकौ कृष्णग्रीवौ चाबन्धयन्नृपः ।
त्वाष्ट्रौ सक्थ्नोः श्वेतपृष्ठौ बार्हस्पत्यौ तु पार्श्वयोः ॥४५॥
श्वेतवर्णोदरं धातृदैवं चाऽधो ह्यबन्धयत् ।
पुच्छे श्वेतमजं चाप्यबन्धयत् पार्थिवस्ततः ॥४६॥
कृष्णवर्णमजं सौर्यं दक्षपार्श्वेऽप्यबन्धयत् ।
याम्यं कृष्णं वामपार्श्वेऽबन्धयच्चैवमेव सः ॥४७॥
ग्राम्यान् शतत्रयं नवचत्वारिंशद् बबन्ध सः ।
आरण्यकान् शतत्रयं षष्टिं चापि बबन्ध सः ॥४८॥
अजादयो ग्राम्यवाच्या आरण्याः श्वापदादयः ।
तदुपाकरणं चक्रे पर्यग्निकरणं तथा ॥४९॥
नमस्कृत्य पशून् सर्वान् संकल्प्य देवतार्थकान् ।
दिव्यान्पूज्यानपसार्याऽवाऽसृजत्तानपशून्नृपः ॥५०॥
अश्वनाम्ना सुकुष्माण्डं धृत्वा घृताक्तकम्बले ।
कृत्वा प्राक्शिरसं चोदक्पादं संज्ञपनं व्यधात् ॥५१॥
राज्ञ्यः पत्न्यो ग्राम्यशब्दैर्गर्हां व्यधुस्ततः परम् ।
फलगर्भवपाहोमान् षट् प्रजापतये ददौ ॥५२॥
विष्णुक्रमानक्रामच्च ष्माण्डान्यपराणि च ।
पशुस्थानानि संज्ञप्य होमान् सर्वानकारयत् ॥५३॥
आज्यादिना तिस्र आहुतीश्च हुत्वा ततः परम् ।
पत्नीसंयाजान्तकर्माऽनुष्ठाय व्यरमन्नृपः ॥५४॥
सुत्यादिने तृतीये च कृत्वा सौमिककर्म च ।
प्राजापत्यान् पशूनेकादश कुष्माण्डरूपिणः ॥५५॥
हुत्वा कर्माण्यनुष्ठायाऽवभृथं प्रचकार ह ।
पिंगाक्षश्वेतकुष्ठस्य पुरुषस्य तु मूर्धनि ॥५६॥
होमत्रयं प्रदत्वा चाऽददत् शतसुवर्णकम् ।
कृत्वा त्रैधातवीयेष्टिम् आसम्वत्सरमेव ह ॥५७॥
तत्तदृतुफलैः राजाऽयजच्चाश्वं प्रपूजयन् ।
दैवाऽश्वं देववन्मेने राजा परमधार्मिकः ॥५८॥
वत्सराऽन्ते लक्षयतीन् साधून् सन्यासिनस्तथा ।
सतीः साध्वीस्तथा विप्रान् बालान् विद्यार्थिनस्तथा ॥५९॥

विद्यार्थिनीर्भिक्षुकीश्च भोजयामास वै नृपः ।
आवर्षं नित्यहोमान्ते ददौ दानानि भावतः ॥६०॥
प्रतीक्षते कदा चाश्वरूपः पिता मनुष्यताम् ।
गच्छेदिति विचारस्थो निद्रां ययौ नृपो निशि ॥६१॥
वत्सरान्ते यज्ञपरिहारे रात्रौ नरायणम् ।
ददर्श दिव्यरूपं चाऽच्युतं मुकुटमण्डितम् ॥६२॥
सर्वाभरणसंयुक्तं सर्वशोभासमन्वितम् ।
सर्वैश्वर्यादिसम्पूर्णं न्यूनषोडशवत्सरम् ॥६३॥
आचतुर्दशहायन्या त्वया लक्ष्म्या विराजितम् ।
प्रसन्नाननया सत्या तदा सौभाग्यशोभया ॥६४॥
निद्रायामेव तुष्टाव श्रीकृष्णं पुरुषोत्तमम् ।
त्वं यज्ञस्त्वं चाश्वरूपश्चाश्वमेधस्त्वमेव च ॥६५॥
त्वं राजा त्वं राज्यपालस्त्वं राजेश्वर एव च ।
त्वं लोकस्त्वं लोकनाथस्त्वं देवस्त्वं सुरेश्वरः ॥६६॥
त्वं विष्णुस्त्वं स्वयं ब्रह्मा त्वं वैराजो महेश्वरः ।
त्वं भूमा त्वं प्रधानेशो वासुदेवो जनार्दनः ॥६७॥
त्वं धामेशो महाकालो मायेशस्त्वं परेश्वरः ।
त्वं श्रीकृष्णप्रभुः श्रीमत्पुरुषोत्तम सर्वराट् ॥६८॥
कर्ता धर्ता नियन्ता च पाता हर्ताऽन्तरस्थितः ।
त्वमेव सर्वं भगवँस्त्वयि सर्वं समर्पितम् ॥६९॥
त्वं वै शरण्य एवाऽसि पितुर्मेऽश्वभवं प्रभो ।
शापजन्यं द्रुतं नारायण नाशय केशव ॥७०॥
एवं तुष्टाव मां राजा तदा सोऽभिहितो मया ।
अश्वमेधे महायज्ञे मां विहाय त्वया नृप ॥७१॥
पूजिता देवताश्चाऽन्ये विना मत्स्मरणं किल ।
अनर्पितोऽश्वमेधश्च मयि चाऽर्पणवर्जितः ॥७२॥
त्वदिच्छापूरको नैव वर्ततेऽद्य नराधिप ।
तस्मात्पुनस्त्वश्वयज्ञं कुरु पूजय मां पुनः ॥७३॥
सर्वत्र सर्वकार्येषु ततस्ते जनको नरः ।
मानुषतां पुनश्चापि समेष्यति न संशयः ॥७४॥
दर्शनं मे पुनर्भावि सर्वं योग्यं भविष्यति ।
इत्युक्त्वाऽदृश्यतां प्राप्तस्त्वयाऽहं श्रीनरायणि ॥७५॥
धर्मधरो नृपो निद्रां विहाय तूर्णमेव ह ।
उत्थितश्च यथार्थं वै स्वप्नं मेने ततः पुनः ॥७६॥
कृत्वा मे कानकीं मूर्तिं यथादृष्टां त्वया सह ।
पुनश्चक्रेऽश्वमेधं स विधिना मां प्रपूजयन् ॥७७॥
अवभृथे पुनश्चाऽहं प्राप्तो दिव्यस्वरूपवान् ।
त्वया साकं तदा लक्ष्मि स्नात्वा वारि च पावनम् ॥७८॥

अश्वे पितरि चिक्षेप स्वयं नारायणो ह्यहम्।
स तु राजा वर्मधराऽभिधो विधूय पापकम् ॥७९॥
पूर्वरूपं राजरूपं प्राप्तवान् द्रुतमेव ह।
साश्रुर्जातिस्मरो मां स तुष्टाव बहुगद्गदः ॥८०॥
यशोवराऽभिधा राज्ञी श्रि! ते सत्कारमाचरत्।
देवसत्री गुरुस्तस्याः पुपूज मां परेश्वरम् ॥८१॥
षोडशोपस्रुवस्त्वाद्यैः प्रार्थयामास वै पुनः।
अजहारितवचनाद्भगवन्! समुपागतः ॥८२॥
शापमुक्त्यै नृपस्याऽस्य वसाऽत्र भगवन्! सदा।
तथाऽस्त्वेवं मयोक्तश्च देवसत्री तपोधनः ॥८३॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः।
**अनादिश्रीमेधनारायणनाम्ना** स्थिरोऽभवम् ॥८४॥
त्वया **मेधावतीलक्ष्म्या** साकं विद्रवखण्डके।
ततः पृथ्व्यां चाश्वमेधा यज्ञा वै बहवोऽभवन् ॥८५॥
उच्चावचा मखा यथाशक्त्याऽकुर्वन् नराधिपाः।
विना युद्धं दिव्यमश्वं प्रपूज्य च पुनः पुनः ॥८६॥
वर्तमानस्य मे भूमौ पूजितस्याऽश्वमेधके।
उत्सृष्टं तुरगं केचिन्नाऽबध्नन् मम भीतितः ॥८७॥
सर्वे नृपा ज्ञातवन्तो नारायणोऽश्वमेधिनः।
पक्षे गृहे मखे चाऽऽस्ते प्रत्यक्षः परमेश्वरः ॥८८॥
तस्य यज्ञे युद्धविघ्नं कर्तव्यं नहि सर्वथा।
युद्धेन विजयं कश्चिन्नैव यास्यति निर्णयः ॥८९॥
इत्येवं तत्र कल्पे वै यज्ञा हिंसाविवर्जिताः।
दैवपाशवभोक्तारोऽभवन् मत्तोषकारिणः ॥९०॥
अजहारितविप्रश्च साधुधर्मपरायणः।
श्रुत्वा मां त्वाययौ शीघ्रं श्रीपतिं पुरुषोत्तमम् ॥९१॥
राजगृहं च राजानं मिलित्वा मां ततः परम्।
साधुरूपो मम भक्तो मत्सेवायां व्यराजत ॥९२॥
प्रददौ स मयाऽऽज्ञप्तो वैष्णवान् श्रेयसे मनून्।
प्रजाभ्यो बोधयामास कारयामास मच्छ्रितान् ॥९३॥
वर्मधरोऽपि वैराग्यात् प्राप्य दीक्षां तु साधवीम्।
उपादिदेश लोकेभ्यः प्रत्यक्षोपासनां हि मे ॥९४॥
भेजे मां सततं साधुः साधुधर्मपरायणः।
राज्ञी यशोवरा चापि साध्वीदीक्षामवाप्य माम् ॥९५॥
भेजे श्रिया युतं नित्यं साध्वीधर्मपरायणा।
नारीभ्यः प्रददौ सा तु दीक्षां मे वैष्णवीं सतीम् ॥९६॥
भजनं कारयामास कारयामास वैष्णवीः।
साध्वीर्ब्रह्मस्वरूपस्था ब्रह्मशीलप्रपालिकाः ॥९७॥
आकल्पान्तं स्थितश्चाऽहं त्वया साकं नरायणि।
स्मर नारायणीश्रि! त्वं सर्वं मेधावतीं निजाम् ॥९८॥
एवमन्येऽवतारा मे जातास्ततोऽप्यनेकशः।
जानाम्यहं तु तान्सर्वान् धर्मकार्यपरायणान् ॥९९॥
पठनाच्छ्रवणादस्य स्मरणाद्धारणादपि।
अश्वमेधफलं प्राप्याऽघानि निधूंय सर्वथा ॥१००॥
सकामश्चेद् बहून् स्वर्गान् भुक्त्वा चिरं ततः परम्।
यायाद् ब्रह्मपरं धाम भक्त्या मे सततं प्रियम् ॥१०१॥
निष्कामस्य तु भक्तस्य भक्तिर्मे जायते द्रुतम्।
सर्वसौख्यैः सुसन्तुष्टो याति मत्परमं पदम् ॥१०२॥
सर्वतीर्थफलं सर्वव्रतोत्थं च फलं तथा।
सर्वसेवाफलं चापि प्राप्नुयात् श्रवणाज्जनुम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः सप्तत्रिंशे वत्सरेऽजहारितशापेनाऽश्वीभूतस्य वर्मधरनृपस्य मोक्षार्थे तत्पुत्रकृताश्वमेधेऽनादिश्रीमेधनारायणस्य मेधावतीश्रिया सहितस्य प्राकट्यमित्यादिनिरूपणनामैकत्रिंशोऽध्यायः ॥ ३१ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि! त्वं प्राकट्यं मे ततः परम्।
वेधसोऽष्टात्रिंशवर्षे कल्पे षष्ठेऽष्टमे मनौ ॥ १ ॥
ब्रह्मधर्मसमुत्पन्नोऽसुरोऽरिष्टोऽनलादनः।
ववृधे जातमात्रः स बुभुक्षितोऽतितैजसः ॥ २ ॥
अन्यतेजांसि यद्देहे लयं यान्ति समन्ततः।
अग्नीन् सर्वान् भक्षयति नान्यं भुंक्ते हि जन्मतः ॥ ३ ॥
जलं पृथ्वीं न ग्रसते ग्रसतेऽनलमात्रकम्।
यत्र यत्राऽनलाः सन्ति वह्नयस्तत्र तत्र सः ॥ ४ ॥
गत्वा गत्वा प्रसह्याऽग्निं धृत्वा धृत्वाऽत्ति सर्वशः।
ब्रह्मणो मानसं पुत्रं महाग्निं स त्वभक्षयत् ॥ ५ ॥
तत्त्रिसुतान् पावकं च पवमानं शुचिं तथा।
अभक्षयत्तथा पावकात्मजं सहरक्षकम् ॥ ६ ॥
पवमानात्मजं कव्यवाहनं चाप्यभक्षयत्।
शुच्यात्मजं हव्यवाहं धृत्वाऽसुरोऽप्यभक्षयत् ॥ ७ ॥
अग्नेश्चतुर्थं पुत्रं ब्रह्मौदनाग्निमभक्षयत्।
ब्रह्मौदनाग्निपुत्रं च भरतं चाप्यभक्षयत् ॥ ८ ॥
तथा भरतपुत्रं च वैश्वानरमभक्षयत्।
अथाग्नेः पञ्चमं पुत्रमथर्वाणमभक्षयत् ॥ ९ ॥

अथर्वपुत्रानमृतं दध्यङ्ङमङ्गिरं तथा ।
निर्मथ्यं चेति चतुरोऽप्यभक्षयत् महाऽसुरः ॥१०॥
निर्मथ्यस्य सुतं गार्हपत्यं तथा ह्यभक्षयत् ।
गार्हपत्यसुतौ शंस्यं शुकं तथा ह्यभक्षयत् ॥११॥
शंस्यसुतानावसथ्यं सभ्यं चाहवनीयकम् ।
अभक्षयन्महारिष्टानलादो नाम चासुरः ॥१२॥
तथा शंस्यसुतानन्यान् नदीषु जातसंभवान् ।
धिष्णिसंज्ञानपि पुत्रानभक्षयन्महासुरः ॥१३॥
ऋतुं प्रवाहणं चाग्नीध्रं सम्राजं कृशानुकम् ।
पारिषदं प्रतक्कं च नभसं च वसुं तथा ॥१४॥
अजैकपादं चाहिर्बुध्नं च गृहपतिं तथा ।
अभक्षयच्च होत्रीयं शान्तप्रचेतसं तथा ॥१५॥
विश्वदेवं तथाऽवक्षुमच्छावाकमभक्षयत् ।
उशीरं च कविं पोतमावारिमप्यभक्षयत् ॥१६॥
मार्रि नैष्ठीयसं चापि व्यरत्निमप्यभक्षयत् ।
मार्जालीयमवस्फूर्जमब्जं च जाठरं तथा ॥१७॥
जठरस्य सुतं मन्युमन्तं तथा ह्यभक्षयत् ।
सवर्त्तकं मन्युमजं वाडवं चाप्यभक्षयत् ॥१८॥
वाडवोत्थं सहरक्षं क्षामं च सहरक्षजम् ।
क्षामात्मजं च क्रव्यादं ह्यभक्षयन्महासुरः ॥१९॥
शुचेः पुत्रमारणेयं चापरं चाप्यभक्षयत् ।
आरणेयसुतं चायुं चायुजं महिमानकम् ॥२०॥
महिमानसुतं चापि सवनं चाप्यभक्षयत् ।
सवनोत्थं चाद्भुतं च विविधिं चाद्भुतात्मजम् ॥२१॥
विविधिजं तथाऽर्कं चाऽप्यभक्षयन्महासुरः ।
अर्कसुतान् वाजसृगमनीकवन्तमित्यपि ॥२२॥
यष्टिकृतं रक्षोहं च सुरभिं च वसुं तथा ।
अन्नादं रुक्मराजं चाप्यभक्षयन्महासुरः ॥२३॥
एवमन्यान् श्मशानस्थान् महासुरोऽप्यभक्षयत् ।
एवं नारायणीश्रि ! वै जगच्चाग्निविवर्जितम् ॥२४॥
दाहशून्यं पाकशून्यं हिमवत् संव्यजायत ।
मृत्यून्मुखं समस्तं वै वीक्ष्य पृथ्वी शुचान्विता ॥२५॥
ययौ सत्यालयं तत्र ब्रह्माणं शरणं गता ।
तुष्टाव परया भक्त्याऽनलरक्षार्थमेव सा ॥२६॥
अनलादविनाशार्थं चक्रे वै प्रार्थनां मुहुः ।
ब्रह्मा सस्मार मनसा मां तदा पुरुषोत्तमम् ॥२७॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
परब्रह्माऽक्षरातीतं सर्वान्तर्यामिणं हरिम् ॥२८॥

श्रुत्वाऽहं प्रार्थनां लक्ष्मि ! प्रत्यक्षो ब्रह्मणोऽभवम् ।
त्वया साकं तदा पद्मे ब्रह्मा पुपूज मां तथा ॥२९॥
त्वां पुपूज पृथिवी साऽऽर्थयद् रक्षार्थमित्यथ ।
असुरस्य विनाशार्थं तदा त्वं तु मदाज्ञया ॥३०॥
पृथ्वीपुत्री चाभवश्च **पार्थिवीश्रीः** सुकन्यका ।
त्वां नीत्वा सा ययौ तूर्णं भूलोकं विमलाशया ॥३१॥
अहं वह्नेः स्वरूपं च धृत्वा ज्वालात्मकोऽभवम् ।
अनलादोऽसुरो मां संवीक्ष्य मेरौ समाऽऽद्रवत् ॥३२॥
भक्षणार्थं चाययौ प्राऽद्रवं चाहं भुवं प्रति ।
यत्र त्वं भूसहिता च प्रतीक्षसे ममाऽऽगमम् ॥३३॥
भानुमत्पर्वतस्यैव गह्वरे तत्र चाऽऽगमम् ।
पश्यन्त्याश्च तव चापि पृथ्व्यास्तत्र महासुरः ॥३४॥
अगिलन्मां महाज्वालामयाऽग्निं परमेश्वरम् ।
अहमन्तर्गतो भूत्वाऽदहं तं वै महासुरम् ॥३५॥
भस्मीभूतं च तं कृत्वा वह्नीनजीवयं पुनः ।
सर्वेऽग्नयस्तदा जीवसहिताश्चेतनाः शुभाः ॥३६॥
यथापूर्वमभवँस्तेऽस्तुवन्मां चाप्यपूजयन् ।
अनादिश्रीवह्निनारायणं मां पुरुषोत्तमम् ॥३७॥
मयाऽऽज्ञता वह्नयस्ते स्वस्वस्थानेषु वै द्रुतम् ।
प्रवृत्ताः स्वस्वकार्येषु सशक्ताश्च समन्विताः ॥३८॥
अथ जगन्ति वै लोकाः प्रजाश्च साऽग्नयोऽभवन् ।
हिमभावो गतस्तेषां सजीवा ह्यभवन् पुनः ॥३९॥
सर्वे ज्ञात्वा मम तत्र प्राकट्यं तु सुरादयः ।
आययुः पूजनार्थं ते व्योमवृष्टिस्ततोऽभवत् ॥४०॥
चन्दनानां कुसुमानां जयशब्दस्तथाऽभवन् ।
महोत्सवः कृतस्तत्र सर्वदेवादिभिर्मम ॥४१॥
पृथ्व्या त्वं चार्पिता मह्यं पार्थिवीश्रीर्विवाहिता ।
आकल्पान्तं स्थितश्चाऽहं त्वया साकं नरायणि ॥४२॥
प्राकट्यं मे कथितं ते लक्ष्मि ! स्मर सुखप्रदम् ।
अन्येऽवतारा बहवस्तदा वर्षेऽभवन्मम ॥४३॥
जानाम्येतान् समस्तान् वै नान्यो जानाति कश्चन ।
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिः प्रजायते ॥४४॥
वह्नेरुपद्रवो न स्याद् रोगाः स्युर्न कदाचन ।
आनन्दं ब्रह्मणो नित्यं लभेदेवाऽत्र पाठकः ॥४५॥
अथाऽन्यच्चापि मे लक्ष्मि ! प्राकट्यं च ततः परम् ।
कथयामि समासेन महापुण्यप्रदं शुभम् ॥४६॥
नवत्रिंशे वेधसश्च नागवर्षे पुराऽभवत् ।
षष्ठकल्पे षष्ठमनौ इलोदरो महासुरः ॥४७॥

रसादः सर्वतत्त्वानां रसभक्षक उल्बणः ।
राहोः पुत्रोऽसुरकर्मा स्वर्गभूरसभक्षकः ॥४८॥
स हि पृथ्व्यां समागत्य तपस्तेपेऽतिदारुणम् ।
सहस्रवत्सरान् मेरौ तुतोष शंकरः स्वयम् ॥४९॥
आययौ सन्निधौ तस्योवाच वृणु वरं ततः ।
असुरः संययाचेऽपि सर्वरसप्रभक्षिताम् ॥५०॥
तथाऽस्त्विति हरः प्रोक्त्वा तिरोबभूव सत्वरम् ।
असुरः स सदा पार्थिवान् रसान् सलिलस्थितान् ॥५१॥
भुंक्ते यथेष्टं सततं पुष्टिमेति समन्ततः ।
ततस्तृप्तः पुनर्वर्षसहस्रोर्ध्वं तपः परम् ॥५२॥
चक्रे ब्रह्माणमुद्दिश्याऽवध्यभावार्थमेव सः ।
वाय्वाहारं शुष्कगात्रं वीक्ष्य ब्रह्मा ह्युपाययौ ॥५३॥
उवाच प्रोक्ष्य सलिलैः सञ्जीवीकृत्य तं तदा ।
वरं वृणु यथेष्टं मे प्रसन्नोऽस्मि महासुर ॥५४॥
सोऽपि नेत्रे समुन्मिल्योवाचाऽजेयत्वमुत्तमम् ।
चतुर्दशभुवां वासैर्नाऽहं जय्यो भवामि ह ॥५५॥
तथाऽस्त्विति ब्रह्मवाक्यं प्राप्तवान् स महासुरः ।
ब्रह्माऽप्यदृश्यतां प्राप्य ययौ ततो महासुरः ॥५६॥
बुभुजे बहुशो भोगान्निर्भयो दैवमानुषान् ।
अथापि चिन्तयामास मरणं मे तु नो भवेत् ॥५७॥
ततस्तपः पुनः कार्यं मेरौ वर्षसहस्रकम् ।
विचार्येत्थं चकाराऽपि विष्णुमुद्दिश्य वै तपः ॥५८॥
विष्णुर्वर्षसहस्रान्ते त्वाययौ देवनोदितः ।
प्राह तं ते किमिष्टं वै वृणु विष्णुरहं त्विह ॥५९॥
वरप्रदानकार्याय समायातोऽस्मि मा चिरम् ।
असुरः प्राह यथैवं मरणं मे न वै भवेत् ॥६०॥
तथा वृणोमि विष्णोस्ते वरदानं मयेप्सितम् ।
विष्णुः प्राह जनिर्यस्य मृतिस्तस्य ध्रुवाऽसुर ॥६१॥
पितुस्ते राहुसंज्ञस्य मरणं ध्रुवमेव ह ।
तत्पितुः कश्यपस्यापि तत्पितुश्चापि वै ध्रुवम् ॥६२॥
अमृत्युः कस्यचिन्नास्ति विना श्रीपुरुषोत्तमम् ।
आत्मा नित्यः कर्मभोक्ता वसति देहपञ्जरे ॥६३॥
स च देहाद्विनिर्यातो मृत इत्युपचर्यते ।
देहः षाट्कौशिकश्चास्ति कोशा भूतादिसंभवाः ॥६४॥
भूतानां परिणामाश्च जायन्ते नित्यमेव ह ।
परिणामाः सदाऽनित्यास्ततोऽनित्यं हि वर्ष्म च ॥६५॥
अनित्यस्य न नित्यत्वं वरमन्यं वृणु ध्रुवम् ।
राज्यं स्वर्गं च पातालं चिरंजीवित्वमित्यपि ॥६६॥

ददामि तेऽसुर ! द्रव्यं स्वर्णरूप्यादि भूतलम् ।
सौर्यं चान्द्रं च माहेन्द्रं पदं कौबेरमित्यपि ॥६७॥
वृणु चान्यत्पदं श्रेष्ठं मा चिरं प्रददामि यत् ।
श्रुत्वैवमाह सर्वादो मा मृत्युर्मे भवेदिह ॥६८॥
त्रिदेवतत्सृष्टिजेभ्यश्चेति वृणोमि देहि मे ।
तथाऽस्त्विति हरिः प्राहाऽदृश्यतां स द्रुतं ययौ ॥६९॥
अथाऽसुरस्तपस्त्यक्त्वा मृत्युभीवर्जितस्तथा ।
देवदैत्यमनुष्याणां भोगान् भुंक्ते प्रसह्य सः ॥७०॥
ब्रह्मणश्चापि विष्णोः सः शिवस्यापि विभूतिकाः ।
सर्वा आहृत्य च बलाद् भुंक्ते वरबलैधितः ॥७१॥
ह्येकदा स ययौ जित्वा देवान् कैलासमित्यपि ।
शंकरं प्राह युद्धं मे कैलासं वा प्रदेहि मे ॥७२॥
शंभुः प्राहार्धमेवैतत् कैलासं तव सर्वथा ।
गृहाणेति तदा सोऽपि चार्धं प्राप्य मुमोद ह ॥७३॥
अथाऽऽययौ सत्यलोकं ब्रह्माणं प्राह मे तव ।
पदं ब्रह्मन् हि सर्वस्वं देहि वा युद्धमेव वा ॥७४॥
ब्रह्मा प्राह गृहाणेदं पारमेष्ठ्यपदार्धकम् ।
लब्ध्वा सोऽपि प्रसन्नोऽभूद् ययौ विष्णुं पयोदधिम् ॥७५॥
प्राह मे श्वेतभूद्वीपं देहि विष्णो सरोषकम् ।
यद्वा युद्धं च मे देहि कुरु यत्ते हि रोचते ॥७६॥
विष्णुः प्राह तु ते दत्तं क्षीराब्ध्यर्धपदं सदा ।
लब्ध्वाऽसुरः प्रसन्नश्च ययौ मेरुं निजालयम् ॥७७॥
अथैषेष शिवां श्रीं च ब्राह्मीं देवीर्महासुरः ।
अर्थयामास ता यावत् तावद्देवा विनाशने ॥७८॥
मतिं चक्रुश्चासुरस्य कौतुकं च व्यधुर्द्रुतम् ।
पिशाचिनीत्रयं तत्तद्रूपधरं हरः स्वयम् ॥७९॥
प्राहिणोत् तं तत इल्लोदरो जहर्ष मूढधीः ।
पिशाचिन्यो व्रतं चक्रुः सर्वरसप्रभक्षणम् ॥८०॥
मासमात्रं व्रतं सर्वरसभक्षणनामकम् ।
कृत्वा ततो व्रते पूर्णे भविष्यामः प्रसेवने ॥८१॥
उपस्थिता इति श्रुत्वा ज्ञात्वा च मुमुदेऽसुरः ।
समर्थोऽयं सर्वरससञ्चये वर्तते यतः ॥८२॥
पार्थिवान् वै सर्वरसान् जलीयानपि सर्वशः ।
पाकापाककृतान् सर्वानानयामास सत्वरम् ॥८३॥
ददौ ताभ्यस्त्रिवर्गाभ्यः पिशाचिनीभ्य एव च ।
भोजयामास बहुधा पाययामास सर्वशः ॥८४॥
पृथ्वी रसविहीना वै जलं रसविहीनकम् ।
तत्त्वानि यानि रस्यानि तान्यरसानि चाऽभवन् ॥८५॥

रसशून्यं भोजनं च घृतं चामृतमित्यपि ।
हव्यं कव्यं चामिषादि सर्वं रसविहीनकम् ॥८६॥
जातं तेन समस्तं चाऽभोज्यं चापेयमित्यपि ।
क्लेशमापुः प्रजाः सर्वा देवासुरर्षिमानवाः ॥८७॥
परमेशार्पणे चापि नैवेद्ये रसवर्जिता ।
सर्वा जाता ततश्चेशा नादन्ति भोजनं खरम् ॥८८॥
तेऽथ सर्वे मिलित्वा मामाराधयन् सुदुःखिताः ।
इलोदरस्य नाशार्थं तुष्टुवुर्बहुधा तथा ॥८९॥
श्रुत्वाऽहं च परब्रह्म श्रीपतिः पुरुषोत्तमः ।
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ॥९०॥
त्वया साकं त्वक्षराद्वै धाम्नो लक्ष्मि ! स्वयं हरिः ।
आययौ देवकोटीनामग्रे साक्षाद् बभूव ह ॥९१॥
पूजितश्चार्थितश्चापि निवेदितोऽसुराऽर्दने ।
गतोऽहं मेरुभूभागे यत्राऽसुरः प्रमोदते ॥९२॥
रसरूपोऽभवं तत्र ह्रदो भूत्वा व्यवस्थितः ।
मिष्टः शीतः सुगन्धश्चानन्ददः सुखदः शुभः ॥९३॥
उज्ज्वलः श्वेतपीयूषरूपश्च मादको मृदुः ।
प्रवाहरूपश्चाऽपूर्णो ह्रदोऽभवं तदन्तिके ॥९४॥
पिशाचिन्यस्तिस्र एव वीक्ष्य रसोत्तमं ह्रदम् ।
कथयामासुरेवैनं सोऽपि तूर्णं समाययौ ॥९५॥
पपौ रसं तथा ताश्च पाययामास सोत्सवः ।
पाने तृप्तिर्न चोद्गारो जायते पाति वै मुहुः ॥९६॥
भानं त्यक्त्वा पपौ चाति पपावाकण्ठमेव तु ।
रसोऽहं न ममौ त्वस्योदरे सोऽपि व्यवर्धत ॥९७॥
पीत्वा पीत्वाऽक्षयं सर्वं रसं सोऽभून्महोदरः ।
यावती महिमासिद्धिस्ततस्तावदभून्महान् ॥९८॥
मानोत्तरं गतश्चापि पपौ रसं पुनः पुनः ।
उदरं तस्य वै त्यक्त्वा शक्तिं वै धारणात्मिकाम् ॥९९॥
मध्यनाभिप्रदेशाच्च पाटितं हृदयावधिम् ।
जघनं पाटितं चापि निर्गतोऽहं रसात्मकः ॥१००॥
बहिरेवोदरात्तस्य पपात स ममार च ।
**अनादिश्रीरसनारायणश्चाहं** त्वया सह ॥१०१॥
**अनादिश्रीरसलक्ष्म्या** साकं तत्राऽभवं स्थितः ।
पिशाचिन्यः प्रसन्नाश्च पूजयित्वा हरिं तु माम् ॥१०२॥
ययुः कैलासमेवैताः देवाद्यास्तत्र चाययुः ।
पुष्पवृष्टिं प्रचक्रुश्च तुष्टुवुर्मां रसात्मकम् ॥१०३॥
अनादिश्रीरसनारायणं श्रीपुरुषोत्तमम् ।
सर्वदा च निवासार्थमर्थयामासुरीश्वराः ॥१०४॥
अहं सदाऽवसं पृथ्व्यां रसपुष्टिप्रवृद्धये ।
मन्वन्तरैकमात्रं मूर्तिमानभवं तदा ॥१०५॥
ततो रसात्मको भूत्वाऽऽकल्पं स्थितोऽभवं प्रिये ।
स्मर लक्ष्मि ! मम तद्वै प्राकट्यं तद्रसात्मकम् ॥१०६॥
अथ देवा ययुः सर्वे नैजान् वासान् दिवादिषु ।
अन्ये तदाऽवतारा मेऽभवँश्चापि सहस्रशः ॥१०७॥
अवतारी परब्रह्म रसनारायणोऽभवम् ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदपि ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽष्टात्रिंशे वर्षे अनलादमहासुरविनाशार्थम् अनादिश्रीवह्निनारायणस्य पार्थिवीश्रियासहितस्य, तथा नवत्रिंशे वत्सरे इलोदरस्य रसादस्य महासुरस्य विनाशार्थम् अनादिश्रीरसनारायणस्य श्रीरसलक्ष्म्या सहितस्य च प्राकट्यमित्यादिनिरूपणनामा द्वात्रिंशोऽध्यायः ॥ ३२ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि ! ततश्चापि प्राकट्यं मम वच्मि ते ।
वेधसो वत्सरे चत्वारिंशे कल्पेऽष्टमे तथा ॥ १ ॥
मनौ च दशमे प्रान्तद्वापरे भूतलेऽभितः ।
कालबलेन धर्मस्य नैर्बल्ये पापिदेहिषु ॥ २ ॥
अधर्मस्य बले व्याप्तेऽसुराणां बलवर्धने ।
प्रजास्त्वासन् पीडिता वै मखा रुद्धाः समन्ततः ॥ ३ ॥
दानं दया दमाद्याश्च सर्वथा विलयं गताः ।
अहिंसा सत्यमस्तेयं दृश्यन्ते नैव भूतले ॥ ४ ॥
शौचं तपो व्रतं चेति नष्टान्यति प्रजासु वै ।
दृश्यते नोपकारित्वं शीलं नैव च नैव च ॥ ५ ॥
बाधन्ते दुर्बलान् सर्वे बलिश्चोपभुंजते ।
तत्समृद्धीस्ते प्रसह्यैवाऽप्यपहरन्ति सर्वशः ॥ ६ ॥
दैत्यानां दानवानां चाऽसुराणां कोट्यो भुवि ।
सर्वत्रैवाऽवलोक्यन्ते तीर्थयात्रा लयं गता ॥ ७ ॥
मर्यादा नरनारीणां राक्षसैर्हि विनाशिता ।
सर्ववर्णाः स्वतन्त्राश्च धर्मन्यायविवर्जिताः ॥ ८ ॥
देवानामर्हणं सर्वं सर्वथैव लयं गतम् ।
बालाऽनाथाऽतिथीनां च पालनं विलयं गतम् ॥ ९ ॥
नास्तिक्यं सर्वकार्येषु सर्वधर्मेषु चाऽभवत् ।
वृद्धानां चावमानादि धार्मिकाणां प्रपीडनम् ॥१०॥
आसुरैः सर्वथा लोके कृतं त्वभक्ष्यभक्षकैः ।
अपेयपानकैश्चाप्यकार्यैर्जुगुप्सितैरपि ॥११॥

नृपाः सर्वे दैत्यवंशा आचार्या दैत्यवंशिनः ।
गुरवोऽपि दैत्यवंशा सम्बभूवुर्यदा क्षितौ ॥१२॥
दैवं पैत्र्यं तथा स्वर्ग्यं सर्वं लयं गतं द्रुतम् ।
तदा देवैश्च ऋषिभिर्मानवैर्धर्ममानसैः ॥१३॥
आराधितः स्वयं श्रीमत्परमेश्वर एव ह ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥१४॥
ज्ञानविष्णुगृहे पुत्रस्वरूपोऽहं तदाऽभवम् ।
सुदर्शनेन सहितश्चक्रनारायणः प्रभुः ॥१५॥

माता मे वेदिनी चाऽऽसीत् तत्कुक्षेः प्रकटोऽभवम् ।
तदा त्वं मन्निदेशेन राजकन्याऽभवः शुभा ॥१६॥
सार्वभौमस्य नृपतेर्ब्रह्मचित्रधरस्य वै ।
राज्ञ्याः शोभालिकानाम्न्याः कुक्षौ सुधाक्षिणी तदा ॥१७॥
सुधाक्ष्यास्ते पिता चक्रे सम्राट् स्वयंवरं तव ।
महोत्सवं ततस्तत्र राजानोऽसुरपुङ्गवाः ॥१८॥
त्वदाज्ञयाऽऽययुः सर्वे सम्राजः खण्डगास्तथा ।
परखण्डगताश्चापि वैमानिका बलोत्कटाः ॥१९॥

अहं वैश्यो ज्ञानविष्णोः सुतश्चक्रसमन्वितः ।
ययौ स्वयंवरे तत्र रूपैश्वर्यगुणान्वितः ॥२०॥
त्वं मां विलोक्य सर्वांस्तान् विहाय परमेश्वरी ।
सभामध्ये ददौ मालां मम कण्ठेऽतिशोभनाम् ॥२१॥
अथ राजन्यवर्गास्ते क्रुद्धा युद्धार्थमुत्थिताः ।
मया सुदर्शनेनैवाऽयुतभूपा निपातिताः ॥२२॥
साधारणानां संख्या न दैत्याः सर्वे हता मया ।
दानवा निहताश्चाप्यसुराः सर्वे निपानिताः ॥२३॥

पिता ते रक्षितस्त्वेको भक्तो मे सोऽभवत्ततः ।
राज्यं निजं सुधाक्षिण्यै दत्तवान् पुत्रवर्जितः ॥२४॥
मया सर्वं कृतं राज्यं सहस्रवत्सरं ततः ।
धर्माः संस्थापिता लोके प्रजासु देवपितृजाः ॥२५॥
मर्यादा दानयज्ञानां स्थापिता च पुनर्मया ।
**अनादिश्रीचक्रनारायणेन** सर्वजिष्णुना ॥२६॥

स्मर नारायणीश्रि ! त्वं साम्राज्यं तव वै तदा ।
जानाम्यहं हि तत् सर्वं नान्ये जानन्ति केचन ॥२७॥
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिर्भवेद् ध्रुवम् ।
अन्येऽवताराः शतशो धर्मरक्षाकरा मम ॥२८॥
जातास्तदानीं बहुधा देवमानवसिद्धजाः ।
धर्मरक्षाकरा मुक्तिप्रदास्तान् पद्मजे ! स्मर ॥२९॥
अथापि वेधसस्त्वेकचत्वारिंशे तु वत्सरे ।
अध्वराख्ये त्रिपञ्चाशत्कल्पे मनौ तु सप्तमे ॥३०॥

सप्तषष्ठितमे चापि कलौ प्राकट्यमेव मे ।
अभवत्तच्छृणु श्रि ! त्वं परब्रह्मण एव ह ॥३१॥
कलेर्बलेऽतिसंव्याप्ते जने म्लेच्छमये तथा ।
एकाकारे सर्वलोके वर्णाश्रमविवर्जिते ॥३२॥
वितस्तिमात्रदेहे च पृथ्वीविवरमन्दिरे ।
तृणमूलादने लोके दैवपैत्र्यविवर्जिते ॥३३॥
कुटुम्बलोपे सर्वत्र स्वार्थसम्बन्धमात्रके ।
यथेष्टयुगले लोके मम भानविवर्जिते ॥३४॥

उपद्रवाधिके चाल्पसुखे चाश्रयवर्जिते ।
जाते च सत्यधर्माणां स्थापनार्थं स्वयं हरिः ॥३५॥
प्रादुरभवं भूमौ वै भक्तस्य पुत्रतां गतः ।
नाम्ना द्रावणविप्रस्य चतुर्भुजः स्वयं प्रभुः ॥३६॥
त्वं तदा ब्रह्मवर्चस्था मम देहे स्थिता सदा ।
अभवोऽदृश्यरूपा श्रीर्विजयाख्या मया सह ॥३७॥
आसुराणां विनाशार्थं गरुडः संस्मृतो मया ।
रथो दिव्यो गजाश्चापि चतुर्दन्ताः सितप्रभाः ॥३८॥

आयुधानि समस्तानि गदाखड्गशराऽसयः ।
धनुश्शक्तिवज्रचक्रप्राशतोमरकुन्तलाः ॥३९॥
अस्त्रशस्त्रधरश्चाऽहं त्वया विजयया सह ।
जैत्रं रथं समास्थाय गारुडध्वजमूर्ध्वगम् ॥४०॥
हस्तिवाह्यं व्योमगं च युयुधेऽसुरकोटिभिः ।
नाशिताश्च नृपाः पूर्वं म्लेच्छा दैत्येश्वरा बलाः ॥४१॥
दानवेशाश्चासुरेशास्ततो म्लेच्छप्रजादिकाः ।
मया च रक्षितास्तत्र संग्रामे शरणागताः ॥४२॥
कृतास्ते पाययित्वाऽम्भो पादयोर्ब्राह्मणाः पुनः ।
निष्कासिताश्च ते सर्वे मत्प्राकट्यानलान्तरात् ॥४३॥

पाविताश्च कृताः कायाकल्पिता द्विजकोटयः ।
स्थापितास्तेषु सर्वेषु धर्मा मे सत्यसंभवाः ॥४४॥
ममाऽस्तित्वबलेनाऽपि भूतानि सात्त्विकानि वै ।
संभूतानि समस्तानि नरा नार्योऽतिसात्त्विकाः ॥४५॥

सत्यधर्मपराः सर्वे संभूता मत्प्रभावतः ।
पवनाऽनलवार्भूमिव्योमाद्याः सत्त्वतां गताः ॥४६॥
वृक्षवल्लीतृणाद्याश्च रसपूर्णास्तदाऽभवन् ।
विप्राः कृता हि राजानो यज्ञाश्चापि प्रवर्तिताः ॥४७॥
आस्तिक्यं दानधर्माश्च विवाहाश्च प्रवर्तिताः ।
साधुसाध्वीजनाश्चापि सन्तः सिद्धाः शुभाः कृताः ॥४८॥
तिष्यो विनाशितश्चापि सत्यः संस्थापितो मया ।
देवाश्च रक्षिताः सर्वे ऋषयः स्थापिताः पुनः ॥४९॥

मन्दिराणि कारितानि होमशाला विधापिताः ।
सत्यत्रेतायुगकालमवसं भूतले तदा ॥५०॥
स्मर लक्ष्मि ! तदा चमत्कारं मम पुरातनम् ।
अनादिश्रीसत्यनारायणं श्रीविजयान्वितम् ॥५१॥
परब्रह्म स्वयं सत्यस्थापकं चावतारिणम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥५२॥
एवमन्येऽप्यवतारास्तत्र तत्र सहस्रशः ।
मम जातास्तु तान् सर्वान् जानाम्यहं न चेतरः ॥५३॥
पठनाच्छ्रवणादस्य सत्यधर्माश्रितो भवेत् ।
भुक्तिर्मुक्तिर्भवेच्चापि यथेष्टफलवान् भवेत् ॥५४॥
अथाऽन्यन्मम दिव्यं च प्राकट्यं कथयामि ते ।
ब्रह्मणो द्वाचत्वारिंशाऽब्दे हिरण्याभिधानके ॥५५॥
कल्पे नवतिसंख्ये चाऽऽरम्भे चाद्यमनोस्तथा ।
पृथ्व्यां द्वादशखण्डानां विभाजकास्तु पर्वताः ॥५६॥
सपक्षाश्च स्वतन्त्राश्च तथाऽन्ये द्वीपपर्वताः ।
चेतनाः सबला मूर्ताः स्थानार्थे वादमादधन् ॥५७॥
अहं मेरोः सन्निधाने निवत्स्यामि न दूरतः ।
अहं चाऽहं तथेत्येवमन्योन्येषां विवादनम् ॥५८॥
अभवद् बलिनस्तत्र ये चासँस्ते तु वै बलात् ।
इष्टस्थलेष्ववसँश्च परे याता मनुं प्रति ॥५९॥
स्वस्वकष्टनिवेदार्थं मनुनाऽऽहूय बोधिताः ।
तथापि मेनिरे नैव बलिष्ठास्ते मनोर्वचः ॥६०॥
अथेन्द्राय ददावाज्ञां वज्रधराय शिक्षणम् ।
पर्वतेभ्यः प्रदातुं चान्यथा दण्डयितुं नगान् ॥६१॥
इन्द्रस्त्वागत्य भूभागे मेरौ मेरोः समीपतः ।
पर्वतान् मूर्तरूपाँश्चाऽऽहूय जगाद तद्धितम् ॥६२॥
ब्रह्मणा निर्मिता यूयं पृथ्वीस्थैर्यस्य हेतवे ।
खण्डविभागकार्याय रत्ननिधानहेतवे ॥६३॥
प्रजारक्षणकार्याय खण्डप्राकारहेतवे ।
ये ये यत्र नियुक्तास्ते तत्र तत्रैव सर्वथा ॥६४॥
निवसन्तु नान्यथा वै हितं मे वचनं यतः ।
अन्यथा भवतां पक्षान् शातयित्वा बलादहम् ।
वज्रेण सर्वथा युष्मान् पातयिष्ये यथास्थलम् ॥६५॥
इत्येवं गर्वयुक्तं वै श्रुत्वेन्द्रवाक्यमुल्बणाः ।
पर्वतास्तूर्णमेवैते समुत्पेतुर्विहायसा ।
सर्वे बलिनो गर्विष्ठाः स्वेच्छारूपधरास्तदा ॥६६॥
ग्रहतुल्या महेन्द्रस्योपरि निपेतुरेव ह ।
इन्द्रस्तु मर्दितस्तत्र मृतप्रायो बभूव ह ॥६७॥
वज्रं वज्रधरस्यापि नष्टं चूर्णं बभूव च ।
इन्द्रबलं हतं दीर्घभूभृद्भिश्चूर्णितं तदा ॥६८॥
कच्चरिताः सुराद्याश्च पलायनं प्रचक्रिरे ।
भूभृतो व्योमगाश्चापि युद्धं चक्रुः सुरैः सह ॥६९॥
पृथ्वी भारेण हीना च समतौल्यं विहाय सा ।
महाजलतलं गन्तुं पार्श्वनिम्ना बभूव ह ॥७०॥
अथोत्पाता बभूवुश्च ग्रहाणामपि सर्वतः ।
वायूनामपि चाऽस्थैर्यं पर्वतैश्च कृतं ह्यभूत् ॥७१॥
गगनं कम्पते सर्वं समण्डलं लये यथा ।
पृथिव्याः रक्षणं स्थैर्यं पर्वतस्थैर्यलम्बितम् ॥७२॥
पृथ्वीस्थैर्ये ततो मेरोः स्थैर्यं ध्रुवस्य चापि वै ।
सत्येवं स्वर्गलोकानां स्थैर्यं सुखं भवेदिति ॥७३॥
विचार्य सहसा ब्रह्मा रुद्रो विष्णुश्च देवताः ।
महान्तो नम्रभावाश्च सान्त्वनायुक्तबोधिनः ॥७४॥
बोधयामासुरेवैतान् पर्वतान् बहुधा तदा ।
नियुक्तस्थानवासार्थं तथाप्येते न मेनिरे ॥७५॥
हिरण्यकः कानकश्च राजतो राजकस्तथा ।
माणेयश्च वैष्णवश्च हैमेयश्च दिगीशकः ॥७६॥
भैरवश्च महेन्द्रश्च तथोदयनपर्वतः ।
आरुणश्च महाभश्च लोकालोकश्च मेरुकः ॥७७॥
एवमन्ये महारौद्रा मेनिरे न तदा सुराः ।
पर्वतानां महाक्लेशप्रशमाय नरायणम् ॥७८॥
परमेशं ह्यनादिश्रीकृष्णनारायणं हरिम् ।
सस्मरुस्तूर्णमेवाऽहं शंखचक्रगदाधरः ॥७९॥
परब्रह्म स्वयं तत्राऽऽजगाम तूर्णमेव ह ।
सुदर्शनं धृतं चक्रं गदा पृथ्व्यां धृता मया ॥८०॥
यत्र चोर्ध्वाऽभवत् पृथ्वी तत्राऽपेक्षितवस्ततः ।
समतोलाऽभवत् सा च रक्षिताऽऽयुधभारतः ॥८१॥
पर्वतांश्च समाहूय वरदानेन ते ततः ।
योजिताश्च मया लक्ष्मि ! मम वासकृता हि ते ॥८२॥
ये मयोक्तेषु देशेषु स्थास्यन्ति पर्वताः क्षितौ ।
तत्र तत्राऽहमेवापि स्थास्ये श्रीपुरुषोत्तमः ॥८३॥
ततस्ते पर्वतास्तूर्णं मम वाक्यं समाश्रिताः ।
मेरुर्मध्ये च परितो लोकालोको विधापितः ॥८४॥

चतुष्कोणेषु चत्वारो लग्ना समुद्रगाः कृताः ।
हिरण्यकोऽग्निकोणे च कानको निर्ऋतेऽर्कके ॥८५॥
राजतश्च मरुत्कोणे रत्नकश्चेशकोणके ।
पूर्वे चोत्तरदक्षावायतौ माणेयवैष्णवौ ॥८६॥
दक्षिणे प्राक्पश्चलग्नौ हैमेयश्च दिगीशकः ।
पश्चिमे चोत्तरदक्षौ भैरवश्च महेन्द्रकः ॥८७॥
उत्तरे चारुणो महाभश्चायतौ निवेशितौ ।
पूर्वाऽब्धौ निहितश्चाप्युदयनः सर्वभाऽन्वितः ॥८८॥
एवमन्ये पर्वताश्च मध्ये मध्ये निवेशिताः ।
अथ ते प्रार्थनां चक्रुः पक्षनाशो हि नो न वै ॥८९॥
भवेदिति मयोक्तं च सपक्षाः सन्तु वै स्थिराः ।
यद्याकाशे गतिमन्तो भविष्यथ तदा ह्ययम् ॥९०॥
महेन्द्रो वज्रधारेण शातयिष्यति पक्षकान् ।
ततस्ते स्थैर्यमापुश्च स्वस्वस्थाने यथासुखम् ॥९१॥
अथ देवादयः सर्वे पूजयित्वा च मां ययुः ।
निजलोकान् पर्वतेषु निवासं च त्वया सह ॥९२॥
व्यधापयं बहुरूपधरो रक्षाकरः प्रभुः ।
आकल्पान्तं न्यवसं वै त्वया हिरण्यया सह ॥९३॥
अनादिश्रीहिरण्यश्रीनारायणः पुमुत्तमः ।
वाग्बद्धोऽहं पर्वतेषु न्यवसं बोधयन् सुरान् ॥९४॥
मानवानपि पितॄंश्च महर्षीन् व्योमचारिणः ।
अथ स्थिराऽभवत् पृथ्वी पर्वताः सुखिनोऽभवत् ॥९५॥
निर्भया मम वासेन प्रजाश्च सुखितास्तथा ।
अनादिश्रीहिरण्मयनारायणं परं प्रभुम् ॥९६॥
स्मर नारायणीश्रि ! त्वं त्वां हिरण्यां तथा स्मर ।
एवमन्येऽप्यवतारा देवमानवजन्तुषु ॥९७॥
कार्यापेक्षा अभवँश्च तान् जानामि समस्तकान् ।
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिर्भवेच्छुभा ॥९८॥
मम स्मर्तुर्गृहे वासो नित्यदा मम जायते ।
यत्र मे भावयुक्ताश्च भक्ता वसन्ति तत्र च ॥९९॥
वसाम्येव न सन्देहो पर्वते च वनेऽपि च ।
गृहे प्रासादके चापि महारण्ये जलेऽपि च ॥१००॥
मम भक्तस्य रक्षार्थं पृथ्व्या रक्षार्थमित्यपि ।
देवानां चापि लोकानां सृष्टेः रक्षार्थमित्यपि ॥१०१॥
निवसामि स्थलं कृत्वा तद्रूपोऽमानवोऽपि सन् ।
यत्र वसामि तत्रैव धामाऽक्षरं ममाऽस्ति च ॥१०२॥
मुक्ताश्चायान्ति तत्रैव सर्वं तत्र प्रपद्यते ।
मायिका नैव पश्यन्ति पश्यन्ति दिव्यचक्षुषः ॥१०३॥
सिद्धा मुक्ताः साधवश्च सन्तः सन्यासिनोऽमलाः ।
साध्व्यः सत्यश्च भक्तांश्च पश्यन्ति मजनिं प्रिये ! ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसश्चत्वारिंशे वत्सरे दैत्यानां नाशार्थम् अनादिश्रीचक्रनारायणस्य सुधाक्षिणीश्रीसहितस्य, एकचत्वारिंशे वत्सरे च सत्ययुगधर्मस्थापनार्थम् अनादिश्रीसत्यनारायणस्य विजयाश्रीसहितस्य, द्वाचत्वारिंशे वत्सरे च पर्वतानां स्थित्यर्थम् अनादिश्रीहिरण्यनारायणस्य हिरण्याश्रीसहितस्य, प्राकट्यमित्यादिनिरूपणनामा त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं प्राकट्यं मम चेतरत् ।
ब्रह्मणो राजते वर्षे त्रिचत्वारिंशके पुरा ॥ १ ॥
कल्पे द्वाषष्टियुक्सप्तशते मनौ त्रयोदशे ।
भक्तो विष्णोर्नैष्ठिकश्चाऽभवन्नाम्ना निरञ्जनः ॥ २ ॥
विप्रो द्रुमनिवासश्च मूलपत्रफलाशनः ।
सत्यधर्मपरो नित्यं हरेर्मे जपतत्परः ॥ ३ ॥
प्राणायामपरश्चापि सिद्धासनपरायणः ।
प्रत्याहारपरश्चापि धारणाध्यानतत्परः ॥ ४ ॥
कायेन मनसा वाचाऽऽत्मना विष्णुपरायणः ।
संयमी ब्रह्मविद्वाँश्च रागद्वेषादिवर्जितः ॥ ५ ॥
शुद्धस्फाटिकवद्भास्वान् व्योमवन्निर्मलान्तरः ।
सत्संगस्नेहपूर्णश्च सतां सेवापरायणः ॥ ६ ॥
ब्रह्मदृष्टिर्ब्रह्मयत्नो ब्रह्मवत् सिद्धिशेवधिः ।
यथा ब्रह्मा यथा विष्णुर्यथा शंभुस्तथा ह्यहम् ॥ ७ ॥
उपासनाबलात् सर्वैश्वर्याब्धिः समजायत ।
नैकरूपधरश्चापि परकायप्रवेशवान् ॥ ८ ॥
देवेश्वरादिलोकेषु चाऽव्याहतगतिस्तथा ।
समाधिसिद्धिमान् भक्तो मम भक्तिपरायणः ॥ ९ ॥
स त्वेकदा स्थितो वृक्षमूलेऽविचारयद् यथा ।
विष्णुं चतुर्भुजं त्वद्य पृच्छामि हृदयस्थितम् ॥१०॥
नारायणस्य वै दिव्यं दर्शनं कीदृशं त्विति ।
विचार्येत्थं प्रगे स्नात्वा पूजायां निषसाद सः ॥११॥
विष्णुं चतुर्भुजं न्यस्याऽऽर्चयत् सर्वोपचारकैः ।
ततः समाधिमासाद्याऽऽह्वयद् विष्णुं पुरःस्थितम् ॥१२॥

दिव्यरूपं च विष्णुं स पप्रच्छ विनयान्वितः ।
नारायणस्य वै दिव्यं दर्शनं कीदृशं त्विति ॥१३॥
विष्णुः प्राहाऽहमस्म्येव नारायणः प्रपश्य माम् ।
चतुर्भुजः श्रीनिवासः शंखचक्रगदाऽब्जवान् ॥१४॥
निरञ्जनश्च तं प्राह भवान्नारायणोऽपरः ।
परनारायणो नास्ति परं दर्शय मे त्विह ॥१५॥
विष्णुः श्रुत्वाऽभवत्तत्र सहस्रभुजवाँस्तदा ।
सहस्रविष्णुसदृशस्तेजसा वयसा गुणैः ॥१६॥
प्राह निरञ्जनं पश्य नारायणं हि मत्परम् ।
मादृशा विष्णवश्चास्मादुत्पद्यन्ते दिने दिने ॥१७॥
वर्षे वर्षे सहस्राणि विलीयन्ते पुनः पुनः ।
श्रुत्वा दृष्ट्वा च सम्पूज्य नत्वा प्राह निरञ्जनः ॥१८॥
यद्यप्ययं सहस्राक्षः सहस्रभुजवान् प्रभुः ।
परनारायणश्चास्ति तथाप्यस्मात्परोऽपरः ॥१९॥
नारायणो भवत्येव यस्य मे दर्शनं प्रियम् ।
भक्ताभिलाषां संवीक्ष्य ज्ञात्वा विष्णुस्ततः परम् ॥२०॥
रूपं विवर्तयामास महाविष्णवात्मकं द्रुतम् ।
महालक्ष्मीसेवितं च कोटिवैराजसदृशम् ॥२१॥
तेजसा वयसैश्वर्यैर्गुणैर्विभूतिवैभवैः ।
दर्शयामास तद्रूपं चाह भक्तं प्रपश्य माम् ॥२२॥
अयुताऽयुतबाहुं चाऽयुताऽक्षिपत्कजम् ।
इदं मे परमं रूपं कोटिवैराजकारणम् ॥२३॥
श्रुत्वा ज्ञात्वा वीक्ष्य नत्वा प्रपूज्य च निरञ्जनः ।
प्राह विष्णुं न चाप्येतत्परमं रूपमैश्वरम् ॥२४॥
इतोऽप्यन्यद् वर्तते तद् रूपस्याऽस्याऽपि कारणम् ।
मे तद् दर्शय रूपं वै परमोर्ध्वमितोऽपि यत् ॥२५॥
श्रुत्वा भक्तस्य भावं च ज्ञात्वा विष्णुस्ततः परम् ।
विवर्तयामास रूपं तत् ततोऽपि महत्तरम् ॥२६॥
महाविष्णुकोटितुल्यं कोट्यैश्वर्याधिकं परम् ।
रूपलावण्यमाधुर्यतेजआदिभिरुद्धतम् ॥२७॥
कोट्ययुताक्षिबाहुं कोट्ययुतपदाम्बुजम् ।
कोटिकोटिगुणोर्ध्वं च प्राह पश्य ततोऽधिकम् ॥२८॥
निरञ्जनस्तु तं वीक्ष्य नत्वा प्रपूज्य भाववान् ।
कृत्वा च दण्डवत् पुष्पाञ्जलिं दत्त्वा जगाद ह ॥२९॥
एतद्रूपं मया दृष्टं कृपया तव सद्गुरो ।
सर्वैश्वर्यभृतं सर्वेश्वराणां च नियामकम् ॥३०॥
ईश्वराणां च या सृष्टिस्तस्यास्तेषां च शासकम् ।
तृप्तोऽस्मि वीक्ष्य परमं रूपं ते परमप्रभो ॥३१॥
किन्तु नात्यन्ततृप्तोऽस्मि चाग्रे धावति मे मनः ।
द्रष्टुं ते परमं रूपं ततोऽपि पारमेश्वरम् ॥३२॥
श्रुत्वा दृष्ट्वा भक्तभावं विष्णुर्भूमस्वरूपकम् ।
द्रुतं विवर्तयामास ततोऽब्जाऽर्बुदनेत्रकम् ॥३३॥
अब्जाऽर्बुदादिचरणं ततो कोट्यब्जसद्गुणम् ।
कोटिभूमोत्पादकं च कोटिसंकर्षणादिकृत् ॥३४॥
वासुदेवात्मकं दिव्यं कोटिप्रद्युम्नसेवितम् ।
कोटितेजोमहैश्वर्योऽनिरुद्धादिसमन्वितम् ॥३५॥
वासुदेवं प्रभुं वीक्ष्य संहृष्टमानसो ह्यति ।
बभूव भक्तराट् तूर्णं नेमे तं दण्डवन्मुदा ॥३६॥
तुष्टाव च हृदा पश्चाद् विष्णुं प्राह पुनः स च ।
नात्र तृप्तिं मनश्चैति प्रदर्शय ततोऽधिकम् ॥३७॥
यावत् चतुष्टयं तावत्परं रूपं न तद् भवेत् ।
एक एवाऽद्वितीयः सः परमेशः परात्परः ॥३८॥
श्रुत्वा ज्ञात्वा भक्तभावं विष्णुस्ततः पुनर्निजम् ।
लक्ष्मीनारायणरूपं दर्शयामास शोभनम् ॥३९॥
भक्तस्तं चापि नत्वैव प्रपूज्य दण्डवद् व्यधात् ।
नैतद्रूपं च तत्प्राह ततो विष्णुः पुनश्च तम् ॥४०॥
राधाकृष्णस्वरूपं स्वं दर्शयामास वै तदा ।
नत्वाऽभ्यर्च्य स्तुतिं कृत्वा भक्तः प्राह पुनस्तथा ॥४१॥
इतोऽप्यूर्ध्वं परब्रह्म नारायणेश्वरेश्वरः ।
सर्वान्तर्यामिकः श्रीमान् परेशः पुरुषोत्तमः ॥४२॥
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ।
अक्षराधिपतिर्नाथो मुक्तकोट्यादिसेवितः ॥४३॥
यस्तं निरञ्जनं यावदवताराऽवतारिणम् ।
द्रष्टुमिच्छामि वै विष्णो कृपा चेन्मयि दर्शय ॥४४॥
विष्णुर्निरञ्जनं प्राह मेऽधिकारो न तत्र वै ।
तद्रूपं केऽपि शक्ता नो धर्तुं तस्याऽवतारिणः ॥४५॥
अवतारा ईश्वरा वा सगुणा निर्गुणा अपि ।
अंशा विभूतयश्चापि कलाऽऽवेशा महेश्वराः ॥४६॥
विभवाश्चापि वा व्यूहा धर्तुं शक्ताः कदापि न ।
अवतारी स्वयं धर्तुं शक्तो रूपाणि तानि वै ॥४७॥
तस्मान्नाऽहं समर्थोऽस्मि प्रदर्शयितुमेव तम् ।
यदि त्वं वीक्षितुं तं चेद् समिच्छसि निरञ्जन ! ॥४८॥
मदन्तर्यामिणं तं त्वं पूजयस्व परेश्वरम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥४९॥
यस्त्वदात्मा स एवाऽपि ममात्मा हृदये स्थितः ।
अक्षरे परमे धाम्नि स एवाऽऽत्मा सदा स्थितः ॥५०॥

परब्रह्म स्वयं तुष्टस्तव ध्यानेन सेवया ।
तीव्रयोपासनयाऽपि स्नेहभक्त्याऽतिमात्रया ॥५१॥
स्वयं दृष्टिपथं चात्राऽऽगमिष्यति कृपावशः ।
भज तं श्रीपतिं सर्वपतिं ह्येकं परेश्वरम् ॥५२॥
सर्वमुक्तपतिं सर्वशक्तिपतिं रमापतिम् ।
माणिकीवाहिनं तं सं भज द्रक्ष्यसि केशवम् ॥५३॥
द्विभुजं सर्वशोभाढ्यं सर्वान्तर्यामिणं च तम् ।
इत्युक्त्वा सहसा विष्णुस्तिरोऽभवत् ततः परम् ॥५४॥
निरञ्जनो व्यधाद् ध्यानं मम सर्वावतारिणः ।
धारणां च व्यधाच्चापि ध्यानं पुनर्व्यधात्तथा ॥५५॥
समाधिं च ततो लेभे मयि श्रीपुरुषोत्तमे ।
अक्षरे परमे धाम्नि समाययौ समाधिना ॥५६॥
ददर्श मम रूपं च त्वया साकं परात्परम् ।
दिव्यं मुक्तजुषं सर्वावतारादिविलक्षणम् ॥५७॥
एकमेवाऽद्वितीयं तत् सर्वोदग्रं परात्मकम् ।
यत्र सर्वावताराश्च सर्वधामानि यानि च ॥५८॥
सर्वेश्वराश्च तल्लोकाः सृष्टयश्च समस्तिकाः ।
निरञ्जनो ददर्शैव मूलं रूपं ददर्श च ॥५९॥
प्रार्थयामास भक्तो मां गन्तुं लोके निजे सह ।
आत्यन्तिकविमुक्त्यर्थं जीवानां गोचरो भव ॥६०॥
भक्तवश्योऽप्यहं तस्मै तथास्त्वेवं तदाऽवदम् ।
त्वया साकं श्रिया चाऽहं भक्तेन सह भूतले ॥६१॥
समाययौ तदा लक्ष्मि! साक्षाच्छ्रीपुरुषोत्तमः ।
भक्तेच्छापूरकश्चाऽहं भूलोके मानवोऽभवम् ॥६२॥
निरञ्जनस्य वै गेहे प्राकट्यं मे ह्यजायत ।
त्वं तदा पार्श्ववासस्य तापसस्य द्विजस्य च ॥६३॥
नाम्ना निष्किञ्चनस्यापि पुत्री व्यजायथाः प्रिये ।
स च कालेनाऽऽपर्यन्मे ज्ञात्वा मामवतारिणम् ॥६४॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
परब्रह्माऽक्षरातीतं परमेशं सनातनम् ॥६५॥
ततश्चाहमनादिश्रीनैरञ्जनिनरायणः ।
ख्यातिमातस्त्वया साकं नैष्किञ्चनीश्रिया प्रिये ॥६६॥
मन्वन्तरं न्यवसं च मोचयन् मानवान् श्रितान् ।
स्मर लक्ष्मि! तदा मां त्वां प्राकट्यं स्मर शोभनम् ॥६७॥
अन्येऽवतारास्तत्रापि कल्पेऽभवन् मम प्रिये ! ।
सर्वान् जानाम्यहं नान्ये जानन्ति तान्नरायणि ॥६८॥
असंख्यजीवा मोक्षे वै तदा सम्प्रेषिता मया ।
त्वया चासंख्यजीवाश्च साध्व्यश्चापि विमोचिताः ॥६९॥
पठनाच्छ्रवणाच्चास्य स्मरणाद्धारणादपि ।
भुक्तिर्मुक्तिर्भवेच्चापि यथेष्टानन्दवान् भवेत् ॥७०॥
अग्रहा नाम ते माता मम माताऽऽशुतोषिणी ।
प्राप्य पुत्रीं श्रियं पुत्रं परमेशं हरिं प्रभुम् ॥७१॥
मेना ते जन्मसाफल्यं मुक्तान्यौ ते ह्युभे सदा ।
आचार्याण्यौ तु ते जाते लोकानां मातरावुभे ॥७२॥
यशस्विन्यौ मोक्षदात्र्यौ सर्वपूज्ये पराऽऽस्पदे ।
वंशौ तौ सर्वदा पूज्यौ बभूवतुस्तदा प्रिये ॥७३॥
अथेतरच्च लक्ष्मि! त्वं शृणु प्राकट्यमेव मे ।
वेधसो वत्सरे चतुश्चत्वारिंशे कपालके ॥७४॥
नवनवत्यूर्ध्वनवशते कल्पेऽद्रये मनौ ।
पतिव्रता मम भक्ता नाम्ना पुण्यवती सती ॥७५॥
विप्राणी देवपुष्पस्य विप्रस्याऽभूद् विवाहिता ।
शीलपरा धर्मपरा देवपूजापरायणा ॥७६॥
पतिसेवापरा चापि सत्यधर्मपरायणा ।
तीर्थकर्त्री व्रतकर्त्री ध्यानयोगपरायणा ॥७७॥
विप्रोऽपि धार्मिकश्चासीत् साधुसेवापरायणः ।
युगलं निरपत्यं वै वार्धक्याऽभिभवाऽन्वितम् ॥७८॥
अजायत सुतो नैव सुता नापि व्यजायत ।
सती पुत्रेषणाखिन्ना भाग्यं शुशोच वै मुहुः ॥७९॥
एकदा भाग्यकर्तारं वेधसं सा शशाप ह ।
जडो भव प्रजाहीनो यथा चावां तथा भव ॥८०॥
द्रुतं तदा सत्यलोके वेधसो हस्ततस्तदा ।
निर्माणदण्डोऽप्यपतत् कुलालस्य कराद् यथा ॥८१॥
संसारचक्रं न्यपतत् कीलकात् पार्श्वभूतले ।
ब्रह्माण्डघटपिण्डश्च विशीर्णो वेगघातितः ॥८२॥
तन्तुर्दूरं तथाऽऽक्षिप्तं क्षिप्तान्युपकराण्यपि ।
ब्रह्मा तु जडतां प्राप्तः शववन्मूर्छितोऽभवत् ॥८३॥
घटशाला सकम्पा च व्यजायत विमर्दनात् ।
कृतान्यन्यानि चाण्डानि भग्नानि चक्रतोऽभवन् ॥८४॥
हाहाकारो महान् जातो घटशालाभितस्तदा ।
ब्रह्मा स्रष्टा मृतश्चेति मृतप्रायो हि मूर्छितः ॥८५॥
कारणं किं न वै विद्मो जगुः कार्यकरास्तथा ।
सावित्र्याद्याश्चाययुर्वै रुरुदुर्वीक्ष्य मूर्छितम् ॥८६॥
सिद्धा महर्षयश्चाप्याययुस्तत्र प्रजेश्वराः ।
ब्रह्मपुत्राः कार्यकराः शालायां समुपाययुः ॥८७॥
दिक्पालाश्चाययुः सर्वे ब्रह्माणश्चापरेऽपि च ।
शापजडं तथा वीक्ष्य वीक्ष्य सृष्टिविहीनकम् ॥८८॥

विलापं बहुधा चक्रुस्ते सर्वे तत्र संहताः ।
अथ ये ये ब्रह्मपुत्रा ब्रह्मपुत्र्यस्तथा च याः ॥८९॥
ब्रह्मणश्चानपत्यत्वशापेनापि समावृताः ।
मृत्यवे समजायन्त रुग्णाश्च मूर्छिता द्रुतम् ॥९०॥
यथा द्वौ पुत्रहीनौ तौ पुत्रीहीनौ तथा यथा ।
तथा ब्रह्माऽपि पुत्र्यादिहीनो साविन्त्रिका तथा ॥९१॥
पुत्रपुत्र्यादिहीना च भवितुं दैवयोजिता ।
निजपुत्रान्निजपुत्रीर्ददर्श जडरोगिणः ॥९२॥
मुमूर्षून् सहसा तत्र यतः शापो भयंकरः ।
द्वयोरेवावशेषार्थं शापः सत्याः प्रवर्तितः ॥९३॥
तदा सर्वैः स्मृतो विष्णुः शंभुर्विराट् नरायणः ।
सर्वे क्षणादाययुश्च शापरोधनहेतवे ॥९४॥
मिलित्वा कारणं मार्गयित्वा ययुर्द्रुतं सतीम् ।
पुण्यवतीं प्रति क्षमायां सान्त्वयामासुरेव ताम् ॥९५॥
सा प्रपूज्य भगवतः सर्वान् प्राह हृदि स्थितम् ।
भाग्यं मम कथं पुत्रपुत्रीहीनं कृतं यतः ॥९६॥
नाऽहं शापं प्रदत्तं निवर्तयिष्ये सुरेश्वराः ।
यथागता गृहं यान्त्वन्यथा शप्ता भविष्यथ ॥९७॥
ज्ञात्वा श्रुत्वा च भक्ताया वचनं बलवत्तदा ।
भीताः सर्वे सस्मरुश्च श्रीपतिं पुरुषोत्तमम् ॥९८॥
तैः स्मृतोऽहं भगवानागतस्तत्र तु पद्मजे ।
त्वया साकं ह्यनादिश्रीकृष्णनारायणो हरिः ॥९९॥
पुण्यवती प्रभुं वीक्ष्य लज्जानम्रा बभूव ह ।
इष्टदेवं परमेशं वीक्ष्य मच्छरणं गता ॥१००॥
पपात पादयोस्तूर्णं पत्या सह च मे च ते ।
मयोक्ता सान्त्विता सा तु ययाचे युगलं तदा ॥१०१॥
पुत्रं मां च तथा पुत्रवधूं त्वां च ततः परम् ।
वेधसश्च भवेच्छापनिवृत्तिर्भाग्यरोहणात् ॥१०२॥
तथाऽस्त्विति मया प्रोक्ता सा जगाद च वेधसः ।
जडत्वं यातु चावाभ्यां तुल्यता चापि माऽस्तु च ॥१०३॥
सप्रजत्वं बहुपुत्रपुत्रीमत्वं भवत्वपि ।
इत्युक्तमात्रे तूर्णं सा घटशाला सुचेतना ॥१०४॥
ब्रह्मा च ब्रह्मणश्चाप्यपत्यानि चेतनानि वै ।
जिजीविषवोऽजायन्त सतीवाक्यप्रणोदिताः ॥१०५॥
अहं तस्याः सुतो जातस्तत्रैव परमेश्वरः ।
अनादिश्रीपुण्यनारायणः श्रीपुरुषोत्तमः ॥१०६॥
त्वं च कल्याणिकानाम्न्या भक्ताया मम पुत्रिका ।
अभवश्चाग्निहोत्रस्य द्विजस्याऽपत्यरूपिणी ॥१०७॥
तेन मह्यं प्रदत्ता त्वं विधिना मद्विवाहिता ।
अभवस्त्वं तदा लक्ष्मि ! कल्याणीश्रीरितिश्रुता ॥१०८॥
स्मर सर्वं जनुस्ते मे सर्वसौभाग्यकारकम् ।
पठनाच्छ्रवणाच्चापि स्मरणाद् भुक्तिमुक्तिदम् ॥१०९॥
अन्ये तथाऽवतारा मे तदाऽभवन् सहस्रशः ।
भुक्तिमुक्तिप्रदाश्चापि लोकरक्षाकराः प्रिये ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसस्त्रिचत्वारिंशे वत्सरे भक्तार्थम् अनादिश्रीनैरञ्जनी-नारायणस्य नैष्किञ्चनीश्रीसहितस्य, चतुश्चत्वारिंशे वत्सरे च ब्रह्मणः पुण्यवतीशापनिवृत्त्यर्थम् अनादिश्रीपुण्यनारायणस्य कल्याणिका-श्रीसहितस्य च प्राकट्यमित्यादिनिरूपण-नामा चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि ततश्चोर्ध्वं प्राकट्यं मेऽप्सरोऽब्दके ।
वेधसः पञ्चचत्वारिंशाऽब्दे कल्पे सहस्रके ॥ १ ॥
द्वितीये च मनौ सर्वाप्सरसां भक्तिभावनैः ।
आकृष्टोऽहं मोक्षदाताऽनादिकृष्णनरायणः ॥ २ ॥
आविरासं पृथिव्यां वै शृणु तत्पद्मजे यथा ।
स्वर्गे सत्ये महेन्द्रस्य सभायां देवकोटिषु ॥ ३ ॥
तथाऽन्यत्र प्रशंसा वै सर्वत्र मम जायते ।
रूपे गुणे स्वभावे चैश्वर्ये सुखे विलासने ॥ ४ ॥
स्पर्शे शब्दे विहारे च शीले तृप्तौ रसे बले ।
आनन्दे सहवासे च योगे हास्ये च नर्मणि ॥ ५ ॥
शयने सेवने मोहे हावे भावे विकर्षणे ।
मोदे प्रमोदे रमणे उत्सवे भोजने स्थितौ ॥ ६ ॥
आसने वाहने याने गृहे पाने च नर्तने ।
शृंगारे च सुगन्धे च वीर्ये पराक्रमे कृतौ ॥ ७ ॥
रञ्जने च क्रियायां च प्रसन्नत्वे प्रभोगने ।
अनादिश्रीकृष्णनारायणतुल्यो न चापरः ॥ ८ ॥
एवं प्रशंसां श्रुत्वैवाऽप्सरसः कोटिशो दिवि ।
स्पृहां चक्रुर्मम योगे भोगे विलासने रतौ ॥ ९ ॥
तास्तु भोगान् विहायैव मम प्राप्त्यर्थमुत्सुकाः ।
व्रतानि चक्रुर्बहूनि मानव इव योषितः ॥१०॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
अस्मत्पतिर्भवेद्येन तृप्ताः स्याम हि सर्वथा ॥११॥

इति संकल्प्य सर्वास्ताः पूजनं मम संव्यधुः ।
मयाऽप्याकाशवाण्या वै ताभ्यस्ततो निवेदितम् ॥१२॥
सर्वा भवन्तु मानुष्यो निजांशैः कन्यकाः शुभाः ।
राजपुत्र्यो विप्रपुत्र्यो भक्तपुत्र्यश्च सर्वथा ॥१३॥
अद्यारभ्य यथेष्टं वै गृह्णन्तु जन्म भूतले ।
मेरोः पश्चिमतो भागे खण्डे हेमरथाह्वये ॥१४॥
तत्राऽहं मानवो मिलिष्यामि वै क्षत्रपुंगवः ।
वर्चिष्णुवंशमूर्धन्यः परब्रह्म स्वयं हरिः ॥१५॥
इत्युक्तास्ता अप्सरसो दध्रुर्जन्मानि सर्वशः ।
अहं साकं त्वया लक्ष्मि खण्डे हेमरथाभिधे ॥१६॥
वर्चिष्णुक्षत्रियवंशे बृहदिन्द्रनृपालये ।
प्रभास्वतीमहिष्यां वै प्रादुरासं द्रुतं तदा ॥१७॥
शंखचक्रगदापद्मकौस्तुभादिविराजितः ।
भक्तौ मे पितरौ धन्यं भाग्यं मेनात एव च ॥१८॥
देवदुन्दुभयो नेदुर्महर्षयोऽपि मंगलम् ।
स्मरणं पूजनं चक्रुर्वर्धयामासुरीश्वराः ॥१९॥
पुष्पवृष्टिर्व्योममार्गादभवच्छुभशंसिका ।
उत्सवं चक्रिरे राजा प्रजाः सुरा महर्षयः ॥२०॥
अथ त्वं रुक्मचम्पाया राज्ञ्या गवेन्द्रभूपतेः ।
कुक्षौ तदाऽभवः प्रादुः सर्वसौभाग्यसुन्दरी ॥२१॥
शातकुंभाऽऽभदेहा च सर्वलक्ष्मसमन्विता ।
प्राप्ते विवाहयोग्ये च काले मह्यं समर्पिता ॥२२॥
तव पित्रा तथा मात्रा प्रदत्ता मम भामिनी ।
मया च विधिना तत्र विवाहिताऽतिसुन्दरी ॥२३॥
सम्राजस्तस्य राज्ञश्चोत्सवे वैवाहिके मम ।
आदेशान्नृपवंशाश्च श्रेष्ठिवंशास्तथा परे ॥२४॥
द्विजवंशाः क्षत्रवंशा वैश्यवंशाः समाययुः ।
अप्सरसश्च याः कन्या मां स्वप्ने ददृशुर्निशि ॥२५॥
विवाहो जायते नश्च हरिणा परमात्मना ।
तव विवाहरात्रौ ता ददृशुर्मां पतिं प्रभुम् ॥२६॥
अथ ता निर्णयं चक्रुर्मदर्थे वै स्वयंवरे ।
पतिं स्वयं ग्रहीष्यामो वरमालाप्रदानतः ॥२७॥
अथाऽहं परमात्मा च महैश्वर्यसमन्वितः ।
तासां मदर्थकन्यानां पितृभ्यां दर्शनं ददौ ॥२८॥
स्वप्ने ताभ्यां निजा पुत्री मह्यं दत्तेति चोत्सवे ।
तत उत्थाय पितरौ सर्वासां वै स्वभावतः ॥२९॥
तां तां सुतां दत्तवन्तौ मह्यं श्रीपरमात्मने ।
कोटिशोऽप्सरसो मां वै प्राप्य कान्तं यथेप्सितम् ॥३०॥
आनन्दं परमं प्रापुः सुखं प्रापुरनुत्तमम् ।
एकमन्वन्तरं राजा चक्रवर्ती तदाऽभवम् ॥३१॥
नाम्ना सम्राड्बृहद्ब्रह्मनारायणनृपेश्वरः ।
मम पुत्रास्तदा कोट्यर्बुदाब्जाः पुत्रिकास्तथा ॥३२॥
तथासंख्या अभवँश्च राजवंशेषु चार्पिताः ।
मम पौत्राश्च दौहित्रा ब्रह्मक्षत्रविशात्मकाः ॥३३॥
प्रजात्मकास्तथा जाता राजानोऽपि च भूतले ।
मन्वन्तरान्ते पत्नीस्ता मोक्षयित्वा ततः परम् ॥३४॥
अहं वनं जगामाऽपि साकं त्वया नरायणि ! ।
अरण्ये चाऽदृश्यभावं त्वया साकं गतोऽभवम् ॥३५॥
एवं ममापि लोकेषु पूजा ततः प्रवर्तिता ।
अनादिश्रीबृहद्ब्रह्मनारायणस्य सर्वदा ॥३६॥
रुक्मवत्या त्वया सार्धं चाऽऽकल्पान्तं हि पद्मजे ।
स्मर सर्वं शिवराज्ञि ! प्राकट्यं ते च मेऽपि च ॥३७॥
एवमन्येऽप्यवतारास्तत्कल्पे बहवोऽभवन् ।
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिः परा भवेत् ॥३८॥
सर्वतीर्थफलं स्याच्च यावद्व्रतफलं तथा ।
यावद्दानफलं चापि यावच्छ्रौतफलं भवेत् ॥३९॥
सर्वपापविनाशः स्यात् सर्वाऽऽनन्दाप्तिरित्यपि ।
सर्वप्रमोदभाक् स्याच्च मम प्राप्तिस्तथा भवेत् ॥४०॥
अथाऽपरं प्रवक्ष्यामि प्राकट्यं मम तच्छृणु ।
वेधसो वत्सरे षट्चत्वारिंशे ब्रह्मसारसे ॥४१॥
कल्पे नवशते षष्ठे मनौ चाद्ये कृते पुरा ।
ब्रह्मणा निर्मिता विप्रा मेधावन्तो महर्षयः ॥४२॥
ऊषुस्ते भूतले कर्मभूमौ त्वरण्यवासिनः ।
प्रत्यक्षदर्शिनः सर्वे सर्वधर्मपरायणाः ॥४३॥
ब्रह्मविद्याऽभवत् तेषां स्वाभाविकी प्रवर्तिका ।
अथ त्रेतायुगे प्राप्ते सांऽशे ह्रासं गता तदा ॥४४॥
तर्कवादा अभवँश्च महर्षयः परस्परम् ।
विस्मृतयोऽभवँश्चापि कालेनाऽविद्यया हताः ॥४५॥
ततश्चाराधयामासुर्मां श्रीशं पुरुषोत्तमम् ।
अनादिश्रीकृष्णनारायणं श्रीपरमेश्वरम् ।
अहमाविर्भवं तेषां मध्ये ज्ञानप्रदापकः ॥४६॥
विद्यामध्यापयामास ब्राह्मीं परां तथाऽपराम् ।
वेदविद्यां तथा चात्मविद्यां धर्मक्रियात्मिकाः ॥४७॥
विद्याश्चान्या महर्षिभ्योऽध्यापयामास वै तदा ।
कुतर्कनाशिनीं पूजाभक्तिबोधभृतां शुभाम् ॥४८॥

मोक्षदां स्वर्गदां विद्यामध्यापयं हितप्रदाम् ।
महर्षीणां गुरुश्चाऽहं वेदविद्याप्रदोऽभवम् ॥४९॥
ब्रह्मस्वरर्षिपुत्रः सन् गौरवे च पदे स्थितः ।
विप्रो भूत्वाऽवर्तयं वै महर्षिगणसेवतः ॥५०॥
आद्यापरान्तायुष्कोऽहं त्वया साकं सुविद्यया ।
छ्रदन्तरर्षिसुतया नाम्ना सुविद्यया श्रिया ॥५१॥
अनादिश्रीगुरुनारायणः श्रीपुरुषोत्तमः ।
स्मर त्वं त्वां सर्वविद्याधिष्ठात्रीं तु तदा प्रिये ॥५२॥
एवमन्येऽप्यवतारा बहवोऽपि तदाऽभवन् ।
जानाम्येतानहं सर्वान् स्मर तान् परमेश्वरि ! ॥५३॥
पठनाच्छ्रवणाच्चास्य तमो लीयेत मूलतः ।
ब्रह्मप्रकाशो जायेत तथाऽऽस्मदर्शितां व्रजेत् ॥५४॥
इत्येवं मम कमले प्राकट्यं कथितं तव ।
अथाऽन्यदपि कथये परब्रह्मण एव मे ॥५५॥
स्वर्धूनीवत्सरे सप्तचत्वारिंशे तु वेधसः ।
कल्पेऽष्टादशके त्रिंशच्छतोत्तरेऽष्टमे मनौ ॥५६॥
राजाऽभवन्मम भक्तो बृहद्धर्मा जनेश्वरः ।
स तु यज्ञं राजसूयं समारभत शोभनम् ॥५७॥
राजधान्यां प्रसिद्धायाम् ओजस्वत्यां नृपः स्वयम् ।
इष्टीश्च पशुयागौ च सोमयागान् व्यधापयत् ॥५८॥
नवत्रिंशद्द्विशिष्टैकशतमिष्टीनकारयत् ।
षट्सोमयज्ञकान् सप्त दर्वीहोमानकारयत् ॥५९॥
फाल्गुने शुक्लपक्षस्य प्रथमे प्रतिपद्दिने ।
समारभद्धि तज्यज्ञं वर्षमेकं तु तत्र च ॥६०॥
चातुर्मास्याऽनुष्ठानं त्वकारयद्विधिना नृपः ।
वैश्वानरस्य च पर्जन्यस्येष्टिं चाप्यकारयत् ॥६१॥
आग्नेयं सौम्यं सावित्रं सारस्वतं ततः परम् ।
पौष्णं च मारुतं वैश्वदेवं द्यावापृथिव्यकम् ॥६२॥
यागानेतानष्टसंख्यान् वैश्वदेवाख्यपर्वणि ।
अकारयत् स्वयं राजा तत्र क्रमाच्च देवताः ॥६३॥
अग्नयेऽष्टाकपालं च पुरोडाशं समार्पयत् ।
सोमाय च चरुं सवित्रे द्वादशकपालकम् ॥६४॥
चरुं समार्पयत् सरस्वत्यै चरुं ददौ तथा ।
पूष्णे पिष्टचरुं मरुते तु सप्तकपालकम् ॥६५॥
पुरोडाशं ददौ विश्वेदेवेभ्य आमिक्षकां ददौ ।
द्यावापृथिवीभ्यां ददावेककपालकं शुभम् ॥६६॥
पुरोडाशं ततस्तत्र मधुं च माधवं तथा ।
शुक्रं शुचिं घृतहोमैरतर्पयन्नृपः स्वयम् ॥६७॥
एवं कृत्वा वैश्वदेवपर्व ततो द्वितीयकम् ।
वरुणप्रघासपर्व चक्रे तु विधिना नृपः ॥६८॥
आग्नेयं सौम्यं सावित्रं सारस्वतं च पौष्णकम् ।
ऐन्द्राग्नं मारुतं चापि वारुणं कायमेव च ॥६९॥
अकारयन्नवयागान् तत्राग्निं स्तोममित्यपि ।
सवितारं तथा सरस्वतीं पूषाणमित्यपि ॥७०॥
इन्द्राग्नी मरुतश्चापि वरुणं कं क्रमेण वै ।
तत्तद्द्रव्यैर्नृपः सम्यगवर्तयत् हवादिभिः ॥७१॥
नभं नभस्यम् इषं चोर्जं चेति हुत्वाऽप्यतर्पयत् ।
अवभृथं चकाराऽपि नियमान् जगृहेऽपि च ॥७२॥
ततश्च तृतीयं साकमेधपर्वाऽप्यकारयत् ।
अनीकवत्यादीष्टीश्च महाहवींषि चेत्यपि ॥७३॥
पितृयज्ञं त्र्यम्बकहवींषि चापि व्यधापयत् ।
ऋषभं चाह्वयच्चापि क्रीडनेष्टिं ह्यकारयत् ॥७४॥
सहं सहस्यं तपसं तपस्यं चेत्यतर्पयत् ।
ततश्च विधिना महापितृयज्ञं ह्यकारयत् ॥७५॥
पितृमन्तं बर्हिषदोऽग्निष्वात्तानप्यतर्पयत् ।
पिण्डान् ददौ च विधिना त्र्यम्बकहवींषि ददौ ॥७६॥
रुद्राय होमं प्रददौ चकाराऽदितिदैवतम् ।
यागं च चरुणा पश्चात् शुनासीरीयपर्वकम् ॥७७॥
कारयामास नृपतिराग्नेयादीन् यथायथम् ।
कारयामास च तथा ऐन्द्राग्नं वैश्वदैवकम् ॥७८॥
शुनासीरीयकं वायव्यं सौर्यं यागमित्यपि ।
अकारयत्तथा तत्तद्देवताश्चाप्यतर्पयत् ॥७९॥
अधिकमासनाम्ना चैककपालं ददौ तथा ।
ऐष्टिकानि समस्तानि सम्वत्सरेण चाऽकरोत् ॥८०॥
ततो राजा पवित्रादीन् षट् सोमयागकानपि ।
क्रमेणाऽऽकारयच्चापि सहस्रधेनुदक्षिणाः ॥८१॥
ददौ चाप्यनुमत्यादीनष्टौ यागान् व्यधापयत् ।
अनुमत्यै पुरोडाशमष्टाकपालकं ददौ ॥८२॥
आदित्यं च चरुं चापि प्रददौ नृपतिस्तथा ।
आग्नावैष्णवकं चैकादशकपालकं ददौ ॥८३॥
अग्नीषोमीयकं चैकादशकपालकं ददौ ।
ऐन्द्रं चैकादशकपालकं चाग्नेयकं ततः ॥८४॥
अष्टाकपालकं चैन्द्रं दधि नृपो ददौ तथा ।
ऐन्द्राग्नं द्वादशकपालं चरुं वैश्वदैवतम् ॥८५॥
सौम्यं श्यामाकं च चरुं सारस्वतं चरुं ददौ ।
अष्टाकपालमाग्नेयं रौद्रं गावीधुकं चरुम् ॥८६॥

ऐन्द्रं दधि यवमयं वारुणं च चरुं ददौ ।
अपामार्गकृतान् होमान् नृपश्चाकारयत्ततः ॥८७॥
धात्रे ददौ पुरोडाशं तद् द्वादशकपालकम् ।
अनुमत्यै चरुं राकायै चरुं च ददौ नृपः ॥८८॥
सिनीवाल्यै चरुं कुह्वै चरुं ददौ च दक्षिणाः ।
गोवृषभौ ददौ चाथ ततोऽन्यद्धवनान्यपि ॥८९॥
आग्नावैष्णवमेकादशकपालं ददौ नृपः ।
पुरोडाशं तथैन्द्रावैष्णवं च तादृशं ददौ ॥९०॥
वैष्णवं त्रिकपालं च प्रददौ नृपतिस्तथा ।
अग्नीषोमीयकं चैकादशकपालकं तदा ॥९१॥
पुरोडाशं ददाविन्द्रासोमीयकं च तादृशम् ।
सौम्यं चरुं ददौ चापि सौमपौष्णं चरुं ददौ ॥९२॥
ऐन्द्रापौष्णं चरुं पौष्णं च ददौ नृपस्तथा ।
ततो वैश्वानरीयां द्वादशकपालिकां शुभाम् ॥९३॥
इष्टिं चकार च वारुणं चरुं प्रददौ ततः ।
बार्हस्पत्यं चरुमैन्द्रमेकादशकपालकम् ॥९४॥
पुरोडाशं ददौ चाथाऽऽदित्यं चरु ददौ ततः ।
नैर्ऋतं च चरुमष्टाकपालमग्निदैवतम् ॥९५॥
पुरोडाशं ददौ दशकपालं वारुणं तथा ।
पुरोडाशं ददौ सप्तकपालं मारुतं तथा ॥९६॥
सावित्रं द्वादशकपालं पुरोडाशकं ददौ ।
आश्विनं द्विकपालं च पुरोडाशं ददौ तथा ॥९७॥
पौष्णं चरुं रौद्रमपि चरुं ददौ नृपस्ततः ।
द्वादशेष्टीस्ततो राजा कारयामास भूसुरैः ॥९८॥
चकार दीक्षणीयेष्टिं मित्रं बृहस्पतिं तथा ।
अयजच्च ततश्चाग्नीषोमीयेऽष्टौ हवींषि च ॥९९॥
ददौ यथाऽग्नये पुरोडाशमष्टाकपालकम् ।
सोमाय श्यामाकचरुं ददौ स्वयं नृपस्ततः ॥१००॥
सवित्रे द्वादशकपालं पुरोडाशकं ददौ ।
गावीधुकं च रुद्राय चरुं ददौ नृपस्ततः ॥१०१॥
चरुं नैवारकं बृहस्पतये च ददावपि ।
इन्द्रायैकादशकपालं पुरोडाशकं ददौ ॥१०२॥
मित्राय च चरुं वरुणाय यवमयं चरुम् ।
एवं दत्वा सर्वयागान् कृत्वा राजा स्थितोऽभवत् ॥१०३॥
ब्रह्मा राज्ञः करं स्पृष्ट्वा प्रजाभ्यः सन्न्यवेदयत् ।
अयं राजा भवतीनाम् अङ्गीचक्रुः प्रजाः नृपे ॥१०४॥
अभिषेकं जलैश्चक्रुः राजाषड्ढोममाचरत् ।
सर्वद्रव्यादिसम्पन्नं देवताह्लादकारकम् ॥१०५॥

पार्थहोमोत्तरं भूपौ रथं समारुरोह च ।
रथमोचनहोमांश्च कृत्वाऽऽसनस्थितो नृपः ॥१०६॥
कथां शृण्वन् भूसुरेभ्यो दत्वा स्वर्णं ततः परम् ।
वैश्वदेवं तथा माहेन्द्रयागं च व्यधात्ततः ॥१०७॥
अवभृथेष्टिं कृत्वा च हवींषि दश चातनोत् ।
अष्टाकपालमाग्नेयं पुरोडाशं ददौ ततः ॥१०८॥
सारस्वतं चरुं चापि ददौ राजा ततः परम् ।
सावित्रं द्वादशकपालं पुरोडाशकं ददौ ॥१०९॥
पौष्णं चरुं तथा बार्हस्पत्यं चरुं ददावपि ।
ऐन्द्रमेकादशकपालं ददौ च नृपस्ततः ॥११०॥
वारुणं च दशकपालं सौम्यं च चरुं ददौ ।
त्वाष्ट्रमष्टाकपालं च वैष्णवं त्रिकपालकम् ॥१११॥
पुरोडाशं ददौ चैवं संसृपामप्यवर्तयत् ।
दक्षिणाः प्रददौ श्रेष्ठां राजा स्वयं च मण्डपे ॥११२॥
अध्वर्यवे स्वर्णमयौ दर्पणौ रत्नशोभितौ ।
उद्गात्रे मालिकां हिरण्मयीं होत्रे तु वर्तुलाम् ॥११३॥
प्रस्तोत्रे प्रतिहर्त्रे च ददावश्वं सभूषणम् ।
ब्रह्मणे बालगर्भिणीर्दश गाः सन्ददौ नृपः ॥११४॥
मैत्रावरुणाय च वन्ध्यां गां ददौ नृपतिस्तदा ।
ब्राह्मणाच्छंसिने बलीवर्दं ददौ नृपस्तदा ॥११५॥
नेष्ट्रे पोत्रे प्रददौ च धौताम्बरे शुभे तदा ।
अच्छावाकाय शकटं यवपूर्णं ददौ तदा ॥११६॥
अग्नीध्रे ऋषभं चापि ददौ नृपस्तथाविधिम् ।
दशपेयं क्रतुं कृत्वा व्रतं जग्राह वै ततः ॥११७॥
केशानामवपनाख्यं सम्वत्सरावधि नृपः ।
ततश्चातिरात्रसंस्थात्मकं सोमक्रतुं व्यधात् ॥११८॥
व्युष्टिद्विरात्रमेवापि क्षत्रधृतिं व्यधापयत् ।
सौत्रामणिं चकारापि विधिना नृपतिस्ततः ॥११९॥
ऐन्द्रं तथाऽऽश्विनं सारस्वतं चैन्द्रवायोधसम् ।
पयोग्रहात्मकं होमं ददौ राजा ह्यवभृथम् ॥१२०॥
चकारैवं च दानानि ददौ राजा बहून्यपि ।
इयेष राज्यं दत्वैव दीक्षां च साधवीं शुभाम् ॥१२१॥
ग्रहीतुं स्वेष्टदेवाद्वै विप्रेभ्यः स न्यवेदयत् ।
सर्वां पृथिवीं विप्रेभ्यो ददौ दाने हि दक्षिणाम् ॥१२२॥
व्रतं त्वनशनं चक्रे सपत्नीको मदर्थकः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥१२३॥
स्वयमागत्य मां दीक्षयित्वा साधुं व्यधापयेत् ।
राजसूयादियज्ञानां फलं हरौ तदाऽऽर्पयत् ॥१२४॥

अहं तन्निश्चयं ज्ञात्वा विप्राणां प्रार्थनामपि ।
भक्तेच्छापूरणार्थं वै त्वया सार्कं हि पद्मजे ॥१२५॥
आविर्बभूव सहसा कोटिभास्करसन्निभः ।
स्वागतं मे च ते चक्रुः पूजनं च ततोऽप्यहम् ॥१२६॥
ददौ राज्ञे महादीक्षां साधवीं मोक्षदां शुभाम् ।
राज्ञ्यै दीक्षां ददौ चापि वीक्ष्य विप्रा महर्षयः ॥१२७॥
लक्षमिता महादीक्षां जगृहुर्मत्त एव ते ।
अहमाचार्यरूपश्च साधुधर्मानबोधयम् ॥१२८॥
वैष्णव्यस्ताः प्रजा जाताः समस्ता मोक्षगाः प्रिये ।
त्वं सतीनां महाचार्याणी तदा संव्यजायथाः ॥१२९॥
**अनादिश्रीमहाचार्यनारायणोऽभवं ततः ।**
**अनादिश्रीमहाचार्याणीश्रीयुतो हरिः स्वयम् ॥१३०॥**
सद्भिः सम्प्रार्थितश्चाहं मन्वन्तरं भुवस्तले ।
व्यचरं दिव्यरूपो वै मोक्षधर्मपरायणः ॥१३१॥
स्मर त्वं त्वां च मां लक्ष्मि ! महाचार्यस्वरूपिणौ ।
एवमन्येऽप्यवतारा ममाऽभवन् सहस्रशः ॥१३२॥
राजा नाम्नाऽभवत् राजसूयायनो हि दीक्षितः ।
राज्ञी च राजसूयश्रीरभवत् साध्विका तदा ॥१३३॥
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेत् प्रिये ।
स्वर्गो मोक्षो भवेच्चापि रागो विरागतां व्रजेत् ॥१३४॥
अविद्या विलयं गच्छेदीयुर्बन्धा विलोपताम् ।
दिव्यरूपो भवेत् पुण्यशालिसेव्यो भवेदिह ॥१३५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः पञ्चचत्वारिंशे वत्सरेऽप्सरसां मानुषीभूतानां मनोरथपूरणार्थम् अनादिश्रीबृहद्ब्रह्मनारायणस्य रुक्मवतीश्रीसहितस्य, षट्चत्वारिंशे वत्सरे च महर्षिभ्यो ब्रह्मविद्यादिदानार्थम् अनादिश्रीगुरुनारायणस्य सुविद्याश्रीसहितस्य, सप्तचत्वारिंशे वत्सरे च हरिभक्तस्य बृहद्धर्मनृपतेः राजसूययज्ञे सर्वस्वदानोत्तरं साध्वीमहादीक्षार्थं प्रार्थितस्याऽनादिश्रीमहाचार्यनारायणस्य आचार्याणीश्रीयुतस्य, च, प्राकट्यमित्यादिनिरूपणनामा पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं मे ततः परम् ।
वेधसोऽर्चिमार्गनाम्नि वत्सरे चाथ कल्पके ॥ १ ॥
सप्तषष्ट्यधिके चाष्टशतेऽथ पञ्चमे मनौ ।
रुद्रकुक्षेः समुद्भूतो विद्युत्स्त्रावो हि राक्षसः ॥ २ ॥
सः प्रचक्रे तपश्चोग्रं शंभुतोषणहेतवे ।
सूर्यचन्द्राग्नितेजोभ्यश्चातितेजोऽभिलब्धये ॥ ३ ॥
पञ्चशतेषु वर्षेषु गतेषु शंकरः स्वयम् ।
तुतोष परया प्रीत्या वरार्थं चान्वरोधयत् ॥ ४ ॥
सोऽपि वव्रे वरं सूर्यचन्द्राग्नितेजसां परम् ।
तेजो मे स्याद् यथेष्टं वै देवाद्यनाश्यमेव च ॥ ५ ॥
तथाऽस्त्विति हरः प्राह वरं लब्ध्वाऽतिमोदवान् ।
तपस्त्यक्त्वोज्ज्वलो भूत्वा स्वर्गं चायाति याति च ॥ ६ ॥
अप्सरसो मुमुहुश्च देव्योऽपि मोहमागताः ।
चञ्चलास्तं वीक्ष्य चानुदुद्रुवुर्वारिताः सुरैः ॥ ७ ॥
देवानां स्वर्गलोके वै क्लेशोऽयं नूतनोऽभवत् ।
दैत्योऽपि राक्षसरूपं प्रगृह्य देवतोज्ज्वलः ॥ ८ ॥
देवाभरणभूषाढ्यः स्वर्गात् स्वर्गं प्रयाति च ।
मोहयत्येव देवीश्च कलहं जनयत्यपि ॥ ९ ॥
सूर्याधिकः सुरूपश्च सुतेजाः सुप्रभाधरः ।
भूत्वा सूर्यं समभ्येति तिरस्करोति भास्करम् ॥१०॥
चन्द्रं वह्निं समभ्येति तिरस्करोति तेजसा ।
वडवाग्निं समभ्येति ग्रहानभ्येति वै तथा ॥११॥
पातालादौ मणिश्रींश्चाभ्येति तिरस्करोति च ।
महाजले तले चापि सामुद्रे मणियादसाम् ॥१२॥
प्रकाशान् वै तिरस्कृत्य गर्वं स्वीयं करोति सः ।
सर्वरूपधरो दैत्यो ज्ञात्वा बलं निजं महत् ॥१३॥
इयेष राजा भवितुं ययौ कुबेरपत्तनम् ।
युयुधेऽति कुबेरेण चात्मसात् कृतवान् पुरीम् ॥१४॥
ततो वह्निं ययौ युद्धे जिगाय स्ववशं व्यधात् ।
चन्द्रं जेतुं ययौ चापि सोऽपि तद्वशगोऽभवत् ॥१५॥
सूर्यं जेतुमियेषापि युद्धार्थं प्रययौ रविम् ।
युयुधे चतुरो मासान् विद्युत्स्त्रावो महासुरः ॥१६॥
पराजयं न चाप्नोति श्रमं याति न वै मनाक् ।
विद्युतः प्रकटीकृत्य लोकान् दग्धान् करोति च ॥१७॥
सूर्यादधिकतेजोभिर्दहत्येतज्जगत्त्रयम् ।
हाहाकारस्तदा जातः सूर्यः खिन्नः शुशोच ह ॥१८॥
सस्मार परमं ब्रह्म परमेशं सनातनम् ।
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ॥१९॥
सश्रीकोऽहं समायातः सूर्यरक्षाकरः प्रभुः ।
हिरण्मयः परेशो वै सर्वतेजोऽस्त्रशस्त्रवान् ॥२०॥
ईशानीसंज्ञया सर्वशक्तिमत्या त्वया सह ।
लक्ष्मि ! सूर्यकृतस्वार्हपूजाऽऽगतादिसत्क्रियः ॥२१॥

सुदर्शनेन चक्रेणाऽऽशातयं चासुरं हि तम् ।
विद्युत्स्रावो विनाशं च प्राप्याब्धौ पपात सः ॥२२॥
जगत्सु तस्य विसृष्टान् वह्नीनशामयं त्वहम् ।
तदा देवर्षिगन्धर्वग्रहमानवकोटिभिः ॥२३॥
संस्तुतोऽहं सर्वभूषु पर्यटनं चकार वै ।
सूर्ये हिरण्मयश्चाऽहं हिरण्यकेशवान् हरिः ॥२४॥
चन्द्रे राजतदेहोऽहं कुप्यकेशः स्वयं हरिः ।
वह्नौ प्रभोज्ज्वलदेहः प्रभाश्मश्रुर्भवाम्यहम् ॥२५॥
भूतले तु त्वया साकं मानवैरभियाचितः ।
अनादिश्रीमहाविद्युन्नारायणोऽभवं तदा ॥२६॥
वैद्युतीश्रीयुतश्चाहं लोकेऽत्र मानवेऽवसम् ।
मन्वन्तरं तु कालं वै मानवानां हि मुक्तये ॥२७॥
स्मर लक्ष्मि ! च मे ते च प्राकट्यं वै तथोदितम् ।
अन्यास्तथाऽवतारा मे जाता वै बहवो भुवि ॥२८॥
पठनाच्छ्रवणाच्चास्य दुःखहानिर्भवेदिह ।
भुक्तिश्चात्र भवेत्त्वन्ते मुक्तिर्मे शाश्वते पदे ॥२९॥
अथ तेऽन्यच्च मे वच्मि प्राकट्यं शृणु सुन्दरि ।
वेधसोऽब्धिमथनाख्ये वत्सरे च नवाधिके ॥३०॥
चत्वारिंशेऽथ द्विपञ्चाशदूर्ध्वे कल्पके शते ।
तृतीये च मनौ लक्ष्मि ! लोकेऽभवं त्वया सह ॥३१॥
रसातलस्य दैत्यस्य रसभक्षस्य वै सुतः ।
मधुभक्षोऽभवद् दैत्यो बलवान् तपसा पुरा ॥३२॥
स तु तेपे तपस्तीव्रं सुन्दराख्ये गिरौ तदा ।
शंकरं तपसाऽऽराध्य वरं वव्रे हि शंकरात् ॥३३॥
रसान् भोक्तुं मधून् भोक्तुं शक्तिर्मे विपुला भवेत् ।
यथा यथा भक्षयामि तथा तथा च पाचनम् ॥३४॥
भवेदेव न चाऽजीर्णं भवेन्मे वै कदाचन ।
अरुचिश्चापि मे न स्यात्पुष्टिर्बलं महद् भवेत् ॥३५॥
श्रुत्वैवं शंकरः प्राह चाऽहत्वौषधिपादपान् ।
रसान् मधून् भुंक्ष्व का चान्यथा मरणं तव ॥३६॥
इत्येवं वरदानं वै दत्वाऽदृश्यो हरोऽभवत् ।
मधुभक्षोऽसुरश्चापि सुन्दराद्रौ द्रुमादिषु ॥३७॥
प्रविश्य मायया सर्वान् मधून् चूषति चान्तरान् ।
पत्रपुष्पादिकस्थान् स मधून् चूषति सर्वशः ॥३८॥
फलानि नैव जायन्ते शुष्यन्ति च दलान्यपि ।
नवांऽकुराणि सर्वाणि नारोहन्ति ततः परम् ॥३९॥
मूलरसं स्तम्बरसं स्थाणुरसं ततः परम् ।
स्कन्धरसं च शाखानां रसान् भुंक्ते समस्तकान् ॥४०॥
उपशाखारसाँश्चापि पत्ररसान् स चूषति ।
पुष्परसान् फलरसान् चूषत्येव समस्तकान् ॥४१॥
वृक्षेभ्यश्चापि वल्लीभ्यः स्तम्बेभ्यस्तृणमूलतः ।
कन्देभ्यश्च शलाकाभ्यो रसान् भुंक्ते समस्तकान् ॥४२॥
मायया शतरूपश्च सहस्रायुतरूपवान् ।
कोट्यर्बुदाऽब्जरूपश्च भूत्वा भूत्वाऽतिखादति ॥४३॥
यथा यथा रसान् भुंक्ते पचन्ति सर्वशश्च ते ।
पुष्टो भवति बलवाँश्च समर्थो भोजनेऽधिकः ॥४४॥
मायया चायतवपुः पर्वतेषु वनेषु च ।
अरण्येषु महोद्यानेष्वपि सौधद्रुमेषु च ॥४५॥
वाटिकासु कृषिसस्येष्वपि सर्वेषु शाखिषु ।
अंकुरेषु तथाऽऽमेषु पक्वाऽपक्वेषु सर्वथा ॥४६॥
मधून् रसान् सदा भुंक्ते करोति शुष्कशाखिनः ।
शुष्कायन्ते ह्यरण्यानि क्षेत्राणि च वनानि च ॥४७॥
प्रजाभिश्च पशुभिश्च पक्षिभिर्जन्तुभिस्तथा ।
प्राणिभिर्नैव चाप्यन्ते रसाश्च मधवोऽपि च ॥४८॥
क्षुधाभिः पीडिताः सर्वे म्रियन्तेऽकालमृत्यवः ।
अवग्राहं विना जातं दुर्भिक्षं प्राणनाशकम् ॥४९॥
मानवानां च लोकेषु पातालेभ्यः समाययौ ।
महासुरः पृथिवीस्थानचूषद् द्रुलतातरून् ॥५०॥
पार्थिवान् सार्वभौमाँश्च वल्लीतृणादिपादपान् ।
चक्रे सर्वांश्च सहसा नीरसान् शुष्कविग्रहान् ॥५१॥
मानवानां भोजनानि देवानां भोजनानि च ।
प्रणष्टानि समस्तानि रसमूलानि सर्वथा ॥५२॥
मधूनि सर्वजातीनि पीतानि तेन रक्षसा ।
वर्धितः स तु बलवान् वायुवद् व्यापकोऽभवत् ॥५३॥
उद्भिजेषु महाशक्त्या व्यापकः सोऽभवद् वरात् ।
मायया चापि दैत्यः सः सर्वान्नखादकोऽभवत् ॥५४॥
निरर्थका यतो मेघा कृषिर्निरर्थिका तथा ।
पृथ्व्याः रसप्रदानत्वं निरर्थकं कृतं तदा ॥५५॥
बीजानां रसशक्तिश्च सर्वा निरर्थिका कृता ।
प्रजार्थं चासुरेणैव जगत् क्षुधाप्रपीडितम् ॥५६॥
कृतं तेन ततो लोकाश्चाराधयन् हरिं च माम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥५७॥
श्रुत्वा तु प्रार्थनां तेषां ज्ञात्वाऽसुरोपपीडनम् ।
विरसत्वं चौषधीनामाजगाम भुवं प्रति ॥५८॥
शंखचक्रगदापद्मशार्ङ्गादिहेतिमान् स्वयम् ।
दिव्यरूपो हरिः सोऽहं युयुधे तेन वै तदा ॥५९॥

सुदर्शनेन चक्रेण मधुमक्षो हतो मया।
त्वं मया माधवी लक्ष्मीः कृत्वा द्रुमेषु वेशिता ॥६०॥
सर्वपादपजातीनां मधुरूपा रसात्मिका।
त्वमभवस्तदा लक्ष्मि! माधवीश्रीः समूर्जिता ॥६१॥
अनादिश्रीमधुनारायणश्चाऽहं प्रजास्वपि।
गोचरो न्यवसं मन्वन्तरकालं त्वया सह ॥६२॥
प्रवेशात्तववृक्षाश्च रसान्वितास्तदाऽभवन्।
सर्वलोकेषु सर्वत्र मधुवाहा हि पादपाः ॥६३॥
अभवन् सिन्धवश्चापि मधुक्षराश्च धेनवः।
ओषधयो मधुगर्भा माधवीवासितास्तदा ॥६४॥
बभूवुः पल्लविताश्च फलिताश्च मधुप्रदाः।
माधवोऽहं तदा लक्ष्मि! रसात्मकस्त्वया सह ॥६५॥
अवसं चापि वृक्षादौ माधव्या परमेश्वरः।
लोका अपूजयँस्तत्र माधवीमाधवौ च नौ ॥६६॥
स्मर त्वं माधवीरूपं मां च मधुरसात्मकम्।
अन्येऽपि च तदा देवा महर्षयश्च मां प्रिये ॥६७॥
पुपूजुः परया प्रीत्या प्राणदं परमेश्वरम्।
एतत्ते कथितं नारायणि! प्राकट्यमेव मे ॥६८॥
तेऽपि रक्षाकरं लोकप्रजानां सर्वदेहिनाम्।
अथाऽप्यन्यत् प्रवक्ष्यामि प्राकट्यं ते च मेऽपि च ॥६९॥
वेधसो वत्सरे पञ्चाशत्तमे नारदाभिधे।
अष्टाशीत्यूर्ध्वके चतुश्शते कल्पेऽष्टमे मनौ ॥७०॥
तिष्ये च सप्ततौ भूमौ दैत्याश्च दानवास्तथा।
असुरा नास्तिका धर्महणोऽभवन् समस्ततः ॥७१॥
धर्माश्च मानवा नष्टाः क्रौर्यं प्रवर्तितं बहु।
मांसादाश्चाभवन् सर्वे म्लेच्छवर्णा नराः स्त्रियः ॥७२॥
पापात्मानः पापकराः पापमात्रपरायणाः।
सर्वादाः सर्वभक्षाश्च सर्वभोक्तार उत्पथाः ॥७३॥
पशून् पक्षिगणान् जन्तून् भक्षयन्ति हि मानवाः।
मानवान् मानवाश्चापि भक्षयन्तीति का कथा ॥७४॥
अन्येषां प्राणिनां लक्ष्मि! हाहाकारोऽभवद् भुवि।
आरण्यका हि पशवो भक्षिता मानवैः खलु ॥७५॥
पक्षिणो भक्षिताश्चापि मिलन्ति न यथा तथा।
वनारण्यान्यभवँश्च पशुपक्षिक्षयाणि वै ॥७६॥
पशुपक्षिविहीनानि ततस्ते मानवाः खलु।
ग्राम्यान् पशून् पक्षिणश्च भक्षयितुं समारभन् ॥७७॥
महिष्यश्चाविका ऊरणश्च सर्वाः प्रभक्षिताः।
अश्वा उष्ट्रा गर्दभाश्च वृषभाश्चापि भक्षिताः ॥७८॥
हस्तिनश्चापि गवया हरिणा वानरा अपि।
ऋक्षाः सिंहाः श्वापदाश्च श्वानश्च शूकरादयः ॥७९॥
सर्वेऽपि भक्षिताः क्रूरैः राक्षसैर्दैत्यदानवैः।
मानवैस्तादृशैः सर्वैर्गावो वत्साश्च भक्षिताः ॥८०॥
धेनवश्च प्रभक्ष्यन्ते मांसादैश्च यदा क्षितौ।
तदा रक्षार्थमेवाऽहं चायाम्यप्रेरितोऽपि सन् ॥८१॥
देवा गोषु स्थिताः सर्वे तासामाराधनावशाः।
देवानां दुःखहन्ताऽहं गवां रक्षाकरः प्रभुः ॥८२॥
धर्मरक्षाकरश्चापि पृथ्व्यां साकं त्वया प्रिये।
तूर्णं चागतवान् साक्षात् सर्वशस्त्रधरो हरिः ॥८३॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः।
धेनुरक्षानिमित्तं वै समालम्ब्य परेश्वरः ॥८४॥
सर्वरक्षाकरो धर्मरक्षकः श्रीपतिः प्रभुः।
कलेर्दोषविहन्ताऽहं शीघ्रं वै गोचरोऽभवम् ॥८५॥
आक्षराख्ये रथे स्थित्वा हन्यते यत्र गौः क्षितौ।
तत्स्थले व्योममार्गेण तूर्णं गत्वाऽहनं हि तम् ॥८६॥
गोहन्तारं घातकं च घातकानपरानपि।
अहनं तत्र तत्रैव तेन रुष्टास्तदग्रगाः ॥८७॥
संभूय मां प्रहन्तुं ते चाययुर्वै स्थले स्थले।
म्लेच्छप्राया दानवाश्च दैत्याश्चासुरकोटयः ॥८८॥
अहनं तान् संगरेऽहं भ्रमित्वा सकलां क्षितिम्।
कोट्यर्बुदा हता हिंस्राः सात्त्विक्यो मोचिताः प्रजाः ॥८९॥
मम वायुप्रसंगेन शिष्टाश्च सत्त्विनोऽभवन्।
गवां रक्षा कृता विप्ररक्षा रक्षा सतां तथा ॥९०॥
धर्मरक्षा कृता चापि देवाः सन्तोषिता मया।
सत्यधर्माः स्थापिताश्च म्लेच्छा नृपा विहिंसिताः ॥९१॥
अहिंसा स्थापिता चाप्युपासना मम चाहिता।
देवानां पूजनाद्यं च सर्वं संस्थापितं पुनः ॥९२॥
सेवाधर्मो दयाधर्मः स्थापितश्च मया पुनः।
अनादिश्रीनाथनारायणः पृथ्व्यां स्थिरोऽभवम् ॥९३॥
अनाथानां तु धेनूनां रक्षको नाथनामधृक्।
त्वं च लक्ष्मि! धेनुमतीश्रीर्नाम्ना चाभवस्तदा ॥९४॥
युगार्धं च पृथिव्यां वै स्थित्वाऽहं पुरुषोत्तमः।
त्वया साकं ययौ धामाऽक्षरं स्मर तदा जनुम् ॥९५॥
ममैवं तिष्यलोकानां शिक्षार्थं वै पुनः पुनः।
अंशाऽऽवेशकलाभूत्याद्यवतारा भवन्त्यपि ॥९६॥
तेषां वै गणना नास्ति कार्यवशाद् भवन्ति यत्।
कार्यं निष्पाद्य लीयन्ते मय्येव शिवशंभुजे! ॥९७॥

कल्पे कल्पे स्वयं स्वेच्छावशो भक्तवशोऽथवा ।
समागच्छामि भूमौ वै कृपया हितकृत् प्रभुः ॥९८॥
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ।
अवतारी परब्रह्म स्वयं श्रीपरमेश्वरः ॥९९॥
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेदपि ।
यथेष्टफलसत्प्राप्तिर्भवेदपीह सर्वथा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसोऽष्टचत्वारिंशे वत्सरे विद्युत्खावराक्षसस्य सूर्यचन्द्रादिविजेतुर्विनाशार्थम् अनादिश्रीमहाविद्युन्नारायणस्य ईशनीश्रीसहितस्य, नवचत्वारिंशे वत्सरे च मधुभक्षादिदैत्यनाशार्थम् अनादिश्रीमधुनारायणस्य माधवीश्रीसहितस्य, पञ्चाशत्तमे वत्सरे च गोहन्तॄणां धर्महन्तॄणां तिष्ये दैत्यानां नाशार्थम् अनादिश्रीनाथनारायणस्य धेनुमतीश्रीसहितस्य च, प्राकट्यमित्यादिनिरूपणनामा षट्त्रिंशोऽध्यायः ॥ ३६ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं प्राकट्यं मेऽवतारिणः ।
वेधसो वैष्णवे चैकपञ्चाशत्तमवत्सरे ॥ १ ॥
आद्ये कल्पे चाद्यमनौ कृते युगे हि वेधसः ।
आयुष्याधोत्सवं स्वर्णोत्सवं देवादयोऽर्जयन् ॥ २ ॥
सत्यलोकेऽभवत्तत्र समाजो द्युनिवासिनाम् ।
तलवासाः स्वर्गवासा जनतपोनिवासिनः ॥ ३ ॥
मेरुवासा मानसस्था लोकालोकनिवासिनः ।
वैराजवासाश्चैवाऽन्ये सत्यलोकं समाययुः ॥ ४ ॥
सिद्धाः साध्या ब्रह्मशीला ब्रह्मचारिण आययुः ।
महर्षयश्च ऋषयः पितरश्च समाययुः ॥ ५ ॥
लोकपाला देवपाला लोकेश्वराः समाययुः ।
आदित्या वसवो रुद्रा मनवोऽश्विनीपुत्रकौ ॥ ६ ॥
इन्द्रा ग्रहाश्च ताराश्च नक्षत्राणि समाययुः ।
यक्षाश्च चारणा याम्या गन्धर्वाश्च समाययुः ॥ ७ ॥
किंपुंसः किन्नराः सर्पा नागा रक्षांसि चाययुः ।
कैलासस्थाः क्षीरवारिधिस्थाश्चापि समाययुः ॥ ८ ॥
मानवाश्च नदा नद्यो वृक्षा वल्लयः समाययुः ।
तीर्थानि ऋतवः कालाः पक्षाद्याश्च समाययुः ॥ ९ ॥
युगाश्च वत्सराश्चापि भूततत्त्वानि चाययुः ।
धर्मवंश्याः सतीसाध्व्यो योगिन्यश्च तथाऽऽययुः ॥१०॥
अण्डजाः पशवश्चापि जातिस्मराः समाययुः ।
सुताश्च मागधाश्चापि बन्दिनः पण्डिता ययुः ॥११॥
वेदा रुद्राश्च राजानो यादांसि च समाययुः ।
खाताऽखातसमुद्राश्च पर्वताद्याः समाययुः ॥१२॥
ब्रह्मसरसोऽप्सरसो दासा दास्यः समाययुः ।
वाहनानि विचित्राणि शस्त्राऽस्त्राणि समाययुः ॥१३॥
स्वराः शास्त्राणि विद्याश्च विद्यापुर्यश्च समाययुः ।
देशाः खण्डा मूर्तिमन्तः स्वेदजाश्चापि चाययुः ॥१४॥
मनोजा देहजाः स्पर्शजन्याश्च दृष्टिजा ययुः ।
जडाश्च चेतनाश्चापि कामरूपाः समाययुः ॥१५॥
कामाद्याश्च वसन्ताद्या गणाश्च पार्षदा ययुः ।
भक्ता मुक्ता ईश्वराश्चेशान्यश्चापि समाययुः ॥१६॥
सर्वेषां वै समाजोऽभूदसंख्यानन्दसंप्लुतः ।
प्रातर्वै ब्रह्मणस्तत्राभिषेकं ते प्रचक्रिरे ॥१७॥
ततः शृंगारितं चाऽजं पुपूजुस्ते विधानतः ।
भूदेवाः स्वर्गदेवाः सत्यदेवा वनदेवताः ॥१८॥
सर्वज्ञातिप्रदेवाश्च पुपूजुः परमेष्ठिनम् ।
आशीर्वादान् ददुश्चापि ददुश्चाप्युपदाः शुभाः ॥१९॥
बृहस्पत्यादिदेवानां वाचकानां शुभान्यपि ।
ब्रह्मशंसीन्यभवँश्च व्याख्यानानि समास्थले ॥२०॥
नर्तनं गायनं चापि बहुधा च ततोऽभवत् ।
संगीतानि विचित्राणि भोजनानि तथाऽभवन् ॥२१॥
पारितोषिकदानानि श्रेष्ठान्यपि तदाऽभवन् ।
अथ तत्र सुधापानं चाऽमृताऽन्नादिभोजनम् ॥२२॥
कृत्वा सर्वे प्रचक्रुश्च मम भक्तिमहोत्सवम् ।
अनादिश्रीकृष्णनारायणस्य भजनं मम ॥२३॥
परब्रह्माऽक्षरातीत परेश पुरुषोत्तम ।
जय ब्रह्मेश सर्वेश श्रीहरे परमेश्वर ॥२४॥
जयाऽवतारधर्तस्त्वं जय व्यूहविभावन ।
जयेश्वरेश देवेश जयाऽन्तर्यामिनीश्वर ॥२५॥
इत्येवं भजनं चक्रुः सवाद्याः सर्वदेहिनः ।
ततो वै तुष्टुवुः सर्वे ब्रह्माद्या मां समाहिताः ॥२६॥
आगच्छ भगवन् भर्तः सर्वसृष्टिविभावन ।
परमेश कृपां कृत्वा नो गृहाणाद्य पावय ॥२७॥
अवतारेश धामेश मुक्तेश यावदीश्वर ।
निर्गुणेश सगुणेश नो गृहाणाद्य पावय ॥२८॥
त्वमायुस्त्वं परा सत्ता त्वं धिष्ण्यं त्वं प्रराजता ।
त्वं प्रकाशश्च विज्ञानं त्वमिच्छा त्वं प्रयत्नकः ॥२९॥

त्वं क्रिया त्वं विनियोगस्त्वं फलं त्वं फलप्रदः ।
त्वं भोक्ता त्वं भोग्यवासस्त्वं भोगाधिस्थदेवता ॥३०॥
त्वं चात्मा त्वं परात्मा च त्वं सर्वं त्वयि सर्वकम् ।
सर्वेषु त्वं महाराज नो गृहाण्यद्य पावय ॥३१॥
इत्यर्थितस्तदा लक्ष्मि ! त्वया साकं हरिः स्वयम् ।
अहं विचार्य सहसा सत्यलोके समागमम् ॥३२॥
गोचरो वै सभामध्ये भक्तानां भजनक्षणे ।
सर्वतेजोऽभिसम्पन्नो दिव्यरूपो महाप्रभुः ॥३३॥
व्यराजं सर्वदेवाद्यर्पितस्वर्णशुभासने ।
ब्रह्मा ननाम च विष्णुः शंभुर्ननाम मां ततः ॥३४॥
सुराद्याश्च समानर्चुर्मां प्रचक्रुश्च दण्डवत् ।
त्वां तथा मानयामासुः साविज्याद्याः सतीस्त्रियः ॥३५॥
आवाभ्यां चाशिषा ब्रह्मा वर्धितोऽद्भिः प्रषेचितः ।
ब्रह्माद्याश्च ततो नौ वै नैवेद्यं भोजनं शुभम् ॥३६॥
आर्पयन् ताम्बूलकादि जलं चामृतमित्यपि ।
पादसंवाहनं चक्रुः प्रार्थयामासुरुत्सुकाः ॥३७॥
कृपया पाविताः कृष्णनारायण परेश्वर ।
दिष्ट्या ते दर्शनं लब्धं सर्वेश्वरस्य वै प्रभो ॥३८॥
अनुग्रहेण ते चैतद् ब्रह्माण्डं पुण्यतां गतम् ।
पावनोऽद्य समाजश्च दिवसश्च वयं ह्यपि ॥३९॥
यथा कृत्वा कृपां दत्तं दर्शनं सत्यलोकके ।
तथा कृत्वा कृपां देहि दर्शनं सर्वलोकके ॥४०॥
वस सत्ये तपस्यपि जने महरि भूतले ।
अतलादौ वस शीश ! परब्रह्म कृपां कुरु ॥४१॥
इत्येवमर्थितश्चाऽहं त्वया साकं हि पद्मजे ! ।
सर्वैस्तदा तथाऽस्त्वेवं मया तत्र प्रतिश्रुतम् ॥४२॥
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ।
परब्रह्म स्वयं सत्ये जने तपसि भूतले ॥४३॥
महर्लोके तथा स्वर्गे गमनाय मनो दधे ।
ब्रह्मणश्चोत्सवान्ते वै विदार्य प्राप्य मानवाः ॥४४॥
सुरा देवेश्वराश्चापि पितरश्च महर्षयः ।
निन्युर्मां स्वस्वलोकेषु नानारूपधरं विभुम् ॥४५॥
अनादिश्रीविभुनारायणं श्रीपुरुषोत्तमम् ।
विभ्वीश्रीसहितं चाहं भूतलादौ तदाऽवसम् ॥४६॥
एकमन्वन्तरं तत्र कृपया तत्र तत्र च ।
स्मर लक्ष्मि ! तव मेऽपि प्राकट्यं पारमेश्वरम् ॥४७॥
विष्णोश्चापि च पञ्चाशद्वर्षान्ते स्वर्णकोत्सवे ।
श्वेतद्वीपे ययौ चापि त्वया साकं ततः परम् ॥४८॥
शंभोश्चापि च पञ्चाशद्वर्षान्ते स्वर्णकोत्सवे ।
कैलासे च ययौ चापि त्वया साकं परेश्वरि ॥४९॥
ब्रह्मा ज्येष्ठो मध्यमश्च विष्णुः शंभुः कनिष्ठकः ।
भ्रातरस्ते त्रयो वैराजाद् दिनैक्ये प्रजज्ञिरे ॥५०॥
एकपञ्चाशत्तमस्य वर्षस्याऽऽद्यदिने ततः ।
महोत्सवेषु तेषां वै तत्रोपस्थितवानहम् ॥५१॥
चतुर्दशसु लोकेषु मद्योगान्मानसीप्रजाः ।
पार्शनी दार्शनी चापि संगिनी च प्रजा तथा ॥५२॥
सर्वास्ता अभवँल्लक्ष्मि ! नारायण्यो ममाऽऽश्रिताः ।
वैष्णव्यः सर्वथा जाता मन्वन्तरेषु तास्तथा ॥५३॥
भक्तान्यः सत्प्रजाः सर्वा मम योगेन वै तदा ।
आकल्पान्तं च ताः सर्वा नारायण्योऽभवन् प्रजाः ॥५४॥
असंख्या मेऽवताराश्च तेऽवतारा ह्यसंख्यकाः ।
स्मर तान् श्रि ! त्वया साकं जानाम्यहं यथायथम् ॥५५॥
इत्येवं कथितं ते मे प्राकट्यं परमोत्तमम् ।
अथाऽन्यत्ते कथयामि वेधसः सोमवत्सरे ॥५६॥
द्वापञ्चाशत्तमे षष्ठिकल्पे चतुर्थके मनौ ।
ब्रह्मैकदा सभायां स्वपुत्रानृषींश्च देवताः ॥५७॥
पितॄनुपादिदेशापि कर्मकाण्डान् सुखप्रदान् ।
ध्यानं कुरुत प्रातर्वै स्नानं कुरुत वै ततः ।
पूजां कुरुत देवानां ब्रह्मांशानां विशेषतः ॥५८॥
वैश्वदेवं च कुरुत नैवेद्यं कुरुतापि च ।
अतिथ्याद्यियज्ञांश्च कुरुत व्यावहारिकम् ॥५९॥
सन्ध्यां च वन्दनं भक्तिं श्रवणं कीर्तनादिकम् ।
कुरुताऽपि च विश्रान्तिं निद्रां शुद्धिं च भोजनम् ॥६०॥
दैवं पैत्र्यं पुण्यकार्यं दानं कुरुत सेवनम् ।
सतां सेवां च सत्संगं धर्मं कुरुत सत्क्रियाम् ॥६१॥
दारान् पुत्रान् दुहितॄश्च पतिं सम्बन्धिबान्धवान् ।
पोषयत पशून् गाश्च पक्षिणो जन्तुदेहिनः ॥६२॥
परोपकारं कुरुत गृहाणि वाटिकास्तथा ।
क्षेत्राणि सस्यजातानि पोषयत समाश्रितान् ॥६३॥
धर्ममर्थं च कामं चोपार्जयत यथोचितान् ।
सुखं स्वर्गं लभध्वं च पुनः पुनर्दिने दिने ॥६४॥
सृष्टिप्रवाहं कुरुत चाखण्डितं हि पुत्रकाः ।
कल्पान्ते सत्यलोकं वै समायात ततः पुनः ॥६५॥
कल्पारंभे संभवत महर्षयः सुराः पुनः ।
पितरश्च लोकपालाः सृष्टिसञ्चालनार्थकाः ॥६६॥

श्रुत्वैवं ब्रह्मणः पुत्रा ये चासन् सिद्धयोगिनः ।
ब्रह्मशीला ब्रह्मव्रतास्ते पप्रच्छुः पितामहम् ॥६७॥
रुचिर्येषां न वै तत्र तेषां कर्म पितामह ।
यद्युक्तं वाऽपरं चास्ते पृथक् कृत्वा प्रबोधय ॥६८॥
श्रुत्वैवमाह वेधास्तान् कर्म द्वेधा भवेदिह ।
प्रवृत्तं च निवृत्तं च फलं द्वेधाऽपि वै तयोः ॥६९॥
उक्तं सर्वं प्रवृत्तं तद् दारपुत्रधनादिजम् ।
रागद्वेषादियुक्तं च कामक्रोधादिसंभृतम् ॥७०॥
वासनामोहयुक्तं च सम्बन्धं गृहलोभजम् ।
अत्यागो यत्र दाराणां तथा लोकैषणाकृताम् ॥७१॥
द्वन्द्वानां सुखदुःखानां जन्ममरणयोस्तथा ।
आवर्त्तानां न वै त्यागो संसारान्तो न यत्र च ॥७२॥
पुनरावर्तनं यत्र जरामृत्युसमन्वितम् ।
विषयेच्छासमावाप्तिर्भोगतृष्णामयं तथा ॥७३॥
शीतोष्णादिसुसंयुक्तं शोकोद्वेगादियोजितम् ।
उत्सवाऽनुत्सवाऽऽक्रान्तं वंशविस्तारलम्बितम् ॥७४॥
प्रवृत्तं सर्वमेवैतन्मयोक्तं सृष्टिहेतुकम् ।
पूर्वे सप्तर्षयश्चापि तथा दश महर्षयः ॥७५॥
प्रजापतयो मनवः कृत्वा प्रवृत्तिकर्म तत् ।
पुनरावृत्तिरूपाणि श्मशानानि हि भेजिरे ॥७६॥
रागद्वेषयुतं शोकोद्वेगदुःखादिसंभृतम् ।
अशुद्धिकर्ममिथुनं यद्गृहे तच्छ्मशानकम् ॥७७॥
तापत्रयोद्भवो यत्र पुण्यापुण्योदयस्तथा ।
इषणात्रयसम्बन्धस्तद्गृहं वै श्मशानकम् ॥७८॥
म्रियन्ते चापि च प्रेता जायन्ते यत्र दुःखिनः ।
गर्भवासाश्च सूयन्ते तद्गृहं वै श्मशानकम् ॥७९॥
अशुद्धदेहयोर्योगो यत्र वै कामितोऽस्ति तत् ।
मृतानां मरणायैव जन्मगृहं श्मशानकम् ॥८०॥
संसारः सर्व एवास्ति श्मशानं वै प्रवर्तकम् ।
ततो भिन्नं तु यत्कर्म निवृत्तिः सा तु मोक्षदा ॥८१॥
यत्र दारग्रहो नास्ति नास्ति कामस्य वासना ।
रागद्वेषौ कामरोषौ गृहलोभो न यत्र च ॥८२॥
मोहो नास्ति नेषणा च द्वन्द्वानि सन्ति यत्र न ।
सा स्थितिः ब्रह्मशालाऽस्ति ब्रह्मविद्याप्रदायिनी ॥८३॥
ब्रह्मचर्यं यत्र चास्ति ब्रह्मार्पणं च यत्र वै ।
विषयेच्छालयश्चापि भोगतृष्णालयस्तथा ॥८४॥
आत्मतृप्तिश्चात्मरतिः परब्रह्मप्रसंगिता ।
शोकोद्वेगोष्णशीतादिस्पर्शोऽपि यत्र नास्ति वै ॥८५॥
ब्रह्मोत्सवः सदा यत्राऽच्युतगोत्रत्वमित्यपि ।
सतां सत्संग एवापि ब्रह्मार्पणपरस्थितिः ॥८६॥
निवृत्तं तद्धरौ प्रेमभक्त्यात्मकं हि कर्म यत् ।
सर्वं मोक्षप्रदं तद्वै समनुष्ठाय साधवः ॥८७॥
सन्न्यासिनस्तथा सिद्धा यतयश्चोर्ध्वरेतसः ।
ब्रह्मशीला ब्रह्मपराः सत्यः साध्व्यस्तथाविधाः ॥८८॥
त्यागमार्गाश्रिताः पूर्वे ध्रुवस्वर्गाणि भेजिरे ।
यन्न दुःखादिसंभिन्नं न च ग्रस्तं तथोत्तरे ॥८९॥
अपुनरावृत्ति सुखं चाहतं स्वर्गमुत्तमम् ।
तत्स्वर्गं श्रीभागवताः पूर्वे वै प्रतिपेदिरे ॥९०॥
भगवन्तं हरिं नारायणनारायणं प्रभुम् ।
परब्रह्माऽक्षरातीतं भजित्वा पुरुषोत्तमम् ॥९१॥
अनादिश्रीकृष्णनारायणं सर्वावतारिणम् ।
भजित्वा श्रीपतिं मुक्तपतिं धाम प्रपेदिरे ॥९२॥
तत्सेवां तद्भजनं च तद्दर्शनं तद्दास्यकम् ।
तदर्चनं च तत्सख्यं तस्मै चात्मनिवेदनम् ॥९३॥
तद्योगं तत्र सर्वस्वं समर्प्य धाम भेदिरे ।
अक्षरं परमं धाम परामुक्तिस्थलं ध्रुवम् ॥९४॥
शाश्वतानन्दसन्दोहं निवृत्तास्तत् प्रपेदिरे ।
पुरुषोत्तमयोगेन धामोत्तमं प्रपेदिरे ॥९५॥
भवन्तः साधवः सिद्धा ब्रह्मधर्मपरायणाः ।
निवृत्तिकर्म सम्पाद्य प्रयान्तु परमाऽक्षरम् ॥९६॥
इत्युक्तास्ते यतयो वै सन्तुष्टाश्चनिवर्तनम् ।
सर्वार्पणं च भजनं कृत्वाऽऽप्ताः कृतकृत्यताम् ॥९७॥
ब्रह्मा चाथ ततोऽप्याहोभयान् ऋषीन् यतीन् पुनः ।
प्रवृत्तं वा निवृत्तं वा ब्रह्मार्पणं निवर्तनम् ॥९८॥
दैह्यं वा दैहिकोत्थं वा कर्मोभयं कृतं ह्यपि ।
परमेशे च सर्वेशे प्रत्यक्षेऽर्पितमेव चेत् ॥९९॥
निवृत्तं तत् प्रजायेत मोक्षदं हरियोगतः ।
अनलस्याऽतिवेगेन सर्वं भस्मीभवेद् यथा ॥१००॥
हरेः साक्षात् सुयोगेन सर्वं भस्मीभवेत्तथा ।
श्रुत्वैवं हर्षिताश्चापि कर्मठाः ऋषयो ह्यति ॥१०१॥
निवृत्ता हर्षिताश्चापि सर्वे पप्रच्छुरेव तम् ।
पितामहं प्रणम्यैत्र स्मृत्वा श्रीपुरुषोत्तम् ॥१०२॥
हरेः साक्षादत्र लोके योगो भवेत् कथं हि नः ।
येनाऽर्पणात्मिकां सेवां कुर्मो दर्शय तद्विधिम् ॥१०३॥
कृत्वाऽपि प्रवृत्तिकर्म चार्पणेन च गोचरे ।
हरौ प्राप्स्याम ऊर्ध्वोर्ध्वं धामाक्षरं परं यतः ॥१०४॥

ब्रह्मोवाच तदा लक्ष्मि ! तान् सर्वान् त्वरितं वचः ।
सत्रं कुर्वन्तु च्चात्रैवाऽऽराधनात्मकमेव ह ॥१०५॥
तेनाऽऽकृष्टो हरिस्तूर्णं भक्त्यधीनो भविष्यति ।
आगमिष्यति प्रत्यक्षः सेवां वश्च ग्रहीष्यति ॥१०६॥
श्रुत्वैवं सर्वदेवाद्याश्चोभये च प्रचक्रिरे ।
नामसंकीर्तनसत्रं सत्यलोके समाहिताः ॥१०७॥
श्रुत्वाऽहं तापसानां वै तेषां भक्तिसुकीर्तनम् ।
आययौ च त्वया साकं लक्ष्मि ! चाक्षरदेशतः ॥१०८॥
गोचरस्तत्सभामध्ये नेमुस्ते मां परेश्वरम् ।
पुपूजुश्चार्थनां चक्रुर्नित्यवासार्थमेव तु ॥१०९॥
ऋषिमध्ये सत्यलोके सिद्धमध्ये तथा पुनः ।
पितृमध्ये जनलोके मानवेषु क्षितौ तथा ॥११०॥
तथाऽस्त्वेवमहं प्राह त्वया साकं सदा स्थितः ।
**अनादिश्रीमोक्षनारायणः** श्रीपुरुषोत्तमः ॥१११॥
**मुक्तिश्रीरितिनाम्ना** त्वं श्रीमती पुरुषोत्तमी ।
अवसतं सर्वलोकेष्वनेकरूपधारिणौ ॥११२॥
ततस्ते सत्रमापूर्णं कृत्वा ययुर्निजान् गृहान् ।
प्रवृत्ताः प्रवृत्तिमाप्ता निवृत्तिं निवृत्ता अपि ॥११३॥
मदर्पणेन नैर्गुण्यं चाप्ता धाम प्रपेदिरे ।
अन्ये महर्षयो जाताः पुण्यात्मानश्च तत्स्थले ॥११४॥
एवं मया त्वया साकं प्राकट्यं मोक्षदं कृतम् ।
स्मर मन्वन्तरकालं पृथ्व्यामासमहं स्वयम् ॥११५॥
एवमन्येऽप्यवतारा मम जाताः सहस्रशः ।
लक्षशोऽपि च तान् सर्वान् जानाम्यहं न चेतरे ॥११६॥
पठनाच्छ्रवणाच्चाऽस्य भुक्तिं मुक्तिं लभेद् ध्रुवाम् ।
दिव्यां च सुखसम्पत्तिमैहिकीं पारलौकिकीम् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः एकपञ्चाशत्तमे वत्सरे स्वर्णोत्सवेऽनादिश्रीविष्णुनारायणस्य विम्बीश्रीसहितस्य, द्वापञ्चाशत्तमे च वत्सरेऽनादि-श्रीमोक्षनारायणस्य मुक्तिश्रीसहितस्य, प्राकट्य-मित्यादिनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि ! ततोऽजस्य गायत्रीवत्सरे पुनः ।
आद्ये वाराहकल्पे च मनौ च प्रथमे मम ॥ १ ॥
अनादिश्रीकृष्णनारायणस्य परमात्मनः ।
इदानीं वर्तमानस्य शिवराज्ञीश्रिया त्वया ॥ २ ॥
सह मेऽत्राऽस्ति वै प्राकट्यं क्षेत्रेऽक्षरसंज्ञके ।
अश्वपट्टसरस्तीरे कुंकुमवापिकान्तिके ॥ ३ ॥
महालक्ष्मीकम्भराश्रीगृहे सर्वार्थपूरितें ।
श्रीमद्गोपालकृष्णाख्यजनकाद् वै सुराष्ट्रके ॥ ४ ॥
कोट्यर्बुदाऽब्जकन्यानां मनःपूरणहेतवे ।
धर्मसंरक्षणार्थाय कृपया त्वागतस्य मे ॥ ५ ॥
पित्रोस्तपोभिरुग्रैश्चाऽऽकृष्टस्याऽक्षरवासिनः ।
प्राकट्यं मेऽत्र संजातं त्वं मयाऽत्र निजीकृता ॥ ६ ॥
कोट्यर्बुदाऽब्जकन्याभिः साकं नारायणि प्रिये ।
अथापि संभविष्यामि कल्पे कल्पे पुनः पुनः ॥ ७ ॥
त्वयैव साकं कमले क्षेत्रेलोमशवासिते ।
ममाऽवतारा बहवो मत्स्यवाराहकच्छपाः ॥ ८ ॥
कपिलसिंहतुरगा हंसवामननारदाः ।
वासुदेवहरिदत्तात्रेयपर्शुधरर्षभाः ॥ ९ ॥
पृथुयज्ञकुमाराद्या व्यासरामाधिराजकाः ।
धन्वन्तरिबुद्धकृष्णकल्किमोहनिकास्तथा ॥१०॥
हरिकृष्णनरनारायणकृष्णनरायणाः ।
सहस्रशो भविष्यन्ति कार्यवशात् क्षितौ दिवि ॥११॥
युगे युगेऽवतारा मे व्यासाश्चापि युगे युगे ।
भविष्यन्ति यथाधर्मस्थापका धर्मबोधकाः ॥१२॥
भविष्यति शिखायुक्तः श्वेतकृष्णायनो मुनिः ।
श्वेतव्यासः कथावक्ता संहिताया भविष्यति ॥१३॥
अवतारोऽद्य मे साध्यो विष्णुर्नारायणः प्रभुः ।
ब्रह्मलोकनमस्कार्यो धर्मवक्ता भविष्यति ॥१४॥
एवमन्येऽपि वै व्यासा ममांऽशा धर्मबोधकाः ।
सत्यभार्गवसवितृवसिष्ठाऽरुणिसृंजयाः ॥१५॥
ऋतंजयभरद्वाजतृणबिन्दुद्विपायनाः ।
प्रभुर्वल्लभसौरेयदेवानीककृतंभराः ॥१६॥
वारेयकमहाविद्यविभावसुसमाश्रवाः ।
धारीणकसुकौक्षेयवार्षधारवनव्रताः ॥१७॥
भविष्यन्ति ममांशास्ते विद्याप्राकट्यकारिणः ।
कालदैर्घ्येण संख्यातुं चान्येन नैव शक्यते ॥१८॥
कोटिः कोटिसहस्राणामतीता वै स्वभुवाम् ।
कोट्यः कोटिसहस्राणां भविष्यन्ति पुनः पुनः ॥१९॥
अर्थादसंख्यास्ते सर्वे सृष्टिपाः कालभक्षणाः ।
अकालभक्षणा नारायणाः श्रियो मदात्मकाः ॥२०॥
नित्यमुक्तास्तथा याश्च मुच्यन्ते मुक्तकोटयः ।
अकालभक्षाः सर्वे ते धामधामनिवासिनः ॥२१॥
इत्येतत् कथितं लक्ष्मि ! सर्वं पृष्टं यथायथम् ।
अवतारी स्वयं प्रकाशितोऽहं कथितो मया ॥२२॥

सुखं लभ निजं लक्ष्मि ! ममाऽवतारिणः सदा ।
अथाऽन्यच्चापीष्टतमं परिपृच्छ नरायणि ! ॥२३॥

**श्रीशिवराज्ञीश्रीरुवाच—**

तृप्ताऽहं पूर्वरूपाणि ज्ञात्वा कान्तमुखान्मम ।
प्राणेशाय नमस्तेऽस्तु पुरुरूपाय शार्ङ्गिणे ॥२४॥
रौद्रीरमणीनाथश्रीद्युनारायण ते नमः ।
भैरवीधृतियुङ्मेरुनारायणाय ते नमः ॥२५॥
सौरीशातनीयविष्णुनारायणाय ते नमः ।
चान्द्रीकौमुदीशदेवनारायणाय ते नमः ॥२६॥
भूयसीदक्षिणाश्रीशयज्ञत्रयण ते नमः ।
वैष्णवीश्रीश ते ब्रह्मनारायण नमोऽस्तु च ॥२७॥
देववीथीश्रीश आदित्यनरायण ते नमः ।
आनन्तीश्रीश ते गरुत्मन्नारायण ते नमः ॥२८॥
आर्षीपद्मेश ते आर्षनारायणाय ते नमः ।
ज्योत्स्नाश्रीश्वर ते प्राज्ञनारायण नमोऽस्तु ते ॥२९॥
शार्दूलिकाश्रीश वीरनारायणाय ते नमः ।
सरोभद्राश्रीश भद्रनारायणाय ते नमः ॥३०॥
सर्वभद्राश्रीश हरिनारायण नमोऽस्तु ते ।
स्वतन्त्राश्रीपते बीजनारायण नमोऽस्तु ते ॥३१॥
जयालक्ष्मीपते वरनारायण नमोऽस्तु ते ।
सुदर्शनीश्रीश स्त्रीपुंनारायण नमोऽस्तु ते ॥३२॥
जलनारायणीश्रीश जलत्रयण ते नमः ।
स्वधाजश्रीश ते शीलनारायण नमो नमः ॥३३॥
पुण्डरीकश्रीश वार्धिनारायण नमोऽस्तु ते ।
माक्षिकीश्रीश ते चतुर्मुखनारायण नमः ॥३४॥
कृपावतीश्रीश कृपनारायण नमोऽस्तु ते ।
रत्ननारायणीश्रीश तीर्थत्रयण ते नमः ॥३५॥
भक्तिश्रीकान्त ते जीवनारायण नमो नमः ।
अर्धश्रीश्वर तेऽर्धश्रीपतिनारायण नमः ॥३६॥
अर्धोर्ध्वश्रीश्वर तेऽर्धपितृनारायण नमः ।
पिप्पलश्रीपते प्लक्षनारायण च ते नमः ॥३७॥
पीठिकाश्रीश ते शालपुंस्त्वनारायण नमः ।
वटश्रीकान्त ते श्यामनारायण नमो नमः ॥३८॥
राजराज्ञीश्रीश राजनारायण च ते नमः ।
नैष्ठिकीश्रीश ते ब्रह्मचारित्रयण ते नमः ॥३९॥
शिवनारायणीश्रीश शिवत्रयण ते नमः ।
कानकीश्रीपते स्वर्णनारायण च ते नमः ॥४०॥
स्वामिनीश्रीपते स्वामिनारायण च ते नमः ।
निर्वाणीश्रीश सावननारायण च ते नमः ॥४१॥
साध्वीनारायणीश ते साधुनारायण नमः ।
कुंभिकाश्रीश ते भक्तनारायण नमो नमः ॥४२॥
मेघावतीश्रीश ते च मेघनारायण नमः ।
पार्थिवीश्रीश ते वह्निनारायण नमो नमः ॥४३॥
रसनारायणीश्रीश रसत्रयण ते नमः ।
सुधाक्षिणीश्रीश चक्रनारायण नमोऽस्तु ते ॥४४॥
विजयाश्रीपते सत्यनारायण च ते नमः ।
हिरण्याश्रीपते हिरण्यनारायण ते नमः ॥४५॥
नैष्किञ्चनीश्रीश नैरंजनित्रयण ते नमः ।
कल्याणीश्रीपते पुण्यनारायण च ते नमः ॥४६॥
रुक्मवतीश्रीश बृहद्ब्रह्मनारायण नमः ।
सुविद्याश्रीपते गुरुनारायण च ते नमः ॥४७॥
आचार्याणीश्रीश आचार्यनारायण ते नमः ।
वैद्युतीश्रीश ते विद्युन्नारायण नमो नमः ॥४८॥
माधवीश्रीपते मधुनारायण च ते नमः ।
धेनुमतीश्रीश नाथनारायण नमोऽस्तु ते ॥४९॥
विश्वीश्रीश विभुनारायण ते च नमो नमः ।
मुक्तिश्रीश ते मोक्षनारायण नमो नमः ॥५०॥
शिवराज्ञीश्रीश कृष्णनारायणाय ते नमः ।
लक्ष्मीनाथश्रीपते ते कमलाकान्त ते नमः ॥५१॥
पद्मापते रमाकान्त नारायणीश ते नमः ।
इन्दिराकान्त च हिरण्मयीप्राणपते नम ॥५२॥
महालक्ष्मीपते कृष्णापते ईश्वरीश नमः ।
हरिणीकान्त परमेश्वरीपते च ते नमः ॥५३॥
द्रव्यापते च पुरुषोत्तमीपते च ते नमः ।
वैष्णवीश च सम्पद्रूपाधीश च ते नमः ॥५४॥
भगवतीश च हरिदासीश्वर च ते नमः ।
हरिप्रियेश वैकुण्ठिकेश ब्राह्मीश ते नमः ॥५५॥
समृद्धीश्वर शालग्रामीकान्त च ते नमः ।
धनत्रयोदशीकान्त चक्रिणीनाथ ते नमः ॥५६॥
पद्मिनीस्वामिने बिन्दूपतये ते नमो नमः ।
अब्धिजेशाय च स्वर्णरूपिणीकान्त ते नमः ॥५७॥
गोशकृद्वासिनीस्वामिन् ब्रह्महृत्स्थेश ते नमः ।
धनेश्वरीश्वर ऋतंभराय ते नमो नमः ॥५८॥
प्लक्षवासेश्वरीशाय मायेशाय च ते नमः ।
मातृकेश्वर चाऽमायेश्वर सतीश ते नमः ॥५९॥

स्वामिनीनाथ ते ब्रह्मशक्तिकान्त च ते नमः ।
आत्मात्मिकेशाऽन्तरात्मिकेश रमेश ते नमः ॥६०॥
सत्त्वप्रकर्षिणीकान्त पद्मलेश च ते नमः ।
पद्मद्रूपेश्वरश्रीवत्सेश ऐन्द्रीश ते नमः ॥६१॥
जयन्तीश च ते मण्डलात्मिकेश्वर ते नमः ।
सर्वतोभद्रिकास्वामिन् पद्मशिलेश ते नमः ॥६२॥
आक्षरीश च प्रज्ञेश श्रांगारिकेश ते नमः ।
भाग्यरूपेश सिद्धीशाऽवतारिणीपते नमः ॥६३॥
शान्तानाथ परेशांऽशेश्वर कलेश ते नमः ।
विभवीश्वर भूम्नीश धामिनीकान्त ते नमः ॥६४॥
अर्चास्वामिन् जननीश कारिणीवर ते नमः ।
देवीश्वरीश्वरीश्वर मुक्तानिकापते नमः ॥६५॥
प्रपोषिकेश च परब्रह्मपत्नीपते नमः ।
अनादिनीपते मम पते वृन्दापते नमः ॥६६॥
तुलसीकान्त ते चापि भार्गवीपतये नमः ।
अनादिश्रीकृष्णनारायणपत्नीश ते नमः ॥६७॥
अनादिनीपते वैभवेश्वरीशाय ते नमः ।
सम्पत्तीश च वासुदेवीश्वर च ते नमः ॥६८॥
कार्ष्णीस्वामिन् हंसिकेश माणिकीकान्त ते नमः ।
पद्मावतीपते राधापते गोपीपते नमः ॥६९॥
पार्षदानीपते पद्मालयापते च ते नमः ।
आजानुबाह्वीशाय यान्त्रिकीशाय ते नमः ॥७०॥
सौराष्ट्रीशाय ते चाजनाभीश्वराय ते नमः ।
देविकापतये षष्ठीमनसापतये नमः ॥७१॥
दीपावलीस्वामिने ते तलाजापतये नमः ।
कामधेनवीकान्ताय आर्जन्तीस्वामिने नमः ॥७२॥
क्रोधनास्वामिने ते च गह्वरास्वामिने नमः ।
सूचीकान्ताय च वनदेवीश्वराय ते नमः ॥७३॥
दामनीस्वामिने कंकाताळीनाथाय ते नमः ।
पितृकन्यास्वामिने ते दासीश्वराय ते नमः ॥७४॥
रासातळीस्वामिने ते वासन्तीपतये नमः ।
साल्मालीश्वर मातृकेश्वराय च ते नमः ॥७५॥
स्वास्तिकीनाथ नागेशीश्वराय ते नमो नमः ।
शावदीनीस्वामिने ते ऐन्द्रजालीश ते नमः ॥७६॥
सरस्वतीस्वामिने ते विद्याकान्ताय ते नमः ।
लक्ष्मणीपतये भूगर्भीयानाथाय ते नमः ॥७७॥
नाडिकापतये वैश्वावासवीपतये नमः ।
जुम्मासेम्लीस्वामिने से सान्तपनीश ते नमः ॥७८॥
सौरतीस्वामिने महाबालेश्वरीश ते नमः ।
ऐलबीलाधीश दाक्षजवंगरीश ते नमः ॥७९॥
औष्णालयीनाथ प्राजाकीयेश्वर नमोऽस्तु ते ।
पैत्रीनाथाय ते सेविकेश्वराय च ते नमः ॥८०॥
प्राचीनीपतये नृपीपतये ते नमो नमः ।
पैशंगीपतये सान्तारणीनाथाय ते नमः ॥८१॥
शैत्रीश्वराय ते थार्कूटस्थीश्वराय ते नमः ।
वैरजारीस्वामिने ते शास्त्यक्षिणीश ते नमः ॥८२॥
पिचाशिनीश्वर कालिमाशीनाथाय ते नमः ।
औरलकेतवीस्वामिन् क्राथकीश च ते नमः ॥८३॥
पार्थवीराजिकेशाय चौष्ट्रालीशाय ते नमः ।
हंकारीपतये जयकाष्ठलीपतये नमः ॥८४॥
तीराणीपतये चाल्वीनारीशाय च ते नमः ।
वार्धिकापतयेऽनाथानाथाय ते नमो नमः ॥८५॥
राजपुत्रीश्वर प्रकीर्णिकाकान्तेश ते नमः ।
आल्पकेतवीकान्ताय जयकार्ष्णीश्वराय च ॥८६॥
पारीशानीस्वामिने ते चैन्दुरायीश ते नमः ।
मौद्राण्डीपतये गण्डात्मजानाथाय ते नमः ॥८७॥
लैनोर्णीस्वामिने बार्हच्छरीश्वराय ते नमः ।
बाललीनीस्वामिने ते वारसैंद्वीश ते नमः ॥८८॥
रायगामलिकाकान्त स्तोकद्दोमीश ते नमः ।
फैनतान्तवीनाथाय काष्ठयानीश ते नमः ॥८९॥
कोलकीशाय च दैनमानीशाय च ते नमः ।
रायकिन्नटिकास्वामिन् रायकोटीश्वरीश ते ॥९०॥
राणजितीस्वामिने ते वाकक्षिकेश ते नमः ।
मारीशीपतये वालेश्वरीश्वराय ते नमः ॥९१॥
लाम्बरीस्वामिने रायनवार्कीपतये नमः ।
ढुण्डिशास्वामिने कूपेशिकाधिपतये नमः ॥९२॥
कालीमाण्डीस्वामिने ते जेलेशीपतये नमः ।
पारावारीस्वामिने ते कोटिश्वरीश ते नमः ॥९३॥
सातीशिकास्वामिने ते कार्कशिनीश ते नमः ।
आण्डजारीश ते बाल्यराजसीपतये नमः ॥९४॥
सौमनिकापतये ते गात्राक्षीपतये नमः ।
पाराङ्व्रत्तीश सुमणीश्वरीनाथ च ते नमः ॥९५॥
ऐशानपानीपतये रायपानीभृते नमः ।
मंगलापतयेऽमृतापतये ते नमो नमः ॥९६॥
प्रेमादिपतये राशीपतये ते नमः ।
कौबेरीपतये चापि माहेन्द्रीपतये नमो नमः ॥९७॥

यमीश्वराय च नमो वायवीशाय ते नमः।
वैश्वकर्मीस्वामिने ते वार्क्षीनाथाय ते नमः ॥९८॥
रौद्रीशाय च ते वह्निपुत्रीश्वराय ते नमः।
श्रावणीस्वामिने ते खानिजीनाथाय वै नमः ॥९९॥
सांवत्सरीस्वामिने ते गोपिकेशाय ते नमः।
प्राचीनीपतये ते च पिशंगीपतये नमः ॥१००॥
राशियानीस्वामिने ते रोमायनीश ते नमः।
पारशीपतये ते च खैबरीपतये नमः ॥१०१॥
किन्नरीस्वामिनेऽमरीकान्ताय ते नमो नमः।
गौरीशाय परीशायाऽऽब्रिक्तीशाय च ते नमः ॥१०२॥
हारितीशाय पातालीश्वराय ते नमो नमः।
स्वार्गिणीशायाऽप्सरःकान्ताय ते च नमो नमः ॥१०३॥
ब्रह्मसरःपतये ते गायिकापतये नमः।
विद्युन्मणिस्वामिने ते कुशलेशाय ते नमः ॥१०४॥
भौमीश्वराय च तुभ्यं दानवीशाय ते नमः।
शक्तिनाथाय च कशीराशीशाय नमो नमः ॥१०५॥
धेनुपालीस्वामिने ते सखीश्वराय ते नमः।
राजराजेश्वरीशाय लीलेश्वराय ते नमः ॥१०६॥
विभुतीशाय च दिव्यसिद्धीश्वराय ते नमः।
अशनापतये विश्वापतये ते नमो नमः ॥१०७॥
श्रीधराय भगवतीस्वामिने ते नमो नमः।
महामायाधिपतये प्रकृतीशाय ते नमः ॥१०८॥
न्यासिनीपतये साध्वीपतये ते नमो नमः।
पतिव्रतास्वामिने ते दीक्षाधिपतये नमः ॥१०९॥
प्रपत्तिपतये राधेशाय प्रियाभृते नमः।
वैराजीशाय च भूतीश्वराय ते नमो नमः ॥११०॥
सृष्टीशाय विनष्टीशाय पुष्टीशाय ते नमः।
गीतेश्वराय उपनिषदीश्वराय ते नमः ॥१११॥
श्रुतीश्वराय च पराविद्येश्वराय ते नमः।
गायत्रीशाय नमस्ते शारदेशाय ते नमः ॥११२॥
शाब्दीशाय नमस्तुभ्यमेकादशीश ते नमः।
द्वादशीशाय च नमो जयन्तीशाय ते नमः ॥११३॥
भावनेशाय च मुक्तीशाय तुभ्यं नमो नमः।
सेवानाथाय ते चाराधनाकान्ताय ते नमः ॥११४॥
गंगानाथाय च मोक्षपुरीनाथाय ते नमः।
सांख्ययोगिनीश्वराय नैष्ठिकीपतये नमः ॥११५॥
त्यागिनीपतये चार्याधीशाय च ते नमः
योगिनीपतये वीतरागीशाय ते नमः ॥११६॥

नागवल्लीस्वामिने ते पूगीश्वराय ते नमः।
रतिनाथाय सुरभिस्वामिने ते नमो नमः ॥११७॥
निर्वृत्तीशाय सन्ध्याऽधिपतये ते नमो नमः।
मोहिनीशाय च विद्याश्रीशाय ते नमो नमः ॥११८॥
किंपुरुषीस्वामिने ते कृषीश्वराय ते नमः।
आब्रीश्वराय च मृदीश्वराय ते नमो नमः ॥११९॥
भूपतये ललितास्वामिने ते च नमो नमः।
कुंकुमवापीश संहितानाथाय नमो नमः ॥१२०॥
गुर्वीश्वराय च मुद्रिकेश्वराय च ते नमः।
अरणीशाय च काशीश्वराय ते नमो नमः ॥१२१॥
तपस्विनीस्वामिने ते सैरन्ध्रीशाय ते नमः।
धात्रीशाय च नमो नागरीशाय ते नमः ॥१२२॥
परिव्राजिकाकान्तायाऽऽर्यसूरिणीश्वराय च।
रमेशाय तथा रामेशाय ते च नमो नमः ॥१२३॥
स्तुतीशायाऽऽरार्तिकेशाय पूजेशाय ते नमः।
अम्बिकेशाय च नभोवाणीश्वराय ते नमः ॥१२४॥
बुद्धीश्वराय च स्तनश्रीश्वराय च ते नमः।
प्रतिमाश्रीपतयेऽव्यक्तेशाय च ते नमः ॥१२५॥
रसाधिपतये सुधापतये ते नमो नमः।
पुण्याधिपतये मिष्टापतये ते नमो नमः ॥१२६॥
पाकिनीशाय धान्याधिपतये ते नमो नमः।
आज्ञानाथाय च मुमुक्षापतये च ते नमः ॥१२७॥
विरजेशाय च चन्द्रकालेशाय च ते नमः।
सुशीलापतये कदम्बमालेशाय ते नमः ॥१२८॥
पारिजाताऽधिपतये कालिकापतये नमः।
दुर्गानाथाय चम्पाधिपतये ते नमो नमः ॥१२९॥
नन्दिनीशाय च पट्टांगनेशाय च ते नमः।
सरयूस्वामिने सात्त्वतीशाय ते नमो नमः ॥१३०॥
साकेतापतये सुदक्षिणाधिपतये नमः।
करीषिणीस्वामिने ते हरिणीपतये नमः ॥१३१॥
धरणीस्वामिने लीलास्वामिने ते नमो नमः।
सत्यानाथाय पाञ्चालीपतये ते नमो नमः ॥१३२॥
प्रदीपापतये भागिरथीकान्ताय ते नमः।
कनकास्वामिने चैरावतीनाथाय ते नमः ॥१३३॥
सरोजिनीस्वामिने ते कान्ताकान्ताय ते नमः।
गोमतीपतये रेवास्वामिने ते नमो नमः ॥१३४॥
विशालाक्षिस्वामिने ते स्वर्णरेखेश ते नमः।
रेवतीस्वामिने ऋकूस्वामिने ते च नमो नमः ॥१३५॥

वैकुण्ठापतये ब्रह्मसतीकान्ताय ते नमः ।
ईशावास्यास्वामिने ते स्मृतिकान्ताय ते नमः ॥१३६॥
कन्याकान्ताय च भद्राकान्ताय ते नमो नमः ।
ओजस्वतीस्वामिने ते सत्ताकान्ताय ते नमः ॥१३७॥
विष्णुगर्भाधिपतये वैराज्ञीपतये नमः ।
देवीश्वराय च प्रधानास्वामिने नमो नमः ॥१३८॥
वरणीपतये गोलोकीश्वराय ते नमः ।
बदरीशाय च श्वेतानाथाय ते नमो नमः ॥१३९॥
पावनीपतये चाऽव्याकृतिकान्ताय ते नमः ।
धात्रीशाय च ज्योत्स्नास्वामिने ते नमो नमः ॥१४०॥
वीर्याकान्ताय महतीनाथाय ते नमो नमः ।
ओषधिपतयेऽजापतये ते च नमो नमः ॥१४१॥
विश्वंभरास्वामिने ते चान्नपूर्णाभृते नमः ।
विभावरीस्वामिने ते दक्षिणापतये नमः ॥१४२॥
आहुतीशाय च सनातनीश्वराय ते नमः ।
अञ्जनीशाय च गण्डकीश्वराय च ते नमः ॥१४३॥
ते सीतेशाय शबरीपतये पिंगलाभृते ।
प्रेयसीपतये चापि श्रेयसीपतये नमः ॥१४४॥
मालावतीस्वामिने ते द्वारिकेशाय ते नमः ।
सिंहवतीस्वामिने ते त्रिस्पृशास्वामिने नमः ॥१४५॥
पक्षवर्धिनीनाथायोन्मिलनीस्वामिने नमः ।
उत्पत्तिस्वामिने मोक्षदाकान्ताय च ते नमः ॥१४६॥
सफलास्वामिने पुत्रप्रदानाथाय ते नमः ।
षट्तिलास्वामिने जयास्वामिने ते नमो नमः ॥१४७॥
विजयास्वामिने चामलकीनाथाय ते नमः ।
पापमोचनीनाथाय कामदेशाय ते नमः ॥१४८॥
वरूथिनीस्वामिने ते मोहिनीस्वामिने नमः ।
अपरास्वामिने ते च निर्जलास्वामिने नमः ॥१४९॥
योगिनीस्वामिने ते च शयनीस्वामिने नमः ।
कामिकास्वामिने ते च पुत्रदास्वामिने नमः ॥१५०॥
अजानाथाय पद्मानाथायेन्दिराभृते नमः ।
पाशांकुशाधिनाथाय रमानाथाय ते नमः ॥१५१॥
प्रबोधिनीश्वरायाऽपि कमलेशाय ते नमः ।
धामदेशाय च कपिलेशाय ते नमो नमः ॥१५२॥
शलभेशाय च चन्द्रभागेशाय च ते नमः ।
कुमुद्वतीस्वामिने ते नित्यानाथाय ते नमः ॥१५३॥
चन्द्रकान्ताय पद्माक्षीस्वामिने ते नमो नमः ।
कान्तिमतीस्वामिने ते हृषीकेशाय ते नमः ॥१५४॥
अपराजितानाथाय पद्मवतीश ते नमः ।
सुनन्दास्वामिने धीपतये ते च नमो नमः ॥१५५॥
नन्दानाथाय च त्रयीस्वामिने ते नमो नमः ।
क्षेमंकरीस्वामिने ते सुन्दरीपतये नमः ॥१५६॥
सुभगास्वामिने सुलक्षणानाथाय ते नमः ।
कूर्मीनाथाय च मत्स्यीनाथाय ते नमो नमः ॥१५७॥
अश्विनीस्वामिने हंसीस्वामिने ते नमो नमः ।
सौभाग्यसुन्दरीशाय कल्किनीस्वामिने नमः ॥१५८॥
दुःखहाश्रीस्वामिने ते वञ्जुलीस्वामिने नमः ।
रात्रीश्वराय नमोऽश्ववेश्वराय नमो नमः ॥१५९॥
क्षीरोदतनयेशाय घण्टिकापतये नमः ।
नीराजनाधिनाथाय घटिकास्वामिने नमः ॥१६०॥
वसुमत्यधिनाथाय ऋतंभराभृते नमः ।
राध्यासापतये दिव्यारुणानाथाय ते नमः ॥१६१॥
वम्रीनाथाय च ज्योष्ट्रीनाथाय ते नमो नमः ।
सुदुघास्वामिने कैदारिकानाथाय ते नमः ॥१६२॥
जालन्धरीस्वामिने ते शंखचूडीभृते नमः ।
मालतीस्वामिने बर्बरिकानाथाय ते नमः ॥१६३॥
वेदवतीस्वामिने ते पद्मिनीस्वामिने नमः ।
वृन्दावनीस्वामिने ते कंवतीस्वामिने नमः ।
पीवरीस्वामिने मरुपत्नीनाथाय ते नमः ॥१६४॥
तीर्थवल्लीस्वामिने ते तीर्थश्रीस्वामिने नमः ।
तिलोत्तमास्वामिने ते रूपवतीभृते नमः ॥१६५॥
वेदमातृवरायाऽपि गायत्रीपतये नमः ।
सरमेशाय च पैप्पलादीश्वराय ते नमः ॥१६६॥
उपलेशाय धरणिजेशाय ते नमो नमः ।
धरेशाय नमस्तुभ्यं मातुलीशाय ते नमः ॥१६७॥
पिङ्गलीशाय च मृगीशाय ते च नमो नमः ।
गौरस्वरूपिणीशाय नीतीश्वराय ते नमः ॥१६८॥
बुद्धीश्वराय च नमः सत्क्रियेशाय ते नमः ।
तुष्टीशाय नमस्तुभ्यं कामनेशाय ते नमः ॥१६९॥
वेदिकेशाय च नमश्चाज्याहुतिभृते नमः ।
पत्नीशालाधिपतये चितिनाथाय ते नमः ॥१७०॥
इध्मानाथाय च नम उद्गीतिपतये नमः ।
धृतीशाय नमो वेलास्वामिने च नमो नमः ॥१७१॥
धूमोर्णापतये ते च काष्ठाधीशाय ते नमः ।
वधूनाथाय च लतानाथाय ते नमो नमः ॥१७२॥

नदीनाथाय च नमः पताकापतये नमः ।
भोगिनीपतये नमो रसिकापतये नमः ॥१७३॥
चिदानन्दीस्वामिने ते मृत्युलक्ष्मीभृते नमः ।
सुश्रुतिपतये विजयन्तीश्वराय ते नमः ॥१७४॥
सुकन्यापतये नमश्चाऽलसापतये नमः ।
श्रीछायास्वामिने चित्रलेखानाथाय ते नमः ॥१७५॥
नवरंगाधिपतये किंशुकीस्वामिने नमः ।
कल्पलताधिनाथाय बकुलापतये नमः ॥१७६॥
चित्रवतीस्वामिने ते चारुपद्माभृते नमः ।
सुवर्णमुखरीशाय मालावतीभृते नमः ॥१७७॥
वीराधिपतये प्रभावतीनाथाय ते नमः ।
श्रीमतीस्वामिने पण्यास्वामिने ते नमो नमः ॥१७८॥
नागलक्ष्मीस्वामिने ते ज्योतिष्मतीभृते नमः ।
उद्योगिनीस्वामिने ते पूर्णानाथाय ते नमः ॥१७९॥
सिद्धेश्वरीस्वामिने ते कृतिकान्ताय ते नमः ।
कवितास्वामिने ग्रन्थिवरात्मने नमो नमः ॥१८०॥
तालिकास्वामिने चापि संगीतिस्वामिने नमः ।
प्रहारिणीपतये ते मानिनीस्वामिने नमः ॥१८१॥
जरत्कार्वीस्वामिने ते स्वस्तिनाथाय ते नमः ।
क्षमानाथाय च नमः प्रतिष्ठापतये नमः ॥१८२॥
लज्जानाथाय च नमः पिपासापतये नमः ।
दाहिकास्वामिने श्रद्धास्वामिने ते नमो नमः ॥१८३॥
मैथिलीयूथनाथाय कौशलास्वामिने नमः ।
निकुंजकान्तानाथाय शय्याकान्ताय ते नमः ॥१८४॥
पुरन्ध्रीकुलकान्ताय किरातीस्वामिने नमः ।
पुलिन्दीस्वामिने सिंहलद्वीपस्त्रीभृते नमः ॥१८५॥
दैशिकीस्वामिने नमो विदैशिकीभृते नमः ।
क्रतुकानकीनाथायाऽजितपत्नीभृते नमः ॥१८६॥
श्रीलोकाद्रिप्रियेशाय देवतेशाय ते नमः ।
सामुद्रिकास्वामिने ते पार्थिवीस्वामिने नमः ॥१८७॥
उर्वशीव्रातनाथाय सुतलीस्वामिने नमः ।
त्रिवेणीप्राणनाथाय शबरीशाय ते नमः ॥१८८॥
पम्पावराय च राजेश्वरीशाय च ते नमः ।
लम्बाननाधिनाथाय चाजामुखीश्वराय च ॥१८९॥
कन्याकुमारिकेशाय गोपकन्याभृते नमः ।
रैवतीस्वामिने नमो गौलीस्वामिने नमः ॥१९०॥
जीवन्तीपतये लावण्यवतीपतये नमः ।
मालिनीप्राणनाथाय कुब्जिकास्वामिने नमः ॥१९१॥

यवनीस्वामिने मृगावतीनाथाय ते नमः ।
कान्तिमतीस्वामिने ते जरद्गौरीश्वराय च ॥१९२॥
सुमित्रास्वामिने सुतानाथाय ते नमो नमः ।
विन्ध्यावलीस्वामिने ते पौष्यनैषेयिकाभृते ॥१९३॥
वर्धिनीस्वामिने वैश्रावसवीशाय ते नमः ।
कुलादेवीस्वामिने ते रासेश्वरीभृते नमः ॥१९४॥
राजवतीस्वामिने सीमन्तिनीशाय ते नमः ।
सामवतीस्वामिने ते चाऽऽनर्तीशारदाभृते ॥१९५॥
महानन्दास्वामिने बन्दुलानाथाय ते नमः ।
मनोरमाधिनाथाय शुचिष्मतीभृते नमः ॥१९६॥
अर्चिष्मतीस्वामिने सुशीलाविप्राभृते नमः ।
कलावतीस्वामिने ते लीलावतीभृते नमः ॥१९७॥
रत्नावलीस्वामिने ते शशिलेखाभृते नमः ।
अनङ्गलेखापतये चित्रलेखाभृते नमः ॥१९८॥
दिव्यार्षीस्वामिने चापि सुरसास्वामिने नमः ।
वर्षाभ्वीस्वामिने पारावतीनाथाय ते नमः ॥१९९॥
प्रभावतीस्वामिने ते नर्मदास्वामिने नमः ।
रोहिणीशाय कुमुदाकान्ताय ते नमो नमः ॥२००॥
पुरुहूतापतये च शर्मवतीभृते नमः ।
सुधाम्नीस्वामिने ते च माधवी स्वामिने नमः ॥२०१॥
कुन्ददन्तीस्वामिने ते कदम्बमालिकाभृते ।
शाण्डिलीस्वामिने मधुविद्याभृते च ते नमः ॥२०२॥
अश्वमुखीस्वामिने ते गजमुखीश्वराय च ।
अम्बेश्वराय च वृद्धेश्वराय ते नमो नमः ॥२०३॥
कुंकुमवापीनाथाय हिंगलाजीश्वराय च ।
कामाक्षीस्वामिने ते च मीनाक्षीशाय ते नमः ॥२०४॥
दमयन्तीस्वामिने ते भद्रिकास्वामिने नमः ।
प्रीतिकर्णोत्पलेशाय दीर्घिकेशाय ते नमः ॥२०५॥
फलवतीस्वामिने ते ह्यमानाथाय ते नमः ।
गोभिलास्वामिने गोपसुतानाथाय ते नमः ॥२०६॥
उदुम्बरीस्वामिने तेऽष्टषष्टिस्वामिने नमः ।
रत्नवतीस्वामिने ते शुभाक्षीस्वामिने नमः ॥२०७॥
देवलीलास्वामिने ते देवनदीश्वराय च ।
बहुचराधिनाथाय हिंगुलाजाभृते नमः ॥२०८॥
ब्रह्ममोहिनीनाथायाऽनुवृत्तिस्वामिने नमः ।
विशालापतये पराविद्याधिपतये नमः ॥२०९॥
देवतापतये चित्याकुतिस्वामिन्नमोऽस्तु ते ।
पुरीनाथाय कमलेश्वरीशाय नमो नमः ॥२१०॥

प्राचीनाथाय च ऋषितोयानाथाय ते नमः ।
गौतमीशाय च वपुष्मतीशाय च ते नमः ॥२११॥
मणिकर्णाधिनाथाय श्रीमातृस्वामिने नमः ।
नमः पार्थाधिपतये माहिष्मतीभृते नमः ॥२१२॥
भिल्लिकास्वामिने तुभ्यं सौराष्ट्रीशीभृते नमः ।
व्याघ्रीशाय नमस्तुभ्यं चिल्लीनाथाय ते नमः ॥२१३॥
तिथिनाथायाऽऽभिचारिणीश्वराय च ते नमः ।
निषादीस्वामिने व्यालीस्वामिने ते नमो नमः ॥२१४॥
चतुर्भुजाधिनाथाय हर्षसिद्धिभृते नमः ।
सारिकापतये विश्वरूपानाथाय ते नमः ॥२१५॥

शृगालीपतये ते च मयूरीशाय ते नमः ।
मंगलास्वामिने शैलीकन्यकास्वामिने नमः ॥२१६॥
नालमेधीस्वामिने ते भक्तानाथाय ते नमः ।
विमलास्वामिने चापि लम्बिकास्वामिने नमः ॥२१७॥
मरीचिकाधिनाथाय वेदीनाथाय ते नमः ।
गुण्डिचाधिप्रणाथाय भक्तीश्वराय ते नमः ॥२१८॥
रोहिणीशाय च कामदुघेशाय च ते नमः ।
रतीश्वराय च पृथ्वीश्वराय ते नमो नमः ॥२१९॥
संज्ञेश्वराय च देविकेश्वराय च ते नमः ।
विभावर्यधिनाथाय मूर्तिकान्ताय ते नमः ॥२२०॥

रुक्मिणीस्वामिने प्रेमसखीकान्ताय ते नमः ।
गोदावरीस्वामिने ते कपिलास्वामिने नमः ॥२२१॥
स्वर्णगौरीस्वामिने ते रंभानाथाय ते नमः ।
शीतलास्वामिने चम्पास्वामिने ते नमो नमः ॥२२२॥
साध्यानाथाय धन्याधिस्वामिने ते नमो नमः ।
पुष्पाकान्ताय च कोकिलाकान्ताय नमो नमः ॥२२३॥
पूर्णिमाधिपतये ते मञ्जरीशाय ते नमः ।
गालवीशाय च याज्ञसेनीशाय च ते नमः ॥२२४॥

श्रीमतीस्वामिने लीलावतीनाथाय ते नमः ।
कदलीस्वामिने कालिन्दीश्वराय च ते नमः ॥२२५॥
हैमीश्वराय च महावेदीश्वराय ते नमः ।
खनीश्वराय च सनातनीश्वराय ते नमः ॥२२६॥
श्यामानाथाय च सर्वेशनीशाय च ते नमः ।
तपस्विनीस्वामिने ते गायिकास्वामिने नमः ॥२२७॥

कल्पपुत्तलिकेशाय ईशिकास्वामिने नमः ।
लाजाधिपतये प्रेंखानाथाय ते नमो नमः ॥२२८॥
नमः श्रीमंगलागौरीस्वामिने ते नमो नमः ।
क्रोधनापतये ते च श्रीवल्लीस्वामिने नमः ॥२२९॥

वीरकन्याधिपतये रणचण्डीश्वराय च ।
गरुत्मतीस्वामिने ते भीरुलक्ष्मीश ते नमः ॥२३०॥
बालाहकीस्वामिने ते सुसहास्वामिने नमः ।
किरणास्वामिने द्युतिस्वामिने ते नमो नमः ॥२३१॥
नूलकुमारिकास्वामिनाथाय ते नमो नमः ।
शत्रुञ्जयीस्वामिने ते काललक्ष्मीश्वराय च ॥२३२॥
श्रावणीपतये सांवत्सरीकान्ताय ते नमः ।
कालकन्याधिपतये वह्निजास्वामिने नमः ॥२३३॥
प्रैतीनाथाय पित्रीस्वामिने ते च नमो नमः ।
दर्व्यादिस्वामिने राशिकन्याकान्ताय ते नमः ॥२३४॥

आनन्दिनीस्वामिने ते महाब्राह्मीश ते नमः ।
शान्तिनाथाय च परधाम्नीशाय च ते नमः ॥२३५॥
प्रधानापतये चापि प्राह्लादीपतये नमः ।
विभूषापतये कलिकाद्याधिपतये नमः ॥२३६॥
दैत्यानिकाधिनाथाय सुनन्दिनीभृते नमः ।
भोगिनीस्वामिने महाकालीनाथाय ते नमः ॥२३७॥
केसरिपृष्ठगाभृते तपतीस्वामीने नमः ।
सौदाम्नीपतये हरिजिह्वाधिपतये नमः ॥२३८॥
दृषद्वतीप्रकान्ताय कृत्तिकास्वामिने नमः ।
करञ्जनिलयानाथात्मने ते च नमो नमः ॥२३९॥

लोहितायनिकानाथात्मने ते च नमो नमः ।
नाट्यनटीस्वामिने ते नारीश्वराय ते नमः ॥२४०॥
कथानाथाय च सञ्जीवनीनाथाय ते नमः ।
राणिकापतयेऽमरपुत्रिकापतये नमः ॥२४१॥
धन्येश्वरीस्वामिने ते सतीशास्वामिने नमः ।
देवानिकीस्वामिने ते कुण्णिकास्वामिने नमः ॥२४२॥
कुशानाथाय तेऽनरण्यसुतेशाय ते नमः ।
परानाथाय च हृच्छायिनीनाथाय ते नमः ॥२४३॥

पट्टकन्यास्वामिने ते कृतमालाभृते नमः ।
माँऽजाम्बिकाधिनाथाय जलनारीभृते नमः ॥२४४॥
विद्यास्नातास्वामिने ते सुषुम्णास्वामिने नमः ।
इडानाथाय च नमः पिंगलापतये नमः ॥२४५॥
यशस्विनीस्वामिने ते विश्वोदराभृते नमः ।
पयस्विनीस्वामिने ते तेजस्विनीभृते नमः ॥२४६॥

नमः पुरीतत्पतये गान्धारीपतये नमः ।
अरजास्वामिने चित्रांगदानाथाय ते नमः ॥२४७॥
दैत्यनारीप्रणाथाय श्वेतानाथाय ते नमः ।
रक्तानाथाय च पीतानाथाय ते नमो नमः ॥२४८॥

नीलानाथाय च नमो जयश्रीपतये नमः ।
सेवादेवीश्वरायोर्ध्वरेतसीपतये नमः ॥२४९॥
आरवीस्वामिनेऽनाथास्वामिने ते नमो नमः ।
गोपदेवीस्वामिने ते मेरुकोटीश्वराय च ॥२५०॥
कल्पपावटित्रेशाय कुलपूज्याभृते नमः ।
नमः किशोरीस्वामिने सुकृतिस्वामिने नमः ॥२५१॥
राथीतरीस्वामिने च धामकन्याभृते नमः ।
ऋषिपत्नीस्वामिने ते त्यागिनीस्वामिने नमः ॥२५२॥
मनुकन्याधिपतये भक्तकन्याभृते नमः ।
सुराणीपतये ते चाऽसुराणीपतये नमः ॥२५३॥
धनालसाधिपतये त्र्यष्टकार्वीभृते नमः ।
धुमतीपतये ते च सांख्यसतीश ते नमः ॥२५४॥
शीलवतीस्वामिने ते भीमाश्रीपतये नमः ।
कृष्णानाथाय च तुंगभद्रानाथाय ते नमः ॥२५५॥
ऐलविलाधिनाथाय सह्याद्रिजीभृते नमः ।
दुग्धानाथाय जीवन्तीस्वामिने ते नमो नमः ॥२५६॥
महामारीस्वामिने ह्रस्वबद्रीश ते नमः ।
ब्रह्मयोषित्पतये ते धीनाथाय ते नमः ॥२५७॥
सुनन्दापतये नमो लविंगास्वामिने नमः ।
चक्रवाकीस्वामिने ते मार्जारीशाय ते नमः ॥२५८॥
जानकीपतये काञ्चनीगंगापतये नमः ।
चन्द्रावतीस्वामिने चेरावतीस्वामिने नमः ॥२५९॥
शालावतीस्वामिने ते हरांगिकाभृते नमः ।
मीनकंगधिनाथाय ब्रह्मपुत्रीभृते नमः ॥२६०॥
शिक्षांगापतये नमो मौक्तिकापतये नमः ।
पन्नामीपतये मणिवर्णानाथाय ते नमः ॥२६१॥
नारायणीस्वामिने ते मेनकांगाभृते नमः ।
अंगशिवांगिकाभृते लवहिताभृते नमः ॥२६२॥
लाटिशापतये नमः कानिशापतये नमः ।
मार्पीगापतये नमः सीक्यांगापतये नमः ॥२६३॥
अंगस्वांगाधिनाथाय तारिमापतये नमः ।
अंगहास्वामिने पर्णवर्णानाथाय ते नमः ॥२६४॥
मन्नाम्निस्वामिने देववर्णानाथाय ते नमः ।
रंगवर्णास्वामिने ते शरभीपतये नमः ॥२६५॥
तरलिकाधिनाथाय कुमुदास्वामिने नमः ।
देववरूथिनीशाय शूरदेवीश्वराय च ॥२६६॥
पिशाचीशतनाथाय दीक्षितास्वामिने नमः ।
त्रिनेत्रिकाधिकान्ताय चोरुलास्वामिने नमः ॥२६७॥

जगतीस्वामिने पाटलिकानाथाय ते नमः ।
ध्वजानाथाय च योनिभृते तुभ्यं नमो नमः ॥२६८॥
शिलानाथाय च यशोवत्यादिस्वामिने नमः ।
मेखलास्वामिने चाधिदेवतास्वामिने नमः ॥२६९॥
प्रोक्षणीस्वामिने तुरीदेवीनाथाय ते नमः ।
भुवनेशीस्वामिने ते गंगापुत्रीश ते नमः ॥२७०॥
वल्गुप्रभृतिनाथाय चेन्दिरास्वामिने नमः ।
आम्रजान्यादिनाथाय वामदेवीसुताभृते ॥२७१॥
अमरीस्वामिने मास्वामिने तुभ्यं नमो नमः ।
निर्गुणापतये सर्वापतये ते नमो नमः ॥२७२॥
काश्यपीपतये कुण्डलिनीनाथाय ते नमः ।
आपस्तम्बादिपतये निजाकान्ताय ते नमः ॥२७३॥
मत्कुंजेशाय च आमजनायाः पतये नमः ।
अकान्तकान्ताकान्ताय मम कान्ताय ते नमः ॥२७४॥
श्रीरंगायाऽशोकसुन्दरीश्रीकान्ताय ते नमः ।
द्वादशोत्तरसाहस्रयुगलात्माभिधाय ते ॥२७५॥
विशिष्टस्वामिने स्वीयास्वामिने ते नमो नमः ।
शिवराज्ञीलक्ष्मीशाय नारायणीशाय नमः ॥२७६॥
दयाजयारमाहैमीमनूर्ज्ञालाडकीभृते ।
मालतीसुगुणाहंसीकस्तूरीपतये नमः ॥२७७॥
मुक्ताभुक्ताधिनाथाय रक्तारिक्ताभृते नमः ।
स्मृत्वा सर्वाणि रूपाणि मद्युक्तानि प्रभोस्तव ।
भवाम्यतीव मुदिता युगलानि सुखानि च ॥२७८॥
अन्यान्यपि त्वसंख्यानि स्मर्यन्ते कृपया तव ।
अन्यानन्दं समाप्तास्मि भूयः कान्ताय ते नमः ॥२७९॥
अथाऽन्यानि चरित्राणि भक्तानां त्वद्गतात्मनाम् ।
मोक्षार्थानि वृषार्थानि श्रोतुमिच्छामि तद्रसा ॥२८०॥
एतद् युगलश्रीकान्तस्तोत्रं नामसहस्रकम् ।
द्वादशोत्तरनामाढ्यं चतुःपुमर्थदं परम् ॥२८१॥
सौभाग्यदं वंशदं च लक्ष्मीदं सम्पदां प्रदम् ।
राज्यदं स्वर्गदं सर्वभोग्यदं स्वेष्टदं परम् ॥२८२॥
सिद्धिदं पुण्यदं मूर्तौ समाधिदं च पावनम् ।
पापहं मृत्युहं विघ्ननाशकं दुःखनाशकम् ॥२८३॥
दिव्यभावप्रदं परामुक्तिभूप्रापकं शुभम् ।
अलभ्यदं तथाऽऽरोग्यप्रदं स्मृद्धिप्रदं सदा ॥२८४॥
पठतां श्रृण्वतां सर्वनामार्थस्मरतां तथा ।
नरनारीसमस्तानां सर्ववाञ्छाप्रपूरकम् ॥२८५॥

साक्षान्मन्मुखतो जातं लक्ष्मीजं श्रीप्रदं हरे ।
लक्ष्मीरहं स्तवरूपा स्तवपात्रं भवान् पतिः ॥२८६॥
आवयोः स्तावकानां चावयोस्तुल्यत्वमस्त्विति ।
अनादिश्रीकृष्णनारायण नमोऽन्तरात्मने ॥२८७॥
सर्वाभ्यस्तव योषाभ्यो नमो भूयो नमो नमः ।
वद मेऽन्यचरित्राणि त्वयि स्नेहकराणि वै ॥२८८॥
पुरुषोत्तमभावस्योद्भावकानि शुभानि च ।
नरनारायणाद्यास्तेऽवताराः सन्ति ये भुवि ॥२८९॥
तव बोधं प्रकुर्वन्ति कया रीत्याऽवतारिणः ।
वद मे तत् कृपासिन्धो यदि लोकोपकारकम् ॥२९०॥
विनाऽवतारिविज्ञानं नोपासनोत्तमा भवेत् ।
तस्मात् कथय मे कान्त ! कान्तायै कृपया प्रभो ॥२९१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः त्रिपञ्चाशत्तमे वत्सरेऽनादिश्रीकृष्णनारायणस्य श्रीशिवराज्ञीश्रीसहितस्य प्राकट्यं, युगलस्य द्वादशोत्तरशताधिकसाहस्रनामस्तोत्रमित्यादिनिरूपणनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि प्रवक्ष्यामि नरनारायणीकथाम् ।
पुरुषोत्तमबोधाढ्यां ममाऽपारोक्ष्यबोधिनीम् ॥ १ ॥
एकदा तु विशालायां दर्शनार्थं महर्षयः ।
ययुर्मम स्वरूपस्य नरनारायणस्य ते ॥ २ ॥
तत्र श्रीशंकरश्चापि समायातः सतीयुतः ।
सनत्कुमारः सनकः सनन्दनः समाययौ ॥ ३ ॥
अंगिराद्या महर्षिसत्तमाः स्वतःप्रकाशकाः ।
पत्नीव्रतो द्विजश्चान्ये लोमशाद्याः पुरातनाः ॥ ४ ॥
तपःसत्रं चिकीर्षन्तोऽपश्यन् धर्मसुतं शुचिम् ।
नारायणं नरं चापि मत्तनुं तापसीं शुभाम् ॥ ५ ॥
प्रपूज्य विधिवत् सर्वे स्तोत्रैः संस्तूय वैदिकैः ।
प्रणेमुर्दण्डवत् भक्तिसंयुता योगवित्तमाः ॥ ६ ॥
जगदुस्ते हृष्टहृदो नारायणं परं गुरुम् ।
भवन्तमेकं शरणं प्रपन्नाः पुरुषोत्तमम् ॥ ७ ॥
नारायणं स्वयं साक्षात् पुराणं परमेश्वरम् ।
श्रेष्ठं तपो भवद्योगो भवज्ज्ञानं तपः परम् ॥ ८ ॥
मुक्तिदं तत् तपः श्रेष्ठं यत्र चाऽऽराध्यते भवान् ।
तन्नो ब्रूहि हरे कस्मादिदं प्रवर्तते जगत् ॥ ९ ॥
क आत्मा का च मुक्तिर्वै संसारः कोऽस्ति वै कुतः ।
किं तत्परतरं ब्रह्म सर्वं नो वक्तुमर्हसि ॥१०॥
इति पृच्छन्तो मुनयः प्रापश्यन् तं नरायणम् ।
विहाय तापसं वेषं परब्रह्म सनातनम् ॥११॥
भ्राजमानं च तेजोभिर्मुक्तमण्डलसेवितम् ।
अक्षरब्रह्मधामस्थं सश्रीवत्सं श्रिया वृतम् ॥१२॥
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ।
त्वया साकं हसन्तं स्वसर्वायुधसमन्वितम् ॥१३॥
दृष्ट्वा शंभ्वादयः सर्वे लक्ष्मि ! क्षणं प्रमुग्धताम् ।
अत्यानन्देन मग्नास्ते प्रापुः श्रीपरमेश्वरे ॥१४॥
अथ कृत्वा तिरोभावं दिव्यभावस्य मे तदा ।
नारायणस्तापसोऽभूद् यथा बद्रीतलेऽभवत् ॥१५॥
ततः स्वस्थान् मुनीन् सर्वानाह तत्र नरायणः ।
अदृश्यं मम रूपं तत् परमेश्वरसंज्ञकम् ॥१६॥
यस्मान्मयि राजतेऽत्र प्रकाशितो नरायणः ।
यं न देवा विजानन्ति यतन्तोऽपि विना कृपाम् ॥१७॥
कृपया दर्शनं प्राप्य ब्राह्मीभूता महत्तमाः ।
न संसारं प्रपद्यन्ते ब्रह्मगा ब्रह्मवादिनः ॥१८॥
वक्ष्ये भक्तिमतामद्य तज्ज्ञानं ब्रह्मवादिनाम् ।
आत्माऽयं देहिनां स्वच्छः शुद्धः सूक्ष्मः सनातनः ॥१९॥
तत्र सर्वान्तरः श्रीमद्ब्रह्मनारायणः प्रभुः ।
वर्तते स प्राणरूपः सोऽन्तर्यामी पुमुत्तमः ॥२०॥
अस्मादक्षरवासाद्वै विश्वानि च भवन्ति हि ।
स मायया नैजतनूः करोति विविधाः सृजौ ॥२१॥
कर्मबद्धा हि जीवाद्याः संसरन्ति पुनः पुनः ।
अकर्मबद्धमुक्ताश्च प्रयान्ति तत्परं पदम् ॥२२॥
यथा प्रकाशतमसोः सम्बन्धो नोपपद्यते ।
तथा संसारहर्योश्च सम्बन्धो नोपपद्यते ॥२३॥
छायातपौ यथा भिन्नौ तथा संसारशार्ङ्गिणौ ।
एवमात्मा देहिनां च भिन्नः संसाररूपतः ॥२४॥
अहं कर्ता सुखी दुःखी कृशः स्थूलस्तु या मतिः ।
सा चाऽहंकारकर्तृत्वादात्मन्यारोपिता जनैः ॥२५॥
तस्मादज्ञानमूलो हि संसारः कर्मबन्धनः ।
अहंकाराऽविवेकेन कर्मबन्धं करोत्ययम् ॥२६॥
पश्यन्ति ऋषयो भक्ताः परमोपासका जनाः ।
शुद्धात्मनि निजे देवं श्रीपतिं परमेश्वरम् ॥२७॥
प्रकृतिं पुरुषं काले बुद्ध्वाऽऽत्मानं निजं तथा ।
हरिणा संगतो यश्च शाश्वतानन्दभाग् हि सः ॥२८॥

स्वात्मानमक्षरं ब्रह्म नाऽवबुद्ध्यति चेद् यदि ।
अनात्मन्यात्मविज्ञानं दुःखसंसारदायकम् ॥२९॥

रागद्वेषादयो दोषाः सर्वे त्वज्ञानमाश्रिताः ।
कारयन्ति हि कर्माणि पुण्याऽपुण्यानि देहिनाम् ॥३०॥

तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ।
तस्माद् भाव्यं ब्रह्मणा वै स्वेनाऽऽत्मना तु साधुभिः ॥३१॥

परेशेन समं नैजं त्वैक्यं व्याप्यं सुबुद्धिभिः ।
यथा तु धूमसम्पर्कान्नाकाशो मलिनो भवेत् ॥३२॥

तथा त्वन्तःकरणोत्थैर्भावैरात्मा न लिप्यते ।
यथा स्वप्रभया सूर्यः प्रकाशते समन्ततः ॥३३॥

तथा ज्ञानमयश्चात्मा तद्युक्तः सम्प्रकाशते ।
ज्ञानरूपस्ततश्चाऽयं चिद्रूपो भववर्जितः ॥३४॥

यथा रञ्जनसान्निध्ये स्फटिको रञ्जनो जनैः ।
लक्ष्यते च तथा चायं भावसन्निधिसद्गुणः ॥३५॥

सोऽहमात्माऽक्षरः शुद्धो नित्यो भक्तो मयाऽनिशम् ।
उपासितव्यो मन्तव्यः श्रोतव्यः परमेश्वरः ॥३६॥

एवं ज्ञाने तु सर्वत्र यदा भात्यस्य माधवः ।
भक्तस्य श्रद्दधानस्य हरिः सम्पद्यते तदा ॥३७॥

स्वस्मिन् सर्वात्मकं ब्रह्मपरं भात्यस्य वै यदा ।
तदा प्रत्यक्षरूपं तं स्वात्मन्येवाऽभिपश्यति ॥३८॥

यदा सर्वेषु भूतेषु परेशं तं प्रपश्यति ।
तदा सर्वत्र भक्तस्य परब्रह्म विकासते ॥३९॥

यदाऽऽत्मस्थो नेतरद्वै स्वयं किमपि पश्यति ।
तदा परेण सम्बद्धः परमेशं प्रपश्यति ॥४०॥

यदा हृदयकामा वै विलीयन्ते न सन्ति तु ।
तदाऽसावमृतीभूतः परमेशं प्रपश्यति ॥४१॥

यदा सर्वस्थितं कृष्णनारायणं प्रपश्यति ।
तदा तद्योगमापन्नस्तत्स्वरूपाय कल्पते ॥४२॥

यदा पश्यति देवेशं परमं पुरुषं प्रभुम् ।
मायामात्रं गतं तस्य नाऽस्य ब्रह्मातिरेकिता ॥४३॥

यदा जन्मजरादुःखव्याधीनामेकभेषजम् ।
स्वज्ञानं ब्रह्मविज्ञानं वर्ततेऽसौ तदा शिवः ॥४४॥

यथा नदीनदाः सर्वे समुद्रे यान्ति विस्तृते ।
तथा भक्ता अक्षरे ब्रह्मणि यान्ति ह्युपास्तिभिः ॥४५॥

अज्ञानमुग्धा विज्ञानं नार्जयन्ति तु यावता ।
अज्ञानतिमिराक्रान्ता न यान्ति परमं पदम् ॥४६॥

आत्मज्ञानं विधातव्यं योगो नारायणस्य च ।
उभाभ्यां श्रीहरिश्चाऽस्य परमात्मा प्रकाशते ॥४७॥

हरेर्योगात्समग्राण्यैश्वर्याण्यस्य भवन्ति च ।
देहेऽत्रैवाऽथवा देहान्तेऽपि हरेः स्वनुग्रहात् ॥४८॥

यत्तत् सर्वमतं दिव्यमैश्वर्यं तदवाप्नुयात् ।
तदैश्वर्यप्रदाता सः सर्वेषां परमेश्वरः ॥४९॥

सर्वभूतेषु सर्वात्मा सर्वस्थः सर्वतोमुखः ।
सर्वरूपः सर्वरसः सर्वगन्धोऽजरोऽमरः ॥५०॥

सर्वतः पाणिपादः सोऽन्तर्यामी श्रीसनातनः ।
अपाणिपादो जवनो ग्रहीता हृदि संस्थितः ॥५१॥

अचक्षुरपि द्रष्टा सः चाऽकर्णश्च शृणोत्यपि ।
वेत्त्ययं सर्वमेवेऽ न तं जानाति कश्चन ॥५२॥

परमेशं महानाथं वदन्ति विमलाशयाः ।
पश्यन्ति ऋषयो हेतुं यदैश्वर्यमनुत्तमम् ॥५३॥

विदित्वा तस्य सायुज्यं लभन्ते तत्र वेशिताः ।
ये तन्मायामतिक्रान्ता या चास्ते बन्धरूपिणी ॥५४॥

ते लभन्ते परंधाम निर्वाणं हरिणा सह ।
प्रसादात्तस्य ते यान्ति पुनरावृत्तिमेव न ॥५५॥

एतज्ज्ञानं पुत्रशिष्ययोगिभ्यो देयमेव ह ।
मोक्षदं परमं शान्तिप्रदं वै ब्रह्मवित्तमाः ! ॥५६॥

अन्यच्चापि प्रशृणुत परमेशात्ततोऽभवत् ।
कालाख्यः पुरुषश्चापि पौरुषी प्रकृतिस्तथा ॥५७॥

ताभ्यां प्रधाना पुरुषस्ताभ्यां हिरण्मयोऽप्यजा ।
हिरण्मयी च ताभ्यां तु विराड् वैराजिकेति च ॥५८॥

ताभ्यां त्रिदेवताश्चातो नरनारीमयं जगत् ।
एवं हरेः सर्वमिदं तस्माद् ब्रह्ममयं जगत् ॥५९॥

हरिस्त्वात्माऽस्ति भूतानां ज्ञाताऽऽत्मा परमेश्वरः ।
द्विजाः शृणुत चाथापि हरेरिच्छा ह्यभूत्पुरा ॥६०॥

माया सा दिव्यरूपाऽपि जीवकर्मान्विता सती ।
सत्त्वकर्मात्मिका सत्त्वा रजःकर्मा तु राजसी ॥६१॥

तमःकर्मयुता सा च तामसी कर्मरूपिणी ।
जीवानां कर्मणां यादृग् रूपं सा तादृशी जनैः ॥६२॥

गीयते रक्तकाचाढ्यं तेजो रक्तं यथेतिवत् ।
वस्तुतः शुद्धरूपा सा किन्तु जीवानुवेशिता ॥६३॥

कर्मानुसारफलदा सा माया त्रिप्रकारिणी ।
मूला शुद्धाऽथ विषमा कर्मानुसारयायिनी ॥६४॥

महत्तत्त्वं च बुद्ध्याख्यं प्रकाशयति वै ततः ।
महत्तत्त्वादहं बुद्धिश्चाभिमानात्मिका ततः ॥६५॥

ततः षोडशको गणस्तन्मात्रेन्द्रियमानसः ।
तन्मात्रेभ्यश्च भूतानि स्थूलानि गुणवन्ति च ॥६६॥

स्थूलेभ्यस्तु शरीराणि जायन्ते तज्जगत् खलु ।
जडात्मकं ह्यपि व्याप्तं चेतनैः कुरुते क्रियाः ॥६७॥
कर्मानुगुणं सरणं संसारो वासनामयः ।
साऽपि कालस्य वशगा ह्यविवेकसमुद्भवा ॥६८॥
मनःसाहाय्यमासाद्य प्रवर्तयति देहिनः ।
तस्मान्मनो नियम्यैव वासनां क्षपयेद् बुधः ॥६९॥
कालमायाऽतीतरूपो भूत्वा भजेत माधवम् ।
नास्ति तस्मात्परं किंचित् तं भजित्वा विमुच्यते ॥७०॥
नाऽयं तपोभिर्विविधैर्न दानेन न चेज्यया ।
शक्यो हि मानवैर्ज्ञातुमृते भक्तिमनुत्तमाम् ॥७१॥
स वै समग्रभूतानामन्तस्तिष्ठति सर्वतः ।
तं सर्वसाक्षिणं ज्ञात्वा मुच्यते सर्वबन्धनात् ॥७२॥
तस्याऽन्तरे सर्वमिदं स तु सर्वान्तकः परः ।
तमेव गृणन्ति शास्त्राणि सत्यैकं परमेश्वरम् ॥७३॥
यजन्ति विविधैर्यज्ञैर्ब्राह्मणाः सत्रकोटिभिः ।
ध्यायन्ति तं योगिजना भजन्ते साधवोऽमलाः ॥७४॥
सर्वदेवतनुः सोऽयं धार्मिकास्तमुपासते ।
तेभ्यो ददाति तत्स्थानमानन्दं परमं पदम् ॥७५॥
नरा नार्योऽपि कर्मस्था भक्तिमन्तो ह्यकल्मषाः ।
पूजयन्ति च तं भक्त्या ते प्रयान्ति परां गतिम् ॥७६॥
इत्येवमृषयो बुद्ध्वा तं परेशं प्रभुं हरिम् ।
सर्वान्तर्यामिणं ध्यात्वा प्रयान्तु परमं पदम् ॥७७॥
इत्युक्त्वा बदरीनाथः शिवराज्ञि ऋषीश्वरान् ।
पुनश्च दर्शयामास तापसे वर्ष्मणि प्रभुम् ॥७८॥
कोटिकन्दर्पशोभाढ्यं श्रीसमेतं परात्परम् ।
अनेकैश्वर्यसञ्जुष्टं राजाधिराजशोभिनम् ॥७९॥
अनादिश्रीकृष्णनारायणात्मकं सुसुन्दरम् ।
सर्वकान्तं सर्वदिव्यलावण्यमधुतान्वितम् ॥८०॥
अनन्तमुक्तमुक्तानीसेवितं पारमेश्वरम् ।
अवतारादिभिश्चापि व्यूहैर्नुतं स्तुतं तथा ॥८१॥
परब्रह्मात्मकं दिव्यं सर्वेश्वरादिसेवितम् ।
सर्वश्रीसंभृतं धामेश्वरं श्रीपुरुषोत्तमम् ॥८२॥
ऋषयस्ते हरेः रूपं दृष्ट्वा तृप्ताः सुखान्विताः ।
यावत्तपःफलं प्राप्ता मुदितास्तुष्टुवुः पुनः ॥८३॥
त्वं प्रभुस्त्वं परब्रह्म त्वं कृष्णस्त्वं नरायणः ।
नारायणः परज्योतिर्भवानक्षरधामवान् ॥८४॥
त्वं हिरण्मयरूपश्च विष्णुस्त्वं व्यापको भवान् ।
सर्वदेवमयस्त्वं च तापसस्त्वं परेश्वरः ॥८५॥
त्वां दृष्ट्वा कृतकृत्याः स्मस्त्वां प्राप्य पुरुषोत्तमम् ।
मायापारं गताः स्मोऽद्य कृपा तेऽसीममुक्तिदा ॥८६॥
यदिच्छया समायाताश्चात्र पूर्णो मनोरथः ।
नेतरच्छिष्यते कार्यं कर्तव्यं दर्शनात्परम् ॥८७॥
अलौकिकं परं रूपं सदैवं भातु नः प्रति ।
इत्येवमेव वाञ्छामो वरं देहि वरं हि नः ॥८८॥
इत्येवं शिवराज्ञीश्रि ! स्तुत्वा मौनं च तस्थिरे ।
ततो दिव्यं परब्रह्मरूपं तत्र तिरोऽभवत् ॥८९॥
अहं वै तापसो जातः सद्यो नारायणात्मकः ।
बदर्यधःस्थितस्ते च पुपूजुर्मां तथाविधम् ॥९०॥
आज्ञामादाय च ययुर्भजन्तो मां निजालयान् ।
त्वं विजानाहि तद्रूपं मम नारायणात्मकम् ॥९१॥
तापसं लोकरक्षार्थं धर्मरक्षाकरं सदा ।
नरनारायणात्मानं ह्यान्तर्यामिणमेव माम् ॥९२॥
पुरुषोत्तमसंज्ञं च विजानाहि पतिं तव ।
एतज्ज्ञानं समगृह्य शंकराद्यास्ततो भुवि ॥९३॥
उपादिदिशुः ऋषयो मुक्तिं ददुश्च सर्वतः ।
देहिभ्यो ब्रह्मधाम्न्येव ममोपासनकारिणः ॥९४॥
पठनाच्छ्रवणाच्चैतत्स्मरणादपि मुक्तिदम् ।
सर्वानन्दप्रदं लक्ष्मि ! ज्ञातव्यं न यतः परम् ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने बदर्यां तपोऽर्थं प्राप्तानां महर्षीणां नरनारायणे परब्रह्मरूपदर्शनात् तृप्तानां मानवेभ्यश्चोपदेशनमित्यादिनिरूपणनामा नवत्रिंशोऽध्यायः ॥ ३९ ॥

श्रीनारायणीश्रीरुवाच—

पुरुषोत्तमकान्तानां धर्मकर्माणि नो वद ।
येन गार्हस्थ्यदोषाणां संभवो न भवेदिह ॥ १ ॥
भवानास्ते परब्रह्म वयं ब्राह्मयः स्त्रियस्तव ।
दिव्यता सर्वथा यत्र दोषलेशो न विद्यते ॥ २ ॥
तथापि गृहधर्माणां देहिनां नरयोषिताम् ।
धर्मलाभो भवेत् तस्माद् गृहधर्मान् हि नो वद ॥ ३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं शृण्वन्तु सर्वमत्प्रियाः ।
गृहधर्मान् दोषहरान् वदामि श्रेयसां प्रदान् ॥ ४ ॥

गृहं धामाऽक्षरं ज्ञेयं पतिः श्रीपुरुषोत्तमः ।
पुत्रा बोध्याः पञ्चदेवाः क्रियाश्च पूजनं मम ॥ ५ ॥
एवं या संप्रवर्तन्ते नार्यो गार्हस्थ्यसंस्थिताः ।
मयि सर्वार्पणभावास्तासां धर्मः सवैष्णवः ॥ ६ ॥
ध्यायेत् पत्यौ हरिं नित्यं मां पतिं पुरुषोत्तमम् ।
नार्यो ध्यायेत् सदा लक्ष्मीं श्रीं सतीं पुरुषोत्तमीम् ॥ ७ ॥
पुत्रेषु पार्षदान् ध्यायेत् पुत्रीषु श्रीरमादिकाः ।
वाहनेषु गरुडाद्यान् मुक्तान् वै बान्धवादिषु ॥ ८ ॥
ध्यायेदेवं निजे देहे श्रीकृष्णं पुरुषोत्तमम् ।
तस्मै समर्पयेत् सर्वं निजान्तरनिवासिने ॥ ९ ॥
एवं वै कर्मयोगोऽयं भवतीनामुदाहृतः ।
नैष्कर्म्यभावनायुक्तो मोक्षदो मम भक्तियुक् ॥१०॥
कर्मयोगेषु सर्वेषु स्वयं योगो विशिष्यते ।
हरेः सेवात्मको योगः कर्मणा मनसा गिरा ॥११॥
हरिरेव सदाऽऽराध्यो नामजपादिभिस्तथा ।
प्रदक्षिणां प्रकुर्याच्च प्रतिमां मम पूजयेत् ॥१२॥
मम प्रासादिकं भुञ्ज्यान्मत्पादयोर्मनो न्यसेत् ।
हरेरग्रे स्वनैरुच्चैर्नृत्येत्तथा समालपेत् ॥१३॥
करतालादिसन्धानैः सुस्वरैर्गायनं चरेत् ।
कथां शृणुयात् सततं निर्माल्यं मस्तके धरेत् ॥१४॥
अर्चनीयो नमस्कार्यः सदाऽहं मोक्षदः प्रभुः ।
ततोऽनादिकृष्णनारायणं श्रीकान्तमच्युतम् ॥१५॥
श्रीहरिं मां पूजयध्वं प्रपद्यध्वं क्षणे क्षणे ।
भक्तिमत्यो हरौ पत्यौ सर्वदा भवत प्रियाः ॥१६॥
कर्मयोगेन सततं समार्चयत मां हरिम् ।
यजध्वं मां हरिं लक्ष्म्यः स्नानभोजनसेवनैः ॥१७॥
प्रातर्मत्पूर्वमुत्थाय सुस्नस्य मेऽङ्गमर्दनम् ।
पादसंवाहनं ब्रह्मप्रियाः कुरुत नित्यशः ॥१८॥
यथेष्टं मां पतिं देवं चानन्दयत सेवया ।
आज्ञया निजदेहादिशुद्ध्यर्थं यात वै ततः ॥१९॥
मां स्मरन्त्यो हरिं कृष्णं स्नात मत्पादवारिभिः ।
मन्नामकीर्तनं चापि कुर्वन्त्यस्तर्पणं जलैः ॥२०॥
अञ्जलिभिः प्रकुरुत सुरान् संस्मृत्य वै पितॄन् ।
नमस्कुरुत वृद्धांश्च विप्रान् साधून् सतीश्च गाः ॥२१॥
दैववृक्षांश्च तीर्थानि देवान् नमत सर्वदा ।
स्नात्वा दानानि योग्यानि योग्यपात्रेभ्य एव तु ॥२२॥
अर्पयत धनान्नादि वस्त्रभूषाद्यपेक्षितम् ।
दर्शनानि च देवानां विधाय च ततो गृहम् ॥२३॥
समायात च मे सेवां स्नानाद्यंगमयीं शुभाम् ।
प्रकुरुत यथावद्वै स्नापयतोष्णवारिभिः ॥२४॥
तैलसुगन्धलेपाद्यैर्मर्दयित्वा यथोचितम् ।
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ॥२५॥
वेषयत स्वर्णरौप्यताराम्बरादिभिस्तथा ।
आभूषयत भूषाभिः शृंगारयत सद्द्रवैः ॥२६॥
सुगन्धिपुष्पहाराद्यैर्गन्धसारादिभिस्तथा ।
धूपदीपादिभिर्मां च केशप्रसाधनादिभिः ॥२७॥
पूजयत्वं भोजयध्वं दुग्धपायसभोजनैः ।
जलं ताम्बूलकं चार्पयध्वं प्रेम्णा तु मे सदा ॥२८॥
मार्जयध्वं गृहस्थलीः शय्याः संहरताऽपि च ।
वार्याहरत च तथा चरताऽऽदोहनं गवाम् ॥२९॥
तर्कदध्यादि कुरुत वृद्धानर्चयताऽपि च ।
पाकादिकं प्रकुरुध्वं भोजयध्वं च देवताः ॥३०॥
ऋषीनतिथीन् विप्रांश्च साधून् भोजयताऽपि च ।
गोभ्योऽर्पयत ग्रासादीन् अग्निभ्यो हवनादिकम् ॥३१॥
अनाथदीनबालादीन् भोजयध्वं सुभोजनम् ।
परोपकारं कुरुत सूर्यं नमत सर्वदा ॥३२॥
अभ्यागतान् भोजयध्वं कुरुत स्वागतादिकम् ।
शृंगारयत देहाँश्च निजान् भूषादिभिः सदा ॥३३॥
भवत्यो मत्प्रियाः सर्वा मदात्मिका मदर्थिकाः ।
मत्प्रसादमनुप्राप्ता भवन्तु भावनाभराः ॥३४॥
भुञ्जन्तु मिष्टमिष्टान्नं प्रसन्नाः संभवन्तु च ।
वृद्धाज्ञां सम्मानयन्तु ज्येष्ठाज्ञां च सुभाषितम् ॥३५॥
कुलधर्मांश्च रक्षन्तु ज्ञातिधर्मांस्तथाऽपरान् ।
देशधर्मांश्च गृह्णन्तु मद्धर्मान् मुख्यतोऽधिकान् ॥३६॥
वस्त्रादीनां सदाशुद्धिं क्षालनाद्यैर्मृदादिभिः ।
प्रकुर्वन्तु सदा लक्ष्म्योऽनुसरन्तु वरीयसीः ।
कथां ज्ञानं कलां चापि कौशल्यं विविधं सदा ॥३७॥
अधियन्तु सदा लक्ष्म्यः पाकादिककलास्तथा ।
मातृसेवाः स्वसृसेवा श्वश्रूसेवाश्चरन्त्विति ।
सपत्नीस्नेहबाहुल्यं वर्धयन्तु दिने दिने ॥३८॥
महीमानान् पालयन्तु सत्कारयन्तु भोजनैः ।
सर्वप्रदानकैश्चापि भिक्षून् सम्मानयन्त्वपि ॥३९॥
साधून् साध्वीः पूजयन्तु वैष्णवाँश्च विशेषतः ।
आनुकूल्येन भोगांश्च भुञ्जन्तु मयि चार्पितान् ॥४०॥
सन्ध्यां देवीं च गायत्रीं जपन्तु मयि योजिताम् ।
जपं कुर्वन्तु मन्नाम्नां स्मृत्वा मां परमेश्वरम् ॥४१॥

गृहकार्याणि कुर्वन्तु वैशद्यानि शुभानि च ।
रक्षन्तु गृहवस्तूनि सर्वविधानि चांजसा ॥४२॥
नृत्यं गीतं सुवेषादि विधापयन्तु मत्कृते ।
सेवयन्तु गवादीनि गोवत्सादीनि भावनैः ॥४३॥
शुकमेनाहंसचित्रगरुडादीन् प्रपान्तु च ।
गजवाजिवृषभादीन् प्रपान्तु महिषीस्तथा ॥४४॥
अन्नादिशुद्धिं कुर्वन्तु वेषवारादिशोधनम् ।
पालयन्तु सूतकादि संस्कुर्वन्तु च विकृतीः ॥४५॥
गृहशुद्धिं प्रकुर्वन्तु पोषयन्तु कुटुम्बिनः ।
यशः कीर्तिं वर्धयन्तु भवन्तु सहनाऽन्विताः ॥४६॥
दयाक्षमाकृपासेवागुणवत्यो भवन्तु च ।
परोपकारशालिन्यो भवन्तु सर्वदा प्रियाः ॥४७॥
विभज्य स्वार्थयायिन्यो भवन्तु निस्पृहास्तथा ।
परार्थवृत्तयश्चापि परमार्थपरायणाः ॥४८॥
दैवपैत्र्यक्रियाश्रद्धावत्यो भवन्तु सर्वदा ।
लोकसेवापराश्चापि शिष्यासेवापरायणाः ॥४९॥
प्रजासेवापराश्चाप्याशीर्वादादिपरायणाः ।
शुभाशयाः सदा सन्तु परोत्कर्षप्रदायिकाः ॥५०॥
परस्मृद्धिप्रमुदिताः स्वसमृद्ध्यर्पणभावनाः ।
अपरिग्रहशीलाश्च भवन्तु मयि चार्पिताः ॥५१॥
अन्यायवर्जिता न्यायमग्नाः शीलव्रतान्विताः ।
तृष्णागृध्नाविहीनाश्च रागद्वेषविवर्जिताः ॥५२॥
धर्मवंशसमायुक्ता अधर्मान्वयवर्जिताः ।
नारायणीस्वभावाश्च भवन्तु ब्रह्मयोषितः ॥५३॥
मायावत्यो भवन्तु स्वसम्बन्धिबान्धवादिषु ।
स्नेहिन्यश्च सदा सन्तु नैजकौटुम्बिकेषु च ॥५४॥
अस्पृश्यधर्मचारिण्यो वधूरीतिमुपाश्रिताः ।
स्पृश्यधर्माऽभिचारिण्यो मातृधर्ममुपाश्रिताः ॥५५॥
भवन्तु च सदा देव्यो वृद्धाऽग्रे निम्नतान्विताः ।
अनुचासनसंस्थाश्च कराञ्जलिसमन्विताः ॥५६॥
भवन्तु मधुरालापा नम्रकंधरमानसाः ।
दृष्ट्वा स्वगृहकार्यं चाऽकृतं त्वग्रे ह्युपस्थितम् ॥५७॥
प्रकुर्वन्तु विना मानं स्तब्धतामन्तराः प्रियाः ।
परस्परं जनयन्तु हर्षं सहाय्यताप्रदम् ॥५८॥
सहाय्यं चापि कुर्वन्तु सपत्नीकाः परस्परम् ।
परस्परं सेवयन्तु केशप्रसाधनादिभिः ॥५९॥
अस्वास्थ्येऽन्योन्यसेवादि चरन्तु भावभाविताः ।
पात्रादिशोधनार्थं च दासीः रक्षन्तु सर्वदा ॥६०॥
दासीनां रक्षणं भोज्याम्बरवेतनदानकैः ।
यथायोग्यं प्रकुर्वन्तु मानदानादिभावनैः ॥६१॥
राजस्वल्यं पालयन्तु शुद्धिं रक्षन्तु दैहिकीम् ।
क्रोधादिदोषजातांश्च वर्जयन्तु हि दुःखदान् ॥६२॥
सुखनाशकरान् लोभादिकांस्त्यजन्तु सर्वथा ।
मा मारयन्तु लिक्षाद्याः स्वेदजाश्चाण्डजा अपि ॥६३॥
मा हि घ्नन्तु जीवजातान् जन्तुन् सूक्ष्मानपि क्वचित् ।
गालयित्वा जलं दुग्धं रसान् पिबन्तु शोधितान् ॥६४॥
रोगदान् मा भक्षयन्तु जाड्यालस्यकरानपि ।
चित्तभ्रामणकाँश्चापि दुष्टगन्धादिसंभृतान् ॥६५॥
मद्यं मांसं व्यवायं च स्तैन्यं कुर्वन्तु मा क्वचित् ।
असत्यं चाऽनृतं चापि कापट्यं मा चरन्तु वै ॥६६॥
निन्दनं त्वन्यहान्यर्थं मा वदन्तु क्वचित् प्रियाः ।
अप्रियं क्लेशदं चापि क्रूरं वदन्तु मा क्वचित् ॥६७॥
सरोषं तु मुखं नैजं मा कुर्वन्तु कदापि वै ।
सहसा मा क्वचित् कार्यं कुर्वन्तु त्वविचारितम् ॥६८॥
अयोग्यं चापि मा यान्तु प्रदेशं परमन्दिरम् ।
त्यजन्तु संशयापन्नं कुर्वन्तु निश्चयोर्जितम् ॥६९॥
अफलं माऽनुतिष्ठन्तु वृथावादं वृथाक्रियाम् ।
वृथानिद्रां च मा प्रकुर्वन्तु वृथाऽटनं तथा ॥७०॥
वृथाविज्ञानि केषाञ्चिन्मा कुर्वन्तु कदाचन ।
पशुचर्यां मा चरन्तु मौर्ख्यं त्यजन्तु दूरतः ॥७१॥
विचारं च विवेकं च गृह्णन्तु शिक्षणं सुखम् ।
आनुकूल्येन तिष्ठन्तु श्रेष्ठे पूज्ये च साधुषु ॥७२॥
अभ्यासेन मनो नित्यं नियमयन्तु सर्वथा ।
इषणा दुःखदा याश्च तास्त्यजन्तु समन्ततः ॥७३॥
सुखदा चैषणाः नार्यः सफलयन्तु धार्मिकीः ।
अविश्वासस्थलानां मा विश्वासं प्राचरन्तु वै ॥७४॥
अनावरणदेहाश्च मा भवन्तु निरम्बराः ।
सौभाग्याभूषणहीना मा भवन्तु कदाचन ॥७५॥
नातिभोगान् प्रकुर्वन्तु रोगदुःखकरान् प्रियान् ।
व्रतहानिं नाचरन्तु लाभं त्यजन्तु नैव च ॥७६॥
अकर्मण्यतां प्रमादं च त्यजन्तु दूरतः स्त्रियः ।
मार्दवं चापि नैपुण्यं समुत्साहं चरन्तु च ॥७७॥
प्रीतिं मिथो भावयन्तु त्यजन्तु च दुराग्रहम् ।
हठं त्यजन्तु विफलं हानिदं दुःखदं तथा ॥७८॥
तवेदं न ममेदं वै ममेदं न तवेति च ।
मत्वा हानिकरं नैव कुर्वन्तु स्वे परेऽपि च ॥७९॥

पश्यन्तु निजवत् सर्वा नारायणस्य सेविकाः ।
अनादिश्रीकृष्णनारायणस्य मम यद् भवेत् ॥८०॥
तत्सर्वं चापि पश्यन्तु नैजं नैजं स्वकं यथा ।
स्वकमेव न पारक्यं भवत्यत्र यथा हि तत् ॥८१॥
पक्षपातं न कुर्वन्तु सर्वभोग्येषु वै क्वचित् ।
सम्पत्समृद्धिं सुरक्षन्तु दिव्यां कृत्वा नवां नवाम् ॥८२॥
व्ययं कुर्वन्तु योग्यं च यथेष्टं सुखदं तथा ।
निजजन्मदिनादौ च दानं कुर्वन्तु भूरिशः ॥८३॥
पातिव्रत्यं पालयन्तु पत्नीव्रतैर्धितं सदा ।
देवार्पणं प्रकुर्वन्तु वैश्वदेवादिकाऽर्पणम् ॥८४॥
नग्नान्नरान् क्वचिन्नैवाऽवलोकयन्तु सत्स्त्रियः ।
विवादं च कलिं चापि शामयन्तु परोत्थितम् ॥८५॥
जलवह्न्योघविश्वासं मा कुर्वन्तु कदाचन ।
पशूनां तत्समानां च मा विश्वासं चरन्तु वै ॥८६॥
वञ्चिकानां सहवासं धूर्तानां चापि योषिताम् ।
मा कुर्वन्तु नास्तिकीनां प्रसंगं द्विष्टयोषिताम् ॥८७॥
नीतिक्षतौ न कुर्वन्तु चात्मघातं विभेदनम् ।
ताडनं छेदनं वापि चांऽगानां तु विनाशनम् ॥८८॥
श्रेयः कुर्वन्तु सर्वेषां वधूभ्यो जननीदृशः ।
आत्महितं प्रकुर्वन्तु पत्युर्हितं सदा तथा ॥८९॥
मालिन्यं मा प्ररक्षन्तु पात्रे वस्त्रे च वर्ष्मणि ।
ओषधानि प्रसेवन्तां पथ्यानि हितदानि च ॥९०॥
समाजेषु यथायोग्यं प्रयान्तु मण्डलान्विताः ।
स्त्रीसमाजे त्वग्रगण्यपदार्थे प्रयतन्त्वपि ॥९१॥
अग्रगण्यगुणाढ्याश्च भवन्तु स्त्रीजनादिषु ।
बाल्यभावान् माऽऽचरन्तु विखेलनानि यानि च ॥९२॥
सुखेलनानि गृह्णन्तु द्यूतं मा स्वीचरन्त्वपि ।
अतिनिद्रां चात्यशनं वर्जयन्तु च रोगकृत् ॥९३॥
सर्वविधानि भोग्यानि भुञ्जन्तां तृप्तिहेतवे ।
न्यायोपेतानि सर्वाणि पञ्चविषयकाणि च ॥९४॥
यानवाहनशिबिकाविमानानि शुभानि च ।
अधिरुह्य वनोद्देशान् पश्यन्तु व्योमदृष्टयः ॥९५॥
जैह्व्यान् रसान् समस्तान् वै भुञ्जन्तां च मदर्पितान् ।
स्पार्शनानि सकामानि चानुभवन्तु वै मयि ॥९६॥
अर्पयन्तु समस्तानि कर्माणि मयि माधवे ।
न्यूनं मत्तः प्रगृह्णन्तु चापेक्ष्यं सर्वमेव तु ॥९७॥
मदधीना अपि सर्वाः स्वतन्त्राः सन्तु नित्यशः ।
यथायोग्यं बहिर्दृशो मा भवन्तु कदाचन ॥९८॥

परगन्धसहाश्चापि मा भवन्तु प्रिया मम ।
लज्जान्विताः सुखिन्यश्च भवन्तु सततं शुभाः ॥९९॥
ब्रह्मदृश्यो दिव्यदृश्यो भवन्तु मुक्तकोटिकाः ।
भूवारिवह्निवाय्वादौ शुद्धिं पश्यन्तु चार्तवीम् ॥१००॥
एवंविधान् वृषान् पत्न्यः प्रियाश्चरन्तु शोभनान् ।
श्राद्धदानादिसहितान् भक्तियुक्तान् गतिप्रदान् ॥१०१॥
धनधान्यप्रदान् पुत्रपुत्रीवंशप्रदानपि ।
आयुःकीर्तिप्रदाँश्चापि सौभाग्यवर्धकानपि ॥१०२॥
तेजःप्रदान् सौमनस्यप्रदानानन्ददानपि ।
प्रसन्नताऽऽपादकान्मे भवन्तु मोदवार्धयः ॥१०३॥
सर्वसौख्यान्विताश्चापि सर्वेच्छातोषसंगताः ।
विजयन्तु सदा साध्व्यो मम प्राणप्रियाः स्त्रियः ॥१०४॥
अन्या या जगति नार्यो वर्तिष्यन्ते यथोदितम् ।
रमण्यस्ते पुण्यभूमिखनयो देविका मताः ॥१०५॥
स्वर्गं तासां गृहेष्वेव मोक्षस्तासां करेष्वपि ।
सौभाग्यं शाश्वतं तासां भविष्यन्ति न संशयः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायामनादिश्रीकृष्णनारायणोपदिष्टगृहस्त्रीकर्तव्यता-निरूपणनामा चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीपुरुषोत्तम उवाच—

उपवीतं रक्षयेच्च नरो नारी समाहितः ।
सन्ध्यां कुर्वीत च नमेद् गुरुवर्गं सदा वधूः ॥ १ ॥
उपाध्यायं च पितरं ज्येष्ठभ्रातरमित्यपि ।
नृपं मातुलं श्वशुरं मातामहपितामहौ ॥ २ ॥
वर्णश्रेष्ठं च पितृव्यं मातामहीं च मातरम् ।
पितृसहोदरीं गुर्वीं श्वश्रूं पितामहीं तथा ॥ ३ ॥
धात्रीं ज्येष्ठां सपत्नीं च भगिनीं प्रणमेद् वधूः ।
अनुवर्तनमेतासां मनोवाक्कायकर्मभिः ॥ ४ ॥
प्रपालयेच्च ता दृष्ट्वोत्तिष्ठेत् समभिवादयेत् ।
नैतैरुपविशेत् सार्धं विवदेन्नाऽऽत्मकारणात् ॥ ५ ॥
जीवितार्थमपि द्वेषाद् गुरून् नैवाऽपमानयेत् ।
उद्रिक्ताऽपि गुरुद्वेषकरी वधूः पतत्यधः ॥ ६ ॥
भर्ता भ्राता तथा विद्याप्रदाता जननी पिता ।
पूजनीया विशेषेण पञ्च ते गुरवोऽग्रगाः ॥ ७ ॥
आत्मनः सर्वयत्नेन प्राणत्यागेन चापि वै ।
तेषां हितं सदा कार्यं श्वश्वाश्च श्वशुरस्य च ॥ ८ ॥

मूत्रं कृत्वा त्रिराचामेत् तथैव भोजनोत्तरम् ।
मलं त्यक्त्वा स्नानमेव समाचरेत् सुखार्थकम् ॥ ९ ॥
केशानां गुप्तदेहस्य स्पर्शे प्रक्षालनं नसः ।
कर्तव्यं कर्णनाभ्यादेः स्पर्शेऽपि चरणस्पृशौ ॥१०॥
अग्नौ श्मशाने काष्ठे वा शाद्वले गोमये न च ।
जले जीर्णे देवगृहे वल्मीके जन्तुगर्तके ॥११॥
मलमूत्रादि कुर्यान्न राजमार्गे तुषादिषु ।
न क्षेत्रे न बिले तीर्थे नोद्याने नगराशये ॥१२॥
नित्यमुद्यममग्ना स्यात् साध्व्याचाररता सती ।
गुर्व्यग्रे प्रौढपादा न भवेद् वधूः कदाचन ॥१३॥
गुरोर्निन्दा तथा गुर्व्याः परिवादोऽपि यत्र वा ।
प्रवर्तते तत्र कर्णौ पिधातव्यौ यथाऽन्यतः ॥१४॥
गन्तव्यं च तथा सेवा कर्तव्या भावनान्विता ।
प्रयुञ्जीत सदा वाचं मधुरां हितकारिणीम् ॥१५॥
लौकिकं वैदिकं वापि तथाऽऽध्यात्मिकमित्यपि ।
आददीत यतो ज्ञानं तं न द्रुह्येद् वधूजनः ॥१६॥
गुर्वीवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः ।
अभ्यञ्जनस्नापनाद्यैर्गात्रसम्मार्दनादिभिः ॥१७॥
केशप्रसाधनाद्यैश्च गुर्व्यः सेव्या वधूजनैः ।
अभिवाद्य गुरुपत्नीं प्राधीयीत श्रुतीस्ततः ॥१८॥
सावित्रीं श्रीहरिं नाम वेदान्तांश्चात्मशोधितान् ।
अधीयीताऽभ्यसेन्नित्यं ब्रह्मनिष्ठा समाहिता ॥१९॥
ओंकारमादितः कृत्वा व्याहृतीश्च ततः परम् ।
ततोऽधीयीत मन्नाम श्रीमत्कृष्णनरायणम् ॥२०॥
न जीर्णमलवद्वस्त्रा भवेद् वधूटिका क्वचित् ।
सख्यं सखीभिः कुर्याच्च कुर्यादात्महितं वधूः ॥२१॥
वयसः कर्मणोऽर्थस्य श्रुतस्याऽभिजनस्य च ।
देशवाग्बुद्धिसारूप्यमाचरन्ती गृहे वसेत् ॥२२॥
वृद्धैर्वृद्धाभिरुत्कृष्टं सेवितं वृषमेव सा ।
निषेवेत न तेनेयं यान्ती दुष्यति कर्हिचित् ॥२३॥
त्रिवर्गसेविका स्याच्च स्याच्च विभागशालिनी ।
सा गृहिणी सदा प्रोक्ता स्वर्गादिसत्यधारिणी ॥२४॥
धर्मस्याऽऽयतनं यत्नाच्छरीरं परिपालयेत् ।
नहि देहं विना नारायणोऽहं प्राप्तिगोचरः ॥२५॥
न हिंस्यात् सर्वभूतानि नान्याऽहितं चरेत् क्वचित् ।
न देवद्रव्यहर्त्री स्याद् विषं देवस्य वै धनम् ॥२६॥
देवद्रोहं न कुर्वीत गुरुद्रोहं तथैव च ।
स्वामिद्रोहं न कुर्वीत श्वश्रूद्रोहं न चाचरेत् ॥२७॥
अनृताद् बहुभोगाच्च परपीडाविधापनात् ।
शापाद् रोगाच्च वै दीर्घादायुष्यं नाशमेति हि ॥२८॥
न संवसेत् सुमूर्खाभिः पापाभिश्च क्वचिद् वधूः ।
सहवासात् संगमाद्यैः पापं संक्रमते यतः ॥२९॥
न कुर्याच्छुष्कवैराणि मर्मभीन्दि न चोच्चरेत् ।
बह्वीभिश्च समं कुर्यान्न विरोधं वधूः क्वचित् ॥३०॥
न देवगुरुविप्राणां दीयमानं निवारयेत् ।
न चात्मानं प्रशंसेच्च निन्दां चापि विवर्जयेत् ॥३१॥
न पापं पापिनां ब्रूयान्मिथ्यादोषं न चार्पयेत् ।
नाऽश्नीयात् स्वामिना सार्धं त्वेकस्थाल्यां कदाचन ॥३२॥
न कुर्यात् कस्यचित् पीडां सुतां शिष्यां तु शिक्षयेत् ।
नात्मानं चावमन्येत दैन्यं च वर्जयेत् सदा ॥३३॥
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ।
न गालीः संवदेत् क्वापि नाऽश्लीलानि वदेत्तथा ॥३४॥
नैव स्वप्याच्छून्यगेहे निर्जने वा परासने ।
चैत्यवृक्षं न वै छिन्द्याद् गुरून्न वञ्चयेत् क्वचित् ॥३५॥
न देवायतने गच्छेद् वामं कृत्वा तु मन्दिरम् ।
न व्याधिदूषिताभिश्च संसर्गं रचयेद् वधूः ॥३६॥
न निन्देद् योगिनः सिद्धान् व्रतिनो वा यतींस्तथा ।
देवान् देवनिवासांश्च साध्वीः सतीश्च गुर्विकाः ॥३७॥
रात्रौ तिलसमायुक्तं दधि त्यजेन्न भक्षयेत् ।
नाऽश्नीयात् पयसा तक्रं कृमिदुष्टं विवर्जयेत् ॥३८॥
अर्थानामुचिते पात्रे दानं दद्याद्धि भूतये ।
नित्यं दद्याज्जलान्नादि क्वचिद् दद्याद् व्रतादिषु ॥३९॥
दद्यादपत्यविजयैश्वर्यार्थे चापि शोभनम् ।
हरेर्मे चातिप्रीत्यर्थे दद्याद्वै ब्रह्मवादिषु ॥४०॥
दानेनोपासितं पात्रं तारयत्येव सर्वथा ।
भक्तिपूर्वं प्रदातव्यं देयपात्रप्रमोदकृत् ॥४१॥
भूमिं दद्यादिक्षुयुक्तां यवगोधूमशालिनीम् ।
विद्यां दद्यात्तथा दद्यात् सुवर्णं रजतं मणीन् ॥४२॥
हीरकं रत्नभूषादि दद्याद् वस्त्राणि कम्बलान् ।
अन्नं शाकं च पात्राणि प्रदद्यान्मधुसर्पिषी ॥४३॥
तिलान् दद्यात् प्रीयतां मे हृषीकेशः प्रभुः पतिः ।
एवमुक्त्वा यतीन् साधून् साध्वीः प्रपूज्य चार्पयेत् ॥४४॥
फलमूलानि पानानि शाकानि चौषधं तथा ।
दद्याच्छत्रं तथोपानद् यदिष्टं स्यात् समर्पयेत् ॥४५॥
कन्यादानं चरेत् साध्वी रूपाढ्यगुणशालिनि ।
कुलिने युनि समृद्धे वित्तपूर्णे नरे दृढे ॥४६॥

सर्वाभरणसंयुक्ता दातव्या कन्यका निजा ।
विक्रयो नैव कन्यायाः कर्तव्यः श्रेयसां प्रहन् ॥४७॥
भूमिं गां च हिरण्यं च धनं वस्त्रं च धान्यकम् ।
जामातुर्यौतकं दत्त्वा सर्वं भवति चाऽक्षयम् ॥४८॥
यौतकेन विना दत्ता दासीत्वमुपगच्छति ।
अत्यशने विदूरस्थे व्यसनाढ्येऽतिदुर्जने ॥४९॥
कुलहीने च मूर्खे च न दातव्या कदाचन ।
अतिवृद्धे चातिदीने रोगिणि सर्वनाशके ॥५०॥
अतिक्रुद्धेऽप्यसन्तुष्टे दातव्या न हि कन्यका ।
कन्यादात्री लभेत् स्वर्गं पतिं च परमेश्वरम् ॥५१॥
कन्यादाता लभेत् पत्नीं परत्र वरवर्णिनीम् ।
कण्डनी पेषणी चूल्ली जलकुंभी प्रमार्जनी ॥५२॥
पञ्चसूना गृहस्थानां नश्यन्ति पञ्चसन्मखैः ।
जन्तुभ्यः संप्रदद्याच्च दद्यात् पितृभ्य इत्यपि ॥५३॥
यादोभ्यश्च तथा दद्याद् दद्याद् गोवृक्षपत्रिषु ।
देवताभ्यः प्रदद्याच्चाऽतिथिभ्योऽपि यथाधनम् ॥५४॥
एवं दानेन वै दोषा नश्येयुर्नाऽत्र संशयः ।
दानं शुद्धिं तथा पात्रं शुद्धं तारयति ध्रुवम् ॥५५॥
पावकः सर्वथा मेध्यो मेध्याश्च योषितः सदा ।
साधवश्चातिमेध्याश्च देवतास्ते त्रयो मताः ॥५६॥
सुरापी व्याधिता द्वेष्ट्री न कर्तव्या वधूः क्वचित् ।
विरोधेन न वै भाव्यं पत्न्या पत्यादिभिः क्वचित् ॥५७॥
यत्राऽविरोधो दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ।
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ॥५८॥
सेह कीर्तिमवाप्नोति मोदते स्वगृहे सती ।
स्त्रीभिर्भर्तृवचः कार्यमेष दोषो न विद्यते ॥५९॥
आज्ञापितं शुभं चाप्यशुभं कुर्यादसंशया ।
भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ॥६०॥
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाऽशनैः ।
संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ॥६१॥
श्वश्रूश्वशुरयोः कुर्यात् पादयोर्वन्दनं सदा ।
हिता भर्तुर्दिवं गच्छेदिह कीर्तिरवाप्य सा ॥६२॥
क्रीडाशरीरसंस्कारसमाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥६३॥
पतिं विना न तिष्ठेत दिवा सन्धौ च वा निशि ।
पूजयेद् विधिना कान्तं रमयेद् रामयेत्तथा ॥६४॥
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते ।
वाक्पाणिपादचापल्यं वर्जयेद्वै वधूजनः ॥६५॥
आचरेत् सदृशीं वृत्तिमजिह्मामशठां तथा ।
दंभहेतुकपाषण्डिबकवृत्तीश्च वर्जयेत् ॥६६॥
पादौ प्रतापयेन्नाऽग्नौ न चैनमभिलंघयेत् ।
विरुद्धं वर्जयेत्कर्म प्रेतधूमं विवर्जयेत् ॥६७॥
गुरुं शास्त्रं तथाऽऽचार्यं राजानं स्त्रीं पतिं तथा ।
नाऽऽक्रामेज्जननीं श्वश्रूं तच्छायां च विवर्जयेत् ॥६८॥
वर्जयेत्परशय्यादि परद्रव्याणि वर्जयेत् ।
रसास्वादवती भूत्वा नाऽन्यं नरं समाश्रयेत् ॥६९॥
अस्नेहा न भवेत् क्वापि गुप्तचारा च नो भवेत् ।
सौवर्णराजताब्जानां शंखरज्ज्वादिचर्मणाम् ॥७०॥
पात्राणामासनानां च कार्या शुद्धिर्हि वारिणा ।
उष्णेन स्रुक्स्रुवयोश्च धान्यानां प्रोक्षणेन च ॥७१॥
तक्षणाद् दारुशृंगादेर्यज्ञपात्रस्य मार्जनात् ।
त्रपुसीसकताम्राणां क्षाराऽम्लोदकवारिभिः ॥७२॥
भस्माऽद्भिर्लोहकांस्यानां भूशुद्धिर्मार्जनादिना ।
अमेध्याक्तस्य मृत्तोयैर्गन्धलेपाऽपकर्षणात् ॥७३॥
नोत्संगे भक्षयेद् भक्ष्यान् न नग्ना च स्वपेत् क्वचित् ।
न दन्तैर्नखरोमाणि छिन्द्यात् सुप्तं न बोधयेत् ॥७४॥
कुद्वारेण प्रविशेन्न बाहुभ्यां न नदीं तरेत् ।
नाऽङ्गारभस्मकेशादिष्वधितिष्ठेत् कदाचन ॥७५॥
यन्त्रचूल्लीप्रदीपादिदीपने कुशला भवेत् ।
सावधाना भवेद् वार्याहरणेऽध्वनि सर्वदा ॥७६॥
कूपसरित्तटाकादितीरे ध्यानवती भवेत् ।
पादन्यासेऽपि कृष्यादौ तृणादौ कुशला भवेत् ॥७७॥
करीषकाष्ठप्रभृत्यादानेऽपि कुशला भवेत् ।
कोणे जीर्णे जन्तुमये स्थलेऽपि कुशला भवेत् ॥७८॥
मार्गे यानेऽपि च वधूर्निजं कान्तं ह्यनुव्रजेत् ।
सावधाना भवेत् पृष्ठे यथा नान्यभ्रमा भवेत् ॥७९॥
पुत्राऽपत्यादिबालानां रक्षणे कुशला भवेत् ।
पथ्याऽपथ्यादिसंज्ञाना ग्राह्यादौ कुशला भवेत् ॥८०॥
पुत्रान् संशोधयेत् साध्वी संस्कारयेच्छुभैर्वृषैः ।
उपादिशेत् सुखान् धर्मान् चास्तिक्यं पालयेत् सदा ॥८१॥
स्नायाज्जलेन च वधूर्वर्जयित्वा शिरः सदा ।
तैलस्नानं तु शिरसो विदध्यान्नित्यमेव ह ॥८२॥
उद्वर्तनं शुभं स्नानं ज्ञानस्नानं चरेत्तथा ।
ब्रह्मचिन्तनकं स्नानं शोधनं चाचरेत् सदा ॥८३॥
सहस्रपरमां नित्यं शतमध्यां दशावराम् ।
मालिकां श्रीहरेर्नाम्नो जपेच्छान्तिस्थिता वधूः ॥८४॥

पितृन् प्रपूजयेन्नित्यं त्रेधा ते पितरः स्मृताः ।
प्रत्यक्षा मानवाश्चात्र देवाः स्वर्गगतास्तथा ॥८५॥
अन्ये प्रेता जन्मलाभास्त्रयस्ते पितरो मताः ।
माता पिता गुरुः श्वश्रूः पतिः प्रत्यक्षगोचराः ॥८६॥
चन्द्रमाऽर्कोऽग्निरित्येते दिवि स्थिता हि देवताः ।
प्रेतभावं गताश्चान्यजन्मानो मृतपूर्वजाः ॥८७॥
तृतीयास्ते प्रबोद्धव्यास्तान्नमेद् गृहधारिणी ।
चन्द्रः पिता रविः पितामहोऽग्निः प्रपितामहः ॥८८॥
सोमपश्च बर्हिषच्च अग्निष्वात्तश्च ते क्रमात् ।
यज्ञीया आज्यपा विप्राः साधवस्तान् प्रभोजयेत् ॥८९॥
चान्द्रा मातापित्राद्याश्च सौर्या द्विजादयः शुभाः ।
आग्नयोऽतिथयः सन्तः पितरस्तेऽक्षिगोचराः ॥९०॥
तान् वधूर्भोजयेन्नित्यं यथाशक्ति यथाधनम् ।
गवादीन् सेवयेल्लक्ष्मीसम्पत्सौभाग्यवाञ्छया ॥९१॥
देवताभ्यो नमः कुर्याद् वृद्धान्नित्यं नमेत्तथा ।
गुरुं नमेज्जपेन्मालां मम नामयुतां वधूः ॥९२॥
जपकाले न भाषेत स्मरेच्छ्रीपतिमच्युतम् ।
हरेराराधनं पुण्यं नित्यमाराधयेद्धरिम् ॥९३॥
निवेदयेन्निजात्मानं वधूः श्रीपरमात्मनि ।
सन्ध्यायाञ्छ्रीहरिं नित्यं सर्वशान्तिप्रदं पतिम् ॥९४॥
देवायाऽन्नं प्रदद्याच्च देवयज्ञः स वै भवेत् ।
मूर्तये वा जले भूम्यां वैश्वदेवेऽपि चाऽर्पयेत् ॥९५॥
शेषं गोभ्यः श्वपचेभ्यः श्वभ्यो भूतेभ्य आर्पयेत् ।
दीनपतितपक्षिभ्यो भूतयज्ञः स उच्यते ॥९६॥
साधुं विप्रं सतीं बालान् भोजयेत् पितृयज्ञकः ।
अतिथिं भोजयेत् तृप्तिं कारयेत् पितृवत् सदा ॥९७॥
अभ्यागतान् यथाशक्ति पूजयेदतिथीन् सतीः ।
भिक्षां च भिक्षवे दद्यात् साधवे ब्रह्मचारिणे ॥९८॥
अर्थिभ्योऽपि प्रदद्याच्च वधूर्वै लोभवर्जिता ।
मानुषोऽयं यज्ञ उक्तो महाशीर्वादसाधनम् ॥९९॥
मह्यं दद्यात् सदाऽन्नं च श्रीभृते परमात्मने ।
ब्रह्मवेत्त्रे प्रदद्याच्च ब्रह्मयज्ञः स वै मतः ॥१००॥
सर्वथा भोजनकार्ये करौ प्रक्षालयेत् सती ।
शुद्धिपूर्वं प्रदद्याद्वै तेन तृप्यन्ति देवताः ॥१०१॥
भोजनार्थं चोपविशेत् पादौ प्रक्षाल्य वै करौ ।
आपोशानक्रियां कृत्वा प्राणेभ्यः प्राप्यं वै ततः ॥१०२॥
प्रशंसापूर्वकं चान्नं भुञ्ज्याज्जुहुयादात्मनि ।
नाऽद्यात्सूर्यग्रहात्पूर्वं प्रतिसायं शशिग्रहात् ॥१०३॥
ग्रहकाले न चाऽश्नीयात् स्नात्वाऽश्नीयात् समर्पयेत् ।
स्वार्थार्थं भोजनं यस्या भोगार्थं काममैथुनम् ॥१०४॥
वृत्त्यर्थं च कला यस्यास्तस्याः शून्यान्तजीवनम् ।
न दक्षाभिमुखी स्वप्यात् पश्चिमाभिमुखी न च ॥१०५॥
न चाकाशे न नग्ना वा नाऽन्याऽऽसने वधूः सती ।
संस्मरेच्छ्रीहरिं मां वै सर्वकार्येषु चान्वहम् ॥१०६॥
दिवानिशं स्मरेन्मां वै मोक्षदं पुरुषोत्तमम् ।
यथेष्टं मां प्रसेवेत वधूः संकोचमन्तरा ॥१०७॥
एतान् धर्मान् सदाचारान् पालयन्ती सुखस्थिता ।
प्रमोदते गृहे नित्यं सुखाधिक्यवती भवेत् ॥१०८॥
पठनाच्छ्रवणादस्य धर्माचारफलं लभेत् ।
पालनात्पापनाशः स्यान्मोक्षमार्गगतिर्भवेत् ॥१०९॥
तीर्थदानव्रतभक्तिफलं लभेत् सती वधूः ।
धर्मार्थकाममोक्षांश्च पुत्रपुत्रीर्लभेत्तथा ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां वधूटीधर्मसदाचारादिवर्णननामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं शिवराज्ञीश्रियं हरिः ।
ततोऽपि विविधानाहाऽऽचारान् वदामि ते शुभात् ॥ १ ॥
नवान्नानि रसवन्ति दातव्यानि सदाऽर्थिने ।
नवसस्येष्टिरेवाऽत्र दीर्घायुःसम्प्रदा यतः ॥ २ ॥
सर्वेऽपि मानवा नार्यो नराश्चापि नवेऽन्नके ।
सति चाग्निं विशुद्धाऽन्नैर्यजेत परमेश्वरम् ॥ ३ ॥
दध्ना मिष्टाम्ब्लमधुरास्वादेन पयसा तथा ।
मिष्टसारान्वितेनाऽपि यजेत परमेश्वरम् ॥ ४ ॥
पायसान्नैः पयःपाकैः क्षीरैर्यजेत माधवम् ।
घृतेन घृतपक्वेन घृताक्तैश्च शुभान्नकैः ॥ ५ ॥
नवनीतैः शुभैः सद्योजातैः शर्करयाऽन्वितैः ।
यजेत परमात्मानं दुग्धपुटीप्रपूरितैः ॥ ६ ॥
पूरिकापोलिकायुक्तैर्गुप्तपुटकभोजनैः ।
यजेत मां हरिं लक्ष्मि ! येन तृप्तो भवामि च ॥ ७ ॥
शर्कराभिश्च खण्डाद्यैर्मधुभिर्गुडकेसरैः ।
सद्रसैश्चापि मां शीतपेयैर्यजेत सर्वथा ॥ ८ ॥
आम्रफलैर्मिष्टफलैर्यजेत द्राक्षिकाफलैः ।
कदलैश्चाऽमृतैश्चापि नारीकेलादिपाचनैः ॥ ९ ॥

शीतफलैः रायणैश्च जम्बूभिः पनसैस्तथा ।
नवचिर्भटकर्कटीभिर्यजेत वधूर्हि माम् ॥१०॥
मानाऽवमानौ द्वावेतौ सदा बोध्यौ विषाऽमृते ।
तत्स्पर्शाभिभवं प्राप्य वधूवर्गोऽवसीदति ॥११॥
तस्माद् दास्येन भावेन वर्तितव्यं वधूजनैः ।
चक्षुःपूतं चरेन्मार्गं मनःपूतां चरेत् क्रियाम् ॥१२॥
स्वामिपूतां चरेत् सेवां धर्मपूते वधूर्वसेत् ।
स्वाम्याज्ञां पालयेन्नित्यं चाऽऽज्ञाभंगं न चाचरेत् ॥१३॥
आज्ञाधर्मो हि पत्नीनां तेनेच्छेत् सिद्धिमुत्तमाम् ।
कैतवं छद्म शाठ्यं च पैशुन्यं वर्जयेद् वधूः ॥१४॥
अतिहास्यमवष्टंभं लीलां स्वेच्छाप्रवर्तनम् ।
वर्जयेत् सर्वयत्नेन गुर्वीणां सन्निधौ वधूः ॥१५॥
तद्वाक्यप्रतिकूलं च तथाऽयुक्तं गुरौ वचः ।
न वदेद् गृहिणीवर्गो ह्यनिष्टं न स्मरेत् क्वचित् ॥१६॥
रजस्वलां सूतिकां च न स्पृशेन्मलवाहिनीम् ।
चतुर्थ्यां सुवधूर्नैव रतिकार्यकरी भवेत् ॥१७॥
अल्पायुर्व्रतविद्याढ्यत्वादिहीनप्रसूस्तदा ।
यतो जायेत तस्माद्वै बलवद्व्रहगा भवेत् ॥१८॥
सङ्गं सतीभिः कुर्वीत भवेत् सर्वार्थसाधिका ।
असतीसंगमुज्जह्यात् परत्राऽत्र हितं न यत् ॥१९॥
वर्जयेत् क्षुद्रसंगं च विरोधं स्वजनेषु च ।
शत्रुसेवापरासंगं दुष्टायोगं च वर्जयेत् ॥२०॥
उत्तमाभिर्हि सांगत्यं पण्डिताभिश्च सत्कथाम् ।
अलुब्धाभिश्च मित्रत्वं कुर्वाणा नावसीदति ॥२१॥
परसंगं परिहास्यं चाऽस्थाने नरयोषितोः ।
परवेश्मनि वासं च न कुर्वीत कदाचन ॥२२॥
पराऽपि हितकर्त्री चेद् बान्धवी सा न चेतरा ।
अहितो देहजो व्याधिर्हितमारण्यकौषधम् ॥२३॥
बान्धवी या हिता सैव स पिता यस्तु पोषकः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥२४॥
स भृत्यो यो विधिभृत्यस्तद्बीजं यत्प्ररोहति ।
सा भार्या या पतिनिष्ठा स पुत्रो यः सुखास्पदे ॥२५॥
सा जीवति गुणा यस्या धर्मो यस्याः सा जीवति ।
गुणधर्मविहीनाया निष्फलं जीवनं यतः ॥२६॥
सा भार्या या गृहे दक्षा प्रतिप्राणा प्रियंवदा ।
हिता भक्ताऽनुकूला च सर्वसौभाग्यवर्धिनी ॥२७॥
यस्य भार्या निःस्नेहाक्षी कपटा कलहप्रिया ।
वादप्रियाऽन्यसंसक्ता त्यक्तलज्जा विमानिनी ॥२८॥
कश्मला सेवया हीना सा जरा न जरा जरा ।
यस्य भार्या समवृत्तिर्गुणज्ञा चानुगामिनी ॥२९॥
पतिभाग्याऽल्पसन्तुष्टा प्रियभावा प्रियंकरी ।
पतिधर्मा पत्यभिन्ना सा प्रिया न प्रिया प्रिया ॥३०॥
दुष्टा भार्या शठं मित्रं भृत्यः स्वार्थपरायणः ।
सर्पो यत्र च तत्र स्याद्वासो मृत्युप्रदः खलु ॥३१॥
अगुणज्ञः पतिः क्रुद्धा सपत्नी दोषदायिनी ।
सर्वसंशयिनी वासो यत्र तत्र न शं भवेत् ॥३२॥
त्यजन्तु दुर्जनसंगं भजन्तु साधुसंगतिम् ।
कुर्वन्तु पुण्यमनिशं स्मरन्तु मां हरिं पतिम् ॥३३॥
आपदर्थे धनं रक्षेद् दारान् रक्षेद्धनादिभिः ।
पतिं पुत्रं सतीं भार्यां रक्षेद् धनादिभिः सदा ॥३४॥
त्यजेदेकं कुलस्यार्थे धर्मार्थे तु कुलं त्यजेत् ।
धर्मं त्यजेच्च हर्यर्थे मोक्षार्थे सर्वमुत्सृजेत् ॥३५॥
वरं वासोऽरण्यदेशे न तु दुष्टे गृहे क्वचित् ।
दुश्चरितं गृहं क्लेशः प्रत्यक्षनरकावुभौ ॥३६॥
चलत्येकेन पादेन तिष्ठत्येकेन धीमती ।
न परीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥३७॥
त्यजेद्ग्रामसद्वृत्तं वासं सोपद्रवं त्यजेत् ।
कृपणं स्वामिनं मायामयं दुष्टं नरं त्यजेत् ॥३८॥
पदस्थस्यैव मित्राणि यानि तानि न चांजसा ।
अर्थपदविहीनस्य मित्राणि सार्थकानि वै ॥३९॥
आपद्रक्षाकरं मित्रं क्षीणसम्पत्सु कामिनी ।
दुर्भिक्षादौ सह्याना सा भार्या भाग्यशालिनः ॥४०॥
द्रुमं क्षीणफलं शुष्कं सरः पतिं च निर्धनम् ।
छाया मत्स्या धर्मपत्नी न त्यजन्ति कदाचन ॥४१॥
विहगाः सारसाश्चापि गणिकास्तान् त्यजन्ति वै ।
स्वार्थवशास्तथा बोध्या विश्वसेन्न तथाविधान् ॥४२॥
लुब्धां द्रव्यप्रदानेन श्रेष्ठामञ्जलिना तथा ।
मूर्खां छन्दानुवृत्त्या च याथातथ्येन पण्डिताम् ॥४३॥
साध्वीं प्रसेवया बालां मिष्टवाण्या जयेद् वधूः ।
साध्व्यश्च देवताश्चापि तुष्यन्ति शुद्धभावनैः ॥४४॥
असती खाद्यपानाद्यैः शठा शाठ्येन तुष्यति ।
यस्या यादृक्स्वभावः स्यात् तस्यां तथाऽऽविशेद् वधूः ॥४५॥
नद्यश्च नखिनश्चापि शृंगिणः शस्त्रपाणयः ।
राजकुलं च लुब्धादौ विश्वासार्हा न सर्वथा ॥४६॥
द्रव्यहानिं समुद्वेगं गृहे दुश्चरितं तथा ।
अवमानं वञ्चनं च प्रकाशयेन्न वै वधूः ॥४७॥

स्वामित्यागो हीनसंगो वधूशीलविनाशकौ ।
गर्वी दोषी व्यसनी च लाभनाशकरास्त्रयः ॥४८॥
यत्र मानं न प्रीतिर्न विद्या शान्तिर्न सौहृदम् ।
पतिस्नेहो न वै पत्न्यां तद् गृहं त्वनलालयम् ॥४९॥
भयहीनं धनं त्वर्ज्यं भयहीनं च सौहृदम् ।
भयहीना तथा प्रीतिर्निर्भयः स्वर्ग एव सः ॥५०॥
दात्र्या भाव्यं न त्वदात्र्या क्षन्त्र्या भाव्यं स्त्रिया सदा ।
शीलिन्या च तथा भाव्यं पुण्यार्जिन्या सुखाय च ॥५१॥
नग्ना रूक्षा भिक्षुकी च कृपणा याचनापरा ।
अवस्थेयमदानस्य तस्माद् दात्री भवेद् वधूः ॥५२॥
सञ्चितं याचितं प्राप्तं सत्कार्ये युज्यते न चेत् ।
चौरपार्थिवपृथिवीहार्यं तद्वै भविष्यति ॥५३॥
कदर्याया धनं याति भूमितस्करराजसु ।
नार्या दण्डः पृथक् शय्या पत्युर्दण्डो ह्यसेवनम् ॥५४॥
दुर्जना दासवर्गाश्च पटहाः पशवस्तथा ।
ताडिता मार्दवं यान्ति दुष्टा स्त्री व्यसनी नरः ॥५५॥
नद्यो नार्यः समभावा वेगवत्योऽतिनिम्नगाः ।
कूलं कुलं पातयन्ति स्वच्छन्दगतिका यदि ॥५६॥
न तृप्तिरस्ति कामस्य पुत्रस्य च धनस्य च ।
सुखस्य जीवितस्यापि तानि जित्वा भजेद्धरिम् ॥५७॥
शाश्वतं साधयेद् भावि देवपूजादिसाधनैः ।
अशाश्वतं विदित्वैव त्यक्तव्यं दैहिकं तु यत् ॥५८॥
ध्रुवमोक्षं परित्यज्य चाऽध्रुवं या हि सेवते ।
अध्रुवं नाऽऽत्मना सार्धं गमिष्यति चरेद् ध्रुवम् ॥५९॥
हविर्दुष्टकुलाद् ग्राह्यं बालादपि सुभाषितम् ।
अमेध्यात् काञ्चनं ग्राह्यं मोक्षः सत्पुरुषात्तथा ॥६०॥
स्थानेष्वेव प्रयोक्तव्या भृत्या भूषाः स्त्रियोऽपि च ।
सती नारी सदश्वश्च वीरः सत्यपरो जनः ॥६१॥
अनपेक्षो न सहते कषाघातं तथाऽनृतम् ।
वैभवेन विहीनाऽपि सती नीचं न सेवते ॥६२॥
सकृद्दुष्टं पुनर्मित्रं न सन्धीत कदाचन ।
सन्धानाया भवेन्मृत्युर्वध्वास्तत्र विशेषतः ॥६३॥
शत्रुपत्यं विषपात्रं विश्वासपात्रमेव न ।
विपत्प्रदं भवेत् काले विपरीते समागते ॥६४॥
सानुकूलं यदा दैवं सर्वमन्यन्निरर्थकम् ।
सानुकूलं न दैवं चेत् कृतं सर्वं निरर्थकम् ॥६५॥
धनार्जने व्यये विद्यार्जने प्रभोजने रतौ ।
स्वकार्यसाधने त्यक्तलज्जा नारी सुखं लभेत् ॥६६॥
लज्जा रक्षा जलं राजा गुरुर्देवालयो निजाः ।
जना यत्र न वर्तन्ते स्थितिस्तत्र हि दुःखदा ॥६७॥
साधुर्ज्योतिर्विदो ज्ञानी वृद्धश्च मेलनं मिथः ।
स्नेहश्चान्नं च वैद्यश्च यत्र नो तत्र नो वसेत् ॥६८॥
स्वजनान् पालयेत् साध्वी वधूरन्नाम्बरादिभिः ।
विष्णुं प्रपूजयेन्नित्यमायुःकीर्तिबलप्रदम् ॥६९॥
क्षणेन विभवो नश्येन्नात्मायत्तं धनादिकम् ।
क्षणं मत्वा साधयेद्वै मोक्षं प्रसेव्य मां सती ॥७०॥
व्याघ्री जरा च रोगोऽरिः प्रसह्याऽऽगच्छतो हि तौ ।
आयुर्भिन्नघटाभं च ज्ञात्वा मोक्षं प्रसाधयेत् ॥७१॥
पितृवत्परपुरुषे परद्रव्येषु घासवत् ।
निजवत् सर्वभूतेषु या पश्यति सती हि सा ॥७२॥
द्रव्यवत्यास्तु मित्राणि द्रव्यवत्यास्तु बान्धवाः ।
द्रव्यवती सुपूज्या स्याद् द्रव्यवती हि पण्डिता ॥७३॥
शास्त्रहीना सदाऽन्धा स्यात् तस्माच्छास्त्रवती भवेत् ।
शास्त्रचक्षुष्मती नारी स्वाराज्यसुखमेधते ॥७४॥
यया सन्तोषितो देवः पतिर्दास्यः प्रतिप्रियाः ।
कुटुम्बनारीवर्गाद्या जिता तेन वसुन्धरा ॥७५॥
मनस्तापं न कुर्वीत क्वापि वधूर्महापदि ।
समप्रज्ञा विवेकाढ्या सुखदुःखसमा भवेत् ॥७६॥
परगृहं न मन्तव्यं पत्युर्गृहं निजं गृहम् ।
यत्पत्युस्तन्निजं सर्वं मोदितव्यं विवेकतः ॥७७॥
चापल्याद् वारयेद् दृष्टिं मिथ्यावाक्यं च वारयेत् ।
मनो निवारयेच्छाठ्यात् संसारात् स्वां निवारयेत् ॥७८॥
हुंकारं भ्रुकुटीं नैव तेजयेत् स्वजनान् प्रति ।
सहस्त्रीवर्गमालोक्य रञ्जयेत् प्रणमेद् वधूः ॥७९॥
उद्योगश्च विवेकश्च धैर्यं शक्तिः सुशीलता ।
उत्साहश्चेति षट् नार्याः सिद्धिदाः सुखदाः सदा ॥८०॥
मार्दवं दास्यभावश्च नम्रता क्षमता दया ।
प्रसन्नता स्निग्धता च सप्त वध्वाः सुखप्रदाः ॥८१॥
कुलशीलगुणोपेता सत्यधर्मपरायणा ।
रूपवती प्रसन्ना च नार्यध्यक्षा भवेद्धि सा ॥८२॥
बलाबलमतिज्ञात्री सैन्याऽध्यक्षा भवेद्धि सा ।
इङ्गिताकारभावज्ञा प्रतीहारी भवेद् रमा ॥८३॥
मेधाविनी च वाचाला सत्यव्रता जितेन्द्रिया ।
बहुशास्त्रादिकुशला चोपदेष्ट्री भवेद्धि सा ॥८४॥
बुद्धिमती परचित्तलक्षकी तथ्यवादिनी ।
कुलीना प्रभुशक्त्याढ्या नारी दूती तु सा मता ॥८५॥

समस्तनियमज्ञा या तर्कशक्तिसमुच्छ्रया ।
देशकालादिविज्ञा च धर्माध्यक्षा भवेद्धि सा ॥८६॥
मातृमातामहीदक्षा कृतपाकपरिश्रमा ।
शुद्धा शुद्धिप्रविज्ञा च रसज्ञा पाचिका भवेत् ॥८७॥
आयुर्वेदकृताभ्यासा सर्वेषां हितकारिणी ।
निदानपद्धतिप्रज्ञा भिषग्वर्या भवेद्धि सा ॥८८॥
वेदवेदाङ्गतत्त्वज्ञा ध्यानहोमजपान्विता ।
हिताशीर्वादवक्त्री स्याद् गुर्वी तथा च शिक्षिका ॥८९॥
आचारज्ञा नियमज्ञा देशकालादिबोधिनी ।
कुशला चतुरा स्याद्वै लेखिका पाठिका गुरुः ॥९०॥
द्विजिह्वा क्लेशदा नारी तथोद्वेगकरी शठा ।
क्रूरा च दारुणा या स्यात् साऽपकारकरी मता ॥९१॥
दुष्टा स्त्री परिहर्तव्या विद्ययाऽलंकृताऽपि तु ।
दुर्जनी च वधूस्तद्वत् त्यक्तव्या व्यवहारके ॥९२॥
तुल्यार्थो तुल्यसामर्थ्यो मर्मज्ञां व्यवसायिनीम् ।
शूरां प्रभावयुक्तां च योजयेद् राज्यकर्मसु ॥९३॥
निरालस्या च सन्तुष्टा सुखदा प्रतिबोधिका ।
सुखःदुखसमा धीरा भृत्या सर्वत्र दुर्लभा ॥९४॥
क्षान्तिसत्यविहिना च क्रूरा शठा च निन्दिका ।
दांभिकी गृध्नभावा च त्यक्तव्या भक्ष्यलुञ्चिका ॥९५॥
गुणयुक्तां नियुञ्जीत गृहे राज्ये शुभे स्थले ।
अगुणां मोक्षमार्गे च दास्ये युञ्जीत वा प्रियाम् ॥९६॥
सतीभिः सततं रामा ह्यासीत सङ्गतौ तथा ।
असतीभिर्न चासीत मैत्रीं नो विदधीत च ॥९७॥
पण्डिताभिर्वनिताभिः सत्यव्रताभिरित्यपि ।
बन्धनस्थापि तिष्ठेत न खलाभिः कदाचन ॥९८॥
सावशेषाणि कार्याणि कर्तव्यानि वधूजनैः ।
अपूर्णे तु परित्यक्ते हानिः स्वस्या प्रजायते ॥९९॥
मक्षिकावन्मधु ग्राह्यं पत्युर्वध्वा सुयोषिता ।
अवन्ध्यं दिवसं कुर्याद् भक्तिसेवादिभिः सदा ॥१००॥
रागं त्यजेन्नीतिवर्ज्यं स्नेहं कुर्याद् वृषान्वितम् ।
ज्ञानं कुर्यादनालस्यं या सा जयेज्जगत्त्रयम् ॥१०१॥
पत्या न वै गृहं प्रोक्तं गृहिण्या गृहमेव यत् ।
तस्माद् गृहं सदा रक्ष्यं स्वामिन्या प्रतिमा यथा ॥१०२॥
कर्तव्यमेतन्नारिणां वधूनां सुज्ञयोषिताम् ।
सर्वं मत्वा निजं सेव्यं वर्धनीयं विशेषतः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
वधूगीतायां सदाचारप्रदर्शनादिनिरूपणनामा
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं यदाह परमेश्वरः ।
शिवराज्ञीश्रियं श्रेष्ठं सदाचारं पुनस्ततः ॥ १ ॥
साध्वीनां भूषणं शीलं पत्नीनां भूषणं पतिः ।
सर्वासां भूषणं लज्जा हरिर्भूषणभूषणम् ॥ २ ॥
या न साक्षाद् भवेल्लक्ष्मीर्लक्ष्मीतुल्याऽपि नैव या ।
यस्या भाग्यं हरौ लग्नं सा वै नारायणी स्मृता ॥ ३ ॥
माता साक्षाद् भवेल्लक्ष्मीः पिता यस्या जनार्दनः ।
भाग्यं यस्या हरौ नास्ति सा शोच्या हरिवर्जिता ॥ ४ ॥
पूर्वकृतं समग्रं वै क्रमाद् भुंक्ते हि देहवान् ।
गर्भशय्या हि पाकार्थे कर्मणां ब्रह्मणा कृता ॥ ५ ॥
यस्मिन् वयसि यत्काले यथा यस्माद् विनिर्मितम् ।
तत् तथाऽऽयाति विधिना नोदितं नान्यथा क्वचित् ॥ ६ ॥
दत्तं दानं कृता विद्या पुरा कृतं हि कामितम् ।
सर्वं त्वायाति काले वै भोगार्थं देहिनां त्विह ॥ ७ ॥
कर्मलभ्यशरीरेऽत्र सन्ति रोगा ह्यनेकशः ।
गर्भकोष्ठलिकारोगः सदा चास्ते तु योषिताम् ॥ ८ ॥
अतो वै शास्त्रगर्भिण्या बुद्ध्या विचार्य भामिनी ।
सरोगात् स्वं रोगशून्यमात्मानं समपादयेत् ॥ ९ ॥
आत्मा यस्याः सदा सत्यशौचेन विशदीकृतः ।
सा शुद्धा लभते स्वर्गं परमेशपदं ततः ॥१०॥
भावोपहृतहृदया तृष्णाक्षपचीसंयुता ।
न पुनाति सहस्रैश्च स्नानानां तीर्थकर्मणाम् ॥११॥
सम्माने हर्षणं नास्त्युद्वेगो नास्ति विमानने ।
क्षमा शीलं सदा यत्र सा साध्वी सद्वधूर्मता ॥१२॥
वालुकाकोटिसंघातो नद्या भवति निम्नगः ।
कर्मकोटिसुसंघातो नार्या भवति निम्नगः ॥१३॥
जलचेतनसंघातो नद्या भवति तीरगः ।
शीलचेतनसंघातो नार्या भवति पारकृत् ॥१४॥
दूरदेशप्रसक्तानां भिन्नकुटुम्बयोषिताम् ।
भक्तब्रात्मकं परं कर्म कृष्णे मयि नियोजकम् ॥१५॥
सकृदुच्चरितं नाम यया हरीति भावतः ।
साधितं चाक्षरं धाम तया शाश्वतमोदनम् ॥१६॥
यदीच्छेच्छाश्वतीं प्रीतिं श्रीपतौ मयि माधवे ।
अनुवृत्तिं पालयेन्मे साधनं मत्परं मतम् ॥१७॥
सर्वभूतेषु विश्वासः सत्त्वभावः स्वभावजः ।
हरौ गुप्ता सदा सेवा साध्व्या वृषो हि सम्मतः ॥१८॥

मलिनां मलदन्तां च बह्वाशिनीं च निष्ठुराम् ।
सन्ध्यायां शायिनीं नारीं श्रीमपि त्यजति प्रभुः ॥१९॥
भूलेखिनीं तृणच्छेत्रीं दन्ताऽशुद्धां मलाम्बराम् ।
रूक्षकेशीं नग्ननिद्रां श्रीमपि त्यजति प्रभुः ॥२०॥
दम्पत्योश्च स्त्रियोः पश्वोर्यन्त्रयोर्वेगिनोस्तथा ।
मध्यतो नैव गन्तव्यं क्रुद्धयोर्युद्ध्यतोस्तथा ॥२१॥
षट्कर्णा भिद्यते गाथा चतुःकर्णा तु धार्यते ।
द्विकर्णा तु क्वचिन्नैव प्रकाशमेति वार्तिका ॥२२॥
क्षमायुक्ते जने लोकाः कल्पयन्ति हि दूषणम् ।
अशक्तिं बलहीनत्वं निर्माल्यमिव फल्गुताम् ॥२३॥
अकृतज्ञा ह्यनार्या च दीर्घरोषा ह्यनार्जवा ।
चतुर्विधा हि चाण्डाली जात्या ततोऽपि पञ्चमी ॥२४॥
नवे वयसि या शान्ता सा शान्ता सर्वदा वधूः ।
धातुक्षये तु यावत्यः शान्ता भवन्ति योषितः ॥२५॥
धर्मो यत्र हि सन्यासी तपस्तीर्थार्थमुद्गतम् ।
सत्यं यात्राकरं चास्ते कापट्यं च गृहे स्थितम् ॥२६॥
दारिद्र्यं कलहश्चापि बान्धवा इव यद्गृहे ।
हिंसा पत्नीस्वरूपा च तद्गृहं याम्यकोटरा ॥२७॥
कुपतौ निर्वृत्तिर्नास्ति कुभार्यायां न निर्वृत्तिः ।
कुमित्रे निर्भयत्वं न विचार्येति प्रवर्तयेत् ॥२८॥
परान्नं च परस्वं च परशय्याः परस्त्रियः ।
परपुमान् परसौधः श्रीविनाशकरा हि ते ॥२९॥
अधमाः क्लेशरागा वै सन्धिरागास्तु मध्यमाः ।
उत्तमा मानरागाश्च वध्वो भवन्ति भिन्नभाः ॥३०॥
अधमा धनरागाश्च मध्या मानधनानुगाः ।
उत्तमा मानमात्रस्था वध्वो भवन्ति देहिनाम् ॥३१॥
विरहश्चापमानं च ऋणं च दुष्टसेवनम् ।
दारिद्र्यं कलहश्चेति विनाऽग्निं दाहकानि षट् ॥३२॥
अस्थिरं जीवनं द्रव्यं यौवनं च मनस्तथा ।
पुत्रदारपतयोऽपि हरिं ततः स्थिरं भजेत् ॥३३॥
अहोरात्रमयः कालो हरते देहिमण्डलम् ।
कालकालं हरिं ज्ञात्वाऽऽश्रयेन्मां पुरुषोत्तमम् ॥३४॥
या निजे न गुरौ भृत्ये पत्यौ दीने दयावती ।
किं तस्या जीवनं लोके काकीवद् भोगयोषितः ॥३५॥
यद्गृहं धर्मभक्त्यादिशून्यं यापयति क्षणम् ।
भस्त्रागृहं हि तद्बोध्यं श्वासिमासनिवासदम् ॥३६॥
स्वादप्रमादविश्वासैः स्वार्थदारिद्र्यमाननैः ।
स्त्रियो भ्रश्यन्ति तस्मात् तास्तान् कुर्युर्दूरतः सदा ॥३७॥

तावद्भयस्य भेतव्यं यावद्भयं ह्यनागतम् ।
उपस्थिते भये तीव्रे स्थातव्यं वै ह्यमीलवत् ॥३८॥
या दयां न कुरुते दीने भृत्ये गुरौ स्त्रियाम् ।
मित्रे पत्यावनाथे जीवनं तस्यास्तु काकवत् ॥३९॥
पराधीना मृता एव स्वाधीना जीवनार्थिकाः ।
परोपकारकारिण्यो मृता अपि सजीवनाः ॥४०॥
यथा यथा हि नार्योऽत्र शास्त्रशीला भवन्ति च ।
तथा तथा सुमेधाः स्युर्ब्रह्मवादिन्य इत्यपि ॥४१॥
यथा यथा च कल्याणे कुर्वन्ति स्वमतिं तथा ।
तथा स्त्रियो भवन्त्येव पूजापात्राणि सुप्रियाः ॥४२॥
परोक्षे कार्यहन्त्री या प्रत्यक्षे प्रियवादिनी ।
वर्जनीया प्रयत्नेन वल्लीव चेन्द्रवारुणी ॥४३॥
दुर्जनायाः प्रसंगेन सुनार्यपि विनश्यति ।
तस्माद् वध्वा दुर्जनायाः संगस्त्याज्यः प्रयत्नतः ॥४४॥
मनःप्रसन्नता यत्र मंगलानि हि तत्र वै ।
नारीप्रसन्नता यत्र तत्र वासो हि सम्पदाम् ॥४५॥
सा स्त्री या न मदं कुर्यात् सा पत्नी या पतिप्रिया ।
सुखिनी सा ह्यतृष्णा या वधूः सा वंशवर्धिनी ॥४६॥
साधूनां च नदीनां च सतीनां योषितां तथा ।
मूलान्वेषो नातिकार्यो वधूनां चौषधस्य तु ॥४७॥
राज्यश्रीः कृतपुण्यान्ता शीलं स्त्रीसंगमान्तकम् ।
कुलकीर्तिः स्त्रीशीलान्ता कुलस्याऽन्तः स्त्रियोऽपि च ॥४८॥
अनायके न वरो वासो न वापि बहुनायके ।
स्त्रीनायकेऽपि न वरो वासोऽपि बालनायके ॥४९॥
पित्रधीना कुमारत्वे पत्यधीना तु यौवने ।
पुत्राधीना च वार्धक्ये सत्याधीना तथाऽऽश्रमे ॥५०॥
लज्जाऽधीना व्यसने च दैवाधीना तु सम्पदि ।
दानाधीना तु पत्नीत्वे या वधूः सा सुखप्रदा ॥५१॥
वन्ध्यां मृतप्रजां स्त्रीमातरं चाऽप्रियवादिनीम् ।
अपुत्रदां प्ररक्ष्यैव पुत्रार्थं त्वपरां वहेत् ॥५२॥
अर्थहीना भिया युक्ता कान्ताधीना हि वर्तते ।
अर्थपूर्णा निर्भयाऽपि कान्ताधीना हि शस्यते ॥५३॥
अर्थातुराया धर्मो न कामुकाया भयं न च ।
चिन्तातुरायाः सौख्यं न वधूस्तानि विवर्जयेत् ॥५४॥
प्रेष्यायाश्च दरिद्रायाः पुंश्चल्याश्च सुखं कुतः ।
ऋणवत्या व्याधितायां वन्ध्यायाश्च सुखं कुतः ॥५५॥
स्थानस्थितायाः पद्माया मित्रे वरुणभास्करौ ।
स्थानच्युतायास्तस्यास्तौ क्लेशशोषणकारकौ ॥५६॥

स्थाने स्थिताः सुपूज्यन्ते नार्योऽपि बालका अपि ।
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नृपाः ॥५७॥
अनृणायाः सुखा निद्रा निर्भयायाः सुखा तथा ।
अव्याध्याश्च सुखा निद्रा सन्न्यासिन्याः सुखा तथा ॥५८॥
असंगतायाः पुंसा च संगतायाश्च शार्ङ्गिणा ।
वितृष्णायाः सुखा निद्रा वध्वा वाऽप्यन्ययोषिताम् ॥५९॥

जलयोगेन कमलं समुच्छ्रायं लभेद् यथा ।
बलवत्स्वामिना भार्या महत्पदं लभेत्तथा ॥६०॥
आचारेण कुलस्याऽत्र देशस्य भाषणेन तु ।
स्नेहस्य चक्षुषा मूल्यं वपुषा भोजनस्य च ॥६१॥
अब्धौ वृष्टेर्न वै मूल्यं तृप्ते च भोजनस्य न ।
समृद्धे नैव दानस्य नीचे पुण्यस्य नैव च ॥६२॥

दूरगतस्य हृदये स्नेहेन वास उच्यते ।
समीपस्थस्य वैरेण दूरवासः समुच्यते ॥६३॥

कदर्यत्वं स्वरो दीनो गात्रदारिद्र्यमूर्जितम् ।
कृपणत्वं भयं चेति चिह्नानि याचनार्थिनाम् ॥६४॥
महान् विष्णुर्हि भगवान् याचमानो हि वामनः ।
जायते तर्हि का चाऽन्याऽर्थिनी याति न लाघवम् ॥६५॥

विद्याधनं सदा प्राऽर्ज्यं साधुतादायिनी सती ।
प्रियाकरी गौरवस्य प्रदा दुःखविनाशिनी ॥६६॥

परमा देवता विद्या दिव्यज्ञानस्य शेवधिः ।
वधूर्विद्या समा बोध्या गृहसम्पत्प्रसाधिनी ॥६७॥
सर्वद्रव्याणि बाह्यानि नाशभीतिमयानि वै ।
आत्मद्रव्यं हि विद्याऽऽस्ते नाशभीतिविवर्जितम् ॥६८॥
आत्मविद्यावती भार्या तीर्थरूपा न संशयः ।
तीर्थभुवः सुताः पुत्र्यः पावना मोक्षभागिनः ॥६९॥
तीर्थयोगवतः पुंसः पत्युर्मोक्षो भवेदपि ।
तीर्थपावनवस्तूनां भोक्तारश्च कुटुम्बिनः ॥७०॥

यान्ति मोक्षपदं भार्यातीर्थपुण्येन पाविताः ।
यस्य भार्या महासाध्वी साधुव्रतपरायणा ॥७१॥
धर्माचारपरा नित्यं वधूः पतिपरायणा ।
सुपुण्याङ्गी सुपुत्रा च मंगलार्हा ऋतंवदा ॥७२॥
शुद्धा प्रियकरी प्रियव्रता पतिनिषेविणी ।
ज्ञात्री गुणवती कथाश्राविणी बहुतापसी ॥७३॥
नित्यं वै धर्मतः पत्नी सहपुण्यकरा शुभा ।
पतिमार्गे प्रयाता च पतिदेवमखान्विता ॥७४॥
सद्भावाच्च पतिं नैव दूरयत्येव या प्रिया ।
यथा छाया तथाऽभिन्नव्रतधर्मपरायणा ॥७५॥

नारीणां मोक्षदे पातिव्रत्ये व्रते स्थिता सदा ।
पुण्या स्त्री यस्य भवति स वै ब्रह्ममयः पतिः ॥७६॥
सव्यं पादं चाक्षरं धाम स्वपत्युर्हि या सती ।
मनुते दक्षपादं च परब्रह्मात्मकं सदा ॥७७॥
तत्पादोदकसंस्नाता ब्राह्मी भवति भामिनी ।
सर्वतीर्थसमा सर्वतीर्थवासा हि सा मता ॥७८॥

मखानां यजनात् पुण्यं यादृशं सम्प्रजायते ।
ततोऽधिकं महत्पुण्यं पातिव्रत्येन जायते ॥७९॥
नास्ति नार्याः पृथग् धर्मः पत्युः शुश्रूषणं विना ।
तस्मात् कान्तसहाया सा सर्वदा सुखदायिनी ॥८०॥

पुण्या पुण्यतमा साध्वी विशिष्यते जगत्त्रये ।
सा न त्याज्या भवेत् क्वापि लोकेऽत्रापि परत्र च ॥८१॥
येन भार्या परित्यक्ता सुनीता धर्मचारिणी ।
दशांगधर्मस्तेनाऽपि परित्यक्तो भवेदिह ॥८२॥

भर्ता याति यदा ग्रामान्तरं तदा तु वै सती ।
भूमौ शयनकर्त्री स्याच्छृंगारं न करोत्यपि ॥८३॥

घृतं तैलं पयः पानं दधि मिष्टं न खादति ।
ताम्बूलं मधु मिष्टान्नं नैव खादति वै सती ॥८४॥
एकवेणीधरा नैककञ्चुकीवस्त्रधारिणी ।
वियोगे चाऽसमर्था संप्रतीक्षते तदागमम् ॥८५॥

सम्बन्धः पुण्ययोगेन जायते पतिना सह ।
नारीणां हि सदा तीर्थं भर्ता सोऽपि स्त्रियास्तथा ॥८६॥
मिथश्चावाहयेन्नित्यं वाचा कायेन कर्मभिः ।
मनसा पूजयेन्नित्यं सत्यभावेन वै मिथः ॥८७॥
दक्षांगं चापि वामांगं सदा तीर्थद्वयं शुभे ।
तारयत्येव सततं कुटुम्बं शतमेककम् ॥८८॥

सुसुखं पुत्रसौभाग्यं सम्पत्सौभाग्यमित्यपि ।
रूपं तेजो यशः कीर्तिः भर्तुः स्त्रियाः प्रसादतः ॥८९॥

नारीणां यौवनं रूपं भर्तुः सम्पत् तु सा मता ।
तुष्टे भर्तरि संसारे लोकाः सर्वे स्त्रियाः शुभाः ॥९०॥
पतिहीना सुरूपाऽपि सम्पद्भिः संभृता अपि ।
कुतस्तस्याः सुखं रूपं यशः कीर्तिः सुतादयः ॥९१॥
दुर्भाग्यं च महादुःखं पापा भुंक्ते पतिं विना ।
तुष्टे भर्तरि देवाद्या ऋषयो मानवाः सुराः ॥९२॥
पितरश्चापि तुष्टाः स्युरुभलोकसुखप्रदाः ।
भर्ता नाथो गुरुर्भर्ता देवता दैवतैः सह ॥९३॥
भर्ता तीर्थं च पुण्यं च वधूनां भाग्यगौरवम् ।
श्रृंगारो भूषणं रूपं वर्णसौगन्ध्यमित्यपि ॥९४॥

पतिः स्वर्गः पतिर्धर्मः पतिः सौभाग्यमेव च ।
पतिर्वेशः पतिः शोभा वधूस्तथा पतिं प्रति ॥९५॥
विना धर्मं विना भार्यां विना च स्वामिनं शुभम् ।
गृहं वनायते चापि श्मशानायत एव च ॥९६॥
वधूः पतिव्रता यत्र पत्नीव्रतः पतिस्तथा ।
सम्पत् स्नेहश्च यत्राऽस्ति ब्रह्मभक्तिश्च यत्र वै ॥९७॥
यत्र देवार्हणं नित्यं स्त्रीसम्मानं च यत्र च ।
यत्र कन्यारक्षणं च यत्र मातृप्रसेवनम् ॥९८॥
यत्र बाला मोदते च यत्र नारी प्रमोदते ।
यत्र वै हृदयं नार्याः फुल्लितं सम्प्रमोदते ॥९९॥
तत्र स्वर्गो चेश्वराणां सम्पदो ब्रह्मलोकता ।
तस्माल्लक्ष्मि ! ब्रह्मप्रिया भवन्तु शीलतत्पराः ॥१००॥
मत्पराः सर्वदा सत्यः सदाचारपरायणाः ।
सद्धर्मपरमा नित्यं देवार्हणपरायणाः ॥१०१॥
पातिव्रत्यपरा हारिव्रत्यपराश्च सर्वथा ।
अनादिश्रीकृष्णनारायणपरायणाः सदा ॥१०२॥
वध्वो मम प्रियाः सर्वा गृह्णन्त्वानन्दशेवधिम् ।
भवतीनां सुखैः सर्वं सुखं मे शाश्वतं यतः ॥१०३॥
वधूधर्माः खड्गधारसमाः सन्ति प्रियास्थिताः ।
तान् प्ररक्ष्य स्थिता यूयं मदात्मिका भविष्यथ ॥१०४॥

॥ इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
वधूगीतायां वधूपाल्याचारादिनिरूपणनामा
॥ त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कथां पूर्वभवां शुभाम् ।
वेदायनो महर्षिः स्वां भार्यामकथयत् पुरा ॥ १ ॥
श्रेष्ठतमं प्रवक्ष्यामि पातिव्रत्यमनुत्तमम् ।
वाचा सुमनसा चैव कर्मणा शृणु भामिनि ॥ २ ॥
आग्रायणे शृणु धर्मान् वध्वाः श्रेयस्करान् मुदा ।
शुश्रूषां कुरुते भर्तुः प्रत्यहं स्वीयभावनैः ॥ ३ ॥
क्रुद्धं च निर्धनं वापि न त्यजेत् तं पतिव्रता ।
तस्य दोषं न गृह्णाति ताडिताऽपि प्रतुष्यति ॥ ४ ॥
भर्तुः कर्मसु सर्वेषु पुरतस्तिष्ठते सदा ।
कुष्ठिनं वृन्दलं वापि कान्तं या सेवते सती ॥ ५ ॥
त्सुर्लोकं प्रयात्येव प्रसादात् स्वामिनः शुभम् ।
तितं व्याधितं कुब्जं विकलं रोगिणं च वा ॥ ६ ॥
षण्ढं धर्मविहीनं पातकिनं व्यसनान्वितम् ।
अपि नाथं त्यजेन्नैव वधूः श्रेयो यदीच्छति ॥ ७ ॥
कान्तं त्यक्त्वा व्रजेदन्यत्कार्यार्थे स्नेहवर्जिता ।
सा पत्युः शापमासाद्य पुंश्चलीत्वमवाप्नुयात् ॥ ८ ॥
गते भर्तरि शृंगारं लौल्यं च सेवते यदि ।
सा तु कामस्य वेगेन भ्रष्टा भवेज्जनान्तरात् ॥ ९ ॥
या पतिं स्वं परित्यज्य पितुर्गेहे वसेत् सदा ।
विधिहीना धर्महीना सा नारी शासनार्हणा ॥१०॥
गार्हस्थ्यं हि परित्यज्य याऽटतेऽन्यत्र वेश्मनि ।
सा न भवति सम्पूर्णा पतिदेवा ह्यभागिनी ॥११॥
भर्तारं च परित्यज्य महोद्यानादिवर्तिनी ।
शृंगारभूषावेषाढ्या निर्घृणा सा तु पापिनी ॥१२॥
भवति पुंश्चली नाम यया त्यक्तः स्वकः पतिः ।
पृथक्शय्या वधूः प्रोक्ता पुंश्चली धर्मवर्जिता ॥१३॥
चक्षुर्हीना धर्मनेत्रविहीना पतिवर्जिता ।
सर्वस्थाने पतिर्ह्येको भार्याया धर्मधृङ्नरः ॥१४॥
पितुर्गेहे स्थिता कन्या चिरं नाशं प्रयाति सा ।
पत्युर्गेहे स्थिता कान्ता चिरमायुष्यमृच्छति ॥१५॥
पतिव्रता महाभागा सर्वतीर्थमयी सती ।
देवी सर्वमयी नित्या सर्वधर्ममयी हि सा ॥१६॥
असद्गतिं गतायै च यस्यै कस्यैचिदप्यथ ।
ददात्येकदिनस्यापि पुण्यं पतिव्रतोद्भवम् ॥१७॥
पिशाचिन्या भवेन्मोक्षः पापशान्तिर्भवेत्तथा ।
शरीरं शीर्यतेऽवश्यं पातिव्रत्यमुपार्जयेत् ॥१८॥
पिंगला शृंगली नाम द्वौ कृमीकर्णमूलयोः ।
चपलः पिप्पलश्चैव द्वावेतौ नासिकाग्रयोः ॥१९॥
भृंगली जंगली चैतो नेत्रयोरान्तरस्थितौ ।
कृमयो वै तथा सन्ति सर्वांगेषु नवा नवाः ॥२०॥
तैश्च संभक्ष्यते देहः पतिधर्मपरायणः ।
वध्वा विचार्य साध्योऽतो धर्मः पतिव्रतात्मकः ॥२१॥
तेजःप्रभावो ह्यतुलः सतीनां पतिदैवतः ।
धाता सोढुं समर्थो न न सूर्यो न च पावकः ॥२२॥
सत्कारयोग्याः सत्यश्च सतीत्वं पूज्यते सदा ।
क्षमा शान्तिर्ब्रह्मचर्यं दया दमश्च सौहृदम् ॥२३॥
प्रज्ञा सन्तोष ऐश्वर्यमार्जवं शुद्धता तथा ।
सिद्धयः कल्पलतिकाः सत्या देहे वसन्ति हि ॥२४॥
गुरवः पितरश्चापि विष्णुर्लक्ष्म्या समन्वितः ।
हरश्च सत्या सहितः सावित्र्या सह विश्वसृट् ॥२५॥

सतीगेहं समायान्ति देवाश्चाग्निपुरोगमाः ।
मोक्षमार्गस्थितायां वै योषिति गृहयोषिति ॥२६॥
ज्ञानौदार्यस्थितायां च सतीषु धर्मवत्स्वपि ।
साधुष्वपि गृहस्थेषु नित्यं तिष्ठन्ति देवताः ॥२७॥
भक्तस्याऽपि कुटुम्बस्य गृहे वसामि माधवः ।
समर्थाः साधवः साध्व्यो यत्र तत्र वसामि च ॥२८॥
सतीगृहं गृहं मे वै ब्रह्मप्रियायुतस्य ह ।
सञ्चरामि सदा गेहे पातिव्रत्यादिशोभिते ॥२९॥
ईश्वराः स्वामिनः सर्वे दर्शनार्थं प्रयान्त्यपि ।
पतिव्रतागृहं यत्र निवसामि नरायणि ॥३०॥
रूपसौभाग्यशृङ्गारसुखं सम्पत्तिरित्यपि ।
नारीणां सर्वथा कान्ते सर्वस्वं शोभतेऽनिशम् ॥३१॥
कान्ता कान्तेन रिक्ता न त्यक्तव्या वै कदाचन ।
त्यागकर्ता दोषभाक् स्यात् सतीधर्मस्य लोपकृत् ॥३२॥
विनीतां विमलां पुण्यां वधूं त्यक्त्वा प्रयाति यः ।
तस्य पुण्यं कृतं सर्वं वृथा वधूविलापनात् ॥३३॥
धर्माचारपरां पुण्यां भार्यां त्यक्त्वा प्रयाति यः ।
साध्वीं सुगुणां वत्सां स धर्मफलं न विन्दति ॥३४॥
सर्वाचारपरा साध्वी पुण्यपुञ्जार्जने रता ।
सतीव्रतरता सेवारता विज्ञा विनोदिनी ॥३५॥
ज्ञानगुणा भवेद्भार्या यस्य भक्तिमती शुभा ।
महासती च तद्गेहे देवास्तिष्ठन्ति सर्वदा ॥३६॥
पितरस्तादृशं पुत्रं वधूं चेच्छन्ति सर्वथा ।
पुण्या सती वधूर्गेहे वर्तते सत्यशालिनी ॥३७॥
तत्र यज्ञाश्च देवाश्च तीर्थानि पुण्यदानि च ।
कामदुघाः कल्पलतास्तत्र वसन्ति सर्वदा ॥३८॥
तत्र सर्वाणि पुण्यानि तीर्थानि सरितो नदाः ।
तत्र लक्ष्म्यो निवसन्ति सम्पदश्च वसन्त्यपि ॥३९॥
भार्यातीर्थे सर्वपुण्यशीलास्तिष्ठन्ति योगिनः ।
भार्यायोगेन पत्युश्च पादौ तीर्थस्वरूपिणौ ॥४०॥
सतीभार्यानिवासेन सुगार्हस्थ्यं सुदैवतम् ।
सर्वयज्ञमयं स्याद्वै सर्वव्रतार्थसम्प्रदम् ॥४१॥
गृहस्थस्य गृहं पुण्यं भार्या पुण्या पतिव्रता ।
यत्र तत्र प्रवर्तन्ते सर्वे धर्माः सनातनाः ॥४२॥
दानाचाराः प्रवर्तन्ते उत्सवाश्च महासुखाः ।
भार्याहीनं वनं व्याघ्राकुलितं दुःखसंभृतम् ॥४३॥
नास्ति भार्यासमं तीर्थं धर्मसाधनमुत्तमम् ।
वने ग्रामेऽप्यरण्ये वा सतीतीर्थं हि मोक्षदम् ॥४४॥

नास्ति भार्यासमं पुण्यं नास्ति भार्यासमं सुखम् ।
नास्ति भार्यासमं ज्ञानं तारणाय हिताय च ॥४५॥
धर्मभार्यां सतीं त्यक्त्वा योऽन्यत्र कुरुते मतिम् ।
गृहधर्मं परित्यज्य फलं क्वाऽस्य भवेन्ननु ॥४६॥
पत्नीं विना यदा तीर्थे श्राद्धं दानं कृतं शुभम् ।
सर्वं प्रयाति विफलं तस्माद् वधूं न संत्यजेत् ॥४७॥
यथाऽमृतप्रदानेन पितृतृप्तिः प्रजायते ।
भार्यादत्तेन पिण्डेन तथा तृप्तिः प्रजायते ॥४८॥
गार्हस्थ्यस्य तु धर्मस्य भार्या भवति स्वामिनी ।
तया विनाऽर्पितं श्राद्धं कवोष्णं जायते हि तत् ॥४९॥
भार्या पचति चैवान्नं स्वहस्तेनाऽमृतोपमम् ।
तदन्नमेव भुञ्जन्ति पितरो हृष्टमानसा ॥५०॥
तेनैव तृप्तिमायान्ति सन्तुष्टाश्च भवन्ति ते ।
तस्माद् भार्यां विना धर्मः पुरुषाणां न सिद्ध्यति ॥५१॥
भार्या सती वधूर्नित्यं धर्मं साधयति ध्रुवम् ।
यज्ञाः सिद्धिं न चाऽऽयान्ति गृहिणीरहिते गृहे ॥५२॥
सत्यधर्मसुखाः पुण्या ज्ञानाद्याः प्रबलाः सुता ।
धर्मस्य ते सहाया वै सतीं रक्षन्ति सर्वथा ॥५३॥
सती रक्षापरा चास्ते दमशान्तिपरायणा ।
न तां जेतुं समर्थो वै कालो वा यम एव वा ॥५४॥
भर्त्रा विना सतीं कश्चिन्निरीक्षेत यदा जनः ।
सतीनेत्राग्निना सोऽपि भस्मीभूतो भवेत् खलु ॥५५॥
यत्र सती महाभागा वधूर्वै सर्वमंगला ।
तस्याः सत्येन सन्तुष्टा देवा वरं ददत्यपि ॥५६॥
सतीं यान्तीं चाऽभियन्ति वह्नयो देवता अपि ।
गृहदेवा अभियन्ति वनदेव्योऽभियन्ति च ॥५७॥
सतीं यान्तीं जले स्नातुं जलदेव्योऽभियन्ति च ।
सतीं यान्तीं तीर्थयात्रां तीर्थानि चाभियन्त्यपि ॥५८॥
सतीं यान्तीं देवगृहं देवास्तामभियन्ति च ।
सतीं यान्तीं वाटिकायां क्षेत्रदेव्योऽभियन्ति ताम् ॥५९॥
सतीं यान्ती यज्ञभूमिं मखदेव्योऽभियन्ति ताम् ।
सतीं यान्तीं प्रवासं च पृथ्वी याति सतीमनु ॥६०॥
सतीं स्नान्तीं प्रसेवन्ते पित्र्यो देव्यो जलार्थिकाः ।
सतीतन्वा जलं ताश्च पिबन्ति वस्त्रपीडितम् ॥६१॥
वधूर्या मोदते पातिव्रत्येन स्वगृहे सदा ।
स्वर्गेऽपि तत्सुखं नास्ति सिद्धिलभ्यं सतीसुखम् ॥६२॥
सिद्धयश्चाणिमाद्याश्च सेवन्ते वै पतिव्रताम् ।
सतीच्छाः पूर्णतां यान्ति यथातथापि कल्पिताः ॥६३॥

विष्णुर्ब्रह्मा हरश्चेन्द्रः सूर्यश्चन्द्रो यमो गुरुः ।
सतीं नमन्ति साध्वीं च पूजयन्ति सतीं च ते ॥६४॥
निजपत्नीं सतीं सर्वे देवा इच्छन्ति सर्वथा ।
राजानोऽपि दिशां पाला बिभ्यति स्त्रीसतीबलात् ॥६५॥
सत्यं व्रतं भवेद् यत्र सती सा सर्वथा मता ।
पत्युर्व्रतं भवेद् यत्र सती सा तु पतिव्रता ॥६६॥
ब्रह्मव्रतवती या सा सती ब्राह्मी पतिव्रता ।
मम चैकान्तिका या सा सती श्रीपुरुषोत्तमी ॥६७॥
बहुपुण्येन लभ्योऽहं पतिः श्रीपुरुषोत्तमः ।
शतजन्मशीलकोशान्मम प्राप्तिर्भवेदिह ॥६८॥
सतीसंकल्पमात्रेण रोगा दूरं प्रयान्ति च ।
विघ्ना दूरं प्रयान्त्येव गणेशोऽपि बिभेति वै ॥६९॥
यमराजो भयं चैति कालो गच्छति दूरतः ।
मातरश्च प्रसन्नाः स्युर्यत्र गेहे पतिव्रता ॥७०॥
चण्डयाद्याः शान्तिमासाद्य रक्षन्ति ताः सतीगृहम् ।
बालग्रहा न चायान्ति सीम्नि सतीगृहस्य वै ॥७१॥
मारीरोगाश्च मन्त्राश्च मोहभ्रान्तिकरा अपि ।
उच्चाटनाद्या भीं प्राप्य वर्जयन्ति सतीगृहम् ॥७२॥
हनुमान् ब्रह्मशीलोऽपि सेनानीः शीलवानपि ।
ब्रह्मचर्याख्यपुरुषः सतीं नमन्ति दूरतः ॥७३॥
विद्युद्वृष्टिसमुद्राणामुत्पाता भीं प्रयान्ति च ।
सतीवाक्येन सन्तोऽपि स्वानुरोधं जहत्यपि ॥७४॥
पतिव्रताया वध्वाश्च सन्निधौ चेश्वरा अपि ।
पराजयं क्वचित् प्राप्य सत्याज्ञां मानयन्ति च ॥७५॥
सतीकोपेन सर्पाद्याः सविषा यान्ति भस्मताम् ।
पर्वताद्या विलीयन्ते शुष्कायन्तेऽब्धयोऽपि च ॥७६॥
ग्रहा गतिं विहायैव स्तब्धा भवन्ति दण्डिताः ।
कामाद्या मानसा देवा लयं यान्ति सतीबलात् ॥७७॥
वासना भवदा सत्याशीर्वादेन प्रदह्यति ।
महामायाविलयश्च जायते तु सतीच्छया ॥७८॥
अवग्रहः सतीकोपाद् वृष्टिः सतीप्ररञ्जनात् ।
वंशरेखा सतीशापान्नश्यत्यपि जगत्सु च ॥७९॥
सतीच्छया नवं सर्वं जगत्पुनः प्रजायते ।
यत्र सती वधूश्चास्ते तत्राऽहं भगवान् स्वयम् ॥८०॥
विराजे धामसहितो मुक्तादिसहितस्तथा ।
विराजे पार्षदैर्युक्तो विराजे धर्मसंयुतः ॥८१॥
विराजे भक्तियुक्तश्च श्रीपतिः पुरुषोत्तमः ।
विराजे सम्पदा युक्तः प्रत्यक्षोऽहं सतीगृहे ॥८२॥
सती साध्वी ब्रह्मपरा भक्ता नारायणी हि सा ।
पतिव्रता सात्त्वती सा महाभागवती मता ॥८३॥
सच्चिदानन्दसंज्ञोऽहं निवसामि सतीगृहे ।
तद्वंशे प्रकटीसंभवामि चापि सतीच्छया ॥८४॥
प्रसन्नोऽहं सदा भक्तवत्सलः श्रीसतीगृहे ।
अनादिश्रीकृष्णनारायणोऽहं भगवान् स्वयम् ॥८५॥
परिपूर्णतमश्चास्मि तत्र क्षतिर्न विद्यते ।
न्यूनता नैव भवति संशयो न भवत्यपि ॥८६॥
तस्य वै सफलं जन्म सफलं गृहमित्यपि ।
सफलो वंशविस्तारो यस्य गेहे हरिः सती ॥८७॥
धर्मस्तस्यापि सफलो क्रियाश्च सफलाः सदा ।
प्रयासाः सफलाः सर्वे यस्य गेहे हरिः सती ॥८८॥
सदाऽऽनन्दाश्च कुशलं स्वास्थ्यं सर्वविधं तथा ।
यत्र साध्व्यो हरिर्धर्मो यतयः साधवः सुराः ॥८९॥
तत्र यतो भवेत् सिद्धिः लौकिकी पारलौकिकी ।
यत्र क्षणं स्थिता साध्वी सन्तस्तत्र हरिः स्वयम् ॥९०॥
कृतं तेन परं पुण्यं पूर्वजन्मनि चातुलम् ।
येन प्राप्ता सती भार्या हरिः श्रीपुरुषोत्तमः ॥९१॥
सतीं द्रष्टुं मुख्यदेवाः सन्तश्चायान्ति नित्यशः ।
अश्वपट्टसरश्चेदं गृहं मे शिवसंज्ञिके ॥९२॥
तस्मात् परं हि सुकृतं देशस्याऽस्य प्रवर्तते ।
यत्र सत्यो मम पत्न्यो भवन्ति कोटिशोऽर्बुदाः ॥९३॥
त्वया निभालिता लक्ष्मि स्वतुल्याश्च मदात्मिकाः ।
परिपूर्णतमश्चाऽहं कृष्णनारायणो हरिः ॥९४॥
वधूभिः सह संराजे दिव्ये सुराष्ट्रके स्थले ।
आक्षरे मम सत्क्षेत्रे दिव्ये कुंकुमनामके ॥९५॥
सृष्टिधामाधिपश्चाहं तव भक्त्या वशीकृतः ।
लक्ष्मि वसामि तेऽग्रे च स्ववशस्तव मन्दिरे ॥९६॥
अहो ब्रह्मप्रियाः सर्वा रसं गृह्णन्ति मे हरेः ।
कृपयाऽऽनन्दसन्दोहं पिबन्ति मम चाऽमृतम् ॥९७॥
यूयं ब्रह्मप्रियाः परब्रह्मरूपा मदात्मिकाः ।
मम धर्मपराः सन्तु कल्याणदा हि योषिताम् ॥९८॥
धन्या कुंकुमवापीयं धन्यं व्याघ्रवनं त्विदम् ।
धन्यं चाश्वसरश्चापि धन्या भूश्च सुराष्ट्रिका ॥९९॥
धन्यो देशः प्रजाश्चापि वृक्षाश्च वल्लिकास्तथा ।
धन्यास्तृणस्तम्बवृक्षाः पशवो नरयोषितः ॥१००॥
धन्यश्चापि समयोऽयं धन्याश्च जन्तवोऽपि च ।
येषां मे श्रीहरेर्योगः क्षणे क्षणेऽत्र जायते ॥१०१॥

यत्र धर्मः कुटुम्बाढ्यो वर्तते शाश्वतः सुखः ।
यत्र मुक्तिस्तथा भक्तिः प्रीतिश्च सन्ति वै ध्रुवाः ॥१०२॥
एवं मत्वा नरा नार्यो धन्यमात्मानमेव ये ।
स्मरिष्यन्ति सतीधर्मास्तेऽपि यास्यन्ति धाम मे ॥१०३॥
पठनाच्छ्रवणाच्चास्य सतीधर्मस्य वाचनात् ।
पालनादपि मुक्तिश्च सिद्धिश्चापि भवेद् ध्रुवा ॥१०४॥
वंशः सम्पद् यशो मानं चारोग्यं च प्रभाविता ।
प्रभूता चेश्वरभावो भवन्त्यस्य विचारणात् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
वधूगीतायां सतीसत्यसामर्थ्यनिरूपणनामा
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीनारायणीश्रीरुवाच—

देवदेव कृपासिन्धो पुरुषोत्तम माधव ।
निर्गुणो भक्तियोगस्ते सत्या कार्यः कथं त्वयि ॥ १ ॥
श्रोतुमिच्छामि लोकानां हितार्थं सर्वयोषिताम् ।
ब्रह्मप्रियाभिः सर्वाभिरस्माभिः कार्य एव यः ॥ २ ॥
तथाऽन्याभिश्च योषिद्भिर्नरैश्चापि कृतो भवेत् ।
यथा तथाऽऽकर्णयितुं सम्यगिच्छामि तद्वद ॥ ३ ॥
एताः सर्वाः स्वसारो मे कोट्यर्बुदाब्जसंख्यकाः ।
श्रोतुमिच्छन्ति कान्तास्ताः प्रेरितास्ताभिरत्र ह ।
पृच्छामि निर्गुणं भक्तियोगं तव वदाऽत्र नः ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

गुणवन्ति हि कर्माणि सफलानि भवन्ति वै ।
तान्येव मयि संत्यक्तफलानि निर्गुणानि वै ॥ ५ ॥
फलाकांक्षायुतं कर्म बन्धकृज्जायते प्रिये ।
अफलेच्छायुतं कर्म मोक्षदं सम्प्रजायते ॥ ६ ॥
सात्त्विकाः सत्त्वकर्माणि कृत्वा यान्ति दिवं जनाः ।
राजसा नरलोकं च कृत्वा राजससत्क्रियाः ॥ ७ ॥
तामसाः कल्मषलोकान् यान्ति तमोलया जनाः ।
निर्गुणं मां तु सम्प्राप्य ममाऽक्षरं प्रयान्ति वै ॥ ८ ॥
पञ्चाग्नयो वनेवासा निष्कल्मषा जनाः प्रिये ।
लोकं सप्तर्षीणां ते प्रयान्ति फलभागिनः ॥ ९ ॥
सन्यासाश्रमवासाश्च दण्डादिधारिणस्तथा ।
जितेन्द्रियमनोधर्माः सत्यलोकं प्रयान्ति ते ॥१०॥
अष्टांगयोगसम्पन्नाः स्ववशा ऊर्ध्वरेतसः ।
महर्लोकं जनलोकं प्रयान्ति गतकल्मषाः ॥११॥

याज्ञिका यजमानाश्च प्रयान्तीन्द्रपदं चिरम् ।
दातारो यान्ति सोमस्य लोकं चामृतवर्षिणम् ॥१२॥
व्रतिनस्तु प्रयान्त्येव सूर्यलोकं सुतेजसः ।
तैर्थिका वह्निलोकं चोज्ज्वलं प्रयान्ति पुण्यतः ॥१३॥
सत्यव्रतास्तथा यान्ति वारुणं लोकमुत्तमम् ।
विष्णुभक्तियुता यान्ति वैकुण्ठं चाऽपुनर्भवम् ॥१४॥
शंभुभक्तियुता यान्ति नित्यकैलासमूर्ध्वगम् ।
पितॄणां याजिनः पुत्रसुखैश्वर्यादिवाञ्छया ॥१५॥
दक्षिणेन पथाऽर्यम्णा पितृलोकं प्रयान्ति ते ।
स्मृतिधर्मपराः स्वर्गं प्रयान्ति पुण्यकारिणः ॥१६॥
पञ्चदेवप्रपूजाढ्या दिवं प्रयान्ति दैविकम् ।
प्रजापतियजो यान्ति दक्षादींश्च प्रजापतीन् ॥१७॥
भूतयज्ञकरा यान्ति भूतानि विविधानि च ।
स्वादितत्त्वोपासकाश्चाऽऽवरणेषु व्रजन्ति वै ॥१८॥
यक्षलोकाँस्तथा यान्ति कौबेरयक्षयाजिनः ।
ईश्वराणां च यज्वानो यान्तीश्वरपदानि ने ॥
तापसा बदरीं यान्ति श्वेतद्वीपं
ब्रह्मव्रतास्तु वैराजान् लोकान् यान्ति
साध्व्यः सतीनां लोकाँश्च प्रयान्ति
लक्ष्मीलोकाँस्तथा यान्ति श्रीलोकान
पतिव्रता हरेर्लोकान् पतिलोकान्
ब्रह्मचारिण्य एवापि लोकाँस्तु ब्रह्मचारणाम् ॥२२॥
गणिका गणलोकाँश्च प्रयान्ति कर्मवेदिनाम् ।
ईशभक्ता ईशलोकान् प्राणभक्ता मरुत्स्थलीम् ॥२३॥
आसुरा निर्ऋतलोकान् यमलोकाँस्तु पापिनः ।
आर्षांल्लोकान् संयमिनो यन्ति तपोजनादिकान् ॥२४॥
वेदविद्यारता यान्ति सत्यलोकं विरागिणः ।
त्यागिनो यान्ति वैकुण्ठं जलावृत्त्यूर्ध्वसंस्थितम् ॥२५॥
ऐश्वर्ययाजका यान्ति सिद्धिलोकान् सुयोषिताम् ।
द्रव्यदा वसुलोकाँश्च भस्मिनो रुद्रमन्दिरम् ॥२६॥
पञ्चाग्नितापसा यान्ति चादित्यमण्डलं जनाः ।
कामिनश्चान्द्रलोकं च शीतदानपरायणाः ॥२७॥
क्रूरकर्मकरा यान्ति राक्षसानां गृहाणि तु ।
वासनावन्त एवापि यान्ति पिशाचयोनिषु ॥२८॥
दीपदानादिकर्तारः प्रयान्ति वह्निमण्डलम् ।
समृद्धिदा यान्ति वै स्वर्गं नाक्षत्रं सुविलासवत् ॥२९॥
वाटिकाक्षेत्रदातारो यान्ति सम्राट्पदं क्षितौ ।
विद्यावन्तस्तथा सारस्वतं पदं प्रयान्ति च ॥३०॥

धर्मस्य नाशका यान्ति दारुणं दानवं पदम् ।
अधर्मिणो भवन्त्येव दैत्या उद्वेगशालिनः ॥३१॥
क्रुद्धाश्च क्रूरकर्माणो नागाः सर्पा भवन्ति च ।
जलहानिकरा यान्ति यादसां योनिसंभवान् ॥३२॥
पुनरावर्तिनः सर्वे लोकाः सत्यान्तिनो मताः ।
कर्मणां सनिमित्तानां मार्गो गतागतात्मकः ॥३३॥
तावन्मोदः प्रमोदश्च यावत्पुण्यं प्रविद्यते ।
क्षीणे पुण्ये समायाति निम्नलोकं हि कालतः ॥३४॥
तस्माल्लक्ष्मि कृतं कर्माऽर्पणीयं परमेश्वरे ।
कर्मफलस्य संत्यागान्निर्गुणं जायते मयि ॥३५॥
भक्ता निष्कारणा भूत्वा ज्ञानवैराग्यसंयुता ।
प्रेमभक्त्या युता कृष्णहरिभक्तजनप्रिया ॥३६॥
भज मे चरणौ हंससेवितं निर्भयं प्रिये ।
मृत्युर्यत्र न सबलस्तं मां भज प्रिये सदा ॥३७॥
भक्तियोगो द्विधा लक्ष्मि सगुणश्चापि निर्गुणः ।
सगुणोऽस्ति बहुधा वै निर्गुणस्त्वेकधा मतः ॥३८॥
भावो विभिद्यते स्त्रीणां गुणयुक्तो हि सर्वदा ।
गुणत्रिकाद् भवन्त्येव भक्तास्त्रिभेदशोभनाः ॥३९॥
हिंसां दम्भं च मात्सर्यं कपटं स्वार्थशालिताम् ।
आलम्ब्य कुरुते भावं क्रुद्धा सा तामसी मता ॥४०॥
यश्च ऐश्वर्यविषयानभिसन्धाय यत्नतः ।
अर्चयेन्मां शिवराशि ! राजसी सा प्रकीर्तिता ॥४१॥
कर्तव्यमिति मत्वा या करोति रागवर्जिता ।
मोक्षार्थं भजते मां सा सात्त्विकी सेविका स्मृता ॥४२॥
दुःखी स्वार्थी विवेकी च मनिषी भजते तु माम् ।
पुण्यपात्राणि वै नार्यो निमित्तेन भजन्ति माम् ॥४३॥
स्नेहेन मम भक्ताश्च मां भजन्ति सदा सुखाः ।
गुणैर्दोषैश्चाऽपरेऽपि मां भजन्ति स्मरन्ति च ॥४४॥
निर्गुणं भक्तियोगं तु कुर्वन्ति मयि साधवः ।
साध्व्यश्च रागशून्या यास्ता भजन्ति हरिं वरम् ॥४५॥
परिपूर्णतमे सर्वकारणानां च कारणे ।
अनादिश्रीकृष्णनारायणे श्रीकान्तवल्लभे ॥४६॥
प्रेमगतिरविच्छिन्नाऽखण्डिताऽहैतुकी शुभा ।
सा भक्तिर्निर्गुणा दिव्या मयि प्रसन्नताफला ॥४७॥
यः स्नेहो दुःखनाशार्थो न स्वार्थो न निरर्थकः ।
हरेः प्रसन्नताऽऽलभ्यस्तद्वती निर्गुणा मता ॥४८॥
भक्तिर्यथा निर्गुणाऽस्ति दासी तथा च निर्गुणा ।
निसर्गप्रेमधारा यं प्रति श्रीपुरुषोत्तमम् ॥४९॥
वहति प्रेमरूपा सा निर्गुणा मयि योजिता ।
आनन्दात्म फलं तृप्तिः शाश्वती फलमित्यपि ॥५०॥
प्रफुल्लता फलं समुत्साहः फलं प्रमोदनम् ।
अहो अहो स्थितिर्या च सुधामिष्टा विशारदी ॥५१॥
पीयूषरसदात्री च निर्गुणायाः फलं मतम् ।
नववध्वा युवत्याश्च विवाहोत्तरमेव यत् ॥५२॥
स्वकान्तसंगमेच्छाया यथा धारा प्रवर्तते ।
नवानन्दः प्रमोदश्च प्रफुल्लता प्रसन्नता ॥५३॥
स्नेहभरः सुतृप्तिश्च सन्तोषो निर्वृत्तिस्तथा ।
मिष्टं सुष्ठु समस्तं वै यथा वध्वाः प्रभासते ॥५४॥
तथा भक्तिमतीनार्या मयि सर्वं प्रभासते ।
सैषा वेदप्रसूर्विद्या निर्गुणा मत्स्वरूपिणी ॥५५॥
नैषा मद्व्यतिरेकेण क्वचित् कुत्रापि जायते ।
सैषा भागवती विद्या शाश्वती पुरुषोत्तमी ॥५६॥
सैषा प्रसन्नतालभ्या ममाऽऽन्तरे निवासतः ।
नान्यसाधनलभ्या वै निर्गुणा निर्गुणं विना ॥५७॥
नृपस्नेहो नृपकृपां विना भृत्यस्य नास्ति वै ।
तथा मम कृपां हित्वा योगोऽयं नैव जायते ॥५८॥
लक्षणं निर्गुणानां मे भक्तानां शृणु पद्मजे ! ।
आक्षरं चापि गोलोकं वैकुण्ठं श्वेतभूतलम् ॥५९॥
क्षीरस्थानं बद्रिकां वा पारमेष्ठ्यपदं च वा ।
अव्याकृतं चामृतं च लक्ष्मीलोकं प्रकुण्ठकम् ।
वैराजं वैश्वराणां च स्थानानि विविधान्यपि ॥६०॥
शक्रधिष्ण्यं सार्वभौमं रसाधिपत्यमित्यपि ।
दिक्पालत्वं याम्यभावं योगर्द्धिं वैश्वरोत्तमम् ॥६१॥
चमत्कारांस्तथा सिद्धीरैश्वर्याणि महान्त्यपि ।
नाऽभिलषन्ति ये भक्ता मम पादप्रसेवकाः ॥६२॥
दीयमानं मया लक्ष्मि सालोक्यं चापि वोत्तमम् ।
न गृह्णन्ति कदाचित्ते मत्सेवानन्दसंभृताः ॥६३॥
सामीप्यं चापि नेच्छन्ति प्रेम्ण औन्यात् क्षतेः खलु ।
विरहोऽपि संगविघ्नः स्पर्शविघ्नो महान् हि सः ॥६४॥
सन्निकृष्टे तु यत्प्रेम दूरत्वं लभते क्वचित् ।
तस्मान्मत्संगतौल्ये न सान्निध्यं वर्तते क्वचित् ॥६५॥
अथापि दीयमानं च सारूप्यं मानसंभृतम् ।
गृह्णन्ति नैव भक्ता मे समानत्वाभिमानतः ॥६६॥
दास्ये समानता विघ्नो नैरपेक्ष्यं च विघ्नता ।
मम सेवोत्सुकास्तस्मान्न गृह्णन्ति सरूपताम् ॥६७॥

अथैकत्वं दीयमानं नैव वाञ्छन्ति मामकाः।
द्रवीभावे विलीनीभावे चैकत्वं भवेत् खलु ॥६८॥
तथासति कथं सौख्यं स्वामिसेवकसंभवम्।
दासीलभ्यं सुखं नैव कान्ताद्धरेर्भवेन्नु ॥६९॥
अमूर्तभावे त्वेकत्वं भक्तस्य संभवेन्नु।
सत्येवं योगजं सौख्यं मूर्तेर्मूर्तौ कथं भवेत् ॥७०॥
सेवासुखं न लभ्येत नेच्छन्त्येकत्वमित्यतः।
निरपेक्षाश्च शान्ताश्च समदर्शनसंगताः ॥७१॥
कान्तसुखानुसुखिन्यो भवन्ति निर्गुणाः स्त्रियः।
नैरपेक्ष्यं महासौख्यं नैरपेक्षा हरिश्रिताः ॥७२॥
सकामास्तु महासौख्यं निष्कामाया विदन्ति न।
निष्कामो भक्तियोगो वै भवेदात्यन्तिकं पदम् ॥७३॥
निरपेक्षाः प्रिया नित्यं मां भजन्ति प्रकारकैः।
स्मृत्या संकीर्तनेनापि श्रवणेन च सेवया ॥७४॥
पूजया वन्दनेनापि दास्येन सख्यकेन च।
आत्मनिवेदनेनापि प्रेम्णा भक्तिं चरन्ति ह ॥७५॥
दुर्लभा भक्तिमत्यो मे मद्भावभावनान्विताः।
महतीनां मानभावं कुर्वन्त्यश्च दयां तथा ॥७६॥
दीनास्वथ समानासु मैत्रीं चरन्त्य एव याः।
मम पादाऽब्जमधुपा मम संयोगलालसाः ॥७७॥
मां प्रस्मरन्ति प्राणेशं यथा प्रोषितभर्तृकाः।
मम स्मृतेः रोमहर्षो यासां स्वेदः प्रजायते ॥७८॥
आनन्दाश्रुकलाश्चापि वैवर्ण्यं प्रेमसंभृतम्।
अनादिश्रीकृष्णनारायणं गृणन्त्य एव च ॥७९॥
दिवानिशं मयि सक्तास्ता वै भागवतीतमाः।
मन्मानस्यो मद्धृदया मय्येवाऽङ्गसमर्पणाः ॥८०॥
मय्येवाऽऽनन्दभोक्त्र्यश्च महाभागवतीतमाः।
भुवि जलेऽनले वायौ गगने तारकासु च ॥८१॥
वनेऽरण्ये जंगमेषु पश्यन्त्यः परमेश्वरम्।
अनादिश्रीकृष्णनारायणं मां च प्रहर्षिताः ॥८२॥
विलोकयन्त्यः कामिन्यो रुदन्ति च वदन्ति च।
क्वचिन्नन्दन्ति धावन्ति हसन्ति मार्गयन्ति च ॥८३॥
गायन्ति चाऽऽह्वयन्त्युग्रं नृत्यन्ति रमयन्ति च।
विहरन्ति च जल्पन्ति पश्यन्ति मां द्रुमान्तरे ॥८४॥
क्वचित्तूष्णीं भवन्त्येता मत्स्वरूपा मदात्मिकाः।
कृतकृत्याः कृतार्थाश्च सर्वानन्दपरिप्लुताः ॥८५॥
यासां दर्शनमात्रेण चान्या यान्ति कृतार्थताम्।
दिव्या दिव्यक्रिया वध्वो दिव्यरूपा हि ता यतः ॥८६॥
शाश्वतीनां च तासां वै न कालो न यमस्तथा।
न भूमा न महारुद्रो दण्डं दातुं क्षमः क्वचित् ॥८७॥
यासां वामे गदा कौमुदकी दक्षे सुदर्शनम्।
अग्रे शार्ङ्गं धनुः पश्चे पाञ्चजन्यस्तु कम्बुकः ॥८८॥
नन्दकश्च महाखड्गः शतचन्द्रः पुरस्तथा।
इषवः परितश्चापि छत्रं चोर्ध्वे व्यवस्थितम् ॥८९॥
यष्टिश्च पादयोश्चापि पार्श्वे त्वैश्वर्यकोटयः।
मूर्तौ च सिद्धयः सर्वा मम रक्षन्ति ताः प्रियाः ॥९०॥
ऊर्ध्वं छत्रं महापद्मं छायां करोति शोभनाम्।
गरुडः पक्षवातैश्च श्रमहर्ता भवत्यपि ॥९१॥
यत्र यत्र गताः सत्यस्तत्र तत्र हरिः प्रभुः।
अनादिश्रीकृष्णनारायणोऽहं विचरामि च ॥९२॥
तीर्थीकरोमि भूभागान् श्रीमत्पादाब्जरेणुभिः।
क्षणं यत्र स्थिताः सत्यस्तत्र तीर्थानि सन्ति हि ॥९३॥
पापा मृता भवेत्तत्र साऽपि याति परां गतिम्।
कृष्णप्रिया वीक्ष्य दूरान्नाऽऽधयो व्याधयोऽपि च ॥९४॥
भूतप्रेतपिशाचाद्या ग्रहा विघ्नाश्च राक्षसाः।
आसुरा दोषभागाश्च पलायन्ते भयान्मम ॥९५॥
नद्यो नदाः पर्वताश्च प्राकाराः खातभूमयः।
गर्ताश्च गह्वराश्चापि समुद्रा वह्नयस्तथा ॥९६॥
मार्गं ददति साध्वीभ्यो निरपेक्षाभ्य एव मे।
साध्वीनां ज्ञाननिष्ठानां विरक्तानां हि योषिताम् ॥९७॥
मदात्मिकानां तासां वै प्रतिबन्धो न कुत्रचित्।
शतजन्मतपःपूता पुण्यपुञ्जसमन्विता ॥९८॥
संगमासां सा लभते दुर्लभं पुण्यहानिभिः।
यत्कुले मम भक्ता वै जायते ब्रह्मलक्षणा ॥९९॥
तत्कुलं विमलं बोध्यं निकृष्टमपि चोर्ध्वगम्।
लक्ष्मि मे भक्तियुक्ता तु सर्वैश्वर्यसमन्विता ॥१००॥
पितॄन् दशकुलोद्भूतान्निजाँश्च पतिपक्षगान्।
मातृपक्षगताँश्चापि तावतश्चोद्धरत्यपि ॥१०१॥
अपि ब्रह्माण्डमखिलं समुद्धर्तुं बलान्विता।
निरयान् पापबन्धाँश्च क्षेप्तुं शक्ता तु सा मता ॥१०२॥
ये याश्च देहवत्यो वै सम्बन्धिनश्च ये च याः।
भृत्याद्याः सुहृदश्चापि कर्मचाराश्च ये च याः ॥१०३॥
पक्षिणः पशवश्चापि जन्तवो मशकादयः।
पिपीलिकाः पतंगाश्च कीटाश्च मक्षिकादिकाः ॥१०४॥
मम भक्ता गृहे ये यास्तेषां तासां प्रमोक्षणम्।
भवत्येव न सन्देहो मखतीर्थव्रतैर्विना ॥१०५॥

साध्वीसंसर्गतस्तेऽपि ता यान्ति हरिमन्दिरम् ।
मलिनेऽपि प्रदेशे वै भक्ता लोकान् पुनाति मे ॥१०६॥
मयि केनापि भावेन मनो लग्नं करोति या ।
याति मद्रूपतां साऽपि ममाऽभ्यासाद् यथा तथा ॥१०७॥
स्नेहकामभयक्रोधैरैक्यसौहार्दमोहनैः ।
भूत्वा मन्मयभावा तु याति मद्भवनं सती ॥१०८॥
स्नेहात् पितरौ ग्राम्याश्च कामाद् ब्रह्मप्रियास्तथा ।
भयाद् दैत्या दानवाश्च क्रोधाद् रणांगणे भटाः ॥१०९॥
ऐक्यात् कुटुम्बिनोऽसंख्याः सौहार्दाद् ऋषयोऽमलाः ।
मोहान्नार्यः कोटिशश्च भूत्वा मन्मयभावनाः ॥११०॥
मद्रूपगुणसामर्थ्यभावसंलग्नमानसाः ।
अनादिश्रीकृष्णनारायणं प्राप्ता हि मां प्रभुम् ॥१११॥
तस्मात् केनापि भावेन मनो मयि निवेशयेत् ।
सततं स्मरणं मे स्यात् तेन मद्भावमृच्छति ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां निर्गुणभक्तियोगनिरूपणनामा पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं विशेषं भक्तियोजनम् ।
न मां रोधयति ख्यातिर्मखो धर्मस्तपो न च ॥ १ ॥
न योगो न विवेकोऽपि न व्रतानि यमास्तथा ।
न तीर्थानि च छन्दांसि पूर्तानि नियमा न च ॥ २ ॥
न दानं दक्षिणा नेष्टं विना भक्तिं कदाचन ।
ख्यात्यादिभिः प्राप्यते यत् प्राप्यते सर्वमेव तत् ॥ ३ ॥
भक्त्या तु स्वल्पया लक्ष्मि भक्तेः पदं ततः परम् ।
नैभिर्भक्तिपदं लभ्यं चाऽसमर्थैः प्रधिष्ण्यदैः ॥ ४ ॥
उद्धारिणी मम भक्तिर्विश्वपापाद्धि पावनी ।
उत्तारिणी भवाब्धेश्च संहारिणी च कर्मणाम् ॥ ५ ॥
सत्कारिणी श्रेयसां च दात्री हरेः पदस्य च ।
वसन्तपञ्चमी भक्तजनानां रंगदायिनी ॥ ६ ॥
कल्पलता स्नेहिलानां चिन्तामणिस्तु कामिनाम् ।
विद्युल्लताऽन्धभक्तानां दीपिका शास्त्रगामिनाम् ॥ ७ ॥
दीपावलिः सुकृतीनामुत्सवी वरशालिनाम् ।
विजया दशमी चेयं जयिनां दमिनां शुभा ॥ ८ ॥
नौका पारगतीच्छूनां विमानिकाऽम्बरार्थिनाम् ।
तापिनी शीतमग्नानां प्राणदाऽजाऽर्दिताऽर्थिनाम् ॥ ९ ॥
जीवनी विषदग्धानां प्रापिका श्रेयइच्छताम् ।
निःश्रेणी चाऽक्षरधाम्नो माता दीक्षां प्रगृह्णताम् ॥१०॥
भक्तिर्मे निर्गुणा वेत्रधरा मे योगदा सदा ।
ब्रह्मधामप्रदा ब्रह्मानन्ददा चाऽनिवर्तिनी ॥११॥

श्रीः पार्वती कमलजा तुलसी च पद्मा
पद्मावती भृगुसुताऽपि च पद्मिनी च ।
राधा रमा च विरजा च सरस्वती च
दुर्गा रमा बदरी पद्मरती च लक्ष्मीः ॥१२॥
रेवा रतिश्च ललिता च जया च हंसी
भक्तिश्च माधवसुता ह्यथ माणिकी च ।
नारायणी च सुगुणेति च मञ्जुलेति
जापात्तरन्ति भवसागरमत्र नार्यः ॥१३॥
नारायणोऽक्षरपतिः पुरुषोत्तमश्च
कृष्णो हरिश्च परमेश्वर ईश्वरेशः ।
स्वामी प्रभुः परमधामपतिः परेशः
सर्वान्तरस्थ इह मानवरूपकृष्णः ॥१४॥
श्यामः सितः सकलभक्तपतिर्हृदिस्थो
ब्रह्मातिगोऽपि निजभक्तसमूहसंस्थः ।
ब्रह्मप्रियेश इति मे शुभनामजापा-
त्पारं प्रयान्ति तु नरा मम भक्तिभाजः ॥१५॥

सत्संगेन भवेदेव भक्त्यंकुरः सुपल्लवः ।
वर्धते चातिवेगेन सतीसंगेन सिञ्चितः ॥१६॥
तस्मात् सतीप्रसंगं वै देहेन मनसा गिरा ।
क्रियया सेवया सर्वार्पणेनापि क्रियात् सदा ॥१७॥
सेवाविधिं प्रवक्ष्यामि लक्ष्मि गृही तरेत्तथा ।
सेवया मां परब्रह्म प्राप्नुयाच्छ्रीपतिं हरिम् ॥१८॥
अनादिश्रीकृष्णनारायणध्यानपरायणम् ।
गुरुं सन्तं समाश्रित्य सिद्धा भवति मानुषी ॥१९॥
गुर्वीं सतीं समाश्रित्य साध्वी भवति मानुषी ।
मानवा वै गुरुं प्राप्य तरन्ति तु भवाम्बुधिम् ॥२०॥
मम दीक्षान्वितः स्याद्वै गुरुश्चाचार्यसत्तमः ।
मम सेवाऽधिकारी च सेवाधिकारिणी च वा ॥२१॥
सेवाविधिं शिक्षयेद्वै श्रीकृष्णस्य मम प्रभोः ।
उत्तराभिमुखं रम्यं कारयेन्मम मन्दिरम् ॥२२॥
सहस्रकलशाऽऽढ्यं च कलशैक्येन चाधिकम् ।
तत्र गजासनं प्रोच्चं सपीठं कुम्भमण्डितम् ॥२३॥
अक्षराख्यं सच्चिदानन्दात्मकं स्वर्णनिर्मितम् ।
बहुसोपानशोभं च मणिरत्नादिभूषितम् ॥२४॥

महार्हरत्नैराच्छन्नं पृष्ठाम्बरविराजितम् ।
आवरणाऽम्बराऽग्रं च तूल्यासनादिशोभितम् ॥२५॥
मृदु पार्श्वकशिप्वादिसहितं हेमशोभितम् ।
उपबर्हणसंयुक्तं समुल्लोचादिछादितम् ॥२६॥
सच्चित्रकुण्डशोभाढ्यं सर्वतोभद्रमण्डलम् ।
तोरणैः राजितं रम्यैर्गवाक्षवारियन्त्रकैः ॥२७॥
चतुःशालविशालाग्रजालैः प्रकाशभासितम् ।
प्रांगणे च सभाश्रेष्ठमण्डपेन सुशोभितम् ॥२८॥
तुलस्या शोभितं रम्यं द्विपिद्वयविराजितम् ।
सिंहव्याघ्रगरुडाद्यैः शोभितं पुरतः शुभैः ॥२९॥
चक्रं सुदर्शनं शृंगोपरि द्वारेऽभिधायुतम् ।
मम नामानि लेख्यानि तोरणेषु समन्ततः ॥३०॥
शंखं पद्मं गदां शार्ङ्गमालेख्यानि च भित्तिषु ।
बाणा बाणधराः कोशाः पार्श्वयोः सर्वथा मताः ॥३१॥
मन्दिरस्य पृष्ठभागे शतचन्द्रं च नन्दकम् ।
हलं च मुशलं चापि चित्रितव्यं शुभात्मकम् ॥३२॥
गजासनस्य वै पृष्ठे पार्श्वे मे पट्टयोषितः ।
ततो ब्रह्मप्रियाश्चापि गोप्यो गावश्च दासिकाः ॥३३॥
मुक्ताः सन्तस्तथा साध्व्यः सत्यश्च साधवोऽमलाः ।
अवताराश्च गोपालाः सोपानेषु कपाटके ॥३४॥
देहल्यां कल्पवृक्षाश्च स्तम्भेषु च लतास्तथा ।
कुड्येषु गोमती गंगा स्वर्णरेखाऽश्वपट्टकम् ॥३५॥
कुंकुमवापिकाक्षेत्रं भद्रा यमी सरस्वती ।
आलेख्यं रासरमणं जन्मोत्सवो मखादयः ॥३६॥
दशावतारचित्राणि नरनारायणाश्रमः ।
पुण्यतीर्थानि कार्याणि रंगैर्मन्दिरमध्यतः ॥३७॥
शंखचक्रगदापद्मकरं किशोरमूर्तिकम् ।
सपादपञ्चषष्ट्यंगुलप्रमाणं च मां निजम् ॥३८॥
श्वेतचम्पकवर्णाभं कारयित्वाऽभिपूजयेत् ।
प्रतिष्ठाविधिनाऽऽस्थाप्य गुरुहस्तेन मन्दिरे ॥३९॥
भक्तः परमया भक्त्या पूजयेत्परमेश्वरम् ।
अनादिश्रीकृष्णनारायणं ब्रह्मप्रियापतिम् ॥४०॥
भक्ता भक्तोऽपि च सदाऽहर्निशं मत्परो भवेत् ।
मत्प्रसादे स्वरसनां घ्राणं मत्तुलसीदले ॥४१॥
त्वचं मत्स्पर्शने कुर्यात् कर्णौ मच्छ्रवणे तथा ।
नेत्रे मद्दर्शने दद्यात् करपादादिकं तथा ॥४२॥
दद्यात् सेवाविधौ मे च ह्येवं सेवापरा भवेत् ।
भक्तां प्रेमभरां तां वै प्राहुर्भागवतोत्तमाम् ॥४३॥
अश्वमेधाऽयुतयज्ञा राजसूयाऽयुतान्यपि ।
मम सेवाकलांशस्य तुल्यतां यान्ति नैव ह ॥४४॥
अनादिश्रीकृष्णनारायणाऽर्चाप्रदर्शनम् ।
सेवनं तस्य चैवास्ते फलदं नात्र संशयः ॥४५॥
कोटिपापानि नश्यन्ति गुर्वाचार्यस्य सेवनात् ।
देहान्ते दिव्यमुक्ता मे श्वेतचम्पककान्तयः ॥४६॥
गर्जं नीत्वा समायान्ति नेतुं धाम ममाऽक्षरम् ।
विमाने गरुडे चापि गजे कृत्वा नयन्ति ताम् ॥४७॥
ब्राह्मे मुहूर्ते चोत्थाय मम नाम स्मरेत् सती ।
गुरुं मां च ततो नत्वा मुखक्षालनमाचरेत् ॥४८॥
उपविश्याऽऽसने शीघ्रं श्वासं विजित्य वै ततः ।
हस्तावुत्संग आधाय ध्यायेन्मां भक्तवल्लभम् ॥४९॥
शंखचक्रगदापद्मधरं चाशीःपरायणम् ।
स्वस्तिकासनमासीनं ध्यायेत् सुशान्तमच्युतम् ॥५०॥
ब्रह्मप्रियाऽभिसहितं पट्टांगनाभिसेवितम् ।
सर्वांगसुन्दरं रम्यं सर्वभूषाविभूषितम् ॥५१॥
किशोरं श्वेतरूपं च तेजःपरिधिभाषितम् ।
ध्यात्वैवं मां ततो यायाद् देहशुद्ध्यर्थमन्यतः ॥५२॥
अशौचायास्तु विफलाः क्रिया भवन्त्यतः सदा ।
देहशुद्धिं जलाद्यैश्च स्नानाद्यैराचरेत् प्रिये ॥५३॥
सत्त्वशुद्धिविहीनाया भक्तिर्मे नैव पुष्यति ।
मुखशुद्धिविहीनाया जपमन्त्रा निरर्थकाः ॥५४॥
आयुर्बलं यशो वर्चः प्रजाः पशून् वसूनि च ।
ब्रह्म प्रज्ञां च मेधां च ददाति शुद्धिरुत्तमा ॥५५॥
सूर्यं नमेन्नमेद् वृद्धान् वृद्धाः सतीर्नमेत्तथा ।
साध्वीर्नमेत् प्रसेवेत साध्वीः साधुजनानपि ॥५६॥
प्रणयेद्धरिभक्तांश्च देवायतनप्रभृतीन् ।
नामानि चापि गृह्णीयात् पावनानि स्मरेत्तथा ॥५७॥
साकेता मधुनगरी माया काशी ह्यवन्तिनी ।
काञ्ची सुवर्णनगरी पुरी च पुरुषोत्तमी ॥५८॥
कुंकुमवापिका चैता मोक्षदाः प्रणमेत्तथा ।
शालग्रामो गण्डकीगः शंभलो हरिमन्दिरे ॥५९॥
नन्दिग्रामः कोसलस्थोऽक्षरग्रामान् स्मरेत्तथा ।
दण्डकं सैन्धवारण्यं जम्बूमार्गं च पुष्करम् ॥६०॥
उत्पलावर्त्तमारण्यं नैमिषं कुरुजांगलम् ।
अर्बुदं हेमवन्तं च व्याघ्रारण्यं स्मरेत्तथा ॥६१॥
तिलकं भालके कुर्याद् रक्तकुंकुमराजितम् ।
चन्द्रकं कौंकुमं कुर्यान्मध्ये भाले सती तथा ॥६२॥

मन्दिरं प्रति गत्वा च घण्टानादं समाचरेत् ।
कीर्तनं भजनं कुर्यात् स्मरन्ती परमेश्वरम् ॥६३॥
जयारावं तालिकां च वादयन्ती नमेत्प्रभुम् ।
प्रदीपं घृतसौगन्ध्यवासितं च प्रदीपयेत् ॥६४॥
उत्तिष्ठोत्तिष्ठ भगवन् योगनिद्रां त्यज प्रभो ।
सेवायामागता चाऽस्मीत्येवमुत्थापयेद्धरिम् ॥६५॥
पादसंवाहनं कुर्यादंगसेवां समाचरेत् ।
दन्तधावनमर्पय्य स्नापयेद् गन्धवारिभिः ॥६६॥
गन्धसाराद्यर्पयेन्मे ततो वस्त्राणि चार्पयेत् ।
चन्दनाद्यैरर्चयेन्मां मंगलाऽऽर्तिक्यमाचरेत् ॥६७॥
भ्रामयेन्नववारं मे मुखोपरि प्रदीपितम् ।
पञ्चवर्त्यं जलं वस्त्रं भ्रामयित्वा जयं वदेत् ॥६८॥
निवेद्य बहुपक्वान्नं दुग्धं च शर्करान्वितम् ।
श्रृंगारं भावतः कृत्वा वस्त्रभूषणमंगलैः ॥६९॥
आर्तिक्यं हारतोराद्यैः श्रृंगार्यैव समाचरेत् ।
पुरीलड्डुनवनीतदधिदुग्धानि चार्पयेत् ॥७०॥
पञ्चभोगान्, ततो नत्वा ताम्बूलं जलमर्पयेत् ।
अथ नैजं चरेत् कार्यं व्यावहारिकमुत्सुका ॥७१॥
मध्याह्ने च महाभोगान् नानारसान् समर्पयेत् ।
राजभोगार्तिकं कृत्वा कारयेच्छयनं मम ॥७२॥
प्रसादं तुलसीयुक्तं भुञ्जीत सततं सती ।
चतुर्घट्यवशेषे तु दिने उत्थापयेत्तु माम् ॥७३॥
वाद्यनादेन भावेन फलभोगं समर्पयेत् ।
ततः सेवां मम कुर्यात् कुर्यान्नैजं क्रियादिकम् ॥७४॥
ततः सन्ध्यार्तिकं कुर्याद् दुग्धादीनि निवेदयेत् ।
प्रदोषे पुनरार्तिक्यं भोगं दत्त्वेष्टमेव मे ॥७५॥
शयनं कारयेद् रम्ये राजसेवां समाचरेत् ।
सर्वार्पणं विधायैव महानन्दं लभेत् सती ॥७६॥
एवं कृष्णपरा साध्वी सेवासंलग्नमानसा ।
अनादिश्रीकृष्णनारायणदास्यपरायणा ॥७७॥
तारयित्वा कुलशतं याति धामाऽक्षरं मम ।
मम जन्माष्टमी कार्या राधाष्टमी शुभा तथा ॥७८॥
लक्ष्मीनवमी कार्या च व्रतोत्सवप्रपूजनैः ।
रामादित्यनवमी च वामनद्वादशी तथा ॥७९॥
अन्नकूटोत्सवश्चापि तथाऽनन्तचतुर्दशी ।
चतुर्दशी नृसिंहस्य तथा जन्मदिनानि मे ॥८०॥
शुक्ला रमासप्तमी च कार्तिके व्रतरूपिणी ।
कर्तव्या पुण्यवतीपूर्णिमा चैत्रस्य सोत्सवा ॥८१॥
पञ्चवर्णसमायुक्ते स्थण्डिले कारयेच्छुभम् ।
सप्तधान्यैः सर्वतोभद्राख्यं शोभनमण्डलम् ।
द्वात्रिंशद्दलसंयुक्तं कर्णिकाकेसरोज्ज्वलम् ॥८२॥
कर्णिकायां न्यसेन्मां च स्वर्णसिंहासने सती ।
रमां राधां श्रियं भूं च विरजां माणिकीं रतिम् ॥८३॥
पद्मावतीं च लक्ष्मीं चामृतां च मंगलां तथा ।
दुर्गां सरस्वतीं हंसीं मंजुलां सद्गुणां जयाम् ।
चम्पां कस्तूरिकां हैमीं शान्तां मुक्तां च देविकाम् ॥८४॥
स्थापयेत्तत्सतीमध्ये मां स्वयं भक्तवल्लभम् ।
राधारमासखीश्चान्याः पार्षदान् स्थापयेच्च मे ॥८५॥
शंखं चक्रं गदां पद्मं शार्ङ्गं बाणांश्च नन्दकम् ।
मुसलं च हलं दण्डं कौस्तुभं स्वस्तिकं तथा ॥८६॥
वनमालां श्रीवत्सं च पीताम्बरं च वेत्रिकाम् ।
स्थापयेद् गरुडं चापि तालं च रथशोभितम् ॥८७॥
सुमतिं दारुकं चापि कुमुदं कुमुदाक्षकम् ।
नन्दं सुनन्दं चण्डं च प्रचण्डं च बलं तथा ॥८८॥
प्रबलं वल्लभं चापि शुकं भागवतं तथा ।
स्वप्रकाशं च हेमन्तं भगवन्तं दिशांपतीन् ॥८९॥
विश्वक्सेनं चाक्षरं च शिवं विष्णुं विनायकम् ।
ग्रहान् देवान् मातृकाश्च ब्रह्मप्रियादिमण्डलम् ॥९०॥
वीतिहोत्रं तथा सर्वानवतारान् समन्यसेत् ।
ततः सम्पूजयेद् भक्त्या सती त्वावाहनादिभिः ॥९१॥
आवाहनं चासनं च पाद्यमर्घ्यं सुगन्धि च ।
पञ्चामृतं जलस्नानं भूषाम्बरं च चन्दनम् ॥९२॥
मधुपर्कं धूपदीपौ गन्धं यज्ञोपवीतकम् ।
पुष्पाऽक्षतान् द्रवान् रम्यान् कुंकुमं जलमुत्तमम् ॥९३॥
आचमनं च नैवेद्यं ताम्बूलं दक्षिणां तथा ।
प्रदक्षिणं प्रार्थनां च दण्डवच्च क्षमापनम् ॥९४॥
नीराजनं नमस्कारं पुष्पाञ्जलिं ततोऽर्पयेत् ।
ततः सर्वाधिदेवान् वै देवीश्च पार्षदादिकान् ॥९५॥
पूजयेत् परया भक्त्या भक्ता नारी सतीव्रता ।
घण्टावाद्यरणद्धंटाकांस्यवीणादिकीचकैः ॥९६॥
करतालमृदंगाद्यैः कीर्तनं नर्तनं क्रियात् ।
नृत्येयुः श्रीहरेरग्रे मे भक्ताः प्रेमविह्वलाः ॥९७॥
जयशब्दयुताश्चापि सत्कथाख्यानतत्पराः ।
सर्वा नृत्यं प्रकुर्युश्च परीहारं ततश्च ताः ॥९८॥
शयनं कारयेयुश्च मां सत्यो भक्तितत्पराः ।
एवं सेवाप्रधानाया वध्वा नार्याश्च योषितः ॥९९॥

सदांऽकेऽहं निवसामि वसामि हृदये तथा।
साऽपि नाके पदं धृत्वा मम धाम प्रयाति वै ॥१००॥
या कापि कोऽपि मे पूजां करिष्यति जगत्त्रये।
तास्ते यास्यन्ति मे धामाऽक्षरं चतुःपदार्थदम् ॥१०१॥
अपि मां पूजयेद् भक्त्या संस्मरेत् सेवयेच्च वा।
भोजयेद् रामयेच्चापि शृंगारयेत् प्ररंजयेत् ॥१०२॥
सहवासकरी भूत्वा शयने स्वापयेच्च माम्।
मर्दयेद् वाहयेन्मां च हास्तयेद् रासयेदपि ॥१०३॥
सर्वां प्रेममयीं भक्तिं कुर्याच्च कारयेदपि।
सा वै प्रिया मे सहगा ब्रह्मप्रिया भविष्यति ॥१०४॥
नरो वा ब्रह्ममुक्तः स्यात्तथाऽऽत्मवेदनो हि यः।
दिव्यो वै पार्षदः शश्वत्मत्समो नात्र संशयः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां श्रीपुरुषोत्तमयोगनिरूपणनामा षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं मम योगं परात्परम्।
नारायणे जगन्नाथे सर्वकामफलप्रदे ॥ १ ॥
मयि कृष्णे रतिं कुर्याद् या सा लभेत् परं पदम्।
मयि ध्यानपरा लक्ष्मि चाण्डाल्यपि हि देवता ॥ २ ॥
गणिका मम योगस्था निर्गुणा दिव्यवर्तना।
अध्यात्मज्ञानसम्पन्ना हरिपूजापरायणा ॥ ३ ॥
लभते चाक्षरं धाम पुनरावृत्तिवर्जितम्।
यतो जातमिदं विश्वं यतश्चैतन्यमश्नुते ॥ ४ ॥
यस्मिंश्च विलयं याति येनाऽऽविष्टं च जीवति।
निर्गुणोऽपि परोऽनन्तो गुणवानिव भाति यः ॥ ५ ॥
सदाऽऽन्तरस्थो योऽहं सः संसारभयनाशकः।
तं मामभ्यर्च्य कान्तेशं संसारात् परिमुच्यते ॥ ६ ॥
कर्मणा देहमाप्नोति देही कामेन बध्यते।
स कामं मयि संयुज्य प्राप्नुयान्मत्परं पदम् ॥ ७ ॥
मां विना कामनायुक्ता क्रोधेन चाभिभूयते।
लोभस्तां प्रविशत्येव धर्मनाशं करोत्यपि ॥ ८ ॥
मतिभ्रान्तिं जनयति पापं नयति मानवम्।
एवं पापस्य मूलं स्याच्छरीरं मां विना प्रिये ॥ ९ ॥
तस्मान्मद्योगमासाद्य दोषान्निर्गुणकान् व्रजेत्।
सर्वां सृष्टिं च संगृह्य शेते योऽक्षरधामनि ॥१०॥
तं मां वै मोक्षदं ज्ञात्वा सेवेत सत्वधर्मिणी।
वेदार्थविद्भिः कर्मज्ञैरिज्यते विविधैर्मखैः ॥११॥
व्रतिभिस्तापसैर्योगसाधकैर्ज्ञानयज्ञकैः।
स एव कर्मफलदो मोक्षदोऽकामकर्मणाम् ॥१२॥
हव्यकव्यादिदानेषु देवतापितृरूपधृक्।
भुंक्ते यो भगवान् मां तं मोक्षदम् ऋषयो विदुः ॥१३॥
ध्यातः प्रणमितो वापि पूजितो वापि भक्तितः।
ददामि शाश्वतं धाम तं मां हरिं समर्चयेत् ॥१४॥
आधारः सर्वभूतानामेकोऽहं परमेश्वरः।
जरामृत्युविनिर्मुक्तो मोक्षदोऽस्म्यव्ययो हरिः ॥१५॥
सम्पूज्य मम पादाब्जं देहिनोऽपि नरायणि।
अमृतत्वं भजन्त्याशु मां विद्धि पुरुषोत्तमम् ॥१६॥
आनन्दमजरं ब्रह्म परं ज्योतिः सनातनम्।
परात्परतरं सोऽहं तद्विष्णोः परमं पदम् ॥१७॥
अद्वयं निर्गुणं नित्यमद्वितीयमनौपमम्।
परिपूर्णतमं ज्ञानमयं मोक्षस्य साधनम् ॥१८॥
एवंविधं तु मां लक्ष्मि सेवया सर्वभावया।
या तूपास्ते योगिनी सा याति मत्परमं पदम् ॥१९॥
निर्गुणा संगरहिता शमादिगुणशोभना।
वासनावर्जिता ब्राह्मी प्रिया यात्यक्षरं पदम् ॥२०॥
ममाऽवताररूपाणि भवन्ति युगलानि वै।
समर्थयन्ति मां सर्वे शाश्वतस्थानदं हरिम् ॥२१॥
यस्याऽभिन्नमिदं सर्वं यच्चेंगद् यच्च नेंगति।
तमूर्ध्वमजरं ध्यात्वा संसारान्मुच्यते सती ॥२२॥
जितप्राणा जिताहारा मम सेवापरायणा।
हृदि पश्यति मां कान्तं सर्वानन्दसुखप्रदम् ॥२३॥
निर्गुणोऽपि गुणाधारो भूत्वा सेवां सतीकृताम्।
अङ्गीकरोमि सर्वस्वां लोकानुग्रहरूपधृक् ॥२४॥
अध्यक्षः सर्वकार्याणां देहिनां हृदये स्थितः।
अनुपमोऽखिलाधारस्तं मां वै शरणं व्रजेत् ॥२५॥
महदाद्या विशेषान्ता जाता यस्येच्छया कृतेः।
तं विद्यान्मां हरिं कृष्णनारायणमनामयम् ॥२६॥
यस्याऽऽज्ञया जगच्चानिरुद्धः सृजति रूपवत्।
प्रद्युम्नः पालकश्चास्ते संकर्षणो विकर्षति ॥२७॥
ब्रह्मविष्णुमहेशाश्च तदंशास्तत्क्रियापराः।
तं मां सर्वांशधर्तारं विद्यान्मुक्तिं व्रजेत् ततः ॥२८॥
यज्ज्ञानं भक्तिमूलं स्यान्मोक्षदं ज्ञानमित्यपि।
भक्तिः कर्मात्मिका स्नेहसेवात्मिका शुभोत्तमा ॥२९॥

दानानि यज्ञा विविधा व्रततीर्थार्हणादिकाः ।
यथा पूर्वे कृतास्तस्या भक्तिर्भवेद्धरौ मयि ॥३०॥
शाश्वतः परमो धर्मो भक्तिलेशेन शोभते ।
श्रद्धया परया युक्तो मयि भागवतो भवेत् ॥३१॥
दोषाणां विलये बुद्धिः प्रसन्ना जायते सदा ।
दोषा रागादयस्ते च मयि क्षिप्ता विशारदाः ॥३२॥
गुणा एव प्रजायन्ते विवर्तन्ते यतो मयि ।
तैर्युक्ता च मतिः श्रेष्ठा प्रसन्ना च विशारदी ॥३३॥
सा ज्ञानात्मकधारा च तदा प्राप्यो भवाम्यहम् ।
सा मतिर्ज्ञानरूपा वै मोक्षदा मम धामदा ॥३४॥
क्रियायोगं मयि कृत्वा मतिनैर्मल्यमर्जयेत् ।
सेवायोगेन मां नित्यं ततो दासी प्रसेवयेत् ॥३५॥
साधुभूर्वार्वह्निसूर्यविप्रहृच्चित्रधातुजाः ।
साध्वीगोयोगिबुद्ध्याद्याः प्रतिमा मम मूर्तयः ॥३६॥
देवताचैत्यतीर्थाद्याः प्रतिमाश्च विभूतयः ।
एतासु पूज्य एवाऽहं पत्याविव जनार्दनः ॥३७॥
कर्मणा मनसा वाचा भक्त्या सर्वगतं च माम् ।
पूजयेद् भक्तिसंयुक्ता या सा ब्राह्मी भविष्यति ॥३८॥
वध्वा पत्यौ नरभावो नेशभावो भवत्यपि ।
कामक्रोधादिदोषाणां दर्शनाद् दिव्यता न वै ॥३९॥
किन्तु पत्यौ कृता स्याच्चेद् दिव्यता मनसा सदा ।
वध्वा नारायणदृष्ट्या सेवा सा मुक्तिदा भवेत् ॥४०॥
नार्या मूर्तौ प्रतिमायां दिव्यदृष्टिः कृता यदि ।
सा स्यात्तस्या मोक्षदा वै शिवलिंगे यथा मतिः ॥४१॥
साधवश्च तथा साध्व्यो मूर्तयः प्रतिमा मम ।
तासु दृष्टिं शुभां दिव्यां कृत्वा सेवां समाचरेत् ॥४२॥
पाञ्चभौतिकप्रतिमाश्चेतनास्ता ममैव ह ।
तासां संप्रीणनाच्चाऽहं प्रसन्नः संभवामि हि ॥४३॥
क्रियार्पणं कृतं तत्र गृह्णामि सेवनात्मकम् ।
ददामि सेविकायै तु धामाऽक्षरं पदं परम् ॥४४॥
अहिंसासत्यमक्रोधो ब्रह्मचर्याऽपरिग्रहौ ।
अनीर्ष्या च दया शान्तिः सेवा च सद्गुणा इमे ॥४५॥
सर्वान् विन्यस्य च मयि मम योगं समाचरेत् ।
चराचरात्मको नाथः श्रीकृष्णपुरुषोत्तमः ॥४६॥
मत्वैवं श्रीहरिं नैजं पतिं कृत्वा भजेत् प्रिया ।
योगोऽयं साध्यरूपो वै श्रेष्ठः साक्षान्मदात्मकः ॥४७॥
मम प्राप्तिस्वरूपः स जानन्त्येनं मनीषिणः ।
दोषान् विहाय कृत्वैव गुणरूपान् हरौ मयि ॥४८॥
आनुकूल्येन सर्वेशं कान्तं मां प्रभजेत् सती ।
मुक्त्यर्थमर्चयेन्नित्यं क्रियायोगपरा प्रिया ॥४९॥
रता लोकहिते चापि स्वहिते च रता तथा ।
समर्चयति मां साध्वी दिव्यक्रियावती हि सा ॥५०॥
नारायणं जगद्योनिं सर्वान्तर्यामिणं हरिम् ।
स्तोत्राद्यैः स्तौति मां प्रातः कीर्तनैर्गायति प्रभुम् ॥५१॥
उपवासादिभिश्चापि कथाश्रवणचिन्तनैः ।
पुष्पाद्यैश्चाऽर्चनं चापि क्रिया दिव्या हि सा मता ॥५२॥
भक्तिक्रियावतामेवं दोषा नश्यन्ति मूलतः ।
दिव्यभावं प्रयान्त्येव कामक्रोधादयोऽपि च ॥५३॥
मतिर्दिव्या भवेच्चापि मोक्षदा ज्ञानसंभृता ।
एकं नारायणं मां च ऋते सर्वमनित्यकम् ॥५४॥
अनित्यास्तु पदार्था वै नित्यस्त्वेको हरिः प्रभुः ।
अनित्यैः साधनैर्वै च नित्यमेकं समाश्रयेत् ॥५५॥
इहाऽमुत्र च भोगेषु विरक्ता तु सदा भवेत् ।
अविरक्ता हि संसारान्निवर्तते न वै क्वचित् ॥५६॥
शमादिगुणसम्पन्नाऽभ्यस्येन्मोक्षविबोधनम् ।
हरिध्यानपरा स्याच्च विशुद्धमतिका भवेत् ॥५७॥
सर्वत्र भावयेन्मां च श्रीपतिं पुरुषोत्तमम् ।
क्षराऽक्षरात्मकं विश्वं व्याप्य कृष्णोऽहमास्थितः ॥५८॥
इतिज्ञात्वा भजेन्मां च सर्वत्र भक्तिमाश्रिता ।
आत्मा द्वेधा परश्चाप्यपरश्चेतिस्वभावतः ॥५९॥
परमात्मा परश्चाऽहं श्रीकृष्णपुरुषोत्तमः ।
ममाऽवतारा बहवो राधाकृष्णादयो मताः ॥६०॥
मम मूर्तेः शुभं तेजश्चात्माऽक्षरो निगद्यते ।
मुक्ताश्च बहवः सन्ति सर्वेऽपरा भवन्ति ते ॥६१॥
ईश्वराः शक्तयो देवा देव्यश्च मानवादयः ।
सर्वे चापरजीवास्ते भवन्ति भवदेहिनः ॥६२॥
एवं चेतनविज्ञानं जीवात्मपरमात्मनोः ।
कृत्वा भजेत्परं कृष्णनारायणं सदा सती ॥६३॥
एकः शुद्धोऽक्षरपरः परमात्माऽऽत्मनां पतिः ।
मायाकालाऽक्षरपतिश्चावतारपतिः प्रभुः ॥६४॥
सतां पतिर्मुक्तपतिर्ब्रह्मप्रियापतिर्हरिः ।
सतीपतिर्भक्तपतिर्भक्तापतिः प्रियापतिः ॥६५॥
ब्राह्मीपतिः सर्वपतिः स्वपतिः परमेश्वरः ।
अनादिश्रीकृष्णनारायणश्चेति विभावयेत् ॥६६॥
एकमेवाऽद्वितीयं यत्परं ब्रह्म सनातनम् ।
वेदान्तवेद्यं तद्वै मां विदित्वाऽक्षरमाव्रजेत् ॥६७॥

एक एव परानन्दो निर्गुणः परतः परः ।
दिव्यगुणैर्भृतो नारायणोऽहं परमेश्वरः ॥६८॥
ज्ञानिनां परमात्माऽहं हृदि भामि निरन्तरम् ।
अष्टसोपानसंसिद्धा याति मत्परमं पदम् ॥६९॥
आहारशुद्धिः प्रथमा देहशुद्धिर्द्वितीयका ।
तृतीयेन्द्रियशुद्धिश्च चतुर्थ्यान्तरशुद्धिका ॥७०॥
पञ्चमी त्वात्मशुद्धिर्वै षष्ठी परात्मधारणा ।
सप्तमी ध्यानवृत्तिश्चाष्टमी तत्रैव लग्नता ॥७१॥
इति कृत्वाऽष्टकं साध्वी मां समासेन संश्रयेत् ।
मत्प्रसादाशना स्याद्धि चाहारशुद्धिरेव सा ॥७२॥
मम दीक्षायुता स्याच्च देहशुद्धिर्मता हि सा ।
इन्द्रियाणि मदर्थं वै तृतीया शुद्धिरेव सा ॥७३॥
करणानि मदर्थं चान्तरा शुद्धिर्हि सा मता ।
आत्माऽर्पणं मयि कृष्णे दिव्यसद्गुणशालिता ॥७४॥
सत्त्वप्रकर्ष एवाऽत्र त्वात्मशुद्धिर्मता हि सा ।
निजात्मानं ब्रह्मरूपं विभावयेत् सदा सती ॥७५॥
मुक्तां नित्यां महामुक्तां लक्ष्मीरूपां सनातनीम् ।
आत्मशुद्धिर्हि सा प्रोक्ता मायामायिकवर्जिता ॥७६॥
निजं सिंहासनं कृत्वा परेशं मां च वाहयेत् ।
धारयेत् स्थापयेच्चापि मम योगं समाचरेत् ॥७७॥
मम धारणयोग्याया रूपे वसामि चेतने ।
मम वासः स एवाऽस्याः परात्मधारणा मता ॥७८॥
मयि प्रत्ययभावस्य त्वेकतानत्वमेव यत् ।
सर्वानन्दप्रवाहस्य त्वेकतानत्वमेव यत् ॥७९॥
सर्वप्रकाशपूरस्य चैकतानत्वमेव यत् ।
सर्वचैतन्यपूरस्य चैकतानत्वमेव यत् ॥८०॥
यावत्प्रज्ञाप्रवाहस्य चैकतानत्वमेव यत् ।
अविच्छिन्नप्रवाहस्य मयि लग्नत्वमेव यत् ॥८१॥
सप्तमीध्यानवृत्तिः सा प्रोक्ता सोपानिका वरा ।
वृत्तीनां श्रीहरौ जाते वलयात्मलयेऽधिके ॥८२॥
आकृष्टस्य चेतनस्याऽर्पणं चाभिन्नयोगिता ।
समाधिः परमः सोऽत्र शाश्वतानन्ददोहनः ॥८३॥
परमेशस्वरूपस्य निर्भासो यत्र विद्यते ।
स्वनिर्भासो न वै चास्तेऽष्टमी सा परमा स्थितिः ॥८४॥
ब्रह्मानन्दमयी मूर्तिर्निजा परेशरूपिणी ।
यदा विभासतेऽश्नुते सर्वान् कामान् मया सह ॥८५॥
सुखं तृप्तिश्च सन्तोषस्तुष्टिश्चानन्द उत्सवः ।
रतिः प्रसन्नता मोदः प्रमोदो रञ्जनं च चित् ॥८६॥
लहरी तानता भोगः सत्त्वं चैश्वर्यमुत्तमम् ।
प्रफुल्लता च पुलकः स्नेहः प्रीतिर्विरामिता ॥८७॥
आकर्षणं च विश्रान्तिर्महासुषुप्तिरित्यपि ।
तुर्यावस्था निजानन्दश्चेत्येवं बहुनामभिः ॥८८॥
फलं प्रवर्ण्यते तज्ज्ञैस्तद्वत्ता चाष्टमी स्थितिः ।
तां प्राप्य पुनरावृत्तिर्विद्यते नैव नैव न ॥८९॥
एवमष्टांगयोगेन मयोक्तेन नरायणि ।
अनादिश्रीकृष्णनारायणं मां वै विवाहयेत् ॥९०॥
हरिभक्तिर्दृढा यस्या हरिपूजा तथोत्तमा ।
तस्या विशुद्धियोगिन्या मोक्षो हस्तगतोऽस्ति वै ॥९१॥
हरौ मयि स्थिरा स्याच्च समासीत मयि प्रभौ ।
श्रेष्ठासनं हि तद्बोध्यं प्राणं मां च समाश्रयेत् ॥९२॥
प्रत्याहरणमेवापि मय्येव च समाचरेत् ।
प्रयाता स्यात्परब्रह्म पुनरावृत्तिवर्जितम् ॥९३॥
निजात्मनि प्रवेशयेत् परमेशं श्रियःपतिम् ।
अनादिश्रीकृष्णनारायणं मां स्थापयेत् सती ॥९४॥
सर्वात्मानं निजात्मानं सर्वलोकैककारणम् ।
सुरूपं कान्तिकान्तं च तेजःपरिधिराजितम् ॥९५॥
मनोगम्यं युवानं च सर्वकामप्रपूरकम् ।
विकसत्पद्मपत्राऽक्षं चारुकुण्डलभूषितम् ॥९६॥
दीर्घबाहुमुदारांगं सर्वालंकारभूषितम् ।
पीताम्बरधरं कान्तं पतिं योग्यं सुसंगिनम् ॥९७॥
हैमयज्ञोपवीतं च बिभ्रत्सत्तुलसीस्रजम् ।
श्रीवत्सवक्षसं हारमणिकौस्तुभशोभितम् ॥९८॥
ध्यायेन्मां परमात्मानं परं मोक्षं लभेत्ततः ।
ध्यानात्पापानि नश्यन्ति ध्यानान्मोक्षो भवेदपि ॥९९॥
हरिः प्रसीदति ध्यानाद् ध्यानेऽहं समवस्थितः ।
ध्यानं ध्येयं ध्यातृभावं त्रयमेकीभवेद् यदा ॥१००॥
तदाऽमृतत्वं भवति ज्ञानामृतं निषेवते ।
महानन्दं प्रभुंक्ते च भुंक्ते ब्रह्मामृतं सदा ॥१०१॥
शब्दब्रह्माऽक्षरब्रह्मकरणब्रह्म चेत्यपि ।
आत्मब्रह्म परब्रह्म चैकीभवन्ति तानि वै ॥१०२॥
महानन्दसमुद्रे वै मुक्तिः समाधिजा हि सा ।
आनन्दो वै परब्रह्म परब्रह्म हरिः प्रभुः ॥१०३॥

ओमित्येव परब्रह्म सच्चिदानन्द एव सः ।
एतदभ्याससंयुक्ता परं मोक्षं व्रजत्यपि ॥१०४॥
या त्वेतच्छृणुयाच्चापि पठेद्वापि समाहिता ।
सा मदैक्यं समापन्ना हरिप्रिया भवेद् ध्रुवम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां साक्षात्परब्रह्मयोगनिरूपणनामा सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीनारायणीश्रीरुवाच—

यथा तुष्यति भगवान् परमेशः परात्परः ।
तन्ममाऽऽख्याहि सर्वज्ञ कान्त कारुण्यवारिधे ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

नारायणं परं कान्तं सच्चिदानन्दविग्रहम् ।
भज सर्वात्मना कान्ते ! मां यद्यानन्दमिच्छसि ॥ २ ॥
रिपवस्तां न हिंसन्ति न बाधन्ते ग्रहादयः ।
राक्षसाश्चापि नेक्षन्ते नारीं विष्णुपरायणाम् ॥ ३ ॥
भक्तिर्दृढा भवेद् यस्याः परेशे परमात्मनि ।
तस्याः श्रेयांसि सिद्ध्यन्ति भक्तियुक्ताऽधिका ततः ॥ ४ ॥
पादौ तौ सफलौ तस्या यौ विष्णुगृहगामिनौ ।
तौ करौ सफलौ तस्या मम पूजापरौ तु यौ ॥ ५ ॥
ते नेत्रे सफले तस्याः पश्यतो ये श्रियः पतिम् ।
सा जिह्वा मंगला तस्या हरेर्नामपरा तु या ॥ ६ ॥
ते श्रोत्रे सफले तस्याः श्रीकथासारग्राहके ।
सा त्वग् वै पावनी तस्या या हरिस्पर्शवेदिनी ॥ ७ ॥
रसना सा रसवती यया प्राप्तो हरेः रसः ।
घ्राणं पुण्यं हि तस्यास्तद् यच्छ्रीमद्गन्धवेदि वै ॥ ८ ॥
सा कटिर्या तु हर्यर्थे गुप्तं हर्यर्थमेव च ।
वक्षश्चाप्यपि हर्यर्थे गण्डौ हर्यर्थमेव यौ ॥ ९ ॥
कपोलं चापि हर्यर्थे हर्यर्थे जघनं तथा ।
सक्थिनी चापि हर्यर्थे जङ्घे हर्यर्थमेव च ॥१०॥
ओष्ठौ चापि तु हर्यर्थे केशा हर्यर्थमेव च ।
शयनं चापि हर्यर्थे जागरणं हरेः कृते ॥११॥
यस्या रमणं हर्यर्थे विलासोऽपि हरेः कृते ।
हावा भावाश्च हर्यर्थे नृत्यं हर्यर्थमित्यपि ॥१२॥
गायनं हसनं चापि दृष्टिर्हर्यर्थमेव या ।
मानसं चिन्तनं चापि बुद्धिर्हर्यर्थमेव या ॥१३॥
अहंभावोऽपि हर्यर्थे क्रिया हर्यर्थमेव च ।
शृंगारोऽस्याश्च हर्यर्थे रूपं हर्यर्थमेव च ॥१४॥
अलंकाराश्च हर्यर्थे भूषा हर्यर्थमेव च ।
कज्जलं चन्दनं तैलं हर्यर्थे कबरी तथा ॥१५॥
धम्मिलाश्चापि हर्यर्थे पुष्टिर्हर्यर्थमेव च ।
व्रतं शीलं तथा शुद्धिः स्नानं हर्यर्थमेव च ॥१६॥
संस्काराश्चापि हर्यर्थे दानं हर्यर्थमेव च ।
मानं लज्जा प्रमोदश्च प्रीतिर्हर्यर्थमेव च ॥१७॥
सौकुमार्यं च माधुर्यं दीप्तिर्हर्यर्थमेव या ।
प्रसाधनं च हर्यर्थे प्रोत्साहोऽपि हरेः कृते ॥१८॥
उत्सवाश्चापि हर्यर्थे शोभा हर्यर्थमेव च ।
उपार्जनं व्ययश्चापि यत्नो हर्यर्थमेव च ॥१९॥
सुखं रतिर्महानन्दः सर्वे हर्यर्थमेव च ।
गृहं क्षेत्रं सम्पदश्च सर्वं हर्यर्थमेव च ॥२०॥
सुताः पुत्र्यश्च गावश्च हर्यर्थे वाजिनस्तथा ।
गजा यानविमानानि यस्या हर्यर्थमेव च ॥२१॥
वाटिकाः सस्यसम्पच्चोपस्कराश्च हरेः कृते ।
निमेषं श्वासरक्षा च चेतनोऽपि हरेः कृते ॥२२॥
गुणभावाश्च हर्यर्थे भावनाऽपि हरेः कृते ।
उत्थानमुदयश्चापि विरामोऽपि हरेः कृते ॥२३॥
अनावरणभावश्च हृदयं च हरेः कृते ।
गोप्यं मन्त्रो रहस्यं च सर्वं यस्या हरेः कृते ॥२४॥
कलाः शिक्षाऽभ्यसनं च रागः शान्तिर्हरेः कृते ।
आरम्भाश्च प्रपूर्तिश्च पाचनं च हरेः कृते ॥२५॥
भ्रमणं व्यवहारश्च स्फुर्तिश्चास्या हरेः कृते ।
लोभः कामश्च संकल्पश्चोत्सवश्च हरेः कृते ॥२६॥
यज्ञो दानं भजनं च धर्मश्चास्या हरेः कृते ।
पुष्पशय्या उरःशय्या चोर्ध्वशय्या हरेः कृते ॥२७॥
मण्डपो मण्डपी रासो लीला लौल्यं हरेः कृते ।
भ्रमणं हरणं चापि वर्तनं च हरेः कृते ॥२८॥
लेखनं खेलनं चापि कौशल्यं च हरेः कृते ।
चातुर्यं चापि चापल्यं दिव्यताऽपि हरेः कृते ॥२९॥
अप्यंगानां मोडनं च स्वेदश्चोत्तेजनं तथा ।
राजसो वेग एवापि सर्वं हर्यर्थमेव च ॥३०॥
भोजनं पानमुद्गारो धातुलाभो हरेः कृते ।
समयश्चापि संकेतो वाटश्चापि हरेः कृते ॥३१॥
मार्गणं चाऽन्वेषणं च प्रतीक्षणं हरेः कृते ।
आनन्देच्छा हरेरेव हर्यर्थे चान्तरं स्थलम् ॥३२॥

अन्तर्बहिर्हरिर्यस्याः स्नेहमूर्तिर्हरेर्हि सा ।
सत्यसारमिदं सर्वं न कान्तः केशवात्परः ॥३३॥
असारे खलु संसारे सारः कान्तो हरिर्महान् ।
संसारपाशाः सुदृढा अभक्तायाः भवन्ति ते ॥३४॥
भक्तायास्ते गुणदा वै विपाशाश्च भवन्ति वै ।
आनन्दमतुलं मे च वशीकृत्वा समर्जयेत् ॥३५॥
स्थानं रूपं तथाऽऽनन्दः सुखं वक्तुं न शक्यते ।
निर्देष्टुं चापि च द्रष्टुं शक्यते नाऽकृतात्मभिः ॥३६॥
सर्वोपाधिविनिर्मुक्तश्चानन्दोऽतिशयो हरेः ।
परब्रह्ममयं भुक्त्वाऽऽनन्दं ब्राह्मी भवेत् सती ॥३७॥
सत्कथायां च रमते सत्कथां च करोति या ।
सत्संगो नित्यमेवाऽस्याः प्रीतो भवामि पद्मजे ॥३८॥
नामसंकीर्तने मे च क्षुत्तृट्प्रस्खलनादिषु ।
करोति सततं या तु तस्याः प्रीतो भवामि वै ॥३९॥
या तु वधूः पतिप्राणा पतिपूजापरायणा ।
तस्यास्तुष्टः सदा चास्मि ददामि स्वपदं प्रियम् ॥४०॥
असूयारहिता या तु तथाऽहंकारवर्जिता ।
दासीभावपरा साध्वी तस्यास्तुष्यामि सर्वथा ॥४१॥
तस्माद् ब्रह्मप्रियाः सर्वा हरिप्रिया मदात्मिकाः ।
भजताऽत्र हरिं कान्तं मां प्रियं कृष्णवल्लभम् ॥४२॥
शरीरं मृत्युवासं वै ह्रासवासं हि कर्मिणाम् ।
जीवितं चञ्चलं विद्युल्लोलाश्च सम्पदस्तथा ॥४३॥
राजादिभिर्धनं बाध्यं स्मृद्धयः क्षणभंगुराः ।
निद्रार्ध्यं चायुषार्धं चोपार्जनार्थं तथाऽर्धकम् ॥४४॥
भोगार्थं च तदर्धं तु बाल्यं सौषुप्तमित्यपि ।
विचार्येति सती कुर्याद् वयस्येव ममाऽर्चनम् ॥४५॥
वपुर्विनाशनिलयं चापदां परमं पदम् ।
अकस्माद् भिन्नमार्गे च तेन भक्तिं प्रसाधयेत् ॥४६॥
असारभूते संसारे सारे मयि समर्पणम् ।
सर्वात्मना प्रकुर्याद्वै ज्ञात्वा नारी प्रमोक्षणम् ॥४७॥
देहयोगनिवृत्त्यर्थं सद्य एव नरायणम् ।
अनादिश्रीकृष्णनारायणं भजेत मां सती ॥४८॥
कोटिजन्मसहस्रेषु स्थावरादिषु योषितः ।
संभ्रान्तायाः कथंचिद्वै मानुष्यं समुपस्थितम् ॥४९॥
तत्र दानं चार्चनं च जन्मान्तरतपःफलम् ।
भक्तिश्चाशीर्वादफलं सेवा सौभाग्यमित्यपि ॥५०॥
मानुष्यं दुर्लभं प्राप्य या हरिं नार्चयेत् सती ।
मूर्खा सैव जडबुद्धिर्नारी पुनर्भविष्यति ॥५१॥
तस्याश्चातीव मूर्खाया विवेकः किं करिष्यति ।
आराधितो हरिः कृष्णो ददात्यभिमतं फलम् ॥५२॥
चण्डालो वा निकृष्टो वा मलिनः पापवानपि ।
गणिका वा शीलहीना व्यवायादिपरायणा ॥५३॥
अशुद्धा वा सूतिका वा विष्णुभक्ता द्विजाधिका ।
विष्णुभक्तिविहीना तु द्विजाऽपि श्वपची च वा ॥५४॥
तस्माद्धरिं प्रसेव्यैव तोषयेत्परमेश्वरम् ।
मयि तुष्टेऽखिलं तुष्टं सर्वात्माऽहं यतोऽस्मि च ॥५५॥
हस्तिपदे सर्वपदं गगने सार्वभौतिकम् ।
अनादिश्रीहरौ तद्वन्मयि सर्वं प्रतिष्ठितम् ॥५६॥
जन्ममृत्यू प्रान्तभागौ तन्नाशो मम सेवया ।
ध्यातः स्मृतः पूजितो वा प्रणतो वोद्धराम्यहम् ॥५७॥
संसारपाशविच्छेदं करोमि कृपया सदा ।
मन्नामोच्चारणादेव महापातकनाशनम् ॥५८॥
मन्मूर्तेः स्मरणादेव ब्रह्मभावो भवेदपि ।
मत्सतीसेवया मोक्षगामित्वं स्याद् द्रुतं प्रिये ॥५९॥
नीयमाना यमभटैरशक्ता स्वविमोचने ।
अपुण्याऽपि स्मरेन्मां च तामुद्धरामि कष्टतः ॥६०॥
विद्राव्य याम्यदूतांश्च नयामि मत्पदं प्रियाम् ।
स्मरन्ती मां शरणागतामबलां दीनमानसाम् ॥६१॥
अनाथां परवशगां पुण्यपुञ्जविवर्जिताम् ।
आलम्बवर्जितां निराधारामुद्धारयाम्यहम् ॥६२॥
यावन्नेन्द्रियवैकल्यं यावद्व्याधिर्न बाधते ।
तावत् प्रसेव्य मां साध्वी मुक्तिमार्गे हि वल्गयेत् ॥६३॥
कृष्णः सर्वात्मना पूज्यो ध्येयश्च माधवः सदा ।
हरिः सेव्यः सदा साध्व्या प्रसादनीयः केशवः ॥६४॥
अनाराध्य जगन्नाथं ब्रह्मप्रियान्तरस्थितम् ।
परमानन्दलाभो न संसेव्य तं सुखं व्रजेत् ॥६५॥
अच्युताऽनन्तगोविन्दकृष्णमाधवकेशव ।
अनादिश्रीकृष्णनारायण दामोदर प्रभो ॥६६॥
हरे कृष्ण विभो राम नारायण नरायण ।
हृषीकेशाऽक्षरातीत परब्रह्म परेश्वर ॥६७॥
पुरुषोत्तम मुक्तेश ब्रह्मेश च जनार्दन ।
भगवन् व्यापक स्वामिन्नुच्चारयेत् सती सदा ॥६८॥
एवं मां भजमानाया दूरे नाऽहं वसामि वै ।
सा मय्यहं च तस्यां च वर्तामि सर्वदा प्रिये ॥६९॥
नारायण जगन्नाथ कम्भरात्मज कामद ।
गोपालकृष्णतनय वासुदेव जनार्दन ॥७०॥

कान्त दान्त महानन्दप्रद श्रीपरमेश्वर ।
सतीनाथ सतांनाथेतीरयन्ति मुहुर्हि याः ॥७१॥
तासां पूजां प्रकुर्वन्ति ब्रह्माद्या अपि देवताः ।
वन्दितास्ता भवन्त्येव सर्वत्र कमला यथा ॥७२॥
यत्प्रभावं न जानन्ति या मायाऽऽवृतमानसाः ।
हृत्पद्मस्थं न जानन्ति तासां हानिर्महत्तमा ॥७३॥
हरिः श्रद्धावतां तुष्येन्न धनैर्न च बान्धवैः ।
नाऽऽत्मगुणैर्न तपसा भक्त्या तुष्येज्जनार्दनः ॥७४॥
सेवया चातितुष्येच्च पूजया स्मरणेन च ।
आत्माऽर्पणेन तुष्येच्च तोषयन्तु ततः प्रियाः ॥७५॥
पुत्रमित्रसमृद्धयश्च बह्वयो भवन्ति सम्पदः ।
हरिपूजारतानां वै दुर्लभाः सन्ति ता नहि ॥७६॥
इहाऽमुत्र सुखवाञ्छावती सम्पूजयेद्धरिम् ।
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ॥७७॥
न नमेद्विष्णवे यस्या मस्तकं मोक्षदायिने ।
कर्मणां मेदिने तस्या देहो बोध्योऽघशेवधिः ॥७८॥
हरिभक्तियुतो देहो दिव्यो बोध्यः स्त्रिया अपि ।
श्रेष्ठा भक्त्या भवन्त्येव भक्तिहीनाः कनिष्ठिकाः ॥७९॥
पूजनीयास्ततो लक्ष्मि योषितो भक्तिसंभृताः ।
सम्मार्जनादिभिर्यास्तु मम शुश्रूषणे रताः ॥८०॥
सतां समागमकर्त्र्यस्ता यान्ति परमं पदम् ।
हरिधर्मरताः शान्ता हरिपादाब्जसेविकाः ॥८१॥
हरिकार्यपराः कृष्णकृष्णरटनतत्पराः ।
रोमरोमसु कृष्णस्य प्रेमनिस्यन्दराजिताः ॥८२॥
अहं कृष्णाऽप्यहं कृष्णा चेष्टा एवं समाश्रिताः ।
गृहाण वंशीं कुञ्जे च समायाहीति शब्दिताः ॥८३॥
एकान्तं त्वं गृहाणाऽत्र रहस्यं मे प्रदेहि च ।
प्रेमरसं महानन्दं मां प्रपायय कुञ्जगाम् ॥८४॥
अन्तर्भावरसं कृष्ण संगमोत्थं प्रपायय ।
तादात्म्यस्नेहमापन्नां कुरु स्पष्टां च किंकरीम् ॥८५॥
अंकदासीं शयनस्य सखीं विधेहि माधव ।
निर्जनस्य सरसश्च विधेहि पद्मिनीं प्रभो ॥८६॥
पयःफेननिभरात्रेर्विधेहि शारदीं विभो ।
वसन्तस्य च वल्लीषु विधेहि कोकिलां हरे ॥८७॥
शैत्यर्तोर्मां कृपां कृत्वा कम्बलिनीं विधेहि च ।
सर्वयज्ञस्य कार्यस्य वेदीं विधेहि मां त्विह ॥८८॥
विश्रान्त्यर्थं कृपासिन्धो तूलिकां मां विधत्स्व नु ।
अग्नितप्तस्य कान्तस्य शीतां कान्तां विभावय ॥८९॥
निरालम्बसमाधेश्च ब्रह्मानन्दीं प्रियां कुरु ।
मायायुक्तस्य कृष्णस्य मुक्तानिकां पुजस्व माम् ॥९०॥
सर्वोत्कृष्टस्य चित्तस्य मग्नस्थलीं विधापय ।
प्रेमप्रवाहसरितां सामुद्रिकीं निभालय ॥९१॥
अमानोद्गतमोदस्य भिन्नमूर्तिं स्वकां कुरु ।
समरस्मरयुक्तस्य वाहिनीं तव मां कुरु ॥९२॥
कौस्तुभस्य वियुक्तस्याऽऽसनीभूतं च हृत् कुरु ।
प्रेमबिम्बाधरस्यात्राऽऽधारलतां सुयोजय ॥९३॥
पद्मपत्रायतनेत्रे नेत्रयोर्बिम्बके कुरु ।
पूर्णाऽमावार्धितुल्यायाः कौमुदीशो भवाऽत्र मे ॥९४॥
साध्व्याः स्वामी चकोरायाश्चन्द्रः कृष्णो भवाऽत्र मे ।
शलमायाश्चाऽनलश्च तिम्याः कण्टरसो भव ॥९५॥
चातक्यास्तु स्वातिवर्षा मयूर्या जलदो भव ।
नववध्वा वरश्रेष्ठः कृष्णनारायणो भव ॥९६॥
विरहाग्निप्रदाघाया योगिवारिप्रदो भव ।
भवाब्धिगर्तमग्नायाः करग्राहो हरिर्भव ॥९७॥
नेत्रे हृदि च मनसि चेतने निहितो भव ।
सर्वेन्द्रियेषु सुखदश्चान्तरेषु स्थिरो भव ॥९८॥
आनखशिखमासाद्य यावान् यावत्तु मे वस ।
इत्येवं शिवराज्ञीश्रि ! मयि तादात्म्ययोजनम् ॥९९॥
यायाद् या सा ब्रह्मप्रिया हरिप्रिया भवेदिह ।
पठनाच्छ्रवणादस्य राधालक्ष्मीसमा भवेत् ॥१००॥
मम तादात्म्ययोगोऽयं कल्पभक्त्या भवेन्ननु ।
नरो नारी च सम्पाद्य मदात्मकत्वमाव्रजेत् ॥१०१॥
अपात्रं भक्तिहीनं वै नाऽयं पचति तस्य वै ।
वधूगीतां पुरा श्रुत्वा सदाचारपरा भवेत् ॥१०२॥
सती भूत्वा निर्गुणं च भक्तियोगं ततश्चरेत् ।
पुरुषोत्तमयोगं च प्रपाल्य तन्मयी भवेत् ॥१०३॥
ततः साक्षात् परब्रह्मयोगयुक्ता भवेद् ध्रुवा ।
तया तादात्म्ययोगोऽयं प्राप्यते मत्कृपावशात् ॥१०४॥
सर्वा वध्वो भवन्त्वेवं परिपूर्णतमे मयि ।
लोकनार्यस्तथा भूत्वा भविष्यन्ति मदात्मिकाः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
अक्षरातीततादात्म्ययोगनिरूपणनामा-
ऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीनारायणीश्रीरुवाच—

कृपानाथ रमानाथ सर्वानाथ सतां पते ।
या पुण्यपुञ्जरहिता बुभुक्षुकोटिका भवेत् ॥ १ ॥
तस्या बीजबलार्थं वै किं विधेयं भवेदिह ।
आद्यारम्भे मुमुक्षुताभावस्य वद मे हरे ॥ २ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं पापाया अपि शुद्धये ।
क्रमभावं कथयामि येन चान्तपदं लभेत् ॥ ३ ॥
आर्तिकाले विपत्काले तस्यै वाच्यं बलं मम ।
स्मृतोऽपि मनसा कृष्णो विपन्नाशं करोति वै ॥ ४ ॥
सा स्मरेन्मां ततश्चाऽस्यै सकामायै व्रतं शुभम् ।
लक्ष्मीनारायणाख्यं वै वाच्यं कुर्यात् ततो हि सा ॥ ५ ॥
देहशुद्धिं पञ्चगव्यैर्विदध्याच्च ततः परम् ।
मम प्रासादिकं वारि पिबेदाचमनीयकम् ॥ ६ ॥
उपवासं प्रकुर्याच्च मम पूजनमाचरेत् ।
शृणुयाद्वै वधूगीतां मन्त्रान् मे शृणुयात्ततः ॥ ७ ॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥ ८ ॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥ ९ ॥
'ब्राह्म्यहं श्रीकृष्णनारायणभक्ताऽस्मि शाश्वती ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥१०॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन्मित्रं रक्षकः पोषकोऽस्तु सः' ॥११॥
'अनादिश्रीकृष्णनारायणः श्रीभक्तवल्लभः ।
परब्रह्माऽक्षरातीतोऽवताराणां स्वरूपधृक् ॥१२॥
अन्तर्यामी सदाऽस्मत्सु भगवान् सर्वकारणम् ।
सर्वान्तरात्मा सर्वेशो निर्लेपो मोक्षदः स हि ॥१३॥
पावनः सेवितो भुक्तिमुक्तिदश्च सदाऽवतु' ।
'ब्रह्मप्रियाः समस्ताश्च राधालक्ष्म्यादियोषितः ॥१४॥
परब्रह्मस्वरूपिण्यः परब्रह्माऽर्धमूर्तयः ।
परब्रह्मार्थसर्वस्वा दिव्या भुक्तिप्रमुक्तिदाः ॥१५॥
तत्सम्बन्धिक्रियाश्चापि निर्गुणा मोक्षदाः सदा' ।
'यो यो या या बालकृष्णं तत्प्रियाश्च भजत्यपि ॥१६॥
स स सा सा तत्स्वरूपा दिव्या मोक्षप्रदा सदा' ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१७॥
'श्रीकृष्णस्वामिभक्ताऽहं श्रीहरिः शरणं मम' ।
'श्रीकृष्णःश्रीवल्लभश्च श्रीस्वामी शरणं मम' ॥१८॥
'श्रीकृष्णोवल्लभःस्वामीश्रीहरिः शरणं मम' ।
इत्येतान् सर्वमन्त्रांश्च सार्थान् संश्रावयेद् गुरुः ।
पूजनं सर्वतोभद्रमण्डले कारयेन्मम ॥१९॥
पूजाविधिं प्रवक्ष्यामि व्रतांगं शृणु सर्वथा ।
उपवासदिनं ग्राह्यं मार्गशीर्षस्य पूर्णिमा ।
प्रातःस्नानं विधायाऽपि तीर्थादौ जलमर्पयेत् ॥२०॥
पितृभ्यश्च गृहं गत्वा नारी नारायणं स्मरेत् ।
प्रक्षाल्य पादावाचम्य शुद्धाम्बरधरा सती ।
नित्यं देवार्चनं कृत्वा पश्चात् संकल्पपूर्वकम् ॥२१॥
लक्ष्मीनारायणं देवमर्चयेद् भक्तिभावतः ।
जलस्य कलशं धृत्वा सुगन्धजलसंभृतम् ॥२२॥
पञ्चामृतानि चादाय सौवर्णे श्रीनरायणम् ।
शुद्धपात्रे निधायैव पञ्चामृतादिभिर्जलैः ॥२३॥
स्नापयेद्धारयेच्चापि वस्त्राणि भूषणानि च ।
अर्चयेद् गन्धपुष्पाद्यैश्चन्दनैस्तैलकुंकुमैः ॥२४॥
धूपदीपसुनैवेद्यमूलफलजलादिभिः ।
ताम्बूलाऽऽरार्त्रिकस्तोत्रवन्दनाऽभ्यर्थनादिभिः ॥२५॥
गीतैर्वाद्यैश्च नृत्यैश्च संहितापाठनादिभिः ।
संकीर्तनं प्रकुर्याद्वै व्रतकर्त्री समाहिता ॥२६॥
देवस्य पुरतः कृत्वा स्थण्डिलं चतुरस्रकम् ।
अरत्निमात्रे तत्राऽग्निं स्थापयित्वा घृतादिभिः ॥२७॥
चरुणा च तिलाद्यैश्च जुहुयाद् भावतः स्वयम् ।
लक्ष्मीनारायणाभ्यां स्वाहेति सा जुहुयात्तदा ॥२८॥
अष्टोत्तरशतहोमान् सर्वपापनिवृत्तये ।
प्रायश्चित्तादिकं गुर्वी कारयेत् तां ततः परम् ॥२९॥
पुनः पूजां विधायैव परीहारं विधापयेत् ।
उपचारादि देवाय ह्यर्पयेद् भक्तिसंयुता ॥३०॥
पौर्णमास्यां कृतं व्रतं समर्पयामि ते प्रभो ।
अर्घ्यं दद्यादिन्दवेऽपि नमस्कुर्यात् सुपुष्पकैः ॥३१॥
अक्षताद्यैस्ततः कुर्याज्जागरणं निशान्तकम् ।
संहिताश्रवणं कुर्यान्नृत्यं च कीर्तनादिकम् ॥३२॥
प्रातः स्नात्वा सतीः साधून् भोजयेच्च ततः स्वयम् ।
पूजयित्वा पतिं लक्ष्मीनारायणं च भोजनम् ॥३३॥
पारणां च प्रकुर्वीत विप्रांश्च भोजयेदपि ।
एवं पौषादिमासेषु संवत्सरं व्रतं चरेत् ॥३४॥
कार्तिक्यां च प्रकुर्वीतोद्यापनं पूर्णिमातिथौ ।
मण्डपं कारयेद् रम्यं चतुरस्रं सुमंगलम् ॥३५॥

कदलीस्तम्भशोभाढ्यं नवपल्लवतोरणम् ।
कलशाद्यैः शोभितं च दीपावलिविराजितम् ॥३६॥
पुष्पमालादिसंयुक्तं वितानध्वजमण्डितम् ।
तन्मध्ये सर्वतोभद्रं मण्डलं पञ्चवर्णकम् ॥३७॥
तन्मध्ये रत्नवार्याढ्यं नूत्नं कुम्भं न्यसेत् सती ।
पञ्चपल्लववस्त्राद्यैः शोभितं च तदूर्ध्वके ॥३८॥
तिलस्थाल्यां स्थापयेन्मां लक्ष्मीनारायणं हरिम् ।
पञ्चामृतेन संस्नाप्याऽभ्यर्च्य गन्धादिभिः क्रमात् ॥३९॥
वस्त्रभूषादिभिश्चापि भक्ष्यभोज्यादिभिस्तथा ।
सिंहासने स्थापयेन्मामारात्रिकोत्तरं ततः ॥४०॥
कथाकीर्तनभजनैर्दिवसं च प्रयापयेत् ।
मध्याह्ने निशि पूजां च कारयेज्जागरं क्रियात् ॥४१॥
परेऽह्नि प्रातरेवेयं श्रीपतिं मां समर्चयेत् ।
साध्वीभ्यो भोजयेच्चापि ततो भोजनमाचरेत् ॥४२॥
गुर्वीभ्यः सम्प्रदद्याच्च मूर्तिं तिलान् तथेतरत् ।
तिलहोमं प्रकुर्याच्चाऽर्थयेल्लक्ष्मीनरायणम् ॥४३॥
कृपया तव देवेश कृतं साम्वत्सरं व्रतम् ।
लक्ष्मीः प्रसन्ना भवतु नारायणः प्रसादवान् ॥४४॥
भक्तां मां सर्वथा नैजीं कृत्वा गृहाण माधव ।
भुक्तिं मुक्तिं देहि मे त्वं कान्त श्रीपुरुषोत्तम ॥४५॥
फलं समस्तमेवाऽहं चार्पयामि त्वयि प्रभो ।
इति व्याहृत्य दद्याच्च पुष्पाञ्जलिं नमेत्ततः ॥४६॥
एवं कृत्वा परीहारं विसर्जनं समाचरेत् ।
नित्यं कथां शृणुयाच्च सत्संगं च समाचरेत् ॥४७॥
पुण्यपुञ्जाश्रया भूत्वा सा यायान्मेऽक्षरं पदम् ।
इह भुक्त्वा महाभोगान् पुत्रपौत्रसमन्विता ॥४८॥
सर्वपापविनिर्मुक्ता कुलाऽयुतसमन्विता ।
प्रयाति मम भवनं योगिनामपि दुर्लभम् ॥४९॥
मुक्ता दिव्या भवेदत्र मम योगेन भामिनी ।
ब्राह्मी भवेत्ततो ब्रह्मप्रिया हरिप्रिया ततः ॥५०॥
सर्वसिद्धिसमायुक्ता सर्वैश्वर्यादिशालिनी ।
यथा लक्ष्मीर्यथा राधा तथा स्यान्मे प्रिया ततः ॥५१॥

**श्रीनारायणीश्रीरुवाच—**

व्रतं कर्तुमशक्तायाः पापायाः पापनाशकम् ।
विना प्रयत्नं सरलं सुलभं साधनं वद ॥५२॥

**श्रीपुरुषोत्तम उवाच—**

अबलायास्तु पापाया व्रताऽसमर्थयोषितः ।
गुर्वर्पणं गुरुं नावं समाश्रित्याऽघनाशनम् ॥५३॥
गुरुतीर्थे तु या स्नाता शुद्ध्येत् सा द्रुतमेव ह ।
स्वर्गिणी जायते सद्यो मोक्षं स्वेष्टं च विन्दति ॥५४॥
गुरुतीर्थं परा सिद्धिस्तीर्थानां परमं हि तत् ।
ध्यानं तीर्थं हरिस्तीर्थं ब्रह्मतीर्थं सनातनम् ॥५५॥
इन्द्रियाणां वृत्तयो वै निवर्तन्ते तु यत्स्थले ।
मनोबुद्ध्योश्च निर्वृत्तिर्यत्र संजायते परा ॥५६॥
आत्मशान्तिर्भवेच्चापि सद्गुरोस्तु प्रतापतः ।
एवंविधे गुरौ तीर्थे स्नायात् सर्वार्पणेन वै ॥५७॥
गकारस्त्वन्धकारः स्याद् रकारस्तन्निरोधकः ।
गुर्वी साऽस्ति समर्था वै ह्यान्धकारनिरोधिका ॥५८॥
ज्ञानं दद्यादात्मनस्तु ध्यानं दद्याद्धरेस्तथा ।
विवेकं पापपुण्यानां दद्याज्जडचिदोरपि ॥५९॥
शुभाशुभानां भानं च दद्याद् दोषनिवारणम् ।
मुमुक्षुतां भावयेच्च या सा गुर्वी हि तारिणी ॥६०॥
शान्तिं दद्याद् विचारेण प्रसादेन पवित्रताम् ।
आशीर्वादं सुस्नेहेन भाग्यं दद्याद् बलेन च ॥६१॥
समृद्धिं दद्यात्तपोभिश्च भक्त्या दद्याद्धरिं तु या ।
मोक्षं दद्यात् सहगत्या गुर्वी सा संश्रयात् सदा ॥६२॥
मन्त्रं दद्याद्धरेर्या च कण्ठीं दद्याच्च तौलसीम् ।
नामसंकीर्तनं दद्यात् कृष्णनारायणेति च ॥६३॥
स्नेहं दद्याद्धरौ तस्य माहात्म्यज्ञानमुत्तमम् ।
दिव्यताभानमादद्यात् तां गुर्वीं संश्रयेत् सती ॥६४॥
यस्याः पादजलं पापप्रक्षालकं भवेद् ध्रुवम् ।
यस्याः प्रसादजं चाऽन्नं वासनाक्षालकं भवेत् ॥६५॥
यस्याः पुष्पं फलं वस्त्रं देहयोगगतं जडम् ।
दिव्यं पवित्रं पुण्यं च मोक्षदं वर्तते शुभम् ॥६६॥
यस्या देहोऽस्ति भगवद्देह एव न संशयः ।
याऽस्ति वै निर्गुणा नित्यं निर्गुणस्य हरेः प्रिया ॥६७॥
महाभागवती दिव्या सर्वदाऽऽत्मनिवेदिनी ।
तस्याः पादरजश्चापि पापिनीनां तु पावनम् ॥६८॥
क्षालकं मूलतश्चास्ते मोक्षदं जायते तथा ।
राधालक्ष्मीसमा गुर्वी रमापद्मासमा हि सा ॥६९॥
प्रेष्ठापद्मावतीतुल्या पद्मिनीमाणिकीसमा ।
कमलाश्रीसमा पार्श्ववर्तिनारायणीसमा ॥७०॥

तस्याः केशेषु भगवत्केशाः सन्ति निवासिताः।
ब्रह्मरन्ध्रे हरेः रन्ध्रं मस्तके मस्तकं हरेः ॥७१॥
भाले भालं हरेश्चास्ति भ्रुकुटौ भ्रूकुटिर्हरेः।
नेत्रयोर्हरिनेत्रे च कर्णौ हरेश्च कर्णयोः ॥७२॥
मेधायां श्रीहरेर्मेधा हरेर्गण्डौ च गण्डयोः।
कपोलयोः कपोलौ च हरेर्नासा नसि प्रभोः ॥७३॥
तस्या मुखे च जिह्वायां दन्तेषु चोष्ठयोर्हरेः।
मुखं जिह्वा च दन्ताश्च ह्योष्ठौ हनौ हनूर्हरेः ॥७४॥
तस्याः कण्ठे हरेः कण्ठो हरेर्वक्षस्तु वक्षसि।
भुजयोर्हस्तयोर्बाह्वोश्चांगुलिषु नखेषु च ॥७५॥
हरेर्भुजौ करौ बाहू चांऽगुल्यश्च नखास्तथा।
कुक्षौ कुक्षिर्हरेस्तस्या उदरे ह्युदरं हरेः ॥७६॥
नाभौ नाभिर्हरेस्तस्या जघने जघनं हरेः।
कट्यां कटिर्हरेस्तस्याः पृष्ठे पृष्ठं हरेस्तथा ॥७७॥
गुह्ये गुह्यं हरेश्चापि सक्थ्नोर्हरेस्तु सक्थिनी।
जान्वोस्तस्या हरेर्जानू जंघे च जंघयोर्हरेः ॥७८॥
पादयोः फणयोश्चापि हरेः पादौ फणावपि।
अस्थिषु श्रीहरेः सन्ति चास्थीनि त्वक् त्वचीत्यपि ॥७९॥
रोमसु श्रीहरेः सन्ति रोमाणि मानसे मनः।
इन्द्रियाणीन्द्रियेष्वस्या गुणेषु च हरेर्गुणाः ॥८०॥
भूतेष्वस्या हरेस्तत्त्वं चान्तरे चान्तरं तथा।
ज्ञानेच्छायत्नधर्मेषु हरेर्ज्ञानादयस्तथा ॥८१॥
क्रियायां श्रीहरेश्चास्याः क्रियाश्चेष्टा हरेस्तथा।
हसनं गमनं यानं कीर्तनं स्वपनं तथा ॥८२॥
गुर्व्याः सर्वं हरेश्चास्ते तस्माद् गुर्वी हि तारिणी।
मोक्षदा भवपारस्था दिव्या दिव्यगतिप्रदा ॥८३॥
गुर्व्याः पदोश्च तीर्थानि पृथिवी वर्तते सदा।
जंघयोर्वरुणो देवो जान्वोः कुबेरकोऽस्ति च ॥८४॥
सक्थ्नोरिन्द्रश्च शेषश्च कट्यां धर्मो विराजते।
हिरण्यगर्भ उदरे जघने वह्निदेवता ॥८५॥
नितम्बयोस्तु नासत्यौ वक्षसि श्रीहरिः स्वयम्।
स्तनयोः पर्वताश्चैव कुक्षिषु सागरास्तथा ॥८६॥
रोमस्वोषधयः सर्वाः पार्श्वयोर्देवतागणाः।
कण्ठे सरस्वती चास्ते मुखे लक्ष्मीर्विराजते ॥८७॥
नेत्रयोः सूर्यचन्द्रौ च मस्तके ब्रह्म राजते।
हस्तयोश्चाप्यन्नपूर्णा दुर्गा चापि विराजते ॥८८॥
हृदये धर्मवंशश्च मानसेऽस्या हरिप्रियाः।
पुण्यं साध्व्या वचनेषु शृंगारे स्मृद्धयस्तथा ॥८९॥
गुर्व्याः प्रसन्नतायां वै भुक्तिमुक्तिर्विराजते।
आशीर्वादे चेष्टसुखं भाग्यमास्ते च दर्शने ॥९०॥
भोजने यज्ञभुक् चास्ते पानेऽमृतं विराजते।
रूपे च शारदा देवी लावण्ये च सुधाऽस्ति वै ॥९१॥
पितरोऽस्याः समौदार्ये महर्षयो व्रते तथा।
साधवोऽस्या भावनायां भक्तिश्चात्मनि राजते ॥९२॥
गावोऽस्या हस्ततलयोर्वसवोऽस्याः प्रहर्षणे।
रुद्राश्चास्या भ्रुकुटौ च भास्करा गण्डयोस्तथा ॥९३॥
ओष्ठयोर्भगवन्माया गुर्व्या दिव्या विराजते।
गुर्व्यासनेऽक्षरं ब्रह्म गंगा पादुकयोस्तथा ॥९४॥
गुर्व्याः शाट्यां महालक्ष्मीः कञ्चुक्यां राधिकाऽस्ति च।
कट्यम्बरे सुराण्यश्च भूषासु श्रीरमादयः ॥९५॥
यज्ञोपवीते त्रैलोक्यं योगपट्टेऽष्टसिद्धयः।
सौभाग्यद्रव्यपुञ्जेषु सम्पदोऽस्या वसन्ति च ॥९६॥
गुर्व्यास्त्वचि च सर्वत्र सन्ति स्थावरजंगमाः।
शरीरमध्ये सर्वत्र सन्ति ब्रह्मविभूतयः ॥९७॥
ऐश्वर्ये चेश्वराश्चास्याश्चमत्कारेषु मातरः।
ब्रह्मव्रतं च शीलेऽस्यास्तादात्म्येऽहं परेश्वरः ॥९८॥
गुह्येऽस्याः सगुणं ब्रह्म सक्थ्नोर्मूले सुसृष्टयः।
राजेऽहं गुरुरूपायां गुर्वी चाऽहमहं च सा ॥९९॥
अस्या वै सेवयोद्धारः पापाया अपि जायते।
अपि या गणिका वापि पुंश्चली मद्यपायिनी ॥१००॥
मांसादा सर्वभक्ष्या वा हत्याढ्या श्वपची च वा।
गुर्व्याः सत्संगशरणाश्रयसेवादिभिर्हि सा।
पूयते निष्कल्मषा स्याद् दीव्यति प्रोत्तरत्यपि ॥१०१॥
मायाकालक्रियापाशान्मुक्ता मुक्तिं प्रयाति मे।
पठनाच्छ्रवणाच्चास्य मम मुक्तिं प्रयाति वै ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां पापोद्धारकलक्ष्मीनारायणव्रतश्रीहरिगुरुगुर्वीतीर्थमहिमवर्णननामा नवचत्वारिंशोऽध्यायः ॥ ४९ ॥

**श्रीनारायणीश्रीरुवाच—**

गुरुतीर्थस्य माहात्म्यं भूयोऽपि वद मे पते।
जिज्ञासा वर्धते श्रोतुं सुलभं गुरुतीर्थकम् ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

धन्याऽसि कृतकृत्याऽसि गुरुतीर्थाऽवगाहिनी।
योषितां दयया लक्ष्मि श्रेयःकरी यतो ह्यसि ॥ २ ॥

कथयामि तथा भूयो गुरुतीर्थं निशामय ।
सर्वपापहरं चापि शिष्याणां मोक्षदायकम् ॥ ३ ॥
दिव्यतापादकं पुण्यं धर्मात्मकं सनातनम् ।
सर्वैश्वर्यान्वितं शीघ्रं प्रत्यक्षफलदायकम् ॥ ४ ॥
गुरोः प्रसादात् कमले इहैव फलभाग् भवेत् ।
परलोकसुखं भुंक्ते महानन्दमवाप्नुयात् ॥ ५ ॥
गुरोः प्रसादात् कमले त्रैलोक्यं सचराचरम् ।
प्रत्यक्षं दृश्यते शिष्यैरीशलोकगतिं प्रति ॥ ६ ॥
अव्याहतगतिमान् स्याद् विज्ञानं विन्दते तथा ।
यशः कीर्तिं व्यवहारं प्राधान्यं कृपया लभेत् ॥ ७ ॥
सूर्यवत् सर्वथा गुरुः प्रकाशकोऽन्धचक्षुषाम् ।
सोमवच्छान्तिदश्चापि प्रकाशदो निशात्मके ॥ ८ ॥
दीपवद् गृहहृदये प्रभादो वै गुरुः सदा ।
दिवा सूर्यः शशी रात्रौ दीपो गृहे गुरुः सदा ॥ ९ ॥
प्रकाशते शिष्यहृदि गुरुर्ब्रह्मप्रकाशकृत् ।
अतो गुरुः परं तीर्थं तारकं ज्ञानदानकैः ॥१०॥
विज्ञायैवं गुरुं गुर्वीं सर्वभावैः प्रसादयेत् ।
कर्मभिर्मनसा देहैर्वाण्या च सेवया तथा ॥११॥
अत्रार्थे ते कथयामि कथां दिव्यां मनोहराम् ।
ब्रह्मपुत्रो भृगुस्तस्य वंशेऽभूच्च्यवनो मुनिः ॥१२॥
कदाऽहं ज्ञानसम्पन्नः स्यामित्यचिन्तयन् मुहुः ।
तदर्थं तीर्थयात्रायामगमज्ज्ञानलब्धये ॥१३॥
गंगायात्रां बदरीतश्चाकपिलाश्रमं व्यधात् ।
गोदावर्याः सरस्वत्या नर्मदायास्तथा व्यधात् ॥१४॥
कायश्च निर्मलो जातः सूर्यतेजःसमप्रभः ।
ओंकारेश्वरमासाद्य वटच्छायास्थितोऽभवत् ॥१५॥
नर्मदाया जलं पीत्वा क्षणं ध्यानपरोऽभवत् ।
तत्र शुश्राव पक्षिणां भाषां विज्ञानसंभृताम् ॥१६॥
शुकपुत्रा हि चत्वारश्चासंस्ते पितृनन्दनाः ।
उज्ज्वलश्च समुज्ज्वलो विज्वलश्च कपिञ्जलः ॥१७॥
एते कुंजलशुकजाः पितृमातृपरायणाः ।
फलान्याहृत्य पितृभ्यां ददत्यपि च भुञ्जते ॥१८॥
क्रीडन्ति पितृनिकटे मातृसन्निधिमुत्सुकाः ।
स्वपन्ति च च्यवनस्य पश्यतो नित्यमेव ते ॥१९॥
सायमागत्य ते सर्वे नित्यं सेवां चरन्ति च ।
आगतास्ते चरित्वैव पितुर्नीडं सुखावहम् ॥२०॥
पितरं मातरं चोभौ प्रणेमुश्च फलानि च ।
ददुश्चापि च पितृभ्यां मानिताः श्रान्तिमास्थिताः ॥२१॥
सम्भाषिताः सेविताश्च पक्षवातादिभिश्च ते ।
सेवन्ते स्म पितरौ च पितरौ ददतुस्तदा ॥२२॥
शुभाशीर्वचनान्येव ततः पप्रच्छ तान् पिता ।
उज्ज्वल त्वं चाद्य कस्यां दिशायां वै गतोऽभवः ॥२३॥
तत्र दृष्टं श्रुतं चाऽप्यपूर्वं चेन्मे निवेदय ।
श्रुत्वोज्ज्वलः प्रणम्यैव पितरं प्राह तत्कथाम् ॥२४॥
गंगाद्वीपं जगामाऽद्य राजा यत्र हि धार्मिकः ।
दिवोदासो वर्तते वै सत्यधर्मपरायणः ॥२५॥
ब्राह्मीदेवी तस्य पत्नी पातिव्रत्यपरायणा ।
सुषुवे गुणरूपाढ्यां सुशीलां चारुमंगलाम् ॥२६॥
दिव्यादेवीतिविख्यातां कन्यां लावण्यशेवधिम् ।
प्रथमे वयसि दिव्यां वरयोग्यां विलोक्य च ॥२७॥
पिता कामरूपदेशराजं चित्रप्रसेनकम् ।
आहूय कन्यां प्रददौ चित्रसेनाय धीमते ॥२८॥
विवाहयज्ञे राजा स चित्रसेनो ममार ह ।
अकृताग्निप्रदक्षिणा कन्या सौभाग्यवर्जिता ॥२९॥
अभवद् वै तदा राजा विप्रान् पप्रच्छ कारणम् ।
अस्या विवाहसमये चित्रसेनो दिवं गतः ॥३०॥
अस्या वै कीदृशं कर्म भवत्येव ब्रुवन्तु मे ।
श्रुत्वा विप्राः समाहुर्वै लग्नकालस्तथाविधः ॥३१॥
पतिमृत्युश्च वा पत्युः प्रव्रजिता च रुग्णता ।
अथ राजा च कालेन त्विन्द्रप्रस्थपुरं ययौ ॥३२॥
इन्द्रप्रस्थनृपरूपसेनायेमां समार्पयत् ।
रूपसेनोऽपि वै मृत्युं गतो विवाहनक्षणे ॥३३॥
एवं यदा यदा यस्मै राजा ददाति कन्यकाम् ।
तद्भर्ता वह्निसाक्ष्ये वै मृत्युं गच्छति सत्वरम् ॥३४॥
एकविंशतिसंख्याका वरा मृत्युंगतास्तथा ।
कन्या त्वास्ते चाऽक्षता वै दिवोदासः शुशोच ह ॥३५॥
ततो मन्त्रिवचो मत्वा स्वयंवरं व्यधापयत् ।
राजानो बहवस्तत्र समाहूताः समन्ततः ॥३६॥
स्वयंवरसभामध्ये यदा प्राप्ता कुमारिका ।
राधासमां चन्द्रमुखीं व्यलोकयन् नृपास्तदा ॥३७॥
अदत्तवरमालाया रूपं वीक्ष्य तु तामसाः ।
राजानो मोहमापन्ना हरणार्थं समुद्यताः ॥३८॥
अन्ये तस्यास्तु रक्षार्थं तदैवं समरोऽभवत् ।
तत्र महान् क्षयो जातः क्षत्रियाणां स्वयंवरे ॥३९॥
दिव्यादेवी सुदुःखार्ता वैराग्यं समुपागता ।
ययौ विन्ध्याचले तप्तुं तपस्तत्र रुरोद सा ॥४०॥

मया तस्या रोदनं वै श्रुतं दृष्टं तदन्तिके ।
पितस्तस्याः कथं तादृग्भाग्यं राजन्यनाशकम् ॥४१॥
कुमारत्वं वने वासश्चार्धे विवाहनं तथा ।
इति मे संशयश्चास्यां वर्तते तन्निषूदय ॥४२॥
श्रुत्वा पुत्रवचस्तत्र शुकः कुंजलको जगौ ।
पूर्वजन्मकृतं सर्वं शृणु पुत्र हि कान्यकम् ॥४३॥
सा कन्या पूर्वमासीद्वै सुवीरवैश्यभामिनी ।
वाराणस्यां च नाम्ना वै चित्रा स्वतन्त्रगामिनी ॥४४॥
अनाचारपरा पापा स्वैरिणी व्यभिचारिणी ।
भर्तारं मन्यते नैव पुण्यहीना तु पापिनी ॥४५॥
कुत्सयते पतिं क्लेशकरी सद्धर्मवर्जिता ।
परगृहे वसति भ्रमत्यपि सा गृहे गृहे ॥४६॥
परच्छिद्रं पश्यति द्राक् साधुनिन्दापरा तथा ।
परहास्यकरी दुष्टा सदाचारविवर्जिता ॥४७॥
सुवीरेण तु वैश्येन गृहान्निष्कासिता हि सा ।
दुष्टानां संगतिं प्राप्ता दूतीकर्म चकार सा ॥४८॥
कुलटा च व्यभिचारकर्म कारयति पराः ।
गृहभंगं कारयति साधूनां धर्मवर्त्मनाम् ॥४९॥
साध्वीं नारीं समाहूय द्रव्यदानैः प्रलोभयेत् ।
मनोभंगं कारयति व्यवाये योजयत्यपि ॥५०॥
साधूनां सा स्त्रियं भङ्क्त्वाऽप्यन्यस्मै प्रददात्यपि ।
एवं गृहशतं भग्नं चित्रया दुष्टया पुरा ॥५१॥
संग्रामं सा महादुष्टाऽकारयत् पतिपुत्रकैः ।
एवं पापपरा सा तु मृता यमपुरं गता ॥५२॥
भुंक्त्वा च यातनाः पश्चात् कर्मविपाकमागता ।
सा त्विदानीं कृतं कर्म भुंक्ते रोदिति भामिनी ॥५३॥
यस्माद् गृहशतं तस्मादस्याः शतं वराः ।
एकविंशतिसहिता विवाहे च स्वयंवरे ॥५४॥
पापायाः शुभसमये तत्संख्याका मृता वराः ।
गृहभंगो न कर्तव्यो यस्य कस्यापि देहिनः ॥५५॥
परभंगे निजभंगो जायते नैव संशयः ।
श्रुत्वैव मुज्ज्वलः प्राह पितश्चास्या महत्कुले ॥५६॥
जन्म कथं च वै जातं पापाया वद मेऽपि तत् ।
श्रुत्वा पुत्रवचश्चापि कुञ्जलः प्राह पुत्रकम् ॥५७॥
दूती यत्राऽभवत् सा वै तत्रैकदा तु भूसुरः ।
साधुधर्मा सिद्धगतिः कुचेलो दण्डवान् यतिः ॥५८॥
कौपीनमात्रवस्त्रश्च चित्राद्वारमुपस्थितः ।
मौनी जितेन्द्रियो ज्ञानी ब्रह्मभक्तिपरायणः ॥५९॥
तत्त्वदर्शी क्षुधातृषाव्याप्तश्च श्रमितः सुखी ।
दूराध्वानपरिश्रान्तश्चित्रया स विलोकितः ॥६०॥
नाम्ना कृष्णायनं चित्रा दृष्ट्वाऽऽजुहाव तं गृहे ।
आसनं च ददौ वारि भोजनं मधुपर्ककम् ॥६१॥
देहसंवाहनं चक्रे साधुं मत्वा सुसेवनम् ।
अकरोत् सा प्रसन्नः सा आशीर्वादं ददौ शुभम् ॥६२॥
राजपुत्री भवत्वेवं कथयित्वा ययौ हि सः ।
अथ कालान्तरे चित्रा मृत्युंगता ततस्त्विह ॥६३॥
साधोः सेवाफलेनाऽपि तदाशीर्वादतस्तथा ।
दिवोदासगृहे पुत्री दिव्यादेवी व्यजायत ॥६४॥
सा हि दत्तवती चान्नं जलं सेवां तथाऽऽसनम् ।
तस्मात् पुण्यस्य महात्म्याद् राजपुत्री हि वर्तते ॥६५॥
गृहभंगादिपापैश्च ह्यघवात्वं पुनः पुनः ।
सहते वै ततः सेवा कर्तव्या सततं सताम् ॥६६॥
गुरोः सेवा प्रकर्तव्या साधोर्धर्मव्रतस्य च ।
साध्व्याः सेवा प्रकर्तव्या सर्वसम्पत्करी हि सा ॥६७॥
राजपुत्रा मृथा ये ये ते पुरा भाण्डजातयः ।
नारीणां हारकाश्चासन् तेन पापेन ते मृताः ॥६८॥
गोविप्रगुरुसाधूनां सेवापरायणाः पुरा ।
आसँश्चापि च वै तेन राजपुत्रत्वमागताः ॥६९॥
अतः सेव्याः साधवश्च गुरवश्च सदा हि ताः ।
परभंगो गृहभंगो न कर्तव्यः कदाचन ॥७०॥
श्रुत्वोज्ज्वलः पुनस्तत्र पप्रच्छ पितरं प्रति ।
कथं सा मुच्यते शोकान्महादुःखाद् वदस्व मे ॥७१॥
कथं सा लभते मोक्षं तं चोपायं वदस्व मे ।
पिता च कुञ्जलः प्राह श्रुत्वा पुत्रं तमुज्ज्वलम् ॥७२॥
शृणु पुत्र प्रवक्ष्यामि तस्या दुःखविनाशकम् ।
साधनं मोक्षणस्यापि येन शुद्धा भविष्यति ॥७३॥
हरेर्ध्यानाज्जपाच्चापि व्रताच्च गुरुसेवनात् ।
पापनाशो मोक्षणं च भवेदेव न संशयः ॥७४॥
दिव्यो नारायणश्चास्तेऽक्षरे धाम्नि परात्परः ।
सर्वज्ञः सर्वशक्तिश्च सर्वैश्वर्यसमन्वितः ॥७५॥
किशोरः सर्वशोभाढ्यः श्रीकान्तः परमेश्वरः ।
मानिकाऽऽकारवर्ण्यः स दिव्याकारसमन्वितः ॥७६॥
दिव्यमुकुटमूर्द्धा च दिव्यचक्रादिशोभनः ।
कोटिचन्द्राभवदनः पद्मपत्रनिभेक्षणः ॥७७॥
सर्वभूषणशोभाढ्यः कौस्तुभेन विराजितः ।
कमलाकृतसेवश्च श्रीवत्सांकेन राजितः ॥७८॥

मनोहारिस्वरूपश्च कान्तः कान्तार्हयौवनः ।
एवं ध्यायेत् सती नित्यं सर्वपापविशोधकम् ॥७९॥
हरे नारायण कृष्ण श्रीपते कमलापते ।
अनादिश्रीकृष्णनारायण श्रीकृष्णमोक्षकृत् ॥८०॥
एवं कुर्याद् भजनं वै जपं कुर्याद्धरे इति ।
व्रतं कुर्यात् पूर्णिमाया लक्ष्मीनारायणव्रतम् ॥८१॥
उद्यापनेन सहितं कृष्णपूजान्वितं शुभम् ।
गुरोस्तत्र च्यवनस्य प्रकुर्यात् सेवनं हि सा ॥८२॥
कर्मणा मनसा वाचा तदा दुःखं प्रहास्यति ।
इत्युक्तं सर्वमेवैतत् पक्ष्यपत्यं प्रणम्य च ॥८३॥
पितुराज्ञां समादाय यत्र सा तत्र वै ययौ ।
पक्षिभाषां परित्यज्य स्त्रीवाण्या तां जगाद ह ॥८४॥
उज्ज्वलः सन्निधौ गत्वा तापसीं चेदमब्रवीत् ।
का त्वं भवसि कस्याऽसि कस्मादत्र समागता ॥८५॥
समाचक्ष्व त्वमनघे तपसश्चापि कारणम् ।
दिव्यादेवी समुवाच पक्ष्यपत्यं विलोक्य सा ॥८६॥
आश्चर्यं महदापन्ना पक्षिन् शृणु यथातथम् ।
को भवान् मे वदत्वत्र विश्वासो येन जायते ॥८७॥
पक्षी प्राह महाभागे पक्ष्यहं तव दुःखहाः ।
रुदमानां विलोक्यैतत् पृष्टं मे वद कारणम् ॥८८॥
यथाबलं यतिष्येऽहं तव दुःखविनाशने ।
श्रुत्वा दिव्यादेविका सा जगाद पक्षिणं प्रति ॥८९॥
कर्मणां मे फलं भुंजे दिवोदाससुताऽस्मि च ।
शताधिका हि पतयो मृता उद्वाहनोत्सवे ॥९०॥
अथवाऽहं हि तिष्ठामि तपोऽर्थमत्र चागता ।
पापनाशो भवेद् येन तमुपायं करोमि च ॥९१॥
उज्ज्वलश्च समाकर्ण्य पित्रोक्तं प्राह योषिते ।
साऽपि तथ्यं हि तन्मेने प्रायश्चित्तमियेष सा ॥९२॥
पप्रच्छ पक्षिणं पूर्वकृतपापस्य निष्कृतिम् ।
उज्ज्वलः प्राह विष्णोर्वै ध्यानं कुरु यथोदितम् ॥९३॥
जपं कुरु हरे कृष्णनारायण परेश्वर ।
व्रतं कुरु शुभं लक्ष्मीनारायणव्रतं परम् ॥९४॥
पूर्णिमायां निराहारं जागरणसमन्वितम् ।
उद्यापनसमेतं च गुरोः संसेवनं कुरु ॥९५॥
गुरुश्चात्र च्यवनोऽस्ति नर्मदायाः शुभे तटे ।
भजस्व तं महात्मानं पुण्यपुञ्जा भविष्यसि ॥९६॥
इत्युक्ता जगृहे सर्वं पक्षितः सा शुभोदया ।
व्रतं चक्रे जपं चक्रे ध्यानं चक्रे हरेस्तथा ॥९७॥
च्यवनस्य वटे सेवां चक्रे गत्वा गुरोर्हि सा ।
देहेन मनसा वाचा सर्वार्पणेन कन्यका ॥९८॥
गुरोस्तु कृपया साध्वी वर्षमध्ये ददर्श ह ।
दिव्यं नारायणं कृष्णनारायणं परेश्वरम् ॥९९॥
घनश्यामं सुन्दरं च शंखचक्रगदाधरम् ।
सर्वाभरणशोभाढ्यं दृष्ट्वा ननाम पादयोः ॥१००॥
दण्डवद् धरणिं प्राप्य चकार गद्गदाऽभवत् ।
उवाच च हरिश्चाऽहं कृपया तव चागतः ॥१०१॥
गुरोः प्रसादलाभेन जातं मे दर्शनं तव ।
वरं वृणु महाभागे ददामि तव वाञ्छितम् ॥१०२॥
श्रुत्वा सा कन्यका वव्रे मामुद्धर भवार्णवात् ।
तव पादौ भजिष्यामि कान्तभक्तिं प्रदेहि मे ॥१०३॥
मोक्षे दासीपदं देहि यदि तुष्टोऽसि नाथ मे ।
हरिः प्राहाऽस्त्वेवमेव चायाहि मम धाम वै ॥१०४॥
तावत् साऽप्यभवद् दिव्यादेवी लक्ष्मीस्वरूपिणी ।
विमानवरमासाद्य ययौ वैकुण्ठमेव सा ॥१०५॥
उज्ज्वलः पितरं प्राह वृत्तान्तं सर्वमेव ह ।
पिता विवेद सर्वं च महिमानं गुरोस्तदा ॥१०६॥
च्यवनः सर्वकामानां पूरको वैष्णवो गुरुः ।
सेवितः कन्यया तेन याता सा ब्रह्मदर्शनम् ॥१०७॥
तेनैव दिव्यदेहेन याता मोक्षपदं सती ।
लक्ष्मीर्जाताऽपरा धाम्नि ध्यानजपव्रतादिभिः ॥१०८॥
पठनाच्छ्रवणाच्चाऽस्य पापाऽपि पापशोधिता ।
भूत्वा यायाद्धरेर्धाम लक्ष्मि ! कान्ता भवेन्मम ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरुतीर्थे दिव्यादेवीमोक्षणं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

शृणु नारायणीश्रि त्वं कुञ्जलस्तु ततः परम् ।
द्वितीयं स्वसुतं चापि पप्रच्छ विनयान्वितम् ॥ १ ॥
समुज्ज्वल ! किमपूर्वं दृष्टवान् श्रुतवान् वद ।
श्रुत्वा समुज्ज्वलः प्राह हिमवन्तं गिरिं पितः ॥ २ ॥
आहारार्थं प्रगच्छामि पश्यामि कौतुकं नवम् ।
मानसं यत्सरश्चास्ते तत्र दृष्टं वदामि तत् ॥ ३ ॥
बहुहंससमाकीर्णो हंस एकः समागतः ।
स च कृष्णो महातेजाः कृष्णहंसान्वितः शुभः ॥ ४ ॥
त्रयश्चान्येऽपि शुक्लाश्च चञ्चुपादैस्तु कृष्णकाः ।
आययुस्ते चतुर्णां वै पत्न्यो हंस्यः समाययुः ॥ ५ ॥

भयंकर्यश्चोर्ध्वकेश्यः कृष्णवर्णा विभीषणाः ।
कृष्णा हंसा जले सस्नुर्न सस्नुश्च त्रयोऽपरे ॥ ६ ॥
चतस्रो हंसिकाश्चापि नैव सस्नुः सरोवरे ।
कृष्णा हंसा जलात्तस्माद्विनिर्गत्याऽऽययुर्द्रुतम् ॥ ७ ॥
त्रयोऽन्ये हंसकाश्चाप्याययुरुड्डीय विन्ध्यकम् ।
शिष्टाश्चतस्रो हंस्योऽपि विन्ध्याचलमुपाययुः ॥ ८ ॥
हंसा हंस्यो महाभीता बभ्रमुः परितस्ततः ।
निषण्णा दुःखदग्धाश्च वृक्षशाखासु संहिताः ॥ ९ ॥
तत्र कश्चित् समायातो लुब्धकस्तु धनुर्धरः ।
शिलापृष्ठे निषसाद भिल्ली ततः समागता ॥१०॥
द्वावेतौ च्यवनौ दृष्ट्वा महर्षिं तं प्रणेमतुः ।
च्यवनस्य पादजलं पीत्वा दिव्यौ बभूवतुः ॥११॥
विमानवरमारुह्य ययतुः स्वर्गमेव तौ ।
देवौ दिव्यतमौ भूत्वा दृष्टौ साक्षान्मयि हि तौ ॥१२॥
अथ हंसास्तदोड्डीय च्यवनस्यैव पादयोः ।
रजस्सु ते समलुठन् तथा पादजलं पपुः ॥१३॥
च्यवनेनाऽभिषिक्तास्ते श्वेता बभूवुरेव च ।
कृष्णत्वं लीनतां प्राप्तं ययुश्चाऽदृश्यतां ततः ॥१४॥
के त्वासन् वै पितर्हंसाः कृष्णवर्णा हि ते पुरा ।
पश्चात् श्वेताः कथं जाताः क्व गतास्ते ततः परम् ॥१५॥
कुञ्जलस्तत् समाकर्ण्य प्राह पुत्रं समुज्ज्वलम् ।
शृणु पुत्र कथयामि दिव्यं कथानकं तु तत् ॥१६॥
तान्यासन् सर्वतीर्थानि चाऽष्टषष्टिमतानि वै ।
एतेषु मानवाः स्नात्वा पापानि क्षालयन्ति च ॥१७॥
गोवधाख्यं महापापं स्त्रीवधाख्यं तथाविधम् ।
स्वामिद्रोहात्मकं पापं सुरापानात्मकं तथा ॥१८॥
हेमस्तेयोद्भवं पापं गुरुनिन्दात्मकं तथा ।
भ्रूणहत्या महाघोरा राजद्रोहस्तथाविधः ॥१९॥
मित्रद्रोहश्च विश्वासघातश्च देवभेदनम् ।
वृत्तिच्छेदो गोचरस्य नाशनं वह्निदाहनम् ॥२०॥
साधुसाध्वीविनाशश्च गरदानं भयंकरम् ।
मातापितृवधश्चापि बालिकाभोग इत्यपि ॥२१॥
पशुहत्या मातृसंगो विंशतिपातकानि वै ।
तथाऽन्यानि पातकानि मानवाः क्षालयन्ति हि ॥२२॥
तैः पापैः कृष्णतां यान्ति प्राप्तानि तीर्थकानि वै ।
तानि पापानि सर्वाणि क्षालयितुं निजानि हि ॥२३॥
भूत्वा हंसस्वरूपाणि गतानि मानसं सरः ।
स्नात्वा नैव विनष्टानि पापानि तेन वै पुनः ॥२४॥
नर्मदायास्तीरमाप्ता हंसाश्चासन् सुदुःखिताः ।
पापप्रक्षालनं तीर्थं चिन्तयन्तो द्रुमे स्थिताः ॥२५॥
तैर्दृष्टौ दिव्यरूपौ च व्याधीव्याधौ दिवंगतौ ।
परस्परं वदमानौ च्यवनस्य गुरोर्बलम् ॥२६॥
ब्रह्महत्या गुरुघातश्चाऽगम्यागमनादिकम् ।
गोहत्या च सुरापानं नष्टं गुरोर्बलाद्धि नौ ॥२७॥
दिव्यौ जातौ स्वर्गयानौ धन्यं पादं गुरोर्भुवि ।
इतिश्रुत्वा च ते हंसाश्च्यवनस्याऽन्तिकं ययुः ॥२८॥
लुलुठुः पादरजसि पादवारि पपुश्च ते ।
च्यवनोऽपि तदा रेवतोयैश्चाऽऽप्रोक्षयद्धि तान् ॥२९॥
सर्वे हंसाः श्वेतवर्णा भूत्वा नत्वा मुनिं मुहुः ।
ययुश्चाऽदृश्यतां तत्र हंसा हंस्योऽपि सर्वशः ॥३०॥
गुरुतीर्थं पातकानां शामकं परमोत्तमम् ।
सर्वतीर्थानि मानानि गुरुतीर्थे भवन्ति वै ॥३१॥
कृष्णहंसाऽन्वितश्चैको यश्चासीत् कृष्णहंसकः ।
सर्वतीर्थसमेतः सह्यभूत् प्रयागराजकः ॥३२॥
त्रयश्चान्ये तु हंसास्ते रेवा गोदा च पुष्करम् ।
हंस्यश्चापि चतस्रस्ता गंगा च ब्रह्मपुत्रिका ॥३३॥
सरस्वती च कावेरी ह्यासंस्तत्र हि हंसिकाः ।
इत्येतत् कथितं सर्वं गुरुतीर्थनिषेवणम् ॥३४॥
सर्वपापहरं मोक्षप्रदं वै गुरुतीर्थकम् ।
अथ वै कुञ्जलः पुत्रं पप्रच्छ च तृतीयकम् ॥३५॥
किं विज्वल ! त्वया दृष्टमाश्चर्यं कथयाऽत्र मे ।
विज्वलः पितरं प्राह नूत्नं विलोकितं तु यत् ॥३६॥
पितश्चाऽहं नवलक्षाऽभिधं वै पर्वतं ययौ ।
देववृन्दैश्चाप्सरोभिः ऋषिभिः सेवितं शुभम् ॥३७॥
दिव्यवृक्षैः समाकीर्णं फलपुष्पनतैः सदा ।
योगिनो नवलक्षाणि वर्तन्ते यत्र पर्वते ॥३८॥
आनन्दकाननं नाम वनं तत्र प्रभासते ।
विमलं च सरस्तत्र विशालं चावलोकितम् ॥३९॥
यादोभिर्विविधैर्युक्तं हंसकारण्डवादिभिः ।
किन्नरोरगगन्धर्वैश्चारणाद्यैः सुशोभितम् ॥४०॥
विमानं तत्र वारीणामुपरि चाम्बरे शुभम् ।
सुवर्णकलशैर्युक्तं दृष्टं सहसा कानकम् ॥४१॥
छत्रदण्डपताकाभी राजमानः पुमान् शुभः ।
किन्नरैरप्सरोभिश्च गन्धर्वाद्यैर्महर्षिभिः ॥४२॥
स्तूयमानो महासिद्धैर्दृष्टः सुरूप उत्तमः ।
सर्वाभरणशोभांगो रत्नहारादिराजितः ॥४३॥

तत्पार्श्वे त्वेककान्ता च वरानना सुशोभिता ।
मुक्ताहारयुता चाऽपि वलयैः कंकणैर्युता ॥४४॥
दिव्याम्बरा सुशृंगारा युवती चार्चिता स्थिता ।
तौ द्वौ दृष्टौ विमानाच्चाऽवरोहयतां भूतले ॥४५॥
स्नातवन्तौ च यावत्तौ मृतौ तावद्धि तौ तटे ।
शवौ दिव्यौ तटे स्तश्च तौ द्वौ पृथक् तटे स्थितौ ॥४६॥
नार्यौ द्वे च नरौ द्वौ च तावेव वीक्षितौ मया ।
तत्र वैमानिकौ द्वौ यौ तौ शस्त्रेण निजौ शवौ ॥४७॥
भक्षयामासतुस्तत्र नारी नारीं नरो नरम् ।
क्षुधया पीड्यमानौ भक्षयतः पिशितं निजम् ॥४८॥
अन्ये द्वे च स्त्रियौ तात चायाते त्वम्बरात् पृथक् ।
हसतः खादमानौ तावस्मद्योगेऽपि नार्पितम् ॥४९॥
अन्नं स्वल्पं जलं स्वल्पं कस्मैचित्स्वपिनाऽर्पितम् ।
एवं तौ भक्षयित्वैव पीत्वा जलं दिवं प्रति ॥५०॥
गतौ विमानमारुह्य दृष्टं सर्वं मया नवम् ।
किमेतद् वद मे तात स्वमांसभक्षणं कुतः ॥५१॥
श्रुत्वा पुत्रस्य तद्वाक्यं कुशलः प्राह पुत्रकम् ।
शृणु विज्वल! लोकोऽयं कर्मभूमिर्हि वर्तते ॥५२॥
पुण्यकर्मा मोदतेऽत्र परत्र भोजनादिभिः ।
दत्तं दानं समायाति पुरतो यत्र याति सः ॥५३॥
अदत्तं नैव चायाति स्वर्गेऽन्यत्र च वा गतः ।
यादृशं वपते बीजं क्षेत्रे तु कृषिकारकः ॥५४॥
लभते तादृशं तत्र फलं बीजसजातिकम् ।
यादृशं क्रियते कर्म तादृशं लभ्यते फलम् ॥५५॥
कर्मदायादको लोकः पूर्वकर्मवशानुगः ।
पूर्वं दत्तं कृतं चैतत् फलरूपं निषेव्यते ॥५६॥
पञ्च सृष्टानि गर्भेऽस्य देहिनः कर्मजानि वै ।
यशोवित्ते जीविका च विद्या च मरणं तथा ॥५७॥
देवत्वं वा मानुषत्वं पशुत्वं पक्षिताऽथवा ।
तिर्यक्त्वं स्थावरत्वं च स्मृद्धयो भोजनादिकम् ॥५८॥
आत्मना विहितं यादृक् तादृक् समुपतिष्ठति ।
पूर्वदेहकृतं कश्चित् कर्तुमलं हि नाऽन्यथा ॥५९॥
शुभाऽशुभं कृतं कर्म कर्तारमनुगच्छति ।
उपभोगादृते तस्य नाश एव न विद्यते ॥६०॥
सुशीघ्रमपि धावन्तं स्वकर्म चानुधावति ।
उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति ॥६१॥
छायावद् वर्तते लग्नं भोगं फलं ददाति तत् ।
येन यत्रोपभोक्तव्यं दैवेन तत्र नीयते ॥६२॥
कर्मभूमिरियं तात चान्या भोगाय भूमयः ।
चोलराजः सुबाहाख्यो ददौ दानानि भूरिशः ॥६३॥
रत्नानि च सुवर्णानि राजतादीनि कोटिशः ।
अन्नं जलं च सुलभं मत्वा ददौ न तत्तदा ॥६४॥
पुरोधाश्चोलराजस्य जैमिनिस्तमुपादिशत् ।
श्रद्धया विधिवत् पात्रे देहि चान्नं धनादिकम् ॥६५॥
अन्नदानात् परं नास्ति प्राणिनां तृप्तिदं द्रुतम् ।
तस्मादन्नं पयोयुक्तं प्रदेहि क्षत्रियर्षभ ॥६६॥
तारणाय हितायैव सुखसम्पत्तिहेतवे ।
ग्रासाग्रमपि दातव्यं मुष्टिप्रस्थं च वा नृप ॥६७॥
श्रद्धया वा पर्वदिने विप्रं सन्तं प्रभोजय ।
एकभोजनलभ्यं वै फलं नित्यं भुनक्ति हि ॥६८॥
पूर्वजन्मनि दत्तान्नं जन्मान्तरे सदा लभेत् ।
नित्यं प्रभुज्यते दत्तं देह्यन्नं चाऽविचारयन् ॥६९॥
प्राणरूपं यतोऽन्नं तत् प्रदेहि त्वं प्रयत्नतः ।
स्वर्गे लोके सदा चान्नं दत्तममृतमीयते ॥७०॥
श्रुत्वा नृपतिः पप्रच्छ स्वर्गगुणान् वदाऽत्र मे ।
जैमिनिः स्वर्गलाभाँश्चाऽकथयद् वै सुबाहवे ॥७१॥
सर्वकामप्रदान्युद्यानानि स्वर्गे भवन्ति वै ।
सर्वर्तुफलपुष्पाणि विमानानि च सन्ति वै ॥७२॥
अप्सरसश्च दिव्याश्च हेमशय्यासनानि च ।
सर्वकामसमृद्धयो विद्यन्ते कल्पवल्लिजाः ॥७३॥
न रोगा न जरा मृत्युर्न शोको न हिमाऽऽतपौ ।
न तत्र क्षुत्पिपासा च न ग्लानिश्चापि विद्यते ॥७४॥
एवंविधगुणं स्वर्गं दोषाँस्तत्रापि तान् शृणु ।
अत्र दत्तं हि लभ्येत नाऽदत्तं तत्र लभ्यते ॥७५॥
दोषो महानयं स्वर्गेऽतिशयो दोष इत्यपि ।
अदत्तस्याऽत्र भोग्यस्याऽसन्तोषस्तत्र वै सदा ॥७६॥
अन्यश्रियं परां दृष्ट्वा समुद्वेगः सदाऽस्ति च ।
अकस्मात् पतनं चापि वासनावशवर्तिता ॥७७॥
फलभूमिर्मता द्यौश्च कर्मभूमिरियं मता ।
तस्माद्दत्तं प्रदत्तं यत् तत्स्वर्गे भुज्यते सुरैः ॥७८॥
श्रुत्वा नृपः ऋषिं प्राह निर्दोषं वद मे पदम् ।
जैमिनिश्चाह भगवत्पदं निर्दोषमेव ह ॥७९॥
आब्रह्मभवना लोकाः सदोषाः कर्मणाऽर्जिताः ।
मायालोकाः समस्ता वै दोषवन्तो गुणात्मकाः ॥८०॥
अगुणं तु पदं विष्णोर्नारायणस्य शार्ङ्गिणः ।
भक्तियोगगतास्तत्र साध्व्यो गच्छन्ति साधवः ॥८१॥

राजा प्राह न मे स्वर्गे गन्तुमिच्छा प्रवर्तते ।
यस्माद्वै पतनं तत्र गन्तव्यं नैव सर्वथा ॥८२॥
दानफलं च भोगो वै भोगान्ते पतनं यदि ।
दानमेव न कर्तव्यं पातफलं मया क्वचित् ॥८३॥
करिष्ये ध्यानभक्त्यादि यजिष्ये कमलापतिम् ।
दाहप्रलयवर्ज्यं च गमिष्ये परमं पदम् ॥८४॥
श्रुत्वा तं जैमिनिश्चाह राजन् धर्मो नृपस्य यः ।
अनिच्छताऽपि कर्तव्यो दानं यज्ञः प्रदानकम् ॥८५॥
आदावन्नं सुयज्ञेषु जलं ताम्बूलमम्बरम् ।
काञ्चनं भूमिदानं च गोदानं चेतरच्च यत् ॥८६॥
वैकुण्ठेऽपि फलं भुंक्ते दानधर्मस्य शाश्वतम् ।
साधुभ्यस्तु विभागैकं गोग्रासं च ततः परम् ॥८७॥
भृत्यादिभ्यश्चैकभागं प्रयच्छन्ति तपोधनाः ।
एवमन्नस्य दानेन दिव्यलोकगता अपि ॥८८॥
क्षुधातृषाविहीनाश्च नित्यतृप्ता हरेः स्थले ।
तिष्ठन्ति नान्यथा राजन् देह्यन्नं धनमित्यपि ॥८९॥
दानाज्ज्ञानं ततः सिद्धिस्ततस्तृप्तिं गमिष्यसि ।
अदाने त्वं गतश्चापि वैकुण्ठे क्षुधमाप्स्यसि ॥९०॥
श्रुत्वा राजा तदा प्राह दानं चेत् तृप्तिकारणम् ।
योगिनां च सतां त्यागवतां मोक्षे हि का गतिः ॥९१॥
अदत्तदानाः ऋषयः करपात्रा हि साधवः ।
अपरिग्रहसर्वस्वा मोक्षे तृप्ताः कथं वद ॥९२॥
श्रुत्वा प्राह ऋषिस्तं वै ज्ञानभक्तिपरायणाः ।
मूर्त्यानन्देन तृप्तास्ते सदा क्षुत्तृड्विवर्जिताः ॥९३॥
राजा प्राह तथैवाऽहं यतिष्ये ज्ञानभक्तिमान् ।
दानं बन्धप्रदं नैव कर्तव्यं निश्चिकाय सः ॥९४॥
ज्ञानं कृत्वा तथा स्वल्पां भक्तिं कृत्वा ममार सः ।
सुबाहुः प्रमदायुक्तो विमानोदग्रमाश्रितः ॥९५॥
ययौ स्वर्गं पूर्वकृतं पुण्यं भोक्तं विधानतः ।
नाऽभुक्तं क्षीयते पुण्यं कृतं स्वर्णादिदानजम् ॥९६॥
क्षुधा जाता महातीव्रा तृषापि च तथाविधा ।
राजा वै प्रियया सार्धं क्षुधातृषाप्रपीडितः ॥९७॥
स्वर्गे रुद्धः कर्मणा वै वैकुण्ठं नैव गच्छति ।
हृषीकेशो दृश्यते न विमानं नोर्ध्वमृच्छति ॥९८॥
स्वर्गे राजा व्याकुलो वै जातः क्षुधादिपीडितः ।
इतश्चेतश्च वेगैश्च धावति क्ष्माधिपस्तदा ॥९९॥
सर्वाभरणशोभांगश्चन्दनादिविभूषितः ।
अप्सरोभिः सेव्यमानो देवैश्च सत्कृतोऽपि च ॥१००॥
अदत्तं नाऽऽप्तवान् राजाऽमृतं चान्नं प्रभोजनम् ।
जलं च नाऽऽप्तवान् स्वर्गे बभ्राम पीडितो मुहुः ॥१०१॥
भार्या संप्राह राजानं सत्यं दानफलं सुराः ।
भुञ्जतेऽमृतमेवाऽत्र दत्तमन्नं पुरा तु यत् ॥१०२॥
अन्नवारिप्रदानं तु न कृतं भूतले नृप ।
क्षुधा मां त्वां बाधतेऽतस्तृषा चोग्रा प्रवर्तते ॥१०३॥
भोजनं सलिलं चात्र लभ्यते न विमानके ।
अमृतं भोजनं नास्ति चान्यदेवगृहे इव ॥१०४॥
यामः पृथ्व्यां भोजनार्थं जलार्थं ननु पार्थिव ।
इत्युक्तो भूपतिः राज्ञ्या विमानेन द्रुतं क्षितिम् ॥१०५॥
आजगाम वने रम्ये नन्दने तत्र वै ऋषिम् ।
ददर्श वामदेवं स सभार्यो नृपतिस्ततः ॥१०६॥
अवतीर्य नमश्चक्रे दत्तासने ह्युपाविशत् ।
ऋषिकृतं स्वागतादि जग्राहाऽथ निरामयम् ॥१०७॥
पृष्टो राजा जगादर्षिं निरामयो भवामि न ।
क्षुधा मे बाधते चापि तृषा चातीव दारुणा ॥१०८॥
ताभ्यां शान्तिं न गच्छामि सुखं विन्दामि नैव च ।
श्रुत्वैव वामदेवस्तं प्राह राजन् हितं शृणु ॥१०९॥
अन्नदानं जलदानं त्वया दत्तं न भूतले ।
हरिश्चाराधितो नैव नैवेद्यफलवारिभिः ॥११०॥
तेन दोषेण स्वर्गे न वैकुण्ठेऽपि न ते कृते ।
भोजनं विद्यते राजन् सर्वमन्यत् प्रविद्यते ॥१११॥
आराधितस्त्वया विष्णुर्ज्ञानभक्त्या तु शुष्कया ।
तेन प्राप्तं त्वया स्वर्गे शुष्कं भोजनमन्तरा ॥११२॥
अन्नं त्वमृतरूपेण स्वर्गे चावाप्यते नृप ।
वैकुण्ठे ब्रह्मतृप्त्यात्म पीयूषं प्राप्यते सदा ॥११३॥
कटुतिक्तकषायाश्च क्षाराम्लमधुरास्तथा ।
स्निग्धाश्चोपस्कराः सर्वे नानारूपाश्च भूगताः ॥११४॥
दत्ताः सर्वा ह्यवाप्यन्ते ओषध्यः पुष्टिहेतवः ।
साधवः पितरो देवा भोजिता येन भूपते ॥११५॥
स एव भुंक्ते स्वर्गेऽपि भोजनस्य फलामृतम् ।
मिष्टान्नपानमेवाऽत्र दाने दत्तं न वै त्वया ॥११६॥
स्वशरीरं त्वया पुष्टमन्नैरमृतसदृशैः ।
अदत्तं च यतस्तस्माद् भुंक्ष्व क्षुधातृषाफलम् ॥११७॥
यदि ते क्षुत्प्रतीकारो ह्यभीष्टो वर्तते तदा ।
याहि नन्दनसरसि स्नात्वा भुंक्ष्व शवं निजम् ॥११८॥
एवमुक्तः सुबाहुश्च वामदेवं प्रणम्य तु ।
नन्दनाख्यवने गत्वा सस्नौ तटाकवारिणि ॥११९॥

तावच्छवौ समुत्पन्नौ राज्ञो राज्ञ्या हि तौ शवौ ।
निजौ तौ भक्षितवन्तौ तृप्तौ जातौ तदा हि तौ ॥१२०॥
हसतश्च स्त्रियौ द्वे ये प्रज्ञा श्रद्धा हि ते मते ।
दानमार्गं परित्यज्य ज्ञानमार्गे गतं नृपम् ॥१२१॥
लोभमार्गे स्थितं भूपं हसतस्ते ह्युभे स्त्रियौ ।
अस्मद्योगेऽपि दत्तं न भुंक्ष्व राजन् फलं चिरम् ॥१२२॥
अथ राजा वामदेवं ययौ भुक्त्वा पुनर्वने ।
उद्धारो मे यथा स्याद्वै तथा विधेहि चार्थयत् ॥१२३॥
वामदेवः करे दत्वा जलं राज्ञ्या नृपस्य च ।
शम्याः कृष्णार्पणं पुण्यमकारयद् दिवःप्रदम् ॥१२४॥
राजा कृष्णार्पणं चक्रे पुण्यं गुरोस्तु पादयोः ।
पुण्यहीनोऽभवच्छीघ्रं पापहीनो बभूव च ॥१२५॥
फलमूलान्नसलिलैर्विष्णुमपूजयत्तदा ।
तृप्तो विष्णुर्गुरोर्वाक्यात् प्रत्यक्षः समजायत ॥१२६॥
पार्षदैः सहितो दिव्ये विमाने च नृपीं नृपम् ।
नीत्वा पीयूषसंवार्धौ वैकुण्ठमनयत् प्रभुः ॥१२७॥
नित्यतृप्तिस्तदा जाता नैवेद्यसलिलार्पणैः ।
एवं श्रुत्वा विज्वलोऽभूत् संहृष्टः सद्गुरोर्बलम् ॥१२८॥
गुरुर्मोक्षप्रदाता च विष्णुतुल्यो भवत्यपि ।
पापतापशमयिता नित्यतृप्तिप्रदो गुरुः ॥१२९॥
पठनाच्छ्रवणाच्चास्य पुरुषार्थचतुष्टयम् ।
साधनं चापि कृत्वैव ब्रह्मलोकं व्रजेज्जनः ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरुतीर्थे तीर्थानां पापनाशकं गुरुपदम्, अदत्तान्नजलदानकस्य सुबाहुनृपतेः स्वशवभक्षकस्य वामदेवाख्यगुरोर्योगान्नित्यतृप्तिर्मोक्षावाप्तिश्चेत्यादिनिरूपणनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कुञ्जलस्तुर्यपुत्रकम् ।
कपिञ्जलं च पप्रच्छ नूतनं किं विलोकितम् ॥ १ ॥
श्रुत्वा कपिञ्जलः प्राह कैलासे धवले गिरौ ।
शिवस्याऽऽस्ते दिव्यमर्घ्यं मन्दिरं स्वर्गसन्निभम् ॥ २ ॥
सेवितं पुण्यलोकैश्च गणैर्गणीभिरुत्तमम् ।
तत्राऽहं गतवानद्य गंगाप्रवाहसन्निधौ ॥ ३ ॥
गंगाह्रदो महानस्ति तत्र हंसा वसन्त्यपि ।
वारितीरे शिलायां हि कन्यैका संविलोकिता ॥ ४ ॥
आसीना मुक्तकेशा च रूपलावण्यशोभिता ।
दिव्याऽलंकारशृंगाराऽम्बरशोभान्विता शुभा ॥ ५ ॥
दुःखाकुला रोदिति साऽश्रूणि मुञ्चति धारया ।
मुक्तामौक्तिकतुल्यानि पतितानि ह्रदोदके ॥ ६ ॥
तेभ्यो भवन्ति पद्मानि हृद्यानि सुरभीणि च ।
नेत्राश्रुजानि पद्मानि तरन्त्यसंख्यकानि वै ॥ ७ ॥
तानि पद्मानि चादाय कश्चित्पुण्यमयो मुनिः ।
दिग्वासा जटिलो दण्डी तापसो भस्मवान् कृशः ॥ ८ ॥
पूजयति हरं रत्नेश्वरं नृत्यति गायति ।
हसति सुस्वरं चापि दृष्टमेतन्मयाऽद्भुतम् ॥ ९ ॥
पितः कः स भवेत्तत्र का सा नारी च वा भवेत् ।
नारी प्ररोदिति कस्माद् वद मे सर्वमेव तत् ॥१०॥
श्रुत्वा स कुञ्जलः पुत्रं कपिञ्जलमुवाच ह ।
पुत्र शृणु महादेवी त्वेकदा प्राह शंकरम् ॥११॥
दर्शयस्व ममैवाऽद्य काननं काननोत्तमम् ।
महादेवस्तथाऽस्त्वाह ततः सज्जो बभूव ह ॥१२॥
वृषभं चारुरोहाऽपि गणैर्देव्या युतो हरः ।
नन्दनाख्यं प्रविवेश वनं दिव्यं मनोहरम् ॥१३॥
दर्शयामास देव्यै तद्वनं स्मृद्धं समन्ततः ।
कल्पवृक्षान् कल्पवल्लीर्दर्शयामास शंकरः ॥१४॥
पार्वती चाकरोत्तत्र संकल्पं कन्यकाकृते ।
कल्पवृक्षात् ततस्तूर्णं कन्यैका समजायत ॥१५॥
स्वस्वरूपा स्वसमाना युवती कमलेक्षणा ।
पद्मानना स्वर्णदेहा सप्रभा लम्बमूर्धजा ॥१६॥
सुगन्धदेहा दिव्या च भूषाम्बरविभूषिता ।
दिव्यशृङ्गारशोभाढ्या वनदेवी यथा शुभा ॥१७॥
कन्या ननाम भक्त्या च पादयोः शिवयोस्तदा ।
पार्वती तां तु पुत्रीं स्वां स्वीचकार हि मानसीम् ॥१८॥
अशोकसुन्दरीनाम्नीं प्राह तां पार्वती ततः ।
सोमवंशे नहुषाख्यो नृपस्ते वै पतिः सुते ! ॥१९॥
भविष्यतीति तस्यै सा वरं दत्वा हि पार्वती ।
वने विसृज्य कैलासं शंभुना सह चाययौ ॥२०॥
अशोकसुन्दरी रेमे नन्दने वनदेवता ।
तामेकदा विप्रचित्तिदैत्यात्मजस्तु हुण्डकः ॥२१॥
दृष्ट्वा कामेन चाविष्टः पत्नीं कर्तुं समादिशत् ।
अशोकसुन्दरी प्राह शिवयोरस्मि कन्यका ॥२२॥
नहुषो मे पतिर्भावी पार्वती मां जगाद ह ।
मा वृथा त्वं प्रयतस्व विपरीतं भविष्यति ॥२३॥

महाशापेन योक्ष्यामि गच्छाऽन्यत्र महासुर ! ।
श्रुत्वा हुण्डस्तिरोभूत्वा चिन्तयामास वै पुनः ॥२४॥
कथं भार्या भवेत् सा मे कपटं रचयामि तत् ।
विचार्येत्थं देवकन्यारूपं दधार हुण्डकः ॥२५॥
वने तत्र तया सार्धं मित्रतां कृतवाँस्ततः ।
आश्रमं मेऽत्र गंगायास्तीरेऽस्तीति जगाद ताम् ॥२६॥
अशोकसुन्दरी हुण्डाश्रमं ययौ सुखान्विता ।
हुण्डिकाकन्यया सार्धं न्यवसत्तत्र तापसी ॥२७॥
भोजने शयने चापि विहारे सहगे हि ते ।
वर्तेते ते सखीरूपे स्नाने निद्रास्थलादिषु ॥२८॥
रात्रौ ते त्वेकशय्यायां सुप्ते तत्र तु हुण्डिका ।
हुण्डकं नररूपं च विधायाऽशोकसुन्दरीम् ॥२९॥
कामभावेन पस्पर्श तदा त्वशोकसुन्दरी ।
अप्राप्तनिद्रा तं ज्ञात्वाऽसुरं कपटकन्यकाम् ॥३०॥
उवाच मा स्पृशाऽत्र त्वं भस्म तूर्णं भविष्यसि ।
त्रस्तो हुण्डस्तदा तूर्णं पपात पादयोः पुनः ॥३१॥
अशोकसुन्दरी प्राह मम भर्ता नृपो हि सः ।
आगत्याऽत्र वने दुष्ट ! तव नाशं विधास्यति ॥३२॥
इत्युक्त्वा प्रययौ तूर्णं गंगातीरे वनान्तरे ।
तापसी वर्तते तत्राऽशोकसुन्दरी भामिनी ॥३३॥
अथ राजा ऐलपुत्र आयुः पुत्रार्थमेव ह ।
दत्तात्रेयात् प्रार्थयच्च सुपुत्रं सद्गुरोर्हरेः ॥३४॥
दत्तात्रेयो वरदानं ददौ हि पुत्रवान् भव ।
सर्वगुणैः समुपेतो वैष्णवांशेन संयुतः ॥३५॥
पुत्रस्ते सार्वभौमश्च महेन्द्राभो भविष्यति ।
इत्याशिषं समासाद्य त्वायुः स्वराज्यमाययौ ॥३६॥
नागाभिधे पुरे राजा चेन्दुमत्या स्त्रिया समम् ।
रेमे लेभे च नहुषं पुत्रं यथोक्तलक्षणम् ॥३७॥
हुण्डश्छिद्रं समासाद्य पुत्रं जहार चाम्बरे ।
निनाय स्वगृहे रात्रौ राक्षस्यै चार्पयत् सुतम् ॥३८॥
मारयित्वा पाचयित्वा भोजनार्थं निवेदितम् ।
राक्षसी विकलानाम्नी दयावती तु बालकम् ॥३९॥
रात्रौ विशिष्टकुट्यां सा निक्षिप्य चागता द्रुतम् ।
हरिणं पाचयित्वा च भोजयामास हुण्डकम् ॥४०॥
हुण्डस्तु निर्भयो जातो बालो मया हि खादितः ।
अथ वशिष्ठः प्रातश्च ददर्श बालकं शुभम् ॥४१॥
वर्धयामास दिव्यं तं विष्णुलक्षणलक्षितम् ।
ज्ञानं शस्त्राणि शास्त्राणि नीतिं कला वृषं तथा ॥४२॥
अध्यापयामास बालं राज्ययोग्यं चकार ह ।
इन्दुमत्यै प्रातरेव नारदः प्राह तद्दिने ॥४३॥
मा शोकं कुरु पुत्रस्ते वशिष्ठस्याऽऽश्रमेऽस्ति वै ।
हुण्डं दैत्यं नाशयित्वा विवाह्याऽशोकसुन्दरीम् ॥४४॥
शिवपुत्रीपतिर्भूत्वा गृहं ते चाऽऽगमिष्यति ।
इन्द्रोपेन्द्रसमः पुत्रो भविष्यति स्वतेजसा ॥४५॥
इत्युक्त्वा पूजनं प्राप्य नारदोऽन्तर्दधे तदा ।
अथ पुत्रं च नहुषं वशिष्ठः प्राह पुत्रक ! ॥४६॥
फलान्यानय वन्यानि धनुर्धारी प्रयाहि वै ।
राजा त्वाज्ञां समादाय ययौ वन्यार्थमेव ह ॥४७॥
हुण्डस्तत्राऽऽययौ दृष्ट्वा कुमारं देवतोपमम् ।
अपहर्तुं नाशयितुं मनश्चक्रे हि दैत्यराट् ॥४८॥
युयुधे च समागत्य नहुषेण समं बली ।
नहुषाय सहस्राक्षो ददौ शस्त्राणि वै तदा ॥४९॥
देवा दिव्यानि चास्त्राणि ददुस्तदा हि वै क्षणात् ।
इन्द्रो रथं ददौ चापि मातलिसंयुतं शुभम् ॥५०॥
विष्णुश्चक्रात् समुत्पाद्य चक्रं दीप्तं ददौ तदा ।
शंभुः शूलं ददौ चापि ब्रह्मास्त्रं प्रददावजः ॥५१॥
युयुधे नहुषः सोऽयं हुण्डेन मायिना तदा ।
देवा देव्यश्च गन्धर्वा जगुर्जयं तु नाहुषम् ॥५२॥
हुण्डो ज्ञात्वा निजं शत्रुं युयुधे चातिवेगतः ।
तत्र सर्वे दानवाश्च युयुधिरे चकिम्परे ॥५३॥
सेहिरे दानवा नैव बाणवर्षं हि नाहुषम् ।
मृताः केचिद् द्रुताः केचिन्नष्टाः केचिन्महाहवे ॥५४॥
रथस्थेन तु हुण्डेन ताडितो नहुषस्तदा ।
त्रिभिर्ध्वजं प्रचिच्छेद हुण्डस्य सायकैर्बली ॥५५॥
चतुर्भिस्तुरगाँश्चापि छत्रं त्वेकेन वै तथा ।
दशभिः सारथिं पश्चादेकेन च भुजं पुनः ॥५६॥
चिच्छेद नहुषस्तत्र शक्तिं मुमोच तद्धृदि ।
हुण्डस्तु पतितो भूमौ ममार प्राणतस्तदा ॥५७॥
देवाः प्रहर्षं जग्मुश्च पुष्पवृष्टिं जयं व्यधुः ।
अशोकसुन्दरी श्रुत्वा दैत्यवधं प्रहर्षिता ॥५८॥
नहुषं प्राप्य चोवाच धर्मपत्नी भवामि ते ।
समुद्वहस्व मां वीर देवैर्हि निर्मिता तव ॥५९॥
नहुषः प्राह भद्रं ते गुरोर्वाक्योत्तरं प्रिये ।
भद्रे त्वामुद्वहिष्यामि रथे तिष्ठ मया सह ॥६०॥
इति तां रथमारूढां नीत्वा गुर्वाश्रमं ययौ ।
निवेदयामास सर्वं गुरवे नृपबालकः ॥६१॥

वशिष्ठो हर्षमापन्नस्तिथौ लग्ने शुभे तयोः ।
विवाहं कारयामास वह्निभूसुरसन्निधौ ॥६२॥
आशीर्भिरभिनन्द्यैनं प्रेषयामास तत्पुरम् ।
नागाह्वयं पुरं गुरुर्नहुषोऽपि ययौ ततः ॥६३॥
पितरं मातरं नत्वा जगाद सर्वचेष्टितम् ।
आयुश्चेन्दुमती लब्ध्वा सभार्यपुत्रमुत्तमम् ॥६४॥
महोत्सवं प्रचक्राते पुत्रस्याऽऽगमनं प्रति ।
नहुषोऽपि धनुर्धृत्वा महेन्द्रस्य रथेन वै ॥६५॥
जिगाय पृथिवीं सर्वां सप्तद्वीपां सपत्तनाम् ।
पितरं याजयामास राजसूयादिभिस्ततः ॥६६॥
अथ देवाः समागत्य नागाह्वयं पुरोत्तमम् ।
अभ्यषिञ्चन्महात्मानं नहुषं वै नराधिपम् ॥६७॥
अर्धेन्द्रपदभाग् जातो नहुषो वैष्णवांशवान् ।
शिवपुत्रीपतिः श्रीमान् गुरोर्बलात् प्रतापवान् ॥६८॥
वशिष्ठस्य प्रतापेन महेन्द्रो मानवोऽभवत् ।
शिवागुर्वीप्रतापेन कन्या चाशोकसुन्दरी ॥६९॥
अर्धेन्द्राण्यभवत् तत्र देवी या वनदेवता ।
इन्दुमतीं निजश्वश्रूं सिषेवे किंकरी यथा ॥७०॥
अथ गंगातटे या तु रोदिति तां शृणु स्त्रियम् ।
हुण्डे मृते तु तत्पुत्रो विहुण्डस्तप आचरत् ॥७१॥
देवान् हन्तुं कृतमतिस्त्रैलोक्यं हन्तुमुद्यतः ।
पितुर्वैरं हरिष्यामि हनिष्यामि नरान् सुरान् ॥७२॥
इति निश्चित्य गंगायास्तटे स नन्दने वने ।
ययौ यदा तदा विष्णुर्नारीरूपो बभूव ह ॥७३॥
मोहयितुं विहुण्डं तं नाशयितुं तु युक्तितः ।
तां मायां वैष्णवीं दृष्ट्वा मुमोह तु विहुण्डकः ॥७४॥
उवाच तां वरारोहे संगमं देहि मेऽनघे ।
मायोवाच यदि मां त्वं भोक्तुमिच्छसि चेत्तदा ॥७५॥
सप्तकोटिमितैः पुष्पैः प्रसंपूजय शंकरम् ।
कामोदासंभवैर्दिव्यैः सुगन्धैर्देवदुर्लभैः ॥७६॥
तत्पुष्पाणां कृतां मालां मम कण्ठे समर्पय ।
तदाऽहं सुप्रिया भार्या भविष्यामि तवाऽनघ ॥७७॥
इत्युक्तश्चाऽसुरश्चापि मार्गयामास तद्द्रुमम् ।
अप्राप्य तां ययौ नारीं पप्रच्छ तद्द्रुमं पुनः ॥७८॥
नारी प्राह द्रुमो वै न तादृशो विद्यते क्वचित् ।
कामोदा विद्यते कन्या गंगाह्रदे प्रतिष्ठति ॥७९॥
कामोदाख्या तु सा साध्वी यदा हसति वै तदा ।
उत्पद्यन्ते हि पुष्पाणि तस्या हासाच्छुभानि वै ॥८०॥

कामोदानि सुगन्धानि पीतानि शोभनानि वै ।
तेनाऽप्येकेन पुष्पेण यः पूजयति शंकरम् ॥८१॥
तस्येप्सितं महाकामं सम्पूरयति शंकरः ।
तस्यास्तु रोदनाच्चापि लोहितानि सुमानि वै ॥८२॥
प्रभवन्ति न वै तेषां स्पर्शं कुर्यात् कदाचन ।
रोदनोत्थकुसुमानां स्पर्शोऽनिष्टं यतो भवेत् ॥८३॥
गंगाह्रदे गच्छ तत्र प्रहासय च तां स्त्रियम् ।
यद्वा तद्धास्यजातानि पुष्पाणि तु बहून्यपि ॥८४॥
गंगाप्रवाहे चायान्ति पतितानि गृहाण च ।
इत्युक्तो दानवो गंगाप्रवाहे समलोकयत् ॥८५॥
प्रवाहितानि कामोदारोदनोत्थसुमानि वै ।
जग्राह तानि सारल्यादपूजयच्च शंकरम् ॥८६॥
अनिष्टं तत्प्रजातं वै तेन क्रुद्धो हि शंकरः ।
हुंकारमकरोत् तेन दानवो वै मृतोऽभवत् ॥८७॥
देवकार्यं कृतं त्वेवं विष्णुना प्रभविष्णुना ।
विष्णुर्नारीस्वरूपः स तिरोभावं ययौ तदा ॥८८॥
देवताः सुप्रसन्नाश्च जाता हुण्डस्य नाशनात् ।
अथाऽब्धिमथने जाता चतस्रः कन्यकाः पुरा ॥८९॥
अलक्ष्मीर्वारुणी कामोदा च लक्ष्मीश्चतुर्थिका ।
उद्दालकाय चाऽलक्ष्मीर्दत्ता तदाऽब्धिना ततः ॥९०॥
वरुणाय च वै देवी वारुणी त्वब्धिनाऽर्पिता ।
कामोदा विष्णवे दत्ता तुलसी या भविष्यति ॥९१॥
लक्ष्मीश्च विष्णवे दत्ता वैकुण्ठसहवासिनी ।
कामोदा सा त्वब्धिपुत्री सुधोत्था नारदात् खलु ॥९२॥
शुश्राव विष्णोर्मानुष्ये जन्म भावि पुनः पुनः ।
कामोदा चाऽसहमाना विष्णोर्वियोगमेव सा ॥९३॥
रुरोद वै मुहुर्गंगामूले गत्वा तदैकला ।
रोदनात् खलु जातानि रक्तपुष्पाणि तानि वै ॥९४॥
तत्पूजोत्थफलं दैत्यमरणं समजायत ।
कामोदाया हास्यहेतुं शृणु तत्कथयामि वै ॥९५॥
यदा सा तुलसीरूपा तदा विष्णोः प्रपूजने ।
निजपत्राणि दत्त्वैव चोपयुक्ता भविष्यति ॥९६॥
तया सह जगन्नाथो रमिष्यति सदैव हि ।
स्मृत्वैवं हसति कन्या कामोदा वै क्वचित् क्वचित् ॥९७॥
मञ्जरी हास्यजन्या च बोद्धव्या तुलसीभवे ।
तुलस्याः पत्रमेकं वा मञ्जरीं विष्णवेऽर्पयेत् ॥९८॥
ब्रह्मणे शंकरायाऽपि तदेष्टफलभाग् भवेत् ।
इतीत्थं पुष्पपूजोत्थफलं बोध्यं शुभावहम् ॥९९॥

कपिञ्जल तथा नारी कामोदा रोदनान्विता ।
हास्यान्विता च पुष्पाणामुत्पादिका प्रदर्शिता ॥१००॥
विहुण्डः पुण्यहर्ताऽपि तुभ्यं मया प्रदर्शितः ।
एवं विष्णुरूपगुरोस्तीर्थयोगेन तूलसी ॥१०१॥
सदा पूज्या च कामोदा तत्पुष्पं पूज्यतेऽपि च ।
पुष्पैश्च पूज्यते देवमण्डलं सर्वदा सुत ॥१०२॥
गुरुतीर्थं महत्प्रोक्तं भुक्तिमुक्तिप्रदं सदा ।
विहुण्डो नाशमापन्नो ययौ कैलासमेव सः ॥१०३॥
शंभुतीर्थस्य योगेन हुण्डोपि नृपयोगतः ।
स्वर्गं गतो हि तस्माद्वै गुरुतीर्थं विशिष्यते ॥१०४॥
कुञ्जलः कथयित्वैवं विरराम निजान् सुतान् ।
च्यवनस्तु तदा लक्ष्मि श्रुत्वा पप्रच्छ पक्षिणम् ॥१०५॥
को भवान् वर्तते चात्र दिव्यज्ञानी विहंगम ! ।
पक्षी प्राह पुरा चाऽहं कश्यपस्य कुलस्य वै ॥१०६॥
विद्याधरस्य वै पुत्रो धर्मशर्मा हि नामतः ।
मूर्खोऽहमभवं पूर्णः कदाचिन्मद्गृहं प्रति ॥१०७॥
सिद्धायनो महर्षिश्च साधुस्तत्र समागतः ।
मया प्रसेवितः सोऽपि ज्ञानं मह्यं ददौ शुभम् ॥१०८॥
आशीर्वादं प्रददौ मे सिद्धायनः स वै ऋषिः ।
निःसंगो निःस्पृहो भूत्वा चैकान्तस्थानसंश्रयः ॥१०९॥
सर्वप्रकाशको ज्ञानी सर्वदर्शी भविष्यसि ।
एकस्थानस्थितश्चापि वेत्स्यसि त्वं त्रिलोकजम् ॥११०॥
एवं गुरोः प्रसादेन वेद्मि सर्वं त्रिलोकजम् ।
भवन्तं च्यवनं वेद्मि सद्गुरुं मोक्षदं परम् ॥१११॥
कीरभावे कारणं च मम वच्मि निशामय ।
संसर्गाज्जायते पापं संसर्गात् पुण्यमित्यपि ॥११२॥
मया क्रीतः शुकशिशुस्तस्य मुग्धोऽभवं सदा ।
मामेवं वदति सोऽपि तात मामेहि चाऽऽस्यताम् ॥११३॥
स्नानं गच्छ महाभाग देवानर्चय चेत्यपि ।
तस्य वाक्यविनोदेन विस्मृतं धर्मकर्म मे ॥११४॥
अथ वाटीं गतश्चाऽहं शाकाद्यर्थं तदा गृहे ।
बिडालेन हतः पक्षी मयाऽऽगत्य विलोकितः ॥११५॥
अतिदुःखेन तत्पश्चान्मृतोऽहं शुकभावनः ।
मरणे शुकभावोऽहं शुकजन्मगतोऽभवम् ॥११६॥
जातिस्मरो भवाम्यत्र सिद्धायनप्रतापतः ।
नास्ति तीर्थं गुरुसमं ज्ञाने मोक्षे हि सर्वथा ॥११७॥
स्थलजादुदकाद् बाह्यं मलं नश्यति नाऽन्तरम् ।
गुरुतीर्थात् पूर्वजन्मकृतं मलं विनश्यति ॥११८॥
संसारे तारणायैव जंगमं तीर्थमुत्तमम् ।
अथाऽहं तर्तुमिच्छामि गुरो च्यवन तारय ॥११९॥
इत्युक्त्वा पक्षिराट् पुत्रसहितो भार्यया युतः ।
पादयोरागतश्चापि च्यवनस्य महात्मनः ॥१२०॥
च्यवनो भगवन्नाममन्त्रं ददौ शुकाय वै ।
जलं च पाययामास कृष्णनाम्नाऽभिमन्त्रितम् ॥१२१॥
पक्षिणस्ते गुरुं नत्वा स्मृत्वा नारायणं च माम् ।
देहाँस्त्यक्त्वा पार्षदा मे भूत्वा वैकुण्ठमाययुः ॥१२२॥
दिव्यं तं सद्गुरुं तीर्थं लब्ध्वा मोक्षं ययुर्यतः ।
सर्वतीर्थोत्तमं तीर्थं गुरुतीर्थं भवत्यपि ॥१२३॥
नरो नारी मोक्षदात्री गुर्वी तीर्थस्वरूपिणी ।
वधूर्वा चाऽधवा चापि भक्ता वै मोक्षदायिनी ॥१२४॥
तां समाश्रित्य मुक्तिं वै प्रापणीया हि शाश्वती ।
साध्वी देवी सेवनीया वधूभिः पापनाशिनी ॥१२५॥
ब्राह्मी ब्रह्मप्रिया चापि हरिप्रिया पतिव्रता ।
साधुः सत्पुरुषश्चापि सद्गुरुश्च हरिप्रियः ॥१२६॥
भुक्तिमुक्तिप्रदश्चापि सेवनीयः सदा जनैः ।
पठनाच्छ्रवणाल्लक्ष्मि चास्य मोक्षो भवेद् ध्रुवः ॥१२७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरुतीर्थे नहुषकथानकं कुञ्जलशुककथानकं कामोदाकथानकं च्यवनकथानकं चेत्यादिनिरूपण-नामा द्वापञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि ! यत्कृत्वाऽऽत्मा विशुद्धयति ।
वधूस्त्वाः सर्वथा शुद्धिं प्राप्य प्रेयुः परं पदम् ॥ १ ॥
गुरुं ब्रह्मस्वरूपं वै विद्याच्छ्रीपरमेश्वरम् ।
गुर्वीं लक्ष्मीस्वरूपां च विद्यात् सेवेत तां वधूः ॥ २ ॥
मानावमानौ द्वावेतौ तौ बोध्यौ वै विषाऽमृते ।
अवमानोऽमृतं तत्र सम्मानो विषमेव यत् ॥ ३ ॥
गुरोर्मानं विधातव्यं स्वस्या अमानमेव तु ।
या वधूर्वर्तते नित्यं निर्मानां मानदा तदा ॥ ४ ॥
सा लभेत सदा मानं मान्या भवति योषिताम् ।
सेवया वशमायाति सिंहोऽपि च ग्रहोऽपि च ॥ ५ ॥
सेवावृत्तिर्गुरूणां हि वशकर्त्री वधूकृते ।
पुत्र्या वध्वा च किंकर्या दास्या च भृत्ययाऽपि च ॥ ६ ॥
समाश्रितयाऽऽगन्तुकया सेवया साध्यतेऽखिलम् ।
राज्ञी गुर्वी शिक्षिका वा देवी गौः राक्षसी च वा ॥ ७ ॥

सेवया स्वाधीनभावा जायते श्रीः सती रमा ।
गुरुसेवा महच्छस्त्रं वशकार्ये सहायदम् ॥ ८ ॥
तस्मादाचारबध्वा वै श्वश्रूः सेवा ह्यमानया ।
पत्युः सेवा देवसेवा श्वश्वाश्चाज्ञाप्रपालनम् ॥ ९ ॥
गृहसेवाऽपत्यसेवा बध्वाः पञ्चव्रतानि वै ।
अक्रोधो गुरुशुश्रूषा शौचं वृद्धाभिसेवनम् ॥१०॥
पत्यर्थे चापि सर्वस्वं वध्वास्ते नियमा मताः ।
वध्वा गृहक्रिया यज्ञश्चातिथ्यर्हा सुरार्चनम् ॥११॥
कान्तप्रसन्नताभक्तिः, सन्ध्या श्वश्रूप्रसन्नता ।
स्नानं तु पतिसेवात्म यमाः धर्मार्थसाधकाः ॥१२॥
सदाचाररता शान्ता स्वधर्मपरिपालिका ।
सर्वान् लोकान् विनिर्जित्य ब्रह्मलोकं प्रयाति सा ॥१३॥
गुरूपदेशयुक्तानां वृद्धानां क्रमवर्तिनाम् ।
अभ्युत्थानादिकं सर्वं प्रणामं वन्दनं चरेत् ॥१४॥
अष्टांगैर्वा च पञ्चांगैः प्रणिपातेन पादयोः ।
त्रिःप्रदक्षिणयोगेन वन्द्या गुर्वी सतीव्रता ॥१५॥
ज्येष्ठा सर्वा वन्दनीया वृद्धा वन्द्या पुनः पुनः ।
आज्ञाभंगं न कुर्वीत यदीच्छेत् सिद्धिमात्मनः ॥१६॥
दुष्टायोगगुहारण्यं क्षुद्रमन्त्रोपसेवनम् ।
विषग्रहविडम्बादीन् वर्जयेत् सर्वयत्नतः ॥१७॥
कैतवं वित्तशाठ्यं च पैशुन्यं वर्जयेत् सती ।
अतिहास्यमतिमानं लीलां लज्जाविवर्जिताम् ॥१८॥
स्वेच्छाविहारमेतान् वै वर्जयेद् गुरुसन्निधौ ।
तद्वाक्यप्रतिकूलं चाप्ययुक्तं चापि नो वदेत् ॥१९॥
अनिष्टं न स्मरेत् क्वापि कलहं न स्मरेत् क्वचित् ।
आक्रोशं न प्रकुर्वीत वैमनस्यं न चाचरेत् ॥२०॥
रसपात्राणि सर्वाणि पाकपात्राणि वै पदा ।
भोज्यपात्राणि वस्त्राणि न स्पृशेन्नापसारयेत् ॥२१॥
यज्ञपात्राणि पूजाया द्रव्यपात्राणि वै तथा ।
पवित्रयोग्यपात्राणि गृहवस्तूनि यानि च ॥२२॥
मार्जनीं चुल्लिकां वह्निं फलशाकानि यानि च ।
पेयपात्राणि सर्वाणि शृंगारस्य द्रवाणि च ॥२३॥
पुस्तकादीनि दर्भांश्च पुष्पपात्राणि कज्जलम् ।
हेतीन् भूषाश्चाम्बराणि प्रसाधनानि यानि च ॥२४॥
भक्ष्यभोज्यानि लेह्यानि चारनालानि यानि च ।
वेद्यवारादिपात्राणि काष्ठाद्यासनकानि च ॥२५॥
वधूः पदा स्पृशेन्नैव पदा नैवाऽपसारयेत् ।
देवद्रोहं गुरुद्रोहं श्वश्वादिद्रोहमित्यपि ॥२६॥
ग्रामद्रोहं सतां द्रोहं नैव कुर्यात् कदाचन ।
उद्धृताऽनुष्णफेनाभिः पूताभिर्वस्त्रचक्षुषा ॥२७॥
अद्भिः समाचरेत् सर्वं वर्जयेत् कलुषोदकम् ।
गन्धवर्णरसैर्दुष्टमशुचिस्थानसंस्थितम् ॥२८॥
पङ्काऽश्मदूषितं चैव सामुद्रं पल्वलोदकम् ।
सशैवालं तथाऽन्यैर्वा दोषैर्दुष्टं विवर्जयेत् ॥२९॥
जलाहरणपात्रे वा हण्डे गर्गरिकामुखे ।
क्षिप्त्वाऽञ्जलिं मुखं पादौ क्षालयेन्न कदाचन ॥३०॥
उद्धृत्याऽधिकवार्यूर्ध्वं चोच्छिष्टं न क्रियात्तथा ।
मुखे स्पृष्टं पानपात्रं जलपात्रे न मज्जयेत् ॥३१॥
अप्रक्षाल्य करौ भोज्यवस्त्वादीनि स्पृशेन्न वै ।
परिवेषणकार्यादि कुर्यान्नाऽक्षालितैः करैः ॥३२॥
पाककार्ये नैव कुर्यादशुद्धिवस्त्रधारिणी ।
अग्निना च रसानां च शुद्धिं कुर्यात् सदा वधूः ॥३३॥
तृणकाष्ठादिवस्तूनां दृष्ट्या च क्षरणेन च ।
जलस्याऽभ्युक्षणेनाऽपि शुद्धिं कुर्यात् वधूः सदा ॥३४॥
मुशलोलूखलस्यापि शुद्धिं कुर्याद्धि वारिणा ।
वस्त्रादिना मार्जनेन शृंगाऽस्थिदारुशोधनम् ॥३५॥
द्रव्याणां संहतानां तु शोधनं प्रोक्षणेन वै ।
अभुक्तराशिधान्यानां त्वेकदेशादिदूषणे ॥३६॥
तावन्मात्रं समुद्धृत्य प्रोक्षयेद्वै कुशांभसा ।
शाकमूलफलादीनां क्षालनेन हि शोधनम् ॥३७॥
स्निग्धानां मार्जनेनैव रूक्षाणां तु जलादिना ।
मार्जनेन गृहशुद्धिमुल्लेखनेन वा तथा ॥३८॥
लेपनेन क्वचिद् वारिप्रोक्षणेन च वायुना ।
गोनिवासेन शुद्धिं च धरायाः संविधाऽऽचरेत् ॥३९॥
भूमिस्थमुदकं शुद्धं निर्मलं मेध्यगन्धितम् ।
वत्सः शुचिः प्रस्रवणे दोहने प्रसवेऽपि च ॥४०॥
फलपाते तु शकुनिः रतौ भार्यामुखं शुचि ।
पण्यं प्रसारितं शुद्धं वायुना किरणेन च ॥४१॥
शुचिराकरजं सर्वं श्वमुखं च मृगग्रहे ।
छाया च विप्रुषो विप्राः सन्तः साध्व्यश्च मक्षिकाः ॥४२॥
रजो भूर्वायुरग्निश्च बालं मेध्यानि स्पर्शने ।
मैथुने च मलत्यागे ह्यमेध्यस्पर्शने तथा ॥४३॥
रजस्वलादिस्पर्शे च स्नानाच्छुद्धिरुदाहृता ।
वैद्यो विश्वसिता शुद्धो भृत्यः शुद्धः सदा मतः ॥४४॥
गृहन्य पशवो बालाः पक्षिणश्च गृहांगणम् ।
चत्वरो वेदिका वृक्षाः कपाटं छत्रमित्यपि ॥४५॥

दोला खट्वा गेन्दुकादि शकटं मार्जनी तथा ।
पेषणी पट्टिका सोपानानि कीलकमित्यपि ॥४६॥
शृंखला पशुरज्जवश्च जलरज्जुश्च नाडिकाः ।
हण्डाधानी यष्टिका मत्सरदानी च पुत्तली ॥४७॥
लेखिनी पुस्तिका दीपः प्रतिमा व्यजनस्तथा ।
भूषापात्रं वस्त्रपेटी घृततैलादिपात्रकम् ॥४८॥

गवाक्षं चन्द्रशाला च धनधानी नृपस्तथा ।
साधुर्यतिर्ब्रह्मचारी गुरुः शुद्धाश्च गौः सदा ॥४९॥
वायुना चातपेनापि स्वभावेन हि पावनाः ।
दीक्षिताः कथकाश्चापि कर्मठाः पावनाः सदा ॥५०॥
खले धान्यं सदा शुद्धं समाजे मानवास्तथा ।
उत्सवे च स्त्रियः शुद्धाः कन्याः शुद्धाः सदा मता ॥५१॥

नैष्ठिकानां नृपाणां च राज्ञीनां गुरुयोषिताम् ।
मण्डलीनां नृत्यगीतकर्त्रीणां दासयोषिताम् ॥५२॥
बालरक्षाप्रकर्त्रीणां सैरन्ध्रीवारयोषिताम् ।
शुद्धिर्वै सर्वदा बोध्या नाव्यवाद्यज्ञयोषिताम् ॥५३॥
सत्ये युगे सदा नार्यः शुद्धाश्चार्तववर्जिताः ।
युगान्तरेषु मासान्ते राजस्वल्येन पाविताः ॥५४॥

शुद्ध्यन्ति सर्वदा नार्यः स्नानेन च व्रतेन च ।
रजस्वला स्पृशेन्नैव रजस्वलां हि यत्नतः ॥५५॥
दिने चतुर्थके स्नात्वा पतिं देवं हि सेवयेत् ।
चतुर्थ्यां सेवने रात्रौ त्वल्पायुः सम्प्रसूयते ॥५६॥
विद्याहीनं दरिद्रं च पित्रसन्तोषकारकम् ।
पञ्चम्यां सेवने कन्यां षष्ठ्यां पुत्रं प्रसूयते ॥५७॥
सप्तम्यां सेवने कन्यामष्टम्यां सूयते सुतम् ।
नवम्यां सेवने कन्यां दशम्यां पण्डितं सुतम् ॥५८॥
एकादश्यां सुतां द्वादश्यां धर्मवत्सुतं शुभम् ।
त्रयोदश्यां जडां कन्यां चतुर्दश्यां सुतं वरम् ॥५९॥

पञ्चदश्यां धर्मिकन्यां षोडश्यां ज्ञानपारगम् ।
प्रसूयते ततः शुद्धाः भूत्वा सेवेत वै पतिम् ॥६०॥
राजस्वल्ये तु चाण्डालं मलिनं सूयते सदा ।
पतितीर्थप्रतापेन प्रजा शुद्धा भवेत् स्त्रियाः ॥६१॥
यादृशं पतितीर्थं स्यात् प्रजा भवति तादृशी ।
क्षेत्रं चापि भवेद् दुष्टं दुष्टा प्रजा प्रजायते ॥६२॥
मनःशुद्धिर्यादृशी स्यात्प्रजा भवति तादृशी ।
तत्त्वशुद्धिर्यादृशी वै तात्त्विकी शुद्धिरेव सा ॥६३॥
शुद्धिः स्वयं शुद्धिरूपा वर्तते शुद्धपात्रके ।
अशुद्धे पात्रके शुद्धिः शुद्धित्वं प्रजहाति वै ॥६४॥

अपात्रे खलु संस्काराः संस्कारत्वं जहत्यपि ।
पार्थिवे वर्ष्मणि देवा देवत्वं च जहत्यपि ॥६५॥
निकृष्टस्य गृहे सत्याः सतीत्वं वै विलीयते ।
आसुराणां गृहे देव्या देवीत्वं नश्यति ध्रुवम् ॥६६॥
कौलिकस्य गृहे राज्ञ्या राज्ञीत्वं नैव तिष्ठति ।
बध्वा परगृहे नैव पातिव्रत्यं प्ररक्ष्यते ॥६७॥

गणिकाया गृहे नैजे सतीत्वं नैव तिष्ठति ।
नास्तिक्या भक्तिमत्त्वं च भक्ताया नास्तिकत्वकम् ॥६८॥
नैव तिष्ठति वै क्वापि तस्मात् पतिप्रिया भवेत् ।
पतिव्रता भवेद् ब्रह्मप्रिया भवेद्धरिप्रिया ॥६९॥
नारायणप्रिया नारी सत्संगिनी भवेत् सदा ।
साधुप्रिया भवेन्मोक्षे न त्वसाधुप्रिया क्वचित् ॥७०॥

धर्मप्रिया भवेन्नित्यं नाऽधर्मादिप्रिया भवेत् ।
व्रतप्रिया भवेत् साध्वी नाऽनाचारप्रिया भवेत् ॥७१॥
देवप्रिया भवेद् देवी नाऽसुराणां प्रिया भवेत् ।
शीलप्रिया भवेच्छश्वन्न त्वशीलप्रिया भवेत् ॥७२॥
शौचप्रिया भवेन्नित्यं न त्वशौचरतिर्भवेत् ।
तपःप्रिया भवेद्दान्ता न त्वतपःप्रिया भवेत् ॥७३॥

हरिप्रिया भवेन्नित्यं न तु हारिप्रिया भवेत् ।
ब्रह्मप्रिया भवेन्नित्यं भ्रमप्रिया न वै भवेत् ॥७४॥
कृष्णप्रिया भवेन्नित्यं चात्मप्रिया तथा भवेत् ।
मुक्तिप्रिया भवेन्नित्यं भुक्तिप्रिया न वै भवेत् ॥७५॥

विभुप्रिया भवेन्नित्यं चाऽल्पप्रिया न वै भवेत् ।
देहिप्रिया भवेन्नित्यं देहप्रिया न वै भवेत् ॥७६॥
परप्रिया भवेन्नित्यं नाऽपरस्य प्रिया भवेत् ।
परपुंसः प्रिया स्याच्च नाऽपरस्य प्रिया क्वचित् ॥७७॥
परः पुमान् हरिः कृष्णो नारायणः परेश्वरः ।
अनादिश्रीकृष्णनारायणस्तस्य प्रिया भवेत् ॥७८॥

पतिर्नारायणः साक्षात् तस्य प्रिया सदा भवेत् ।
आत्मनैव प्रिया स्याद्वै नैव देहादिभिः क्वचित् ॥७९॥
सैषा ब्राह्मी स्थितिर्लक्ष्मि ब्रह्मप्रियाविभाविनी ।
ब्राह्मी शुद्धिश्श्रेयमेव तां प्राप्य मयि मोदते ॥८०॥
बध्वा बधूदशायां सा प्रापणीया विवर्धिनी ।
हरेर्योगस्य सेवायाः प्रदायिनी प्रमोक्षिणी ॥८१॥
अशुद्धो देह एवाऽसाविन्द्रियाणि तथा च वै ।
इन्द्रियार्था अशुद्धाश्च मायिका मोहमात्रकाः ॥८२॥
वृत्तयोऽपि तथा बोध्या अशुद्धा वै तदुत्थिताः ।
भोगाश्चापि तथा बोध्याः फलं चाशुद्धमेव च ॥८३॥

वासनाऽपि ह्यशुद्धा च तृष्णेहाश्च तथाविधाः ।
प्रवृत्तयश्च कार्याणि ह्यशुद्धानि भवन्ति वै ॥८४॥
गुणाश्चापि तथा नित्यमशुद्धा निरयप्रदाः ।
अशुद्धं सर्वमेवैतत् का शुद्धिस्तत्र लभ्यते ॥८५॥
शुद्धश्चैकः स्वयमात्मा परमात्मसमन्वितः ।
परमात्मगतां दिव्यां शुद्धिमिच्छेत् समर्पणैः ॥८६॥
यथा स्वर्णस्य योगेन पित्तलं स्वर्णसदृशम् ।
स्वर्णमूल्येन राजेत पित्तदेहोऽपि वै तथा ॥८७॥
हरेर्योगेन सौवर्णो हिरण्मयः पुमान् भवेत् ।
इन्द्रियाणि समस्तानि चेन्द्रवारुणिकारसैः ॥८८॥
मिश्रितानि हरौ तानि त्वर्पितानि मधूनि वै ।
प्रजायन्ते हि दिव्यानि शाश्वतिकानि पद्मजे ॥८९॥
शाश्वतं स्वरूपं नैजं कृष्णयोगेन बुद्ध्यते ।
शाश्वतानन्दममृतं कृष्णकान्तेन लभ्यते ॥९०॥
मायापुत्राः पुरा लक्ष्मि वेधसा वै त्रयोदश ।
आकूतयः पञ्च पञ्च चितयो मन इत्यपि ॥९१॥
अहंकारस्तथा बुद्धिः प्रेरिता वै प्रजेप्सया ।
सर्वे चाऽदृश्यदेहास्ते ह्युक्ताः सृजत वै प्रजाः ॥९२॥
ततस्ते नाऽभ्यनन्दन्त तद्वाक्यं परमेष्ठिनः ।
त्यक्त्वा चाऽऽज्ञां निजं कर्म दोषं दृष्ट्वा हि कर्मसु ॥९३॥
जुगुप्सन्तश्च कर्माणि व्यरमन्त हि सुष्ठितः ।
अर्थं धर्मं च कामं च हित्वा ते निष्क्रियाः खलु ॥९४॥
अजन्म कांक्षमाणास्ते चाऽप्रवृत्ताः व्यवस्थिताः ।
तेषां तु तमभिप्रायं ज्ञात्वा ब्रह्मा तु कोपितः ॥९५॥
प्राह तान् वै मया यूयं प्रजासर्गे नियोजिताः ।
प्रसूयध्वं यजध्वं चेत्युक्ता मया पुरा ततः ॥९६॥
मम वाक्यमनादृत्य सन्ततिं नाभ्यनन्दथ ।
तस्माद् यूयं कर्मशीला भवथेति सदा शपे ॥९७॥
इति शप्ता ब्रह्मणा ते कर्मशीलास्ततोऽभवन् ।
त्रयोदशैव ते नैजे व्यापारे विपुले सदा ॥९८॥
प्रवर्तन्ते दिवारात्रौ निवर्तन्ते न वै क्वचित् ।
जया नाम सुरास्ते वै सर्वे भिन्नप्रवृत्तयः ॥९९॥
त एव तुषिता बोध्याः सत्यास्त एव सन्ति च ।
हरयश्चापि वैकुण्ठाः साध्या आदित्यका अपि ॥१००॥
तान् सदा चाऽर्पयेल्लक्ष्मि ! नारायणे परेश्वरे ।
मयि तेन हि चादित्या मोक्षदाः संभवन्ति ते ॥१०१॥
गुर्वर्पणं हि देवानां क्रियाणां कारयेत् सती ।
वृत्तीनां चापि तेषां च व्यापाराणां समर्पणम् ॥१०२॥
गुरौ मयि प्रकर्तव्यं तेन दिव्या भवन्ति ते ।
ब्रह्मधामप्रदाः सर्वे रहस्यं कथितं तव ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वेधसः वधूगीतायां गुरुरहस्यसदाचारकथननामा त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणुनारायणीश्रि त्वं गुरोर्बलं महत्तमम् ।
महापापातिपापानां नाशकं परमोज्ज्वलम् ॥ १ ॥
जालन्धरे महापीठे देशे दासक्रियापरम् ।
खशजातिकुटुम्बं वै न्यवसन्मामके पुरे ॥ २ ॥
विष्णुदासो हि नाम्नाऽभूत् खशो धर्मपरायणः ।
अनिवेद्य विष्णवे च गुरवेऽप्यनिवेद्य सः ॥ ३ ॥
नैव भुंक्तेऽन्नवस्त्रादि फलं जलाद्यपि क्वचित् ।
विष्णुदासस्य वै तत्र गुरुर्मोक्षपरायणः ॥ ४ ॥
साधुर्नाम्ना ऋषिधर्मो मोक्षदो भक्तिकारकः ।
नित्यं त्रिषवणस्नायी त्रिकालदेवताऽर्हणः ॥ ५ ॥
व्यवस्थापरवृत्तिश्च त्रिगुणक्लेशवर्जितः ।
अयाचितान्नपत्रादिवृत्तिर्दिगम्बरः सदा ॥ ६ ॥
नदीतीरे कृतावासो वृक्षाऽधो निर्जने स्थितः ।
नित्यं वै भजते नारायणं मां पुरुषोत्तमम् ॥ ७ ॥
द्वन्द्वसहिष्णुरेवाऽयं रागद्वेषविवर्जितः ।
निरीहोऽप्यतिनिष्कामो वृद्धो दोषविवर्जितः ॥ ८ ॥
वाक्सिद्धश्चापि मौनी च जयत्येव च मां सदा ।
आर्ताश्चायान्ति चार्तानां नाशार्थे शरणं यदा ॥ ९ ॥
आशीर्वादैर्जलदानैः रजोदानैर्व्यपोहति ।
दुःखानि शरणार्थिनां परोपकारभूषणः ॥१०॥
लोकाः फलानि वस्त्राणि मिष्टान्नानि धनानि च ।
अग्रे समर्प्य तिष्ठन्ति प्रयान्ति तं प्रपूज्य च ॥११॥
साधुर्वस्तूनि नैवाऽयं स्पृशति नापि पश्यति ।
अन्ये तु भिक्षुका यद्वा पशवो वा हरन्ति च ॥१२॥
निर्मोहो निर्ममश्चाऽयं वर्तते चाप्यमायया ।
एवंविधं गुरुम् ऋषिधर्मं खशो निषेवते ॥१३॥
खशपत्नी रामणी च सेवते मार्जनादिभिः ।
पत्रपुष्पाद्यर्पणैश्च पादसंवाहनादिभिः ॥१४॥
खशस्याऽऽसीत् कन्यका च नाम्ना लीलावती शुभा ।
द्वादशाब्दा हि साधोः सा सेवायां वर्तते सदा ॥१५॥

देवार्थं पुष्पवल्लीनां जलसेकादिकर्मणि ।
श्रद्धावती भक्तिमती भक्तानां स्वागतादिषु ॥१६॥
सा चाऽज्ञानवशा कन्या वृक्षेषु जलसेचने ।
बिलवासां मूषिकां सापत्यां ददर्श निर्गताम् ॥१७॥
बालभावेन कन्या सा धृत्वाऽपत्यानि तानि च ।
दूरं गत्वा निचिक्षेप बालान् मातृवियोजितान् ॥१८॥
मूषिका भयमापन्ना तृणपुंजान्तरे स्थिता ।
स्वल्पान् बालानाददाना कन्यां शशाप वै तदा ॥१९॥
मद्वियुक्ताश्च मे बाला यथा दुःखगतास्तथा ।
भवती पितृमात्रादिवियुक्ता दुःखिनी भव ॥२०॥
मूषिकायास्तु शापोऽयं दारुणो वै व्यजायत ।
दिनान्तरे च तत्पाकफलं प्राप्तं हि कन्यया ॥२१॥
कन्या सायं गुरुं संसेव्य गृहं याति यावता ।
मार्गे म्लेच्छो युवा कश्चित्प्राप्तो जग्राह कन्यकाम् ॥२२॥
रोरूयमाणां शीघ्रं तां निनाय बलवान् वनम् ।
वनाद् वनान्तरं रात्रौ दूरदेशं गतोऽभवत् ॥२३॥
म्लेच्छेन स्वगृहे दासी कृता सा कन्यका खशी ।
मद्यं वै पायितं चापि मांसं च भोजितं तथा ॥२४॥
व्यवायितं तथा पापं हिंसादि कारितं मुहुः ।
म्लेच्छकर्म समस्तं वै कारितं तेन कन्यया ॥२५॥
म्लेच्छी सा ह्यबला चाप्यज्ञाताऽरण्यस्य मार्गकम् ।
नैव जानाति वै नित्यं शोचत्येव गृहागमम् ॥२६॥
अथैकदा पुरे म्लेच्छोत्सवोऽभवद् विवाहजः ।
तत्राऽऽययुर्गायिकाश्च गणिकाश्चोत्सवे तदा ॥२७॥
सैषा खशी सुरूपा च गणिकाः समलोकयत् ।
दासीभावेन ताम्बूलं ददाति नर्तनादिषु ॥२८॥
नियोजिता हि म्लेच्छेन गणिकासेवनं व्यधात् ।
गणिका तां समपृच्छत् क्व ते माता पिता सुते ॥२९॥
खशी श्रुत्वा जगादैव सर्वं वृत्तान्तकं निजम् ।
भावं ज्ञात्वा गमनस्य हरणार्थं मनो व्यधात् ॥३०॥
विश्वासं सम्प्रदायैव संकेतं चाऽकरोत् ततः ।
अथ कालान्तरे संकेतानुसारेण कन्यकाम् ॥३१॥
म्लेच्छगृहाद्धि निष्कास्याऽप्रापयद् गणिका गृहम् ।
गणिकायाः शुभा दासी ततोऽभवद्धि कन्यका ॥३२॥
व्यवायादौ प्रवृत्ता चाऽभवद्धर्मविवर्जिता ।
महापापातिपापानि करोति गणिकावशा ॥३३॥
अथ कालान्तरे रुग्णाऽभवद्वै गणिका ह्यति ।
उदरेन्द्रियरोगार्ताऽभक्ष्यचौषधान्यपि ॥३४॥
नैवाऽऽरोग्यं लभते वै गणिका सा शुशोच ह ।
कथं रोगो भवेद् दूरं भगन्दरात्मको मम ॥३५॥
दासी खशी तदोवाच गुरुर्मेऽस्ति महान् प्रभुः ।
समर्थो रोगनाशाय वाक्सिद्धिस्तत्र याहि वै ॥३६॥
श्रुत्वैवं गणिका ज्ञात्वा वृत्तान्तं तु गुरोः शुभम् ।
सज्जा बभूव सहसा द्रव्यखशीसमन्विता ॥३७॥
अन्या दासीश्च गणिका भाण्डाँश्च पुरुषानपि ।
आदाय गणिकाऽरण्यमुल्लंघ्य यत्र राजते ॥३८॥
साधुस्तत्र नदीतीरे समायाताऽतिभावतः ।
खशी लीलावती चाऽतिप्रसन्नाऽभूद्धृदन्तरे ॥३९॥
साधुं ननाम भावेन प्राप्ता स्वं पितरं यथा ।
गुरुं देवं प्रणम्यैव वृत्तान्तं स्वं न्यवेदयत् ॥४०॥
गणिकायाश्च वृत्तान्तं रोगनाशार्थकं ह्यपि ।
न्यवेदयत्ततः साधुः प्राह कर्मफलं तदा ॥४१॥
यया यादृक् कृतं पूर्वं तया तादृक् प्रभुज्यते ।
लीलावति ! त्वया बाला मूषिकाया वियोजिताः ॥४२॥
वृक्षाणां वारिदानार्थकाले मूषिकया तदा ।
शप्ता त्वं च वियोगेन पित्रोर्दुःखं गता ततः ॥४३॥
गणिकेयं व्यवायेन रोगं भुंक्ते निकृष्टकम् ।
किन्तु त्वया मम सेवा कृता पूर्वं फलं हि तत् ॥४४॥
कारयामास मे प्राप्तिं पुनश्चाऽस्या मिषेण वै ।
गणिकेयं चातिथीनां सेवापरायणाऽभवत् ॥४५॥
भक्तायास्तव योगेन मद्योगं समुपागता ।
साधुं नयति सत्संगः कुसंगस्तु ह्यसाधुकम् ॥४६॥
दुष्टं कर्म दुःखयति सती सुखयति क्रिया ।
साधुसंगस्तु पुण्येन जायते नान्यथा सुते ॥४७॥
तव पापानि सर्वाणि मार्जये म्लेच्छजानि वै ।
गणिकायाश्च पापानि मार्जये चापि पुत्रिके ॥४८॥
ममाऽत्र सन्निधौ वासं पर्णशालां विधाय वै ।
कुर्वन्त्यत्रैव च व्रतं कायशोधार्थमित्यपि ॥४९॥
इत्युक्तास्ताः समस्ताश्च वृक्षाऽधोभूतले शुभाम् ।
पर्णकुटीं विधायैव वासं चक्रुर्हि सन्निधौ ॥५०॥
एकभुक्तं व्रतं ताभ्यो ददौ च ऋषिधर्मकः ।
पञ्चगव्यं व्रते चाप्यप्राशयद् वै दिनत्रयम् ॥५१॥
ततो मन्त्रान् ददौ लक्ष्मि ! ताभ्यः ऋषिवरः शुभान् ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥५२॥
'कालमायापापकर्मशत्रुयाम्यकुदृग्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥५३॥

'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा'।
'व्राह्मयहं श्रीकृष्णनारायणभक्ताऽस्मि शाश्वती ॥'५४॥
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे'।
इतिमन्त्रान् ददौ कर्णे हस्ते जलं ददौ तथा ॥'५५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा'।
इत्युक्त्वा ऋषिधर्मः स जलं व्यामोचयद् भुवि ॥५६॥
तावत्तत्राऽभवल्लक्ष्मि! महाश्चर्यं च तच्छृणु।
लीलावत्यास्तथा तासां गणिकानां शरीरतः ॥५७॥
समन्ततो नीलवर्णा निर्ययुः काकपक्षिणः।
निर्ययुश्च ततो घूकास्ततश्च मशका अपि ॥५८॥
पिशाचाश्च ततश्चापि कद्रूपाः क्रूरविग्रहाः।
वृक्णाः कृशाः क्षुधिताश्च दुर्बलाः काणखञ्जकाः ॥५९॥
कुष्ठिनश्च जडाश्चान्धा दुर्गन्धा मलसंभृताः।
निर्ययुश्च रुधिराढ्याः सर्वांगविषमास्तदा ॥६०॥
रुरुदुस्ते ऋषिं वीक्ष्य नग्नाः सर्वे निराश्रयाः।
लीलावती गणिकाद्या आपुश्चाश्चर्यमेव च ॥६१॥
तास्तु ऋषिं गुरुं नत्वा पप्रच्छुः के इमे गुरो!।
गुरुः प्राह सुते! सर्वपापानि सन्ति वः खलु ॥६२॥
मया मन्त्रप्रदानेन निष्कासितानि देहतः।
काका इमे श्वपचानां संगजानि ह्यघानि वै ॥६३॥
घूकाश्चेमे गणिकात्वे कृतान्यघानि सन्ति वै।
मशका मद्यपानस्य पापानि सन्ति तानि वै ॥६४॥
पिशाचाश्च भवतीनां मांसाऽशनान्यघानि वै।
तानि सर्वाणि देहेभ्यो युष्माकं निर्गतानि वै ॥६५॥
रुदन्ति तानि सर्वाणि पश्यन्त्विमानि योषितः।
पापान्यपि तदा लक्ष्मि! चक्रुर्वै प्रार्थनां मुनेः ॥६६॥
निराधाराणि सर्वाणि वयं सुदुःखितानि ह।
ऋषे मोक्षं विधेह्यत्र जलदानेन सर्वथा ॥६७॥
श्रुत्वा ऋषिर्निजं पादं दक्षं प्रक्षाल्य तेषु वै।
अञ्जलिना निचिक्षेप गृहीता बिन्दवश्च तैः ॥६८॥
पीताः सर्वे बिन्दवश्च तृप्तान्यघानि वै तदा।
एवमृषिः पुनश्चापि चिक्षेपापि जलाञ्जलिम् ॥६९॥
अथ दिव्यस्वरूपास्ते यथा देवास्तथाऽभवन्।
अथाऽञ्जलिं तृतीयं च चिक्षेप देवतोपरि ॥७०॥
तूर्णं त्र्यक्षा गणाः सर्वे बभूवुः शूलधारिणः।
पापान्यपि पुण्यजना अभवँस्ते सहस्रशः ॥७१॥
सर्वे नराकृतयश्च दिव्यरूपधराः शुभाः।
ऋषेराज्ञां समादाय नत्वा हिमालयं ययुः ॥७२॥
ततो मेरुं ययुः सर्वे पुण्यजना हि तेऽभवन्।
ख्याता देवगणाः सर्वे साधोरेव प्रतापतः ॥७३॥
अथ पापादिशून्याश्च गणिका देवता यथा।
अभवन् दिव्यरूपाश्च ताभ्यः पादजलं ददौ ॥७४॥
ऋषेः पादजलं पीत्वा नीरुग्णा गणिकाऽभवत्।
अन्याश्चापि जलं पीत्वा नष्टसंसारवासनाः ॥७५॥
योगिन्यश्च यथा साध्व्यस्तथा सर्वास्तदाऽभवन्।
रोगा निर्गत्य तूर्णं वै नत्वा कैलासकं ययुः ॥७६॥
सर्वा दीक्षां जगृहुश्च साध्वीनां गणिका हि ताः।
भाण्डाश्च जगृहुर्दीक्षां साधूनां तत्र वै तदा ॥७७॥
'हरे कृष्ण हरे विष्णो हरे नारायण प्रभो।
अनादिश्रीकृष्णनारायणाऽक्षरपते विभो' ॥७८॥
इत्येवं भजनं चक्रुस्तत्राश्रमे च संहिताः।
लीलावत्याः पितरौ च प्राप्य पुत्रीं सुखान्वितौ ॥७९॥
बभूवतुर्हि कमले भक्तौ गुरुप्रतापतः।
साधुदीक्षां जगृहतुः स्वशौ तौ तत्र स सद्गुरोः ॥८०॥
पापनाशात्मिकी वार्ता प्रासरत् सर्वतोदिशि।
मानवाः पापनाशार्थं च्यायुश्चकितास्तदा ॥८१॥
नरानार्यो जगृहुश्च दीक्षां श्रीवैष्णवीम् ऋषेः।
ताः संविधाय मुक्ताँश्च प्रेषयामास चाऽक्षरम् ॥८२॥
शिष्याश्चापि च शिष्यांश्च प्रेषयामास चारक्षरम्।
ऋषेः संकल्पमात्रेण विमानानि चिदम्बरात् ॥८३॥
पार्षदैः सहितान्येव विष्णुमूर्तियुतानि वै।
आगतानि च तान्यारुह्यैव ययुः परं पदम् ॥८४॥
वैकुण्ठवासा अभवन् गणिकाद्या गुरोर्बलात्।
लीलावती तथा तस्याः सख्यः पञ्च तथाऽपराः ॥८५॥
सहस्रशोऽभवन् धाम्नि वैकुण्ठे श्रीहरेर्मम।
सेयं लीलावती तेऽस्ति काशीराजसुताऽधुना ॥८६॥
भगिनी तव चाऽत्राऽऽस्ते ब्रह्मप्रिया विवाहिता।
गणिका सा सुशीलाऽऽस्ते सखी तेऽत्र समुद्रजे ॥८७॥
इत्येवं शिवराज्ञीश्रि मम योगेन निर्गुणः।
ऋषिधर्मो निर्गुणश्च तद्योगेन नराः स्त्रियः ॥८८॥
निर्गुणा एव जायन्ते मुक्ता एव न संशयः।
कामात् क्रोधाद् भयाल्लोभान्मा ये याः पर्युपासते ॥८९॥
मद्भक्तांश्चापि साधूँश्च गुरून् तानुद्धराम्यहम्।
अपि पापा दुराचारा गुरोर्योगेन पावनाः ॥९०॥
जायन्ते धामवासाश्च किमुत व्रतिनां तु मे।
गुरौ वै कृतसर्वस्वा गुरुतीर्थनिषेविणः ॥९१॥

गुरौ विश्वासमापन्नाः प्रयान्ति परमं पदम् ।
गुरुर्देवो गुरुः कृष्णो गुरुर्दीक्षा हि पावनी ॥९२॥
गुरुर्व्रतं गुरुर्दानं गुरुर्यस्या मतो हरिः ।
गुरुतीर्थप्रतापेन भवाऽब्धिं सा तरत्यपि ॥९३॥
प्रयाति परमानन्दं धामाऽक्षरं हि शाश्वतम् ।
मम वासमयं दिव्यं सर्वधामपरं प्रियम् ॥९४॥
सर्वतृप्तिप्रदं सर्वकामनापूरकं पदम् ।
न न्यूनं वर्तते तत्राऽश्नुते भोगान् मया सह ॥९५॥
वध्वो वापि विधवा वा ह्यधवा वा निराश्रिताः ।
गुरुतीर्थं परं प्राप्य मुच्यन्ते भवसागरात् ॥९६॥
पठनाच्छ्रवणाच्चाऽस्य स्मरणात् कथनादपि ।
भुक्तिर्मुक्तिर्दिव्यगतिर्धामप्राप्तिः प्रजायते ॥९७॥
सकामानां स्वर्गलब्धिर्निष्कामानां प्रमोक्षणम् ।
मत्कामानां मम प्राप्तिः पुरुषोत्तमशार्ङ्गिणः ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरुतीर्थे ऋषिधर्ममहर्षेर्योगेन लीलावत्याः सुशीलादीनां च पापानां विगमे ब्रह्मप्रियात्वप्राप्त्यादि-निरूपणनामा चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कथां चान्यां सुपावनीम् ।
गुरुतीर्थमयीं सर्वोद्धारिणीं पापहारिणीम् ॥ १ ॥
सौराष्ट्रे चोपलेष्टायां नगर्यां श्वपची सती ।
रक्षानाम्नी हरिभक्ता सुमरस्य हि भामिनी ॥ २ ॥
अवसत् सकुटुम्बा वै पुर्यां मलापहारिणी ।
मलानां हारिणीत्वात् सा ह्यशुद्धा वर्तते दिने ॥ ३ ॥
मध्याह्ने तु ततः स्नात्वा शुद्धिं कृत्वा स्वहस्तयोः ।
ततो याति गृहं नैजं वृक्षमध्ये विधापितम् ॥ ४ ॥
कृत्वा सा रोटकं नैजं भोजयित्वा पतिं हरिम् ।
शुने दत्वा ततो भुंक्ते रक्षा सन्तोषसद्गुणा ॥ ५ ॥
विचारयति नित्यं सा गृहे स्थिता दशां निजाम् ।
कथं वै मानवेऽप्यत्र श्वपची ह्यभवं न्वहम् ॥ ६ ॥
दारिद्र्यं सर्वदा चास्ते कैंकर्यं सर्वदा तथा ।
मलनिष्कासनं नित्यं ह्यशुद्धिर्नित्यमेव च ॥७॥
तिरस्कारः प्रतिक्षेत्रं चाऽस्पृश्यत्वं च सर्वदा ।
सत्यपि मानवे भावे पाशवं जीवनं मम ॥ ८ ॥
भोजनं दृश्यते नैव लभ्यते न रसान्वितम् ।
अम्बराणि निकृष्टानि शृंगारो लभ्यते न च ॥ ९ ॥
गृहं तु शोभनं नैव भोग्यजातं न विद्यते ।
मानं यशो न चैवाऽऽस्ते धिक् जन्म पापसंभृतम् ॥१०॥
यानं च वाहनं नास्ति धातुपात्राणि सन्ति न ।
विभूषाः सन्ति नैवाऽपि मिष्टान्नं विद्यतेऽपि न ॥११॥
द्रव्यं च नाणकं नास्ति पर्यंको नास्ति शोभनः ।
सुवर्णस्य तु वै स्वप्ने चाशा नास्ति कदाचन ॥१२॥
एवं मे विद्यते सर्वं वैरूप्यं कल्मषं तथा ।
एको गुणो मे श्वपचीज्ञातौ वै विद्यते शुभः ॥१३॥
अस्पृश्यत्वात् परपुंसः स्पर्शो नास्ति कदापि मे ।
पातिव्रत्यं सर्वदाऽस्ति सहजं सर्वतो गुरु ॥१४॥
स्वजातयोऽपि विद्यन्ते दूरे दूरे पुरान्तरे ।
तेषां नाराणां योगोऽपि नैवास्ति स्पर्शनं मम ॥१५॥
एवं मेऽस्ति व्रतं शीलं पुण्यं स्वर्गप्रदं सदा ।
निर्मानता विरागश्च निर्बाधताऽपि विद्यते ॥१६॥
नदी त्वास्ते पार्श्वतो मे स्नानं नित्यं भवत्यपि ।
गृहं वने सदा चास्ते निर्बन्धं वानप्रस्थवत् ॥१७॥
चौराणां तु भयं नास्ति राज्ञां भयं न विद्यते ।
सुखं स्वपिमि पत्या मे साकं सेवापरायणा ॥१८॥
साधूनां पार्श्वमार्गेण यातानां दर्शनं क्वचित् ।
जायते मे भाग्यवशात् सूर्यस्य दर्शनं सदा ॥१९॥
आमध्याह्नं मलहारात्मकं कार्यं न वै ततः ।
दिवसार्धे निशायां च निवृत्तिर्मम विद्यते ॥२०॥
परमेशस्य नाम्नां वै भजनार्थं विशेषतः ।
विद्यते मे समयश्च लाभाः सन्ति तथाविधाः ॥२१॥
ग्रामे महोत्सवे दैवे मानुषे वा प्रवर्तिते ।
प्रसादः प्राप्यते चापि पावनो दैवमानुषः ॥२२॥
तत्रापि मम साफल्यं मनुष्यस्य तु जन्मनः ।
श्वपच्या अपि मे शीलं पातिव्रत्यं परं खलु ॥२३॥
अन्यासां जनमध्ये च ग्रामे वा नरयोषिताम् ।
प्रजास्त्रीणां सहवासो दृश्यते शीलनाशकः ॥२४॥
यत्र नरास्तथा नार्यो निवसन्ति मिथोऽभितः ।
तत्र धर्मो हन्यते वै देशकालबलेन ह ॥२५॥
विवाहितानां नारीणां परपुंस्पर्शनं तथा ।
एकान्तसेवनं चापि धर्मघ्नं निरयप्रदम् ॥२६॥
यासां तथाविधानां वै संकरीणां तु योषिताम् ।
अद्य वै नरकं नास्ति तासां वै नरकं ततः ॥२७॥
जन्मान्तरे भवेदेव इहाऽधर्मप्रयोजितम् ।
मम श्वपचीरूपायाः प्रत्यक्षं नरकं त्विह ॥२८॥

किन्तु धर्मबलेनैव मृत्यूर्ध्वे नरकं न वै।
तस्माच्छ्रेष्ठा गतिश्चास्ते प्रजानारीभ्य उत्तमा ॥२९॥
अस्मृद्धयो विरागाय समृद्धयो बन्धनाय वै।
नैर्जन्यं परलोकाय सौजन्यं बन्धनाय वै ॥३०॥
श्वपच्यहं बन्धशून्या विचरामि सती यथा।
रथ्यां रथ्यां विचरामि साध्वी पतिव्रता यथा ॥३१॥
निर्भया मे स्थितिश्चाऽऽस्ते सुखाढ्या व्याधिवर्जिता।
मार्जयामि मलगर्तान् वैराग्यं च लभाम्यपि ॥३२॥
स्वमलं सर्वलोका वै मार्जयन्ति दिने दिने।
प्रातरुत्थाय सर्वेऽपि क्षालयन्ति निजं मलम् ॥३३॥
नार्यश्चापत्यवत्यश्च क्षालयन्ति हि बालकान्।
गृहमध्ये वस्त्रमध्ये शय्यामध्ये कृतान्यपि ॥३४॥
बालमलानि वै सर्वा निष्कासयन्ति मद्विधाः।
विशेषो मे तथा तासां मलशुद्धौ न विद्यते ॥३५॥
सर्वे वै श्वपचा नैजदेहमलापसारणे।
तस्माच्छ्रैष्ठ्यं ममैवाऽऽस्ते श्वपच्यां निरुपद्रवम् ॥३६॥
राजा स्याद् दुःखभाङ्नित्यं राज्ञी ततोऽपि दुःखिनी।
कारागारनिभे सौधे रुद्धयमाना भटैः सदा ॥३७॥
श्रेष्ठिनार्यो वस्त्रवरुथकैश्छन्नाः प्रयान्ति च।
श्रेष्ठिनोऽपि सभया नो बहिर्यान्ति विना भटैः ॥३८॥
एवं दुःखनिमग्नास्ते साक्षान्नरकं भुञ्जते।
को विशेषोऽस्ति वै तेषां श्वपच्याः सन्निधाविह ॥३९॥
अपि तृष्णा पिशाच्येषां हृदयानि निकृन्तति।
रोगाः साक्षाद् यमदूताः शोषयन्ति धनं वपुः ॥४०॥
भृत्याधीना भृत्यभृत्या जायन्ते धनिनो जनाः।
पारतन्त्र्यं पराशा च नरकौ द्वौ गृहस्थितौ ॥४१॥
स्वातन्त्र्यं च निराशा च स्वर्गौ द्वौ स्वकरस्थितौ।
धन्याऽहं श्वपची शुद्धा तादृग्दोषविवर्जिता ॥४२॥
आजीवनं स्वर्गयुक्ता चान्तेऽपि स्वर्गगामिनी।
हरिणी लभते भोज्यं वनेऽपि फलपत्रवत् ॥४३॥
सिंहिका लभते भोज्यं महारण्येऽपि मांसजम्।
श्रेष्ठिनी लभते भोज्यं स्वाद्वपि रोगसंभृतम् ॥४४॥
श्वपची लभते भोज्यं शुष्कं चापि बलप्रदम्।
धन्याऽहं श्वपची चास्मि महासौख्यसमन्विता ॥४५॥
राजा राज्ञी तथा चान्ये ह्यायुषोऽन्तिमभागके।
सन्यासिनो वानप्रस्था जायन्ते मोक्षसिद्धये ॥४६॥
वने पश्यामि तान् सर्वान् भोगरागविवर्जितान्।
मादृशाँस्तापसान् सर्वान् धन्याऽहं जन्मतस्तथा ॥४७॥
सन्यासिनी सदैवाऽस्मि सदैव पतिदेवता।
सदैव शीलयुक्ता च भवामि श्वपची शुभा ॥४८॥
अहो मे बन्धनं नास्ति नास्ति मे धर्मवर्जनम्।
ग्रामसेवां करोम्यत्र जातियोग्यां हितावहाम् ॥४९॥
साधवो ब्रह्मविज्ञानाः पापिनां पापकल्मषान्।
उपदेशप्रदानेन हृदो निष्कासयन्ति ते ॥५०॥
श्वपची कर्मविज्ञाना मलिनां मलकल्मषान्।
देहसेवाप्रदानेन निष्कासयामि गर्त्ततः ॥५१॥
मलनिष्कासनं कार्यं चोभयोर्वै समं यतः।
सन्यासिनी भवाम्येव कर्मसन्यासिनी यथा ॥५२॥
गुरवः सन्ति लोकेऽत्र मलनाशकराः शुभाः।
अज्ञानमलनाशेन प्रज्ञानं दीपयन्ति ते ॥५३॥
अहं भूत्वा निजा गुर्वी शोकमलं जहाम्यपि।
स्वस्या गुर्वी स्वयं भूत्वा निर्मला विचरामि च ॥५४॥
अहो भाग्यमहो भाग्यं श्वपच्या मम मानवे।
सुखिन्यस्मि सदा चाऽन्याऽपेक्षया कृपया हरेः ॥५५॥
नास्ति मे कलहः कश्चिद् बहूनां संगमे हि यः।
नास्ति मे धर्मभंगश्च बहूनां संगजस्तु यः ॥५६॥
विना वनं वने वासो विद्यते मे सुखावहः।
आत्मशान्तिः सदा चास्ते प्रव्रज्यामन्तराऽपि मे ॥५७॥
धन्याऽहं धन्यपात्रं च सुखपात्रं यदुत्तमम्।
स्वपत्या दीयमानं च सुखं भुञ्जामि सर्वकम् ॥५८॥
यस्या गृहे भवेत् क्लेशो वैमनस्यं नरस्त्रियोः।
नित्यं शंकास्पदत्वं च रौरवं नरकं तु तत् ॥५९॥
यस्य गृहे भवेत् प्रेम सौमनस्यं नरस्त्रियोः।
तथा चाऽनभिशंकित्वमैन्द्रं स्वर्गं पदं हि तत् ॥६०॥
तादृशं स्वर्गमेवाऽत्र विद्यते श्वपचीगृहे।
द्रुमाश्चेमे ममोद्यानो वर्तते च नदी मम ॥६१॥
साध्वीत्वं सर्वमूर्धन्यं वर्तते मम मोक्षदम्।
धन्याऽहं श्वपची तस्मात् सर्वसौभाग्यशालिनी ॥६२॥
एवं वै वर्तमानायाः पार्श्वमार्गेण गच्छतः।
जातं वै दर्शनं साधोर्ब्रह्ममग्नस्य योगिनः ॥६३॥
नाम्ना चैतन्यशीलस्य महासिद्धस्य वै प्रभोः।
रक्षा तूर्णं ययौ सन्तं प्रति मार्गे स्थिताऽभवत् ॥६४॥
अनमद् दूरतः साधुं कृताञ्जलिर्नतानना।
साधुः प्राह सदा शान्तिमती मोक्षवती भव ॥६५॥
दिव्या देवी तथा भूत्वा ब्रह्मप्रिया सदा भव।
हरिभक्ता भव साध्वी साधुसेवाकरी भव ॥६६॥

इत्युक्त्वा चैतन्यशीलो भद्रावतीनदीतटे ।
वृक्षतलेऽतिदूरे च गत्वा ह्युपाविशत् क्षणम् ॥६७॥
नदीजले ततो गत्वा स्नात्वा कृत्वाऽर्हणं हरेः ।
हरये च फलं वारि शर्करां च निवेद्य सः ॥६८॥
श्वपच्यै तत्र यातायै प्रसादं दत्तवान् मुनिः ।
साऽपि प्रसादमासाद्य पतये विनिवेद्य च ॥६९॥
ततश्चखाद शेषं च मत्वा भाग्यं निजं परम् ।
अथ साधुः पादपाऽधो रात्रिवासं व्यधादपि ॥७०॥
शैत्यं च बाधते तस्य वीक्ष्य सा श्वपची ददौ ।
काष्ठानि चाग्निदीप्त्यर्थे साधुर्वह्निमदीपयत् ॥७१॥
मालां चावर्तयच्चापि भजनं प्रचकार ह ।
'हरे कृष्ण हरे विष्णो हरे नारायण प्रभो ॥७२॥
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम' ।
तालिकावादनैः साधुश्चक्रे श्रीनामकीर्तनम् ॥७३॥
श्वपची स्वामिना सार्कं त्वागत्य वृक्षसन्निधौ ।
दूरं निषद्य भजनं तद्विधं प्रचकार सा ॥७४॥
भजनान्ते च साधुं तं पप्रच्छ विनयान्विता ।
कुत आगम्यते साधो क्व निवासोऽपि नित्यदा ॥७५॥
कुत्र संगम्यते चापि कुशलं त्वस्ति सर्वथा ।
साधुः प्राह हरेर्गेहादागम्यतेऽतिदूरतः ॥७६॥
निवासः श्रीहरौ मेऽस्ति गम्यते श्रीहरिं प्रति ।
कुशलं सर्वथा चास्ते गुरुतीर्थप्रसादतः ॥७७॥
रक्षा प्राह शुभं साधो गुरुतीर्थं हि कीदृशम् ।
येन स्यात् कुशलं सर्वं वद मे कृपया मुने ॥७८॥
साधुः प्राह गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्हरः ।
गुरुः स्वामी हरिः साधुर्गुरुर्माता पतिः पिता ॥७९॥
गुरुर्ज्ञानप्रदाता च पापहर्ता गुरुर्महान् ।
गुरुर्मोक्षप्रदाता च निजात्मा परमो गुरुः ॥८०॥
गुरोर्गुरुश्चान्तरात्मा श्रीहरिः परमेश्वरः ।
तदाश्रयेन पापानां ध्वंसो मोक्षोऽपि शाश्वतः ॥८१॥
अपि पापसमाचारः श्वपाकः श्वपचोऽपि वा ।
मद्यमांसाशनश्चापि व्यवायमदिराशनः ॥८२॥
महापापाऽतिपापोऽपि प्रशुद्ध्यति गुरुश्रयात् ।
न व्रतं नैव तीर्थं च प्रायश्चित्तं न तत्परम् ॥८३॥
आप्ता गुरोः कृपा येन सद्यो मुच्येत बन्धनात् ।
गुरोर्मन्त्रं हरेर्नाम्नो गृह्णीयात्पावनं परम् ॥८४॥
पीत्वा गुरोः पदाम्भोजं ध्यात्वा मूर्तिं गुरोर्गुरोः ।
सेवयित्वा गुरुं देवं प्रसादयित्वा तत्क्षणम् ॥८५॥
सर्वस्वं प्रसमर्प्यैव सद्यो मोक्षमवाप्नुयात् ।
साधुर्नौका गुरुर्नौका हरिर्नौका सतीपतिः ॥८६॥
ज्ञानं नौका परानौका भक्तिश्च शरणागतिः ।
रक्षा पप्रच्छ साधुं तं देहि मे शरणागतिम् ॥८७॥
देहि मन्त्रं श्वपच्यै मे स्वामिने श्वपचाय मे ।
चैतन्यशीलः पूर्वं तां पाययामास वै शुभम् ॥८८॥
निजं पादजलं तत्र निक्षिप्य श्रीहरेर्जलम् ।
पवित्रां पावनीं कृत्वा ददौ मन्त्रं ततः परम् ॥८९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
'अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥९०॥
'हरे कृष्ण हरे विष्णो हरे नारायण प्रभो ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम' ॥९१॥
इति मन्त्रान् ददौ साधुः श्वपच्यै श्वपचाय च ।
भजनं कारयामास राज्यर्धं च ततः परम् ॥९२॥
पादसंवाहनं साधोश्चक्राते दम्पती ह्युभौ ।
चाण्डालत्वं विलीनं च साधोः संसेवया तदा ॥९३॥
प्रातःपर्यन्तमेवाऽऽभ्यां पादसंवाहनं कृतम् ।
प्रातर्हरिः समायातो दिव्यविमानराजितः ॥९४॥
पार्षदैः प्रवरैर्युक्तो राधालक्ष्म्यादिराजितः ।
साधुं रक्षां सुमरं च हरिः प्राह ममाऽनुगाः ॥९५॥
त्रयोऽपि मम भक्ताः स्थो दिव्यभावमुपागताः ।
गुरुतीर्थप्रपूता मे चारोहत विमानकम् ॥९६॥
इत्युक्तास्ते त्रयो नत्वा त्यक्त्वा देहान् भुवस्तले ।
दिव्यौ च पार्षदौ भूत्वा पार्षदानी तथाविधा ॥९७॥
दिव्या चतुर्भुजा भूत्वा स्थित्वा विमानकं तदा ।
हरिणा सह वैकुण्ठं प्रययुर्मोक्षमुत्तमम् ॥९८॥
एवं लक्ष्मि गुरुतीर्थं पावनं सद्य एव ह ।
वधूनां चाप्यशुद्धानां श्वपाकीतुल्ययोषिताम् ॥९९॥
मोक्षदं चोत्तमं चास्ते तस्माद् गुरुं निषेवयेत् ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदिह ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरुतीर्थे चैतन्यशील्गुरोः प्रतापात् सुमर-पत्न्याः रक्षाश्वपच्याः पतिना सह गुरुणा सह च मोक्षप्राप्तिरित्यादिनिरूपणनामा पञ्चपञ्चाश-त्तमोऽध्यायः ॥ ५५ ॥

**श्रीनारायणीश्रीरुवाच—**

भगवन् देवदेवेश गुरुतीर्थं परात्परम् ।
कथं वै श्रेष्ठतमतां प्राप्तं मे वद कारणम् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

भूमिशुद्धिर्वायुनैव देहशुद्धिस्तु वारिणा ।
मनःशुद्धिर्विरागेण चात्मशुद्धिर्विवेकतः ॥ २ ॥
विवेकस्तत्त्वविज्ञानं तच्च गुरोर्विना न वै ।
तूर्णं प्रकाशदातृत्वाद् गुरुर्वै परमो मतः ॥ ३ ॥
अन्धकारे मनुष्याणां लक्षेष्वपि प्रदीपकः ।
प्रकाशकृद् भवत्येव तथा गुरुः प्रदीपकः ॥ ४ ॥
बहूनां यादसां चाब्धौ सत्त्वेऽपि नौर्हि तारिका ।
जगदब्धौ देहिनां सत्त्वेऽपि गुरुर्हि तारकः ॥ ५ ॥
ताराणां गगने नान्तः प्रकाशकस्तु चन्द्रमाः ।
मानवानां तथा नान्तः प्रकाशदस्तु सद्गुरुः ॥ ६ ॥
अन्यैर्ग्रहैर्न वै नाशो निशाया विगमः क्वचित् ।
अन्यैर्जनैर्न चाऽज्ञानविगमः सद्गुरुं विना ॥ ७ ॥
जलं तीर्थं भूमिरिज्या यज्ञो व्रतं च चैत्यकम् ।
सद्गुरुणैव तीर्थानि सञ्जातानि पुरा किल ॥ ८ ॥
मूर्तितीर्थं प्रतिमाख्यं ज्ञानतीर्थं तु पुस्तिका ।
तु ह्युभे सद्गुरोरेव समुद्भूते न चान्यथा ॥ ९ ॥
देवा गुरुबलाः सर्वे मन्त्रा गुरुबलास्तथा ।
योगो गुरुबलश्चापि गुरुतीर्थं ततोऽधिकम् ॥१०॥
गुरुत्वं मम योगेन वर्धते च प्रकाशते ।
चमत्कारमयं चापि जायते मम संगतः ॥११॥
मम संगो मम स्नेहो मम भक्तिः प्रसेवनम् ।
ममैव च कृतं येन गुरुता तस्य शाश्वती ॥१२॥
शाश्वतोऽहं गुरुर्यस्मादनादिज्ञानवान् प्रभुः ।
मम योगेन भक्तस्य शाश्वती गुरुता ततः ॥१३॥
मूल्यवद्वस्तुयोगेन निर्मूल्यं मूल्यवद्भवेत् ।
दुग्धवत्सायुता गौश्च बहुमूल्या सदा भवेत् ॥१४॥
विद्याखनिर्मानवश्च बहुमूल्यः प्रजायते ।
नैर्मल्यभाहीरकोऽपि बहुमूल्यः प्रगण्यते ॥१५॥
पित्तलं स्वर्णसंगेन बहुमूल्यं हि जायते ।
कन्या वरयुता लोके बहुमूल्या सुपूज्यते ॥१६॥
भृत्या राजयुताः सर्वे राजमूल्या भवन्ति वै ।
पात्रं वस्तुभृतं चापि मूल्यवज्जायते प्रिये ॥१७॥
एवं भक्तो भक्तियुक्तो मया युक्तो विशेषतः ।
नैर्मल्यभावयुक्तश्च बहुमूल्यः प्रजायते ॥१८॥
भृत्यः प्रसन्नः सहसा प्रजाकार्यं करोति वै ।
कारयत्येव सहसा नृपद्वारा त्वरायुतः ॥१९॥
न तु राज्ञः पुत्तलिका प्रजाकार्यं करोति हि ।
न च पुत्तलिका कार्यं त्वरितं कारयत्यपि ॥२०॥
तथा भृत्या मम भक्ताः शरणागतरक्षकाः ।
शरणागतकार्याणां कर्तारः सहसा ह्यपि ॥२१॥
चैतन्यमूर्तयो मे वै साधवो गुरवो भुवि ।
राज्ञो वै कार्यकर्तारो भृत्याश्चैतन्यमूर्तयः ॥२२॥
अभिभाय हसित्वा च गृहित्वा सेवनादिकम् ।
दत्वा दानं मनुं भानं कुर्वन्तीष्टं हि देहिनाम् ॥२३॥
शरणागतजीवानामाधारा गुरवो यतः ।
मया दत्तं गुरुभ्यो वै पदं मेऽधिकृतिस्तथा ॥२४॥
मद्वद् भवन्ति पूज्यास्ते लोके नारायणा हि ते ।
यथाऽहं च तथा तेऽपि मम भक्तिप्रवर्तकाः ॥२५॥
तस्मात्ते गुरवः श्रेष्ठास्तीर्थं गुर्वात्मकं परम् ।
पापानां क्षालनं शीघ्रं कुर्वन्ति वारिदानतः ॥२६॥
अज्ञाननाशनं शीघ्रं कुर्वन्ति मन्त्रदानतः ।
स्वर्गादिकां महास्मृद्धिमाशीर्वादैर्ददत्यपि ॥२७॥
प्रसादेन द्रुतं मोक्षपदं सम्प्रेषयन्त्यपि ।
लीलया मे क्वचित्तूर्णं कारयन्तीह दर्शनम् ॥२८॥
मम दिव्यस्वरूपस्य कृपया दर्शनं हृदि ।
तस्मान्मे साधवः श्रेष्ठा गुरवो लक्ष्मि! सर्वदा ॥२९॥
भक्त्या मे ते भवन्त्येव श्रेष्ठतमाः परेश्वराः ।
भक्तिं ते कथयाम्यत्र यया श्रेष्ठतमा हि ते ॥३०॥
गुरुदेवर्षिसिद्धर्षिसेवनं साधुसंगमः ।
सत्क्रियाव्यसनं चाऽत्रापरा भक्तिर्मता मम ॥३१॥
ममांशानां गुरूणां या सेवा सा चाऽपरा मम ।
भक्तिरेव मया नित्यं मन्यते मोक्षदायिनी ॥३२॥
प्राप्य ब्रह्मरसं दिव्यं पीत्वा चानन्दमृतम् ।
भक्ता ब्रह्मपराभोगास्तृप्ता भवन्ति शाश्वताः ॥३३॥
ब्रह्मरसाभिप्लुताश्च भवन्त्यक्षररूपिणः ।
यथाऽग्निरग्नौ सम्प्राप्तस्तथाऽऽत्मा परमात्मनि ॥३४॥
ब्रह्मरूपकरं नाम हरे हरे सदा जपेत् ।
अहं ब्रह्मपरंज्योतिर्मायातत्त्वविवर्जितः ॥३५॥
अहं ब्रह्म परंज्योतिर्ज्ञानवानस्मि मुक्तये ।
भक्त्या ज्ञानाढ्यया लभ्यो भगवान् पुरुषोत्तमः ॥३६॥
ध्यानेन पूजया जप्यैः सम्यक् स्तोत्रैर्यतव्रतैः ।
सेवया प्रेमभक्त्या वै प्राप्योऽहं परमेश्वरः ॥३७॥
महतः श्रेयसो मूलं प्रसवः पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु नियतिस्मरणं हरेः ॥३८॥

सेवा स्नेहयुता बोध्या भक्तिः साधनभूयसी ।
भक्तास्ते मम सेवायां लग्ना चाभिन्नभावनैः ॥३९॥
मुञ्चन्त्यश्रूणि संहर्षात् संप्रहृष्टतनूरुहाः ।
कृष्णक्रियापरा नित्यं स्निग्धा मे वैष्णवाः सदा ॥४०॥
ब्रह्माऽक्षरं परब्रह्म शृण्वन् भागवतान् गृणन् ।
प्रणामपूर्वकं भक्त्या कीर्तयेद् वैष्णवोत्तमः ॥४१॥
मे भक्तजनवात्सल्यं भक्तपूजाऽनुमोदनम् ।
भक्तगाथाश्रवे प्रीतः स वै भक्तोत्तमो मतः ॥४२॥
येन सर्वात्मना कृष्णे भक्त्या भावः समर्पितः ।
सद्गुरोः शरणं प्राप्य महाभागवतो हि सः ॥४३॥
स्वयं त्वभ्यर्च्चयेन्मां वै विष्णुं तथोपजीवति ।
बहुधा भक्तिसम्पन्नो म्लेच्छोऽपि वैष्णवो हि सः ॥४४॥
स वै श्रेष्ठो मुनिर्भक्तः स याति परमां गतिम् ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥४५॥
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ।
मम भक्तो न चाण्डालो दिव्यो मे पार्षदोऽस्ति सः ॥४६॥
दयां कुरु प्रपन्नाय तवाऽस्मीति च याचते ।
अभयं सर्वभूतेभ्यो दद्यादेतद्व्रतं हरेः ॥४७॥
मन्त्रयाजिसहस्रेभ्यो वेदवेदान्तवित् परः ।
सर्ववेदान्तविज्ञेभ्यो विष्णुभक्तो विशिष्यते ॥४८॥
एकान्तिनो दिव्यदेहैर्गच्छन्ति परमं पदम् ।
एकान्तेन समो विष्णुर्विष्णुर्भक्तपरायणः ॥४९॥
भक्ता एकान्तिनः सन्तो विप्रकोट्युत्तमा मताः ।
प्रियाणामपि सर्वेषां मम चातिप्रिया हि ते ॥५०॥
महाभागवताः सन्तः साधवो विप्रकोटितः ।
ब्राह्मणानामर्बुदेभ्यः सदा श्रेष्ठतमा मताः ॥५१॥
लोकानां गुरवो विप्रा विप्राणां वेदयाजिनाम् ।
ब्राह्मणानां च सर्वेषां साधवो गुरवो मताः ॥५२॥
विप्रा गृहनिमग्नास्ते श्मशानानि ह भेजिरे ।
साधवो ब्रह्ममग्नास्ते परंधाम प्रपेदिरे ॥५३॥
आपत्स्वपि सदा येषां भक्तिरव्यभिचारिणी ।
या प्रीतिरधिका कृष्णे विष्णौ सदाऽनपायिनी ॥५४॥
विष्णुं स्मरन् मम भक्तो हृदो न दूरमेति सः ।
दृढभक्तो रज्जुपाशैर्बद्धो बध्नाति मां मिथः ॥५५॥
यो भक्तिं वहते विष्णौ तेन सर्वं प्रसाधितम् ।
स एव साधुरेवाऽस्ति येनाऽहं साधितः प्रियः ॥५६॥
यज्वानः क्रतुमुख्यानां वेदानां पारगा अपि ।
न तां यान्ति गतिं श्रेष्ठां यां यान्ति मुनिसत्तमाः ॥५७॥

यः कश्चिद् वैष्णवो लोके मिथ्याचारोऽप्यनाश्रमी ।
पुनाति सकलान् लोकान् यथाऽहं भगवान् स्वयम् ॥५८॥
ये नृशंसा दुरात्मानः पापाचाररतास्तथा ।
यान्ति स्थानं परं मे ते नारायणपरायणाः ॥५९॥
दृढा नारायणे भक्तिः सदा याऽव्यभिचारिणी ।
सैव शाश्वतसुखदाऽस्ति कियत् स्वर्गं तदन्तिके ॥६०॥
भ्रमित्वाऽपि महाब्धौ वै संसाराख्येऽमितो मुहुः ।
प्रलम्ब्य स्वकरं कृष्णं धरन्तु यदि चाप्यते ॥६१॥
न शृणोति गुणान् दिव्यान् श्रीहरेः परमात्मनः ।
स लोके बधिरो बोध्यः सदा पापश्रवोऽथवा ॥६२॥
नाम्नि संकीर्तिते विष्णोर्यस्य नो पुलकोद्गमः ।
स राजाऽपि सुरूपोऽपि बोध्यो वै कुणपः शवः ॥६३॥
भक्तिमतां नराणां च नारीणां षण्ढदेहिनाम् ।
मयि निविष्टमनसां मुक्तिर्निश्चयभाविनी ॥६४॥
पाशहस्तान् यमानाह यमराजो ह्यहं प्रभुः ।
अवैष्णवानां पापानां वैष्णवान् मा नयन्त्विह ॥६५॥
अपि यावद्दुराचारो भजते मां मयि स्थितः ।
साधुरेव स वै मुक्तः कोटिविप्राऽधिको गुरुः ॥६६॥
महाभागवता धर्मास्तस्मिन् सर्वे वसन्ति ह ।
सर्वविद्या तथा शान्तिस्तत्र वसति पद्मजे ॥६७॥
धर्मार्थकामाश्चैतस्य कियतीं गणनां गताः ।
मुक्तिश्चास्य सदा दासी मुक्तिश्चास्य करे स्थिता ॥६८॥
माया वा मायिका लोकाश्चैश्वर्याणि च सिद्धयः ।
भुज्यमाना अपि नैव बाधन्ते मम योगिनः ॥६९॥
किं यज्ञैः किं व्रतैर्दानैः किमन्यैः पुण्यसाधनैः ।
यस्य प्रीतिर्हरौ जाता तया चाराध्यते प्रभुः ॥७०॥
अन्यैर्लेपैः प्रदीपाद्यैश्चन्दनैर्गन्धभूषणैः ।
नाऽहं तुष्यामि कमले यथा प्रेम्णाऽर्पणेन वै ॥७१॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
मयि कृष्णे परा भक्तिर्मद्भक्तैश्च समागमः ॥७२॥
पत्रैः पुष्पैः फलैश्चाद्भिर्धनैर्भोज्यैर्विभूषणैः ।
भक्त्या लभ्ये मयि नाथे वर्तयेन्मुक्तिदायिनी ॥७३॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
प्रेताश्चास्मत्कुले भक्तः कश्चिन्नस्तारयिष्यति ॥७४॥
शरणं मां प्रपन्ना ये ध्यानज्ञानविवर्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति मत्परमं पदम् ॥७५॥
मुक्तिहेतुमनाद्यन्तं श्रीपतिं पुरुषोत्तमम् ।
यो नमेत् सर्वलोकस्य नमस्यो जायते जनः ॥७६॥

विष्णुमानन्दकोशं तं चान्तरस्थं प्रभुं हरिम् ।
प्रणमेत् सर्वदा भक्त्या चेतसा देहयोगिना ॥७७॥
योऽन्तस्तिष्ठन् समग्राणां पश्यतीशः शुभाशुभम् ।
तं सर्वसाक्षिणं कान्तं प्रणमेत् परमेश्वरम् ॥७८॥
हेलयाऽपि नमस्कारः प्रयुक्तश्चक्रपाणये ।
संसारपाशरज्जूनां नाशकः समजायते ॥७९॥
अनादिश्रीकृष्णनारायणे श्रीकृष्णरूपिणि ।
भावकृतः प्रणामोऽपि श्वपाकं च पुनात्यपि ॥८०॥
प्रणम्य दण्डवद् भूमौ नमस्कारं चरेन्मुदा ।
एकप्रणाममात्रेण याति मत्परमं पदम् ॥८१॥
नमस्कारेण मे लक्ष्मि ! शाश्वती मुक्तिरेव ह ।
अहं कृष्णो नमन्तं वै तारयामि भवार्णवात् ॥८२॥
आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रं जपेत् सदा सुधीः ॥८३॥
नारायणेति मे नाम जिह्वायोग्यं प्रविद्यते ।
तथापि याम्यं पश्यन्ति गृहं वैतण्डिका जनाः ॥८४॥
व्यासादयः शंकराद्याः स्तुवन्तः परमेश्वरम् ।
मतिश्रमान्निवर्तन्ते मद्गुणान्तो न विद्यते ॥८५॥
अवशोऽपि रटेन्नाम नारायणेति चाऽसकृत् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥८६॥
स्वप्नेऽपि श्रीहरेर्नाम रटितं च श्रुतं च वा ।
मोक्षार्थं जायते तद्वै किं पुनर्जाग्रतस्त्विह ॥८७॥
नमः कान्ताय कृष्णाय नमः श्रीहरये नमः ।
स्वामिने च नमश्चेति वदन् मोक्षगतिं लभेत् ॥८८॥
कल्माषाणां क्षयः स्याद्वै नामसंकीर्तनाद्धरेः ।
गच्छतां दूरमध्वानं श्रीहरेर्धामयोजितम् ॥८९॥
पाथेयं श्रीहरेर्नामकीर्तनं लक्ष्मि सर्वथा ।
वध्वः स्त्रियोऽतिलज्जाश्च गृहमध्ये स्थिता अपि ॥९०॥
कृष्णकान्त हरे जप्त्वा मुक्ता भवन्ति धामगाः ।
जिह्वाग्रे वर्तते यस्या हरिरित्यक्षरद्वयम् ॥९१॥
संसारसागरं तीर्त्वा सा प्रयास्यति मत्पदम् ।
सहस्रदुष्कृतिव्याप्ता धर्मकर्मविवर्जिता ॥९२॥
शुद्धिमभीप्समाना च मुक्तिं च मत्पदाश्रयाम् ।
गुप्ताऽपि मन्नामपरा भूत्वा मां सा समर्जयेत् ॥९३॥
अशेषलोककान्तस्याऽऽराधनं श्रीहरेर्मम ।
सारश्चाऽसारसंसारे योषितां सर्वथा प्रिये ॥९४॥
दद्याद् हृदयभावेन पुष्पाण्यापस्तथा फलम् ।
मह्यं तेनाऽर्चिता देवाश्चार्चितं मुक्तमण्डलम् ॥९५॥
न तत्करोति माताऽपि न पिता नापि बान्धवः ।
यत् करोमि प्रभुश्चाहं सन्तुष्टः सेवयाऽर्चितः ॥९६॥
वर्णाश्रमाचारवत्या योषिता परमः पुमान् ।
अहमाराध्ये वै लक्ष्मि स पन्थास्तोषको मम ॥९७॥
सम्पदैश्वर्यमाहात्म्यैः सन्तत्या श्रद्धयाऽपि च ।
प्रेमभक्त्याऽन्वितैः सर्वैराराध्योऽहं भवामि वै ॥९८॥
भक्तिं विना विना स्नेहं विना प्रेम च भावनाम् ।
नाऽहं प्रसन्नतां यामि भावक्षुधायुतोऽस्म्यहम् ॥९९॥
पूर्वे पूर्वतराश्चापि गता मेऽक्षरमुत्तमम् ।
पूर्वतमा गता भक्त्या तथा यान्तु स्त्रियोऽपि च ॥१००॥
एवं मां सर्वदा कृष्णरूपिणं श्रीपतिं प्रभुम् ।
स्वामिनं चान्तरात्मानं रक्षन्ति हृदि साधवः ॥१०१॥
त एव मम योगेन सन्तः सत्यश्च साधवः ।
साध्व्यश्च गुरुवर्गीयाः सर्वश्रेष्ठतमा मताः ॥१०२॥
मदात्मका मत्स्वरूपा मदन्यूना नरायणाः ।
अवतारा हि मे सर्वे साधवः सत्ययोषितः ॥१०३॥
साध्व्यः सर्वा अवतारिण्यश्च मे ता भवन्ति वै ।
तस्माद् गुर्व्यो मम योगान्मन्त्रदा मोक्षदा अपि ॥१०४॥
एवं नारायणीश्रि ! वै गुरोः श्रैष्ठ्यं सदाऽस्ति हि ।
अहं गुरुर्गुरुश्चाहं नात्र भेदो मनागपि ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां गुरोः श्रेष्ठतमत्वे श्रीहरिस्वरूपताहेतु-निरूपणनामा षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं सर्ववैदिकसारकम् ।
सर्वसाधनसाध्यो वै भजनीयः परेश्वरः ॥ १ ॥
दानैस्तीर्थैस्तपोभिश्चाऽध्वरैः परोपकार्यकैः ।
रञ्जनीयः परमात्मा साधनीयो नरायणः ॥ २ ॥
षष्टिस्तीर्थसहस्राणि षष्टिस्तीर्थशतानि च ।
कृष्णनारायणभक्तचरणे संवसन्ति हि ॥ ३ ॥
प्रायश्चित्तान्यशेषाणि तपांसि च व्रतानि च ।
यानि तेषां समस्तानां कृष्णानुस्मरणं परम् ॥ ४ ॥
पापदहनवाञ्छानां जनानां योषितां तथा ।
प्रायश्चित्तं तु परमं श्रीहरेः स्मरणं मम ॥ ५॥
मुहूर्तमपि यद्ध्यानं श्रीहरेः परमात्मनः ।
स्वर्गदं तद् भवत्येव नित्यध्यानं तु मोक्षदम् ॥ ६ ॥

जाग्रत्स्वप्नसुषुप्तेषु नारायणपरायणाः ।
येषां यासां वृत्तयश्च तास्ते मुक्ता न संशयः ॥ ७ ॥
उत्तिष्ठन् निपतन् गच्छन् प्रलपन् विविशंस्तथा ।
भुञ्जन् पिबंश्च मां कृष्णं यः स्मरेन्मुक्त एव सः ॥ ८ ॥
स्वे स्वे कर्मणि सर्वत्र वृत्तिः कार्याऽच्युताश्रया ।
तेन कर्म हि तत्सर्वं निर्गुणं मोक्षदं भवेत् ॥ ९ ॥
ध्यानं धर्मः परः प्रोक्तस्तपः परं व्रतं परम् ।
शौचं परं हरेर्ध्यानं ध्यानमग्नस्ततो भवेत् ॥१०॥
नास्ति विष्णोः परं ध्येयं गेयं प्राप्यं परं ततः ।
तस्माद् विष्णोर्हरेः कार्यं ध्यानं प्रचिन्तनं हृदि ॥११॥
यद् दुर्लभं परं चास्ते मनसो नापि गोचरम् ।
तदप्यत्र हरिर्ध्यातः प्रसन्नः सन् ददाति वै ॥१२॥
प्रमादादपि कृष्णस्य ध्यानं स्मृतिर्नमस्कृतिः ।
कृता सती परब्रह्मपदं ददाति शाश्वतम् ॥१३॥
ध्यानेन सदृशं चान्यन्नास्ति वै पापशोधकम् ।
आगामिदेहबीजस्य दाहकं स्मरणं हरेः ॥१४॥
विनिष्पन्ना ध्यानसिद्धिः समाधिं चादधाति वै ।
हरौ समाधिमापन्नो मोक्षमत्र समश्नुते ॥१५॥
निजचित्ते स्थिते विष्णौ भक्तानां किल्बिषाणि वै ।
दह्यन्ति मूलतश्चात्मा मुक्तब्रह्म प्रजायते ॥१६॥
अग्नियोगात् कनकं वै निर्मलं सम्प्रजायते ।
हरेर्योगाद्धि भक्तात्मा ब्रह्मधामा प्रजायते ॥१७॥
गंगास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत्पापं लीनतां याति स्मृते नश्यति तद्धरौ ॥१८॥
प्राणायामसहस्रैस्तु यत्पापं लीयते हि तत् ।
ध्यानेन क्षणमात्रेण हरेर्ध्यातुर्विनश्यति ॥१९॥
पापं कालस्तथा माया चान्तको यमसेवकाः ।
मृत्युश्चापि न तस्यास्ति यस्यास्ति पुरुषोत्तमः ॥२०॥
सा तिथिस्तदहोरात्रं स योगः स च चन्द्रमाः ।
शकुनं लग्नमेतद्वै शुभं यत्र स्मृतो हरिः ॥२१॥
सा हानिः स च रोगोऽस्ति सैव क्षतिर्दरिद्रता ।
यत्र क्षणे गृहे कृष्णो हरिः स्मृतो न केशवः ॥२२॥
यस्य गेहे हरिश्चास्ते तस्य सत्ययुगः सदा ।
यस्य नास्ति हरिर्गेहे तस्य चान्ये युगा गृहे ॥२३॥
हृदये यस्य नो कृष्णश्चिन्तने नो हरिस्तथा ।
प्रतिमा न गृहे यस्य श्मशानं मानसं गृहम् ॥२४॥
यस्याऽग्रतस्तथा पृष्ठे चान्तरे करणेषु च ।
गोविन्दः सम्प्रभात्येवाऽक्षरं धामाऽभितोऽस्य वै ॥२५॥
वासुदेवे मनो यस्य पानभोजनकर्मसु ।
अक्षरं धाम तस्यास्ति दृढं गम्यं हि शाश्वतम् ॥२६॥
गार्हस्थ्यकर्मकर्ताऽपि व्यवहारावृतोऽपि च ।
छिनत्ति पौरुषीं मायां केशवार्पिततत्क्रियः ॥२७॥
विघ्ना दूरं प्रयान्त्येव कालः शिखां त्यजत्यपि ।
मृत्युर्दृष्टिं न चायाति श्रीहरौ हृदयस्थिते ॥२८॥
ध्यायेन्नारायणं विष्णुं कृष्णं तं सर्वकर्मसु ।
लाभस्तस्य जयस्तस्य यद्धृदिस्थो जनार्दनः ॥२९॥
कीटपक्षिगणानां श्रीहरेः प्रसन्नतायुजाम् ।
ब्रह्मलोकगतिश्चास्ति किं पुनः सेविनां हरेः ॥३०॥
नारायणतरुच्छाया नातिशीता न तापदा ।
याम्यद्वारप्रशमनी सेवनीया सुखार्थिभिः ॥३१॥
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ।
न विस्मरेद्धरिं यो वै सिद्धयोगी मतो हि सः ॥३२॥
ध्येयः सदा गुरौ मूर्तौ साध्व्यां कान्ते रवौ हरिः ।
युवा भूषाम्बरधारी कोटिकामाऽतिसुन्दरः ॥३३॥
नहि ध्यानेन सदृशं पवित्रं पापनाशकम् ।
श्वपचोऽपि भवेच्छुद्धः श्वपचाऽन्नाद इत्यपि ॥३४॥
विष्णुभक्तिर्यस्य जीवे विष्णुर्यदात्मनि स्थितः ।
स तारयति संसाराच्छरणागतकोटिकान् ॥३५॥
तज्ज्ञानं यत्र लक्ष्मीशः सा कथा यत्र माधवः ।
तत्कर्म यत्केशवार्थं सा सेवा या श्रियः पतेः ॥३६॥
सा जिह्वा या हरिं स्तौति तच्चित्तं चिन्तयेत्प्रभुम् ।
तौ करौ यौ हरेः सेवापरायणौ सतां तथा ॥३७॥
मस्तकस्य फलं कृष्णप्रणामो धीफलं स्मृतिः ।
हरेः पूजा पाणिफलं मनःफलं मतिर्हरौ ॥३८॥
वचःफलं हरेः स्तोत्रं चक्षुःफलं दृशिर्हरेः ।
त्वक्फलं स्पर्शनं विष्णोर्देहफलं प्रसेवनम् ॥३९॥
सर्वार्पणं फलं स्मृद्धेर्मोक्षः फलं तु जीविनः ।
लोकालोकसमो राशिः पापस्यापि विनश्यति ॥४०॥
श्रीहरेः स्मरणादेव पुण्यात्मा जायते जनः ।
यत्किञ्चित्कुरुते कर्म साध्वसाधु शुभाशुभम् ॥४१॥
कामिकं चाकामिकं वा स्वार्थं परार्थमित्यपि ।
सर्वं नारायणे न्यस्य कर्ता तस्य न लिप्यते ॥४२॥
राष्ट्रस्य शरणं राजा पितरो बालकस्य च ।
धर्मस्तु सर्वमर्त्यानां सर्वेषां शरणं हरिः ॥४३॥
ये नमन्ति स्मरन्तीशं पूजयन्ति च मां सदा ।
त एव तीर्थरूपा मेऽभिन्ना मोक्षप्रदायकाः ॥४४॥

शूद्रं वा भगवद्भक्तं निषादं श्वपचं च वा ।
गणिकां घातकं वापि श्रेष्ठं मन्ये हि पद्मजे ॥४५॥
आदीप्तं पर्वतं दृष्ट्वा पलायन्ते मृगादयः ।
मया दीप्तं जनं दृष्ट्वा पलायन्तेऽघराशयः ॥४६॥
यस्य यावाँस्तु विश्वासस्तस्य सिद्धिर्हि तावती ।
अनुग्रहो विशेषोऽत्राऽसीमफलप्रदो भवेत् ॥४७॥
प्रसन्नताया नान्तोऽस्ति फलान्तोऽपि न विद्यते ।
तत्र यावच्च यावाँश्च नियमो नास्ति वै हरौ ॥४८॥
प्रसन्नो भगवान् सम्राट् जलमात्रेण तुष्यति ।
ददात्यमृतसामुद्रं स्वामी कः स्वामिनोऽस्ति वै ॥४९॥
राज्ञे तु चूम्बनं दत्त्वा लभतेऽधासनं सखी ।
हरये वै तथा दत्त्वा लभते मेऽक्षरं पदम् ॥५०॥
एवं नारायणीश्रि ! त्वं सर्ववधूभिरीश्वरी ।
समर्पिताऽसि सहिता सोऽहं सा त्वं हरिः स्वयम् ॥५१॥
हरिकृष्णप्रसादेन यदि कश्चिद् भजत्यपि ।
न निस्तरति संसारं देवानामपि दुस्तरम् ॥५२॥
ध्यायेदाराधयेद् विष्णुं सदा निजात्मसंस्थितम् ।
अनादिश्रीकृष्णप्रभुं तेन मुच्येत बन्धनात् ॥५३॥
सर्वदेहिविधातारं सर्वज्ञानमनोरतिम् ।
सर्वगं सद्गुरुं विष्णुं सदा ध्यायन् प्रमुच्यते ॥५४॥
धामातीतं धामसंस्थं सर्वावतारकारणम् ।
अवतारिस्वरूपं मां ध्यायन् शीघ्रं प्रमुच्यते ॥५५॥
कृष्णमनादिकृष्णं च नारायणं नरायणम् ।
वासुदेवाद्यात्मकं मां ध्यायन् शीघ्रं प्रमुच्यते ॥५६॥
भूमानं प्रकृतेः पारं पूरुषं पुरुषोत्तमम् ।
सर्वेश्वरेश्वरं कान्तं मां ध्यायन् संप्रमुच्यते ॥५७॥
हिरण्मयं महाविष्णुं वैराजं विष्णुमित्यपि ।
अन्तरात्मस्वरूपं मां ध्यायन् सद्यः प्रमुच्यते ॥५८॥
मुक्तैर्मुक्तानिकाभिश्चेश्वरैरीश्वरिकादिभिः ।
अवतारैः सुरैश्चापि ध्यातं ध्यात्वा प्रमुच्यते ॥५९॥
संसारबन्धनान्मुक्तिमिच्छन् यः कोऽपि देहवान् ।
स्तुत्वा ध्यात्वा पूजयित्वा मां हरिं सम्प्रमुच्यते ॥६०॥
लक्ष्मि ! नित्यं बलं प्राप्य मम सर्वावतारिणः ।
अक्षरेशं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥६१॥
शंखचक्रगदापद्मधारिणं परमेश्वरम् ।
अन्तःस्थितं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥६२॥
मीनशूलध्वजधनुःस्वस्तिचक्रशरान्वितम् ।
श्रीवत्सांकं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६३॥
कम्भराश्रीसुतं कृष्णनारायणं प्रियं पतिम् ।
गोपालजं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६४॥
ब्रह्मप्रियापतिं हरिप्रियापतिं सतीपतिम् ।
श्रीपतिं संप्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६५॥
राधारमापतिं लक्ष्मीरमापद्मावतीपतिम् ।
माणिकीशं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥६६॥
कमलादुःखहालक्ष्मीपतिं नारायणीपतिम् ।
शिवजेशं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६७॥
दिव्यादेवीपतिं कीरापतिं कामोदकापतिम् ।
सुशीलेशं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६८॥
लीलावतीखशीनाथं हुण्डिकागणिकापतिम् ।
हंसिकेशं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥६९॥
अशोकसुन्दरीनाथं विकलेन्दुमतीपतिम् ।
भिल्लीशं संप्रपन्नास्मि किं मां मृत्युः करिष्यति ॥७०॥
रक्षाप्रज्ञाशमीश्रद्धानाथं मुक्तपतिं हरिम् ।
मम कान्तं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥७१॥
कृष्णं रामं रामकृष्णं नारसिंहं जनार्दनम् ।
राजराजं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥७२॥
वाराहं वामनं विष्णुं माधवं केशवं पतिम् ।
कान्तकान्तं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥७३॥
कपिलं च हरिं वासुदेवं जनार्दनं शिवम् ।
अक्षरेशं प्रपन्नाऽस्मि किं मां मृत्युः करिष्यति ॥७४॥
अनन्तशिरसं कृष्णं सनातनं परं पतिम् ।
ब्रह्मयोनिं प्रपन्नाऽस्मि किं मे मृत्युः करिष्यति ॥७५॥
प्रेमरसं हरेर्नित्यं पिबामि पार्श्ववर्तिनी ।
हरेः पादं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥७६॥
हरेस्ताम्बूलजं मिष्टं रसं सुगन्धसंभृतम् ।
पिबामि तं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥७७॥
अमृताख्यं प्रसादं च नित्यमास्वादयामि च ।
ओष्ठरसं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥७८॥
श्रीहरेः शयनं प्राप्ता महानन्दं वहामि च ।
आन्तरस्थं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥७९॥
आक्षरं बलमाप्ताऽस्मि नित्यं सुखं गताऽस्मि च ।
एकात्मानं प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥८०॥
तादात्म्यसुखमापन्ना रहस्यानन्दभोगिनी ।
तद्भावं च प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥८१॥
मृत्योः पिता महाकालो येन सृष्टोऽस्मि यद्वशः ।
तं प्रभुं सम्प्रपन्नास्मि किं मां मृत्युः करिष्यति ॥८२॥

इत्येवं श्रीहरेमें वै मदमाता प्रिया मम ।
निर्भया सेवते मां चाश्नुते सर्वं सुखं मम ॥८३॥
सा धन्या सा सफलार्था सा च सर्वसुखस्थिता ।
सफलं जीवितं तस्याः स्तौति या पुरुषोत्तमम् ॥८४॥
ओं नमोऽक्षरवासाय मुक्तसेव्याय ते नमः ।
ओं नमश्चेश्वरेशायाऽवतारेशाय ते नमः ॥८५॥
ओं नमो मुक्तपतये सतां च पतये नमः ।
ओं नमोऽक्षरपतये मुक्तानीपतये नमः ॥८६॥

नमस्ते परमानन्द नमस्ते परमाऽक्षर ।
नमस्ते नित्यसर्वज्ञ नमस्ते ज्ञानमुक्तिद ॥८७॥
नमस्ते चात्मवासाय नमस्ते पुरुषोत्तम ।
सर्वान्तरात्मरूपाय नारायणाय ते नमः ॥८८॥
नमस्ते कम्भरापुत्र गोपालजाय ते नमः ।
नमस्ते श्रीपते कृष्णनारायण च ते नमः ॥८९॥
नमस्ते कुंकुमवापीनिवासायाऽब्धिशायिने ।
ब्रह्मप्रियाधिपतये हरिप्रियाप्रियाय च ॥९०॥

जय सत्यजगत्साक्षिन् जय सर्वपुमर्थद ।
जय वेदान्तवेद्यस्त्वं जय कान्त मनोहर ॥९१॥
जय सूक्ष्मचिदानन्द जय चित्तनिरञ्जन ।
जय नाथ जय सर्व जय शान्तसनातन ॥९२॥
त्वं गुरुस्त्वं हरे कान्तस्त्वं स्वामी त्वं ममाधिपः ।
धर्मज्ञानादयस्त्वं मे त्वं मे विष्णुः प्रमोक्षदः ॥९३॥
त्वं प्रभुस्त्वं समुद्धर्त्ता त्वं पाता त्वं प्रलुम्पकः ।
त्वं श्रीः पुष्टिस्त्वं च लक्ष्मीस्त्वं प्रभा त्वं च माणिकी ॥९४॥
त्वं क्षेत्रज्ञः परेशश्च त्वं यज्ञस्त्वं हुताशनः ।
तव रूपमिदं सर्वं परब्रह्म त्वमीश्वरः ॥९५॥
अवतारात्मकमूर्तिं ते भजन्ति दिवौकसः ।
भजने पूजने पाने भोजने पुरुषोत्तम ॥९६॥
क्षन्तुमर्हसि देवेश यत्कृतं न कृतं मया ।
न शक्नोमि सदा कर्तुं पूजां सम्यक् क्षमस्व माम् ॥९७॥
यत् कृतं जपहोमादि ह्यसाध्यं पुरुषोत्तम ।
न्यूनं पूर्णं मम मत्वा निजां मां स्वीकुरु प्रभो ॥९८॥
दिवारात्रौ च सन्ध्यायां सर्वावस्थासु मे प्रभो ।
अचला वै त्वयि भक्तिस्तवांघ्रियुगले स्थितिः ॥९९॥
इतिस्तोत्रेण मां नार्थं भक्त्येडिष्व नरायणि ।
यदिच्छसि ममानन्दं भज भक्त्या जगद्गुरुम् ॥१००॥
प्रातर्जपेदिदं स्तोत्रं स्मरन्मां पुरुषोत्तमम् ।
स्वर्गं मोक्षं सम्पदं च सर्वान् कामानवाप्नुयात् ॥१०१॥
पुत्रार्थी लभते पुत्रान् बद्धो मुच्येत बन्धनात् ।
कन्यार्थिनी लभेत् कन्यां कन्या शुभं पतिं लभेत् ॥१०२॥
रोगाद् विमुच्यते रोगी निर्धनो लभते धनम् ।
जातिस्मरत्वं मेधावी विद्यार्थी ज्ञानमर्जयेत् ॥१०३॥
जघन्यश्चापि मूर्धन्यस्त्वसाधुः साधुसत्तमः ।
शठोऽपि सत्यवाक् स्याच्च यः स्तौति पुरुषोत्तमम् ॥१०४॥
सर्वधर्मबहिष्कृता अपि ते साधवो मताः ।
येषां प्रवर्तनं सर्वं हरिमुद्दिश्य जायते ॥१०५॥

नाऽऽशौचं विद्यते तस्या यस्या भक्तिः परेश्वरे ।
मनो वाग् वर्ष्म सर्वस्वं मया क्षिप्तौ हरौ त्विह ॥१०६॥
आराध्य सर्वदा कृष्णनारायणं सुखप्रदम् ।
नरो नारी च वा षण्ढः प्राप्नोतीह सुवाञ्छितम् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां ध्येयस्य श्रीहरेः सर्वार्पणस्तोत्रादिप्रदर्शननामा सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीपुरुषोत्तम उवाच—

अहं ब्रह्म परं ज्योतिर्विष्णुरेवेति चिन्तयन् ।
नारायणि भवेदत्र जीवन्मुक्तो हि मानवः ॥ १ ॥
आराधना बलं जीवे सञ्चितं वै प्रमोददम् ।
आराधनायुतश्चायं याति मुक्तिं न संशयः ॥ २ ॥
विष्णौ सक्तं मनो यस्य विष्णुमेवाऽनुपश्यति ।
विष्णुं ध्यायँस्त्यजेत् प्राणान् याति तत्परमं पदम् ॥ ३ ॥
आराधनेन नार्यश्च कृत्वा पापानि भस्मसात् ।
हरौ मग्ना ब्रह्मकान्ता लभन्ते परमां गतिम् ॥ ४ ॥
मन्थनाद् दृश्यते ह्यग्निस्तद्वद् वै मननाद्धरिः ।
दृश्यते गोचरस्याऽग्रे मुक्तिश्चात्रैव सा मता ॥ ५ ॥
वेदात्र तं पुरुषं यं चिद्रूपं तमसः परम् ।
अस्याऽहमितिमोक्षाय नान्यः पन्था विमुक्तये ॥ ६ ॥
यदा सर्वे निजा भावाश्चार्प्यन्ते परमेश्वरे ।
तदाऽमृतत्वमाप्नोति जीवन्नेवाऽक्षरस्थितः ॥ ७ ॥
अहं ब्रह्म परं ज्योतिर्मायापारेऽस्मि सर्वथा ।
मत्वैवं परमात्मानं स्वाश्रयेन्मुक्तिभाग् भवेत् ॥ ८ ॥
स्मरणं पूजनं चैव प्रणामो भक्तिपूर्वकम् ।
प्रत्येकमश्वमेधस्य फलाधिकफलप्रदम् ॥ ९ ॥
पुरा विप्रः कौशिको वै मम भक्तिपरायणः ।
सामगानरतो नित्यं करतालसमन्वितः ॥१०॥

भोजनासनशय्यासु व्यवहारे विनोदने ।
ममैव चरितं शश्वद्गायमानोऽभवन्मुहुः ॥११॥
देवालयं समासाद्य परमेश्वरसन्निधौ ।
अगायत हरिं तत्र तालवर्णलयान्वितम् ॥१२॥
मूर्छनास्वरयोगेन श्रुतिभेदेन भेदितम् ।
तत्रैनं गायमानं च दृष्ट्वा पद्माख्यभूसुरः ॥१३॥
ददावन्नं हि भिक्षार्थं गायन्नास्ते च कौशिकः ।
शृण्वन्नास्ते स पद्माख्यो नित्यं भिक्षां ददाति च ॥१४॥
कौशिकस्य ततः शिष्या अभवन् बहवः खलु ।
सर्वे गायन्ति वै विष्णोश्चालये कौशिकान्विताः ॥१५॥
मन्दिरे मालवो नाम वैश्यस्तत्रैव भक्तिमान् ।
दीपमालां हरेर्नित्यं करोति भार्यया युतः ॥१६॥
गोमयेन समालिप्य हरेः क्षेत्रं समन्ततः ।
भर्त्रा सहास्ते सुप्रीता शृण्वती गानमुत्तमम् ॥१७॥
एवं पतिव्रता पूजाकरी भजति माधवम् ।
अन्ये गायनकुशला ब्राह्मणाश्च कुशस्थलात् ॥१८॥
पश्चाशद्वै समापन्ना गानार्थं हरिमन्दिरम् ।
कौशिकस्यैव गानस्य पुष्टिं कुर्वन्ति तेऽपि च ॥१९॥
गानविद्यार्थतत्त्वज्ञाः शृण्वन्तो ह्यवसंस्तु ते ।
एवं गायनतत्त्वज्ञाः समवेता हि मन्दिरे ॥२०॥
ख्यातमासीत् तत्र तस्य गानं वै कौशिकस्य तत् ।
श्रुत्वा राजा कलिंगोऽपि कीर्तिं गीतिविदां तदा ॥२१॥
समाययौ नमस्कारं चक्रे प्राह ततः परम् ।
मम सौधे समायान्तु सर्वे वै गीतिकोविदाः ॥२२॥
कौशिकोऽपि समायातु ममैव महदालये ।
मम गीतिं प्रकुर्वन्तु कौशिकाद्या ममालये ॥२३॥
शृण्वन्तु का प्रजाश्चापि मम सर्वाः सुगीतिकाः ।
पारितोषिकवर्याणि दास्यामि वेतनान्यपि ॥२४॥
स्वर्णहीरकरौप्याणि पञ्चगुणानि वोऽधिकम् ।
तच्छ्रुत्वा कौशिकः प्राह कलिङ्गं भूभृतं शनैः ॥२५॥
न जिह्वा मे महाराज वाणी मेऽपि न मे मनः ।
हरेरन्यदपीन्द्रं वा स्तौति नैव च वक्ष्यति ॥२६॥
अन्ये च कौशिकस्यापि शिष्याः सर्वे तथाऽवदन् ।
वशिष्ठो गौतमश्चापि हरिः सारस्वतस्तथा ॥२७॥
चित्रश्च चित्रमाल्यश्च शिशुश्चोचुस्तथैव ते ।
न वयं भगवद्भिन्नं नरं वा देवतादिकम् ॥२८॥
गायामो नापि गास्यामो वयमेकान्तिनो हरेः ।
अथ ये श्रावकाश्चासन् वैष्णवास्तेऽपि वै तथा ॥२९॥
पार्थिवं जगदुस्तत्र राजन् वयं हि वैष्णवाः ।
देहेन्द्रियमनोबुद्ध्यहंकारात्मगुणा हि नः ॥३०॥
विष्णुपरा नान्यपरा वैष्णवस्यापि सेविनः ।
अवैष्णवस्य संगं न कुर्वन्ति विभ्रमादपि ॥३१॥
विष्णोर्वैष्णवभक्तस्य शृण्वन्ति चरितानि वै ।
श्रोत्रागीमानि राजेन्द्र ! तदन्यस्य न कर्हिचित् ॥३२॥
गानकीर्तिं वयं हरेः शृणुमोऽन्यां न च स्तुतिम् ।
अन्यैः सह व्यवहारमात्रं वच्म इव त्वया ॥३३॥
न स्पृशामो वैष्णवाऽन्यं जलं स्थलं जडं चितम् ।
न वदामो वैष्णवाऽन्यं पश्यामो नाप्यवैष्णवम् ॥३४॥
जलान्नादि न गृह्णीमो वैष्णवाऽन्यस्य वै क्वचित् ।
यदि प्राप्तं भवेत् स्यात्तद् भुञ्जामो वैष्णवाऽर्पितम् ॥३५॥
तच्छ्रुत्वा पार्थिवो रुष्टस्त्वेते ममाऽवमानकाः ।
प्रसह्य गापनीया वै गायन्तामिति चाऽब्रवीत् ॥३६॥
मम भृत्यान् मम कीर्तिं श्रावयन्तु हि कोविदाः ।
इत्याज्ञां वै समाकर्ण्य वैष्णवास्ते दृढव्रताः ॥३७॥
नैव जगुस्तदा राजा भृत्यानाज्ञापयन्निजान् ।
गातुं निजयशो भृत्या आरेभिरे नृपाज्ञया ॥३८॥
नृपस्यैव यशो गातुं तदा ते वैष्णवादयः ।
अङ्गुल्यादिभिरेव द्राक् श्रोत्राणि पिदधुस्तदा ॥३९॥
ततो राजा सुसंक्रुद्धः स्वदेशात् तान् विवासयत् ।
गायकास्तं परित्यज्य ययुर्वै दिशमुत्तराम् ॥४०॥
गायन्तः श्रीहरेर्नाम शृण्वन्तः परमेश्वरम् ।
श्रावयन्तश्च ते नारायणं कृष्णं हि मानुषान् ॥४१॥
हिमालयं ययुः शैत्ये कालधर्मं ततो गताः ।
विष्णुः प्राह समागत्य समागच्छन्तु मामनु ॥४२॥
भवन्तो मम भक्ता हि मदर्थं त्यक्तजीवनाः ।
इत्युक्त्वा भगवान् विष्णुरनयत्तान् दिवं परम् ॥४३॥
देवाद्यैः पूजितास्ते च पितृभिश्चाभिवन्दिताः ।
ब्रह्मलोकं गताः शीघ्रं मुहूर्तेनैव ते द्विजाः ॥४४॥
कौशिकादींस्ततो दृष्ट्वा ब्रह्मा लोकपितामहः ।
प्रत्युद्गम्य यथायोग्यं स्वागतेनाऽभ्यपूजयत् ॥४५॥
ततो विष्णुर्हि भगवान् समादाय निजाश्रितान् ।
विष्णुलोकं ययौ शीघ्रं वासुदेवः परः प्रभुः ॥४६॥
वैकुण्ठे तत्र वै विष्णुर्नारायणः परेश्वरः ।
मुक्तैः सिद्धैर्विष्णुभक्तैः पार्षदैः परिसेवितः ॥४७॥
नारायणसमैर्दिव्यैश्चतुर्बाहुधरैः शुभैः ।
विष्णुचिह्नसमापन्नैर्दीप्यमानैरकल्मषैः ॥४८॥

सनकाद्यैर्नारदाद्यैर्दिव्यस्त्रीभिः समन्ततः ।
विराजते सेव्यमानः सहस्रद्वारसंवृते ॥४९॥
सहस्रयोजनायामे दिव्ये मणिमये शुभे ।
विमाने विमले चित्रे गजपीठासने हरिः ॥५०॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
कौशिकादीन् विलोक्याऽथ हरिर्नारायणः प्रभुः ॥५१॥
एकरूपो ह्यभवच्च दिव्यगजासनस्थितः ।
कौशिकेत्याह सम्प्रीत्या स्वागतं कृतवाँस्तथा ॥५२॥
जयघोषो हि भक्तानां तदासीद् धामगर्जनः ।
भगवानाह भक्ता मे वैकुण्ठे संवसन्त्विति ॥५३॥
मत्कीर्तिश्रवणे युक्ता गीतितत्त्वार्थकोविदाः ।
लक्ष्मीनारायणसंहितार्थकीर्तनगायिनः ॥५४॥
अनन्यदेवता भक्ता मत्समीपे वसन्त्विति ।
मम धाम्नि भवन्त्वत्र पार्षदा मम शाश्वताः ॥५५॥
कौशिको मालवश्चापि मालवी पद्मनेत्रकः ।
तथाऽन्ये गायकाः सर्वे मम गायनसेविनः ॥५६॥
मयैव सह नित्यं वै गायन्तु च वसन्तु च ।
कौशिको गायनं मे वै करोतु वाद्यसंयुतम् ॥५७॥
मालवोऽयं दीपमालां करोतु सह भार्यया ।
पद्माक्षोऽयं धनेशो मे भवत्वेवाऽन्नसम्प्रदः ॥५८॥
मम सान्निध्यमाप्ता वै सर्वे वै लोकपूजिताः ।
अथैवं वदति विष्णौ क्षणे तत्र समागताः ॥५९॥
विपञ्चीगुणतत्त्वज्ञा वाद्यविद्याविशारदा ।
मन्दं मन्दस्मिता देवी मधुराक्षरपेशला ॥६०॥
शृंगारिता गायमाना लक्ष्मीर्विष्णुपरिग्रहा ।
वृता सहस्रकोटिस्वांगनाभिर्वै समन्ततः ॥६१॥
तत्र स्मृता महासाध्वी सरस्वती तु शार्ङ्गिणा ।
समायाता सवाद्या च सर्वशृंगारशोभना ॥६२॥
राधा रमा च कमला माणिकी श्रीः सती तथा ।
पद्मावती च हंसी च मंजुली सद्गुणा तथा ॥६३॥
आययुस्तत्र वै देव्यो गंगा दुर्गा सवाद्यकाः ।
सावित्री विरजा चाप्सरसो नारायणस्मृताः ॥६४॥
उर्वश्याद्यास्तदा गीतिनृत्यलीलाविशारदाः ।
मेनका सहजन्या च पर्णिनी पुञ्जिकस्थली ॥६५॥
कृतस्थली घृताची च विश्वाची पूर्वचित्तिका ।
अनुम्लोचा च प्रम्लोचा मनुवंती सुकेशिका ॥६६॥
अरूपा सुभगा भासी हंसा सूता सरोवती ।
कामली ह्यभया हंसपादी च सुमुखी दया ॥६७॥
अनपायाऽरुणा वरांबरा च विमनुष्यिका ।
असिपर्णा मिश्रकेशी शुचिकाऽलम्बुषा रमा ॥६८॥
मारीचिश्चाद्रिका विद्युत्पर्णा तिलोत्तमा जया ।
क्षेमा रंभा लक्ष्मणा चाऽसिता मनोभवाऽम्बिका ॥६९॥
सुबाह्वी सुप्रिया पुण्डरीका च सुरसा प्रभा ।
अजगन्धा सुदती च सुभुजा शान्तिका हिमा ॥७०॥
मुक्ता देवी च हैमी च पुष्पा चम्पा सविन्त्रिका ।
आययुश्चापि गन्धर्वाः स्मृता नारायणेन वै ।
नारदः पर्वतश्चापि विश्वावसुर्वरेण्यकः ॥७१॥
वसुरुचिः सुरुचिश्च वरुथश्चापि दारुणः ।
हंसो ज्योतिष्टमो मध्य आचारस्तुम्बुरुस्तथा ॥७२॥
सुबाहुश्च हहा हूहूः पर्जन्यश्च कलिस्तथा ।
शालिशिराश्चित्ररथो भीमश्च प्रयुतस्तथा ॥७३॥
अर्कपर्णः पर्णवान् सूर्यवर्चा धृतराष्ट्रकः ।
गोमान् सुपर्णो वरुणश्चोग्रसेनश्च भीमकः ॥७४॥
एते चान्येऽपि वाद्यैरन्वितास्तत्र चाययुः ।
तुम्बुरुस्तत्र गन्धर्वश्चाज्ञप्तो मम सन्निधौ ॥७५॥
लक्ष्मि ! त्वां गायिकां पश्यन् नेमे त्वां मां ततः परम् ।
तत्रासीनो यथायोगं नानामूर्छासमन्वितम् ॥७६॥
जगौ कलपदं हृष्टो विपञ्चीं चाभ्यवादयत् ।
श्रेष्ठं गानं प्रगायैव प्रसादितः परेश्वरः ॥७७॥
ददौ रत्नानि दिव्यान्याभरणान्यम्बराणि च ।
तुम्बुरवे ह्यमूल्यानि हृष्टश्च तुम्बुरुस्ततः ॥७८॥
प्रशंसितः स हरिणा तुम्बुरुस्तत्र चाग्रगः ।
अन्ये जगुश्च गन्धर्वा बहवस्तद्यथाबलम् ॥७९॥
यथाज्ञानं यथाऽभ्यासं जगुर्वाद्यस्वरादिभिः ।
लेभिरे तेऽपि वै तत्र पारितोषिकमुत्तमम् ॥८०॥
तथापि तुम्बुरुतुल्यं न तद्वै पारितोषिकम् ।
अप्सरसस्ततः सर्वाः प्रजगुर्वाद्यसाधनाः ॥८१॥
लक्ष्मीर्जगौ तथादेवी सरस्वती जगौ ततः ।
उत्तमं ते लब्धवत्यौ पारितोषिकमित्यपि ॥८२॥
उर्वशी प्रजगौ रम्यं सर्वरञ्जनकारकम् ।
अन्याश्चापि यथाशक्ति जगुर्नृत्यसमन्विताः ॥८३॥
भगवान् श्रीहरिश्चाहं प्रसन्नश्चाऽभवं तदा ।
दत्तवान् हीरकरत्नाम्बरभूषासुमालिकाः ॥८४॥

सर्वे सर्वाश्च सन्तुष्टास्ततो वै नारदो जगौ ।
दत्तवाँश्चोत्तमं तस्मै पारितोषिकमित्यपि ॥८५॥
मनाङ्न्यूनं तुम्बुरोस्तु तेन तुष्टो न नारदः ।
गायनेऽपि न सम्पूर्णो यतस्तापमवाप्तवान् ॥८६॥
चिन्तामापेदिवाँस्तत्र शोकाकुलान्तरोऽभवत् ।
कदाऽहं गायनं कृत्वा सर्वोत्तमोत्तमोत्तमम् ॥८७॥
लप्स्ये हरेः सकाशाद्वै पारितोषिकमुत्तमम् ।
श्रेष्ठं तुम्बुरुणा प्राप्तं धिङ्मां मूढं विचेतसम् ॥८८॥
इति सञ्चिन्तयन् विप्रस्तप आस्थितवान् मुनिः ।
दिव्यं वर्षसहस्रं तु नारदः श्रीहरिं स्मरन् ॥८९॥
ततो गीतिं कलां सर्वां तुम्बुरोरप्यवागमत् ।
ज्ञात्वा सर्वं तुम्बुरोश्च जगौ नारायणं प्रति ॥९०॥
बहुमन्वन्तरे काले प्रसन्नः पुरुषोत्तमः ।
हरिर्नारायणो देवस्तस्मै सर्वं ददौ शुभम् ॥९१॥
पारितोषिकमुत्कृष्टं समं चक्रे च तुम्बुरोः ।
एवं श्रीभगवद्दासी वधूर्नारायणस्य वै ॥९२॥
लक्ष्मीर्यथा हरेरर्थे सर्वार्पणं चकार ह ।
यथा च तुम्बुरुश्चापि नारदश्च यथापि च ॥९३॥
यथा च कौशिको विप्रो यथा पद्माक्षको द्विजः ।
यथा च मालवी पत्नी मालवश्च पतिस्तथा ॥९४॥
यथाऽन्ये गायका विप्राः कृतवन्तोऽर्पणं हरौ ।
तथा सर्वार्पणं कार्यं परमेशे जनार्दने ॥९५॥
इन्द्रियाणां वृत्तयश्च व्यापाराश्च क्रियास्तथा ।
मदर्थमेव कर्तव्यास्तेन तुष्यामि सर्वदा ॥९६॥
दर्शनं श्रवणं चापि स्पर्शनं गायनादिकम् ।
नृत्यं हास्यं मदर्थं वै भक्त्या कर्तव्यमेव ह ॥९७॥
मद्भक्तेभ्यः प्रदातव्यं भोजनं वारि चाम्बरम् ।
गृहं शय्यासनं यानं वाहनं वाटिका स्थलम् ॥९८॥
यथाशक्ति प्रदातव्यं जायते तोषणाय मे ।
भुक्तिमुक्तिफलं तच्च भवत्येव न संशयः ॥९९॥
लक्ष्मि संश्रवणाच्चापि मननाच्छ्रावणादपि ।
फलं नारदतुल्यं वै प्राप्येत नात्र संशयः ॥१००॥
लक्ष्मीतुल्यं फलं नारी वधूः सरस्वतीसमम् ।
जना गायकतुल्यं च विन्देयुर्नात्र संशयः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां कौशिकादिगायकदृष्टान्तेन वैष्णवोत्तमत्व-निरूपणनामाऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीनारायणीश्रीरुवाच—

नारायण हरे कान्त श्रीपते परमेश्वर ।
नारदः केन योगेन गानविद्यां हि लब्धवान् ॥ १ ॥
तुम्बुरोश्च समानत्वं कदा काले उपेयिवान् ।
पूर्वकल्पकथां चैतां वद मे श्रीनरायण ॥ २ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि विस्तरात्तां कथां शुभाम् ।
नारदस्तत आरभ्य वैकुण्ठाच्च विनिर्ययौ ॥ ३ ॥
निरुच्छ्वासेन विमनास्तुम्बुरोर्गौरवं स्मरन् ।
तताप वर्षसाहस्रं तपोराशिस्ततोऽभवत् ॥ ४ ॥
तदाऽन्तरीक्षे शुश्राव भारतीमशरीरिणीम् ।
किमर्थं नारद चैतत्तपस्तपसि दुश्चरम् ॥ ५ ॥
उलूकं पश्य गत्वा त्वं यदि गाने रता मतिः ।
मानसोत्तरशैले वै गानबन्धुरितिश्रुतम् ॥ ६ ॥
गच्छ शीघ्रं प्रपश्यैनं गानवित् त्वं भविष्यसि ।
इत्युक्तो नारदः शीघ्रं गानबन्धुं जगाम ह ॥ ७ ॥
कामरूपधरः पक्षी कामस्वरोऽतिदैवतः ।
शिक्षयति स्म गानं च पक्षिणो देहिनोऽपि च ॥ ८ ॥
गन्धर्वाः किन्नरा यक्षास्तथा चाप्सरसां गणाः ।
समासीनास्तु परितो गानबन्धुं तदाऽभवन् ॥ ९ ॥
गानविद्यां समापन्नाः शिक्षितास्तेन पक्षिणा ।
स्निग्धकण्ठस्वरास्तत्र गायन्ति स्म क्रमात्तदा ॥१०॥
मुनिं नारदमालोक्य गानबन्धुरुवाच ह ।
नमस्ते मुनिशार्दूल स्वागतं तेऽभिवन्दनम् ॥११॥
किमर्थं भगवाँश्चात्र कृपया वा यदृच्छया ।
दातुं वा दर्शनं पुण्यं वद किं करवाणि ते ॥१२॥
नारदस्तं तदा प्राह शृणूलूक यथातथम् ।
महाद्भुतं मम वृत्तं पुरा जातं वदामि ते ॥१३॥
अतीते कल्पके तत्राऽतीते युगे त्वहं हरेः ।
सन्निधावगमँस्तत्र गानं कर्तुं समुत्सुकः ॥१४॥
लक्ष्मीसमन्वितो विष्णुः समाहूय च तुम्बुरुम् ।
मां विनिर्धूय संहृष्टो ह्यशृणोद् गानमुत्तमम् ॥१५॥
तेनाऽहमतिदुःखार्तस्तपस्तप्तुं गतोऽभवम् ।
विष्णोर्माहात्म्ययुक्तस्य गानयोगस्य वैभवम् ॥१६॥
सञ्चिन्त्याऽहं तपो घोरं तप्तवान् वै ततः परम् ।
दिव्यवर्षसहस्रान्ते त्वामुद्दिश्याऽम्बरीं गिरम् ॥१७॥

अश्रृणवं गानबन्ध्वभिधं याहि मतिर्यदि ।
गाने चेद् वर्तते तर्हि ह्युलूकं पश्य मा चिरम् ॥१८॥
इत्यहं प्रेरितश्चात्र त्वत्समीपमुपागतः ।
शिष्यं मां त्वं ततो मत्वा प्रशिक्षय प्रपालय ॥१९॥
श्रुत्वैवं गानबन्धुश्च नारदं प्राह कोविदः ।
अत्याश्चर्यमयीं गाथां विष्णुभक्त्याश्रयां शुभाम् ॥२०॥

भुवनेशइतिख्यातो राजाऽभूत् पूर्वकल्पके ।
अश्वमेधसहस्रैश्च वाजपेयाऽयुतेन च ॥२१॥
गवां कोट्यर्बुदेनैव सुवर्णपद्मकोटिभिः ।
वाससां रथहस्तीनां कन्याऽश्वानां परार्धकैः ॥२२॥
दानं दत्त्वा हि विप्रेभ्यः साधुभ्योऽपालयद्धराम् ।
अगापयन्निजां कीर्तिं गायकेभ्योऽप्यहर्निशम् ॥२३॥
ये न गायन्ति तान् कारागारे धृत्वाऽवरुध्यति ।
मम गानमकुर्वाणो वध्यो मे-इतिशासनम् ॥२४॥

मम गानं प्रकुर्वन्तु स्त्रियो नराश्च नित्यशः ।
सूतमागधसंघाश्च गीतं कुर्वन्तु मे मुहुः ॥२५॥
इत्याज्ञप्य स राजा वै राज्यं स्वं पर्यपालयत् ।
तस्य नृपस्य साम्राज्ये हरिमित्रइतिश्रुतः ॥२६॥
ब्राह्मणो विष्णुभक्तोऽभूद् गीतिं करोति वै हरेः ।
नदीपुलीनमासाद्य प्रतिमां श्रीहरेः शुभाम् ॥२७॥
अभ्यर्च्याऽपि च नैवेद्यं जलं दत्त्वा ह्यगायत ।
अतीव स्नेहसंयुक्तस्तालवर्णलयान्वितम् ॥२८॥

अथ राज्ञः समादेशकर्ता चारः समागतः ।
आज्ञापयामास तं च गातुं राज्ञो यशस्तदा ॥२९॥
विप्रश्च वैष्णवः सोऽपि नाऽङ्गीचकार तद्वचः ।
ततश्चारो ब्राह्मणं तं गृहीत्वा राजसन्निधौ ॥३०॥
नीत्वा न्यवेदयद् राजा भर्त्सयामास तं द्विजम् ।
राज्यान्निर्यातयामास हृत्वा सर्वं धनादिकम् ॥३१॥
विप्रो वनान्तरे गत्वाऽभजच्छ्रीपरमेश्वरम् ।
राजा चाऽऽयुःक्षयेनैव कालधर्ममुपेयिवान् ॥३२॥

यमलोके गतस्तत्र कुंभीपाके पपात ह ।
क्षुधया च तृषा व्याप्तस्तिरस्कारैः प्रतोदितः ॥३३॥
भुक्त्वा दुःखानि बहुधा ततः स्वर्गमुपागतः ।
किन्तु तत्र विमाने यत्प्राप्तं भोज्यं जलामृतम् ॥३४॥
दृश्यमात्रं जायते तल्लीयते ग्रहणक्षणे ।
नैव पेयं तथा भोज्यं नृपदेवस्य जायते ॥३५॥
तेन खिन्नः शुशोचापि स्वर्गतस्यापि मे त्विह ।
क्षुत्तृट्प्रवर्तते भोज्यं पेयं स्पृष्टं विलीयते ॥३६॥

मया पापं कृतं किं यत्फलं त्वेतत्प्रभुज्यते ।
इत्येवं चिन्तयानस्य व्योमवाणी ह्यजायत ॥३७॥
त्वया राजन्महत्पापं कृतमज्ञानमोहतः ।
हरिमित्रं द्विजं कृष्णपरायणं हि गायकम् ॥३८॥
तव गानमकुर्वन्तं दत्तवान् दण्डमुल्बणम् ।
त्वया हृतं धनं तस्य विवासितश्च राज्यतः ॥३९॥

सक्षुधातृट्समवेतो वने तपः करोति वै ।
भक्तोऽयं वै हरेः राजँस्त्वया प्रदुःखितः कृतः ॥४०॥
तेन पापेन ते राजन् भोज्यं पेयं विलीयते ।
दानयज्ञादिकं सर्वं निष्फलं ते प्रजायते ॥४१॥
गीतवाद्यसमोपेतं गायमानं हरिश्रितम् ।
हरिमित्रं सुभक्तं त्वं दुःखितं चाऽकरोर्यतः ॥४२॥
नष्टस्ते स्वर्गलोकोऽपि गच्छ पर्वतकोटरम् ।
धूलीं खादन् वस तत्र यावन्मन्वन्तरं भवेत् ॥४३॥

कर्दमी नाम कीटस्त्वं ततः कालान्तरे पुनः ।
पापभोगं प्रभुक्त्वैव मानुष्यं त्वं गमिष्यसि ॥४४॥
इत्येवं स च राजा वै भ्रष्टः स्वर्गाच्च कोटरम् ।
आययौ कर्दमे जातः कर्दमी जलभूस्थले ॥४५॥
उलूकोऽहं तत्र चापि जिज्ञासार्थं गतोऽभवम् ।
मया पृष्टः स वृत्तान्तं जगाद पूर्वपादितम् ॥४६॥
भगवद्भक्तद्रोहस्य फलं कर्दमभक्षिताम् ।
जगादाऽपि ततश्चाहं निर्ययौ तस्य गह्वरात् ॥४७॥

व्योममार्गे दृष्टवाँश्च विमानं पार्षदान्वितम् ।
गीतियुक्तं यत्र चास्ते ब्राह्मणो हरिमित्रकः ॥४८॥
देवैश्च पार्षदैश्चापि स्तूयमानो विमानके ।
विष्णुलोकं ययौ श्रीमान् मया सोऽपि विलोकितः ॥४९॥
हरेर्गानस्य पुण्यं तद् वैकुण्ठं प्रति सद्गतिः ।
तदैश्वर्यप्रभावेण मनो मे समुपागतम् ॥५०॥
गानविद्यां प्रति ततः किन्नरैः समुपाविशम् ।
षष्टिं वर्षसहस्राणां गानयोगेन मे ततः ॥५१॥

जिह्वा वैशद्यमापन्ना ततो गानमशिक्षयम् ।
ततोऽपि बहुकालेन गानं चाऽशिक्षयं मुहुः ॥५२॥
गानयोगसमायुक्ता गता मन्वन्तरा दश ।
गानाचार्योऽभवं पूर्वं गन्धर्वाणां च योषिताम् ॥५३॥
किन्नराणां गायकानां सर्वेषां नरयोषिताम् ।
अप्सरसां तथाऽऽचार्यश्चाऽभवं पूर्वकल्पके ॥५४॥
गायकानां तदा संघा मामाचार्यमुपागताः ।
ये त्विदानीं नारदाऽत्र वर्तन्ते समुपस्थिताः ॥५५॥

ते तु शिष्यप्रशिष्याणां शाखासहस्रयोगिनः ।
वंशवंशानुवंश्याश्च वर्तन्ते मम शिष्यकाः ॥५६॥
तपसा नैव शक्या वै गानविद्या हि नारद ।
तस्माच्छ्रुतेन सम्पन्नो मत्तस्त्वं गानमाप्नुहि ॥५७॥
इत्युक्तो नारदो लक्ष्मि प्रणिपत्य नमस्य माम् ।
शिक्षाक्रमेण चोलूकात् तत्र गानमशिक्षत ॥५८॥
कथायां स्त्रीसहसंगे गीते द्यूते च भोजने ।
व्यवहारे द्रव्यलाभे चाये व्यये निजार्थके ॥५९॥
त्यक्तलज्जो जनो याति जयं लज्जायुतो न वै ।
न कुंचितेन गूढेन वस्त्रप्रावरणादिभिः ॥६०॥
हस्तविक्षेपभावेन व्यादितास्येन चैव ह ।
निर्यातजिह्वायोगेन न गेयं हि कथंचन ॥६१॥
न गायेदूर्ध्वबाहुत्वे नोर्ध्वदृष्टिः कथंचन ।
स्वांगं निरीक्षमाणेन परं सम्प्रेक्षता तथा ॥६२॥
संघट्टे च तथोत्थाने कटिस्थाने न शस्यते ।
ह्रासो रोषस्तथा कम्पस्तथाऽन्यत्र स्मृतिः पुनः ॥६३॥
नैतानि शस्तरूपाणि गानयोगे महामते ।
नैकहस्तेन शक्यं स्यात् तालसंघटनं मुने ॥६४॥
क्षुधार्तेन भयार्तेन तृषार्तेन तथैव च ।
गानयोगो न कर्तव्यो नान्धकारे कथञ्चन ॥६५॥
एवमादीनि चाऽन्यानि प्रमादाऽऽलस्यकानि च ।
न कर्तव्यानि वै रंगे गायता च विजानता ॥६६॥
एवं शिक्षां समगृह्य विधिना नारदो मुनिः ।
अशिक्षत तथा गीतं दिव्यं वर्षसहस्रकम् ॥६७॥
ततः समस्तसम्पन्नो गीतप्रस्तरकादिषु ।
विपञ्च्यादिषु सम्पन्नः सर्वस्वरविभागवित् ॥६८॥
अयुतानि च षट्त्रिंशत् सहस्राणि शतानि च ।
स्वराणां भेदयोगेन ज्ञातवान् मुनिसत्तमः ॥६९॥
ततो गन्धर्वसंघाश्च किन्नराणां तथैव च ।
मुनिनां सह संयुक्ताः प्रीतियुक्तास्ततोऽभवन् ॥७०॥
गानबन्धुं मुनिः प्राह प्राप्य गानमनुत्तमम् ।
त्वां समासाद्य सम्पन्नस्त्वं हि गीतिविशारदः ॥७१॥
गुरो तव प्रपूजायां किमाचार्य ! करोमि ते ।
गानबन्धुस्ततः प्राह ब्रह्मणो दिवसे खलु ॥७२॥
नश्यन्ति मनवस्तत्र चतुर्दश तथा त्वहम् ।
जीवामीति वरं देहि दक्षिणां हि ममेप्सिताम् ॥७३॥
तावन्मे त्वायुषो भावस्तावन्मे परमं शुभम् ।
मनसा वाञ्छितं मे स्याद् दक्षिणा नारदात्र वै ॥७४॥

नारदस्तं तदा प्राह भवत्वेवं ततोऽपि च ।
कल्पान्तरे भवानेव गरुडश्च भविष्यति ॥७५॥
स्वस्ति तेऽस्तु महाप्राज्ञ भगवद्वाहनः शुभः ।
गमिष्यामि नमस्तेऽस्त्वित्युक्त्वा श्रीनारदो ययौ ॥७६॥
नारायणस्य वैकुण्ठं लक्ष्मि यत्र वसाम्यहम् ।
ममाऽग्रे गायनं चक्रे बहुधैव सुगीतिकम् ॥७७॥
तच्छ्रुत्वाऽहमवोचं तं गानाऽसम्पन्नमेव ह ।
तुम्बुरोर्न विशिष्टोऽसि गीतैरद्यापि नारद ॥७८॥
गानबन्धुं समासाद्य गानार्थज्ञो भवान् ननु ।
यदा विशिष्टो भविता तदा तुष्टोऽपि माधवः ॥७९॥
भविष्यामि क्षितौ भाव्ये मानवे चाऽवतारिणि ।
तदानीं मां समासाद्य कारयेथा यथातथम् ॥८०॥
तदा त्वां गीतसम्पन्नं करिष्यामि महाव्रतम् ।
तुम्बुरोश्च समं चापि तथाऽतिशयसंयुतम् ॥८१॥
तावत्काले यथायोगं देवगन्धर्वयोनिषु ।
शिक्षस्व त्वं यथान्यायं स्वस्ति तेऽस्तु सुराष्ट्रके ॥८२॥
श्रुत्वा नारायणवाक्यं प्रणम्य नारदो हरिम् ।
स्कन्धे विपञ्चीमासाद्य सर्वलोकान् चचार ह ॥८३॥
वारुणं याम्यमाग्नेयमैन्द्रं कौबेरमित्यपि ।
वायव्यं च तथैशानं सदः संप्राप्य नारदः ॥८४॥
गायमानो हरिं सम्यग् वीणावादनदक्षकः ।
गन्धर्वाप्सरसां संघैः पूज्यमानस्ततस्ततः ॥८५॥
ब्रह्मलोकं समासाद्य रात्रिं निनाय काल्पिकीम् ।
प्रातः पुनश्चात्र कल्पे ब्रह्मलोकेऽजमन्दिरे ॥८६॥
हाहाहूहूश्च गन्धर्वौ गीतवाद्यविशारदौ ।
ब्रह्मणो गायकौ दिव्यौ नित्यगायनतत्परौ ॥८७॥
तत्र ताभ्यां समासाद्य गायमानो हरिं प्रभुम् ।
गृहीतपारितोषश्च प्रणम्य च पितामहम् ॥८८॥
चचार स यथाकामं प्रययौ तुम्बुरोर्गृहम् ।
वीणामादाय तत्रस्थो ह्यगायताऽप्यशिक्षत ॥८९॥
स्वरकल्पास्तु तत्रस्थाः षड्जाद्याः सप्त ये मताः ।
तान्समग्रांस्तुम्बुरोर्वै नारदः समशिक्षत ॥९०॥
सप्तस्वराऽगनाश्चापि नारदः समशिक्षत ।
किन्तु गायनकाले वै वीणायोगे हि चांगनाः ॥९१॥
तन्व्यः प्रपेदिरे नैव यथायोग्योद्भवानि वै ।
ततोऽश्वपट्टसरसि लोमशस्याऽऽश्रमे पुनः ॥९२॥
गानं चकाराऽनिष्पन्नं तदाऽहं श्रीनरायणः ।
अवदं त्वां प्रियां नित्यदिव्यरूपां हि पद्मजे ॥९३॥

सरस्वतीं चाऽवदं च शिक्षयस्व हि नारदम् ।
विणागानसमायोगे तथेत्युक्त्वा ततः परम् ॥९४॥
सम्प्रहासा शिक्षयामासिथ लक्ष्मीः सरस्वती ।
ततो ब्रह्मप्रियाणां वै सन्निधौ गानमाचरत् ॥९५॥
उक्तोऽसौ गायमानोऽपि न स्वरं वेत्सि वै मुने ।
ततः स्वरांगनाः प्राप्य तन्त्रीयोगं च नारदम् ॥९६॥
आहूयाऽहं गानयोगमशिक्षयं त्वनुत्तमम् ।
ततोऽतिशयमापन्नस्तुम्बुरोर्मुनिसत्तमः ॥९७॥
ततो ननर्त गात्वैव प्रणिपत्य च मां मुहुः ।
मयोक्तो नारदस्तत्र सर्वज्ञोऽसि ममान्तिके ॥९८॥
गायस्व ज्ञानयोगेन जगौ चापि स नारदः ।
तुष्टोऽहं नित्यसान्निध्यं दत्तवानत्र चाक्षरे ॥९९॥
क्षेत्रे कुंकुमवाप्यां स वर्तते नारदो मुनिः ।
प्राप्योत्तमं पारितोषिकं प्रसन्नेन चार्पितम् ॥१००॥
मयैव तुम्बुरोश्चापि श्रेष्ठत्वं चापि चार्पितम् ।
अथ कालान्तरे कृष्णगृहे गास्यति नारदः ॥१०१॥
एष वो ब्रह्मपत्न्योऽत्र प्रोक्तो गीतिक्रमो मुनेः ।
गाता क्रमेण चानेन मम सालोक्यमाप्नुयात् ॥१०२॥
कर्मणा मनसा वाचा नारायणपरायणः ।
गायन् शृण्वन् मामुपैति तद्धै गेयं परं मतम् ॥१०३॥
उलूकोऽपि गरुडोऽयं वर्ततेऽश्वसरोवरे ।
गानबन्धुर्महाभागः पार्षदो गानकृन्मम ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने श्रेष्ठभक्तदृष्टान्ते वधूगीतायां नारदस्य गान-शिक्षाऽर्जनगरुडाख्याननिरूपणनामा नवपञ्चा-शत्तमोऽध्यायः ॥ ५९ ॥

**श्रीनारायणीश्रीरुवाच—**

वैष्णवा इति ये प्रोक्ता नारायणपरायणाः ।
भागवताः सात्त्वता ये सर्वस्वात्मनिवेदिनः ॥ १ ॥
कानि चिह्नानि तेषां वै तासां च ब्रूहि मे प्रभो ।
तेषां तासां च भगवान् किं करोषि हरे विभो ॥ २ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं मम भक्तस्वरूपिणीम् ।
प्रेमकथां पावनीं मे तादात्म्यभावधारिणीम् ॥ ३ ॥
यत्रास्ते मम भक्तस्तु तत्राऽहं सर्वदा स्थितः ।
अहमेव सदा तेषां तासां परमदेवता ॥ ४ ॥

कीर्त्यमाने हरौ नित्यं रोमाञ्चो जायते मुहुः ।
कम्पः स्वेदस्तथाऽक्षेषु दृश्यन्ते जलबिन्दवः ॥ ५ ॥
मम भक्तिपरान्पुंसो नारीर्वा वीक्ष्य वै द्रुतम् ।
प्रीतिर्भवति चान्तर्गा येषां यासां स वैष्णवः ॥ ६ ॥
नान्यदाच्छादयेद् वस्त्रं नान्याधीना भवेत् सती ।
वैष्णवं सात्त्वतं दृष्ट्वा प्रेम्णा सम्मुखसंस्थिता ॥ ७ ॥
प्रणामादि करोत्येव श्रीकृष्णे वै यथा मयि ।
भक्तं भक्तां च वा वीक्ष्य भक्तो भक्ता नमेद् द्रुतम् ॥ ८ ॥
मदात्मा मम भक्तः स भक्ता च भामिनी मम ।
जयं लभते त्रैलोक्ये सर्वधामसु सृष्टिषु ॥ ९ ॥
विना लज्जां भजते मां निराकृत्य दुरीतकान् ।
दत्ते सर्वं मदर्थं वै वैष्णवः सः सा वैष्णवी ॥१०॥
रूक्षाऽक्षराणि वै शृण्वन् भक्तेरितानि वै क्वचित् ।
प्रमोदं लभते तत्र न रोषं प्रकरोति हि ॥११॥
प्रणामपूर्वकं क्षान्त्या गृह्णीयाद् गुणमेव तु ।
वैष्णवो वैष्णवी सैव दिव्यदृष्टियुता सती ॥१२॥
गन्धपुष्पादिकं सर्वं शिरसा या हि धारयेत् ।
हरेः सर्वमितीत्येवं मत्वेयं वैष्णवी हि सा ॥१३॥
मम क्षेत्रे शुभानेव करोति तु दिवानिशम् ।
मां सतो मम भक्तांश्च सेवते स्नेहसंयुतः ॥१४॥
प्रतिमां पूजयेन्नित्यं मम सर्वोपचारकैः ।
कर्मणा मनसा वाचा स सा भक्तोत्तमा मता ॥१५॥
रोगे कष्टेऽथवाऽऽपत्तौ विघ्ने चोद्वेजने तथा ।
मानतां मम सेवायाः सत्संगस्य तथा सताम् ॥१६॥
मन्दिरस्य च साधूनां भक्तानां भक्तयोषिताम् ।
गुरूणां चापि सेवायाः कुर्यात् दहर्निशं च यः ॥१७॥
ब्रह्मप्रियाणां सेवायास्तथा क्षेत्रस्य वै शुभाम् ।
अन्नवस्त्रजलादानवस्त्रक्षालनकामिकाम् ॥१८॥
लेपनक्षालनसंस्कारणमार्जनकामिकाम् ।
पात्रमज्जनरूपां च गोमहिषीप्रसेवनाम् ॥१९॥
आगन्त्वतिथिसेवां च सेवां भोजनपानदाम् ।
पादसंवाहनसेवां चांगमर्दनरूपिणीम् ॥२०॥
औषधादिप्रदानां च काष्ठाहरणरूपिणीम् ।
यथाशक्ति यथायोग्यां जात्यवस्थानुरूपिणीम् ॥२१॥
सेवां भृत्यक्रियां दासीदासक्रियां सुशोभनाम् ।
मानतां यश्च या कुर्यात् कुर्यात्तथैव भृत्यताम् ॥२२॥
नारायणपरं यस्य यस्याः सर्वस्वमेव तु ।
सतां परायणं यस्य यस्याः सर्वस्वमेव च ॥२३॥

धर्मार्थे चापि मोक्षार्थे ययोः सर्वस्वमेव च ।
नारायणपरावेतौ महाभागवतौ हि तौ ॥२४॥
भोजनाऽऽराधनं सर्वं यथाशक्ति करोति यः ।
विष्णुभक्तस्य वै नित्यं स वै भागवतोत्तमः ॥२५॥
नारायणपरो भक्तोऽश्नाति यदन्नमेव तत् ।
हरेरास्यं समश्नाति तृप्यत्येव हरिः स्वयम् ॥२६॥
विष्णुभक्तान् पूजयेद् यो भक्त्या वै विष्णुवन्नरः ।
नारी वा विष्णुसामीप्यं याति मुक्तिं हि शाश्वतीम् ॥२७॥
अन्यभक्तसहस्रेभ्यो विष्णुभक्तो विशिष्यते ।
विष्णुभक्तसहस्रेभ्यो हरेर्भक्तो विशिष्यते ॥२८॥
हरेर्भक्तो ब्रह्मरूपः परेशधामगो भवेत् ।
अवतारिस्वरूपस्य ममैव भक्तराट् हि सः ॥२९॥
अत्रैव जीवमानाया मुक्तायाः खलु रक्षणम् ।
करोम्यहं सदा लक्ष्मि ! शृणु भक्ताकथां पराम् ॥३०॥
चिदम्बराऽभवद् राज्ञी सम्राज्ञी जिष्णुभूभृतः ।
सौराष्ट्रे गोदले देशे मम भक्तिपरायणा ॥३१॥
जिष्णुशक्तिर्हि निधनं प्राप्तो भक्त्या ममालयम् ।
ययावक्षरसंज्ञं च राज्ञी राज्यमकारयत् ॥३२॥
भक्ता ब्रह्मपरा देवीतुल्या शौचसमन्विता ।
प्रातरुत्थाय मां कृष्णनारायणं पुमुत्तमम् ॥३३॥
परमेशं चाऽक्षरेशं श्रीपतिं पुरुषोत्तमम् ।
अर्चयामास सततं वाङ्मनःकायकर्मभिः ॥३४॥
भोजनं पूजनं वारिदानं पुष्पस्रजर्पणम् ।
गन्धादिपेषणं चापि धूपद्रव्यप्रसाधनम् ॥३५॥
भूमेरालेपनं चापि हविषां पाचनं तथा ।
भक्तिकौतुकसर्वस्वा स्वयमेव चकार सा ॥३६॥
शुभा चिदम्बरा नित्यं वाचा नारायणेति च ।
अनादिश्रीकृष्णनारायणेति भाषते मुहुः ॥३७॥
दशवर्षसहस्राणि तत्परा चान्तरात्मना ।
अर्चयामास मां कृष्णं गन्धपुष्पादिभिः सदा ॥३८॥
विष्णुभक्तानपरांश्च महाभागवतान् शुभान् ।
दानमानार्चनैर्नित्यं धनैः रत्नैरतोषयत् ॥३९॥
ततः कदाचित् सा राज्ञी सुष्वाप पूजनोत्तरम् ।
द्वादश्यां च निशान्ते तां प्रत्यक्षः पुरुषोत्तमः ॥४०॥
अहमेव स्वयं लक्ष्मि सर्वशोभान्वितोऽभवम् ।
तया स्वप्नकृतां पूजामङ्गीचकार सर्वशः ॥४१॥
मया दत्तानि चिह्नानि मालां कण्ठे हि तौलसीम् ।
भाले सतिलकश्चन्द्रः कौङ्कुमः शोभनस्तथा ॥४२॥
नेत्रयोः कज्जलं चापि कर्णयोः कुण्डले तथा ।
कण्ठे कमलमालां च बाह्वोरायुधलेखिकाः ॥४३॥
शंखचक्रगदापद्मरेखाः सतिलकास्तथा ।
अहं ततोऽभवं लक्ष्मि चाऽदृश्यस्तत्क्षणाद्धि सा ॥४४॥
उन्निद्रा ह्यभवत्तूर्णं ददर्शाऽङ्कितविग्रहाम् ।
आश्चर्यं महदापन्नाऽभवत् प्रमोदसंभृता ॥४५॥
महाभागवती जाता महासात्त्वतिका तथा ।
मदर्थकृतसर्वस्वा मदर्थराज्यवैभवा ॥४६॥
मदर्थाऽर्पणसर्वस्वा भेजे ततो हि मां सती ।
महावैराग्यमूर्तिः सा परमेशपरायणा ॥४७॥
ब्रह्मचर्यपरा नित्यं सत्संगतिपरायणा ।
त्यक्तविषयरागा च साध्वीवद् वर्तते सदा ॥४८॥
आत्मनिवेदिनी दासी किंकरीव हि वर्तते ।
अथ कालान्तरे चाऽहं परीक्षितुमुपाययौ ॥४९॥
ऐरावतमिवाऽचिन्त्यं कृत्वा वै गरुडं निजम् ।
स्वयं शक्रोऽभवं चापि राज्ञीसौधमुपागतः ॥५०॥
इन्द्रोऽहमस्मि भद्रं ते किं ददामि वरं च ते ।
सर्वस्वर्गेश्वरश्चाऽहं दातुं त्वां स्वर्गमागतः ॥५१॥
गृहाण नाकं श्रेष्ठं वा माहेन्द्रं पदमुत्तमम् ।
ते दासी भवतु द्यौश्च भूश्च दासी सदा तव ॥५२॥
गृहाण राज्यं सुभगे वैधव्यं विप्रवासय ।
गृहाण श्रेष्ठं सौभाग्यं मन्वन्तरसमं शुभम् ॥५३॥
मा देहं क्षपयेर्दिव्यं भोगयोग्यं सुकोमलम् ।
यदृच्छयाऽऽगतं प्राप्य सुखिनी भव भामिनी ॥५४॥
विना कान्तं सदा रूक्षं जगद् दग्धं हि योषिताम् ।
तस्मात् कान्तं सुकान्तं मां गृहाण पुण्यशालिनी ॥५५॥
श्रुत्वा चिदम्बरोवाच नमस्यामीन्द्रयोगिने ।
देवतायै नमो मेऽस्तु मा दोषं पश्य देवते ॥५६॥
देहोऽयं मानवश्चास्ते देवता तैजसी सदा ।
ऐन्द्रपदस्य हन्त्री च मानवीयोनिरुल्बणा ॥५७॥
मा मनुष्ये पुण्यहारे मनः कृथाः सुरोत्तम ।
मा तथा मच्छापदग्धो भव क्षमां विधेहि माम् ॥५८॥
पूजां प्राप्य नमो लब्ध्वा प्रयाहि त्वं सुरेश्वर ।
राजस्यो देवता यूयं स्त्रीवन्तो वै स्वभावजाः ॥५९॥
स्त्रीकामास्तत्र नाश्चर्यं किन्तु मे तन्न रोचते ।
नाऽहं त्वामभिसन्धाय राज्यं करोमि भूतले ॥६०॥
त्वया दत्तं च नेष्यामि याहि चेन्द्र निजालयम् ।
मम नारायणो नाथस्तं कान्तं प्रभजामि हि ॥६१॥

गच्छेन्द्र ! मा कृथास्त्वत्र मम बुद्धिविलोपनम् ।
अनादिश्रीकृष्णनारायणदासी भवाम्यहम् ॥६२॥
श्रुत्वैवं भगवानिन्द्रो विवृत्त्य चेन्द्ररूपताम् ।
शार्ङ्गचक्रगदापद्मपाणिरूपोऽभवत् स्वयम् ॥६३॥
गरुडोपरि लक्ष्मीश्रीसहितोऽहं हरिः प्रभुः ।
प्रत्यक्षतां गतस्तस्याः सा तुष्टाव ननाम माम् ॥६४॥
प्रसीद देवदेवेशेश्वरेश्वरेश्वरेश्वर ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥६५॥
त्वमनादिः पतिर्नाथः स्वामी कान्तः श्रियः पतिः ।
अप्रमेयो विभुर्विष्णुर्गोविन्दः कमलेक्षणः ॥६६॥
ब्रह्मप्रियापतिर्हरिप्रियापतिः परमेश्वरः ।
त्वां प्रपन्नाऽस्मि गोविन्द गोदलेश प्रिय प्रभो ॥६७॥
त्वां विना कांक्षये नैव राज्यं स्वर्गं सुखं परम् ।
नान्या गतिस्त्वदन्या मे त्वमेव शरणं मम ॥६८॥
सत्येन्द्रस्त्वं महेन्द्रस्त्वं चात्मेन्द्रस्त्वं परेश्वर ।
मम सर्वेन्द्रियाणां त्वां यथार्थेन्द्रं भजामि हि ॥६९॥
नमामि प्राणनाथं त्वां नमामि चान्तरस्थितम् ।
नमामि सुखशय्यास्थं तुर्यपदसुयोगिनम् ॥७०॥
श्रुत्वा स्तुतिमवोचं तां किं ते हृदि चिकीर्षितम् ।
तत्सर्वं ते प्रदास्यामि वद भक्ताऽसि मे परा ॥७१॥
भक्तिप्रियोऽहं सततं यदिच्छसि ददामि तत् ।
श्रुत्वा चिदम्बरा प्राह नित्य मे मानसं च हृत् ॥७२॥
अनादिश्रीकृष्णनारायणकान्तपरायणम् ।
वर्ततां मयि नाथस्त्वं कान्ताकान्तो हृदि स्थितः ॥७३॥
यथा हरे भवानास्ते सर्वान्तरात्मवित् प्रभुः ।
तथा भवाम्यहं कृष्ण त्वदान्तरात्मभूयसी ॥७४॥
कृपया ते यावदस्ति पालयिष्यामि मेदिनीम् ।
वैष्णवं च क्रतुं कृत्वा तर्पयिष्यामि देवताः ॥७५॥
वैष्णवान् पालयिष्यामि भवान् वसतु मे गृहे ।
मम कान्तो भवानास्ते सदा रक्षाकरो भव ॥७६॥
यद्वा धाम निजं नीत्वा मां लक्ष्मीमपरां कुरु ।
यथेष्टं चर गोपाल रमापाल चिदं प्रति ॥७७॥
चिदम्बरोक्तं श्रुत्वैव मया लक्ष्मि गदा मम ।
सर्वसंहारतेजोभिर्युक्ता तस्यै समर्पिता ॥७८॥
राज्यरक्षाकरी शत्रुनाशिनी पार्श्वयायिनी ।
सहस्राणां सहस्राणि गदानां यत्स्वरूपतः ॥७९॥
जायन्ते रणकाले वै शापरोगारिनाशिकाः ।
तां दत्वाऽहं मम स्थानं समाययौ कृपामयः ॥८०॥

साऽपि प्रमुदिता राष्ट्रं गोदलं पालयत्यपि ।
सर्ववर्णान् धर्ममार्गे स्वस्वकर्मस्वयोजयत् ॥८१॥
गृहे गृहेऽकारयच्च भक्तिं श्रीपौरुषोत्तमीम् ।
गृहे गृहे हरिस्तथौ वेदघोषो गृहे गृहे ॥८२॥
नामघोषो हरेश्चैव यज्ञघोषः पुरे पुरे ।
कारयामास यज्ञांश्च वैष्णवान् नृपनन्दिनी ॥८३॥
चिदम्बरायां शास्त्र्यां च भूमिरासीद् रसप्रदा ।
सतृणा रोगहीनाश्च प्रजाश्च निरुपद्रवाः ॥८४॥
दुर्भिक्षादिरहिताश्च महोत्सवोत्सवाः शुभाः ।
अकालमृत्युर्नास्त्येव व्याधिराधिर्न विद्यते ॥८५॥
एवं लक्ष्मि तया राज्ञ्या कृतं राज्यं हि वैष्णवम् ।
साधवो रक्षिताश्चापि मन्दिरेषु स्थले स्थले ॥८६॥
सन्तः सम्पूजिताश्चापि वार्यम्बराऽन्नभोजनैः ।
सत्यः साध्व्यो रक्षिताश्च सेविताः सततं तथा ॥८७॥
गावश्च रक्षिताः साध्व्या अनार्थाः पालितास्तथा ।
नित्यं प्रातस्तथा सायं कारितं भजनं मम ॥८८॥
मण्डल्यः स्थापिताश्चापि भक्तनारीजनान्विताः ।
हरे कृष्ण हरे नारायण श्रीपुरुषोत्तम ॥८९॥
हरे लक्ष्मीपते राधापते ब्रह्मप्रियापते ।
एवं तया कारितं च कीर्तनं मम सर्वतः ॥९०॥
अन्नसत्राणि रम्याणि कारितानि तया तथा ।
जलप्रपाः कारिताश्च वृक्षच्छायाः प्रकारिताः ॥९१॥
धर्मशालाः कारिताश्च गोशालाः कारितास्तथा ।
विद्यालयाः कारिताश्च ब्रह्मविद्यालयास्तथा ॥९२॥
कृषिकार्योदयाश्चापि नदाश्च कारितास्तया ।
कुंकुमवापिकाक्षेत्रे चिदम्बरासतीकृतम् ॥९३॥
मन्दिरं मे शोभतेऽत्र पश्य गगनशृंगवत् ।
नित्यं प्रातर्हि सा राज्ञी स्नात्वा सम्पूज्य मां ततः ॥९४॥
सभायां ब्रह्मविज्ञानां समायाति हि नित्यशः ।
ब्रह्मकथां सदा तत्र करोति गोदलायनः ॥९५॥
लक्ष्मीनारायणसंहितायाः करोति वाचनम् ।
कीर्तनं जायते पश्चात् ततश्चापि विसर्जनम् ॥९६॥
साधूनां च सतीनां च सत्संगो जायते शुभः ।
ब्रह्मशीलपराणां वै सेवा हृद्या प्रजायते ॥९७॥
नित्यं भवन्ति पञ्चापि यज्ञास्तस्या हि राष्ट्रके ।
इत्येवं ध्यायमाना मां करोति राज्यनिर्वहम् ॥९८॥
दिव्या दिव्यरमातुल्या चिदम्बरा हरिप्रिया ।
हरिं पतिं प्रभुं प्राप्य वैराग्यवृत्तिमाश्रिता ॥९९॥

'भजन्तां भगवन्तं तं प्राणेशं परमेश्वरम् ।
प्रयान्तु शाश्वतं धाम लभन्तां मुदमुत्तमम्' ॥१००॥
इत्येवं सा प्रजाः सर्वाः शिक्षां श्रावयति ध्रुवाम् ।
ध्रुवपुण्यफलां साध्वी दिव्यदेहवती ह्यभूत् ॥१०१॥
एतादृशीनां भक्तानां रक्षां करोमि सर्वदा ।
ददामि पार्श्ववासं च सेवां चरणयोस्तथा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां महाभागवतभक्तचिह्नानि चिदम्बराराज्ञ्याः परीक्षणं भक्तिश्रेत्यादिनिरूपणनामा षष्टितमोऽध्यायः ॥ ६० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्ताया रक्षणं तथा ।
गदया च कृतं तत्ते वक्ष्यामि चाद्भुतं महत् ॥ १ ॥
एकदा भद्रको नाम राक्षसोऽब्धिनिवासकृत् ।
श्रुत्वा ज्ञात्वा स्त्रिया राज्यं गोदलं पश्चराष्ट्रकम् ॥ २ ॥
चिदम्बरां निजां नारीं कर्तुमनाः स राक्षसः ।
कामरूपधरो भूत्वा राजन्यशतमोहनः ॥ ३ ॥
युवा भूत्वाऽतिरमणः पुष्टः सौन्दर्यराजितः ।
क्लृप्तवैष्णवतिलकः क्लृप्तराक्षससाधुभिः ॥ ४ ॥
क्लृप्तविप्रजनैर्युक्तो यात्रालुवेषशोभितः ।
राजस्मृद्धियुतो गोदलाख्यं पुरमुपाययौ ॥ ५ ॥
किलासनायां वाट्यां स संघरूपो ह्युवास ह ।
राज्ञ्या वृत्तान्तमाज्ञाय रक्षो भूत्वा तु वैष्णवः ॥ ६ ॥
नृपो ययौ राजसौधं राज्ञीं ददर्श शोभनाम् ।
राज्ञ्या विज्ञाय राजन्यः सत्कृतः स्वागतादिभिः ॥ ७ ॥
ययाचे स ततो राज्ञीं राज्यं चाऽङ्गमोहितः ।
राज्ञी न्यषेधयत् तूर्णं गन्तुं राष्ट्राद् बहिस्तदा ॥ ८ ॥
शीघ्रमाज्ञापयच्चापि राक्षसोऽपि तु वै द्रुतम् ।
नत्वा स्वकान् जनान् नीत्वा समुद्रं प्रययौ ततः ॥ ९ ॥
एकाकी त्वागतः कालान्तरे रात्रौ नृपीं प्रति ।
शयानां तां समुत्तोल्य स्कन्धे निनाय चाऽम्बरे ॥१०॥
प्रययौ वै द्रुतं रक्षो राज्ञी चोन्निद्रिता यदा ।
ददर्श राक्षसं व्योम्नि स्वां नयन्तं सती तदा ॥११॥
सस्मार तां गदां कौमुदकीं गदा द्रुतं पुरः ।
आगता च ततो राज्ञ्या त्वाज्ञप्ता रक्षणाय वै ॥१२॥
राक्षसं चापि हन्तुं वै तावद् गदा भयंकरी ।
अम्बरे तु समुड्डीय रक्षःस्कन्धे पपात ह ॥१३॥
मस्तके पृष्ठभागे च बाह्वोः सक्थ्नोश्च पादयोः ।
भद्रकस्याऽवयवेषु चोत्पत्योत्पत्य वै मुहुः ॥१४॥
जघान राक्षसं सोऽपि पृथ्व्यां पपात ताडितः ।
मूर्छितश्चाऽभवत् किलासनोद्यानसमीपतः ॥१५॥
गदया सहिता राज्ञी स्मृत्वा मां परमेश्वरम् ।
सप्राणं राक्षसं त्यक्त्वा निजालयमुपाययौ ॥१६॥
राक्षसः प्रययौ नैजं स्थानं सामुद्रमध्यगम् ।
राज्ञीरक्षां समाकर्ण्य प्रजा मग्नास्तदाऽभवन् ॥१७॥
आशीर्वादैः प्रजा राज्ञीं वर्धयामासुरुत्सुकाः ।
राज्ञी पूजां हरेः कृत्वा गदापूजां चकार ह ॥१८॥
एवं रक्षा कृता राज्ञ्या गदया राक्षसात् तदा ।
राक्षसोऽपि पुनः कालान्तरे चाऽयात् ससैन्यकः ॥१९॥
आहर्तुं तां नृपीं राज्यं नैजं कर्तुं समुद्यतः ।
बहुभिः सैन्यभागैः सः पुरीमावृत्य गर्जनाम् ॥२०॥
चकार व्योममार्गेण युद्धवाद्यान्यवादयत् ।
राज्ञी तुष्टाव मां कृष्णं गदां पुपूज चन्दनैः ॥२१॥
भोजनैर्हारगन्धाद्यैः रक्षां वव्रे ततः परम् ।
गदोत्थाय निजस्थानादम्बरे साऽभवत् क्षणात् ॥२२॥
कोटिसूर्याग्निसम्पन्ना बभूव क्षणमात्रतः ।
उद्वमत्सुवह्निशिखा सगर्जना मुहुर्मुहुः ॥२३॥
रोदसी नादयमाना शुशुभे विजयावहा ।
ययौ शीघ्रं भद्रकस्य सैन्यं च भद्रकं प्रति ॥२४॥
भद्रकं मारयामास मूढमारेण सा गदा ।
ततः सैन्यं गदादेवी मारयामास मूढवत् ॥२५॥
सैन्यं भग्नं राक्षसानां राक्षसोऽपि विमूर्छितः ।
पपात भूतले तावद् गदा मौनमुपस्थिता ॥२६॥
राक्षसः प्राणरक्षां च कृत्वा पलायनं व्यधात् ।
सैन्यं दुद्राव शिष्टं च जयकारोऽभवत् स्त्रियाः ॥२७॥
सा शान्ता च गदा स्थानमागत्य निष्क्रियाऽभवत् ।
राज्ञी पुपूज विधिना नैवेद्यादि ददौ तथा ॥२८॥
अथ कालान्तरे याते राक्षसा बहवोऽब्धिजाः ।
मिलित्वा मन्त्रणां चक्रू राज्ञीराष्ट्रोपलब्धये ॥२९॥
अस्त्रशस्त्रविदश्चाऽन्ये मायामन्त्रविदोऽपरे ।
अन्तर्धानविदश्चापि बहुरूपविदस्तथा ॥३०॥
सिद्धिमन्तो राक्षसाश्च राक्षस्योऽपि सहस्रशः ।
युद्धसामग्रिकायुक्ताश्चाययुर्गोदलां पुरीम् ॥३१॥
व्योममार्गेण रक्षांसि विनेदुर्जयकांक्षिणः ।
युद्धशब्दान् प्रचक्रुश्चाऽवादयन् दुन्दुभीन् मुहुः ॥३२॥

शंखशब्दान् प्रचक्रुश्च रणवाद्यान्यवादयन् ।
किलंकिलादिशब्दानास्फोटादींश्च व्यधुस्तदा ॥३३॥
एवं श्रुत्वा राक्षसानां घोषान् भयंकरान् प्रजाः ।
सन्त्रेसू राजसैन्यानि सन्त्रेसुश्चाऽति भूस्तरे ॥३४॥
प्रधानाद्या नृपीं गत्वा ज्ञापयामासुरुल्बणम् ।
उपद्रवं समरार्थे राक्षसानां समीहितम् ॥३५॥
राज्ञी शीघ्रं समुत्थाय स्नात्वा गदां पुपूज सा ।
धूपदीपसुनैवेद्यैर्नीराजनैरवर्धयत् ॥३६॥
गुर्वी गदा तदा नारीरूपा दिव्या रणेश्वरी ।
भूत्वा सर्वाऽस्त्रशस्त्राद्यैः सम्पन्ना समुवाच ह ॥३७॥
अहं भागवतीशक्तिः रक्षार्थं तेऽस्मि योजिता ।
अनादिश्रीकृष्णनारायणेन परमात्मना ॥३८॥
अद्याऽपराधिनं चैनं त्रिवारं समुपागतम् ।
रणं दत्वा विविधं च ततो वै प्राणनाशनम् ॥३९॥
करिष्येऽस्य महाराज्ञि नमस्ते स्वस्ति ते शुभम् ।
इत्युक्त्वा सर्वशक्त्याढ्या रणेश्वरी गदा तदा ॥४०॥
स्वदेहात् सुषुवे पुष्टान् योद्धृन् रणाऽविसह्यकान् ।
योजयामास तान् सर्वान् व्योमगतीन् गदेश्वरान् ॥४१॥
कृत्वा सैन्यानि सास्त्राणि सशस्त्राणि च तेऽम्बरे ।
उड्डीय रक्षःसैन्यानि समास्कन्दितवन्ति वै ॥४२॥
राक्षसा राक्षसीव्राताश्चापि पेतुर्महोल्बणाः ।
शस्त्रैर्गदाभिर्दण्डैश्च तोमरैर्लोहगोलकैः ॥४३॥
प्रस्तरैश्चोपलाभिश्च भूशुण्डीशक्तिभिर्द्रुमैः ।
नाराचैश्च शरैर्बाणैः खड्गैर्मल्लैश्च गोलकैः ॥४४॥
अथ दृष्ट्वा राक्षसानां सन्नाहं चातिवेगिनम् ।
गदेश्वराश्चाऽभिपेतुर्व्योम्ना समरदुर्मदाः ॥४५॥
शस्त्रैरस्त्रैर्गोलकैश्च गदाभिस्तोमरादिभिः ।
निजघ्नुः राक्षसान् वीरा गदादेवीप्रणोदिताः ॥४६॥
परस्परं निजघ्नुश्च शस्त्रैर्विविधधारिभिः ।
मारयामासुरुग्रास्ते द्विभागान् राक्षसान् व्यधुः ॥४७॥
कण्ठतः स्कन्धतश्चापि कटितः करतस्तथा ।
सक्थितो भेदयामासुर्नाशयामासुरासुरान् ॥४८॥
चूर्णयामासुरुग्रान् वै राक्षसान् हि गदेश्वराः ।
पातयामासुरसुभिर्वियुज्याऽम्बरतस्तलम् ॥४९॥
गले धृत्वा कराभ्यां च चूषयामासुरासुरान् ।
अग्निं विभाव्य रक्षांसि ज्वालयामासुरीश्वराः ॥५०॥
विमर्दो वै महाञ्जातो रक्षसां भूनिपातिनाम् ।
तदा स भद्रकश्चक्रे मायां राक्षसजीवनीम् ॥५१॥
रक्षांस्युज्जीवयामास सर्वशस्त्रास्त्रकोविदान् ।
उत्थायोत्थाय ते जघ्नुर्गदेश्वरान् भटान् मुहुः ॥५२॥
मायिकान् वै गजानुष्ट्रान् मकरान् व्याघ्रभल्लुकान् ।
सिंहान् झषान् शरभांश्च द्विपिनो व्यालपुंगवान् ॥५३॥
भूतप्रेतपिशाचांश्च पर्वतान् वैद्युतान् भटान् ।
मेघशिलाः समुत्पाद्य मायया जघ्नुरीश्वरान् ॥५४॥
वातवृष्टिं प्रचक्रुश्च रजोवृष्टिं व्यधुस्तथा ।
वह्निवृष्टिं व्यधुश्चापि शिलावृष्टिं व्यधुस्तथा ॥५५॥
शलभानां महावृष्टिं वृश्चिकानां प्रवर्षणम् ।
व्यालानां कृकलासानां गोधानां वर्षणं व्यधुः ॥५६॥
विषवृष्टिं व्यधुश्चापि रक्तवृष्टिं व्यधुस्तथा ।
उष्णोदकानां धाराभिः प्रजानां पीडनं व्यधुः ॥५७॥
कर्दमानां वर्षणं च हस्तिनां वर्षणं ततः ।
वृक्षाणां वर्षणं चापि सिंहानां वर्षणं व्यधुः ॥५८॥
अग्नीनां वर्षणं चापि राक्षसानां च वर्षणम् ।
व्यधुस्ते राक्षसास्तत्र भयंकरप्रवर्षणम् ॥५९॥
शस्त्राणां वर्षणं चापि व्यधुर्देहविभेदिनाम् ।
एवं विनाशरूपं ते चक्रू रणं हि राक्षसाः ॥६०॥
ब्रह्मजित् क्रतुजिच्चापि देवान्तको नरान्तकः ।
कुम्भगर्तः शंकुरथश्चायोमुखः शताह्वयः ॥६१॥
इन्द्रजिदेकचक्रश्च प्रापणश्च पुरुण्डकः ।
चूर्णनाभश्चासिलोमा कुंभमानो महोदकः ॥६२॥
श्वलभस्तालकेतुश्च सव्यसिव्यः सुपुङ्खिकः ।
कालनाभो यज्ञहाश्च श्राद्धादो वज्रहास्तथा ॥६३॥
विद्युत्पुत्रश्च रसनो वपाद्यो रक्तकर्णकः ।
वृत्ताक्षाः पिङ्गलाश्चापि ह्रष्टदंष्ट्रा महोदराः ॥६४॥
स्थूलशीर्षा ह्रस्वजंघास्ताम्रस्याश्चोर्ध्वमूर्धजाः ।
गर्ताक्षा लम्बजिह्वोष्ठा लम्बभ्रूस्थूलनासिकाः ॥६५॥
हतास्तत्र गदाभिश्च त एते रक्षसां गणाः ।
राक्षस्यो विकचा ब्रह्मधाना आलम्बिकादिकाः ॥६६॥
गदोत्थाभिर्गदाभिश्च हतास्ता युद्धभूमिषु ।
गदासैन्यानि मां नारायणं कृष्णं हरिं प्रभुम् ॥६७॥
स्मृत्वा स्मृत्वा निपेतुश्च राक्षसानां हि मूर्धसु ।
चूर्णितानि शिरांस्येव वक्षांसि रक्षसां तदा ॥६८॥
'निहन्मः सर्वरक्षांसि यमक्षयाय सर्वदा ।
नोत्थानाय पुनः शपामहे संकर्षणाह्वया' ॥६९॥
इत्युक्त्वा मारयामासू रणेश्वर्यो गदास्तदा ।
आत्यन्तिकं च निधनं प्रपेदुः रक्षसां गणाः ॥७०॥

मायया वृष्टयः सर्वा विलीनाश्च ततोऽम्बरे ।
पृथ्वी रक्षोगणदेहैः शवैः सर्वाऽऽवृताऽभवत् ॥७१॥
भद्रकस्त्वाययौ धर्तुं धावन् रणेश्वरीं गदाम् ।
तमापतन्तं परितो गदाशतं बभूव ह ॥७२॥
मारयामास परितो मूदमारेण भद्रकम् ।
रक्तस्रावं चकाराऽपि वमनं रक्तजं तथा ॥७३॥
कृत्वा भग्नशिरो वक्षाः पपात ह्यावदन् क्षितौ ।
भद्रको निधनं यातो राक्षसा येऽपरेऽभवन् ॥७४॥
रणं विहाय शतशः पलायनं प्रचक्रिरे ।
गदाः पृष्ठे पतित्वैव जघ्नुस्तान् जीवदानतः ॥७५॥
निपेतुस्ते प्राणहीनाः प्रसार्य करजानुजान् ।
व्यादायाऽऽननकुक्षींश्च कालधर्मं प्रपेदिरे ॥७६॥
नैकोऽपि शेषतां भेजे सर्वं शतसहस्रकम् ।
सैन्यं राक्षसवर्याणां निधनं गदयाऽऽर्पितम् ॥७७॥
अथ राज्ञी प्रसस्मार पतिं नारायणं हि माम् ।
शुद्ध्यर्थं जीवनार्थं च प्रजानां रणभूमिषु ॥७८॥
शीघ्रं मया तदा लक्ष्मि मम पादजलामृतम् ।
अर्पितं कलशेऽगाधे चिदम्बरात्मके द्रुतम् ॥७९॥
सा भूमौ व्योममार्गेण प्रजाजीवनहेतवे ।
प्रोक्षणं प्रचकारैषा प्रजा जीवन्तु मे मृताः ॥८०॥
इति संकल्पितास्तत्र रणे या याः प्रजास्तदा ।
प्रसह्य मध्ये भूभागे निधनं गमिताश्च ताः ॥८१॥
ताः सर्वा जीवनं प्राप्ता निद्रोत्थिता यथा पुनः ।
राक्षसानां तु देहानां गदाभिर्वह्निना तदा ॥८२॥
भस्मता वै कृता तत्र ममेच्छया हि पद्मजे ।
एवं गदाः परं कृत्वा रणं हत्वा तु राक्षसान् ॥८३॥
रणेश्वर्यः पुरस्तान्मे राज्ञ्याः सौधे समाययुः ।
आशीर्भिर्वर्धितास्ताश्च वरदानाय नोदिताः ॥८४॥
वव्रिरे ताः कन्यका वै पतिं मां परमेश्वरम् ।
चिदम्बरापि मुदिता रणेश्वरीभिरेव सा ॥८५॥
सहिता पूजयामास मां तदा वरमालया ।
रणेश्वर्यः सहस्रं वै वरयामासुरेव माम् ॥८६॥
गदेश्वरास्तथा रम्यं वव्रिरे वरदानकम् ।
पार्षदा भवितुं धाम्नि मया तथाऽस्त्विति ध्रुवाः ॥८७॥
स्वीकृताः पार्षदाः सर्वे ययुर्धाम ममाऽक्षरम् ।
रणेश्वर्यस्तथा लक्ष्मि मम प्रियाः परेऽक्षरे ॥८८॥
वर्तन्ते ताश्च वै मुक्तानिकाः परमधामनि ।
चिदम्बराऽपि मे भक्ता गदेश्वराय योगिने ॥८९॥
मम भक्ताय सौम्याय पार्षदाय समस्तकम् ।
राज्यं दत्वा ययौ धामाऽक्षरं मम परात्परम् ॥९०॥
गदेश्वरो महाराजो ब्रह्मचर्यपरायणः ।
चकार लक्षवर्षाणि राज्यं वैष्णवधर्मवान् ॥९१॥
भक्तिं मे कारयित्वा च कृत्वा प्रजाश्च वैष्णवीः ।
यज्ञयागादिकान् कृत्वा सन्तृप्य देवता पितॄन् ॥९२॥
मम विमानमारुह्य ययौ धामाऽक्षरं मम ।
तद्दायादोऽभवच्चापि योगेश्वरोऽपि भक्तराट् ॥९३॥
साधुधर्मा साधुवर्मा साधुसाध्वीसमर्चकः ।
मम भक्तिं कारयित्वा ययौ धामाऽक्षरं मम ॥९४॥
इत्येवं कथितं लक्ष्मि मम भक्तस्य गौरवम् ।
रक्षणं मम भक्ताया यथा करोमि वै तथा ॥९५॥
यत्र भक्ता च भक्तो मे तत्र वसामि गोचरः ।
अगोचरोऽथवा तिष्ठे सामर्थ्येन हि हेतिना ॥९६॥
पार्षदेन प्रभावेण रक्षयामि ममाऽऽश्रिताम् ।
नरो नारी नपुं वापि मम भक्तिपरायणः ॥९७॥
मदात्मा मत्क्रियः सम्यग् रक्ष्यते चान्तरात्मना ।
मया निवसता पार्श्वे हृदये वाऽन्तिके पुरः ॥९८॥
पृष्ठे चोर्ध्वेऽधोभूमौ च मध्ये चावयवेष्वपि ।
मम वासेन भक्ताया रक्षा भवति सर्वथा ॥९९॥
वध्वः पराधीनभावा मम भक्ता हि ता यदि ।
रक्ष्यन्ते नित्यदा ताभिः साकं स्थितेन वै मया ॥१००॥
अनाथानां हि नाथोऽहं करोमि रक्षणं सदा ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिश्च रक्षणम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां चिदम्बराराज्ञ्याः भगवद्दया कृतं भद्रकादिरक्षःसंघाताद् रक्षणमित्यादिनिरूपण-नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं सर्वात्मकं नरायणम् ।
सर्वक्रियान्वयं नारायणं विद्धि मां तु या ॥ १ ॥
नारायणं जपेन्नित्यं नमेन्मां पुरुषोत्तमम् ।
स्वापे नारायणं याने गमने मां नरायणम् ॥ २ ॥
स्थाने नारायणं मां भोजने नारायणं च माम् ।
उन्मेषे च निमेषे च नारायणं हि मां स्मरेत् ॥ ३ ॥
जागरणेऽपि मां नारायणं नमेत् स्मरेत्तथा ।
भोज्यं पेयं च लेह्यं च नमो नारायणेति या ॥ ४ ॥

पावयित्वाऽभिभुंक्ते या सा याति परमां गतिम् ।
अन्यानभिजनाँश्चापि प्रापयत्येव सद्गतिम् ॥ ५ ॥
मम नामस्मृतिसंकीर्तनाढ्यायास्तु योषितः ।
त्वं लक्ष्मीर्मम सर्वस्वरूपा कृष्णस्यवल्लभा ॥ ६ ॥
गृहे क्षेत्रे तथा वासे तस्या वससि वर्ष्मणि ।
षोडशाऽक्षरमन्त्रं मे पठमाना पुरेन्द्रजा ॥ ७ ॥
जयन्ती जन्ममूका सा सार्वज्ञ्यं च सरस्वतीम् ।
प्राप पाण्डित्यमुत्कृष्टं बृहस्पतिसमाऽभवत् ॥ ८ ॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इत्येवं जपकर्त्र्या वै नैपुण्यं जायते मतौ ॥ ९ ॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इति जपं प्रकुर्वन्त्याः सौभाग्यं सुस्थिरं भवेत् ॥१०॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥११॥
इत्येवं जपमानाया नाथो नारायणस्त्वहम् ।
भूत्वा ददामि मे धामाऽक्षरं शाश्वतमोदनम् ॥१२॥
'ब्राह्मयहं श्रीकृष्णनारायणभक्ताऽस्मि शाश्वती ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥१३॥
इत्येवं जपमानां वै लक्ष्मीरूपां करोम्यहम् ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥१४॥
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ।
इत्येवं जपमानां वै ब्रह्मप्रियां करोम्यहम् ॥१५॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
इत्येवं जपमानाया नाशयाम्यघसंचयम् ॥१६॥
'अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
परब्रह्माऽक्षरातीतोऽवताराणां स्वरूपधृक् ॥१७॥
अन्तर्यामी सदाऽस्मासु भगवान् सर्वकारणम् ।
सर्वान्तरात्मा सर्वेशो निर्लेपो मोक्षदः स हि ॥१८॥
पावनः सेवितो भुक्तिमुक्तिदश्च सदाऽवतु' ।
इत्येवं जपमानायै ददामि कमलापदम् ॥१९॥
'ब्रह्मप्रियाः समस्ताश्च राधालक्ष्म्यादियोषितः ।
परब्रह्मस्वरूपाश्च परब्रह्मार्धमूर्तयः ॥२०॥
परब्रह्मार्थसर्वस्वा दिव्या भुक्तिप्रमुक्तिदाः ।
तत्सम्बन्धिक्रियाश्चापि निर्गुणा मोक्षदाः सदा' ॥२१॥
इत्येवं जपमानां वै मुक्तानीं प्रकरोम्यहम् ।
'यो यो या या बालकृष्णं तत्प्रियाश्च भजत्यपि ॥२२॥
स स सा सा तत्स्वरूपा दिव्या मोक्षप्रदा सदा' ।
इत्येवं जपमानाया दिव्यरूपं प्रजायते ॥२३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इत्येवं जपमानां स्वे रूपेऽन्तर्भावयाम्यहम् ॥२४॥
'ओं श्रीकृष्णनारायणः शरणं मे' इतिमनुम् ।
जपन्त्याः साधयाम्येव पुरुषार्थचतुष्टयम् ॥२५॥
'कृष्णस्यप्रियभक्ताऽहं श्रीहरिः शरणं मम' ।
'श्रीकृष्णःसर्वविद्याब्धिः श्रीस्वामी शरणं मम' ॥२६॥
'श्रीकृष्णोवल्लभस्वामी श्रीहरिः शरणं मम' ।
इतिमन्त्रान् जपन्त्यां मे नित्यवासोऽस्ति सा मयि ॥२७॥
इमे मन्त्रा मया लक्ष्मि स्वमूर्तयः प्रकाशिताः ।
मत्समा मत्स्वरूपास्ते मद्वत्कार्यार्थसाधकाः ॥२८॥
'श्रीकृष्णोवल्लभोनाथः शरणं मे' इति मनुः ।
सर्वार्थदो द्वादशार्णस्तन्माहात्म्यं वदामि ते ॥२९॥
वेधःपुत्री समुत्पन्ना सरस्वती सुबालिका ।
सर्वविद्यापरिपूर्णा वेदवेदांगसंभृता ।
ततश्च शारदा कन्या चोत्पन्ना ब्रह्मणः सुता ॥३०॥
सरस्वती वदत्येव संस्कृतामुत्तमां गिरम् ।
शारदा न शशाकाऽपि कृतोपनयनाऽपि सा ।
मूकाऽभवत्तदा जिह्वा स्पन्दते नैव यत्नतः ॥३१॥
खिन्नोऽभवद् विधाता च सावित्री खेदिताऽभवत् ।
ततो वै शारदा कन्या शुशोच मनसा हृति ।
ययौ सरस्वतीपार्श्वे दर्शयन्ती स्वजिह्विकाम् ॥३२॥
सरस्वती विचार्यैव द्वादशाऽक्षरमन्त्रवत् ।
जलं प्रमन्त्र्य प्रददौ तज्जिह्वायां तु पावनम् ॥३३॥
'श्रीकृष्णवल्लभाचार्यः शरणं मे' इति मुहुः ।
जलं प्रमन्त्र्य प्रददौ तज्जिह्वायां पुनः पुनः ॥३४॥
तावत्तु शारदादेव्या वाणी जिह्वागताऽभवत् ।
स्वरव्यञ्जनवाक्यानि वेदवेदांगकानि च ॥३५॥
भूतभव्यानि सर्वाणि जगौ मन्त्रप्रतापतः ।
एवं दिव्याऽभवद्वाणीयुक्ता वै शारदा सती ॥३६॥
प्रसन्नोऽभूद् विश्वसृट् च सावित्री च सरस्वती ।
एतद्वै कथितं लक्ष्मि द्वादशाक्षरवैभवम् ॥३७॥
पठतां शृण्वतां चापि ध्रुवं वै परमं पदम् ।
अपि पापसमाचारा द्वादशाऽक्षरतत्परा ॥३८॥
प्राप्नोति परमं स्थानं मे शुभं त्वक्षराभिधम् ।
'ओमि'त्येकाक्षारं मन्त्रं जपन् याति परां गतिम् ॥३९॥
'कृष्णे'तिद्व्यक्षरं मन्त्रं जपन् गोलोकमृच्छति ।
'श्रीकृष्ण'त्र्यक्षरं मन्त्रं जपन् गोलोकमुत्तमम् ॥४०॥

'वासुदेवे'तिमन्त्रं वा 'राधाकृष्णे'ति वा जपन् ।
चतुर्वर्णं मनुं याति त्वया कृतं निजालयम् ॥४१॥
'ओं नारायण'पञ्चार्णं जपन् श्वेताक्षरं पदम् ।
'नमो नारायणाये'तिजपन् ब्रह्माक्षरं पदम् ॥४२॥
'ओं श्रीकृष्णनारायण'जपन् यात्यक्षरं पदम् ।
'लक्ष्मीनारायणश्रीरोमि'तिजपन् विकुण्ठकम् ॥४३॥
'अनादिकृष्णनारायणे'त्यपि चाऽक्षरं पदम् ।
'अनादिश्रीकृष्णनारायणे'तिदिव्यमक्षरम् ॥४४॥
'ओं माणिकीश्रीकृष्णनारायणे'ति पराऽक्षरम् ।
पदं याति जपन् देहि लक्ष्मि धामोत्तमोत्तमम् ॥४५॥
'ओं सुखदालक्ष्मीकृष्णनारायणे'ति मत्पदम् ।
प्राप्नोति जपवान् भक्तो भक्तानी जपसंयुता ॥४६॥
'श्रीकृष्णोवल्लभःस्वामी शरणं मे' मनुं त्विमम् ।
मनुनूर्षन्वमुसाहाजपन् याति ममाऽऽन्तरम् ॥४७॥
'ओं श्रीकृष्णाय नमः' 'ओं नारायणाय नमश्च' ।
'ओं वासुदेवाय नमः' 'ओं महाविष्णवे नमः' ॥४८॥
'ओं विष्णवे नमश्चे'ति 'ओं सदाशिवाय नमः' ।
'ओं हिरण्यगर्भाय नमः' 'ओं शिवाय नमस्तथा' ॥४९॥
'ओं रामादित्याय नमः' 'ओं नृसिंहाय नमश्च' ।
'ओं कपिलाय नमः' 'ओं श्रीहरये नम'श्च ॥५०॥
'ओं दत्तात्रेयाय नमः' 'ओमृषभाय नमश्च' ।
'ओं वामनाय नम'श्च 'ओं पर्शुरामाय नमः'॥५१॥
'ओं यज्ञाय नम'श्च 'ओं सनत्कुमाराय नमः' ।
'ओं व्यासाय नमश्चे'ति 'ओं बुद्धाय नम'स्तथा ॥५२॥
'ओं नरनारायणाय नमः' 'ओं ब्रह्मणे नमः' ।
'ओं परब्रह्मणे नमः' 'ओमन्तर्यामिणे नमः' ॥५३॥
'ओं माधवाय नमश्च' 'ओं गोविन्दाय नम'श्च ।
'ओं केशवाय नमश्च' 'ओं श्रीपतये नमश्च' ॥५४॥
'ओं स्वामिने नमश्च' 'ओमक्षरातीताय नमः' ।
'ओं पुरुषोत्तमाय नमः' 'ओं परमात्मने नमः' ॥५५॥
'ओमनादिश्रीकृष्णनारायणाय विद्महे' ।
गोपालकृष्णात्मजाय धीमहि ।
तन्नः कम्भराश्रीसुतः प्रचोदयात्' ॥५६॥
एते मन्त्राः सदा लक्ष्मि भुक्तिमुक्तिफलप्रदाः ।
तत्तद्धामप्रदाः सर्वे पापतापप्रणाशकाः ।
सर्वपुमर्थदाश्चापि सर्वेच्छापूरकास्तथा ॥५७॥
सहस्रं चाऽयुतं चापि लक्षं कोटिर्जपा मताः ।
यथाभद्रं यथासंख्यं यथावेगं फलप्रदाः ॥५८॥

'ओं श्रियै नमः' 'ओं लक्ष्म्यै नमः' 'ओं रमायै नमः' ।
'ओं महालक्ष्म्यै नमः' 'ओं नारायण्यै नमश्च' वै ॥५९॥
'ओं ब्राह्म्यैव नमः' 'ओं पुरुषोत्तम्यै नम'श्च तथा ।
'ओं वैष्णव्यै नमः' 'ओं कमलायै नमः' 'ओं मायै नमः' ॥६०॥
'ओं वासुदेव्यै नमः' 'ओं कृष्णायै नम' इत्यपि ।
'ओं माधव्यै नमः' 'ओं परमेश्वर्यै नम' इति ॥६१॥
'ओं शिवायै नमः' 'ओमन्तर्यामिण्यै नम'इति ।
'ओं महावैष्णव्यै नमः' 'ओं पद्मायै नमस्तथा' ॥६२॥
'ओं कम्भरालक्ष्म्यै नमः' 'ओं प्रज्ञायै नम'स्तथा' ।
'ओं राधायै नमश्च' ओं ब्रह्मप्रियायै नमश्च' ॥६३॥
'ओं हरिण्यै नमः' 'ओं हरिप्रियायै नम'स्तथा ।
'ओं हिरण्मय्यै नमः' 'ओं कार्ष्णवाल्लभ्यै नमः' ॥६४॥
'ओं पार्वत्यै नमः' 'ओं माणिक्यायै नम'इत्यपि ।
'ओं सुखदालक्ष्म्यै नमः' 'ओं शिवराज्ञीश्रियै नमः' ॥६५॥
'ओं नारायणीश्रियै नमः' 'ओं धामिन्यै नमः' ।
'ओं सुखदालक्ष्म्यै विद्महे नारायणीश्रियै धीमहि ।
तन्नः शिवराज्ञीश्रीः प्रचोदयात्' ॥६६॥
ओं कृष्णाय विद्महे वल्लभाय धीमहि
प्रज्ञा तन्नः प्रचोदयात् ।
ओम् आचार्याय विद्महे गुरवे धीमहि
पार्वती नः प्रदचोयात् ॥६७॥
एते मन्त्राः सदा लक्ष्मि भुक्तिमुक्तिफलप्रदाः ।
यावत्पुमर्थदाः सर्वसुखवाञ्छाप्रपूरकाः ॥६८॥
शतं सहस्रं चायुतं नियुतं कोटिरित्यपि ।
जप्ताः श्रद्धान्वितास्त्वां मां स्मृत्वा शाश्वतकामदाः ॥६९॥
त्वमहं त्वमहं लक्ष्मि सोऽहं सोऽहं जपेच्च यः ।
स्मृत्वा मां चापि तस्मै च तस्यै ददाम्यहं निजम् ॥७०॥
ममासनं मम धाम ममात्मानं ददामि च ।
मद्भक्तार्थं मम सर्वं शेषयामि न चार्पणे ॥७१॥
भज लक्ष्मि भज राधे मां कृष्णं वल्लभं पतिम् ।
भज कान्ते भज चान्ते प्रकाशे च रहस्यपि ॥७२॥
भज देहे भज गेहे प्राणप्रियं तथाऽऽन्तरे ।
भज गुते भज सुते शाश्वतानन्दकृत्सुखम् ॥७३॥
भजनं भक्तिरत्यन्तं प्रेमसेवा विनोदिनी ।
द्रव्यसम्पद्घाटिकाद्यैर्वाङ्मनःकायकर्मभिः ।
सेवेत परमात्मानं श्रीकृष्णं मां परेश्वरम् ॥७४॥

प्रत्यक्षं वर्तमानं मां सेवेरन् वै नराः स्त्रियः ।
अहं दिव्यस्वरूपोऽस्मि परमाक्षरधामगः ।
स एवात्र भवाम्यद्य सौराष्ट्रे कंभरात्मजः ॥७५॥
श्रीमद्गोपालकृष्णस्य नन्दनः परमेश्वरः ।
मन्वन्तरेषु वै लक्ष्मि स्थास्याम्यत्रैव सर्वथा ॥७६॥
पावनोऽहं गुरुरूपो यथाऽस्मि लोमशस्तथा ।
धातुपाषाणमूर्त्यादौ यथाहं निवसामि वै ॥७७॥
तथा चाऽस्मि वैष्णवाचार्येषु स्वयं परः प्रभुः ।
ये ये गुरुस्थले योग्या अभिषिक्ता नराः स्त्रियः ॥७८॥
तेषु तासु निवत्स्यामि साकं त्वया हि पद्मजे ।
तस्माद्वै गुरवो लोके दिव्या ममैव मूर्तयः ॥७९॥
दर्शनात् स्पर्शनाच्चपि सेवनात् तारका हि ते ।
मां विना पृथिवी नैव रिक्ता प्रजायते क्वचित् ॥८०॥
प्रवाहांऽशाऽऽवेशरूपैः प्रवर्तेऽहं वसामि च ।
चेतना मूर्तयः सर्वा गुर्वात्मिका जगत्त्रये ॥८१॥
अक्षरेऽहं सदा मुक्तमुक्तानीपतिरस्मि च ।
गोलोकेऽहं गोपिकानां गोपानां पतिरस्मि च ॥८२॥
वैकुण्ठेऽहं पार्षदानां पार्षदीनां पतिस्तथा ।
अव्याकृतेऽपि चैवाऽस्मि तथाऽमृते भवामि च ॥८३॥
श्रीपुरे श्रीः स्वयमस्मि कैलासे शंकरोऽस्मि च ।
सत्ये ब्रह्मा गुरुश्चाऽस्मि पितृलोके तथाऽर्यमा ॥८४॥
बृहस्पतिः सुरलोके मानवे साधुरस्मि च ।
दैत्यानामुशनाश्चास्मि ब्राह्मणानां वसिष्ठकः ।
साध्वी चास्मि योषितां च नराणां धिष्ण्यशोभनः ॥८५॥
सर्पाणां शेष एवाऽस्मि पशूनां वृषभोऽस्मि च ।
यादसां कच्छपश्चास्मि क्रूराणां शरभोऽस्मि च ॥८६॥
कल्पलता तु वल्लीनां शाखिनां कल्पपादपः ।
विद्यार्थिनां शिक्षकोऽस्मि वधूनां पतिमातृका ॥८७॥
एवं गुरुत्वं सर्वत्र मम सत्तामयं प्रिये ।
वर्तेऽहं सर्वदा तत्र गुरौ तीर्थोत्तमोत्तमे ॥८८॥
गुरुं मां गोचरं ज्ञात्वा यो भजेत निरन्तरम् ।
तस्य नान्यत्र मे गवेषणं कर्तुं हि शिष्यते ॥८९॥
गुरौ स्थित्वा दिव्यरूपः प्रतीक्षामि हि सेविनः ।
ये या यथा प्रपद्यन्ते तांस्तास्तथा भजाम्यपि ॥९०॥
सर्वकामान् पूरयामि श्रद्धाभावसमन्वितान् ।
प्रेमस्नेहार्द्रसंदब्धान् करोमि सफलान् सदा ॥९१॥
बान्धवोऽहं बन्धहर्ता गुरौ तिष्ठामि सर्वथा ।
बन्धास्तु वासनारूपा वासना वृत्तिसंभवा ॥९२॥
वृत्तयो योगलभ्याश्च संयोगो भोग्यवस्तुजः ।
भोग्यद्रव्याद्यलब्धिश्च वियोगे वै सहायिनी ॥९३॥
वृत्तीनां तेन विलयो वासनाविलयस्ततः ।
निर्बन्धता भवेत्तेन यतितव्यं तथा सदा ॥९४॥
गुरोर्योगो हि निर्बन्धो भावनाऽऽपादकः सदा ।
मोक्षस्थानप्रापकश्च महानन्दप्रदस्तथा ॥९५॥
दिव्यतापादकश्चापि सत्संगः शेवधिर्गुरोः ।
एवं लक्ष्मि सदाऽवाप्यो भवामि प्रेमभक्तितः ॥९६॥
बद्धान् सर्वान् मोचयामि निर्बन्धोऽहं गुरुः प्रियः ।
तारयामि महापापान् नरान्नारीर्नपुंसकान् ॥९७॥
पशून् पक्षिगणान् वारिनिवासान् वनिनोऽपि च ।
द्रुमान् वल्लीस्तारयामि सुरान् पितॄन् मुनीनपि ॥९८॥
शरणागतसन्त्राता भवामि भगवानहम् ।
कार्ये मे सुखदानं च दुःखात् त्राणं हि देहिनाम् ॥९९॥
तदेव सर्वसृष्ट्यादौ करोमि चापि सृष्टिषु ।
सृष्ट्यन्तेऽपि तथैवाऽहं विदधामि प्ररक्षणम् ॥१००॥
इत्येतत् कथितं सर्वं यथा पृष्टं प्रिये त्वया ।
वधूगीतामयं ज्ञानं सर्वासां मोक्षकृत् प्रिये ॥१०१॥
पठनाच्छ्रवणादस्य ज्ञातव्यं नाऽवशिष्यते ।
भुक्तिमुक्तिप्रदं मे वै तादात्म्यसम्प्रदं तथा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां बहुविधानां दिव्यमन्त्राणां गुरोर्बलस्य च निरूपणनामा द्वाषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीनारायणीश्रीरुवाच—

के दासा वैष्णवाः कृष्णकान्त प्रिय कृपानिधे ।
के भक्ता कीदृशाश्चापि कीदृशो महिमाऽपि च ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

देहसेवाविधातारो मम दासा हि ते मताः ।
रहस्यसेविनः श्रेष्ठा निःशंका दिव्यदृष्टयः ॥ २ ॥
अहं मानुषरूपेण विचरामि जनैः सह ।
जना मां वीक्ष्य लौकीयं सेवन्ते नैव शंकिताः ॥ ३ ॥
मन्वते निजवत् कामक्रोधस्वभावसंभृतम् ।
न मन्वते हि भक्तानां संकल्पपूरकं प्रभुम् ॥ ४ ॥
सर्वाणि मे चरित्राणि देहजानि शुभानि वै ।
स्मृतान्यपि वीक्षितानि मोक्षदानि न संशयः ॥ ५ ॥

तत्र संशयकर्तारो न सेवन्ते हि मां खलाः ।
अदिव्यं मां प्रमन्वाना निन्दां कुर्वन्ति मे ततः ॥ ६ ॥
तेन पापेन निरये तिर्यक्ष्वपि प्रयान्ति च ।
आसुरत्वं न वै तेषां लक्ष्मि क्वचिन्निवर्तते ॥ ७ ॥
दास्यं हि कठिनं लक्ष्मि महत् सर्वार्पणात्मकम् ।
नरो वा यदि वा नारी देहं दैहिकमर्पयेत् ॥ ८ ॥
निःशंकं चार्पयेत् सर्वं तद्दास्यं चोत्तमोत्तमम् ।
तर्कमूहं संशयं वा न मध्ये कारयेत् क्रियात् ॥ ९ ॥
धर्मं लज्जां व्यवहारं न मध्ये स्थापयेन्मम ।
नारायणकृतो धर्मो लज्जा नारायणश्रिता ॥१०॥
नारायणव्यवहारो मोक्षदा नेतरे इति ।
मत्वा मम क्रियां सर्वां धर्मात्मिकीं विचिन्तयेत् ॥११॥
कामः क्रोधश्च लोभश्च मोहो मदश्च नर्म च ।
अश्लीलं चाऽघटितं च मम दिव्यं हि सर्वथा ॥१२॥
न मे कामो नारकी वै न मे क्रोधो हि घातकी ।
न मे लोभः पापभृच्च न मे मोहो हि वञ्चकः ॥१३॥
न मे मदो बन्धकृच्च न मे नर्मं वृषोज्झितम् ।
न मेऽश्लीलं क्षुद्रकृच्च न मेऽघटितमस्ति यत् ॥१४॥
सर्वं दिव्यं कृतं मुक्तिप्रदं प्रजायते हि तत् ।
तस्माद् दास्यं हि कठिनं कर्तुं सर्वैर्जनैरिह ॥१५॥
नरा नार्यश्च या दास्यं कर्तुमिच्छन्ति मे सदा ।
तैश्च ताभिः सदा भाव्यमाशंकावर्जितैस्तथा ॥१६॥
आशंकावर्जिताभिश्च पत्नीभिर्भाव्यमित्यपि ।
लक्ष्मीराधारमाकान्तातुल्याभिर्भाव्यमित्यपि ॥१७॥
ततो दास्यं प्रकर्तव्यं निरावरणमुत्तमम् ।
सर्वं प्रेमभृतं दास्यं शोभते वर्धतेऽत्यति ॥१८॥
भेदभावं विना दास्यं वर्धते नित्यमेव च ।
शंकां विना परं दास्यं महानन्दप्रदं भवेत् ॥१९॥
परमेशे पतिकृष्णे स्वामिनि परमात्मनि ।
कथं शंका कथं प्रातिकूल्यं विवेकिनो भवेत् ॥२०॥
यत् करोति स्वयं कृष्णो मोक्षदं सर्वमेव तत् ।
यत् करोति स्वयं कृष्णो धर्म एव हि पुण्यकृत् ॥२१॥
तस्माद् दास्यं हि तादात्म्यप्रदं कार्यं सतीजनैः ।
तादात्म्ये चावरणानि भेदकानि प्रिये शृणु ॥२२॥
ऐक्यभावे भेदभावश्चावरणं हि तन्मतम् ।
अहमन्या हरिश्चान्यश्चेति भानं द्वितीयकम् ॥२३॥
आवरणं विघ्नकर्तृ दास्ये क्षतिं करोति तत् ।
अहं नारी नरः कृष्णः परश्च पुरुषो ह्ययम् ॥२४॥
पराऽहं चेति भानं चाऽवरणं तत् तृतीयकम् ।
हरेः पार्श्वे स्थितायाश्च भयमन्यस्य यद् भवेत् ॥२५॥
तदप्यावरणं तुर्यं दास्ये क्षतिं दधाति वै ।
नाऽयं वै समयश्चाऽस्ति पञ्चमावरणं हि तत् ।
नात्र नैव मनो मेऽस्ति षष्ठमावरणं हि तत् ॥२६॥
अर्थार्थित्वं सप्तमं चावरणं चापि विद्यते ।
मानं दास्ये महद्विघ्नं चाष्टमं तद्धि गद्यते ॥२७॥
नवमं स्वार्थसिद्धिश्च रोधिका दास्यकर्मणः ।
दशमं चाऽदिव्यता च रोधिका सेवने सदा ॥२८॥
यथेष्टविनियोगश्च दास्ये भवति पङ्कजे ।
स चेन्नास्ति तदा दास्यं चोत्कृष्टं नैव पद्यते ॥२९॥
स्वत्वं दास्यं त्वदीयत्वं तत्परत्वं तदात्मता ।
पञ्चकं दास्यसन्दृब्धं शोभते दास्यमेव तत् ॥३०॥
यथा लक्ष्मि तव दास्यं शोभते सर्वमेव ह ।
तथा दास्यं नराणां वा नारीणां शोभते कृतम् ॥३१॥
भक्तियुक्तं कृतं सर्वं सप्रेम शोभते मयि ।
सर्वावरणवर्ज्यं स शोभते मोदते मयि ॥३२॥
ब्रह्मक्रियारता नित्यं मम सेवापरायणाः ।
शंखचक्राद्यंकिताश्च मोदन्ते मयि वैष्णवाः ॥३३॥
सतां सेवापराश्चापि साध्वीसेवापरास्तथा ।
विष्णुपूजापराश्चापि मोदन्ते मयि वैष्णवाः ॥३४॥
हरेर्दासा हरेश्चापि प्रिया हर्यर्थवर्तिनः ।
सर्वदा मम भक्त्याढ्या मोदन्ते मयि वैष्णवाः ॥३५॥
महोत्साहपराश्चापि महानैवेद्यभोजनाः ।
सर्वप्रसादयोक्तारो मोदन्ते मयि वैष्णवाः ॥३६॥
विष्णोरयं यतश्चास्ते तस्माद्वै वैष्णवो मम ।
नारायणस्य मे चास्ते ततो नारायणीयकः ॥३७॥
सर्वेषामुत्तमो भक्तो नारायणीय एव ह ।
ब्रह्मणोऽयं ब्राह्मभक्तश्चाक्षरस्य तथाऽऽक्षरः ॥३८॥
कृष्णस्याऽयं कार्ष्णभक्तो मोदन्ते मयि वैष्णवाः ।
नारायणीया ब्राह्माश्च तथाऽऽक्षरा ममाऽनुगाः ॥३९॥
ब्रह्मरूपधरा भक्ता ब्राह्मणास्ते प्रकीर्तिताः ।
यतः सकाशात् सञ्जाता ब्राह्मणा वेदपारगाः ॥४०॥
साधवस्ते सनकाद्या गुरवो ब्राह्मणाः पुरा ।
विप्रादीनां गुरवस्ते साधवो ब्रह्मयोगिनः ॥४१॥
ब्रह्मणा निर्मिताः पूर्वं सनकाद्या हि साधवः ।
ब्रह्मशीला यतयश्च स्कन्दश्च हनुमाँस्तथा ॥४२॥

एवमेते प्रतिसृष्टिसाधवो गुरवः सदा ।
शूद्राणां हि द्विजाः सन्ति गुरवो गृहमेधिनाम् ॥४३॥
द्विजादीनां ब्राह्मणाश्च गुरवो गृहमेधिनः ।
ब्राह्मणानां साधवश्च गुरवो मोक्षदा यतः ॥४४॥
साधवः सर्वतः श्रेष्ठाः सुरर्षिपितृपूजिताः ।
सुरेभ्यः साधवः श्रेष्ठा महर्षिभ्यस्तथोत्तमाः ॥४५॥
पितृभ्यः साधवः श्रेष्ठा भूसुरेभ्यः सदोत्तमाः ।
त्रैलोक्ये नास्ति तच्छ्रैष्ठ्यं यच्छ्रैष्ठ्यं सत्सु विद्यते ॥४६॥
सतीतः साधवः श्रेष्ठा यतयो ब्रह्मदर्शनाः ।
गोभ्यश्च साधवः श्रेष्ठा नित्यं ब्रह्मपरायणाः ॥४७॥
भूदेवीतश्चोत्तमाश्च सन्तो वै क्षमयाऽन्विताः ।
मूर्तिभ्यः साधवः श्रेष्ठा ज्ञानदानप्रमोक्षणैः ॥४८॥
देवतायतनेभ्यश्च श्रेष्ठाः सन्तो हि तारकाः ।
पतिव्रताभ्यः श्रेष्ठाश्च सन्तः श्रीपतिसेविनः ॥४९॥
षडंगवेदिविप्रेभ्यः श्रेष्ठाः सन्तो हरिप्रियाः ।
वेदेभ्यः साधुवाक्यानि श्रेष्ठानि कृष्णयोजनात् ॥५०॥
वेदेभ्यः साधवः श्रेष्ठा वेदाः साधुत्वसंश्रयात् ।
तीर्थेभ्यः साधवः श्रेष्ठाः शीघ्रं पापविनाशनात् ॥५१॥
व्रतेभ्यः साधवः श्रेष्ठा यथेष्टाऽनन्तपुण्यदाः ।
पावकात् साधवः श्रेष्ठा मायाकल्मषशोधकाः ॥५२॥
ब्रह्मर्षयोऽपि साधूनां पूजयन्ति पदानि वै ।
ईश्वराः कृष्णरूपाश्च परमेशोऽहमच्युतः ॥५३॥
पूजयामः सतो भक्तान् साधून् सर्वस्वपावनान् ।
सन्तस्ते सद्गुणैश्चाढ्या गुणाढ्याः श्रेष्ठिनो हि ते ॥५४॥
सन्तस्ते ब्रह्मराज्येन राजानश्चक्रवर्तिनः ।
सन्तस्ते ज्ञानभण्डारा विद्वांसो गुरवः पराः ॥५५॥
आचार्याः सन्त एवैते मोक्षदा मन्त्रदास्तथा ।
सन्तस्ते वेदविद्यादिविज्ञास्ते ब्राह्मणोत्तमाः ॥५६॥
षट्कर्मनिरताः सन्तो विप्रा एव मता मम ।
लक्ष्मि सन्तो ममात्मानश्चात्माऽहं वै सतां सदा ॥५७॥
सत्यशौचक्षान्तियुक्ता रागद्वेषविवर्जिताः ।
ब्रह्मविद्याविवेकज्ञा वैष्णवाः साधवः पराः ॥५८॥
अग्निहोत्रपराश्चापि नित्यं चातिथिपूजकाः ।
पितृभक्ता मातृभक्ता वैष्णवाः साधवः पराः ॥५९॥
दयाधर्मादिसंयुक्तास्तथा पुण्यपरायणाः ।
शंखचक्रादिचिह्नाढ्याः वैष्णवाः साधवः पराः ॥६०॥
कण्ठे माला तौलसेयी धृता यैश्चानने हरिः ।
गीतिः कृष्णस्य कुर्वन्तो वैष्णवाः साधवः पराः ॥६१॥
संहितासु रता नित्यं मखेषु च रतास्तथा ।
सर्वधर्मेष्वादरिणो वैष्णवाः साधवः पराः ॥६२॥
पापात् पापान्मोचयन्ति नैव निन्दन्ति मानवान् ।
देहिनः सुखयन्त्येव वैष्णवाः साधवः पराः ॥६३॥
गोपालकृष्णं श्रीकृष्णं कृष्णनारायणं हि माम् ।
येऽर्चयन्ति प्रतिमां मे वैष्णवाः साधवः पराः ॥६४॥
शालग्रामं पूजयन्ति पूजयन्त्यवतारिणम् ।
अनादिश्रीहरिं मां च वैष्णवाः साधवः पराः ॥६५॥
गोपालोऽयं च कृष्णोऽयं रामादित्योऽयमच्युतः ।
इत्येवं मां पूजयन्ति वैष्णवाः साधवः पराः ॥६६॥
कुंकुमवाप्यां रूपं मे यथा च सिद्धपत्तने ।
यथा च गोकुले तद्वद् यथा हिमालयेऽपि च ॥६७॥
यथा च नार्मदे तीरे यथा रूपं धृतं मया ।
तादृग्रूपं पूजयन्ति वैष्णवाः साधवः पराः ॥६८॥
चतुर्भुजां द्विनेत्रां च शंखचक्रगदाब्जगाम् ।
पीताम्बरां समुरलीं वनमालादिशोभनाम् ॥६९॥
मुकुटेन युतां रम्यां कौस्तुभोद्भासितां तथा ।
राधारमादिसंयुक्तां सौवर्णीं प्रतिमां मम ॥७०॥
रौप्यां ताम्रोद्भवां चापि पैत्तलीं मणिजां तथा ।
प्रतिष्ठाप्याऽऽगममन्त्रैर्वेदवाक्यैर्विशेषतः ॥७१॥
षोडशोपचारमन्त्रैः पूजयेयुर्विधानतः ।
प्रेमभक्त्या हृदयेन वैष्णवाः साधवः पराः ॥७२॥
साधवस्ते वैष्णवा वै मन्मयाः पुण्यरूपिणः ।
यथा विष्णुस्तथा सर्वे नाऽन्तरं वर्तते मनाक् ॥७३॥
एवं विज्ञाय राजश्रि साधून् सम्पूजयेत् सदा ।
अहं विष्णुरहं साधुः सतां चाहं पतिव्रता ॥७४॥
अहं माता पिता चाहं पतिः साध्वी च योगिनी ।
अहं नारायणः साधुः स्वामी नारायणी त्वहम् ॥७५॥
रुद्रो रुद्रीरजश्चाजी सुरः सुरी भवाम्यहम् ।
सर्वभूतेषु सततं वसामि संभवामि च ॥७६॥
पतिकामुकया पूज्यश्चाहं पतिस्वरूपवान् ।
मोक्षकामुकया पूज्यश्चाऽहं श्रीपुरुषोत्तमः ॥७७॥

श्रीनारायणीश्रीरुवाच—

कथं कदा भवान् पूज्यो वस्तुभिः कैश्च केशव ।
विधिना केन भगवन् पतिकामुकया वद ॥७८॥

श्रीपुरुषोत्तम उवाच—

चैत्रमासे शुक्लपक्षे ह्येकादश्यां प्रगे शुभे ।
गत्वाऽऽरामे ग्रहीतव्या दिव्या दमनमञ्जरी ॥७९॥

गुर्वाज्ञया प्रकर्तव्यं पूजनं दमनस्य वै ।
दमने तिष्ठते कामदेवश्च रतिसंयुतः ॥८०॥
कामदेव नमस्तेऽस्तु त्वं सदा पुरुषोत्तमः ।
हरिं कामं विचिनोमि कृपां कुरु ममोपरि ॥८१॥
गीतवादित्रनिर्घोषैरानेतव्यो गृहं प्रति ।
अधिवासनपूर्वं च सर्वतोभद्रमण्डले ॥८२॥
स्थापयित्वा हरिं कामं रतिं च दमनद्रुमम् ।
आच्छाद्य श्वेतवस्त्रेण पूजयेत् कन्यका प्रिये ॥८३॥
क्लीं कामदेवाय नमो ह्रीं रत्यै च नमोनमः ।
पूर्वस्यां ह्रीं च कन्दर्पं पूजयामि निशाऽऽगमे ॥८४॥
गन्धपुष्पाक्षतधूपदीपनैवेद्यकैः शुभैः ।
आरार्त्रिकादिभिर्देवं पूजयामि पतिं प्रभुम् ॥८५॥
मदनाय नमः प्राच्यां मन्मथाय नमोऽग्निके ।
कन्दर्पाय नमो याम्येऽनंगाय नमो नैर्ऋते ॥८६॥
वारुण्यां मोहनाय नमः स्मराय नमोऽनिले ।
कौवेर्यामीश्वराय नमः पुष्पबाणायेशान्यां नमः ॥८७॥
सर्वदिक्षु नमस्कृत्य मां कन्या पूजयेत् ततः ।
'ओं कन्दर्पपुरुषाय विद्महे कामदेवाय धीमहि ।
तन्नोऽनङ्गः प्रचोदयात् ॥८८॥
इति चाष्टोत्तरशतजपान् कुर्याद्धि सन्निधौ ।
'नमोऽस्तु कामपतये पुष्पशराय ते नमः ॥८९॥
मन्मथायाऽऽनन्ददात्रे नमो रतिकराय ते ।
प्रीतिदाय नमस्तेऽस्तु सर्वबीजाय ते नमः ॥९०॥
कान्ताय कान्तरूपाय सर्ववासाय ते नमः ।
पुरुषोत्तमरूपायाऽनंगदेवाय ते नमः ॥९१॥
अनादिश्रीकृष्णनारायण वाञ्छितकामद ।
हृत्स्थान् पूरय कामान्मे प्रभो कामेश्वरीप्रिय ॥९२॥
स्तुत्वैवं मञ्जरी वारि दातव्ये मम पादयोः ।
गीतवादित्रनृत्यैश्च कर्तव्यश्चोत्सवो महान् ॥९३॥
जागरणं प्रकुर्याच्च प्रातः स्नात्वाऽर्चयेद्धरिम् ।
गुरुं चापि द्रविणादि वस्त्रालंकारभोजनम् ॥९४॥
दानेऽर्पयेद्धि गुरवे सहाऽश्रीयाच्च वैष्णवैः ।
भूमिदानं धेनुदानं महादानं तु भूरिशः ॥९५॥
सर्वदानं तया दत्तं मञ्जर्याः पूजनेन मे ।
गोसहस्रप्रदानस्य फलं दमनकार्चने ॥९६॥
मल्लिकाकुसुमैर्मां या वसन्ते कान्तमुत्तमम् ।
अर्चयेत्परया भक्त्या सा कान्तं लभते ध्रुवम् ॥९७॥
मधुकश्च दमनकश्चातिप्रीतिकरौ हरेः ।
ताभ्यामहं पूजितो द्राक् पतिं ददामि योषिते ॥९८॥
कन्यायै रतिरूपायै प्रसन्नः पुरुषोत्तमः ।
पतिं ददामि तद्योग्यं कान्तं कान्तिनिधिं शुभम् ॥९९॥
कामदेवसमं रम्यं सवयस्कं मदात्मकम् ।
सौम्यशीलं च नीरोगं सम्पद्युक्तं गुणाकरम् ॥१००॥
प्रीतिपात्रं प्रेमपात्रं ददामि पतिमुत्तमम् ।
इत्येवं कथितं लक्ष्मि मुक्तिदं भुक्तिदं व्रतम् ॥१०१॥
पूजनं मम लोकेऽत्र भजनं चापि चोत्तमम् ।
गुरुतीर्थे साधुसाध्वीरूपे चापि तथोत्तमम् ॥१०२॥
दासदासीवैष्णवादिस्वरूपाणि तथा प्रिये ।
अनावरणसेवा च कथिता मम लब्धये ॥१०३॥
पठनाच्छ्रवणाच्चाऽस्य स्मरणात् करणात्तथा ।
अवश्यं फलमाप्नोति भक्ता भक्तो यथोदितम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरयुगसन्ताने वधूगीतायामनावरणसेवादास्यसाधुसाध्वीश्रैष्ठ्यदमनकव्रतादिनिरूपणनामा त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीनारायणीश्रीरुवाच—

हरे नारायण कृष्ण परमेश सनातन ।
कस्यां तिथौ किंस्वरूपो भवान् पूज्यः प्रवेदय ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

प्रतिपद्धनदस्योक्ता तत्र पूज्योऽहमेव ह ।
कुबेरमूर्तिरूपो वै धनदोऽहं भवामि हि ॥ २ ॥
लक्ष्म्यास्ते वै द्वितीयाऽस्ति त्वं पूज्या पुरुषोत्तमी ।
सर्वलक्ष्मीप्रदा त्वं स्या मदात्मिका नरायणी ॥ ३ ॥
तृतीया पार्वतीदेव्यास्तिथिः प्रोक्ता शुभा प्रिये ।
तत्र पूज्या पार्वती तु सौभाग्यदा हि सा मता ॥ ४ ॥
गणेशस्य चतुर्थी वै पूज्यो विघ्नहरो हि सः ।
कृष्णनारायणरूपो लाभादिसम्प्रदोऽपि सः ॥ ५ ॥
चन्द्रस्य पञ्चमी प्रोक्ता पूजनीयः शशी ह्यहम् ।
गोवृषवाटिकादाता भवामि चामृतान्नदः ॥ ६ ॥
कार्तिकस्य तिथिः षष्ठी कार्तिकं पूजयेत्तदा ।
जयप्रदो ग्रहहर्ता भवामि कार्तिकाऽऽत्मकः ॥ ७ ॥
सप्तमी तु रवेर्बोध्या सूर्यः पूज्यस्तदा प्रिये ।
सूर्यनारायणश्चाऽहं तेजो ददामि नैकधा ॥ ८ ॥

दुर्गायास्त्वष्टमी बोध्या दुर्गा पूज्या शुभप्रदा ।
सर्वकष्टहरा सा च मम शक्तिः सनातनी ॥ ९ ॥
नवमी चैव मातृणां पूज्या वै मातरः शुभाः ।
रक्षाकर्यो भवन्त्येव क्षेमंकर्यो हि वंशिनाम् ॥ १० ॥
यमस्य दशमी बोध्या यमः पूज्यस्तदा शुभः ।
पापनिरयदुःखघ्नो यमोऽहं संभवामि वै ॥ ११ ॥
एकादशी कमलायाः श्रीः पूज्या तत्र सर्वथा ।
श्रेयसां पदमाप्नोति ददामि श्रीं समर्चिने ॥ १२ ॥
द्वादशी मे माधवस्य पूजितोऽहं तदा प्रिये ।
मधु सर्वविधं श्रेष्ठं ददामि रससंभृतम् ॥ १३ ॥
त्रयोदशी च कामस्य पूज्योऽहं तत्र सर्वदा ।
कामान् ददामि सम्पूर्णान् सर्वकामप्रपूरकः ॥ १४ ॥
चतुर्दशी हरस्याऽस्ति महादेवमयो ह्यहम् ।
पूजनीयः स्मृद्धिदश्चैश्वर्यप्रदो हि शंकरः ॥ १५ ॥
पंचदशी वेधसोऽस्ति वेधाः पूज्यः शुभप्रदः ।
वंशवृद्धिप्रदश्चापि पितृवच्छ्रेयसांप्रदः ॥ १६ ॥
अधिका तिथिराच्युती पुरुषोत्तमसंज्ञिका ।
अनादिश्रीकृष्णनारायणः पूज्योऽहमेव च ॥ १७ ॥
सर्वेष्टसम्प्रदश्चास्मि परमेशः पुरातनः ।
अमावास्या तु देवानां तिथिः पूज्या हि देवताः ॥ १८ ॥
आवाहनं समारभ्य विसर्जनावधिं ध्रुवम् ।
सर्वोपचारशोभाढ्यं पूजनं सर्वदा मतम् ॥ १९ ॥
स्नानमम्बरमाभूषा मन्त्रमालाऽऽर्द्रचन्दनम् ।
धूपदीपसुनैवेद्यवारिताम्बूलतोषणम् ॥ २० ॥
नमः क्षमा दक्षिणा चेत्यावश्यकं हि पूजने ।
अष्टोत्तरशतवस्तुकृतं प्रपूजनं भवेत् ॥ २१ ॥
सर्वसम्पत्प्रदं लक्ष्मि सर्वसिद्धिप्रदं तथा ।
सर्वकामप्रदं चापि भुक्तिमुक्तिप्रदं भवेत् ॥ २२ ॥
एवं मे महतीं पूजां कुर्याद् भक्ता प्रसादिनीम् ।
यया कृतया श्रीकृष्णः प्रसीदामि प्रियंकरः ॥ २३ ॥
दीपमाला प्रदातव्या मम सौधे च मन्दिरे ।
चतुर्विधं च नैवेद्यमन्नं दद्यात् सुमिष्टकम् ॥ २४ ॥
वस्त्राऽलंकारविधिनाऽभ्यर्च्य मां पूजयेद् गुरुम् ।
मन्त्रभक्तिविधिहीनं पूजितं पूर्णमस्तु ते ॥ २५ ॥
धन्याऽहं कृतकृत्याऽहं सौभाग्या धरणिस्थिता ।
यां मामङ्गीकृत्य नाथः श्रीकृष्णो मुक्तिदोऽस्ति मे ॥ २६ ॥
सर्ववासनानिर्मुक्ता दिव्या राधासमाऽद्य वै ।
जाताऽस्मि गौरवं प्राप्ता गुरोः प्रतापतो भुवि ॥ २७ ॥

नमस्ते गुरवे कृष्णात्मकाय परमात्मने ।
प्रतिष्ठादिव्यमूर्तिस्त्वं गुरुः कृष्णो हि तारकः ॥ २८ ॥
सर्वानन्दप्रदो मुक्तिप्रदस्त्वं मे गुरुर्हरिः ।
सर्वबन्धप्रहर्ता च पापतापविनाशकः ॥ २९ ॥
ब्रह्मकैवल्यदाता मे परमाक्षरधामदः ।
परमात्मस्वरूपस्त्वं नमस्ते परमात्मने ॥ ३० ॥
धन्याऽस्मि कृतकृत्याऽस्मि सफलं जीवितं च मे ।
मज्जन्मनि निदाने च धन्यौ तौ पितरौ मम ॥ ३१ ॥
यन्मयाऽनादिभगवान् वल्लभः समुपार्जितः ।
त्वया कृष्ण वियुक्ताऽहं यथा न स्यां तथा कुरु ॥ ३२ ॥
दानं तपो व्रतं भक्तिः सेवा पूर्वं कृता मया ।
ययाऽहं कृष्णकान्तं वै लब्धवत्यत्र भूतले ॥ ३३ ॥
बहुपुण्यप्रतापेन लब्धवती हरिं गुरुम् ।
गुरौ सन्निहितो विष्णुः स्वभक्तेष्वेव सर्वथा ॥ ३४ ॥
गुरावास्ते हरिश्चेति महिमानं विभावयेत् ।
गुरुर्हष्टः प्रणमितः स्नापितः पूजितस्तथा ॥ ३५ ॥
यज्ञकोटिसमं पुण्यं ददाति गुरुसेविने ।
दोषयुक्ताऽपि या नित्यं भक्तिभावान्विता सती ॥ ३६ ॥
गुर्वीमूर्तिं पूजयेत् साऽच्युता भवति धामनि ।
गुर्वीमूर्तिर्महाहत्यापापातिपातनाशिनी ॥ ३७ ॥
स्मृता संकीर्तिता ध्याता पूजिता च नमस्कृता ।
गुर्वीदेवीप्रतिमा सा धामाऽक्षरप्रदायिनी ॥ ३८ ॥
आचार्याणीं सतीं गुर्वीं साध्वीं ब्राह्मीं पतिव्रताम् ।
हरिव्रतां योगिनीं च प्राप्याऽऽसेव्य प्रमुच्यते ॥ ३९ ॥
सिंहीं वीक्ष्य यथा यान्ति मृग्यो भयात्तथा त्विह ।
मायाः सर्वाः पापमय्यो गुर्वीप्राप्त्या वियन्ति हि ॥ ४० ॥
नमस्करोति या शिष्या गुरुस्त्रीं पावनीं सतीम् ।
भक्त्या वा यदि वाऽभक्त्या सा पुण्या मुक्तिगामिनी ॥ ४१ ॥
वैवस्वतभयं नास्ति तस्या मरणजन्मनोः ।
या करोति सती सेवां पूजनं गुरुयोषितः ॥ ४२ ॥
गन्धपाद्याऽर्घनैवेद्यैर्दीपैर्धूपैर्विलेपनैः ।
गीतैर्वाद्यैस्तथा स्तोत्रैर्गुर्वीं देवीं प्ररञ्जयेत् ॥ ४३ ॥
अर्चयते मानवी मां सतीभक्तिपरायणा ।
कल्पकोट्ययुतान्येषा रमते मम सद्मनि ॥ ४४ ॥
गुरुदेवनमस्कारो भावेनाऽपि यया कृतः ।
सा देवी मानुषे लोके ममाऽनुग्रहपात्रिका ॥ ४५ ॥
मद्भक्तिबलदर्पस्था मम साधुपरायणा ।
गुर्वीसेवापरा साध्वी मोदते मम धामनि ॥ ४६ ॥

गुरुदेवप्रतिमायां लक्ष्मि सदा वसाम्यहम् ।
पद्मकोटिसहस्रेस्तु विष्णुपूजाफलं तु यत् ॥४७॥
गुरुदेवस्य पूजायां फलं तल्लभते सती ।
न कृतं मर्त्यलोके यैर्गुरुदेवार्चनं जनैः ॥४८॥
ते मृता एव च मुहुर्जायन्ते कर्मभागिनः ।
गुरुदेवस्य निकटे सर्वं याति पवित्रताम् ॥४९॥
भुक्त्वा गुरोः प्रसादं च यज्ञकोटिफलं भवेत् ।
गुरोः पादोदकैः पीतैर्हत्याकोटिर्विनश्यति ॥५०॥
काशीवासो युगान्यष्टौ दिनैकगुरुसेवनात् ।
तस्माद् गुरोः पूजनं वै कर्तव्यं मोक्षकाम्यया ॥५१॥
गुरुदेवस्वरूपः श्रीपतिर्यत्र हि तिष्ठति ।
तत्र देवाः सुराः साध्यश्चेश्वराश्च वसन्ति वै ॥५२॥
सुराणां कीर्तनैः सर्वैः कोटिभिर्यत् फलं भवेत् ।
तत्फलं श्रीहरेश्चापि गुरोश्च कीर्तनाद् भवेत् ॥५३॥
गुरुदेवमुखे हुत्वा सकृत् पिण्डेन तर्पिताः ।
पितरस्तृप्तिमायान्ति शाश्वतीं चाऽमृतान्विताम् ॥५४॥
ये पिबन्ति जना वारि गुरोश्चरणपावितम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥५५॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैश्च वा किं वै पीत्वा पादोदकं गुरोः ॥५६॥
यो ददाति गुरवेऽत्र घृतं दुग्धं च शर्कराम् ।
तेनेष्टं सर्वमिष्टान्नैस्तेनेष्टं क्रतुभिः शतैः ॥५७॥
गृहेऽपि वसतस्तस्य तीर्थस्नानं दिने दिने ।
दीक्षाऽस्य सर्वयज्ञेषु येन सन्तोषितो गुरुः ॥५८॥
स्वर्गे मर्त्ये च पाताले गुरवः सन्ति तारकाः ।
गुरुदेवसमं नास्ति त्रैलोक्ये पावनं परम् ॥५९॥
मानुषे सुभगे लोके सफलं जीवितं यतः ।
गुरोः प्राप्तिः कृता येन यया वा सेवनं गुरोः ॥६०॥
पत्रं पुष्पं फलं तोयं वस्त्रं द्रव्यं च भोजनम् ।
जायते मेरुणा तुल्यं गुरुदेवसमर्पणात् ॥६१॥
विधिहीनाऽपि या नारी क्रियामन्त्रादिवर्जिता ।
गुरुभक्ताऽर्चयेद् भक्त्या तस्याः शास्त्रोदितं फलम् ॥६२॥
निवसामि सदा तत्र देहे गुरोर्गुरौ सदा ।
स्कन्धे याने गुरुं कृत्वा योऽध्वानं वहते जनः ॥६३॥
तस्य मार्गो ह्यनिरुद्धो मम धाम्नोऽस्ति सर्वदा ।
गुरुदेवस्थितिर्यत्र तत्र सन्निहितो हरिः ॥६४॥
तीर्थं महादानं कुरुक्षेत्रं च नैमिषम् ।
र्ं च प्रयागं चाप्यश्वपट्टसरस्तथा ॥६५॥
बालकृष्णसरश्चापि विषतुर्यसरस्तथा ।
तत्र नारायणी चापि तत्रैरावतिका नदी ॥६६॥
मेनकांगा च तत्रैव ब्रह्मपुत्राऽपि तत्र च ।
यत्र गुरोर्निवासोऽस्ति सर्वतीर्थानि तत्र वै ॥६७॥
ब्रह्महत्यादिकं पापं यत्किंचिज्जायते जने ।
तत्सर्वं निर्दहत्याशु गुरुदेवप्रसेवनम् ॥६८॥
गुरोर्मूर्तिर्हरेर्मूर्तिर्यत्रोभयोर्हि संगमः ।
तत्र द्वारवती बोध्या मुक्तिदा भक्तिराच्युती ॥६९॥
गुर्वर्चने न मन्त्राश्च न जपो न च भावना ।
न द्रव्यं न हीरकादि नोपदा नेतरत्त्वपि ॥७०॥
न स्तुतिर्नापि दैन्यं च प्रेममात्रमपेक्षते ।
अकृत्यस्याऽप्यभक्ष्यस्याऽपेयस्य ग्रहणे कृते ॥७१॥
यत्पापं तद् विनश्येद्वै सन्तुष्टे श्रीगुरौ हरौ ।
पूजनं कुरुते गुर्व्या नित्यं शिष्या तु या सती ॥७२॥
सेवनं कुरुते गुर्व्याः पादसंवाहनादिकम् ।
अनन्तोत्तरकालं सा वैधव्यं विन्दते न वै ॥७३॥
कृष्णसौभाग्यमापन्ना पद्मिनी जायते रमा ।
गुरोः छायां समाश्रित्य दद्याद् दानानि वै सदा ॥७४॥
न जह्याच्च गुरोः पार्श्वं याम्यभीतो जनस्त्विह ।
गुरोरग्रे यमदूता न चाऽऽयान्ति कदाचन ॥७५॥
गुरोः सेवा हरेः सेवा पत्युः सेवा यया कृता ।
सफलं जीवितं तस्या यस्या गेहे त्रयं सदा ॥७६॥
सन्नियम्याऽन्यतो वृत्तीर्गुरुदेवस्य तोषणम् ।
या कुर्यान्मानवी साध्वी भक्त्या सेवां च पूजनम् ॥७७॥
यथायोग्यं वस्तूनामर्पणं निवेदनं जलम् ।
श्रद्धया गुरवे दत्ते पुष्पे पुष्पेऽश्वमेधजम् ॥७८॥
फलं सा विन्दते शिष्या साक्षाद् गुरुहरिश्रिता ।
जन्मदुःखजरारोगैर्मुक्ता सा मोक्षगा मता ॥७९॥
गवामयुतदानेन यत्फलं प्राप्यते त्विह ।
गुरवे पद्ममालां वै समर्प्येयाद्धि तत्फलम् ॥८०॥
दुर्लभं चापि दुष्प्रापं त्रैलोक्ये सचराचरे ।
तदपि प्रार्थितं लक्ष्मि गुरुसेवा ददाति वै ॥८१॥
ऐश्वर्यं सन्ततिं ज्ञानं राज्यं च सुखसम्पदः ।
गुरुकृपा ददात्येव सेवालभ्या हि सा मता ॥८२॥
मेरुमन्दरतुल्यानि पापानि सर्वथा लयम् ।
यान्ति गुरोः सेवनाद्धि साक्षाद्धरिर्गुरुर्हि सः ॥८३॥
नमो नारायणायेति नमः श्रीगुरवे तथा ।
उक्त्वा नित्यं नमेद्देवं गुरुं हरिं पतिं प्रभुम् ॥८४॥

व्रजेत् सा परमात्मानं धामाऽक्षरनिवासिनम् ।
शाश्वताऽऽनन्ददातारं ह्यनामयपदस्थितम् ॥८५॥
गुरोर्नाम हरेर्नाम पठते या मुहुर्मुहुः ।
याति सा परमं धाम पुनर्जन्म न विन्दति ॥८६॥
कुले तस्याश्च ये जाताः शतशोऽथ सहस्रशः ।
तेऽपि यान्ति परं धाम यया सन्तोषितो गुरुः ॥८७॥
महोत्सवेषु सर्वेषु गुरुं सम्पूजयेत् सती ।
पूजयित्र्या गृहे नित्यं भवेयुर्वै महोत्सवाः ॥८८॥
आषाढे भावनाऽभिज्ञा पूर्णायां पूजयेद् गुरुम् ।
तत्फलं लभते नारी सौभाग्यं शाश्वतं सती ॥८९॥
स्नापयेदुष्णसलिलैर्गन्धद्रव्यैर्विलेपयेत् ।
मर्दयेद् गन्धतैलैश्च स्वच्छद्रव्यैः प्रमार्जयेत् ॥९०॥
अभिषेकं कारयेच्च धारयेदम्बराणि च ।
श्रृंगारयेच्च श्रृंगारैरर्चयेदक्षतादिभिः ॥९१॥
पुष्पचन्दनमाल्यैश्च समर्चयेद् गुरुं सती ।
विभूषा धारयेच्चापि धूपदीपादि कारयेत् ॥९२॥
फलामिष्टान्नपानादि दद्याच्छ्रीगुरवे ततः ।
दक्षिणां प्राऽर्पयेच्चापि यथावैभवमुत्तमम् ॥९३॥
पादामृतं पिबेच्चापि पादसंवाहनं चरेत् ।
गुर्व्याः सदाऽङ्गमर्दादि कुर्याच्छिष्या रुती शुभम् ॥९४॥
याने कृत्वा वाटिकायां महोद्याने गृहे तथा ।
गुरुं गुर्वीं नयेद्वापि तोषयेद् भक्तिसंभृता ॥९५॥
अनादिश्रीकृष्णनारायणं मां परमं गुरुम् ।
एवं प्रसादयेत् साध्वी वधूर्या श्रीनरायणि ! ॥९६॥
अन्या वा स्वपतिं कृष्णं प्रसादयेद्धि भावतः ।
तथा या स्वगुरु प्रसादयेद्वै सेवया सती ॥९७॥
सर्वास्ता ब्रह्मरूपा वै मोक्षगाः सन्ति पद्मजे ।
दिव्या दिव्यस्वरूपाश्च पराया दिव्यताप्रदाः ॥९८॥
स्वस्याः समागमं प्राप्ता या या भवन्ति योषितः ।
तास्ता दिव्यास्तथा भूत्वा प्रयास्यन्ति परं पदम् ॥९९॥
हरिश्चाहं सदा दिव्यः शक्तिर्दिव्या च मे सदा ।
सा च त्वं श्रीस्तथा राधा रमा प्रज्ञा च माणिकी ॥१००॥
लक्ष्मीर्गंगा च विरजा पद्मावती च माधवी ।
एवमाद्याः शक्तयो मे दिव्या ब्रह्मप्रिया हि ताः ॥१०१॥
हरिप्रिया न मे भिन्ना अभिन्नास्ताः सदा मम ।
वसन्ति शक्तयः सर्वा गुर्व्यां गुरौ सदा प्रियाः ॥१०२॥
अहं शक्तिसहितो वै निवसामि वधूजने ।
स्वामिजने निवसामि साधौ पत्यौ वसामि च ॥१०३॥
पूरयामि मनःकामान् तत्तद्गुरुत्वमास्थितः ।
एवं श्रीशिवराज्ञीश्रि मां प्रसेवय माधवम् ॥१०४॥
पठनाच्छ्रवणादस्य स्मरणाद् वन्दनादपि ।
भावग्राहादपि मुक्तिर्भवेदेव न संशयः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां सर्वतिथिषु हरेर्भिन्नरूपस्य पूजा गुरुरूपस्य सदा पूजा चेत्यादिनिरूपणनामा चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु त्वं शिवराज्ञीश्रि माहात्म्यं परमेशितुः ।
अनादिश्रीकृष्णनारायणस्य गुरुरूपिणः ॥१॥
ममैव खलु माहात्म्यं यथावत् प्रवदामि ते ।
न च तृप्याम्यहं वक्तुं नारीदयावशंवदः ॥ २ ॥
नित्यं सम्पूजयेत् साध्वी मोक्षसौभाग्यकांक्षिणी ।
स्नापयेत जलैर्भक्त्या मधुक्षीरघृतेन माम् ॥ ३ ॥
पञ्चगव्येन सलिलैर्गन्धचन्दनवारिभिः ।
चन्दनेन सुगन्धेन कुंकुमेन गुलालकैः ॥ ४ ॥
अबीरेण तथा काश्मीरेण केसरवारिभिः ।
कर्पूरोशीरमिश्रेण लोपयेन्मां द्रवेण च ॥ ५ ॥
अर्चयेद् रुचिरैः पुष्पैर्गन्धधूपसमन्वितैः ।
गुग्गुलं गोघृताक्तं वै ददेन्मे सन्निधौ सती ॥ ६ ॥
दीपकं च दिवारात्रौ दद्याद् घृतेन सुन्दरी ।
नैवेद्यं दुग्धपानादि क्षीरान्नं परमर्पयेत् ॥ ७ ॥
एवमभ्यर्चयेन्मां च प्रणम्याऽभिप्रणम्य च ।
'ओं नमः कृष्णकान्ताय' जपेदष्टोत्तरं शतम् ॥ ८ ॥
जुहुयाच्च घृताभ्यक्तैस्तिलव्रीहियवादिभिः ।
तथैव नाम्ना मह्यं वै सर्वमुक्ताभितृप्तये ॥ ९ ॥
कमलैर्मम चरणौ पूजयेद् भक्तिवर्धिनी ।
बिल्वपत्रैर्जानुदेशं पूजयेन्मे विलासिनी ॥१०॥
जघनं मे पूजयेच्च राजचम्पकपुष्पकैः ।
वक्षो मे पूजयेत्साध्वी स्थलपद्मसुपद्मकैः ॥११॥
मस्तकं पूजयेद् रामा मालत्या वृन्दया तथा ।
चन्दनेन समग्रं च शरीरं पूजयेन्मम ॥१२॥
देहबुद्धिं परित्यज्य हरिबुद्ध्या प्रपूजयेत् ।
सर्वविधां मम सेवां ब्रह्मचर्ययुताऽऽचरेत् ॥१३॥
पत्नीभिर्भर्तृवाक्येन कर्तव्यं पूजनं मम ।
विधवाभिर्मम वाक्यान्मोक्षसौख्यविवृद्धये ॥१४॥

सर्वकामसमृद्ध्यर्थं कन्याभिः पूजनं मम ।
सर्वस्मृद्धिप्रलाभार्थं नरैः कार्यं प्रपूजनम् ॥१५॥
एतादृशं पूजनं मे मोक्षदं स्मृद्धिदं प्रिये ।
नारीविक्रयपापस्य नाशकं पूजनं त्विदम् ॥१६॥
पूजा भक्तिः कथिता ते लक्ष्मि श्रेष्ठां च तां शृणु ।
मल्लीनचित्ता या भक्तिः सा भक्तिः परमा मता ॥१७॥
प्रेमप्रवाहमग्नाया मद्विरहाऽसहिष्णुता ।
मत्स्वरूपाकारचित्ता भक्तिः सा परमोत्तमा ॥१८॥
उत्तमा चात्मना भक्तिर्मध्यमा मनसा तु सा ।
कनिष्ठा वर्ष्मणा भक्तिस्त्रेधा भवति मोक्षदा ॥१९॥
मुक्तानामात्मना भक्तिर्योगिनां मानसी तथा ।
अज्ञानां देहजा भक्तिस्त्रेधाऽपि मोक्षदा मता ॥२०॥
आत्मभक्त्या सुखं श्रेष्ठं मनसा मध्यमं सुखम् ।
देहेन वै सुखं स्वल्पं त्रेधा विभिद्यते सुखम् ॥२१॥
आत्मना ब्रह्मरूपेण ह्यानन्दः शाश्वतो मम ।
मनसा दिव्यभावेन ह्यानन्दो योगसावधिः ॥२२॥
देहेन क्रिययाऽऽनन्दो देहक्षणाद्यपेक्षकः ।
स्वार्थानन्दपरा भक्तिस्तामसी मम सा मता ॥२३॥
उभयानन्दगर्भा सा राजसी भक्तिराच्युती ।
हर्यानन्दपरा भक्तिः सात्त्विकी स्वार्थवर्जिता ॥२४॥
गुरोर्भक्तिर्हरेर्भक्तिस्तादात्म्येन कृता यदि ।
शीघ्रं सा फलदा लक्ष्मि साक्षाद्गुरुर्हि वै हरिः ॥२५॥
भक्तिमत्याः स्त्रिया नित्यं शान्तिं कुर्वन्ति देवताः ।
क्षेमं कुर्वन्ति शंभ्वाद्याः स्वस्ति यच्छन्ति साधवः ॥२६॥
पुण्यं यच्छन्ति ऋषयश्चाशीर्वादपरायणाः ।
शुभं यान्ति ग्रहाश्चापि शुभं यान्ति पिशाचकाः ॥२७॥
राक्षसाश्च शुभं यान्ति प्रसन्ना मुनयोऽपि च ।
लक्ष्मीः स्थिरा गृहे तस्यास्तिष्ठत्येव सदा शुभा ॥२८॥
रसास्तिष्ठन्ति तस्या वै मधूनि मन्दिरे यथा ।
मिष्टामृतानि तिष्ठन्ति सुधा भक्तियुताग्रहे ॥२९॥
पीयूषाणि समस्तानि तिष्ठन्ति च महोत्सवाः ।
सर्वविधानि स्वर्गाणि तिष्ठन्ति भक्तियुग्गृहे ॥३०॥
भक्तिमती सदा नारी राधा लक्ष्मीर्मता मम ।
शारदा कमला कान्ता श्रीः पद्मा सा मता मम ॥३१॥
या कापि जातिसम्पन्ना भजते मामनन्यगा ।
सा ममैव प्रिया भक्ता मोक्षे मुक्तानिका भवेत् ॥३२॥
यस्या दर्शनमात्रेण ब्रह्महा अपि शुद्ध्यति ।
तद्गृहं सर्वतीर्थानां वासरूपं वरं मतम् ॥३३॥
यत्र भक्तैतादृशी स्यान्नारी नारायणी शुभा ।
इयं सा कमलामूर्तिर्भक्ता वै पापहारिणी ॥३४॥
कैवल्यफलदा सा वै यथा गंगा रमा यमी ।
तिष्ठत्येतादृशी भक्ता यत्स्थाने यत्र मन्दिरे ॥३५॥
यत्कुले भूतले वापि सर्वं मोक्षप्रदं हि तत् ।
किमत्र बहुनोक्तेन भक्ता रमा रमा हि सा ॥३६॥
रमां मत्वा मम भक्तां या नमिष्यन्ति सत्स्त्रियः ।
तासां दर्शनमात्रेण ब्रह्मघ्नी शुद्ध्यति ह्यपि ॥३७॥
दासीभावेन या तस्याः सेवनं कुरुतेऽबला ।
तस्याः पुण्यं न जानाति ब्रह्माऽपि खलु पद्मजे ॥३८॥
शंखचक्रान्वितां भक्तां पूजयेद् या तु वैष्णवी ।
पूजितं तेन वै सर्वं जगत्स्थावरजंगमम् ॥३९॥
स एव दिवसो धन्यो धन्या माताऽपि तत्कुलम् ।
पिता धन्यस्तथा साध्व्या यया भक्ता प्रपूजिता ॥४०॥
सर्वा धन्यतमाः साध्व्यो मम भक्तिपरायणाः ।
तासां दर्शनमात्रेण महापापं विलीयते ॥४१॥
उपपापानि सर्वाणि प्रकीर्णकानि तानि वै ।
सर्वाण्येव विनश्यन्ति वैष्णवीनां हि दर्शनात् ॥४२॥
पावका इव पावन्यो विष्णुभक्ताः स्त्रियः सदा ।
आर्द्रं शुष्कं लघु स्थूलं नाशयन्ति हि कल्मषम् ॥४३॥
प्रामादिकं हि यत्पापं ज्ञानाऽज्ञानकृतं तथा ।
संसर्गजं च पापं च नश्यति द्रुतमेव ह ॥४४॥
सतीनां दर्शनाल्लक्ष्मि साधूनां सेवनात्तथा ।
स्वर्गं प्रयान्ति निष्पापाः पापिष्ठा यान्ति शुद्धताम् ॥४५॥
संसारकर्मपाशानां मोक्षणे वै विशारदी ।
पावनी पावनानां च मम भक्ता सदा शुभा ॥४६॥
प्रत्यहं मम भक्ता या मां प्रस्मरत्यहर्निशम् ।
सा तु मद्रूपिणी बोध्या हरिणी सा न संशयः ॥४७॥
भ्राजत्कर्पूरशुभ्रं मां पद्मपत्रायतेक्षणम् ।
शंखचक्रगदापद्ममीनध्वजधनुर्धरम् ॥४८॥
पीताम्बरं विराजन्तं कौस्तुभेन समुज्ज्वलम् ।
श्रीवत्सवक्षसं पुष्टं वनमालादिभूषितम् ॥४९॥
स्वर्णकुण्डलभाव्यासकपोलवदनं हरिम् ।
वलयांऽगदनूपुरकिरीटरशनान्वितम् ॥५०॥
प्रसन्नवदनं कृष्णनारायणं प्रभुं विभुम् ।
वामसक्थिस्थपाण्डुरश्रीचिह्नप्रविराजितम् ॥५१॥
सपादपञ्चषड्यंगुलोर्ध्वमानं पुमुत्तमम् ।
चतुर्बाहुं चन्द्रशुभ्राननं शृङ्गारराजितम् ॥५२॥

मामनादिकृष्णनारायणं ध्यायति या सती ।
सा भक्ता वैष्णवीरूपा श्रीरूपा मत्स्वरूपिणी ॥५३॥
तस्यास्तु दर्शनेनापि भक्त्या वा भोजनेन च ।
पूजनेन कमले वै मुक्तिगा जायते सखी ॥५४॥
तृषातुरा यथा वारि तद्वन्मां सा स्मरत्यपि ।
हिमाकुला यथाग्निं च तद्वन्मां सा स्मरत्यपि ॥५५॥
यथा पतिं पतिधर्मा तद्वन्मां सा स्मरत्यपि ।
भीता यथा स्वगोप्तारं तद्वन्मां सा स्मरत्यपि ॥५६॥
लोभवती यथा द्रव्यं तद्वन्मां सा स्मरत्यपि ।
पुत्रकामा यथा पुत्रं तद्वन्मां सा स्मरत्यपि ॥५७॥
विवासिता यथा गेहं तद्वन्मां सा स्मरत्यपि ।
चातकी च यथा मेघं तद्वन्मां सा स्मरत्यपि ॥५८॥
ब्रह्मवेत्त्री यथा ब्रह्म तद्वन्मां सा स्मरत्यपि ।
पितरश्च यथा पिण्डं देवा हव्यं यथाऽध्वरे ॥५९॥
ऋषयश्च यथा मन्त्रान् मानवाः सम्पदो यथा ।
हंसाश्च मानसं यद्वत् तद्वन्मां सा स्मरत्यपि ॥६०॥
कामुकी कामिनं यद्वद् भक्ता भजन्तमेव यम् ।
माताऽपत्यं यथा तद्वन्मां सा स्मरति सात्त्विका ॥६१॥
भक्तिमन्तो यथा कृष्णं भक्तिं च वैष्णवा यथा ।
पशवश्च तृणं यद्वत् तद्वन्मां सा स्मरत्यपि ॥६२॥
सन्तो धर्मं साधवश्च क्षमां श्रेष्ठी समर्हणाम् ।
प्राणी प्राणान् वधुश्चात्मा तद्वन्मां सा स्मरत्यपि ॥६३॥
जीवाश्चायुर्भ्रमराश्च पुष्पं सूर्यं तु चाटिका ।
वल्लभा वल्लभं यद्वत् तद्वन्मां सा स्मरत्यपि ॥६४॥
रात्रिस्थाश्च यथा ज्योतिः श्रमार्ताः श्रान्तिमेव च ।
निद्रां जागरिणो यद्वत् तद्वन्मां सा स्मरत्यपि ॥६५॥
अनालसा यथा सिद्धिं करिणोऽरण्यभूमिकाम् ।
सिंहा गाढवनं यद्वत् तद्वन्मां सा स्मरत्यपि ॥६६॥
सूर्यकिरणमासाद्य सूर्यकान्तेऽनलो यथा ।
एवं साध्वीसुसत्संगाद्धरौ प्रेमवती भवेत् ॥६७॥
चन्द्रकिरणयोगेन चन्द्रकान्तः स्रवेत्सुधाम् ।
एवं वै वैष्णवीयोगाद्धरौ भक्तिस्तवो भवेत् ॥६८॥
कौमुदीं प्राप्य च यथा कुमुदं संविकासते ।
गुर्वीं भक्तां तथा प्राप्य हृत्पद्मं संविकाशते ॥६९॥
यथा कीटी भ्रमरीं च स्मृत्वा भ्रमरी जायते ।
योगस्मृत्या तथा साध्वी स्मृत्वा मां मत्समायते ॥७०॥
वध्वश्च कामबुद्ध्यैव कृष्णरूपं परं गताः ।
तथा गोपी च मां स्मृत्वा कृष्णनारायणायते ॥७१॥

काचिद्दास्यायते मां च काचित् स्नेहायते च माम् ।
काचित् स्पृहायते मां च काचित् स्वाम्यायते सती ॥७२॥
प्रेमायते च काचिच्च कृष्णायते च भामिनी ।
एवं मां भक्तियोगेन समीपे विन्दते क्षणात् ॥७३॥
सान्निध्येऽपि स्थितश्चाऽहं दूरे भक्तिं विना सदा ।
भक्तियोगेन दृश्यैव भक्ताभिः परमेश्वरः ॥७४॥
देवाद्यैरमृतं प्राप्तं तथापि दुःखिनो हि ते ।
भक्तिमेवाऽमृतं प्राप्य दुःखं सर्वं विनश्यति ॥७५॥
भक्त्या वैकुण्ठमासाद्य मोदते विष्णुसन्निधौ ।
अन्यत्सर्वं परित्यज्य मम भक्तिं समाश्रयेत् ॥७६॥
प्राप्य देहं विना भक्तिं क्रियते यद् वृथा हि तत् ।
विष्णुभक्तिं विना नैव संसाराब्धितरिर्भवेत् ॥७७॥
दुःखदावानलदग्धं मम भक्तिः प्रशाम्यति ।
जन्मान्तरेऽपि भक्तिर्मे मामकीं विदधाति वै ॥७८॥
भूत्वा च मामकी दासी लक्ष्मीः प्रजायते ततः ।
रेणुमात्रमपि भक्तेर्मम धाम ददाति वै ॥७९॥
शतैश्च श्रूयते भक्तिः सहस्रैरपि बुध्यते ।
लक्षैश्च भज्यते तत्र भक्ता काचिद् रमा भवेत् ॥८०॥
बुद्धिदा बहवो लोके भजमानस्तु कश्चन ।
तत्रापि च तदात्मत्वं प्राप्तः कोटिगणेऽद्वयः ॥८१॥
पूजया दृश्यते भक्तिर्जपैर्हाश्यते तथा ।
भक्त्या भक्तिः शस्यते च मया भक्तिः प्रगृह्यते ॥८२॥
मूले सिक्तस्य वृक्षस्य शाखादलफलोद्भवः ।
तथा सिक्तो हरिर्भक्त्या भक्तानन्दफलोद्भवः ॥८३॥
यस्या वृत्तिर्यादृशी सा तथा भक्तिं करोति वै ।
भजनादेव मे लक्ष्मि फलमग्रे ह्यवाप्यते ॥८४॥
पानीयहारिणी यद्वद् घटे तीरे प्रकर्षणे ।
चित्तं ददाति तद्वच्चेन्मयि ददाति मुच्यते ॥८५॥
यथा लोके स्थितं व्योम भूतैर्नैव हि लिप्यते ।
तथा लोके स्थिता भक्ता कर्मभिर्नहि लिप्यते ॥८६॥
दिवारात्र हि मे भक्ता ममानन्दोपजीविनः ।
तेऽत्रस्था अपि धामस्था दिव्या मुक्ता हि ते मताः ॥८७॥
सर्वमेधादियज्ञानां फलं स्वर्गं प्रपातवत् ।
मम भक्त्यध्वरफलं पुनरागमवर्जितम् ॥८८॥
दृष्टमानन्त्यमेवाऽस्या भक्तेर्मे मत्प्रसादतः ।
पाषाणो जलमध्यस्थो जलेन लिप्यते न सः ॥८९॥
भक्तो मायान्तरस्थोऽपि मायया लिप्यते न सः ।
मे भक्तस्यान्तरे शैत्यं विना जलेन मद्वशात् ॥९०॥

दर्दुरो वसति नीरे गन्धं वेत्ति न पद्मजम् ।
भ्रमरोऽरण्यवासोऽब्जगन्धं प्रवेत्ति वै स तु ॥९१॥
अहं वसामि हृदये बहिर्वृत्तिर्न वेत्ति माम् ।
प्रेमभक्तियुतो दूरस्थोऽपि वेत्ति हृदि स्थितम् ॥९२॥
गंगातटे वसन्त्येके वसन्त्यन्येऽर्बुदाचले ।
माहात्म्यवित् फलं त्वत्ति तथा भक्तियुतो जनः ॥९३॥
गर्दभश्चन्दनभारं वहते गन्धमेति न ।
बहिःस्थश्चान्तरस्थं मां न वेत्ति नैति मत्सुखम् ॥९४॥
मृगा जिघ्रन्ति रथ्यानि कस्तूरीगन्धवेदिनः ।
स्वनाभिस्थं न जानन्ति तथा मां वै बहिर्मुखाः ॥९५॥
मूर्खाणां ज्ञानशून्यानामुपदेशो निरर्थकः ।
तथा मद्भक्तिशून्यानामानन्दोऽपि निरर्थकः ॥९६॥
सर्पपीतं पयः क्ष्वेडं शठभक्तिस्तथाविधा ।
अन्धो दीपं वीक्षते न तथा मां वै बहिर्मुखः ॥९७॥
वेषेण च यथा चर्मं चर्मणा वर्ष्म संवृतम् ।
वर्ष्मणेन्द्रियकं यद्वत्तथेन्द्रियैर्हि वासना ॥९८॥
तयाऽऽवृतश्च जीवात्मा तेनाऽहं वै समावृतः ।
अणोरणीयान् चान्तःस्थो वसाम्यात्मा न चैति माम् ॥९९॥
दुग्धे घृतं तिले तैलं विद्यतेऽहं तथा विधः ।
विद्मे सर्वत्र मां नैव जानन्ति बहिरिच्छवः ॥१००॥
एकसूत्रे यदा प्रोता मणयो मयि तत्तथा ।
सृष्टयः सर्वथा प्रोताश्चात्मानो न विदन्ति माम् ॥१०१॥
यथा काष्ठादिगो वह्निर्मथनाद् दृश्यते बहिः ।
तथा त्वात्मस्थितश्चाऽहं दृश्ये भक्तिप्रमन्थनात् ॥१०२॥
यथा दीपात् प्रभवन्ति दीपाश्चान्ये ह्यपेक्षिताः ।
तथा गुरोः प्रजायन्ते सर्वशा भक्तिमुक्तिगाः ॥१०३॥
यथाऽर्कस्योदये ज्योतिः सर्वत्रैव प्रकाशते ।
तथा भाग्योदये स्वामी गुरुः स्वयं प्रकाशते ॥१०४॥
यथा वायुः सर्वगश्च सर्वगन्धवहस्तथा ।
गुरुर्हरिः सर्वगश्च कर्मभक्तिफलावहः ॥१०५॥
नीरं यादृग्रसाढ्यं वै तादृग्रसो मुखे भवेत् ।
आत्मा यादृक्प्रेमपूर्णस्तथाऽनन्दरसो निजे ॥१०६॥
पृथ्वी नैकरसैर्युक्ता नानासस्यस्वरूपिणी ।
आत्मा नैकसुखाढ्यश्च नानाब्रह्मसुखान्वितः ॥१०७॥
सच्चिदानन्दरूपोऽयं ह्यात्मा भक्तोऽतिमोदवान् ।
ममाऽऽनन्देन संयुक्तो महानन्दी प्रजायते ॥१०८॥
ममाऽऽनन्दं मम भक्तिं लक्ष्मि या वेत्ति वै हृदि ।
सा भक्ता कमलातुल्या मम धामाऽभियायिनी ॥१०९॥
अहं वसामि सर्वत्र लोका जानन्ति नैव माम् ।
अविद्यया न जानन्ति चाऽभक्तया न विदन्ति माम् ॥११०॥
सर्वकर्माणि चेत् कुर्युर्विष्णुदैवतकानि वै ।
तैरेव निर्गुणैर्योगैश्चाप्नुवन्ति पुरःस्थितम् ॥१११॥
एवमुक्तं मया लक्ष्मि मम सान्निध्यमद्भुतम् ।
विचार्य प्राप्य विज्ञाय भजित्वा मामवाप्नुयात् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां भगवदुक्तभक्तिमाहात्म्योत्कर्षनिरूपण-नामा पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

## श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि ! चैकोऽहं बहुधाऽपि च ।
नामरूपविभेदेन युगभेदेन वै तथा ॥ १ ॥
भक्तभेदेन च कार्यभेदेन संभवामि वै ।
प्रत्यात्मनियतश्चाऽस्मि सर्वजन्तुषु सर्वदा ॥ २ ॥
मदिच्छा हि महामाया मूलप्रकृतिरेव सा ।
राधा लक्ष्मीर्मम शक्तिद्वयं मदात्मकं हि तत् ॥ ३ ॥
प्रधानं त्रिगुणं चापि मया तादृग्विधं कृतम् ।
तत्र जीवा अनन्ता वै चेतना निवसन्ति हि ॥ ४ ॥
प्रधानात् प्रभवन्त्येव भूतानि देहहेतवः ।
देहास्तस्मात्प्रजायन्ते जीवादीनां गृहाणि वै ॥ ५ ॥
सत्त्वमायामयो विष्णुश्चाहं भवामि पद्मजे ।
रजोमायामयो ब्रह्मा चाहं भवामि पद्मजः ॥ ६ ॥
तमोमायामयः शंभुश्चाहं भवामि भालजः ।
तत्र सर्वत्र वै चाहं परमेशो वसामि च ॥ ७ ॥
अतः सर्वगतश्चाहं त्रिदेवसृष्टिमण्डले ।
अविद्यया न जानन्ति गूढं लोका गुहाशयम् ॥ ८ ॥
विद्यया वै प्रजानन्ति साधवो यतिसत्तमाः ।
ब्रह्मज्ञानं हि सा विद्यापरा यत्र ममाश्रयः ॥ ९ ॥
वेदावसानमेवैतद् यत्राऽहं वर्णितः प्रिये ।
आत्मना चाप्यते ब्रह्म परं विभु सनातनम् ॥१०॥
मनसा चिन्त्यते ब्रह्म चक्षुषा दृश्यते तथा ।
देहेनाऽऽश्लिष्यते ब्रह्म कृपया प्राप्यते हरिः ॥११॥
शुद्धेन मनसा युक्तात्मना संसेव्यते हरिः ।
मनसा बन्धुना ग्राह्यं परब्रह्म सनातनम् ॥१२॥
मनसा बन्धुना त्याज्यं मायायाः पटलं खलु ।
मनसा बन्धुना जीवास्तीर्यन्ते ब्रह्मयोगिना ॥१३॥

मनसा शत्रुणा जीवाः पात्यन्ते विषयार्थिना ।
दिव्येन मनसा ध्यात्वा श्रीपतिं मां परेश्वरम् ॥१४॥
दिव्यां क्रियां प्रकुर्वन् वै कुर्वन्नपि न लिप्यते ।
पद्मपत्रं यथा नीरगतं वार्भिर्न लिप्यते ॥१५॥
मनो मायागतं चापि मद्योगि लिप्यते न वै ।
यदा ब्रह्मरसं वेत्ति तदाऽन्यल्लवणायते ॥१६॥
यदा भक्तिरसं वेत्ति तदान्यद् गरलायते ।
यदा सेवारसं वेत्ति राज्यं तस्य मलायते ॥१७॥
यदा प्रेमरसं वेत्ति सर्वमन्यद् घृणायते ।
यदा मूल्यं मम वेत्ति सर्वं वै कचरायते ॥१८॥
यदाऽऽनन्दाशनं वेत्ति मुक्त्याद्यस्य न रोचते ।
ममाऽऽनन्दप्रवाहस्थं चान्यद्वेत्ति न वै यदा ॥१९॥
तदा प्रवाहभावेन द्रवतामेति मानसम् ।
द्रवभक्त्या प्राप्य मां तादात्म्ययोगमृच्छति ॥२०॥
गुरोर्योगाच्छास्त्रयोगाज्ज्ञानं दिव्यमवाप्यते ।
विज्ञानं चाप्यतेऽभ्यासैस्ततो ज्ञेयमवाप्यते ॥२१॥
ज्ञेयोऽहं परमात्मा च श्रीपतिः पुरुषोत्तमः ।
यदा प्राप्तस्तदा शून्यं मायामयं प्रजायते ॥२२॥
भावशुद्धिश्चाग्रपदा मनःशुद्धिस्ततः परा ।
आत्मशुद्धिश्चोर्ध्वपदा ताभिश्चावाप्यते हरिः ॥२३॥
नार्यो बहुविधाः सन्ति ह्याश्लिष्यन्ति च नैकधा ।
यथा भावश्च सम्बन्धस्तथा फलं क्रियादिकम् ॥२४॥
आलिङ्ग्यते निजा कान्ता यथा भावस्तथा फलम् ।
आलिङ्ग्यते हरिर्जीवैर्यथा भावस्तथा फलम् ॥२५॥
सम्प्राप्यते यया बुद्ध्या तथा चावाप्यते फलम् ।
यथा बुद्ध्या हि मामेति तथा ददामि वै फलम् ॥२६॥
श्रेष्ठं चात्मानन्दफलं प्राप्तव्यं सेवया सदा ।
प्रसन्नताप्रयोज्यो वै महानन्दा मयाऽर्प्यते ॥२७॥
प्रसन्नताऽनुकूल्येन प्रातिकूल्यविवर्जनात् ।
अर्चाकसेवया भक्त्या प्रसन्नता प्रजायते ॥२८॥
न सा क्रयेण लभ्या वा न वा क्षणादिबुद्धिभिः ।
न वा तात्कालिकी प्राप्या स्वार्थवृत्त्या न लभ्यते ॥२९॥
न मानेन न वै चातुर्येण नैपुण्यकेन न ।
न सा स्वेष्टमनोवृत्त्या किन्तु सर्वार्पणे न सा ॥३०॥
सर्वाज्ञापालनेनैव दैन्यभावेन लभ्यते ।
कैंकर्येण च दास्येन तदीयत्वेन लभ्यते ॥३१॥
सोऽहं मत्वा मदीयं तं तां च वै तादृशीं सतीम् ।
मत्वा प्रसन्नतां कुर्वे प्राप्तो भवामि वै ततः ॥३२॥

येनाऽहमस्मि प्राप्तव्यस्तेन भाव्यं निवेदिना ।
स्वोपानद्धारणे यद्वत् पृथ्वी निष्कण्टका तथा ॥३३॥
स्वस्मिन् दास्येऽर्जिते माया निर्बन्धा दिव्यताप्रदा ।
स्वस्मिन् भृत्येऽर्जिते माया स्वामिताविरहाऽस्य वै ॥३४॥
स्वस्मिन् दैन्येऽर्जिते माया सत्ताशून्याऽस्य सर्वथा ।
स्वस्मिन् सर्वार्पिते प्राप्ते माया निराशतां व्रजेत् ॥३५॥
बुद्धिर्ब्रह्मविधा स्याच्चेन्मायाकार्यं विलीयते ।
मायामयी तु या बुद्धिः सा जगज्जन्मदायिनी ॥३६॥
विषवल्ली दुग्धसिक्ता विषभावं न मुञ्चति ।
बुद्धिरासुरभावा चेदासुरतां न मुञ्चति ॥३७॥
शर्करारसपानोऽपि निम्बः कटुतरो भवेत् ।
तथाऽऽसुरस्वभावो वै मां न कदापि रोचते ॥३८॥
तादृशानां जगज्जानां शास्त्रज्ञातो निरर्थकः ।
नैव स्वभावं त्यजति सत्संगं न करोत्यपि ॥३९॥
भक्तिर्न रोचते यस्य स्नेहो नैसर्गिको न च ।
मुमुक्षुता न यस्याऽस्ति नास्तिकत्वं प्रमोदते ॥४०॥
तस्य शाश्वतमोदाशा व्योमपुष्पायते सदा ।
छित्वा चाम्रद्रुमं कस्मात् फलं पुष्पं समीयते ॥४१॥
भित्त्वा भक्तिं च सेवां च कथं सुखमवाप्यते ।
इन्द्रियाणां सुखार्थित्वे वृथा जन्म हि देहिनः ॥४२॥
छित्वा कर्पूरखण्डानि कुतृणानि प्ररक्षति ।
रसपुष्पादिहीनानि वृथा यत्नोऽस्य तत्र वै ॥४३॥
सतां सेवां विनिन्द्यैव दुष्टसेवां करोति च ।
पुण्यकर्मविहीनां वै वृथा यत्नोऽस्य सर्वथा ॥४४॥
स्वर्णस्थाल्यां वृषलेन पच्यते सरमामिषम् ।
नरदेहे तु पापेन पच्यते यमयातना ॥४५॥
जन्मरोगी वृथाजन्मा मायारोगी वृथामनुः ।
वृथाश्रमोऽगृहकोशी वृथामृत्युर्हरिं विना ॥४६॥
वृथा वाचो महामूर्खे चाऽसंयमे वृथौषधम् ।
हरिं विना वृथा यात्रा विद्वाहि जन्म वै वृथा ॥४७॥
सर्वनाथं हरिं त्यक्त्वा वानरं सेवते तु यः ।
तत्तुल्यो देहमात्रस्य पोषको मोक्षवर्जितः ॥४८॥
विना भक्तिं बहुविद्यागमस्यापि फलं नु किम् ।
येनाऽऽत्मशान्तिर्नैवास्ति तस्माच्छान्तिप्रदं भजेत् ॥४९॥
किं तेन लक्ष्मि देहेन चन्दनादिप्रसेविना ।
येन सेवाहरेर्नैव नैव सतां न मोक्षणम् ॥५०॥
श्वपचोऽपि यदि भक्तियुतो जन्माऽस्य सार्थकम् ।
विप्रदेहोऽपि निर्भक्तो जन्माऽस्य निरयप्रदम् ॥५१॥

मणिकंकणमाबद्ध्वा दर्पणं निष्फलं यथा ।
सतां सत्संगमासाद्य वृथा तदन्यसाधनम् ।।५२।।
दृढाश्रिता न गृह्णन्ति दत्तैश्वर्यं सुरादिभिः ।
दृढभक्ता न गृह्णन्ति दत्तैश्वर्यं हरेरपि ।।५३।।
अनिच्छुकस्य भक्तस्य जयश्चास्ते पदे पदे ।
न तं प्रलोभितुं शक्तः स्वयं नारायणोऽपि वै ।।५४।।
इच्छया बध्यते देही तृष्णया तु विनश्यति ।
द्वाभ्यामूर्ध्वस्थितायाऽत्र दातुं नाऽलं ह्यपि प्रभुः ।।५५।।
नित्यतृप्तस्य शान्तस्य धैर्यं त्याजयितुं ह्यलम् ।
निर्भयस्यापि भक्तस्य कश्चिन्नास्ति जगत्त्रये ।।५६।।
भक्तं चैतादृशं नैजं रञ्जयितुं नरायणः ।
भवाम्यहं दृश्यवच्च येन ध्यातो भवामि च ।।५७।।
अनादिश्रीकृष्णनारायणं ध्यात्वा च मां जनाः ।
साकारं दिव्यरूपं वै शाश्वतं धामगं हि माम् ।।५८।।
असंख्यदेहिनो भक्ता गता मे परमाऽक्षरम् ।
पूजां भक्तिं दिव्यसेवां विधाय भृत्यतां तथा ।।५९।।
दासतां संविधायाऽपि पातिव्रत्यं विधाय च ।
विधाय मम दासीतां गता नार्यो ममाऽक्षरम् ।।६०।।
शून्ये भक्तिर्न भवति भक्तिर्भवति साकृतौ ।
आधाररूपे नाथे श्रीपतौ मयि परेश्वरे ।।६१।।
विधाय प्रेमभक्तिं वै श्रीवन्मां स्वामिनं पतिम् ।
प्रापुः पूर्वतरा नार्यो जारभावमुपाश्रिताः ।।६२।।
किं पुनर्निजयोषाश्च सर्वस्वार्पणसंश्रिताः ।
तस्माल्लक्ष्मि स्वयं स्वामी साकारोऽहं प्रभुः पतिः ।।६३।।
सुखदः शाश्वतानन्दप्रदो भूत्वा नयाम्यपि ।
कासाञ्चिद्दर्शने स्नेहः कासाञ्चित्स्पर्शनेऽधिकः ।।६४।।
कासाञ्चिद्रमणे स्नेहः कासाञ्चित् स्वपनेऽपि च ।
कासाञ्चित्कामसंभोगे कासाञ्चिद्दासकर्मणि ।।६५।।
कासाञ्चिद् भोजने स्नेहः कासाञ्चित् स्नानकेलिषु ।
कासाञ्चिच्चुम्बनादौ च कासाञ्चित्तु महोत्सवे ।।६६।।
कासाञ्चित्सहवासे च कासाञ्चित् त्ववियोजने ।
कासाञ्चिन्निजशय्यायां कासाञ्चिन्नर्मकर्मसु ।।६७।।
कासाञ्चित्तु रहस्ये वै स्नेहो मयि विभाव्यते ।
तासां सम्पूर्य कामांश्च नमामि धाम मेऽक्षरम् ।।६८।।
गुणी तां गुणवद्भार्यां मुक्तानिकां विधाय वै ।
नयामि कान्तरूपोऽहं शाश्वतानन्दधाम मे ।।६९।।
सेवारसो हि साकारे लभ्यते सुन्दरीगणैः ।
भक्तैः सेवारसः पूर्णः प्राप्यते मयि धामनि ।।७०।।
ममैव हि प्रसादेन रोमाञ्चितशरीरिणी ।
नयनानन्दसलिला मुक्तिदासी वधूर्भवेत् ।।७१।।
वाण्या गायति मां दासी मनसा मां स्मरत्यपि ।
कर्मणा मां हर्षयति कटिदानार्पणादिभिः ।।७२।।
पूजाजपार्चनसेवापादसम्मर्दनादिभिः । ।
रहस्याऽर्पणभावैश्च लभते शाश्वतं सुखम् ।।७३।।
साकारे मयि भक्ता मे देहभावैः प्रसेवया ।
सर्वेन्द्रियैर्महासौख्यं लभते लोकवत् सखी ।।७४।।
वधूर्भूत्वा वरं कान्तं सेवते मां पतिं प्रभुम् ।
सर्वान् कामान् पूरयामि कामद्वारा हि योषितः ।।७५।।
न मे कामो रतिर्नैव न मे कामसुखं प्रिये ।
पूर्णकामस्य मे रत्या किं कामेन प्रयोजनम् ।।७६।।
सर्वानन्दपरिपूर्णमूर्तेर्मे नास्त्यपूर्णता ।
नेन्द्रियाऽधीनता चापि किं कामेन प्रयोजनम् ।।७७।।
कामो मया कृतः पूर्वं कर्मिणां सुखलब्धये ।
मायामयो हि कामो वै रतिर्मायामयी तथा ।।७८।।
तया तेन न मे कार्यं प्रयोजनं हि मायिकम् ।
किन्तु देहवशा लोका नरा नार्यो निजानिव ।।७९।।
कामान् भावान् कल्पयन्ति मयि पूर्णे सनातने ।
तैस्तैर्भावैस्तथा तांस्ताः संगृह्य कामभाविताः ।।८०।।
कामद्वाराऽपि मे योगं दत्वा नयामि धाम मे ।
मोक्षपदं प्रापयामि कामिनामपि सुन्दरीः ।।८१।।
कृपा मे तादृशी बोध्या संसारो हि तथाविधः ।
ऐन्द्रियिका हि मे भक्ताः संभृताः सन्ति भूतले ।।८२।।
वैषयिकास्तथा भक्ताः स्थले स्थले वसन्ति वै ।
आत्मिका ब्रह्मभावास्तु क्वचित्सन्ति हि पण्डिताः ।।८३।।
अतो ये मां यथा यान्ति तथा तान् प्राप्य तद्विधः ।
मोक्षयोगं प्रदत्वैव नयामि धाम मेऽक्षरम् ।।८४।।
प्रायशो योषितां सिद्धिं कर्तुं भवामि कामवान् ।
तासां कामप्रसक्तानां कथमुद्धरणं भवेत् ।।८५।।
तस्माद् दयावशो भूत्वा सेवे कामीव ताः सदा ।
दिव्यरूपा विधायैव नयामि मोक्षमुत्तमम् ।।८६।।
वधूः कन्या युवतीश्च वृद्धा वापि पतिव्रताः ।
नपुंसकी च विधवा सधवा ब्रह्मचारिणी ।।८७।।
यतिनी योगिनी साध्वी सती चार्या विरागिणी ।
सन्यासिनी विविक्ता च तापसी वानप्रस्थिनी ।।८८।।
त्यागिनी सांख्ययोगस्था शक्तिर्वा गणिकाऽपि वा ।
पुंश्चली स्वैरिणी चापि कामिनी कामवर्जिता ।।८९।।

रण्डा षण्ढा रतिशून्या रजःस्था चाऽरजोऽन्विता ।
गौरी वा रोहिणी चापि कुमारिका शवात्मिका ॥९०॥
संस्कृता चाऽसंस्कृता वा शुद्धाऽशुद्धा च वर्जिता ।
त्यक्ता मन्त्रवती चापि दीक्षिता वा च न्यक्कृता ॥९१॥
विवासिता वनहारिस्त्री यद्वा श्वपची खसी ।
प्रमदा वा निर्मदा वा व्यभिचारपरायणा ॥९२॥
मुण्डा वा केशिनी वापि दुर्भग्या सुभगाऽथवा ।
कुब्जा ह्रस्वा सेन्द्रिया वा निरिन्द्रिया ह्युदासिनी ॥९३॥
यादृशी तादृशी वापि सूतिका पाशवी च वा ।
गोधर्मा वा मृगीधर्मा या वा का वा भवत्यपि ॥९४॥
काषाम्बरा वा रक्ता वा विरक्ता हरिदम्बरा ।
ध्वजाम्बरा वा देवी वा दैत्यानी राक्षसी च वा ॥९५॥
दानवी नागिनी नग्ना पक्षिणी जान्तवी च वा ।
वार्क्षी वा वल्लिकाभावा शरभी सिंहिकाऽपि वा ॥९६॥
श्वापदी वा बहुपदी पृष्ठपदी पिशाचिका ।
आर्षी ब्राह्मी पैतृकी वा माता वा क्षेत्ररक्षिका ॥९७॥
पक्षिणी किन्नरी वापि गान्धर्वी नर्तकी च वा ।
वेश्या वापि व्यवायस्था सहस्रलिंगिनी च वा ॥९८॥
ईश्वरी वा मानवी वा भूती प्रेती च डाकिनी ।
निकृष्टा पापकर्त्री वा या काचिन्मामुपागता ॥९९॥
यथा भावेन तां लब्ध्वा पावयित्वा नृपीमपि ।
अशुद्धां संस्कृतां कृत्वा नयामि धाम मेऽक्षरम् ॥१००॥
तदर्थे पुंस्वरूपोऽहं भवामि मानवो हरिः ।
समुद्धर्तुं योषितां वै गणाम् कोटिसहस्रशः ॥१०१॥
रहस्यं कथितं तेऽत्र लक्ष्मि कामगुणो वृषः ।
मामासाद्य हि धर्मात्मा कामो भवति मोक्षकृत् ॥१०२॥
नारीणां योनिसम्बन्धश्चोत्कृष्टस्नेहकारकः ।
तथा कृत्वा नयाम्येव नारीः सर्वा परेऽक्षरे ॥१०३॥
श्रुत्वा चापि पठित्वेदं रहस्य दिव्यताप्रदम् ।
नारायणीयं मोक्षाख्यं धाम यास्यन्ति मत्पदम् ॥१०४॥
संशयं त्वत्र या नार्यो नरा वा यान्ति तास्तु ते ।
पुण्यं पूर्वं कृतं हित्वा ह्यधो यास्यन्ति दोषिणः ॥१०५॥
अपात्राणां संशया वै भवन्ति लोकवादिनाम् ।
मत्पात्राणां संशया नो भवन्ति दिव्यवेदिनाम् ॥१०६॥
वधूगीतारहस्यं वै यच्चास्ते हृदये मम ।
वधूमोक्षप्रदं तेऽत्र निःसंकोचेन बोधितम् ॥१०७॥
वधूमूल्यं ममाऽऽवासादाकृष्टिः प्रियताऽपि च ।
बोद्धव्यं शिष्यते नैवाऽधिकं लोके हि योषिताम् ॥१०८॥
कामभावेन युक्तानां मोक्षदोऽहं न संशयः ।
निजधर्मं प्रथमं वै पुरस्कृत्य भजेद्धरिम् ॥१०९॥
नारीधर्मो हि रत्याऽस्ति कामधर्मः पुरस्कृतः ।
मद्योगे ब्रह्मचर्यं तत् कामो नार्या व्रतं परम् ॥११०॥
स्वधर्मे मरणं श्रेयः हरेर्धर्मो हि मोक्षदः ।
स्वधर्मे मोक्षणं स्याद्वै हरेर्योगान्न संशयः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
वधूगीतायां वधूभक्तिरहस्यनिरूपणनामा
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं हृद्यं निवेदयामि ते ।
अहं वै सर्वजीवानां साधारणो महाप्रभुः ॥ १ ॥
मामाराध्यैव सर्वेऽत्र सृष्टावैश्वर्यशालिनः ।
भवन्त्येव ततस्तेभ्यो ददाम्यैश्वर्यमर्थितम् ॥ २ ॥
यथाकर्मफलं देयं न्यायोऽयं मम सर्वदा ।
प्रसन्नता फलं रिक्तं विशेषोऽयं मम गृहे ॥ ३ ॥
परितोषिकरूपा मे प्रसन्नता हि सेवके ।
कार्यकरे यत्नवति प्रसन्नता निसर्गजा ॥ ४ ॥
नार्यां नरे च वा सृष्टौ करोमि यत्र तत्र वा ।
पार्वत्यां चापि सामुद्रयां द्वीपिन्यां वाऽन्ययोषिति ॥ ५ ॥
हारित्यां वाऽप्यमर्यां वा गौर्यां पर्यां च वा तथा ।
राशियान्यां च वा ब्राह्मयां रौद्र्यां वनिन्यां योषिति ॥ ६ ॥
मानस्यां वा तथैशान्यां दरिद्रायां तथा च वा ।
अन्त्यजायां पूर्वजायां मध्यजायां तथापि वा ॥ ७ ॥
धीवर्यां वा शबर्यां वा यवन्यां वा तथा पुनः ।
पिशंग्यां प्राचीनकायां चाबिरक्तायामथापि वा ॥ ८ ॥
श्वेतायां वापि कृष्णायां चित्रायां वापि योषिति ।
तथाविधे नरे वापि भक्ते देवे तथार्षके ॥ ९ ॥
ईश्वरे वापि मुक्ते वा यत्र प्रसन्नता मम ।
तत्र तत्र हि सर्वेषां रत्नानां स्यादसंख्यता ॥१०॥
ऐश्वर्याणां समस्तानां सिद्धीनां स्यादसंख्यता ।
सम्पदां च समस्तानामृद्धीनां स्यादसंख्यता ॥११॥
आनन्दानां सुखानां च प्रमोदानामसंख्यता ।
उत्सवानां तथोत्साहविलासानामसंख्यता ॥१२॥
लक्ष्मीनां श्रेयसां चापि भोग्यानां स्यादसंख्यता ।
सर्वेषामपि कामानां तृप्तीनां स्यादसंख्यता ॥१३॥

यत्राऽहं च प्रसन्नः स्यां पारितोषिकरूपवान् ।
तत्राऽक्षरं पदं मे च स्वर्गे परं वसत्यपि ॥१४॥
वद लक्ष्मि कथंकारं न्यूनत्वं संभवेत्ततः ।
सर्वं दिव्यं भवत्येव सर्वं सर्वोत्तमं मम ॥१५॥
भक्तगृहं मम गृहं भक्तोऽहं चाऽहमेव सः ।
इत्येवं वर्तते ह्यत्र तत्कुटुम्बं ममैव ह ॥१६॥
मम सर्वं च भक्तस्य भेदो मनाङ् न विद्यते ।
का माया कश्च कालो वा प्रभुर्वै मन्निवेशने ॥१७॥
यत्राऽहं संवसाम्येव धामाऽक्षरं परं हि तत् ।
मृत्तिकागृहरूपं वै शाश्वतं तत्परं पदम् ॥१८॥
यत्राऽहं नास्मि तत्सौधं विमानमपि नारकम् ।
यत्राऽहं न वसाम्येषा भूमिः श्मशानरूपिणी ।
यत्राऽहं सेवितो नैव रमणी साऽपि राक्षसी ॥१९॥
नाऽऽश्लिष्टोऽहं यया लक्ष्मि सा भूती च पिशाचिनी ।
येनाऽहं वन्दितो नैव समाश्लिष्टो न माधवः ॥२०॥
स चात्र विद्यते भूतो राक्षसो जन्मखादकः ।
मामाश्रित्य पिशाचाश्च भवन्ति देवतोत्तमाः ॥२१॥
पिशाचिन्योऽपि मां प्राप्य जायन्ते ब्रह्मयोषितः ।
दोषाः पिशाचास्तद्वत्यः पिशाचिन्यो भवन्ति वै ॥२२॥
गुणा मुक्ता हि तद्वत्यो मुक्तान्यस्ता भवन्ति वै ।
अहंब्रह्मेतिज्ञानिन्यो ब्रह्मपत्न्यो भवन्ति वै ॥२३॥
परब्रह्माश्रिताः सर्वा हरिपत्न्यो भवन्ति वै ।
हरिं मां वै परित्यज्य तपो दुःखं कथं चरेत् ॥२४॥
परेशेन विना काचिन्नैव सिद्धिमवाप्नुयात् ।
ब्रह्मणा निर्मिता देहा देहधर्मा ह्यनन्तकाः ॥२५॥
ब्रह्मधर्मा देहधर्मा मनो धर्मास्तथाऽऽन्तराः ।
लोकधर्मास्तथा तेन निर्मिताः सर्वसौख्यदाः ॥२६॥
मम धर्मास्तु नित्या वै ब्रह्मापि निर्मितो मया ।
मम नित्यान् परान् धर्मानाश्रित्य मां प्रयाति सः ॥२७॥
मम प्रसन्नता ह्येव धर्मो मे दिव्यताप्रदः ।
ब्रह्मधर्मान् सुसत्कृत्य मम धर्मान् समाचरेत् ॥२८॥
कर्तव्यं विद्यते नाऽस्या मम धर्मार्थयोषितः ।
स्वधर्मोऽयं मम धर्मः शुक्लश्च निर्गुणश्च सः ॥२९॥
शुक्लधर्मेण वै स्थेयं शुक्लं देयं न मे सदा ।
स्वल्पं शुक्लं च मे दत्तमानन्त्याय प्रजायते ॥३०॥
शुक्लं मदर्थमेवाऽत्र लीलयाऽपि कृतं च वा ।
इन्द्रियाद्यैः कृतं वापि शुक्लं धामनि चाप्यते ॥३१॥
पुण्यं शुक्लं मम कार्यं तद्वतोऽघं न जायते ।
दुःखं नैव तथा माया नैव जन्म कुतो मृतिः ॥३२॥
तस्मात् स्थेयं सदानन्दपूर्णतया मदाश्रितैः ।
मामनाश्रित्य बन्धेन कर्मणाऽत्र वहन्ति ये ॥३३॥
भारं वै वासनाजन्यं ते भवन्ति पुनः पुनः ।
शाखामृगो यथा याति प्रतिवृक्षं तथा हि सः ॥३४॥
नीयते कर्मणा जीवः संसारवनयोनिषु ।
क्रीडार्थं कन्दुको यद्वत् क्षिप्यते रंगबालकैः ॥३५॥
तथाऽयं कर्मभिः क्षेत्रे क्षिप्यते मायिके स्तरे ।
बद्धोऽश्वो न स्वतन्त्रोऽस्ति विहर्तुं यातुमेव वा ॥३६॥
कर्मबद्धो न स्वतन्त्रः सुरर्षिपितृमानुषे ।
मनुष्या भूतले श्रेष्ठाः किन्तु ते पक्षवर्जिता. ॥३७॥
पक्षिणो व्योमगाश्चापि हस्तसाधनवर्जिताः ।
देवा दिव्यस्वरूपाश्च क्षितिस्थौल्यादिवर्जिताः ॥३८॥
नार्यो रूपगुणाढ्याश्च नियाम्यास्तास्तथाकृताः ।
वृद्धाः पूज्या निर्मिताश्च किन्त्वधिकारवर्जिताः ॥३९॥
साधिकारा युवानश्च दीर्घानुभववर्जिताः ।
गजो हि बलवानास्ते किन्तु साधनवर्जितः ॥४०॥
सिंहो वै बलवान् राजा पशुस्तामससत्तमः ।
हरिणः पावनश्चास्ते किन्तु वन्यः पशुः कृतः ॥४१॥
विप्रा विद्यानिधयोऽपि दारिद्र्यरोषपीडिताः ।
काकाः शकुनचतुराः किन्तु मलिनयोनिजाः ॥४२॥
मणयो मौक्तिकाः श्रेष्ठाः किन्तु ते दुर्लभाः कृताः ।
कटुतृणानि बहूनि मिष्टानि दुर्लभानि वै ॥४३॥
सुलभा वै कापुरुषा दुर्लभाः साधवः प्रिये ।
सत्यः साध्व्यो दुर्लभाश्च सुलभा वारयोषितः ॥४४॥
पत्राणि सन्ति बहूनि फलानि दुर्लभानि वै ।
भोगिनः सन्ति सुलभा दुर्लभास्तु विरागिणः ॥४५॥
कीटकाः सन्ति सर्वत्र फणाढ्या दुर्लभाः प्रिये ! ।
मरणं सुलभं लक्ष्मि ! चामृतं दुर्लभं बहु ॥४६॥
कलहः सुलभो लक्ष्मि ! मेलनं दुर्लभं बहु ।
स्वार्थः सर्वत्र सुलभः परार्थो दुर्लभः सदा ॥४७॥
भोगस्तु सुलभो लक्ष्मि ! मोक्षोऽस्ति दुर्लभः सदा ।
पुमांसः सुलभा लक्ष्मि ! पुमुत्तमस्तु दुर्लभः ॥४८॥
पुरुषः सुलभश्चास्ते दुर्लभः पुरुषोत्तमः ।
नार्यः सर्वत्र लभ्यन्ते नारायणी तु दुर्लभा ॥४९॥
उद्योगः सर्वथा प्राप्यः सेवा तु दुर्लभा प्रिये ! ।
देहस्तु बहुधा लभ्यश्चाऽऽत्मा वै दुर्लभः प्रिये ! ॥५०॥

गृहं तु सुलभं लभ्यं धामाऽक्षरं तु दुर्लभम् ।
गर्भस्तु सुलभो लक्ष्मि ! हिरण्यगर्भो हि दुर्लभः ॥५१॥
खनयः सुलभा लक्ष्मि ! ब्रह्मशृंगं हि दुर्लभम् ।
वासनाः सुलभा लक्ष्मि ! वासुदेवो हि दुर्लभः ॥५२॥
पतयः सुलभा लक्ष्मि ! दुर्लभः शाश्वतः पतिः ।
स्वामिनः सुलभा लोके परस्वामी हि दुर्लभः ॥५३॥
सर्वं वै सुलभं लक्ष्मि ! कृष्णोऽहं दुर्लभः सदा ।
माया वै सुलभा लोके मायेशोऽहं तु दुर्लभः ॥५४॥
समर्थस्वामिना लक्ष्मि ! कर्मयोनिर्निरस्यते ।
कर्मबद्धं जगत्सर्वं कृष्णोऽहं तारयामि वै ॥५५॥
तोयं सर्वत्र सुलभं विष्णुपद्वारि दुर्लभम् ।
दुर्लभेषु समस्तेषु विष्णुपदं हि दुर्लभम् ॥५६॥
दुर्लभं सुलभं भक्तिमतां करोमि सर्वथा ।
एवं कृत्वा सेविनां मे कर्म सर्वं हि मुक्तिदम् ॥५७॥
वद लक्ष्मि ! कृपा मेऽत्र कारणं पारितोषिकम् ।
तल्लब्ध्वा पुण्यमुत्कृष्टं ममाऽऽनन्दपदं व्रजेत् ॥५८॥
मयि त्यागो दुर्लभो वै तदन्यः सुलभः खलु ।
मयि न्यासो दुर्लभो वै तदन्यः सुलभः सदा ॥५९॥
अन्यार्पणं तु सुलभं मय्यर्पणं हि दुर्लभम् ।
अन्ययत्नोऽपि सुलभो मदर्थः स तु दुर्लभः ॥६०॥
अन्यार्थता हि सुलभा मदर्थता हि दुर्लभा ।
अन्यवधूत्वं सुलभं वधूत्वं मम दुर्लभम् ॥६१॥
मायिकं सुलभं सर्वं मदीयं दुर्लभं प्रिये ! ।
कृतश्रया विजानाति ह्यश्रमाया न वेदनम् ॥६२॥
कियद्यत्नेन लभ्योऽहं जानाति श्रीर्नरायणी ।
सती हैमी विजानाति कथं लभ्यो हि शंकरः ॥६३॥
माणिक्याऽश्वी विजानाति कथं धार्मिर्हि लभ्यते ।
राधा कृष्णा च कमला विजानन्ति परिश्रमम् ॥६४॥
गायत्री नैव जानाति नैव जानाति चाब्धिजा ।
पद्मावती विजानाति कथं लभ्यः परेश्वरः ॥६५॥
लब्धकृपांशवनिता न जानाति तपःश्रमम् ।
जानन्ति योगिनो युक्ताः साध्व्यो जानन्ति तच्छ्रमम् ॥६६॥
योगिन्यश्च विजानन्ति तापस्यो देहशोषिकाः ।
त्वं लक्ष्मि ! किं विजानासि हनूमत्पर्वते तपः ॥६७॥
कृत्वा श्रमेण लब्धवत्यसि मां पुरुषोत्तमम् ।
मृत्योर्विनिमये लभ्यो भवामि नाऽन्यथा प्रिये ! ॥६८॥
बाह्यं च मानसं सर्वं मदर्थं यस्य जीवितम् ।
मदर्थे त्यजनं सर्वं स मां प्राप्नोति वै श्रमात् ॥६९॥
मदर्थं यस्य सर्वस्वं यस्या मदर्थिनी कृतिः ।
यस्यास्त्यागा मदर्थाश्च सा मां प्राप्नोति वै श्रमात् ॥७०॥
शुद्धगेहाऽऽत्तकाया च योगिनी योगिपुत्रिका ।
मदर्थकृतसर्वस्वा मां प्राप्नोतीव भार्गवी ॥७१॥
योगे मां योगिनं वेत्ति ध्याने मां च स्मरत्यपि ।
मदर्थकृतसर्वस्वा पद्मेवाऽऽप्नोति सा हि माम् ॥७२॥
स्वल्पयत्नाऽपि कल्याणी मदर्थविरहातुरा ।
चिदानन्दमयं मां सा ह्यवाप्नोतीव माधवी ॥७३॥
सर्वकामकृता यज्ञा मय्येव सर्वसौख्यदाः ।
नित्यं सौख्यं लभन्ते ता भक्तिमत्यो मयि स्थिताः ॥७४॥
सर्वाक्षरपदं राज्यं सर्वेश्वरगतं सुखम् ।
सर्वावतारानन्दादि लभते मम भामिनी ॥७५॥
यस्या मतिर्न भिद्येत मदन्यकामनादिभिः ।
सा मां तु दुर्लभं कान्तं कृत्वा सुलभमेति वै ॥७६॥
कृष्णसेवापरां नारीं कालो यमश्च मुञ्चतः ।
अपराधसहस्रां वा करोमि दोषवर्जिताम् ॥७७॥
रक्षकोऽहं हृदयस्थो बहिस्तिष्ठामि सत्वरम् ।
दुर्लभोऽपि भवाम्येव सुलभो गोपवेश्मवत् ॥७८॥
दुर्लभोऽपि भवाम्येव सुलभो वामनो यथा ।
सुदूरोऽपि भवाम्येव निकटस्थो गजार्थवत् ॥७९॥
अदृश्योऽपि भवामीव दृश्यो प्रह्लादकाष्ठगः ।
अगम्योऽपि भवाम्येव गम्यः स्वपतिरीशवत् ॥८०॥
सर्वं स्नेहार्पणाल्लक्ष्मि ! ददामि वितरामि च ।
दुर्लभं सुलभं सर्वं सेविकार्थे करोमि च ॥८१॥
त्वदर्थं क्रियते सर्वं भक्तार्थं क्रियते तथा ।
ब्रह्मप्रियार्थं क्रियते सर्वं भक्त्या वशेन ह ॥८२॥
इत्येवं मां विदित्वैव या जन्मान्तं करोति सा ।
दिव्यश्रीरिव सम्पन्ना मदीया जायतेऽक्षरे ॥८३॥
स्वपन्ति मोहनिद्रायां शरीरसुखमोहिताः ।
उपदेशेन मे चेद्वै जागर्तिं यान्ति बोधिताः ॥८४॥
तदा लभ्यं पतिं कान्तं मां प्रयान्ति पुमुत्तमम् ।
नरा नार्यः सदा मुक्ता भवन्ति दिव्यविग्रहाः ॥८५॥
दिव्यानन्दभरा नित्यं न्यूनसौख्यं न विद्यते ।
परिपूर्णं सुखं सर्वं तत्र लोके प्रविद्यते ॥८६॥
मन्मूर्ताविव साक्षाच्च मय्येवानन्दशेवधिः ।
आनन्दानां प्रवाहा वै स्रवन्ते मम मूर्तितः ॥८७॥
मद्भक्तानानन्दयित्वा प्रविशन्ति च ते मयि ।
मन्मूर्तितो हि निर्यान्ति प्रकृष्टानन्दवार्धयः ॥८८॥

मद्भक्तासु चिरं स्थित्वा पुनश्चायान्ति वै मयि ।
एते सर्वे महानन्दा ह्रासं व्रजन्ति नैव ह ॥८९॥
न्यूना भवन्ति नैवापि सान्ता भवन्ति नैव च ।
प्रवाहाणां प्रवाहाश्च स्वेच्छाजन्या भवन्ति वै ॥९०॥
अक्षया वर्धमानाश्च मम मूर्तिसुयोगजाः ।
ब्रह्मानन्दः स एवास्ते मुक्तानां मम धामनि ॥९१॥
भुंक्ष्व तं परमानन्दं सर्वाभिः सह पद्मजे ।
एतास्त्वत्करगा आल्यः सख्यस्ते स्वसृसंज्ञिताः ॥९२॥
सपत्न्यः कोट्यब्जलक्षार्बुदा मन्मयमूर्तयः ।
त्वदभिन्ना हि ताः सर्वा मदभिन्ना भवन्त्यपि ॥९३॥
ततो भिन्ना हि मे मूर्तेर्मदात्मिका गुणात्मिकाः ।
मच्छक्तयश्च ताः सर्वा मयाऽऽज्ञप्ताः स्त्रियोऽभवन् ॥९४॥
मां च प्राप्य मया नैजस्वरूपात्मत्वमापिताः ।
मया सर्वपृथिव्यां वै गत्वा स्वयं हि मार्गिताः ॥९५॥
अन्विष्य निजकान्तात्वं प्रापिता मम शक्तयः ।
वधूधर्मान् पुरस्कृत्य भुञ्जन्तां नन्दितं हि माम् ॥९६॥
अक्षरं चाऽक्षयं चाऽप्यव्ययं शाश्वतमुत्तमम् ।
सर्वानन्दनिधानं मां भुञ्जन्तां परमेश्वरम् ॥९७॥
या काचिन्मां पुरस्कृत्य कृत्वा मां हृदि सर्वथा ।
वधूगीतां मदुक्तां च श्रुत्वा कान्तं सनातनम् ॥९८॥
इच्छिष्यन्ति निजानन्दं श्रीपतिं पुरुषोत्तमम् ।
तासां प्राप्तो भविष्यामि ग्रहीष्यामि च तत्करम् ॥९९॥
नेष्यामि परमं धाम करिष्ये स्वामिनीं हि ताम् ।
मुक्तानिकां ब्रह्मप्रियां करिष्ये तां हरिप्रियाम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वधूगीतायां हरेः कृपासर्वस्वफलनिरूपणनामा सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीनारायणीश्रीरुवाच—

भगवन् भवता प्रोक्ता वधूगीता हि मोक्षदा ।
अनादिश्रीकृष्णनारायणप्राप्तिप्रदाऽखिला ॥ १ ॥
तस्य ते कान्तवर्यस्य मन्त्रं श्रोतुं समुत्सुका ।
भवामि भवरोगाणां भेषजं परमं मनुम् ॥ २ ॥
श्रीहरे केन मन्त्रेण गम्यते परमं पदम् ।
तन्मेब्रूहि कृपासिन्धो सर्वासां मोक्षहेतवे ॥ ३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि मन्त्रं मन्त्रवरं शुभम् ।
दिष्ट्याऽहं तेऽत्र वक्ष्यामि रहस्यं मम चोत्तमम् ॥ ४ ॥
न जानन्ति सुराः सर्वे ऋषयश्चेश्वरा अपि ।
सर्गादौ प्रोक्तवाँश्चाऽहं ब्रह्मणे परमेष्ठिने ॥ ५ ॥
वैराजाय तथा महाविष्णवे भूम्न इत्यपि ।
वासुदेवाय कृष्णाय नारायणाय चोक्तवान् ॥ ६ ॥
अनादिश्रीकृष्णनारायणस्य मे परात्मनः ।
ईश्वरीभिर्देविकाभिः सह पारं न यन्ति ते ॥ ७ ॥
तेभ्योऽर्थितान्ददौ मन्त्रान् भक्तोद्धारणतत्परान् ।
मम रूपस्वरूपात्मबलैश्वर्यसमन्वितान् ॥ ८ ॥
मन्त्रोऽहं मन्त्ररूपोऽहं पुराणपुरुषोत्तमः ।
सकृदुच्चारणात्तेषां मिलत्येव परं पदम् ॥ ९ ॥
भुक्तिमुक्तीष्टदा लक्ष्मि पुरश्चरणमन्तरा ।
मद्देवता ममैवैवेऽवतारा मन्त्रसत्तमाः ॥१०॥
शृणु लक्ष्मि च मन्त्राणां मन्त्ररत्नं शुभावहम् ।
सत्कृत्स्मरणमात्रेण ददाति धाम चाऽक्षरम् ॥११॥
'अनादिश्रीकृष्णनारायणे'ति शरणागतम् ।
प्रपाति धर्मकामार्थमोक्षदो मनुरुत्तमः ॥१२॥
दशार्णोऽयं महामन्त्रो दशाऽवतारसंयुतः ।
अकारो मत्स्यरूपोऽस्ति नकारो नरकेशरी ॥१३॥
दकारोऽत्र वराहश्च शकारो हयमस्तकः ।
ककारः कृष्णरूपश्च णकारो वामनः प्रभुः ॥१४॥
नकारः परशुभृक् च रकारो रामभूपतिः ।
यकारो बोधकृद्विष्णुः णकारः कल्कनाशकः ॥१५॥
एवं दशावतारात्मा मन्त्रो मे सर्वकामदः ।
अस्योच्चारणमात्रेण परतुष्टोऽस्मि सर्वदा ॥१६॥
शृणु लक्ष्मि तथाऽनादिश्रीस्त्वं मन्त्रे विराजसे ।
कृष्णनारायणश्चाऽहं विराजे पुरुषोत्तमः ॥१७॥
युगलार्थोऽपि मन्त्रोऽयं युगलानां सुखप्रदः ।
दम्पतीसुखसम्पत्तिसौभाग्यर्द्धिप्रमोददः ॥१८॥
वंशवृद्धिकरो जप्तो धनधान्यादिवर्धकः ।
निर्विघ्नब्रह्मलोकादिमहानन्दप्रदो मनुः ॥१९॥
आरोग्यकीर्तिसत्ताश्रीराज्यस्वर्गादिसम्प्रदः ।
महामन्त्रो युगलात्मा सर्वेष्टानन्दपूरकः ॥२०॥
शृणु लक्ष्मि तत्र मन्त्रे राजते तु चतुष्टयम् ।
अनादिश्रीः स्वयं राधा कृष्णो गोलोकभास्करः ॥२१॥
अनादिश्रीश्च लक्ष्मीर्वै नारायणो विकुण्ठगः ।
ताभ्यां ताभ्यां समेताभ्यां चतुष्टययुतो मनुः ॥२२॥
सर्वकामफलावाप्तिप्रदो धामप्रदः परः ।
सर्वसौभाग्यदश्चापि मनुः सर्वार्थसाधकः ॥२३॥

श्रृणु लक्ष्मि तथा तत्र मन्त्रे परं चतुष्टयम् ।
अनादिनो हि ये मुक्ताः श्रियो मुक्तानिकागणाः ॥२४॥
गोपा गोप्यश्च वै ताभिर्युक्तः कृष्णः स्वयं प्रभुः ।
नारायणस्तथा चाहं चतुष्टयमिदं हि तत् ॥२५॥
मुक्तमुक्तानिकायुक्तनारायणोऽहमेव च ।
गोपगोपीयुक्तकृष्णो गोलोकवासवाँस्तथा ॥२६॥
श्रृणु लक्ष्मि तथा तत्र मन्त्रे षट्कं परं स्थितम् ।
अशब्द ओंवाचकश्च नादो ब्रह्मपरस्तथा ॥२७॥
नादोऽस्याऽस्तीति नादी वै वेदः स्वयं तथा मतः ।
नादिनो वै सर्ववेदा ओंविशिष्टाः सदा शुभाः ॥२८॥
श्रियः सर्वाः शक्तयश्चांऽगना ब्राह्मयो मतिस्थिताः ।
विद्यात्मिका हि ता बोध्या ब्रह्मविद्यात्मिका हि ताः ॥२९॥
कृष्णाश्च मोक्षदाः सर्वेऽवताराश्चात्र कीर्तिताः ।
नाराश्चात्र समग्राश्च सन्तः साध्व्यश्च मोक्षदाः ॥३०॥
तत्र सर्वत्राऽऽयनं वै यस्य श्रीपरमात्मनः ।
ओंकारे चापि वेदेषु विद्यास्ववतारेषु च ॥३१॥
साधुसाध्वीषु वासी यः सोऽहं मन्त्रे निरूपितः ।
श्रृणु लक्ष्मि त्रयं तत्र मन्त्रे स्थितं वदामि ते ॥३२॥
अनादि चाक्षरं धाम श्रीकृष्णाश्चेश्वरालयाः ।
नारा ब्रह्माण्डव्राताश्च तत्राऽयनं करोम्यहम् ॥३३॥
एवं सृष्टित्रयाऽन्तःस्थश्चाऽहं श्रीपुरुषोत्तमः ।
सर्वकामप्रदश्चाऽस्मि निबोधार्थं परार्थकम् ॥३४॥
श्रृणु लक्ष्मि द्व्यर्थमत्र जडचेतनसंज्ञितम् ।
अनादिश्रीर्महामाया प्रकृतिः शक्तिराच्युती ॥३५॥
कृष्णनारायणश्चाऽहं तत्रस्थः पुरुषोत्तमः ।
इत्येवं तत्र मन्त्रार्थं ज्ञानदं बोधयेदपि ॥३६॥
श्रृणु लक्ष्मि तथा तत्र स्वतन्त्रमर्थमित्यपि ।
अकारो वासुदेवश्च नश्च नारायणस्तथा ॥३७॥
दश्च देवाः समस्ताश्च श्रीश्च सर्वा हि शक्तयः ।
कृश्च कृष्णाद्यवताराः ष्णः षिरा नालजोह्यजः ॥३८॥
नो वा नियाम्यमुक्ताद्याः रश्च ऋषिगणास्तथा ।
यश्च योगीश्वरः शंभुः णश्च नियामकोऽप्यहम् ॥३९॥
विशिष्टं सर्वमेवैतन्मन्त्रार्थे वेशितं प्रिये ।
श्रृणु लक्ष्मि तथा चाऽन्यं मन्त्रार्थं शोभनं शुभम् ॥४०॥
आदिर्जन्म च तद्येषां नास्ति ते शाश्वता मताः ।
श्रीश्च त्वं शाश्वती लक्ष्मीः कृष्णोऽहं शाश्वतस्तथा ॥४१॥
नृष्यात्मसु निवसामि श्रीकृष्णोऽहं मनुस्थितः ।
शाश्वतश्चाऽन्तर्यामी च मन्त्रार्थः शोभनः शुभः ॥४२॥
श्रेष्ठोऽयं मन्त्रमूर्धन्यस्तुभ्यं मे कथितो मनुः ।
नाऽस्मात्परो भवेन्मन्त्रः सर्वमन्त्रोत्तमोत्तमः ॥४३॥
अथाऽपरो मनु'र्लक्ष्मीनारायणोऽपि' मे मतः ।
लक्ष्मीस्त्वं श्रीः हरिश्चाऽहं नारायणः परः प्रभुः ॥४४॥
लक्ष्मं मत्पातिव्रत्यं वै यासामस्तीति ताः स्त्रियः ।
लक्ष्म्यो ब्रह्मप्रियाः सर्वा मम पत्न्यस्तु कोटिशः ॥४५॥
नारा नार्यो मम सर्वा मुक्तानिका हरिप्रियाः ।
लक्ष्मीषु चापि नारासु अयनं मम सर्वथा ॥४६॥
लक्ष्मीनारायणः सोऽहं मन्त्रार्थस्ते निवेदितः ।
लक्ष्मं मत्तिलकं चिह्नं शंखचक्रांकनादि च ॥४७॥
तद्वन्तो लक्ष्मिणः सर्वे भक्ता नारीनरादयः ।
तादृशा ये चेतना वै नाराः सर्वे ममाऽऽश्रिताः ॥४८॥
तेषु प्राप्तमयनं मे तेनाऽहं मन्त्रहृद्गतः ।
लान्तिकर्मफलं यस्मात् लाश्च ब्रह्माण्डवासिनः ॥४९॥
क्षमन्ते चापि पुष्यन्ति क्षाश्चैश्वर्यपरेश्वराः ।
मीयन्ते ब्रह्मलोके ये माश्च मुक्तादयस्तथा ॥५०॥
नारा मायाजतत्त्वानि तेषु प्राप्तोऽयनं तु यः ।
सोऽहं परेश्वरो लक्ष्मि विशिष्टो मन्त्रहृद्गतः ॥५१॥
अथाऽपरो मनुः 'श्रीमन्नारायणे'ति मे मतः ।
श्रयन्ते मां चेतनाश्च जडाश्चाश्रयमागताः ॥५२॥
तद्वान् श्रीमानहं नारायणः श्रीपुरुषोत्तमः ।
श्रीस्त्वं तद्वानहं नारा नार्यो मे कोटिशस्त्विह ॥५३॥
त्वया साकं प्रतिष्ठोऽहं तासु मध्ये सदा प्रभुः ।
श्रीमानहं जले चास्मि क्षीरोदे तेन वा तथा ॥५४॥
श्रीमन्नारं चाऽक्षरं मे धाम तत्र स्थितिर्मम ।
तेन तथा भवाम्येव श्रीमन्नारायणः प्रभुः ॥५५॥
'श्रीकृष्णोवल्लभश्चे'ति मन्त्रोऽयं प्राप्तिबोधकः ।
श्रीकृष्णवत् लभ्यते यः श्रीपतिः पुरुषोत्तमः ॥५६॥
नराणां चापि नारीणां कृपया सुलभोऽस्मि वै ।
पुरुषोत्तममासेऽपि सुलभः कृपयाऽस्मि च ॥५७॥
सृष्टौ सृष्टौ तथा कल्पे कल्पे कृष्णो भवाम्यहम् ।
गोपीनां सुलभश्चाऽस्मि गोपानां चान्यदेहिनाम् ॥५८॥
गोलोकस्थः स्वयं कृष्णो यथाऽहं सुलभः क्षितौ ।
तथा चाऽक्षरधामस्थः सुलभोऽहं परेश्वरः ॥५९॥
कल्पे कल्पे भवाम्यत्र क्षितौ कृपालभः स्वयम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥६०॥
एवं वै सुलभो लक्ष्मि मन्त्रः 'श्रीकृष्णवल्लभः' ।
श्रीकृष्णो वल्लभो मेऽस्ति रूपं धृतं मया हि तत् ॥६१॥

राधाया रञ्जनाद्यर्थं गोपीनां मोदकारकम् ।
सर्वेषां सुलभं रूपं श्रीकृष्णो वल्लभोऽप्यहम् ॥६२॥
स्वामी वै वल्लभः कान्तः पतिः श्रीपुरुषोत्तमः ।
सोऽहमाकृष्य मद्भक्तान् नयामि धाम मे परम् ॥६३॥
सोऽहं स्वामी पतिः श्रीयुक् कृष्णो ब्रह्मपरः प्रभुः ।
श्रीकृष्णोवल्लभश्चाहं मन्त्रार्थेऽस्मि हरिः स्वयम् ॥६४॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
मन्त्रोच्चारणमात्रेण परितुष्टोऽस्मि सर्वदा ॥६५॥
सर्वे वर्णा आश्रमाश्च नरा नार्यो नपुंसकाः ।
मन्त्राधिकारिणः सर्वे संकराश्चाप्यसंस्कृताः ॥६६॥
नागाः सर्पा दानवाश्च दैत्याश्च राक्षसा अपि ।
मन्त्राधिकारिणः सर्वे किं पुनर्मानवाः क्षितौ ॥६७॥
पशवः पक्षिणश्चापि जन्तवः पादपा अपि ।
देहिनः सर्व एवैते मन्त्राधिकारयोगिनः ॥६८॥
श्रावितोऽयं तिरश्चां हि मोक्षदो मम वै मनुः ।
यक्षगन्धर्वसूताश्च पिशाचाः किन्नराः खगाः ॥६९॥
किंपुरुषाः पुण्यजना भूताः प्रेताश्च देवताः ।
विनायकाश्च वेताला गणाश्च गणिकास्तथा ॥७०॥
योगिन्यश्च यतिन्यश्च साध्व्यः पतिव्रतास्तथा ।
स्नुषा वृद्धाश्च बालाश्च बालकाः स्तन्यपा अपि ॥७१॥
वसवश्च ऋषयश्च रुद्राः सूर्याश्च चन्द्रमाः ।
कामश्च मनवश्चापि महेन्द्राद्याः सुरा अपि ॥७२॥
लोकपालाश्च दिक्पाला नक्षत्राणि ग्रहास्तथा ।
तारका मानवाश्चापि सिद्धाश्च चारणास्तथा ॥७३॥
नृपाः प्रजा यमश्चापि यमदूतास्तथेश्वराः ।
ईश्वराण्यो ब्रह्मशीलास्तामसा राजसास्तथा ॥७४॥
सत्त्ववन्तो धामवासाः सर्वे मन्त्राऽधिकारिणः ।
गुरोः प्राप्य परं मन्त्रं चात्मानं मोचयेद् भवात् ॥७५॥
मन्त्राधिकारिणः सर्वे मम भक्ता ममाऽऽश्रिताः ।
शरण्यः शरणानां च तथैवाऽनन्यसेविनाम् ॥७६॥
अनन्यसाधनानां च साधनं मन्त्र उत्तमः ।
आर्त्तानामाशु फलदो जप्तः सकृच्च वा मुहुः ॥७७॥
दीनानां देहिनां चापि जन्मान्तरनिवारकः ।
सर्वेषां मोक्षदश्चापि मन्त्रो मम चतुर्विधः ॥७८॥
दुःखी स्वार्थी विवेकी वा तदिच्छुकोऽधिकारवान् ।
शरणं प्राप्याऽऽप्य मनुं मुक्तिफलमवाप्नुयात् ॥७९॥
दीक्षितश्चापि भक्तश्च निर्मानी चास्तिकः कृती ।
कृतज्ञः श्रद्धया युक्तः शुश्रूषुर्दोषवर्जितः ॥८०॥
मत्तादात्म्यक्रियायोग्यो गृह्णीयान्मनुमुत्तमम् ।
पापिनामपि वक्तव्यः शोधको भवनाशकः ॥८१॥
अपि मांसादनः शुद्ध्येत् किं पुनर्धर्ममार्गगः ।
अपि व्यवायकृन्छुद्ध्येत् किं पुनः शीलमार्गगः ॥८२॥
अपि चौर्यपरः शुद्ध्येत् किं पुनर्न्यायमार्गगः ।
सुरापश्चापि शुद्ध्येद्वै किं पुनर्विप्रधर्मवान् ॥८३॥
देशकालादिनियमो विद्यते ग्रहणेऽस्य न ।
स्नानदानादिनियमो विद्यते ग्रहणेऽस्य न ॥८४॥
व्रतोत्सवादिनियमो विद्यते ग्रहणेऽस्य न ।
नारीनरादिनियमो विद्यते ग्रहणेऽस्य न ॥८५॥
गुरोर्ग्राह्यो वैष्णवाद्वै गुर्व्याश्च नियमोऽस्य वै ।
ग्रहणे सति भक्तेन भाव्यं भक्त्या सदा मम ॥८६॥
मच्चिह्नांऽकितदेहेन मदीयाराधनेन च ।
मयि कर्मार्पणेनैव मे शरणागतेन च ॥८७॥
मयि फलार्पणेनापि मयि विश्वस्तवर्तिना ।
अनन्यसाधनेनापि सर्वार्पणेन वै मयि ॥८८॥
अनन्यदेवताकेन भाव्यं भागवतेन वै ।
इत्येवं नियमाः पाल्या भक्तेन मन्त्रग्राहिणा ॥८९॥
तस्याऽनादिकृष्णनारायणश्चाहमृषिः प्रभुः ।
देवताश्च श्रिया युक्ता ब्रह्मप्रिया ममांऽशजाः ॥९०॥
ब्रह्मप्रियाश्रीसहितः परो देवोऽस्मि वै मनौ ।
छन्दो गायत्रीतिबोध्यो दशाक्षरो मनुर्हि मे ॥९१॥
षडक्षरस्तथा षडक्षरः षडक्षरस्तथा ।
मनवो मे त्रयश्चाऽन्ये तान् चांऽगेषु नियोजयेत् ॥९२॥
दशाक्षरं दशांगेषु मूर्द्धनेत्राऽऽननेषु च ।
ग्रीवाबाहुहृदयेषूदरकट्यूरुपत्सु च ॥९३॥
षडक्षरं चोत्तमांगे ग्रीवायां भुजयोर्हृदि ।
उदरे चापि सक्थ्नोश्च पादयोश्चेति वै न्यसेत् ॥९४॥
ध्यानं लक्ष्मीसहितस्य नारायणस्य मे मतम् ।
तथा यथार्थदेवानां ध्यानं मदन्वितं मतम् ॥९५॥
कम्भराबालकं श्रीमद्गोपालकृष्णनन्दनम् ।
अनादिश्रीकृष्णनारायणं मां पूजयेत्ततः ॥९६॥
शंखचक्रगदापद्मपाणिनं कमलापतिम् ।
शूलमीनध्वजधनुश्चक्रस्वस्तियुतं हरिम् ॥९७॥
वामांऽकस्थश्रिया युक्तं लक्ष्मीशं परमेश्वरम् ।
पूजयेद् गन्धपुष्पाद्यैर्नैवेद्यैश्चाम्बरादिभिः ॥९८॥
विभूषणैश्च श्रृंगारैर्नीराजनैः स्तवादिभिः ।
प्रदक्षिणैर्दक्षिणाभिर्नृत्यकीर्तनगायनैः ॥९९॥

विसर्जनाद्यैश्चैवं मे कुर्यात् प्रपूजनं प्रिये।
दानं दद्याद् यथाशक्ति सद्भयः सतीम्य उत्तमम् ॥१००॥
भोजयेद् रामयेच्चापि रञ्जयेत् सेवयेत् तथा।
वैष्णवत्वेन तिष्ठेच्च वर्तेत दास्यभावतः ॥१०१॥
कुर्याद्वै भजनं नित्यं मन्त्रैरिष्टैः सहस्रकम्।
शतमाला जपेद्वापि मालामेकां जपेच्च वा ॥१०२॥
दशवारं जपेद्वापि नित्यं प्रातर्निशामुखे।
मध्याह्नेऽपि जपेद्वाऽपि मोक्षदोऽहं भवामि वै ॥१०३॥
सकामानां सम्पदां वै प्रदाताऽहं भवामि च।
निष्कामानां श्रेयसां वै प्रदाताऽहं भवामि च ॥१०४॥
इत्येवं कथितं लक्ष्मि रहस्यं मे मनोस्तव।
जपेन्नारी नरो वापि दद्याच्च देहिनेऽर्थिने ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महामन्त्ररहस्ये मन्त्रतदर्थन्यासादिनिरूपणनामा-ऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥

**श्रीनारायणीश्रीरुवाच—**

श्रेष्ठमुक्तं त्वया कान्त रहस्यं मनुसंभृतम्।
महामन्त्रस्य सामर्थ्यं सर्वेष्टपूरकं महत् ॥ १ ॥
त्वं प्रभुस्त्वं पतिस्त्वं च लोकानां गुरुरेव च।
त्वं स्वामी त्वं सखा नाथस्त्वं गतिस्त्वं सहायकृत् ॥ २ ॥
त्वं भोक्ता त्वं तारयिता त्राता पोष्टा सुहृत् सदा।
त्वं जनकोऽसि लोकानां गर्भधस्त्वं हि देहिनाम् ॥ ३ ॥
अहं शिष्या वधूः पत्नी कान्ता सखी तवाऽस्मि च।
दासी भृत्या किंकरी च भार्या योषित्तवाऽङ्गना ॥ ४ ॥
इमा ब्रह्मप्रियाः सर्वास्तवाऽर्धाऽगस्य शक्तयः।
हरिप्रियाश्च वै तद्वच्छक्तयः सन्ति ते पराः ॥ ५ ॥
सर्वासां मेऽपि च कृपाकरस्त्वं शाश्वतोऽधिपः।
मन्त्रदाता भवानेव दीक्षादाता भवानपि ॥ ६ ॥
मन्त्रदीक्षाविधिं मां त्वं ब्रूहि लोकहितेच्छया।
प्राप्य दीक्षां महामोक्षं प्राप्स्यन्तीति कृपां कुरु ॥ ७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु कान्ते प्रवक्ष्यामि मन्त्रदीक्षाविधिं हि ते।
यदा भवेद्धि संकल्पः सत्संगस्य बलेन वै ॥ ८ ॥
पूर्वपुण्यबलेनापि चान्यसम्प्रेरितेन वा।
तदा स्नात्वा हरिं स्मृत्वा शीघ्रं गच्छेद् गुरुं प्रति ॥ ९ ॥
सद्गुरुर्धर्मसम्पन्नस्त्यागवान् संयतेन्द्रियः।
महाभागवतो भक्तो विद्वान् भक्तिपरायणः ॥१०॥
आचार्यो वेदविन्मन्त्रतत्त्वार्थविद् रहस्यवित्।
मन्त्रजापरतश्चापि मत्सम्प्रदायसंयुतः ॥११॥
परब्रह्मसम्प्रदायदीक्षावान् मत्पदाश्रितः।
ब्रह्मविद्यासु निष्णातश्चानन्यदैवतः शुचिः ॥१२॥
साधुः साध्वी सती विप्रो गुरुपादाश्रितोऽपि यः।
गुर्वर्थंकृतसर्वस्वः शासिता मोक्षदो गुरुः ॥१३॥
एतादृशं श्रेष्ठगुरुं यद्वा मन्त्रविदं गुरुम्।
अभिगच्छेदर्घ्यपाणिर्ज्ञानदं दिव्यमूर्तिकम् ॥१४॥
आचारशासकं भक्तिशासकं ब्रह्मदायकम्।
आचार्यं परमं दिव्यं गुरुं गच्छेन्नमेत्तथा ॥१५॥
आचार्यं निजसंकल्पं मन्त्रार्थकं निवेदयेत्।
यथोक्तवचनं मत्वा मम जन्माष्टमीदिने ॥१६॥
ऊर्जकृष्णेऽथवा चोर्जे द्वादश्यां शुक्लके दले।
यद्वापुण्यदिने यद्वा यदेच्छेद्वै तदा दिने ॥१७॥
तीर्थजलं करे धृत्वा हरेः पादामृतं जलम्।
आचमनं विधायैव निषीदेद्वै गुरोः पुरः ॥१८॥
गुरुस्तस्मै हरेर्नाम श्रावयित्वा पुनः पुनः।
शंखचक्रगदापद्मचिह्नानि दापयेज्जलैः ॥१९॥
यद्वा वह्निं स्थापयेच्च वह्निमन्त्रविधानतः।
स्थण्डिलादौ जुहुयाच्च गवाज्यं मन्त्रसंयुतम् ॥२०॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं च वा।
जुहुयाद्वै महामन्त्रसंयुतं च फलादिभिः ॥२१॥
मन्त्रैः पुरुषसूक्ताद्यैर्लक्ष्मीसूक्तादिभिस्तथा।
पायसं च घृताद्यं च जुहुयान्मेऽभिधानकैः ॥२२॥
ततो वै राजतं यद्वा सौवर्णं ताम्रमेव वा।
शंखं चक्रं गदां पद्मं पञ्चामृतैः निषेचयेत् ॥२३॥
पूजयेच्च ततो वह्नौ तापयेन्मुद्रणोचितम्।
दशहोमान् प्रकुर्याच्च षट्होमान् वा ततः पुनः ॥२४॥
उद्धृत्य चक्रं बाह्वोर्वै चांऽकयेद् गुरुराश्रितम्।
दक्षे चोर्ध्वे चक्रमेव शंखं तूर्ध्वे हि वामके ॥२५॥
गदां दक्षे ह्यधोभागे पद्मं वामे च निम्नके।
एवं बाह्वोरंकयित्वा तीर्थकलशवारिणा ॥२६॥
मन्त्रेणैवाऽभिमन्त्र्यैव शिष्यमूर्ध्न्यभिषेचयेत्।
आचमनं प्रदद्याच्च ह्यूर्ध्वपुण्ड्रं प्रकारयेत् ॥२७॥
सचन्द्रकं कौंकुमं च मन्त्रमध्यापयेत्ततः।
त्रिवारं दक्षकर्णे वै नार्या वामे वदेद् गुरुः ॥२८॥
मन्त्रार्थान् बोधयेत् सर्वान् निर्भयत्वं ददेत्ततः।
जपस्य नियमान् दद्याद् दद्यात् कण्ठीं च तौलसीम् ॥२९॥

जपमालां प्रदद्याच्च परिहारं समापयेत् ।
शिष्यस्ततोऽर्चयेद्भक्त्या गुरुं भूषाऽम्बरादिभिः ॥३०॥
एवं मन्त्रयुतः शिष्यो नत्वा यायाद् गृहं निजम् ।
इदं रहस्यं परमं लक्ष्मि ! ते समुदाहृतम् ॥३१॥
मन्त्रचतुष्टयं श्रेष्ठं मुक्तिदं दिव्यताप्रदम् ।
तज्जपाद्वै भवेन्मोक्षो यावत्कृत्यनिकृन्तनः ॥३२॥
पूर्वोक्तं मन्त्रदशकं तथेदं च चतुष्टयम् ।
सर्वभुक्तिसर्वमुक्तितादात्म्यादिप्रदं मम ॥३३॥
त्रयोदश तथा मन्त्राश्चापरे प्राङ्निदर्शिताः ।
ते च मोक्षकरा लक्ष्मि भुक्तिमुक्तिप्रदाः शुभाः ॥३४॥
त्रयस्त्रिंशत्तथा मन्त्रा गायत्र्यन्ता उदीरिताः ।
सर्वे ते सिद्धिदा लक्ष्मि पुरुषार्थप्रदाः शुभाः ॥३५॥
त्रयस्त्रिंशत्तथाऽन्ये ते मन्त्रा लक्ष्मि प्रकीर्तिताः ।
तव गायत्रिकान्तास्ते पुरुषार्थप्रदाः शुभाः ॥३६॥
ततो रमायाः पार्वत्या गायत्रीद्वयमुत्तमम् ।
ततो मन्त्रत्रयं स्वामीकृष्णोवल्लभदैवतम् ॥३७॥
सर्वार्थसाधकं लक्ष्मि सर्वमन्त्रोत्तमोत्तमम् ।
अथ गायत्रिकाश्चापि शृणु मोक्षप्रदाः शुभाः ॥३८॥
'परमेशाय विद्महे पुमुत्तमाय धीमहि ।
तन्नोऽवतारी प्रचोदयात्' ॥३९॥
'गोपीश्वराय विद्महे श्रीराधेशाय धीमहि ।
तन्नः कृष्णः प्रचोदयात्' ॥४०॥
'नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात्' ॥४१॥
'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात्' ॥४२॥
'तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात्' ॥४३॥
'पद्मोद्भवाय विद्महे वेदवक्त्राय धीमहि ।
तन्नः स्रष्टा प्रचोदयात्' ॥४४॥
'महाविष्णवे विद्महे हिरण्यगर्भाय धीमहि ।
तन्नो भूमा प्रचोदयात्' ॥४५॥
एताः सप्त मत्स्वरूपाः शृणु त्वद्रूपगा अपि ।
गायत्र्यः शुभदाः सर्वपुरुषार्थप्रदा रमे ॥४६॥
'ब्रह्मप्रियायै विद्महे हरिप्रियायै धीमहि ।
तन्नो ब्राह्मी प्रचोदयात्' ॥४७॥
'नारायण्यै विद्महे वासुदेव्यै च धीमहि ।
वैष्णवी नः प्रचोदयात्' ॥४८॥
'महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात्' ॥४९॥
'हिरण्यवर्णायै विद्महे श्रियै हरिण्यै धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात्' ॥५०॥
'महाऽम्बिकायै विद्महे पार्वत्यै सत्यै धीमहि ।
तन्नो गौरी प्रचोदयात्' ॥५१॥
'महासावित्र्यै विद्महे वेदगायत्र्यै धीमहि ।
तन्नो वाणी प्रचोदयात्' ॥५२॥
'सुखदालक्ष्म्यै विद्महे शिवराज्ञीश्रियै धीमहि ।
तन्नः कार्ष्णी प्रचोदयात्' ॥५३॥
'नारायण्यै विद्महे माणिक्यायै धीमहि ।
तन्नो राधा प्रचोदयात्' ॥५४॥
'नारायण्यै विद्महे रमादेव्यै धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात्' ॥५५॥
'नारायण्यै विद्महे पद्मावत्यै धीमहि ।
तन्नो बिम्बी प्रचोदयात्' ॥५६॥
'नारायण्यै विद्महे रमादेव्यै धीमहि ।
तन्नः प्रभ्वी प्रचोदयात्' ॥५७॥
धर्मदेवाय विद्महे भक्तिदेव्यै धीमहि ।
तन्नो हरिः प्रचोदयात्' ॥५८॥
इत्येता द्वादशगायत्र्यश्च लक्ष्मि तवाभिधाः ।
धर्मार्थकाममोक्षाख्यपुमर्थसम्प्रदाः शुभाः ॥५९॥
इत्येवं सकला मन्त्राः शतं च दश पंच च ।
पञ्चदशोर्ध्वशतशक्तिदेवता मदात्मकाः ॥६०॥
रहस्यं कथितं तेऽत्र परमेशपरायणम् ।
जपित्वा तान्नरो नारी चैकं वा मनुमित्यपि ॥६१॥
यायात् स्वर्गात्परं स्वर्गं धाम्नो धाम परात्परम् ।
उत्सवाद्युत्सवाऽऽढ्यं चानन्दानन्दसंभृतम् ॥६२॥
पुरुषोत्तमतो देवः परो नास्ति प्रमुक्तिदः ।
मम सेवा ततः कार्या पुरुषोत्तमसंज्ञिनः ॥६३॥
मम मन्त्राः सदा जप्या यथाशक्ति दिवानिशम् ।
मम दीक्षा ग्रहीतव्या धार्याण्यंकानि मे सदा ॥६४॥
तत्त्वं नारायणश्चाऽहं वासुदेवस्तथा त्वहम् ।
परमात्मा परब्रह्म परज्योतिः परेश्वरः ॥६५॥
विष्णुः परात्परश्चाऽहं कृष्णो वै पुरुषोत्तमः ।
शाश्वतात्माऽन्तरात्मा च साक्षी चाऽहं जनार्दनः ॥६६॥
हृषीकेशस्तथा यज्ञश्चाऽहं लीलापतिः प्रभुः ।
सर्वमूर्धा सर्वचक्षुः सर्वपाद् भगवानहम् ॥६७॥

विश्वात्मा श्रीपतिश्चाऽहं सविता रमणोऽप्यहम् ।
सर्वेश्वरश्च सर्वज्ञो जगन्नाथोऽहमेव च ॥६८॥
सर्वविद्यान्तरस्थोऽहं सर्वायुधधरोऽप्यहम् ।
सर्वशास्ता सर्वचेत्यश्चाहं श्रीपुरुषोत्तमः ॥६९॥
मम चिह्नं प्रसिद्धं वै चक्रं सुदर्शनं शुभम् ।
ऊर्ध्वपुण्ड्रं च तिलकं शंखादीनि तथापि च ॥७०॥
धारणीयानि भक्तेन पूज्योऽहं पुरुषोत्तमः ।
शंखचक्रादिचिह्नाढ्यः कुर्यान्मे पूजनं प्रिये ॥७१॥
धारयित्वैव चिह्नानि ब्रह्मकर्म समाचरेत् ॥
बाह्वोर्धारयिता धर्ता याति मत्परमं पदम् ॥७२॥
अंकयित्वा जपन्मन्त्रं भवपाशात्प्रमुच्यते ।
सुदर्शनयुतं भक्तं श्राद्धादौ भोजयेत् सती ॥७३॥
पितरो नित्यतृप्ता वै भवन्ति वैष्णवाशनात् ।
दद्याद्गोभूहिरण्यादि चक्रांकितभुजाय वै ॥७४॥
चक्रांकिताः पापमुक्ताः प्रयान्ति मत्परं पदम् ।
चक्राद्यैरंकिते देहे पावने वैष्णवे प्रिये ॥७५॥
सर्वतीर्थानि यज्ञाश्च वसन्ति मुक्तकोटयः ।
मन्त्रसिद्ध्यै च पूजार्थं चक्रं धार्यं विशेषतः ॥७६॥
वैष्णवत्वस्य सिद्ध्यर्थं ज्ञानसिद्ध्यै विशेषतः ।
मम भृत्यत्वसिद्ध्यर्थं चक्रं धार्यं विशेषतः ॥७७॥
शंखचक्रगदापद्मरेखा बाह्वोर्न्यसेत् सदा ।
मीनशूलध्वजधनुर्बाणस्वस्तिकदण्डकान् ॥७८॥
रेखात्मकान्न्यसेन्नित्यं चान्दनान् तप्तकाँश्च वा ।
पवित्रचक्ररेखाढ्यास्तरेयुः पातकाम्बुधिम् ॥७९॥
पवित्रं चरणं नेमिर्हरेश्चक्रं सुदर्शनम् ।
तेन तप्तशरीरा वै प्रयान्ति मम धाम ह ॥८०॥
शुद्धेन वह्नितप्तेन ब्रह्म तेन पुनीहि नः ।
यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ॥८१॥
येन देवा पवित्रेण आत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥८२॥
प्राजापत्यं पवित्रं तच्छतोद्यामं हिरण्मयम् ।
वयं ब्रह्मविदस्तेन पूतं ब्रह्म पुनीमहे ॥८३॥
सनेमिचक्रं सततं चाऽक्षरस्य महात्मनः ।
तस्मिँश्चक्रकृते देहे महोन्नतिपदं ययौ ॥८४॥
एवं ममैव वाक्यानि श्रुतयो मे वदन्त्यपि ।
रेखास्ता विधिवद् धार्याः शंखचक्रादिहेतयः ॥८५॥

कलत्राऽपत्यभृत्याद्यैर्धार्याश्च पशुभिस्तथा ।
वृक्षवल्ल्यादिभिश्चापि गृहारामादिभिस्तथा ॥८६॥
यानवाहनपेटाद्यैर्धार्या रेखादिहेतयः ।
आन्तरे मम मूर्तिश्च बाह्ये चिह्नानि मे तथा ॥८७॥
अनन्यभक्तियोगश्च सर्वार्पणादिपूर्वकः ।
कर्तव्यश्चापि धार्यश्च ते मे दासा हि वैष्णवाः ॥८८॥
उर्ध्वपुण्ड्रं तथा भाले लक्ष्म्या बिन्द्वया युतं चरेत् ।
लक्ष्मि साकं त्वया चाहमूर्ध्वपुण्ड्रे वसामि वै ॥८९॥
ऊर्ध्वपुण्ड्रयुतो देहो मम दिव्यं हि मन्दिरम् ।
ऊर्ध्वपुण्ड्रयुतः स्नातः सर्वतीर्थेषु विद्यते ॥९०॥
दीक्षितः सर्वयज्ञेषु सर्वलोकेषु पूजितः ।
विमानवरमारुह्य याति मे परमं पदम् ॥९१॥
ऊर्ध्वपुण्ड्रधरं भक्तं दृष्ट्वा पापैः प्रमुच्यते ।
नमस्कृत्याऽथवा भक्त्या सर्वदानफलं लभेत् ॥९२॥
श्राद्धेऽस्य भोजने कल्पकोटितृप्तिं प्रयान्ति वै ।
पितरोऽस्य गयाश्राद्धकृतं फलमवाप्नुयुः ॥९३॥
यज्ञदानतपश्चर्याजपहोमाद्यनन्तकम् ।
पुण्यवज्जायते चोर्ध्वपुण्ड्रभालस्य योगिनः ॥९४॥
एकान्तिनो महाभागाः साधवो ब्रह्मचारिणः ।
सान्तरालं प्रकुर्युर्वै पुण्ड्रं मम पदाकृति ॥९५॥
मम पदाकृति पुण्ड्रं मन्दिरं मे सचन्द्रकम् ।
मध्ये तिष्ठामि भालेऽहं श्रिया साकं त्वया हरिः ॥९६॥
पुण्ड्रं कुर्युर्जना नित्यं कृष्णसालोक्यसिद्धये ।
तीर्थमृदा चन्दनेन कुंकुमेन द्रवेण वा ॥९७॥
जलाद्यैर्वा प्रकुर्युश्च ह्यूर्ध्वपुण्ड्रं सचन्द्रकम् ।
धृत्वा पुण्ड्राणि चांगेषु मम सायुज्यमाप्नुयुः ॥९८॥
ललाटे मां हरिं ध्यायेन् नारायणमथोदरे ।
वक्षःस्थले श्रियं ध्यायेत् कण्ठे श्रीपुरुषोत्तमम् ॥९९॥
बाह्वोर्नरं तथा कृष्णं कन्धरे माणिकीपतिम् ।
पार्श्वयोः श्रीभूपतिं मां पृष्ठे जनार्दनं तु माम् ॥१००॥
करयोश्च रमापद्मावतीनाथं स्मरेद्धि माम् ।
एवं द्वादशपुण्ड्राणि भक्तो मे धारयेत् सदा ॥१०१॥
महाभागवती नारी महाभागवतो नरः ।
ऊर्ध्वपुण्ड्रसुचन्द्राढ्यो मत्स्वरूपो न संशयः ॥१०२॥
एवं लक्ष्मि मयोक्ता वै मन्त्राः सह्योर्ध्वपुण्ड्रकाः ।
सचन्द्रकाश्च ते सर्वे तुलसीमालिकायुताः ॥१०३॥

मत्स्मृतिप्रसहिताश्च भवन्ति मत्प्रदप्रदाः ।
नरा नारायणा नार्यो नारायण्यो भवन्ति वै ॥१०४॥
किम्बधिकं प्रवक्तव्यं मम प्रिया भवन्ति वै ।
पठनाच्छ्रवणादस्य मोक्षमार्गो भवेत् ध्रुवः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महामन्त्रादिगायत्र्यादिसचन्द्रकोर्ध्वपुण्ड्रादिमहिम-निरूपणनामा नवषष्ठितमोऽध्यायः ॥ ६९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं ग्राहयेत् सद्गुरोर्मनून् ।
सहस्रशाखाध्यायी च सर्वयज्ञेषु दीक्षितः ॥ १ ॥
तापसो विप्रवर्योऽपि न गुरुः स्यादवैष्णवः ।
महाभागवतो यश्च मम ध्यानपरायणः ॥ २ ॥
भक्तिमार्गप्रदेष्टा वैष्णवो गुरुर्भवेद् बुधः ।
आचार्यः सद्गुरुः साधुर्भवबन्धविदारकः ॥ ३ ॥
तस्मान्मन्त्रान् हि गृह्णीयादोंकारसहितान् शुचिः ।
आदौ सर्वत्र मन्त्राणां योजयेत् प्रणवं प्रभुम् ॥ ४ ॥
ओंकारोऽहं परब्रह्म प्रणवो मन्त्रनायकः ।
ओमित्येकाक्षरं पूर्वं चतुर्थ्यन्ता ममाऽभिधा ॥ ५ ॥
ततश्च द्व्यक्षरं नाम नमः इत्येवं पूरयेदपि ।
'ओं श्रीकृष्णनन्दजाय नमः' एवं वदेद् गुरुः ॥ ६ ॥
मन्त्रचतुष्टयं श्रेष्ठं मन्त्रदशकमुत्तमम् ।
सप्त द्वादश च द्वे च गायत्र्यश्चोत्तमा मम ॥ ७ ॥
त्रयोदश तथा मन्त्रास्त्रयः श्रेष्ठाः सदा मम ।
त्रयस्त्रिंशदवतारमन्त्राः श्रेष्ठास्तथा मम ॥ ८ ॥
त्रयोस्त्रिंशच्छ्रियो मन्त्राः श्रेष्ठाः सर्वे मता मम ।
एको वा सर्व एवापि ह्यनेके वा यथेष्टकम् ॥ ९ ॥
ग्राह्या मन्त्रा हि शिष्येण गुरुः परीक्ष्य वाऽर्पयेत् ।
पञ्चदशोर्ध्वशतमन्त्रदेवोऽस्मि हरिः स्वयम् ॥१०॥
त्रयस्त्रिंशन्मम मन्त्राश्चान्ये मद्रूपवर्णिनः ।
रूपरूपितादात्म्याद्वै युज्यन्ते मयि सर्वशः ॥११॥
यो भक्तो यत्स्वरूपस्य तन्मन्त्रं शृणुयाद् गुरोः ।
परब्रह्मतरोः शाखाः शतं च दश पंच च ॥१२॥
तानि तानि च रूपाणि तत्तन्मन्त्रैः प्रपूज्य च ।
आराध्य मत्स्वरूपाणि यास्यन्त्येव हि मां हरिम् ॥१३॥
परब्रह्मसम्प्रदायाः सर्वे मेंऽगानि पद्मजे ।
मदुत्पन्नमिदं सर्वं मत्तो नैवातिरिच्यते ॥१४॥
अनादिश्रीकृष्णनारायणे प्रोता मयीश्वराः ।
अवतारास्तथा मुक्ता जीवाः प्रोता हरौ मयि ॥१५॥
अवतारिण्य एवेमाः शक्तयो मयि संस्थिताः ।
सर्वा मन्त्रस्वरूपिण्यः प्रोता मयि हरौ प्रभौ ॥१६॥
इतिविज्ञाय मन्त्राणां शतं पंचदशाधिकम् ।
विद्वान् विज्ञाय दद्याद्वै विदुषे त्वधिकारिणे ॥१७॥
स स्याद्'आचार्यसम्राट्'वै सर्वमन्त्रप्रदो गुरुः ।
'परब्रह्मसम्प्रदायाऽऽचार्यसम्राट्' निगद्यते ॥१८॥
न्यूनमन्त्रप्रदा न्यूना आचार्यास्ते भवन्ति वै ।
स्वतःप्रकाशोभगवान् स्थाप्यते वै मया गुरुः ॥१९॥
'परब्रह्मसम्प्रदायाऽऽचार्यसम्राट् मनुप्रदः ।
सर्वमनूपदेष्टा स मत्स्वरूपो भवत्यपि ॥२०॥
त्वं लक्ष्मीश्च तथा गुर्वी स्थाप्यते वै मया प्रिये ।
'परब्रह्मसम्प्रदायाचार्यसम्राज्ञी' मन्त्रदा ॥२१॥
सर्वमनूपदेष्ट्री त्वं मत्स्वरूपात्मिका ह्यसि ।
किं च लक्ष्मि शृणु चान्यन्मन्त्रे यन्नाम विद्यते ॥२२॥
स तन्मनोस्तथाऽऽचार्यः, मदंशो वर्तते सदा ।
सा तन्मनोस्तथाऽऽचार्याणी च बोध्या मदाज्ञया ॥२३॥
एवं मनून् नियुञ्जीत गृह्णीयाच्च गुरोर्मुखात् ।
सबीजोऽयं भवेन्मन्त्रो गुरोस्तैजसभासुरः ॥२४॥
दैवबलो गुरोर्बली मनुर्मोक्षप्रदो भवेत् ।
शिष्यबलोऽधिकः स्याद्वै मनुर्भुक्तिप्रमुक्तिदः ॥२५॥
बीजं सर्वत्र मन्त्रेषु कृष्णकान्तोऽहमेव तु ।
नित्याऽनपायिनी शक्तिः श्रीर्लक्ष्मीर्विद्यते मनौ ॥२६॥
ओंकारो मेऽभिधानं श्रि! अकाराऽहं परेश्वरः ।
उकारः श्रीस्त्वमेवासि मकारो भक्त एव मे ॥२७॥
अकारोऽहं परात्मा च उकारश्चेश्वरा मताः ।
मकारश्च जीववृन्दा तदात्मा ओं मतो मम ॥२८॥
अकारश्चानिरुद्धश्च उकारस्तु प्रद्युम्नकः ।
मकारः संकर्षणस्त्रेधा ओमित्यहं श्रीहरिः ॥२९॥
अकारश्च स्वयं विष्णुरुकारः शंकरस्तथा ।
मकारश्च विश्वसृड् वै त्रेधाऽहं परमेश्वरः ॥३०॥
अकारश्चाऽक्षरं ब्रह्म उकारो मुक्तकोटयः ।
मकारश्चावतारा मे त्रेधाहं पुरुषोत्तमः ॥३१॥
अकारो ब्रह्मसृष्टिर्मे उकारश्चेश्वरसृजिः ।
मकारो जीवसृष्टिश्च त्रेधाहं परमेश्वरः ॥३२॥
अकारोऽहं परब्रह्म उश्च ब्रह्मप्रिया मम ।
मश्च हरिप्रियाः सर्वास्त्रेधाऽहं परमः प्रभुः ॥३३॥
अहं स्वामी स्वामिनी त्वं शेषा दासास्तथा परे ।
एवं मे विद्यते हार्दं प्रणवार्थे हि दासता ॥३४॥

दासा दास्यो मम भक्ताः परतन्त्राः सदा मम ।
देहेन्द्रियमनोऽहंधीगुणा भक्तस्य मे वशाः ॥३५॥
मय्यर्पिता हि ते दिव्या मत्तन्त्रा मत्प्रजीवनाः ।
अतो मम पदस्थस्य मदिच्छाधीनवर्तनम् ॥३६॥
ममैव सर्वसंकल्पात् प्रारब्धं तस्य विद्यते ।
ममैव लक्ष्मि सामर्थ्यान्नाऽलम्यं तस्य विद्यते ॥३७॥
मय्यर्पितभरः श्रीशे मत्कर्मैव समाचरेत् ।
परमात्मा ह्यहं स्वामी भक्तस्तु दास एव मे ॥३८॥
इच्छया विनियोक्तव्यो भवेद् दासो हि सर्वदा ।
दासी भृत्या किंकरी च नियोक्तव्या ममाऽऽश्रिता ॥३९॥
ममाऽहं मत्स्वरूपौ वै मम भक्तस्य नेतरौ ।
तस्माद् देहादिबन्धैः स मुक्तो नित्यो ममाऽऽश्रयात् ॥४०॥
कुर्वन्नपि हि कर्माणि मत्कृतान्येव तानि वै ।
न लेपं लभते तैश्च भक्तो मे बन्धवर्जितः ॥४१॥
माया भक्तस्य मे दिव्या भक्तं रञ्जयति ध्रुवम् ।
आनन्दयति दिव्या सा मोक्षार्थं योजयत्यपि ॥४२॥
एवं लक्ष्मि मम मनोर्माहात्म्यमुदितं तव ।
अनादिश्रीकृष्णनारायणोऽहं चाऽक्षराधिपः ॥४३॥
पुरुषोत्तमसंज्ञोऽहं चाऽवतारी परेश्वरः ।
परमेश्वर एवाऽहं परमात्मा सनातनः ॥४४॥
पूर्णब्रह्म परब्रह्म भगवान् सर्वकारणम् ।
ममाऽवताराः कृष्णाद्या वासुदेवादयोऽपि च ॥४५॥
भूमादयोऽपीश्वराश्च राधालक्ष्म्यादिशक्तयः ।
ममांऽशा विष्णुरुद्राऽजा देवाश्चांऽशकलांऽशकाः ॥४६॥
मानवाद्यास्तदंशाश्च तिर्यञ्चः पादपास्तथा ।
किंचिदंशांशसंभूताः सृष्टयः सन्ति चैव मे ॥४७॥
तत्र नारायणश्चाऽहं नारा इत्यात्मसंहतिः ।
तत्राऽयनं करोम्येव ततो नारायणोऽस्म्यहम् ॥४८॥
नराज्जातेषु तत्त्वेषु वासी नारायणोऽस्म्यहम् ।
नारे चराचरे लोकेऽन्तःस्थो नारायणोऽस्म्यहम् ॥४९॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
यस्मान्मत्तः समुत्पन्नः सोऽहं वै परमेश्वरः ॥५०॥
यद्भूतं यच्च भाव्यं च यस्मात् सर्वं परेश्वरात् ।
अमृतत्वस्य चेशानः सोऽहं श्रीपुरुषोत्तमः ॥५१॥
वासुदेवो यतो भाति हिरण्यगर्भ इत्यपि ।
सविता च यतो भाति सोऽहं श्रीपुरुषोत्तमः ॥५२॥
वेदादिश्च परा वाणी यस्य भाषा सुसंस्कृता ।
स्वरो यस्य प्रकण्ठाद्वै सोऽहं श्रीपुरुषोत्तमः ॥५३॥
परमात्मा तु यश्चास्ते मायी च माययाऽर्चितः ।
मायेशो मायया शून्यः सोऽहं श्रीपुरुषोत्तमः ॥५४॥
पादे सृष्टिस्त्रिपादे चाऽक्षरं धामाऽस्ति यस्य वै ।
भूलीलाश्रीपतिर्योऽस्ति सोऽहं श्रीपुरुषोत्तमः ॥५५॥
यज्ञनारायणश्चाऽहं सर्वनारायणोऽस्मि च ।
भिन्ननारायणरूपः सोऽहं श्रीपुरुषोत्तमः ॥५६॥
यन्मूर्तेर्मूर्तयः सन्ति विप्राद्या मानवाः सुराः ।
चन्द्रः सूर्योऽग्निर्विद्युत् सोऽहं श्रीपुरुषोत्तमः ॥५७॥
एतादृशस्य मे दास्यं नरनारीभिरादरात् ।
मन्त्रं लब्ध्वा प्रकर्तव्यं रहस्यं मोक्षदं हि तत् ॥५८॥
विश्वतः पाणिपादोऽहं चक्षुष्मान् विश्वतस्तथा ।
विश्वानि भुवनान्येव धामानि त्वपि सन्ति मे ॥५९॥
एवं बृहत्स्वरूपोऽहं श्रीपतिः पुरुषोत्तमः ।
ईश्वर्या वै त्वया साकं दिव्यमंगलरूपवान् ॥६०॥
बृहद्देहो मानवर्ज्यो युवा हरिः पतिस्तव ।
रेमे रेमे त्वया लक्ष्म्या श्रिया साकं हि शाश्वतः ॥६१॥
अहं जगज्जनन्या वै कुमारो नित्ययौवनः ।
कन्दर्पाऽर्बुदलावण्यस्तिष्ठामि परमे पदे ॥६२॥
मुक्तिस्थानं परं व्योम मुक्तमुक्तानिकाश्रितम् ।
शाश्वतानन्दसौख्यादिसंभृतं चाऽक्षरं मम ॥६३॥
गोलोकश्चापि वैकुण्ठोऽव्याकृतोऽमृत इत्यपि ।
भोगार्थानि हि धामानि मया कृतानि सन्ति वै ॥६४॥
हिरण्मयास्तथा वैराजाद्याश्च मायिकास्तथा ।
सादाशैवा वैष्णवाश्च प्राधानिकाश्चभूमयः ॥६५॥
आवरणानि सर्वाणि सत्यादिमानवादयः ।
पातालान्ताश्च लीलार्थाः क्रीडासौभाग्यसंभृताः ॥६६॥
सर्वे लोका मम क्रीडालीलाद्यर्था मया कृताः ।
भोगे नित्या स्थितिर्मे धामस्ववतारूपिणः ॥६७॥
लीलां तु संहरे लक्ष्मि मायामयं हि तद् यतः ।
त्रिपाद्यप्यक्षरं धाम परमं मे हि शाश्वतम् ॥६८॥
त्रिपाद् विभूतिर्नित्या सा तत्र धामानि यानि मे ।
गोलोकादीनि सर्वाणि नित्यान्येव पराणि हि ॥६९॥
पादोऽस्यैश्वरजैवादिलोका अनित्यसंज्ञकाः ।
लीलात्मका हि ते सर्वे क्रीडार्थं वै मया कृताः ॥७०॥
नित्येऽक्षरे च गोलोके वैकुण्ठेऽव्याकृतेऽमृते ।
अच्युतः शाश्वतो दिव्यः सदा यौवनमाश्रितः ॥७१॥
तिष्ठाम्यनादिश्रीकृष्णनारायणः पुमुत्तमः ।
श्रीकृष्णश्च तथा नारायणो भूमा तथा प्रभुः ॥७२॥

वासुदेवः सदा लक्ष्मि तव रूपैः समन्वितः ।
मुक्तानिकाब्रह्मप्रियाहरिप्रियाभिः संयुतः ॥७३॥
राधाविरजागोपीभिर्गोलोके मम शक्तिभिः ।
लक्ष्मीहरिणीकमलादिसेवितो विकुण्ठके ॥७४॥
रमाश्रीपार्षदानीभिः सेवितोऽव्याकृते प्रभुः ।
वासुदेवीपद्मिनीभिः सेवितोऽमृतधामनि ॥७५॥
मुक्तैर्गोपैः सेवकैश्च पार्षदैरभिसेवितः ।
अवतारस्वरूपोऽहं भिन्नरूपो वसामि वै ॥७६॥
नित्यसंभोगमीश्वर्या श्रिया लक्ष्म्या च राधया ।
त्वया च रमया वासुदेव्या कमलया सह ॥७७॥
विन्देऽहं सर्वदा लक्ष्मि भूम्या च दिव्यया सदा ।
नित्या सा त्वं जगन्माता मम श्रीरनपायिनी ॥७८॥
सर्वगता सदा विभ्वी हीशानां जगतां सदा ।
सर्वतः पाणिपादाढ्या सर्वतोऽक्षिशिरोमुखी ॥७९॥
परमेशी जगन्माता नारायणी हिरण्मयी ।
त्वत्तनावास्थितं सर्वं जगत् स्थावरजंगमम् ॥८०॥
जगत्स्थितिलयौ स्यातां तवोन्मीलनमीलनात् ।
सर्वस्याद्या महाब्राह्मी महालक्ष्मीः परेश्वरी ॥८१॥
लक्ष्याऽलक्ष्यस्वरूपा त्वं कृत्स्नं व्याप्य व्यवस्थिता ।
विभूतिस्त्वं परे धाम्नि राधा गोलोकवासिनी ॥८२॥
लक्ष्मीर्वैकुण्ठवासा च रमाऽव्याकृतवासिनी ।
पद्माऽमृतनिवासा च विभूतिश्चाऽऽक्षरी मम ॥८३॥
ईश्वराणां च लोकेषु जीवानामण्डकेषु च ।
लीलैश्वर्यवपुस्त्वं वै भवसि भूमिकात्मिकाः ॥८४॥
ईश्वराणां भूमयश्चाऽऽलयाः प्रासादकोटयः ।
स्मृद्धयो वाटिकाः क्षेत्रदिव्यविषयभूमयः ॥८५॥
भवत्येवं भवतीति लीला मे सर्वसम्पदः ।
आवरणानि तत्त्वानि त्वं सादाशैवगानि च ॥८६॥
वैष्णवानि च तत्त्वानि मायिकान्यपि यानि च ।
हैरण्मयानि तत्त्वानि वैराजादीनि यानि च ॥८७॥
सत्यादिद्युनिवासानि मानवान्यपि यानि च ।
पातालेषु तथा यानि तत्त्वानि भोगभूमयः ॥८८॥
जलभूतैजसवायुमयानि यानि सन्ति च ।
तानि सर्वाणि ते लक्ष्मि लीलारूपाणि सन्ति वै ॥८९॥
रूपरसगन्धस्पर्शरूपा त्वं स्वररूपिणी ।
लक्ष्मीरूपत्वमापन्ना धनद्रव्यादिनामिका ॥९०॥
एवं जगत्स्वरूपा त्वं जगतः श्रीः श्रिता हिमाम् ।
वेदा वेद्यं समस्तं वै तव रूपं हि पद्मजे ॥९१॥
स्त्रीरूपमखिलं लक्ष्मि तव रूपं वपुस्तव ।
सौन्दर्यं शीलमौज्ज्वल्यं सौभाग्यं मार्दवं सुखम् ॥९२॥
लावण्यं चापि सौगन्ध्यं चाकर्षणं रसादिकम् ।
तवैवं रूपं कमले सर्वनारीषु संस्थितम् ॥९३॥
ब्राह्मी नारायणीश्रीश्चाऽऽक्षरी मुक्तानिका रमा ।
ब्रह्मप्रिया च कमला हरिप्रिया च माणिकी ॥९४॥
राधा लक्ष्मीः पराविद्या रमा श्रीश्च नरायणी ।
विद्या सरस्वती माता वैष्णवी पद्मिनी सती ॥९५॥
पद्मा च पद्मजा चाऽब्धिपुत्री रंभा च राधिका ।
भूर्लीला सुखदालक्ष्मीर्हरिणी माधवीश्वरी ॥९६॥
गौरी कार्ष्णी कृष्णनारायणी स्वाहा स्वधा रतिः ।
सम्पत् स्मृद्धिर्वासुदेवी विरजा च हिरण्मयी ॥९७॥
भार्गवी शिवराज्ञीश्री रामा श्रीकान्तवल्लभा ।
एतानि तव नामानि सदा प्रातः पठेद्धि यः ॥९८॥
स स्मृद्धिं महतीं लक्ष्मीं श्रियमाप्नोत्यनाशिनीम् ।
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥९९॥
ज्योत्स्नां हिरण्मयीं लक्ष्मीं विन्दते मत्स्वरूपिणीम् ।
उत्कृष्टगन्धरूपादिस्वरूपां पुष्टिवर्धिनीम् ॥१००॥
तव दाता प्रभुः श्रीमान् पुरुषोत्तम एव च ।
परनारायणः स्वामी वात्सल्यकरुणाऽर्णवः ॥१०१॥
सुशीलः सुभगः पूर्णकामश्च सर्वशक्तिमान् ।
स्वर्गापवर्गसुखदः शरणं सर्वदेहिनाम् ॥१०२॥
सोऽहं मे दासभक्ताय दास्यै साकं त्वयाऽप्यहम् ।
मां चाऽर्पयामि देवेशि परस्परात्मवेदिताम् ॥१०३॥
श्रीमन्नारायणः स्वामी श्रीपतिः पुरुषोत्तमः ।
अनादिश्रीकृष्णनारायणः सोऽहं गतिः परा ॥१०४॥
शरणं मन्दिरं वासो बन्धुः पिता पतिः सुहृत् ।
माता भ्राता रक्षिता च पालको जगतां प्रभुः ॥१०५॥
कल्याणगुणवान् श्रीशः सर्वकामफलप्रदः ।
प्राकृतगुणशून्योऽहं निर्गुणो दिव्यमूर्तिमान् ॥१०६॥
दिव्याऽसंख्यगुणैश्वर्यरूपलावण्यसंयुतः ।
अमृते शाश्वते दिव्येऽनन्तेऽक्षरे परे पदे ॥१०७॥
निवसामि ब्रह्मलोके ब्रह्मानन्दसुखान्विते ।
अतितेजोमये शुद्धे प्रलयादिविवर्जिते ॥१०८॥
असंख्ये चाऽजरे नित्ये जाग्रत्स्वप्नादिवर्जिते ।
समानाधिकरहितेऽन्ताऽऽद्यविरहिते शुभे ॥१०९॥
अतिसर्वोत्कृष्टतेजोभृते चानन्दसागरे ।
यदक्षरं वेदवेद्यं यस्मिन् देवाः साध्या निषेदुः ॥११०॥

अधिविश्वे निषेदुश्च देवा विदुस्तदासते ।
तदक्षरं मे परमं सदा पश्यन्ति सूरयः ॥१११॥
यत्र गावो भूरिशृंगा अयास आसतेऽभितः ।
ते ह नाकस्य महिमानं विदुः साध्ययोगिनः ॥११२॥
तिष्ठामस्तत्र सततं युवानौ श्रीनरायणौ ।
यत्र स्वसारो युवत्यस्त्वदाद्या मम वल्लभाः ॥११३॥
तत्प्राप्य न निवर्तन्ते परमाक्षरधाम मे ।
एतन्मोक्षपदं दिव्यं प्रयान्ति मन्त्रवेदिनः ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महामन्त्रगूढार्थज्ञानप्राप्त्यादिनिरूपणनामा सप्ततितमोऽध्यायः ॥ ७० ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं त्रिपाद्विभूतिविस्तरम् ।
असंख्यातानि धामानि शुद्धसत्त्वमयानि वै ॥ १ ॥
ब्रह्मानन्दसुखाढ्यानि नित्यानि तानि सन्ति ह ।
निर्विकाराणि सर्वाणि हेयादिरहितानि च ॥ २ ॥
दिव्यहिरण्मयान्येव शुद्धानि तैजसानि ह ।
अवतारपदाम्भोजभक्तिमत्सेवितानि वै ॥ ३ ॥
नित्यमुक्तैर्दिव्यरूपैः पुरुषैः स्त्रीभिरित्यपि ।
वासितानि वनोद्यानसरोनगरवन्ति च ॥ ४ ॥
तद्धामान्युपभोक्तव्यान्यक्षरब्रह्मसेविनाम् ।
स्वात्मजानन्दसौख्यानि मन्दिराणि भवन्ति च ॥ ५ ॥
निःश्रेयसानि निर्वाणकैवल्यानि च यानि वै ।
श्रीशांऽघ्रिभक्तिसेवैकरसभोगयुतानि ह ॥ ६ ॥
नित्यमुक्ता महादिव्या मम पादप्रसेविनः ।
सेविकाश्च वसन्त्येतेष्वेव नित्यसनातनाः ॥ ७ ॥
मन्त्रज्ञाः परमाण्येव यान्ति धामानि तानि वै ।
ब्रह्मसुखप्रदान्येव मम योगप्रदानि वै ॥ ८ ॥
तत्र तत्र स्थितश्चाऽहमवतारस्वरूपवान् ।
अवतारी त्वक्षरे वै परे धाम्नि भवामि च ॥ ९ ॥
महामाया प्रकृतिर्या सा मां स्तौति पुनः पुनः ।
नमस्तेऽक्षरवासाय परमेशाय ते नमः ॥१०॥
अवतारस्वरूपायाऽवतारिणे च ते नमः ।
मायाऽहं भवतः शक्तिर्मायालोकाश्च ते प्रभो ॥११॥
ईश्वराणामालयाश्च तवैव भूमिकास्त्विमाः ।
तत्त्वानि च समस्तानि तवैव कार्यकाणि वै ॥१२॥
पुराणपुरुषस्त्वं वै सर्वकारणकारणम् ।
श्रीभूलीलारमानाथ माणिकीमुक्तिकापते ॥१३॥
प्रज्ञापद्मावतीकान्त नमस्ते सुखदापते ।
लक्ष्मीपद्मापते तुभ्यं नमो नारायणाय वै ॥१४॥
सर्वेश्वरस्वरूपाय सर्वदेवात्मने नमः ।
अनन्तमूर्तये कृष्णनारायण हरे नमः ॥१५॥
तेऽच्युताय च कान्ताय परमेशाय ते नमः ।
सर्वज्ञाय समस्ताय गोपालात्मज ते नमः ॥१६॥
सर्वस्रष्ट्यात्मने तुभ्यं नमस्ते परमात्मने ।
ब्रह्मणे ज्योतिषे तुभ्यं नमस्ते शुचिवर्चसे ॥१७॥
प्रसवित्रे नमः पित्रे सर्गस्थित्यन्तहेतवे ।
नारायणाय च नमः सर्वात्मान्तरवर्तिने ॥१८॥
अनन्तदिव्यगुणवन् ! नमः पुमर्थदायिने ।
व्यूहरूपाय च नमः पञ्चावस्थस्वरूपिणे ॥१९॥
प्रसीद भगवन् विष्णो सर्वलोकहिताय वै ।
आत्मानो ज्ञानहीना वै निराकारा निरिन्द्रियाः ॥२०॥
सर्वानुष्ठानरहिता वर्तन्ते च निराश्रयाः ।
तेषां लोकाँश्च देहाँश्च दातुमर्हसि वै मयि ॥२१॥
लीलाविभूतिं श्रीकृष्ण यथापूर्वं प्रकल्पय ।
चेतनाचेतनं कृत्स्नं जगत्स्थावरजंगमम् ॥२२॥
पश्य लीनं मायिकं वै मयि सुप्तं प्रबोधय ।
प्रकृत्या वै मया सार्धं सृजस्व परमेश्वर ॥२३॥
धर्माधर्मौ सुखं दुःखं भावयित्वा मयि प्रभो ।
मामधिष्ठाय वै लीलां श्रिया कर्तुं त्वमर्हसि ॥२४॥
इत्येवं चार्थितश्चाऽहं लक्ष्मि पूर्वं हि मायया ।
तस्यामेव हि मायायां जगत् स्रष्टुं प्रचक्रमे ॥२५॥
स्वेच्छया धाममुक्तो वै पुरुषो युयुजे तया ।
प्रकृतिपूरुषः प्रोक्तस्तस्मात् प्रधानपूरुषः ॥२६॥
प्रधानं वै महत्तत्त्वं बुद्धिरित्येवमीश्वरी ।
प्रधानपुरुषात्तस्मादहंकारः प्रजायते ॥२७॥
सोऽयं हिरण्यगर्भो वै महाविष्णुर्निगद्यते ।
तस्मान्मनः प्रभवति तन्मात्राणीन्द्रियाणि च ॥२८॥
षोडशको गणः सोऽयं वैराजो नाम पूरुषः ।
वैराजाज्जायन्त ईशा ब्रह्मविष्णुमहेश्वराः ॥२९॥
ब्रह्मा पृथ्वी जलं विष्णुः रुद्रस्तेजो महत्तरम् ।
प्राणोऽनिलोऽथ हृदयं गगनं खं व्यजायत ॥३०॥
एभ्यः ऋषयः पितरः सुरा भूताश्च मानवाः ।
असुरा दानवा दैत्या नागाः सर्पाश्च सृष्टयः ॥३१॥

तिर्यञ्चो जन्तवः सर्वे व्यजायन्त यथायथम् ।
सर्वे कर्मानुसारेण युज्यन्ते योग्ययोनिषु ॥३२॥
सदा स्थिता हि प्रकृतौ प्रभवन्तीच्छया हरेः ।
एवं लक्ष्मि मम लीलां मायामयीं विभावय ॥३३॥
त्वमेव सा महामाया दिव्या मद्योगमाश्रिता ।
मत्स्वरूपा ममेच्छैव शक्तिस्त्वं सर्वरूपिणी ॥३४॥
मम चाऽर्धांगना ब्राह्मी नारायणी महेश्वरी ।
महालक्ष्मीर्वासुदेवी वैष्णवी कमला रमा ॥३५॥
राधा लक्ष्मीः प्रिया कान्ता श्रीस्त्वं सुखप्रदा सदा ।
सर्वसृष्टिस्थजीवानामुद्भवादिविधायिनी ॥३६॥
मम शक्तिं विना सृष्टेर्नोन्मेषो विद्यते क्वचित् ।
अतो यावज्जगत्प्राणमयी त्वं परमेश्वरी ॥३७॥
प्राणाद्याः प्राणरूपोऽहं पतिस्ते परमेश्वरः ।
सर्वसद्गुणपूर्णोऽहं परमेशः परेश्वरः ॥३८॥
श्रीकृष्णोऽहं भवाम्येव राधाकामप्रपूर्तये ।
नारायणो भवाम्येव लक्ष्मीकामप्रपूर्तये ॥३९॥
वासुदेवो भवाम्येव परिपूर्णस्त्रिरूपधृक् ।
प्रद्युम्नमूर्तिस्तस्माद्वै सर्वैश्वर्यसमन्विता ॥४०॥
भूम्नश्चापीश्वराणां चेश्वरेशानां प्रभुः खनिः ।
कालस्याऽपि शासकश्च सृष्टिं चैशीं करोति हि ॥४१॥
अन्तर्यामित्वमापन्नो महाकालानुवेशितः ।
हरेर्मे प्रबलैश्वर्ये महाकालस्वरूपधृक् ॥४२॥
प्रबलो मम संकल्पश्चैश्वर्ये कालकारणम् ।
महाकालस्य पुत्रो वै कालसंज्ञो भवत्यपि ॥४३॥
तदन्तर्भावमासाद्याऽनिरुद्धो लोकसर्जकः ।
मम शानं ददौ तस्मै नित्यवेदात्मकं पुरा ॥४४॥
अनिरुद्धस्यांऽशभागा ब्रह्माणः संभवन्ति हि ।
वासुदेवात्ततश्चाऽन्यः प्रद्युम्नः संव्यजायत ॥४५॥
मच्छक्तितेजऐश्वर्यान्वितः पालनकर्मकृत् ।
ऐशीं सृष्टिं पालयति स्थितिं सञ्चालयत्ययम् ॥४६॥
तदंशात्मा विष्णुरूपः पाति सर्वं जगन्मुहुः ।
वासुदेवात्ततो जातः संकर्षणो विनाशकृत् ॥४७॥
विद्याबलास्त्रशस्त्रादियुतो यदंशसंभवाः ।
रुद्राद्या नाशकर्माणो भवन्ति सृष्टिलोपकाः ॥४८॥
एवमेते मदंशा वै लक्ष्मि सदा भवन्ति हि ।
तदंशाश्चापि तत्पत्न्यो भवन्ति मम वाञ्छया ॥४९॥
मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश ॥५०॥
अवतारा मम लक्ष्मि जायन्ते सर्वसृष्टिषु ।
मम कार्यकरा एते आवश्यकानुभाविनः ॥५१॥
अहं भवाम्यवतारी स्वेच्छया सहितस्त्वया ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥५२॥
मम भक्त्या मम धामाऽक्षरं पदं प्रयान्ति वै ।
अवताररूपभक्त्या गोलोकादि प्रयान्ति वै ॥५३॥
गत्वा चैषु न वै मुक्ता निवर्तन्ते समा मया ।
मत्समानसुखाः सर्वे यथा त्वं सुखिनस्तथा ॥५४॥
मदिच्छया प्रजायन्ते लोककल्याणहेतवे ।
न कर्मबन्धनं जन्म मन्मुक्तानां हि भूतले ॥५५॥
मम चानुचरत्वं हि मोक्ष एव न चेतरः ।
मम दास्यं बन्धनं वै सदासुखं सदाऽक्षरम् ॥५६॥
पुनस्ते मम धामस्था यास्यन्ति धाम चेच्छया ।
ब्रह्मप्रिया महामुक्ता हरिदासा निरामयाः ॥५७॥
अन्येऽपि कर्मबन्धस्था मन्त्रं लब्ध्वा ममापि वै ।
विषमिश्राशनं लोकसुखं त्यक्त्वा भजन्ति चेत् ॥५८॥
मामेव ते प्रपद्यन्ते नामकीर्तनपूजनैः ।
भक्त्या त्वनन्यया मां संभजेयुः करुणालयम् ॥५९॥
रक्षामि तान्परमात्मा भक्तवात्सल्यशेवधिः ।
नयामि वैष्णवं धाम सहस्रसूर्यरश्मिनि ॥६०॥
विमाने तामवस्थाप्य भगवान् श्रीहरिः स्वयम् ।
मम मन्त्रप्रजप्तॄन् वै मम भक्तिपरायणान् ॥६१॥
श्रीपतेः श्रीहरेर्मेऽत्र मन्त्रोच्चारणमुत्तमम् ।
सर्वामृतमयं दिव्यमौषधं परमौषधम् ॥६२॥
सर्वोद्वेगादिशमनं मायापाशहरं परम् ।
ह्येतद्रसायनं दिव्यं मायागदहरं शुभम् ॥६३॥
विद्यमाने कृष्णमन्त्रे महौषधेऽत्र भूतले ।
मानवा नोपगृह्णन्ति हानिः सा महती मता ॥६४॥
पूर्वसञ्चितदुष्टास्ते भ्रममायान्तरे स्थिताः ।
ये पिबन्ति न वै मूढा हरिनामरसायनम् ॥६५॥
हरिपूजोपचारेण ध्यानेन सेवया च मे ।
सत्यदास्येन दानेन कायात्मशुद्धिसंभवः ॥६६॥
ततो वासो हृदये मे तथात्मनि निरन्तरम् ।
मन्दिरं भक्तहृदयं कृत्वा नयामि धाम मे ॥६७॥
लक्ष्मि ब्रह्मप्रियाः सर्वा हरिप्रियास्तथाऽपराः ।
शृण्वन्तु मम लीलाद्या जुषन्तां मां प्रियं पतिम् ॥६८॥
व्रजन्तु सुपथं मे च भावैः सर्वैः समर्पितैः ।
सेवाभिर्ज्ञानविज्ञानैर्ध्यानैस्तपोभिरित्यपि ॥६९॥

व्रतैर्यज्ञैश्च दानैश्च शृंगारैश्चन्दनादिभिः ।
हावभावविलासैश्च भजन्तां मां प्रियं पतिम् ॥७०॥
पश्यन्तु मां च सर्वत्र शुष्केष्वार्द्रेषु सर्वदा ।
स्थावरेषु जंगमेषु भूमावभ्रेषु मूर्तिषु ॥७१॥
स्वकार्येषु परधर्मेस्वपि मां पुरुषोत्तमम् ।
मामुद्दिश्य ददत्वपि दानानि विविधानि च ॥७२॥
अनादिश्रीकृष्णनारायणं जपत मां सदा ।
यजध्वं मां च मन्मन्त्रं स्मरन्तु सार्थकं च माम् ॥७३॥
पिबन्तु वैष्णवरसं मन्त्रामृतं पिबन्तु च ।
अनादिश्रीकृष्णनारायणामृतं पिबन्तु च ॥७४॥
आज्ञामृतं प्रेमरसं सेवारसं पिबन्तु च ।
मुक्तिरसं कान्तरसं कान्ताः सर्वाः पिबन्तु च ॥७५॥
भक्तिरसं योगरसं चात्मरसं पिबन्तु च ।
ब्रह्मरसं दास्यरसं प्रियरसं पिबन्तु च ॥७६॥
स्नेहरसं तानरसं सर्वरसान् पिबन्तु च ।
अर्चयन्तु सदा कान्तं ध्यायन्तु मधुसूदनम् ॥७७॥
गायन्तु मां महाकृष्णं जपन्तु श्रीहरिं सदा ।
तप्यन्तां मम तोषार्थं मद्ध्याना मत्परायणाः ॥७८॥
एवं या ये करिष्यन्ति भक्तिं मदर्थिकां भुवि ।
तास्ते वै मानवाद्यास्तु सर्वे भागवताः पराः ॥७९॥
मम प्रभावतो लक्ष्मि पूजास्तोत्रमनुग्रणाः ।
आधिहीना भवन्त्येव भविष्यन्ति न संशयः ॥८०॥
वीतशोकाश्च पुण्याश्च भविष्यन्ति निरामयाः ।
सर्वैश्वर्यसमापन्नाः सर्वरोगादिवर्जिताः ॥८१॥
अमरा निर्जराश्चापि धनधान्यसमृद्धयः ।
मम चातिप्रसादेन पुत्रपौत्राद्यलंकृताः ॥८२॥
मम भक्तागारभागे हृदये चापि मानसे ।
सत्यव्रतं सदा चास्ते सर्वरत्नोपदायकम् ॥८३॥
भक्तानां मन्त्रयुक्तानां गृहद्वारेषु नित्यदा ।
कल्पद्रुमा भवन्त्येव सर्वकामफलप्रदाः ॥८४॥
सर्वकामदुघा गावः सच्चिन्तामणयस्तथा ।
कल्पलताः कल्पपात्राण्यासते भक्तमन्दिरे ॥८५॥
मम प्रसादतो लक्ष्मि अमरास्ते भवन्ति च ।
सर्वसौभाग्यसम्पन्नाः पुण्यमंगलशोभनाः ॥८६॥
दानज्ञानध्यानपरायणा आनन्दसंभृताः ।
न दुर्भिक्षं न च व्याधिर्नाऽकालमरणं भवेत् ॥८७॥
वैष्णवा यत्र मे भक्ता मम व्रतपरायणाः ।
मद्ध्याना मज्जपा लक्ष्मि मम भावपरायणाः ॥८८॥
एषां गृहाणि दिव्यानि पुण्यानि मोक्षदान्यपि ।
तीर्थानि समजायन्ते ममाऽक्षरनिभानि वै ॥८९॥
यद्गृहेषु गदाचक्रध्वजधनूंषि सन्ति मे ।
शूलमीनशरस्वस्तिकानि चिह्नानि सन्ति मे ॥९०॥
भित्तिभागेषु सर्वेषु प्रतिमा मे भवन्ति च ।
गृहद्वारेषु सर्वेषु पुण्यस्थानेषु सर्वथा ॥९१॥
मम लीलाचरित्राणां दिव्यचित्राणि सन्ति च ।
तुलसीराधिकालक्ष्मीमाणिकीप्रतिमायुतः ॥९२॥
प्रज्ञापद्मावतीपद्मासुखदाश्रीसमन्वितः ।
अहं यत्र चित्रितो वै भवामि परितो गृहे ॥९३॥
अभितो वैष्णवो भावो मंगलं बहु दृश्यते ।
विष्णुभक्तास्तथा नार्यो भित्तिषु चित्रिताः शुभाः ॥९४॥
विद्यन्ते यत्र सौधेषु तीर्थानि तद्गृहाणि मे ।
जलक्रीडाप्रतिमाश्च राधारासस्य मण्डलम् ॥९५॥
ब्रह्मप्रियाविवाहस्य प्रतिमाश्चित्रिता गृहे ।
तद्गृहं दिव्यरूपं मे भक्तस्य मुक्तितीर्थकम् ॥९६॥
गोभिर्युतं च रूप मे विद्याऽध्ययनचित्रकम् ।
विमानस्थं चित्रकं मे यज्ञदीक्षादिचित्रकम् ॥९७॥
कुंकुमवापिकाचित्रं चाश्वपट्टसरोऽन्वितम् ।
लोमशाश्रमसंशोभं चित्रं श्रीकम्भरायुतम् ॥९८॥
गोपालकृष्णचित्रं च सर्वदेवादिपूजितम् ।
भक्तरक्षाकराश्चापि प्रतिमा मे शुभास्पदाः ॥९९॥
सर्वा मोक्षप्रदा लक्ष्मि तीर्थं मन्मूर्तियुग्गृहम् ।
त्रिपञ्चाशन्मूर्तयो मेऽवतारिणस्त्वया सह ॥१००॥
सर्वास्ता मोक्षदा येषां गृहेषु सन्ति पद्मजे ।
तद्वंशवंशवंशानां मोक्षः प्रजायते ध्रुवः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने त्रिपाद्विभूतिः, मायाप्रार्थनया कृतैकपादलीलाविभूतावपि दिव्यतादिनिरूपणनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भजनं मम मोक्षदम् ।
कृष्ण विष्णो हरे राम मुकुन्द मधुसूदन ॥ १ ॥
नारायण हृषीकेश पुरुषोत्तम केशव ।
अनादिश्रीकृष्णनारायण लक्ष्मीपते प्रभो ॥ २ ॥
पद्मनाभाऽक्षरवर्तिन् चात्माराम कृपानिधे ।
वासुदेव मुक्तिकेश श्रीधर श्रीपते विभो ॥ ३ ॥

राधारमापते जिष्णो प्रज्ञापद्मावतीपते ।
श्रीद श्रीश श्रीनिवास मोक्षकुन्माणिकीपते ॥ ४ ॥
कम्भरानन्दन ब्रह्मप्रियाकान्त जनार्दन ।
गोपालबाल विश्वेश सुखदाश्रीपतेऽधिप ॥ ५ ॥
प्राणेश कान्तकान्तेश परमेश्वर माधव ।
इत्येवमुच्चरन्त्यो वै नार्यो नामानि मे भुवि ॥ ६ ॥
नराश्चापि प्रयान्त्येव धाम मे जरठा अपि ।
बाला वृद्धाः कुमाराश्च मम नामपरायणाः ॥ ७ ॥
प्रणमन्ति हरिं मां ये गृहकर्मरता अपि ।
आसने शयने याने ध्याने ज्ञाने हि मां ध्रुवम् ॥ ८ ॥
क्रीडमानाः प्रणमन्ति ते यान्ति धाम मेऽक्षरम् ।
दिवारात्रौ सुमधुरं ब्रुवन्ति यत्र नाम ते ॥ ९ ॥
कृष्णस्य दृश्यते भावो यत्र गृहे भुवस्तले ।
विष्णुलोकस्य समता मम धाम्नश्च तुल्यता ॥१०॥
तद्गृहस्य सदा लक्ष्मीर्नात्र कार्या विचारणा ।
नाऽन्तरं तत्र पश्यामि भक्तगृहेऽक्षरालये ॥११॥
ममोच्चारं प्रकुर्वन्ति नित्यं धाम्न्यक्षरे मम ।
तथा पृथ्व्यां मम नाम गृणन्ति यत्र तद्गृहम् ॥१२॥
दिव्यं धामाऽक्षरं बोध्यं विशेषोऽत्र न विद्यते ।
उभयोर्लोकयोर्भावः समस्तेन समानता ॥१३॥
जरारोगभयं नास्ति मृत्युहीना यतो जनाः ।
यत्र मन्नामगानं च मन्मन्त्ररटनं तथा ॥१४॥
किम्वधिकं वदेयं वै माया दिव्या ममाश्रयात् ।
गावो दिव्या हि भक्तस्य महिष्यश्च तथा शुभाः ॥१५॥
गृहोद्यानानि दिव्यानि गृहं दिव्यं शुभं सदा ।
गृहोपकरणान्यस्य दिव्यानि भोजनान्यपि ॥१६॥
गृहांगणं सदा दिव्यं पुत्रपौत्रादयोऽपि च ।
सदा भक्तस्य दिव्या वै पात्राणि च धनानि च ॥१७॥
वृक्षाश्च वल्लिका दिव्या खट्वाद्यास्तरणानि च ।
पेटिकाऽम्बरभूषाद्या दिव्या भक्तस्य मे सदा ॥१८॥
भक्तगृहस्य धूली च रजांस्यपि जलानि च ।
धान्यान्यपि च दिव्यानि यत्राऽहं परमेश्वरः ॥१९॥
अपि तद्गृहभोक्तारः पक्षिणः पशवोऽपि च ।
दिव्या अतिथयश्चापि मम प्रसादपाविताः ॥२०॥
तीर्थानि तानि सर्वाणि भक्तभोग्यानि सर्वथा ।
वस्तूनि भोग्यजातानि पावनानि हि पापिनाम् ॥२१॥
इत्येवं विद्यते लक्ष्मि पावनं मम वासतः ।
निर्गुणं पुण्यदं मोक्षप्रदं भक्तगृहादिकम् ॥२२॥

शृणु लक्ष्मि ययातेर्वै नाहुषस्य कथानकम् ।
मम भक्तस्य लोकेऽत्र पावनं लोकमोक्षदम् ॥२३॥
ययातिर्भगवद्भक्तो ह्यश्वमेधशतं तथा ।
वाजपेयशतं चक्रे वैष्णवः पृथिवीपतिः ॥२४॥
ददावनेकरूपाणि दानानि श्रद्धया नृपः ।
गवां लक्षसहस्राणि तथा कोटिशतानि च ॥२५॥
कोटिहोमांश्चकाराऽपि भूमिदानादिकं ददौ ।
वर्षाणां तु सहस्राणि ह्यशीतिर्जीवितो हि सः ॥२६॥
शुशोच वै ययातिः स देहोऽयं कर्मबन्धनः ।
भस्मान्तो वा विडन्तो वा मृदन्तो वा भविष्यति ॥२७॥
अनेन चार्ज्यते पापं नरकं च फलं ततः ।
अनेन चार्ज्यते पुण्यं स्वर्गं राज्यं पुनः पुनः ॥२८॥
अनेन चार्ज्यते भक्तिर्मोक्षो यया भवेद् ध्रुवः ।
तस्मात् स एव साध्योऽत्र राज्ये स्थित्वा विवेकिना ॥२९॥
विचार्येत्थं हरेर्नाम्नामारेभे भजनं नृपः ।
हरे कृष्ण हरे विष्णो कृष्णनारायण प्रभो ॥३०॥
अनादिश्रीकृष्णनारायण दामोदराच्युत ।
एवं भजन् निजदूतानादिदेश शुभं वचः ॥३१॥
यान्तु दूता मम राष्ट्रे समुद्रान्तं हि मण्डलम् ।
आदिशन्तु प्रजाभ्यश्च कुर्वन्तु भजनं हरेः ॥३२॥
पश्यन्तु परमात्मानं गृणन्तु नामकीर्तनम् ।
पूजयन्तु हरिं नित्यं भजन्तां परमेश्वरम् ॥३३॥
करं नैव ग्रहीष्यामि भक्तप्रजाभ्य एव ह ।
नामामृतं हरेरेव कीर्तयन्तु सदा प्रजाः ॥३४॥
दूतादिष्टाः प्रजाश्चापि चक्रुर्वै भजनं तथा ।
ध्यायन्ति स्म हरिं कृष्णं गायन्ति स्म जनार्दनम् ॥३५॥
जपन्ति स्म च तप्यन्ते यजन्ते स्म च मां सदा ।
मद्ध्याना मद्व्यवसिता मम पूजापरायणाः ॥३६॥
यावद्भूमण्डलं सर्वं बभूव वैष्णवं तदा ।
मत्प्रतापेन सञ्जाता मानवा आधिवर्जिताः ॥३७॥
वीतशोकाश्च पुण्याश्च सर्वरोगविवर्जिताः ।
सर्वैश्वर्यसमापन्ना धनधान्यसमन्विताः ॥३८॥
पुत्रपौत्रादिसद्वंशा निरामया निरीतयः ।
गृहद्वारे कल्पवृक्षाः सर्वकामफलप्रदाः ॥३९॥
सर्वकामदुघा गावश्चिन्तामणयश्चापि वै ।
अभवन् राज्यवृद्ध्याद्याः सम्पदश्चाऽवितर्किताः ॥४०॥
सर्वसौभाग्यसम्पन्ना ज्ञानध्यानपरायणाः ।
प्रजाश्चासन् सुपुण्याश्च भक्तिपूजापरायणाः ॥४१॥

न दुर्भिक्षं न च व्याधिर्नाऽकालमरणं नृणाम् ।
वैष्णवा मानवाः सर्वे मम ध्यानपरायणाः ॥४२॥
मज्जपा मद्भक्तिसेवानामकीर्तनतत्पराः ।
सर्वत्र वैष्णवो भावो गृहे वृक्षे पशुष्वपि ॥४३॥
गृहे गृहे मन्दिराणि भास्वन्ति मम चाभवन् ।
गृहभित्तिषु चित्राणि ममैवाऽऽसन् त्वया सह ॥४४॥
मद्भक्ताभिश्च नारीभिर्गीयन्ते गीतयो मम ।
प्रभजन्ति प्रजा मां च बालवृद्धकुमारकाः ॥४५॥
गृहकर्मरता नार्यो भजन्ते मां परेश्वरम् ।
आसने शयने याने पाने स्थाने च भोजने ॥४६॥
क्रीडायामुत्सवे कामे मां भजन्ति हरिं प्रभुम् ।
ब्रुवन्ति श्रीहरेर्नाम मानयन्ति स्म मोक्षदम् ॥४७॥
एवं वैकुण्ठतुल्यं वै भूतलं सर्वतोऽभवत् ।
सर्वे भक्तिपरा लक्ष्मि मम स्नेहपरायणाः ॥४८॥
ययातिनोपदिष्टास्ते सञ्जाता वैष्णवा भुवि ।
जरामरणशून्याश्चाऽभवन् मम प्रसादतः ॥४९॥
मम लोकं न ते यान्ति वैष्णवा दीर्घजीविनः ।
ये च यान्ति विमानेन वैष्णवं मम धाम ते ॥५०॥
अप्यब्दलक्षदेहास्ते वृद्धा अपि नराः स्त्रियः ।
पञ्चविंशाऽब्दिकाः सर्वे दृश्यन्ते कृपया मम ॥५१॥
स्थिरकायाश्च सुखिनो जरारोगादिवर्जिताः ।
तेषु भक्तेषु सर्वेषु विष्णुदूता हरेः श्रिताः ॥५२॥
विचरन्ति ताडयन्ति दृष्ट्वा यमस्य पार्षदान् ।
रुदन्तस्ते ताडिताश्च याम्या ययुर्यमं प्रति ॥५३॥
कथयामासुरेवैते चेष्टितं भूभृतः क्षितौ ।
अमृत्युभूतलं जातं वैष्णवं सर्वमेव ह ॥५४॥
ययातिना महाभक्त्या वैकुण्ठाभं कृतं खलु ।
ताड्यन्ते यमदूता वै विष्णुदूतैः क्षितौ यम ॥५५॥
किं कुर्मो नैव गच्छामो भूतलं धर्मराज वै ।
धर्मराजः श्रुतवाँश्च चिन्तयामास तत्क्षणम् ॥५६॥
अस्य राज्ञो भवेदन्तस्तथा कार्यं मया ध्रुवम् ।
राज्ञो नाशे प्रजाः सर्वा भविष्यन्ति कुमार्गगाः ॥५७॥
याम्यमार्गः साऽतिथिको भविष्यति पुनस्तथा ।
विचार्येत्थं ययौ विष्णुं वैकुण्ठे प्रार्थयत् प्रभुम् ॥५८॥
ननाम दण्डवच्चापि पुपूज परमेश्वरम् ।
न्यवेदयद्धरिं धर्मराजो ययातिवर्तनम् ॥५९॥
तव भक्तेन भगवन् रुद्धः पन्था यमस्य मे ।
मानवा भूतले सर्वे वैष्णवास्तेन वै कृताः ॥६०॥
तस्माद्धरे निजभक्तं शीघ्रमत्र समाह्वय ।
पापिनां दण्डरोधोऽपि भवेदुद्घाटितस्ततः ॥६१॥
इदानीं तु भक्तयोगात् पापिनोऽपि व्रजन्ति तत् ।
धाम पापानि निर्धूय रिक्तं याम्यगृहं मम ॥६२॥
इत्यर्थितो हरिः प्राह सत्यं मम तथाऽस्ति तत् ।
मद्भक्तानां संगमाद्वै पापिनोऽपि हि पावनाः ॥६३॥
भवन्त्येव न सन्देहो भूर्वैकुण्ठसमा हि सा ।
किन्तु भक्ताधीन एव भवामि नान्यथा यम ॥६४॥
भक्तस्येच्छाविरुद्धं यन्नाचरामि कदाचन ।
स्वस्ति तेऽस्तु भज मां त्वं मा भक्तिविघ्नमाचर ॥६५॥
यद्वा सत्ये ब्रह्मलोके याहि त्वं परमेष्ठिनम् ।
निवेदय यथार्थं च स ते बुद्धिं प्रदास्यति ॥६६॥
इत्युक्तो यमराजश्च लक्ष्मि ययावजं प्रति ।
ननाम पुपूज यमो न्यवेदयच्च तत्तथा ॥६७॥
श्रुत्वा ब्रह्मा यमं प्राह भक्तो राजा हि वैष्णवः ।
पराभाव्यो न वै स्याद्धि मा यत्नं कुरु तत्र वै ॥६८॥
किन्तु ते चाऽस्ति हृदयं याम्यमार्गे प्रवर्तितुम् ।
कुरु यत्नं तथा धर्म याहीन्द्रं प्रति वै दिवम् ॥६९॥
अर्धासनं महेन्द्रस्य राज्ञे दानाय वेदय ।
एवं कृते सदा राजा स्वर्गे स्थास्यति न क्षितौ ॥७०॥
भक्तिर्मन्दा प्रजायां च भविष्यति ततो यम ।
धर्मो मन्दस्तेन मार्गस्तव पूर्णो भविष्यति ॥७१॥
इत्युक्तः प्रययौ धर्मराजश्चेन्द्रं दिवं प्रति ।
समायान्तं धर्मराजं ददर्श सुरराट् द्रुतम् ॥७२॥
समुत्थाय ददावर्धासनं पप्रच्छ चागमम् ।
धर्मराजोऽब्रवीत् सर्वं ययातेश्चरितं शुभम् ॥७३॥
नहुषस्याऽऽत्मजेनापि ययातिना महीतले ।
वैष्णवेन कृताः सर्वे वैष्णवा धार्मिकाः खलु ॥७४॥
वैकुण्ठतुल्यरूपं वै राजते भूमिमण्डलम् ।
मानवा अमरा जाता जरारोगविवर्जिताः ॥७५॥
अपापाः सत्यशीलाश्च क्रोधादिदोषवर्जिताः ।
भक्तिशीला धर्मपराः समर्चन्ति नरायणम् ॥७६॥
दूर्वा वटा यथा भूमौ विस्तारं यान्ति वंशगाः ।
तथा प्रजा विस्तृताश्च पुत्रपौत्रैः प्रपौत्रकैः ॥७७॥
यममार्गे न चाऽऽयान्ति यान्ति वैकुण्ठमेव ताः ।
कार्यहीनोऽस्मि सञ्जातो व्यापारेण विवर्जितः ॥७८॥
एतज्ज्ञात्वा महेन्द्र त्वं प्रजाया मेऽपि वै हितम् ।
समाचार प्रवाहस्य वेधःसर्गस्य वै गतिम् ॥७९॥

इत्युक्त्वा प्रययौ धर्मराजः स्वस्याऽऽलयं ततः ।
महेन्द्रो मातलिं चाह सारथिं याहि भूतलम् ॥८०॥
नाहुषं नृपतिं भक्तं ययातिं वद मद्वचः ।
अर्धासनं महेन्द्रो वै भवते दास्यते निजम् ॥८१॥
याहि स्वर्गं सुखं भुङ्क्ष्व कल्पान्तं दिवि भूपते ।
वर्षाणां तु सहस्राणि राज्यं भुक्तं त्वया नृप ॥८२॥
स्वर्गं भुङ्क्ष्व पुनः श्रेष्ठं शाश्वतं च ततः पदम् ।
पुत्रास्ते सन्ति चत्वारो रुरुः पुरुः कुरुर्यदुः ॥८३॥
तेभ्यो राज्यं समर्प्यैव विमानेनैहि वै दिवम् ।
इलः पुरूरवा विप्रचितिः शिबिर्मनुस्तथा ॥८४॥
सगरो नहुषस्तेऽपि पिताऽन्ये च नरेश्वराः ।
स्वर्गे तत्र प्रमोदन्ते चायाहि त्वं तथाविधः ॥८५॥
शक्रेण सह मोदस्व स्वर्गधर्मेषु संस्थितः ।
नृपाऽशीतिसहस्राणि वर्षाणि भूतले तव ॥८६॥
दानयज्ञवृषभक्तिभिर्गतानि शुभानि ह ।
पञ्चात्मकशरीरस्य भूमौ त्यागं विधाय वै ॥८७॥
दिव्यं रूपं समगृह्य भुङ्क्ष्व स्वर्गसुखानि तु ।
श्रुत्वोवाच ययातिश्च मातले! शृणु मद्वचः ॥८८॥
येन कायेन संसिद्ध्येत् सुकृतं मुक्तिसाधनम् ।
भक्तिश्च जायते कृष्णे कथं त्याज्यं कलेवरम् ॥८९॥
सत्यधर्मात्मकं पुण्यं येन कायेन मानवः ।
समर्जयति मुक्तिं च तत् कस्मात् संविसर्जयेत् ॥९०॥
आत्मा कायश्च द्वावेतौ मित्ररूपावुभावपि ।
तस्मान्नैव परित्याज्यमात्मना स्वकलेवरम् ॥९१॥
श्रुत्वैतन्मातलिश्चाह राजन् सत्यं तवोदितम् ।
किन्तु कालवशो देहः कर्मपोष्यः स्थितस्त्विह ॥९२॥
भूतपञ्चकरूपश्च पार्थिवस्तु विशेषतः ।
आयुष्यकर्मनाशे वै त्यक्तव्योऽयं प्रसह्य वै ॥९३॥
भवत्येव सदा लोकैः स्थितिरेषा हि विद्यते ।
जराऽस्य जायते पश्चान्नश्यत्येव न संशयः ॥९४॥
तस्मात् त्याज्यस्वभावं वै देहं त्यक्त्वा दिवं व्रज ।
श्रुत्वा प्राह ययातिर्वै मातले सा जरा ननु ॥९५॥
कदोत्पन्ना कथं पीडाकरी वद यथातथम् ।
श्रुत्वा च मातलिः प्राह शृणु राजन् स्वभावजम् ॥९६॥
महाकालो हरेः शक्तिः श्रीपतेः परमात्मनः ।
महाकालस्य मृत्युर्वै पुत्री तस्या जरा सुता ॥९७॥
सा मायाकृततत्त्वेषु समुत्पत्तौ सहस्थिता ।
उत्पन्नान्निर्णीतकालानाविशति क्षयंकरी ॥९८॥
क्षीयते हि प्रधानं वै महत्तत्त्वं विनाशवत् ।
अहंकारः क्षीयतेऽपि मनोऽपि क्षीयतेऽपि च ॥९९॥
वैराजः क्षीयते चापीन्द्रियाणि विषयास्तथा ।
भूतानि चापि क्षीयन्ते भौतिकानि तथा मुहुः ॥१००॥
रसाः पोषणकर्तारः क्षीयन्ते देहसंस्थिताः ।
सरसाः सर्वदेहा वै प्रकाशन्ते प्रपोषिताः ॥१०१॥
रसाः शुक्रस्वरूपा वै रसाधिक्ये तु यौवनम् ।
नारीप्रसंगतो राजन् रसनाशो भवत्यपि ॥१०२॥
नार्या नरप्रसंगेन रसनाशो हि वृद्धता ।
रसो वीर्यं कामनात्म तन्नाशे सर्ववृद्धता ॥१०३॥
शुक्रशोणितयोर्नाशे शून्यदेहः प्रजायते ।
विवर्णो दुःखसन्तप्तो जराव्याप्तस्तदा भवेत् ॥१०४॥
पलितं जायते तेन ज्वरतापः प्रजायते ।
नाशमायान्ति जीर्णास्ते मरणं तत्तथा ध्रुवम् ॥१०५॥
इतिराजन् विचार्यैव देहं त्यक्त्वा दिवं व्रज ।
विमानं चेन्द्रसौभाग्यमानीतं त्वत्कृते मया ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने भगवन्नाममन्त्रभजनेन ययातेर्नृपस्य प्रभावेण सर्वप्रजावैष्णवीत्वादिनिरूपणनामा द्वासप्ततितमोऽध्यायः ॥ ७२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं ययातेरुत्तराणि वै ।
मानवे दिवि वा सत्ये विशेषो नैव वै मृतौ ॥ १ ॥
तस्मादेहं विहायाऽहं गमिष्यामि न वै दिवम् ।
नैव कायो विना प्राणं प्राणा जीवं विना न च ॥ २ ॥
जीवो नात्मानमृते च ह्यात्मा हरिं विना न च ।
एतत्सर्वं विहायाऽत्र स्वर्गो मे नैव रोचते ॥ ३ ॥
येषां प्रसादभावेन सुखमश्नामि भूतले ।
तान् संत्यक्त्वा स्वर्गभोगं भोक्ष्येऽहं नैव सर्वथा ॥ ४ ॥
पश्य मे पुण्यभक्त्याढ्यं कायं विंशतिवर्षवत् ।
अशीतिवर्षजीर्णोऽहं भजे देहं नवं यथा ॥ ५ ॥
नैव ग्लानिर्न मे हानिर्न श्रमो व्याधयो न च ।
वर्धते धर्मभक्तिभ्यां बलवान् काय एव मे ॥ ६ ॥
सर्वामृतमयं दिव्यमोषधं भक्तिसंयुतम् ।
धर्माढ्यं क्रियते चात्र पापव्याधिप्रणाशनम् ॥ ७ ॥
श्रीहरेः कीर्तनेनैव कायो मया हि शोधितः ।
एतद्रसायनं नित्यं पिबामि पाचयामि च ॥ ८ ॥

तेन मे च जरामृत्यू विद्येते नैव तद्बलात्।
ये पिबन्ति महाभक्ताः कृष्णनामरसायनम् ॥ ९॥
तेषां देहो दिव्यरूपो जायते वै यथा मम।
हरेर्ध्यानेन भक्त्या च पूजया सेवया तथा ॥१०॥
सत्येन दानपुण्येन मन्त्रजपेन मातले!।
भक्तिसंस्थापनेनाऽपि कायो मेऽस्ति निरामयः ॥११॥
आशीर्वादैः सतां जातो मायाकालादिनिर्भयः।
हरेः कृपावशादत्र स्वर्गात्स्वर्गं ममाऽस्ति वै ॥१२॥
हरेः पूजोपचारेण भक्त्या ध्यानेन कीर्तनैः।
सत्यदाननियमाद्यैः कायो मे दिव्यतां गतः ॥१३॥
नाऽहं स्वर्गं गमिष्यामि स्वर्गमत्र करोमि वै।
याहि चेन्द्रं यथार्थं वै मयोक्तं सन्निवेदय ॥१४॥
श्रुत्वा च मातलिस्तूर्णं ययाविन्द्रं न्यवेदयत्।
इन्द्रोऽपि चिन्तयित्वैव बलतानां चाऽपरां ततः ॥१५॥
व्यरचयन्नृपं मोहयितुं चाह च मातलिम्।
शृणु त्वं मातले राजा विष्णुभक्तो दृढोऽस्ति वै ॥१६॥
स तु भक्तिं परित्यज्य दिवं नाऽऽयास्यति क्वचित्।
किन्तु सदेह एवासावामन्त्रणीय आदरात् ॥१७॥
विज्ञापनीयो विनयैर्देवाद्यैः सृष्टिनीतितः।
अथ वै मातलिश्चाज्ञां प्राप्य ययौ नृपं प्रति ॥१८॥
राजा चक्रे च सम्मानं मातलिः प्राह वै स्फुटम्।
राजन्निन्द्रो वरुणश्च ममः कुबेरकोऽनलः ॥१९॥
ईशानश्चाप्यनिलश्च निर्ऋतश्च गुरुः कविः।
सर्वे त्वां मानयामुर्निजधिष्ण्याऽर्हमेव च ॥२०॥
सर्वे निवेदयामासुर्लोकहितार्थमेव यत्।
सदेहेनाऽपि वै स्वर्गे देवहितार्थमित्यपि ॥२१॥
आगन्तव्यं त्वया राजन्नित्यामन्त्रणमस्ति नः।
दृष्ट्वा श्रुत्वा यथेष्टं च सम्मिलित्वा सुरादिकान् ॥२२॥
पुनर्गन्तव्यमेवाऽथ भूतले च यथेच्छया।
इत्युक्तः स तु राजर्षिः सम्मान्य दैवतं वचः ॥२३॥
विमानवरमारुह्य ययौ मातलिना दिवम्।
दिक्पालानां सभायां स नृपः सम्मानितः सुरैः ॥२४॥
सुरान्नत्वा निषसाद यथार्हं च ततः परम्।
मैत्रीं साप्तपदीनां च कृत्वा परस्परं ततः ॥२५॥
इन्द्रो जगाद राजानं शृणु राजन् हितावहम्।
लोका वै मायया व्याप्ता मानवा देवतासुराः ॥२६॥
त्वया लोका निर्जिताश्च विष्णुभक्त्या हि भूतले।
नृपे धर्मयुते तस्य प्रजा भवति धार्मिकी ॥२७॥

नृपे भक्ते भक्तियुक्ता दुष्टे दुष्टा भवत्यपि।
भूतलं वैष्णवं धाम त्वया कृतं शुभं खलु ॥२८॥
किन्तु राजन् यममार्गः स्वर्गमार्गोऽपि साऽर्गलः।
इदानीं वर्तते भक्त्या वैकुण्ठं यान्ति मानवाः ॥२९॥
दिक्पालानां च ये लोका निर्जना वै भवन्ति यत्।
ब्रह्मणा च कृतः सृष्टेः प्रवाहोऽपि निरुद्ध्यते ॥३०॥
देवानां चापि पितॄणामाशा लुप्ता भवत्यपि।
वंशविस्तारभावाश्च प्रवर्धन्ते हि वैष्णवाः ॥३१॥
सर्वे यास्यन्ति वैकुण्ठं न स्वर्गं न यमालयम्।
न जनं न तपश्चापि न सत्यं ब्रह्मणो गृहम् ॥३२॥
एवं वै वर्तमाने तु ऋणानुबन्धिता नृप।
लुप्तैव स्यात्ततो राजन् प्रवाहो न यथा क्षयेत् ॥३३॥
तथा विचार्य सर्वेषामानुकूल्यं विधेहि वै।
इच्छामो भवते दातुमप्सरोरत्नमुत्तमम् ॥३४॥
गृहाण भुङ्क्ष्व भूलोके यथा राजा तथा प्रजाः।
भविष्यन्ति ततो मार्गा यमादीनामनर्गलाः ॥३५॥
श्रुत्वा प्राह ययातिर्वै नाऽहं कापथगो नृपः।
कोटिपुण्योत्तरां भक्तिं कृत्वा नारायणप्रियाम् ॥३६॥
निर्मक्ष्यामि न संसारे सर्वथाऽऽलोकिते पुनः।
मम पुण्यं विनश्येच्च भक्तिः स्याद् व्यभिचारिणी ॥३७॥
संसारपारमाप्तस्य पुनर्मे पतनं भवेत्।
विष्णुर्नारायणः कृष्णः कुप्रसन्नो भवेन्मम ॥३८॥
सर्वं कृतं मे व्यर्थं स्यात् तन्नेच्छाम्यप्सरोवराम्।
इत्युक्त्वा मौनमास्थाय स्थितस्तावत् सुरादयः ॥३९॥
सस्मरुर्विष्णुमीशानं ब्रह्माणं तत्र वै द्रुतम्।
प्राययुर्देववर्याश्च पूजिता देवतादिभिः ॥४०॥
निषेदुश्चासनेष्वेव विज्ञापिताः कथां प्रति।
श्रुत्वा विष्णुस्तदा प्राह ययातिं तु निजानुगम् ॥४१॥
राजन् गृहाण देवानां वाक्यं हितं यमस्य च।
गृहाण चाऽप्सरोरत्नं प्रजाते तादृशी तदा ॥४२॥
भविष्यति मोहयुक्ता धर्मादिकार्यवर्जिता।
यमादिसृतयश्चापि भविष्यन्त्यप्यनर्गलाः ॥४३॥
मम वाक्यं गृहाणेदं स्वस्ति ते संभविष्यति।
ब्रह्महरौ तथैवैव प्राहतुस्तं नृपं तदा ॥४४॥
नृपो नत्वाऽर्थयामास बन्धनं पापमेव मे।
भवेत्तस्मात् कृपासिन्धो समुद्धारं कुरु प्रभो ॥४५॥
विष्णुः प्राह न ते बन्धोऽप्सरसा वै भविष्यति।
कर्म सर्वं तव राजन् निर्गुणं वै ममाऽऽज्ञया ॥४६॥

तामसानां राजसानां मोहनार्थं समाचर ।
अप्सरोरत्नमासाद्य कामभोगान् समाचर ॥४७॥
मुक्तिस्ते भविता राजन्नाऽत्र कार्या विचारणा ।
अस्मद्वाक्यं हि वेदोऽस्ति विधिर्धर्मः स एव सः ॥४८॥
अस्मद्वाक्यविधानेन मुक्तिर्मुक्तिः शुभा गतिः ।
अस्मद्वाक्यविरोधेन दुःखं बन्धो ह्यधोगतिः ॥४९॥
इत्युक्तः स तु राजर्षिः स्वीचकाराऽप्सरोवराम् ।
देवताः पूजयामासु राजानं वाक्यवर्तिनम् ॥५०॥
विष्णू रक्षाकरं मन्त्रं ददौ नैजं तु निर्गुणम् ।
'विष्णुप्रयोजितश्चाऽहं करोमि कर्म यद्विधम् ॥५१॥
सर्वं समर्पितं विष्णौ निर्बन्धं विष्णवे स्वाहा' ।
एनं मन्त्रं तदा लब्ध्वा नीत्वा चाऽप्सरसं नृपः ॥५२॥
बिन्दुमतीं चाऽथ नत्वा सुरान् विष्णुं प्रपूज्य च ।
आययौ भूतलं राजा विमानवरमास्थितः ॥५३॥
रेमे सार्कं तया लक्ष्मि मोहमासोऽभवत्ततः ।
चिरेणाऽयं धर्मकर्मभक्त्यादीन् विस्मृतोऽभवत् ॥५४॥
प्रजा वीक्ष्य नृपं तद्वद् धर्मकर्मविवर्जिताः ।
चिरेणाऽप्यभवन् लक्ष्मि यथा राजा तथा प्रजाः ॥५५॥
बिन्दुमती रतिपुत्री चाऽप्सरोगणमध्यगा ।
राजपत्नी हि राजानं मोहे चिक्षेप सर्वदा ॥५६॥
कामभोगैश्च वार्धक्यं ह्यवाप नृप एव सः ।
सतृष्णस्याऽन्तिकाद् बिन्दुमती चाऽदृश्यतां ययौ ॥५७॥
राजा शोकं चकाराऽस्याः कृते चापि दिवानिशम् ।
अथ सा ददृशे रात्रौ राजानं प्रति भावुकी ॥५८॥
वृद्धस्त्वं दृश्यसे राजन् नैव योग्योऽसि मत्कृते ।
यौवनं प्राप्य वर्तेथास्त्वां सेविष्ये तदा नृप ॥५९॥
राजा कामातुरः पुत्रानाहूय वाक्यमाह तत् ।
तुरुं यदुं कुरुं पुरुं स्पष्टमाह नृपस्तदा ॥६०॥
एकोऽपि गृह्यतां पुत्रा जरा मेऽशक्तिकारिणी ।
धीरो भूत्वा ततो नैजं तारुण्यं मम दीयताम् ॥६१॥
मानसं मेऽतिसन्तप्तं स्त्र्यासक्तं बहुचञ्चलम् ।
जरायाश्चोपग्रहणं करिष्यति सुतस्तु यः ॥६२॥
स भुनक्ति तु मे राज्यं भुवं सन्धारयिष्यति ।
विपुला सन्ततिस्तस्य यशः कीर्तिर्भविष्यति ॥६३॥
श्रुत्वा पुत्रास्तमूचुर्वै भवान् धर्मपरो नृप ।
कस्मात्ते चाऽप्सरोयोगादीदृशी भावनाऽधमा ॥६४॥
ययातिः प्राह मोहान्मे भावना चेदृशी सुताः ।
अवश्यंभाविनो भावा भवन्ति प्रकृतेर्वशाः ॥६५॥
एवं ज्ञात्वा प्रकर्तव्यं यत्सुखं मम पुत्रकाः ।
तुरुः प्राह शरीरं प्राप्यते पितृप्रसादतः ॥६६॥
धर्मः सेवा च शुश्रूषा पित्रोस्तेनैव जायते ।
तेन विषयभोगश्च जायते च युना सदा ॥६७॥
सोऽयं मे दानकालो न न दास्ये यौवनं हि ते ।
भवान् वृद्धत्वमापन्नो योग्योऽयं समयस्तथा ॥६८॥
श्रुत्वा राजा शशापैनं तरुं ज्येष्ठं सुतं तदा ।
अपध्वस्तस्त्वयाऽऽदेशो ममैवं पापचेतन ॥६९॥
तस्मात् पापी भव त्वं वै सर्वधर्मबहिष्कृतः ।
वेदाचारविहीनश्च ब्रह्मघ्नो मद्यपो भव ॥७०॥
सर्वभक्षश्च दुर्मेधा म्लेच्छाचारो भविष्यसि ।
पुत्राः पौत्राः प्रपौत्राद्यास्तादृशास्ते भवन्त्विति ॥७१॥
एवं शप्त्वा तुरुं चापि निष्कास्य राज्यमण्डलात् ।
यदुं प्राह प्रदेहि मे यौवनं भुंक्ष्व राष्ट्रकम् ॥७२॥
यदुः प्राह न शक्नोमि दातुं ते यौवनं नृप ।
जराया हेतवः पञ्च चिन्ता वृद्धस्त्रियस्तथा ॥७३॥
कदन्नं नित्यमध्वा च शीतजाठरपीडनम् ।
सा जरा रोचते मे न भोगकालो ह्ययं मम ॥७४॥
श्रुत्वा राजा शशापैनं राज्यहीनः सवंशजः ।
तेजोहीनः क्षत्रधर्मवर्जितः पशुपालकः ॥७५॥
भविष्यसि न सन्देहो याहि राज्याद् बहिर्मम ।
इत्युक्त्वा च कुरुं प्राह शर्मिष्ठाबालकं नृपः ॥७६॥
देहि मे यौवनं पुत्र गृहाण त्वं जरां मम ।
कुरुः प्राह करिष्यामि भजनं श्रीहरेः सदा ॥७७॥
कः पिता कोऽत्र वै माता सर्वे स्वार्थपरा भुवि ।
न कांक्षे तव राज्यं वै न दास्ये यौवनं मम ॥७८॥
इत्युक्त्वा पितरं नत्वा हिमालयवनं ययौ ।
तत्र तेपे तपश्चापि वैष्णवो धर्मभक्तिमान् ॥७९॥
कृषिं चकार धर्मात्मा सप्तक्रोशमितक्षितेः ।
हलेन कर्षयामास महिषेण वृषेण च ॥८०॥
आतिथ्यं सर्वदा चक्रे नूतनधान्यादिभिः सदा ।
विष्णुर्विप्रस्वरूपेण ययौ कुरोः कृषिं प्रति ॥८१॥
आतिथ्यं च गृहीत्वैव मोक्षपदं ददौ ततः ।
कुरुक्षेत्रं च तन्नाम्ना कृतं नारायणेन ह ॥८२॥
सर्वमोक्षकरं रम्यं पापतापप्रणाशकम् ।
अथ राजा पुरुं प्राह देहि मे यौवनं सुत ॥८३॥
भुंक्ष्व राज्यं मया दत्तं सुपुण्यं हतकण्टकम् ।
पुरुर्नत्वाऽऽह राज्यं वै भोक्तव्यं दैवयोगतः ॥८४॥

जरां देहि गृहाणाऽपि यौवनं मे पितर्द्रुतम् ।
तृप्तिं याहि महाराज यथेष्टां यौवनेन मे ॥८५॥
तवैव यौवनं त्वेतत् तवैवांऽशोऽहमस्मि च ।
स्वत्वं तवैव मय्यास्ते गृहाण यौवनं मम ॥८६॥
इत्युक्त्वा जलमादाय ददौ हस्ते पितुर्जलम् ।
यौवनं ताम्रवर्णं वै तूर्णं देहाद् व्यपासरत् ॥८७॥
प्रविवेश ययातेस्तु शरीरे स च वै युवा ।
बभूव च जरा प्राप्ता पुरुं पुत्रं पिशाचिनी ॥८८॥
पुरुमाह ततो राजा प्रसन्नवदनेक्षणः ।
मम राज्यं प्रभुंक्ष्व त्वं मया दत्तं महामते ॥८९॥
यौवनं तेऽपि चाऽद्यैव पुनर्भवतु मेऽपि च ।
विष्णोः प्रसादतः पुत्र जराव्यपगमस्तव ॥९०॥
आवयोर्यौवनं नित्यं विष्णुभक्तिप्रभावतः ।
सर्वदाऽस्तु जगादैवं पुत्रो युवा बभूव ह ॥९१॥
ययातिश्च युवा जातः पश्य लक्ष्मि बलं मम ।
पितृभक्तिबलं चापि चाऽप्सरःसंगमं तथा ॥९२॥
सर्वमेतत् फलदं वै स्वानुरूपं क्षितौ मतम् ।
पुरुः राज्यं चकाराऽपि ययातिर्भोगमाप्तवान् ॥९३॥
धनूराज्यं च छत्रं च गजमश्वं धनं धराम् ।
कोशं वेशं बलं सर्वं चामरं व्यजनं गृहम् ॥९४॥
ददौ राजा हि पुरवे बिन्दुमतीपतिस्तदा ।
ययावुद्यानभागं चोवासैकान्ते तया सह ॥९५॥
अथ बिन्दुमती प्राह शृणु त्वद्दूषणं नृप ।
शर्मिष्ठा देवयानी च तव भार्ये ह्युभे ह्यपि ॥९६॥
अन्याश्च राजकन्यास्ते भार्याशतं भवत्यपि ।
सापत्नकेन भावेन भवान् भर्ता प्रतिष्ठितः ॥९७॥
ससर्पोऽसि महाराज चन्दनस्य द्रुमो यथा ।
वरमग्निप्रवेशं च शिखरात्पतनं वरम् ॥९८॥
तं वरं नैव पश्यामि सपत्नीविषसंयुतम् ।
अहं राजन् प्रभोक्त्री स्यां तव कायस्य भूपते ॥९९॥
इत्यर्थे प्रत्ययं देहि मम वै स्वकरं नृप ।
यत्र क्वापि निवासेन नाऽत्र सपत्निकागृहे ॥१००॥
राजा ददौ प्रत्ययं च ततो वनादिषु स्वयम् ।
ययौ सार्धं बिन्दुमत्या पर्वतेषु दिगन्तरे ॥१०१॥
वै विंशतिसहस्राणि वर्षाण्यस्य गतानि हि ।
अथाऽप्सरोऽभवद् गर्भवती चैच्छद् दिवं प्रति ॥१०२॥
गन्तुमिन्द्रगृहं कामगृहं पितुर्निवेशनम् ।
राजानं चापि नेतुं सा महाग्रहं चकार ह ॥१०३॥
देवानां दर्शनं राजन् करिष्यसि दिवं व्रज ।
इत्युक्तः स तु राजर्षिः शुशोच वै क्षणं हृदि ॥१०४॥
सर्वं कालेन भवति कालोऽयं मे ह्युपागतः ।
पृथ्व्यास्त्यागे वचनं मे सत्यं कार्यं भवेदतः ॥१०५॥
एवं विचार्य च पुरुं जरायुक्तं सुतं नृपः ।
आहूय निजतारुण्यं ददौ जग्राह वै जराम् ॥१०६॥
राज्यार्थं च समादिश्य भक्तिमादिश्य वैष्णवीम् ।
प्रजाभ्यश्च स्वजनेभ्यश्चाशीर्दत्वा ययौ दिवम् ॥१०७॥
भक्तिमत्यः प्रजा नारायणं स्मृत्वा च तत्पराः ।
अभवन् सह गन्तुं वै नारायणपरायणाः ॥१०८॥
दिव्यदेहोऽभवद् राजा प्रजा दिव्याश्च कोटिशः ।
अब्जखर्वसहस्राणि जनास्ते परिजग्मिरे ॥१०९॥
स्वर्गं गत्वा च तत्रैव बिन्दुमतीं रतिगृहे ।
निधाय वैष्णवैः साकं विष्णुना चाऽनुमोदितः ॥११०॥
ययातिः प्रययौ विष्णोर्वैकुण्ठं वैष्णवैः सह ।
ब्रह्मलोकं ययुः सर्वे पूजिताश्चाऽमरादिभिः ॥१११॥
एवं भक्तिप्रभावोऽस्ति लक्ष्मि निर्बन्धकृत् सदा ।
अहं नयामि वैकुण्ठं गोलोकं चाऽक्षरं परम् ॥११२॥
भक्तं कर्मसु मग्नं वै निर्बन्धं प्रकरोमि च ।
राजा वैकुण्ठमासाद्य नेमे वराय योजितः ॥११३॥
ययाचे सर्वथा दास्यं मया दत्तं हि शाश्वतम् ।
दिक्पालानामभूत् कार्यं प्रजाप्रवाह इत्यपि ॥११४॥
पठनाच्छ्रवणादस्य स्मरणाच्च विचिन्तनात् ।
धर्मो ज्ञानं विरागश्च भक्तिर्मोक्षो भवन्त्यपि ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ययातेः स्वर्गतः पृथिव्यामधिकभक्त्यादिलाभ इति तस्य पृथिव्यास्त्यागार्थमिन्द्रकृतबिन्दुमत्याः प्रदानं पुत्रतो यौवनप्राप्तिश्चान्ते वैकुण्ठगमनं चेत्यादिभक्तिप्रभाववर्णननामा त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं माहात्म्यं चाधिकं मम ।
भुक्तिमुक्तिप्रदं चापि नैर्गुण्यदिव्यताप्रदम् ॥ १ ॥
केन मे तु भवेत् प्रीतिः कथं तुष्टो भवामि च ।
तुष्टेन च मया तूर्णं दिव्यो विधीयतेऽनुगः ॥ २ ॥
कथयामि समासेन शृणु त्वं परमेश्वरि ।
प्रजानां रक्षणं येन कृतं सेवा कृता यया ॥ ३ ॥

सतां च पूजनं येन कृतं मे पूजनादिकम् ।
मोक्षश्चोद्घाटितो येन ज्ञानोपदेशकीर्तनैः ॥ ४ ॥
तेषां तुष्यामि कमले साधूनां मण्डलेऽस्मि च ।
साधूनां तोषणाल्लक्ष्मि तुष्याम्यहं सदा प्रिये ॥ ५ ॥
सज्जनानां परिवादो मम विद्वेषणं महत् ।
सज्जनानां पूजनेन पूजितोऽहं न संशयः ॥ ६ ॥
नित्यमिवाद्याः सन्तश्च भोजनीया निरन्तरम् ।
सेवनीयाः साधवस्ते प्रतिमा मम मूर्तयः ॥ ७ ॥
तेषां तुष्यामि भक्तानां सत्सेवां ये प्रचक्रिरे ।
न तेषामशुभं किञ्चित्कल्मषं चापि विद्यते ॥ ८ ॥
साधुं साध्वीं सतीं देवं पूजयेन्नित्यमुत्सुकः ।
पूजितं हि जगत्तेन सदेवाऽऽसुरमानुषम् ॥ ९ ॥
तेन रूपेण पूजां वै गृह्णाम्यहं सदा प्रभुः ।
पूजा ममैषा न त्वन्या सत्सु साध्वीष्वहं स्थितः॥१०॥
यत्र प्रतिष्ठा मे चास्ते तान् विहायेतरं वृथा ।
साभिमाना जना वेगात् पूजयन्त्यज्ञसत्तमाः ॥११॥
नाऽहं तत्प्रतिगृह्णामि न सा तुष्टिकरी मम ।
मम सम्बन्धमाप्ता ये तेषां पूजा गरीयसी ॥१२॥
चक्रं मे पूजनीयं वै पादौ पूज्यौ सदा मम ।
वाराहाद्यवतारा मे पूजनीयाश्च साधवः ॥१३॥
चक्रेण निहता दैत्याः पद्भ्यां क्रान्ता वसुन्धरा ।
वाराहाद्यवतारैश्च ह्यसुरा विनिपातिताः ॥१४॥
साधुरूपैर्जनानां च मोक्षदानं ददाम्यपि ।
साध्वी धर्मवती नारी भक्तशक्तिर्निगद्यते ॥१५॥
तथा धर्मो रक्ष्यते मे पिता जन्म वहाम्यहम् ।
माता साध्वी सदा बोध्या भक्तिरूपा न संशयः ॥१६॥
दासी लक्ष्मीस्वरूपा च सर्वदा मम धारिणी ।
परितुष्टो भवाम्येषां पूजनात् सर्वतोऽधिकः ॥१७॥
तेषु मां पूजयिष्यन्ति नास्ति तेषां पराभवः ।
अपि साधुं सतीं दृष्ट्वा ब्रह्मचारिणमागतम् ॥१८॥
नत्वा दत्वाऽऽहुतिं भुञ्ज्यादमृतं तद्धि भोजनम् ।
साध्वीं सन्ध्यामुपासित्वा साध्वादित्यं नमेत्ततः ॥१९॥
सर्वतीर्थेषु स स्नातो मुच्यते सर्वकिल्बिषैः ।
साधुरूपं धर्मदेवं पालयेत् स्वगृहे सदा ॥२०॥
सत्संगं धर्ममेवाऽऽप्य पालयेद् भक्तराट् मम ।
सतां प्रसन्नता मे च येन धर्मः स वै मतः ॥२१॥
सतामुद्वेगजननं ह्यधर्मः स तु मे मतः ।
मम भक्ता न तुष्यन्ति येन तेन नु किं हि मे ॥२२॥
येन तुष्यन्ति मे सन्तस्तदेव मम सद्धनम् ।
कल्ये ह्युत्थाय सततं स्प्रष्टव्याः साधवो मम ॥२३॥
गावो घृतं दधि चाहं सर्षपाः साधिकास्तथा ।
स्प्रष्टव्याः प्रातरुत्थाय येन कल्मषनाशनम् ॥२४॥
स्त्रीघ्ना गोघ्नाः कृतघ्नाश्च ब्रह्मघ्ना गुरुतल्पगाः ।
शुद्ध्यन्ति साधुसंस्पर्शात् साधोश्च सेवनान्मम ॥२५॥
सन्तो गावोऽनलाः साध्व्यः स्प्रष्टव्या न पदा द्विजाः ।
पादेन स्पर्शने पुण्यं स्प्रष्टुः सर्वं विनश्यति ॥२६॥
परमान्नं प्रदातव्यं भोजने तेभ्य उत्तमम् ।
मिष्टान्नं च प्रदातव्यं शाश्वतीतृप्तिदं शुभम् ॥२७॥
आतिथ्यं सततं कुर्याद् दीपं दद्यात् सतां गृहे ।
सतो वन्देत् प्रसेवेत ह्येषः श्रेष्ठतमो वृषः ॥२८॥
अपि क्रतुशतैरिष्ट्वा क्षयं गच्छति तद्धविः ।
न तु नश्यन्ति ते धर्माः साधवो यैः प्रतोषिताः ॥२९॥
यो यजेताऽश्वमेधेन वाजपेयशतेन च ।
अवाक्शिराऽवलम्बेत सत्रं कुर्यान्निरन्तरम् ॥३०॥
न यस्य हृदयं शुद्धं साधवो मे न सेविताः ।
मम सेवा कृता नैव मायानिरयगो हि सः ॥३१॥
साधुसेवा शुद्धता च हृदयस्य हि मोक्षदे ।
शुद्धेन मनसा कृत्वा स्वल्पमपि प्रमुच्यते ॥३२॥
श्रद्धानेन कर्तव्यं गुरूणां वचनं सदा ।
सतां सेवा प्रकर्तव्या तेजस्वी तेन जायते ॥३३॥
अहन्यहनि यो दद्यात् कपिलां द्वादशीः समाः ।
मासि मासि च सत्रेण यो यजेत सदा जनः ॥३४॥
गवां शतसहस्रं च यो दद्याज्ज्येष्ठपुष्करे ।
ततोऽधिकं फलं तस्य तुष्यन्ति यस्य साधवः ॥३५॥
श्रूयन्ते यानि तीर्थानि जलस्थलमयानि वै ।
सिद्धदेवादिजुष्टानि सेवितानि महर्षिभिः ॥३६॥
अभिषेकः समस्तेषां साधुचरणवारिभिः ।
अल्पं शीतं जलं दत्तं साधवेऽन्नं समर्पितम् ॥३७॥
दातुः पुण्योदका नाम नदी प्रेते विधीयते ।
अक्षयं सलिलं तत्र शीतलं ह्यमृतं भवेत् ॥३८॥
अन्नं तथाऽमृतं तत्र पद्यते परलोकिनः ।
अन्यच्चापि प्रदत्तं तत्परलोकेऽभिपद्यते ॥३९॥
लोके ह्युच्छिष्टकाः प्रायो बहुच्छिद्रा हि मानवाः ।
त्यक्तशीलसमाचारान् प्रविशन्ति पिशाचकाः ॥४०॥
मानवा ये सतां सेवापरायणाः शुभाश्रयाः ।
तान् पिशाचा नाऽऽविशन्ति भक्तान् पुण्यकृतान्नरान् ॥४१॥

साधुजनो यत्र यत्र भुनक्ति देवतार्पितम् ।
साध्या रुद्रास्तथाऽऽदित्या विश्वेदेवास्तथाऽश्विनौ ॥४२॥
मरुतो वसवश्चापि प्रतिभुञ्जन्ति तद्गताः ।
ऋषीणां देवतानां च पितॄणां मे हरेस्तथा ॥४३॥
मुक्तानामीश्वराणां च प्रसादाल्लय एव सः ।
यो भवेत् साधुसाध्वीनां सेवाकृत् तोषकृत्तथा ॥४४॥
कृत्वाऽपि पापकं कर्म मत्साधुशरणं गतः ।
मुच्यते पापकोटिभ्यः पूतो भवति पावकः ॥४५॥
पापिनः पावयेत् साधुर्मम सेवाजितात्मवान् ।
मम संगं सदा कुर्यात् पापिसंगं विवर्जयेत् ॥४६॥
ब्रह्मदृष्ट्याऽर्पयेद् दानं साधुदृष्ट्याऽर्पयेत्तथा ।
हरिदृष्ट्याऽर्पयेल्लक्ष्मि तद्दानं शाश्वतं भवेत् ॥४७॥
अन्नदानं वारिदानं ज्ञानदानं शुभं परम् ।
अभीदानं ब्रह्मदानं मोक्षदानं परात्परम् ॥४८॥
आत्मदानं सदा देयं तत्समं नेतरद् भुवि ।
दत्तात्रेयो हरिः साधुः शिष्येभ्यो ब्रह्मनिर्गुणम् ॥४९॥
दाने दत्त्वा ययौ धामाऽक्षरतुल्यं स्वकैः सह ।
कपिलश्च तथा साधुर्हरिर्दत्त्वा विवेकजम् ॥५०॥
ज्ञानं मोक्षं च शिष्येभ्यो ययौ धाम निजं परम् ।
ऋषभोऽपि समादिश्य शिष्येभ्यो ब्रह्म शाश्वतम् ॥५१॥
हरिः सोऽपि ययौ धाम निजं सर्वसुखास्पदम् ।
एवमन्येऽपि सन्तश्च ययुर्दानपरायणाः ॥५२॥
ब्रह्मदानप्रदानेन शाश्वतं चाऽक्षरं पदम् ।
साधुव्रताश्च राजानो ब्रह्मभावं विलोक्य च ॥५३॥
अदेयमपि दत्त्वैव ब्राह्मणे स्वर्गिणोऽभवन् ।
शिबिरौशीनरः प्राणान् प्रियस्य तनयस्य च ॥५४॥
ब्रह्मिष्ठार्थमुपाकृत्य महत्स्वर्गमितो गतः ।
प्रतर्दनः काशिकेशः प्रदाय तनु वै निजम् ॥५५॥
ब्रह्मिष्ठायाऽतुलां कीर्तिं लब्ध्वा मोक्षपदं गतः ।
रन्तिदेवश्च सांकृत्यो वसिष्ठाय महात्मने ॥५६॥
अर्घ्यं पूजां प्रदायैव ययौ मोक्षपदं शुभम् ।
देवावृधो ययौ धाम दत्त्वा छत्रं च काञ्चनम् ॥५७॥
ब्रह्मिष्ठाय महायज्ञे शतशलाकमुत्तमम् ।
अम्बरीषोऽपि राष्ट्रं वै दत्त्वा सर्वं प्रभोः कृते ॥५८॥
ब्रह्मलोकं ययौ भक्त्या महाभागवतः शुभः ।
वृषादर्भिश्च सर्वस्वं दत्त्वा धाम ययौ मम ॥५९॥
निमि राष्ट्रं हरये मे दत्त्वा धाम ययौ मम ।
कन्यां दत्वा ह्यगस्त्याय वैदर्भिर्मोक्षमासवान् ॥६०॥
पर्शुरामः क्षितिं दत्त्वा विप्रेभ्यस्तीर्थमावसत् ।
वामनोऽपि क्षितिं दत्त्वा विप्रेभ्यश्च ततः परम् ॥६१॥
स्वर्गं दत्त्वा हि देवेभ्यो ययौ धाम निजं हरिः ।
रामादित्योऽपि विप्रेभ्यः क्षितिं दत्त्वाऽक्षरं ययौ ॥६२॥
कन्यामांगिरसे दत्त्वा मरुत्तोऽप्यक्षरं ययौ ।
मित्रसहो वसिष्ठाय भार्यां दत्त्वा दिवं ययौ ॥६३॥
सहस्रचित्यो राजर्षिः प्राणान् दत्त्वा दिवं ययौ ।
शतद्युम्नः क्षितिं दत्त्वा मौद्गल्याय दिवं ययौ ॥६४॥
शाण्डिल्याय क्षितिं दत्त्वा सुमन्युर्धाम मे ययौ ।
द्युतिमान् पृथिवीं दत्त्वा ऋचीकायाऽक्षरं ययौ ॥६५॥
मदिराश्वः सुतां दत्त्वा हिरण्यायाऽक्षरं ययौ ।
शान्तां दत्वा लोमपादः ऋष्यशृंगाय स्वर्ययौ ॥६६॥
भगीरथः सुतां हंसीं दत्वा कौत्साय स्वर्ययौ ।
पृथ्व्यामन्ये भविष्यन्ति राजानो दानयोगिनः ॥६७॥
साधुभ्यो दानमर्प्यैव यास्यन्ति परमं पदम् ।
लक्ष्मि सखीस्तव सर्वा दत्त्वा मह्यं प्रजेश्वराः ॥६८॥
याता यास्यन्ति मद्धाम नारायणपरायणाः ।
मत्साधूनां सेवका ये सेविका धर्मसंयुताः ॥६९॥
भक्तियुता भावयुतास्तादात्म्येन स्थिता मयि ।
नरा नार्यः प्रयास्यन्ति मम धामाऽक्षरं परम् ॥७०॥
धर्मादर्थाद्भयात्कामात्कारुण्यात्साधवे सदा ।
देयं स्वल्पं च बहु वा तद्धि मोक्षाय कल्प्यते ॥७१॥
धर्मार्थं स्वर्गलोकार्थं दातव्यं सुखकीर्तये ।
पुनश्चास्माच्च लब्धव्यं भविष्यतीति तत्फलम् ॥७२॥
एवमर्थार्थिना देयं साधवेऽनन्तसत्फलम् ।
विपत्काले भये प्राप्ते नाशे प्राप्ते च वस्तुनः ॥७३॥
दातव्यं वस्तु सर्वस्वं साधवे चाऽफलेच्छुना ।
प्रियतार्थं प्रदातव्यं सकामं साधुमूर्तये ॥७४॥
दीनाय च दरिद्राय दातव्यं करुणान्वितम् ।
साधवे मम भक्ताय विप्रायापि शुभं शुभम् ॥७५॥
हरेः प्रसन्नतार्थं च दातव्यं मोक्षदं हि तत् ।
कर्तव्यं मम चैतद्वै विचार्येत्थं समर्पयेत् ॥७६॥
साधवे निर्गुणं चैतन्नारायणाय मेऽपि च ।
दद्यान्नारायणस्येदं नेदं ममेति निर्गुणम् ॥७७॥
अनन्तफलदं तद्वै महानन्दप्रदं भवेत् ।
धाम्नि मे तत्फलं दास्ये ददामि भूतलेऽपि च ॥७८॥
दात्रे ददामि चाऽसंख्यानन्दवार्धिं परेऽक्षरे ।
एवं लक्ष्मि सतां सेवाकर्तुर्मे परमं पदम् ॥७९॥

शाश्वतं चाऽऽयतौ चास्ति ममैश्वर्यादिसंभृतम् ।
स्वल्पं बहुतमं कृत्वा ददाम्यक्षरधामनि ॥८०॥

श्रीनारायणीश्रीरुवाच—

कीदृक् स्वल्पस्य दत्तस्य फलं ददासि दर्शय ।
कृपया मे हरे कृष्ण परेश्वर कृपां कुरु ॥८१॥

श्रीपुरुषोत्तम उवाच—

पश्य लक्ष्मि समायान्तं विप्रं भक्तं ममाऽन्तिकम् ।
स्वल्पदानेन तस्मै वै दास्याम्यहं ह्यनन्तकम् ॥८२॥
इत्युक्ते दीनवद् विप्रो नाम्ना परशुचन्द्रकः ।
कदर्यो गृहसर्वस्वं समादाय समाययौ ॥८३॥
पत्नीपुत्रविहीनो वै कृष्णनारायणं जपन् ।
स्कन्धे कोष्ठलिकां स्थालीकलशस्रुक्समन्विताम् ॥८४॥
वहन् कट्यां नीर्णवस्त्रं बद्ध्वा यष्टिं करे दधन् ।
तन्दुलान् प्रस्थमानांश्च धौत्रं प्रावरणं तथा ॥८५॥
शिरस्त्राणं दधन् मूर्ध्नि ह्येतावन्मात्रसम्पदा ।
युतो नारायण कृष्ण पुरुषोत्तममाधव ॥८६॥
गृणन् चाग्रे वस्तुजातं धृत्वा च पादयोस्तदा ।
रक्ष शरण्य कृष्ण त्वं मोक्षं देहि पदे तव ॥८७॥
इत्ययाचत तन्दुलान् ददौ च भर्जितान् हि तान् ।
चकार दण्डवत्तत्र लुलोठ प्राऽऽप्यं मस्तकम् ॥८८॥
नेत्रे प्रमील्य च क्षणं सुष्वाप भूतले पुरः ।
अनादिश्रीकृष्णनारायणोऽहं भक्तवत्सलः ॥८९॥
किंकरोम्यस्य भक्तस्य शरणागतरक्षकः ।
वद लक्ष्मि ! मृतश्चाऽयं प्राणान् त्यजति सन्निधौ ॥९०॥
इत्युक्त्वा तण्डुलान् स्वल्पान् मुखे क्षिप्त्वा ह्यमक्षयम् ।
पश्यैतस्य फलं चाऽस्मै ददामि धाम चाऽक्षरम् ॥९१॥
तावत्तत्र समायातं विमानं पार्षदान्वितम् ।
आरुरोह स विप्रोऽपि दिव्यदेहः कृपान्वितः ॥९२॥
विमानं व्योममार्गेण स्मृद्धं धामाऽक्षरं ययौ ।
पश्य लक्ष्मि मम धाम्नि प्रासादोऽस्य कृते मया ॥९३॥
कलतः स्मृद्धियुतो भक्ष्यभोज्यपेयादिकाऽन्वितः ।
दिव्यदृष्ट्या पश्य सर्वं स्मृद्धं फलं मयाऽर्पितम् ॥९४॥
कामगं च विमानं वै तस्याऽर्थे चार्पितं मया ।
ब्रह्माऽमृतं तथाऽनन्तं चार्पितं तान्दुलं फलम् ॥९५॥
पेयं सर्वविधं चापि स्वर्णाम्बराणि वै तथा ।
शरणागतभक्तस्य भोग्यार्थं चार्पितानि वै ॥९६॥
अथाऽऽलोक्य प्रसन्ना श्रीर्लक्ष्मीर्मुमोद चान्तरे ।
विप्रदेहः सरस्येव कृष्णेच्छया ममज्ज ह ॥९७॥
स्वयं गतियुतो भूत्वा विलयं तत्र वै गतः ।
महाश्चर्यं च सर्वाभ्यो लक्ष्मीश्चोक्तवती त्विदम् ॥९८॥
सर्वा ब्रह्मप्रियाद्याश्चालोकयामासुरेव तम् ।
दिव्यदृष्ट्या महिमानं कृष्णनारायणस्य मे ॥९९॥
पश्यैवं महिमा मेऽस्ति सर्वस्याऽपि महत्फलम् ।
पठतां शृण्वतां चापि तथैव फलमुत्तमम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्तानेऽनादिश्रीकृष्णनारायणभक्तस्य महिमकथने हरेस्तुष्टिसाधनानां वर्णनं, कदर्यस्य परशुचन्द्रकस्य विप्रस्याऽल्पदानस्याऽनन्तफलप्राप्तिश्चेत्यादिनिरूपणनामा चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

श्रीनारायणीश्रीरुवाच—

दृष्ट्वा कृष्ण महाश्चर्यं निर्वृत्ताऽस्मि च वै तथा ।
भूयोऽपि तव माहात्म्यं वद मे च प्रदर्शय ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

पश्य लक्ष्मि महाश्चर्यं मुखान्मेऽग्निरजायत ।
इत्युक्ते वह्निरुत्पन्नो व्याप्नोत् पार्श्ववनेऽभितः ॥ २ ॥
ज्वालामालासमाकुलोऽदहद् व्याघ्रवनं क्षणात् ।
सद्रुमं सतृणं विरुल्लतासस्यादिसंयुतम् ॥ ३ ॥
सपक्षिगणसंघातं सश्वापदसरीसृपम् ।
एव वह्निर्महाज्वालो दग्ध्वा वनमशेषतः ॥ ४ ॥
हरेः पुरो मूर्तिमान् स चाययौ शिष्यवत्तदा ।
अनमत्पादयोश्चापि तिरोबभूव वै हरौ ॥ ५ ॥
अथ वनं सर्वथैव दग्धं दृष्ट्वा हरिस्त्वहम् ।
सौम्यैर्दृष्टिनिपातैस्तत् पुनः प्रकृतिमानयम् ॥ ६ ॥
तथैव तद्वनं भूयः प्रपुष्पितलताद्रुतम् ।
सपक्षिगणसंघुष्टं सश्वापदसरीसृपम् ॥ ७ ॥
अभवत् पश्य लक्ष्मि त्वं यथापूर्वं यथास्थितम् ।
दृष्ट्वाऽऽश्चर्यं च पप्रच्छ कान्तं लक्ष्मीर्नरायणम् ॥ ८ ॥
कोऽयमग्निः कथं कृष्ण वर्तते त्वयि सर्वदा ।
श्रुत्वा नारायणः प्राह शृणु तेजो हि मामकम् ॥ ९ ॥
बहुधा वर्तते मूर्तौ संकर्षणात्मकं हि तत् ।
तथा रुद्रात्मकं चापि शंकरात्मकमित्यपि ॥१०॥

सर्वसंहारकृत् तद्वै महाकालस्वरूपवत् ।
सर्वं चैश्वर्यरूपं मे वर्तते मयि सर्वदा ॥११॥
यदा यदा प्रलयाश्च भवन्ति लोकिनां तदा ।
ऐश्वर्यं तदिदं मे वै प्रवर्ततेऽति सृष्टिषु ॥१२॥
संहरामि समग्रं वै तेनैव साधनेन तत् ।
सृजामि च पुनः शक्त्या यथावत्कल्पनाकृतम् ॥१३॥
सृष्ट्यैश्वर्यं च तन्मेऽस्ति यथा सृष्टं वनं पुनः ।
भवत्यो ब्रह्मरूपिण्यः सृष्टा मया ममांऽशतः ॥१४॥
एतज्जगत् समग्रं वै सृष्टं तथा मयांऽशतः ।
मम चर्यापरीतस्य मे साधूनां प्रसेवया ॥१५॥
कालात्माऽग्निर्न दहति मे संकीर्तनकारिणः ।
पश्यैनं लोमशं त्यक्त्वा त्यक्त्वा तदाश्रमं तथा ॥१६॥
ऋषीणामाश्रमाँस्त्यक्त्वा व्याप्नोद् वह्निर्न चाश्रमान् ।
एवं मे भक्तभक्तानामनिष्टं कर्तुमक्षमः ॥१७॥
ये मां भजन्ति मनुजास्तेषां कालो न विद्यते ।
माया न विद्यते तेषामुद्वेगो नापि विद्यते ॥१८॥
त्रेधा तापा न वै तेषां दुःखं तेषां न विद्यते ।
तेषां कष्टमहं सर्वं भक्षयामि न संशयः १९॥
कालकालोऽहमेवाऽस्मि जीवयामि ममाऽऽश्रितान् ।
कालमाज्ञापयाम्येव भोगान् भक्तस्य शाश्वतान् ॥२०॥
मा संहर कदाचित् त्वं मा जरां प्रापय क्वचित् ।
इत्येवं मम भक्तानां तिष्ठामि रक्षणे सदा ॥२१॥
इत्येतद् दर्शितं लक्ष्मि सामर्थ्यं मम गौरवम् ।
महिमा मम भक्तेश्च दर्शितस्ते महाबलः ॥२२॥
अहिंसा सत्यवचनं सर्वभूताऽनुकम्पनम् ।
व्रतं दानं च शान्तिश्च धर्मा वै भक्तिसंश्रिताः ॥२३॥
उपवासोऽपि वै भक्त्या गतार्थो भवति ध्रुवम् ।
ब्रह्मचर्यं च भक्त्यैव गतार्थं मयि जायते ॥२४॥
वेदव्रतं चाऽग्निकार्यं गुरुकार्यप्रसाधनम् ।
स्वाध्यायश्चेति धर्माः स्युर्गतार्था भक्तिकारिणः ॥२५॥
अतिथिव्रतता चापि प्रसादभोजनं च मे ।
भुक्ते परिजने पश्चाद् भोजनं समशीलता ॥२६॥
दम्पत्योरेव गृहिणोः सुरेभ्योऽन्ननिवेदनम् ।
सतां सेवाऽनिशं चाऽपि गतार्था भक्तिकारिणः ॥२७॥
पालनं दानमुद्योगो यज्ञश्च भरणं तथा ।
पितृसेवा स्वामिसेवा गतार्था भक्तिकारिणः ॥२८॥
गवादेः पालनं चाऽग्निहोत्रं सत्पथवर्तनम् ।
त्यागो दमः स्वागतं च गतार्था भक्तिकारिणः ॥२९॥
शुश्रूषा च शुभाचारो दीनता भृत्यतादिकम् ।
दासीता दासता चेति गतार्था भक्तिकारिणः ॥३०॥
साधवो लोकसारा वै सनत्कुमारपूर्वजाः ।
धात्रा सृष्टाः पुरा लोके लोककल्याणहेतवः ॥३१॥
मया लक्ष्मि साधवस्तु भक्तिमन्तो विनिर्मिताः ।
बहवश्चाऽत्र संसारे मम माहात्म्यबोधकाः ॥३२॥
लोकाँस्तारयितुं कृत्स्नान् शक्ताः क्षितौ हि देवताः ।
ब्रह्मविद्या भजनं च मत्कथा ध्यानमुत्सवः ॥३३॥
मन्मन्त्रदानमित्येतत् कर्मषट्कं सतां सदा ।
शरणागतरक्षा च मोक्षश्च पापनाशनम् ॥३४॥
भक्तिदानं ब्रह्मशीलं कर्तव्यपञ्चकं सताम् ।
विद्वत्ता शास्त्रशीलत्वं स्वाध्यायो जपनं श्रुतम् ॥३५॥
आचारश्चेति षट्कं वै सतां स्वाभाविकं भवेत् ।
शमश्चोपरतिः सत्सु प्रीतिः सत्कृतिरित्यपि ॥३६॥
हरेः स्मृतिः सदा ब्रह्मस्थितिः सतां महान् वृषः ।
मानक्रोधादिराहित्यं स्निग्धवाणीमनोऽन्तरः ॥३७॥
अभ्यागतरतिः शेषप्रसादभोजनं तथा ।
क्षमा तृप्तिश्च सन्तोषः सतां गुणाः स्वभावजाः ॥३८॥
परिचर्या तु वृद्धानां गवां द्युवासिनां हरेः ।
निवृत्तिः स्वादुवस्तुभ्यो धर्मो मोक्षाय तिष्ठति ॥३९॥
आशापाशविमोक्षश्चाऽसंगिताऽऽध्यात्मचिन्तनम् ।
स्नेहपाशविहीनत्वं चात्मन्यात्मसमर्पणम् ॥४०॥
परिव्रजति साधुर्यो मोक्षदृष्टेन कर्मणा ।
मुक्तो ह्यटति सर्वत्र मयि स्थिरो भवेत् सदा ॥४१॥
एष मोक्षविदां धर्मो गतार्थो भक्तिकारिणः ।
भक्तेः परतरं नास्ति शाश्वतानन्दधर्मभृत् ॥४२॥
अदुःखमुत्तमसुखमजराऽमरमव्ययम् ।
साधोर्मोक्षपदं चास्ते सहैव भक्तिकारिणः ॥४३॥
ते सुरैः समतां यान्ति द्योतयन्ति जगत्त्रयम् ।
भक्तिदयाधर्मपरास्तपसा दग्धकिल्बिषाः ॥४४॥
सन्तश्चक्रधराः पुण्या मम लोकचराः शुभाः ।
मालाचक्रधरा घ्नन्ति पापानि पापिनां क्षितौ ॥४५॥
कण्ठे कण्ठीधरा हस्ते मालाध्या मद्धरा हृदि ।
भाले पुण्ड्रधरा देहे शीलाढ्या भक्तिकारिणः ॥४६॥
चित्ते क्षमाधरा भावे स्नेहाढ्याः प्रीतिवृत्तयः ।
बुद्धौ मोक्षप्रियाश्चात्मन्येव ब्रह्मधराः सदा ॥४७॥
आश्रितेषु च वात्सल्यधरा धीध्या विवेचने ।
मत्कथायां रसाढ्याश्च भूतेषूदासिताधराः ॥४८॥

भोग्येऽनासक्तियुक्ताश्चाऽऽवश्यके यान्त्रिका यथा ।
मयि तादात्म्यमापन्ना ब्रह्माम्बराः प्रपावनाः ॥४९॥
उपास्तिपक्षयुक्ताश्च सतां संगकराः सदा ।
आश्रिताऽर्पितसन्तृप्ताः साधवः साधुभूषणाः ॥५०॥
एषां समाश्रयाल्लक्ष्मि गतार्थं मोक्षसाधनम् ।
कर्तव्यं नाऽवशिष्येत धामस्थानां समागमात् ॥५१॥
ऋषिधर्मः साधुधर्मः सत्ये शीले सदा रतिः ।
न स्तम्भी न च मानी स्यान्नाऽप्रसन्नो न विस्मितः ॥५२॥
पितृदेवार्चने रक्तो रात्रिम्मन्यो दिवा सदा ।
स्वापम्मन्यो जाग्रतौ च निम्नम्मन्यो गुरुत्तमे ॥५३॥
तमोमन्यः प्रकाशे च विषम्मन्यो रसोत्तमे ।
ह्रासम्मन्यो महावृद्धौ दैन्यम्मन्यः सगर्वके ॥५४॥
सम्पत्सु विपदम्मन्यो मृतिम्मन्यश्च जीवने ।
धर्मम्मन्यो हरेः संगे रतिम्मन्यो हृदन्तरे ॥५५॥
भक्तिमत्सु सुखम्मन्यो जनम्मन्यो वनादिषु ।
गतिम्मन्योऽच्युतगोत्रे तारयत्येव सज्जनः ॥५६॥
साधुस्तारयिता लक्ष्मि साध्वी तारणिका मता ।
त्यागे मूल्यं न मे चाऽस्ति मूल्यं भक्तौ हि मद्गृहे ॥५७॥
भक्तिमतां साधूनां पूजयामि चरणौ सदा ।
भक्तानां चापि साध्वीनां सम्मानं प्रकरोम्यहम् ॥५८॥
मयि भक्तिस्तदा स्याद्वै निवृत्तिश्चान्यतो यदा ।
शमे रतिर्मयि स्वापः क्रिडाकाण्डोऽपि वै मयि ॥५९॥
ऋषीकेशाः साधवस्ते साध्व्यश्चापि तथाविधाः ।
मम भक्तिभूतानन्दसन्दोहाप्लवसम्प्लुताः ॥६०॥
देशेषु मम वासेषु नदीनां निर्झरेषु च ।
स्रवन्तीनां निकुञ्जेषु पर्वतेषु वनेषु च ॥६१॥
भक्तालयेषु वा सन्तो वसन्ति मम योगिनः ।
योगचर्यापराश्चापि व्योमशय्यासनास्तथा ॥६२॥
वृक्षाऽऽश्लेषाशना नित्यं वन्यपरिजनाः सदा ।
चीरवल्कलसंवीता मम भक्तिपरायणाः ॥६३॥
सुखं वसन्ति निर्विघ्ने सद्भिर्दैवगणैः सह ।
सत्त्वस्थाः सर्वमुत्सृज्य दीक्षिता मयि माधवे ॥६४॥
एवंविधाः साधुवृत्ताः साधुशीला मदाश्रयाः ।
नरा नार्यः प्रिया मे वै तेषां लोकाः सनातनाः ॥६५॥
स्थिताः पापे समुत्सृज्य पापं कुर्वन्ति सत्क्रियाम् ।
पुण्यं भक्तिं तदा तेऽपि साधुत्वमुपयन्ति वै ॥६६॥
स्थितो ब्रह्मिष्ठधर्मेण ब्राह्मण्यमुपयाति च ।
यः कोऽपि मम योगेन ब्रह्मभूयं स गच्छति ॥६७॥
अध्यात्मं नैष्ठिकं सद्भिर्ब्रह्मकामैर्निषेव्यते ।
वनं नारायणश्चाऽहं सतां वासो मयि ध्रुवे ॥६८॥
वनं गुरुस्तथा बोध्यो गुरौ वासः सतां सदा ।
हवनं मे च नैवेद्यं यज्ञोऽहं श्रीनरायणः ॥६९॥
चातुर्मास्यं सतां चाहं व्रतान्यहं सतां सदा ।
एवमाचारवन्तो वै साधवः साधुभूषणाः ॥७०॥
विमुक्ताः सर्वपापैस्ते चरन्ति साधवो मयि ।
सन्तः सत्पथनित्यास्ते प्रयान्ति परमां गतिम् ॥७१॥
ब्रह्मलोकं महापुण्यं दिव्यर्द्धिमत् सुशाश्वतम् ।
प्रयान्ति मुनयः सिद्धा लक्ष्मि मत्पदसंश्रयाः ॥७२॥
स्वयं ते निर्भयाश्चाऽत्र ददत्यभयदक्षिणाम् ।
भक्तिलाभपरा नित्यं साधवः साधुभूषणाः ॥७३॥
सर्वभूतानुकम्पाश्च सर्वभूताऽऽर्जवव्रताः ।
सर्वभूतात्मभूताश्च साधवः साधुभूषणाः ॥७४॥
सर्ववेदेषु वा स्नानं सर्वभूतेषु दर्शनम् ।
सर्वात्मसमता येषां ते सन्तः साधुभूषणाः ॥७५॥
आर्जवं वै सतां धर्मो ह्यधर्मो जिह्म एव ह ।
आर्जवेन युता लोके देवताः सन्ति गोचराः ॥७६॥
व्यपेतमायो भक्तात्मा प्रीत्या सत्पथमाश्रितः ।
चारित्रपरमो बुद्धो ब्रह्मभूयाय कल्पते ॥७७॥
शृणु लक्ष्मि मां विहाय करोति सत्क्रियामपि ।
ऐहिकं हि फलं तस्य विना भक्तिं हि नश्वरम् ॥७८॥
उपवासव्रतैर्याति गन्धर्वलोकमुत्तमम् ।
मण्डूकवज्जलेशायी नागलोकं प्रयाति वै ॥७९॥
शष्पपत्रादिभक्षी तु प्रगच्छत्यमरावतीम् ।
शैवालपर्णभक्षी तु वारुणं लोकमृच्छति ॥८०॥
फलमूलाऽनिलाऽदस्तु यक्षलोकं प्रगच्छति ।
अग्नितपःपरो राजा प्राणरोद्धा नृपो भवेत् ॥८१॥
अनशने रतो राजा स्वर्गे दिवि प्रमोदते ।
जलाब्धौ देहमरणे वारुणं लोकमृच्छति ॥८२॥
अश्मना चरणौ भित्त्वा मृतो भवति गुह्यकः ।
हुत्वाऽग्नौ देहमुत्सृज्य वह्निलोके प्रजायते ॥८३॥
वीररीत्या गतो लोकं शक्रस्य स तु विन्दते ।
कामगेन विमानेन मोदते स सुरादिभिः ॥८४॥

योगिदीक्षां गृहीत्वा च रुद्रलोकं प्रयाति सः ।
धनदानानि दत्त्वा तु कुबेरालयमृच्छति ॥८५॥
स्वर्णदानानि च दत्वा सूर्यलोकं प्रयाति सः ।
पेयदानानि दत्त्वा च चन्द्रलोकं प्रयाति सः ॥८६॥
वस्त्रदानानि दत्त्वा तु ग्रहलोकान् प्रयाति सः ।
कन्यादानानि दत्त्वा तु चाऽप्सरोलोकमृच्छति ॥८७॥
यानदानानि दत्त्वाऽत्र याति वैमानिकं गृहम् ।
अन्नदानानि दत्त्वाऽत्र पितृलोकं प्रयाति सः ॥८८॥
ब्रह्मदानानि दत्त्वाऽत्र सत्यलोकं प्रयाति च ।
ऐश्वर्यादिप्रदानेन यातीश्वरालयान् स वै ॥८९॥
भक्त्या सर्वस्वदानेन मम लोकं प्रयाति सः ।
यदि मां स्मरति तत्र चान्यथा याति तैजसम् ॥९०॥
वैराजपदमेवाऽयं मद्भक्त्या तु पदं मम ।
तानि सर्वाणि दानानि मह्यं तत्राऽन्तरात्मने ॥९१॥
स्मृत्वा ददाति भक्त्या चेन्नयामि ब्रह्म शाश्वतम् ।
एवं मे महिमा लक्ष्मि भावनामात्रगोचरः ॥९२॥
भावनाभक्षकश्चाऽहं भावनातन्तुबन्धनः ।
भावनारूपपत्रेण चोपतिष्ठामि सन्निधौ ॥९३॥
साध्व्यः सन्तो भावनाढ्यास्ततो मन्मयमूर्तयः ।
मदाचारा मम देहास्तारकाः पापिनां सदा ॥९४॥
तेभ्यो नाऽणुः प्रभेदोऽस्ति मम सर्वार्थयोजने ।
त एवाऽहमहं ते च हार्दं ते कथितं मम ॥९५॥
भवत्यो भक्तिमत्यो मे सर्वा ब्रह्मप्रियाः स्त्रियः ।
साध्व्य एव सदा स्थाऽत्र तारिका मोक्षदाः शुभाः ॥९६॥
भवतीनां निवासोऽत्राऽक्षरं धाम तदेव हि ।
भवतीनां सन्निधानं सत्संगः शाश्वतो हि सः ॥९७॥
भवतीनां सेवनं च सदाऽऽत्मसेवनं परम् ।
भवतीनां दर्शनादि सदा मुक्तिप्रदं शुभम् ॥९८॥
भवतीनां क्रियाः सर्वा मद्योगाद् ब्रह्मसंज्ञिकाः ।
भवतीनां शरीराणि पुरुषोत्तमवन्ति वै ॥९९॥
भवतीनां च सर्वस्वं चाऽहं श्रीपुरुषोत्तमः ।
ततः श्रीपुरुषोत्तम्यो भवत्यः सन्ति सर्वथा ॥१००॥
न मे मनाग् भवतीभ्यो भेदोऽत्र च परत्र च ।
यूयं चाहमहं यूयं सर्वे मे भवतीकृतम् ॥१०१॥
एवं मत्वाऽपरा या मद्भक्तियुक्ता भविष्यति ।
तदा तस्या भवतीनां तुल्यता वै भविष्यति ॥१०२॥
पठनाच्छ्रवणादस्य ज्ञानस्य श्रवणादपि ।
साध्वीभावोदयः स्याच्च ब्रह्मप्रियात्वमृच्छति ॥१०३॥
राधारमासमानत्वं भवेद् भक्त्या न संशयः ।
ब्रह्ममुक्तसमानत्वं भवेद् भक्त्या न संशयः ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वह्निप्रकाशनतिरोभावौ, साधुप्रतापो, विविधफलप्राप्तिः, साधुसंगमे मम प्राप्तिरित्यादिनिरूपणनामा पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं माहात्म्यं मे ततोऽधिकम् ।
बालेषु चाऽवशून्येषु ह्यनाथेषु वसाम्यहम् ॥ १ ॥
बालानां हृदयं शुद्धं मायाजिह्मत्ववर्जितम् ।
वासनादिरहितेऽस्मिन् साधुवन्निवसाम्यहम् ॥ २ ॥
बालाः सर्वे मूर्तयो मे स्वच्छा आदर्शसदृशाः ।
ब्रह्मावस्थास्ततो बाला योगावस्था यथा जनाः ॥ ३ ॥
मूर्त्यवस्थाश्च मे बाला बालिकाश्चाऽष्टवर्षगाः ।
एते सर्वे साधवो वै सनकाद्या यथा पुरा ॥ ४ ॥
साधुधर्माः साधवस्ते गृहधर्मास्तु यौवने ।
युवभावविहीनास्तु साधवो ब्रह्मचारिणः ॥ ५ ॥
साधुत्वं शीलवर्तित्वं गृहित्वं कामयोगतः ।
कामजये हि साधुत्वं कामिनोऽपि प्रजायते ॥ ६ ॥
अकामिनोऽपि संभोगे कामे गार्हस्थ्यमेव तत् ।
न स्त्रीयोगो न पुंयोगो गार्हस्थ्ये कारणं भवेत् ॥ ७ ॥
रतिप्रयोगो गार्हस्थ्यं तद्धीनत्वं च साधुता ।
सा च नार्यो नरे चापि भवेन्निष्कामभावने ॥ ८ ॥
अकामः सत्यकामो वै सर्वकामः प्रजायते ।
स एव ब्रह्म विज्ञेयो ब्राह्मण्यं साधुतान्वितम् ॥ ९ ॥
ब्रह्मिष्ठत्वं दुर्लभं श्रि ! साधुत्वं दुर्लभं तथा ।
मत्कृपातो भवत्येव ब्रह्मिष्ठता च साधुता ॥१०॥
साध्वीता मत्कृपातश्च जायते मोक्षदा शुभा ।
वंशोद्धारणकर्त्री च साध्वीता च यथा त्वयि ॥११॥
सत्यधर्मरताः साध्व्यः सन्तो ब्रह्मपरास्तथा ।
यदृच्छालाभसन्तुष्टा हठाऽऽडम्बरवर्जिताः ॥१२॥
धर्मलब्धार्थभोक्तारः परमेशसमर्पकाः ।
निर्बन्धाः स्वच्छहृदयाः साधवः साधुभूषणाः ॥१३॥
गुणकर्मतपोभिः श्रि ! नरो नारायणो भवेत् ।
मालिन्यं सम्परित्यज्य नीचोऽप्युच्चतरो भवेत् ॥१४॥
यथा जन्मान्तरे शूद्रः कर्मणा धर्मसंभृता ।
उत्तरे जन्मनि विप्रो जायते पुण्ययोगतः ॥१५॥

तथैकस्मिन् जनौ चापि ब्रह्माचारैस्तु ब्राह्मणः ।
जायेत ब्राह्मणेतरो विप्रोऽपि शूद्रतां व्रजेत् ॥१६॥
शुभाऽशुभक्रियासंगपापपुण्यबलं महत् ।
विवर्तयति धर्मान् वै सत्त्वाधिको हि भूसुरः ॥१७॥
रजोऽधिको भवेद् राजा तमोऽधिकस्तु शूद्रकः ।
सत्त्वरजोभ्यां संस्पृष्टो वैश्यो भवति शोभनः ॥१८॥
रजस्तमोभ्यां संस्पृष्टो वैश्यो भवत्यशोभनः ।
तमोमात्राबहुलस्तु घातकी श्वपचो भवेत् ॥१९॥
सत्त्वमात्राबहुलस्तु विप्रः साधुः सती भवेत् ।
ब्रह्मयोगबहुलस्तु मुक्तो भवति वै क्षितौ ॥२०॥
इत्येतत् कथितं लक्ष्मि चोत्कृष्टत्वं शुभावहम् ।
मम योगपरश्चात्र नारायणोऽपि जायते ॥२१॥
तद्योगेन तथा चान्ये नारायणा भवन्त्यपि ।
एवं परम्परा नारायणानां मम योगतः ॥२२॥
भवत्येव प्रभावेण ममैश्वर्यादिलाभतः ।
नारायणा नराः सर्वे नारायण्यः स्त्रियस्तथा ॥२३॥
उपासनया जायन्ते ममैव परमात्मनः ।
देवता वसवो रुद्रा जायन्ते विष्णवस्तथा ॥२४॥
उपासनया जायन्ते ब्रह्माणश्चेश्वरास्तथा ।
ईश्वराण्यश्च जायन्ते ममोपासनया रमे ॥२५॥
वीतरागा विमुच्यन्ते कर्मभिः कर्मबन्धनैः ।
यैश्च नारायणास्ते वै जायन्ते समनुष्ठितैः ॥२६॥
तानि सर्वाणि कर्माणि मदुपास्तिमयानि हि ।
ऋते चोपासनां मे वै बलि कर्म नास्ति वै ॥२७॥
उपासना सकामानां कामनापूरिका भवेत् ।
निष्कामानामहं स्मृद्धः स्मृद्धिदाता प्रसह्य वै ॥२८॥
कर्मणा मनसा वाचा मामुपास्ते हि भक्तिमान् ।
न सज्जते च कर्तव्ये बन्धनं नैव गच्छति ॥२९॥
प्राणयात्राऽतिपाताद्वै विरताः शीलयोगिनः ।
तुल्यद्वेषप्रिया दान्ता मुच्यन्ते कर्मबन्धनैः ॥३०॥
सर्वभूतदयावन्तो विश्वास्याः सर्वदेहिनाम् ।
कृतभक्तिसमाचारा लोकास्ते धामगामिनः ॥३१॥
स्वार्थशून्याः परकार्यसहायदा निराशयाः ।
धर्मलब्धप्रतुष्टाश्च लोकास्ते धामगामिनः ॥३२॥
नारीवर्गेषु पश्यन्ति मातृस्वसृदुहितृवत् ।
नरवर्गेषु पश्यन्ति पितृमातृसुपुत्रवत् ॥३३॥
यथोक्तसाधुसेवाढ्या मम भक्तिपरायणाः ।
अस्तेना भाग्यजीवाश्च लोकास्ते धामगामिनः ॥३४॥
नैजभोग्यरता ये च धर्मकालाभिसारिणः ।
अग्राम्यसुखलुब्धाश्च हृच्चक्षुस्तेजसाऽन्विताः ॥३५॥
इन्द्रमार्गानुसाराश्चेन्द्रियाऽवश्याऽऽत्मसंस्थिताः ।
मम भक्तौ कृतावासा लोकास्ते धामगामिनः ॥३६॥
अकषायकृतो मार्गो दानधर्मतपोमयः ।
शीलशौचदयाढ्यश्च भक्तिसेवाऽर्पणाऽन्वितः ॥३७॥
आशीःप्रसन्नतादश्च सत्संगफलवर्धनः ।
नैर्मल्यधीप्रकर्षाढ्यः सेवनीयः सदा बुधैः ॥३८॥
आत्महेतोः परार्थे वा नर्महास्याश्रयाच्च वा ।
मृषाभावविहीना ये यान्त्यकषायसत्पथे ॥३९॥
वृत्त्यर्थे धर्महेतोर्वा कामकाराच्च ये जनाः ।
भाषन्ते नाऽनृतं ते वै यान्त्यकषायसत्पथे ॥४०॥
मिष्टां वाणीं बाधशून्यां पापलेशविवर्जिताम् ।
हार्दस्नेहां ये भाषन्ते यान्त्यकषायसत्पथे ॥४१॥
अपैशून्यरताः सन्तो मित्राऽभेदप्रवर्तनाः ।
अद्रोहाः ऋतमैत्राश्च यान्त्यकषायसत्पथे ॥४२॥
शाठ्यशून्याः सौम्यवाचः कोपभावविवर्जिताः ।
हृद्विदारणशून्यास्ते यान्त्यकषायसत्पथे ॥४३॥
सान्त्वयुक्ता हितवाचः सत्यगुणा हरिश्रिताः ।
साधवः सात्त्विका लक्ष्मि यान्त्यकषायसत्पथे ॥४४॥
मनसाऽपि न वाञ्छन्ति निर्जनेऽपि धनं परम् ।
न्यस्तं वा मिलितं ये ते यान्त्यकषायसत्पथे ॥४५॥
ग्रामे गृहेऽपि पारक्यं नाभिवाञ्छन्ति वै क्वचित् ।
अजातशत्रवो ये ते यान्त्यकषायसत्पथे ॥४६॥
श्रुतवन्तो भक्तिमन्तः सत्यदयाप्रपालकाः ।
नित्यतुष्टा विरागास्ते यान्त्यकषायसत्पथे ॥४७॥
मैत्रीचित्तरताः श्रद्धास्नेहोपकारसम्मुखाः ।
फलविपाकविज्ञास्ते यान्त्यकषायसत्पथे ॥४८॥
न्याय्याऽऽग्रहाः स्वर्गशीलाः समुत्थानपरायणाः ।
आत्मनिष्ठा मत्परास्ते यान्त्यकषायसत्पथे ॥४९॥
महाप्राज्ञा ब्रह्मपरा ज्ञानविज्ञानभाविनः ।
तर्कशास्त्रपरा ये ते यान्त्यकषायसत्पथे ॥५०॥
पापत्रासान्विताश्चापि श्रेयःसाधनतत्पराः ।
आनृण्याऽभिलषुकास्ते यान्त्यकषायसत्पथे ॥५१॥
ये तु शुक्लाभिजातीयाश्चात्मद्रोहविवर्जिताः ।
जन्तुत्रासाकराश्चाप्यभयदानप्रदास्तथा ॥५२॥
आत्मवत्स्नेहभावाश्च देववत्सुघटाः शुभाः ।
दैवाचाराः सौम्यभावा यान्त्यकल्मषसत्पथे ॥५३॥

सुवृत्ताः सत्कर्मिणश्च प्राणिद्रोहविवर्जिताः ।
दीर्घायुषो भवन्तीह यान्त्यकल्मषसत्पथे ॥५४॥
दाता सतां च सत्कर्ता दीनार्तकृपणादिषु ।
भक्ष्यभोज्यान्नपानानां दाताऽम्बरादिदायकः ॥५५॥
भक्तियोगकृतावासो ज्ञानदानप्रदायकः ।
शरणागतरक्षश्च यात्यकल्मषसत्पथे ॥५६॥
प्रतिश्रयान् सभाः कूपान् कुर्यात् पुष्करिणीः प्रपाः ।
आसनं शयनं यानं गृहं रत्नं धनं मनः ॥५७॥
सस्यजातानि सर्वाणि गाः क्षेत्राणि च कन्यकाः ।
यश्च प्रीतमना दाने प्रयच्छति च पात्रके ॥५८॥
सर्वस्वार्पणकर्ता वै यात्यकल्मषसत्पथे ।
देवताद्विजसाधूनां सतीनां पूजकस्तथा ॥५९॥
नमस्कर्ता प्रश्रितश्च सर्वप्रियकरः शुचिः ।
सर्वहितः सुमुखश्च यथार्हसत्क्रियापरः ॥६०॥
सन्मार्गदर्शी गुर्वर्ची यात्यकल्मषसत्पथे ।
सम्मतः सर्वभूतानां सर्वलोकनमस्कृतः ॥६१॥
उदात्तकुलजातीय उदात्ताभिजनस्तथा ।
मैत्रदृष्टिः पितृसमो विश्वास्यः सर्वजन्तुषु ॥६२॥
भक्तिमान् मे महापुण्यो यात्यकषायसत्पथे ।
एवंविधः सदा लक्ष्मि निर्बाधं सुखमेधते ॥६३॥
एष श्रेष्ठः सतां पन्था बाधा यत्र न विद्यते ।
साधून् वै वेदविदुषः सिद्धान् भक्तियुतांस्तथा ॥६४॥
सेवन्ते ये भावयुता वर्जयन्त्यशुभं सदा ।
तेषां शाश्वतसौख्याढ्यः पन्था ब्रह्मगतिप्रदः ॥६५॥
एषां समागमैर्लक्ष्मि कल्याणानि भवन्ति वै ।
श्रेयांसि सर्वरूपाणि स्वर्गाण्यसंख्यकानि च ॥६६॥
प्रतिपद्यन्त एवाऽत्र सतां धर्मे स्थितस्य वै ।
नृणां हितार्थमेवाऽत्र मया ते समुदाहृतम् ॥६७॥
हितं चात्मा विवेकस्थो निजं जानाति चान्तरे ।
परं कर्तुं न शक्नोति विना सद्गुरुसंश्रयम् ॥६८॥
पुण्यं लब्धुं समिच्छन्ति मानवाः सर्वदा प्रिये ।
पुण्यहेतून्न कुर्वन्ति मूढाः सत्यपि वैभवे ॥६९॥
सतां संगान्ममसंगात् साध्वीसंगाच्छुभं परम् ।
श्रेयः परं भवत्येव जानन्त्येव च तत्तथा ॥७०॥
तथापि पापबाधाभिर्बाधितास्तर्कनिम्नगाः ।
अभिमानमहादुष्टग्रासाननगताः सदा ॥७१॥
न सेवन्ते सतः साध्वीर्नार्चयन्ति च मां तथा ।
विषयेष्वभिरागाश्च पतन्ति निरयादिषु ॥७२॥
न तरन्ति पापदुष्टा मायानदीं मनोहराम् ।
नास्तिका दानशून्याश्च भावशून्याः प्रदूषकाः ॥७३॥
भक्तिभावविहीनाश्च दिव्यभावविवर्जिताः ।
दुष्टभावयुता नित्यं देहदृष्टियुताः सदा ॥७४॥
निकृष्टकर्मसु रताः स्वार्थमात्रपरायणाः ।
उदरेन्द्रियसुतृप्ता बाह्यसौख्याभिदृष्टयः ॥७५॥
अनात्ममात्रनिरता यान्ति निरयमेव ते ।
आत्ममात्ररताः साधुधर्मरताश्च सेवकाः ॥७६॥
आज्ञापालनकर्तारो यान्त्यकल्मषसत्पथे ।
वर्णास्तथाऽऽश्रमा लक्ष्मि ये केऽपि स्युर्नराः स्त्रियः ॥७७॥
वृद्धाशीर्वादसौभाग्याः प्रयान्ति स्वर्गमेव ते ।
वध्वः कन्याः कुमार्यो वा स्वामिन्यो वा सपुत्रकाः ॥७८॥
अपुत्रा वाऽपि वृद्धाऽऽशीर्वादस्थाः स्वः प्रयान्ति ताः ।
प्रधाना वापि राजानो भृत्या वा दीनवर्तिनः ॥७९॥
ससत्ता वाऽप्यसत्ता वा नित्यं वृद्धोपसेविनः ।
ऋजवो नम्रतासाराः स्वः प्रयान्ति न संशयः ॥८०॥
येऽत्र लोके यशोभागाः सेवकाः स्वर्गभागिनः ।
ते गन्तारः पदं चोर्ध्वं ममाऽनुग्रहसंभवात् ॥८१॥
साधुशीलाः साधुवृत्ताः क्षमिणः सेविनस्तथा ।
सेवाभिः सुखदातारो द्युगता यान्ति मत्पदम् ॥८२॥
येषां मुखे हरेर्नाम हृदये श्रीहरिः स्वयम् ।
वृद्धाज्ञावचनाश्चापि मत्पदाश्रयिणो हि ते ॥८३॥
गोसुतासुतदातारो वाटिकाक्षेत्रसौधदाः ।
कटिसक्थ्यंकदातारो द्युगता यान्ति मत्पदम् ॥८४॥
गां विप्राय सुतां कुमाराय सुतं च साधवे ।
वाटीं देवाय मे क्षेत्रं सौधं कुटुम्बियोगिने ॥८५॥
कटिं बलं च भीताय शरणं सक्थि कष्टिने ।
अंकं द्रव्यं दरिद्राय दत्वा यान्ति दिवं जनाः ॥८६॥
ततो भक्तिं ममाऽऽसाद्य मह्यमर्पणकारिणः ।
त एव साधवो यान्ति मत्पदं कमलाश्रितम् ॥८७॥
केशौष्ठगण्डदातारो वक्षःपृष्ठकरप्रदाः ।
ग्रीवाजंघापाददाश्च यान्ति स्वर्गं च मत्पदम् ॥८८॥
केशान् ब्रह्मेशविष्णूंश्च दत्वा सन्न्याससमाश्रिताः ।
प्रयान्ति मम भक्तास्ते स्वर्गं ततोऽमृतं पदम् ॥८९॥
ओष्ठौ चादेशमन्त्रौ च दत्वाऽऽचार्यपदं श्रिताः ।
प्रयान्ति भक्तिमन्तो मे स्वर्गं धामाऽक्षरं ततः ॥९०॥
गण्डौ प्रेमस्नेहभावौ हार्दिकौ भक्तिपूर्वकौ ।
दत्वा मे मम भक्ताः श्रि ! प्रयान्ति स्वस्ततोऽक्षरम् ॥९१॥

वक्षो विश्वासमेवाऽपि कृत्वा दत्वा च तं मयि ।
विश्वस्तो याति वै स्वर्गं ततो मत्पदमक्षरम् ॥९२॥
पृष्ठं साहाय्यमाप्यैव परलोकप्रदं शुभम् ।
स्वर्गं पूर्वं ततो भक्त्या याति मद्धाम चोत्तमम् ॥९३॥
करौ सेवां च दास्यं च कृत्वा दत्वाऽर्पणं मयि ।
स्वर्गं याति ततो भक्त्या मम धाम प्रयाति सः ॥९४॥
ग्रीवां सर्वस्वमेवाऽपि जीवदानमथापि वा ।
प्राणदानं च मे दत्वा याति स्वर्गं ततोऽक्षरम् ॥९५॥
जंघे सम्पत् कुलं चोभे दत्वा मे स्वः प्रयाति हि ।
ततोऽर्प्यय समस्तं च मम धाम प्रयाति सः ॥९६॥
पादौ धनं जीविकां च यो ददाति महात्मने ।
स्वर्गत्वा मम भक्त्या च प्रयाति धाम चाऽक्षरम् ॥९७॥
एवं दानानि वै लक्ष्मि ज्ञात्वा नार्या नरेण च ।
यथार्थानि च गुप्तानि देयानि मोक्षकांक्षया ॥९८॥
योषादानं प्रदातव्यं बहुभावेन वै सदा ।
योषा माया समाख्याता या उषा रजनीमुखा ॥९९॥
बन्धयित्री हि जीवानां सा देया परमात्मने ।
स्वयं मायाविहीनः सन् प्रयाति परमं पदम् ॥१००॥
कन्यादानं प्रदातव्यं कुमाराय सुखप्रदम् ।
कन्या तृष्णा सुखाशा सा कुमाराय परात्मने ॥१०१॥
शार्ङ्गिणे मारशून्याय दत्वाऽऽत्मा धाम संव्रजेत् ।
गोदानं च प्रदातव्यं गोः ज्ञानं श्रीहरेः शुभम् ॥१०२॥
दत्वा दाता ग्रहीता च यातारौ धाम चाऽक्षरम् ।
इत्येवं लक्ष्मि विज्ञाय माहात्म्यं मम ये त्विह ॥१०३॥
कर्मभूमौ प्रकुर्वन्ति विचरन्ति विमुक्तये ।
शाश्वतानन्दभोक्तारो भवन्ति मत्पदाश्रये ॥१०४॥
इत्येवं कथितं तेऽत्र माहात्म्यं मम योगजम् ।
अधिकं पठनाच्चापि श्रवणाद् भुक्तिमुक्तिदम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ब्राह्मण्य-साधुत्वप्रापकसाधनानि धामगमनसाधनानि चाऽकषाय-सत्पथसाधनानि दिव्यदानादीनि हरेर्योगश्चेत्यादि-निरूपणनामा षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

श्रीनारायणीश्रीरुवाच—

साध्वीधर्मान् समस्तान् वै वक्तुमर्हसि माधव ।
साध्व्यः सर्वा भवद्देहाज्जाता मायापरा हि ताः ॥ १ ॥
लोकेऽत्र वै कथं ताभिर्वर्तितव्यं निरन्तरम् ।
कृष्णधवा हि त्यागिन्यः सांख्ययोगिन्य एव ताः ॥ २ ॥
हरिप्रियाश्च ताः सर्वाः कृष्णकान्ता हि योषितः ।
ब्राम्हयस्ताश्च महाभागवत्यः सात्त्वत्य एव ताः ॥ ३ ॥
सर्वथाऽऽत्मनिवेदिन्यो वर्तेरन् केन चाऽध्वना ।
पातिव्रत्यं कथं तासां विना विवाहितं पतिम् ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं त्यागदीक्षितयोषिताम् ।
दीक्षा विवाह एवास्ति मया साकं हि योजितः ॥ ५ ॥
'ॐनमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इति मन्त्रेण सा साध्वी विवाहिताऽग्निसन्निधौ ॥ ६ ॥
होमं कृत्वा दीक्षिता सा मम मूर्त्या समं तदा ।
पूजयित्वा च मां प्राप्ता निवेदिताऽग्निमण्डपे ॥ ७ ॥
मम काषायाम्बराणि स्वीचकार च सा सती ।
गुर्वाज्ञया च मे कान्ता जाताऽस्ति दीक्षितक्षणात् ॥ ८ ॥
अतश्चाऽस्याः कृष्ण एव पतिश्चाऽस्मि नरायणः ।
विवाहितैव सा चास्ते पातिव्रत्यं सदा मयि ॥ ९ ॥
पालनीयं तया साध्व्या पावन्या मम योषिता ।
ममाऽध्वना हि गच्छेयुर्वर्तेरँश्च ममाऽध्वना ॥१०॥
दिव्यभक्त्या च वर्तेरन् मोक्षाध्वना सदध्वना ।
साधुसेवां प्रकुर्युश्च साधवो मम मूर्तयः ॥११॥
निष्कामवृत्त्या वर्तेरन् सेवयेयुस्तथैव च ।
सर्वथाऽऽत्मनिवेदिन्यो भवेयुर्मम मूर्तिषु ॥१२॥
साध्वीधर्माः स्त्रीधर्मास्ते विवाहे ऋषिभिः कृताः ।
सहधर्मादिचारिण्यो भर्तुर्भवन्ति लग्नके ॥१३॥
तस्माल्लग्नवती पत्नी यथा पत्युर्निदेशिनी ।
तथा त्यागवती साध्वी पत्युर्मेऽस्ति निदेशिनी ॥१४॥
अग्निं साक्षिणमासाद्य गुरुं च पितरावपि ।
गणेशं च तथा मां च पत्नी साध्वी समे ह्युभे ॥१५॥
पातिव्रत्यं परं धर्मं गृह्णीतः स वृषः समः ।
पत्नीव्रत्यं तथा पत्युर्हरेर्मे च समं तथा ॥१६॥
सहधर्मचरी भर्तुर्भवत्यग्न्यादिसन्निधौ ।
सहधर्मचरः पत्न्या भवत्यग्न्यादिसन्निधौ ॥१७॥
सहधर्मचरं कान्तमनुस्मरेत् सदाऽर्पिता ।
सुस्वभावा सुवचना सुवृत्ता सुखदर्शना ॥१८॥
अनन्यचित्ता सुमुखी भर्तुः सधर्मचारिणी ।
भवेत् सद्धर्मपरमा भवेत् सद्धर्मभागिनी ॥१९॥
देवदेवं स्वभर्तारं साध्वी नित्यं विलोकयेत् ।
शुश्रूषां परिचर्यां च कुर्याद् दिव्यक्रियाऽन्विता ॥२०॥

नाऽन्यभावा ह्यविमनाः सुभावा सुखदायिनी ।
पुत्रवक्त्रमिवाऽभीक्ष्णं भर्त्राननं विलोकयेत् ॥२१॥
नमेत् सुनियमाढ्या च भर्तारं धर्मचारिणी ।
ज्ञात्वा दम्पतीधर्मांश्च सद्धर्मान् निजाश्रितान् ॥२२॥
मत्वैव धर्मपरमा भवेत् भर्तुसमव्रता ।
देवदेवं हि भर्तारं सेवेत शान्तिसंयुता ॥२३॥
सुप्रसन्नमुखी भर्तुर्भवेदेवापि शिक्षिता ।
ताडिलोक्ता परुषाणि वश्या तथापि नित्यदा ॥२४॥
नान्यं नरं स्पृशेत् साध्वी निरीक्षेत न कामतः ।
हास्यभावादिभिश्चापि नान्येन सह वर्तयेत् ॥२५॥
भर्तृवर्जं प्रियं नास्ति यस्या उच्छिष्टमेव तत् ।
भर्तृयुक्तं प्रियं सर्वं महाप्रसाद एव तत् ॥२६॥
भर्त्राज्ञा भगवत्स्वाज्ञा भर्ता श्रीपरमेश्वरः ।
भर्त्रारोहा भवेद् या सा भवेद्वै धर्मचारिणी ॥२७॥
दरिद्रं व्याधितं दीनं दुःखितं श्रमितं मृदुम् ।
पतिं कान्तमुपास्ते या सा भवेद् धर्मभागिनी ॥२८॥
पुत्रिणी कन्यका माता चानपत्या च निष्फला ।
पतिप्रिया पतिप्राणा या सा स्याद् धर्मभागिनी ॥२९॥
दास्यं भृत्यत्वमेवापि कैंकर्यं कुर्वती च या ।
शुश्रूषणं परिचर्यां कुर्वती धर्मभागिनी ॥३०॥
विनीता कोमलवृत्तिः स्निग्धा पत्यौ स्थिराशया ।
पत्यर्थकृतसर्वस्वा सा भवेद् धर्मभागिनी ॥३१॥
न कामेषु न भोगेषु नैश्वर्येषु सुखेषु न ।
स्पृहा यस्या यथा कान्ते सा साध्वी धर्मभागिनी ॥३२॥
प्रागुत्थानप्रिया प्रातर्गृहसेवापरायणा ।
सम्मार्जनप्रलेपादिशुद्धिपरा च या सदा ॥३३॥
अग्निकार्यपरा चापि देवकार्यपरा तथा ।
कर्तव्यार्थपरा या स्यात् सा भवेद् धर्मभागिनी ॥३४॥
देवताऽतिथिभृत्यानां पत्युर्वृद्धजनस्य च ।
यथापेक्षं प्रदत्त्वैव जलादि तोषयेत्तु या ॥३५॥
तान् सर्वान् भोजयित्वैव शेषान्नं भुंक्त एव या ।
तुष्टपुष्टकुटुम्बा च सा भवेद्धर्मभागिनी ॥३६॥
श्वश्रूश्वशुरयोः पादौ सेवमाना नता सदा ।
मातृपितृपरा नित्यं सा भवेद्धर्मभागिनी ॥३७॥
साधून् दीनाननाथांश्च बिभर्त्यन्नादिभिस्तु या ।
यथाशक्ति स्वामिधर्मा सा भवेद्धर्मभागिनी ॥३८॥
ब्रह्मिष्ठावत् पतिस्था या पत्यन्यं पुरुषं क्वचित् ।
अपि चतुःखनिस्थं वै नेक्षते बद्धनेत्रिका ॥३९॥

दुर्लभा तादृशी लोके विना लक्ष्मीं हृदि स्थिताम् ।
विना सतीं शंभुहृत्स्थां चाऽऽदृश्यभावमास्थिताम् ॥४०॥
व्रतं चरति या स्वाम्यं दुश्चरं पतिनोदितम् ।
पतिचित्ता पतिहिता सा भवेद्धर्मभागिनी ॥४१॥
पुण्यमेतत् स्वर्गमेतत् तपश्चैतद् व्रतं च तत् ।
भर्ता ह्येव परो देवो यस्या नारायणः स्वयम् ॥४२॥
पतिर्देवो हि नारीणां पतिर्गुरुः पतिर्गतिः ।
पतिर्बन्धुः पतिर्भाग्यं पतिः प्राणः परायणः ॥४३॥
पतिप्रसादः स्वर्गोऽस्ति निरयः पत्यतोषणम् ।
अकार्यं चाप्यधर्मं वा प्राणनाशकरं च वा ॥४४॥
पतिर्ब्रूयात् तथा कुर्यात् पातिव्रत्यं परो वृषः ।
दारिद्र्यं व्याधिरापद्वा शत्रुता शापदग्धता ॥४५॥
विचित्तत्वं च वा पत्युः सर्वं स्वानुगुणं क्रियात् ।
सुभाग्यं सर्वमेवैतन्मत्वा सेवेत वै पतिम् ॥४६॥
एवं सर्वस्वार्पणा या वर्तते पतिगामिनी ।
आपद्धर्माननुप्रेक्ष्य सा प्रातिव्रत्ययोगिनी ॥४७॥
पतिश्चाऽहं सदा साध्व्या यथा लोके विवाहितः ।
साध्वी मदर्थमेवाऽत्र वर्तेत मत्परायणा ॥४८॥
मदर्थस्नानशुद्धिश्च मदर्थाऽमलतान्विता ।
मदर्थे च कृतवेषा मदर्थे रूपशालिनी ॥४९॥
मदर्थसर्वसंस्कारा साध्वी मे वै पतिव्रता ।
रक्ताम्बरा मदर्थे काषायवस्त्रा मदर्थिनी ॥५०॥
पुण्ड्रचन्द्रादियुक्ता च मदर्थे गन्धयोगिनी ।
मदर्थे पुष्पहारा च मदर्थे माल्यधारिणी ॥५१॥
मदर्थे कण्ठपद्धस्तभूषा साध्वी पतिव्रता ।
मदर्थे भोजनाहारा मदर्थे पानयोगिनी ॥५२॥
मदर्थे कृतशृंगारा मदर्थे भोगवाहना ।
मदर्थे कृदलंकारा साध्वी सा मे पतिव्रता ॥५३॥
मदर्थे केशवेषा च मदर्थे कृतकञ्चुकी ।
मदर्थे कृतशाटी च मदर्थे कटिवस्त्रिणी ॥५४॥
मदर्थे करपादा च मदर्थकृतमस्तका ।
मदर्थकृतकबन्धा च मदर्थान्तरचारिणी ॥५५॥
मदर्थगुणभावा च मदर्थानन्दवर्षिणी ।
मन्नामगुणमग्ना च साध्वी सा मे पतिव्रता ॥५६॥
मदर्थनित्यसत्त्वस्था मदर्थनित्यराजसी ।
मदर्थरोधसंयुक्ता मदर्थस्नेहरक्षिणी ॥५७॥
मदर्थहृदया नित्यं मदर्थकामकारिणी ।
एवं वै वर्तमाना या सा मे हरिव्रता सती ॥५८॥

अपि पुण्यमपि धर्मं कर्म चाचरणं शुभम् ।
यद्वाऽन्यत् कुर्वती साध्वी शीलसौभाग्ययोगिनी ॥५९॥
मत्परा स्यान्मद्विश्रान्ता मत्प्राणा मल्लयान्विता ।
मन्मूर्तिरेव वर्तेत सा साध्वी मे हरिव्रता ॥६०॥
मदर्थत्यागधर्मा च मदर्थसत्यशालिनी ।
मदर्थं च कृतस्वापा मदर्थे जाग्रति स्थिता ॥६१॥
मदर्थे व्यापृता चास्ते मदर्थे विनिवृत्तिका ।
एवं मदर्थसन्तोषा मदर्थाऽहिंसनव्रता ॥६२॥
मदर्थयज्ञसन्न्यासा मदर्थहोमसत्क्रिया ।
मदर्थं ब्रह्मचर्यस्था मदर्थे चाऽपरिग्रहा ॥६३॥
मदर्थशौचाचारा च मदर्थे तपआस्थिता ।
मदर्थे स्वाध्यायपरा मदर्थोपासनायुता ॥६४॥
मदर्थेन्द्रियव्यापारा मदर्थमानसा सदा ।
मदर्थाऽहंचन्तना च मदर्थनिर्णयान्विता ॥६५॥
मदर्थसत्त्वयत्ना च मदर्थभावनाश्रया ।
मदर्थैश्वर्यसिद्धिश्च मदर्थध्यानसंस्थिता ॥६६॥
मदर्थशुक्लमार्गस्था मदर्थाऽतिथिपूजना ।
मदर्थपाचनकार्या मदर्थाहारगोचरा ॥६७॥
मदर्थगृहशालाढ्या मदर्थगीतिकीर्तना ।
मदर्थे नृत्यभावस्था मदर्थे च कथाश्रवा ॥६८॥
मदर्थे च महोत्साहा मदर्थतीर्थचारिणी ।
मदर्थे कृतयात्रा च मदर्थपुष्पवाटिका ॥६९॥
मदर्थे कृतव्यापारा मदर्थक्रयविक्रया ।
मदर्थे कृषियत्नाढ्या मदर्थे राष्ट्ररक्षिणी ॥७०॥
मदर्थे सेवनं यस्या मदर्थे भृत्यतान्विता ।
मदर्थे दास्यमापन्ना मदर्थे सर्वसंविधा ॥७१॥
मदर्थगमनाऽऽदाना मदर्थाऽऽलोचनान्विता ।
एवं मदर्थतां प्राप्ता साध्वी सा मे हरिव्रता ॥७२॥
मदर्थे कार्तिकव्रता मदर्थे पौषतापसी ।
मदर्थे चैत्रपुण्याढ्या मदर्थे श्रावणीस्थिता ॥७३॥
मदर्थे दीपदा चापि मदर्थे पंक्तिभोजना ।
मदर्थे शिष्यतां प्राप्ता मदर्थे गुरुतां गता ॥७४॥
मदर्थे सर्वशिष्याभिः समन्विताऽपि सेविका ।
गुर्वी गुरुपदं प्राप्ता मन्मूर्तिश्चापि सा सती ॥७५॥
साध्वी साध्वीसमाचारा सा साध्वी मे हरिव्रता ।
एवंविधा त्यागधर्मा मम लक्ष्मि पतिव्रता ॥७६॥
राधासख्यस्तथा लक्ष्मीसख्यः श्रीसख्य इत्यपि ।
माणिकीसख्य एवापि सतीसख्यश्च याः शुभाः ॥७७॥
सावित्रीसख्य एवापि सीतासख्यश्च यास्तथा ।
भक्तिसख्यश्च याः सर्वा नारायण्यश्च या मताः ॥७८॥
वासुदेव्यस्तथा कार्ष्ण्यो ब्रह्मप्रियाश्च यास्तथा ।
वैष्णव्यो भगवत्यश्च ब्राह्म्यो मुक्तान्य इत्यपि ॥७९॥
यास्तथा पारमेश्वर्य ईशान्यश्चापि योषितः ।
ईश्वर्यश्चापि सर्वास्ताः साध्व्यो मे वै पतिव्रताः ॥८०॥
यासां यदर्थे सर्वस्वं कान्तार्थं सर्वमेव मे ।
इत्यन्योन्यं साधुसाध्वीभावोऽहं परमेश्वरः ॥८१॥
मां विना नहि साध्व्यस्तास्ता विना नहि चास्म्यहम् ।
परस्परानुयोगस्था भोगमुक्तिप्रदा नृणाम् ॥८२॥
देवानामीश्वराणां च सिद्धानां ब्रह्मवादिनाम् ।
सर्वेषां देहिनः चापि भोगदा मुक्तिदा वयम् ॥८३॥
निबोध लक्ष्मि माहात्म्यं ते सखीनां तवापि च ।
ममापि मम मुक्तानां माहात्म्यं चाववेहि तत् ॥८४॥
अहं सन् भगवान् साक्षात्परब्रह्मपरेश्वरः ।
चित् साध्वी त्वं सतीवर्गो ब्रह्मप्रिया हरिप्रियाः ॥८५॥
तद्योगेन सदानन्दो महानन्दोऽस्ति चावयोः ।
शाश्वतानन्द एवाऽस्ति तद्योक्ता मुक्त एव ह ॥८६॥
अहं साधुः रमा साध्वी लक्ष्मीः सती सदाऽस्ति वै ।
श्रीः सम्पत् माणिकी सौख्यं पञ्चैतद् दैवतं परम् ॥८७॥
साधुः सर्वविधं सौख्यं ददाति च करोति च ।
साध्वी सर्वविधं सौख्यं ददाति च करोति च ॥८८॥
सती सत्यं वर्तयति सम्पद् भद्रत्वमुत्तमम् ।
रक्षत्येव ततः सौख्यं प्रवर्तते हि शाश्वतम् ॥८९॥
सर्वदा मुक्तितुल्यं वै परब्रह्मभूतं महत् ।
एवं लक्ष्मि सदा साध्वी पारब्राह्मी सती मम ॥९०॥
सर्वानन्दपरिपूर्णा मोदते स्वामिना मया ।
अनादिश्रीकृष्णनारायणेन परमात्मना ॥९१॥
देहश्चाऽयं नरो नारी नात्मा नारी नरोऽपि वा ।
आत्मारामा मुनयश्च साधवः साध्विकास्तथा ॥९२॥
ब्रह्मात्मनिष्ठा मद्योगा मद्भावा मच्छ्रयास्तथा ।
नरा नार्यः शेषभूतास्तेषु नारायणोऽस्म्यहम् ॥९३॥
नरमाश्रयति या सा नारी चात्मा मदाश्रितः ।
एवं सर्वे तथाऽऽत्मानो नार्यश्चाश्रयधर्मतः ॥९४॥
आश्रयदो नरश्चाऽहं नारायणः पतिः प्रभुः ।
एवं तत्त्वं विदित्वेह साध्वी सौभाग्ययोगिनी ॥९५॥
मम कान्तां विदित्वा स्वां पातिव्रत्यं सदाऽऽचरेत् ।
अलौककान्ता सा साध्वी कृष्णकान्ता पतिव्रता ॥९६॥

लोके युवा भवेत् कान्तो युवत्या देहयोगतः ।
अहन्तु सर्वदा कान्तो गर्भे बाल्ये च यौवने ॥९७॥
वार्धक्ये मरणे चापि प्रेते लोकान्तरेऽपि च ।
संसारे स्वर्गलोकादौ मोक्षेऽपि कान्त एव ह ॥९८॥
सर्वात्मनां भवाम्येव सर्वात्मना हि शाश्वतः ।
आत्मन्यहं सदा चास्मि नियामकोऽन्तरे स्थितः ॥९९॥
तथा तत्रापि नित्यं वै कान्तोऽस्मि कान्तता मयि ।
कान्तात्वं मम योगेन चात्मस्वेव हि विद्यते ॥१००॥
एवं शाश्वतिकः कान्तः सर्वासां संभवाम्यहम् ।
मत्कान्त्या कान्तिमन्तो वै मुक्ताः सर्वे तथेश्वराः ॥१०१॥
देवाश्च मानवाद्याश्च तिर्यञ्चस्तरवोऽपि च ।
जडाश्च चेतनाश्चापि माया च मायिका अपि ॥१०२॥
मत्कान्त्या कान्तिमन्तो ये ताः कान्ता मे निसर्गतः ।
एवं कान्तात्मकं सर्वं वैधव्यं नास्ति वै क्वचित् ॥१०३॥
तस्मात् साध्व्यो भजेयुर्मां कान्तं सौभाग्ययोजिताः ।
एवं लक्ष्मि रहस्यं वै साध्वीनां तु मयेरितम् ॥१०४॥
सर्वात्मनां चेरितं च गूढं तत्त्वार्थसंभृतम् ।
तस्मान्मदो न कर्तव्यः पुमानहमिति क्वचित् ॥१०५॥
आत्माऽहमिति कृत्वैव भजनीयः पतिः प्रभुः ।
अनादिश्रीकृष्णनारायणश्चाऽहं पतिः परः ॥१०६॥
साध्वीरहस्यमेतद्वै ज्ञात्वा ये यास्तथा प्रजाः ।
मंस्यन्ते चाऽऽचरिष्यन्ति ते प्राप्स्यन्ति परां गतिम् ॥१०७॥
भुक्तिं मुक्तिं तथाऽऽप्स्यन्ति सुखं चाऽऽनन्दमित्यपि ।
मम योगं शाश्वतं च निर्वाणपदमुत्तमम् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सती-साध्वीनां पातिव्रत्यपराकाष्ठादिविज्ञाननिरूपणनामा सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं साध्वीकथां ह्यनुत्तमाम् ।
सौराष्ट्रे जालकपुर्यामभूद् गोपी सुचन्द्रिका ॥ १ ॥
गोपश्चास्याः पतिः कृष्णनारायणं भजत्यपि ।
भक्तोऽभवत् सदा स्नानपरश्च गोव्रजाऽनुगः ॥ २ ॥
गोपालो गोपवासाश्च गोपवासश्च मां सदा ।
सेवते बालकृष्णं वै वने वन्यादिभिः सदा ॥ ३ ॥
पायसैर्दुग्धपाकैश्च क्षीरैर्दध्ना घृतादिभिः ।
नवनीतेन पुष्पैश्च जलैः पूजयतीति माम् ॥ ४ ॥

स च ज्वरेण वै वर्षाकाले त्यक्त्वा निजं वपुः ।
ययौ स्वर्गं सकामो मे भक्तो दौर्हृदलक्षणाम् ॥ ५ ॥
गोपीं पत्नीं परित्यज्य ह्यर्धायुर्विगमे सति ।
गोपालो वै कृपया मे विमानवरमास्थितः ॥ ६ ॥
अप्सरोभिश्च सहितो राजते धेनुभिः सह ।
सर्वैः सर्वोपकरणैर्भक्ष्यभोज्यादिभिर्युते ॥ ७ ॥
भूतले चास्य पत्नी सा भक्ता मे गर्भबालका ।
सगर्भाऽपि निजकान्तमनु मर्तुं समिच्छति ॥ ८ ॥
पतिव्रता पतिं विना दुःखं सोढुमशक्तिका ।
ययौ चितां स्वामिनश्च तदा लोकैर्निवारिता ॥ ९ ॥
गर्भस्य नाशने गोपि ! पापं बहुगुणं तव ।
पत्युः स्वर्गे तव जातं स्वर्गविमानकम् ॥१०॥
रक्ष गर्भं पुत्रवती भविष्यसि समान्तरे ।
पत्युः पृष्ठे मरणे तु पुण्यं वै पतियोषितः ॥११॥
अगर्भाया भवत्येव सगर्भायास्तु दूषणम् ।
तस्मान्मा कुरु घातं स्वं सुखिनी वस गोव्रजे ॥१२॥
इत्येवं वार्यमाणाऽपि पपात पतिना सह ।
चितायां तावदेवाऽयं पतिस्तस्या विमानगः ॥१३॥
ददृशे व्योममार्गेण मा मैवं गोपि ! मा कुरु ।
निषिषेध स्वहस्तेनोत्तोलयामास तां प्रियाम् ॥१४॥
अदग्धां तां समाश्वास्य दाहं प्रशाम्य तत्क्षणम् ।
विमाने तां समारुह्योपाऽऽदिशद् गर्भरक्षणे ॥१५॥
पुत्रस्य रक्षणं कृत्वा विवाह्य च ततः परम् ।
समायाहि मम स्वर्गं मा कृथाश्चाऽनुयात्रिकाम् ॥१६॥
इत्युक्ता सा प्रशान्ता च सुखिनी पतिवाक्यगा ।
पृथ्व्यां विमानात् पतिना प्रापिता शोकवर्जिता ॥१७॥
चितां नत्वा पतिं नत्वा ययौ गृहं हि गोपिका ।
भजते मां हरे कृष्ण कृष्णनारायण स्म च ॥१८॥
धर्मं भक्तिं व्रतं शीलं पालयत्येव गोपिका ।
सुषुवे च सुतं गोपी सुचन्द्रिका शुभाननम् ॥१९॥
ववृधे बालकश्चाऽपि युवा जातो विवाहितः ।
गोपी पुत्राय च ततो न्यवेदयत् पुराभवम् ॥२०॥
सर्वं वृत्तं निजपत्युः पुत्रोऽपि मुमुदे ततः ।
अथ स्वर्गं प्रगन्तव्यं मया ते पितरं प्रति ॥२१॥
इत्युक्त्वा सा गोशकृतोपलिप्य भूतलं ततः ।
उपाविशत् क्षणं ध्यात्वा पतिं तत्याज वर्ष्म तत् ॥२२॥
तावत्पत्युर्विमानं तद् देवदेवीसमन्वितम् ।
समायातं व्योमतश्चाऽऽरोहयामासुरेव ताम् ॥२३॥

सुचन्द्रिकां जयवाक्यैर्वर्धयन्त्योऽप्सरोवराः ।
गोपपुत्रो वधूयुक्तो व्यलोकयद् विहायसि ॥२४॥
पितरं देवरूपं च प्राणमन्मातरं ततः ।
विमानं क्षणमात्रेण गतं चाम्बरमूर्धनि ॥२५॥
विमानस्था मञ्जुघोषाऽप्सरोवरा तु गोपिकाम् ।
अपृच्छत् सुचन्द्रिकां च भर्तुः सन्निधिमेव ह ॥२६॥
केन व्रतेन कल्याणि ! केनाऽऽचारेण वर्धिता ।
गोपी विधूय पापानि देवलोकं समागता ॥२७॥
बहुयुज्ज्वलाम्बरधरा स्वर्णचम्पकशोभना ।
ज्वलमाना च तेजोभिर्दिव्या कथं स्वरागता ॥२८॥
नाल्पेन तपसा गोपि ! दानेन नियमेन वा ।
स्वर्गं लोकमनुप्राप्ता कथं वद समागता ॥२९॥
श्रुत्वा सुचन्द्रिका गोपी मञ्जुघोषां समब्रवीत् ।
कथं वै प्राप्यते स्वर्गो वद मे तत्र कारणम् ॥३०॥
मञ्जुघोषा ततः प्राह गोपीं शृणु च कारणम् ।
काषायवसना या स्यात् त्यागमार्गपरायणा ॥३१॥
मुण्डा वा जटिला वा स्यात्तथा वल्कलधारिणी ।
तापसी दानपरमा बहुदा पुण्यशालिनी ॥३२॥
सर्वप्रदाऽतिथये या साधवे च महात्मने ।
सा स्वर्गगा भवेत् साध्वी पातिव्रत्यपरायणा ॥३३॥
पतिर्देवः पतिः कृष्णः पतिरेव परो वृषः ।
पत्याज्ञा परमो वेदः पत्युस्तुष्टिर्वृषः स्त्रियाः ॥३४॥
एवं या वर्तते साध्वी सा स्वर्गं विन्दतेऽच्युतम् ।
श्रुत्वा प्राह तदा गोपी शृणु विमानवाहिनि ! ॥३५॥
नाऽहं काषायवसना नाऽपि त्यागपरायणा ।
न मुण्डा न जटिला वा नाऽपि वल्कलधारिणी ॥३६॥
और्णाम्बरादिधर्त्र्यस्मि नापि वै तापसी तथा ।
वनवासा दुग्धदाना किन्त्वतिथिं न वेद्म्यपि ॥३७॥
साधुसेवाकरी चाऽस्मि गोपी गोपानुयोजिता ।
पतिसेवापरा चाऽऽसं येन देवीत्वमागता ॥३८॥
आहितानि परुषाणि कदाचिन्नाऽब्रुवं पतिम् ।
श्रीकृष्णदेवसाधूनां पूजनेऽहं रताऽभवम् ॥३९॥
पत्युर्गवां सेविका च श्वश्रूश्वशुरवर्तिनी ।
पैशुन्ये न प्रवर्ते च न कापट्यं मनस्यपि ॥४०॥
अस्थाने न च तिष्ठामि चाऽश्लीलं प्रवदामि न ।
असद्वा हसितं वाप्यहितं वा पापसंभृतम् ॥४१॥
रहस्यं चाऽरहस्यं वा न वै करोमि सर्वथा ।
गवामर्थे निर्गतं मे भर्तारं गृहमागतम् ॥४२॥
जलान्नासनदानाद्यैः सेवयामि सदाऽनुगा ।
यदन्नं रोचते नाऽस्य यद्भोज्यं रोचते न च ॥४३॥
भक्ष्यं लेह्यं च पेयं च सर्वं तद् वर्जयाम्यहम् ।
कुटुम्बार्थे समग्रं वै कार्यं सदा करोमि च ॥४४॥
मंगलानि मम सर्वविधानि स्वामिनः कृते ।
अंजनं रोचनां स्नानं माल्यानुलेपनादिकम् ॥४५॥
प्रसाधनं च निष्क्रान्ते नाभिनन्दामि भर्तरि ।
नोत्थापयामि भर्तारं सुखसुप्तं क्वचित् खलु ॥४६॥
आन्तराण्यपि कार्याणि करोम्यहं सुखान्विता ।
नाऽऽयासयामि भर्तारं तेन तुष्यति मे मनः ॥४७॥
गुप्तगुह्या सदा चास्मि तदाज्ञावशवर्तिनी ।
एवं प्रपाल्य वै पत्युश्चितायां निधनोत्तरम् ॥४८॥
निविष्टाऽपि निषिद्धा चोत्तोलिता जीविताऽऽहिता ।
पृथ्व्यां पुत्रं सवधूकं सम्पाद्य दिवमागता ॥४९॥
एवं वै मञ्जुघोषेऽहं दिवमेतत्समागता ।
पतिः प्राप्तो मया चात्र पुत्रो मे वर्तते भुवि ॥५०॥
एतादृश्यो विविधा वै गोप्यो भवन्ति भूतले ।
कृष्णगोप्यश्च ता जाताः कल्पकल्पान्तरेष्वपि ॥५१॥
भजित्वा श्रीहरिं कृष्णनारायणं तथा पतिम् ।
एवमहं पतिं देवं भजित्वाऽत्र समागता ॥५२॥
श्रुत्वैवं मञ्जुघोषा सा प्रहृष्टा प्रशशंस ताम् ।
अन्या अप्सरसश्चापि शशंसुस्तां पतिव्रताम् ॥५३॥
बहुकालमुषित्वा च भोगान् भुक्त्वा ह्यनेकशः ।
सत्यलोकं ययौ साध्वी पत्या साकं सुचन्द्रिका ॥५४॥
सावित्री चात्र चाऽपृच्छत् स्वर्गाद् गच्छन्ति वै सुराः ।
मर्त्यलोकं चाऽवशेषं भोक्तुं त्वं कथमत्र वै ॥५५॥
सत्यं समागता साध्वि वद तत्र हि कारणम् ।
सुचन्द्रिका च सावित्रीमुवाच हृष्टमानसा ॥५६॥
स्वर्गे दृष्टं मया सर्वं सुखं भोगात्मकं परम् ।
परन्त्वनियमं तद्धि शीलव्रतविवर्जितम् ॥५७॥
देवानां नास्ति वै शीलं न शीलं देवयोषिताम् ।
अप्सरस्सु व्यवायश्च विद्यते परमो दिवि ॥५८॥
देवेषु चापि देवीनां प्रायशोऽपि तथा विधा ।
रीतिर्वै विद्यते तत्र सावित्रि ! किं वदाम्यहम् ॥५९॥
कामरूपधरा देवा देव्यश्चापि तथाविधाः ।
विहरन्ति यथेष्टं वै मर्यादावर्जिताः खलु ॥६०॥
पातिव्रत्यं न देवीषु पत्नीव्रतं न नाकिषु ।
एवंविधा भुक्तशेषा व्रजन्ति मानवालयम् ॥६१॥

प्रधानेषु च देवेषु पत्नीव्रतं न विद्यते।
का कथा चाऽल्पदेवानां ते मृता यान्ति मर्त्यकम् ॥६२॥
संज्ञा चान्द्री रोहिणी च पौलोमी ऋषियोषितः।
एताश्चान्याः स्वल्पसंख्या भवन्ति वै पतिव्रताः ॥६३॥
मया स्वर्गे मम पत्युर्विमाने वै पतिव्रतम्।
पालितं सर्वथा नित्यं यथा पृथ्व्यां तथा दिवि ॥६४॥
हरेः पूजा कृता नित्यं वृषश्चापि प्रपालितः।
अनन्यनरसंस्पृश्या भवामि पूर्वपुण्यतः ॥६५॥
श्रीहरेः कृपया चापि सावित्रि! तद्बलादहम्।
सह पत्या सत्यलोकं चायाता नाऽन्यकारणम् ॥६६॥
अत्रोषित्वा प्रयास्यामि कृपया स्वामिनस्तव।
वैकुण्ठं तु जलोर्ध्वे यत् पत्युर्हरेर्व्रतेन च ॥६७॥
इत्येवं चाऽवदत् साध्वी न्यूषतुस्तत्र वै चिरम्।
ततो ययतुर्वैकुण्ठं विष्णोः पादाम्बुजे ध्रुवौ ॥६८॥
गत्वा तत्र महासाध्वी नेमे लक्ष्मीं हरिप्रियाम्।
ननाम विष्णुं गोपश्च ववन्दतुश्च तौ मुदा ॥६९॥
पृष्टा लक्ष्म्या कथं साध्वि सत्यलोकादुपागता।
सुचन्द्रिका श्रियं प्राह कान्तभक्त्या समागता ॥७०॥
कान्तोऽयं मे हि गोपालो विष्णुश्चाऽयं परेश्वरः।
कान्तं भजामि नित्यं वै कान्तकान्तं च शाश्वतम् ॥७१॥
साध्वीधर्मं समापन्ना पातिव्रत्यपरायणा।
कान्तधर्मबलेनाऽहं वैकुण्ठं समुपागता ॥७२॥
अथ तत्राऽप्युषित्वा सा चिरं पत्या समन्विता।
ययौ गोलोकमेवाऽपि गोपी गोपेन शोभिता ॥७३॥
नेमे गोपी राधिकां च गोपः कृष्णं ननाम च।
ऊषतुस्तत्र लोके तौ गोपीगोपगणेष्वपि ॥७४॥
राधा सुचन्द्रिकामाह कथं चाऽत्र समागता।
वद मे कारणं गोपि! केन पुण्येन चागता ॥७५॥
सुचन्द्रिकाऽऽह राधां वै कृष्णकान्तस्य सेवया।
कान्तस्य सेवया कान्तकान्तस्याऽपि च सेवया ॥७६॥
पातिव्रत्येन धर्मेण कृष्णधर्मेण गोगृहम्।
आगताऽहं राधिकेऽत्र साध्वीधर्मेण योजिता ॥७७॥
पातिव्रत्यं परो धर्मः सर्वधर्मोत्तमोत्तमः।
कृष्णधर्मः परो धर्मः साध्वीधर्मोत्तमोत्तमः ॥७८॥
मया नित्यं मम कान्तः पूजितो गोपसत्तमः।
गोपानामपि गोपश्च कृष्णः सदा प्रपूजितः ॥७९॥
तेन पुण्येन लोकेऽत्र चागता राधिके तव।
उषित्वा च चिरं पश्चाद् यास्याम्यक्षरधाम वै ॥८०॥

कृष्णाज्ञया तु सा साध्वी कान्तयुतोषिता चिरम्।
पातिव्रत्यं पालयित्वा ययौ धामाऽक्षरं ततः ॥८१॥
अनादिश्रीकृष्णनारायणाश्रयं परात्परम्।
ब्रह्महृदे चाप्लुता च महामुक्तानिकाऽभवत् ॥८२॥
मुक्तोऽभवत् पतिश्चापि ब्रह्मभावान्वितस्तदा।
मायाकार्याणि सर्वाणि लीनानि वै द्वयोस्तदा ॥८३॥
एकभावानि तत्त्वानि जातानि च द्वयोस्तदा।
आत्मतत्त्वं समस्तं वै समूर्तं शोभनं परम् ॥८४॥
पुरुषोत्तमरूपेण रूपितं चाऽभवत्तदा।
पुंस्त्रीभावौ गतौ तत्र दिव्यभावावुपागतौ ॥८५॥
श्रीहरेस्तत्र सारूप्यं सालोक्यं सार्ष्टिताऽभवत्।
सामीप्यं चाऽभवत्तत्र नेमतुः पुरुषोत्तमम् ॥८६॥
ऊषतुश्चाऽक्षरे धाम्नि जपन्तौ पुरुषोत्तमम्।
अनादिश्रीकृष्णनारायणश्रीपरमेश्वर ॥८७॥
परब्रह्म हरे कृष्ण श्रीकृष्ण पुरुषोत्तम।
इत्येवं तौ ततो लक्ष्मि मुक्तौ जातौ ममाऽक्षरे ॥८८॥
पूर्वं तौ लोमशात् प्राप्तौ मम मन्त्रान् भुवस्तले।
तद्बलान्मम भक्तिश्च व्यवर्धत तयोश्चिरात् ॥८९॥
पतिव्रत्यं हारिव्रत्यं पत्नीव्रतं च शोभनम्।
व्यवर्धत सदा गोप्या गोपस्याऽप्युत्तरोत्तरम् ॥९०॥
मे साधूनां सेवया च शीलेन सर्वथा तथा।
सर्वलोकेषु मे भक्त्या प्राप्तवन्तो हि मां पतिम् ॥९१॥
माणिक्या मे प्रिया धाम्नि जया च ललिता तथा।
पप्रच्छुस्तां गोपिकां वै कथं चात्र समागता ॥९२॥
सुचन्द्रिकाऽऽह माणिक्यां मुक्तां श्रीपरमेश्वरि!।
पतिशुश्रूषया साध्वीधर्मवृत्त्या तथा शुभे ॥९३॥
अनादिश्रीकृष्णपातिव्रत्यभक्त्या समागता।
पतिर्मेऽयं महामुक्तो ब्रह्महृदे समप्लवात् ॥९४॥
सञ्जातश्चाऽऽहमेवापि ब्रह्मप्रियाऽस्मि सर्वथा।
जाता मुक्तानिका साध्वी मुक्तरूपा हि माणिकि ॥९५॥
कृपालभ्या परामुक्तिः सर्वथा नैव संशयः।
सतां सेवा हि सत्संगः सेवया पुण्यशेवधिः ॥९६॥
पुण्यपुञ्जैर्विवेकश्च भवेदात्मपरात्मनोः।
विवेकादात्मकल्याणे प्रवृत्तिर्जायते ततः ॥९७॥
पापनाशः पावनत्वं ताभ्यां भक्तिरुदेति च।
भक्त्या च नामधामादिस्मरणं स्नेहसंभृतम् ॥९८॥
स्नेहार्पणेनेष्टसिद्धिः सविविधा प्रजायते।
परमात्मा सदेष्टश्चाऽनादिनारायणो हरिः ॥९९॥

सोऽयं सम्प्राप्यते सिद्धः पतिः कृष्णोऽतिवल्लभः ।
एवं मया हरिः कान्तः प्राप्तोऽत्राऽक्षरधामनि ॥१००॥
इत्युक्ता माणिकी तुष्टा प्रशशंस सुचन्द्रिकाम् ।
सखीं शीलवतीं प्राप्याऽऽनन्दिता सा बभूव च ॥१०१॥
सुचन्द्रिका सदा मुक्ता ह्युवास श्रीरिवाऽपरा ।
हरिप्रियाऽक्षरे धाम्नि लक्ष्मि भक्ता प्रिया मम ॥१०२॥
इत्येवं दर्शितं तेऽत्र साध्वीमाहात्म्यमुत्तमम् ।
सस्वामिन्या हि भक्ताया मे साध्व्या मोक्षकृत्परम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सुचन्द्रिकाख्यगोप्याः पातिव्रत्येन हरिपातिव्रत्यभक्त्या च सपतिकायाः स्वर्गसत्यवैकुण्ठगोलोकाऽक्षरधामगमनमित्यादिसाध्वीचमत्कारनिरूपणनामाऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

श्रीनारायणीश्रीरुवाच—

साध्वी पतिव्रता कृष्ण गार्हस्थ्ये वर्तते यदि ।
ऋद्धिमाप्नोति किं कृत्वा वद मे कान्त सौख्यकृत् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

साध्व्या गार्हस्थ्यमाश्रित्य श्रीकृष्णपुरुषोत्तमः ।
आराधनीयः सततं स वै ऋद्धिं ददाति ह ॥ २ ॥
ऋषयः पितरो देवा मनुष्याः साधवो द्विजाः ।
वृद्धाश्चाऽतिथयः साध्व्यः पूजनीया विशेषतः ॥ ३ ॥
पूजायज्ञेन देवांश्च सदातिथ्येन मानवान् ।
ऋषीन् पितॄन् श्राद्धपिण्डैश्चाग्नौ हुत्वा समर्चयेत् ॥ ४ ॥
पयोमूलफलैः श्राद्धं कुर्याच्च भोजयेत् सतः ।
द्विजेभ्योऽप्यर्चयेद् द्रव्यं भोजनं चाम्बरादिकम् ॥ ५ ॥
अतिथीन् भोजयेत् साध्वी साध्वीः सतीश्च भोजयेत् ।
ऋत्विजं स्नातकं साधुं गुरुं श्वशुरमित्यपि ॥ ६ ॥
स्वामिनं च पतिं मिष्टैर्मधुपर्कैः समर्चयेत् ।
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चाऽऽवपेद् भुवि ॥ ७ ॥
दद्यान्नारायणायेह स्वाहेतिवचनान्विता ।
गोभ्यो दद्याद् घासपूलान् बालेभ्यः शर्करादिकम् ॥ ८ ॥
जलं दद्याच्च वृक्षेभ्यो मत्स्येभ्यश्चणकादिकान् ।
कणान् पक्षिगणेभ्यश्च प्रसादं पार्श्ववर्तिने ॥ ९ ॥
यादेवं यथाशक्ति कथाश्रवणमाचरेत् ।
ावर्तनमेवाऽपि कुर्याच्च देवदर्शनम् ॥१०॥
जलदानं प्रकुर्याच्च स्नानध्यानार्चनादिकम् ।
नामसंकीर्तनं कुर्याद् भजनं स्मरणं तथा ॥११॥
देहशुद्धिं धर्मशुद्धिं मनःशुद्धिं समाचरेत् ।
सतां सेवां सतीसेवां कुर्याच्छक्त्या यथायथम् ॥१२॥
सुमनोधूपदीपानां दानं दद्याद् यथाविधि ।
सोमांशा ओषधयश्च सदाऽमृतसमन्विताः ॥१३॥
विषं तापोद्भवं चोग्रं हरन्ति पुष्पजातयः ।
अमृतं मनसः प्रीतिं सद्यस्तृप्तिं ददत्यपि ॥१४॥
विषं हरन्ति पुष्पाणि सुगन्धेन हि देहिनाम् ।
ह्लादयन्ति मनो लक्ष्मीं कुर्वन्ति सुमनांसि वै ॥१५॥
पुष्पैस्तुष्यन्ति देवाद्यास्तुष्टाः पुष्टिं ददत्यपि ।
इष्टगन्धानि देवानां पुष्पाणीति विभावय ॥१६॥
अकंटकानां श्वेतानि देवेष्टानि सुमानि वै ।
जलीयपद्ममाल्यानि यक्षगन्धर्वभोगिनाम् ॥१७॥
कटुकण्टकरक्तानि पुष्पाण्यभिचरार्थिनाम् ।
तीक्ष्णवीर्याणि भूतानां कृष्णानि कण्टकानि च ॥१८॥
मनोनयननन्दानि मानुषाणां प्रियाणि वै ।
अशुद्धभूमिपुष्पाणि वर्ज्यानि सर्वथा प्रिये ॥१९॥
गन्धेन देवास्तुष्यन्ति दर्शनाद् यक्षराक्षसाः ।
नागाः समुपभोगेन त्रिभिरेव तु मानुषाः ॥२०॥
सद्यो देवान् प्रीणयन्ति गन्धाः पौष्पाश्च चान्दनाः ।
प्रीताश्च भावयन्त्येतान् मर्त्यान् सिद्धीश्च सम्पदः ॥२१॥
धूपो निर्यासरूपो वै गुग्गुलुः प्रवरो मतः ।
देवास्तुष्यन्ति धूपेन गार्हस्थ्ये सम्पदां प्रदाः ॥२२॥
अगुरुः श्रेष्ठ एवापि यक्षराक्षसभोगिनाम् ।
दैत्यानां कृत्रिमा धूपाः सल्लकीयाश्च तद्विधाः ॥२३॥
हरिद्राया धूपदानैर्भूतास्तृप्ताः प्रयान्ति च ।
सर्जरसादिधूपाश्च मानवेष्टा भवन्ति वै ॥२४॥
दीपदानं सदा तेजोवर्धनं जायते प्रियम् ।
अन्धं तमश्च तामिस्रं दक्षिणायनमेव च ॥२५॥
पराभाव्योत्तरमार्गं दीपो ददाति चार्पितः ।
दीपस्तूर्ध्वगतेर्दाता तमोनाशस्य भैषजम् ॥२६॥
दीपदानेन वै देवाः प्रभावन्तः प्रकाशकाः ।
तेजस्विनः स्वर्गलोके जाता दीपं ततोऽर्पयेत् ॥२७॥
आलोकदानाच्चक्षुष्मान् बुद्धिप्रकाशवान् भवेत् ।
दीपहर्ता भवेदन्धस्तमोगतिः प्रभाक्षयः ॥२८॥
हविषा चौषधीनां च रसैर्निर्यासकैस्तथा ।
पूर्णचन्द्रप्रतीकाशा दीपदाः संभवन्ति वै ॥२९॥

यावदक्षिनिमेषाणि ज्वलन्ति तावतीः समाः ।
दृष्टिमान् रूपवान् शक्तिमान् प्रदीपप्रदो भवेत् ॥३०॥
तस्माद् दीपाः प्रदातव्याः साध्व्या गार्हस्थ्यलग्नया ।
तपश्चापि प्रकर्तव्यमुत्तरायुषि सर्वथा ॥३१॥
येन वै तपसा ब्रह्माऽक्षरधामगतिर्भवेत् ।
शृणु लक्ष्मि कथयामि साध्वीधर्ममनुत्तमम् ॥३२॥

यत् कृत्वा मोक्षमागच्छेत् पूर्वकल्पकथानकम् ।
पूर्वकल्पेऽभवत्त्वाद्यो मनुर्नाम्ना हरिप्रथः ॥३३॥
तस्य ब्रह्मप्रथा पत्नी साध्वीदीक्षान्विताऽभवत् ।
कण्डायनमहर्षेर्वै पुत्री ब्रह्मपरायणा ॥३४॥
कण्डायनगृहे सा च मानसी संव्यजायत ।
ज्ञानपूर्णा तपःपूर्णा मनोविकारवर्जिता ॥३५॥
युवती वनवासा च साध्वीदीक्षां पितुर्गृहे ।
जग्राह ब्रह्मचर्यस्था यतिनी साऽभवद् गृहे ॥३६॥

अक्षतदेहा चाऽस्पृष्टा नरेण केनचिद्धि सा ।
वने वै वैष्णवे साध्वी चन्द्रोज्ज्वला नदीतटे ॥३७॥
स्नातुं पित्रा समं याता स्नाताऽऽर्द्रवस्त्रधारिणी ।
पुष्टा युवती शीलस्था त्यागधर्माऽन्विताऽपि सा ॥३८॥
दृष्टा व्योम्ना हि मनुना हरिप्रथेन गच्छता ।
ब्राह्मी ब्रह्मतपोभाभिर्व्याप्ता मनोहरा शुभा ॥३९॥
देवी दिव्या यथायोग्या गृहशोभाकरी सती ।
तेजसा व्याप्तदेहा च सूर्यकान्त्यतिकान्तिका ॥४०॥

सर्वश्रीसंभृता सर्वैश्वर्यलक्ष्मीनिवासिनी ।
सर्वनारायणीस्त्रीषु मूर्द्धन्या रूपभादिभिः ॥४१॥
विलोक्यैव विचार्यैव नदीतीरे द्रुतं नृपः ।
अवातरद् विमानाद्वै तमृषिं प्राणमन्मुदा ॥४२॥
पितृवत् पूजयामास ददौ परिचयं निजम् ।
श्रुत्वा काण्डायनर्षिश्च जहर्षाऽऽद्य मनुं तदा ॥४३॥
राजानं वैधसं पुत्रं दृष्ट्वा प्रतिपुपूज तम् ।
कन्याऽपि तूर्णमागत्य मनोः सत्कारमाचरत् ॥४४॥

मिथश्च कुशलं पृष्ट्वा प्रशशंसुर्हि दर्शनम् ।
मनुश्च ब्राह्मणं नत्वा मौनं क्षणं स्थिरोऽभवत् ॥४५॥
ऋषिश्चोवाच तूर्णं वै मनो ! किं करवाणि ते ।
मनुः प्राह हृदये मे वाञ्छा या वर्तते गुरो ॥४६॥
यदि शक्तो भवस्यत्र तां पूरयितुमर्हसि ।
ऋषिर्ध्यानेन नितरां विज्ञाय मानसं मनोः ॥४७॥
पुत्रीं पप्रच्छ साध्वीं तां त्यागिनीं दानहेतवे ।
वद पुत्रि मनुस्तु त्वां समीहते करोमि किम् ॥४८॥

पुत्री प्राह समे धर्मो पित्रादेशो यथा भवेत् ।
शीलं मे रोचते शश्वत् साध्वीधर्मं यतो गता ॥४९॥
तथापि पितृवशगा कन्या पितृवचश्चरेत् ।
पितृवचनमासाद्य पत्यधीना हि कन्यकाः ॥५०॥
सत्यः साध्व्यो भवन्त्येव वध्वस्ताश्च पतिव्रताः ।
यथेष्टं चर चात्राऽर्थे प्रसन्नाऽस्मि निदेशने ॥५१॥

काण्डायनः प्रसन्नोऽभूद् ददौ मनवे पुत्रिकाम् ।
मान्योऽभवत् त्रिलोकेषु मनोः सम्बन्धयोगतः ॥५२॥
ब्रह्मप्रथां विवाह्यैव निन्ये मनुर्निजालयम् ।
ब्रह्मप्रथायै त्रैलोक्ये ददौ राज्यनिरीक्षणम् ॥५३॥
मनुवन्मनुपत्नी सा राज्यं चकार चोत्तमम् ।
गृहसंस्कारवशगा सदाऽसेवत वै सतः ॥५४॥
साध्वीरसेवताऽप्येषा जग्राहाऽऽशीर्वचांसि च ।
मनोः काले चकारैषा यज्ञान् सर्वविधान् सती ॥५५॥

दानव्रतानि श्रेष्ठानि पुण्यानि विविधानि च ।
सर्वसत्कारकर्माणि शोभनानि चकार सा ॥५६॥
साधुसाध्वीसेवनं सा महर्षिसेवनं तथा ।
त्यागिनीतापसीसेवां तपस्विसेवनं व्यधात् ॥५७॥
मनोश्चाधिकारपूर्णे समये मनुना सह ।
ययौ साध्वी विमानेन धामाऽक्षरं हरेर्मम ॥५८॥
तत्र पृष्टा मया साध्वी सत्कृता मुक्तकोटिभिः ।
केन पुण्येनाऽक्षरं त्वं चाऽऽयाता वद सुन्दरि ॥५९॥

सा च प्राह महाभक्ता सात्वती साधुसेविका ।
भगवन् कान्त कान्तेश पूजयामि नमामि च ॥६०॥
सर्वज्ञोऽसि हरे कृष्ण तथाप्याज्ञाकरी त्वहम् ।
यथानियुक्ता कान्तेन स्वामिना परमात्मना ॥६१॥
भवता हि तथा सर्वं निवेदयामि मे शृणु ।
शतसहस्रसौवर्णमुद्रादानं द्विजातये ॥६२॥
अददां रत्नदानानि रूप्यकार्बुदकार्पणम् ।
ब्राह्मं व्रतं चाऽकरवं नेहाऽगां तत्फलादहम् ॥६३॥

यज्ञान् पञ्चदशरात्रान् दशैकरात्रानध्वरान् ।
ज्योतिष्टोमशतं चक्रेऽपीह नाऽगां हि तत्फलात् ॥६४॥
गंगातटे शतवर्षं तपस्तप्त्वा सुदारुणम् ।
अददामश्वलक्षं च नाऽहमागां हि तत्फलम् ॥६५॥
दशाऽयुताश्वान् विंशत्ययुतगाश्च पयस्विनीः ।
नारीपुरमदां दाने नाऽहमागां हि तत्फलात् ॥६६॥
स्वर्णचन्द्रान्वितकन्यासहस्रमददां तथा ।
सर्वभूषाभूषितस्त्रीषष्टिसहस्रकाण्यपि ॥६७॥

दशार्बुदान्यददां गाः सवत्सा गोसवेषु च ।
स्वर्णकांस्यादियुक्ताश्च नाऽहमागां हि तत्फलात् ॥६८॥
आप्तोर्यामेषु नियतं गोदशकं द्विजायते ।
प्राऽदां लक्षं दशगुणं गवां नाऽगां हि तत्फलात् ॥६९॥
दशाऽयुताश्वानददां बाह्लिजातान् मनोरमान् ।
हेममालापल्लहाव्यान् नाऽहमागां हि तत्फलात् ॥७०॥
अष्टादशकोटिहेममुद्रा प्रादां तथाऽन्वहम् ।
एकैकस्मिन् क्रतौ चापि नाहमागां हि तत्फलात् ॥७१॥
वाजिनां श्यामकर्णानां हरितानां परेश्वर ।
प्राऽदां हेमस्रजां कृष्णा कोटीर्दश च पञ्च च ॥७२॥
पद्मिनोऽन्यान् सहस्राणि प्रांशून् महाशरीरिणः ।
दीर्घदन्तान् स्वर्णभूषान् प्राऽदां दश च पञ्च च ॥७३॥
काञ्चनांगरथान् स्वलंकृतान् दशायुतानि च ।
वाजियुक्तान् स्वर्णभूषाभूषितानददां मखे ॥७४॥
दक्षिणांऽव्ययवाँश्चापि वेदोदितान् तथा परान् ।
वाजपेयेषु दशसु प्राऽदां चांगसमन्वितम् ॥७५॥
निष्ककण्ठान् महादासान् दासीश्च दक्षिणास्तथा ।
राजसूयदशके वै प्राऽदां नाऽगां हि तत्फलात् ॥७६॥
स्रोतश्च ब्रह्मपुत्राया रुद्धोऽभूद् दक्षिणादिभिः ।
स्वर्णदाने रत्नदानैर्नागामत्र हि तत्फलात् ॥७७॥
ग्रामाऽर्बुदं च विप्रेभ्यः सप्तद्वीपेषु चाऽददम् ।
शम्याक्षेपैरयजं च सावस्कन्नियुतैः सुरान् ॥७८॥
त्रयोदशद्वादशाहैः पौण्डरीके क्रतौ त्वहम् ।
तथापि तत्पुण्यैश्च नाऽहमत्र समागता ॥७९॥
ककुद्म्यष्टसहस्राणि द्विजेभ्यश्चाऽददां क्रतौ ।
श्वेतांश्च वृषभान् श्वेता गाश्च स्वर्णविभूषिताः ॥८०॥
हिरण्यरत्ननिचयानददां मौक्तिकद्रुमान् ।
सधान्यसस्यवाटीश्च खण्डदाने तथाऽददाम् ॥८१॥
एकादशाहैरयजं द्वादशाहैः पुनः पुनः ।
सदक्षिणैरश्वमेधैः षोडशार्कायणैस्तथा ॥८२॥
योजनानां शतं दीर्घमरण्यं पर्वतान्वितम् ।
निष्कैककण्ठप्रत्यग्रं महोद्यानानि चाऽददम् ॥८३॥
तथापि तत्पुण्यैश्च नाऽहमत्र समागता ।
व्रतानि चाऽकरवं च नित्यनैमित्तिकान्यपि ॥८४॥
गवामयनमयजं चाऽष्टाभिस्तथा च सोमकैः ।
सर्वमेधैर्नरमेधैः सप्तभिर्दशभिस्तथा ॥८५॥
अष्टोत्तरशतविश्वजिद्भिस्तथाऽजमेधकैः ।
न चापि तेषां पुण्यैश्च भगवन्निह चाऽगमम् ॥८६॥
गंगायां ब्रह्मपुत्रायां चेरावत्यां तथा पुनः ।
मेनकांगामहानद्यां बालकृष्णसरस्यपि ॥८७॥
श्वेतवार्धौ शीतवार्धौ नारायण्यां तथा पुनः ।
तपस्तप्तवती चाऽहं साधुसेवापरायणा ॥८८॥
तत्र तत्र सेविता वै साधवः कृष्णभूषणाः ।
साध्व्यश्च सेविताः सन्तोषिताः सर्वप्रदानकैः ॥८९॥
भोजिताः पूजिता दृष्टाः स्पृष्टा देहेषु मर्दिताः ।
संवाहिताः पादयोश्च नताश्च परिचारिताः ॥९०॥
हरे कृष्ण हरे विष्णो कृष्णनारायण प्रभो ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥९१॥
एवं कीर्तनगातारः सन्तः साध्व्यो ह्यनुव्रताः ।
साधवो मे ततस्तुष्टाः साध्व्यस्तुष्टाः सदा मम ॥९२॥
विप्राश्च ऋषयश्चाप्यतिथयो भक्तिशालिनः ।
सात्त्वता भगवत्यश्च योगिन्य सम्प्रतोषिताः ॥९३॥
पिता प्रतोषितश्चापि वचोऽनुवर्तनेन वै ।
तेषां तासां महतीभिराशीर्भिः पुण्यमाप्य ह ॥९४॥
सिद्धा साध्वी पावनी च दिव्या जाताऽस्मि तत्क्षणात् ।
दिव्यदेहा हरियशैर्जाता ब्रह्मप्रियासखी ॥९५॥
प्रियेण पतिना सार्धं मायापारं गताऽस्ति च ।
साधुसाध्वीभिरुक्ताऽस्मि याहि धामाऽक्षरं हरेः ॥९६॥
अनादिश्रीकृष्णनारायणस्य परमात्मनः ।
साऽहं धामाऽक्षरं कृष्णनारायण परेश्वर ॥९७॥
इमं लोकमनुप्राप्ता सेवया तोषलाभया ।
गृहाण मे करं कृष्ण निवासय सदाऽत्र माम् ॥९८॥
विधेहि स्वां किंकरीं माणिक्यासखीमनुत्तमाम् ।
इत्युक्ता च ततो लक्ष्मि मया सखी कृता च वः ॥९९॥
साधुसेवासमं नास्ति परं कर्तव्यमेव ह ।
ऋद्धिदं मोक्षदं चापि स्वर्गदं शान्तिदं तथा ॥१००॥
इत्येतत् कथितं तेऽत्र दानोत्तरं हि सेवनम् ।
पठनाच्छ्रवणाच्चापि भुक्तिर्मुक्तिर्भवेत्तथा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साध्व्याः कर्तव्ये पूजादानादिः, हरिप्रथमनोर्ब्रह्मप्रथायाः पत्न्याः साध्व्याः स्वर्गे स्थित्युत्तरं साधुसाध्वीसेवाफलं चाऽक्षरधामगमनमित्यादिनिरूपणनामा नवसप्ततितमोऽध्यायः ॥ ७९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं साधुसेवाफलं परम् ।
पूर्णायुःसम्प्रदं शश्वत् साधुसाध्वीप्रसेवनम् ॥ १ ॥
आचारलक्षणो धर्मः सन्तश्चारित्रलक्षणाः ।
साधूनां यद् यथावृत्तमेतदाचारलक्षणम् ॥ २ ॥
अप्यदृष्टं श्रवादेव सन्तं सद्धर्मचारिणम् ।
भक्तिकर्माणि कुर्वन्तं प्रजाः स्मरन्ति दूरगाः ॥ ३ ॥
सतां धर्मं पालयेद्वै यदीच्छेद् भूतिमात्मनः ।
अपि पापशरीरस्य पापं हन्ति सतां वृषः ॥ ४ ॥
सदाचाराद् भवेत्पूर्णमायुः कृते दशाऽयुतम् ।
त्रेतायामयुतवर्षं द्वापरे तु सहस्रकम् ॥ ५ ॥
तिष्ये शतं समाश्चापि पूर्णायुर्जायते सदा ।
सदाचारात् सदा लक्ष्मीर्गृहे श्रीर्वसति ध्रुवा ॥ ६ ॥
कीर्तिश्चेह परत्राऽपि सदाचारस्य जायते ।
सतां प्रसन्नता हेतुर्दीर्घायुष्ट्वे मता मम ॥ ७ ॥
अन्यत् सर्वं बाध्यते वै बाध्यते न सतां वचः ।
मम भक्तियुताः शीलव्रतिनः शान्तमूर्तयः ॥ ८ ॥
ममाऽऽराधनकार्याश्च साधवः साधुभूषणाः ।
तारयन्ति मृतांश्चापि जीवतः पावयन्ति च ॥ ९ ॥
दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
यतस्त्रस्यन्ति भूतानि त्रासश्चायुर्विनाशकः ॥१०॥
ये निन्दकाः सतां क्रूरा गुरुशास्त्राऽभिलंघिनः ।
अधर्मस्था दुराचारास्ते भवन्ति गतायुषः ॥११॥
विशाला भिन्नमर्यादा हिंस्रा विषयिणश्च ये ।
अल्पायुषो भवन्त्येव भक्तिहीनाश्च निस्त्रपाः ॥१२॥
सर्वलक्षणशून्योऽपि ह्यदाराचारवान् जनः ।
श्रद्धाभक्तियुतः साधुः पूर्णवर्षाणि जीवति ॥१३॥
अनसूयुः सत्यवादी क्रोधशाठ्यादिवर्जितः ।
अजिह्मश्चाऽप्यहिंस्रश्च पूर्णवर्षाणि जीवति ॥१४॥
लोष्ठमर्दी तृणच्छेदी नखखादी मलावृतः ।
अस्थिरमानसश्चापि नेहायुर्विन्दते परम् ॥१५॥
व्यभिचारी व्यवायी च दीर्घं नैव हि जीवति ।
नहीदृशमनायुष्यं लोके सर्वत्र विद्यते ॥१६॥
यादृशं पुरुषस्येह परदारोपसेवनम् ।
गुरुद्रोही पितृद्रोही साधुद्रोही न जीवति ॥१७॥
स्त्रीद्रोही मातृद्रोही च देवद्रोही न जीवति ।
बाहरागी नदीतारः शस्त्राभ्यासी न जीवति ॥१८॥
सुरापायी चामिषादश्चिरं नैव हि जीवति ।
वाक्सायकवदनश्च मर्मतुदोऽतिरोगवान् ॥१९॥
शापदग्धः साहसी च चिरं नैव हि जीवति ।
अभिचारी घातकी च पूज्यपूजाविलोपकः ॥२०॥
शरणागतघाती च वश्यघाती च सर्वथा ।
विश्वासघाती बालघ्नश्चिरं नैव हि जीवति ॥२१॥
पाशी शूली मुष्कनाशी भगबन्धी च गर्भहाः ।
ऋतुनाशी जन्तुनाशी मधुहाश्च न जीवति ॥२२॥
व्याधकर्मा तथा चक्री सूनी दीर्घं न जीवति ।
विषी भूती वायुरोगी क्षयी प्रमेहवान् कफी ॥२३॥
श्वासी रक्ती मन्दपाची चोद्वेजको न जीवति ।
प्रसह्यहर्ता चाग्निदो व्योमयानी न जीवति ॥२४॥
प्रवासी सततं यश्च प्रतारकश्च मादकी ।
अहिफेनव्यसनी च चिरं नैव तु जीवति ॥२५॥
मातापितरमाचार्यं गुरुं साधुं सतीं पतिम् ।
देवं वृद्धं पूर्वमेवोत्थाय यश्चाभिवादयेत् ॥२६॥
पथ्यं भुञ्जीत सततं यश्चिरं स च जीवति ।
घृतादश्च प्रसादादो दीर्घमायुर्हि विन्दति ॥२७॥
प्राङ्मुखो भोजनं भुंक्ते ह्यायुष्यं विन्दते महत् ।
पथ्यघृताक्तान्नभोजी दीर्घजीवी भवेत् खलु ॥२८॥
आर्द्रपादस्तु भुञ्जानो पूर्णायुर्जीवति ध्रुवम् ।
चतुस्तेजांसि नोच्छिष्ट आलभेत कदाचन ॥२९॥
अग्निं गां ब्राह्मणं साधुं तथा ह्यायुर्न रिष्यति ।
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ॥३०॥
प्रत्युत्थानाऽभिवादाभ्यां पुनस्तान् प्रतिपद्यते ।
उच्छिष्टो न स्पृशेच्छीर्षं सर्वे प्राणास्तदाश्रयाः ॥३१॥
न चाऽभीक्ष्णं शिरः स्नायात्तथाऽस्याऽऽयुर्न रिष्यति ।
तिलसृष्टं न चाऽश्नीयात्तथाऽस्याऽऽयुर्न रिष्यति ॥३२॥
अभ्यस्यति त्वनध्याये ह्यायुस्तस्य प्रहीयते ।
प्रत्यादित्यं प्रत्यनलं प्रतिगां च प्रतिस्त्रियम् ॥३३॥
ये मेहन्ति च पन्थानं ते भवन्ति गतायुषः ।
गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः ॥३४॥
दीर्घजिजीविषुर्विप्रं क्षत्रं सर्पं न दुःखयेत् ।
सन्तं साध्वीं सतीं गां च देवं धर्मं न कुत्सयेत् ॥३५॥
पतितैस्तु कथां नेच्छेत् तद्दर्शनं विवर्जयेत् ।
तत्संसर्गं न वै कुर्यात् तदायुर्विन्दते महत् ॥३६॥
न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम् ।
न चाऽस्नातां स्त्रियं गच्छेत् तदायुर्विन्दते महत् ॥३७॥

पूज्या वृद्धाः साधवश्च साध्व्यो देवा गुरुत्तमाः ।
गृहे वासयितव्यास्ते धन्यमायुष्यमेव तत् ॥३८॥
महात्मनामवमानमायुःक्षयकरं सदा ।
महात्मनोऽतिगुह्यानि न वक्तव्यानि कर्हिचित् ॥३९॥
सम्प्रशंसेत् सतीः साधून् तथाऽऽयुर्विन्दते महत् ।
सन्ध्यायां न स्वपेत् क्वापि जपेच्चिरं स जीवति ॥४०॥
कारयेच्छ्मश्रुकर्म प्राङ्मुख उदङ्मुखोऽथवा ।
परिवादं न च ब्रूयात्तथाऽऽयुर्विन्दते महत् ॥४१॥
अनायुष्या भवेदीर्ष्या पूज्यनिन्दा च तादृशी ।
अनायुष्यं दिवास्वप्नं पारदार्यं तथाविधम् ॥४२॥
आचारो भूतिजननश्चाचारः कीर्तिवर्धनः ।
आचाराद् वर्धते ह्यायुराचारो हन्त्यलक्षणम् ॥४३॥
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते ।
सतामाशीर्वचनानि दीर्घायुःसम्प्रदानि वै ॥४४॥
मार्कण्डेयस्य दीर्घायुर्मर्त्त्वं सप्तर्षिवाक्यतः ।
वेधसो वाक्यतश्चापि निदर्शनं परं हि तत् ॥४५॥
पितुः क्रोधान्नाचिकेता मृत्युमवाप वै तथा ।
वानरा रामचन्द्रेणोज्जीविता ये रणे हताः ॥४६॥
वपुर्द्वेधा भौतिकं च यशोरूपं तथा रमे ।
भौतिकं त्वायुरापेक्षं यशश्चाचारबन्धनम् ॥४७॥
आशीर्वादैर्भौतिकस्य शुभायुर्वर्धते त्विह ।
सदाचारैः सेवया च वर्धते तु यशः शुभम् ॥४८॥
सत्कर्मभिः पुण्यपुञ्जो वर्धते यशसा सह ।
भक्त्या द्वयं जायते च वर्धते शाश्वतं यथा ॥४९॥
कुले साधुर्भवेत् कश्चित् साध्वी वा ब्रह्मयोगिनी ।
कुलं तद् यशसा लोके ध्रुवं कीर्तिं प्रविन्दति ॥५०॥
पुण्ये कुले हि पुरुषाः ख्याताचारा भवन्ति हि ।
पापे कुले तु पापा वै जायन्ते बहुधा खलु ॥५१॥
सर्वेऽनर्था कुले यत्र जायन्ते पापपूरुषाः ।
अकीर्तिं जनयन्त्येव कीर्तिं ते लोपयन्त्यपि ॥५२॥
विद्वानेको भवेत् पुत्रो भक्तः कीर्तिं करोति सः ।
सदाचारः स एवाऽत्र तारयत्येव बान्धवान् ॥५३॥
सदाचारा यदि साध्वी भवेत् कन्या वधूश्च वा ।
कुलं सर्वं पावनं च कृत्वा तारयति ध्रुवम् ॥५४॥
नारायणो हरिर्यस्य यस्या हृदि स्थितः प्रभुः ।
तारकस्तेन लोकान् सा स वा तारयति ध्रुवम् ॥५५॥
दीर्घायूश्च कुलं तस्य यशश्चिरं प्रतिष्ठति ।
मुक्तिश्चापि ध्रुवा तस्य तस्याः प्रजायते शुभाः ॥५६॥
दशाऽऽचार्येभ्य एवाऽत्रोपाध्यायः श्रेष्ठ उच्यते ।
दशोपाध्यायतः श्रेष्ठः पिता भवति सर्वथा ॥५७॥
दशपितृभ्यश्च माता श्रेष्ठा सदा गरीयसी ।
दशमातृसमा गुर्वी साध्वी सती पतिव्रता ॥५८॥
शीलयुक्ता ब्रह्मचर्यपरा ब्रह्मप्रिया हि सा ।
मत्स्वरूपा सदा साध्वी वैष्णवी सा नरायणी ॥५९॥
कार्ष्णी सा माधवी लक्ष्मीः शक्तिर्वै पौरुषोत्तमी ।
साधुरूपः सदा चाऽहं संवर्ते सर्वसृष्टिषु ॥६०॥
साधवो मत्स्वरूपा वै साध्व्यश्च मम शक्तयः ।
मम धामप्रदाः सर्वे सर्वाश्च पावनाः प्रिये ॥६१॥
साधुभ्यस्तु परं नास्ति पावनं सर्वसृष्टिषु ।
साधुसेवासमं नास्ति पुण्यं तपश्च सर्वथा ॥६२॥
धनाढ्यास्तु धनेनैव सेवन्ते पूज्यदेहिनः ।
दरिद्राः साधुसेवाढ्या लभन्ते ब्रह्म शाश्वतम् ॥६३॥
धनाढ्या यान्ति वै स्वर्गं दरिद्रा यान्ति धाम च ।
अधना वर्ष्मणा सेवां कुर्वन्ति भावतः सताम् ॥६४॥
उपवासान् प्रकुर्वन्ति कोटियज्ञफलप्रदान् ।
अतो द्रव्यमयाद् यज्ञात् सेवायज्ञो विशिष्यते ॥६५॥
सदा तीर्थं सेवनीयं तारकं चात्मनां मुदा ।
स्थूलं तीर्थं भूजलादि सूक्ष्मं साधुप्रसेवनम् ॥६६॥
दिव्यं तीर्थं मनःशुद्धिस्तत्तीर्थाऽऽसेवनं चरेत् ।
मनस्तीर्थे तु यः पूतश्चात्मतीर्थे प्रमुच्यते ॥६७॥
अगाधे विमले शुद्धे सत्यतोये धृतह्रदे ।
स्नातव्यं मानसे तीर्थे सत्त्वमालम्ब्य शाश्वतम् ॥६८॥
तीर्थशौचं प्रवदामि शृणु लक्ष्मि प्रमोक्षदम् ।
साधुत्वं जायते येन येन मायाविनाशनम् ॥६९॥
अग्राहित्वमनर्थित्वमार्जवं सत्यमित्यपि ।
अहिंसा मार्दवं शान्तिरानृशंस्यं दमः शमः ॥७०॥
निर्ममाऽहंकृतित्वं निर्द्वन्द्वत्वं निष्परिग्रहः ।
शुचित्वं च गुणा यत्र तीर्थीभूता हि साधवः ॥७१॥
ब्रह्मवेत्ता महत्तीर्थं तारकं पापनाशकम् ।
सर्वत्यागेष्वभिरता भक्तिज्ञाः समदर्शिनः ॥७२॥
कषायरहिताः शान्ताः साधवस्तीर्थभूषणाः ।
मनःशौचं परंशौचं स्नातस्तत्र प्रमुच्यते ॥७३॥
नोदकक्लिन्नगात्रो वै स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः ॥७४॥
गतं नैवाऽनुशोचन्ति प्रत्यक्षे निर्ममाः सदा ।
स्पृहा नोत्पद्यते येषां तेषां शौचं हि तीर्थवत् ॥७५॥

निष्किंचनत्वं देहस्य मनसश्च प्रसन्नता ।
ज्ञानशौचं चात्मनश्च तीर्थानि त्रीणि चैव ह ॥७६॥
वृत्तशौचं शरीरस्य व्रतशौचं तु मानसम् ।
तीर्थशौचमात्मनश्च त्रीणि मोक्षकराणि वै ॥७७॥
ज्ञानोत्पन्नं परं शौचं ब्रह्मज्ञानजलात्मकम् ।
स्नाति यो मानसे तत्र मोक्षं याति न संशयः ॥७८॥
तत्त्वारोपितशौचस्तु नित्यं भक्तिसमन्वितः ।
सेवासद्गुणसम्पन्नस्तीर्थमेव जनः सदा ॥७९॥
कीर्तनाच्चैव तीर्थस्य स्नानाच्च पितृतर्पणात् ।
सर्वपापानि दह्यन्ति ततो यात्यक्षरं पदम् ॥८०॥
परिग्रहाच्च साधूनां श्रीकृष्णस्य मनोर्ग्रहात् ।
भक्तिसरित्कृताप्लावात् तरन्ति प्राकृतं तमः ॥८१॥
साधवस्तीर्थवर्या वै साधुता तीर्थसत्तमा ।
उभयोरेव यः स्नायात् स सिद्धिं शीघ्रमाप्नुयात् ॥८२॥
सदाचारः परो धर्मस्तीर्थे चोत्तममेव तत् ।
सतां धर्मे सह नीत्वा याति व्यक्तिः परां गतिम् ॥८३॥
धर्म एको मनुष्याणां सहायः पारलौकिकः ।
स चेद् दिव्यः कृतश्चाऽत्र साधूनां सेवया तदा ॥८४॥
मोक्षदो धामदश्चापि शाश्वतानन्ददः परः ।
मोक्षधर्मसमो धर्मो मूर्धन्यो नास्ति सृष्टिषु ॥८५॥
सर्वतीर्थमयो धर्मो मोक्षधर्मोऽस्ति साधुषु ।
साधवः पालिता येन सेविताश्च प्रसादिताः ॥८६॥
सर्वो धर्मः कृतस्तेन परमात्मा प्रसादितः ।
सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः ॥८७॥
साधुसेवातत्परस्य परं मोक्षपदं भवेत् ।
यथा नागपदेऽन्यानि पदानि संविशन्ति वै ॥८८॥
तथा सर्वाणि धर्माणि विशन्ति साधुसेवने ।
तेषां साधुसेविनां वै ब्रह्मलोको विधीयते ॥८९॥
नाभागेनाऽम्बरीषेण गयेन चित्रकेतुना ।
आयुना चाऽनरण्येन दिलीपेन च भूभृता ॥९०॥
शिबिना मुचुकुन्देन मान्धात्रा भरतेन च ।
जनकेन तथा रुक्मांगदेनाऽलर्कभूभृता ॥९१॥
पृथुना सागरेणापि लक्ष्मणेन महात्मना ।
एभिश्च राजभिर्नित्यं साधवः संप्रसेविताः ॥९२॥
साध्व्यः सत्यः पूजिताश्च परमात्माऽहमर्चितः ।
आत्मतीर्थकृतस्नानाः साध्वाशीर्वादवर्धिताः ॥९३॥
साधुधर्मपरा भूत्वा प्रयाताः परमां गतिम् ।
सर्वेन्द्रियाणां वृत्तीनां शान्तिर्यावन्न जायते ॥९४॥
तावद्भवति संसारो भवमृत्युप्रवाहकृत् ।
वृत्तिलये हि साधुत्वं साधुत्वे मुक्तिरुत्तमा ॥९५॥
नारायणस्य दूता वै सर्वे सन्तीह साधवः ।
कारयित्वा कीर्तनानि नयन्ति धाम चाक्षरम् ॥९६॥
साध्व्यो नारायणस्यैव शक्तयः सन्ति तारिकाः ।
कारयित्वा हरेः सेवां नयन्ति धाम चाक्षरम् ॥९७॥
ब्रह्मप्रियाः समस्ता ये साध्व्यः सन्ति पतिव्रताः ।
भागवत्यश्च सात्वत्यस्तत्तद्देशेषु लीलया ॥९८॥
मदिच्छया समुत्पन्ना देशकल्याणहेतवे ।
जनतासु मम भक्तिप्रवर्तनार्थमेव ताः ॥९९॥
यूयं सर्वा मम पत्न्यः समुत्पन्ना हि सात्विकाः ।
साध्वीधर्मान् पालयन्तु श्रीकृष्णे स्वामिनि ध्रुवाः ॥१००॥
अनादिश्रीकृष्णनारायणे मयि परात्मनि ।
शाश्वतायुष्यभोगिन्यो मत्तुल्याः स्थो ध्रुवाः सदा ॥१०१॥
मम धामनिवासिन्यो मम पार्श्वे स्थ एव ह ।
द्वितीयेन स्वरूपेण भूस्थाः स्थोऽत्र मया सह ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दीर्घाऽऽयुःप्रदसाधनं मोक्षसाधनं च सतां सेवानादिकमित्यादिनिरूपणनामाऽशीतितमोऽध्यायः ॥ ८० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं साधुसंगतिसत्फलम् ।
अहं भद्रावतीतीरे विहारार्थे गतोऽभवत् ॥ १ ॥
गृध्रा मांसाशनास्तत्र क्षेत्रे तीरेऽभवन् शतम् ।
शौचार्थे कलशं धृत्वा क्षेत्रमध्ये गतोऽभवम् ॥ २ ॥
गृध्राणां मध्यतो मार्गं कृत्वाऽहमगमं पुरः ।
गृध्रास्ते मिष्टशब्देन चोचुर्वाक्यानि वीक्ष्य माम् ॥ ३ ॥
तिष्ठन्तो यत्र तत्रैव विश्वस्ता निर्भयाः सुखाः ।
अहोऽस्माकं महद् भाग्यं भूतले समुपस्थितम् ॥ ४ ॥
अयं नारायणः साक्षादस्मन्मध्ये समागतः ।
साधुरूपः साधुशीलो मुक्तिदो मुक्तिदस्तथा ॥ ५ ॥
प्रगृह्णन्तु चरणयोश्चास्य रजांसि पक्षयोः ।
मूर्ध्नि मुखे जलं चास्य कलशादपि पावनम् ॥ ६ ॥
ब्रह्मकमण्डलूवारि सहस्रांशे न तत्समम् ।
मोक्षोऽस्माकं भवितैव स्पृशन्त्वस्य पदे ह्युभे ॥ ७ ॥
पक्षाभ्यां वीजयन्त्वेनं श्रीकान्तं पुरुषोत्तमम् ।
सुस्वरैः कीर्तयन्त्वेनं नारायण नरायण ॥ ८ ॥

मस्तकैः प्रणमन्त्वेनं पापप्रज्वालकं हरिम् ।
पद्भ्यां तमभिगच्छन्तु प्रदक्षिणं पुनः पुनः ॥ ९ ॥
चक्षुर्भ्यां श्रीहरिं कृष्णं विलोकयन्तु सत्पतिम् ।
सन्तं सतां पतिं साध्वीनाथं पक्षिपतिं प्रभुम् ॥१०॥
इत्येवमुच्चरन्तश्चाऽऽययुः समन्ततश्च माम् ।
नेमुः पादौ पस्पर्शुश्च चक्रुश्च दर्शनं मुहुः ॥११॥
प्रार्थयामासुरत्यर्थं मोक्षार्थं पक्षियोनितः ।
ऊचुश्च वयमासन् वै शूद्रा व्याधा हि मानवाः ॥१२॥
अब्रह्मण्या नृशंसाश्च कदर्याः पापजीविनः ।
अपहारकाश्चौराश्च द्वेष्टारो देहिनां तथा ॥१३॥
मिथ्याचारा व्यभिचाराः परस्वहरणे रताः ।
देवपितृमखद्वेष्टारश्च भीदा हि देहिनाम् ॥१४॥
धनधान्यादिसम्पत्तिं दृष्ट्वाऽन्यस्यैश्वर्यवस्तथा ।
तेन पापेन जाताः स्मो गृध्रजातीयपक्षिणः ॥१५॥
पक्षिषु श्वपचाः सर्वे दुर्गन्धिशवभक्षिणः ।
निःकृष्टा निजपापैस्तान्नः कृपां कुरु चोद्धर ॥१६॥
व्याधत्वेऽपि वने साधून् दृष्ट्वा दत्वा फलानि च ।
आशीर्वादान् गृहीत्वा चाऽर्जितवन्तः सुपुण्यकम् ॥१७॥
तत्पुण्येन स्मृतिर्नोऽस्मान् विजहाति हरे प्रभो ।
इत्यर्थितस्तदाऽहं तानवोचं संगतेर्बलात् ॥१८॥
सतां सेवाफलं त्वेतत् प्राग्जन्मस्मरणं तथा ।
ममापि दर्शनं चात्र तिर्यग्जन्मनिवारकम् ॥१९॥
अथ यूयं च राजानो भविष्यथ ततः परम् ।
विप्रा भूत्वा ततो देवास्ततो ब्रह्मर्षयः शुभाः ॥२०॥
सत्यलोके चिरं स्थित्वा प्रयास्यथाऽक्षरं मम ।
तत्र तत्र हि साधूनां समागमो भवष्यति ॥२१॥
इत्युक्तास्ते मया लक्ष्मि गृध्राः सर्वे मृतिं गताः ।
जातास्ते क्षत्रियाः सर्वे मृत्वा विप्रास्ततोऽभवन् ॥२२॥
ततो देवाश्च ऋषयस्ततो धामाऽक्षरं ययुः ।
इत्येवं साधुसंगस्य फलं तेऽभिहितं मया ॥२३॥
तिरश्चामपि यन्मेऽपि दर्शनं सुलभं ह्यभूत् ।
येनाऽवापुः पदं गृध्राः पूर्णं ब्रह्म सनातनम् ॥२४॥
तस्मात् समागमः कार्यः पापिनाऽपि सतां मुहुः ।
पापक्षालनमेवाऽपि पुण्यं मुक्तिश्च संभवेत् ॥२५॥
एकदा लोमशो भूमौ पद्भ्यां साधुशतैर्युतः ।
विचचार हि श्रेयोऽर्थं लोकानां शुद्धिकाम्यया ॥२६॥
मार्गे श्रुत्वा पदानां वै शब्दान् जीवटकीटकः ।
अधावद् वाटदेशाद्वै बहिर्गन्तुं त्वरान्वितः ॥२७॥
लोमशः परिपप्रच्छ दृष्ट्वा जीवटकीटकम् ।
कथं त्वरितस्त्रस्तोऽसि गम्यते क्व त्वया वद ॥२८॥
श्रुत्वा जीवटकीटश्च प्राहाऽहं वीक्ष्य मण्डलम् ।
सतां तु बहुसंख्याकं श्रुत्वा पादस्वनाँस्तथा ॥२९॥
भयं प्राप्तो मृत्युजातं पादकच्चरमर्दनात् ।
धावामि सत्वरं मार्गाद् यथा बहिः प्रयामि वै ॥३०॥
गृहं मे विद्यते पार्श्वे स्त्रीपुत्रादिसुखान्वितम् ।
अकालमरणं मे न भवेच्छून्ये कुटुम्बिनः ॥३१॥
एकलस्य मृतिः शून्ये कुटुम्बरहितस्य मे ।
असद्गतिप्रदा स्याद्वै शोचेयुर्मम बान्धवाः ॥३२॥
तस्माच्छीघ्रं प्रवदामि मृत्योर्दुःखं परं यतः ।
त्वरयामि जीवनार्थं जीवतः सुखमुत्तमम् ॥३३॥
लोमशस्तु समाकर्ण्य जीवटं प्राह ते कुतः ।
कीटयोनौ सुखं चास्ते दुःखयोनौ वदाऽत्र मे ॥३४॥
दुःखयोनेस्तु मरणं तव श्रेयो भवेदिह ।
नाभिजानासि वै श्रेष्ठान् स्पर्शभोगसुखोत्तमान् ॥३५॥
न च वेत्सि रसमिष्टान् यानवाहनसूत्सवान् ।
तस्मात्पापेऽत्र देहे ते श्रेयो वै मरणं भवेत् ॥३६॥
जीवटः प्राह श्रुत्वैव लोमशं दीर्घदर्शिनम् ।
देही सर्वत्र सुसुखी यत्र देहे प्रवर्तते ॥३७॥
वनं पश्यामि विविधं विविधान् दृश्यसंभवान् ।
कुटुम्बं स्त्रीसुताढ्यं च पश्यामि चोत्सवान्वितः ॥३८॥
स्पृशामि स्त्रीं सुतं पुत्रीं कुटुम्बिनोऽत्र भूतले ।
शृणोमि विविधा गीतीश्चारण्ये स्वजनादियुक् ॥३९॥
भक्षयामि रसान् मिष्टान् वृक्षवल्लीसमुद्भवान् ।
जिघ्रामि बहुधा गन्धान् भुंजामि विषयान् बहून् ॥४०॥
यथादेहं विषया मे वर्तन्ते चोत्तमोत्तमाः ।
सकुटुम्बो भवाम्यत्र कुटुम्बं चोत्तमं मम ॥४१॥
इत्याकर्ण्य ऋषिः प्राह शृणु कीट ! वदामि ते ।
अल्पायुस्त्वं लक्ष्यसेऽत्र कृतयत्नोऽपि सर्वथा ॥४२॥
मृत्युस्तव हि निकटे घृतपाशः प्रतिष्ठति ।
तस्मान् मा वह वाञ्छां वा जीवनार्थं सुखाय वा ॥४३॥
साधुसमागमः कीट बहुपुण्याय कल्पते ।
मृत्युस्ते विद्यतेऽवश्यश्चाऽद्य क्षणे न संशयः ॥४४॥
यदि मे दर्शनात् कीट श्रेष्ठं जन्म समिच्छसि ।
वद ते तद् ददाम्यत्र शुभं जन्म सतां बलात् ॥४५॥
एतान् साधून्नमस्कारं कृत्वा याहि मृतिं ततः ।
कल्याणं ते करिष्यामि वद किं ते मनोऽत्र ह ॥४६॥

जीवटश्च ततः प्राह यद्येवं मरणं मम ।
पार्श्वे मम कुटुम्बस्य सन्निधौ मृतिरस्तु मे ॥४७॥
मानवश्च ततो देहो भवत्वत्र च भूतले ।
येन श्रेयो विविधं मे सतां योगाद् भविष्यति ॥४८॥
इत्युक्त्वा तूर्णमेवाऽसौ वाटपार्श्वमुपागतः ।
तृणमूले कृतावासान् कुटुम्बिनश्च गर्तगान् ॥४९॥
आजुहाव द्रुतं कीटः सम्मिल्य तान् मृतिं ययौ ।
तज्जीवं स्थापयामास क्षत्रगर्भे सुराष्ट्रके ॥५०॥
पौरराज्यकुले जातो राजा प्रजानियामकः ।
लोमशश्च ततो भूयो ययावब्धितटे मुदा ॥५१॥
ददर्शभूपं भूयोऽपि जातिस्मरोऽर्चयन्मुनिम् ।
जग्राह चरणौ भक्त्या प्रोवाच सर्वमेव तु ॥५२॥
ऋषे ते कृपया कीटान्निर्गत्याऽस्मि नृपोऽभवन् ।
नार्यो गजाश्च तुरगा उष्ट्रा यानानि सम्पदः ॥५३॥
भवन्ति मम भोग्यास्ते कृपयाऽत्र गुरो सदा ।
साधुकृपाफलं चैतत् प्राश्नामि मिष्टमुत्तमम् ॥५४॥
श्रेष्ठशय्यातले राज्ञीसेवितश्च स्वपिम्यपि ।
जागर्मि वन्दितः सूताद्यैश्च देवो यथा हरिः ॥५५॥
दास्यो दासा ह्यसंख्या मेऽमात्याश्चाज्ञावहाः शुभाः ।
नमस्तेऽस्तु गुरो साधो किं करोमि वदाऽत्र मे ॥५६॥
श्रुत्वा हृष्टो लोमशस्तं नृपं वै जीवचन्द्रकम् ।
प्राह राजँस्त्वया राजदेहाद् गन्तव्यमेव ह ॥५७॥
भोगा भुक्तास्त्वया राजन् बहुधा मे ह्यनुग्रहात् ।
अथ त्वं भव विप्रो वै श्रेष्ठजन्म गृहाण च ॥५८॥
मम ते दर्शनं जातं तदेव सुकृतं पुनः ।
वैष्णवस्त्वं भव मन्त्रं गृह्ण श्रेयो भविष्यति ॥५९॥
त्यज मोहं कुटुम्बस्य राज्यस्य स्त्रीजनस्य च ।
साधुकृपां गृहाणाऽत्र मा प्रमादी भवाऽत्र वै ॥६०॥
इत्युक्तः स नृपस्तूर्णं जग्राह मन्त्रमुत्तमम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥६१॥
अथ श्रीलोमशस्तत्र दध्यौ नारायणं हृदि ।
तावद् राजा शरीरं स्वं तत्याज सर्वसन्निधौ ॥६२॥
सौराष्ट्रे चाऽभवद् विप्रोऽक्षरक्षेत्रेऽत्र चोत्तमे ।
कुंकुमवापिकातीर्थे चाश्वपट्टसरोन्तिके ॥६३॥
योगायनो महर्षिः स जातिस्मरोऽति भक्तिमान् ।
जन्मतः सिद्धिमान् धर्मी ब्रह्मिष्ठः पावनः परः ॥६४॥
अथ श्रीलोमशस्तं च कुमारं प्रत्यपद्यत ।
अनादिश्रीकृष्णनारायणं भज महामते ॥६५॥
मम योगात् क्षेत्रयोगान्मुक्तिस्ते भाविनी शुभा ।
परमेश्वरभक्तेश्च फलं ते स्यान्महोत्तमम् ॥६६॥
बद्धः स वैष्णवश्रेष्ठः सर्वमन्त्रान् ऋषेर्मुखात् ।
जग्राह च ततो नैजां जननीं तु कलावतीम् ॥६७॥
पितरं चार्यशीलाख्यं ननाम भावतस्तदा ।
आज्ञां लब्ध्वा ततस्तूर्णं कृत्वा तीर्थे सुपूजनम् ॥६८॥
मामभिगम्य च नैजं देहं त्यक्त्वा विमानगः ।
मम सालोक्यमगमद् ब्रह्म धाम सनातनम् ॥६९॥
अवाप स पदं लक्ष्मि मम धामाऽक्षरं परम् ।
साधोः समागमादेवं मोक्षपदं हि लभ्यते ॥७०॥
साधवो मत्पादजुषश्चक्षुर्ददति चान्तरम् ।
विधून्वन्ति च पापानि जन्महार्सं दधत्यपि ॥७१॥
कर्मक्षयं कारयन्ति कृपया पुण्यशेवधिम् ।
ददत्यपि स्वाऽनुगाय भक्ताय प्रहितात्मने ॥७२॥
बन्धनानि विचित्राणि दृढानि यानि चात्मनाम् ।
तानि विभेदयित्वेह वितरन्ति शुभानि च ॥७३॥
स्वर्गसुखानि रम्याणि सत्यकल्पोद्भवानि च ।
देवतुल्यानि वर्ष्माणि भोग्यानीश्वरभानि च ॥७४॥
शाश्वतदिव्यमूर्तिं च कृत्वा धामाऽक्षरं मम ।
प्रेषयन्ति प्रतापेन नैजेन मम साधवः ॥७५॥
साध्व्यश्चैवं शुभाचारा मम भक्तिपरायणाः ।
स्वयोगमागतान् जीवान् प्रेषयन्ति पदं मम ॥७६॥
शृणु लक्ष्मि विनोदिन्या विप्रायाश्च कथां शुभाम् ।
धाराग्रामनिवासिन्या भक्ताया मम पावनीम् ॥७७॥
पतिव्रता पतिं साध्वी सिषेवे चेशवत् सदा ।
भागवतं शतानन्दनामानं विप्रमुत्तमम् ॥७८॥
दशसाहस्रवर्षाणि तयोर्गतानि भूतले ।
ब्रह्मपरायणयोर्वै भक्तयोरनपत्ययोः ॥७९॥
शतानन्दस्त्वेकदा तां पत्नीं प्राह शुभाशयः ।
कथं साध्वि ऋतुस्नाता धर्मेण सेविताऽपि वै ॥८०॥
गर्भं वंशकरं नैव धारयस्यत्र मे वद ।
कारणं वा विभाग्यं वा वन्ध्यात्वं वापि वेत्सि चेत् ॥८१॥
मम दोषोऽथवा चास्ते मम भाग्यं न चास्ति वा ।
कथं पुत्रवती नैव चिरेणाऽपि विलोक्यसे ॥८२॥
श्रुत्वा पत्नी पतिं प्राह कारणं भक्तराट् शृणु ।
गर्भवासो महद् दुःखं जीवस्याऽनलपाचने ॥८३॥
जन्मदुःखं देहदुःखं मृत्योर्दुःखं पुनः पुनः ।
अशुद्धिश्च पुनर्दुःखं निरये गमनं पुनः ॥८४॥

वासनाऽपि महद्दुःखं स्नेहदुःखं पुनस्तथा ।
एवं दुःखानि चालोक्याऽनपत्यत्वे परं सुखम् ॥८५॥
मत्वा नाऽहं धारयामि गर्भं मायाविडम्बनम् ।
श्रुत्वा तां च पतिस्त्वाह ऋणं पितृकृतं प्रिये ॥८६॥
यावन्नोत्तीर्यते तावत् पितॄणां दुःखमित्यपि ।
मम दुःखं च ते दुःखं पुन्नामनरकोद्भवम् ॥८७॥
वन्ध्यात्वस्याऽपवादं च निर्वंशत्वादिकिंकथाम् ।
अपाकर्तुमपि साध्वी गर्भं धर्तुं त्वमर्हसि ॥८८॥
श्रुत्वैवं साध्विका प्राह यद्येवं कान्त संश्रृणु ।
पुत्रा ये ये भवेयुस्ते प्रेषणीया हरिं प्रति ॥८९॥
भक्ताः स्युः साधवश्चैते मुक्तिं दास्यन्ति मे च ते ।
इत्येवं वाग्बन्धनेन धारयामि च दौर्हृदम् ॥९०॥
तथाऽस्त्विति पतिः प्राह ऋतुस्नाता च सेविता ।
दधार गर्भं पतितः सुषुवे कालतः सुतम् ॥९१॥
ववृधे च शनैर्बालो बोधितश्चाऽऽत्मविद् यथा ।
मात्रा विवेकवान् पुत्रः कृतोपवीतसंस्कृतिः ॥९२॥
निवेदितश्च मह्यं वै साधुत्वार्थं समर्पितः ।
मुक्त्यायनो मया नाम्ना कृतः साधुर्विरक्तिमान् ॥९३॥
शतानन्दः प्रसन्नोऽभूत् पुत्रं साधुं विलोक्य ह ।
अथ पत्नीं द्वितीयं च गर्भं दधार कालतः ॥९४॥
सुषुवे कालतश्चापि वर्धयामास भावतः ।
बोधयामास विज्ञानैर्ददौ मह्यं च तं सुतम् ॥९५॥
सोऽपि सन्दीक्षितो नाम्ना ब्रह्मायनः कृतो मया ।
कविर्जातो महान् साधुर्मोक्षमार्गपरायणः ॥९६॥
शतानन्दश्च तं वीक्ष्य प्रसन्नः समजायत ।
ददौ तृतीयगर्भं च पत्न्यै प्रसन्नमानसः ॥९७॥
सुषुवे सा च तं पुत्रं शिक्षयामास सेवनम् ।
ज्ञानं गानं ददौ मह्यं साधुदीक्षार्थमेव च ॥९८॥
मया तु दीक्षितो नाम्ना प्रेमायनः कृतः स च ।
गीतिकाकुशलः साधुः सोऽपि मोक्षपरोऽभवत् ॥९९॥
पुत्राः पञ्चशतान्येवं समजायन्त वै चिरात् ।
सर्वे ते साधवो जाता मम दीक्षापरायणाः ॥१००॥
दिव्या दिव्यविहाराश्च दिव्यक्रिया हि साधवः ।
तीर्थरूपाः समस्तास्ते शीलव्रतपरायणाः ॥१०१॥
जीवानां मोक्षदाः सर्वे ज्ञानध्यानपरायणाः ।
मम भक्तियुताः सौम्याः साधवः साधुभूषणाः ॥१०२॥
विद्यावन्तः शीलवन्तो मम मूर्तिपरायणाः ।
अश्वपट्टसरःक्षेत्रे वसन्त्येते हि योगिनः ॥१०३॥
शतानन्दस्य पुत्रास्ते महाभागवतास्त्विमे ।
वर्तन्ते भक्तिकर्तारश्चाऽक्षरे क्षेत्रके मम ॥१०४॥
अथाऽन्ते श्रीशतानन्दः पत्नीं प्राह सुतं तु मे ।
देह्येकं वंशकर्तारं मा तं साधुं विधेहि वै ॥१०५॥
इत्युक्त्वा ब्राह्मणी विनोदिनी पुत्रं तु चान्तिमम् ।
विश्वायनं ददौ संशिक्षितं कान्ताय पद्मजे ॥१०६॥
विश्वायनोऽभवन्नित्यं गृहधर्मान्वितो हि सः ।
विवाहितो वंशकर्ता महर्षिर्लोमशाश्रमे ॥१०७॥
महाभागवतो दीक्षायुतो वेदांगपारगः ।
अथ विनोदिनी चेयं साध्वीदीक्षासुदीक्षिता ॥१०८॥
अमृताख्या ब्रह्मसखी वर्तते त्यागमाश्रिता ।
शतानन्दोऽपि साधुत्वे वर्तते चाश्रमे मम ॥१०९॥
मम सेवापरो दिव्यगतिमान् पद्मजे सदा ।
इत्येवं कथितं तेऽत्र विनोदिन्याः कथानकम् ॥११०॥
मोक्षार्थं समवर्तिन्याः सर्वपुत्रार्पणात्मकम् ।
पठनाच्छ्रवणाच्चास्य मोक्षमार्गो भवेद्ध्रुवः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधुसंगत्या गृध्राणां मोक्षो जीवटकीटस्य मोक्षो विनोदिन्याः पंचशतपुत्राणां साधुत्वं चेत्यादिनिरूपणनामैकाऽशीतितमोऽध्यायः ॥ ८१ ॥

**श्रीनारायणीश्रीरुवाच—**

अनादिश्रीकृष्णनारायण कृष्ण प्रभो विभो ।
स्वैरिण्याश्चापि कामिन्याः पुंश्चल्याश्चापि योषितः ॥ १ ॥
सवासनायाः पापानि नश्येयुर्वै कथं वद ।
का गतिर्वापि तस्याः स्यात् केन शुद्धिश्च जायते ॥ २ ॥
कथं वा सद्गतिः स्याच्च दयां कृत्वा वदस्व मे ।
अनाथाया हि नाथस्त्वं चाऽबलाया बलं भवान् ॥ ३ ॥

**श्रीपुरुषोत्तम उवाच—**

श्रृणु नारायणीश्रि त्वं पृष्टं कल्याणकृद्वचः ।
दयया हि त्वया पृष्टं तस्माद् ऋजु वदामि ते ॥ ४ ॥
संगाद् बलाच्च पुष्टेश्च मदाद् रसाच्च यौवनात् ।
जायन्ते वासनास्तीव्रा भोगात्मिका हि कामनाः ॥ ५ ॥
ऋतवो धातवश्चापीन्द्रियदार्ढ्यं सुखेषणा ।
उत्तेजका हि कामानां तृष्णातन्तुविवर्धकाः ॥ ६ ॥
अंगानां दर्शनाद्धास्यादेकान्तस्य प्रसेवनात् ।
प्रायशो हि विवर्धन्ते स्पर्शादेः कामवासनाः ॥ ७ ॥

अयोग्या अपि युज्यन्ते देहाभ्यां वै परस्परम् ।
लोकशास्त्रव्यवहारान् परित्यज्य स्वतन्त्रतः ॥ ८ ॥
कामिनीत्वं पुंश्चलीत्वं स्वैरिणीत्वं ततो भवेत् ।
कामकारेण लोकेऽत्र योषितां लग्नमन्तरा ॥ ९ ॥
पुरुषाणां च स्वैरत्वं स्त्रीचलत्वं च कामिता ।
भवत्येवातिकामेन तृष्णया माययाऽपि च ॥१०॥
तेषां पापविनाशार्थं साधनानि बहून्यपि ।
भवन्ति पद्मजे प्रायश्चित्तानि च व्रतानि च ॥११॥
दुष्कराणि तथा याम्यवेदनानि बहून्यपि ।
देहदण्डानि चान्यानि राजदण्डानि सन्त्यपि ॥१२॥
त्यागाश्रमाणि रम्याणि तापसाश्रमणानि च ।
तीर्थानि विविधान्येव भवन्ति शुद्धयेऽपि च ॥१३॥
तदेतेषां परंश्रेयःकरं तु शरणागतिः ।
नैतादृशं परं चास्ति साधनं चेतरत् त्विह ॥१४॥
पापानां नाशकं सर्वपुण्यानां दायकं तथा ।
साधूनां सेवनं तत्र वासनाक्षालकं मतम् ॥१५॥
सत्संगो ज्ञानदस्तत्र मोहरागनिवारकः ।
कृपा चात्मोन्नतिप्राप्तिकारणं वै सतां मता ॥१६॥
प्रसादभोजनं पादवार्यमृतादिपानकम् ।
सतां सद्यः पुनात्येव पापकोटियुतं जनम् ॥१७॥
सन्तः प्रत्यक्षतीर्थानि सन्तः प्रत्यक्षवह्नयः ।
सन्तः प्रत्यक्षवर्षा च सन्तः साक्षात्सुधामृतम् ॥१८॥
सन्तः साक्षाद् धर्मदेहाः सन्तोऽहं भगवान् स्वयम् ।
सन्तो यज्ञा गोचरा वै सन्तो देवाधिदेवताः ॥१९॥
सन्तो व्रतानि सर्वाणि सन्तो नावो भवाम्बुधौ ।
सन्तो नारायणाः सर्वे सन्तस्तेजांसि शार्ङ्गिणः ॥२०॥
सन्तस्तपांसि सर्वाणि सन्तो ब्रह्म हि पावनम् ।
सन्तः कामदुघा बोध्याः सन्तो वै कल्पपादपाः ॥२१॥
सन्तश्च कल्पलतिकाः सन्तश्चिन्तामणीश्वराः ।
सन्तश्चाऽक्षयपात्राणि पुण्यानां धर्मकर्मणाम् ॥२२॥
सन्तश्चाऽव्ययकोशाश्च शाश्वतानन्दवारिधेः ।
तारका धारकाः सन्तः पापानां क्षालका द्रुतम् ॥२३॥
हरेर्गृहाणि सन्तो वै मूर्तयः साधवो मम ।
तेषां समागमात्तूर्णं महापापाघयोऽपि च ॥२४॥
अनले तृणवद् भस्मीभवन्ति स्पर्शमात्रतः ।
महापापाभिरेवाऽत्र स्त्रीभिर्नैजविशुद्धये ॥२५॥
सर्वस्वाऽर्पणभावेन सेवनीया हि साधवः ।
मम मन्त्रान् शरणादिप्रदान् सद्भयोऽवगम्य च ॥२६॥
महाभाग्यवतीरीत्या प्रसेवेत सतो जनान् ।
दर्शनं स्पर्शनं नतिं परिचर्यां च पूजनम् ॥२७॥
भोजनं मर्दनं पानं स्नानं च श्रवणं हरेः ।
सतां चापि प्रकुर्याच्च येषां स्वामी भवाम्यहम् ॥२८॥
तदा लक्ष्मि ! स्वामिवत्पावनाः सन्तो मता मम ।
सन्त इव च शरणागताश्च सेवकाः खलु ॥२९॥
सेविकाश्च भवन्त्येव सुदिव्या निर्गुणास्तथा ।
निष्पापाः पावनाः सर्वे विष्णुः सन्तश्च सेवकाः ॥३०॥
इत्येतत्परमं गुप्तं रहस्यं मम ते प्रिये ।
अबलानां कृते चोक्तं सुलभं पावनं परम् ॥३१॥
यदाश्रित्य सतां योगाज्जायन्ते वह्निसन्निभाः ।
ब्रह्मनिभा भवन्त्येव नार्यो निष्पापविग्रहाः ॥३२॥
शृणु तेऽत्र कथयामि प्रत्यक्षं ते निदर्शनम् ।
वाराणसी पुरी लक्ष्मि शिवेश्वरस्य ते पितुः ॥३३॥
यत्र गणाश्च गणिकाः सहस्रशः पितुस्तव ।
सेवकाः सेविकाश्चापि विद्यन्ते चाऽविवाहिताः ॥३४॥
यथेष्टकामचाराश्च शिवस्य भक्तिकारिणः ।
स्वैरिण्यश्चापि पुंश्चल्यः कामिन्यो गणिकाः खलु ॥३५॥
वसन्ति ते पितुः पुर्यां पुमांसोऽपि तथाविधाः ।
गणा भाण्डा नर्तकाश्च गायका वादका अपि ॥३६॥
नग्ना गणास्तथा नग्ना योगिन्यो गणिकास्तथा ।
यथाकामं प्रवर्तन्ते योगिशंकरसंश्रयाः ॥३७॥
तेषां तासामेकदा वै गंगायास्तु जलेऽभवत् ।
समाजो हि तु नौकासु गानकीर्तननर्तनैः ॥३८॥
गणिकानां नर्तनानि भाण्डानां हसनानि च ।
वृन्दलानां च नर्माणि प्रावर्तन्त निशामुखे ॥३९॥
प्रवृद्धमंगलनाम्ना जायते स महोत्सवः ।
तत्र वै प्रेक्षका रात्रौ लक्षशो मानवा अपि ॥४०॥
अभवन् संघशो वारौ नौकासु सर्वतोदिशि ।
कृत्वोत्सवान् सासदैनान् व्यरमन्त पितुस्तव ॥४१॥
विश्वनाथस्वरूपस्य मन्दिरे नर्तनादिभिः ।
अथात्र भगवान् योगी वात्स्यायनो महानृषिः ॥४२॥
आजीवं ब्रह्मचर्यस्थः साधुधर्मपरायणः ।
ऊर्ध्वरेताः शंभुवच्च महायोगीन्द्रसत्तमः ॥४३॥
समाजगाम तत्रैव धर्मारण्यात् सुतीर्थकृत् ।
विवस्त्रो मानहीनश्च सर्वांगधूलिधूसरः ॥४४॥
अविकारो युवा चापि वार्धक्यवृत्तिभूषितः ।
सर्वं ब्रह्मस्वरूपं च यस्य दृष्टौ प्रवर्तते ॥४५॥

स्नादिलिभाहीनः स्वयं साधुः सुशोभनः ।
दर्श शांकरं देवं गणान् पूजनतत्परान् ॥४६॥
गणिकाश्च समस्ता वै युवतीर्भूषितास्तथा ।
दृशोभिता यथा ताश्च स्वैरिणीरिव संस्थिताः ॥४७॥
कुल्यः कामिनीश्चापि सर्वचेष्टासमन्विताः ।
इसमे ते पितुः प्रसन्नताप्राप्त्यै सुशलिताः ॥४८॥
अलकन्या इव रम्या देवीरिव समुज्ज्वलाः ।
सर्वाङ्गकर्मौक्तिकाद्यलंकृताः सुशोभनाः ॥४९॥
दीक्ष्य सर्वा ऋषिर्वात्स्यायनः साधुर्नाम ह ।
इत्थंगणिकाः सर्वा वीक्ष्य शान्तं स्थितं मुनिम् ॥५०॥
युवानं स्तपुष्टं च नग्नं शंकरसदृशम् ।
आत्मारामं देहभानवर्जितं सूर्यभास्वरम् ॥५१॥
तीर्थपादकरूपं च भोग्यमानससंश्रयम् ।
कृपापुञ्जं स्पर्शमात्रात् पापपुञ्जप्रदाहकम् ॥५२॥
तादृशं वरं वीक्ष्य मुग्धा निश्चित्य शंकरम् ।
दर्शितमन्तं चागतं वै परस्पर्शुः गणिकागणाः ॥५३॥
नापि कामभावेन मोहभावेन काश्चन ।
काश्चन देवभावेन साधुभावेन काश्चन ॥५४॥
तदा चुचुम्बुर्देवस्य ऋषेर्लिंगं च नेत्रयोः ।
पर्शामामुस्त्वर्थं मेनिरे च कृतार्थताम् ॥५५॥
आश्चर्यं तत्र तासां वै जातं शृणु हि पद्मजे ।
शंभुस्तु तिष्ठते स्तब्धो जडवत् सुसमाधिगः ॥५६॥
ः स्पृशन्ति गणिकास्तं तासां राजसवृत्तयः ।
भवन् प्राक्समस्तास्ता व्यलीयन्त स्पृशेः ऋषेः ॥५७॥
सत्त्वमतां गताः सर्वाः सत्त्वपूर्णाः शुभाशयाः ।
कामवृत्तिविहीना वै स्पर्शमात्रात् क्षणान्तरे ॥५८॥
अज्ञानं सर्वथा नष्टं गणिकानां समन्ततः ।
लीनां च विकारा वै वेगा निर्वेगतां ययुः ॥५९॥
मनांसि समस्तानां निर्विकाराणि चाऽभवन् ।
तृष्णा वासनाः कामा रागा रतिश्च कामना ॥६०॥
वै लीनाः क्षणात् तासां योगिस्पर्शगयोषिताम् ।
दिव्याश्च दृष्टयस्तासामभवन् शंभुयोषिताम् ॥६१॥
आऽऽकाशे महाश्चर्यं व्यलोकयँस्ततश्च ताः ।
ताश्च समुद्भूता वागुरिका ह्यधोमुखाः ॥६२॥
आकाशमार्गेण गंगाऽनुगा हिमालयम् ।
गणिकास्तत्र सञ्जाताः सर्वावरणवर्जिताः ॥६३॥
दिव्याश्च दिव्यदेहाश्च सतीराधारमा यथा ।
स्ताः शुद्धिमापन्नाः सर्वाः पापविवर्जिताः ॥६४॥

अन्तर्दृष्ट्या विलोक्यैनं वात्स्यायनं हि योगिनम् ।
ब्रह्मरूपं पापनाशकरं स्पर्शेन सर्वथा ॥६५॥
विदित्वा तं मुनीन्द्रं वै साधुं साधुविभूषणम् ।
नत्वा स्पृष्ट्वा पुनः सन्तं पप्रच्छुर्विनयान्विताः ॥६६॥
साधो पुण्यप्रतापात्ते दिव्या नो दृष्टयस्त्विह ।
देहाश्चापि च दिव्या नो जाताः स्पर्शनदर्शनात् ॥६७॥
कामा हृदय्या नष्टाश्च युवतीत्वं हि चञ्चलम् ।
सर्वं लीनं भवद्योगात् पादधूलिप्रवाहणात् ॥६८॥
वयं सर्वाः पाविताश्च स्वैरिण्यो गणिकास्त्विह ।
पुंश्चल्यश्चापि कामिन्यो यथा साध्व्यः स्म एव ह ॥६९॥
शंकरस्य प्रपूजायाः फलं महोत्सवस्य च ।
प्राप्तं त्वया हि लोकेऽत्र ह्नन्दि यन्निर्मलानि नः ॥७०॥
परं पृच्छाम एवाऽत्र साधो वागुरिकाश्च याः ।
अम्बरे ताः समुड्डीय लक्षशो विगतास्त्विलः ॥७१॥
कास्ताः कथं समायाताः क्व गताश्च कुतश्च ताः ।
वद नस्तद् यथार्थं वै त्वं नौ नैर्मल्यकारकः ॥७२॥
श्रुत्वा वात्स्यायनः प्राह साध्व्यः शृणुत मद्वचः ।
मम स्पर्शो भवतीभिर्येन केनापि कर्मणा ॥७३॥
येन केनापि भावेन विहितोऽत्राऽङ्गनास्ततः ।
भवतीनां वासना याः कामपापात्मिकास्तथा ॥७४॥
तृष्णाः पापात्मिकाश्चापि पापान्यसंख्यकानि च ।
गणिकाकृतकर्माणि तानि सर्वाणि यानि च ॥७५॥
मम पादस्पर्शनेन मल्लिंगस्पर्शनेन च ।
मद्धूलिधारणेनापि देहेभ्यो निर्गतानि वै ॥७६॥
भवतीनां शरीराणां पावनत्वं विलोक्य च ।
अशक्तानि हि संस्थातुं निर्यातानि समन्ततः ॥७७॥
तानि सर्वाणि पापानि वागुलिकात्मकानि च ।
भूत्वा यातानि सर्वाणि हिमालये तु मानसम् ॥७८॥
सरस्तत्र भविष्यत्यद्धा तन्मोक्षो विलीनता ।
मम योगेन सर्वासां पापानि निर्गतानि वै ॥७९॥
अथ यूयं समस्ताश्च गृह्णत मन्त्रमुत्तमम् ।
इत्युक्त्वा प्रददौ मन्त्रं गणिकाभ्यो मनुं मम ॥८०॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
गृहीत्वा गणिकादेव्यो मन्त्रं तूर्णं चतुर्भुजाः ॥८१॥
भूत्वा श्रीवैष्णवीदेव्यो दिव्यदेहाः सुशोभनाः ।
नारायण्यो विमानैश्च ययुर्धामाऽक्षरं मम ॥८२॥
सहस्रशो गणिकास्ता हरिप्रियास्ततोऽभवन् ।
वर्तन्ते चाऽक्षरेधाम्नि मम सेवापरायणाः ॥८३॥

इत्येवं साधुसंगेन लक्ष्मि! पुंश्चलिका अपि।
सद्यः शुद्ध्यति धर्माढ्या दिव्या भवति सेविका ॥८४॥
तस्मात् पापातिपापानां शोधकं सेवनं सताम्।
येन केनापि भावेनं सेविताः शोधयन्ति ते ॥८५॥
अथाऽन्या गणिकाः श्रुत्वा चाययुस्तमृषिं प्रति।
शुद्ध्यर्थं च तदा ताभ्यः कामशास्त्रं जगाद ह ॥८६॥
श्रावयित्वा शिक्षयित्वा सेवां दत्वा निजां ततः।
तासां मोक्षं चकाराऽपि वात्स्यायनो महानृषिः ॥८७॥
शंकरश्च स्वयं मूर्तिमान् भूत्वा गोचरोऽस्य च।
अभवत् प्राह धन्योऽसि गणिकामोक्षकृद् ऋषे ॥८८॥
साधो साधुस्वरूपोऽसि कामं कृत्वा सुचिन्तितम्।
अपि कामेन नैव त्वं लिप्तोऽसि कामशास्त्रकृत् ॥८९॥
यथाऽहं दाहकश्चाऽस्मि कामस्य जीवकोऽपि च।
यथा कृष्णो विजेताऽस्ति कामस्य रमयन्नपि ॥९०॥
तथा त्वं च विजेताऽसि कामस्य वर्णयन्नपि।
भव साधो मुक्तिदाता पापं विनाश्य योषिताम् ॥९१॥
शास्त्रं ते तव नाम्नैव ख्यातं लोके भविष्यति।
इत्युक्त्वा शंकरो देवो तिरोभावं पिता तव ॥९२॥
ययौ काश्यां च साधुः स व्यचचार महीतले।
मोक्षयन् जीवजातानि वात्स्यायनो हि वैष्णवः ॥९३॥
पठनाच्छ्रवणादस्य स्मरणात् सेवनादपि।
महापापानि नश्यन्ति मोक्षगतिर्भवेत् ॥९४॥
इत्येवं कथितं लक्ष्मि रहस्यं साधुसेवनम्।
भुक्तिमुक्तिप्रदं दिव्यभावप्रदं कथानकम् ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने स्वैरिणीकामिनीपुंश्चलीनामपि गणिकानां काश्यां साधुवात्स्यायनसमागमेन पापनाशोत्तरं मुक्तिप्राप्तिरित्यादिनिरूपणनामा द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

**श्रीनारायणीश्रीरुवाच—**

केन वै हेतुना साधुर्नारायणो निगद्यते।
यद्यपि बहवस्तत्र हेतवः स्युर्दृढव्रताः ॥ १ ॥
तथापि सरलं हेतुं यद्वा श्रेष्ठमनुत्तमम्।
दुष्करं वाऽवगन्तुं तं समिच्छामि तथा वद ॥ २ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि महत्तश्च हेतून् बहुविधानपि।
क्षमा शीलं विरागश्च शान्तिस्तथाऽपरिग्रहः ॥ ३ ॥
वैतृष्ण्यं स्वादशून्यत्वं चाऽऽत्मनिष्ठत्वमित्यपि।
अलोलुपता द्वेषादिराहित्यं सर्वमित्रता ॥ ४ ॥
आत्मसाधनकर्तव्यं मयि सर्वसमर्पणम्।
अस्नेहो बन्धशून्यत्वं मायाकैंकर्यवर्जनम् ॥ ५ ॥
देहेन्द्रियादियात्रातन्मात्रनिर्वाहणाऽर्जनम्।
प्रतीक्षा मोक्षलोकस्य ममाऽहंवर्जनं तथा ॥ ६ ॥
नवोन्मेषारम्भहानिः स्थैर्यं चात्मनि नेतरे।
शीलं मनसो नैर्मल्यं साधुत्वे कारणानि वै ॥ ७ ॥
परोपकारो यस्याऽस्ति मोक्षमार्गप्रदर्शनम्।
व्रतं शीलं च यस्याऽस्ति नारायणार्थमुत्तमम् ॥ ८ ॥
तपश्चोग्रं च यस्याऽस्ति मायाबन्धनवर्जितम्।
वृत्तयश्चापि सर्वा वै यस्य मद्गोचराः सदा ॥ ९ ॥
ह्येतच्चतुष्टयं लक्ष्मि साधुत्वे मुख्यकारणम्।
नहि काषायवस्त्राणि नहि चिह्नानि बाह्यतः ॥१०॥
नहि दीक्षा नहि वासः साधुत्वे श्रेष्ठहेतवः।
आत्ममोक्षविधातारो मायामोक्षाद्यभीप्सवः ॥११॥
परब्रह्मणि निष्णातास्तापसाः साधुसत्तमाः।
साध्व्यश्चापि सतीधर्मपराः शीलपरा मम ॥१२॥
रागशून्या भक्तिमत्यः साध्व्यः साध्वीविभूषणाः।
शरीरे भोगशून्यत्वं साधुसोपानमादिमम् ॥१३॥
इन्द्रियरागशून्यत्वं सोपानं च द्वितीयकम्।
अन्तःकरणवशता सोपानं च तृतीयकम् ॥१४॥
आत्मनश्चार्पणं कृष्णे सोपानं तच्चतुर्थकम्।
ज्ञाने मन्मूर्तिवासश्च सोपानं पञ्चमं च तत् ॥१५॥
मोक्षफलप्रयत्नश्च सोपानं षष्ठमेव तत्।
तुर्यावस्थास्थितिर्नित्यं सोपानं चाऽन्तिमं हि तत् ॥१६॥
सप्तसोपानमारूढः साधुरेव सदुत्तमः।
अपि साध्व्यस्तथाचाराः साध्व्युत्तमा मता मम ॥१७॥
त एते ह्युच्चकक्षास्थाः सन्तः साध्व्यो मयोदिताः।
मध्यकक्षागतांश्चापि दर्शयामि निबोध मे ॥१८॥
देहेन्द्रियादिरागस्थास्तजन्यसुखलिप्सवः।
किन्तु सर्वार्पणाः कृष्णे मयि चात्मनिवेदिनः ॥१९॥
मायाया गौणबलिनो मद्बले चोत्तमास्पदाः।
एवंविधा मध्यमास्ते साधवः साध्विकाः प्रिये ॥२०॥
अथ ततोऽपि निम्नस्थान् शृणु लक्ष्मि मदर्थकान्।
सर्वथा रागयुक्ताश्च देहेन्द्रियादियोगिनः ॥२१॥
लब्धदीक्षा अपि स्वार्थपरायणा मदाश्रयाः।
कुर्वतोऽग्रे मां प्रदर्श्याऽपि त्यागाश्रमनिवासिनः ॥२२॥

त्यागगन्धस्य मात्रां च स्वल्पां नैव विदन्ति च ।
तथापि कष्टमासाद्य त्यागमार्गे स्थिता इव ॥२३॥
वर्तन्ते ये निम्नचित्ता जालावृत्ता हरिध्वजाः ।
त एते नामतः सर्वे साधवो वै भवन्ति हि ॥२४॥
यथा काष्ठकृतो हस्ती यथा व्याघ्रश्च चर्मजः ।
तथाऽम्बरेण यः साधुस्त्रयस्ते व्यर्थशक्तयः ॥२५॥
अज्ञानां भयदाश्चैते विज्ञानामुपला इव ।
आश्रितानां नेष्टदास्ते त्रयो विश्वासघातकाः ॥२६॥
निश्चितार्थविघातास्ते समुन्नतिविरोधिनः ।
असत्काचसमाश्चैते संगाद् भंगनिरूपकाः ॥२७॥
तपः श्रुतं च शक्तिश्चाऽप्येतत् साधुत्वलक्षणम् ।
क्षमा भक्तिर्विरागश्च साधुत्वे कारणानि वै ॥२८॥
एतादृशे तु साधौ वै तृप्ते तृप्ताः सुरादयः ।
यथा हि सुलभे क्षेत्रे फलं विन्दति कर्षुकः ॥२९॥
तथा समर्प्य साधौ वै फलं दाता समश्नुते ।
असाधौ दत्तमेवैतन्मोघं स्यान्नात्र संशयः ॥३०॥
अदन्नसाधुर्हन्त्यन्नमद्यमानं च हन्ति तम् ।
तं चाऽन्नं पाति यः साधुरदन्नन्नं च रक्षति ॥३१॥
रक्षणं परलोकेऽपि पात्रेऽर्पितं करोति तत् ।
प्रभुर्ह्यन्नमदन् साधुर्दातारं पोषयत्यपि ॥३२॥
पुण्येन कर्मणा तस्मात् सत्पात्रेऽन्नं नियोजयेत् ।
यदेव ददतः पुण्यं तदेव प्रतिगृह्णतः ॥३३॥
यत्रुभे साधुरूपे वै पात्रे स्यातां हि निर्मले ।
यत्र वै साधवः सन्ति श्रुतवृत्तोपयोगिनः ॥३४॥
तत्र दानफलं पुण्यं जायते वै सहस्रधा ।
ये ब्रह्मशुद्धाः सततं शीलशुद्धाश्च साधवः ॥३५॥
तपस्यभिरताश्चापि भक्ताः पूज्यतमा हि ते ।
तैश्च सद्भिः कृतः पन्था दिव्य एव न संशयः ॥३६॥
तेन याता न मुह्यन्ति मायायां चैश्वरे स्थले ।
परं पारं प्रगच्छन्ति ब्रह्मवाहा हि साधवः ॥३७॥
दुरन्वयं दुःप्रधर्षं दुरापं दुरतिक्रमम् ।
सदाशीर्वादतः सर्वमभ्येति नात्र संशयः ॥३८॥
सुरापो भ्रूणहाः स्तेनो गुरुतल्पनिषेवणः ।
साधुना तीर्यते सर्वैनसश्च प्रमुच्यते ॥३९॥
सर्वपूज्याः पूज्यधना विद्यावन्तो हि साधवः ।
तपस्विनो दानरता भक्तिमन्तो हि तारकाः ॥४०॥
इमं च ब्रह्मलोकं च मोक्षस्थानमनुत्तमम् ।
साधुसेवासुकृतिनः प्रपद्यन्ते तु लौकिकाः ॥४१॥
पूजिताः पूजयन्त्येते मानिता मानयन्त्यपि ।
प्रज्वाल्य पापिपापानि तारयन्ति हि साधवः ॥४२॥
यो भर्ता सेवकैस्तुष्टो भर्तुस्तुष्टाश्च सेवकाः ।
यत्रैवं साधुभावोऽस्ति तत्र कल्याणकोटयः ॥४३॥
अद्भिर्गात्रान्मलमिव तमोऽग्निप्रभया यथा ।
साधोश्च सेवया तद्वत् सर्वपापमपोहति ॥४४॥
स्वस्ति करोति सर्वस्य पावयत्यपि देहिनः ।
एतत्क्रियापरः साधुः श्रेयःकर्ता जगत्त्रये ॥४५॥
जीवानां मुक्तये लक्ष्मि मया साम विनिर्मितम् ।
साधवः साम गायन्ति बोधयन्ति जनानिह ॥४६॥
उपदिशन्ति मन्त्रादीन् कीर्तयन्ति च मां मुहुः ।
वर्णयन्ति कथां मे च चरित्राणि बहूनि च ॥४७॥
गुणान्मे मम कार्याणि निरूपयन्ति सर्वथा ।
एवं साम्ना गीतिकाभिर्वाचयन्ति हि साधवः ॥४८॥
विद्वांसो मां शास्त्रमुखैः प्रसंगायन्ति नित्यदा ।
कवयन्ति च कवयः स्तुवन्ति चार्थसाधकाः ॥४९॥
एवं साम्ना हि बहुधा मामर्जयन्ति मानवाः ।
साम्ना गुरोर्मुखात्प्राप्य मां च दानेन साधयेत् ॥५०॥
दानं समस्तभावेन समर्पणं निवेदिता ।
आत्मसमर्पणं दानं तेनाऽर्जयेच्च मां सदा ॥५१॥
साधवो दानयोगेन चार्जयन्ति ददत्यपि ।
ज्ञानदानं मन्त्रदानं नामदानं हरेस्तथा ॥५२॥
प्रसाददानं मालादिप्रदानं शिक्षणार्पणम् ।
लाभदानं सुखदानं मोक्षदानं परात्परम् ॥५३॥
ददत्यभयं दानं तत् तपोदानं शुभास्पदम् ।
पुण्यदानं प्रकुर्वन्ति साधवः साधुभूषणाः ॥५४॥
कृपादानं तथा रम्याशीर्वादानां प्रदानकम् ।
दर्शनस्य प्रदानं च सेवादानं शुभावहम् ॥५५॥
सद्गुणानां प्रदानं च तेन तेन हि साधवाः ।
मां हरिं चार्जयन्त्येव भक्तेभ्यश्च ददत्यपि ॥५६॥
दीक्षादानं चात्मदानं कृत्वाऽपि तारयन्ति ते ।
भक्तिदानं शुभं कृत्वा तारयन्ति जनान् भवात् ॥५७॥
अन्ततश्चाश्रयदानं चरणामृतदानकम् ।
वाग्दानं साक्षितादानं कृत्वाऽपि तारयन्ति ते ॥५८॥
मनोदानं स्नेहदानं पावित्र्यादिप्रदानकम् ।
सदाचारक्रियाशिक्षादानं स्मृतिप्रदानकम् ॥५९॥
कण्ठीदानं चिह्नदानं कृत्वाऽपि तारयन्ति ते ।
मूर्तिदानं पात्रदानं कृत्वाऽपि तारयन्ति ते ॥६०॥

अथ भेदं योजयन्ति दानं साम च यत्र न।
देहोऽयं मलसंयुक्तो मलिनः क्षणभङ्गुरः ॥६१॥
आत्मा शुद्धो हरेर्भक्तो मुक्तियोग्यो हि शाश्वतः।
एवं भेदं विवेकं वै योजयन्ति च साधवः ॥६२॥
अथ दण्डं वर्तयन्ति प्रायश्चित्तं विधर्मिणि।
अमार्गगं जनं सन्तो नियमयन्ति सद्व्रतैः ॥६३॥
प्रायश्चित्तैः कृच्छ्रचान्द्रायणादिभिः क्रियात्मकैः।
द्रव्यव्ययात्मकैर्यज्ञमहोत्सवैः सुखोत्सवैः ॥६४॥
अन्नसत्रैर्भोजनाद्यैः पूजादानार्पणादिभिः।
श्रेयस्करैस्तथाऽऽयासैर्योजयन्ति विशुद्धये ॥६५॥
धर्मकर्मादिभिश्चापि योजयन्ति प्रसह्य तान्।
यद्वा प्रबलदण्डेन नियमयन्ति साधवः ॥६६॥
यथा पापानि नश्येयुर्मोक्षं विन्देयुरेव च।
एवं हितात्मदण्डेन श्रेजयन्ति हि साधवः ॥६७॥
गर्विष्ठानां तु वै क्रूरं दण्डं कुर्वन्ति वै क्वचित्।
तेषां निष्कल्मषतार्थं मुक्त्यर्थं चापि साधवः ॥६८॥
दैविकं वा शुभं दण्डं प्रेरयन्ति जपादिकम्।
येन निष्कल्मषत्वं च प्राप्य यान्ति परं पदम् ॥६९॥
पापी वा पुण्यशाली वा मिश्रितो वोभयादिभिः।
भक्तिमान् वा ह्यभक्तो वा नास्तिको वाऽऽस्तिकोऽपि वा ॥७०॥
यः कश्चिद्वा भवेद् देही नयन्ति शरणं पुरः।
संस्कृत्योपायभेदैश्च पावयन्ति पुनः पुनः ॥७१॥
प्रसादयित्वा सततं कृत्वा शुद्धं सनातनम्।
निजतुल्यं ततः सन्तो नयन्ति धाम चाऽक्षरम् ॥७२॥
एवं सतां सदा लक्ष्मि परोपकारशालिता।
अप्रतिदानलभ्या वै तथा शुद्धयन्ति देहिनः ॥७३॥
यथा चाऽहं तथा ते वै गुरवो लोकतारकाः।
आनखशिखं सन्तस्तु पवित्रा मम मूर्तयः ॥७४॥
यथा वै शर्कराखण्डः सर्वथा मिष्टसद्रसः।
भागत्यागो न तत्राऽस्ति तथा ते साधवो मम ॥७५॥
यथा वा नवनीतस्य पिण्डः स्नेहात्मकोऽखिलः।
भागत्यागो न तत्राऽस्ति तथा ते साधवो मम ॥७६॥
यथा वा मौक्तिकः शुद्धः स्वच्छो वा स्फटिकस्तथा।
कौस्तुभो वा मणिर्यद्वत् तथा ते साधवो मम ॥७७॥
यथा वा कामधेनुर्गौर्यथा दुग्धं च निर्जलम्।
यथा वा कनकं शुद्धं तथा ते साधवो मम ॥७८॥
यथा चिन्तामणिः श्रेष्ठो यथा कल्पतरुश्च वा।
कल्पवल्ली यथा श्रेष्ठा तथा ते साधवो मम ॥७९॥

यथा मे हृदयं श्रेष्ठं यथा मूर्तिश्च मे परा।
यथाऽक्षरं परं धाम तथा ते साधवो मम ॥८०॥
यथा विष्णुः सदा शुद्धः यथा शीलं व्रतोत्तमम्।
यथा शान्तिर्महद्द्रव्यं तथा ते साधवो मम ॥८१॥
यथा क्षेत्रं कणिसस्यान्वितं गौः प्रसवोन्मुखी।
यथा यज्ञो दक्षिणान्तस्तथा ते साधवो मम ॥८२॥
यथा वृक्षाः फलाढ्याश्च पुष्पाढ्या वल्लयो यथा।
चमत्कारी यथा त्यागी तथा ते साधवो मम ॥८३॥
यथा रत्नमयी पृथ्वी माया गुणमयी यथा।
आत्मा चाऽशत्रयाढ्यश्च तथा ते साधवो मम ॥८४॥
यथाऽहं सर्वसामर्थ्यो यथा लक्ष्मीर्हि सम्पदः।
यथा कृष्णात्मकं सर्वं तथा ते साधवो मम ॥८५॥
यथा सुदर्शनं चक्रं यथा दण्डो यमस्य च।
यथा प्रसन्नता विष्णोस्तथा ते साधवो मम ॥८६॥
यथा शंभुकृता भक्तिर्यथा सेवा सतीकृता।
यथा स्नेहः कामकृतस्तथा ते साधवो मम ॥८७॥
यथा क्षमा साधुनिष्ठा यथा भक्तगतं वचः।
दास्यं साध्वीगतं यद्वत् तथा ते साधवो मताः ॥८८॥
व्रतं पत्नीगतं यद्वत् तृप्तिर्निस्तृष्णगा यथा।
गंगाम्भः पावनं यद्वत् तथा ते साधवो मम ॥८९॥
यथा वंशः पुत्रगतो दानं कन्यागतं यथा।
पूजा गणेशगा यद्वत् तथा ते साधवो मम ॥९०॥
यथाऽहं साधुरेवाऽस्मि साध्वी त्वं च विराजसे।
यथा योगश्चावयोर्वै तथा ते साधवो मम ॥९१॥
किम्वधिकं वेदयामि प्रशंसा नाऽत्रलभ्यते।
भगवन्तः साधवो मे भक्तोऽहं सर्वथा सताम् ॥९२॥
अनर्घ्यं मम सद्द्रव्यो यो भुंक्ते स्वोदरसंभरः।
जायते स कुशे देशे कुशो वै ब्रह्मराक्षसः ॥९३॥
साधूचितं पूजनं चाऽकृत्वा यो मोदते गृहे।
स्वगर्वात् सोऽपि देहान्ते जायते ब्रह्मराक्षसः ॥९४॥
धनैश्वर्ययुतश्चापि सेवते न सतो जनान्।
निन्दति चाऽवजानाति स भवेद् ब्रह्मराक्षसः ॥९५॥
गुणाभिमानसन्दब्धो प्राऽज्ञान् पश्यति वै सतः।
दरिद्रांश्चाऽवजानाति स भवेद् ब्रह्मराक्षसः ॥९६॥
अजेयानपि साधूंश्च तिरस्कारान् करोति यः।
मिथ्यादोषान् प्राहिणोति स भवेद् ब्रह्मराक्षसः ॥९७॥
अजातशत्रून् साधून् यः क्लेशे योजयतीश्वरः।
सम्पन्नोऽपि मृतः पश्चाज्जायते ब्रह्मराक्षसः ॥९८॥

विद्वानपि सतः शान्तानवमत्य जुगुप्सति ।
हीयमानोऽपि दुर्वृत्तैः स भवेद् ब्रह्मराक्षसः ॥९९॥
यस्तु मित्रमुखः शत्रुर्भवति श्वासघातकः ।
अनार्यश्चार्यविद्वेष्टा जायते ब्रह्मराक्षसः ॥१००॥
अयत्सु वर्तमानश्च सतो भावं विडम्बते ।
प्रशंसति दुष्टभावान् जायते ब्रह्मराक्षसः ॥१०१॥
महद्गुणैस्तु यो हीनो महत् प्रार्थयतेऽखिलम् ।
सतोऽवमन्ता तद्योगे जायते ब्रह्मराक्षसः ॥१०२॥
तपस्विनं क्षमायुक्तं गुरुं विज्ञानिनं प्रभुम् ।
प्रसह्य चाऽवमन्ता यो जायते ब्रह्मराक्षसः ॥१०३॥
साधून् वनेचरान् वीक्ष्य नोत्तिष्ठते पुरस्तु यः ।
नात्महितं चरेद् यस्तु जीवन् वै राक्षसो हि सः ॥१०४॥
राक्षसोऽपि हरेर्भक्तान् साधूंस्त्वा प्रसेवते ।
प्रसादयति सेवाभिश्चाशीर्वादान् सुविन्दति ॥१०५॥
सद्गुणान् सुखदान् लक्ष्मि यो गृह्णाति सतो जनात् ।
स एव जायते लोके साधुर्वै साधुवर्तनः ॥१०६॥
न जन्म नापि यत्नश्च न वेषः साधुताऽर्जकः ।
साधुसत्संगसेवादि कारणं साधुताग्रहे ॥१०७॥
त एव तारका लक्ष्मि दर्शनात् स्पर्शनादपि ।
सेवनात् परिचरणात् तरन्ति देहिनो भवात् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधुत्वे विविधप्रयोजककारणादि साधुस्तवनाऽस्तवनफलादि चेतिकथननामा त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

श्रीनारायणीश्रीरुवाच—

कृपासिन्धो जीवबन्धो चात्मप्राणपते विभो ।
कर्मक्षेत्रे नरनारीदेहे प्राप्ते शुभावहे ॥ १ ॥
श्रेयोऽर्थिना दरिद्रेण भाग्यहीनेन सर्वथा ।
यत्र नैव तु साधूनां लभ्यतेऽपि समागमः ॥ २ ॥
तत्र कृत्वा विधिं किं च प्राप्येत मोक्षणं निजम् ।
आत्मकल्याणवाञ्छावान् कल्याणं लभते कथम् ॥ ३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं श्रेष्ठं पृच्छसि शोभनम् ।
कर्मक्षेत्रमिदं चास्ते लब्ध्वा मानुषमुत्तमम् ॥ ४ ॥
मातुः सेवां प्रकुर्वीत गृहतीर्थस्य सर्वथा ।
यथा यथा निजा माता प्रसन्ना स्यात्तथा तथा ॥ ५ ॥
सेवयित्वा चाऽर्जयेद्वै तदाशिषः सुपुण्यदाः ।
दारिद्र्यनाशिकाश्चापि श्रेयसां सम्प्रदाः शुभाः ॥ ६ ॥
मातुश्च सेवया भाग्यं भाग्यहीनस्य वर्धते ।
माला नारायणी ब्राह्मी श्रेयः करोति चाशिषा ॥ ७ ॥
एवं पितुः शुभा सेवा कर्तव्या तीर्थरूपिणः ।
तदाशीर्वादलाभेन श्रेयः पुण्यं हि लभ्यते ॥ ८ ॥
भाग्यं भवेद्विशालं च सम्पन्नं श्रेयसा भृतम् ।
अथैवं सेवया भाग्योदयेन स्यात् सती मतिः ॥ ९ ॥
शास्त्रार्थचिन्तने योग्या ततो ज्ञानं समर्जयेत् ।
ज्ञानोत्तरं विवेकञ्च ततो ध्येयं हरिं तु माम् ॥१०॥
ध्यायीत भक्तिं कुर्वीत ममैव सर्वदा शुभाम् ।
बहुधा यत्र नैर्मल्यं स्थैर्यं च मनसो भवेत् ॥११॥
नामजपं प्रकुर्वीत हरे कृष्ण नरायण ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥१२॥
एवं वै कीर्तनं कुर्वन् कारयन् भजनं परम् ।
सखायं संविदधीत सखीन् भक्तान् विवर्धयेत् ॥१३॥
सत्संगमण्डलं पश्चात् स्थापयेत् संभजेत माम् ।
कीर्तनं मे सदा कुर्यात् सायं चैकत्र मण्डलम् ॥१४॥
हरेर्भक्ता मण्डले ये ते बोध्याः साधवस्तदा ।
शास्त्रश्रवणलाभेन वृद्धवाक्येन वा सदा ॥१५॥
साधुगुणान् सखीन् प्राप्य सत्संगं वर्धयेत् ततः ।
एवं कृत्वा विशालं वै विदधीत स्वमण्डलम् ॥१६॥
महापुण्यप्रतापेन खलु सत्संगमण्डलात् ।
मुमुक्षुता भवेच्छ्रेष्ठा ततो भक्त्या शुभावया ॥१७॥
भजित्वा माऽऽत्मकल्याणं प्रकुर्वीत स भक्तराट् ।
एवं लक्ष्मि बलं नैजं सबीजं वर्धयेत् सदा ॥१८॥
सत्संगपोषकं येन भुक्तिर्मुक्तिर्भवेत्ततः ।
नामकीर्तनतुल्यं वै सुलभं साधनं नहि ॥१९॥
अलब्धसाधुसंगस्य नामकीर्तनमुत्तमम् ।
साध्वी जिह्वा निजा बोध्या तत्समागममाचरेत् ॥२०॥
साध्वी मतिर्निजाबोध्या तया मन्वीत माधवम् ।
मनः साधु निजं बोध्यं तेन मन्वीत मां सदा ॥२१॥
देवः साधुरितिकृत्वा तेन सेवेत केशवम् ।
एवं संगतिमासाद्य मां भजेत सनातनम् ॥२२॥
आचार्या वा गुरवश्च कोटिकल्याणकारिणः ।
एवमात्मबलेनैव तेरुर्भवार्णवात् स्वयम् ॥२३॥
तारयामासुरन्यांश्च श्रीहरेः कृपया त्विह ।
यतमानं निजं भक्तं साहाय्यवर्जितं हरिः ॥२४॥
स्वयं तत्राऽवतीर्यैव चोषित्वा हृदयेऽपि च ।
भक्तमण्डलमध्ये वा चोषित्वा श्रेय अर्पयेत् ॥२५॥

नहि कीर्तनकृत् कश्चिदनिष्टं विन्दति प्रिये ।
स एव तत्र साधुर्वै कीर्तनेन प्रजायते ॥२६॥
अयि लक्ष्मि श्वपचोऽपि गृहे संकीर्तयंश्च माम् ।
सुदूरोऽपि साधुमनाः साधुस्निग्धो हि साधुवत् ॥२७॥
चर्मकारोऽपि शीलाढ्यो मम भक्तिपरायणः ।
साधुस्निग्धः साधुरेव कीर्तयन्मां स्वकर्मकृत् ॥२८॥
म्लेच्छोऽपि शीलयुक्तश्चेन्मम भक्तिपरायणः ।
साधुस्निग्धः साधुरेव कीर्तयन्मामहिंसकः ॥२९॥
घातकी व्याध एवाऽपि शीलव्रतस्त्यजन् हृतिम् ।
साधुस्निग्धः साधुरेव कीर्तयन्मामहिंसकः ॥३०॥
ध्वजी चक्री च वा साधुः साधुस्नेहपरायणः ।
शीलव्रतोऽहिंसकश्च कीर्तयन्मामहर्निशम् ॥३१॥
गणिका च व्यवायी च साधुस्नेहपरायणौ ।
साधूशीलव्रतौ कीर्तयन्तौ मां कामवर्जितौ ॥३२॥
धीवरश्चापि मत्स्यादः शीलव्रतोऽप्यहिंसकः ।
साधुस्नेहपरः साधुः कीर्तयन्मां परेश्वरम् ॥३३॥
जल्लादो हारकः स्तेनः साधुस्नेहपरायणाः ।
शीलव्रताः कर्मशून्याः साधवश्चेद् रटन्ति माम् ॥३४॥
भुजिष्या वृन्दलो वापि साधू शीलपरौ यदा ।
साधुस्निग्धौ कीर्तयन्तौ मां हरिं पुरुषोत्तमम् ॥३५॥
भाण्डा नटा नर्तकाश्च कुशीलवाश्च साधवः ।
शीलव्रताः साधुस्निग्धाः कीर्तयन्तश्च मां हरिम् ॥३६॥
बहुरूपा नर्मकाराः शवहाराश्च साधवः ।
शीलव्रताः साधुस्निग्धाः कीर्तयन्तश्च मां हरिम् ॥३७॥
सर्वादा गणिकेशाश्च गोधादाः सर्पभोजनाः ।
साधवः शीलव्रतिनः साधुस्निग्धा रटन्ति माम् ॥३८॥
जालग्राहाः पिशितादाः सन्त्यज्य क्रूरवर्तनाम् ।
साधवः शीलव्रतिनः साधुस्निग्धा रटन्ति माम् ॥३९॥
अग्निदा गरदाः शूलप्रदाः पाशप्रदा अपि ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥४०॥
शस्त्रजीवी चिकित्साकृच्छवांगभेदिनो यदि ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥४१॥
भ्राष्ट्रभट्टीकराश्चापि वनारण्यविघातिनः ।
शीलपराः साधुस्निग्धाः साधवो हि रटन्ति माम् ॥४२॥
उन्मत्तश्च विचित्तश्च शठः स्वार्थी हि साधवः ।
साधुस्निग्धाः शीलपरा मां रटन्ति विदुर्गुणाः ॥४३॥
आसुरा राक्षसा दैत्या दानवाः पापिनोऽपि च ।
साधुस्निग्धाः शीलवन्तः साधवो मां रटन्त्यपि ॥४४॥
भूताः प्रेताः पिशाचाद्या रटन्तो मां हि साधवः ।
शीलपराः साधुव्रताः साधुस्निग्धास्तथा मयि ॥४५॥
माधुकश्च मत्स्यहाराः शाकुनिश्च हि साधवः ।
साधुशीलाः साधुस्निग्धाः कर्मशून्या रटन्ति माम् ॥४६॥
पशुवाहाः पञ्जरिणो विश्वासघातकाश्च ते ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥४७॥
तिर्यग्वृत्तय आत्मस्त्रीरक्तविक्रयिणोऽपि तु ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥४८॥
यन्त्रिणश्चक्रिणश्चापि शस्त्रिणः साधवो हि ते ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि सात्त्विकाः ॥४९॥
राजभटाधिपा न्यायाधिपा नृपा हि साधवः ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि सात्त्विकाः ॥५०॥
मुष्कच्छेदकरा दंष्ट्राहाराश्च लिङ्गकृत्तिनः ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि सात्त्विकाः ॥५१॥
अकर्माणो विकर्माणो नृशंसा अपि साधवः ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥५२॥
दौर्हृदनाशका धातुभोजिनः शौचवर्जिताः ।
रटन्तो मां साधुशीलाः साधुस्निग्धा हि साधवः ॥५३॥
येषां वै पञ्चकं सिद्धं साधवस्ते सदा मताः ।
निष्कामता ह्यलोभित्वं निर्मानित्वं निःस्वादिता ॥५४॥
निःस्नेहिता च सर्वत्र सन्तस्तत्पञ्चवृत्तयः ।
कामवासनाहीनत्वं निष्कामिता यथायथम् ॥५५॥
आवश्यकातिरिक्तेच्छाहीनत्वं लोभवर्जिता ।
अगर्वः सर्वथा निर्मानित्वं स्तब्धत्ववर्जिता ॥५६॥
प्राणयात्रार्थभोज्याप्तिर्निःस्वादित्वं हि तत् स्मृतम् ।
एवं शीलपराः साधुर्भक्तिमार्गपरायणः ॥५७॥
तरति तारयत्यन्यान् महाभागवतो हि सः ।
येषां वा पञ्चकं चान्यन्मुमुक्षुत्वं कथाश्रुतिः ॥५८॥
भक्तसाधोः संगतिश्च सेवाभक्तिप्रवर्तनम् ।
आत्मनिवेदनं चेति पञ्चवत्साधवो मताः ॥५९॥
येषां वा पञ्चकं चान्यत् प्रातःस्नानप्रपूजनम् ।
मध्याह्ने हरये भोज्यनिवेदनं सदाऽन्वहम् ॥६०॥
उपार्जनस्य विंशांऽशोऽर्पणीयो हरये तथा ।
मालिकावर्तनं नित्यं चान्ते त्वात्मनिवेदनम् ॥६१॥
त एते साधवः स्युश्च गृहे वने च निर्जने ।
समाजे वापि जीवानां तारकास्ते भवन्ति वै ॥६२॥
दुष्टगुणान् विहायैव सद्गुणानर्जयेत्तु यः ।
साधुरत्र भवेत् सोऽपि भजते चेद्धरिं सदा ॥६३॥

माया पापं पापवन्तो जीवा मायाविनः खलु ।
मायादुर्गुणमुत्सृत्य सद्गुणान् प्राप्य मद्रताः ॥६४॥
धर्मवंशाश्रया लोके साधवः साधुभूषणाः ।
संसारिणस्तु ये जीवाः सर्वे दुर्गुणसंभृताः ॥६५॥
पश्चात्प्राप्य सतां श्रेष्ठगुणान् भवन्ति साधवः ।
मायामलेन हीनास्ते सन्तो भवन्ति निर्मलाः ॥६६॥
दीयमानानि रत्नानि कल्पलतावराणि च ।
सम्पदः सुखभोग्याश्च नाऽवेक्षते हृदाऽपि यः ॥६७॥
भोग्यभोक्तृत्ववृत्तिश्च यस्य नाऽऽवर्तते मुहुः ।
साधुवृत्तिः स विज्ञेयस्तापसो दोषतापनः ॥६८॥
जैह्वयं शैश्न्यं जितं येन जितं सर्वं महात्मना ।
अश्राव्यो बधिरो यश्चाऽप्यप्रेक्ष्ये नेत्रवर्जितः ॥६९॥
अस्पृश्ये त्वग्विहीनश्चाप्यघ्रेये घ्राणवर्जितः ।
अकथ्ये जिह्वया हीनश्चाऽभक्ष्ये रसनाक्षयः ॥७०॥
अग्राह्ये हस्तशून्यश्चाप्यगम्ये पादवर्जितः ।
अत्याज्ये पायुशून्यश्चाप्ययोग्ये कामवर्जितः ॥७१॥
अलिङ्ग्ये लिङ्गशून्यश्च सर्वथा मत्परायणः ।
विदेहः साधुरेवाऽयं परस्यापि गतिप्रदः ॥७२॥
आस्यभूर्भृंगवद्यस्य शय्या चाऽऽजगरी यथा ।
निद्रा च जलवद् यस्य कल्पना व्योमपुष्पवत् ॥७३॥
देहश्छायासमो यस्य वस्तुजातं तु स्वप्नवत् ।
स्मृद्धयो भस्मवद् यस्य सम्मुखं च श्मशानवत् ॥७४॥
अस्तित्वं नास्ति तात्तुल्यं साधुः सोऽयं सदुत्तमः ।
यस्य सर्वं मयि चास्ते मत्तुल्यः साधुरेव सः ॥७५॥
यथाऽऽकाशगतं चाऽभ्रं विद्युद्वेगात् प्रवर्षति ।
तथा साधोः प्रसंगाच्च भक्तः स्नेहेन वर्षति ॥७६॥
यथा मेघा विलीयन्ते वायुवेगेन चाम्बरे ।
तथा साधोः प्रसंगेन लीयन्ते पापकोटयः ॥७७॥
यथा वै जाग्रतः स्वाप्नं लीयते तत्क्षणं तथा ।
साधोर्योगेन लीयन्ते कषायास्तत्क्षणं रमे ॥७८॥
यथा तमोविनाशो वै सूर्यभाभिः प्रजायते ।
तथा साधोश्चमत्कारैर्लीयन्ते कल्मषाणि वै ॥७९॥
यथा पुत्रप्रसवेन लीयन्ते शोककोटयः ।
तथा साधुप्रसंगेन लीयन्ते शोककोटयः ॥८०॥
यथा लग्नप्रसंगे आनन्दा भवन्ति सोत्सवाः ।
तथा साधुप्रसंगेन मोक्षानन्दोत्सवोद्भवाः ॥८१॥
यथा मातुर्दर्शनेन सुखं बालस्य जायते ।
तथा साधोर्दर्शनेन सुखं भक्तस्य जायते ॥८२॥
यथा मिष्टान्नलाभेन मोदन्ते बालबालिकाः ।
तथा वै साधुलाभेन मोदन्ते भक्तकोटयः ॥८३॥
यथा वर्षर्तुमासाद्य केका वदन्ति केकिनः ।
तथा साध्वर्तुमासाद्य कीर्तयन्ति हरेर्जनाः ॥८४॥
यथैकपुत्रनाशेन वृद्धपित्रोर्विदेहता ।
तथा सतां वियोगे तु भक्तानां स्याद् विदेहता ॥८५॥
यथा वन्ध्या पुत्रलाभे हर्षोन्मत्ता प्रजायते ।
तथा साधोर्गृहे लाभे हर्षोन्मत्ता ममाऽऽश्रिताः ॥८६॥
यथा सुगन्धसाराद्यैः प्रफुल्लं मानसं तथा ।
श्रीकृष्णसाधुधर्माद्यैर्भक्तमनः प्रफुल्लति ॥८७॥
यथाऽतीष्टस्य लाभेन सर्वानन्दा भवन्ति वै ।
तथा साधोरागमने सर्वानन्दा भवन्ति हि ॥८८॥
यथा नाट्यगतं पात्रं रङ्गं प्रसन्नयत्यति ।
तथा साधोः सेवकश्च साधून् प्रसन्नयत्यति ॥८९॥
यथा साध्वी हरिं कान्तं सदा प्रसेवते सुखा ।
तथा भक्तो हरिं साधुं सेवते च मुदा सुखः ॥९०॥
यथा व्याघ्रस्य पुत्रादौ स्नेहः सदा प्रपोषणे ।
तथा भक्तस्य साध्वादौ स्नेहः सदा प्रमोक्षणे ॥९१॥
यथा गौर्वत्समासाद्य ददाति धारया पयः ।
भक्तः साधून् समासाद्य सर्वस्वं प्रददाति ह ॥९२॥
यथा वृक्षा जलं पीत्वा प्रफुल्लिता नवाऽङ्कुराः ।
तथा भक्ताः सतः प्राप्य ब्रह्मार्पणनवाऽङ्कुराः ॥९३॥
यथा नद्यः पूरवृद्ध्या ह्युन्मत्ता आप्तुमब्धिनिधिम् ।
तथा भक्ता भक्तिवृद्ध्या ह्युन्मत्ता आप्तुमीश्वरम् ॥९४॥
यथा च नापितो राजसेवां प्राप्य प्रमोदते ।
तथा भक्तः साधुसेवां प्राप्य सदा प्रमोदते ॥९५॥
यथा युवा च युवतीं प्राप्यैति तत्तदात्मताम् ।
तथा भक्तो हरिं साधुं प्राप्यैति तत्तदात्मताम् ॥९६॥
यथा राजाऽऽज्ञया भृत्या वर्तन्ते नम्रमार्गिणः ।
तथा साध्वाज्ञया भक्ता वर्तन्ते धर्ममार्गिणः ॥९७॥
यथा दीपो रात्रियोगे प्रकाशते स्वयम्प्रभः ।
तथा भक्तः साधुयोगे प्रकाशते हरिप्रभः ॥९८॥
यथा पक्वं फलं वृक्षं जहात्येव हि कालतः ।
तथा पक्वफलो भक्तो जहात्येव तु मायिकम् ॥९९॥
यथा पत्नी धर्मशीलाऽनुसरत्येव सत्पतिम् ।
तथा साध्वीं च वा साधुमनुव्रजति भक्तराट् ॥१००॥
नारायणनिवासेन यथा नारायणायते ।
तथा साधुनिवासेन व्यक्तिर्वै साधवायते ॥१०१॥

यद्वद्भक्तिनिवासेन भक्तो भवति मानवः ।
लक्ष्मि साधुत्ववासेन साधुर्भवति मानवः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधुसमागमरहितस्यापि मोक्षोपायाः साधुलाभः साधुत्वलाभस्तद्द्विविधता चेत्यादिनिरूपणनामा चतुरशीतितमोऽध्यायः ॥ ८४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं साधुधर्मं सनातनम् ।
धार्यन्ते येन लोकाः सः सतां धर्मो हरिः स्वयम् ॥ १ ॥
हरेर्लीलाचरित्राणि स्मर्तव्यानि सदा मम ।
साधुधर्मः सदा कृष्णो रक्षणीयो निजे हृदि ॥ २ ॥
महायज्ञफलं चापि सर्वदानफलं तथा ।
गवां फलं तीर्थफलं व्रतानां फलमित्यपि ॥ ३ ॥
एतत्फलमवाप्नोति यो जनः साधुधर्मवान् ।
मोक्षकार्यं सदा साधोर्नारायणसमाश्रयात् ॥ ४ ॥
बन्धहानिस्तथा कार्यं साधोरेव प्रकीर्तितम् ।
वक्तारो भक्तिकर्तारो येषां शुद्धं च मानसम् ॥ ५ ॥
तेषां व्यक्तं जिता लोकाः साधूना साधुसंगिना ।
मुच्यते किल्बिषाच्चापि न स पापेन लिप्यते ॥ ६ ॥
धर्मं च लभते नित्यं साधुसंगी शरीरवान् ।
मोक्षं ततश्च लभते साधोर्हरेः कृपाकणात् ॥ ७ ॥
मानवास्तु सदा लक्ष्मि बालिशा इव मोहनः ।
साधूंन्निन्दन्ति मद्रूपान् यान्ति ते नरकान् बहून् ॥ ८ ॥
क्रूरास्तु मानवा लोके दयाहीनाश्च घातकाः ।
साधूंन्निरर्थकान्मत्वा त्यजन्ति भाररूपिणः ॥ ९ ॥
तेषां गतिर्न वै स्याद्धि सती क्वाऽप्यघसञ्चयात् ।
असाधुनिन्दकाः क्रूरास्तामसादिस्ववर्तनैः ॥१०॥
तिर्यग्योनिगतान् सत्वान् जीवान् हिंसन्ति मोहिताः ।
कीटान् पिपीलिकान् सर्पान् वृश्चिकान् पशुपक्षिणः ॥११॥
अपि चेत् ते शरणं वै सतां यान्त्यघनुत्तये ।
प्रसेवेयुः सतश्चेद्वै देहेन मनसा यदि ॥१२॥
तदा पापैः प्रमुच्यन्ते न चेद्धिंसन्ति वै पुनः ।
सतां प्रसेवया पुण्यं जायते बलवत्तरम् ॥१३॥
पुण्येन शुभसंकल्पाः शनैश्चापि शुभक्रियाः ।
असत्क्रियाणां सन्त्यागः सत्संगातिप्रवीणता ॥१४॥
पश्चात्तापः स्वकृत्यानां प्रायश्चित्तं तपः परम् ।
उपवासादिकं भक्तिर्यजनं दानमर्पणम् ॥१५॥
पूजनं देवतादीनां जपध्यानसुकीर्तनम् ।
तीर्थयात्रा ज्ञानलाभस्त्वेवं भवन्ति धर्मिणः ॥१६॥
ततः स्वर्गगतिः पश्चान्मोक्षगतिः प्रसंभवेत् ।
एतत् सर्वं सतां योगे तूर्णं श्रेष्ठं प्रजायते ॥१७॥
सन्तो नारायणाः सर्वे पापघ्ना मोक्षदायिनः ।
तेषु सदा विराजेऽहं शाश्वतः पुरुषो हरिः ॥१८॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
श्रीवत्सांको हृषीकेशः सर्वेश्वरादिपूजितः ॥१९॥
सर्वज्ञः सर्वसंश्लिष्टः सर्वगः सर्वतोमुखः ।
परमात्मा हृदयस्थः सर्वव्यापी सनातनः ॥२०॥
नायकः सर्वसृष्टीनां धाम्नां धामजुषामपि ।
श्रीकृष्णः पुण्डरीकाक्षः श्रीगर्भः श्रीसहोषितः ॥२१॥
शार्ङ्गचक्रादिचिह्नश्च दमशीलशमान्वितः ।
परक्रमेण वीर्येणोत्तमेन दर्शनेन च ॥२२॥
उत्साहेन प्रमाणेन धैर्येणार्जवसम्पदा ।
कृपया स्नेहभक्त्या च निजान् प्रति समन्वितः ॥२३॥
योगमायः समस्ताक्षो ब्रह्मण्यश्च शरण्यकः ।
भयहर्ता भयार्तानां दीनानां पालने रतः ॥२४॥
श्रुतवानर्थसम्पूर्णो वरदश्च वरार्थिनाम् ।
परमेशो रमेशश्च मेशो ब्रह्मप्रियापतिः ॥२५॥
सर्वाः सुखं संश्रिताश्च शरीरे मम देवताः ।
सोऽहं परेश्वरः साक्षाच्छ्रीभूलीलारमापतिः ॥२६॥
यो हि मां द्रष्टुमिच्छेद्वै चावतारावतारिणम् ।
द्रष्टव्यास्तेन मे सन्तः साध्वर्थाः साधुभूषणाः ॥२७॥
दृष्टेष्वेतेष्वहं दृष्टो न मे भेदोऽत्र विद्यते ।
सन्तो नारायणाः सर्वे इति विद्धि मम प्रिये ॥२८॥
सोऽहं श्रीपुण्डरीकाक्षो यस्य प्रीतो भवामि च ।
तस्य देवगणः प्रीतः सर्वार्थास्तस्य हस्तगाः ॥२९॥
यश्च मां मानवे लोके संश्रयिष्यति मानवः ।
तस्य कीर्तिर्जयश्चैव स्वर्गश्चाऽत्र भविष्यति ॥३०॥
धर्माणां देशिकः पूज्यः स भविष्यति धर्मभाक् ।
साधुरेव स मन्तव्यो नमस्कार्यः सदा जनैः ॥३१॥
धर्म एव परः स स्याद् यस्मिन्नभ्यर्हितोऽस्म्यहम् ।
सोऽहं प्रजाहितार्थे वै साधुकोटीरसर्जयत् ॥३२॥
ब्रह्मायनादीन् सर्वांश्च सच्चिदानन्दप्रभृतीन् ।
सनत्कुमारमध्यांश्च पूर्वान् पूर्वतरानपि ॥३३॥
सोऽहं साधुस्वरूपोऽस्मि हरिर्नारायणः प्रभुः ।
भगवान् सर्वरूपाणां धर्ता कर्ता विनाशिता ॥३४॥

वन्दितोऽहं च वन्दे तं मानितो मानयाम्यपि ।
अर्हितश्चाऽर्हयाम्येनं पूजितः पूजयामि तम् ॥३५॥
दृष्टः पश्याम्यजस्रं तं संश्रितः संश्रयामि तम् ।
एवं मे ध्यानकर्तुश्च ध्याताऽहं सततं प्रिये ॥३६॥
एवं मेऽस्ति व्रतं नित्यं तादृशाः साधवो मम ।
सज्जनाऽचरितं त्वेतद् व्रतं मे नाऽपरैरिह ॥३७॥
तस्मात् सन्तो मम रूपास्तारका देहिनामिह ।
कर्मणा मनसा वाचा सेवनीया हि साधवः ॥३८॥
साधून् दृष्ट्वा ममाऽप्येव दर्शनं जातमेव हि ।
समस्ताश्च सुरा नित्यं साधुदेहे वसन्ति वै ॥३९॥
सुरेश्वरस्तथा विष्णुश्चाऽहं साधौ वसामि च ।
सर्वाऽऽरामः सुरामोऽहं रमेशः परमेश्वरः ॥४०॥
कुंकुमवापिकाक्षेत्रे निवसामि त्वया सह ।
ब्रह्मप्रियाभिः सहितो हरिप्रियानुसेवितः ॥४१॥
कीर्तिर्लक्ष्मीर्धृतिः शान्तिः पुष्टिस्तुष्टिः रतिः रमा ।
भुक्तिर्मुक्तिः श्रीर्लीला च यत्र तत्राऽहमेव च ॥४२॥
मम साधुषु वर्तन्ते सदा कीर्त्यादयः प्रिये ।
निवसामि सदा तेषु मद्रूपाः साधवस्ततः ॥४३॥
प्रभावं साधुपूगस्य यश्च जानाति सर्वथा ।
स तु साधुं समाश्रित्य प्राप्य मां याति मत्पदम् ॥४४॥
भवन्त्येव च तस्यैव सर्वे कामा यथेप्सिताः ।
ये वा नाम रटन्त्यत्र मम लक्ष्मि समाहिताः ॥४५॥
तेषां कीर्तनभक्तानां संसिद्ध्यन्ति मनोरथाः ।
पूज्याः कीर्तनभक्ता मे तान्नमस्यामि चाप्यहम् ॥४६॥
साधुं मुक्तं सतीं साध्वीं ब्रह्मप्रियां हरिप्रियाम् ।
सन्तं चाश्वपट्टभूमिं ये नमन्ति नमामि तान् ॥४७॥
लक्ष्मीं राधां रमां श्रीं च माणिक्यां सुखदांश्रियम् ।
रमां पद्मावतीं कृष्णां ये नमन्ति नमामि तान् ॥४८॥
अवतारांश्च मे व्यूहान् भक्तांश्च पार्षदानपि ।
मूर्तीर्मे ये नमस्यन्ति तन्नमस्याम्यहं सदा ॥४९॥
वरुणं भास्करं वायुं वह्निं चन्द्रं बलाहकम् ।
शिवं विष्णुमजं देवान् ये नमस्यन्ति तान्नमे ॥५०॥
दुर्गां सरस्वतीं भूमिं शारदां विरजां तथा ।
मंगलाममृतां ये च नमस्यन्ति नमामि तान् ॥५१॥
बृहस्पतिं नारदं च सनत्कुमारमच्युतम् ।
नरं नारायणं ये च नमस्यन्ति नमामि तान् ॥५२॥
तपोधनान् महर्षींश्च भक्तिधनान् सतो जनान् ।
विद्याधनांश्च विदुषो ये नमन्ति नमामि तान् ॥५३॥
अभुक्त्वा दैवकर्माणि कुर्वते ये प्रभुप्रियाः ।
सन्तुष्टाः क्षमिणः सन्तस्तान् नमामि पुनः पुनः ॥५४॥
यज्ञे यजन्ति ये चेष्टीर्जितेन्द्रियाः सुशान्तयः ।
प्रातर्भजन्ति सायं ये तान्नमामि सुहृत्प्रियान् ॥५५॥
धर्मं भक्तिं च पितरौ गाश्च गुरुं नमाम्यहम् ।
ये वै संयमिनः शान्ता वने मूलफलाशनाः ॥५६॥
असंचयाः साधवस्तान् नमामि सततं प्रिये ।
भृत्यपोषा अतिथीनामाश्रया विघसाशिनः ॥५७॥
सत्यवाचो ब्रह्मचारास्तान्नमामि सदा सतः ।
प्रसन्नहृदयाः सर्वसत्त्वेषु मद्विवेकिनः ॥५८॥
स्वाध्यायध्याननिरतास्तान्नमामि सतो जनान् ।
गुरुप्रसादे मद्भक्तौ यत्नवन्तः स्थिरव्रताः ॥५९॥
शुश्रूषवोऽनसूयन्तस्तान्नमस्यामि सज्जनान् ।
सुव्रता सुनयो भक्ता ब्रह्मिष्ठा ब्रह्मदायिनः ॥६०॥
वोढारो मे प्रसादस्य तान्नमामि सदा सतः ।
भैक्षचर्यासु निरता दीना गुरुकुलाश्रयाः ॥६१॥
निर्घृणाश्चाऽच्युतधना निर्ममा गतवासनाः ।
ब्रह्मवक्तार ऐशा ये तान्नमामि सतो जनान् ॥६२॥
अहिंसानिरताः सत्यव्रता दान्ता वितृष्णकाः ।
कपोतवृत्तिका गृह्यास्तान्नमामि सतो जनान् ॥६३॥
चतुर्वर्गस्थिताः शान्ता अपि निष्कामयोगिनः ।
शिष्टाचारप्रवृत्ताश्च नमाम्येतान् रमे सदा ॥६४॥
ब्राह्मणा ब्रह्मतनवो भक्तिपराः सुपुण्यिनः ।
सुधाभक्षा व्रतयुक्तास्तान्नमामि सदाश्रितान् ॥६५॥
अयोनीनग्नियोनींश्च ब्रह्मयोनीन् सदुद्भवान् ।
अच्युतगोत्रान् श्रीगोत्रान्नमामि सततं सतः ॥६६॥
अक्षरं चापि गोलोकं वैकुण्ठं चाऽमृतं पदम् ।
अव्याकृतपदं ये च गन्तुमिच्छव ऐश्वरम् ॥६७॥
वैष्णवं धाम वा साध्वाश्रमान् जिगमिषूंस्तथा ।
नमस्यामि सतस्तान् वै सर्वानहं हि पद्मजे ॥६८॥
लोकज्येष्ठान् कुलज्येष्ठान् तमोघ्नान् लोकभास्करान् ।
कृष्णधामप्रदान् साधून्नमामि भवपारदान् ॥६९॥
पूजार्हान् हितधातॄंश्च सुखदान् पोषकामपि ।
रक्षकान् कालमायादेर्नमामि सजनान् सतः ॥७०॥
अत्राऽमुष्मिन् सुखदास्ते हरेर्भक्ता हि साधवः ।
ये सर्वाऽतिथयो नित्यं तान्नमामि सदा रमे ॥७१॥
एतादृशेषु भक्तेषु साधुषु ब्रह्मयोगिषु ।
अनुरक्ताश्चाभिरता दुर्गाण्यतितरन्ति ते ॥७२॥

तेषु शान्तिपरास्तेषां प्रशंसकाश्च सेवकाः ।
अनसूयका भक्ताश्च दुर्गाण्यतितरन्ति ते ॥७३॥
सर्वान् सतो नमस्कुर्वन् देवान् वृद्धान् शुभावहान् ।
श्रद्धावान् भक्तिमाँश्चापि दुर्गाण्यतितरत्यपि ॥७४॥
तपस्विनः साधवो वै कौमारब्रह्मचारिणः ।
भक्त्या प्रभावितात्मानस्तारयन्त्यविनो जनान् ॥७५॥
मात्रापित्रोर्गुरुजने भक्त्या वसन्ति ये जनाः ।
सदाऽऽशीर्वादनेतारो दुर्गाण्यतितरन्ति ते ॥७६॥
यथा त्वं वर्तसे लक्ष्मि वर्तन्ते साधवो यथा ।
ब्रह्मप्रियाश्च वर्तन्ते वर्तन्ते च हरिप्रियाः ॥७७॥
यथा कुंकुमवापीस्था वर्तन्ते च नराः स्त्रियः ।
सर्वे मुक्ता ब्रह्मवासाः सन्तः साध्व्यो हि मे मताः ॥७८॥
चतुर्दशसु लोकेषु नर्षयस्तादृशास्तथा ।
पितरो मुनयो नैव न सुरा मानवास्तथा ॥७९॥
नाऽन्ये विप्रा यथा चैते पावना मत्स्वरूपिणः ।
क्षेत्रे कुंकुमवापीयं चाऽक्षरं धाम मेऽस्ति यत् ॥८०॥
तत्रस्थाः सर्वमुक्ताश्च मुक्तान्यः शक्तयो मम ।
सर्वा ब्रह्मप्रिया नार्यः सर्वे मुक्ता नरास्त्विह ॥८१॥
पादपाश्चाण्डजा जरायूजाश्चान्येऽपि जन्तवः ।
स्वेदजा वापि सर्वे चाऽक्षरक्षेत्रे वसन्ति ये ॥८२॥
दिव्या मुक्ता हि ते सर्वे सर्वपूज्या भवन्ति ते ।
त एव साधवः सर्वे मुक्तिदा वासमात्रतः ॥८३॥
कल्पद्रुमस्य चांगानि सर्वाणि पावनानि वै ।
तथा चाऽक्षरभूमेश्च वासिनः पावना हि मे ॥८४॥
साधवस्ते शरण्या वै शरणागतरक्षिणः ।
यथाऽहं च तथा ते वै दयापूर्णा विमुक्तिदाः ॥८५॥
सर्वस्वं चापि दत्त्वैव रक्षन्ति शरणागतान् ।
शृणु लक्ष्मि समाख्यानं साधोर्वृषायनस्य ह ॥८६॥
वृषायनो हि साधुर्मे दीक्षां प्राप्य वने वसन् ।
भजते मां हरिं कृष्णं निर्द्वन्द्वो निष्परिग्रहः ॥८७॥
विदेह इव राजन् वै तेजसा भास्करो यथा ।
दयया चाऽभयदाता जीवानां श्रेयसि स्थितः ॥८८॥
व्याघ्रारण्ये निम्बतरोरधोवासो विराजते ।
तत्रैकदा तु श्येनेन पात्यमाना भयातुरा ॥८९॥
चटका शरणं प्राप्ता वृषायनाख्ययोगिनम् ।
स तां दृष्ट्वा निराधारां त्रासादंकमुपागताम् ॥९०॥
आश्वास्याऽऽह भयं मा ते चटकेऽस्त्विह मेऽन्तिके ।
इत्युक्त्वा चटकां हस्ततले धृत्वा तदासने ॥९१॥
अग्रे तां रक्षयामास तावच्छ्येन उवाच तम् ।
ऋषे साधो मम भक्ष्यं चटकेयं प्रदीयताम् ॥९२॥
प्रयत्नान्महतो लब्धा त्यजैनां भक्षणं मम ।
अस्या मांसं तु मे चाद्य पर्याप्तं स्यात्प्रतोषणम् ॥९३॥
क्षुधा मे बाधते साधो भोज्यं मे दीयतां द्रुतम् ।
मया ह्यनुसृता त्वेषा ममैव भक्ष्यरूपिणी ॥९४॥
साधुना नाऽत्र वयसोः स्थातव्यं मध्यपातिना ।
औदासीन्यस्थितेस्तेऽत्र को लाभो द्वेषरागयोः ॥९५॥
समवृत्तिर्भवेत् साधुः पक्षपातो न ते वृषः ।
क्षुधितोऽहं चाति साधोऽन्यथा मे मरणं भवेत् ॥९६॥
दयालो त्वं देहि भक्ष्यं चटकां मन्निपातिताम् ।
चटकाया रक्षणे ते मे हत्यापापमापतेत् ॥९७॥
मम जीवनदाने तु चटकाध्वंसपातकम् ।
ते भवेदिति चात्रार्थे भवौदासीनवृत्तिमान् ॥९८॥
इत्याकर्ण्य क्षणं वृषायनश्चिन्तामवाप ह ।
द्वयोश्चाऽभयदानं च विचार्येत्थमुवाच तम् ॥९९॥
वद श्येन निजार्थं वै यथा ते क्षुन्निवर्तनम् ।
भवेदेव तथा कुर्वे मुञ्चामि चटकां नहि ॥१००॥
शरणं सा जीवनार्थं स्वागता मां प्ररक्षिणम् ।
न मुञ्चति ममांगानि पश्य रक्षार्थिनीं त्विमाम् ॥१०१॥
तत्रापि विद्यते नारी न हन्तव्या कदाचन ।
गर्भिणी विद्यते चापि न हन्तव्या त्वया द्विज ॥१०२॥
फलं मूलं चान्नमिष्टं भिक्षागतं ददामि ते ।
आनयामि त्वदर्थं वै मिष्टान्नं तत्प्रभक्षय ॥१०३॥
श्येनः प्राह न मे कार्यं फलमूलैर्न भिक्षया ।
यस्तु देवेन विहितो भक्ष्यो मे चटकात्मकः ॥१०४॥
मांसं भक्ष्यं श्येनजातेः रीतिस्त्वेषा पुरातनी ।
यदि साधो चटकायां स्नेहस्ते पक्षपातवत् ॥१०५॥
ततस्त्वं मे प्रयच्छाऽद्य स्वमांसं चटकामितम् ।
तुलया तोलितं मे स्यात्पर्याप्तं नाधिकं खलु ॥१०६॥
वृषायनः प्रसन्नोऽभूच्छ्रुत्वा तूर्णं तमाह च ।
महाननुग्रहश्चाऽयं खग त्वया मयि कृतः ॥१०७॥
ततः कृत्वा पर्णपुञ्चौ तुलां कृत्वा यथोचिताम् ।
उत्कृत्योत्कृत्य मांसं स्वं श्येनार्थं समतोलयत् ॥१०८॥
चटकाभारमांसं स्वं ददौ श्येनाय बाहुजम् ।
श्येनो लब्ध्वा प्रभुक्त्वा च पीत्वा जलं वनं ययौ ॥१०९॥
चटका रक्षिता जाता प्रसन्नाऽभूत् सुनिर्भया ।
शनैः सा तु ऋषिं नत्वा पार्श्वे वने ययौ ततः ॥११०॥

सन्धिनीं पूर्णीं श्रेष्ठामोषधिं प्राप्य चाययौ।
साधोर्हस्ते ददौ पत्ररसं बाहुः प्रपूरितः ॥१११॥
यथापूर्वमभवच्च नीरुक् साऽपि ततः परम्।
सेवार्थं सर्वदा साधोः पार्श्वेऽवसत् सुपक्षिणी ॥११२॥
फलपत्राणि चादाय साधवेऽर्पणमेव ह।
करोति चाथ कालेन सुषुवेऽण्डानि पञ्च च ॥११३॥
सेवाफलेन ते सर्वे बाला भूतादिवेदिनः।
त्रिकालदर्शिनः सर्वे जाताः श्वेतस्वरूपिणः ॥११४॥
दीपोत्सवीघोटकाख्या महर्षिणा हि ते कृताः।
शकुनज्ञाः शकुन्तास्ते पूज्यन्ते दैववेदिभिः ॥११५॥
चटका सा ततः काले वार्धक्ये मृत्युमागता।
विमानेन ययौ स्वर्गं जाताऽप्सरोवरा शुभा ॥११६॥
नाम्ना चाऽलम्बुषा त्विन्द्रसेविका च ततः परम्।
मुक्तिं प्राप्ता ब्रह्मलोके साधोः सेवाफलेन वै ॥११७॥
एवं परोपकारार्थदत्तसर्वस्वसाधवः।
रक्षन्ति चापि मोक्षं च प्रेषयन्ति च देहिनः ॥११८॥
भक्तानां रक्षिता चानुरक्तानां शरणार्थिनाम्।
यः स साधुर्दयालुश्च सुखं ददाति विदन्ति ॥११९॥
साधुवृत्तो जनश्चात्र साधुत्वमनुतिष्ठति।
किं न प्राप्तं भवेत्तेन मदर्थत्यागवर्षिणा ॥१२०॥
वृषायनो हि भगवान् वर्ततेऽश्वसरोवरे।
यदाश्रयेण बहवो यान्ति धामाऽक्षरं मम ॥१२१॥
पश्य लक्ष्मि स्थितं वारितटे ध्याने मदर्थिनि।
एवं मे साधवो लोके भवन्ति श्रेयसां प्रदाः ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधोर्मुख्यधर्मो नारायणस्तेन साधुत्वम्। साधवे नारायणनतिः, वृषायनेन साधुना चटकाभारमांसं श्येनाय दत्वा चटका रक्षिता चेत्यादिनिरूपणनामा पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

श्रीनारायणीश्रीरुवाच—

किं कृत्वेह तु राजानश्चान्ये धनमदास्तथा।
बलगर्वाश्च वै लोका अश्नुवते परं सुखम् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

ब्रह्मिष्ठानां सदा सेवा कर्तव्या सुखमिच्छता।
साधून्नारायणभक्तान् वृद्धाँश्चाप्यभिपूजयेत् ॥ २ ॥
पौरजानपदाँश्चापि साधुजनान् बहुश्रुतान्।
भक्त्या दानेन सेवाभिर्नमस्कारैः समर्चयेत् ॥ ३ ॥
यथाऽऽत्मानं यथा पुत्राँस्तथा साधून् प्रसेवयेत्।
ये चाऽप्येषां पूज्यतमास्तान् विशेषेण पूजयेत् ॥ ४ ॥
सन्तः पूज्या नमस्कार्या मान्या देवा यथा भुवि।
तेषु तुष्टेषु राज्यादिसम्पदः सुसुखाः सदा ॥ ५ ॥
कृष्णध्यानप्रसक्तानां ब्रह्मभक्तिं प्रकुर्वताम्।
धर्मज्ञानां सतां नित्यं सेवां कीर्तिं समाचरेत् ॥ ६ ॥
देवैश्च पितृभिश्चापि गन्धर्वैर्ब्राह्मणैस्तथा।
वसुभिश्च तथाऽऽदित्यै रुद्रैश्च पूजिता यतः ॥ ७ ॥
अदैवं दैवतं कुर्युर्दैवतं चाऽप्यदैवतम्।
यमिच्छेयुः स देवः स्याद् यो नष्टः स पराभवेत् ॥ ८ ॥
परिवादप्रकर्तारो नश्येयुर्नात्र संशयः।
तस्मात्साधून्पूजयेच्चेश्वरान् वै सुखदुःखयोः ॥ ९ ॥
एते भोज्याश्च पूज्याश्च किमिच्छकैः सुवस्तुभिः।
नमस्कारैश्चाऽर्पणाद्यै रक्ष्याश्च पितृवन्नृपैः ॥१०॥
ईतीनां चापि विघ्नानां शान्तिः सद्भिः प्रजायते।
ब्रह्मवर्चस्विनः सन्तो यज्ञाः साक्षाद् भवन्ति वै ॥११॥
ब्रह्मिष्ठं भक्तिसम्पन्नं धर्मशीलगुणान्वितम्।
वासयेत गृहे राजा सन्तं मोक्षप्रदं सदा ॥१२॥
सतां मुखे हविर्दत्तं प्रतिगृह्णन्ति चेश्वराः।
पितरो देवताश्चापि मुक्तास्तृप्यन्ति योगिनः ॥१३॥
ऋषयो वसवः सिद्धा मनवो भास्कराः शिवाः।
सुराश्च विष्णवो ब्रह्माणश्च साध्या मरुद्गणाः ॥१४॥
वालखिल्याश्च गन्धर्वाः किन्नराः पुरुषोत्तमाः।
अवताराः सत आविश्याऽन्नं सुखाः प्रभुञ्जते ॥१५॥
यत्र नो भगवद्भक्ता उत्सवे वा महोत्सवे।
ताः सम्पदस्तथाऽऽनन्दाः श्मशानान्ताः प्रकीर्तिताः ॥१६॥
यत्रोत्सवेषु सन्तश्च विद्यन्ते शुभदर्शनाः।
त उत्सवा ऊर्ध्वगतिप्रदाः पुण्यमयाः शुभाः ॥१७॥
सन्तं विना महाराज्यं श्मशानं याम्यपुष्टिकृत्।
सता युक्तं वनं चापि दिव्यं गोलोकमुक्तिदम् ॥१८॥
साधुं यत्र स्थले सन्तं विहरन्तं स्थितं च वा।
पश्यन्ति यमदूताश्च नाभियन्ति स्थलं हि तत् ॥१९॥
साधुं जनं विलोक्यैव विघ्ना वियन्ति दूरतः।
रोगा मायाः कालवेगास्त्रस्ता वियन्ति दूरतः ॥२०॥
येन येनैव सन्तोऽत्र हविषा तर्पिता मुहुः।
ये सन्तमनुवृत्ताश्च तेषां पुण्यमनन्तकम् ॥२१॥

न ते प्रेत्य विनश्यन्ति न ते यान्ति पराभवम् ।
यद्वै सतां मुखात्प्राप्तं प्रतिगृह्णन्ति सद्वचः ॥२२॥
पापिनोऽपि जनास्ते वै न प्रयान्ति पराभवम् ।
यत्किञ्चिद् दृश्यते लोके श्रूयते पठ्यते तथा ॥२३॥
सर्वं तच्छ्रीमतां पुण्यसतामाशीर्वचोभवम् ।
भूमिः पप्रच्छ पूर्वं वै श्वेतवाराहमीश्वरम् ॥२४॥
गृहिणां पापकर्माणि केन नश्यन्ति मूलतः ।
वाराहश्च तदोवाच ध्यात्वा श्रेष्ठतमं वचः ॥२५॥
साधून् संसेवमानानां पापं सर्वं विलीयते ।
साधून् सदा प्रसेवेत पवित्रान् लोकधारकान् ॥२६॥
एभ्यो भूतिश्च कीर्तिश्च स्मृद्धिर्बुद्धिः प्रजायते ।
भक्तिः प्रजायते तेन पावनी मतिरीयते ॥२७॥
महायशो हरेर्भक्तः साधुरेव न संशयः ।
साधुं सेवेत सततं भूमे ! सर्वविभूतये ॥२८॥
विप्रेभ्यश्च परे सन्ति गुरवस्तूपदेशकाः ।
गुरुभ्यश्चोपदेष्टृभ्य उपाध्यायाः परे मताः ॥२९॥
तेभ्यः परा सदा चार्या आचार्येभ्यस्तु शीलिनः ।
ब्रह्मचारेभ्य उत्कृष्टा भक्ताः श्रीपरमात्मनः ॥३०॥
भक्तेभ्य उत्तमाः सन्ति सदा चात्मनिवेदिनः ।
आत्माऽर्पितेभ्य उत्कृष्टाः साधवो मम मूर्तयः ॥३१॥
अपरेषां परेषां च परेभ्यश्चापि ते परे ।
मत्तोऽपि परमाः सन्तः सतां दासो भवाम्यहम् ॥३२॥
साधवो यं प्रशंसन्ति स नरो माधवो भवेत् ।
साधूनाक्रोशयति यः पराभवति सोऽचिरात् ॥३३॥
यथा महार्णवे क्षिप्तं लवणं संविलीयते ।
तथा पापानि साधौ वै क्षिप्तानि यन्ति लीनताम् ॥३४॥
साधवो यं प्रशंसन्ति स जातोऽत्र प्रवर्धते ।
यशसा सम्पदा स्मृद्धया पुष्टया लक्ष्म्या स्त्रिया सुतैः ॥३५॥
साधवः संविदन्त्येव मार्गं स्वर्गस्य वै तथा ।
मोक्षस्यापि निरयस्य कर्मणां च गतिं तथा ॥३६॥
भाग्यानां च गतिं चापि विदन्ति साधवो जनाः ।
आगताऽनागतं चापि विदन्ति जन्मकर्मभिः ॥३७॥
सर्वेषां क्षत्रवर्गाणां तेजांसि प्रबलानि च ।
ब्राह्मणेषु प्रशाम्यन्ति ब्राह्मणानां तु साधुषु ॥३८॥
साधून् वै सेवमानानां रजः सर्वं प्रणश्यति ।
इच्छन् कीर्तिं च भूतिं च लोकाँश्चाप्युत्तमोत्तमान् ॥३९॥
सतां चानुमते तिष्ठेद् राजा श्रेष्ठी तथेतरः ।
जन्मनैव चमत्कारी ब्राह्मिष्ठो यस्तु जायते ॥४०॥
नमस्यः सर्वभूतानां स साधुश्चाऽच्युतात्मजः ।
सर्वथा सुहृदः सन्तः श्रेयो मात्रविधायकाः ॥४१॥
स्मृतिभिः कृष्णयुक्ताभिर्गीर्भिश्च मंगलादिभिः ।
आश्रितानां सुश्रेयांसि चानुध्यायन्ति पूजिताः ॥४२॥
श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
लक्ष्म्यः सर्वविधाः साधुसंकल्पेन भवन्ति हि ॥४३॥
साधवो विविधाः सन्ति दुरासदाः परार्थिनः ।
केचिन्नारायणसत्त्वाः शीलसत्त्वाश्च केचन ॥४४॥
व्रतसत्त्वास्तपःसत्त्वा ध्यानसत्त्वास्तथाऽपरे ।
वैराग्यसत्त्वा विद्यादिसत्त्वा भक्तिबलाः परे ॥४५॥
धर्मसत्त्वास्तथौदासीन्यादिमुख्या भवन्त्यपि ।
अपि सेव्याः सर्वविधाः सारो ग्राह्यो मुमुक्षुणा ॥४६॥
सिंहसत्त्वाः सन्ति केचिन् मृगसत्त्वास्तथाऽपरे ।
सर्पसत्त्वाः परेचापि कपिसत्त्वास्तथाऽपरे ॥४७॥
अग्निसत्त्वास्तथा चाऽन्ये जलसत्त्वास्तथाऽपरे ।
क्षमासत्त्वा वायुसत्त्वाश्च भवन्त्येवंप्रकारिणः ॥४८॥
असह्याः सिंहसत्त्वा वै सर्वसह्या मृगा इव ।
द्वेषगराः सर्पतुल्या हारकाः कपिसदृशाः ॥४९॥
पापघ्ना वह्निसत्त्वास्ते शान्तिदाः जलसत्त्विनः ।
क्षमन्ते क्षमासमाश्चापि गुणग्राह्या मरुत्समाः ॥५०॥
सिंहसर्पकपितुल्यान् यावदर्थं समाश्रयेत् ।
मोक्षार्थं चेतरान् सर्वानाश्रयेन्मतिमान् जनः ॥५१॥
साधवो हि महात्मानो देवानामपि देवताः ।
सततं पूजयेत् साधून् दास्येन परिचर्यया ॥५२॥
एकदा मालतीदेवी पप्रच्छ स्वपतिं नृपम् ।
चित्रकेतुं नमस्कृत्य त्रैलोक्यपूजितं सती ॥५३॥
केन वृत्तेन राजँस्त्वं त्रैलोक्यमधितिष्ठसि ।
श्रैष्ठ्यमेतादृशं केन प्राप्तं ब्रूहि व्रतेन वै ॥५४॥
चित्रकेतुस्तु तां प्राह साधुसेवाव्रतं मम ।
वन्ध्यं दिनं न मे याति साधुसेवामृते क्वचित् ॥५५॥
अग्रतः साधवो मे वै पृष्ठतः साधवोऽत्र मे ।
पार्श्वयोः साधवः सन्ति सभायां साधवश्च मे ॥५६॥
यात्रायां साधवो मे च भोजने चोत्सवादिषु ।
आरम्भे साधवो मे वै वर्तन्ते ब्रह्मशीलिनः ॥५७॥
तेषां दास्यं व्रतं मेऽस्ति तेन बृहद्व्रतेन वै ।
अधितिष्ठामि लोकाँस्त्रीन् हरेर्भक्तिं करोमि च ॥५८॥
अन्यानि मे शृणु पत्नि वृतानि शोभनान्यपि ।
लोके यैर्मान्यता चास्ते चाऽप्रधृष्यत्वमित्यपि ॥५९॥

नाऽसूयामि क्वचित् साधून् सम्मन्ये तान् यथासुखम् ।
ब्रह्मिष्ठान्नाऽवजानामि नाऽपराध्यामि कर्हिचित् ॥६०॥
अभ्यर्च्याऽभ्यनुपृच्छामि सेवां करोमि नित्यदा ।
सदण्डवन्नमः कृत्वा पादौ गृह्णामि वारि च ॥६१॥
यामाज्ञां ते निर्दिशन्ति वहामि तोषयामि तान् ।
सतो नित्यं शृणोम्येव कथाऽमृतरतान् प्रभून् ॥६२॥
एतच्छ्रेष्ठममृतं वै दिव्यं चक्षुश्च पारगम् ।
यद् ब्रह्मिष्ठमुखाद् वाक्यं शास्त्रं चाऽऽज्ञा प्रवर्तते ॥६३॥
ब्रह्मिष्ठास्तपसा भक्त्या सिध्यन्ति धीबलाः सदा ।
आत्मबलं मम बलैर्युक्तास्ते तारयन्त्यपि ॥६४॥
वसन्तो ब्राह्मीर्वसतीर्यतयः समदर्शनाः ।
निर्वाणस्था हि ते भूमौ श्रेयप्रदाः सुखप्रदाः ॥६५॥
भूमिस्तं वै निगिरति यो ब्रह्मिष्ठं न सेवते ।
अभिमानः श्रियं हन्ति समृद्धस्याऽप्यल्पमेधसः ॥६६॥
अभिमानं ततो हित्वा हित्वा राजमदं तथा ।
पादसंवाहनं नित्यं करोमि वै सतां मुदा ॥६७॥
मां च भक्तं चित्रकेतुं श्रुत्वा श्रुत्वा हि साधवः ।
भूभागात् स्वर्गभागाच्च पातालात् सागरादपि ॥६८॥
सत्यलोकात् समायान्ति नारदाद्या हि पावनाः ।
धन्यं भाग्यं मम चास्ते यः कोटिस्त्रीपतिर्नृपः ॥६९॥
साधुभक्त इति ख्यातो यं प्रतियन्ति साधवः ।
यद्गृहं साधुसम्पन्नं यन्नार्यः साधुसेविकाः ॥७०॥
यो राजा विघसाऽश्यस्मि ततो धन्येतरो नु कः ।
यो यो वै याचते किंचिद् ददाम्येव तु तत्क्षणम् ॥७१॥
प्रतोषयामि सततं साधून् विप्रांश्च योगिनः ।
राज्यं यथा स्वेन्द्रियार्थं साध्वर्थं मे मतं बहु ॥७२॥
ब्रह्मिष्ठार्थं मम राज्यं मोक्षार्थं वर्तते प्रिये ।
अपीडयन् राजवर्गं प्रदद्यां सर्वमैहिकम् ॥७३॥
यथा मे साधवः पूज्यास्तथाऽनु ब्राह्मणा अपि ।
ऋत्विक्पुरोहिताचार्याः शिष्याः सम्बन्धिबान्धवाः ॥७४॥
स्त्रियो बाला बालिकाश्चाऽनाथा निराश्रयास्तथा ।
शरणागतलोकाश्चाऽभ्यागता भिक्षुकास्तथा ॥७५॥
अनाधाराश्च मे पूज्या धनिनो गृहिणोऽपि च ।
सत्कर्माणः सदा पूज्याः श्रुतवन्तो हरेर्जनाः ॥७६॥
अतोऽन्यथा वर्तमाना दण्ड्याः शास्त्रनयेन वै ।
भक्तिधर्मः सदाचारो ज्ञानं चात्मविवेचनम् ॥७७॥
अहिंसा सत्यमस्तेयमार्जवं दम ईशिता ।
अक्रोधश्चाऽनभिमानश्चाऽद्रोहो ह्रीः क्षमा दमः ॥७८॥
तितिक्षा वासनानाशस्तृष्णानाशः पवित्रता ।
यस्मिन्नेतानि दृश्यन्ते न त्वकार्याणि वै प्रिये ॥७९॥
सत्पात्रं तद्धवेल्लोके सर्वदा मानमर्हति ।
अपूर्वं चापि पूर्वं वा पारक्यं नैजमेव वा ॥८०॥
यद्वा विशेषितं वापि संप्रत्यागतमेव वा ।
ब्रह्मिष्ठं श्रेयसिस्थं यत् तत्पात्रं मानमर्हति ॥८१॥
लोके भवन्ति बहवश्चाभिमानभरा जनाः ।
असूयाद्वेषयुक्ताश्चाऽसहमानाः परान्नरान् ॥८२॥
परख्यातिं सहन्ते न परसौख्यं परोन्नतिम् ।
न सहन्ते च दह्यन्ति ततो निन्दन्ति सज्जनान् ॥८३॥
अप्रामाण्यं सतां वाक्ये वैदिके लोकसम्मते ।
मत्वाऽतिलंघनं चापि कुर्वन्ति धर्मसेतुषु ॥८४॥
अव्यवस्थां च कुर्वन्ति स्वयं पण्डितमानिनः ।
हेतुवादान् ब्रुवन्तश्च सत्सु द्रोहं प्रकुर्वते ॥८५॥
आक्रोष्टारस्तथा शास्त्रविरुद्धवादिनः खलाः ।
मूढाः कटुकवाचश्च नराः पापपरायणाः ॥८६॥
स्वतुल्यान् सुहितान् सत्वा शुनोऽर्चयन्ति वै खलाः ।
मालति ! तादृशा दम्भा नरश्वानो जगत्त्रये ॥८७॥
कल्याणं नैव कुर्वन्ति नाशयन्ति निजान् परान् ।
आत्मनाशं चाऽऽह्वयन्ति ते दण्ड्याः सर्वथा नृपैः ॥८८॥
यथा श्वा भषितुं चैव खादितुं चाऽवसज्जते ।
तथा ते लोकमर्यादां नाशयितुं ज्वलन्ति वै ॥८९॥
तस्माद् राज्ञि ! लोकमेलं धर्मं चात्महितं शुभम् ।
हृदयं देशकालौ च वीक्ष्याऽऽज्ञां वर्तयेज्जनः ॥९०॥
एवं नित्यं वर्तमानः शाश्वतीर्वर्धते समाः ।
राजानो वा धनिनो वा बलिनो वा जनास्त्विह ॥९१॥
तथैव वर्तमानाश्चेन्नाभिभवन्ति वै क्वचित् ।
ऋणमुक्ता हरेर्भक्ता भूत्वाऽन्ते यान्ति मोक्षणम् ॥९२॥
इत्येवं चित्रकेतुर्वै मालतीं प्राह साऽपि तु ।
हरेर्बलं परं प्राप्याऽसेवताऽहर्निशं सतः ॥९३॥
अभजत्परमात्मानं सेवापूजनकीर्तनैः ।
नैजं कर्मकलापं सा चकार वै सतां कृते ॥९४॥
नृपाज्ञया हि सततं भेजे सत्पुरुषान् शुभान् ।
भोजनैर्दानसेवाभिर्जलवस्त्रफलार्पणैः ॥९५॥
सा च भक्त्यारुढभावा ददर्श मां परेश्वरम् ।
पूजायां दिव्यरूपं वै चतुर्बाहुं विमानगम् ॥९६॥
ययाचे मोक्षणं चापि त्वाज्ञामादाय भूभृतः ।
तूर्णं च भौतिकं त्यक्त्वा चारुरोह विमानकम् ॥९७॥

दिव्या चतुर्भुजा जाता लक्ष्मीसखी शुभानना ।
मालती वर्तते धाम्नि ब्रह्मप्रिया नरायणी ॥९८॥
एवं साधुप्रसंगेन राजा साधुर्हि चित्रकृत् ।
पत्नुः साधोः प्रसंगेन मोक्षमार्गमवाप सा ॥९९॥
मोक्षगतिमवाप्यैव मालती तु रमासखी ।
जाता ब्रह्मप्रिया लक्ष्मि सत्संगो यावदर्थकः ॥१००॥
निर्धनो वा धनवाँश्च सगुणो निर्गुणोऽपि वा ।
साध्वाश्रयं समालम्ब्य भवत्येव नरायणः ॥१०१॥
मदंशो भक्तिवेगेन जायते चोर्ध्वकीर्तिमान् ।
तारकः सर्वलोकानां धारकः सर्वधर्मिणाम् ॥१०२॥
प्रापकश्चाऽक्षरस्यापि रक्षकश्च निजान्तिके ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदपि ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने धनमदिबलगर्विनृपादीनामपि परमश्रेयसि चित्रकेतो-र्मालित्या दृष्टान्तेन साधुप्रतापफलादिवर्णन-नामा षडशीतितमोऽध्यायः ॥ ८६ ॥

**श्रीनारायणीश्रीरुवाच—**

ब्रह्मपुत्रा ब्राह्मणा ये तनवस्ते भवन्ति मे ।
पावनाः सर्वथा लोके सर्ववर्णोत्तमा यतः ॥ १ ॥
कामक्रोधमहामोहलोभपाशावृताः सदा ।
नारीवन्तो गृहधर्मा आशातृष्णादिसंवृताः ॥ २ ॥
ते श्रेष्ठा वा निरालम्बा विरागाः साधवस्तव ।
कामक्रोधादिशून्याश्च तृष्णाऽऽशादिविवर्जिताः ॥ ३ ॥
लोभपाशादिशून्याश्च शुभाः सर्वाश्रमोत्तमाः ।
अगृहधर्मा निर्दोषा मोक्षमार्गपरायणाः ॥ ४ ॥
सन्तः श्रेष्ठा द्वयोर्मध्ये श्रैष्ठ्यं कुत्र वद प्रभो ।
उभे ते वै शरीरे स्तो द्वयोर्भेदोऽस्ति वा न वा ॥ ५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि हितं तथ्यं पथ्यं प्रत्यक्षदर्शनम् ।
अकामेभ्यस्तु निष्कामाः श्रेष्ठतमा भवन्ति वै ॥ ६ ॥
सस्त्रीकेभ्यो यतयस्तु सदा श्रेष्ठतमाः प्रियाः ।
कामक्रोधमहामोहा नारीयोगे भवन्ति वै ॥ ७ ॥
रतिप्रिया मे तनवः श्रेष्ठाः श्रेष्ठतमास्तु न ।
श्रेष्ठतमाः साधवो मे सर्वमायाविवर्जिताः ॥ ८ ॥

मायावन्तो गृहस्था वै नित्यं निरययोगिनः ।
श्मशानानि नरकाणि नित्यं भजन्ति नारकाः ॥ ९ ॥
मायाशून्या यतयो वै नित्यं माधवयोगिनः ।
वैकुण्ठसमवद्धासान् सेवन्ते हरियोगिनः ॥१०॥
त्यागाश्रमात्तु गार्हस्थ्यं निम्नं भवति सर्वदा ।
वर्णेषु ब्राह्मणाः श्रेष्ठाः स्त्रीमत्सु न तु सर्वथा ॥११॥
वर्णाश्रमेषु वै श्रेष्ठतमा मे साधवो मम ।
ब्रह्मचर्यं सदा श्रेष्ठं साधुत्वं श्रेष्ठमेव च ॥१२॥
वानप्रस्थाश्रमः श्रेष्ठो मनाक् न तु च साधुवत् ।
रतिप्रिया वृथा मानं वहन्ते नारका यथा ॥१३॥
सन्न्यासवन्महत्स्थानं श्रेष्ठं क्वापि न विद्यते ।
माया मायिककर्माणि निकृष्टानि स्वभावतः ॥१४॥
अमायिकव्रतस्था वै साधवः सर्वतोऽधिकाः ।
ईश्वरा अपि दारस्थाः पूजयन्ति सतो जनान् ॥१५॥
द्विजा नृपाः सुराश्चापि साधून् प्रपूजयन्ति हि ।
सेवावृत्तिपरेभ्यस्तु कृषिकाराः सदोत्तमाः ॥१६॥
कर्षुकेभ्यो रक्षकाश्च रक्षकेभ्यस्तु तापसाः ।
तापसा ब्राह्मणास्तेभ्यो दारवर्ज्या हि साधवः ॥१७॥
ब्रह्मपरा आत्मपरा मुक्तिपरा हि साधवः ।
दोषहीना चोर्ध्ववीर्या ब्रह्मसत्त्वा हि साधवः ॥१८॥
वर्णानां ब्राह्मणः श्रेष्ठो ब्राह्मणानां तु साधवः ।
विप्राणां पूजनीयाश्च पावनानां हि पावनाः ॥१९॥
तामस्यो मे तनवस्तु राक्षसा दैत्यदानवाः ।
राजस्यो मे तनवश्च क्षत्रियाद्या निजार्थिनः ॥२०॥
सात्त्विक्यो मे तनवश्च विद्यावन्तो द्विजातयः ।
निर्गुणा दिव्यतनवः साधवो मे प्रभुक्तिदाः ॥२१॥
ततः श्रेष्ठतमा लक्ष्मि ! साधवोऽति न तु द्विजाः ।
क्षत्रतेजांसि सर्वाणि विप्रतेजसि यन्ति हि ॥२२॥
विप्रतेजांसि सर्वाणि साधुतेजसि यन्ति हि ।
साधुतेजांसि सर्वाणि लीयन्ते मयि माधवे ॥२३॥
मत्सदृशाः सदा सन्तो विप्राणां तारका भुवि ।
पापप्रज्वालकाः सन्तो मोक्षदा दारयोगिनाम् ॥२४॥
तपस्तेजो व्रतं सत्यं चमत्कारः सुशीलता ।
पुण्यं स्रवन्ति चैतानि नारीयोगेन देहिनः ॥२५॥
साधूनां तानि सर्वाणि वर्धन्ते शीलयोगिनाम् ।
नारायणा इव सन्तो जायन्ते वै नरायणाः ॥२६॥
ततः श्रेष्ठा ब्राह्मणाश्च सन्तः श्रेष्ठतमाः सदा ।
ब्रह्मा रुद्रः पुरा सनत्कुमाराय हि साधवे ॥२७॥

तोलयामास वै श्रैष्ठ्यं साधुत्वब्राह्मणत्वयोः ।
साधुत्वं श्रेष्ठतमतां प्राप्तं द्विजत्वसन्निधौ ॥२८॥
पश्चात्पुनश्चैकतुलामध्ये न्यधाद्धि विप्रताम् ।
क्षत्रियतां वैश्यतां च शूद्रतां ब्रह्मचारिताम् ॥२९॥
गृहितां वनितां चापि ततोऽन्यस्यां न्यधादजः ।
साधुत्वं केवलं सत्ये पश्यतां सर्वदेहिनाम् ॥३०॥
साधुत्वं गौरवं प्राप्तं सप्तभ्यश्चैव सर्वथा ।
तस्माच्छ्रेष्ठतमं सृष्टौ साधुत्वं मोक्षणेष्वपि ॥३१॥
श्रेष्ठं पात्रं ब्राह्मणा वै श्रेष्ठतमं तु साधवः ।
महाभागवताः श्रेष्ठा गृहिणस्तेषु साधवः ॥३२॥
त्यागवन्तः सदा श्रेष्ठा नारायणपरायणाः ।
भारवाहा न वै श्रेष्ठा गन्धज्ञा उत्तमा यथा ॥३३॥
तथा दारवहा नैव श्रेष्ठाः श्रेष्ठास्तु साधवः ।
लक्ष्मि ! चाऽहं गृहस्थोऽस्मि पूजयामि सतो जनान् ॥३४॥
मुक्ता ये ब्रह्मलोकस्थाः सर्वे ते साधवो मम ।
तान् जपामि पूजयामि नारायणनरायणान् ॥३५॥
विप्रविप्रान् ब्राह्मणानां ब्राह्मणान् ब्रह्मयोगिनः ।
शीलिनां शीलिनश्चापि यतीनां च यतीन्परान् ॥३६॥
अस्वादरसलुब्धांश्च ह्यनिन्द्रियसुखान् सतः ।
अप्रमदागन्धसहान् पूजयामि निरन्तरम् ॥३७॥
न मे लक्ष्मि रोचतेऽयं गृहाश्रमो हि कल्मषी ।
भक्तानीनां भवतीनामिच्छया चाऽभवं गृही ॥३८॥
ये यथा मां प्रपद्यन्ते तांस्तथैव भजामि वै ।
प्रतिज्ञा मे सदा चास्ते भक्तेच्छापूरको ह्यहम् ॥३९॥
कामिनीनां कामदानैश्चार्तानां चार्तिनाशनैः ।
अर्थार्थिनामर्थदानैः पूरयामि मनोरथान् ॥४०॥
ज्ञानिनां निर्गुणो भूत्वा करोमि मोक्षणं प्रिये ।
साधवो मेऽवतारा वै तेषु वसामि नित्यदा ॥४१॥
सत्सु वसामि यावांश्च विशेषतः समस्ततः ।
अन्यत्र तु यथाकार्यं यथाजोषं यथाफलम् ॥४२॥
तस्माच्छ्रेष्ठतमा नित्यं साधवः शीलयोगिनः ।
अथैकदा स्वयं विष्णुर्लक्ष्मीयुक्तो ययौ वनम् ॥४३॥
तपश्चचार बहुधा वर्षपूगसहस्रकम् ।
सेवायां वर्तते लक्ष्मीस्तां न पस्पर्श तापसः ॥४४॥
तदा लक्ष्मीर्नम्रभावा पप्रच्छ परमेश्वरम् ।
कथं न स्पृशसि विष्णो ! कारणं नु वदाऽत्र मे ॥४५॥
विष्णुः प्राह व्रतश्रेष्ठं नारीस्पर्शो न यत्र तु ।
ब्रह्मचर्यं व्रतं तपःसिद्धिप्रदं परात्परम् ॥४६॥
स्त्र्यस्पर्शः साधुता श्रेष्ठा साधुत्वं तपसां बलम् ।
साधुत्वे जायते सिद्धिस्तपसां चाऽपराजिता ॥४७॥
लक्ष्मीः सन्देहमापन्ना स्वयं नारायणोऽपि सन् ।
निर्दोषोऽपि कथं वक्ति प्रभुः प्राकृतजीववत् ॥४८॥
अथ विष्णुस्तपःपूर्णसिद्ध्युत्तरं श्रियः खलु ।
सन्देहनाशनार्थं वै ययौ वैकुण्ठमेव तु ॥४९॥
तत्र नारायणो देवो लक्ष्म्या साकं विराजते ।
सोऽपि नित्यं सतः साधून् पूजयत्येव योगिनः ॥५०॥
इत्येवं सम्प्रदर्श्यैव लक्ष्मीं ततो ययौ परम् ।
गोलोकं श्रीकृष्णधाम तत्र कृष्णः सराधिकः ॥५१॥
नित्यं साधूनर्चयतीत्येवं प्रदर्श्य वै ततः ।
ययौ विष्णुश्चाऽक्षराख्यं धाम धामोत्तमं परम् ॥५२॥
तत्राऽनादिकृष्णनारायणो ब्रह्मप्रियाऽन्वितः ।
साधून् मुक्तान् पूजयति दर्शयामास तच्छ्रियम् ॥५३॥
ततो लक्ष्म्यास्तु सन्देहो निवृत्तो मूलतः खलु ।
अथ विष्णुर्निजे रूपे लक्ष्मीमन्तर्विभाव्य च ॥५४॥
लक्ष्म्यै सन्दर्शयामास लक्ष्म्या रूपं सनातनम् ।
ब्रह्मचर्यस्वरूपं यच्छीलं सा लक्ष्मीरेव ह ॥५५॥
इच्छया वर्तते नारी वस्तुतः शीलरूपिणी ।
अभिन्ना भगवत्येव सा त्वं लक्ष्मि ! मम प्रिया ॥५६॥
वर्तसे शीलरूपेति साध्वीरूपेति मत्प्रिया ।
ब्रह्मशीलं चाति चाति प्रियं मे नाऽपरं तथा ॥५७॥
तद्रूपा त्वं प्रिया नित्यं नेतरन्मे प्रियं ततः ।
त्वत्स्वरूपाश्च मे सन्तः सर्वे प्रियतमा मम ॥५८॥
साधवो हृदयं मेऽस्ति लक्ष्मीर्मे हृदयं तथा ।
कौस्तुभो मे हृदयेऽस्ति श्रीवत्सो हृदये च मे ॥५९॥
श्रीवत्साः साधवो मे वै हृदये मे वसन्ति हि ।
श्रीपतिश्च यथा चाहं सत्पतिश्च तथाऽस्मि च ॥६०॥
प्रेमपतिः सदा चास्मि शीलपतिः सदाऽस्मि च ।
साधुपतिः सदा चाऽस्मि लक्ष्मीपतिः सदाऽस्मि च ॥६१॥
लक्ष्मि चिह्नं प्रेमरूपं शीलाख्यं मयि वर्तते ।
तद्यत्र विद्यते तद्धि लक्ष्मीति परिकीर्त्यते ॥६२॥
तद्वती त्वं मदिच्छाऽसि साधवो मम मूर्तयः ।
शीलं मम गुणः शश्वत् सोऽहं साधुस्वरूपवान् ॥६३॥
अतः श्रेष्ठतमाः सन्तः सर्वसृष्टिभ्य एव ह ।
कियन्तो ब्राह्मणास्तत्र नारीकल्मषयोजिताः ॥६४॥
न देवा नेश्वराश्चापि साधुतुल्याः कथञ्चन ।
नर्षयः पार्षदाश्चापि नारीयोगमुपागताः ॥६५॥

तेभ्यो मे साधवः श्रेष्ठतमा लक्ष्मि परात्पराः ।
शीलयुक्तं तपः श्रेष्ठं तादृक्तपस्तु साधुषु ॥६६॥
तस्माद् वै साधवः श्रेष्ठास्तव पूज्याः सदा रमे ।
अथ ते संशयो मा स्यात् कथं श्रेष्ठा हि साधवः ॥६७॥
अश्वपट्टसरःक्षेत्रे भज साधून् समागतान् ।
अतिथीन् त्यागयोगाँश्च सम्मानय समर्हणैः ॥६८॥
तेषामाशीर्वचोभिश्च परमं श्रेय ईयते ।
तेषां प्रसन्नताजन्यं पुण्यं भवेद्धि शाश्वतम् ॥६९॥
तेषां सेवाफलं कोटिगोलोकानन्दसदृशम् ।
जायते च ततः सर्वा ब्रह्मप्रिया हरिप्रियाः ॥७०॥
साधुसेवां प्रकुर्वन्तु तोषयन्तु सतो जनान् ।
निर्विकारान् मोक्षदाँश्च मायापारकरान् गुरून् ॥७१॥
दुर्गा चण्डी महाकात्यायनी हत्वा महासुरान् ।
महिषादींस्ततः शंभुं पप्रच्छ परमेश्वरी ॥७२॥
अहिंसो परमो धर्मः स्वयं शंभो निगद्यसे ।
हिंसा क्षयकरी सा च मया कृताऽतिदारुणा ॥७३॥
निपातिता हि बहवो विदारिता हि काश्यपाः ।
दानवाश्चासुरा दैत्या ये ये रणे समागताः ॥७४॥
तेषां पापं तथा तेषां नारीणां रोदनादिकम् ।
वैधव्यजं च मे पापं बालाऽनाथनिकन्दनम् ॥७५॥
कथं वै परिहर्तव्यं मया केन हि शोधिना ।
कर्मणा वा व्रतेनापि प्रायश्चित्तेन वा वद ॥७६॥
श्रुत्वा शंभुस्तदा प्राह त्वं साक्षात्पारमेश्वरी ।
दिव्या ब्राह्मी महाशक्तिर्यत्र पापं न विद्यते ॥७७॥
नित्यशुद्धस्वरूपाऽसि त्वं लक्ष्मीस्त्वं रमा रतिः ।
त्वं माया त्वं महालक्ष्मीः पापं ते नैव विद्यते ॥७८॥
अहं संहारकृद् रुद्रो रुद्राणी त्वं विनाशिनी ।
महाकाली महाशक्तिः पावनी लोकभक्षिणी ॥७९॥
मत्स्वरूपा सदा त्वं वै ब्रह्माऽहं परमेश्वरः ।
नारायणी जगद्धात्री शिवा पुण्यमयी शुभा ॥८०॥
सती साध्वी वह्निरूपा शुद्धाऽसि पौरुषोत्तमी ।
तथापि ते मनःशान्त्यै लोकसंग्रहहेतवे ॥८१॥
दर्शयामि तथा तत्त्वं समाचर महेश्वरि ।
पापक्षालनशक्तं वै तीर्थं व्रतं तपस्त्रयम् ॥८२॥
तेभ्यश्च बलवद् दुर्गे साधुसेवनमुत्तमम् ।
साधूनां दर्शनं पुण्यं स्पर्शनं सम्प्रतोषणम् ॥८३॥
वन्दनं दास्यमेवाऽपि पादसंवाहनादिकम् ।
प्रसन्नताकरं सर्वं सद्यःपापप्रणाशकम् ॥८४॥
तत् त्वं याहि विशालां च साधुर्यत्र स्वयं हरिः ।
धर्मपुत्रः परमात्मा नारायणो विराजते ॥८५॥
सदा व्रती तापसश्च ब्रह्मचारी गुरुर्मम ।
तत्सेवया महापापादीनां नाशो भविष्यति ॥८६॥
तत्राऽन्ये साधवो दिव्या महाभागवताः सति ! ।
वर्तन्ते भक्तिसम्पन्ना दर्शनान्मोक्षदायिनः ॥८७॥
पावना ब्रह्मरूपाश्च नित्यमायान्ति तत्र च ।
नारदाद्यास्तथा सनत्कुमाराद्या हि साधवः ॥८८॥
लोमशाद्याः साधवश्च तेषां दर्शनसेवनात् ।
बदर्याश्रमवासात् स्यात् सर्वकल्मषनाशनम् ॥८९॥
इत्युक्ता प्राह शंभुं तु सती यामि तवाऽऽज्ञया ।
यदि ते रोचते शंभो ह्यागन्तव्यं त्वया प्रभो ॥९०॥
तथाऽस्त्विति हरो मत्वा ययौ देव्या समं गणैः ।
बदरीं व्योममार्गेण नेमे नारायणं गुरुम् ॥९१॥
सती नेमे ततो नारायणाय विनिवेद्य तत् ।
साधुसेवात्मकं सर्वं सेवनं प्रचकार सा ॥९२॥
नारायणस्याऽऽसनस्य बदर्याः सन्निधेस्तथा ।
भूभागस्य सदा प्रातर्मार्जनं च जलार्पणम् ॥९३॥
पत्रपुष्पार्पणं मालार्पणं ध्यानं च दर्शनम् ।
जपं चेत्यादि दुर्गा सा प्रचकार यथायथम् ॥९४॥
शंभुश्चापि महर्षीणां सेवनादि चकार ह ।
साधूनां च यथापेक्षं स्वागतादि चकार ह ॥९५॥
एवं वै मासमात्रं श्रीनारायणस्य सद्गुरोः ।
सती सेवां प्रचकार प्रसन्नो भगवान् हरिः ॥९६॥
उवाच तां वद दुर्गे ! कथं किं समपेक्षसे ।
दुर्गा प्राह कृपासिन्धो ! तवाऽस्मि वैष्णवी सुता ॥९७॥
शंभोः प्राप्ता मया दीक्षा पावनी दीक्षया सदा ।
तथापि लोकरक्षार्थं दैत्यानां नाशकारिणी ॥९८॥
जाताऽस्मि तेन हत्यादिमहापापाभिशंकिनी ।
हराऽऽज्ञया क्षालयितुं शरणं ते समागता ॥९९॥
साधोर्नारायणस्य श्रीहरेस्ते सेवया प्रभो ।
सर्वपापानि नश्यन्तु चेच्छा मे हृदि वर्तते ॥१००॥
श्रुत्वैवं श्रीहरिर्नारायणः प्राह शिवे ! त्वयि ।
पापलेशो न चैवाऽस्ति ब्राह्मी त्वं पारमेश्वरी ॥१०१॥
वर्तसे शिवशक्तिस्त्वं महापातकनाशिनी ।
तथापि लोकलाभार्थं करोषि तादृशं व्रतम् ॥१०२॥
तव पापानि सर्वाणि दैत्यहत्यात्मकानि वै ।
शान्तानि पावनी त्वं वै साधोर्ममैव दर्शनात् ॥१०३॥

साध्वर्षीणां सेवनाच्च नष्टान्यद्यानि ते सति ।
इत्युक्त्वा भगवान्नारायणो वारि ददौ तदा ॥१०४॥
कमण्डलोः प्रसादाख्यामृतं वारि पपौ सती ।
अथ शिवा शिवो नैजगणैः सार्कं हरिं प्रभुम् ॥१०५॥
प्रपूज्याऽऽज्ञां समादाय कैलासं प्रति जग्मतुः ।
इत्येवं शंभुना लक्ष्मि माहात्म्यमुत्तमं सताम् ॥१०६॥
सेवायाः फलरूपं च दर्शितं पापनाशकम् ।
स्वर्गमोक्षप्रदं भुक्तिप्रदं मुक्तिप्रदं तथा ॥१०७॥
धनसम्पत्प्रदं चापि साधुसेवनमुत्तमम् ।
वंशप्रदं तारकं च दारिद्र्यदुःखनाशकम् ॥१०८॥
अज्ञानतिमिरघ्नं च नारायणातिकारकम् ।
सुखदं धामदं चापि साधूनां सेवनं रमे ! ॥१०९॥
पठनाच्छ्रवणाच्चाऽस्य स्मरणाद्वाचनादपि ।
भुक्तिः स्वर्गं भवेच्चापि मुक्तिः स्यात्पारमेश्वरी ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विप्रगृहिभ्यः साधवः सर्वथा श्रेष्ठतमा इत्यर्थे विष्णोर्निदर्शनं दुर्गाया अपि साधुसेवानिदर्शनं चेत्यादिनिरूपणनामा सप्ताऽशीतितमोऽध्यायः ॥ ८७ ॥

### श्रीनारायणीश्रीरुवाच—

भगवन् साधुरूपस्त्वं श्रीपते पुरुषोत्तम ।
इतिज्ञात्वा प्रपृच्छामि विशेषतो भवन्मुखात् ॥ १ ॥
साधवस्तारका लोके साध्व्योऽपि भवतारिकाः ।
विरक्तास्त्यागमार्गस्था जीवोद्धारप्रदाः सदा ॥ २ ॥
पूज्यन्ते ते कृपालेशादस्माभिर्नित्यमेव ह ।
ब्रह्मप्रियाः सतामाशीर्वादैः प्रमुदिताः सदा ॥ ३ ॥
वर्तामहे भवद्योगैर्विविधैश्चातिलौकिकैः ।
नः पुण्यानां न पारोऽस्ति येषां कान्तो हरिर्भवान् ॥ ४ ॥
अथाऽत्र ज्ञातुमिच्छामि सहधर्मेति यद्व्रतम् ।
पाणिग्रहणतश्चोर्ध्वं दम्पत्योः सर्वदा मतम् ॥ ५ ॥
सोऽयं धर्मः कीदृशोऽस्ति क्षणिकः शाश्वतोऽपि वा ।
वैदिकः कल्पितो वापि चैन्द्रियक अथाऽऽसुरः ॥ ६ ॥
अत्रैव वा परत्रापि दम्पत्योर्वर्तते कथम् ।
कर्मभेदात्तु दम्पत्योर्मरणं युगपन्नहि ॥ ७ ॥
गतिश्चैकत्र नास्त्येव सहधर्मः कुतो भवेत् ।
ऐच्छिको वा सहधर्मो नियतो वा प्रसह्य वा ॥ ८ ॥
कीदृशः किंफलश्चेति निखिलेन ब्रवीहि मे ।
येन श्रुतेन सर्वासां धर्मलाभो भवेदिह ॥ ९ ॥

### श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि सहधर्मं सनातनम् ।
विवाहाऽग्निकृतसाक्ष्ये वरो गृह्णाति यत्करम् ॥१०॥
या ददाति करं नैजं वरहस्तेऽतिहर्षिता ।
तयोर्धर्मः सहधर्मो यावज्जीवनमेव ह ॥११॥
स्वेच्छया वा द्वयोर्योगे पित्रोर्वा वाञ्छया तथा ।
सम्बन्धिनां वाञ्छया वा प्रसह्य वा क्वचित् तथा ॥१२॥
प्रसह्यपूर्वसम्मेलाद् द्वयोर्वा सहधर्मकः ।
दानधर्मः सुताया वा कुमारस्य तथा च वा ॥१३॥
एवं प्रवर्तते लक्ष्मि दम्पत्योः सहधर्मकः ।
द्वयोरैक्यं मनोभ्यां च तनुभ्यां कर्मभिस्तथा ॥१४॥
गुणैरैक्यं धनैरैक्यं गृहेणैक्यं द्वयोरपि ।
उपकरणैरैक्यं च भोग्यैरैक्यं समस्तकैः ॥१५॥
आहारैश्च विहारैश्च नर्ममन्त्रानुमन्त्रणैः ।
ऐक्यं व्रतैर्दानतीर्थैरैक्यं हृद्भ्यां तथेन्द्रियैः ॥१६॥
ऐक्यं जागरणस्वापैरैक्यं साहाय्यसेवया ।
ऐक्यं प्राणैर्ममाऽहंभ्यामैक्यं स्नेहानुबन्धनैः ॥१७॥
ऐक्यं चान्तरभावैश्च बाह्यैर्द्वन्द्वैः फलादिभिः ।
ऐक्यं पुण्यादिभिश्चैव तथाऽऽयव्ययरक्षणैः ॥१८॥
यानवाहनशृङ्गारैर्भूषास्वर्णाम्बरादिभिः ।
स्मृद्धिसम्पत्क्षेत्रवाटीराज्याऽऽपणादिभिस्तथा ॥१९॥
ऐक्यं बालसुताऽपत्यैरैक्यं दुःखसुखादिभिः ।
यथायथं विशेषैश्च शान्तघोरप्रमूढकैः ॥२०॥
आनन्दैश्च प्रमोदैश्च महोत्सवैः सवादिभिः ।
पुण्यैः कार्यैः समस्तैश्च दम्पत्योरैक्यमत्र यत् ॥२१॥
सहधर्मः कथितोऽयं पातिव्रत्यपुरःसरः ।
पत्नीव्रतान्वितश्चापि सम्पूर्णश्चेद् धृतो भवेत् ॥२२॥
दम्पत्योः सहकालेन सहयात्रा दिवं प्रति ।
भवेदेव यथेष्टं वै धर्मसामर्थ्ययोगतः ॥२३॥
सहधर्मे क्षतिर्लक्ष्मि ! यावती तावदेव तु ।
द्वयोर्विभिन्नकालीनं मरणं च गतिस्तथा ॥२४॥
विभिन्ना च भवत्येव योन्यन्तरे यथा दिवि ।
लोकान्तरे तथा स्याच्च गतिर्भिन्ना विधर्मिणोः ॥२५॥
सहधर्मः क्षत्यभावे शाश्वतिको भवेत् सदा ।
उभौ यात इतः स्वर्गं ततः सत्यं ततः परम् ॥२६॥

वैकुण्ठं चापि गोलोकं धामाऽक्षरं परं मम ।
उभौ सहैव मोक्षं च विन्दते सहधर्मिणोः ॥२७॥
यदि क्षतियुतो धर्मः सहधर्मो धृतोऽत्र वै ।
तदा वियोगो दम्पत्योर्भवेदेव न संशयः ॥२८॥
अतः सः क्षणिको धर्मो न तु शाश्वतरूपवान् ।
वैदिकः सहधर्मोऽयं देशकालानुसारतः ॥२९॥
न चास्ति कल्पितो लक्ष्मि ! सापेक्षा कल्पना यतः ।
अपेक्षा देशकालादेर्वैषम्ये जायते यदि ॥३०॥
सहधर्मस्तदा गौणः क्वचिद् विपत्सु वर्तते ।
नैतावता तत्र हानिः प्रायश्चित्तेन शुध्यति ॥३१॥
ऐन्द्रियिकः केवलो न पारमार्थिक इत्यपि ।
आत्मार्थः सहधर्मोऽस्ति लोके तु देहमाश्रितः ॥३२॥
परलोके चात्मनिष्ठो मोक्षे मुक्ते व्यवस्थितः ।
इच्छाया चेद्धि दाम्पत्यं चैच्छिकं तत्प्रकथ्यते ॥३३॥
प्रसह्य यत्तु दाम्पत्यं चाऽऽसुरं तत्प्रकथ्यते ।
दाम्पत्यं येन केनाऽपि वर्त्मनाऽऽसं तदुत्तरम् ॥३४॥
सहधर्मः पूर्णरूपः पालितः स तु शाश्वतः ।
अपालितः क्षतिमान् स्याद् वियोगस्यैव कारणम् ॥३५॥
यथा यावत्पालितः स्यात् तावत्फलप्रदो हि सः ।
कनिष्ठः पालितश्चेत् स कनिष्ठफलदो भवेत् ॥३६॥
मध्यो मध्यमफलदश्चोत्तमः श्रेष्ठसत्फलः ।
सृष्ट्यारम्भे युगलानि ब्रह्मणानिर्मितानि वै ॥३७॥
युगलानि समुत्पाद्य सहधर्मेण तत्परम् ।
सह यन्ति परं लोकं मृत्वा मोक्षं दिवं च वा ॥३८॥
पातिव्रत्यबलेनैव पत्नीव्रतबलेन च ।
अथ कालस्य दौर्बल्ये दौर्बल्यं सहधर्मणि ॥३९॥
दौर्बल्यं सहयोगे च दौर्बल्यं पारलौकिकम् ।
एवं ह्रासे समुत्पन्ने भिन्नमार्गा नराः स्त्रियः ॥४०॥
भिन्नयोनिगता नैजकृतानि भुञ्जतेऽयुजः ।
इत्येवं कथितं लक्ष्मि ! सहधर्मरहस्यकम् ॥४१॥
दैविप्रजाः पालयन्ति नाऽपराः स्वार्थमात्रगाः ।
भिन्ना मार्गा हि तासां ता भ्रमन्ति भवसागरे ॥४२॥
अपरस्परसम्बद्धा अपरस्परभागिनः ।
अपरस्परधर्मज्ञाः श्मशानशीलिनो मुहुः ॥४३॥
लक्ष्मीराधारमातुल्या वियुज्यन्ते न कर्हिचित् ।
सतीपद्माप्रथातुल्या वियुज्यन्ते न कर्हिचित् ॥४४॥
माणिक्याश्रीरतितुल्या वियुज्यन्ते न कर्हिचित् ।
पौलोमीतुलसीतुल्या वियुज्यन्ते क्वचित् क्वचित् ॥४५॥
भूत्यातुल्या वियुज्यन्ते युज्यन्ते तु क्वचित् क्वचित् ।
पारकीसदृशी नैव युज्यते विगता पुनः ॥४६॥
एवं चक्रं वर्ततेऽत्र लोके लक्ष्मि ! दुरन्तकम् ।
धर्मचक्रं रक्षकं वै योगस्य बलवद् यथा ॥४७॥
तदेव निर्बलं सत्तु योगं रक्षति नैव च ।
वियोगस्तेन सर्वेषां दम्पतीनरयोषिताम् ॥४८॥
अधर्मः कारणं लक्ष्मि वियोगे ऋणकारिता ।
केचिद् विवाह्य तूर्णं वै वियुज्यन्ते वियन्ति च ॥४९॥
केचित् कालेन केचिच्च मध्यकालेऽन्तिमेऽपरे ।
वियुज्यन्ते ऋणवाहा यथा येषामृणं स्थितम् ॥५०॥
स्व एव कारणं तत्र योगे वियोजने रमे ! ।
तस्माच्चरेद् वृषं वीक्ष्य सहधर्ममखण्डितम् ॥५१॥
सहधर्मं परित्यज्य त्यक्त्वा शास्त्रं गुरोर्वचः ।
व्यवहारवृषं त्यक्त्वा यान्ति ये विपथेन तु ॥५२॥
प्रयान्ति निरयं घोरं दुःखदारिद्र्यसंभृतम् ।
दैवं पैत्र्यं न कुर्वन्ति गृहस्थाः स्वोदरंभराः ॥५३॥
नाऽतिथिपूजका ये ते यान्ति निरयमुल्बणम् ।
दानहीनाः शौचहीना मंगलाचारवर्जिताः ॥५४॥
कलिग्रहा रजोभ्रष्टाः श्ववृत्तिजीविनश्च ये ।
रोदनक्लेशकलहव्यासा यान्ति ह्यधोगतिम् ॥५५॥
भगवन्नामशून्याश्च परोच्छिष्टप्रभोजिनः ।
दुरात्मानो मन्त्रहीना यान्ति निरयमुल्बणम् ॥५६॥
क्रियाहीनाः श्राद्धहीना भक्तिहीना निरीश्वराः ।
महोत्सवादिहीनाश्च यान्ति निरयमुल्बणम् ॥५७॥
पतिताश्च जडोन्मत्ताः कुष्ठिनः श्वित्रिणस्तथा ।
क्लीबा यक्ष्महताश्चापि पापा यान्ति ह्यधोगतिम् ॥५८॥
चिकित्सका देवलका वृथा नियमदर्शकाः ।
रोगिणो निन्दका भक्तिहीना यान्ति ह्यधोगतिम् ॥५९॥
गायका नर्तकाश्चापि कूर्दका वादकास्तथा ।
कथका योधका भक्तिहीना यान्ति ह्यधोगतिम् ॥६०॥
भ्रष्टधर्मा भ्रष्टव्रता भ्रष्टकुलकुटुम्बकाः ।
परसंकीर्णका भक्तिहीना यान्त्यधमां गतिम् ॥६१॥
होमहीनाः श्राद्धशून्या व्यभिचारनिषेविणः ।
नास्तिकाऽध्यापका भक्तिहीना यान्ति ह्यधोगतिम् ॥६२॥
ब्रह्मविक्रयिणश्चापि स्त्रीविक्रयिणस्तथा ।
पतिविक्रेत्र्यश्च भक्तिहीना यान्ति ह्यधोगतिम् ॥६३॥
सर्वसंगाऽभिमन्तारः शवशौचयुतास्तथा ।
स्तेनाः पुत्रीजीविनश्च पापा यान्ति ह्यधोगतिम् ॥६४॥

वधूजीवा मातृगोत्रजीवाश्चाऽज्ञातजीवनाः ।
ऋणिनो हारका भक्तिहीना यान्ति ह्यधोगतिम् ॥६५॥
प्राणिविक्रयकाराश्च स्त्रीपण्यादिप्रजीवनाः ।
वेश्यानाथा अजपाश्च पापा यान्ति ह्यधोगतिम् ॥६६॥
व्रतहीना निजपत्नीक्लेशदाः पाशवा जनाः ।
अयुक्तकार्यकर्तारः पापा यान्ति ह्यधोगतिम् ॥६७॥
परस्परं विमन्तारः परस्परं प्रतारकाः ।
अनर्जवः शठा भक्तिहीना यान्ति ह्यधोगतिम् ॥६८॥
असाक्षिणा मृषावाणिज्यादिनिष्ठा मृषावृषाः ।
मृषावाचोऽसत्यकार्याः पापा यान्ति ह्यधोगतिम् ॥६९॥
दरिद्राः परभाग्याश्च हिंस्राः कल्कयुताः खलाः ।
कलंकिनः कलंकदाः पापा यान्ति ह्यधोगतिम् ॥७०॥
कितवाश्चाऽवृत्तिकाश्च सर्वभक्ष्या विहारिणः ।
दारुणकर्मगा भक्तिहीना यान्ति ह्यधोगतिम् ॥७१॥
मिथ्याशपथिनश्चापि मांसाशनाः सुरापिबाः ।
अवेदव्रतचारित्राः पापा यान्ति ह्यधोगतिम् ॥७२॥
गुर्वभयादिकार्यार्थे वर्जयित्वा पुनः पुनः ।
अनृतवाक्क्रियाचित्तास्ते वै निरयगामिनः ॥७३॥
परस्वनाशकाः परस्त्र्यपहारकरा जनाः ।
पैशुन्यवादिनः पापास्ते वै निरयगामिनः ॥७४॥
प्रपाशालासभाऽगारछायासत्रादिभेदिनः ।
अनाथप्रमदाबालवृद्धभीतप्रवञ्चकाः ॥७५॥
साधुसाध्वीतापसीवञ्चका निरयगामिनः ।
जीविकागृहमित्रस्त्रीविश्वासधर्मघातिनः ॥७६॥
मर्यादान्यायसत्कर्मदानयज्ञविभेदिनः ।
कृतघ्ना दूषकाश्चापि जना निरयगामिनः ॥७७॥
पाखण्डानिष्परीक्षाश्च विषविक्रयिणो जनाः ।
अभिचाराऽग्निगरदाः पापा निरयगामिनः ॥७८॥
आशाघ्नाश्च प्रतिज्ञाघ्ना भक्तिघ्नाः श्रमघातिनः ।
भेदकाश्च शुभघ्नाश्च जना निरयगामिनः ॥७९॥
शस्त्रशल्यादियोक्तारो गोकन्यास्त्रीप्रघातिनः ।
बालजन्त्वादिघाताश्च जना निरयगामिनः ॥८०॥
मार्गाणां रोधका ये च कीलशिलाप्रकण्टकैः ।
भृत्यभक्तस्त्रीत्यजश्च जना निरयगामिनः ॥८१॥
वृषणोच्छेदका नासाभेदका दन्तपातकाः ।
पशूनां दुःखकर्तारो घातका निरयाऽऽयिनः ॥८२॥
अगोसारो नृपाश्चापि दानहीना धनेश्वराः ।
आश्रितत्याजिनो मूढा नरा निरयगा मताः ॥८३॥
आश्रितादीनदत्त्वा ये भुञ्जतेऽग्रेसरा जनाः ।
अयोग्यशासकाः पापा जना निरयगा मताः ॥८४॥
पूजाहीना देवहीना भक्तिहीना असेविनः ।
स्नेहहीना मृषाचाराः पापा यान्ति ह्यधोगतिम् ॥८५॥
सद्धर्मो न वै तेषां तासां वा वै विधर्मिणाम् ।
अधर्मिणां तु पापानां पाशवं जीवनं हि तत् ॥८६॥
इह लोके सुखं नास्ति धर्मो नास्ति व्रतं न च ।
दानं पुण्यं दया नास्ति पशुतुल्याः कथं सुखाः ॥८७॥
परलोकेऽपि ते प्रेता दुःखिनो वै भवन्ति च ।
अप्राप्तजलभक्ष्यान्नाः कुटुम्बाऽदर्शिनस्तथा ॥८८॥
एकलाः परजालस्था यान्ति निरयमन्दिरम् ।
सद्धर्मं न जानन्ति तृष्णाविषयवेदिनः ॥८९॥
परदुःखं न जानन्ति स्वसौख्यार्थं हि तामसाः ।
सर्पतुल्या विषवाहा यान्ति निरयमन्दिरम् ॥९०॥
स्त्रीरक्षां नैव जानन्ति गोरक्षां न विदन्ति च ।
दासदासीसुखं नैवेच्छन्ति यान्ति ह्यधोगतिम् ॥९१॥
धनहारा व्रतहारा धर्महाराः प्रदूषकाः ।
सत्यमसत्यं कुर्वन्तो यान्ति पापा ह्यधोगतिम् ॥९२॥
सद्धर्मे न तु तृप्ता विधर्मे च वहन्ति ये ।
परार्थं नैव पश्यन्ति भक्तिहीना ह्यधोगमाः ॥९३॥
जारवद् गणिकावद् ये वर्तन्ते गृहवासिनः ।
परवत्स्वार्थिवद् ये च ते सर्वे वै ह्यधोगमाः ॥९४॥
हिंस्रवच्चौरवद्धूर्तवच्च कितववत्तथा ।
कालवन्मृत्युवद् ये च वर्तन्ते ते ह्यधोगमाः ॥९५॥
सद्धर्मोत्तरं यत्र वैमनस्यं द्वयोर्गृहे ।
प्रत्यक्षं निरयं तत्र परलोकेऽपि तत्तथा ॥९६॥
अस्नेहश्चापि वैरं च तिरस्कारोऽवमाननम् ।
पराजयोऽतिनिन्दा च प्रत्यक्षनिरयाणि वै ॥९७॥
महारोगो निर्धनत्वं कारागारनिषेवणम् ।
भोज्यभूषादिराहित्यं प्रत्यक्षनिरयाणि वै ॥९८॥
अनपत्यत्वमेवापि बहुशत्रुत्वमित्यपि ।
अतिपरिश्रमजीवित्वं साक्षान्निरयाणि वै ॥९९॥
चिन्तापिशाचिनी यस्य भार्या पिशाचिनीसमा ।
दारिद्र्याख्यपिशाचश्च रौरवं तस्य मन्दिरम् ॥१००॥
तस्माद् विचार्य मेधावी सद्धर्मान् समाचरेत् ।
क्षतीः सर्वाः परित्यज्य कुशलः सन् सुखी भवेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सद्धर्मस्वरूपवर्णनं चाऽसद्धर्मे निरयगामित्वमित्यादिनिरूपणनामाऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥

श्रीनारायणीश्रीरुवाच—

ननु साक्षान्नरकाणि चिन्ताशोककराणि वै ।
यानि भवन्ति तान्यत्र ममाऽऽचक्ष्व हरे प्रभो ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं चिन्ताशोककराणि वै ।
निस्तेजस्वित्वकार्श्यादिरोगशोषकराणि च ॥ २ ॥
यानि साक्षान्नरकाणि दुःखमात्राणि सन्ति वै ।
संभावितस्य सर्वाण्यसंभावने भवन्ति वै ॥ ३ ॥
सुहृन्मित्रं विना पत्नीं विना कुटुम्बमन्तरा ।
विदेशे या स्थितिः सा च निरयः खलु गोचरः ॥ ४ ॥
साधूपचरितैश्चापि कुटुम्बिनामतोषणम् ।
धिक्कारश्चावमानं च निरयः सोऽत्र गोचरः ॥ ५ ॥
धनैश्वर्याद्यधिकैश्च जनैर्ज्ञातिजनैरपि ।
कृताऽवमानसहनं निरयः सोऽत्र गोचरः ॥ ६ ॥
स्वगुणेष्वधिकेष्वन्याऽगुणिनो माननं बहु ।
सन्निधावेव जायेत निरयश्चाऽत्र गोचरः ॥ ७ ॥
जीविकामन्तरा भिक्षालज्जाभयेन या क्षुधा ।
रक्तं दहति नित्यं स निरयश्चात्र गोचरः ॥ ८ ॥
विवादे श्रेष्ठभावेऽपि कनिष्ठेन जितो भवेत् ।
पराजयोऽयं सततं निरयः सोऽत्र गोचरः ॥ ९ ॥
क्लिष्टा जना भवेयुश्च यस्य मित्राणि नित्यदा ।
दुःखदा भयदाश्चापि निरयस्तस्य गोचरः ॥१०॥
प्रशंसंभावितश्चापि मूर्खैर्मूर्खीकृतो जनः ।
दुर्वृत्तैर्धर्षणं यच्च निरयः सोऽत्र गोचरः ॥११॥
मित्रमुखश्चाऽरिसंघो वञ्चनातत्परोऽभितः ।
तेन वै वञ्चनं चापि निरयश्चात्र गोचरः ॥१२॥
रहस्यकुशलश्चापि सर्वार्थगतिकोऽपि च ।
तज्ज्ञैर्न पूज्यते तस्य निरयश्चात्र गोचरः ॥१३॥
असत्सु बहुषु पार्श्वगतेषु च गुणा निजाः ।
असद्भिर्दुर्गुणायन्ते निरयश्चात्र गोचरः ॥१४॥
धनबुद्धिशास्त्रहीना अपि वीक्ष्य महाजनान् ।
महत्त्वाशाग्निदग्धा वै निरयश्चात्र गोचरः ॥१५॥
कृतबुद्धिं कृतसिद्धिं कृतपाण्डित्यमाननम् ।
बान्धवा नाऽभिनन्दन्ति निरयश्चात्र गोचरः ॥१६॥
स्वभार्यायाः प्रातिवेश्यो बली धनी युवाऽपरः ।
वर्तते स्वाऽनभिप्रेतो निरयश्चात्र गोचरः ॥१७॥
यस्य वाक्यस्य वै मूल्यं यथार्थस्याऽपि नैव हि ।
ज्ञातृमध्येऽपि जायेत निरयश्चात्र गोचरः ॥१८॥
मूर्खमध्ये सदा वासो निन्दकेषु निवासनम् ।
ईर्ष्याऽसूयायुग्जनेषु वासोऽपि निरयस्त्विह ॥१९॥
स्वामी चाऽऽसञ्जयित्वा यं कृत्ये पश्चाद्धनादिकम् ।
नित्यमर्थयते यस्मात् तस्य वै निरयस्त्विह ॥२०॥
अन्तर्गतमभिप्रायं दर्शयितुं न शक्यते ।
जाड्याद् भयाच्च शैथिल्यान्निरयश्चात्र गोचरः ॥२१॥
निर्गुणत्वेऽपि गुणिनो जेतुमिच्छति चेर्ष्यया ।
वीक्ष्य गुणान्न सहते निरयस्तस्य गोचरः ॥२२॥
अविद्वान् भीरुरल्पार्थो यशश्चेच्छति यो महत् ।
ज्वलति चिन्तया नित्यं निरयस्तस्य गोचरः ॥२३॥
चिराभिलषितं नैव प्राप्यते यस्य दुःखिनः ।
प्राप्तं चाऽन्यैरपहृतं निरयस्तस्य गोचरः ॥२४॥
अभिशप्तः स्त्रिया मात्रा विप्रैश्च साधुभिश्च वै ।
आत्मदोषेण धिग्भावं गतो यो निरयी त्विह ॥२५॥
साधून् दृष्ट्वा मुक्तजनान् गालीदानं करोति यः ।
पापं करोति तस्यात्र निरयः स्वालयो मतः ॥२६॥
अन्यदुःखादि वीक्ष्याऽपि हर्तुमशक्त एव यः ।
शोचति ध्रुवमर्थं च निरयस्तस्य गोचरः ॥२७॥
अनाज्ञावर्तिनः पुत्रा नारी वचोऽवमानिनी ।
शिष्या विरुद्धाचाराश्च तस्याऽस्ति निरयस्त्विह ॥२८॥
दुष्टदत्तान् प्रभुक्त्वैव जीवति स्वालयं विना ।
आहिण्ड्यतेऽटवी येन निरयस्तस्य गोचरः ॥२९॥
पापं प्रवर्धते यस्य कल्याणं चाऽवसीदति ।
गर्हापात्रं मतो यश्च निरयस्तस्य गोचरः ॥३०॥
शत्रूणां करगो यश्च सुहृद्भ्यो वियोजितः ।
अकस्माज्जीवनं यस्य निरयस्तस्य गोचरः ॥३१॥
दुष्टारिध्याननिष्ठस्य चाऽप्राप्येच्छावतस्तथा ।
चिन्तयानस्य पारक्यं निरयस्तस्य गोचरः ॥३२॥
स्वराज्यस्य धनिनश्चाऽनपत्यता च रुग्णता ।
अकीर्तिश्च विचित्तत्वं निरयास्त्विह गोचराः ॥३३॥
साधोर्जनस्य साध्व्याश्च भोगेच्छा निरयस्त्विह ।
आचार्याणां गुरूणां च धिक्कारो निरयस्त्विह ॥३४॥
मन्दाग्निः सर्वदा दीर्घरोगाश्च निरयास्त्विह ।
यौवने स्त्रीरहितत्वं कान्तहीनत्वमित्यपि ॥३५॥
वैधव्यं च विधुरत्वं गोचरा निरयास्त्विह ।
सत्सु पुत्रेषु भृत्यत्वं पराधीनस्वपोषणम् ॥३६॥

वार्धक्ये च पराधीनत्वं चेति निरयास्त्विह ।
अनिन्द्रियस्य दीर्घायुः सबलस्य दरिद्रता ॥३७॥
दारिद्र्ये बह्वपत्यत्वं साक्षाद्वै निरयास्त्विह ।
अनिकेतनिवासित्वं परगृहनिवासिता ॥३८॥
परभाग्योपजीवित्वं सदा भिक्षुकवृत्तिता ।
गृहस्थस्येति लोकेऽत्र प्रत्यक्षा निरया रमे ! ॥३९॥
पत्युरस्नेहिता नार्यो पुत्रा विमार्गगास्तथा ।
कन्यानां गर्भवत्ता च प्रत्यक्षा निरयास्त्विह ॥४०॥
प्रधानाऽमात्यवर्गस्य दोषे निगडपातनम् ।
राज्या राजकुमारस्य सतो देशगुरोस्तथा ॥४१॥
कारागारनिवासश्च राज्ञो द्विजस्य च स्त्रियाः ।
देवजनस्य विदुषः प्रत्यक्षा निरयास्त्विह ॥४२॥
अपूर्णभोज्यलाभश्च ह्यपूर्णं च धनार्जनम् ।
अरसं शुष्कमुच्छिष्टं भोज्यं वै निरयस्त्विह ॥४३॥
सति वृद्धे त्वपत्यानां नाशोऽपि निरयस्त्विह ।
प्रेतप्रवेशनाद्यं च प्रत्यक्षा यमयातना ॥४४॥
राजदण्डादि कष्टं च प्रत्यक्षा यमयातना ।
ईतयश्चापि दुःखानि प्रत्यक्षा यमयातनाः ॥४५॥
सापत्न्यं दुःसहं नित्यं ताडनं परवश्यता ।
पाशवं जीवनं सर्वं प्रत्यक्षा यमयातनाः ॥४६॥
दुष्कालाऽऽवृतता चाऽग्निगरपाशादिपातिता ।
जलगर्तोर्ध्वपाताश्च प्रत्यक्षा यमयातनाः ॥४७॥
शूलशस्त्राऽस्त्रघाताश्च रोधनं गह्वरादिषु ।
गर्भपीडा प्रसवार्त्तिः प्रत्यक्षा यमयातनाः ॥४८॥
असह्यकामभोगाश्च ह्यपथ्यभोजनाशनम् ।
त्रिदोषज्वरबाधाद्याः प्रत्यक्षा यमयातनाः ॥४९॥
पाकाः शरीरे क्लेदाश्च सदा विड्दुदरं वपुः ।
श्लेष्माकफादिसातत्यं प्रत्यक्षो निरयस्त्विह ॥५०॥
अशान्तिः सर्वदा चित्ते तथा देशविवासनम् ।
अपमृत्युरसहाये प्रत्यक्षो निरयस्त्विह ॥५१॥
केवलकन्यकावत्त्वं पुत्रशून्यत्वमेव च ।
नपुंसकत्वं षण्ढत्वं प्रत्यक्षो निरयस्त्विह ॥५२॥
श्वपचत्वं मलवाहित्वं च क्लेदादियोगिता ।
दुर्गन्धालयवत्ता च प्रत्यक्षो निरयस्त्विह ॥५३॥
उद्वेगः सर्वदा चित्ते तृष्णाज्वालादवानलः ।
शान्तिः सुखं न वै यस्य प्रत्यक्षो निरयस्त्विह ॥५४॥
बाल्यं चैवाऽतिवार्धक्यं मैथुनारूढता तथा ।
मृज्जलाभ्यां न चेच्छुद्धिः प्रत्यक्षा निरयास्त्विह ॥५५॥
मद्यं मांसं रतिः कामः प्रत्यक्षा निरयास्त्विह ।
विपत्काला हि निरयाः सम्पत्कालाः सदाऽमृताः ॥५६॥
स्नेहः स्वर्गो निरयस्तु द्वेष एवाऽत्र पद्मजे ! ।
ज्ञानं स्वर्गो विवेकश्च धौर्गोर्धर्मः स्वराज्यकम् ॥५७॥
सन्तोषः शाश्वतं स्वर्गो मोक्षस्तु वासनाक्षयः ।
इत्येतत् सर्वमाज्ञाय त्याज्यं त्यजेत् सुबुद्धिमान् ॥५८॥
ग्राह्यं समर्जयेत् तुष्ट्या विवेकी श्रेयआशयः ।
साधुः स्वर्गो हरिः स्वर्गो भक्तिः स्वर्गो हि शाश्वतः ॥५९॥
ब्रह्मस्थितिः परः स्वर्गो ब्रह्माप्तिः स्वर्गमुत्तमम् ।
निर्भयत्वं महत् स्वर्गं जीवतोऽपि सदा रमे ! ॥६०॥
शृणु चैको भृत्यपरिश्रमी दिवाक्रियापरः ।
नित्यवेतनलाभेन कृषिकार्यकरो ह्यभूत् ॥६१॥
नाम्ना विश्रामगुप्तोऽसौ क्षेत्रे सस्यादिपोषकः ।
नित्यं प्रयाति स प्रातः श्रमं क्षेत्रे करोति च ॥६२॥
सायं प्राप्य नैतिकं च धनमन्नं च कर्षुकात् ।
लब्ध्वा नैजं गृहं याति द्वारप्राकारवर्जितम् ॥६३॥
पर्णकाण्डादिजन्यं च भूशय्याशोभनं तथा ।
मृद्भाण्डद्वित्रिशोभं च चलच्चुल्लीविराजितम् ॥६४॥
असंस्कृतत्रिपाषाणे धृत्वा भ्राष्ट्रं च वह्निना ।
रोटकं पाचयित्वा च भुक्त्वा लवणवारिणा ॥६५॥
मरीचकेन सह वा मूलकेनाऽथवाऽनिशम् ।
कन्देन वा प्रभुक्त्वाऽथ पीत्वा वारि तदाऽऽहृतम् ॥६६॥
प्रक्षाल्य मृत्तिकापात्रं कृष्णनाम जपन् भुवि ।
स्वपित्येवैकचीर्णोत्थखण्डप्रावरणान्वितः ॥६७॥
निर्भयश्चापि निश्चिन्तः पुष्टो नीरोग उद्बलः ।
न शैत्यं बाधते चाऽस्य न विषाऽऽक्ताऽऽतपोऽपि च ॥६८॥
ब्रह्मचारी सदा शेते सर्वचिन्ताविवर्जितः ।
अपरिग्रहतस्तस्य चौर्यभयं न विद्यते ॥६९॥
विनम्रस्य च भृत्यस्य शत्रुभयं न विद्यते ।
अनिच्छोस्तस्य निद्रा वै शान्तस्याऽऽप्रातरेव तु ॥७०॥
निगाढा सा भवत्येव स्वाप्नचिन्ताविवर्जिता ।
प्रातर्मानवनादैश्च जागर्ति सहसा ततः ॥७१॥
कृत्वा शीघ्रं रोटकं च सह नीत्वा प्रयाति च ।
क्षेत्रं श्रमयुतस्तत्र यथाकालं च खादति ॥७२॥
एवं वै वर्तमानस्य सुखिनो दर्शनेन वै ।
सन्निधौ संवसन् सोमचन्द्राख्यो वणिगुत्तमः ॥७३॥
परोपकारचित्तात्मा दुःखिनं गणयन् हि तम् ।
कर्षुकभृत्यमाहूय ददौ द्रव्यं दयावशः ॥७४॥

रूप्यकद्विशतं दानं सहार्य्यं जगृहेऽपि सः।
अथ चिन्ता समुत्पन्ना रक्षणार्थं गृहे निजे ॥७५॥
यथाऽन्यो नैव जानीयात् तथा ररक्ष कोणके।
थूत्कारस्य स्थले धूल्यां खात्वा चिक्षेप गर्तके ॥७६॥
निक्षिप्य च ततो नित्यं याति कार्यार्थमेव सः।
क्षेत्रे गतोऽपि स्मरति द्रव्यं गृहे सुरक्षितम् ॥७७॥
मध्याह्ने च तत आगत्यापि दृष्ट्वा प्रयाति च।
सायमागत्य वीक्ष्य क्ष्मां भुक्त्वा स्वपिति नित्यवत् ॥७८॥
रात्रौ निद्राति वै स्वप्ने तूर्णं जागर्ति शब्दने।
चिन्तया चौरहार्यस्य रक्षणार्थं विचिन्तकः ॥७९॥
एवं नित्यं सुखा निद्रा क्षीणाऽभवच्छनैः शनैः।
अपाचनं जाठरेण बलक्षयोऽपि संवृतः ॥८०॥
अस्थैर्यं मानसस्याऽपि द्रव्यलग्नस्य सर्वथा।
कार्ये क्षेत्रेऽपि कर्माऽलग्नता जाता शनैः शनैः ॥८१॥
कार्यं सम्पद्यते न्यूनं विचित्तस्य दिने दिने।
तदा वै स्वामिना पृष्टः कर्षुकेण महात्मना ॥८२॥
कथं त्वं वर्तसे भ्रान्तो विह्वलो भूतवेशितः।
कृषेः कर्माऽपि पूर्णं त्वं करोषि नैव सर्वथा ॥८३॥
वेतनं नैत्यकं चान्नं दास्ये न्यूनं यथाक्रियम्।
इत्युक्तः स च भृत्यस्तु क्षणं विचिन्त्य कर्षुकम् ॥८४॥
प्राहाऽत्र कारणं चास्ते रूप्यकाणां शतद्वयम्।
वणिजाऽर्पितमेवाऽऽस्ते पर्णगृहे ममैव तत् ॥८५॥
तच्चिन्ताचिन्तितश्चाऽहं विभ्रान्तको भवामि ह।
द्रव्यं वै निरयः साक्षान्निद्रानाशो यतोऽभवत् ॥८६॥
पुष्टिनाशः शान्तिनाशः क्रियानाशो यतोऽभवत्।
द्रव्यं साक्षाद्भयं चास्ते मृत्युर्द्रव्ये प्रतिष्ठति ॥८७॥
कालो द्रव्ये राजते च क्षयो द्रव्ये विराजते।
प्रत्यक्षं नरकं द्रव्यं तृष्णातन्तुविवर्धकम् ॥८८॥
परिग्रहो हि निरयस्त्यागः स्वर्गं परं मतम्।
शान्तिराध्यात्मिकं स्वर्गं त्यागो बाह्यं स्वरमृतम् ॥८९॥
द्रव्यं लब्ध्वा मया स्वर्गं नाशितं वा विवासितम्।
ततोऽहं तु यथापूर्वं सुखीभवामि वर्जनात् ॥९०॥
इत्युक्त्वा कर्षुकायैव सह नीत्वा च कर्षुकम्।
दर्शयामास कोणे तत्प्रत्यक्षं निरयं ह्यघम् ॥९१॥
दुःखं दुःखकरं शान्तिहरं शतद्वयात्मकम्।
निष्कास्य गर्तात् तत्सर्वं ददौ च वणिजे पुनः ॥९२॥
द्रव्यं प्रत्यक्षनिरयं नैव मे रोचते वणिक्।
गृहाण त्वं निरयं वै द्रव्यरूपं सुखक्षयम् ॥९३॥
इत्युक्त्वा सम्प्रदायैव सुखं शेते यथागतम्।
पुनः सुखी ह्यभवत्स वितृष्णो निष्परिग्रहः ॥९४॥
सर्वसम्पूर्णकार्याढ्यो यथापूर्वं तथाऽभवत्।
तस्माल्लक्ष्मि चेहलोके दुःखदा निरयाः खलु ॥९५॥
परिग्रहा हि ते सर्वे दुःखदा निरयास्त्विह।
साधोः स्वर्गं सदा चास्ते सहैव सुखिनस्ततः ॥९६॥
नारायणस्तथा चाऽहं वसामि साधुमानसे।
ममाऽऽनन्देन मुदिता निजानन्देन नन्दिताः ॥९७॥
तारयन्ति जनानन्यान् प्रेषयन्त्यक्षरं पदम्।
प्रज्वालयन्ति पापानि निरयान् प्रहरन्ति च ॥९८॥
उपादिशन्ति तत्त्वानि विवेकं च ददत्यपि।
भक्तिं मे कारयित्वा च विधाय दिव्यभावनाः ॥९९॥
नारायणस्वरूपांश्च कारयित्वाऽक्षरं पदम्।
प्रापयन्ति सुभक्तान् वै सदा स्वर्गप्रदा हि ते ॥१००॥
सेवनीया हि सततं साधवः साधुभूषणाः।
पठनाच्छ्रवणाच्चापि स्मरणादपि मुक्तिभाक् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने प्रत्यक्षनिरयाणां वर्णनम्, कर्षुकभृत्यदृष्टान्तेन द्रव्यादयः प्रत्यक्षनिरया इति प्रदर्शनम्, प्रत्यक्षस्वर्गं चेत्यादि-निरूपणनामा नवाऽशीतितमोऽध्यायः ॥ ८९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि! त्वं येषां स्वर्गं हि शाश्वतम्।
दानधर्मयुता नित्यं देवभक्ताः शुभाशयाः ॥ १ ॥
तपःसत्यपराः शुद्धा यान्ति स्वर्गं निरामयम्।
गुरुशुश्रूषावदाता विद्याशीलसुशोभनाः ॥ २ ॥
प्रतिग्रहाघरुचयो यान्ति स्वर्गं निरामयम्।
स्वार्थात् कीर्तेर्भयाद् व्याधेः कष्टाद् दारिद्र्यदूषणात् ॥ ३ ॥
ज्ञानाल्लोभादाश्रयाच्च स्नेहात् सम्बन्धयोजनात्।
सहवासाद्भक्तिमन्तो यान्ति स्वर्गं निरामयम् ॥ ४ ॥
क्षमाधैर्यतितिक्षाढ्याः सत्कार्येषु सदोत्थिताः।
पूजाद्याचारसम्पन्ना यान्ति स्वर्गं निरामयम् ॥ ५ ॥
मद्यमांसव्यवायादिनिवृत्ताश्चौर्यवर्जिताः।
देवप्रसादभोक्तारो यान्ति स्वर्गं निरामयम् ॥ ६ ॥
धर्मशालाप्रकर्तारो देशोद्धारादिकारिणः।
द्रुमोद्यानाश्रमपाश्च यान्ति स्वर्गं निरामयम् ॥ ७ ॥
ग्रामनगरपातारः प्रजारक्षाविधायकाः।
आपत्सहायदाः सर्वे यान्ति स्वर्गं निरामयम् ॥ ८ ॥

मृषाम्बरप्रदातारश्चान्नपानप्रदास्तथा ।
कुटुम्बसेवकाः सर्वे यान्ति स्वर्गं निरामयम् ॥ ९ ॥
हिंसाद्रोहादिनिवृत्ताः सोढारश्चापदां सदा ।
शरणस्य प्रदाः सर्वे यान्ति स्वर्गं निरामयम् ॥१०॥
आश्रयदास्तथापेक्ष्यपर्यंकशयनप्रदाः ।
यानवाहनदातारो यान्ति स्वर्गं निरामयम् ॥११॥
ग्रामक्षेत्रादिदातारो गृहगोवृषदास्तथा ।
पात्रोपकरणप्रादा यान्ति स्वर्गं निरामयम् ॥१२॥
वृद्धं गुरुं सुरं कान्तं मातरं पितरं हरिम् ।
शुश्रूषयन्ति साध्वीं च यान्ति स्वर्गं निरामयम् ॥१३॥
स्नेहवन्तो यथायोग्यं हितकाराः कुटुम्बिनाम् ।
परार्थसाधकाः सुज्ञा यान्ति स्वर्गं निरामयम् ॥१४॥
धर्माढ्या माधवबला जिततृष्णा जितेच्छवः ।
आराधनरता धीरा यान्ति स्वर्गं निरामयम् ॥१५॥
अपराधिदयावन्तो वत्सला मार्दवान्विताः ।
अदण्डरोषाः शास्त्रज्ञा यान्ति स्वर्गं निरामयम् ॥१६॥
आतिथेयाः शरण्याश्च सहस्रदाः सुसाधवः ।
अनेकत्राणकर्तारो यान्ति स्वर्गं निरामयम् ॥१७॥
स्वर्णरूप्यकरत्नानां दातारो वाससां तथा ।
मौक्तिकानां प्रदातारो यान्ति स्वर्गं निरामयम् ॥१८॥
महोत्सवेषु द्रव्याणां वस्तूनां चार्पकास्तथा ।
यौतकादिप्रदातारो यान्ति स्वर्गं निरामयम् ॥१९॥
वैवाहिकानां वस्तूनां दीक्षांगानां तथा प्रदाः ।
दासदासीप्रदाश्चापि यान्ति स्वर्गं निरामयम् ॥२०॥
प्रपाऽऽरामसभाकूपसरसां च विधायकाः ।
दीर्घिकासत्रकर्तारो यान्ति स्वर्गं निरामयम् ॥२१॥
क्षेत्रवसतिसौधानां गह्वरसरितां तथा ।
जलाशयानां दातारो यान्ति स्वर्गं निरामयम् ॥२२॥
कणानां द्विदलानां च धान्यानां दायिनस्तथा ।
रसानां च प्रदातारो यान्ति स्वर्गं निरामयम् ॥२३॥
मिष्टान्नानां फलानां च कन्दानां पत्रिणां तथा ।
शाकानां च प्रदातारो यान्ति स्वर्गं निरामयम् ॥२४॥
दुःखानां हारका ये च तापसन्तापनाशकाः ।
विपद्विनाशका लक्ष्मि यान्ति स्वर्गं निरामयम् ॥२५॥
यत्र क्वापि कुले जाता अपि स्नेहस्वभाविनः ।
वंशविस्तारवन्तश्च पुत्रपौत्रसुतान्विताः ॥२६॥
दयावन्तः साधुशीला लज्जामर्यादया स्थिताः ।
अमृषाहृदयाः शान्ता यान्ति स्वर्गं निरामयम् ॥२७॥
पराऽनिष्टाऽप्रकर्तारो निन्दाद्वेषाऽस्पृशो जनाः ।
सन्तुष्ट्या गुरुसेवाढ्या यान्ति स्वर्गं निरामयम् ॥२८॥
आशीर्वादग्रहीतारः पुण्यकार्यनिषेविणः ।
पुण्यसाहाय्यकर्तारो यान्ति स्वर्गं निरामयम् ॥२९॥
प्रतिष्ठायामलुब्धाः स्वगौरवे स्नेहवर्जिताः ।
निर्माना दासवद्भावा यान्ति स्वर्गं निरामयम् ॥३०॥
निरपेक्षा धनानां च महासन्तोषसंभृताः ।
अपरिग्रहसर्वस्वा यान्ति स्वर्गं निरामयम् ॥३१॥
परिग्रहे सदा चाप्यकृतलम्बकराऽननाः ।
लुञ्चाभक्ष्यादिशून्याश्च यान्ति स्वर्गं निरामयम् ॥३२॥
सर्वघातादिशून्याश्च तथाऽत्मघातवर्जिताः ।
ब्रह्मघातादिशून्याश्च यान्ति स्वर्गं निरामयम् ॥३३॥
सद्धर्मस्थिता नित्यं गृहस्था धर्मिकर्मिणः ।
भक्तिदानपराः शुद्धा यान्ति स्वर्गं निरामयम् ॥३४॥
शीलव्रतिनः सततं वनव्रतिन एव च ।
सन्न्यासव्रतशीलाश्च यान्ति स्वर्गं निरामयम् ॥३५॥
कृतस्याऽऽघातकाश्चापि विश्वासस्याऽप्यघातकाः ।
ईष्टस्याऽघातकाः पुण्या यान्ति स्वर्गं निरामयम् ॥३६॥
लोकोपकारकाराश्च मोक्षोपकारकारकाः ।
हितोपकारकाराश्च यान्ति स्वर्गं निरामयम् ॥३७॥
शास्त्रोपकारकाराश्च कलोपकारकारकाः ।
उद्योगोपकारकारा यान्ति स्वर्गं निरामयम् ॥३८॥
नवीनयोजनावन्तो देशविघ्ननिवारकाः ।
प्रजासौख्यप्रकर्तारो यान्ति स्वर्गं निरामयम् ॥३९॥
अघाता ये सदा सन्ति चाऽहिंसाव्रतशीलिनः ।
देवाश्रिताश्चात्मतृप्ता यान्ति स्वर्गं निरामयम् ॥४०॥
अघातयित्वा ये सन्ति घातकाख्या जनास्त्विह ।
तेषां संगं न कुर्वन्ति यान्ति स्वर्गं निरामयम् ॥४१॥

श्रीनारायणीश्रीरुवाच—

अघातयित्वाऽपि च ये घातकाः सन्ति मानवाः ।
ताँस्तान् वेदितुमिच्छामि प्रदर्शय हरेऽत्र मे ॥४२॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि कथयामि तादृशान् मानवानपि ।
अहिंसयित्वाऽपि जना हिंसकाः संभवन्ति तान् ॥४३॥
घातवद्दुःखदो यः स्याद् घातकः स तु कीर्तितः ।
घातवत् फलदश्चापि घातकः सम्प्रकीर्त्यते ॥४४॥

भिक्षुकं स्वयमाहूय भिक्षार्थे तिथिवर्जितम् ।
ब्रूयान्नास्तीति यः काले विद्याद् भिक्षुहणं तु तम् ॥४५॥
न्यायस्थितं तु यो राजा दण्ड्यं मत्वा ततः परम् ।
वृत्तिं हरति तस्मात् स जीवहा वृत्तिहारकः ॥४६॥
तृषितानां गवां विघ्नं तथाऽन्येषां करोति यः ।
जलहा गोघ्न एवापि प्राणहा स भवेदिह ॥४७॥
यश्च शास्त्रं नियमाँश्च शासनं चोपदेशनम् ।
हन्ति चाशो दूषयति न्यायहा शास्त्रकारहा ॥४८॥
निजपुत्रीं युवतीं च समये सदृशे वरे ।
न प्रयच्छति कन्याहा धर्महा स भवेदिह ॥४९॥
अधर्मिष्ठश्च यः साधुद्विजपूज्यादिदेहिषु ।
मर्मभेदं क्रियाच्छोकं पूज्यहा स मतो भवेत् ॥५०॥
पंगोरन्धस्य मूर्खस्य नार्याश्चाऽनाथदेहिनः ।
सर्वस्वहर्ता भवति जीवहा सर्वहा तथा ॥५१॥
ग्रामारण्यवनादौ चाऽश्रमक्षेत्रगृहादिषु ।
अग्निदाता सर्वहा वै ग्रामहा ब्रह्महा मतः ॥५२॥
विषदश्चाऽस्त्रनिक्षेप्ता रोधयिता च मर्दकः ।
पाशदो भयमार्गदर्शकोऽनिष्टौषधिप्रदः ॥५३॥
अभिचारप्रदो मिथ्याकलंकदो यशःप्रहा ।
राज्यहा च कलायन्त्रसाधनाद्यपहारकः ॥५४॥
अङ्गुष्ठहा ऋतुहा च धर्महा यज्ञहा तथा ।
लग्नहा पाठहा पूजाघातको भक्तिघातकः ॥५५॥
गर्भहा नेत्रहा हस्तघातको लिंगहा तथा ।
बीजहा मुष्कहा जीव्यपशुहारक इष्टहा ॥५६॥
गुरूणां धिक्प्रवक्ता च सर्वे ते प्राणघातिनः ।
मोक्षहा चात्महा प्रोक्तो नास्तिको ब्रह्महा मतः ॥५७॥
शीलहा धर्महा प्रोक्तः पापकृत् स्वर्गहा मतः ।
सतीत्वदूषको नारीघ्नश्चोक्तो धर्महा अपि ॥५८॥
ब्रह्मणः श्रीहरेर्भीतिं त्यक्त्वा मे परमात्मनः ।
हनो भवन्ति ते तस्मात् सर्वेऽपि ब्रह्मघातिनः ॥५९॥
निरया याम्यलोका वै तेषां तु शाश्वतीः समाः ।
प्रेतभावास्तथा गर्भवासास्तिर्यग्भवादयः ॥६०॥
नारकास्ते नरकस्था यत्र क्वापि भवन्ति वै ।
सर्वदा दुःखभोक्तारः सुखलेशविवर्जिताः ॥६१॥
नहि तेषामयं लोकः स्वर्गो नैव कुतोऽक्षरम् ।
किन्तु मद्भक्तिमासाद्य तरन्ति कृपया चिरात् ॥६२॥

श्रीनारायणीश्रीरुवाच—

ननु पापकराणां ते कृपा वै जायते कथम् ।
तत्रापि घातकानां वै क्रूराणां लोकनाशिनाम् ॥६३॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं यथा मे जायते कृपा ।
क्रमं ते विशदं चात्र वक्ष्यामि येन मोक्षणम् ॥६४॥
घातकानां तीव्रवेगवतां शापा भवन्ति वै ।
प्राणिनां शापनिःश्वासैः पुण्यहानिर्ध्रुवं भवेत् ॥६५॥
शीघ्रं च दुःखभोगानामानन्त्यमुपतिष्ठति ।
गृहं दाराः सुताः पुत्र्यः कुटुम्बं पशवो धनम् ॥६६॥
अचिरादेव नश्यन्ति दारिद्र्यं जायतेऽसहम् ।
रोगा भयंकराश्चापि सर्वनाशोऽपि जायते ॥६७॥
अन्नसलिलवस्त्राणां प्राप्तिः सर्वा विलीयते ।
भिक्षुकाः किंकरा यद्वत् कदर्यास्ते भ्रमन्ति च ॥६८॥
धिक्काराऽमंगलाः स्थानहीना विवासितास्ततः ।
श्ववल्लोके विभ्रमन्ति दुःखदारिद्र्यधर्षिताः ॥६९॥
दुःखान्येतानि संभुक्त्वा चिरं धैर्यविवर्जिताः ।
तितिक्षारहिता दुःखदण्डैर्मार्दवमागताः ॥७०॥
शोचन्ति सुतरां क्वापि भाग्यं दैवं हरिं तथा ।
हृदये शरणं यान्ति दुःखनिवारकं प्रति ॥७१॥
'इदं दुःखमसह्यं मे लीयतां नाऽऽचरे पुनः ।
अहो नारायण ! दुःखं मम नाशय चाऽसहम् ॥७२॥
शरणं ते पतितोऽस्मि चासह्यं त्वं निवारय ।
दानं पुण्यं तीर्थयात्रां करिष्ये सत्क्रियां शुभाम् ॥७३॥
जपं सेवां सतां वापि करिष्ये मानतां हरेः ।
व्रतं तपो गुरोश्चापि प्रायश्चित्तं करोमि च' ॥७४॥
इत्येवं शुभसंकल्पाः प्रजायन्तेऽवशस्य वै ।
राजदण्डैर्लोकदण्डैर्देवदण्डैर्विपद्गणैः ॥७५॥
दुःखदण्डैर्याम्यदण्डैर्महाकष्टातिकष्टकैः ।
प्रजायन्ते शुभा बुद्धिस्ततो याति हृदा हरिम् ॥७६॥
धर्मं पुण्यं व्रतं भक्तिं जपं दानं शुभं प्रति ।
एवं शुभप्रसंगेन शुभक्रियाविधायिना ॥७७॥
मनाक्पुण्यं प्राप्यते वै पापध्वंसो मनाङ् मनाक् ।
शनैः पुण्यक्रियाभिश्च सुयोगाः संभवन्ति च ॥७८॥
सतां सेवा तीर्थसेवा परोपकार आर्जवम् ।
भजनं घातपापेभ्यो भयं मे स्मरणं तथा ॥७९॥

एवं चिरेण करणैर्याति मे शरणं सताम् ।
साधवो मम भक्ताश्च मन्त्रदानं च मालिकाम् ॥८०॥
नामकीर्तनभक्तिं च सत्संगं कारयन्ति तम् ।
एवं पुण्योदये चित्ते नैर्मल्ये च मुमुक्षुता ॥८१॥
जायते लीयते बुभुक्षता सम्पद्यते श्रितः ।
शिष्यः स वैष्णवः स्याच्च जिज्ञासति हरिं गुरुम् ॥८२॥
कथासत्संगसेवाभिर्वर्धते भजनेऽनिशम् ।
आराधनायाः सोपानं यथा यथाऽधिरोहति ॥८३॥
तथा तथोपासना मे वर्धते प्रबला सुखा ।
एवं दग्धाऽघ एव स्यात् पुण्यशेवधिरित्यपि ॥८४॥
ततो दास्यं मम चाप्तस्ततश्चात्मनिवेदिताम् ।
ततः कृपा मे भवति जायते पंक्तिपावनः ॥८५॥
साधुर्वा जायते भक्तो मुक्तो वा जायते शुभः ।
परधामाऽर्हं एवाऽपि जायते च महेश्वरः ॥८६॥
एवं लक्ष्मि ! नरो नारायणो भवति सा कृपा ।
कारणं तत्र बोद्धव्या मोक्षदा मन्नियोजिता ॥८७॥
पापाः पापतमाश्चापि तरन्त्येवं चिरेण ह ।
यातनादुःखभोगाश्चाऽसह्यास्ते गुरुसदृशाः ॥८८॥
दण्डा निवर्तने लोके भवन्ति हेतवः क्वचित् ।
एवमार्त्ताः प्रायशो मां भजन्ति बहुदुःखिताः ॥८९॥
अर्थार्थिनश्च वै तद्वत् तरन्त्यपि न संशयः ।
साधवस्तारकाः शीघ्रं चेन् मिलन्ति कृपावशाः ॥९०॥
तेभ्यो दत्वा मनःप्राणाँस्तरन्ति पापिनोऽपि च ।
प्रातः सम्पूज्य साधूँश्च वृद्धान् प्रणम्य सर्वदा ॥९१॥
गुरून् समर्प्य विप्राँश्च तरन्ति पापकोटितः ।
अर्पयेद् वस्तुजातं च तोषयेत् साधुसत्तमान् ॥९२॥
मम भक्ताः शीलधर्मा निःस्पृहाः स्वादवर्जिताः ।
पुण्याब्धयः साधवो ये तेभ्यो दत्तं महाफलम् ॥९३॥
कामक्रोधादिरहिताः सर्वसहा जितेन्द्रियाः ।
तापसा हितमैत्राश्च तेभ्यो दत्तं महाफलम् ॥९४॥
अरागा ज्ञानविज्ञानपारगाः सत्यसद्व्रताः ।
मोक्षमार्गरताः सन्तस्तेभ्यो दत्तं महाफलम् ॥९५॥
येषां शिष्याः प्रतीक्षन्ते सुवृष्टिमिव कर्षुकाः ।
तेभ्यो दत्तं प्रजायेत सहस्रगुणितं त्विह ॥९६॥
शीलचारित्रयुक्ता ये कृशाऽऽयजीविकादयः ।
भिक्षुकाः साधवो विप्रास्तेषु दत्तं महाफलम् ॥९७॥
स्वभक्ताः स्वगृहावासाः स्वबलाः स्वाश्रया द्विजाः ।
पावनाश्चार्थिनश्चेत् स्युस्तेषु दत्तं महाफलम् ॥९८॥
यस्य सत्राणि विद्यन्ते बटवः साधवो गृहे ।
भुञ्जते यस्य तस्यापि सत्रे दत्तं महाफलम् ॥९९॥
हृतसर्वविधस्वाश्च भक्तिमात्रपरायणाः ।
अनाथाः साधवो ये स्युस्तेषु दत्तं महाफलम् ॥१००॥
पारायणस्थिता यज्ञस्थिता महोत्सवस्थिताः ।
तेभ्यः पूर्त्यर्थमेवापि दत्तं सर्वं महाफलम् ॥१०१॥
आपत्काले कृशप्राणाः कृशद्रव्याः कृशव्रताः ।
तथापि साधुशीला ये तेभ्यो दत्तं महाफलम् ॥१०२॥
त्यागवन्तश्च निःस्नेहा दम्भमानविवर्जिताः ।
साधवः साधुभूषा ये तेभ्यो दत्तं महाफलम् ॥१०३॥
जापका ब्रह्मसर्वस्वा भैक्षाचारास्तपस्विनः ।
सन्तो मृषागन्धशून्यास्तेभ्यो दत्तं महाफलम् ॥१०४॥
बालाऽपराधशून्याश्च चात्माऽपराधवर्जिताः ।
ब्रह्माऽपराधशून्या ये तेभ्यो दत्तं महाफलम् ॥१०५॥
सतां ये तु कृपापात्राण्यपि भक्ता हरेस्तथा ।
साध्वीसन्तोषपात्राणि तेभ्यो दत्तं महाफलम् ॥१०६॥
इत्येवं कमले ! दत्त्वा साधुभ्यो दानमुत्तमम् ।
अन्नजलाम्बरयोग्यवस्त्वात्मकं तरेत् ततः ॥१०७॥
नौका वै साधवः सन्ति पापिनः प्रस्तराः खलु ।
साधुनौकास्तरन्त्येव तारयन्त्यपि चाऽऽश्रितान् ॥१०८॥
पठनाच्छ्रवणाच्चास्य घातपापप्रणाशनम् ।
साधुसेवाफलं प्राप्य स्वर्गं लभेत शाश्वतम् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने स्वर्गगामिनः, अघातयित्वाऽपि घातकिनः, कृपया क्रमोद्धारः सत्सेवयोद्धारश्चेत्यादिनिरूपणनामा नवतितमोऽध्यायः ॥ ९० ॥

श्रीनारायणीश्रीरुवाच—

घातकिनां सतां योगो यदि नैवोपजायते ।
कथमुद्धरणं तेषां भवेत् कथय चोत्तमम् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

साधवः सर्वतः श्रेष्ठा मिलेयुर्न तदा भुवि ।
श्रेष्ठतीर्थेषु गन्तव्यमध्वराऽवभृथे च वा ॥ २ ॥
कुंभसूर्ये प्रगन्तव्यं तीर्थे स्नात्वा प्रमुच्यते ।
कुंकुमवापिकातीर्थे गोमतीतीर्थमित्यपि ॥ ३ ॥

स्वर्णरेखा महत्तीर्थं नारायणह्रदः स्वयम् ।
हिरण्यासंगमस्तीर्थं सोमनाथे महत्तमम् ॥ ४ ॥
नर्मदासागरयोगश्चोंकारेश्वर इत्यपि ।
श्रीशैलश्चापि सह्याद्रिः पंपासरस्तथोत्तमम् ॥ ५ ॥
दक्षिणोदधिभूतीरः सेतुः कन्याकुमारिका ।
गोदावरी चन्द्रभागा कावेरी सरयूस्तथा ॥ ६ ॥
गंगा च यमुना ब्रह्मपुत्रा सिन्धुः सरस्वती ।
चन्द्रवीना शालवीना मानपींगा तथा सरित् ॥ ७ ॥
मेनकांगी च शिक्षांगी ह्यंगशिक्षांगिका तथा ।
होयांगहा चामुरा च वीना यानाक्षिका तथा ॥ ८ ॥
बालकृष्णसरश्चापि द्विकलाख्यसरस्तथा ।
ओवी च तेरिमा द्वीना वोल्गा च नीपरा तथा ॥ ९ ॥
नारायणी सर्वदीर्घा विषतुर्यसरोवरम् ।
कङ्गूनदी नायजीरा चित्तं तुंगानिकं सरः ॥१०॥
आमजाना सरिच्चापि मिश्शूरी मीनकंञ्चुकी ।
सुलीवनसरो विनिपेगं सुपारयं सरः ॥११॥
एरसरः कारुलिंगी तथाऽन्याः सरितः शुभाः ।
यत्र यत्राऽहं मुनिभिः सह स्नातः सरित्सु वै ॥१२॥
सरोवरेषु खातेषु समुद्रेषु क्षितौ रमे ! ।
तत्र तत्रैव तीर्थस्य विधिना स्नानतस्तथा ॥१३॥
घातपापनि नश्यन्ति पुनश्चेन्नाऽऽचरेद् यदि ।
मत्प्रतिमाऽमृतवार्भिः स्नातः शुद्ध्यति तत्क्षणात् ॥१४॥
मत्प्रसादाऽशनेनाऽपि मम सेवादिभिस्तथा ।
देवालयादिनिर्मित्या सद्यः शुद्ध्यति घातकः ॥१५॥
मन्दिरादेर्विनिर्माता मन्मूर्तिस्थापकस्तथा ।
साध्वर्थे प्राणदाता च धर्मार्थे प्राणदायकः ॥१६॥
शुद्ध्यत्येव महापापाद् घातकाख्यात् समूलतः ।
पुष्करं मानसं चापि हिमालयो गिरीश्वरः ॥१७॥
बद्रिकाश्रमतीर्थं च पावनानि समस्ततः ।
मातृतीर्थं पितृतीर्थं निषेवेत ह्यतन्द्रितः ॥१८॥
गुरुतीर्थं सतीतीर्थं निषेवेत प्रयत्नतः ।
कान्ततीर्थं ज्ञानतीर्थं चात्मतीर्थं ततः परम् ॥१९॥
भक्तितीर्थं परं तस्मादहं सर्वोत्तमोत्तमः ।
मां निषेवेत सततं मुच्यते सर्वपातकैः ॥२०॥
यस्य घातः कृतस्तस्मै स्वर्णदानं समर्पयेत् ।
हस्तिदानं राज्यदानं ग्रामदानं समाचरेत् ॥२१॥
वंशस्य जीविकादानं कन्यादानं तथाऽऽचरेत् ।
गोदानं पृथिवीदानं दद्याद् घातविनाशकम् ॥२२॥
दद्याद् यद्वा स्वयं स्वं च भृत्यं यथाऽनुगं यथा ।
दासं यथा यथा शिष्यं यथा क्रय्यं तथाऽऽर्पयेत् ॥२३॥
तेनाऽऽपि घातपापस्य नाशो भवति पद्मजे ।
यथा तोषो भवेत् तच्च दद्यात् सर्वं विशेषतः ॥२४॥
गृहं भूषाऽम्बरसम्पत्पशून् दद्यात् समस्ततः ।
घातपापस्य नाशो वै तेन संजायतेऽपि च ॥२५॥
प्रभासं नैमिषारण्यं गन्धमादनपर्वतम् ।
नीलाद्रिं चापि कैलासं क्षेत्रं च पौरुषोत्तमम् ॥२६॥
शुक्लतीर्थं भृगुतुङ्गं धर्मारण्यं च दण्डकम् ।
व्याघ्रारण्यं विपाशां च करतोयां च गण्डकीम् ॥२७॥
कर्मनाशां देवदारुवनं कालंजरं तथा ।
ब्रह्मसरो रामह्रदं चित्रकूटं च विन्ध्यकम् ॥२८॥
एवमादीनि तीर्थानि कृत्वा पापं विनश्यति ।
विख्यातो हिमवान् पुण्यः सिद्धनारायणाश्रितः ॥२९॥
तत्र प्राणा यदि यान्ति प्रपूज्य देवतामुनीन् ।
शुद्धः सिद्धो दिवं यायाद् ब्रह्मलोकं सनातनम् ॥३०॥
कामं क्रोधं लोभमोहौ मदं जित्वाऽऽर्च्य मातरम् ।
पितरं च गुरुं नत्वा गणेशं तीर्थमाविशेत् ॥३१॥
तस्य पातकनाशश्च तीर्थाभिगमनाद् भवेत् ।
अगम्यानि तु तीर्थानि स्मृत्वा पापमपानुदेत् ॥३२॥
ब्रह्म मेध्यं ब्रह्म पुण्यं ब्रह्म स्वर्ग्यमनुत्तमम् ।
साधवो ब्रह्म चेत्युक्ताः पावनं ब्रह्म सर्वदा ॥३३॥
तदाश्रयं प्रकुर्याद्वै पावनाः साधवः सदा ।
देवास्तु साधवो यज्ञमयजन्त हरिं हि माम् ॥३४॥
यज्ञेन कर्मणा नित्यभजनेन च सेवया ।
सेवात्मकानि धर्माणि प्रथमान्युत्तमानि च ॥३५॥
आसँस्तैर्धर्मकार्यैश्च माहात्म्यं प्रसचन्त ह ।
नाकं नित्यानन्दयुक्तं धाम चापुर्हि साधवः ॥३६॥
यत्र साध्या नित्यमुक्ता देवा वसन्ति सेवकाः ।
अनादिनश्च वै पूर्वे पूर्वतमा वसन्त्यपि ॥३७॥
तेषामाश्रयकरणान्मुक्तिरेव न संशयः ।
इदं रहस्यं मे लक्ष्मि श्रीपतेः परमात्मनः ॥३८॥
ब्रह्मविद्या भजनं च मत्कथा ध्यानमुत्सवः ।
मन्मन्त्रदानमित्येभिस्तारयन्ति निजाश्रितान् ॥३९॥
शरणागतरक्षा च मोक्षश्च पापनाशनम् ।
भक्तिलाभो ब्रह्मशीलं भवन्ति साधुसंगमात् ॥४०॥
इदं लक्ष्मि ! मतं कश्चिन्मम श्रीपरमात्मनः ।
शृणुयात् स लभेद्धाम भजित्वा मां सतश्च मे ॥४१॥

सन्तश्चाऽहं निवसामि त्वश्वपट्टसरोऽमितः ।
अनादिश्रीकृष्णनारायणः श्रीकृष्णनामधृक् ॥४२॥
यत्रेमे लोमशाद्याश्च ऋषयः साधवोऽपरे ।
स्वतःप्रकाशाः ऋषयो वसन्ति चाक्षरे तले ॥४३॥
स देशः पावनो लक्ष्मि ! जलं पापप्रणाशनम् ।
तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन सेवया ॥४४॥
गतिं तां न लभेदश्वपट्टं संसेव्य यां लभेत् ।
स्पृष्टान्यश्वपट्टसरोजलैर्गात्राणि देहिनाम् ॥४५॥
येषां तेषां भवेन्मुक्तिराक्षरी मे कृपालवात् ।
सर्वाण्यश्वपट्टसरोजलैः कार्याणि देहिनाम् ॥४६॥
कर्माणि ते भुवं त्यक्त्वा यास्यन्ति परमं पदम् ।
घातपापानि सर्वाणि नश्यन्त्यश्वसरोवरे ॥४७॥
यावदस्थि मनुष्यस्य सरोवरेऽत्र तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गं भुक्त्वा प्रमुच्यते ॥४८॥
चान्द्रायणसहस्राणि चाश्वपट्टजलेन वै ।
तुल्यानि नैव जायन्ते श्रेष्ठं चाश्वसरोजलम् ॥४९॥
कुंकुमवापिकातीर्थं चाश्वपट्टसरोवरम् ।
लोमशस्याऽऽश्रमश्चैते सच्चिदानन्दरूपिणः ॥५०॥
अग्नौ निक्षिप्ततृणवत् पापान्यत्र सरोवरे ।
स्नातस्यैव विनश्यन्ति मोक्षभाक् स भवेदिह ॥५१॥
भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
गतिमन्वेष्यमाणानां चाऽश्वसरोऽधिका गतिः ॥५२॥
अनाचाराश्च ये केचिदधर्मशरणाश्च ये ।
तेषां मुक्तिप्रदं चाश्वसरोवरं मयाऽऽश्रितम् ॥५३॥
अघैश्च प्रबलैर्व्याप्तान् पापिनः पुरुषाऽधमान् ।
पततो नरके चाश्वसरः स्मृतं हि तारयेत् ॥५४॥
अमंगला अशिवाश्च कल्मषैः कृष्णतां गताः ।
तेऽश्वपट्टजले स्नात्वा शिवाः शुक्ला भवन्ति वै ॥५५॥
कुंकुमवापिकाधूलिं जनो मूर्ध्ना बिभर्ति यः ।
सोऽर्करूपस्त्विह भूत्वा याति ब्रह्म सनातनम् ॥५६॥
अश्वपट्टसरःक्षेत्राऽनिलः स्पृशति यं जनम् ।
तस्य पाप्मा बहुरूपः सद्यो नश्यति मूलतः ॥५७॥
व्यसनैश्चापदाभिश्च विनाशोन्मुखमानवम् ।
दर्शनादाक्षरं क्षेत्रं रक्षत्यथ पुनाति तम् ॥५८॥
वाङ्मनःकर्मणां पापैर्ग्रस्तं जनं तु पापिनम् ।
कुंकुमवापिका तूर्णं स्मृता तारयति ध्रुवम् ॥५९॥
सप्ताऽवरान् सप्तपरान् पितॄन् तारयते सरः ।
श्रुतं पीतं वीक्षितं च स्पृष्टं तथाऽवगाहितम् ॥६०॥
दर्शनात् स्पर्शनात् पानाच्चाश्वपट्टेतिकीर्तनात् ।
पुनात्यपुण्यान् पुरुषान् शतशश्च सहस्रशः ॥६१॥
उत्क्रामद्भिश्च यः प्राणैः स्मरेत् लोमशीं भूमिकाम् ।
नमेत् हृदाऽपि सहसा स गतिं परमां व्रजेत् ॥६२॥
न कालाच्च भयं तस्य न पापेभ्यो यमात्तथा ।
अश्वपट्टसरःस्नातस्यैव मोक्षार्थिनस्त्विह ॥६३॥
शृणु लक्ष्मि ! द्विजत्वं विप्रत्वं साधुत्वमित्यपि ।
गुणैः सञ्जायते सम्यग्गुणास्तीर्थनिषेवणात् ॥६४॥
तीर्थं तु स्थावरं चापि जंगमं चात्मसंस्थितम् ।
स्थावरं मम योगेन जंगमं साधवो मम ॥६५॥
आत्मस्थोऽहं चान्तरात्मा तीर्थत्रयं हि तारकम् ।
गुणाः पुण्येन चायान्ति दोषाः पापेन देहिनाम् ॥६६॥
पुण्यं सत्कार्यकरणैः सन्ति कार्याणि वै शृणु ।
मम पूजा मम ध्यानं मम कीर्तनमुत्तमम् ॥६७॥
मम कर्मकलापश्च मम सेवा निरन्तरम् ।
मम सतां सेवनं च पुष्पहारार्चनादिभिः ॥६८॥
जलभोजनदानाद्यैः पादसंवाहनादिभिः ।
नैवेद्यार्पणगन्धाढ्याऽम्बरकुंकुमसत्फलैः ॥६९॥
आरार्त्रिकनमःप्रदक्षिणस्तुतिक्षमापनैः ।
यज्ञयागादयश्चापि होमा अतिथिसेवनम् ॥७०॥
अनाथबालादिसेवा सतीसाध्वीप्रपूजनम् ।
महीमानस्वागतादि गोविप्रादिप्रसेवनम् ॥७१॥
भक्तानां जरठानां च पित्रोर्गुरोश्च सेवनम् ।
मालाजपश्च लोकानामुपकारविधापनम् ॥७२॥
इत्येवमादीनि कार्याणि कूपसरोविधापनम् ।
उद्यानशालाकरणं विश्रान्तिद्रुमरोपणम् ॥७३॥
प्रपासत्रादिकरणं दानक्षेत्रादिरक्षणम् ।
वृद्धानां माननं नित्यं चाश्रितानां च रक्षणम् ॥७४॥
दैवं पैत्र्यं साधवं च सत्कार्यं स्वेष्टदैविकम् ।
दैशिकं ज्ञानदानादि भक्तिदानादिकं तथा ॥७५॥
एवमादीनि कुर्वीत सत्कार्याणि शुभानि वै ।
तेन गुणाभवन्त्येव शीलव्रतादयः शुभाः ॥७६॥
गुणैः साधुत्वमेवाऽपि ब्रह्मिष्ठत्वं च जायते ।
भुक्तिर्मुक्तिः करे तस्य कर्तव्यं नाऽवशिष्यते ॥७७॥
पुरा कश्चिद् द्विजपुत्रो नाम्ना कृशांग ऐच्छिकम् ।
महिषं नवधुर्यं चोवाह शकटयोजितम् ॥७८॥
दण्डेन ताडयामास तीव्रशंकुयुतेन वै ।
रुधिरं तेन निर्भिद्य निःसृतं तन्नितम्बतः ॥७९॥

तद् दृष्ट्वा महिषी माता सशोका पुत्रगृद्धिनी ।
शोचन्तं तं सुतं प्राह मा शुचः पुत्र ! पापिनि ॥८०॥
नाऽयं द्विजो भवत्येषश्चाण्डालो वाहकस्तव ।
द्विजे दारुणता नास्ति द्विजो मैत्रो भवेत् सदा ॥८१॥
द्विजः सत्त्वयुतः स्याद्धि दयावान् रक्षकस्तथा ।
अहिंस्रो भक्तिसम्पन्नः सर्वेष्वात्मसमः शुचिः ॥८२॥
अदोषे दण्डपाते तु चाण्डालो लुब्धकोऽथवा ।
प्रवर्तते घातकश्च क्रूरो निर्दय उद्धृषः ॥८३॥
अयं पापो दयाहीनः स्वजातिं त्वनुवर्तते ।
श्रुत्वैवं दारुणं वाक्यं महिष्यास्तु कृशांगकः ॥८४॥
पप्रच्छ महिषीं नत्वा ब्रूहि जानासि मां यदि ।
माता मे ब्राह्मणी चास्ते केन वा दूषिता भवेत् ॥८५॥
चाण्डालो हि कथं चाऽहं महिषि ! शंस मे द्रुतम् ।
महिषी प्राह विप्रायां वृषलेन जनिस्तव ॥८६॥
क्षेत्रे सस्याऽन्विते रात्रै शय्यायां ते पितुस्तदा ।
पितरि निर्गते क्षेत्रे सुप्तोऽभूद् वृषलोऽनुगः ॥८७॥
कर्मचारी स्ववास्याश्च सस्त्रीकोऽपि तदैकलः ।
अन्धकारे ह्यनावीक्ष्याऽऽगत्य ते जननी तदा ॥८८॥
शय्यायां सह सुप्ता च कामभावं गता सती ।
लब्धवती ततो गर्भं दैवात् त्वं वृषलस्ततः ॥८९॥
जानाम्यहं समीपस्था क्षेत्रे बद्धा च बालिका ।
स त्वं वृषलाद् विप्रायां जातश्चाण्डालको ह्यसि ॥९०॥
दुर्गुणास्ते निषेकाद्वै वर्तन्ते घातमारकाः ।
श्रुत्वा कृशांगकस्तूर्णं नत्वा च जननीं तदा ॥९१॥
महिषीं च ततो नत्वा क्षमाप्य महिषं ततः ।
पापजन्मविनाशार्थं तपस्येव स्थितोऽभवत् ॥९२॥
शतवर्षं तत्र भूमौ क्षेत्रे तेपे सुदारुणम् ।
तापयामास देवांश्च महेन्द्रस्तमुपाययौ ॥९३॥
कृशांग ! तप्स्यसे किं त्वं कृषिं त्यक्त्वा सुखप्रदाम् ।
वरं ददामि वद मे ह्यनवाप्यं ददामि ते ॥९४॥
कृशांगः प्राह चाण्डालश्चाऽहं विप्रत्वकांक्षया ।
तपामि देहि विप्रत्वं पितृदोषं निवारय ॥९५॥
महेन्द्रः प्राह तं चाहो विप्रत्वं दुर्लभं तव ।
पितृदोषेण बीजं त्वं शुद्धो भवितुं नाऽर्हसि ॥९६॥
प्रविनंक्ष्यसि प्रत्युत तदुपारम यत्नतः ।
पावित्र्यं प्राप्यते चापि चाण्डालत्वं न नश्यति ॥९७॥
एवमुक्त्वा ययाविन्द्रः कृशांगस्तु स्थितस्तथा ।
तपस्येव निधनार्थं वैप्रयार्थं वा दृढक्रियः ॥९८॥
अतिष्ठदेकपादेनाऽपरं वर्षशतं तथा ।
पुनश्चेन्द्रः समागत्योवाच विरम यत्नतः ॥९९॥
ब्राह्मण्यं दुर्लभं चैतत् साहसेन विनङ्क्ष्यसि ।
नहि शक्यं निषेकस्थं वृषलत्वं व्यपोहितुम् ॥१००॥
एवंस्थिते तपोयत्नः शीघ्रं त्वं न भविष्यसि ।
तिर्यग्योनिगतः सर्वो यदि मानुष्यमृच्छति ॥१०१॥
केनचित् पुण्ययोगेन चाण्डालो जायते पुरा ।
ततः सहस्रकालान्ते शूद्रत्वं विन्दते मुहुः ॥१०२॥
अथ कालान्तरे वैश्यो मुहुर्भूत्वा ततः परम् ।
क्षत्रियः पुण्ययोगेन जायते च ततः परम् ॥१०३॥
ब्रह्मबन्धुश्च कालेन ततो विप्रः प्रजायते ।
ततः कालान्तरे स्याच्च श्रोत्रियश्च ततः परम् ॥१०४॥
विप्रधर्मान् पालयित्वा तितिक्षुः साधुतां व्रजेत् ।
तत्र चेद्धर्षशोकौ च कामद्वेषौ कृशांगकः ॥१०५॥
अतिमानाऽतिवादौ चाऽऽविशेते पात्यते तु तैः ।
तस्मात्ते वृषलोत्थत्वं दूरं न स्यात् कदाचन ॥१०६॥
इत्युक्त्वा प्रययाविन्द्रः कृशांगश्च ततो दृढः ।
सहस्रवर्षमपरं चैकपदा ह्यतिष्ठत ॥१०७॥
ब्रह्मचर्यपरः शुद्धो गृणन् ब्रह्म सनातनम् ।
अथाऽऽययौ महेन्द्रश्च प्राह वरं वृणु ध्रुवम् ॥१०८॥
कृशांगः प्राह शीलं मे सहस्रवर्षमुत्तमम् ।
तेन मे दीयतां विप्रत्वं महेन्द्र न चाऽपरम् ॥१०९॥
इन्द्रः प्राह परं कामं वृणीष्व मा तु विप्रताम् ।
चाण्डालबीजजातस्य वृथा तेऽयं परिश्रमः ॥११०॥
इत्युक्त्वा प्रययाविन्द्रः कृशांगश्च ततः परम् ।
अश्मपट्टस्रः प्राप्याऽतिष्ठद् वर्षसहस्रकम् ॥१११॥
वायुमात्राशनः कृशोऽभवच्छुष्कस्तरुर्यथा ।
पपातोर्व्यां मरणाय तावदिन्द्र उपाययौ ॥११२॥
जग्राह पतितं चैनं वरदानदयापरः ।
प्राह वरं वृणीष्वाऽत्र ददामि ते कृशांगक ! ॥११३॥
कृशांगको वरं वव्रे ब्राह्मण्यं देहि मे सदा ।
इन्द्रः प्राह न ते तद्वै दुर्लभं सुलभं क्वचित् ॥११४॥
कोटिवर्षतपोभिश्च प्राप्यते न तु सर्वथा ।
ब्राह्मणेभ्योऽनुतृप्यन्ते पितरो देवतादयः ॥११५॥
भूदेवो ब्राह्मणश्चास्ते ब्राह्मण्यं तव दुर्लभम् ।
अन्यं वरं वृणीष्व त्वं पूज्यत्वं श्रेष्ठतां च वा ॥११६॥
कृशांगः प्राह चेन्द्र ! त्वं समर्थो नैव दृश्यसे ।
किं मां तुदसि दुःखार्त्तं मृतं मारयसे कथम् ॥११७॥

द्विजत्वं तु त्रिभिर्वर्णैः प्राप्यते गुणकर्मभिः ।
द्विजत्वं चापि विप्रत्वं समानं गुणकर्मभिः ॥११८॥
उपवीतेन द्विजन्मा विज्ञानेन च विप्रता ।
ब्रह्मयोगेन तत्रैव ब्राह्मणत्वं प्रकीर्तितम् ॥११९॥
निष्ठया ब्रह्मणि ब्रह्मिष्ठता मोक्षे तु साधुता ।
इत्येवं गुणयोगेन सर्वं भवति साधितम् ॥१२०॥
वह्निपाकेन पृथिवी बहुरत्नोत्तमोत्तमा ।
पुण्यपाकेन देहाश्च विप्रसाधुस्वरूपिणः ॥१२१॥
गुणैः पशुर्गुणैर्यक्षो राक्षसोऽपि गुणैरिह ।
विप्रो गुणैः क्षत्रियादिः साधुर्गुणैश्च मुक्तराट् ॥१२२॥
नरो नारायणश्चाऽपि कर्मगुणैः प्रजायते ।
शोच्यस्त्वं नैव जानीषे ब्राह्मण्यं धनमुत्तमम् ॥१२३॥
लब्ध्वाऽपि नैव जानीषे क्षत्रो भवसि मानवान् ।
न योग्यस्त्वं वरं दातुं याहि शक्र ! निजालयम् ॥१२४॥
विप्रगुणान् समास्थाय कथं नार्हामि विप्रताम् ।
तपसा मे मातृदोषः पितृदोषः क्षयं गतः ॥१२५॥
ब्राह्मणोऽस्मि न सन्देहो याहि शक्र ! निजालयम् ।
एवमुक्तो महेन्द्रो वै लक्ष्मि ! ददौ वरं शुभम् ॥१२६॥
कुशांग ! त्वं तपोभिश्च शुद्धोऽसि पावितोऽस्यपि ।
कुशानुरग्निरूपस्त्वं ब्रह्मक्षत्रात्मको भव ॥१२७॥
सर्वपूज्यो ब्राह्मणानां सदा पूज्यः सुरोत्तमः ।
विप्रोत्तमश्च ब्रह्मिष्ठो भव कल्पान्तरेष्वपि ॥१२८॥
गुणैस्त्वयाऽर्जितं चात्र विप्रत्वं च गुणैस्ततः ।
ब्रह्मिष्ठत्वं सदा प्राप्तं चाग्नित्वं प्राप्तमेव ह ॥१२९॥
इत्येवं वरदानं तु दत्वा शक्रो ययौ दिवम् ।
कुशांगोऽभूत् कुशानुश्च ह्यश्वपट्टसरोवरे ॥१३०॥
कुशानुतीर्थमत्राऽऽस्ते रमे ! ब्रह्मिष्ठताप्रदम् ।
साधुत्वं पावनत्वं निर्लेपत्वं प्राप्यतेऽत्र वै ॥१३१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने घातकिनां तीर्थयोगेन पावनत्वं, जंगमतीर्थं साधुजनादयः, अश्वपट्टसरोवरे पुरा द्विजापुत्रस्य कुशांगस्य वृषलोद्भवस्य चाण्डालत्वेऽपि तपोभिश्चेन्द्रवरेण ब्रह्मिष्ठत्वब्राह्मण्यमयं कुशानुत्वं चाऽभवदित्यादिनिरूपणनामा चैकनवतितमोऽध्यायः ॥ ९१ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं ब्राह्मण्यं वचनादपि ।
अन्त्यजातेः पुरा जातं तथा लोके भविष्यति ॥ १ ॥
दिवोदासो महाभक्तोऽभवद् वाराणसीनृपः ।
हैहयैरेकदा युद्धे जितो ययौ प्रयागकम् ॥ २ ॥
भरद्वाजं बृहस्पतेः पुत्रमृषिं ननाम सः ।
दुःखं निवेदयामास ततः ऋषेः प्रतापतः ॥ ३ ॥
पुत्रेष्टया च सुतो जातो दिवोदासस्य योषिति ।
प्रतर्दनः स गत्वा च युवा वाराणसीं पुरीम् ॥ ४ ॥
युयुधे हैहयैः साकं पराजितास्तु हैहयाः ।
पलायनपरा भृगोः शरणं चाश्रमे गताः ॥ ५ ॥
प्रतर्दनो ययौ पृष्टे प्राह भृगुं प्रणम्य च ।
देहि मे शत्रुभूपालान् वीतहव्यादिहैहयान् ॥ ६ ॥
तेषां वधाद् भविष्याम्यनृणः पितुः कृपां कुरु ।
भृगुः प्राह कृपाविष्टः क्षत्रिया नात्र सन्ति वै ॥ ७ ॥
प्रतर्दनः प्रत्युवाच कृतकृत्योऽस्मि वै भृगो ।
राजानोऽपि च वीर्येण स्वजातिं त्याजिता मया ॥ ८ ॥
प्रतर्दनो भृगुं नत्वा वीतहव्यं नृपं द्विजम् ।
विप्रं भृगोर्वचनेन प्राणरक्षणहेतवे ॥ ९ ॥
त्यक्त्वा ययौ निजां राजधानीं वाराणसीं ततः ।
भृगोर्वचनमात्रेण वीतहव्योऽपि हैहयः ॥१०॥
भयेन क्षत्रभावं संत्यक्त्वा ब्रह्मर्षितां गतः ।
तस्य पुत्रो गृत्समदो विप्रर्षिर्वैदिकोऽभवत् ॥११॥
तस्य द्विजः सुतेजाश्च विहविस्तस्य वै द्विजः ।
तस्य वितत्यस्तस्य तु सत्यस्तस्य श्रवाद्विजः ॥१२॥
तस्य ऋषिस्तस्य पुत्रः प्रकाशस्तस्य वाचिकः ।
तस्य प्रमितिर्विप्रश्च तस्य रुरुः सुविप्रकः ॥१३॥
तस्य शुनकस्तस्यैव शौनको विप्रसत्तमः ।
एवं साधोर्महर्षेश्च वचनाद् विप्रता तथा ॥१४॥
ब्रह्मण्यता भवत्येव दीक्षयाऽपि भवेत्तथा ।
दीक्षया त्रिवर्णजाता भवन्ति ब्राह्मणोत्तमाः ॥१५॥
साधवो वैष्णवाः सर्वे विप्रा अच्युतगोत्रजाः ।
एवं गुणैर्वचसा च दीक्षया विप्रता भवेत् ॥१६॥
ब्राह्मणस्य गृहे तिष्ठन्नाबाल्याद् यदि संस्कृतः ।
ब्राह्मणो जायते सोऽपि गृहीतोंऽके द्विजेन सः ॥१७॥
स्तन्यपो बालको येन वर्धितोऽन्नजलादिभिः ।
तज्जातिं समवाप्नोति ब्राह्मणे ब्राह्मणो भवेत् ॥१८॥
तपसा च चमत्कारैराशीर्वादैश्च वै द्विजाः ! ।
जायन्ते ब्राह्मणाश्चापि धर्मकर्मादिशोभनाः ॥१९॥
शृणु लक्ष्मि तथाऽन्यच्च समर्थो व्याकरोति हि ।
शंकरेण कृतो नन्दी मानवोऽपि गणो निजः ॥२०॥

रमाऽङ्घिजा तु हरिणा कृता नारायणी निजा ।
विश्वामित्रेण नरपः त्रिशंकुर्देवताकृतः ॥२१॥
कृता हराद्याः कृष्णेन गोलोके गोपिकाः स्त्रियः ।
मासि मासि च सुद्युम्नोऽभवन्नरोऽबला तथा ॥२२॥
अर्धनारीश्वरः शंभुर्विष्णुश्च मोहिनी तथा ।
नरबीजं सर्वसृष्टौ सुता सुतोऽपि जायते ॥२३॥
देवपुत्रा मानवाश्च काश्यप्यः सर्वशः प्रजाः ।
एवं बीजेऽपि वैवर्त्यं जायते जातिरोधकम् ॥२४॥
स्वेदजाश्चापि जायन्ते सर्वे विजातयः खलु ।
जडेभ्यश्च जडाश्चापि विजातयो भवन्त्यपि ॥२५॥
तस्माज्जातिर्न नियता सापेक्षा गुणकर्मभिः ।
साधुत्वं सर्वतः श्रेष्ठं प्राशस्त्यं शुभकर्मभिः ॥२६॥
शृणु लक्ष्मि नहुषोऽभूत् सर्पस्तेनैव वर्ष्मणा ।
अगस्त्यस्य प्रशापेन वहमानस्य तं नृपम् ॥२७॥
कल्माषपादः सहसा वशिष्ठशापतोऽभवत् ।
राक्षसो द्वादशवर्षाण्यचरत् स वनान्तरे ॥२८॥
अहल्या चाऽभवत् पत्युः शापाच्छिला पुनश्च सा ।
वृन्दाऽभवत्तुलसी सा वृक्षरूपा क्षणान्तरे ॥२९॥
हरिः शालग्रामरूपः काली गौरी तथाऽभवत् ।
शनैश्चरः पन्नतित्वं प्राप्तश्चेन्द्रो विडालताम् ॥३०॥
हरिर्मत्स्यादिरूपश्च वह्निः सुवर्णरूपधृक् ।
भंगास्वनस्तथा राजा वने स्नात्वा सरोवरे ॥३१॥
शतपुत्रजनकोऽपि स्त्रीत्वमाप्तो यथार्थतः ।
पुनः सा ऋषिभार्याऽभूच्छतपुत्रप्रसूर्वने ॥३२॥

**श्रीनारायणीश्रीरुवाच—**

कथं भंगास्वनो राजा नरो नारी तथाऽभवत् ।
श्रोतुमिच्छामि कान्ताऽत्र कथां तां वद मे हरे ॥३३॥

**श्रीपुरुषोत्तम उवाच—**

पुरा भंगास्वनो नाम राजर्षिर्धर्मवान् शुचिः ।
अनपत्यः स पुत्रेष्टिं समाचरत् क्रतुं शुभम् ॥३४॥
इन्द्रप्रधानभावस्याऽसत्त्वादिन्द्रो रुषा ज्वलन् ।
विघ्नं कर्तुमियेषाऽपि रन्ध्रं नाऽवाप वै ततः ॥३५॥
यज्ञान्ते तु कश्चिद्राजा मृगयार्थं वनं ययौ ।
इन्द्रश्छिद्रं परं लब्ध्वाऽऽगत्याऽऽविवेश भूभृति ॥३६॥
अश्वस्थं तं नृपं दूरेऽरण्ये निनाय भ्रान्तिगम् ।
राजा च तृषितस्तत्राऽपश्यच्छ्रेष्ठं सरोवरम् ॥३७॥
सोऽश्वं संपाययामास जलं बबन्ध पादपे ।
स्वयं पीत्वा जलं पश्चात् स्नानं चक्रे सरोवरे ॥३८॥
अवगाहनमात्रेण द्रुतं स्त्रीत्वमवाप्तवान् ।
दृष्ट्वाऽऽत्मानं स्त्रीकृतं च व्रीडितोऽभवदेव च ॥३९॥
व्यचिन्तयन्मुखं कीदृग् दर्शयिष्ये पुरे मम ।
शतपुत्रा मम सन्ति तान्प्रवक्ष्यामि किन्त्विदम् ॥४०॥
एवं स दुःखितो राजा चाश्वमारुह्य कृच्छ्रतः ।
लज्जां विहाय नगरीं ययावश्वेन वै च तम् ॥४१॥
पुत्रा दाराश्च भृत्याश्च पौरा जानपदास्तदा ।
दृष्ट्वा किं त्विदमेवेत्याश्चर्यं च विस्मयं गताः ॥४२॥
स उवाच मृगयार्थं वनान्तरसरोवरे ।
गतः स्नातस्तावताऽहं स्त्रीत्वमापन्न एव ह ॥४३॥
पुत्रेभ्यो मम राज्यं सम्प्रददामि वनं ततः ।
प्रयामीत्यमिधायैव दत्वा राज्यं ययौ वनम् ॥४४॥
स्त्रीरूपा सा ऋषेः पत्नी ह्यभवत् स्ववंहस्य तु ।
स्ववंहर्षेः शतं पुत्रा राज्ञ्यां तस्यां ततोऽभवत् ॥४५॥
सा तानादाय राज्यं स्वं ययौ पूर्वसुतान् प्रति ।
प्राह यूयं पुरुषत्वे सुताः स्त्रीत्वे सुतास्त्विमे ॥४६॥
एकत्र भुज्यतां राज्यं भ्रातृभावेन पुत्रकाः ।
पितृमातृवचो मत्वा राज्यं बुभुजिरे सह ॥४७॥
अथेन्द्रस्तत्र चागत्य भेदयामास पूर्वजान् ।
पितृपुत्रा राज्ययोग्याः स्त्रीपुत्रा न कदाचन ॥४८॥
स्त्रीपुत्राः सन्ति विप्रा वै न तेऽर्हन्ति नृपास्पदम् ।
तत उत्तरजानाह भवन्तश्चोत्तमाः खलु ॥४९॥
पूर्वजाः क्षत्रियाः सन्ति भवद्दासा हि ते मताः ।
मा राज्यं ते प्रकुर्वन्तु राज्ययोग्या हि भूसुराः ॥५०॥
इत्यन्योन्यं कारयित्वा वैरं युद्धेन नाशिताः ।
श्रुत्वा तु तापसी माता रुरोद शोकसंप्लुता ॥५१॥
इन्द्रस्त्वागत्य तामाह केन दुःखेन रोदिषि ।
विप्ररूपं तु तं प्राह मम पुत्रशतद्वयम् ॥५२॥
युद्धेन नष्टं विप्रेन्द्र! शोचामि तांश्च रोदिमि ।
इन्द्रः प्राह पुरा राज्ञा त्वया यज्ञः सुतेष्टिकः ॥५३॥
विहितो मामनादृत्य मम दुःखं त्वया कृतम् ।
वैरं निर्यापितं राज्ञि मया मा रोदनं कुरु ॥५४॥
श्रुत्वा राज्ञी निपपात पादयोः क्षम चाह वै ।
इन्द्रो वरं ददौ तस्यै जीवन्तु के सुतास्तव ॥५५॥
सा प्राह स्त्रीसमुत्पन्ना जीवन्तु मम पुत्रकाः ।
इन्द्रः प्राह कथं पूर्वे न जीवन्तु वदाऽत्र मे ॥५६॥

साऽऽह स्त्रियाः परः स्नेहोऽपत्येषु न नरस्य वै ।
तस्मादुत्तरजाता मे सर्वे जीवन्तु पुत्रकाः ॥५७॥
इन्द्रः प्राह शते द्वे वै सर्वे जीवन्तु ते सुताः ।
कृपया जीवयाम्येतान् राज्यं कुर्वन्तु ते मिथः ॥५८॥
इत्युक्ता जीविताः सर्वे सत्यवक्त्र्याः सुपुत्रकाः ।
अथेन्द्रो वरदानार्थं पुनः प्राह स्त्रियं प्रति ॥५९॥
वरं वृणु नरत्वं नारीत्वं वा यत् प्रकांक्षसे ।
स्त्री प्राह मे सदा स्त्रीत्वं चास्तु नैव नरत्वकम् ॥६०॥
इन्द्रः प्राह कथं स्त्रीत्वे विशेषाभिनिवेशनम् ।
साऽऽह स्त्रिया नरयोगे प्रीतिरभ्यधिका सदा ॥६१॥
कामसुखं च दशधा तुष्यामि स्त्रीस्वरूपिणी ।
तथाऽस्त्विन्द्रो वरं दत्वा ययौ दिवं च सा सती ॥६२॥
स्त्रीरूपा स्ववंहं कान्तं भङ्गास्वनाऽप्यसेवत ।
पप्रच्छ स्त्रीस्वभावाँश्च कान्तं कान्तो जगाद ताम् ॥६३॥
स्त्रियो मूलं हि दोषाणां लघुचित्ता विनाशिकाः ।
पञ्चचूडाऽप्सरोवरा नारदायाऽऽह पृच्छते ॥६४॥
नारद ! स्त्रीस्वभावोऽस्ति चंचलः पुरुषाश्रयः ।
अचला चेहते कान्तं रामकं रमणोत्सुकम् ॥६५॥
कुलीना रूपवत्यश्च नाथवत्यश्च योषितः ।
मर्यादासु न वर्तन्ते दोषोऽयं प्रमदाजने ॥६६॥
स्त्रीत्वं सदाऽभिवाञ्छन्ति पुरुषाऽधीनताकरम् ।
गृहराज्यं स्त्र्यधीनं वै पुमान् स्त्र्यधीन एव च ॥६७॥
अप्रयत्नाः सदा भोग्यजातानि भुञ्जते स्त्रियः ।
पूज्यन्ते मानमर्हन्ति मोहगर्वं विदन्ति च ॥६८॥
आयोद्यमादिनिश्चिन्ताः सदा चेच्छन्ति भोग्यताम् ।
स्त्रीत्वमिच्छन्ति सौभाग्यं दार्ढ्यमेतत् स्त्रियाः सदा ॥६९॥
अनुकूलान्वृद्धिमतः सुरूपान् स्ववशे स्थितान् ।
परानन्तरमासाद्य भुंजते स्वान् विहाय च ॥७०॥
अयं दोषो हि नारीणां महानास्ते ह्यगोचरः ।
स्त्रियं हि यः प्रार्थयते ददातीष्टं पुनः पुनः ॥७१॥
इषच्च कुरुते सेवां निर्लज्जास्तं हि भुञ्जते ।
नैव मिलति यावद्वै विमार्गवाहको नरः ॥७२॥
भयं नैव कुटुम्बस्य मर्यादा नेतरस्य च ।
राजदण्डभयं चेन्न व्यवायं यान्ति तास्तदा ॥७३॥
नाऽगम्योऽस्ति नरः कोऽपि नाऽऽसां वयसि गौरवम् ।
न रूपादौ दार्ढ्यभावः पुमानित्येव भुञ्जते ॥७४॥
या रक्ष्यन्ते सर्वदानैः सर्वमानसपूरणैः ।
तथापि सम्प्रसजन्ते कुब्जाऽन्धजडवामनैः ॥७५॥

कामदोषो महानासां प्रवर्तन्ते मिथः स्त्रियः ।
चलस्वभावा दुष्पूर्या दुर्नियम्याः स्वभर्तृभिः ॥७६॥
कामानामपि दातारं मनसां प्रियकारिणम् ।
पालकं न गणयन्ति कान्तं नार्यो ह्यनर्गलाः ॥७७॥
रत्यनुग्रह एवाऽऽसां मुख्यः पुमर्थ इष्टकृत् ।
धर्मार्थमोक्षास्तमनु मताः स्त्रीणां तु यौवने ॥७८॥
साहसं कपटं मौढ्यं लोभो गुप्तिर्हठोऽनृतम् ।
अशौचं क्रूरता चापि दोषा भवन्ति योषिति ॥७९॥
आश्रयः स्वीयता सेवा तितिक्षा प्राणदायिता ।
मार्दवं स्निग्धता वश्यं गुणा ह्येते तु योषिति ॥८०॥
दुःखे दुःखं सुखे सौख्यं हृदयैक्यं धनैकता ।
आत्मनिवेदिता दास्यं नारीषु प्रायशो गुणाः ॥८१॥
धर्मवृत्तिर्व्रतवृत्तिश्चास्तिक्यं पूजनं हरेः ।
आतिथ्यं स्वजनकीर्तिर्गुणाः श्रेष्ठा हि योषिति ॥८२॥
दानं श्रैष्ठ्यं कुटुम्बस्य कान्तनिन्दाश्रुतिर्न च ।
क्षमा पालनशक्तिश्च गुणाः सन्ति हि योषिति ॥८३॥
गृहकार्यकारिणीत्वं चोपार्जनमतिस्तथा ।
व्ययभीरुत्वमेवाऽपि गुणाः सन्ति हि योषिति ॥८४॥
रासनं च सुखं स्वादश्चांगमर्दनमित्यपि ।
समुद्विग्नमनःशान्तिर्गुणाः सन्ति हि योषिति ॥८५॥
वंशविस्तारकारित्वं बालरक्षा गृहाऽवनम् ।
परोपकारशीलत्वं गुणाः सन्ति हि योषिति ॥८६॥
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ।
उद्विग्नं प्रियवाक्यैश्च सन्तोषयन्ति मायया ॥८७॥
वानरीणां तु चाञ्चल्यं मार्जारीणां तु गुप्तता ।
कलहश्चक्रवाकीनां मूषिकाणां चरित्रता ॥८८॥
पिपीलिकानां चयनं मार्गणं गृध्रपक्षिणाम् ।
सूर्योदयस्य प्राकट्यं ह्यानन्दस्य तु मूर्छना ॥८९॥
शोको मृतैकपुत्रस्य मौर्ख्यमुष्ट्रस्य वै तथा ।
मार्दवं चोरणस्यापि तैक्ष्ण्यं क्षुरस्य वै तथा ॥९०॥
एते धर्माः प्रमदासु वर्तन्ते वै विशेषतः ।
पूर्वे सर्गे तदा नार्यः साध्व्यः सत्य इहाऽभवन् ॥९१॥
स्वयं प्रजा देवसमा आसन् यान्ति दिवं हि ताः ।
ततो मानवमोहार्थमसाध्वीर्विश्वमोहिनीः ॥९२॥
ब्रह्माऽसृजत् क्रियाहीनाः कामक्रोधपरायणाः ।
शय्यासनमलंकारमन्नपानमनार्यताम् ॥९३॥
दुर्वाग्भावं चोग्ररतिं ददौ स्त्रीभ्यः प्रजापतिः ।
तैर्धर्मैः रक्षितुं शक्या नैव नार्यः कथंचन ॥९४॥

तथापि लक्ष्मि जायन्ते तपोव्रतोपवासनैः ।
सतां सेवादिभिर्नार्यः पवित्रा लोकपावनाः ॥९५॥
कृष्णपातिव्रत्यपराः साध्व्यो भवन्ति योगतः ।
दोषान् दग्ध्वा हृषीकावन्मुक्ता जायन्त एव ताः ॥९६॥
यत्र क्वापि कुले जाता विप्राश्रिता द्विजास्तु ताः ।
साध्वीदीक्षान्वितास्तास्तु साध्व्यः सत्यो द्विजाश्च ताः ॥९७॥
योगदीक्षान्विता विप्रा योगिन्यस्ता हि देवताः ।
सांख्ययोगान्वितास्तास्तु मुक्तान्यो ब्रह्मयोषितः ॥९८॥
हरेः पत्नीत्वमापन्ना ब्राह्मण्यस्ता हरिप्रियाः ।
त्यागिन्यस्त्यागमापन्ना ब्रह्मप्रियाः सदा मताः ॥९९॥
गोपालकन्या ब्रह्माणं प्राप्य गायत्रिकाऽभवत् ।
पूज्या वन्द्या ब्राह्मणी सा ब्रह्माणी लोकमातृका ॥१००॥
श्वपचस्य सुता प्राप्य वसिष्ठं ब्राह्मणी शुभा ।
आर्षी चाऽरुन्धतीनाम्नी पूज्या पतिव्रताऽभवत् ॥१०१॥
कन्यास्तु बहुवर्णानां कृष्णं प्राप्य च गोपिकाः ।
कार्ष्ण्यो जाताः कृष्णरूपाः स्त्रियः शुद्ध्यन्ति योगतः ॥१०२॥
राक्षस्यो देवमासाद्य देव्यो भवन्ति सर्वथा ।
पौलोमी वै महेन्द्रं तु समासाद्य हि देवता ॥१०३॥
देव्यपि देवयानी च क्षत्रमासाद्य मानवम् ।
ययातेर्गृहिणी भूत्वा मानवी सा व्यजायत ॥१०४॥
दक्षपुत्र्यश्च काश्चित्तु चान्द्रयो देव्योऽभवन् दिवि ।
धर्मपत्न्यो देवताश्च ब्राह्मण्यः ऋषियोषितः ॥१०५॥
मनुपत्न्यस्तु मानव्यः काश्यप्यो बहुजातयः ।
जातास्तस्मान्न वै स्त्रीणां जातित्वं नियतं क्वचित् ॥१०६॥
किमत्र बहुनोक्तेन मम पत्न्योऽर्बुदाऽर्बुदाः ।
सर्वभूस्वःसत्यमहर्जनपातालदेहिजाः ॥१०७॥
सर्वजातिसमुत्पन्ना मद्योगाद् विप्रजातयः ।
यज्ञोपवीतधारिण्यो ब्रह्मप्रिया रमा इव ॥१०८॥
भवत्य सन्ति चात्रैवाऽक्षरक्षेत्रे मया सह ।
ब्राह्मण्यः सर्वपूज्या वै दिव्या मद्रूपधारिकाः ॥१०९॥
सर्वा वै पारमेश्वर्यः पौरुषोत्तम्य ईशिकाः ।
पावन्यः सर्वसृष्टीनां श्रीभूर्गंगा इव प्रियाः ॥११०॥
तस्माल्लक्ष्मि ! मम योगान्नारायणी यथा भवेत् ।
देवयोगाच्च देवी वै साधवी साधुयोगतः ॥१११॥
विप्रयोगाच्च विप्राणी ब्राह्मणी ब्रह्मयोगिनी ।
मुक्तयोगाच्च मुक्तानी सिद्धिः सिद्धप्रयोगिणी ॥११२॥
गणयोगाच्च गणिका योगियोगाच्च योगिनी ।
ईशयोगादीश्वराणि मनोर्योगात्तु मानवी ॥११३॥
नार्यश्चैवं प्रजायन्ते सत्ययोगात् सती सदा ।
तत्र सर्वत्र श्रेष्ठोऽहं श्रीपतिः पुरुषोत्तमः ॥११४॥
मम योगेन च पौरुषोत्तमीत्वं परात्परम् ।
प्राप्तव्यं मां भजित्वैव साध्वीत्वं साधुसेवया ॥११५॥
मोक्ष एव भवेद् यस्मात् तद्गृहं शाश्वतं सदा ।
अशाश्वतं विहायैव शाश्वतं समुपाश्रयेत् ॥११६॥
पठनाच्छ्रवणादस्य ब्राह्मीत्वं चेह जायते ।
भुक्तिर्मुक्तिर्भवेच्चापि नारायणीत्वमीयते ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्तानेऽन्यजातीनामपि गुणव्रताचारदीक्षावरशापलब्ध्यादियोगेन तत्तज्जातिपरिवर्तनं ब्राह्मण्यं च जायतेऽत्रार्थेऽनेकनिदर्शनानि भङ्गास्वननृपस्य नारीत्वे निदर्शनमित्यादिनिरूपणनामा द्वानवतितमोऽध्यायः ॥ ९२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मीह संसारे दुर्लभं सुलभं व्रतैः ।
तपोभिश्चाशिषा चापि सेवया चार्पणेन च ॥ १ ॥
ब्रह्मयोगबलस्याऽग्रे बलान्यन्यानि सर्वशः ।
निम्नायन्ते ब्रह्मचर्यबलाग्रे इव पङ्कजे ॥ २ ॥
कथयामि कथां पूर्वभवां शीलप्ररक्षिणीम् ।
शिष्येण योगिना भार्या गुरोः शीले प्ररक्षिता ॥ ३ ॥
देवशर्माऽभवद् विप्रो महर्षिर्वै सुराष्ट्रके ।
तस्य पत्नी रुचिनाम्नी रूपेण राधिकासमा ॥ ४ ॥
गुणैर्लक्ष्मीसमा दिव्ययौवना देवतोत्तमा ।
तस्या रूपेण चोन्मत्ता देवाः सिद्धाश्च मानवाः ॥ ५ ॥
अजायन्त विशेषेण महेन्द्रो मोहमाप्तवान् ।
व्यचिन्तयत् सदा तां तु समारब्धुं क्षणान्तरे ॥ ६ ॥
देवशर्माऽपि नारीणां स्वभावज्ञो यथाबलम् ।
ररक्ष तां निजावासे नैकान्तं प्रददौ क्वचित् ॥ ७ ॥
इन्द्रो मुहुः समायात्याश्रमोपान्ते गवेषुकः ।
तस्या लाभार्थमेवाऽपि नैवाऽलभत तत्क्षणम् ॥ ८ ॥
बिभेति विप्रशापाद्वै दृष्टिपथं न गच्छति ।
प्रच्छन्नश्च प्रयात्येव रूपान्तरैरनेकधा ॥ ९ ॥
देवशर्मा तपोयोगाज्जानातीन्द्रं गवेषिणम् ।
कामुकं विहरन्तं च वनोपान्ते विचारिणम् ॥१०॥
अथैकदा ऋषिर्लक्ष्मि ! व्रतं कर्तुमना निजम् ।
शिष्यमाहूय विपुलं दयितं ब्रह्मयोगिनम् ॥११॥

समर्थे रक्षणे चापि धर्मस्थं बन्धनस्थितम् ।
व्रते मे वर्तते वृत्तिश्चाऽश्वपट्टसरोवरे ॥१२॥
कुंकुमवापिकाक्षेत्रे गमिष्यामि व्रतान्वितः ।
चातुर्मास्यं व्रतं कृत्वा चागमिष्यामि वै ततः ॥१३॥
रुचिं सुरूपां पत्नीं मे महेन्द्रो भोक्तुमिच्छति ।
नित्यं रक्षस्व चैनं त्वं शीलभंगो न वै भवेत् ॥१४॥
पातिव्रत्यं न नश्येच्चाऽप्रमत्तो भव चेन्द्रकम् ।
इन्द्रश्चात्र समायाति बहुरूपधरोऽनिशम् ॥१५॥
क्वचित् किरीटी वज्रधृक् क्वचिद्धन्वी च दण्डवान् ।
मुहूर्तेन तु चाण्डालः शिखी विप्रो जटी व्रती ॥१६॥
चीरवासाः क्वचित् स्थूलः कृशोऽतिथिः क्वचित्तथा ।
तापसो गौरवर्णो वा श्यामः क्वचिद्वनेचरः ॥१७॥
बालो वृद्धो विचित्तो वा क्षत्रो वैश्योऽपि दासकः ।
शुको वा वायसो हंसो मृगो व्याघ्रो भवत्यपि ॥१८॥
राजा देवोऽथवा दैत्यो भवत्येव च मूषकः ।
यथा रुच्यो भवेद् योगस्तथा प्रवर्तते हि सः ॥१९॥
मक्षिका मशकश्चापि पुष्पवल्ली भवत्यपि ।
एवंभूतो महेन्द्रः स दृश्यते योगचक्षुषा ॥२०॥
स त्वं योग्योऽसि रक्षैनां चाऽप्रमत्तो हि तं प्रति ।
यथा रुचिं नाऽवलिहेत् तथेन्द्रं प्रति जागृहि ॥२१॥
विपुलश्च गुरोर्वाक्यं मत्वा चिन्तापरोऽभवत् ।
मायावी वीर्यवानिन्द्रो दुर्धर्षो बहुरूपधृक् ॥२२॥
कथं मया रक्षितव्या गुर्वी विधाय चाश्रमम् ।
विचार्य बहुधा कायाऽऽवेशं श्रेष्ठममन्यत ॥२३॥
अन्येन पौरुषेणेयं न शक्या रक्षितुं यतः ।
सोऽहं योगबलेनैनां रक्षिष्यामि वपुस्थितः ॥२४॥
इति निर्णीय विपुलः प्रविवेश समाधिना ।
कलेवरे गुरुपत्न्या उवास च समाहितः ॥२५॥
असक्तः पद्मपत्रस्थजलबिन्दुसमोऽभवत् ।
गुर्व्या देहे निजं सूक्ष्मं देहं कृत्वा समन्ततः ॥२६॥
स्थलं तु व्यापकं देहं लीनं कृत्वा तु योगतः ।
स्थूलेनाऽपि विवेशाऽसौ गुर्वीदेहेऽभितः खलु ॥२७॥
एवं विष्टभ्य विपुलो ह्युवास सा विवेद न ।
चातुर्मास्यं तु सम्पूर्णं मातरं सोऽभ्यरक्षत ॥२८॥
उवासाऽचेष्टमानः स छायेवाऽन्तर्हितोऽनिशम् ।
इन्द्रो दिव्यस्वरूपः सन् प्रविवेश युवाऽऽश्रमम् ॥२९॥
लोभनीयतमो भूत्वा सर्वशृंगारशोभनः ।
रुचिं कमलपत्राक्षीं चन्द्रकान्तिसमद्युतिम् ॥३०॥
कोमलां युवतीं चाग्रे दृष्ट्वा मोहमवासृजत् ।
सूक्ष्मातिसूक्ष्मवस्त्रान्तोपस्थदर्शनमोहिता ॥३१॥
विस्मिता चातिरूपेण कोऽसीति वक्तुमिच्छुकी ।
प्रत्युत्थातुमियेषाऽपि विष्टब्धा विपुलेन सा ॥३२॥
उत्थातुं न शशाकैव निगृहीता समाधिना ।
इन्द्रस्तां सम्प्रहस्याऽऽह युवतीं दत्तमानसाम् ॥३३॥
त्वदर्थे त्वागतश्चात्र महेन्द्रो देवताधिपः ।
रतिं देहि समायाहि विमाने शीघ्रमेव मे ॥३४॥
किन्तु सा न शशाकैवोत्थातुं वक्तुं च किंचन ।
विपुलः सर्वमाज्ञाय द्वयोस्तत्र विचेष्टितम् ॥३५॥
बबन्ध योगबन्धैः स तस्याः सर्वेन्द्रियाणि ह ।
अथाऽचेष्टां निर्विकारां दृष्ट्वेन्द्रो व्रीडितोऽपि ताम् ॥३६॥
एह्येहीति पुनः प्राह तदा तु विपुलः खलु ।
शरीरस्थः प्रत्युवाच भोः किमागमनं तव ॥३७॥
पुरन्दरो विचार्यैव निर्मनस्कोत्तरं तदा ।
अवैक्षत दिव्यदृष्ट्या देहस्थं विपुलं मुनिम् ॥३८॥
घोरतपस्विनं दृष्ट्वा शापभीतः पुरन्दरः ।
प्रवेपताऽभवत् स्तब्धो जडतुल्यः क्षणं तदा ॥३९॥
तूर्णं तु विपुलो देहान्निष्क्रम्येन्द्रं समब्रवीत् ।
दुष्टमानस दुष्टात्मन् पापबुद्धे सुराऽधम ॥४०॥
मानुषीं ब्राह्मणीं धर्माद् भ्रंशयितुमना भवान् ।
समागतोऽसि दण्ड्योऽसि किन्तु त्यजामि गच्छ वै ॥४१॥
गौतमेन भगांकस्त्वं कृतस्तद्विस्मृतं नु किम् ।
जाने त्वां दुष्टचेष्टं तन्मयेयं रक्ष्यते ततः ॥४२॥
याहि शीघ्रं गुरुर्मे त्वां मा निर्दहेद् रुषाग्निना ।
मा कदाचित्पुनश्चैवं कुरु क्षयनिमन्त्रणम् ॥४३॥
अमरस्याऽपि मृत्युर्वै तपसाऽऽकस्मिको भवेत् ।
न देवो न च विप्रो वा साधोरग्रे प्रतिष्ठति ॥४४॥
साधुश्चाऽहं ब्रह्मशीलो योगी नारायणाश्रयः ।
गुरोः सेवां करोम्यत्र गुर्व्याश्च रक्षणं सदा ॥४५॥
ब्रह्मचारी भवाम्येव तव निग्रहणे क्षमः ।
याहीत्युक्तश्च देवेन्द्रः सन्त्रस्तः प्रययौ दिवम् ॥४६॥
एवं स विपुलो नित्यं रक्षत्येव हि मातरम् ।
अथैकदा तु सन्ध्यायां राक्षसो लोममर्षणः ॥४७॥
आगतस्तां सतीं हर्तुं विपुलस्तत्र तिष्ठति ।
तूर्णं गुर्वीं समुत्तोल्य स्कन्धे कृत्वाऽम्बरे ययौ ॥४८॥
विपुलः सहसा वीक्ष्योत्पपाताम्बरवर्त्मना ।
जग्राह राक्षसं लोममर्षणं च गले तदा ॥४९॥

पार्श्वं कृत्वा रुरोधाऽस्य प्राणान् गुर्वी ररक्ष च ।
राक्षसश्च व्यसुर्भूत्वा पपातोर्व्यां भयंकरः ॥५०॥
गुर्वीमुत्तोल्य चाकाशे शनैरुर्व्यामवातरत् ।
विपुलः प्रणनामाऽपि मातरं च ररक्ष ह ॥५१॥
अथैकदा समुद्रस्थः कपर्दको महासुरः ।
भ्रमन्नाकाशमार्गेण दृष्ट्वा रुचिं निजाश्रमे ॥५२॥
विहरन्तीं वृक्षमूले जलसेचनकारिणीम् ।
अवाततार सहसा व्योम्नो मोहगतश्च ताम् ॥५३॥
प्रसह्य परिजग्राह रुचिं ययौ ततोऽम्बरे ।
विपुलो वेगतः पृष्ठे व्योमयानेन चाऽद्रवत् ॥५४॥
सहसाऽऽगृह्य तं दुष्टं कपर्दकं पुनर्बलात् ।
मुष्टिघातेन शिरसि मारयामास नैकधा ॥५५॥
ब्रह्मरन्ध्रं बिभेदाऽस्य कपर्दकस्य चाऽम्बरे ।
मस्तकं वेशयामास गलान्तरे ततोऽसुरः ॥५६॥
मृतिं ययौ निजां गुर्वीं नीत्वा व्योम्ना द्रुतं हि सः ।
विपुलश्चाययौ पर्णकुटीं शान्तोऽभवत्तदा ॥५७॥
एवं ररक्ष तां देवीं चातुर्मास्ये मुहुर्मुहुः ।
एकदा स गुरुस्तस्य परीक्षार्थं सुरूपिणी ॥५८॥
द्वितीया तु रुचिर्भूत्वा निर्जने तु तमोमये ।
विपुलं परिजग्राह श्रोत्रप्रान्ते रतीच्छया ॥५९॥
विपुलः शीलसम्पन्नो ज्ञात्वा रुच्यास्तु विकृतिम् ।
स्वयं पाषाणरूपोऽभूद् योगैश्वर्येण पुत्तलः ॥६०॥
अथापि सा रुचिः समाश्लिषत् पाषाणपुत्तलम् ।
तदा वह्निं पुत्तलाद्वै दाहकं च भयंकरम् ॥६१॥
शीघ्रमुत्पादयामास विपुलः सा ददाह च ।
तत्याज विपुलं रुचिस्वरूपो गुरुरुत्सुकः ॥६२॥
एवं वै शीलरक्षायां सावधानं सुशिष्यकम् ।
वीक्ष्य तुतोष गुरुराट् ततश्चाऽदृश्यतां ययौ ॥६३॥
नेदं जानाति विपुलो रक्षत्येव रुचिं सदा ।
एव तु विगतं चातुर्मास्यं व्रतं गुरोस्ततः ॥६४॥
व्रतोत्थिताय गुरवे न्यवेदयत् समस्तकम् ।
यथा विघ्नान्यागतानि यथा दूरीकृतानि च ॥६५॥
तुतोष गुरुराट् सम्यक् श्रुत्वा शीलस्य रक्षणम् ।
प्राह प्रीतोऽस्मि ते शिष्य शीलं रक्षितवान् यतः ॥६६॥
कृतवान् योगरीत्या चाऽऽविश्याऽपि स्त्रीतनौ स्थितम् ।
रक्षणं दुष्टदेवाच्च राक्षसेभ्यः पुनः पुनः ॥६७॥
स्वयं स्पृशसि नैवाऽपि स्पृहावतीं रुचिं तथा ।
अतोऽहं ते प्रसन्नोऽस्मि सदा मुक्तः सुखी भव ॥६८॥
यदि त्वहं त्वां दुर्वृत्तमद्राक्षं शिष्यसत्तम ।
शपेयं त्वामहं तत्र किन्तु त्वं धर्मधैर्यवान् ॥६९॥
विजयं सर्वथा प्राप्तः साधुस्त्वमेव वर्तसे ।
त्वादृशानां सेवनाच्च मोक्षो ध्रुवो भविष्यति ॥७०॥
त्वादृशाः साधवो लोके दुर्लभा मोहवर्जिताः ।
स्वयं प्राप्ता परित्यक्ता रुचिस्त्वयोपलात्मना ॥७१॥
स्वजनो पुरुषं नार्यो भ्रामकश्चेद् भवेद्धि सः ।
साधुश्चेत् स भवेत् तत्र नारी धर्मे वसेत्तदा ॥७२॥
साधुसंगः साधुतां च करोति शीलरक्षिणीम् ।
असाधुसंगमो हन्ति सतीत्वं साधुतां तथा ॥७३॥
असाधुसंगतिर्धर्मनाशिनी दुःखदायिनी ।
असत्संगो वृषं हन्ति चाऽवृषं सत्करोति च ॥७४॥
अधर्मागमतो वृत्तिर्बुद्धिर्मनोऽघकर्मसु ।
प्रवर्तन्ते ततश्चात्मा कल्मषेण तु हन्यते ॥७५॥
तस्मात् कुर्यात् प्रसत्संगं धर्मदां साधुसंगतिम् ।
सत्संगः शाश्वतः कोशः सत्संगः शेवधिः परः ॥७६॥
पठनाच्छ्रवणादस्य स्मरणाद् वर्तनात्तथा ।
धर्मभक्त्यादिशीलाद्यैर्भुक्तिमुक्तिर्भवेन्नृणाम् ॥७७॥
इत्युक्त्वा विरराामाऽपि देवशर्मा तु पद्मजे ! ।
विपुलोऽपि सिषेवे च गुरुं गुर्वीं च निःस्पृहः ॥७८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वबलाधिके ब्रह्मयोगबले रुचिब्राह्मण्याः शीलरक्षणे विपुलाख्यशिष्यस्य योगिनो विजयः, इन्द्रस्य पराजयः, लोमहर्षणकपर्दकराक्षसयोर्विनाशः, गुरोः प्रसन्नताऽऽशीर्वादः, साधुत्वगौरवं चेत्यादिनिरूपणनामा त्रिनवतितमोऽध्यायः ॥ ९३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि ! त्वं महतामाश्रयात् सदा ।
महत्त्वं चापि कल्याणं जायते धर्मरक्षणम् ॥ १ ॥
सतां योगेन वै सर्वश्रेयांसि संभवन्ति हि ।
अत्रार्थे ते कथयामि पुरावृत्तं शुभास्पदम् ॥ २ ॥
आजनाभमिदं वर्षं दशसाहस्रयोजनम् ।
सह्याद्रेः पश्चिमं मात्रागस्कराख्यं च यावता ॥ ३ ॥
सिंहारण्ये मध्यभागे भूभागं तीर्थमुत्तमम् ।
गोकर्णाख्यं महर्षीणां निवासाढ्यमभूत् पुरा ॥ ४ ॥

सगरस्य सुतैः खाता पृथिवी पश्चिमा हि सा ।
दक्षिणा पृथिवी खाता ह्यष्टसाहस्रयोजना ॥ ५ ॥

अवशेषोऽस्य खण्डस्य द्वे सहस्रेऽवशिष्यते ।
पृथ्वीखातोत्तरं तीर्थे गोकर्णे चिरकालतः ॥ ६ ॥

सामुद्रं जलमापन्नं भूमग्ना क्षारवारिभिः ।
तीर्थं गोकर्णसंज्ञं च शारभं तीर्थमित्यपि ॥ ७ ॥

सिंहारण्यं समस्तं च जलमग्नं ततोऽभवत् ।
सार्धयोजनविस्तारं गोकर्णं भूतलं ह्यभूत् ॥ ८ ॥

गोकर्णाख्यऋषेः क्षेत्रं हरावताररूपिणः ।
तत्राऽसंख्यानि तीर्थानि मुनिदेवालयास्तथा ॥ ९ ॥

अवसन् सिद्धसंघाश्च मुनयः संशितव्रताः ।
निर्वाणं परमं प्राप्ताः पुनरावृत्तिवर्जितम् ॥१०॥

तत्क्षेत्रे सर्वदा लक्ष्मि प्रीत्या भूतगणैः सह ।
देव्या च सकलैर्देवैर्नित्यं वसति शंकरः ॥११॥

सिद्धिकामा वसन्ति स्म मुनयस्तत्र केचन ।
अचिरेणैव तत्सिद्धिं प्राप्नुवन्ति स्म तद्बलात् ॥१२॥

अम्भोधिसलिले मग्नं वीक्ष्याश्रमादि भूतलम् ।
तपसां निधयः सन्तस्तथा प्रजाजना अपि ॥१३॥

सह्याद्रिं पूर्वभागस्थं निलयार्थं समारुहन् ।
वसन्तस्तत्र ते सन्तः सम्प्रधार्य परस्परम् ॥१४॥

उद्धारोपायमत्यन्तश्रेष्ठं साधुसमाश्रयम् ।
महेन्द्रादौ तपस्यन्तं रामं गन्तुं प्रचक्रमुः ॥१५॥

मलयाचलवासाश्च तथा नीलाद्रिवासिनः ।
देशभूवासिनश्चापि रामं गन्तुं प्रचक्रमुः ॥१६॥

शुष्कसुमित्रधर्माद्या मुनयः संशितव्रताः ।
ययुर्दिदृक्षवो रामं महेन्द्रमचलं प्रति ॥१७॥

अतीत्य सुबहून् देशान् वनानि द्रोणमापगाः ।
आसेदुरचलश्रेष्ठं ददृशू राममण्डलम् ॥१८॥

प्रशान्तसर्वसत्त्वाढ्यं सर्वर्तुद्रुमशोभितम् ।
आश्रमं सम्प्रविश्यैव ददृशुः परशुप्रभुम् ॥१९॥

अजिने तु सुखासीनं शिष्यैः परिवृतं प्रभुम् ।
ववन्दिरे महामौनं पुपूजाऽर्घ्यादिभिर्हरिम् ॥२०॥

कृतातिथ्यानृषीन् रामः स्मितपूर्वमभाषत ।
स्वागतं वो महाभागाः पावितोऽहं शुभागमैः ॥२१॥

सेवां ममाऽर्हाम् ऋषयो दर्शयन्तु करोमि वै ।
श्रुत्वा महर्षयः प्राहुर्गोकर्णाख्यं तु भूतलम् ॥२२॥

खनद्भिः सागरजन्यैः पतितं सागराम्भसि ।
उत्सारितार्णवजलं क्षेत्रं तत् सर्वपावनम् ॥२३॥

उपलब्धुमभीप्सामो भवतस्तु कृपां कुरु ।
विष्णोरंशो भवानास्ते साधुः सतां बलोदयः ॥२४॥

भृगोः पुत्रस्यर्चिकस्य जमदग्निः सुतोऽमलः ।
तस्य त्वं ब्रह्मधर्माऽसि समर्थोऽसि महाप्रभुः ॥२५॥

तस्मात् कर्तुमशक्यं तत्ते किञ्चिन्नैव विद्यते ।
वाञ्छितार्थप्रदं त्वां चाभियाचितुं समागताः ॥२६॥

स त्वमात्मप्रभावेण समुत्सार्योऽर्णवोदकम् ।
क्षेत्रं गोकर्णमित्याख्यं सिंहारण्ये जले प्लुतम् ॥२७॥

दातुमर्हसि भगवन्नः सर्वानृषिसत्तमान् ।
इति श्रुत्वा ततो रामः प्राह योग्यं तपोधनाः ॥२८॥

करणीयं सतां कार्यं नाऽत्र कार्या विचारणा ।
किन्तु शस्त्राणि सन्न्यस्य तपः कर्तुं समागतः ॥२९॥

विना शस्त्रं तदसाध्यं किं कर्तव्यं दिशन्तु माम् ।
शुष्काद्याः ऋषयः प्राहुः श्रुत्वा रामोदितं हि तम् ॥३०॥

सतां संरक्षणार्थाय शस्त्रसंग्रहणं तु यत् ।
व्रतं प्रतिज्ञां धर्मं वा सत्यं पोषयति ध्रुवम् ॥३१॥

न च्यावयते सत्याद्वा न धर्माद्वा व्रतान्न वा ।
तस्मात् साधुहितार्थाय भवता ग्राह्यमायुधम् ॥३२॥

तप एव महत्तच्च कृतं तेऽत्र भविष्यति ।
धर्म एव महाँस्तेन चरितस्ते भविष्यति ॥३३॥

इत्युक्तः परशुभृक् च विचार्य साधुरक्षणम् ।
परं भागवतं धर्मं सशस्त्रः सह चाययौ ॥३४॥

तपस्त्यक्त्वा सतां रक्षातपो धृत्वाऽम्बरे ययौ ।
सह्याद्रिं चाययौ पश्चान्मलयाचलमाययौ ॥३५॥

वरुणं त्वाह्वयामास मेघगम्भीरया गिरा ।
अहं मुनिगणैः सार्धमागतस्त्वद्दिदृक्षया ॥३६॥

तस्मात् स्वरूपधृङ् मह्यं प्रचेतो देहि दर्शनम् ।
पुनः पुनश्चापि समाहूतो यदा न चाययौ ॥३७॥

निस्तोयमर्णवं कर्तुमियेष रुषितो हरिः ।
आचम्य च धनुर्धृत्वाऽऽरोप्य ज्याघोषमाचरत् ॥३८॥

स्वर्णपुंखं विशिखं च भार्गवं वह्निदैवतम् ।
समन्त्रास्त्रं महाघोरं सन्दधे च मुमोच ह ॥३९॥

ततश्चचाल वसुधा सशैलवनकानना ।
प्रक्षोभं परमं जग्मुः सर्वलोकाश्च वार्धयः ॥४०॥

सदिग्दाहाऽभ्रपटलैरभवन् संवृता दिशः ।
अस्त्राग्निज्वालिता आपो विनाशं प्रययुस्तदा ॥४१॥

बभूव वरुणो देवो गर्विष्ठोऽपि शराग्निना ।
दग्धस्तूर्णं भस्मसाद्वै समुद्रः शुष्कतां ययौ ॥४२॥

तावद् ब्रह्मादयस्तत्राऽऽययुस्तुष्टुवुरीश्वरम् ।
अलं चाऽलं हरे शान्तिं गृहाण परमेश्वर ॥४३॥
असाध्यं ते न वै किञ्चिच्छ्रीपतेः परमात्मनः ।
वरुणो दग्धतां यातो जलं नष्टं प्रजायते ॥४४॥
जलहीनं जगत् सर्वं नाशं क्षणात् प्रयास्यति ।
प्रसीद त्वं कृपासिन्धो निवारयाऽस्त्रमुल्बणम् ॥४५॥
उज्जीवय च वरुणं जलहेतुं सुरं प्रभो ।
नमस्ते रुद्ररूपाय संकर्षणाय ते नमः ॥४६॥
महाकालस्वरूपाय मृत्युरूपाय ते नमः ।
सर्वसंहारकृत्कृष्णसाधुरूपाय ते नमः ॥४७॥
क्षत्रान्तकाय देवानां हिताय च नमो नमः ।
सतां हिताय रामाय श्रीहरये ते नमः ॥४८॥
इतिस्तुतो हरिस्तत्र वीक्ष्य देवान् पुरःस्थितान् ।
शान्तिमासाद्य वह्न्यस्त्रं निजग्राह निवृत्तये ॥४९॥
संहृत्याऽस्त्रं स्थितो रामो वरुणो नाशतां गतः ।
उज्जीवनार्थं तस्यैवाश्विनीबालौ सुरादयः ॥५०॥
सस्मरुस्तूर्णमायातौ ब्रह्माज्ञया रसौषधैः ।
वारुणं भस्मचयनं सिषिचतुः समन्त्रकैः ॥५१॥
वरुणो भस्मतस्तत्रोज्जीवनं प्राप्य चोत्थितः ।
कृताञ्जलिर्भीत एव पपात रामपादयोः ॥५२॥
उवाच रक्ष मां राम कृपया शरणागतम् ।
अपराधमिमं नैव प्रगणय्य प्रशाधि माम् ॥५३॥
एवं ब्रुवाणं वरुणं रामः प्राह जलेश्वरम् ।
त्वत्तोये मेदिनीं पूर्वं खनद्भिः सगरात्मजैः ॥५४॥
अधो निपातितं तीर्थं गोकर्णमृषिसेवितम् ।
एषां वासाय तत् क्षेत्रं प्रदेहि पूर्ववच्छुभम् ॥५५॥
मा जलं तत्र यायातु योजनानां शतद्वये ।
गोकर्णे चापि च शूर्पारके तीर्थे कदाचन ॥५६॥
भवतीर्थे सतीतीर्थे तीर्थे तथा च शारभे ।
श्रुत्वा वरुण ओमित्यंगीकृत्य संप्रपूज्य च ॥५७॥
भुवं दत्वा जीवनं च लब्ध्वा ययौ सुरैः सह ।
व्यस्मयन्त तु मुनयो दृष्ट्वा रामस्य विक्रमम् ॥५८॥
ऋषयः स्थानमासाद्य प्रसेदुश्चातिहर्षिताः ।
कृतकृत्या भृशं राममाशिषा समपूजयन् ॥५९॥
तैराज्ञप्तो ययौ रामो महेन्द्रपर्वतं प्रति ।
तत्तोयनिःसृते क्षेत्रे न्यूषुर्महर्षयः प्रजाः ॥६०॥
द्वीपाश्चान्तर्जले ते च वर्तन्ते तीर्थरूपिणः ।
मुनयो व्योममार्गेण विचरन्ति हि योगिनः ॥६१॥

इत्येवं साधुयोगेन रामयोगेन पद्मजे ।
त्वत्पिता प्रददौ भूमिं जीवनं वरुणाय च ॥६२॥
हरिः प्रददौ तत्रैव तीर्थलाभो भवत्पुनः ।
सर्वं ददाति साधुर्वै भुक्तिं मुक्तिं समुन्नतिम् ॥६३॥
परोपकारशीला वै साधवो ह्यनिवर्तिनः ।
शृणु चान्यां कथां चापि साधुजन्यां हितावहाम् ॥६४॥
सूर्यपुत्रो बभूवाऽपि चेक्ष्वाकुर्नृपसत्तमः ।
अयोध्यायां च तद्वंशे कुवलाश्वोऽभवन्नृपः ॥६५॥
धार्मिकश्च महाशूरो यज्वा साधुप्ररक्षकः ।
हिमालयस्य निकटे ह्युत्तंकस्याऽऽश्रमान्तिके ॥६६॥
धुन्धुनामा मधोः पुत्रो राक्षसोऽभवदुल्बणः ।
तन्नाशार्थं कुवलाश्वं युयोजोत्तंक एव ह ॥६७॥
सज्जोऽभवत् कुवलाश्वो धुन्धुं नाशयितुं सरुट् ।
सहस्रैरेकविंशत्या पुत्राणां सह सत्वरः ॥६८॥
तमाविशत्ततो विष्णुर्भगवान् स्वेन तेजसा ।
उत्तंकस्य नियोगेन लोकानां हितकाम्यया ॥६९॥
दिव्यैः पुष्पैश्च तं देवाः समन्तात् समवाकिरन् ।
धुन्धुश्चासीद् वालुकायामन्तस्तले हि भूतले ॥७०॥
तत्र गत्वा च राजा स्वतनयैः सह भूतलम् ।
विशालं खनयामास धुन्धुरासादितस्तले ॥७१॥
धुन्धुर्मुखेन वह्निं वै ह्यवासृजद् भयंकरम् ।
वह्निना कुवलाश्वस्य पुत्रा दग्धाः समन्ततः ॥७२॥
त्रयो दूरं स्थितास्तत्रोर्वरिता जीवसंयुताः ।
कुवलाश्वो जलास्त्रेण शमयामास चानलम् ॥७३॥
धुन्धुं च मारयामास शैवाऽस्त्रेण हि सत्वरम् ।
उत्तंकं दर्शयामास मृतं तं राक्षसं नृपः ॥७४॥
उत्तंकोऽपि प्रसन्नोऽभूद् वरं ददौ तु भूभृते ।
ददतश्चाऽक्षयं वित्तं शत्रुभिश्चाप्यधृष्यताम् ॥७५॥
धर्मे रतिं च सततं स्वर्गे वासं तथाऽक्षये ।
पुत्राणां चाऽक्षयान् लोकान् ये चात्र राक्षसा हताः ॥७६॥
उत्तंकस्य प्रसादेन चाययुर्देवतास्तदा ।
विमानानि समादाय पुत्रास्ते चैकविंशतिः ॥७७॥
सहस्राणि दिव्यदेहा भूत्वा विमानसंस्थिताः ।
ययुः स्वर्गं पश्यतां वै सर्वेषां जयनादिनाम् ॥७८॥
एवमृषेः प्रतापेन राजा विजयमासवान् ।
पुत्राणां चाऽक्षयं स्वर्गं साधोः प्रतापतोऽभवत् ॥७९॥
अथैवं कुवलाश्वस्य दृढाश्वो जीववान् सुतः ।
तस्य वंशेऽभवद्राजा सत्यव्रतो महाबलः ॥८०॥

स च विदर्भनृपतेर्विवाहे मण्डपे ययौ ।
पाणिग्रहणकाले वै युद्धं कृत्वा महाबलः ॥८१॥
कामाद् बलाच्च मोहाच्च संहर्षेण बलेन च ।
भाविनोऽर्थस्य च बलाद् भार्यां जहार मण्डपात् ॥८२॥
देवान् विप्रानवमत्य पापं वै कृतवान् स च ।
तेन त्र्य्यारुणाख्येन पित्रा त्यक्तो ह्यधार्मिकः ॥८३॥
कथितश्चापि वासाय श्वपाकैः सह वै बहिः ।
उवासाऽपि बहिर्गत्वा श्वपाकाऽवसथान्तिके ॥८४॥
अथ द्वादशवर्षाणि नाऽवर्षत् पाकशासनः ।
विश्वामित्रस्तदा देशे तपश्चकार दारुणम् ॥८५॥
विश्वामित्रस्य पत्नी च बहुपुत्रसमन्विता ।
कुटुम्बभरणार्थाय व्यक्रीणाम्मध्यमं सुतम् ॥८६॥
ज्ञात्वा सत्यव्रतस्तद्वै मोक्षयामास तं सुतम् ।
दत्वा बहूनि चाऽन्नानि सत्यबलोद्भवानि च ॥८७॥
एवं सत्यव्रतस्तस्या भरणं ह्यकरोत्तदा ।
विश्वामित्रस्य तुष्ट्यर्थमनुकम्पार्थमित्यपि ॥८८॥
विश्वामित्रसुतो यश्च मोचितो गालवो हि सः ।
महर्षिश्चाऽभवच्छूरो व्रतभक्तिसमन्वितः ॥८९॥
तस्य व्रतेन भक्त्या च कृपया च प्रतिज्ञया ।
विश्वामित्रकलत्रादीन् सत्यव्रतो बभार ह ॥९०॥
वसिष्ठश्चाऽभवद् राज्ये त्र्य्यारुणिनृपस्य वै ।
अयोध्यायां सत्यव्रते विमना इव सर्वथा ॥९१॥
इतिहेतोर्वसिष्ठे वै सत्यव्रतस्य भावना ।
नाऽऽसीन्मनागपि तत्र भाविनोऽर्थस्य वै बलात् ॥९२॥
सत्यव्रतोऽथ वै रोषाद् वसिष्ठस्याश्रमं ययौ ।
भोज्यादीनि समग्राणि जहार बालवत्तदा ॥९३॥
भोजयामास तत्सर्वं विश्वामित्रस्य चात्मजान् ।
वसिष्ठस्तं तदा प्राह त्रिपापस्त्वं सदाऽसि वै ॥९४॥
कन्यास्त्रीहरणं त्वेकं चाण्डालेन निवेशनम् ।
मम भोज्यादिहरणं त्रिशंकुस्त्वं ततो मतः ॥९५॥
विश्वामित्रस्तु तपसा निवृत्तो ज्ञातवानिदम् ।
प्रसन्नोऽभूद् वरं प्रादाद् देववत् प्रसुखी भव ॥९६॥
अथ वव्रे सत्यव्रतस्त्रिशंकुः पुण्यवानपि ।
सशरीरो व्रजे स्वर्गं भुक्त्वा राज्यमकण्टकम् ॥९७॥
[illegible]य्यारुणौ मृते राज्येऽभ्यषिंचत् तं त्रिशंकुकम् ।
[illegible]ज्यं कृत्वा ययौ तेन वर्ष्मणा दिवमेव सः ॥९८॥
[illegible]षतां देवतानां च वसिष्ठस्य च कौशिकः ।
विश्वामित्रः सशरीरं दिवमारोपयन्नृपम् ॥९९॥
संभवोऽसंभवस्याऽयं तदद्भुतमिवाऽभवत् ।
विश्वामित्रप्रसादेन त्रिशंकुर्दिवि राजते ॥१००॥
प्रतापोऽयं महानास्ते साधोः ऋषेस्तपस्विनः ।
तस्माद्वै साधवः सेव्या उद्धर्त्तारो हि पापिनाम् ॥१०१॥
तस्य सत्यरता भार्या सुषुवे हरिश्चन्द्रकम् ।
रोहितस्तस्य पुत्रश्च विश्वामित्रकृपालयाः ॥१०२॥
तारिता बहुकष्टैश्च विश्वामित्रेण धीमता ।
शाश्वतकीर्तयो लोके कृताः स्त्रीपुत्रभूभृतः ॥१०३॥
एतत्ते कथितं लक्ष्मि साधोराश्रयणे सदा ।
कल्याणं विविधं चापि जायते मोक्षणं ह्यपि ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने परशुरामाश्रयेण सिंहारण्यवासिनां सागरमग्नस्य गोकर्णतीर्थस्य पुनर्लाभः, उत्तंकर्षेः कृपया कुवलाश्वस्य धुन्धुमारत्वम्, विश्वामित्रस्य कृपया सत्यव्रताख्यत्रिशंकोः सदेहस्वर्गगामित्वमित्यादिसाधुप्रतापवर्णननामा चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

**श्रीनारायणीश्रीरुवाच—**

किं जप्यं सर्वदा कान्त ! भामिनीभिः स्वमुक्तये ।
कः पूज्यः को नमस्कार्यो वद मे स्त्रीकृपावशः ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

भामिनीभिः सदा जप्यं श्रीकान्तेति सुखप्रदम् ।
मम नामोत्तमं नाम मुक्तिं ददामि तेन वै ॥ २ ॥
विधवाभिर्हरे कृष्णनारायण प्रभो पते ।
इतिजप्यं मम नाम पुनः पुनः स्वमुक्तये ॥ ३ ॥
कन्यकाभिः सदा जप्यं राधावरेतिनाम मे ।
वृद्धाभिः सर्वदा जप्यं लक्ष्मीनारायणेति वै ॥ ४ ॥
अनादिश्रीकृष्णनारायणेति जप उत्तमः ।
सर्वाभिः प्रमदाभिश्च कर्तव्यः सर्वसिद्धये ॥ ५ ॥
अहं पूज्यो नमस्कार्यः श्रीकृष्णोवल्लभः पतिः ।
स्वर्णादिप्रतिमायां च पत्यावहं परेश्वरः ॥ ६ ॥

**श्रीनारायणीश्रीरुवाच—**

सर्वदा मानवैर्यत्र व्रते महोत्सवे गृहे ।
मन्दिरे देवपूजायां श्राद्धे प्रवासने तथा ॥ ७ ॥

प्रस्थाने वा प्रवेशे वा विवाहे शुभकर्मणि ।
गृहारंभे कृषिकार्ये ह्युद्यमे विजयार्थिनि ॥ ८ ॥
अभ्युदये तथा स्वास्थ्ये वैमनस्ये ह्यनिष्टके ।
शुभाऽशुभादौ किं जाप्यं स्वेष्टफलादिलब्धये ॥ ९ ॥

श्रीपुरुषोत्तम उवाच—

सर्वत्र लाभदं शान्तिपुष्टिदं भयनाशनम् ।
रक्षाकरं शत्रुविघ्ननाशकं साधुसम्मतम् ॥१०॥
ब्रह्मशरं प्रवक्ष्यामि सर्वपापविनाशकम् ।
यत्र क्वचिज्जपन् देही सर्वपापैः प्रमुच्यते ॥११॥
आयुष्मान् भवते चैनं श्रीः समुपैति चोत्तमा ।
अक्षरब्रह्मणा साम्यं धाम्नि चन्ममतुष्टये ॥१२॥
मुक्तानां मण्डलैः साकं विहितं वाङ्मयं तदा ।
यदाऽहमगमं सृष्टौ त्वया साकं तु पद्मजे ॥१३॥
नमः श्रीपरमेशाय नमोऽक्षराधिपाय च ।
नमो मुक्ताधिनाथाय नमो ब्रह्मप्रियाजुषे ॥१४॥
हरिप्रियादिपतये नमो नमोऽवतारिणे ।
नमोऽनादिकृष्णनारायणाय परमात्मने ॥१५॥
नम ईश्वरनाथायेश्वरीणीस्वामिने नमः ।
नमो व्यूहाधिनाथाय वैष्णवीस्वामिने नमः ॥१६॥
नमो नारायणीशाय श्रीलक्ष्मीशाय ते नमः ।
नमोऽन्तर्यामिणे वेदनिधये ते नमो नमः ॥१७॥
नमः सहस्रशीर्षायाऽसंख्यनाम्ने च ते नमः ।
विष्णवे शंभवेऽजाय त्रिरूपाय च ते नमः ॥१८॥
आदित्येभ्यो नमश्चापि वसुभ्यश्च नमो नमः ।
अश्विभ्यां च नमः सर्वसुरेभ्यश्च नमो नमः ॥१९॥
यज्ञदेवेभ्य एवाऽपि कालाय मृत्यवे नमः ।
विश्वदेवेभ्य एवापि पितृभ्यश्च नमो नमः ॥२०॥
सिद्धेभ्यश्च मुनिभ्यश्च साधुभ्यश्च नमो मुहुः ।
गणेश्वरेभ्यः सर्वेभ्यः पार्षदेभ्यो नमो नमः ॥२१॥
साध्वीभ्यश्च सतीभ्यश्च देवीभ्यश्च नमो नमः ।
मातृभ्यश्च जनकेभ्यो वृद्धेभ्यश्च नमो नमः ॥२२॥
विप्रेभ्यः पूज्यवर्गेभ्यस्तीर्थेभ्यश्च नमो नमः ।
कम्भरायै महालक्ष्म्यै सन्तुष्टायै नमो नमः ॥२३॥
माणिक्यायै प्रभावत्यै प्रज्ञायै च नमो नमः ।
लक्ष्म्यै श्रियै राधिकायै कमलायै नमो नमः ॥२४॥
श्रीमद्गोपालकृष्णाय ते महाविष्णवे नमः ।
सप्तर्षिभ्यो मानवेभ्यो ब्राह्मणेभ्यो नमो नमः ॥२५॥

चमत्कारिपुरुषेभ्यः सद्गुरुभ्यो नमो नमः ।
धर्माय भक्त्यै कृष्णाय हरये च नमो नमः ॥२६॥
नराय तत्पूर्वजाय वृषजेभ्यो नमो नमः ।
दिक्पालेभ्यः समस्तेभ्यो लोकपालेभ्य आनमः ॥२७॥
गुरुभ्यो मोक्षदेभ्यश्च शान्तिदेभ्यो नमो नमः ।
पालकेभ्यः पवित्रेभ्यः पावनेभ्यो नमो नमः ॥२८॥
पावकेभ्यश्च तत्त्वेभ्यश्चैश्वर्येभ्यो नमो नमः ।
सर्वाभ्यो ब्रह्मविद्याभ्यो मुक्तिदाभ्यो नमो नमः ॥२९॥
गुर्वीभ्यः कामधेनुभ्यः सद्भ्यो मुहुर्नमो नमः ।
तापसेभ्यः शीलधर्मिभ्यो योगिभ्यो नमो नमः ॥३०॥
सर्वात्मनेऽनादिकृष्णनारायणाय ते नमः ।
स्वतःप्रकाशरूपाय मन्त्राणां निधये नमः ॥३१॥
एते ब्रह्मस्वरूपास्तान् कीर्तयेत् कीर्तिवर्धनान् ।
अवताराँस्तथा मुक्तानीश्वरान् कीर्तयेत् सुरान् ॥३२॥
श्रीकृष्णं परमं ब्रह्म सर्वशास्त्रप्रबोधितम् ।
मंगलं सर्वभूतानां पवित्रं कीर्तयेद्धि माम् ॥३३॥
व्याधिप्रशमनं सिद्धिप्रदं च पुष्टिदं तथा ।
कल्पं सायं सदा रात्रौ कीर्तयेन्मां दिनेऽनिशम् ॥३४॥
त एते देवताः सर्वकार्यसिद्धिप्रदा नृणाम् ।
रक्षन्ति चाभिवर्षन्ति कामान् पुष्णन्ति कीर्तिताः ॥३५॥
एते तु नायकाः सर्वे साक्षिणः कर्मणामपि ।
कीर्तितास्ते ततस्तुष्टा व्यपोहन्त्यशुभं नृणाम् ॥३६॥
एवं कल्पं समुत्थाय नमस्कारान् मुहुश्चरेत् ।
नाग्निचौरभयं तस्य न मार्गप्रतिरोधनम् ॥३७॥
अशुभं न भवेत्तस्य शुभं स्याद्वै पदे पदे ।
दुःस्वप्नो न भवेत्तस्य स्वस्तिमान् स्यात्क्षणे क्षणे ॥३८॥
नश्यन्ति सर्वपापानि सुपुण्यान्युद्भवन्ति च ।
नश्यन्ति व्याधयो रोगाः कुले स्वस्त्ययनं चरेत् ॥३९॥
आत्मनश्च सुतानां च दाराणां च कुटुम्बिनाम् ।
धनानामोषधीनां च रक्षां ब्रह्मशरः क्रियात् ॥४०॥
रणे नश्यन्ति रिपवो विजयः स्यात् प्रपाठिनः ।
दैवे पैत्र्ये पठनीयं तृप्यन्ति पितरः सुराः ॥४१॥
कश्मलं दूरमेव स्यान्नैर्मल्यं च भवेत् सदा ।
प्रवासे शुभकार्ये च ब्रह्मशरस्य पाठनात् ॥४२॥
परा सिद्धिर्भवेत् स्वेष्टकार्याणां नाऽत्र संशयः ।
न च राजभयं तस्य श्वापदानां भयं न च ॥४३॥
न भयं शत्रुतस्तस्य पिशाचोरगरक्षसाम् ।
नाऽन्यम्बुपवनाकाशाद् भूकम्पाद् ग्रहतो भयम् ॥४४॥

यत्र ब्रह्मशरः स्तोत्रं दुःखं ततो विलीयते ।
न तत्र म्रियते बालः सम्पन्नाशो न जायते ॥४५॥
धनं शेवधिः पठतो गावोऽस्य बहुवत्सिकाः ।
एतादृशं ब्रह्मशरस्तोत्रं शश्वद् रक्षकम् ॥४६॥
तुभ्यं लक्ष्मि समाख्यातं तथ्यं ब्रह्म सनातनम् ।
हृदयं सर्वभूतानां श्रुतिर्मे वाक् सनातनी ॥४७॥
दिवं यान्ति सुरान् जप्त्वा महाविष्णुं तथैश्वरान् ।
लोकान् यान्ति प्रकीर्त्याऽत्राऽवतारान् यान्ति धाम च ॥४८॥
मामनादिं हरिंकृष्णं नारायणं प्रकीर्त्य तु ।
ममाऽक्षरपदं यान्ति लक्ष्मीं प्रकीर्त्य सम्पदः ॥४९॥
जप्त्वा राधां तथाऽश्विनौ रूपं यान्ति परोत्तमम् ।
धर्मं स्मृत्वा वृषं यान्ति ब्रह्म स्मृत्वाऽक्षयं सुखम् ॥५०॥
साधून् स्मृत्वा परं पुण्यं नैर्विघ्न्यं यान्ति सर्वदा ।
जप्यं ब्रह्मशरस्तोत्रं सर्वकार्यार्थसिद्धये ॥५१॥
पूजनीयाः साधवश्च सर्वपापोपशान्तये ।
साधूनां तु परिभवः साधयेदपि चेश्वरान् ॥५२॥
साधुजनान् सम्प्रसाद्य कदाचन न रिष्यति ।
सन्तः पूज्या नमस्कार्याः सेवनीयाः परेशवत् ॥५३॥
साधुजनेषु सततं वर्तितव्यं तु दीनवत् ।
सन्तो लोकानिमान् सर्वान् धारयन्ति दयालवः ॥५४॥
भक्तियुक्ता भजनेन रक्षन्ति शरणागतान् ।
सन्तो वै भगवद्योगान्महान्तो धर्मसेतवः ॥५५॥
स्त्रीधनत्यागिनः सन्तो वाणीसंयमयोगिनः ।
दर्शनीयाश्च भूतानां शीलयुक्ता धृतव्रताः ॥५६॥
प्रमोक्षकाश्च लोकानां शास्त्राणां पालकास्तथा ।
लेखका दर्शकाश्चापि धर्मोद्यमपरायणाः ॥५७॥
तपो भक्तिर्धनं येषां श्रीहरिर्विपुलं बलम् ।
आश्रयाः सर्वधर्माणां साधवो दिव्यदर्शिनः ॥५८॥
मोक्षकामाः स्थिता भक्तौ धर्मे च धर्मसेतुषु ।
यान् समाश्रित्य जीवन्ति प्रजाः सर्वाश्च देहिनः ॥५९॥
साधवो ब्रह्मसोपानाः पन्थानो मुक्तिगामिनाम् ।
यज्ञपुण्यप्रदातारो भोजनाद्यैः सनातनाः ॥६०॥
पितृदेवोद्धारकाश्च हव्यकव्याग्रभोजिनः ।
आशीर्वादेन लोकाँस्त्रीँस्त्रायन्ते मायिकाद् भयात् ॥६१॥
सूर्याः सर्वप्रलोकानां नेत्राणि नेत्रिणां तथा ।
सर्वकथाश्रुतिधना निपुणा मोक्षदायिनः ॥६२॥
गतिज्ञाः सर्वसत्त्वानामध्यात्मगतिचिन्तकाः ।
आरम्भान्तादिबोद्धारो गन्तारः परमां गतिम् ॥६३॥
परावरादिविज्ञाना आत्मबोधादिशोभनाः ।
विमुक्ताः पापरहिता धूतपापाश्रितालयाः ॥६४॥
निर्द्वन्द्वा बन्धनहीना अराग्रा निष्परिग्रहाः ।
मानार्हा मानिताः सद्भिर्महात्मभिः प्रवैष्णवैः ॥६५॥
पंके लेपे चन्दने च समामिष्टे कटौ रसे ।
क्षौमेऽजिने दुकूले च समा अनशने रताः ॥६६॥
शोषयेयुश्च गात्राणि तपोभिर्विद्यया व्रतैः ।
अदैवतं प्रकुर्युस्ते सदैवतं धनान्वितम् ॥६७॥
लोकानन्यान् सृजेयुश्च तपोबलाद्धि साधवः ।
विप्राणामपि ये विप्रा देवानामपि देवताः ॥६८॥
प्रमाणानां प्रमाणानि साधवः शास्त्रभूषणाः ।
येषां वृद्धश्च बालश्च निर्धनोऽपि धनान्वितः ॥६९॥
नारी वापि नरो वापि समं मानं समर्हति ।
तपोविद्याविशेषात्तु परं मानं समर्हति ॥७०॥
अविद्वान् ब्रह्मविद्वान् वै साधुः पात्रं महत्परम् ।
विद्वान् साधुः परब्रह्म पावनं पात्रमुत्तमम् ॥७१॥
अविद्वाँश्चैव विद्वाँश्च साधुर्वै दैवतं महत् ।
श्मशाने ह्यपि तेजस्वी पावको नैव दुष्यति ॥७२॥
तथा संसारचक्रे वै साधुः क्वापि न दुष्यति ।
यज्ञे हविर्लिहन् वह्निर्यथा साधुः प्रशोभते ॥७३॥
विप्राणां तु सहस्रेषु संभुजत्सु महाध्वरे ।
साधोरसत्त्वे व्यर्थं स्यात् साधुर्नारायणो यतः ॥७४॥
साधवः सोमसूर्यादिप्रपूज्याईश्वरेश्वराः ।
साधूनां वै प्रपूजायामायुःकीर्तिर्यशो बलम् ॥७५॥
भक्तिर्मुक्तिर्दैवतं च वर्धन्तेऽहर्निशं सदा ।
लोकालोकेश्वराः साधुपूजकाः संभवन्ति ह ॥७६॥
धर्मार्थकाममोक्षेषु यशःश्रीरोगशान्तिषु ।
देवतापितृपूजासु सन्तोष्याः साधवोऽमलाः ॥७७॥
साधवो हि माधवास्ते लोके चात्र परत्र च ।
तारयेयुर्जगत् सर्वं सन्तुष्टाः श्रीपतिर्यथा ॥७८॥
कश्यपस्य गृहे साधुर्वैष्णवस्तापसो यतिः ।
प्रणद्ब्रह्माभिधश्चासीन्मानसो वेधसः सुतः ॥७९॥
शीलव्रतो जटी कृशो महैश्वर्यादिसिद्धिमान् ।
मालाजपेऽतिमग्नश्च प्रायो मौनपरायणः ॥८०॥
मारीचः कश्यपस्तं तु प्रातः प्रसेवते सदा ।
पादसंवाहनाद्यैश्च भोज्यपानादिकार्पणैः ॥८१॥
साधुश्चाऽयं भजन् कृष्णनारायणं हरिं च माम् ।
ध्याने प्रायो वर्तते वै मम भक्तिपरायणः ॥८२॥

स स्वैरं चरते लोकान् दिव्यान् नागाँश्च मानुषान् ।
पुनश्चायात्यालयं च कश्यपस्य महात्मनः ॥८३॥
प्रणद्ब्रह्मैकदा प्राह कश्यपं मां प्रभोजय ।
दुग्धपाकं ह्यपूपाँश्च कश्यपस्तमभोजयत् ॥८४॥
प्रणद्ब्रह्म ततः प्राह कश्यपं सेवकं मुनिम् ।
ममांगानि प्रलिम्पस्व पायसेन मुहुर्मुहुः ॥८५॥
कश्यपः कृतवान् सर्वं पायसेन विलेपनम् ।
अस्नापयत् पायसेन प्रणद्ब्रह्ममहामुनिम् ॥८६॥
अथोत्थाय प्रणद्ब्रह्मोच्छिष्टेन पायसेन तु ।
कश्यपस्याऽऽननं मूर्धानं चाऽलेपयदित्यपि ॥८७॥
अथाऽन्तिके स्थितां दृष्ट्वा युवतीमदितिं तथा ।
हस्तेन सम्परिगृह्याऽलिम्पत पायसेन ताम् ॥८८॥
मुखे वक्षसि कट्यां च सक्थ्नोः पृष्ठे नितम्बयोः ।
व्यसृजच्च ततस्तां स प्रणद्ब्रह्म मुनीश्वरः ॥८९॥
अथाऽदितिं पुनः प्राह पायसान्वितविग्रहाम् ।
वह स्कन्धे निधायैव मां बहिः सर्वसन्निधौ ॥९०॥
अदितिस्तं निधायैव स्कन्धे ययौ बहिस्तदा ।
पल्लताभिस्ताडयति मुनिस्तां बालयौवनाम् ॥९१॥
साऽपि साधुजनं स्कन्धे कृत्वा चचार सर्वतः ।
पश्यतां सर्वलोकानां चाययौ स्वगृहं प्रति ॥९२॥
मुनिः स राजमार्गेण स्कन्धस्थश्चाययौ गृहम् ।
कश्यपस्य स्तोकमपि दुःखं नासीन्न चादितेः ॥९३॥
गृहे त्वागत्य मुनिराट् पतितो भूतले द्रुतम् ।
स्कन्धात्तदा कश्यपश्चादितिस्तथाऽन्ययोषितः ॥९४॥
परिचर्यां प्रचक्रुश्च प्रसीद भगवन्निति ।
ततः स मुनिराट् स्वस्थो विलोक्य कश्यपं तथा ॥९५॥
अदितिं प्राह तुष्टात्मा देवमाता भविष्यसि ।
जितक्रोधो भवान् यस्मात् कश्यपोऽस्ति ततस्त्विह ॥९६॥
पिता सर्वप्रजानां त्वं भविष्यसि न संशयः ।
तव वंशे साधवश्च कोट्यर्बुदा हि मादृशाः ॥९७॥
वंशोद्धारकराः सर्वे ब्रह्मध्यानपरायणाः ।
भविष्यन्ति तथा दारयुजो गृहादिमेधिनः ॥९८॥
सर्वविधान्यपत्यानि भविष्यन्ति तवैव ह ।
पुण्या कीर्तिस्तव नित्या भविष्यति न संशयः ॥९९॥
तव वंशो हरेश्चापि प्राकट्यानि पुनः पुनः ।
भविष्यन्ति हि लोकानामुद्धारार्थं हि कश्यप ॥१००॥
न त्वां जरां वा रोगो वाऽदितिं चापि लगिष्यति ।
सर्वस्त्रीणां प्रधाना त्वमदिते संभविष्यसि ॥१०१॥
एषैव ते बुद्धिरस्तु साधून् प्रति सदा तव ।
इत्युक्त्वा विररामाऽसौ स्नात्वा शुद्धो बभूव ह ॥१०२॥
प्राहाऽमृतप्रभोक्तारः पुत्रास्ते देवताः शुभाः ।
भविष्यन्ति पायसान्नफलभाजः सदाऽदिते ॥१०३॥
अन्यासां दैवयोगेन प्रसादभागिनः क्वचित् ।
भविष्यन्ति तव स्त्रीणां कश्यपत्वं सुखी भव ॥१०४॥
सर्वसमृद्धिभृतान्येव गृहाणि कश्यपस्य वै ।
भवन्त्विति मुनिः प्राह तत्तथा तानि चाऽभवन् ॥१०५॥
एवं लक्ष्मि प्रणद्ब्रह्मसाधोश्चाशीर्वचांसि वै ।
सेवाश्च संशयशून्याः फलिताः कश्यपस्य ह ॥१०६॥
अदितेः फलिताश्चापि साधोः सेवा हरिप्रसूः ।
देवप्रसूरदितिर्वै जायते नाऽपरा मुहुः ॥१०७॥
साधोः सेवाफलं लक्ष्मि भोगमोक्षप्रदं भवेत् ।
सर्वसम्पत्प्रदं चापि कामनापूरकं भवेत् ॥१०८॥
पूज्यन्ते सततं सर्वैः साधवो देवतादिभिः ।
मानवैश्चापि लोकेशैर्दिक्पालैश्चेश्वरादिभिः ॥१०९॥
एकतः सर्वभूतानां सेवनं चैकतः सताम् ।
सतां सेवाफलस्याऽग्रेऽन्यानि नार्हन्ति षोडशीम् ॥११०॥
पठनाच्छ्रवणाच्चास्य सतां सेवाफलं लभेत् ।
भुक्तिं मुक्तिं लभेच्चापि शाश्वताऽऽनन्दभाग् भवेत् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पूजनीयनमस्करणीयसाधुजनमाहात्म्ये प्रणद्ब्रह्मसाधोराशीर्वादेन सेवया च कश्यपस्याऽदितेश्च देवतामातृपितृत्वादिलब्धिरितिनिरूपणनामा पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

श्रीनारायणीश्रीरुवाच—

सन्तो हरिर्भवान् धर्मः सती मोक्षश्च साधनम् ।
भक्तिश्चेत्यादिषु कान्त प्रमाणानि तु कानि वै ॥ १ ॥
नह्यप्रमाणसंघुष्टं हृदये चाध्यवस्यति ।
तस्मात् प्रामाणिकं कर्तुं प्रमाणं तेषु किं मतम् ॥ २ ॥
वद मे लोकनाथ त्वं सर्वविद्यादिशेवधिः ।
यत्र मे संशयो न स्याल्लोकानां तु हिताय वै ॥ ३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि प्रमाणं ज्येष्ठमेव तु ।
प्रत्यक्षं स्वेन यद्वस्तु त्वालोचितं मुहुर्मुहुः ॥ ४ ॥

परिचयेनेन्द्रियैश्च साक्षान्निर्णायकं हि तत् ।
सन्तः शीलव्रता भक्तिमन्तो निर्वासनास्तथा ॥ ५ ॥
परीक्षणीयाः सुप्त्वाऽपि शय्यायां शीलधर्मणि ।
सहवासेन भक्तौ च भोगदानेन वासने ॥ ६ ॥
परीक्षणीयाः सन्तो वै साक्षान्न त्वन्यथा क्वचित् ।
आलिंगने प्रयासे वा विकृतिर्यस्य नैव ह ॥ ७ ॥
शीलिनस्ते महासन्तो नारायणाः स्वयं त्विह ।
सततं बहुधायां तु भक्तौ यस्य श्रमो न वै ॥ ८ ॥
नर्तने गायने सेवादौ च लज्जा न रुद्ध्यति ।
भक्तिमन्तश्च ते साक्षाद् बोद्धव्याः साधवः शुभाः ॥ ९ ॥
भोगा बहुविधा देया घटिताऽन्यास्तु साधवे ।
न भुंक्ते निर्मनाश्च स्यात् साक्षात् साधुत्वनिर्णयः ॥१०॥
वासना रसना लिङ्गं परीक्षाविषयादि वै ।
प्रत्यक्षं तु भवेत्तत्र निर्णायकं हितावहम् ॥११॥
गतानुगतिका वाणी न वक्तव्या कदाचन ।
नाऽनुमानं हि निर्दोषं सदा सद्धेतुमन्तरा ॥१२॥
असद्धेतुसमापन्नं निश्चायकं न तद्भवेत् ।
हरौ कृष्णे मयि साक्षाच्चिह्नानां दर्शनं मम ॥१३॥
हस्तयोः पादयोश्चापि मूर्तौ चिह्नादिदर्शनम् ।
प्रत्यक्षं तु भगवत्त्वे प्रमाणं चात्र कीर्तितम् ॥१४॥
चिह्नानां तु प्रमाणं वै शास्त्रं परम्परागतम् ।
आप्तवाक्यात्मकं चापि तन्मूलं वैदिकं तथा ॥१५॥
वेदाश्चापि प्रमाणं वै यन्मूर्तेश्चायुधं च यत् ।
लिखितं दिव्यचक्षुष्कैर्दृष्ट्वा मत्पार्श्ववर्तिभिः ॥१६॥
तदायुधस्य रेखा स्यात् करे यस्य च वा पदे ।
स एव भगवान् स स्यान्मानवादिस्वरूपधृक् ॥१७॥
यथाऽहं मत्स्यशूलाद्यैरस्मि करे प्रचिह्नितः ।
साक्षाद् दिव्यस्वरूपश्च कोट्यब्जश्रीरमापतिः ॥१८॥
षोडशचिह्नवान् वर्ते पादयोश्चापि वर्ष्मणि ।
असंख्यचिह्नवानस्मि साक्षाच्चक्रगदादिमान् ॥१९॥
एवं प्रमाणैर्बोद्धव्यो भगवान् पुरुषोत्तमः ।
धर्मो लोकव्यवहारसौख्यार्थे पूज्यमानवैः ॥२०॥
एषा रीतिः सरणीया चेत्येवं निश्चितः स वै ।
दानं परोपकरणं विवाहः पररक्षणम् ॥२१॥
शुद्धिन्यायार्जनं चापि पूजनं चोद्यमस्तथा ।
इत्येवमाद्या मार्गाश्च देशकालानुसारतः ॥२२॥
सौख्यार्थं चाप्यविघ्नार्थं निश्चितो धर्म एव सः ।
आप्तवाक्यं चाप्तकर्म धर्मरूपं प्रकाशते ॥२३॥
सती साध्वी सदा बोध्या पातिव्रत्यादिसद्गुणैः ।
सहवासेन सा सहवासिन्या बुद्ध्यते सदा ॥२४॥
सत्यैश्वर्याणि शास्त्रेषु लिखितानि भवन्ति वै ।
चमत्कारास्तथा यासु दृश्यन्ते ताः सतीस्त्रियः ॥२५॥
मोक्षश्चात्मनि रिक्तत्वं क्लेशाद्यैश्चात्र बुद्ध्यते ।
सदा शान्तिः सुखं नैजं शाश्वतश्च तथा भवेत् ॥२६॥
इत्येवं मुक्तलोकानां शाश्वतानन्ददायिनाम् ।
अनादिश्रीकृष्णनारायणस्यापि मयापि च ॥२७॥
अक्षरादिस्थलानां च निवासत्वेन चाऽर्जनम् ।
मोक्षश्चैवं शास्त्ररीत्या प्रत्यक्षेणाऽपि वै मनाक् ॥२८॥
निश्चेतव्यः सदा लक्ष्मि भक्त्या प्राप्यः स वै मतः ।
ज्ञानमार्गेण वा भ्रान्तिनाशे विज्ञमयी स्थितिः ॥२९॥
विज्ञेया मोक्षरूपा सा शास्त्रं तत्र प्रमाणकम् ।
चमत्कारसमं मानं विद्यते नापरं प्रिये ॥३०॥
चमत्कारे नमस्कारस्तत्र सर्वं विलुम्पति ।
प्रत्यक्षमनुमानं वोपमानं शब्द इत्यपि ॥३१॥
अर्थापत्तिश्चोपलब्धिः संभवश्चेतिह्यासनम् ।
चेष्टा मौनं चाभिवित्तिः स्वप्नं दैवं च मानसम् ॥३२॥
चतुर्दशाऽपि मानानि चमत्कारे लयन्ति वै ।
तस्मात् सिद्धिस्वरूपं वै प्रमाणं बलवत्तथा ॥३३॥
प्रत्यक्षं सिद्धमेवापि सिद्ध्याऽन्यथयते पुनः ।
का वार्ता तत्र चान्यानां प्रमाणानां तु पद्मजे ॥३४॥
साधुजनान् प्रसेवस्व लक्ष्मि ! सत्कृत्य मानतः ।
सत्सु भुक्तिस्तथा मुक्तिः सद्गतिः सत्सु सर्वथा ॥३५॥
हरिर्धर्मश्च भक्तिश्च मोक्षः सत्सु प्रवर्तते ।
साधुता च सतीता च सर्वं सत्सु प्रवर्तते ॥३६॥
ज्ञानं सेवा मम भक्तिर्दानं सर्वविधं तथा ।
धर्मा ह्येते सर्वमूर्द्धन्याश्च सन्तोषणान्विताः ॥३७॥
सुखं तेषु प्रमोदश्च तेष्वानन्दः परो मतः ।
मोक्षस्तेषु हरेर्योगः साधुष्वेव भवेत् प्रिये ! ॥३८॥
रजसा तमसा व्याप्ता नास्तिकाः साधुनिन्दकाः ।
निरयं प्रतिपद्यन्ते साधुधर्माद्यसूयकाः ॥३९॥
ये तु साधून् साधुधर्मं सेवां साधोरुपासते ।
सत्याऽर्जवपराः सन्तस्ते भूत्वा यान्ति मत्पदम् ॥४०॥
धर्मभक्तिर्गतिस्तेषां मत्सेवोपासनाद् भवेत् ।
भक्तिमन्तो मम धाम प्रयान्ति साधवो हि ते ॥४१॥

पुण्यमात्राः स्वर्गलोकं प्रयान्ति गृहमेधिनः ।
साधवः शीलसम्पन्नाः शिष्टाचारा उपासकाः ॥४२॥
पञ्चानामशनं दत्वा शेषमश्नन्ति साधवः ।
गां देवं भास्करं साधुं सतीं गुरुं तपस्विनम् ॥४३॥
विप्रं वृद्धं धार्मिकं च ये कुर्वन्ति प्रदक्षिणम् ।
अतिथीनां च भृत्यानां कुटुम्बिनां च योषिताम् ॥४४॥
आश्रितानां शरणे चागतानां रक्षकाश्च ये ।
गुरोः सेवारताश्चापि वृद्धानां सेवकाश्च ये ॥४५॥
सदा ह्येकान्तशीलाश्च तीर्थवासा हरिप्रियाः ।
ज्ञानवन्तश्च सन्तुष्टाः सदा चातः सुखभृताः ॥४६॥
वृद्धवचःप्रकर्तारः स्वाध्यायनिरतास्तथा ।
निवृत्तेन्द्रियविषया विना श्रीपुरुषोत्तमम् ॥४७॥
व्याधितानां च सर्वेषामायुष्याद्यभिनन्दिनः ।
त्वंकारवाचा रहिताः साधवः साधुभूषणाः ॥४८॥
यथा लवणमम्भोभिराप्लुतं प्रविलीयते ।
तथा सद्धयोऽर्पितं पापं सर्वं सद्यो विनश्यति ॥४९॥
बुद्धः पापं न गूहेत गूह्मानं विवर्धते ।
कृत्वा साधुषु चाख्येयं ते तत्प्रशमयन्ति हि ॥५०॥
भक्तियुक्तं चरेद्धर्मं न धर्मध्वजिको भवेत् ।
धर्मवाणिजकाः स्वर्गं भुक्त्वा पुनः पतन्ति यत् ॥५१॥
अर्चेद् देवानदम्भेन सेवेताऽमायया सतः ।
गुरूननुसरेद् भक्त्या मोक्षार्थे दानमाचरेत् ॥५२॥
भाग्यं समर्जयेद् भक्त्या सेवया तपसा व्रतैः ।
भागधेयं ततो विन्देताऽयत्नोऽपि विना श्रमम् ॥५३॥
नाऽलाभकाले लभते प्रयत्नेऽपि कृते सति ।
लाभकाले सतः प्रसेव्याऽर्जयेत् तत्परं पदम् ॥५४॥
कृतं काले ह्यनाकृष्टं स्वयमागत्य तिष्ठति ।
निष्फला न भवेत् सेवाऽऽशीर्वादैः सह कर्हिचित् ॥५५॥
अधीत्य नीतिशास्त्राणि नीतियुक्तो न चेद् यदि ।
अधीतं विफलं तस्य निरयाणां प्रदायकम् ॥५६॥
सम्प्राप्य मानुषं जन्म कर्तव्याऽऽराधना मम ।
यदि नेह क्रियात्तां चेत् कृतमन्यत्तु निष्फलम् ॥५७॥
विद्यायुक्तो न चेद्विद्यामात्मार्थे योजयेत्यपि ।
अशान्तः कृततृष्णश्च विद्या तस्य हि निष्फला ॥५८॥
विद्वान् शान्तिं परित्यज्य विहायाऽऽत्मप्रमोक्षणम् ।
लोकदृष्टया चेद्वहति निष्फलं तस्य जीवनम् ॥५९॥
इदं कृतं करिष्येऽपि कुर्वन्ति राजसादयः ।
सात्त्विकाश्चेत्तथामार्गा निष्फलं तत्प्रजीवनम् ॥६०॥

परोपकारं लोकेभ्यो दर्शयत्येव मानितम् ।
स्वसमेभ्यः शिक्षयित्वा वाचयत्येव सद्यशः ॥६१॥
भक्तिमार्गं न कुर्वन्ति देहिख्यातिं गताः खलाः ।
त एव धर्महन्तारो बहिर्दृशा न चान्तरे ॥६२॥
यदि विद्यामुपाश्रित्य जनः शान्तिं समश्नुते ।
सर्वोत्कृष्टं फलं तस्य सम्पन्नं नाऽधिकं ततः ॥६३॥
न विद्वान् विद्यया हीनं वृत्त्यर्थमुपसंश्रयेत् ।
न विद्वान् धनिनो मूढान् स्तुवीत क्षुद्रकाम्यया ॥६४॥
विदुषः क्षुद्रकामा न विद्या क्षुद्रमतेर्न च ।
नित्यसन्तोषवान् विद्वान् साधुर्ब्रह्मप्रमोदवान् ॥६५॥
साधुविदुषोः समता सन्तोषे चात्मदर्शने ।
सत्ये च वचने भक्तौ ब्रह्मिष्ठत्वे परेश्वरे ॥६६॥
अर्थेच्छति समारंभान् साहाय्यं चेन्न विन्दति ।
उग्रं तपः समारोहेद्धयनुत्तं न प्ररोहति ॥६७॥
दत्तमासाद्यते पश्चात् सेवा स्मृद्धिं ददाति च ।
अद्रोहेण च दीर्घायुर्भक्त्या सतां परं पदम् ॥६८॥
सद्भयो दद्यात्तु विपुलं सेवेत सततं सतः ।
प्रियं कुर्याद् देहिनां च जयं लब्ध्वाऽक्षरं व्रजेत् ॥६९॥
कंजुषो नैव याचेत दरिद्रेषु वसेन्न च ।
खलमैत्रीं न वै कुर्यात् साधून् सेवेत मुक्तये ॥७०॥
सुखं चात्मस्थितं भुञ्ज्याद् दायादः स्यात् सदा हरेः ।
पुत्रो भवेत् सतां वश्यो मोक्षमिच्छेत् परेऽक्षरे ॥७१॥
सतीः साध्वीर्नमस्कुर्याद् भजेत मां हरिं प्रभुम् ।
अर्पयेत् स्वसमस्तं वै मय्येव मत्परायणः ॥७२॥
अनर्पितं विनश्येच्च विफलं चार्जितं श्रमात् ।
समर्प्य तद्विधायैव शाश्वतं मोक्षणे लभेत् ॥७३॥
दानं धर्मस्य शान्तेश्च प्रमोदस्योत्सवस्य च ।
आनन्दस्य च कर्तव्यं चामृतस्याऽपि लब्धये ॥७४॥
सेवादानं प्रकर्तव्यं सम्पदामपि सर्वथा ।
गृहकुटुम्बदानं च कर्तव्यं तत्तदाप्तये ॥७५॥
सत्कार्ये चाश्वसीतैव नाऽसत्कार्ये कदाचन ।
धर्मबुद्धावाश्वसीत प्रवर्तेत द्रुतं तदा ॥७६॥
धर्मः शीघ्रं त्वाचरितो भक्तौ मनः प्रवर्तयेत् ।
भक्तिं कुर्वन्नवाप्नोति पुत्रं मां परमेश्वरम् ॥७७॥
एवमेवाऽऽत्मनाऽऽत्मानं प्रापयन्ति हि धार्मिकाः ।
परमात्माऽर्जनं स्याद्वै धर्मो वै विजयप्रदः ॥७८॥
पञ्चभूतशरीराणां सर्वेषां सहजात्मनाम् ।
यत्र धर्मो ध्रुवो नैजस्तत्राऽहं नियतो हरिः ॥७९॥

सर्वेषां तुल्यभावानां देहिनां धर्मवर्त्मनाम् ।
भक्तिः सेवा मोक्षदाऽस्यौ गुरोः सतः पितुर्हरेः ॥८०॥
साधुवंशस्य सेवा वै श्रेयः परममुच्यते ।
विपाप्मा च भवेत्तद्वत् सुखमेति प्रसेवनात् ॥८१॥
कल्मषाणां नाशकं वै साधूनां सेवनं शुभम् ।
अहोत्पन्नं वर्ष्मणा वेन्द्रियैः पापं तथाऽऽन्तरैः ॥८२॥
ज्ञात्वाऽज्ञात्वाऽपि सर्वं तल्लीयते साधुसेवया ।
रात्रौ सन्ध्यादिकाले वा जातं जपतो नश्यति ॥८३॥
साधुसेवा जपो मे च कुर्वाते स्वस्तियोगिनम् ।
तिर्यग्योनिर्विनश्येद्वै नरकं संकरादिकम् ॥८४॥
न भयं न मरणं चाऽऽकस्मिकं सत्प्रसेवया ।
सर्वगुरुस्त्वनादिश्रीकृष्णनारायणोऽस्म्यहम् ॥८५॥
सर्वप्राणश्चान्तरात्माऽऽत्मनां पतिः परेश्वरः ।
स्मरणीयः सदा लक्ष्मि तथाऽवतारकोटयः ॥८६॥
महाविष्णुर्वासुदेवो नारायणोऽपि विश्वसृट् ।
विष्णुः शिवः सती लक्ष्मीः राधा सूर्यश्च चन्द्रमाः ॥८७॥
स्मरणीया नरनारायणौ तत्पार्षदा अपि ।
यमो धूमोर्णया साकं गौर्या साकं जलेश्वरः ॥८८॥
ऋद्ध्या धनेश्वरश्चापि गौः सुरभिर्मरुद्गणः ।
वालखिल्याः ऋषयश्च नारदाद्या महर्षयः ॥८९॥
उर्वशी श्रीहरेः पुत्री स्मरणीयाः प्रगे सदा ।
आदित्या वसवो रुद्राः साश्विनः पितरोऽपि च ॥९०॥
धर्मः श्रुतं तपो दीक्षा भक्तिर्बृहस्पतिस्तथा ।
अश्वपट्टसरश्चापि प्रभासं गोमती तथा ॥९१॥
गंगा रेवा गण्डकी च यमी सरयूर्गौत्तमी ।
नारायणी चेन्द्रतोया ब्रह्मपुत्री हिरण्वती ॥९२॥
पुष्करं बालकृष्णं च सरश्चापि सरस्वती ।
मेरुर्हिमालयो विन्ध्य उरलो रैवतस्तथा ॥९३॥
महेन्द्रो मलयः सह्यो गन्धनमादन इत्यपि ।
समुद्राश्चापि तत्त्वानि स्मरणीयानि सर्वदा ॥९४॥
पान्तु सर्वे दिव्यदेवाः कीर्तिताऽकीर्तिता अपि ।
पान्तु सर्वे साधवश्च साध्व्यः पान्तु सदा तु माम् ॥९५॥
कम्भराश्रीः सदा पातु पातु गोपालकृष्णकः ।
पातु मां पार्वती देवी प्रज्ञा पातु च राधिका ॥९६॥
ब्रह्मप्रियाः सदा पान्तु हरिप्रियाः प्रपान्तु च ।
गर्वाश्च शुकश्चापि वल्लभश्च प्रपान्तु माम् ॥९७॥
तीव्रतो ब्राह्मणर्षिः स्वतःप्रकाश ईश्वरः ।
मशश्च गुरुर्वृद्धः सर्वे पान्तु सदा तु माम् ॥९८॥
कुंकुमवापिका देवी क्षेत्रं चाऽक्षरसंज्ञकम् ।
साधुलालायनाद्याश्च पान्तु मां परमेश्वराः ॥९९॥
इत्येवं कीर्तयानश्च मुच्यते सर्वकिल्बिषैः ।
स्तुवँश्च प्रतिनन्दँश्च मुच्यते सर्वतोभयात् ॥१००॥
ममाश्रितानां साधूनां संहितागदितात्मनाम् ।
लीलाः स्मृत्वा लभन्ते वै परं पदं ममाऽक्षरम् ॥१०१॥
मदाश्रितानां नारीणां साध्वीनां ब्रह्मयोषिताम् ।
स्मृत्वा दिव्यचमत्कारान् लभन्ते परमं पदम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने श्रीहरिसत्पुरुषधर्मसतीजनमोक्षसाधनभक्त्यादिषु प्रमाणानां गतिः साधूनां समागमो बलवत्प्रमाणं चमत्कारो बलवत्तमं चेत्यादिनिरूपणनामा षण्णवतितमोऽध्यायः ॥ ९६ ॥

श्रीनारायणीश्रीरुवाच—

किं कर्तव्यं मानवेन लोकव्यायामशालिना ।
देहयात्रां लोकयात्रां किंधर्मः सन् विभावयेत् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

द्रोहं विहाय स्तैन्यं च त्यक्त्वा व्यवायमित्यपि ।
त्यक्त्वा कायेन पापानि श्रेष्ठं सर्वं समाचरेत् ॥ २ ॥
ग्राम्यवार्ता च पारुष्यं पैशून्यं च मृषावचः ।
वाचा चत्वारि सन्त्यज्य सत्यं संव्याहरेत् सदा ॥ ३ ॥
परस्वानामनाकांक्षां सर्वदेहिषु मित्रताम् ।
कर्मफलादावास्तिक्यं मनसा धारयेत् सदा ॥ ४ ॥
वासना नोद्भावयेच्च तृष्णां त्यजेत् परिग्रहम् ।
मयदं च विहायैवाऽऽत्मना साधुं समाश्रयेत् ॥ ५ ॥
सर्वस्वार्पणमासाद्य नवधाभक्तिमाचरेत् ।
प्रेम्णा ध्यानेन मां लब्ध्वा व्रजेत्तु परमं पदम् ॥ ६ ॥
एवं सदाऽऽचरेच्छ्रेष्ठं शुभं हितं च सत्फलम् ।
अशुभं विपरीतं च नाऽऽचरेत्तु कदाचन ॥ ७ ॥
मातुः सेवां पितुः सेवां पत्युः सेवां स्त्रियास्तथा ।
गुरोः सेवां गवां सेवां कुर्याद् वृद्धस्य सेवनम् ॥ ८ ॥
देवसेवां सतां सेवां सतीसेवां समाचरेत् ।
आतिथ्यं च परोपकारादिकं चाचरेत् सदा ॥ ९ ॥
भजनं मे प्रकुर्याच्च दीनसेवां समाचरेत् ।
लोकसेवां राष्ट्रसेवां प्रजासेवां समाचरेत् ॥१०॥
तीर्थसेवां ब्रह्मसेवां मोक्षसेवां समाचरेत् ।
शृणु लक्ष्मि पुरा तीर्थे प्रसेव्य साधुमण्डलम् ॥११॥

आलम्बायनसंज्ञश्च महर्षिर्मोक्षमाप्तवान् ।
सिंहारण्ये महातीर्थे गोकर्णे ऋषिराट् स्वयम् ॥१२॥
लक्षवर्षाण्यवसत् सः साधूनां सेवया सुखी ।
दशवर्षोऽभवद् यावत्तावत् सौराष्ट्रदेशजः ॥१३॥
केशरिणीं निजां नत्वा प्रसूं प्राह स बालकः ।
मातर्मे जायते चेच्छा सतां समागमे मुहुः ॥१४॥
अनित्यः खलु संसारो मानुष्यं दुर्लभं तथा ।
हरेर्भक्तिर्दुर्लभा च दुर्लभः सत्समागमः ॥१५॥
गृहं च वाटिका पत्नी बान्धवाश्च धनान्यपि ।
गावो भृत्याश्च सुलभाः परं बन्धनकारिणः ॥१६॥
दुर्लभाः साधवो भक्तिर्नारायणाश्रयस्तथा ।
मोक्षोऽपि दुर्लभो मातः साधयेत्तान् पुमान् बुधः ॥१७॥
एवं मे वर्तते बुद्धिर्यथा शाधि करोमि तत् ।
माता प्राह सुतं धन्यो वर्तसे त्वं हि देवता ॥१८॥
आबाल्यात्ते तु संकल्पा विवेकसंभृताः सुत ! ।
धन्याऽहं जननी तेऽपि पिता धन्योऽपि ते सुत ! ॥१९॥
यत्पुत्रो भगवद्भक्तिं कर्तुमिच्छसि सेवनम् ।
सतां मोक्षमवाप्तुं च मतिस्ते धन्यपात्रिणी ॥२०॥
अद्य पुत्र समाकर्ण्य पारमेश्वरमुत्तमम् ।
विवेकं ते बहुपुण्या भवामि मोक्षकांक्षिणः ॥२१॥
संकल्पास्ते भवन्त्वेव पूर्णा भक्तौ हरेः शुभाः ।
सेवायां च सतां पुत्र नैर्विघ्न्यं ते सदाऽस्तु च ॥२२॥
बाल्यक्रीडादिकं त्यक्त्वा त्यक्त्वा युवत्वकल्पनाम् ।
रागादिकमनादृत्य मोक्षे बुद्धिस्तवाऽस्ति यत् ॥२३॥
प्रसन्नाऽहं मम पुत्र तारकोऽसि कुटुम्बिनाम् ।
मानुषं जन्म मोक्षार्थं तदन्यानि भवाब्धये ॥२४॥
भवाब्धिदानि सन्त्यज्य सफलीकुरु मानवम् ।
विनिवेद्य जनकाय लब्ध्वाऽऽज्ञां पारगामिनीम् ॥२५॥
याहि चाऽपुनरावृत्तिलाभाय सत्पदालयम् ।
यत्र ते साधवो धीरा श्रूयन्ते ब्रह्मपारगाः ॥२६॥
निर्गुणा ब्रह्मगुणका मोक्षदा याहि तत्र वै ।
स्मर मा मां प्रसूं क्वापि पितरं बान्धवान् गृहम् ॥२७॥
बन्धनानि विचित्राणि जन्मभुवं सखींस्तथा ।
मा स्मर विषयान् पुत्र मा ध्यानं देहि लौकिके ॥२८॥
मा प्रवाहे रसानां चाऽऽस्वादानां पत कर्हिचित् ।
मा प्रसंगं विषयाणां क्वापि ते पुत्र जायताम् ॥२९॥
मोक्षमार्गश्च ते पुत्र निर्विघ्नोऽन्तं प्रवर्तताम् ।
मानवस्य तु देहस्य सत्सेवायां समर्पणम् ॥३०॥

सदैव कुरु पुत्र त्वं निःश्रेयः शुभमाप्नुयाः ।
अन्ते नारायणप्राप्तिस्तेऽस्तु धाम्नि निवासिता ॥३१॥
पितरं ब्रह्मतारं ते पृष्ट्वा याहि शुभं कुरु ।
इत्युक्त्वा पुत्रमूर्धानमजिघ्रद् धन्यमानसा ॥३२॥
भोजनं कारयामास धैर्यं चोग्रं ददौ प्रसूः ।
त्यागाश्रमार्थं पुत्राय‍ाऽप्रेषयत् पितरं प्रति ॥३३॥
पुत्रो ययौ तु पितरं सुखासीनं ननाम च ।
सर्वं निवेदयामास ब्रह्मताराय योगिने ॥३४॥
ब्रह्मतारोऽपि विप्रो वै प्राह पुत्रं शुभात्मकम् ।
अहो धन्योऽस्मि सततं यद्गृहे पुत्र ईदृशः ॥३५॥
भगवद्भक्तितानश्च साधुसत्संगमानसः ।
अभोगो भोगकामादिरहितो बाल्यतः शुभः ॥३६॥
पूर्वपुण्येन वै पुत्रो जायते भक्तिमान् व्रती ।
साधुर्विरागवाँश्चापि नैष्ठिकश्चोर्ध्वशीलवान् ॥३७॥
भज पुत्र हरिं नित्यं प्रसेवय सतोजनान् ।
गोकर्णे तीर्थके गत्वाऽऽत्मानं मोक्षे निवेशय ॥३८॥
सफलं श्रेष्ठफलकं मानवं वर्ष्म संकुरु ।
पुत्रवानस्मि पुत्रेण त्वादृशेन सुयोगिना ॥३९॥
शतजन्मकृतं पुण्यं यदोदेति तदा भवेत् ।
जिज्ञासा मोक्षमार्गे वै साधुसेवापथेऽपि च ॥४०॥
बन्धनं तु दृढं सेवात्मकं कुटुम्बिबन्धुषु ।
छित्वा शूरो भवेत् कश्चिन्मोक्षसंगरसंप्लुतः ॥४१॥
कीटे पतंगके देवे दानवे मानवे खगे ।
सरीसृपे पशौ सिद्धे ऋषौ भोगाः समाः खलु ॥४२॥
त एव वारिजाः क्लेदा भौतिकास्ते प्रभोजनाः ।
इन्द्रियाणि समानानि प्राणास्तुल्याश्च वायुजाः ॥४३॥
दिवसाश्च समाना वै प्रयान्ति देहिनां तथा ।
निद्रालवो यतन्ते न मोक्षार्थं दैववर्जिताः ॥४४॥
निरयार्थास्त एवाऽत्र परत्र सन्ति निर्मिताः ।
मोक्षः पुमर्थ आत्मार्थोऽन्ये देहार्था न मुक्तये ॥४५॥
त्रिराशीन् यः समुत्तीर्योत्तरे तूर्ये विशेत्तु वै ।
स एव देव एवाऽत्र चेश्वरः सोऽपि मुक्तराट् ॥४६॥
स एव कृतकृत्योऽस्ति साधुरेवाऽस्ति सोऽपि च ।
नारायणः स एवाऽस्ति तारको गुरुरेव सः ॥४७॥
दुर्जेयं कामसंकल्पं दुर्जेयं स्त्रीधनादिकम् ।
दुर्जेयं मानसं स्वस्य दुर्जेया वासना तथा ॥४८॥
तृष्णा चापि च दुर्जेया जिता त्वया कृतात्मना ।
जितं येनाऽत्र शिश्नं च रसना येन सज्जिता ॥४९॥

मनोराजो जितो येन सर्वं जितं जितात्मना ।
प्राप्नुहि विजयं पुत्राऽसारे मायामये द्रुतम् ॥५०॥
प्राप्नुहि विजयं परे ब्रह्मण्यपि सनातने ।
श्रेयस्तेऽस्तु शुभं तेऽस्तु प्रमोदस्तेऽस्तु सूत्सवः ॥५१॥
शाश्वतानन्दमग्नश्च भव मुक्तो हरेः पदे ।
त्वां द्रक्ष्याम्यक्षरे धाम्नि युक्तमण्डलमध्यगः ॥५२॥
पत्नीयुतो हि त्वां पुत्र नारायणस्वरूपिणम् ।
इत्युक्तः कृततिलकः कृतस्नेहः सुतोऽपि च ॥५३॥
नत्वा पित्रोः पादजलं पीत्वा कृत्वा च मंगलम् ।
भ्रातृशतं तथा नत्वा ययौ गोकर्णतीर्थकम् ॥५४॥
हरे कृष्ण हरे विष्णो हरे कृष्णनरायण ।
हरे राधापते लक्ष्मीपते हरे हरे प्रभो ॥५५॥
इत्येवं भजनं कुर्वन् करतालेन वै ततः ।
पद्भ्यां ययौ जालिकातः सोमनाथं सुतीर्थकम् ॥५६॥
भवनाथं शरभं च सतीतीर्थं ततो ययौ ।
ततस्तीर्थं च गोकर्णे विष्णुं पुपूज सादरम् ॥५७॥
दिव्यकर्णाभिधं नारायणं नत्वा ततो ययौ ।
स्वर्गलक्ष्मीमहातीर्थं ततो ब्राह्मीं महानदीम् ॥५८॥
ततो गोकर्णशंभुं च ऋषिवासाँस्ततो ययौ ।
नारिकेलद्रुमाणां स वने वासं ततोऽकरोत् ॥५९॥
आराधनां हरेश्चक्रे साधुसेवां चकार सः ।
जपं चकार मे नाम्नां कृष्णनारायणप्रभो ॥६०॥
भजनं प्रचकारैवं सततं मां स्मरँस्तथा ।
सतां भिक्षान्नलाभेन देहयात्रां न्यवर्तयत् ॥६१॥
नवाऽयुतसमाश्चासीद्भिक्षान्नपरिपोषकः ।
ततः सहस्रवर्षाणि कन्दमूलाऽशनोऽभवत् ॥६२॥
पञ्चसाहस्रवर्षाणि ततः शुष्कदलाशनः ।
अथाऽभवत्ततो वाय्वाहारोऽतिष्ठत् समाधिगः ॥६३॥
आत्मानमात्मनि ध्यायन् युयुजे परमात्मना ।
लक्षवर्षे प्रयाते तु सम्पूर्णे चाम्बरात्ततः ॥६४॥
विष्णोर्विमानमायातं पार्षदैर्दिव्यशोभनैः ।
सहितं तद्विलोक्याऽयमालम्ब्यायनसाधुराट् ॥६५॥
विहाय भौतिकं तूर्णं दिव्यदेहोऽभवत्तदा ।
चतुर्भुजः शंखचक्रगदापद्मादिचिह्नकः ॥६६॥
विष्णोः पार्षदवर्यैश्च नत्वा ऋषिगणान् मुनिः ।
ययौ धाम हरेकृष्ण वदन् विस्मापयन् जनान् ॥६७॥
अथ प्रयाणे ऋषयश्चाऽस्तुवन् तं मुनीश्वरम् ।
अस्मान्नय महाभक्त धाम वैकुण्ठमुत्तमम् ॥६८॥
स चाह ऋषयः सर्वे सज्जा भवन्तु सत्वरम् ।
गत्वा वैकुण्ठमेवाऽहं चागच्छामि विमानकैः ॥६९॥
सहितो भवतो नेतुं पृष्ट्वा विष्णुं नरायणम् ।
ओमित्युक्तश्च ऋषिभिर्ययौ तूर्णं हरेर्गृहम् ॥७०॥
पार्षदैः सत्कृतश्चाऽयं विमानादवतारितः ।
वैकुण्ठे दिव्यसौधाग्ये न्यविशत् सौधमुत्तमम् ॥७१॥
अदृष्ट्वा श्रीहरिं सौधे तूर्णं विनिर्ययौ बहिः ।
मार्गयामास तं सौधं यत्राऽऽस्ते श्रीनरायणः ॥७२॥
गत्वा कृत्वा दण्डवच्च पूजां चकार वै हृदा ।
जय नारायणकृष्णेत्युवाचाऽपि पुनःपुनः ॥७३॥
नेत्राश्रूणि मुमोचाऽपि गद्गदश्चाऽभवत्क्षणम् ।
पपात पादयोर्विष्णोः पपौ पादाऽमृतं ततः ॥७४॥
स्वागतेन हरिणाऽसौ पृष्टो जगाद हृद्गतम् ।
कृपया ते प्रभो प्राप्तश्चरणौ शाश्वतौ मुदा ॥७५॥
गोकर्णे निवसन्तश्च मुनयो ये तपोधनाः ।
प्रयाणकाले मामाहुः सहयानाय धाम ते ॥७६॥
मया त्वभिहितं चास्ते गत्वा त्वायामि सर्वथा ।
आज्ञां हरेः समादाय सज्जा भवन्तु सर्वशः ॥७७॥
इत्युक्तास्ते प्रतीक्षन्ते वैकुण्ठागमनं प्रति ।
यद्याज्ञा ते भवेद् यामि चानयामि तवाऽन्तिकम् ॥७८॥
नारायणस्तदा प्राह योग्यं भक्त त्वया कृतम् ।
परं निबोध मे किञ्चित् सारात् सारतरं परम् ॥७९॥
मम भक्तिं विना स्यान्न वासो वैकुण्ठके मम ।
गोकर्णे सन्ति ऋषयस्तपोद्रव्यास्तपःप्रियाः ॥८०॥
मनोनिग्रहवन्तश्चेन्द्रियनिग्रहिणस्तथा ।
आत्ममात्ररता नित्यं ज्ञानमात्रपरायणाः ॥८१॥
व्रतमात्रपराश्चापि बहवो रागवर्जिताः ।
योगक्रियापराश्चापि शुष्कतपसिवर्तिनः ॥८२॥
मम भक्तिविहीनास्ते विना वै मदुपासनम् ।
कथमर्हा भवेयुश्चागमार्थं मम धाम ते ॥८३॥
अभक्तानां न वैकुण्ठं यद्यपि तपतां सदा ।
कर्मठानां न वैकुण्ठं ह्यनाराधनवेदिनाम् ॥८४॥
मम धामाऽऽगमे हेतुः स्नेहभक्तिः सदा मम ।
मम भक्तस्य वै सेवा मयि चात्मनिवेदिता ॥८५॥
ध्यानं मे भजनं चापि कीर्तनं सततं मम ।
तपसां च व्रतानां च दानानां मयि चाऽर्पणम् ॥८६॥
सर्वकर्मार्पणं चापि दीक्षाया ग्रहणं मम ।
मम मन्त्रस्य दिव्यस्य ग्रहणं कारणं तथा ॥८७॥

ममाऽऽराधनमेवापि वैकुण्ठागमने यतः ।
अपक्वा ये योगिनस्ते तपन्ति चिरकालिनः ॥८८॥
दशलक्षसमाः केचित् केचिल्लक्षसमास्तथा ।
अन्ये बहुयुगाः सन्ति सहस्रशश्चिरायुषः ॥८९॥
याहि तेभ्यः प्रदेहीमं मन्त्रं मोक्षप्रदं मम ।
दीक्षां दत्वा नामसत्रं प्रवर्तय महामखम् ॥९०॥
'अनादिश्रीकृष्णनारायणो मे शरणं पतिः' ।
मन्त्रमेतं प्रदत्वाऽथ दीक्षां देहि प्रसात्त्विकीम् ॥९१॥
कण्ठे तु तौलसीं कण्ठीं मालां च जपमालिकाम् ।
तिलकं चन्द्रकं चापि चक्राद्यंकनमित्यपि ॥९२॥
'अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ।
राधालक्ष्मीपते कृष्णनारायण विभो प्रभो' ॥९३॥
एवं सततं साधूनां कीर्तनं सम्प्रकारय ।
दिवानिशं महायज्ञं तत्र तिष्ठन्तु दीक्षिताः ॥९४॥
येषामाराधना पूर्णा भक्तिः पूर्णा भविष्यति ।
तानहं नित्यदा नैजविमानेन सुवर्चसा ॥९५॥
समानेष्ये हि वैकुण्ठं याहि सत्रं प्रवर्तय ।
इत्युक्तो भक्तराट् नत्वाऽऽलम्बायनो हि पार्षदः ॥९६॥
आययौ दिव्यदेहेन विमानेन पुरालयम् ।
गोकर्णे तेजसा तूर्णं प्रकाशितं तदाऽभवत् ॥९७॥
दुद्रुवुः संभ्रमयुक्ताः ऋषयस्तं तु पार्षदम् ।
सज्जीभूतान् सतो नत्वाऽऽदिदेश विष्णुभाषितम् ॥९८॥
नामसंकीर्तनसत्रं कुर्वन्त्वत्र सुदीक्षिताः ।
ऋषयोऽपि तथा चक्रुर्वैकुण्ठलब्धये शुभाः ॥९९॥
विविदुस्ते च माहात्म्यं भक्तेः श्रेष्ठं तपोबलात् ।
भक्ता भूत्वा दीक्षिताश्च लब्ध्वा ते जपमालिकाम् ॥१००॥
सवाद्यकीर्तनं चक्रुर्दिवानिशं हि मुक्तये ।
लक्षशो मुनयश्चापि प्रजालोकास्तथाऽपरे ॥१०१॥
श्रुत्वा तत्कीर्तनं तत्र मिलित्वा भजनं व्यधुः ।
तत्तीर्थे वैकुण्ठसत्रनाम्ना ख्यातिं गतं ततः ॥१०२॥
मासान्ते ये भक्तिपक्वा जातास्तेषां कृते हरिः ।
आययौ स्वविमानेन लक्ष्मीश्रीसहितः प्रभुः ॥१०३॥
निन्ये सहस्रसाधूँश्च वैकुण्ठे परमेश्वरः ।
एवं मासान्तरान्ते च त्रिमासान्तेऽपि कौंश्चन ॥१०४॥
चतुष्पंचादिमासान्ते निन्ये लक्षजनान् हरिः ।
पक्वाः पक्वाः प्रभूत्वा च ऋषयो यान्ति धामे ते ॥१०५॥
गोकर्णस्थाः साधवस्ते वर्षान्ते सर्वशो गताः ।
वैकुण्ठं परमं धाम महाश्चर्यमभूद्धि तत् ॥१०६॥
नामसत्रं समारभ्य देवाद्या मानवास्ततः ।
गोकर्णे तीर्थके यान्ति वैकुण्ठं परमेश्वरम् ॥१०७॥
इत्येवं कथितं लक्ष्मि भक्तिमाहात्म्यमुत्तमम् ।
साधोः संगेन भगवान् कारयित्वा तु कीर्तनम् ॥१०८॥
पावयित्वा तापसाँश्च निन्ये धामोत्तमं निजम् ।
वर्षान्ते साधुरेवाऽयं नामसत्रं समाप्य च ॥१०९॥
ययौ धाम हरेर्दिव्यदेहो दिव्यविमानगः ।
कोटिशः साधवस्तत्र सिंहाऽरण्ये ततोऽभवन् ॥११०॥
विष्णुधामसमं धाम गोकर्णं तदभून्महत् ।
एवं लक्ष्मि सतां सेवा फलत्येव चिरेण ह ॥१११॥
सत्संगोऽपि फलत्येव चिरेणाऽपि नृजन्मनाम् ।
तस्मात् सतां सुसत्संगः कर्तव्यः फलदो भवेत् ॥११२॥
पठनाच्छ्रवणादस्य स्मरणान्मुक्तिदोऽपि च ।
सत्संगयोगो भवति लक्ष्मि शाश्वतमोक्षदः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने लोकव्यायामशालिभिरपि सत्संगेन मुक्तिर्लभ्यते तापसैरपि तथेत्यर्थे आलम्बायनसाधोः संगेन लक्षाधिलक्षमानवानां गोकर्णे मुक्तिप्राप्तिरित्यादिनिरूपणनामा सप्तनवतितमोऽध्यायः ॥ ९७ ॥

श्रीनारायणीश्रीरुवाच—

महत्यापद्गतस्यापि यथोद्धरोद्धृतं भवेत् ।
तथा मे दर्शय कृष्णकान्त लोकहिताय वै ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

प्रणमामि सदा सद्भ्यो येषां ब्रह्मपरं धनम् ।
येषां करतले स्वर्गो मोक्षोऽपि वचने स्थितः ॥ २ ॥
ये बाला वा युवानो वा वृद्धा वा साधवोऽमलाः ।
उद्वहन्ति हरेर्भक्तेर्धुरं नमामि तानहम् ॥ ३ ॥
ब्रह्मविद्यासु निष्णाता विनीता वशमानसाः ।
ब्रह्मभाषाः श्रुतवन्तो व्रतिनः साधुभूषणाः ॥ ४ ॥
अक्षरब्रह्मरूपाणां संसत्सु ब्रह्मवादिनः ।
मांगल्यरूपा रुचिरा ये तान्नमामि सज्जनान् ॥ ५ ॥
ये तेषामपि संसेव्या ब्रह्मसदसि चाग्रगाः ।
विज्ञानध्यानसम्पन्नास्तेभ्योऽधिस्पृहयाम्यहम् ॥ ६ ॥
सत्सु शुश्रूषमाणेषु प्रेत्य चेह सुखं महत् ।
सर्वापदां विनाशश्च त उद्धारकराः शुभाः ॥ ७ ॥

सुसंस्कृतानि चान्नानि शीतानि सलिलानि च ।
रम्याणि चाम्बराण्येभ्यो दातव्यानि सदा रमे ! ॥ ८ ॥
धन्यः स्याद् यः साधुकुले जन्म लभेत पुण्यवान् ।
भवेद् यश्चोत्तरे काले कोटिदेहिप्रमोक्षदः ॥ ९ ॥
न मे त्वत्तः प्रियतरा लक्ष्मि काऽपि भुवस्तले ।
ब्रह्मप्रियाः प्रियाः सर्वाः सन्त प्रियतमा मम ॥१०॥
न मे पितरौ कमले तथा प्रियतरौ त्विह ।
यथा मे साधवः शान्ताः प्रियोत्तमोत्तमाः सदा ॥११॥
महत्त्यापद्गतस्याऽपि साधवोऽत्र शुभावहाः ।
भजनीयाः पूजनीयाः सुराणामपि देवताः ॥१२॥
सात्त्वतश्चेति मां लोकाः प्राहुस्तुष्यामि तेन च ।
सतां योगेन साध्वीशं मामाहुर्मक्तिकारिणः ॥१३॥
यथा भर्त्राश्रयो धर्मो नारीणां विद्यते तथा ।
सर्वेषां तु सदाचारः साध्वाश्रयो वृषो मतः ॥१४॥
विप्रक्षत्रविशां चापि साधवो गुरवो मताः ।
देववत् कृष्णवत् पूज्याः सेवनीया हि साधवः ॥१५॥
अग्निवत् सेवनीयास्ते ब्राह्मणैः साधवोऽमलाः ।
साधूनां सेवनैस्तिष्ठेद् ब्राह्मण्यं सर्वपावनम् ॥१६॥
पत्यभावे यथा नारी देवरं कुरुते पतिम् ।
प्रजास्तथा साध्वभावे प्रतिमां कुरुते प्रभुम् ॥१७॥
ऋजून् सतः सत्यशीलान् सर्वप्राणिहिते रतान् ।
सुहृदः सर्वजीवानां साधून् परिचरेत् सदा ॥१८॥
राजा स्वजनकं यद्वद् रक्षेत् साधुजनं तथा ।
आश्रमे चान्ववेक्षेत किंस्विदस्तीति जीवनम् ॥१९॥
ब्रह्मिष्ठान् ब्रह्म च तथा सर्वथा पालयेद् धनी ।
भिक्षातृप्तसतामाशीर्वादानासादयेद्धनी ॥२०॥
प्रतिश्रुत्य न दातव्यं तदेव नरकं महत् ।
आशाहन्तुर्हि यत्पापं सर्वसुकृतनाशकम् ॥२१॥
हुतं दत्तं तपस्तप्तं चाशाहन्तुर्विहन्यते ।
आशादानं त्वश्वमेधयज्ञपुण्यं करोति वै ॥२२॥
आशापूर्तिर्विष्णुयागसहस्रफलदा भवेत् ।
तस्मादाशां प्रदायैतां पूरयेच्च यथाबलम् ॥२३॥
एकदा श्वपचगृध्रौ श्मशाने मिलितौ तदा ।
गृध्रं परासुं खादन्तं पप्रच्छ श्वपचः शनैः ॥२४॥
किं त्वया वै कृतं पापं यदश्नासि प्रपूतिकम् ।
कुत्सितं मृतकं चातिदुर्गन्धं क्लेदितं त्विह ॥२५॥
गृध्रः प्राह पुरा चाऽहमभूवं लोभवान् धनी ।
प्रतिश्रुत्याऽपि च ददौ नैव वाऽपूर्णमेव वा ।
तेन पापेन संजातो गृध्रश्चात्र श्मशानगः ॥२६॥
तस्मादेवं चातिदुष्टं भक्षयामि बुभुक्षितः ।
परं ते श्वापचं जन्म कथं जातं नु मे वद ॥२७॥
श्वपचः प्राह पूर्वेऽहं धनधान्ययुतोऽपि सन् ।
साधूनां निन्दकश्चाऽऽसं ब्राह्मणोऽपि घृणी सति ! ॥२८॥
दृष्ट्वा साधून् धिक्करोमि तिरस्करोमि नर्म च ।
न ददामि क्वचिद् भिक्षां वारयामि परं ह्यपि ॥२९॥
तेन पापेन सर्वस्वं गृहदारसुतादिकम् ।
नष्टं वह्निप्रकोपेन दग्धं दग्धोऽहमित्यतः ॥३०॥
यमलोकं गतस्तत्र याम्यैरन्धतमिस्रके ।
निक्षिप्तौ बहुवर्षाणि निष्कास्य नेत्रजिह्विके ॥३१॥
अथाऽहमभवं वागुरिका विष्टामुखी ततः ।
सर्पोऽहमभवं पश्चाद् घूकस्ततोऽथ गोधिका ॥३२॥
ततोऽस्मि जातश्चाण्डालः साधूनां निन्दनात् खलु ।
तस्मान्न साधवः क्वापि तिरस्कार्या हरेः प्रियाः ॥३३॥
भिक्षा नैषां वारणीया दानं वार्यं न वै क्वचित् ।
तेषां वस्तु न हर्तव्यं देयं तेषां तु तुष्टये ॥३४॥
ब्रह्मिष्ठैः साधुभिः साकं साध्वीभिश्च तथा जनैः ।
समं विवादो मोक्तव्यो दातव्यं च प्रतिश्रुतम् ॥३५॥
न कार्यं निन्दनं तेषां श्रवणीयं न कर्हिचित् ।
विप्रत्वस्य न वै गर्वः कर्तव्यः सन्निधौ सताम् ॥३६॥
विप्रा ये गृहिणस्ते तु स्त्रीश्मशानप्रसेविनः ।
साधुभ्यो निम्नमार्गस्था विप्रैः पूज्या हि साधवः ॥३७॥
ये मूत्रक्लिन्नसंसक्तास्ते वै निरयगामिनः ।
तानुद्धर्तुं समर्थास्ते साधवः शीलयोगिनः ॥३८॥
न स्तेनस्तारयेत् स्तेनमस्तेनो यः स तारयेत् ।
न कामी तारयेत् कामादकामस्तारयेद् रतम् ॥३९॥
न हर्तव्यं साधुवस्तु क्षन्तव्यं तेषु नित्यशः ।
बालाश्च नाऽवमन्तव्याः कृपणा वाऽप्यशक्तयः ॥४०॥
आशा कार्या न सततं साधुभ्यः स्वार्थसाधिका ।
नैव साधून् नियुञ्जीत भृत्यवद् भोजनाप्तये ॥४१॥
जलाप्तये तथा खट्वागेन्दुकाद्युपलब्धये ।
आसनार्थं च वासार्थं चाश्रयार्थं च मन्दिरे ॥४२॥
नाऽऽयासे योजयेत् साधुं यतः पुण्यं विनश्यति ।
साधुवासे गृहस्थैर्वै वस्तव्यं नहि कर्हिचित् ॥४३॥
सत्संगार्थं प्रगन्तव्यं क्लेशार्थं नहि कर्हिचित् ।
निद्रार्थं मलमूत्रादित्यागार्थं वा सदाश्रमे ॥४४॥
गन्तव्यं नैव नैजीयांऽगिककार्यनिवर्त्तये ।
साधूनां शान्तिकाले वा विक्षेपश्चलता तथा ॥४५॥

अयोग्याचार एवापि कर्तव्यो न कदाचन ।
साधूनां सन्निधावुच्चासने स्थेयं न कर्हिचित् ॥४६॥
विवादो नैव कर्तव्यो वाचा धनेन कर्मणा ।
ज्ञानेन स्वस्य निर्वाहार्थं वा बलेन लोभिना ॥४७॥
दुष्टमानुषसंगेन वादः कार्यो न सज्जनैः ।
तद्धनाशा न कर्तव्या वशे कार्या न साधवः ॥४८॥
निरीक्षणं हि साधूनां कार्यं न दैहिकं क्वचित् ।
रागद्वेषस्वभावाः स्वाः प्रयोक्तव्या न साधुषु ॥४९॥
साध्वाश्रमे ग्राम्यकथाः क्लेशकथा मृषाकथाः ।
भोगकथा न कर्तव्या नोच्चार्यं चाऽपमानकृत् ॥५०॥
योजनीयो न गर्वश्च बलं सत्ता न साधुषु ।
निम्नीकार्या न वै सन्तो यतः पुण्यं विनश्यति ॥५१॥
अहं जानामि साधुः किं जानतीत्येव गर्विता ।
कर्तव्या नैव वै क्वापि गर्वः पतनकारणम् ॥५२॥
साधुं दृष्ट्वा प्रणमेच्चाऽनमनं पुण्यघातकम् ।
स्वस्य कामादिकान् दोषान् नारीदोषान् निजात्मकान् ॥५३॥
स्वस्वभावस्य कालुष्यं न प्रयुञ्जीत साधुषु ।
साध्वाश्रमे प्रगन्तव्यं गुणलाभार्थमेव ह ॥५४॥
बहवः सन्ति लोकेऽत्र खलेश्वरा जना अपि ।
स्वस्य विषयतृप्त्यर्थे स्पर्शतृप्त्यर्थमित्यपि ॥५५॥
दृष्टितृप्त्यर्थमेवाऽपि यान्ति स्त्रीसंघभूस्थलीम् ।
मन्दिरे चोत्सवे तीर्थे यत्र स्त्रीजनमर्दनम् ॥५६॥
सम्मर्दे सम्प्रयान्त्येव लीलाख्यानकथादिषु ।
दोषान् गृह्णन्ति तत्रैव साधूनां योषितां तथा ॥५७॥
तेन पापेन जात्यन्धाः कुष्ठिनश्च नपुंसकाः ।
जायन्ते दीर्घरोगाश्च दरिद्राः कृपणास्तथा ॥५८॥
नार्योऽपि च तथाचेष्टा जायन्ते रोगसंभृताः ।
अपत्यादिविहीनाश्च धनधान्यादिवर्जिताः ॥५९॥
तस्माद् दोषान्न गृह्णीयात् साध्वीनां च सतामपि ।
गुणानेव हि गृह्णीयात् सुखदान् पुण्यदान् शुभान् ॥६०॥
यथेक्षुदण्डतः सूक्ष्मकण्टकाँश्चमरान् दलान् ।
त्वक्कूर्चान् संविहायैव रसं गृह्णन्ति मानवाः ॥६१॥
यथा भोज्यगतान् शाके क्षिप्तान् दग्धमरीचकान् ।
पत्रादिकान् परित्यज्य शाकमात्रं प्रभुञ्जते ॥६२॥
यथा फलगतान् बीजत्वगादीन् संविहाय वै ।
भुञ्जते गर्भमात्रं वै रसान् चूषन्ति देहिनः ॥६३॥
यथा वृक्षगतान् दोषाँस्त्यक्त्वा गृह्णन्ति तत्फलम् ।
यथा वल्लीगतान् दोषाँस्त्यक्त्वा गृह्णन्ति पुष्पकम् ॥६४॥
तथा साधुगताँस्त्याज्याँस्त्यक्त्वाऽर्जयेत तद्गुणान् ।
एवं वै वर्तमानस्य पुण्यप्राप्तिः पदे पदे ॥६५॥
आयुर्विद्यायशोवृद्धिर्धनधान्यर्द्धिसम्पदाम् ।
अनन्तत्वं प्रजायेत साधुसद्गुणसंजुषाम् ॥६६॥
साधवो हि यदा तुष्टाः प्रतिनन्दन्ति सेवकम् ।
तद्गृहं संभवत्येव सर्वैरत्नोपबृंहितम् ॥६७॥
पुत्रान् पौत्रान् पशूँश्चापि बान्धवाँश्च कुटुम्बिनः ।
ग्रामं जनपदं चापि साधुतुष्टिः प्रपोषयेत् ॥६८॥
साधुजनस्य दत्तेन ध्रुवं स्वर्गो ह्यनुत्तमः ।
मोक्षश्चाऽर्जयितुं शक्यः साधुसेवा परा क्रिया ॥६९॥
सद्भयो दत्तेन जीवन्ति देवताः पितरोऽपि च ।
मुक्तास्तुष्यन्ति भगवान् भुंक्ते साधुजनेषु वै ॥७०॥
तस्माद् दानानि देयानि साधुभ्यः प्रविजानता ।
तीर्थं सुदिव्यमेवाऽऽस्ते साधुमूर्तिः सुचेतना ॥७१॥
अधमोद्धारकाः सन्ति साधवो मम मूर्तयः ।
अनाथानां सनाथास्ते दुःखिनां दुःखहारकाः ॥७२॥
पापानां क्षालकाश्चापराधिनां दोषनाशकाः ।
तिरस्कृतानां शरणप्रदातारो हि साधवः ॥७३॥
शृणु पूर्वकथां वच्मि साधुभिस्तारितो द्विजः ।
हिमालयेऽभवद् रम्यमाश्रममृषिसेवितम् ॥७४॥
ऋषिधामाश्रमं नाम सिद्धर्षिविप्रशोभितम् ।
व्रतिभिस्तापसैश्चापि नियमिभिश्च दीक्षितैः ॥७५॥
कृतात्मभिस्तथा साधुयतिभिः सन्निवेशितम् ।
ऋषेस्तु दीर्घतपसो द्विजश्रेष्ठस्य योगिनः ॥ ॥७६॥
तत्र कश्चित् समायातः शबरो वनजीवनः ।
ददर्शर्षिगणान् देवकल्पाँस्तपोरतान् शुभान् ॥७७॥
निश्चिकाय तपस्तप्तुं पप्रच्छ दीर्घतापसम् ।
धर्मं मे भगवन् वक्तुं प्रव्राजयितुमर्हसि ॥७८॥
शूद्रोऽहं कर्तुमिच्छामि शुश्रूषां ते प्रसीद मे ।
दीर्घतपास्तदोवाच शूद्रस्त्वं वर्तसे यतः ॥७९॥
प्रव्राजयितुं शक्यं न ह्यधिकारविवर्जनात् ।
आस्यतां चैवमेवाऽत्र शुश्रूषां कुरु रोचते ॥८०॥
शुश्रूषया पराँल्लोकानवाप्स्यसि वनेचर ।
इत्युक्तः स शबरोऽपि मुमुदे चाश्रमान्तिके ॥८१॥
वृक्षाऽधोभागके नैजां स्थलीं कृत्वा ह्युवास ह ।
भोजनं फलपुष्पादि चक्रे शुश्रूषणमृषेः ॥८२॥
एकदा स्वस्वभावेन वन्यं शशं दधार सः ।
मारयित्वाऽदनं चक्रे ऋषेराश्रमसन्निधौ ॥८३॥

अथैनं हिंसकं शूद्रं तत्यजुः ऋषयश्च ते।
शेपुश्च राक्षसो भूत्वा भव दुःखी वनान्तरे ॥८४॥
तूर्णं स राक्षसो भूत्वा विकृतो व्यचरद्वने।
क्षुधातृषादिदुःखाढ्यो ययौ गंगातटे ततः ॥८५॥
तत्राऽनेन तपोमग्नः साधुर्भक्तिपरायणः।
नाम्ना नारायणमुनिर्दृष्टो वैष्णवसत्तमः ॥८६॥
साधुं भक्षयितुं तूर्णं राक्षसः प्रययौ तटम्।
साधुर्दृष्ट्वा राक्षसं तं दृष्टया व्यलोकयत्तथा ॥८७॥
जलं चिक्षेप शिरसि राक्षसस्य च वर्ष्मणि।
पवित्रो भव धर्मात्मा दुःखाद् विरहितो भव ॥८८॥
शापमुक्तो भवाऽत्रैव साधोर्मे सन्निधौ ह्यघिन्।
इत्येवमुक्तः शबरो जलस्पर्शेन सत्वरम् ॥८९॥
विहाय राक्षसं भावं दिव्यो बभूव मानवः।
अथ चोद्धारकं साधुं नारायणमुनिं ततः ॥९०॥
सिषेवे परया प्रीत्या पावनीं लोकपावनः।
शूद्रोऽपि साधुयोगेन भक्तिमानभवत्ततः ॥९१॥
साधोराज्ञां गृहीत्वैव ययौ वनान्तरं प्रति।
भेजे नारायणं नित्यं तपश्चचार दारुणम् ॥९२॥
शबरः स तु देहान्ते राज्यं श्रेष्ठमवासवान्।
उज्जयिनीनृपो वीरविक्रमो ह्यभवद्धि सः ॥९३॥
भुक्त्वा भोगान् हरेश्चापि कृत्वा भक्तिं तथोत्तमाम्।
ययौ धामाऽक्षरं मुक्तो बभूव सत्प्रसंगतः ॥९४॥
तत्कुटुम्बं साधुसेवां कृत्वा ययौ परं पदम्।
तस्माद् गृध्र सदा सेव्याः साधवः साधुभूषणाः ॥९५॥
आगच्छाऽस्मत्समीपेऽस्ति साधुः कृष्णस्तवाऽभिधः।
तमाश्रित्य भविष्यावो धूतपापौ हि पावनौ ॥९६॥
इत्युक्त्वा लक्ष्मि ययतुः कृष्णस्तवाभिधं प्रति।
नेमतुस्तुष्टुवतुश्चाऽर्थयामासतुरेव च ॥९७॥
मोक्षणं चाथ साधुस्तौ पाययामास वारि च।
प्रसादं भोजयामास कृतवान् पावनौ द्रुतम् ॥९८॥
पापं प्रक्षालयामास श्रावयामास कीर्तनम्।
नाम नारायणं चापि ददौ तूर्णं हि तावुभौ ॥९९॥
भौतिकौ तु तदा देहौ त्यक्त्वा साधुप्रतापतः।
ययतुस्तौ पापहीनौ स्वर्गे देवौ बभूवतुः ॥१००॥
साध्वाश्रयेण वै स्वर्गं भुक्त्वा प्रसादसत्फलम्।
कालेन तौ ययतुश्च वैकुण्ठं परमात्मनः ॥१०१॥
लक्ष्मीत्येवं साधुसंगो लवमात्रं कृतोऽपि वै।
पावयत्येव पुण्यानां पुञ्जं ददाति सत्वरम् ॥१०२॥
राज्यं स्वर्गं ददात्येव मोक्षणं च ददात्यपि।
प्रयच्छति महानन्दं सत्संगः कृष्णयोगिनाम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने आपद्गतस्याऽपि साधुसंगतिः कल्याणदेत्यर्थे गृध्रश्वपचयोः शबरस्य च स्वर्गाद्युत्तरं मोक्षणं चेत्यादिनिरूपणनामाऽष्टनवतितमोऽध्यायः ॥ ९८ ॥

श्रीनारायणीश्रीरुवाच—

सत्यं तद्भगवन् कृष्णनारायण जगत्प्रभो।
यत्र ते साधवः सन्ति तत्र पुमर्थसिद्धयः ॥ १ ॥
ये च सन्तो निर्मला मे पत्युः प्रियतमा जनाः।
तेषां पादरजश्चाऽहं वहामि शिरसा सदा ॥ २ ॥
तेषामाज्ञामर्थकरीं शुभां वाऽप्यथवाऽशुभाम्।
वहामि सर्वदानेन निःशंका तव कारणात् ॥ ३ ॥
सतां वाणी सत्यपूता यादृशी तादृशी ह्यपि।
सतां वाणी परो वेदो भवान् यत्र प्रतिष्ठति ॥ ४ ॥
मौनव्रतं सदा चास्ते सतां वैखर्यनावृतम्।
सन्तो विनाऽर्थं परमं वदन्त्येव न लौकिकम् ॥ ५ ॥
मुखमस्तीति वक्तव्यं निसर्गोऽयं न वै सताम्।
सूक्ष्मा गतिर्हि सत्यस्य दुर्ज्ञेया ह्यकृतात्मभिः ॥ ६ ॥
मूढरुच्यनुसारेण वक्तव्यं न सता क्वचित्।
वचने दोषसंक्रान्तिस्ततो मौनं वरं सताम् ॥ ७ ॥
मानवास्तादृशा लोके जायन्ते च भवन्ति च।
गुरुश्चाप्युपदेष्टाऽपि स्वमतं चेद्वदेद् यदि ॥ ८ ॥
तदा स गुरुराट् श्रेष्ठोऽन्यथाऽज्ञः परिकीर्त्यते।
एतादृशा भवन्त्येव शिष्या घोरतमोवृताः ॥ ९ ॥
स्वमतमनुद्रेष्टा वै गुरुर्गुरुर्न चान्यथा।
तस्मात्ते नारकाश्चात्र परत्रापि भवन्ति हि ॥१०॥
अतः शिष्याभिरेवाऽत्र शिष्यैर्वा यन्मतं मतम्।
तन्मतं चेद् विरुद्धं वै शास्त्रधर्मादिबाधकम् ॥११॥
तदा न गुरुणा ग्राह्यं त्याज्याः शिष्यास्तु तादृशाः।
प्रायशो बहवो लोके मृषापण्डाभिमानिनः ॥१२॥
विज्ञंमन्या भवन्त्येव शिष्या गुरुनियामकाः।
अपथे गम्यमानास्ते पतन्त्येव ह्यधो ह्यधः ॥१३॥
असद्वाणी महापापा न वक्तव्या कदाचन।
तत्र सद्भिर्न वक्तव्या कस्यचित् किञ्चिदग्रतः ॥१४॥
वरां मौनेन मुनयो दीक्षां कुर्वन्ति संयमे।
दुरुक्तस्य भयात् कृष्ण नाऽऽभाषन्ते वृथा मृषा ॥१५॥

धार्मिका गुणसम्पन्नाः सत्यभक्तिसमन्विताः ।
सत्योपदेशैर्मुनयः प्रापयन्ति परं पदम् ॥१६॥
दुष्कृतं दारयन्त्येव श्रोतॄणां ब्रह्मदानतः ।
आनन्दाऽब्धिं प्रापयन्ति परमेशप्रसंगदाः ॥१७॥
अपात्रं शरणं यायात् परीक्षणीयं सर्वथा ।
उपदेशो न कर्तव्यः सहसा स्थितिमन्तरा ॥१८॥
अपात्रे चोपदेशात् तत्पापं संक्रमते गुरौ ।
विमृश्य ज्ञानदानं वै कर्तव्यं सत्यसंजुषा ॥१९॥
अनृते चाऽप्यपात्रे चोपदेशः स्वं हिनस्ति हि ।
तादृग्बोधः प्रदातव्यो येन सत्यं प्ररक्षयेत् ॥२०॥
येन सनातनो देवो नारायणः प्रसाद्यते ।
एतादृशाः सत्यशीलाः सत्यनारायणाश्रिताः ॥२१॥
सत्यसनातनभक्ताः साधवो गुरवो मम ।
वसामि भगवँस्तत्र यत्र मे गुरवोऽमलाः ॥२२॥
पूज्यन्ते भवता साकं सुभगा ब्रह्मवेदिनः ।
प्रगल्भा भक्तिदक्षाश्च श्रीहरिव्यवसायिनः ॥२३॥
देवभक्ताः कृतज्ञाश्च जितेन्द्रियाश्च सात्त्विकाः ।
पुरुषार्थपरा दिव्याः सन्तो यत्र वसाम्यहम् ॥२४॥
यत्र कान्तो मम नारायणः श्रीपुरुषोत्तमः ।
भवानास्ते निवसामि तत्र सर्वस्वदानतः ॥२५॥
न वसाम्यपुमर्थाढ्ये नास्तिके कृतघातिनि ।
धर्मसांकरिके नैव भिन्नसेतौ वसामि न ॥२६॥
नृशंसे निन्दके दुष्टे चौरे गुरुध्वसूयिनि ।
साधूनां द्वेषिणि दृप्ते नैव वसामि सर्वथा ॥२७॥
अल्पतेजसि सत्त्वेन विहीने बलवर्जिते ।
क्लिष्टे क्रुद्धे न तिष्ठामि चाऽस्थिरे स्थितिवर्जिते ॥२८॥
अप्रार्थिनि स्वभावेन विहतेऽल्पप्रतोषिणि ।
बहुव्यये व्यसनिनि नाऽहं वसामि सर्वदा ॥२९॥
धर्माढ्ये धर्मविदुषि दान्ते वृद्धोपसेविनि ।
क्षान्तिपरे कृतकृत्ये निवसामि महोत्सवे ॥३०॥
सत्यस्वभावासु दान्तास्वबलासु वसामि च ।
आर्जवाढ्यासु साधूनां सेविकासु वसामि च ॥३१॥
देहद्विजगुरुस्वामिपूजिकासु वसामि च ।
मलिनां चाऽस्थिरां नैजकार्यालसां विरोधिनीम् ॥३२॥
प्रतिकूलस्थितिं भर्तुः परपक्षसहायिनीम् ।
अलज्जां चाऽसहमानां वर्जयामि सदा त्वहम् ॥३३॥
पापामसाधुसेवाढ्यां क्रुद्धां धैर्यविवर्जिताम् ।
शठां कलहमूलां च बहुनिद्रां त्यजामि च ॥३४॥
सत्यव्रतासु दिव्यासु गुणसौभाग्यदासु च ।
पतिव्रतासु शीलासु वसामि भूषितासु च ॥३५॥
यानेषु साधुयुक्तेषु भक्तासु कन्यकासु च ।
यज्ञेषु साधुयुक्तेषु मन्दिरे च वसाम्यहम् ॥३६॥
पुष्पेषु सत्यगात्रेषु गजेषु मन्दुरासु च ।
गोष्ठेषु साधुपादेषु पंकजेषु वसाम्यहम् ॥३७॥
नदीयुक्तप्रदेशेषु तपस्विसिद्धयोगिषु ।
वृषभे गोमण्डले च नरेन्द्रे सज्जने तथा ॥३८॥
उच्चासने च हव्यादे सुरगोब्रह्मपूजके ।
आतिथ्यशोभने सौधे नित्यं वसामि माधव ॥३९॥
अनादिश्रीकृष्णनारायणे साधौ च तेऽनुगे ।
साध्व्यां भक्तजने चापि वसामि नित्यमूर्जिता ॥४०॥
प्रसन्नाश्चाऽदृश्यभावा यत्र वसामि केशव ! ।
त्वदाज्ञया वर्धयामि धर्मयशोऽर्थकामनैः ॥४१॥
भगवन् मे रहस्यं तु कथयामीह सर्वथा ।
साधवो यत्र सेव्यन्ते तत्र वसामि सर्वदा ॥४२॥
साधवो भगवद्रूपा मम नाथस्य मूर्तयः ।
तेषां सेवादिलाभार्थं तव प्रसन्नताऽऽप्तये ॥४३॥
नित्यं वसामि साधूनां सेविकायां च सेवके ।
यत्र गोपालकृष्णश्च यत्र श्रीकंभरासती ॥४४॥
सन्तुष्टा यत्र वै चास्ते यत्र श्रीहरिवल्लभः ।
तत्र वसामि नित्यं वै यत्र पूजा हरेस्तव ॥४५॥
सर्वस्वार्पणभावेन भजन्ते ये जना हरिम् ।
स्वार्थभावविहीनास्तान् नैव त्यजामि कर्हिचित् ॥४६॥
यत्र साध्वन्नसत्राणि यत्र साध्वाश्रमाः सदा ।
यत्र सतां शुभा सेवा तत्र वसामि वृद्धिदा ॥४७॥
यत्र निष्कपटा बुद्धिर्वर्तते सेवके जने ।
निर्दोषा च मतिर्यत्र तत्र वसामि सर्वथा ॥४८॥
गृहदारसुतापुत्रधनेभ्यश्चाऽधिकास्तथा ।
यस्य सन्तो मतास्तस्य गृहे वसामि सर्वथा ॥४९॥
पतिदेवश्वशुरेभ्योऽधिका यत्र हि साधवः ।
पूज्यन्ते योषितां तासां गृहे वसामि सर्वथा ॥५०॥
साधूनां रटणं यत्र साधूनां यत्र दर्शनम् ।
स्नेहो यत्र सदा सत्सु तत्र वसामि सर्वथा ॥५१॥
भगवान् भगवन्तश्च हरिश्च साधवस्तथा ।
स्वामी च सेवका यत्र तत्र वसामि सर्वदा ॥५२॥
यत्र स्वामी न मे चास्ते न तद्भक्ता हि साधवः ।
सूर्यवत् पुण्ययोगेनोदयित्वाऽस्तं प्रयाम्यहम् ॥५३॥

यद्गृहे दिवसो याति विना त्वन्नामकीर्तनम् ।
तद्गृहं सन्त्यजाम्येव मूर्छया पीडिता सती ॥५४॥
यत्र ते सत्पूरुषाणां भोजनं विद्यते न वै ।
तद्गृहं गह्वरं मत्वा श्मशानवत्त्यजाम्यहम् ॥५५॥
यत्र साधुजनपादं वर्षेऽपि नैव दृश्यते ।
तद्गृहं पुण्यशून्यं वै श्मशानवत् त्यजाम्यहम् ॥५६॥
यत्रोत्सवो न कृष्णस्य वर्षान्तरेऽपि जायते ।
तद्गृहं सन्त्यजाम्येव तवोत्सवविवर्जितम् ॥५७॥
यत्र भक्ता न ते सन्ति वसन्ति नैव च क्वचित् ।
तत्र मे रोचते नैव वासः कर्दमसागरे ॥५८॥
यत्र सौधे मन्दिरे वा भवने देवतालये ।
पतिर्नारायणो नास्ति तत्र नैव वसाम्यहम् ॥५९॥
यत्र स्वर्णालये स्वर्णकोशे राज्यासनेऽपि वा ।
नारायणार्पणं प्रातर्नास्ति नैव वसाम्यहम् ॥६०॥
यत्र हरेः पूजनाग्रे घृतदीपो न विद्यते ।
धूपश्चारार्त्रिकं नास्ति तत्र नैव वसामि च ॥६१॥
यत्र नैवेद्यकं विष्णोः कृते नास्ति जलं न च ।
यत्र विष्णुजनः क्वापि न भुंक्ते न वसाम्यहम् ॥६२॥
यत्राऽष्टमीजयन्त्याश्च त्रयोदश्या महोत्सवः ।
ऊर्जे कृष्णे न चास्त्येव तत्र नैव वसाम्यहम् ॥६३॥
यत्राऽवतारगाथास्ते नैव श्रूयन्त ऐश्वरम् ।
पूजनं वा प्रतिमानं नास्ति नैव वसाम्यहम् ॥६४॥
शंखचक्रादिचिह्नानि तुलसीवृक्षमित्यपि ।
यत्र नैव प्रविद्यन्ते तत्र नैव वसाम्यहम् ॥६५॥
यत्र लक्ष्म्यवताराणां कथा मूर्तिर्न चाऽस्ति च ।
नारायणावताराणां नापि तत्र वसामि न ॥६६॥
यत्र सतां न सत्कारो वृद्धानां सेवनं न च ।
गवां सम्माननं नास्ति तत्र नैव वसामि च ॥६७॥
यत्र श्राद्धं न देवानां पितृणां जीवतां च वा ।
पुण्यदानं न यत्रास्ति तत्र नैव वसामि च ॥६८॥
यद्गृहे बालका नैव रक्ष्यन्ते भोजनादिभिः ।
उत्ताप्यन्ते स्त्रियो यत्र तत्र नैव वसामि च ॥६९॥
पंक्तिभेदो गृहे यत्र चाश्रितानां प्रपीडनम् ।
पशूनां रोधनं यत्र तत्र नैव वसामि च ॥७०॥
गोपुरे यन्नगरस्य नारायणप्रतिकृतिः ।
विद्यते नैव तत्रापि चिरं नैव वसाम्यहम् ॥७१॥
यत्र सरस्वती लक्ष्मीर्हस्तिकमलमालिनी ।
राजते चन्द्रशालादौ तद्गृहे निवसामि च ॥७२॥
यत्र गणेशो नास्ति न सन्ति श्रीमातरः कृताः ।
बिन्दुरूपास्तत्र नैव वसाम्यहं चिरं क्वचित् ॥७३॥
यत्र नरे च नार्या च वैमनस्यं सुतादिषु ।
भृत्यस्वामिषु चौदासीनता तत्र वसामि न ॥७४॥
यत्रास्ते रक्षकः स्वामी भक्षको धर्मवर्जितः ।
नारायणस्य वै द्वेषी चौरस्तत्र वसामि न ॥७५॥
यत्र वाट्यां देववृक्षा विद्यन्ते नैव सर्वथा ।
यज्ञीया वल्लयो वृक्षा नैव तत्र वसामि न ॥७६॥
यत्र क्षेत्रे सस्यशोभे सतां विचरणं नहि ।
तत्र कणेषु नैवाऽहं संभवाम्यतिवर्तिनी ॥७७॥
यत्र सन्तो न सरसि नद्यां नदे तडागके ।
कूपे स्नान्ति क्वचित्तत्र जले रसे वसामि न ॥७८॥
यत्र लोकसमाजे वा तथा देवसमाजके ।
विदुषां च समाजे न साधुस्तत्र वसामि न ॥७९॥
यत्र राजसमाजे वा प्रजासमाजके तथा ।
तीर्थे वा नास्ति भक्तात्मा तस्मादपसराम्यहम् ॥८०॥
या सभा साधुशून्या या कृतिर्हर्यर्पणं विना ।
प्राप्तिर्या दानशून्या च ततोऽप्यपसराम्यहम् ॥८१॥
यत्रेन्द्रो विजयो लक्ष्मीर्यूपे स्तम्भे गृहे तथा ।
यत्र श्रीशः स्वयं चास्ते तत्र वसामि केशव ॥८२॥
यत्र रात्रौ न दीपोऽस्ति दिवा निवेदनं न च ।
यत्र स्नेहागमो नास्ति ततश्चापसराम्यहम् ॥८३॥
दारिद्र्यं राजते यत्र धर्मकर्मोऽर्हणादिषु ।
जीर्णदानं च यत्र स्यात् ततोऽप्यपसराम्यहम् ॥८४॥
यत्र सीता च वृषभाः पूज्यन्ते न कृषिक्षणे ।
भूमिर्न पूज्यते यत्र तत्र नैव भवाम्यहम् ॥८५॥
यत्र भाले न चन्द्रोऽस्ति कौंकुमश्चान्दनोऽपि वा ।
सौभाग्यभूषणं नास्ति ततश्चापसराम्यहम् ॥८६॥
यत्राऽऽस्ते चाऽभयदानं मोक्षमार्गप्रदर्शनम् ।
भक्तगाथाचरित्राणि तत्र वसामि केशव ॥८७॥
सतां शीलस्वभावानामपरिग्रहयोगिनाम् ।
वाचि हृदि पादयोश्च वसामि मुदिता सदा ॥८८॥
हरेः पूजाऽवशिष्टे च जले पत्रे सुमे कणे ।
प्रसादेऽन्नेऽम्बरे द्रव्ये वसामि सर्ववस्तुषु ॥८९॥
दीक्षिते सात्त्वते भक्ते साध्व्यां च ब्रह्मयोषिति ।
हर्यर्थे पाचिकायां च निवसामि ह्यतन्द्रिता ॥९०॥
पत्नीव्रतः सदा त्वं वै नारायणो भवस्यतः ।
मद्धस्तमन्तरा नैव गृह्णास्यन्यसमर्पितम् ॥९१॥

तस्मात् समर्पके तूर्णं निवसामि नियोगतः ।
निवेदको मत्स्वरूपः सेवको योऽपि कोऽपि वा ॥९२॥
या वा का वा सेविका ते लक्ष्मीरूपा न संशयः ।
साधवः सेवकास्ते वै सर्वथाऽऽत्मनिवेदिनः ॥९३॥
तेषु मयाऽपि वसतिः सर्वदाऽऽचर्य्यते प्रभो ।
हरेर्भक्ताश्च ये नारीनराश्चापि भवन्ति च ॥९४॥
देवाश्च पितरश्चापि महर्षयश्च मानवाः ।
नागा दैत्या राक्षाश्च दानवा भक्तिकारिणः ॥९५॥
साध्या विश्वे मरुतश्चाऽऽदित्या रुद्रा वसूत्तमाः ।
सिद्धाश्च किन्नराः सूता मागधा बन्दिनस्तथा ॥९६॥
किम्पुमांसश्च गन्धर्वा अप्सरसोऽपि चेशिकाः ।
योगिन्यो मातरश्चापि शक्तयः साधिकास्तथा ॥९७॥
गणिकाश्च गणाश्चापि कन्याः कुमारकास्तथा ।
यक्षाश्च लोकपालाश्च दिक्पालास्तीर्थकोटयः ॥९८॥
तिर्यञ्चो वा तैजसाश्च तामसा वा चतुष्पदाः ।
कीटा वा पक्षिणश्चापि ये केऽपि जडचेतनाः ॥९९॥
तव भक्त्यर्थमेवैते उद्यतास्तत्र तत्र च ।
शीघ्रं वसामि गत्वैव करोमि पावनाँश्च तान् ॥१००॥
ततो गृह्णासि तद्दत्तं नारायण करान्मम ।
एतादृशं निजपत्नीव्रतं नान्यत्र विद्यते ॥१०१॥
पातिव्रत्यं तथा लक्ष्म्यां तदन्यत्र न विद्यते ।
सन्तस्ते सर्वदा सत्यपातिव्रत्यान्विताः खलु ॥१०२॥
यथा लक्ष्मीस्तथा सन्तः सन्तो लक्ष्म्यस्तव प्रियाः ।
अतो निगद्यसे कृष्ण लक्ष्मीकान्तः सतां पतिः ॥१०३॥
अतोऽहं मत्सपत्नीनां सतां देहेषु सर्वदा ।
अभिन्ना संवसाम्येव नैतज्जानाति चेतरः ॥१०४॥
नमस्तस्मै भगवते कृष्णनारायणाय ते ।
साधुभ्यश्च नमो लक्ष्म्यै लक्ष्म्याढ्येभ्यो नमोऽपि च ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधुजनेषु सदा लक्ष्मीनिवासः लक्ष्मीनिवासस्थानानि, पापिप्रभृतिष्वनिवासश्चेत्यादिनिरूपणनामा नवनवतितमोऽध्यायः ॥ ९९ ॥

श्रीनारायणीश्रीरुवाच—

परमेश कृपासिन्धो साधूनां परमं धनम् ।
मुक्तानां जीवनं कृष्णो देवानां दैवतं परम् ॥ १ ॥
कृपयैव भवान् कृष्णनारायणोऽत्र भूतले ।
समायास्यथवा चान्यत् कारणं विद्यते नु किम् ॥ २ ॥

श्रीपुरुषोत्तम उवाच—

कृपाऽत्र कारणं मुख्यं शिवराज्ञीप्रिये सदा ।
इच्छैव कारणं सृष्टौ ममागमस्य सर्वथा ॥ ३ ॥
तथापि नियतं हेतुमुद्भावयामि चापरम् ।
यदा यदा समायामि सृष्ट्यन्तरे च कल्पके ॥ ४ ॥
आदौ क्वचिन्महर्षेश्च भृगोर्निमित्तमाप्य ह ।
समायामि मुहुश्चेति भक्तानामिच्छयाऽपि च ॥ ५ ॥

श्रीनारायणीश्रीरुवाच—

भृगोः किं कारणं जातं यदर्थं वै त्वया प्रभो ।
मुहुर्मानुषभावेऽत्र प्राकट्यं गृह्यते वद ॥ ६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि कथयामि पुरावृत्तं तु कारणम् ।
भृगुस्त्रीख्यातिवधतो भृगुशापेन मानुषे ॥ ७ ॥
प्राकट्यं सर्वथा विष्णोर्बहुवारं प्रजायते ।
देवकार्यार्थलग्नस्य दिव्यैश्वर्यस्य शार्ङ्गिणः ॥ ८ ॥
युगधर्मे परावृत्ते शिथिले च वृषे ततः ।
कर्तुं धर्मव्यवस्थानं जायते विष्णुरव्ययः ॥ ९ ॥
हिरण्यकशिपुर्दैत्यो राज्ये त्रिलोकमण्डले ।
शास्ताऽभवत्पुरा राजा दशकोटिसमास्तथा ॥१०॥
द्वासप्ततिलक्षाणि वर्षाण्यन्यानि वै तथा ।
तथाऽशीतिसहस्राणि सम्राट् निरामयोऽभवत् ॥११॥
ततो दशयुगं राजा प्रह्लादश्चाऽभवद् भुवः ।
ततो राजा बलिश्चासीद् दशकोटिसमास्तथा ॥१२॥
त्रिंशल्लक्षाणि च षष्टिसहस्राणि समा भुवः ।
त्रयस्ते इन्द्रा विख्याता दैत्यानामभवँस्तदा ॥१३॥
दैत्यसंस्थमिदं सर्वमासीद् राज्यं त्रिलोकगम् ।
अत्रान्तरे च संग्रामाः सुरासुरक्षयावहाः ॥१४॥
आसन् द्वादश चोग्राश्च विष्णुर्यत्र सुराऽर्थितः ।
दैत्यान् व्यनाशयद् दिव्यचक्रेण संगतो मुहुः ॥१५॥
वाराहकल्पे ते सर्वे संग्रामास्तान् प्रिये शृणु ।
प्रथमो नारसिंहस्तु हिरण्यकशिपुर्हतः ॥१६॥
द्वितीयश्चापि वाराहो यत्र हतो हिरण्यदृक् ।
प्रह्लादो निर्जितश्चापि तृतीयोऽमृतमन्थने ॥१७॥
विरोचनश्चतुर्थश्च हतो वै तारकामये ।
तारका सा बृहस्पतेः पत्नी चन्द्रेण चाहृता ॥१८॥

तन्निमित्तं तु तद्युद्धं बभूव रोमहर्षणम् ।
वामनेन बलिर्बद्धो युद्धं महदभूत्तदा ॥१९॥
षष्ठे ह्याडीबको जम्भो हतः शक्रेण विष्णुना ।
सप्तमे शंभुना दैत्यास्त्रिपुराद्या विनाशिताः ॥२०॥
अष्टमे चाऽन्धको निघातितः सदैत्यदानवः ।
नवमे विप्रचित्त्याद्या लक्षशः शक्रसूदिताः ॥२१॥
वृत्रासुरो घातितश्च दशमे वज्रपाणिना ।
एकादशे तु रजिना दैत्याः सर्वे विनाशिताः ॥२२॥
द्वादशे च सुरैः षण्डामर्काद्या विनिपातिताः ।
एते देवासुराणां वै संग्रामा द्वादशाऽभवन् ॥२३॥
विष्णुस्तत्र च सर्वत्र साहाय्योऽभूद् द्युवासिनाम् ।
पर्यायेण च सम्प्राप्तं त्रैलोक्यं पाकशासनम् ॥२४॥
ततो यज्ञस्य भागाँश्च यज्ञे देवा ह्युपागमन् ।
यज्ञनारायणश्चापि देवपक्षी ततोऽभवत् ॥२५॥
यज्ञे देवानथ गते शुक्रं प्राहुर्हि दानवाः ।
दैत्याश्चासुरमूर्धन्यास्त्रासमाप्त्वा हि निर्बलाः ॥२६॥
स्थातुं न शक्नुमो भूमौ प्रविशामो रसातलम् ।
एवमुक्तोऽसुरगुरुर्विषण्णः सान्त्वयन् गिरा ॥२७॥
माऽभैष्ट धारयिष्यामि तेजसा स्वेन वोऽसुरान् ।
वृष्टिमोषधीन् भोज्यानि रसान्सुधाः सुखानि च ॥२८॥
युष्मदर्थे प्रदास्यामि धारयित्वा स्वतेजसा ।
यास्याम्यहं महादेवं मन्त्रार्थे विजयाय च ॥२९॥
युष्माननुग्रहीष्यामि पुनः पश्चादिहागतः ।
यूयं तपश्चरध्वं वै संवृता वल्कलैर्वने ॥३०॥
नो चेद् देवा हनिष्यन्ति यावदागमनं मम ।
अतश्चोग्रान् महामन्त्रान् सम्प्राप्याऽहं महेश्वरात् ॥३१॥
आगच्छामि ततो योत्स्यामहे जेष्याम एव तान् ।
पितुर्भृगोश्चाश्रमस्थाः सम्प्रतीक्षत दानवाः ॥३२॥
सः सन्दिश्याऽसुरान् काव्यो महादेवं प्रपद्य च ।
सम्पूज्य स्वागतं प्राप्य प्रणम्योवाच शंकरम् ॥३३॥
मन्त्रानिच्छामि शंभो त्वत् ये न सन्ति बृहस्पतौ ।
पराभवाय देवानामसुरेष्वभयावहान् ॥३४॥
श्रुत्वा महेश्वरः प्राह चरव्रतं मयोदितम् ।
पूर्णं वर्षसहस्रं वै कुण्डधूममवाक्छिराः ॥३५॥
पास्यसि ब्रह्मचारी सँस्ततो मन्त्रानवाप्स्यसि ।
तथोक्तः शुक्र एवाऽसौ धूम्रपस्तापसोऽभवत् ॥३६॥
वटशाखां समालम्ब्य कैलासेऽवाक्शिराः सदा ।
तस्मिन् छिद्रे तदाऽमर्षाद् देवा दैत्यानुपाद्रवन् ॥३७॥
प्रगृहीतायुधा बृहस्पतिपुरोगमा द्रुतम् ।
अथ जेतुं सुरान्नैव शक्ष्याम इति दानवाः ॥३८॥
नत्वा ययुस्तदा शुक्रमातरं ख्यातिमेव ह ।
शरणं भीतभीतास्ते प्रापद्यन्त तदाऽभयम् ॥३९॥
चक्रे रक्षां भृगोः पत्नी किन्तु देवा रुषान्विताः ।
असुरान् जघ्नुः परितः ख्यातिः क्रुद्धाऽभवत्तदा ॥४०॥
पातिव्रत्यबलेनेन्द्रं संस्तम्भाऽभ्यचरत् सती ।
संस्तम्भितो द्रुतं चेन्द्रो वशीकृतो जडोऽभवत् ॥४१॥
व्यद्रवन्त विलोक्यैनं देवास्ततो दिशो दश ।
अथ विष्णुः प्राह शक्रं शीघ्रं त्वां न्यस्य वै मयि ॥४२॥
प्रवेशयित्वा रक्षामि माऽभैषीस्त्वं सुरोत्तम ।
इन्द्रं विष्णुः स्वमूर्तौ प्रावेशयित्वा ररक्ष ह ॥४३॥
विष्णुना रक्षितं वीक्ष्य ख्यातिः क्रुद्धा वचोऽवदत् ।
एषा विष्णुं महेन्द्रं च दहामि क्षणमात्रतः ॥४४॥
इन्द्रः श्रुत्वा हरिं प्राह शीघ्रं कुरु परेश्वर ।
जहि सुदर्शनेनैनां यावन्नो न दहेत् सती ॥४५॥
विष्णुः ससंभ्रमश्चक्रं मुमोच प्राणहेतवे ।
ख्यातेश्चिच्छेद मूर्धानं पतिता सा मृताऽभवत् ॥४६॥
स्वस्त्रीवधं समाकर्ण्य भृगुश्चुकोप सत्वरम् ।
शशाप स्त्रीविहन्ता त्वं मानुषेषु पुनः पुनः ॥४७॥
जन्म धृत्वाऽतिदुःखानि चानुभव मुहुर्मुहुः ।
स्त्रीनिमित्तानि दुःखानि भुंक्ष्व लोके पुनः पुनः ॥४८॥
एवं भृगोः प्रतापेन जायते विष्णुरच्युतः ।
नष्टे धर्मे लोककार्यहितार्थं मानुषेष्विह ॥४९॥
अथ भृगुः शिरो धृत्वा काये द्राक् समयोजयत् ।
यदि कृत्स्नो मया धर्मश्चरितो ज्ञायतेऽपि वा ॥५०॥
पत्नीव्रतपरश्चाऽहं त्वं पतिव्रततत्परा ।
तेन सत्येन जीवस्व जीवस्व विष्णुसन्निधौ ॥५१॥
इत्युक्त्वा प्रोक्ष्य वार्भिश्च जीवयामास तां भृगुः ।
ख्यातिस्तूर्णं गतनिद्रेवाऽभिबुबोध तत्क्षणम् ॥५२॥
इन्द्रस्य स्तंभनं विष्णुर्नाशयामास योगतः ।
भृगुः शान्तोऽभवत् पश्चात् तुष्टाव परमेश्वरम् ॥५३॥
क्षमां ययाचे सततं भोजनादि ददौ शुभम् ।
विष्णुर्नैव हि जग्राह भृगुं प्राह हि माधवः ॥५४॥
तव पुत्री मम पत्नी भाविनी भार्गवी यदा ।
तदा ग्रहीष्याम्यागत्य तया साकं हि भोजनम् ॥५५॥
इत्युक्त्वा प्रययौ विष्णुस्त्यक्त्वा दैत्यादिकाँस्तदा ।
इन्द्रः स्वस्थो ययौ स्वर्गं देवा ययुर्निजालयान् ॥५६॥

दैत्याद्याश्च भृगोः क्षेत्रे स्वस्था आश्रमसन्निधौ ।
तपन्ति च प्रतीक्षन्ते शुक्रस्यागमनं प्रति ॥५७॥
शुक्रोऽपि हरपार्वत्योः सन्निधौ वटवृक्षके ।
अधःशिरास्तपश्चोग्रं करोति शंकराज्ञया ॥५८॥
पूर्णे वर्षसहस्रे तु विगते शंकरः स्वयम् ।
दिव्यरूपेण निकटेऽदृश्यताऽऽगत्य वै वटे ॥५९॥
शुक्रस्तुष्टाव शंभुं तं लम्बमानो वटेऽपि च ।
नमोऽस्तु शितिकण्ठाय कपर्दिने च शंभवे ॥६०॥
मीढुषे वसुवीर्याय रुद्राय रोहिताय ते ।
गिरीशायाऽर्कनेत्राय तक्षकक्रीडनाय च ॥६१॥
पिनाकिने च श्वेताय भीमायोग्राय ते नमः ।
महादेवाय शर्वाय मृगव्याधाय ते नमः ॥६२॥
स्थाणवे बहुरूपाय त्रिनेत्राय च मृत्यवे ।
त्र्यम्बकाय नमस्तेऽस्तु शंकराय शिवाय च ॥६३॥
ध्यानिने व्यापिने सद्योजातायेशाय ते नमः ।
वामदेवाय च कृत्तिवस्त्राय प्रभवे नमः ॥६४॥
भगनेत्रविहन्त्रे ते पशूनां पतये नमः ।
भूतानां पतये पूषाहन्तघ्नाय च ते नमः ॥६५॥
अर्करूपाय च न्यग्रोधाय कालाय ते नमः ।
संकर्षणाय रुद्राय वह्नये योगिने नमः ॥६६॥
पृथिव्याद्यष्टरूपाय लिंगायाऽलिंगिने नमः ।
पार्वतीपतये तुभ्यं गोपतये नमो नमः ॥६७॥
महेशाय च डमरुवादित्राय च ते नमः ।
कैलासस्थाय देवानां स्तुत्याय ते नमो नमः ॥६८॥
महावैष्णवसन्नाम्ने गणानां पतये नमः ।
ब्रह्मिष्ठाय च शुक्रस्य पित्रे भूयो नमो नमः ॥६९॥
इत्युक्त्वा विररामाऽसौ शुक्रस्तं प्राह शंकरः ।
मा तपः कुरु विप्रेन्द्र संकल्पस्ते भयावहः ॥७०॥
तथापि वत्सरान्तेऽहं पूरयिष्ये तु शीलिने ।
शीलव्रताय ते शुक्र दास्ये यथेष्टमन्त्रकान् ॥७१॥
इत्युक्त्वा शंकरो देवस्तत्रैवाऽन्तरधीयत ।
अथेन्द्रेण निजाकन्या जयन्ती प्रेषिता तदा ॥७२॥
कथिता पुत्रि शक्रो वै दारुणं चरते तपः ।
अनिद्रार्थं त्रिलोक्यां वै ततो याहि द्रुतं च तम् ॥७३॥
शुक्रं प्रसेवयस्वैनं शय्यासेवादिभिर्द्रुतम् ।
तैस्तैर्मनोऽनुकूलैश्च ह्युपचारैरतन्द्रिता ॥७४॥
श्रुत्वा सुरूपा कन्या सा जयन्ती प्रययौ हि तम् ।
पित्रा यथोक्तं वाक्यं सा शुक्रे कृतवती सती ॥७५॥
शुक्रस्तां प्राह सुश्रोणि ! दशवर्षाणि वै मया ।
सह तिष्ठाऽदृश्यरूपा सम्प्रयोगं च मे कुरु ॥७६॥
इत्याज्ञप्ता दश समाः शुक्रेण सह सा स्थिता ।
शुक्रवत् तापसी भूत्वा सूक्ष्मयोगवती सदा ॥७७॥
अथ बृहस्पतिर्दशवत्सरेषु निजं वपुः ।
शुक्ररूपात्मकं कृत्वाऽसुरानशिक्षयत्तदा ॥७८॥
अथ शुक्रो दशवर्षोत्तरे दैत्यानुपागमत् ।
अहं शुक्रोऽस्मि दैत्येन्द्रा मद्वचः सन्निबोधत ॥७९॥
दैत्याः प्राहुर्न नः स्वामी भवान् शुक्रो न वै ऋतः ।
दशवर्षाणि नः स्वामी सत्योऽयं शुक्र एव ह ॥८०॥
इत्येवमसुरैः शुक्रोऽवमानितः शशाप तान् ।
दैत्या यूयं सत्यशुक्रं बोधिता नाऽभ्यनन्दथ ॥८१॥
तस्मात् प्रणष्टवीर्या वै पराभवमवाप्स्यथ ।
इति शप्ता असुरास्ते ज्ञात्वा शापं च देवताः ॥८२॥
युयुधुर्दानवाद्यैश्च हतवन्तोऽसुरान् बहून् ।
काव्यशापाऽभिभूताश्च शुक्राधारविवर्जिताः ॥८३॥
असुरा हन्यमानास्ते विविशुश्च रसातलम् ।
देवानां विजयो जातो विष्णुना तु सहायिना ॥८४॥
एतत्ते कथितं लक्ष्मि विष्णोर्जन्मसु कारणम् ।
भृगोर्निमित्तमालम्ब्य विष्णुः संजायते मुहुः ॥८५॥
धर्मान्नारायणो जातश्चाक्षुषे च मनौ हरिः ।
वैवस्वते पृथुर्विष्णुर्वामनश्चादितेः सुतः ॥८६॥
दत्तात्रेयोऽभवत्सोऽपि पर्शुरामोऽपि चैव सः ।
रामादित्यस्तथा विष्णुर्व्यासो भवति सर्वदा ॥८७॥
वासुदेवोऽपि विष्णुश्च कल्की विष्णुर्भविष्यति ।
एवमन्येऽप्यवतारा विष्णोर्भवन्ति मानवाः ॥८८॥
दैत्यानां तु विनाशार्थं धर्मरक्षणहेतवे ।
क्वचिन्नारीनिमित्तेन क्वचित्सुराऽवनाय च ॥८९॥
क्वचिद्धर्मनिमित्तेन क्वचिच्च कृपया किल ।
एते सर्वे मम लक्ष्मि ह्यवतारा विभूतयः ॥९०॥
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः ।
इच्छयाऽनुग्रहेणापि चायामि हितवान् सताम् ॥९१॥
साधून् विप्रान् वृषं गाश्च रक्षामि मानवो मुनिः ।
साधवो मेऽवताराश्च हेतयोऽपि तथाविधाः ॥९२॥
ऐश्वर्याणि चावताराः शक्तयोऽपि तथाविधाः ।
मुक्ता मे ह्यवताराश्च भक्ताश्चापि तथाविधाः ॥९३॥
देवाश्चाप्यवतारा मे धर्मावनाय सर्वथा ।
आज्ञया सृष्टिलोकेषु जायन्तेऽन्तर्भवन्ति च ॥९४॥

मूर्तयो मम याः सन्ति दिव्याः सर्वा हि तास्तु मे ।
अवताराः सदा सेवाग्राहका भक्तवत्सलाः ॥९५॥
ममाऽवतारयोगं ये लब्धवन्तः सुराऽसुराः ।
दैत्याश्च दानवा यक्षा राक्षसाश्च नराः स्त्रियः ॥९६॥
पशवो वाहनात्मानो गजाश्च वाजिनोऽपि च ।
उष्ट्राश्च वृषभाश्चान्ये मम योगमुपागताः ॥९७॥
मत्साधुयोगमापन्ना याता यान्ति परं पदम् ।
इत्येवं मे कृपा चास्ते स्वभावो मेऽपि तादृशः ॥९८॥
मद्योगं समवाप्तस्य मत्तुल्यत्वं प्रजायते ।
साधुयोगात्साधुर्भवति दैवयोगाच्च देवता ॥९९॥
मम योगाद्भवत्येव मादृशो भक्तराट् स्वयम् ।
नारायणस्य योगेन नरो नारायणो भवेत् ॥१००॥
नारी नारायणी स्याच्च मुक्तानिका रमा यथा ।
यथा पद्मावती जाता नारायण्यौ प्रिये मम ॥१०१॥

श्रीनारायणीश्रीरुवाच—

अनादिश्रीकृष्णनारायणस्वामिन् पते मम ।
जिज्ञासां पूरय जाते त्रायण्यौ तु रमाऽब्जके ॥१०२॥
कथं केन निमित्तेन संजाता संगतिस्तव ।
पद्मावत्या रमायाश्च स्फुटं कृष्ण वदाऽत्र मे ॥१०३॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं सर्वज्ञाऽसि हि मादृशी ।
तथापि मानवं भावमाप्य जिज्ञाससि त्विदम् ॥१०४॥
कथयामि पुरा वृत्तं येन मे संगमोऽनयोः ।
ककुप्सूर्यात्मजयोर्वै कुटुम्बे कारवेऽभवत् ॥१०५॥
पुरा सूर्यो यदोत्पन्नः सहस्रकिरणोऽभवत् ।
उच्चावचप्रदेशश्च ब्रह्माण्डदाहकाऽग्निकः ॥१०६॥
असह्यतेजाश्चात्युग्रो विवराण्यज्वलन् यतः ।
सूर्यं तेजस्विनं ज्ञात्वा याऽर्पिता विश्वकर्मणा ॥१०७॥
संज्ञानाम्नी कन्यकाऽपि सा जज्वालार्कतेजसा ।
विहायेयं पतिं स्वस्याः छायां कृत्वा निजां स्त्रियम् ॥१०८॥
स्वधिष्ण्ये तां समास्थाय निर्ययौ सा गृहान्निजात् ।
क्लिष्टचित्ता गूहती स्वां विश्वकर्मालयं ययौ ॥१०९॥
पित्रोपदिष्टा सूर्यस्य गृहे गन्तुं तथापि सा ।
न याता वडवा भूत्वा हिमाद्रौ व्यचरत् सती ॥११०॥
तदाऽर्कस्तां मार्गयितुं समायाद्धिमपर्वते ।
अश्वो भूत्वाऽऽरब्धवाँस्तां सा न कामं ददौ तदा ॥१११॥
मुखं ददौ तदा सूर्यो धातुं नसोर्व्यसर्जयत् ।
नासिकाद्वयतो जातावश्विन्याः सुकुमारकौ ॥११२॥
ततः सा प्रययौ साकं सूर्येण सूर्यमण्डलम् ।
किन्तु सूर्यस्य तेजोभिर्जज्वालैषा पुरा यथा ॥११३॥
सोवाच पितरं सूर्यमन्दतार्थे पिता ततः ।
विश्वकर्मा दिवानाथं शाणोल्लीढं चकार ह ॥११४॥
शातितश्चाभितः सूर्यश्चातिरूपोऽतिमोहकः ।
सह्यतेजाः समभवत् संज्ञा तस्मिन् स्थिराऽभवत् ॥११५॥
तदा सुरूपं सुखदं सह्यं भोगप्रदं सुरम् ।
वीक्ष्य चकमे युवती दिशा भूत्वा सुकन्यका ॥११६॥
हावभावविलासाद्यैश्चेष्टाभिस्तं दिगिच्छति ।
रन्तुकामां सुमुग्धां च पार्श्वे प्राप्तां रजोन्विताम् ॥११७॥
सूर्यस्तां वीक्ष्य तत्राह दिग्देवते किमिच्छसि ।
दिग्देवी स्वेष्टमाहाऽस्मै कामं देहि सुतृप्तिदम् ॥११८॥
सूर्यः प्राह न मे भोगो व्यर्थः स्यात् तद्विचारय ।
यदीष्टस्तेऽस्ति चेद् गर्भो गृहाण मम संगमम् ॥११९॥
तदा दिशा स्वयं देवी गर्भो नेष्ट इति स्वयम् ।
विचार्याऽपि महामुग्धा भोगमैच्छद् दिनाधिपात् ॥१२०॥
सूर्यः प्राह प्रिये देवि भोगं दास्ये फलान्वितम् ।
कदाचिन्मानवे भावे त्वं कन्या संभविष्यसि ॥१२१॥
तदा ते मानवीनार्यै मद्योगः सफलो भवेत् ।
यदाऽनादिकृष्णनारायणः श्रीपुरुषोत्तमः ॥१२२॥
पृथ्व्यां मानवरूपेण विचरिष्यति कामदः ।
गोपालबालकः कृष्णः कंभरानन्दनः प्रभुः ॥१२३॥
तदा ते जन्मसाफल्यं सर्वथा संभविष्यति ।
इत्युक्त्वा विररामाऽर्को दिशा कन्या तिरोऽभवत् ॥१२४॥
अथ सूर्यः श्वशुरं स्वं प्रसन्नः प्राह साञ्जलिः ।
वरं वृणु प्रदास्येऽत्र यन्मनोऽनुगतं प्रियम् ॥१२५॥
विश्वकर्मा तदा प्राह प्रसन्नोऽसि यदि प्रभो ।
जामाता पुत्ररूपो वै तथापि पुत्रवाञ्छया ॥१२६॥
अर्थयामि वरं रम्यं पुत्रो मे भव भास्कर ।
सूर्यस्तथाऽस्त्विति प्राह प्रजगाद च तत्परम् ॥१२७॥
यदाऽनादिकृष्णनारायणः पृथ्व्यां भविष्यति ।
गोपालबालकः सत्याः कम्भरायाः सुखात्मजः ॥१२८॥
तदा तद्योगलाभार्थमहं चेच्छामि जन्म वै ।
अद्य वा च युगान्ते वा युगानामयुतेऽपि वा ॥१२९॥

श्रीहरेर्योगलाभार्थं भविष्यामि सुमानवः ।
तत्र काले विश्वकर्मन् भवता पृथिवीतले ॥१३०॥
प्राकट्यं मानवे कार्यं मत्पितृत्वस्य सिद्धये ।
भवन्तं पितरं प्राप्य कारुयोनौ त्वदात्मजः ॥१३१॥
भविष्यामि सुपुत्रस्ते पूरयिष्ये मनोरथम् ।
इत्येतत् समयं प्राप्य पृथ्व्यां यदा हरिः स्वयम् ॥१३२॥
गोपालबालकोऽनादिकृष्णनारायणोऽभवत् ।
कंभराश्रीगृहे तत्र विश्वकर्माऽऽप्य वै क्षणम् ॥१३३॥
मंकणकसुकारोर्वै गृहे बालुजशिल्पिराट् ।
विश्वकर्मा स्वयं जज्ञे जटिलापतिरित्ययम् ॥१३४॥
बालुजशिल्पिनं विश्वकर्मावतारमुत्तमम् ।
पितरं सम्प्रकल्प्यैव सूर्यः पुत्रोऽभवत्ततः ॥१३५॥
नाकमिच्छिल्पिराट् सर्वशिल्पिवर्यः सुयोगिराट् ।
तस्याऽस्य पूर्णरूपस्य भार्याऽभवत्तु सा ककुब् ॥१३६॥
या जाता कन्यका दिगंशात्मिका मानवी सती ।
अम्बामाता शिल्पिवर्यमनोजित्पुत्रिका शुभा ॥१३७॥
विवाहिता दिगंशा साऽर्कोऽशनाकजिता भुवि ।
दम्पत्योः पुत्रिका जाताः पञ्च ज्येष्ठाऽत्र चाब्जिका ॥१३८॥
दिशामंशस्वरूपा या साऽम्बायाः पुत्रिकाऽग्रजा ।
पद्मावती सतीतुल्या कृष्णकान्तस्य सत्प्रिया ॥१३९॥
सूर्यप्रभा स्वयं सूर्यजन्या हरौ सुमोहिता ।
हरिं पतिं प्रकर्तुं सा सूर्यपुत्री तु मानवी ॥१४०॥
व्यजायत सुरूपा वै सूर्यमानवपुत्रिका ।
द्वितीया सा रमा जाता सूर्यांशनाकजित्सुता ॥१४१॥
सूर्यपुत्री रमा साऽम्बादेव्यां व्यजायतोत्तमा ।
पद्मिनीरूपसौभाग्यगुणयुक्ता हरिप्रिया ॥१४२॥
ब्रह्मणो ये पुरा पुत्र्यौ रमापद्मावतीमिधे ।
पुरुषोत्तममासस्य त्रयोदश्या व्रतेन वै ॥१४३॥
प्राप्तेऽक्षरं परं धाम ते पुनः श्रीहरीच्छया ।
भुवि श्रीभगवत्सेवाकरणायाऽर्कपुत्रिका ॥१४४॥
रमा जाताऽथ दिक्पुत्री जाता पद्मावती तथा ।
मानवे तु हरौ पत्नीरूपेणेमेऽर्पिते भुवि ॥१४५॥
पार्षदौ मे धामसंस्थौ भर्गो हेमन्त इत्यमू ।
सेवार्थं नीतवानेतौ सहाऽहं तौ सहोदरौ ॥१४६॥
प्रजातौ तौ यत्र पत्नीजन्म तत्र गृहे त्विमौ ।
भर्गोऽभवद्धि भगवान् हेमन्तो हेमसंज्ञकः ॥१४७॥
सिषेवाते हरिं मां तौ परब्रह्मपरायणौ ।
भगवान् स सुतो मध्ये जातो वै भगवद्गुणः ॥१४८॥
हेमन्तश्च ततो जातोऽनुजो हेमसमोत्तमः ।
ततस्तिस्रः सुता या मालती हंसी च सद्गुणा ॥१४९॥
वैकुण्ठसख्यस्तिस्रस्ता अभवन्नम्बिकासुताः ।
एवं सर्वं भक्तियुक्तं कृष्णनारायणाश्रयम् ॥१५०॥
कुटुम्बं देवतारूपं जातं भक्त्यर्थमुत्तमम् ।
सेवार्थं श्रीकृष्णनारायणस्यैवाऽभवत् क्षितौ ॥१५१॥
इत्येषः कथितः पूर्ववृत्तान्तस्तेऽत्र मत्प्रिये ! ।
पद्मावत्यारमा याश्च प्रिययोर्मम सर्वदा ॥१५२॥
यथा लक्ष्मीर्जया राधा माणिक्या ललिता, प्रिया ।
यथा श्रीस्त्वं तथा पद्मावती रमाऽत्र मे प्रिया ॥१५३॥
ब्रह्मप्रियाऽष्टकं त्वेतत् कोट्यर्बुदाऽङ्गनोत्तमम् ।
पठनाच्छ्रवणादस्य मुक्तिं मुक्तिं लभेत्तथा ॥१५४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने भगवदवताराणां सृष्टावागमने कृपा वा भृगोः शापो निमित्तं, दैत्यानां द्वादशसंग्रामाः, पद्मावतीरमा-कुटुम्बस्य प्राग्वृत्तान्तादिश्चेत्यादिनिरूपणनामा शततमोऽध्यायः ॥ १०० ॥

श्रीनारायणीश्रीरुवाच—

भगवन् यस्य साधूनां योगस्त्वत्र बभूव न ।
प्रेतस्य तस्य चोद्धारः कथं स्याद् वद तद्धितम् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

शृणु श्रीशिवराज्ञीश्रि प्रेतस्य पृष्ठतो जनैः ।
श्राद्धे सन्तो भोजनीयाः पूजनीयाः सुवस्तुभिः ॥ २ ॥
वस्त्रभूषारत्नरूप्यसुवर्णधनवाहनैः ।
सन्तोषणीयाः सन्तश्च विप्राश्च ब्रह्मवेदिनः ॥ ३ ॥
गोदानानि प्रदेयानि गावो वै तारिका सदा ।
गोदानाच्छाश्वतान् लोकान् प्राप्नुयात् प्रेत उत्थितः ॥ ४ ॥
गौर्हि न्यायागता दत्ता सद्यस्तारयते कुलम् ।
मान्धातारं पुरा प्राह बृहस्पतिः शृणुष्व तत् ॥ ५ ॥
सन्तं प्रपूज्य विप्रं च गुरुं प्रपूज्य गां तथा ।
प्रेतनाम्ना प्रदद्याच्च गां पात्राय महात्मने ॥ ६ ॥
गौर्मे माता पिता चोक्षा तत्र स्वर्गं प्रतिष्ठितम् ।
सायं गोष्ठे व्रती स्थित्वा गोसेवादिपरायणः ॥ ७ ॥
प्रातरुत्थाय गोदानं कुर्यात् स्मृत्वा परेतकम् ।
प्रेतस्तूर्णं दिवं याति कमले ! नात्र संशयः ॥ ८ ॥

वसेदेकां निशां गोभिः समसख्यः समव्रतः ।
ऐकात्म्यभावयुक्तो यः कलुषात् स विमुच्यते ॥ ९ ॥
दोग्ध्र्यः सवत्सिका देया प्रातः सूर्यस्य दर्शने ।
युवत्यो रूपशालिन्योऽमृतगर्भाः प्ररोहदाः ॥१०॥
एनो गावः प्रणुदन्तु स्वर्गयानाय सन्तु मे ।
मातृवन्मां प्ररक्षन्तु सन्त्वाशीर्वादसम्प्रदाः ॥११॥
रोगनाशे परे मोक्षे स्वर्गे समृद्धौ सुखे घने ।
गावः प्रसन्ना उदयं ददतु श्रेयसां पदे ॥१२॥
सर्वदेवाश्रयाः पुण्या दिशध्वं गतिमुत्तमाम् ।
आत्मना मनसा युक्ता ददत्वात्मार्पणं फलम् ॥१३॥
अर्घ्यं वस्त्रं सुपर्णं च वसु तावत ओदनान् ।
ऊर्ध्वास्यां सुप्रसन्नां गां सवत्सां वैष्णवीं ददे ॥१४॥
गोप्रदाता समुच्चार्य दद्यात् फलं लभेत् परम् ।
गोदः शीलीपूजकश्च दाताऽर्वस्य च सेवकः ॥१५॥
साधुभक्तः पितृभक्तो गुरुभक्तः सुरार्हकः ।
सत्यशीलस्तापसश्च न स्युर्वै दुःखिनः क्वचित् ॥१६॥
स्नानाभ्यासी कथाहृष्टो ब्रह्मभजनतत्परः ।
गोसेवाढ्यश्च चत्वारो वैष्णवा धामयोगिनः ॥१७॥
गोव्रती गोप्रदाता च गव्याशनो गवायनः ।
वैष्णवः परमो बोध्यो गोमाता विष्णुदैवता ॥१८॥
देवव्रती वेदव्रती गोव्रती साधुसद्व्रती ।
गोमेधादिव्रती चाग्र्यान् विन्दते तैजसाऽऽलयान् ॥१९॥
कामधेनुप्रदाताऽत्र कामान् सर्वान् महोत्सवान् ।
हव्यकव्यादिभुग्दत्तान् भुंक्ते भौमांश्च तैजसान् ॥२०॥
यवान् पिबेद् गव्ययुक्तान् क्षितौ स्वप्याद् गवायने ।
शीली दोग्ध्रीं प्रदद्याद्गां सर्वयज्ञफलं लभेत् ॥२१॥
साधवे साधुदीक्षार्थे पुत्रं दद्याच्छुभक्रियम् ।
तेनापि कृतपुण्येनोद्ध्रियन्ते प्रेतदेहिनः ॥२२॥
साध्व्यै दद्यात् कन्यकां च सतीं वैराग्यशालिनीम् ।
युवतीं ज्ञानसम्पन्नां संसारोद्धारशालिनीम् ॥२३॥
शीलपरायणां गृहिधर्मरागविवर्जिताम् ।
त्यागवृत्तिं तथाऽऽचार्याणीस्थानशोभनां शुभाम् ॥२४॥
राजा दद्यात्तु गुरवे दासीं दासं द्विजाय च ।
द्विजपुत्रं प्रदद्याच्च विप्रं दद्यात् सुभूभृते ॥२५॥
यो भवेद्वै गुरुतुल्यो विद्यासत्संगशेवधिः ।
तादृच्छीलस्वभावस्य दानं कुर्याद् द्विजस्य च ॥२६॥
विप्रकुमारदानं तु मतं गोदानसदृशम् ।
उद्धारको भवेद्विप्रश्चेह परत्र सर्वदा ॥२७॥
विप्रपुत्रस्य पित्रे वै दद्यात् स्वर्णं धनं बहु ।
एवं विप्रसुतं क्रीत्वा दद्याद् दानं द्विजातये ॥२८॥
यज्ञकार्यनिर्वहार्थे पाठशालार्थमित्यपि ।
राज्यगुरुत्वलाभार्थं गृही शाश्वानपत्यकः ॥२९॥
सुतदानं सुतादानं गोदानं स्वर्णदानकम् ।
आत्मदानं मोक्षदानं मोक्षदानि मतानि वै ॥३०॥
वत्सलां सत्त्वसम्पन्नां तरुणीं च विभूषिताम् ।
गत्वा गां च सुतां दाने सर्वपुण्यैः सुयुज्यते ॥३१॥
दुःखदारिद्र्यलोकान् स गां दत्वा नैव गच्छति ।
दन्तहीना वलीयुक्ता लीनक्षीरा ऋतुक्षया ॥३२॥
जरठा रोगिणी रुष्टा दुष्टा देया न कर्हिचित् ।
सर्वासु कपिला श्रेष्ठा सा दातव्या विशेषतः ॥३३॥
देवाः सूर्यश्च वै वृष्टिं कुर्वन्ति यज्ञतर्पिताः ।
यज्ञीयं कर्म गव्यैश्च जायते दुग्धसर्पिषा ॥३४॥
प्रजापतिः स्वयं तृप्तिमगच्छत् सर्पिषा पुरा ।
गोलोकस्थगवां पश्चादसृजल्लोकमातृकाः ॥३५॥
सुवर्णवर्णाः कपिलाः स्रवन्तीर्दुग्धनिर्झरान् ।
क्षीराऽमृतं स्रवन्त्येता धेनवो जीवभोजनम् ॥३६॥
ददौ ताश्च ऋषिभ्योऽथ देवेभ्यः स प्रजापतिः ।
मानवेभ्यो ददौ चापि दुग्धाध्वरादिहेतवे ॥३७॥
विप्रेभ्यः प्रददौ चापि दैवकार्यार्थसिद्धये ।
कपिलानां प्रदानं वै ततः श्रेष्ठतमं मतम् ॥३८॥
दुग्धदाः पुण्यदाः प्राणप्रदाः प्रेतप्रमोक्षदाः ।
गाश्च दत्वा सर्वकामप्रदः स्यादिह वा परे ॥३९॥
हव्यं कव्यं तर्पणं च शान्तिं यानं तथाऽम्बरम् ।
वृद्धबालादितृप्तिं चाऽऽप्नुयाद् गोप्रदमानवः ॥४०॥
गावः सुरभिगन्धिन्यस्तथा गुग्गुलगन्धयः ।
गावः प्रतिष्ठा लोकानां गावः स्वस्त्ययनं महत् ॥४१॥
न दुष्यत्यनिलो नाग्निर्न सुवर्णं न चोदधिः ।
न दुग्धं नाऽमृतं नातपो गौः साधुर्न नेश्वरः ॥४२॥
गावो धनं नित्यलभ्यं गावः पुष्टिः सनातनी ।
गावो लक्ष्म्याः परं मूलं सम्पदां मूलमेव ताः ॥४३॥
अन्नं हि परमं गोस्थं देवानां परमं हविः ।
स्वाहावषट् गोस्थितौ च गोषु दत्तं हि शाश्वतम् ॥४४॥
गावो यज्ञफलं चापि गोषु यज्ञाः प्रतिष्ठिताः ।
गोभ्यो रसाः प्रवर्धन्ते बालाः पायसजीविनः ॥४५॥
यानि कानि तु पापानि स्वल्पान्यतिकृतानि वा ।
धेनुं ददति ये ते वै तरन्ति यान्ति मोक्षणम् ॥४६॥

कपिलां ये प्रयच्छन्ति सवत्सां कांस्यदोहनाम् ।
सभूषां वस्त्रसंवीतामुभौ लोकौ जयन्ति ते ॥४७॥
शंकराय पुरा कृष्णो वृषभं प्रददौ ततः ।
वृषभस्य प्रदानं वै प्रवृत्तं तूत्तमं भुवि ॥४८॥
युवानमुच्छ्रितं श्वेतं भूरिशृंगमलङ्कृतम् ।
वृषभं ये प्रयच्छन्ति भवन्त्यैश्वर्यशालिनः ॥४९॥
गाः स्मृत्वा च हरिं सन्तं स्मृत्वा स्वप्यात् सदा निशि ।
उत्थाय तान् स्मरेच्चापि नमस्येत् पुष्टिमाप्नुयात् ॥५०॥
अनिष्टं स्वप्नमालक्ष्य गां मुहुः सम्प्रकीर्तयेत् ।
गोकरीषैः पाचयेच्च गोमयैः शुद्धिमाचरेत् ॥५१॥
गोघृतेन जुहुयाच्च घृतेन स्वस्ति वाचयेत् ।
घृतं दद्याद् घृतं प्राश्नीयात् गवां पुष्टिमश्नुते ॥५२॥
गौर्मे चाग्रे सदा चास्तु पृष्ठे पार्श्वे सदाऽस्तु च ।
सर्वरत्नमयीं धेनुं तां ददामि शुभाप्तये ॥५३॥
गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः ।
सुरभ्यः सौरभेय्यश्च गावः पश्यन्तु मां सदा ॥५४॥
गावः सत्यो देवताश्च साध्व्यो लक्ष्म्यः पतिव्रताः ।
सन्तो मुक्ता ईश्वराश्च गुरवः साधवः शुराः ॥५५॥
भक्तिः पुण्यं वृषः सेवा दत्तं तप्तं ह्युपकृतम् ।
महाभयेषु रक्षन्ति समेषु विषमेषु च ॥५६॥
शृणु लक्ष्मि पशवोऽपि धेनवो भुवमागताः ।
तपश्चक्रुः पुरा सर्वा गच्छेम श्रेष्ठतामिति ॥५७॥
सर्वाभ्यो दक्षिणाभ्योऽपि वयं श्रेष्ठतमा स्विति ।
सर्वपापप्रणाशिन्यो लिम्पामो दूषणैर्न च ॥५८॥
अस्मद्द्रव्यादिभिः सर्वो जनः पूयेत वै तथा ।
शकृता चापि मूत्रेण पूताः स्युः सर्वदेहिनः ॥५९॥
गोदातारश्च गोलोकं गच्छेयुरिति पद्मजे ।
तापसीभ्यो वरान् ब्रह्मा ददौ धेनुभ्य उत्तमान् ॥६०॥
एवं भवत योगिन्यो लोकाँस्तारयतेति च ।
सर्वथा च पवित्राः स्थो मोक्षदा भवतेति च ॥६१॥
लक्ष्मीर्वसतु गोशकृति तान् वरान् ददाम्यहम् ।
एवं दत्वा वरान् ब्रह्मा ययौ सत्यं ततश्च ताः ॥६२॥
प्रातर्नमस्याः पूज्याश्च सर्वथा पुष्टिदाः शुभाः ।
लोककल्याणकारिण्यो बभूवुर्मवलारिकाः ॥६३॥
समानवत्सां कपिलां धेनुं दत्वा पयस्विनीम् ।
सौम्यां भूषाम्बरयुतां ब्रह्मलोके महीयते ॥६४॥

लोहितां तादृशीं दत्वा सूर्यलोके महीयते ।
शबलां तादृशीं दत्वा सोमलोके महीयते ॥६५॥
श्वेतां च तादृशीं दत्वा शक्रलोके महीयते ।
कृष्णां च तादृशीं दत्वा वह्निलोके महीयते ॥६६॥
धूम्रां च तादृशीं दत्वा धर्मलोके महीयते ।
पाण्डुरां तादृशीं दत्वा वारुणं लोकमश्नुते ॥६७॥
वादलवर्णां गां दत्वा वायुलोके महीयते ।
हिरण्यवर्णां पिंगाक्षीं दत्वा कुबेरतामियात् ॥६८॥
पीतां दत्वा तादृशीं तु पितृलोके महीयते ।
कर्बुरां तादृशीं दत्वा विश्वदेवः प्रजायते ॥६९॥
गौरीं च तादृशीं दत्वा वसुलोकमवाप्नुयात् ।
पाण्डुकम्बलवर्णां गां दत्वा साध्यसुरो भवेत् ॥७०॥
विशालपृष्ठां दत्वा गां मरुल्लोकान् प्रपद्यते ।
रत्नाढ्यां तादृशीं दत्वा गन्धर्वतामवाप्नुयात् ॥७१॥
अनड्वाहं महोक्षं वा सर्वरत्नैरलंकृतम् ।
दत्वा युवानं तु लोके प्रजापतेर्महीयते ॥७२॥
गोदाता याति परमं स्वर्गं गोलोकमित्यपि ।
विमानेनाऽर्कवर्णेन वृषयानेन वाऽम्बरे ॥७३॥
स्वर्गे तं गोप्रदातारं सहस्रसुरयोषितः ।
सेवन्ते सततं प्रातर्बोधयन्ति सुकीर्तनैः ॥७४॥
यावन्ति धेनुरोमाणि तावद्वर्षाणि मोदते ।
धेनुदश्च ततो भूमौ गोभूपालो भवत्यपि ॥७५॥
घृतक्षीरप्रदा गावो घृतदेहा घृतोद्भवाः ।
घृतनद्यो घृतावर्त्ताः सन्तु मे सततं गृहे ॥७६॥
गावो मे हृदये नित्यं गावो नाभ्यां तथात्मनि ।
गावः सर्वत्र देहे मे गावो वसन्तु मानसे ॥७७॥
घृतं तासां मम देहेन्द्रियप्राणेषु तिष्ठति ।
गावः सन्त्वग्रतो मे च पृष्ठतः सन्तु धेनवः ॥७८॥
सर्वतः सन्तु गावो मे गोमध्येऽहं वसामि हि ।
एवंभावयमानस्य क्षीयन्ते पापकोटयः ॥७९॥
यत्र कानकसौधाश्च स्वर्णागमो ह्यमापकः ।
देव्यो गान्धर्वकुशला यत्राऽमृतं समृद्धयः ॥८०॥
दधिकुल्या घृतकुल्या पयःकुल्याश्च यत्र च ।
नवनीतकुल्या यत्र तत्र यान्ति गवां प्रदाः ॥८१॥
सहस्रगोप्रदाता तु स्वर्गे देवेश्वरो भवेत् ।
लक्षगोदानकृत् सम्राट् त्रैलोक्यस्य भवेद् रमे ! ॥८२॥

कोटिगोदानकर्ता तु वैकुण्ठं याति मोक्षभाक् ।
अर्बुदगोप्रदाता तु गोलोकं याति मोक्षभाग् ॥८३॥
अब्जधेनुप्रदाता त्वक्षरं धाम प्रयाति वै ।
दशगोदानतः प्रेतो मुच्यते सृष्टिबन्धनात् ॥८४॥
मातरं पितरं स्मृत्वा पत्नीं स्मृत्वा पितामहान् ।
गोदाता तत्कुलान्येकादशोद्धारयति ध्रुवम् ॥८५॥
गां स्मृत्वा तिलदानेन जलदानेन वापि च ।
प्रेतस्य यमलोके वै निरस्यति तु यातनाः ॥८६॥
मातरो दुग्धदात्र्यो मे देववासा हि धेनवः ।
गावो मामुपतिष्ठन्तामिति नित्यं प्रकीर्तयेत् ॥८७॥
गोदानं परमं पुण्यं फलं च शाश्वतं यतः ।
कर्तव्यं नाऽवशिष्येत स्वर्गार्थे गोप्रदायिनः ॥८८॥
गावो दाने यमुद्दिष्टास्तारयन्ति हि तं जनम् ।
धारयन्ति बालकांश्च वर्धयन्ति पयोऽमृतैः ॥८९॥
गावो वै मानवे लोके स्वर्गे सत्ये भवन्ति वै ।
ऐश्वरे चापि वैकुण्ठे गोलोके च भवन्ति हि ॥९०॥
अक्षरे भूरिश्रृंगाश्च गावोऽयासो वसन्ति वै ।
गावो यज्ञस्य यज्ञत्वं दैवतं द्युसदामपि ॥९१॥
गावः प्रतिष्ठा भूतानां गावः पुण्यं परायणम् ।
गावः समासत सत्रं सिषासन्त्यः शफांस्तथा ॥९२॥
श्रृंगाणि चापि दशमे मासि वेधास्ततो ददौ ।
तासां श्रृंगाण्यजायन्त यासां याद्दङ्मतानि वै ॥९३॥
गावस्तेजो महद् दिव्यं पालयन्ति सुसाधवः ।
सुकृतिनः पुण्यभाजो गवां सेवारताः सुराः ॥९४॥
यत्र द्रुमा मिष्टरसा मधुस्रावफलान्विताः ।
मधुसुगन्धिपुष्पाश्च भूमिर्मणिमयी तथा ॥९५॥
यत्र काञ्चनभूभागाः सुखदाः कामदास्तथा ।
सर्वविधैरुपलैश्च भान्ति यत्र जलाशयाः ॥९६॥
केसरा यत्र वर्तन्ते सौरभाढ्या मरुद्गताः ।
षड्रसाः फलिनः स्तम्बाः शाकानि च मधूनि च ॥९७॥
मुक्ताफुल्ला वल्लयश्च सफलाश्चाऽमृतप्रदाः ।
सौवर्णा गिरयो यत्र नित्यनूतनशोभिनः ॥९८॥
नवरूपधरा नार्यो सेवन्ते मुक्तकोटिकाः ।
सर्वकामाः सर्वरसाः सर्वभोगा भवन्ति च ॥९९॥
यत्र चान्दनारण्यानि रमन्ते तत्र गोप्रदाः ।
सर्वसंकल्पसमृद्धा निःशोका भाग्यवर्द्धिताः ॥१००॥
विमानेषु विचित्रेषु महोद्यानेषु यान्ति च ।
मोदन्ते गोप्रदातार उपक्रीडन्ति सर्वशः ॥१०१॥
विहरन्ति स्त्रीजनैश्च पूज्यन्ते स्वर्गिभिस्तथा ।
मोदं प्रमोदमानन्दान् सुखानि भुञ्जतेऽन्वहम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधूनां योगहीनस्य प्रेतस्योद्धरणे गोदानं हेतुरिति-गोमाहात्म्यादिनिरूपणनामैकाऽधिकशत-तमोऽध्यायः ॥ १०१ ॥

श्रीपुरुषोत्तम उवाच—

गवाराधनसंज्ञं च व्रतं कुर्युर्विमुक्तये ।
प्रेतस्य वंशजा भार्या पुत्रः सम्बन्धिबान्धवाः ॥ १ ॥
गवां गोष्ठे निवसनं गवां शुश्रूषणं तथा ।
गवाऽन्वाहारमेवापि गवान्वपानमित्यपि ॥ २ ॥
गवान्वशयनं चापि गोप्राक्प्रबोधनं तथा ।
गोस्थलीमार्जनाद्यं च दंशादीनां निवारणम् ॥ ३ ॥
शाद्वलघासदानं च गव्याहारस्तथाऽर्हणम् ।
रक्षणं सर्वथा शश्वद् गोष्ठे वासः सदा तथा ॥ ४ ॥
द्रुह्येन्न मनसा वापि गोषु नित्यं सुखप्रदः ।
अर्चयेत रमाबुद्ध्या नमस्कारैः प्रपूजयेत् ॥ ५ ॥
त्र्यहमुष्णं पिबेन्मूत्रं त्र्यहमुष्णं पिबेत् पयः ।
त्र्यहं घृतं पिबेदुष्णं वायुभक्षस्त्र्यहं भवेत् ॥ ६ ॥
वहेद् घृतं तु शिरसा वह्निं संजुहुयाद् घृतैः ।
घृतं दद्यात्तथाऽश्नीयाद्घृतेन स्वस्ति वाचयेत् ॥ ७ ॥
गवोच्छिष्टयवभक्षो ब्रह्महत्यां व्यपोहति ।
दैत्यैश्च दानवैर्युक्ताः प्रसह्य भोजने सुराः ॥ ८ ॥
आशिता निजभक्ष्याणि ततः शुद्ध्यर्थमेव ह ।
गवाराधनसंज्ञं वै व्रतं मासकृतं कृतम् ॥ ९ ॥
ततः शुद्धाः पुनर्देवाः संसिद्धा निजकर्मसु ।
अतो गावः पवित्राश्च पावनाः पुण्यदास्तथा ॥१०॥
गोदानं तच्छुभं दत्वा शुद्ध्यति स्वर्गमश्नुते ।
अग्निमध्ये गवां मध्ये सतां मध्ये वसन्नपि ॥११॥
विप्रमध्ये सतीमध्ये वेदमध्ये वसन्नपि ।
यज्ञमध्ये तीर्थमध्ये वसन् शुद्ध्यति पातकात् ॥१२॥
गावस्तुष्टाः प्रयच्छन्ति पुत्रं धनं पतिं प्रियाम् ।
श्रृणु श्रीशिवराज्ञीश्रि ! पुरा श्रीस्त्वं स्वभावतः ॥१३॥
कान्तं वपुर्विनिर्माय गोमध्ये संस्थिताऽभवः ।
गावश्चाश्चर्यसम्पन्ना वीक्ष्यते रूपसम्पदम् ॥१४॥
पप्रच्छुस्त्वां काऽसि कन्ये कुतोऽसि रूपसुन्दरी ।
कथं चात्राऽऽगता सौम्ये वद चेन्मन्यसे हि नः ॥१५॥

तदा त्वं गाः प्रणम्यैवोदितवती प्रसादिता ।
विष्णुकान्ताऽस्मि भद्रं वः श्रीर्नामाऽहं हरेः प्रिया ॥१६॥
मयाऽभिपन्ना देवाद्या मोदन्ते शाश्वतीः समाः ।
सूर्यश्चन्द्रो महेन्द्रश्च वसवो देवकोटयः ॥१७॥
अग्निरापो मयाऽऽविष्टाः स्मृद्ध्युद्भावा भवन्ति वै ।
यान्नाविशाम्यहं गावस्ते विनश्यन्ति सर्वथा ॥१८॥
यत्र धर्मार्थकामाश्च मया जुष्टा हि तद्गृहम् ।
मोदप्रमोदशान्त्याढ्यं महानन्दभृतं भवेत् ॥१९॥
इच्छामि चापि युष्मासु वस्तुं भवत मद्युताः ।
स्त्रीवर्गे मे सदा वस्तुं वाञ्च्छा जाताऽस्मि वै ध्रुवा ॥२०॥
श्रुत्वा गावश्च भवतीं प्राहुस्त्वं चञ्चला ह्यसि ।
सर्वगां त्वां न चेच्छामो भद्रं तेऽन्यत्र गम्यताम् ॥२१॥
श्रुत्वा त्वं चाऽर्थितवती कथं मां नाभिनन्दथ ।
महदुग्रं तपः कृत्वा मां निषेवन्ति मानवाः ॥२२॥
यक्षा असुरा गन्धर्वा ईश्वरा उरगाः सुराः ।
कथं मां प्रतिगृह्णीध्वं नैव यूयं हि दुर्लभाम् ॥२३॥
श्रुत्वैवं धेनवः प्राहुश्चलचित्ताऽसि सर्वथा ।
बहुना तु किमुक्तेन ततस्त्वां वर्जयामहे ॥२४॥
श्रुत्वैवं त्वं चोक्तवती चाञ्चल्यं सन्त्यजाम्यहम् ।
भवतीनां कृते गावो वस्तुं स्थानं प्रयच्छथ ॥२५॥
ततो गावश्चोक्तवत्यः शकृन्मूत्रे वस ध्रुवा ।
ओमित्यवसस्त्वं लक्ष्मि गवां मूत्रे च शकृति ॥२६॥
गोमूत्रं गोमयं तस्माल्लक्ष्मि गृहं तवाऽस्मि वै ।
यत्र त्वं तत्र चाऽहं च निवसामि न संशयः ॥२७॥
एवं ज्ञात्वा महिमानं गां प्रयच्छन्ति ये जनाः ।
हुतशिष्टाशिनस्ते वै सत्रिणोऽध्वरिणश्च ते ॥२८॥
ऋते दधि घृतं नाऽत्र यज्ञः कश्चित् प्रवर्तते ।
ततो यज्ञस्य यज्ञत्वं गोमूलकं प्रतिष्ठितम् ॥२९॥
गोपुत्राः सततं लोके कृषियोगमुपासते ।
उत्पादयन्ति धान्यानि प्रवर्तन्ते मखाश्च तैः ॥३०॥
वहन्ति विविधान् भारान् क्षुत्तृषादिप्रपीडिताः ।
साधूंश्च धारयन्तीह पृष्ठे च शकटेऽपि च ॥३१॥
गोलोकं सन्नयन्त्येव दत्ता दाने परेतकम् ।
तस्मात् स्थानं गवामूर्ध्वं स्वर्गात् सत्यात् तथैश्वरात् ॥३२॥
गोलोकं वै गवां स्थानं मम कृष्णस्य मन्दिरम् ।
गोदाता याति गोलोकं कृष्णनारायणालयम् ॥३३॥
अन्यच्छृणु महालक्ष्मि पुरा देवयुगे खलु ।
अदितिस्तु तपस्तेपे विष्णुः पुत्रो भवेन्मम ॥३४॥

एकपादेन तपतीं वीक्ष्य दक्षसुता तदा ।
सुरभीनामिका चापि तपस्तेपे तया सह ॥३५॥
तदा गत्वा स्वयं ब्रह्माऽदितये सद्वरं ददौ ।
विष्णुः पुत्रस्ते भविता सुरकार्यकरो हरिः ॥३६॥
सुरभ्यै वरदानं च दत्तवान् विश्वसृट् तदा ।
दक्षसुते ! तापसि ! त्वं ह्यमरीत्वमवाप्स्यसि ॥३७॥
ईश्वरीत्वं च गोपीत्वमवाप्स्यसि सर्वशः ।
मुक्तानीत्वं तथा मोक्षदात्रीत्वं संत्रजिष्यसि ॥३८॥
सृष्टित्रये पूज्यतमोपरिष्टाच्च निवत्स्यसि ।
गोप्रदास्तांश्च गोलोकान् गोपतेर्वै प्रसादतः ॥३९॥
वासस्थानान्यवाप्स्यन्ति यत्र वसन्ति धेनवः ।
भूरिशृंगा यत्र गावो यास्यन्ति वंशजास्तथा ॥४०॥
उरुगायस्य कृष्णस्य तद्धाम परमं पदम् ।
हव्यार्पणादिपुण्येन या वै दुहितरस्तव ॥४१॥
देवसेवाप्रकर्त्र्यः स्युर्निवत्स्यन्ति च तत्पदे ।
मनसा चिन्तिता भोगाः सम्पत्स्यन्ते सुखास्तव ॥४२॥
गोदातॄणां परे लोकाः सर्वकामसमन्विताः ।
न येषु क्रमते मृत्युर्न जरा न च पावकः ॥४३॥
न दारिद्र्यं नाऽशुभं च विद्यते गोपदे क्वचित् ।
तत्र दिव्यान्यरण्यानि दिव्यानि भवनानि च ॥४४॥
विमानानि सुदिव्यानि कामगानि भवन्ति च ।
घृतकुल्या दधिकुल्याः पयःकुल्या भवन्ति च ॥४५॥
पुष्करिण्योऽमृतानां च नवनीताऽऽद्रयोऽपि च ।
शर्करामधुसुस्वादाः सुधाचया भवन्ति च ॥४६॥
तरुण्यो गोपिका यत्र भवन्ति दिव्यभूषिताः ।
गोदातारः प्रयास्यन्ति सौरभि ! त्वत्पदं परम् ॥४७॥
ब्रह्मचर्येण तपसा सेवया च सतां हरेः ।
दानैः पुण्यैर्दमेनापि सत्येन तीर्थसेवनैः ॥४८॥
कृष्णनारायणभक्त्या राधाभक्त्या विशेषतः ।
शक्यः समासादयितुं गोलोकः कृष्णशोभितः ॥४९॥
गोभक्तो लभते सर्वं यथेष्टं कामितं शुभम् ।
भक्ताः स्त्रियो लभन्ते च कामितं सर्वमुत्तमम् ॥५०॥
पुत्रार्थी लभते पुत्रं कन्यार्थी कन्यकां तथा ।
वित्तार्थी लभते वित्तं धर्मार्थी धर्ममाप्नुयात् ॥५१॥
मोक्षार्थी प्राप्नुयान्मोक्षं सम्पदर्थी तु सम्पदः ।
विद्यार्थी चाप्नुयाद् विद्यां सुखार्थी लभते सुखम् ॥५२॥
रसार्थी लभते रस्यं दार्ढ्यार्थी दृढतां तथा ।
पत्यर्थिनी पतिं श्रेष्ठं कान्तार्थी सुन्दरीं शुभाम् ॥५३॥

सुतार्थी लभते पुत्रीं स्वर्गार्थी स्वर्गमाप्नुयात् ।
गोप्रदाता महाराज्यं लभते पार्थिवं ह्यपि ॥५४॥
ऐन्द्रं पदं सूर्यपदं चान्द्रं कौबेरकं पदम् ।
याम्यपदं तथा धर्म्यं बाह्लवं चैशमित्यपि ॥५५॥
कैलासं चापि वैकुण्ठं वैराजं पदमित्यपि ।
लभेत श्रेष्ठगोलोकं धामाऽक्षरं लभेत च ॥५६॥
आरोग्यं लभते गोदो यशः कीर्तिं लभेत च ।
गजवाजिसुरभीश्च लभेत गोप्रदः खलु ॥५७॥
रूपं रत्नानि वस्त्राणि मणीन् सौवर्णशेवधिम् ।
लभते गोप्रदाता वै स्मृतं गोदानकालिकम् ॥५८॥
अपमृत्युर्विनश्येच्च प्रेतत्वं दूरतो व्रजेत् ।
पापानि संप्रणश्येयुर्गोदातुश्च स्मृतस्य च ॥५९॥
इत्येवं वरदानानि ददौ ब्रह्मा हि धेनवे ।
न किञ्चिद् दुर्लभं लक्ष्मि ! गोभक्तस्य भवेदिह ॥६०॥
सिद्धयश्चाणिमाद्याश्च सर्वैश्वर्यादिसम्पदः ।
यावन्तश्च चमत्कारा भवन्ति धेनुदे रमे ! ॥६१॥
वेदपुण्यं मखपुण्यं कन्यापुण्यं च दक्षिणा ।
भूमिपुण्यं स्वर्णपुण्यं गोदानेन प्रजायते ॥६२॥
गोदानेन समं देयं सुवर्णं दक्षिणात्मकम् ।
अप्राप्तायां मूर्तिमत्यां देया धेनुर्हि कानकी ॥६३॥
सदा भूमेर्गवामर्थे देयं सुवर्णमित्यपि ।
स्वर्णं गौः पृथिवी चेति त्रीणि दानानि पद्मजे ॥६४॥
प्रेतमुक्तिकराण्येव भवन्ति नात्र संशयः ।
गाश्च भूमिं च वित्तं च दत्वा पापी प्रपूयते ॥६५॥
अजोऽग्निर्वरुणो मेषः सूर्योऽश्वः प्राग् व्यजायत ।
तत्तद्दानानि वै प्रेतमुक्तयेऽपि भवन्ति हि ॥६६॥
कुंजराश्च मृगा नागा महिषाश्चासुरा हि ते ।
आसुरयोनिमुक्त्यर्थं हस्त्यादिदानमुत्तमम् ॥६७॥
कुक्कुटाश्च वराहाश्च राक्षसाः परिकीर्तिताः ।
रक्षोयोनिविमुक्त्यर्थं तत्तद्दानं प्रशस्यते ॥६८॥
इडा गावः पयः सोमो भूमिरजायतैव ह ।
प्रेतादीनां विमुक्त्यर्थं गोभूदानं प्रशस्यते ॥६९॥
अग्निर्हि देवता स्वर्णे देवता शस्यते ततः ।
स्वर्णदानं परं प्रोक्तं देवदानं शुभप्रदम् ॥७०॥
अग्न्यभावे तु कुरुते वह्निस्थानेषु कांचनम् ।
कुशस्तम्बे जुहोत्यग्निं सुवर्णे तत्र च स्थिते ॥७१॥
विप्रहस्ते साधुहस्ते दर्भस्तम्बेऽजकर्णके ।
अप्सु काष्ठे सुवर्णे च जुहोत्यग्नेरसन्निधौ ॥७२॥
हुते प्रीतिकरीमृद्धिं श्रीपतिः सम्प्रयच्छति ।
नित्यं ददाति सौवर्णं यथाशक्ति तु योजनः ॥७३॥
ब्रह्मवाय्वाग्निसोमानां सालोक्यमुपयाति सः ।
माता पिता सुतश्चेति गार्हस्थ्यं त्र्यात्मकं शुभम् ॥७४॥
गवां स्वर्णस्य पृथ्व्याश्च दानं त्र्यात्मकमुत्तमम् ।
श्रद्धास्नेहश्चादरश्च त्रेधाऽतिथिप्रसादकृत् ॥७५॥
तथा भूगोसुवर्णानि परलोकप्रदानि वै ।
भवनं सम्पदो वृत्तिस्त्रेधा सौख्यप्रसाधनम् ॥७६॥
धेनुभूकनकान्येवं दाने सौख्यप्रदानि वै ।
ज्ञानं शान्तिश्च निवृत्तिस्त्रयश्चानन्दहेतवः ॥७७॥
धेनुक्षितिस्वर्णकानि महानन्दप्रदानि वै ।
भक्तिर्हरिश्च मोक्षश्च सम्बद्धास्ते त्रयः सदा ॥७८॥
साधुः शीलं क्षमा चेति सम्बद्धास्ते त्रयोऽपि च ।
तथा दाने स्वर्णधेनुभुवो बद्धा हि नित्यशः ॥७९॥
भुक्तिदा मुक्तिदाश्चापि प्रेतोद्धारकरास्तथा ।
स्वर्गदाः पापपुञ्जानां नाशका पुण्यदास्त्रयः ॥८०॥
गोयज्ञात्म गवां दानं पितृयज्ञं तु तर्पणम् ।
सतां यज्ञं भोजनं च दत्वा सौवर्णदक्षिणाम् ॥८१॥
नारायणबलिं कृत्वा नीलपुच्छादितर्पणम् ।
कारयित्वाऽभ्यर्थितस्य दानं प्रेतं प्रमोक्षयेत् ॥८२॥
इत्येवं कथिता लक्ष्मि प्रेतमुक्तिः शुभोद्भवा ।
मोक्षशास्त्रकृतं चापि पारायणं प्रमोचयेत् ॥८३॥
नामसंकीर्तनं चापि ह्यखण्डभजनं मम ।
सतां करजतोयं च मुक्तिदं प्रेतयोनितः ॥८४॥
अवभृथं पवित्रं च स्नानं श्राद्धं शुभे क्षणे ।
साधूनां दर्शनं चापि स्पर्शनं च निदेशनम् ॥८५॥
मुक्तिदं प्रेतयोनेस्तु तीर्थवारिनिषेवणम् ।
यत्र क्वापि गतश्चापि मुच्यते भजनाद्धरेः ॥८६॥
यक्षो वा राक्षसो वापि भूतः प्रेतः पिशाचकः ।
सर्पो वा पशुदेहोऽपि याम्यो वा वायुदेहवान् ॥८७॥
डाकिनी वा शाकिनी वा भूती पिशाचिनी च वा ।
वेतालिनी वा वेतालो यत्र क्वापि गतोऽपि वा ॥८८॥
साधूनां दर्शनं यद्वा प्रसादं श्रीहरेश्च वा ।
लभते वा जलं चापि मुच्यते नात्र संशयः ॥८९॥
सन्तो हि तारका लोके पापानां नाशकास्तथा ।
कल्मषाणां हारकाश्च दिव्यतामोक्षसम्प्रदाः ॥९०॥
गोस्वर्णवह्निदेवेभ्यः श्रेष्ठाः सन्तः सदा रमे ! ।
सतां योगो मम योगः सर्वपुमर्थदः खलु ॥९१॥

एकदा पुष्कसो नाम्ना भारुण्डो मद्यपानकृत् ।
मांसादः शीलहीनश्च स्तेनो मृतो वनान्तरे ॥९२॥
याम्यैर्नीतो यमपूर्यां नरकेषु निपातितः ।
तत्पत्न्या तु कृतं तीर्थे गोदानं स्वर्णमण्डितम् ॥९३॥
प्रेतस्य सर्वपापानि दूरीभूतानि तत्क्षणात् ।
प्रेतः स्वर्गं ययौ तूर्णं पापानि सुरभीं ययुः ॥९४॥
सुरभी साऽऽह पापानि नाशयितुं तु वेधसे ।
पुष्कसस्य तु पापानि मयि लग्नानि दानतः ॥९५॥
माया नाशयितव्यानि कुत्र गत्वा पितर्वद ।
श्रुत्वा ब्रह्माऽऽह तां गां च याहि सनत्कुमारकम् ॥९६॥
साधुं शीलव्रतं द्राक् स नाशयिष्यत्यघानि ते ।
श्रुत्वा गत्वा सुरभ्येनं साधुं नेमे तथाऽऽर्थयत् ॥९७॥
पापनाशार्थमेवाऽपि साधुः पादजलं ददौ ।
पपौ सा सुरभी गौश्च नष्टान्यघानि सत्वरम् ॥९८॥
ततः सुरभी ब्रह्माणं प्रययौ संस्कृता सता ।
जगाद श्लोकान् सन्तुष्टा नत्वा श्रीवेधसं गुरुम् ॥९९॥
'धन्या वै साधवो लोके शीलिनो रागवर्जिताः ।
अमायिका दिव्यरूपाः पापनाशो यदाश्रयात् ॥१००॥
तीर्थानां कामधेनूनां सतीनां च तपस्विनाम् ।
विप्राणां यानि पापानि तानि नश्यन्ति साधुषु ॥१०१॥
पितॄणां च सुराणां च महर्षीणां च योषिताम् ।
देहिनां यानि पापानि तानि नश्यन्ति साधुषु ॥१०२॥
राज्ञां रक्षसां यक्षाणां भूतानां याम्यवासिनाम् ।
असद्व्रतीनां पापानि नश्यन्त्येव हि साधुषु ॥१०३॥
कामिनां क्रोधिनां चापि लोभिनां मोहिनां तथा ।
घातिनां यानि पापानि तानि नश्यन्ति साधुषु ॥१०४॥
हत्यानां पशुमाराणां क्रूराणां प्राणरोधिनाम् ।
विश्वासहृणां पापानि नश्यन्त्येव हि साधुषु ॥१०५॥
गणिकानां पुंश्चलीनां ध्वजिनां चक्रिणां तथा ।
शस्त्रिणां चापि वैद्यानां नश्यन्त्यघानि साधुषु ॥१०६॥
श्रितघ्नानां बालघ्नानामग्निदानां विषादिनाम् ।
विषदानां वनघ्नानां नश्यन्त्यघानि साधुषु' ॥१०७॥
इत्युक्त्वा प्रययौ गोष्ठं लक्ष्मि ! सुरभी सुव्रता ।
पठनाच्छ्रवणादस्य नश्येयुः पापकोटयः ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने गवाराधननामव्रतं गोशकृन्मूत्रयोर्लक्ष्मीवासो गोदानविविधफलानि प्रेतोद्धारकाणि साध्वाश्रयः सर्वोद्धारकश्चेत्यादिनिरूपणनामा द्वयधिकशततमोऽध्यायः ॥ १०२ ॥

श्रीनारायणीश्रीरुवाच—

कदा काले प्रदानेन स्वर्णगोभूमयः फलम् ।
कीदृशं समददति तन्मे बोधय केशव ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

दत्वा दानानि प्रथमे दिने शुक्लस्य पक्षजे ।
श्राद्धभोजनयुक्तानि प्राप्नुयात् सुभगाः प्रियाः ॥ २ ॥
द्वितीयायां तथा दत्वा लभते कन्यकाः सुतान् ।
तृतीयायां तथा दत्वा लभते श्रेष्ठवाजिनः ॥ ३ ॥
चतुर्थ्यां तु तदा दत्वा लभते पशुगोधनम् ।
पञ्चम्यां तु तथा दत्वा लभते सद्गुणान् सुतान् ॥ ४ ॥
षष्ठ्यां तु च तथा दत्वा लभते सद्यशो बलम् ।
सप्तम्यां तु तथा दत्वा लभते क्षेत्रवाटिकाम् ॥ ५ ॥
अष्टम्यां तु तथा दत्वा लभते द्रव्यमुत्तमम् ।
नवम्यां तु तथा दत्वा हस्त्युष्ट्राऽश्वादिकान् लभेत् ॥ ६ ॥
दशम्यां तु तथा दत्वा कामधेनुयुतो भवेत् ।
एकादश्यां तथा दत्वा रूप्यशेवधिमान् भवेत् ॥ ७ ॥
द्वादश्यां तु तथा दत्वा स्वर्णरत्नादिमान् भवेत् ।
त्रयोदश्यां तथा दत्वा लोकराजस्तथा भवेत् ॥ ८ ॥
चतुर्दश्यां तथा दत्वा साम्राज्यं समवाप्नुयात् ।
पूर्णमास्यां तथा दत्वा चमत्कारी जनो भवेत् ॥ ९ ॥
अमायां तु तथा दत्वा सर्वान् कामानवाप्नुयात् ।
मे जयन्त्यां तथा दत्वा मोक्षं परममाप्नुयात् ॥१०॥
नक्षत्रेषु विशेषेण दानफलं वदामि च ।
कृत्तिकायां प्रदानेन भवेद्वै विगतज्वरः ॥११॥
रोहिण्यां सम्प्रदानेन चापत्यवान् भवेज्जनः ।
दानेन मृगशिरसि तेजस्वी मानवान् भवेत् ॥१२॥
आर्द्रायां तु प्रदानेन जयवान् सर्वदा भवेत् ।
पुनर्वसौ प्रदानेन धनवान् ऋद्धिमान् भवेत् ॥१३॥
पुष्ये दानप्रदाता तु सर्वथा पुष्टिमान् भवेत् ।
आश्लेषायां प्रदानेन धीरान् पुत्रानवाप्नुयात् ॥१४॥
मघायां तु प्रदानेन प्रजाप्राधान्यमाप्नुयात् ।
पूर्वाफाल्गुनिकादानाच्छ्रेष्ठभाग्ययुतो भवेत् ॥१५॥
उत्तराफाल्गुनीदानाद्ब्रह्मपत्यो भवेज्जनः ।
हस्ते दानप्रकर्ता तु कार्यफलानि चाप्नुयात् ॥१६॥
चित्रायां तु प्रदानेन लभेद् रूपवतः सुतान् ।
स्वातौ दानप्रदाता तु वाणिज्यरत्नवान् भवेत् ॥१७॥

विशाखायां प्रदाता तु सुपुत्रो बहुपुत्रवान् ।
अनुराधासु दाता स्याच्चक्रवर्ती प्रधानकः ॥१८॥
ज्येष्ठायां सम्प्रदाता वै चाधिपत्यं लभेदिह ।
मूले दानप्रकर्ता तु लभेदारोग्यमुत्तमम् ॥१९॥
पूर्वाषाढाप्रदानेन यशोभाङ्मानवान् भवेत् ।
उत्तराषाढिकादानाद् वीतशोको भवेत् सदा ॥२०॥
दानं त्वभिजिति कुर्वन् भिषक्सिद्धिमवाप्नुयात् ।
श्रवणे दानकर्ता तु लभेत्सुपरमां गतिम् ॥२१॥
धनिष्ठायां प्रदाता स्यादाचार्यो गुरुराण्नृपः ।
शतभिषाप्रदानेन धातुसिद्धिमवाप्नुयात् ॥२२॥
पूर्वभाद्रपदादानफलं चाजाविकादिकम् ।
उत्तरप्रोष्ठपदादो गोवाजिगजवान् भवेत् ॥२३॥
रेवत्यां तु प्रदानेन स्वर्णरूप्यादिमान् भवेत् ।
अश्विनीदानकर्ता स्यान्महिष्यश्वादिमान् जनः ॥२४॥
भरण्यां दानदो दीर्घजीवी भवेन्न संशयः ।
गोभूस्वर्णप्रदाता वै सर्वफलान्यवाप्नुयात् ॥२५॥
परीक्षेत न वै दानपात्राणि दानधर्मवित् ।
दैवे पैत्र्ये च साधव्ये परीक्षेत न वै क्वचित् ॥२६॥
विद्यावन्तो भक्तिमन्तो ब्रह्मिष्ठाः सर्वपावनाः ।
सदाचारपरा ब्रह्मदेयाश्च सामगा द्विजाः ॥२७॥
मातापितृसेवकाश्च देवानां सेवकास्तथा ।
ब्रह्मचर्यपराः शुद्धा यतयः सर्वपावनाः ॥२८॥
सत्यधर्मव्रतशीलाः पुण्यतीर्थनिषेविणः ।
मखाभिषेकवन्तश्चाऽवभृथस्नानकारिणः ॥२९॥
पारायणप्रवक्तारस्तापसाः कीर्तने रताः ।
मोक्षमार्गपराः कथावाचका धर्मदेशकाः ॥३०॥
गुरुमन्त्रप्रदा वृद्धादरा गोसेवकाश्च ये ।
साधवः साधुसेवाढ्याः पात्राणि सर्वपावनाः ॥३१॥
अग्र्या धर्मप्रलेखेषु मोक्षलेखेषु चाग्रगाः ।
विद्याश्रया ज्ञानशीलाः शान्ता वै पंक्तिपावनाः ॥३२॥
यावदेते प्रपश्यन्ति पंक्तिं पुनन्ति तत्क्षणात् ।
ध्यानज्ञानपरा भक्तिपरास्तपःपरास्तथा ॥३३॥
निर्गुणक्रियया युक्ताः साधवः पंक्तिपावनाः ।
प्रेतानां मुक्तिदाः सन्तो भोजिताः पूजिता नताः ॥३४॥
भक्तिमन्तस्तापसाश्च सन्तो ब्रह्माण्डपावनाः ।
तपश्चैषामिन्द्रियाणां निग्रहः परमं मतम् ॥३५॥
मनसो निग्रहश्चापि श्रीहरेर्धारणं सदा ।
त्यागस्य चापि सम्पत्तिस्तप उत्तममेव तत् ॥३६॥
उपवासो ब्रह्मचर्यं मौनं क्षमा तपः परम् ।
तितिक्षा तुष्टिरौदार्यं सहनं तप उत्तमम् ॥३७॥
ऋतवादित्वमेवाऽपि विघसाशित्वमित्यपि ।
अमृताशित्वमेवापि परमं तप उच्यते ॥३८॥
एकभुक्तो भवेदेव सदोपवासिवत् खलु ।
एकपत्नीव्रतश्चापि ब्रह्मचारी सदा भवेत् ॥३९॥
ऋतुमात्रप्रसंगी च साधुरेव भवेद्धि सः ।
स्त्रीमात्रसंगरहितो मुक्तो भूमौ न संशयः ॥४०॥
स्वर्णस्त्रीपाशरहितो द्विभुजः परमेश्वरः ।
तादृशी स्त्री धर्मयुक्ता साक्षान्नारायणी मता ॥४१॥
साध्वी सा दानपात्रं च सती पात्रं तथोत्तमम् ।
विधवा दानपात्रं चाऽप्यनाथा दानपात्रकम् ॥४२॥
कन्यका दानपात्रं च वृद्धा दानस्य पात्रकम् ।
निराश्रया दानपात्रं यदि भक्तिवृषान्विता ॥४३॥
दानदाता पवित्रो वै सदा भवति भक्तिमान् ।
विभज्य च ततो भुंक्तेऽमृतभोजी भवेद्धि सः ॥४४॥
देवेभ्यः सन्निवेद्याऽत्ता विघसाशी भवेद्धि सः ।
एतादृशस्य भवने ह्यदृश्या अपि ऋद्धयः ॥४५॥
मूर्तरूपं परं प्राप्य मोदन्ते मोदयन्ति तम् ।
देवताः पितरः सिद्धा योगिनो यतयस्तथा ॥४६॥
सन्त ईशा ईश्वराण्यो रमन्ते दातृमन्दिरे ।
अप्सरसश्च गन्धर्वाः सुरा देव्यश्च साधवः ॥४७॥
सत्यश्च भाग्यवत्यश्च तथा च कामधेनवः ।
पुत्राः पौत्राः सुताः पुत्र्यो गावश्चास्य भवन्ति हि ॥४८॥
एवं दातुः कुटुम्बं वै सर्वं देवकुलं भवेत् ।
पशवो देवपशवः सस्यानि दैवतान्यपि ॥४९॥
स्वर्णरूप्यादिकं सर्वं लक्ष्मीरूपं सुदैवतम् ।
भाग्यान्यपि च सर्वाणि रूपं भूषाश्च दैवतम् ॥५०॥
एवं दातुर्भवेदेव दिव्यं दैवं कुटुम्बकम् ।
तस्माल्लक्ष्मि प्रदातव्यं स्वर्णं गौः पृथिवी शुभा ॥५१॥
यदि पाचनशक्तिः स्याद् ग्रहीतव्यं न चान्यथा ।
अल्पशक्तेः पुण्यनाशो भवत्येव प्रतिग्रहात् ॥५२॥
सप्तर्षिभ्यः पुरा राजा वृषादर्भिः समुत्सुकः ।
रत्नान्यदर्शयद् दातुं नाऽगृह्णन् ऋषयस्तदा ॥५३॥
वृषादर्भिः स्वयं प्राह समर्थाः स्थ प्रतिग्रहे ।
प्रतिग्रहस्तारयति वृणुध्वं वित्तमुत्तमम् ॥५४॥
सुवर्णानि रूप्यकाणि मौक्तिकानि च हीरकान् ।
मणीन् श्वेतगजानश्वान् श्वेतान् गोवृषभाँस्तथा ॥५५॥

गृष्टीश्चाग्र्याः कामधेनूर्ग्रामान् क्षेत्राणि चार्पये ।
राज्यं राज्ञीर्दासवर्गान् दासीर्दास्ये महासभाः ॥५६॥
प्रासादान् सरितश्चाद्रीन् दास्ये वनानि सर्वशः ।
गृह्णन्तु ब्राह्मणा मेऽद्य विप्राश्च साधवो मम ॥५७॥
अदेयं मे विद्यते न मोक्षार्थे प्रयते यतः ।
दत्वा पात्रेभ्य एवाऽत्र लप्स्येऽहं शाश्वतं फलम् ॥५८॥
इत्येवं त्वर्थयन्तं वै दानं दातुं ह्युपस्थितम् ।
ऋषयः प्राहुरव्यग्रा धीराः शान्ताः प्रतोषिणः ॥५९॥
राजन् प्रतिग्रहो राज्ञां मध्वास्वादो विषोपमः ।
तद् दाव इव निर्दह्यात् प्राप्तो राजपरिग्रहः ॥६०॥
अप्रतिग्राह्यमेवाऽतः प्रेत्येह च सुखेप्सुना ।
राजधनं प्रतीच्छन् वै पापिष्ठां लभते गतिम् ॥६१॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
सर्वं तन्नाऽलमेकस्य तस्माद् विद्वान् शमे वसेत् ॥६२॥
उत्पन्नस्य रुरोः शृंगं वर्धमानस्य वर्धते ।
पुरुषस्य स्त्रियाश्चापि तथेच्छा वर्धते सदा ॥६३॥
न तल्लोके द्रव्यमस्ति यल्लोकान् परितर्पयेत् ।
समुद्रतृष्णः पुरुषो न कदापि प्रतुष्यति ॥६४॥
कामं कामयमानस्य कामो यदोपयुज्यते ।
प्रकामः स प्रवर्धेत सतृष्णश्चाति विध्यति ॥६५॥
प्रतिग्रहे संयमो वै तपो धारयते ध्रुवम् ।
परिग्रहे तपः सर्वं नश्यत्येव न संशयः ॥६६॥
तपःसंचय एवेह विशिष्टो द्रव्यसञ्चयात् ।
तस्माद् राजान् धनं तेऽस्तु मा विषं सेचय द्विजे ॥६७॥
दावं राजधनं नैवेच्छामः शान्ता महर्षयः ।
स्वस्ति तेऽस्तु महाराज ! यामो वयं दिवं पुनः ॥६८॥
इत्युक्त्वा प्रययुः सर्वर्षयो दानग्रहं विना ।
वृषादर्भिस्ततः सम्यग्ज्ञातवान् दानघोरताम् ॥६९॥
अपात्रेऽर्पितदानस्याऽपथ्यत्वं सुतरां खलु ।
तस्मात् पात्रं हि दानानां पुण्याश्रया द्विजास्तथा ॥७०॥
सन्तोऽपि भगवद्भक्तास्तेभ्यो देयं विशेषतः ।
विप्रा अपि हरेर्भक्तास्तेभ्यो देयं विशेषतः ॥७१॥
ये लोभं नैव कुर्वन्ति स्वार्थमात्रविवर्जिताः ।
श्रीहरेः पूजकास्तेभ्यो देयं दानं विशेषतः ॥७२॥
पात्रजनः सर्वरीत्या लोभं सदा विवर्जयेत् ।
हरये चाऽर्पणं मत्वा गृह्णीयान्नान्यथा क्वचित् ॥७३॥
वृषादर्भिस्ततो लक्ष्मि प्रयागे कुंभयोगके ।
ददौ दानानि गत्वैव साधुभ्यस्तानि भाववान् ॥७४॥

अथाऽऽगतं विमानं च वैकुण्ठाद् यामुने तटे ।
गंगायाः संगमे विष्णुपार्षदैः शोभितं तदा ॥७५॥
राजानं पार्षदा नीत्वा ययुर्वैकुण्ठधाम ह ।
एवं साधुजनानां वै सेवया मोक्षणं रमे ! ॥७६॥
भवत्येव न सन्देहस्तस्मात् पात्रं समर्जयेत् ।
दद्याद्भावेन तस्मै च हरयेऽर्पणमस्त्विति ॥७७॥
अथ दद्याच्छत्रदानं चोपानद्दानमित्यपि ।
धोत्रकञ्चुकदानं च शिरस्त्राणसमर्पणम् ॥७८॥
भवेच्छत्रपतिस्तेन भवेद्विमानगस्तथा ।
दद्यात् सिंहासनदानं राज्याधिपो भवेत्ततः ॥७९॥
दद्याच्चामरदानं च वेत्रदानं तथाऽर्पयेत् ।
ध्वजदानं प्रकुर्याच्च रथदानं चरेत्तथा ॥८०॥
कोशदानं प्रकुर्याच्च कणसञ्चयदानकम् ।
इक्षुक्षेत्रप्रदानं च सस्यक्षेत्रप्रदानकम् ॥८१॥
सरोवराऽर्पणं चापि शाकवाटीप्रदानकम् ।
उद्यानपुष्पवाट्यादेर्दानं कुर्यात्प्रयत्नतः ॥८२॥
शाटीभूषाकञ्चुकीन कुर्याद् दानानि वै तथा ।
खट्वाशय्याप्रदानानि कुर्यात् प्रेतस्य मुक्तये ॥८३॥
पात्रगर्गरिकादानं कलशस्थालिकाऽर्पणम् ।
शृंगारवस्तुदानानि दद्यात् प्रेतस्य मुक्तये ॥८४॥
उदकुंभीदुग्धकुंभीदधिकुंभीप्रदानकम् ।
जलद्रोणीघृतकुंभीकण्डन्यादिसमर्पणम् ॥८५॥
मुशलस्य प्रदानं च मार्जनीसम्प्रदानकम् ।
व्यजनादेः प्रदानं च दीपपेटीप्रदानकम् ॥८६॥
शय्याश्रीसम्प्रदानं च पात्रश्रीसम्प्रदानकम् ।
चुल्लिकापेषणीदानं दर्वीचीपिटिकाऽर्पणम् ॥८७॥
सन्दंशदानं कांगकेशीदानं दर्पणदानकम् ।
रशनारज्जुदानानि कारयेत् प्रेतमुक्तये ॥८८॥
जलदानं रन्धितान्नप्रदानं च फलार्पणम् ।
पयःपाकादिदानं च मिष्टान्नानां प्रदानकम् ॥८९॥
गोधूमशालितिलानां दानानि विविधानि च ।
कुर्याद् रसमधुक्षारार्पणं प्रेतस्य मुक्तये ॥९०॥
महाकम्बलदानानि महाम्बरप्रदानकम् ।
महाशृंगारदानानि कुर्यात् प्रेतस्य मुक्तये ॥९१॥
एकादश्यादिपुण्यानां दानं कुर्यात् प्रयत्नतः ।
व्रतदानं तपोदानं भक्तिदानं कथाऽर्पणम् ॥९२॥
जपदानं धर्मदानं कुर्यात् प्रेतस्य मुक्तये ।
वायुवाहनदानं च वह्निवाहनदानकम् ॥९३॥

जलवाहनदानं च भूवाहनप्रदानकम् ।
नरयानप्रदानं च यन्त्रवाहनदानकम् ॥९४॥
सौधदानं मन्दिरस्य दानं प्रासाददानकम् ।
ग्रामदानं वर्मदानं कुर्यात् प्रेतस्य मुक्तये ॥९५॥
शृणु लक्ष्मि पुरा नैजे चाश्रमे संवसन् ऋषिः ।
क्रीडन् वै धनुषा बाणान् जमदग्निर्मुमोच ह ॥९६॥
तानानीय शरान् पत्नी रेणुकाऽदात् पुनः पुनः ।
मध्याह्ने विषतापश्च सूर्यस्योग्रोऽभवत्तदा ॥९७॥
दग्धपादा तु सा पत्नी शनैरायात् पतिं प्रति ।
मुनिः प्राह कथं कान्ते ! चिरायते शराऽऽहृतौ ॥९८॥
पत्नी प्राहाऽर्कतापेन दग्धापादा भवामि वै ।
मुनिस्तूर्णं समाकर्ण्य शरान्मुमोच भास्करम् ॥९९॥
सूर्यस्त्रस्तश्चाययौ च विप्ररूपो मुनिं प्रति ।
उवाचर्षे हत मा मां प्रसादये क्षमस्व माम् ॥१००॥
मुनिः प्राह मम पत्न्याः पन्थाः सुखगमो यथा ।
भवेत् तापविहीनो वै तथा सूर्य विधापय ॥१०१॥
श्रुत्वा सूर्यो ददावस्मै छत्रोपानहमाशु वै ।
स्वल्पं यानं कामगं च भूषाम्बराणि वै तथा ॥१०२॥
पात्रमक्षयमेवाऽपि कल्पछायां वितानजाम् ।
हारं तापहारं चापि तृप्तिदं चामृतं तथा ॥१०३॥
उपकरणान्यन्यानि ददौ सूर्यः सुखानि च ।
ययौ नत्वा दिवं चाऽर्को रेणुकाऽभूत् सुखाश्रया ॥१०४॥
अपाददग्धा मृदुला ऋषिः प्रसन्नतां गतः ।
एवं छत्रादिदानं वै प्रवृत्तं सूर्यमूलकम् ॥१०५॥
तत्तद्दानप्रदानेन जीवतां प्रेतदेहिनाम् ।
दुःखशान्तिर्भवत्येव पुण्येन मोक्षणं भवेत् ॥१०६॥
पठनाच्छ्रवणादस्य सर्वदानफलं भवेत् ।
लक्ष्मि ! दानफलं सर्वं पुनरायाति दातरि ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विविधदानैः प्रेतोद्धारो भवति, दानपात्रं श्रेष्ठं साधुजनश्चेत्यादौ वृषादर्भैः सूर्यस्य च निदर्शनमित्यादिनिरूपणनामा त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

श्रीनारायणीश्रीरुवाच—

गार्हस्थ्यं धर्मसारं मे प्रब्रूहि परमेश्वर ।
समृद्धिमाप्नोति किं कृत्वा गृहस्थः सुतदारवान् ॥ १ ॥
किमवश्यं प्रकर्तव्यं किं कृत्वा च कृतं भवेत् ।
येनाऽन्यत् सर्वकर्तव्यसमावेशः प्रजायते ॥ २ ॥

श्रीपुरुषोत्तम उवाच—

साधवः पितरो देवा गुरवश्च महर्षयः ।
साध्व्यो भक्ता अर्चनीया इज्या नित्यं यथाधनम् ॥ ३ ॥
अन्नपुष्पप्रणामाद्यैस्तोषणीया हि साधवः ।
सेवया चानुवृत्त्या च प्रसादनीयाः साधवः ॥ ४ ॥
जलार्पणेन चान्नेन पयोमूलफलैर्दलैः ।
तोषणीया हि पितरः सिद्धान्नैः सद्रसादिभिः ॥ ५ ॥
देवार्पणं कारयेच्च कुर्याद् देवप्रपूजनम् ।
मखं कुर्यान्नित्यमपि देवान् सन्तोषयेत् सदा ॥ ६ ॥
गुरूणां सेवनं कुर्यादाज्ञां वहेत नित्यदा ।
गुर्वर्पणं विदध्याच्च मात्रे पित्रे समर्पयेत् ॥ ७ ॥
वृद्धेभ्यश्चाऽर्पयेदिष्टं प्रसेवेत मुदा मुदे ।
ऋषिभ्यश्च द्विजेभ्यश्च नमस्कुर्यात्तथाऽर्पयेत् ॥ ८ ॥
सामाऽध्यायं पठेच्चापि विद्यादानं च कारयेत् ।
साध्वीभ्यश्च सतीभ्यश्च दद्यादन्नं जलादिकम् ॥ ९ ॥
आश्रयं चाम्बरं दद्यात् सन्तोषयेन्निराश्रयाम् ।
भक्तान् सम्पूजयेन्नित्यं सत्संगं च समाचरेत् ॥१०॥
मोक्षमार्गं साधयेच्च धर्मं सञ्चिनुयात् सदा ।
गृहागता देहिनो वै यथा स्युः सुखिनस्तथा ॥११॥
प्रवर्तेताऽऽश्रयं दत्वा चोपकृत्वा प्रतोषयेत् ।
हरिर्नारायणश्चाऽयं ह्यभ्यागतो गृहागतः ॥१२॥
तत्र नारायणश्चास्ते तुष्यत्वयं जनार्दनः ।
एवं स्वागतमादध्यात् सर्वं ब्रह्मार्पणं भवेत् ॥१३॥
भिक्षुकेभ्यः प्रदद्याच्च गोभ्यो दद्यात्तथा गृही ।
श्वभ्यो दद्यात् तथा पारावातेभ्यश्चापि चार्पयेत् ॥१४॥
यादोभ्योऽपि प्रदद्याच्चाऽनाथेभ्योऽपि समर्पयेत् ।
निशाचरेभ्यो भूतेभ्यो बलिं नक्तं समर्पयेत् ॥१५॥
नागसर्पादिजीवेभ्यो दद्यात् कीटेभ्य इत्यपि ।
पिष्टं कणान् रन्धितं च घासं पत्रं यथायथम् ॥१६॥
आचार्यस्य पितुः साधोः सख्युरासस्य चातिथेः ।
इदमस्ति गृहे मह्यमिति नित्यं निवेदयेत् ॥१७॥
गृहस्थः कमलाकान्तशिष्टाशी वै सदा भवेत् ।
पत्युः स्थाने स्थिता पत्नी गृहिणी गृहरक्षिणी ॥१८॥
धर्मरक्षाकरी नित्यं सर्वधर्मान् निभावयेत् ।
सदा त्वं कुरु कल्याणि दानं मानं प्रसेवयेत् ॥१९॥
आशीर्वादादिलाभेन नारी नारायणी भवेत् ।
नरो नारायणः स्याद् भूलोको गोलोकतां व्रजेत् ॥२०॥

एतद् गृहामृतं प्रोक्तं यत् कृत्वा ऋद्धिमान् भवेत् ।
धर्मसारमिमं श्रुत्वा यः कुर्यात् स दिवं लभेत् ॥२१॥
शृणु संक्षेपतश्चाऽन्यद्धृदयस्थं विभावय ।
अहं पतिस्वरूपोऽस्मि नारायणः सदा गृहे ॥२२॥
त्वं श्रीर्नारीस्वरूपाऽसि पत्नी गृहिगृहे सदा ।
पार्षदा मे सुतकन्यास्वरूपाः सन्ति वै गृहे ॥२३॥
महीमाना अतिथयः साधवोऽभ्यागताश्च मे ।
इत्येवं दिव्यदृष्ट्या वै कुटुम्बं वर्तते गृहे ॥२४॥
कृष्णार्पणस्वरूपेण सेवते स्म परस्परम् ।
भक्त्यार्पणं सर्वमस्य कर्तव्यं नाऽवशिष्यते ॥२५॥
त एव विषयास्तानि खानि भोगास्त एव च ।
कल्पिता मयि कृष्णे स्युर्मोक्षदा निर्गुणाः प्रिये ॥२६॥
धर्मसारः कथितोऽयं गृहामृतफलः शुभः ।
ऋद्धिदः पुण्यदो बन्धवर्जितो मोक्षदः सुखः ॥२७॥
सहस्रजन्मपुण्यस्य ज्ञायते तत्त्वमीदृशम् ।
अपात्रस्य विषयिणः कल्मषिणस्तु दुर्ग्रहम् ॥२८॥
देहेन्द्रियमनोबुद्धिचेतनैः सर्वथा प्रिये ।
तर्पणीयाः साधवश्च तृप्तो भवामि तत्स्थितः ॥२९॥
गृहवाटीक्षेत्रवाजिगजगोमहिषीधनैः ।
तोषणीयाः साधवश्च जलाम्बरान्नसेवनैः ॥३०॥
यजस्व विविधैर्यज्ञैर्बहुन्नैः स्वर्णदक्षिणैः ।
साधून् सेवय साध्वीश्च पितॄन् देवांश्च तर्पय ॥३१॥
ब्रह्मप्रिया रञ्जयस्व वृद्धांश्च परिसेवय ।
आश्रितान् शुभसत्कारैरर्चयस्व यथार्हतः ॥३२॥
शृणु लक्ष्म्यभवत् पूर्वं नरशायो हि तस्करः ।
पत्नीपुत्रसमेतश्च सदा स्तैन्योपजीवनः ॥३३॥
सिंहारण्ये वसन्नित्यं वसतौ याति वै निशि ।
प्रसह्य धनिसौधादीन् भित्त्वा नीत्वा धनानि च ॥३४॥
अन्नादीनि चाम्बराणि नीत्वा याति वने पुनः ।
एवं सततं चौर्येण निर्वहत्यथ तद्वने ॥३५॥
साधुः श्रीचक्रभासाख्यो वैष्णवो विहरन् पथि ।
मिमेल तं नरशायं चौरं सरोवरान्तिके ॥३६॥
चौरो विज्ञाय तं साधुं निर्दोषं निर्भयं शुभम् ।
गत्वाऽन्तिकं ननामाऽथ निषसाद पुरः क्षणम् ॥३७॥
साधुः पीत्वा जलं तस्मै ददौ वारि प्रसादजम् ।
चौरोऽपि मानयन् भाग्यं तूर्णं पपौ जलामृतम् ॥३८॥
पानमात्रेण हृदयं व्यावर्तत शुभाश्रयम् ।
पूतं च मानसं वर्ष्म विवेकः समपद्यत ॥३९॥
पप्रच्छ तं पावनं वै मत्वा शान्तं सुखप्रदम् ।
पापनाशः कथं स्याद्वै साधो दर्शय सत्पथम् ॥४०॥
श्रुत्वा श्रीचक्रभासस्तं प्राह चौर्यं हि लौकिकम् ।
विहाय कुरु चौर्यं त्वं गुणानां च सतां हरेः ॥४१॥
सेवां साधोर्हरेर्नित्यं समाचर सदाशयः ।
श्रुत्वा पप्रच्छ साधुं तं नरशायः पुनः पुनः ॥४२॥
कया रीत्या मया सेवा कर्तव्या वद मे मुने ।
साधुः प्राह वने वन्यैः प्रसेवय समर्पितैः ॥४३॥
फलमूलकृताहारो भव चौर्यं परित्यज ।
हरेर्मूर्तिं चार्चयाऽत्र भजनं सततं कुरु ॥४४॥
सर्वपापानि नश्येयुश्चैवं प्रसेवनाद्धरेः ।
एवमुक्तः स वै स्तेनः साधुमाह सरोऽन्तिके ॥४५॥
विद्यते मम वासोऽत्र साधो चागच्छ मद्गृहम् ।
सेवयिष्ये भवन्तं च हरिं त्वया प्रदर्शितम् ॥४६॥
नाशमेष्यन्ति पापानि स्युः स्त्रीपुत्राश्च पावनाः ।
श्रुत्वैवं श्रीचक्रभासो जपन्नारायणं हरिम् ॥४७॥
सवल्कलो जटायुक्तो मालां करे दधन्मुदा ।
वृद्धो ययौ स्तेनकुटीं तत्स्त्रीपुत्रादिसंयुताम् ॥४८॥
दत्तासने निषसाद भजन् कृष्णनरायणम् ।
स्तेनस्त्रीपुत्रपुत्र्याद्या मत्वा वृद्धं पितुर्गुरुम् ॥४९॥
जलपात्रं सत्फलानि पक्वाऽऽम्राणि च तत्क्षणम् ।
न्यधुः साधोः समीपे च भुंक्ष्वेति जगदुस्ततः ॥५०॥
पादसंवाहनं चक्रुश्चानन्दिता मुदा मुहुः ।
साधुः फलानि बुभुजे पपौ वारि च शीतलम् ॥५१॥
भुंजन् ददाति मध्ये च मध्ये तेभ्यः पुनः पुनः ।
स्त्रीपुत्राद्याश्च दत्तानि मत्वा प्रसादमुत्तमम् ॥५२॥
भक्षयन्ति सुमिष्टानि स्तेनोऽपि बुभुजे ततः ।
साधुर्नारायणं मां च स्मृत्वा निवेद्य विष्णवे ॥५३॥
भुंक्ते ददाति चैतेभ्यस्ते भुक्त्वा चाघवर्जिताः ।
तूर्णं जाताः पावनाश्च सेवया स्पर्शनेन च ॥५४॥
हृदयानि परावर्तितानि तेषां सतोऽन्तिके ।
प्रोचुः सर्वे भगवन्नः कल्याणं वै यथा भवेत् ॥५५॥
तथा कुरु वने त्वत्र वसन् कुट्यां च नो गृहे ।
साधुस्तथाऽस्त्विति प्राह चोवास शान्तिमौंश्चिरम् ॥५६॥
शिक्षयामास भजनं नित्यं नारायणस्य मे ।
रात्रौ मिलित्वा भजनं कीर्तयन्ति स्वराऽन्विताः ॥५७॥
'हरेकृष्ण हरेकृष्ण कृष्णनारायण प्रभो ।
अनादिश्रीकृष्णनारायण लक्ष्मीपते विभो' ॥५८॥

इत्येवं कीर्तयित्वा मां स्वपन्ति नित्यमेव ते ।
प्रातरुत्थाय भजनं साधुना सह ते तथा ॥५९॥
कृत्वा यान्ति सरः स्नान्ति नमस्कुर्वन्ति भास्करम् ।
साधुं नत्वा मालिकां च पञ्च जप्त्वा वनं प्रति ॥६०॥
यान्ति फलानि चाहर्तुं समायान्ति कुटीं निजाम् ।
मध्याह्ने फलकन्दादि भर्जयित्वा तु वह्निना ॥६१॥
प्रदत्वा गुरवे तस्मै निवेद्य हरये तु मे ।
भोजयित्वा भुंजते ते कुर्वन्ति भजनं ततः ॥६२॥
सायं कुर्वन्ति भजनं सेवन्ते च कथामृतम् ।
पुत्राः साधुं प्रसेवन्ते स्त्री सेवते दिवानिशम् ॥६३॥
स्तेनोऽपि सेवतेऽभीक्ष्णं साधुं नारायणात्मकम् ।
स्त्रीपुत्राद्यैः कृतं यद्यत् कर्म स्तैन्यात्मकं पुरा ॥६४॥
सर्वं निवेदितं तस्मै धनं च यत्समाहृतम् ।
साधुः सर्वं समगृह्य ययौ गोकर्णतीर्थके ॥६५॥
चिक्षेप जलमध्ये श्रीकृष्णार्पणं वदन्निति ।
तावद्द्रव्यं समस्तं तच्छ्रीलक्ष्मीरूपकन्यका ॥६६॥
भूत्वा साधुं प्राह साध्वी त्वया कृष्णाय चार्पिता ।
पावनी खलु जाताऽस्मि मालिन्यं विगतं मम ॥६७॥
अथ चौरॉस्तथा पूर्वधनिनोऽपि च पावनान् ।
कृत्वा नयामि कृष्णस्य चरणौ कृत्यमेव मे ॥६८॥
इत्युक्त्वाऽऽदाय साधुं तं ययौ लक्ष्मीश्च तद्वनम् ।
यत्र ते स्तेनकर्माणश्चाऽभवन् तेऽपि विस्मिताः ॥६९॥
पप्रच्छुः कन्यकां दृष्ट्वा साधुं साधुर्जगाद तान् ।
लक्ष्मीः साक्षात् समायाता नेतुं नारायणगृहम् ॥७०॥
सज्जा भवन्तु तूर्णं वै यान्तु नारायणालयम् ।
श्रुत्वा मोदं गताः सज्जा भूत्वा नत्वा गुरुं च तम् ॥७१॥
आगते दिव्यशोभाढ्ये विमाने ते समारुहन् ।
ययुः साधोराज्ञया ते पार्षदैः सह सेविनः ॥७२॥
वैकुण्ठं भगवद्धाम लक्ष्मि ! साधोः समागमात् ।
अथ कन्या श्रीस्वरूपा साधुना सह चाग्रगा ॥७३॥
ययौ तद्धनिनां सौधान् दृष्ट्वा च धनिनोऽपि ते ।
ससंभ्रमाः स्वागताद्यैरपूजयन् सुरेश्वरीम् ॥७४॥
साधुं प्रापूजयन्सर्वे ज्ञात्वा वृत्तान्तमादितः ।
चौरहस्तगता लक्ष्मीः साधुहस्तेन चार्पिता ॥७५॥
श्रीकृष्णे दिव्यतां प्राप्ता प्राप्ता कल्याणहेतवे ।
विज्ञाय तेऽपि साधोश्चाऽऽज्ञया सज्जास्ततोऽभवन् ॥७६॥
मोक्षार्थं तावदेवाऽपि विमानं भास्वरं महत् ।
समायातं त्वम्बराद्वै पार्षदादिसमन्वितम् ॥७७॥
लक्ष्मीः सर्वान् धनपाँश्च समादाय विमानके ।
स्थित्वा नीत्वा ययौ नत्वा साधुं श्रीचक्रभासुरम् ॥७८॥
गोलोकं धाम कृष्णस्य पत्युर्हरेः परात्परम् ।
एवं लक्ष्मि त्वया पूर्वं स्तेनश्रेष्ठिकुटुम्बिनाम् ॥७९॥
साधोर्योगेन कल्याणं कृतं योजितया हरौ ।
साधुः श्रीचक्रभासश्च ययौ लोमशभूमिकाम् ॥८०॥
तीर्थार्थं च समाधौ वै निषसाद युगाद् युगम् ।
ददर्श मोक्षमार्गं स यथा यान्ति जनास्त्वितः ॥८१॥
भित्त्वा स्वर्गं महर्लोकं जनं तपश्च सत्यकम् ।
जलोपरि च वैकुण्ठं यान्ति तत्र हरे पुरः ॥८२॥
विश्रान्तिं लभते सौख्यं स्वागताद्यैः सुमाननम् ।
हर्याज्ञया ततो यान्ति परवैकुण्ठमुत्तमम् ॥८३॥
गोलोकं वाऽक्षरं धाम परंधाम प्रयान्ति च ।
दिव्यदेहा दिव्यधर्मा विद्वांसो घनमूर्तयः ॥८४॥
प्रणवाख्यं किरणाढ्यं विमानं सम्प्रविश्य ते ।
ब्रह्मलोकं प्रवर्तन्ते ब्रह्मकाया ह्यनिम्नगाः ॥८५॥
आनन्दं ब्रह्मणः प्राप्य चाऽमृतत्वाय ते गताः ।
ब्रह्मलोकेऽक्षरं ब्रह्म सर्वेषां वै पुरोहितम् ॥८६॥
मुक्तेश्वरं पुरस्कृत्याऽऽनन्दामृतं प्रभुंजते ।
आधिपत्यं विना तुल्या भवन्ति परमात्मना ॥८७॥
रूपप्रभावविजयैश्वर्यसामर्थ्यसदृशाः ।
एवंविधं त्वमृताख्यं ब्रह्मसत्रं सनातनम् ॥८८॥
अपुनर्मारकं स्थानं चामृतत्वाय ते गताः ।
ब्रह्मण्यभ्यासिनो युक्ताः परां काष्ठामुपासते ॥८९॥
वीतरागा जितप्राणा निर्मोहाः सत्यवादिनः ।
शान्ताः प्राणिहितात्मानो दयावन्तो जितेन्द्रियाः ॥९०॥
निःसंगाः शुचयो भक्ता ब्रह्मसायुज्यगास्मृताः ।
अकामयुक्तैर्वै वीरास्तपोभिर्दग्धकिल्बिषाः ॥९१॥
तेषामभ्रंशिनो लोका अप्रमेयसुखाः शुभाः ।
एतद् ब्रह्मपदं दिव्यं परं मे व्योम्नि भास्वरम् ॥९२॥
एतद् गत्वा न शोचन्ति ह्यमरा ब्रह्मणा सह ।
यस्मादेषां परं वीर्यं परमायुः परं तपः ॥९३॥
परा शक्तिः परो धर्मः परा विद्या परा धृतिः ।
परं ब्रह्म परं ज्ञानं परमैश्वर्यमित्यपि ॥९४॥
तस्मात् परतरं भूतं ब्रह्मणो यत्र विद्यते ।
परे स्थितो ह्येष परः सर्वार्थेषु ततः परम् ॥९५॥
परब्रह्म परो भूत्वा प्रपश्यति न चान्यथा ।
एवं ज्ञानप्रतिष्ठत्वात् सर्वं ब्रह्माऽनुपश्यति ॥९६॥

आक्षरक्षेत्रमुक्तानामाक्षरे धाम्नि संस्थितिः ।
शाश्वती विद्यते लक्ष्मि शाश्वतानन्ददोहिनी ॥९७॥
सतां समागमो नित्यं ब्रह्मलोकप्रदायकः ।
सर्वपापहरो लक्ष्मि लक्ष्म्याः शुद्धिकरस्तथा ॥९८॥
आत्मशुद्धिकरश्चापि मोक्षशुद्धिकरस्तथा ।
ज्ञानशुद्धिकरश्चोपासनाशुद्धिकरस्तथा ॥९९॥
निर्वाणशुद्धिदश्चापि शुभ्रः सार्वज्ञ्यशोधकः ।
आत्मनिवेदितासंशोधकः सेवाप्रशोधकः ॥१००॥
दोषसंशोधकश्चापि मायासंशोधकस्तथा ।
विवेकशोधकश्चापि बन्धनानां च शोधकः ॥१०१॥
एतदमृतसत्रं वै ब्रह्मसत्रमधीत्य ह ।
जायते ब्रह्मधर्मोऽत्र परत्रापि न संशयः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने गार्हस्थ्यधर्मसारे नरशायतस्करस्य श्रीचक्रभाससाधुयोगेन दिव्यलक्ष्मीद्वारा मुक्तिः पूर्वधनिनामपि मुक्तिर्ब्रह्मसत्रविज्ञानं चेत्यादिनिरूपणनामा चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

श्रीनारायणीश्रीरुवाच—

धर्माणां कर्मणां चापि मूलं मे वद माधव ।
यदाश्रयात् प्रपुष्टिं संप्रयाति मानवो वृषे ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

शृणु श्रीशिवराशीश्रि ! धर्ममूलं सनातनम् ।
नारायणे यथा लक्ष्मीः श्रीकृष्णे राधिका यथा ॥ २ ॥
अनादिश्रीकृष्णनारायणे त्वं मयि राजसे ।
विष्णौ लक्ष्मीर्यथा चास्ते गोपाले कम्भरा यथा ॥ ३ ॥
साविच्यजे हरे दुर्गा सिद्धिर्विनायके यथा ।
तथा विवाहिता पत्नी धर्ममूलं हि देहिनाम् ॥ ४ ॥
पितृदेवाऽतिथीनां च स्वजनस्य गृहस्य च ।
वंशस्य वंशशाखानां मूलं पत्नी विवाहिता ॥ ५ ॥
अलंकृत्योदकपूर्वां कन्यां दद्याच्छुभे वरे ।
वरारोहां युवतीं चाऽनङ्गवासशरीरिणीम् ॥ ६ ॥
अभिप्रेता च या यस्य कन्याऽभिप्रेत एव यः ।
तयोर्मुदा विवाहो वै कर्तव्यो हितकृद्धि सः ॥ ७ ॥
ब्राह्मणानां सतां चापि सात्त्विकानां विधिर्ह्ययम् ।
धनेन बहुधा क्रीत्वा प्रसह्य हरणं च वा ॥ ८ ॥
न कर्तव्यं क्वचिल्लग्नं केनचित् सुखमिच्छता ।
निःश्वासाभिहतं सर्वं दहत्येव हि योषितः ॥ ९ ॥
जातस्त्रीव्यञ्जनां भार्यामुद्वहेच्छ्रेय इच्छता ।
उद्भिन्नयौवनां पुष्टामुद्वहेत्पुष्टयौवनः ॥१०॥
राजस्वल्यं विना नैव क्षतां कुर्यान्निजांगनाम् ।
अथवा चेत् कामुकी सा स्नेहस्पृहया निसर्गजा ॥११॥
स्वयं पतिं प्रगच्छेच्चेद् रमणे नैव दूषणम् ।
पत्नीच्छामन्तरा नोपयच्छेत् नारीचलो भवन् ॥१२॥
कामुकः स्वैरवृत्तश्च धर्मं हन्ति गृहाश्रयम् ।
प्रसह्याऽधर्म एवास्ते स्नेहकार्यो वृषो मतः ॥१३॥
शृणु लक्ष्मि महाराष्ट्रे क्षत्रियो जांघलामखः ।
आसीत् वत्रे स कन्यां द्वादशवर्षां सुरूपिणीम् ॥१४॥
अजातयौवनभावां धर्महृदययोगिनीम् ।
सद्विवेकयुतां राजस्वल्योत्तरं पतिं प्रति ॥१५॥
कामधर्मं चेहमानां नान्यथा सा सतीव्रता ।
धर्मं कृत्वा पुरश्चास्ते पतिसेवापरा सदा ॥१६॥
कामुकश्च पतिस्तां वै प्रसह्य कामतृप्तये ।
स्प्रष्टुमियेष सा प्राह कान्त ! धर्मः प्रबाधते ॥१७॥
नाऽहं योग्या भवाम्यत्र विना धर्मर्तुं पते ।
स्पर्शसेवां करोम्यत्र कामसेवां प्रवर्जय ॥१८॥
इत्युक्तोऽपि पतिधर्ममनावेक्ष्य हि कामुकः ।
प्रसह्य पत्नीं जग्राह सती निःश्वासमाचरत् ॥१९॥
निःश्वासान्मूर्तिमानग्निः प्रादुर्बभूव तत्क्षणम् ।
अज्वालयत् पतिं सौधं समृद्धिं चोपस्कराणि च ॥२०॥
सती शुशोच बहुधा पत्यौ नष्टे पतिव्रता ।
सस्मार धर्मं धर्मोऽपि तदा साक्षाच्चतुर्भुजः ॥२१॥
आययौ मा शुचश्चेति प्राह बालामनिन्दिताम् ।
धर्मरक्षाकृते बाले प्रसन्नोऽस्मि वृषोऽस्म्यहम् ॥२२॥
वरं वरय भद्रं ते मा धर्माच्चल भामिनि ! ।
धर्मो रक्षति रक्षितो नाशितो नाशयत्यपि ॥२३॥
तेन नाशितवानस्मि ततो नाशोऽस्य चाऽभवत् ।
त्वया वै रक्षितस्तेन त्वं चाऽबाधा प्रजीवसि ॥२४॥
वह्निस्त्वां न ददाहाऽत्र गृहे बाले बलान्मम ।
वरं वृणु यथेष्टं वै ददाम्यद्य हि मा चिरम् ॥२५॥
श्रुत्वा बाला कुन्दधर्मानाम्नी तदा वरं पतिम् ।
वव्रे कुटुम्बकं पत्युश्चापि सञ्जीवितं गृहम् ॥२६॥
सर्वोपस्करसंयुक्तं धर्मज्ञानयुतं पतिम् ।
धर्मदेवस्तथाऽस्त्वाह द्रुतं सञ्जीवितः पतिः ॥२७॥

कुटुम्बसहितः सर्वगृहोपकरणान्वितः ।
धर्मज्ञानयुतश्चापि मुमुदे चातिभाववान् ॥२८॥
प्रशशंस परं धर्मं पत्न्याः ऋतुजयच्छनम् ।
धर्मो ययौ ततः पूजां लब्ध्वाऽयो जांगलामखः ॥२९॥
पत्नीधर्मं सदा सम्पालयामास यथोदितम् ।
सती सत्यवती प्राप दग्धमपि निजं पतिम् ॥३०॥
इत्येवं चास्ति मर्यादा पत्नीच्छानिर्मिता सदा ।
तां रक्षन् जायते पुण्यं चान्यथा पातकं मतम् ॥३१॥
शृणु लक्ष्मि तथा चान्यद् युवतीकन्यकावृषम् ।
त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती ॥३२॥
चतुर्थे त्वथ सम्प्राप्ते स्वयं भर्तारमर्जयेत् ।
प्रजा न हीयते तस्या रतिश्चापि न हीयते ॥३३॥
अतोऽन्यथा वर्तमाना भवेद्वाच्या जनस्य सा ।
तस्माद् रजस्वलाधर्मं विवाहयेन्न रक्षयेत् ॥३४॥
असपिण्डा निजमातुरसगोत्रा च या पितुः ।
इत्येतामनुगच्छेत मानवो नियमो ह्ययम् ॥३५॥
पाणेर्ग्रहणपूर्वं तु याचन्ते वै जना मुहुः ।
वरः श्रेष्ठो मिलेद् दद्यात्तस्मै विहाय चाऽपरम् ॥३६॥
नाऽनिष्टाय प्रदद्याद्वै न हीनाय न रोगिणे ।
नाऽरये न बिभत्साय न दद्यात् क्रूरकर्मणे ॥३७॥
नाऽधार्मिकाय दद्याद्वै हिंसकाय तथा न च ।
न ह्येव भार्या क्रेतव्या न विक्रय्या कथंचन ॥३८॥
यत्रेष्टं तत्र देया स्यान्निःशुल्का संविभूषिता ।
मृते पत्यौ प्रदातव्या यत्रेष्टं योषितः खलु ॥३९॥
विवाहितेन चेत् त्यक्ता दातव्या त्वपराय सा ।
भार्यया च परित्यक्तो भार्यामन्यां समुद्वहेत् ॥४०॥
मृतायामपि भार्यायां भार्यामन्यां समुद्वहेत् ।
देवरं प्रविशेद्वापि देवरो वा विशेत् स्त्रियम् ॥४१॥
द्वयोश्चेदानुकूल्यं स्यादेष धर्मः सनातनः ।
अपितृजां चाऽमातृजां विन्देत् मानवीं सतीम् ॥४२॥
अग्निं देवं पितरं वा गां परिक्रम्य सर्वथा ।
वृद्धानां सन्निधौ यद्वा मालां समर्प्य वै मिथः ॥४३॥
हस्तयोर्मेलनं वापि कृत्वा नत्वा परस्परम् ।
मण्डपे मन्दिरे वापि विवाहयेद् गुरोः पुरः ॥४४॥
अविरोधेन लोकानां कुटुम्बिनां नृपस्य च ।
प्रजानां चाऽविरोधेन द्वयोर्ग्रहो विवाहनम् ॥४५॥
प्रकाशं यद्द्वयोरैक्यं चाऽविरोधेन शोभनम् ।
हृदययोः साक्षिताऽत्र धर्मः सोऽपि पुरातनः ॥४६॥
अप्रकाशे गर्भवत्ता निन्दिता पितृवर्जिता ।
दासीनामिव वंशो न गणनां याति धार्मिकीम् ॥४७॥
नियोगादपि जायन्ते पुत्रास्ते पितृलोकिताः ।
ब्रह्मक्षत्रा वंशकरा धर्मः सोऽपि पुरातनः ॥४८॥
साधूनां पुनराचारो गरीयान् धर्मलक्षणः ।
पित्राऽऽज्ञप्ता स्वयं वृत्ता भर्त्रा योगमुपागता ॥४९॥
साध्वाचारेण सा जाता विवाहिता हि सा मता ।
भार्यापत्योर्हि सम्बन्धश्चामृत्युश्चिरशोभनः ॥५०॥
रतिसाधारणो नैषस्तस्माद्धर्मः सनातनः ।
रतिमात्रार्थसम्बन्धः स्त्रीपुंसोर्नहि धार्मिकः ॥५१॥
दायभागेऽपि पुत्रो वै गण्यते वंशभागवान् ।
पुत्रो न स्यात्तदा पुत्री दायभागाधिकारिणी ॥५२॥
पुत्रः पुत्री समौ बोध्यौ दायभागेऽतिकारिणौ ।
बहवोऽपि सुता यस्य पुत्र्योऽपि च तथाविधाः ॥५३॥
तस्यापि दायभागे स्युः पुत्राः पुत्र्योऽधिकारिणः ।
समभागाः प्रदातव्या एष धर्मः सनातनः ॥५४॥
विवाह्य दायभागं चाऽदत्त्वा सम्प्रेषयन्ति ये ।
कन्याभागप्रभोक्तारः पतन्ति नरके हि ते ॥५५॥
जीवितार्थाय विक्रीय कुमारं वा कुमारिकाम् ।
भुंजते तद्धनं ते तु भुंजते पिशितं तयोः ॥५६॥
अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः ।
वश्यां कुमारीं बलतो विक्रीणीयान्न कश्चन ॥५७॥
धर्मबुद्ध्या चार्पयेद्वै जामात्रे यौतकान्विताम् ।
मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥५८॥
दौहित्र एव तद्रिक्थमपुत्रस्य पितुर्हरेत् ।
पुत्रदौहित्रयोरेव विशेषो नास्ति धर्मतः ॥५९॥
पितृभिर्भ्रातृभिश्चापि श्वशुरैरथ देवरैः ।
पूज्या भूषयितव्या च बहुकल्याणमिप्सुभिः ॥६०॥
पूज्या लालयितव्याश्च स्त्रियो नित्यं गृहस्थिताः ।
रमण्यो यत्र तुष्यन्ति वसन्ति तत्र सम्पदः ॥६१॥
सिद्धयः प्रतिवर्षन्ति सर्वान् कामान् ददत्यपि ।
यत्र नार्योऽवमन्यन्ते सर्वास्तत्राऽफलाः क्रियाः ॥६२॥
नैव भान्ति न वर्धन्ते वंशाः श्रिया विवर्जिताः ।
स्त्रीहेतुकः सदा श्रेष्ठो धर्मो ह्यसत्यलोकदः ॥६३॥
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रीत्यर्थो लोकयात्राया यापनं स्त्रीजने स्थितम् ॥६४॥
नास्ति यज्ञस्तादृशो वै न श्राद्धं नोपवासनम् ।
धर्मो युगलसौहार्दसमो ह्यमोक्षदोऽपरः ॥६५॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थविरे पान्ति स्त्रीरक्षैवं पुरातनी ॥६६॥
श्रिय एताः स्त्रियो नाम सत्कार्या भूमिमिच्छता ।
पालिताऽनुगृहिता च स्त्री श्रीरेव प्रकाशते ॥६७॥
अथ लक्ष्मि स्त्रियै देयो दायभागोऽपि सम्मतः ।
पुत्रपुत्रीसमोभागस्तद्धनं योषितः सदा ॥६८॥
भर्त्रा तच्च धनं दत्तं यथेष्टं भोक्तुमर्हति ।
स्त्रीणां तत्पतिदायाद्यं ह्युपभोगफलं मतम् ॥६९॥
एकस्य बहुभार्यत्वे ब्राह्मणी सर्वथोत्तमा ।
स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम् ॥७०॥
हव्यं कव्यं देवपूजां भोजनं ब्राह्मणी चरेत् ।
अन्नं पानं च माल्यं च वासांस्याभरणानि च ॥७१॥
ब्राह्मण्येतानि दद्यात् स्वभर्त्रे सा हि गरीयसी ।
अथवा चानुकूल्यं तु यथा भवेद्धि योषिताम् ॥७२॥
अक्लेशेन प्रमोदेन स्नेहेन चानुवृत्तितः ।
तथा सेवेत विप्रा वा क्षत्रिया वाऽपरापि वा ॥७३॥
पत्युराज्ञां समगृह्य नान्यथा तु कथंचन ।
गर्भशुद्धिश्च विज्ञेया गुणरूपनिसर्गकैः ॥७४॥
अपत्यं प्रतिबिम्बं वै पितुर्मातुश्च वा भवेत् ।
तत्स्वभावमपत्यं तद्विज्ञेयं शुद्धवंशजम् ॥७५॥
तत्र यत्र पृथग्भावो गर्भाऽशुद्धिर्हि सा मता ।
निषेके संकरीभावे वैरुप्यं बालके भवेत् ॥७६॥
सान्निध्येऽनिष्टवस्तूनां सांकर्यं जायते हृदि ।
बीजे संक्रमते तच्च गर्भे तद्भाव उद्भवेत् ॥७७॥
गर्भदानं ततोऽद्दश्ये रहस्ये विघ्नवर्जिते ।
शान्तशब्दे शान्तलोके शान्तपश्वादिभाषणे ॥७८॥
सुशान्तसर्वतत्त्वेषु विधातव्यं न चान्यथा ।
शुद्धवंशप्रसूतिः सा भवेदत्र न संशयः ॥७९॥
अन्यशब्दस्पर्शरूपरसस्वभावदूषणम् ।
प्रक्रमते बीजदाने प्रतिमादर्शनादपि ॥८०॥
तस्मात् पतिमुखं दृश्यं नान्यद् दृश्यं तदा मतम् ।
प्रसन्नहृदयाभ्यां च भाव्यं न तु क्रुधा रुषा ॥८१॥
न च मालिन्यभावेन भाव्यं सुगन्धिसंभृता ।
प्रसन्नमनसा भाव्यं भाव्यं सत्त्वगुणेन च ॥८२॥
एकाग्रमनसा भाव्यं दात्रा धात्र्या च सर्वथा ।
स वंशः शुद्ध एव स्यात् स्मर्तव्यं नेतरत् तदा ॥८३॥
नारायणो हरिः कृष्णः परमेशः परात्परः ।
स्मर्तव्यो दम्पतीभ्यां वै बीजदाने न चाऽपरः ॥८४॥

यत्स्मृतिस्तद्गुणा भावाः प्रक्रमन्ते प्रकृतयः ।
तस्माच्छ्रेष्ठः पतिर्देवो देवदेवो जनार्दनः ॥८५॥
शृणु लक्ष्मि कथयामि कथां पुरातनीं शुभाम् ।
पुलस्त्यो वेधसः पुत्रो ददौ दानं यदाऽऽर्तवम् ॥८६॥
तदा प्रीतिः पुलस्त्यस्य भार्या सस्मार राक्षसम् ।
निर्ऋतं रावणस्तेन रक्षोधर्मा व्यजायत ॥८७॥
यदाऽऽर्तवे प्रसस्मार विष्णुं नारायणं हरिम् ।
तद्भावभावितो जातो भक्तः पुत्रो विभीषणः ॥८८॥
पार्वतीशंकरौ पूर्वं सस्मरतुर्बलान्वितम् ।
सेनापतिं सुतं दैत्यनाशकं विजयप्रदम् ॥८९॥
स्कन्दस्तेनाऽभवद् विघ्ननाशार्थे गणपोऽभवत् ।
वैराजस्त्रिगुणान् स्मृत्वोत्पादयामास वै त्रिकम् ॥९०॥
ब्रह्मविष्णुमहेशाख्यं यथा स्मृतिस्तथा जनिः ।
चरौ फले प्रसादे च बीजे चाशीर्वचस्यपि ॥९१॥
यादृक् स्मरणं रोहेद्वै तादृशी जायते प्रजा ।
यद्भावना भवेद् भक्तिः फलं तद्भावभावितम् ॥९२॥
कल्पवृक्षे हरेर्मूर्तौ गुरौ पत्यौ स्त्रियां सति ।
औषधे मन्त्रे तपसि यथा भावस्तथा फलम् ॥९३॥
विद्यायामुद्यमे युद्धे कृषौ भृत्यक्रियाविधौ ।
भौतिकाभ्युदये वेगे यादृग्यत्नस्तथा फलम् ॥९४॥
नृपे साधौ हरौ पित्रोः श्रेष्ठिनि स्वामिनि क्रमे ।
देवे पितरि सन्तुष्टे यथा कृपा तथा फलम् ॥९५॥
शत्रौ नियामके सर्पे विप्रे शस्त्रिणि तापसे ।
कलहे रोधने नाशे यथा रोषस्तथा फलम् ॥९६॥
भक्तौ योगे प्रार्थनायां सेवायां दैवकर्मसु ।
शास्त्रे भोग्ये दीर्घकार्ये यथा शान्तिस्तथा फलम् ॥९७॥
धर्मे लग्ने मृधे दाने वचने विघ्नसारणे ।
चौर्ये मोक्षे देशकाले यथा शौर्यं तथा फलम् ॥९८॥
काव्ये न्याये चोपदेशे चाज्ञायां चान्तिमे क्षणे ।
संहारे चापदि प्रारंभे यथाधीस्तथा फलम् ॥९९॥
क्षेत्रे स्वर्गे स्त्रियां शिष्ये पुत्रे कार्ये ह्युपार्जने ।
मन्त्रे शास्त्रे रचनायां यथा बीजं तथा फलम् ॥१००॥
कीर्तौ रतौ वृषे वंशे सुखे श्रमे च भोजने ।
कोशेऽतिथौ गृहे स्वर्गे यथा भार्या तथा फलम् ॥१०१॥
तस्माल्लक्ष्मि सदा भार्या पातिव्रत्यपरायणा ।
विशेषतो हि धर्माणां मूलं भवति सर्वथा ॥१०२॥
पुरुषार्था हि चत्वारश्चोपायाः साधनानि च ।
यात्राः सर्वाः प्रवर्तन्ते सिद्ध्यन्ति निजयोषिता ॥१०३॥

क्षेत्रं वै सर्वधर्माणां वाटिका पुत्रसम्पदाम् ।
कल्पलता सुखानां च भार्या भवति मूलिका ॥१०४॥
मन्दुरा सा मनोऽश्वानामाश्रया प्राणपक्षिणाम् ।
नौः सा संसारिणां पत्नी यानं सा स्वर्गिणां तथा ॥१०५॥
यज्ञे वंशे सुखे दुःखे पुण्ये महोत्सवे सवे ।
गृहे कार्ये धने ख्यातावर्धांगना निजात्मिका ॥१०६॥
पठनाच्छ्रवणाल्लक्ष्मि तथा धर्मसमाश्रयात् ।
भुक्तिर्मुक्तिर्भवेच्चापि नार्या नरस्य सर्वथा ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वधर्मकर्मणां मूलं विवाहिता पत्नीति जांवलामखस्य क्षत्रियस्य कुन्दधर्मपत्न्याः सरधर्मे चमत्कारः कन्यादानयोग्यता वरयोग्यता दायभागयोग्यता बीजशुद्धिरित्यादिनिरूपणनामा पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

**श्रीपुरुषोत्तम उवाच—**

यथा पत्नी तथा पुत्रो धर्माश्रयः पितुर्मतः ।
पिता पुत्रस्वरूपोऽस्ति पितृधर्मः सुते स्थितः ॥ १ ॥
प्रच्छन्नो वा प्रकाशो वा पुत्रः पिता प्रकीर्तितः ।
आर्यत्वं धर्मशीलत्वं मार्दवं व्यवसायिता ॥ २ ॥
भक्तिर्विवेक एते व्यञ्जयन्ति पुत्रमुत्तमम् ।
अनार्यत्वमनाचारः क्रूरता निष्क्रियात्मता ॥ ३ ॥
अभक्तिश्चाऽविवेकश्च कालुष्यं व्यञ्जयन्ति वै ।
पित्र्यं वै भजते शीलं मातृजं वोभयं तथा ॥ ४ ॥
शुद्धयोनिप्रजन्मा वै सांकर्यं भजते नहि ।
ज्यायानपि तु शीलेन हीनो मानं न चार्हति ॥ ५ ॥
अपि शूद्रोऽपि शीलाढ्यः सद्वृत्तः पूज्यते जनैः ।
आख्यात्मानमेवाऽत्र शीलचारित्रकर्मभिः ॥ ६ ॥
आत्मा पुत्र औरसः स्वः पिता स्वयं स कथ्यते ।
स्वक्षेत्रे तु नियोगेन परजन्यो द्वितीयकः ॥ ७ ॥
स्वक्षेत्रे चाऽनियोगेन प्रच्छन्नजस्तृतीयकः ।
ऊढा गर्भवती भार्या तज्जातस्तु चतुर्थकः ॥ ८ ॥
जन्मतः केनचिद्दत्तः पञ्चमः सः प्रवर्धितः ।
यौवने दत्तकतया गृहीतः षष्ठ इत्यपि ॥ ९ ॥
शिष्यरूपेण सम्प्राप्तः सप्तमः पुत्र इत्यपि ।
क्रीतः प्रोक्तस्त्वष्टमश्चाऽनूढाजो नवमः सुतः ॥१०॥
मनोजन्यो दशमश्च कथितो मानसः सुतः ।
पथि त्यक्तो जातमात्रो गृहीतः कृत्रिमः सुतः ॥११॥
एकादशः स विज्ञेयः दौहित्रो द्वादशः स्मृतः ।
पुत्र्यश्चापि तथा बोध्या द्वादशधा तु वंशजाः ॥१२॥
संस्काराश्चात्मवत्तेषां स्वामिवत् संभवन्ति हि ।
कानीनको ह्यनूढाजो मातृवर्णे प्रपद्यते ॥१३॥
गणिकानामपत्यानि मातृवर्णानि तानि वै ।
दासीनां पतिहीनानामपत्यानि तु यानि वै ॥१४॥
मातृवर्णानि बोध्यानि स्वामिवर्णानि वा तथा ।
भिक्षादीक्षालभ्यबाला अच्युतगोत्रका हि ते ॥१५॥
साध्व्यश्च साधवः सर्वे भवन्त्यच्युतगोत्रकाः ।
त्यागिवर्गाश्च वै पुत्राः पुत्र्यो नारायणस्य ह ॥१६॥
एवं वै भूतले लोके व्यवस्थाऽस्ति तु पद्मजे ।
ऐच्छिकी त्वन्यलोकेषु तथैषाऽपि प्रवर्तते ॥१७॥
भार्या चतुर्विधा लक्ष्मि प्रायशः संभवन्ति हि ।
पत्नी विवाहिता प्रोक्ता दासी या तु सहागता ॥१८॥
उपकुर्वाणिका या तु कञ्चित्कालं गृहे स्थिता ।
प्रच्छन्नयोगमापन्ना रक्षिता सा तु कीर्तिता ॥१९॥
स्वामिनोऽपि तथा सन्ति चतुर्धा पद्मजे ! शृणु ।
विवाहितः पतिः प्रोक्तो लग्नितः श्रेष्ठ एव सः ॥२०॥
देवरादिर्गौणकान्तो द्वितीयः स प्रकीर्तितः ।
नियोगमाप्तस्तृतीयश्चोपकुर्वाणकः स हि ॥२१॥
प्रच्छन्नयोगमापन्नो रक्षितः स प्रकीर्तितः ।
प्रजास्तयोर्यथायोगं नार्या वा च नरस्य वा ॥२२॥
विवादेऽपत्यमेवाऽत्र यमिच्छेत् तस्य वै हि तत् ।
देशभेदात् कालभेदाद् रीतिभेदात् पृथग्वृषः ॥२३॥
दत्ता कन्या दानरूपा पुत्री कथं न कल्प्यते ।
कल्प्यते भोग्यरूपा सा तस्माद् रीतिर्हि कारणम् ॥२४॥
भावना यादृशी यत्र व्यवहारश्च तादृशः ।
भुक्त्वा क्रोधेन वै त्यक्ता वैराग्येण तथा च वा ॥२५॥
त्यागेनाऽपि विवेकेन त्यक्ता मातृसमा हि सा ।
तस्माल्लक्ष्मि ! महामायाप्रवाहो मूर्छनात्मकः ॥२६॥
मूर्छनासु विविधासु नयन्ति देहिनः सदा ।
यथाविधः प्रवाहोऽस्ति यदा यत्र युगे स्थले ॥२७॥
तथारीतिकृतो धर्मः सुखदः शान्तिदो भवेत् ।
देवानां रीतयश्चान्या योगिनामितराश्च ताः ॥२८॥
मानवानां विभिन्नाश्च पश्वादीनां तथेतराः ।
यथारीतिः स वै धर्मो यद्यनर्थं न चाऽऽवहेत् ॥२९॥
अनर्थं प्रापयन्पन्थां धर्मात्मा नैव गण्यते ।
दुःखदो नैव धर्मोऽस्ति सुखदः सर्वथा वृषः ॥३०॥

अर्थो वृषानुसम्बुद्धोऽनर्थोऽधर्मानुयोजितः ।
कामो धर्मार्थसहितस्तद्धीनो न पुमर्थकः ॥३१॥
धर्मार्थकामपारं यो यातः स विन्दतेऽक्षरम् ।
अधर्म्यनर्थी विषयी विन्दते यमयातनाम् ॥३२॥
कुटुम्बादिष्ववस्थाऽपि पुरुषार्थपरायणा ।
अपुमर्थयुता रीतिः पाशवी न तु मानुषी ॥३३॥

शास्त्रं शासनधर्मं वै मानुषादौ प्रवर्तते ।
तिर्यग्योनौ न वै शास्त्रं विद्याशून्यतया खलु ॥३४॥
बलं रीतिः पशूनां तु मोहश्चेति निबन्धनम् ।
तदाधाराणि तिर्यञ्चि यादांसि कीटयोनयः ॥३५॥
अथैवं वर्तमानानां भवपारो न विद्यते ।
यदृच्छया सतां योगे भवपारो भवेत् क्वचित् ॥३६॥

नह्यात्मा शक्यते हन्तुं तस्मादुद्धारमाचरेत् ।
स्नेहेन दर्शनं साधोः संवासं सेवयाऽऽचरेत् ॥३७॥
ब्रह्मवासकृतारम्भं साधुं सेवेत मानवः ।
निहत्य मानं शोकं च क्रोधं हर्षं च वासनाम् ॥३८॥
विश्रम्भपात्रं भूतानां शुचिं श्रीकृष्णदैवतम् ।
ऊर्ध्वब्रह्मस्थितिं शान्तं सर्वेषां प्रियदर्शनम् ॥३९॥
निःशेषितसमारंभं ध्याननिष्ठं वशेन्द्रियम् ।
निष्णातं ब्रह्मविद्यायां समनेत्रं दयापरम् ॥४०॥

एतादृशं साधुजनं चाश्रयेत् प्रार्थयेत्तथा ।
अज्ञानाद् यत्कृतं पापं प्रक्षालय जगद्गुरो ॥४१॥
मोक्षमार्गस्य सोपानं प्रदर्शय जगद्गुरो ।
वासनाग्रन्थिमुज्ज्वाल्य पावय स्वान् जगद्गुरो ॥४२॥
भक्तिं प्रदर्श्य परमां प्रमोक्षय जगद्गुरो ।
एवं वै प्रार्थनां कुर्याद् यथा कुर्यात् कृपां तथा ॥४३॥
वक्तव्यं च सतामग्रे तवाऽस्मीति पुनः पुनः ।
करवाणि यदाऽऽज्ञा स्यात् सर्वं कर्ताऽस्मि दुष्करम् ॥४४॥
यदि राज्यं यदि धनं यदि गा यदि स्वं गृहम् ।
यज्ञं दानं सुतं वार्तां ब्रूहि सर्वं ददामि ते ॥४५॥

इत्येवमर्थयेत् साधुं प्रतोषयेत् समर्पणैः ।
अशंकयाऽर्पयेत् सर्वं मुक्तिभाक् स भवेत् खलु ॥४६॥
माया हि संशयः प्रोक्तो ब्रह्मणि नास्ति संशयः ।
संशयश्चेत् सतां योगे सेवायां वचने कृतौ ॥४७॥
कदा मुक्तिः कदा शुद्धिः कथं सेवा भवेदिह ।
कदा शुद्धस्वरूपस्य निष्ठा वापि भवेदिह ॥४८॥
तस्मान्निःसंशयो भूत्वा सेवेत साधुमुत्तमम् ।
पापक्षालनशक्तं च मोक्षदं दिव्यवर्तनम् ॥४९॥

सन्तुष्टं ज्ञानकोशं च ब्रह्माधानं निराश्रयम् ।
निरालम्बं मदालम्बं मन्मूर्तिं सेवयेत् सदा ॥५०॥
शृणु लक्ष्मि कथयामि साधुसेवाफलं परम् ।
सस्वामिपशुपक्ष्यासुहृदां मोक्षणं यतः ॥५१॥
आसीत् कर्णाटके देशे भक्तिमान् तापसो मुनिः ।
नाम्ना शंभलवारश्च जात्या सूतीयसंभवः ॥५२॥

स तु नद्यास्तटे वासं चकारैकल एव ह ।
युवाऽपि स्त्रीं विनाऽनंगभोगेच्छुः समधारयत् ॥५३॥
तपः श्रेष्ठं परं कृत्वा भुक्त्वा भोगान् हि धर्मतः ।
यास्याम्यहं ततः स्वर्गे शाश्वतं परमं पदम् ॥५४॥
विचार्येत्थं तीर्थयात्रां कर्तुं गृहाद्विनिर्गतः ।
गोदावर्यास्तटे रम्ये समुत्सेधस्थले शुभे ॥५५॥

ग्रामे सत्राशयाख्ये वै निजावासं व्यधात् ततः ।
उच्छ्रये स तपः कर्तुं वीक्ष्यानुकूलभूतलम् ॥५६॥
मानवैः कृतसम्मानोऽन्नादिभिः स मनो दधे ।
पञ्चाग्निषु निषसाद षण्मासानथ तत्परम् ॥५७॥
उत्थितोऽभूद् वर्षमात्रं त्वेकपादेन तापसः ।
तपश्चचार परमं भजन् विष्णुं नरायणम् ॥५८॥
वर्षान्ते निजपादौ स बद्ध्वा वल्ल्या वटद्रुमे ।
शाखायां निम्नमूर्द्धाऽसौ व्यलम्बत समान्तरम् ॥५९॥

एवं कृत्वा तपः पश्चाद् वर्षान्ते मस्तकं भुवि ।
निधायोर्ध्वपदो भूत्वा तपश्चचार दारुणम् ॥६०॥
वर्षान्ते चोर्ध्वहस्तोऽभूदंगुष्ठमात्रतोलनः ।
अनिमेषोऽर्कदृष्टिश्च तपश्चचार दारुणम् ॥६१॥
षण्मासान् तत्परं नद्यां जलान्तरेऽवसत्ततः ।
पञ्चमे वत्सरे विष्णुर्जले मत्स्यस्वरूपधृक् ॥६२॥
आययौ चक्रचिह्नाढ्यश्चखाद चर्म तन्मुनेः ।
मांसं चखाद च तथापि न कम्पं ययौ मुनिः ॥६३॥
विष्णुर्मत्स्यस्य वाचा तं प्राह जलेऽत्र वर्तसे ।
कस्त्वं कथं स्थितस्त्वत्र वद कोऽर्थोऽत्र ते मतः ॥६४॥

श्रुत्वा शंभलवारस्तं मत्स्यमाह शुभाशयम् ।
तपः करोमि सौख्यार्थं सुखं धर्मफलं यतः ॥६५॥
राज्यं गृहं धनं भार्याः सुताः पुत्र्यश्च धेनवः ।
दासा दास्यो वाहनानि लभ्यन्ते तपसा सदा ॥६६॥
धर्मार्थकाममोक्षाश्च लभ्यन्ते गृहयोगतः ।
भूत्वा गृही प्रयास्यामि तपः कृत्वा परं पदम् ॥६७॥
इत्युक्तो मत्स्य आहाऽपि किं ते भोगेषु वासना ।
तपः कृत्वा फलं भुंक्ष्व मोक्षपदे परे पदे ॥६८॥

अनित्याः सन्ति भोगा वै दुःखदा बन्धनात्मकाः।
तान् विहाय पदं याहि नारायणस्य शाश्वतम् ॥६९॥
श्रुत्वा शंभलवारश्च प्राह मत्स्यं तदा पुनः।
भवान् मत्स्यो यथा ज्ञानी वर्तसे विषयेष्वपि ॥७०॥
तथा ज्ञात्वाऽपि विषयानभुक्त्वा न निवर्तनम्।
भुक्त्वा विविधान् विषयान् तृप्तिमासाद्य सर्वथा ॥७१॥
वासनायाः क्षयं कृत्वा ततो यायात्परं पदम्।
इत्येवं सुलभः पन्थास्तदन्यः संशयात्मकः ॥७२॥
सरागस्य गतिर्नास्ति रागं प्रशामयेत्ततः।
अतोऽहं तपसाऽऽराध्य विष्णुं प्रसाद्य माधवम् ॥७३॥
वृत्वा भोगान् प्रभुक्त्वा तान् भक्त्या यास्यामि तत्पदम्।
श्रुत्वा मत्स्यस्तदा प्राह पश्य मे रूपमैश्वरम् ॥७४॥
तपसा ते प्रतुष्टोऽस्मि नारायणोऽस्मि चागतः।
वृणु यत्ते यथेष्टं तद् ददामि सर्वथा चिरम् ॥७५॥
मुनिर्वव्रे धनं राज्यं नारीः पुत्रान् पशून् सुताः।
गजाश्ववृषभान् गाश्च पुरुषार्थचतुष्टयम् ॥७६॥
तथाऽस्त्विति हरिः प्राह दत्वा वरं तिरोऽभवत्।
अथ शंभलवारोऽपि जलाद् बहिर्विनिर्ययौ ॥७७॥
मालामावर्तयन्नाम्ना नारायणस्य वै हरेः।
उवासोत्सेधभागे च नद्यास्तटे मनोहरे ॥७८॥
अथ सत्राशयो ग्रामो दशसाहस्रमानवः।
वर्षायां सरितः पूरैः समावृणोत् समन्ततः ॥७९॥
जलमग्नोऽभवच्चापि तद्राजा मरणं ययौ।
अन्येऽपि बहवो लोका नरा नार्यो जनाः प्रजाः ॥८०॥
जलप्लवेन निधनं याताः पञ्चसहस्रिणः।
ततः परे ययुर्देशान्तरे वासार्थमेव च ॥८१॥
सहस्रं मानवास्तत्र न्यूषुर्धैर्यप्रपालिताः।
भक्ताः सर्वे तापसाश्च नारायणपरायणाः ॥८२॥
अथ शंभलवारोऽपि मानपात्रं परं शुभम्।
तद्ग्रामवासिनां तत्र चाभवत्तापसो यतः ॥८३॥
ग्रामराज्यं प्रचकार प्रजाभिर्मानितस्ततः।
एवं राजाऽभवत्तत्र सहस्रमानवार्चितः ॥८४॥
ग्रामप्रजा ददुस्तस्मै कन्यकाश्चैकविंशतिम्।
गावः पशवो दासाश्च दास्यः प्रजाजनास्तथा ॥८५॥
अजावयोऽश्ववृषभाः सर्वे तस्याऽभवँस्ततः।
एवं स तपसा राज्यं भोगान् स्त्रीश्च सुतादिकान् ॥८६॥
प्राप नारायणभक्तिं चक्रे सतां प्रसेवनम्।
अस्य भक्त्या धर्मभृत्या व्यवर्धन्त प्रजाः पुनः ॥८७॥
दशसाहस्रसंख्योर्ध्वा अभवन् सत्रनागराः।
सर्वा अनेन मुनिना वैष्णव्यस्ता कृतास्तथा ॥८८॥
नामसंकीर्तनं चापि पूजनं श्रीहरेस्तथा।
अकारयद् यथायोग्यं मन्दिरं चाप्यकारयत् ॥८९॥
साधवोऽस्य गृहे नित्यं निवसन्ति सहस्रशः।
भक्तिं च नवधा नित्यमकारयत् सुमन्दिरे ॥९०॥
अथाऽयं विगते काले प्रजाः प्राह विवेकवान्।
पुत्रा मे चासते दैवाच्छतं पञ्च तथा स्त्रियः ॥९१॥
एकविंशतिसंख्याश्च पुत्र्यो मे द्वे शते तथा।
गावः सन्ति सहस्राणि वृषभा वाजिनस्तथा।
शुकाश्च सारिकाश्चापि हस्तिनः सरमासुताः ॥९२॥
दासा दास्यो भवन्त्यत्र प्रजा यूयं सुखास्तथा।
धर्मः कृतस्तथा चार्थः कामो दृष्टोऽथ मोक्षणम् ॥९३॥
कर्तुमिच्छामि सहसा दत्वा राज्यं सुताय मे।
ज्येष्ठाय च ततो यास्ये नारायणाक्षरं पदम् ॥९४॥
प्रजास्तथास्त्विति प्राहुः प्राहुश्चान्यच्छुभाऽऽस्पदम्।
वयं सर्वाः प्रयास्यामः सहैव परमं पदम् ॥९५॥
स्वस्वसुतान् प्रसंस्थाप्य यथाधिकारकर्मसु।
एवं सम्मन्त्र्य राजाऽसौ समाधौ योगमाप्तवान् ॥९६॥
सर्वे पुत्रे सन्निधाय मोक्षे वृत्तिं समादधत्।
राज्ञ्यः सर्वाः प्रजाः सर्वास्तत्स्थले श्रीहरौ तदा ॥९७॥
योजयित्वेन्द्रियप्राणान् लग्ना आसन् निजात्मसु।
भजन्तः श्रीपतिं नारायणं प्रियं प्रभुं पतिम् ॥९८॥
आययौ तत्र वै विष्णुर्विमानैः सह पार्षदैः।
प्रभासयन् दिशः सर्वा गर्जयद्भिर्दिगन्तरान् ॥९९॥
प्राह भक्तं शंभलं तं समागच्छ विमानके।
नत्वाऽऽर्च्य भगवन्तं तं प्राह शंभलवारकः ॥१००॥
भगवन् कृपया सर्वाः प्रजा यास्तु समुत्सुकाः।
आगन्तुं मोक्षमेवाऽत्र सज्जास्ता नय वै सह ॥१०१॥
गवाऽश्ववृषभाऽजाश्चावयो गावः शुकादयः।
तथाऽन्ये ये भवन्त्यत्र तव प्रसादपाविताः ॥१०२॥
मम पुत्राश्च पुत्र्यश्च राज्ञ्यश्चापि कुटुम्बिनः।
सज्जा ये ये भवन्त्यत्र ताँस्तान् नय निजं पदम् ॥१०३॥
इतीच्छां मे हरे कृष्ण प्रपूरय कृपां कुरु।
हरिः प्राह तथास्त्वेवं तव भक्त्या करोम्यहम् ॥१०४॥
पुत्रास्ते भिन्नजातीया भिन्ननारीसमुद्भवाः।
ब्राह्मणाः क्षत्रियाश्चान्ये वैश्याः शूद्रास्तथाऽपरे ॥१०५॥

भिन्नजातीयराज्ञीनां सुताः पुत्रास्तथाऽनुगाः ।
दासा भृत्याश्च दास्यश्च येऽन्येऽन्या भक्तिमार्गगाः ॥१०६॥
आरोहन्तु विमानं मे नयामि मम धाम तान् ।
इत्युक्ताः सर्व एवैते ये ये मुमुक्षवोऽभवन् ॥१०७॥
आरुरुहुर्विमानं ते नवसाहस्रसंख्यकाः ।
पशवः पक्षिणः सर्वे कृपया श्रीहरेस्तदा ॥१०८॥
आरुरुहुर्विमानं तद् दिव्यदेहाश्चतुर्भुजाः ।
चतुर्भुज्यश्च कमला नार्यः शर्वास्तदाऽभवन् ॥१०९॥
प्रजाः सर्वा आरुरुहुर्विमानं दिव्यभास्वराः ।
एकैकपुत्रं सन्त्यज्य वंशबीजं यथायथम् ॥११०॥
सर्वाः प्रजास्तथा राजा राजकुटुम्बसंयुतः ।
सर्वे ययुर्विमानेन वैकुण्ठं परमं पदम् ॥१११॥
एवं शंभलवारो वै साधुर्गृहे स्थितोऽपि सन् ।
तापसोऽपि भुवो भोगान् भुक्त्वा प्रपूज्य केशवम् ॥११२॥
ययौ पदं तु परमं भक्त्या नारायणाश्रितः ।
भिन्नजातीयपत्नीनां पतिः पुत्रादिसंयुतः ॥११३॥
एवं साधुप्रसंगेन कुटुम्बं सर्वथा रमे ! ।
प्रयाति परमं धाम योग्यायोग्ये न तत्र वै ॥११४॥
पठनाच्छ्रवणादस्य भोगवैराग्यवान् भवेत् ।
भक्त्या भुक्तिं समालभ्य मुक्तिं व्रजेद् बलाद्धरेः ॥११५॥
साधुवृत्त्या व्रजेन्मुक्तिं नयेन्मुक्तिं सहस्रशः ।
यथा शंभलवारोऽसौ ययौ मुक्तिं प्रजायुतः ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
विविधपुत्राः, विविधपत्न्यो विविधपतयः, साधुयोगे मुक्तिः,
सूतजातीयस्य शंभलवारस्य साधुभक्तस्य भक्त्या
तपसा राज्यसुतपशुपक्ष्यादिप्राप्त्युत्तरं सप्रजस्य
मुक्तिरित्यादिनिरूपणनामा षडधिक-
शततमोऽध्यायः ॥ १०६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि चमत्कारं साधोः श्रीचिह्नयोगिनः ।
सौराष्ट्रवासिनस्तेऽत्र वदामि स्मृद्धिमोक्षदम् ॥ १ ॥
आसीत् साधुर्मम भक्तो कीशादनपुरस्थितः ।
श्रीचिह्नयोगीतिसिद्धो दिव्यकर्मा समाधिमान् ॥ २ ॥
अनादिश्रीकृष्णनारायणं मां भजते स्म सः ।
क्वचिददृश्यरूपेण क्वचिद् दृश्येन वर्तते ॥ ३ ॥
क्वचिज्जले वने वृक्षे पर्वते वसति क्वचित् ।
वृष्टौ तापे क्वचिच्चाऽब्धितटे चाऽश्वसरोवरे ॥ ४ ॥
क्वचिद् वह्नौ च वायौ च क्वचिद् विशति गह्वरे ।
एतादृशः समर्थोऽपि भजते मां निरन्तरम् ॥ ५ ॥
'अनादिश्रीकृष्णनारायण श्रीपरमेश्वर ।
अक्षराधिपते लक्ष्मीपते श्रीपुरुषोत्तम' ॥ ६ ॥
एवं मां रटति नित्यं भजते च पुनः पुनः ।
कृष्णनारायणनाम्ना मालां करोति नित्यशः ॥ ७ ॥
स्नानं ध्यानं च पूजां करोति मम नित्यदा ।
मानसे हृदये नित्यं मूर्तं पश्यति मां हि सः ॥ ८ ॥
सहस्रशो लक्षशश्च मानवा यमुपासते ।
कल्पवृक्षसमं सन्तं वीक्ष्य यत् कल्पयन्ति ते ॥ ९ ॥
सर्वं तत् फलति तेषां कल्पनादेव सन्निधौ ।
नाऽऽशीर्वादावश्यकता सेवावश्यकता न च ॥१०॥
एवंविधः स साधुस्त्वेकदा कौपीनमात्रधृक् ।
यदृच्छया चोपपन्नो देवानीकनृपं प्रति ॥११॥
सौराष्ट्रराजो विज्ञाय सन्तं नेमे पुपूज तम् ।
स्वागतं चासनं दत्वा मधुपर्कं ददौ ततः ॥१२॥
पादामृतं जलं लब्ध्वा पपौ कुटुम्बयुङ्नृपः ।
कल्याणदेवानीकस्त्री सहजाश्रीरिति नृपी ॥१३॥
नेमे तं च ददौ भोज्यं मिष्टं फलं जलं घृतम् ।
मुनिर्जग्राह भावेन पपौ वारि तुतोष च ॥१४॥
राजा सत्कृत्य बहुधा मुनिं पुनरथाऽब्रवीत् ।
भगवन् परवन्तौ स्यो ब्रूहि किं करवावहै ॥१५॥
यदि राज्यं यदि धनं यदि गा यदि भामिनीम् ।
यानं सुतां सुतं सौधं ब्रूहि सर्वं ददामि ते ॥१६॥
इदं गृहमिदं राज्यमिदं धर्मासनं च ते ।
नृप त्वमसि शाध्युर्वीमहन्तु परवाँस्त्वयि ॥१७॥
श्रुत्वा श्रीचिह्नयोगी तं प्राह भक्तं नृपं द्विजम् ।
न राज्यं कामये राजन्न धनं भामिनीं न च ॥१८॥
न गाः पानं सुतां सौधं सुतं वा कामये नृप ।
किन्तु मया गृहीतोऽस्ति नियमस्तस्य पूर्तये ॥१९॥
परिचर्योऽस्मि यत्ताभ्यां युवाभ्यामविशंकया ।
राजा हृष्टोऽभवच्छ्रुत्वा प्राह तथाऽस्तु तं मुनिम् ॥२०॥
प्रावेशयद् गृहोद्देशं दर्शनीयमदर्शयत् ।
इयं शय्या भगवतो यथाकाममिहोष्यताम् ॥२१॥
प्रासादोऽयं च भोगाश्च भुज्यन्तां स्वीयसम्पदः ।
व्रतं सम्यगनुतिष्ठ सर्वं गृहाण पूर्तये ॥२२॥
किमन्नं किं जलं चान्यत् किं किं भवतोऽपेक्षितम् ।
यतिष्ये प्रीतिमाहर्तुं किमुपस्थापयामि च ॥२३॥

श्रुत्वा मुनिर्भोजनं च यथोपपन्नमुत्तमम् ।
पायसाद्यं प्रयच्छस्वेत्याह राजा समानयत् ॥२४॥
बुभुजे च जलं पीत्वा प्राह श्रीचिह्वयोगिराट् ।
स्वप्तुमिच्छामि शय्यायां न प्रबोध्योऽस्मि सर्वथा ॥२५॥
संवाहितव्यौ मे पादौ जागृतव्यं च ते निशि ।
इत्युक्त्वा स प्रसुष्वाप दिवसानेकसप्ततिम् ॥२६॥
शुश्रूषापरमौ राज्ञीनृपौ चाहारवर्जितौ ।
बभूवतुस्ततः साधुरुत्तस्थौ व्रतमास्थितः ॥२७॥
प्रोवाच स तदा तैलाभ्यंगो मे रोचतेऽधुना ।
राज्ञीनृपौ सुगन्धाढ्यतैलाभ्यंगं प्रचक्रतुः ॥२८॥
कारयामासतुः स्नानं भूषयामासतुस्तथा ।
भोजयामासतुश्चापि साधुं मिष्टान्नकानि च ॥२९॥
मिष्टपाकान् समग्रांश्च लड्डुकान् सर्वजातिकान् ।
वेशवारविशेषांश्च पोलिकाः पूरिकादिकाः ॥३०॥
रसान्नानाप्रकारांश्च शाकानि विविधानि च ।
द्रवाणि सर्वरूपाणि भर्जितांश्च कणाँस्तथा ॥३१॥
क्षाराम्लमिष्टचूर्णानि फलानि विविधानि च ।
आरनालानि रम्याणि राजभोज्यानि सर्वशः ॥३२॥
भोजयामासतुस्तत्र महर्षिर्बुभुजे सुखः ।
आह कल्याणनृपतिं राज्ञीं वहतं मां वनम् ॥३३॥
स्कन्धे कृत्वा शिबिकायां राजा राज्ञी मुदं गतौ ।
स्वर्णरूप्यादिसंशोभमारोहयित्वा तं मुनिम् ॥३४॥
ऊहतुर्नगरे चापि नगरान्ते तथा वने ।
दृष्ट्वा प्रसन्नमनसौ निर्विकारौ हि सेवकौ ॥३५॥
प्रसन्नः श्रीचिह्वयोगी शिबिकातो ह्यवातरत् ।
विमुक्त्वा तौ वरं श्रेष्ठं ब्रूतां ददान्युवाच तौ ॥३६॥
सुकुमारौ च तौ विद्धौ पादयोः स्कन्धयोस्तथा ।
पस्पार्शाऽमृतकल्पाभ्यां कराभ्यां चिह्व योगिराट् ॥३७॥
सुसम्पन्नौ श्रमहीनौ दिव्यदेवाविव ह्युभौ ।
सञ्जातौ नवरूपौ च तथा च नवयौवनौ ॥३८॥
तौ मुनिश्चाह गम्येतां कौशादनं निजं पुरम् ।
अहमत्र निवत्स्यामि वने व्रतं चराम्यपि ॥३९॥
यत्कांक्षितं युवयोस्तु सर्वं तद्वै भविष्यति ।
इत्युक्ते नृपराज्ञ्यौ चाहतुस्तं वै मुनीश्वरम् ॥४०॥
अपराधाश्च सेवायां जाताश्चेत्ते मुनीश्वर ।
क्षन्तव्याः सर्व एवैते दयावार्धिमहात्मना ॥४१॥
तव प्रीतिं प्रसादं चाऽभिकांक्षावः सदा मुने ।
प्राह श्रीचिह्वयोगी तु पश्यतां रूपमैश्वरम् ॥४२॥

प्रसन्नोऽस्मि हरिश्चाऽस्मि श्रीचिह्वहृदयोऽस्म्यहम् ।
श्रीवत्सवक्षा मे नाम लक्ष्मीपतिर्भवाम्यहम् ॥४३॥
साधुरूपो गृहे तेऽत्र चागतोऽस्मि कृपावशः ।
ममाऽवतारो भक्तानां सदा कल्याणहेतवे ॥४४॥
अतश्चरामि साधुर्वै दिव्यदेहो जनार्दनः ।
देवानीक ! प्रसन्नोऽस्मि सहजाश्रि रतोऽस्मि च ॥४५॥
वृणुतं सद्वरान् स्वेष्टान् सेवाफलं ददामि च ।
श्रुत्वैवं तु तदा लक्ष्मि देवानीकः प्रणम्य तम् ॥४६॥
प्रपूज्य परमात्मानं मत्वा सुकृतमात्मनः ।
प्रोवाच स्नेहभृद्वाक्यैर्भगवन्तं हि मां तदा ॥४७॥
प्राप्तं सर्वं मया कृष्णनारायण तवागमात् ।
सेवया पूर्णया तीर्णः सपत्नीकश्च तद्वहु ॥४८॥
यत्प्रीतोऽसि हरेकृष्ण कुलं त्रातं च तारितम् ।
एष मेऽनुग्रहस्तत्र सेवा फलं च जीवतः ॥४९॥
एतद्राज्यफलं चैव भक्तेश्चापि फलं मम ।
किं च त्वं प्रीतिमानास्से संशयं मे निवारय ॥५०॥
किंव्रतं कीदृशं कस्मादेतत्सर्वमनुष्ठितम् ।
श्रुत्वा श्रीचिह्वयोगी च देवानीकमुवाच ह ॥५१॥
शृणु भक्त समग्रं तन्मया यन्निश्चितं स्वतः ।
तव वंशे भविष्यामि भगवान् भक्तवल्लभः ॥५२॥
त्वां तथा तव राज्ञीं च पावनार्थमुपागतः ।
पावने भक्तवंशेऽहं ततश्चावतरामि हि ॥५३॥
साधुरूपं मम रूपं पावयत्येव मानवान् ।
साधुरूपेण बीजं त्वां पूतं कृत्वा ततः परम् ॥५४॥
अनादिश्रीकृष्णनारायणः श्रीकृष्ण एव वै ।
श्रीमद्गोपालबालोऽहं कंभराश्रीसुतो हरिः ॥५५॥
भविष्यामीति सेवायाः फलदानार्थमेव ह ।
सेवां कारयितुं चात्र समायातोऽस्मि सर्वथा ॥५६॥
यथोक्ता मम सेवा वै कृता त्वया च योषिता ।
पादसंवाहनं स्नानं भोजनं शिबिकाधृतिः ॥५७॥
सर्वं सम्पादितं मे वै तेन ते वंशजास्त्विह ।
परत्रापि तथा सर्वे भविष्यन्ति सुखान्विताः ॥५८॥
भवानपि च गोलोकं कालान्तरे गमिष्यति ।
सभार्यस्त्वं महानन्दं धाम्नो मेऽपि लभिष्यसि ॥५९॥
पत्नीव्रतस्य विप्रस्य ब्राह्मण्यं वर्तते तव ।
त्वद्वंशे राजलक्ष्म्याश्च राजता ब्रह्मता पुनः ॥६०॥
ब्राह्मण्यं मम वासेन ध्रुवं सदा भविष्यति ।
ब्रह्मिष्ठत्वे महर्षित्वं तपस्विता च साधुता ॥६१॥

मुक्तता दिव्यता चापि कृष्णता मोक्षदातृता ।
सर्वपूज्यत्वमेवाऽपि सर्वरत्नसमुद्रता ॥६२॥
सर्वसौभाग्यखनिता सर्वैश्वर्याढ्यता तथा ।
श्रीलक्ष्मीशारदाभूतिसम्पदाश्रयता सदा ॥६३॥
एतत्सर्वं मम वाक्षाद् भविष्यति पुरा कुले ।
इत्युक्त्वा भगवान् सोऽहं दत्वा हारं तु कानकम् ॥६४॥
मणिमालां तथा दत्वा दत्वा मन्त्रं परं मनुम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥६५॥
पात्रं तथाऽक्षयं दत्वा दत्वा चक्रं सुदर्शनम् ।
अदृश्यतां गतश्चाऽहं देवानीको ययौ गृहम् ॥६६॥
स्वर्णवर्णान् सुप्रासादान् प्राकारं कानकं तथा ।
कल्पोद्यानावृतं दृष्ट्वा वीक्ष्याऽप्सरोयुतं निजम् ॥६७॥
मन्दिरं च तथा दिव्यविमानेन सुशोभितम् ।
दासदासीगणान् दिव्यान् शंखचक्रादिचिह्नितान् ॥६८॥
कामधेनूश्च परितो गौरीर्लक्ष्मीश्च कन्यकाः ।
प्रजा वैकुण्ठतुल्याश्च हस्तिनश्चाष्टदन्तिनः ॥६९॥
अश्वान् श्वेतान् श्यामकर्णान् हंसान् श्वेतान् विहंगमान् ।
रथान् सूर्यशशित्रातसंशोभान् व्योमगामिनः ॥७०॥
पार्षदान् विष्णुरूपाँश्च देवानीको मुमोद ह ।
यज्ञकुण्डान् मण्डपाँश्च महर्षीन् साधुमण्डलम् ॥७१॥
साधुजनान् लक्षशश्च देवान् सर्वान् ददर्श ह ।
स्वर्णनदीं पार्श्वतश्च यान्तीं ददर्श भक्तराट् ॥७२॥
श्रीहरेः कृपया लक्ष्मि देवानीकोऽभवत्तथा ।
महेन्द्र इव नृपतिः स्वराड् राज्ञी रमा यथा ॥७३॥
कृपया मम योगेन धामाऽक्षरं व्यजायत ।
कीशादनं नगरं तच्छ्रीशायनं व्यजायत ॥७४॥
देवानीको महाश्चर्यं जगाम तं च मां प्रभुम् ।
अभजत् परया प्रीत्या संस्मरन् साधुरूपिणम् ॥७५॥
अथाऽहं गतकालेन जातोऽस्मि भक्तवत्सलः ।
कोट्यर्बुदाब्जपत्नीनां नाथः श्रीपुरुषोत्तमः ॥७६॥
एवं साधोः प्रसंगेन प्रसंगेन हरेस्तथा ।
सेवकस्य कुलं सर्वं भवत्येव हरेः कुलम् ॥७७॥

श्रीनारायणीश्रीरुवाच—

कान्तोऽसि सर्वनाथोऽसि परमेशः स्वयं हरिः ।
अकुलस्य कुलं नास्ति श्रीहरेस्तव शार्ङ्गिणः ॥७८॥
तथापि मानवे लोके वंशमूला परम्परा ।
प्रवर्ततेऽतस्ते कृष्ण तामिच्छामि प्रवेदितुम् ॥७९॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि पुरा सृष्टेरहं नारायणोऽभवम् ।
ममांगेभ्योऽभवन् ब्रह्मविष्णुरुद्रसुरादयः ॥८०॥
सृष्ट्यादौ च तदा नारायणस्य परमात्मनः ।
मुखपिण्डाद् ब्राह्मणः श्रीपत्नीव्रतो बभूव ह ॥८१॥
पतिव्रताख्या भार्याऽस्य युगलं तद्बभूव ह ।
परमेष्ठिसमायुष्यं वृषमूर्त्यात्मकं हि तत् ॥८२॥
पूर्वपितामहाख्यं मे लक्ष्मि निबोध चादिमम् ।
पत्नीव्रतस्य वै पुत्रो ब्रह्मव्रतस्तु मानसः ॥८३॥
शीलव्रताऽस्य भार्या च बभूव मानसी च सा ।
परमेष्ठिसमायुष्यौ तावुभौ व्यूहकोटिजौ ॥८४॥
वासुदेवो वासुदेवी यौ तावुभौ बभूवतुः ।
तयोः शिष्या लक्षशोऽपि स्वतःप्रकाशयोगिना ॥८५॥
निभालिता अभवँश्च सौराष्ट्रे सर्वतोदिशि ।
ब्रह्मव्रतस्य वै पुत्रो ब्राह्मणः पृथिवीपतिः ॥८६॥
नाम्ना कल्याणदेवानीकस्तु कीशादनेश्वरः ।
सहजाश्रीसंज्ञया च भार्यया युग् बभूव ह ॥८७॥
वेधःपूर्वार्धसमयायुष्यौ तौ च बभूवतुः ।
भूमानारायणो योऽसौ भौमानिकीश्रिया युतः ॥८८॥
ब्रह्माण्डेऽत्राऽऽज्ञया मे वै प्रादुर्भूतो हि ताविमौ ।
ताभ्यां श्रीचिह्वयोगीतिस्वरूपेण सता मया ॥८९॥
आशीर्वादः प्रदत्तो वै प्राकट्यार्थे कुले मम ।
अथ कल्याणदेवानीकस्य पुत्रोऽपि मानसः ॥९०॥
कृष्णमुकुटमण्यात्मा चानर्तनृपपूजितः ।
पिचुदेवानीकनामा नारायणस्वरूपवान् ॥९१॥
बभूव मुकुटकल्पया मिष्टादेव्या पुत्रोऽत्र ह ।
वेधःपूर्वार्धसमयायुष्यौ त्वेतौ बभूवतुः ॥९२॥
पिचुदेवानीकपुत्रो महाविष्णुः स्वयं प्रभुः ।
श्रीमान् गोपालकृष्णाऽऽख्यो दशकल्पायुरेव ह ॥९३॥
महालक्ष्म्या कंभराश्रीदेव्या युतो बभूव ह ।
खट्वांगदनृपस्याऽर्थे वरदानाय चागतौ ॥९४॥
एतौ तु पितरौ मत्वाऽनादिकृष्णनरायणः ।
मानसोऽहमभवं सुपुत्रः श्रीपुरुषोत्तमः ॥९५॥
कोट्यर्बुदाब्जपत्नीनां भक्तानां च पतिः प्रभुः ।
अक्षराधिपतिः श्रीशश्चावतारी परात्परः ॥९६॥
भवामि शिवराज्ञीश्रि ! कान्तस्ते कृष्णमाधवः ।
अहं, मम पिता, तस्य पिता, तस्य पिता तथा ॥९७॥

तत्पिता, तत्पिता, तस्य पिता चैते तु पूर्वजाः ।
सर्वे नारायणा नारायणांशा मत्स्वरूपिणः ॥९८॥
नारायण्यो मातरश्च सर्वा मदात्मिकाः खलु ।
किमु तद्बहुनोक्तेन लक्ष्मि जानासि सर्वथा ॥९९॥
अहं सर्वात्मको भूत्वा लीलां विस्तारयामि ताम् ।
अंशस्य श्रवणात्पाठाद् भुक्तिर्मुक्तिर्ध्रुवा भवेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कल्याणदेवानीकभक्तस्य सेवापरीक्षा, श्रीकृष्ण-नारायणपरम्परानिर्देशश्चेत्यादिनिरूपणनामा सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

### श्रीनारायणीश्रीरुवाच—

भगवन् लोकतत्त्वेषु मग्नानां देहिनां क्वचित् ।
बाधायामुपपन्नायां किं जप्यं वद मेऽत्र तत् ॥ १ ॥
अनाथानां शरण्यं किं दैवतं रक्षकं च किम् ।
बलाश्रयं च शुभदं परमं किं वृषात्मकम् ॥ २ ॥
आपद्विनाशकं चाघक्षालकं मुक्तिदं परम् ।
वासनाध्वंसकं मायाग्रन्थिपाशविकर्तनम् ॥ ३ ॥

### श्रीपुरुषोत्तम उवाच—

अनादिश्रीकृष्णनारायणनामसहस्रकम् ।
पुरुषोत्तमसामाख्यं जपन्नमन् हरिं च माम् ॥ ४ ॥
पूजयन् सर्वदा भक्त्या पठन् सञ्चिन्तयँश्च माम् ।
सर्वात्मसुस्थितं ध्यायन् सर्वबाधाः समुत्तरेत् ॥ ५ ॥
शरण्यं सर्वपुण्यानां निधिं धर्माश्रयं प्रभुम् ।
सद्धियोद्भावकं च त्रिकालाऽबाध्यमच्युतम् ॥ ६ ॥
दिव्यसम्पत्कल्पमूर्तिं चमत्कारादिसंभृतम् ।
सर्वैश्वर्यभगवन्तं भक्त्या संकीर्तयेद्धि माम् ॥ ७ ॥
दिव्याक्षरादिसंसेव्यतेजोवार्धिप्रदं प्रभुम् ।
शाश्वतानन्दपूराणां गमकं परमेश्वरम् ॥ ८ ॥
पावनानां पावनं च परब्रह्म परात्परम् ।
मुक्तानां भाग्यरूपं चेश्वराणामीशितात्मकम् ॥ ९ ॥
सुराणां सुरताधानमृषीणामार्षताजुषम् ।
सतीसाध्वीसत्यभावस्नेहसेवाव्रतात्मकम् ॥१०॥
कामपूरं दिव्यशक्तिसामर्थ्यबलदायिनम् ।
अन्तकाले सखायं चोत्क्रमणे सहयायिनम् ॥११॥
सर्वाधारं सुहृदं तं श्रीहरिं मां जपेत् सदा ।
कान्तं शान्तं हृत्सु भान्तं पुरःस्थितं च मां नमेत् ॥१२॥
योगक्षेमकुशलादिप्रदातुर्मे हरेः रमे ! ।
दिव्यनामसहस्रं यत् सर्वाघभयनाशनम् ॥१३॥
लीलैश्वर्यगुणकर्मनिसर्गरूपरूपितम् ।
मुक्तेश्वरर्षिदेवाद्यैर्गीतं वदामि सिद्धिदम् ॥१४॥
अस्य श्रीमत्कृष्णनारायणनामस्तवस्य तु ।
ऋषिः सर्वेश्वरो लक्ष्मि त्वहं श्रीपुरुषोत्तमः ॥१५॥
छन्दोऽनुष्टुप् परो देवोऽनादिकृष्णनरायणः ।
आक्षराख्योमहामुक्तोमुक्तानीशो हि बीजकम् ॥१६॥
श्रीभूलीलारमाराधालक्ष्मीमाणिक्य एव च ।
शक्तयो हृदयं श्रीमत्पुरुषोत्तमसाम च ॥१७॥
गोपालकम्भराबालः कीलकं चाऽस्त्रमाच्युतम् ।
पद्मावतीरमापद्मास्वामिने च वषट् नमः ॥१८॥
शूलमीनध्वजधनुर्बाणध्रोऽस्त्राय फट् स्वाहा ।
सर्वबाधानिवृत्त्यर्थं जपेऽस्य विनियोजनम् ॥१९॥
ब्रह्मलोके विराजन्तं जुष्टं ब्रह्मिष्ठमण्डलैः ।
ब्रह्मप्रियास्वामिनं तं ध्याये सर्वान्तरस्थितम् ॥२०॥
दिव्ये लोमशक्षेत्रे वै विहरन्तं मनोहरम् ।
मन्दहासं पूर्णकामं कान्तं कृष्णं विचिन्तये ॥२१॥
पुष्टं प्रियं कामदं च दुःखहं सुखदं प्रभुम् ।
चत्वारिंशदूर्ध्वशतकान्तं स्मरामि मोक्षदम् ॥२२॥
भुक्तिदं मुक्तिदं चेष्टप्रदं सर्वप्रदं हरिम् ।
अनादिश्रीकृष्णनारायणं पतिं भजामि च ॥२३॥
किरीटकुण्डलभूषाभूषितं रूपसुन्दरम् ।
आकर्षकं श्वेतवर्णं बालकृष्णं नमाम्यहम् ॥२४॥
कोट्यर्बुदाब्जशक्तीनां पतिं चात्मपतिं विभुम् ।
पीताम्बरं सतां श्रेष्ठं सेवे चात्मनिवेदनैः ॥२५॥
नमोऽनन्तस्वरूपाय सर्वपादाक्षिवर्तिने ।
सहस्रनामबोध्याय काममायेश्वरात्मने ॥२६॥
ओं प्रमात्मा परमात्मा परब्रह्म परेश्वरः ।
पुरुषोत्तम ईशेशश्चाक्षराधिपतिः प्रभुः ॥२७॥
मुक्तेश्वरोऽवतारेशो मुक्तानीशो महाप्रभुः ।
अनादिश्रीकृष्णनारायणः श्रीकृष्णनन्दनः ॥२८॥
बाह्यमूर्तिश्चात्मवृत्तिः सर्वज्ञः श्रीहरिर्विभुः ।
अक्षरो ब्रह्म भगवान् वासुदेवो नरायणः ॥२९॥
नारायणः स्वयंज्योतिर्बालकृष्णश्चिदम्बरः ।
धामेशः शाश्वतानन्दोऽवतारी परमेश्वरः ॥३०॥
गोमान् दिव्यगुणागारः श्यामसुन्दर आन्तरः ।
सन् सनातन आनन्दश्चिच्चिदात्मा जडान्वितः ॥३१॥

ऋद्धिमान् भूतिमान् राजा संकर्षणो नियामकः ।
गोपालो गांगतो गोभृद् गोपीनाथो गवेश्वरः ॥३२॥
पार्षदः परिषत्पूज्यः पर्षत् पारिषदेश्वरः ।
दिव्यः शान्तः शान्तिदश्च सत्त्वः सत्त्वप्रकर्षवान् ॥३३॥
स्तवः श्लोकः स्मृतिः शब्दः कविर्वेदो विधिः प्रधीः ।
आसनं चाधिकरणं धृतिर्धैर्यं क्षमा यमः ॥३४॥
प्रद्युम्नो द्योतमानश्च द्यौः कान्तः कमलापतिः ।
अनिरुद्धोऽच्युतो भूमा महाकालो महेश्वरः ॥३५॥
महाविष्णुर्मध्यविष्णुर्विष्णुर्व्यापक ऊर्ध्वदृक् ।
वैराजः कारणं कर्ता कृतिः कार्यं नृपो जपः ॥३६॥
कपिः खपश्चेन्द्रियार्थ ऋषीकेशः समाधिमान् ।
योगी योगश्चक्रवर्ती चक्री शंखी गदी ध्वजी ॥३७॥
रथी क्षत्री च नक्षत्री वृत्तिश्चावृत्तिरुज्जयी ।
अव्याकृतश्च सूत्रात्मा तुर्यपदं सुखास्पदम् ॥३८॥
सदाशिवश्च देवश्च शिवः संहारधर्मवान् ।
धाता पोष्टा विधाता च पिता माता सुहृत् सखा ॥३९॥
प्राणनाथः सहायश्च स्वामी धानी धनी मखी ।
कोशो विश्वं महाभूतो भावः संभावनाधिपः ॥४०॥
गतिः कान्तिः पावनश्च चिदाभासः फलं फली ।
अन्तर्यामी पुरुषश्च क्षेत्रज्ञः क्षेत्रमार्त्तिहा ॥४१॥
साक्षी प्रधानपुरुषः प्रकृतीशो गुणाधिपः ।
गोलोकेशोऽमृतधामा वैकुण्ठेशो रमापतिः ॥४२॥
राधापतिः श्रीनिवासो दामोदरो विभावसुः ।
प्रभाजापो वामनश्च त्रिक्रमो भूरिविक्रमः ॥४३॥
केशवः कपिलः काशी नृसिंहो मापतिर्निधिः ।
श्रीशः स्थाणुः सतीशश्च शशी विद्युद्ध्रुवो रविः ॥४४॥
ब्रह्माऽर्यमा विष्णुरातो हरो वैष्णवसात्त्वतः ।
साधुर्यतिर्ब्रह्मचारी भर्ता धर्ताऽमरोऽमृतम् ॥४५॥
विभवः संभवो भूश्च पुष्कलो भूयसीप्रदः ।
स्वरो रागो मूर्छना च वादश्चालाप उत्सवः ॥४६॥
सवः सत्रं मखो यज्वा यज्ञो वह्निः प्रहव्यभुक् ।
दत्तात्रेयो महामत्स्यः पद्मनाभोऽञ्जनेत्रकः ॥४७॥
कञ्जहस्ततलः शार्ङ्गी विश्वकर्मा सुराधिपः ।
श्वेतक्रोडो वृषभश्च वृषजन्मा वृषाकपिः ॥४८॥
सूतो वक्ता गुरुः शास्त्रं महाचार्यो मनुर्मधुः ।
ईश्वरोऽध्यापकः शास्ता न्यायो नेता च नीतिमान् ॥४९॥
तर्कश्च निर्णयो ज्येष्ठ ईशानश्च पुरातनः ।
सनातनश्च सन्न्यासी मुनिर्व्रती च तापसः ॥५०॥

हिरण्यगर्भो हरिणीकान्तः कमलपत्तलः ।
विद्वान् विद्याधरो वाग्मी वाणीशो वर्णिशीलभृत् ॥५१॥
गृही गृहपतिर्गोप्ता वक्षाश्रीवत्सलाञ्छनः ।
व्यासोऽनादिप्रकर्षश्च द्रष्टा श्रीकृष्णचन्द्रकः ॥५२॥
काम्भरेयश्च मेधावी प्रजापतिर्दिवस्पतिः ।
दिक्पतिः श्रीपतिर्लक्ष्मीपतिर्ब्रह्मपतिर्नतिः ॥५३॥
कृतज्ञः शरणं विप्रो विवाहो वररूपवान् ।
वरहारश्च संवर्तो मण्डपोऽनङ्ग उत्तमाः ॥५४॥
सर्वगर्भो नरो वीर्यी प्रजात्मा वत्सरः सरः ।
दिवा द्युमणिरिष्टेष्टः सन्धिर्दण्डः सुखं शमः ॥५५॥
दानं दाता स्वत्वरूपस्त्यागः स्नेहः सुमंगलम् ।
शकुनं शकुनी पत्री हंसः शुकः कणः कृषिः ॥५६॥
स्फुरणं च प्रमा कूर्मो रामो रैवत आत्मवित् ।
पृथुः पर्शुधरः खड्गी धन्वी रणी रथीषुधिः ॥५७॥
लक्ष्यं क्रमः प्रत्ययश्च सिद्धोऽजः शाश्वतः शुभः ।
स्वप्रकाशो वसुः सत्यः समदर्शी समायनः ॥५८॥
भोगी शुक्लोऽर्जुनो दक्षः प्रत्ययः प्रत्यगात्मवान् ।
आमौघः सर्वयोनिश्च परमहंस आर्थिकः ॥५९॥
निर्वाणपादः सुषिरः शिराव्याप्तः पृथुश्रवाः ।
सौम्यो रौद्रो निग्रहात्मा स्वारोहः सर्वगः प्रभः ॥६०॥
वित्तिर्वेद्यस्वरूपश्च वेत्ता वेदनिधिर्विधिः ।
विश्वक्सेनः सुसंस्थानोऽध्यक्षोऽपरोक्षगोचरः ॥६१॥
कृतोऽकृतस्त्रियुगश्च लोकोऽलोको रमायनः ।
व्यूहोंऽशो विभवश्चार्चात्मकः स्वरूप ऊर्जितः ॥६२॥
सहनः स्थावरो भोक्ता फलदः सुजियत्नवान् ।
अमोघो गदहा व्याघ्रो गिरीशो गिरिधारकः ॥६३॥
अनिर्वाच्यः सुवाच्यश्च महीध्रो माणिकीधरः ।
सन्मूर्तिः पार्श्वतिकेशो गोविन्दो गरुडध्वजः ॥६४॥
ऋषभो गरुडः कल्किः कुमारो बुद्धिसर्जनः ।
हयशीर्षाः स्वर्णवर्णः सुरर्षिः पद्मजापतिः ॥६५॥
मुक्तापतिर्भूपतिश्च मुक्तपती रमावसुः ।
विश्वावसुः सिंहरूपो निमिषश्च बृहस्पतिः ॥६६॥
मरुद्दनं मनस्तेजोऽम्बरं दिगम्बरः श्रुतिः ।
त्रिपात् पादः सर्वपाच्च प्रपाता मृदुवर्तनः ॥६७॥
मिष्टः संभ्रमणः शेषः स्वागतं सन्नवार्तिकः ।
असंख्याक्षः शिष्टधर्मा धर्मवर्मा प्रसिद्धिमान् ॥६८॥
नारायणीनिवहश्च शिवराज्ञीसतीपतिः ।
माधवीशो भार्गवीशस्तूलसीनायको बृहत् ॥६९॥

देही देहीश्वरो रत्नं पुण्ड्रं पुण्ड्रधरः पुमान् ।
विधृतिः सर्वसेतुश्च नाको जलान् शिखी स्मृतिः ॥७०॥
संस्कारो गुरुता मानं सामान्यं वरदो वहः ।
प्रतिष्ठा स्कन्नभावश्च धुर्वहो यानमग्रणीः ॥७१॥
देवो मेरुर्गारुत्मश्च प्राश आर्षश्चतुर्मुखः ।
कूपस्तीर्थं सावनश्च मेघो वार्धिः रसः शयः ॥७२॥
भद्रः सुतः शूरवीरस्तारकः स्थविरो युवा ।
अर्कः प्लक्षः शरभश्च गजो गजाननो मृगः ॥७३॥
समयो हेतुरुदरं भाग्यं तारस्तमः कला ।
आवेशः प्रणवो बीजं प्रयोजनं धनं क्षमः ॥७४॥
ऋतुर्यूपो वत्सलश्च धनेशः सोमपः पुरुः ।
स्थूलः सूक्ष्मश्च लिङ्गं च सुपर्णोऽनशनो मृधः ॥७५॥
कीशो जयो भागवतः सात्त्वतो यन्त्रचेतनः ।
मन्त्रो मुकुन्दो विश्वासः पत्नीव्रतः प्रदक्षिणम् ॥७६॥
जीवोऽनन्तोऽन्तकश्चार्हो नन्दो दाता गुहा गृहम् ।
कलशः पिप्पलो वृन्दाद्रुमः कल्पलताश्रयः ॥७७॥
स्तम्भो वास्तुर्महाकुण्डश्चायुधं कम्बलः करः ।
कारुः शिल्पी वात्स्य आप्तस्त्वष्टा स्तरः प्ररोचनः ॥७८॥
अशोकः खदिरो बिल्वो वटः पलाश आमलः ।
उदुम्बरः कदलीशः पूगो राजेश्वरो रतिः ॥७९॥
दम्पती कुमुदो मोदो नन्दनः श्रीधरः स्मरः ।
शृंगारो दास्यदो नेमिर्बिन्दुर्भस्म ऊर्मिर्महः ॥८०॥
केशवः कामकृज्जिष्णुर्ब्रह्मण्यो वासुकिः प्रियः ।
लेख्यो बिम्बः प्रतिबिम्बो निरोधो दीर्घिका पयः ॥८१॥
प्रपा पानं पिशंगश्च पिंगाक्षो गायको गयः ।
नर्तको नटको मायी मन्त्री तन्त्री जितेन्द्रियः ॥८२॥
कल्पमणिर्महावीर्यं महद्रजोऽग्र्यपूरुषः ।
साधुजनः स्त्रीजनश्चाऽव्ययो वधूजनात्मकः ॥८३॥
स्तन्यपः साध्यदेवश्च धर्मजन्यो वृषासुतः ।
ऋतम्भरश्चमत्कारः स्वाहाकारश्च कर्मठः ॥८४॥
आरार्त्रिकं चाऽभिषेको मुकुटः कण्ठिकाप्रियः ।
सिन्दूरकः कुंकुमं च दूर्वा व्रीहिर्यवस्तिलः ॥८५॥
नागवल्लश्चेक्षुदण्डः श्रीफलो भक्तिवर्धनः ।
पूगीफलस्वरूपश्च सुगन्धः श्रेय आरमः ॥८६॥
श्रीमयः श्रीकृतवेषः श्र्यंगः श्र्यानन्दसम्प्रदः ।
श्रीतिलकः श्रीकृतोरुः श्रीशयः श्रीकथाश्रयः ॥८७॥
श्रीसेवः श्रीसमवायः श्र्यशनः श्रीसमाधिमान् ।
लक्ष्मीलक्ष्मा महालक्ष्मीभवो लक्ष्मीविभावनः ॥८८॥
लक्ष्मीपार्श्वो महालक्ष्मीगर्भो लक्ष्मीधराऽधरः ।
ब्रह्मज्ञो ब्रह्मपरमो ब्रह्मजपोऽनृणी मणिः ॥८९॥
अतिथिः पूर्णचन्द्रश्च देवयानो नभोगतिः ।
जगद्गुरुर्जयानाथो ललिताकान्त एकलः ॥९०॥
स्तुतिर्जपः स्थितिः स्थैर्यं सत्ता भूतिर्विभूतिमान् ।
हर्षः पञ्चात्मकः साक्षी सारः स्नेहः सुसम्पवान् ॥९१॥
काषायवेषो दीप्तात्मा पञ्चाग्नितापसो नगः ।
नागो निराशो नप्ता च कामफलं कुमारकः ॥९२॥
स्वस्तिकः प्रतिभारूपः प्रतिज्ञात्मा प्रमापकः ।
सहजः स्वभवः शंकुः कुशः शालशिलः शिवः ॥९३॥
चैत्यो गर्तश्च हुंकारो जघनं वीथिरज्वरः ।
उद्गीथश्चोपनिषच्च पुराणपुरुषः श्वनीः ॥९४॥
सत्परः सन्निवासश्च श्रीद्रुमोऽसुरनाशकः ।
कुञ्चिकात्मा ब्रह्मरन्ध्रं ब्रह्महृदो महाध्रुवः ॥९५॥
परिधिः किरणं केशः पञ्चशिखः परासनः ।
प्रवर्ग्यश्च महोपायो विशिष्टो विद्रुमो वशः ॥९६॥
मोदकस्तण्डुलश्चापामार्गो देवाधिदैवतम् ।
देवानीकतिलकश्च महाश्वपट्टसारसः ॥९७॥
जामाता धर्मवृद्धश्च संकल्पो मधुपर्ककः ।
सर्वतोभद्ररूपश्च पीठो वेदिर्बलिर्जलम् ॥९८॥
स्थण्डिलो मणिक्षेत्रेशः पाद्मक्षेत्रमहेश्वरः ।
लोमशानन्ददः पत्नीव्रतवंशप्रभाकरः ॥९९॥
इन्द्रद्युम्नस्थलीरक्षो नारसिंहवनेश्वरः ।
व्याघ्रारण्यनिवासश्च रुक्मांगदेष्टसम्प्रदः ॥१००॥
प्राभासिकप्रभानुश्च सोमक्षेत्रप्रपोषकः ।
सामपद्मनिशानाथोऽनादिकृष्णः प्रजापतिः ॥१०१॥
वसन्तश्च किशोरश्च महेन्द्रः शम्प्रदः सहः ।
मंगलेशो मनसेशो रेवेशो विरजापतिः ॥१०२॥
रतीशो गोमतीशश्च कामदुघेश्वरोऽतुलः ।
एकादशीपतिः स्वर्णरेखाकान्तो ह्यमूर्तकः ॥१०३॥
नन्दिनीशश्च दोलेशः पुष्पं कलावतीपतिः ।
बदरीशश्च पम्पेशो दर्पहा बान्धवो धवः ॥१०४॥
भक्तवत्सल उन्नेता मानकृल्लोकधृग्धरः ।
धन्यश्चतुर्भुजो दुर्गस्तन्तुकृत् सुकृतं कृती ॥१०५॥
सुन्दरश्चाश्वमेधश्च पर्जन्यश्चामृतापतिः ।
सुलभोऽदुर्लभोश्वःथो रक्षोहा दैत्यनाशनः ॥१०६॥
सप्ताश्वः सप्तजिह्वश्च प्राग्वंशश्च प्रभातकः ।
आश्रमश्च यमः सूर्यचन्द्रनेत्रस्त्रिनेत्रकः ॥१०७॥

विश्वनाभिर्भूश्चरणोऽनिलोऽसुर्दिक्छ्रवा द्युकः ।
अग्न्याननश्च बस्त्यब्धिः सर्ववर्ष्मा रमोऽरमः ॥१०८॥
घनश्यामो हितस्तथ्यो ब्रह्मधामा स्वधामवान् ।
नित्यश्च चेतनश्चान्तर्यामी विशेषवित्तिमान् ॥१०९॥
कार्यकारणरूपश्चाऽऽयोजको धृतिमान् पदी ।
प्रत्ययितः श्रुतिगम्यो वाक्यकृत् संख्यितोऽव्ययः ॥११०॥
स्वस्तिदाता स्वस्तिकर्ता स्वस्तिरूपः प्रशस्तिमान् ।
सृष्ट्यधिष्ठानमुत्तुंगो गोलकः कं च खं खगः ॥१११॥
मध्यावस्थो मध्यवासः सन्ध्यंशोऽभिजिदात्मकः ।
अमृतश्च शुभो लाभः क्षेमकृत् सिद्धिनायकः ॥११२॥
धन्वन्तरिर्नलो नालः प्रवाहो दधिमण्डपः ।
पुत्त्रः स्वर्गश्चाशीरात्मा प्रलयो वैष्णवार्चितः ॥११३॥
नवनीतोऽपवर्गश्च हृद्दीपः परमार्थदः ।
कालमायापापकर्मयमदूतभयापहा ॥११४॥
द्वारं द्वारी चन्द्रशालो घृताशी चाऽद्वितीयकः ।
बहुप्रजोऽप्रजो जाग्रत् प्राजननोऽन्तरङ्गकः ॥११५॥
ग्रन्थो ग्रन्थिर्नागरश्च सीमान्तः सीमवर्जितः ।
अबाध्यश्चाऽपरिच्छिन्नोऽविवर्तोऽपरिणामकः ॥११६॥
अवच्छेदक ऐश्वर्यं लक्षणं लक्ष्यमीशनीः ।
इतिः कवलमन्त्रं च सनातनतमः सनः ॥११७॥
वंशी कदम्बकः कीलः समाजः सार्थ आदरः ।
उदारो द्वयात्मकः श्रेष्ठी त्रियुगो युगलात्मकः ॥११८॥
स्त्रीपतिः स्वपतिः प्राप्तिस्तादात्म्यं निर्मितिः कृतिः ।
तत्त्वं स्वत्वमभिप्रायश्चेष्टोद्भवश्च भावनः ॥११९॥
उदयोऽयः प्रमेधश्च सुषुम्णामूर्तिदर्शनः ।
दानं दमो दया दिष्टं दितिर्देवी च दोहनम् ॥१२०॥
वक्ता वाचयिता लेखयिताऽध्यापक ऊहवान् ।
वाङ्मनोऽगोचरः पुण्यं पुण्यश्रुतिजपार्हणः ॥१२१॥
जीवनं मन्दहासः सत्पथाचारः पणो रणः ।
आत्मजश्चागमेयश्च नैगमेयो ह्यनावरः ॥१२२॥
असंख्यश्चैकसंख्यश्च निर्भयो भयनाशकः ।
आध्वरो हवनादश्च भावादनो भवापहः ॥१२३॥
ऊर्ध्ववीर्योऽप्रस्खलनो विघ्नहा च नरोत्तमः ।
दुःस्वप्ननाशकः शान्तिप्रदः प्रमोदकारकः ॥१२४॥
आकर्षकोऽक्षयपात्रं पर्यवसानमौरसः ।
व्याहृतिर्व्यवहारश्च स्फुर्तिश्चैकाक्षरो ध्वनिः ॥१२५॥
भुक्तिदो मुक्तिदः पापक्षालनः पुण्यदः प्रथः ।
ख्यात्यात्मा सर्वसेनश्च दिक् तारो नाद ईपतिः ॥१२६॥
स्फोटो नौका फलं पुष्पं पिष्टं सदसदात्मकः ।
ब्रह्मसूत्रं कंकणं च सद्धेतुः सर्वहेतिमान् ॥१२७॥
मूलं मूलोत्तरं मूलादिमः सर्वान्तसंस्थितः ।
आलयश्च तलं सर्वोदरः सर्वशरीरकः ॥१२८॥
अन्वयो व्यतिरेकश्च नित्ययुक्तो नमःपुरः ।
सम्पन्नो विकसद्भावो विश्वसद्भाव ओंनमः ॥१२९॥
इतीदं पावनं पुण्यं सर्वबाधाविनाशकम् ।
अनादिश्रीकृष्णनारायणनाम्नां सहस्रकम् ॥१३०॥
पुरुषोत्तमसामाख्यं स्तोत्रं लक्ष्मि मयोदितम् ।
श्रोतुर्वक्तुः कीर्तयितुर्मन्तुर्नश्यत्यघानि वै ॥१३१॥
इहाऽमुत्र न बाधा स्याद् विघ्ननाशो द्रुतं भवेत् ।
विप्रो विद्वान् ब्रह्मवित् स्याच्छूरः क्षत्रो जयी भवेत् ॥१३२॥
धनी श्रेष्ठी वैश्यवर्णो भवेच्छूद्रः सुखी भवेत् ।
ब्रह्मचारी चमत्कारी गृही स्त्रीसम्पदन्वितः ॥१३३॥
वनी वन्यर्द्धिसम्पन्नो भवेत् साधुः प्रशान्तिमान् ।
विन्देद्धर्मं धर्मरुचिश्चार्थेच्छुरर्थवान् भवेत् ॥१३४॥
कामेच्छुः कामसम्पत्तिं मुमुक्षुर्मोक्षमृच्छति ।
राज्यार्थी राज्यमाविन्देत् प्रजार्थी तु प्रजां लभेत् ॥१३५॥
पुत्रार्थी पुत्रमृच्छेद्वै भार्यार्थी स्त्रीं लभेन्नवाम् ।
कन्यार्थी कन्यकामृच्छेत् पत्यर्थिका पतिं लभेत् ॥१३६॥
विद्यार्थी प्राप्नुयाद् विद्यां धनार्थी धनमाप्नुयात् ।
वृत्त्यर्थी वृत्तिमान् स्याच्च भोगार्थी भोगवान् भवेत् ॥१३७॥
इष्टार्थी चेष्टमृच्छेच्च गृहार्थी गृहमाप्नुयात् ।
नित्यं प्रातः पठेद् भक्त्या शुद्धान्तःकरणस्तु यः ॥१३८॥
प्रधानतां यशः ख्यातिं श्रियं श्रेयश्च विन्दति ।
भयं नैव भवत्यस्य तेजो वीर्यं च वर्धते ॥१३९॥
नीरोगो जायते पाठात् पुष्टो बली गुणी भवेत् ।
रूपवान् जायते रम्यः काम्यो भवति पाठनात् ॥१४०॥
बन्धनं शीर्यते वक्तुर्भयं नश्यति सर्वथा ।
आपत्तयो विनश्यन्ति नश्यन्ति शत्रवोऽपि च ॥१४१॥
दुर्गाणि सुगमान्येव भवन्ति स्तुवतः खलु ।
पुरुषोत्तमशरणः पुरुषोत्तमभक्तिमान् ॥१४२॥
मायाञ्जनरहितात्मा लभते पुरुषोत्तमम् ।
मद्भक्तस्याऽशुभं नास्ति संसारस्य भयं न च ॥१४३॥
दुरीतं जन्म मृत्युश्च व्याधिर्जरा न रुग्णता ।
मोघताऽभिभवो नैव मद्भक्तस्य प्रजायते ॥१४४॥
एतत्पाठाद् भवेदात्मसुखं शान्तिः सुसम्पदः ।
समृद्धिः श्रीः कीर्तिरौदार्यं प्राधान्यं पुष्टिरीशिता ॥१४५॥

मुक्ता ईशाः पितरश्च सिद्धा देवा महर्षयः।
एतत्स्तोत्रजपेनैव सिद्धिं परमिकां ययुः ॥१४६॥
आयुष्मान् भवते श्रुत्वा निष्पापः पठनाद्भवेत्।
श्रद्धाभक्तियुतो वक्ता प्रेत्य चेह प्रमोदते ॥१४७॥
मयाऽनादिकृष्णनारायणेन ते प्रभाषितम्।
लक्ष्मि स्तोत्रं मत्परं तत्पाठान्मत्परमो भवेत् ॥१४८॥
अपि श्लोकैकपाठेन पाठोऽस्यापि कृतो भवेत्।
शृणु लक्ष्मि चमत्कारमयं श्लोकं वदामि ते ॥१४९॥
'नमामि सृष्टित्रयसंविधायिने
भजामि कोट्यर्बुदशक्तिशालिने।
ध्यायामि चात्मान्तरसन्नियामिनेऽ-
र्पयामिसर्वस्वमथाऽऽत्मवेदिने' ॥१५०॥
नमोऽनन्तस्वरूपाय नमोऽसंख्यप्रमूर्तये।
नमो युगलरूपाय नमः श्रीपरमात्मने ॥१५१॥
नमोऽनादिकृष्णनारायणाय स्वामिने नमः।
नमः श्रीकम्भरालक्ष्मीगोपालजनुषे नमः ॥१५२॥
नमोऽनाथाधिनाथाय नमः कान्ताकृपालवे।
नमो धर्माधिगोप्त्रे ते बालकृष्णाय ते नमः ॥१५३॥
शिवराज्ञीस्वामिने ते नारायणीश्वराय च।
रमापद्मावतीशाय नारायणाय ते नमः ॥१५४॥
नमो ब्रह्मप्रियेशाय श्रीकृष्णाय च ते नमः।
सर्वज्ञदेशिकेशायाचार्येश्वराय ते नमः ॥१५५॥
स्तवश्चायं पठितश्चार्पितस्त्वयि फलाप्तये।
सर्वदस्त्वं पाहि कृष्णनारायण नमो नमः ॥१५६॥
सहस्रपाठतश्चाऽस्य पुरश्चरणमाचरेत्।
महापदो विनश्यन्ति महासौख्यं भवेद्ध्रुवम् ॥१५७॥
विज्ञानं सर्वतत्त्वानां वर्धतेऽस्य प्रपाठनात्।
सार्वज्ञ्यकल्पता स्याच्च कृष्णस्य करुणाकणात् ॥१५८॥
राजा प्रधानः पृथिवीप्रधानः
स्वर्गप्रधानो धनदप्रधानः।
विद्याप्रधानोऽर्हणताप्रधानो
भवेत् स्तवस्याऽस्य सुपाठकृज्जनः ॥१५९॥
नित्यमेकप्रपाठेन सर्वकामसमृद्धिमान्।
जायते मे कृपालेशाल्लक्ष्मि तद्धृदमावस ॥१६०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वबाधानाशकं सर्वेष्टप्रदं श्रीपुरुषोत्तमसामाख्य-मनादिश्रीकृष्णनारायणनामसहस्रस्तोत्रकथन-नामाऽष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

श्रीनारायणीश्रीरुवाच—

भगवन् प्राप्तमुत्कृष्टं स्तोत्रं ते भवपारदम्।
बाधानाशकरं श्रेष्ठं भुक्तिमुक्तिप्रदं परम् ॥ १ ॥
कर्मठाः स्तोत्रपाठेन कृतकर्मफलं प्रभो।
भुक्त्वा यान्त्यथवा चाऽप्यभुक्त्वा मोक्षं प्रयान्ति ते ॥ २ ॥
यदि भुक्त्वा प्रयान्त्येव क्व कीदृग् भुञ्जते फलम्।
कस्य वा कर्मणः कीदृग् भुक्त्वा फलं प्रयान्ति ते ॥ ३ ॥
सत्कर्मिणां तु ये लोकास्तांश्चेद् भुक्त्वा प्रयन्ति वै।
ब्रूहि ते कीदृशा यत्र मोहः पुनर्न जायते ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि! वक्ष्यामि सत्फलान्यपि।
ज्ञातानि च पुनर्मोहं गन्तुर्नादधते परम् ॥ ५ ॥
तपः कर्म हि मूर्धन्यं कर्मणां भवते सदा।
स्वर्गः श्रेष्ठो हि तपसा लभ्यते कीर्तिसंभृतः ॥ ६ ॥
दीर्घायुष्यं श्रेष्ठभोगा लभ्यन्ते च तपोबलात्।
सम्पदो रूपमारोग्यं विद्या विज्ञानमुत्तमम् ॥ ७ ॥
आधिपत्यं परं द्रव्यं सौभाग्यं वंशविस्तरः।
लभ्यन्ते तपसा श्रेष्ठदेवत्वं तपसाऽऽप्यते ॥ ८ ॥
तापसः सर्वमेतद्वै भुक्त्वा चिरं तपःफलम्।
पश्चात् स्तोत्रफलं भुंक्ते ब्रह्मलोके हि शाश्वते ॥ ९ ॥
मौनव्रतं तपः प्रोक्तं पालितं येन तस्य तु।
वाक्सिद्धिर्जायते चाज्ञाप्रदत्वं जायते तथा ॥१०॥
बहूनामुपदेष्टा स्याद् गुरुराचार्य इत्यपि।
राजगुरुर्भवेच्चापि सेनापतिस्तथा भवेत् ॥११॥
धर्मशास्ता भवेच्चापि नियामकस्तथा भवेत्।
अत्र लोके स्वर्गलोके फलं भुक्त्वा स्तवस्य च ॥१२॥
फलं भोक्तुं प्रयात्येव धामाक्षरं परं हरेः।
दानकर्ता भवेत् स्वर्गे देवेशो भूतले धनी ॥१३॥
राजा भवेदुपभोगान् भुक्त्वा स्तोत्रफलं लभेत्।
परमेऽक्षरसंज्ञे वै राजते सर्वसौख्यभाग् ॥१४॥
ब्रह्मचर्यव्रतं श्रेष्ठं तप आनन्दवर्जनम्।
चिरायुः स भवेल्लोके बली पुष्टो दृढो युवा ॥१५॥
अप्रधृष्योऽपराभाव्यो भवेद् ब्रह्मसमेश्वरः।
फलं बहुसमा भुक्त्वा ततः स्तोत्रफलं लभेत् ॥१६॥
ब्रह्मलोकं प्रयात्येव मोदते ब्रह्मवेदिभिः।
अहिंसाऽपि तपः श्रेष्ठं नियमाऽऽख्यं निगद्यते ॥१७॥

अदुःखं सुखमात्रं च लभते स्वरहिंसकः ।
सुखं तत्र परं भुक्त्वा ततः स्तोत्रफलं लभेत् ॥१८॥
याति धामाऽक्षरं श्रेष्ठं मोदते ब्रह्मवादिभिः ।
दीक्षा धर्मयुता तपोयुक्ता तपः परं मतम् ॥१९॥
दीक्षितो भक्तियुक्तश्च पारमेष्ठ्यपदं लभेत् ।
बार्हस्पत्यपदं चापि महाचार्यपदं लभेत् ॥२०॥
पूजनीयकुले जन्म सतां कुलेऽच्युतगृहे ।
लभते दीक्षितस्तत्र भुक्त्वा भोगान् ततः परम् ॥२१॥
स्तोत्रफलं सुखं भुंक्तेऽक्षरे मे धामसत्तमे ।
फलमूलाशनं चापि तपः श्रेष्ठं निगद्यते ॥२२॥
तत्फलं राज्यमासाद्य स्वर्गे श्रेष्ठं प्रविन्दति ।
पर्णाशनः पयोभक्षा यान्ति स्वर्गं समृद्धिदम् ॥२३॥
फलं भुक्त्वा ततो यान्ति स्तोत्रफलं मदक्षरम् ।
स्वर्णदानेन साम्राज्यं चक्रवर्तित्वमित्यपि ॥२४॥
यत्र क्वापि लभेल्लोके ततोऽक्षरं प्रयाति सः ।
स्तोत्रफलं तत्र भुंक्ते शाश्वतानन्दशेवधिम् ॥२५॥
गुरोः शुश्रूषणं सेवा तपः परं निगद्यते ।
सेवया लभ्यते विद्या प्रसन्नताऽऽशिषः शुभाः ॥२६॥
पुण्यं सर्वोत्तमं स्वर्गं यदिष्टं तद्धि लभ्यते ।
मातापित्रोश्च वृद्धानां पत्युः पत्न्याः कुटुम्बिनाम् ॥२७॥
गवां सतां सुराणां चातिथीनां परवासिनाम् ।
रुग्णानां चाप्यनाथानां दीनानां सेवनं शुभम् ॥२८॥
तपो वै परमं प्रोक्तं फलं सर्वोत्तमं सुखम् ।
यदिष्टतमं लोके सर्वं विन्दति सेवया ॥२९॥
सार्वेश्यं सेवया प्राप्य स्वर्गलोके महीयते ।
स्वर्गे सत्ये फलं भुक्त्वा स्तोत्रफलं प्रविन्दति ॥३०॥
शाश्वतानन्दसम्पूर्णसुखानां सेविता भवेत् ।
अक्षरे परमे धाम्नि महामुक्तो भवेत् सदा ॥३१॥
श्राद्धं कुर्यात्तु यश्चात्र दद्यात् पितृभ्य उत्तमम् ।
कव्यं हव्यं द्विजातिभ्यो भोजनं दक्षिणादिकम् ॥३२॥
फलं स्वर्गे चिरं भुक्त्वा पितृलोकं प्रगच्छति ।
तत्र चिरं फलं भुक्त्वा स्तोत्रफलं ततो लभेत् ॥३३॥
सत्यलोकं विहायैवाऽक्षरं लोकं प्रयाति सः ।
अत्र सन्ततिबाहुल्यं श्राद्धकर्तुर्भवत्यपि ॥३४॥
वैष्णवं तत्कुटुम्बं स्याद् भजित्वा परमेश्वरम् ।
नैवेद्यं वै समर्प्याऽपि नित्यं प्रपूज्य भावतः ॥३५॥
स्तोत्रस्याऽस्य प्रतापेनाक्षरं धाम प्रयाति च ।
एवं वंशप्रवंशा वै श्राद्धदातुः प्रजा रमे ! ॥३६॥
प्रयान्ति चाक्षरं धाम स्तोत्रवक्ता प्रमोदते ।
प्रमोदन्ते वंशजाश्च सहवासाः सदाऽक्षरे ॥३७॥
गवां प्रसेवया याति स्वर्गं सत्यं ततः परम् ।
गोलोकं परमं याति स्तोत्रपुण्येन चाक्षरम् ॥३८॥
त्रियत्रिषवणं स्नात्वा लभन्ते चोत्तमान् वरान् ।
विप्राणीत्वं च देवीत्वं यान्ति स्तोत्रेण चाऽक्षरम् ॥३९॥
वाय्वाहारस्तपःकर्ता लभेद् यज्ञफलं दिवम् ।
स्तोत्रेण च ततो याति परमाक्षरमुत्तमम् ॥४०॥
नित्यस्नायी बुद्धिमान् स्यान्मेधावी स्फूर्तिमान् जनः ।
प्राणायामपरो याति स्वर्गं स्तोत्रेण चाक्षरम् ॥४१॥
स्थण्डिले शयनाढ्यस्तु लभते मन्दिराणि वै ।
राजयोग्यानि वै स्वर्गे स्तोत्रेण याति चाक्षरम् ॥४२॥
चीरवल्कलवस्त्राढ्यः प्रैति भूषाम्बराणि च ।
शय्यासनानि रम्याणि लभते च ततः परम् ॥४३॥
स्तोत्रेण याति मे धामाऽक्षरं मोदं प्रविन्दति ।
अग्निस्नातः प्रयात्येव सूर्यलोकं ततः परम् ॥४४॥
वह्निलोकं ततः स्तोत्रबलाद् यात्यक्षरं पदम् ।
रसानां नियमे याति सौभाग्यं स्वर्गमुत्तमम् ॥४५॥
अनामिषादः स्वर्याति चिरायुर्जायते दिवि ।
ततः स्तोत्रेण वै धामाऽक्षरं याति सुखास्पदम् ॥४६॥
उदवासी नृपः स्याच्च समुद्राधिपतिर्भवेत् ।
भूत्वा च वरुणः स्तोत्रबलाद् धामाऽक्षरं ततः ॥४७॥
सत्यव्रती प्रयात्येव स्वर्गं स्तोत्रेण चाऽक्षरम् ।
पानीयदानमात्रेण स्वर्गेऽमृतादनो भवेत् ॥४८॥
अन्नदोऽपि प्रयात्येव स्वर्गं भोगाढ्यमुत्तमम् ।
कामभोगान् प्रभुक्त्वा स्तोत्रेण यात्यक्षरं पदम् ॥४९॥
सान्त्वदः सर्वभूतानां याति सत्यं पदं शुभम् ।
देवशुश्रूषया याति सिद्धलोकं तु वैधसम् ॥५०॥
स्तोत्रेण च ततो यात्यक्षरं मत्परमं पदम् ।
दीपदाता दिव्यदृष्टिर्भवत्येव सुसिद्धिमान् ॥५१॥
सत्यलोके चिरं स्थित्वा स्तवेन याति चाक्षरम् ।
आदर्शादिप्रदाता च वैराज्यमेति सत्पदम् ॥५२॥
गन्धमाल्यादिदानेन गान्धर्वं चैति राजसम् ।
पञ्चकेशाऽक्षौरकर्मा वंशविस्तारवान् भवेत् ॥५३॥
कन्यादानविधाता तु स्वर्गे वैराजसत्पदम् ।
लभते चैश्वरं भावं दासीदाससहस्रकम् ॥५४॥
अलंकारान् महाभोगान् दिव्यान् प्रासादसत्तमान् ।
यशैश्वानयानाद्यैश्च स्वर्गे पितृपदं तथा ॥५५॥

फलपुष्पादिदानेन तूद्यानादिपतिर्भवेत् ।
तिलधेनुप्रदाता तु वसुलोकं प्रयाति वै ॥५६॥
भूमिदाताऽव्याकृतं च धाम याति सुखास्पदम् ।
धुर्यदानेन च वसुलोकं याति सुखाश्रयम् ॥५७॥
छत्रदानेन चैशत्वं कैलासे लभते जनः ।
उपानहोः प्रदानेन यानविमानवान् भवेत् ॥५८॥
गन्धदानेन सुरभिर्भवेदीश्वरकोटिकः ।
सपुष्पफलवृक्षस्य दाताऽमृतपदं व्रजेत् ॥५९॥
रसदाताऽमृतं धाम गच्छेदीश्वरकोटिकः ।
स्रग्धूपलेपदानेन वैकुण्ठं लभते परम् ॥६०॥
शय्यादानविधाता वै गोलोकं याति भक्तराट् ।
तत्र तत्र महानन्दान् भुक्त्वा स्तोत्रेण चाऽक्षरम् ॥६१॥
प्रयात्येव प्रतापान्मे लक्ष्मि धामोत्तमोत्तमम् ।
तडागस्य प्रदाता वै प्रयात्यमृतधाम सः ॥६२॥
तत्र भोगान्परान् भुक्त्वा स्तोत्रेण याति चाऽक्षरम् ।
धर्मार्थकाममोक्षाणां दातृ सरोवरार्पणम् ॥६३॥
तडागेन प्रदेशस्य श्रियो यान्ति विकासताम् ।
चतुर्दशास्तरवासाः संश्रयन्ति जलाशयम् ॥६४॥
अग्निहोत्रफलं स्वर्गगोदानस्य फलं तथा ।
अग्निष्टोमफलं चातिरात्रयज्ञफलं तथा ॥६५॥
वाजिमेधफलं चापि लभते सरसः प्रदः ।
गावः सन्तो जनाः पक्षिवराः प्राणप्रधारिणः ॥६६॥
पशवः पादपा वारि पिबन्ति जन्तवोऽपि च ।
विश्रमन्ति तटे तत्र स्नान्ति च क्षालयन्ति च ॥६७॥
एवं तडागदातुर्वै फलं त्वनन्तकं भवेत् ।
सर्वदानेषु वै ज्येष्ठं पानीयं शान्तिदं परम् ॥६८॥
जलदाताऽमृतभोक्ता जायते चैश्वरे पदे ।
विरजायास्तटे स्थित्वा चिरं गोलोकमेति च ॥६९॥
भुक्त्वा भोगान् सुबहुधा ततः स्तोत्रेण चाऽक्षरम् ।
प्रयात्येव प्रभक्तो मे स्तोत्रफलं पराऽक्षरम् ॥७०॥
अथ वृक्षप्रदाता च दिव्यवृन्दावनं शुभम् ।
गोलोकस्थं समेत्येव गुल्मदाता लतार्पकः ॥७१॥
वल्लीप्रदो वंशदाता तृणदो याति तत्पदम् ।
देवलोकं शुभं भुक्त्वा पितृलोकं प्रयाति च ॥७२॥
वृक्षाः पुष्पैः सुरगणान् पितॄन् फलैः रसादिभिः ।
अतिथीन् छायया पत्रैः प्राणिनः पूजयन्ति वै ॥७३॥
ददत्याश्रयमुत्कृष्टं देहिभ्यो वृक्षजातयः ।
वृक्षदं पुत्रवद् वृक्षास्तारयन्ति परत्र तु ॥७४॥
वृक्षरोपी चेष्टयज्ञः सत्यवादी जितेन्द्रियः ।
स्वर्गे सत्ये च वैराजेऽमृतेऽव्याकृतधामनि ॥७५॥
वैकुण्ठे चापि गोलोके महीयन्तेऽतिमोदिनः ।
तेऽपि लक्ष्मि स्तवेनैव प्रयान्त्यक्षरमुत्तमम् ॥७६॥
अभयं सर्वभूतेभ्यो दत्वाऽभयं परेऽक्षरे ।
प्राप्नोत्येव स्तवेनाऽपि शाश्वतानन्दभाग् भवेत् ॥७७॥
व्यसनेष्वपि लोकानामनुग्रहः परो वृषः ।
दुःखहा व्यसनक्षेता स्वर्गं याति सुखास्पदम् ॥७८॥
यच्चाऽभिलषितं दद्यात् तृषितायाऽभियाचते ।
दत्तं तूर्णमुपयुक्तं ग्रहीता तोषणं व्रजेत् ॥७९॥
श्रेष्ठं तद्दानमेवाऽत्र दातारमुपगच्छति ।
स्वर्णदानं धेनुदानं पृथिवीदानमुत्तमम् ॥८०॥
प्रासाददानं कन्याया दानं विद्याप्रदानकम् ।
अन्नवारिप्रदानं च भूषाम्बरप्रदानकम् ॥८१॥
गृहोपकरणानां च दानं शृंगारदानकम् ।
यानवाहनदानं चाऽभयदानं विशेषतः ॥८२॥
विश्वासदानं द्रव्याणां दानं कुमारदानकम् ।
वृषभाणां गजानां च वाजिनां दानमुत्तमम् ॥८३॥
छत्रासनादिदानं च वेत्रदानं परं मतम् ।
सिंहासनप्रदानं च गजासनप्रदानकम् ॥८४॥
ज्ञानदानं भक्तिदानं पुरुषार्थप्रदानकम् ।
कामदानानि चैतानि पवित्राण्युत्तमानि च ॥८५॥
साधुभ्यो दैवतवद्भ्यो दत्तान्येतानि पद्मजे ।
नित्यदा खलु दातारं पापात् प्रमोक्षयन्ति हि ॥८६॥
पुण्यपुञ्जैर्योजयन्ति नयन्ति दिवमुत्तमम् ।
सत्यलोकं च वैराजान् लोकान् नयन्ति तानि ह ॥८७॥
विष्णुलोकान् सदाशिवलोकान् नयन्ति तानि ह ।
मायालोकानीशलोकान् गोलोकान् प्रापयन्ति च ॥८८॥
लक्ष्मीलोकान् मुक्तलोकान् श्रीलोकान् प्रापयन्ति च ।
अव्याकृताऽमृतधामविशेषान् प्रापयन्ति च ॥८९॥
पार्षदानां महालोकान्नारीलोकान्नयन्ति च ।
साध्वीलोकान् सतीलोकान् दातारं प्रापयन्ति च ॥९०॥
वह्निलोकान् धर्मलोकान् चन्द्रलोकान्नयन्ति च ।
यद्यदिष्टतमं लोके यच्च स्याद् दयितं प्रियम् ॥९१॥
तत्तद् देयं सुपात्राय फलमक्षयदं हि तत् ।
प्रियकृल्लभते नित्यं प्रियं प्रियप्रदो भवेत् ॥९२॥
प्रियो भवति भूतानामिह चापि परत्र च ।
अमित्रमपि दीनं चेच्छरणैषिणमागतम् ॥९३॥

व्यसने योऽनुगृह्णाति स वै नारायणो मतः ।
कृशायाऽधीतविद्याय वृत्तिक्षीणाय सीदते ॥९४॥
दद्यात् कष्टं नाशयेच्च स वै नारायणो मतः ।
सत्कर्मपरमान् साधून् पुत्रदारकुटुम्बिनः ॥९५॥
अयाचमानान् दद्याच्च सर्वोपायैः प्रतुष्टये ।
लालसां नैव भोगेषु स्वर्गेष्वपि प्रकुर्वते ॥९६॥
नित्यतुष्टा निराशाश्च कृताऽवसथवासिनः ।
ब्रह्मपराः प्रदातव्याः सर्वस्मृद्धिभिरादरात् ॥९७॥
यदि ते प्रतिगृह्णीयुः श्रद्धापूतं प्रदापितम् ।
दत्तं तत् कोटिपुण्यानां प्रदं मोक्षप्रदं भवेत् ॥९८॥
धार्मिका भक्तिमन्तो वै विद्वांसो व्रतिनो जनाः ।
तापसाः शीलयोगाश्च दान्ताः पात्राणि साधवः ॥९९॥
तेषु दत्तं महायज्ञो नित्यं ब्रह्ममखो भवेत् ।
विशिष्टः सर्वयज्ञेभ्यश्चानृण्यसम्प्रदः सदा ॥१००॥
कुप्यन्ति नैव चाऽलाभे लुभ्यन्ति न तृणेष्वपि ।
तुष्यन्ति सुखिनो दृष्ट्वा मोदन्ते वर्द्धयन्ति च ॥१०१॥
नारायणं च मां नित्यं स्मरन्ति कीर्तनैः सदा ।
साधवो ब्राह्मणा ब्रह्मधराश्च ऋत्विजोऽमलाः ॥१०२॥
पुरोहितास्तथाऽऽचार्यास्ताद्दृशः साध्विकाः स्त्रियः ।
मातरः पुत्रकल्याणकर्त्र्यः पूज्यतमाश्च याः ॥१०३॥
वित्तादिना सदा पूज्या नमस्कार्या यथायथम् ।
दातव्याश्चर्द्धिभिर्नित्यं देवा देव्यो हि ता मताः ॥१०४॥
यथा स्वाम्याश्रयो धर्मः स्त्रीणां लोके सनातनः ।
तथा स्वाम्याश्रयो धर्मो दानात्मा देवताश्रयः ॥१०५॥
साधुभ्यः प्रथमं दद्याद् ब्रह्मविद्भ्यः शुभं मुहुः ।
अनाथेभ्यस्ततो दद्याद् भिक्षुकेभ्यस्ततः परम् ॥१०६॥
विप्रेभ्यश्च ततो दद्याच्चारीभ्यश्च ततः परम् ।
ब्राह्मणेभ्यस्ततो दद्यादन्येभ्यश्च ततः परम् ॥१०७॥
दासादिभ्यस्ततो दद्यादेवं दाता प्रमोदते ।
दानफलं च लोकेषु भुक्त्वा ब्रह्म प्रयात्यनु ॥१०८॥
पुरुषोत्तमसामाख्यस्तोत्रैर्गैत्यक्षरं पदम् ।
सर्वदानफलं सौख्यं मोदमानन्दमुत्सवम् ॥१०९॥
लभते शाश्वतमूर्तिर्ब्रह्मसायुज्यमास्थितः ।
पठनाच्छ्रवणादस्य ब्रह्मसायुज्यभाग् भवेत् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दानफलभोगोत्तरं पुरुषोत्तमसामजपफलमक्षरधामस्थ-शाश्वताऽऽनन्दात्मकं भुंक्ते दातेत्यादिनिरूपणनामा नवाधिकशततमोऽध्यायः ॥ १०९ ॥

श्रीपुरुषोत्तम उवाच—

विद्या चाचरणं लक्ष्मि जन्म दीक्षा शुभाश्रयः ।
एते यत्र प्रविद्यन्ते दानपात्रं तदुत्तमम् ॥ १ ॥
याचते यत्प्रदत्तं तच्छ्रेय एव निगद्यते ।
अयाचते प्रदत्तं तु दानं स्वस्वत्ववर्जितम् ॥ २ ॥
ब्रह्मिष्ठो दानपात्रं वै साधुः पात्रप्रभूषणम् ।
लब्ध्वा साधुः सुविद्वान् यत् प्रीणाति देवता गुरून् ॥ ३ ॥
याचना सर्वथा लक्ष्मि निकृष्टोद्वेगकारिणी ।
प्रकाशदस्युर्याचमानो भवत्येवाऽप्रकृद्धि सः ॥ ४ ॥
याचना तु भवेन्मृत्युर्मृत्युरेव तु याचना ।
सा तु दुःखप्रदा तस्माद् याचतो दानमेव न ॥ ५ ॥
दातृत्वं जीवनं प्रोक्तं याचते दीयते यदि ।
जीवनं श्रेय एवास्ति दाता श्रेयश्च विन्दति ॥ ६ ॥
ग्रहीता श्रेयसा युक्तो भवत्येव तथाऽधर्मः ।
उत्तमो वै प्रदाता स्यात्तस्माद्दानं प्रशस्यते ॥ ७ ॥
याचते दीयमानेनाऽनृशंसत्वं विभाव्यते ।
अयाचते तु दानेन स्वर्गफलं विभाव्यते ॥ ८ ॥
पूज्या हि ज्ञानविज्ञानतपोभक्तियुता जनाः ।
योगिनः साधवः पूज्यास्तेभ्यो देयं समस्तकम् ॥ ९ ॥
दत्तमतिथये विद्यावते शीलवतेऽर्थिने ।
अक्षयं वै फलं तस्य जायते शाश्वतं दिवम् ॥१०॥
येषां शिष्याः सुता दाराः प्रतीक्षन्तेऽन्नवारिणी ।
तेभ्यो दत्तं प्रभुञ्जानास्त्रेताग्निं प्रीणयन्ति ते ॥११॥
साधुभ्यो ब्रह्मचारिभ्यो दत्तं प्रभुञ्जते तु ते ।
ब्रह्माग्निं ते प्रीणयन्ति सवनं परमं हि तत् ॥१२॥
मध्यन्दिनं तु सवनं भिक्षुकेभ्योऽर्पणं सदा ।
देवेभ्यश्चापि पितृभ्योऽर्पणं तद्वैश्वदैविकम् ॥१३॥
सवनं तु तृतीयं तद् यज्ञास्त्रयो दिवंप्रदाः ।
नारायणाय मह्यं यद् दत्तं दिव्यमखो हि सः ॥१४॥
आत्मार्पणात्मको लक्ष्मि कर्तव्योऽयं विजानता ।
अद्रोहः सर्वभूतानां संविभागोऽनुयायिनाम् ॥१५॥
सेवा तुष्टिर्दमस्त्यागो यज्ञा भवन्ति सात्त्विकाः ।
त एतेऽवभृथायन्ते श्रद्धापूताः सदक्षिणाः ॥१६॥
पापकृतां जनानां न प्रतिगृह्णन्ति साधवः ।
तस्माद् द्रव्यमये यज्ञे दातव्यं पापनाशनम् ॥१७॥
यदि गृह्णन्ति सन्तोऽस्य पापिनः पावनं हि तत् ।
पापप्रक्षालनशक्तं पात्रबलात् प्रजायते ॥१८॥

ब्राह्मणांस्तर्पयेद् द्रव्यैस्तत्तदिष्टतमाऽर्पणैः ।
मैत्रान् साधून् वेदविदः शीलव्रततपोजुषः ॥१९॥
तर्पयेद् बहुधा दानैः स्वाद्वन्नैर्दक्षिणादिभिः ।
प्रभावतो भक्तजनान् प्रजावान् जायते हि के ॥२०॥
यावतः साधुधर्मान् वै सन्तः संवर्धयन्ति हि ।
ते भर्तव्या बहुदानैर्जीवकल्याणकारिणः ॥२१॥
धेनवो वृषभा भूषा अम्बराणि धनानि च ।
आज्यान्यन्नानि यानानि छात्रं वासांस्युपानहौ ॥२२॥
अश्ववन्ति च यानानि वेश्मानि शयनानि च ।
एते देयाः साधुसद्भ्यः स्वर्गदा मोक्षदा हि ते ॥२३॥
दाता पापैर्विनिर्मुक्तः पूतः स्वर्गं प्रयाति हि ।
उपछन्नं प्रकाशं वा वृत्त्या साधून् प्रपालयेत् ॥२४॥
राजसूयाऽश्वमेधानां फलभाक् स भवेद् ध्रुवः ।
योगं क्षेमं विन्दतेऽपि शाश्वतं चाक्षरं पदम् ॥२५॥
साधवो यं न शसन्ति तन्न कुर्यात् कदाचन ।
दद्याद्वै महतो भोगान् क्षुद्भयं प्रणुदेत् सताम् ॥२६॥
यत्र देशे प्रपश्यन्ति स्वादुभोज्यानि बालकाः ।
प्रपश्यन्त्येव नाऽश्नन्ति स देशोऽघमलात्मकः ॥२७॥
यत्र देशे साधवश्चाऽनाथाः स्त्रियश्च बालकाः ।
क्षुधा सीदन्ति देशः स नाशमायाति सर्वथा ॥२८॥
क्रोशन्त्यो यत्र वै देशे म्रियन्ते तरसा स्त्रियः ।
गावश्चापि प्रजाश्चापि स देशो मरणोन्मुखः ॥२९॥
तस्मादभयदानाख्यं दानं परमकं मतम् ।
अभयस्य प्रदाता वै याति चाऽभयमक्षरम् ॥३०॥
पुरुषोत्तमसाम्नश्चोद्दाता यात्यभयाऽक्षरम् ।
पृथिवीदानकृल्लक्ष्मि ! याति क्ष्मामक्षरात्मिकाम् ॥३१॥
दत्ताऽत्र क्ष्मा दिव्यरूपं धृत्वोत्तिष्ठति चाक्षरे ।
अचला चाऽक्षया दोग्ध्री दिव्यकामादिपूरणी ॥३२॥
रत्नवासांसि रम्याणि सुधात्रीहियवाऽमृतान् ।
सर्वविधान्यमृतानि लभते भूमिदोऽक्षरे ॥३३॥
भूमिदः सर्वलोकेषु शाश्वतीरेधते समाः ।
यावद्भूमेरिहाऽऽयुश्च तावद्भूमिद एधते ॥३४॥
भूमिं ददुश्च ये दाने भूमिं ते भुञ्जते पराम् ।
भूमिर्भूतिर्महालक्ष्मीर्दातारं कुरुते प्रियम् ॥३५॥
यथादानं तथा भोगो दानं श्रीः परमा मता ।
अपि पापसमाचारे ब्रह्मघ्ने भक्तिवर्जिते ॥३६॥
क्षितिः क्षिता पुनात्येव ग्रहीता साधुभिस्तु चेत् ।
सा मन्यते धन्यभाग्यं साधुहस्तगता सती ॥३७॥
दातारं कुरुते शुद्धं स्वापत्यं जननी यथा ।
पृथ्व्या नामाऽस्ति धर्माढ्यं प्रियदत्तेति सार्थकम् ॥३८॥
भूमिं तु साधवे दत्वा भूमिं दिव्यां प्रविन्दते ।
यः साधोर्भूमिमादत्ते न भूमिं विन्दते हि सः ॥३९॥
साधोर्भूमिः शस्यतेऽत्र सा तु नारायणी मता ।
पापी गोचर्ममात्रेण भूमिदानेन पूयते ॥४०॥
यो यजेताऽश्वमेधेन दद्याद्वा साधवे महीम् ।
महीदानं प्रशस्तं शाश्वतानन्दफलप्रदम् ॥४१॥
सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतद् दत्तवान् स्याद् यो ददाति वसुन्धराम् ॥४२॥
तपो यज्ञः श्रुतं शीलं गुरोः सेवा गवार्चनम् ।
साधुदैवतपूजा च एता भवन्ति भूमिदे ॥४३॥
दातृनिःश्रेयसे युक्ता श्रेयः परं ददाति सा ।
यथा जननी पुत्रं स्वं क्षीरेण भरतेऽन्वहम् ॥४४॥
तथा पुष्णाति दातारं सर्वगन्धरसैर्मही ।
मृत्युः कालो यमदण्डो माया वह्निर्ज्वरो ह्यरिः ॥४५॥
पाशो बाधाश्च विघ्नाश्च भयं दुरीतमित्यपि ।
अकस्माता ईतयश्च नोपसर्पन्ति भूमिदम् ॥४६॥
पितॄन् देवान् महर्षींश्च सिद्धान् योगिजनान् सतीः ।
साध्वीर्युक्तान् ब्रह्मकान्ताः सन्तर्पयति भूमिदः ॥४७॥
कृशाय वृत्तिहीनायाऽनाथाय सीदते क्षितिम् ।
जीविकाजननीं दत्वा सर्वसत्री भवेज्जनः ॥४८॥
यथा धेनुः स्ववत्सं वै यच्छति वत्सला पयः ।
पोषयत्येव तद्वत् क्ष्मा दातारं पोषयत्यति ॥४९॥
ससस्यां वा सबीजां वा सकणां यः प्रयच्छति ।
श्रेष्ठं गृहं चार्पयति भवेद् ब्रह्मा स दानकृत् ॥५०॥
यथा चन्द्रमसो वृद्धिः शुक्ले प्रत्यहमेव ह ।
तथा भूदः परां वृद्धिं सस्ये सस्ये प्रविन्दति ॥५१॥
पृथ्वी मूर्तिमती प्राह पृथ्वीस्वामिन एव सा ।
मामादाय च मां दत्त दत्वा मां मामवाप्स्यथ ॥५२॥
प्रायश्चित्तं महीदानं पुनात्युभयतो दश ।
स कुलीनः स पुरुषः स बन्धुः स हि पुण्यकृत् ॥५३॥
स दाता स मखी साधुर्यो ददाति वसुन्धराम् ।
यथा सस्यानि रोहन्ति तथा क्ष्मादस्य कामनाः ॥५४॥
भूमिर्माता पिता लक्ष्मीरन्नं जीवनमित्यपि ।
भूमौ भवन्ति पुष्टाश्च निष्ठां व्रजन्ति वै भुवि ॥५५॥
आदित्या वरुणा रुद्रा ब्रह्माणो विष्णवोऽनलाः ।
वसवः शशिनो देवा भूमिं दत्वाऽभवन् सुराः ॥५६॥

सुवर्णदानं गोदानं भूमिदानं गृहार्पणम् ।
ददन्नेतान् साधवेऽत्र सर्वपापैः प्रमुच्यते ॥५७॥
भर्तुर्निःश्रेयसे यस्या पतिव्रताऽर्धदेहिनी ।
भूदानमाचरेत् तेन भर्ता यात्यक्षरं पदम् ॥५८॥
रत्नोपकीर्णां वसुधां सर्वकामगुणान्विताम् ।
दद्याद् राजाधिराजः स्यात् पुण्यः स्वर्गे महीयते ॥५९॥

सर्वकामदुघां धेनुं महीं कामप्रवर्षिणीम् ।
कन्यां वंशकरीं साध्वीं ददन् स्वर्गे महीयते ॥६०॥
मधुसर्पिःप्रवाहिण्यः पयोदधिवहास्तथा ।
सरितस्तर्पयन्तीह परे तु वसुधाप्रदम् ॥६१॥
महीं शस्त्रजितां दत्वा युद्धपापं व्यपोहति ।
न तस्य लोकाः क्षीयन्ते स्वर्गे मोदन्त एव ते ॥६२॥

भूतिं चेच्छन् प्रदद्याद् क्ष्मां पुण्यामृद्धिरसान्विताम् ।
सागरान् सरितः शैलान् काननानि च सर्वशः ॥६३॥

तडागान्युदपानानि स्रोतांसि च सरांसि च ।
स्नेहान् सर्वरसांश्चैव ददाति वसुधां ददन् ॥६४॥
ओषधीर्वीर्यसम्पन्ना नगान् पुष्पफलान्वितान् ।
काननोपलशैलांश्च धातून् खनीश्च सर्वथा ॥६५॥
जीविकां सर्वजीवानां ददाति वसुधां ददन् ।
इक्षुभिः सन्ततां भूमिं यवगोधूमशालिनीम् ॥६६॥
गोऽश्ववाहनपूर्णां च निधिगर्भां ससाधनाम् ।
ददाति योऽक्षयलोकान् लभते स महासुखान् ॥६७॥

भूमिसत्रं भवेत्तस्य सर्वकलुषनाशकम् ।
सतां लोके परे दिव्ये सद्भिर्दाता महीयते ॥६८॥
शतं दिव्या योषितोऽपि दिव्यमालाविभूषिताः ।
सम्पदश्चोपतिष्ठन्ति ब्रह्मलोके धराप्रदम् ॥६९॥
शंखभद्रासनं छत्रं वराश्वावरवाहनम् ।
धर्मपुण्यानि पुष्पाणि हिरण्यनिचयांस्तथा ॥७०॥
आशां सदाऽप्रतिहतां जयशब्दान् वसूनि च ।
हिरण्यपुष्पाश्चौषधीन् कुशकाञ्चनशाद्वलाः ॥७१॥

अमृतप्रसवां भूमिं भूतिं क्ष्मादः प्रपद्यते ।
नास्ति भूमिसमं दानं नास्ति मातृसमो गुरुः ॥७२॥
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ।
नास्ति साधुसमं पात्रं नास्ति मोक्षसमं सुखम् ॥७३॥
नास्ति मुक्तिप्रदं स्तोत्रं पुरुषोत्तमसामवत् ।
दानकृत् स्तोत्रवक्ता च याति धामाऽक्षरं मम ॥७४॥
दानफलं परं भुक्त्वा स्वर्गे सत्ये तथैश्वरे ।
दिव्यलोके ततो याति स्तवाद्धामाऽक्षरं मम ॥७५॥

यथा भूमिस्तथा चान्नं शस्यते दानरूपकम् ।
लोकयात्रा भवत्यन्ने प्राणा अन्ने प्रतिष्ठिताः ॥७६॥
अन्नं तत् प्रथमं ब्रह्म जीवकं तृप्तिदं सदा ।
अन्नमूर्जस्करं शक्तिप्रदं धारकमेव तत् ॥७७॥
तापसा भिक्षवः सन्तो गृहिणोऽन्ने प्रतिष्ठिताः ।
क्षुधितायाऽन्नदाता तु परत्र निधिमान् ध्रुवः ॥७८॥

अतिथिं चागतं शीघ्रं जलान्नैः पूजयेद् गृही ।
अन्नदो लभते स्वर्गं चेह वाऽमृतमुत्तमम् ॥७९॥
अन्नं श्वपाके शुनि वा दत्तं न विप्रणश्यति ।
दद्याददृष्टपूर्वाय स महद्धर्ममाप्नुयात् ॥८०॥
पितॄन् देवानृषीन् विप्रान् साधून् नारीरनाथकान् ।
अतिथीन् प्रीणयत्यन्नैस्तस्य पुण्यमनन्तकम् ॥८१॥
अन्नदानं सर्ववर्णे शस्यते पुण्यदं हि तत् ।
न पृच्छेद् गोत्रचरणं स्वाध्यायं देशमित्यपि ॥८२॥

भिक्षुकाय प्रदद्याद्वै याचितोऽन्नं समुत्तमम् ।
अन्नदस्याऽन्नसस्यानि सर्वदा फलदानि वै ॥८३॥
भवन्ति चेहाऽमुत्रापि सुधास्वादुफलानि हि ।
पितरोऽपि प्रतीक्षन्ते कुलेऽन्नदो भवेद्धि नः ॥८४॥

सन्तो विप्रा अनाथाश्च व्यंगा अन्नस्य भिक्षवः ।
सत्कृताश्च निवर्तन्ते दत्वा पुण्यानि दैवतम् ॥८५॥
नित्यं मिष्टान्नदायी तु स्वर्गे वसति सत्कृतः ।
अन्नदः पशुमान् पुत्री धनवान् भोगवानपि ॥८६॥

प्राणवान् रूपवाँश्चापि जायते पूज्यते सुरैः ।
क्षेत्रं क्षुधायुतं पात्रं तत्रोप्यते प्ररोहति ॥८७॥
प्रत्यक्षं प्रीतिजननं चामृतं पुण्यसत्फलम् ।
भोक्तुर्दातुर्भवत्येव जीवनांकुरमेव ह ॥८८॥
धातुमूलं काममूलं गर्भमूलं सदाऽन्नकम् ।
प्रसवश्चापि धर्मार्थौ रोगनाशोऽन्नतो मताः ॥८९॥
अन्ने भूः स्वः सत्यलोकः सर्वे तिष्ठन्ति पद्मजे ।
अन्नाभावे प्रभिद्यन्ते शरीरे पञ्चधातवः ॥९०॥

बलं रूपं प्रशक्त्याद्या नश्यन्त्यन्ननिरोधनात् ।
उत्सवाश्च विवाहाश्च यज्ञाश्चान्नैर्भवन्ति हि ॥९१॥
स्थावरं जंगमं यच्च सर्वमन्ने प्रतिष्ठितम् ।
जडं च चेतनं चापि पुष्टितत्त्वमपेक्षते ॥९२॥

अपि यन्त्राणि तैलाऽऽपोऽपेक्षन्ते का कथाऽऽत्मनः ।
भवनानि प्रकाशन्ते दिवि चान्नप्रदात्मनाम् ॥९३॥
तारासंस्थानि जायन्ते चन्द्रशुभ्राणि तानि वा ।
तरुणादित्यवर्णानि किंकिणीजालवन्ति च ॥९४॥

अनेकशतभौमानि सान्तर्जलचराणि च ।
वैदूर्याऽर्कप्रकाशानि रौप्यरुक्ममयानि च ॥९५॥
सर्वकामफलदाश्च वल्लीवृक्षाश्च तेष्वपि ।
वाप्यो वीथ्यः सभाः कूपा दीर्घिकाः सन्ति तेषु च ॥९६॥
घोषवन्ति विमानानि लभ्यन्ते भवनेष्वपि ।
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च ॥९७॥
क्षीरनद्यो दधिनद्यो घृतनद्योऽत्र सन्ति च ।
प्रासादा दिव्यकान्ताश्च सुशय्याः काञ्चनोज्ज्वलाः ॥९८॥
देव्यो मनोहरा योग्याः प्राप्यन्ते तत्र मन्दिरे ।
अन्नदानां सदा लक्ष्मीर्वर्धतेऽमृतवर्षिणी ॥९९॥
सुधानद्यः प्रस्रवन्ति पीयूषवार्ध्यस्तथा ।
एवं भुक्त्वा शुभान् लोकान् यथापुण्यमतः परम् ॥१००॥
पुरुषोत्तमसाम्ना वै लक्ष्मि याति पदं मम ।
अक्षरं धाम परमं भुंक्ते कामान् मया सह ॥१०१॥
साधून् विप्रांस्तर्पयेद्वै सर्पिषा पायसेन च ।
कृसरैः पोलिकाद्याभिः सूपोदनैश्च तर्पयेत् ॥१०२॥
तिलपक्वान्नकैर्भक्ष्यैः फाणितैः पायसैः शुभैः ।
शाकैः फलैर्मूलकैश्च कन्दैर्दलैश्च सक्तुकैः ॥१०३॥
राजमाषैश्च मिष्टान्नैर्लड्डुकैस्तर्पयेत् सतः ।
दक्षिणायां स्वर्णदानं रूप्यकं चाऽर्पयेत्तथा ॥१०४॥
स्वर्गान् भुक्त्वा सामपाठादक्षरं संव्रजत्यपि ।
शाश्वतं परमानन्दं भुंक्ते लक्ष्मि मया सह ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दानपात्रे दानफलं भूदानफलमन्नदानफलं पुरुषोत्तमसामफलं चेत्यादिनिरूपणनामा दशाधिकशततमोऽध्यायः ॥ ११० ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं जलं तु जीवनं सदा ।
जलदानं जीवदानं कीर्तितं चामृतात्मकम् ॥ १ ॥
शीतलं मधुरं वारि मिष्टं कृत्वा सुगन्धयुक् ।
शार्करं पाययेत् साधून् विप्रानन्याँस्तृषान्विताम् ॥ २ ॥
प्रपाः कुर्यात् कारयेच्च पाययेत् सुजलानि वै ।
कूपान् वापीतडागाँश्च कारयेल्लोकतृप्तिदान् ॥ ३ ॥
जलदानं रसदानं परे लोके प्रपद्यते ।
अर्धं पापस्य हरति जलं दत्तं सुतृप्तिदम् ॥ ४ ॥
जलं साक्षिस्वरूपं च वरुणात्म प्रदीप्यति ।
चेतनं ब्रह्म वार्यास्ते देयं पुण्यतमं जलम् ॥ ५ ॥
गावो विप्राः साधवश्च साध्व्योऽन्ये देहिनोऽपि च ।
यस्य खाते पिबन्त्यंभस्तारयन्ति कुलानि ते ॥ ६ ॥
यथा वारि तथा पुण्यं घृतं दद्यात् प्रभक्षणे ।
साधुद्विजातिशिभ्योऽपि रूपवान् रसवान् भवेत् ॥ ७ ॥
फलं पुष्टिं यशः स्नेहं चामृतं लभते दिवि ।
बलं गाश्च महिषीश्च लभते घृतदानकृत् ॥ ८ ॥
दद्याद् दाने पायसं च सर्पिर्दद्याद् विशेषतः ।
घृतदातुर्गृहं रक्षोयमाद्या धर्षयन्ति न ॥ ९ ॥
पिपासया न म्रियते करकावारिदानकृत् ।
शकटस्य प्रदातुश्च भवन्ति वाहनानि वै ॥१०॥
स्वर्गयानानि रम्याणि विमानानि शुभानि च ।
उपानत्संप्रदातुश्च नश्यन्ति कण्टकाः सदा ॥११॥
शकटं दम्यसंयुक्तं दत्तं भवति तस्य वै ।
तिलदानं प्रकर्तव्यं पितृभोज्याः शुभास्तिलाः ॥१२॥
सर्वसत्रैर्यजते स यस्तिलान् सम्प्रयच्छति ।
पौष्टिकान् रूपदाँश्चापि तथा पापविनाशकान् ॥१३॥
यत्र घृतं व्रीहिर्नास्ति नास्ति फलानि पायसम् ।
तत्र तिलैः प्रहोतव्यं तृप्यन्ति पितरः सुराः ॥१४॥
तिलदस्याऽमृतं स्वर्गे चोपतिष्ठति सर्वदा ।
तिलदाताऽन्नदः प्रोक्तः फलदश्चापि कथ्यते ॥१५॥
एवं लक्ष्मि ! भूमिदाता यज्ञषष्ठांशमृच्छति ।
न सीदति स कृच्छ्रेषु न च दुर्गाणि गच्छति ॥१६॥
शीतवातातपसहां गृहभूमिं सुशोभिताम् ।
यो दत्ते मोदते स्वर्गे पुण्यान्तेऽपि न चाल्यते ॥१७॥
प्रतिश्रयप्रदाता वै स्वर्गे याति प्रमोदते ।
धर्मशालाविधाता च स्वर्गलोके प्रमोदते ॥१८॥
यस्य सौधे पाठशाला साधुशाला गवां कुलम् ।
स दाता स्वश्च वैराजं प्राधानिकं गृहं लभेत् ॥१९॥
आशतानि कुलान्येव तारयत्याश्रयप्रदः ।
क्षेत्रदः सततां लक्ष्मीं रत्नदो वंशविस्तरम् ॥२०॥
उद्यानदः फलरसान् तीर्थदो मोक्षमुत्तमम् ।
गोदो याति तु गोलोकं विप्रदो ब्रह्म चाक्षरम् ॥२१॥
कुमारदो भूमलोकं कन्यादः श्रीस्थलीं शुभाम् ।
दासीप्रदोऽप्सरोलोकं दीपदः सूर्यसन्निधिम् ॥२२॥
घृतदः सोमलोकं च दुग्धदोऽमृतधाम च ।
रत्नदोऽव्याकृतं धाम स्त्रीदो विष्णुपदं परम् ॥२३॥

गृहदः सत्यलोकं च ऋद्धिदः प्राकृतं स्थलम् ।
भूषादो वैष्णवं धाम प्रयाति शाश्वतीः समाः ॥२४॥
गोदः प्राणप्रदः प्रोक्तः शरण्यस्य प्रदस्तथा ।
गोसहस्राणि दश यो ददातीन्द्रत्वमृच्छति ॥२५॥
स्वायंभुवं महस्स्थानं कणदः समगच्छति ।
लोमशश्च गुरुः प्राह प्राणदानं परं मतम् ॥२६॥
येन प्राणाः प्ररक्ष्यन्ते प्राणदानं हि तन्मतम् ।
अन्नेनापि जलेनापि तथौषधादिभिः क्वचित् ॥२७॥
शरणेनाऽभयेनाऽप्याश्रयेण प्राणरक्षणम् ।
तानि दानानि कमले प्राणदानानि सर्वदा ॥२८॥
दातव्यानि चिरायुष्यफलानि स्वर्गदानि च ।
जलं सुराणाममृतं जायते दत्तमत्र यत् ॥२९॥
नागानां तत् सुधारूपं पितॄणां च स्वधात्मकम् ।
वत्सानां चापि बालानां जलं दुग्धात्मकं भवेत् ॥३०॥
जलदानं सदा दद्याद् यदीच्छेद् भूतिमात्मनः ।
दानान्येतानि धन्यानि चायुष्याणि सुखानि च ॥३१॥
सर्वकामप्रदान्येव प्रेत्यानन्दप्रदानि च ।
एतद्दानानि दत्वाऽत्र भोगान् भुक्त्वा त्रिविष्टपे ॥३२॥
उषित्वा चिरकल्पाँश्चाऽक्षरं स्तोत्रात् प्रयाति च ।
पुरुषोत्तमसाम्नश्च फलं त्वक्षरधाम वै ॥३३॥
निजदानं प्रदातव्यं गृहिणा त्यागिने शुभम् ।
सर्वं त्यक्त्वा साधवे स्वार्पणकर्ताऽक्षरे पदे ॥३४॥
मोदते ब्रह्मविद्भक्तो मुक्तो भूत्वा निरन्तकः ।
पूर्वे नृपास्तथा विप्राः स्वार्पणं त्यागिने रमे ॥३५॥
गुरवे स्वार्पणं चक्रुर्नैजं त्यागाश्रमाय ह ।
भूत्वा वनी ततो न्यासी गच्छेद्वै परमं पदम् ॥३६॥
पुरुषोत्तमसाम्ना वै लभेताऽक्षरधाम च ।
श्रृणु लक्ष्मि कथां दीर्घशीलस्य ब्राह्मणस्य वै ॥३७॥
शत्रुंजयायाः सरितस्तटे ग्रामे **विरामणे** ।
दीर्घशीलोऽभवद्विप्रो वसन्त्येऽपि भूसुराः ॥३८॥
अथ प्राह यमः कंचिद् दूतं भयंकरं निजम् ।
याहि विरामणं दीर्घशीलं समानय ॥३९॥
भारद्वाजं गोत्रतश्च स्नानपूजाविवर्जितम् ।
नास्तिकं निन्दकं शास्त्रमृषावादिनमेव तम् ॥४०॥
मा चाऽन्यमानयेथास्त्वं नाम्ना गोत्रेण सदृशम् ।
दानशीलं दीर्घशीलं वसन्तं वै विरामणे ॥४१॥
स गत्वा त्वानयद् दूतो निषिद्धं दानशीलिनम् ।
ग्रामे कोलाहलो जातो मृतो वै दीर्घशीलवान् ॥४२॥
सम्बन्धिनः सुहृदश्चाययुस्तदुभयोर्गृहम् ।
भ्रान्ता न्यवर्तयँश्चापि दृष्ट्वा जीवन्तमेककम् ॥४३॥
केचिदाहुर्यमदूतोऽस्माभिर्दृष्टो भयंकरः ।
दीर्घशीलं मुनीत्वैव गच्छन् व्योमगतिस्त्वरन् ॥४४॥
श्रुत्वा त्रासं जगामापि नास्तिको मरणं निजम् ।
अन्तिके त्वागतं किन्तु दूतो विस्मृत्य मां परम् ॥४५॥
आस्तिकं हृतवानेव ततो दानं करोमि च ।
दत्तवान् द्रुतमेवाऽयं गोतिलाम्बरभूषणम् ॥४६॥
गृहं घृतं सुभोज्यान्नं जजाप च पुनः पुनः ।
पुरुषोत्तमसामाऽपि भीयुक्तो मरणस्य सः ॥४७॥
तत्पुण्यं बहुधा जातं सर्वपापविनाशकम् ।
प्रतीक्षते यमदूतं त्वायास्यन्तं मुहुर्दिशम् ॥४८॥
अथ संयमिनीपुर्यां गतश्चास्तिकभूसुरः ।
दृष्टो यमेन धर्मेण नतश्चोत्थाय पूजितः ॥४९॥
मधुपर्कादिभिः सम्यक् सत्कृतो वन्दितस्तथा ।
भोजितश्चामृतान्नैश्च क्षमां प्रति ततोऽर्थितः ॥५०॥
अथ धर्मनृपो दूतं प्राह नाऽयं स दण्डभाक् ।
पूजितो नीयतामेषः सोऽन्य आनीयतामिति ॥५१॥
एवमुक्ते तु वचने त्वास्तिकः प्राह धर्मजम् ।
निर्विण्णोऽहं शेषकालं वसेयमिति सर्वदा ॥५२॥
नाऽहमिच्छामि दुःखाढ्ये देहे निवसितुं यम ।
धर्मान् श्रावय भद्रं ते यान् प्रपाल्याऽप्यते सुखम् ॥५३॥
धर्मराजस्ततः प्राह श्रृणु तत्त्वं हि भूसुर ।
भूमिदानं सर्वदानसमं सर्वसुखप्रदम् ॥५४॥
गृहदानं सर्वसाध्यसाधनैश्चोपबृंहितम् ।
सुखदं पुण्यदं स्वर्गप्रदं विप्र परं मतम् ॥५५॥
उद्यानवाटिकादानं रसदानं परं मतम् ।
सर्वरसानवाप्नोति फलपुष्पादनानि च ॥५६॥
तटाकसरितां दानं श्रेष्ठं तृप्तिप्रदं मतम् ।
गोदानं परमं विप्र स्वर्गमोक्षप्रदं मतम् ॥५७॥
वैतरणीतारकं च मायाबन्धननाशकम् ।
भवाब्धितारकं पापक्षालकं हि गवार्पणम् ॥५८॥
स्वर्गदानं भूषणादिसमर्पणं परं मतम् ।
श्रृंगाराम्बरदानं च स्मृद्धिदं परमं मतम् ॥५९॥
कन्यादानं च दाम्पत्यप्रदं श्रेष्ठं दिवप्रदम् ।
दासदासीप्रदानं च धनदानं तथा शुभम् ॥६०॥
सर्वगार्हस्थ्यभोगानां सम्पादकं तु नाणकम् ।
तिलदानं घृतदानं दीपदानं परं तथा ॥६१॥

शर्करागुडदानं च यवगोधूमदानकम् ।
छत्रोपानत्प्रदानं च स्वर्गराज्यप्रदं मतम् ॥६२॥
तानि सर्वाणि देयानि देयं चाभयदानकम् ।
मोक्षदानं परतमं सर्वेभ्यो वै विशिष्यते ॥६३॥
विप्र त्वया प्रदत्तानि बहूनीमानि सर्वथा ।
पुण्यवानसि सम्यक् त्वं कुरु श्रेयो हि देहिनाम् ॥६४॥
पुरुषोत्तमसामाख्यं स्तोत्रं जप पुनर्मुहुः ।
मोक्षदं शाश्वतानन्दप्रदं मोक्षप्रमोददम् ॥६५॥
नित्यसुखप्रदं पापध्वंसकं चाक्षरप्रदम् ।
पुरुषोत्तमसाम्नस्तु पाठकं पूर्वपापिनम् ॥६६॥
दण्डं नाऽहं ददाम्यत्र पावनः स तु कीर्त्यते ।
अदण्ड्यो मे भवेद् विप्र महापाप्यपि पाठकः ॥६७॥
याहि विप्र सुखेनैव क्षन्तव्यश्चापि धर्मराट् ।
इत्युक्तो दीर्घशीलश्च दूतेन सह सत्वरम् ॥६८॥
नत्वा धर्मं चाययौ वै निजं देहं विनेश ह ।
प्रसन्ना बान्धवा जाता विप्रो दानानि वै ददौ ॥६९॥
ययौ धामाऽक्षरं चान्ते जप्त्वा स्तोत्रं मम प्रियम् ।
पुरुषोत्तमसामाख्यं सर्वबाधानिवर्तकम् ॥७०॥
यमदूतो नास्तिकं तं नीत्वाऽऽययौ यमं प्रति ।
दण्डायाऽऽवेदयामास चित्रगुप्तं तु धर्मराट् ॥७१॥
दृष्ट्वाऽऽह चित्रगुप्तोऽपि पुण्यं विवर्धतेऽस्य वै ।
पापान्यन्यानि सर्वाणि दुरीतानि कृतानि तु ॥७२॥
विलीनानि समग्राणि पुरुषोत्तमसामतः ।
पुण्यपुञ्जाः प्रवर्धन्ते सर्वदानादिभिस्त्विह ॥७३॥
ततो दण्ड्योऽस्ति नाऽयं वै पूजनीयोऽस्ति सर्वथा ।
श्रुत्वा श्रीधर्मराजोऽपि पुपूज दीर्घशीलिनम् ॥७४॥
भयेन पुण्यकर्तारं जप्तारं स्तवनस्य च ।
अर्घ्यं चाऽऽचमनं पादप्रक्षालनजलं ददौ ॥७५॥
स्वागतं चाऽर्हणं भोज्यं मधुपर्कादिकं ददौ ।
कृत्वा च संविदं तेन विससर्ज तदा हि सः ॥७६॥
पप्रच्छ धर्मराजं तं कृतं नष्टं कथं मम ।
नास्तिकोऽहं निन्दकश्चाऽधर्मी पापी भवामि च ॥७७॥
तथापि नैव दण्डो मे महाश्चर्यमिदं मम ।
वद मे धर्मराज त्वं कथं दण्डो न वै मम ॥७८॥
श्रुत्वाऽऽह धर्मराजस्तं कृतं तु भुज्यते सदा ।
नियमोऽस्ति सदा लोके प्रज्वलितं न भुज्यते ॥७९॥
अन्नं वस्त्रं गृहं यानं शयनं पापकं वृषः ।
प्रज्वलिता न भुज्यन्ते ते पापं ज्वलितं द्विज ॥८०॥
पुरुषोत्तमसामाख्यस्तोत्रपाठेन सर्वथा ।
दानानां परमं पुण्यं चोद्भूतं तव भूसुर ॥८१॥
भुंक्ष्व पुण्यं क्षितौ दीर्घमुषित्वा स्वस्ततः परम् ।
ततः सत्यं च वैराजं वैकुण्ठं च ततः परम् ॥८२॥
ततोऽक्षरं शाश्वतं च याहि भुंक्ष्व महासुखम् ।
पुरुषोत्तमभक्तानामशुभं विद्यते न वै ॥८३॥
कालमायापापकर्मभया नश्यन्ति सर्वथा ।
पुरुषोत्तमभक्तेषु नाऽधिकारोऽस्ति मेऽपि च ॥८४॥
पूर्वनास्तिकविप्रोऽसौ पप्रच्छ च ततो यमम् ।
गत्वा तत्र मया यद्यत् कर्तव्यं तद् वदाऽत्र मे ॥८५॥
यथाशक्ति करिष्यामि कारयिष्यामि शोभनम् ।
श्रुत्वाऽऽह यमराजोऽपि विप्रं धर्ममयं वृषम् ॥८६॥
शृणु विप्र प्रकर्तव्यं मन्दिरं परमात्मनः ।
स्थापनीयोऽनादिकृष्णनारायणः श्रिया सह ॥८७॥
सेवाः सर्वविधाश्चास्य करणीया यथाक्षणम् ।
भोजनीयाः साधवश्च सेवनीया निरन्तरम् ॥८८॥
पादसंवाहनाद्यैश्च दानैश्च सर्ववस्तुभिः ।
दोषणीयाः सदा सन्तो मोक्षदा भवतारकाः ॥८९॥
मन्दिरे दीपदानं च जलप्रस्रवणार्पणम् ।
नवेदनार्पणं चापि पूजाद्रव्यार्पणं तथा ॥९०॥
यानवाहनदानं च वाटिकोद्यानकार्पणम् ।
ध्वजार्पणं कलशानामर्पणं पात्रकार्पणम् ॥९१॥
शय्यार्पणं रसानामर्पणं गन्धार्पणं तथा ।
स्वर्णभूषार्पणं दिव्याम्बराद्यर्पणमित्यपि ॥९२॥
शाकपत्रार्पणं चापि ताम्बूलकादिकार्पणम् ।
व्यजनाद्यर्पणं चापि कम्बलाद्यर्पणं तथा ॥९३॥
पूजाप्रवाहवस्तूनां द्रव्याणामर्पणं तथा ।
वादित्राणां शुभं दानं वेषाणामर्पणं तथा ॥९४॥
महास्थाल्यादिदानं च गर्गरीदानमित्यपि ।
पर्यंकादिप्रदानं च महासनसमर्पणम् ॥९५॥
गोवाजिगजदानं च वृषभार्पणमित्यपि ।
मणिरत्नादिदानं च कर्तव्यं मन्दिरे सदा ॥९६॥
दातव्यं गुरवे सर्वं चेष्टदेवार्हणाय वै ।
दासीदासप्रदानं च सभाशालाप्रदानकम् ॥९७॥
कूपवापीतडागादिदानं कार्यं तु मन्दिरे ।
छत्रचामरदानं तु सिंहासनादिकार्पणम् ॥९८॥
पुस्तकार्पणमेवापि पेटिकाद्यर्पणं तथा ।
कणानामर्पनं चापि गोधूमतण्डुलार्पणम् ॥९९॥

एवंविधानि दानानि जलान्नसहितानि वै ।
दातव्यानि विशेषेण गृहिणा भूसुरेण ह ॥१००॥
स्नानं सन्ध्याजपं भक्तिं स्तोत्रपाठं समाचरेत् ।
मोक्षदं चात्मविज्ञानं ब्रह्मविद्यां पठेत्तथा ॥१०१॥
पित्रोः प्रसेवनं कुर्यात् परोपकारमित्यपि ।
ब्रह्मशीलो भवेच्चापि भक्तिशीलो भवेत्तथा ॥१०२॥
रागहीनो भवेच्चापि दोषान् प्रवर्जयेत् सदा ।
विष्णुपूजां प्रकुर्याच्च मोक्षशास्त्ररतो भवेत् ॥१०३॥
कीर्तयेत् सततं कृष्णनारायणं परेश्वरम् ।
ध्यायेच्च श्रीपतिं लक्ष्मीपतिं मुक्तपतिं हरिम् ॥१०४॥
वन्देत श्रीपरमेशं पुरुषोत्तमसामगः ।
एवं कृत्वा सुकर्माणि पुण्यानि मोक्षदानि च ॥१०५॥
जित्वा मायां तथा कालं मृत्युं जित्वाऽक्षरं व्रजेत् ।
इत्येवं विप्र गत्वा त्वं कुरु देवार्चनं सदा ॥१०६॥
पित्रर्चनं सतां पूजां विधेहि स्वात्मवत् सदा ।
विजयस्ते सदा भावी स्वर्गे सत्ये तथाऽक्षरे ॥१०७॥
इत्युक्तः पद्मजे ! विप्रो ययौ गृहं चकार तत् ।
अन्ते स्वर्गाण्यनेकानि भुक्त्वा धामाऽक्षरं ययौ ॥१०८॥
श्रुत्वा स्मृत्वा पठित्वाऽपि कृत्वा देवार्चनं तथा ।
भूत्वा ममाश्रितः प्राणी लभते मेऽक्षरं रमे ! ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने जलदानभूदानविविधदानकर्तुः पुरुषोत्तमसामजापकस्य दीर्घशीलस्याऽऽस्तिकस्य दीर्घशीलस्य नास्तिकस्याऽपि यमद्वारोपदेशो मोक्षणं चेत्यादिनिरूपण-नामैकदशाधिकशततमोऽध्यायः ॥ १११ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं गौर्देया विधिना सदा ।
गौर्बोध्या त्रिविधा श्रेष्ठा पृथ्वी धेनुः सरस्वती ॥ १ ॥
शिष्याय देया विद्यागौर्ब्राह्मीविद्या मुमुक्षवे ।
कलाज्ञानं शिल्पिने च भौतिकं रसवेदिने ॥ २ ॥
खज्ञानं गणकायाऽपि नार्यै पाककलामपि ।
शास्त्रज्ञानं च विदुषे देयं गोभूसमं हि तत् ॥ ३ ॥
धेनुदानं प्रदातव्यं मातरो धेनवः सदा ।
वृद्धिमाकांक्षता नित्यं गावः कार्याः प्रदक्षिणाः ॥ ४ ॥
सन्ताड्या नहि पादेन देव्यः पूज्याः सुमङ्गलाः ।
गोवाहका गवादाश्च राक्षसा निरयंगमाः ॥ ५ ॥
तृषिताः क्षुधिता गावो जनं हन्युः सबान्धवम् ।
पितृसद्मानि सौधाश्च देवतायतनानि च ॥ ६ ॥
पूयन्ते शकृता यासां पूतं किमधिकं ततः ।
घासमुष्टिं चान्नमुष्टिं वर्षे दद्याद् गवे तु यः ॥ ७ ॥
अकृत्वा स्वयमाहारं व्रतं तत् सार्वकामिकम् ।
फलं पुत्रान् यशोऽर्थांश्च श्रियं चाप्यधिगच्छति ॥ ८ ॥
विनश्यत्यशुभं तस्य दुःस्वप्नं नैव जायते ।
दुष्टाय गौर्न दातव्या लुब्धाय नास्तिकाय न ॥ ९ ॥
वत्से दयारहिताय क्रूराय घातिनेऽपि च ।
घाससेवारहिताय न दातव्या कदाचन ॥१०॥
गृहस्थानरहिताय तृणादिरहिताय च ।
भक्तिधर्मविहीनाय न दातव्या कदाचन ॥११॥
साधवे बहुपुत्राय भिक्षवे देवतार्थिने ।
क्षेत्रवते प्रदातव्या तृणसेवाकृते च गौः ॥१२॥
गोसेवा गुरुसेवा च पितृसेवा सदा रमे ! ।
घ्नन्ति पापप्रपुञ्जानि तारयन्ति समर्पकान् ॥१३॥
सतां समागमो लक्ष्मि तथा तारयति ध्रुवः ।
अलाभे तु गवां दद्याद् घृतधेनुं शुभावहाम् ॥१४॥
तस्यैता घृतवाहिन्यः क्षरन्ति वत्सला इव ।
घृतालाभे क्षीरधेनुं दद्यादुत्साहश्रद्धया ॥१५॥
स कष्ठात्तारितो धेन्वा क्षीरनद्यां प्रमोदते ।
क्षीरालाभे तिलधेनुं दद्यात्तिलैः प्रमोदते ॥१६॥
तिलालाभे फलधेनुं दद्यात् फलैः प्रमोदते ।
फलालाभे कणधेनुं दद्यादन्नैः प्रमोदते ॥१७॥
अन्नालाभे गूडधेनुं दद्यान्मिष्टैः प्रमोदते ।
गूडाऽभावेऽम्बरधेनुं दद्याद् वस्त्रैः प्रमोदते ॥१८॥
सर्वाभावे जलधेनुं दद्यान्नदीषु मोदते ।
एकापि कपिला दत्ताऽमृताऽऽपगाऽस्य जायते ॥१९॥
अप्येका साधवे दत्ता देवतार्चनयोगिनी ।
प्रापयत्येवाऽक्षरं मे दातारं धाम शाश्वतम् ॥२०॥
गोप्रदाता यत्र याति लोकास्ते नित्यमोदिनः ।
न तत्र क्रमते कालो न जरा न च पावकः ॥२१॥
अशुभं तत्र नाऽऽस्ते च न व्याधिर्न च वै क्लमः ।
यदिच्छन्त्युपतिष्ठन्ति गवां पुण्यबलेन वै ॥२२॥
कामगाः कामचारिण्यो गावस्तत्रोपयन्ति च ।
वाप्यः सरांसि सरितो घृतदुग्धमयास्तथा ॥२३॥
गृहाणि पर्वताश्चारण्यानि वनानि यन्ति च ।
मनोज्ञमिष्टं मिष्टं च रसोपेतं प्रपद्यते ॥२४॥

तत्र सर्वसहाः क्षान्ता गोदातारः प्रयान्ति ह ।
गुरुशुश्रूषका यान्ति दानिनोऽतिथिपूजकाः ॥२५॥
न पापा गोप्रहर्तारः पुण्यलोकं प्रयन्ति वै ।
दायद्रव्येण गां क्रीत्वा प्रयच्छेच्छ्रेयसां कृते ॥२६॥
अमात्सनाणकैः क्रीत्वाऽर्पयेन्मोक्षार्थमेव तु ।
द्यूते जित्वा धनं तेन क्रीत्वा दद्यात् स्वरात्तये ॥२७॥
दायभागां च गां दद्याद् दद्याद् दानाऽऽगतां च वा ।
सत्यव्रतस्य गोदातुः सहस्रगोसमं फलम् ॥२८॥
नित्यं प्रातर्नमेद् गां च तृणग्रासाँस्तथाऽर्पयेत् ।
जलं प्रपाययेद् यश्च राजसूयफलं लभेत् ॥२९॥
अनाहारोऽग्रभक्तं यो गवे दद्याद्धि गोव्रती ।
वर्षेण गोसहस्रस्य फलं लभते सेवया ॥३०॥
एकभक्तो हि गां क्रीत्वा दद्याद्वै गुरवे स तु ।
तस्या यावन्ति रोमाणि तावद्गोफलमाप्नुयात् ॥३१॥
यस्त्वात्मविक्रयं कृत्वा धेनुं क्रीत्वा प्रयच्छति ।
रोम्णि रोम्णि धेनुदातुर्लोका भवन्ति चाक्षयाः ॥३२॥
अरण्ये गां भूसुरं च साधुं दस्त्रायतीति सः ।
अश्वमेधक्रतोस्तुल्यं फलं लभते मोदते ॥३३॥
मृत्युकाले यथेच्छाऽस्य भवेद् दिव्यविभूतिगा ।
तत्सर्वं समवाप्नोति परित्राणेन रक्षकः ॥३४॥
सुवर्णं परमं दानं दक्षिणा च गवा सह ।
दातव्या वै यथाशक्ति स्मृद्धिदा पावनी सदा ॥३५॥
दरिद्रो निर्धनश्चैवाऽपरिग्रहस्तु यो भवेत् ।
कुर्याद् व्रतं व्रतान्येव लभेत स परं पदम् ॥३६॥
इन्द्रियाणां नियमो वै व्रतं श्रेष्ठतमं रमे ! ।
जितेन्द्रियो ब्रह्मभक्तो ब्रह्मलोके प्रमोदते ॥३७॥
दमः सुखप्रदो दान्ता निर्वृत्ता विषयव्रजात् ।
प्रत्याहृत्य मनोवेगं ब्रह्मणि यान्ति पाविताः ॥३८॥
विक्रमेण च तपसा यज्ञैर्दानैः प्रसेवया ।
भक्त्या शान्त्या क्रियया च सन्ति लोकाः सनातनाः ॥३९॥
ऋषिलोकान् देवलोकान् सिद्धलोकान् गवां गृहान् ।
मुक्तलोकानीशलोकान् शीलव्रताः प्रयान्ति हि ॥४०॥
अध्यापको होमकर्ता गुरुसेवापरस्तथा ।
सतीसाध्वीपूजकश्च याति धामाऽक्षरं मम ॥४१॥
भक्तौ धर्मे व्रते शूरा दानेऽध्ययनकर्मणि ।
यजने संगरे शुश्रूषायां चोपार्जनेऽपि च ॥४२॥
दमे शूराः ऋते ज्ञानेऽरण्ये त्यागे गृहेऽपि च ।
शमे च नियमे शान्तावार्जवे शूरकर्मिणः ॥४३॥
गुरोर्मातुः पितुः पत्युः शुश्रूषायां तथाऽपरे ।
भैक्ष्येऽतिथौ तपस्येव शूराः सन्ति च केचन ॥४४॥
सर्वे यान्त्यैश्वरान् लोकान् यथाकर्मफलभृतान् ।
सत्यव्रतिनो भक्ताश्च यान्ति वैकुण्ठमुत्तमम् ॥४५॥
आजन्ममरणाद् यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किञ्चिदप्राप्यं नारायणस्य वै यथा ॥४६॥
ब्रह्मचर्यं दहेद् दोषान् सर्वपापान्युपासितम् ।
ब्रह्मधामगतः स्याद्वै ब्रह्मचारी बलैधितः ॥४७॥
मातरं पितरं वाऽपि गुरुमाचार्यमच्युतम् ।
सेवते यस्तस्य धामाऽक्षरं मे शाश्वतं पदम् ॥४८॥
नाऽबीजं जायते किञ्चिन्न बीजेन विना फलम् ।
यादृशं वपते बीजं लभते तादृशं फलम् ॥४९॥
बीजं पुरुषाकरो वै सेवात्मको वृषात्मकः ।
क्षेत्रं सद्गुरवो माता पिता गौर्देवतेश्वरः ॥५०॥
भक्तश्च कर्षुको यादृग् वपते चैति तादृशम् ।
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ॥५१॥
कृतं लभते सर्वत्र स्वर्गे स्वर्गसुखानि च ।
रूपं भाग्यं प्रसौभाग्यं रत्नानि विविधानि च ॥५२॥
तारकास्त्रिदशाः सिद्धा यक्षाश्चन्द्रार्कमारुताः ।
सर्वे कृतेन धर्मेण मानुष्याद् देवतां गताः ॥५३॥
नाऽदातारं भजन्त्यर्था निष्क्रियं न भजन्त्यपि ।
अपुण्यं न भजन्त्यर्था भजन्ति त्वर्थकारिणम् ॥५४॥
अकृत्वा मानुषं यत्नं दैवमात्रं प्रतीक्षते ।
न तस्य सिद्धिः कमले ! क्लीबपत्न्या इवोभये ॥५५॥
सेवायां शूरता यस्य बलं शीलमयं तथा ।
यत्नो दैवं यस्य चास्ते सिद्धिस्तस्याऽञ्जलिस्थिता ॥५६॥
न केवलं रमे ! दैवं पुण्णात्यवति रक्षति ।
निजयत्नसमायुक्तं दैवं साधु विवर्धते ॥५७॥
निःस्नेहः खलु वै दीपः स्वयमेव प्रशाम्यति ।
विना पुण्यं विना यत्नं भाग्यं स्वयं प्रशाम्यति ॥५८॥
तस्माल्लक्ष्मि ! सदा यत्नः कर्तव्यस्तपसि व्रते ।
पुण्ये दानेऽर्जने भक्तौ सेवायां भूतिमिच्छता ॥५९॥
धनं विपुलं भोगाँश्च योषितो भोजनानि च ।
पुण्यहीनो न वै भोक्तुं समर्थो जायते क्वचित् ॥६०॥
व्ययशीलं दानशीलं चोपैति विपुलं धनम् ।
पूर्वदत्तेन चायाति विना यत्नं क्वचित् प्रिये ॥६१॥
दातव्यं सर्वथा सर्वं यद् यदिष्टतमं भवेत् ।
दानस्यैव फलं भुंक्ते लोकोऽयं कर्मबन्धनः ॥६२॥

नाऽदत्त्वा प्राप्यते लक्ष्मीर्नाऽदत्त्वा प्राप्यते प्रिया ।
नाऽदत्त्वा प्राप्यते धेनुर्नाऽदत्त्वा प्राप्यते मही ॥६३॥
नाऽदत्त्वा प्राप्यते बुद्धिर्नाऽदत्त्वा स्मृद्धिराप्यते ।
नाऽकृत्वा प्राप्यते सेवा नाऽदत्तं प्राप्यते सुखम् ॥६४॥
नाऽकृतं प्राप्यते चाऽऽयुर्नाऽदत्तं राज्यमाप्यते ।
नाऽदत्तं चाप्यते लक्ष्मि सुखमैन्द्रियिकं बहु ॥६५॥

तस्माद् दानानि देयानि भूषाम्बरगृहाणि च ।
भोज्यप्रेयप्रभोग्यानि यानि स्वेष्टतमानि वै ॥६६॥
मया सृष्टीः समुत्पाद्याऽवतारेश्वरदेवताः ।
कन्यादानैस्तोषिता वै तत्फलं त्व्यर्बुदाब्जकम् ॥६७॥
यद्यप्यहं समर्थोऽस्मि नित्यपुण्याश्रयो हरिः ।
ममांऽगात् प्रमद्य वामाजायन्तेऽर्बुदकोटयः ॥६८॥
न मे दानफलापेक्षा समर्थस्य परात्मनः ।
तथापि लोकरक्षार्थं निदर्शनं प्रदर्शितम् ॥६९॥

सर्वं जगच्छरीरं मे नरा नार्योऽर्धमूर्तयः ।
नरा नारायणार्धा मे नार्यो मेऽर्धांगनास्तथा ॥७०॥
एवं संसारनिर्वाहो दानेनाऽऽसाद्यते फलम् ।
तपोनियमसंयुक्ताः साधवः संशितव्रताः ॥७१॥

फलं प्राप्य भवन्त्येव नारायणसमेश्वराः ।
येन लोकास्त्रयः सृष्टा मया श्रीपतिना पुरा ॥७२॥
सोऽहं तपामि क्षीरोदे बदर्यां च चिरं रमे ।
सोऽहं कृत्वा दर्शयामि कुर्वन्तु तप उत्तमम् ॥७३॥
वामनोऽहं क्षितिं प्राप्य पर्शुरामस्तथा पृथुः ।
दानं पृथ्व्याश्चकारैव रामादित्योऽपि वै पुरा ॥७४॥

शिक्षयामास भगवान् भूत्वाऽपि दानमुत्तमम् ।
प्रजाभ्यो यज्ञकार्यैश्च यज्ञनारायणोऽप्यहम् ॥७५॥
मया राधा प्रदत्ता वै श्रीकृष्णाय मदात्मने ।
नारायणी तथा दत्ता नारायणात्मने तु मे ॥७६॥
भूर्दत्ता च वराहाय श्रीर्दत्ता विष्णवे पुरा ।
लक्ष्मीर्महाविष्णवे च सावित्री ब्रह्मणेऽर्पिता ॥७७॥
प्रकृतिर्या मूलरूपा पुरुषाय पुरार्पिता ।
एवं कृत्वा संकलनं दानरीतिः प्रवर्तिता ॥७८॥

तस्माल्लक्ष्मि दानफलं प्रमोदाः सर्वं एव ह ।
येन येन शरीरेण यद्यद् दानं करोति यः ॥७९॥
तेन तेन शरीरेण तत्तत् फलमुपाश्नुते ।
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ॥८०॥
तस्यां तस्यामवस्थायां भुंक्ते कर्ता तु तत्फलम् ।
चक्षुर्दद्यान्मनोदद्याद् वाचं दद्यादृतंभराम् ॥८१॥

आत्मानं सम्प्रदद्याद्वै सेवेत सततं गुरुम् ।
एवं दानं परं प्रोक्तं देहं दद्याद् यथोचितम् ॥८२॥
एवमपि प्रदानेन तरत्यब्धिं हि कर्मणाम् ।
शृण्वत्र कथयाम्येव ज्ञानेन दानमुत्तमम् ॥८३॥
यत्फलं ब्रह्मलोकाख्यं प्राप्ता ब्रह्मसती पुरा ।
योगिन्यासीद् ब्रह्मसती ब्राह्मणी सा कुमारिका ॥८४॥

सोमनाथे शुभे तीर्थे भजमाना तु शंकरम् ।
युवती च सुरूपा च शीलयुक्ता तपोधना ॥८५॥
सरस्वत्यां करोत्येषा त्रिषवणं जपादिकम् ।
तैर्थिकाः सूर्यतुल्यां तां पश्यन्ति यन्ति मुग्धताम् ॥८६॥
सा न दृष्टिं ददात्येव क्वापि कुत्रापि सर्वथा ।
एकदा तां तु संवीक्ष्य दैत्यः स्थण्डिलघोषकः ॥८७॥
उज्जहार बलेनैव व्योम्नाऽब्धौ निजमन्दिरम् ।
तस्या भोगं प्रसह्यापि चक्रे वै ब्रह्मयोषितः ॥८८॥

साऽप्यनाथा च निर्विण्णा ज्ञात्री देहविरागिणी ।
शोकं तथाऽप्यशोकं च मेने चात्मप्रतिष्ठिता ॥८९॥
शीलं व्रतं सदा रक्ष्यं तद्भंगः शोक एव सः ।
आपत्काले न चेद् रक्षा देहोऽहं नेत्यशोचनम् ॥९०॥

विवेकेन शरीराद्वै भिन्नात्मानममन्यत ।
देहं भिन्नं तथा मत्वा शोकं जहौ पराश्रया ॥९१॥
एवं विधां तु तां वीक्ष्य दैत्यः पप्रच्छ तां मुहुः ।
कथं न कुरुषे शोकं प्रधर्षिताऽपि भामिनि ! ॥९२॥
सा तु प्राह मलिनोऽयं देहो वै धर्षितस्त्वया ।
नाऽहं प्रधर्षिता दैत्य ! शुद्धाऽहं चेतनात्मिका ॥९३॥

त्वयि नारायणश्चास्ते ब्रह्म यत्परमः प्रभुः ।
तदधिष्ठितदेहेन मुक्तो देहो न चेतनः ॥९४॥
त्वमज्ञो वर्तसे दैत्य ! नाऽहमज्ञाऽऽपदि स्थिता ।
शोचनीयः सदा देहस्तं शोचाम्यवशा कथम् ॥९५॥

आत्मा न स्त्री पुमांश्चैव पृथ्वीपाषाणरूपिणौ ।
देहौ तथाऽभिधानो वै तत्र का परिदेवना ॥९६॥
श्रुत्वैवं स्थण्डिलघोषस्त्वाश्चर्यं परमं ययौ ।
ज्ञानमासाद्य च ततो ययाचे कर्मणः क्षमाम् ॥९७॥
तां स्कन्धे स्वे निधायैव सोमनाथं समानयत् ।
ज्ञानयोगेन दैत्योऽपि तपोभक्तिं चकार ह ॥९८॥
तस्या योगेन तपसा शुद्धो भूत्वा हरस्य सः ।
कालेन गणतां प्राप्तो ययौ कैलासमुत्तमम् ॥९९॥
ब्रह्मसती शुशोचापि यत्र मे परवश्यता ।
तत्राऽधीनाऽभवं चाऽब्धौ दैत्यहस्तगता तदा ॥१००॥

ज्ञानाग्निना मया पापं ज्वालितं किन्तु लौकिकम् ।
प्रायश्चित्तं विधातव्यं न लुप्येत वृषो यथा ॥१०१॥
सा ययौ योगिनं शान्तं किरीटिनं हराश्रितम् ।
पप्रच्छ शौचं शीलस्य किरीट्युवाच तां तदा ॥१०२॥
रूपं ते विद्यते साध्वि ! शंकरस्यापि मोहकम् ।
तस्मात् पुनः पुनर्विघ्नं ते भविष्यति यौवने ॥१०३॥
तस्मादाश्रय कान्तं त्वं स्वेष्टं ब्रह्मविदं जनम् ।
येन विघ्नविलोपः स्यात् पापं शान्तं भवेत्ततः ॥१०४॥
देहशुद्ध्या तथा चैवोद्वाहेन विधिनाऽपि च ।
प्रायश्चित्तं तवैव स्याद् राजस्वल्यं च शोधकम् ॥१०५॥
इत्युक्ता सा ज्ञानकोशा भक्ता तमेव योगिनम् ।
किरीट्याख्यं पतिं वव्रे गुरुं पतिं चकार सा ॥१०६॥
दीक्षां जग्राह गार्हस्थ्यशोभनां शंकरान्तिके ।
पार्वत्या कृततिलका दत्तसौभाग्यचन्द्रिका ॥१०७॥
समर्था योगिनी जाता दिव्या शंभोः शुभाशिषा ।
एवं देहेनाऽर्पिता सा गणपत्नी सुयोगिनी ॥१०८॥
दिव्या सामर्थ्यसम्पन्ना व्यवर्तत हि शाश्वती ।
एकदा शंभुना साकं विष्णुलोकं गता सती ॥१०९॥
तया दासीस्वरूपा सा नीता ब्रह्मसती सह ।
नारायणं तु मां दृष्ट्वा मुमोह स च भामिनी ॥११०॥
सत्या निवेदिता मह्यं सा मुक्ता संबभूव ह ।
दिव्यरूपेण वै नित्या रमया सह राजते ॥१११॥
ब्राह्मीसतीतिनाम्नैव पत्नी मे साऽभवत्ततः ।
अपरेणाऽपि रूपेण किरीटस्यापि भामिनी ॥११२॥
वर्तते नित्यकैलासे मोदते शंभुसेविका ।
इत्येतत् कथितं लक्ष्मि रहस्यं तेऽर्पणे विधौ ॥११३॥
देहदानं प्रकर्तव्यं लभ्यते चेन्नरायणः ।
नारायणप्रदाता च लभ्यते मोक्षदः प्रभुः ॥११४॥
देहदानं विधातव्यं मोक्षार्थं सार्वकालिकम् ।
अन्यैर्यो भुज्यते देहो भुज्यतां परमात्मना ॥११५॥
तदर्पणेन वै लक्ष्मि लक्ष्मीतां लभते सती ।
पठनाच्छ्रवणाच्चाऽस्य भुक्तिर्मुक्तिर्गतिर्भवेत् ॥११६॥
रहस्यं परमं त्वेतत् कथितं ते पुराऽभवत् ।
ततश्चान्या रूपवत्यश्चार्पणं चक्रुरात्मनाम् ॥११७॥
नारायणेऽभवन् साध्व्यः कोटिशो वै शुभांगनाः ।
मम योगेन संसारं तीर्त्वा ब्रह्मपदं ययुः ॥११८॥
ब्रह्मप्रियाश्च ताः सर्वा वर्तन्तेऽत्र तवाऽग्रतः ।
ब्रह्मप्रियासु योगिन्यो मुक्तान्यो दिव्यविग्रहाः ॥११९॥
अपात्रेभ्यो न दातव्यं ज्ञानमेतन्नरायणि ।
श्रुत्वा च निन्दिकाभ्यश्च न दातव्यं कदाचन ॥१२०॥
मोक्षार्थकृतसर्वस्वाभ्यो दातव्यं शुभं त्विदम् ।
यत्प्राप्य मत्पदं दिव्यं लभन्ते मामनुश्रिताः ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने गोदानगोकल्पदानविविधव्रताचारार्पणफलनिरूपणे ब्रह्मसत्या योगिन्या देहदाननिदर्शनं मोक्षणं चेत्यादिनिरूपणनामा द्वादशाधिक-शततमोऽध्यायः ॥ ११२ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं तपांसि विविधानि वै ।
केवलानि तथा भक्तियुतानि प्रवदामि ते ॥ १ ॥
यत्कृतेन भवेत् स्वर्गे पुण्यं च सम्पदोऽमलाः ।
भक्तियुक्तेन तेनैव लभ्यते धाम मेऽक्षरम् ॥ २ ॥
औदार्यं परमं प्रोक्तं तपो व्ययात्मकं सदा ।
धनं दद्याद् वनं दद्याद् गृहं दद्याच्छुभाश्रयम् ॥ ३ ॥
कुलं दद्यात् कणान् दद्यादौदार्ये दानमास्थितम् ।
उदारस्य भवेल्लोको दानिनां धनदाधिकः ॥ ४ ॥
भक्तियुक्तं महौदार्यं मम धामप्रदं भवेत् ।
स्थण्डिले शयनं नित्यं तपः परमकं मतम् ॥ ५ ॥
तस्य फलं महत् स्वर्गे प्रासादाः स्वर्णशोभनाः ।
शयनानि च रम्याणि जायन्तेऽमृतदान्यपि ॥ ६ ॥
चीरवल्कलधारित्वं तपः परं प्रकथ्यते ।
फलं तस्य भवेद् रम्यवासांस्याभरणानि च ॥ ७ ॥
योगचित्तं तपःश्रेष्ठं फलं विमानकानि वै ।
वाहनानि तथा दिव्याः सिद्धयः स्वर्गवासिता ॥ ८ ॥
अग्नितापस्तपः श्रेष्ठं फलं राज्यं दिवं भवेत् ।
रसानां वर्जनं श्रेष्ठं तपस्तस्य फलं शुभम् ॥ ९ ॥
सौभाग्यं तु भवेन्नार्या गृहं रसाऽभिपूरितम् ।
अनामिषं व्रतं श्रेष्ठं फलं वंशसुतादिकम् ॥१०॥
अवाक्शिरा वसेद् यश्च तस्येन्द्रपदमुत्तमम् ।
उदवासं वसेद् यश्च चन्द्रलोकोऽस्य सत्फलम् ॥११॥
ब्रह्मचारी भवेद् यः स ब्रह्मलोकं प्रयाति वै ।
पाद्यमासनमन्नं च जलमाश्रयमित्यपि ॥१२॥
दद्यादतिथये यज्ञः पञ्चांगोऽयं तपः परम् ।
एतानि भक्तियुक्तानि ममाऽक्षरप्रदानि वै ॥१३॥

देवार्थे च गवार्थे च गुर्वर्थे वीरशायनम् ।
तपः प्राणप्रदानं तन्मोक्षदं स्वर्गदं परम् ॥१४॥
मौनं व्रतं परं प्रोक्तं चाऽद्रोहः परमं तपः ।
अनिन्दा चाऽवितण्डा च तपः परमकं मतम् ॥१५॥
तेनाऽविच्छिन्नगतिकश्चाशापको भवेद् दिवि ।
उपवासस्तपः श्रेष्ठमुपभोगाः फलं मतम् ॥१६॥
संयमेन तु शीलेन दीर्घायुर्बलवान् भवेत् ।
अहिंसा च तपः श्रेष्ठमैश्वर्याऽऽरोग्यरूपदा ॥१७॥
फलमूलाशनं चापि तपो राज्यप्रदं मतम् ।
पर्णादस्य भवेत् स्वर्गं विघसाशी हरिं व्रजेत् ॥१८॥
प्रायोपवेशिनः स्याद्वै सर्वत्र सुखमुत्तमम् ।
शाकदः शाकवान् स्याच्च महोद्यानसमन्वितः ॥१९॥
गोप्रदो धेनुमान् स्याच्च तृणादोऽमृतभाग् भवेत् ।
स्नानं त्रिषवणं श्रेष्ठतरं तपः फलं परम् ॥२०॥
दिव्याः स्त्रियो भवन्त्यस्य त्रिकालस्नायिनः किल ।
वाय्वाहारः तपः श्रेष्ठं फलं यज्ञफलं भवेत् ॥२१॥
सत्यव्रतं तपः श्रेष्ठं स्वर्गं रत्नान्वितं भवेत् ।
दीक्षा तपः श्रेष्ठतमं कुलं श्रेष्ठतमं भवेत् ॥२२॥
जलाशनं तपः श्रेष्ठं सदा सुधाशनं फलम् ।
अग्निहोत्रं तपः श्रेष्ठं चाग्निलोकं फलं भवेत् ॥२३॥
मन्त्रजापस्तपः श्रेष्ठं राज्यं स्वर्गं च मोक्षणम् ।
एकभुक्तं व्रतं श्रेष्ठं स्वर्गोत्तमं फलं मतम् ॥२४॥
दीक्षोपवासः कमले तपः स्वर्गप्रदं मतम् ।
अभिषेकस्तपः श्रेष्ठं गुरुत्वापादकं हि तत् ॥२५॥
विद्यार्जनं तपः श्रेष्ठं बार्हस्पत्यं स विन्दति ।
मानसं तु चरन् धर्मं धर्मलोकं समश्नुते ॥२६॥
तृष्णानाशस्तपः श्रेष्ठं सुखं वैकुण्ठसदृशम् ।
पूजनं च तपो नित्यं यायाद् गोलोकधाम सः ॥२७॥
पिता ब्रह्मा प्रसूः पृथ्वी गुरुर्ब्रह्म सनातनम् ।
त्रयः सन्तोषिता येन सर्वं तेन कृतं तपः ॥२८॥
सर्वे धर्माः कृतास्तेन व्रतान्यपि कृतानि च ।
भक्त्या युक्तानि चैतानि ममाऽऽक्षरप्रदानि वै ॥२९॥
नार्या कृताः सर्वधर्माः पतिर्यया प्रसादितः ।
पतिनाऽपि कृता धर्मा येन पत्नी प्रतोषिता ॥३०॥
राज्ञा सर्वे कृता धर्मा येन प्रजाः प्रतोषिताः ।
प्रजाभिश्च कृता धर्मा याभिर्नारायणोऽर्चितः ॥३१॥
हिंसकस्य वृथा मन्त्रो मखो वृथा ह्यदक्षिणः ।
विना मन्त्रं वृथा होमः सत्यहीनं व्रतं मृषा ॥३२॥
भावं विना वृथा सेवोपास्तिर्वृथा हरिं विना ।
शीलं विना वृथा धर्मो वृथाऽस्तित्वं सुखं विना ॥३३॥
साधुं विना वृथा दानं भक्तिं विना वृथा जनिः ।
वृथा गृहं विना लक्ष्मीं विना मोक्षं वृथा मृतिः ॥३४॥
विना पात्रं वृथा ज्ञानं जयं विना वृथा मृधः ।
वृथा सर्वं विना स्नेहं कृष्णं विना वृथाऽर्जनम् ॥३५॥
सन्तं विना वृथा वासः पुष्टिः प्रसूं विना मृषा ।
वृथा दृष्टिर्विना देवं वृथा कर्णौ विना कथाम् ॥३६॥
वृथा त्वक् श्रीहरेः स्पर्शं विना रूपवती ह्यपि ।
वृथा जिह्वा विना कृष्णप्रसादस्थरसादनम् ॥३७॥
वृथा वाक् कीर्तनं कृष्णगुणानामन्तरा तथा ।
वृथा घ्राणं हरेर्गन्धं विना धीः स्मरणं विना ॥३८॥
देहतत्त्वानि सर्वाणि निरर्थकानि मां विना ।
बलं व्यर्थं धृतिर्व्यर्था यशो व्यर्थं च मां विना ॥३९॥
विद्या च वाग्मिता तर्कबुद्धिर्मतिश्च शेमुषी ।
व्यर्थं सर्वं विना चाराधनं श्रीपरमात्मनः ॥४०॥
षण्ढे यद्वद् भवेन्नारी युवत्यपि च निष्फला ।
तथा सर्वं निष्फलं वै षण्ढे मया निराकृते ॥४१॥
मां विना च तथा लक्ष्मि ! मम सन्तं विना तु यत् ।
राज्यं स्मृद्धं कुलं मानं प्राणान्ते निष्फलायते ॥४२॥
शृणु लक्ष्मि कथां पुरातनीं वैवर्तभूभृतः ।
पूर्वेण तपसा राज्यमासमुद्रान्तमस्य यत् ॥४३॥
स्मृद्धमासीत् समग्रं वै त्वेकचक्रं हि शासनम् ।
व्योमवार्तावहा दूताश्चासन् राज्येऽस्य चेतनाः ॥४४॥
शासकानि च शास्त्राणि नैसर्गिकाणि चाऽभवन् ।
तेजसां सुप्रवाहाश्च भास्कराश्चाऽभवन् सदा ॥४५॥
श्रावका व्योमदूताश्च राष्ट्रेऽस्य सर्वतोऽभवन् ।
जलदूता जलयानेष्वधोवाहास्तथाऽभवन् ॥४६॥
विमानान्यभवँश्चाऽस्य लोकान्तरगतान्यपि ।
सर्वं पुण्यप्रतापेन मानवं दैवमित्यपि ॥४७॥
तादात्म्यमिव चापन्नं राज्ये तस्य तदाऽभवत् ।
जडं चेतनरूपाढ्यं कर्मचारं सदाऽभवत् ॥४८॥
स्मृतिस्मराऽभवद्वृष्टिरमृतं च स्मृतिस्मरम् ।
स्मृतिस्मराणि सस्यानि स्मृतिस्मराः समृद्धयः ॥४९॥
स्मृतिस्मरा योषितश्च दासा दास्यः स्मृतिस्मराः ।
उपतिष्ठन्ति भोग्यानि स्मृतिस्मराणि चास्य वै ॥५०॥
एतादृशोऽभवत् सिद्धो वैवर्तो नाम भूपतिः ।
राज्ञी तस्यैकदा प्राह नाम्ना कालंधरा सती ॥५१॥

राजन् यथेश्वरश्चाऽऽस्ते भूतलेऽद्यासमो भवान् ।
तपसा चार्जितं सर्वं विष्णुनेव त्वया क्षितौ ॥५२॥
तथापि श्वेतदुग्धाभं वर्तते सारमन्तरा ।
उद्धृतनवनीतं वै यथा दुग्धं तथा त्विदम् ॥५३॥
विना नारायणं कृष्णं विना सन्तं वृषं विना ।
विना यज्ञं विना दानं विनाऽभ्यागतसत्कृतिम् ॥५४॥
विना भक्तिं हरेश्चापि निःसारं भासते मम ।
तस्मान्नारायणं कृष्णं भज भक्तान् प्रसेवय ॥५५॥
आत्ममोक्षवृषं कृत्वा यास्यस्येवं परं पदम् ।
इत्युक्तः स तु भूनाथो मेने नैव प्रियोदितम् ॥५६॥
स सिषेधैव सर्वं तन्नास्तिक्येन पुनः पुनः ।
न देवो मानवः कृष्णः साधुर्वा कस्यचित् प्रदः ॥५७॥
तपसा लभ्यते सर्वं तदन्यत्तु मृषात्मकम् ।
तपसैव गमिष्यामि स्वर्गं स्वर्गोत्तमं पुनः ॥५८॥
इदं स्वर्गं क्षितावास्ते द्वितीयं तारकामयम् ।
संलप्स्यामि तपसैव मा चिन्तां कुरु भामिनि ! ॥५९॥
इत्येवं मानभानेन भ्रान्तो नाऽगणयत् प्रियाम् ।
नास्तिक्येन चिरं कालं यापयामास राज्यकृत् ॥६०॥
अथाऽऽयुष्यस्य विगमे भुक्तपुण्ये ह्यशेषिते ।
निर्ययौ निजदेहाद्वै कालपाशप्रणोदितः ॥६१॥
सहाया नाऽभवन्नस्य केचित् कालाद्धि रक्षणे ।
प्रजा राज्यः प्रधानाश्च पुत्राः पुत्र्यः सहस्रशः ॥६२॥
तस्थुरेव विलोक्यैव रुदन्तः शोकसम्प्लुताः ।
नास्तिकस्याऽस्य तत्काले न देवा गुरवो न च ॥६३॥
नाऽऽययुः साधवश्चापि प्रेतं नेतुं परत्र ह ।
न धर्मो नापि पुण्यं च न देव्यो नापि सद्गतिः ॥६४॥
मृतं नेतुं नाऽऽययुर्वै भ्रष्टं राज्याच्च देहतः ।
गतिरोधोऽभवत्तस्य विना पुण्यं परे स्थले ॥६५॥
नेन्द्रियाऽधिष्ठितं सूक्ष्मं शक्तं गन्तुं तदाऽभवत् ।
न मनोऽहंमतिप्राणा गन्तुं च प्रभवोऽभवन् ॥६६॥
देहान्निर्गत्य जडवत् सौधाग्रे स स्थितोऽभवत् ।
प्रतीक्षते तु पुण्यार्थं पुण्यं धर्मं परेतकम् ॥६७॥
नास्तिकस्य न वै स्वर्गो नाऽयं लोकः कथं परः ।
देवयानोऽस्य नैवाऽस्ति धूम्रयानोऽपि नास्ति च ॥६८॥
अगतिर्मूर्छितो मृत्वा दुःखितं स्वममन्यत ।
शुशोच न मया दत्तं जलान्नं न मखः कृतः ॥६९॥
नोपकारः कृतः क्वापि न सन्तश्चाप्युपासिताः ।
न देवार्हणनैवेद्यस्तवनादि कृतं मया ॥७०॥
अनाथा रक्षिता नैव तोषिता नापि भिक्षुकाः ।
नाऽभ्यागताः पूजिताश्च साध्व्यः सत्यो न सत्कृताः ॥७१॥
न गोदानं स्वर्णदानं भूदानं च कृतं मया ।
सर्वर्द्धिसंभृतश्चाऽहं कृतवान्न कुतर्कितः ॥७२॥
अद्य पुण्यविहीनस्य गतिर्मे नास्ति सर्वथा ।
नोपतिष्ठन्ति यानानि विमानानि ममापि वै ॥७३॥
विद्युतो नैव तिष्ठन्ति पूर्वं या मम चाभवन् ।
शस्त्राणि नोपतिष्ठन्ति चेतनानि यथाऽभवन् ॥७४॥
साम्राज्यर्द्धिः परा सत्ता लुप्तेव नैव दृश्यते ।
गतं सार्कं स्थूलतत्त्वैर्वर्ष्मणा सह योगि तत् ॥७५॥
सूक्ष्मयोगि कृतं नैव नायाति च सहायदम् ।
कृतं वै लभ्यते सर्वं तपो मे व्यर्थतां गतम् ॥७६॥
स्थूलं मतं नास्ति सूक्ष्मं कारणं केवलं तु यत् ।
निःसामर्थ्यं वर्ततेऽद्य किं तेन मे गतिश्च का ॥७७॥
तुर्यो नोपासितो देवः का गतिर्मेऽद्य तिष्ठति ।
न चापि यमदूता मे दृष्टिपथं पतन्त्यपि ॥७८॥
येनाऽहं धर्मराजस्य पुरीं गच्छामि नोदितः ।
नास्तिकस्य गतिर्नास्ति नास्त्यकृतस्य सर्वथा ॥७९॥
सुभगा वा विभगा वा नैका नैवाऽपरा गतिः ।
अहो प्रेतशरीरं मे भाव्यं तदपि नास्ति वै ॥८०॥
वायुरूपं परिपूर्णं भूतप्रेतात्मकं न च ।
न चक्षुर्मे पूर्णमत्र न कर्णौ न च जिह्विका ॥८१॥
न पादौ नापि हस्तौ च शक्तिहीनो भवामि ह ।
मनोमात्रं भवाम्यद्य सर्वसामर्थ्यवर्जितः ॥८२॥
यथा कललभावस्य गर्भस्थस्य तथा गतिः ।
भानं मे निर्विकल्पाभं तच्चापि भावनोज्झितम् ॥८३॥
स्वप्ने मे दर्शनं दातुं वक्तुं चापि न वा प्रभुः ।
येन पत्न्यै कथयामि गत्यर्थं पुण्यदानकम् ॥८४॥
अहो नास्ति गतिश्चाऽद्य सम्राजो भूपतेर्मम ।
गतं सर्वं कृतं नैव प्रतारणेन मुष्णता ॥८५॥
पत्न्या मे कथितं पूर्वं स्मर नारायणं हरिम् ।
तं स्मरामि प्रभुं चाऽद्याऽधमोद्धारं स तारयेत् ॥८६॥
इत्येवं मनसि कृत्वा निर्विकल्पे दधार माम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥८७॥

यथा यथा स दध्यौ मां तथा तथा तदान्तरः ।
प्रकाशः समभूत्तस्य तत्र मयोदितं तदा ॥८८॥
अदृश्येन स्वरूपेण यथा व्योमगिरा तथा ।
पुण्यं त्वया कृतं नैव कृतं नैव तथाऽपरम् ॥८९॥
गतिस्तेन च रुद्धा ते याम्या गतिश्च ते न वै ।
तादृक् पापं त्वया नैव कृतं याम्यगतिर्भवेत् ॥९०॥
तस्माद् गर्भे तव पत्न्याः पुनर्याया हि देवरात् ।
तव भ्राताऽनुजो राज्ञीं स्पृशेत् पुत्रो भविष्यसि ॥९१॥
करस्पर्शेन पुत्रस्योत्पत्तिर्युगानुसारिणी ।
भवत्येवेति तादृक् त्वं भव पुत्रोऽनुजस्य ह ॥९२॥
निजक्षेत्रे ततः कृत्वा भजनं दानपूर्वकम् ।
मखान् कृत्वा साधुपूजां परोपकृतिमुत्तमाम् ॥९३॥
गोदानं भूमिदानं च स्वर्णदानमनुत्तमम् ।
दत्वा कृत्वा व्रतान्येव जातिस्मरोऽथ वै चिरम् ॥९४॥
भुक्त्वा भोगान् भजित्वा मां ततो यास्यसि मोक्षणम् ।
याहि स्वप्ने तव पत्न्यास्तथा तवाऽनुजस्य च ॥९५॥
कैवर्त्तस्य ततः पुत्रः कथयित्वा तथा भव ।
एवमुक्त्वा विरराम गर्भवाणी तदाम्बरे ॥९६॥
वैवर्त्तः शक्तियुग् भूत्वा रात्रौ स्वप्ने जगाम ह ।
अनुजाय तथा राज्यै तथ्यं न्यवेदयत् ततः ॥९७॥
कैवर्तेन करेणापि स्पृष्टा राज्ञी ऋतूत्तरा ।
कालंधराऽभिधाना सा गर्भवती बभूव ह ॥९८॥
सुषुवे चापि कालेन सुतं जातिस्मरं हि तम् ।
सोऽपि बाल्यादेव पद्मे ! भक्तिं चकार शार्ङ्गिणः ॥९९॥
दानानि प्रददौ सर्वविधानि निजमुक्तये ।
मखांश्च कारयामास तडागानि समन्ततः ॥१००॥
अन्नसत्राणि रम्याणि प्रपास्थानानि सर्वशः ।
धर्मशाला वेदशालाः कारयामास सर्वतः ॥१०१॥
गोभूहिरण्यदानानि ददौ कन्यार्पणानि च ।
गृहदानानि देवानामालयान् प्रचकार ह ॥१०२॥
मम लक्ष्मि ! मन्दिराणि रचयामास तत्र च ।
साधुवासान् कारयित्वा सेवयामास चात्मना ॥१०३॥
एवं राष्ट्रं समग्रं वै ततो भक्तियुतं शुचि ।
संविधाय प्रभुक्त्वा च भोगान् बहुविधान् सुखान् ॥१०४॥
संवर्त्तो नाम राजर्षिर्भूत्वा त्यक्त्वा वपुर्निजम् ।
ययौ चान्ते मम भक्त्या धामाऽक्षरं परं पदम् ॥१०५॥
तस्माद् दानानि देयानि सेवनीयाश्च साधवः ।
पूजनीया देवताश्च मखाः कार्या यथाधनम् ॥१०६॥
पठनाच्छ्रवणादस्य स्मरणात् करणात्तथा ।
भुक्तिं मुक्तिं दिव्यगतिं लभते नात्र संशयः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विविध-तपसां फलानि, तान्येव भक्तियुक्तानि मोक्षदानि, वैवर्त-नृपस्य नास्तिक्येन गत्यभावे निजपत्न्यां देवरात् पुनर्जन्म, तत आस्तिककर्मभिर्भक्त्या च मोक्ष इत्यादिनिरूपण-नामा त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि ! साध्वाश्रयेण मोक्षणम् ।
साध्वाश्रयेण वै रक्षां जीवनं च तथा शुभम् ॥ १ ॥
आसीद् रोमपदो नाम पशुपालो वनोत्तमे ।
ओजस्वत्यास्तटे देशे सौराष्ट्रे सिंहसेविते ॥ २ ॥
रोमपादः पशुवर्द्धे वर्तते धर्मवर्जितः ।
न स्नानं भजनं दानं करोति गृहधर्म्यपि ॥ ३ ॥
दुग्धदध्यन्नवन्याद्यैः प्राणयात्रां करोति च ।
वन्यपशून् मारयित्वा मांसादनं करोत्यपि ॥ ४ ॥
अन्यसत्ताकमन्नादि दूरं गत्वा निशामुखे ।
क्षेत्रादिभ्यश्चानयति चौर्यं करोति वै मुहुः ॥ ५ ॥
एवमधर्ममार्गस्य पुत्रोऽभवद् वृषंगमः ।
ववृधे स युवा जातो महिषीपालकोऽभवत् ॥ ६ ॥
पित्रा साकं कदाचित् स ययौ वने पशुव्रतः ।
पित्रा त्वासादितस्तत्र हरिणः सञ्चरन् वने ॥ ७ ॥
श्वभिः पित्रा कृष्णमृगो निपातितो वनेऽन्तिके ।
वृषंगमोऽपि पित्रा युक् तूर्णं ययौ मृगं प्रति ॥ ८ ॥
मृगस्य म्रियमाणस्य श्वभिर्विपाटितस्य ह ।
क्रन्दमानस्य दुःखं च पादानां भूमिघातनम् ॥ ९ ॥
वीक्ष्य दयापरो भूत्वा त्रासं परं जगाम सः ।
कम्पं चाति जगामापि तत्याज तं मृगं हि सः ॥१०॥
जगृहे न मृगं तत्र निसर्गदययाऽर्दितः ।
नाऽहं मांसं भक्षयिष्ये मारयिष्यामि न क्वचित् ॥११॥
पापं चेदृक् प्रसह्यैव प्राणानां त्याजनात्मकम् ।
कः कुर्यादुदरस्याऽर्थे मानवो निर्दयो यथा ॥१२॥
इत्येवं दयया युक्तस्तत्याज प्राणिहिंसनम् ।
वृषंगमस्ततो यातः क्वचिद्वै कार्तिके स्वयम् ॥१३॥
सोमनाथस्य तीर्थार्थे सस्नौ ददर्श शंकरम् ।
आत्मकृतं च तत्पापं हराय सन्न्यवेदयत् ॥१४॥

पापं तस्य विनष्टं च शुद्धिर्जाता हृदोऽस्य च ।
साधवस्तत्र चायाता दृष्टास्तेन नतास्ततः ॥१५॥
पूजिताः सेविताश्चैषां सत्संगश्च कृतस्तथा ।
प्राप्तो मन्त्र 'ओं श्रीकृष्णनारायणो गतिर्मम' ॥१६॥
तुलस्या मालिका प्राप्ता भक्तिः प्राप्ता शुभाश्रया ।
अनिवेद्य श्रीहरये भोक्तव्यं न कदाचन ॥१७॥
साधुसतीभ्यो दातव्यं दुग्धं दधि घृतं तथा ।
सेवनीयाः साधवश्च भजनीयो जनार्दनः ॥१८॥
एवं लब्ध्वा स नियमान् निजगृहमुपाययौ ।
वर्तते सा तथैवापि भजते श्रीनरायणम् ॥१९॥
साधवस्तत्र चायान्ति वर्षे सकृद् वनान्तरे ।
सेवां लब्ध्वा प्रयान्त्येव ग्रामान्तरं वनान्तरम् ॥२०॥
वृषंगमोऽपि चान्नस्य रोटकस्य प्रदानकम् ।
पयसाश्चापि दध्नश्च दानं करोति वै तदा ॥२१॥
एवं दानफलं पुण्यं बहुस्यातिव्यजायत ।
अथैवं प्राप्तकालोऽस्य पिता मृत्युमुपागतः ॥२२॥
यमदूताः शस्त्रहस्ता आययुर्वै भयंकराः ।
चुक्रोश बहुधा त्रस्तो मारयन्तीति वै मुहुः ॥२३॥
मोचयन्तु च मां केऽपि याम्येभ्यो बान्धवा मम ।
मम नाडीस्त्रोटयन्ति प्रहरन्ति च मुद्गरैः ॥२४॥
रक्षयन्तु जना मां वै मां गृहिणि ! प्ररक्षय ।
पुत्र ! मां रक्षय दीनं ताड्यमानं यमानुगैः ॥२५॥
इत्येवं क्रोशमानं तं पुत्र उवाच रे पितः ।
नारायणं प्रभुं कृष्णं स्मर रक्षां करिष्यति ॥२६॥
जप मन्त्रं 'ओं श्रीकृष्णनारायणो गतिर्मम' ।
इत्येवं प्रददौ मन्त्रं पित्रे लक्ष्मि स पुत्रकः ॥२७॥
'हरेकृष्ण हरेकृष्ण कृष्णनारायण प्रभो ।
हरे विष्णो हरे स्वामिन् श्रीपते पुरुषोत्तम' ॥२८॥
एवं संकीर्तनं चक्रे तावद् दूता भयं गताः ।
विसृज्य पितरं तस्थुर्दूरे च जगदुर्मिथः ॥२९॥
अस्मद्भागो ह्ययं गोपः पुत्रेण विप्रमोचितः ।
मन्त्रं दत्वा हरेरस्मै भजनेन च पावितः ॥३०॥
इत्येवं प्रवदन्त्येव यमदूता यदा तदा ।
साधूनां मण्डलं तत्र यदृच्छया समागतम् ॥३१॥
पुत्रः स्वागतसम्मानं प्रचकार च सत्वरम् ।
साधवो वीक्ष्य कालान्तं ददौ वारि प्रसादजम् ॥३२॥
पिता पपौ हरिस्तावत् समायातो गजस्थितः ।
अनादिश्रीकृष्णनारायणोऽहं स्वयमेव ह ॥३३॥
रोमपादं विनिष्कास्य देहाद्दिव्ये परं पदम् ।
पुत्रयोगेन साधूनां दर्शनं चान्तकालिकम् ॥३४॥
पितुर्जातं मोक्षणं च दानफलं शुभक्तियुक् ।
एवं लक्ष्मि भक्तियोगाद् भक्तयोगात् क्षणान्तरे ॥३५॥
पापिनामपि मोक्षः स्यात् कार्योऽतः सत्समागमः ।
वृषंगमोऽपि देहान्ते मम धाम गतो ह्यनु ॥३६॥
शृणु त्वन्यां कथां लक्ष्मि रक्षणं साधुसंगतः ।
आसीदेको महान् चौरो नग्नभंगोऽतिदारुणः ॥३७॥
विंशतिचौरयुग् रात्रौ सहेतिलुण्टति गृहान् ।
येषां श्रुतं महाद्रव्यं तच्छिद्रं चिन्तयत्यथ ॥३८॥
प्राप्तेऽनुकूलसमये चौर्यं करोति दारुणम् ।
मारयित्वा ताडयित्वा मर्दयित्वा जनान् धनम् ॥३९॥
स्वर्णरूप्यमयं रत्नमयं हरति मोदते ।
एवं वै वर्तमानस्यैकदा कार्यवशाद् दिने ॥४०॥
राजसौधे स्वर्णभूषानिर्माता स्वर्णकारकः ।
चिरमित्रं दृष्टिपथं राजपथे तदा ॥४१॥
नग्नभंगोऽपि तं दृष्ट्वा सहर्षो मिलितः पथि ।
कुशलं चापि पप्रच्छोद्योगं पप्रच्छ वै ततः ॥४२॥
स्वर्णकारः समस्तं स्वं वृत्तान्तं प्राह तं निजम् ।
अत्र मासे तु नृपतेर्भूषारचनकार्यकृत् ॥४३॥
गच्छामि राजसौधं च यत्राऽऽस्ते स्वर्णकोटिकम् ।
मौक्तिकानां सहस्राणि रत्नानामयुतान्यपि ॥४४॥
यत्र कोशे भवन्त्येव तत्पार्श्वे शुभमन्दिरे ।
स्वर्णशिल्पाः स्वर्णकाराः कुर्मस्त्वाभरणानि वै ॥४५॥
नग्नभंगस्ततः प्राह यदि ते रोचते वचः ।
कथयाऽन्तःप्रवेशस्य रात्रिमार्गं तु निर्जनम् ॥४६॥
चोरयामि सुवर्णादि भागं दास्यामि तेऽपि च ।
इत्युक्तः स्वर्णकारो वै दर्शयामास तत्पथम् ॥४७॥
स्थानं च निःसृतिं चापि गुप्तद्वाराणि यानि च ।
उपयुक्तानि शस्त्राणि दृढहेतीनदर्शयत् ॥४८॥
युक्तगुप्तहारिकां चाऽदर्शयन्निर्गमं तथा ।
ततो रात्रौ स्वसार्थेन नग्नभंगो विवेश तम् ॥४९॥
सौधं धनं स्वर्णरूप्यरत्नमौक्तिकमुत्तमम् ।
चोरयित्वा चाति गुप्तो दुद्रावाऽलक्षितो जनैः ॥५०॥
दत्वा सर्वं सहायेभ्योऽप्रेषयत्तान् वनान्तरे ।
भूगर्ते तद् विनिक्षेप्तुं समादिशद् द्रुतं निजान् ॥५१॥
स तु श्रमापनोदार्थं गङ्गापानार्थमुत्सुकः ।
शनैर्ब्राह्मे मुहूर्ते वै ययौ श्रीनगराद् बहिः ॥५२॥

यत्राऽऽसन् साधवः शैवा गङ्गापानाऽमितापसाः ।
तत्र गत्वा ययाचे वै पानं तामालगाङ्गिकम् ॥५३॥
नेमे भक्त्या कृत्रिमया चकार दण्डवत्तथा ।
निषसाद समीपे च मुद्रामुपायनं ददौ ॥५४॥
साधवोऽपि यथा भक्तं तथा मत्वाऽनुसेवकम् ।
लब्ध्वा मुद्रां च पूजायां ददुस्तस्मै तमालकम् ॥५५॥
पपौ निद्रां कृतवाँश्च प्रातः सूर्योदयं प्रति ।
जजागार ततस्तत्र तस्थौ माध्यन्दिनावधि ॥५६॥
भोजनादि चकारैव श्रमं चापनुदत्तथा ।
सार्थचौराः समस्तास्ते गर्ते निक्षिप्य तद्धनम् ॥५७॥
ययुस्ते वनमार्गेण निजग्रामं हि योजनम् ।
तावन्नृपगृहे व्यक्तं जातं चौर्यं धनस्य तत् ॥५८॥
पादचिकित्सकान् कृत्वा चाग्रे राज्ञस्तु सैनिकाः ।
चौरान् मार्गयितुं प्रातर्निर्गताः शस्त्रधारिणः ॥५९॥
श्रीनगरादश्ववाराः सह पादचिकित्सकैः ।
वने गत्वा जगृहुस्तान् गच्छतः खेटकं निजम् ॥६०॥
ताडयामासुरत्यर्थं चानयामासुरेव तान् ।
नृपं प्रति तथा कारागारे रुरुधुरुल्बणान् ॥६१॥
अथ साधुप्रसंगेन नग्नभंगस्तु रक्षितः ।
राजैकगारिकश्चापि राजभटैर्न लक्षितः ॥६२॥
अन्ये चौरा निगडेषु निक्षिप्ता दण्डिता हताः ।
श्रुत्वाऽयं नग्नभंगस्तु जीवनं साधुसंगतः ॥६३॥
निर्बाधं वै निजं मत्वा साधूनप्रार्थयन्मुदा ।
साधुधर्मो मया पाल्यो दीक्षा ग्राह्या च साधवी ॥६४॥
साधुसेवा प्रकर्तव्या साधुर्भवामि चाऽग्रतः ।
वच्म्यहं निष्कपटं मे कृत्यं साधुजनाग्रतः ॥६५॥
चौर्यं बहुविधं चाहं कृतवानस्मि वै मुहुः ।
तद्दोषैश्च यथा मुक्तो भवामि कुरुतोऽनघाः ॥६६॥
शरणागतरक्षार्थमुद्यताः साधवः सदा ।
तेषां प्रसंगतश्चाऽहं जीवाम्यन्ये मृताः किल ॥६७॥
तस्माद्वैराग्यमासाद्य भजामि परमेश्वरम् ।
साधुसेवां करिष्येऽपि साधुर्भूत्वा निरन्तरम् ॥६८॥
इत्यर्थिताः साधवस्ते चिदम्बरायनादयः ।
प्रायश्चित्तं कारयित्वा क्षालयित्वाऽघसञ्चयान् ॥६९॥
पावयित्वा नग्नभंगं दीक्षां भागवतीं व्यधुः ।
सोऽपि पापविनिर्मुक्तो नाम्ना भागवतायनः ॥७०॥
भक्तोऽभवत् सदा साधुश्चाऽभजन्मां परेश्वरम् ।
साधुसेवां परां कृत्वा तीर्थार्थे चाक्षरस्थलीम् ॥७१॥
आययौ कुंकुमवापीं मोक्षं ययौ सरस्तटे ।
इत्येवं कथितं लक्ष्मि साधुसंगेन रक्षणम् ॥७२॥
स्वात्मार्पणेन मोक्षश्च मया तस्य कृतोऽत्र वै ।
अथाऽन्यत्ते कथयामि कथानकं पुराभवम् ॥७३॥
आसीत् पुरा महासाधुः शुकायनोऽतिधार्मिकः ।
भजते मां सदा रात्रिदिनं श्रीपरमेश्वरम् ॥७४॥
अपरिग्रहसर्वस्वो दिग्वासा मत्परायणः ।
आम्रवृक्षतले वासं कुरुते भोजनं फलैः ॥७५॥
वन्यैः पत्रैर्दलैः कन्दैः कुसुमैर्वहतेऽदनम् ।
कुंकुमवापिकापूर्वे वने वसति सर्वदा ॥७६॥
शैत्यं तापं च सहते वृष्टिं सहते क्षुत्तृषाम् ।
नित्यं प्रदक्षिणं प्रातः स्नात्वा च कुरुते सरः ॥७७॥
एवं मध्याह्नके भिक्षामेकभुक्तां करोति च ।
सायं मे कीर्तनं दिव्यं कृत्वा स्वापं करोति च ॥७८॥
मूर्तिं मे त्वाम्रवृक्षस्य स्तम्बे चित्रमयीं सदा ।
संरक्षति प्रपूज्यैनां ध्यायति हृदयेऽन्वहम् ॥७९॥
आम्रवणं परं श्रेष्ठं प्रियं चाऽस्य सदाऽभवत् ।
सोऽपि चाम्रफलान्येव निवेदयति मे मुहुः ॥८०॥
एवं वै वर्तमानस्य चाम्रवृक्षप्रपोषिणः ।
एकदा दैवयोगेन वने वह्निर्व्यजायत ॥८१॥
तृणपुञ्जाः स्तम्बपुञ्जाः पत्रपुञ्जास्तथौषधिः ।
ज्वलिता ज्वालया सर्वा वृक्षाश्च ज्वलितास्तदा ॥८२॥
निजस्थानस्य नियतश्चाम्रोऽपि ज्वलितस्तदा ।
ततो वह्निः समन्ताद्वै प्रजज्वालाऽतिवेगतः ॥८३॥
वायुना प्रेरितस्तीक्ष्णो भयंकरोऽतिदारुणः ।
साधुश्चाऽयं स्थितो ध्यानेऽचिन्तयन्मां हरिं तदा ॥८४॥
मया त्वाकाशवाण्या वै बोधितः स मुहुर्मुहुः ।
याहि दूरं विहायैतान् वृक्षान् दग्धोऽत्र मा भव ॥८५॥
स चाह वाणीं नैवाऽहं त्यक्त्वा यास्यामि चाश्रयान् ।
यत्राऽहं सर्वथा नैजं स्थानं च जीवनं गृहम् ॥८६॥
आश्रयं च सुखं भक्ष्यं प्राप्नोमि ताँस्त्यजामि न ।
इमे मे बान्धवाः सर्वे पितरो वापि बालकाः ॥८७॥
मातरो वल्लिकाः सर्वास्ताः कथं चोत्सृजामि वै ।
नाऽहं कृतघ्नः स्वार्थश्च नाहं पापो भवामि च ॥८८॥
येषां फलैः सुजीवामि यच्छायायां वसामि च ।
यद्रसैः पोषणं यामि ताँस्त्यक्त्वा क्व प्रयाम्यहम् ॥८९॥
नेमे बन्धनकर्तारो जडा विजातयस्त्विमे ।
न मे कुटुम्बिनः किन्तु कृतसेवा इमे मम ॥९०॥

तादृशान् सेवकान् नित्यं परोपकारशालिनः ।
दिवानिशं सहायाँश्च मदाश्रयानिव स्थितान् ॥९१॥
सद्गुणशालिनो वन्यान् कथं दग्ध्वा प्रयाम्यहम् ।
दग्धो भवामि चात्रैव नाहं यास्यामि चापरम् ॥९२॥
साधुश्चाऽहं तितिक्षुश्च तितिक्षवो द्रुमा इमे ।
साधवः साधुभूषाश्च ताँस्त्यक्त्वा न व्रजाम्यतः ॥९३॥
यद्वा तद्वा भवत्वत्र भस्म वा जीवनं च वा ।
सहयोगेन भाव्यं वै सहपोष्येण साधुना ॥९४॥
इत्युक्त्वा नोच्चचालापि नोत्तस्थौ धैर्यशेवधिः ।
ब्रह्मध्याता निषसाद यथा तथैव चास्थितः ॥९५॥
दया स्नेहश्च साधूनां महान् धर्मो भवेत् सदा ।
समर्थमुपजीव्यैर्मे त्यजेयं कक्षमद्य वै ॥९६॥
'नारायण हरे कृष्ण श्रीपते पुरुषोत्तम ।
अनादिश्रीकृष्णनारायण रक्ष द्रुमानिमान्' ॥९७॥
इत्येवं श्रावयन् वाणीं साधुर्जजाप मानसे ।
मां ध्यात्वा च तदा प्रत्ययैकतानेन भावतः ॥९८॥
अथाऽग्निर्दाहयामास पार्श्वभागं हि योगिनः ।
पादौ हस्तौ जटां स्कन्धौ रोमाणि चर्म सर्वतः ॥९९॥
तथापि मां भजँस्तस्मात् स्थानाच्चचाल नैव ह ।
अथाऽहं तं सत्यसाधुं शरणागतरक्षकम् ॥१००॥
देहाद्यनादरधर्मं चात्मनिष्ठापरायणम् ।
भक्तं मे च विदेहं तं ज्ञात्वाऽवोचं वरं वृणु ॥१०१॥
प्रसन्नोऽस्मि विरागास्ते साधुधर्मसमन्वितान् ।
दयाधर्मस्य बाहुल्याद् भक्तेर्मे मानसे स्थितेः ॥१०२॥
वरं वृणु समर्थोऽस्मि सोऽहं साक्षान्नरायणः ।
यं त्वं विद्वन् ध्यायसि वै यदर्थं त्वं निवेदितः ॥१०३॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
आनृशंस्यं तव वृत्तान्तकं दृष्ट्वा प्रतोषितः ॥१०४॥
वरं वृणीष्व साधो त्वं ददामि सर्वमिष्टकम् ।
साधुश्च मनसा वव्रे वृक्षस्य च वनस्य च ॥१०५॥
संभवं रससम्पन्नं यथर्द्धं प्राक् तथैव ह ।
अहं ज्ञात्वा दृढां भक्तिं तत्साधौ परसौख्यदाम् ॥१०६॥
प्रीतोऽहं चाऽमृतदृष्ट्या सिक्तवान् चाम्रमुत्तमम् ।
सर्वान् द्रुमान् वल्लिकाश्च क्षेत्रं वनं समस्तकम् ॥१०७॥
सिक्तवान् पीयूषदृष्ट्योज्जीवयं वनमुत्तमम् ।
ततः फलानि पत्राणि शाखाः पुष्पाणि सर्वशः ॥१०८॥
वने पूर्वस्थितेश्चापि समृद्धानि चाऽभवन् पुनः ।
वह्निः शान्तिं गतः सर्वो भस्मापि तत्र नास्ति च ॥१०९॥
सर्वं वह्निकृतं कर्म लीनं मत्कृतिरुद्गता ।
एवं दिव्यं वनं चाम्रवणं जातं सरोऽन्तिके ॥११०॥
भागवतायनं साधुं भक्तिमन्तं समाश्रितम् ।
सर्वार्थसिद्धिमापत् तद्वनं तथा सतस्तु यः ॥१११॥
आश्रितः स लभेत् सिद्धिं साधुना कल्पितां शुभाम् ।
साधुः सोऽयं भागवतायनो मे धाम्नि राजते ॥११२॥
मुक्तिं गतो हि कालेन कृपया भजनेन मे ।
पठनाच्छ्रवणादस्य मुक्तिर्मुक्तिर्भवेत्तथा ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साध्वाश्रयेण रोमपादपशुपालस्य मोक्षणं, नग्नभंगाख्यचौरस्य साधुसमागमेन राजभयाद् रक्षणम् , आम्रवणवृक्षादिनाम् वह्निदग्धानां भागवतायनसाधुसहवासेन पुनरुज्जीवनमित्यादिनिरूपणनामा चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

**श्रीनारायणीश्रीरुवाच—**

अहं जाता बहुवारं सृष्टौ वै भवता सह ।
लक्ष्मीर्नारायणी श्रीश्च भार्गवी माधवी रमा ॥ १ ॥
वृन्दा च तुलसी शिवराज्ञीश्रीः कमला प्रमा ।
पद्मा विद्यापरा पद्मावती शतसहस्रशः ॥ २ ॥
मम रूपाणि लोकेऽत्र विद्यन्ते श्रीहरे प्रभो ।
जिज्ञासा मे समुत्पन्ना महालक्ष्मीः कदा कथम् ॥ ३ ॥
समुत्पन्ना च किन्नाम्नी पृथ्व्यां कृष्णनरायण ।
यद्यप्यहं विजानामि श्वश्रूं मे जननीं तव ॥ ४ ॥
महालक्ष्मीं चाऽथ गजाननां सुराष्ट्रकेऽपराम् ।
चमत्कारपुरे जातां क्षीरोदसागरोद्भवाम् ॥ ५ ॥
द्वितीयां तां विजानामि तथा महाहिरण्मयीम् ।
तृतीयां तां विजानामि तदन्या यदि भूस्थिता ॥ ६ ॥
महाकार्यकरी चाऽऽस्ते चेत् तां मह्यं प्रकीर्तय ।
यां श्रुत्वा सम्प्रहर्षामि यद्बलं च चमत्कृतिम् ॥ ७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि कथयामि वर्तमानां तु भूतले ।
चमत्कारकरीं पूज्यां महालक्ष्मीं तु दक्षिणे ॥ ८ ॥
काञ्चन्यां तु नगर्यां सा माता वै राजते सती ।
पुरा शंभोर्मोहनार्थं कामदेवः समाययौ ॥ ९ ॥
कैलासे देवकार्यार्थे शंकरेण स भस्मितः ।
चित्रकर्मा गणो भस्म किञ्चिद् धृत्वा तु पुत्तलम् ॥१०॥

रचयामास तत्रैवाऽऽवेशयामास जीवनम् ।
बालकश्चेतनः सोऽपि सञ्जातो रोषवानति ॥११॥
शतरुद्रीयपाठी च पपाठ शंकरान्तिके ।
शंभुर्भूत्वा प्रसन्नस्तं वरार्थं प्राह वै तदा ॥१२॥
वरं वव्रे स मे राज्यं त्रैलोक्ये स्यादकण्टकम् ।
प्रतियोद्धस्त्रशस्त्राणि वृथा भवन्तु सर्वथा ॥१३॥
ममाऽस्त्रशस्त्रमन्त्राश्च मा भवन्तु वृथा क्वचित् ।
तथेत्याह तदा शंभुः राज्यमस्मै तथा ददौ ॥१४॥
षष्टिवर्षसहस्राणि राज्यं भवत्वकण्टकम् ।
तदा वीक्ष्य स्वयं ब्रह्मा भण्डासुरेतिनामतः ॥१५॥
भण्डास्फोटो ह्ययं जात इति मत्वा जगाद ह ।
अथाऽयं रुद्रभालस्य क्रोधानलात् प्रभर्जितः ॥१६॥
भस्मोत्पन्नः पुनस्तस्माद् रुद्रजो दानवोऽभवत् ।
ववृधे शीघ्रमेवाऽसौ शुक्रं समाह्वयत् गुरुम् ॥१७॥
मयं समाह्वयत् पूजां चक्रे तयोस्ततः पुनः ।
मयं तं शिल्पिनं प्राह पुरातनी पुरी तु या ॥१८॥
दैत्येश्वराणां चास्ते तां भग्नां पुनर्नवां कुरु ।
तच्छ्रुत्वा तु मयो गत्वा चक्रे नवं पुरं हि तत् ॥१९॥
यत्र स्थित्वा तु दैत्येन त्रैलोक्यं शासितं पुरा ।
तत्राऽभिषिक्तः शुक्रेण दैतेयैः स महाबलैः ॥२०॥
शुशुभे परया समृद्ध्या तेजोभिश्च बलादिभिः ।
हिरण्यकशिपुर्यं वै किरीटं प्राक् दधार ह ॥२१॥
किरीटं तं सजीवं चाऽविनाश्यं शुक्रधारितम् ।
दधौ भण्डश्चामरे द्वे सजीवे शक्तिशोभिते ॥२२॥
न रोगो न च दुःखानि जायन्ते यन्निषेवणात् ।
आतपत्रं दधौ यस्य छायास्थान् नाऽस्त्रकोटयः ॥२३॥
बाधन्ते न विनाशो न पराजयो न जायते ।
विजयाख्यं धनुः शंखं रिपुघ्नं भूषणानि च ॥२४॥
सिंहासनं तैजसं चाऽक्षयशौर्यं ददौ कविः ।
एवं राजा समावृत्तस्तस्याऽष्टौ तु महाबलाः ॥२५॥
प्रधानाः सैन्यपूज्याश्चाऽभवन् त्रिलोकिगामिनः ।
इन्द्रशत्रुरमित्रघ्नो विद्युन्माली विभीषणः ॥२६॥
उग्रकर्मोग्रधन्वा च विजयः श्रुतिपारगः ।
सर्वे वै वेदशास्त्रज्ञाः कर्मकाण्डपरायणाः ॥२७॥
युद्धविशारदा मायाविशारदाः प्रतापिनः ।
अथ दैत्यं विशुक्रं स दक्षांसेन ससर्ज ह ॥२८॥
वामांसेन विषांगं स ससर्ज दुष्टशेखरम् ।
धूमिनीं भगिनीं चापि कण्ठात् ससर्ज भण्डकः ॥२९॥

सुमोहिनी कुमुद्वती चित्रांगी सुन्दरी तथा ।
चतस्रो वनितास्तस्य दैत्यपुत्र्योऽर्पितास्तदा ॥३०॥
स्यन्दनास्तुरगा नागा विमानानि सहस्रशः ।
सम्बभूवुर्जितलोकाः शुक्राचार्यमतानुगाः ॥३१॥
भण्डो बभूवं भक्तोऽसौ शंकरस्य सदैत्यकः ।
गृहे गृहे रुद्रयज्ञास्तदा चासन् समन्ततः ॥३२॥
ऋचो यजूँषि सामानि तन्त्राणि च प्रतिग्रहम् ।
प्रवर्तन्ते स्म दैत्यानां समूहेऽपि तथाऽध्वरे ॥३३॥
तदा यज्ञेषु दैत्यानां बुभुजुर्हव्यभोजिनः ।
भ्रातृभ्यामुग्रवीर्याभ्यां प्रधानैश्च बलैस्तथा ॥३४॥
दिशो जिगाय सर्वाश्च रेजे महेन्द्रवत्तदा ।
ब्रह्माण्डं खण्डयामास शौर्यवीर्यसमुच्छ्रितः ॥३५॥
बहुवारं देवताद्या निर्जिता रणमूर्धनि ।
ब्रह्मविष्णुमहेशाद्यास्तं दृष्ट्वा दीप्ततेजसम् ॥३६॥
पलायनपराः सर्वे स्वे स्वे धाम्नि सदाऽवसन् ।
केचित्पातालगर्भेषु केचिदम्बुधिवारिषु ॥३७॥
केचिद् दिगन्तकोणेषु केचित् कुञ्जेषु भूभृताम् ।
विलीना भृशवित्रस्ता विचेरुश्छन्नवेषिणः ॥३८॥
पितॄन् सिद्धान् साध्यदेवान् नागान् यज्ञान् दिगीश्वरान् ।
ब्रह्माणं पद्मनाभं च रुद्रं वज्रिणमित्यपि ॥३९॥
मत्वा तृणायितान् सर्वान् लोकान् भण्डः शशास ह ।
एवं राज्यं कृतवतो भण्डस्य जितकाशिनः ॥४०॥
षष्टिवर्षसहस्राणि व्यतीतानि ततः परम् ।
हीयमानबलान् देवान् सम्प्रेक्ष्य कमलापतिः ॥४१॥
उग्रं भण्डासुरं हन्तुं त्रैलोक्यं चापि रक्षितुम् ।
ससर्ज सहसा मायां स्वात्मरूपां विमोहिनीम् ॥४२॥
निजरूपा ललिता सा बभूव परदेवता ।
महालक्ष्मीः स्वयं याऽस्ति कंभरा जननी मम ॥४३॥
पाशांकुशधनुर्बाणपरिष्कृतचतुर्भुजा ।
सा माता परमा शक्तिः परब्रह्मस्वरूपिणी ॥४४॥
या महावैष्णवी दैत्यव्रातविलयकारिणी ।
तामुवाच हरिर्मायां भण्डं दैत्यं निषूदय ॥४५॥
एवमाज्ञां समासाद्य सा ययाचेऽप्सरोगणम् ।
हरिर्ददावप्सरसः सापि विश्वाचिकादिभिः ॥४६॥
ययौ तूर्णं हिमगिरिं यत्रास्ते भण्डकासुरः ।
तत्र सा तु महालक्ष्मीर्मूले चम्पकशाखिनः ॥४७॥
निवासमकरोद् रम्यं गायन्ती मधुरस्वरम् ।
श्रुत्वा दैत्यश्चागतस्तां ययाचे मदनातुरः ॥४८॥

सापि हावाँस्तथा भावान् चेष्टा वार्ताश्च मञ्जुलाः ।
कृत्वाऽहरद्धि दैत्यानां मनांसि भण्डकस्य च ॥४९॥
विसस्मरुस्तदा भण्डो दैत्याः सायं श्रीशंकरम् ।
सन्ध्यां स्तोत्रं पूजनं च वृद्धानां सेवनादिकम् ॥५०॥
विजहुस्ते यज्ञकार्यं तथा सर्वं शुभावहम् ।
एवं शुक्रं निजाचार्यं विसस्मरुश्च पूजनम् ॥५१॥
इयं देवी मोहयित्वा रुरोध दैत्यपुंगवान् ।
अवमानहतः शुक्रः कोपितोऽभूत्तदा मुहुः ॥५२॥
दैत्यानाह न वै योग्या भवन्तो राज्यऋद्धये ।
पतन्तु पराराज्याद्वै मदो वो यातु संक्षयम् ॥५३॥
जडीभूतानसुराँश्च मायाकृतान् विलोक्य तु ।
इन्द्राद्याः कृतसन्नाहास्तपोऽर्थं यमुनां ययुः ॥५४॥
मखमारंभयामासुर्वैष्णवं बलदं शुभम् ।
नारायण्या महालक्ष्म्याः पूजां चक्रुर्हि देवताः ॥५५॥
उग्रे तपसि संस्थाना जपध्यानपरायणा ।
अनन्यमानसा लक्ष्मीः सावधाना बभूव सा ॥५६॥
बहुब्देषु व्यतीतेषु स्वयं शुक्रः पुरोहितः ।
दैत्यानाह भवतां वै विनाशार्थं सुरादयः ॥५७॥
यज्ञं ध्यानं तपश्चापि कुर्वन्त यमुनातटे ।
जातिमात्रं हि भवतां हनिष्यति सुरादयः ॥५८॥
हरिः सर्वान् भवत्पक्षान् हनिष्यत्यचिरात् खलु ।
तेनैव निर्मिता माया महालक्ष्मीस्वरूपिणी ॥५९॥
तस्यां मुग्धान् भवतश्च वीक्ष्येन्द्राद्यास्तपन्ति वै ।
गत्वा शीघ्रं तत्र विघ्नं समाचरत वै द्रुतम् ॥६०॥
श्रुत्वा भण्डासुरयुक्ता दैत्या युद्धविशारदाः ।
यमुनातटमासाद्य विघ्नं चक्रुर्महारणम् ॥६१॥
तपोविघ्नकरान् दैत्यान् वीक्ष्य भक्तार्थकारिणी ।
महालक्ष्मीरकरोद्वै महाप्राकारमुज्ज्वलम् ॥६२॥
अलंघ्यं दानवैर्दैत्यैरिन्द्रप्रस्थाभिधं दृढम् ।
तं दृष्ट्वा भण्डकश्चापि विषण्णः स्वपुरं ययौ ॥६३॥
श्रुतवर्मा सखा भण्डं प्राह राजन् वचः शृणु ।
षष्टिवर्षसहस्राणां राज्यं तव शिवार्पितम् ॥६४॥
ततोऽन्तस्तव राज्यस्य कालोऽयं शिवनोदितः ।
अशक्यप्रतिकार्योऽयं तस्मात् कालं प्रयापय ॥६५॥
काले तु भोगः कर्तव्यः काले निवृत्तिरुत्तमा ।
इत्युपदेशं संश्रुत्वा विरेमे भण्डकासुरः ॥६६॥
देवता इन्द्रप्रस्थे वै विशाले वनविस्तरे ।
कुण्डं सुयोग्यविस्तारं कृत्वा वह्निं निधाय च ॥६७॥
कृत्वा दृढां प्रतिज्ञां वै महालक्ष्मीं प्रपूज्य च ।
परितो हवनं चक्रुः प्रीत्यर्थं तु श्रिया हरेः ॥६८॥
ब्रह्मभूता भविष्यामो मोक्ष्यामो वा त्रिविष्टपम् ।
इत्येवं हवनं चक्रुस्तावत् प्रादुर्बभूव ह ॥६९॥
चक्राकारं महत्तेजस्तन्मध्ये पारमेश्वरी ।
जगन्माता जीवदात्री नारायणी परेश्वरी ॥७०॥
व्यूहतेजोमयी ब्रह्मानन्दिनी हरिसुन्दरी ।
पाशांकुशेक्षुकोदण्डपद्ममाला लसत्करा ॥७१॥
दृष्ट्वा तां मुमुहुर्देवाः प्रणेमुर्विगतज्वराः ।
तुष्टुवुः श्रीमहालक्ष्मीं ललितां वैष्णवीं प्रसूम् ॥७२॥
जय लक्ष्मि जगन्मातर्जय लक्ष्मि परात्परे ।
जय कल्याणनिलये जय सर्वकलात्मिके ॥७३॥
जय ब्राह्मि महालक्ष्मि ब्रह्मात्मिके परात्मिके ।
जय नारायणि शान्ते जय श्रीललिते रमे ॥७४॥
जय श्रीविजये देवीश्वरि श्रीदे जयर्द्धिदे ।
नमः सहस्रशीर्षायै सहस्राननलोचने ॥७५॥
नमः सहस्रहस्ताब्जपादपंकजशोभिते ।
अणोरणुतरे लक्ष्मि महतोऽपि महीयसि ॥७६॥
अतलं ते स्मृतौ पादौ वितलं जानुनी तव ।
रसातलं कटिस्ते च कुक्षिस्ते पृथिवी मता ॥७७॥
हृदयं भुवः स्वस्तेऽस्तु मुखं सत्यं शिरो मतम् ।
दृशश्चन्द्रार्कदहना दिशः कर्णा भुजाः सुराः ॥७८॥
मरुतस्तु तवोच्छ्वासा वाचस्ते श्रुतयो मताः ।
क्रीडा ते लोकरचना सखा ते परमेश्वरः ॥७९॥
आहारस्ते सदानन्दो वासस्ते हृदये हरेः ।
दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते ॥८०॥
शिरोरुहा घनास्ते वै तारकाः कुसुमानि ते ।
धर्माद्या बाहवस्ते च कालाद्या हेतयस्तव ॥८१॥
यमाश्च नियमाश्चापि करपादनखास्तव ।
स्तनौ स्वाहास्वधाकारौ सर्वजीवनदुग्धदौ ॥८२॥
प्राणायामस्तव श्वासो रसना ते सरस्वती ।
महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव ॥८३॥
आदौ दया धर्मपत्नी ससर्ज निखिलाः प्रजाः ।
हृत्स्था त्वं व्यापिनी लक्ष्मीर्मोहिनी त्वं तथा परा ॥८४॥
इदानीं दृश्यसे ब्राह्मी नारायणी प्रियंकरी ।
नमस्तस्यै महालक्ष्म्यै गजमुख्यै नमो नमः ॥८५॥
सर्वशक्त्यै सर्वधात्र्यै महालक्ष्म्यै नमो नमः ।
या ससर्ज विराजं च ततोऽजं विष्णुमीश्वरम् ॥८६॥

रुद्रं तथा सुराग्र्यांश्च तस्यै लक्ष्म्यै नमो नमः ।
त्रिगुणायै निर्गुणायै हरिण्यै ते नमो नमः ॥८७॥
यन्त्रतन्त्रात्मिकायै ते जगन्मात्रे नमो नमः ।
वाग्विभूत्यै गुरुतन्व्यै महालक्ष्म्यै नमो नमः ॥८८॥
कंभरायै सर्वविद्याभरायै ते नमो नमः ।
जयाललितापाञ्चालीरमातन्वै नमो नमः ॥८९॥
पद्मावतीरमाहंसीसुगुणाऽऽज्ञाश्रियै नमः ।
नमः स्तुता प्रसन्नैवं छन्दयामास सद्वरैः ॥९०॥
देवाः प्राहुश्च तुष्टा चेद् भण्डासुरं विनाशय ।
दुर्धरं जीवितं सौख्यं देहि ते शरणार्थिनः ॥९१॥
महालक्ष्मीः समुवाच मुदिताः सन्तु निर्भयाः ।
भण्डासुरं नाशयिष्ये ललिताऽहं महासती ॥९२॥
स्तावका मे भविष्यन्ति श्रीयशोधर्मसंभृताः ।
विद्याविनयसम्पन्ना निरोगा दीर्घजीविनः ॥९३॥
पुत्रमित्रकलत्राढ्या भविष्यन्ति सुसम्पदः ।
इतिलब्धवरा देवाः सत्रं चक्रुः प्रपूर्णकम् ॥९४॥
अथ सा ललिता लक्ष्मीर्वरमालां करोत्थिताम् ।
अनादिश्रीमहाविष्णुस्वरूपाय परात्मने ॥९५॥
तत्रैव पश्यतां सर्वसुराणां चार्पयद् गले ।
देवदुन्दुभयो नेदुर्जयशब्दास्तदाऽभवन् ॥९६॥
गीतयश्चाऽभवँस्तत्राऽप्सरसां सुरयोषिताम् ।
ननृतुश्चाप्सरसश्च जगुर्गान्धर्वसत्तमाः ॥९७॥
ऋषयः स्तवनं चक्रुराशीर्वादपरायणाः ।
साधवो नमनं चक्रुः सेवां चक्रुश्च पार्षदाः ॥९८॥
लक्ष्म्याद्याः पूजनं चक्रुर्दम्पत्योश्चेन्द्रप्रस्थके ।
यौतकानि ददुश्चापि भूषणानि धनानि च ॥९९॥
रत्नानि विविधान्येव दम्पतीभ्यां सुरादयः ।
भोजनानि व्यधुस्तत्र विवाहान्ते सुरादयः ॥१००॥
अथ ब्रह्मा प्रजगाद भण्डासुरक्षयाय तु ।
महालक्ष्मीं ललिताख्यां परब्रह्महरिं तथा ॥१०१॥
धर्मस्य रक्षणार्थाय देवानां रक्षणाय च ।
तदा तूर्णं महालक्ष्मीर्नारायणाज्ञया तदा ॥१०२॥
सस्मार दिव्यहेतींश्च चक्रादीन् दिव्यविग्रहान् ।
आययुर्मूर्तिमन्तस्ते तस्थुश्च पुरतो हरेः ॥१०३॥
जग्राह तान् महालक्ष्मीः सर्वकामाक्षिणी सती ।
सर्वकामप्रदस्य श्रीनारायणस्य चाज्ञया ॥१०४॥
सर्वदेवान् सहायाँश्चाऽदृश्यनारायणान्वितान् ।
नीत्वा दैत्यान्नाशयितुं प्रतस्थे जयवर्धिता ॥१०५॥
सैन्यानि पार्षदानां च गणानां द्युसदां तथा ।
देवीनां चापि सिद्धानां निर्ययुः सज्जहेतयः ॥१०६॥
सहस्रशो गवाश्वाश्च सिंहाः शार्दूलकाः खगाः ।
वृषभाः शरभाश्चापि हंसाश्च गरुडास्तथा ॥१०७॥
विमानानि सहस्राणि यानानि च रथास्तथा ।
सायुधाः कल्पजाश्चेन्द्रप्रस्थाद् विनिर्ययुस्तदा ॥१०८॥
महालक्ष्मीमहासैन्यं श्रीलक्ष्मीकमलान्वितम् ।
दुर्गासतीमहाचण्डीदेवीकोटिसमन्वितम् ॥१०९॥
दिव्यं चाऽव्याहतगति निर्ययौ स्वम्बरेण तत् ।
दिव्याऽस्त्रशस्त्रमन्त्राद्यैर्वर्धितं रक्षितं तथा ॥११०॥
गगनं सत्यलोकान्तं शब्दितं सैन्यगर्जनैः ।
सर्वे नारायणाश्चेशाः श्रुत्वा तूर्णं समाययुः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कामदेवभस्मत उत्पन्नस्य भण्डासुरस्य नाशार्थमिन्द्रप्रस्थाऽऽगतदेवानां मखे प्रादुर्भूतललितामहालक्ष्मीसैन्यसन्नाहादिनिरूपणनामा पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि ततः सैन्यानि योषिताम् ।
मातॄणां दिव्यदेहानां रेजिरे च विनिर्ययुः ॥ १ ॥
महालक्ष्मीस्तथा लक्ष्मीः सरस्वती च शारदा ।
दुर्गा गङ्गा यमी रेवा राधा रमा च पद्मिनी ॥ २ ॥
कमला श्रीः पाशवती रमा माणिकी मंजुला ।
सुखदा कंभरालक्ष्मीः सन्तुष्टा विजया जया ॥ ३ ॥
सुपर्णा माधवी हंसी भार्गवी सुगुणा सती ।
नारायणी वासुदेवी हरिणी च हिरण्मयी ॥ ४ ॥
शार्दूलवाहना मत्ता गजानना च हंसिनी ।
विश्वा भूतिः पिंगलाक्षी कामाक्षी वल्लभा दया ॥ ५ ॥
कार्ष्णी वृन्दा वैष्णवी च ज्योत्स्नी कामदुघाऽनघा ।
भूर्धौर्धरिणी धात्री च भारती करिणी कृतिः ॥ ६ ॥
ब्राह्मी रौद्री रेवती च माहेश्वरी कुमारिका ।
शाक्री सौरी नैर्ऋती च सौम्या शिखण्डिनी शिवा ॥ ७ ॥
वाराही नारसिंही च बला रक्ता सुनन्दिनी ।
शकुनी रेवती काली जयन्ती चादितिस्तथा ॥ ८ ॥
श्यामा विनायकी सिद्धिः ऋद्धिश्च विनता स्वधा ।
उषा स्वाहा वषट्कारा ज्येष्ठालक्ष्मीश्च मुक्तिका ॥ ९ ॥

माया रतिर्मंगला चाऽमृता षष्टिश्च मानसा ।
शान्तिरेकादशी हैमी चोर्जस्का पुरुषोत्तमी ॥१०॥
एताः सर्वा हि वैष्णव्यो मूर्धन्या योद्धनाशिकाः ।
तथाऽपराश्च शांकर्यो कातरो निर्ययू रणे ॥११॥
शांकरी मालिनी चण्डी वायव्या दूतिका खगा ।
चामुण्डा च शतानन्दा चलच्छिखा सुपिच्छला ॥१२॥
बला चातिबला मातृनन्दा नन्दाऽपराजिता ।
महाकाली भैरवी च कराली च गणी तथा ॥१३॥
मृत्युर्मारी महामारी दितिर्वटोदरी दनुः ।
उलूकी कर्णमोटी च वज्रहस्ता कपालिका ॥१४॥
पिशाची राक्षसी खेटा भुशुण्डी लांगली तथा ।
धूम्रा करालिनी चैकवीरोदुम्बरी कुक्कुटी ॥१५॥
केंकरी प्रेतयाना च क्रौंची शैलमुखी सखी ।
कपर्दिनी कामरूपा रोचना केशिनी तथा ॥१६॥
दंष्ट्रालोल्कामुखी धूम्रशिखा क्ष्वेला प्रकम्पिनी ।
सर्पकर्णी विशोका च निकुंभा बगलामुखी ॥१७॥
माकरी कच्छपी चित्रा कोणा च लांगलवती ।
अयोमुखी क्रोधना चाशनी हूंकारिणी तथा ॥१८॥
महादेवी रुद्रसटा कात्यायनी करालिनी ।
गौरी सांकर्षिणी देवी प्रालेयी भूतडामरी ॥१९॥
सृष्टिगर्भा महामाया खटीधारी च पाशिनी ।
एताश्चान्यास्तमोभूषा रुद्राण्यो निर्ययुर्मृधे ॥२०॥
अथ सर्वाः पारमेष्ठ्यो ब्रह्माण्यश्चापि निर्ययुः ।
संक्रान्तयः सुसिद्धान्यः सिद्धयः ब्रह्मसारसाः ॥२१॥
दण्डनाथा मन्त्रनाथा धूमोर्णा मन्त्रनायिका ।
श्यामला यन्त्रिणी घनश्यामा संगीतयोगिनी ॥२२॥
त्रिपुरा चक्रनाथा च साम्राजी चक्रवर्तिनी ।
महाविद्याऽऽम्नायनाथा वैदिकी सिमगास्तथा ॥२३॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चण्डिका शोणविग्रहा ॥२४॥
क्षोभिणी द्राविणी चाकर्षिणी वशंकरी तथा ।
उन्मादिनी खेचरा च यष्टिर्महांकुशा तथा ॥२५॥
सर्वबीजाधिवासिन्यश्चान्यास्तत्त्वादिशक्तयः ।
कोट्यर्बुदाऽब्जसंख्याका निर्ययुर्युद्धदुर्मदाः ॥२६॥
मात्राकर्षणिका देव्यश्चित्ताकर्षणिकास्तथा ।
आत्माकर्षणिकाश्चापि शरीराकर्षिकास्तथा ॥२७॥
अनंगलेखा सर्वजृंभणा मृत्युप्रदायिनी ।
सर्वव्याधिहरा रक्षानाम्नी रहस्ययोगिनी ॥२८॥
वशिनी जयिनी वह्निवासिनी कुलसुन्दरी ।
शोषिणी च रतिः प्रीतिः कान्तिः शान्तिश्च तुष्टिका ॥२९॥
पुष्टिः श्रद्धा च भूः प्रमाथिनी च नागवीथिका ।
मातंगी सिद्धलक्ष्मीश्च दुर्गाऽम्बा पोत्रिणी तथा ॥३०॥
यक्षिणी शंखिनी चापि लाकिनी हाकिनी तथा ।
शाकिनी डाकिनी धातुनाथा वार्तालिकाऽन्धिनी ॥३१॥
एता अन्या अर्बुदाब्जाः शक्तयो निर्ययुर्मृधे ।
अथेन्द्रोऽप्सरसश्चापि साध्याश्च विश्वदेवताः ॥३२॥
विश्वकर्मा मयोऽग्निश्च रुद्राः पिशाचकास्तथा ।
राक्षसाश्चापि गन्धर्वा मित्राश्च किन्नरास्तथा ॥३३॥
विद्याध्राश्चापि गोविन्दो भगवान् कमलापतिः ।
ब्रह्माऽश्विपुत्रौ गणका धन्वन्तरिश्च वासुकिः ॥३४॥
नागाश्च भूसुराश्चापि पुरोहिताश्च निर्ययुः ।
तदा मृदंगमुरजाः पटहोऽतुकुलीगणाः ॥३५॥
सेलुका झल्लरी रान्या हुडुका डुडुका धराः ।
आनकाः पणवाश्चापि गोमुखाश्चार्धचन्द्रिकाः ॥३६॥
यवमध्या मर्दलाश्च डिण्डिमा झर्झरास्तथा ।
वरीताश्चोद्धकाश्चापि तुडुण्डा बर्बरास्तथा ॥३७॥
हुँकारा भेरयश्चापि दध्वनुः समरोद्यमे ।
सर्वाऽशेषास्त्रशस्त्रैश्च हेतिभिर्मन्त्रकोटिभिः ॥३८॥
सहिताः सर्वयोद्धयश्च रथवाजिगजादिभिः ।
महायानविमानैश्चाययुर्भण्डासुरस्थलीम् ॥३९॥
अम्बरं सैन्यसम्व्याप्तं युद्धघोषसमन्वितम् ।
वीक्ष्याऽसुरास्तदा त्रेसुर्ललितागमसंभ्रमात् ॥४०॥
तदाऽसुराणामभवन्नरिष्टानि पदे पदे ।
अकाल इव निर्भिन्ना भित्तयो दैत्यपत्तने ॥४१॥
घूर्णमानाः पतन्ति स्म महोल्का गगनस्थलात् ।
भूकम्पो हृत्कम्पनानि तदाऽभवन् पुनः पुनः ॥४२॥
ध्वजाग्रवर्तिनः कंका गृध्रा बकाः खगास्तथा ।
आदित्यमण्डले चक्रं नाशसूचकमास च ॥४३॥
वामांगानि नराणां नारीणां दक्षांगभूमयः ।
स्फुरितान्यभवँस्तत्र दृश्यन्ते केतवोऽम्बरे ॥४४॥
दैत्यस्त्रीणां च विभ्रष्टा अकाले भूषणस्रजः ।
दर्पणानां वर्मणां च ध्वजानां खड्गसम्पदाम् ॥४५॥
मणीनामम्बराणां च मालिन्यमभवत्तदा ।
अपतन् वेदिमध्येषु बिन्दवः शोणिताम्भसाम् ॥४६॥
उत्पातान् वीक्ष्य सन्त्रस्ता दैत्याः प्राहुर्हि भण्डकम् ।
भण्डोऽपि क्रोधमापन्नश्चाहूय मन्त्रिणौ तदा ॥४७॥

सभायां मन्त्रणां शीघ्रं चक्रे युद्धावलम्बिनीम् ।
विशुक्रश्च विषंगश्च मन्त्रिणो बुद्धिदायिनौ ॥४८॥
तथा सामन्तदैत्येन्द्रा आज्ञार्थं समुपागताः ।
अवोचत विशुक्रश्च सर्वेषां शृण्वतां तदा ॥४९॥
सुराद्या लब्धकालाश्चाऽस्माकमसुः स्त्रीं बलगर्विताम् ।
सज्जीकृत्य च तां देवास्तया सार्कं समागताः ॥५०॥
अस्मान् जेतुं समायाता हा कष्टं विधिनोदितम् ।
अबला जेष्यतेऽस्माँश्चेत् परिहासाय तद् भवेत् ॥५१॥
अस्माकं विजयायाऽद्य स्त्रीजातिरभिधावति ।
यद्यपि स्त्री भवेच्छत्रुर्हन्तव्या विजिगीषुभिः ॥५२॥
सकचग्रहमाकृष्य साऽऽनेतव्या सदासिका ।
तवैव चेटिकाभावं सा दुष्टा संश्रयिष्यति ॥५३॥
एवमुक्त्वा स भण्डस्य क्रोधं तत्र व्यवीवृधत् ।
विषंगश्च ततः प्राह बुद्धियुक्तं सुखावहम् ॥५४॥
सर्वं विचार्य कर्तव्यं विवेकः परमा गतिः ।
अविवेकेन यत्कार्यं विनाशायोपपद्यते ॥५५॥
चारैर्बलाऽबले ज्ञेये जयसिद्धिमभीप्सता ।
तिर्यगित्यपि नारीति क्षुद्रा चेत्यपि राजभिः ॥५६॥
नाऽवज्ञा वैरिणां कार्या शक्तिः सर्वत्र विद्यते ।
शक्तिरेव हि सर्वत्र कारणं विजयश्रियः ॥५७॥
केयं च किंबला किंसहायिकेति विचार्यताम् ।
श्रुत्वैवं तु विषंगस्य भण्डः प्राह रुषान्वितम् ॥५८॥
अरे विद्वन् मतिं त्यक्त्वा किमेवं शंकसे स्त्रियम् ।
ललितेयं मया चारैर्ज्ञाता बलविवर्जिता ॥५९॥
मायया स्त्रीकदम्बं सा कृत्वोत्पाद्य समागता ।
नास्ति भयं हि मे तस्या धृत्वाऽऽनयन्तु मां प्रति ॥६०॥
त्रैलोक्याऽऽलंबिमहिमा भण्डः केन विजीयते ।
मया प्रदण्डिता देवाः श्वसितुं प्रभवोऽपि न ॥६१॥
पातालेऽब्धौ गह्वरेषु प्रच्छन्नास्ते वसन्ति वै ।
न जानन्ति स्त्रियो मूढा वृथा कल्पितसाहसा ॥६२॥
विनाशमनुधावन्ति स्वकार्यकृतदर्पिकाः ।
अथवा ताः पुरस्कृत्य यद्यागच्छन्ति नाकिनः ॥६३॥
सर्वे संभूय शंभ्वाद्यास्तान् सम्पेष्टुमहं क्षमः ।
मलकश्च कुरण्डश्च करंटको बलाहकः ॥६४॥
विकटः कर्कटकश्च हुम्बको हलमल्लुचः ।
कर्कशः कुक्कुरश्चापि जंभणो घोषकस्तथा ॥६५॥
शिरालकः कूपकश्च लड्डुनो मारकस्तथा ।
विषेणश्च परूषश्च द्रघणः कोल्लटस्तथा ॥६६॥
दासेरो मूषको महाण्डश्च कुभाण्डकस्तथा ।
एते दैत्या हिरण्याक्षहिरण्यकशिपुप्रभाः ॥६७॥
तेषामग्रे सहस्राक्षौहिण्यः स्युर्भरमशोषिताः ।
मायाविलासा नार्यास्तु हास्याः समरसीमनि ॥६८॥
तस्मात्तां केशपाशेन धृत्वाऽऽनयन्तु मां प्रति ।
अन्याः सर्वाश्च गृह्णन्तु यथाप्राप्तां निजां निजाम् ॥६९॥
कुटिलाक्षोत्तिष्ठ सैन्यं सन्नाह्य समन्ततः ।
इत्याभाष्य चमूनाथं सहस्रत्रितयाधिपम् ॥७०॥
कुटिलाक्षं महासत्त्वं भण्डश्चान्तःपुरं ययौ ।
ततः सज्जाः किलाऽऽरावाः समनह्यन्त दानवाः ॥७१॥
पट्टिशैर्मुद्गरैश्चापि भिदुरैर्भिण्डिपालकैः ।
द्रुहणैश्च भूशुण्डीभिः कुठारैर्मुसलैरपि ॥७२॥
गदाभिश्च शतघ्नीभिस्त्रिशिखैर्विशिखैरपि ।
अर्धचक्रैर्महाचक्रैर्धनुर्भिः शार्ङ्गधन्विभिः ॥७३॥
दण्डैः क्षेपणिकाशस्त्रैर्वज्रबाणैर्दृषद्वरैः ।
कटारैः फणिदन्तैश्च शरैश्च खण्डलैस्तथा ॥७४॥
पाशाऽऽयुधैर्गदाभिश्च वह्निगोलैश्च खड्गकैः ।
एवंविधैरायुधैस्ते सज्जा दैत्या विनिर्ययुः ॥७५॥
सन्नद्धनिजहस्ताग्रा वर्मिता दैत्यकोटयः ।
अश्वारोहा गजारोहा गर्दभारोहिणस्तथा ॥७६॥
उष्ट्रारोहा वृकारोहाः शुनकारोहिणस्तथा ।
काकारोहास्तथा गृध्रारोहा व्याघ्रादिरोहिणः ॥७७॥
सिंहारोहा शरभस्था गेन्डकारोहिणस्तथा ।
सूकरारोहिणो व्यालारोहिणः प्रेतवाहनाः ॥७८॥
यानविमानगाश्चापि प्रचेलुर्ललितां प्रति ।
कुटिलं सैन्यभर्तारं दुर्मदं चापि दानवम् ॥७९॥
दशाऽक्षौहिणिकायुक्तं प्राहिणोल्ललितां प्रति ।
कुटिलाक्षस्तालजंघस्तालभुजस्तालकटिः ॥८०॥
एते भण्डपुरस्यैव ररक्षुर्गोपुराणि वै ।
चत्वारिंशदक्षौहिणिकान्वितास्तस्थुरुल्बणाः ॥८१॥
एकाऽक्षौहिणिकां नैजमन्दिरस्याऽभितोऽकरोत् ।
विशुक्रः प्रेषयामास दूतं तु कपिशीर्षकम् ॥८२॥
भण्डासुराज्ञया तूर्णं सोऽपि गत्वा न्यवेदयत् ।
पत्नी भण्डमहाराजस्यैव भव सुशोभने ॥८३॥
अन्यथा ते वधो भावी यथेष्टं कुरु भामिनि ।
श्रुत्वाऽऽह च महालक्ष्म्याः सखी दुर्गा हरप्रिया ॥८४॥
भण्डतां जहि निकृष्ट पातालं याहि सत्वरम् ।
अन्यथा तव नाशोऽत्र नारीकृतो भविष्यति ॥८५॥

दूतश्चाऽऽह यथार्थं तद् भण्डाय सोऽपि सत्वरम् ।
विशुक्रस्य शृण्वतो वै जगादाऽथ च रोषवान् ॥८६॥
भण्डासुरस्तत आज्ञां चकार योधनाय तान् ।
सेनापतीन् समस्तांश्च दैत्यान् रणप्रहर्षितान् ॥८७॥
कृत्वा किलकिलारावं भटास्तत्र सहस्रशः ।
ललितासैन्यमभितो निपेतुर्युद्धदुर्मदाः ॥८८॥
मारयध्वं घातयध्वं भेदयध्वं हि चुक्रुशुः ।
दोधूयमानैरसिभिर्निपेतुः स्त्रीमहाऽर्णवे ॥८९॥
देव्यश्चापि तदोद्दण्डाः समयुध्यन्त दानवैः ।
अनर्गलायुधैर्देव्यो व्यमृद्नुर्दानवीं चमूम् ॥९०॥
शक्तिभिः पात्यमानानां दानवानां रसैर्मही ।
रक्तारुणाऽभवत् पेतुर्दैत्यानां मुण्डराशयः ॥९१॥
इतस्ततः शक्तिशस्त्रैर्भेदिता दानवा मृताः ।
तदन्तरे तु बाणानां वृष्टयश्चाऽभवन् रणे ॥९२॥
अम्बरं सर्वथा बाणैर्व्याप्तं जातं नीरन्ध्रकम् ।
दुर्गा मुमोच वह्निं चाऽज्वालयच्छरजालकम् ॥९३॥
दैत्यानज्वालयद्वह्निर्विवर्धितो हरिणीबलात् ।
दुर्मदस्तु मृतस्तत्र विशुक्रोऽपि विपाटितः ॥९४॥
प्राकाररक्षिणः सर्वे दिव्यशस्त्रैर्निपातिताः ।
गोपुराणां रक्षिकाश्च चत्वारिंशत्तदा तु याः ॥९५॥
अक्षोहिण्यः समग्रास्ता लक्ष्मीसैन्यैर्विभेदिताः ।
भण्डासुरस्य सौधस्य रक्षार्थं सैन्यमेव यत् ॥९६॥
दशाऽक्षौहिणिकारूपं देवीभिस्तद्विनाशितम् ।
नगरं शून्यवज्जातं भण्डस्य प्रेतवासवत् ॥९७॥
सर्वे सैन्यप्रणेतारो नष्टा भण्डस्य कारणात् ।
स्वप्नेऽपि यन्न संभाव्यं यन्न श्रुतमितः पुरा ॥९८॥
यच्च नाऽऽशंकितं दैत्यैस्तत्कष्टं स्वागतं तदा ।
विचार्येत्थं शतं चाक्षौहिणीनां समप्रेषयत् ॥९९॥
दिवानिशं महायुद्धं शस्त्रास्त्रबलनोदितम् ।
व्यवर्तताऽसुरैः सार्कं लक्ष्मीनां दिव्ययोषिताम् ॥१००॥
शतमक्षौहिणीनां च पपातैकदिनेन ह ।
शोणितं नगरं सर्वं भग्नं शोणितसम्प्लुतम् ॥१०१॥
अथ भण्डस्त्रिशताऽक्षौहिणीसेना असजयत् ।
अप्रेषयत् सर्वदेवीसैन्यं नाशयितुं ततः ॥१०२॥
वीक्ष्य तल्ललितादेव्याः षष्टिकोट्यात्मकं तदा ।
सैन्यं क्रुद्धमभूद् दृष्ट्वा निर्दैत्यं कर्तुमापतत् ॥१०३॥
पाशिन्यो मुशलिन्यश्च चक्रिण्यः शक्तिधारिकाः ।
मुद्गरिण्यः पट्टिशिन्यः कोदण्डिन्यस्त्रिशूलगाः ॥१०४॥
पिबन्त्य इव दैत्याब्धिं सन्निपेतुर्हि कोटिशः ।
अस्पृष्टपरशस्त्रास्ता दिव्या विभेदुरासुरान् ॥१०५॥
अभ्यन्तरे द्वयोः सैन्ये विविशतुः परस्परम् ।
संकुलाकारतां प्राप्तावास्तां वै सैन्यसागरौ ॥१०६॥
त्रिशताऽक्षौहिणिकास्ता देवीभिर्वै निकृन्तिताः ।
महालक्ष्म्याः प्रसादेन भिद्यन्ते नैव योषितः ॥१०७॥
प्रहारा नैव जायन्ते शस्त्राणि न स्पृशन्त्यति ।
जयोऽभवन्महालक्ष्म्या भण्डः शुशोच वै तदा ॥१०८॥
विजयो वा कथं स्यान्मे भवेयं जीवितः कथम् ।
एवं भूविवरे गत्वा व्यचिन्तयन्मुहुर्मुहुः ॥१०९॥
कैकसान् खलु दैतेयान् सस्मार भण्डकस्तदा ।
पूर्वं सूर्याद्वरं प्राप्तान् जये योग्यान् महाहवे ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महालक्ष्म्याः सैन्यानि भण्डनाशार्थं निर्ययुः, भण्डासुरस्य मन्त्रणा, भण्डसैन्यानां विनाशो भण्डस्य कैकसादिस्मरणमित्यादिनिरूपणनामा षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

**श्रीनारायणीश्रीरुवाच—**

कथं पूर्वं वरं प्राप्ताः कैकसा नाम दैत्यकाः ।
येषां जयो भवेल्लोके नारायणीमृधेऽपि वै ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि कथयामि नारायणीमृते क्वचित् ।
विजयो वृणुते नान्यं चान्ते जयो हरिश्रिते ॥ २ ॥
किन्तु सन्तपसा सम्यगेधितानां महाहवे ।
क्षणं विभाव्यते लक्ष्मि जयवन्नाशकृज्जयः ॥ ३ ॥
कैकसेयाः सप्तसहोदराः पूर्वं तु भास्करम् ।
उद्दिश्य तु तपश्चक्रुः शतवर्षाणि निर्जलम् ॥ ४ ॥
शुष्कप्राया अभवँस्ते तदा सूर्य उपस्थितः ।
कैकसेयान् समुवाच भवतां तपसाऽधुना ॥ ५ ॥
परितुष्टोऽस्मि भद्रं वो वरं वृणुत दानवः ।
इत्युक्तास्ते वरं वव्रुर्योऽस्माकं संयुगे रिपुः ॥ ६ ॥
नारी नरो मनुष्यो वा देवोऽन्यो ब्रह्मसृष्टिजः ।
उपतिष्ठेत तिर्यक् च तेषां नेत्राणि वै तदा ॥ ७ ॥
अन्धीकर्तुं त्वया सूर्य स्थातव्यं नोऽक्षिषु ध्रुवम् ।
भवता घोरतेजोभिर्दहता प्रतिरोधिनः ॥ ८ ॥

तथाऽक्षिविषयः सर्वो निश्चेष्टो भवतात् तदा ।
चक्षुस्तेजोविहीनास्ते रिपवश्चान्धतां गताः ॥ ९ ॥
स्तब्धशस्त्राश्च निश्चेष्टा हन्तव्याः स्युर्जयश्च नः ।
इत्युक्तश्च रविस्तथाऽस्त्विति प्राह हि कैकसान् ॥१०॥
प्राहाऽधर्मं यदा द्रक्ष्ये गमिष्यामि तदा त्वयम् ।
धर्मयुद्धे सहायोऽहं भविष्यामि न संशयः ॥११॥
इत्युक्तास्ते कैकसाः श्रि ! जयवत् जयमानिनः ।
सूर्यबलाद्विजयार्थं भण्डोक्तास्ते समाययुः ॥१२॥
वरदानबलेनैव युद्धे चेरुर्मदोद्धताः ।
तदा सूर्यसमाविष्टनेत्रैस्तैस्तु निरीक्षिताः ॥१३॥
देवताः स्तब्धनेत्राश्च विफलोत्साहतां गताः ।
अभिभूताश्चान्ध्यदोषैः शक्तयो जोषमासत ॥१४॥
दैत्या व्यमर्दयन् शक्तिसैन्यं चाऽधर्मयोधनैः ।
लक्ष्म्यो विरमिताः स्तब्धा अन्धा व्यापारवर्जिताः ॥१५॥
अदृष्टयोऽभवँस्तासां युद्धं योग्यं न धर्मजम् ।
न हन्तव्यो रिपुर्युद्धे न्यस्तशस्त्रो निरंगकः ॥१६॥
पिबन् द्रवन् पतितश्च बद्धः शरणमागतः ।
एतादृशेषु युञ्जाना अधर्मो बाधते हि तान् ॥१७॥
कैकसेया अनिवार्यं जघ्नुः शरादिभिः सतीः ।
देव्यस्ता दैत्यशस्त्रौघैः स्पृष्टगात्रास्तदाऽभवन् ॥१८॥
हाहाकरं तदा कृत्वा सस्मरुर्ललितेश्वरीम् ।
ललिताश्रीस्तदा सूर्यमधर्मे प्राह सत्वरम् ॥१९॥
अयुध्यतां हि योद्धृणां ताडनं दैत्यकारितम् ।
अधर्मं पश्य सूर्य त्वं कथं तिष्ठसि शत्रुषु ॥२०॥
सूर्यः शापभयेनैव निर्गतो दैत्यनेत्रतः ।
शक्तयो विगतान्ध्याश्च युयुधुर्वेगतस्तदा ॥२१॥
सिंहनादैर्विनद्यैषून् मोचयामासुरुल्बणान् ।
कृष्णरूपभुजंगाभान् बाणान् दैत्या न सेहिरे ॥२२॥
इतस्ततो मृद्यमानाः स्थितिं तत्र न लेभिरे ।
सावित्र्या प्रहितं चाऽस्त्रं सावित्रं दैत्यकोटिषु ॥२३॥
काकसेयाश्च ते सप्त तथा सैन्यस्य कोटयः ।
हतास्तदाऽस्त्रवेगेन रक्तनद्यस्ततोऽभवन् ॥२४॥
हतशिष्टाः कतिपया भण्डं जग्मुरसुप्रियाः ।
शशंसुः स्वविनाशं वै भण्डो निराशतां गतः ॥२५॥
सावित्रीं विजयं प्राप्तां शशंसुर्देवतागणाः ।
भण्डोऽपि शेषवर्गेण चकार मन्त्रणां तदा ॥२६॥
अहो दैत्यकुलानां वै विनाशः समजायत ।
उपेक्षामधुना कर्तुं प्रवृत्तो बलवान् विधिः ॥२७॥

मद्भृत्यनाममात्रेण विद्रवन्ति दिवौकसः ।
तादृशानामिहाऽस्माकमागतोऽयं विपर्ययः ॥२८॥
करोति बलिनं क्लीबं धनिनं धनवर्जितम् ।
दीर्घायुषमनायुष्कं राजानं रंकसेविनम् ॥२९॥
क्व सत्त्वमस्मद्वाहूनां क्वेयं दुर्ललिता वधूः ।
यया चेट्या महागर्वाः सेनान्यो विनिपातिताः ॥३०॥
जीवग्राहो हि कर्तव्यो भोक्तव्या सा प्रसह्य वै ।
तदा निर्वापणं मे स्याद् गृह्णन्तु तां सुजीविताम् ॥३१॥
स्त्रीवेषैर्वा भवद्भिश्च दैत्यानीभिश्च वा तथा ।
कापट्येन मिलिताभिर्गृह्यतां जीवयोगिनी ॥३२॥
यद्वा युद्धं क्रियतां वै चाग्रे महोल्बणं परम् ।
विकृष्यन्तां च सैन्यानि तासां सेनामुखे हि नः ॥३३॥
पृष्ठे सा स्वल्पसाहाय्या सुग्राहा मे भविष्यति ।
ततोऽहं स्त्रीवेषधर्ता यामि तत्रैव यत्र सा ॥३४॥
प्रसह्य धृत्वा भुक्त्वा च मारयित्वा ततः परम् ।
अन्याः सर्वा नाशयित्वाऽऽगमिष्यामि निजालयम् ॥३५॥
सैव निःशेषशक्तीनां मूलभूता महीयसी ।
तस्याः समूलनाशेन शक्तिवृन्दं विनश्यति ॥३६॥
तामाकृष्य विजित्यैव भुक्त्वा नेष्यामि वा गृहम् ।
इति मन्त्रितमन्त्रोऽयं दुर्मन्त्री भण्डदानवः ॥३७॥
सेनापतींश्च सैन्यानि नीत्वा ययौ रणाजिरम् ।
सायंकालोऽभवच्चापि प्रवृत्तं च तमः परम् ॥३८॥
असुराणां प्रदुष्टानां रात्रिरेव बलप्रदा ।
तस्यां वै व्यापृतं सैन्यं देवीसैन्याग्रतोऽभवत् ॥३९॥
युयुधे शस्त्रघातैश्च तिमिरे प्राणनाशकम् ।
देव्यस्तत्र प्रताड्यन्ते म्रियन्ते दैत्यकोटयः ॥४०॥
जीवदा जीवनाशाश्च प्रहाराः संभवन्ति हि ।
गुप्ताचारा हि भण्डस्य ययुर्यत्र सुरेश्वरी ॥४१॥
तत्र युद्धं प्रचक्रुश्च पृष्ठे चाग्रे महामृधम् ।
अथ याः शक्तयः कालीप्रभृतयो निशासुखाः ॥४२॥
भैरव्यो भैरवा रुद्रगणा रुद्राण्य ईशिकाः ।
निजघ्नुर्दानवान् दैत्यान् भूत्यो जघ्नुश्च दानवान् ॥४३॥
रात्रौ दानवसैन्यं तद् दशाऽक्षौहिणिकात्मकम् ।
विनष्टं सर्वमेवैतद् भण्डः पलायितोऽभवत् ॥४४॥
विभाता रजनी प्रातः प्रसन्नाश्चाऽभवन् दिशः ।
विजेत्रीणां च देवीनां ललिता तोषमासदत् ॥४५॥
अथ भण्डो मन्त्रयित्वा सममात्मसुतैः पुनः ।
चतुर्बाहुमुखान् पुत्रान् प्रेषयामास संयुगे ॥४६॥

त्रिंशत्संख्या दुर्मदास्ते युयुधुश्च दिवानिशम् ।
द्विशत्यक्षौहिणी सेना निर्ययौ वेगवत्तमा ॥४७॥
श्रीबाला तु महालक्ष्म्याः पुत्री सन्तोषिकाऽभिधा ।
या सा कुमारिका योद्धुं तदा सज्जाऽभवद् रणे ॥४८॥
शतकोटिसखीयुक्ता सर्वायुधधरा सती ।
अष्टादशभुजायुक्ता भण्डसेनां समद्रवत् ॥४९॥
ततः प्रववृते युद्धमत्युद्धतपराक्रमम् ।
कोटिरूपधरा जाता श्रीबाला युद्धदुर्मदा ॥५०॥
दर्शयामास शौर्यं च ललितादुहिता मृधे ।
अस्त्रप्रत्यस्त्रमोक्षेण तान् सर्वानभिनत् क्षणात् ॥५१॥
नारायणास्त्रमोक्षेण श्रीबाला सा कुमारिका ।
द्विशत्यक्षौहिणीसैन्यं भस्मसादकरोद् दिने ॥५२॥
युगपत् त्रिंशतो बाजानवासृजत् सा कुमारिका ।
ननान्दा तव सन्तोषा भण्डसुतान् यमगृहम् ॥५३॥
प्रेषयामास सहसा विभिद्य तच्छिरांसि वै ।
शक्तयश्च जगुस्तत्र साधुवादान् मुहुर्मुहुः ॥५४॥
ततोऽन्ये जीविताशाश्च स्वल्पा दैत्या प्रदुद्रुवुः ।
स्वगृहं तु समासाद्य शोकं भण्डाय सञ्जगुः ॥५५॥
अथ श्रुत्वा सुतान्नष्टान् शोकानलपरिप्लुतः ।
विललाप स भण्डो वै मत्वा जातं कुलक्षयम् ॥५६॥
हा हतोऽस्मि विपन्नोऽस्मि मन्दभाग्योऽस्मि चाऽद्य वै ।
नारी कुलक्षयकर्त्री विद्यतेऽद्य ममापि तु ॥५७॥
इतिमूर्छांलुसमानो निष्पपात भुवस्तलम् ।
अथोत्थितः खड्गमुग्रमुद्धृत्य व्याजहार सः ॥५८॥
इदानीमेव तां लक्ष्मीं खड्गेनाऽनेन खण्डशः ।
शकलीकृत्य समरे शान्तिं प्राप्स्यामि शाश्वतीम् ॥५९॥
इति खड्गं विधुन्वन् स प्रलपन् संगरे ययौ ।
चूषयामि समस्तास्ताः करवाणि निजाः प्रियाः ॥६०॥
छिनदानि सुरान् सर्वान् भिनदानि सुरालयान् ।
पिनषाणि च सैन्यानीत्येवं क्रुद्धा रणे ययौ ॥६१॥
भ्रातरो विहिताः सर्वे सेनान्यश्च हतास्ततः ।
युद्धं त्रिदिवसं सर्वे मन्नाशार्थं व्यजायत ॥६२॥
नाशो वा विजयो वा स्यान्न बलं स्वबलं विना ।
पत्नीं प्राप्स्ये ललितां तां यद्वा नेष्यामि तत्क्षयम् ॥६३॥
वदन् मुहुर्मुहुः कृत्वा धुन्वानः करवालिकाम् ।
कालाग्निरिव संक्रुद्धः स्त्रीसैन्याग्रे स्थितोऽभवत् ॥६४॥
वीक्ष्य तं ललितालक्ष्मीस्तेन योद्धुं प्रचक्रमे ।
चक्रराजरथस्तस्याः शुशुभे प्रचचाल तम् ॥६५॥
चतुर्वेदमहाचक्रपुरुषार्थमहाभयः ।
आनन्दध्वजसंशोभी नवभूमिसमन्वितः ॥६६॥
नवभूमिस्थदेवीभिराक्रुष्टगुरुधन्विभिः ।
परार्धाऽधिकसंख्यातदिव्यादिव्यसहायिभिः ॥६७॥
दशयोजनमुन्नद्धश्चतुर्योजनविस्तृतः ।
अन्यासामपि देवीनां वाहनानि परार्द्धशः ॥६८॥
नृसिंहोष्ट्रनरव्यालमृगपक्षिहयास्तथा ।
गजभेरुण्डशरभव्याघ्रवातमृगादयः ॥६९॥
जगर्जुर्भण्डनाशार्थं दिव्यरूपधराः सदा ।
देवदुन्दुभयो नेदुः पतिताः पुष्पवृष्टयः ॥७०॥
निमित्तानि प्रशस्तानि लक्ष्मीसैन्ये तदाऽभवन् ।
तदा प्रववृते युद्धं सेनयोरुभयोरपि ॥७१॥
हन्यन्ते दानवसैन्यान्यजस्रं योषितां गणैः ।
भूर्जाता तु तदा नृत्यदैत्यकबन्धपूरिता ॥७२॥
दैत्यकेशसहस्राढ्यशिरोभिर्नारिकेलिता ।
चक्रकृत्तकरिग्रामा शक्तिध्वस्ताऽसुराशया ॥७३॥
दैत्यवीराननव्याप्ता रक्तवाहातिकर्दमा ।
यां प्रपश्यामि मृत्योश्च त्रासोऽपि समजायत ॥७४॥
चतुर्थे दिवसे दैत्यसैन्यनाशोऽभवत्ततः ।
ललिताश्रीसमं युद्धं भण्डासुरस्य चाऽभवत् ॥७५॥
अस्त्रप्रत्यस्त्रसंक्षोभैर्विशिखैः प्राणहारिभिः ।
महालक्ष्मीप्रमुक्तो वै बाणश्चैको दशाऽभवन् ॥७६॥
दशधा शतधा व्योम्नि दैत्यसैन्ये सहस्रधा ।
दैत्यांगसंगे सम्प्राप्ता लक्षसंख्याः शरास्तदा ॥७७॥
भण्डमर्मप्रभेदान् सा बाणैः सम्यक् चकार ह ।
भण्डो मुमोचाऽन्धतामिस्राख्यमस्त्रं भयंकरम् ॥७८॥
महाभास्करबाणेन महालक्ष्मीर्नुनोद तत् ।
पाखण्डास्त्रं भण्डदैत्यो रणे प्रमुमुचे ततः ॥७९॥
गायत्र्यस्त्रं मुमोचेयं लक्ष्मीर्नुनोद तत्ततः ।
अन्धास्त्रमसृजद् भण्डः सर्वदृष्टिविघातकम् ॥८०॥
महालक्ष्मीर्मुमोचाऽथ चाक्षुष्मतमहास्त्रकम् ।
अशक्त्यस्त्रं ततो भण्डो मुमोच योषितां गणे ॥८१॥
महाशक्त्यस्त्रमुग्रं च लक्ष्मीर्मुमोच तत्प्रति ।
अन्तकाऽस्त्रं भण्डदैत्यो मुमोच सर्वनाशकम् ॥८२॥
महामृत्युञ्जयाऽस्त्रं तु लक्ष्मीर्मुमोच तत्प्रति ।
सर्वाधीतिविनाशास्त्र भण्डो मुमोच वै तदा ॥८३॥
धारणास्त्रं मुमोचेयं लक्ष्मीर्मेधाप्रदं निजाः ।
भण्डस्ततो भयास्त्रं च कमला चाभयास्त्रकम् ॥८४॥

भण्डो महाऽऽमयास्त्रं च लक्ष्मीर्निरामयास्त्रकम् ।
भण्डश्चायुर्नाशनास्त्रं लक्ष्मिर्योगास्त्रमित्यथ ॥८५॥
आसुरास्त्रं भण्डकश्च लक्ष्मीर्दुर्गास्त्रकं तदा ।
आसुराणां तु लक्षाणां दुर्गानां लक्षयोगिनाम् ॥८६॥
सैन्यानि चाभवन् व्योम्नि युयुधुर्बहुवेगतः ।
शूलं चक्रं गदां शक्तिं चापं खड्गं शरान् पविम् ॥८७॥
दण्डं पाशं गोलकाँश्च धृत्वा धृत्वा परस्परम् ।
मारयामासुरत्यर्थं देवीषु न स्पृशन्ति वै ॥८८॥
आसुरास्तत्र हन्यन्ते देवीगणैः समन्ततः ।
सिंहवाहनमारुह्य दुर्गा युद्धं तथाऽकरोत् ॥८९॥
नारायणी महालक्ष्मीर्विजयं संलभेत वै ।
अर्णवास्त्रं ततो भण्डो मुमोच योषितां गणे ॥९०॥
महालक्ष्मीः शोषणास्त्रं मुमोच त्वम्बरे ततः ।
अथ क्रुद्धो भण्डदैत्यो हुंकारमातनोत्ततः ॥९१॥
जाताः सहस्रशो दैत्या दुर्गास्ताननयद् यमम् ।
अथ भण्डो हरिण्यस्त्रं लक्ष्मीः सिंहास्त्रमातनोत् ॥९२॥
बल्यस्त्रं चासृजद् भण्डो लक्ष्मीर्वामनमस्त्रकम् ।
हैहयास्त्रं भण्डकश्च पर्शुरामास्त्रमीश्वरी ॥९३॥
रावणास्त्रं ततो भण्डो लक्ष्मीः रामास्त्रमासृजत् ।
राजास्त्रं व्यातनोद् भण्डो लक्ष्मीः कृष्णास्त्रमातनोत् ॥९४॥
ब्रह्माण्डास्त्रं भण्डदैत्यो व्यूहास्त्रं कमलाऽसृजत् ।
कल्पस्त्रं भण्डदैत्यश्च लक्ष्मीः कल्क्यस्त्रमातनोत् ॥९५॥

दशावताराः सर्वे ते कृत्वा चासुरनाशनम् ।
ललितां श्रीं नमस्कृत्य बद्धांजलिपुटाः स्थिताः ॥९६॥
महालक्ष्म्या निदेशेन वैकुण्ठाय च ते ययुः ।
मोहास्त्रं चाऽसृजद् भण्डो लक्ष्मीर्ज्ञानास्त्रमातनोत् ॥९७॥
लक्ष्मीर्नारायणास्त्रेण दैत्यान् भस्मीचकार ह ।
चमूनाथान् समस्ताँश्च भस्मीचकार वह्निना ॥९८॥
भण्डं भस्मीचकारापि परब्रह्मास्त्रतेजसा ।
नगरं भस्मसाच्चक्रे तल्मात्रमशिष्यत ॥९९॥
भण्डो मृतोऽथ त्रैलोक्यं जातं सुहर्षनादितम् ।
पठनाच्छ्रवणादस्य दैत्यभीतिर्विनश्यति ॥१००॥
शत्रुभीतिः कदनानि विनश्यन्ति न संशयः ।
भुक्तिं मुक्तिं भाग्यमृद्धिमुत्तमां च भजन्त्यपि ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
महालक्ष्म्याः सैन्यैर्भण्डासुरसैन्यानां नाशे कृते
भण्डासुरनाशोऽपीतिनिरूपणनामा सप्तदशा-
धिकशततमोऽध्यायः ॥ ११७ ॥

श्रीनारायणीश्रीरुवाच—

भगवन् देवदेवेशेश्वरेश्वरेश्वरेश्वर ।
भण्डनाशोत्तरं तुर्यप्रातः ततोऽभवच्च किम् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

युद्धोत्तरं श्रमं सर्वदेवीनां ललितारमा ।
अपानुदन्महालक्ष्मीः सुधामृतविलोकनैः ॥ २ ॥
मानदानैः पारितोषिकादिदानैर्महार्हणैः ।
भोजनानि सुदिव्यानि महालक्ष्मीर्ददौ तदा ॥ ३ ॥
शृंगाराणि समस्तानि दिव्यानि प्रददौ तदा ।
कृत्वा सर्वाः स्वहृदये कोट्यर्बुदाब्जमूर्तिका ॥ ४ ॥
समकाले स्नेहभरा समाश्लिक्षत् महारमा ।
मम पुत्र्य इतिप्राह मुक्तान्यो ब्राह्मय ईशिकाः ॥ ५ ॥
सर्वाभ्यः प्रददाम्येवाऽक्षरं धाम हि शाश्वतम् ।
अनादिश्रीकृष्णनारायणस्य शाश्वतीप्रियाः ॥ ६ ॥
सन्तु सदानन्दवेत्र्यो मद्दिष्यश्चेति शार्ङ्गिणः ।
जगाद ताभ्यः सर्वाभ्यश्चन्द्रकाँश्च ललाटके ॥ ७ ॥
व्यधान्माला ददौ ताभ्यो मम कण्ठेऽर्पणाय सा ।
सर्वाभिस्तत्र कण्ठे मे मालाऽर्पितास्तदा प्रियाः ! ॥ ८ ॥
कोट्यर्बुदाब्जकन्यास्ता ब्राह्मयो देव्यो मदंशिकाः ।
जाता मम प्रियाः सर्वा या इदानीं भवन्ति मे ॥ ९ ॥
सान्निध्ये तव वै लक्ष्मि विवाहिता मया तदा ।
कुंकुमवापिकाक्षेत्रे वर्तन्ते यास्तव प्रियाः ॥१०॥
सपत्न्यस्ते स्वसारो वै मदर्थं भिन्नभूभवाः ।
ममाऽऽज्ञप्ता हि मानुष्यो दैव्यः पैत्र्यस्तथाऽपराः ॥११॥
अनेकदेहसम्पन्ना मत्पत्न्यः सन्ति ता इमाः ।
शृणु लक्ष्मि चतुर्थे वै मध्याह्ने देवतागणाः ॥१२॥
ब्रह्मा विष्णुश्च रुद्रश्च महेन्द्रश्च बृहस्पतिः ।
आदित्या वसवो रुद्रा मरुतः साध्यदेवताः ॥१३॥
सिद्धाः किंपुरुषा यक्षा दिक्पाला लोकपालकाः ।
भक्ता दैत्या दानवा ये नागाश्च वैष्णवास्तु ये ॥१४॥
देवपक्षा आसुरा ये तामसा राजसाश्च ये ।
सर्वे श्रीविजयं श्रुत्वा वीक्ष्य देवसुखं तथा ॥१५॥
सभायां संहतास्तत्र सर्वस्त्रीजातिशोभिताः ।
तुष्टुवुः सहगन्धर्वाऽप्सरसश्च महारमाम् ॥१६॥
नमो नमस्ते परमेश्वरस्त्रीमूर्द्धन्यमूर्तेऽर्धहरिस्वरूपे ।
महाक्षरे चाक्षरधामवासे त्रिसृष्टिमातः सुनमो नमस्ते ॥१७॥

नमोऽवतारादिसमग्रवासे नमः समस्तेश्वरकोटिवासे ।
नमः समग्रेश्वरिकानिवासे मुक्तानिकामुक्तगणाधिवासे ॥१८॥
तुभ्यं नमः कृष्णनरायणाङ्के सिद्धर्षिसत्पित्रमुदे नमस्ते ।
सुरेश्वरीवृन्दसुसेविते ते श्रीमानवीरूपिणि ते नमोऽस्तु ॥१९॥
श्रीकम्भरे श्रीललिते सनाथे सन्तोषिकामातरथो नमस्ते ।
गजाननेऽनन्तरमानुरूपे मातर्नमस्ते हरिणीस्वरूपे ॥२०॥
सर्वेश्वरि सर्वरमाधिनाथे श्रीमाणिकीपाशवतीप्रमोदे ।
लक्ष्मीमहासागरभाविके ते ब्रह्मप्रियास्थे सततं नमस्ते ॥२१॥
कामाधिनाथेऽर्थितदानदक्षे चिन्तामणे चित्रजगत्प्रसूते ।
मोक्षप्रदे भास्करचन्द्रनेत्रे मन्दस्मिते योगिनि ते नमोऽस्तु ॥२२॥
नमो नमो भण्डमहासुरघ्ने समस्तदैत्यान्तककर्त्रि मातः ।
मुद्राधिनाथे च सुयन्त्ररूपे सर्वश्रुतिप्रोद्भविके नमस्ते ॥२३॥
कृष्णे परे चक्रसुषट्कसंस्थे षडूर्मिहर्त्रि श्रमनाशिके ते ।
षड्भावशून्येऽष्टगुणाश्रये ते मातर्नमो मुख्यसमस्तराशि ॥२४॥
कान्ताधिनाथे कमले सुनिर्मले
कलाधिनाथे भुवनेश्वरि प्रिये ।
रसायने सर्वरसाधिवासिनि
दिव्यस्वरूपे च नमोऽस्त्वभीक्ष्णशः ॥२५॥
सदाणिमाद्यष्टकसेवनीये गोपालकृष्णात्मकमङ्कवासे ।
देवाधिदेवप्रमदे सवित्रि लोकस्य मातः प्रणमो नमस्ते ॥२६॥
ब्रह्मप्रिये ब्रह्मरमे हरिश्रि ब्रह्मात्मिके श्रीललिते नमस्ते ।
ब्रह्मामृतस्रोतसि जन्महन्त्रि ब्रह्मेश्वरि श्रीललिते नमस्ते ॥२७॥
शुभाश्रये शुभप्रदेऽक्षराख्ये हृतारिवर्गे ललिते नमस्ते ।
सर्वाधिके सर्वगते समस्तसिद्धिप्रदे श्रीललिते नमस्ते ॥२८॥
सर्वाऽमराऽऽकांक्षितपूरयित्रि
वरप्रदे श्रीललिते नमस्ते ।
बिन्दुस्थिते बिन्दुसुरूपिणि श्री-
बृहत्कुचाऽम्भोजविलोलहारे ॥२९॥
फलप्रदे कम्पलतेऽर्कशोभे सरोजवक्त्रे ललिते नमस्ते ।
सारैकभूमे पुरुषोत्तमि श्रीभूपद्मिकाऽजाकमलात्मिके ते ॥३०॥
कृपानिधाने सुरकार्यशालिनि
श्रीवैष्णवि श्रीसकलावतारिणि ।
सारंगशावाक्षि मनोहरे प्रसु
मातर्नमस्ते ललितेऽतिसुन्दरि ॥३१॥
श्रीमन्महालक्ष्मि समृद्धिदायिनि
विपन्निवारेऽतिसनातनि प्रभे ।
त्वया समस्तं भुवनं सुरक्षितं
भण्डासुरादीन् विनिहत्य संगरे ॥३२॥
श्रीशंभुना भस्मित एव मन्मथो
भस्मोत्थभण्डोऽपि हतः पुनस्त्वया ।
कामस्य भस्माऽपि सुभस्मिता यतो
निष्कामता नीरतिता प्रदर्शिता ॥३३॥
स्थूलं शरीरं मदनस्य शंभुना
दग्धं च सूक्ष्मं तु ततः पुनस्त्वया ।
एवं शरीरोभयवर्जितं पतिं
विलोक्य तज्जीवनमार्थयद् रतिः ॥३४॥
तदा पुनः कारणवर्ष्म कल्पना-
त्मकं यदासीद् बहुवासनात्मकम् ।
तस्मादहश्यं रमणस्य वर्ष्म वै
व्याप्तं बृहत्कृत्य ददौ रतिश्रियै ॥३५॥
रतिर्निजं कान्तमनुत्तमं पुनः
समस्तलोकस्थितिकं हृदि स्थितम् ।
अदृश्यरूपं प्रसमीक्ष्य रञ्जिता
प्रसन्नतापूर्वकमाश्लिषत् पतिम् ॥३६॥
अवर्ष्मरूपो ह्यपि वर्ष्मकार्यकृत्
कामो भवत्या विहितस्ततो ह्यसौ ।
तवाज्ञया व्याप्तिमगाच्छिवापतौ
स्कन्दोऽभवच्छैलसुतासुयोगतः ॥३७॥
स्थूलस्य कामस्य जयस्य कर्ता
शंभुस्वरूपो भवतीति बोध्यः ।
सूक्ष्मस्य कामस्य जयस्य कर्ता
लक्ष्मीस्वरूपो भवतीति बोध्यः ॥३८॥
कुवासनाऽनंगजयस्य कर्ता नारायणश्चोर्ध्वगतिर्हि बोध्यः ।
एवं त्वया बोधितमेव सर्वेभ्यो नः परेशेश्वरि मुक्तये नः ॥३९॥
इतिस्तुत्वा पूजयित्वा निषेदुर्हृष्टमानसाः ।
उत्सवं तन्निमित्तं च चक्रुः सर्वे रणाजिरे ॥४०॥
तद्राज्यं ललितालक्ष्मीर्ददौ रतीश्वराय च ।
कामरूपः स्वयं कामो भूत्वा राज्यं चकार ह ॥४१॥
नवलक्षाधिपो जातः कामो रतिपतिः प्रभुः ।
प्रीतिमान् श्रीमहालक्ष्मीभक्तो नारायणानुगः ॥४२॥
स मयाऽद्य धृतो लक्ष्मि भवतीनां प्रतुष्टये ।
दिव्यो मे भक्त एवाऽसौ मुक्तो वै वर्तते गुणः ॥४३॥
सत्यकामस्वरूपोऽसौ ब्रह्मप्रियासुखप्रदः ।
अनन्तरूपमापन्नः सगुणोऽपि त्रिलोकिषु ॥४४॥
व्यापको वर्तते लक्ष्मि कृपया ते रतीश्वरः ।
अथ देवाश्च पितरो महात्मानो महर्षयः ॥४५॥

ययुः सर्वे निजान् लोकान् महालक्ष्मीः सदासिका ।
महावैकुण्ठरूपायां काञ्चीपुर्यां सदाऽवसत् ॥४६॥
द्वितीयेन स्वरूपेण महाविष्णोर्गृहं ययौ ।
तृतीयेन स्वरूपेण कंभराश्रीर्हि वर्तते ॥४७॥
चतुर्थेन स्वरूपेण गजानना प्रवर्तते ।
श्रीललिताऽभिधा सैषा सौराष्ट्रेऽनुभविष्यति ॥४८॥
अनन्ता ह्यवताराश्च भविष्यन्ति ततः परम् ।
अगम्याश्चाप्यवर्ण्याश्च दिव्या मोक्षप्रदाः सदा ॥४९॥
अनादिनी महाशक्तिर्ब्राह्मी श्रीपुरुषोत्तमी ।
शेयं माता कम्भरा मे महालक्ष्मीः प्रविद्यते ॥५०॥
श्वश्रूं तां सेवय लक्ष्मि मोक्षदां भुक्तिदां सदा ।
प्रसेवेऽहं सदा तां च नमामि मातरं मुहुः ॥५१॥
मातृसेवापराणां न गतिर्दुष्टा भवेत् क्वचित् ।
मातृसेवा महाविघ्नदैत्यनाशनकारिणी ॥५२॥
शृणु लक्ष्मि तथाऽन्यत्र मन्दिराणि शुभानि वै ।
महालक्ष्म्या मम मातुर्ललिताया वदामि ते ॥५३॥
यत्र षोडशधा भिन्ना निवासं प्रकरोति सा ।
रचितानि समस्तानि मयेन विश्वकर्मणा ॥५४॥
मेरौ तथा च निषधे हेमकूटे हिमाचले ।
गन्धमादे च नीलाद्रौ मेषाद्रौ शृंगपर्वते ॥५५॥
महेन्द्रे चेति भौमानि मन्दिराणि शुभानि वै ।
नवैतानि तु तीर्थानि मोक्षदानि हि सन्ति तु ॥५६॥
औदकानि तु चान्यानि सप्तसिन्धुगतानि वै ।
लवणे चैक्षवे सौरे घार्ते दाध्ने च पायसे ॥५७॥
मिष्टे चेति समुद्रे वै मन्दिराणि भवन्ति हि ।
रत्नहीरकमणिभिः सन्नद्धानि भवन्ति हि ॥५८॥
विशालानि चोच्छ्रितानि महोद्यानयुतानि वै ।
पारेसहस्रास्तरवः सदापुष्पाः सदाफलाः ॥५९॥
सदापल्लवशोभाढ्याः सदा सौरभसंकुलाः ।
नानाऋतुसमाविष्टा लक्ष्म्याः शृंगारहेतवः ॥६०॥
अमृतं स्यान्मधुरसः पुष्पाणि च विभूषणम् ।
पीताम्बराणि दिव्यानि प्रवालान्येव तानि च ॥६१॥
एतादृशाः कल्पवृक्षा मन्दिराग्रे भवन्ति च ।
कल्पवाप्यः कल्पशाला हरिचन्दनवाटिकाः ॥६२॥
मन्दारद्रुमवाट्यश्च पारिजातादिवाटिकाः ।
कदम्बतरुवाटयश्च भवन्ति दिव्यशर्कराः ॥६३॥
चिन्तामणिगृहाण्यत्र महालक्ष्म्या भवन्ति तु ।
मातंगो वै पुरा लक्ष्मि ! महर्षिर्भक्तिसेवकः ॥६४॥
उपासनां महालक्ष्म्याश्चक्रे तापसधर्मवान् ।
महालक्ष्मीः प्रसन्नाऽस्मै ददौ संकल्पसिद्धिकाः ॥६५॥
तुष्टाव गोचरां लक्ष्मीं हर्षितो भक्तिसम्प्लुतः ।
मातस्त्वत्स्मृतिमात्रेण सर्वाश्च मम सिद्धयः ॥६६॥
जाता एवाऽणिमाद्यास्ताः सर्वाश्चान्या विभूतयः ।
प्रापणीयं न मे किञ्चिदस्ति वै भुवनत्रये ॥६७॥
किन्तु नित्यं दर्शनं मे यथा स्यात् तत्तथा कुरु ।
इत्युक्ता च महालक्ष्मीः स्वप्ने मातंगयोषिते ॥६८॥
तापिच्छमञ्जरीमेकां ददौ कर्णाऽवतंसतः ।
सिद्धिमती च सा पत्नी गर्भवती ततोऽभवत् ॥६९॥
विष्णुश्यामेति सा पुत्री **श्यामा** सा नामधारिणी ।
अभवत् सिद्धिमत्यास्तु गर्भाज्जन्मवती हि सा ॥७०॥
ततः श्यामा महालक्ष्मीं समुपास्य विराजते ।
महालक्ष्म्याः सन्निधौ वै सेवायां सर्वदा सखी ॥७१॥
तया प्रसेव्यमाना सा सश्यामा वैष्णवी मता ।
**घनश्यामा** द्वितीयाऽपि सेविका वर्तते तथा ॥७२॥
**मेघपुत्री** चाम्बराद् वै महालक्ष्मीं प्रसेवते ।
ता ललिताऽर्हणध्यानजपस्तोत्रपरायणाः ॥७३॥
मधुश्रीर्माधवश्चोपासेते पारमेश्वरीम् ।
शुक्रश्रीश्च शुचिश्रीश्चोपासेते पारमेश्वरीम् ॥७४॥
नभःश्रीश्च नभस्यश्रीरुपासेते परेश्वरीम् ।
इषश्रीश्च तथोर्जश्रीरुपासेते परेश्वरीम् ॥७५॥
सहःश्रीश्च सहस्यश्रीरुपासेते परेश्वरीम् ।
तपःश्रीश्च तपस्यश्रीरुपासेते परेश्वरीम् ॥७६॥
वासन्तशक्तयो लक्ष्म्यः सेवन्ते पारमेश्वरीम् ।
ललितापूजनध्यानजपस्तोत्रपरायणाः ॥७७॥
ललितायां भक्तियुक्ता वर्तन्ते दिव्ययोषितः ।
सुदिव्याः पक्षिणस्तत्र पार्षदाः सिद्धिसेविताः ॥७८॥
ललितामन्त्रजसारो ललिताऽऽज्ञापराः सदा ।
चारण्यश्चारणाश्चापि वर्तन्ते देवकोटयः ॥७९॥
गायन्ति ललितादेव्या गीतिबन्धान् मुहुर्मुहुः ।
गन्धर्वाऽप्सरसां वृन्दा गायन्ति वल्लकीस्वनैः ॥८०॥
सुकुमारस्वरूपाश्च श्रीलक्ष्मीभक्तिशालिनः ।
योगिनश्चापि योगिन्यो वैष्णव्यो भक्तिसंभृताः ॥८१॥
सेवन्ते ललितालक्ष्मीं ध्यायन्त्यपि यथायथम् ।
स्वसौभाग्यविवृद्ध्यर्थं प्रजपन्ति च तन्मनुम् ॥८२॥
किन्नराः किम्पुरुषाश्च किन्नर्यादियुताः सदा ।
नृत्यन्तश्चापि गायन्तः सेवन्ते पुरुषोत्तमीम् ॥८३॥

ललितापरमेश्वर्या भक्ता ये मानवोत्तमाः ।
दिव्यदेहाः प्रसेवन्ते श्रीलक्ष्मीं मातरं सदा ॥८४॥
पातालवासिनो ये ये श्रीलक्ष्म्यर्चनसाधकाः ।
ते सिद्धमूर्तयस्तत्र वसन्ति सुखभोगिनः ॥८५॥
ललितामन्त्रजप्तारो ललिताशास्त्रदीक्षिताः ।
ललितापूजकास्तेषु श्रीनगरेषु सन्ति हि ॥८६॥
तत्र ये ज्ञानिनो भक्ता महालक्ष्मीपरायणाः ।
भक्ताढ्या ब्रह्मरूपाश्च ते विशन्त्याक्षरं पदम् ॥८७॥
जयाऽऽख्या ललिताज्येष्ठा नयत्येवाऽक्षरं पदम् ।
अनादिश्रीकृष्णनारायणाग्रे संवसन्ति ते ॥८८॥
देवलोकनिवासाश्च सस्त्रीकाः श्रीपुरोत्तमे ।
वसन्ति भक्तिसम्पन्नाः श्रीलक्ष्मीनामजापकाः ॥८९॥
सिद्धा दिव्यर्षयश्चापि पवनाभ्यासिनोऽपरे ।
मारुताश्च दिव्यमुक्ताः सेवन्ते पारमेश्वरीम् ॥९०॥
निधयः ऋद्धयश्चापि भूतयश्च विभूतयः ।
दिव्या वसन्ति तत्रैव सेवन्ते पुरुषोत्तमीम् ॥९१॥
कामदुघाश्च वै बह्व्यो दुग्धप्रणिधिगर्विताः ।
ललिताप्रीतिनिरताः सेवन्ते ललितेश्वरीम् ॥९२॥
रुद्राण्यश्च तथा रुद्राः सर्वाभरणभूषिताः ।
परिवाराश्च रुद्रस्य सेवन्ते ललितेश्वरीम् ॥९३॥
ते सर्वे सुमहात्मानो वैष्णवोत्तमविग्रहाः ।
श्रीदेव्या ध्याननिष्णाताः श्रीलक्ष्मीमन्त्रजापिनः ॥९४॥
श्रीलक्ष्म्याश्च महाभक्ताः सेवन्ते पुरुषोत्तमीम् ।
शतरुद्रा भक्तियुक्ताः सेवन्ते दिव्यवैष्णवाः ॥९५॥
अर्यमा विश्वसृट् सर्वमुनियुक्तश्च सेवते ।
मरीच्याद्याः प्रसेवन्ते ललिताश्रीं परेश्वरीम् ॥९६॥
विद्याः सर्वाश्चोपविद्याः सेवन्ते तां सहस्रशः ।
कलाः सर्वाः कुमार्यश्च सेवन्ते मां परेश्वरीम् ॥९७॥
श्रीपतिर्वै तथा विष्णुः सेवते तां सनातनः ।
चतुर्धा दशधा चैव तथा द्वादशधा प्रभुः ॥९८॥
विभिन्नमूर्तिः सततं सेवते माधवः सदा ।
दशावतारदेवाश्च तां तु माणिक्यमण्डपे ॥९९॥
शंखचक्रगदापद्मभ्राः सेवन्ते परेश्वरीम् ।
नारायणः केशवश्च गोविन्दो माधवस्तथा ॥१००॥
सेवन्ते श्रीमहालक्ष्मीं ललितां मातरं सतीम् ।
आगमा मूर्तिमन्तश्च सेवन्ते श्रीपरेश्वरीम् ॥१०१॥
सर्वज्ञश्च महादेवः सत्या समं प्रसेवते ।
ग्रहराशिगणाः सर्वे नक्षत्राण्यपि तारकाः ॥१०२॥
तैजस्यः शक्तयश्चाप्युपासते परमेश्वरीम् ।
चन्द्रो नक्षत्रसहितश्चोपास्ते परमेश्वरीम् ॥१०३॥
ललिताया जपैर्ध्यानैः स्तोत्रैः पूजाशतैरपि ।
अश्विन्यादियुतश्चन्द्रः सेवते परमेश्वरीम् ॥१०४॥
शृंगारकमलाश्चान्या नानाभूषणभूषिताः ।
उपासते महालक्ष्मीं ललिताश्रीं वरांवदाः ॥१०५॥
वह्निर्निजांगनायुक्तः सेवते परमेश्वरीम् ।
धूम्रार्चिरुष्णा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ॥१०६॥
सुश्रीः सुरूपा कपिला हव्यकव्यवहाः स्त्रियः ।
सेवन्ते वह्नियुक्तास्ता महालक्ष्मीं परेश्वरीम् ॥१०७॥
सूर्यश्च तपिनी तापी धूम्रा ज्वाला रुचिः क्षमा ।
सुषुम्णा बोधिनी भोगा मरीचिर्धारिणी तथा ॥१०८॥
विश्वेतिद्वादशशक्तिसहितः सेवते तु ताम् ।
चन्द्रकला अमृता मानदा पूष्णा रतिर्धृतिः ॥१०९॥
तुष्टिः पुष्टिश्चन्द्रिका श्रीः कान्तिर्ज्योत्स्नाऽङ्गदा शशा ।
प्रीतिः पूर्णाऽमृता पूर्णा सेवन्ते परमेश्वरीम् ॥११०॥
पुष्टिः ऋद्धिः स्थितिर्मेधा कान्तिर्लक्ष्मीर्द्युतिर्धृतिः ।
जरा सिद्धिरिति ब्रह्मकलाः सेवन्त ईश्वरीम् ॥१११॥
स्थितिश्च पालिनी शान्तिश्चेश्वरी कामिका ततिः ।
वरदा ह्लादिनी प्रीतिर्दीर्घा चेति हरेः कलाः ॥११२॥
विष्णुना सह सेवन्ते श्रीलक्ष्मीं ललितां सदा ।
तीक्ष्णा रौद्री भया निद्रा तन्द्रा क्षुत् क्रोधिनी त्रपा ॥११३॥
उत्कारी मृत्युरित्येता रौद्र्यः कला हरान्विताः ।
सेवन्ते श्रीमहालक्ष्मीललितां कम्भरासतीम् ॥११४॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च दीपिका ।
इन्दिरा रोचिका मुक्ता परा सूक्ष्माऽमृता कला ॥११५॥
ज्ञाना व्यासा व्योमिका व्याधिनी षोडश चारिकाः ।
सेवन्ते तां महालक्ष्मीं मातरं पुरुषोत्तमीम् ॥११६॥
इत्येवं श्रीपुरे मातुः सेविकाः कथितास्तव ।
नामश्रुतेः पापहानिर्मोक्षो भक्तिमतो भवेत् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने श्रीललितामहालक्ष्म्या विजयनिमित्तपूजनं महालक्ष्मीस्तोत्रं, विजेत्रीणां पारितोषिकादि, कामरूपाणि, महालक्ष्म्याः षोडशमन्दिराणि, तत्रत्यशोभा, शक्तिसेवेत्यादि-निरूपणनामा अष्टादशाधिकशत-तमोऽध्यायः ॥ ११८ ॥

श्रीपुरुषोत्तम उवाच—

तथा श्रीललितालक्ष्मीः पूज्यते शक्तिभिः सदा।
सेव्यते शक्तिशक्ताद्यैर्नित्यं रमे समन्ततः ॥ १ ॥
पूजां कुर्वन्ति सततं दासिकाः शिष्यिकाश्च ताः।
पुत्रिकाः स्वात्मिकाः सर्वा भिन्नरूपव्यवस्थिताः ॥ २ ॥
गायत्री च गणेशो च महागणपतिस्तथा।
सम्पदेशी तथा कालसंकर्षिणी महारमाम् ॥ ३ ॥
श्रीमहाशंभुनाथा चोपासते च पराम्बिका।
अन्नपूर्णा पादुकाश्रीर्महापद्मा वराहिणी ॥ ४ ॥
तिरस्करणी श्रीपूर्तिः श्रीपादा समुपासते।
रश्मिमाला मन्त्रिनाथा दण्डनाथा ह्युपासते ॥ ५ ॥
चिन्तामणिगृहे सर्वा ललिताश्रीमुपासते।
अणिमा महिमा चापि लघिमा गरिमाऽपि च ॥ ६ ॥
ईशिता च वशिता च मुक्तिः प्राकामिता तथा।
इच्छा प्राप्तिः सर्वकामा उपासते महारमाम् ॥ ७ ॥
रससिद्धिर्मोक्षसिद्धिर्बलसिद्धिस्तथा शुभाः।
खड्गसिद्धिः पादसिद्धिरञ्जनासिद्धिरित्यपि ॥ ८ ॥
वाक्सिद्धिर्लोकसिद्धिश्च देहसिद्धिरुपासते।
कोटिशस्तास्तथा चान्या निकटस्थाश्च सिद्धयः ॥ ९ ॥
ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा।
वाराही चापि माहेन्द्री चामुण्डा श्रीरुपासते ॥१०॥
क्षोभिणी द्राविणी चाकर्षिणी संवशिनी तथा।
उन्मादिनी महांकुशा खेचरी बीजिका तथा ॥११॥
त्रिखण्डा च महालक्ष्मीरुपासते सुमुद्रिताः।
त्रिपुरा नायिका चापि पालिनी क्षोभणा तथा ॥१२॥
कामाकर्षणिका बुद्ध्याकर्षणिका तथाऽपरा।
रसाकर्षणिका तद्वद् गन्धाकर्षणिकाऽपरा ॥१३॥
चित्ताकर्षणिका तद्वद् धैर्याकर्षणिका तथा।
स्मृत्याकर्षणिका चापि नामाकर्षणिका कला ॥१४॥
बीजाकर्षणिका तद्वच्चार्थाकर्षणिका ह्यपि।
अमृतावर्षिणी चापि शरीराकर्षिणी तथा ॥१५॥
एतास्तु दिव्ययोगिन्यः सर्वाशापूरिका शुभाः।
पालिका द्राविका मुद्रा नवतारुण्यगर्विताः ॥१६॥
अत्यन्तसुन्दराकारा दिव्यसम्पत्तिदेवताः।
उपासते महालक्ष्मीं ललितापरमेश्वरीम् ॥१७॥
कुसुमा मेखला चापि मदना मदनातुरा।
रेखा वेगिन्यंकुशा च मालिनी सुन्दरी तथा ॥१८॥
ह्लादिनी जृंभिणी वशंकरी रञ्जनकारिणी।
उन्मादिनी चार्थकरी सम्पत्पूरा च मन्त्रिणी ॥१९॥
सम्प्रदाया रक्षिका च सेवन्ते परमेश्वरीम्।
सिद्धिदा सम्पत्प्रदा च प्रियंकरी च मंगला ॥२०॥
कामदा दुःखहा मृत्युहरा विघ्नहरा तथा।
सौभाग्यदा च सर्वज्ञा शक्तिनी ज्ञानरूपिणी ॥२१॥
ऐश्वर्यदा व्याधिहा च महाधारा च पापहा।
आनन्दिनी रक्षिणी चेप्सितदा गर्वहा तथा ॥२२॥
मालिनी चेति सर्वास्ताः सेवन्ते ललितेश्वरीम्।
वशिनी कामिनीशा च मोदिनी विमला तथा ॥२३॥
वाग्धारा जयिनी चापि कौलिनी च तथैश्वरी।
एताः सर्वाः सरस्वत्य उपासते परेश्वरीम् ॥२४॥
सिद्धा च खेचरी कामेश्वरी बाणेश्वरी तथा।
वज्रिका च शतघ्नी च भूशुण्डी मुशली तथा ॥२५॥
कृपाणिका पट्टिशा च मुद्गरी भिन्दिपालिका।
एता आयुधिका देव्य उपासते परेश्वरीम् ॥२६॥
कामेशी चापि वज्रेशी भगमाला च मित्रिका।
षोडशिका च गोचर्या सेवन्ते परमेश्वरीम् ॥२७॥
भेरुण्डा वह्निवासा च वज्रीशा कुलसुन्दरी।
विजया नीलपताका ज्वालामाला सुमंगला ॥२८॥
सेवते जगतामृद्ध्यै ललितां चित्स्वरूपिणीम्।
हृद्देवी च शिरोदेवी शिखादेवी तथैव च ॥२९॥
वर्मदेवी दृष्टिदेवी शस्त्रदेवी सुमूर्तयः।
ललिताज्ञाप्रवर्तिन्यः सेवन्ते बिन्दुनादजाः ॥३०॥
अथ श्रीललितादेव्याः पञ्चब्रह्ममये शये।
मञ्चे पादास्तु चत्वारो व्यूहरूपा भवन्ति हि ॥३१॥
महालक्ष्म्याः कृपया ते देवतात्वमुपागताः।
ब्रह्मविष्णुमहेशानेश्वररूपत्वयोगिनः ॥३२॥
एते पादा मूर्तरूपाः पूरुषा हेतिधारिणः।
श्रीध्यानमिलिताक्षाश्च श्रीध्याननिश्चलांगिनः ॥३३॥
तत्र शेते महालक्ष्मीर्ब्रह्मेशी ललितेश्वरी।
सोपानानि भवन्त्यस्य मञ्चस्य मूर्तिमन्ति वै ॥३४॥
भूमिरापोऽनलो वायुराकाशो गन्ध इत्यपि।
रसो रूपं स्पर्शशब्दोपस्थापायुपदानि च ॥३५॥
पाणिवाग्घ्राणजिह्वाश्च त्वक् चक्षुः श्रोत्रमित्यपि।
अहंकारश्च बुद्धिश्च मनः प्रकृतिपूरुषौ ॥३६॥
नियतिः कालरागौ च कला विद्या च मायिनी।
पूषा चेति प्रसेवन्ते ललितां परमेश्वरीम् ॥३७॥

अथ मञ्चे वर्तते वै हंसतुलिकतल्पिका ।
परमहंसमूर्द्धोपधानयुक्ता शुभाश्रया ॥३८॥
सेवापादोपधानाढ्या प्रमोत्तरच्छदान्विता ।
सर्ववेदांगरज्ज्वाढ्या शान्तिपार्श्वोपधानिका ॥३९॥

एतस्यां श्रीमहालक्ष्मीर्महाविष्णुसमन्विता ।
विराजते पतिं नैजं सेवते ललितेश्वरी ॥४०॥
दयालुं षोडशवर्षं शृंगारवेषशोभितम् ।
उद्यद्भास्करतुल्याभं गन्धसारातिगन्धितम् ॥४१॥

हारकेयूरमुकुटकटकाद्यैरलंकृतम् ।
कमनीयस्मितं ज्योत्स्नापूर्णाननं सुशोभनम् ॥४२॥
सेवमाना महालक्ष्मीस्तरुण्यादित्यभासुरा ।
सदा चतुर्दशाब्दा च नवयौवनदर्पिता ॥४३॥
अमृष्टपद्मरागाभा चन्दनाञ्जनखच्छरा ।
यावकश्रीनिर्व्यपेक्षा पादलौहित्यवाहिनी ॥४४॥

कलनिःस्वानमञ्जीरपतत्कंकणमोहिनी ।
अनंगवरतूणीरदर्पोन्मथनजंघिका ॥४५॥
करिशुण्डदोःकदलीकान्तितुल्योरुशोभना ।
रशनाकटिशोभाढ्या जघनाभोगभासुरा ॥४६॥
रत्नकाञ्चीयुता निम्ननाभित्रिवलिशोभिता ।
स्तनकुड्मलमौक्तिकपीवरोरःस्थलान्विता ॥४७॥
अलक्तकामचतुर्दोःशोभमानाऽतिभासुरा ।
केयूरकंकणांऽगुलीयकोर्मिकादिशोभिता ॥४८॥

मुखदर्पणवृत्ताभचिबुका लाटपाधरा ।
कुन्दकुड्मललक्ष्मीकैर्दन्तैर्दर्शितविद्यिका ॥४९॥
पद्मायतप्रान्तभागरक्तपद्माभनेत्रिका । ।
तन्तिकाललिते भाले सम्यक्क्लृप्ताऽलकच्छटा ॥५०॥
फुल्लाऽवतंसमाणिक्यकुण्डलाऽऽमण्डितश्रुतिः ।
नवकर्पूरकस्तूरीसदामोदितवीटिका ॥५१॥
शरच्चन्द्रनिशानाथमण्डलीमधुरानना ।
चिन्तामणीनां सारैश्च क्लृप्तचारुकिरीटिका ॥५२॥
स्फुरत्तिलकमध्यस्थभालचन्द्रविराजिता ।
वक्रचञ्चत्सुनिबिडश्यामकुन्तलसंहतिः ॥५३॥
सीमन्तरेखाविन्यस्तसिन्दूरश्रेणिशोभिता ।
सर्वशृंगारवेषाढ्या सर्वाभरणभूषिता ॥५४॥
दिव्यातिदिव्यावयवा हर्षानन्दविवर्धिनी ।
समस्तलोकमाता सा महालक्ष्मीः परेश्वरी ॥५५॥
सेवते स्वपतिं मञ्चे सेव्यते सर्वशक्तिभिः ।
यस्याः सेवनमात्रेण सर्वदेवार्हणं भवेत् ॥५६॥

तस्या वै ललितादेव्या गुणानुवर्णनं रमे ! ।
कल्पकोटिसहस्रैश्च कर्तुं नैव हि शक्यते ॥५७॥
एतादृशं ललितायाः श्रीपुरं वर्तते रमे ! ।
शृण्वन्ति तत् कथयन्ति तेऽपि यान्ति परां गतिम् ॥५८॥
कृत्वा शिल्पिजनैर्दिव्यं महालक्ष्म्याः सुमन्दिरम् ।
सर्वशक्तियुतं भक्तो याति तत्परमं पदम् ॥५९॥
एवमन्यनगराणि यत्र देव्यश्च देवताः ।
वसन्ति चापि सेवन्ते ललितां परमेश्वरीम् ॥६०॥

अनादिश्रीमहालक्ष्मीं कम्भराश्रीपरेश्वरीम् ।
श्रीमद्गोपालकृष्णस्य महाविष्णोः प्रियां सतीम् ॥६१॥
मातरं मे तव श्वश्रूं प्रेमर्षेः शुभपुत्रिकाम् ।
सर्वकल्याणकर्त्रीं श्रीकुंकुमवापिकेश्वरीम् ॥६२॥
भज त्वं शिवराज्ञीश्रि ! नारायणि ! प्रसूं मम ।
पारमेशीं दिव्यवाञ्छां परब्रह्मगतां शुभाम् ॥६३॥
अमूर्तां तां समूर्तां वै जप तन्मन्त्रमुत्तमम् ।
यन्त्रं पूजय कृष्णेशि भुक्तिसम्पत्प्रमोक्षदम् ॥६४॥

**श्रीनारायणीश्रीरुवाच —**

कस्य मन्त्रस्य तस्यास्तु जपो विधिश्च कीदृशः ।
वद मे भगवन्नेतत् सर्वलोकाभिकांक्षितम् ॥६५॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं पदार्थाः शब्दबोधिताः ।
नित्यशब्दात्मको वेदो मन्त्रास्तत्रोत्तमा मताः ॥६६॥
श्रेष्ठास्तत्र हरेर्मन्त्रा लक्ष्मीमन्त्रा सदोत्तमाः ।
दुर्गायाश्च गणेशस्य रवेः शंभोर्विभावसोः ॥६७॥
मन्त्राणां चोत्तमा मन्त्रा महालक्ष्म्या भवन्ति हि ।
श्यामायाः कम्भराया वै वदामि ते निबोध माम् ॥६८॥
प्रातरुत्थाय मां नत्वा स्नात्वा शुभासनस्थिता ।
स्मर स्वमस्तके लक्ष्मि दिव्यं कमलमुज्ज्वलम् ॥६९॥
सहस्रपत्रशोभाढ्यं सकेशरसकर्णिकम् ।
तत्र श्रीसद्गुरुं ध्यात्वा प्रसन्नं करुणामयम् ॥७०॥
श्रीमद्गोपालकृष्णाख्यं पितरं सद्गुरुं परम् ।
आचम्य चोर्ध्वपुण्ड्रं सचन्द्रं कृत्वा ततः परम् ॥७१॥
स्कन्धे कृत्वा पट्टकं च हृदि धृत्वा परेश्वरीम् ।
अन्तःशुद्धिमती भूत्वा सन्ध्यावन्दनमाचर ॥७२॥
अश्वत्थपत्राकारेण पात्रेण सकुशाक्षतम् ।
सपुष्पचन्दनं चार्घ्यं महालक्ष्म्यै प्रदेहि तत् ॥७३॥

त्रिरर्घ्यं सम्प्रदायाऽथ तर्पयित्वा जलेन च ।
होमभूमिं प्रगत्वैव सर्वशृङ्गारशोभिता ॥७४॥
सर्वपूजादिसामग्रीसहिता चासनस्थिता ।
अंगन्यासान् कुरु लक्ष्मि तान्निबोध मयोदितान् ॥७५॥
'ओमनादिपरब्रह्मैश्वर्यै शिरसि मे नमः ।
ओमनादिकृष्णनारायण्यै भाले च मे नमः ॥७६॥
ओमनादिवासुदेवीलक्ष्म्यै मे नेत्रयोर्नमः ।
ओमनादिब्रह्मलक्ष्म्यै मुखे मे ते नमो नमः ॥७७॥
ओमनादिकंभरालक्ष्म्यै च कण्ठेऽस्तु मे नमः ।
ओमनादिमहालक्ष्म्यै हृदये मे च ते नमः ॥७८॥
ओमनादिश्रीनरायण्यै नमस्ते ममोदरे ।
ओमनादिवैष्णव्यै ते नाभौ मम नमो नमः ॥७९॥
ओमनादिललितायै जघने ते च मे नमः ।
ओमनादिश्रियै चाऽस्तु नमः सक्थ्नोश्च मे सदा ॥८०॥
ओमनादिकमलायै नमो जान्वोश्च मेऽस्तु ते ।
ओमनादिरमायै ते नमोऽस्तु पादयोर्मम ॥८१॥
ओमनादिहरिण्यै ते करयोर्मे नमोऽस्तु ते ।
ओमनादिमहामात्रे सर्वतस्ते नमो नमः ॥८२॥
ओमनादिपद्मायै द्विहस्ततलयोस्ते नमः ।
ओमनादिरक्षित्र्यै ते पृष्ठदेशे नमो नमः ॥८३॥
ओमनादिहिरण्यायै रम्यांगेषु च ते नमः ।
ओमनादिसुवर्णायै भाग्यरेखासु ते नमः ॥८४॥
ओमनादिकुमार्यै ते शीलधर्मे नमो नमः ।
ओमनादिजनन्यै ते सर्वांगेषु नमो नमः' ॥८५॥

एवं न्यासान् विनिर्वर्त्य ध्यायस्व श्रीपुराधिपाम् ।
ध्यायस्व श्रीपुरं चापि श्रीपुरेशीश्वरं च माम् ॥८६॥
सुवर्णनिर्मितां मूर्तिमावाहय ततः परम् ।
आसनं सम्प्रदेहि त्वं पाद्यमर्घ्यं ततः परम् ॥८७॥
आचमनं जलं पञ्चामृतस्नानं प्रकारय ।
सुगन्धितैलसाराद्यैः प्रमर्दय परेश्वरीम् ॥८८॥
आभिषेकं कारयित्वा वस्त्रभूषार्पणं कुरु ।
सर्वं शृंगारं सौभाग्योत्तमं धूपं प्रदीपकम् ॥८९॥

नमस्कारं दण्डवच्चाऽऽरात्रिकं च प्रदक्षिणम् ।
नैवेद्यं विविधं भोज्यं भक्ष्यं चोष्यं च लेह्यकम् ॥९०॥
जलं शाकादि वै पेयं दुग्धसारं च पायसम् ।
जलपानं नागवल्लीदलताम्बूलकं फलम् ॥९१॥
प्रदेहि श्रीमहालक्ष्म्यै क्षमापराधनं वृणु ।
पुष्पाञ्जलिं परिहारं कृत्वा स्वोद्यममाचर ॥९२॥

ततश्च तुलसीमालां धृत्वा मन्त्रं जप प्रिये ।
महालक्ष्म्या महामन्त्रं जप लक्ष्मि मम प्रियम् ॥९३॥
सर्वार्थसाधकं सर्वानर्थानां नाशकं प्रभुम् ।
उदङ्मुखा प्राङ्मुखा वा जपश्रीसन्निधौ सदा ॥९४॥
"ओं महालक्ष्म्यै विद्महे महाविष्णुपत्न्यै धीमहि ।
तन्नो महालक्ष्मीः प्रचोदयात् ।
ओं श्रीं महालक्ष्म्यै नमः ओं ह्रीं क्लीं श्रीं फट् स्वाहा" ॥९५॥

षट्त्रिंशल्लक्षसंख्यास्तु जपन् सिद्धिर्भविष्यति ।
तद्दशांशस्तु होमः स्यात् तद्दशांशं तु तर्पणम् ॥९६॥
तद्दशांशं तु भक्तानां भोजनं समुपाचर ।
एवं मन्त्रो भवेत् सिद्धः काम्यजपांस्ततः कुरु ॥९७॥
लक्षमात्रं जपित्वा तु मनुष्यान् वशमानयेत् ।
नारीर्द्विलक्षजाप्येन त्रिलक्षैस्तु नृपांस्तथा ॥९८॥
चतुर्लक्षैर्नागकन्याः पातालस्त्रीस्तु पञ्चभिः ।
षड्लक्षैर्भूसुन्दरीश्च सुराणीः सप्तलक्षकैः ॥९९॥
अष्टलक्षैर्देवताश्च गीर्वाणान्नवलक्षकैः ।
दशलक्षैश्च वै पितॄन्नेकादशैः सुरेश्वरान् ॥१००॥
द्वादशलक्षजापैश्च सिद्धीर्वशा नयेत्तथा ।
लक्ष्मीवान् धनवान् स्याच्च स्मृद्धिमान् स भवेत्तथा ॥१०१॥

यथेष्टं लभते सर्वमैश्वर्यं दैवतं तथा ।
ध्यायन्तस्तां जपन्तस्तां लभन्ते महतीं श्रियम् ॥१०२॥
सम्प्राप्यते सिद्धिरेषा नाऽसद्भिस्तु कदाचन ।
यैस्तु तप्तं तपस्तीव्रं तैरियं प्राप्यते जनैः ॥१०३॥

वंशोऽपि यस्य कस्य स्यान्मनुज्ञो जापको जनः ।
तद्वंश्याः सर्वं एव स्युर्मुक्तास्तृप्ताश्च योगिनः ॥१०४॥
परमात्मेयमेवाऽस्ति समन्त्रा ललिता रमे ।
इयमेव महत्तीर्थं सन्तो ध्यायन्ति तां सदा ॥१०५॥

कुचारित्रैर्निन्दकैश्च भावहीनैर्न लभ्यते ।
कामाक्षी वैष्णवी महालक्ष्मीः श्रीललितेश्वरी ॥१०६॥
परब्रह्मलालनाद्वै ललिता सुविलासिनी ।
महाविष्णोर्लालिनी सा जयत्येव प्रसूर्मम ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
चिन्तामणिगृहस्थितदिव्यब्राह्मीसेविकादिकृतसेवनं,
महालक्ष्मीमन्त्रस्तज्जपादिफलं चेत्यादि-
निरूपणनामा नवदशाऽधिक-
शततमोऽध्यायः ॥ ११९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि! महालक्ष्म्या मन्त्रान्तरं वदामि ते।
यदाराधनतो भूयात् साधको भुक्तिमुक्तिमान् ॥ १ ॥
"ओं महालक्ष्मीमहामायामहानारायण्यै कमलवासिन्यै
महाविष्णुप्रियायै नमः, ओं श्रीं ह्रीं क्लीं णीं म्लीं
ष्णीं महामात्रे पुरुषार्थवर्षिण्यै स्वाहा" ॥ २ ॥
पञ्चाशदक्षरं दिव्यं महामन्त्रं जपेत् सदा।
ऋषिर्नारायणश्चाऽहं महालक्ष्मीर्हि देवता ॥ ३ ॥
स्वर्णचम्पकरूपाभां सर्वभूषणभूषिताम्।
कृपाहास्यप्रसन्नास्यां भक्तानुग्रहतत्पराम् ॥ ४ ॥
सर्वैश्वर्यादिसम्पूर्णां सर्वाम्बरविराजिताम्।
कोटिसूर्येन्दुकान्तां च रत्नहारादि बिभ्रतीम् ॥ ५ ॥
कम्भराश्रीमहालक्ष्मीं श्रीमद्गोपालरूपिणीम्।
महाविष्णुमहाशक्तिं ध्यायेच्छ्रीमातरं रमाम् ॥ ६ ॥
जपेन्मन्त्रायुतं मन्त्रलक्षं वाऽथ दशांशतः।
पायसेन हवनं च कुर्याच्छ्रीचन्दनार्चनम् ॥ ७ ॥
स्थापनं पूजनं कुर्यादारात्रिकं निवेदनम्।
जलं ताम्बूलकं दद्यात् क्षमापनं विसर्जनम् ॥ ८ ॥
नवशक्तीः पूजयेच्च महालक्ष्म्याः स्वरूपिणीः।
विभूतिमुन्नतिं कान्तिं सृष्टिं कीर्तिं च सन्नतिम् ॥ ९ ॥
व्युष्टिमुत्कृष्टिमृद्धिं च दक्षिणे तु गजाननम्।
वामे कुसुमधन्वानं पूजयेच्चन्दनादिभिः ॥१०॥
उमां श्रीं भारतीं दुर्गां धरणिं वेदमातरम्।
देवीमुषां चाष्टदिक्षु गंगां यमीं च पूजयेत् ॥११॥
पादपद्मक्षालनायाऽऽनीता अपः प्रपूजयेत्।
शंखपद्मनिधी चाऽर्चेत् पार्श्वयोर्धृतचामरौ ॥१२॥
धृतातपत्रं वरुणं पूजयेत् पश्चिमे तथा।
राशीन्नवग्रहाँश्चापि दिग्गजानर्चयेत्तथा ॥१३॥
लोकपालाँस्तदस्त्राणि पूजयेच्चानले तथा।
दूर्वाभिराज्यसिक्ताभिर्जुहुयादायुषे नरः ॥१४॥
गुडूचीमाज्यसंसिक्तां जुहुयात् सप्तवासरान्।
अष्टोत्तरसहस्रं यः स जीवेत् पूर्णमेव ह ॥१५॥
हुत्वा तिलान् घृताभ्यक्तान् दीर्घमायुष्यमाप्नुयात्।
शालिभिर्जुह्वतो नित्यमष्टोत्तरसहस्रकम् ॥१६॥
अचिरादेव महती लक्ष्मीः सञ्जायते ध्रुवा।
नारीकेलघृताद्यैर्जुहुयात् कुबेरवद् भवेत् ॥१७॥
गुडघृताभ्यां हवनादन्नवान् सम्प्रजायते।
एवं यो भजते लक्ष्मीं कंभरां ललितां श्रियम् ॥१८॥
सम्पदस्तस्य जानन्ते महालक्ष्मीः प्रसीदति।
देहान्ते वैष्णवं धाम लभते पारमेश्वरम् ॥१९॥
श्रीपुरे दिव्यलोके सा माता लक्ष्मीः परेश्वरी।
विविधान् स्वावतारान् हि त्रैलोक्यां कुरुते सदा ॥२०॥
महालक्ष्मीर्महामाया मूलप्रकृतिरीश्वरी।
पारब्राह्मी चाऽक्षरी च परेशी पुरुषोत्तमी ॥२१॥
राधालक्ष्मीश्च गंगा च विरजा च सरस्वती।
सावित्री चाथ गायत्री कमला पद्मिनी रमा ॥२२॥
तुलसी माधवी पद्मा चेत्येवं ख्यायते हि सा।
विष्णुकाञ्च्यां महालक्ष्मीर्ललिता वर्तते सती ॥२३॥
शिवकाञ्च्यां सैव देवी कामेश्वरी शिवप्रिया।
वर्तते परमा पूज्या नैकरूपा हि कंभरा ॥२४॥

श्रीनारायणीश्रीरुवाच—

काञ्चीपुर्याः सुकल्याणी द्वेधा या वर्तते स्वयम्।
महालक्ष्मीः परा शक्तिस्तां द्वेधां दिश मे प्रभो ॥२५॥

श्रीपुरुषोत्तम उवाच—

काञ्चीक्षेत्रे पुरा ब्रह्मा मालक्ष्मीदर्शनाय ह।
आत्मैकध्यानयुक्तश्च तपस्तेपेऽतिदुःसहम् ॥२६॥
पुरस्तस्य प्रादुरासीन्महालक्ष्मीः कराब्जिका।
पद्मासने राजमाना विष्णुना महता सह ॥२७॥
सर्वशृंगारवेषाढ्यां सर्वाभरणभूषिताम्।
आदिलक्ष्मीं प्रवीक्ष्यैव ब्रह्मविष्ण्वीशमातरम् ॥२८॥
कामाक्षीं तां दिव्यदेवीमस्तौषीद् विश्वसृट् स्वयम्।
अनादिश्रीकृष्णनारायणस्य जननीं भुवि ॥२९॥

ब्रह्मोवाच—

जय लक्ष्मि महालक्ष्मि जगन्मातः परेश्वरि।
जय श्रीनाथसहजे जय श्रीसर्वमंगले ॥३०॥
जयश्रीकरुणाराशे जय वैष्णववन्दिते।
जय लोकप्रपूज्ये त्वं लोककर्त्र्यै च ते नमः ॥३१॥
अनन्यभावनाभक्तैर्वेद्यायै ते नमो नमः।
आम्नायमुनिसंघातैर्ज्ञातोक्ता या परेश्वरी ॥३२॥

परब्रह्मस्वरूपायै मात्रे ते वै नमो नमः ।
हृदयस्थे नमस्तुभ्यं साम्राज्यसम्पदीश्वरि ।
वेदा निःश्वसितं ते वै तस्यै मात्रे नमो नमः ॥३३॥
सहस्रशीर्षा देवोऽपि धत्ते यदाज्ञया क्षितिम् ।
सूर्यचन्द्राग्नयो भान्ति यदंशतेजसा सदा ॥३४॥
पञ्चविंशतिरूपायै मात्रे लक्ष्म्यै नमो नमः ।
ईश्वरा अपि यस्यास्ते प्राप्यैश्वर्याणि चेश्वराः ॥३५॥
सर्वात्मनामन्तरस्थां परमानन्दरूपिणीम् ।
श्रीविद्यां श्रीमहालक्ष्मीं त्वां नमामि पुनः पुनः ॥३६॥
सर्वज्ञानात्मिका यूपात्मिका स्वर्णात्मिकाऽसि च ।
तत्त्वोपदेशरूपा च स्मृद्धयात्मा शान्तिवर्षिणी ॥३७॥
देशकालपदार्थात्मा मणिमन्त्रौषधात्मिका ।
धातुतैजसरूपा च तस्यै मात्रै नमो नमः ॥३८॥
कल्याणगुणसम्पन्ना कम्भराभूतिशालिनी ।
कुंकुमवापिकामाता बालकृष्णप्रसूः रमा ॥३९॥
अनादिश्रीकृष्णनारायणांकशोभिताऽव्यया ।
वारंवारं सुराष्ट्रे त्वं समायासि नमोऽस्तु ते ॥४०॥
इतिस्तुता च सा माता सन्तुष्टा वीक्ष्य वेधसम् ।
वृणीष्वेति तदा प्राह ब्रह्माऽपि चार्थयद् वरम् ॥४१॥
मातस्ते दर्शनादद्य कृतकृत्योऽस्मि सर्वथा ।
तथापि लोकरक्षार्थं कामये तत् प्रदेहि मे ॥४२॥
कर्मभूमौ जना मूढाः संसारवासनावृताः ।
तेषां मोक्षार्थमेवात्र भूमौ निवासमाचर ॥४३॥
श्रुत्वाऽऽह वेधसं माता तथाऽस्त्विति तदा रमे ।
ब्रह्माऽपि मन्दिरं शीघ्रं कारयामास सौभगम् ॥४४॥
महालक्ष्म्या समं स्थातुं सस्मार परमेश्वरम् ।
पुण्डरीकाक्षमीशेशेश्वरेश्वरेश्वरेश्वरम् ॥४५॥
सोऽपि साक्षात् समायातः प्रार्थितो ब्रह्मणा तथा ।
निवासार्थं सह लक्ष्म्या तथास्त्विति जगाद सः ॥४६॥
एवं काञ्चनतुल्यायां स्थल्यां शुभे हि मन्दिरे ।
महाविष्णुयुता माता महालक्ष्मीः स्थिताऽभवत् ॥४७॥
अथ ब्रह्मा पुनः प्राह मातः पितः सदाऽत्र वै ।
वैष्णवाश्यो भवद्भक्तः शंकरोऽपि वसत्विह ॥४८॥
वैष्णव्या निजशक्त्याऽऽढ्यश्चेति पूरय कामनाम् ।
तथाऽस्त्विति हरिः प्राह शिवरूपोऽभवद्धरिः ॥४९॥
महालक्ष्मीश्चाऽभवच्च महागौरी महोज्ज्वला ।
सर्वशृंगारशोभाढ्या महालावण्यशेवधिः ॥५०॥
शिवं गौरीं तदा ब्रह्मा नारायणश्च देवताः ।
पुपूजुः परया भक्त्या स्थापयामासुरीश्वरी ॥५१॥
मनसा निर्मितं धात्रा मध्ये नगरमुत्तमम् ।
मन्दिरं च तयोरर्थे शिवकांचीतिसुन्दरम् ॥५२॥
महालक्ष्म्या वायुभागे स्थितवान् शंकरस्तदा ।
अग्निभागे विष्णुरेव ब्रह्माऽव्यक्तो व्यराजत ॥५३॥
आदिर्लक्ष्मीर्महालक्ष्मीर्माता सा श्रीपरेश्वरी ।
का नाम वाणी मा नाम कमला ते ह्युभे ततः ॥५४॥
कामा साऽक्ष्णा तु वामेन पश्यत्येव हरिं प्रभुम् ।
शंकरं दक्षिणेनाऽक्ष्णा पश्यत्येव च वेधसम् ॥५५॥
कामाक्षीति ततः साऽभूत् कथिता देवपुंगवैः ।
तदा गंगायमुनाद्याः सर्वतीर्थाधिदेवताः ॥५६॥
तिस्रः कोट्योऽर्धकोटी च सेवार्थं समुपाययुः ।
तदाऽऽदाय करयोस्तु चामरे श्रीः सरस्वती ॥५७॥
महालक्ष्मीं विजयन्त्यौ स्थिते वै पार्श्वयोः सुखे ।
आदिश्रीनयनोत्पन्ने सर्वशृंगारशोभिते ॥५८॥
एवं स्वमातरं पृष्ठे स्थिता सन्तोषिणी सुता ।
छत्रं स्वर्णमयं धृत्वा राजते दिव्यरूपिणी ॥५९॥
महालक्ष्म्याश्चाज्ञयाऽथ सरस्वती स्वयंप्रभा ।
पश्यतां सर्वदेवानां विधातुर्देहमाविशत् ॥६०॥
इन्दिराश्रीराविशच्च विष्णुदेहे तदाज्ञया ।
एवं गौरी शंकरस्य तदा वर्ष्म समाविशत् ॥६१॥
सन्तुष्टा चाविशन्मातृदेहं ब्रह्मव्रता सदा ।
एवं ता देवतास्तत्र काञ्च्यां वसन्ति पङ्कजे ॥६२॥
ब्रह्मा ततः सुरानाह प्रतिवर्षमिहालये ।
विवाहः सम्प्रकर्तव्यो महागौरीमहेशयोः ॥६३॥
तथा कार्यो विवाहो वै महालक्ष्म्यामहाप्रभोः ।
महोत्सवः प्रकर्तव्यो राजोपचारकैरिह ॥६४॥
विवाहोत्सवकर्तॄणां सौभाग्यं शाश्वतं भवेत् ।
काञ्च्यां कुंकुमवाप्यां वा महोत्सवफलं समम् ॥६५॥
मया कुंकुमवाप्याख्ये क्षेत्रे सौवर्णमन्दिरे ।
स्थापिता मे प्रसूर्माता महालक्ष्मीः परेश्वरी ॥६६॥
सहगोपालकृष्णेन महानारायणेन वै ।
तत्पूजां ये करिष्यन्ति ते यास्यन्ति महत्फलम् ॥६७॥
नैवेद्यं ये धरिष्यन्ति ते यास्यन्ति दिवं सुखम् ।
भक्तिं तयोः करिष्यन्ति ते यास्यन्त्यमृतं पदम् ॥६८॥
श्रीपुरं चैश्वरं धाम महाविष्णोर्महात्मनः ।
इयमेव महालक्ष्मीः श्रीमती परमेश्वरी ॥६९॥

त्रियुगलं ससर्जाऽपि लक्ष्मीविष्णुमयं तथा ।
सावित्रीविश्वसृड्रूपं शिवाशिवस्वरूपकम् ॥७०॥
जया च विजया विद्या सेवन्ते परमेश्वरीम् ।
सम्पत्करी महादेवी सेवते श्रीमतीं सदा ॥७१॥
मन्त्रं जपेत्पूजयेच्च श्रीचक्रं सर्ववस्तुभिः ।
धारितं मनसा सिद्ध्येत् श्रीचक्रस्य प्रपूजनात् ॥७२॥
श्रीचक्रं वै महालक्ष्मीमूर्तिर्गुप्ता न संशयः ।
भक्तो भूत्वाऽखिलं भारमैहिकामुष्मिकात्मकम् ॥७३॥
श्रीदेवतायां निक्षिप्य भवेच्छरणवर्तनः ।
अनुकूलो महालक्ष्म्याः प्रातिकूल्यविवर्जितः ॥७४॥
रक्ष मामिति विश्वस्तः सेवां तु वृणुयात् सदा ।
दीनाधीनो भवेच्चापि मुक्तिं मुक्तिं स विन्दति ॥७५॥
अमानित्वमदंभित्वमहिंसा क्षान्तिरार्जवम् ।
सद्गुरूपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७६॥
इन्द्रियार्थेषु वैराग्यमहंकारविवर्जितः ।
जन्ममृत्युजराव्याधिदुःखदोषानुचिन्तनम् ॥७७॥
असक्तिरनभिष्वंगो मायिकेषु तु वस्तुषु ।
समता तु सुखे दुःखे भक्तिः श्रीललितेश्वरे ॥७८॥
एकान्तशीलता चान्यसंसद्रागविहीनता ।
आध्यात्मिकपरत्वं च परज्ञानाभिमग्नता ॥७९॥
एवं च वर्तयन् भक्त्या महालक्ष्म्याः प्रपत्तिमान् ।
विन्दते परमं मोक्षं भुक्तिं स्वर्गमनुत्तमम् ॥८०॥
श्रीलक्ष्मीदर्शने दीक्षां वदामि शृणु पद्मजे ।
हस्ते श्रीनगरं ध्यात्वा धाम यत्परमं परम् ॥८१॥
महालक्ष्म्या महाविष्णोर्हिरण्मयं सुशोभनम् ।
महालक्ष्म्या जपन्मन्त्रं गुरुः शिष्यतनुं स्पृशेत् ॥८२॥
स्पर्शदीक्षां सर्वपापनाशिनीं पुण्यदायिनीम् ।
दत्वा निमील्य नयने ध्यात्वा श्रीपरमेश्वरीम् ॥८३॥
गुरुः शिष्यं प्रपश्येत् सा दृग्दीक्षा पावनी शुभा ।
गुरोर्दृष्ट्याः स्पर्शनेन भाषणेन च सेवया ॥८४॥
पापनाशो भवेज्ज्ञानं दिव्यदेहो भवेदपि ।
गुरोः प्रसादमासाद्य शिष्यस्तद्रूपवान् भवेत् ॥८५॥
चिरं शुश्रूषता तुष्टो दद्यादाशीर्गुरुर्हि सा ।
दीक्षा तु मानसी प्रोक्ता सर्वार्पणा तदुत्तमा ॥८६॥
शुक्लपक्षे शुभे काले स्नात्वा सन्ध्यामुपास्य च ।
गुरुं नत्वा पवित्रं च मन्दिरं प्रति संव्रजेत् ॥८७॥
आचमनं ततः कृत्वा महालक्ष्मीं प्रपूजयेत् ।
आवाहनासने पाद्यमर्घ्यमाचमनं क्रियात् ॥८८॥
स्नानं पञ्चामृतमयं शुद्धाऽद्भिरभिषेचनम् ।
वस्त्रं विभूषणं गन्धं पुष्पं धूपं च दीपकम् ।
नैवेद्यं सलिलं ताम्बूलकं प्रदक्षिणं स्तुतिम् ॥८९॥
"ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः ओं नमो महालक्ष्म्यै कम्भरायै कामाक्ष्यै ललितायै श्रीचक्रायै महानारायण्यै महापरमेश्वर्यै पूर्णब्रह्ममहाविष्णुपत्न्यै श्रीगोपालकृष्णांगनायै सर्वसम्पत्प्रपूरिण्यै चाऽष्टोत्तरद्विशतमहासामर्थ्यमय्यै ते नमः क एं ईल ह्रीं हस कहल ह्रीं सकल ह्रीं ऐं क्लीं सौः सौः क्लीं ऐं श्रीं स्वाहा ॥९०॥
इतिपुष्पांजलिं दद्यात्ततो गोमयलेपिते ।
भूतले तण्डुलपीठे वारिकुंभं सरत्नकम् ॥९१॥
पञ्चपल्लवसंयुक्तं नारिकेलफलान्वितम् ।
अभ्यर्च्य गन्धपुष्पाद्यैस्ततो मन्त्रं जपेन्मुहुः ॥९२॥
अष्टोत्तरशतं जप्त्वा दीपं प्रदर्श्य वै गुरुः ।
शिष्यं च कारयित्वैव साष्टांगं कुसुमाञ्जलिम् ॥९३॥
प्रार्थनां कारयेत् तत्र मुहुः सर्वेष्टलब्धये ।
परंधाम परंब्रह्म मम त्वं स्वेष्टदेवता ॥९४॥
रक्ष मां सकुटुम्बं त्वं रक्ष मोक्षार्थमेव माम् ।
गुरोश्चरणयोर्न्यस्य मस्तकं भक्तिसंयुतः ॥९५॥
हस्तौ प्रक्षाल्य च ततो नैवेद्यं मिष्टमुत्तमम् ।
विविधान्नं फलं दुग्धसारं लक्ष्म्यै समादिशेत् ॥९६॥
शिष्यकर्णे मनुं दत्वाऽभिषिञ्चेत् कुंभवारिणा ।
ततः शुद्धो महालक्ष्म्याः सपर्यां सर्वदाऽऽचरेत् ॥९७॥
लक्ष्मीशेषं प्रभुञ्ज्याच्च दक्षिणां गुरवेऽर्पयेत् ।
भोजयेद् वैष्णवान् साधून् साध्वीर्बालाँश्च कन्यकाः ॥९८॥
शरीरमर्थं प्राणं च तस्मै श्रीगुरवे दिशेत् ।
तदधीनश्चरेन्नित्यं तद्वाक्यं नैव लंघयेत् ॥९९॥
प्रसादभोजी शिष्यः स्यात् पंक्तिपावनपावनः ।
यः प्रसन्नः क्षणार्धेन मोक्षलक्ष्मीं प्रयच्छति ॥१००॥
दुर्लभं तं विजानीयाद् गुरुं संसारतारकम् ।
आददीत ततो ज्ञानं सेवेत सततं च तम् ॥१०१॥
गुरुभक्तिर्भवेच्छिष्यस्तद्द्रोहः पातकं परम् ।
तत्पादसेवनं मुक्तितुल्यं मुक्तिप्रदं मतम् ॥१०२॥
गुरुशासनवर्तित्वाच्छिष्यसंज्ञा प्रतन्यते ।
जपं ध्यानं जपं ध्यानं कुर्याच्छ्रान्तत्वहानये ॥१०३॥
ध्यानात् कीटो भ्रमरः स्यात्तथा शिष्यो हरिर्भवेत् ।
आत्मैक्यभाविनो ब्रह्मीभूतता दर्शनं फलम् ॥१०४॥

अहंभावे गते ज्ञाते चात्मनि परमात्मनि ।
यत्र यत्र मनो याति सर्वे ते हि समाधयः ॥१०५॥
सर्वब्रह्मात्मलब्धेस्तु ब्रह्मरूपस्य योगिनः ।
न तस्य किञ्चिदासव्यं ज्ञातव्यं चाऽवशिष्यते ॥१०६॥
पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥१०७॥
देहो देवालयः प्रोक्तो जीवोऽयं सेवकः स्मृतः ।
सेवयाऽन्तर्गतं कृष्णं तोषयेत् सर्वदानकैः ॥१०८॥
कोटिदानव्रतयज्ञेभ्यो वरं गुरुसेवनम् ।
निर्गतं यद्गुरोर्वक्त्रात् तत्सर्वं शास्त्रमस्य वै ॥१०९॥
निषिद्धमपि तत्कुर्याद् गुर्वाज्ञां नैव लंघयेत् ।
जातिविद्याधनाढ्योऽपि गुरुं दण्डवदाचरेत् ॥११०॥
रिक्तपाणिस्तु नोपेयाद् राजानं देवतां गुरुम् ।
फलपुष्पाम्बरादीनि यथाशक्ति समर्पयेत् ॥१११॥
सद्भक्तरक्षणायैव दिव्यदेवोऽपि माधवः ।
कृपानिधिर्गुरुर्भूत्वा संसारीव स चेष्टते ॥११२॥
नास्ति गुर्वधिकं तत्त्वं नास्ति ज्ञानाधिकं सुखम् ।
नास्ति भक्त्यधिका पूजा नास्ति मोक्षाधिकं फलम् ॥११३॥
स्मरणात्पूजनाचापि श्रवणात्पठनादपि ।
भुक्तिमुक्तिप्रदं दिव्यं फलं चाऽस्य प्रजायते ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महालक्ष्म्या मन्वान्तरं काञ्चीपुर्योमहालक्ष्म्या द्वेधारूपता ब्रह्मविष्णुमहेशानां तत्र निवासो दीक्षाविधानं चेत्यादिनिरूपणनामा विंशाऽधिकशततमोऽध्यायः ॥ १२० ॥

श्रीनारायणीश्रीरुवाच—

ललिताख्यमहालक्ष्म्या नामान्यसंख्यकानि वै ।
तथाप्यष्टोत्तरशतं सपादं श्रावय प्रभो ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

मुख्यनाम्नां प्रपाठेन फलं सर्वाभिधानजम् ।
भवेदेवेति मुख्यानि तत्र वक्ष्यामि संशृणु ॥ २ ॥
"ललिता श्रीर्महालक्ष्मीर्लक्ष्मीः रमा च पद्मिनी ।
कमला सम्पदीशा च पद्मालयेन्दिरेश्वरी ॥ ३ ॥
परमेशी सती ब्राह्मी नारायणी च वैष्णवी ।
परेश्वरी महेशानी शक्तीशा पुरुषोत्तमी ॥ ४ ॥
बिम्बी माया महामाया मूलप्रकृतिरच्युती ।
वासुदेवी हिरण्या च हरिणी च हिरण्मयी ॥ ५ ॥
कार्ष्णी कामेश्वरी कामाक्षी चापि भगमालिनी ।
वह्निवासा सुन्दरी च संविच्च विजया जया ॥ ६ ॥
मंगला मोहिनी तापी वाराही सिद्धिरीशिता ।
भुक्तिः कौमारिकी बुद्धिश्चामृता दुःखहा प्रसूः ॥ ७ ॥
सुभाग्याऽऽनन्दिनी सम्पद् विमला बिन्दिकाऽभिधा ।
माता मूर्तिर्योगिनी च चक्रिकाऽर्चा रतिर्धृतिः ॥ ८ ॥
श्यामा मनोरमा प्रीतिः ऋद्धिः छाया च पूर्णिमा ।
तुष्टिः प्रज्ञा पद्मावती दुर्गा लीला च माणिकी ॥ ९ ॥
उद्यमा भारती विश्वा विभूतिर्विनता शुभा ।
कीर्तिः क्रिया च कल्याणी विद्या कला च कुंकुमा ॥१०॥
पुण्या पुराणा वागीशी वरदा विभवाऽऽत्मिनी ।
सरस्वती शिवा नादा प्रतिष्ठा संस्कृता त्रयी ॥११॥
आयुर्जीवा स्वर्णरेखा दक्षा वीरा च रागिणी ।
चपला पण्डिता काली भद्राऽम्बिका च मानिनी ॥१२॥
विशालाक्षी वल्लभा च गोपी नारी नरायणी ।
सन्तुष्टा च सुषुम्णा च क्षमा धात्री च वारुणी ॥१३॥
गुर्वी साध्वी च गायत्री दक्षिणा चान्नपूर्णिका ।
राजलक्ष्मीः सिद्धमाता माधवी भार्गवी परी ॥१४॥
हारिती राधियानी च प्राचीनी गौरिका श्रुतिः" ।
इत्यष्टोत्तरशतकं सप्तविंशतिरित्यपि ॥१५॥
ललितामुख्यनामानि कथितानि तव प्रिये ! ।
नित्यं यः पठते तस्य भुक्तिर्मुक्तिः करस्थिता ॥१६॥
स्मृद्धिर्वंशस्य विस्तारः सर्वानन्दा भवन्ति वै ।
"ओंश्रीललितामहालक्ष्म्यै नमः श्रींह्रींक्लीं स्वाहा" ॥१७॥
इति मन्त्रं जपेल्लक्षवारं सा दृश्यते ध्रुवम् ।
अथ लक्ष्मि महामन्त्रं गुरुमन्त्रं वदामि ते ॥१८॥
"ओम् अन्तर्लिंगाय गुरवे ललाटस्थाय
सर्वात्मने नमः स्वाहा" ।
इतिलक्षं जपेत् सिद्धिर्जायते ब्रह्मसदृशी ॥१९॥
गुरुं ध्यायेत् स्नापयेच्च पूजयेद् बहुवस्तुभिः ।
भोजयेत् संप्रसेवेत तोषयेत् सर्वदानकैः ॥२०॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः श्रीशंकरः स्वयम् ।
गुरुर्नारायणः कृष्णो गुरुर्ब्रह्मपरं प्रभुः ॥२१॥
गुरुः पिता पतिः पुत्रो बन्धुर्माता च रक्षकः ।
मोक्षदस्तारकश्चापि महानन्दप्रदो गुरुः ॥२२॥

अनादिश्रीकृष्णनारायणः साक्षाद्गुरुर्हरिः ।
इत्युक्त्वा प्रणमेतापि नीराजयेद्गुरुं ततः ॥२३॥
पुष्पाञ्जलिं दिशेच्चापि दण्डवद्वै समाचरेत् ।
दानं दद्याच्च गुरवे स्वेष्टतमस्य वस्तुनः ॥२४॥
चेतनो वै भगवान् स गुरुरेव परेश्वरः ।
त्रायते च्चापदां त्राताश्रयस्यैवाऽक्षरं पदम् ॥२५॥
नित्यं वै प्रथमं प्रातर्गुरोर्दर्शनमुत्तमम् ।
गुरोः पादांगुष्ठजलं पिबेत् पावनमुत्तमम् ॥२६॥
अपि हत्यादिपापानां नाशकं च्चरणामृतम् ।
अपि मायादिबन्धानां कर्तनं च्चरणो गुरोः ॥२७॥
यामपाशविमोक्षाय शक्तं वै स्मरणं गुरोः ।
अनाथानां सदा नाथो नारायणो गुरुः परः ॥२८॥
गं गाढं च तमो गुसं रुणद्धीतिगुरुर्मतः ।
गुरोर्मूर्तिं शुभां कृत्वा गृहे कण्ठे प्ररक्षयेत् ॥२९॥
गुर्वद्वैतमुपासीताऽश्नुतेऽमृतमनुत्तमम् ।
इत्येतत् कथितं लक्ष्मि सारात् सारतरं परम् ॥३०॥
मातृतीर्थात् पितृतीर्थाद् गुरुतीर्थं महत्तमम् ।
श्वश्रूतीर्थाद् पतितीर्थाद् गुरुतीर्थं महत्तमम् ॥३१॥
सतीतीर्थात् प्रियातीर्थाद् गुरुतीर्थं महत्तमम् ।
देवतीर्थाज्जडतीर्थाद् गुरुतीर्थं महत्तमम् ॥३२॥
अर्चातीर्थान्मखतीर्थाद्गुरुतीर्थं महत्तमम् ।
व्रततीर्थात्तपस्तीर्थाद् गुरुतीर्थं महत्तमम् ॥३३॥
ज्ञानतीर्थाद्योगतीर्थात् गुरुतीर्थं महत्तमम् ।
परोपकारादितीर्थेभ्यो गुरुतीर्थं महत्तमम् ॥३४॥
अनादिश्रीकृष्णनारायणेन परमात्मना ।
मया सन्दिश्यते त्वेतद्गुरुतीर्थं प्रमाणवत् ॥३५॥
सत्यतीर्थं साधुतीर्थं तीर्थश्चाहं परेश्वरः ।
त्रीणि तीर्थानि चैतानि गुरौ तीर्थे विशन्ति हि ॥३६॥
इत्येतच्छिवराज्ञीश्रि हृदयं कथितं तव ।
पठनाच्छ्रवणादस्य चतुःपुमर्थभाग् भवेत् ॥३७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ललितामहालक्ष्म्याः पञ्चत्रिंशदुत्तरशतनामानि गुरुतीर्थमाहात्म्यं चेत्यादिनिरूपणनामैक-विंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

श्रीनारायणीश्रीरुवाच—

परमेश कृपासिन्धो महालक्ष्मीजनिं शुभाम् ।
प्राकट्यं च निमित्तं च वैभवं मण्डलानि च ॥ १ ॥
श्रुत्वा श्रुत्वा प्रहृष्यामि पुत्र्यां स्पृहयते मनः ।
धन्या सा जननी यस्याः सुता त्वेतादृशी भुवि ॥ २ ॥
यद्गृहे परमेशानी महालक्ष्मीर्विराजते ।
महालक्ष्मीसमा पुत्री केन पुण्येन लभ्यते ॥ ३ ॥
व्रतेनाऽऽराधनेनापि सेवया वा जपेन वा ।
दानेन तपसा यज्ञैः किंवा भक्त्या हि मे वद ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि बहून्यत्र कारणानि भवन्ति वै ।
प्रागदत्त्वेह केनापि लभ्यते नहि किञ्चन ॥ ५ ॥
कर्मबन्धानुयोगेन लभ्यन्ते सुतपुत्रिकाः ।
कर्मतन्तुप्रवाहोऽयं लोको वंशानुवंशवान् ॥ ६ ॥

पिता पुत्रस्वरूपो वै जायतेऽणोर्निजात्मकात् ।
माता पुत्रीस्वरूपा च जायतेऽणोर्निजात्मकात् ॥ ७ ॥
पूर्वं येन प्रदत्तं वै कन्यादानं तु तस्य वै ।
सत्पुण्यप्रेरिता यत्र क्वापि प्रजायतेऽपरा ॥ ८ ॥

बालिका स्वं भवत्येव बालकोऽन्यत्र प्राक् तथा ।
तयोर्विवाहो लोकेऽत्र भार्या सा विधिना भवेत् ॥ ९ ॥
एवं कन्योद्भवो लक्ष्मि पतिपुण्येन जायते ।
पत्युः ऋणं श्वशुरस्य श्वश्र्वाश्च प्राग्भवं भवेत् ॥१०॥
तेनर्णेन भवेत् कन्या वर्धिता दीयते ततः ।
एवं पारक्यमेवापि धनं कन्या निगद्यते ॥११॥
ऋणानुबन्धा पुत्रीयं कथिता ते रमे ! त्विह ।
प्रायशः संभवन्त्येव पत्युः ऋणं हि कन्यकाः ॥१२॥
दातुर्दानफलं स्याद्वै पत्युः प्रागर्पितस्य तत् ।
दातैव फलभोक्तेति भोक्ता दाता पुरा मतः ॥१३॥
येन राज्ञा हि दीयन्ते कन्यादानानि सद्व्ययैः ।
येषां केषामपि लक्ष्मि ! कन्यानां लग्नकानि वै ॥१४॥
धनव्ययैः कारयन्ति दापयन्ति हि कन्यकाः ।
राजानस्ते त्विह लोके बहुस्त्रीका भवन्ति हि ॥१५॥
यद्वा स्वर्गे बहुस्त्रीको भवत्येव सुरो महान् ।
बह्वीभिरप्सरोभिश्च सेव्यमानः प्रमोदते ॥१६॥
कन्यादो विन्दते पत्नीं नान्यथा तु कदाचन ।
यावन्त्यस्ताः प्रदीयन्ते विना मूल्यं हि कन्यकाः ॥१७॥
तावन्त्यस्ता हि लभ्यन्ते पत्न्यस्तावद्गुणान्विताः ।
पत्नीदो लभते पत्नीं पत्नीदानं कृते युगे ॥१८॥
त्रेतायां द्वापरे धर्मो नातिश्रेयान् क्वचिद् वरः ।
पातिव्रत्यं परो धर्मश्चैकपतित्वमुत्तमम् ॥१९॥

ब्रह्मचर्यव्रतं प्रोक्तमेकपतित्वमुत्तमम् ।
तद्धानिः स्वांगनादाने तस्माद् दानं स्त्रिया न वै ॥२०॥
बहुसामर्थ्यसंयुक्ते तैजसे पुरुषे क्वचित् ।
पत्नीदानं निराबाधं हितकृद् देयमित्यपि ॥२१॥
यत्र धर्मो न लुप्येत कन्याभावोऽपि यस्य तु ।
यस्य बह्व्यः स्त्रियः सन्ति पत्नी देया हि तेन तु ॥२२॥
तत्र पत्नीप्रदानस्य फलं पत्नी भवान्तरे ।
पुत्रहीनस्य धर्मोऽयं मतः पुत्रफलाशया ॥२३॥
श्रेष्ठस्तु परकन्याया दानं द्रव्यसहायता ।
कर्तव्या पितृवत्तेन फलं पत्नीं लभेत् स तु ॥२४॥
एष एव विधिः श्रेष्ठः पत्नीदानं न चोत्तमम् ।
कन्यादानफलं पत्न्यश्चेति सर्वैः प्रवर्तितम् ॥२५॥
पितृसेवा श्राद्धदानं फलं पुत्रात्मकं स्मृतम् ।
पुत्रेष्टिः पुत्रफलदा पुत्रीष्टिः पुत्रिकाप्रदा ॥२६॥
पुत्रीदानं शुभं देयं नाऽशुभं तु कदाचन ।
द्रव्याऽऽदानेन दानं वै ह्यशुभं फलदं न तत् ॥२७॥
शुभं विभूषिता देया द्रव्याऽऽदानविवर्जिता ।
अन्यकन्यां सुयोग्यां च सर्वदोषविवर्जिताम् ॥२८॥
मातापित्रोस्तु संवादं कृत्वा दत्वा धनं महत् ।
आत्मीकृत्याऽथ संस्नाप्य दत्वा भूषाम्बराणि च ॥२९॥
शृंगारयित्वा शृंगारैर्गन्धमाल्यैः समर्चयेत् ।
निमित्तानि समीक्ष्याऽथ गोत्रनक्षत्रकादिकान् ॥३०॥
अन्विष्य सद्वरं कन्यायोग्यं योग्यगुणादिकम् ।
उभयोश्चित्तमालोक्य प्रेमाढ्यं चेत्परस्परम् ॥३१॥
उभौ सम्पूज्य विधिना विवाहोत्सवमण्डपे ।
दातव्या सद्वरायैव ब्रह्मिष्ठाय तपस्विने ॥३२॥
विदुषे सद्गुणाढ्याय कन्यापालनशक्तये ।
दासदासीधनभूषाम्बरवाहनमर्पयेत् ॥३३॥
क्षेत्रमुद्यानमर्थांश्च धान्यानि वाटिकां दिशेत् ।
गृहं चोपकरणानि दिशेच्च दापयेत्तथा ॥३४॥
कामधेनुं च महिषीं गजाश्ववृषभान् दिशेत् ।
जीविकां प्रदिशेत् सर्वां योग्यां युगलपोषिणीम् ॥३५॥
एवं दातुर्हि कन्याया दानस्य धनिनस्त्विह ।
पुण्यजाः स्युरसंख्या वै भोगाः स्वर्गेऽपि वै तथा ॥३६॥
देहे यावन्ति रोमाणि कन्यायाः सन्ततौ पुनः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥३७॥
तत्रैव मण्डपे कार्यं लक्ष्मीदानमनुत्तमम् ।
सर्वसम्पत्करं सौख्यमहदैश्वर्यवर्धनम् ॥३८॥

श्रीलक्ष्मीमतुलां कृत्वा हिरण्येन यथाविधि ।
सहस्रेण तदर्धेन तदर्धार्धेन वा पुनः ॥३९॥
अष्टोत्तरशतेनापि सर्वलक्षणसंयुताम् ।
सर्वशृंगारितां लक्ष्मीं सर्वालंकारशोभिताम् ॥४०॥
चतुर्भुजां शुभां लक्ष्मीं महालक्ष्मीं कराऽष्टकाम् ।
विन्यस्य मण्डले तस्या दक्षे विष्णुं हरिं तथा ॥४१॥
अर्चयित्वोपचाराद्यैः राजभोगैः श्रियं हरिम् ।
होमोत्तरं पूजयित्वा भोजयित्वा च पाययेत् ॥४२॥
ताम्बूलकं ततो दत्वा नीराजयेन्नमस्क्रियात् ।
दण्डवत्कुसुमानां चांऽजलिं दत्वा ततः परम् ॥४३॥
दद्याल्लक्ष्मीं सुपात्राय साधवे ब्रह्मचारिणे ।
जलसाक्ष्ये वह्निसाक्ष्ये विप्रसाक्ष्ये प्रकाशने ॥४४॥
गुरोः साक्ष्ये सूर्यसाक्ष्ये देवसाक्ष्ये हरेः पुरः ।
एवं लक्ष्म्या दानकर्तुः सम्पत् सर्वा प्रजायते ॥४५॥
स्वर्णचम्पकवर्णाभाः पत्न्यो भवन्ति तत्फलम् ।
कन्यकाः श्रेष्ठपुत्राश्च स्वसारश्च भवन्त्यपि ॥४६॥
दासा दास्यस्तथा भृत्या भवन्ति परिचारिकाः ।
स्वर्गेऽप्सरसां स्वामी स्यान्मोक्षे शक्तिपतिः प्रभुः ॥४७॥
महालक्ष्मीप्रदानेन सम्राट् स्याल्ललनापतिः ।
कम्भराश्रीप्रदानेन सर्वसौख्यान्वितः स्वराट् ॥४८॥
युगलस्य प्रदानेन युगलात्मा प्रजायते ।
पुरा युगलजन्मानोऽभवन् महर्षयोऽखिलाः ॥४९॥
ततो मिथुनभावाढ्या सृष्टिर्व्यस्ताऽभवत्' खलु ।
पुराऽभवद्धि दाम्पत्यमार्षयोः सहजन्मनोः ॥५०॥
कालान्तरे भिन्नकुलजातयोर्वै विवाहनम् ।
सर्वसृष्ट्युपकारार्थं स्नेहसंकलनार्थकम् ॥५१॥
ओतप्रोतादिलाभार्थं व्यधुः सर्वे महर्षयः ।
धर्मा एव ह्यधर्माः स्युरधर्मास्तु वृषाः पुनः ॥५२॥
कालान्तरे प्रजायन्ते देवमानवसत्स्वपि ।
पशुधर्माः पक्षिधर्माः कालान्तरे तु मानवाः ॥५३॥
ऋषिधर्मा देवधर्माः कालान्तरे तु मानवाः ।
दैत्यदानवधर्माश्च कालान्तरे तु मानवाः ॥५४॥
भवन्त्येव पुनस्तेऽपि विपरीताः पुनः पुनः ।
अतो दानफलं तत्र तत्राऽऽप्यते यथावृषम् ॥५५॥
दत्तमेव भवेत् प्राप्यं नदत्तं न कदाचन ।
एवं कुमारदानस्य पतिप्राप्तिः फलं शुभम् ॥५६॥
केतुमाले कुमाराणां दानं कुर्वन्ति मातरः ।
गौर्यस्तेनाऽऽप्नुवन्त्येव स्वामिनः सुस्वरूपिणः ॥५७॥

स्वसृदानेन चाप्यन्ते स्वसारः शोभिताः शुभाः ।
मातृसेवाफलं श्रेष्ठं सन्मात्रङ्के जनुर्भवेत् ॥५८॥
एवं धर्मा भवन्त्येव निगूढा कमले ! भुवि ।
अतत्त्वज्ञा न जानन्ति मुह्यन्ति तत्र तत्र च ॥५९॥
आप्नुवन्ति परं कष्टं क्लेशं कुर्वन्ति वै तथा ।
धर्ममधर्मं मत्वैव दानं कुर्वन्ति नैव ह ॥६०॥
भवत्यो मम पत्न्योऽपि पूर्वदत्तफलं हि तत् ।
शृणु लक्ष्मि तथाऽन्यच्च पुत्रीप्राप्तौ तु कारणम् ॥६१॥
व्रतं पुत्रीव्रतं नाम कम्भराश्रीव्रतं हि तत् ।
यदा लोके समानो वै भागोऽधिकार इत्यपि ॥६२॥
दायभागः समानश्च पुत्रपुत्र्योः पुराऽभवत् ।
तदा पुत्रीव्रतं माता पुत्रेष्टिं चाऽकरोत् पिता ॥६३॥
सर्वलोकेषु सर्वत्र धर्मश्चाऽयं परोऽभवत् ।
मम माता कम्भराश्रीः पुत्र्यर्थं पुत्रिकाव्रतम् ॥६४॥
अकरोत्तेन सन्तोषानाम्नी पुत्री ततोऽभवत् ।
वासुदेवी स्वयं लक्ष्मीः पुत्रीरूपा व्यजायत ।
या प्रोक्ता श्रीकृष्णनारायणस्वसा सुशीलिनी ॥६५॥

**श्रीनारायणीश्रीरुवाच—**

कीदृशं तत्र व्रतं प्रोक्तं पुत्रीव्रतं मखात्मकम् ।
आद्यन्तं सफलं स्याद् यत् तत्तथा मे विधिं वद ॥६६॥

**श्रीपुरुषोत्तम उवाच—**

शृणु पुत्रीव्रतं माता कम्भरा यच्चकार ह ।
महालक्ष्मीर्ललिताश्रीः सपुत्री सा ततोऽभवत् ॥६७॥
फाल्गुनस्याऽसिते चाऽऽद्ये पक्षे वै पञ्चमीतिथौ ।
पुत्रीव्रतं प्रकर्तव्यं मात्रा सौभाग्यसम्पदा ॥६८॥
चतुर्थ्यास्तु निशायां वै दुग्धपानपरा भवेत् ।
ब्रह्मचर्यपरा स्याच्च भवेद् भूतलशायिनी ॥६९॥
दुष्टस्वप्नं यथा न स्यात्तथा निद्रां विधाय वै ।
ललिताश्रीमहालक्ष्मीं स्मृत्वोत्थाय क्षणं च ताम् ॥७०॥
ध्यात्वा चतुर्भुजां लक्ष्मीं स्वर्णचम्पकरोचनाम् ।
युवतीं च हरिद्वर्णाम्बरां स्वर्णविभूषिताम् ॥७१॥
आलिप्तां चन्दनाद्यैश्च गन्धसारसुगन्धिताम् ।
प्रसन्नवदनां पद्मगर्भाभकरपत्तलाम् ॥७२॥
रूपानुरूपावयवां चन्द्राभमुखशोभिताम् ।
ताम्बूलचर्वणरक्ताधरशोभाविराजिताम् ॥७३॥
यौवनपूरसंशोभद्विग्रहां पुष्टरूपिणीम् ।
ध्यात्वा स्नात्वा ततः स्वर्णमूर्तौ तां पूजयेत् सती ॥७४॥
संकल्पयेन्महालक्ष्मि ! पुत्र्यर्थे पञ्चमीव्रतम् ।
करोम्यद्य निराहारं निर्विघ्नं पूर्णमस्तु मे ॥७५॥
तन्निमित्तं पूजनं ते मातः करोमि शोभनम् ।
आगच्छाऽत्राऽऽसने तिष्ठ गृह्ण पाद्यं शुभार्घ्यकम् ॥७६॥
आचमनं ततः पञ्चामृतस्नानं विधेहि च ।
अभिषेकं गन्धिजलैर्गन्धिसारयुतैः कुरु ॥७७॥
वस्त्राभरणभूषालंकारशृंगारकं वह ।
सौभाग्यद्रव्यसिन्दूरान् पुष्पहारान् प्रयुंक्ष्व च ॥७८॥
धूपं दीपं च नैवेद्यं दुग्धसारं च पायसम् ।
मिष्टान्नानि विचित्राणि भुंक्ष्व शाकफलानि च ॥७९॥
जलपानं ततस्ताम्बूलकं स्वीकुरु चोत्तमम् ।
आरार्त्रिकं पुष्पमालां प्रार्थनां स्वीकुरु ध्रुवाम् ॥८०॥
प्रदक्षिणां नमस्कारान् दण्डवत् स्वीकुरु त्वय ।
देहि पुत्रीं त्वत्सरूपां सर्वसौभाग्यशालिनीम् ॥८१॥
सर्वांगशोभनां रम्यां पद्मिनीं मन्थरागतिम् ।
सेविकां तोषहेतुं च दिव्यर्द्धिं शान्तिचन्द्रिकाम् ॥८२॥
दीर्घजीवां च नीरोगां सम्पदामीश्वरीं सतीम् ।
वंशशोभां पतिपुत्रभाग्यवतीं च सद्गुणाम् ॥८३॥
परमेश्वरभक्तां ते भक्तां देहि सुपुत्रिकाम् ।
इत्यभ्यर्थ्य ततो भक्तिं कुर्यात् कीर्तनरूपिणीम् ॥८४॥
जपमालां यथाशक्त्यावर्तयेद् भक्तिमानसा ।
मध्याह्नेऽपि सुनैवेद्यं जलं ताम्बूलकं दिशेत् ॥८५॥
प्रस्वापयेत्ततश्चोत्थापयेत् फलं समर्पयेत् ।
जलं समर्पयेद् रात्रावारार्त्रिकं सुपूजनम् ॥८६॥
कुंकुमाऽबीरकस्तूरीकर्पूरकुसुमादिभिः ।
पायसाद्यैर्भोजनं च कारयित्वाऽथ नर्तनम् ॥८७॥
कीर्तनं गायनं चापि चरेज्जागरणं निशि ।
व्रतकर्त्री ततः प्रातः स्नात्वा संस्नाप्य मातरम् ॥८८॥
महालक्ष्मीं पूजयित्वा संभोज्याऽऽरार्त्रिकोत्तरम् ।
देहि पुत्रीं व्रतं पूर्णं कृतं क्षमां कुरु व्रते ॥८९॥
अपूर्णं पूर्णतां यातु त्वत्प्रतापात् परेश्वरि ।
इत्यभ्यर्थ्य नमस्कृत्वा विसर्जयेत्ततः परम् ॥९०॥
पतिं स्वं भोजयित्वा तत्पादांगुष्ठजलामृतम् ।
लक्ष्मीप्रसादसहितं पीत्वा भोजनमाचरेत् ॥९१॥
दद्याद् दानानि विधिना यथाशक्ति यथाधनम् ।
कन्यायोग्याम्बरभूषाशृंगारादि समस्तकम् ॥९२॥
कन्यकां भोजयेदष्टाऽवरां दद्यात् सुदक्षिणाम् ।
एवं कुर्याद्व्रतं लक्ष्मि पुत्रीप्राप्तिप्रदायकम् ॥९३॥

कृष्णे यथा तथा शुक्ले चतुर्विंशतिपञ्चमीः ।
कुर्यान्निरुक्तरूपेण व्रतिनी पुत्रीदायिनीः ॥९४॥
स्वप्ने त्वागत्य सा ब्रूयान्महालक्ष्मीः सुकन्यका ।
पुत्री ते भाविनी साध्वि वर्षव्रतोत्तरं ततः ॥९५॥
उद्यापनं प्रकुर्याच्च शय्यादानसमन्वितम् ।
महालक्ष्मीप्रपूजां च कारयेत् सर्वभद्रके ॥९६॥
महोत्सवं कारयेच्च धेनुं दद्यात् सवत्सिकाम् ।
कन्यादानं दापयेच्च यथाशक्ति यथाधनम् ॥९७॥
नमो लक्ष्म्यै नमो धिष्ण्यै नमः पुन्यै नमः श्रियै ।
रमायै ललितायै च महालक्ष्म्यै नमोऽस्तु ते ॥९८॥
यथर्तुपुष्पमालाद्यैर्यथर्तुफलसद्रसैः ।
प्रीयतां मे महालक्ष्मि पुत्रीदात्री च मे भव ॥९९॥
एवमाराधयेद् देवीं कम्भराश्रीं सदा व्रते ।
वित्तशाठ्यं न वै कुर्यात् कन्या शठा न जायते ॥१००॥
गर्भिणी सूतिका वापि रोगिणी शुद्धिवर्जिता ।
आपद्गता स्त्रियाऽन्यया कारयेत् प्रयता स्वयम् ॥१०१॥
अतिदुर्भाग्ययुक्ताया वर्षत्रयव्रतैर्ध्रुवम् ।
पुत्रीप्राप्तिभवेदेव ललिताश्रीकृपाकणात् ॥१०२॥
पुत्रीप्रसवमालोक्य व्रतं देव्यै समर्पयेत् ।
व्रतं पुत्रीफलान्तं वै कर्तव्यं चिरमेव हि ॥१०३॥
आरम्भः फाल्गुने कृष्णे समाप्तिः पुत्रिकाऽर्जने ।
कम्भराश्रीमहालक्ष्म्या कृतमासीत् त्विदं व्रतम् ॥१०४॥
सन्तोषाख्या वासुदेवी लक्ष्मीस्तेन सुताऽभवत् ।
इत्येतत् कथितं लक्ष्मि व्रतं परमपावनम् ॥१०५॥
पुत्रीव्रतं नरो नारी कृत्वा पुत्रीमवाप्नुयात् ।
समुद्रः कृतवानेतल्लक्ष्मीं पुत्रीमवाप सः ॥१०६॥
सदाशिवः कृतवाँश्च जयां पुत्रीमवाप सः ।
ब्रह्मा व्रतं कृतवाँश्च ललितां प्राप वै सुताम् ॥१०७॥
दिशो व्रतं कृतवत्यश्चापुः पद्मावतीं सुताम् ।
सूर्यो व्रतं कृतवाँश्च प्रभां पुत्रीमवाप ह ॥१०८॥
कल्पद्रुमा व्रतं कृत्वा श्रीं पुत्रीमापुरेव ते ।
दिव्या विभूतिरेवैतत् कृत्वाऽऽप माणिकीं सुताम् ॥१०९॥
वैराजी च व्रतं कृत्वा कमलामाप पुत्रिकाम् ।
ख्यातिश्चैतद् व्रतं कृत्वा प्राप श्रीभार्गवीं सुताम् ॥११०॥
धरणिस्तद्व्रतं कृत्वा प्राप पद्मावतीं सुताम् ।
एवमेतन्नान्यथाऽस्ति सफलं तद्व्रतं ध्रुवम् ॥१११॥
कन्यार्थी निजपत्नीं संगच्छेद्वै पञ्चमेऽथवा ।
सप्तमे नवमे चैकादशे त्रयोदशे च वा ॥११२॥
पञ्चदशे शुभे काले दिनसंख्यागते निशि ।
बीजदाने कन्यका सा जायते गर्भसंभवा ॥११३॥
बीजदाने वायुदेवो वामपार्श्वे गतिप्रदः ।
तदा कन्या भवेदेव दक्षपार्श्वे कुमारदः ॥११४॥
एवमेतन्न सन्देहस्ततो ज्ञात्वा व्रजेद्दतुम् ।
पठनाच्छ्रवणादस्य वंशदं सत्फलं भवेत् ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
पुत्रीप्राप्त्यर्थं कन्यादानं लक्ष्मीदानं पुत्रीव्रतं
चेत्यादिनिरूपणनामा द्वाविंशत्यधिक-
शततमोऽध्यायः ॥ १२२ ॥

**श्रीनारायणीश्रीरुवाच—**

अनादिश्रीकृष्णनारायण कान्त जगद्गुरो ।
सर्वव्रतानां मूर्द्धन्यं सर्वनिःश्रेयसां प्रदम् ॥ १ ॥
सर्वाऽऽपद्वारकं सर्वविघ्नानां च निवारकम् ।
सर्वसंकष्टहरणं सर्वव्याधिविनाशनम् ॥ २ ॥
सर्वभाग्योर्ध्वपदकं सर्वसमृद्धिकरं व्रतम् ।
येनैकेन तु चीर्णेन सर्वव्रतानि सर्वथा ॥ ३ ॥
चीर्णान्येव भवन्त्येव वद तद्व्रतमुत्तमम् ।
येन पापानि सर्वाणि नश्यन्त्येव कृतेन वै ॥ ४ ॥
प्रायश्चित्तानि सर्वाणि भवन्ति यत्कृतेन च ।
सर्वार्थदायकं सर्वधर्मोत्तमं परात्परम् ॥ ५ ॥
यदग्रेऽन्यव्रतव्रातास्तृणायन्ते हि तद्वद ।
सर्वसत्कार्ययज्ञाद्या यत्र विशन्त्यनुष्ठिते ॥ ६ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु लक्ष्मि सर्वधर्मदानतीर्थविधिव्रतैः ।
कृतैरपि न यत् सिद्ध्येत् तत्सिद्ध्यर्थं परात्परम् ॥ ७ ॥
कृतं व्रतं सिद्धिदं स्याद् ध्रुवं तादृग् वदामि ते ।
मया तु बहुधा प्रोक्तं स्पष्टं पुनर्वदामि तत् ॥ ८ ॥
साधुव्रतं दास्यसेवात्मकं सर्वार्थसाधकम् ।
सर्वव्रतानां मूर्द्धन्यं सर्वकल्याणकारकम् ॥ ९ ॥
सर्वदुःखहरं सर्वविघ्नहरं सुखास्पदम् ।
आध्युपाधिव्याधिहरं सर्वभाग्योदयप्रदम् ॥१०॥
सर्वर्द्धिकृत् सर्वपापहरं कल्मषनाशकम् ।
सर्वधर्मात्मकं पुण्यं सर्वयज्ञात्मकं हि तत् ॥११॥
नित्यं सम्पूजयेत् साधून् साधुपूजाव्रतं हि तत् ।
यथालब्धोपचारैर्हि सन्तोषयेन्मुनीश्वरान् ॥१२॥

प्रातस्तेषां दर्शनं वै कर्तव्यं सर्वदा शुभम् ।
मंगलानां मंगलं तत् साधुसन्दर्शनव्रतम् ॥१३॥
पादसंवाहनं कार्यं नित्यं सायं सतां शुभम् ।
पुण्यदं सम्पदां दातृ पादसंवाहनव्रतम् ॥१४॥
प्रातर्दुग्धादि पेयं वै दातव्यं साधवेऽन्वहम् ।
यथाशक्ति सुधास्वादु साधुपेयाऽर्पणव्रतम् ॥१५॥
प्रातः फलादिकं देयं साधुभ्यः श्रेय इच्छता ।
पक्वमिष्टरसा देयाः साधुफलार्पणव्रतम् ॥१६॥
सूर्यपक्वा वह्निपक्वाः ऋतुपक्वाः कणादयः ।
सद्भ्यो नित्यं प्रदेयास्तत् साधुकणाऽर्पणव्रतम् ॥१७॥
शाकपत्राणि देयानि भक्ष्याणि विविधान्यपि ।
इक्षुकन्दांऽकुरादीनि साधुशाकाऽर्पणव्रतम् ॥१८॥
आमवस्तूनि देयानि घृतपिष्टपयांसि च ।
मिष्टक्षाराऽऽरनालानि साध्वपक्वार्पणव्रतम् ॥१९॥
पक्वभोज्यानि मिष्टानि रम्याणि विविधानि च ।
नित्यं देयानि भावेन साधुभोज्याऽर्पणव्रतम् ॥२०॥
शीतवारि प्रदेयं च स्नानपानक्रियार्थम् ।
मिष्टं सुगन्धि पानार्हं साधुजलार्पणव्रतम् ॥२१॥
मुखवासस्य योग्यानि पूगीफलदलानि च ।
बीजादीनि प्रदेयानि साधुसुवासदव्रतम् ॥२२॥
सायं वा भोज्यवस्तूनि पेयवस्तूनि यानि च ।
प्रदेयानि यथाशक्ति साधुसायंव्रतं हि तत् ॥२३॥
देहसंवाहनं कार्यं श्रममर्दनमित्यपि ।
तैलादिमर्दनं कार्यं साधुश्रमक्षयप्रदम् ॥२४॥
वस्त्रदानं प्रदातव्यं कम्बलादिप्रदानकम् ।
शय्यासनप्रदानादि साधुवस्त्रार्पणव्रतम् ॥२५॥
स्थालीतुम्बीप्रदानं च पात्रपत्रावलीपुटाः ।
प्रत्यहं सम्प्रदेयास्तत् साधुपात्रार्पणव्रतम् ॥२६॥
पुष्पाणि पुष्पहाराश्च गन्धसारसुगन्धिनः ।
चन्दनादि प्रदेयं च साधुगन्धार्पणव्रतम् ॥२७॥
काष्ठं समित् प्रदेयं च कटपट्टसुपट्टिकाः ।
बृसीचतुष्कीमञ्चादि साधुसमिध्व्रतं हि तत् ॥२८॥
विद्यापुस्तकदानं च शालादानं गृहार्पणम् ।
ब्रह्मविद्याग्रहदानं साधुविद्यार्पणव्रतम् ॥२९॥
दृष्टियन्त्रघटीयन्त्राऽक्षरलेखिनिकाऽर्पणम् ।
मषीपत्राद्यर्पणं च साधुयन्त्रार्पणव्रतम् ॥३०॥
तन्तुसूचीप्रदानं च पादत्राणप्रदानकम् ।
कञ्चुकादिप्रदानं च साधुत्राणव्रतं विदम् ॥३१॥
आश्रमं बन्धयित्वाऽस्याऽर्पणं वृक्षादिशोभिनः ।
साध्वाश्रमव्रतं त्वेतत् स्वर्गमोक्षप्रदायकम् ॥३२॥
कूपः साध्वाश्रमे वापी सरो वा दीर्घिका नली ।
कुण्डी कार्या धनैश्चेदं साधुवारिव्रतं शुभम् ॥३३॥
प्रतोली धर्मशाला च चन्द्रशाला वितर्दिका ।
स्थण्डिलं कारणीयं च धूनी कार्याऽऽतपप्रदा ॥३४॥
अग्निशाला कारणीया पाकशाला सतां कृते ।
स्नानध्यानजपशाला साधुशालाव्रतं त्विदम् ॥३५॥
साधुभ्यो धेनवो देया दोग्ध्र्यो वत्सीसमन्विताः ।
वृषभा वाहनार्थं च साधुधेनुव्रतं त्विदम् ॥३६॥
गजोष्ट्रतुरगा देयाः सिंहव्याघ्रमृगादयः ।
साधवे तु समर्थाय साधुवाहनसद्व्रतम् ॥३७॥
वातगा च विमानं च हंसयानं जले तरीः ।
शकटी नरवाहं च शिबिका रक्षिका वशा ॥३८॥
गन्त्री च पादुका सिंहासनं देयं गजासनम् ।
फलकासनमेवापि साधुयानव्रतं त्विदम् ॥३९॥
उद्यानो वाटिका क्षेत्रं जीविका वर्षवृत्तिका ।
आयभागः प्रदेयश्च साधुवृत्तिव्रतं त्विदम् ॥४०॥
वाद्यं कांस्यं झल्लरी च पटहस्तन्त्रिका शुभा ।
वंशी वीणा मृदंगादि मूरजं तारतुम्बिका ॥४१॥
जलवाद्यं स्वरवाद्यं करतालं च दुन्दुभिः ।
विद्युद्वाद्यं प्रदेयं च साधुवाद्यव्रतं त्विदम् ॥४२॥
सिंहचर्म गजचर्म व्याघ्रचर्म मृगस्य च ।
अजीनं पावनं देयं साधुचर्मव्रतं त्विदम् ॥४३॥
मौक्तिकं हीरको रत्नं मणिः काचः शिलोत्तमा ।
मर्दली मुशलं देयं साधुसाधनसद्व्रतम् ॥४४॥
पेटिका कोष्ठली जोली तुम्बिका कलशी तथा ।
रज्जुश्च बन्धनी देया साधुजोलीव्रतं त्विदम् ॥४५॥
भिक्षा माधुकरी देया कण्ठी माला च तौलसी ।
पूजासामग्रिका देया साधुपूजाव्रतं त्विदम् ॥४६॥
व्यजनश्चामरं देयं त्रभाणं च्चोत्तरापटम् ।
पट्टो गलन्तिका देया साधुसन्ध्याव्रतं त्विदम् ॥४७॥
ओषधं चापि चूर्णं च वटिका गोलिका तथा ।
क्वाथा लेह्यानि देयानि साधुस्वास्थ्यव्रतं त्विदम् ॥४८॥
छत्रं दात्रं शिरस्त्राणं पत्त्राणं धोत्रमम्बरम् ।
कौपीनं पटको देयः साधुत्राणव्रतं त्विदम् ॥४९॥
भस्म पुण्यं दन्तधावं यज्ञोपवीतमित्यपि ।
कटिबन्धं गात्रिकं च देयं साधुवृषव्रतम् ॥५०॥

साध्वपेक्षितदानं यत् तत्साध्वपेक्षितव्रतम् ।
साधूनां वचनं ग्राह्यं साध्वाज्ञापालनं व्रतम् ॥५१॥
साधुप्रसादो भोक्तव्यः साधुपुण्याऽमृतं व्रतम् ।
साधुपादजलं पेयं साधुवार्यामृतं व्रतम् ॥५२॥
साधोः प्रसन्नता लभ्या साध्वनुग्रहसद्व्रतम् ।
साधोः प्रासादिकं वस्तु ग्राह्यं साध्वाश्रयव्रतम् ॥५३॥
लक्ष्म्येवं ते कथितानि साधुव्रतानि वस्तुतः ।
अथान्यानि कथयामि सेवात्मकव्रतान्यपि ॥५४॥
येषां तु करणे सम्यक् सिद्धिर्भवति देहिनाम् ।
प्राप्ते दुःखे तु साधूनां सेवार्थं मानता तु या ॥५५॥
कर्तव्या भृत्यता रूपा दासतारूपिणी च वा ।
सर्वार्पणात्मिका या तु द्रव्यार्पणात्मिका च वा ॥५६॥
दीपार्पणात्मिका या च नैवेद्यार्पणरूपिणी ।
तैलार्पणात्मिका यद्वा भूषार्पणात्मिका च या ॥५७॥
वस्त्रार्पणात्मिका या च पुत्रीपुत्रार्पणात्मिका ।
साध्व्यै च साधवे योग्या मानता सेवनात्मिका ॥५८॥
सा सर्वा दुःखदारिद्र्यनाशिका साध्वर्पणव्रतम् ।
नार्या कार्या मानता सा साध्वीसेवात्मिका शुभा ॥५९॥
नरेण सा तु कर्तव्या साधुसेवात्मिका शुभा ।
यथा धर्मस्य रक्षा स्यात् पुण्यं वर्धेत सौख्यदम् ॥६०॥
यथा नारी नरो वापि पुण्यं सम्प्राप्नुयात् परम् ।
गुरोर्वापि च गुर्व्याश्च साधोः साध्व्याश्च वै तथा ॥६१॥
सेवां कुर्याच्छ्रद्धया वै निःसंशयेन वर्त्मना ।
मानता या कृता पूर्वं तया सेवेत सद्गुरुम् ॥६२॥
साधुसेवा हि सा प्रोक्ता साधुव्रतं शुभं परम् ।
दुष्टस्वप्ने तु सञ्जाते कर्तव्या मानता शुभा ॥६३॥
साधूनां दर्शनं चाहं करिष्ये सेवनं क्षणम् ।
फलं दुष्टस्वापजन्यं मा भवेन्मे कदाचन ॥६४॥
जाते त्वपशकुनेऽपि कर्तव्या मानता शुभा ।
साधूनां दर्शनं कृत्वा त्वाशीर्वादवचः शुभम् ॥६५॥
प्राप्स्याम्यपशकुनस्य फलं मे मा भवेदिति ।
शत्रोर्भये समुत्पन्ने कर्तव्या मानता शुभा ॥६६॥
साधूनां दर्शनं पूजां परिचर्यां द्व्यहं शुभाम् ।
करिष्याम्याश्रमे स्थित्वा शत्रोर्भयं न मे भवेत् ॥६७॥
राजभये तु सम्प्राप्ते कर्तव्या मानता शुभा ।
साधूनां दर्शनं सेवां करिष्ये पञ्चवासरान् ॥६८॥
भोजयिष्ये सतो द्रव्यं दास्यामि विपुलं सते ।
देवसेवां धर्मदानं करिष्ये मा नृपाद् भयम् ॥६९॥
प्रजाभये समुत्पन्ने कर्तव्या मानता शुभा ।
साध्वर्थे वृत्तिकां दास्ये क्षेत्रवाट्यादि शोभनम् ॥७०॥
मासमात्रं सेवयिष्ये साधून् प्रजाभयं न मे ।
आभिचारभये जाते कर्तव्या मानता शुभा ॥७१॥
भूतावेशाद्यभिचारो विनश्येन्मे यदा तदा ।
साधुसेवां पञ्चदिनं करिष्ये भजनं तथा ॥७२॥
मलिनोपद्रवे जाते प्राणघातसमे तदा ।
कर्तव्या मानता चाऽहर्निशं साध्वाश्रमे मठे ॥७३॥
उषित्वा मासपर्यन्तं सेवयिष्ये सतो जनान् ।
करिष्ये भजनं भविष्यामि वै निरुपद्रवः ॥७४॥
प्रकृतिविकृतौ जायमानायां मानता शुभा ।
कर्तव्या साधुसत्संगं करिष्ये पक्षसेवनम् ॥७५॥
प्रकृतिर्मे भवेत् स्वस्था भोजयिष्ये सतो जनान् ।
वायुरोगे प्रकर्तव्या मानता साधुसंगतिम् ॥७६॥
करिष्ये दशदिवसान् नश्येदुन्मत्तता मम ।
विषिप्राणिकृते दंशे कर्तव्या मानतोत्तमा ॥७७॥
विषं नश्येज्जीवनं मे स्थिरं भवेत्तदर्थकम् ।
साधूनां सेवनं मासं करिष्येऽहर्निशं सदा ॥७८॥
शस्त्रघातादिजातायां पीडायां मानता शुभा ।
कर्तव्या दुःखनाशार्थं करिष्ये पूजनं सताम् ॥७९॥
द्रव्यदानादिकं चापि भोज्यदानादिकं तथा ।
मासमात्रं साधुवासे वत्स्यामि सेवनोत्सुकः ॥८०॥
हृत्पीडायां च मूर्छायां त्रिदोषे वृत्तिसंहृतौ ।
कर्तव्या मानता श्रेष्ठा जीवामि यदि घाततः ॥८१॥
साधुर्भूत्वा साधुमठे वत्स्यामि भक्तिलब्धये ।
यद्वा सेवां सतां सम्वत्सरं दिवानिशं शुभाम् ॥८२॥
करिष्ये मनसा द्रव्यैर्देहेन तन्मयात्मना ।
ज्वरादिरोगनाशार्थं कर्तव्या मानता शुभा ॥८३॥
द्व्यहं सेवां सतां वासे करिष्ये रोगनुत्तये ।
महापूजां कारयिष्ये सर्वतोभद्रकं तथा ॥८४॥
मण्डलं कारयिष्येऽपि क्रूररोगापनुत्तये ।
भोजनं विविधं सद्भ्यो दास्ये पीडाऽपनुत्तये ॥८५॥
अंगभग्नादिपीडायां कर्तव्या मानता शुभा ।
अंगस्वास्थ्यं भवेन्मे चेत् करिष्ये रूप्यकार्पणम् ॥८६॥
गृहार्पणं जीविकाया अर्पणं साधुसेवनम् ।
देहे शस्त्रचिकित्सायां कृतायां भिषजां वरैः ॥८७॥
कर्तव्या मानता स्यां चेत् सजीवनो निरामयः ।
षण्मासान् साधुसेवायां स्थास्येऽन्नधनदो भवन् ॥८८॥

पूरवाहेऽभिमध्ये वा विवरे कर्दमेऽपि वा ।
एवमादिस्थले मग्ने कर्तव्या मानता शुभा ॥८९॥
यद्यहं जीवनाढ्यः स्यां दुर्निवार्यापदस्तदा ।
सर्वस्वं मे च वाऽर्धं वाऽर्पयिष्ये देवमन्दिरे ॥९०॥
साधूनां सेवनं मासषट्कं दिवानिशं मठे ।
करिष्येऽन्नधनवस्त्रदेहमानसशक्तिभिः ॥९१॥
युद्धे विजयलाभार्थं कर्तव्या मानता शुभा ।
ग्रामान् देशान् सम्पदश्च स्वर्णरूप्यादिहीरकान् ॥९२॥
यानवाहनभूषाश्च छत्रचामरपट्टिकाः ।
अर्पयिष्ये श्रीहरये सद्भ्यश्चापि यथायथम् ॥९३॥
दासवच्च सतां सेवां करिष्ये मासपञ्चकम् ।
यज्ञे साधून् भोजयिष्ये कारयिष्ये च मन्दिरम् ॥९४॥
पाशबद्धेन कर्तव्या निगडस्थेन मानता ।
एतस्माच्चेद् विमुच्येयं करिष्ये साधुसेवनम् ॥९५॥
द्विमासं तु मठे स्थित्वा दत्वा भोज्यं यथाबलम् ।
वैर्यावृतः प्रकुर्याद्वै मानतां जीवनार्थिनीम् ॥९६॥
यद्यहं जीववान् स्यां चेद् दास्ये स्वर्णभरां तनूम् ।
रूप्यभारं शरीरं स्वं शर्कराभारकं च वा ॥९७॥
चौर्यहृतधनादेस्तु प्राप्त्यर्थं पुनरेव ह ।
कर्तव्या मानता श्रेष्ठा यदि प्राप्येत तद्धनम् ॥९८॥
दास्येऽर्धं परमेशाय साधवे धर्मकर्मिणे ।
यज्ञदानादिकं चापि करिष्ये तद्धनात्तदा ॥९९॥
पत्नीसुतापुत्रपितृमातृस्वसृकुटुम्बिनाम् ।
कृतेऽपहरणे द्विष्टैः कर्तव्या मानतोत्तमा ॥१००॥
जीविताः पुनरेवात्राऽऽगच्छेयुश्चाक्षता यदि ।
तदा वत्सरपर्यन्तं करिष्ये साधुसेवनम् ॥१०१॥
दास्ये द्रव्यं भोजनादि करिष्ये यजनं शुभम् ।
अरिष्टशान्तिं परमां करिष्ये रक्षणात्मिकाम् ॥१०२॥
लक्ष्मीत्येवं साधुसेवाव्रतानि कथितानि ते ।
कर्तव्यानि नरैर्नारीभिश्च पीडाहराणि वै ॥१०३॥
अथाऽप्यन्यानि सर्वाणि कथयिष्ये समासतः ।
येषां करणे विघ्नाश्च पीडा यान्ति विदूरतः ॥१०४॥
साधुसेवासमं श्रेष्ठं व्रतं सृष्टौ न विद्यते ।
आशीर्वादेन तूर्णं वै पीडा नश्यत्यनाशिनी ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वव्रतोत्तमव्रतं साधुसेवामानतात्मकमितिनिरूपणनामा त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

श्रीपुरुषोत्तम उवाच—

श्रूयतां शिवराज्ञीश्रि ! नारायणीरमे शृणु ।
साधुसेवाव्रतव्रातान् कथयाम्यधिकान् हिवाम् ॥ १ ॥
गोमहिष्यव्रजोष्ट्रीणां दोग्ध्रीणां दोहरोधने ।
अभिचारे कृतेऽन्येन साधुव्रतं समाश्रयेत् ॥ २ ॥
साधुपादरजो लब्ध्वा प्रसवेत्यभिधाय च ।
पशोः पृष्ठे न्यसेत्तेनाऽभिचारो नश्यति ध्रुवम् ॥ ३ ॥
दोग्धुं ददाति सहसा दोग्ध्री नारी तु पाशवी ।
यद्वा चैकदिनं साध्वाश्रमे दुग्धं समस्तकम् ॥ ४ ॥
दद्यात् सेवां प्रकुर्याच्च सतां दोग्धुं तदाऽर्पयेत् ।
पशूनां रोगपीडायां कर्तव्या मानता तदा ॥ ५ ॥
पश्वर्पणं करिष्येऽहं यदि रोगो विनश्यति ।
यद्वा साधून् सेवयिष्येऽहर्निशं भृत्यवन्मठे ॥ ६ ॥
गजवाजिगरुडानां हंसवृषभपक्षिणाम् ।
वाहनानां तु पीडायां कर्तव्या मानता शुभा ॥ ७ ॥
पीडानाशे वाहनं वै कारयित्वा सतां तदा ।
अर्पयिष्ये वाहनं तद् यद्वाऽहर्निशयादरात् ॥ ८ ॥
सतां मठे प्रसेविष्ये सतो जनान् यथासुखम् ।
निषाद्य वाहने साधून् नेष्यामि वाटिकां प्रति ॥ ९ ॥
स्वगृहं चापि चानाय्य पूजयिष्येऽम्बरार्पणैः ।
अर्पयिष्ये धनं धान्यं पशुरक्षा भवेद् यदि ॥१०॥
गृहकोणे चत्वरे मे रथ्यायां भूतसञ्चरः ।
योऽस्ति तस्य विनाशार्थं कर्तव्या मानता शुभा ॥११॥
साधूनां भोजनं चात्र पूजनं हरिकीर्तनम् ।
कारयिष्ये जलसेकं प्रसादामृतवर्षणम् ॥१२॥
मूत्रेन्द्रियादिस्तंभे तु कर्तव्या मानता शुभा ।
मासं मठे स्थितिं कृत्वा सेविष्ये साधुसत्तमान् ॥१३॥
भोजयिष्ये पूजयिष्ये वर्तिष्ये तद्वचस्यहम् ।
सस्यकणिशयोगे चेज्जन्तुरोगः प्रजायते ॥१४॥
कर्तव्या मानता तत्र जन्तुरोगापनुत्तये ।
धान्यानां दशमो भागो दातव्यो देवमन्दिरे ॥१५॥
साधूनां भोजनं चाप्यतिथिदीनाऽन्नदानकम् ।
मया कार्यं तथा श्रेष्ठश्चान्नकूटसमुत्सवः ॥१६॥
मया कार्यः सुपाकं मे क्षेत्रं भवतु ऋद्धिमत् ।
उद्यानेषु फलिवृक्षादिषु रोगापनुत्तये ॥१७॥
कर्तव्या मानता श्रेष्ठा यदि रोगो विनश्यति ।
साधुभ्यः सत्फलान्येवाऽर्पयिष्ये वै दशांशतः ॥१८॥

कन्दमूलादिसत्पाके यदि हानिः प्रदृश्यते ।
पत्रपुष्पादिपाके च शाकपाके तदा शुभा ॥१९॥
कर्तव्या मानता पाकः समृद्धो मे भवेद्यदि ।
साधुभ्यः प्रथमं नित्यं दास्ये कन्ददलादिकम् ॥२०॥
साधुवासं कारयिष्ये क्षेत्रमध्ये शुभाश्रये ।
इक्षुपाके शृगालेन्दुर्वादिकृते ह्यपक्षये ॥२१॥
मानता तत्र कर्तव्या तदुपद्रवशान्तये ।
इक्षुखण्डान् प्रत्यहं वै दास्ये साधुभ्य उत्तमान् ॥२२॥
पञ्च वा दश वा त्वेकादशवां वा प्रत्यहं तथा ।
गूडं चोत्पन्नफलतो दशांशं साधवे शुभम् ॥२३॥
अर्पयिष्ये शर्करादि कारयिष्ये महोत्सवम् ।
व्यापारे लाभभागः स्यादुत्कृष्टो विपुलो यदि ॥२४॥
तदा दशांशं साधुभ्यो दास्ये देवाय वा ध्रुवम् ।
अधिकश्चेद् धारणातो लाभो मे वै भविष्यति ॥२५॥
तदा दास्येऽर्धमेवापि भागं श्रीहरये सते ।
सर्वनाशक्षणे कार्या मानता सर्वदानिका ॥२६॥
मृत्योर्भये समुत्पन्ने कर्तव्या मानता शुभा ।
समर्पितो भविष्यामि साधवे हरये च वा ॥२७॥
यदि जीवन् रक्षितोऽत्र भवेयं कालवेगतः ।
कुष्ठे शुष्के जडीभावे रक्तस्रावे विभेदने ॥२८॥
धातुरोगे फुल्लरोगे पाकरोगे जलोदरे ।
भगन्दरेऽर्शे रक्तोष्णविकृतौ प्रदरे वृणे ॥२९॥
प्रमेहे क्षीणभावे वा कर्तव्या मानतोत्तमा ।
एभ्यो रोगेभ्य एवाऽहं यदि मुक्तो भवामि च ॥३०॥
तदा साधून् सेवयिष्ये चातुर्मास्ये मठे स्थितः ।
देहसेवां चानुवृत्तिरूपां प्रसन्नताप्रदाम् ॥३१॥
करिष्ये सर्वथाभावैर्दास्यभावमुपाश्रितः ।
ऋणी कुर्यान्मानतां वै ऋणमुक्तो भवामि चेत् ॥३२॥
दशांशं वा विशांशं वा पञ्चमांशं धनस्य मे ।
धान्यादेर्वा सम्प्रदास्ये साधुभ्यः सुनवार्जनात् ॥३३॥
द्व्यहं मासे सतां सेवां करिष्ये दास्यतां तथा ।
शुश्रूषणं मठे स्थित्वा करिष्ये दिनपञ्चकम् ॥३४॥
निर्वंशस्याऽनपत्यस्य पुत्र्याद्यर्थे तु मानता ।
कर्तव्या गर्भलाभार्थे गोदानं साधुसेवनम् ॥३५॥
मठसम्मार्जनं चापि देवालयस्य मार्जनम् ।
लेपनं साधुवासे च जलाहरणमित्यपि ॥३६॥
आमान्नार्पणमेवाऽपि नित्यं सतां च दर्शनम् ।
पादसंवाहनं चाप्याशीर्वादग्रहणं सदा ॥३७॥

एवं कृते भवत्येव गर्भाधानं ततः परम् ।
मानता तत्र कर्तव्या गर्भरक्षणहेतवे ॥३८॥
सम्वत्सरं नित्यमेव दीपदानं घृतार्पणम् ।
आमान्नसम्प्रदानं च करिष्ये हरये सते ॥३९॥
प्रसवोपद्रवे कार्या मानता सुखजन्मने ।
पुत्रभारेण सौवर्णं रजतं शर्करां च वा ॥४०॥
वितरिष्यामि बालेभ्यः सद्भ्यः सद्भोजनं तथा ।
द्रव्यदानं च हरये बालिकाभ्यो धनार्पणम् ॥४१॥
सतां गमागमं देवदर्शनं कण्ठिकार्जनम् ।
बालकस्य कारयिष्ये मनुग्रहणमित्यपि ॥४२॥
साधूनां सेवनं दिनपञ्चकं तन्मठे वसन् ।
करिष्ये सेवनं शुश्रूषणं पुत्रविवृद्धये ॥४३॥
गर्भस्रावो न मे भूयात् पुत्रमृत्युर्न मे भवेत् ।
कर्तव्या तु तदर्थं वै मानता देवतार्हणा ॥४४॥
महापूजां कारयिष्ये सतां पूजां च भोजनम् ।
तीर्थयात्रां करिष्येऽहं सतां दास्यं दशाहकम् ॥४५॥
मन्दिरे भृत्यतां चापि करिष्ये महिषीगवाम् ।
भक्तानां सेवनं चापि करिष्ये जपकीर्तनम् ॥४६॥
धान्यसौवर्णदानं च करिष्ये वै सतां मठे ।
बहुष्वपि च पुत्रेषु करिष्ये पुत्रकार्पणम् ॥४७॥
यदि रोगो भवेन्नैव प्राणनाशो भवेन्न च ।
विघ्नं चापि भवेन्नैव करिष्ये पुत्रकार्पणम् ॥४८॥
साधुवासे सुकूपादिं कारयिष्ये प्रपास्थलीम् ।
छायावासं कारयिष्ये शान्तिशालां तथोत्तमाम् ॥४९॥
साधुवासं पर्णकुटीं कारयिष्ये सदाश्रयम् ।
सभास्थानं कारयिष्ये व्याख्यानपीठमुत्तमम् ॥५०॥
अर्पयिष्ये स्वगुरवे साधवे तु तदिष्टकम् ।
चिरं जीवेत्याशिषश्च दापयिष्ये सुतस्य मे ॥५१॥
यज्ञोपवीतविध्यर्थे यदि विघ्नो विलोक्यते ।
कर्तव्या मानता तत्र करिष्ये मखमुत्तमम् ॥५२॥
साधूनां भोजनं स्वेष्टदेवस्य तु निवेदनम् ।
वेद्यं विविधं चापि जलं फलं दलादिकम् ॥५३॥
दानं चाऽम्बरभूषाणां शृंगाराणां तु योषिते ।
साध्व्यै त्वं देवभक्तायै सुखयिष्ये धनार्पणात् ॥५४॥
वाग्दाने लग्नके विवाहोत्सवे पुनरावृतौ ।
विघ्नो विलोक्यते चेद्वै कर्तव्या मानता शुभा ॥५५॥
वाग्दानं लग्नकं चापि विवाहनं पुनर्गृहम् ।
निर्विघ्नं चेद् भवेन्मेऽत्र करिष्ये मन्दिरेऽर्पणम् ॥५६॥

महस्त्रादिसुवर्णानां रूप्यकाणां तथाऽर्पणम् ।
यद्वा षण्मासपर्यन्तं सतां शुश्रूषणं सदा ॥५७॥
मन्दिरस्य तथा सेवां करिष्ये देहसंभवाम् ।
नैवेद्यदीपिकां स्वेष्टदेवार्थे चोत्तमोत्तमाम् ॥५८॥
प्रथमो मम पुत्रो वा देवार्पितो भविष्यति ।
कन्या वा साध्विकादेव्यर्पिता मया भविष्यति ॥५९॥
गवां दानानि बहूनि करिष्ये वा सुसाधवे ।
क्षेत्रार्पणं गजाश्वानां करिष्ये वा समर्पणम् ॥६०॥
दासदास्यर्पणं वापि ग्रामार्पणं परात्मने ।
मन्दिराय सते चापि गुरवे च द्विजातये ॥६१॥
अनाथेभ्यश्च दीनेभ्यो दास्ये वृत्त्यर्पणं तथा ।
नारीभ्यश्च कुमारीभ्यो दास्येऽन्नधनभूषणम् ॥६२॥
अपत्यानामभिचारपराभवे कुदृष्टिके ।
उपद्रवेऽपरे जाते कर्तव्या मानता शुभा ॥६३॥
अपत्यं मे भवेत् स्वस्थं दास्ये तद्भारशर्कराम् ।
महापूजां कारयिष्ये सतां च भोजनं तथा ॥६४॥
यद्वा दिनद्वयं सेवां करिष्ये साधुमन्दिरे ।
यद्वा गोधूमतण्डुलयवान् दास्ये तु साधवे ॥६५॥
पितापुत्रवैमनस्ये कुटुम्बक्लेशने च वा ।
बान्धवानामसम्मेले कर्तव्या मानता तथा ॥६६॥
यदि चैषां सौमनस्यं सौहार्दं च परस्परम् ।
भवेत्तर्हि करिष्येऽहं साधवे हरयेऽथवा ॥६७॥
धनभोज्यार्पणाद्यं च ज्ञातिसम्मेलनं शुभम् ।
देवसेवादिकं चापि करिष्ये च यथायथम् ॥६८॥
दम्पत्योस्तु विवादे वा वैमनस्ये वियोजने ।
मानता तत्र कर्तव्या सौमनस्यार्थमुत्तमा ॥६९॥
महापूजां कारयिष्ये साधूनां त्र्यहसेवनम् ।
भोजनं मालिकावर्तनं च सेवां च मन्दिरे ॥७०॥
निष्कासिता स्वपतिना तिरस्कृताऽवमानिता ।
कुर्याद्धि मानतां तत्र स्नेहोद्भावनकारिणीम् ॥७१॥
महापूजां कारयिष्ये करिष्ये साधुसेवनम् ।
देवसेवां धनाद्यैश्च करिष्येऽन्नादिदानकैः ॥७२॥
मन्त्रजपं मालिकावर्तनं पुष्पदलार्पणम् ।
सर्वार्पणं करिष्ये मां पतिर्निभालयिष्यति ॥७३॥
गृहस्य मानवः कश्चिद् दिग्भ्रमेण दिगन्तरम् ।
कुमार्गगो भ्रमन् भ्रष्टो गतोऽनागमनाय चेत् ॥७४॥
मानता तत्र कर्तव्या तदागमनकारिणी ।
गृहाऽऽयाते करिष्यामि गोदानं देवमन्दिरे ॥७५॥
साधोः सेवां द्व्यहं मिष्टभोजनाद्यैश्च पूजनम् ।
कन्याया अपहरणे मनुष्यहरणे तथा ॥७६॥
कर्तव्या स्त्रीहरणेऽपि मानता चागमार्थिनी ।
गृहाऽऽगते करिष्यामि महापूजां सतां तथा ॥७७॥
भोजनं पञ्चदिवसान् सेवां मठे च मन्दिरे ।
द्रव्यार्पणं स्वर्णरत्नाद्यर्पणं हरिकीर्तनम् ॥७८॥
जीविकाकार्यरोधे तु कर्तव्या मानता शुभा ।
जीविकायाः प्रवाहो मे यद्यरुद्धो भविष्यति ॥७९॥
यद्वाऽन्यजीविकालाभो भविष्यति तदा त्वहम् ।
पश्चाद् साधुसेवां च प्रथमाऽऽयधनार्पणम् ॥८०॥
महापूजां करिष्यामि साधूनां भोजनादिकम् ।
व्यापारारम्भणे कार्या मानता लाभदायिनी ॥८१॥
यावान् लाभस्तद्दशांशं दास्ये नारायणाय वै ।
धर्मार्थे च व्ययं सम्यक् करिष्ये साधुसेवनम् ॥८२॥
राज्यालये न्यायवादे विवादे पञ्चसाक्षिणि ।
स्वलाभार्थे तु कर्तव्या मानता साधुसेवनम् ॥८३॥
लाभार्थे हरये दास्ये साधुभ्यो भोजनादिकम् ।
विजये तु शुभं द्रव्यं दत्वा नवं सुमन्दिरम् ॥८४॥
साध्वाश्रमं कारयिष्ये तथाऽन्नसत्रमुत्तमम् ।
देवोद्यानं कारयिष्ये महोत्सवे धनार्पणम् ॥८५॥
रथार्पणं गोप्रदानं गृहदानं स्थलार्पणम् ।
अकस्मादिष्टलाभे तु कर्तव्यः सुमहोत्सवः ॥८६॥
नामकीर्तनवाद्याद्यैः शोभितो भोजनात्मकः ।
पूजोत्सवाः कारणीया ध्वजदानार्पणं तथा ॥८७॥
नारिकेलाद्यर्पणं च तैलार्पणं घृतार्पणम् ।
लड्डुकानामर्पणं च संयावाद्यर्पणं तथा ॥८८॥
करनक्तकगुच्छानां पुष्पाणामर्पणं तथा ।
आकस्मिके भये प्राप्ते भयनाशार्थमेव ह ॥८९॥
कर्तव्या मानता श्रेष्ठा गुरोः सेवात्मिका तथा ।
हरेः सेवा साधुसेवा धनधान्यार्पणात्मिका ॥९०॥
उपाधौ जायमाने तु लोकानां भजनादिषु ।
तन्नाशार्थे प्रकर्तव्या मालाऽऽवर्त्तनमानता ॥९१॥
दुर्भिक्षोपद्रवे कृष्णनामकीर्तनमानता ।
यज्ञकार्यस्य विप्राणां भोज्यदानस्य मानता ॥९२॥
साधूनां स्वागताद्यं च प्रसन्नतासमर्जनम् ।
पतिव्रतायाः सत्कारो गवां ग्रासाऽर्पणादिकम् ॥९३॥
महामार्याद्युपप्लवे देशोपप्लवने तथा ।
रक्षार्थं सर्वदेवानां ग्रहाणां श्रीहरेस्तथा ॥९४॥

देवीनां च सतां सेवापूजाभक्त्यात्ममानता ।
कर्तव्याऽहर्निशं नारीनराद्यैः प्राणहेतवे ॥९५॥
सामुद्रे यानभंगे वा रक्षार्थे मानता शुभा ।
आकाशे यानभंगे वा भजनं सततं हरेः ॥९६॥
गुरुं साधुं सेवयिष्ये षण्मासान् मन्दिरे स्थितः ।
कर्तव्या मानता चापि ह्युत्पातेष्वनिवर्तिषु ॥९७॥
उत्पातानां विनाशेऽहं करिष्ये मखमुत्तमम् ।
साधूनां भोजनं चापि देवानां तु प्रपूजनम् ॥९८॥
देवतानां तु नैवेद्यं यथोचितं यथाधनम् ।
काराग्रहादिदुःखानां निवृत्तये हि मानता ॥९९॥
कर्तव्या स्वार्पणं श्रीमत्कृष्णनारायणेऽखिलम् ।
साधूनां भोजनं श्रीमद्बालकृष्णस्य पूजनम् ॥१००॥
अनादिश्रीकृष्णनारायणस्य मम सेवनम् ।
राज्यलाभे तु तद्योग्या महती मानता मता ॥१०१॥
प्राणलाभे तु तद्योग्या मता सर्वार्पणात्मिका ।
सम्पल्लाभे वंशलाभे यथायोग्या हि सा मता ॥१०२॥
सर्वत्र साधुसाध्वीनां सेवाशुश्रूषणात्मिका ।
मानता चोत्तमा शीघ्रसिद्धिदाऽनुग्रहात्मिका ॥१०३॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥१०४॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ॥१०५॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
'साधवो मे रक्षकाश्च सन्तु दुःखापहारकाः' ॥१०६॥
एवं मे शरणं गत्वा यत्र क्वापि स्थले जले ।
गगने गर्तके वह्नौ वायौ रक्षणमर्थयेत् ॥१०७॥
ध्यात्वा कृष्णं गुरुं साधुं देवं धर्मं सनातनम् ।
ध्यात्वाऽन्तर्यामिणं चापि कुर्याद् रक्षार्थमानता ॥१०८॥
हानौ लाभे सुखे दुःखे कर्तव्या मानता रमे ! ।
साधुदेवादिपूजादि रक्षत्येव सुकल्पिता ॥१०९॥
अन्तर्यामी विराजेऽहं शृणोमि हृदयंगतम् ।
दीनभक्तादिरक्षां वै द्राक् करोमि समर्पणात् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सुखदुःखादौ साधुदेवादिसेवाव्रतमानतादिनिरूपणनामा चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥



श्रीनारायणीश्रीरुवाच—

साधुव्रतं शुभं श्रेष्ठं धर्मार्थकाममोक्षदम् ।
श्रुतं ते कृपया कृष्ण श्रोतव्यं नावशिष्यते ॥ १ ॥
तथापि तु गृहस्थानां धर्मवर्त्मानुवर्तिनाम् ।
लोकैषणादिसिद्ध्यर्थं जिज्ञासा दानधर्मिणी ॥ २ ॥
जायतेऽतो गृहस्थानां हितार्थं परमेश्वर ।
महादानं भवेद् यच्च सर्वदानोत्तमोत्तमम् ॥ ३ ॥
तादृशं विद्यते यद्वा तादृशानि भवन्ति चेत् ।
मह्यं निवेदय कृष्णकान्त लोकहिताय वै ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि कथयामि तथाविधम् ।
बहुधा विद्यते तच्च महादानमनुत्तमम् ॥ ५ ॥
सर्वपापक्षयकरं सर्वदुःस्वप्ननाशनम् ।
पुण्यं पवित्रमायुष्यं सर्वपापहरं शुभम् ॥ ६ ॥
यत्तत् षोडशधा प्रोक्तं सत्पात्रे प्रतिपादनम् ।
न्यायोपार्जितसम्पत्तेर्दानं दानं तदुत्तमम् ॥ ७ ॥
आद्यं तत्सर्वदानानां तुलापुरुषसंज्ञकम् ।
हिरण्यगर्भदानं च द्वितीयं परिकीर्तितम् ॥ ८ ॥
ब्रह्माण्डदानं तृतीयं महादानमनुत्तमम् ।
कल्पपादपदानं च चतुर्थं परमं स्मृतम् ॥ ९ ॥
पञ्चमं गोसहस्राद्यर्पणं दानमनुत्तमम् ।
हिरण्यकामधेनूनामर्पणं षष्ठमुत्तमम् ॥१०॥
हिरण्याऽश्वप्रदानं च दानं श्रेष्ठतमं मतम् ।
हिरण्याश्वरथदानं श्रेष्ठं तदष्टमं तथा ॥११॥
हेमहस्तिरथदानं नवमं श्रेष्ठमुच्यते ।
पञ्चलाङ्गलकं दानं दशमं परमं मतम् ॥१२॥
धरादानं श्रेष्ठमेकादशं महत्तमं मतम् ।
विश्वचक्रप्रदानं तु महद्दानमनुत्तमम् ॥१३॥
कल्पलताप्रदानं च त्रयोदशमनुत्तमम् ।
सप्तसागरदानं च चतुर्दशमुदाहृतम् ॥१४॥
रत्नधेनुप्रदानं च पञ्चदशं ह्यनुत्तमम् ।
षोडशं तु महाभूतघटदानं परं शुभम् ॥१५॥
सर्वाण्येतानि दानानि रक्षाकराणि सर्वथा ।
स्वर्गदानि मोक्षदानि भवन्तीष्टप्रदानि वै ॥१६॥
तानि विघ्नसहस्रेभ्यो महादानानि सर्वथा ।
रक्षन्ति देवरूपाणि ह्येकैकमपि भूतले ॥१७॥

एषामन्यतमं कुर्यात् परमेशप्रसादतः ।
महादानमखं कुर्यात् साधुविप्रादिपूजितः ॥१८॥
अथ लक्ष्मि समासेन विधिना तानि ते पुनः ।
कथयामि यथा यत्र यदा देयानि तानि वै ॥१९॥
तुलापुरुषदानं तु दातव्यं विषुवेऽयने ।
दिनक्षये व्यतीपाते पुण्ये व्रतदिने शुभे ॥२०॥
युगाद्यदिवसे राहुग्रहे मन्वाद्यहेषु च ।
संक्रान्तौ वैधृतौ पञ्चदश्यां चतुर्दशीदिने ॥२१॥
अष्टम्यां द्वादशिकायामेकादश्यां च पर्वणि ।
यज्ञोत्सवविवाहेषु दुःस्वप्नाऽद्भुतदर्शने ॥२२॥
द्रव्यब्राह्मणदेवानां लाभे सतां समागमे ।
तीर्थे च मन्दिरे गोष्ठे कूपाऽऽरामसरित्सु च ॥२३॥
गृहे नवे तडागे च श्रद्धापात्रे च पावने ।
साधौ दीनेऽनाथबाले बालायां विधवाजने ॥२४॥
निराश्रये महाभक्ते तापसे चाऽपरिग्रहे ।
दैवे समर्थपुरुषे तैजसे च नरायणे ॥२५॥
नारायणांशे विमले योगिनि पार्षदे हरेः ।
साध्व्यां सत्यां च योगिन्यां देव्यां योषिति दुर्बले ॥२६॥
एवमाद्येषु देयानि महादानानि तानि च ।
स्नात्वा शुभे क्षणे कृत्वा पुण्यं ब्राह्मणवाचनम् ॥२७॥
षोडशाऽरत्निमात्रं वा दश द्वादश वा करान् ।
मण्डपं कारयेत्तत्र चतुर्भद्रासनं शुभम् ॥२८॥
कृत्वा वेदीं सप्तहस्तां मध्ये पञ्चकरां तथा ।
कृत्वा मध्ये तोरणं च सारदारुमयं शुभम् ॥२९॥
कुर्यात् कुण्डानि चत्वारि चतुर्दिक्षु शुभानि वै ।
मेखलायोनियुक्तानि पूर्णकुंभान् निधापयेत् ॥३०॥
आसनानि पवित्राणि विष्टराणि शुभानि च ।
यज्ञपात्राणि सर्वाणि ताम्रपात्रद्वयं तथा ॥३१॥
तिलाऽऽज्यधूपपुष्पोपहाराणि शोभनानि च ।
निधापयेत् सन्निधौ वै ततः पूर्वोत्तरे स्थले ॥३२॥
ग्रहादिदेवपूजार्थं वेदीं हस्तमितां चरेत् ।
तत्राऽर्हणं मम कार्यं पुरुषस्य परात्मनः ॥३३॥
वासुदेवादिरूपाणां कृष्णाद्यानां समर्हणम् ।
ब्रह्मविष्णुमहेशानां फलमाल्याम्बरादिभिः ॥३४॥
पताकाः सध्वजा देया मण्डपे किंकिणीस्वने ।
तोरणानि प्रकार्याणि द्वारेषु शोभनानि वै ॥३५॥
चत्वारि क्षीरवृक्षाणां प्रतिद्वारं घटद्वयम् ।
स्रग्गन्धाऽक्षतधूपार्घ्याऽम्बररत्नफलान्वितम् ॥३६॥

शालेङ्गुदीदेवदारुश्रीपर्णिबिल्वचन्दनैः ।
प्रियकाञ्चनकैश्चापि कृतं स्तम्भद्वयं तथा ॥३७॥
हस्तयुगाऽवखाते तत् क्षिप्त्वा कृत्वा दृढं च तत् ।
पञ्चहस्तोच्छ्रितं मध्यभूमिर्हस्तचतुष्टयम् ॥३८॥
स्तम्भोपरि दृढं तुलाऽवलम्बनं सुभारधृक् ।
मध्यभाराख्यकाष्ठं च न्यस्य कृत्वा स्थिरं च तत् ॥३९॥
तन्मध्ये च तुला धार्या दीर्घा हस्तचतुष्टयम् ।
दशांगुलायते स्थाल्यौ स्वर्णपट्टसुशृंखले ॥४०॥
लोहपाशयुते चापि रत्नमालाविभूषिते ।
माल्यलेपनयुक्ते च चन्दनादिप्रपूजिते ॥४१॥
द्वयोः स्थाल्योर्मध्यभागे लिखेत् कुंकुमपद्मके ।
तुलापात्रिकयोस्तत्र विकीरेत् पुष्पकाणि च ॥४२॥
तुलादण्डिकमध्ये च फलमालम्बयेच्छुभम् ।
अथर्त्विजो वेदविदः साधवः साधुभूषणाः ॥४३॥
द्विजेन्द्रा गुरवः सन्तश्चाचार्यो मन्त्रसम्प्रदः ।
सिताम्बरो मम भक्तस्तिष्ठेत्तुलान्तिके स्थले ॥४४॥
पूर्वं ऋचां विदावास्तां दक्षे यजुर्विदौ तथा ।
पश्चे सामविदावुत्तरे त्वथर्वविदौ तदा ॥४५॥
ततः सूक्तजपः कार्यो होमश्चाग्नौ घृतादिभिः ।
गणेशग्रहलोकेशा वस्वादित्यमरुद्गणाः ॥४६॥
ब्रह्मविष्णुमहेशाश्च तर्पणीया हवादिभिः ।
परमेशस्तथा कृष्णो नारायणो नरायणः ॥४७॥
वासुदेवोऽवताराश्च महाविष्णुर्विराड् हरिः ।
तर्पणीया हवनैश्च देव्यो लक्ष्म्यः समस्तिकाः ॥४८॥
होमोत्तरं गुरुस्तूर्यनादैरावाहयेत् सुरान् ।
बलिं पुष्पं च धूपं च कृत्वा मनून् वदेत्तथा ॥४९॥
एह्येहीन्द्रोवज्रधरो रक्षाऽध्वरं नमोऽस्तु ते ।
एह्येह्यग्ने हव्यवाह तिष्ठाऽध्वरे नमोऽस्तु ते ॥५०॥
एह्येहि धर्मराज त्वं पाहि मखं नमोऽस्तु ते ।
एह्येहि निर्ऋतदेव पाहि मखं नमोऽस्तु ते ॥५१॥
एह्येहि वारुणदेव पाहि चास्मान्नमोऽस्तु ते ।
एह्येहि प्राणनाथ त्वं वायो मखे नमोऽस्तु ते ॥५२॥
एह्येहि त्वं कुबेराऽत्र नमोऽस्तु धनधारिणे ।
एह्येहि त्वं महेशान गृहाणार्हो नमोऽस्तु ते ॥५३॥
एह्येहि नागराज त्वं ममाऽध्वरं प्रपालय ।
एह्येहि धातर्विश्वात्मन्नत्र मखे नमोऽस्तु ते ॥५४॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे ॥५५॥

देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मनवो गावो देवमातर इत्यपि ॥५६॥
सर्वा देव्यो रमा लक्ष्म्यो ब्रह्मप्रिया हरिप्रियाः ।
मुक्तान्यश्चेश्वरेशाश्च रक्षां कुर्वन्तु मेऽध्वरे ॥५७॥
बलिं मिष्टं सुनैवेद्यं गृह्णन्तु हि मयाऽर्पितम् ।
पूजामारार्त्रिकं चापि गृह्णन्त्वपि च दक्षिणाः ॥५८॥
इत्यावाह्य सुरान् पूजयित्वा नीराजनोत्तरम् ।
ऋत्विग्भ्यो होमभूषादि दद्यादन्यानि चापि वै ॥५९॥
कुण्डलानि च हैमानि सूत्राणि कटकानि च ।
अङ्गुलीयपवित्राणि वासांसि शयनानि च ॥६०॥
द्विगुणं गुरवे दद्याद् भूषणाच्छादनानि च ।
जपेयुः शान्तिपाठांश्च जापकाः सर्वतोदिशम् ॥६१॥
कृत्वाऽधिवासनं सर्वे कुर्याद् ब्राह्मणवाचनम् ।
स्नात्वा मंगलसलिलैः कुर्याच्च त्रिःप्रदक्षिणम् ॥६२॥
धृत्वा पुष्पाञ्जलिं तुलां प्रार्थयेच्छ्वेतवस्त्रकः ।
नमस्ते धर्मशक्ते च सत्यरूपे तपोधने ॥६३॥
साक्षिभूते जगन्मातस्ते नमोऽस्तु रमासमे ।
धर्माधर्मपरीक्षार्थं कृताऽसि ब्रह्मणा पुरा ॥६४॥
प्रमाणं सर्वभूतानां दानेऽसि पारमार्थिके ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥६५॥
योऽन्तर्यामी परेशोऽस्ति जीवात्मा यश्च तत्तनुः ।
ताभ्यामधिष्ठिता त्वं वै तस्यै देव्यै नमो नमः ॥६६॥
लूता माया प्रकृतिर्यातस्या जालं प्रपञ्चकम् ।
तद् विनाश्य परे लोके प्रहिणोति यतस्तुला ॥६७॥
अनादिश्रीकृष्णनारायण तौलेय ते नमः ।
तुलापुरुषरूपस्त्वं संसारात् तारयस्व नः ॥६८॥
एवं तुलां नमस्कृत्य पूजयित्वा प्रदक्षिणम् ।
कृत्वाऽऽरूह्यात् स्वयं स्थाल्यां तुलायां दानकृज्जनः ॥६९॥
निजवेषयुतः सम्यक् सर्वाभरणहेतियुक् ।
धर्मदेवं तथा सूर्यं श्रीहरिं चावलोकयेत् ॥७०॥
साधुं सतीं देवमूर्तिं प्रपश्येत्तावदेव सः ।
कराभ्यां बद्धमुष्टिभ्यां नमेत् कृष्णनरायणम् ॥७१॥
कुटुम्बिनः स्वर्णमयं रूप्यमयं च वेतरत् ।
निजभारं द्रव्यमेव न्यसेयुः शर्करादिकम् ॥७२॥
तुल्यादभ्यधिकं यावत् कांचनं रजतं धनम् ।
शर्करां वा न्यसेयुश्च सर्वपापापनुत्तये ॥७३॥
पुष्टिकामः प्रकुर्वीत भूमिसंस्थां धृतेस्तुलाम् ।
तोलयित्वा क्षणं तत्र वन्देत परमेश्वरीम् ॥७४॥
नमस्ते ते महालक्ष्मि धार्मिकि धर्मसाक्षिणि ।
सनातनि सर्वपापनाशिनी पुण्यदायिनी ॥७५॥
स्वर्णभरे कम्भरे त्वं रूप्यभरे प्रमुक्तिदे ।
रसाढ्ये रसदे देवि मातर्लक्ष्मि तुले नमः ॥७६॥
त्वया धृतं जगत् सर्वं सर्वदानफलप्रदे ।
हरेः प्रिये मम शुद्धिं प्रकारय समर्पिता ॥७७॥
इत्युक्त्वा चाऽवतीर्याऽथ गुरवेऽर्द्धं निवेदयेत् ।
ऋत्विग्भ्यो वै परमर्धं दद्यादुदकपूर्वकम् ॥७८॥
गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्चार्पयेत्तथा ।
तेषां तदाज्ञया स्वर्णाद्यन्येभ्योऽपि परं दिशेत् ॥७९॥
दीनाऽनाथनिराधारान् सतीसाध्वीसुयोषितः ।
बालांश्च बालिकाश्चापि समर्च्यं साधुसज्जनान् ॥८०॥
ब्राह्मणान् भिक्षुकान् विप्रान् ब्रह्मिष्ठान् पार्षदान् प्रभून् ।
दानपात्राणि तत्र स्युर्ये ये तांस्तान् ततोऽपरम् ॥८१॥
स्वर्णं रूप्यं शर्करादि भक्त्या सम्पूज्य चार्पयेत् ।
न चिरं धारयेद् गेहे धनं दानार्थतोलितम् ॥८२॥
प्रोक्षितं कल्पितं वापि स्वर्णं रूप्यं धनं च वा ।
तिष्ठेद् भयावहं यस्माच्छोकव्याधिकरं भवेत् ॥८३॥
शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति दानवान् ।
स्वगृहे दानपूर्तं यद् देवस्वं विप्रनाशकम् ॥८४॥
साधुस्वं च सतीस्वं च विधवास्वं प्रचोरितम् ।
धनं यत्तन्निजीयं स्वं नाशयत्येव गच्छति ॥८५॥
उपभुक्तं न सौख्याय रोगाय सज्जते हि तत् ।
कुलहानिफलं तस्य निर्वंशत्वकरं हि तत् ॥८६॥
तस्माद् देवधनं साधुधनं विप्रधनं तथा ।
धर्मधनं न वै भक्ष्यं दीननारीधनं च वा ॥८७॥
न वा स्थाप्यं धने नैजे सर्वनाशफलं यतः ।
शुक्तकोऽभूत् पुरा विप्रो देवसाधुप्रपूजकः ॥८८॥
साधुभिः सह देवस्य प्रतिमादिप्रपूजने ।
भक्तार्पितं धनं भुंक्ते ढब्बुकं शर्करादिकम् ॥८९॥
पक्षपातेन नित्यं स भुंक्तेऽदत्त्वोदरंभरः ।
तेन पापेन तस्याऽभूत् पुण्यक्षयः समन्ततः ॥९०॥
प्रत्युत पापवान् जातो दारिद्र्यदुःखदुःखितः ।
गृहलक्ष्मीर्विनष्टा च पत्नी नष्टा सुतादयः ॥९१॥
क्षेत्रं च वाटिका नष्टा ऋणवान् समजायत ।
क्षुधाऽऽवृतोऽतिदीनश्च भिक्षुकः समजायत ॥९२॥
नेत्रहीनो धर्महीनो बुभुक्षितः पदे पदे ।
पापवृत्तिश्चाऽभवच्च मृत्युमुखं गतोऽभवत् ॥९३॥

याम्यदुःखान्यनुभूय श्वपचत्वं ततो गतः ।
कालान्तरे पुनस्तिर्यग्योन्यादौ समजायत ॥९४॥
एवं लक्ष्मि धनं साध्व्या देव्या देवस्य योगिनः ।
हानिदं न गृहे रक्ष्यं समूलाऽपह्नुतिप्रदम् ॥९५॥
तुलादानं हि विधिना निजभारं धनादिकम् ।
एवं दद्याद् यो मनुजो महेन्द्रादिपदं लभेत् ॥९६॥
लोकपालाधिनाथः स्यात् शाश्वतं स्वर्गमृच्छति ।
विमानेनाऽर्कवर्णेन किङ्किणीजालमालिना ॥९७॥
पूज्यमानो देवताभिर्भुक्त्वा स्वर्गे महाचिरम् ।
सत्यलोकं महालक्ष्मीलोकं श्रीनगरं व्रजेत् ॥९८॥
विष्णुपुरं हरेर्लोकं गोलोकं स व्रजेत्तथा ।
भक्तिमान् याति वैकुण्ठं चाऽक्षरं सत्पदं लभेत् ॥९९॥
दीयमानं महादानं प्रपश्यति प्रशंसति ।
निवेदयति लोकेभ्यः कालान्तरे स्मरत्यपि ॥१००॥
शृणोति वा प्रपठति भक्तिभावयुतो जनः ।
नारी वा भक्तियुक्ता सा राजा राज्ञी सखा सखी ॥१०१॥
विप्रो विप्राणिका चान्या दासी दासोऽपरोऽपि वा ।
तद्दशांऽशं फलं तत्र लभते दानशंसकः ॥१०२॥
स्वर्गे दानफलं भुक्त्वा भक्त्या यास्यति मत्पदम् ।
तुलादानफलं चैवं विशिष्यते समस्ततः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महादानषोडशकेषु तुलापुरुषदानविधिनिरूपणनामा पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि महादानं हिरण्यगर्भसंज्ञकम् ।
सर्वपापहरं पुण्यप्रदं देयं शुभाप्तये ॥ १ ॥
पवित्रं दिवसं दृष्ट्वा तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसंभारभूषापात्राम्बराणि च ॥ २ ॥
संगृह्योपोषितः प्रातर्देवावाहनमाचरेत् ।
पुण्याहं वाचयेद् विप्रैः कारयित्वाऽधिवासनम् ॥ ३ ॥
प्रतिमां कानकीं धर्मदेवस्य परमेष्ठिनः ।
कुंभं तु कानकं तद्वद् राजतं मण्डपे न्यसेत् ॥ ४ ॥
द्विसप्तत्यंगुलोच्छ्रायां हेमपंकजगर्भकम् ।
त्रिभागहीनविस्तारं घृतक्षीरादिपूरितम् ॥ ५ ॥
रत्नपल्लवतण्डुलवस्त्रफलाभिशोभितम् ।
तत्पार्श्वे स्थापयेद् दार्वीं सूचीं च हेमनालकम् ॥ ६ ॥
पीठकं बहिरादित्यं वस्त्रं तथोपवीतकम् ।
हैमं दण्डं पिधानं च कमण्डलुं शुभं नवम् ॥ ७ ॥
मुक्तावलीं पद्मरागान् स्थापयेद् घटसन्निधौ ।
तिलद्रोणान्वितस्थालीं स्थापयेच्च घटोपरि ॥ ८ ॥
घटं तु मण्डपे वेदीमध्ये संस्थाप्य पूजयेत् ।
मंगलैर्वेदमन्त्रैश्च ब्रह्मघोषैः स्तवैः शुभैः ॥ ९ ॥
प्रोक्षितः स्नापितः सर्वौषधिवारिभिरादरात् ।
यजमानः शुक्लमाल्याम्बरधृग् भूषणान्वितः ॥१०॥
कुसुमाञ्जलिमाबद्धयोच्चारयेत् स्तवनं नमः ।
नमोऽक्षराधिनाथाय कृष्णनारायणाय ते ॥११॥
नमो नित्यहिरण्याय हिरण्यवर्णिने नमः ।
नमो हिरण्यकेशाय हिरण्याऽऽप्रणवात्मने ॥१२॥
नमो हिरण्यानाथाय हरिण्याः पतये नमः ।
नमो हिरण्यगर्भाय हिरण्यकवचाय च ॥१३॥
नमः सुवर्णवर्णाय स्वर्णश्मश्रुप्रशोभिने ।
नमो महामहानारायणीनाथाय ते नमः ॥१४॥
अनादिश्रीकृष्णनारायणाय परमात्मने ।
धर्मदेवाय ते चापि वेधसेऽपि च ते नमः ॥१५॥
सृष्टित्रयाधिनाथाय जगद्धात्रे च ते नमः ।
सर्वे लोकास्तव गर्भे व्यापकस्य व्यवस्थिताः ॥१६॥
सर्वे देवास्तव देहे माधवस्य व्यवस्थिताः ।
सर्वा देव्यस्तव देहे लक्ष्म्यात्मकस्य संस्थिताः ॥१७॥
नमस्ते विश्वरूपाय परेशतनवे नमः ।
नमस्ते भुवनाकार भुवनाधार ते नमः ॥१८॥
भुवनाश्रय सर्वात्मन् नमस्ते गर्भरूपिणे ।
नमो हिरण्यगर्भाय ब्रह्मगर्भाय ते नमः ॥१९॥
सम्पद्गर्भस्वरूपाय पुण्यगर्भाय ते नमः ।
मुक्तिगर्भाय कृष्णाय स्वर्गगर्भाय ते नमः ॥२०॥
त्रिदेवा यस्य गर्भे स्युस्तस्मै देवाय ते नमः ।
सर्वात्मा श्रीहरिस्त्वं वै भूते भूते व्यवस्थितः ॥२१॥
सर्वभूताध्मभूतात्मन् मामुद्धर भवार्णवात् ।
एवं कृत्वा नमस्कारं स्तवनं कानकं ततः ॥२२॥
मुष्टिभ्यां परिसंगृह्य धर्मराजचतुर्मुखौ ।
जानुमध्ये शिरः कृत्वा तिष्ठेदुच्छ्वासपंचकम् ॥२३॥
तदा कुर्याद् द्विजस्तत्र संस्कारान् वैदिकान् शुभान् ।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ॥२४॥
हिरण्यगर्भदेवस्य ब्रह्मणः परमेष्ठिनः ।
धर्मदेवस्य च तत्र घटपात्रे स्थितस्य च ॥२५॥

गीतमंगलमन्त्राद्यैस्तत उत्थापयेद् गुरुः ।
जातकर्मादिसंस्काराः कर्तव्याः षोडशोऽपि च ॥२६॥
ततः शुद्धं पूर्णमूर्तिं वेधसं च वृषं नमेत् ।
सूच्यादिकं तु गुरवे दद्याद् वै साधवेऽपि वा ॥२७॥
नमस्कारं प्रकुर्वन् वै स्तुतिं कुर्यादिमां शुभाम् ।
नमो हिरण्यगर्भाय सावित्रीपतये नमः ॥२८॥
महालक्ष्म्यधिनाथाय हरिणीपतये नमः ।
नमस्ते विश्वगर्भाय स्वर्णगर्भाय ते नमः ॥२९॥
चराचरस्य जगतो गृहभूताय ते नमः ।
साक्षिरूपाय देवाय ब्रह्मरूपाय ते नमः ॥३०॥
यथाऽहं जनितः पूर्वं मर्त्यधर्मा तथा पुनः ।
त्वद्गर्भजननाच्चाहं दिव्यदेहो भवामि च ॥३१॥
इत्यभ्यर्थयमानस्तु चतुर्भिः कलशैर्द्विजाः ।
स्नापयेयुर्यजमानं मन्त्राशीर्वादतत्पराः ॥३२॥
अद्यजातस्य तेऽङ्गानि चाभिप्रेक्ष्यामहे वयम् ।
दिव्येनाऽनेन वपुषा चिरंजीव सुखी भव ॥३३॥
पापहीनः पुण्यनिधिः स्वर्गाधिकारवान् भव ।
भक्तिमान् मुक्तिमान् चान्ते शाश्वतानन्दभाग् भव ॥३४॥
ब्राह्मणेभ्यः प्रदद्याच्च दक्षिणाः स्वर्णराजतीः ।
रत्नमयीर्धनमयीर्वस्त्रान्नपानरूपिणीः ॥३५॥
अथ श्रीगुरवे दद्याद्धिरण्यगर्भमुत्तमम् ।
धर्मं दद्यात् साधवे च घटान् दद्यात्तु भिक्षवे ॥३६॥
विप्रेभ्यः स्वर्णमुद्राश्च कलशान् रूप्यकाँस्तथा ।
पात्राम्बराणि दद्याच्च भोजनान्युत्तमान्यपि ॥३७॥
विप्राश्च साधवः पूज्या बहुदानपरायणैः ।
तत्रोपकरणं सर्वं गुरवे वा निवेदयेत् ॥३८॥
उपानत्पादुकाछत्रचामरासनभाजनम् ।
ग्रामं वा विषयं शालां गृहं वा मन्दिरं शुभम् ॥३९॥
एवं हिरण्यगर्भस्य दाता ब्रह्माण्डदानतः ।
विशेषदः सदा भूत्वा ब्रह्मलोके महीयते ॥४०॥
कल्पकोटिशतं यावद् ब्रह्मलोके महीयते ।
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ॥४१॥
इन्द्रराज्यं परं कृत्वा सूर्यराज्यं तथाऽपरम् ।
चन्द्रराज्यं ततः कृत्वा ध्रुवराज्यं ततः परम् ॥४२॥
परमेष्ठिपदं भुक्त्वा भवेद् वैराज्यराज्यवान् ।
श्रीपुराख्यं महालक्ष्म्या राज्यं प्राप्य सनातनम् ॥४३॥
भूमराज्यं वासुदेवराज्यं भुक्त्वा ततः परम् ।
याति वै चाऽक्षरं धामाऽनादिनः परमात्मनः ॥४४॥
ललिताश्रीमहालक्ष्म्या नारायण्याः पदाम्बुजे ।
भक्तो भूत्वा च मां श्रीशं कृष्णनारायणं प्रभुम् ॥४५॥
प्राप्याऽश्नुते सर्वकामान् सह नारायणेन सः ।
हिरण्यगर्भदानं तद् भुक्तिमुक्तिप्रदं रमे ॥४६॥
पितॄणां तारकं वंशप्रदं पुत्रसुताप्रदम् ।
नारकाणां तारकं च सर्वविघ्नविनाशकम् ॥४७॥
अरिष्टानां नाशकं च तथा दुर्भाग्यनाशकम् ।
क्लेशानां नाशकं चापि सिद्धिबुद्धिसुखप्रदम् ॥४८॥
पाठकस्य तथा श्रोतुः पठमानस्य वै तथा ।
मधुतुल्यं सुधातुल्यं फलदं सिद्धमानदम् ॥४९॥
हिरण्यगर्भदानार्थे मतिं दद्याद्धि देहिने ।
सोऽपि देवाऽप्सरोभिश्च पूज्यते नायको भवन् ॥५०॥
शृणु लक्ष्मि तथा चान्यन्महादानमनुत्तमम् ।
ब्रह्माण्डदानमित्येतत् सर्वपातकनाशकम् ॥५१॥
सर्वसमृद्धिप्रदं सर्वसाम्राज्यश्रीप्रदं तथा ।
ब्रह्मपदप्रदं चापि स्वर्गप्रदं सुखप्रदम् ॥५२॥
पुण्यं दिनं समासाद्य मण्डपं कारयेत्ततः ।
आकारयेद् ऋत्विजश्च संभारान् कल्पयेत्ततः ॥५३॥
भूषाम्बरधनरत्नस्वर्णरजतहीरकान् ।
दानार्थं स्थापयेत्तत्र स्वर्णादिकलशाँस्तथा ॥५४॥
फलं जलं स्वर्णमालां दानद्रव्याणि यानि च ।
सर्वाणि स्थापयेत्तत्र मण्डपे हव्यकानि च ॥५५॥
अन्नानि विविधान्येव रसाँश्च विविधाँस्तथा ।
श्रीहरेः श्रीमहालक्ष्म्या आवाहनं प्रकारयेत् ॥५६॥
लोकपालान् देवगणानवतारान् समाह्वयेत् ।
गन्धाऽमृतजलपुष्पाऽक्षतचन्दनकुङ्कुमैः ॥५७॥
पूजयेद् विधिना सर्वान् स्वर्णमूर्तिमयाँस्तथा ।
अधिवासनकं कुर्याद् देवानां श्रीजुषां तदा ॥५८॥
सुवर्णस्याऽथवा रूप्यकस्य विंशपलाधिकम् ।
ब्रह्माण्डं कारितं तत्र मण्डपे स्थापयेच्छुभम् ॥५९॥
कलशद्वयसंयुक्तं शेषकच्छपशोभितम् ।
दिग्गजाऽष्टकसंयुक्तं षड्वेदांगसमन्वितम् ॥६०॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम् ।
शिवाऽच्युताऽर्कचन्द्रादिदेवालयविराजितम् ॥६१॥
उमालक्ष्मीसतीब्राह्मीसावित्रीमाणिकीयुतम् ।
प्रजापद्मावतीकृष्णाराधाश्रीभूसमन्वितम् ॥६२॥
वस्वाऽऽदित्यमरुद्रुद्रनिधिसिद्धिसमाश्रितम् ।
चतुर्दशस्तरगर्भं मेरुदण्डविराजितम् ॥६३॥

रत्नखनिप्रराजञ्च महाधातुसमन्वितम् ।
वितस्तेरङ्कुलशतं यावदायामविस्तरम् ॥६४॥
कौशेयवस्त्रसंवीतं तिलद्रोणोपरिन्यसेत् ।
तथाऽष्टादशधान्यानि समन्तात् परिसन्न्यसेत् ॥६५॥
पूर्वेणाऽनन्तशयनं लक्ष्मीनारायणं न्यसेत् ।
अग्नौ न्यस्येद् देवदेवं प्रद्युम्नं परमेश्वरम् ॥६६॥
दक्षिणे प्रकृतिं मायां महालक्ष्मीं तु कम्भराम् ।
निर्ऋते श्रीमहाराजं संकर्षणं प्रभुं न्यसेत् ॥६७॥
पश्चिमे चतुरो वेदान् वेदाङ्गनान्वितान् न्यसेत् ।
वायव्ये श्रीपतिं चानिरुद्धं देवं समन्यसेत् ॥६८॥
सौवर्णं वह्निदेवं तूत्तरे श्रीसेवितं न्यसेत् ।
अग्नौ श्रीमद्वासुदेवं वासुदेवीयुतं न्यसेत् ॥६९॥
अनादिश्रीकृष्णनारायणं मध्ये रमापतिम् ।
समन्ताच्छ्रीराधिकाकान्तं श्रीकान्तं नरान्वितम् ॥७०॥
वासुदेवत्रयनं च स्थापयेत् स्वर्णनिर्मितान् ।
समन्ताद् गुडपीठेषु स्थापयेत् कलशान् दश ॥७१॥
पञ्चपल्लवरत्नाढ्यान् फलाक्षतसमन्वितान् ।
नारिकेलयुतान् वस्त्रसंवीतान् जलपूरितान् ॥७२॥
दशधेनूः स्थापयेच्च स्वर्णराजतशार्कराः ।
यथाशक्ति समूर्ता वा सवत्सा दुग्धदोत्तमाः ॥७३॥
स्वर्णशृंगयुता रूप्यशफवत्यम्बरान्विताः ।
ताम्रपृष्ठयुताश्चापि कांस्यदोहसमन्विताः ॥७४॥
घासग्रासादिसंयुक्ताः शृंगारिताः प्रपूजिताः ।
उपानत्पादुकाछत्रचामरासनदर्पणैः ॥७५॥
भक्ष्यभोज्याम्बदीपेक्षुफलमाल्यानुलेपनैः ।
पूजयेत् सर्वदेवाँश्च धेनूश्च ब्राह्मणानपि ॥७६॥
साधून् साध्वीः पूजयेच्च सर्वपूजनवस्तुभिः ।
राजयोग्यैर्गन्धसारैर्मालाहाराम्बरादिभिः ॥७७॥
आरात्रिकं प्रकुर्याच्च ब्रह्माण्डस्य प्रदक्षिणम् ।
नमस्कारं प्रकुर्याद् गा देवान् साधून् सतीर्द्विजान् ॥७८॥
घृताक्ततिलपुष्पाढ्यव्रीहिहोमान् शतोत्तरान् ।
कारयित्वा ततश्चाधिवासनान्ते समन्त्रकम् ॥७९॥
स्नानं तीर्थजलैर्विप्रा यजमानस्य पापहम् ।
कलशानां जलैः सम्यक् कारयेयुः सुपुण्यदम् ॥८०॥
प्रदक्षिणं प्रकुर्याच्च यजमानस्त्रिवारकम् ।
ततः सम्प्रार्थयेद् देवं ब्रह्माण्डाख्यं नरायणम् ॥८१॥
नमोऽनन्तमहासृष्टिगर्भ विश्वात्मवासद ।
विश्वधाम जगत्क्षेत्र ब्रह्माण्ड ते नमो नमः ॥८२॥
परार्धे ते परब्रह्माऽधोऽर्धे ते श्रीनरायणी ।
द्वयोर्मध्येऽक्षरधाम सर्वसृष्टिसमन्वितम् ॥८३॥
सर्वावतारधामानि सर्वेश्वरविभूतयः ।
सर्वदेवविहाराश्च सर्वमानवमूर्तयः ॥८४॥
सर्वे मध्ये निवसन्ति ब्रह्माण्डोदरवासिनः ।
सर्वसृष्टिमयी मूर्तिर्नारायणी परेश्वरी ॥८५॥
ब्रह्माण्ड त्वं राजसेऽत्र दानं ते वितराम्यहम् ।
सर्वपापानि नश्यन्तु भवन्तु पुण्यकानि मे ॥८६॥
पितरो मे भवन्त्वेव मुक्तास्ते दानतो ध्रुवम् ।
दुःखिताः सुखिनः सन्तु दारिद्र्यं नाशमेतु च ॥८७॥
रोगाः सर्वे विनश्यन्तु भवन्तु सम्पदो गृहे ।
ऋद्धयः सर्वदा सन्तु भूतयो मे गृहे सदा ॥८८॥
स्वर्णरौप्यमहारत्नहीरकाः सन्तु मे गृहे ।
वंशविस्तारवाँश्चापि भवामि तव दानतः ॥८९॥
पापदोषा लयं यान्तु कुटुम्बिनां ममापि च ।
सौभाग्यं सर्वदा चास्तु नारीणां मत्कुटुम्बके ॥९०॥
नमोऽस्तु ब्रह्मरूपाय स्वाहा नारायणाय ते ।
इत्युक्त्वा प्रणमेदण्डं सौवर्णं राजतं च वा ॥९१॥
गुरवे साधवे दद्यात् सत्पात्राय द्विजाय वा ।
अन्योपकरणान्येव दद्याच्छ्रीगुरवे तथा ॥९२॥
अन्यरत्नानि सौवर्णमुद्रा दद्याद् द्विजातये ।
भिक्षुकेभ्यश्चापि दद्याद् रूप्यमुद्रा यथाधनम् ॥९३॥
यद्वा विभज्य दशधा ब्रह्माण्डं च ततः परम् ।
भागद्वयं श्रीगुरवे शेषभागान् द्विजातये ॥९४॥
ब्राह्मणेभ्यः प्रदद्याच्च भिक्षुकेभ्योऽपरं धनम् ।
एवं ब्रह्माण्डदानं वै कृत्वा संभोजयेत् सतः ॥९५॥
साधून् साध्वीर्भोजयेच्च बालाँश्च बालिकाँस्तथा ।
दीनाऽनाथान् भोजयेच्च विधवा भिक्षुकीस्तथा ॥९६॥
विद्यार्थिनीर्भोजयेच्च विद्यार्थिनोऽपि भोजयेत् ।
ब्रह्मिष्ठान् भोजयेच्चापि भक्तान् संभोजयेत्तथा ॥९७॥
एवं ब्रह्माण्डदानेन पुण्यं ब्रह्माण्डदानजम् ।
स्वर्गराज्यं महाराज्यं पारमेष्ठ्यपदं परम् ॥९८॥
नैकविमानसाम्राज्यं दिव्यसिद्धिसुखान्वितम् ।
वैराजं वा पदं लब्ध्वा गोलोकं प्राप्य शाश्वतम् ॥९९॥
वैकुण्ठं वा परं लोकं मुक्तमुक्तानिकायुतम् ।
नित्यकैलासलोकं वा गोलोकं प्राप्य शाश्वतम् ॥१००॥
तत्राऽनन्तसमयं सः प्रापयित्वा पितामहान् ।
जननीकुलवंशाँश्च सहस्राणि कुटुम्बिनः ॥१०१॥

तारयित्वाऽक्षरं धाम प्रयाति दानकृज्जनः ।
यः शृणोति प्रपठति स्मरत्येव विधिं त्विमम् ॥१०२॥
तस्य पुण्यं हि दानस्य जायते स्वर्गमुत्तमम् ।
अन्यस्मै दानकार्यस्य मतिं ददाति योऽपि च ॥१०३॥
तस्य स्वर्गे भवेदन्ते पुण्यभागेन राज्यभाग् ।
पुनर्दानं परं दत्वा याति वै परमं पदम् ॥१०४॥
इत्येवं शिवराज्ञीश्रि ! ब्रह्माण्डदानकं परम् ।
कथितं ते भुक्तिमुक्तिप्रदं परपदप्रदम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महादानेषु हिरण्यगर्भदानस्य ब्रह्माण्डदानस्य च विधेर्निरूपणनामा षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं महादानमथाऽपरम् ।
कल्पपादपदानाख्यं सर्वपातकनाशनम् ॥ १ ॥
पवित्रदिवसं प्राप्य तुलापुरुषदानवत् ।
कारयेन्मण्डपं रम्यं घटादिभिः सुशोभितम् ॥ २ ॥
शृंगारितं पुष्पवस्त्रैः कदलीस्तम्भतोरणैः ।
कुण्डवेदीयुतं रम्यं विप्रासनविराजितम् ॥ ३ ॥
सर्वोपकरणाद्यैश्च तीर्थजलघटैर्युतम् ।
पूजाविधानसामग्र्यादिभिः पूर्णं च सध्वजम् ॥ ४ ॥
द्वारदेशान् तोरणस्थान् देवान् दिक्पालदेवताः ।
शाखस्थान् देवदेवाँश्चाऽऽवतारान् परमेश्वरम् ॥ ५ ॥
महालक्ष्मीप्रभृतिश्रीदेवीश्च यावतीस्तथा ।
आवाहयेद् यथास्थानं पुण्याहघोषपूर्वकम् ॥ ६ ॥
कांचनस्य शुभं वृक्षं पत्रपुष्पफलान्वितम् ।
पक्षिव्रातकृतशोभम् मञ्जर्यंकुरराजितम् ॥ ७ ॥
वस्त्रभूषाछादनादितन्तुवल्लीसमन्वितम् ।
शक्तितस्त्रिपलादूर्ध्वमासहस्रपलात्मकम् ॥ ८ ॥
एवं तत्कल्पवृक्षस्य गुडप्रस्थे सुरोपणम् ।
कृत्वा सिताम्बरयुग्मं दद्याच्छाखासु चोत्तमम् ॥ ९ ॥
ब्रह्मविष्णुमहेशाद्यैर्देवैः सुशोभिते द्रुमम् ।
पञ्चशाखं चोपशाखं भासुरं श्वेतरक्तकम् ॥१०॥
हरिद्वर्णदलाढ्यं च रक्तांकुरसमन्वितम् ।
श्वेतमूलं पिशंगादिस्तम्बभागसमन्वितम् ॥११॥
शृंगारयित्वाऽधस्ताच्च महास्वर्णासने शुभे ।
अनादिश्रीकृष्णनारायणं संकल्पपूरकम् ॥१२॥
स्थापयेन्मां कमलेशं सकलत्रं सुवर्णजम् ।
ममाऽवतारान् सर्वांश्च पितरं मातरं मम ॥१३॥
सर्वा लक्ष्मीः स्थापयेच्च कामदेवं सभार्यकम् ।
अष्टसिद्धीः स्थापयेच्च कल्पवल्लीः प्रकल्पयेत् ॥१४॥
कल्पस्तबकान् परितः कल्पयेत्तु नवांकुरान् ।
शृंगारयेत् समस्ताँस्तान् कुंकुमाबीरचन्दनैः ॥१५॥
महावृक्षस्य पुत्राख्यान् वृक्षान् स्वल्पान् सुशोभितान् ।
सन्तानरूपान् परितस्तुरीयांशेन कल्पयेत् ॥१६॥
घृतपिण्डमुपन्यस्य घृतपात्रं च वा पृथु ।
पूर्वभागे ह्युपन्यस्य स्वल्पकल्पद्रुमं शुभम् ॥१७॥
न्यस्येद् घृतोपरिष्टाद्वै कल्पवल्लीषु शोभितम् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्धं न्यसेदपि ॥१८॥
गोधूमानां समुदाये कल्पस्तम्बादिशोभिते ।
अथ पश्चिमभागेऽपि पारिजातद्रुमं शुभम् ॥१९॥
सौवर्णं कल्पपुष्पाढ्यवल्लीयुक्तं न्यसेच्छुभे ।
तण्डुलानां समुदाये तृणांकुरादिशोभिते ॥२०॥
सावित्र्या जीरकपुञ्जस्थितया सह सन्न्यसेत् ।
अथोत्तरे सुगन्धाढ्यं तिलपुञ्जे सुशोभितम् ॥२१॥
कुन्दस्तबकयुक्तं च हरिचन्दनमुत्तमम् ।
व्रीहिपुञ्जोपशोभं च पूजासामग्रिकान्वितम् ॥२२॥
स्थापयेत् कोणभागेषु बकुलं चैशदिग्भवम् ।
अग्नौ तु चम्पकं रम्यं नैर्ऋते नारिकेलजम् ॥२३॥
वायव्ये पूगिकावृक्षं नागवल्लीसमन्वितम् ।
एलादिस्तम्बयुक्तं च कृत्वोद्यानं सुशोभनम् ॥२४॥
इक्षुदण्डान् रोपयेच्च फलमाल्याम्बरान्वितान् ।
कौशेयवस्त्रमूलाँश्च कृत्वैवं वाटिकां शुभाम् ॥२५॥
आम्रद्रुप्रान्तभागां वै मयूरकोकिलाश्रिताम् ।
गोगोपवृषयुक्तां च जलवापीसमन्विताम् ॥२६॥
संशोभयित्वा तत्राऽष्टौ न्यस्येत् पूर्णघटान् शुभान् ।
रत्नपल्लववस्त्राढ्यान् फलवारिसमन्वितान् ॥२७॥
पादुके चामरे छत्रं वेत्रं वितानकं रथम् ।
विमानं वाहनं चापि स्थापयेत् तत्र सन्निधौ ॥२८॥
पात्रं नैवेद्यदानार्थं स्थाली चाशनभाजनम् ।
जलपानार्थकलशं स्थापयेत् पादपान्तिके ॥२९॥
दीपं धूपं प्रकुर्याच्च फलं मिष्टं रसान्न्यसेत् ।
तथा समस्तधान्यानि चाष्टादशविधानि वै ॥३०॥
यथाशक्ति न्यसेत्तत्र मण्डपे पादपान्तिके ।
गोधूमान् तण्डुलान् कङ्गूः ज्वारिका बर्जरोंस्तथा ॥३१॥

वण्टिका शीणिका मुद्गान् चणकान् राजमाषकान् ।
कुलत्थिका वटाणाँश्च माषाँश्च कोद्रवाँस्तथा ॥३२॥
यवान् तुवरीर्धान्यानि षोडशोपन्यसेत् पुरः ।
निवारान् राजगुरुकान् शृंगाटकांश्च चिर्भटान् ॥३३॥
आम्रानिक्षून् नारिकेलानमृतान् बिल्वकाँस्तथा ।
पनसान् जाम्बुकाँश्चापि लिचिकाँश्च कलिंगरान् ॥३४॥
शर्कराः खर्बूचकाँश्च कर्कटीः षोडश न्यसेत् ।
अथ होमाँश्च कुण्डाग्नावष्टोत्तरशतं चरेत् ॥३५॥
पायसान्नैः फलैश्चापि विविधैः रससंभृतैः ।
सुवर्णस्य गणेशं च सपत्नीकं प्रपूजयेत् ॥३६॥
कुर्यान्मूर्तेर्हरेर्मेऽधिवासनं सद्रुमस्य च ।
वृक्षं संस्नापयेन्मां च कुर्यात् त्रिःसम्प्रदक्षिणम् ॥३७॥
नमस्कुर्यात् स्तवनं चाचरेत् सम्प्रार्थयेत्ततः ।
नमस्ते परमेशाय कल्पद्रुमात्मकाय च ॥३८॥
कल्पवल्ल्यधिनाथाय चिन्तितार्थप्रदायिने ।
सर्वरसगन्धरूपविभूतिमूर्तये नमः ॥३९॥
विश्वम्भराय देवाय नमस्ते पूर्तिमूर्तये ।
सर्वान्नपूर्णदेवाय सर्वामृताय ते नमः ॥४०॥
सर्वसुधानिवासाय पीयूषरूपिणे नमः ।
त्वमेव परमेशोऽसि नारायणोऽसि माधवः ॥४१॥
संकर्षणोऽनिरुद्धस्त्वं प्रद्युम्नस्त्वं विभासि च ।
सूर्यश्चन्द्रोऽग्निरिन्द्रस्त्वं जाठरस्त्वं सनातनः ॥४२॥
ब्रह्मणो मानसोद्यानेश्वरस्त्वं च वनस्पतिः ।
मूर्तरूपोऽप्यमूर्तोऽसि बीजवृक्षात्मकोऽसि च ॥४३॥
नरनारीस्वरूपोऽसि महालक्ष्मीयुतोऽसि च ।
सनातनस्वरूपोऽसि सृष्टिरक्षणनाशकृत् ॥४४॥
सन्तानवल्लिकावृक्षैर्युतोऽस्मान् पाहि सर्वतः ।
स्वर्गं देहि विभूतीश्च प्रदेहि सम्पदः शुभाः ॥४५॥
सिद्धीर्देहि विमानानि वंशोद्धारं तथा कुरु ।
पितॄणां मोक्षदस्त्वं वै तेषां तृप्तिं विधेहि च ॥४६॥
अन्ते श्रीकृष्णकृष्णस्य पदं देहि महासुखम् ।
एवमभ्यर्थ्य तं दद्याद् गुरवे कल्पपादपम् ॥४७॥
चतुर्भ्यश्चाथ ऋत्विग्भ्यः सन्तानादीन् समर्पयेत् ।
अन्यदानानि सर्वाणि साधुभ्यश्च द्विजातये ॥४८॥
दद्यात् प्रभोजनं रम्यं कारयेद् भिक्षुयोगिनाम् ।
न वित्तशाठ्यं कुर्वीत दद्याद्धनं यथोचितम् ॥४९॥
फलमूलानि धान्यानि दद्याद् योग्येभ्य एव तु ।
नमस्कुर्यात् प्रसाद्यैव विसर्जयेत्ततः स्वयम् ॥५०॥
प्रसादभोजनं कुर्यादेवं दानप्रदः पुमान् ।
सर्वपापविनिर्मुक्तश्चाश्वमेधाऽयुतोद्भवम् ॥५१॥
पुण्यं लभते धर्मात्मा सपत्नीकः सबान्धवः ।
सकुटुम्बो महाराज्यं भुक्त्वाऽत्राऽथ दिवं व्रजेत् ॥५२॥
महत्स्वर्गे च वै भुक्त्वा सत्यलोकं व्रजेत्ततः ।
वैराजं च पदं भुक्त्वा यायाद् वैकुण्ठमेव च ॥५३॥
भूतान् भाव्यान् शतगोत्रान् तारयेन्मानवान् स हि ।
स्तूयमानान् दिवः पृष्ठे पितापुत्रप्रपौत्रकान् ॥५४॥
विमानैरर्कतुल्यैश्च विष्णुलोकं परात्परम् ।
प्रेषयत्येव तत्पुण्यैर्धामाऽक्षरं ततः परम् ॥५५॥
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणप्रसेवकः ॥५६॥
यजमानोऽनादिकृष्णनारायणपदं व्रजेत् ।
श्रोता वक्ताऽस्य च स्मर्ता महेन्द्रो जायते ध्रुवम् ॥५७॥
शृणु त्वं शिवराशीश्रि महादानं तथाऽपरम् ।
गोसहस्रमहादानं सर्वपुण्यप्रदायकम् ॥५८॥
पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकीम् ।
जयन्तीं देवदेवीनां नारायणस्य मे तथा ॥५९॥
मण्डपं रमणीयं वै कृत्वा कुण्डं शुभं ततः ।
होमवस्तूनि संगृह्य देवानावाहयेत्ततः ॥६०॥
समर्चयेद्धरिं मां चावतारानीश्वरीस्तथा ।
सर्वा लक्ष्मीः पूजयेच्च गोमूर्तिं स्वर्णकारिताम् ॥६१॥
पूजयेद् यजमानस्तां पयोव्रती त्र्यहं च वा ।
एकाहं वा ततो विप्रैः पुण्याहं वाचयेदथ ॥६२॥
अग्नौ च हवनं कुर्याद् घृतव्रीहिफलादिभिः ।
सहस्रवारं हवनं कृत्वा गवां सहस्रकम् ॥६३॥
बहिःस्थितं पूजयेच्च प्रणमेच्च प्रदक्षिणम् ।
वस्त्रमाल्याम्बरभूषाशृंगखुरसुदोहनैः ॥६४॥
शृंखलाकुंकुमपृष्ठाच्छादनैः पूजयेत्ततः ।
सुवर्णशृंगाभरणा रौप्यपादसमन्विता ॥६५॥
सुवर्णघण्टिकायुक्ताः कांस्यदोहनकान्विताः ।
सुवर्णतिलकोपेता हेमपट्टाद्यलंकृताः ॥६६॥
कौशेयवस्त्रसंवीता माल्यगन्धादिकार्चिताः ।
घासग्रासयुता दण्डैश्चामरैरुपशोभिताः ॥६७॥
उपानत्पादुकाछत्रभाजनासनसंयुताः ।
नन्दिकेश्वरयुक्ताश्च वत्सवत्सतरीयुताः ॥६८॥
यद्वा सौवर्णगोमध्ये नन्दिकोऽपि सुवर्णजः ।
दशगोमध्यगो वस्त्राभरणादिविभूषितः ॥६९॥

लवणद्रोणशिखरे माल्येक्षुफलसंयुतः ।
पलशतोर्ध्वसौवर्णः शतत्रयमितोऽथवा ॥७०॥
शक्तितः पल्साहस्रत्रितयोद्भावितोऽथवा ।
स्थापनीयः पूजनीयस्तथा गोदशकं शुभम् ॥७१॥
सौवर्णं पूजनीयं वै दशांशं पूजयेच्च वा ।
गीतमंगलनादैश्च स्नापयित्वाऽमृतोदकैः ॥७२॥
प्रदक्षिणं च त्रिःकृत्वा गृहीतकुसुमाञ्जलिः ।
पूजयित्वा गवां वृन्दं नमस्कृत्याऽर्थयेत्ततः ॥७३॥
नमोऽस्तु ब्रह्ममूर्तिभ्यो विश्वमातृभ्य आनमः ।
लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥७४॥
गवामंगेषु तिष्ठन्ति सृष्टयस्तिस्र एव च ।
चतुर्दशभवनानि वेधसः सृष्टिरित्यपि ॥७५॥
विष्णोः सदाशिवस्याऽपि चाऽष्टाविंशतिभूस्तराः ।
षट्पञ्चाशच्च मायाया लोकास्तिष्ठन्ति गोषु तु ॥७६॥
रोहिण्यो द्रोण्य ईश्वर्यो मातरः पान्तु मां सदा ।
गावो ममाऽग्रतः सन्तु गावः सन्तु च पृष्ठतः ॥७७॥
गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम् ।
वृषोऽयं धर्मरूपश्च भवत्यपि सनातनः ॥७८॥
हरेर्मूर्तौ वसन्पातु मां सदा सकुटुम्बकम् ।
स्वर्गं सत्यं च वैराजं भौमं वैकुण्ठमुत्तमम् ॥७९॥
श्रीपुरं चामृतं चाव्याकृतं गोलोकमक्षरम् ।
ब्रह्मधाम वृषो गावो ददत्वेव च मे शुभम् ॥८०॥
इति सम्प्रार्थ्य सौवर्णीं धेनुं श्रीगुरवेऽर्पयेत् ।
नन्दीश्वरं प्रदद्याच्च धर्ममूर्तिं सते तथा ॥८१॥
ऋत्विग्भ्यो धेनुमेकैकां दद्यात् शृंगारितां शुभाम् ।
अन्यगावः प्रदद्याच्च विप्रेभ्योऽपि यथोचितम् ॥८२॥
नैका बहुभ्यो दातव्या क्लेशदा स्यात्ततः खलु ।
बह्व्यस्त्वेकस्य दातव्या धीमताऽऽरोग्यवृद्धये ॥८३॥
सर्वाभूषणयुक्ताश्च दातव्या गुरवे शुभाः ।
बह्व्यः श्रीगुरवे देया यदि बाधो न वर्तते ॥८४॥
विविधानि धनान्येव धान्याम्बराणि यानि च ।
स्वर्णरजतरूप्याणि देयानि भिक्षुकादिषु ॥८५॥
पयोव्रती ब्रह्मचारी हरिभक्तिपरायणः ।
श्रावयेच्छृणुयाद्धेनुकथां कुर्याज्जपं हरेः ॥८६॥
विपुलां श्रियमाप्नोति पापहीनो भवेत्तथा ।
बहुपुण्यो विमानेन सूर्यसहस्रशोभिना ॥८७॥
देहान्ते नाकपृष्ठं च गत्वा सत्यं ततः परम् ।
लोकपालैः पूजितश्च वंशविस्तारशोभितः ॥८८॥
भुक्त्वा भोगान् दिव्यसंज्ञान् वैराजलोकसंस्थितान् ।
वैष्णवं योगमास्थाय ततो यात्यक्षरं पदम् ॥८९॥
शतमेकोत्तरं सोऽयं पितॄणां तारयेद् बुधः ।
मातामहानां तद्वच्च तारयेच्छतवंशजान् ॥९०॥
पितरश्चाभिनन्दन्ति गोसहस्रप्रदं सुतम् ।
अपि स्यात् स कुलेऽस्माकं पुत्रो दौहित्र एव वा ॥९१॥
गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति ।
तस्य कर्मकरो वा स्यादपि द्रष्टाऽनुमोदकः ॥९२॥
संसारसागरादस्मात् सोऽपि नस्तारयिष्यति ।
मृतस्याऽग्रे यान्ति गावो याम्यलोकसृतावपि ॥९३॥
वैतरण्यां तारयन्ति धर्मराजगृहेऽपि च ।
स्वर्गे वा सत्यलोके वा महेश्वरनिवासने ॥९४॥
विष्णोर्वासे तथेशानीवासे श्रीपुरकेऽपि च ।
महालक्ष्म्या निवासे चावताराणां निवासने ॥९५॥
सर्वत्र यान्ति गावश्च तारिकाः पोषिकाः शुभाः ।
यत्र गौस्तत्र वै देवा ईश्वराः पार्षदा मम ॥९६॥
सर्वा लक्ष्म्यो ब्रह्मपत्न्यो यत्र गावो वसन्ति वै ।
यत्र ब्रह्माक्षरं चापि गोलोको यत्र वर्तते ॥९७॥
गवां योगेन गोलोकः मे कृष्णस्य व्यजायत ।
यत्र गावस्तत्र चाहं लक्ष्मीः राधा च माणिकी ॥९८॥
प्रज्ञा पद्मावती श्रीश्च महालक्ष्मीः परेश्वरी ।
तत्राऽमृता पुरी दिव्या श्रीपुरी धामिनी शुभा ॥९९॥
नित्या सर्वप्रभोगाढ्या दिव्योपकरणान्विता ।
दिव्यशक्तिगणाकीर्णा दिव्यवैभवशोभना ॥१००॥
शाश्वतानन्दसन्दोहा दिव्यभोज्यसुपानिका ।
दिव्यवासोद्यानवाटीशय्याविहारसंभृता ॥१०१॥
एवंविधां श्रीपुरीं वै लभते गोसहस्रदः ।
गोलोकं लभते चापि लभते चाऽक्षरं पदम् ॥१०२॥
लभते स ममैश्वर्यं शिवाराशि ! समस्तकम् ।
लभते स रसान् सर्वान् नारायणि ! न संशयः ॥१०३॥
लभते विविधाः शक्तिर्दुःखहे ! सुखसंभृताः ।
अश्नुते सर्वकामांश्च ब्रह्मणा सह धामनि ॥१०४॥
पठनाच्छ्रवणादस्य स्मरणादुपदेशनात् ।
प्रेरणाद् भुक्तिमुक्ती स लभते यजमानकः ॥१०५॥
नरो नारी सती साध्वी साधुर्देवो गुरुः प्रभुः ।
गोदानस्य प्रदो याति शाश्वतं ब्रह्म मत्पदम् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
कल्पवृक्षमहादानगोसहस्रमहादानविधिनिरूपणनामा
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु त्वं शिवराज्ञीश्रि ! महादानं तथाविधम् ।
हिरण्यकामधेनोस्तत् सर्वसंकल्पसाधकम् ॥ १ ॥
मण्डपं कारयेद् रम्यं कुण्डतोरणशोभनम् ।
आसनैश्चोपकरणैर्हव्यैर्वह्न्यादिभिर्युतम् ॥ २ ॥
लोकपालान् देवताश्च परमेशं रमापतिम् ।
लक्ष्मीः सर्वास्तथाऽऽवाह्य पूजां होमं च कारयेत् ॥ ३ ॥
यजमानस्ततस्तत्राऽधिवासनं समाचरेत् ।
पुण्यवेदस्तवघोषान् विप्राः कुर्युश्च साधवः ॥ ४ ॥
कांचनस्याऽतिशुद्धस्य धेनुं वत्सां च कारयेत् ।
उत्तमां पलसाहस्रीं तदर्धेन तु मध्यमाम् ॥ ५ ॥
कनीयसीं तदर्धेन त्रिपलादूर्ध्वमित्यपि ।
कारयित्वा मण्डपे तामानाय्य मृगचर्मणि ॥ ६ ॥
वेद्यां गुडोपरि स्थाप्य महारत्नादिभिः शुभैः ।
शृंगखुरपृष्ठवंशे स्वर्णभूषादिभिस्तथा ॥ ७ ॥
ललाटे कुंकुमाद्यैश्च पूजयेत्तां सवत्सिकाम् ।
कुंभाष्टकं रत्नपत्रजलतण्डुलशोभितम् ॥ ८ ॥
स्थापयेन्मण्डपे तत्र धान्यान्यष्टादशाऽपि च ।
इक्षुदण्डाष्टकं तद्वत् फलानि विविधानि च ॥ ९ ॥
पात्राणि दोहपात्रं च रज्जुं च शृंखलां शुभाम् ।
खानपात्रं रस्यघासं स्थापयेन्मण्डपे तथा ॥१०॥
कौशेयाऽम्बरयुगलं भूषाछत्रप्रदीपकान् ।
कुण्डलचामरघण्टास्वर्णशृंगादिकास्तथा ॥११॥
विभूषा रूप्यखुरिकाः सर्वरसान् न्यसेच्छुभान् ।
हरिद्रां फलपुष्पाणि कस्तूरीं चन्दनं तथा ॥१२॥
कर्पूरं शर्कराः सौम्यं वितानकं तथाऽम्बरम् ।
एवं सर्वाः शुभा दिव्याः सामग्रीस्तीर्थवारि च ॥१३॥
दर्भं चाक्षतकाँश्चापि तुलसीपत्रकाणि च ।
संस्थाप्य मण्डपे तत्र यजमानः शुचिः स्वयम् ॥१४॥
पुष्पहस्तः पूजयेद् गां विप्रो वेदान् समुच्चरेत् ।
मंगलैः स्तवनैर्युक्तः त्रिःप्रदक्षिणमाचरेत् ॥१५॥
स्तवनं च प्रकुर्याद्वै तिष्ठन् गोसन्निधौ तदा ।
मातस्त्वं सर्वदेवानां मन्दिरं सर्वयोगिनाम् ॥१६॥
देहिनां तारिणी त्वं वै शक्तीनामाश्रयाशुभा ।
स्वर्गमार्गप्रदा मोक्षप्रदा सम्पत्प्रदाऽसि च ॥१७॥
पापनाशकरी चासि सुखदे त्वां नमाम्यहम् ।
यथेष्टफलदे मातर्दुःखसन्तापनाशिनी ॥१८॥

कामधेनो महानन्दप्रदात्रि परमेश्वरि ।
मोक्षदात्रि हरेर्नित्यं प्रीतिकरि नमोऽस्तु ते ॥१९॥
कानकी त्वं हरिणी त्वं हिरण्या त्वं च चन्द्रिका ।
श्रीस्त्वं लक्ष्मीर्महालक्ष्मीः कमला त्वं हरिप्रिया ॥२०॥
नारायणी त्वं रसदा संकल्पपूरिका रमा ।
पद्मा त्वं धामशक्तिस्त्वं जया त्वं ललितेश्वरी ॥२१॥
शारदा त्वं माणिकी त्वं प्रभा त्वं परमेश्वरी ।
दुःखहा त्वं पाशवती पद्मजा त्वं च तुलसी ॥२२॥
माधवी त्वं च गायत्री कार्ष्णी त्वं शांकरी सती ।
वैकुण्ठा त्वं चाक्षरी त्वं ब्राह्मी त्वं कनकेश्वरी ॥२३॥
स्वर्गिणी त्वं तापसी त्वं सत्या त्वं वैष्णवी प्रिया ।
मेदिनी त्वं प्रसूस्त्वं च वाटिका त्वं हि शाश्वती ॥२४॥
रक्षयित्री प्रापयित्री पुण्यस्य शाश्वतस्य वै ।
मोचयित्री हि पापानां दात्री मोक्षस्य पावनी ॥२५॥
त्वं धेनो मां विनिष्पापं कृत्वा कुटुम्बसंयुतम् ।
समृद्धं स्वर्गं सदा दत्वा ततो मोक्षं प्रदास्यसि ॥२६॥
कृपया ते गताः स्वर्गं पितरो मे पुरातनाः ।
गमिष्यन्त्यपरे प्रेताः स्वर्गं मोक्षं प्रदानतः ॥२७॥
एषा भवती दत्ताऽसि गुरवे ब्राह्मणाय च ।
सत्पुरुषाय दिव्याय साधवे हरयेऽपि च ॥२८॥
इत्युक्त्वा च जलं क्षिप्त्वा दद्याद् गां गुरवे तदा ।
मणिरत्नानि मुद्राश्च रूप्यकाणि धनानि च ॥२९॥
धान्यानि वस्त्रजातानि दद्यादन्येभ्य आदरात् ।
भोजनानि विचित्राणि मिष्टान्नान्युत्तमानि च ॥३०॥
पायसानि सुगन्धानि भोजयेद् विप्रयोगिनः ।
दीनाऽनाथसतीसाध्वीसाधुबालान् प्रभोजयेत् ॥३१॥
दद्याद् दानानि बहूनि चान्यान्यपि यथाधनम् ।
एवं स्वर्णधेनुदाता याति ब्रह्म सनातनम् ॥३२॥
स्वर्णधेनुप्रदाने यः शक्तो नास्ति स राजतीम् ।
सवत्सां गां प्रदद्याच्च तत्राऽशक्तस्तु वत्सिकाम् ॥३३॥
वत्सिकादानकरणेऽप्यशक्तो मानवस्तु यः ।
दानप्रशंसां कुर्याच्च बोधयेत्प्रेरयेत्परान् ॥३४॥
शृणुयाच्छ्रावयेच्चापि कीर्तयेत् तत्फलं व्रजेत् ।
अथाऽन्यत्ते प्रवक्ष्यामि लक्ष्मि दानमनुत्तमम् ॥३५॥
महादानं हिरण्याऽश्वप्रदानं स्वर्गराज्यदम् ।
मोक्षदं श्वेतवाहानां वैहायसविमानदम् ॥३६॥
पुण्यदिने समासाद्य मण्डपं कारयेच्छुभम् ।
वेदिकां वा शुभं कुण्डं होमार्थं तत्र कारयेत् ॥३७॥

सर्वोपकरण्यान्येव स्थापयेत् सन्निधौ तथा ।
दानसामग्रिकाः सर्वाः स्वर्णरूप्यकहीरकान् ॥३८॥
अन्नवस्त्रभाजनानि स्थापयेत् पूजनार्थिकाः ।
सामग्रीश्चापि सर्वाश्च चन्दनाक्षतमालिकाः ॥३९॥
नैवेद्याऽऽरार्त्रिकवस्तून्यपि पार्श्वे न्यसेत्ततः ।
तीर्थजलेन पूर्णं वै कुंभं न्यसेच्च मण्डपे ॥४०॥
पुण्याहवाचनं तत्र कारयेद्विप्रसत्तमैः ।
लोकपालादिदेवानामावाहनं प्रकारयेत् ॥४१॥
अनादिश्रीकृष्णनारायणस्य श्रीपतेस्तथा ।
अवतारप्रमुक्तानां शक्तीनां सर्वयोषिताम् ॥४२॥
आवाहनं कारयेच्च पूजयेच्च विधानतः ।
स्थापयेद् वेदिकामध्ये कृष्णाऽजिनतिलोपरि ॥४३॥
कौशेयवस्त्रसंवीतं सौवर्णं श्रेष्ठवाजिनम् ।
त्रिपलात्तु समारभ्याऽऽसहस्रपलसूद्भवम् ॥४४॥
स्वर्णपल्याणपृष्ठं च स्वर्णहारसुकल्गिकम् ।
सुवर्णरशनायुक्तं सुवर्णपट्टशोभितम् ॥४५॥
सुवर्णनेत्रपटलं हीरकशाविराजितम् ।
सच्छत्रं सत्पादबन्धं सच्छफं सुमनोहरम् ॥४६॥
यद्वाऽश्विनीं सुवर्णस्य सवत्सरीं विभूषिताम् ।
स्थापयेत् सौम्यवर्णां वा दानार्थं मण्डपे तिले ॥४७॥
उपानत्पादुकाछत्रचामरासनभाजनम् ।
स्थापयेन्मण्डपे तत्रेक्षुदण्डान् कलशाऽष्टकम् ॥४८॥
माल्यतण्डुलपत्रादिरत्नश्रीफलसंयुतम् ।
जलपूर्णं हि सौवर्णं राजतं ताम्रजं च वा ॥४९॥
अन्यानि दानयोग्यानि वस्तूनि सुभगान्यपि ।
हीरकमाणिक्यरत्नान्यनेकधान्यकानि च ॥५०॥
वस्त्रालंकारपात्राणि दानार्थे तत्र विन्यसेत् ।
शय्यां पर्यंकसहितां शिरोधानादिसंयुताम् ॥५१॥
पार्श्वधानोपधानोपस्करादिशोभितां न्यसेत् ।
स्थालीं च कलशं रम्यां वाटिकीं च न्यसेदपि ॥५२॥
मिष्टान्नानि च पेयानि दुग्धादीनि न्यसेदपि ।
फलान्यनेकमिष्टानि सुपक्वानि न्यसेदपि ॥५३॥
कन्दानि मूलकन्दानि दलशाकानि सन्न्यसेत् ।
एवंविधे मण्डपे वै यजमानः शुचिः शुभः ॥५४॥
विप्रैः सर्वौषधिस्नानस्नापितः कुसुमाञ्जलिः ।
त्रिः प्रदक्षिणमावृत्य वह्निमश्वं गुरुं ततः ॥५५॥
प्रार्थयेत् परमात्मानं सर्ववाजिविराजितम् ।
नमस्ते सर्ववाजाढ्य सर्वात्मन् वाजिहृद्गत ॥५६॥
वेदाऽऽहरणकर्तस्त्वं चाऽश्विनीपुत्र ते नमः ।
स्वर्णाश्वरूपमूर्ते ते दिव्यमूर्ते च ते नमः ॥५७॥
सूर्याश्वमूर्ते कल्क्यश्वमूर्ते तुभ्यं नमो नमः ।
उच्चैःश्रवसे देवाश्वरूपिणे ते नमो नमः ॥५८॥
इन्द्रियाश्वस्वरूपाय मानसाश्वाय ते नमः ।
अश्वत्थसाम्यरूपाय महाश्वाय च ते नमः ॥५९॥
श्वेताश्वरूपधर्त्रे ते पापघ्नाय च ते नमः ।
वाजिरूपो हरिस्त्वं मां पाहि संसारसागरात् ॥६०॥
स्वर्गं मोक्षं महाराज्यं देहि ऋद्धिं सनातनीम् ।
देहि मे सम्पदः सर्वा मोक्षं देहि ततः परम् ॥६१॥
तव दानेन विश्वात्मा तृप्तो भवतु माधवः ।
एवमुच्चार्य परितश्चैकं प्रदक्षिणं चरेत् ॥६२॥
अष्टोत्तरं शतं हुत्वा ततो दानेऽर्पयेद्धयम् ।
नमस्कृत्य हिं गुरवे तमश्वं विनिवेदयेत् ॥६३॥
अन्यान्यपि च वस्तूनि दद्याद् दाने यथोचितम् ।
ऋत्विग्भ्यश्चार्पयेद् द्रव्यं भिक्षवेऽन्नं धनादिकम् ॥६४॥
दत्वा पापक्षयाद् दिव्यो जायते यजमानकः ।
सूर्यलोकं सत्यलोकं वैकुण्ठं च प्रयाति सः ॥६५॥
संहिताश्रवणं कुर्याद् भोजनादि प्रकारयेत् ।
विप्रेभ्यश्चापि साधुभ्यः साध्वीभ्योऽन्नानि चार्पयेत् ॥६६॥
अनाथबालबालाभ्यो गोभ्योऽश्वेभ्यो तृणानि च ।
दद्याद् भावभरो भूत्वा भोजयेदन्नकांक्षिणः ॥६७॥
लक्ष्मि स्वर्णाश्वदानं यो ददात्येवं यथाधनम् ।
सम्पूज्यमानो देवेशैर्मुक्तो याति पदं हरेः ॥६८॥
स्वर्णविमानमारूढो यात्यर्कलोकमुत्तमम् ।
शृणुयाद्वा कथां चेमां सोऽपि यात्यर्कसद्गृहम् ॥६९॥
वाचयेच्छ्रावयेच्चापि सोऽपि यात्यर्कसन्निधिम् ।
अभिनन्दनदश्चापि याति स्वर्गं सुखाश्रयम् ॥७०॥
शृणु लक्ष्मि महादानं पुण्यमश्वरथात्मकम् ।
पुण्यं दिनं समासाद्य मण्डपं कारयेच्छुभम् ॥७१॥
वेदीं कुण्डं कारयेच्च पूजावस्तूनि चाहरेत् ।
लोकपालान् देवताश्च परब्रह्माऽवतारकान् ॥७२॥
ईश्वरानीश्वरिणीश्चाऽऽवाहयेन्मण्डपे शुभे ।
अष्टादश च धान्यानि पात्राणि च धनानि च ॥७३॥
वस्त्रभूषणरूप्याणि स्थापयेन्मण्डपेऽभितः ।
गणेशाद्याँस्तथा देवान् श्रीपतिं मां जनार्दनम् ॥७४॥
बालकृष्णं तथा कृष्णां ब्रह्मप्रिया हरिप्रियाः ।
आवाहयेत्पूजयेच्च सुवर्णरथमाहरेत् ॥७५॥

अश्वसप्तकयुक्तं च चतुश्वकं ततोऽधिकम् ।
ऐन्द्रनीलेन कुंभेन वरूथेन ध्वजेन च ॥७६॥
कूवरेण सूर्यमुख्या सूतेन च विराजितम् ।
अनादिश्रीकृष्णनारायणं मां कमलायुतम् ॥७७॥
स्थापयेत्तद्रथमध्ये पट्टराज्ञीसमन्वितम् ।
पार्षदान्मे स्थापयेच्च छत्रचामरशोभितान् ॥७८॥
वेत्रधरान् हेतिधरान् पूजसेवनतत्परान् ।
साधून् साध्वीः स्थापयेच्च रथे मत्पार्श्वतस्तथा ॥७९॥
देवर्षिपितृसंवातान् स्थापयेद् रथसत्तमे ।
महालक्ष्मीं कंभरां च श्रीमद्गोपालकृष्णकम् ॥८०॥
सन्तुष्टां स्थापयेच्चापि सर्वा देवीः शुभाश्रयाः ।
ललितां स्थापयेत्तत्र सर्वशक्तिसमन्विताम् ॥८१॥
रत्नानि हीरकान् हारान् स्वर्णभूषा रथे न्यसेत् ।
सिंहचर्मोपरि द्रोणतिलान् ततोऽधिकाँश्च वा ॥८२॥
आधारपटकान् कृत्वा तेषु संस्थापयेद् रथम् ।
षोडश वा चतुरो वा सरत्नपल्लवाक्षतान् ॥८३॥
वस्त्रजलफलपूर्णान् कलशांस्तत्र विन्यसेत् ।
कौशेयवस्त्रसंयुक्तान् पूजयेद्भावतः सुरान् ॥८४॥
रथे मां पूजयेल्लक्ष्मि मन्नाम्ना चाधिवासनाम् ।
कुर्याद् यथान्यवस्तून्याहरेद् दानार्थमेव च ॥८५॥
छत्रं च चामरे चापि कौशेयाम्बरमित्यपि ।
उपानहौ पादुके च गाः शय्या पात्रमित्यपि ॥८६॥
मञ्चकश्चापराण्येव वस्तूनि शोभनानि च ।
हेमसिंहं कारयेच्च रथेन सह शोभनम् ॥८७॥
द्वाभ्यां वा च चतुर्भिर्वा वाजिभिः सहितं रथम् ।
चक्ररक्षाकरौ साश्वौ सहेती पार्श्वगौ तथा ॥८८॥
रथं सहस्रसौवर्णं तदन्यत्तु यथाधनम् ।
यद्वा रथं त्रिपलोर्ध्वं पूजयेत् त्रिःप्रदक्षिणम् ॥८९॥
शुचिः स्वयं यजमानो गृहीतकुसुमाञ्जलिः ।
शुक्लमाल्याम्बरधरः कृत्वा मे हवनं घृतैः ॥९०॥
अथान्यफलपुष्पाद्यैस्ततो रथं प्रदक्षिणम् ।
कृत्वाऽर्थयेद् रथं मां चाऽभेदेन श्रीपदं प्रभुम् ॥९१॥
नमो धामाभिगतये नमो नारायणाय ते ।
नमोऽनादिकृष्णनारायणरूपाय योगिने ॥९२॥
ब्रह्माण्डपारगायाऽपि सर्वलोकात्मकाय ते ।
नमो धाम्नामधीशाय सर्वेश्वररथाय ते ॥९३॥
महाकालो महामृत्युश्चायने ऋतवो ह्यराः ।
सर्वे ते गतिचक्राख्यास्तेभ्यो मां त्रातुमर्हसि ॥९४॥
देहि स्वर्गं शाश्वतं मे देहि च धार्मिकीं गतिम् ।
देहि मे परमं धाम कालमायाविवर्जितम् ॥९५॥
पितॄणां मे कुटुम्बानां मोक्षं कुरु रथोत्तम ।
दिव्यो विमानरूपस्त्वं भूत्वा नयाक्षरं पदम् ॥९६॥
मुक्तास्तव ध्वजे सन्ति धामाऽक्षरं तु पट्टके ।
ईश्वरा दण्डदेहे च वरूथे शक्तयोऽखिलाः ॥९७॥
अन्तर्भागे स्वर्गलोका मध्ये नारायणो हरिः ।
परितो देवताः सर्वा सर्वे देवा बहिःस्थिताः ॥९८॥
अधः सप्ततलवासाश्चक्रयोश्च यमो वृषः ।
अग्रे पुण्यं तथा भक्तिर्गुरवस्ते वसन्ति च ॥९९॥
तेषां साक्ष्ये ददाम्येव रक्ष मां भवसागरात् ।
इत्युक्त्वा गुरवे देयो रथश्चान्यधनान्यपि ॥१००॥
अन्यत् सर्वमनाथेभ्यो देयं दानं यथायथम् ।
भोजयेत्सर्वसाधूंश्च विप्रांश्च बालबालिकाः ॥१०१॥
विसर्जयेत्ततः सर्वान् परिहारं विधापयेत् ।
श्रावयेत् संहितां दानकथां चान्यान् दिशेत्तथा ॥१०२॥
उपदेष्टाऽनुमन्ता च फलं तुल्यं हि विन्दति ।
दिव्यरथेऽधिरुह्यैव याति धामाऽक्षरं मम ॥१०३॥
सर्वस्वर्गविशेषाँश्च मुक्त्वा कुटुम्बयुक् चिरम् ।
ईश्वरोऽपि महान् भूत्वा याति धाम रथार्पकः ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महादानेषु स्वर्णकामधेनुदानहिरण्याश्वदानहिरण्यरथदानविधिनिरूपणनामा अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि वदाम्यत्र हेमहस्तिरथार्पणम् ।
यत्प्रदानाद् दिव्यपदं वैष्णवं लभते जनः ॥ १ ॥
पुण्यदिनं समासाद्य मण्डपं कारयेच्छुभम् ।
वेदीं कुण्डं हव्यवस्तून्युपन्यसेच्च मण्डपे ॥ २ ॥
आसनानि जलघटान् विप्रानाहूय तत्र च ।
तीर्थान्यावाहयेच्चापि तथा पुण्याहवाचनम् ॥ ३ ॥
मंगलानि समस्तानि गापयेद् यजमानकः ।
देवतावाहनं कुर्यात् पूजयेच्च यथाविधि ॥ ४ ॥
हेमहस्तिरथं पुष्पाकारं मण्यादिमण्डितम् ।
वलभीभिर्विचित्राभिः कारयेद् दशचक्रकम् ॥ ५ ॥
सध्वजं सवरूथं च सोपस्करं सुशोभनम् ।
छत्रचामररत्नाढ्यं वेत्रधरादिशोभितम् ॥ ६ ॥

चन्द्रदर्पणपूर्वस्थप्रभाशोभाविराजितम् ।
व्याघ्रचर्मणि शार्दूलचर्मणि स्थापयेत्तिलान् ॥ ७ ॥
तत्र रथं स्थापयेच्च देयवस्तूनि चापि वै ।
रथे नारायणं कृष्णं स्थापयेन्मां रमापतिम् ॥ ८ ॥
अवतारानीशनीश्च माणिक्यां दुःखहाश्रियम् ।
राधिकां च प्रभां पाशवर्तीं लक्ष्मीं जयां रमाम् ॥ ९ ॥
ललितां कमलां पद्मां पद्मिनीं तुलसीं सतीम् ।
सावित्रीं कंभरां लीलां गायत्रीं मञ्जुलां भुवम् ॥१०॥
महालक्ष्मीं महाविष्णुं सरस्वतीं च माधवीम् ।
भार्गवीं सुगुणां हंसीं ब्रह्मविष्णुशिवौंस्तथा ॥११॥
अनादिश्रीकृष्णनारायणंश्रीकृष्णमाधवम् ।
ब्रह्मप्रियाहरिप्रियान्वितं मां सेवितं न्यसेत् ॥१२॥
मुक्तान्मे पार्षदाँश्चापि स्थापयेत्तत्र वै रथे ।
सर्वायुधानि दिव्यानि दिव्यधान्यानि यानि च ॥१३॥
भाजनानि विचित्राणि चन्दनाऽक्षतदर्भकान् ।
जलकुंभान् रत्नयुक्तान् पञ्चपल्लवराजितान् ॥१४॥
दीपं चोपानहौ छत्रं दर्पणं पादुके तथा ।
शय्यां मञ्चं कलशं च वस्त्राणि विविधानि च ॥१५॥
फलान्यपि विचित्राणि भोज्ययोग्यान्नकानि च ।
धनानि स्वर्णरूप्याणि दानार्थं तत्र विन्यसेत् ॥१६॥
ध्वजं सगरुडं कुर्यात् कूबरं सविनायकम् ।
सवितानं सुहारालीसंशोभिताऽभिगर्भकम् ॥१७॥
षोडशघटसंयुक्तं षोडशगोभिरन्वितम् ।
षोडशहेममातंगैर्मुक्तादामविभूषितैः ॥१८॥
स्वर्णकूथकृतपृष्ठैः स्वर्णदन्तसुचक्रकैः ।
स्वर्णाऽम्बालिकपृष्ठैश्च पादभूषादिराजितैः ॥१९॥
क्वणद्घंटास्वरशोभैर्युक्तं कृत्वा रथं शुभम् ।
पूजयेच्छ्रीहरिं तत्रस्थितं मां देवतादिकान् ॥२०॥
प्रदक्षिणं च त्रिःकृत्वा नमस्कारादि वै चरेत् ।
स्तुतिं कुर्यात् कुसुमानामञ्जलिं विदधन् पुरः ॥२१॥
नमस्ते ब्रह्मरूपाय नारायणाश्रिताय च ।
सर्वेश्वरनिवासाय मुक्तकोटिमयाय च ॥२२॥
अक्षरब्रह्मरूपाय कोटिशक्तिश्रिताय ते ।
नमो ब्रह्मनिवासाय स्वर्गमोक्षात्मकाय च ॥२३॥
तव दानेन यज्ञानां तीर्थानां व्रतरूपिणाम् ।
शीलानां सर्वदानानां पुण्यं मे जायतामिह ॥२४॥
सर्वदेवमयस्त्वं वै सर्वयज्ञमयोऽप्यसि ।
सर्वलक्ष्मीजुष्टदेवनिवासोऽसि प्रपाहि माम् ॥२५॥
पुनीहि पापव्रातेभ्यो रक्ष संसारसागरात् ।
गतिं दानेन मे देहि स्वर्गीयां चाऽऽक्षरीं ततः ॥२६॥
यस्य पादौ प्रणमन्ति सुरेश्वरेश्वरेश्वराः ।
अवतारास्तथा मुक्तास्तेन जुष्टोऽसि वै जय ॥२७॥
अध्वपारप्रापकस्त्वं भवाटव्या हरिश्रितः ।
सम्पत्प्रदो भवानेव वर्तते भवयोगिनाम् ॥२८॥
पितॄणां तारकस्त्वं च वंशानां वर्धको ह्यसि ।
सुखानां योजकस्त्वं च कृष्णरथ ! नमोऽस्तु ते ॥२९॥
इत्यभ्यर्थ्य चतुर्थं च कृत्वा प्रदक्षिणं नमेत् ।
हवनं चानले कुर्यादष्टोत्तरशतं हरौ ॥३०॥
ततो दानं चरेच्छ्रीमद्गुरवे साधवे ततः ।
अन्यदानानि दद्याच्च ह्युचितानि सते तदा ॥३१॥
विप्रेभ्यो भिक्षुकेभ्यश्च बालेभ्यः सद्म इत्यपि ।
दद्याद् दानान्यनेकानि बालिकाभ्योऽम्बराणि च ॥३२॥
मिष्टान्नानि विचित्राणि दुग्धसाराणि यान्यपि ।
पात्राणि भोजनान्येव धान्यानि रूप्यकाणि च ॥३३॥
दद्याद् यथाधनं सर्वं गृहं शालां च वाटिकाम् ।
सहस्रपलनिर्माणो रथः साम्राज्यदो मतः ॥३४॥
लक्षस्वर्णकृतश्चेन्द्रपदप्रदोऽजभूप्रदः ।
दशपलादूर्ध्वमेव दत्तो ददाति सम्पदः ॥३५॥
नारायणे मयि न्यस्तो धाम ददाति चाक्षरम् ।
महासाधुजने न्यस्तो ददाति पदमैश्वरम् ॥३६॥
निर्गुणे मम भक्ते तु न्यस्तो ददाति मत्पदम् ।
एवं दत्वा दिवं भुक्त्वा दाताऽन्ते याति मत्पदम् ॥३७॥
श्रवणात्कीर्तनाच्चास्य स्मरणाच्छ्रावणात्तथा ।
अनुमोदकरणाच्च रथदानफलं लभेत् ॥३८॥
शृणु लक्ष्मि तथा चान्यन्महादानमनुत्तमम् ।
पञ्चलांगलकदानं पापहं सर्वपुण्यदम् ॥३९॥
पुण्यदिने यजमानो मण्डपं कारयेत्ततः ।
कुण्डं वेदीं चासनानि होमदानार्थकानि च ॥४०॥
वस्तूनि हीरकरत्नादीनि पूजार्थकानि च ।
चन्दनाक्षतपुष्पाणि सर्वोपकरणानि च ॥४१॥
मण्डपे स्थापयेत्तत्र जलकुंभान् सरत्नकान् ।
सदलान् सफलाँश्चापि पञ्च सौवर्णधातुजान् ॥४२॥
स्थापयेन्मण्डपे तत्र धान्यानि विविधानि च ।
यथाशक्ति च भोज्यान्नमिष्टान्नानि च सन्न्यसेत् ॥४३॥
वस्त्राऽऽभूषणद्रव्याणि दानार्थानि च सन्न्यसेत् ।
सारदारुमयान् पञ्च कारयित्वा हलान् शुभान् ॥४४॥

धुर्युक्तान् रज्जुनद्धान् सितासिताभ्रशोभितान् ।
मुष्टिकृष्टियुतान् रम्यान् वृषभैः पुरुषैर्युतान् ॥४५॥
दण्डरश्म्यादियुक्तांश्च काञ्चनान् राजतांश्च वा ।
पञ्चपलात् समारभ्याऽऽसहस्रादिपलावधि ॥४६॥
कारयित्वा हलानेवं वृषभान् दश तद्युजः ।
धुरन्धरान् कारयित्वा सर्वशृंगारशोभितान् ॥४७॥
रूप्यपादाग्रतिलकान् रक्तकौशेयझुल्लिकान् ।
मुक्ताहाराढ्यसत्कण्ठान् घुर्घुरादिविभूषणान् ॥४८॥
स्वर्णशृंगान् सुशोभाढ्यान् मण्डपे चाधिवासयेत् ।
शकटानि सुयोग्यानि यथाशक्ति प्रकारयेत् ॥४९॥
खर्वटं खेटकं ग्रामं क्षेत्रं च सस्यशालिनम् ।
गृहं रम्यं च वा वाटीं स्वर्णपात्रे प्रकारयेत् ॥५०॥
रक्षयेत्तत्र सान्निध्ये मण्डपे च ततः परम् ।
स्वस्तिपुण्याहवाचश्च वाचयेद् विप्रकोविदैः ॥५१॥
आवाहयेद्धरिं मां च कृष्णं कृषिकरं तथा ।
कार्ष्णीं राधां महालक्ष्मीमावाहयेच्च कर्षिणीम् ॥५२॥
अवतारांस्तथा मुक्तानीश्वरीर्देवताः सुरान् ।
धरण्यादित्यरुद्रादीन् लोकपालान् समाह्वयेत् ॥५३॥
समिद्भिस्तिलमिष्टैश्च फलैर्दलैश्च पायसैः ।
वह्नौ होमांश्चरेदष्टोत्तरशतं स्मरंश्च माम् ॥५४॥
धरण्यादित्यरुद्रेभ्यः पायसं निर्वपेच्चरुम् ।
गुरुर्दद्यात्तथा तेभ्यः पालाशसमिधो घृतम् ॥५५॥
कृष्णतिलाः शर्कराश्च व्रीहींश्चापि फलानि च ।
पृथ्वी साक्षान्महालक्ष्मीः सिता लक्ष्मीः प्रतुष्यति ॥५६॥
धरण्याः पुत्रिका देवी सिता पृथ्वीविदारिणी ।
दारिका पुत्रिका चापि गर्भं भित्त्वोत्थिता हि सा ॥५७॥
तस्यै देयं पायसं वै तुष्टये हवने तदा ।
होमोत्तरं विप्रदाम्पत्यं समाहूय पूजयेत् ॥५८॥
दिव्याम्बरविभूषाद्यैर्हेमसूत्राऽङ्गुलीयकैः ।
साधुं साध्वीं पूजयेच्च यथोचितप्रदानकैः ॥५९॥
मण्डपेऽष्टादशधान्यान्यपि धेनुं पयस्विनीम् ।
शय्यां सोपस्करां चेक्षुदण्डादिशोभितां न्यसेत् ॥६०॥
हलान् प्रदक्षिणीकृत्य गृहीतकुसुमाञ्जलिः ।
प्रार्थयेत् परमात्मानं हलस्थं मां विदारिणम् ॥६१॥
सितासितायां सिताभ्रे शिवश्चेषास्थितो हली ।
धुरे धर्मधरो विष्णू रज्ज्वां नारायणी प्रिया ॥६२॥
वृषभेषु धर्मदेवो भक्तिर्यष्ट्यां स्थिताऽस्ति च ।
सर्वत्र श्रीहरिश्चास्ते नमस्ते परमेश्वर ॥६३॥
सर्वदेवा धुराढ्ये च त्वय्यासते च ते नमः ।
भूवनस्पतिमूलानां रसज्ञां चिन्तये सिताम् ॥६४॥
कृष्णाय कृषिकाराय नमः श्रीहलधारिणे ।
हलात्मने ब्रह्मणे ते व्यापकाय नमो नमः ॥६५॥
दानेऽर्पितो भवानत्र पञ्चलाङ्गलरूपधृक् ।
स्वर्गं सत्यं महाराज्यं वैराज्यं भौममित्यपि ॥६६॥
देहि मे तत्फलात्माऽपि तथाऽन्ते मोक्षणं परम् ।
इत्येवमुक्त्वा नत्वा च मुखे पञ्चलांगलान् ॥६७॥
अर्पयेद् वृषभाद्युक्तानुपस्करणशोभितान् ।
अन्यान्यपि च दानानि दद्याद् भिक्षुजनेषु वै ॥६८॥
विप्रेभ्यश्च यथायोग्यमृत्विग्भ्यश्चार्पयेत्तथा ।
पञ्चलाङ्गलकृष्यर्हां पञ्चशतविघाटिकाम् ॥६९॥
भूमिं यद्वा न्यूनभागां सह दद्यात् सवाटिकाम् ।
स्वर्णभूमिं च वा दद्याद् गृहं दद्याद्धि शान्तये ॥७०॥
अन्नजलादिकं दद्याद् दाने यथाधनं तदा ।
भोजनानि ततस्तत्र कारयेद् द्विजयोगिनः ॥७१॥
साध्वीसाधुबालबालाऽपांगान्धाद्यबलाजनान् ।
एवं दद्याद् यथाशक्तिदानं पापविनाशकम् ॥७२॥
स्वर्गदं स्याद् राज्यदं स्यात् परमेष्ठिपदप्रदम् ।
भूमौ यावन्ति सस्यानि तावद्युगानि वै दिवि ॥७३॥
मोदते सकुटुम्बश्च ततो याति हरेः पदम् ।
पितॄणामुद्धरणं च भवत्येव न संशयः ॥७४॥
पञ्चलाङ्गलदानेन पुण्यं वै पञ्चकल्पजम् ।
जायते तेन वै स्वर्गे मुहुर्दिवस्पतिर्भवेत् ॥७५॥
गोभूमिहलवृषभार्पको वैकुण्ठमाप्नुयात् ।
पठनाच्छ्रवणादस्य तादृशं फलमाप्नुयात् ॥७६॥
अथ लक्ष्मि धराद्वीपमहादानं वदामि ते ।
पापघ्नं पुण्यदं चाप्यमांगल्यनाशकं सुखम् ॥७७॥
पुण्यदिनं समासाद्य मण्डपं कारयेच्छुभम् ।
कुण्डं वेदीं कारयेच्च स्थापयेज्जलभृद्घटान् ॥७८॥
सरत्नपल्लववस्त्रान् अष्टसौवर्णकारितान् ।
दानयोग्यानि वस्तूनि होमयोग्यानि यानि च ॥७९॥
पूजायोग्यानि सर्वाणि सर्वधान्यानि सन्न्यसेत् ।
हैमीं क्षितिं जम्बुद्वीपात्मिकां सीमाद्रिशोभिताम् ॥८०॥
मध्ये मेरुयुतां रम्यां नवखण्डसमन्विताम् ।
सागरैर्वेष्टितां चान्ते नदीनदसरोऽन्विताम् ॥८१॥
सर्वरत्नखनियुक्तां वाराहदेवपार्श्वगाम् ।
हेम्नः पलसहस्रेण तदर्धेन तदंशकैः ॥८२॥

पञ्चपलैरूर्ध्वमेव कारयित्वा न्यसेद्धि ताम् ।
मध्ये मां श्रीहरिं तत्र स्थापयेच्छ्रीरमापतिम् ॥८३॥
अवतारान्मम मुक्तान् मुक्तानिका न्यसेत्तथा ।
ब्रह्मप्रियाः समस्ताश्च हरिप्रियास्तथाऽबलाः ॥८४॥
ईश्वरानीश्वराणीश्च देवान्देवीः ऋषींस्तथा ।
महालक्ष्मीं श्रीगोपालकृष्णं कुंकुमवापिकाम् ॥८५॥
अश्वपट्टसरश्चापि मन्दिरं मे शुभं तथा ।
लोमशस्याश्रमं चापि कारयित्वा न्यसेत्तथा ॥८६॥
भूषाच्छादनवस्त्राणि धनानि विविधानि च ।
भोज्यान्नदानयोग्यानि स्थापयेत्तत्र मण्डपे ॥८७॥
सिंहचर्म न्यसेत्तत्र मृगचर्म न्यसेच्च वा ।
तिलेषु तत्र धान्यानि रसाँश्च शर्कराः शुभाः ॥८८॥
फलान्यपि न्यसेच्चापि कौशेयं च वितानकम् ।
आवाहयेल्लोकपालान् दिशां पालान् सुरेश्वरान् ॥८९॥
अधिवासनमाकुर्याच्छुक्लाम्बरधरः शुचिः ।
प्रदक्षिणं क्षितेः कृत्वा गृहीतकुसुमाञ्जलिः ॥९०॥
पूजयेत्प्रार्थयेच्चापि भावनाभावितान्तरः ।
नमस्ते सर्वलोकात्मन् क्षित्यात्मन् भगवन् हरे ॥९१॥
त्वं क्षितिस्त्वं धरित्री त्वं धात्री पाहि वसुन्धरे ।
वसुमत्यै नमस्तेऽत्र वसून् देहि च मे सदा ॥९२॥
अनन्तशेषमूर्द्धस्थाऽनन्तायै ते नमो नमः ।
त्वं लक्ष्मीस्त्वं महालक्ष्मीः सन्तुष्टा त्वं नरायणी ॥९३॥
गायत्री त्वं शिवा त्वं च माणिक्या त्वं ममाऽन्तिके ।
दुःखहा त्वं च लोकानां गर्भधात्री च पाहि माम् ॥९४॥
त्वं ज्योत्स्ना त्वं प्रभा बुद्धिर्मेधा विश्वंभरा सती ।
धृतिः स्थितिः क्षमा क्षौणिः पृथ्वी रसा च जन्मदा ॥९५॥
पाहि स्वर्गं महद्राज्यं देहि मे शाश्वतं पदम् ।
पितॄन्मोक्षगतान्सर्वान् विधेहि चार्पिता सती ॥९६॥
एवं नत्वाऽर्पयेत् क्ष्मां तां सौवर्णां गुरवे सते ।
विप्रेभ्योऽर्धां प्रदद्याद् वा रत्नान्यन्यापि चपि वै ॥९७॥
भोजयेदथ भिक्षूँश्च सतीः साधून् समागतान् ।
दद्याद् दानानि धान्यानि वस्त्राणि च फलानि च ॥९८॥
होमं प्रकारयेदष्टोत्तरशतं सुखप्रदम् ।
पापं नश्यति तेनैव पुण्यं दानेन लभ्यते ॥९९॥
सम्पदं वैष्णवीं याति धरादानप्रदः पुमान् ।
विमानेनाऽर्कवर्णेन पितृद्धारसमन्वितः ॥१००॥
प्रयाति श्रीपुरं नारायणपुरं च शाश्वतम् ।
पठनाच्छ्रवणाच्चास्य मुक्तदेहोऽभिजायते ॥१०१॥
वैराजराज्यं भुक्त्वा च याति धामाऽक्षरं मम ।
एवं ते कथितं लक्ष्मि महादानं धरात्मकम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने हेमहस्तिरथमहादानपञ्चलांगलकमहादानहेमधरा-महादाननिरूपणनामा नवविंशत्यधिक-शततमोऽध्यायः ॥ १२९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं महादानमतः परम् ।
विश्वसुदर्शनचक्रमहादानं महत्तमम् ॥ १ ॥
श्रेष्ठं पलसहस्रेण तदर्धेन तु मध्यमम् ।
तदर्धेन कनिष्ठं वा कारयेच्चक्रमुज्ज्वलम् ॥ २ ॥
षोडशारं चाऽष्टनेमि रूप्यकपट्टराजितम् ।
विंशतिफलतश्चोर्ध्वं कारयेच्चक्रमुत्तमम् ॥ ३ ॥
तन्नाभौ श्रीकृष्णनारायणं मां रचयेच्छुभम् ।
चतुर्भुजं समुकुटं चतुरायुधशोभितम् ॥ ४ ॥
आद्यनेमौ ब्रह्मप्रियेश्वरीर्हि कानकीः शुभाः ।
विन्यस्येद् राधिकां लक्ष्मीं प्रज्ञां पद्मावतीं सतीम् ॥ ५ ॥
माणिक्यां ललितां हैमीं जयां चेति मम प्रियाः ।
द्वितीयनेमौ तद्वत्तु पूर्वतो जलशायिनम् ॥ ६ ॥
कम्भराश्रीयुतं श्रीमद्गोपालकृष्णकं प्रभुम् ।
पतिव्रतायुतं पत्नीव्रतं गुरुं नरायणम् ॥ ७ ॥
लोमशं कुंकुमवापीसहितं सद्गुरुं शुभम् ।
सावित्रीसहितं चाऽजं शिवायुक्तं शिवं तथा ॥ ८ ॥
मत्स्यं कूर्मं च वाराहं नरसिंहं च वामनम् ।
रामं पर्शुधरं रामं कृष्णं बुद्धं च कल्किनम् ॥ ९ ॥
तृतीयनेमौ मातृकाः सप्त वस्वष्टकं तथा ।
गणेशं सकुटुम्बं च कारयेद् वाहनान्वितम् ॥१०॥
चतुर्थे द्वादशादित्यान् वेदाँश्चतुर इत्यपि ।
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशाऽपि च ॥११॥
लोकपालाष्टकं षष्ठे दिङ्मातङ्गाँश्च कारयेत् ।
सप्तमेऽस्त्राणि सर्वाणि स्वस्तिकादीनि चापि वै ॥१२॥
अष्टसिद्धीरष्टमे चाऽष्टैश्वर्याणि च विन्यसेत् ।
एवं सुदर्शनं चक्रं कारयित्वा तु मण्डपे ॥१३॥
कारिते कदलीस्तंभाद्यैश्च महति चानयेत् ।
वेदिकासन्निधौ चक्रं कृष्णाजिनतिलोपरि ॥१४॥
विन्यस्येत् सर्वसंभारभूषणाच्छादनानि च ।
तथाऽष्टादशधान्यानि रसाँश्च लवणादिकान् ॥१५॥

पूर्णकुंभाष्टकं चापि रत्नमण्यम्बराणि च।
मालेक्षुफलपुष्पाणि दानवस्तूनि यानि च ॥१६॥
भोज्यपेयानि श्रेष्ठानि शर्कराश्च धनानि च।
गां कन्यां तुलसीं चापि रक्षयेदनलं तथा ॥१७॥
ततो मंगलवाद्यानि वादयेत् स्नानशुद्धिमान्।
शुक्लाम्बरधरो भूत्वा यजमानस्तु मण्डपे ॥१८॥

आसने चोपविष्टश्च ऋत्विग्भिः सह सादरम्।
आचमनादिकं कृत्वा चाऽऽवाह्य देवतास्ततः ॥१९॥
विधिना पूजयित्वाऽथाऽष्टोत्तरं होमकाँश्चरेत्।
कृत्वाऽधिवासनं चापि पुष्पाञ्जलिं समर्पयेत् ॥२०॥
प्रदक्षिणं होमचक्रं कृत्वा सम्प्रार्थयेदपि।
नमः षट्चक्ररूपाय सर्वान्तर्यामिणे नमः ॥२१॥
विश्वचक्रस्वरूपाय सुदर्शनाय ते नमः।
नमोऽनादिकृष्णनारायणहस्ताऽङ्गुलिस्थित ॥२२॥

नमस्ते पापपुञ्जानां ज्वालकाय दयालुषे।
हेमचक्रप्रदानेन भुक्तिं मुक्तिं प्रदेहि मे ॥२३॥
परमानन्दमूर्ते ते नमो नारायणात्मने।
तेजोमयाय दिव्यायाऽसुरपाटनशक्तये ॥२४॥
हृदयस्थाय च गुणातीताय ते नमो नमः।
नारायणे स्थितं चक्रं चक्रमध्ये हरिः स्थितः ॥२५॥
द्वयोर्मध्ये महालक्ष्मीस्तस्यै देव्यै नमो नमः।
आयुधं भक्तरक्षार्थं वर्तसे मां प्रपाहि च ॥२६॥

एवमुच्चार्य गुरवे दद्याच्चक्रं सुदर्शनम्।
अन्यानि दानयोग्यानि द्विजातिभ्योऽर्पयेत्तथा ॥२७॥
दीनाऽन्धकृपणेभ्यश्च योषिद्भ्योऽप्यर्पयेत्तथा।
बालेभ्यो बालिकाभ्यश्च दद्याद् दानानि वै तदा ॥२८॥
भोजयेत् सर्वभोज्यानि आरार्त्रिकं तथाऽऽचरेत्।
परिहारं प्रकुर्याच्च विसृजेद् भूसुरादिकान् ॥२९॥

एवं प्रदाता चक्रस्य मुच्यते भवबन्धनात्।
विष्णुलोके परे स्वर्गे सत्ये वैराजभूस्तरे ॥३०॥
भुक्त्वा भोगाननन्ताँश्च भूत्वा नारायणात्मकः।
वैकुण्ठलोकमासाद्य चतुर्बाहुः सनातनः ॥३१॥
चिरं वसेत्ततो याति गोलोकं धाम चोत्तमम्।
ततो ब्रह्मपुरं याति चाक्षरं धाम मे परम् ॥३२॥
नित्यं वै कानकं चक्रं सुदर्शनं हरिश्रितम्।
कारयित्वा गृहे भक्तः पूजयेत् कुसुमाऽक्षतैः ॥३३॥
विश्वचक्रं तरेत् सोऽपि हरेश्चक्रस्य पूजनात्।
सुदर्शनं गृहे यस्य तस्याऽघचक्रकाणि तु ॥३४॥

नश्यन्त्येव न जायन्ते जायन्ते पुण्यपर्वताः।
रक्षां करोति सततं गृहस्थं वै सुदर्शनम् ॥३५॥
वर्धयत्येव चाऽऽयुष्यं ददाति विपुलां श्रियम्।
साम्राज्यचक्रं यद्वापि चक्रवर्तित्वमित्यपि ॥३६॥
अथ ते शिवराज्ञीश्रि! कथयामि तथोत्तमम्।
माहात्म्यं मम चक्रस्य रहस्यं सर्वतोऽधिकम् ॥३७॥

यस्य देहे गृहे हस्ते वस्त्रे वाट्यां च वस्तुषु।
सुदर्शनं भवेच्चक्रं तत्र पापं न तिष्ठति ॥३८॥
याम्यदूता न चायान्ति राक्षसा विद्रवन्ति च।
भूतप्रेतपिशाचाद्याः पलायन्तेऽपि दूरतः ॥३९॥
रोगा ज्वरादिकाः सर्वे न तिष्ठन्ति कदाचन।
वासना निर्मूलतां च गच्छत्येव सुदर्शनात् ॥४०॥
राजदेवादिबाधाश्च नश्यन्त्येव सुदर्शनात्।
सर्पवृश्चिकबाधाश्च विषाण्यन्यानि यानि च ॥४१॥

नश्यन्ति तेजसा तूर्णं सुदर्शनस्य शार्ङ्गिणः।
ऋद्धयः सर्वथा तत्र निवसन्ति सुरक्षिताः ॥४२॥
बालग्रहादयश्चापि पीडयन्ति न तद्गृहे।
अकालमरणं तत्र जायते न सुदर्शनात् ॥४३॥
अनपत्यगृहं नैव भवेद् यत्र सुदर्शनम्।
उत्पाता न भवन्त्येव यत्र सुदर्शनं मम ॥४४॥
अकस्माता न च स्युश्च यत्र मे वै सुदर्शनम्।
विजयः सर्वदा स्याच्च सर्वथा मे सुदर्शनात् ॥४५॥

चौरव्याघ्रभयाद्याश्च नैव जायन्त एव तु।
जलवह्निभयाश्चापि भूकम्पभयमित्यपि ॥४६॥
नैव तत्र प्रजायन्ते यत्र मेऽस्ति सुदर्शनम्।
गर्भस्रावभयं चापि स्त्रीवैधव्यभयादिकम् ॥४७॥
सम्पन्नाशभयं नैव प्रजायन्ते सुदर्शनात्।
क्लेशा नैव प्रजायन्ते जन्तुभयं न जायते ॥४८॥

शस्त्रभयं भवेन्नैव वातभयं न जायते।
ग्रहपीडा भवेन्नैव यत्र मेऽस्ति सुदर्शनम् ॥४९॥
रूपसौन्दर्यसौभाग्यसमृद्धिसद्रसादिकम्।
सुदर्शनप्रतापेन जायतेऽचिन्तितं बहु ॥५०॥
शृणु लक्ष्मि तथा चक्रं मालाचक्रं महत्तमम्।
स्वर्णमाला तुलस्या वा मालिका चक्रमुत्तमम् ॥५१॥
ब्रह्मचक्रमिदं प्रोक्तं सुदर्शनं हि तत्परम्।
अष्टोत्तरशतारं तत् साधुचक्रं महत्तमम् ॥५२॥
साधुहस्तगता माला निकृन्तति ह्यघानि वै।
मायादुर्गाणि सर्वाणि निकृन्तति समूलतः ॥५३॥

जन्ममरणभाराणि चोत्तारयति मस्तकात् ।
गले माला धृता येन मस्तकं तस्य पूज्यते ॥५४॥
हस्ते माला धृता हस्ते पद्माऽस्य संवसेत् सदा ।
भुजे माला प्रकोष्ठे वा धृता प्रजायते रमा ॥५५॥
लक्ष्मीवासो भवेत्तस्य प्रकोष्ठः सर्वदा प्रियः ।
मालाचक्रं गृहे यत्र तद्गृहं रक्षितं भवेत् ॥५६॥
नारायणेन सहसा मया सर्वात्मना रमे ।
मालाजापेन दैत्यानां दुष्टेन्द्रियनिवासिनाम् ॥५७॥
कल्मषाणां समस्तानां विलयो जायते ध्रुवम् ।
एवं ब्रह्ममहाचक्रं परं मालासुदर्शनम् ॥५८॥
सर्वदा रक्षकं लक्ष्मि दाने देयं विशेषतः ।
स्वर्णां मालां राजतीं वा स्फाटिकीं मौक्तिकीं च वा ॥५९॥
तौलसीं वाऽर्पयेद् दाने स्वर्गदा मोक्षदा हि सा ।
सते सद्गुरवे दद्याज्जापकाय महात्मने ॥६०॥
पूजयित्वा चन्दनाद्यैर्मालिकां हृदयंगमाम् ।
श्रीहरेर्हृदये चास्ते माला स्फाटिकसंभवा ॥६१॥
तौलसीमालिका हस्ते लक्ष्मीतो मानतां गता ।
सेयं लक्ष्मीर्महालक्ष्मीर्मालिका मलनाशिनी ॥६२॥
स्वर्गमालाप्रदा भुक्तिमुक्तिप्रदा समुज्ज्वला ।
अष्टोत्तरशतमणिशोभिता स्वर्गतन्तुना ॥६३॥
स्फाटिकेन सुरम्येण मेरुणा राजतेन वा ।
शोभिता ब्रह्मग्रन्थ्यादिनद्धा श्रीवासिनी सती ॥६४॥
सच्चिदानन्दरूपा सा माला देया विधानतः ।
संस्थाप्य सर्वतोभद्रमण्डले कलशोपरि ॥६५॥
शर्करादियुता देया गोमुखी वस्त्रशोभिता ।
आसनेन युता देया प्रच्छादनपटान्विता ॥६६॥
फलसुगन्धयुक्ता च प्रदेया दिव्यपारिका ।
दिव्यमणिसुसम्पन्ना हीरतन्तुविराजिता ॥६७॥
सदक्षिणा प्रदेया वै धनधान्यसमन्विता ।
मृगाजिने घटे स्थाल्यां विन्यस्य मालिकां च ताम् ॥६८॥
श्रीहरेर्मे प्रतिमायाः करे दत्वा प्रपूजयेत् ।
चन्दनाक्षतपुष्पाद्यैः स्नापयेन्मालिकां मम ॥६९॥
चन्दनाद्यैः पूजयित्वा पुनर्हस्ते तु मेऽर्पयेत् ।
आरार्त्रिकं धूपदीपौ कृत्वा नत्वा च मां ततः ॥७०॥
नैवेद्यं मे समर्प्याऽपि मालायै भोजयेत्ततः ।
चिद् देवी मालिका मेऽस्ति ललिता ललना मम ॥७१॥
सदाशक्तिर्महादिव्या सर्वपुण्यप्रदायिनी ।
स्वस्तिकेन सह दद्याद् धनधान्यादिभिः सह ॥७२॥

गुरवे वै नमस्कृत्य दद्यान्नत्वा पुनः पुनः ।
प्रार्थयेद् गुरवे तत्र मालादानं करोमि यत् ॥७३॥
तेन पुण्येन मे कृष्णपरमात्मा प्रसीदताम् ।
मालया राधया लक्ष्म्या रक्ष्योऽहं सर्वदा तथा ॥७४॥
मम पापानि नश्यन्तु मालादानेन सद्गुरो ।
माधवो मालया नित्यं प्रसन्नो मेऽस्तु सौख्यदः ॥७५॥
इत्येवं मालिकाचक्रं दद्याद् दाने भयापहम् ।
मालाचतुर्थभागं च यत्र वै सप्तविंशतिः ॥७६॥
मणयः स्युः शुभं वा रक्षकं दद्यात्तु राजतम् ।
वा विकल्पश्च सन्देहस्तस्माद् रक्षति संख्यया ॥७७॥
सोऽयं वारक्षकस्तस्याः सुतस्तमपि चार्पयेत् ।
मालादानं महादानं सर्वपापविनाशकम् ॥७८॥
मालया नित्यजापः स्यान्नारायणस्य मे प्रिये ।
तेन दुष्टानि पापानि नश्यन्त्येव क्षणे क्षणे ॥७९॥
मयि न्यस्तसमग्रस्य जपतो नास्ति पातकम् ।
चक्रद्वयमिदं प्रोक्तं ददतो नास्ति पातकम् ॥८०॥
महाचक्रद्वयं प्रोक्तं सुदर्शनं च मालिका ।
मालिका भवहन्त्री च दैत्यघ्नं तु सुदर्शनम् ॥८१॥
अथापि च तृतीयं वै चक्रं चांगुलिभूषणम् ।
स्वर्णभूषोर्मिकाचक्रं दाने देयं विशेषतः ॥८२॥
ऊर्मिकासम्प्रदाता वै सम्राड् भवति भूतले ।
सर्वांगुलीयकदाता स्वर्गे राजा भवत्यपि ॥८३॥
ऊर्मिकांऽगुलीयकादिप्रदाता विश्वसृड् भवेत् ।
स्वर्णरूप्यादिभिः कृत्वा पूजयित्वा गुरुं द्विजम् ॥८४॥
साधुं सतीं महासाध्वीं पतिव्रतां च सद्गुरुम् ।
आचार्यं वेदविद्वांसं साधुं नारायणात्मजम् ॥८५॥
अच्युतगोत्रकं वापि नमस्कृत्याऽर्पयेत्ततः ।
ऊर्मिकांऽङ्गुलीयकानि पूजयित्वा सुकुंकुमैः ॥८६॥
अर्पयेद्दक्षहस्तेन चांगुष्ठेयं च भूषणम् ।
तत्राऽऽस्ते सर्वदा स्वर्णहारिणी कमला रमा ॥८७॥
पूजयित्वा प्रार्थयेत्तामूर्मिकांऽगुलिभूषणम् ।
संसारसागरजन्योर्मिभ्यो रक्ष सदा हि माम् ॥८८॥
मम हस्ते सदा स्वर्णं भवत्येव च मोक्षणम् ।
देहि मे भगवन्नामयुते भगवति प्रिये ॥८९॥
पापपुञ्जानि सर्वाणि मम विनाश्य चोर्मिके ।
ब्रह्मानन्दोर्मिसंमग्नं कुरु मां कृष्णवल्लभे ॥९०॥
इत्यभ्यर्च्य च सम्प्रार्थ्य दद्याद् दाने शुभोर्मिकाम् ।
त्रिवलीं पञ्चवलिकां सप्तवलीं सुशोभनाम् ॥९१॥

स्वर्णमात्रकृतां रम्यामेकां वा दश वा तथा ।
विंशतिं वा समर्थश्चेद् दद्याद् दाने द्विजातये ॥९२॥
साधवे विष्णुभक्ताय प्रदद्याच्च सुभक्तितः ।
चतुर्थं वलयं हस्ते कटकं वा सुवर्णजम् ॥९३॥
चक्रतुल्यं रत्ननद्धं मणिहीरकशोभितम् ।
मौक्तिकमाणिक्यनद्धं खचितं कौस्तुभेन च ॥९४॥
सिंहासनं प्रदद्याच्च सर्वदारिद्र्यनाशकम् ।
सर्वसम्पत्प्रदं लक्ष्मीप्रदं पत्नीप्रदं तथा ॥९५॥
स्वर्गराज्यप्रदं चापि सत्यलोकप्रदं तथा ।
ब्रह्मलोकप्रदं चापि भुक्तिमुक्तिप्रदं तथा ॥९६॥
एवं लक्ष्मि प्रदद्यात्तु पादप्रकोष्ठभूषणम् ।
काम्बिकां कदलीं चापि शृंखलां वंगडीं तथा ॥९७॥
स्वर्णरजतनिर्माणं समणिमौक्तिकान्विताम् ।
सर्वशोभास्पदां चापि किंकिणीजालनिःस्वनाम् ॥९८॥
एवं लक्ष्मि तथा दद्यान् नस्थिकां स्वर्णवालिकाम् ।
सुवर्णवर्तुलवालीं सरत्नां शोभनां दिशेत् ॥९९॥
एतानि सर्वचक्राणि प्रोक्तानि ते मया प्रिये ।
दातव्यानि यथाशक्ति दाने पुण्यकराणि वै ॥१००॥
स्वर्गदानि महासमृद्धिप्रदानि मोक्षदान्यपि ।
दारिद्र्यरोगवैमत्यनाशकानि सुखानि च ॥१०१॥
दिव्यवंशप्रवंशादिविस्तारकारकाणि च ।
दिव्यनारीपतिपुत्रसौभाग्यवर्धकानि च ॥१०२॥
पठनाच्छ्रवणाच्चापि स्मरणाच्चानुमोदनात् ।
दानान्येतानि सर्वाणि भुक्तिमुक्तिप्रदानि वै ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विश्वसुदर्शनमहाचक्रदानस्य मालिकामहाचक्रदानस्य वारक्षकदानस्य ऊर्मिकांऽगुलीयकांऽगदकटकशृंखलाबिंगिडीकंकणनस्थिकादिमहाचक्रदानानां च निरूपणनामा त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

श्रीपुरुषोत्तम उवाच—

शृणु श्रीशिवराज्ञीश्रि महादानमनुत्तमम् ।
महाकल्पलताख्यं च दानं सुवर्णवल्लिकम् ॥ १ ॥
पुण्यां तिथिं समासाद्य कारयेन्मण्डपं शुभम् ।
वेदिं कुण्डं कारयेच्च स्थापयेद्धवनार्थकम् ॥ २ ॥
वस्तुव्रातं ब्राह्मणैश्च कारयेत् स्वस्तिवाचनम् ।
दानवस्तून्युपादाय मण्डपे तत्र सन्न्यसेत् ॥ ३ ॥
ऋत्विजः सर्वसंभारभूषणाच्छादनादिकम् ।
आसनेषु च देवानां नारायणस्य मे श्रियः ॥ ४ ॥
देवीनां च तथा कुर्यादावाहनं प्रपूजयेत् ।
मण्डपे तत्र सौवर्णीर्दश कल्पाख्यवल्लिकाः ॥ ५ ॥
दशोत्तरसुवर्णोत्थाः स्थापयेत् फलपुष्पिताः ।
रत्नांशुकादिसंयुक्ता भूषिताः शोभितास्तथा ॥ ६ ॥
विद्याधरीभिः संयुक्ताः सुपर्णैः शोभितास्तथा ।
प्रतिवल्लि प्रकुर्याच्च दिक्पालाष्टकयोषितः ॥ ७ ॥
शर्करापर्वते वल्लीः सर्वाश्चाभ्यधिरोहयेत् ।
ऐन्द्रीं हस्तिस्थितां शक्तिमाग्नेयीं मेषसंस्थिताम् ॥ ८ ॥
याम्यां महिषीनिष्ठां च नैर्ऋतिं गर्दभीस्थिताम् ।
वारुणीं मकरस्थां च वायवीं हरिणीस्थिताम् ॥ ९ ॥
कौवेरीं स्वर्णयानरथामीशानीं वृषभस्थिताम् ।
तथा षोडशधान्यानि स्थापयेत् तत्र मण्डपे ॥१०॥
लक्ष्मीं शिवां च सावित्रीं माणिक्यां दुःखहारमाम् ।
कम्भराश्रीमहालक्ष्मीं सन्तुष्टां भगिनीं हरेः ॥११॥
रसान् गन्धान् मिष्टरसान् घृतकुंभान् न्यसेत्तथा ।
आसहस्रमितस्वर्णैः कृत्वा न्यसेद्धि मण्डपे ॥१२॥
अष्टधेनूश्चाऽष्टकुंभान् रत्नसलिलपूरितान् ।
वस्त्रतण्डुलपत्राद्यैः शोभितान् स्थापयेदपि ॥१३॥
पूजयेत्तान् विधानेन वल्लिकाः पूजयेत्तथा ।
वेदघोषैः पूजयित्वा कृत्वा प्रदक्षिणत्रयम् ॥१४॥
प्रार्थयेत्ता वल्लिकाश्च कृष्णनारायणाऽन्विताः ।
विनाशिनीभ्यः पापानां पालिनीभ्यः स्वसद्मषाम् ॥१५॥
नमोऽस्तु फलदाभ्यश्च कल्पाभ्यो वै नमो नमः ।
सर्वसम्पत्प्रदाभ्यश्च सर्वर्द्धिभ्यो नमो नमः ॥१६॥
महालक्ष्मीस्वरूपाभ्यः सर्वात्मिकाभ्यो वै नमः ।
स्वर्गामृतं श्रीपुरं च वैराजं च गवायनम् ॥१७॥
वैकुण्ठं चाक्षरं धाम वितरन्तु च नः सदा ।
भवत्यो दानरूपाश्च दत्ता रक्षन्तु नः सदा ॥१८॥
इति प्रार्थ्य पुनः कृत्वा प्रदक्षिणं समर्पयेत् ।
गुरवे साधवे चार्धमर्धाश्चान्येभ्य एव तु ॥१९॥
रत्नहीरकरूप्याणि गा वस्त्राणि च यानि च ।
तद्धि दद्याद् भिक्षुकेभ्योऽनाथहीनेभ्य इत्यपि ॥२०॥
हवनं विधिवत् कुर्याद् भोजयेत् साधुभूसुरान् ।
बालांश्च बालिकाश्चापि भोजयेच्चार्पयेद्धनम् ॥२१॥
परिहारं ततः कुर्याद् विसृजेत्प्रणमेत् प्रिये ।
एवं कल्पलतादानं कुर्यात्तस्य फलं बहु ॥२२॥

साम्राज्यं जायते पित्रुद्धारो भवत्यपि ।
क्षितिः सस्यादिसम्पूर्णा सदा तस्योपतिष्ठते ॥२३॥
सिद्धयश्चाणिमाद्याश्च लतादातुर्भवन्ति हि ।
स्वर्गे कल्पलतास्ताश्चाऽप्सरसोऽस्य भवन्ति च ॥२४॥
एवं लक्ष्मि महादानं संकल्पपूरकं हि ते ।
कथितं सर्वलोकेषु महाराज्यप्रदं शुभम् ॥२५॥

तथा कल्पप्रियादानं कर्तव्यं शृणु तद्विधिम् ।
स्वर्णभारसहस्रैस्तु कर्तव्या पुत्तली शुभा ॥२६॥
वस्त्रालंकारसंयुक्ता सर्वशृंगारशोभिता ।
रूपवती युवती च पुत्रपुत्र्यादिशोभिता ॥२७॥
गोमहिषीगजवाजियुक्ता शय्यादिशोभिता ।
धनधान्यादियुक्ता च रसभोज्यफलान्विता ॥२८॥

मण्डपे न्यस्य तां पत्नीरूपां तत्र महारमाम् ।
आवाहयेद् वेदिकाऽग्रे पूजयेत् सर्ववस्तुभिः ॥२९॥
आरार्त्रिकं प्रकुर्याच्च सुनैवेद्यं जलं दिशेत् ।
यादृशी चेष्यते पत्नी यथासामग्रिकान्विता ॥३०॥

तादृशी सा तु कर्तव्या शृंगारद्रव्यशोभिता ।
दासदासीसखीयुक्ता गृहसौभाग्यशोभिता ॥३१॥
तां प्रपूज्य च हवनं कुर्याद् वह्नौ शतोत्तरम् ।
दद्यात् सा स्वकरे धृत्वा कृत्वाऽनलं प्रदक्षिणम् ॥३२॥
गुरवे चापि विप्राय साधवे हरयेऽथवा ।
कुमाराय सते वापि प्रार्थयेच्च ततः परम् ॥३३॥
एषा दत्ता मया पत्नीरूपा दाने द्विजातये ।
सर्वगार्हस्थ्योपकरणादियुक्ता विभूषिता ॥३४॥
नारायणी महालक्ष्मीस्त्वमेव परमेश्वरी ।
दानफलं च दाम्पत्यं मम देहि सदा रमे ॥३५॥

स्वर्गे सत्ये च वैराजे वैकुण्ठे पत्निका मम ।
संयुक्ता सहगा स्याच्च तथा देहि फलं मम ॥३६॥
एवमाभाष्य विप्रस्य गुरोर्हस्ते न्यसेत् प्रियाम् ।
मुक्तिदा भुक्तिदा सा स्यात् स्वर्णपुत्तलिका प्रिया ॥३७॥
जन्मान्तरसहस्रेषु दाम्पत्यं स्यादखण्डितम् ।
सर्वसमृद्धिप्रदं लक्ष्मि शाश्वतानन्ददायकम् ॥३८॥
सर्वभोगप्रदं पुत्रपौत्रवंशविवर्धनम् ।
कल्पपत्नीमहादानमिदं प्रोक्तं मया तव ॥३९॥
यथासंख्या योषितश्चेष्यन्ते दिवि क्षितौ च वा ।
तथासंख्याः प्रदातव्याः पुत्तल्यः पत्निका निजाः ॥४०॥
मण्डपे ता निधायैव वह्नेः समीपतः खलु ।
विवाहविधिना सर्वा विवाहयेद् द्विजैः पुरा ॥४१॥

वरमालाभिसन्नद्धा हस्तकृतपरिग्रहाः ।
सर्वाभरणशोभाश्च सर्वालंकारसंभृताः ॥४२॥
निजपत्नीकृताः सर्वास्ततो दानेऽर्पयेद् बुधः ।
एवं दत्ता हि विधिना चेह परत्र ताः स्त्रियः ॥४३॥
भवन्त्येव न सन्देहो महादानमिदं परम् ।
स्वर्णस्त्रीदानमेवैतत् स्वस्त्रीप्रतिनिधिप्रखम् ॥४४॥

नारी दाने न वै देया देया सौवर्णपुत्तली ।
नारीदानं महादानं तदेवोक्तं हि वेधसा ॥४५॥
एवं लक्ष्मि सुवर्णस्य पतिं दानेऽपि चार्पयेत् ।
सर्वालंकारसंयुक्तं सर्वसमृद्धिसुशोभितम् ॥४६॥
स्वर्णकान्तमहादानं पतिसौभाग्यदं हि तत् ।
विधिं ते कथयाम्यत्र यत्कृतेन कदापि वै ॥४७॥

वैधव्यं जायते नैव पतिसौभाग्यमेति सा ।
सुवर्णपुत्तलं कृत्वा मण्डपे तत्र पूजयेत् ॥४८॥
आवाहयेत्तत्र नारायणं श्रीपतिमीश्वरम् ।
स्थापयेन्मण्डपे चापि विवाहविधिना ततः ॥४९॥

तं स्त्री परिणयेन्मत्वा पतिं नैजं तु कानकम् ।
वरमालायुता हस्तग्राहोत्तरं पतिप्रखम् ॥५०॥
प्रदक्षिणकृतस्वात्मपतिं दानेऽर्पयेत्ततः ।
अन्यान्यपि समस्तानि वस्तून्यपि तदाऽर्पयेत् ॥५१॥
यादृशः स्वपतिश्चेष्टो जन्मजन्मान्तरेऽपि च ।
तादृशः सर्वसम्पन्नो दातव्यो विप्रयोषिते ॥५२॥
एतद्दानं महादानं पतिदानं प्रकीर्तितम् ।
सर्वसौभाग्यदं नित्यगार्हस्थ्यसम्प्रदं शुभम् ॥५३॥
स्वर्गमोक्षप्रदं चापि शाश्वतानन्दसम्प्रदम् ।
पुत्रदानं भ्रातृदानं स्वर्णपुत्तलिकोद्भवम् ॥५४॥
एवमेव विधातव्यं चावाह्य मां परेश्वरम् ।
विधिवद् दीयमानं तत् पुत्ररूपं फलत्यपि ॥५५॥
भ्रातृरूपं फलत्येव यद् दत्तं तत्प्रजायते ।
हरेर्मूर्तेः प्रदानेन हरिर्मिलति माधवः ॥५६॥
कान्तदानप्रदानेन कृष्णः कान्तो भवत्यपि ।
एवमेतानि दानानि देयानि विधिना ततः ॥५७॥

दासीदासप्रदानेन दासीदासा मिलन्ति च ।
नाऽदत्तं प्राप्यते किञ्चित् तस्माद् देयं हि भूतले ॥५८॥
अत्र वापि परत्रापि दत्तमत्रोपतिष्ठते ।
सुखदः सुखवान् स्याच्च दुःखदो दुःखवान् भवेत् ॥५९॥
पुण्यदानं प्रदातव्यं जलं मुक्त्वा कुटुम्बिने ।
रोगिणे च दरिद्राय परलोकविदायिने ॥६०॥

मरणोन्मुखजीवाय पुण्यं देयं व्रतादिजम् ।
एवमन्यानि पुण्यानि यानि तपोमयानि तु ॥६१॥
मखात्मकानि पुण्यानि महोत्सवोद्भवान्यपि ।
पारायणादिपुण्यानि जपपुण्यानि यानि च ॥६२॥
दानपुण्यानि सर्वाणि सत्रप्रपोद्भवानि च ।
देवपूजोत्थपुण्यानि गुरुसेवोद्भवानि च ॥६३॥
दाने देयानि विधिना पतिसेवोद्भवानि च ।
पातिव्रत्यादिधर्माश्च देया दाने सुखप्रदाः ॥६४॥
पत्नीव्रतादिधर्माश्च साधुधर्माः सुखावहाः ।
परोपकारधर्माश्च देया दाने विधानतः ॥६५॥
विद्यापुण्यं खातपुण्यं चेष्टापूर्तादिपुण्यकम् ।
औषधाद्युपकारोत्थं दाने पुण्यं सुखप्रदम् ॥६६॥
शरण्यपुण्यं सत्योत्थं तथा दयोद्भवं शुभम् ।
अहिंसोत्थं महापुण्यं दाने देयं विशेषतः ॥६७॥
कण्ठदानोद्भवं पुण्यं कटिदानोद्भवं तथा ।
हार्ददानोद्भवं पुण्यं दाने देयं विशेषतः ॥६८॥
शरणागतरक्षोत्थं निराश्रिताश्रयोद्भवम् ।
जीवदानमहापुण्यं देयं दाने विशेषतः ॥६९॥
सर्वदानमहादानं ब्रह्मदानं परात्परम् ।
ज्ञानदानं हरेर्दानं मोक्षदानं ततोऽधिकम् ॥७०॥
अभयस्य प्रदानं वै सर्वदानोत्तमोत्तमम् ।
प्रदेयं सर्वतोभावैर्यस्मात्परं न विद्यते ॥७१॥
चन्द्रसूर्यप्रदानं वै नेत्रयोस्तेजसां प्रदम् ।
विज्ञानस्य प्रदानं वै हृदयस्य प्रभाप्रदम् ॥७२॥
मुक्तिदानं चात्मनस्तु शाश्वतानन्ददायकम् ।
अभीतिदानमेवैतद् देयं मुक्तिमभीप्सता ॥७३॥
देहदानं प्रकर्तव्यं शुभदेहादिलब्धये ।
गेहदानं प्रकर्तव्यं भवनादिसुलब्धये ॥७४॥
घृतदानं प्रकर्तव्यं देहपुष्टिसुलब्धये ।
बीजदानं प्रकर्तव्यं धर्मवंशादिवृद्धये ॥७५॥
जलदानं प्रकर्तव्यं पितॄणां स्वस्य तृप्तये ।
गुरुदानं विधातव्यं गुरोर्मूर्तिं तु कानकीम् ॥७६॥
विधाप्य विधिनाऽभ्यर्च्य शृंगारसहितां च ताम् ।
गुरुमावाह्य सम्प्रार्थ्य स्वात्मतारणहेतवे ॥७७॥
प्रदद्यात्तां धार्मिकाय साधवे पूजकाय च ।
यस्याः पूजां नित्यमेव कर्तुं यः शक्त एव ह ॥७८॥
तस्मै देया गुरोर्मूर्तिः पूजाफलं हि लभ्यते ।
अपूज्यायाः प्रत्यवायभागिता स्यात् प्रदातरि ॥७९॥
देवानां मूर्तयश्चापि स्वर्णराजतसंभवाः ।
मणिरत्नादिजन्या वा तरुचित्रादिनिर्मिताः ॥८०॥
प्रदातव्या विधिनैव प्रतिष्ठापूर्विका हि ताः ।
सर्वाभरणशोभाढ्याः सर्ववेषोपसंयुताः ॥८१॥
सर्वशृंगारसहिताः सौम्या रूपाभिरूपिकाः ।
प्रदातव्याः पात्रयुता गन्धार्हणोपवस्तुभिः ॥८२॥
सहिता हारहारालीभूषोत्सवार्हहेतिभिः ।
गणेशस्य हनूमतो विष्णोः शंभोः रवेस्तथा ॥८३॥
वास्तोश्च लोकपालानां गणानां स्वामिनां तथा ।
पार्षदानां सतां देयाः प्रतिमाः शोभनाः शुभाः ॥८४॥
सर्वाभरणयुक्ताश्च सर्वशृंगारशोभनाः ।
योग्यवेषाभिसम्पन्ना योग्यायुधसमन्विताः ॥८५॥
योग्यवाहनयुक्ताश्च योग्यभृत्यसमन्विताः ।
निजशक्तियुताश्चापि दाने देयाः सुखप्रदाः ॥८६॥
महानारायणी ब्राह्मी महालक्ष्मीः रमाऽमृता ।
कमला श्रीः प्रभा देया कानकी माणिकी तथा ॥८७॥
सौवर्णा कंभरालक्ष्मीर्ललिताश्रीः शुभानना ।
गजानना महालक्ष्मीर्देया शोभाभिशोभिता ॥८८॥
गंगा दुर्गा पार्वती सती कन्याकुमारिका ।
सन्तुषा जानकी देया रमा जया च पद्मिनी ॥८९॥
सावित्री विजया देया दुःखहा वेदमातृका ।
संज्ञा स्वाहा वह्नियुक्ता चण्डी देया विभूषिता ॥९०॥
कात्यायनी महाकाली देया तद्वेशशोभिता ।
गौरी देया च तुलसी वृन्दा विवाहशोभिता ॥९१॥
एवमाद्याः सुराण्यश्च तथेशान्यश्च मातरः ।
योगिन्यश्चापि मुक्तान्यो देया दाने जनार्दने ॥९२॥
पूजार्थं साधवे देया भक्ताय च द्विजातये ।
महोत्साहेन देयास्ता मूर्तयः सुप्रतिष्ठिताः ॥९३॥
वेषालंकारनैवेद्यपात्राम्बरादिशोभिताः ।
तासां निवासयोग्यानि देयानि मन्दिराण्यपि ॥९४॥
उद्यानाश्च महास्मृद्धाः फलमाल्यमधुभृताः ।
वाटिकाः सस्ययुक्ताश्च क्षेत्राणि चेक्षुवन्ति हि ॥९५॥
शाकपत्रादियुक्तानि देयानि विविधानि च ।
अरण्यानि प्रदेयानि कूपा वाप्यः सरांसि च ॥९६॥
उपभोग्यानि सर्वाणि गन्धरसाऽदनानि च ।
धान्यानि धनकोशाश्च देया दासाश्च दासिकाः ॥९७॥
यद् दीयते लभ्यते तन्नाऽदत्तं लभ्यते क्वचित् ।
तस्माद् देयाः प्रतिमाश्च कृत्वापि दारदासिकाः ॥९८॥

एवं दत्वा लभेतापि परं सौख्यं गृहाश्रमे ।
इह लोके सुखी भूत्वा साम्राज्यं विन्दते पुनः ॥९९॥
स्वर्गे सत्ये च वैराज्ये वैकुण्ठे श्रीपुरेऽक्षरे ।
गोलोके जायते धामेश्वरनारायणप्रभः ॥१००॥
सर्वविलाससम्पन्नः सर्वभोगाभिभोगवान् ।
सर्वानन्दमहानन्दप्लुतो भवति शाश्वतः ॥१०१॥
पठनाच्छ्रवणादस्य स्मरणाच्चानुमोदनात् ।
दाने प्रेरणाच्चापि तुल्यपुण्याश्रयो भवेत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महाकल्पलतासुवर्णवल्लीदानस्य कल्पप्रियादानस्य स्वर्णकान्तदानस्य पुण्यदानस्याऽभयादिदानानां गुरुदेवदेवीमहादानानां मन्दिरक्षेत्रवाप्यलंकारादिमहादानानां च विधिनिरूपणनामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं सप्तसागरदानकम् ।
महादानमिदं सर्वपापघ्नं स्वर्गधामदम् ॥ १ ॥
पवित्रं दिनमासाद्य कारयेन्मण्डपं शुभम् ।
वेदीं च कारयेद् रम्यां दानवस्तूनि चाहरेत् ॥ २ ॥
स्वस्तिशब्दान् पुण्यदिनं वाचयेद् वेदकोविदैः ।
आसनेषु मण्डपे चावाहयेल्लोकपालकान् ॥ ३ ॥
परमेशं हरिं मां च श्रीरमामुदधेः सुताम् ।
सप्तकुण्डानि रम्याणि कारयेन्मण्डपे खलु ॥ ४ ॥
काञ्चनानि सप्तपलादूर्ध्वाणि शोभनानि च ।
आसहस्रपलात्मानि स्थालीतुल्यानि तत्र च ॥ ५ ॥
प्रथमं पूरयेत् कुण्डं लवणेन तु कांचनम् ।
द्वितीयं पयसा तद्वत् तृतीयं तु घृतेन वै ॥ ६ ॥
चतुर्थं तु गुडेनैव दध्ना तु पंचमं तथा ।
षष्ठं शर्करया चापि सप्तमं मिष्टवारिभिः ॥ ७ ॥
एते सप्तसमुद्रा वै पूजनीया विशेषतः ।
ब्रह्माणं काञ्चनं चाद्ये समुद्रे स्थापयेच्छुभम् ॥ ८ ॥
द्वितीये केशवं मां च तृतीये तु हरं तथा ।
चतुर्थे भास्करं चापि पञ्चमे चन्द्रमित्यपि ॥ ९ ॥
षष्ठे लक्ष्मीं मम पत्नीं सप्तमे पार्वतीं सतीम् ।
स्थापयेद् दासदासीश्च रत्नहीरकमौक्तिकान् ॥१०॥
सर्वधान्यान्युत्तमानि दानवस्तूनि यानि च ।
होमं वारुणमन्त्रैश्च कृत्वा सम्पूजयेत् सुरान् ॥११॥
त्रिःप्रदक्षिणमावृत्य प्रार्थयेन्मां ससागरम् ।
सर्वरसान् समुत्पाद्य भवन्तः सागराः सदा ॥१२॥
सर्वसृष्टिं सुखयन्ति तथा कुरुत मां सुखम् ।
भवतां वारिभिः सर्वपापानि यान्ति संक्षयम् ॥१३॥
सम्पदश्च प्रवर्धन्ते ममापि कुरुत श्रियम् ।
दत्ता दाने भवन्तश्च वर्धयन्तु मम श्रियम् ॥१४॥
मम कोशाः स्वर्णरूप्यमयाः स्युः सागरा इव ।
मम सौख्यं चाऽक्षयं च भवत्वत्र परत्र च ॥१५॥
भवन्तोऽत्राऽर्पिताः सन्तु मदर्थं दिव्यदेहिनः ।
भुक्तिमुक्तिप्रदाः सर्वे महासाम्राज्यदायिनः ॥१६॥
स्वर्गसत्यप्रदाश्चान्ते भौमवैराजलोकदाः ।
श्रीपुराऽमृतधामाऽव्याकृतदाश्चाऽक्षरप्रदाः ॥१७॥
राधापुत्रा भवन्तो वै गोलोकं नो ददत्वपि ।
आनन्दानां सागरांश्च ददत्वेव च मे सदा ॥१८॥
पितॄणां तृप्तिदश्चापि भवन्तूद्धारकारिणः ।
सर्ववंशप्रवंशानां भवन्तु सुखदायिनः ॥१९॥
इत्यभ्यर्थ्य प्रदेयास्ते काञ्चनाः सप्तसागराः ।
गुरवे साधवे चापि हरये स्वामिने तथा ॥२०॥
दीनाऽन्धकृपणेभ्यस्तु देयानि विविधानि च ।
अन्नरत्नाम्बरपात्रधनानि च यथायथम् ॥२१॥
भोजयेद् विप्रसाधूँश्च सतीः साध्वीश्च योषितः ।
बालाँश्च बालिकाश्चापि दद्याद् दानानि सर्वशः ॥२२॥
इत्येवं दानकृल्लक्ष्मि याति वैराजधाम ह ।
श्रीपुरं चामृतं धाम गोलोकं चाक्षरं ततः ॥२३॥
ब्रह्मलोकं परं लोकं प्रयाति शाश्वतं पदम् ।
स्वर्णवर्णविमानेन चाप्सरोभिः प्रसेवितः ॥२४॥
पार्षदैर्मानितो याति पदं मे शाश्वतं प्रियम् ।
तत्रानन्दमहाब्धौ च मोदते सुमहीयते ॥२५॥
शृणु लक्ष्मि ! तथा चान्यन्महादानमनुत्तमम् ।
रत्नधेन्वात्मकं धेनुलोकप्रदं सुखप्रदम् ॥२६॥
पवित्रदिनमासाद्य मण्डपं कारयेच्छुभम् ।
वेदीं कुण्डं कारयेच्च रत्नानि सन्न्यसेत्तथा ॥२७॥
दानवस्तूनि सर्वाणि तथा रत्नानि सन्न्यसेत् ।
गोप्रदानार्थयोग्यानि कृष्णाजिने न्यसेद् बुधः ॥२८॥
लवणे द्रोणपुञ्जे च मृगचर्मणि वै तदा ।
रत्नधेनुं स्थापयेच्च सवत्सां चाप्यलंकृताम् ॥२९॥
राजा कुर्यान्महतीं वै धेनुं सर्वार्थकामदाम् ।
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे तु गोः ॥३०॥

पुष्परागशतं चापि घोणायां परिकल्पयेत् ।
ललाटे हेमतिलकं मुक्ताफलशतं दृशोः ॥३१॥
भ्रूद्वये विद्रुमशतं शुक्ती च कर्णयोस्तथा ।
काञ्चनानि तु शृंगाणि शिरो वज्रमणिकृतम् ॥३२॥
ग्रीवायां पटकं चापि गोमेदादिशतोद्भवम् ।
इन्द्रनीलशतं पृष्ठे पार्श्वे वैदूर्यशोभिते ॥३३॥
स्फाटिकैरुदरं चापि सौगन्धिशतकैः कटिम् ।
खुरान् राजतरूपांश्च पुच्छं मुक्तावलीकृतम् ॥३४॥
सूर्यकान्तेन्दुकान्तौ च घ्राणे कर्पूरचन्दने ।
कौंकुमानि च रोमाणि रौप्यनाभिं च कारयेत् ॥३५॥
गारुत्मतशतं पुच्छमूले स्तनेषु सन्मणीन् ।
तथाऽन्यान्यपि रत्नानि यथाशक्ति प्रकल्पयेत् ॥३६॥
जिह्वां च शर्करारूपां गुडं गोमयरूपिणम् ।
घृतं मूत्रस्वरूपं च दधिदुग्धे स्वरूपतः ॥३७॥
पुच्छाग्रे चामरं चापि ताम्रदोहं समीपतः ।
कुण्डलानि च हैमानि भूषणानि यथाधनम् ॥३८॥
घासग्रासान् धान्यकांश्च रक्षयेत्तत्र सन्निधौ ।
चतुर्थांशेन वत्सीं च सर्वधान्यानि सन्न्यसेत् ॥३९॥
इक्षुपादान् कारयेच्च पञ्चवर्णां तु झुल्लरीम् ।
नानाफलानि रम्याणि मण्डपे सन्न्यसेत्तथा ॥४०॥
होमं कृत्वाऽनले देवाऽऽवाहनं कारयेत्तथा ।
पूजयेद् विधिना मां च देवान् धेनुं प्रदक्षिणम् ॥४१॥
कृत्वाऽर्थयेद् दानकर्ता नत्वा विप्रान् हरिं च गाम् ।
त्वं देवि सर्वदेवानां वासरूपाऽसि तारिणी ॥४२॥
कामधेनुसमस्तानां प्रतिमायै च ते नमः ।
सर्वकामप्रदे मातर्गोलोकवासिनि प्रिये ॥४३॥
पापहे पुण्यदे मोक्षप्रदे मातश्च ते नमः ।
मामस्मात्सागराल्लक्ष्मीरूपे तारय सर्वथा ॥४४॥
सर्वसम्पत्प्रदे कृष्णप्रिये तारय सागरात् ।
स्वर्गं देहि च वैराजं श्रीपुरं चामृतं तथा ॥४५॥
गोलोकं चाऽक्षरं धाम प्रदेहि कमले हि मे ।
इति सम्प्रार्थ्य दातव्या गुरवे साधवे हि सा ॥४६॥
विप्राय योग्यपात्राय दातव्या वैष्णवाय च ।
अन्यरत्नानि धान्यानि देयवस्तूनि यानि च ॥४७॥
तानि सर्वाणि देयानि भिक्षुकेभ्योऽतिभावतः ।
भोजनीयाः साधवश्च विप्राश्च बालबालिकाः ॥४८॥
एवं दानप्रदाना स्यात् स्वर्गभाङ् मोक्षभाक् तथा ।
भुक्तिमुक्तिमहामुक्तिसम्पन्नो जायते सदा ॥४९॥

पितॄणां तारकश्चापि कुटुम्बिनां च तारकः ।
सर्वपुण्यसुपात्रं वै ब्रह्मानन्दमयो भवेत् ॥५०॥
अथान्यत्ते प्रवक्ष्यामि महादानं तथा रमे ।
महाभूतकलशाख्यं परं सर्वार्थसाधकम् ॥५१॥
पवित्रतिथिमासाद्य कृत्वा मण्डपमुत्तमम् ।
स्वस्तिवाचश्च पुण्याहवाचनं कारयेत्ततः ॥५२॥
कुण्डस्य सन्निधावाज्यव्रीह्यादीन् समुपन्यसेत् ।
दानसम्भारभूषाद्याच्छादनान्नफलादिकम् ॥५३॥
संस्थाप्य लोकपालानां ममावाहनमाचरेत् ।
पूजयेद् विधिना सर्वान् स्वर्णघटं च विन्यसेत् ॥५४॥
महारत्नादिसंयुक्तं पञ्चपल्लवशोभितम् ।
प्रादेशादङ्गुलशतप्रमाणमानशोभितम् ॥५५॥
क्षीराऽऽज्यपूरितं कल्पाम्बरपुष्पादिसंयुतम् ।
स्थापयेत् पूजयेच्चापि तत्र तीर्थानि चाहरेत् ॥५६॥
पृथ्वीं वाराहसहितां कमलाद्यैरलंकृताम् ।
स्थापयेन्मण्डपे तत्र विनायकं प्रपूजयेत् ॥५७॥
इन्द्रमग्निं यमं रक्षो वरुणं चानिलं तथा ।
कुबेरं च महेशानं पूजयेद्धान्यपुञ्जके ॥५८॥
अक्षसूत्रयुतं तत्र ऋग्वेदं पूजयेत् तथा ।
पद्मयुक्तं यजुर्वेदं सामवेदं विणायुतम् ॥५९॥
अथर्वाणं स्रुक्स्रुवाढ्यं पद्माढ्यं पूजयेत्तथा ।
ब्रह्माणं रुद्रमेवापि विष्णुं सम्पूजयेत्ततः ॥६०॥
माणिक्यासहितं मां श्रीकृष्णनारायणं प्रभुम् ।
पूजयेद् भक्तिभावेन ततश्चारात्रिकं चरेत् ॥६१॥
सर्वधान्यानि भूषाश्च रत्नानि विविधानि च ।
उपानत्पादुकाछत्रचामरासनदर्पणम् ॥६२॥
शय्यां कुंभान् दीपिकां च द्रव्याणि विविधानि च ।
दानार्थकानि सर्वाणि कृत्वा मां त्रिःप्रदक्षिणम् ॥६३॥
दद्याद् दाने तु विधिना प्रार्थयेत् कलशं तदा ।
नमो ब्रह्माण्डरूपाय कृष्णवासाय वेधसे ॥६४॥
रुद्ररूपाय शान्ताय विष्णवे कलशाय ते ।
नमः सर्वाधिवासाय मोक्षदाय नमो नमः ॥६५॥
नमोऽमृताधिवासाय सुवर्णस्वर्गदाय च ।
श्रीपुराऽक्षरदात्रे ते स्वर्णकलश ते नमः ॥६६॥
सर्वदेवनिवासोऽसि सर्वदेवीसमाश्रितः ।
सर्वर्द्धिभूतिसम्पद्भिर्युक्तोऽस्य ते नमो नमः ॥६७॥
पञ्चभूतात्मरूपोऽसि ददामि दानरूपिणम् ।
साम्राज्यं मे प्रदेह्यत्र परत्र मोक्षणं ततः ॥६८॥

इति प्रार्थ्य च गुरवे साधवे योगिने तथा ।
हरये मे प्रदातव्यो घटः स्वर्णमयः शुभः ॥६९॥
अन्यानि सर्वदानादि देयानि च यथोचितम् ।
भोजनानि प्रदेयानि सर्वेभ्यो मण्डपान्तिके ॥७०॥
महोत्सवं प्रकुर्याद् य एवं घटार्पणात्मकम् ।
तस्य राज्यं महाराज्यं भुवि स्वर्गे भवेद् ध्रुवम् ॥७१॥
सत्ये वैराजके लोके वैष्णवे श्रीपुरेऽमृते ।
वैकुण्ठेऽव्याकृते धाम्नि गोलोके चाऽक्षरेऽपि च ॥७२॥
महामुक्तिं प्रपद्येत भोगान् भुक्त्वोत्तमोत्तरान् ।
पितॄन् सर्वान् मोचयेच्च भवेत् विमानगः सदा ॥७३॥
स्वल्पस्यापि कलशस्य दानं कुर्याद् यथाधनम् ।
महाघटस्य हण्डस्य द्रोण्या गोल्याः समर्पणम् ॥७४॥
कुसुलायाः प्रदानं च कोशस्यापि प्रदानकम् ।
कुर्यात्तेन भवेद् भुक्तिर्मुक्तिश्चापि सुखप्रदा ॥७५॥
पठनाच्छ्रवणाच्चापि स्मरणाच्चानुमोदनात् ।
घटदानफलं स्याद्वै सर्वपापप्रणाशनम् ॥७६॥
अथाऽन्यत्ते प्रवक्ष्यामि दानं लक्ष्मि निबोध मे ।
लक्ष्मीदानं महादानं कर्तव्यं भूतिमिच्छता ॥७७॥
मण्डपं कारयेच्छ्रेष्ठं मणिरत्नादिभूषितम् ।
सर्वपल्लवकदलीस्तम्भतोरणशोभितम् ॥७८॥
चित्राम्बराऽऽदर्शयुक्तं स्वर्णकलशशोभितम् ।
सध्वजं वेदिकायुक्तं कुण्डासनविराजितम् ॥७९॥
धान्यभूषाम्बररत्नमणिमाणिक्यराजितम् ।
देयवस्तूपसम्पन्नं ऋत्विगादिकृतस्थलम् ॥८०॥
जलकुंभयुतं पूजायोग्यसामग्रिकान्वितम् ।
तत्र मध्ये सुवर्णस्याऽऽसने लक्ष्मीं महासतीम् ॥८१॥
कानकीं स्थापयेद् रम्यां यथाधनं विनिर्मिताम् ।
सर्वालंकारसंयुक्तां सर्वशृंगारशोभिताम् ॥८२॥
सर्वभूषाम्बरयुक्तां नारायणसमन्विताम् ।
स्वर्णनारायणमूर्तिं चतुर्भुजां सभूषणाम् ॥८३॥
वरयोग्यां स्थापयेच्च स्वस्तिवाचनमाचरेत् ।
नारायणं तथा लक्ष्मीं पूजयेच्च विधानतः ॥८४॥
स्नानाद्यारम्य कुर्याद्वै पुष्पाञ्जल्यन्तमर्हणम् ।
विवाहविधिना सर्वं विधिं कुर्याद् यथोचितम् ॥८५॥
वरमालां हरेः कण्ठे निधापयेच्छ्रियाः करैः ।
नैवेद्यं च जलं ताम्बूलकमारार्त्रिकं चरेत् ॥८६॥
कृत्वा प्रदक्षिणं जुहुयाद्घृतादिसुपायसम् ।
ततो दानं महालक्ष्म्या दद्यान्नारायणाय वै ॥८७॥
प्रार्थयेद् विधिना लक्ष्मीं नारायणं परं प्रभुम् ।
युवां मातापितरौ स्थः, रक्षकौ पालकौ प्रभू ॥८८॥
लक्ष्मीदानेन भगवन् मम सम्पद् विवर्धताम् ।
पापानां सर्वभागानां लयो भवतु वै ध्रुवम् ॥८९॥
महाराज्यं च वैराज्यं पदं मेऽस्तु तवाऽर्पणात् ।
पितॄणां मम मोक्षोऽस्तु वंशवृद्धिस्तथाऽस्तु मे ॥९०॥
वैकुण्ठधामलाभो मे ततो मेऽस्त्वाक्षरं पदम् ।
सर्वविधाः श्रियः सन्तु मद्गृहे ते कृपावशात् ॥९१॥
इति सम्प्रार्थ्य दातव्या लक्ष्मीर्नारायणाय वै ।
लक्ष्मीनारायणमूर्तिस्ततो देया सतेऽर्थिने ॥९२॥
गुरवे साधवे देया मन्दिराय शुभार्थिने ।
अन्यरत्नादिकं सर्वं दातव्यं भिक्षुवर्गिणे ॥९३॥
साधून् विप्रान् भोजयेच्च बालान् दीनान् सुबालिकाः ।
अनाथान्धान् द्विजान् भक्तान् योगिनो भोजयेद् वधूः ॥९४॥
अन्नदानादिकं कुर्याद् वस्त्रदानादिकं ह्यपि ।
धनदानादिकं कुर्याद् यथाश्रद्धं यथाधनम् ॥९५॥
एवं लक्ष्मीप्रदानेन लक्ष्मीदानफलं भवेत् ।
कन्यादानफलं चापि पत्नीदानफलं व्रजेत् ॥९६॥
व्रतयज्ञफलं चापि सत्रेष्टापूर्तिजं फलम् ।
सर्वदानफलं चापि चातुर्मास्यफलं व्रजेत् ॥९७॥
साम्राज्यं चेह लोकेऽपि भुक्त्वा लक्ष्मीप्रसादतः ।
स्वर्गराज्यं सत्यराज्यं वैराजं पदमाप्नुयात् ॥९८॥
ततः श्रीपुरराज्यं च भुक्त्वा गोलोकमाप्नुयात् ।
वैकुण्ठं च परं भुक्त्वा ततो यात्यक्षरं पदम् ॥९९॥
ब्रह्मानन्दह्रदे मग्नो ब्रह्मलोके महीयते ।
भुक्तिं मुक्तिं यथेष्टां वै लभते दानकृत्तथा ॥१००॥
एवमुक्तानि ते लक्ष्मि महादानानि यानि वै ।
तथाऽन्यानि भवन्त्यत्र दानानि विविधान्यपि ॥१०१॥
सूर्यदानं चन्द्रदानं महेन्द्रदानमित्यपि ।
ब्रह्मदानं विष्णुदानं शंभुदानं तथा परम् ॥१०२॥
कुबेरदानमेवापि यमदानं शुभास्पदम् ।
प्राणदानं चेन्द्रियादिदानं स्वर्णप्रतिकृतिम् ॥१०३॥
दद्यात् तत्रैव सर्वत्र यन्त्रदानं यथोचितम् ।
आक्षरब्रह्मदानं च गोलोकदानमित्यपि ॥१०४॥
वैकुण्ठदानमेवापि श्रीपुरस्याऽर्पणं तथा ।
एवमन्यानि दानानि यानि स्वेष्टानि सन्ति च ॥१०५॥
तानि दद्यात् समग्राणि लब्ध्यर्थं वै भवान्तरे ।
मोक्षार्थं वा प्रदद्याच्च भक्तिदानं महोत्तमम् ॥१०६॥

पठनाच्छ्रवणादस्य स्मरणाच्चानुमोदनात् ।
दानपुण्यं भवेत् सर्वं यथाश्रद्धं यथाशुचि ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सप्तसागरमहादानस्य रत्नधेनुमहादानस्य महाभूतकलशदानस्य लक्ष्मीमहादानस्य तथाऽन्यमहादानानां विधिनिरूपणनामा द्वात्रिंशाधिकशततमोऽध्यायः ॥ १३२ ॥

**श्रीनारायणीश्रीरुवाच—**

कृष्णकान्त मम कान्त श्रुतं दानमहत्फलम् ।
पुण्ये दिने प्रदातव्यं यदुक्तं भवता प्रभो ॥ १ ॥
पुण्याश्च दिवसाः सर्वे ज्ञातास्त्वयोदिता मया ।
तेषु पुण्यतमं चाहर्ज्ञातुमिच्छामि तद्वद ॥ २ ॥

**श्रीपुरुषोत्तम उवाच—**

अनादिश्रीकृष्णनारायणस्य यत्र भूतले ।
प्राकट्यं मे दिने जातं दिनं पुण्यतमं हि तत् ॥ ३ ॥
ऊर्जकृष्णाष्टमी सैषा सर्वोत्तमा प्रदानके ।
दातुर्जन्मदिनं चापि श्रेष्ठं दातुः कृते मतम् ॥ ४ ॥
कल्पनाम्ना च दिवसाः श्रेष्ठतमा भवन्त्यपि ।
ब्रह्मणो मासदिवसाः श्रेष्ठा भवन्ति दानके ॥ ५ ॥
मासाहस्त्रिंशन्नामानि कथयामि निबोध मे ।
येषां तु कीर्तनादेव वेदपुण्येन युज्यते ॥ ६ ॥
प्रतिपत् श्वेतकल्पस्तु द्वितीयो नीललोहितः ।
तृतीयो वामदेवस्तु तुर्यो राथन्तराभिधः ॥ ७ ॥
पञ्चमो रौरवाख्यश्च षष्ठो देवदिनाभिधः ।
सप्तमो बृहदाख्यश्चाऽष्टमः कन्दर्पनामकः ॥ ८ ॥
नवमः सद्यनामा चेशानस्तु दशमो मतः ।
एकदशस्तमोनामा सारस्वतो द्वयंदश ॥ ९ ॥
त्रयोदश उदानाख्यो गारुडस्तु चतुर्दशः ।
पञ्चदशस्तु कौमार्यः षोडशो नारसिंहकः ॥१०॥
सप्तदशः समानाख्यश्चाऽऽग्नेयोऽष्टादशात्मकः ।
एकोनविंशः सोमाख्यो विंशतिर्मानवो मतः ॥११॥
तत्पुमानेकविंशश्च दिवसो ब्रह्मणः स्मृतः ।
वैकुण्ठो द्वाविंशकश्च लक्ष्मीस्त्रिविंशकस्तथा ॥१२॥
चतुर्विंशस्तु सावित्री पञ्चविंशस्त्वघोरकः ।
वाराहः षड्विंशकश्च वैराजः सप्तविंशकः ॥१३॥
अष्टाविंशस्तु गौरीति नवविंशो महेश्वरः ।
त्रिंशस्तु पितृकल्पो वै या कुहूर्ब्रह्मणो मता ॥१४॥
एतेषु यानि भगवद्दिनानि श्रीदिनानि च ।
शिवादिनामतिथयः पुण्यास्ता दानकरिणः ॥१५॥
हरेर्जन्मदिनान्येव हरिणीजन्मराशयः ।
पुण्याः सन्ति व्रताहाश्च दानयोग्याः सदा रमे ॥१६॥
नहि कर्तुं समर्था वै सर्वे क्षुद्रहृदो जनाः ।
कुर्वन्त्युदारमनसो दानान्युक्तानि यानि ह ॥१७॥
यदा यस्य भवेद् बुद्धिर्दानधर्मपरायणा ।
तदा तस्मिन् दिने कार्यं दानं दात्रा तु सत्वरम् ॥१८॥
गता श्रद्धा गतः कालो गत उत्साह इत्यपि ।
गतं पात्रं गतं वस्तु पुनर्नाऽऽयास्यति क्वचित् ॥१९॥
गत्वराः सम्पदः सर्वा गत्वरं जीवनं तथा ।
गत्वराश्चापि संकल्पास्तान् सत्कार्ये नियोजयेत् ॥२०॥
नारायणं हरिं कृष्णं मामक्षरपतिं प्रभुम् ।
अवतारानीश्वरांश्च सुरानृषीन् सुतोषयेत् ॥२१॥
ग्रहान् सन्तोषयेद् दानैर्लक्ष्मि मम स्वरूपिणः ।
सर्वकामाप्तये नित्यं ग्रहं शान्तं विधापयेत् ॥२२॥
श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
निजायुःपुष्टिकामो वा वंशेच्छुः सुखभावनः ॥२३॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ।
ग्रहान् ग्रहादिदेवांश्च संस्थाप्य होममाचरेत् ॥२४॥
ग्रहयज्ञोऽयुतहोमो लक्षहोमस्तथा मतः ।
कोटिहोमस्तथा चापि यथाकार्यबलानुकृत् ॥२५॥
अयुतेनाऽऽहुतीनां तु नवग्रहमखो मतः ।
गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् ॥२६॥
विप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयशोभनाम् ।
चतुरस्रामुदङ्मुखां कृत्वाऽग्निनयनं ततः ॥२७॥
आवाहयेत् सुरांस्तस्यां सूर्यं सोमं च मंगलम् ।
बुधं गुरुं कविं शनैश्चरं राहुं च केतुकम् ॥२८॥
मध्ये सूर्यं दक्षिणे मंगलं गुरुं तथोत्तरे ।
बुधं पूर्वोत्तरे शुक्रं पूर्वे संस्थापयेत्तथा ॥२९॥
दक्षपूर्वे चन्द्रमसं शनिं तु पश्चिमे तथा ।
राहुं तु दक्षपश्चे तु केतुं पश्चोत्तरे तथा ॥३०॥
तण्डुलेषु स्थापयेद्वा तथोपदेवताः शुभाः ।
सूर्यस्येशं शशिनश्च पार्वतीं चोपदेवताम् ॥३१॥
स्कन्दं भौमस्य च हरिं बुधस्याऽप्युपदेवताम् ।
ब्रह्माणं च गुरोरिन्द्रं शुक्रस्याप्युपदेवताम् ॥३२॥

यमं शनेस्तथा राहोः कालं तथोपदेवताम् ।
चित्रगुप्तं च केतोर्वै स्थापयेदुपदेवताम् ॥३३॥
अथ प्रत्युपदेवाँश्च स्थापयेत्तत्र तत्र च ।
क्रमादग्निं जलं पृथ्वीं विष्णुमिन्द्रं शचीं तथा ॥३४॥
प्रजापतिं भोगिनश्च ब्रह्माणं स्थापयेच्च तान् ।
विनायकं च दुर्गां च वायुमाकाशमित्यपि ॥३५॥
आवाहयेद् व्याहृतिभिस्तथैवाश्विकुमारकौ ।
ध्यायेद्रविं रक्तवर्णं मंगलं रक्तमित्यपि ॥३६॥
सोमशुक्रौ श्वेतवर्णौ बुधगुरू तु पिंगलौ ।
शनिराहू कृष्णवर्णौ धूम्रं केतुं स्मरेत्तदा ॥३७॥
ग्रहवर्णानि देयानि पुष्पाणि चाम्बराणि च ।
सुरभिर्धूप एवाऽत्र वितानकं तथोपरि ॥३८॥
फलपुष्पादि पूजार्हं सर्वं दद्यात् समर्हणे ।
गुडौदनं तु सूर्याय सोमाय घृतपायसम् ॥३९॥
मंगलाय तु संयावं बुधाय क्षीरकुल्लरीम् ।
दध्योदनं तु गुरवे शुक्राय तु गुडौदनम् ॥४०॥
शनैश्चराय कृशरां माषाँस्तु राहवे तथा ।
चित्रौदनं तु केतुभ्यस्ततः समर्चयेत् सुरान् ॥४१॥
प्रागुत्तरेण कलशं दध्यक्षतसमन्वितम् ।
चूतपल्लवसंयुक्तं फलवस्त्रयुगान्वितम् ॥४२॥
पञ्चरत्नसमायुक्तं स्थापयेद् वरुणं न्यसेत् ।
तीर्थानि च समुद्राँश्चावाहयेत् तत्र वै जले ॥४३॥
गजाश्वरथ्यावल्मीकचत्वरह्रदगोकुलात् ।
मृदमानीय च सर्वौषधिवारिसमन्विताम् ॥४४॥
स्नानार्थे विन्यसेत् तत्र यजमानस्य भूसुरः ।
होमं समाचरेत् सर्पिर्यवव्रीहितिलादिभिः ॥४५॥
अर्कः पालाशखदिरावपामार्गश्च पिप्पलः ।
औदुम्बरः शमी दुर्वा कुशाश्च समिधः क्रमात् ॥४६॥
एकैकस्याऽष्टकशतमष्टाविंशतिमेव वा ।
होतव्या मधुसर्पिर्भ्यां दध्ना च समिधा तथा ॥४७॥
तत्काण्डान् प्रादेशमात्रानशाखानपलाशिनः ।
कल्पयेत् समिधस्तत्र जुहुयाद् देवमन्त्रतः ॥४८॥
पक्वं चरुं घृताभ्यक्तां समिधं भक्ष्यप्रभृति ।
दशाहुतीः प्रहुत्वा जुहुयाद् व्याहृतिभिस्तथा ॥४९॥
मन्त्रितं च चरुं तस्मै तस्मै देवाय चाऽर्पयेत् ।
पूर्णाहुतिं ततो दद्यात् स्नापयेत् यजमानकम् ॥५०॥
सुरास्त्वामभिरक्षन्तु सर्वे ये चात्र पूजिताः ।
तथाऽन्ये पूजनार्हाश्च त्वामवन्तु समन्ततः ॥५१॥
इति स्नपितः सस्त्रीको यजमानस्तु दक्षिणाम् ।
ददद् विप्रेभ्य एवापि गृहेभ्यश्चापि तां यथा ॥५२॥
सूर्याय कपिलां धेनुं शंखं चन्द्राय चार्पयेत् ।
भौमाय वृषभं रक्तं बुधाय कनकं दिशेत् ॥५३॥
गुरवे पीतवस्त्रं च शुक्राय श्वेतवाजिनम् ।
कृष्णां गां शनये दद्यादायसं राहवे तथा ॥५४॥
छागं दद्यात् केशवायाऽथवा गावस्तु यावताम् ।
सुवर्णं वा प्रदद्याच्च गुरुर्यथा प्रतुष्यति ॥५५॥
देये वस्तुनि देवस्य ममाराधनपूर्वकम् ।
दानं श्रेष्ठतमपुण्यप्रदं प्रजायते रमे ॥५६॥
मातस्त्वं पृथ्वीरूपा धेनुः कृष्णस्य वत्सला ।
पुण्या पापहरा मेऽस्तु नित्यां शान्तिं प्रयच्छ मे ॥५७॥
शंखस्त्वं पुण्यपुञ्जानां मूर्तिर्मंगलरूपिणी ।
कृष्णहस्तस्थितो नित्यं शान्तिं प्रयच्छ मेऽनिशम् ॥५८॥
धर्मदेवो वृषः कृष्णमूर्तौ प्रतिष्ठते भवान् ।
सर्वानन्दप्रमोदानामधिष्ठानं दधातु माम् ॥५९॥
कनक त्वं वह्निपुत्र हेमबीजं विभावसोः ।
अनन्तपुण्यफलदं शान्तिमृद्धिं प्रयच्छ मे ॥६०॥
पीताम्बरं सदा श्रेष्ठं दिव्यं श्रीकृष्णवल्लभम् ।
शान्तिं च सम्पदं देहि कुरु मां कृष्णवल्लभम् ॥६१॥
हयग्रीवो भवान् विष्णुरमृतौषधिवीर्यपः ।
देहि मे चामृतं शान्तिं माणिक्याश्रीपतिः प्रभुः ॥६२॥
कृष्णे गो त्वं कृष्णपत्नी कार्ष्णी नारी व्यजायथाः ।
कृष्णस्य धारिणी चारसे मां प्रपोषय नित्यदा ॥६३॥
धातूनामायसं दासः सर्वकिंकरकार्यकृत् ।
सिताशरादिदेव त्वं नित्यां शान्तिं प्रयच्छ मे ॥६४॥
छाग त्वं कालरूपोऽसि स्वप्ने दृष्टो भयावहः ।
वह्निवाह सदा शान्तिं मे प्रयच्छ प्रपूजितः ॥६५॥
गावः कृष्णस्वरूपा वै सर्वेश्वरसुराश्रयाः ।
सर्वोद्धारसमर्थाश्च श्रियै मे सन्तु सर्वथा ॥६६॥
शय्ये कृष्णेन संभुक्ता पावनी त्वं सुतप्रदा ।
सम्पत्प्रदाऽस्तु मे नित्यमशून्याऽस्तु मम स्त्रिया ॥६७॥
सर्वरत्नानि देवानां वासात्मकानि वै यतः ।
रत्नवासं गृहे मेऽत्र प्रकुर्वन्त्वर्पितानि ह ॥६८॥
भूमिदानं परं दानं तथा सुवर्णदानकम् ।
अन्नर्द्धिं च धनर्द्धिं च कुरुतं मे समर्पिते ॥६९॥
इत्यभ्यर्थ्य च सम्प्रार्थ्य दाने दद्याद् विशेषतः ।
सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥७०॥

यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः ।
तं तु यत्नेन सम्पूज्य तोषयेच्छेषसंयुतम् ॥७१॥
वर्मवच्चोपघातानां शान्तिर्भवति पूजनात् ।
सम्पूर्णां दक्षिणां दद्याद् वित्तशाठ्यं विवर्जयेत् ॥७२॥
विवाहोत्सवयज्ञेषु प्रतिष्ठादिक्रियादिषु ।
निर्विघ्नार्थं प्रशान्त्यर्थं कुर्यादुद्वेगशान्तिदम् ॥७३॥
नवग्रहमखं भक्तोऽयुतहोमात्मकं शुभम् ।
अनादिश्रीकृष्णनारायणात्मकमहाध्वरम् ॥७४॥
प्रार्थयेद् यजमानोऽत्र मां देवानीश्वरान् सतीः ।
यजमानस्तीर्थजलैः स्नापितो वेदविज्जनैः ॥७५॥
स्नापयितृद्विजा दद्युराशीर्वादान् सुरक्षकान् ।
अनादिकृष्णनारायणो नारायणीयुतः ॥७६॥
मुक्तमुक्तानिकायुक्तस्त्वां सदा रक्षतु ध्रुवम् ।
श्रीकृष्णो राधिकायुक्तो नारायणः श्रिया सह ॥७७॥
वासुदेवादयो व्यूहा रक्षन्तु त्वां प्रपूजकम् ।
ब्रह्मविष्णुमहेशाश्च महेन्द्राद्या दिगीश्वराः ॥७८॥
धर्मपत्न्यः समग्राश्च सूर्याद्याश्च नवग्रहाः ।
वसवो निधयो रुद्राः ऋषयो मुनयो वृषाः ॥७९॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥८०॥
भूतप्रेतपिशाचाद्या रुद्रा गणा गणेश्वराः ।
योगिन्यः शक्तयः सर्वाः शस्त्राऽस्त्रवाहनानि च ॥८१॥
रत्नौषधानि विघ्नाश्च कालः कालस्य वंशजाः ।
सर्वेऽपि कालावयवास्तीर्थानि निखिलान्यपि ॥८२॥
एते त्वामभिषिञ्चन्तु रक्षन्तु वर्धयन्त्वपि ।
एवमाशीर्वर्धितश्च शुक्लाम्बरधरोऽर्पयेत् ॥८३॥
दक्षिणा विविधाः सर्वा विप्रेभ्यो गुरवे सते ।
भोजयेद् बहुधा विप्रान् साधून् साध्वीश्च योषितः ॥८४॥
बालाँश्च बालिकाँश्चापि दीनान्धकृपणाँस्तथा ।
भिक्षुकान् दैववृत्तींश्च मिष्टान्नपायसादिभिः ॥८५॥
होमानयुतसंख्याकान् कारयेद् विप्रपुंगवैः ।
यद्वा स्वयं प्रकुर्याच्च ब्रह्मशीलव्रतान्वितः ॥८६॥
ततः कुर्यात् परिहारं ग्रहाऽध्वरस्य सर्वथा ।
ग्रहशान्तिर्भवेत्तेन पीडा नश्येत् सुखी भवेत् ॥८७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पुण्यतमदिनप्रदर्शनं ग्रहशान्तिपूजादिप्रदर्शनं चेतिनिरूपणनामा त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

श्रीपुरुषोत्तम उवाच—

शृणुनारायणीश्रि ! त्वं लक्षहोमग्रहाध्वरम् ।
सर्वकामप्रदं सर्वविघ्नशान्तिकरं सुखम् ॥ १ ॥
पितॄणां वल्लभं श्रेष्ठं भुक्तिमुक्तिफलप्रदम् ।
ग्रहताराबलं दृष्ट्वा कृत्वा ब्राह्मणवाचनम् ॥ २ ॥
गृहस्योत्तरपूर्वेण मण्डपं कारयेन्नवम् ।
द्वादशहस्तविस्तारं चतुरस्रमुदङ्मुखम् ॥ ३ ॥
दशहस्तमष्टहस्तं च वा प्रकारयेत्तु तम् ।
प्रागुदक्प्लवनां भूमिं कारयेत् सर्वरक्षिणीम् ॥ ४ ॥
कुण्डं समेखलं कुर्याच्चतुरस्रं सयोनिकम् ।
प्रागुत्तरे मण्डपाऽधोभागे रंगादिरञ्जितम् ॥ ५ ॥
चतुरंगुलविस्तारां मेखलां तद्वदुच्छ्रयाम् ।
द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं शुभम् ॥ ६ ॥
लक्षहोमे रचयेद्वै कुण्डं शोभावहं तथा ।
तस्य चोत्तरपूर्वेण वितस्तित्रयमानकम् ॥ ७ ॥
प्रागुदक्प्रवणं तच्च चतुरस्रं समन्ततः ।
विष्कम्भार्धोच्छ्रितं कार्यं स्थण्डिलं शिल्पकर्मणा ॥ ८ ॥
संस्थापनाय देवानां वप्रत्रयसमावृतम् ।
द्व्यङ्गुलोर्ध्वः प्रथमस्तु वप्रः कार्यः शुभावहः ॥ ९ ॥
वप्रद्वयं चांगुलोर्ध्वं प्रत्येकं वै तथोपरि ।
दशांगुलोच्छ्रिता भित्तिः स्थण्डिले वै तथोपरि ॥१०॥
तत्र त्वावाहयेत् देवान् पुष्पतण्डुलकासने ।
सूर्यादीनधिदेवादींस्तथा प्रत्यधिदेवताः ॥११॥
गरुत्मानधिकस्तत्र सम्पूज्यः श्रियमिच्छता ।
विष्णुभक्तो महाभक्तो विषपापहरोऽसि वै ॥१२॥
सुखदो विष्णुभक्तानां शान्तिमृद्धिं प्रयच्छ मे ।
कुंभमामन्त्र्य विधिना लक्षहोमान् समाचरेत् ॥१३॥
समित्संख्याधिकान् होमान् समाचरेत्प्रशान्तये ।
घृतकुंभवसोर्धारां पातयेदनलोपरि ॥१४॥
औदुम्बर्या बाहुमार्गदीर्घया जुहुयात् स्रुवा ।
श्रावयेत् सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवम् ॥१५॥
महावैश्वानरं साम ज्येष्ठसाम च वाचयेत् ।
स्नानयेद् यजमानं च स्वस्तिवाचनमुच्चरेत् ॥१६॥
सुदद्याद् दक्षिणाश्चापि भूयसीः शान्तचेतसा ।
ऋत्विग्भ्यश्च चतुर्भ्यो वा द्वाभ्यां वा दक्षिणां ददेत् ॥१७॥
भक्ष्यभोज्यानि दानानि गोरत्नानि तथाऽर्पयेत् ।
शयनानि सवस्त्राणि हैमानि कटकानि च ॥१८॥

कर्णांगुलिपवित्राणि कण्ठहारान् सुवर्णजान् ।
भूषणानि धनं दद्याद् वित्तशाठ्यं न चाऽऽचरेत् ॥१९॥
अन्नदानं प्रकुर्याच्च सुभिक्षवर्षदायकम् ।
साधून् विप्रान् बालबाला भोजयेद् विविधान्नकम् ॥२०॥
अन्नहीनो दहेद् राष्ट्रं मन्त्रहीनस्तु ऋत्विजः ।
यष्टारं दक्षिणाहीनं नास्ति यज्ञसमो रिपुः ॥२१॥
सकामो लक्षहोमांश्च कृत्वेष्टकाममाप्नुयात् ।
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ॥२२॥
भार्यार्थी शोभनां भार्यां पत्यर्थिनी पतिं प्रियम् ।
भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ॥२३॥
मानं लभते मानार्थी प्राधान्यं लोकवन्दितम् ।
विजयार्थी जयं चापि लभते सार्वकालिकम् ॥२४॥
यं यं प्रार्थयते कामं चैश्वर्यं सिद्धिमित्यपि ।
तं तं लभते यज्ञेन ग्रहाणां समनुग्रहात् ॥२५॥
निष्कामः कुरुते यज्ञं स परब्रह्म गच्छति ।
तत्र भुंक्ते परान् भोगान् सुखमानन्त्यमश्नुते ॥२६॥
अथ नारायणीश्रि त्वं शृणु यज्ञं ततोधिकम् ।
अस्माच्छतगुणो यज्ञः कोटिहोमः प्रजायते ॥२७॥
आहुतिभिः श्रद्धया च दक्षिणाभिः फलेन च ।
मण्डपे ग्रहदेवानावाहयेदुपदेवताः ॥२८॥
प्रत्युपदेवानावाह्य शुद्धिस्नानादि चाचरेत् ।
कोटिहोमे चतुर्हस्तं चतुरस्रं समन्ततः ॥२९॥
योनिवक्रद्वयोपेतं कुर्यात् कुण्डं त्रिमेखलम् ।
प्रथमा द्व्यङ्गुलोर्ध्वा त्र्यङ्गुलोर्ध्वा तु द्वितीयका ॥३०॥
उच्छ्रायविस्तराभ्यां तु तृतीया चतुरंगुला ।
वितस्तिमात्रा योनिश्च षट्सप्तांगुलविस्तृता ॥३१॥
कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चाङ्गुलोच्छ्रिता ।
गजोष्ठसदृशी तद्वदायता छिद्रशोभिता ॥३२॥
अश्वत्थपत्रतुल्याऽऽभाऽऽकृतिरेखादिराजिता ।
वेदी चतुर्वितस्तिः स्याच्चतुरस्रा त्रिवप्रिणी ॥३३॥
वप्रप्रमाणं पूर्वोक्तं वेद्युच्छ्रयोऽपि तद्विधः ।
मण्डपः षोडशहस्तश्चतुर्मुखः सुशोभितः ॥३४॥
मण्डपे पूर्वगद्वारे बह्वृचं स्थापयेद् द्विजम् ।
यजुर्विदं दक्षिणे च पश्चिमे सामवेदिनम् ॥३५॥
उत्तरेऽथर्वविज्ञं च तथाऽष्टौ होमकार्ऽर्थिनः ।
एवं द्वादश विदुषः पूजयेद् भक्तिसंभृतः ॥३६॥
कुंकुमाऽक्षतभूषाद्यैर्वस्त्रमाल्यानुलेपनैः ।
रात्रिसूक्तं रुद्रसूक्तं पवमानं सुमंगलम् ॥३७॥

शान्तिपाठं वाचयेत् प्राङ्बह्वृचाननतः पुरा ।
शान्तं शाक्रं च सौम्यं च कौष्माण्डं शान्तिमेव च ॥३८॥
पाठयेद् दक्षिणविप्राननाद् यजुर्विदो ह्यथ ।
सुपर्णं चापि वैराजमाग्नेयं रुद्रसंहिताम् ॥३९॥
ज्येष्ठं साम तथा शान्तिं पठेद्वै पश्चिमो द्विजः ।
शान्तिं सूक्तं च सौरं च तथा शाकुनकं परम् ॥४०॥
पौष्टिकं च महाराज्यमुत्तरस्थः पठेद् द्विजः ।
पञ्चभिः सप्तभिश्चात्र होमः कार्यो द्विजोत्तमैः ॥४१॥
वसोर्धाराविधानं च दशोत्तरं हि पूर्वतः ।
एवं कृत्वा कोटिहोमान् सर्वान् कामानवाप्नुयात् ॥४२॥
विष्णुपदं व्रजेच्चापि पदमिन्द्रस्य गच्छति ।
वैराजं च पदं लब्ध्वा याति धामाऽक्षरं मम ॥४३॥
अश्वमेधाऽध्वराणां यश्चाष्टादशसहस्रकम् ।
कृत्वा यत्फलमाप्नोति कोटिहोमात् तदश्नुते ॥४४॥
ब्रह्महत्यासहस्राणि भ्रूणहत्याऽर्बुदानि च ।
कोटिहोमाध्वरेणैव नश्यन्ति मम योगतः ॥४५॥
ग्रहयज्ञत्रयं कुर्याद् यस्तु प्रसन्नतां मम ।
इच्छन् सोऽपि व्रजेच्छान्तिं पीडानां मे प्रभावतः ॥४६॥
य इदं शृणुयाद्वापि श्रावयेच्च स्मरेदपि ।
न तस्य ग्रहपीडा स्याद् वर्तमाना तु नश्यति ॥४७॥
ग्रहयज्ञत्रयं गेहे लिखितं यस्य विद्यते ।
न पीडा तत्र बालानां न रोगो न च बन्धनम् ॥४८॥
शृणु लक्ष्मि ग्रहमूर्तीर्यथा कार्याः सुवर्णजाः ।
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥४९॥
सप्ताश्वः सप्तरज्जुश्च द्विभुजश्च किरीटवान् ।
कुण्डलाढ्यः सपरिधिः सूर्यः कार्यः प्रभान्वितः ॥५०॥
श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतवाहनः ।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥५१॥
रक्तमाल्याम्बरधरः शक्तिशूलगदादिमान् ।
चतुर्भुजः श्वेतरोमा वरदो मंगलो मतः ॥५२॥
पीतमाल्याम्बरधरः कर्णिकारसमप्रभः ।
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥५३॥
बृहस्पतिश्च शुक्रश्च पीतः श्वेतः क्रमात्तथा ।
चतुर्भुजौ दण्डिनौ च साक्षसूत्रकमण्डलू ॥५४॥
इन्द्रनीलप्रभः शूली वरदो गृध्रवाहनः ।
शरधनुष्यधारी च कर्तव्यो वै शनैश्चरः ॥५५॥
नीलसिंहासनस्थश्च राहुः कृष्णप्रभो मतः ।
धूम्रा द्विबाहवः सर्वे गदायुता रुषान्विताः ॥५६॥

ग्रहासनाः केतवः कर्तव्याश्च वरदास्तथा ।
सर्वे किरीटिनः कार्या ऊर्ध्वेऽष्टयुक्शतांगुलाः ॥५७॥
शृणु लक्ष्मि पुरा वैश्यो धनधान्यसमृद्धिमान् ।
लोहांगारइतिनाम्नाऽभवद् देशे तु मालवे ॥५८॥
व्यापारेण महाश्रेष्ठी राज्यकोशाभिरक्षकः ।
देशप्रजाद्रव्यपाला द्रव्यदाताऽभवत्तथा ॥५९॥
यस्याऽभवन् गृहे वाजिगजाश्च वाटिकास्तथा ।
उद्यानानि विचित्राणि भवनानि शुभानि च ॥६०॥
स्वर्णसिंहासनान्येव कलशाः स्वर्णराजताः ।
नार्यः सौवर्णभूषाढ्या रत्नहारावलीयुताः ॥६१॥
विमानेनाऽर्कतुल्येन विहरन्ति परेऽम्बरे ।
दासा दास्यः शतं यस्य भृत्या लक्षं तु नित्यशः ॥६२॥
कर्मचारा भवन्त्यस्य द्रव्योपार्जनतत्पराः ।
प्रजाराजाऽमात्यवर्गेष्वस्य मानं मतं बहु ॥६३॥
सर्वमासाच्छुभं किन्तु ग्रहा दुष्टा यदाऽस्य तु ।
दुष्टस्थाने शनिश्चान्येऽभवँस्तैः पीडितो ह्ययम् ॥६४॥
रोगी जातो मृतप्रायो लक्ष्मीर्द्रव्याणि भूभृता ।
लुण्टितानि समग्राणि पुत्राः कारागृहे कृताः ॥६५॥
भवनानि चाग्निदग्धान्येव जानाति वै तदा ।
व्यापाराः सर्व एवैते नष्टप्रायास्तदाऽभवन् ॥६६॥
कलंकेन यशोहानिर्जाताऽस्यापि प्रजास्वपि ।
समन्ततो महाकष्टं समायातं भुनक्ति सः ॥६७॥
अथाऽस्याऽऽसीद् गुरुर्विप्रो महर्षिश्चाऽमृषायनः ।
योगी त्रिकालदर्शी च वेदविद् ग्रहपूजकः ॥६८॥
नारायणस्य भक्तोऽपि व्रतशीलोपशोभितः ।
साधुः सात्त्विकभावाढ्यः सत्यव्रतोऽतिविद्यकः ॥६९॥
लोहांऽगारं निज्यशिष्यं श्रुत्वा कष्टप्रमग्नकम् ।
द्रष्टुं गृहे समायातः कृपया प्रेरितस्तदा ॥७०॥
वीक्ष्य शिष्यं कष्टमग्नं नष्टद्रव्यं विना यशः ।
पुत्रदण्डं तथा रोगं दयां परामवाप्तवान् ॥७१॥
प्राह लोहांगारकं तं कुरु शान्तिं ग्रहस्य वै ।
ग्रहशान्त्या ग्रहमखैः कष्टं दूरं गमिष्यति ॥७२॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
भजाऽनन्यमनस्कस्त्वं परं सौख्यमवाप्स्यसि ॥७३॥
इत्युक्तः सोऽपि सहसा भक्तिभावसमन्वितः ।
तथैवेति समगृह्य कारयामास मण्डपम् ॥७४॥
कृष्णाष्टम्यामूर्जमासे कुण्डं चकार शोभनम् ।
ग्रहमूर्तीः कानकीश्च मम मूर्तिं च कानकीम् ॥७५॥
त्वया लक्ष्म्या च सहितां चकाराऽतिप्रशोभनाम् ।
वस्त्राभूषणशृंगाराद्यभिशोभितविग्रहाम् ॥७६॥
अधिदेवान् प्रत्यधिदेवताश्च मण्डपे ततः ।
आसनेष्वावाहयामासाऽर्चयामास वैधतः ॥७७॥
अष्टोत्तरशतविप्रान् वव्रे जपार्थमेव सः ।
कोटिजपान् वेदविद्भिः कारयामास सर्वथा ॥७८॥
पूजान्ते प्रददौ दानं गुप्तं पृथ्व्याः प्रगर्ततः ।
निष्कास्य लक्षसौवर्णमुद्राणां लक्ष्यवर्जितम् ॥७९॥
अप्रकाशं यदासीत्तद् रत्नमाणिक्यहीरकान् ।
ददौ दाने तु विप्रेभ्यो गोगजाऽश्वादिकं तथा ॥८०॥
नैवेद्यानि यथोक्तानि ददौ पेयानि यानि च ।
देवेभ्यो बलिदानानि सात्त्विकानि ददौ तथा ॥८१॥
भोजयामास विप्रांश्च साधून् साध्वीश्च योषितः ।
बालाँश्च बालिकाश्चापि दीनकृपणदुःखिनः ॥८२॥
निराश्रितान् निर्धनाँश्च कंगालाँश्च दरिद्रकान् ।
पुण्यान् पुण्यजनाँश्चापि भोजयामास भावतः ॥८३॥
सर्वं चकार विधिना पूजनं मम तेऽपि च ।
ग्रहशान्त्या यज्ञपुण्यैर्मम ते च प्रसादतः ॥८४॥
लोहांगारस्य देहाद्वै रोगोऽनश्यद् द्रुतं तदा ।
स्वस्थोऽभवत्ततो राजा दयामग्नोऽभवच्च तम् ॥८५॥
समाहूय ददौ मानं पूर्वतोऽभ्यधिकं बहु ।
महामात्यपदं तस्मै प्रायच्छद् देवलाधिपः ॥८६॥
प्रजाश्चापि नमश्चक्रुर्मानयामासुरादरात् ।
पुत्रान् राजा स्वयं कारागारादमोचयत्तदा ॥८७॥
अथ चौराश्च भग्नाशास्त्रस्ता राज्यभयं गताः ।
चोरितं सर्वमेवाऽपि चिक्षिपुर्निशि चत्वरे ॥८८॥
प्रकाशे प्रजया प्रातर्दृष्टं चास्मै निवेदितम् ।
प्राप्तं सर्वं धनं चापि ग्रहशान्त्या तदा रमे ॥८९॥
एवं सा प्राप्य सर्वं तत् कल्पयामास दानकम् ।
स्वर्णं रत्नानि माणिक्यं हीरकान् रूप्यकाणि च ॥९०॥
वैष्णवं च महायज्ञं समारेभे द्विजातिभिः ।
सर्वं प्रत्यागतं द्रव्यं ददौ स दक्षिणाः शुभाः ॥९१॥
अहं प्रसन्नो ह्यभवं तस्य तस्य गुरोस्तथा ।
ददौ स्वदर्शनं लक्ष्मि त्वया साकं ह्यवभृथे ॥९२॥
वराऽर्थं देशितः सोऽपि वरं वव्रे हि भृत्यताम् ।
मयोक्तं कुरु रम्यं मे मन्दिरं मां च मन्दिरे ॥९३॥
प्रतिष्ठाप्य सदा सेवां भृत्यतां कुरु सर्वथा ।
कृत्वा तूर्णं स एवं वै दास्यं चक्रे कुटुम्बवान् ॥९४॥

आत्मनिवेदितां चक्रे भेजे मां पुरुषोत्तमम् ।
वैष्णवः परमो भूत्वा राजानं देवलाभिधम् ॥९५॥
वैष्णवं प्रचकाराऽपि प्रजाश्च वैष्णवीस्तथा ।
चकार निजयोगेन भक्तिमतीः शुभक्रियाः ॥९६॥
लक्षवर्षं क्षितौ स्थित्वा स्वर्गे भुक्त्वा युगाष्टकम् ।
सत्यलोकं कोटिवर्षं वैराजं तु परार्धकम् ॥९७॥
भुक्त्वा वैकुण्ठमेवापि ययौ मे त्वक्षरं पदम् ।
पूर्वकल्पे महालक्ष्मि कथेयं सम्प्रवर्तिता ॥९८॥
अद्य मे वर्तते धाम्नि पार्षदः सकुटुम्बकः ।
एवं ग्रहाध्वरं कृत्वा स्वर्गे मोक्षमवाप्नुयात् ॥९९॥
दुःखनाशं सुखं मोदं प्रमोदं लभतेऽन्वहम् ।
अनिष्टानां विनाशं च स्वेष्टानां लभते स्थितिम् ॥१००॥
नित्यं राजन् पूजयेद् यस्तस्य शान्तिर्हि शाश्वती ।
ग्रहपीडा न जायेत यक्षरक्षोभवाऽपि न ॥१०१॥
चौरकालकृता नापि नापि देवकृतापि च ।
ग्रहे शक्तिप्रदाताऽहं रक्षामि वैष्णवं मम ॥१०२॥
श्रवणात्पठनादस्य स्मरणाच्चानुमोदनात् ।
ग्रहशान्तिसमां शान्तिं लभते नाऽत्र संशयः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ग्रहमखे लक्षजपहोमकोटिजपहोमादिविधिः, लोहांगारकवैश्यस्य सर्वस्वनाशोत्तरं ग्रहशान्त्या पुनर्लब्धिरित्यादिनिरूपणनामा चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं पुरा दक्षेण वन्दिता ।
प्राकट्यानि ललितायाः लक्ष्म्योश्चोक्तवती स्वयम् ॥ १ ॥
दक्षः पप्रच्छ मातस्ते प्राकट्यान्यत्र भूतले ।
कानि कुत्र च वर्तन्ते वर्त्स्यन्ते तानि मे वद ॥ २ ॥
यत्पूजाबलतश्चाऽहं विघ्नान् विनाशये सदा ।
ग्रहदोषान् कर्मदोषान् विनाशये तवाऽर्हणात् ॥ ३ ॥
तदा त्वं निजपूजायाः फलं चोक्तवती शुभम् ।
ललिताख्यमहालक्ष्म्याः पूजकस्याऽशुभानि वै ॥ ४ ॥
विनंक्ष्यन्ति न सन्देहो मम पूजाप्रकारिणः ।
यानि यानि स्वरूपाणि यत्र यत्र भवन्ति च ॥ ५ ॥
तानि वक्ष्यामि ते दक्षप्रजापते निशामय ।
अहं त्वक्षरधामस्था श्रीदेवी पुरुषोत्तमी ॥ ६ ॥
अनादिश्रीकृष्णनारायणी श्रीपरमेश्वरी ।
ब्रह्ममुक्तानिका ब्राह्मी कार्ष्णी नारायणी रमा ॥ ७ ॥
वासुदेवी च वैराजी हिरण्या हरिणी प्रभा ।
महालक्ष्मीः कंभराश्रीर्ललिता कमला चला ॥ ८ ॥
ईश्वरी वैष्णवी चान्द्री हिरण्मयी च देवता ।
आर्षी सिद्धा योगिनी च साध्वी सती पतिव्रता ॥ ९ ॥
प्रभ्वी धामा जया भौमी महेशी भूर्नारायणी ।
पाशवती च माणिक्या मारूपा श्रीहरिप्रिया ॥१०॥
दुःखहा शिवराशीश्री कृष्णनारायणी सती ।
ब्रह्मप्रिया ब्रह्मधाम्नि महालक्ष्मीश्च श्रीपुरे ॥११॥
लक्ष्मीः कुंकुमवाप्यां च महालक्ष्मीस्तु रैवते ।
व्याघ्रेश्वरी माहिषे च गोकर्णे धेनुकर्णिका ॥१२॥
सन्तुष्टा चाक्षरे क्षेत्रे चमत्कारे तु माधवी ।
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी ॥१३॥
प्रयागे ललिता चास्मि कामाक्षी गन्धमादने ।
मानसे कुमुदा देवी विश्वकाया चिदम्बरे ॥१४॥
गोमन्ते गोमतीनाम्नी मन्दराद्रौ तु कामगा ।
मदोत्कटा चैत्ररथे जयन्ती वारहाह्वये ॥१५॥
गौरीनाम्नी कान्यकुब्जे रंभा तु मलयाचले ।
एकाम्रके कीर्तिमती विश्वा विश्वेश्वरेऽस्मि च ॥१६॥
पुष्करे पुरुहूताऽस्मि केदारे मार्गदाऽस्मि च ।
हिमाचले च नन्दाऽस्मि बिल्वके बिल्वपत्रिका ॥१७॥
स्थानेश्वरे भवान्यस्मि श्रीशैले पद्मिनी सदा ।
भद्रा भद्रेश्वरे चास्मि जया वाराहपर्वते ॥१८॥
कामला कमलाभूमौ रौद्री च रुद्रकोटिके ।
काली कालंजरे चाऽस्मि मर्कोटे मुकुटेश्वरी ॥१९॥
महालिंगे कपिलाऽस्मि शिवलिंगे जलप्रिया ।
शालग्रामे महादेवी मायापुर्यां कुमारिका ॥२०॥
सन्ताने काञ्चिकापुर्यां ललिता दुर्गपत्तने ।
उत्पलाक्षी सहस्राक्षे कलमाक्षे महोत्पला ॥२१॥
गंगायां मंगला दुर्गा विमला पुरुषोत्तमे ।
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्धने ॥२२॥
नारायणी सुपार्श्वेऽस्मि त्रिकूटे भद्रसुन्दरी ।
विपुले विपुलानाम्नी कल्याणी मलयाचले ॥२३॥
कोटितीर्थे कोटवी च सुगन्धा माधवे वने ।
कुब्जाम्रके त्रिसन्ध्याऽस्मि गंगाद्वारे रतिप्रिया ॥२४॥
शिवकुण्डे सुनन्दाऽस्मि नन्दिनी देविकातटे ।
रुक्मवर्णा द्वारवत्यां राधा वृन्दावनेऽस्मि च ॥२५॥

मधुरायां देवकन्या पाताले परमेश्वरी ।
चित्रकूटे तु सीताऽस्मि विन्ध्ये विन्ध्याचली तथा ॥२६॥
सह्याद्रावेकवीराऽस्मि हर्मचन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थेऽस्मि यमुनायां मृगावती ॥२७॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
अरोमा वैजनाथेऽस्मि महाकाले महेश्वरी ॥२८॥
अभयाऽस्मि चोष्णतीर्थे अमृता विन्ध्यकन्दरे ।
माण्डव्ये माण्डवीनाम्नी स्वाहा माहेश्वरे पुरे ॥२९॥
छागलेऽस्मि प्रचण्डाऽहं चण्डिका मकरन्दके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥३०॥
सरस्वत्यां देवमाता पारा पारातटेऽस्मि च ।
महालये महाभागा पयोष्ण्यां पिंगलेश्वरी ॥३१॥
सिंहारण्ये सिंहिकाऽस्मि कार्तिकेये यशस्करी ।
उत्पलावर्तके लोला सुभद्रा शोणसंगमे ॥३२॥
माता लक्ष्मीः सिद्धपुरे अञ्जना पुलहाश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्वते ॥३३॥
देवदारुवने पुष्टिर्मेधा काश्मिरमण्डले ।
हिमाद्रौ भीमिकादेवी पुष्टिर्विश्वेश्वरेऽस्मि च ॥३४॥
कपालमोचने शुद्धिर्माता कायावरोहणे ।
शंखोद्धारे धरादेवी धृतिः पिण्डारकेऽस्मि च ॥३५॥
माणिक्याऽऽनर्तके नारायणीश्रीरस्मि नागरे ।
कालाऽस्मि चन्द्रभागायामच्छोदे शिवकारिणी ॥३६॥
वेणायाममृतानाम्नी बदर्यामुर्वशी तथा ।
ओषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ॥३७॥
मन्मथा हेमकूटे तु मुकुटे सत्यवादिनी ।
अश्वत्थे वन्दनीयास्मि निधिश्च श्रवणालये ॥३८॥
गायत्री ब्रह्मणा साकं पार्वती शिवसन्निधौ ।
देवलोके तथेन्द्राणी ब्रह्मास्येऽस्मि सरस्वती ॥३९॥
सूर्यबिम्बे प्रभा धैर्ये पाशवती तु वैष्णवी ।
अनादिश्रीकृष्णनारायणेऽस्मि सुखदा रमा ॥४०॥
अरुन्धती सती चास्मि तिलोत्तमाऽप्सरोगणे ।
चित्ते ब्रह्मकला चास्मि कान्ता कान्तेषु सर्वशः ॥४१॥
भंगा नीलगिरावस्मि विजयाऽऽसामभूतले ।
कामरूपे च कामाक्ष्या ब्रह्मदेश इराऽस्मि च ॥४२॥
खासीनेषु ब्रह्मपुत्री पतत्काये तु पावनी ।
श्यामा श्यामप्रदेशेऽस्मि प्राचीने मेनकांगिनी ॥४३॥
उच्चीने यागशिक्षांगी व्यंगुलेषु तु कारमी ।
काराकारे कृष्णवर्णा एलुने खनिरस्मि च ॥४४॥
मूकी मंगोलके चास्मि खिंगने मञ्चिछकाऽस्मि च ।
स्तेनावासे पारशवी राशिपुत्री तु राशने ॥४५॥
उरला चोरलाद्रौ च रक्ता चारक्तभूतले ।
नारायणी सुदानेऽस्मि चाल्पा चाल्पे च पर्वते ॥४६॥
इङ्गितज्ञा केतुमाले परी चास्मि बलायते ।
हारिती पिंगदेशे च अमरी किंपुमात्मके ॥४७॥
राकरी मानकंगौ च परीनारी तु दक्षके ।
संहारा नजरेऽद्रौ च कामरूपा कमारणे ॥४८॥
मासाम्बा साम्बशैलेऽस्मि कलिहारा तु मित्रपे ।
त्रिहोत्रे होत्रिणी चास्मि झम्बे मांझाम्बिकास्मि च ॥४९॥
नवदेशे मणिकान्ता उष्ट्रालये महोर्ध्विका ।
कलगरली श्वानायां चालिशी क्राथपर्वते ॥५०॥
एवमादिस्वरूपैश्च भूतले संवसाम्यहम् ।
दक्ष ! सर्वत्र मत्पूजां कुरु भुक्तिप्रमुक्तिदाम् ॥५१॥
इत्याह श्रीमहालक्ष्मीस्तदा दक्षं प्रजापतिम् ।
अतस्ते तु महालक्ष्म्याः पूजनं सर्वशान्तिकृत् ॥५२॥
पूजायां सर्वनामानि द्वे शते तव यो जपेत् ।
सर्वाश्च सिद्धयस्तस्योपतिष्ठन्तु यथेष्टदाः ॥५३॥
ग्रहाणां चापि यक्षाणां रक्षसां वैरिणां तथा ।
कष्टानि यान्तु नाशं वै तव शान्तिमखादिभिः ॥५४॥
मण्डपं सर्वतोभद्रं कमलाकारमुत्तमम् ।
वर्तुलं कारयित्वा यः कुण्डं कमलवत्तथा ॥५५॥
शतद्वयेन संस्मृत्य नाम्नां त्वां परमेश्वरीम् ।
तण्डुलेषु समावाह्य पूजयेत् कमलादिभिः ॥५६॥
तस्य पीडाः समस्ता वै नाशमेष्यन्ति मद्वरात् ।
होमान् कृत्वाऽष्टसंख्यान् वै प्रत्येकनामसंयुतान् ॥५७॥
घृतपायससमिद्धान्नैस्ततो दद्यान्महाहुतिम् ।
घृतधाराभिरेवाऽपि फलैर्व्रीह्यादिभिस्तथा ॥५८॥
नारिकेलफलाद्यैश्च समिद्भिः शर्करादिभिः ।
यस्तस्य मानसेष्टं यत् तत्सर्वं वै भविष्यति ॥५९॥
राज्यं स्वर्गश्च मोक्षश्च सर्वं तस्य भविष्यति ।
स्त्रीपुत्रपतिलाभादिर्धनकीर्ती भविष्यतः ॥६०॥
सुविधानं तत्र वच्मि लक्ष्मीयज्ञे यथायथम् ।
शतं च विंशतिश्चापि हस्तानां परिमण्डलम् ॥६१॥
मण्डपार्थं तु गृह्णीयाद् दशस्तंभमयं शुभम् ।
मण्डपं रचयेत्तत्र चतुर्द्वारैः सुशोभितम् ॥६२॥
तोरणैः सुवितानेन वर्तुलशिखरेण च ।
सौवर्णकलशैश्चापि ध्वजेन शोभितेन च ॥६३॥

रक्तवस्त्रध्वजेनापि शोभितं कारयेच्छुभम् ।
परितस्तव शस्त्राणि तोरणेषु लिखेत्तथा ॥६४॥
अष्टादश विभिन्नानि पूर्वतो दक्षिणक्रमात् ।
खड्गं चर्म करवालं दण्डं पाशं पविं धनुः ॥६५॥
परशुं च शरं चक्रं गदां शंखं महांकुशम् ।
कमलं मालिकां शक्तिं क्षेपणीं चाभयं तथा ॥६६॥
एवमेतान्यायुधानि तोरणेषु निधापयेत् ।
प्रतिस्तम्भं कलशाँश्च ध्वजानपि विधापयेत् ॥६७॥
द्वारशाखास्वष्टदेवीः स्थापयेच्चाऽङ्गदेवताः ।
पूर्वशाखाद्वये श्रीं च माणिक्यां स्थापयेत्तथा ॥६८॥
दक्षिणे च रमां पाशवर्तीं संस्थापयेत्तथा ।
पश्चिमे मंगलां चैवाऽमृतां संस्थापयेत्तथा ॥६९॥
उत्तरे तु विजयां च जयां संस्थापयेत्तथा ।
मध्यस्तम्भेषु चैशाने दुर्गां सतीं च विन्यसेत् ॥७०॥
अग्निस्तम्भद्वये स्वाहां स्वधां चावासयेत्तथा ।
नैर्ऋते संहारिणीं च वशिनीं स्थापयेत्तथा ॥७१॥
वायव्ये शारदां वाणीं स्थापयेच्छोभनां शुभाम् ।
सावित्रीं चापि गायत्रीं सरस्वतीं तथा यमीम् ॥७२॥
वैष्णवीं च वराहीं चण्डिकामैन्द्रीं च वारुणीम् ।
भुवं संज्ञां कौमुदीं च नन्दां नारायणीं रमाम् ॥७३॥
सन्तुष्टां षोडशशक्तिः स्थापयेत्तु वितानके ।
स्तम्भान्तरचतुरस्थानेष्वतिश्रृंगारशोभिताः ॥७४॥
द्विहस्ताः सर्वभूषाढ्याः पूजयेत्तीर्थवारिभिः ।
कुंकुमाऽक्षततैलाद्यैः सुगन्धिचन्दनादिभिः ॥७५॥
कुण्डं तु वर्तुलं हस्तदशकं वै यथा भवेत् ।
तथा षोडशदलवत् पद्मरूपं विधापयेत् ॥७६॥
सयोनिं कारयेत्तत्र मेखलात्रिकमित्यपि ।
लक्षहोमान् कोटिहोमान् कारयेदिष्टसिद्धिदान् ॥७७॥
द्वे शते तव रूपाणि चावाहयेद् प्रपूजयेत् ।
महालक्ष्मीं तव मूर्तिं प्रोन्नतां तु शुभाननाम् ॥७८॥
षट्पञ्चाशदङ्गुलां समुकुटां हारराजिताम् ।
स्वर्णसिंहासनस्थां वै कानकीं वाऽन्यधातुजाम् ॥७९॥
कारयेत् तत्सखीनां तु यथायोग्यां प्रकारयेत् ।
पञ्चामृतैस्तीर्थजलैः संस्नाप्य परमेश्वरीम् ॥८०॥
गन्धसुगन्धश्रृंगारैर्विभूषाभिश्चिदम्बरैः ।
कुसुमाभरणैर्देहावयवानां सुशोभनैः ॥८१॥
चन्दनाऽक्षततुलसीकस्तूरीगन्धसारकैः ।
पूजयित्वा विविधानि नैवेद्यानि समर्पयेत् ॥८२॥

मिष्टान्नानि समस्तानि पायसान्नानि यानि च ।
मिष्टरसान् शाकभाजा नैवेद्ये वै समर्पयेत् ॥८३॥
जलं ताम्बूलकं दद्यादारार्त्रिकं ततश्चरेत् ।
प्रदक्षिणं ततः कृत्वा प्रार्थयेत् प्रणमेत्तथा ॥८४॥
जन्महन्त्रि भवहन्त्रि रोगहन्त्रि परेश्वरि ।
वासुदेवि कृष्णदेवि महालक्ष्मि नमोऽस्तु ते ॥८५॥
पारब्राह्मि सर्वभूतहृदयस्थे परात्परे ।
सर्वदेवीस्वरूपे ते रक्षयित्रि नमो मुहुः ॥८६॥
तव भक्तस्य मे कष्टं दैवं वा मानुषं तथा ।
कर्मजं कालजं वापि प्रारब्धजं ग्रहोत्थितम् ॥८७॥
स्वभावजं मानसं वा यदस्ति जायतेऽथवा ।
जनिष्यते च यत्कष्टं शापाद् द्रोहात्प्रमादतः ॥८८॥
अज्ञानाच्चापि वै यच्च दुष्प्रारब्धं च मे भवेत् ।
अवंशत्वं चाऽपुत्रत्वं निःस्त्रीकत्वं विमानता ॥८९॥
सर्वं रोगमयं चापि मम नाशं प्रयातु तत् ।
सौख्यं तवैव कृपया मोदो भवतु चानिशम् ॥९०॥
शाश्वतं श्रीपुरं स्वर्गं चामृतं पदमस्तु मे ।
अन्तेऽक्षरं परं धाम ममाऽस्तु परमं पदम् ॥९१॥
इत्यभ्यर्थ्य कुसुमानामंजलिं वितरेत्ततः ।
अपराधान् क्षन्तुमेवाऽऽराधयित्वा महासतीम् ॥९२॥
विसर्जयेत् तथा दासीश्चोपदेवीविसर्जयेत् ।
दद्याच्च देवतां लक्ष्मीं गुरवे ब्रह्ममूर्तये ॥९३॥
मन्दिरे स्थापयेद्वापि महालक्ष्मीं स्थिरे दृढे ।
अनादिश्रीकृष्णनारायणेन सहितां च वा ॥९४॥
श्रीमद्गोपालकृष्णेन महाविष्ण्वात्मना युताम् ।
स्थापयेत् स्वर्णशिखरैः शोभिते देवतालये ॥९५॥
सुवर्णमुद्रादानानि रूप्यकाँश्चार्पयेत्तथा ।
माणिक्यहीरकरत्नभूषावस्त्राणि चार्पयेत् ॥९६॥
मिष्टान्नानि दिशेश्चापि नारीवस्त्राणि चार्पयेत् ।
रम्यश्रृंगारभूषाश्चोपकरणानि चार्पयेत् ॥९७॥
धनधान्यानि सर्वाणि गृहदानानि कारयेत् ।
एवं कृत्वा परिहारं ततो भोजनमाचरेत् ॥९८॥
भोजयेत् साधुविप्राँश्च दीनान्धकृपणाँस्तथा ।
बालान् प्रबालिकाश्चापि योषितोऽनाथनिर्धनीः ॥९९॥
सतः सतीश्च साध्वीश्च भोजयेत्पूजयेत्तथा ।
नित्यं लक्ष्मीं पूजयेच्च भोजयेत् विधिना तथा ॥१००॥
एवं कर्तुर्न वै दुःखं सन्तापो वा भवेत् क्वचित् ।
भुक्तिः सम्पन्महामुक्तिः साम्राज्यं च भवेत् सदा ॥१०१॥

अखण्डानन्दभोक्तृत्वं देवीवृन्दाधिकान्तता ।
भवेत् कृष्णसमानत्वं श्रीपते कृपया श्रियाः ॥१०२॥
इत्येवं कथितं लक्ष्मि तवाऽर्हणं प्रशान्तिदम् ।
पठनाच्छ्रवणाच्चास्य महासौख्यं भवेत् सदा ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दक्षप्रजापतये महालक्ष्म्युक्तानि स्वीयानि शतद्वयनामरूपाणि लक्ष्मीमखे शान्तिपूजा महालक्ष्मीप्रतिमातन्मण्डलादि चेतिनिरूपणनामा पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं लक्ष्मीनाम्नां शतद्वयम् ।
पुरा जप्त्वा समाराध्य तपः कृत्वा तवोपरि ॥ १ ॥
अच्छोदा नाम पितॄणां कन्यका मानसी शुभा ।
अमावसुं हि बलिनं पतिं प्राप्तवती ततः ॥ २ ॥
पितॄणां च महालक्ष्म्या आशीर्वादमवाप सा ।
मत्स्ययोनिसमुत्पन्ना वसोः राज्ञः सुवीर्यजा ॥ ३ ॥
कन्यका धीवरपोष्या सत्यवती भविष्यसि ।
पराशरस्य वीर्येण पुत्रमेकमवाप्स्यसि ॥ ४ ॥
द्वीपे तु बदरीप्राये बादरायणमच्युतम् ।
विष्णोर्माता स्वयं भूत्वा ततः परं विवाहिता ॥ ५ ॥
समुद्रांशेन भूपेन शन्तनुना सुपुत्रिणी ।
भविष्यसि सुतौ चित्रांगदविचित्रवीर्यकौ ॥ ६ ॥
उत्पाद्य च ततः पितृलोकं प्रयास्यसि द्रुतम् ।
प्रौष्ठपद्यष्टकारूपा पितृलोके भविष्यसि ॥ ७ ॥
नाम्ना सत्यवती लोके पितृलोके तथाऽष्टका ।
आयुरारोग्यदा नित्यं सर्वकामफलप्रदा ॥ ८ ॥
भविष्यसि ततश्चापि नदीत्वं संव्रजिष्यसि ।
अच्छोदानामतश्चापि पित्रुद्धारकरी सदा ॥ ९ ॥
इत्येवं सा पितृकन्या लक्ष्मीशान्तिव्रतेन वै ।
ख्यातिमती व्यासमाता वरदानमवाप ह ॥१०॥
गीयते द्वे शते नाम्नां येनाऽष्टम्यां च पूजने ।
गोदाने श्राद्धदाने वा बहुपुत्रो भवेद्धि सः ॥११॥
द्वे शते ते तथा लक्ष्मि तीर्थान्यपि भवन्ति च ।
सृष्टित्रयेऽपि तत्रापि स्नाता ब्रह्माऽधिगच्छति ॥१२॥
पितरस्तस्य सन्तृप्तास्तरन्ति ब्रह्म यान्त्यपि ।
अथ चान्ये बर्हिषदः पुलस्त्यस्य सुता दिवि ॥१३॥
पितरः शतशः सन्ति तासां कन्या तु मानसी ।
पीवरी नामतः साध्वी चक्रे लक्ष्मि व्रतं तव ॥१४॥
लक्ष्मीशान्तिकरं कृत्वा व्रतं तपश्च दारुणम् ।
त्वां लब्ध्वा गोचरां दिव्यां हरिकृष्णयुतां वने ॥१५॥
वरं चावाप तत्रैव त्वत्तः पतिमती भव ।
पतिस्ते शुक्रदेवो वै महायोगी भविष्यति ॥१६॥
व्याससुतस्तस्य भार्या भवती मानसीं सुताम् ।
कृत्वीनाम्नीं लप्स्यसे च योगिनीं दिव्यशोभनाम् ॥१७॥
दास्यसि त्वं सुतां राज्ञे पाञ्चालेशाय वै ततः ।
पुत्रास्तेऽपि च चत्वारः कृत्व्यनुजा महेश्वराः ॥१८॥
कृष्णो गौरः प्रभुः शंभुर्भविष्यन्ति प्रमुक्तिदाः ।
पतिपुत्रादिसहिता चिरेण मोक्षमेष्यसि ॥१९॥
इत्येवं पीवरी प्राप्ता वरदानं तव व्रतात् ।
अथ चाऽन्ये पितरोऽपि मरीचिगर्भनामिनः ॥२०॥
एतेषां मानसी कन्या यशोदा नामतः शुभा ।
कृत्वा व्रतं तव लक्ष्मि पत्नी ह्यंशुमतोऽभवत् ॥२१॥
जनन्यपि दिलीपस्य भगीरथपितामही ।
अजायत ततः स्वर्गे मोक्षं गताऽपि सुन्दरी ॥२२॥
अथाऽऽज्यपानां कन्यापि नाम्ना तु विरजा पुरा ।
लक्ष्मीशान्तिव्रतं कृत्वा नहुषस्य प्रियाऽभवत् ॥२३॥
ययातेर्जननी सा च ऐकाष्टकाऽभवत्ततः ।
ब्रह्मलोकगता तत्र मोदते शाश्वतीः समाः ॥२४॥
अथ मानसपितॄणां कन्या तु नर्मदा सती ।
लक्ष्मीशान्तिव्रतं कृत्वा नदीरूपा प्रमोदते ॥२५॥
प्रमोदते सदा स्वर्गे पितृलोकेऽपि मोदते ।
पूज्यते त्रिषु लोकेषु हरेर्नर्मप्रदा सखी ॥२६॥
अथ गौः पितृकन्यापि लक्ष्मीशान्तिव्रतेन वै ।
शुक्रस्य दयिता पत्नी साध्यमाता विराजते ॥२७॥
एवं स्वर्गे तथा सत्ये भूतलेऽपि स्थले-स्थले ।
लक्ष्मीशान्तिव्रतेनैव मोदन्ते सम्पदर्द्धिभिः ॥२८॥
अथ लक्ष्मि शुकपुत्री नाम्ना कृत्वी तु योगिनी ।
पितृमानसकन्यायाः पीवर्याः पुत्रिका पुरा ॥२९॥
लक्ष्मीशान्तिव्रतं चक्रे नारायणसमन्वितम् ।
पुत्रार्थं तत्पतिश्चापि पञ्चालाधिपतिर्नृपः ॥३०॥
अनघो नाम वैभ्राजो हरिं नारायणं रमाम् ।
लक्ष्मीशान्तिव्रतेनैव तोषयामास वै ततः ॥३१॥
लक्ष्मीजनार्दनौ तुष्टौ प्राहतुस्तौ वराय च ।
वव्राते तौ वरं पुत्रं नारायणसमं तदा ॥३२॥

पारगं सर्वशास्त्राणां धार्मिकं योगिनं वरम् ।
सर्वभूतरुतज्ञं च महाबलपराक्रमम् ॥३३॥
एवमस्त्विति चार्पय्य वरदानं तिरोगतौ ।
सोऽयं नारायणः साक्षात्तस्य पुत्रोऽभवत्तदा ॥३४॥
ब्रह्मदत्ताभिधानो वै दयालुः सत्त्वसद्बलः ।
तस्य भार्याऽभवल्लक्ष्मीर्नाम्ना सन्नतिरित्यथ ॥३५॥
विश्वक्सेनोऽभवत्तस्याः पुत्रोऽपि भगवान् स्वयम् ।
एवं लक्ष्मीव्रतपुण्यं महाफलप्रदं सदा ॥३६॥
अथ कर्दमपत्नी या सिनीवाली पुराऽभवत् ।
लक्ष्मीशान्तिव्रतं कृत्वा देवहूती ततोऽभवत् ॥३७॥
कपिलं श्रीहरिं पुत्रं प्रासवती व्रतेन ते ।
धुतिस्तप्त्वा तपः कृत्वा लक्ष्मीशान्तिव्रतं पुरा ॥३८॥
विभावसुं पतिं लेभे पवमानादिकान् सुतान् ।
तुष्टिस्तेपे तपश्चापि लक्ष्मीशान्तिव्रतं व्यधात् ॥३९॥
पतिं प्राप हि धातारं सर्वलोकनमस्कृतम् ।
प्रभा कृत्वा व्रतं लेभे पतिं प्रभाकरं हरिम् ॥४०॥
कुहूः कृत्वा व्रतं लेभे हविष्यन्तं पतिं शुभम् ।
कीर्तिर्जयन्तं भर्तारं वसुर्मारीचकश्यपम् ॥४१॥
धृतिः प्राप्ता पतिं नन्दिं पुरूरवसमुर्वशी ।
उर्वशी त्वेकदा लक्ष्मीस्वयंवरे ननर्त ह ॥४२॥
लक्ष्मीशान्तिव्रतं चक्रे सुतानष्टावजीजनत् ।
आयुं दृढायुमश्वायुं धनायुं सधृतिं वसुम् ॥४३॥
शुचिविद्यं शतायुं च ततो दिवं ययौ हि सा ।
अथ लक्ष्मि वृषपर्वसुता शर्मिष्ठिका शुभा ॥४४॥
लक्ष्मीशान्तिव्रतं कृत्वा ययातिं प्राप सत्पतिम् ।
शुक्रपुत्री देवयानी चक्रे लक्ष्मीव्रतं ततः ॥४५॥
गुरुपुत्रं कचं दैत्यवृकैस्तमजीवयत् ।
पुनर्दैत्यैर्मदिरायां चूर्णितं पायितं कचम् ॥४६॥
शुक्राय स च शुक्रोऽपि सञ्जीवनीं कचाय वै ।
ददावुदरस्थायाऽपि देवयान्याः शुभाग्रहात् ॥४७॥
लक्ष्मीशान्तिव्रतं कृत्वा कचः पितृगृहं ययौ ।
सञ्जीवनीं स्वशिष्येभ्योऽध्यापयामास तद्बलात् ॥४८॥
अथ वै ज्यामघभार्या चैत्रा लक्ष्मीव्रतेन वै ।
पुत्रं विदर्भसंज्ञं चाऽवाप सद्गुणशालिनम् ॥४९॥
स्नुषा पतिं ह्यवापाऽथ लक्ष्मीव्रतेन तं तथा ।
या जिता रणसंग्रामे ज्यामघेन स्नुषा कृता ॥५०॥
लक्ष्मीशान्तिव्रतं चक्रे दृशद्वती ह्युशीनरात् ।
शिबिमौशीनरं पुत्रं लेभे वै चक्रवर्तिनम् ॥५१॥

बलेः पत्नी सुदेष्णा च कृत्वा लक्ष्मीव्रतं पुरा ।
अंगं वंगं कलिंगं च पुण्ड्रं सुह्मं सुतान् शुभान् ॥५२॥
दीर्घतमसः संलेभे ब्राह्मणान् राज्यभोगिनः ।
शकुन्तला व्रतं कृत्वा लेभे तु भरतं सुतम् ॥५३॥
ममता तु व्रतं कृत्वा भरद्वाजं सुतं शुभम् ।
अवाप तु बृहस्पतेर्भरताय ददौ च तम् ॥५४॥
हिरण्यनाभिनः शिष्यः कौशल्यस्य महात्मनः ।
कृतायनो व्रतं कृत्वा लक्ष्मीप्रसादतस्ततः ॥५५॥
चतुर्विंशतिधाश्चक्रे दिव्या वै सामसंहिताः ।
अहल्या तु दिवोदासभगिनी वै शरद्वतात् ॥५६॥
शतानन्दमृषिं पुत्रं लेभे लक्ष्मीव्रतात् किल ।
कावेरी कृष्णवेणी च नर्मदा यमुना तथा ॥५७॥
गोदावरी वितस्ता च चन्द्रभागा इरावती ।
विपाशा कौशिकी चापि शतद्रूः सरयूस्तथा ॥५८॥
सीता मनस्विनी चापि ह्रदिनी पावना नदी ।
लक्ष्मीशान्तिव्रतं कृत्वा धिष्ण्यान् पुत्रान् हि लेभिरे ॥५९॥
एवमन्या योषितोऽपि कृत्वा लक्ष्मीव्रतं त्विदम् ।
लेभिरे सम्पदः पुत्रीपुत्रान् स्वर्गं च मोक्षणम् ॥६०॥
शृणु लक्ष्मि व्रतं श्रेष्ठं सौभाग्यशयनं त्वपि ।
पुरा कृतं त्वया त्वेतत् सर्वकामफलप्रदम् ॥६१॥
पुरा दग्धेषु लोकेषु भूर्भुवःस्वर्महःसु च ।
सौभाग्यं सर्वभूतानां पिण्डीभूतं तदाऽभवत् ॥६२॥
वैकुण्ठं तत् समासाद्य विष्णोर्वक्षःस्थले स्थितम् ।
पुनः सृष्टौ प्रजायां तत् सौभाग्यं गन्तुमिच्छुकम् ॥६३॥
हरेर्वक्षःस्थलाल्लक्ष्मीरूपं प्रादुरजायत ।
सर्वसौख्यप्रदं तच्चाऽभवद्धरेरनुज्ञया ॥६४॥
लक्ष्मीरूपं विहायैव रसरूपं सुधात्मकम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ये सृष्टेर्वै धुरन्धराः ॥६५॥
ते सौभाग्यं पपुस्तत्र रसं देवीसमन्विताः ।
रूपलावण्यसौभाग्यतेजोबलादिवर्धनम् ॥६६॥
शेषं सर्वप्रभूतार्थमष्टधा समजायत ।
रसात् सप्ताऽभवन् मोदाः सप्त सौभाग्यदायिनः ॥६७॥
इक्षवो गुडपिण्डावा निष्पावा जीरकानि च ।
गोक्षीरादि कुसुम्भं च सिन्दूरं कुंकुमं तथा ॥६८॥
लवणं चेति सौभाग्यं वर्धन्ते तानि तद्व्रतात् ।
नारायणेन सौभाग्यात्मकं स्वेनापि रक्षितम् ॥६९॥
लालनात् साऽभवत्तस्य ललिता नाम सुन्दरी ।
लोकान् सौभाग्यरूपान् सा लालयत्येव सर्वदा ॥७०॥

लोकानवाप्य लालित्याल्ललिताश्रीस्तदुच्यते ।
त्रैलोक्यसुन्दरीमेनामुपयेमे महाप्रभुः ॥७१॥
या लोके सौभाग्यमयी भुक्तिमुक्तिफलप्रदा ।
त्वमेव लक्ष्मि सञ्जाता महालक्ष्मीः सुभाग्यदा ॥७२॥
त्वामाराध्य नरो नारी भक्त्या किं किं न विन्दति ।
आराधनं व्रतं ते तद् वक्ष्याम्यत्र हितावहम् ॥७३॥
वसन्तमासमासाद्य तृतीयायां तु शुक्लके ।
पूर्वाह्णे यजमानस्तु तिलैः स्नानं समाचरेत् ॥७४॥
सौभाग्या ललिता देवी वव्रे नारायणं तदा ।
तया सहैव मां नारायणं सम्पूजयेत् प्रगे ॥७५॥
तृतीयायां फलैः पुष्पैर्धूपैर्दीपैर्निवेदनैः ।
पञ्चगव्येन च तीर्थतोयैः संस्नापयेच्छ्रियम् ॥७६॥
नमो लक्ष्म्यै महालक्ष्म्यै ललितायै तु मस्तके ।
नमो देव्यै महादेव्यै ललितायै मुखे नमः ॥७७॥
नमो ब्राह्म्यै महाब्राह्म्यै वैष्णव्यै हृदये नमः ।
नमो मात्रे महामात्रे नारायण्यै तथोदरे ॥७८॥
नमः श्रियै महाश्रियै वासुदेव्यै कटिस्थले ।
नमो भाग्यै महाभाग्यै सौभाग्यायै उरौ नमः ॥७९॥
नमो भूम्न्यै महाभूम्न्यै व्यापिकायै च पादयोः ।
नमोऽनादिकृष्णनारायणपत्न्यै समन्ततः ॥८०॥
सौभाग्यभवनायै ते नमः कान्ताविभूतये ।
नमो युगलरूपायै दम्पत्यै ते नमो नमः ॥८१॥
सर्वसौभाग्ययुक्तायै ललितायै नमोनमः ।
एवं संस्नाप्य विधिना वस्त्रालंकारमर्पयेत् ॥८२॥
भूषणानि समस्तानि शृंगाराणि समर्पयेत् ।
घृतं सिन्दूरकं क्षीरं कुंकुमं लवणं तथा ॥८३॥
जीरकं कज्जलं चापि चन्दनं रक्तचन्दनम् ।
हरिद्रां कर्पूरकं च कस्तूरीं कंकणानि च ॥८४॥
शृंखलां नथिकां तन्तीं नूपुरोर्मिकसंयुताम् ।
निष्पावान् पत्रिकां पूगीफलं ताम्बूलकं तथा ॥८५॥
शर्करां च लवंगं च एलां संस्थापयेत् पुरः ।
धूपं दीपं च नैवेद्यं दद्याज्जलं सुगन्धि च ॥८६॥
आरार्त्रिकं प्रकुर्याद्वै ललितायाः प्रदक्षिणम् ।
नमस्कारं पुनः कुर्यात् पुष्पाञ्जलिं समर्पयेत् ॥८७॥
प्रार्थयेल्ललितां कृष्णं दीयेतां भाग्यमुत्तमम् ।
दम्पतीरूपमेवापि ह्यखण्डितसुखावहम् ॥८८॥
रसधान्यादिभोज्यानि मिष्टान्नानि सदा गृहे ।
सूपौदनानि शाकानि दध्योदनानि यानि च ॥८९॥
क्षीरोद्भवानि सर्वाणि चेक्षुभवानि यानि च ।
वेशवारादिकं चापि मुखवासादिकानि च ॥९०॥
शय्यास्तरणयानानि वेषशृंगारकाणि च ।
भूषाम्बराणि सर्वाणि विविधाभूषणानि च ॥९१॥
यानवाहनरथका गोवाजिगजसद्वृषाः ।
दासदासीभृत्यसखीवर्गाः स्वर्णालयास्तथा ॥९२॥
भवनानि विचित्राणि क्षेत्राणि वाटिकास्तथा ।
महोद्यानानि सर्वाणि वंशः पुत्राः सुतास्तथा ॥९३॥
स्नुषाश्च बान्धवाश्चापि यशो कीर्तिश्च सम्पदः ।
ऋद्धिः शान्तिः रत्नगजा आरोग्यं धर्म उत्तमः ॥९४॥
भक्तिर्ज्ञानं च दीयन्तां कृष्णौ धामाक्षरं ततः ।
एवमभ्यर्च्य तौ तत्र स्थापयेन्मण्डपे त्वथ ॥९५॥
हवनं तु प्रकुर्याद्वै चाष्टोत्तरशतात्मकम् ।
दक्षिणां च ततो दद्याद् भोजयेद्विप्रसज्जनान् ॥९६॥
दीनाऽनाथान् भोजयेच्च दद्याद्दानानि वै ततः ।
परिहारं प्रकुर्वीत मध्याह्ने पुनरेव च ॥९७॥
भोजयेद् विविधं भोज्यं जलं ताम्बूलकं दिशेत् ।
स्वापयेद्घटिकामुत्थापयेत् कृष्णां नरायणम् ॥९८॥
जलं फलं प्रदद्याच्च सायं रात्रौ प्रपूजयेत् ।
आरार्त्रिकं सोत्सवं च कारयेद् भोजयेत्ततः ॥९९॥
स्वापयेद् भगवन्तौ तौ शयने मृदुले शुभे ।
सहैव शयनं चैतत् सौभाग्यशयनं व्रतम् ॥१००॥
प्रातरुत्थापयेद् देवौ पूजयेद् विधिना ततः ।
तथा च द्विजदाम्पत्यं पूजयेद् वस्त्रभूषणैः ॥१०१॥
सौभाग्याऽष्टकसंयुक्तं सुवर्णचरणद्वयम् ।
द्वयोश्चतुष्टयं दद्याद् विप्राय साधवे तदा ॥१०२॥
ललितां गुरवे दद्यात् कृष्णं दद्यात्तु साधवे ।
युगलं साधवे दद्यात् सौभाग्यचिरताप्तये ॥१०३॥
एवं सम्वत्सरं यावत् तृतीयायां समाचरेत् ।
वत्सरान्ते प्रकुर्याच्च सूद्यापनं महत्तमम् ॥१०४॥
चैत्रे शृंगाटकं दद्याद् वैशाखे घृतपायसम् ।
ज्येष्ठे मन्दारकुसुमं वृन्दापत्रं शुचौ तथा ॥१०५॥
श्रावणे दधि दद्याच्च नभस्ये तु कुशोदकम् ।
क्षीरमाश्वयुजे मासि कार्तिके नवनीतकम् ॥१०६॥
मार्गे मासे द्विदलं च पौषे घृतं सशर्करम् ।
माघे कृष्णातिलान् दद्यात् पञ्चगव्यं तु फाल्गुने ॥१०७॥
तुलसीकमलादीनि सर्वमासे मतानि वै ।
एवं कृत्वा व्रतं नारी कुमारी विधवाऽपि वा ॥१०८॥

व्रतान्ते शयनं दद्यात् सर्वोपस्करसंयुतम् ।
लक्ष्मीनारायणौ हैमौ शयने स्थापयेत्ततः ॥१०९॥
दानं दद्याद् ब्राह्मणाय साधवे वा सुपूजिने ।
धान्यालंकारगोदानं धनं दद्याद् द्विजातये ॥११०॥
एवं करोति यः सम्यक् सौभाग्यशयनव्रतम् ।
सर्वान् कामानवाप्नोति पदं चानन्तमश्नुते ॥१११॥
यस्तु द्वादशवर्षाणि सौभाग्यशयनव्रतम् ।
करोति स्त्री नरो वापि देव्यनुग्रहलालितौ ॥११२॥
पूज्यमानौ वसेतां स्वः यावत्कल्पाऽयुतत्रयम् ।
शृणुयाद्वा पठेद्वापि प्रदद्यादथ वा मतिम् ॥११३॥
सोऽपि देवेश्वरो भूत्वा स्वर्गे वसेन्न संशयः ।
भुक्तिं मुक्तिमवाप्नोति शाश्वतानन्दसम्पदः ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने लक्ष्मीशतद्वयनामजपेन पितृकन्यकादीनां स्वेष्टफलावाप्तिः, लक्ष्मीसौभाग्यशयनव्रतविधिश्चेतिनिरूपणनामा षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं घटलक्ष्मीव्रतं तव ।
घटलक्ष्मीव्रतिनस्तु क्रमात् सप्तदिवं भवेत् ॥ १ ॥
भूलोकोऽयं दिवं प्रोक्तः सम्पत्सुखप्रमोदनैः ।
भुवर्लोकोऽपि च दिवं सिद्धिमतां हि योगिनाम् ॥ २ ॥
स्वर्गादयो दिवं सन्ति सत्यान्ताः सर्व एव ते ।
देवलोका हि सप्तैते यतो दिव्यगतिप्रदाः ॥ ३ ॥
पर्यायेण तु सर्वेषामाधिपत्यं तव व्रतात् ।
घटलक्ष्मीव्रतादेव जायते नात्र संशयः ॥ ४ ॥
इह लोके शुभं रूपमायुः सौभाग्यमुत्तमम् ।
लक्ष्मीश्च विपुला सम्पज्जायते ते व्रतादिह ॥ ५ ॥
शृणु चात्र कथां दिव्यामगस्त्यस्य महात्मनः ।
पुरा वह्निः समाज्ञप्तो महेन्द्रेण सुरद्विषाम् ॥ ६ ॥
विनाशार्थं ततो वह्निर्ददाह कोटिदानवान् ।
निर्दग्धेभ्योऽवशिष्टा ये दानवास्तु सहस्रशः ॥ ७ ॥
पलायमानास्त्वरताश्च समुद्रं विविशुः खलाः ।
तारकः कमलाक्षश्च कालदंष्ट्रः परावसुः ॥ ८ ॥
विरोचनश्च ते चाऽब्धौ सन्निवेशमकुर्वत ।
अशक्तास्ते चेति मत्वा वह्निना समुपेक्षिताः ॥ ९ ॥
अथ कालान्तरे दैत्या बलमवाप्य वै पुनः ।
सम्पीडयन्ति ते देवान् मनुष्यान् सह जंगमान् ॥१०॥
विप्रान् साधून् प्रसम्पीड्य प्रविशन्ति पुनर्जलम् ।
एवं वर्षसहस्राणि वीराः पञ्च च सप्त च ॥११॥
जलदुर्गबलाल्लक्ष्मि पीडयन्ति जगत्त्रयम् ।
ततः पुनर्महेन्द्रोऽपि वह्नये समुपादिशत् ॥१२॥
अचिराद् दैत्यनाशार्थमब्धिरेष विशुष्यतु ।
यस्मादस्मद्द्विषामेषः शरणं वरुणालयः ॥१३॥
तस्माद् भवान् द्रुतमस्य क्षयं विधातु शोषणात् ।
अग्निः प्राह ततः शुक्रं समुद्रशोषणं प्रति ॥१४॥
अधर्म एव देवेन्द्र सागरस्य प्रशोषणम् ।
अस्य योजनमात्रेऽपि जीवकोटिशतानि वै ॥१५॥
निवसन्ति हि जीवानां महान् प्रसंक्षयो भवेत् ।
पापं चाऽसीमकं स्यान्मे तत्कथं प्रकरोम्यहम् ॥१६॥
एवं श्रुत्वा महेन्द्रस्तु प्राह रोषाद् वचस्तदा ।
न धर्मोऽधर्मसंश्लेषं प्राप्नुवन्त्यमरा दिवि ॥१७॥
भवान् दाहकरो देवः पापलेपविवर्जितः ।
तथापि नाऽऽज्ञां वहसे शपामि मानुषो भव ॥१८॥
अथाह पवनं चेन्द्रस्त्वं प्रशोषय सागरम् ।
पवनोऽपि तथा प्राह पापकृत्यं करोमि न ॥१९॥
तदेन्द्रस्तं शशापापि भव त्वं मानुषोऽनिल ।
एवं शापं गतौ तौ च वशिष्ठाऽगस्त्यनामकौ ॥२०॥
वह्निर्जातोऽगस्त्यमुनिर्वायुर्वसिष्ठ एव च ।
कुंभाद् द्वौ सहजातौ वै मित्रावरुणवीर्यतः ॥२१॥
उर्वशी श्रीनरनारायणपुत्र्यप्सरोवरा ।
मित्रेणाऽऽमन्त्रिता कामाद् गच्छन्ती चाम्बरे यदा ॥२२॥
पश्चाद् दृष्टा वरुणेन धृता कामार्थमित्यपि ।
किन्तु सा सत्यमार्गस्था वरुणं नाभ्यनन्दत ॥२३॥
मित्रेणाऽहं वृता पूर्वं तस्य भार्या भवामि ह ।
ते भार्या धर्मतो नास्मि ह्यधुना वरुण प्रभो ॥२४॥
आह तां वरुणश्चित्तं मयि न्यस्य प्रगम्यताम् ।
सापि मित्रं गता मित्रः शुश्राव च तयोदितम् ॥२५॥
चित्तन्यासं समाकर्ण्य क्रुद्धस्तत्याज तां तदा ।
वेश्याधर्मं श्रितवती द्वाभ्यां त्यक्ता हि सा ययौ ॥२६॥
संकल्पजं धातुमुग्रं मित्रश्च वरुणोऽपि च ।
उर्वशीदर्शनोत्थं वै घटमध्ये ससर्जतुः ॥२७॥
एतस्मिन्नेव काले तु निमिना श्रीवसिष्ठकः ।
शप्तो विदेहभावत्वे विदेहः सन् घटे स्थितः ॥२८॥

अगस्त्योऽपीन्द्रशापेन घटे तत्र स्थितोऽभवत् ।
अग्निरगस्त्यो घटत उत्पन्नस्तत्र बालकः ॥२९॥
वायुर्वशिष्ठो घटत उत्पन्नस्तत्र बालकः ।
वरुणांऽशोऽगस्त्यकश्च मित्रांशस्तु वशिष्ठकः ॥३०॥
उत्पन्नौ जातमात्रौ तौ जातिस्मरौ प्रवेदिनौ ।
चक्रतुः शापमुक्त्यर्थं घटलक्ष्मीव्रतं ह्युभौ ॥३१॥
मण्डपं कदलीस्तंभैः कारयामासतुश्च तौ ।
हारतोरणमालाभिर्वस्त्रपुष्पफलादिभिः ॥३२॥
मृत्तिकाकलशाद्यैश्च कुण्डवेदीभिरन्वितम् ।
होमसामग्रिकायुक्तं काष्ठासनादिराजितम् ॥३३॥
पूजोपहारयुक्तं च स्वर्णकलशराजितम् ।
मृत्तिकाया घटं वारियुतं स्वयोनिमुत्तमम् ॥३४॥
मण्डपे चानयामासतुश्च द्वौ तौ पुपूजतुः ।
मातरं श्रीमहालक्ष्मीमाह्वयामासतुश्च तौ ॥३५॥
स्थापयामासतुस्तत्र घटे सौवर्णकारिताम् ।
पञ्चामृतैर्जलैश्चापि स्नापयामासतुस्ततः ॥३६॥
भूषयामासतुः श्रृंगारयामासतुरीश्वरीम् ।
वेषयामासतू रक्ताम्बराद्यैर्मातरं हि ताम् ॥३७॥
पूजयामासतुः पुष्पाक्षतकुंकुमकज्जलैः ।
सर्ववस्तुभिरभ्यर्च्याऽऽरार्त्रिकं चक्रतुस्तथा ॥३८॥
मिष्टान्नं पायसान्नं च भोजयामासतुर्मुदा ।
जलं ताम्बूलकं चाप्यर्पयामासतुरादरात् ॥३९॥
सुवर्णकलशं पार्श्वे माल्यवस्त्रविभूषितम् ।
पञ्चरत्नसमायुक्तं घृतपात्रसमन्वितम् ॥४०॥
तिलपत्रफलयुक्तं स्थापयामासतुश्च तौ ।
अङ्गुष्ठमात्रं पुरुषं परमं ब्रह्म शाश्वतम् ॥४१॥
अनादिश्रीहरिं मां स्थापयामासतुरत्र च ।
धान्यानि वस्त्रभूषाश्च पात्ररत्नानि सर्वथा ॥४२॥
विन्यस्य पूजयामासतुश्च गां वत्सिकायुताम् ।
सर्वाभरणभूषाढ्यां श्रृंगखुरैः सुवर्णजाम् ॥४३॥
सकांस्यदोहपात्राढ्यां घण्टाऽऽभरणभूषिताम् ।
पूजयामासतुश्चापि पुष्पाञ्जलिं न्यवापतुः ॥४४॥
ततः प्रसन्ना माता श्रीघटलक्ष्मीर्महासती ।
प्रत्यक्षाऽभूत्तयोरग्रे वरार्थं तौ न्ययोजयत् ॥४५॥
वव्राते तौ वरं श्रेष्ठं मातस्तव प्रसादतः ।
जन्मनोऽस्माद् भवेन्मुक्तिर्मानुषात्तत् तथा कुरु ॥४६॥
लक्ष्मीः प्राह तदागस्त्यं दैत्या वसन्ति वारिधौ ।
अब्धिपानोत्तरं मुक्तिर्मानुषात्ते भविष्यति ॥४७॥
वसिष्ठोऽयं दिव्यदेहस्त्वया साकं भविष्यति ।
लक्ष्मीः प्राह पुनश्चापि वरार्थे च तदा मुनिः ॥४८॥
वसिष्ठः सम्प्रययाचे घटलक्ष्मीव्रतं शुभम् ।
अगस्त्योदयदिवसे प्रातः शुक्लतिलादिभिः ॥४९॥
तीर्थजलैः स्नानमात्रः शुक्लाम्बरधरो गृही ।
मृद्घटे वा स्वर्णघटे लक्ष्मीं त्वां पूजयेत्तु यः ॥५०॥
श्रीहरिं च वसिष्ठं चाऽगस्तिं च पूजयेत्तु यः ।
आसप्तरात्रं वापि च सप्तदशसमाश्च वा ॥५१॥
पूजयेदर्घमप्यत्र दद्यात्तस्य क्रमात् खलु ।
भूर्लोके च भुवर्लोके स्वर्गे महरि वै जने ॥५२॥
तपोलोके सत्यलोके वासो भवेच्चिरं खलु ।
कल्पं कल्पं प्रभुक्त्वा स भोगान् यायात्ततोऽक्षरम् ॥५३॥
सप्ताऽर्घ्यकर्ता प्राप्नुयात् सप्तलोकान् समृद्धिकान् ।
'नमो लक्ष्म्यै महालक्ष्म्यै विष्णुपत्न्यै नमो नमः ॥५४॥
अर्घ्यं गृहाण सर्वेशि देहि सौख्यानि सर्वशः' ।
'नमो नारायणाय श्रीपतये हरये नमः ॥५५॥
अर्घ्यं गृहाण भगवन् देहि सौख्यानि सर्वशः' ।
'काशपुष्पप्रतीकाशावग्निमारुतसंभवौ ॥५६॥
मित्रावरुणयोः पुत्रौ कुंभयोनी नमोऽस्तु वाम्' ।
एवमर्घ्यं च पूजां च पुष्पाञ्जलिं समर्पयेत् ॥५७॥
तस्य लोकाः शाश्वतास्ते लक्ष्मि भवन्तु सर्वदा ।
यावदायुश्च यः कुर्यात्तस्य वासोऽक्षरे भवेत् ॥५८॥
इत्यर्थिता वशिष्ठेन कुंभलक्ष्मीः प्रसूस्तदा ।
तथास्त्विति प्राह ताभ्यां शीघ्रं लीनाऽभवत् प्रसूः ॥५९॥
मुनी कृत्वा परिहारं तेपतुर्दुश्चरं तपः ।
ततः कालेन दैत्यानां वीक्ष्योपद्रवमुल्बणम् ॥६०॥
अगस्त्यः पीतवानब्धिं दैत्या नाशं ययुस्तदा ।
इन्द्रादिदेववृन्देन हता नष्टाः सुरद्विषः ॥६१॥
ततो देवाः प्रसन्ना वै ब्रह्माद्याश्चाययुर्मुनी ।
यत्र तपस्तेपाते तौ वरार्थं प्रेरितौ च तैः ॥६२॥
अगस्त्यश्च वरं वव्रे यदभीष्टं तदाऽभवत् ।
यावद् ब्रह्मसहस्राणां पञ्चविंशतिकोटयः ॥६३॥
वैमानिकौ भविष्यावो द्वावावां स्वर्गगामिनौ ।
वसिष्ठः सप्तमध्ये स्यादगस्त्यो दक्षिणापथे ॥६४॥
अस्मत्तारोदये कुर्याद् यः कश्चित् पूजनं तु नौ ।
स सप्तलोकसम्राड् वै पर्यायेण भवेदिति ॥६५॥
देवाः प्राहुस्तथाऽस्त्वेवं ययुस्ते च यथागतम् ।
वसिष्ठागस्त्यकौ चापि मलयाद्रौ गतौ तदा ॥६६॥

ततः कालान्तरेऽगस्त्यं पर्शुरामः प्रतापवान् ।
समुद्रस्य प्रपानार्थं सर्षिगणो न्यवेदयत् ॥६७॥
गोकर्णतीर्थभूम्यर्थे तदाऽगस्त्यः पुनः पपौ ।
एवं कृत्वा महत्कार्यं स्वर्गं ययतुस्तौ मुनी ॥६८॥
इत्येतत् कथितं लक्ष्मि घटलक्ष्मीव्रतं तव ।
सप्तदिनं फलाहारात्मकं पूजात्मकं तव ॥६९॥
अगस्त्यस्योदये कार्यं भुक्तिमुक्तिफलप्रदम् ।
एवं लक्ष्मि तव पूजां भाद्रपदेऽष्टमीदिने ॥७०॥
मार्गशीर्षे च वैशाखे ऊर्जे वा शुक्लपक्षके ।
मण्डपोद्यानसंयुक्तामुद्यापनसमन्विताम् ॥७१॥
करिष्यन्ति नरा नार्यो यास्यन्ति ते परां गतिम् ।
पञ्चगव्येन क्षीरेण पुष्पगन्धोदकेन च ॥७२॥
मधुना स्नापयेत्त्वां सम्पूजयेत् फलपुष्पकैः ।
शृंगारयेद् वेषयेच्च विभूषयेन्नीराजयेत् ॥७३॥
भोजयेच्च ततः पुष्पाञ्जलिं दद्यात् सुमूर्तये ।
क्षमां याचेत च नमेत् प्रार्थयेद् गुरवेऽर्पयेत् ॥७४॥
'महालक्ष्म्यै नमः पादौ तव गुल्फौ नमः श्रियै ।
शोकहन्त्र्यै नमो जङ्घे रमायै जानुनी नमः ॥७५॥
ऊरू मंगलकारिण्यै वक्षःस्थल्यै नमः कटिम् ।
पद्मायै नम उदरमुरः कामश्रियै नमः ॥७६॥
करौ सौभाग्यलक्ष्म्यै ते बाहूदरमुखं श्रियै ।
कमलायै नमो नासां पद्मिन्यै लोचने नमः ॥७७॥
पुष्ट्यै ललाटमलकान् हिरण्यायै शिरो नमः ।
हरिण्यै सुखदालक्ष्म्यै ललितायै नमो नमः ॥७८॥
नारायण्यै वासुदेव्यै सम्पदायै नमोऽस्तु ते ।
सर्वमंगलमांगल्यं देहि मे मातरीश्वरि ॥७९॥
सर्वमंगलमांगल्यव्रतेन तव पद्मजे ।
ममेष्टं सर्वमेवाऽस्तु कृपया तव चाब्धिजे' ॥८०॥
गीतमंगलनिर्घोषान् कारयेद् यजमानकः ।
सुवासिन्यः कन्यकाश्च कुर्युर्गीतानि तत्र च ॥८१॥
पूजयेयू रक्तवस्त्रै रक्तमाल्यानुलेपनैः ।
कुसुमैरक्षतैर्वाभिर्नमस्कारैः प्रभोजनैः ॥८२॥
सिन्दूरकुंकुमतैलसारकस्तूरिकाऽञ्जनैः ।
एवं सम्पूज्य तां मूर्तिं दद्याच्छ्रीगुरवे शुभाम् ॥८३॥
गुरुं सम्पूजयेच्चापि कमलैश्चन्दनादिभिः ।
परिहारं ततः कुर्याद् भोजयेद् बालबालिकाः ॥८४॥
सर्वमंगलमांगल्यलक्ष्मीव्रतमिदं परम् ।
यः कुर्यात्तस्य मांगल्यं बहुधा वै वसेद् गृहे ॥८५॥
सर्वपापविनाशश्च सौभाग्यारोग्यवर्धनम् ।
सर्वामोदप्रमोदेष्टानन्दसौख्यप्रदं व्रतम् ॥८६॥
अथाऽप्यन्यद् व्रतं लक्ष्मि वदामि सांख्ययौगिकम् ।
सांख्ययोगकृतदीक्षायुतां त्वां तत्र पूजयेत् ॥८७॥
पूर्णिमायां तथा चैकादश्यां शुक्ले तु पक्षके ।
सर्वमासेषु सौवर्णी कृत्वा लक्ष्मीं शुभाननाम् ॥८८॥
रक्ताम्बरां रक्तलेपां रक्तचन्दनचर्चिताम् ।
पाटलां त्वां रक्तवर्णासने सम्यक् प्रपूजयेत् ॥८९॥
रक्तकुंकुमसलिलैः स्नापयेत् त्वां विभूषयेत् ।
रक्तपुष्पाम्बरै रक्तहारै रक्तफलादिभिः ॥९०॥
रक्तपुष्पैः पूजयेच्च रक्तां नारायणे मयि ।
भोजयेत्पूजयेच्चापि नीराजयेन्नमेत्तथा ॥९१॥
प्रार्थयेद् पूजिका त्वां च सांख्ययोगव्रतस्थिता ।
रक्तवस्त्रे महालक्ष्मि रक्ते नारायणे स्थिते ॥९२॥
स्वास्थ्यं त्यागं महाशान्तिं हरेर्योगं प्रदेहि मे ।
अन्येभ्यश्च विरक्ताऽहं रक्ताऽहं श्रीपतौ प्रभौ ॥९३॥
सांख्ययोगमहालक्ष्मीव्रतं तेऽत्र करोम्यहम् ।
अनेन मम सौभाग्यं तवेव भवताद्ध्रुवं ॥९४॥
सर्वविघ्नविनाशोऽस्तु सर्वानन्दा भवन्तु मे ।
सर्वे रसाः सर्वश्रेयःकल्याणानि भवन्तु मे ॥९५॥
इत्यभ्यर्थ्य दिशेल्लक्ष्मीं गुरवे कानकीं तथा ।
रत्नभूषाम्बरधान्यपात्रादीनि समर्पयेत् ॥९६॥
एवं व्रतं प्रकर्त्र्यास्तु हरेर्दास्यं प्रपद्यते ।
भुक्तिर्मुक्तिर्भवेद्धस्तगता नारायणाश्रयात् ॥९७॥
सोपवासं प्रकर्तव्यं सांख्ययौगव्रतं त्विदम् ।
सर्वपापहरं दिव्यदेहप्रदं हरिप्रियम् ॥९८॥
हरिप्रिया भवेत् साध्वी व्रतकर्त्री विदेहिनी ।
चमत्कारमयी दिव्याऽक्षरधामगता भवेत् ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने घटलक्ष्मीव्रतस्याऽगस्त्यकृतस्य सर्वमंगलमांगल्यलक्ष्मीव्रतस्य, सांख्ययोगलक्ष्मीव्रतस्य च निरूपणनामा सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

**श्रीपुरुषोत्तम उवाच—**

रसकल्याणललिताव्रतं लक्ष्मि च ते शृणु ।
द्वादश्यां मण्डपं कुर्यात् सर्वतोभद्रमण्डलम् ॥ १ ॥
पूरयेद् बहुधान्यैश्च कलशान् स्थापयेच्छुभान् ।
मध्यमे कलशे स्थाप्या सौवर्णी भूषणान्विता ॥ २ ॥

रसकल्याणललितालक्ष्मीः रसप्रदायिनी ।
माघमासे शुक्लपक्षे द्वादश्यां ललितां श्रियम् ॥ ३ ॥
स्नापयेन्मधुना चेक्षुरसेन च घृतेन च ।
दध्ना दुग्धेन च तीर्थजलैः संस्नापयेत्ततः ॥ ४ ॥
भूषाम्बराणि दद्याच्च चन्दनाक्षतकुंकुमम् ।
शृंगारद्रव्यमेवापि दिशेत् पुष्पादिकानि च ॥ ५ ॥
धूपं दीपं च नैवेद्यं नीराजनं तथाऽर्पयेत् ।
प्रार्थयेद् दक्षिणां दद्यात् पुष्पांजलिं समर्पयेत् ॥ ६ ॥
एवं सम्पूज्य विधिवत् साधून् विप्रान् प्रपूजयेत् ।
पूजयेद् द्विजदाम्पत्यं दद्याद् दानं धनादिकम् ॥ ७ ॥
भोजयेदन्नपानाद्यैर्मधुरेण रसेन च ।
सुवर्णकमलं वस्त्रयुगलं कलशं दिशेत् ॥ ८ ॥
कलशं शर्करापूर्णं रसपूर्णं दिशेच्च वा ।
रसं विद्याद् घृतं क्षीरं दधि मधु च शर्कराम् ॥ ९ ॥
लड्डुकान् भोजयेच्चापि संयावमथ पूरिकाः ।
घारिकामप्यपूपाँश्च पिष्टापूपाँश्च मण्डकान् ॥१०॥
क्षीरं शाकं पायसान्नं दध्यन्नं भोजयेत्तथा ।
कमले माधवि लक्ष्मि मातः रमे समुद्रजे ॥११॥
भद्रे जये कम्भरे श्रि महालक्ष्मि सुखं कुरु ।
पद्मिनि पद्मजे कृष्णे नारायणि नरायणि ॥१२॥
आद्ये श्रीललिते कृष्णप्रिये ब्राह्मि नमोऽस्तु ते ।
वासुदेवि महादेवि हिरण्ये धनरूपिणि ॥१३॥
सर्वरसे सर्वसुखे सर्वकल्याणदायिनि ।
सम्पदं मोदमत्यन्तं देहि मे त्वद्व्रतेन वै ॥१४॥
एवमभ्यर्थ्य सौवर्णां लक्ष्मीं रसप्रदायिनीम् ।
रसकल्याणललितां दाने श्रीगुरवे दिशेत् ॥१५॥
पञ्चरत्नादिसहितामङ्गुष्ठमात्रनिर्मिताम् ।
चतुर्भुजां चक्रशंखमालापूजासमन्विताम् ॥१६॥
तथा गोमिथुनं दद्याद् विप्राय तु महात्मने ।
सालंकारं सवस्त्रं च सदोहं दुग्धदं शुभम् ॥१७॥
अनेन विधिना यस्तु रसकल्याणिनीश्रियः ।
व्रतं कुर्यात् स पापेभ्यस्तत् क्षणादेव मुच्यते ॥१८॥
नवाऽर्बुदसहस्राणि समाः स्वर्गे महीयते ।
सुवर्णं कमलं लक्ष्मीं मासि मासि ददन्नृपः ॥१९॥
अग्निष्टोमसहस्रस्य फलं स्वर्गे समश्नुते ।
नारी कन्या च कुरुते विधवा वा सती च या ॥२०॥
अग्निष्टोमफलं प्राप्य सौभाग्यारोग्यमाप्नुयात् ।
मतिदातापि वै स्वर्गे मोदते देवतागृहे ॥२१॥

शृणु लक्ष्मि व्रतं चान्यत् तवैव दशमीदिने ।
आषाढे शुक्लपक्षे वै चातुर्मास्याऽग्रगे दिने ॥२२॥
प्रातरेव समुत्थाय स्नात्वा ध्यायेद्धरिं प्रभुम् ।
ततश्चाद्रनिन्दलक्ष्मीं सौवर्णीं पूजयेद् व्रती ॥२३॥
अंगुष्ठमात्रां सद्वस्त्रां भूषाशृंगारशोभिताम् ।
नारायणीश्रियं दर्भगन्धोदकैः सुचन्दनैः ॥२४॥
स्नापयेच्छुक्लपुष्पैश्च कुंकुमाक्षतभोजनैः ।
नैवेद्यैर्भोजयेच्चापि नीराजयेत् क्षमापयेत् ॥२५॥
अनादिश्रीकृष्णनारायणेन सहितां श्रियम् ।
प्रार्थयेन्द्द्रावद्धदयैः स्वेष्टदं स्वेष्टदां तदा ॥२६॥
महालक्ष्म्यै नमः पादौ महाविष्णो नमोऽस्तु ते ।
शोकहन्त्र्यै नमो जङ्घे सुखदाय नमोऽस्तु ते ॥२७॥
कमलायै नमश्चोरू आनन्दाय नमो हरे ।
ईश्वरिण्यै नमः कटिं सम्पत्प्रदाय ते नमः ॥२८॥
माधव्यै च नमो नाभौ स्वर्णवर्णाय ते नमः ।
स्तनौ पोषणकारिण्यै नमो विश्वंभराय ते ॥२९॥
कण्ठे नमः सरस्वत्यै नीलकण्ठाय ते नमः ।
करौ कमलधारिण्यै नारायणाय ते नमः ॥३०॥
बाहू नमो रक्षयित्र्यै सुदर्शनधराय च ।
चान्द्र्यै चन्द्रानने नौमि हरिं वह्निमुखाय च ॥३१॥
नेत्रे कृपाप्रवर्षिण्यै करुणानिलयाय च ।
भ्रुवौ नमः क्षेमदायै कुशलकारिणे नमः ॥३२॥
ललाटे धनरूपायै स्वर्णवर्णाय ते नमः ।
मुकुटे सर्वरत्नायै सकौस्तुभाय ते नमः ॥३३॥
सर्वकायौ सर्ववासौ सर्वैश्वर्यसमन्वितौ ।
सर्वकामप्रदौ वन्दे आद्रीश्यानन्दमाधवौ ॥३४॥
सम्पदा चोपकरणैर्धनैर्धान्यै रसादिभिः ।
भूषाम्बरादिभिश्चापि गृहमार्द्रं प्रपूरितम् ॥३५॥
कुरुतं स्त्रीदासदासीभृत्यापत्यसुशोभितम् ।
दिव्यसाधनशोभं च धेनुवाजिगजान्वितम् ॥३६॥
उद्यानवाटीक्षेत्राढ्यं यशोमानप्रवर्धितम् ।
यानविमानवाहाढ्यं शिष्यप्रशिष्यसत्प्रजम् ॥३७॥
मोदप्रमोदसौख्याढ्यं समुत्साहोत्सवान्वितम् ।
वाद्यगीतिमहासत्रदानपानसमन्वितम् ॥३८॥
धर्मकर्माऽध्वरयुक्तं नित्यं च बहुदक्षिणम् ।
विघ्नशून्यं पञ्चयज्ञपरं कुरुतं मद्गृहम् ॥३९॥
स्नुषाभिः परितो रम्यां साधुसाध्वीविराजितम् ।
परमेशमहाभक्तिप्रवाहितं निरन्तरम् ॥४०॥

अन्ते दिव्यरसाढ्ये चामक्षरे वसतिं च मे ।
एवमभ्यर्थ्य च पुष्पाञ्जलिं दत्वा विसर्जयेत् ॥४१॥
लक्ष्मीं नारायणं चार्द्रानन्दौ श्रीगुरवे दिशेत् ।
रत्नहीरकधान्यानि द्विजातिभ्यो दिशेत्तथा ॥४२॥
भोजयेद् बालबालाश्च दिशेच्च दक्षिणाः शुभाः ।
शंखचक्रे सकटके स्वस्तिकांऽकुशचामरान् ॥४३॥
दद्यात् सत्पुरुषायाऽपि मिष्टान्नाम्बरकाणि च ।
घृतपात्राणि पात्राणि सहिरण्यकानि सन्दिशेत् ॥४४॥
शर्करासक्तुपात्राणि चतुर्मासं दिशेत्तथा ।
तिलपात्राणि पूर्णानि रसपात्राणि यानि च ॥४५॥
गन्धोदकं पुष्पवारि चन्दनं कुंकुमोदकम् ।
अपक्वं दधि दुग्धं च गोशृंगोदकमित्यपि ॥४६॥
तुलसीं कमलं दद्याच्चातुर्मास्ये सदार्चने ।
दाने सर्वं प्रदद्याच्च वदेच्चापि श्रियाः पुरः ॥४७॥
लक्ष्मि मे प्रीयतां नित्यं पापनाशाय माधवी ।
सौभाग्याय प्रसन्नाऽस्तु ललिते मे सुखाय च ॥४८॥

एवमुक्त्वा दिशेत् सर्वं कार्तिके दशमीदिने ।
हिरण्यकमलं दत्वा चैकादश्यां प्रगे पुनः ॥४९॥
पूजयित्वा व्रतं पूर्णं कुर्याद् दिशेद् द्विजातये ।
सतूलास्तरणां शय्यां लक्ष्मीर्मे प्रीयतामिति ॥५०॥

आर्द्रानन्दरमानारायणव्रतं त्विदं महत् ।
तेनेहाऽमुत्र च सदानन्दमाप्नोति सम्पदः ॥५१॥
भुक्त्वा स्वर्गान् चिरस्थाँश्च परं पदमवाप्नुयात् ।
श्रोतुर्वक्तुश्च संस्मर्तुश्चाप्यानन्दो भवेद् ध्रुवः ॥५२॥
गृहे स्वे महदानन्दशतानि चानुभूय च ।
भूयो लक्ष्मीपदं याति श्रीपुरं धाम चैश्वरम् ॥५३॥
शृणु लक्ष्मि व्रतं तेऽन्यच्छारदेयव्रतोत्तमम् ।
बृहस्पतेस्तु दिवसे कर्तव्यं पूजनं तव ॥५४॥
माण्डपं सुभगं कृत्वा तोरणादिसमन्वितम् ।
सौवर्णकलशैर्धान्यैश्चासनादिभिरुर्जितम् ॥५५॥
तन्मध्ये कारयेद् रम्यं गजासनं सुवर्णजम् ।
तत्र पीठे स्थापयेच्च शारदाख्यां रमां सतीम् ॥५६॥

द्विभुजां ललितालक्ष्मीं सर्वाभरणभूषिताम् ।
वीणाकमलहस्तां च मुकुटादिसुशोभनाम् ॥५७॥
अथ पार्श्वे स्थापयेच्च गायत्रीं च सरस्वतीम् ।
वाद्ययुक्तां दिव्यरूपां वेदपुस्तकधारिणीम् ॥५८॥
एवं देवीत्रयं तत्र पूजयेद् गन्धकुंकुमैः ।
अक्षतैः श्वेतपुष्पाद्यैर्धूपदीपाऽऽदिवस्तुभिः ॥५९॥

क्षीरं च पायसं सिद्धान्नं मिष्टं भोजयेत्तथा ।
मिष्टवारि सुगन्धाढ्यं पाययेच्छीतलं तथा ॥६०॥
ताम्बूलकं प्रदद्याच्च नीराजनं ततश्चरेत् ।
प्रार्थयेच्छारदालक्ष्मीं वाणी मे प्रीयतामिति ॥६१॥
कृपया ते भविष्यामि विद्यावारिनिधिः परः ।
रसनाग्रे मम नित्यं सरस्वती वसत्वपि ॥६२॥
इह लोके सदानन्दमवाप्नुयां तथा कुरु ।
वेदाः शास्त्राणि शस्त्राणि गीतनृत्यादिकं च यत् ॥६३॥
न विहीनं त्वया वाणि तथा मे सन्तु सिद्धयः ।
वाणी मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा मतिः ॥६४॥
एताभिः पाहि चाष्टाभिस्तनूभिर्मां नरायणि ।
एवं सम्प्रार्थ्य दानानि दद्यात् पुष्पाञ्जलिं तथा ॥६५॥
भोजयेद् बालबालाश्च साधुसाध्वीश्च योषितः ।
धनवस्त्राणि दद्याच्च कमण्डलुं च पुस्तकम् ॥६६॥
वाद्यदानं प्रकुर्वीत शृंगाराभरणार्पणम् ।
परिहारं प्रकुर्वीत गुरवे श्रियमर्पयेत् ॥६७॥
मौनव्रतेन भुञ्जीत सायं प्रातश्च वै व्रती ।
गुरुवारे प्रतिमासं मासांस्त्रयोदश व्रतम् ॥६८॥
सन्ध्यायां च तथा मौनं रक्षन् व्रती समाचरेत् ।
नाऽन्तरा भोजनं कुर्यात् समाप्ते च व्रते ततः ॥६९॥

उद्यापनं परं कुर्यान्महोत्सवसमन्वितम् ।
वस्त्रयुग्मं स्त्रियै दद्याद् विप्रायै भोजनान्वितम् ॥७०॥
गोदानं गृहदानं च कुर्याद् यथाधनं व्रती ।
अनेन विधिना कृत्वा पायसादि प्रभोजनम् ॥७१॥
विद्यावान् धनवान् मिष्टकण्ठो व्रती प्रजायते ।
शारदायाः प्रसादेन ब्रह्मलोके महीयते ॥७२॥
नरो नारी कुमारी वा कुरुते शारदाव्रतम् ।
ब्रह्मलोके वसेद् ब्राह्मी यावत्कल्पायुतत्रयम् ॥७३॥
विद्यादानं प्रकुर्याद् यो व्रतं कृत्वा धनार्पणैः ।
विद्वान् विद्यां प्रदद्याच्च शारदाव्रतवाँश्च यः ॥७४॥
विद्याधरपुरे सोऽपि वसेत् कल्पाऽयुतत्रयम् ।
अन्ते लक्ष्मीपुरं याति ब्रह्माऽक्षरं व्रजेत्ततः ॥७५॥

अथाऽन्यत्ते शुभं लक्ष्मि कल्याणीकमलाव्रतम् ।
अशेषयज्ञफलदमशेषाघविनाशनम् ॥७६॥
अशेषदुःखशमनमशेषसुरपूजितम् ।
पवित्राणां पवित्रं च मंगलानां सुमंगलम् ॥७७॥
दैवतं दैवतानां च पुराणानां पुरातनम् ।
माघशुक्लैकादशिकाव्रतं कल्याणदं शुभम् ॥७८॥

घृतेनाऽभ्यञ्जनं कृत्वा दशम्यां च तिलैर्जलैः ।
स्नात्वा प्रातर्हरिकृष्णं पूजयेत् सर्ववस्तुभिः ॥७९॥
नमोऽनादिकृष्णनारायणाय पादयोर्नमः ।
सर्वात्मने नमः के च वैकुण्ठाय नमो मुखे ॥८०॥
श्रीवत्सधारिणे वक्षःस्थले नमो मुहुर्मुहुः ।
शंखचक्रगदापद्मवरदानप्रधारिणे ॥८१॥
नमो बाहुषु सर्वेषूदरे दामोदराय च ।
मेढ्रे नमः सुखदाय ऊर्वोः सौभाग्यदाय च ॥८२॥
जान्वोर्नमो भूतप्राय जंघयोर्मोक्षदाय च ।
पादयोः पापनाशाय श्रीकृष्णाय नमो नमः ॥८३॥
नमः कल्याणकारिण्यै कमलायै नमो नमः ।
नमः श्रीललितालक्ष्म्यै जयालक्ष्म्यै नमो नमः ॥८४॥
नमः श्रीमाणिकीलक्ष्म्यै नारायणीश्रियै नमः ।
नमः श्रीसुखदालक्ष्म्यै शिवराज्ञीश्रियै नमः ॥८५॥
नमः श्रीपार्वतीलक्ष्म्यै कान्ताप्रभाश्रियै नमः ।
नमः श्रीकम्भरालक्ष्म्यै महालक्ष्मीश्रियै नमः ॥८६॥
नमः श्रीसन्तुष्टिलक्ष्म्यै कार्ष्णीश्रियै नमो नमः ।
नमः श्रीराधिकालक्ष्म्यै रमालक्ष्म्यै नमो नमः ॥८७॥
एवं नत्वा च गोविन्दं श्रियं नत्वा पुनः पुनः ।
सर्वोपचारकैश्चोभौ कल्याणदौ प्रपूजयेत् ॥८८॥
गन्धैर्माल्यैर्धूपदीपैर्भक्ष्यैर्नानाविधैरपि ।
जलैस्ताम्बूलकैश्चारार्त्रिकैः पुष्पार्पणैस्तथा ॥८९॥
प्रीयतां मम गोपालः श्रीपतिः पुरुषोत्तमः ।
प्रीयतां मम कल्याणीमहालक्ष्मीनरायणी ॥९०॥
एवमुच्चार्य शयने स्थापयेत् परमेश्वरौ ।
मध्याह्ने पूजयेच्चापि भोजयेच्च निशामुखे ॥९१॥
सोत्सवं पूजयेच्चापि भोजयेत् पायसादिकम् ।
सुप्त्वा चैकादशीप्रातरुत्थाय स्नानमाचरेत् ॥९२॥
पूजयद् विधिना लक्ष्मीं कल्याणीं मण्डपे शुभे ।
सर्वतोभद्रके रम्ये मण्डले विष्णुना सह ॥९३॥
पूजयित्वा च गोदानं शय्यादानं घटार्पणम् ।
लक्ष्म्यर्पणं रत्नभूषाम्बरपात्रधनार्पणम् ॥९४॥
धान्यभोजनभोग्याद्यर्पणं कुर्याद् व्रती प्रगे ।
भोजयेच्छ्रीमहालक्ष्मीं दुग्धं फलादिकं शुभम् ॥९५॥
मध्याह्ने पूजयेच्चापि भोजयेत् पायसादिकम् ।
सायं सम्पूजयेच्चापि रात्रौ जागरणं चरेत् ॥९६॥
द्वादश्यां प्रातरेवाऽपि प्रपूज्य विधिना दिशेत् ।
गुरवे साधवे साध्व्यै दानानि च द्विजातये ॥९७॥
भोजयेत् सुमृष्टमिष्टान्नानि विप्रान् सतस्तथा ।
बालकान् बालिका नारीः साधून् संभोजयेत्तथा ॥९८॥
दद्याद् दानानि बहूनि परिहारं ततश्चरेत् ।
लक्ष्मीनारायणसंहितायाः कथामिमां वदेत् ॥९९॥
पठनाच्छ्रवणादस्य स्मरणाच्चानुमोदनात् ।
भुक्तिर्मुक्तिर्भवेच्चापि कल्याणानि बहूनि च ॥१००॥
पुराजन्मनि चाभीरीकन्या कल्याणिनीव्रतम् ।
कृत्वा नारायणपुत्री ऊर्वशी समजायत ॥१०१॥
पुरा वैश्यकुटुम्बोत्था पुलोमकन्यका त्विदम् ।
व्रतं कृत्वा महेन्द्राणी व्यजायत दिवेश्वरी ॥१०२॥
पुरा कृत्वा व्रतं चैतत् सुरपुत्रो द्विजस्ततः ।
सूर्यो बभूव स्वर्गेशः सहस्ररश्मिवान् प्रभुः ॥१०३॥
तस्मात् कल्याणिकालक्ष्मीव्रतं स्वेष्टोत्तमप्रदम् ।
माघे दिनत्रयं कार्यं सर्वकल्याणसम्प्रदम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने रसकल्याणललिताव्रतस्य, आर्द्रानन्दरमानारायणव्रतस्य, शारदेयव्रतस्य, कल्याणीकमलाव्रतस्य च निरूपण-नामा अष्टत्रिंशदधिकशततमोऽध्यायः ॥१३८॥

**श्रीनारायणीश्रीरुवाच—**

आगतानां हि शोकानामपनोदार्थमेव यत् ।
व्रतं स्यात्तत्कथयाऽत्र दयया मे हरे प्रभो ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

पुण्ये चाश्वयुजे मासि शुक्ले द्वादशिकाव्रतम् ।
शोकनाशार्थमेवाऽस्ति विशोकद्वादशीव्रतम् ॥ २ ॥
दशम्यां लघुभुग् भूत्वा पृथ्वीशयनमाचरेत् ।
ब्रह्मचारी भवेच्चापि प्रातरुत्थाय मां स्मरेत् ॥ ३ ॥
स्नात्वा सम्पूजयेन्मां चैकादश्यां व्रतमाचरन् ।
निराहारः फलाहारश्चैकभोजी च वा भवेत् ॥ ४ ॥
अशोकललितां स्वर्णमयीं श्रीकृष्णशोभिताम् ।
कारयित्वा पूजयित्वा भोजयित्वा गजासने ॥ ५ ॥
स्वापयेज्जागरं कुर्यान्मण्डपे कदलीकृते ।
द्वादश्यां प्रातरुत्थाय स्नात्वा संपूजयेत्पुनः ॥ ६ ॥
स्नानं सर्वौषधैः कुर्यात् पञ्चगव्यजलैरपि ।
पीताम्बरधरो लक्ष्मीं पूजयेच्छ्रीशमुत्पलैः ॥ ७ ॥
विशोकायै नमः पादौ वरदायै तु जङ्घयोः ।
जान्वोः श्रियै नमश्चापि सक्थ्नोरब्धिजयोषिते ॥ ८ ॥

गुह्ये विशोककर्त्र्यै च कट्यां मायै नमो नमः ।
उदरे पोषयित्र्यै च नमो भायै च पार्श्वयोः ॥ ९ ॥
नाभौ नमः सर्वधर्त्र्यै हृदयेऽर्घाश्रियै नमः ।
कण्ठे वाण्यै नमो वक्षःस्थले कान्ताश्रियै नमः ॥१०॥
बाह्वोर्नमो रक्षयित्र्यै ललितायै तु हस्तयोः ।
चान्द्रयै मुखे नमश्चापि कमलायै तु नेत्रयोः ॥११॥
नासायां सुरभिदेव्यै ललाटे मोहिनीश्रियै ।
कर्णयोर्व्यापिकायै ते नमो मूर्ध्नि महाश्रियै ॥१२॥
मण्डले स्थण्डिले लक्ष्मीप्रतिमासन्निधौ हरिम् ।
स्वर्णमूर्तिं पूजयेच्च श्रीपतिं मां विशोकिनम् ॥१३॥
नमोऽनादिकृष्णनारायणाय पादयोर्नमः ।
नमः कृष्णाय कान्ताय जंघयोस्ते नमो नमः ॥१४॥
नमः श्रीवासुदेवाय जान्वोस्ते च नमो नमः ।
नमो नारायणायेति सक्थ्नोस्ते भगवन्नमः ॥१५॥
नमश्चानन्दरूपाय मेढ्रे ते च नमो नमः ।
नमः कट्यां नरनारायणाय ते नमो नमः ॥१६॥
उदरे ते नमो विश्वंभराय भगवन्नमः ।
पार्श्वयोः रामकृष्णाभ्यां नमो नमः नमो नमः ॥१७॥
नाभौ ते पद्मनाभाय हृदये हंसयोगिने ।
कण्ठे ते नीलकण्ठाय वक्षसि ब्रह्मणे नमः ॥१८॥
बाह्वोश्चक्रधरायाऽपि करयोः शंखधारिणे ।
मुखे रूपाभिरूपाय नेत्रयोः कमलाक्षिणे ॥१९॥
नासायां सर्वगन्धाय ललाटे गुरुरूपिणे ।
कर्णयोः श्रुतिकर्त्रे ते नमो मूर्ध्नि शिखावते ॥२०॥
इत्यभ्यर्च्याऽपि गोविन्दं फलमाल्यानुलेपनैः ।
शूर्पे संस्थाप्य पुरतो लक्ष्मीं मां तत्र सन्न्यसेत् ॥२१॥
नमो मोक्षप्रमोदानां दातृभ्यां सर्वसम्पदाम् ।
नमः शोकपरिहारकर्तृभ्यां सर्वदा नमः ॥२२॥
विशोकौ दुःखनाशाय विशोकौ वरदौ च मे ।
विशोकौ मम सम्पत्त्यै विशोकौ सर्वसिद्धये ॥२३॥
भवतां मम शोकानां सर्वेषां नाशकौ प्रभू ।
शुक्लाम्बरैः समावेष्ट्य शूर्पे सम्पूजयेत् फलैः ॥२४॥
वस्त्रैर्नानाविधैस्तद्वत् सुवर्णकमलेन च ।
पूजयित्वा भोजयेच्च दुग्धपाकादिकं शुभम् ॥२५॥
त्रिकालं पूजयेच्चापि कमलैर्भोजयेदपि ।
रजन्यां च व्रती शीतं दर्भोदकं पिबेच्छुचि ॥२६॥
ततस्तु जागरं गीतनृत्यवाद्यान्वितं चरेत् ।
प्रातः प्रपूजयेल्लक्ष्मीमशोकां श्रीपतिं तथा ॥२७॥
दम्पती पूजयेच्चापि विप्राणां विधिना ततः ।
वस्त्रभूषाभोज्यपात्रशृंगारशाटिका दिशेत् ॥२८॥
धनदानानि रत्नानां धेनूनामर्पणानि च ।
यथाशक्ति प्रकुर्याच्च भोजयेद् बालबालिकाः ॥२९॥
साधून् साध्वीर्भोजयेच्च दद्याद्दानानि सर्वतः ।
परिहारं प्रकुर्याच्च दक्षिणाः प्रदिशेत्तथा ॥३०॥
अनेन विधिना कुर्याद् विशोकाललिताव्रतम् ।
विशोकाद्वादशीरूपं शोका नश्यन्ति तस्य वै ॥३१॥
धेनुदानं सोपधानशय्यादानं धनार्पणम् ।
प्रकुर्याच्च ललिताश्रीलक्ष्मीं स्तुवीत भावतः ॥३२॥
यथा न लक्ष्मीः सम्पच्च मां परित्यज्य गच्छति ।
तथा सुरूपताऽऽरोग्यमशोकः सन्तु मे सदा ॥३३॥
यथा भक्तिर्भवेदग्र्या श्रीकृष्णवल्लभे मम ।
यथा कृष्णो बालकृष्णः सलक्ष्मीको मम गृहे ॥३४॥
सदा वसेत्तथा शूर्पलक्ष्मीदानं करोमि च ।
सुवर्णकमलं रम्यं करवीरं च कुंकुमम् ॥३५॥
केतकीं सिन्दुवारं च मल्लिकां केसरं तथा ।
कज्जलं चाऽलक्तकं च चन्दनं च कदम्बकम् ॥३६॥
रञ्जनं गन्धितैलं च गन्धसारं ददामि च ।
सर्वशृंगारपुष्पाणि ददामि सौख्यहेतवे ॥३७॥
पठनाच्छ्रवणाच्चापि स्मरणात्करणादपि ।
भुक्तिर्मुक्तिर्भवेदेव विशोकललिताव्रतात् ॥३८॥
अथ कृष्णलालनाख्यं व्रतं वच्मि च ते रमे ।
विभूतयो भवन्त्येव कृष्णलालनसद्व्रतात् ॥३९॥
कार्तिके चैत्रके वैशाखके मार्गे च फाल्गुने ।
आषाढे शुक्लके दिनत्रयात्मकं व्रतं त्विदम् ॥४०॥
सुलघुसुग् दशम्यां तु रात्रौ शीलव्रती भवेत् ।
कृत्वा सायन्तनीं पूजां गृह्णीयान्नियमं व्रती ॥४१॥
एकादश्यां निराहारं करिष्येऽहं व्रतं त्विति ।
नमो नारायणायेति प्रातरुत्थाय चिन्तयेत् ॥४२॥
स्नात्वैकादशिकाप्रातर्मण्डपे पूजयेत् प्रभुम् ।
अनादिश्रीकृष्णनारायणं मां पुरुषोत्तमम् ॥४३॥
शुक्लपुष्पाक्षतवारिकुंकुमचन्दनादिभिः ।
नमो विभूतये पादौ नमोऽशोकाय जानुनी ॥४४॥
नमः कृष्णयेत्यूरू च विश्वमूर्ते नमः कटिम् ।
कन्दर्पाय नमो मेढ्रं फलं नारायणाय च ॥४५॥
दामोदरायेत्युदरं वासुदेवाय च
माधवायेत्युरो विष्णोः कण्ठमुत्कण्ठिने

श्रीधराय मुखं केशान् केशवायेति मस्तकम् ।
पृष्ठं शार्ङ्गधरायेति श्रवणौ श्रुतिवेदिने ॥४७॥
हरये शंखचक्रासिगदाजलजपाणये ।
शिरः सर्वात्मने तस्मै नम इत्यभिपूजनम् ॥४८॥
मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ।
उदकुंभे न्यसेत्तच्च दाने प्रपूज्य वै दिशेत् ॥४९॥
गुडपात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ।
फलानि विविधान्येव दाने प्रपूज्य चार्पयेत् ॥५०॥
आरार्त्रिकं प्रकुर्याच्च विभूतिश्रीश्रीकृष्णयोः ।
नैवेद्यानि विचित्राणि प्रातर्मध्ये निशामुखे ॥५१॥
दत्वा प्रस्वापयेच्चापि गीतवादित्रकोत्सवैः ।
जागरणं व्रती कुर्यात् प्रातः स्नात्वा प्रपूजयेत् ॥५२॥
द्वादश्यां प्रार्थयेच्चापि पद्मं दद्याद् द्विजाय तु ।
उदकुंभं सरत्नं च गां दद्याद् गुरवे तथा ॥५३॥
यथा न मुच्यसे कृष्ण सदा सर्वविभूतिभिः ।
तथा मामुद्धराऽशेषदुःखसंसारसागरात् ॥५४॥
शय्यां दद्याद् धनं दद्याद् ग्रामं क्षेत्रं गृहादिकम् ।
गुरुं सम्पूज्य विधिवद् भूषावस्त्राणि चार्पयेत् ॥५५॥
अधनः पूजयेत्पुष्पैर्भोजनान्नं दिशेद् व्रती ।
अनेन विधिना यस्तु कृष्णलालनसद्व्रतम् ॥५६॥
विभूतिसम्प्रदं कुर्यात्तस्यर्द्धयः पदे पदे ।
पापानि तस्य नश्यन्ति पितॄणां तारयेच्छतम् ॥५७॥
जन्मनां शतसाहस्रं न शोकफलभाग् भवेत् ।
न तु व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ॥५८॥
यावद् युगसहस्राणां शतमष्टोत्तरं भवेत् ।
तावत् स्वर्गे वसेच्चापि भूपतिः सः पुनर्भवेत् ॥५९॥
व्रतं कृत्वा हरेर्धाम प्रयात्येव न संशयः ।
सर्वान् कामानश्नुते च कृष्णेन हरिणा सह ॥६०॥
शृणु लक्ष्मि कल्पे रथन्तरेऽभूल्लुब्धको ह्यघी ।
परुषाख्यः स मांसदो दुर्गन्धश्चातिपापवान् ॥६१॥
भार्याऽप्यस्यातिदुष्टा च व्यभिचारपरायणा ।
जीवहिंसापरौ तौ त्वेकदा वने सरोवरात् ॥६२॥
पद्मान्यादाय बहूनि विक्रयार्थं तु वैदिशम् ।
नगरं ययतुश्चापि विक्रयो न व्यजायत ॥६३॥
निराशौ तावता रात्रौ क्षुधितौ श्रमितावुभौ ।
प्रासादसन्निधौ मार्गे सुप्तौ शुश्रुवतुः शनैः ॥६४॥
मण्डपे श्रीहरेः पूजाशब्दान् वेश्याकृतान् शुभान् ।
माघे रात्रौ शुक्लपक्षे चैकादश्यां वरांगना ॥६५॥
गणिकाऽनंगवतीति जगौ तदा सुगीतिकाः ।
पूजयित्वा तदा रात्रौ दानं ददौ तु सा बहु ॥६६॥
गुरवे साधवे वेदविप्राय शयनादिकम् ।
लवणाचलमेवापि मूर्तिं विष्णोस्तु कानकीम् ॥६७॥
धनान्यपि बहूनि च धान्यानि विविधानि च ।
अलंकृत्य हृषीकेशं सौवर्णाम्बरपादपम् ॥६८॥
तां तु दृष्ट्वा ततस्ताभ्यामिदं हि परिनिश्चितम् ।
इमानि कमलान्यत्र पूजायां दद्व एव ह ॥६९॥
एवं भक्त्या दत्तवन्तौ वेश्यापि च धनं शतम् ।
दातुं समारभताऽपि तौ तु जग्रहतुर्न तत् ॥७०॥
दत्तमन्नं भोजनार्थं तौ तु जग्रहतुर्न तत् ।
प्रसंगादुपवासस्य माहात्म्यं संविदित्य वै ॥७१॥
जागरणं कृतवन्तौ प्रातर्द्वादशिकाऽभवत् ।
प्रभाते वेश्या दत्ता शय्या सलवणाचला ॥७२॥
गृहाणि गुरवे भक्त्या विप्रेभ्यो द्वादशाऽपि च ।
वस्त्रालंकारसंयुक्ता गावश्च वत्सिकायुताः ॥७३॥
भोजनं च सुहृन्मित्रदीनान्धकृपणैः समम् ।
लुब्धकेन तथा नार्या दृष्टमेतत्प्रपूजनम् ॥७४॥
श्रीहरेर्द्वादशिकायां प्रसादः शर्करात्मकः ।
चरणामृतसलिलं गृहीतं च ततः परम् ॥७५॥
ययतुः स्वगृहं तौ च वेश्यापि स्वगृहं गता ।
भक्तिमन्तस्त्रयस्ते वै कालेन निधनं गताः ॥७६॥
पुष्करप्रार्पणात्तत्र केशवार्पणसत्फलात् ।
विनष्टाशेषपापश्च पुण्यवान् लुब्धकः स तु ॥७७॥
**पुष्करवाहनो** राजाऽभवत् पुष्करखण्डके ।
राज्ञो नाम्ना महाखण्डः पुष्कराख्योऽभवत् पुरा ॥७८॥
भक्त्या तुष्टेन हरिणा कृष्णलालनसद्व्रतात् ।
व्रतसन्तुष्टया लक्ष्म्या विभूत्या भूभृतेऽर्पितम् ॥७९॥
कमलं काञ्चनं रम्यं कामदं कामगं परम् ।
लोकैः समस्तैर्नगरवासिभिः कमलेन सः ॥८०॥
विमानाख्येन नाकं सद्वीपानि व्यचरन्नृपः ।
सप्तमः पुष्करस्याऽस्य द्वीपः पुष्करनामकः ॥८१॥
पुष्पवाहननामाऽपि पुष्करासन इत्यपि ।
ख्यातिं प्राप तथा राज्ञो नारीसहस्रपूजिता ॥८२॥
नाम्ना लावण्यवतीति बभूव कमलासमा ।
पुत्रास्तस्यामयुतं सम्बभूवुः पुष्करस्य वै ॥८३॥
या च वेश्या सापि जाता सपत्नी भूभृतो वधूः ।
देहान्ते नृपतिश्चापि लवण्या च प्रिया ह्युभौ ॥८४॥

ययतुश्चाक्षरं धाम मम लक्ष्मि परं पदम् ।
सपत्नी या तु वेश्याऽभूत् सा त्यक्त्वा योषितो वपुः ॥८५॥
कामदेवस्य वै पत्नी प्रीतिः रत्याः सपत्निका ।
लोकेष्वानन्दजननी व्यजायत सुरेश्वरी ॥८६॥
कृष्णलालनसंज्ञं च विभूतिद्वादशीव्रतम् ।
पुष्करपुष्पसंज्ञं वा व्रतमेतदुदीरितम् ॥८७॥
यथाकथञ्चित्कमले कमलैर्द्वादशी तिथिः ।
हरिं प्रपूज्य कर्तव्या देयं दानं च दक्षिणाः ॥८८॥
न वित्तशाठ्यं कुर्वीत भक्त्या दिशेद् यथाधनम् ।
सुवर्णकमलं यद्वा देयं पद्मं जलोद्भवम् ॥८९॥
देयं वा स्थलकमलं कमलेशः प्रसीदति ।
ददाति सार्वभौमं च राज्यं स्वर्गं दिवं परम् ॥९०॥
सत्यं ददाति वा सौरं चान्द्रं ब्राह्मं पदं च वा ।
वैराजं वैष्णवं वापि पदं श्रीपुरमित्यपि ॥९१॥
वैकुण्ठं वापि गोलोकं चाव्याकृतं तथाऽमृतम् ।
अक्षरं परमं धाम ब्रह्मधाम ददात्यपि ॥९२॥
अहं विभूतिनाथोऽस्मि ददामि पूजकाय वै ।
अनन्तगुणकं लक्ष्मि विभूतिद्वादशीव्रतैः ॥९३॥
चक्रवर्तिनृपा लक्ष्मि ये ये भवन्ति भूतले ।
जाताः पूर्वेषु कल्पेषु विभूतिद्वादशीव्रतैः ॥९४॥
कमलं कमलास्थानं सौवर्णं तु मया सह ।
कमलस्य प्रदानेन कमलासहितस्त्वहम् ॥९५॥
वसामि दातरि चापि ममांऽशेन चिरायुषि ।
चक्रचिह्नं प्रददामि करे वै चक्रवर्तिनः ॥९६॥
मध्यांगुलिद्वयोः शंखौ शेषाणां चक्रकाष्टकम् ।
साक्षान्नारायणस्यैवं सन्ति चक्राणि पद्मजे ! ॥९७॥
पद्मं करे पदे पद्मं चक्रं वा चक्रवर्तिनः ।
एवं करे ध्वजचिह्नं ध्वजदातुर्ददामि वै ॥९८॥
त्रिशूलार्पणकर्तुश्च त्रिशूलं प्रददामि च ।
धनुष्यदातुः सशरं धनुष्यं प्रददामि च ॥९९॥
मत्स्यदातुः करे मत्स्यं ददामि सर्वशोभनम् ।
स्वस्तिकस्य प्रदातुश्च स्वस्तिकं प्रददामि च ॥१००॥
सुवर्णानां ध्वजादीनां दात्रे ददामि सर्वथा ।
ससागरां पृथिवीं वै चक्रवर्तित्वमित्यपि ॥१०१॥
यस्य दक्षकरे स्युश्च ध्वजः शूलो धनुः शरः ।
मीनः स्वस्तिक एते षट् सोऽहं नारायणः स्वयम् ॥१०२॥
लक्ष्मि साधुस्वरूपेण हृदये त्वां निधाय च ।
वामसक्थ्न पाण्डुराभां धृत्वा वसामि भूतले ॥१०३॥
अदृश्या त्वं जनैर्लक्ष्मि मत्सेवाया विराजसे ।
तदा साधुस्वरूपे चाऽधुना त्वं पृथगेव या ॥१०४॥
त्वं विभूतिस्वरूपाऽसि व्रतैर्विभूतिदायिनी ।
वामहस्ते दण्डदीर्घरेखा मे धर्मबोधिनी ॥१०५॥
पादयोरुभयोरुर्ध्वरेखे मे व्यापिके द्वयोः ।
धामसृष्ट्योरन्तरात्मबोधिन्यौ तेऽपि तद्विधे ॥१०६॥
मद्भक्तस्य कृपया मे चिह्नमेतद् भवेदपि ।
पठनाच्छ्रवणादस्य विभूतिफलमाप्नुयात् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विशोकललिताद्वादशीव्रतस्य, विभूतिललिताकृष्णलालनव्रतस्य च निरूपणम् पुष्करवाहनाख्यस्य चक्रवर्तिनो दृष्टान्तः चक्रवर्तिचिह्नानि चेति निरूपणनामा नवत्रिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

**श्रीनारायणीश्रीरुवाच—**

भगवन् पावनान्येव व्रतानि कथितानि मे ।
नवनवानि चान्यानि शिष्टान्यपि निवेदय ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

बहूनि सन्ति कमले ! व्रतानि मोक्षदान्यपि ।
भुक्तिदान्यपि बहुधा वदामि शृणु तान्यपि ॥ २ ॥
फलेच्छया विहितानि भोगदानि भवन्ति वै ।
मम प्रसन्नतार्थं तु कृतानि मोक्षदानि हि ॥ ३ ॥
सम्वत्सरं नक्तभोजी नक्तव्रतं समीरितम् ।
कार्तिकाद्वा ह्याषाढाद्वा समारमेत तद्व्रती ॥ ४ ॥
एकादशीं समारभ्य वर्षे पूर्णे तु धेनुयुक् ।
चक्रं सुदर्शनं हैमं दद्याच्छ्रीगुरवेऽर्पणे ॥ ५ ॥
सुसाधून् भोजयेच्चापि व्रतोद्यापनमाचरेत् ।
वस्त्रदानानि दद्याच्च विष्णुलोके स मोदते ॥ ६ ॥
एकभक्तं व्रतं कुर्यान्मध्याह्ने भोजनात्मकम् ।
देवाय सर्वं प्राऽर्प्यैव भुञ्जीत नाऽन्यथा क्वचित् ॥७॥
वर्षव्रतं भवेदेतद् वर्षान्ते च महोत्सवम् ।
उद्यापनं कारयेच्च वृषभं कानकं दिशेत् ॥८॥
भोजनानि दिशेच्चापि साधुभ्यो गां दिशेदपि ।
एकान्तरव्रतं चापि वर्षमात्रं प्रपालयेत् ॥ ९ ॥
एकान्तरितभोजी स्याद् व्रतान्ते च महोत्सवम् ।
स्वर्णपद्मं दिशेद् दाने ह्युद्यापनं समाचरेत् ॥१०॥

शर्करापूर्णपात्रं च दद्यात् प्रभोजयेत् सतः ।
व्रती याति महापुण्यं चान्तेऽपि वैष्णवं पदम् ॥११॥
चातुर्मास्ये वर्जयेच्च देहाभ्यंगं सुतैलजम् ।
अभ्यंगवर्जनं त्वेदत् व्रतं प्रोक्तं तपः परम् ॥१२॥
व्रतान्ते तैलदानादि दद्याच्च भोजन्यान्यपि ।
मम प्रीतिकरं त्वेतत्तेन याति हरेः पदम् ॥१३॥
रसानां वर्जनं चापि रसव्रतं प्रकीर्तितम् ।
मधुनारिकेलवारिदधिक्षीरघृतैक्षवम् ॥१४॥
वर्जयेद् वत्सरान्ते वा ह्युद्यापनं समाचरेत् ।
रसदानादि दद्याच्च सूक्ष्मवस्त्राणि चार्पयेत् ॥१५॥
कामव्रतं प्रकुर्याच्च सदा शोकविनाशकम् ।
चातुर्मास्ये ब्रह्मचर्यपरायणः सदा भवेत् ॥१६॥
पूर्णे व्रते कांचनस्याऽशोकवृक्षं समर्पयेत् ।
इक्षुं समर्पयेच्चापि वस्त्राण्यपि समर्पयेत् ॥१७॥
उद्यापनं चरेद्भुक्त्वा भोगान् विष्णुपदं व्रजेत् ।
नखानां कर्तनं चातुर्मास्ये व्रती हि वर्जयेत् ॥१८॥
केशानां वपनं चापि चातुर्मास्ये विवर्जयेत् ।
अकर्तनसंज्ञं चैतद् व्रतं कृत्वा महोत्सवम् ॥१९॥
कुर्यादुद्यापनं चान्ते भोजयेत् पायसं सतः ।
कानकान्नखकेशाँश्च दाने दद्याद् द्विजातये ॥२०॥
सौम्यां मूर्तिं मम लक्ष्मि तव प्रतिदिनं दिशेत् ।
मासपर्यन्तमेवैतत् सौम्यव्रतं प्रकीर्तितम् ॥२१॥
वैकुण्ठे सौम्यमुक्तः स्यादत्र वै चन्द्रमा भवेत् ।
बहुदानानि रत्नानां दद्यात्तु श्रावणाऽन्तके ॥२२॥
कार्तिके कानकीं मूर्तिं गृहोपस्करशोभिताम् ।
दद्यात् सम्पूज्य गुरवे सौभाग्यव्रतमुच्यते ॥२३॥
विष्णोर्मूर्तिं श्रिया मूर्तिं दद्याच्छ्रीगुरवे तदा ।
अन्यदानानि कुर्वीत श्रीहरिः प्रीयतामिति ॥२४॥
सारस्वतं व्रतं कुर्यात् सन्ध्यायां मौनमेव तु ।
सम्वत्सरं व्रतं कृत्वा घृतकुंभं तिलान् घटम् ॥२५॥
वस्त्रयुग्मं च पात्रं च घण्टां दद्याद् द्विजायते ।
गोदानं गुरवे दद्यात् पुस्तकानां प्रदानकम् ॥२६॥
सारस्वतव्रतं चेदं विद्यारूपादिदायकम् ।
अथ सम्पद्व्रतं कुर्यात् पञ्चम्यां माधवीं सतीम् ॥२७॥
लक्ष्मीं नित्यं पूजयेच्च वर्षान्ते हेमपद्मकम् ।
कमलं गुरवे दद्याद्धेनुं दोग्ध्रीं सवत्सिकाम् ॥२८॥
स वैष्णवं पदं याति लक्ष्मीवान् जन्मजन्मसु ।
नित्यं वै मार्जयेत् सर्वं मन्दिरं श्रीपते प्रभोः ॥२९॥
वर्षान्ते प्रदिशेद्धेनुं दोग्ध्रीं जलघटं तथा ।
जन्मायुतं स राजा स्यात्ततो विष्णुपुरं व्रजेत् ॥३०॥
एतदायुर्व्रतं नाम पापमार्जनकारकम् ।
अथ कीर्तिव्रतं कुर्यादेकभुक्तं सदाऽऽचरेत् ॥३१॥
वर्षान्ते धेनुदशकं दद्याद् वृक्षं हिरण्मयम् ।
अश्वमेधफलं स्याच्च भूतिकीर्तिफलं भवेत् ॥३२॥
अथ सामव्रतं प्रोक्तं नित्यं स्तोत्रं प्रकीर्तयेत् ।
हरेरग्रे त्रिकाले वै तिलदानं च नित्यदा ॥३३॥
पुष्पाऽक्षतप्रदानं च हरये पूजनार्थकम् ।
सम्वत्सरान्ते पूर्णे च हेमपद्मं दिशेन्महत् ॥३४॥
अष्टांगुलं तिलधेनुं दद्याद्याति परं पदम् ।
अथ वीरव्रतं कुर्यान्नवम्यामेकभुक्तकः ॥३५॥
कन्यका भोजयेद् वर्षे वर्षान्ते हेमकञ्चुकीः ।
शाटीर्हैमं केशरिणं दद्याच्छ्रीगुरवे तथा ॥३६॥
कन्यकाभ्यो यथायोग्यभूषाम्बरादि चार्पयेत् ।
जन्मार्बुदं सुरूपः स्याच्चाऽन्ते धाम हरेर्व्रजेत् ॥३७॥
सम्वत्सरं पूर्णिमायां पयोव्रती भवेत्तथा ।
समान्ते पञ्चधेनूश्च दोग्ध्रीर्दद्यात् सवत्सिकाः ॥३८॥
वासांसि च पिशंगानि जलकुंभयुतानि च ।
स याति वैष्णवं लोकं पितॄणां तारयेच्छतम् ॥३९॥
पितृश्राद्धं कारयेच्च पितृव्रतमिदं मतम् ।
अथ चैत्रादिमासेषु चतुर्षु शीतलं जलम् ॥४०॥
पाययेत् सर्वलोकाँश्च व्रतान्ते मणिकं दिशेत् ।
अन्नवस्त्राणि दद्याच्च तिलपात्रं सुवर्णकम् ॥४१॥
जलानन्दव्रतं त्वेतत् कल्पान्तो भूपतिर्भवेत् ।
अथ कुर्याद् धृतिव्रतं प्रत्यहं श्रीहरिं तु माम् ॥४२॥
पञ्चामृतेन सुभगं स्नपनं कारयेत्ततः ।
वर्षान्ते शंखदानं च कुर्याद् याति हरेः पदम् ॥४३॥
मा हिंस्यात् सर्वभूतानि वर्षान्ते व्रतकृज्जनः ।
गोदानं हेमहरिणप्रदानं चाचरेत् त्विदम् ॥४४॥
अहिंसाव्रतमेतेन कल्पान्तो भूपतिर्भवेत् ।
अथ माघस्नानमेव कुर्याच्छीतेन वारिणा ॥४५॥
सूर्यं नित्यं पूजयेच्च दद्याद् दानं द्विजातये ।
धान्यवस्त्रविभूषादि सूर्यव्रतं तदुच्यते ॥४६॥
चातुर्मास्ये महाविष्णुं महालक्ष्मीं च पूजयेत् ।
गोदानं भोजनं चापि यथाशक्ति दिशेद् व्रती ॥४७॥
स वैष्णवपदं याति विष्णुव्रतमिदं शुभम् ।
अथ व्रतं शीलनाम शीलाऽऽरोग्यफलप्रदम् ॥४८॥

वर्षं पूर्णं ब्रह्मचर्यं पालयेत् स्त्रीः नरोऽपि वा।
घृतधेनुं प्रदद्याच्च पुष्पमालाः सदाऽर्पयेत् ॥४९॥
सुसाधून् घृतमुत्कृष्टं पायसं भोजयेत्तथा।
उद्यापनं वत्सरान्ते कुर्याद् धान्यधनं दिशेत् ॥५०॥
अनादिश्रीकृष्णनारायणाऽक्षरं प्रयाति सः।
अथ वर्षे न भुञ्जीत तैलं यच्छेत्प्रदीपकम् ॥५१॥
स्वर्णं दीपं काञ्चनं च चक्रं दद्याद् द्विजातये।
वस्त्रयुग्मं प्रददेत याति ब्रह्मपदं हि सः ॥५२॥
दीपव्रतमिदं प्रोक्तं दीप्तिदं रूपदं तथा।
अथ कार्तिकमारभ्य नक्तं भुञ्जीत पायसम् ॥५३॥
वर्षान्ते गां प्रदद्याच्च पायसाख्यव्रतं त्विदम्।
कल्याणकारकं पृथ्व्या राज्यप्रदं प्रमोक्षदम् ॥५४॥
अथ गन्धानुलेपादि वर्जयेद् वत्सरं सदा।
निर्गन्धाख्यं व्रतं प्रोक्तं वर्षान्ते गन्धदानकम् ॥५५॥
अथ कान्तिव्रतं कुर्याद् गोदानं प्रत्यहं दिशेत्।
लवणं नैव भुञ्जीत सम्वत्सरं ततः परम् ॥५६॥
उद्यापनं प्रकुर्याच्च कान्तिकीर्तिफलप्रदम्।
राजा भूत्वा कल्पपूर्णं विष्णुलोके वसेद् ध्रुवे ॥५७॥
ब्रह्मव्रतं ततः कुर्याद् ब्रह्माण्डं काञ्चनं शुभम्।
स्वल्पं तिलसमायुक्तं पुण्ये दिने द्विजायते ॥५८॥
दद्यात् त्रिदिवसान् तिलाशनो भवेद् व्रती तथा।
माल्यवस्त्रविभूषाणां दानं कुर्याद् व्रती परम् ॥५९॥
ब्रह्मलोकं प्रयात्येषो निर्वाणपदमाप्नुयात्।
शक्तितस्त्रिपलादूर्ध्वं ब्रह्माण्डं परिकीर्तितम् ॥६०॥
अथ धेनुव्रतं कुर्यात् त्र्यहं पयोव्रती भवेत्।
काञ्चनं च वृषं धेनुं ददेतोभयतोमुखीम् ॥६१॥
तण्डुलान् सम्प्रयच्छेच्च पलोर्ध्वं कानकं वृषम्।
दत्वा ब्रह्मपदं याति गोलोकं धेनुसद्व्रतात् ॥६२॥
अथ कल्पव्रतं कुर्यात् पलोर्ध्वं कल्पपादपम्।
कृत्वा दद्यात् साधवे च तण्डुलान् द्विदलान्वितान् ॥६३॥
कल्पदानेन कल्पान्ते स्वर्गाद् गच्छति मत्पदम्।
अथ मासोपवासी स्यात् प्रयच्छेन्महिषीं शुभाम् ॥६४॥
दोग्ध्रीं श्रीगुरवे चैतन्माहिषं व्रतमुच्यते।
दद्याद् विंशतिपलोर्ध्वं पृथिवीं काञ्चनीं शुभाम् ॥६५॥
धराव्रतमिदं प्रोक्तं त्वेकभोजी दिने भवेत्।
सप्तकल्पशतान्येव वसति श्रीशमन्दिरे ॥६६॥
ततो यात्यक्षरं धाम धराव्रतकरः पुमान्।
मद्भक्तो मां प्रयात्येव पार्षदः सन् प्रसेवते ॥६७॥

माघे चैत्रे गुडं दद्याद् गुडव्रतपरायणः।
गुडभोजी गुडपायी तिलैर्गुडैः प्रपूजयेत् ॥६८॥
मां लक्ष्मीं च गुडदाने दद्याद् गुडमयीं गुडम्।
गुडव्रतमिदं प्रोक्तं मुक्तिदं मोक्षदं तथा ॥६९॥
अथ पक्षोपवासी स्यात् कपिलायुगलं दिशेत्।
उद्यापनं प्रकुर्याच्च परमानन्दकारकम् ॥७०॥
कल्पान्ते राजराजः स्यात् कपिलाव्रतमेव तत्।
अथ वर्षे चैकभोजी नित्यभोज्यजलप्रदः ॥७१॥
विष्णुलोके वसेदन्ते प्राप्तिव्रतमिदं मतम्।
नक्ताशी चाष्टमीषु स्याद् वत्सरान्ते च धेनुदः ॥७२॥
स्वर्गं याति ततश्चान्ते ब्रह्मपदं प्रयाति सः।
सुगतिव्रतमेवेदं प्रोच्यते सद्गतिप्रदम् ॥७३॥
विप्रायेन्धनदो यस्तु वत्सरं धेनुदस्तथा।
वैश्वानरव्रतं चेदं तत्कर्ता ब्रह्म गच्छति ॥७४॥
एकादश्यां व्रतकर्ता द्वादश्यां काञ्चनीं शुभाम्।
अनादिश्रीकृष्णनारायणमूर्तिं ददाति च ॥७५॥
समान्ते वैष्णवं हैमं चक्रं ददाति यो व्रती।
एतत्कृष्णव्रतं कृत्वा कल्पान्ते राज्यभाग् भवेत् ॥७६॥
वर्षान्ते मां प्रदायैव मम धाम ह्यवाप्नुयात्।
पायसाशी समान्ते तु दद्याद् विप्राय गोयुगम् ॥७७॥
लक्ष्मीलोकमवाप्नोति श्रीव्रतं चैतदुच्यते।
सप्तम्यां यः प्रदद्याच्च धेनुं पयस्विनीं शुभाम् ॥७८॥
सूर्यलोकं प्रयात्येव भानुव्रतं तदुच्यते।
चतुर्थ्यां नक्तभुक् दद्यादब्दान्ते हेमहस्तिनम् ॥७९॥
व्रतं वैनायकं नाम भुक्तिमुक्तिफलप्रदम्।
चातुर्मास्ये स्वर्णरूप्यफलानि चार्पयेद् व्रती ॥८०॥
फलव्रतं विष्णुलोकप्रदं त्वेतन्महाबलम्।
यश्चोपवासी सप्तम्यां समान्ते हैमपंकजम् ॥८१॥
गाश्च दद्यात् स्वर्णघटं सौरव्रतं प्रकीर्तितम्।
सूर्यलोकप्रदं चैतत् सूर्यदानं दिशेदपि ॥८२॥
द्वादश द्वादशीर्यस्तु समाप्योपोषणेन ह।
गोवस्त्रकांचनभूषा दद्याच्छ्रीगुरवे व्रती ॥८३॥
परं पदमवाप्नोति विष्णुव्रतमिदं रमे।
कार्तिक्यां तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ॥८४॥
शैवपदं समाप्नोति वार्षव्रतमिदं मतम्।
गोपदानि सुवर्णानि दद्याद् दाने पदव्रतम् ॥८५॥
सप्तरात्रोषितो दद्याद् घृतकुंभं तु साधवे।
घृतव्रतमिदं प्रोक्तं ब्रह्मलोकफलप्रदम् ॥८६॥

आकाशशायी वर्षासु चान्ते धेनुं पयस्विनीम् ।
दद्यादाकाशसंज्ञं च व्रतमिन्द्रपदप्रदम् ॥८७॥
अनग्निपक्वभोजी च तृतीयायां ततः परम् ।
गोदानं तु प्रकुर्याद्वै मासान्ते यः पयस्विनीम् ॥८८॥
श्रेयोव्रतमिदं प्रोक्तं गोलोकदं सुखप्रदम् ।
हैमं पल्ढ्वादूर्ध्वे रथं चाश्वयुजं शुभम् ॥८९॥
ददानो द्राग् वसेत् स्वर्गे कल्पशतं रथव्रती ।
कल्पान्ते राजराजः स्यात्ततो याति परं पदम् ॥९०॥
षण्मासानुपवासान् यः कुर्यादेकान्तरं दिनम् ।
समान्ते गोप्रदः स्याच्च वारुणं व्रतमुच्यते ॥९१॥
वारुणं राज्यमासाद्य ततो याति परं पदम् ।
चान्द्रायणं व्रतं कुर्याद्धेमचन्द्रं दिशेत् सते ॥९२॥
चन्द्रव्रतमिदं श्रेष्ठं चन्द्रलोकफलप्रदम् ।
ज्येष्ठे पञ्चतपा नित्यं हेमधेनुप्रदो भवेत् ॥९३॥
तपोव्रतमिदं प्रोक्तं साम्राज्यं लभते ततः ।
वैकुण्ठं चापि गोलोकं चाऽक्षरं लभते ततः ॥९४॥
देवालये वितानं तु दद्यात् पटादिभिः कृतम् ।
वितानदो दिवं याति वितानव्रतसत्फलात् ॥९५॥
माघे निन्यार्द्रवासाः स्यात् सप्तम्यां गोप्रदो भवेत् ।
राजा भवेद् दिवं याति चार्द्रव्रती प्रमुक्तिगः ॥९६॥
श्रेष्ठं तु भवनं धाम ददाति फाल्गुने तु यः ।
धामव्रती प्रयात्येव परमेश्वरमन्दिरम् ॥९७॥
साधुं साध्वीं प्रपूज्यैव भोजयेमिष्टमुत्तमम् ।
स्वयं प्रसादं भुञ्ज्याच्च प्रसादाख्यव्रतं त्विदम् ॥९८॥
सर्वपापहरं पुण्यप्रदं मोक्षप्रदं तथा ।
पावनं सर्वश्रेष्ठं वै पंक्तिपावनमुत्तमम् ॥९९॥
प्रतिपद्येकभक्ताशीं समान्ते कपिलाप्रदः ।
नित्यं वैश्वानरपूजाकर्ता याति विभावसुम् ॥१००॥
वैश्वानरव्रतं चेदं दिव्यतादं सुखप्रदम् ।
दशम्यानेकभक्ताशीं समान्ते दशधेनुदः ॥१०१॥
सुवर्णपत्रिकां दद्याद् ब्रह्माण्डाधिपतिर्भवेत् ।
विश्वव्रतं प्रोच्यते वै लक्ष्मि पुण्यस्य सागरः ॥१०२॥
कीर्तनं सर्वदा कुर्यात् कीर्तनाख्यं व्रतं त्विदम् ।
कथां च सर्वदा कुर्यात् कथाख्यं तु व्रतं त्विदम् ॥१०३॥
भजनं सर्वदा कुर्याद् भजनाख्यं व्रतं त्विदम् ।
एकषष्टिव्रतान्येवं लक्ष्मि ते कथितानि वै ॥१०४॥
लोकानामुपकारार्थं यतो लोकस्त्रिरंगवान् ।
पठनाच्छ्रवणाच्चास्य स्मरणात् करणादपि ॥१०५॥
अनुमोदनदानाच्च सहाय्यकरणादपि ।
व्रतपुण्यं लभेतैव भुक्तिं मुक्तिमवाप्नुयात् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने प्रकीर्णकानामेकषष्टिव्रतानां संक्षेपतो निरूपणनामा चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

**श्रीनारायणीश्रीरुवाच—**

अक्षराधिपतेऽनादिकृष्णनारायणेश मे ।
गोलोकाधिपते कृष्ण वैकुण्ठेश नरायण ॥ १ ॥
भूमन्नव्याकृतनाथ वासुदेवाऽमृतेश्वर ।
श्रीपते श्रीपुरवासिन् व्रतानि यानि तानि वै ॥ २ ॥
कर्तुं नैव हि शक्तो यस्तस्य मुक्तिः कथं भवेत् ।
स्त्रिया बालस्य वृद्धस्य रुग्णस्य पशुपक्षिणाम् ॥ ३ ॥

**श्रीपुरुषोत्तम उवाच—**

मम नामस्मरणेन तस्य मुक्तिर्भवेद् रमे ।
"अनादिश्रीकृष्णनारायण श्रीकृष्णसत्पते ॥ ४ ॥
श्रीकृष्ण श्रीपते श्रीमन्नारायण नरायण ।
गोविन्द माधव विष्णो स्वामिन्नरेश्वराऽच्युत ॥ ५ ॥
हरिकृष्ण नीलकण्ठ महालक्ष्मीसुखावह ।
बालकृष्ण दयासिन्धो श्रीमद्गोपालनन्दन ॥ ६ ॥
कंभराश्रीनन्दन त्वमश्वपट्टसरोऽधिप ।
कुंकुमवापिकातीर्थकृतावास हृदि स्थित ॥ ७ ॥
राम श्रीपुण्डरीकाक्ष ब्रह्मप्रियापते विभो ।
हरिप्रियाधिनाथ त्वं रक्ष मोक्षय बन्धनात्" ॥ ८ ॥
इत्येवं मम नाम्नां वै कीर्तनं मोक्षदं भवेत् ।
अथापि मम वासस्य क्षेत्रस्याऽक्षरसंज्ञिनः ॥ ९ ॥
अश्वपट्टसरसश्च कुंकुमवापिकाभुवः ।
तीर्थस्याऽस्य च माहात्म्यं शृणुयाच्च गृणीत च ॥१०॥
लक्ष्मीनारायणसंहितायाः शृण्वीत वै कथाः ।
श्लोकानां लक्षमेकं च तदूर्ध्वं पञ्चविंशतिः ॥११॥
सहस्राणीति शृणुयात् सपादलक्षसंहिताम् ।
धर्मार्थकाममोक्षेच्छापूरिकां भुक्तिमुक्तिदाम् ॥१२॥
अनादिश्रीकृष्णनारायणोऽहं संहितात्मकः ।
द्वितीयेनाऽऽगमेनैव रूपेणाऽस्मि स्थितो भुवि ॥१३॥
जीवलोकेषु सर्वत्रेश्वरलोकेषु वै तथा ।
अक्षरेऽपि संहितात्मा स्थितोऽस्मि शब्दमूर्तिकः ॥१४॥

अध्यायं वा प्रकरणं सन्तानं श्लोकमेव वा ।
यः पठिष्यति भूतात्मा मुक्तात्मा स भविष्यति ॥१५॥
श्रोष्यति स्थिरचित्तात्मा ब्रह्मात्मा स भविष्यति ।
वाचका ये नमस्यन्ति मे भविष्यन्ति पावनाः ॥१६॥
पूजां चाऽस्य करिष्यन्ति ते यास्यन्ति दिवं परम् ।
लोमशस्याश्रमःतीर्थे गत्वा वत्स्यन्ति येऽनिशम् ॥१७॥
तेषां भुक्तिस्तथा मुक्तिः कृपया मे करं गता ।
अर्कवर्णविमानेन प्रयास्यन्ति पराऽक्षरम् ॥१८॥
प्रशंसां ये करिष्यन्ति ते यास्यन्ति श्रियाः पुरम् ।
नार्यस्तीर्थे करिष्यन्ति यास्यन्ति ललितापुरम् ॥१९॥
नारायण्या श्रिया साकं मोदिष्यन्तेऽक्षरे हि ताः ।
शिवराज्या तथा लक्ष्म्या साकं स्थास्यन्ति धामनि ॥२०॥
कृष्णं कान्तं च मां लब्ध्वा मोदिष्यन्ते निरन्तरम् ।
अहं तीर्थे परं लक्ष्मि त्वं तीर्थं मम सदृशम् ॥२१॥
आवयोर्वासभूमिश्च तीर्थं चाक्षरसदृशम् ।
सौराष्ट्रे आनर्तदेशे चाश्वपट्टसरोऽभितः ॥२२॥
भद्रावत्या दक्षिणे च शत्रुंजयायाः पश्चिमे ।
रैवताद्रेः पूर्वभागे व्याघ्रारण्योत्तरक्षितौ ॥२३॥
शतक्रोशप्रविस्तारवर्तुलक्षेत्रमेव मे ।
मोक्षदं पापहं लक्ष्मि पुरुषार्थसमस्तदम् ॥२४॥
अश्वपट्टसरःस्नाता दिवं मोक्षं प्रयान्ति वै ।
मण्डलं कुंकुमवापीक्षेत्रात्मकं हरिर्ह्यहम् ॥२५॥
रक्षामि सर्वथा देवैर्मुक्तैरीशानकोटिभिः ।
कुंकुमवापिकाबद्रीं रक्षाम्यहं प्रियां मम ॥२६॥
तां स्मरन् पापदाहे वै शक्तो भवति मानवः ।
दर्शनात् तद्बदर्यास्तु नामसंकीर्तनादपि ॥२७॥
मृत्तिकालंभनात्तस्या नरः पापात्प्रमुच्यते ।
योजनानां सहस्रेषु बदर्याः स्मरणान्नरः ॥२८॥
नारी वा बालभावो वा लभते परमां गतिम् ।
बदरीपत्रपुष्पाणां स्पर्शाद् भद्राणि विन्दते ॥२९॥
अवगाह्य च पीत्वा तु पुनात्यासप्तमं कुलम् ।
मनसा चिन्तयन् बद्रीं कामानाप्नोति पुष्कलान् ॥३०॥
कुंकुमवापिकां गत्वा बद्रीश्रीसमशोभिताम् ।
ब्रह्मचारी वसेन्मासं पितॄन् देवाँश्च तर्पयेत् ॥३१॥
ईप्सिताँल्लभते कामान् यत्र यत्र स जायते ।
देवदानवगन्धर्वा ऋषयः सिद्धचारणाः ॥३२॥
बद्रीं दृष्ट्वा जलं पीत्वा प्रयाता धाम मेऽक्षरम् ।
आर्तानां च दरिद्राणां निश्चितव्यवसायिनाम् ॥३३॥
कुंकुमवापिकाबद्रीतुल्यं चान्यन्न मोक्षदम् ।
व्याधितो यदि वा दीनो वृद्धो बद्रीनिषेवणात् ॥३४॥
बदर्याः सन्निधौ यद्वा प्राणाँस्त्यजेत्तु दैवतः ।
दीप्तकाञ्चनवर्णाभैर्विमानैः सूर्यसन्निभैः ॥३५॥
कृष्णधामानि यात्येव मोदते शाश्वतीः समाः ।
ईप्सितान् लभते सर्वान् कामान् भोग्यादिसंभृतान् ॥३६॥
सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमायुतैः ।
विमानैश्चांगनाकीर्णैर्मोदते शाश्वते पदे ॥३७॥
सर्वकामफला वृक्षा मही यत्र हिरण्मयी ।
सर्वरसाश्च क्षितयस्तत्र लोके महीयते ॥३८॥
बदरीं स्मरमाणोऽपि तथा कुंकुमवापिकाम् ।
प्राणं त्यक्त्वा ब्रह्मलोकं प्रयात्येव परात्परम् ॥३९॥
कर्मणा मनसा वाचा धर्मसत्यावलम्बनः ।
कुंकुमवापिकाक्षेत्रे यस्तु गां सम्प्रयच्छति ॥४०॥
सुवर्णमणिमुक्ताश्च धनं धान्यं तथाऽम्बरम् ।
स्वकार्ये पितृकार्ये च देवाऽर्हणेऽपि वाऽर्पयेत् ॥४१॥
अनन्तगुणितं तस्य सम्पद्यतेऽक्षरे स्थले ।
गवां शतसहस्रेभ्यो दद्यादेकां पयस्विनीम् ॥४२॥
पुत्रान् दासाँस्तथा भृत्यान् गौर्दत्ताऽत्रैव तारयेत् ।
कुंकुमवापिकाक्षेत्रे यस्तु कन्यां प्रयच्छति ॥४३॥
विवाहविधिना तस्य धाम्नि पुण्यमनन्तकम् ।
श्रीकृष्णस्य मणिश्चायं सौराष्ट्रो नित्यविग्रहः ॥४४॥
प्रलयेऽपि न नाशोऽस्य मम वासेन पद्मजे ।
अश्वपट्टसरस्येव राजसूयाश्वमेधयोः ॥४५॥
स्नात्वा फलं लभ्यते वै शाश्वतं चाऽपुनर्भवम् ।
दशतीर्थसहस्राणि षष्टिकोट्यस्तथा रमे ॥४६॥
वसन्ति तानि सर्वाणि मम वासात्मकेऽत्र तु ।
स्वर्णनारीप्रदाताऽत्र स्वर्गगो जायते ततः ॥४७॥
उर्वशीसदृशीनां तु कन्यानां लभते शतम् ।
मध्ये नारीसहस्राणां बहूनां स पतिर्भवेत् ॥४८॥
अश्वपट्टसरो यत्र सिद्धक्षेत्रं हि तन्मम ।
तत्राऽवलुण्ठ्य पापात्मा जायते पंक्तिपावनः ॥४९॥
पवित्राणां पवित्रं च मंगलानां सुमंगलम् ।
मोक्षदानां मोक्षदं च कुंकुमवापिकास्थलम् ॥५०॥
सरसश्चोत्तरे भागे पातालादक्षयाऽऽपगा ।
श्वेतद्वीपमहागंगा लक्ष्मीनारायणेरिता ॥५१॥
वहत्यन्तर्जले श्वेता भुक्तिमुक्तिप्रदायिनी ।
विष्णुपदी स्वयं स्वर्गाददृश्याऽत्र निमीलति ॥५२॥

ब्रह्महृदश्च मे पादान्नित्यं तटागगोऽस्ति च ।
सुधासरिद् दिवः स्थानाद् वारिष्वस्य प्रवर्तते ॥५३॥
ह्यमरास्तेन सर्वे वै वर्तन्तेऽश्वसरःक्षितौ ।
अनाशकफलं चात्र लभते तीर्थकृज्जनः ॥५४॥
मासमेकं तु यः स्नायादश्वपट्टसरोजले ।
मुच्यते सर्वपापेभ्यः स गच्छेत्परमं पदम् ॥५५॥
अज्ञानेन तु यस्येह तीर्थयात्रादिकं भवेत् ।
सर्वकामसमृद्धे स स्वर्गलोके महीयते ॥५६॥
ह्येकदा लोमशो देवो ययौ प्रयागभूतलम् ।
प्रयागस्तत्र नासीद्वै भरद्वाजोऽभवन्मुनिः ॥५७॥
भरद्वाजाय चाऽपृच्छल्लोमशस्तीर्थराजकः ।
क्व यातोऽद्य मुने तस्य दर्शनं मे न जायते ॥५८॥
भरद्वाजस्तदा प्राह कुंभयोगेन मानवैः ।
महापापातिपापानि स्नात्वाऽर्पितानि यानि तु ॥५९॥
तानि क्षालयितुं यातः प्रयागोऽश्वसरोवरम् ।
यत्र कुंकुमवापीति तीर्थे लक्ष्मीः स्वयं स्थिता ॥६०॥
अनादिश्रीकृष्णनारायणो यत्र वसत्यपि ।
तत्र गतः प्रयागोऽस्ति पश्य चायास्यति द्रुतम् ॥६१॥
लोमशस्तत्र वाटं च दृष्ट्वा मुहूर्तमावसत् ।
प्रयागस्तावदायातो विधूयाऽघानि सर्वथा ॥६२॥
लोमशस्तं प्रपूज्यैव ययौ बदरिकावनम् ।
तत्र नाऽऽसीद्धि बदरी दिव्या नारायणाश्रया ॥६३॥
नाऽऽलोकिता लोमशेन तदा तनुऋषिः स्वयम् ।
पृष्टः क्व बदरीयात्रा कदा चाप्यागमिष्यति ॥६४॥
तनुः प्राह गता चास्ते सौराष्ट्रेऽश्वसरोवरम् ।
कुंकुमवापिकाक्षेत्रे श्रीपतिं पुरुषोत्तमम् ॥६५॥
प्राणपतिं सेवयितुं बालकृष्णं प्रियं प्रभुम् ।
कन्यारूपा वर्तते सा ब्रह्मप्रियासु शोभना ॥६६॥
वधूर्भूत्वा हरेर्दासी लक्ष्म्या सह विराजते ।
तापसी सा क्वचित्तत्र कुंकुमवापिकातटे ॥६७॥
बदरीवृक्षरूपेण वर्तते मुक्तकोटिका ।
दीर्घिकाया उपर्यैव विमानं वै वितन्वती ॥६८॥
उत्तरे भूतले चास्ते यच्छाखा दीर्घिकोपरि ।
वर्तन्ते छत्ररूपा वै श्रीकृष्णप्रेरिता सदा ॥६९॥
विशालाक्षी हरेः पत्नी या सा तत्र विराजते ।
बदरी सा स्वयं याऽत्र सा तत्र राजते मुने ॥७०॥
रूपान्तरेण चात्रापि वर्तते भगवत्कृते ।
हरेर्निवासवेलायां छायाप्रदाऽत्र जायते ॥७१॥
सेयं मध्याह्नवेलायामत्रागमिष्यति द्रुतम् ।
एवं तनोर्महर्षेर्वै ज्ञात्वा श्रीलोमशो मुनिः ॥७२॥
तस्थावामध्यदिवसं कन्या सा बदरी सती ।
तूर्णं व्योमपथेनाप्यायाता बदरिकाऽऽभवत् ॥७३॥
लोमशस्तां प्रपूज्यैव तदधः श्रीनरायणम् ।
प्रपूज्यैव ययौ बालकृष्णसरोवरं महत् ॥७४॥
मानसं च सरः स्नात्वा व्योम्ना सौराष्ट्रमाययौ ।
निश्चितं च ततः कृत्वोवास नित्यं ममालये ॥७५॥
अश्वपट्टसरोभूमौ माहात्म्यं प्रविदन् क्षितेः ।
बदरी सा महालक्ष्मीर्नारायणेन वै मया ॥७६॥
नित्यं स्थातुं समाज्ञप्ता वर्तते दीर्घिकातटे ।
कालान्तरे दृश्यरूपाऽप्यदृश्याऽपि भविष्यति ॥७७॥
भक्तानां समवाये तु पुनर्दृश्या भविष्यति ।
ब्रह्मप्रियास्तथाऽन्याश्च बदरीरूपधारिकाः ॥७८॥
दीर्घिकासहसख्यस्तु भूत्वा तज्जलवृत्तयः ।
दृश्यास्तत्र भविष्यन्ति रिक्ता भूमिर्न जायते ॥७९॥
हरिप्रियास्तथा देव्यो वर्तन्ते चात्र वल्लिकाः ।
अनारकलिकानाम्नी दाडिमीरूपधारिणी ॥८०॥
उत्तेजिनी मम पत्नी चिञ्चारूपेण वर्तते ।
स्नेहिली सुभगा चेति ह्रीङ्कुदीद्वयमस्ति च ॥८१॥
जाम्बुवती मम पत्नी जाम्बिका तत्र वर्तते ।
राविणी गायिका तत्र रावणिकाऽपि वर्तते ॥८२॥
एवमन्या मम कान्ताः सख्यस्तासां तथाऽपराः ।
दुग्धिकानामवल्ली च कन्यका तत्र वर्तते ॥८३॥
पुष्पिका ह्युद्यानरूपा बह्वयः सन्ति द्रुमालिकाः ।
सेवन्ते मां सदा मुक्तानिका दिव्यसुविग्रहाः ॥८४॥
क्वचित्ता वृक्षवल्ल्यश्च क्वचित् कान्ताः सुविग्रहाः ।
क्वचिद् दृश्या भवन्त्येवाऽदृश्याः क्वचिद् भवन्त्यपि ॥८५॥
क्वचिन्मे शयने सन्ति क्वचिन्मे वै गजासने ।
क्वचिन्मे व्योमयाने ता विहरन्ति मया सह ॥८६॥
क्वचित् पार्श्वे रासभूमौ क्वचिन्मे मण्डपेऽपि च ।
क्वचिन्मे हृदये लीना भवन्त्यानन्दभक्षिकाः ॥८७॥
एकरस्यं क्वचित्प्राप्ता मोदन्ते मत्तदात्मिकाः ।
भोजने क्रीडने पाने पृथग् भवन्ति सेवने ॥८८॥
लक्ष्मि यथा वर्तसे त्वं हृदि पार्श्वे च सन्निधौ ।
तथा ता मम वर्तन्ते त्वादृशाः कमलाः शुभाः ॥८९॥
तासां यत्र निवासोऽस्ति सा भूमिश्चाऽक्षरं मम ।
सर्वतीर्थोत्तमं लक्ष्मि तीर्थमूर्धन्यमुत्तमम् ॥९०॥

कुंकुमवापिकातीर्थं कल्पे कल्पे सुराष्ट्रके ।
मदिच्छया भवत्येव ब्रह्माण्डादौ मया कृतम् ॥९१॥
सुराष्ट्रं तव राज्यं च स्वतन्त्रं द्वीपकल्पके ।
कृष्णभूमिः कृष्णतुल्या कार्ष्णी सा मत्स्वरूपिणी ॥९२॥
मोक्षद्वारवती भूमिर्युगे युगेऽपि पावनी ।
सुभद्रा भद्रिकानाम्नी नदी यत्राऽस्ति मत्कृता ॥९३॥
यज्जलस्य स्मरणाच्च स्पर्शनात् कणभक्षणात् ।
पापनाशो भवत्येव स्वर्गं तथाऽक्षरं व्रजेत् ॥९४॥
ममाऽर्थस्य नरस्यापि मम वियोगिनि क्षणे ।
यदैश्वर्याणि लीयन्ते लुटयन्ते स्त्रीविभूतयः ॥९५॥
दस्युभिश्च तदा भद्रा सुभद्रा सरिदुत्तमा ।
नरपत्नी महत्तीर्थस्वरूपा वर्तते जले ॥९६॥
स्नातॄणां भद्रदा नित्यं सर्वभद्रप्रकारिणी ।
कार्यरूपा नदी चास्ते मूर्तिः श्रीपुरुषोत्तमे ॥९७॥
दिव्यरूपा बदर्यां च सन्तुष्टा च स्वसा मम ।
मुक्तानिका मम धाम्नि पञ्चरूपा प्रवर्तते ॥९८॥
सागराः सागरतुल्यसरांसि सरितस्तथा ।
पुण्याः कुंकुमवाप्यां मे वर्तन्ते ब्रह्मरूपिकाः ॥९९॥
सर्वे वेदाश्च यज्ञाश्च मूर्तिमन्तोऽक्षरेऽत्र वै ।
महर्षयः पितरश्च सिद्धाश्च साधवोऽमलाः ॥१००॥
सत्यः साध्व्यश्चक्रवर्त्यश्चक्रधराश्च पार्षदाः ।
मामनादिमुपासन्ते श्रीकृष्णं पुरुषोत्तमम् ॥१०१॥
सिद्धिक्षेत्रं महच्चैतद्धामक्षेत्रं परात्परम् ।
इदं धन्यमिदं स्वर्ग्यमिदं सत्यमिदं सुखम् ॥१०२॥
इदं पुण्यमिदं धर्म्यं पावनं कार्ष्ण्यमुत्तमम् ।
श्रुत्वाप्येतत्तीर्थतीर्थं नाकपृष्ठे सुमोदते ॥१०३॥
जातिस्मरत्वं लभते सर्वस्मरत्वमित्यपि ।
त्रैकालिकं प्रवेत्ति यत् सार्वज्ञ्यं चापि विन्दति ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कुंकुमवापिकातीर्थस्मरणदर्शनादिभिरपि पापिनां मोक्षणमिति निरूपणनामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

श्रीनारायणीश्रीरुवाच—

नारायण जगत्कान्त सर्वरक्षक सर्वग ।
कथं त्रिकालजं मृत्युं जयति मानवो भुवि ॥ १ ॥
मृत्युरनिपरावृत्तो बलवान् केन वार्यते ।
केन रूपेण वा मृत्युर्मानवान् परिधावति ॥ २ ॥

श्रीपुरुषोत्तम उवाच—

शृणु श्रीशिवराज्ञीश्रि नारायणीरमेऽपि च ।
लक्ष्मि समुद्रजे चापि शृणु चाक्षरमाणिकि ॥ ३ ॥
गरुडो मम भक्तो वै समासीनोऽभवद्गृहे ।
जपन् मालां मम ध्यायन् मन्मूर्तिं दिव्यरूपिणीम् ॥ ४ ॥
पृष्टस्तदा जनकेन कश्यपेन सुतो निजः ।
कथं पुत्र महाभक्त योगिन् मृत्युर्निवर्तते ॥ ५ ॥
केन रूपेण मृत्युर्वै समायाति हरत्यपि ।
कथं निःस्पर्शनं तस्य देहिनस्त्विह चर्यते ॥ ६ ॥
श्रुत्वा पक्षी च पितरं समुवाच वदामि तत् ।
भक्त्या निवर्तते मृत्युराश्रयात्परमात्मनः ॥ ७ ॥
दण्डी शस्त्रधरो भिक्षुर्नग्नादिः कालदूतकः ।
समायाति वर्ष्म धृत्वा तद्दंशेन न जीवति ॥ ८ ॥
चितावल्मीकशैलादौ कूपे च विवरे तरोः ।
दंशे दंष्ट्रात्रयं लग्नं दष्टो देही न जीवति ॥ ९ ॥
षष्ठ्यां च कर्कटे मेषे मूलाऽऽश्लेषामघादिषु ।
कक्षाश्रोणिगले सन्धौ शंखकर्णोदरादिषु ॥१०॥
वक्त्रे बाहौ च ग्रीवायां पृष्ठे दष्टो न श्रीपति ।
शेषोऽर्कः फणिपश्चन्द्रस्तक्षको भौम ईरितः ॥११॥
कर्कोटो ज्ञो गुरुः पद्मो महापद्मस्तु भार्गवः ।
शंखः शनैश्चरो राहुः कुलिकश्चेति ते ग्रहाः ॥१२॥
तत्तद्ग्रहेषु तज्जातिसर्पदष्टो न जीवति ।
पादांऽगुष्ठः प्रतिपदः स्यात् पादपृष्ठो द्वितीयका ॥१३॥
गुल्फौ नु वै तृतीया स्याज्जानुनी च चतुर्थिका ।
लिंगं भगं पञ्चमीति नाभिः षष्ठीतिथिर्मता ॥१४॥
हृदयं सप्तमी प्रोक्ता स्तनौ चाष्टमिकादिनम् ।
कण्ठस्तु नवमी प्रोक्ता दशमी नासिकापुटौ ॥१५॥
नेत्रे चैकादशी बोध्या कर्णौ द्वादशिका मता ।
भ्रुवौ त्रयोदशीरूपे शंखश्चतुर्दशी मता ॥१६॥
मस्तकं पञ्चदशिका तत्तिथौ तत्स्थले दशेत् ।
तदा कालकवलेन दष्टो देही न जीवति ॥१७॥
पुंसो दक्षिणभागे तु नार्या वामे त्विदं मतम् ।
एतादृशक्षणे दष्टा न जीवन्ति कदाचन ॥१८॥
किन्तु 'ओं गरुड स्वाहा' जपेल्लक्षप्रवर्तनम् ।
जपन् स्पृशेत्पदांगुष्ठे तले पृष्ठे च गुल्फके ॥१९॥

जंघायां जानुभागे च सक्थ्नोर्लिंगे भगे कटौ।
जघने नाभिदेशे च नितम्बे चोदरे हृदि ॥२०॥
स्तनयोः पार्श्वदेशे च बाह्वोश्च करयोस्तले।
अंगुलिषु कफोणे च कण्ठे गले कृकाटके ॥२१॥
हनौ मुखे गण्डके च नासायां च कपोलके।
कर्णयोः कर्णपृष्ठे च ललाटे नेत्रयोर्भ्रुवोः ॥२२॥
कपाले मस्तके चापि शिखायां विन्यसेन्मुहुः।
स एव गरुडो देही जायते मन्त्रमन्त्रणात् ॥२३॥
नाक्रमन्ति च तच्छायां स्वप्नेऽपि विषपन्नगाः।
कालरूपाश्चापि सर्पास्तद्भयाद् विद्रवन्ति वै ॥२४॥
विषं मन्त्रस्य विन्यासात् सर्वं नश्यति लीयते।
'ओं शेषेश्वर नागिनीपते गरुडपृष्ठग ॥२५॥
आस्तीकवाक्फलद् श्रीहरे विषिविषं हर'।
इतिमन्त्रं लक्षवारं जपेत् सिद्धो भवेत्ततः ॥२६॥
प्रयुञ्जीत महाकालोऽप्यपि दूरायते भयात्।
ममाऽनादिकृष्णनारायणनामजपात्तदा ॥२७॥
महाकालोऽपि संयाति विप्रकृष्टो भयान्मम।
जीवाऽयोग्योऽपि देह्यत्र जीवत्येव न संशयः ॥२८॥
श्रीधरस्याऽर्चनं कुर्यात् परिवारान्वितस्य मे।
ध्यात्वाऽऽत्मानं श्रीधराख्यं शंखचक्रगदाधरम् ॥२९॥
ओं श्रीमते पुरुषोत्तमाय नमः परात्मने।
अक्षराय नमश्चेति माणिक्यायै नमो नमः ॥३०॥
पद्मावत्यै जयायै च ललितायै नमो नमः।
सुखदायै च प्रज्ञायै लक्ष्म्यै चापि नमो नमः ॥३१॥
राधिकायै क्रियायै च ज्ञानायै च नमो नमः।
इच्छायै कमलायै च महालक्ष्म्यै नमो नमः ॥३२॥
ओं ह्रीं श्रीधरायापि विष्णवे मे नमो नमः।
अभिषेकं तथा वस्त्रं ततो यज्ञोपवीतकम् ॥३३॥
गन्धं पुष्पं तथा धूपं दीपमन्नं प्रदक्षिणम्।
दद्याज्जपेन्मनुं मे च ध्यायेन्मां च हृदि स्थितम् ॥३४॥
शुद्धस्फटिकसंकाशं कोटिसूर्यसमप्रभम्।
प्रसन्नवदनं सौम्यं स्फुरन्मुकुटकुण्डलम् ॥३५॥
किरीटिनमुदारांगं वनमालाविभूषितम्।
परब्रह्मस्वरूपं मे चिन्तयेच्छोभनं परम् ॥३६॥
श्रीनिवासाय कृष्णाय नमः श्रीपतये नमः।
श्रीधराय सशार्ङ्गाय श्रीप्रदाय नमो नमः ॥३७॥
श्रीवल्लभाय शान्ताय श्रीमते ते नमो नमः।
श्रीपर्वतनिवासाय नमः श्रेयस्कराय च ॥३८॥
श्रेयसाम्पतये चापि श्रीविश्रामाय ते नमः।
नमः श्रेयःस्वरूपाय श्रीकराय नमो नमः ॥३९॥
श्रिया साकं शयानाय शरण्याय नमो नमः।
पुष्पाञ्जलिं ततो दत्वा श्रीश्वरं वै विसर्जयेत् ॥४०॥
एवं पूजाप्रकर्ता च निर्विषो जायते ध्रुवम्।
स विधूयेत पापानि मे प्रयाति परं पदम् ॥४१॥
'ओं श्रीं ह्रीं श्रीधराय श्रीविष्णवे जिष्णवे नमः'।
सर्वव्याधिहरश्चायं सर्वपीडाहरो मनुः ॥४२॥
सर्वपापहरश्चापि भुक्तिमुक्तिप्रदायकः।
सर्वगरलसंहर्ता ह्यभिचारविनाशकः ॥४३॥
सर्वेष्टपूरकश्चापि मम धामप्रदोऽपि च।
मत्स्वरूपः स्वयं भूत्वा जपेज्जीवेन्न संशयः ॥४४॥
यन्मासे यद्दतौ यश्च सूर्येण सह भोगवान्।
सर्पोऽपि वर्तते तस्य नाम्ना शपथमादिशेत् ॥४५॥
तेन सर्पविषं तूर्णं शाम्यत्येव न संशयः।
शृणु लक्ष्मि कथयामि मासससर्पार्कप्रभृतीन् ॥४६॥
ससकं सहं वसति व्यूहं सूर्यात्मनो हरेः।
एकः सूर्यः क्रियाकल्पैर्बहुधा वर्ण्यते तथा ॥४७॥
धाता सूर्योऽप्सरा पुञ्जिकस्थली हेतिराक्षसः।
नागो वासुकी रथकृद्यक्षः पुलस्त्यऋषीश्वरः ॥४८॥
तुम्बुरुश्चापि गन्धर्वश्चैत्रेऽनुवर्तयन्ति ते।
सूर्योऽर्यमाऽप्सरा पुञ्जिकस्थली हेतिराक्षसः ॥४९॥
नागः कच्छनीरोऽथौजा यक्षः पुलहो वै ऋषिः।
नारदश्चापि गन्धर्वो वैशाखे वर्तयन्ति ते ॥५०॥
मित्रः सूर्योऽप्सरा मेनका पौरुषेयराक्षसः।
नागस्तक्षको रथस्वनो यक्षोऽत्रिः ऋषिस्तथा ॥५१॥
हाहा चैवापि गन्धर्वो ज्येष्ठेऽनुवर्तयन्ति ते।
वरुणः सूर्योऽप्सरा रंभा चित्रस्वनस्तु राक्षसः ॥५२॥
शुक्रो नागः सहजन्यो यक्षो वशिष्ठकः ऋषिः।
हूहूश्चैवापि गन्धर्वश्चाषाढे वर्तयन्ति ते ॥५३॥
इन्द्रः सूर्योऽप्सरा प्रम्लोचा वर्यो राक्षसस्तथा।
नाग एलापत्रः श्रोत्रा यक्षोऽङ्गिराः ऋषिस्तथा ॥५४॥
विश्वावसुश्च गन्धर्वः श्रावणे वर्तयन्ति ते।
विवस्वान् सूर्योऽप्सराऽनुम्लोचा व्याघ्रस्तु राक्षसः ॥५५॥
शंखपालो नाग आसारणो यक्षो भृगुः ऋषिः।
उग्रसेनस्तु गन्धर्वो भाद्रपदे भवन्ति ते ॥५६॥
पूषा सूर्योऽप्सरा घृताची वातो राक्षसस्तथा।
नागो धनञ्जयो यक्षः सुरुचिर्गौतमः ऋषिः ॥५७॥

सुषेणश्चेति गन्धर्वो माघमासे भवन्ति ते ।
पर्जन्योऽर्कोऽप्सरा सेनजिती वर्चास्तु राक्षसः ॥५८॥
नाग ऐरावतो यक्षः ऋतुर्भारद्वाजः ऋषिः ।
विश्वो गन्धर्व इत्येते फाल्गुनेऽनुव्रजन्ति वै ॥५९॥
अंशुः सूर्योऽप्सरा चोर्वशी विद्युच्छत्रुराक्षसः ।
नागो महाशंखस्ताक्ष्यों यक्षश्च कश्यपः ऋषिः ॥६०॥
ऋतुसेनश्च गन्धर्वो मार्गशीर्षे भवन्ति ते ।
भगः सूर्यः पूर्वचितिरप्सराः स्फूर्जराक्षसः ॥६१॥
नागः कर्कोटक ऊर्णो यक्ष आयुः ऋषिस्तथा ।
अरिष्टनेमिर्गन्धर्वः पौषेऽनुवर्तयन्ति ते ॥६२॥
त्वष्टा सूर्योऽप्सरास्तिलोत्तमा ब्रह्मापेतरक्षः ।
नागः कम्बलः शतजिद्यक्षो जमदग्निः ऋषिः ॥६३॥
धृतराष्ट्रस्तु गन्धर्वश्चाश्विने वर्तयन्ति ते ।
विष्णुः सूर्योऽप्सरो रंभा मखापेतस्तु राक्षसः ॥६४॥
नागोऽश्वतरो यक्षः सत्यजिद्विश्वामित्रः ऋषिः ।
सूर्यवर्चास्तु गन्धर्वः कार्तिके वर्तयन्ति ते ॥६५॥
स्थानाभिमानिनो ह्येते गणा द्वादशसप्तकाः ।
सूर्या भिन्नानि तेजांसि पाकान् प्रपचयन्ति च ॥६६॥
अप्सरसश्च गन्धर्वा नृत्यगीतिं चरन्ति वै ।
विद्याग्रामणितो यक्षा रथं संयोजयन्त्यपि ॥६७॥
सर्पास्ते रज्जवो भूत्वा यन्ति वै रथबन्धनम् ।
राक्षसाः पृष्ठतो यान्तः प्रेरयन्ति रथं खलु ॥६८॥
ऋषयो वेदमन्त्रैश्च स्तुवन्ति रथिनं प्रभुम् ।
वालखिल्यादयस्ते वै चास्तं प्रति नयन्त्यपि ॥६९॥
एतेषामेव देवानां यथावीर्यं यथातपः ।
यथायोगं यथाधर्मं यथातत्त्वं यथाबलम् ॥७०॥
तथा तपत्यसौ सूर्यस्तेषामिद्धस्तु तेजसा ।
भूतानामशुभं सर्वं व्यपोहति स्वतेजसा ॥७१॥
मानवानां शुभैरेतैर्ह्रियते दुरितन्तु वै ।
दुरितं शुभचाराणां व्यपोहति ममाज्ञया ॥७२॥
तपन्तश्च जपन्तश्च ह्लादयन्तश्च वै प्रजाः ।
गोपायन्ति स्म भूतानि चेहन्ते ह्यनुकम्पया ॥७३॥
तस्माल्लक्ष्मि स्मृताः सूर्या रक्षन्ति दिनकालतः ।
अप्सरसश्चोन्मादनविभ्रमाद् रक्षयन्ति च ॥७४॥
राक्षसा निशि रक्षौघै रक्षन्ति दुष्टकालतः ।
नागा नागविषाद्यैश्च रक्षन्ति पूजितास्तदा ॥७५॥
यक्षा रक्षन्ति च यक्षवासाद्यैर्विवरैः सदा ।
ऋषयस्तपसा मन्त्रै रक्षन्ति पूजिताश्च ते ॥७६॥
गन्धर्वाः पूजिता लोकान् रक्षन्ति सम्पदाम्प्रदाः ।
एवं कालमयाः सर्वे स्वस्वकालेन योजिताः ॥७७॥
पूजिता वन्दिताश्चापि प्रसन्ना रक्षयन्ति ते ।
अथ लक्ष्मि कथयामि मन्त्रं मृत्युञ्जयं वरम् ॥७८॥
येन मृत्युर्भवेज्जन्मवता जप्तेन सञ्जितः ।
अहं नारायणोऽनादिः परमेशोऽस्ति मद्वपुः ॥७९॥
महाकालो मम शक्तिस्तत्पुत्री मृत्युरेव ह ।
ममैश्वर्यस्य पुत्री सा मृत्युर्मया विनिर्मिता ॥८०॥
कालजिदहं भगवान् मृत्युजिदहं माधवः ।
मम नाम जपेन्नित्यं मृत्युञ्जयेति वै नमन् ॥८१॥
'ओं नमो मृत्युञ्जयाय स्वाहा' जपेदहर्निशम् ।
तेन मृत्युः स्वयं तस्मान्निवर्तते न संशयः ॥८२॥
दुःस्वप्नानि प्रणश्यन्ति दुष्टारि शाकुनान्यपि ।
दुष्टग्रहा निवर्तन्ते दुर्भाग्यं लीयतेऽपि च ॥८३॥
महाभयं विलीयेत चेतयो यन्ति वै लयम् ।
उपद्रवाः प्रणश्यन्ति दैवाश्च भौतिकाश्च ये ॥८४॥
आध्यात्मिका व्याधयश्चाधयो नश्यन्त्युपाधयः ।
आकस्मिकानि दुःखानि विलीयन्ते द्रवन्ति च ॥८५॥
यत्राऽहं तत्र वै नास्ति दुःखं मनाक् कुतोऽति च ।
स्मृतोऽहं सततं लक्ष्मि पूजितोऽहं वसामि च ॥८६॥
हृदये तत्र चानन्दः शाश्वतो वै मया सह ।
भवत्येव हि भक्तानां यत्र श्रीस्तत्र मोदनम् ॥८७॥
अहं त्वं चाक्षरं ब्रह्म मुक्ता वसन्ति तद्धृदि ।
कालो मृत्युश्च पापानि पावनानि हि तत्र तु ॥८८॥
सुखदान्येव जायन्ते सद्भाग्यानि भवन्ति च ।
अभक्तस्यैव लोकेऽत्र पीडा ग्रहादिसंभवा ॥८९॥
नागादिसंभवा चापि दुःखदारिद्र्यसंभवा ।
अनाश्रितानां दुष्टाश्च भवन्ति पीडका रमे ॥९०॥
ममाऽऽश्रितेभ्यस्त्वरितं पलायन्ते हि पीडकाः ।
यमदूताः पलायन्ते निमित्तानि च मृत्यवः ॥९१॥
आत्मानमात्मना साकं योजयेद् भक्तिवर्मकः ।
अन्तरात्मात्मको भूत्वा तादात्म्येनाऽऽस्थितो भवेत् ॥९२॥
कर्मणा मनसा वाचा देहेनेन्द्रियधारया ।
मम तादात्म्यमाप्तस्य कालगन्धो न वर्तते ॥९३॥
मायागन्धो न चाऽऽस्तेऽस्य मृत्युगन्धस्ततः कुतः ।
मोदते मम पार्श्वेऽयं ममांशो ममतां गतः ॥९४॥
यथा श्रीमोदते लोके रमा लक्ष्मीः प्रमोदते ।
अनन्तो मोदते यद्वद् गरुडोऽपि प्रमोदते ॥९५॥

सनत्कुमारः सततं शंकरो मोदते यथा ।
यथा विष्णुर्मोदते च नारायणः प्रमोदते ॥९६॥
नरो नारायणश्चापि हरिःकृष्णोऽपि मोदते ।
तथा प्रमोदते भक्तः कालपाशविवर्जितः ॥९७॥
नारी नामजपा या सा माणिक्या सदृशी भवेत् ।
माणिक्याश्रीः सदाऽधिष्ठानात्मिका मम पद्मजे ॥९८॥
यत्राऽहं तत्र सर्वाण्यैश्वर्याणि मम सन्ति हि ।
कालमायादिके तत्र कर्म दुःखं न विद्यते ॥९९॥
'अनादिश्रीकृष्णनारायणाय ओं नमो नमः' ।
इत्येवं जपतो लक्ष्मि पातकं न स्पृशेत् क्वचित् ॥१००॥
इत्युक्तं मे मन्त्रबलं बाध्यते दुर्लभं बलात् ।
मम नामबलं सर्वबलाधिकं प्रविद्यते ॥१०१॥
मम मूर्तिबलं सर्वबलाधिकं सदा प्रिये ।
मद्बलं चापि सर्वेभ्यो बलेभ्योऽधिकमेव ह ॥१०२॥
तदादाय जयेत् कालं मायां पापं च कर्म च ।
संसारस्य विषं चापि शत्रून् विषयगोचरान् ॥१०३॥
सर्वं विषं विजित्यैवाऽमृतं पीत्वा मदात्मकम् ।
भुक्तिं मुक्तिं लभेन्मर्त्योऽमरः प्रजायतेऽक्षरे ॥१०४॥
पठनाच्छ्रवणादस्य स्मरणाच्चिन्तनादपि ।
कालमायाभयं त्यक्त्वा मोदते मत्कृताश्रयः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कालमृत्युस्वरूपतद्बलप्रदर्शनं तज्जयार्थं तत्तन्मन्त्रजपस्य परमेश्वरादिपूजनप्रकारस्य च निरूपणनामाद्वाचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

**श्रीनारायणीश्रीरुवाच—**

परमेश कृपासिन्धो कृते धर्माः पृथग्विधाः ।
त्रेतायां च ततोऽप्यन्ये भवता पूर्वमीरिताः ॥ १ ॥
द्वापरे कीदृशाः सन्ति यत्र लोकाश्च श्रद्धया ।
प्रवर्तमाना धर्मार्थकाममोक्षान् प्रयन्ति वै ॥ २ ॥
मन्त्रान्नामानि भक्तिं च कुर्वाणास्ते कथंविधाः ।
सत्यहीना अपि मुक्तिं व्रजिष्यन्ति दिवं च वा ॥ ३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं सत्यधर्मास्तु मुक्तिदाः ।
त्रेताधर्माः स्वभावात्त महैश्वर्यप्रदस्ततः ॥ ४ ॥
प्रददत्यैश्वरान् लोकान् भौमवैराजवैष्णवान् ।
द्वापरस्य वृषा लक्ष्मि निकृष्टा कल्मषस्पृशः ॥ ५ ॥
तन्नाशार्थं कृष्णरूपो भवामि द्वापरे मुहुः ।
मम योगेन पापा वै तरन्ति साधुसंगमात् ॥ ६ ॥
शृणु द्वापरधर्माणि ह्रासं गतानि पूर्वतः ।
यत्र भक्तिप्रधाना वै तरन्ति नेतरे जनाः ॥ ७ ॥
त्रेतासिद्धयः सर्वास्तु नश्यन्ति द्वापरे युगे ।
लोभो धैर्यरहितत्वं वाणिज्यं कपटान्वितम् ॥ ८ ॥
अतत्त्वनिश्चयश्चापि वर्णानां ध्वंस इत्यपि ।
विपर्ययस्तु सर्वेषु कर्मणां स्वस्वयोगिनाम् ॥ ९ ॥
यात्रा वधः परो दण्डो मानो दर्पो बलं क्षतिः ।
अक्षमा च रजस्तमो भूयो द्वापरके युगे ॥१०॥
आश्रमाश्चापि धर्मार्थाः संकीर्यन्ते वृषाऽवराः ।
श्रुतिशास्त्रेषु वैमत्यं बहुतर्ककृतार्थता ॥११॥
द्वैधमुत्पद्यते तेन निश्चयो नाधिगम्यते ।
अनिर्णीतार्थयोगेन धर्मतत्त्वं ह्रसत्यपि ॥१२॥
वैमत्येन कृतो धर्मो व्याकुलश्चावसीदति ।
वेदश्चतुर्धा कृष्णेन व्यासेन व्यस्यते ततः ॥१३॥
ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः ।
संहिता नूतनाश्चापि जायन्ते तु महर्षिभिः ॥१४॥
द्वापरेषु प्रवर्तन्ते भिन्नार्थैस्तैः स्वदर्शनैः ।
एवमाध्वर्यवं कर्म प्रस्थानैर्विविधैस्ततः ॥१५॥
विकल्पैः संक्षयैश्चापि गौणैर्मुख्यैः प्रकाण्डकैः ।
विभिन्नगुणकं तत्र तत्र देशे प्रवर्तते ॥१६॥
एवं श्रद्धा च विश्वासो धारणा भावनाऽर्हणा ।
नश्यन्ति कालयोगेन सत्यं चापि विनश्यति ॥१७॥
नियाम्यत्वं स्थितिश्चात्र नीतिर्नश्यन्ति छद्मिनी ।
कापट्यं चाप्यसत्यं च प्रतारित्वं विवर्धते ॥१८॥
एवं विपर्ययोत्पन्ना कुदृष्टिर्द्वापरे भवेत् ।
मरणं विघ्नजातानि जायन्ते च मुहुर्मुहुः ॥१९॥
उपद्रवा व्याधयश्च चिन्ताश्चाकस्मिकोद्भवाः ।
विषयाभिसन्धयश्च जायन्ते द्वापरेऽधिकाः ॥२०॥
वृक्षगुल्मौषधयश्च प्रसह्य तु यथाबलम् ।
स्वकीयाश्च प्रकुर्वन्ति प्रजास्तु द्वापरे तदा ॥२१॥
ओषधयो विलोक्यैतत् प्रविष्टास्तु धरां प्रति ।
फालकृष्टाः प्ररोहन्ति द्वापरे वै ततः परम् ॥२२॥
मध्ये तु द्वापरे तत्र नारोहन्त्योषधीगणाः ।
विना बीजं तदा बीजकृषिः समन्ततो भवेत् ॥२३॥
बीजं मूलं च शाखां च कन्दं दण्डं च नालकम् ।
फलं पत्रं मञ्जरीं च ग्रन्थिं तदंकुरं च वा ॥२४॥

जटां त्वचं च काण्डं च रोपयन्ति तदा क्षितौ ।
तदङ्कुरा ओषधयस्ता जायन्ते द्वापरे ततः ॥२५॥
जीविका तदधीना च सर्वेषां जायते तदा ।
व्यापाराश्चौषधीनां च जायन्ते द्वापरे ततः ॥२६॥
अन्यथा जीवितं तासां नास्ति त्रेतायुगात्यये ।
वार्तावृत्तिं कृषिं चापि वाणिज्यं चाश्रयन्ति ते ॥२७॥
हस्तोद्भवा आपश्चापि भवन्ति भूखनैस्तदा ।
कूपाश्च दीर्घिकाश्चापि प्रवर्तन्ते तदाऽभितः ॥२८॥
स्वत्वयुक्ता बलिनश्च प्रजायन्तेऽधिपास्तदा ।
दुर्बला जनहीनाश्च स्वत्वहीना भवन्ति च ॥२९॥
लुप्यन्ते बलिभिर्वृक्षवल्लीप्रभृतिजीविकाः ।
स्त्रियः क्षेत्राणि पुत्र्यश्च सुता धनानि धेनवः ॥३०॥
मर्यादायाः प्रतिष्ठार्थं ब्रह्मा क्षत्रं महाबलम् ।
क्षतात् त्रातुं प्रजामूर्ध्नि स्थापयत्येव भूभृतम् ॥३१॥
वर्णाश्रमप्रतिष्ठां च करोति निर्भयां तदा ।
अवृष्टिर्मरणं व्याधिः प्रवर्तन्तेऽभितस्तदा ॥३२॥
धर्मसर्गो यथा चास्ते तथा चाऽधर्मसर्गकः ।
समतुलो द्वापरे वै मानवेषु प्रवर्तते ॥३३॥
अर्धद्वापरपर्यन्तं त्रेताधर्माः क्वचित् क्वचित् ।
विद्यन्ते तेऽपि नश्यन्ति द्वापरार्धे गते सति ॥३४॥
सत्यं चानृतसहितं चाऽस्तेयं स्तेयमिश्रितम् ।
अहिंसा हिंसया मिश्रा शीलं दुःशीलयोजितम् ॥३५॥
परिग्रहो लोभयुक्तो नीतिरन्यायसंस्पृशा ।
शौचं चाऽशौचसंस्पृष्टं सन्तोषस्तृष्णिकान्वितः ॥३६॥
तपः प्रशंसासंभिन्नं स्वाध्यायो धनकामनः ।
ईशध्यानं कष्टनाशार्थकं भक्तिर्निजार्थिकी ॥३७॥
सुतदारादिकं चार्धस्वार्थं चार्धवृषार्थकम् ।
भृत्यास्तथाविधाश्चार्धस्वार्थाश्चार्धपरार्थकाः ॥३८॥
राजानोऽपि निजस्याऽर्धस्वार्थाश्चार्धपरार्थकाः ।
ऋषयोऽपि तथा चार्धस्वार्थतपःपरायणाः ॥३९॥
द्वापरे सम्प्रजायन्ते सम्बन्धाश्चार्धनैजिकाः ।
धर्मकार्याणि यज्ञाश्च स्वार्धार्थसाधकार्थकाः ॥४०॥
वृष्ट्या चार्धं कूपजलैरर्धं भोज्यान्नमीयते ।
द्वापरान्तरभागे वै निश्चितायुर्न विद्यते ॥४१॥
वृद्धे जीवति पुत्राद्या म्रियन्तेऽर्धानृता यतः ।
वृक्षाश्चार्धाः फलन्त्येव वल्लिकाश्च स्त्रियस्तथा ॥४२॥
पुरुषाश्चार्धधूर्तया भवन्ति द्वापरार्धके ।
अर्धविश्वासिनो लोका मिथो व्यवहरन्ति च ॥४३॥

जायमाने शुभे कार्ये तदर्धं फलति ध्रुवम् ।
नदीवेगास्तथार्धापः ऋतवश्चार्धसत्फलाः ॥४४॥
त्रेतार्धायुष्यजनताः क्वचित् क्वचिद्भवन्ति च ।
संकल्पात् सत्ययुगे वै सृष्टिरस्ति स्थले स्थले ॥४५॥
त्रेतायां दर्शनाच्चापि सृष्टिरीतिः प्रवर्तते ।
त्रेतान्ते स्पर्शनात् सृष्टिर्द्वापरे मिथुनादपि ॥४६॥
द्वापरार्धे गते सृष्टिर्मिथुनाद् विफला क्वचित् ।
एवं सर्वा हि खनयो बीजाधान्यो भवन्ति वै ॥४७॥
पुरुषा मोघवीर्याश्च वासनार्धप्रवर्तनाः ।
विषयार्धकृतस्नेहाः प्रवर्तन्तेऽर्धरागतः ॥४८॥
अर्धरुग्णाः प्रजाश्चापि बलार्धवत्य इत्यथ ।
अर्धह्रस्वाः पूर्वतश्च प्रवर्तन्ते द्वये युगे ॥४९॥
मन्त्राश्चार्धे फलन्त्येव गुरवश्चार्धबोधिनः ।
दानं व्रतं दया धर्मश्चार्धभावं भजन्ति वै ॥५०॥
शिष्याश्चार्धनिदेशस्था वर्तन्तेऽर्धस्वमानिनः ।
नार्यश्चार्धं पातिव्रत्यं समास्थाय वधूटिकाः ॥५१॥
कुटुम्बं सर्वमेवाऽत्र द्वापरेऽर्धार्थसाधकम् ।
आश्रमाश्चाऽर्धवृषिणो वर्णाश्चार्धनिजप्रथाः ॥५२॥
देवाश्चार्धफलदाश्च स्वामिनोऽर्धसुरक्षिणः ।
युद्धेषु चार्धविजयश्चार्धभटाः ऋतंजयाः ॥५३॥
प्रधानाश्चार्धगौणाश्च राज्यं चार्धं प्रकाशते ।
भाग्यं चार्धं फलत्येव निर्णयोऽर्धऋतंभरः ॥५४॥
अर्धरसाः प्रजायन्ते पूर्णरसाढ्यमूलिनः ।
द्वापरे शपथाश्चापि लक्ष्मि चार्धयथार्थकाः ॥५५॥
वचनानि श्रेष्ठिनां च तथैवाऽर्धस्थिराणि च ।
विश्वासो महतां चापि तथैवार्धकृतास्पदः ॥५६॥
सत्यलोकाद्धि सिद्धनामर्धाः सर्वत्र गामिनः ।
पितरश्चापि तद्वच्च भवन्ति चार्धगामिनः ॥५७॥
सुराश्चापि तथा भूमौ समायान्त्यर्धसंख्यया ।
पातालादिस्थिताश्चापि तथैवाऽर्धविहारिणः ॥५८॥
अशक्ताः सर्वशस्तत्र द्वापरेऽर्धप्रजा रमे ।
ओषधयश्चार्धबला भिषजोऽर्धपरीक्षकाः ॥५९॥
दैवज्ञाश्चार्धबोद्धारश्चिकित्साऽर्धाश्चिकित्सकाः ।
यन्त्रतन्त्राणि चार्धानि तथाऽर्धकार्यदानि वै ॥६०॥
मध्ये भग्नानि जायन्तेऽन्तराले लम्बयन्ति च ।
वार्धक्याऽदार्ढ्यभावेऽपि क्षीणदर्शनशक्तयः ॥६१॥
क्षीणादानगतिप्रायाः क्षीणानन्दा भवन्ति च ।
क्षीणश्रवणस्पर्शाद्याः क्षीणास्वादनगन्धिनः ॥६२॥

क्षीणसत्त्वार्धबलिनो द्वापरे संभवन्ति च ।
सत्यगृहं सुराऽऽवासा गुरुकुलानि धार्मिका ॥६३॥
प्रायशोऽर्धे विनश्यन्ति द्वापरेऽर्धे गते क्षितौ ।
यज्ञशाला उत्सवाश्च देवालयाश्च साधवः ॥६४॥
सत्यमानसरत्नानि सत्यतीर्थानि यानि च ।
अर्धं तानि विनश्यन्ति द्वापरेऽर्धे गते क्षितौ ॥६५॥
पवित्रताऽर्धनाशश्च स्पृश्याऽस्पृश्याऽर्धनाशनम् ।
वन्ध्याऽवन्ध्यार्धनाशश्च पूज्यपूजार्धनाशनम् ॥६६॥
भोग्यभोगार्धनाशश्च पेयपानार्धनाशनम् ।
ध्येयध्यानार्धनाशश्च द्वापरेऽर्धे गते क्षितौ ॥६७॥
पुरुषार्थाऽर्धनाशश्च कल्पितार्धविनाशनम् ।
दार्ढ्यं चार्धास्तित्वफलं प्रारंभाश्चार्धगोचराः ॥६८॥
मेधा चार्धविचारा च यत्नश्चार्धफलावहः ।
मित्राणि चार्धभावानि दास्यं चार्धं प्रवर्तते ॥६९॥
पशवश्चार्धविश्वासाः पक्षिणश्चार्धसेविनः ।
भाषाणामर्धविज्ञानं द्वापरेऽर्धे गते भवेत् ॥७०॥
अर्धाकर्षणरूपाणि चार्धाकर्षणशक्तयः ।
स्नेहास्पदादि चार्धानि द्वापरेऽर्धे गते क्षितौ ॥७१॥
राज्यदण्डैर्नियमिताः प्रजास्तिष्ठन्ति नीतिगाः ।
प्रकाशं चार्धमेवाऽपि कर्म तत्कर्म गण्यते ॥७२॥
प्रच्छन्नं गण्यते नैव चार्धं द्वापरिभिर्जनैः ।
दैवभयं प्रयात्येव द्वापरेऽर्धे प्रजासु वै ॥७३॥
पापभयं तथा चार्धं गण्यते नैव तद्युगे ।
द्रोहभयं तथा मिथ्याभयं चार्धं न गण्यते ॥७४॥
असत्कर्मभयं नैव गण्यतेऽर्धं न मन्यते ।
अ[illegible]मैवं जायते वै द्वापरेऽर्धे हि पद्मजे ॥७५॥
[illegible]श्चोत्तरकाले तु त्र्यंशं सत्यं प्रजीवति ।
त्रिभागेणाश्चापि सत्यादेर्नश्यन्त्येव द्वयेऽन्तिमे ॥७६॥
द्वापरेऽन्ते चतुर्थांऽशाऽऽयुष्यवन्तो हि देहिनः ।
सहस्रार्धं समारंभे तदर्धं मध्यद्वापरे ॥७७॥
तदर्धं त्र्यंशके याते चतुर्थांशे तदर्धकम् ।
आयुर्वै ह्रासमापन्नं सर्वेषां देहिनां रमे ॥७८॥
अष्टताला मानवा वै सत्ये भवन्ति चोच्छ्रिताः ।
त्रेतायां ते षट्तालोर्ध्वा द्वापरं चतुरूर्ध्वकाः ॥७९॥
द्वापरार्धे तदर्धाश्च ततोऽर्धा दशहस्तकाः ।
वृक्षाश्चतुर्गुणोर्ध्वाश्च हस्तिनश्च द्रुमार्धकाः ॥८०॥
हस्त्यर्धोर्ध्वा घोटकाश्च तदसमा गोवृषादयः ।
[illegible]परे ते भवन्त्येव बले त्र्यंशविवर्जिताः ॥८१॥

द्वापरान्ते निर्बलाश्च प्रारंभाच्चतुरंशिनः ।
सिद्धिमन्तस्तु ये सन्ति ते भवन्त्यूर्ध्वदीर्घकाः ॥८२॥
पुनर्ह्रस्वाः स्वल्पदेहास्ततोऽल्पपरीणाहकाः ।
भोजनं तु दशमाणं पञ्चमाणं ततोऽर्धकम् ॥८३॥
माणमात्रं तदर्धं च द्वापरान्ते भवेत्तदा ।
दिवसे तु प्रवासो वै सत्ययुगेऽम्बरेऽस्ति च ॥८४॥
चतुर्दशसु लोकेषु पृथ्व्यां द्वीपान्तरेऽपि च ।
त्रेतायां तु प्रवासो वै विमानापेक्ष एव ह ॥८५॥
दिवसे च तदा यान्ति मानवाः शतयोजनम् ।
द्वापरे तु तदर्धं च द्वापरार्धे तदर्धकम् ॥८६॥
द्वापरान्ते तदर्धं च ततोऽर्धं च ततः परम् ।
एवं ह्रस्वशरीराणां पादक्रमो विकुञ्चितः ॥८७॥
प्राणायामैर्विना तेषां व्योमगतिर्न विद्यते ।
भ्वाधारा भूनिवासश्च भूक्रमा भूप्रभोजिनः ॥८८॥
एवं भूमातरस्तत्र द्वापरान्ते प्रजा रमे ।
क्षुधातृषातितापाढ्या द्वापरेऽन्ते जना रमे ॥८९॥
असदाढ्याः शाठ्ययुक्ताः स्वार्थाऽहंकारसंभृताः ।
कल्मषैर्बहुभिर्युक्ता जायन्ते द्वापरेऽन्तके ॥९०॥
क्षुद्रचित्ता धैर्यहीना गाम्भीर्यवर्जितास्तथा ।
जायन्ते मानवा लक्ष्मि द्वापरेऽन्ते समस्ततः ॥९१॥
स्त्रियः श्रीवर्जिताश्चापि मर्यादाऽर्धविहन्त्रिकाः ।
निजार्धस्वत्वममताऽहंकारगर्वितास्तथा ॥९२॥
भवन्त्येव क्लेशदाश्च तथाऽर्धधर्मवर्जिताः ।
श्रियस्ततो वर्जयन्ति लक्ष्म्यो वियन्ति तद्गृहात् ॥९३॥
सम्पदश्चापसरन्ति ऋद्धयोऽपसरन्ति च ।
शिष्टाश्च सम्पदाभासा भवन्ति वै कुसम्पदः ॥९४॥
जनाः शिष्टाः स्वशिष्टत्वं त्यजन्ति द्वापरेऽर्धकम् ।
द्वापरान्ते न शिष्टत्वं कल्मषैर्हन्यते हि तत् ॥९५॥
कालश्चापि पुरा यः स क्लेशार्धात्मा प्रवर्तते ।
कालदूता भवनेषु पराभवन्ति मानवान् ॥९६॥
वह्नयो वामभागार्धं गत्वा यान्ति प्रदक्षिणम् ।
द्वापरेऽन्तेऽर्पितं द्रव्यं पूजार्थं लीयतेऽर्धकम् ॥९७॥
नैजं सर्वं भवेद् द्वेधा परं श्रेष्ठं परार्थकम् ।
परभावेन सम्भिन्नं चित्तं नैजं हि द्वापरम् ॥९८॥
एवं लक्ष्मि विविधान् वै धर्मान् श्रयन्ति मानवाः ।
पापं चार्धं तथा चार्धं पुण्यं कुर्वन्ति तत्प्रजाः ॥९९॥
अर्थं कामं चेहमानाः प्रजा ह्रासं व्रजन्त्यपि ।
तत्र मन्त्रं जपेन्मे च गायत्र्याख्यं निरन्तरम् ॥१००॥

'ओं भूर्भुवः स्वः, श्रीघनश्यामाय विद्महे ।
नीलकण्ठाय धीमहि, तन्नो हरिः प्रचोदयात्' ॥१०१॥
'ओं भूर्भुवः स्वः, श्रीबालकृष्णाय विद्महे ।
अनादिकृष्णाय धीमहि, तन्नः कृष्णः प्रचोदयात्' ॥१०२॥
'ओं भूर्भुवः स्वः, श्रीनाराणाय विद्महे ।
वासुदेवाय धीमहि, तन्नो विष्णुः प्रचोदयात्' ॥१०३॥
'ओं श्रीब्रह्मप्रियावल्लभाय स्वाहा नमः' जपेत् ।
'ओंश्रीहरिप्रियावल्लभाय नमः' जपेत् तथा ॥१०४॥
षट्लक्षजपकर्ता वै तरत्येव भवार्णवात् ।
द्वापरे मन्त्रमेनं वै ततो जपेत् प्रमुक्तये ॥१०५॥
'अनादिश्रीकृष्णनारायण कृष्ण श्रियःपते ।
राधापते परब्रह्म गोपीपते जयापते ॥१०६॥
ललिताश्रीपते प्रज्ञापते पद्मावतीपते ।
सुखदाश्रीपते लक्ष्मीपते श्रीमाणिकीपते ॥१०७॥
हंसगरुडवारणतुरगाधिपते प्रभो ।
सतांपते सतीसाध्वीपते सर्वपते विभो ॥१०८॥
भगवन् पुण्डरीकाक्ष तारयाऽस्मान् भवार्णवात् ।
द्वापराद् घोररूपाद्वै चान्तिमसमयात्मकात्' ॥१०९॥
इत्यर्थयेद् भगवन्तं परमेशं सनातनम् ।
पूजयेन्मां धारयेच्च हृदये मयि चार्पयेत् ॥११०॥
एवं मोक्षं द्वापरेऽन्ते चाप्नुयुर्मानवा रमे ।
पठनाच्छ्रवणाच्चापि संहितायाः ममापि च ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने द्वापरयुगधर्मकर्मस्वभावास्तथाविधमानवानां मोक्षार्थं मन्त्रादिभजनप्रदर्शनमितिनिरूपणनामा त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

श्रीनारायणीश्रीरुवाच—

युगधर्मा हरे नित्या आहोस्वित् परिवर्तिनः ।
युगेऽन्ये चान्ययुगजा प्रवर्तन्ते न वा वृषाः ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

युगधर्मा रमे नित्या युगो धर्मात्मको हि सः ।
किन्तु बलिष्ठपुरुषैर्विवर्त्यन्तेऽन्ययौगिकाः ॥ २ ॥
कल्मषाः कलिधर्मा वै विवर्त्यन्ते ऋतंभरैः ।
देहधर्मा विवर्त्यन्ते बलिष्ठैर्योगिभिस्तथा ॥ ३ ॥
कालधर्मा विवर्त्यन्ते सतीभिः सात्त्विकादिभिः ।
दोषधर्मा विवर्त्यन्ते सिद्धैश्च साधुभिस्तथा ॥ ४ ॥
देशधर्मा विवर्त्यन्ते समर्थाचार्यपुंगवैः ।
प्रजाधर्मा विवर्त्यन्ते राजभिश्च प्रशासकैः ॥ ५ ॥
यतिधर्मा विवर्त्यन्ते चमत्कार्यवतारकैः ।
कन्याधर्मा विवर्त्यन्ते समाजैर्लोकपूजितैः ॥ ६ ॥
उत्सवाद्या विवर्त्यन्ते सिद्धवाग्भिर्जनैरिह ।
वर्णधर्मा विवर्त्यन्ते वर्णाभ्यनीतिवेदिभिः ॥ ७ ॥
आश्रयाः परिवर्त्यन्ते त्यागिविदेहिभिर्जनैः ।
मानसानि विवर्त्यन्ते त्वाकर्षणपरैर्जनैः ॥ ८ ॥
सत्यधर्मा यत्र सत्यं पुरुषे तत्र सन्ति वै ।
त्रेताधर्मा रजोयुक्तं सत्त्वं यत्र प्रवर्तते ॥ ९ ॥
द्वापरस्य रजोयुक्तं तमो मनाक् प्रवर्तते ।
कलेर्धर्मास्तामसा वै तमो यत्र प्रवर्तते ॥१०॥
सात्त्विके सत्त्वधर्मा वै तामसे कलियोजिताः ।
सत्त्वरजोयुते त्रेतारजस्तमोयुते द्विकः ॥११॥
कृते युगे चतुष्पाद्वै लक्ष्मि धर्मः प्रवर्तते ।
प्राप्यते भगवाँस्तेन धर्मकामार्थमोक्षदः ॥१२॥
धर्मो हि भगवान् कृष्णः पूजा कृष्णो हि तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं हरिः ॥१३॥
पादा धर्मस्य चत्वारः सत्यं दानं तपो दया ।
धर्मपाता हरिश्चाऽहं पादाः सत्यादयो मम ॥१४॥
त्रेतायुगे त्रिपाद्धर्मः सत्यदानदयात्मकः ।
यज्ञयागादयः सर्वे त्रेतायामप्यहं रमे ॥१५॥
द्वापरे द्विचरणश्च दानदयात्मकस्त्वहम् ।
कलौ दानं पादमेकं दानात्मकोऽस्म्यहं रमे ॥१६॥
सत्ये श्वेतो भवाम्येव त्रेतायां रक्तवर्णवान् ।
द्वापरेऽहं पिशंगश्च कलौ कृष्णो भवाम्यहम् ॥१७॥
सत्त्वं रजस्तम इति वर्तन्ते पुरुषे गुणाः ।
पूरुषनोदितास्तेऽपि परिवर्तन्त आत्मसु ॥१८॥
प्रभूतं तु यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः ॥१९॥
यदा कर्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता हृदये वै रजोभूतिर्मतो बहिः ॥२०॥
यदा लोभस्त्वसन्तोषो मानो दंभश्च मत्सरः ।
काम्यकर्मरतिश्चापि द्वापरं तद्रजस्तमः ॥२१॥
यदा सदाऽनृतं निद्रा हिंसा क्लेशश्च तन्द्रिका ।
शोकमोहौ भयं दैन्यं तिष्यस्तदा तमो मतः ॥२२॥
द्वापरे विगते लक्ष्मि जनाः कटुकभाषिणः ।
कामप्रधानभावाश्च देशा दस्युविशेषकाः ॥२३॥

धर्माः पाखण्डपूर्णाश्च प्रजाभक्षा नृपास्तदा ।
शिश्नोदरस्पर्शतृपाः प्रजा भूभृत आर्थिकाः ॥२४॥
अव्रता बटवोऽशौचा विभवश्च कुटुम्बिनः ।
तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः ॥२५॥
महाहारा महातृष्णाः कलौ तु साधवस्तदा ।
त्यजन्ति स्वामिनं भृत्यास्तापसस्त्यजति व्रतम् ॥२६॥
शूद्रास्तु प्रतिगृह्णन्ति वैश्यास्तपःपरायणाः ।
उद्विग्नाश्च जनास्तिष्ये पिशाचसदृशीप्रजाः ॥२७॥
अन्यायभोजका देवातिथिपूजाविवर्जिताः ।
स्त्रीपरास्तु नराः सर्वे पित्र्युदकविवर्जिताः ॥२८॥
बहुप्रजाऽल्पभाग्याश्च भवन्त्येव कलौ स्त्रियः ।
शिरःकण्डूयनपरा आज्ञां भिन्दन्ति सर्वथा ॥२९॥
तथा मायामसूयां च वधं चापि तपस्विनाम् ।
साधयन्ति स्वार्थपराः पापेन व्याकुलेन्द्रियाः ॥३०॥
कलौ प्रमादको रोगः सततं क्षुद्भयानि च ।
अनावृष्टिभयं घोरं देशानां च विपर्ययः ॥३१॥
अनृतं ब्रुवते लुब्धां दुराचारैर्दुरिष्टकाः ।
सर्वेषां मानवानां तु सम्बन्धाः सर्वजातिषु ॥३२॥
शयनासनभोज्यानि चैककीर्णानि सर्वथा ।
भ्रूणहत्या वीरहत्या साधुहत्या स्थले स्थले ॥३३॥
स्वल्पायुष्येऽपि म्रियन्ते क्रमं विना कुटुम्बिनः ।
अल्पतेजोबलाश्चाप्यनृतप्राया अधार्मिकाः ॥३४॥
राजवृत्तिस्थिताश्चौराः कामाचाराश्च पार्थिवाः ।
एकपत्न्यो न शिष्यन्ति वर्धन्ते चाभिचारिकाः ॥३५॥
काषायिणश्च निःकच्छा वृत्त्यर्थे दैवलिङ्गिनः ।
उपहृत्य परान्नादि साधयन्ति निजार्थकम् ॥३६॥
श्वपचा राज्यकर्तारो विप्रास्तेषां हि सेवकाः ।
सेवन्ते श्वपचान् विप्राः श्रुतभाग्यबलाक्षयाः ॥३७॥
वेदशास्त्रागमधर्मा विघ्नरूपाः कलौ रमे ।
उत्सादिता भवन्त्येव धर्मसंकरताऽत्र वै ॥३८॥
यज्ञा नैव भवन्त्येव विवाहा न तदा कलौ ।
मनःप्रसन्नताहेतुर्दाम्पत्ये स्वेष्टचारिता ॥३९॥
म्लेच्छाचारं प्रजाः सर्वाः कलौ श्रेष्ठं वदन्ति हि ।
चित्रवर्षी तदा देवः सस्यानां चित्रपाकता ॥४०॥
सर्वे लोभवणिग्वृत्ताः कपटैर्विक्रयार्थिनः ।
नाऽव्याहृतक्रूरवाक्यो नाऽऽर्जवी नाऽनसूयकः ॥४१॥
नोपकारी न च प्रत्युपकारी पापके युगे ।
नृपशून्या वसुमती न च धान्यधनावृता ॥४२॥
निन्दकाश्च पतिताश्च कलौ भवन्ति सर्वथा ।
मण्डलानि भवन्त्येव देशेषु नगरेषु च ॥४३॥
राजकार्यकराण्येव धर्मघ्नानि कलौ युगे ।
अल्पोदका चाल्पफला वसुहीना वसुन्धरा ॥४४॥
गोप्तारश्चाप्यगोप्तारो लुण्टकाश्चाप्यशासकाः ।
हर्तारः परवित्तानां परस्त्रीपुत्रयोषिताम् ॥४५॥
साहसप्रियदुष्टाशाः प्रनष्टचेतना जनाः ।
मुखे मिष्टा हृदि दुष्टा भवन्ति सुहृदः कलौ ॥४६॥
चौराश्चौरस्वहर्तारो हर्तुर्हर्ता कलौ परः ।
कीटमूषकसर्पाश्च धर्षयन्ति कलौ हि तान् ॥४७॥
बहवश्चैव पन्थानः सम्प्रदायाः कलौ युगे ।
प्रच्छन्नाधर्मभोक्तारो बहिश्चेष्टप्रदर्शिनः ॥४८॥
देवसाधुयतियोगिसाध्वीधनान्नभोगिनः ।
क्षुत्तृता मानवा पुष्टिं कुर्वन्ति कुपथस्य वै ॥४९॥
सत्ये शताब्दिको धर्मस्त्रेतायां वार्षिकः स तु ।
द्वापरे मासिकः सोऽपि कलौ चाह्निक एव सः ॥५०॥
आह्निकं चापि धर्मं तं जहत्येव कलौ जनाः ।
व्याकुलाश्च परिभ्रान्ताः परस्परभयार्दिताः ॥५१॥
स्वान् प्राणान् परिरक्षन्तो निष्कारुण्याः सुदुखिताः ।
निर्मर्यादा निराक्रान्ता निःस्नेहा निरपत्रपाः ॥५२॥
उद्यमवर्जिताश्चापि मांसाहारा जनाः कलौ ।
समुद्रतीरवासाश्च मत्स्याहारास्तु सर्वथा ॥५३॥
अनिकेता वल्कलाढ्या भूशय्या मानवास्तदा ।
पशवो मानवा दैवाः पक्षिणो जलचारिणः ॥५४॥
समवृत्ताः प्रायशो वै कलौ सांकर्यभोगिनः ।
अहं नारायणस्तत्र प्रेरयामि निजाश्रितान् ॥५५॥
दिव्यदेहान् पार्षदान्मे ऋषिरूपान् हि तापसान् ।
धर्मसंस्थापनार्थाय ते वसन्ति ह्यगोचराः ॥५६॥
पर्वतेषु शुभाचारा वन्यमूलफलाशिनः ।
युगलानि प्रजायन्ते तेभ्यो धर्ममयानि च ॥५७॥
सर्वैश्वर्यसमर्थानि वेदभक्तियुतानि च ।
ममाऽवतारैर्बहवो हन्यन्ते दुष्टजातयः ॥५८॥
अतिवातातिवृष्ट्याद्यैर्नश्यन्ति चाब्धितीरगाः ।
ततो वनानामृषयो मम पुत्राश्च पार्षदाः ॥५९॥
प्रवर्तन्ते कार्तवीर्या भूमौ सन्तानकारिणः ।
एवं कृतस्य सन्तानः कलेश्चैव क्षयस्तथा ॥६०॥
कृतस्य योग्यतायुक्ता जायन्ते पार्षदर्षयः ।
उपभोगसमर्थाश्च दिव्यदेहाः ऋतव्रताः ॥६१॥

वैराग्ययोगिनः सर्वे चात्मबोधपरास्तथा ।
सन्तुष्टास्तपआस्थाश्च धर्मिष्ठा भक्तिशीलिनः ॥६२॥
सप्तर्षयस्तदा स्वर्गादागत्यैषु वसन्ति च ।
सत्यं सप्तर्षयो धर्मं कथयन्तीह तेषु च ॥६३॥
तिष्ठन्ति ये कलौ सिद्धा अदृष्टा विहरन्ति च ।
प्रकाशं ते समायान्ति ह्याचार्यास्ते भवन्ति हि ॥६४॥
गुरवो लोकरक्षार्हाः प्रजासु विहरन्ति च ।
योग्यब्रह्ममहावंशोत्थेभ्यो राज्यं ददत्यपि ॥६५॥
एवं कृतं युगं लक्ष्मि ! पुनस्तत्र प्रवर्तते ।
त्वं कलौ क्षीणतां याता सत्ये पुनः प्रवर्धसे ॥६६॥
शुद्धिं त्वं लभसे लक्ष्मि साधुसाध्वीसमागमात् ।
आसुरी यातुधानी च पैशाची यक्षराक्षसी ॥६७॥
तिष्या त्वं सत्यरूपा वै दैवी लक्ष्मीः प्रजायसे ।
युगलानि तदा सत्ये प्रायशो गृहधर्मिणः ॥६८॥
यतितुल्याश्च यतयो ब्रह्मचर्यपरायणाः ।
अकामाश्चातिनिष्कामा आत्मानन्दविहारिणः ॥६९॥
संकल्पमात्रयोगाश्च स्त्रीदृष्टिमात्रयोगिनः ।
मानस्यश्च प्रजाश्चापि पुत्रपौत्रादयः पुनः ॥७०॥
साधुसाध्वीस्वरूपास्ते भवन्ति चागते कृते ।
देवाऽसुरमनुष्याश्च यक्षगन्धर्वराक्षसाः ॥७१॥
धर्मव्रताः प्रजायन्ते सत्ययुगबलाद्धि ते ।
परिणाहोच्छ्रये तुल्या जायन्ते पूर्ववत्पुनः ॥७२॥
बले योगे तथैश्वर्ये सम्पत्सु च समाधिषु ।
व्योमगतौ जलगतौ जायन्ते पूर्ववत्पुनः ॥७३॥
मेधायां च विकासे च भौतिकेषु यथा पुरा ।
तथा कृते प्रजायन्ते मम संकल्पनोदिताः ॥७४॥
पशवः पक्षिणश्चापि धेनवः कामधेनवः ।
तरवः कल्पतरवो वल्लिकाः कल्पवल्लिकाः ॥७५॥
मानवा दिव्यदेहाश्च योषितो दिव्ययोषितः ।
तथा कृते प्रजायन्ते यथा पूर्वं कृतेऽभवन् ॥७६॥
किन्तु लक्ष्मि ब्राह्मसंज्ञान्मुहूर्तात् प्रातरूनकम् ।
प्रातःकालात् संगवश्च ततो मध्याह्नकं तथा ॥७७॥
ततोऽपरार्धोऽर्धकालः सायं न्यूनबलं ततः ।
एवं कृता युगाः सर्वे पूर्वपूर्वतरूनकाः ॥७८॥
मनाक्स्वल्पबलाश्चापि मनाक् ह्रासप्रमर्दिताः ।
उत्तरोत्तरह्रासयुक्तास्ततस्तुल्या न सर्वथा ॥७९॥
सृष्ट्यारंभस्थसत्याद्वै परे सत्ययुगास्ततः ।
न्यूनबला भवन्त्येव नादिसत्यसमा हि ते ॥८०॥

मम योगबलं पूर्णं यत्र तत्रादिसदृशाः ।
मन्न्यूनबलवद्व्यक्तौ न्यूनबलं कृतं युगम् ॥८१॥
एवमेव विजानीहि मद्विना निर्बलं जगत् ।
यत्राऽहं तत्र सर्वत्र गार्हस्थ्येऽपि हि साधुता ॥८२॥
यत्र नाऽहं तत्र लक्ष्मि साधुत्वेऽपि न साधुता ।
यस्मिन् कस्मिन् युगे लक्ष्मि येनाऽहं समुपार्जितः ॥८३॥
तेनाऽर्जितः सत्ययुगः सर्वं तेनार्जितं प्रियम् ।
लक्ष्मि सन्तः प्रवक्ष्यामि साधूनथ ततश्च वै ॥८४॥
संयुज्य ब्रह्मणा ह्यन्तस्तेन सन्तः प्रचक्षते ।
सन्तं श्रीपरमात्मानं तन्वन्ति ये प्रजासु च ॥८५॥
सन्तस्ते साध्नुवन्ति स्वकार्यं मोक्षात्मकं तथा ।
परेषां मोक्षकार्यं च साधयन्ति ह साधवः ॥८६॥
दिव्यानां कर्मणां लक्ष्मि साधनात् साधुरुच्यते ।
ब्रह्मणि चरणाल्लक्ष्मि ब्रह्मचारी स एव सः ॥८७॥
गुरोर्हितः स्वहितकृत् सत्ये हिते सदा रतः ।
साधुर्वै ब्रह्मचारी च हितकृत् साधुसत्तमः ॥८८॥
कारणात् साधनाच्चैव गृहस्थः साधुरुच्यते ।
सत्ययुगे गृहस्थास्ते साधुतुल्या हि साधवः ॥८९॥
तापसास्ते तथाऽरण्ये वैखानसा हि साधवः ।
यतमाना यतयश्च साधवो योगसाधनात् ॥९०॥
धर्मश्चोच्चगतिः प्रोक्तः कुशलानां प्रदायकः ।
नारायणेन ऋषिणा ब्रह्मणा निर्मितो वृषः ॥९१॥
दाराग्निहोत्रपूजादिर्वर्णाश्रमविभागशः ।
सद्भिराचरितस्तस्याच्छिष्टाचारः स उच्यते ॥९२॥
शिष्टा मे पार्षदाः पुत्राः शिष्या महर्षयस्तथा ।
शिष्यन्ते येऽत्र धर्मार्थे लोकसन्तानकारिणः ॥९३॥
पूर्वैः पूर्वतरैः शिष्टैराचर्यते पुनः पुनः ।
पूर्वैः पूर्वैर्मतत्वाच्च शिष्टाचारः स शाश्वतः ॥९४॥
दानं सत्यं तपो भक्तिर्विद्येज्या पूजनं दमः ।
अष्टैतानि चरित्राणि शिष्टाचारो हि सम्मतः ॥९५॥
ब्रह्मचर्यं तपो मौनं निराहारत्वमित्यपि ।
सेवनं निजपित्रोश्च गुरोराश्रयणं तथा ॥९६॥
षट्कमेतत्साधुधर्मो गृहस्थाः साधवस्ततः ।
मायाप्रवाहमासाद्य नो वहते तरत्यपि ॥९७॥
तारकः साधुरेवाऽयं गृहस्थोऽपि हि सज्जनः ।
शिष्टाचारप्रवृद्धश्च वृषो वै साधुसम्मतः ॥९८॥
कर्मणां मयि न्यासस्तु सन्न्यासः साधुधर्मकः ।
ब्रह्मस्तोत्रं विधिस्तोत्रं गुणस्तोत्रं हरेर्मम ॥९९॥

प्रवर्त्यन्ते पूर्वरीत्या शिष्टैः सद्भिः सुधार्मिकैः ।
ज्ञानं वैराग्यमैश्वर्यं धर्मश्चेति चतुष्टयम् ॥१००॥
सांसिद्धिकानि येषां वै साधवः ऋषयश्च ते ।
ऋषन्ते परमं ब्रह्म ततस्ते ऋषयो मतः ॥१०१॥
गत्यर्थादृषतेर्धातोः सार्थकत्वं हि साधुषु ।
ईश्वराणां सुता ये च मानसाश्चौरसास्तथा ॥१०२॥
ऋषिपुत्राः ऋषीकाश्च ऋषयस्ते तपोधनाः ।
ब्रह्मपुत्रा ब्राह्मणाश्च क्षत्रियाश्च विशस्तथा ॥१०३॥
ऋषिपुत्राः ऋषयस्ते लोकसन्तानहेतवः ।
इत्येवं लक्ष्मि बहुधा सत्यधर्मा हि साधवः ॥१०४॥
सत्ये पुनः प्रवर्तन्ते गृहस्था अपि साधवः ।
तेषामाश्रयणान्मोक्षो मुक्तिश्च जायते ध्रुवम् ॥१०५॥
पठनाच्छ्रवणाच्चापि स्मरणात् साधुसंगतेः ।
फलं मुक्तिमोक्षरूपं जायते नात्र संशयः ॥१०६॥
सर्वेष्वपि युगेष्वेव गुणश्चैको महान् रमे ।
कृष्णस्य मे कीर्तनाद्वै भवेदेव हि मोक्षणम् ॥१०७॥
कृते यज्ञे हरिर्लभ्यस्त्रेतायां जपतोऽर्च्यते ।
द्वापरे सेवया प्राप्यो हरिः कलौ तु कीर्तनात् ॥१०८॥
कलिर्दोषनिधिस्तत्र गुणो हरिप्रकीर्तनम् ।
द्वापरोऽर्धदुरितोऽपि गुणवान् मम जन्मतः ॥१०९॥
सत्यादौ नाऽतिजन्माऽहं सर्वाः साधुप्रजायतः ।
भवाम्यहं कलौ भूयश्चाऽन्ययुगव्यपेक्षया ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने युगधर्माणां परिवर्तनविवेचनादिनिरूपणनामा चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥१४४॥

**श्रीनारायणीश्रीरुवाच—**

कीर्तनं ते कथं कार्यं वद मे भगवँस्तथा ।
यथा प्रह्वीभावनया भवेत्तव प्रसन्नता ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

कीर्तनं मे सुस्वरेण मिष्टगर्भेण चाऽऽचरेत् ।
सवाद्येन तथा गतिरीत्या संगीतकेन च ॥ २ ॥
तालीतालेन च नृत्येनापि किंकिणिकादिभिः ।
अनेकरागरागिण्यादिभिर्मां कीर्तयेद् रमे ॥ ३ ॥
गान्धर्वं ते प्रवक्ष्यामि याथातथ्येन संशृणु ।
सप्तस्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ॥ ४ ॥
तानाश्चैकोनपञ्चाशदित्येतत् स्वरमण्डलम् ।
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ॥ ५ ॥
धैवतश्च निषादश्च स्वरास्ते सप्तकीर्तिताः ।
सौवीरा मध्यमा हरिणाश्व ग्रामास्त्रयो हि ते ॥ ६ ॥
मूर्छनास्ते वदाम्यत्र दिव्या मूर्छाविधायिकाः ।
हयमेधा हेषिणी वै प्रथमा परिकीर्तिता ॥ ७ ॥
अग्निष्टोमा तु चाग्नेयी द्वितीया परिकीर्तिता ।
वाजपेया तृतीया तु श्येनी सा परिकीर्तिता ॥ ८ ॥
राजसूया राणिका सा चतुर्थी परिकीर्तिता ।
यवराता वंशिनी सा पञ्चमी परिकीर्तिता ॥ ९ ॥
जातरौपी सुवर्णी सा षष्ठी मूर्छा प्रकीर्तिता ।
गोसवना रांभणी सा सप्तमी मूर्छना मता ॥१०॥
झंझावाती वर्षिणी साऽष्टमी वै मूर्छना मता ।
ब्रह्मदाना गर्जिनी सा नवमी मूर्छना मता ॥११॥
प्राजापत्या लालिनी सा दशमी मूर्छना मता ।
दागयाक्षी तु क्षौती सैकादशी मूर्छना मता ॥१२॥
पानक्रान्ता भषिणी तु द्वादशी मूर्छना हि सा ।
मृगाक्रान्ता चित्करी सा त्रयोदशी हि मूर्छना ॥१३॥
विष्णुक्रान्ता धारिणी सा चतुर्दशी हि मूर्छना ।
सन्तकोकिलिका प्रोन्मादिनी पञ्चदशी तु सा ॥१४॥
सूर्यक्रान्ता कालरोहिणिका षोडशी चैव सा ।
सर्वतोभद्रिका मोदमादिनी सप्तदाशिकी ॥१५॥
पूर्वभद्रा बालकण्ठी चाष्टादशी हि मूर्छना ।
आलम्बुषी हांसिनी सा नवदशी हि मूर्छना ॥१६॥
सागरा विजया कोकिलिकी विंशा मनोहरा ।
नारदी मानवी चेति मूर्छनाश्चैकविंशिकी ॥१७॥
अन्याश्चापि भवन्त्येव गौण्यो वै मूर्छनाः प्रिये ।
मानव्यश्चापि पाक्षिण्यः पाक्षव्यश्चाप्यनेकशः ॥१८॥
सर्वास्ताः शारदा वेत्ति सरस्वती च भारती ।
ब्राह्म्यो गाण्यश्च पर्यश्चाप्सर्यो मायूरकीविधाः ॥१९॥
याक्ष्यः कैन्नर्यश्च हांस्यो नागिन्यश्चापि वाडवाः ।
पैत्र्यो दैव्यस्तथा क्षौत्यस्ताडिन्यो भौंकिनीविधाः ॥२०॥
मैनाक्यः पैक्य एवापि शौक्यः किलायिकास्तथा ।
एता यथायथं बुद्ध्वा गायिका गीतिमाचरेत् ॥२१॥
ह्रस्वं दीर्घं प्लुतं ज्ञात्वा स्वरं गाने प्रयोजयेत् ।
अथ तानान् प्रयुञ्जीत प्रवाहे सततं मुहुः ॥२२॥
तानाः स्वरा इति प्रोक्ताः प्रवाहे क्षणयोगिनः ।
विभिद्यन्ते क्षणभेदात् स्फोटतानानुयायिनः ॥२३॥

ब्रह्मतानः प्रथमस्तु गर्भतानो द्वितीयकः ।
व्यज्यः सञ्चरणोऽणुश्च योगश्चारोहणस्तथा ॥२४॥
तनुः पुष्टो विशालश्च विकासः स्तनपस्तथा ।
कुमारो वामनश्चापि द्विस्तरो विकृतस्तथा ॥२५॥
दृढो दुग्धः कलापश्चाऽऽवर्त्तकश्च तरंगकः ।
निम्नः समश्चोर्ध्वकश्च तिर्यक् तथैव कातरः ॥२६॥
कलितश्चाग्रितश्चैपितश्च ततस्तु त्रिंशकः ।
श्रृंगी च तोरणी स्तंभी मुष्णको लीन इत्यपि ॥२७॥
उद्भवश्चांकुरकश्च ग्रन्थिकः शाखिकस्तथा ।
बहुमूलश्च ह्रस्वश्च वर्तुलश्चोच्छ्रयस्तथा ॥२८॥
श्रृंगो गुरुश्चावरोहो वेगः स्थितिर्घटोदरः ।
एते तानास्तव प्रोक्ता गौणान् तानांस्तथा श्रृणु ॥२९॥
स्कन्दः काकुः पुष्कलश्च रोपः सन्तारकस्तथा ।
तरणिः संगमश्चाति विगमः क्षेपणो मृधः ॥३०॥
प्रोक्षणो मिश्रणश्चापि गलिकः कर्तनस्तथा ।
उल्लेखश्च रयश्चापि षोडशः सप्रकीर्तितः ॥३१॥
उच्चरः शशविन्यासो लक्षधारस्तु विंशकः ।
सहासवः सहयानो निम्नयानस्तथोर्ध्वगः ॥३२॥
गर्भयानः पर्ययश्च विपर्ययोऽभिसञ्चरः ।
सेतुबन्धो धारबन्धस्त्रिंशोऽयं परिकीर्तितः ॥३३॥
अगः सुप्तो मूर्छितश्च कम्पः कूर्दन इत्कृतः ।
ओंकृतः संहृतश्चापि जीवनश्च विदेहकः ॥३४॥
उत्तारकस्तालवासो द्विचत्वारिंशको मतः ।
पिण्डकः कीर्णको युक्तो भंगी लहरनामकः ॥३५॥
समवायोऽनुवायश्चेत्येवं ताना गुणात्मकाः ।
अथाऽन्ये तारताराद्यास्तारतमादयस्तथा ॥३६॥
विद्यन्ते तानसन्ताना शंसरोदनहर्षणा ।
विभिन्नभावुका लक्ष्मि तान् ज्ञात्वा कीर्तयेत्ततः ॥३७॥
स्थानयत्नान् प्रकुर्वीत श्वासक्रमानुच्चावचान् ।
हावभावानुगाँश्चापि देहचेष्टायुताँस्तथा ॥३८॥
अंगचेष्टायुताँश्चापि प्रत्यंगकर्मयोजितान् ।
आन्तरज्ञानस्फुर्त्यादिप्रयुक्तान् कीर्तयेद् रमे ॥३९॥
नामान्येतानि भिद्यन्ते कल्पे कल्पे चतुर्युगे ।
जानाम्येतानि सर्वाणि तत्त्वरूपाऽभिधानकैः ॥४०॥
पुरा श्रीनारदो योगी गीत्यर्थे मामुपागतः ।
श्रुतं सर्वं मया तस्य किन्तु न्यूनांगकं हि तत् ॥४१॥
मया तदोपदिष्टः स शिक्षणार्थं पुनः पुनः ।
तव शिष्योऽभवल्लक्ष्मि भवत्या शिक्षितश्चिरम् ॥४२॥
सर्वांगोपांगसम्पूर्णं चागायत पुरो मम ।
भवत्याः सन्निधौ लक्ष्मि ब्रह्मप्रियासभान्तरे ॥४३॥
कोट्यर्बुदाऽब्जनारीणां गर्वहरोऽभवद्धि सः ।
प्रसन्नेन मया निभालितः श्रीनारदो मुनिः ॥४४॥
मम गायकरूपश्च मया नैजीकृतस्ततः ।
वेत्सि त्वं सर्वमेवैतद् यतो नारायणी ह्यसि ॥४५॥
शारदाऽपि तदा वाणी श्रुत्वा नारदगायनम् ।
क्षणं स्तब्धाऽभवत्तत्र का कथा चान्ययोषिताम् ॥४६॥
धूनयामास बहुधा मस्तकं रसवेदिनी ।
सरस्वत्यः समग्राश्चाऽभवन् प्रमोहिताः क्षणम् ॥४७॥
प्रशंसाऽभूद्गुरोस्तत्र लक्ष्म्यास्ते बहुधा खलु ।
नारदाय मया तत्रार्पितं सत्पारितोषिकम् ॥४८॥
चिन्तामणिस्तथा हारश्चक्रं सुदर्शनं मम ।
शक्तिर्मयाऽर्पिता दिव्या ममैश्वर्यविशेषिणी ॥४९॥
ततः श्रीनारदो जातश्चावतारोंऽशरूपकः ।
नारायणो नारदो वै कृपया नावजायत ॥५०॥
सभायां नारदश्चापि प्रशशंस कृपां तव ।
यया प्रशिक्षिता विद्या तां त्वां शशंस सर्वथा ॥५१॥
तत आरभ्य पत्न्यो मे गीतिरीतिः पुनः पुनः ।
समभ्यसन् सकाशात्तेऽप्सरसश्चापि पद्मजे ॥५२॥
प्रावर्तत ततो विद्या संसारे बहुधा प्रिये ।
शंकरो वैष्णवो भूत्वा सकाशात्तेऽविदत् कलाम् ॥५३॥
कीर्तनस्य ततो नृत्यं चकार गीतिशोभितम् ।
प्रसन्नेन मया तस्मै दत्तं योगविभूषणम् ॥५४॥
स्मर लक्ष्मि पुरा सर्वं भवत्यां यत् प्रविद्यते ।
इत्युक्ता च प्रसस्मार सर्वं ददर्श चात्मनि ॥५५॥
संगीतशालां महतीं सहस्रयोजनायताम् ।
श्रीपुरे चैश्वरे धाम्नि भिन्नकक्षासहस्रिकाम् ॥५६॥
ददर्श तत्र चात्मानं सहस्ररूपधारिणीम् ।
शिक्षिकां शिक्षणारूढाम् वाद्यसंगीतकारिणीम् ॥५७॥
शिक्ष्यन्ते तत्र गोप्यश्च पार्षदान्यश्च मुक्तयः ।
ब्रह्मप्रियास्तथैशान्यश्चेश्वराण्यश्च कन्यकाः ॥५८॥
आलापाँस्ताः प्रकुर्वन्त्यः शिक्ष्यन्ते चाप्सरोगणाः ।
देव्यश्च सिद्धयश्चापि योगिन्यः शारदागणाः ॥५९॥
गायत्र्यश्चापि सावित्र्यो ब्राह्मयश्च देवकन्यकाः ।
गन्धर्व्यश्चापि यक्षाण्यः किन्नर्यश्च परीगणाः ॥६०॥
शिक्ष्यन्ते धनदानार्यो भक्तान्यः कश्यपात्मजाः ।
गन्धर्वास्तत्र शिक्ष्यन्ते बहवः पूर्वसृष्टिजाः ॥६१॥

दैत्यकुमारिकाश्चापि दानव्योऽसुरपुत्रिकाः ।
मानव्यश्चार्ष्य आकल्पजीविन्यश्चापि कन्यकाः ॥६२॥
शिक्ष्यन्ते गीतशालायां शिक्षिकां च निजामपि ।
नागकन्याः समस्ताश्च ददर्श शिक्षणार्थिनीः ॥६३॥
एवं विलोक्य सहसा दिव्यविद्यालयान् स्वयम् ।
महाश्चर्ये गता तत्र पूजिता सर्वदैवतैः ॥६४॥
सर्वासां गौरवीस्थाने स्थितां स्वां कृतकारिणीम् ।
अमन्यताऽतिमानार्हां महिमानं विवेद च ॥६५॥
तत्र पतिं तु मां कृष्णं गायन्तं गीतिकामपि ।
अनादिश्रीकृष्णनारायणं वीक्ष्य प्रभुं निजम् ॥६६॥
उत्थाय पादयोर्लक्ष्मीः पतिता व्याजहार ह ।
नमस्ते भगवन् कृष्ण स्वांऽगनानुग्रहान्वित ॥६७॥
कृपासिन्धो हरे कान्त दर्शितं मेऽतिगौरवम् ।
पश्यामि सर्वमेवैतत् कृपया ते जनार्दन ॥६८॥
श्रीपुरेऽस्मि शिक्षिका वै संगीतगीतिकारिणी ।
या या नार्यो नरा लोके गन्धर्वा देवयोषितः ॥६९॥
शारदाश्च सरस्वत्यः शिष्या मे सन्ति ते खलु ।
शिक्षन्ते कोटिशो मत्तः सर्वाः संगीतमन्दिरे ॥७०॥
मत्स्वरूपात् प्रभवन्ति स्वरा ग्रामाश्च मूर्छनाः ।
ब्रह्मण्येव विलीयन्ते यथाऽहं हृदये स्थिता ॥७१॥
एतत् सर्वं मयि चास्ते गीतीच्छा वर्तते मम ।
यद्याज्ञा गायनं सर्वांगोपांगादिसमन्वितम् ॥७२॥
कर्तुमिच्छामि सर्वाभिः सखीभिः परमेश्वर ।
इत्युक्तः श्रीपतिश्चाहं कमलेऽकरणं शुभम् ॥७३॥
मण्डपं सुविशालं चासनानि चाप्ययोजयम् ।
वादित्राणि समाहृत्याऽस्थापयं मण्डपे शुभे ॥७४॥
लक्ष्म्याद्याश्च भवत्यो वै सर्वा ब्रह्मप्रियाः शुभाः ।
आययुर्मण्डपे तत्र यथावस्थानमास्थिताः ॥७५॥
चक्रुः संगीतकं लक्ष्मि प्रसन्नोऽहं ततोऽभवम् ।
वरदानं ददौ चापि भूतले तु पुनः पुनः ॥७६॥
करिष्यथ सुसंगीतं मम पत्न्यो भविष्यथ ।
इतिसत्येन कमले चाश्वपट्टसरोवरे ॥७७॥
ब्रह्मप्रियाः समस्ताश्च हरिप्रियास्तथा स्त्रियाः ।
कुंकुमवापिकाक्षेत्रे भवत्य सन्ति मत्प्रियाः ॥७८॥
इत्येवं जायमानायां वार्तायां दिव्यदर्शने ।
तिरोभवत्तदा सर्वं व्यदृश्यताऽश्वसारसम् ॥७९॥
कुंकुमवापिकाक्षेत्रं मन्दिरं कानकं निजम् ।
यथास्थितां मन्दिरे तां स्वां सखीः कान्तमित्यपि ॥८०॥
विलोक्य मुमुदे लक्ष्मीर्महाश्चर्यपराऽभवत् ।
हर्षपूर्णा समुत्थाय श्रीकृष्णं पुरुषोत्तमम् ॥८१॥
आश्लिष्य संगीतिकां च प्रचकार मुदान्विता ।
विरराम ततो लक्ष्मीर्नारायणो हरिस्तदा ॥८२॥
जलं पातुं समीयेष लक्ष्मीर्जलं ददौ ततः ।
माणिक्याश्रीः सुमिष्टान्नं चक्रे सूपौदनं तथा ॥८३॥
बुभुजे श्रीहरिः कृष्णो नारायणी जलं ददौ ।
पद्मावती ददौ ताम्बूलकं प्रज्ञा च नक्तकम् ॥८४॥
विरराम प्रभुः कृष्णः पर्यंके स्वर्णनिर्मिते ।
पादसंवाहनं चक्रे लक्ष्मीः पद्मावती तथा ॥८५॥
प्रज्ञा च माणिकी देहसंवाहनं प्रचक्रतुः ।
अन्या ब्रह्मप्रियाश्चापि स्वस्वगृहे हरिं पतिम् ॥८६॥
तथैव सेवयामासुर्हरिर्विश्रान्तिमाप ह ।
ततः सर्वा जगृहुश्च प्रसादभोजनानि वै ॥८७॥
जलपानानि चक्रुश्च मध्याह्ने मोदमुत्तमम् ।
प्रापुः पतिकृपालेशं गृहकार्याणि चक्रिरे ॥८८॥
इत्येवं शिवराज्ञीश्रि! पूर्ववृत्तं मया तु ते ।
कथितं सर्वमेवाऽत्र गीतवाद्यादियोगजम् ॥८९॥
पठनाच्छ्रवणाच्चास्य स्मरणात् कीर्तनादपि ।
भुक्तिं मुक्तिं प्रलभेत सर्वानन्दभृतो भवेत् ॥९०॥
कीर्तनं ये करिष्यन्ति स्मृत्वा मां त्वां हरिप्रियाः ।
ब्रह्मप्रियास्तथा लक्ष्मि! तरिष्यन्ति न संशयः ॥९१॥
देहं कृत्वा वियुक्तं वै ज्ञानेन मायिकं तु यः ।
इन्द्रियाणि पृथक्कृत्वा कृत्वा दिव्यनवानि च ॥९२॥
आन्तरीं भावनां दिव्यां कृत्वा दग्ध्वा च वासनाम् ।
प्रणवाऽन्वितसंगीतं मम दिव्यचरित्रकम् ॥९३॥
आत्मना ब्रह्मरूपेण यः करिष्यति मानवः ।
देवो दैत्योऽथवा यक्षो राक्षसोऽसुर एव वा ॥९४॥
सर्पः पशुः पतत्री च किन्नरो गुह्यकोऽपि वा ।
हुत्वाऽऽत्मानं चिदानन्दे मयि योगं विधाय च ॥९५॥
नामकीर्तिं मम लक्ष्मि करिष्यन्ति तु येऽपरे ।
ते सर्वे मम भक्त्यैव लप्स्यन्ते परमं पदम् ॥९६॥
मम मूर्तेः स्मरणेन कृतं कीर्तनमल्पकम् ।
दिव्यं प्रजायते लक्ष्मि मोक्षदं पापनाशकम् ॥९७॥
सर्वात्मना मया चैकीभूय कुर्याद्धि कीर्तनम् ।
सफलं तद् भवेदेव पूर्णानन्दप्रदायकम् ॥९८॥
तीव्रवेगवतां तीव्रफलदं कीर्तनं मम ।
नृत्याम्यहं तदा लक्ष्मि यदा नृत्यन्ति गायिकाः ॥९९॥

गान्धर्वैः सह गायामि न मां पश्यन्ति चर्मिणः ।
प्रमोदं मम भक्तानां वर्धयाम्यर्जयामि च ॥१००॥
स्नेहं प्रवर्ध्य तानन्ते नयामि चाऽक्षरं पदम् ।
प्रसह्य ते समायान्ति न मां त्यजन्ति कामदम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने संकीर्तने संगीतिकास्वरग्राममूर्छनोद्देशो लक्ष्म्याः संगीतशालादिव्यदर्शनं चेत्यादिनिरूपणनामा पञ्चचत्वारिंशदधिकशततमोऽध्यायः॥ १४५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्तस्य गायकस्य मे ।
जपतो मेऽभिधानानि दिव्यता चाऽत्र जायते ॥ १ ॥
यत्र मे गायनं लक्ष्मि भजनं मम कीर्तनम् ।
महोत्पाता न वै तत्र जायन्तेऽपि कदाचन ॥ २ ॥
मम भक्तिविहीनानां महोत्पाता भवन्ति वै ।
तेषां शान्तिः प्रकर्तव्याऽन्यथा नश्यन्ति मानवाः ॥ ३ ॥

श्रीनारायणीश्रीरुवाच—

महोत्पातेषु जातेषु का शान्तिस्तेषु विद्यते ।
सर्वदेहिहितार्थं मे ब्रूहि शान्तिं तथाविधाम् ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि महोत्पाता दिव्याऽन्तरिक्षभूमिजाः ।
जायन्ते यत्र ये तेषां शान्तिं वदामि तत्त्वतः ॥ ५ ॥
सौम्या शान्तिस्तु दिव्येषु ह्यन्तरिक्षेषु चाऽभया ।
वैष्णवी शान्तिरिष्टा च भौमोत्पातेषु पद्मजे ॥ ६ ॥
विजिगीषुः परं शत्रुं भूतिकामश्च यो भवेत् ।
परैरभिचारितश्च शत्रुनाशेच्छुकश्च यः ॥ ७ ॥
महद्भयविनाशार्थमभयां शान्तिमाचरेत् ।
साधुभिश्चापि विप्रैश्च कारयेच्छान्तिमुत्तमाम् ॥ ८ ॥
राजयक्ष्माभिभूतस्तु क्षतक्षीणोऽतिरोगवान् ।
यज्ञकामो धर्मकामः सौम्यां शान्तिं प्रकारयेत् ॥ ९ ॥
भूकम्पेऽन्नविनाशे च दुर्भिक्षे चातिवर्षणे ।
शलभादिभयोत्पन्ने चौरप्रमत्तजे भये ॥१०॥
शान्तिं तु वैष्णवीं तत्र विष्णुभक्तः प्रकारयेत् ।
पशूनां मारणे प्राप्ते नराणामपि मारणे ॥११॥
देहिनां दारुणे मृत्यौ रौद्रीं शान्तिं विधापयेत् ।
यज्ञं च हवनं चापि चरेद् रुद्रादिपूजनम् ॥१२॥
वेदनाशे शास्त्रनाशे नास्तिकेषु जनेषु च ।
अपूज्यपूजने जाते ब्राह्मीं शान्तिं समाचरेत् ॥१३॥
परमेष्ठिप्रपूजादि कारयेद् वेदवेदिभिः ।
भविष्यत्यभिषेके च परचक्रभयेऽपि च ॥१४॥
स्वराष्ट्रभेदेऽरिवधे रौद्रीं शान्तिं प्रकारयेत् ।
त्र्यहातिरिक्ते पवने झंझावातेऽतिदारुणे ॥१५॥
सर्वविगर्हिते भक्ष्ये वातजे विकृते भये ।
व्याधौ वा वातजे जाते वायवीं शान्तिमाचरेत् ॥१६॥
अनावृष्टिभये जाते चातिवृष्टिभयेऽपि च ।
विकृतिवर्षणे जाते विकृते च जलाशये ॥१७॥
जलोत्पन्ने भये तत्र वारुणीं शान्तिमाचरेत् ।
अभिशापभये जाते मन्त्रशापभयेऽपि च ॥१८॥
मिथ्याशापभये प्राप्ते भार्गवीं शान्तिमाचरेत् ।
जाते प्रसववैकृत्ये गर्भरोगे च प्रस्रवे ॥१९॥
शुष्के च प्रसवे कुर्याच्छान्तिं प्राजापतीं रमे ।
उपस्काराणां वैकृत्ये भवनानां तथा रमे ॥२०॥
शकटानां वाहनानां त्वाष्ट्रीं शान्तिं समाचरेत् ।
बालानां बालिकानां च विकृतौ च भयेऽपि च ॥२१॥
विनाशे चाजीवने च कौमारीं शान्तिमाचरेत् ।
दावभये वह्निभये त्वाग्नेयीं शान्तिमाचरेत् ॥२२॥
आज्ञाभंगे तु सञ्जाते जाते भृत्यादिसंक्षये ।
अश्वादीनां विकारे तु रोगात्मके ह्युपस्थिते ॥२३॥
गीतिकादौ विकारे च कण्ठादिपतनेऽपि च ।
गलरोगे व्रणादौ च गान्धर्वीं शान्तिमाचरेत् ॥२४॥
गजानां तु विकारेऽपि शान्तिमाङ्गीरसीं चरेत् ।
पिशाचादिभये जाते भूतप्रेतादिवल्गने ॥२५॥
डाकिन्यादिकृते कष्टे नैर्ऋतीं शान्तिमाचरेत् ।
अपमृत्युभये प्राप्ते दुःस्वप्ने चाऽवलोकिते ॥२६॥
नारके वा तादृशे वा प्राप्ते दुःखे यमादिभिः ।
असद्गतौ याम्यवासे याम्यां शान्तिं विधापयेत् ॥२७॥
धननाशे द्रव्यनाशे भूषारत्नादिनाशने ।
सम्पदां च विनाशे तु कौबेरीं शान्तिमाचरेत् ॥२८॥
वृक्षाणां चापि सस्यानां कन्दानां फलिनां तथा ।
वल्लीनां च कणानां च मूलानां फलवैकृतौ ॥२९॥
अर्थानां भूतियोगानां नाशे शान्तिं तु पार्थिवीम् ।
कारयेद् वेदविद्भिस्तां शान्तिकर्माऽभिवेदिभिः ॥३०॥

प्रथमे दिनयामे च रात्रौ वा समुपद्रवे ।
हस्ते स्वातौ च चित्रायामादित्ये चाश्विने तथा ॥३१॥
अर्यम्णि चापि जाते वा तथाऽन्योपद्रवेषु च ।
अद्भुतेष्वपि जातेषु वायवीं शान्तिमाचरेत् ॥३२॥
द्वितीये दिनयामे तु रात्रौ वा समुपद्रवे ।
पुष्याग्ने च विशाखासु पित्र्यासु भरणीषु च ॥३३॥
उत्पातेषु तथा भाग्ये त्वाग्नेयीं शान्तिमाचरेत् ।
तृतीये दिनयामे च रात्रौ च समुपद्रवे ॥३४॥
रोहिण्यां वैष्णवे ब्राह्मे वासवे वैश्वदैवते ।
ज्येष्ठायां च तथा मैत्र्ये ह्युपद्रवेषु सर्वथा ॥३५॥
ऐन्द्रीं शान्तिं कारयेच्च विप्रैर्मन्त्रप्रवेदिभिः ।
चतुर्थे दिनमाने तु रात्रौ वा समुपद्रवे ॥३६॥
सार्पे पौष्णे तथाऽऽर्द्रायामहिर्बुध्न्ये च दारुणे ।
मूले वरुणदैवत्ये वारुणीं शान्तिमाचरेत् ॥३७॥
मित्रमण्डलवेलासु जायमाने ह्युपद्रवे ।
अद्भुतेषु विचित्रेषु शान्तिद्वयं प्रकारयेत् ॥३८॥
शान्तिर्वर्म भवत्येव रक्षत्युपद्रवादितः ।
शान्तिः पत्नी हि धर्मस्य दक्षस्य दुहिता मता ॥३९॥
धर्मयुक्ता मया चापि युक्ता बलेन योजिता ।
मम शक्तिस्वरूपा च मद्बलेनाऽभिवेशिता ॥४०॥
तत्तद्देवबलैः पुष्टा हरत्यद्यान्युपद्रवान् ।
उपघाताः पलायन्ते शान्तिनामककर्मभिः ॥४१॥
जनापचारान्नियतमपरज्यन्ति देवताः ।
देवनामपरागाच्च ह्युपसर्गः प्रवर्तते ॥४२॥
दिव्यान्तरिक्षभौमाख्यस्तच्छान्तिस्तत्र शान्तिदा ।
ग्रहर्क्षवैकृतो दिव्यश्चोपसर्गः प्रकीर्तितः ॥४३॥
उल्कापातो दिशां दाहः परिवेषस्तथैव च ।
गन्धर्वनगरं चापि वृष्टिस्तु विकृता तथा ॥४४॥
रक्तवृष्टिर्विषतापश्चान्तरिक्षोपसर्गकाः ।
चरस्थिरभवौ भौमो भूकम्पश्चापि भूमिजः ॥४५॥
जलाशयानां वैकृत्यं भौमः सोऽप्युपसर्गकः ।
भौमे त्वल्पफलं ज्ञेयं चिरेण स विपच्यते ॥४६॥
अभ्रजो मध्यफलदो मध्यकालफलप्रदः ।
अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् ॥४७॥
सप्ताहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं भवेत् ।
अद्भुतानां निवृत्तिस्तु विनाशान्त्या न जायते ॥४८॥
त्रिभिर्वर्षैरद्भुतं स्यात् सुमहद्भयकारणम् ।
राज्ञः शरीरे लोके वा पुरद्वारे पुरोहिते ॥४९॥
पाकमायाति पुत्रेषु तथा कोशे च वाहने ।
ऋतुस्वभावाज्जायन्ते ह्यद्भुता उपसर्गकाः ॥५०॥
शान्तिकर्मोपशमिताः शुभावहा भवन्ति ते ।
कालमासप्रभेदे तु शुभास्ते शान्तिमन्तरा ॥५१॥
वज्राशनिमहीकम्पाऽसस्यनिर्घातनिस्वनाः ।
परिवेषरजोधूमरक्ताऽर्काऽस्तमयोदयाः ॥५२॥
द्रुमोद्भेदकरस्नेहो बहुशः सफलद्रुमः ।
गोपक्षिमधुवृद्धिश्च शुभाः फाल्गुनचैत्रयोः ॥५३॥
ऋक्षोल्कापातकलुषं कपिलाऽर्केन्दुमण्डलम् ।
कृष्णं श्वेतं च पीतं च धूसरं ध्वान्तलोहितम् ॥५४॥
रक्तं पुष्पारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम् ।
सरितां चाम्बुसंशोषश्चैते ग्रीष्मे शुभावहाः ॥५५॥
शक्रायुधपरिवेषो विद्युदुल्काधिरोहणम् ।
कम्पोद्वर्तनवैकृत्यं हसनं दारुणं क्षितेः ॥५६॥
नद्योदपानं सरसां विधूनतरणप्लवाः ।
शृङ्गिणां च वराहाणां वर्षासु शुभदा हि ते ॥५७॥
शीतानिलतुषाराश्च नर्दनं मृगपक्षिणाम् ।
रक्षोभूतपिशाचानां दर्शनं वागमानुषी ॥५८॥
दिशो धूमान्धकाराश्च सनभोवनपर्वताः ।
उच्चैः सूर्योदयाऽस्तौ च हेमन्ते चेच्छुभावहाः ॥५९॥
दिव्यस्त्रीरूपगन्धर्वविमानाद्भुतदर्शनम् ।
ग्रहनक्षत्रताराणां दर्शनं वागमानुषी ॥६०॥
गीतवादित्रनिर्घोषो वनपर्वतसानुषु ।
सस्यवृद्धी रसोत्पत्तिः शरत्सु चेच्छुभावहाः ॥६१॥
हिमपाताऽनिलोत्पातविरूपाद्भुतदर्शनम् ।
कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् ॥६२॥
चित्रगर्भोद्भवः स्त्रीषु गोऽजाश्वमृगपक्षिषु ।
पत्राऽङ्कुरलतानां च विकाराः शिशिरे शुभाः ॥६३॥
देवतार्चाः प्रनृत्यन्ति वेपन्ते प्रज्वलन्ति च ।
वमन्त्यग्निं तथा धूमं स्नेहं रक्तं तथा वसाम् ॥६४॥
आरमन्ति रुदन्त्येताः प्रस्विद्यन्ति हसन्त्यपि ।
उत्तिष्ठन्ति निषीदन्ति प्रधावन्ति धमन्ति च ॥६५॥
विक्षिपन्ति मुञ्जते वा कोशप्रहरणध्वजान् ।
अवाङ्मुखा वै भवन्ति स्थानात् स्थानं भ्रमन्ति च ॥६६॥
एवमाद्या हि दृश्यन्ते विकाराः सहसोत्थिताः ।
लिङ्गायतनवप्रेषु तत्र वासं न रोचयेत् ॥६७॥
राज्ञो वा व्यसनं तत्र स च देशो विनश्यति ।
देवयात्रासु चोत्पातान् दृष्ट्वा देशभयं वदेत् ॥६८॥

पितामहस्य हर्म्येषु तत्र वासां न रोचयेत् ।
पशूनां रुद्रजं दुःखं नृपाणां लोकपालजम् ॥६९॥
सेनापतीनां वै स्कन्दविशाखादिसमुद्भवम् ।
लोकानां विष्णुवस्वीन्द्रविश्वकर्मसमुद्भवम् ॥७०॥
विनायकोद्भवं दुःखं नायकानां च शासिनाम् ।
देवप्रेष्यानृपप्रेष्यादेवस्त्रीणां नृपस्त्रियाः ॥७१॥
वासुदेवोद्भवं ग्रहोद्भवं दुःखं न चान्यथा ।
देवतागतदुःखेषु श्रुतिवेत्ता पुरोहितः ॥७२॥
देवतार्चां स्नापयेच्चाच्छादयेच्च विभूषयेत् ।
पूजयेद् गन्धमाल्यान्नमधुपर्कादिसम्पदा ॥७३॥
उपतिष्ठेच्च विधिवज्जुहुयात् सप्तरात्रकम् ।
अग्नौ ततो नित्यमेव भोजयेद् ब्राह्मणान् सतः ॥७४॥
साधून् साध्वीर्मिष्टभोज्यमिष्टपानैः सदक्षिणम् ।
प्राप्तेऽष्टमे दिने धेनुभूरत्नदानमाचरेत् ॥७५॥
कांचनानि प्रदद्याच्च ग्रहशान्तिं समापयेत् ।
शान्तिपाठान् कारयित्वा पापं समुपशामयेत् ॥७६॥
एवं कृते तु ते विघ्नाः शान्तिं यान्ति न संशयः ।
अथाऽनग्निर्दीप्यते चेद् राष्ट्रे यस्य निरिन्धनः ॥७७॥
न दीप्यते चेन्धनवान् तद्राष्ट्रं पीड्यते नृपैः ।
प्रज्वलेदप्सु मांसं वा तथाऽऽर्द्रं वापि किञ्चन ॥७८॥
प्राकारस्तोरणं द्वारं नृपवेश्म सुरालयम् ।
एतानि यत्र दीप्यन्ते तत्र राज्ञो भयं भवेत् ॥७९॥
विद्युता वा प्रदह्यन्ते तदापि नृपतेर्भयम् ।
स्वामिनो वा भयं तत्र यत्राग्निश्चाऽस्थले भवेत् ॥८०॥
अनैशानि तमांसि स्युर्विना पांसुरजांसि च ।
धूमश्चाऽनग्निजो यत्र तत्र विद्यान्महाभयम् ॥८१॥
तडित् त्वनभ्रे गगने भयं स्याद् ऋक्षवर्जिते ।
दिवा सतारे गगने भयं तथैव जायते ॥८२॥
ग्रहनक्षत्रवैकृत्ये तारविषमदर्शने ।
पुरवाहनयानेषु चतुष्पान्मृगपक्षिषु ॥८३॥
आयुधेषु च दीप्तेषु धूमायत्सु तथैव च ।
निर्गमत्सु च कोशात्तु संग्रामस्तुमुलो भवेत् ॥८४॥
विनाऽग्निं विस्फुलिंगाश्च दृश्यन्ते यत्र कुत्रचित् ।
स्वभावाच्चापि पूर्यन्ते धनूँषि विकृतानि च ॥८५॥
विकारश्चायुधानां स्यात् तत्र संग्राममादिशेत् ।
त्रिरात्रोपोषितस्तत्र जुहुयाद्वै पुरोहितः ॥८६॥
समिद्भिः क्षीरवृक्षाणां सर्षपैश्च घृतेन च ।
अग्निमन्त्रैर्हवनेन शान्तिस्तेषां प्रजायते ॥८७॥
साधून् सतीर्ब्राह्मणाँश्च बालाँश्च बालिकाः स्त्रियः ।
भोजयेत् पूजयेद् देवान् महोत्सवं प्रकारयेत् ॥८८॥
सुवर्णं धनरत्नानि दद्याद् गा सुवमम्बरम् ।
अग्निजोपद्रवाणां शस्त्राणां शान्तिस्तदा भवेत् ॥८९॥
पुरेषु येषु दृश्यन्ते पादे पादे प्रगामिनः ।
रुदन्तो वा हसन्तो वा स्रवन्तो वा रसान् बहून् ॥९०॥
अरोगाश्च विना वातं शाखां मुञ्चन्ति वै द्रुमाः ।
फलं मूलं तथा कालं दर्शयन्ति त्रिहायनाः ॥९१॥
एवं वै स्वं दर्शयन्ति फलं पुष्पं तथाऽन्तरे ।
क्षीरं स्नेहं तथा रक्तं मधु तोयं स्रवन्ति च ॥९२॥
शुष्यन्त्यरोगाः सहसा शुष्का रोहन्ति वा पुनः ।
उत्तिष्ठन्तीह पतिताः पतन्ति च तथोत्थिताः ॥९३॥
एवं तत्र फलं लक्ष्मि शृणु भिन्नं वदामि ते ।
रोदने व्याधिरायाति हसने देशविप्लवः ॥९४॥
शाखाप्रपतने स्याद्वै संग्रामो योधनाशकः ।
बालानां मरणं कुर्याद् बालवल्ली प्रपुष्पिता ॥९५॥
स्वराष्ट्रभेदं कुरुते फलपुष्पमथाऽन्तरे ।
क्षयः स्याद् गोक्षीरे चापि स्नेहे दुर्भिक्षमापतेत् ॥९६॥
वाहनापचयो मद्ये रक्ते संग्राम आपतेत् ।
मधुस्रावे भवेद् व्याधिर्जलस्रावे न वर्षति ॥९७॥
अरोगशोषिता वृक्षा दुर्भिक्षं सूचयन्ति वै ।
शुष्केषु सम्प्ररोहस्तु वीर्यमन्नं हिनस्ति च ॥९८॥
उत्थाने पतितानां च भयं भेदकरं भवेत् ।
स्थानात् स्थानं तु गमने देशभंगस्तदा भवेत् ॥९९॥
ज्वलत्स्वपि तु वृक्षेषु रुदत्स्वपि धनक्षयम् ।
एतत् पूजितवृक्षेषु सर्वं राज्ञो विपद्यते ॥१००॥
पुष्पे फले वा विकृते राज्ञो मृत्युं द्रुमो दिशेत् ।
एवं वृक्षेषु जातेषु शीघ्रमाच्छाद्य तद्द्रुमान् ॥१०१॥
गन्धमाल्यादिभिः सर्वान् भूषयेत्पूजयेत्तथा ।
वृक्षोपरि महच्छत्रं कुर्यात् पापोपशान्तये ॥१०२॥
शिवं विष्णुं श्रियं शिवामभ्यर्चयेद् द्रुमेषु वै ।
पशुं चान्नं त्वर्पयेच्च रुद्रशान्तिं प्रकारयेत् ॥१०३॥
रुद्रेभ्य इति वृक्षेषु हुत्वा रुद्रीं जपेत्ततः ।
पायसाऽऽज्यमध्वाद्यैः प्रपूज्य भूदानमाचरेत् ॥१०४॥

गीतं नृत्यं प्रकुर्याच्च रुद्रशान्तिस्ततो भवेत् ।
एवं लक्ष्मि प्रजाराजभयं सर्वं व्यपोहति ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दैवाऽन्तरिक्षभौमोत्पातानां शान्तिकर्माचारादिकथननामा षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

श्रीपुरुषोत्तम उवाच—

अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतम् ।
अनृतौ तु दिवाऽनन्ता वृष्टिर्बोध्या भयप्रदा ॥ १ ॥
अनभ्रे वैकृताश्चापि विज्ञेया राजमृत्यवे ।
शीतोष्णानां विपर्यासे नृपाणां रिपुजं भयम् ॥ २ ॥
शोणितं वर्षते यत्र तत्र शस्त्रभयं भवेत् ।
अंगारपांसुवर्षायां नगरस्य विनाशनम् ॥ ३ ॥
मज्जाऽस्थिस्नेहमांसानां जनमारभयं महत् ।
धान्यपुष्पफलान्नेषु तथा शत्रुभयं महत् ॥ ४ ॥
पांसुवर्षा फलानां तु रोगभीतिकरी मता ।
अकाले चाऽन्नवर्षायां सस्यानां भयमापतेत् ॥ ५ ॥
विरजस्के रवौ व्यभ्रे यदा छाया न दृश्यते ।
दृश्यते चेत् प्रतीपा वै तदा देशभयं भवेत् ॥ ६ ॥
अकाले करकावृष्टौ दुष्कालस्य भयं भवेत् ।
निरभ्रे वा तथा रात्रौ श्वेतं याम्योत्तरेण तु ॥ ७ ॥
इन्द्रधनुस्तथा चोल्कापातो गन्धर्वपत्तनम् ।
दिग्दाहः परिवेषश्च दिशां मलिनताऽपि चेत् ।
परचक्रभयं स्याद्वै स्वदेशोपद्रवोऽपि च ॥ ८ ॥
तच्छान्त्यर्थं सूर्ययज्ञं चन्द्रयज्ञं प्रकारयेत् ।
पर्जन्ययज्ञं च तथा मरुद्यज्ञं प्रकारयेत् ॥ ९ ॥
धनं द्रव्यं कांचनं च गा दद्यात् तत्र दक्षिणाः ।
उत्पातास्ते शान्तिमाप्य फलदा न भवन्ति वै ॥१०॥
शृणु लक्ष्मि तथा चान्यानुत्पातान् दुःखशंसकान् ।
नगरादुपसर्पन्ते समीपमुपयान्ति वा ॥११॥
नद्यो ह्रदाः प्रस्रवाणि विरसाश्च भवन्ति वा ।
विवर्णं कलुषं तप्तं फेनवज्जन्तुसंकुलम् ॥१२॥
स्नेहं क्षीरं सुरां रक्तं वहन्ते वा कुलोदकाः ।
षण्मासाभ्यन्तरे तत्र परचक्रभयं भवेत् ॥१३॥
जलाशया नदन्ते वा प्रज्वलन्ति यथाऽनलैः ।
विमुञ्चन्ति तथा लक्ष्मि ज्वालाधूमरजांसि च ॥१४॥
यद्वा तेषु जलोत्पत्तिः सुसत्त्वा वा जलाशयाः ।
संगीतशब्दाः श्रूयन्ते जनमारभयं भवेत् ॥१५॥
तच्छान्त्यै मधुतैलाज्यैर्हवनं त्वाचरेन्नृपः ।
जपेत्तु वारुणान्मन्त्रान् जापयेद् विप्रकोविदैः ॥१६॥
जले होमो जले चाप्यभिषेचनं घृतादिभिः ।
मध्वाज्यपायसं दद्याद् भोजने साधुयोगिनाम् ॥१७॥
श्वेताम्बरयुता गाश्च दद्याच्छ्रीगुरवे तथा ।
जलकुंभान् प्रदद्याद्वै रत्नमौक्तिकमर्पयेत् ॥१८॥
शृणु लक्ष्मि तथा चाऽन्यन्नारीषु विकृतिं यथा ।
अकालप्रसवा नार्यः कालातीतप्रजास्तथा ॥१९॥
विकृतप्रसवाश्चापि युग्मत्रिप्रसवाश्च वा ।
अमानुषा ह्यतुण्डाश्च सञ्जातव्यसनाः स्त्रियः ॥२०॥
हीनांगा अधिकांगाश्च प्रसूयन्ते वसन्ति च ।
पशवः पक्षिणश्चापि जन्तवश्च सरीसृपाः ॥२१॥
यत्र देशेऽथवा ग्रामे कुले वा तादृशा यदि ।
विनाशस्तस्य देशस्य ग्रामस्य वा कुलस्य वा ॥२२॥
नृपस्तादृशहीनांगान्नराग्नारीर्विवासयेत् ।
स्वराष्ट्रे सूयमानाश्च स्त्रीजातीः शान्तयेद्धवैः ॥२३॥
नारीयज्ञं प्रकुर्याद्वै हवनं भोजनादिकम् ।
नारीणां बालिकानां च वस्त्रालंकारकार्पणम् ॥२४॥
मातॄणां देवतानां च देवीनां पूजनं तथा ।
योगिनीनां सतीनां च साध्वीनां पूजनं तथा ॥२५॥
राधालक्ष्मीप्रभापारवतीनां पूजनं चरेत् ।
माणिक्यादुःखहालक्ष्मीमहालक्ष्मीप्रपूजनम् ॥२६॥
ललितायमुनागंगारतिभक्तिप्रपूजनम् ।
कुलदेवीप्रपूजां च कुर्यात्तथैव कारयेत् ॥२७॥
करयेच्छकैः प्रकुर्याच्च विप्रतर्पणमित्यपि ।
ततः शान्तिर्भवेल्लक्ष्मि ह्युपद्रवो न जायते ॥२८॥
शृणु नारायणीश्रि त्वं यानोपद्रवसूचनाम् ।
यान्ति यानान्ययुक्तानि युक्तान्यपि न यान्ति च ॥२९॥
नोद्यमानान्यपि पृष्ठे यान्ति तत्र महद्भयम् ।
वाह्यमाना न वाह्यन्ते वाह्यन्ते नात्यनाहताः ॥३०॥
अचलाश्च चलन्त्येव न चलन्ति चलानि च ।
आकाशे तूर्यनादाश्च गीतगान्धर्वनिःस्वनाः ॥३१॥
काष्ठदर्वीकुठारादि विकारं कुरुते यदि ।
गावो लाङ्गूलहननैः स्त्रियः स्त्रीश्च प्रताडयेत् ॥३२॥
उपस्करादिविकृतौ घोरं शस्त्रभयं भवेत् ।
तच्छान्त्यर्थं वायुपूजां कारयेद् विप्रपूजनम् ॥३३॥
सक्तून् दद्यादम्बरादि मिष्टान्नानि तु वायवे ।
पवमानमहामन्त्रान् मारुतांश्च मनून् जपेत् ॥३४॥

परमान्नं भोजयेच्च हवनं पायसादिभिः ।
दक्षिणा भूयसीर्दद्यात्तेन शान्तिर्भवेद् रमे ॥३५॥
शृणु श्रीशिवराज्ञीश्रि तथाऽन्यत् पशुसूचनम् ।
प्रविशन्ति यदा ग्राममारण्या वनपक्षिणः ॥३६॥
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलौकसः ।
स्थलौकसो जलं यान्ति घोरं वाशन्ति निर्भयाः ॥३७॥
राजद्वारे पुरद्वारे शिवा घूकाः श्वजातयः ।
दिने रात्रिंचरा यद्वा रात्रौ दिनचरास्तथा ॥३८॥
ग्राम्यास्त्यजन्ति वै ग्रामं शून्यता तत्र वै फलम् ।
दीप्ता वाशन्ति सन्ध्यासु मण्डलानि च कुर्वते ॥३९॥
वाशन्ति विस्वरं यत्र तत्रापि शून्यता फलम् ।
काका घूका मस्तकस्योर्ध्वे वाशन्ति दिवा यदि ॥४०॥
तस्याऽऽपत्काल आगच्छेद् वह्निर्वाऽऽकस्मिको भवेत् ।
मरणं चाप्यकीर्तिश्च स्थानत्यागो भवेच्च वा ॥४१॥
आपत्कालो भवेत्तस्य प्रजाकुटुम्बिभिः कृतः ।
प्रदोषे कुक्कुटो वाशेद्धेमन्ते यत्र कोकिलः ॥४२॥
अर्कोदये त्वभिमुखी शिवा रौति भयं दिशेत् ।
गृहं कपोतः प्रविशेत् क्रव्यादो मूर्ध्नि लीयते ॥४३॥
मक्षिकाश्च मधु कुर्युर्मृत्युर्गृहपतेर्भवेत् ।
प्राकारद्वारगेहेषु तोरणापणवीथिषु ॥४४॥
केतुच्छत्राऽऽयुधाद्येषु क्रव्यादः प्रपतेत् यदि ।
जायन्ते वाऽथ वल्मीका मधु वा स्यन्दते यदि ॥४५॥
स देशो नाशमायाति राजा च म्रियते तथा ।
मूषकाः शलभाश्चापि शुकाः क्षुद्रास्तृणादनाः ॥४६॥
दृश्यन्तेऽसंख्यका यत्र क्षुन्मारभयमापतेत् ।
काष्ठोल्मुकास्थिशृंगाढ्याः श्वानो मर्कटवेदनाः ॥४७॥
विषश्वानश्चाभितोऽपि भ्रमन्ति यत्र पत्तने ।
काका धान्यखले धान्यमुखाः पतन्ति वा पुरे ॥४८॥
दुर्भिक्षवेदना तत्र बोध्या देहिक्षयंकरी ।
रणसेनाभयं स्याच्च प्रजानां च वा तत्र च ॥४९॥
काको मैथुनसक्तो वै दिवसे यदि दृश्यते ।
राजा वा म्रियते तत्र स च देशो विनश्यति ॥५०॥
उड्डीयन्ते निशि काका गृहभंगो भवेत् खलु ।
उलूको दृश्यते यत्र नृपद्वारे तथा गृहे ॥५१॥
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ।
मृगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणम् ॥५२॥
देवाः कपोता रक्षन्तु ग्रामं गृहं कुटुम्बिनः ।
रुद्रमन्त्रानिन्द्रमन्त्रान् जपेयुः पञ्चषा द्विजाः ॥५३॥
गावो देया ह्यवनान्ते ग्रहशान्तिं मखं चरेत् ।
विष्णुयज्ञं प्रकुर्याच्च रुद्रयज्ञं च वा चरेत् ॥५४॥
भौतिकीं शान्तिमेवाऽपि कारयेद्द्विजपुंगवैः ।
शृणु लक्ष्मि तथा चाऽन्यद्भौतिकं सूचनादिकम् ॥५५॥
प्रासादतोरणाऽट्टालद्वारप्राकारवेश्मनाम् ।
निर्निमित्तन्तु पतनं दृढानां राजमृत्युकृत् ॥५६॥
रजसा वाऽथ धूमेन दिशो यत्र समाकुलाः ।
आदित्यचन्द्रताराश्च विवर्णा भयवृद्धिदाः ॥५७॥
राक्षसा यत्र दृश्यन्ते ब्राह्मणाश्च विधर्मिणः ।
ऋतवश्च विफला वै ह्यपूज्यः पूज्यते जनैः ॥५८॥
नक्षत्राणि वियोगीनि महद्भयप्रदानि वै ।
केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः ॥५९॥
ग्रहर्क्षविकृतिर्यत्र तत्र देशे महद्भयम् ।
स्त्रियस्तु कलहायन्ते बाला निघ्नन्ति बालकान् ॥६०॥
क्रियाणामुचितानां च विच्छित्तिर्यत्र जायते ।
हूयमानस्तु यज्ञाऽग्निर्दीप्यते नैव शान्तिषु ॥६१॥
पिपीलिकाश्च क्रव्यादा यान्ति चोत्तरतस्तथा ।
पूर्णकुंभाः स्रवन्ते च हविर्वा विप्रलुप्यते ॥६२॥
मंगल्याश्च गिरो यत्र न श्रूयन्ते समन्ततः ।
क्षवथुर्बाधते यत्र हसन्ति पुत्तलानि च ॥६३॥
बाधन्ते भोज्यजातानि स्रवन्ते पात्रतः पयः ।
देवेषु सत्सु विप्रेषु दैवतं दृश्यते न च ॥६४॥
देवसाधुब्राह्मणेषु भावनारहिताः प्रजाः ।
मन्दघोषाणि वाद्यानि वाद्यन्ते विस्वराणि च ॥६५॥
गुरुमित्रद्विषो यत्र शत्रुपूजारता जनाः ।
पूज्यान्मान्यान् श्रेष्ठजनान् जनो यत्राऽवमन्यते ॥६६॥
शान्तिमंगलहोमेषु नास्तिक्यं यत्र जायते ।
राजा वा म्रियते तत्र देशो वा स विनश्यति ॥६७॥
राज्ञो यत्र तु दुर्भाग्यं तत्र चिह्नानि वै शृणु ।
प्रजा निजाः नृपो द्वेष्टि प्रजाजनैर्विरुद्ध्यते ॥६८॥
प्रजास्वं बलतो धत्ते प्रजाजनान् जिघांसति ।
कृतघ्नतां दर्शयति याचितश्च प्रकुप्यति ॥६९॥
करोति निन्दनं सतां प्रशंसां नाभिमन्यते ।
असह्यं तु करं लोभाद् बलात् पातयते जने ॥७०॥
एवं वै विकृते भावे शक्रयागं समाचरेत् ।
सपत्नीकं सुरेशं च तथा देवान् प्रतर्पयेत् ॥७१॥
भोजनानि द्विजातिभ्यः सुरेभ्यो बलयस्तथा ।
सद्भयः पूजा सतीभ्यश्च शृंगारादिप्रदापनम् ॥७२॥

बालिकाभ्यो भोजनानि बालेभ्योऽपि शुभानि च ।
गोदानं भूकाञ्चनादिदानं वस्त्रार्पणादिकम् ॥७३॥
कर्तव्यं हवनं श्रेष्ठं तेन शान्तिर्भवेत् खलु ।
यत्र देशेऽथवा ग्रामे रन्धितान्नं तु मांसवत् ॥७४॥
दृश्यते दधि रक्ताभं नश्येद् ग्रामः प्रदेशकः ।
ग्रामाध्यक्षस्य वै धिष्ण्यं पतेत्तु कारणं विना ॥७५॥
भग्नं भवेद् गृहं वापि नृपनाशो भवेत्तदा ।
रक्तपाषाणवर्षा चेत् श्वरोदनं समन्ततः ॥७६॥
देशग्रामविनाशः स्याद् विष्णुयागं ततश्चरेत् ।
भूकम्पो गर्जनायुक्तो दुर्भिक्षस्य प्रसूचकः ॥७७॥
दक्षिणादुत्तरं याति साम्राज्यस्य भयं महत् ।
पूर्वात्तु पश्चिमं याति नृपघातो भवेद् ध्रुवम् ॥७८॥
पूर्वं तु पश्चिमाद् याति युद्धं नृपेषु जायते ।
उत्तराद् दक्षिणं याति सुभिक्षं जायते तदा ॥७९॥
आद्यप्रहरे रोगः स्याद् द्वितीये धननाशकृत् ।
तृतीये धान्यधनकृच्चतुर्थे मध्यमप्रदः ॥८०॥
सन्ध्यायां भूकम्पने तु सर्वस्वनाशसूचनम् ।
प्रयाणे कण्टके वृक्षे क्लेशदं काकभाषणम् ॥८१॥
प्रयाणे सन्मुखं काकश्चायाति वाहने स्थितः ।
यद्वाऽम्बरे तदा मृत्युः प्रवासं नैव कारयेत् ॥८२॥
दक्षपार्श्वे पक्षक्षेपे गन्तव्यं नैव तद्दिशि ।
गतः पुनर्न व्यायाति मरणं स्याद्ध्रुवं रमे ॥८३॥
वामाद् दक्षं प्रयाते तु काके वधश्च बन्धनम् ।
उत्तरं ताराक्षरणं दुर्भिक्षकृन्महद् भवेत् ॥८४॥
महामारीरोगजन्म प्रजानां कदनं महत् ।
तारकयोर्द्वयोश्चाभिमुख्ये क्षरणं युद्धकृत् ॥८५॥
सशिखस्योदये छत्रभंगो बालादिनाशनम् ।
सपुच्छस्योदये नाशो पशूनां वै समापतेत् ॥८६॥
खग्रासे ग्रहणे युद्धं दुर्भिक्षं वा भवेद् भुवि ।
प्रयाणे सौषधो देही कृष्णधान्यं कपासकम् ॥८७॥
शुष्कतृणानि च करीषाणि शुष्कं च काष्ठकम् ।
भस्म तैलं गुडं भाग्यहीनो जनः सतैलकः ॥८८॥
नग्नो विकीर्णकेशा स्त्री रुग्णः काषाम्बरस्तथा ।
विक्षिप्तो जीर्णकन्थादि श्वपचो मलपात्रकम् ॥८९॥
मृतपक्षी लोहवस्तु विधवा कर्दमस्तथा ।
चर्म चर्मकरश्चापि तक्रं शवं च गर्भिणी ॥९०॥
कारागारी कृष्णवृषः सर्पो मण्डुक इत्यपि ।
कृकलासो वनगोधा शशस्तुषाश्च सूकरः ॥९१॥
तृणान्यस्थि रक्तपुष्पं मार्जारो हिंसकः पशुः ।
लोहकारो यन्त्रपिष्टा मुण्डी च दुर्जनोऽपि वा ॥९२॥
जटी खञ्जश्च महिषो व्यंगश्च गर्दभस्तथा ।
रोदनं च यतिश्चापि शत्रुश्च बन्धितो जनः ॥९३॥
श्वयुद्धं च लुताजालं महत्पिपीलिकादयः ।
पिपीलिकाप्रवासश्च पाषाणो लवणं तथा ॥९४॥
क्षुवनं गोक्षुवनं च वन्ध्या रजकश्चाऽप्रियम् ।
अभिमिलेद् यदि मार्गे न गच्छेत्तत्र वै क्वचित् ॥९५॥
मरणं वा महादुःखं कार्याऽसिद्धिर्विडम्बना ।
वामांगानि पुरुषस्य नार्या दक्षांगकानि तु ॥९६॥
स्फुरेयुर्यदि विद्याद्वै महापत्तिं विनाशनम् ।
गमने यष्टिकापातः शस्त्रपातोऽथवा भवेत् ॥९७॥
मुकुटादेः प्रपातो वा पतनस्यैव सूचकः ।
पतनं स्वस्य हर्म्याग्रे सोपानादौ च वा यदि ॥९८॥
पराजयो भवेत्तूर्णं मरणं दुःखमित्यपि ।
एवं जातेषु तत्कालं शान्तिकर्माणि चाचरेत् ॥९९॥
विष्णुयागं रुद्रयागं देवपूजां ग्रहार्चनम् ।
जपदानव्रताद्यं च कुर्याच्छान्तिर्भवेद्ध्रुवा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने बहुविधोत्पातानां शान्तिकर्मादिकथननामा सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं हृदुत्थवैकृतानि तु ।
शरीरोत्थानि चान्यानि शकुनस्फुरणानि च ॥ १ ॥
शरीरे स्फुरिते मूर्ध्नि पृथ्वीलाभो भवेदपि ।
ललाटे स्थानवृद्धिः स्यान्भ्रूनसोः प्रियसंगमः ॥ २ ॥
नेत्रस्फुर्तौ भृत्यलाभो दृगुपान्ते धनागमः ।
ऊर्ध्वे मध्ये चापगमो द्रव्यस्यैव प्रजायते ॥ ३ ॥
दृक्कूले स्फुरिते लक्ष्मि जयः शीघ्रं भवेदिति ।
अधःस्फुर्तौ स्त्रिया भोगः श्रवणान्ते प्रिया श्रुतिः ॥ ४ ॥
नासिकायां प्रीतिसौख्यं प्रजाप्तिरधरोष्ठजे ।
कण्ठस्फुर्तौ भोगलब्धिर्भोगवृद्धिस्तथांऽसयोः ॥ ५ ॥
बाह्वोः स्फुर्तौ सुहृत्स्नेहो हस्तयोस्तु धनागमः ।
पृष्ठस्फुर्तौ न विजयो वक्षःस्फुर्तौ जयो भवेत् ॥ ६ ॥
कुक्षिस्फुर्तौ प्रीतिलाभः स्तने स्त्रीप्रसवो भवेत् ।
नाभिस्फुर्तौ स्थानहानिरन्त्रस्फुर्तौ धनागमः ॥ ७ ॥

जानुसन्धौ परैः सन्धिर्बलिभिश्च समागमः ।
जङ्घास्फुतौ खण्डभागविनाशः स्यान्न संशयः ॥ ८ ॥
पादयोः स्फुरणे लक्ष्मि धिष्ण्यस्थानमवाप्नुयात् ।
पादतलस्फुरे चाध्वप्रवासो लाभकृद् भवेत् ॥ ९ ॥
वामे नार्या सदा लाभा दक्षे पुंसः स्फुरादयः ।
अलाभदा विपर्यस्ता भवेयुर्नात्र संशयः ॥१०॥
अनिष्टस्फुर्तिजनने हवनं तर्पणं तथा ।
सुवर्णेन प्रकर्तव्यं दानं च भोजनादिकम् ॥११॥
शान्तिस्तत्र वैष्णवी वा रौद्री कार्या सुखाप्तये ।
अथ हृदुत्थविकृताकारान् निद्रामयान् शृणु ॥१२॥
अनिष्टान् दुष्टफलदान् दृष्ट्वा शान्तिं प्रकारयेत् ।
नाभिं विनाऽन्यगात्रेषु तृणवृक्षांकुरोद्भवः ॥१३॥
चूर्णनं मूर्ध्नि कांस्यानां मुण्डनं नग्नता तथा ।
मलिनाम्बरधारित्वमभ्यंगः पङ्कमर्दनम् ॥१४॥
पंके च मग्नता चोच्चैः पातो दोलाधिरोहणम् ।
अर्जनं पक्वलौहानामश्वानां मारणं तथा ॥१५॥
रक्तपुष्पद्रुमाणां च मण्डलस्याऽधिरोहणम् ।
वराहर्क्षखरोष्ट्राणां तथा चारोहणक्रिया ॥१६॥
भक्षणं पक्वमांसानां तैलस्य कृसरस्य च ।
नर्तनं हसनं चापि विवाहो गीतमित्यपि ॥१७॥
तन्त्रीवाद्यविहीनानां वाद्यानामभिवादनम् ।
स्रोतोऽवगाहनं चापि स्नानं गोमयवारिभिः ॥१८॥
पंकेन स्नानमेवापि धूलीतोयेन वापि च ।
मातुः प्रवेशो जठरे चितारोहणमित्यपि ॥१९॥
इन्द्रध्वजाभिपतनं पतनं चन्द्रसूर्ययोः ।
दिव्यान्तरिक्षभौमानामुत्पातानां च दर्शनम् ॥२०॥
देवद्विजातिभूपालगुरूणां क्रोधनं तथा ।
आलिङ्गनं कुमारीणां पुरुषाणां तु मैथुनम् ॥२१॥
हानिश्चापि स्वगात्राणां विरेकवमनादिकम् ।
दक्षिणाशाभिगमनं व्याधिनाऽभिभवोऽपि च ॥२२॥
पुण्यहानिः फलहानिः स्वप्ने गृहस्य मार्जनम् ।
गृहस्य पतनं क्रीडा पिशाचैर्वानरैः सह ॥२३॥
ऋक्षक्रव्यादकुनरैः कुस्त्रीभी रमणं तथा ।
परादभिभवश्चापि पराच्च दुःखसंभवः ॥२४॥
काषायाम्बरधारित्वं काषायिस्त्रीसमागमः ।
स्नेहपानं स्नेहमग्नता रक्तपुष्पलेपनम् ॥२५॥
भोजनानां भ्रष्टता च काष्ठानां दर्शनं तथा ।
गन्त्रीणां मार्गभ्रंशश्च बहुसंयावभोजनम् ॥२६॥
वेश्यानां दर्शनं तासां स्तन्यपानं तथा खलु ।
शतघ्नीनां स्फोटनादि तथोच्छिष्टादिभोजनम् ॥२७॥
रंगकारगृहाणां च दर्शनं घातकस्य च ।
तडागानां प्रवाहेषु पतनं सस्यदाहनम् ॥२८॥
कलहश्च जलैर्नौकामरणं चान्धदर्शनम् ।
कालीकट्यां निषदनं ह्युपानत् मस्तके स्थितम् ॥२९॥
विरुद्धाक्षरविन्यासा प्रवासे निजदर्शनम् ।
चित्रमूर्त्यदृश्यता च गणेशशवमस्तकम् ॥३०॥
उष्ट्रस्य दर्शनं भोज्यभक्षणे विघ्नता तथा ।
मुण्डनं चाब्धिपतनं लिंगाद् रक्तस्रवस्तथा ॥३१॥
जीर्णाम्बरधरत्वं च गुरोर्विप्रस्य क्रुद्धता ।
भषमाणश्वाऽवलोकः फणाग्रग्रहणं मृतिः ॥३२॥
चन्द्रशालादितश्चापि शिलासु पतनं तथा ।
वनिमार्जाराऽवलोकः कृष्णपुंकृतलक्ष्यकम् ॥३३॥
निशानं धूष्कृतीनां च मृषाऽऽयुधस्य स्फोटनम् ।
तक्रकृसराप्राशश्च वस्तूनां विगमोऽपि च ॥३४॥
शत्रूणां दर्शनं चापि विष्टायां पादपातनम् ।
षट्पदीयजन्तूनां च विष्टायां दर्शनं तथा ॥३५॥
यवनाद्यैः कृतं कर्णनासिकयोश्च कर्तनम् ।
नग्नं स्वदर्शनं तैलाक्तं रक्तस्त्रीसुयोजनम् ॥३६॥
मुकुटादेः पश्चभागे विवर्तनं प्रपातनम् ।
शिखाप्रपातनं कलशेः प्रपातनं दतामपि ॥३७॥
लिंगस्य पतनं चापि पत्नीप्रज्वलनं तथा ।
गलपाशावलोकश्च ताडने मरणं तथा ॥३८॥
गोस्त्रीवधादिकं स्वप्ने महोत्पातादिदर्शनम् ।
पितॄणां दर्शनं चापि परदेशपलायनम् ॥३९॥
सर्वैः कृततिरस्कारः शवाधिरोहणं तथा ।
शत्रुभिश्च धृतश्चापि द्रव्यस्य तु भुवस्तलात् ॥४०॥
भूत्वा पिपीलिका यानं वृश्चिकां वा तथाविधम् ।
पत्न्याः पलायनं चापि सर्वस्वनाशसूचकम् ॥४१॥
कन्यावैधव्यभावश्च देवालयविनाशनम् ।
रक्तस्रावो रक्तरोगः क्षयरोगस्य दर्शनम् ॥४२॥
मृतगर्भप्रसवश्च गर्भिणीमरणं तथा ।
विमानपतनं चापि शकटीभंग इत्यपि ॥४३॥
व्याघ्रधृतिः सिंहकृतं मारणं स्वस्य वै वने ।
मकरैर्धर्षणं चापि गह्वरे पतनं तथा ॥४४॥
खाते रोधस्तथा नैजे भवने रोधनं तथा ।
पादयोर्बन्धनं चापि विदार्य बहुभिर्जनैः ॥४५॥

चाण्डालीभोग एवापि चाण्डालभोग इत्यपि ।
भूतानां दर्शनं स्वप्ने भयदाऽरण्यदर्शनम् ॥४६॥
हिंस्राणां दर्शनं चापि वह्निमध्ये प्रवेशनम् ।
यानेन स्वर्गगमनं श्मशानगमनं तथा ॥४७॥
याम्यावलोकनं चापि कालपुरुषदर्शनम् ।
प्रेतस्य दर्शनं स्वप्ने पाशधरस्य दर्शनम् ॥४८॥
राजदूतस्याऽवलोको गरुडस्यापि दर्शनम् ।
तुलसीभक्षणं चापि गोमयैर्भूविलेपनम् ॥४९॥
झंझावातेनोह्यमानत्वं च यन्त्रेण कर्षणम् ।
समाजे कर्त्तनं चापि पादैः प्रदलनं तथा ॥५०॥
वमनं रक्तकमिश्रं वमने कीटदर्शनम् ।
कृष्णसर्पस्य दंशश्च भोजने कृमिदर्शनम् ॥५१॥
अद्रीणां चालनं चापि भवनानां च चालनम् ।
कन्यानां बालसूतिश्च स्त्रीणां विकृतसूतिता ॥५२॥
नराणां श्मश्रुप्रपातः स्त्रीणां श्मश्रुप्ररोहणम् ।
नराणां स्त्रीवेषवत्त्वं स्त्रीणां पुरुषवेषिता ॥५३॥
अस्तनीत्वं तथा स्त्रीणां नराणां स्तनयुक्तता ।
स्वप्ने चेद् दृश्यते त्वेतद् देशहानिर्महाभयम् ॥५४॥
राजा स्वप्ने हतो दृष्टो राज्यनाशो भवेद्ध्रुवम् ।
वृक्षाणां गमनं चापि वल्लीनां गमनं तथा ॥५५॥
कन्यानां गमनं चापि विदेशं प्रति दृश्यते ।
लक्ष्मीहानिश्च दुर्भिक्षं भवेदेव न संशयः ॥५६॥
सरितां गमनं चाप्युद्वेलताऽब्धेः समन्ततः ।
जलेन प्रलयस्तत्र खण्डस्य च क्षितेरपि ॥५७॥
पृथिव्या वा प्रलयः स्यान्नात्र कार्या विचारणा ।
देवालयानां गमनं चाद्रीणां गमनं तथा ॥५८॥
शिलासैन्यविहारश्च देशनाशफलो भवेत् ।
दुर्गे शब्दास्तु जायन्तेऽज्ञाता भयावहा यदि ॥५९॥
दुर्गनाशभयं तत्र राज्यनाशभयं भवेत् ।
कक्षासु गर्जना रात्रावाकस्मिकी भवेद् यदि ॥६०॥
रोगव्याप्तिर्महामारी प्रजानाशोऽति जायते ।
हसन्ति गृहकोणेषु वानराः ऋक्षका यदि ॥६१॥
गृहं शून्यं भवेदेव मासान्ते नात्र संशयः ।
मुण्डी रक्ताम्बरः स्वप्ने दृश्यते दण्डधृग् यदि ॥६२॥
मरणं तत्र जायेत विनाशः सम्पदामपि ।
वनदेव्यो यत्र शुष्काः क्षीणाश्च वृद्धकन्यकाः ॥६३॥
सगर्भा शुष्कदेहाश्च दृश्यन्ते स्वप्नके यदि ।
भग्नपादाश्च खञ्ज्यश्च वृकण्यः शृंगककुब्जिकाः ॥६४॥
अनावृष्टिहता लोका म्रियन्तेऽत्र न संशयः ।
गावो यत्र विशस्यन्ते म्लेच्छैः स्वप्नेऽवलोक्यते ॥६५॥
तत्र म्लेच्छोपद्रवाश्च जायन्ते नात्र संशयः ।
क्रव्यादा यत्र दृश्यन्ते नगरोपरि यूथशः ॥६६॥
नगरस्य विनाशः स्याद् रक्षा रुद्रमखैर्भवेत् ।
उज्ज्वला उज्जलाः कन्या रुदन्ति यान्ति यत्स्थलात् ॥६७॥
तत्र विद्याविनाशः स्यादुद्योगानां विनाशनम् ।
कलाकौशल्यनाशश्च दारिद्र्यं रंकताऽऽपतेत् ॥६८॥
विधवानां मण्डलानि दृश्यन्ते यत्र चाभितः ।
कबन्धानां मण्डलानि तत्र नाशो हि संगरात् ॥६९॥
अनृतौ पशवो यत्र स्खलन्ति पाशवीषु वै ।
धर्मभंगो भवेद् देशे म्लेच्छाचारविवर्धनम् ॥७०॥
एवमादीनि चान्यानि कुष्ठादिदर्शनं तथा ।
दुःस्वप्नानि भवेयुश्च द्राक् तेषां कथनं वरम् ॥७१॥
भूयः प्रस्वापनं चापि कल्कस्नानं तिलैरपि ।
होमोवह्नौ ब्राह्मणानां सतां पूजा सुरार्चनम् ॥७२॥
स्तुतिः श्रीहरिकृष्णस्य वासुदेवस्य पूजनम् ।
नागेन्द्रमोक्षश्रवणं बालकृष्णस्य पूजनम् ॥७३॥
रुद्रयागो विष्णुयागश्चोत्सवो हरिकीर्तनम् ।
कारयेत् स्वगृहे लक्ष्मी कथां नारायणाश्रिताम् ॥७४॥
लक्ष्मीनारायणसंहितायाः पारायणं महत् ।
भये महति सम्प्राप्ते कारणीयं भयापहम् ॥७५॥
स्वप्नं तु प्रथमे यामे सम्वत्सरे फलप्रदम् ।
षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्तृतीयके ॥७६॥
चतुर्थे मासमात्रेण प्रातर्दशाहकृत्फलम् ।
स्वप्नद्वये शुभाशुभे रात्रौ स्यातां तदा फलम् ॥७७॥
पश्चाद् दृष्टस्य जायेत प्राग्दृष्टं लोपमीयते ।
एतेषामसतां स्वप्ने दर्शने तन्निवारणम् ॥७८॥
ग्रहयज्ञं विष्णुयज्ञं रुद्रयज्ञं सतीमखम् ।
पितृयज्ञं भोज्ययज्ञं दानपुण्यं समाचरेत् ॥७९॥
राज्ञा धर्मप्रसक्तेन प्रजानां च हितेप्सुना ।
ग्रहयज्ञाः प्रकर्तव्या लक्षहोमसमन्विताः ॥८०॥
नदीनां संगमे चापि देवानामग्रतस्तथा ।
तटाकसन्निधौ दैवतीर्थे भूमिं परीक्षयेत् ॥८१॥
खनेत् कुण्डं हस्तमात्रं चाष्टोत्तरसहस्रकम् ।
हवनं तत्र कर्तव्यं शान्तिस्तेन प्रजायते ॥८२॥
द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणम् ।
अष्टौ वै ऋत्विजः कार्या मूलक्षीरफलाशनाः ॥८३॥

रत्नानि दानयोग्यानि मण्डपे सन्निधापयेत् ।
गायत्र्या दशसाहस्रं मानस्तोकेन षड्गुणः ॥८४॥
त्रिंशद् ग्रहादिमन्त्रैश्च चत्वारो विष्णुदैवतैः ।
कुष्माण्डैर्जुहुयात् पञ्च कुसुमाद्यैस्तु षोडश ॥८५॥
होतव्या दशसाहस्रं बादरैर्जातवेदसि ।
श्रियो मन्त्रेण होतव्याः सहस्राणि चतुर्दश ॥८६॥
शेषाः पञ्चसहस्राणि होतव्यास्त्विन्द्रदैवतैः ।
हुत्वा शतसहस्रं तु पुण्यस्नानं समाचरेत् ॥८७॥
कुंभैः षोडशसंज्ञैश्च सहिरण्यैः सुमंगलैः ।
स्नापयेद् यजमानं तु ततः शान्तिर्भवेद् ध्रुवम् ॥८८॥
हस्त्यश्वरथयानानि भूमिवस्त्रधनानि च ।
अनडुद्दोशतं दद्यात् ऋत्विजां चात्र दक्षिणाम् ॥८९॥
मासे पूर्णसमाप्तौ तु लक्षहोमः प्रकीर्तितः ।
कोटिहोमविधानं तु शृणु लक्ष्मि नदीतटे ॥९०॥
ऋत्विजः षोडश तत्र दीक्षा साम्वत्सरी मता ।
चैत्रे वा कार्तिके होमारंभं कृत्वा तु वत्सरम् ॥९१॥
कारयेत् यजमानस्तु पयोभक्षी फलाशनः ।
यवादिव्रीहयो माषास्तिलाश्च सर्षपास्तथा ॥९२॥
पालाशाः समिधः शस्ता वसोर्धारा तथोपरि ।
आद्यमासे तु ऋत्विग्भ्यो दद्याद्वै क्षीरभोजनम् ॥९३॥
द्वितीये कृसरां दद्याद्धर्मकामार्थसाधिनीम् ।
तृतीये मासि संयावं चतुर्थे मोदकान् शुभान् ॥९४॥
पञ्चमे दधिभक्तं च षष्ठे तु सक्तुभोजनम् ।
पूपाँश्च सप्तमे दद्यादष्टमे घृतपूपकान् ॥९५॥
मिष्टौदनं च नवमे दशमे यवमिष्टकम् ।
एकादशे माषवटान् द्वादशे षड्रसान् दिशेत् ॥९६॥
अहतवासाः संवीतो दिनार्धे जुहुयाच्छुचिः ।
इन्द्राद्यादिसुराणां च प्रीणनं सार्वकामिकम् ॥९७॥
सर्वदानानि देवानामग्निष्टोमं च कारयेत् ।
विधिना कारयेत्तत्र पूर्णाहुतिं शते शते ॥९८॥
सहस्रे द्विगुणा देया यावच्छतसहस्रकम् ।
पुरोडाशो देवताभ्यो देयः समर्चयेद् द्विजान् ॥९९॥
सुरान् पितॄन् तर्पयेच्च पिण्डार्पणैर्विधानतः ।
होमान्ते दक्षिणां दद्यात्तुलां शिक्यद्वयान्विताम् ॥१००॥
बध्वाऽऽत्मानं तोलयेच्च पत्नीं च तोलयेत्तथा ।
सुवर्णेन रजतेन शर्कराभिश्च हीरकैः ॥१०१॥
दद्याद् दानं राजसूयफलं स्याद् विघ्ननाशकम् ।
प्रीयतां श्रीहरिकृष्णः सर्वयज्ञेश्वरः प्रभुः ॥१०२॥
इत्युक्त्वा प्रणमेद् विप्रान् भोजयेल्लक्षमानवान् ।
सर्वोपघाता नश्यन्ति पुण्यान्यस्य भवन्ति च ॥१०३॥
न शोचेज्जन्ममरणे कृताकृतविचारणे ।
यथाशक्ति प्रकुर्याद्वा ग्रहादिमखमुत्तमम् ॥१०४॥
सर्वतीर्थविधानस्य सर्वयज्ञविधेः फलम् ।
एवं कृत्वाऽऽप्नुयाल्लक्ष्मि ! श्रवणात्पठनादपि ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने दुःस्वप्नाद्युपघात-तच्छान्त्यर्थकग्रहयज्ञादिनिरूपणनामा अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु त्वं शिवराज्ञीश्रि स्वप्ने दृष्टे शुभे शुभम् ।
फलं सञ्जायते द्रष्टुः पुनर्निद्रां न चाऽऽचरेत् ॥ १ ॥
शैलप्रासादनागाऽश्ववृषभारोहणं शुभम् ।
द्रुमाणां श्वेतपुष्पाणामारोहणं शुभं मतम् ॥ २ ॥
द्रुमतृणोद्भवो नाभौ तथैव बहुबाहुता ।
तथैव बहुशीर्षत्वं फलितद्रुसमुद्भवः ॥ ३ ॥
शुक्लमाल्याम्बरधृतिः सर्वांगपरिमार्जनम् ।
चन्द्रार्कतारकास्पर्शः शक्रध्वजाभिलिंगनम् ॥ ४ ॥
शक्रध्वजोच्छ्रायकर्म शत्रूणां वधदर्शनम् ।
भूम्यम्बुधीनां ग्रसनं वादे द्युते मृधे जयः ॥ ५ ॥
भक्षणं चार्द्रमांसानां मत्स्यानां पायसस्य च ।
दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च ॥ ६ ॥
सुरारुधिरमद्यानां पानं क्षीरस्य चापि वै ।
अन्त्रैर्वा वेष्टनं भूमौ निर्मलव्योमदर्शनम् ॥ ७ ॥
मुखेन दोहनं गोश्च महिष्या हस्तियोषितः ।
सिंहीनां वडवानां च व्याघ्रीणां दोहनं शुभम् ॥ ८ ॥
प्रसादो देवसाधूनां गुरूणां योग्ययोगिनाम् ।
विप्राणां च प्रसादोऽपि सतीनां धर्मयोषिताम् ॥ ९ ॥
अंभसा त्वभिषेकश्च गवां शृंगाश्रितेन वा ।
चान्द्रजलेन वा गंगाजलेन व्योमवारिणा ॥१०॥
सोऽयं राज्यप्रदो बोध्यश्चाभिषेकः शुभावहः ।
स्वप्ने राज्याभिषेकश्च विष्ण्याभिषेक उत्तमः ॥११॥
छेदनं शिरसश्चापि विघ्ननाशाभिबोधकम् ।
लब्धिश्च राज्यचिह्नानां तन्त्रीवाद्यभिवादनम् ॥१२॥
तथोदकानां तरणं तथा विषमलंघनम् ।
करेणुवडवानां च गवां च प्रसवो गृहे ॥१३॥

आरोहणमथाश्वानां हस्तिनां रोहणं तथा ।
वृषभारोहणं चापि विमानारोहणं शुभम् ॥१४॥
वरस्त्रीणां तथा लाभश्चालिंगनं सुयोषितः ।
सुवर्णैः पूजनं श्रेष्ठं देहे विष्ठानुलेपनम् ॥१५॥
जीवतां भूभृतां पित्रोर्गुरूणां दर्शनं सताम् ।
साध्वीनां स्वप्रियायाश्च दर्शनं सौम्यमुत्तमम् ॥१६॥
दर्शनं देवतानां च विमलानां तु योगिनाम् ।
वारीणां निर्मलानां चोत्सवानां दर्शनं शुभम् ॥१७॥
वृक्षाणां फलपुष्पैश्च युक्तानां दर्शनं वरम् ।
वल्लीनां दर्शनं श्रेष्ठमुद्यानानां शुभप्रदम् ॥१८॥
वाटिकानां ससस्यानां क्षेत्राणां दर्शनं शुभम् ।
सजलानां च सरितां मेघानां सरसां तथा ॥१९॥
दर्शनं चापि हंसानां पिकानां दर्शनं शुभम् ।
चातकानां मयूराणां गरुडानां च दर्शनम् ॥२०॥
मेनानां चित्रपक्षाणां शुकानां दर्शनं शुभम् ।
हरिणानां हनूमतां गवयानां च दर्शनम् ॥२१॥
खड्गमृगाणां च तथा गण्डकानां च दर्शनम् ।
शुभदं रक्तसर्पाणां दंशनं दर्शनं वरम् ॥२२॥
नाणकानां रूप्यकाणां सुवर्णानां च दर्शनम् ।
भूषणानां च हाराणां दिव्याम्बराणां दर्शनम् ॥२३॥
शुभं चन्दनकुंकुमाऽक्षतदर्भादिदर्शनम् ।
चापि शृंगारवस्तूनां मांगलिकादिदर्शनम् ॥२४॥
गणिकादर्शनं नृत्यकारिणीदर्शनं तथा ।
राज्ञीनां दर्शनं देवीदर्शनं ब्राह्मणीक्षणम् ॥२५॥
कन्यकादर्शनं साधुदर्शनं देवदर्शनम् ।
मन्दिरालयभवनानां तु वै दर्शनं शुभम् ॥२६॥
भक्तानां दर्शनं चापि दिव्यप्रासाददर्शनम् ।
आरार्त्रिकाद्युत्सवानां दर्शनं कीर्तनश्रवः ॥२७॥
कथायाः श्रवणं चापि मण्डपादिप्रदर्शनम् ।
पूज्यानां दर्शनं स्वप्ने पूज्यैः पादाभिमर्दनम् ॥२८॥
गुरुणा चापि पित्रा वा निजदेहाभिमर्दनम् ।
पादसंवाहनं चापि सर्वकार्यजयप्रदम् ॥२९॥
गणेशदर्शनं चापि हरेः पार्षददर्शनम् ।
वरयात्रादर्शनं च यज्ञयागादिदर्शनम् ॥३०॥
प्रतिष्ठोत्सवदीक्षा च सम्मानं प्रजया कृतम् ।
स्त्रीवर्गैरक्षताद्यैश्च वर्धनं चाशिषा मुहुः ॥३१॥
स्वर्णाम्बरादिधृतिका दिव्यमालादिधारणम् ।
लेखनं पूजनं प्रियारतिप्रदर्शनं तथा ॥३२॥
पुष्पाणां वर्षणं चापि शुभकृत् स्वप्नवीक्षितम् ।
इत्येवमादिवीक्षा वै स्वप्ने सर्वार्थसाधिका ॥३३॥
तथा लक्ष्मि प्रवक्ष्यामि यात्रायां शकुनानि ते ।
सफला वै भवेद् यात्रा प्रजानां नृपतेरपि ॥३४॥
साधूनां चापि नारीणां सर्वेषां सफला भवेत् ।
अदुःखा चेष्टफलदा ऋद्धिदा च भवेत्तथा ॥३५॥
श्वेताः सुमनसः श्रेष्ठाः पूर्णकुंभास्तथाऽबलाः ।
कन्यका भूषणशोभा जलजाः पक्षिणस्तथा ॥३६॥
सगर्भा शफरी मांसं मात्स्याश्च युगलं वधूः ।
गावस्तुरंगमा नागा बुद्ध एकः पशुर्वृषः ॥३७॥
अजस्त्वेको वरराजश्त्रिदशाः सुहृदः स्त्रियः ।
विप्राश्च वैष्णवाः सन्तः सशिखाश्च सपुण्ड्रकाः ॥३८॥
वह्निः प्रकाशितो ज्वालायुतो राजा च सद्गुरुः ।
विद्वान् धर्मी व्रती श्रेष्ठी निर्दंभो दानदक्षिणः ॥३९॥
गणिका च सती साध्वी दूर्वा चार्द्रं च गोमयम् ।
रुक्म रूप्यं च ताम्रं च माणिक्यरत्नहीरकाः ॥४०॥
मौक्तिकानि स्फटिकानि भूषणानि नवाम्बरम् ।
नवं यानं नवा स्त्रीश्च नवं वाहनमित्यपि ॥४१॥
नवान्नं च यवाः सिद्धार्थका ओषधमित्यपि ।
नृयानं भद्रपीठं च स्वर्णराजतवस्तुकम् ॥४२॥
देवरथो वाद्यगीतिनृत्यमण्डलमुत्सवः ।
खड्गं छत्रं पताका च निशानं भेरिकादिकम् ॥४३॥
आयुधानि मृदश्चापि सस्याभारः फलिद्रुमः ।
राजचिह्नानि सर्वाण्याचार्यचिह्नानि यानि च ॥४४॥
घृतं दधि पयश्चापि फलानि विविधानि च ।
सभूषो मान्यपुरुषो स्वस्तिकं वर्धमानकम् ॥४५॥
ताम्बूलदर्शनं चापि नन्द्यावर्तं च कौस्तुभः ।
हाराः पात्राणि रम्याणि वादित्रवादनश्रवः ॥४६॥
गान्धारषड्जऋषभाः स्वरा मिष्टाश्च गीतिकाः ।
पृष्ठे वायुप्रवाहाश्चानुकूलाः सुखदाः सदा ॥४७॥
क्रव्यादाः सुस्वराश्चापि मेघानां गर्जनास्तथा ।
विद्युतः शक्रचापं च गजबृंहणमित्यपि ॥४८॥
प्रसन्नता शुभश्रुतिः पूज्यानामभिवन्दनम् ।
गुर्वाशीर्वादवाचश्च मनस्तुष्टिर्मनःप्रियम् ॥४९॥
एकतः सर्वचिह्नानि मनसस्तुष्टिरेकतः ।
मंगलानां कुंकुमानामक्षतानां च दर्शनम् ॥५०॥
गौः सवत्सा चाश्ववारो हरिणः कृष्ण इत्यपि ।
मेना शुकः सारिकाश्च कोकिलो मण्डुकध्वनिः ॥५१॥

पित्रोर्वचः पृष्ठतश्च गुरोर्वाक्यं तथाविधम् ।
चन्द्रकः पुष्पहारादिः पत्रं दलं च भोजनम् ॥५२॥
मिष्टान्नानि विचित्राणि पूजकः कथकस्तथा ।
सेवकः श्रेष्ठभक्तोऽपि दधि दीपः सुधूपकः ॥५३॥
वेदघोषाः स्तवनानि बालानां खेलनादिकम् ।
कन्यकानां नर्महास्यं वधूटीनां निरीक्षणम् ॥५४॥
तालिकावादनं चापि जयशब्दश्रवस्तथा ।
समाजसंघसन्मानं चाह्वानं तु प्रसन्मुखात् ॥५५॥
गोधूमांकुरशष्पाणां दर्शनं पूर्णपात्रकम् ।
नमस्कारो हर्षनादो दैवादभ्रकणागमः ॥५६॥
पुष्पाणां पतनं चापि मञ्जरीणां द्रुमात्तथा ।
यात्राकाले स्वशिरसि मंगलं लाभसूचकम् ॥५७॥
लाजानां वर्षणं चापि पूजास्थालीप्रदर्शनम् ।
उड्डयनं हयानां च मंगलं जयसूचकम् ॥५८॥
शुभवार्ताश्रवणं च देवगुर्वागमो द्रुतम् ।
ध्वजानां दर्शनं चापि देववाद्यश्रवस्तथा ॥५९॥
गालवाद्यश्रवश्चापि नवपल्लवदर्शनम् ।
मुद्राणां दर्शनं चापि सौभाग्याढ्याऽङ्गनेक्षणम् ॥६०॥
कान्तस्य दर्शनं पत्न्याः कान्ताह्वानं प्रियं वचः ।
आशावचनमेवापि नारायणाभिधाश्रवः ॥६१॥
समस्तजातिभूतानां बाल्यपोषणभोजनम् ।
स्तन्यपानयुतं बालं वत्सं पशुं च पक्षिणम् ॥६२॥
कणाद्यादि भक्षयन्तं समातृकं हि दर्शनम् ।
ग्रामग्रहपशुपक्षिजीवानां रतिकर्म च ॥६३॥
दीयमानानि दानानि शृंगारश्चापि गोपुरे ।
प्राकारे चापि शृंगारो गृहाग्रे रङ्गवल्लिका ॥६४॥
चन्द्रशाला ध्वजायुक्ता दृश्यते तद्धि मंगलम् ।
चैत्यद्रुमा ध्वजायुक्ताश्चैत्यमौतिकभूमयः ॥६५॥
तोरणानि च पत्राणामार्द्राणां मंगलानि वै ।
चन्दनैः कृतलेपाश्च भित्तयो राजमार्गकाः ॥६६॥
सुगन्धिवारिसेकश्च मंगलायतनो हि सः ।
पादुकादर्शनं चापि गुरोर्मूर्तेः प्रदर्शनम् ॥६७॥
समुद्रदर्शनं चापि सरितां पूरदर्शनम् ।
दिव्यकुमारवीक्षा च दिव्यकुमारिकेक्षणम् ॥६८॥
नवीनयन्त्रवीक्षा च गुरुमन्त्रागमस्तथा ।
आख्यानश्रवणं चापि पूर्वजस्मरणं तथा ॥६९॥
अवतारस्मृतिश्चापि महोत्सवादिदर्शनम् ।
पक्वफलानि सर्वाणि सशाखाऽपक्वकान्यपि ॥७०॥
सशिम्बिकणिशाढ्याश्च स्तम्बाः शाखाश्च वै द्रुमाः ।
नवपल्लवशोभाश्च दर्शने सम्पदां प्रदाः ॥७१॥
मसीपात्रान्मसीप्रस्रवणं मस्याः प्रपातनम् ।
कुंकुमक्षरणं चापि नितम्बस्फुरणं तथा ॥७२॥
उपदार्पणमेवापि द्रव्यस्थाल्यर्पणादिकम् ।
सर्वं मिष्टं च यात्रायां मुखे कवलरूपि च ॥७३॥
मंगलं जायते लाभप्रदं जयप्रदं तथा ।
सिंहचर्म मृगचर्म व्याघ्रगजादिचर्मकम् ॥७४॥
स्वर्णपट्टः पट्टिका च घण्टा सिंहस्य गर्जना ।
हस्तिनां चिल्लिनादाश्च मंगलानि भवन्ति हि ॥७५॥
हस्ते द्रव्यार्पणं त्वन्यैः कृतं रत्नार्पणादिकम् ।
कुंकुमाऽक्षतदानं च तालिकादानमित्यपि ॥७६॥
करप्रदानं श्रेष्ठं च मनोदानं तथोत्तमम् ।
एतादृशेषु योग्येषु मंगलेषु तु मंगलम् ॥७७॥
जयो लाभो वर्धनं सम्मानं स्थानं यशो बलम् ।
उदयश्चोन्नतिर्लक्ष्मीः सुखमृद्धिरपत्यकम् ॥७८॥
इत्येवमाद्या जायन्ते गार्हस्थ्ये तु विशेषतः ।
विपरीतान् कथयामि शृणु लक्ष्मि भयप्रदान् ॥७९॥
वायुः सशर्करो रूक्षः सम्मुखे वाति दुःखदः ।
शत्रुर्नीचो दुष्टजनो दृश्यते चेद्भयप्रदः ॥८०॥
मुसलधारवर्षा तु प्रतिलोमा न शोभना ।
अनुलोमा ग्रहाः शस्ता बृहस्पतिर्विशेषतः ॥८१॥
चन्द्रमाः सन्मुखः श्रेष्ठः श्रेष्ठा कन्या च सन्मुखे ।
प्रयाणे ध्वजवस्त्राणां यष्टेश्छत्रस्य पादयोः ॥८२॥
पादुकाया भूषणादेः पतनं दुःखदं मतम् ।
शस्त्रादेः पतनं चोपकरणादेर्दुरन्तकृत् ॥८३॥
निर्गतस्य द्वारदेशे शिरसश्चाभिघातिता ।
पदाग्राघातनं चापि क्षुवनं कुत्सप्रश्नता ॥८४॥
पृष्टिः क्वगमनाद्या चाऽमंगलं दुःखदं हि तत् ।
स्खलनं वाहनानां च वस्त्रसंगस्तु कीलके ॥८५॥
ध्वजे क्रव्यादस्य दुष्टं निषदनं हि दुःखदम् ।
क्व यासि तिष्ठ मा गच्छ पृष्ठतो गच्छशब्दता ॥८६॥
किं ते गतस्य तत्र स्यादित्येवमधिक्षिप्तता ।
बाह्यशब्दत्रासयुक्तो भिन्नभैरवजर्जरः ॥८७॥
अनिष्टाः शापशब्दाश्च दुःखाऽमंगलकारिणः ।
पुरतः शब्द 'एहीति शस्यते न तु पृष्ठतः ॥८८॥
रक्तानि चापि भाण्डानि मृतं शृंगि शवं तथा ।
तुषभस्मकपालाऽस्थिभिन्नभाण्डाम्बराणि च ॥८९॥

वधकाः पापकर्माणो रण्डा तु गर्भिणी तथा ।
चाण्डालः श्वपचश्चापि जल्लादाः पाशधारिणः ॥९०॥
तथैवोद्धृतसाराणि पिण्याकादीनि यानि च ।
खण्डितानि फलादीनि केशबन्धनचर्मकम् ॥९१॥
अयः पंकः षण्ढ उन्मत्तश्च कंगाल इत्यपि ।
विकीर्णकेशा रुजार्ता गैरिकाम्बरमित्यपि ॥९२॥
तैलाक्तो मलिनो मुण्डी नग्नोऽगारस्तथैन्धनम् ।
कार्पासं च तृणं शुष्कं काष्ठं शुष्कं च गोमयम् ॥९३॥
धान्यं कृष्णं चौषधानि भ्रष्टानि दूषितानि च ।
कदर्यदर्शनं चापि क्लिन्नवस्तुप्रदर्शनम् ॥९४॥
हस्तेनाऽऽकर्षणं पश्चाद् वस्तूनां विस्मृतिस्तथा ।
चौर्यं चोपकरणानां विगमो मुख्यवस्तुनः ॥९५॥
अवमानं चाऽश्रुपातः स्खलनं लुण्ठनं स्वपिः ।
ज्वरो निरोधश्चक्रादेर्भंगो हेतिस्रवस्तथा ॥९६॥
गुदाविष्ठादर्शनं च तथा शष्पादिदर्शनम् ।
एवमादीनि सर्वाणि दुःखदानि प्रयाणके ॥९७॥
प्रयाणारंभसमये महीमानागमस्तथा ।
प्रधानागम एवापि विघ्नकृद् विघ्नदुःखदः ॥९८॥
एवमादीनि विज्ञाय गच्छेन्नैव निवर्तयेत् ।
हरेर्मे पूजनं कृत्वा कालान्तरे प्रवासयेत् ॥९९॥
शान्तिकर्म प्रकर्तव्यं होमो जपः प्रपूजनम् ।
भोजनं साधुविप्राणां दानानि च महोत्सवः ॥१००॥
देवानां पूजनं चापि पितॄणां तर्पणं तथा ।
ऋषीणां यजनं चापि भौतिकानां सुतृप्तता ॥१०१॥
एवमादीनि कार्याणि नामसंकीर्तनं हरेः ।
कथायज्ञाः प्रकर्तव्याः शान्तिकर्माणि यानि च ॥१०२॥
लक्ष्मि चैवं कृते नाशं यान्ति दुरितकानि ह ।
पठनाच्छ्रवणाच्चापि दुरितानि वियन्ति वै ।
भुक्तिर्मुक्तिर्भवेच्चापि शान्तिकर्मादिभिः सदा ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने यात्रार्थप्रयाणे शुभशकुनस्वप्नादीनि विपरीतानां निवृत्त्यर्थं पूजाशान्तियज्ञादिश्चेतिनिर्देशनामा नवचत्वारिंशदधिकशततमोऽध्यायः ॥ १४९ ॥

**नारायणीश्रीरुवाच—**

स्थोऽरण्यवासश्च पर्वतादिस्थितोऽपि वा ।
ग्रामस्थो निर्जनस्थो मुच्येतोपद्रवात् कथम् ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु त्वं शिवराज्ञीश्रि वनस्थोऽद्रिस्थितोऽपि वा ।
निर्जनस्थोऽपि कष्टार्तो मुच्यते स्मरणान्मम ॥ २ ॥
मद्भक्तानां स्मरणाच्च पूजनाद् वन्दनादपि ।
निर्जनेऽपि प्रमुच्येत बन्धनात् सर्वतोविधात् ॥ ३ ॥

**श्रीनारायणीश्रीरुवाच—**

त्वद्भक्ता बहवः सन्ति बलवान् शीघ्रपुष्टिदः ।
सहायदः कष्टहरः कोऽस्ति मे कृपया वद ॥ ४ ॥

**श्रीपुरुषोत्तम उवाच—**

त्वरितं स्मृतमात्रोऽपि विना सेवां प्रपूजनम् ।
विना चाराधनां भक्तिं हनूमान् कष्टनाशकः ॥ ५ ॥
परोपकारो धर्मोऽस्ति शरण्यत्वं हनूमतः ।
अव्याजदुःखहन्तृत्वं हनूमति विराजते ॥ ६ ॥
धूपमात्रेण चायाति स्तोत्रमात्रेण दृश्यते ।
स्मृतिमात्रेण चागत्य करोत्याश्रयवाञ्छितम् ॥ ७ ॥
भूतप्रेतपिशाचानां डाकिन्यादिकुयोषिताम् ।
बालव्योमग्रहाणां च हनूमान् हरते रुजम् ॥ ८ ॥
ब्रह्मचर्यं नैष्ठिकं वै हनूमति विराजते ।
ब्रह्मरूपं मम रूपं ब्रह्मचर्यं सदा मतम् ॥ ९ ॥
ब्रह्मणो बलमासाद्य भक्तिबलसमन्वितम् ।
हनूमान् कुरुते कार्यं तपस्सु ते सहायदः ॥१०॥
अदृश्योऽपि मरुद्रूपः समागत्य द्रुतं प्रभुः ।
भूतप्रेतादिकान् हत्वा मोचयत्याश्रितं रुजः ॥११॥
यत्राऽऽस्ते श्रीहनुमान् वै प्रतिष्ठाविधिना स्थितः ।
यत्र प्रतिकृतिस्तस्य तत्र पीडा न जायते ॥१२॥
यद्वने यदरण्येऽपि पर्वते नगरे पुरे ।
ग्रामे खेटे खर्वटके घोषे च वसतावपि ॥१३॥
पुलीने चोच्छ्रये क्रोडे सीम्नि क्षेत्रे जलस्थले ।
गृहे मार्गे चत्वरे च वृक्षे खाते च मन्दिरे ॥१४॥
हनूमान् तद्ध्वजश्चापि प्रतिमा तस्य यत्र च ।
तत्र वने स्थलादौ वा प्राकारे शिबिरेऽपि वा ॥१५॥
नायान्ति भूतवर्गाद्या ज्वरा विघ्ना ग्रहादयः ।
डाकिनी शाकिनी भूता भैरवाश्च पिशाचकाः ॥१६॥
कृत्या वीराश्च रोगाश्च तापा निशाचरादयः ।
कष्टानि च कबन्धाश्च प्रेताश्च ब्रह्मराक्षसाः ॥१७॥

रिपवो यक्षकुष्माण्डा यन्त्रा मन्त्राश्च तन्त्रिकाः ।
अभिचारा विद्रवन्ति चेन्द्रजालाश्च सर्वशः ॥१८॥
योगिन्यो मातरश्चापि दैत्या गणाश्च दानवाः ।
विद्रवन्ति वीक्ष्य देवं हनूमन्तं महाबलम् ॥१९॥
काकिनी कामिनी ब्रह्मग्रहाश्चौरग्रहास्तथा ।
मारीग्रहा विनश्यन्ति श्रुत्वा स्तोत्रं हनूमतः ॥२०॥

व्याघ्राः सर्पाश्च राजानो नार्यश्च शत्रवस्तथा ।
सभा पापानि बध्यन्ते श्रीमद्धनूमतः स्मृतेः ॥२१॥
आयुरारोग्यैश्वर्यादिवृद्धिर्भवति तद्बलात् ।
शिरःशूलं गुल्मशूलं नागपाशादिकं तथा ॥२२॥
कुविद्याश्चाप्यरिष्टानि दुरितानि च यानि च ।
हनूमतः स्तोत्रपाठान्नश्यन्त्येव न संशयः ॥२३॥
यातुधानाः प्रमथाश्च घोरदृष्टय आसुराः ।
कैतवः श्रेयसां प्रतीपकाः सरीसृपादयः ॥२४॥

घोराण्यघानि कृच्छ्राणि दंष्ट्रिणश्चापदस्तथा ।
उपद्रवाः कलहाश्च नश्यन्ति हनुमत्स्तवात् ॥२५॥
शृणु लक्ष्मि पूजनादि कथयामि हनूमतः ।
कार्तिके कृष्णपक्षे तु चतुर्दश्यां व्रतो व्रती ॥२६॥
स्नात्वा सम्पूज्य देवाँश्च पितॄन् नत्वा समर्हणान् ।
कारयेन्मण्डपं रम्यं कदलीस्तंभशोभितम् ॥२७॥

हारैश्च हीरकाद्यैश्च मौक्तिकैः पत्रतोरणैः ।
रत्नवल्लीध्वजाद्यैश्च कलशैः शोभितं शुभम् ॥२८॥
चतुर्द्वारं द्वादशस्तंभं सुचक्रैर्वितानितम् ।
गदाचिह्नं ध्वजायां वै कारयेन्मण्डपेऽपि च ॥२९॥
कुण्डं मध्ये कारयेत्तु हस्तद्वयप्रमाणकम् ।
चिसेतुं च यथायोग्यं सिन्दूराबिल्वकुंकुमैः ॥३०॥

सुशृंगार्यं तैलपात्रं सिन्दूरं माषभोजनम् ।
वटकान् लड्डुकाँश्चापि चणकान् व्रीहितण्डुलान् ॥३१॥
तिलाँश्च दुग्धसाराँश्च पायसं क्षीरमित्यपि ।
राजमाषान् घृतं मिष्टान्नकं फलानि रोटकान् ॥३२॥

दुग्धकृताः पूरिकाश्च गुडं चापि निधापयेत् ।
गुडौदनं दुग्धपक्वं मण्डपे तत्र विन्यसेत् ॥३३॥
नारिकेलान् खारिकाश्च खर्जूरं पनसं तथा ।
पुष्टाऽन्नानि समस्तानि पुष्टफलानि यानि च ॥३४॥
यथाशक्ति मण्डपे च व्रती समुपरक्षयेत् ।
पुण्याहं मंगलवाचो वाचयित्वा द्विजैस्ततः ॥३५॥
प्रायश्चित्तं कारयेच्च संकल्पं कारयेदपि ।
सर्वाऽनिष्टविनाशार्थं सर्वेष्टप्राप्तये तथा ॥३६॥

हनूमतः प्रतिष्ठांगमखं करोमि शान्तये ।
हनूमतः प्रसादेन यातु निर्विघ्नपूर्णताम् ॥३७॥
गणेशं पूजयेच्चापि रुद्रं संस्थापयेत्तथा ।
हनूमत्कलशं तत्र स्थापयेन्मुख्यदैवतम् ॥३८॥
अञ्जनिं मातरं चापि मरुतं पितरं तथा ।
शंकरं धातुपितरं स्कन्दं च ब्रह्मचारिणम् ॥३९॥

साधून् सनत्कुमारादीन् स्थापयेन्मातृकास्तथा ।
रुद्रान् वसूँस्तथाऽऽदित्यानृषीन् ब्रह्मव्रतं तथा ॥४०॥
ब्रह्मचर्यं स्थापयेच्च वास्तुदेवं सदैवतम् ।
दिक्पालाँल्लोकपालाँश्च सप्तर्षीन् स्थापयेत्तथा ॥४१॥
गरुडं शेषसर्पं च व्यूहं श्रीवासुदेवकम् ।
श्रीललितां महालक्ष्मीं रामादित्यं नरेश्वरम् ॥४२॥
वानराँस्तत्सजातीयान् स्थापयेत्पूजयेत्तथा ।
पत्नीं पादसंस्थां च गदां सर्वाघनाशिनीम् ॥४३॥

स्थापयेद् ब्रह्ममालां च वर्धिनीकलशं तथा ।
तत्राऽऽवाह्य च तीर्थानि रत्नानि निक्षिपेदथ ॥४४॥
पञ्चामृतानि सर्वाणि होमपात्राणि यानि च ।
पूजाद्रव्याणि सर्वाणि प्रोक्षयेत्तीर्थवारिणा ॥४५॥
एवमावाह्य देवाँश्च पूजयेच्चन्दनादिभिः ।
षोडशोपसुवस्त्राद्यैस्ततो वह्निं निधापयेत् ॥४६॥
कुण्डे सुहवनं दद्याद्धृतमिष्टान्नपायसैः ।
समिद्भिश्चार्कपुष्पैश्च तथाऽर्कादिसमिन्धनैः ॥४७॥

ग्रहाणां पूजनं कृत्वा जुहुयात् सर्वदैवतम् ।
आज्यं व्रीहिं फलं पत्रं पुष्पं च शर्करादिकम् ॥४८॥
वेदिकायां मुख्यदेवं हनुमन्तं सुवर्णकम् ।
राजतं वाऽथ ताम्रं च रत्नजं प्रस्तरोद्भवम् ॥४९॥

आनाय्य स्थापयेत्तत्र पुण्याहं वाचयेत्पुनः ।
पञ्चामृतैः स्नापयेच्च मर्दयेत्तैलगन्धिभिः ॥५०॥
अभिषेकं कारयेच्च मार्जयेच्चाम्बरं दिशेत् ।
शृंगारयेद् वायुपुत्रं रथे चारोहयेत्ततः ॥५१॥

भ्रामयेन्नगरे वाद्योत्सवैर्गीतैः समन्ततः ।
पूजयेत्प्रणमेत् सर्वप्रजा च गृहमानयेत् ॥५२॥
प्रपूज्य वेदिकास्थाने जले समधिवासयेत् ।
स्थापयेदेकरात्रिं च प्रातस्थापयेत्ततः ॥५३॥
देवपूजां समस्तां च कारयेत् हवनं तथा ।
जापयेद्धनुमन्मन्त्रान् वेदमन्त्रैः समन्वितान् ॥५४॥
शृणु लक्ष्मि महामन्त्रं कथयामि हनूमतः ।
"ॐ नमो हनुमते दुःखभंजनाय सुखं कुरु फट् स्वाहा" ॥५५॥

दशसाहस्रवारं वै विंशत्यक्षरपाठनम् ।
एकमासं जपेन्नित्यं सर्वदुःखप्रणाशनम् ॥५६॥
'ओमस्य श्रीहनुमन्महामन्त्रस्य श्रीकृष्णनारायणः ऋषिः, श्रीहिमाचलहनुमान् देवता, मम समस्तेष्टप्राप्त्यर्थं, समस्ताऽनिष्टनाशार्थं श्रीकृष्णनारायणप्रसन्नार्थं श्रीहिमाचलहनुमत्स्तोत्रमन्त्रजपमहं करिष्ये ॥५७॥
"ओं नमो भगवते महाबलवते सर्वाधिकवीर्यवते महाहनुमते वज्रदेहाय कुमारब्रह्मचारिणे यक्षराक्षसभूतप्रेतपिशाचकुष्माण्ड-विनायकवेतालडाकिनीशाकिनीकाकिनीयोगिनीवेतालि-नीकृत्याग्रहगणबन्धनाय रोगादिबन्धनाय एहि एहि आगच्छ आगच्छ आवेशय आवेशय प्रवेशय प्रवेशय स्फुर स्फुर सर्वमुखबन्धन शत्रुं मे वशमानय क्रीं क्रीं क्रीं ह्रीं श्रीं श्रीं श्रीं क्रीं ह्रीं मर्दय मर्दय मारय मारय चूर्णय चूर्णय ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा' ॥५८॥
"ओं ह्रां ह्रीं ओं नमो भगवते ब्रह्महनुमते रुद्रमरुद-ञ्जनिजाताय सर्वदुःखनिवारणाय सर्वविधज्वरान् छिन्धि छिन्धि सर्वकष्टान्युच्चाटय उच्चाटय ओं ह्रां श्रीं ओं नमो भगवते श्रीहिमाचलमहाहनुमते दुःखहालक्ष्मीपूजिताय ओं ह्रां ह्रीं ह्रुं ह्रैं ह्रौं ह्रः आं ह्रां ह्रां ह्रां ह्रां जौं सौं एहि एहि एहि ॐ हं ॐ हं ॐ हं ओं नमो बलवते गदावते सर्वविषं हर हर व्योमवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय ज्वालय ज्वालय प्रहारय प्रहारय सर्वां मायां भेदय भेदय ओं ह्रां ह्रीं ओं नमो भगवते महालाङ्गुलवते सर्वबलानि क्षोभय क्षोभय सकल-बन्धमोक्षणं कुरु कुरु सर्वशूलान् निर्मूलय निर्मूलय सर्वपाशान् शिथीलय शिथीलय दुष्टाविद्याश्छेदय छेदय निजविद्याः प्रकटय प्रकटय सर्वारिष्टानि नाशय नाशय असाध्यं साधय साधय अत्र मूर्तौ वासं विधेहि विधेहि चमत्कारं प्रदर्शय प्रदर्शय अद्रिवीर तनुमन् हनुमन् मम सर्वशत्रून् भस्म कुरु कुरु हन् हन् हुं फट् स्वाहा" ॥५९॥
अष्टोत्तरशतवारं जपेत् संजुहुयात्ततः ।
पूजयेच्छ्रीहनुमन्तं परिहारं ततश्चरेत् ॥६०॥
तृतीय दिवसे प्रातः पूजयित्वा सुराँस्तथा ।
हवनं कारयित्वा चोत्थाप्य कीशं प्रपूजयेत् ॥६१॥
विमाने तं प्रसंस्थाप्य मन्दिराग्रे समानयेत् ।
प्रदक्षिणं विधायैव प्राङ्मुखे वोत्तरानने ॥६२॥
मन्दिराग्रे निधायैव पूजयेद् बलिमर्पयेत् ।
अङ्गन्यासान् प्रकुर्याच्च तथा तत्त्वानि सन्न्यसेत् ॥६३॥
नेत्राञ्जनं प्रकुर्याच्च वस्त्रभूषादि चार्पयेत् ।
प्राणप्रतिष्ठां कुर्याच्च बीजवर्णनिनादिताम् ॥६४॥
ओं कं खं गं घं ङं आं पृथिव्यप्तेजो-वाय्वाकाशात्मने ओं हृदयाय नमः ।
ओं चं छं जं झं ञं इं शब्दस्पर्श-रूपरसगन्धात्मने ईं शिरसि स्वाहा ।
ओं टं ठं डं ढं णं उं श्रोत्रत्वक्-चक्षूरसनाघ्राणात्मने ऊं शिखायै वषट् ।
ओं तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम् । ओं पं फं बं भं मं ओं वचनादान-विहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट् ।
ओं यं रं लं वं शं सं हं ळं क्षं ज्ञं अं मनोबुद्ध्यहंकार-चित्तात्मने अः अस्त्राय फट् ॥६५॥
अथ देवं स्पृष्ट्वा—'ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य प्राण इह प्राणाः ।
ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः ।
ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणीह ।
ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाः इह तिष्ठन्तु स्वाहा ॥६६॥
अर्चाहृदि अंगुष्ठं दत्वा जपेत्—
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाश्चरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥६७॥
प्रणवेन सन्निरुध्य ध्यात्वा सजीवमेव तम् ।
हनुमन्मन्त्रमेवाऽस्याः कर्णे जपेन्नमेत्ततः ॥६८॥
स्थापयेन्मन्दिरे सिंहासने सम्प्रार्थयेत्तथा ।
सर्वानिष्टानि देव त्वत्स्थापनेन लयं परम् ॥६९॥
यान्तु सर्वान् कुरु कीश सुखिनः सर्वतोमुखान् ।
धूपं दीपं च नैवेद्यं दद्याताम्बूलकं जलम् ॥७०॥
नीराजनं प्रकुर्याच्च पुष्पाञ्जलिं दिशेत्ततः ।
कार्पासवर्तीः प्राज्वाल्य नीराजनमिदं वदेत् ॥७१॥
अत्र नीराजनम्—
"जय कपे बलवँस्त्वं जय कपे बलवँस्त्वम् ।
सुरनरमुनिजनवन्दितपत्कज हनुमँस्त्वम् ॥७२॥
प्रौढप्रताप पवनसुत त्रिभुवनजयकारिन् ।
असुररिपुमदगञ्जन भयसंकटहारिन् ॥ जय० ॥७३॥

भूतपिशाचविकटग्रहपीडा ते जपनात् ।
हनुमद्गर्जितश्रवणान् नश्यति थरकम्पात् ॥ जय० ॥७४॥
रघुवरसहायोल्लंघ्य सागरमतिदीर्घम् ।
सीताशोधनमाप्त्वा लंकां प्राज्वालयत् ॥ जय० ॥७५॥
रामचरणरतिदायक शरणागतत्रातः ।
पूर्णानन्दित हनुमन् वाञ्छितफलदातः ॥ जय० ॥७६॥

पूर्णाहुतिं दिशेत् परिहारं च कारयेत्तथा ।
विप्रान् साधून् सतीर्भक्तान् भोजयेद् दक्षिणां दिशेत् ॥७७॥
नित्यं संपूजयेद् देवं स नाशयेदनिष्टकम् ।
ध्वजादिदर्शनं कुर्यात्पठेन्मन्त्रं निरन्तरम् ॥७८॥
सिन्दूरतैलार्कपुष्पमाला ध्यात्वाऽर्पयेत् सदा ।
भुक्तिर्मुक्तिर्भवेच्चापि लक्ष्मि मत्तुल्यतां व्रजेत् ॥७९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने हनुमन्मन्त्रतजप-हनुमत्प्राणप्रतिष्ठादिविधिनिरूपणनामा पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

श्रीनारायणीश्रीरुवाच—

परमेश कृपासिन्धोऽवतारी त्वं स्वयं हरिः ।
जातोऽसि जगतामुद्धारार्थं जानामि सर्वथा ॥ १ ॥
तव योगं न ये प्राप्तास्तादृशा भाग्यवर्जिताः ।
तेषां पञ्चमहापापपापिनामुद्धृतिः कथम् ॥ २ ॥
ब्रह्महत्या सुरापानं स्वर्णस्तेयं सतीरतिः ।
तत्प्रसंगी कथं कृष्णोद्धरेयुस्ते वदाऽत्र मे ॥ ३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि प्रवदामि तेषामुद्धारसाधनम् ।
कृपा मे पापिपापानां प्रज्वालिकेति निश्चितम् ॥ ४ ॥
मया वै कृपया लोके तीर्थानि सुकृतानि हि ।
सजीवानि तथा निर्जीवानि चमत्कराणि ह ॥ ५ ॥
यत्स्पर्शाद् दर्शनाच्चापि पापानि प्रज्वलन्ति वै ।
अश्वपट्टसरस्तीर्थं सर्वपापप्रणाशनम् ॥ ६ ॥
नार्मदं शुक्लतीर्थं वै भृगुक्षेत्रं तथा परम् ।
ओंकारं च महत् तीर्थं सर्वपापप्रणाशनम् ॥ ७ ॥
सोमनाथं द्वारिका च गोमती स्वर्णलेखिका ।
नारायणह्रदस्तीर्थं सर्वपापप्रणाशकम् ॥ ८ ॥
भद्रावती साभ्रमती गोदावरी सरस्वती ।
कावेरी ताम्रपर्णी च गंगा च यमुना तथा ॥ ९ ॥
गोकर्णं माधुरं क्षेत्रं कपालमोचनं तथा ।
हरिद्वारं विशाला च कौरवं पुष्करं तथा ॥१०॥
संभलं ब्रह्मपुत्रा च गण्डकी काञ्चनी सरित् ।
गागरा सिन्धुरेवापि तथा पम्पासरोवरम् ॥११॥
सेतुबन्धो जगन्नाथः कापिलं तीर्थमुत्तमम् ।
मानसाख्यसरश्चापि सर्वपापप्रणाशनम् ॥१२॥
केदारं च पतत्कायं चैरावती महानदी ।
मेनकांगी च शिक्षांगी बालकृष्णसरोवरम् ॥१३॥
कृष्णानदी च कौबेरं सरो मन्नामिकानदी ।
चांगशिक्षांगिका शालवीना श्यंगिसरोवरम् ॥१४॥
नारायणसरश्चापि श्रीस्तनाख्यसरोवरम् ।
द्विकलाख्यसरश्चापि लीना यानाक्षिणी नदी ॥१५॥
ओबी चोरलकाखातो यूरला नीपरा नदी ।
नारायणी महादीर्घा सर्वपातकनाशिनी ॥१६॥
वोल्गा शावनरी चापि अहमम्बरिका नदी ।
द्वीनदी रानना चापि प्रलयायसरोवरम् ॥१७॥
नायञ्जरानदी श्रेष्ठा तथा चण्डसरोवरम् ।
कङ्गूनदी चामझाना परीमा च सरित्तथा ॥१८॥
सुपारवर्यकसरो मेकांझी च महानदी ।
विनिपादसरश्चापि सुलवाख्यसरोवरम् ॥१९॥
एवमादीनि तीर्थानि मया कृतानि पद्मजे ।
महापापादिपापानां नाशनाय भुवस्तले ॥२०॥
सर्वखण्डेषु देशेषु कृपयोद्धरणाय वै ।
तत्र स्नाता जना यान्ति शुद्धिं मुक्तिं परां मम ॥२१॥
यत्र यत्राऽवतारा मे यत्राऽवतारभूमयः ।
तत्र तीर्थंकृतो लोका मुच्यन्ते सर्वपातकैः ॥२२॥
यत्र मूर्तेः प्रतिष्ठा मे यत्र यज्ञा भवन्ति च ।
स्नानं चाऽवभृथं यत्र मुच्यन्ते तत्र पातकैः ॥२३॥
यत्र देवा विचरन्ति सन्तश्च पंक्तिपावनाः ।
सत्यो यत्र निवसन्ति मुच्यन्ते तत्र पातकैः ॥२४॥
ब्रह्मचारिजना यत्र यतयो यत्र सन्ति च ।
साधवो ब्रह्मशीलाश्च मुच्यन्ते तत्र पातकैः ॥२५॥
ब्रह्मप्रसादो यत्राऽऽस्ते यत्र वै ब्रह्मभोजनम् ।
वैश्वदेवा भुंजते च मुच्यन्ते तत्र पातकैः ॥२६॥
पितृतीर्थं परं तीर्थं मातृतीर्थं ततोऽधिकम् ।
गुरुतीर्थं ततः श्रेष्ठं मुच्यन्ते तत्र पातकैः ॥२७॥
पतिव्रता परं तीर्थं तीर्थं पत्नीव्रतः पतिः ।
गुरुसेवि शिष्यतीर्थं मुच्यन्ते तत्र पातकैः ॥२८॥

विदेहाः साधवो यत्र ब्रह्मनिष्ठाश्च देहिनः ।
कीर्तनं मन्दिरं यत्र मुच्यन्ते तत्र पातकैः ॥२९॥
तपो ध्यानं जपो होमः स्वाध्यायो यत्र सन्ति च ।
गावो यत्र प्रपूज्यन्ते मुच्यन्ते सर्वपातकैः ॥३०॥
ब्राह्मणार्थे गवार्थे वा साध्वर्थेऽसून् परित्यजेत् ।
देवार्थे चापि पित्रर्थे मात्रर्थेऽसून् परित्यजेत् ॥३१॥
स्वाम्यर्थे चापि पत्यर्थे सत्यर्थेऽसून् परित्यजेत् ।
धर्मार्थे चापि यज्ञार्थे मोक्षार्थेऽसून् परित्यजेत् ॥३२॥
तदा सर्वाणि पापानि नश्यन्त्येव न संशयः ।
कुर्यादनशनं वापि भृगोः पतनमित्यपि ॥३३॥
ज्वलन्तं वा विशेदग्निं जलं तीर्थे विशेच्च वा ।
तदा सर्वाणि पापानि विनश्यन्ति न संशयः ॥३४॥
दत्त्वा चाऽन्नं तु विदुषे यश्चाऽऽजीवनमेव ह ।
तस्य पापानि नश्यन्ति ब्रह्महत्या व्यपोहति ॥३५॥
यज्ञानामवभृथके स्नात्वा मुच्येत पातकैः ।
सर्वस्वं विदुषे दद्यात् साधवे हरिमूर्तये ॥३६॥
तस्य पापानि नश्यन्ति दानात् सतां प्रसेवनात् ।
त्रिवेण्यां स्नानमात्रेण नश्यन्त्यघानि सर्वशः ॥३७॥
सदा त्रिषवणः स्नाति नमति सर्वदेवताः ।
एकभुक्तो वर्ततेऽस्य नश्यन्त्यघानि सर्वशः ॥३८॥
हरेः पादोदके स्नात्वा मुच्यते ब्रह्महत्यया ।
पञ्चगव्यं वर्षमात्रं पीत्वा मुच्येत मद्यपः ॥३९॥
स्वर्णस्तेयी मुशलेन हतो नृपैः प्रमुच्यते ।
अगम्यागमनः कुर्याच्चान्द्रायणानि पञ्चशः ॥४०॥
पतितेषु प्रसंगी च कुर्याद् व्रतानि तानि वै ।
तप्तकृच्छ्रं चरेद्वा तु संवत्सरमतन्द्रितः ॥४१॥
सर्वस्वदानं वा दद्यात् सर्वपापप्रशोधकम् ।
पुण्यक्षेत्रे गयादौ च गमनं पापनाशकम् ॥४२॥
अमावास्यातिथिं प्राप्य पूजयेद् यो हरिं तु माम् ।
साधून् विप्रान् भोजयित्वा मुच्यते सर्वपातकैः ॥४३॥
उपोषितश्चतुर्दश्यां कृष्णपक्षे तु शार्ङ्गिणे ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥४४॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
प्रत्येकं तिलसंयुक्तान् दद्यादष्ट जलाञ्जलीन् ॥४५॥
पूजयेद्धर्मदेवं च सर्वपापैः प्रमुच्यते ।
ब्रह्मचर्यमधःशय्यामुपवासं सतोऽर्चनम् ॥४६॥
प्रकुर्वीत स्मरेत् कृष्णं मुच्यते सर्वपातकैः ।
षष्ठ्यामुपोषितः शुक्ले सप्तम्यां सूर्यमर्चयेत् ॥४७॥
सतः संभोजयेच्चापि मुच्यते सर्वपातकैः ।
एकादश्यां निराहारः समभ्यर्च्य हरिं तु माम् ॥४८॥
द्वादश्यां भोजयेत् साधून्मुच्यते सर्वपातकैः ।
नित्यं जपेत्तीर्थसेवां देवसाधुप्रपूजनम् ॥४९॥
कुर्याद्वै श्रद्धया नित्यं मुच्यते सर्वपातकैः ।
ग्रहणादौ ग्रहणान्ते दद्याद् दानानि चापि यः ॥५०॥
हीरकरत्नधान्यानां द्रव्याणां च भुवामपि ।
गृहाणां भोजनानां च मुच्यते सर्वपातकैः ॥५१॥
यो महापापयुक्तोऽपि पुण्यतीर्थेषु भावितः ।
नियमेन त्यजेत् प्राणान्मुच्यते सर्वपातकैः ॥५२॥
ब्रह्मघ्नं वा कृतघ्नं वा महापातकदूषितम् ।
भर्तारं चोद्धरेन्नारी पतिव्रता सती शुभा ॥५३॥
पतिव्रता तु या नारी भर्तुः शुश्रूषणोत्सुका ।
न तस्या विद्यते पापमिह लोके परत्र च ॥५४॥
परब्रह्मपरः साधुः साध्वी लक्ष्मीपरायणा ।
शिष्यो गुरुब्रह्मसेवी मुच्यते सर्वपातकैः ॥५५॥
फल्गुतीर्थादिषु स्नातः सर्वपुण्यफलं लभेत् ।
ममाऽऽज्ञायां तु यः स्नातो महापापान् समुद्धरेत् ॥५६॥
सर्वस्वं साधवे दद्याद् दद्याच्छ्रीहरये तु मे ।
दद्याल्लक्ष्म्यै महालक्ष्म्यै मुच्यते सर्वपातकैः ॥५७॥
सम्पदो निखिलपाश्च दद्याद् देवाय विष्णवे ।
यज्ञार्थे चापि दद्याच्च मुच्यते सर्वपातकैः ॥५८॥
ब्रह्मगृहाद् बहिर्नैव गन्तव्यं यस्य वै क्वचित् ।
यदृच्छालाभसन्तोषी स्पृश्यते नहि पातकैः ॥५९॥
स्वयं दुःखानि संवाह्य परान् सुखान् करोति यः ।
सर्वाशीर्वादपात्रं स स्पृश्यते पातकैर्न वै ॥६०॥
विघसाशी भवेद् यस्तु गुरुप्रसादभोजकः ।
भिक्षाभोजनसन्तुष्टः पातकं नाऽस्य विद्यते ॥६१॥
साधुवृत्तिस्तथा चैवायाऽचितवृत्तिको भवेत् ।
यदृच्छालाभसन्तुष्टः स्पृश्यते नैव पातकैः ॥६२॥
सदा कृष्णकथामग्नो ब्रह्मज्ञानप्रदो जनः ।
सत्संगबोधमिष्टान्नो मुच्यते सर्वपातकैः ॥६३॥
ब्रह्मात्मा ब्रह्मवित्सेवी ब्रह्मिष्ठसेवितस्तथा ।
आत्मविवेकवान् यः स स्पृश्यते नैव पातकैः ॥६४॥
यथाऽपेक्षाग्रहश्चापि यथात्यागविडम्बनः ।
यथाध्यानरतश्चापि स्पृश्यते नैव पातकैः ॥६५॥
इष्टानिष्टे तृषाशून्यो लाभालाभे क्षुधाक्षयः ।
ग्राह्याग्राह्ये क्रियाशून्यः स्पृश्यते नहि पातकैः ॥६६॥

दीनो वा निर्धनो वापि धनाढ्यो नृपतिश्च वा।
यथाशक्ति प्रसेवेत सतः पापैः प्रमुच्यते ॥६७॥
नवनिधीन् प्रदद्याद्वै यज्ञे पापैः प्रमुच्यते।
पद्मं चापि महापद्मं मकरं कच्छपं दिशेत् ॥६८॥
मुकुन्दं चापि नन्दं च नीलं शंखं तथाऽर्पयेत्।
महाशंखं प्रदद्याच्च मुच्यते सर्वबन्धनात् ॥६९॥
न संख्यया निधिर्बोध्यः किन्तु दानेन कर्मणा।
दीनोऽपि दत्वा देवाय पद्मानिधिपतिर्मतः ॥७०॥
महाशंखधनी वाप्यदाता कदर्य उच्यते।
शृणु लक्ष्मि कथयामि दातारं तु निधीश्वरम् ॥७१॥
स्वल्पवित्तोऽपि यो दद्यात् प्रयत्नेन निजं धनम्।
देवार्थे च मखार्थे च सत्यर्थे यतये सते ॥७२॥
विष्णुभक्ताय पुण्यार्थे ब्रह्मनिष्ठाय साधवे।
तद् द्रव्यं पद्मसंज्ञं वै पद्मनिधिपतिर्हि सः ॥७३॥
स्वल्पं वा बहुलं द्रव्यं सर्वस्वं वै निजं धनम्।
यात्रानिर्वाहमात्रं तु विहाय यः समर्पयेत् ॥७४॥
देवादिभ्यो धनं तस्य महापद्मनिधिर्मतम्।
सात्त्विकं तद्धनं प्रोक्तं दाताऽपि सात्त्विको हि सः ॥७५॥
असंख्यं परलोकेऽस्य धनं लक्ष्मीः करोति वै।
मद्भक्तार्थे प्रसन्नात्वं सर्वं तस्मै ददासि हि ॥७६॥
तस्माद् वै देवभक्तानां निर्लोभानाममू निधी।
अक्षयौ दिव्यनामानौ पद्माकृपाप्रपूरितौ ॥७७॥
शृणु वै मकरं वच्मि द्रव्यं क्लेशैरुपार्जितम्।
स्वयं स्वार्थपरो भुंक्ते दाने ददाति नैव हि ॥७८॥
दद्याद् विवृद्धये वर्षे कुसीदार्थे प्रलोभवान्।
नवां नवां च मैत्रीं वै कृत्वा जीर्णां विहाय तु ॥७९॥
एवं द्रव्यस्य नाशो वै पूर्वपूर्वैः प्रजायते।
खड्गबाणादिशस्त्राणां संग्रहेऽपि विनश्यति ॥८०॥
अदानकं स्वार्थमात्रं द्रव्यं तन्माकरो निधिः।
मरणे सति सर्वस्वं विनष्टं तत्परैर्भवेत् ॥८१॥
शृणु वै कच्छपं लक्ष्मि बहुयत्नैः समर्जितम्।
न भुंक्ते न ददात्येव लोभेन विश्वसेन्न च ॥८२॥
क्षिपत्येव हि भूगर्ते कोषे निरुपयोगि तत्।
सञ्चितं त्वेकपुरुषं मरणान्ते परैरपि ॥८३॥
राजभिश्चौरलोकैर्वा ह्रियते कच्छपं हि तत्।
माकरं राजसं प्रोक्तं काच्छपं तामसं सदा ॥८४॥
माकरं त्वर्धपापं च काच्छपं पूर्णपापकम्।
शृणु लक्ष्मि मुकुन्दं च निधिं यत्नैः समर्जयेत् ॥८५॥
किन्तु कोशे पृथिव्यां वा निक्षिप्याऽपि पुनः पुनः।
उद्धृत्योद्धृत्य वेश्यासु नर्तकीगायिकासु च ॥८६॥
भाण्डेषु व्यसने क्लेशे व्ययं करोति नित्यदा।
एवं पापपरा सम्पद् द्रव्यं मुकुन्दनामकम् ॥८७॥
पापकृच्चापि वै बोध्यो मुकुन्दकोशभृन्निधिः।
शृणु नन्दं निधिं चापि वक्ष्यामि पद्मजे हि ते ॥८८॥
रजस्तमोमहानन्दी ह्याधारः स्यात् कुलस्य वै।
सर्वे कुटुम्बिनो द्रव्यं भुञ्जते प्रेमभावतः ॥८९॥
स्तुतयश्चापि जायन्ते बहुभार्या भवन्ति च।
स्वार्थार्थे द्रव्यभोगश्च परोपकृतयेऽपि च ॥९०॥
पूर्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च।
एवंविधं निजं द्रव्यं नन्दनिध्यात्मकं हि तत् ॥९१॥
शृणु लक्ष्मि कथयामि नीलं निधिं तथोत्तरम्।
नीलेन स्वधनेनापि सात्त्विको वै भवेत् सदा ॥९२॥
वस्त्रधान्यादिसंग्राही तडागादि करोति च।
त्रिपौरुषो निधिश्चायं त्वाम्रारामादि कारयेत् ॥९३॥
धर्मकार्ये करोत्येवोद्यानं ददाति विष्णवे।
शंखं निधिं कथयामि शृणु लक्ष्मि विपत्प्रदम् ॥९४॥
एकस्यैव धनं शंखः स्वयं भुंक्ते धनान्तकम्।
न कुलं न च वंशोऽपि भुंक्ते यस्य धनं रमे ! ॥९५॥
कदन्नभुक् परिजनो न च शोभनवस्त्रधृक्।
स्वार्थपोषणमात्रेच्छुर्दद्यात्परनरे वृथा ॥९६॥
शृणु लक्ष्मि महाशंखं निधिं भोगार्थमेव न।
परेष्वेव हि वर्तन्ते धनानि न गृहे मनाक् ॥९७॥
एवं बोध्या हि निधयो ज्ञात्वा तान् व्ययमाचरेत्।
तीर्थदेवसतां कार्ये सर्वपापैः प्रमुच्यते ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वमहापापादिनाशोपायानां निरूपणं, नवनिधीनां धनविनियोगादिप्रयोज्यनामकत्वं चेति कथननामा एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं पापोद्धारकरान् सुतान्।
धर्मस्य बलयुक्तान् वै यदाश्रयेन मोक्षणम् ॥ १ ॥
धर्मदेवात्तु कामं वै श्रद्धा तु सुषुवे सुतम्।
मदर्थे योजितः कामो मोक्षाय परिकल्पते ॥ २ ॥
धर्मदेवात्त दर्पं वै श्रीः पुत्रं सुषुवे शुभम्।
मदर्थे योजितो दर्पो मोक्षाय परिकल्पते ॥ ३ ॥

धर्मदेवात्तु नियमं धृतिस्तु सुषुवे सुतम् ।
मदर्थे योजितश्चायं मोक्षाय परिकल्पते ॥ ४ ॥
धर्मदेवात्तथा तुष्टिः सन्तोषं सुषुवे सुतम् ।
मदर्थे योजितश्चाऽयं मोक्षाय परिकल्पते ॥ ५ ॥
धर्मदेवात्तथा पुष्टिर्लोभं तु सुषुवे सुतम् ।
मदर्थे योजितो लोभो मोक्षाय परिकल्पते ॥ ६ ॥
धर्मदेवात्तथा मेधा श्रुतं तु सुषुवे सुतम् ।
मदर्थे योजितश्चायं मोक्षाय परिकल्पते ॥ ७ ॥
धर्मदेवात्तथा पुत्रं दण्डं तु सुषुवे क्रिया ।
मदर्थे योजितो दण्डो मोक्षाय परिकल्पते ॥ ८ ॥
दण्डानुजं नयं चापि विनयं च नयाऽनुजम् ।
त्रयस्ते योजिता मत्तो मोक्षायैते भवन्ति वै ॥ ९ ॥
धर्मदेवात्तथा बुद्धिर्बोधं तु सुषुवे सुतम् ।
मदर्थे योजितो बोधो मोक्षाय परिकल्पते ॥१०॥
धर्मदेवात्तथा लज्जा सुनयं सुषुवे सुतम् ।
सुनयो योजितः कृष्णे मोक्षाय परिकल्पते ॥११॥
धर्मदेवात्तथा वपुर्व्यवसायमसूयत ।
मदर्थे व्यवसायश्च योजितो मोक्षदो भवेत् ॥१२॥
धर्मदेवात्तथा शान्तिः क्षेमं तु सुषुवे सुतम् ।
मदर्थे योजितः क्षेमो मोक्षाय परिकल्पते ॥१३॥
धर्मदेवात्तथा सिद्धिः सुखं तु सुषुवे सुतम् ।
सुखस्तु योजितः कृष्णे मोक्षाय परिकल्पते ॥१४॥
धर्मदेवात्तथा कीर्तिः सुषुवे च यशः सुतम् ।
यशः संयोजितं कृष्णे मोक्षाय परिकल्पते ॥१५॥
धर्मपौत्राश्च वै सर्वे मदर्थे यदि योजिताः ।
ते सर्वेऽपि तु मोक्षाय भवन्ति पापनाशकाः ॥१६॥
कामपुत्रो महानन्दो हर्षपुत्रोऽतिमानकः ।
नियमस्य विरामस्तु सन्तोषस्य तु तर्पणः ॥१७॥
लोभस्य सञ्चयः पुत्रः श्रुतस्य निर्णयः सुतः ।
दण्डस्य कृच्छ्रसंज्ञश्च नयस्य वर्धनः सुतः ॥१८॥
विनयस्य सुतश्चाभ्युदयो बोधस्य शन्तनुः ।
सुनयस्य सुतस्तेजो व्यवसायस्य आयकः ॥१९॥
क्षेमस्य रक्षणं पुत्रः सुखस्य मोदसंज्ञकः ।
यशसश्चोत्सवः पुत्रः पौत्रा धर्मस्य वै मयि ॥२०॥
योजिता मोक्षदाः सर्वे पापानां नाशका रमे ।
सतां योगेन योक्तव्या दिव्यास्ते तारयन्ति वै ॥२१॥
शृणु लक्ष्मि पापदान् वै पुण्यक्षयकरानपि ।
अधर्मस्य सुतान् दुष्टक्रियाचारप्रवर्तकान् ॥२२॥

हिंसा पत्नी त्वधर्मस्य तस्यां जज्ञेऽनृतं सुतः ।
असत्यमनृतं प्रोक्तं दुःखदं पापकारि तत् ॥२३॥
तस्य स्वसा निर्ऋतिश्च तत्सुतौ नरकं भयम् ।
माया च वेदना चेति कन्यके द्वे तथा मते ॥२४॥
मायासुतस्तथा मृत्युः सर्वभूतापहारकः ।
वेदनायाः सुतश्चापि दुःखाख्यः समजायत ॥२५॥
मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ।
निर्ऋतिः संप्रजज्ञे च विनाशं दुःसहं सुतम् ॥२६॥
ब्रह्मा तु निर्ऋतेः पुत्रं दुःसहं क्षुधितं कृशम् ।
काकस्वनं निम्नमुखं समुवाच वचो हितम् ॥२७॥
मा त्वं खाद जगच्चेदं वृत्तिं ददामि ते सुत ।
अधार्मिकस्य वासस्ते वासो भवतु सर्वदा ॥२८॥
पर्युषितं सकीटं च तथा श्वभिरवेक्षितम् ।
भग्नभाण्डगतं चापि मुखवातोपसंहतम् ॥२९॥
उच्छिष्टं स्विन्नमेवापि चाऽवलीढमसंस्कृतम् ।
उदक्योपहतं भुक्तमुदक्या तव तद् भवेत् ॥३०॥
अश्रद्धया हुतं दत्तमस्नातैर्यदवज्ञया ।
त्यक्तं दुष्टं च सर्वं ते मया यक्ष समर्पितम् ॥३१॥
पंक्तिभेदे च कपटे पाकभेदे प्रतारणे ।
कलहे च कुमेले च भविता वसतिस्तव ॥३२॥
अपोष्यमाणे वृद्धे च बद्धे गवि ह्यपोषिते ।
बालानां पोषणहीने गृहे वासः सदा तव ॥३३॥
वृथोपवासिनो मर्त्यान् द्यूतस्त्रीव्यसनस्थितान् ।
बैडालवृत्तिकाँश्चापि शठानभिभविष्यसि ॥३४॥
दुःखदानां तु पापानां तथा विश्वासघातिनाम् ।
शरणार्थिविरुद्धानां गृहे वासः सदा तव ॥३५॥
त्वया गेहे निर्दये वै सदा स्थेयं हि दुःसह ।
न स्थेयं धार्मिके गेहे देवगेहे कदाचन ॥३६॥
यः संस्कृतादो विधिना शुचिरन्तस्तथा बहिः ।
अलोलुपो जितकामस्तद्गेहं चापवर्जय ॥३७॥
यत्र मैत्री गृहे बालवृद्धयोषिन्नरेषु च ।
तथा स्वजनवर्गेषु गृहं तच्चापि वर्जय ॥३८॥
योषितोऽभिरता यत्र न बहिर्गमनोत्सुकाः ।
लज्जान्विताः सदा गेहं यक्ष ! तत्परिवर्जय ॥३९॥
वयःसम्बन्धयोग्यानि शयनान्यशनानि च ।
यत्र गेहे सतां सेवा तद्गृहं त्वं विवर्जय ॥४०॥
यत्र कारुणिका नित्यं साधुकर्मस्ववस्थिताः ।
सामान्योपस्करैर्युक्तास्तद्गृहं संविवर्जय ॥४१॥

यत्रासनस्थाः सहसोत्तिष्ठन्ति गुरुसन्निधौ ।
वृद्धानां सन्निधौ चापि तद्गृहं संविवर्जय ॥४२॥
तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मनः ।
उद्यानशोभं भवनं श्रेयस्तत्परिवर्जय ॥४३॥
यत्र पुंसां मर्मभेदो जायते न ध्वनिर्गृहे ।
वाणी वा तादृशी नास्ति तद्गृहं परिवर्जय ॥४४॥
देवतापितृमर्त्यानामतिथीनां च पूजनम् ।
तत्प्रसादाशनं यत्र तद्गृहं परिवर्जय ॥४५॥
सत्यवाक्यान् क्षमाशीलानहिंस्रान्नानुतापिनः ।
पुरुषान्प्रमदाश्चापि त्यजेथाश्चाऽनसूयकान् ॥४६॥
भर्तृशुश्रूषणे युक्तामसत्स्त्रीसंगवर्जिताम् ।
कुटुम्बभर्तृशेषान्नपुष्टां च त्यज योषितम् ॥४७॥
ब्राह्मणं वेदविज्ञानं सात्त्विकं देवपूजकम् ।
अध्वरादिपरं तुष्टं शान्तं त्यज सदा शुभम् ॥४८॥
क्षत्रियं रक्षकं चापि दातारं धर्ममार्गगम् ।
न्यायमात्रपरं भक्तं त्यज दुःसह ! सद्बलम् ॥४९॥
वैश्यं तु व्यवसायस्थं सत्यधर्मपरायणम् ।
अहिंसकं दानपरं भक्तं गोसेवकं त्यज ॥५०॥
शूद्रं सेवापरं भक्तं शान्तिं निष्कपटं त्यज ।
पत्नी पतिर्यत्र रतौ परस्परसहायिनौ ॥५१॥
धर्मपरौ मोक्षपरौ तद्गृहं सर्वथा त्यज ।
यत्र पुत्रो गुरोः पूजां देवानां च तथा पितुः ॥५२॥
पत्नी च भर्तुः कुरुते तत्र दुःसह मा वस ।
प्रातः सायं कृतलेपं देवपूजाभिसंस्कृतम् ॥५३॥
गृहं सतां पादपूतं न त्वं शक्नोषि वीक्षितुम् ।
भास्कराऽदृष्टशय्यानि नित्याग्निसलिलानि च ॥५४॥
सूर्यावलोकदीपानि दानद्वारर्द्धिमन्ति च ।
सतां प्रसादपात्राणि लक्ष्म्या गेहानि भाजनम् ॥५५॥
यत्र नारायणश्चापि लक्ष्मीश्चापि प्रपूज्यते ।
यत्र वै साधवः साध्व्यस्तत्राऽलक्ष्मीभयं कुतः ॥५६॥
यत्रोक्षा चन्दनं वीणा आदर्शो मधुसर्पिषी ।
मिष्टाव्यताम्रपात्राणि तद्गृहं न तवाश्रयः ॥५७॥
यत्र कण्टकिनो वृक्षा यत्र मादकवल्लिकाः ।
भार्या विवाहशून्या च वल्मीक ! तत्र संवस ॥५८॥
यत्र गृहे नराः पञ्च स्त्रीत्रयं गोत्रयं तथा ।
अन्धकारो निरग्निश्च तद्गृहं वसतिस्तव ॥५९॥
एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।
षडश्वं सप्तमातंगं गृहं शोषय दुःसह ॥६०॥

कुद्दालदात्रपिटकं तद्वत् स्थाल्यादि भाजनम् ।
सर्वाण्युपकरणानि मुसलोलूखलौ तथा ॥६१॥
स्त्रीणां खट्वी तथा चान्यत् क्षिप्तं यत्र च तत्र चा ।
अमार्जितं च मलिनं गृहं तव प्रतिश्रयम् ॥६२॥
मुसलोलूखले स्त्रीणामासनं चाप्युदुम्बरे ।
अवस्करे मन्त्रणं च तद्गृहे वस दुःसह ॥६३॥
लंघ्यन्ते यत्र धान्यानि पक्वाऽपक्वानि वेश्मनि ।
तद्वच्छास्त्राणि तत्र त्वं यथेष्टं चर दुःसह ॥६४॥
स्थालीपिधाने यत्राग्निर्दत्तो दर्वीफलेन वा ।
गृहे तत्र हि रिष्टानामशेषाणां समाश्रयः ॥६५॥
मानुषास्थि गृहे यस्य दिवारात्रं मृतस्थितिः ।
तत्र दुःसह वासस्ते तथाऽन्येषां च रक्षसाम् ॥६६॥
यत्र पद्ममहापद्मौ युवती मोदकाशिनी ।
वृषभैरावतौ यत्र तद्गृहं त्यज सर्वथा ॥६७॥
अशस्त्रा देवता यत्र सशस्त्रश्चाऽहवं विना ।
कल्प्यन्ते मनुजैरर्च्यास्तत् परित्यज मन्दिरम् ॥६८॥
पौरजानपदा यत्र प्राक्प्रसिद्धमहोत्सवाः ।
क्रियन्ते पूर्ववद्गेहे तत्र गृहे न संवस ॥६९॥
शूर्पवातघटोऽम्भोभिः स्नानं वस्त्राम्बुविप्रुषैः ।
नखाग्रसलिलैश्चापि तान् याहि हतलक्षणान् ॥७०॥
देशाचारयुतं ज्ञातिधर्मयुतं च सोत्सवम् ।
जपहोमपरं देवमंगलेष्टियुतं गृहम् ॥७१॥
शौचाचारयुते लोकशस्यं पूज्यं सदाश्रयम् ।
गृहं मा स्पृश तत्रत्यान् मा विलोकय दुःसह ॥७२॥
इत्येवं दुःसहस्यादौ लक्ष्मि ब्रह्मा ददौ गृहम् ।
निवासार्थं ह्यधर्मस्य सहयुग् दुःसहोऽभवत् ॥७३॥
दुःसहस्याऽभवद्भार्या मलिनीनाम नामतः ।
कलिपुत्री कलहज्ञा क्लेशधर्मावलम्बिनी ॥७४॥
तस्याः पुत्रा अष्टसंख्याः कन्याश्चाष्टौ भयप्रदाः ।
दन्ताकृष्टिस्तथोक्तिश्च परिवर्तस्तृतीयकः ॥७५॥
अङ्गधृक् शकुनिश्चापि गण्डप्रान्तरतिस्तथा ।
गर्भहा सस्यहा चेति कन्यानामान्यपि शृणु ॥७६॥
नियोजिका तु प्रथमा द्वितीया तु विरोधिनी ।
स्वयंहारकरी चापि भ्रामणी ऋतुहारिणी ॥७७॥
स्मृतिहन्त्री बीजहन्त्री विद्वेषिणी तथाऽष्टमी ।
भयदास्तास्तदेतेषां तासां कार्याणि मे शृणु ॥७८॥
दन्ताकृष्टिः प्रसूतानां बालानां दशनस्थितः ।
करोति स ज्वरोत्पादं तच्छान्तिः सितसर्षपैः ।
शयनस्योपरिक्षिप्तैः क्षौमवस्त्रविधारणात् ॥७९॥

तथोक्तिनामको वक्ति दुःसहस्याऽस्तु संस्थितिः ।
तच्छान्त्यर्थं तु मांगल्यं कीर्तनीयो जनार्दनः ॥८०॥
परिवर्तः करोत्येव गर्भाणां परिवर्तनम् ।
रक्षां कुर्वीत रक्षोघ्नमन्त्रैश्च सितसर्षपैः ॥८१॥
अङ्गधृक् स्फुरणं दुष्टं चांगानां प्रकरोति वै ।
कुशैस्तस्यांकसंस्पर्शान्निवृत्तिर्जायते तदा ॥८२॥
काकादिपक्षिसंस्थश्च शकुनिः शकुनं सदा ।
करोति दुष्टमेवाऽत्र कार्यत्यागो निवर्तनम् ॥८३॥
गण्डकालक्षणान्ते च गण्डप्रान्तो वसत्यपि ।
सर्वारम्भान् प्रहन्त्येव देवस्तुत्या निवारणम् ॥८४॥
गोमूत्रसर्षपस्नानैस्तद्दक्षग्रहपूजनैः ।
धर्मोत्सवादिकरणैर्गण्डवान् याति वै लयम् ॥८५॥
गर्भहा गर्भनाशी वै नित्यं शौचाद् विनश्यति ।
दैवमाल्यादिरक्षादिमन्त्रेभ्यः स तु नश्यति ॥८६॥
सस्यहा क्षेत्रभूभागे सस्यद्धिमुपहन्ति च ।
तस्माद् रक्षां प्रकुर्वीत जीर्णोपानद्विधारणात् ॥८७॥
तथाऽपसव्यगमनाच्चाण्डालस्य प्रवेशनात् ।
बहिर्बलिप्रदानाच्च सतां चरणवासनात् ॥८८॥
चौर्यव्यवायमद्यादौ नियोजिका तु मानवान् ।
नियोजयति तच्छान्तिं कुर्यात् साधुसमागमात् ॥८९॥
दीक्षादिग्रहणाद्धर्माद् व्रतात्तीर्थनिषेवणात् ।
विरोधिनी कुरुते वै दम्पत्योश्च विरोधनम् ॥९०॥
बन्धूनां सुहृदां पित्रोः पुत्रैः परस्परं सदा ।
तस्याः शान्तिं प्रकुर्वीत शास्त्राचारनिषेवणात् ॥९१॥
स्वयंहारकरी कन्या धान्यं खलाद्धरत्यपि ।
गोभ्यः पयस्तथा सर्पिः पयसोऽपि हरत्यपि ॥९२॥
समृद्धिमृद्धिमद्द्रव्यादपहन्ति महानसात् ।
अर्धसिद्धं तथाऽन्नं च यदन्नागारसंस्थितम् ॥९३॥
संपरिवेषितं चान्नं साऽर्धं भुंक्ते च भुंजता ।
उच्छेषणं मनुष्याणां हरत्यन्नं हि सा तथा ॥९४॥
कर्मान्तागारशालाभ्यः सिद्धर्द्धिं सा हरत्यपि ।
गोस्त्रीस्तनेभ्यश्च पयः क्षीरहर्त्री सदैव सा ॥९५॥
दध्नो घृतं तिलात्तैलं सुरागारात् तथा सुराम् ।
रागं कुसुंभकादीनां कार्पासात् सूत्रमित्यपि ॥९६॥
तच्छान्त्यर्थं प्रकुर्याच्च द्वन्द्वं शिखण्डिनोः शुभम् ।
कृत्रिमां च स्त्रियं तत्र गृहे न्यसेत् स्थलेऽपि च ॥९७॥
रक्षामन्त्रं तथा लक्ष्म्या रक्षामन्त्रं समुच्चरेत् ।
'लक्ष्मि लक्ष्मि महालक्ष्मि ललिते कम्भरे सति ।
हारिकां हन दुष्टां त्वं हारिका नाशमेतु च' ॥९८॥
इति प्रार्थ्यं गृहे भस्म स्थले गोष्ठे निधापयेत् ।
होमाग्निदैवताधूपभस्मादिभिर्विनश्यति ॥९९॥
उद्वेगं जनयत्यन्या ह्येकस्थाननिवासिनः ।
पुरुषस्य तु दुःखदा भ्रामणी सा भवत्यपि ॥१००॥
तस्याथ रक्षां कुर्वीत विक्षिप्तैः सितसर्षपैः ।
आसने शयने चोर्व्यां यत्रास्ते स तु मानवः ॥१०१॥
अथ पुष्पं हरत्यन्या स्त्रीणां सा ऋणहारिणी ।
कुर्वीत तीर्थदेवौकश्चैत्यपर्वतसानुषु ॥१०२॥
नदीसंगमखातेषु स्नपनं तत्प्रशान्तये ।
चिकित्साशः प्रयुञ्जीत वरौषधमृतुप्रदम् ॥१०३॥
स्मृतिं हरति नारीणां नराणां स्मृतिहा हि सा ।
विविक्तदेशसेवित्वाच्छ्रीहरेर्भजनात्तथा ॥१०४॥
स्निग्धभोजनपानाच्च तस्याश्चोपशमो भवेत् ।
बीजाहापरिणी चाऽन्या वीर्यं रजो हरत्यपि ॥१०५॥
हरेः प्रसादमेध्यान्नभोजनैस्तीर्थयात्रया ।
तस्याश्चोपशमः प्रोक्तो हरते कामफलधृतेः ॥१०६॥
द्वेषिणी द्वेषमादध्याच्छान्त्यर्थं जुहुयात्तिलान् ।
मधुक्षीरघृताक्तांश्च मित्रविन्देष्टिमाचरेत् ॥१०७॥
एतेषां तु कुमाराणां कन्यकानां च पद्मजे ।
अन्यान्यपि ह्यपत्यानि वच्मि नामक्रियादिकम् ॥१०८॥
दन्ताकृष्टेः कन्यके द्वे विजल्पा कलहा तथा ।
उभे क्लेशप्रदे शान्तिः कर्तव्या होमकर्मणा ॥१०९॥
दूर्वांकुरान्मधुघृतक्षीराक्तान् बलिकर्मणि ।
विक्षिपेज्जुहुयाच्चैवानलं मित्रं च कीर्तयेत् ॥११०॥
तथोक्तेः कालजिह्वाख्यः पुत्रोऽसाधून् प्रबाधते ।
परिवर्तसुतौ द्वौ तु विरूपविकृतौ रमे ॥१११॥
तौ तु वृक्षाग्रपरिखाप्राकारांऽभोधिसंश्रयौ ।
गर्भहानिकरौ तस्माद् गर्भिणी नाऽभिरोहयेत् ॥११२॥
वृक्षमट्टं परिखां च प्राकारं च महोदधिम् ।
अङ्गधृगः सुतो लक्ष्मि पिशुनो नाम नामतः ॥११३॥
सोऽस्थिमज्जागतः पुंसां बलमत्त्यजितात्मनाम् ।
शकुनेः पञ्चपुत्राश्च श्येनः काकः कपोतकः ॥११४॥
गृध्रश्चोलूक इत्येते श्येनो मृत्युप्रदो मतः ।
काकः कालकरश्चापि ह्युलूको राक्षसप्रदः ॥११५॥
गृध्रो व्याधिप्रदश्चापि कपोतो यममार्गदः ।
तस्य श्येनादयो यस्य निलीयेयुः शिरस्यथ ॥११६॥
नरस्तद्वर्जयेद् गेहं कपोताक्रान्तमस्तकम् ।
श्येनः कपोतो गृध्रश्च काकोलूकौ गृहे रमे ! ॥११७॥

प्रविष्टः कथयेदन्तं वसतां तत्र वेश्मनि ।
स्वप्नेऽपि हि कपोतादेर्दर्शनं नहि शस्यते ॥११८॥
गण्डप्रान्तरतेः पुत्रा शाजस्वल्पनिवासिनः ।
श्राद्धपर्वनिवासाश्च नाभिगच्छेत्तदा स्त्रियम् ॥११९॥
गर्भहस्य सुतो निघ्नो मेहिनी चापि कन्यका ।
प्रविश्य गर्भमत्त्येको भुक्त्वा मोहयतेऽपरा ॥१२०॥
जायन्ते बालकास्तस्मान्मण्डुकाः कच्छपाः सृपाः ।
पुरीषं वा भवत्येव तस्माद् गर्भवती सती ॥१२१॥
श्मशानकटभूमिं चतुष्पथं वर्जयेन्निशि ।
वृक्षच्छायां वर्जयेच्चोत्तरीयं न परित्यजेत् ॥१२२॥
शस्यहस्य सुतश्चैकः क्षुद्रको हन्ति ऋद्धिकाम् ।
अमंगलयदिने वप्तुः क्षेत्रं फलति नैव ह ॥१२३॥
नियोजिकायाः कन्याश्च मत्तोन्मत्ता प्रमत्तिका ।
नवा चेति विशन्त्येता नाशाय सर्वदेहिनाम् ॥१२४॥
अधर्माद्यैर्योजयन्ति परस्त्रीनरसंगमे ।
विरोधिन्यास्त्रयः पुत्रा नोदको ग्राहकस्तथा ॥१२५॥
तमःप्रच्छादकश्चेति ह्याचारवर्जिते गृहे ।
पैशून्यं कुरुते त्वाद्यो गृह्णाति ग्राहको हि तत् ॥१२६॥
तृतीयस्तमसा क्रोधं जनयन्त्यतिदुःखदाः ।
स्वयंहार्यास्त्रयः पुत्राश्चौर्येण जनिता रमे ! ॥१२७॥
सर्वहार्यर्धहारी च वीर्यहारी तथैव च ।
अनाचारगृहे क्लेशगृहे वसन्ति ते सदा ॥१२८॥
भ्रामण्याः काकजंघाख्यः पुत्रो धर्मविवर्जिते ।
रमते गायति चापि भुनक्ति हास्यमेति च ॥१२९॥
कन्यात्रयं च कुचहा व्यंजनहा च जातहा ।
यस्या न क्रियते लोकः सम्यग् वैवाहिको विधिः ॥१३०॥
कालातीतोऽथवा तस्या हरत्येका कुचद्वयम् ।
वृद्धिश्राद्धमदत्वा च तथाऽनर्च्य च मातरम् ॥१३१॥
विवाहितायाः कन्याया हरति व्यंजनं परा ।
तृतीया त्वम्बग्निमध्ये विधूपे सूतिकागृहे ॥१३२॥
अदीपशस्त्रमुसलेभूतिसर्षपवर्जिते ।
प्रविश्य जातमपत्यं हरते तद्दिनश्यति ॥१३३॥
सा जातहारिणी नाम सुघोरा पिशिताशना ।
तस्मात् सुरक्षणं कार्यं यत्नतः सूतिकागृहे ॥१३४॥
स्मृतिहापुत्रको नाम्ना प्रचण्डश्चाऽऽतुकामनः ।
लीकाश्च चण्डपुत्रास्ते सर्वे चाण्डालयोनयः ॥१३५॥
लीकास्त्वधर्मवंशं वै वासयन्ति हरन्ति च ।
बीजहा बीजनाशार्थे यतते शुद्धिवर्जिते ॥१३६॥
विद्वेषिणीसुतौ पुंसामपकारप्रकाशकौ ।
एकस्तु स्वगुणान् लोके प्रकाशयति पाप्यपि ॥१३७॥
द्वितीयस्तु गुणान् मैत्रीं लोकस्थामपकर्षति ।
इत्येते दौसहाः सर्वे यैः प्रजाः कष्टमाप्नुयुः ॥१३८॥
तेषां शान्तिः प्रकर्तव्या तत्तद्बलिक्रियाऽर्हणैः ।
मखै रौद्रैर्वैष्णवैश्च दैवैर्भौतैश्च चाण्डिकैः ॥१३९॥
हरेः सम्पूजनैर्भक्त्या व्रतैराराधनैरपि ।
सतां सेवाविशेषैश्च चमत्कारिसदर्हणैः ॥१४०॥
इत्येवं कथितं लक्ष्मि पापानां पापनाशनम् ।
शान्त्यादिकर्मभिश्चापि प्रसंगाद् रिष्टकानि च ॥१४१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने धर्मवंशवर्णनमधर्मवंशवर्णनं दुःसहस्य निवासस्थानानि दुःसहवंशानामुपद्रवादिवर्णनमित्यादिनिरूपणनामा द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

**श्रीनारायणीश्रीरुवाच—**

यात्रायां का दिशा श्रेष्ठा कनिष्ठा का कदा मता ।
प्रस्थानं च कदा श्रेष्ठं कदा किं कर्म शोभनम् ॥ १ ॥
अशोभनं कदा स्याच्च नक्षत्रवारयुक्तिथौ ।
तत्सर्वं मे समाचक्ष्व लोककल्याणहेतवे ॥ २ ॥

**श्रीपुरुषोत्तम उवाच—**

कृत्तिका त्वग्निदैवत्या रोहिणी ब्रह्मदेवता ।
मृगशिरा सोमदेवा चाऽऽर्द्रा तु रुद्रदेवता ॥ ३ ॥
पुनर्वसुः सूर्यदेवा पुष्यं तु गुरुदैवतम् ।
अश्लेषा सर्पदैवत्या मघा तु पितृदेवता ॥ ४ ॥
पूर्वाफाल्गुनिका बोध्या पद्मजे भगदेवता ।
उत्तराफाल्गुनी बोध्या पद्मजेऽर्यमदेवता ॥ ५ ॥
हस्ता सवितृदेवा च चित्रा तु त्वष्टृदेवता ।
स्वाती तु वायुदैवत्या विशाखेन्द्राग्निदेवता ॥ ६ ॥
अनुराधा मित्रदेवा ज्येष्ठा तु शक्रदेवता ।
मूला निर्ऋतिदैवत्या पूर्वाषाढाऽऽप्यदेवता ॥ ७ ॥
उत्तराषाढिका वैश्वदेवता परिकीर्तिता ।
अभिजित् ब्रह्मदेवा च श्रवणा विष्णुदेवता ॥ ८ ॥
धनिष्ठा वसुदेवा वारुणदेवा शतंभिषा ।
अजदेवा पूर्वभाद्रोत्तरभाद्राऽहिर्बुध्निका ॥ ९ ॥

पुषादेवा रेवती चाश्विनीदेवा तथाऽश्विनी ।
भरणी यमदेवा च प्रोक्तास्ते ऋक्षदेवताः ॥१०॥
ब्रह्माणी संस्थिता पूर्वे प्रतिपन्नवमीतिथौ ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ ॥११॥
पञ्चम्यां च त्रयोदश्यां वाराही दक्षिणे स्थिता ।
षष्ठ्यां चापि चतुर्दश्यामिन्द्राणी पश्चिमे स्थिता ॥१२॥
सप्तम्यां पौर्णमास्यां च चामुण्डा वायुकाष्ठिका ।
अष्टम्यमावास्यदिने लक्ष्मीस्त्वीशानगा मता ॥१३॥
एकादश्यां त्रयोदश्यामग्निकोणे तु वैष्णवी ।
द्वादश्यां च चतुर्थ्यां तु कौमारी नैर्ऋते सती ॥१४॥
योगिनीसम्मुखे नैव गमनादि प्रकारयेत् ।
अश्विनी रेवती चापि मृगा मूला पुनर्वसुः ॥१५॥
पुष्या हस्ता तथा ज्येष्ठा प्रस्थाने श्रेष्ठताप्रदाः ।
हस्त्यादिपञ्चऋक्षाणि ह्युत्तरात्रयमित्यपि ॥१६॥
अश्विनी रोहिणी पुष्या धनिष्ठा च पुनर्वसुः ।
वस्त्रप्रावरणे श्रेष्ठा सौभाग्यवर्धका अपि ॥१७॥
कृत्तिका भरण्यश्लेषा मघा मूला विशाखिनी ।
तिस्रः पूर्वा अधोवक्त्रा अधःकार्याणि तत्र वै ॥१८॥
वापीकूपतडागादिभूमिखनिप्रगह्वरम् ।
देवागारस्य खननं निधानखननं तृणम् ॥१९॥
गणितं ज्योतिषारम्भं खनिबिलप्रवेशनम् ।
कुर्यात्तान्येव सिद्ध्यन्ति चाधःकार्याणि सर्वथा ॥२०॥
रेवती चाश्विनी चित्रा स्वाती हस्ता पुनर्वसुः ।
अनुराधा मृगो ज्येष्ठा ह्येताः पार्श्वमुखा मताः ॥२१॥
गजोष्ट्राऽश्वबलीवर्ददमनं महिषस्य गोः ।
बीजानां वपनं कुर्यान्नावादीनां प्रवाहणम् ॥२२॥
चक्रयन्त्ररथानां च गमनं चाऽऽगमादिकम् ।
रोहिण्यार्द्रा तथा पुष्या धनिष्ठा चोत्तरात्रयम् ॥२३॥
शतभीषा श्रवणं च नव तूर्ध्वमुखा मताः ।
आसु राज्याभिषेकं च पट्टबन्धं प्रकारयेत् ॥२४॥
ऊर्ध्वमुखान्युच्छ्रितानि सर्वाण्येतासु कारयेत् ।
चतुर्थी त्वशुभा षष्ठी चाष्टमी नवमी तथा ॥२५॥
अमावास्या पूर्णिमा च द्वादशी च चतुर्दशी ।
अथ शुभा प्रतिपत्तु कृष्णा बुधे द्वितीयका ॥२६॥
तृतीया मंगलयुक्ता चतुर्थी शनिवासरे ।
गुरौ तु पञ्चमी, षष्ठी शुभा मंगलशुक्रयोः ॥२७॥
सप्तमी बुधसोमस्थाऽष्टमी मंगलसूर्यगा ।
नवमी सोमवारस्था दशमी गुरुवारिका ॥२८॥
एकादशी गुरुव्याप्ता द्वादशी बुधवासरे ।
त्रयोदशी शुक्रभौमौ शनौ श्रेष्ठा चतुर्दशी ॥२९॥
पौर्णमास्यप्यमावास्या श्रेष्ठा बोध्या बृहस्पतौ ।
द्वादशीं दहति सूर्यः शशी त्वेकादशीं दहेत् ॥३०॥
भौमोद हेच्च दशमीं नवमीं तु बुधो दहेत् ।
गुरुर्दहति चाष्टमीं सप्तमीं भार्गवो दहेत् ॥३१॥
शनैश्वरो दहेत्षष्ठीं गमनं चासु नास्ति वै ।
प्रतिपन्नवमीष्वेव चतुर्दश्यष्टमीषु च ॥३२॥
बुधवारे च प्रस्थानं दूरतः परिवर्जयेत् ।
मेषे कर्कटके षष्ठी कन्यायां मिथुनेऽष्टमी ॥३३॥
वृषे कुंभे चतुर्थी च द्वादशी मकरे तुले ।
दशमी वृश्चिके सिंहे धनुर्मीने चतुर्दशी ॥३४॥
एता दग्धा न गन्तव्यं देहिजीवादिमानवैः ।
विशाखात्रयमादित्ये पूर्वाषाढात्रये शशी ॥३५॥
धनिष्ठात्रितयं भौमे बुधे तु रेवतीत्रयम् ।
रोहिण्यादित्रयं गुरौ शुक्रे पुष्यत्रयं रमे ! ॥३६॥
शनैश्चरे वर्जयेच्च तूत्तराफाल्गुनीत्रयम् ।
एष औत्पातिको योगो मृत्युरोगादिकारकः ॥३७॥
मूलेऽर्कः श्रवणे चन्द्रः प्रोष्ठपद्युत्तरे कुजः ।
कृत्तिकासु बुधश्चैव गुरौ लक्ष्मि पुनर्वसुः ॥३८॥
पूर्वफाल्गुनिका शुक्रे स्वातिश्चैव शनैश्चरे ।
एते ह्यमृतयोगाः स्युः सर्वकार्यप्रसाधकाः ॥३९॥
विष्कंभे घटिकाः पञ्च शूले सप्त प्रकीर्तिताः ।
षड्गण्डे चातिगण्डे च नव व्याघातवज्रयोः ॥४०॥
व्यतीपाते परीघे च वैधृते च दिने दिने ।
वर्जनीया मृत्युयोगा ह्येते कार्यविनाशकाः ॥४१॥
हस्तेऽर्कश्च गुरुः पुष्ये ह्यनुराधाबुधे शुभा ।
रोहिणी तु शनौ श्रेष्ठा सोमे च शतभीषणा ॥४२॥
शुक्रे तु रेवती श्रेष्ठा ह्यश्विनी मंगले शुभा ।
एते ते सिद्धियोगाः स्युः सर्वदोषविनाशकाः ॥४३॥
भार्गवे भरणी चापि सोमे चित्रा तु पद्मजे ।
भौमे चैवोत्तराषाढा धनिष्ठा तु बुधे यदा ॥४४॥
गुरौ शतभिषा चापि शुक्रे वै रोहिणी तथा ।
शनौ तु रेवती चापि विषयोगा हि ते मताः ॥४५॥
पुष्यः पुनर्वसुश्चैव रेवती चापि चित्रिका ।
श्रवणा च धनिष्ठा च हस्ताऽश्विनी मृगा तथा ॥४६॥
शतभीषा चापि योग्या जातकर्मादिकर्मणाम् ।
विशाखा चोत्तरा तिस्रो मघाऽऽर्द्रा भरणी तथा ॥४७॥

अश्लेषा कृत्तिका चैताः प्रस्थाने मरणप्रदाः ।
षडादित्ये दशा बोध्याः सोमे पञ्चदश स्मृताः ॥४८॥
अष्टौ तु मंगले बोध्या बुधे सप्तदश स्मृताः ।
शनैश्चरे दश बोध्या गुरावेकोनविंशतिः ॥४९॥
राहौ द्वादशवर्षाणि ह्येकविंशतिर्भार्गवे ।
रवेर्दशा दुःखदा स्यादुद्वेगनृपनाशकृत् ॥५०॥
विभूतिदा सोमदशा सुखमिष्टान्नदा तथा ।
दुःखप्रदा भौमदशा राज्यादेः स्याद् विनाशिनी ॥५१॥
दिव्यस्त्रीदा बुधदशा राज्यदा कोषवृद्धिदा ।
शनेर्दशा राज्यनाशबन्धुदुःखकरी भवेत् ॥५२॥
गुरोर्दशा राज्यदा स्यात् सुखधर्मादिदायिनी ।
राहोर्दशा राज्यनाशव्याधिदा दुःखदा भवेत् ॥५३॥
हस्त्यश्वदा शुक्रदशा राज्यस्त्रीलाभदा भवेत् ।
मेषमंगारकक्षेत्रं वृषं शुक्रस्य कीर्तितम् ॥५४॥
मिथुनस्य बुधः क्षेत्रं सोमः कर्कटकस्य च ।
सूर्यक्षेत्रं भवेत् सिंहः कन्याक्षेत्रं बुधस्य च ॥५५॥
भार्गवस्य तुलाक्षेत्रं वृश्चिको मंगलस्य च ।
धनुर्बृहस्पतेः क्षेत्रं शनेर्मकरकुंभकौ ॥५६॥
मीनः सुरगुरोश्चेति क्षेत्रेष्टं लाभदं क्रये ।
पौर्णमास्याद्वयं यत्र पूर्वाषाढाद्वयं भवेत् ॥५७॥
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ।
अश्विनी रेवती चित्रा धनिष्ठा स्यादलंकृतौ ॥५८॥
मृगाऽहिकपिमार्जारश्वानः शूकरपक्षिणः ।
नकुलो मूषिकश्चैव यात्रायां दक्षिणे शुभाः ॥५९॥
विप्रकन्या शवं हस्ती शंखो भेरी वसुन्धरा ।
वेणुः स्त्री पूर्णकुम्भश्च यात्रायां शुभदर्शनाः ॥६०॥
जम्बुकोष्ट्रखराद्याश्च यात्रायां वामके शुभाः ।
कार्पासौषधितैलानि पक्वांगारभुजंगमाः ॥६१॥
मुक्तकेशी रक्तमाला नग्नश्चाऽशुभलक्षणाः ।
हिक्का पूर्वे फलदा चाऽग्नेये सन्तापशोकदा ॥६२॥
दक्षिणे हानिदा शोकसन्तापदा तु निर्ऋते ।
मिष्टान्नदा पश्चिमे तु वायव्येऽर्थप्रदा मता ॥६३॥
उत्तरे कलहा चेशाने तु मृत्युप्रदा भवेत् ।
सूर्ये नरस्वरूपं तु विलिख्य तस्य ऋक्षकम् ॥६४॥
तदादित्रयमास्येयं मस्तके त्रयमानने ।
एकैकं स्कन्धयोर्बाहुयुग्मे च हस्तयोर्न्यसेत् ॥६५॥
हृदये पञ्च नाभौ त्वेकं गुह्ये चैकमित्यपि ।
एकैकं जानुके शिष्टानि तु पादे नियोजयेत् ॥६६॥
चरणस्थेन ऋक्षेण त्वल्पायुर्जायते नरः ।
विदेशगमनं जानौ गुह्यस्थे परदारवान् ॥६७॥
नाभिस्थेनाऽल्पसन्तुष्टो हृत्स्थेन तु महेश्वरः ।
पाणिस्थेन भवेच्चौरः स्थानभ्रष्टो भवेद् भुजे ॥६८॥
स्कन्धस्थेन धनपतिर्मुखे मिष्टान्नमाप्नुयात् ।
मस्तके पट्टवस्त्राढ्यश्चेति तद्दक्षवत्फलम् ॥६९॥
सप्तमोपचयश्चन्द्रः श्रेष्ठः शुक्ले द्वितीयजः ।
पञ्चमो नवमश्चापि लाभदः संभवत्त्वपि ॥७०॥
चन्द्रस्य द्वादशाऽवस्था भवन्ति शृणु पद्मजे ।
आश्विन्यास्तु समारम्य त्रित्रिऋक्षेषु वै दशा ॥७१॥
सार्धद्वयेषु बोध्या प्रथमा तु प्रवासदा ।
द्वितीया हानिदा चापि तृतीया मृत्युदा मता ॥७२॥
चतुर्थी जयदा हास्यप्रदा तु पञ्चमी दशा ।
षष्ठी क्रीडारतिदा सप्तमी सुखमोददा ॥७३॥
अष्टमी शोकदा भोगप्रदा तु नवमी दशा ।
दशमी ज्वरदा कम्पप्रदा चैकादशी दशा ॥७४॥
सुस्थितिदा द्वादशी च दशातुल्यं फलं मतम् ।
जन्मस्थः कुरुते तुष्टिं द्वितीये सुखनाशकः ॥७५॥
तृतीये राज्यसम्मानं चतुर्थे कलहप्रदः ।
पञ्चमे स्त्रीप्रदः षष्ठे धनधान्यप्रदो भवेत् ॥७६॥
सप्तमे रतिपूजादोऽष्टमे प्राणसन्देहकृत् ।
नवमे कोषसञ्चयप्रदो दशमे सिद्धिदः ॥७७॥
एकादशे जयदश्च द्वादशे मृत्युदः शशी ।
कृत्तिकादौ पूर्वयात्रां सप्तर्क्षाणि तु संव्रजेत् ॥७८॥
मघादौ दक्षिणे गच्छेदनुराधादौ पश्चिमे ।
धनिष्ठादिसप्तसु यात्रोत्तरे श्रेष्ठा मता सदा ॥७९॥
अश्विनी रेवती चित्रा धनिष्ठा वेषधारणे ।
मृगाऽश्विचित्रापुष्याश्च मूला हस्ता शुभास्तु वै ॥८०॥
कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्मसु ।
शुक्रचन्द्रौ तु जन्मस्थौ शुभदौ सर्वदा मतौ ॥८१॥
चन्द्रबुधगुरुशुक्राः शुभदा वै द्वितीयके ।
तृतीये भौममन्दार्कशशांकाः शुभदा मताः ॥८२॥
बुधश्चतुर्थके श्रेष्ठः शुक्रगुरू तु पञ्चमौ ।
चन्द्रकेतू तथा श्रेष्ठौ पञ्चमौ परिकीर्तितौ ॥८३॥
शनिश्चार्कश्च भौमश्च षष्ठे श्रेष्ठा मताः सदा ।
गुरुश्चन्द्रः सप्तमे च बुधः शुक्रस्तथाऽष्टमे ॥८४॥
नवमे तु गुरुः श्रेष्ठो दशमेऽर्काऽर्किचन्द्रकाः ।
एकादशे ग्रहाः सर्वे द्वादशे बुधभार्गवौ ॥८५॥

सिंहेन मकरः श्रेष्ठः कन्यया मेष उत्तमः ।
तुलया सह मीनस्तु कुंभेन सह कर्कटः ॥८६॥
धनुषा वृषभः श्रेष्ठो मिथुनेन तु वृश्चिकः ।
एवं प्रीत्यै भवत्येव सर्वं शुभफलप्रदम् ॥८७॥
उदयादेव चारम्य सूर्यो राशौ प्रतिष्ठति ।
अह्नि षट्सु निशि षट्सु राशिषु संप्रवर्तते ॥८८॥
घटिकाः पञ्च मीने च मेषे चापि तथाविधाः ।
वृषे कुंभे चतस्रश्च तिस्रो मिथुने नक्रके ॥८९॥
पञ्च चापे कर्कटे च षट् सिंहे वृश्चिके तथा ।
सप्त तुले च कन्यायां घटिकाः परिकीर्तिताः ॥९०॥
मेषलग्ने भवेद् वन्ध्या वृषे भवति कामिनी ।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे ॥९१॥
सिंहे चैवाऽल्पपुत्रा सा कन्यायां रूपसंयुता ।
तुलायां रूपमैश्वर्यं वृश्चिके कर्कशा भवेत् ॥९२॥
सौभाग्यं धनुषि स्याच्च मकरे नीचगामिनी ।
कुंभे चैवाल्पपुत्रा च मीने वैराग्यसंयुता ॥९३॥
तुला कर्कटको मेषो मकरः स्थिरचारिणः ।
पञ्चाननो वृषः कुम्भो वृश्चिकश्च स्थिरा मताः ॥९४॥
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभाविनः ।
यात्रा चिरेण कर्तव्या प्रवेष्टव्यं स्थिरेण ह ॥९५॥
देवस्थापनवैवाह्यं द्विस्वभावेन कारयेत् ।
नन्दा भद्रा जया श्रेष्ठा रिक्ता वर्ज्या तिथिः सदा ॥९६॥
नन्दा प्रतिपत् षष्ठी चैकादशीति तिथित्रयम् ।
भद्रा द्वितीया सप्तमी द्वादशीति तिथित्रयम् ॥९७॥
जयाऽष्टमी तृतीया च त्रयोदशी तिथित्रयम् ।
रिक्ता चतुर्थी नवमी चतुर्दशी तिथित्रयम् ॥९८॥
पूर्णा पञ्चमी दशमी पूर्णिमा ताः शुभा मताः ।
बुधश्चरो गुरुः क्षिप्रो मृदुः शुक्रो रविर्ध्रुवः ॥९९॥
शनिश्च दारुणो भौम उग्रः शशी समोऽपि च ।
चरक्षिप्रैः प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवैः ॥१००॥
दारुणोग्रैश्च योद्धव्यं विजयः स्यान्न संशयः ।
नृपाऽभिषेकोऽग्निकार्यं सोमवारे प्रशस्यते ॥१०१॥
सोमे तुले प्रयाणं च गृहं च भवनादिकम् ।
सैनापत्यं शौर्ययुद्धं शस्त्राभ्यासः कुजे शुभः ॥१०२॥
सिद्धिकार्यं च मन्त्रश्च यात्रा चेति बुधे शुभाः ।
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ ॥१०३॥
कन्यादानं गजारोहः स्त्रीसंगो भार्गवे शुभाः ।
स्थाप्यं गृहप्रवेशश्च गजबन्धः शनौ शुभाः ॥१०४॥
इत्येवं सर्वमालक्ष्य कार्यारम्भं प्रवर्तयेत् ।
भुक्तिर्मुक्तिर्भवेच्चापि पठनाच्छ्रवणाद् रमे ! ॥१०५॥
नक्षत्राणि च योगिन्यस्तिथयो योगका अपि ।
दशाश्चापि शकुनानि हिक्का स्थानानि वै तथा ॥१०६॥
लग्नानि घटिका सर्वं मत्स्वरूपं विभावय ।
यथापुण्यं देहिनो वै तथा समुपतिष्ठते ॥१०७॥
अहं लक्ष्मि स्मृतस्तत्र पूजितो भोजितोऽपि च ।
सेवितो वन्दितः प्रसादितश्च परिचारितः ॥१०८॥
करोमि सर्वं सद्भाग्यं दुःस्थं सुस्थं करोमि च ।
मां विज्ञाय च सर्वत्र कार्यध्वंसो न विद्यते ॥१०९॥
सर्वं भक्तस्य सफलं नास्तिकस्य तु निष्फलम् ।
आत्मवतः फलं श्रेष्ठं चानात्मनः कनिष्ठकम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने नक्षत्रयोगिनीतिथियोगदशाशाकुनहिक्कास्थानलग्नघटिकाविशेषे कार्याकार्यफलाऽफलादिनिरूपणनामा त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं सरोजिनीकथां शुभाम् ।
पुरा कन्याऽभवत् कुंभकारस्य कर्दमार्थिनी ॥ १ ॥
घटादिसर्वभाण्डानां रचनाय तु मृत्तिकाम् ।
समानयति योग्यां च गर्दभाद्यैस्तु वाहनैः ॥ २ ॥
मात्रा पित्रा समं भ्रात्रा क्वचित् स्वस्रा कुमारिका ।
वरयोग्याऽपि सा नैवेयेष वै वरितुं ततः ॥ ३ ॥
पितृगृहेऽवसत् साध्वी ब्रह्मचर्यपरायणा ।
वृद्धसेवापरा चापि शीलधर्मपरायणा ॥ ४ ॥
व्यवसाये निजे रक्ता तुष्टा स्वल्पैश्च वस्तुभिः ।
निर्धनस्य गृहे भूता ततो वाञ्छा न वर्धते ॥ ५ ॥
स्वभावतोषयुक्ता वै वर्तते सात्त्विका यथा ।
अथ काले गता माता नाम्ना चोणावती ज्वरम् ॥ ६ ॥
समासाद्य ययौ स्वर्गं सरोजिनी शुशोच ह ।
मातृसमं सुखं नास्ति नास्त्याधारः प्रसूप्रखः ॥ ७ ॥
कन्यानां सर्वदा माता स्वर्गं गृहे विराजते ।
अपि निर्धनबालानां धनं माता परं मतम् ॥ ८ ॥
अदत्वा निजबालायै भुंक्ते पिबति नो प्रसूः ।
अस्मृत्वा न दिनं याति मातुर्निजोद्भवात्मजान् ॥ ९ ॥

विस्मृतौ चापि निद्रायां समाह्वयति बालकान् ।
देववत् पोषणं माता करोति सेवते निजान् ॥१०॥
मातुरूष्मा ह्येवाऽऽस्तेऽमृतं वै पक्षिणामपि ।
अण्डान्यपि प्रपुष्यन्ति सदा मातुरुरोष्मणा ॥११॥
वियोगे क्षणमात्रं वा माता सुखं न विन्दति ।
सा माता स्वर्गगा चाऽत्र पिता वृद्धो भवत्यपि ॥१२॥
सोऽपि पुत्रार्थानिर्वाणमिच्छन्नगच्छतो दिवम् ।
ततो मया सदा स्थेयं भ्रातृजायाकरे भवेत् ॥१३॥
अनेकैर्न निवासोऽपि निरयोऽत्र हि गोचरः ।
किं कार्यं वै मया ह्यत्र कर्तव्यं किं तथोत्तरे ॥१४॥
इत्येवं नित्यमेवेयं शोचत्येव विरागिणी ।
अथ द्वादशके श्राद्धे महीमानाः समाययुः ॥१५॥
सम्बन्धिनां च सम्बन्धवन्तोऽपि ज्ञातियोगिनः ।
तत्रैकेन कृता याच्ञा सरोजिन्यर्थमेव ह ॥१६॥
पिता निवेदितस्तस्या सोऽपि स्वीचकार तत् ।
वाग्दानेन प्रदत्ता सा कन्यका कुंभकारिणे ॥१७॥
नाम्ना माल्यरायेति पित्रा चैधर्मसंज्ञिना ।
अथ योग्ये क्षणे कन्या विवाहिता सुमंगलैः ॥१८॥
कन्याऽपि सा प्रमत्ताभूच्छोकं तत्याज सर्वथा ।
ययौ गृहं स्वामिनो वै भोगान् भुंक्ते सुखस्थिता ॥१९॥
किन्तु शारीरचिह्नानि कन्यायाः कान्तहानि वै ।
श्मश्रूणीशस्य दैर्घ्यं च तथा चिपिटनासिका ॥२०॥
केकराक्षी पदांगुष्ठानामिके स्पृशतो न क्षमाम् ।
एतादृशी गृहायाता यदा पत्युस्तदा क्षणात् ॥२१॥
पतिर्ज्वरं समापेदे कृशतां प्राप्य वै मृतः ।
विधवा सा च सञ्जाता शारीरचिह्नदोषतः ॥२२॥
अथ पितृगृहं प्राप्ता भ्रातृभिश्चाभिरक्षिता ।
अनवद्या निराधारा शोचति स्म निजां मुहुः ॥२३॥
वर्षान्तरे पुनश्चान्यकुंभकारेण चार्थिता ।
पित्रा विवाहिता साऽपि पुनः पत्युर्गृहं ययौ ॥२४॥
सुखं भुंक्तेऽपि सा तु पूर्वतोऽपि सुखिगृहे ।
किन्तु चिह्नपापेन ग्रहदोषैस्तथा पुनः ॥२५॥
पतिरस्या द्वितीयोऽपि मृतो नाम्ना हि रत्नकः ।
अनवद्यैव सा तं च शुशोच स्मरति मुहुः ॥२६॥
भाग्यं निजं शुशोचापि पुनः पितृगृहं ययौ ।
पिताऽपि पूर्वकालः सन् मृत्युवशं ततो गतः ॥२७॥
भ्रातृजायाऽन्वगात् साऽपि सरोजिनी ततः परम् ।
वर्षान्ते तृतीयेन कुंभकारेण वाञ्छिता ॥२८॥
भ्रात्राऽर्पिता ययौ तस्याः पत्युर्गृहं सरोजिनी ।
सुखं प्राप्ता पूर्वतोऽपि विशेषं तत्र वत्सरम् ॥२९॥
तृतीयोऽपि मृतो लालदासाख्यः स्वपतिस्ततः ।
शुशोचाऽतीव मनसा भाग्यं धिक्कुर्वती हि सा ॥३०॥
अथ भ्रातृगृहं प्राप्ता दुःखेन वर्तते सदा ।
पुनर्वर्षान्तरे चाऽन्यकुंभकारेण चाऽर्थिता ॥३१॥
विधिना स्वाग्रजदत्ता ययौ पत्युर्गृहं हि सा ।
वर्षमात्रं सुखं प्राप्ता चतुर्थोऽपि पतिर्मृतः ॥३२॥
पुनर्भ्रातृगृहं प्राप्ता निरपत्याऽतिदुःखिता ।
पराधीना च दिवसान् दुःखान् निर्गमयत्यपि ॥३३॥
अथैकदा भ्रातृजाया दिदेश कचरार्थिनी ।
आमपात्राणि पक्तुं वै कचरेन्धनहेतवे ॥३४॥
याहि सीम्नि चेन्धनानि समिधः पत्रकचरम् ।
काण्डकाष्ठानि नालानि भ्रष्ट्र्यर्थं त्वं समानय ॥३५॥
सरोजिनी ज्वरार्ताऽभूत्तदैव शीतदूषिता ।
निषिषेध प्रगन्तुं च सुप्ताऽभवद् भुवस्तले ॥३६॥
अथ क्रुद्धा भ्रातृजाया गालीदानं चकार ह ।
सा श्रुत्वा न प्रत्युवाच यतो ज्वराभिदुःखिनी ॥३७॥
आहूताऽपि न चायाति यदा सरोजिनी तदा ।
भ्रातृजाया कुटीं गत्वा धृत्वा हस्ते सरोजिनीम् ॥३८॥
विचकर्ष बलाच्चापि दिदेशाऽऽहर्तुमिन्धनम् ।
न यास्यामीति चुक्रोश सरोजिनी ज्वरान्विता ॥३९॥
तताड भ्रातृजायां च साऽपि तताड तां मिथः ।
केशाकेशि तयोर्युद्धं साक्रोशं समभूत्तदा ॥४०॥
पार्श्ववासाः प्रश्रुत्वाऽपि मिलितास्तद्गृहेऽभवन् ।
कुटुम्बिनः समायाता ग्रामीणाः सुहृदोऽपि च ॥४१॥
सर्वे साम्ना विविधेन क्लेशं शान्तं प्रचक्रिरे ।
अथ वैरं तयोर्जातं नित्यं नेत्ररुषाऽधिकम् ॥४२॥
नेत्रयोश्चापि युद्धं वै जायते नित्यशस्ततः ।
वाचां युद्धं गालिकाभिः कलहश्चापि जायते ॥४३॥
एवं दिनेषु यातेषु भ्राता कालवशं गतः ।
रक्षिताऽस्या नैव चास्ति भ्रातृजाया सुपुत्रिणी ॥४४॥
प्रसह्य तां गृहान्निष्कासयामास निजात्ततः ।
सापि प्रौढस्थितिस्त्यक्त्वा ग्रामं नदीतटेऽस्वपत् ॥४५॥
स्वप्ने ददर्श तत्रैव दुःखहेतुं पुराकृतम् ।
स्वां ददर्श घातकर्त्री निषादिनीं पुराभवे ॥४६॥
स्वगृहे विक्रयार्थे सा हन्ति वै बर्करं त्वजम् ।
बहून् सा बर्करान् हत्वा करोति चोदरभृतिम् ॥४७॥

एवंविधां घातकिनीं स्वां विलोक्य मृताऽभवत् ।
यमपुर्यां ततो याता भुक्त्वा दुःखानि तत्र च ॥४८॥
पिशाचिनी ततो भूत्वा सहस्रवर्षमेव ह ।
कुंभकारगृहे जाता सरोजिनी भवाम्यहम् ॥४९॥
इत्येवं स्वप्नमेवेयं दृष्टवती नदीतटे ।
समुत्तस्थौ ततश्चेयं कर्मफलं बुबोध ह ॥५०॥
पूर्वकृतं हि पश्चाद्वै प्राप्यते सर्वदेहिभिः ।
मया पूर्वे हताश्चाऽजास्तेन नश्यन्ति मे वराः ॥५१॥
पतयो मे सर्व एव म्रियन्ते मम कर्मभिः ।
अतो मया भिक्षुकिन्या भूत्वा गन्तव्यमेव ह ॥५२॥
विचार्येत्थं कर्मपीडां ग्रहपीडां स्वभावजाम् ।
पीडां पूर्वफलं मत्वा साध्व्याश्रमं वने ययौ ॥५३॥
यत्र सन्न्यासिनी दिव्या राजते श्रीसतीश्वरी ।
सहस्रशिष्यासंयुक्ता वैष्णवी ब्रह्मचारिणी ॥५४॥
दिव्यतेजोमयी मूर्तिर्दर्शनात्पापनाशिनी ।
अनादिश्रीकृष्णनारायणभक्तिपरायणा ॥५५॥
दूरश्रवणदृष्ट्यादिचमत्कारयुता शुभा ।
परदुःखहरा योगाभ्यासपरा जितेन्द्रिया ॥५६॥
यदाश्रमे न पुरुषाः प्रविशन्ति कदाचन ।
काश्चिद्धोमपरा यज्ञोपवीतिन्यश्च कन्यकाः ॥५७॥
काश्चिद्ध्यानपराः सन्ति मालाजपपरायणाः ।
काश्चित्तपःपरा साध्व्यो जटासमस्तशोभनाः ॥५८॥
निरम्बरा वृक्षशाल्कपराश्चर्मपरास्तथा ।
पत्रवंशकटवस्त्राः कम्बलादिपरास्तथा ॥५९॥
सर्वाब्रह्मपराः सत्यः साध्व्यः कृष्णव्रतान्विताः ।
साक्षात् कृष्णे कृतस्नेहा मुक्तिमार्गपरायणाः ॥६०॥
वायुसूर्यशशिदेवा वह्नयोऽपि स्पृशन्ति न ।
सकन्यास्ते प्रवर्तन्ते तासां वासेषु सेवकाः ॥६१॥
वैरं मृगे मृगराजे स्वाभाविकं न यत्र वै ।
कामक्रोधादयो यत्र निजभावं त्यजन्ति वै ॥६२॥
युवत्वं यत्र नास्त्येव विद्यमानं तु सात्त्विकम् ।
निर्गुणत्वं भजतेऽत्र सतीनामाश्रमे शुभे ॥६३॥
राजस्वत्वं सतीनां वै तपसा लीनतां गतम् ।
दिव्यदेहा विराजन्ते देव्यो यथा चिदम्बरे ॥६४॥
जलवह्निबाष्पकुण्डा यत्र शीतोष्णयोगिनः ।
सिद्धयो यत्र वर्तन्ते वचःसंकल्पमानसे ॥६५॥
काश्चिद् देव्यो गह्वरस्थाः काश्चित् कुटीगता अपि ।
काश्चिद् व्योमकृतावासा विहरन्त्यपि चाम्बरे ॥६६॥
काश्चिद् वेदस्य वेत्र्यश्च काश्चित् कर्मठिका अपि ।
काश्चित् सामपराः सत्यः काश्चिदृचां प्रबोधिकाः ॥६७॥
काश्चिज् ज्ञानपरा नित्यं बहुरूपधरास्तथा ।
समाधिस्था अपराश्च राजन्ते सात्त्विका इति ॥६८॥
तत्र गत्वा विरूपाक्षी कुमुखी दीर्घकाधरा ।
रोमजंघा चिपिटिकानासा चिपिटपादिका ॥६९॥
स्थूलघोणा रक्तकेशा सूक्ष्ममुखी कृशस्तनी ।
सरोजिनी कुंभकारपुत्री निराश्रया सती ॥७०॥
आश्रमस्यैव गोद्वारे भ्रमन्ति यत्र वै मृगाः ।
तत्र रजोमयीभूमौ लुलोठ महिमान्विता ॥७१॥
पावनी सा धूलिका वै शरीरे मर्दिता तया ।
तां वीक्ष्य पावनीं भक्तां किन्तु चांगैरमंगलाम् ॥७२॥
युवतीं दुःखिनीं लक्ष्मि कन्यकाश्चाभिसंययुः ।
सर्वाभ्यो युवती नत्वा सहाश्रमान्तरं ययौ ॥७३॥
यत्र सा राजते साध्वी श्रीसतीश्वरिणी गुरुः ।
नमस्कृत्य रुरोदाऽपि पपात गुरुपादयोः ॥७४॥
दृष्ट्वा दुःखपरां दीनां दयां कृत्वा सतीश्वरी ।
मा भैष्टेति जगादैनां वल्कलानि ददौ तथा ॥७५॥
पृष्ट्वा ह्युदन्तविषये ज्ञात्वा विरागमाश्रिता ।
रक्षिता च सतीमध्ये देहशुद्धिं प्रकारिता ॥७६॥
व्रतं दत्तवती तस्यै सतीश्वरी तु मासिकम् ।
पञ्चाग्नितपनं चापि भोजनं फलमूलकम् ॥७७॥
जपनं मम मन्त्रस्य नित्यं सहस्रसंख्यया ।
'अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥७८॥
इत्येवं सा जजापैव चैकाग्रमनसा सदा ।
त्रिंशत्सहस्रजापैश्च मासान्ते श्रीसतीश्वरी ॥७९॥
तुष्टा चाहूय तामाह पिब वारि प्रसादजम् ।
सरोजिनी पपौ वारि श्रीकृष्णपूजनामृतम् ॥८०॥
तावत् सा दिव्यरूपा वै सूर्यतुल्या व्यजायत ।
यथा लक्ष्मीर्यथा दुर्गा यथा सावित्रिका शची ॥८१॥
दिव्यशक्तिमहैश्वर्यचमत्कारयुताऽभवत् ।
दिव्यचक्षुर्दिव्यकर्णदिव्यमानसम्पदा ॥८२॥
व्यद्योतत सतीमध्ये यथा मुक्तानिका परा ।
शरीरं सर्वमेवाऽभूद् दिव्यपद्मिनिका यथा ॥८३॥
सद्रेखासर्वश्रेष्ठांगचिह्नशोभं शुभं परम् ।
व्योमगामि कृपालब्धं शरीरं संव्यजायत ॥८४॥
कुंभकर्त्री कृपया वै ब्रह्मधर्त्री बभूव ह ।
अथ सा सेवते नित्यं सतीश्वरीं तु गौरवीम् ॥८५॥

तपोयोगेन दिव्येन चाज्ञया पुण्यपुञ्जकैः ।
सेवाभिश्चापि बह्वीभिस्तोषयामास गौरवीम् ॥८६॥
सतीश्वरी ततश्चैनां पप्रच्छ वद मानसम् ।
किमिष्टं ते ब्रह्मधर्त्रि ददामि तव मानसम् ॥८७॥
सरोजिनी तदा प्राह कृष्णनारायणः पतिः ।
अनादिश्रीकृष्णनारायणो मेऽस्तु परेश्वरः ॥८८॥
लक्ष्म्याः पादतले स्थित्वा सेविष्ये परमेश्वरम् ।
यत्र लक्ष्मीस्तत्र चाहं वसामि सहयोगिनी ॥८९॥
विना लक्ष्मीपतिं कान्तं नान्यन्मे रोचते हृदि ।
मुक्तिं तामेव वाञ्छामि सेवारूपां हि दासिकाम् ॥९०॥
साऽहं प्राप्त्या भविष्यामि कृतकृत्या तथा कुरु ।
तथाऽस्त्विति तदा प्राह सतीश्वरी सरोजिनीम् ॥९१॥
ददौ तस्यै महामन्त्रद्वयं जपार्थमेव ह ।
'ओं महालक्ष्म्यै विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात्' ॥९२॥
'ओं नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात्' ॥९३॥
प्राप्य मन्त्रावुभौ नित्यं जजाप सा पुपूज तौ ।
लक्ष्मीनारायणौ नित्यं ध्यानसेवापरायणा ॥९४॥
वर्षान्ते सुप्रसन्नौ तौ प्रत्यक्षगोचरौ पुरः ।
लक्ष्मीनारायणौ जातावूचतुश्च सरोजिनीम् ॥९५॥
वद किं ते मनस्यत्र वर्तते द्वन्द्व एव तत् ।
श्रुत्वा ननाम भावेन वरयामास तं वरम् ॥९६॥
लक्ष्मीपादतले स्थित्वा सेवयामि सदा हरिम् ।
तथाऽस्त्विति प्राहतुश्च जगृहतुः सरोजिनीम् ॥९७॥
रूपद्वयं सरोजिन्याश्चक्रतुः श्रीरमेश्वरौ ।
कमलं नालपुष्पाढ्यं दिव्यं सुगन्धि चैककम् ॥९८॥
द्वितीयं कन्यकारूपं पद्मिनीत्येव भाषितम् ।
पद्मिनीं तां हरिस्तत्र जग्राह स्वकरेण वै ॥९९॥
पत्नीं लक्ष्मीसमां दिव्यां लक्ष्मीस्वसृस्वरूपिणीम् ।
सरोजिनी वल्लिका च जलमध्ये ततोऽभवत् ॥१००॥
नालकमलपत्राढ्या लक्ष्मीस्तत्राऽवसत् सदा ।
लक्ष्म्याश्चरणसेवाढ्या सरोजिनी सदाऽभवत् ॥१०१॥
तदारभ्य सदा लक्ष्मीः राजते कमले रमे ! ।
लक्ष्मीपादरजःपूता सेवते श्रीनरायणम् ॥१०२॥
एवं लक्ष्मि सदा भक्त्या सरोजिनी पुराऽभवत् ।
कुंभकर्त्री गुरोर्भक्त्या ब्रह्मधर्त्री ततोऽभवत् ॥१०३॥
सतीश्वरीगुरोर्भक्त्या ग्रहाद्याश्च निराभवन् ।
देहचिह्नानि सर्वाणि यानि दुर्भाग्यदान्यपि ॥१०४॥
तानि स्थावृत्तिमासाद्य दिव्यरूपाण्यथोऽभवन् ।
इत्येवं सर्वदा भक्त्या सतां सेवाभिरन्वहम् ॥१०५॥
साध्वीनां ब्रह्मवेत्रीणां कृपया दिव्यतां व्रजेत् ।
पापानि दर्शना देव नश्यन्ति साधुयोगिना ॥१०६॥
लभ्यन्ते सेवया दिव्यगुणाः परममोक्षदाः ।
कालकर्मोदयश्चापि विघ्ना ये दुःखकारिणः ॥१०७॥
सर्वे ते विलयं यान्ति गुरोः सेवाफलेन वै ।
दुष्टा ग्रहाः सुखाश्चैव काला दुष्टाः सुखास्तथा ॥१०८॥
कुमार्ग्यं सुमर्गं स्याच्च देहो भौमोऽपि दीव्यति ।
अनायुष्यं चिरायुष्यं दारिद्र्यं धनितां व्रजेत् ॥१०९॥
पापानि पुण्यभावं च प्रयान्त्येव हि सेवया ।
पठनाच्छ्रवणाच्चाऽस्य स्मरणादपि तत्फलम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सरोजिन्याः कुंभकारपुत्र्याः पूर्वजन्मपापेन चतुष्पतिमरणोत्तरं वैराग्येण श्रीसतीश्वरीसाध्व्याश्रमे गमनं, तत्र श्रीलक्ष्मीनारायणभक्त्या गुरुसेवया च ग्रहदोषशारीरदोषनाशोत्तरं श्रीलक्ष्म्याश्रयायाः कमलिनीवल्लिकायास्तथा पद्मिन्याख्यरमायाः स्वरूपप्राप्तिरित्यादिनिरूपणनामा चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

**श्रीनारायणीश्रीरुवाच—**

मनवो ये भवतोक्ताः किमेशा लोकपूजिताः ।
चतुर्दशेति तेषां चोत्पत्तिं कृष्ण वदात्र मे ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

मनवो वै मदंशास्ते कल्पे कल्पे चतुर्दश ।
भवन्ति सर्वराज्येशा धर्मप्रवर्तका अपि ॥ २ ॥
न्यायप्रवर्तकाश्चापि चतुर्दशस्तराधिपाः ।
मयैव कल्पिताः सर्वे वर्तन्ते निजकर्मसु ॥ ३ ॥
स्वायंभुवः स्वारोचिष औत्तमस्तामसस्तथा ।
रैवतश्चाक्षुषश्चापि वैवस्वतस्तु सप्तमः ॥ ४ ॥
सावर्णिर्दक्षसावर्णिर्ब्रह्मसावर्णिरित्यपि ।
धर्मसावर्णिश्च रुद्रसावर्णिर्द्वादशः स्मृतः ॥ ५ ॥
देवसावर्णिस्तथेन्द्रसावर्णिर्वै चतुर्दशः ।
प्रत्येकस्य मनोरायुः साधिकास्त्वेकसप्ततिः ॥ ६ ॥
चतुर्दशमनूनां तु सहस्रसाधिका स्थितिः ।
सहस्रसाधिकाश्चापि दिनमेकं तु वेधसः ॥ ७ ॥

सहस्रसाधिकाश्चान्या रात्रिरेका च वेधसः ।
साधिकाद्वयसाहस्रान्ते प्रातः सृष्टिदानवा ॥ ८ ॥
पातालात् स्वर्गपर्यन्ता दशलोकात्मिकी भवेत् ।
पूर्वे बहुसभा देवनद्यास्तटे तु वैष्णवम् ॥ ९ ॥
यागं चकार धर्मात्मा धर्मतपा महानृषिः ।
नाम्ना धर्मतपास्तस्य प्रसन्नोऽहं नरायणः ॥१०॥
वरदानं ददौ तस्य वाञ्छानुसारमुत्तमम् ।
प्रवृत्तावपि निवृत्तिं वाञ्छितां तेन शोभनाम् ॥११॥
मया तपःफलं यज्ञफलं मन्वन्तरस्थलम् ।
प्रथमं दत्तमस्मै वै सोऽयं स्वायंभुवोऽभवत् ॥१२॥
ब्रह्मणो मानसः पुत्रः प्रजापालनतत्परः ।
शतरूपां सतीं नारीं पत्नीत्वे जगृहे स च ॥१३॥
प्रियव्रतोत्तानपादौ तयोः पुत्रौ बभूवतुः ।
अथ विप्रो वारणाख्यो वरणासरितस्तटे ॥१४॥
तस्य बुद्धिरियं त्वासीद् द्रक्ष्याम्यहं वसुन्धराम् ।
तावत्तस्य गृहे साधुर्व्योमगोऽतिथिरायर्यौ ॥१५॥
नाम्ना खाखपदस्तस्मै भोजनं प्रददौ द्विजः ।
यात्रार्थं च मनश्चक्रे तदा साधुरुवाच तम् ॥१६॥
मन्त्रौषधीलिप्तपादो भूत्वा विहर गोलकम् ।
इत्युक्त्वा पिष्टमेवास्यौषधं पादद्वये ददौ ॥१७॥
सहस्रं योजनानां हि दिनार्धेनाम्बरे द्विजः ।
ययौ तुषारभूम्यद्रौ जलपृथ्व्यामवातरत् ॥१८॥
क्षालितोऽभूत्पादलेपः परमौषधिकोद्भवः ।
गन्तुं चाकाशमार्गेणाऽसमर्थो भूतले स्थितः ॥१९॥
तं ददर्शाऽप्सरोवर्या वरूथिनीतिनामतः ।
मुमोह चिन्तयामास सेवां कर्तुं हृदन्तरे ॥२०॥
पुरो गत्वा चातिभक्त्या धर्मेण च व्रतेन च ।
शीलेनापि सतीरीत्या सेवयामास तं हि सा ॥२१॥
द्विजस्तुष्टो वरदानं ददौ तस्यै प्रजावती ।
भव पुत्रवती पौत्रवती त्रैलोक्यपूजिता ॥२२॥
इत्याशिषं प्रदत्त्वैव द्विजः सस्मार मां तथा ।
वह्निं प्राह प्रणिपत्य गार्हपत्यमुपांशुना ॥२३॥
ब्रह्मरूपः कृष्णरूपो रक्षको भव चानल ।
यथाऽहमद्य स्वं गेहं पश्येयं सति भास्करे ॥२४॥
यथा वै साधवः सन्तश्चाभ्यागताः प्रसेविताः ।
यथा च वैदिकं कर्म स्वकाले नोज्झितं मया ॥२५॥
यथा च न परद्रव्ये परदारासु मे मतिः ।
यथा नारायणो नित्यं पूजितः परमेश्वरः ॥२६॥
तेन सत्येन मां वह्ने स्वं गृहं प्रापयाऽथ वै ।
एवं तु वदतस्तस्य गार्हपत्यानलः स्वयम् ॥२७॥
आययौ पुरतो मेषात्मकः पक्षान्वितस्ततः ।
द्विजश्चारुह्य तत्पृष्ठे प्राप नैजं गृहं द्रुतम् ॥२८॥
वरूथिन्यपि तं विप्रं नत्वाऽऽशीर्वादसंयुता ।
प्राप दिव्यं सुगन्धर्वं देवकेलिं तु नामतः ॥२९॥
तस्माद् गर्भं दधाराऽपि विप्राशीर्वादवर्चसम् ।
जज्ञे स बालो द्युतिमान् ज्वलन्निव विभावसुः ॥३०॥
स्वरोचिभिर्यतो भाति स्वरोचिर्नामतोऽभवत् ।
स्वरोचिश्च विमानेनाऽम्बरे विनिर्जगाम ह ॥३१॥
मनोरमा सरिद् याऽभूत् कन्यकेन्दीवरस्य वै ।
गन्धर्वस्य पुरा देवी वैष्णवी तपसाऽभवत् ॥३२॥
सासत्सारस्वते क्षेत्रे सरस्वती मनोरमा ।
सरयूसंगमा साध्वी चकमे सा स्वरोचिषम् ॥३३॥
प्रार्थयामास पत्यर्थं धर्मेण विनयेन तम् ।
पतिं कृत्वा तेन साकं तद्गृहं प्रययौ सरित् ॥३४॥
तया साकं विमानेन वनेषूपवनेषु च ।
विचरन्नेकदाऽरण्ये मृगीं ददर्श शोभनाम् ॥३५॥
दिव्यां दिव्यगुणोपेतां निर्भयां निश्चलस्थिताम् ।
समीपे चागतां तां च पस्पर्श दक्षपाणिना ॥३६॥
मृगी सा तु तिरोभूय जाता दिव्या हि देवता ।
ततः स विस्मयाविष्टः का त्वमित्यभ्यभाषत ॥३७॥
सा चाऽस्मै कथयामास वनस्याऽस्याऽस्मि देवता ।
अहं च प्रार्थिता देवैः प्रेषिता त्वां प्रति स्थिता ॥३८॥
उत्पादनीयो हि मनुस्त्वया मयि महामते ।
इत्युक्तः स्वरोचिरेव जग्राह तां निजप्रियाम् ॥३९॥
तस्यां च जनयामास पुत्रं तेजस्विनं तदा ।
तत्क्षणाजातमात्रस्य देववाद्यानि सस्वनुः ॥४०॥
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ।
पिता बालस्य स्वनाम्ना नाम स्वारोचिषं व्यधात् ॥४१॥
स्वारोचिषो मनुर्लक्ष्मि भविता द्वितीयो मनुः ।
पद्मिनी नाम या विद्या लक्ष्मीर्यस्यास्तु देवता ॥४२॥
यदाधाराश्च निधयस्तामध्यगात् समस्ततः ।
यया तु ज्ञायते भूमौ पद्मादिनिधयः स्फुटाः ॥४३॥
देवतानां प्रसादेन साधुसंसेवनेन च ।
निधिभिश्चार्पितं वित्तं मानुष्येऽपि विवर्धते ॥४४॥
पद्मश्चापि महापद्मो मकरः कच्छपस्तथा ।
मुकुन्दो नन्दकश्चापि नीलः शंखश्च ते मनोः ॥४५॥

गृहे एवाऽभवन्नित्यं सर्वेच्छापरिपूरकाः ।
द्रव्यं रत्नानि शस्त्राणि रसा वाद्यं च धातवः ॥४६॥
धान्यानि भोगशृंगारा मनोदिव्याः सदाऽभवन् ।
अथ लक्ष्मि मनुं चापि तृतीयं शृणु शोभनम् ॥४७॥
उत्तानपादपुत्रोऽभूदुत्तमो नाम नामतः ।
सुरुच्यास्तनयः ख्यातो बभौ भानुपराक्रमः ॥४८॥
बाभ्रव्यां बहुलां नाम चोपयेमे स धर्मवित् ।
विष्णुभक्तिपरः सोऽपि तया साकं तु संययौ ॥४९॥
शेषनारायणं द्रष्टुं पुपूज श्रीनरायणम् ।
शेषं चापि पुपूजाऽसौ शेषपुत्रीं पुपूज ह ॥५०॥
ददावाभूषणान्यस्यै कल्याण्यै सा तुतोष ह ।
कल्याणी शेषपुत्री च ददावाशीर्वचः शुभम् ॥५१॥
तव पुत्रो महावीर्यो पत्न्यामस्यां भविष्यति ।
मन्वन्तरेश्वरो धीमानव्याहतसुचक्रकः ॥५२॥
ततो राज्ञोऽभवत् काले प्राप्ते पुत्रोत्तमः सुतः ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात ह ॥५३॥
औत्तमश्चेति मुनयो नाम चक्रुः समागताः ।
उत्तमस्य सुतः सोऽयं नाम्ना ख्यातः सदौत्तमः ॥५४॥
मनुत्वे स्थापयिष्यन्ति तमेनमृषयः सुराः ।
अथ लक्ष्मि चतुर्थं तु मनुं वक्ष्यामि तं शृणु ॥५५॥
राजाऽभूद् भुवि विख्यातः स्वराष्ट्रो नाम वीर्यवान् ।
तपस्तेपे बहुकालं वितस्तापुलिने हि सः ॥५६॥
तस्य भार्या सती राज्ञी योगिनी रूपधारिणी ।
मृगी भूत्वा वने चास्ते नित्यं राज्ञस्तु सन्निधौ ॥५७॥
ब्रह्मचर्यपरो राजा शुश्राव व्योमशारदाम् ।
राजँस्तपोबलेनाऽस्यामुत्पलायां स्त्रियां तव ॥५८॥
पुत्रो दिव्यो हि भविता मनुर्नाम्ना हि तामसः ।
ततश्चाऽस्यै देहि बीजं लोकोपकारकारणात् ॥५९॥
श्रुत्वैवं च ऋतुमत्यै चोत्पलायै नृपो ददौ ।
संगमं स्पर्शमात्रं वै गर्भमापोत्पलावती ॥६०॥
ततः सा सुषुवे पुत्रं मृगीदेहोत्पलावती ।
ततस्तत्रर्षयः सर्वे समेत्य कानने तदा ॥६१॥
अवेक्ष्य मातरं तां तु तामसीं हरिणीं खलु ।
तामसोऽयं भवत्वेव नाम्ना मनुश्चतुर्थकः ॥६२॥
सोऽयं पुत्रोऽपि सहसा समाराध्य हि भास्करम् ।
अवाप्य दिव्यान्यस्त्राणि ससंहाराण्यशेषतः ॥६३॥
राजिष्यते मनुर्भूत्वा तामसाख्यो मनुः रमे ! ।
अथ लक्ष्मि मनुं चापि पञ्चमं शृणु वच्मि ते ॥६४॥

ऋषिरासीन्महाभागः ऋतवागिति नामतः ।
रेवत्यन्तेऽभवत्तस्य दुर्भाग्यो रोगवर्धनः ॥६५॥
पुत्रो तेनापि ऋषिराड् दीर्घरोगमवाप ह ।
ऋतवाग् रेवतीं प्राह तव योगेन मे सुतः ॥६६॥
दुःशीलो रोगदो जातः पतस्वाऽऽशु हि रेवति ! ।
तेनैवं व्याहृते शापे रेवत्यृक्षं पपात ह ॥६७॥
सौराष्ट्रे कुमुदाद्रौ वै वस्त्रापथे मम स्थले ।
कुमुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ॥६८॥
रैवताद्रौ रेवती सा कन्या जाता सरोवरे ।
प्रमुचो नाम मुनिराट् कन्यां चाश्रमसन्निधौ ॥६९॥
नवोत्पन्नां हि जग्राह पोषयामास पुत्रिकाम् ।
अथ कालान्तरे तत्र दुर्गमो नाम भूपतिः ॥७०॥
आययौ चाह्वयामास प्रियां चेति हि रेवतीम् ।
प्रमुचो निजपुत्रीं तां दुर्गमाय ददौ तदा ॥७१॥
तत्र तपःप्रभावेण रेवत्यृक्षं यथाऽम्बरे ।
सोमयोगि व्यधात् प्राग्वज्जामातरमथाऽब्रवीत् ॥७२॥
औद्वाहिकं ते भूपाल कथ्यतां किं ददाम्यहम् ।
राजाऽऽहर्षे प्रसादात्ते मनुं पुत्रं वृणोम्यहम् ॥७३॥
ऋषिः प्राह तथाऽस्त्वेवं मनुस्ते तनयो भवेत् ।
तामादाय ययौ राजा चाश्वपट्टसरोवरम् ॥७४॥
स्नात्वा मां संप्रपूज्यैव नत्वा च लोमशं मुनिम् ।
दुर्गमो दुर्गनगरं ययौ गंगावतीतटे ॥७५॥
ततश्चाऽजायत पुत्रो रेवत्यां रैवतो मनुः ।
कल्पान्तरे सूर्यपुत्रो रेवन्तोऽपि भविष्यति ॥७६॥
एवं लक्ष्मि रैवतोऽयं भविता पञ्चमो मनुः ।
कथितस्ते ततः षष्ठं मनुं शृणु वदाम्यहम् ॥७७॥
पूर्वजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि प्रिये ॥७८॥
जातिस्मरः स जातोऽत्र मातुरुत्संगमास्थितः ।
अवनीन्द्रक्षत्रियस्य गिरिभद्राख्ययोषितः ॥७९॥
गिरिभद्राशयनात्तमाददे जातहारिणी ।
राज्ञो विक्रान्तनाम्नश्च हैमिनियोषितो गृहे ॥८०॥
न्यस्य तं तत्रजन्मानं बालं चादाय निर्ययौ ।
राजबालं बोधविप्रगृहे न्यस्य तदर्भकम् ॥८१॥
विप्रबालं जहाराऽपि भक्षयामास राक्षसी ।
एवं राजगृहे राज्ञीपर्यंके वर्धितोऽपि सः ॥८२॥
आनन्दनाम्ना विख्यातोऽभवत्तथोऽर्थमानसः ।
तपस्तेपे चातितीव्रं ब्रह्मा त्वागत्य सन्निधौ ॥८३॥

चाक्षुषेत्याह तं ब्रह्मा तपसो विनिवर्तयन् ।
मनुं षष्ठं व्यधात् सोऽयं भविता षष्ठको मनुः ॥८४॥
अथ लक्ष्मि सप्तकं ते मनुं वदामि संश्रृणु ।
सूर्यभार्या विश्वकर्मसुता संज्ञेति विश्रुता ॥८५॥
वैवस्वतं शुभं पुत्रं तस्यामजनयद् रविः ।
वैवस्वतो ह्ययं लक्ष्मि भविता सप्तमो मनुः ॥८६॥
पूर्वसवर्णजातत्वात् सावर्णिरिति विश्रुतः ।
अथाऽष्टमं मनुं वच्मि श्रृणु नारायणि प्रिये ॥८७॥
स्वारोचिषेऽन्तरे पूर्वं राजाऽभूत् सुरथाभिधः ।
जगाम स वनं दुःखी शत्रुभिः समरे जितः ॥८८॥
अथाऽऽययौ तत्र दुःखी वैश्यः समाधिनामकः ।
राजा तं दुःखितं दृष्ट्वा पप्रच्छ किन्नु शोचसि ॥८९॥
उवाच नृपतिं वैश्यस्तव राज्येऽभवं सुखी ।
पुत्रदारैर्निरस्तोऽस्र धनलोभादसाधुभिः ॥९०॥
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ।
वयमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥९१॥
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलास्थितिम् ।
नारीणां स्वजनानां च कन्यानां च कुटुम्बिनाम् ॥९२॥
किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम् ।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः ॥९३॥
राजा प्राह निरस्तो यैर्भवान् दारसुतादिभिः ।
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥९४॥
वैश्य आह एवमेतत् तथापि दुःखदं मनः ।
किं करोमि हि मायापि मनस्तेषु प्रधावति ॥९५॥
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।
पतिस्वजनहार्दं च हार्दितेष्वपि मे मनः ॥९६॥
जानामि विपरीतांस्तान् जानन्नपि त्यजामि न ।
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥९७॥
तेषां कृते मे निःश्वासा दौर्मनस्यं च जायते ।
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥९८॥
दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथाऽपरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥९९॥
ज्ञानवन्तोऽपि जायन्ते मोहान्धा दुःखदुःखिनः ।
निःस्वार्थाः पशवश्चापि पक्षिणोऽपि तथाविधाः ॥१००॥
क्लिश्यन्ति दारपुत्रार्थं तुल्या मृगाश्च मानवाः ।
मायया ममतागर्ते मोहावर्ते भ्रमन्ति वै ॥१०१॥
सैषा तु विष्णुभक्तानां वरदा मुक्तये मता ।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥१०२॥
संसारबन्धहेतुः सा ह्यभक्तानां विमोहिनी ।
नित्या सा जगदम्बा वै जगदात्मा भविष्यति ॥१०३॥
योगनिद्रात्मिका चापि विष्णुक्षेत्रे प्रवर्तते ।
तपसा साध्यते माया मोक्षदात्री भवत्यपि ॥१०४॥
इत्येवं नृप वैश्यौ तौ सह वै ज्ञानकारिणौ ।
तेपतुर्वै तपस्तीव्रं लक्ष्मीं स्मृत्वा नरायणम् ॥१०५॥
दर्शनं च ददौ ताभ्यां लक्ष्मीनारायणान्विता ।
वरदानं ददौ राज्ञे मृत्वा जन्म लभिष्यसि ॥१०६॥
सूर्यात् सावर्णिको नाम मनुर्भवान् भविष्यसि ।
वैश्योऽयं ज्ञानवान् सम्पत्सुखवाँश्च भविष्यति ॥१०७॥
इति दत्वा तयोर्लक्ष्मीर्यथाभिलषितं वरम् ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥१०८॥
एवं लक्ष्म्या वरं प्राप्य सुरथः क्षत्रियोत्तमः ।
सूर्यपुत्रः स सावर्णिर्भविता मनुरष्टमः ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने-ऽष्टमनूनां जन्मादिवर्णननामा पञ्चपञ्चाशदधिक-शततमोऽध्यायः ॥ १५५ ॥

**श्रीपुरुषोत्तम उवाच—**

श्रृणु नारायणीश्रि त्वं मनुं तु नवमं प्रिये ।
अभूद् राजा धनवर्मा स्वल्पराज्यः सुराष्ट्रके ॥ १ ॥
महान्ति चान्यराज्यानि वीक्ष्योद्वेगमनाः सदा ।
नाहं भूपाधिभूपोऽस्मि स्वल्पभूपोऽस्मि खर्वटी ॥ २ ॥
विना कीर्तिं च साम्राज्यं शान्तिर्मे हृदये न वै ।
तस्माद् यत्नं करोम्येव साम्राज्यस्य कृतेऽनिशम् ॥ ३ ॥
विचार्येत्थं निजग्रामात् सपत्नीपुत्रबान्धवः ।
ययावश्वपट्टतीरं यात्रार्थे तपसे तथा ॥ ४ ॥
लोमशस्याऽऽश्रमं गत्वा ननाम पादयोः पुरः ।
दत्तासने निषसाद पृष्टश्च कुशलं प्रति ॥ ५ ॥
लोमशं प्रत्युवाचाऽसौ कुशलं कृपया तव ।
ग्रामः पुत्राः सुताः पत्नी गावः क्षेत्राणि कर्षुकाः ॥ ६ ॥
सर्वे वै स्वस्तिमन्तोऽत्रभवतः कृपया गुरो ।
हृदयं चाऽप्यतृप्तं मे ग्रामराज्येन क्षुद्रवत् ॥ ७ ॥
समीहते महद्राज्यं तत्प्राप्त्यर्थं व्रतं वद ।
श्रुत्वा श्रीलोमशस्तस्मै देहशुद्धिव्रतं तु प्राक् ॥ ८ ॥
दत्वाऽनादिकृष्णनारायणमन्त्रं सुपुण्यदम् ।
प्राहाऽत्राऽऽश्रवणे वृक्षतले चाराधय प्रभुम् ॥ ९ ॥

सुतपाः सुजपश्चापि सुभक्तिश्चिरधैर्यवान् ।
सपत्नीकः सुपुत्रादिः कुरु श्रेष्ठं तपो नृप ! ॥१०॥
अनिकेताः कन्दमूलफलाहारा अरागिणः ।
भूशयाना ब्रह्मशीला अपरिग्रहवर्तिनः ॥११॥
नित्यं त्रिषवणस्नानाग्निपूजाकारिणोऽन्वहम् ।
'ओम् अनादिश्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१२॥

इतिमन्त्रपराः सर्वे वत्सरं प्रतपन्त्विह ।
ततो वर्षाऽपरं लक्ष्मीगायत्रीजापकास्त्विह ॥१३॥
'ओं महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयादि'ति वसन्तु वत्सरम् ॥१४॥
इष्टसिद्धिस्तूर्णमेव श्रीहरिः सम्प्रदास्यति ।
इत्युक्तास्ते गुरुं नत्वा प्रपूज्य शुद्धभावतः ॥१५॥
अश्वपट्टसरोवारौ स्नात्वा चाम्रवणं ययुः ।
मासं वर्षं तथाऽन्यार्धं व्यतीयुस्तपतां वने ॥१६॥
प्रसन्नोऽहं तदा लक्ष्मि त्वया साकं जगाम तान् ।
गोचरश्चाऽभवं चाग्रे धनवर्माऽऽप संमुदम् ॥१७॥
कुटुम्बं यस्य सर्वं च ससंभ्रमं ननाम माम् ।
मयेष्टवरदानार्थं प्रेरितो नृपतिर्द्रुतम् ॥१८॥
प्रपूज्य स्वागतरीत्या ययाचे वरमुत्तमम् ।
सर्वमानवराजानामधिकं राज्यमुत्तमम् ॥१९॥
मया तथाऽस्त्विति दत्तं साम्राज्यं मनुविश्रुतम् ।
भविता त्वं धनवर्मन् सकुटुम्बो मनुर्महान् ॥२०॥
दक्षपुत्रो हि सावर्णो भावी यो नवमो मनुः ।
दक्षसावर्णिनामा वै एकसप्ततिसाधिकः ॥२१॥

तावत्कालं स्वर्गलोके वस स्वतन्त्रमण्डलः ।
इत्युक्तमात्रे तत्रैव विमानं सूर्यसन्निभम् ॥२२॥
देवाऽप्सरोभि राद्युष्टं शोभनं त्वाययौ भुवि ।
तावन्मे कृपया राजा सकुटुम्बो मृतिं ययौ ॥२३॥
देवदेहो ययौ स्वर्गं स्वतन्त्रतारकाधिपः ।
भविता दक्षसावर्णिः प्राप्ते काले मनुर्हि सः ॥२४॥

इति ते कथितो लक्ष्मि मनुर्वै नवमोऽप्यथ ।
कथयामि दशमं ते मनुं ब्रह्मसवर्णकम् ॥२५॥
ब्रह्मसावर्णिनामानं पूर्वं तु जडविप्रकम् ।
बालकृष्णसरःप्रान्ते वसन्तं मतिराह ह ॥२६॥
तपः करोमि विपुलं किं विप्रत्वे सुखं त्विह ।
राज्ये सुखं परं चास्ते सर्वभोगप्रपूरितम् ॥२७॥
विचार्येत्थं जडविप्रो नाम्ना बलीश्वरः स्वयम् ।
दशवर्षाणि सततं जलवासाः सरोवरे ॥२८॥

अभवद् ध्यायमानो मां श्रीपतिं वल्लभं प्रभुम् ।
सोऽहं समाधिसंस्थं तं मत्स्यभक्षितनाडिकम् ॥२९॥
शैवालावृतसर्वाऽस्थिपञ्जरं मम भक्तकम् ।
उद्धर्तुं च त्वया साकं ह्यगमं तस्य सन्निधौ ॥३०॥
मया चान्तःप्रविश्यैवोत्थापितः स बलीश्वरः ।
न तस्य विद्यते चर्म नाडीव्रातेन्द्रियाणि च ॥३१॥

कथं पश्येच्छृणुयाच्च स्पृशेद् वदेत् कथं हि सः ।
कथं तिष्ठेत् प्रचलेच्च प्राणसञ्चरणं कुतः ॥३२॥
रक्तं नास्ति न च मज्जोदरं सन्ति न कुक्षयः ।
एवंभूतं तु मां भक्तं ब्रह्मरन्ध्रे मयि स्थितम् ॥३३॥
प्रविश्य चास्य देहे तत्पञ्जरे धातवः कृताः ।
मया पुष्टिं गमिताश्च स्नायूमज्जादयोऽभवन् ॥३४॥
नाड्यश्चापि मया सर्वास्तत्रैव नूतनीकृताः ।
रक्तं प्रपूरितं तत्र केशाः प्ररोहितास्ततः ॥३५॥
चर्मावनद्धो देहोऽस्येन्द्रियप्राणमनोऽन्वितः ।
सम्पन्नः स समाधेस्तु ह्यागत्य बहिर्ययौ ॥३६॥
उत्थितः स जलाद् यावन्मां ददर्श पुरःस्थितम् ।
श्रीयुतं परमात्मानं योजयन्तं वराय तम् ॥३७॥
सोऽपि वीक्ष्य हरिं मां तु तपःफलमयाचत ।
पुपूज जलमात्रेण हृदयेन च वै मुहुः ॥३८॥
हरेकृष्ण बालकृष्ण सिद्धिपते जगत्पते ।
मायापते पतीनां च पते राजपते प्रभो ॥३९॥
महाराज्यं देहि मेऽत्र ब्राह्मण्यं चापि सर्वदा ।
तथाऽस्त्विति मया दत्तो वरस्तस्मै महात्मने ॥४०॥
पतितः पादयोनश्च कमलानि शुभानि च ।
आर्पयत् पादयोर्नश्च पपौ पादामृतं च नः ॥४१॥
आवाभ्यामर्पितं भोज्यं क्षीरात्मकं हि कल्पितम् ।
बुभुजे जलपानं च कृत्वा तूर्णं विदेहवत् ॥४२॥
त्यक्त्वा देहं विमानेन मया साकं त्वया तथा ।
अम्बरं चाजगामैव दिव्यदेहो हि भक्तराट् ॥४३॥
मयाऽर्पितः स देवेभ्यो देवलोके वसत्यपि ।
अथ कालान्तरे प्राप्य पुत्रतां वेधसः स च ॥४४॥
ब्रह्मसावर्णिसंज्ञः स मनुः स्वयं भविष्यति ।
मम पूजाप्रतापेन तपसा मनुतां पराम् ॥४५॥
अवाप्स्यति स वै लक्ष्मि ब्राह्मण्यनृपतान्वितः ।
अथैकादशकं वक्ष्ये मनुं लक्ष्मि निशामय ॥४६॥
धर्मसावर्णिनामानं देवानीककुटुम्बिनम् ।
आसीत् पूर्वं वैश्यवर्णः कर्षुको धर्मतत्परः ॥४७॥

आनन्दवर्णीतिनाम्ना ख्यातः सुराष्ट्रदेशजः ।
करोति भगवद्भक्तिं यतते ब्रह्मचर्यके ॥४८॥
ऊर्ध्वरेताः सदा चास्ते व्याघ्रारण्ये वसत्यपि ।
सोढुभारासरित्तीरे शिंशपाद्रुमसेवनः ॥४९॥
वैराग्येण स महता कुरुते श्रीहरेर्जपम् ।
शर्कराकन्दमात्रादोऽभवत्तत्र समा दश ॥५०॥
ततस्तपोभिरुग्रैश्चाऽऽराधयत्यच्युतं हि माम् ।
निद्रां न लभते मायां मोहिनीं च त्यजत्यपि ॥५१॥
'कृष्णकृष्ण हरेकृष्ण बालकृष्ण जगत्प्रभो ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम' ॥५२॥
एवं रटति नित्यं स जपति श्रीनरायणम् ।
विंशतिर्हि समास्तस्य जपतो निर्ययुः सुखाः ॥५३॥
ततः स कर्षुको देवानीको ध्यानपरोऽभवत् ।
शारद्यां पूर्णिमायां वै चान्द्रतेजोऽतिशोभिते ॥५४॥
वने सुभूतले तत्र शिंशपावृक्षसन्निधौ ।
पूर्णचन्द्राननं दिव्यं मां स ददर्श चागतम् ॥५५॥
उत्थाय सहसा वैद्यः पपात मम पादयोः ।
पुपूज शुभपुष्पाद्यैः शार्करकन्दमूलकैः ॥५६॥
मया प्रवर्तितः सोऽपि वरार्थं सोऽप्ययाचत ।
ब्राह्मण्यं चापि देवत्वं महैश्वर्यं च सम्पदः ॥५७॥
तथाऽस्त्विति मया चोक्तो निवारितः तपःश्रमात् ।
अश्वपट्टमहाक्षेत्रं ययौ श्रीलोमशाश्रमम् ॥५८॥
अहं चाऽदृश्यभावश्च स्वधाम प्रजगाम ह ।
देवानीकोऽभजन्मां च वसन् ऋषिकुले ततः ॥५९॥
कालेन देहमुत्सृज्य ययौ सत्यंशुभं पदम् ।
ब्रह्मणो लोकमेवाऽसौ धर्मगृहे सुपुण्यवान् ॥६०॥
धर्मपुत्रोऽभवद् विप्रो मानसो धर्मसंग्रही ।
कुंकुमवापिकाक्षेत्रे यद्वंशे मम पूर्वजाः ॥६१॥
तव पूज्या वसन्त्येव सौराष्ट्रे बहुविस्तरे ।
जालायने तु सौवीरे सारकटे तु गैरिके ॥६२॥
गोक्षुरे क्षारपाटे च पूर्वजा मे वसन्ति वै ।
धर्मपुत्रः स देवानीकः स्वयं पुण्यपुञ्जकैः ॥६३॥
मदिच्छया हि विप्रत्वं धर्मसावर्णितामपि ।
प्राप्यैव भविता चैकादशो मनुर्नृपेश्वरः ॥६४॥
तावत्कालं सत्यलोके धर्मगृहे विराजते ।
अथ लक्ष्मि द्वादशं च मनुं वच्मि शृणु प्रिये ॥६५॥
अब्रिक्ते भूतले नारायण्यास्तीरेऽवसद् घृणी ।
घृणेषिकाख्यः शूद्रश्च धर्मकर्मविवर्जितः ॥६६॥
कुटुम्बपोषणपरो मत्स्यवृत्तिर्विशेषतः ।
तस्यैकदाऽभवद् वृष्टिरुद्वेलानि जलानि तु ॥६७॥
नारायण्या महानद्याश्चाब्धिवत् प्रसृतानिह ।
गृहं ग्रामं प्रवाहैव निन्युः पूरेऽस्य वै तदा ॥६८॥
स्त्रीपुत्रसहितः शूद्रः प्रोह्यमाणो गृहान्वितः ।
जलमध्येऽभवत्तत्र नौकायामिव वै तदा ॥६९॥
गृहं काष्ठकृतं स्वल्पं समूलं तरति जले ।
मानतां स तदा चक्रे रुद्रस्य स्वाऽवनार्थिकाम् ॥७०॥
यद्यहं जीवमासाद्य लभेयं स्वगृहस्थलीम् ।
साऽन्वयो रुद्रपूजां वै करिष्ये सर्वदा शुभाम् ॥७१॥
मत्स्यान् विवर्जयिष्ये च करिष्ये नाऽपि हिंसनम् ।
वर्तयिष्ये रुद्रभक्त्या वन्यमूलफलादिभिः ॥७२॥
धर्ममात्रं करिष्ये च रक्षतु मां सतीपतिः ।
इत्येवं मानतां कृत्वा सकुटुम्बो गृहे जले ॥७३॥
भजनं प्रचकाराऽसौ रुद्रस्य मत्स्वरूपिणः ।
'हर कष्टं हर दुःखं रक्ष प्राणान् सतीपते ॥७४॥
महादेव महाकाल ब्रह्मविष्णुस्वरूपवन् ।
जय शंभो जय रुद्र जय श्रीपार्वतीपते ॥७५॥
जयाऽन्तकाल रक्ष त्वं त्वदीयोऽस्मि प्रजीवय' ।
इत्येवं भजनं चक्रे तल्लीनः सकुटुम्बकः ॥७६॥
रुद्रेच्छयाऽस्य वारिस्थं तरद्गृहं तटं ययौ ।
पूराणां विगमे सोऽपि गृहान्निर्गत्य भूतलम् ॥७७॥
अवतीर्य ययौ दूरं यत्रास्ते श्रीवनं पुरम् ।
भिक्षयोदरयात्रां च तदा शाकादिभिर्व्यधात् ॥७८॥
ततः पार्श्वेऽरण्यभागे ययौ कुटुम्बशोभितः ।
रुद्रमाराधयामास वर्जयित्वा स्वदुर्गुणान् ॥७९॥
पञ्चसम्वत्सरः कालश्चैवं त्वस्य जगाम ह ।
फलमूलाशनस्यैव तावद्रुद्रः समाययौ ॥८०॥
सतीयुतोऽतिसौम्यश्च वनी योगी यथा महान् ।
प्राह घृणिन् कथं चास्से वने किं ते समीहितम् ॥८१॥
रुद्रोऽहं वद चेष्टं ते ददामि तोषितस्त्वया ।
घृणेषिकस्तदा वव्रे पुत्रत्वं राज्यमित्यपि ॥८२॥
तथाऽस्त्विति हरः प्राह पूजां लब्ध्वा तिरोऽभवत् ।
घृणेषिकश्च वर्षान्ते ज्वरेण सकुटुम्बकः ॥८३॥
देहं त्यक्त्वा ययौ दिव्यगणो भूत्वा किलासकम् ।
यत्र रुद्रो महादेवो विराजते सतीपतिः ॥८४॥
रुद्रपुत्रोऽभवत्तत्र रुद्रगृहेऽवसत् सदा ।
भविता रुद्रसावर्णिर्मनुः साम्राज्यभोगवान् ॥८५॥

इत्येवं ते कथितोऽयं मनुर्द्वादशसंख्यकः ।
त्रयोदशं मनुं देवसावर्णि शृणु पद्मजे ॥८६॥
ब्राह्मणोऽभूत् पुरा केतुमाले दीनानदीतटे ।
वैष्णवो यज्ञभागादितत्परो देवपूजकः ॥८७॥
षोडशाद्युपचारैः सः सूर्यं विष्णुं सतीं हरम् ।
गणेशं पूजयत्येव तर्पयत्येव वै पितॄन् ॥८८॥

यज्ञे देवान् घृताद्यैश्च तर्पयत्येव नित्यदा ।
तस्य चाहं प्रसन्नश्च यज्ञे तद्गोचरोऽभवम् ॥८९॥
वरार्थं रोधयामास ययाचे स वरोत्तमम् ।
साम्राज्यं तव पूजार्थं देवपूजार्थमित्यपि ॥९०॥

अन्ते ब्रह्मपदं चापि प्रदेहि मेऽध्वरायण ।
तथाऽस्त्विति मया दत्तो वरस्तस्मै महात्मने ॥९१॥
सुधर्मनाम्ने तस्मै वै वरं दत्वा तिरोऽभवम् ।
सोऽपि देहं परित्यज्य रुचेः प्रजापतेर्गृहे ॥९२॥

मालिन्यां पुत्र एवाऽसौ जातो देवाऽभिधः खलु ।
रौच्यः स भविता लक्ष्मि देवसावर्णिनामकः ॥९३॥
देवताश्च मिलित्वैव मनुत्वे स्थापनं तदा ।
करिष्यन्त्यस्य देवस्य त्रयोदशस्य वै मनोः ॥९४॥

रुचिर्वै ब्रह्मणः पुत्रो ब्रह्मचर्यमुवास ह ।
पितरस्तं तदा प्राहुर्गार्हस्थ्यं कुरु पुत्रक ॥९५॥
पुत्रेण पितॄणां स्याद्वै प्रोद्धारस्तृप्तिरित्यपि ।
ततः श्राद्धं चकाराऽसौ गार्हस्थ्यं प्रचकार ह ॥९६॥

मालिन्यां च सुतं रौच्यं जनयामास वै मनुम् ।
त्रयोदशो मनुः सोऽयं भविष्यति महाबलः ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने नवमादित्रयोदशमनूनां प्राग्जन्मजन्मचरित्राणां निरूपणं नाम षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

श्रीनारायणीश्रीरुवाच—

रुचिः प्रजापतिर्विज्ञो ह्यनिच्छन्नपि भामिनीम् ।
गार्हस्थ्यं परिजग्राह विस्तरात् तद् वदस्व मे ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं यथा गार्हस्थ्यमाप्तवान् ।
साधुधर्मान् ररक्षापि गृहधर्मानवाप्तवान् ॥ २ ॥
निर्ममो निरहंकारो मितशायी मिताशनः ।
वर्तते स्म रुचिर्लक्ष्मि ! सर्वसंगविवर्जितः ॥ ३ ॥
अनग्निमनिकेतं तमेकाहारमनाश्रमम् ।
विमुक्तसंगं तं दृष्ट्वा प्रोचुस्तत्पितरो रुचिम् ॥ ४ ॥
वत्स कस्माद् भवान्नैव करोति दारसंग्रहम् ।
पुण्यं पवित्रं सुखदं धर्म्यं स्वर्गादिसाधनम् ॥ ५ ॥
ऋणहं मोक्षदं वंशयशोलाभप्रदं शुभम् ।
बन्धविनाशनं सर्ववासनाक्षयकारिणम् ॥ ६ ॥

सदारः सर्वदेवानां पितॄणां च सतामपि ।
ऋषीणामतिथीनां च सेवाभिः स्वर्गमाप्नुयात् ॥ ७ ॥
स त्वं दैवमृणं पितृऋणं ऋषिऋणं तथा ।
अवाप्नोषि विना दारान् बन्धनं च दिने दिने ॥ ८ ॥
सुतोत्पत्तिं विना पुत्र देवसन्तर्पणं विना ।
ऋषितृप्तिं विना नैव प्रयास्यसि परां गतिम् ॥ ९ ॥
क्लेशो दारग्रहे योऽस्ति विना दारान् ततोऽधिकः ।
ऐहिकश्च परत्राऽपि तस्मात् पुत्र गृही भव ॥१०॥

अदारस्याऽप्ययज्ञस्य वंशविरहितस्य च ।
मृतस्य निरयः स्याद्वै तस्मात्पुत्र गृही भव ॥११॥
श्रुत्वा रुचिः प्रत्युवाच पितॄन् धर्म्यं वचः शुभम् ।
मन्येऽहं पितरो वोऽस्तु नमो यथा वदामि तत् ॥१२॥

ब्रह्मचर्यं ब्रह्मरूपं ब्रह्मतुल्यं च मुक्तिदम् ।
मुक्तिमिच्छामि तेनाऽहं स्वर्गं मे नैव रोचते ॥१३॥
इत्येवं कृतबोधस्य मम दारप्रसंग्रहः ।
पापक्लेशातिदुःखाऽऽर्त्तिव्याध्यधोगतिदो मतः ॥१४॥

आत्मेन्द्रियादितत्त्वानां निग्रहो मोक्षदो मतः ।
दारग्रहे स न स्याच्च कामरागाभिपूरिते ॥१५॥
कर्दमो दारयोगोत्थो वासनात्मा विवर्धते ।
अनेकभवसंभूतः कर्मपंकोऽपि तुष्यति ॥१६॥

कर्दमितश्चाऽयमात्मा ब्रह्मतीर्थाप्लवादिभिः ।
भावनाभक्तितोयाद्यैः प्रक्षाल्यो वै विवेकिभिः ॥१७॥
क्षालयामि पुरालग्नं कर्दमं वासनामयम् ।
योग्यं करोमि पितरो ब्रह्मचर्यपरस्त्वहम् ॥१८॥
भवतां तु समुद्धारी मया कर्तुं हि शक्यते ।
ब्रह्मचर्यबलेनैव बन्धं दोषान् जहामि च ॥१९॥

इत्युक्ताः पितरः प्राहुः पुत्र युक्तं हि तत्तथा ।
मोक्षमार्गो ब्रह्मचर्यं भवत्येव न संशयः ॥२०॥
मार्गे विघ्नाः पुरा प्राप्ताः पापाऽशुभदुरीतिकाः ।
अहंममत्वमायाद्याः कर्माण्यसंख्यकान्यपि ॥२१॥
पुराकृतानि सर्वाणि भोगाय कल्पितानि च ।
पुण्याऽपुण्यानि चात्रैव क्षालनीयानि सर्वथा ॥२२॥

तानि भुञ्जन् क्षालयँश्च नवं कुर्वन् सुनिर्गुणम् ।
सर्वार्पणात्मकं कृष्णे बन्धं जहन् विमुक्तये ॥२३॥
यो यात्रां वर्तयत्यत्र तस्य बन्धो न जायते ।
प्राक्कृतस्य समाप्तिश्च फलं निर्विघ्नमोक्षणम् ॥२४॥
एवं प्रक्षालनं युक्तं क्रमेण कर्मणां सुत ।
नाऽयं वै गण्यते पुत्राऽविवेकः पापपंकदः ॥२५॥
तस्माद् दारान्वितो भूत्वा भुंक्ष्व त्यज विमोचय ।
उपकारं परं कृत्वा याहि शाश्वतमक्षरम् ॥२६॥
इतिपितृवचः श्रुत्वा रुचिराह पितामहान् ।
कर्ममार्गोऽस्त्यविद्या वै तत्र मा योजयन्तु माम् ॥२७॥
अज्ञानं चापि कर्मापि नरकं तुल्यमेव तत् ।
नैष्कर्म्यं प्रोच्यते सिद्धिर्नैष्कर्म्यं साधयाम्यहम् ॥२८॥
श्रुत्वैतत् पितरस्तस्य सत्यं जगदुरुत्तरम् ।
कर्म तादृक् प्रकर्तव्यं येन विद्या समर्ज्यते ॥२९॥
विद्यया विलयं यायादविद्याऽज्ञानसंज्ञिका ।
विहिताऽकरणात् पुत्राऽविद्याऽज्ञानं प्रपुष्यति ॥३०॥
विहिताऽकरणं चान्यत्करणं बन्धदं भवेत् ।
विहिताऽकरणे चेत् स्यात् संयमः सोऽपि धर्महा ॥३१॥
स न स्यान्मुक्तये किन्तु चाऽन्तेऽधोगतिकारकः ।
प्रक्षालनं न पापानां प्रत्युताऽर्जनमेव तत् ॥३२॥
विहिताऽकरणोद्भूतैः पापैः सर्वं प्रदह्यति ।
प्रत्यवायाऽनुद्भवार्थं विहितं त्वाचरेच्छुभम् ॥३३॥
ब्रह्मचर्योत्तरं पुत्र गार्हस्थ्यं विहितं यतः ।
तत्कर्म यदि निरयो विषवद् विषहारकम् ॥३४॥
गार्हस्थ्यविषयोगेन प्रत्यवायविषं जहि ।
गार्हस्थ्यं समनुष्ठाय वनिना तद्विषं जहि ॥३५॥
सन्न्यासेन ततः पुत्र वनिविषं सदा जहि ।
ब्रह्मात्मार्पणलाभेन देहेन्द्रियादिकं जहि ॥३६॥
परमात्मप्रसंगेन स्वात्मभावं ततो जहि ।
एवं क्रमं समारुह्य परमारोहणं कुरु ॥३७॥

इत्युक्त्वा पितरः सर्वेऽदृश्या ययुर्निजालयम् ।
रुचिर्मनसा सञ्चिन्त्य भार्यार्थं मतिमादधात् ॥३८॥
ब्रह्माणं पितरं स्मृत्वा तपो व्यधात् पुनर्बहु ।
ब्रह्मा त्वागत्याऽऽह रुचिं भविता त्वं प्रजापतिः ॥३९॥
प्रजाः सृष्ट्वा सुतान् लब्ध्वा कृत्वा च वैदिकीः क्रियाः ।
चातुराश्रम्यमास्थाय संस्थाप्य च प्रजासु तत् ॥४०॥
दारयोगोत्तरं कर्मफलं भुक्त्वा नवं नवम् ।
पितृतृप्तिं ततः कृत्वा परां सिद्धिमवाप्स्यसि ॥४१॥

तुष्टास्ते पितरः पत्नीं सुतान् दास्यन्ति चेप्सितान् ।
आज्ञांकिते प्रसन्नतुष्टाः किन्न दद्युः पितामहाः ॥४२॥

इति वाक्यं वेधसोऽपि लब्ध्वा श्रुत्वा रुचिः स्वयम् ।
तुष्टाव वेधसं चापि पुपूज जलपुष्पकैः ॥४३॥
ब्रह्मा तिरोऽभवत्तत्र नदीतीरे रुचिस्ततः ।
पितॄन् सन्तर्प्य तुष्टाव प्रणतो भक्तिगौरवः ॥४४॥
नमस्ये श्रीहरिकृष्णं शाश्वतं वै पितामहम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥४५॥
नमस्ये श्रीब्रह्मधामाऽक्षरं मुक्तान् महेश्वरान् ।
नमस्ये सर्वशक्त्यैश्वर्याणि गुणान् पितामहान् ॥४६॥
हेतीन् समस्तभूतीश्च विभूतीरीश्वरींस्तथा ।
मुक्तानिका अवतारान् मातॄँश्च श्रीरमादिकाः ॥४७॥
नमस्ये व्यूहसंज्ञाँश्च नमस्ये च विराजकान् ।
नमस्ये सत्यलोकस्थान् साधून् ब्रह्मविदः सतः ॥४८॥
नमस्ये तान् श्राद्धपितॄन् श्राद्धे ये चाधिदेवताः ।
देवैरपि च तर्प्यन्ते ये श्राद्धे तान्नमाम्यहम् ॥४९॥
नमस्येऽहं च तान् स्वर्गे तर्प्यन्ते ये महर्षिभिः ।
तथा सिद्धजनैश्चापि तर्प्यन्ते तान्नमाम्यहम् ॥५०॥
गुह्यकैरपि येऽऽर्च्यन्ते ऋद्ध्यर्थं तान्नमाम्यहम् ।
नमस्येऽहं च तान् पितॄन् येऽर्च्यन्ते मानवैर्भुवि ॥५१॥
नमस्येऽहं च तान् पितॄन् स्वेष्टलोकप्रदायिनः ।
येऽर्च्यन्ते श्रद्धया विप्रैः श्राद्धकर्मसु तर्पिताः ॥५२॥
प्राजापत्यपददातॄन् नमस्ये वनितर्पिताः ।
तान्नमस्ये नैष्ठिकानां फलदातॄन् प्रपूजितान् ॥५३॥
राजन्यतर्पितान् पितॄन्नमस्ये मखपूजितान् ।
वैश्यप्रपूजितान् पितॄन् नमस्ये कव्यभोजनान् ॥५४॥
शूद्राऽर्चितान्नमस्ये तान् सुकालिनोऽन्नपूजितान् ।
आसुराऽर्चितपितॄँश्च स्वधाहारान्नमामि च ॥५५॥
पातालवासिनो यान् ये तर्प्यन्ते श्राद्धकर्मसु ।
स्वधाहारान् नमस्येऽहं रासातलैः प्रपूजितान् ॥५६॥
भोगैरशेषैर्नागाद्यैः सर्पैश्चापि प्रपूजितान् ।
पितॄन्नमस्ये द्युस्थाँश्चाऽन्तरिक्षास्थान् महीस्थितान् ॥५७॥
विमानस्थान् मूर्तरूपान् पितॄन्नमामि सर्वदा ।
योगिजनैः पूजिताँस्तान् क्लेशमुक्तिप्रदान् शुभान् ॥५८॥
पितॄँस्ताँश्च नमस्येऽहं मूर्तान् स्वधाभुजः सदा ।
काम्यफलप्रदान् सर्वान् स्वर्गस्थान् मोक्षदानपि ॥५९॥
तृप्यन्त्विच्छावतां कामप्रदाः सुरत्वपुत्रदाः ।
ऐन्द्रसौरपददाश्च पशुस्वगृहशक्तिदाः ॥६०॥

चन्द्रे सूर्ये रश्मिवासा विमानस्था जलान्नकैः ।
गन्धरसादिभिः सर्वे तृप्यन्तां चामृतप्रदाः ॥६१॥
अग्नौ हुतान्नभोक्तारो हविर्भुजोऽपि येऽपरे ।
विप्रदेहनिवासाश्च साधुदेहनिवासिनः ॥६२॥
पिण्डादास्तृप्तिमायान्तु मयाऽर्पिताऽप्कलादिभिः ।
कृष्णतिलैः शाकपत्रैः प्रीणिता यन्तु ते मुदम् ॥६३॥

कव्यादाश्चामरपूज्याः पुष्पगन्धान्नभोजनैः ।
तृप्तिमायान्तु ते सर्वे पितरः स्वर्गदायिनः ॥६४॥
प्रत्यहं पूजिता मासपूजिता येऽष्टकासु च ।
समान्तेऽभ्युदये पूज्यास्तृप्यन्तु पितरोऽपि मे ॥६५॥
श्वेता विप्राऽर्चितास्वाऽर्कवर्णाः क्षत्रियपूजिताः ।
स्वर्णवर्णा वैश्यपूज्या नीलाः शूद्रप्रपूजिताः ॥६६॥

पुष्पगन्धरसैर्धूपैस्तोयान्नफलपत्रकैः ।
अग्निहुतेन चाज्येन तृप्तिं यान्तु नतोऽस्मि तान् ॥६७॥
देवपूर्वाः कव्यभुजो भूतिसृजो भवन्ति ये ।
भूतप्रेताऽसुररक्षउग्रपितृन् नमाम्यपि ॥६८॥
अग्निष्वात्ता बर्हिषद् आज्यपाः सोमपास्तथा ।
तेऽपि तृप्तिं प्रपद्यन्तां तर्पिताः श्रद्धया मया ॥६९॥

प्राचीं रक्षन्त्वग्निष्वात्ता याम्यां बर्हिषदस्तथा ।
प्रतीचीमाज्यपा रक्षन्त्वुदीचीं सोमपा मम ॥७०॥
रक्षोभूतपिशाचेभ्यो दुष्टाभिचारमन्त्रतः ।
आसुरप्रेतदेहिभ्यो यमो रक्षतु मां सदा ॥७१॥
एकत्रिंशत्पितृगणास्तुष्टा यच्छन्तु मे हितम् ।
विश्वा विश्वभुजो धर्मा धन्याः शुभाननास्तथा ॥७२॥
आराध्या भूतिदा भूतिकृतश्च भूतयो नव ।
कल्याणाः कल्यताः कर्तारश्च कल्पत्वहेतवः ॥७३॥
कल्यतराश्रयाश्चेति षट्चैपितृगणास्तथा ।

वरा वरेण्या वरदाः पुष्टिदास्तुष्टिदास्तथा ॥७४॥
धातारो विश्वपातारः सप्त पितृगणाश्च ते ।
महान्तश्च महात्मानो महिताश्च महाबलाः ॥७५॥
महिमवन्तइत्येते पञ्च पितृगणास्तथा ।
सुखदा धनदश्चापि धर्मदा भूतिदास्तथा ॥७६॥

गणाश्चत्वार एवापि सर्वे तुष्यन्तु मेऽर्चिताः ।
एवं वै स्तुवतस्तस्य रुचेस्तु तेजसां चयः ॥७७॥
समुत्थितः पुरतश्च तं तुष्टाव रुचिस्तदा ।
अमूर्तानर्चितानत्र तेजोमयानुपस्थितान् ॥७८॥
नमस्यामि ध्यानगम्यान् पितॄँस्तान् दिव्यविग्रहान् ।
इन्द्रादीशान् दक्षमारीचर्षिनेतॄन् नमामि च ॥७९॥

मनुमुनीन्द्रचन्द्राऽर्केश्वरान् पितॄन्नमामि च ।
जलेवासान् ग्रहनक्षत्रेशान् वाय्वग्निपूजितान् ॥८०॥
नभःस्थान् भूस्वर्गवासान् नमस्यामि कृताञ्जलिः ।
देवर्षिजनकाँश्चाप्यक्षय्यदातॄन् नमामि च ॥८१॥
प्रजेशाय कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यः सिद्धेभ्यः सद्भ्यो नमामि साञ्जलिः ॥८२॥

सप्तलोकगणेभ्यश्च स्वयंभूपरमेष्ठिने ।
सोमध्रेभ्यश्च नमः सोमाय च नमो नमः ॥८३॥
अग्निरूपान् योगिनश्च नमस्याम्यध्वरस्थितान् ।
तेजःस्थान् सोमसूर्याग्निमूर्तीन्नमामि वै पितॄन् ॥८४॥
ब्रह्मस्वरूपिणः सिद्धान् ब्रह्मचर्यपरायणान् ।
नमामि सत्यलोकस्थानीश्वरानावृतिस्थितान् ॥८५॥

वैराजान् वैष्णवान् भौमान् श्रीपुरस्थाः श्रीयोषितः ।
अव्याकृताऽमृतस्थाँश्च गोलोकस्थान् नमानि च ॥८६॥
वैकुण्ठस्थानक्षरस्थानवतारान् नमामि च ।
अवतारिणीश्च सर्वा मुक्तानिका नमामि च ॥८७॥
मुक्ताँश्च पार्षदान् सर्वानैश्वर्याणि नमामि च ।
अनादिश्रीकृष्णनारायणं श्रीवल्लभम् प्रभुम् ॥८८॥

ब्रह्मप्रियाः समस्ताश्च मातॄर्हरिप्रियास्तथा ।
हेतीन् गुणान् विभूतींश्च नमामि प्रसीदन्तु मे ॥८९॥
इतिस्तुतास्ते पितरस्तेजसो निर्ययुः शुभाः ।
निवेदितान्नपुष्पाद्यैर्युक्ताश्च पुरतः स्थिताः ॥९०॥
पुनर्नतास्तु ते प्राहुः पुत्र पत्नीयुतो भव ।
तस्यां सुतस्ते भविता रौच्यो नाम महामनुः ॥९१॥

अन्ये सुता भविष्यन्ति तेऽपि ते पृथिवीभुजः ।
त्वं च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ॥९२॥
क्षीणाधिकारो भक्तो नः सिद्धिमाप्स्यसि मुक्तिगाम् ।

एतत्स्तोत्रप्रवक्तॄँश्च करिष्यामः समृद्धिगान् ॥९३॥
एतत्स्तोत्रप्रपाठेन तृप्तिर्द्वादशवार्षिकी ।
विकलेऽपि कृते श्राद्धे सगुणं स्तोत्रकीर्तनात् ॥९४॥
इत्युक्ते सहसा लक्ष्मि नदीमध्यात् प्रम्लोचना ।
अप्सरा वै समुत्तस्थौ सकन्या शुभदर्शना ॥९५॥

वरुणस्य तु पुत्रस्य पुष्करस्य प्रिया हि सा ।
उवाच तं रुचिं रुचे ! भार्यां गृहाण मत्सुताम् ॥९६॥
मया दत्तां मम पुत्रीं मनुरस्यां भविष्यति ।
तथेति रुचिणोक्ता सा मालिनीं पुत्रिकां ददौ ॥९७॥
रुचिः पाणिं प्रजग्राह पुत्रस्तस्यां ततोऽभवत् ।
रौच्यो देवो मनुः सोऽयं भविता वै त्रयोदशः ॥९८॥

महाभागवतो भक्तोऽधिकारान्ते विमोक्ष्यते ।
एतत्पवित्रमनघं पित्राख्यानार्चनादिकम् ॥९९॥
पठित्वा मुच्यते कष्टाद् विभूत्या युज्यते तथा ।
लक्ष्मि भुक्तिं लभेताऽत्र मुक्तिं चान्ते लभेदपि ॥१००॥
पितृपूजाफलं चापि वंशं स्वर्गं लभेदपि ।
सम्पल्लक्ष्मीं लभेतापि परं मोक्षमवाप्नुयात् ॥१०१॥
धर्मवृद्धिं तथाऽऽरोग्यं धनं धान्यादिकं लभेत् ।
सर्वान् कामानवाप्नोति पितृप्रसन्नतार्जितान् ॥१०२॥
सर्वानन्दप्रमोदाँश्च सर्वसौख्यानि चाश्नुते ।
गार्हस्थ्यं निर्गुणं तस्य जायते पितृभक्तितः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने रुचिप्रजापतेः पितृदर्शनं स्तवनं गार्हस्थ्यार्थमादेशो गार्हस्थ्यं चेतिनिरूपणनामा सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं वच्मि मनुं चतुर्दशम् ।
इन्द्रसावर्णिनामानं भौत्यं भूते सुतं शुभम् ॥ १ ॥
बभूवाङ्गिरसः शिष्यो भूतिर्नाम्नाऽतिकोपनः ।
चण्डः शापदश्चाल्पेप्यर्थे कठोरवाग् रुषा ॥ २ ॥
एवंविधं तु तं ज्ञात्वा भीत्या तस्याऽऽश्रमान्तिके ।
केऽपि नैव प्रयान्त्येव देवा अपि तु बिभ्यति ॥ ३ ॥
अत एव मातरिश्वा न ववावतिनिष्ठुरः ।
नातिपापं रविश्चक्रे पर्जन्यो नातिकर्दमम् ॥ ४ ॥
नातिशीतं च शीतांशुर्वह्निर्नातीव दह्यति ।
अपि वृक्षास्ततो भीता वल्लयश्च तृणादयः ॥ ५ ॥
अनृतावपि पुष्पादि फलादिस्मृद्धयोऽनिशम् ।
भवन्त्येव च वर्तन्ते ऋतवोऽपि तदाश्रमे ॥ ६ ॥
जलानि सरितस्तस्याश्रमसमीपगानि वै ।
कमण्डलुगताश्चापि भवन्ति तद्भयाद् रमे ॥ ७ ॥
एवंविधो हि भूतिः सोऽनपत्यः पुत्रकाम्यया ।
तपस्तेपे बहुकालं शीतवाताऽनलाहतः ॥ ८ ॥
यताहारः कृशोऽभूच्चाऽनवाप्याऽपि यथेप्सितम् ।
न्यवर्तत तपसः सोऽभवन्मां परमेश्वरम् ॥ ९ ॥
तमेकदाऽग्रजो भ्राता सुवर्चाख्यो निजे मखे ।
समाजुहाव तेनाऽसौ धियासुर्निजशिष्यकम् ॥१०॥
शान्तिधर्माभिधं चाह गच्छामि चाग्रजाऽध्वरम् ।
प्रति जागरणं वह्नेस्त्वया कार्यं ममाश्रमे ॥११॥
यथाग्निर्न शमं यायात्तथाश्रमं च भालय ।
इतिशिष्यं समाज्ञाप्य भ्रातुर्यज्ञं ययौ हि सः ॥१२॥
अथ शान्तिः समित्पुष्पफलाद्यर्थे वनं ययौ ।
आगत्य चाश्रमसेवां कुरुते मार्जनादिकम् ॥१३॥
यावत्समित्प्रदानार्थं वह्निशालां ययौ हि सः ।
तावच्छान्तोऽनलस्तं तु दृष्ट्वा चिन्तापरोऽभवत् ॥१४॥
भूतेर्भयाच्चातिभीतः शुशोचाऽत्यन्तदुःखितः ।
किं करोमि मया किं च प्रतिपत्तव्यमत्र वै ॥१५॥
प्रशान्ताग्निमिमं धिष्ण्यं यदि पश्यति मे गुरुः ।
ततो मां विषमे तूर्णं व्यसने स नियोक्ष्यति ॥१६॥
यदन्यमग्निमत्राऽहमग्निस्थाने करोमि चेत् ।
गुरुः प्रत्यक्षदृग् ज्ञात्वा मां भस्म प्रकरिष्यति ॥१७॥
सोऽहं जातो गुरोस्तस्य निमित्तं कोपशापयोः ।
दृष्ट्वा प्रशान्तमनलं नूनं शप्स्यति मां गुरुः ॥१८॥
अथवा पावकः क्रुद्धोऽवश्यं धक्ष्यति मां तदा ।
अस्तु जातं तु तज्जातं नाऽजातं तद् भविष्यति ॥१९॥
उपायस्तत्र कर्तव्योऽपराधस्य प्रशान्तये ।
यस्याऽपराधस्तस्यैवाऽभ्यर्थना तु क्षमात्मिका ॥२०॥
कर्तव्याऽत्र मया सोऽयं धर्मोऽत्र प्रथमो मम ।
विचार्येत्थं स मतिमान् वह्निस्तोत्रं जगौ तदा ॥२१॥
शरणं पावकं गत्वा त्वेकचित्तः स्तवं व्यधात् ।
'ओं नमोऽनन्तशक्त्युग्रशक्त्यात्मने हरेः प्रभोः ॥२२॥
ओं नमः सर्वलोकानां मखसाधनमूर्तये ।
एकद्विपञ्चधिष्ण्याय राजसूये षडात्मने ॥२३॥
प्रत्यक्षदेवरूपाय नमस्ते देववृत्तये ।
सर्ववर्ष्मवतां शुक्ररूपाय बलिने नमः ॥२४॥
त्वं मुखं सर्वदेवानामीश्वराणां हरेरपि ।
त्वं पाकः सर्वभूतानामन्नानां रसिनां तथा ॥२५॥
हुतं हविर्भक्षयँस्त्वं मेघत्वाय करोषि वै ।
वृष्टिरूपं तु तद् भूत्वौषधिव्रातान् प्रपुष्यति ॥२६॥
तत्फलाद्यैर्भूतवासाः सुखं जीवन्ति जन्तवः ।
तत्समिद्धिर्जना यज्ञान् प्रकुर्वन्ति सुरा अपि ॥२७॥
दैत्याश्च राक्षसाश्चापि त्वदाधारा विभावसो ।
जरायूजाश्चाण्डजाश्च स्वेदजा भूमिजा अपि ॥२८॥
आप्यायन्ते त्वया सर्वे संवृध्यन्ते त्वयाऽनल ।
संरक्ष्यन्ते त्वया सर्वे तथा मां परिरक्षय ॥२९॥
देवेषु तैजसस्त्वं वै कान्ति सिद्धेषु वै भवान् ।
विषं नागेषु चास्से त्वं वायुभागः पतत्रिषु ॥३०॥

मनुजेषु पशुपक्षिगणे क्रोधो भवानपि ।
अवष्टम्भश्च तरुषु काठिन्यं त्वं क्षितावपि ॥३१॥

जले द्रवो भवानेव जवो भवान् हि वायुषु ।
व्यापकस्त्वं नभस्येव सर्वभूतान्तरस्थितः ॥३२॥

त्वमेकस्त्रिविधश्चाप्यष्टधा सहस्रधापि च ।
स्वाहास्वधादिभिर्भोक्ता हव्यकव्यस्य वै भवान् ॥३३॥

हेतिष्वापि भवानेव धारासु संविराजते ।
जातवेदो नमस्तुभ्यं पिंगाक्ष ते नमोऽस्तु च ॥३४॥

हुताशन नमस्तेऽस्तु नमस्ते हव्यवाहन ।
पावकाऽद्य नमस्तेऽस्तु नमस्ते विश्वपावक ॥३५॥

पाककर्तर्नमस्तेऽस्तु पोष्टस्ते च नमो नमः ।
त्वं ज्योतिस्त्वं महादित्यो विभावसो नमोऽस्तु ते ॥३६॥

हिरण्यरेता वह्निस्त्वं सप्तजिह्व नमोऽस्तु ते ।
काली कराली च मनोजवा च लोहिता तथा ॥३७॥

धूम्रा स्फुलिंगिनी विश्वा सप्तजिह्वाः शुभास्तव ।
कालनिष्ठाकरी चाद्या द्वितीया प्रलयंकरी ॥३८॥

तृतीया लघिमाकार्या चतुर्थी कामकारिणी ।
पञ्चमी रोगदा षष्ठी सर्वपुद्गलकारिणी ॥३९॥

सप्तमी शर्मदा ज्वाला ताभ्यः पाहि महाभयात् ।
पिंगाक्ष लोहितग्रीव कृष्णवर्ण हुताशन ॥४०॥

त्राहि मां भयतो वह्ने कृशानो हव्यवाहन ।
सामुद्रवाडवाख्यस्त्वं जाठरस्त्वं तु पाचनः ॥४१॥

वैश्वानरः सोमपस्त्वं हविर्भुक् पाहि मां भयात् ।
तवाऽर्चिभिः स्पृष्टमेतद् द्रव्यं शुचि प्रजायते ॥४२॥

भस्मना ते शुचि सर्वं मां शुचिं त्वं विधापय ।
पिता पुत्रं तथा मां त्वं रक्ष प्राप्तभयादिह ॥४३॥

प्रकाशं स्वयमायाहि भक्तस्यात्र कृतेऽनल ।
यथा मां न गुरुर्भूतिर्दहेच्छापेन रक्षय ॥४४॥

एवं स्तुतोऽनलस्तस्य शान्तेरग्रे सुमूर्तिमान् ।
प्रीतश्चागत्याह शान्तिं भयं मा ते गुरोर्मम ॥४५॥

तुष्टोऽस्मि तव भक्त्याऽहं स्तोत्रेणापि वरं वृणु ।
शान्तिः प्राह भयहीनो भवामि तव दर्शनात् ॥४६॥

गुरुर्भूतिः समागत्य त्वां पश्यतु धिष्ण्यगम् ।
अपुत्रस्य गुरोः पुत्रो विशिष्टश्च भवत्वपि ॥४७॥

इत्युक्तोऽनलदेवश्च प्राह प्रसन्नतान्वितः ।
गुर्वर्थे वरदानं ते नात्मार्थे च त्वयार्थितम् ॥४८॥

ततोऽधिकं प्रसन्नोऽस्मि तथाऽस्त्विति ददाम्यहम् ।
मन्वन्तराधिपः पुत्रो भौत्यो नाम गुरोस्तव ॥४९॥

चतुर्दशो महेन्द्रादिस्थाप्यः प्राज्ञो भविष्यति ।
गुरुः शान्तिप्रियश्चापि भविष्यति न संशयः ॥५०॥

अहं कुण्डे भवाम्येव ज्वालायुक्तः समित्सु च ।
एतत्स्तोत्रेण मे स्तोता निष्पापो यज्ञपुण्यभाग् ॥५१॥

उपद्रवविहीनश्च भविष्यति न संशयः ।
इत्युक्त्वा भगवानग्निः कुण्डे तत्राऽवसद्वसन् ॥५२॥

अथाऽऽजगाम भूतिश्च सौहार्दपूरितोऽभवत् ।
पप्रच्छ शिष्यं हेतुं च सौहार्दस्य शमस्य च ॥५३॥

शान्तिः सर्वं च वृत्तान्तं यथावत् प्राह भूतये ।
प्रसन्नः स गुरुर्भूत्वा वेदान् शिष्याय वै ददौ ॥५४॥

भौत्यो नाम मनुः पुत्रो भूतेस्तत्राप्यजायत ।
शुचिरिन्द्रस्तथा देवा भौत्यं मनुं च जगृहुः ॥५५॥

इन्द्रसावर्णिनामानं मन्वन्तरं च देवताः ।
पुपूजुः सर्वथा तत्र पुष्पाक्षतसुचन्दनैः ॥५६॥

एवं लक्ष्मि भविताऽयमिन्द्रसावर्णिनामकः ।
सायं ततो मनुः सोऽयं कथितस्ते चतुर्दशः ॥५७॥

मनून् श्रुत्वा शिवराशीलक्ष्मि सन्ततिमुत्तमाम् ।
सर्वकामान् धनं ज्ञानं बुद्धिं भार्यां सुरूपिणीम् ॥५८॥

आरोग्यं च बलं पौत्रं पुत्रं माहात्म्यमुत्तमम् ।
शुभं मतिं जयं ज्ञातिश्रैष्ठ्यं च लभते बहु ॥५९॥

अरिनाशं सुराणां च प्रसन्नतां प्रविन्दति ।
पापेभ्यश्चापि सर्वेभ्यो मुच्यते श्रवणादपि ॥६०॥

श्रुतं धर्मं च सम्मानं स्वेष्टं लभते सम्पदः ।
गाः पृथिवीं नृपतित्वं प्रधानत्वं च विन्दति ॥६१॥

आयुष्यमुदयं चापि वैराग्यं लभते ततः ।
आध्यात्मिकसुन्नतिं स्वर्गं श्रीमत्त्वं लभते तथा ॥६२॥

मनवस्तु मदंशास्ते मया निवासिता रमे ।
तत्पूजा मम पूजैव तत्कथा मत्कथा मता ॥६३॥

तत्र तेजो मया क्षिप्तं चक्रवर्तित्वदायकम् ।
आराधनेन मे ते वै भक्ता मे मनवोऽभवन् ॥६४॥

भविष्यन्त्यपरे चापि कल्पान्तरेषु तेऽपि च ।
बभूवुश्चापि ये तेऽपि मदंशा मनवो मताः ॥६५॥

मन्वाद्यतिथयः सर्वात्रतात्मिकाः सुपुण्यदाः ।
पवित्रा दानकर्तॄणां स्वर्गदा भूपतित्वदाः ॥६६॥

इति लक्ष्मि मया प्रोक्तो मनूनामुद्भवस्तव ।
ब्रूहि किं श्रोतुमिच्छा ते वर्तते तद् वदामि हि ॥६७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने चतुर्दशस्य मनोराख्यानमितिनिरूपणनामा अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

श्रीनारायणीश्रीरुवाच—

तृप्ताऽहं भवतो वाक्यामृतैः शाश्वतमोदिनी ।
विहर्तुं वै विमानेन यास्यामो यदि रोचसे ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

सर्वब्रह्मप्रियाश्चापि हरिप्रियास्तथाऽपराः ।
सज्जा भवन्तु वै सर्वा यास्यामो हिमवद्गिरिम् ॥ २ ॥
इत्युक्तास्ताः समस्ता वै सज्जास्तूर्णं श्रिया सह ।
अभवन् कृतशृंगारा आरुरुहुर्विमानकम् ॥ ३ ॥
अत्युत्साहयुता नार्यो कान्तेन हरिणा सह ।
आक्षरेण विमानेन ययुर्देशान् विलोकितुम् ॥ ४ ॥
चतुष्टिलाद्रिं संवीक्ष्यानर्तदेशान् विलोक्य च ।
चमत्कारपुरं नारायणीश्रीगिरिमीक्ष्य च ॥ ५ ॥
सुवर्णद्वीपमीक्ष्याऽपि समुद्रं प्रविलंघ्य च ।
नारायणसरो वीक्ष्य कच्छमुल्लंघ्य सिन्धुकीम् ॥ ६ ॥
नदीं स्नात्वा पावयित्वा वीक्ष्य शिलवत्पर्वतम् ।
इन्दुकुशं प्रवीक्ष्यामि कारुकारं प्रवीक्ष्य च ॥ ७ ॥
श्रीनगरं कश्यपारं वीक्ष्य हिमाद्रिमाययुः ।
सप्तसिन्धुपर्वतांश्च वीक्ष्य नन्दासतीं ययुः ॥ ८ ॥
तया सम्पूजितः कृष्णः कृष्णा ब्रह्मप्रियादिकाः ।
प्राप्य पूजां तया दत्तां तामाश्लिष्य हृदम्बुजैः ॥ ९ ॥
नन्दां देवीं पावयित्वा समैक्षन्त वनानि ताः ।
गंगां सुशोभितां चापि समैक्षन्त सुलम्बिताम् ॥१०॥
गन्धर्वाद्यैः समाकीर्णां नित्यं देवादिसेविताम् ।
सुरेभमदसंसिक्तां समन्ताद्धस्तिराजिताम् ॥११॥
तपस्विशरणोपेतां देवब्राह्मणसेविताम् ।
सितहंसावलिच्छन्नां काशचामरराजिताम् ॥१२॥
पुण्यां सुशीतलां हृद्यां मनसां प्रीतिवर्धिनीम् ।
क्षयवृद्धियुतां रम्यां द्विजसंघनिषेविताम् ॥१३॥
अमृतस्वादुसलिलां तापसैरुपशोभिताम् ।
स्वर्गारोहणनिःश्रेणीं सर्वकल्मषनाशिनीम् ॥१४॥
सुशीतशीघ्रपानीयां महर्षिगणसेविताम् ।
सर्वलोकस्य चौत्सुक्यकारिणीं चित्तहारिणीम् ॥१५॥
पुण्यदां सर्वलोकानां नाकमार्गप्रदायिनीम् ।
मेनासारससंघुष्टां जलजैरुपशोभिताम् ॥१६॥
आवर्तनाभिगंभीरां द्वीपोरुजघनस्थलीम् ।
नीलनीरजनेत्राढ्यां प्रोत्फुल्लकमलाननाम् ॥१७॥
हिमाभफेनवसनां चक्रवाकाधरान्विताम् ।
बलाकापंक्तिदर्शनां चलन्मत्स्यावलिभ्रुवम् ॥१८॥
जलमातंगकन्ध्रस्थरम्यकुंभपयोधराम् ।
हंसनूपुरसंघुष्टां मृणालवलयावलीम् ॥१९॥
स्वतीरद्रुमवल्लीजरजोयोगसुगन्धिनीम् ।
तरंगव्रातसंक्रान्तसूर्यमण्डलदुर्दृशम् ॥२०॥
सुरेभजनिताघातविकूलद्वयमत्तिनीम् ।
शक्रेभगण्डसलिलैर्देवस्त्रीकुचचन्दनैः ॥२१॥
सुगन्धिसलिलां लोभात् षट्पदैरतिसेविताम् ।
तपोधनानां देवानामप्सरसां नृयोषिताम् ॥२२॥
सुखशान्तिप्रदां पापहारिणीं घोषकारिणीम् ।
मुक्तैश्चर्षिगणैर्देवैः पितृभिर्मानवैः श्रिताम् ॥२३॥
यक्षराक्षसगन्धर्वैर्गणैः सिद्धैश्च चारणैः ।
दैवतैर्देववृक्षैश्च सेवितां समलोकयन् ॥२४॥
सस्नुस्तस्यामवतीर्य ब्रह्मप्रिया हरिप्रियाः ।
अनादिश्रीकृष्णनारायणः कोटिस्वरूपवान् ॥२५॥
ताभिः सह जले सस्नौ तासां मनोरथपूरयन् ।
आधाय तासां सौगन्ध्यं शृंगारस्य द्रवांस्तथा ॥२६॥
कृतकृत्याऽभवद् गंगा प्राक्सखीजनसंगता ।
श्रीहरेश्चापि योगेन शाश्वतीं तृप्तिमाप सा ॥२७॥
अथ वेषान् प्रधार्यैताः कृत्वा शृंगारमुत्तमम् ।
विमानं त्वधिरुह्यैव ददृशिरे हिमालयम् ॥२८॥
समुल्लिखद्भिर्बहुभिर्वृतं शृंगैस्तु पाण्डुरैः ।
पाण्डुरजटिभिश्चापि तापसैश्चाप्युधिश्रितम् ॥२९॥
पारेसहस्रनिर्झरसरिद्भिः पट्टपाण्डुरम् ।
पारेसहस्रहिमवच्छीखरैः स्वर्गपाण्डुरम् ॥३०॥
देवदारुवनैर्नीलैः कृताऽधोवसनं तथा ।
श्वेतमेघकृतोष्णीषं नीलमेघोत्तरीयकम् ॥३१॥
क्वचिच्चन्द्रार्कमुकुटं क्वचिद्धातुसमन्वितम् ।
हिमानुलिप्तमध्यांगं पार्श्वयोश्चन्दनान्वितम् ॥३२॥
सालक्तकैरप्सरसां मुद्रितं चरणैः क्वचित् ।
क्वचिद्दिवाकरस्पृष्टं क्वचिच्छायातमःश्रितम् ॥३३॥

दरीमुखैः क्वचिद्वारि प्रस्रवन्तं हि पावनम् ।
क्वचिद्विद्याधरगणैः क्रीडद्भिरुपशोभितम् ॥३४॥
किन्नराणां गणैर्गीतं क्वचित् किंपुरुषैरपि ।
तपस्विशरणं सिद्धैर्विहृतं दिव्यमानवैः ॥३५॥
निरुद्धपवनैर्देशैर्नीलशाद्वलमण्डितैः ।
कुसुमैश्च क्वचिद् व्याप्तं महोद्यानमिव स्थितम् ॥३६॥
मृगैः क्वचित्तु चरितं दन्तिभिन्नमहाद्रुमम् ।
सिंहशार्दूलनादैश्च नादितं गह्वरायुतम् ॥३७॥
हिमच्छत्रमहाशृंगं प्रपातशतनिर्झरम् ।
वंशस्तम्बवनाकारैः प्रदेशैरुपशोभितम् ॥३८॥
वृद्धर्षिप्रतिमं वृद्धसहस्रशीर्षसदृशम् ।
हिमसंरुद्धमार्गं च राजतानुकृतिस्थितम् ॥३९॥
विलोक्य पर्वतं सर्वा मुदं परां हि लेभिरे ।
अरण्यानि विचित्राणि ददृशिरेऽतितद्रसाः ॥४०॥
शालैस्तालैस्तमालैश्च कर्णिकारैः सशामलैः ।
न्यग्रोधैश्च महाश्वत्थैः शिरीषैः शिंशपाद्रुमैः ॥४१॥
महानिम्बैश्च युक्तानि निर्गुण्डीभिर्हरिद्रुमैः ।
कालेयकैर्देवदारुद्रुमैर्निम्बैश्च पद्मकैः ॥४२॥
कपित्थैश्चन्दनैर्बिल्वैः रक्तचन्दनपादपैः ।
वाताम्रै रिष्टकैश्चाक्षोटकैरर्जुनपादपैः ॥४३॥
अञ्जकैर्हस्तिकर्णैः सुमनसैः पनसैस्तथा ।
प्राचीनामलकैः कोविदारैश्च घनकैस्तथा ॥४४॥
समराटैः खर्जूरकैर्नारिकेलैश्च खारिकैः ।
प्रियालुभिश्चेक्षुदैश्च तन्तुमालैर्धवैस्तथा ॥४५॥
काश्मीरीपर्णिभिश्चाम्रातकैश्चूतैश्च सर्जकैः ।
जातीफलैः पूगफलैः पिप्पलीप्लक्षखादिरैः ॥४६॥
कटूफलैश्च लवंगाद्यैरेलाभिः कुसुमांऽशुकैः ।
किंशुकैः खदिरैर्मन्दारकैश्च कोविदारकैः ॥४७॥
यवासैः शमीभिश्चापि वेतसैरम्बुवेतसैः ।
रक्तातिरंगनारंगैः करवीरैश्च चिञ्चुभिः ॥४८॥
हिंगुभिर्जम्बीरकैश्च लिचिकाभिः प्रियङ्गुभिः ।
जाम्बूभिः रावणैश्चापि कटगुंदैः खलीलकैः ॥४९॥
रक्ताशोकैरशोकैश्च कल्लैः श्रीपादपैस्तथा ।
आमलकैः शोभितानि चोदुम्बरैश्च चम्पकैः ॥५०॥
श्वेतचम्पैः राजचम्पैर्मुचकुन्दैश्च कुन्दकैः ।
परूषकैः कदम्बैश्च पारिजातैर्गलाटकैः ॥५१॥
किरातैः वेतकैश्चापि सौभाञ्जनैर्निकोटकैः ।
बल्लकपादपैर्बद्रीद्रुमैरक्षोटकैस्तथा ॥५२॥
कञ्जरीभिः सर्जकैश्च सालैस्तालैस्तमालकैः ।
सहकारैश्चारडूसैर्बर्बुरैः रामफालकैः ॥५३॥
सीताफलैर्यामफलैश्चामृतैः रायणादिभिः ।
तुम्बुरुपादपैश्चापि थूरकैर्हस्तथूरकैः ॥५४॥
चेरिटैश्चार्जुनैश्चापि तिलकैः रक्तकेसरैः ।
मधुकैस्तुलसीभिश्च वृन्दाभिस्तिग्मगन्धकैः ॥५५॥
बकुलैश्च कर्मदैश्च पुन्नागैः केतकैस्तथा ।
यूथिकाभिर्जातिफलैर्लोचैस्तिलैः कुशेशयैः ॥५६॥
पारिभद्रैर्हरिद्रैश्च कदम्बकुटजादिभिः ।
मुरतकैः कुंकुमैः कर्मैर्नीपैः पालीवनैस्तथा ॥५७॥
रक्तपुष्पैः सूर्यमुखैः सारघवैः फलीद्रुमैः ।
दाडिमैर्बन्धूककैश्च कुंजलैर्मल्लिकादिभिः ॥५८॥
कुरबकैर्बीजपूरैः कर्पूरैश्चागुरुद्रुमैः ।
गुग्गुलैश्चेक्षुभिश्चापि हिन्तालैश्चक्रमर्दनैः ॥५९॥
पीलुभिर्घातकीभिश्च चिरबिल्वैश्च लोध्रकैः ।
क्षीरिकाभिरश्मकैश्च नवरंगैस्त्रिखट्वकैः ॥६०॥
भल्लातकैरिन्द्रयवैर्गुञ्जाभिः करमर्दकैः ।
अविष्टकैश्च सद्राक्षैर्द्राक्षाभिः पुत्रजीवकैः ॥६१॥
कंकोलैश्च लवंगैश्च प्रतानैर्नागवल्लिभिः ।
मरीचैर्मल्लिकाभिश्च मुक्तकैस्त्रपुसैस्तथा ॥६२॥
कुष्माण्डकैश्चिर्भटैश्च पटोलैः कारवेल्लकैः ।
कर्कोटकैश्च वार्ताकैर्मूलकैः स्वादुकण्टकैः ॥६३॥
शृंगाटकैश्च कल्हारैः सर्षपैः शोभितानि च ।
सोमवल्लीसंधिनीवल्लिकासञ्जीवनीतृणैः ।
काकालीभिः कासमर्दिभिश्च शाकन्दलैस्तथा ॥६४॥
शिम्बिवनैः सस्यवनैर्वेणुभिः कीचकैस्तथा ।
शरगुल्मैश्च कार्पासैः स्वर्णद्रुमैश्च भूतृणैः ॥६५॥
शृंगवेराजमोदाभिः कुबेरकैः प्रियालकैः ।
कुमुदैश्चोत्पलैश्चापि स्थलपद्मैः कसेरुकैः ॥६६॥
मृणालैश्च गोधूमकै राजिकाभिर्नीवारकैः ।
शोभितानि ह्यरण्यानि समैक्षन्त हरेः प्रियाः ॥६७॥
ददृशिरे तथा तत्र नानारूपान् पतत्रिणः ।
मयूरान् शतपत्रांश्च कलविकांश्च कोकिलान् ॥६८॥
कादम्बकांश्च हंसांश्च कोयष्टीन् खञ्जरीटकान् ।
कुररान् कालकूटांश्च खट्वांगान् लुब्धकांस्तथा ॥६९॥
गोक्ष्वेडकांस्तथा कुंभान् धार्तराष्ट्रान् शुकान् बकान् ।
धातुकांश्चक्रवाकांश्च कटुकान् टिट्टिमान् भटान् ॥७०॥

पारावतांश्च कमलान् सारिका हल्लरांस्तथा ।
लावान् प्रभद्रकांश्चापि गरुडान् ताम्रचूडकान् ॥७१॥
कुक्कुटान् कृष्णचटकान् तित्तिरान् कलहंसकान् ।
काष्ठकुट्टान् कलविंकान् कपिञ्जलांश्च डिण्डमान् ॥७२॥
भूलिंगान् सीरपादांश्च भृंगराजान् व्यलोकयन् ।
दात्यूहान् चटकान् कारण्डवान् चषांश्च चातकान् ॥७३॥
शुकान्मयूरकान् भारद्वाजान् हंसान् व्यलोकयन् ।
अनेकजातिजातांश्च पक्षिसंघान् व्यलोकयन् ॥७४॥
श्वापदान् विविधाकारान् मृगांश्चापि व्यलोकयन् ।
व्याघ्रान् केसरिणः सिंहान् द्वीपिनः शरभान् वृकान् ॥७५॥
ऋक्षांस्तरक्षूंश्च कपीन् गोलाङ्गुलान् प्रगेण्डकान् ।
वानरान् शशकान् मार्जारकान् वृकांश्च मल्लुकान् ॥७६॥
मातंगान् महिषांश्चापि गवयान् चमरान् वृषान् ।
गौरखरांश्च सृमरान् मेषान् सारंगकानपि ॥७७॥
कुकुरान्नीलकांश्चापि करालान् शम्बरांस्तथा ।
रामशरभान् तोरणान् कालपुच्छान् वराहकान् ॥७८॥
तुरगान् गर्दभांश्चापि रेण्डीयरांश्च चित्रकान् ।
व्यलोकयन् स्त्रियः सरोवरान्नदीः सितोदकान् ॥७९॥
प्रणालिकानि चोष्णानि शीतलानि च भागशः ।
कन्दराणि च शैलस्य व्यलोकयन् हरिप्रियाः ॥८०॥
अथाऽग्रे संव्यपश्यंश्च ऋषेरत्रेः शुभाश्रमम् ।
नैसर्गिकप्रभायुक्तं हिंसादोषादिवर्जितम् ॥८१॥
हिमपातो न तत्रास्ति समन्तात्पञ्चयोजनम् ।
अत्रिणा पूजितः कृष्णः कृष्णाश्च पुरतो ययुः ॥८२॥
तत्सन्निधौ रमणीयं शिखरं पाण्डुरं महत् ।
हिमपातं घना यत्र कुर्वन्ति सहिताः खलु ॥८३॥
अथाग्रे शिखरं त्वन्यद् वर्तते चोच्छ्रितं परम् ।
नित्यमेवाभिवर्षन्ति तोयं हिमं घना मुहुः ॥८४॥
द्वयोः शिखरयोर्मध्ये शृंगमत्यन्तमुच्छ्रितम् ।
तस्य कक्ष्यां वृक्षगणा वर्तन्ते पश्चिमे शुभाः ॥८५॥
तमोव्याप्ता निबिडाश्च फलपुष्पादिसमृद्धयः ।
न तत्र सूर्यस्तपति राजते नहि चन्द्रमाः ॥८६॥
तथापि दिवसाभो वै प्रकाशस्तत्र विद्यते ।
बदर्यस्तत्र विद्यन्ते महर्षयो वसन्ति च ॥८७॥
विमानं त्वम्बरात्तत्र कोटिसूर्यसमप्रभम् ।
अवातरद् विशालायां प्रद्योतत् सर्वतोदिशः ॥८८॥
नरो नारायणश्चापि भक्तिधर्मौ महर्षयः ।
तूर्णमाश्चर्यमापन्ना विमानं प्रति चाययुः ॥८९॥
दृष्ट्वा नारायणकृष्णश्रीपतिंवल्लभम् प्रभुम् ।
अनादिश्रीकृष्णनारायणब्रह्मपरप्रभुम् ॥९०॥
पुपूजुः सहसा सर्वे जलचन्दनसत्फलैः ।
नरनारायणौ चापि पूजितौ च परात्मना ॥९१॥
नारायणीभिः सर्वाभिः पूजितो भ्रातरावुभौ ।
महर्षयः पूजिताश्च वन्दिताश्च क्षमापिताः ॥९२॥
ततो दानानि दत्त्वैव सेवित्वा हृदयोद्भवैः ।
भावैरतान् साधुवर्यांश्च नत्वा भक्तिं वृषं हरिम् ॥९३॥
विमानमधिरुह्याऽथ तदग्रे प्रययुस्ततः ।
हिमाचलः स्वयं राजेश्वरो भूत्वा समेनकः ॥९४॥
पूजार्थमाययौ कृष्णविमानं प्रति सोत्सुकः ।
नत्वा पूजां विधायाऽपि प्रार्थयद् भवनं प्रति ॥९५॥
समागन्तुं हरिं सोऽपि तदिच्छयाऽऽलयं ययौ ।
समन्तात्पर्वतानां वै प्राकाराः श्वेतहीमजाः ॥९६॥
मध्ये द्रोणी विशाला च सरोवरादिशोभिताः ।
उद्यानादियुता तत्र प्रासादो नगरान्वितः ॥९७॥
हिमालयस्य सुभगो विद्यते सुमनोहरः ।
अवातरद् विमानं वै, तत्र प्राकारभूस्थले ॥९८॥
हिमालयगृहेऽनादिकृष्णनारायणस्य वै ।
मेना हिमालयश्चापि स्वागतं पूजनं तथा ॥९९॥
हरेर्हरिप्रियादीनां चक्रतुर्वै यथोचितम् ।
आनन्दं पर्वतो लेभे नारायणस्य दर्शनात् ॥१००॥
न्यवासयन्महासौधे परमेशं प्रियायुतम् ।
अमूलानि सुभोज्यानि कारयामास सत्वरम् ॥१०१॥
भोजयामास शीघ्रं चारात्रिकं च व्यधात् ततः ।
श्रीहरिश्च विशश्राम प्रियाभिः सेवितो मुदा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ब्रह्मप्रियादिभिः सहितो विमानेन श्रीकृष्णनारायणो पृथिवीं पश्यन् हिमालयगृहं ययावित्यादिनिरूपणनामा नवपञ्चाशदधिकशततमोऽध्यायः ॥ १५९ ॥

श्रीपुरुषोत्तम उवाच—

अथाऽऽययौ हिमाद्रिर्वै पूजार्थं परमात्मनः ।
सौवर्णं बहुधा धृत्वा स्थालेषु स्वर्णकारिषु ॥ १ ॥
राजतेषु च पात्रेषु विद्रुमानुत्तमान् मणीन् ।
माणिक्याख्यान् मणींश्चापि पद्मरागमणींस्तथा ॥ २ ॥
वज्रमणीन्मारकतान्नीलमणीन्महोज्ज्वलान् ।
वैदूर्याख्यमणींश्चापि भृत्वा स्थालेषु चाययौ ॥ ३ ॥

जातरूपप्रणद्धाँश्च वज्रमणींस्तथा परान् ।
शुक्तिसंख्यान्मारकतानिन्द्रनीलान्महोज्ज्वलान् ॥ ४ ॥
कर्कोटकान् सूर्यकान्ताँश्चन्द्रकान्तान् स्यमन्तकान् ।
स्फटिकान् गोमेदकाँश्च धूलीमरकताँस्तथा ॥ ५ ॥
राजमणीन् ब्रह्ममणीन् मुक्ताफलानि चानयत् ।
अपूजयद्धरिं नारायणं कृष्णं परेश्वरम् ॥ ६ ॥
मणीनां मालिकाहारान् रत्नानां मालिका ददौ ।
हीरकाणां ददौ हारान् मौक्तिकानां ददौ तथा ॥ ७ ॥
चन्दनाऽक्षतपुष्पाद्यैरारार्त्रिकादिभिर्हरिम् ।
अपूजयद्धिमशैलो मेना सतीरपूजयत् ॥ ८ ॥
एवं पूजोत्तरं चाद्रिर्निन्ये मेनालयं शुभम् ।
क्रोशाधिकपरिमाणं सरोवरेण राजितम् ॥ ९ ॥
समन्तात् सरसस्तस्य सोपानानि सुभान्ति वै ।
सौवर्णैः राजतैर्वृक्षैर्द्रुमैर्युतानि चाभितः ॥१०॥
नानामाणिक्यकुसुमैः सुप्रभाभरणोज्ज्वलैः ।
पत्रैर्मरकतैर्नीलवैदूर्यच्छदकैस्तथा ॥११॥
तत्र सरसि पद्मानि पद्मरागच्छदानि वै ।
वज्रकेसरजालानि सुगन्धीनि विभान्ति वै ॥१२॥
मारकतानि पत्राणि नीलवैदूर्यकर्णिकाः ।
शोभन्ते वल्लिकादेहे महाश्चर्यकराणि वै ॥१३॥
सरोवरस्य या भूमिर्दिव्या नैसर्गकोमला ।
नानारत्नैरुपचिता जलजानां समाश्रया ॥१४॥
कपर्दिकानां शुक्तीनां शंखानां समुपाश्रया ।
मकराणां च मत्स्यानां चण्डानां कच्छपैः सह ॥१५॥
मारकतैरसंख्यैश्च शोभिता वज्रकोटिभिः ।
पद्मरागेन्द्रनीलैश्च महानीलैश्च शोभिता ॥१६॥
पुष्परागैः कोटिभिश्च कर्कोटकैरनन्तकैः ।
राजावर्तैस्तुत्थखण्डै रुचिराक्षैश्च कोटिभिः ॥१७॥
सूर्येन्दुकान्तकोट्याद्यैर्नीलैर्वर्णान्तिमैस्तथा ।
ज्योतीरसैः स्फटिकैश्च स्यमन्तकैर्वलक्षकैः ॥१८॥
गोमेदपित्तकैश्चापि धूलीमरकतैस्तथा ।
प्रराजमणिभिश्चापि वैदूर्यगन्धिभिर्युता ॥१९॥
मुक्ताफलैस्तथा ब्रह्ममणिभिर्मौक्तिकैर्युता ।
एतादृशी क्षितिः सौम्या सरसः परितोऽभवत् ॥२०॥
सुखोष्णं च सरस्तोयं स्नानाच्छैत्यविनाशकम् ।
तस्योदकं बहु स्वादु लघुशीतं सुगन्धिकम् ॥२१॥

न क्षिणोति यथा कण्ठं कुक्षिं नाऽऽपूरयत्यपि ।
तृप्तिं विधत्ते परमां शरीरे च महत् सुखम् ॥२२॥
जलमध्येऽभवच्छ्रेष्ठः प्रासादो रुक्मभित्तिजः ।
सर्वरत्नमयश्चन्द्रकान्तिकान्तितभूस्तरः ॥२३॥
रम्यवैदूर्यसोपानो विद्रुमाऽमलसारकः ।
इन्द्रनीलमहास्तम्भो मरकतोत्थवेदिकः ॥२४॥
वज्रांशुजालैः स्फुरितो रम्यो दृष्टिमनोहरः ।
प्रासादे तादृशे मेनकया पूजार्थमच्युतः ॥२५॥
नित्यं संरक्षितश्चास्ते भक्तेच्छाधीनमाधवः ।
भोगिभोगावलिसुप्तः सर्वालंकारभूषितः ॥२६॥
जान्वा तु कुञ्चितस्त्वेकः पादः श्रीस्वामिनस्तथा ।
फणीन्द्रसन्निविष्टोऽङ्घ्रिर्द्वितीयश्च परात्मनः ॥२७॥
लक्ष्म्युत्संगगतोऽङ्घ्रिश्च शेषभोगप्रशायिनः ।
फणीन्द्रभोगसन्न्यस्तबाहुः केयूरभूषणः ॥२८॥
अङ्गुलिपृष्ठविन्यस्तस्वशीर्षश्चैकहस्तकः ।
जानुस्थमणिबन्धाऽऽकुञ्चितलम्ब्यन्यहस्तकः ॥२९॥
किञ्चिदाकुञ्चितनाभिदेशहस्ततृतीयकः ।
आत्तगुच्छघ्राणदेशस्थितचतुर्थहस्तकः ॥३०॥
लक्ष्म्या संवाह्यमानांऽघ्रिः पद्मपत्रनिभैः करैः ।
सन्तानमालामुकुटो हारकेयूरभूषितः ॥३१॥
भूषितश्च विभूषाभिरङ्गदैरंगुलीयकैः ।
फणीन्द्रफणविन्यस्तचारुरत्नशिरोज्ज्वलः ॥३२॥
अज्ञातवस्तुचरितः प्रतिष्ठितो हिमाद्रिणा ।
मेनानुपूज्यः सततं सन्तानकुसुमार्चितः ॥३३॥
दिव्यगन्धानुलिप्तांगो दिव्यधूपेन धूपितः ।
सुरसैः सुफलैर्हृद्यैश्चामृतैः पायसादिभिः ॥३४॥
भोजितो मेनकादेव्या सुप्तश्चोत्पलशीर्षकः ।
शोभितोत्तमपार्श्वश्च सर्वाभिर्दृष्ट एव सः ॥३५॥
अनादिश्रीकृष्णनारायणेन वीक्षितो हरिः ।
मूर्तिमयोऽपि भगवान् दिव्यश्चोत्थाय सन्निधौ ॥३६॥
नत्वा हृदये चाश्लिष्य ववन्दे पुरुषोत्तमम् ।
अनादिश्रीहरिः कृष्णनारायणो जगद्गुरुः ॥३७॥
अवतारगुरुर्व्यूहगुरुश्चांशगुरुः स्वयम् ।
नारायणानां सर्वेषां गुरुर्मद्गृहमागतः ॥३८॥
धन्योऽस्मि कृतकृत्योऽस्मीत्युक्त्वा पुपूज कारणम् ।
पूजां कृत्वाऽभवत्तत्राऽदृश्यो मूर्तौ भुजङ्गमः ॥३९॥

परमेशस्ततोऽप्यग्रे हिमाद्रेर्भवनं ययौ ।
सर्वरत्नमयं दिव्यप्रभायुक्तं समृद्धिकम् ॥४०॥
सर्वोपस्करसंयुक्तं सर्वभोज्यसमन्वितम् ।
सर्वपेययुतं दिव्यं कोमलासनशोभितम् ॥४१॥
सर्वसुगन्धसंव्याप्तं कल्पलताभिशोभितम् ।
सर्वकामप्रदं दासदासीकोटिसमन्वितम् ॥४२॥
स्वर्णहीरकरत्नानां सिंहासनेन राजितम् ।
तस्मिन्न्यषादयत्कृष्णनारायणं हि मेनका ॥४३॥
पुपूज परया प्रीत्याऽऽरात्रिकं प्रचकार च ।
हरिस्तत्राऽमृतभोज्यं गृहीत्वा चोपदादिकम् ॥४४॥
पावयित्वाऽऽलयं चाऽद्रेस्त्वाज्ञयाऽग्रेऽम्बरे ययौ ।
विमानेन द्रुतं प्राप केदारं शिखरं शुभम् ॥४५॥
केदारेशो महादेवः श्रीपतेः पुरतोऽभवत् ।
पुपूज परमात्मानं ब्रह्मप्रियादिसंयुतम् ॥४६॥
बहुरत्नादिभिश्चापि फलपुष्पादिभिस्तथा ।
लब्ध्वा पूजां हरिश्चाग्रे ययौ कैलासपर्वतम् ॥४७॥
त्रिपुरारिसेवितं च कल्पद्रुमसमन्वितम् ।
शंकरः सर्वगणयुक् सतीयुग् वीक्ष्य माधवम् ॥४८॥
समीपे चाऽऽजगामाऽपि पुपूज परमेश्वरम् ।
कुबेरो गुह्यकैः साकं पुपूज श्रीपतिं हरिम् ॥४९॥
सर्वरत्नैः फलपुष्पैः प्राप्य पूजां हरिस्ततः ।
सौगन्धिकं गिरिं वीक्ष्य सुवेलं पर्वतं तथा ॥५०॥
चन्द्रप्रभं गिरिं चापि दिव्यमच्छोदकं सरः ।
चैत्ररथं वनं वीक्ष्य सर्वौषधिं गिरिं तथा ॥५१॥
दिव्यारण्यं विशोकाख्यं वीक्ष्य ककुद्मिनं गिरिम् ।
वैद्युतं च गिरिं वीक्ष्य वैभ्राजं च वनं ततः ॥५२॥
अरुणं पर्वतं वीक्ष्य शैलोदं च सरस्ततः ।
गौरं तु पर्वतं वीक्ष्य सरः काञ्चनवालुकम् ॥५३॥
राजतं भ्राजमानं वै हिमाद्रिं भूमिमण्डलम् ।
ऊर्ध्वं चाभ्रसमुद्रं वै वीक्षमाणाः पुरो ययुः ॥५४॥
पर्वतानां श्रेणिकाश्च दृष्ट्वा श्रीमानसं सरः ।
व्यलोकयन् विमानस्थाः कृष्णपत्न्यः सुहर्षिताः ॥५५॥
कृष्णेन साकं तत्तीरे चावतेरुः समन्ततः ।
सस्नुस्ताः स्वामिना साकं चक्रुश्च जलखेलनम् ॥५६॥
स्नपयन्ति स्नापयन्ति समाश्लिष्यन्ति माधवम् ।
हर्षयन्ति मोदयन्ति स्नान्ति मोदन्त इत्यपि ॥५७॥
आनन्दयन्ति कान्तं श्रीहरिणा हृदि संधृताः ।
आनन्दिताः कान्तमय्यो रञ्जयन्ति प्रियं स्त्रियः ॥५८॥
पतिं विविधचेष्टाभी रञ्जयन्ति तदङ्गनाः ।
कमलानि समादाय कान्ते ता योजयन्ति वै ॥५९॥
काश्चिदाताडयन् कान्तमुदकैः करताडितैः ।
ताड्यमानाश्च कान्तेन प्रीतिमत्योऽभवँस्तदा ॥६०॥
अदृश्यन्त तदा लक्ष्म्यः श्वासनृत्यत्पयोधराः ।
कान्ताम्बुताडनोच्छीर्णकेशपाशनिबन्धनाः ॥६१॥
स्नाताः शीतापदेशेन काश्चित्कान्तं समाश्लिषन् ।
एवं कान्तं रामयित्वा रमयित्वा ततः स्त्रियः ॥६२॥
निर्ययुर्मण्डयन्ति स्म गात्राणि तटमास्थिताः ।
शृंगारयन्ति गात्राणि भूषयन्ति विभूषणैः ॥६३॥
सज्जा भूत्वा विमानस्था बभूवुः पतिवाञ्छया ।
विमानेन ततः सर्वा धवलं गिरिमाययुः ॥६४॥
ततश्च वनशोभाढ्यं हनुमत्पर्वतं ययुः ।
हनूमता पूजितश्च श्रीपतिः पुरुषोत्तमः ॥६५॥
लक्ष्म्या सम्पूजितश्चापि हनूमान् तपसः स्थितौ ।
सहायकृत् पर्वतेऽपि पुरा रक्षाकरः कपिः ॥६६॥
ततो विमानमार्गेण ययुर्गंगां तु काञ्चनीम् ।
जलानि तत्र पीत्वैव शिवेश्वरपुरीं ययुः ॥६७॥
वाराणसीं महाश्रेष्ठां पावनीं वरणान्विताम् ।
गंगां सुशोभनां प्राप्य दृष्ट्वा विश्वेश्वरं शिवम् ।
विश्वेश्वरगृहे सर्वा रात्रिं निन्युः सुखान्विताम् ॥६८॥
शंकरेण तु कृष्णस्य सम्मानं बहुधा कृतम् ।
भोजनाच्छादनाद्यैश्च पानैः संवाहनादिभिः ॥६९॥
शयनैः सुखभोगाद्यैः प्रसादितः परेश्वरः ।
वैकुण्ठसदृशे हर्म्ये रात्रिं निनाय माधवः ॥७०॥
पूजां प्राप्य भोजनादि कृत्वा विदायमालभत् ।
विमानेन द्रुतं विन्ध्याचलं वीक्ष्य ततः परम् ॥७१॥
सप्तपुटं पर्वतं च भृगुकच्छं श्रियाः पुरम् ।
गोपनाथं ततो वीक्ष्य निजां लोमशभूमिकाम् ॥७२॥
नगरीमाययुः सर्वा विश्रान्तिमापुरुत्तमाम् ।
अथ सायं स्थिताः स्वामिनाथस्य पुरतः स्त्रियः ॥७३॥
भोजनादि विधायैव पप्रच्छुः परमेश्वरम् ।
रत्नानीमानि सर्वाणि हीरकादीनि केशव ॥७४॥
कदा कस्मात् प्रजातानि हिमाल्याऽर्पितानि वै ।
भौतिकानि हि सर्वाणि न तु दिव्यानि सन्ति वै ॥७५॥

कौस्तुभादेर्लेशमात्रं दिव्यतैतेषु नास्ति यत् ।
मणिरत्नकथां श्रोतुमिच्छामहे वयं प्रभो ॥७६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने हिमाद्रिकृतपूजां प्रगृह्य केदारकैलासमानसरोहनूमत्पर्वत-काशीविन्ध्यसप्तपुरभृगुकच्छगोपनाथादीन् वीक्ष्य हरेः लोमशवापिकागमनं ब्रह्मप्रियाणां मौक्तिकहीरका-द्युत्पत्तिजिज्ञासा चेत्यादिनिरूपणनामा षष्ट्यधिक-शततमोऽध्यायः ॥ १६० ॥

**श्रीपुरुषोत्तम उवाच—**

शृणुत ब्रह्मकान्ता यद् पृष्टं रत्नसमुद्भवम् ।
पूर्वाख्यानं वदाम्यत्र बलप्रबलभक्तजम् ॥ १ ॥
वैकुण्ठे पार्षदाः सर्वे ये वसन्ति मम प्रियाः ।
बलश्च प्रबलश्चापि द्वौ तेषु समतिष्ठतः ॥ २ ॥
श्रीमल्ललितालक्ष्म्यास्तौ धाम्नि श्रीपुरसंज्ञके ।
मया तौ प्रेषितौ दिव्यौ पार्षदौ द्वारपालकौ ॥ ३ ॥
श्रीललितामहालक्ष्म्या चार्थितौ मां प्रति ध्रुवौ ।
मयाऽऽज्ञप्तौ ययतुस्तौ श्रीपुराख्यं श्रियः पुरम् ॥ ४ ॥
सत्कृतौ तौ ललितया द्वाःपालत्वे नियोजितौ ।
सशस्त्रौ चाऽनलसौ च स्वामिभक्तिपरायणौ ॥ ५ ॥
समुकुटौ शुभवेषौ मणिरत्नादिभूषितौ ।
तेजःपरिधिवृत्ताऽऽस्यौ सौम्यौ पंकजलोचनौ ॥ ६ ॥
अथ नित्यं ललितायाः सख्यो दास्योऽप्यसंख्यकाः ।
प्रातश्चार्घ्यादि चादाय समायान्ति श्रिया गृहम् ॥ ७ ॥
दिव्ये श्रीनिर्झरे स्नात्वा कृष्णोद्यानसुमानि च ।
नूतनानि सुगन्धीनि समादाय प्रयान्ति च ॥ ८ ॥
काश्चित् कदम्बपुष्पाणि काश्चिद् बाकुलकानि च ।
काश्चिदशोकपुष्पाणि काश्चित् कुन्दकलीः शुभाः ॥ ९ ॥
काश्चित् श्रीकुसुमान्येव पारिजातसुमानि च ।
काश्चिच्छृङ्गारपुष्पाणि काश्चित्तु कमलानि वै ॥१०॥
काश्चित्तु चाम्पकान्येव काश्चित् स्थलाब्जकानि च ।
नीत्वा काश्चिद्यूथिकानां गुच्छानां कुसुमानि च ॥११॥
काश्चित् सहस्रपत्राणि तथा कादम्बकानि च ।
एवं सहस्ररूपाणि प्रसंगृह्य प्रयान्ति च ॥१२॥
काश्चिच्चन्दनकुंकुमकर्दमान् गृह्य यान्त्यपि ।
संगृह्य सर्वशृंगारोचितवस्तूनि चापराः ॥१३॥
इतराः कज्जलादीनि सुगन्धितैलकानि च ।
गन्धसारांश्च काश्चित् संगृह्य यान्त्यर्हणाय ताः ॥१४॥
अपरास्तुलसीपत्राणि संगृह्य प्रयान्ति च ।
फलान्यन्या भोजनानि चापराः स्वर्णमुद्रिकाः ॥१५॥
पराश्च रत्नहारांश्च छत्रचामरकाणि च ।
धूपदीपानुपदाश्च नीत्वा यान्ति श्रियं प्रति ॥१६॥
असंख्याताः प्रयान्त्येव सम्मर्दो गोपुरेऽभवत् ।
सखीनां पूजिकानां वै कोलाहलोऽपि चोत्कटः ॥१७॥
अशब्दश्रवणो जातो गोपुरे ललिताश्रियाः ।
युवतीनां तदाऽऽवेशनिर्गमादिप्रवाहजः ॥१८॥
सम्मर्दोऽभून्महांस्तत्र गोपुरे स्तब्धताकरः ।
प्रबलस्याऽऽसनं चापि बलस्याऽप्यासनं तथा ॥१९॥
सम्मर्दितं युवतीभिः पतन्तीभिर्हि पार्श्वयोः ।
वेदिकोपरि काश्चिच्चारोहयामासुरेव च ॥२०॥
सम्मर्दाऽलब्धमार्गास्ताः सम्मर्दभयवेपिताः ।
प्रबलश्चानुजो हस्तौ चाञ्जलिश्चौ विधाय च ॥२१॥
प्रार्थयत्येव शनकैर्गमनार्थं सखीजनान् ।
असम्मर्दार्थमेवापि साम्ना नत्वा वदत्यपि ॥२२॥
बलस्तु बलसम्पन्नः प्रार्थनया वदत्यपि ।
शनैर्यान्तु शनैर्यान्तु सम्मर्दं माऽऽचरन्त्विह ॥२३॥
आवयोरासने चापि चूर्णिते मर्दिते यतः ।
एवं शान्त्या कथ्यमानास्वपि स्त्रीषु तदा रमे ॥२४॥
सम्मर्दितासु चान्योन्यं पतन्तीषु च गोपुरे ।
बलस्य पार्षदस्यापि पतनं समजायत ॥२५॥
तस्योपरि सखीनां च पादन्यासास्तदाऽभवन् ।
मुकुटो नाशमापन्नो वेषो धूलिप्रकर्दमी ॥२६॥
समजायत शस्त्रादि न्यपतद्वस्ततस्तथा ।
एवं वै पतने जाते बलः क्रोधमवाप ह ॥२७॥
जयाप्रज्ञापाशवतीमाणिक्यादिसखीजनात् ।
कफोणिकाभ्यां हस्ताभ्यां पार्श्वाभ्यां वक्षसा तथा ॥२८॥
उत्थायोत्सारयामास धक्कां दत्वाऽतिवेगतः ।
धिक्कारांश्चापि दत्वा स पतितांश्च सखीजनान् ॥२९॥
धृत्वा हस्ते समुत्तोल्योत्थाप्य दूरेऽकरोत्तदा ।
सख्योऽप्यकाले पतने पारवश्येऽतिमर्दके ॥३०॥
सम्मर्दाधीनपतना वीक्ष्य क्रुद्धं बलं तथा ।
धिक्कुर्वन्तं ददानं च धक्कामुत्सारणस्थितम् ॥३१॥
मारयन्तं कफोणिभ्यां प्रमत्तमिव वै रुषा ।
पतस्वेति पतस्वेति प्राहुर्जयादयश्च तम् ॥३२॥
नात्र योग्यो भवानास्ते श्रीगोपुरे रुषान्वितः ।
प्रबलोऽत्र सदा योग्यः सौम्यः सर्वसहो मुहुः ॥३३॥

मिष्टाकृतिर्मधुरा च वाणी यस्य शुभश्रवा ।
विनयश्च सहिष्णुत्वं तैक्ष्ण्यं यत्र न विद्यते ॥३४॥
नारीतुल्याऽवलश्चायं प्रबलोऽपि सुदास्यभृत् ।
न धिक्कारं न वै धक्कां करोति मर्दितोऽपि सन् ॥३५॥
प्रत्युत स्तवनं चायं करोति चाभिवन्दति ।
प्रबलोऽयं सदा योग्यः स्थातुमत्र बलो न तु ॥३६॥
पतत्वेवाऽचिरात् सृष्टौ ब्रह्माण्डे वेधसः खलु ।
भुंक्ष्व फलं कफोणीनां फलं दुर्विनयस्य च ॥३७॥
इत्युक्तः सहसा जातो विवर्णः पतनोन्मुखः ।
रुषा युक्तो मानवाँश्च नारायणबलेधितः ॥३८॥
स्वं श्रेष्ठं मन्यमानश्च प्रत्याह वचनं सरुट् ।
जयाप्रज्ञापाशवतीमाणिक्याश्चापराः स्त्रियः ॥३९॥
या मां पतस्व प्राहुर्वै ताः पतन्त्वपि वेधसः ।
ब्रह्माण्डे यत्र कुत्रापि भुङ्क्ष्वं फलं वियोगजम् ॥४०॥
हरेर्वियोगजं दुःखं धामवियोगजं तथा ।
इत्येवं च मिथो वाक्ये शापात्मके तु निःसृते ॥४१॥
तच्छ्रुत्वा श्रीललिताख्या लक्ष्मीस्तत्र द्रुतं ययौ ।
वृत्तान्तं सकलं ज्ञात्वा क्षणं शुशोच भामिनी ॥४२॥
बलश्चापि जयाद्यास्तां पतनेऽपि विमुक्तये ।
प्रार्थयामासुरत्यन्तं शापनिवृत्तिमित्यथ ॥४३॥
ललिताश्रीः समुवाच मदिच्छया ह्यजायत ।
सम्मर्दः पतनाद्यं च शोकस्तत्र न विद्यते ॥४४॥
मयाऽपि तत्र गन्तव्यं यत्र यूयं सखीस्त्रियः ।
अनादिश्रीकृष्णनारायणः पुरुषोत्तमः ॥४५॥
तत्र देशे स्वयं चाप्यागमिष्यति न संशयः ।
लोकोद्धारणकार्यार्थं सखीमानसपूर्तये ॥४६॥
प्रज्ञेयं च जयेयं च पाशवतीयमित्यपि ।
माणिक्येयं कृष्णपत्न्यो भविष्यथ मया सह ॥४७॥
पतनस्य वियोगस्य दुःखं न स्याद्धि भूतले ।
कृष्णयोगेन सततं सुखवत्यो भविष्यथ ॥४८॥
अपरं च बलश्चायं पार्षदो हरिणोदितः ।
मद्वोपुरे नियुक्तश्च रुषा शापमवाप्तवान् ॥४९॥
सोऽपि कृष्णेच्छया ह्यल्पो मदिच्छयाऽपि वै तथा ।
बलोऽयं रोषयुक्तो वै ब्रह्माण्डे वेधसः खलु ॥५०॥
आसुरेण तु भावेन रोषेण सहितो जनु ।
ग्रहीष्यतीति देवाद्यैर्मृतो मोक्षमवाप्स्यति ॥५१॥
तच्छरीरोत्थधातूनां परिणामात्मका भुवि ।
स्वर्गे चापि सुमणयो रत्नानि भौतिकानि च ॥५२॥
भविष्यन्तीति सर्वत्र पूजार्हाणि समन्ततः ।
इत्येवं सुमहत्कार्यकरणार्थं मयाऽपि च ॥५३॥
नारायणेनाऽपि देव्याः पतनं चाऽभिवाञ्छितम् ।
बलस्य पतनं चाभिवाञ्छितं मणिहेतवे ॥५४॥
यथाऽभिलषितं मेऽपि तत्तथैव भविष्यति ।
बलोऽयं पार्षदो दिव्यो नारायणस्य भक्तराट् ॥५५॥
महाभागवतश्रेष्ठः पावनो लोकपावनः ।
तस्य पावनदेहोत्था मणयोऽपि च पावनाः ॥५६॥
धृताश्च पावना लोकान् पावयिष्यन्ति पापतः ।
रक्षयिष्यन्ति दुःखेभ्यश्चोपद्रवेभ्य इत्यपि ॥५७॥
विभूषाश्च भविष्यन्ति रत्नानि देहजानि वै ।
मणिमूर्तिर्हरिश्चापि निवत्स्यति तु भूतले ॥५८॥
एवं मोक्षो बलस्यापि देवैर्नारायणेन वै ।
पुनः शीघ्रं ततः सख्यो भविष्यति द्रुतं भुवि ॥५९॥
अहं ललितारूपेण भविष्याम्यपि भूतले ।
अनादिश्रीकृष्णनारायणदासी नृपात्मजा ॥६०॥
दक्षिणे ललितालक्ष्मीर्भविष्यामि तु काञ्चिके ।
अनेकोद्धारकार्यार्थं सर्वं योग्यं भविष्यति ॥६१॥
इत्युक्त्वा ललितालक्ष्मीः श्रीपुरे धाम्नि गोपुरे ।
उक्त्वा ययौ स्वासनं च जयाद्या न्यपतन् द्रुतम् ॥६२॥
ब्रह्माण्डे भूतले चात्र यथेष्टं जन्म चाप्नुवन् ।
बलोऽपि चात्र लोके चाऽसुरभावो व्यजायत ॥६३॥
दितेः पुत्रः कश्यपाद्वै बलको नामतोऽभवत् ।
महासुरो हि दैतेयः सुकेश्याद्यग्रजो महान् ॥६४॥
तपस्तेपे समुत्पन्नो जातिस्मरोऽतिहर्षितः ।
शतवर्षं मेरुपृष्ठे विष्णुं समभिध्याय च ॥६५॥
पृथ्व्यां तु मस्तकं कृत्वा पादौ कृत्वा तथाऽम्बरे ।
समाधिमिव चापन्नो वल्लिकाजालसंवृतः ॥६६॥
पादयोर्वल्लिकापृष्ठे पक्षिनीडो व्यजायत ।
वल्लीबद्धः शतवर्षं निश्चलोऽतिष्ठिपत्तथा ॥६७॥
शुष्कमांसोऽभवच्चापि नारायणं हृदि स्मरन् ।
तदाऽहं पुरतो यातस्तस्य शापविमुक्तये ॥६८॥
मया ता वल्लिकाः सर्वाः स्वहस्तेन विदूरिताः ।
हस्ताभ्यां च मया स्पृष्टः किञ्चिज्ज्ञानमवाप सः ॥६९॥
विवेद मम हस्तौ स कोमलौ स्पर्शमात्रतः ।
मया चाप्लावितस्तूर्णमूर्ध्वाननो बभूव ह ॥७०॥
चकार दण्डवच्चापि रुरोदाश्रूणि संत्यजन् ।
प्रेमविह्वलगात्रश्चाऽर्थयन्मोक्षं वियोनितः ॥७१॥

विष्णुः प्राह सदा मे त्वं भक्तोऽसि पावनस्तथा।
दत्वा स्वदर्शनं भक्त पावितोऽसि ततोऽधिकः ॥७२॥
शृणु शीघ्रं हि दानव्या योनेर्विमोक्ष्यसे स्वितः।
तपस्त्यक्त्वा चेन्द्रलोकं याहि बलं च दर्शय ॥७३॥
दैत्यं भक्तं विजेतुं वै न शक्ता देवकोटयः।
भविष्यन्ति यदा सेवां करिष्यन्ति च ते तदा ॥७४॥
प्रसन्नस्त्वं वरदानं तेभ्यो दास्यसि चोत्तमम्।
यज्ञे समित् स्वरूपस्त्वं याचितो वै भविष्यसि ॥७५॥
तदा ते हननं सर्वे करिष्यन्ति च संहताः।
तव देहसमुत्थाश्च भविष्यन्ति तु हीरकाः ॥७६॥
मणयो विविधाश्चापि रत्नानि विविधानि च।
मोक्षस्ते च तदा तूर्णं भविष्यति न संशयः ॥७७॥
इत्युक्त्वा मम चक्रं तु दत्वाऽदृश्योऽभवं स तु।
तपस्त्यक्त्वा ययौ स्वर्गं युद्धं चेन्द्रादयाचत ॥७८॥
समरे दत्तवान् युद्धं महेन्द्रो निर्जितोऽमुना।
सूर्यश्चन्द्रोऽपि विजितौ दिक्पाला विजिता अपि ॥७९॥
लोकपाला जिताश्चापि विष्णुसुदर्शनेन वै।
इन्द्राद्या निर्जितास्तेन तैर्निर्जेतुं न शक्यते ॥८०॥
देवाः परवशा भूत्वा बलसेवां प्रचक्रिरे।
सेवया स बलोऽत्यन्तं प्रसादितो वराय तान् ॥८१॥
सुरान् स प्रैरयत्तेऽपि सुरा विचार्य वै तदा।
विष्णुवाक्यं प्रसंस्मृत्याऽयाचन्त लाभकृत्विजम् ॥८२॥
यदि देयो वरो नोऽस्ति यदि सत्यवचो भवान्।
यदि सेवाप्रतुष्टोऽसि भक्तिमांश्च नरायणे ॥८३॥
तदा देहि वरं सर्वसुरेष्टमेकमुत्तमम्।
यज्ञो नारायणः साक्षात्तत्र समित् स्वयं भव ॥८४॥
अस्माभिर्देवदैत्यैश्च नागैः सर्पैश्च दानवैः।
मिलित्वा होममापन्नो मोक्षस्त्वं वै गमिष्यसि ॥८५॥
इत्युक्तो बलको दैत्यः प्रसन्नश्चात्यजायत।
विष्णोरर्थे समित् प्राहं भाग्यं यत् परमं मम ॥८६॥
देवार्थे मरणं सर्वार्पणं श्रेष्ठं भवेदिह।
मृत्युशीलो हि संसारो मरणं देवतार्थकम् ॥८७॥
यदि लभ्येत् गोऽर्थे च गुर्वर्थे माधवार्थकम्।
धर्मार्थे धर्मकार्यार्थे ततो लाभः परस्तु कः ॥८८॥
अहो भाग्यमहो भाग्यं मम चाऽद्य परं स्थितम्।
यदहं विष्णुदेवस्य मुखगः कल्पितः सुरैः ॥८९॥
आत्मनिवेदिता मेऽद्य सम्पत्स्यते सुशोभना।
विचार्येत्थं तथास्त्वेवं वरदानं ददौ तदा ॥९०॥

सुराश्च वरदानं तत् प्राप्य मेरोस्तु पश्चिमे।
नितम्बे मखभूमिं च कारयामासुरुत्सुकाः ॥९१॥
आकारितास्तत्र देवा दैत्याश्च दानवाः खगाः।
महर्षयश्च पितरो मानवा वृक्षवल्लयः ॥९२॥
यक्षाश्च राक्षसाश्चापि पिशाचा भूतयोनयः।
कुष्माण्डाः किन्नरा नागा गन्धर्वा भोगिनस्तथा ॥९३॥
सर्पा आसुरमूर्धन्या अप्सरसस्तथाऽऽपगाः।
समुद्राश्च तथाऽरण्यान्यपि भूभृत उच्छ्रयाः ॥९४॥
मेघाश्च विद्युतश्चापि खनयश्चौषधिव्रजाः।
तत्त्वान्यामन्त्रितान्येवाऽऽययुस्तत्र महाऽध्वरे ॥९५॥
यज्ञकार्ये ब्रह्मविष्णुमहेशाद्यैः प्रवर्तितम्।
बलो ददौ समिद्रूपं निजं तत्र तदा क्षणे ॥९६॥
निषसादाऽध्वरे यावत् प्रोक्षितो वर्धिनीजलैः।
तावत् समित्स्वरूपः स महानद्रिसमोऽभवत् ॥९७॥
महापुंजो यथावृक्षवल्लीसस्योद्भवोऽभवत्।
व्रीहिपुष्पफलाढ्यश्च घृतमिष्टरसोऽभवत् ॥९८॥
न ज्ञायते प्राणिरूपो हव्यरूपोऽभवत्तदा।
सर्वहव्यानि चाद्रौ वै दृश्यन्ते तत्र वै तदा ॥९९॥
हव्यस्य पर्वताकारं बलं मत्वा विवर्तितम्।
कृत्वा तु पावनं प्रोक्ष्य देवा होमं व्यधुस्तदा ॥१००॥
वह्नावाहुतयस्तस्य लक्षशो वै तदाऽभवन्।
वीजकणाज्यफलसद्रसात्मिकाः सुगन्धयः ॥१०१॥
तस्य विशुद्धसत्त्वस्य बलस्याऽवयवाः शुभाः।
वह्नौ समिधः क्षिप्तास्ता रत्नबीजानि चाऽभवन् ॥१०२॥
सूर्यचन्द्रसमाभानि बीजानि कुण्डके तदा।
दृष्ट्वा सुरादयस्तांश्च जगृहुर्मूल्यवेदिनः ॥१०३॥
देवानामथ यक्षाणां सिद्धानां पवनाशिनाम्।
मानवानां महर्षीणामध्वरिणां समन्ततः ॥१०४॥
रत्नबीजमयो ग्राहः सुमहानभवत्तदा।
कुण्डाद् गृह्णन्ति देवाद्या उत्प्लुत्याऽम्बरमार्गतः ॥१०५॥
संप्रगृह्य दूरं यान्ति विमानैर्वै निजान् गृहान्।
परस्परावकर्षैश्च सम्मर्दोऽभूत्तदा महान् ॥१०६॥
अम्बरे रत्नबीजार्थमास्कन्दनं महत्त्वभूत्।
आस्कन्दिते व्योममार्गात् पेतुर्बीजानि यानि च ॥१०७॥
वेगात्पततां विमानैर्हस्ताभ्यां पतितानि च।
पर्वतेषु समुद्रेषु सरित्सु काननेष्वपि ॥१०८॥
वृक्षेषु मेघमार्गेषु भूमौ सरोवरेष्वपि।
तत्तद्गुणैश्च बीजानि रत्नानि चाभवँस्तदा ॥१०९॥

आवेदगुणयुक्तानि विविधानि तदाभवन् ।
इत्येवं रत्नजातानामुद्भवो वः प्रकीर्तितः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने बलाऽऽख्यपार्षदस्य श्रीपुरधाम्नो जयादिभिः परस्परशापेन पतनं बलदैत्यस्य यज्ञे समित्स्वरूपिणः काय-तत्त्वेभ्यो रत्नानामुत्पत्तिरित्यादिनिरूपणनामा एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

श्रीपुरुषोत्तम उवाच—

शृण्वन्तु श्रीरमाद्याश्च जयाद्या मम वै प्रियाः ।
तानि रत्नानि सर्वाणि महागुणानि सन्ति वै ॥ १ ॥
भूतरक्षोविषव्यालव्याधिघ्नान्यघहान्यपि ।
भवन्ति गुणयुक्तानि तथैव विगुणान्यपि ॥ २ ॥
वज्रा मुक्ताः पद्मरागा मरकता मणीश्वराः ।
इन्द्रनीलाश्च वैदूर्याः पुष्परागाश्च जातयः ॥ ३ ॥
कर्केतनाः सपुलका रुधिराः स्फटिकास्तथा ।
विद्रुमा मौक्तिकाः काचा मणयस्ते भवन्ति वै ॥ ४ ॥
आकारं च तथा वर्णं गुणं दोषं च तत्फलम् ।
परीक्ष्य मूल्यमेतेषां निर्णीयते न चान्यथा ॥ ५ ॥
कुलग्नेष्वप्ययुज्यन्ते यानि चोपहतेऽहनि ।
दोषाढ्यानि भवन्त्येव वियोजयन्ति सम्पदा ॥ ६ ॥
तस्मात् परीक्ष्य रत्नानि गृह्णीयाद् धारयेदपि ।
शुभे काले शुभान्येव परां श्रियं ततो लभेत् ॥ ७ ॥
वज्रमणिः समस्तेषु महाप्रभाववान् भवेत् ।
बलाऽस्थिसमिद्बीजानि निपेतुर्यत्र तत्र च ॥ ८ ॥
वज्राणि वज्रनामानि जातानि विविधानि च ।
हैमामातंगसौराष्ट्राः पौण्ड्रकलिंगकोसलाः ॥ ९ ॥
वेणातटाश्च सौवीरा देशा वज्रोद्भवान्विताः ।
आताम्रा हिमशैलोत्था मातंगोत्थाः कपीशिनः ॥१०॥
सौराष्ट्रजास्तु ताम्रास्ते श्यामाः पुण्ड्रभवा मताः ।
कलिंगोत्थाः स्वर्णवर्णाः पीतप्रभास्तु कोसले ॥११॥
वेणातटीयाः शशिभाः सौवीरे मेघकान्तयः ।
सम्यक् समं तु पार्श्वेषु गुणवद्वर्णवल्लघु ॥१२॥
रेखाबिन्दुकाकपदकलंकत्रुटिवर्जितम् ।
परमाणुमात्रमपि वज्रं वज्रोत्तमं हि तत् ॥१३॥
यदि तीक्ष्णाग्रधारं तत् तस्मिन् देवसमाश्रयः ।
लाभदं चावितथं तत् सर्वसौख्यप्रदं धृतम् ॥१४॥
यथावर्णस्तथा देवनिवासस्तैजसो यथा ।
तथामूल्यं तथा देवाभिधानं चापि कल्प्यते ॥१५॥
वर्णभेदेन वज्रेषु भिन्ना देवा वसन्ति हि ।
हरित्सु हरिरेवाऽऽस्ते श्वेतेषु वरुणः स्वयम् ॥१६॥
पीतेषु शक्रएवाऽऽस्ते पिङ्गेषु तु हुताशनः ।
श्यामेषु पितरः सन्ति ताम्रेषु मरुतस्तथा ॥१७॥
विप्रः कुमुदस्फटिकशंखाभं धारयेद्धितम् ।
क्षत्रियः शशबभ्रुक्षिसदृशं धारयेन्मणिम् ॥१८॥
वैश्यः कदलीदलभं धारयेल्लाभदं मणिम् ।
शूद्रः स्वच्छकरवालनिभं सन्धारयेन्मणिं ॥१९॥
जपाविद्रुमशोणं वा हरिद्रारससन्निभम् ।
द्वौ वज्रवर्णौ राजानो धारयेयुर्हितप्रदौ ॥२०॥
सर्वरङ्गमयं वज्रं राजा वै धारयेन्मणिम् ।
अधरोत्तरवृत्तोऽपि बहुवर्णयुतो मणिः ॥२१॥
राजयोग्यो नेतरेषां वर्णानां कष्टदो हि सः ।
वज्रो विभूतिर्गुणिनामन्येषां व्यसनप्रदः ॥२२॥
यस्य शृंगं दलितं वा विशीर्णं लोक्यते यदि ।
सगुणोऽपि न वै धार्यः श्रेयोऽर्थिभिः कदाचन ॥२३॥
विशीर्णस्फुटितशृंगो मलपृषतमध्यकः ।
वज्रः श्रियं नाशयति न रक्ष्यो भवने क्वचित् ॥२४॥
यदेकदेशो रक्ताभो यद्वा लोहितवर्णवान् ।
स कुर्यान्मृत्युरेवाऽयं मणिर्धार्यो न वै क्वचित् ॥२५॥
कोट्यः पार्श्वानि धाराश्च षडष्टौ द्वादशेति च ।
उत्तुंगसमतीक्ष्णाग्रा वज्रस्याऽऽकरजा गुणाः ॥२६॥
षट्कोटिशुद्धममलं प्रस्फुरत्तीक्ष्णधारकम् ।
लघु वर्णान्वितं दोषशून्यं तथा सुपार्श्वकम् ॥२७॥
इन्द्रायुधांशुरंगाढ्यकृताभिव्योममण्डलम् ।
दुर्लभं धारयेद् वज्रमायुःस्त्रीधनवर्धकम् ॥२८॥
सम्पद्द्रोपशुधान्यानां सम्पदां च प्रवर्धकम् ।
व्यालवह्निविषव्याघ्रतस्कराऽम्बुभयापहम् ॥२९॥
आथर्वणाभिचाराणां दूरान्निवर्तकं मणिम् ।
विंशतितण्डुलभारं वज्रं गुणाऽग्र्यमूल्यकम् ॥३०॥
गुणैः प्रभया स्नेहेन गुरुत्वेनांऽशहीनकम् ।
वज्रं न्यूनं मतं तद्वै मूल्ये लाभे सुखादिषु ॥३१॥
अर्धे त्वर्धगुणं प्रोक्तं पादं पादगुणं भवेत् ।
पादार्धगुणकं चापि मूल्ये पादार्धकं भवेत् ॥३२॥
त्रिंशद्भागं शतांशं चाऽशीतिभागं तथा ह्यपि ।
सहस्रभागं वज्रं स्यात् सूक्ष्मं गुणेऽपि शक्तिमत् ॥३३॥

अष्टाभिः सर्षपैश्चापि वज्राणां गुरुता भवेत् ।
यत्तु सर्वगुणैर्युक्तं वज्रं तरति वारिषु ॥३४॥
रत्नवर्गे समस्तेऽपि धारणं तस्य विद्यते ।
स्वल्पमात्राऽपि गुरुता धारणे त्वनुमीयते ॥३५॥
कर्तव्यं धारणं तस्मात् परमाणोरपि ध्रुवम् ।
अल्पोऽपि दोषवान् वज्रो दशांशमूल्यवान् भवेत् ॥३६॥
प्रकटाऽनेकदोषस्तु शतांशमूल्यवान् भवेत् ।
बहुदोषस्य वज्रस्य मूल्यं स्वल्पं विभूषणे ॥३७॥
सन्नह्य धार्यते तादृक् सदोषं लघुहानिदम् ।
अलं सदोषवज्रस्य भूषायां धारणं ह्यपि ॥३८॥
नार्या वज्रमधार्यं वै सगुणं ह्यपि कर्हिचित् ।
पुत्रप्रसवमिच्छन्त्या नैव धार्यं कदाचन ॥३९॥
धार्यं तु दीर्घं चिपिटं ह्रस्वं वज्रं च निर्गुणम् ।
अयसा पुष्परागेण तथा गोमेदकेन च ॥४०॥
वैदूर्येण स्फटिकेन काचैश्चापि पृथग्विधैः ।
प्रतिरूपाणि जायन्ते कुशलैर्वज्रसन्निभाः ॥४१॥
क्षारोल्लेखनशालाभिस्तेषां कार्यं परीक्षणम् ।
पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः ॥४२॥
सर्वाणि विलिखेद् वज्रं तच्च तैर्न विलिख्यते ।
गुरुता सर्वरत्नानां श्रेष्ठत्वे च प्रभाऽच्छता ॥४३॥
कारणं वज्रके हेतुर्लघुता च प्रभाऽच्छता ।
वज्रजातिरजातिं वै विलिखन्ति समन्ततः ॥४४॥
वज्रेण लिख्यते वज्रं वज्रं नाऽन्येन लिख्यते ।
वज्राणि मुक्तामणयो ये च केचन जातयः ॥४५॥
न तेषां प्रतिबद्धानां भा भवत्यूर्ध्वगामिनी ।
तिर्यक्क्षतत्वात् केषांचित् कथञ्चिद् यदि दृश्यते ॥४६॥
तिर्यगालिख्यमानानां सा पार्श्वेषु विहन्यते ।
विशीर्णकोटिवज्रो विवर्णः सरेखबिन्दुकः ॥४७॥
सेन्द्रायुधश्चेत् पुत्रादीन् धनं धान्यं ददाति सः ।
विद्युत्प्रभमिन्द्रवज्रं दधानो नृपतिः खलु ॥४८॥
पराक्रमेण तस्यैव साम्राज्यं लभते भुवि ।
कथितं वज्ररत्नं वो ब्रह्मप्रियास्ततः परम् ॥४९॥
मुक्ताफलात्मकं रत्नं कथयामि निबोधत ।
अच्छाः स्वच्छाः सान्द्रभाश्च मलभाश्च पृथक् पृथक् ॥५०॥
हस्तिमेघक्रोडशंखमीनाऽहिशुक्तिवेणुजाः ।
पृथ्वीसलिलजा मुक्ता मणयः संभवन्ति वै ॥५१॥

शुक्त्युद्भवं मुक्तकं तु श्रेष्ठं सर्वेषु गण्यते ।
शुक्त्युद्भवं भवेद् वेध्यं शेषाण्यवेध्यकानि हि ॥५२॥
वेणुहस्तिमत्स्यसूतं शंखजं च वराहजम् ।
भासाहीनं यद्यपि स्यान्मंगलं तत् प्रशस्यते ॥५३॥
शंखोद्भवं गजोत्थं च मुक्तारत्नं कनिष्ठकम् ।
गजकुंभमध्यवर्णं पीतं वा निष्प्रभं तथा ॥५४॥
बृहत्कोणपलमानं शांखं चापि कनिष्ठकम् ।
श्रेष्ठाः शंखा हस्तिनश्च शुद्धवंश्यास्तु ये मताः ॥५५॥
तेषु वृत्तानि पीतानि जायन्ते निष्प्रभाण्यपि ।
मीनेषु यानि जायन्ते सुवृत्तानि लघून्यपि ॥५६॥
अतिसूक्ष्माणि पाठीनपृष्ठवर्णानि तानि च ।
मत्स्याऽऽननेषु जायन्ते पयोधेर्मध्यतः खलु ॥५७॥
वाराहदंष्ट्राप्रभावं दंष्ट्रांकुरसमानभम् ।
भूतलोत्थं च मुक्ताख्यं क्वचित् तादृङ् मतं शुभम् ॥५८॥
उपलोत्थं च तद्वर्णं वंशोत्थं तत्समानभम् ।
वेणवोऽपि भव्यजनैर्भोग्याः सर्वत्र नैव ते ॥५९॥
भुजंगजानि रत्नानि वृत्तानि चोज्ज्वलानि च ।
धौतानीव भवन्त्येव खड्गधाराप्रभाणि च ॥६०॥
भौजंगममौक्तिकधृक् पुण्यवान् तेजसाऽन्वितः ।
राज्यश्रीमान् भवेदेव प्रभावाढ्यो भवेदपि ॥६१॥
रत्नमूल्यस्य जिज्ञासुः शुभे मुहूर्तके खलु ।
रक्षितं सुमहत् कृत्वा स्थापयेद् भवनोपरि ॥६२॥
तदाऽम्बरे महाघोषा भेरीनादा भवन्ति हि ।
विद्युतो विस्फुरणानि घनाश्चापि भवन्ति हि ॥६३॥
एतादृशं मौक्तिकं तु यत्र कोषे गृहेऽस्ति वा ।
न तत्र सर्पा विघ्नानि यातुधानाश्च नाऽऽधयः ॥६४॥
उपसर्गा व्याधयो न यत्र भुजंगमौक्तिकम् ।
अथ मेघोद्भवं यत् स्यान्मौक्तिकं तत्तु देवताः ॥६५॥
व्योममार्गाद्धरन्त्येव त्वादित्यार्चिसमप्रभम् ।
रात्रौ भाति दिवावत्तद् यत्रास्ते प्रभया स्वया ॥६६॥
एतादृशस्य रत्नस्य मूल्यं स्वर्णमयी मही ।
अपि नैव सुपर्याप्ता यतस्तत् स्वर्णरत्नदम् ॥६७॥
यस्याऽग्रे रत्नमेतत् स्याद् भुंक्ते सक्षितिमण्डलम् ।
प्रजानां नृपतेश्चापि वर्धन्ते भाग्यकान्तयः ॥६८॥
योजनानां सहस्रेषु ह्यनर्था यान्ति नैव तु ।
एतादृशानि मुक्तानि बलस्य दन्तरूपिकाः ॥६९॥

समिधो याः कृतास्तत्राऽध्वरे ताभ्यस्तदा तदा ।
बीजानि यानि जातानि विचित्रवर्णकानि वै ॥७०॥
समुद्राणां जले यानि निपेतुः शुद्धकानि हि ।
चन्द्रांऽशुकान्तिरम्याणि शुक्तिजानि हि तानि वै ॥७१॥
द्वीपे तु सैंहले तानि सौराष्ट्रे ताम्रपर्णके ।
पारशवे पारलोके कौबेरे पाण्ड्यदेशके ॥७२॥
हाटके हेमके चेति जायन्ते शुक्तिजानि वै ।
शुक्त्युत्थं नातिनिकृष्टवर्णं गुणप्रभायुतम् ॥७३॥
संस्थानमानयुक्तं च जायते वर्धनादिषु ।
वर्धने पारसीके च पाताले सिंहलेऽपि च ॥७४॥
शुक्तिजस्यैकस्य मुक्ताफलस्य शाणयोगिनः ।
मूल्यं मुद्राः सहस्रे द्वे राजत्यः संभवन्ति हि ॥७५॥
माषार्धहीनरत्नस्य दशांशहीनमूल्यकम् ।
माषकत्रयगुरु यत् सहस्रद्वयमूल्यकम् ॥७६॥
सार्धद्वयमाषकस्य मूल्यं सार्धसहस्रकम् ।
माषकद्वयगुरु यन्मूल्यं सहस्रमुद्रकम् ॥७७॥
सार्धमाषकगुरु यन्मूल्यं पञ्चशतानि वै ।
षड्गुञ्जागुरु यद् रत्नं तस्य सार्धशतद्वयम् ॥७८॥
चतुर्गुञ्जागुरु यत्तन्मूल्यं शतद्वयं मतम् ।
गुञ्जाद्वयगुरु यत् तन्मूल्यं शतं मतं तथा ॥७९॥
गुञ्जैकगुरुमूल्यं तु पञ्चाशन्मुद्रिकाः खलु ।
षोडशगुञ्जाधरणं दार्विकाख्यं भवेद्धि तत् ॥८०॥
त्रिंशद्गुञ्जाधरणं तु शिक्यं रत्नं तदुच्यते ।
निकृष्टानि तु रत्नानि त्रिंशन्मूल्यानि तानि वा ॥८१॥
विंशतिमूल्यकान्येव दशमूल्यानि वा तथा ।
अथाऽस्य संपरीक्षा तु भाण्डे जाम्बीरजं रसम् ॥८२॥
निक्षिप्य पच्यते रत्नं घृष्यते पिण्डमूलकैः ।
सरेखं स्यात् कृत्रिमं तन्निकृष्टं वा भवेत् किल ॥८३॥
मृल्लिप्ते पुटके मध्ये निक्षिप्य चाऽनले पचेत् ।
दुग्धे ततश्च पयसि घृते पुनर्जलेषु च ॥८४॥
ततो वस्त्रैर्घर्षणेन गुणकान्तियुतं भवेत् ।
तच्छ्रेष्ठं सत्यमेवेति मौक्तिकं क्षतिवर्जितम् ॥८५॥
श्वेतकाचसमं हेमनद्धं धार्येत भूषणम् ।
कृत्रिमं चेति सन्देहे कार्यं पुनः परीक्षणम् ॥८६॥
उष्णे सलवणे स्नेहे निशां तद् वासयेज्जले ।
व्रीहिभिर्मर्दनीयं तच्छुष्कवस्त्रान्तरीकृतम् ॥८७॥
यदि नाऽऽयाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ।
सितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्मलम् ॥८८॥
तेजोऽधिकं सुवृत्तं च मौक्तिकं गुणवद्धि तत् ।
नाऽस्य भर्तारमेकोऽपि दोषोऽनर्थं उपैति वा ॥८९॥
एवं मुक्तामणयो वै मयोक्ता वो हरिप्रियाः ।
पद्मरागान् प्रवक्ष्यामि शृणुतैतान् यथोद्भवान् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वज्रमणेर्मुक्तमणेश्चोत्पत्तिमूल्यश्रैष्ठ्यादिनिरूपणनामा द्वाषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

श्रीपुरुषोत्तम उवाच—

सूर्यदेवो बलस्याऽसृवसमिधं प्राप्य बीजकम् ।
ययावाकाशमार्गेण लंकाधिपो रुरोध तम् ॥ १ ॥
समुद्रे चापि रावणगंगायां बीजकानि वै ।
निपेतुस्तज्जरत्नानि जातानि दीप्तिमन्ति ह ॥ २ ॥
उज्ज्वलाश्चारुरागास्ते पद्मरागा हि तोयजाः ।
सौगन्धिकोत्था गुणिनः कुरुविन्दोद्भवास्तथा ॥ ३ ॥
स्फाटिकजाः प्रभावन्तो बहुवर्णास्तथाऽपरे ।
जाता बन्धूकगुञ्जेन्द्रगोपजपाऽसृक्सन्निभाः ॥ ४ ॥
दाडिमकिंशुकपुष्पसिन्दूरोत्पलसन्निभाः ।
पद्मकुंकुमलाक्षाजरसवर्णाः प्रभायुताः ॥ ५ ॥
रागे सान्द्राः स्वप्रभया भान्ति ये स्फुटमध्यिनः ।
स्फाटिकजाः सूर्यभाभिः पार्श्वानि रञ्जयन्ति ते ॥ ६ ॥
कुसुमनीलमिश्राभा उग्ररक्ताम्बुजप्रभाः ।
अन्ये पुष्करपुष्पाभा हिंगुलवत्त्विषोऽपरे ॥ ७ ॥
चकोरपीकसारसनेत्रभाश्चापरेऽपि च ।
कोकनदोत्तमपुष्पत्विषश्चान्ये भवन्त्यपि ॥ ८ ॥
प्रभावकाठिन्यगुरुत्वकैः प्रायः समा इमे ।
स्फाटिकजाः पद्मरागाः नीलरक्तप्रभायुताः ॥ ९ ॥
एते सौगन्धिकोत्थास्तु मणयः प्रायशः समाः ।
एतेभ्यो रंगतो न्यूना मणयः कुरुविन्दजाः ॥१०॥
निरर्चिषोऽन्तर्बहुला नाऽतिप्रभावशालिनः ।
तत्सदृशा आन्ध्रदेशे तुम्बुरुदेशके तथा ॥११॥
सधर्माणः प्रजायन्ते स्वल्पमूल्या हि ते मताः ।
रंगाधिक्यं गुरुत्वं च स्निग्धता समताच्छता ॥१२॥
अर्चिष्मत्ता महत्ता च मणीनां श्रैष्ठ्यबोधकाः ।
ये तु कर्करसदृशाच्छिद्रमलादियोगिनः ॥१३॥
प्रभाहीनाः सपरुषा विवर्णास्ते न चोत्तमाः ।
सदोषं मणिमाबद्ध्य शोकचिन्ताऽऽमयाँस्तथा ॥१४॥

मृत्युं दुःखं वित्तनाशं लभते नात्र संशयः।
पद्मरागसमा विजातीया भवन्ति पञ्च च ॥१५॥
कलसपुरजाश्चापि तुम्बुरुदेशजास्तथा।
मुक्तपाणीयजाताश्च सिंहलोत्थाः श्रीपूर्णका ॥१६॥
कलसोत्थास्तुषयोगा भवन्ति मणयो हि ते।
ताम्रवर्णास्तुम्बुरुतथा कृष्णाः सिंहलदेशजाः ॥१७॥
मुक्ता नमःस्वभावाश्च श्रीपूर्णा दीप्तिवर्जिताः।
तुषयोगे ताम्रवर्णा भवन्ति स्नेहिनोऽपि च ॥१८॥
ये प्रघृष्टा वर्जयन्ति दीप्तिं ते निम्नजातिकाः।
अंगुल्याक्रान्तमूर्धा यो बिभर्ति पार्श्वकृष्णताम् ॥१९॥
अन्यस्य सन्निधिस्थस्य गुणान् यश्च बिभर्त्यपि।
निकृष्टमूल्यवान् स स्यान्मुक्तामणिः समोऽपि वै ॥२०॥
जाते कृत्रिमसन्देहे शाणे तं परिलेखयेत्।
स्वजातकसमुत्थेन विलिखेच्च परस्परम् ॥२१॥
वज्रं वा कुरुविन्दं वा विमुच्याऽन्येन केनचित्।
न शक्यं लेखनं कर्तुं पद्मरागेन्द्रनीलयोः ॥२२॥
यत्र लेखः स निम्नो वै मणिर्नोत्तम उच्यते।
यद्वा कृत्रिम एवापि रेखायुक्तो भवेद् यदि ॥२३॥
कृत्रिमो दोषवाँश्चापि धार्यो नैव मणिः क्वचित्।
सत्येन मणिना साकं कौस्तुभेन समं च वा ॥२४॥
चण्डालस्त्वेक एवापि द्विजातींस्तु बहूनपि।
दूषयत्येव तद्वच्च दुष्टो हन्ति गुणानपि ॥२५॥
सत्यपद्मरागधर्ता सपत्नेषु वसन्नपि।
नाऽऽपद्भिरभिभूयेत न विघ्नैरभिभूयते ॥२६॥
नोपद्रवैर्नोपसर्गैर्न दोषैरभिभूयते।
वर्णदीप्तियुतं श्रेष्ठं तद्धीनं हीनमेव तत् ॥२७॥
श्रेष्ठं रत्नं सदा धार्यं न कनिष्ठं कदाचन।
मूल्यहीनस्य धर्तारं मूल्यहीनं करोति तत् ॥२८॥
अथ ब्रह्मप्रिया! योऽत्र मरकतान् वदामि तु।
बलपित्तसमिद्बीजं गृह्णन् वासुकिरम्बरे ॥२९॥
प्रदुद्राव यदा तत्र गरुडस्तमरोधयत्।
बीजानि न्यपतँश्चापि माणिक्यपर्वतस्थले ॥३०॥
तुरुष्कपादपेष्वेवं नलिकावनवल्लिषु।
श्वेतसागरतीरे च मरकतास्ततोऽभवन् ॥३१॥
गरुडस्य चञ्चुरन्ध्राद् बीजानि पतितान्यपि।
तेभ्यो जाताः शुककण्ठशिरीषपुष्परङ्गिणः ॥३२॥
खद्योतपृष्ठसदृशाः शैवलशाद्वलप्रभाः।
कल्हारशष्पतुल्याश्च भुजंगभुजसत्प्रभाः ॥३३॥
पत्ररंगास्तथा पित्तजातास्ते मणयो मताः।
भुजङ्गभोगबीजोत्थैर्विषं सर्वं प्रशाम्यति ॥३४॥
सर्वौषधिमन्त्रगणैर्यन्न शक्यं चिकित्सितुम्।
महाऽहिदंष्ट्राप्रभवं विषं त्वेतैः प्रशाम्यति ॥३५॥
अत्यन्तं तु हरिद्वर्णं कोमलं सप्रभं तथा।
काञ्चनचूर्णमध्याभं रत्नं तदुत्तमं मतम् ॥३६॥
सर्वसंस्थानगुणवत् समानरूपवत्तथा।
गुरु सूर्यकरस्पर्शात् प्रदीपयति चाश्रमम् ॥३७॥
विद्युत्प्रभाया योगाद् यच्चान्तर्दीप्तियुतं भवेत्।
भवेच्च शाद्वलनिभं हरितं श्रेष्ठमेव तत् ॥३८॥
वर्णा यत्र तु बहुला मध्ये स्वच्छकराश्रयम्।
सान्द्रं स्निग्धं विशुद्धं च बर्हिप्रभं समन्ततः ॥३९॥
तन्न्यूनं पूर्वतो बोध्यं किञ्चिच्छ्रेष्ठं हि गण्यते।
शबलं रूक्षं मलिनं कठोरं कर्करं यथा ॥४०॥
मिश्रं शिलोत्थजतुना मरकतं न तूत्तमम्।
मारकतैः कणैः कलुषं सन्धितं वा तथाविधम् ॥४१॥
श्रेयस्कामैर्न तद्धार्यं क्रेतव्यं तन्न वै क्वचित्।
भल्लातकस्य पत्रैर्वैषम्यं यान्ति यत्प्रभाः ॥४२॥
कृत्रिमास्ते मरकता नैव धार्याः कदाचन।
वज्रतुल्यास्तथा मुक्तातुल्या मरकता अपि ॥४३॥
येषां प्रभा चोर्ध्वगा वै ऋज्वी वा वक्रगामिनी।
तिर्यगालोच्यमानानां सद्यो वा सा प्रणश्यति ॥४४॥
एते विजातयो बोध्या मरकताः शुभावहाः।
स्नानाऽऽचमनजप्येषु रक्षामन्त्रक्रियाविधौ ॥४५॥
गोहिरण्यादिदानेषु साधनेऽनुष्ठितेऽपि च।
दैवपैत्र्यातिथेयेषु गुरुसंपूजनेषु च ॥४६॥
बाध्यमानेषु विविधैर्दोषजातैर्विषोद्भवैः।
दोषहीनं गुणवच्च काञ्चनप्रतियोजितम् ॥४७॥
संग्रामे जयकार्ये च धार्यं मरकतं सदा।
पद्मरागाधिकं मूल्यं मारकतं प्रकीर्तितम् ॥४८॥
दोषाधिक्ये मूल्यहानिर्मारकतेऽपि जायते।
एवं मारकताः प्रोक्ता नीलमणीन् वदामि वः ॥४९॥
नेत्रयुग्मसमिद्बीजं बलस्य यत्पपात ह।
सिंहले कच्छदेशे च सा भूमिर्बहुधाऽभितः ॥५०॥
इन्द्रनीलवती जाता नीलास्ते नैकजातयः।
नीलाब्जभृंगशार्ङ्गाभा हरकण्ठसमा अपि ॥५१॥
गिरिशृंगनिभा वार्धिजलाभाः शिखिरङ्गिणः।
नीलीरंगा पीककण्ठसमाभास्ते महागुणाः ॥५२॥

सुपार्श्वा शिलागर्भाः कर्करास्त्रुटिसंयुताः ।
अभ्रिकाचलच्छाया वर्णदुष्टा भवन्त्यपि ॥५३॥
पद्मरागगुणान् सर्वानाप्नोति चेन्द्रनीलधृक् ।
पद्मरागे परीक्षा या सैवेन्द्रनीलकेऽपि च ॥५४॥
वह्नौ क्षिप्तः पद्मरागो वह्निं क्रमेत यावता ।
ततोऽधिकश्चेन्द्रनीलः क्षिप्तः क्रमेत चानले ॥५५॥
परीक्षा सैव बोद्धव्या यथार्थस्य मणेः शुभा ।
तथापि न परीक्षार्थं गुणानां नाशकारके ॥५६॥
वह्नौ मणिर्निधातव्यो यतो दुष्टो भवेद्धि सः ।
सोऽनर्थाय भवेद् भर्तुः कर्तुः कारयितुस्तथा ॥५७॥
काचोत्पलकरवीरवैदूर्यस्फटिकादयः ।
इन्द्रनीलसमास्तेते मणयोऽपि भवन्ति हि ॥५८॥
काठिन्यगुरुताऽऽधिक्ये श्रैष्ठ्यमेषां प्रजायते ।
इन्द्रनीलस्ताम्रवर्णः करवीरोत्पलप्रभः ॥५९॥
यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ।
तमिन्द्रनीलमित्याहुर्महार्हं बहुदुर्लभम् ॥६०॥
यस्य वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तद्वयेत् सर्वं महानीलः स उच्यते ॥६१॥
पद्मरागस्य यन्मूल्यं माषमात्रस्य धार्यते ।
तन्मूल्यं चेन्द्रनीलस्य धार्यते गुणभामतः ॥६२॥
अथ लक्ष्म्यः ! प्रवक्ष्यामि वैदूर्यस्योद्भवादिकम् ।
बलासुरस्य नादात्मसमिद्धीजोद्भवा हि ते ॥६३॥
अनेकवर्णा शोभाभिरामकान्तियुताः खलु ।
विदूरे पर्वते कामरूपकामाक्षिकीक्षितौ ॥६४॥
वैदूर्यास्ते मणयश्च प्रावृड्घनावभासिनः ।
विस्फुलिङ्गसमा जातास्तेजस्विनोऽपि वै शुभाः ॥६५॥
श्रेष्ठा मयूरकण्ठाभा वेणुदलनिभास्तथा ।
चापपक्षनिभास्तेऽपि प्रशस्ता वरभाग्यदाः ॥६६॥
गिरिकाचाः शिशुपालाः काचाश्च स्फटिकास्तथा ।
धूम्राश्चेति च वैदूर्यजातयोऽपि समा यथा ॥६७॥
लिख्याभावात् काचसंज्ञः शिशुपालो लघुत्वतः ।
गिरिकाचस्त्वदीप्तित्वात् स्फटिकश्चोज्ज्वलत्वतः ॥६८॥
पलद्वयगुरोर्मूल्यमिन्द्रनीलसमं मतम् ।
नामाभागुणभेदैर्हि भेदो मूल्ये प्रजायते ॥६९॥
स्नेहलघुतामृदुता भेदे लिङ्गानि सर्वदा ।
मणिकन्ये धृता लाभप्रदाश्चेन्मूल्यषड्गुणाः ॥७०॥
एतन्मूल्यं स्वाकरेषु भूदेशे बहुलं भवेत् ।
सुवर्णः षोडशमाषस्तत्स्वतांशस्तु संज्ञकः ॥७१॥
शाणश्चतुर्माषमाणो माषकः पञ्चकृष्णलः ।
पलस्य दशमो भागो धरणः परिकीर्तितः ॥७२॥
धरणेऽधिकतां प्राप्ते मूल्यमधिकं गौरवात् ।
अथ लक्ष्म्यः पुष्परागान्मणीन् वदामि बोधतः ॥७३॥
बलासुरस्य त्वक्समिद्बीजानि हिमपर्वते ।
पतितानि ततो जाताः पुष्परागा महागुणाः ॥७४॥
आपीतपाण्डराः पद्मरागाः पाषाणजातयः ।
आपीतलोहितास्ते तु कौरुण्डकाभिधानकाः ॥७५॥
स्वच्छलोहितपीतास्तु काषायकाभिधानकाः ।
आनीलशुक्लस्निग्धास्ते सोमानकाभिधानकाः ॥७६॥
अत्यन्तलोहितास्ते ये पद्मरागा हि ते मताः ।
सुनीलास्ते पुष्परागा इन्द्रनीलाभिधानकाः ॥७७॥
मूल्यं वैदूर्यसदृशं धारणाद् योषितां सदा ।
पुत्ररूपं फलं शुद्धः प्रयच्छति न संशयः ॥७८॥
अथ लक्ष्म्यः प्रवक्ष्यामि कर्केतनान् मणीनिह ।
वायुर्बलस्य तु नखसमिद्बीजमुपागमत् ॥७९॥
पद्मवनेषु चिक्षेप कर्केतनास्ततोऽभवन् ।
मधुसोमरुधिराभास्ताम्रपीतानलोपमाः ॥८०॥
नीलश्वेतपरुषाश्च व्याध्यादिदोषहारकाः ।
स्निग्धाः शुद्धाः समवर्णाः पीताश्चित्रा गुरुत्विनः ॥८१॥
रेखाव्रणदोषहीनाः कर्केतनास्ते पावनाः ।
स्वर्णपात्रेण वेष्टयित्वा तापयेदनलेन च ॥८२॥
प्रकाशमेति चेत् कर्केतनः स रोगनाशकृत् ।
क्लेशनाशकश्चाप्यायुष्प्रदश्च सुखवंशदः ॥८३॥
अलंकृतौ धृतश्चाऽयं धनं धान्यं ददाति च ।
पूजां च बान्धवाँश्चापि ददात्युज्ज्वलतामपि ॥८४॥
एके नीलाश्च विकृता म्लानाः कलुषिणस्तथा ।
तेजोदीप्तिहीनवर्णा भवन्ति कर्कसदृशाः ॥८५॥
अगुणास्ते दुःखदा वै न धार्या हि कदाचन ।
सूर्यकिरणमासाद्य तेजः परिधियोगिनः ॥८६॥
जायन्ते ये तेऽग्र्यमूल्याः कर्केतना भवन्ति वै ।
अथ ब्रह्मप्रिया ! वोऽत्र भीष्मरत्नानि वच्म्यहम् ॥८७॥
बलासुरस्य वै वीर्यसमिद्बीजं हिमालये ।
तदुत्तरे प्रदेशे चाऽपतद् भीष्माणि वै ततः ॥८८॥
शंखाऽब्जाभानि भावन्ति स्योनाकसन्निभानि च ।
जातानि कण्ठधृतया तु सम्पत्प्रदानि तानि वै ॥८९॥
भीष्ममणिधरं दृष्ट्वा पलायन्ते तु दूरतः ।
वृका द्वीपिनः शरभा व्याघ्रशार्दूलकुंजराः ॥९०॥

भीष्ममणिश्चाऽङ्गुलीयो गुणयुक्तो धृतो यदि ।
पितृतर्पणकार्ये च बहुतृप्तिप्रदो हि सः ॥९१॥
सर्पाऽण्डजाऽऽखुवृश्चिकविषाणि यान्ति शं तथा ।
जलाग्निचौरवैरिभीर्नश्यत्येवाऽस्य धारणात् ॥९२॥
मेघशैवलरङ्गं च परुषं पीतमप्रभम् ।
विवर्णं मलिनं दूराद् वर्जयेद्वानिदो यतः ॥९३॥
मूल्यं यथागुणं कल्प्यं देशकालादिशोभनम् ।
अथ वै पुलकान् वच्मि मणीन् ब्रह्मप्रिया ! हि वः ॥९४॥
बलासुरस्य नखरसमिद्बीजं भुजङ्गमाः ।
चिक्षिपुः पर्वतेषूर्ध्वे निम्नगास्वपि चोत्तरे ॥९५॥
देशे ततो हि मणयः पुलकास्तु विजज्ञिरे ।
दाशार्णे वागदे मेलकके कालगकेऽपि च ॥९६॥
गुञ्जाऽञ्जनक्षौद्रवर्णा मृणालाभास्तथाऽभवन् ।
गन्धर्ववह्निकदलीभासाः श्रेष्ठास्तथाऽभवन् ॥९७॥
शंखाऽब्जभृंगार्कतुल्यचित्रभंगा अरेखकाः ।
मङ्गलास्ते वृद्धिदा वै पुलकाः परिकीर्तिताः ॥९८॥
काकश्वरासभजम्बूकवृकोग्रस्वरूपिणः ।
समांसगृध्रमुखभा मृत्युदास्ते धृता यदि ॥९९॥
मूल्यमेषां पलभारे शतानि पञ्च मुद्रिकाः ।
अथ लक्ष्म्यो ! रुधिराख्यं रत्नं वः कथयाम्यहम् ॥१००॥
बलासुरस्य रूपाख्यसमिद्बीजं हुताशनः ।
निन्ये चिक्षेप रेवायां निम्नक्षितावपि ध्रुवम् ॥१०१॥
इन्द्रगोपनिभाश्चापि शुकचञ्चुनिभास्तथा ।
पुष्टा रुधिरवर्णास्ते रुधिराश्चाऽभवन् हि ते ॥१०२॥
मध्ये चन्द्रपाण्डुरास्ते शुद्धवर्णास्तुलाभिनः ।
इन्द्रनीलसमाश्चापि भृत्यैश्वर्यप्रदा हि ते ॥१०३॥
पक्वास्ते सुरवज्राख्या लाभदाः सम्पदां प्रदाः ।
अथ लक्ष्म्यः स्फटिकाख्यान् मणीन् वच्मि शुभावहान् ॥१०४॥
कावेरीविन्ध्ययवनचीननेपालभूमिषु ।
बलासुरस्य मेदाख्यसमिद्बीजं तु लाङ्गली ॥१०५॥
चिक्षेपाऽऽकाशमार्गेऽपि तैलं तत् स्फटिकं ह्यभूत् ।
मृणालशंखधवलाः किञ्चिद्वर्णान्तरान्विताः ॥१०६॥
पापनाशकरा योग्यगुणमूल्या हि तेऽभवन् ।
अथ शेषो बलाऽऽन्त्रान् वै समिद्बीजस्वरूपिणः ॥१०७॥
केरलादौ प्रचिक्षेप विद्रुमास्ते ततोऽभवन् ।
शशलोहितवर्णाश्च गुञ्जाजपानिभा अपि ॥१०८॥
सुनीला देवकरोमा जाता भिन्ना हि ते तथा ।
प्रसन्नं कोमलं स्निग्धं सुरागं विद्रुमं हितम् ॥१०९॥
धनधान्यकरं लोके विषार्तिभयनाशनम् ।
एवं जातानि रत्नानि जायन्ते बीजवंशतः ॥११०॥
खनिजाश्च प्रजायन्ते वाह्नेया मणयोऽपि च ।
ब्रह्मप्रियाः समस्ता वो मणयः कथिता मया ॥१११॥
बलस्य मम भक्तस्य निर्मित्तेन समुद्भवाः ।
धारणाद्धाचनाच्चापि मम स्मरणकारकाः ॥११२॥
बलस्ततो विमानेन ययौ धाम ममैव सः ।
जयाद्याश्च भवत्योऽत्र वर्तन्ते योषितो मम ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पद्मरागमरकतेन्द्रनीलवैदूर्यपुष्परागकर्केतनभीष्मपुलक-रुधिरस्फटिकविद्रुममणीनामुद्भवगुणादिनिरूपणनामा त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

**श्रीनारायणीश्रीरुवाच—**

कान्त ! भगवता प्रोक्ता मनवो ये चतुर्दश ।
तेषु तवाऽवतारा ये तान् सकार्यान् वदस्व मे ॥ १ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु श्रीशिवराशीश्रि ! तत्र दैत्यविनाशकान् ।
अवतारान् कथयामि सहेतून् धर्मरक्षकान् ॥ २ ॥
स्वायंभुवो मनुश्चाद्य इन्द्रश्च विश्वभुक् तदा ।
तथा दैत्यो बाष्कलिश्च तपस्तेपे स दारुणम् ॥ ३ ॥
अग्निध्रादीन्मनोः पुत्रान् दैत्यो वशे चकार ह ।
स मरीच्यत्र्यंगिरसपुलस्त्यपुलहक्रतून् ॥ ४ ॥
वसिष्ठं चेति सप्तर्षीनपि स्ववशगान् व्यधात् ।
जयानमितान् शुक्रांश्च यामान् देवान् वशे व्यधात् ॥ ५ ॥
अपि विष्णुर्नारदेन बोधितो दैत्यछित्तये ।
सुदर्शनं महाचक्रं प्रैरयद् रणमूर्धनि ॥ ६ ॥
चिच्छेद मस्तकं दैत्यस्याऽथ देवानमोचयत् ।
अयं विष्णुस्वरूपो मेऽवतारः प्रथमो रमे ॥ ७ ॥
अथ स्वारोचिषे मन्वन्तरे द्वितीयके पुनः ।
पुरुकुत्सरो दैत्यो वै स्विन्द्रं विपश्चितं सुरान् ॥ ८ ॥
अपीडयत्तथा चोर्जं स्तम्बं प्राणं च निश्चलम् ।
ऋषभं चार्ववीरं च दम्भोलिमप्यपीडयत् ॥ ९ ॥
सप्तर्षीन् तुषितान् पारावतान् देवानपीडयत् ।
मनुपुत्रान् चैकलं च विनतं विद्युतं रविम् ॥१०॥
बृहद्गुणं च कर्णान्तं नभसं तानपीडयत् ।
जलमध्ये वसन्तं च मेघरूपेण वा क्वचित् ॥११॥

वर्तमानं विहन्तुं वै महेन्द्रप्रार्थितोऽप्यहम् ।
श्वेतहस्तिस्वरूपं वै सपक्षं पर्वतप्रभम् ॥१२॥
चतुर्दन्तं द्विशुण्डं च दधार सहसा वने ।
युद्ध्यमानं सशस्त्रं च दैत्यं रणे प्रसह्य च ॥१३॥
अहममारयं दन्तैः शुण्डाभ्यां पादमर्दनैः ।
गजनारायणः सोऽहं भविताऽस्मि तदा क्षितौ ॥१४॥
प्रसिद्धः पूजितो लोकैर्मोक्षदो भुक्तिदोऽपि च ।
द्वितीयश्चाऽवतारो मे गजाख्यः कथितो रमे ॥१५॥
औत्तमे च मनौ तृतीयके प्रलम्बदानवः ।
महाबलो महेन्द्रं च स्वशान्तिनामकं तथा ॥१६॥
रथौजसं चोर्ध्वबाहुं शरणं त्वनघं मणिम् ।
शंकुं सुतपसं सप्तर्षींश्च दुःखाकरिष्यति ॥१७॥
वशवृत्तान् स्वधाम्नश्च शिवान् सत्यान् प्रतर्दनान् ।
देवाँस्तान् योधयित्वा स स्ववशान् प्रणयिष्यति ॥१८॥
मनोः पुत्रान् परशुं च विनीतमाजमित्यपि ।
शुचिं सुकेतुं सुबलं देवावृधं सुमित्रकम् ॥१९॥
महोत्साहार्जितं ताँश्च युधे सर्वान् विजेष्यति ।
महाजलान्तरे गत्वा दानवो वासमेष्यति ॥२०॥
तदाऽर्थितोऽहं मनुना भविष्यामि जलान्तरे ।
मत्स्यरूपो हि भगवान् मारयिष्यामि लम्बकम् ॥२१॥
तृतीयश्चाऽवतारोऽयं मम मत्स्यस्वरूपधृक् ।
चतुर्थस्य मनोस्तामसाख्यस्य समये भुवि ॥२२॥
भीमरथोऽसुरो भैमरथासुरैः समेधितः ।
विजितये शिखिनामानमिन्द्रं तथा मनोः सुतान् ॥२३॥
जानुजंघं निर्भयं च नवख्यातिं नयं तथा ।
विविक्षिपं प्रियभृत्यं हविष्कन्धिं कृतं तथा ॥२४॥
कृतबन्धुं प्रस्तलाक्षं दश वशे चकार सः ।
ऋषीन् ज्योतिर्धामकं च धृष्टं काव्यं च हेमकम् ॥२५॥
अग्निं चेतं चैत्रकं च वशे चकार वै तदा ।
देवान् सुरागान् स्वधींश्च हरीन् हरितकान् वशे ॥२६॥
चकाराऽथ सुरैः सम्प्रार्थितश्चाऽहं तदा रमे ।
भीमरथं समुद्रस्य तलस्थं तं महासुरम् ॥२७॥
हनिष्ये कूर्मरूपेण जलमध्ये महावपुः ।
चतुर्थश्चाऽवतारोऽयं मम कूर्मस्वरूपधृक् ॥२८॥
पञ्चमस्य रैवतस्य मनोस्तु समये क्षितौ ।
इन्द्रं तु विभुनामानं बबन्ध शान्तशत्रुकः ॥२९॥
दैत्यो दैत्यगणैर्युक्तस्तथा मनोः सुतानपि ।
महाप्राणं साधकं च प्रत्यंगं नरमित्रकम् ॥३०॥
शुचिं परघ्नं च वनबन्धुं दृढव्रतं तथा ।
केतुशृंगं विजिग्येऽसौ सप्तर्षींश्चाऽप्यपीडयत् ॥३१॥
देवश्रियं वेदबाहुमूर्ध्वबाहुं स्वधामकम् ।
हिरण्यरोमकं पर्जन्यकं च सत्यनामकम् ॥३२॥
एवं देवानभूतरजसोऽश्वमेधकाँस्तथा ।
वैकुण्ठानमृताँश्चाऽप्यपीडयद् बहुधाऽमितः ॥३३॥
ऋषिभिश्चाऽर्थितश्चाऽहं तदाऽरण्यनिवासवान् ।
हंसरूपधरो भूत्वा जघान शान्तशत्रुकम् ॥३४॥
पञ्चमश्चाऽवतारोऽयं मम हंसस्वरूपधृक् ।
चाक्षुषस्य तु षष्ठस्य मनोस्तु समये ततः ॥३५॥
महाकालो महादैत्यो देवदुःखप्रदोऽभवत् ।
इन्द्रं मनोजवाख्यं स जित्वा मनोः सुतानपि ॥३६॥
उरुं पुरुं शतद्युम्नं तापसं सत्यबाहुकम् ।
कृतिमग्निष्णुमतिरात्रं च सुद्युम्नकं नरम् ॥३७॥
एतान् जित्वा तथा देवानार्यान् भाव्यान् प्रलेखकान् ।
पृथुकान् प्रसुताँश्चापि तथा जित्वा ऋषीनपि ॥३८॥
हविष्मन्तं च सुतनुं स्वधामानं च वैराजम् ।
अभिमानं सहिष्णुं च मधुश्रियं हि सप्त तान् ॥३९॥
जित्वा त्रैलोक्यराज्यं वै महाकालः करिष्यति ।
तदा लोकैः प्रार्थितोऽहं हयग्रीवस्वरूपधृक् ॥४०॥
भूत्वा दैत्यं महाकालं नाशयिष्यामि पद्मजे ।
षष्ठोऽयमवतारो मे हयग्रीवस्वरूपवान् ॥४१॥
सप्तमे च मनौ वैवस्वते लक्ष्मि ! महान् खलः ।
हिरण्याक्षो महादैत्यो जिगाय सर्वदेवताः ॥४२॥
मरुद्देवाँस्तथाऽऽदित्यान् वसून् साध्यान् गणाँस्तथा ।
विश्वेदेवानश्विनौ च रुद्रानाङ्गिरसान् सुरान् ॥४३॥
तथा तेजस्विनामानं चेन्द्रं जिगाय दैत्यराट् ।
ऋषींश्च पीडयामास भरद्वाजं च गौतमम् ॥४४॥
विश्वामित्रं कश्यपं च जमदग्निं वशिष्ठकम् ।
अत्रिं चेति तथा मनोः पुत्रान् वशे चकार ह ॥४५॥
इक्ष्वाकुं च लविष्यन्तं नेदिष्टं नामकं नभम् ।
पांशुं विष्टिं च सर्जातिं करूपकं पृषध्रकम् ॥४६॥
सुद्युम्नं चेति सर्वान् वैष्णवाँश्चक्रे निजानुगान् ।
तदा तु भक्त्या पृथ्व्या प्रार्थितोऽहं हरिः स्वयम् ॥४७॥
वाराहरूपवान् हिंसिष्यामि हिरण्यनेत्रकम् ।
सप्तमोऽयं चावतारो वाराहो भ्वादिरक्षकः ॥४८॥
अष्टमे च मनौ सावर्ण्याख्ये चेन्द्रो बलिर्नृपः ।
विरोचनसुतो दैत्यो महाभक्तो बभूव ह ॥४९॥

तद्वशे च तदा देवा अमृताभाः सुतापसाः ।
मुख्याश्चेति गणाः सर्वे वर्तन्ते स्म बलादिव ॥५०॥
अश्वत्थामा कृपो व्यासो गालवो दीप्तिमानपि ।
ऋष्यशृंगः पर्शुरामः ऋषयस्तेऽपि तद्वशे ॥५१॥
सावर्णेस्तु सुता अर्ववीरो विजयः सत्यवाक् ।
कृतिर्निर्देहः सगतिर्वरिष्ठश्च गरिष्ठकः ॥५२॥
वाचश्चेति बलेः सर्वे वश्याश्च दुःखिनो यदा ।
तदाऽहं देवऋषिभिश्चार्थितो वामनाकृतिः ॥५३॥

भूत्वा च याचको विप्रो ग्रहीष्ये शक्रधिष्ण्यकम् ।
बलिं मोक्षं प्रेषयिष्ये दिवं दास्यामि जिष्णवे ॥५४॥
अष्टमोऽयं मेऽवतारस्त्रिविक्रमो हि पद्मजे ! ।
नवमे दक्षसावर्णौ मनौ तु कालकाक्षकः ॥५५॥
देवशत्रुर्वशे निन्ये चेन्द्रमद्भुतनामकम् ।
कार्तिकेयांऽशमिन्द्रं तं तथा मनोः सुतानिमान् ॥५६॥
धृष्टकेतुं दीप्तिकेतुं पद्महस्तं निराकृतिम् ।
पृथुश्रवसमृचिकं बृहद्द्युम्नं बृहद्गुणम् ॥५७॥

तथा निन्ये वशे सप्तर्षींश्च मेधातिथिं वसुम् ।
ज्योतिष्मन्तं सबलं च द्युतिं कव्यं च हव्यकम् ॥५८॥
तथा पारान् सुधर्माख्यान् मरीचिगर्भकान् सुरान् ।
तदाऽहमर्थितो देवैः पद्मनाभो भवामि च ॥५९॥

कालकाक्षं हनिष्यामि करिष्यामि सुखान् सुरान् ।
नवमोऽयं पद्मनाभोऽवतारो मे हि पद्मजे ॥६०॥
दशमे ब्रह्मसावर्णौ बलिशत्रुर्महासुरः ।
शान्तिनामकमिन्द्रं च सप्तर्षीन् वशमानयत् ॥६१॥
आपोमूर्तिं हविष्मन्तं सत्यं सुकृतिनं तथा ।
नाभागं चाऽप्रतिमं च वसिष्ठं चेति तानृषीन् ॥६२॥
मनोः पुत्रान् सुक्षेत्रं च भूमिसेनं जयद्रथम् ।
अनमित्रं वृषभं च शतानीकं सुपर्वकम् ॥६३॥

सुवीर्यमौत्तमौजस्कं वशे निन्ये महासुरः ।
सुखासीनान्निरुद्धांश्च प्राणान् देवान् वशे व्यधात् ॥६४॥
देवैस्तदाऽर्थितश्चाऽहं हरिरूपधरः स्वयम् ।
गदया बलिशत्रुं तं घातयिष्यामि वै रमे ! ॥६५॥
दशमोऽयं हरिरूपोऽवतारो मम पद्मजे ।
एकादशे धर्मसावर्णौ मनौ वृषमिन्द्रकम् ॥६६॥
दशग्रीवो महादैत्यो वशं चकार देवताः ।
विहंगमान् कामगमान्निर्माणरुचिकाँस्तथा ॥६७॥

एकैकरुचिकाँश्चापि देवानथ मनोः सुतान् ।
सर्वत्रगं सुशर्माणं देवानीकं पुरुं गुरुम् ॥६८॥
क्षेत्रवर्णं दृढेषुं चाऽऽर्द्रकं च पुत्रकं तथा ।
सप्तर्षींश्च वशे चक्रेऽग्नितेजसं हविष्यकम् ॥६९॥
विश्वं विष्णुं विस्तरं च हविष्मन्तं च वारुणम् ।
ऋषिभिः प्रार्थितश्चाऽहं श्रीरूपो मोहकारकः ॥७०॥

भूत्वा मुग्धं हरन्तं मां हनिष्यामि महासुरम् ।
एकादशोऽवतारो मे श्रीनारीरूपवान् रमे ॥७१॥
द्वादशे रुद्रसावर्णौ ऋतधामानमिन्द्रकम् ।
तारकाख्योऽसुरश्रेष्ठो वशे चकार वै स्वयम् ॥७२॥

मनोः पुत्रान् देववन्तमुपदेवं विदूरथम् ।
देवश्रेष्ठं मित्रवन्तं मित्रदेवं सवीर्यकम् ॥७३॥
मित्रबिन्दुं मित्रवाहं प्रवाहं चेति वै तथा ।
देवान् स्वधर्मणश्चापि रोहितकान् हरितकान् ॥७४॥

सुरारीन् सुतपसश्च सप्तर्षीनित्यपीति च ।
तपस्विनं सुतपसं तपोमूर्तिं तपोरतिम् ॥७५॥
तपोधृतिं द्युतिं विद्युतिं चेति वै ततः सुराः ।
चक्रिरे प्रार्थनां मे च तारकस्य समाप्तये ॥७६॥

तारकोऽपि शंकरस्य वरदानान्महाबलः ।
नरो वै चेतनं तत्त्वं नारी माया जडं तु तत् ॥७७॥
ताभ्यां मृत्युर्न मे स्याद्वै वरं लब्ध्वा निरामयः ।
जिगाय सर्वभूतानि राज्यं चक्रे त्रिलोकजम् ॥७८॥

ततोऽहं तस्य नाशाय नपुंसकत्वमातवान् ।
तेन रूपेण कमले ! नाशयिष्ये हि तारकम् ॥७९॥
नपुंसकहरिश्चायमवतारो नवीनकः ।
नपुंसकात्मिकी सृष्टिस्ततोऽभवन्मदुत्तरा ॥८०॥

द्वादशश्चाऽवतारोऽयं मम लक्ष्मि ! प्रकीर्तितः ।
नपुंसकहरिं ध्यात्वा भजित्वा मानवास्तदा ॥८१॥
यास्यन्ति परमां मुक्तिं स्त्रीपुंलिंगविवर्जिताम् ।
त्रयोदशे देवसावर्णौ रौच्ये तु दिवस्पतिम् ॥८२॥

इन्द्रं वशे चकाराऽपि दैत्यष्टिट्टिभसंज्ञकः ।
मनोः पुत्रान् चित्रसेनं तपोधर्मरतं धृतिम् ॥८३॥
विचित्रं धर्मपं क्षेत्रवृत्तिं दृढं सुनेत्रकम् ।
वशे चक्रे तथर्षींश्च सुनयं तत्त्वदर्शिनम् ॥८४॥
धृतिमन्तमव्ययं च निशारूपं निरुत्सुकम् ।
निर्मोणं चेत्यथ देवान् स्वरोमकान् स्वधर्मकान् ॥८५॥
स्वकर्मकानमरांश्च वशे चक्रे तु टिट्टिभः ।
मेरुवासं टिट्टिभं तं नाशयितुं सुरादयः ॥८६॥
प्रार्थयन् मां मया दीर्घं रूपं मायूरकं धृतम् ।
मायूरकेण रूपेण घातयिष्यामि टिट्टिभम् ॥८७॥

त्रयोदशोऽवतारोऽयं मम लक्ष्मि प्रकीर्तितः ।
मायूरोऽहं महाराजः पूजां प्राप्स्ये तदा युगे ॥८८॥
चतुर्दशेन्द्रसावर्णौ भौत्ये शुचिर्महासुरः ।
इन्द्रो भूत्वा सार्वराज्यं प्रचकार त्रिलोकजम् ॥८९॥
मनोः पुत्रान् गभीरं च धृष्टमूरुं तरस्विनम् ।
अभिमानं गभीरं च ग्राहं जिष्णुं प्रवीरकम् ॥९०॥
दुर्लभं संक्रन्दनं च वशे तान् स चकार ह ।
सप्तर्षीनग्निबाहुं चाऽग्निध्रं शुचिं च मागधम् ॥९१॥
शुक्रमजितं मुक्तं च वशे चकार स स्वयम् ।
चाक्षुषान् कर्मठांश्चापि पवित्रान् भ्राजिनः सुरान् ॥९२॥
वाचावृधान् देवगणान् वशे चक्रे तथा स्वयम् ।
सायंकाले हरिश्चाऽहं प्रार्थितो ब्रह्मणा यदा ॥९३॥
प्रलयाय विनाशायाऽसुरस्येन्द्रस्य वै तथा ।
सुदर्शनेन चक्रेण घातयिष्यामि शक्रकम् ॥९४॥
सुदर्शनहरिश्चायमवतारो ममाऽन्तिमः ।
कल्पान्ते कथितो लक्ष्मि मध्येऽन्ये बहवोऽपि च ॥९५॥
कार्यवशाद् भवन्त्येव मेऽवतारा असंख्यकाः ।
यस्य हस्तेऽथवा पादतले मत्स्यो धनुर्ध्वजः ॥९६॥
शरः शूलं स्वस्तिको वा चक्रं पद्मं घटोऽपि वा ।
सोऽहं नारायणः साक्षादस्मि प्रच्छन्नरूपवान् ॥९७॥
वर्तामि साधुधर्माऽहं साधुकर्मा समस्तवित् ।
सैश्वर्यश्चाप्यनैश्वर्यो दिव्योऽप्यदिव्यवर्तनः ॥९८॥
संगात् समागमाद् योगाद् दर्शनात् स्पर्शनादपि ।
सहवासात् स्मरणाद्वा सेवनान्मुक्तिदो ध्रुवम् ॥९९॥
भाग्यवन्तो देहिनो मां ज्ञात्वा प्रसाद्य सेवया ।
मोक्षमार्गे चार्जयन्ति ममाऽऽनन्दमलौकिकम् ॥१००॥
अभाग्यास्तु मनुष्यं मां मत्वा यान्ति विदूरतः ।
आसुरास्ते पापवन्तो महेर्ष्यवोऽपराधिनः ॥१०१॥
मुक्तिमार्गस्थिताश्चापि यास्यन्ति निरयान् बहून् ।
चिह्नैश्चापि च सार्वज्ञ्यैस्तथा दिव्यगुणादिभिः ॥१०२॥
मां विदित्वाऽऽश्रयिष्यन्ति ये ते यास्यन्ति मेऽक्षरम् ।
नरा नार्यश्च पशवः पक्षिणः क्षुद्रयोनयः ॥१०३॥
अन्यधर्मपराश्चापि मद्योगात् पावना हि ते ।
कामः क्रोधस्तथा लोभो मानं मदश्च मत्सरः ॥१०४॥
दुर्गुणाः पुण्यपापे च निर्गुणा मम योगतः ।
येन केनापि भावेन युज्यन्ते ये मया सह ॥१०५॥
नित्ययुक्ता हि ते जाता वियुज्यन्ते न कर्हिचित् ।
मम योगो मोक्षदो वै सुरमानवरक्षसाम् ॥१०६॥
शूद्रपक्षिपशूनां च दैत्यदानवयोषिताम् ।
मया संकल्पमात्रेण तार्यन्ते खण्डराशयः ॥१०७॥
मम मनाक् सुयोगेन पूयन्ते पापकर्मिणः ।
या क्रिया पापनाम्नी सा कृता मयि तु पावनी ॥१०८॥
स्वतन्त्रोऽहं ममाऽऽम्नाया उपदिशन्ति वै वृषान् ।
अयं वृषो भवत्वेवं धारयामि वृषो हि सः ॥१०९॥
अवृषोऽपि वृषः स्यान्मे संकल्पाद्वा वृषोऽवृषः ।
विचार्येत्थं प्रसेवन्ते मां मूर्तं परमेश्वरम् ॥११०॥
तेषां मुक्तिः करे त्वास्तेऽमुत्राऽत्र सर्वकर्मसु ।
पठनाच्छ्रवणादस्याऽध्यायस्य मोक्षणं भवेत् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने चतुर्दश-
मन्वन्तरेषु हरेश्चतुर्दशाऽवतारप्रयोजनादिनिरूपणनामा
चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

श्रीनारायणीश्रीरुवाच—

जीवता तु जनेनाऽत्र सत्कार्यं कीदृशं शुभम् ।
कर्तव्यं येन सर्वत्र परत्र स सुखी भवेत् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

मम पूजा प्रकर्तव्या परत्र परसौख्यदा ।
पितृपूजा प्रकर्तव्या देवपूजा तथा शुभा ॥ २ ॥
दानं श्रेष्ठं प्रकर्तव्यं जीवच्छ्राद्धं तथा शुभम् ।
यत्कृतेनेह हस्तेन लभ्यतेऽमुत्र तत्फलम् ॥ ३ ॥

श्रीनारायणीश्रीरुवाच—

जीवच्छ्राद्धं कथं कीदृक् कर्तव्यं तद्विधिं वद ।
तत्र यद्यत्प्रदातव्यं तत्सर्वं मे प्रभो वद ॥ ४ ॥

श्रीपुरुषोत्तम उवाच—

देवालये सतां वासे मठे चेश्वरसन्निधौ ।
विद्यालये यज्ञभूमौ पर्वते च नदीतटे ॥ ५ ॥
वने तीर्थे चैत्यदेशे पावने च स्थलेऽपि वा ।
स्वगृहे नूतने कुर्याज्जीवच्छ्राद्धं सुखप्रदम् ॥ ६ ॥
यदा तु चिन्तयेद्धर्मं श्राद्धं कर्तव्यमादरात् ।
श्रद्धया स्वकरेणैव हृदा भावनयाऽर्प्यते ॥ ७ ॥
श्राद्धं तत् सर्वथा बोध्यं पञ्चधा तत्प्रकीर्त्यते ।
पारब्राह्मिकं च पैत्र्यं दैवमैश्वरं भौतिकम् ॥ ८ ॥

बाल्ये वा यौवने वापि वार्धक्ये मृतिसन्निधौ ।
यदाकदाचित्कर्तव्यं पञ्चधाऽपि शुभैर्जनैः ॥ ९ ॥
जीवच्छ्राद्धे कृते जीवो जीवन्नेव विमुच्यते ।
कर्म कुर्वन्नकुर्वन् वा ह्यज्ञानी ज्ञानवानपि ॥१०॥
श्रोत्रियश्चाप्यश्रोत्रियश्चातुर्वर्ण्यो हि मानवः ।
आश्रमस्थोऽपि वा त्यागी कुर्याच्छ्राद्धं हि पञ्चधा ॥११॥
परब्रह्म हरिं स्मृत्वा मन्दिरेषु महत्सु तु ।
हरये नित्यनैवेद्यं दद्याज्जीवन् जनो भुवि ॥१२॥
श्रीकृष्णाय महानैवेद्यकं दद्यान्नवं नवम् ।
षट्पञ्चाशद्भोगरूपं जीवन्मोक्षे फलाय तत् ॥१३॥
नित्यं प्रातर्भगवते कृष्णनारायणाय ह ।
मुद्गलड्डुकदुग्धादि शर्करां चार्पयेत्तथा ॥१४॥
नागवल्लीदलं ताम्बूलकं दद्यात्तु तृप्तये ।
तत्फलं परलोके स्यात् स्वस्मै दात्रेऽक्षयं सुखम् ॥१५॥
मध्याह्नेऽपि प्रदद्याच्च मिष्टान्नानि शुभानि च ।
घृताऽऽज्यशार्कराक्तानि पक्वान्नानि समर्पयेत् ॥१६॥
शाकानि द्विदलाः सूपं भक्तं विविधपाचितम् ।
पोलिकाः पूरिकाः दुग्धपाकं क्षीरादि चार्पयेत् ॥१७॥
आरनालानि रम्याणि वेषवारयुतानि च ।
भक्ष्यभोज्यानि लेह्यानि चोष्याण्यपि फलानि च ॥१८॥
कन्दपुष्पदलपत्रग्रन्थीन् दद्यात्तु भोजने ।
देवदेवाय कृष्णाय सर्वश्रीसहिताय वै ॥१९॥
नित्यमेवं राजभोगान् दद्यात् स्वर्णादिनिर्मिते ।
स्थाले पात्रे च पात्रेषु प्रत्यक्षं श्राद्धमेव तत् ॥२०॥
जीवता जीविका दत्ता वृत्तिरूपा तु शार्ङ्गिणे ।
फलत्येवाऽक्षरे धाम्नि गोलोके श्रीपुरेऽपि सा ॥२१॥
परमेशाय दत्तं तत् सर्वं भवति चाक्षयम् ।
प्राप्यते मुक्तभावेऽपि प्रत्यर्पितं तु शार्ङ्गिणा ॥२२॥
गोलोके वापि वैकुण्ठेऽव्याकृतेऽप्यमृतेऽपि च ।
दत्तमत्र तदीशायाऽनन्तगुणमवाप्यते ॥२३॥
एवं जलानि मिष्टानि शीतानि मधुराणि च ।
दातव्यानि श्रीहरये सर्वर्तुवाञ्छितानि च ॥२४॥
वृत्त्यात्मकानि दत्तानि प्राप्यन्ते तानि तृप्तये ।
एवं लक्ष्मि प्रदेयानि मुखवासानि शुद्धये ॥२५॥
तान्यपि त्वङ्लवङ्गैलाकपूर्रवीटिकास्तथा ।
पूगीचूर्णखदिरादिचूर्णमिष्टफलानि च ॥२६॥
अथोत्थानसमयेऽपि जलं फलं दलं तथा ।
भोजनार्थं प्रदेयानि चोष्णशीतानि यानि च ॥२७॥
घृतपक्वानि सर्वाणि तैलपक्वानि यानि च ।
वह्निपक्वानि सर्वाणि सूर्यपक्वानि यानि च ॥२८॥
ऋतुपक्वानि भक्ष्याणि सुगन्धिरसवन्ति च ।
प्रदेयानि श्रीहरये तृतीयप्रहरे सदा ॥२९॥
सायं भोजनपानार्थं पूरिकाः पोलिकास्तथा ।
दुग्धं शाकं चारनालं दद्याच्छ्रीहरये जलम् ॥३०॥
नित्यमेव प्रदद्याद्वै वृत्त्यर्थं वाटिकां दिशेत् ।
क्षेत्राणि चाऽर्पयेत् सौधं भवनानि तथाऽर्पयेत् ॥३१॥
ग्रामान् गृहं च पृथिवीं दद्याज्जीवनवृत्तिदाम् ।
अनादिश्रीकृष्णनारायणाय परमात्मने ॥३२॥
जीविकां बन्धयेत् पूजाप्रवाहार्थं धनैरपि ।
एवं यः श्रद्धया कुर्याज्जीवच्छ्राद्धं तदुच्यते ॥३३॥
वर्षे वर्षे त्वेकवारं भोजनं जलसंयुतम् ।
यद्वा भवेत्तथा दद्यात् स्थालनैवेद्यनाणकम् ॥३४॥
प्रतिमासं च वा दद्यात् प्रत्युत्सवं तथाऽर्पयेत् ।
प्रतिपक्षं दिशेद्वापि प्रतिपर्व दिशेदपि ॥३५॥
एवं श्रीहरये दत्ता जीविका वृत्तिरुत्तमा ।
अक्षयाय फलायैषा नित्यतृप्तिप्रदा भवेत् ॥३६॥
पारब्राह्मं श्राद्धमेतल्लक्ष्मि प्रोक्तं मया तु ते ।
ऐश्वरं चापि वै श्राद्धं कथयामि तु तच्छृणु ॥३७॥
यत्र यत्र मेऽवतारप्रतिमाः सन्ति मन्दिरे ।
वासुदेवादयो व्यूहाः कपिलाद्याश्च साधवः ॥३८॥
श्रियो लक्ष्म्यः पार्षदाश्च पार्षदान्यश्च याः शुभाः ।
वैराजाद्या ईश्वराश्च तेभ्यो दद्यान्निवेद्यकम् ॥३९॥
मिष्टान्नं च जलं पेयं फलं कन्दं दलादिकम् ।
ताम्बूलकादिकं क्षीरं दद्याज्जीवन्मधु त्विह ॥४०॥
तत्सर्वमैश्वरं प्रोक्तं दत्तं प्रतिफलाय तत् ।
पैत्र्यं वदामि ते लक्ष्मि पितृभ्यः प्रतिपादितम् ॥४१॥
जले वा दर्भमूले वा वृक्षमूलेऽथ भूतले ।
विप्रहस्ते विप्रमुखे जीवन् दद्यात्तु तृप्तये ॥४२॥
आमपिण्डान् पक्वमिष्टान्नानि दद्यात्तु भोजने ।
शाकपत्रफलकन्दान् क्षीरं दद्यात्तु तृप्तये ॥४३॥
दैवं चापि प्रदद्याच्च श्राद्धं देवेभ्य आदरात् ।
आदित्येभ्यश्च रुद्रेभ्योऽश्विभ्यां वसुभ्य इत्यपि ॥४४॥
तथाऽन्यदेवताभ्यश्च दद्याद् यथेष्टकं शुभम् ।
दैवं श्राद्धं हि तत्प्रोक्तं विधिं वदामि संशृणु ॥४५॥
परीक्ष्य भूमिं विधिवद् गन्धपर्णरसादिभिः ।
अशल्यायां प्रकुर्याद्वै स्थण्डिलं सैकतं शुभम् ॥४६॥

मध्यतो हृत्तमात्रं वा कुण्डं सुशोभनं परम् ।
उपलिप्य विधानेन चाऽऽलिप्याऽग्निं विधाय च ॥४७॥
अन्वाधाय यथाशास्त्रं परिगृह्य च सर्वतः ।
परिस्तीर्य यथाशास्त्रं पारम्पर्यक्रमागतम् ॥४८॥
समाप्याऽग्निमुखं सर्वं सम्पूज्य स्थण्डिलेऽनलम् ।
जुहुयात् समिदाद्यैश्च चरुणा च पृथक् पृथक् ॥४९॥
घृतेनाऽपि जुहुयाच्चोद्धृत्यात्मना सुरादिषु ।
सर्वतस्तत्त्वभूतानि जुहुयात् तृप्तये तदा ॥५०॥
ओं भूर्नमोऽनादिकृष्णनारायणाय शार्ङ्गिणे ।
ओं भूरनादिश्रीकृष्णनारायणाय च स्वाहा ॥५१॥
ओं भुवश्चाऽवतारेभ्यो नम ईश्वरेभ्यस्तथा ।
ओं भुवश्चावतारेभ्यः स्वाहा ईश्वरेभ्यस्तथा ॥५२॥
ओं स्वर्नमो जीवसृष्टिभ्यः पितृदेवतादिभ्यः ।
ओं स्वः स्वाहा जीवसृष्टिभ्यः पितृदेवतादिभ्यः ॥५३॥
ओं भूर्वृषसेऽस्तु नमः ओं भूर्वृषसे स्वाहा ।
ओं भुवर्विष्णवे नमः ओं भुवर्विष्णवे स्वाहा ॥५४॥
ओं स्वः शंकराय नमः ओं स्वः शंकराय स्वाहा ।
ओं महः सुरेशाय नमः ओं महः सुरेशाय स्वाहा ॥५५॥
ओं जनः पितृभ्यो नमः ओं जनः पितृभ्यः स्वाहा ।
ओं तपः प्रकृतये नमः ओं तपः प्रकृतये स्वाहा ॥५६॥
ओं सत्यं हरये नमः ओं सत्यं हरये स्वाहा ।
ओं कृष्णधरां मे गोपाय घ्राणे गन्धं देवाय कृष्णाय भूर्नमः ॥५७॥
ओं कृष्णधरां मे गोपाय
घ्राणे गन्धं कृष्णाय भू स्वाहा ।
ओं कृष्णधरां मे गोपाय
घ्राणे गन्धं कृष्णस्य पत्न्यै भूर्नमः स्वाहा ॥५८॥
ओं कृष्णधरां मे गोपाय घ्राणे गन्धं कृष्णपत्न्यै भूः स्वाहा ।
ओं हरे जलं मे गोपाय जिह्वायां रसं हरये भुवो नमः ॥५९॥
ओं हरे जलं मे गोपाय जिह्वायां रसं हरये भुवः स्वाहा ।
ओं हरे जलं मे गोपाय जिह्वायां रसं हरेः पत्न्यै भुवो नमः ॥६०॥
ओं हरे जलं मे गोपाय जिह्वायां रसं हरेः पत्न्यै भुवः स्वाहा ।
ओं परेशाऽग्निं मे गोपाय नेत्रे रूपं परेशाय स्वरों नमः ॥६१॥
ओं परेशाऽग्निं मे गोपाय नेत्रे रूपं परेशाय स्वः स्वाहा ।
ओं परेशाऽग्निं मे गोपाय नेत्रे रूपं परेशपत्न्यै स्वरों नमः ॥६२॥
ओं परेशाऽग्निं मे गोपाय नेत्रे रूपं परेशपत्न्यै स्वः स्वाहा ।
ओं ब्रह्म वायुं मे गोपाय त्वचि स्पर्शं ब्रह्मणे देवाय महर्नमः ॥६३॥

ओं ब्रह्म वायुं मे गोपाय
त्वचि स्पर्शं ब्रह्मणे देवाय महः स्वाहा ।
ओं ब्रह्म वायुं मे गोपाय
त्वचि स्पर्शं ब्रह्मपत्न्यै महरों नमः ॥६४॥
ओं ब्रह्म वायुं मे गोपाय
त्वचि स्पर्शं ब्रह्मपत्न्यै महः स्वाहा ।
ओं परव्योम सुषिरं मे गोपाय
श्रोत्रे शब्दं परव्योम्ने जनो नमः ॥६५॥
ओं परव्योम सुषिरं मे गोपाय
श्रोत्रे शब्दं परव्योम्ने जनः स्वाहा ।
ओं परव्योम सुषिरं मे गोपाय
श्रोत्रे शब्दं परव्योमपत्न्यै जनो नमः ॥६६॥
ओं परव्योम सुषिरं मे गोपाय
श्रोत्रे शब्दं परव्योमपत्न्यै जनः स्वाहा ।
ओं मुक्तेशरजो मे गोपाय
द्रव्ये तृष्णां मुक्तेशाय तपो नमः ॥६७॥
ओं मुक्तेशरजो मे गोपाय
द्रव्ये तृष्णां मुक्तेशाय तपः स्वाहा ।
ओं मुक्तेशरजो मे गोपाय
द्रव्ये तृष्णां मुक्तेशपत्न्यै तपो नमः ॥६८॥
ओं मुक्तेशरजो मे गोपाय
द्रव्ये तृष्णां मुक्तेशपत्न्यै तपः स्वाहा ।
ओं बालकृष्ण सत्यं मे गोपाय
श्रद्धां धर्मे बालकृष्णाय सत्यं नमः ॥६९॥
ओं बालकृष्ण सत्यं मे गोपाय
श्रद्धां धर्मे बालकृष्णाय सत्यं स्वाहा ।
ओं बालकृष्ण सत्यं मे गोपाय
श्रद्धां धर्मे बालकृष्णपत्न्यै सत्यं नमः ॥७०॥
ओं बालकृष्ण सत्यं मे गोपाय
श्रद्धां धर्मे बालकृष्णपत्न्यै सत्यं स्वाहा ।
ओं जीवपते जीवनं मे गोपाय
चेष्टं परत्र जीवपतये जीवनं नमः ॥७१॥
ओं जीवपते जीवनं मे गोपाय
चेष्टं परत्र जीवपतये जीवनं स्वाहा ।
ओं जीवपते जीवनं मे गोपाय
चेष्टं परत्र जीवपतेपत्न्यै नमः स्वाहा ॥७२॥

ओं जीवपते जीवनं मे गोपाय
चेष्टं परत्र जीवपतिपत्न्यै जीवनं स्वाहा ।
ओं परब्रह्मणे नमः श्रीपुरुषोत्तमाय स्वाहा ॥७३॥
ओं पित्रे नमः पित्रे स्वाहा प्रपित्रे नमः प्रपित्रे स्वाहा ।
ओं प्रपितामहाय नमः प्रपितामहाय स्वाहा ॥७४॥
ओं भूतेभ्यो नमो भूतेभ्यः स्वाहा ।
ओं सूक्ष्मेभ्यो नमो मात्राभ्यः स्वाहा ॥७५॥
ओमिन्द्रियेभ्यो नम इन्द्रियेभ्यः स्वाहा ।
ओं प्राणेभ्यो नमः प्राणेभ्यः स्वाहा ॥७६॥
ओमन्तःकरणेभ्यो नमोऽन्तःकरणेभ्यः स्वाहा ।
ओमात्मने नम आत्मने स्वाहा ॥७७॥
ओं कृष्ण धरां मे छिन्धि घ्राणे गन्धं
छिन्धि मेऽर्थं भूः स्वाहा भुवः स्वाहा स्वः स्वाहा ॥७८॥
एवं पृथक् पृथक् हुत्वा केवलेन घृतेन वै
सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा ॥७९॥
महालक्ष्मीं घृतेनैव शतमष्टोत्तरं पृथक् ।
प्राणादिभिश्च जुहुयाद् घृतेनैव च केवलम् ॥८०॥
ओं प्राणे निविष्टोऽमृतं जुहोमि ।
हरिर्माऽऽविश प्रदाहाय प्राणाय स्वाहा ।
प्राणाऽधिपतये श्रीहरये परब्रह्मणे कृष्णाय स्वाहा ॥८१॥
ओं भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहा ।
एवं क्रमेण जुहुयात् श्राद्धोक्तं च यथायथम् ॥८२॥
पूर्णाहुतिं ततो दद्यात् तृप्तये परमात्मनः ।
परमात्मपत्न्याश्चापि तृप्तये चार्पयेत्ततः ॥८३॥
समाप्यैवं सुरान् पितॄन् स्वं नाम्ना चापि वै दिशेत् ।
भूतादीन् सम्प्रदद्याच्च ऋणवद्भ्यस्तथाऽर्पयेत् ॥८४॥
अनृणी च ततो भूत्वा योगीन्द्रान् भोजयेद् बहून् ।
साधून् सतः सतीः साध्वीर्भोजयेद् बालबालिकाः ॥८५॥
बान्धवान् भोजयेच्चापि दिव्यान् गुरून् प्रभोजयेत् ।
वैष्णवानां च पात्राणां वस्त्राभरणकम्बलान् ॥८६॥
वाहनं शयनं यानं कांस्यताम्रादिभाजनम् ।
हैमं च राजतं धेनुं तिलान् क्षेत्रं च वैभवान् ॥८७॥
दासीदासगणाँश्चापि दद्याच्च दक्षिणामपि ।
पिण्डं च सुरसं दद्यात् पृथगष्टप्रकारतः ॥८८॥
त्र्यहं श्रीविष्णवे दद्याच्चरुं च क्षीरभोजनम् ।
मृते कुर्यान्न कुर्याद्वा जीवन् कुर्यान्मृतो लभेत् ॥८९॥
एवं कृत्वा मृतस्याऽत्र शौचाशौचं न विद्यते ।
जीवन्मुक्तो यतः सोऽस्ति तस्य वै सूतकं नहि ॥९०॥
दाहकानां स्नानमात्रं सूतकं नाऽधिकं ततः ।
तद्वंशे कन्यका पुत्रो यः कोऽपि वंशवर्धनः ॥९१॥
सोऽपि मुक्तो भवत्येव पितृुद्धारकरो भवेत् ।
मुच्यन्ते जीवतः श्राद्धात् पितरो नरकादपि ॥९२॥
मुच्यते कर्मणाऽनेन मातापितृऋणादयम् ।
कालं प्राप्ते गर्तवासो दहनं जलवाहनम् ॥९३॥
यद्भवेत् सर्वमेवाऽस्य मोक्षार्थं दोषवर्जितम् ।
स्वेनैव स्वकृतं कार्यं तस्मादृणं विलीयते ॥९४॥
भौतिकं गोपशुभ्यश्च दद्याच्छुकादिपक्षिणे ।
कीटपतंगप्राणिभ्यो मत्स्यादिभ्यो दिशेदपि ॥९५॥
वृक्षादिभ्यो ददेद्वारि कणान् देहिभ्य इत्यपि ।
भिक्षुकेभ्योऽर्पयेदन्नं वस्त्रं पात्रं समर्पयेत् ॥९६॥
यथाशक्ति दिशेद् यस्तु स्वेन हस्तेन सर्वथा ।
मृतस्याऽस्य द्वादशाहप्रतीक्षा नैव विद्यते ॥९७॥
याति शीघ्रं विमानेन पुण्यलोके वृषेस्थितः ।
आतिवाहिकदेवास्तं यद्वा नयन्ति च्चोर्ध्वगाः ॥९८॥
एवं लक्ष्मि प्रकर्तव्यं श्राद्धं जीवत्प्रदानकम् ।
भुक्तिमुक्तिप्रदं स्यात्तत् स्वकरोपार्जिताऽर्पणम् ॥९९॥
स्वेनहस्तेन पचनं स्वेन हस्तेन भक्षणम् ।
स्वेन हस्तेनाऽर्जनं च स्वेन हस्तेन दानकम् ॥१००॥
यः करोति जयत्यत्र परत्राऽपि जयत्यपि ।
एतच्छ्रवणतश्चापि तथा पुण्ययुतो भवेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने जीवच्छ्राद्धविधिनिरूपणनामा पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

**श्रीनारायणीश्रीरुवाच—**

अमृतं च विषं चेति द्वयं लोके प्रवर्तते ।
सुधाऽमृतं गरं विषं रस्यं तद्द्वयमेव हि ॥ १ ॥
अरस्यं तद्भवेद्वा न भवेच्चेत् कीदृशं हरे ।
यज् ज्ञात्वाऽयं लोकजनो विरज्येत दधीत वा ॥ २ ॥

**श्रीपुरुषोत्तम उवाच—**

समुद्रमथने पूर्वं समुत्पन्नं महाविषम् ।
पपौ श्रीशंकरो योगी तमस्तुवन् महर्षयः ॥ ३ ॥

अत्युग्रं कालकूटाख्यं संहृतं भगवन् हर ।
त्वया सुरक्षितं सर्वं प्रतिष्ठितं कृपानिधे ॥४॥
समर्थोऽसि महेशोऽसि रक्षकोऽसि विषादन ।
सदा जय सुयोगींस्त्वं ब्रह्माऽसि संगवर्जितः ॥५॥
श्रुत्वैवं प्रहसन् शंभुर्विषं प्राहेतरन्मुनीन् ।
न विषं कालकूटाख्यं संसारो विषमुल्बणम् ॥६॥
संहरेत् तद्विषं यस्तु स समर्थो ह्यनेन किम् ।
योगी सर्वप्रयत्नेन संहरेन्मायिकं विषम् ॥७॥
मायिकस्य ये विषस्य हर्तारस्ते हि शंकराः ।
शं कुर्वन्ति गुरवो वा देवाः सन्तोऽतिनिर्मलाः ॥८॥
योगिनो वा महात्मानः शान्तिदा मोक्षदा हि ते ।
संसारविषहर्तारः समर्थास्ते हि साधवः ॥९॥
सनकाद्याः साधवस्ते शुकाद्या योगिनस्तथा ।
सत्यश्च ब्रह्मचारिण्यो वासनाक्षयकारिकाः ॥१०॥
संसारोऽयं द्विविधोऽस्ति मूर्तश्चाऽमूर्त इत्यपि ।
मूर्तो वै दम्पतीरूपोऽमूर्तस्तु वासनात्मकः ॥११॥
मिथ्याज्ञानं वासनायाः कारणं वासनाबलात् ।
गार्हस्थ्यं विषयाणां च भोगवत्त्वं सरागिणाम् ॥१२॥
रागो द्वेषः सखारूपः साहाय्यदोऽप्यनिष्टके ।
एतौ द्वौ भवतो दोषौ प्रवर्तकौ निवर्तकौ ॥१३॥
सगुणा सा प्रवृत्तिश्च निवृत्तिश्च क्रियाकरी ।
सक्रियस्य भवेदाद्यक्षणसम्बन्ध उद्भवः ॥१४॥
वृद्धिः पुष्टिर्दृढता च ह्रासः क्षयो लयादिकम् ।
पुनः कर्मानुसारेणोद्भवो लयान्तको भवेत् ॥१५॥
एवं संसारचक्रेऽत्रे भ्रमन्नपि विवेकवान् ।
रागद्वेषादिरहितो मुक्तो भवति बन्धनात् ॥१६॥
गराणि सन्ति बहूनि वदामि शृणु पद्मजे ।
मिष्टं गरं कुटुम्बस्याऽभिमानं जन्मतो भवेत् ॥१७॥
माता पिता सखा बन्धुश्चाभिमानं महद् गरम् ।
गृहं मे वाटिका मे च क्षेत्रं मे पेटिका च मे ॥१८॥
धनं मे च सुवर्णं मेऽम्बरं मे गरमुत्तमम् ।
मान्यं मम वचो नित्यं मदुक्तं सत्यमेव तत् ॥१९॥
अग्र्यं वाक्यं चाऽप्रधृष्यं ममैव मान्यमेव तत् ।
विजयो मे निश्चयो मे मान्यो नान्यस्य कस्यचित् ॥२०॥
निर्णीतं च मया यत् तत् स्वीकार्यं सर्वथा जनैः ।
गरं चैतन्महत्प्रोक्तं यन्मदेन प्रपीड्यते ॥२१॥
बलं विषं परं प्रोक्तं क्लेशदं युद्धकृद्धि तत् ।
कलाज्ञानं गरं चापि सम्पद्गरं तु नाशकृत् ॥२२॥
विषयास्तु गरं लक्ष्मि महानिरयपातिनः ।
विषया विषमेवाऽस्ति यदावेशोऽप्रतिक्रियः ॥२३॥
तृष्णा विषं परं लक्ष्मि रागो विषं महत्तरम् ।
द्वेषो विषं वह्निरूपं चिन्ता गरं तु नाशकृत् ॥२४॥
कामो गरं समस्तानां विषाणां विषमुल्बणम् ।
निरयोऽर्थं निरयाणां प्रदं निरयवासदम् ॥२५॥
मोहो विषं तथाऽनिष्टकरं दुःखप्रदं महत् ।
मुग्धः कृत्यं न जानाति मोहदग्धो विनश्यति ॥२६॥
सत्ता विषं परं चास्ते राज्यं विषं तु मारकम् ।
जिह्वाशिश्नोदरगृध्ना विषं कालप्रकूटकम् ॥२७॥
नास्तिकत्वं गुरोः पित्रोरवमानं विषं गुरु ।
हन्यते येन सहसाऽधोगतिं नाशमेति च ॥२८॥
शापो विषं दुःखितानां सतामस्निग्धता विषम् ।
अधर्मश्च विषं स्वर्गदाहकं भूतिनाशकम् ॥२९॥
निन्दा चौर्यं बलात्कारो विषाणीमानि मूलतः ।
निकृन्तनानि कर्तुर्वै विनाशकानि चाऽचिरात् ॥३०॥
मत्सरोऽसहनं चेर्ष्या नेत्रं ह्यन्मानसं तु तैः ।
निजं निजं तु भवनं कृतं च दह्यते पुमान् ॥३१॥
एवं विषैरावृतोऽयं चाविद्यापरिवेष्टितः ।
नारकी सर्वथा चास्ते विषमेतद् दुरन्तकम् ॥३२॥
उद्भिजः स्वेदजश्चापि तथाऽण्डजो जरायुजः ।
त्यागाभावाद् भ्रमन्त्येवाऽज्ञानवासनकर्मभिः ॥३३॥
षाट्कौशिकं सगरं च भजत्येव कलेवरम् ।
प्रथमं पितृतो जन्म बीजदानात्मकं मतम् ॥३४॥
गर्भाज्जन्म द्वितीयं च बालरूपं तु तन्मतम् ।
तृतीयं ब्रह्मसूत्राच्च विवाहाच्च चतुर्थकम् ॥३५॥
पञ्चमं सर्वसन्न्यासात् षष्ठं तु मरणोत्तरम् ।
सप्तमं मोक्षभाक्त्वं च ततो जन्म न विद्यते ॥३६॥
बैजिकं पाशवं चापि मानवं कर्मबन्धनम् ।
आच्युतं प्रैतकं चाप्यपुनर्भवं हि सप्तमम् ॥३७॥
एवमेतानि जन्मानि विषाक्तानि भवन्ति हि ।
बीजमात्रस्य चाधानं बैजिकं जन्म चोच्यते ॥३८॥
पशुवद् भ्रूणजन्मासं पाशवं बालजन्म तत् ।
मनुं मन्त्रं च गायत्रीं यज्ञोपवीतमित्यपि ॥३९॥
मानवांश्च वृषानेति मानवं जन्म चेति तत् ।
विवाहः कर्मबन्धश्च कारागारसमा स्थितिः ॥४०॥
कर्मबन्धनरूपं तज्जन्म दाम्पत्यरूपकम् ।
सर्वं त्यक्त्वा विरागः सन् सन्न्यासं लभते तु यः ॥४१॥

तस्य जन्माऽऽच्युतं प्रोक्तं हरेः शरणयायिनः ।
देहत्यागे प्रेतभावे सूक्ष्मशरीरयोगकृत् ॥४२॥
धर्माधर्मयुतो देही भ्रमत्येवेति जन्म तत् ।
प्रैतकं प्रोच्यते पुनर्भवार्थे यत्र तत्र वा ॥४३॥
मोक्षार्थं निर्गुणां भक्तिं कृत्वा त्यक्त्वा ऋणानि च ।
छित्वा बन्धान् संविलीय विनाश्य गरलानि च ॥४४॥
यः प्रयाति हरेर्धामाऽपुनर्भवं हि जन्म तत् ।
अनुत्तरविषादः स महामृताद एव सः ॥४५॥
सप्तमं जन्म चासाद्य मरणं नाऽस्य विद्यते ।
एवं लक्ष्मि षड्विषाणि विशालानि भवन्ति वै ॥४६॥
क्रूराणि दाहकान्येव पाचकानि समन्ततः ।
गर्भे दुःखान्यनेकानि योनिमार्गेऽपि वै तथा ॥४७॥
भूतले चापि शय्यायां कौमारे यौवने ततः ।
भोगे योगे व्यवहारे वार्धके पारवश्यगे ॥४८॥
अशक्तौ निर्धने रोगे मरणे प्रेतके तथा ।
याम्ये खनौ विषाक्तानि दुःखान्येव विवेकिनः ॥४९॥
तिर्यक्षु मानवे याक्षे पैशाचे राक्षसे सुरे ।
पितृगणे भोगवत्सु गान्धर्वे चाप्सरोगणे ॥५०॥
ऐन्द्रे ब्राह्मे प्राकृते वैराजे प्रजापतिगृहे ।
पौरुषे कालकवले दुःखं विषं महत्तमम् ॥५१॥
पार्थिवं च तथाऽऽप्यं च तैजसं चापि मारुतम् ।
व्यौमं च मानसं चापि बौद्धं तथाऽऽभिमानिकम् ॥५२॥
प्राकृतं च विषं दुःखं चादौ मध्ये तथाऽन्तके ।
वर्तमानानि दुःखानि भविष्यन्ति गराणि च ॥५३॥
देशे काले क्रियायां च दुःखानि विविधानि च ।
छिन्नमूलतरुर्यद्वत् स्ववशः पतति क्षितौ ॥५४॥
पुण्यत्रक्षक्षयाद् देवा गां पतन्ति परा अपि ।
पापजन्यं तथा दुःखं प्रसह्य दुःखमित्यपि ॥५५॥
नारकाणां नरकेऽपि राज्ञां चाऽप्राप्य मानसम् ।
विहिताऽकरणाच्चापि यतीनां वर्णिनां तथा ॥५६॥
संसारभयमग्नानां दुःखं विरागिणामपि ।
कीटपक्षिमृगाणां च पशूनां गजवाजिनाम् ॥५७॥
गरं दुःखं दुःखवच्चाऽत्यजतो दुःखमेव तत् ।
वैमानिकानां सर्वेषां दुःखं कल्पाधिकारिणाम् ॥५८॥
स्थानाभिमानिनां चापि मन्वादीनां विषं स्थलम् ।
देवानां चापि दैत्यानामन्योन्यविजिगीषया ॥५९॥
रक्षसां च नृपाणां च विषं दुःखं जगत्त्रये ।
श्रमार्थमाश्रमाः सन्ति विश्रामो विद्यया भवेत् ॥६०॥
विद्या दुःखमपात्रे च तस्मात् सत्पात्रतां लभेत् ।
साधुसंगेन सततं जायते सत्यपात्रता ॥६१॥
तया धार्यं भवेद् ब्रह्म कृपयाऽपि सतां रमे ।
नेत्रे धार्यं परब्रह्म कर्णे धार्यो हरिस्तथा ॥६२॥
कृष्णो धार्यस्त्वचां योगे विष्णुर्धार्यो रसाश्रये ।
घ्राणे धार्यः परमेशः पदे धार्यः प्रभुः स्वयम् ।
पायौ लिङ्गे चान्तरात्मा धार्यो व्यापक ईश्वरः ॥६३॥
धार्यो मनसि मायेशो हृदि धार्यो नरायणः ।
बुद्धौ धार्यो माधवश्च हृषीकेशस्तु चिन्तने ॥६४॥
पृथ्व्यां धार्यः परमात्मा जले धार्यो जलेशयः ।
धार्यस्तेजसि धामेशो वायौ धार्यो विराट्पतिः ॥६५॥
महाविष्णुश्चाऽम्बरे च धार्योऽहं तु निजात्मनि ।
द्रष्टव्योऽहं ततो लक्ष्मि श्रोतव्योऽहं तथा हरिः ॥६६॥
घ्रातव्यश्च रसितव्यः स्पर्शितव्योऽहमेव च ।
मन्तव्यश्चापि बोद्धव्योऽहंकर्तव्योऽप्यहं हरिः ॥६७॥
चेतयितव्य एवाऽहं वक्तव्योऽहं तथा प्रभुः ।
आदातव्यश्च गन्तव्यः सर्गायितव्य इत्यहम् ॥६८॥
आनन्दयितव्य एवाऽहं तत्त्वे तत्त्वे स्थितोऽस्म्यहम् ।
प्राणे प्रयाणे याने च पाने स्थैर्ये स्थितोऽस्म्यहम् ॥६९॥
सर्वात्मानं चरन्तं मां समुपासीत चात्मवान् ।
अन्नस्थं चापि वारिस्थं प्राणस्थं मानसे स्थितम् ॥७०॥
विज्ञानस्थमुपासीत मां हरिं पुरुषोत्तमम् ।
इन्द्रियस्थं च मात्रास्थं कालस्थं जीवसंस्थितम् ॥७१॥
सर्वस्थं मामुपासीत संसारविषछित्तये ।
अमृतं चाक्षरेशं मां परमात्मानमान्तरम् ॥७२॥
प्रसन्नं हरिमीशेशं सहस्थं सहजं प्रभुम् ।
अज्ञानं तु मलं क्ष्वेडं त्यक्त्वा मां ज्ञानगोचरम् ॥७३॥
चाऽपरोक्षं विदित्वैवाऽमृतत्वं त्वाप्नुयाद् बृहत् ।
ज्ञानमेवाऽभ्यसेन्नित्यं मद्गोचरं प्रधानतः ॥७४॥
ज्ञानेनैकेन मायुक्तो भक्तिस्नेहानुयोजितः ।
त्यक्तसंगविषो मुक्तो मामुपैति न संशयः ॥७५॥
इह लोके परे वापि कर्तव्यं नाऽस्य विद्यते ।
जीवन्मुक्तो यतस्तस्य वासनाऽपि लयंगता ॥७६॥
ज्ञानभक्तिरतश्चाऽयं ब्रह्मवित्परमार्थतः ।
एवं स मुक्तः संसाराद् दुःखविषादिवर्जितः ॥७७॥
गुर्वाश्रये स्थितो याति धामाऽक्षरं परात्मनः ।
योगिनः सर्वपापानि जीर्यन्ते गरलानि च ॥७८॥

क्रीडन्नपि न लिप्येत गरैर्नानाविधैरपि ।
ध्यानं निर्विषमेवाऽऽस्ते श्रीहरेः सर्वदा रमे ॥७९॥
ब्रह्मशीलो मम ध्यानं कुर्याद् गुरोः प्रसंगमात् ।
मयि तत्तानताभावं प्रान्ते मल्लीनतामपि ॥८०॥
विन्दत्येव हि मद्भक्तो गरं त्वस्याऽमृतं भवेत् ।
एवं गराणि सर्वाणि चामृतान्यस्य भान्ति ह ॥८१॥
भूतानि सूक्ष्ममात्राणि विषया विषयोद्भवाः ।
अगुणाश्च गुणाश्चापि क्रिया गराणि यानि तु ॥८२॥
तानि सर्वाण्यमृतानि कल्पितानि परे मयि ।
एवं वै विषपो भक्तः समर्थो नेतरः क्वचित् ॥८३॥
पृथ्वीं जलं च तेजश्च धर्तुं शक्तो ह्ययं भवेत् ।
वायुं व्योम तथा धर्तुं चाष्टावृत्तीस्तथेश्वरान् ॥८४॥
धर्तुं शक्तो भवेच्चाऽयं प्रकृतिं पुरुषं ह्यपि ।
कालं धर्तुं समर्थश्च भवेत् तदात्मको मम ॥८५॥
अक्षरात्मा भवेच्चापि मुक्तान् धर्तुं प्रभुर्ह्यपि ।
यथाऽहं तु तथा सोऽयं प्रारंभावननाशनम् ॥८६॥
कर्तुं जायेत शक्तो मदात्मकैश्वरभाववान् ।
पारमेशपदं प्राप्य सर्वं कर्तुं प्रभुर्भवेत् ॥८७॥
विषं विद्यादनुभूत्या परिहारं विचिन्तयेत् ।
अविषं वा चोग्रविषं भुक्त्वा विषं विनाशयेत् ॥८८॥
अविषाः साधवः प्रोक्ता उग्रविषो हरिस्त्वहम् ।
साधुसंगान्मम पानान्निर्विषो जायते विषी ॥८९॥
अविषस्य मम स्नेहाद्भक्त्या मम प्रसादनम् ।
प्रसादेन द्रुतं मुक्तिः प्रतिशैषा रमे मम ॥९०॥
गर्भस्थो जायमानो वा बालो वा तरुणोऽपि वा ।
वृद्धो वा मुच्यते देही प्रसादात्परमात्मनः ॥९१॥
अण्डजश्चोद्भिज्ज उत स्वेदजोऽपि प्रमुच्यते ।
जराजो वा नरो नारी मुच्यते मे प्रसादवान् ॥९२॥
ममैवांशा देहिनोऽपि मम योगविशेषिणः ।
मम भावेन सम्पन्नाः प्रयान्ति परमां गतिम् ॥९३॥
मया निभालिता भक्ता ममांऽशा मत्पदाश्रिताः ।
कृपापात्राणि तरन्ति संसारविषसागरम् ॥९४॥
यथा तैलं जलयोगे तरत्येवोर्ध्वमुद्गतम् ।
तथा देही कृष्णयोगे तरत्येवोर्ध्वमुद्गतः ॥९५॥
यथा वह्निः स्वभावेन यात्यूर्ध्वमेधितो ह्यति ।
तथा देही सुभक्त्या मे यात्यूर्ध्वं वर्धितो ह्यति ॥९६॥
यथा योगी महैश्वर्यैर्ब्रह्मद्वारं प्रयाति वै ।
तथा सोऽयं ममैश्वर्यैः परब्रह्म प्रयाति हि ॥९७॥
यथा गोपी ह्यजं प्राप्य गायत्रीत्वमुपागमत् ।
तथा गोपो हरिं प्राप्य गोलोकं समवाप्नुयात् ॥९८॥
यथा लक्ष्मीर्हरिं प्राप्य हृदये वासमाप सा ।
तथा भक्तो हरिं प्राप्याऽक्षरे वासमवाप्नुयात् ॥९९॥
यथा माया हरिं प्राप्य हरौ सा प्रविलीयते ।
तथा भक्तो हरिं प्राप्य हरौ सम्प्रविलीयते ॥१००॥
यथा पत्नी कान्तलग्ना पृथक्त्वे नैव वेत्ति सः ।
तथा भक्तो हरौ लग्नो भेदं नैजं न वेत्ति च ॥१०१॥
यथा तु शर्करा दुग्धे रसतामुपयाति च ।
तथा कृष्णे कृष्णकर्मा भक्तौ दुग्धत्वमृच्छति ॥१०२॥
यथा स्निग्धं मानसं वै स्नेहपात्रे मिलत्यपि ।
तथा स्निग्धो मम भक्तो मय्यपृथङ् मिलत्यपि ॥१०३॥
यथाऽऽनन्दः प्रमोदश्च सुखान्यात्मनि चाऽपृथक् ।
तथा भक्तो दिव्यरूपः परमात्मनि चाऽपृथक् ॥१०४॥
इत्येवं ते मया लक्ष्मि विषहारत्वमीरितम् ।
पठनाच्छ्रवणादस्य विषं सर्वं व्यपोहति ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने संसारविषाणां तद्धरणोपायानां च निरूपणनामा षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

श्रीनारायणीश्रीरुवाच—

आपद्गतस्य भक्तस्य भक्तायास्तव केशव ।
आपन्नाशः कथं स्याच्च पापनाशः कथं भवेत् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

अव्रतस्याऽप्यशक्तस्य ज्ञानहीनस्य देहिनः ।
आपत्पापादिनाशार्थं स्तोत्रं व्यापहनं मतम् ॥ २ ॥
एकाग्रमानसो भूत्वा स्तुवीत परमेश्वरम् ।
अवतारांस्तथा मुक्तानीश्वरान् पितृदेवताः ॥ ३ ॥
ऋषीन् गुरून् भागवतान् साधून् भक्तान् स्तुवीत च ।
अनन्यशरणो भूत्वा प्रार्थयेत् सुखवान् भवेत् ॥ ४ ॥
सर्वसिद्धिप्रदं स्तोत्र दिव्यं वदामि ते रमे ।
श्रोतुर्वक्तुर्वाचयितुः सर्वेष्टानां द्रुतं प्रदम् ॥ ५ ॥
'नमोऽनादिकृष्णनारायणाय परमात्मने ।
महाभगवते मुक्ताऽक्षरेशाय परात्मने ॥ ६ ॥
सृष्टित्रयाधिनाथाय सर्वान्तर्यामिणे नमः ।
परब्रह्मणे पुरुषोत्तमाय चावतारिणे ॥ ७ ॥

सर्ववित् सर्ववासः श्रीनिवासः सर्वसंस्थितः ।
पराऽक्षरस्थो मुक्तेशश्चापत्पापं व्यपोहतु ॥ ८ ॥
अवतारी परब्रह्म दिव्यात्मा श्रीनरायणः ।
परमेशो हि भगवानापत्पापं व्यपोहतु ॥ ९ ॥
अनाद्यनन्तः सर्वेशः सर्वविद्याधरो हरिः ।
सर्वप्रदः सुखदश्च पापाऽऽपदो व्यपोहतु ॥१०॥
अणोरणीयान्महतो महीयान् विश्वपूजितः ।
अनादिश्रीकृष्णनारायणः पापं व्यपोहतु ॥११॥
ब्रह्मप्रियाप्रियः कान्तः शान्तः स्नेहभरः प्रभुः ।
हरिप्रियामनोहारी पायाऽऽपदो व्यपोहतु ॥१२॥
मुक्तमण्डलसंसेव्यो मुक्तानिकाप्रसेवितः ।
कमनीयः परः कान्तः पापाऽऽपदो व्यपोहतु ॥१३॥
अवतारी परिपूर्णः परब्रह्म परात्परः ।
परावरेशः परमः पापाऽऽपदो व्यपोहतु ॥१४॥
श्रीपतिः श्रीधरः श्रीहृत् श्रीमान् श्रीदः श्रियाऽन्वितः ।
श्रीपादः श्रीहरिः कृष्णः पापाऽऽपदो व्यपोहतु ॥१५॥
लक्ष्मीपतिर्लक्ष्मीधरो लक्ष्मीहृत् लक्ष्मदाऽन्वितः ।
लक्ष्मीसेवाऽतिसन्तुष्टः पापाऽऽपदो व्यपोहतु ॥१६॥
राधापतिश्च राधाधृग् राधाहृद्राधिकाऽन्वितः ।
राधात्मा राधिकाकृष्णः पापाऽऽपदो व्यपोहतु ॥१७॥
माणिकीवाहनो माणिकीश्वरो माणिकीप्रभुः ।
माणिक्याऽभिनवहारः पापाऽऽपदो व्यपोहतु ॥१८॥
गोलोकेशो गोपिकेशो गोपीगोपप्रपूजितः ।
गोपालकृष्णो गोधृङ् मे पापाऽऽपदो व्यपोहतु ॥१९॥
नृधरो नृपतिर्नाथो नारायणो नरोत्तमः ।
वैकुण्ठवासी भगवान् पापाऽऽपदो व्यपोहतु ॥२०॥
वसुदो वासुदेवश्च धर्मार्थकाममोक्षदः ।
अमृतादोऽमृतदो ये पापाऽऽपदो व्यपोहतु ॥२१॥
भूमिदो भूस्थितो भूमा भूमता भाग्यवर्धनः ।
भूसत्ताऽव्याकृतस्वामी पापाऽऽपदो व्यपोहतु ॥२२॥
वेदाऽवनो धराधृक्च मन्द्रधृग् ज्ञानधृग् हरिः ।
गोधृग् गोदोहनो हंसः पापाऽऽपदो व्यपोहतु ॥२३॥
तापसो वत्सलः साधुर्भिक्षुः क्रूरोऽध्वरो वनी ।
बालो भिषग्वरः क्लेशी पापाऽऽपदो व्यपोहतु ॥२४॥
सम्राट् शास्त्री कृष्णकान्तः प्राज्ञोऽवतारकारणम् ।
आवेशोंऽशः कला भूतिः पापाऽऽपदो व्यपोहतु ॥२५॥
पूर्णः परो व्यूह ऐशोऽन्तर्याम्यर्चा स्वरूपकृत् ।
विभवश्चैत्यः सुन्यासी पापाऽऽपदो व्यपोहतु ॥२६॥

सर्वधामनिवासो योऽनेकरूपः परेश्वरः ।
जडचेतनशास्ता मे पापाऽऽपदो व्यपोहतु ॥२७॥
नारायणी श्रीपुरेशी माधवी पुरुषोत्तमी ।
कार्ष्णी श्रीललितालक्ष्मीः पापाऽऽपदो व्यपोहतु ॥२८॥
भार्गवी दुःखहालक्ष्मीः शिवराज्ञी च वैष्णवी ।
पद्मिनिका पद्मजा मे पापाऽऽपदो व्यपोहतु ॥२९॥
कंभराश्रीर्महालक्ष्मीर्वासुदेवी परेश्वरी ।
आक्षरी श्रीर्भगवती पापाऽऽपदो व्यपोहतु ॥३०॥
पौरुषी प्राकृती देवी मायेशी पार्वती प्रभा ।
पारब्राह्मी रमा माता पापाऽऽपदो व्यपोहतु ॥३१॥
भूम्नी पद्मा च वैराजी गंगा रेवा सरस्वती ।
गायत्री गोमती गोपी पापाऽऽपदो व्यपोहतु ॥३२॥
सादाशैवी च माहेशी ब्राह्मी ब्रह्मप्रिया सती ।
साध्वी च स्वामिनी चान्द्री पापाऽऽपदो व्यपोहतु ॥३३॥
हिरण्मयी कानकी च हरिणी स्वर्णरूपिणी ।
वैकुण्ठा तुलसी वृन्दा पापाऽऽपदो व्यपोहतु ॥३४॥
सिद्धा पैत्री सिद्धिरूपा चमत्कृतिः सुधैनवी ।
सुधाऽमृता पाशवती पापाऽऽपदो व्यपोहतु ॥३५॥
प्रभा सौरी पार्षदानी चैश्वरी देवता रतिः ।
प्रीतिर्भक्तिर्व्रतरूपा पापाऽऽपदो व्यपोहतु ॥३६॥
सौम्या पुरातनी दिव्या सन्तुष्टा तृप्तिरम्बिका ।
कमलाऽम्बा शारदा मे पापाऽऽपदो व्यपोहतु ॥३७॥
ऐन्द्री चानन्दमात्रा च चिच्छक्तिर्ज्ञानरूपिणी ।
योगिनी नैष्ठिकी हृत्स्था पापाऽऽपदो व्यपोहतु ॥३८॥
मोहिनी नन्दिनी पद्मेक्षणोर्वशी पतिव्रता ।
जननी स्वर्णवर्णा मे पापाऽऽपदो व्यपोहतु ॥३९॥
पुण्या च पावनी विद्या धनदा वित्तधारिणी ।
आर्त्तिहाऽब्धिसुता शान्ता पापाऽऽपदो व्यपोहतु ॥४०॥
भावज्ञा भुक्तिमुक्त्यादिप्रदा भक्ताऽभयंकरी ।
सर्वाधांगा जीवनी श्रीः पापाऽऽपदो व्यपोहतु ॥४१॥
सौभाग्ययुक्ता शोभाढ्या सर्वाभरणभूषिता ।
सर्वशृंगारदीप्तांगा पापाऽऽपदो व्यपोहतु ॥४२॥
सस्यलक्ष्मीः रत्नलक्ष्मीः सम्पल्लक्ष्मीः कुटुम्बिनी ।
धान्याऽन्नधारिणी गौरी पापाऽऽपदो व्यपोहतु ॥४३॥
रोहिणी पोषणकर्त्री कन्यका नवयौवना ।
रामचित्री सुरामा मे पापाऽऽपदो व्यपोहतु ॥४४॥
सत्त्वमयी सत्त्वदात्री सत्त्वभा सत्त्वयोगिनी ।
सात्त्विकी सच्चिदानन्दा पापाऽऽपदो व्यपोहतु ॥४५॥

मुक्ताश्च पार्षदा भक्ता भक्तान्यः साध्व्य ईश्वराः ।
ईश्वराण्यो महामुक्ता व्यपोहन्त्वघमापदः ॥४६॥
शंखश्चक्रं गदा पद्मं कौस्तुभो मुकुटो हरेः ।
वनमाला पुष्पमाला व्यपोहन्त्वघमापदः ॥४७॥
यष्टिश्छत्रं चामरं चांगदश्च कटकस्तथा ।
शृंखला रशना कार्ष्णी व्यपोहन्त्वघमापदः ॥४८॥
गुणैश्वर्याणि सर्वाणि चमत्काराश्च सिद्धयः ।
शक्तयः श्रीहरेः सर्वा व्यपोहन्त्वघमापदः ॥४९॥
शालग्रामस्तथा शालंकायनर्षिश्च गण्डकी ।
त्रिवेणी शालवृक्षश्च व्यपोहन्त्वघमापदः ॥५०॥
बदरी बदरीवासाः ऋषयश्च नरो हरिः ।
गंगा हिमाश्रयो हैमा व्यपोहन्त्वघमापदः ॥५१॥
शेषशायी क्षीरनिधिः क्षीरजा श्वेतभोगिराट् ।
निरन्नमुक्तभक्ताश्च व्यपोहन्त्वघमापदः ॥५२॥
ब्रह्मा विष्णुः शंकरश्च गणेशश्च प्रभाकरः ।
गणा रुद्राश्च रुद्राण्यो व्यपोहन्त्वघमापदः ॥५३॥
सिद्धा यक्षाश्च गन्धर्वाश्चन्द्रस्ताराश्च तैजसाः ।
ग्रहाश्च केतवश्चापि व्यपोहन्त्वघमापदः ॥५४॥
हंसो गरुडो वृषभः सिंहश्च हरिणो गजः ।
शेषः शिखी दिव्यवाहा व्यपोहन्त्वघमापदः ॥५५॥
कार्त्तिकेयो महाकालो महावज्रं त्रिशूलकम् ।
कालदण्डो हेतयस्ते व्यपोहन्त्वघमापदः ॥५६॥
आदित्या वसवो रुद्रा अश्विनावीश्वरेश्वराः ।
दिक्पाला लोकपालाश्च व्यपोहन्त्वघमापदः ॥५७॥
गगनं स्पर्शनं तेजो रसश्च पृथिवी तथा ।
तन्मात्राणि तथा प्राणा व्यपोहन्त्वघमापदः ॥५८॥
साध्या विश्वे मरुतश्च किन्नरा गुह्यकास्तथा ।
गन्धर्वा किंपुरुषका व्यपोहन्त्वघमापदः ॥५९॥
देवानां मातरश्चापि गणानां मातरस्तथा ।
भूतानां मातरः सर्वा व्यपोहन्त्वघमापदः ॥६०॥
अप्सरसस्तथा देव्यो राशयस्तिथयस्तथा ।
पक्षा मासा वत्सराश्च व्यपोहन्त्वघमापदः ॥६१॥
ज्वरा रोगाश्च ऋतवः ऋणानि राक्षसास्तथा ।
दैत्याश्च दानवा दुष्टा व्यपोहन्त्वघमापदः ॥६२॥
सागराः सरितः कूपास्तडागानि च दीर्घिकाः ।
वाप्यः सरांसि वरुणो व्यपोहन्त्वघमापदः ॥६३॥
गावो याः कामवर्षिण्यः कल्पपूराश्च वल्लिकाः ।
तथा च कल्पतरवो व्यपोहन्त्वघमापदः ॥६४॥
यज्ञा यज्ञक्रियाश्चापि विधयः श्रुतयोऽपि च ।
ऋचः सामानि छन्दांसि व्यपोहन्त्वघमापदः ॥६५॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुः सर्वज्ञो व्यपोहन्त्वघमापदः ॥६६॥
पावकः पावनो वह्निः सप्तार्चिः सप्तजिह्विकः ।
स्वर्णपिता ब्रह्ममुखं पापाऽऽपदो व्यपोहतु ॥६७॥
दानं दमो दया दैवं देवा देव्यश्च साधवः ।
सन्तः सत्पुरुषाः पुण्या व्यपोहन्त्वघमापदः ॥६८॥
वृद्धा वन्द्या भागवता भक्ताश्चैकान्तिनो हरेः ।
दैवज्ञा देवपुरुषा व्यपोहन्त्वघमापदः ॥६९॥
व्रतानि पुण्यकर्माणि सुकृतानि प्रसेवनम् ।
सेवा श्रद्धा भावना च व्यपोहन्त्वघमापदः ॥७०॥
योगा ज्ञानानि सर्वाणि सत्यं वैराग्यमीशिता ।
उपासना हरेराज्ञा व्यपोहन्त्वघमापदः ॥७१॥
गृहदेवा ग्रामदेवाः क्षेत्रदेवाश्च सीमगाः ।
द्वारदेवा बहिर्देवा व्यपोहन्त्वघमापदः ॥७२॥
वास्तुदेवाः श्राद्धदेवा मखदेवा महोत्सवाः ।
तीर्थानि देववासाश्च व्यपोहन्त्वघमापदः ॥७३॥
देवालया मन्दिराणि मठाः कथास्थलानि च ।
मुक्तिक्षेत्राणि सर्वाणि व्यपोहन्त्वघमापदः ॥७४॥
मातरः पितरः श्रेष्ठा बान्धवाश्च सतीस्त्रियः ।
भक्ता बाला बालिकाश्च व्यपोहन्त्वघमापदः ॥७५॥
प्रायश्चित्तानि सर्वाणि दर्भाश्च देवहेतयः ।
हव्यकव्यानि दैवानि व्यपोहन्त्वघमापदः ॥७६॥
देवरथा देवयाना देवमार्गाश्च देवताः ।
आतिवाहिकदेवाश्च व्यपोहन्त्वघमापदः ॥७७॥
विद्युतश्च घना मेघा भूकम्पा ईतयस्तथा ।
बलिहाराश्च ये देवा व्यपोहन्त्वघमापदः ॥७८॥
निधयश्च दिशाश्चापि मनवश्च कलास्तथा ।
चतुर्दशभवनानि व्यपोहन्त्वघमापदः ॥७९॥
व्याहृतयः प्राणयमा याम्याश्च धर्मवंशजाः ।
धर्मदेवश्च तत्पत्न्यो व्यपोहन्त्वघमापदः ॥८०॥
कुण्डमण्डपदेवाश्च ध्वजशाखानिवासिनः ।
समित्पात्रादिदेवाश्च व्यपोहन्त्वघमापदः ॥८१॥
सद्गुरोश्चरणौ लक्ष्मि चरणामृतवारि च ।
गुरुभुक्तप्रसादश्च व्यपोहन्त्वघमापदः ॥८२॥
सतीपतिपादवारि साधुचरणवारि च ।
विष्णुपादोदकं पुण्यं व्यपोहन्त्वघमापदः ॥८३॥

सतां समागमः सेवाऽऽश्रयश्चाऽऽज्ञावचांसि च ।
प्रसन्नताऽऽशीर्वादाश्च व्यपोहन्त्वघमापदः ॥८४॥
मातृतीर्थं पितृतीर्थं गुरुतीर्थं तथोत्तमम् ।
पतितीर्थं सतीतीर्थं व्यपोहन्त्वघमापदः ॥८५॥
गोतीर्थं चाऽवभृथतीर्थं पंक्तितीर्थं च दीक्षणम् ।
सन्यासतीर्थं मन्त्रश्च व्यपोहन्त्वघमापदः ॥८६॥
यज्ञोपवीतकं कण्ठी तौलसेयी समर्पणम् ।
आत्मनिवेदिताख्यं च व्यपोहन्त्वघमापदः ॥८७॥
योगित्वं साधुता नैष्ठिकता श्रोत्रियता तथा ।
ब्रह्मसत्ता भक्तता च पावयन्तु हि मां सदा ॥८८॥
पावनी कुंकुमवापी पावनः श्रीनरायणः ।
पावनीश्रीः पावयन्तु मां सदा शरणागतम् ॥८९॥
धर्मो विष्णुः श्रीश्च भक्तिः सेवा मां पावयन्त्विह ।
एषः समर्पितश्चाऽस्मि तं मां भक्तं पुनन्त्विह ॥९०॥
एवं स्तुवन् नमेद् भूमौ लक्ष्मिं पावनवृत्तिमान् ।
आपदस्तस्य नश्यन्ति निवर्तन्ते ह्यघानि च ॥९१॥
व्यपोहनस्तवं दिव्यं यः पठेच्छृणुयादपि ।
पत्रं पुष्पाद्यर्पयेश्च शुद्धो भवति तत्क्षणात् ॥९२॥
कन्यार्थी लभते कन्यां जयकामो जयं लभेत् ।
अर्थकामो लभेदर्थं पुत्रकामः सुतान् लभेत् ॥९३॥
विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात् ।
सम्पदर्थी सम्पदश्च राज्यार्थी राज्यमाप्नुयात् ॥९४॥
स्वर्गार्थी स्वर्गमाद्यान्मोक्षार्थी मोक्षमाप्नुयात् ।
दुःखनाशाभिलाषी च दुःखनाशमवाप्नुयात् ॥९५॥
पत्यर्थिनी पतिं रम्यं धनार्थिनी धनं लभेत् ।
सुखार्थिनी सुखं चापि सौभाग्यं लभते तथा ॥९६॥
यशोऽर्थिनी यशश्चापि प्राधान्यं लभते तथा ।
यान् यानर्थयते कामान् सर्वानवाप्नुयात् स्तवी ॥९७॥
पठ्यमानमिदं पुण्यं यमुद्दिश्य तु पठ्यते ।
तस्य रोगा न बाधन्ते वातपित्तादिसंभवाः ॥९८॥
नाऽमृत्युर्भवेत्तस्य न दंष्ट्राविषसंगमः ।
नाऽकालदुःखवाँश्चापि भवेद् व्यपोहनस्तवी ॥९९॥
सर्वतीर्थप्रपुण्यानि यज्ञपुण्यानि यानि च ।
दानव्रतानां पुण्यानि लभेद् व्यपोहनस्तवी ॥१००॥
गोघ्नः कृतघ्नो वीरहा ब्रह्महा बालहा तथा ।
शरणागतहा मित्रविश्वासघातकोऽपि च ॥१०१॥
मातृहा पितृहा नारीहा तथा पशुघातकः ।
व्यपोह्य सर्वपापानि शुद्धो भवति संस्तवी ॥१०२॥
भक्तिं कृत्वा सर्वपुण्यो याति मोक्षप्रदं ततः ।
अगतिकस्य गतिदं स्तोत्रं व्यपोहनं त्विदम् ॥१०३॥
लक्ष्मिं स्तुत्वाऽनेन मां तु नमेत् प्रप्रार्थयेत्ततः ।
ध्यात्वा ब्रह्ममयो भूत्वा मुच्यते बन्धनादितः ॥१०४॥
एतदुच्चार्य भावेन स्तोतव्यं नावशिष्यते ।
तस्मादापत्प्रदे काले व्यपोहनं समुच्चरेत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सर्वाऽऽपत्पापबन्धनादिनाशार्थकं व्यपोहनस्तवनमुक्तमिति सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं सर्वपापविनाशकम् ।
सर्वपुण्यप्रदं पुण्यं मखे कन्याप्रदानकम् ॥ १ ॥
यज्ञं कृत्वा भोजयित्वा तोषयित्वा सतो द्विजान् ।
भिक्षुकान् बालिका बालान् दत्वा च दक्षिणावराः ॥ २ ॥
कन्यादानं दिशेत् कोटियज्ञपुण्यं लभेद्धि सः ।
मण्डपे कुण्डके वह्नौ जुहुयात् पायसैः फलैः ॥ ३ ॥
मिष्टान्नैश्च कणाद्यैश्च समिद्भिराज्यकैः शुभैः ।
घृतानां पुष्टधाराभिस्तर्पयेत् पितृदेवताः ॥ ४ ॥
ततश्चावाहयेत्तत्र मण्डपे तु कुमारकम् ।
विद्वांसं च सुरूपं च कीर्तिमन्तं सुवंशजम् ॥ ५ ॥
सम्पन्नं च युवानं च कन्यामानसमोदनम् ।
सुभाग्यं पूर्वविज्ञातशीलधर्मगुणादिकम् ॥ ६ ॥
समाजस्य प्रकाशे तं निषाद्य वह्निसन्निधौ ।
विप्राणो साक्षिकार्ये च वह्नेः साक्ष्ये च मण्डपे ॥ ७ ॥
देवानां यज्ञभोक्तृणां साक्ष्ये कन्यापिता तदा ।
पूजयेद् वारिपुष्पाद्यैर्नामगोत्रादि कीर्तयेत् ॥ ८ ॥
दानार्थं पात्रतां वीक्ष्य वाचयेत् स्वस्तिवाचनम् ।
देहशुद्धिं कारयेच्च दद्याद् यज्ञोपवीतकम् ॥ ९ ॥
मन्त्रं प्रदापयेद् यज्ञे वैष्णवं पारमेश्वरम् ।
तुलसीं रक्षयेत् तत्र तिलकं कारयेत्ततः ॥१०॥
चन्द्रकं कारयेदक्षताक्तकुंकुमचन्दनैः ।
पुष्पहारान् शुभं वेषं धारयेद् वरशोभनः ॥११॥
विभूषाश्चार्पयेत्तस्मै पादौ प्रपूजयेत्ततः ।
मधुपर्कं दापयेच्च प्राशयेत् सुप्रसादकम् ॥१२॥
यज्ञीयं पायसाद्यं च हवनं कारयेदपि ।
अथ वाद्यानि रम्याणि वादयेद् गापयेत्तथा ॥१३॥

गीतिका वेदमन्त्राँश्चोच्चारयेद् वैदिकैर्द्विजैः ।
सर्वदेवान् हरिं लक्ष्मीं नारायणं नरायणीम् ॥१४॥
वह्निं विप्रान्नमस्कृत्य पिता कन्यामुपस्थिताम् ।
भूषितां बहुभूषाभिः शृंगारितां सुसारकैः ॥१५॥
वेषितां दिव्यवस्त्राद्यै रञ्जितां मानदानकैः ।
प्रसादितां विवाहार्थे समानीतां तु मण्डपे ॥१६॥
प्रकाशे सर्वलोकानां स्थापयेद् वरवामके ।
वह्निं नमेद् द्विजान् साधुनृषीन् वृद्धान् समाजकम् ॥१७॥
कुमारं प्रणमेच्चापि पुष्पाक्षतैः प्रवर्धयेत् ।
कुंकुमाऽक्षतचन्द्रं च कुर्यात् कुमारभालके ॥१८॥
नारायणः प्रीयतां मे गणेशः प्रीयतामिति ।
प्रीयन्तां देवताः सर्वे विधीयन्तां ममेष्टकम् ॥१९॥
वदेदथाऽऽसने कन्या निषद्य भूसुरार्पितम् ।
जलं धृत्वा निजे हस्ते कुर्यात् संकल्पमुत्तमम् ॥२०॥
अहं कन्या कुमार्यस्मि नारायणसमीपतः ।
देवानां सन्निधौ यज्ञे स्वर्पणार्थमुपागता ॥२१॥
पिता यस्मै प्रदास्येत तस्याऽहं वह्निसन्निधौ ।
भविष्यामि धर्मपत्नी निर्विघ्नं मे भवत्विह ॥२२॥
इत्युक्त्वा तज्जलं पृथ्व्यां विमुञ्चेत् सा हि कन्यका ।
अथाऽस्या जनको यद्वा भ्राता माताऽथ बान्धवः ॥२३॥
विप्रोक्तरीत्या हि जलं गृह्णीयात् स्वकरे तदा ।
कुमारस्य करे चापि जलं दद्याद् गुरुस्तदा ॥२४॥
संकल्पं कारयेच्चापि पुण्याहं वाचयेत्तथा ।
कन्यादातृत्वाधिकारं ख्यापयेज्जलसाक्षिकम् ॥२५॥
कुमारस्य दानग्रहणार्हतां वाचयेत्तदा ।
एषोऽहं चामुकगोत्रनामादिर्मण्डपे मखे ॥२६॥
कन्यादानं ग्रहीष्यामि धर्मार्थे वह्निसाक्षिकम् ।
इति संकल्प्य च जलं कुमारः प्रक्षिपेत् क्षितौ ॥२७॥
रक्षिष्यामि मम पत्नीं कन्यामाजीवनं त्विमाम् ।
सहधर्मान् चरिष्यामि नारायणस्य साक्षिके ॥२८॥
इत्युच्चारादुत्तरं च पिता संकल्पमुच्चरेत् ।
कन्यादानं ददाम्यस्मै कुमाराय वराय ह ॥२९॥
अमुकगोत्रनाम्ने वै देववह्न्यादिसाक्षिणा ।
दत्तेयं मम कन्याऽस्य पत्नीरूपा प्रजायताम् ॥३०॥
इत्युक्त्वा कन्यकाद्वारा वरमालां वरस्य वै ।
कण्ठे चार्पय्य च नमः कारयेत् कन्यकाकरम् ॥३१॥
वामं प्रदापयेद् दक्षे हस्ते वरस्य शोभने ।
कामफलेन संशोभे संशोभं कन्यकाऽर्पयेत् ॥३२॥
एषाऽहं भवतः पत्नीत्येवं संकल्पयेत् हृदि ।
एषोऽहं च भवत्यास्तु पतिश्चेति वरो वदेत् ॥३३॥
पुष्पैः संवर्धयेयुश्च मण्डपस्था द्विजादयः ।
वरो मालां कन्यकायाः कण्ठे दद्यान्निजस्थिताम् ॥३४॥
उभौ समालौ चोत्थाय वस्त्रग्रन्थियुतौ तदा ।
वह्निं प्रदक्षिणीकृत्य चतुर्वारं निजासने ॥३५॥
स्थित्वा कृत्वा प्रणामादीन् निषद्य हवनं ततः ।
प्रकुर्यातां घृताद्यैश्च पिता दद्याद् धनादिकम् ॥३६॥
स्वर्णं वस्त्राणि भवनं यानं वाहनमुत्तमम् ।
अन्ये दद्युश्च दानानि यौतकानि शुभानि च ॥३७॥
एवं यज्ञे निजकन्यादानं दैवविवाहनम् ।
देवानां साक्षिकत्वे वै श्रेष्ठमुत्तममुत्तमम् ॥३८॥
पेटिकादिप्रदानेन स्वर्गदानफलं भवेत् ।
अत्र द्रोणीप्रदानेन हण्डदानेन वा तथा ॥३९॥
गगरीसम्प्रदानेन ब्रह्माण्डदानजं फलम् ।
गोभूधान्यहिरण्यादिप्रदानेनाऽध्वरे तदा ॥४०॥
दम्पतीभ्यां फलं पृथ्वीमेरुदानादिजं भवेत् ।
हेमशृंगी खुरै रूप्यैर्दिव्यवस्त्रेण संयुता ॥४१॥
सकांस्यपात्रा दातव्या क्षीरिणी गौः सवत्सिका ।
सदक्षिणा प्रदातव्या गोलोकदानजं फलम् ॥४२॥
यावद् वत्सस्य पादाद्यमुखं योन्यां प्रदृश्यते ।
तावद्द्यौः पृथिवी ज्ञेया दाता साम्राज्यमाप्नुयात् ॥४३॥
श्रान्तसंवाहनं रोगिपरिचर्या सुरार्चनम् ।
पित्रर्चनं वृद्धपूजा सत्सेवा पतिसेवनम् ॥४४॥
सतीपूजा तथा देवालयस्य मार्जनादिकम् ।
उच्छिष्टम्वादिपात्रादिमार्जनं साधुयोगिनाम् ॥४५॥
विप्राणां तोषणं चेति सर्वं तद् गोप्रदानवत् ।
पापघ्नं पुण्यदं स्वर्गप्रदं मोक्षप्रदं तथा ॥४६॥
साधवे स्वमभीष्टन्तु दत्वा मोक्षमवाप्नुयात् ।
द्विजाय स्वमभीष्टन्तु दत्वा स्वर्गमवाप्नुयात् ॥४७॥
दम्पतीभ्यां प्रदानेन स्वर्गमोक्षाववाप्नुयात् ।
भूदीपाँश्चान्नवस्त्राणि सर्पिर्दत्वा व्रजेच्छ्रियम् ॥४८॥
गृहधान्यच्छत्रमाल्यवृक्षयानघृतानि च ।
जलं शय्यामनुलेपं दत्वा स्वर्गमवाप्नुयात् ॥४९॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्लभम् ।
वेदार्थयज्ञशास्त्राणि धर्मशास्त्राणि यानि च ॥५०॥
संहिताश्च तथा दत्वा ब्रह्मलोकमवाप्नुयात् ।
समर्थो यो न गृह्णीयाद् दातृलोकानवाप्नुयात् ॥५१॥

अयाचितागतं ग्राह्यं ह्यपि दुष्कृतकर्मणाम् ।
कुशाः शाकं पयश्चाऽऽज्यं दधि वारि च पावनम् ॥५२॥
वस्त्रं तैलं चन्दनं च कुंकुमं चाम्बरादिकम् ।
अयाचिताऽऽहृतं प्राप्तं ग्राह्यं नारायणेच्छया ॥५३॥
नारायणीच्छया प्राप्तं ग्राह्यं सता विपश्चिता ।
असंगेन विरागेण ग्राह्यं देयं तथाऽपरे ॥५४॥
दम्पतीभ्यां तथा यज्ञे दत्तं स्वल्पमपि ध्रुवम् ।
अक्षयं चानन्तफलं जायते नात्र संशयः ॥५५॥
यज्ञे दत्ता तु या कन्या लक्ष्मीरूपा प्रजायते ।
नारायणस्वरूपोऽपि ग्रहीता स वरो मतः ॥५६॥
आच्युतेऽध्वरभवने क्षेत्रे तु पावने तदा ।
दानं देवादिसाक्ष्ये वै जायते चाऽऽच्युतं हि तत् ॥५७॥
एवं दानं प्रदातव्यं दैवो विवाह एव सः ।
सर्वपापानि नश्यन्ति सर्वपुण्योदयो भवेत् ॥५८॥
एतादृशं परं दानं भूलोके नैव विद्यते ।
शृणु लक्ष्मि तथा चान्यत् कृतपापविनाशनम् ॥५९॥
कृतानां कर्मणां कृष्णेऽर्पणं पापविनाशकम् ।
अर्पणं निर्गुणं प्रोक्तं भोगाय नैव जायते ॥६०॥
दोषान् वा संवदेद् विप्रे गुरौ देवे च राजनि ।
क्षमां याचेत नत्वैव दक्षिणं श्रवणं स्पृशेत् ॥६१॥
पुनश्चाऽदोषतास्थित्यै दद्याच्च वचनं तथा ।
एवं कृतेऽपि दोषाणां दण्डस्तस्य न विद्यते ॥६२॥
देवार्थे प्राणसहितं दद्यात् सर्वस्वमेव यः ।
तस्य नश्यन्ति कर्माणि ह्यपि चोग्राणि कर्मजे ॥६३॥
अथाऽन्यत्ते प्रवक्ष्यामि सन्न्यासग्रहणं शुभम् ।
कालमायापापकर्मयाम्यभयादिनाशकम् ॥६४॥
कृत्वा मखं तु गृह्णीयात् सन्न्यासं वैष्णवं परम् ।
आत्मनिवेदितां लब्ध्वा सर्वाघानि व्यपोहति ॥६५॥
कर्मसन्न्यासमासाद्य पापान्यपि व्यपोहति ।
साधुतीर्थं प्रसेव्याऽपि सर्वपापानि मार्जयेत् ॥६६॥
अथाऽन्यत्ते प्रवक्ष्यामि विनायकोपसर्जनन् ।
दुष्टातिदुष्टदुःखानां निवारकं सुखप्रदम् ॥६७॥
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ।
विफलारंभणं चापि खंसीदत्यनिमित्ततः ॥६८॥
राजा राज्यं तु नाप्नोति कुमारी च पतिं तथा ।
गुर्विणी नाप्नोति पुत्रं कष्टे त्वेवमुपस्थिते ॥६९॥
विधिपूर्वं प्रगे पुण्ये क्षणे स्नपनमाचरेत् ।
गौरसर्षपगन्धाढ्यैरुद्वर्तनोत्तरं शिरः ॥७०॥

सर्वौषधैः सर्वगन्धैर्विलिपेत् स्वस्ति वाचयेत् ।
ह्रदाच्चतुर्भिः कलशैराहृतेषु जलेषु तु ॥७१॥
मृत्तिकां रोचनां गन्धान् गुग्गुलं न्यस्य तज्जलैः ।
भद्रासने स्नापयेच्च स्वप्नवन्तं हि देहिनम् ॥७२॥
इन्द्रमृषयोऽस्नापयँश्चाऽमोचयन् पुरा ह्यघात् ।
तथा त्वामभिसिञ्चामः पावमान्यः पुनन्तु त्वाम् ॥७३॥
भगवान् वरुणो राजा भगं सूर्यो बृहस्पतिः ।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥७४॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ।
ललाटे कर्णयोरक्ष्णोर्नाशं तद्यातु ते सदा ॥७५॥
स्नातस्य सार्षपं तैलं श्रवणे मस्तकेऽर्पयेत् ।
साज्यान् कुशान् परिगृह्य जुहुयाच्छालदुण्डकैः ॥७६॥
कुष्माण्डं राजपुत्राँश्च स्वाहासमन्विताँस्तथा ।
दद्याच्चतुष्पथे भूमौ कुशानास्तीर्य सर्वशः ॥७७॥
तण्डुलौदनमपक्वं पुष्पं चित्रं सुगन्धवत् ।
सुरामन्नं पायसं च घृतं दधि गुडौदनम् ॥७८॥
भूमौ दत्वा शिवं नत्वा भोजयेदम्बिकां सतीम् ।
दूर्वासर्षपपुष्पैश्च स्वस्ति संप्रार्थयेत् सतीम् ॥७९॥
रूपं देहि यशो देहि भाग्यं देहि सुभाग्यदे ।
पुत्रान् श्रियं सर्वकामान् देहि मे विघ्नमुक्तताम् ॥८०॥
विप्रान् साधून् तोषयेच्च दानभोजनचन्दनैः ।
गुरुं ग्रहान् पूजयेच्चार्पयेल्लक्ष्मीं नरायणम् ॥८१॥
यद्वा लक्ष्मि दुःखमूर्तिं कृत्वा दुखं प्रपूजयेत् ।
कृशं पङ्गुं कृष्णवर्णं पुष्टहस्तं शुचाऽन्वितम् ॥८२॥
निम्ननेत्रं चान्धतुल्यं क्षुधितं धमनिस्फुटम् ।
श्वेतकेशं च कद्रूपं चिन्तायुतं मलान्वितम् ॥८३॥
अधर्मपुत्र कष्ट त्वं दूरं याहि प्रपूजितः ।
बलिं लब्ध्वा कृसरान्नं पिण्याकं च सुखी भव ॥८४॥
एवं प्रपूज्य पुष्पाद्यैः कृष्णवस्त्रयुतं ततः ।
विसर्जयेन्नदीवारौ नारायणपदेऽथवा ॥८५॥
विसर्जितः पूजितः स दुःखदेवः प्रयाति वै ।
एवं लक्ष्मि पापदेवः पूजनीयः सुखार्थिभिः ॥८६॥
कृष्णवर्णः पुष्टपादो लम्बहस्तस्तमोऽक्षिमान् ।
कृष्णाननो भयव्यासः क्रूरकर्मा सहिंसकः ॥८७॥
कृष्णपुष्पैः कज्जलैश्च पूजयित्वाऽर्पयेत् बलिम् ।
माषादिकं पायसादि विसर्जयेत्ततो वने ॥८८॥
एवं कृते प्रयात्येव दूरे वै पापपूरुषः ।
एवं लक्ष्मि पूजयेच्च सुखं देवं सुखेन वै ॥८९॥

प्रसन्नवदनं सौम्यं पुष्टं श्वेतं सुभूषणम् ।
स्वर्णाम्बरं समस्तांगकृतशोभं सुयौवनम् ॥९०॥
सर्वाभरणसंयुक्तं पुष्पाक्षतादिभिः शुभैः ।
पायसं चापि मिष्टान्नं फलादि चार्थयेद् बलिम् ॥९१॥
धर्मयुतं भक्तियुतं शीलव्रतादिसंयुतम् ।
पूजयित्वा शुभे पुण्ये मन्दिरे चालये तथा ॥९२॥
जले विसर्जयेद् भक्त्या सम्प्रार्थ्य च प्रणम्य च ।
सर्वात्मन् सर्वलोकानां महानन्दप्रद प्रभो ॥९३॥
तव वासेन मे नित्यमहानन्दः प्रजायते ।
अविमुक्तो मम नित्यं भव वासं सदा कुरु ॥९४॥
तव दृष्ट्यापि लोकेशा भवन्ति चेश्वरा दिवि ।
पृथ्व्यां ते कृपया देव सुखिनः सन्ति मानवाः ॥९५॥
तेनाऽहं च सुखी स्यां वै प्रसन्नो वरदो भव ।
इत्यभ्यर्थ्य सुखं देवं पूजयित्वा प्रणम्य च ॥९६॥
विसर्जयेज्जलमध्ये पूजकः सुखवान् भवेत् ।
नरो नारी च वा नान्यतरोऽपि चोक्तरीतितः ॥९७॥
पूजयित्वा लभेल्लक्ष्मीं सम्पदं धनमुत्तमम् ।
पुत्रं पशुं क्षितिं नारीं वंशविस्तारमित्यपि ॥९८॥
अदुःखं लभते नित्यं महोत्सवान् प्रपद्यते ।
अत्रलोके भवेच्चापि महास्मृद्धः परत्र च ॥९९॥
महाभोगान् प्रसम्पाद्य मोक्षलोकं प्रयाति सः ।
न तस्य जायते हानिश्चाकस्मात्तो न जायते ॥१००॥
पीडा चाकस्मिकी चापि दारिद्र्यं नैव जायते ।
नित्यं सम्पत् सुखं सर्वं वर्धते भोग उत्तमः ॥१०१॥
पठनाच्छ्रवणादस्य पूजनस्य फलं भवेत् ।
सुखवान् धनवान् स्याच्च दाता भवेत् पुनः पुनः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने यज्ञे कन्यादानं कृष्णार्पणं सन्न्यासग्रहणं विनायकोपसर्जनम् पापदुःखसुखपुरुषप्रपूजनं चेति महाफलप्रदमित्यादिनिरूपणनामाऽष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

श्रीनारायणीश्रीरुवाच—

कथं नित्या अपि जीवा ज्ञानवन्तोऽपि देहिनः ।
जानन्तोऽपि मृत्युपदं प्रयान्ति कारणं वद ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

सर्वे जिह्मं मृत्युपदं जिह्मा मृत्युं प्रयान्ति हि ।
कुटिलां वृत्तिं कुर्वन्ति कामाद्यास्ते हि मारकाः ॥ २ ॥
त एव निजदेहस्थाः शत्रवो घातकाः सदा ।
तद्धीनानां न वै मृत्युर्योगिनां च सतां रमे ॥ ३ ॥
मृत्युर्वै नरकः प्रोक्तः स च जन्मादिनिर्मितः ।
जन्म कर्मबलात् प्राप्तं कर्म वासनयाऽर्जितम् ॥ ४ ॥
सा चेन्निर्दह्यते शान्त्या दमेन सेवया सताम् ।
हरेर्भक्त्या क्षालयेच्चात्मानं विशदतां दिशेत् ॥ ५ ॥
ततो मृत्युः कष्टरूपो मरणाख्यो न जायते ।
दिव्यभावमुपायातो याति ब्रह्म सनातनम् ॥ ६ ॥
चिरंजीवो भवत्येव शाश्वतैश्वर्यवान् भवेत् ।
मृत्युशीला धातवोऽस्य दिव्या भवन्ति मद्बलात् ॥ ७ ॥
प्रमादश्चापि मोहश्च विनश्यतोऽस्य सर्वथा ।
तावेव मृत्युरूपौ हि नास्याऽऽविशतो वै क्वचित् ॥ ८ ॥
मायाहीनस्य भक्तस्य मम योगे स्थितस्य च ।
माया दिव्या जायतेऽपि बन्धनादिविवर्जिता ॥ ९ ॥
ततोऽसौ नित्यमुक्तात्मा ब्रह्मण्येव प्रवर्तते ।
एवं लक्ष्मि भवत्येव त्वं यथा चाब्धिजा ह्यपि ॥१०॥
वर्तसे मम योगेन दिव्या मायाविवर्जिता ।
नित्या सुसमसंस्थाना वृद्धिह्रासविवर्जिता ॥११॥
यथाऽहं च तथा त्वं वै तथा भक्तो भवत्यपि ।
मदिच्छा तादृशी लक्ष्मी तया तथैव जायते ॥१२॥
आत्मनस्तु पुराऽहंकारेण युद्धमवर्तत ।
अहंकारेण देहोऽयं निजराज्यात्मकः कृतः ॥१३॥
सुगन्धश्च हृतस्तेन सर्वोऽपि निजराज्यजः ।
दुर्गन्धश्चावशिष्टश्च मृत्युदो दुःखदो गरः ॥१४॥
चिदात्मा वीक्ष्य दुष्कृत्यं ज्ञाननाशात्मकं ह्यपि ।
अनात्म्याचरणं वीक्ष्य शस्त्रं विवेकमादधे ॥१५॥
अहंकारस्य दुष्टस्याऽवासृजन्मृत्युदस्य तत् ।
वध्यमानोऽप्यहंकारः शस्त्रेण चातिवेगिना ॥१६॥
विवेश पृथिवीं त्यक्त्वा जलभागं निरामयम् ।
सुरसश्च हृतस्तेन सर्वोऽपि निजराज्यजः ॥१७॥
दुष्टरसोऽवशिष्टश्च मृत्युदो दुःखदो गरः ।
आत्मा शस्त्रं पुनस्तस्याऽवासृजद् वधहेतवे ॥१८॥
वध्यमानो विवेशाऽहंकारो ज्योतिःप्रदेशकम् ।
तत्र रूपं सुरूपं च जग्राह निजराज्यगम् ॥१९॥
कुरूपं चाऽवशिष्टं च चिदात्मा पुनरेव च ।
तीक्ष्णं शस्त्रं विवेकाख्यमस्य चाऽवासृजत्ततः ॥२०॥
ताड्यमानोऽप्यहंकारो विवेश वायुभूस्तरम् ।
तत्र स्पर्शं सुष्ठुसंज्ञं जग्राह निजराज्यगम् ॥२१॥

कुस्पर्शश्चावशिष्टो वै तं विलोक्य पुनस्तथा ।
शस्त्रं चाऽवासृजत्तस्य विनाशार्थमथापि सः ॥२२॥
अहंकारोऽविशद् व्योम शब्दं जग्राह तद्गतम् ।
कुशब्दश्चावशिष्टश्च वीक्ष्य तं तु पुनस्तथा ॥२३॥
चिदात्मा शस्त्रमागृह्य मारयामास यावता ।
अहंकारो विवेशाऽपि चिदात्मनि निराश्रितः ॥२४॥
चिदात्मा च गुरुर्भूत्वोपादिदेशाप्यहंकृतिम् ।
अहं ब्रह्मस्वरूपोऽस्मीत्यहंकारोऽपि तद् दधौ ॥२५॥
ततो ब्रह्मस्वरूपस्याऽभिमस्था ब्रह्मतां ययौ ।
मायिकोऽपि गुरोर्वाक्यादुपास्त्या ब्रह्मतां ययौ ॥२६॥
चिदात्मा तं विवेकेन जघानापि न वै हतिम् ।
ययौ चात्मस्थितस्तस्माज्जातो मृत्युविवर्जितः ॥२७॥
स्वस्वभावं परित्यज्य चिदात्मरूपतां गतः ।
अवध्यभावमासाद्य दिव्याऽहंभावमाश्रितः ॥२८॥
बुद्धिं दिव्यां समाश्रित्य परमात्मानमाप्तवान् ।
अवध्यः स सदा जातो दिव्यबुद्ध्याऽऽत्मसंस्थितः ॥२९॥
परमेश पराभक्त्या मुक्तभावमुपागतः ।
मुक्तानां दिव्यतत्त्वानां व्याघातो नैव जायते ॥३०॥
एवं लक्ष्मि विनाशो वै मृत्योर्भवति चार्पणात् ।
आत्मार्पणं समस्तानामिन्द्रियाणां च कर्मणाम् ॥३१॥
वृत्तीनां चात्मना साकं ब्रह्मार्पणं हि निर्गुणम् ।
निर्गुणे मयि नास्त्येव मृत्युर्लोकाभिदुःखदः ॥३२॥
व्याधयो द्विविधा लक्ष्मि शारीरा मानसास्तथा ।
तेषां परस्परं जन्म परस्परमपेक्षिणाम् ॥३३॥
वातपित्तकफानां तु वैषम्ये देहजा हि ते ।
अवैषम्ये स्वस्थभावश्चारोग्यं गीयते हि तत् ॥३४॥
औषधेन यथामृद्यं मृद्यते तद्विरोधिना ।
उष्णेन मृद्यते शीतं शीतेनोष्ण्यं च मृद्यते ॥३५॥
मानसेऽपि तथा दोषे मृदुस्तीक्ष्णेन मृद्यते ।
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ॥३६॥
सत्त्वरजस्तमसां चेत् साम्यं स्वास्थ्यं तदात्मनः ।
वैषम्यं व्याधिरेवाऽयं तत्र मर्दनमिष्यते ॥३७॥
दुःखवान् यतते सौख्ये सुखी दुःखं स्मरत्यपि ।
गुणजौ तावुभौ भावौ मानसौ न तु चात्मनः ॥३८॥
तथापि वेगमासाद्य वहते तत्प्रवाहणे ।
संगं च लभते देही मनुते मानसान्निजे ॥३९॥
यदि चेल्लभते प्रज्ञां पुराणीं सद्गुरोर्मुखात् ।
सच्चिदानन्दभावां स्वां मनो नाशं तदेच्छति ॥४०॥
यतते तद्विनाशार्थं प्रज्ञाशस्त्रेण चात्मनः ।
आत्मा योद्धा स्वयं स्याच्च ब्रह्मरथे निषद्य वै ॥४१॥
पारब्रह्मपदं लक्ष्मि तदा चात्मा विजेष्यति ।
बाह्यं सर्वोपकरणं दैह्यं द्रव्यं समुत्सृजेत् ॥४२॥
असंगश्चाऽपरिग्रहस्ततः सिद्धिं प्रलप्स्यते ।
ममेति जायते यावन्मृत्युस्तावदुपस्थितः ॥४३॥
न ममेति यदा भावो मृत्युस्तस्य गतो मृतिम् ।
सोऽहं ब्रह्मेति तस्यैव शाश्वतं सम्प्रकाशते ॥४४॥
एतादृशस्य तु विवेकिनो लक्ष्मि ह्यसीमकम् ।
ब्रह्माण्डराज्यमस्याऽस्ति जंगमस्थावरात्मकम् ॥४५॥
तथापि नाऽस्य ममता मृत्युस्तं किं करिष्यति ।
मृत्युमूर्ध्नि पदं कृत्वा स याता ब्रह्म शाश्वतम् ॥४६॥
कामं वै वसतो लक्ष्मि वने वन्येन जीवतः ।
ममतामत्यजतस्तु मृत्युः केशेषु तिष्ठति ॥४७॥
बाह्यान्तराणां ममतां मायां वीक्ष्याऽऽन्तरात्मना ।
अन्तर्ब्रह्मस्वरूपेण स्थातुर्मुक्तिर्महाभयात् ॥४८॥
सर्वाः प्रवृत्तयो लोके कामोद्भाव्या भवन्ति ताः ।
विचार्योऽकामगो भूत्वा यदि संहरते मनः ॥४९॥
कारणस्यैव संहाराद् भूयोऽभ्यासबलैर्धितः ।
मायाप्रवाहमुत्तीर्य याति ब्रह्मसनातनम् ॥५०॥
सारमार्गे प्रलम्बेत दानं व्रतं तपो मखम् ।
सारमपि ह्यसारं चाऽकामं कृत्वाऽनुसञ्चरेत् ॥५१॥
हर्यर्पणं महासारं कृत्वा यद्वाऽनुसञ्चरेत् ।
सर्वं तस्योत्तरणाय भवेदुत सहायकृत् ॥५२॥
निग्रहो मोक्षबीजं वै प्रग्रहो भवबीजकम् ।
शृणु लक्ष्मि पुरागाथां वृत्तां जीवात्मनो यथा ॥५३॥
आत्मा सुखी स्वयं पार्श्वस्थितं पप्रच्छ चैकदा ।
अभिमानं सुखे विघ्नकर्तारं बलिनं मुहुः ॥५४॥
कथं केन विनाशस्ते यदि सत्यव्रतो भवान् ।
वद मे येन प्रयते त्वन्नाशे सुखवानहम् ॥५५॥
तदाऽहंकारपुरुषः श्मश्रुबलं प्रदर्शयन् ।
सरोषं देहिनं प्राह शृणु सत्यं वदामि तत् ॥५६॥
न कश्चिन्मम नाशं वै कर्तुमत्र भवोत्थितः ।
ऋते नारायणं यद्वा महाभागवतं जनम् ॥५७॥
नाऽहं शक्यः संगवता हन्तुं भूतेन केनचित् ।
यद्बलेन हन्यते तद्बलं प्रहरणं च वा ॥५८॥
न मां हन्तुं समर्थं वै यावत्त्वेन भवत्युत ।
बीजपुष्टिकरं स्याद् यत् पुनः प्रादुर्भवाम्यहम् ॥५९॥

यज्ञाद्यैर्दक्षिणाढ्यैर्मां हन्तुं प्रयतते यदि ।
धर्मेच्छाऽस्य मम पुष्टिस्तया प्रादुर्भवाम्यहम् ॥६०॥
जपेन चापि मौनेन मां हन्तुं यतते यदि ।
साहंभावोऽत्र पुष्टिर्मे तया प्रादुर्भवाम्यहम् ॥६१॥
वेदान्तैर्ज्ञानमार्गैर्वा मां हन्तुं यतते यदि ।
मया हतेत्यहंपुष्टिस्तया प्रादुर्भवाम्यहम् ॥६२॥
सन्न्यासेन विरागेण मां हन्तुं यतते यदि ।
प्रमादोऽन्यत्र पुष्टिर्मे तया प्रादुर्भवाम्यहम् ॥६३॥
प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः ।
सन्न्यासिनोऽपि वर्तन्ते देवसन्दूषिताशयाः ॥६४॥
धृत्वा ब्रह्मव्रतेनापि मां हन्तुं यतते यदि ।
ज्याऽभिमानबीजाख्यपुष्ट्या पुनर्भवाम्यहम् ॥६५॥
तपसैश्वर्यलब्ध्या मां प्रहन्तुं यतते यदि ।
मधुमत्यादिभिश्चमत्कृतिभिर्योगसिद्धिभिः ॥६६॥
बीजात्मिकाभिरत्यर्थपुष्ट्या पुनर्भवाम्यहम् ।
मोक्षार्थं साधनैश्चापि मां हन्तुं यतते यदि ॥६७॥
तमज्ञं साधनतुष्टं नृत्यामि च हसामि च ।
एवंविधाभिलषिणामवध्योऽहं सनातनः ॥६८॥
ममत्वं विपरीते वा स्वेष्टे मनाग् भवेद् यदि ।
तत्राऽहं जीवनं लब्ध्वा भवामि भवबन्धकृत् ॥६९॥
ममता मनसो भावो मनोनाशे विनश्यति ।
काचभावे क्षितेर्दोषा विनश्यन्ति न संशयः ॥७०॥
तथापि भग्नताभावः काचस्यापि न नश्यति ।
तथाऽऽत्मनो ममतात्मा भावोऽन्ततो न नश्यति ॥७१॥
प्रलयं तु समासाद्य पृथ्वी जले विलीयते ।
एवंक्रमेण तत्त्वानां महत्तत्त्वे लयो भवेत् ॥७२॥
मनसश्च लये मायालये जीवत्वरोधने ।
आत्मत्वभासने मृत्युर्मम स्यादपुनर्भवः ॥७३॥
आत्मावभासः सहसा परमेशकृपावशः ।
तदर्पणेन सर्वस्य मम नाशो यतो मतः ॥७४॥
एवमुक्तः पुरा चात्माऽभिमानेन गरीयसा ।
सोऽयं लक्ष्मि यततैव परमेशे मयि ध्रुवे ॥७५॥
सर्वार्पणादिभावेन तदाऽहन्ता विनश्यति ।
ममता लीयते चापि पतिता परमात्मनि ॥७६॥
लवणस्य यथा पाते समुद्रे लीनता सदा ।
न प्ररोहो भवेत् क्वापि तथा कृष्णोऽस्य नाऽङ्कुरम् ॥७७॥
ज्ञात्वैवं यतते साधुः सर्वात्मार्पणमुत्तमम् ।
देहेन्द्रियमनःप्राणाऽहंकारमहतामपि ॥७८॥
सत्त्वरजस्तमसां च सच्चिदानन्दधर्मणाम् ।
अस्तित्वस्याऽर्पणं चापि सर्वार्पणं करोति हि ॥७९॥
मय्यर्पणेन भक्तानां सर्वं मद्योगतः किल ।
मत्स्वरूपं भवत्येव न तद्बन्धाय जायते ॥८०॥
शृणु लक्ष्मि कथयामि मम भक्तस्य वै कथाम् ।
भक्तो नाम्ना साधुभावायनश्चात्र सरस्तटे ॥८१॥
संकुच्य वृत्तीः सर्वास्तु समाधौ संस्थितोऽभवत् ।
तावत्तस्य समीपस्थोऽहंकारपुरुषोऽभवत् ॥८२॥
विकरालश्चोग्ररूपः कृष्णवर्णोऽतिपुष्टिमान् ।
हसन्नुवाच तं साधुभावायनं हृदन्तरे ॥८३॥
कस्त्वं कस्मादितो मां वै निष्कासयसि मद्गृहात् ।
व्रते चाऽहमहंकारो पुण्यविषयसंस्थितः ॥८४॥
दाने चाहमहंकारः स्वर्गधर्मव्यवस्थितः ।
यज्ञे चाहमहंकारः कर्तृवृत्तिव्यवस्थितः ॥८५॥
दक्षिणाविषयश्चापि यजमानत्वसंस्थितः ।
तीर्थे चाहमहंकारः पावित्र्यविषयस्थितः ॥८६॥
सेवायामप्यहंकारः करोमीत्येव संस्थितः ।
जपे चाऽहमहंकारोऽघनाशवृत्तिमास्थितः ॥८७॥
ब्रह्मचर्येऽप्यहंकारो व्रती चाहमितिस्थितः ।
विद्यायामप्यहंकारो विद्वानिति व्यवस्थितः ॥८८॥
वैराग्ये चाप्यहंकारो ह्यदोषोऽहमिति स्थितः ।
सन्न्यासे चाप्यहंकारः संसारक्षपणो न्वहम् ॥८९॥
ध्याने चापि ह्यहंभावो ध्याताऽहं योगवानहम् ।
समाधावप्यहंकारश्चेश्वरोऽहं विमायिकः ॥९०॥
एवं मे विगमे चैकेऽपरे पक्षे तु जीवनम् ।
वर्तते चेति तस्मान्न मृतो भवामि कर्हिचित् ॥९१॥
एकेनाऽर्पणभावेन गच्छामि चार्पिते श्रये ।
पुण्यं कर्म फलं भक्तिश्चात्मा वृत्तिश्च मानसम् ॥९२॥
अर्पितानि मतिश्चाऽहं यदि श्रीपरमात्मनि ।
तदा सर्वे प्रगच्छामोऽर्पणाश्रये शुभाश्रये ॥९३॥
अर्पितारं विहायैव गच्छामो दानकर्मणा ।
तस्मात् साधोऽर्पय बुद्धिं मायां त्रिगुणशोभनाम् ॥९४॥
अविद्यां च तथा विद्यां महत्तत्त्वं वृषाश्रयम् ।
धर्मादिकान् सर्वभावान् मानसं चापि धर्मवत् ॥९५॥
इन्द्रियाणि समस्तानि देवता वृत्तीरन्तरम् ।
बाह्यं च करणं सर्वं तन्मात्राणि च गोचरान् ॥९६॥
विषयान् पञ्चभूतानि भौतिकानि गृहाणि च ।
गोलकान् तत्फलं चापि गुणान कर्माणि यानि च ॥९७॥

सर्वाणि चेषणाः सर्वा वासनाश्चापि भावनाः ।
सम्बन्धाँश्च तथा सर्वसंस्कारानपि चार्पय ॥९८॥
अनादिश्रीकृष्णनारायणे भक्त्याऽर्पणं कुरु ।
तदाऽहं स्वकुटुम्बेन युतो यास्यामि नान्यथा ॥९९॥
श्रुत्वैवं सहसा मित्रं मत्वोत्थाय समाधितः ।
अनादिश्रीकृष्णनारायणे मयि समर्पणम् ॥१००॥
सर्वस्य कर्मकाण्डस्याऽकरोत् साधुभवायनः ।
मद्भावः सर्वथा भूत्वाऽऽर्पयच्चात्मनिवेदिताम् ॥१०१॥
एवं योगसमाध्यादींस्त्यक्त्वा श्रीपौरुषोत्तमीम् ।
सेवात्मिकां क्रियां सर्वां नारायणे समार्पयत् ॥१०२॥
अभिमानस्तदा तस्य विलीनः परमात्मनि ।
नित्यमुक्तोऽभवत् सोऽपि मदात्माऽक्षरवासकृत् ॥१०३॥
एवं सर्वार्पणं लक्ष्मि साधनं दुःखनाशनम् ।
मोक्षस्य साधनं चैतन्ममाऽर्पणं समस्ततः ॥१०४॥
पठनाच्छ्रवणादस्य निर्ममत्वं प्रजायते ।
अनादिमुक्तता चापि जायते वर्तनात्तथा ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
मृत्युप्रदकारणानि तद्विनाशसाधनं साधुभावाय-
नर्षिदृष्टान्तेनाऽभिमानस्य कृष्णार्पणविधया
नाशश्चेत्यादिनिरूपणनामा नवषष्ट्यधिक-
शततमोऽध्यायः ॥ १६९ ॥

श्रीनारायणीश्रीरुवाच—

मुक्तिधर्मान् कृष्णकान्त मोहच्छेदनकारकान् ।
जीवानामनुकम्पार्थं वदात्र सर्वसम्मतान् ॥ १ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं सर्वसखीसमन्विता ।
सिद्धिदान् मुक्तिदान् धर्मान् वक्ष्यामि हितकारिणः ॥ २ ॥
अक्षरं परमं व्योम सच्चिदानन्दलक्षणम् ।
मुक्तिस्थानं परंधाम ममाऽस्ति लक्ष्मि वेत्सि तत् ॥ ३ ॥
मया श्रीकृष्णरूपेण गोलोकः सेव्यते सदा ।
राधादिगोपिकावृन्दैः सेवितेन निजात्मना ॥ ४ ॥
प्रथमं परमंधाम द्वितीयं चाक्षरं पदम् ।
गोलोकस्तृतीयं धाम मुक्तिस्थानं ममाऽस्ति तत् ॥ ५ ॥
वैकुण्ठे तु चतुर्थे वै नारायणो वसाम्यहम् ।
लक्ष्म्यादिभिः पार्षदाद्यैः सेवितः परमेश्वरः ॥ ६ ॥
पञ्चमे वासुदेवोऽहं संकर्षणादिभिः सह ।
वसाम्यव्याकृते धाम्नि मुक्तिस्थाने सदा प्रिये ॥ ७ ॥
षष्ठेऽमृताख्ये लोकेऽहं भूमा नाम्ना वसामि च ।
ईश्वराणां न्यायकर्ता महाराजाधिराजकः ॥ ८ ॥
सप्तमे श्रीपुरधाम्नि वसामि ललितापतिः ।
महालक्ष्मीपूजितोऽहं महाविष्णुस्वरूपधृक् ॥ ९ ॥
येयं श्रीकम्भरालक्ष्मीगोपालकृष्णसंयुता ।
भूतले वर्तते चाऽत्र माता मे भाग्यशालिनी ॥१०॥
अष्टमे प्राकृते धाम्नि मायामये तु पौरुषे ।
निवसामि पतिश्चाऽहं प्रकृतेः पुरुषात्मकः ॥११॥
महापुरुषरूपस्य मुक्तिस्थानं हि तत्तथा ।
सादाशैवं नवमं च नित्यकैलासनामकम् ॥१२॥
वैष्णवं दशमं धाम श्रीविष्णुरूपसेवितम् ।
वैराजं धाम वै चैकादशं त्वीश्वरकोटिकम् ॥१३॥
द्वादशं मात्स्यमेवापि कौर्मं त्रयोदशं तथा ।
चतुर्दशं तु वाराहं पञ्चदशं तु कापिलम् ॥१४॥
षोडशं चापि हारेयं वासुदेवीयकं ततः ।
अष्टादशं तु पार्थं वै दात्तात्रेयं ततः परम् ॥१५॥
विंशं हंसाश्रितं धार्मिकविंशं नारसिंहकम् ।
आर्षभं द्वाविंशकं च त्रयोविंशं तु वामनम् ॥१६॥
चतुर्विंशं पर्शुरामाश्रयं यान्ं ततः परम् ।
रामधाम ततश्चापि सप्तविंशं कुमारवत् ॥१७॥
अष्टाविंशं हायग्रीवं नारदं तु ततः परम् ।
त्रिंशं तु राजराजाख्यं व्यासस्य त्वेकत्रिंशकम् ॥१८॥
बौद्धं द्वात्रिंशकं त्रयस्त्रिंशं तु मोहिनीश्रितम् ।
नापुंसकं चतुस्त्रिंशं तथाऽसंख्यानि चाऽक्षरे ॥१९॥
अक्षरस्य प्रदेशेषु सीमस्वेतानि सन्ति वै ।
बहूनि मे स्वरूपाणि चावतारास्तथा रमे ॥२०॥
अनन्ताश्च ततो धामान्यप्यनन्तानि सन्ति मे ।
भक्तानां भावनापूर्वं कृतानि तानि तत्तथा ॥२१॥
मुक्तिस्थानानि सर्वाणि यथाभक्ति यथास्थिति ।
प्राप्यन्ते मानवैस्तान्युपासनाबलिभिः प्रिये ॥२२॥
एवमन्यानि लोकेऽत्र भवन्ति च बहून्यपि ।
जलावरणवैकुण्ठं सत्यं धामाऽपि वेधसः ॥२३॥
बदर्याश्रममेवाऽपि नरनारायणस्य मे ।
ततःस्थानं शुभं मुक्तिप्रदं लौकिकमुक्तिदम् ॥२४॥
श्वेतद्वीपाभिधं धाम निरन्नमुक्तसेवितम् ।
शेषे यत्राऽहमेवाऽऽस्से लक्ष्मीरेवादिसेवितः ॥२५॥

चान्द्रं स्थानं तथा सौरं स्थानं मे यत्र राजते।
मूर्तिर्हिरण्मयी दिव्या वह्नौ चापि तथा स्थिता ॥२६॥
कौबेरं चापि याम्यं च मारुतमैन्द्रमित्यपि।
ऐशानं चापि कैलासं शैवं च वारुणं जले ॥२७॥
मेरौ स्थानान्यसंख्यानि मुक्तितुल्यसुखानि वै।
पातालेषु तथा सन्ति स्थानानि सुखदान्यपि ॥२८॥
ऐहिकमुक्तियोग्यानि भवन्ति तानि पद्मजे।
सान्तानि तानि सर्वाणि ब्रह्माण्डस्थानि यानि वै ॥२९॥
चिरस्थसुखदान्येव मुक्तितुल्यानि सन्ति हि।
ऐश्वराण्यपि धामानि सान्तानि प्रलये खलु ॥३०॥
प्राकृतानि समस्तानि नाशयोग्यानि तानि हि।
चिरमुक्तिप्रशस्तानि भवन्ति मम वाञ्छया ॥३१॥
विनाऽक्षरपदं लक्ष्मि बृहद्धाम विनाऽपरे।
लोकाः स्थानानि दिव्यानि काशान्तेऽन्तर्भवन्ति च ॥३२॥
परब्रह्मस्वरूपोऽहं यदा भवामि योगवान्।
राधायुक्तो रमायुक्तस्तदा धामानि मत्कृते ॥३३॥
सर्वाण्याविर्भवन्त्येव ब्रह्मतोऽक्षरधामनि।
ब्रह्मात्मकानि सर्वाणि ब्रह्मान्तानि हि पद्मजे ॥३४॥
क्वचिच्चाऽक्षरधामाऽपि मयि सर्वे विलीयते।
परधामस्थितेऽनादिपरब्रह्मणि स्वामिनि ॥३५॥
परधाम सदा मेऽस्ति यतोऽक्षरादयो मुहुः।
आविर्भवन्ति काशान्ते मुक्तानां कोटयोऽपि च ॥३६॥
ममाऽऽश्रिताश्च वा ये तु ममाऽवतारमाश्रिताः।
ममेश्वरानाश्रिता वा मम मूर्तिमुपाश्रिताः ॥३७॥
ममांऽशानाश्रिता ये वा मद्विभूतिमुपाश्रिताः।
मत्साधूनाश्रिता ये वा मच्छक्तिं समुपाश्रिताः ॥३८॥
मद्भक्तिध्याननिरता मम सेवापरायणाः।
मत्साधुसेवने सक्ता मत्साध्वीसेवने तथा ॥३९॥
मत्कलामाश्रिता ये वा मदावेशमुपाश्रिताः।
मद्वंशमाश्रिता ये च मम पत्नीरुपाश्रिताः ॥४०॥
मदर्थमात्मसर्वस्वनिवेदित्वमुपाश्रिताः।
ते सर्वे मम मार्गस्था मम मार्गमुपाश्रिताः ॥४१॥
मम मार्गे प्रवृत्ताश्च मम मार्गे प्रगामिणः।
मम स्नेहभराः सर्वे मम सान्निध्यमागताः ॥४२॥
मम मुक्तिं प्रयान्त्येव मया मद्धाम प्रापिताः।
क्रममार्गाधिरूढास्ते प्रयान्ति परमं पदम् ॥४३॥
मानवाः ऋषयो देवाः पितरो मुनयस्तथा।
सन्तः सिद्धाः सत्पुरुषाः सत्यः साध्व्यः पतिव्रताः ॥४४॥
आत्मनिवेदिनो ये च वैष्णवा मत्सुयोगिनः।
तेषामाश्रयमाप्ता ये ते सर्वे क्रमशः खलु ॥४५॥
मदंशोपासनाशक्त्या मामेष्यन्ति शनैः शनैः।
मुक्तिधर्मः क्रमवाँश्च पुष्टो भवति तैरिह ॥४६॥
साक्षान्मां ये चाश्रयन्ति वेदसंहितया विदः।
तेषां क्रमं विना प्राप्तिर्धाम्नः परस्य मे भवेत् ॥४७॥
एवं वै बहवो याता मामुपाश्रित्य मत्पदम्।
मत्स्वरूपोपासकास्तु क्रमाद् यास्यन्ति मत्पदम् ॥४८॥
एवं लक्ष्मि मया लोके मुक्तिमार्गः कृपाकृतः।
तं स्मृत्वा लंघयिष्यन्ति भवाऽरण्यं ममाश्रिताः ॥४९॥
एकदाऽश्वपट्टसरस्तटे श्रीमानसो मुनिः।
निषण्णो ब्रह्मवृक्षाऽधो भूतले प्रजपन् हरिम् ॥५०॥
ददर्श योगिपुरुषं ज्ञानविज्ञानपारगम्।
सर्वतत्त्वार्थकुशलं सुखदुःखविवेकिनम् ॥५१॥
जातिस्मरं पुण्यपापकोविदं चात्मवेदिनम्।
ज्ञातारं च गतीनां वै कर्मणां देहिवर्तिनाम् ॥५२॥
चरन्तं मुक्तवत् सिद्धं प्रशान्तं च जितेन्द्रियम्।
दीप्यमानं श्रिया ब्राह्मयाऽन्तर्धानविद्यावेदिनम् ॥५३॥
तथाऽदृश्यैर्भागवतैर्भक्तैर्यान्तं शनैरनु।
श्रीमानसः समुत्थाय योगिनं प्राणमत् पुरः ॥५४॥
स्वागताद्यैश्चिदानन्दाभिधं तं पर्यतोषयत्।
भावेन श्रद्धया भक्त्या सेवया तुष्ट एव सः ॥५५॥
चिदानन्दः समुवाच योग्यं श्रीमानसं मुनिम्।
शृणु साधो कृपयाऽत्र वदामि कृष्णप्रेरितः ॥५६॥
कृष्णस्यैव जगत् सर्वं कृष्णार्थं परिकल्पितम्।
कृष्णार्थं योजितं सर्वं मुक्तये दिव्यताप्तये ॥५७॥
कृष्णं विहाय चाऽन्यस्मै योजितं लौकिकाप्तये।
लौकिकातिप्रदं स्यात्तन्न तु शाश्वतमुक्तये ॥५८॥
विविधैः कर्मभिर्लोकाः पुण्ययोगैश्च केवलैः।
प्रयान्त्येव शुभां मर्त्या देवलोकादिसंस्थितिम् ॥५९॥
न तत्र सुखमत्यन्तं न तत्र शाश्वती स्थितिः।
स्थानात्तु महतो भ्रंशो दुःखलब्धात् पुनः पुनः ॥६०॥
अशुभा गतयः प्राप्तास्तादृश्यश्च मया त्वया।
पुरा बह्वयो निपातान्ताः कष्टाः पापाभिसंभृताः ॥६१॥
कामक्रोधमहामोहतृष्णारागादिसंभृताः।
यत्र मुहुर्हि मरणं मननं यत्र वै मुहुः ॥६२॥
आहारा विविधा भुक्ताः पीताः स्तना असंख्यकाः।
मातरो विविधा दृष्टाः पितरोऽपि पृथग्विधाः ॥६३॥

सुखानि च विचित्राणि नराणां योषितां तथा।
दुःखान्यपि विचित्राणि रोदनानि बहून्यपि ॥६४॥
वक्षःकुट्टानि बहुधा कृतानि तत्र तत्र च।
शिरस्ताडनमेवाऽपि चाऽऽत्मघाता ह्यनेकधा ॥६५॥
प्रियैर्विवासा बहुधा संवासाश्चाऽप्रियैः सह।
दुःखाप्तानां सञ्चितानां धनानां नाशनानि च ॥६६॥
अवमानाः सुकष्टाश्च नृपेभ्यः स्वजनादितः।
शारीरा मानसा वापि वेदनाश्चातिदारुणाः ॥६७॥
तिरस्काराश्चोग्ररूपा वधा बन्धाश्च दारुणाः।
पारवश्यातिकष्टानि रोगकष्टानि वै तथा ॥६८॥
यातना यमजाश्चापि निरये पतनान्यपि।
जन्मरोगाश्च बहवो जरारोगाश्च दारुणाः ॥६९॥
व्यसनानि समस्तानि त्रासदानि मुहुर्मुहुः।
लोकेऽस्मिन्ननुभूतानि द्वन्द्वजानि मया त्वया ॥७०॥
त्वयाऽनादिकृष्णयोगात् त्यक्तं जालं हि मानसम्।
दैहिकं च सदा त्यक्तं श्रीहरौ परमात्मनि ॥७१॥
सुखी चाऽऽससेऽत्र परमे पावने चरणे हरेः।
अश्वपट्टसरःक्षेत्रे मोक्षदे दिव्यमुक्तवत् ॥७२॥
अहं विचार्य च सर्वं परं वैराग्यमाप्तवान्।
अनादिश्रीकृष्णनारायणपादमुपाश्रितः ॥७३॥
लोकतन्त्रं त्यक्तवाँश्च दुःखार्त्तः साधुवृत्तिमान्।
सर्वं दुःखं चाऽनुभूय त्विमं मार्गमनुष्ठितः ॥७४॥
ततः सिद्धिमवापाऽपि प्रसादात्परमात्मनः।
अथाऽहं श्रीकृष्णनारायणश्रीवल्लभं प्रभुम् ॥७५॥
दृष्ट्वा नत्वा पूजयित्वा प्रयामि परमं पदम्।
नाऽहं पुनरिहाऽऽगन्ता तीर्थं कृत्वा प्रयाम्यहम् ॥७६॥
त्वां दृष्ट्वा च पुनः सिद्धिर्दिव्या मेऽत्र व्यजायत।
आसिद्धेराप्रजासर्गादात्मनोऽपि गतीः शुभाः ॥७७॥
नोपलब्धाऽस्म्युत्तरे वै तथेयं सिद्धिरुत्तमा।
शुभं सर्वं मया न्यस्तं नारायणे परात्मनि ॥७८॥
न मे ततः शुभं चापि भोक्तव्यमवशिष्यते।
इतः परं गमिष्यामि श्रीहरेः परमं पदम् ॥७९॥
परब्रह्मपदं श्रेष्ठं मा ते भूदत्र संशयः।
नाऽहं पुनरिहाऽऽगन्ता सृष्टिलोकं हि दुःखदम् ॥८०॥
त्वां दिव्यं तु परं भक्तं दृष्ट्वा गुरोर्हरेरिह।
प्रीतोऽस्मि ते चात्मवेदिन् ब्रूहि किं करवाणि ते ॥८१॥
कालोऽयं विद्यते शुभ्रो भक्तेऽर्पयितुं मानसम्।
आत्मनिवेदिभक्तस्य सेवया सर्वमाप्यते ॥८२॥
प्रसादेन महामुक्तिराप्यते नाऽत्र संशयः।
यथा त्वं स्याः प्रसन्नोऽत्र तथा सेवां प्रदर्शय ॥८३॥
भृशं प्रीतोऽस्मि भवतो भक्त्योपासनया हरेः।
परिपृच्छस्व भाषेयं सर्वं यत्तव वाञ्छितम् ॥८४॥
बहु मन्ये च ते भक्तिं भृशं त्वां पूजयामि च।
येनाऽहं कृतकृत्योऽस्मि किं ददामि द्रुतं वद ॥८५॥
इत्युक्तः श्रीमानसोऽपि प्रपूज्य तं सुवस्तुभिः।
चिदानन्दं दिव्यजनं पप्रच्छ बहुधामतिम् ॥८६॥
कथं देहः क्षयमेति कथं देहः प्रपद्यते।
कथं देही संसरँश्च संसारात्परिमुच्यते ॥८७॥
कथं माया लीयते च कथं मायां प्रपद्यते।
एकं देहं परित्यज्य कथमन्यं प्रपद्यते ॥८८॥
कथं निजाऽर्जिते चात्मा शुभाशुभे भुनक्ति च।
शुभाऽशुभे प्रभुक्त्वा च कथं ब्रह्माऽभिपद्यते ॥८९॥
विदेहस्याऽस्य जीवस्य कर्म क्व वा प्रतिष्ठति।
कर्मणां फलनाशार्थं कस्याऽऽश्रय उपास्यते ॥९०॥
कथं केन प्रतापेन दिव्यताऽत्र समर्ज्यते।
कथं वा नित्यमुक्तत्वं कथं वाऽक्षरवासिता ॥९१॥
कथं सारूप्यमेवाऽपि भवेत्तानि निरूपय।
इत्येवं लक्ष्मि पप्रच्छ चिदानन्दं हि मानसः ॥९२॥
चिदानन्दस्तु कृपया स्मृत्वा मां परमेश्वरम्।
सर्वान् प्रश्नान् यथायुक्तान् विचार्योत्तरमाह ह ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मुक्तिधर्मेषु विविधधाम्नां निर्देशः श्रीमानसचिदानन्दयोगिनोर्मिथः प्रश्नाश्चेत्यादिनिरूपणनामा सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

श्रीपुरुषोत्तम उवाच—

एवं सम्प्रेरितश्चिदानन्दो योगी प्रतापवान्।
श्रीमानसं सर्वप्रश्नोत्तराण्याह क्रमाद् रमे ॥ १ ॥
आनुपूर्व्येण कमले तानि मे गदतः शृणु।
आयुःकराणि कर्माणि यावद् देहो प्रसेवते ॥ २ ॥
तावदायुःप्रसन्धानं चेहैव जायतेऽग्रगम्।
पुण्यं सभाजनसेवा साधुसेवा शुभाशिषः ॥ ३ ॥
दानं दमश्चेन्द्रियाणां ब्रह्मचर्यं तपः शुभम्।
योगाभ्यासो भजनं च सर्वाण्यायुःकराणि वै ॥ ४ ॥
वह्निसेवौषधसेवाऽप्यहिंसा घृतभोजनम्।
विघसाशित्वमित्येतान्यायुर्वृद्धिकराणि वै ॥ ५ ॥

सतीतीर्थं मातृतीर्थं धर्मतीर्थं सुरार्चनम् ।
अरागित्वं ह्यभोगित्वं चैतान्यायुःकराणि वै ॥ ६ ॥
ऋष्यर्पणं तथा देवार्पणं कृष्णार्पणं तथा ।
नित्यमुक्तार्पणं ब्रह्मार्पणं चायुःकराणि वै ॥ ७ ॥
स्वर्गिणा सह मैत्री च स्वर्गाऽऽयुःसम्प्रदा भवेत् ।
एवमायुर्यशोदातृ सेवते कर्म भाग्यवान् ॥ ८ ॥
आयुःक्षयपरीतात्मा विपरीतानि सेवते ।
बुद्धिर्व्यावर्तते तस्य विनाशे समुपस्थिते ॥ ९ ॥
बलं शक्तिं समाश्रित्य गर्वं चाप्यभिमानकम् ।
अत्यन्तं भोगमादत्ते विरुद्धमप्यनात्मवान् ॥१०॥
निषेवतेऽतिकष्टानि भुंक्तेऽधिकानि शक्तितः ।
दुष्टान्नामिषपानानि विरुद्धानि मिथो गुणे ॥११॥
भुंक्तेऽमितानि गुरूणि ह्यजीर्णेऽपि पुनः पुनः ।
बलातिरेकं व्यायामं व्यवायं चातिसेवते ॥१२॥
सततं धनलोभाच्च भारवाहित्वमृच्छति ।
वेगवाहो भवत्येव नितरां जयकांक्षया ॥१३॥
विकृतैश्च रसैर्युक्तमन्नमत्यश्नुते जने ।
मूत्रमलादिवेगं च रुणद्धि कर्मपाशितः ॥१४॥
योग्यां निद्रां सेवते न दिवा निद्रां प्रसेवते ।
आदत्ते चाऽप्यपक्वाँश्च रसान् रसनयाऽऽहतः ॥१५॥
रोगव्याधिमयो भूत्वा देहक्षयं प्रविन्दति ।
अतिरुग्णोऽत्यनुत्साहः पराजितोऽतिकष्टकैः ॥१६॥
धैर्यं विहाय सहसा मरणाभिमुखो भवेत् ।
अपि चेद्बन्धनादीनि विपरीतानि विन्दते ॥१७॥
एवंविधैर्विपरीतैः शरीरं च्यवते द्रुतम् ।
उष्मारुद्धः कुपितश्च वायुना चातिवेगिताः ॥१८॥
बन्धान् विच्छिद्य सहसा प्राणान् क्षिपति कोष्ठलात् ।
भिनत्ति मर्मस्थानानि जीवस्वास्थ्यकराण्यपि ॥१९॥
ततः सद्यो ज्ञाननाशे जीवः प्रच्यवते स्थलात् ।
क्षरं देहं त्यजत्यत्र स्थूलं सूक्ष्माभिसंवृतः ॥२०॥
जातिमरणसंविज्ञः पुनश्चान्यत्र याति हि ।
अन्ये पश्यन्ति तं यान्तं त्यजन्तं स्थूलवर्ष्म च ॥२१॥
तथापि नैव वैराग्यं लभन्ते न भजन्ति माम् ।
म्रियन्ते तत्तथैवैते त्यजन्ति सर्वमत्र च ॥२२॥
लभन्ते मरणे पीडां मर्मणां घातनादिषु ।
गर्भसंक्रमणे चापि लभन्ते वेदनां तथा ॥२३॥
जन्मकृतां देहकृतां पुनर्मरणयोजिताम् ।
लभन्ते वेदनां जीवाः पारस्तस्या न विद्यते ॥२४॥

यदा देहं जहात्येव निरुच्छ्वासश्च दृश्यते ।
स निरूष्मा निरुच्छ्वासो निःश्रीको हतचेतनः ॥२५॥
मया च ब्रह्मणा त्यक्तो मृतात्मेत्युच्यते तदा ।
स्रोतोभिर्यैर्विजानाति चेन्द्रियार्थान् शरीरभृत् ॥२६॥
तेषां प्राणनिरोधेन स्रोतसां प्रलयो भवेत् ।
स्रोतसां मर्मवासानां भिन्नेषु मर्मसु प्रियः ॥२७॥
अप्रियो जायते गच्छन् नाभिजानाति किञ्चन ।
प्राणयुक्तः सूक्ष्मदेहसहितस्त्रिरुच्छ्वस्य च ॥२८॥
निष्क्रामन् कम्पयत्याशु स्थूलं मनागचेतनम् ।
कायात् प्रच्युत एवाऽसौ कर्मभिः स्वैः समावृतः ॥२९॥
अमितैः पापकैः पुण्यैः सहितः सूक्ष्मदेहवान् ।
प्रयाति गतिमन्यां स त्रेधा वलक्षां यथाकृताम् ॥३०॥
पुण्यपापसमप्राप्तां गतिं प्रयाति मानवीम् ।
इहैवोच्चावचान् भोगान् प्राप्नोत्येव स्वकर्मभिः ॥३१॥
अशुभैः कर्मभिर्लोका ह्यर्वाग्गतिं प्रयान्ति वै ।
निरये यत्र पच्यन्ते कर्मफलैः प्रयान्ति तम् ॥३२॥
पुण्यभाजस्तूर्ध्वगतिं तारामयीं प्रयान्ति ह ।
चन्द्रमण्डलमेवाऽपि सूर्यमण्डलमित्यपि ॥३३॥
एवमाद्यानि रम्याणि भुक्त्वा पुण्यक्षये पुनः ।
च्यवन्ते पृथिवीं यान्ति पुनर्जन्म पुनर्मृतिम् ॥३४॥
पुनः स्वर्गं वा नरकं प्रयान्ति कर्मयोजिताः ।
न च स्वर्गेऽपि सन्तोषो दृष्ट्वा दीप्ततमां श्रियम् ॥३५॥
नीचोच्चमध्यमा देवाः स्पृहयन्ति हरन्ति च ।
विचार्येत्थं बुद्धिमाँस्तु सूक्ष्मं देहं हरौ प्रभौ ॥३६॥
कृत्वाऽर्पणं प्रयात्येव दिव्यो भूत्वाऽक्षरं पदम् ।
नेत्रं नेत्रस्य वृत्तिं च गोलकं देवतां तथा ॥३७॥
विषयं रूपमेवापि ज्ञानं बोधं च वेदिताम् ।
मननं निर्णयं चाभिमतिं भोगं समस्तकम् ॥३८॥
तथाऽऽत्मानं च संस्कारान् स्मरणं चापि केशवे ।
आत्मनिवेदितं सर्वनिवेदितं विधाय च ॥३९॥
सूक्ष्मं देहं तथा दिव्यं विधाय वा विहाय च ।
संयोगं प्रकृतेस्त्यक्त्वा ब्रह्मयोगं निधाय च ॥४०॥
वासनां सर्वथा दग्ध्वा मम भावनया रमे ।
प्रयात्येव परब्रह्म मां हरिं पुरुषोत्तमम् ॥४१॥
एवं देहत्रयं त्यक्त्वा लभते ब्रह्मशाश्वतम् ।
सर्वगन्धादिविषयान् बहिःस्रोतांसि सर्वथा ॥४२॥
अन्तःस्रोतांसि तद्वच्च फलं भोगं तथा मयि ।
सर्वं न्यस्य त्रिकं त्यक्त्वा याति मां परमेश्वरम् ॥४३॥

कर्मक्षये स्थूलदेहक्षयो भवति पद्मजे।
पुण्याऽपुण्यक्षये सूक्ष्मदेहक्षयः प्रजायते ॥४४॥
ब्रह्मानन्दप्रवाहेण वासनाक्षय एव च।
वासना लिंगदेहोऽयं मम भावेन लीयते ॥४५॥
अज्ञानाख्यकारणस्य देहस्य विलयोऽपि च।
शृणु देहस्य वै प्राप्तिरात्मनस्तु यथा भवेत् ॥४६॥
सच्चिदानन्दरूपस्याऽदेवस्याऽदेहिनस्तथा।
कारणैर्विविधैर्लक्ष्मि देहयोगः प्रजायते ॥४७॥
आत्माऽयं स्वच्छदिव्योऽस्ति स यत्राऽऽस्तेऽक्षरेऽथवा।
अक्षरस्य प्रदेशे वा सीम्नि मायार्थसन्निधौ ॥४८॥
सन्निधिधर्ममादत्ते स्फटिकवत् स्वभावतः।
त एव धर्मा पारक्याः पारक्यैर्योति वाच्यताम् ॥४९॥
कार्यप्रवृत्तिनियमा मायाधर्मा भवन्ति तान्।
लब्ध्वा प्रकाशितश्चाऽहं प्रवृत्तो नियमान्विताः ॥५०॥
इत्येवं मनुते चात्मा मायातत्त्वादिवृत्तिभिः।
निर्णयं चाभिमानं वा चिन्तनं मननं च वा ॥५१॥
मायाप्रभात्मकं नैजप्रभात्मकं स वेत्ति वै।
वेदनं नैजमेवाऽपि मिश्रं मायाप्रभात्मकम् ॥५२॥
मिश्रणं चाऽस्य भ्रान्तिश्चाऽविद्याऽज्ञानाऽभिधं हि तत्।
तेन प्रवर्तते चात्मा पुण्यपापात्मकर्मसु ॥५३॥
शुभाऽशुभानि जायन्ते कर्माणि माययाऽस्य तु।
शुभाऽशुभानां लेपश्च जायतेऽस्य प्रवेदने ॥५४॥
ज्ञाने लेपात्तत्प्रजन्यसंस्कारेष्वपि लेपिता।
संस्कारे धर्मरूपे यो लेपः स स्वच्छरूपिणि ॥५५॥
आधारे जायते जीवे तैर्जीवः संसरत्यपि।
स्वेष्टभोगादिलब्ध्यर्थं सूक्ष्मयुक्तोऽपि चेहते ॥५६॥
तेन सूक्ष्मैः समेतोऽयं लभते स्थूलभौतिकम्।
स्थूलं जाड्यं समासाद्य स्थूलैः पङ्कोऽतिजाड्यवान् ॥५७॥
स्थूलभावैर्भोगवाँश्च कर्मलुब्धो भवत्यसौ।
प्राप्य प्राप्य च कर्माणि क्षेत्रं क्षेत्रं पुनः पुनः ॥५८॥
भुंक्ते भोगान् भोगमयान् भाग्यसंस्कारदान् पुनः।
लभते च फलं दीर्घं चिरसेव्यं च तैस्ततः ॥५९॥
अनेकजन्मभोक्तव्यं चाऽक्षयं लभते फलम्।
एवं लक्ष्मि ह्यसंगोऽपि चाऽऽकर्षणस्वभावतः ॥६०॥
आकृष्य चान्यधर्मान् स स्वाराज्यं स्थापयत्यपि।
अराजा च बली राज्यमाहृत्य राज्यवान् यथा ॥६१॥
तथाऽयं जायते देही समाकर्षणयोगवान्।
अमायोऽपि मायिकोऽयं जायते न निवर्तते ॥६२॥
गाढाद् गाढतरं भावं प्रपद्यते न मुच्यते।
चर्मकारो यथा कुण्डं दुर्गन्धं ह्यपि नोज्झति ॥६३॥
चर्मोल्बावृत एवाऽसौ दुष्टं देहं न मुञ्चति।
शुभं तथाऽशुभं कर्म मिश्रं वाऽयं प्रपद्यते ॥६४॥
यथा प्रसूयमानस्तु फली दद्यात् फलं बहु।
तथाऽस्य स्याद् बहु पुण्यं सत्त्वेन मनसा कृतम् ॥६५॥
पापं चापि तथा चैति पापेन मनसा कृतम्।
मनोयुतस्ततश्चाऽयं महालसः प्रवर्तते ॥६६॥
मनोभृत्यो यथा चास्मै ददाति भुंक्त एव सः।
पुनश्चेच्छति भोगाँश्च तावदायुर्निवर्तते ॥६७॥
कामनाप्रेरितश्चाऽयं गर्भवासे प्रणीयते।
मनसा पुण्यपापैश्च गर्भे स्वपिति निर्बलः ॥६८॥
शुक्रं शोणितसंसृष्टं कललं देहपूर्वजम्।
गर्भाशये समाप्नोति शुभाशुभादिसद्दशम् ॥६९॥
कश्चिद् विशति कलले पूर्वकर्मानुसारतः।
कश्चिद्विशति बुद्बुदे स्वस्य कर्मानुसारतः ॥७०॥
कश्चिद्विशति मांसे च कश्चित् पेश्यां स्वकर्मतः।
कश्चित् करण्डे विशति कश्चिदंगाढ्यपुत्तले ॥७१॥
कश्चित् प्रत्यंगमूर्तौ च कश्चिद् भ्रूणे विशत्यपि।
पूर्वकर्मानुसारेण द्रुतं वा यदि वा चिरम् ॥७२॥
प्रसूनालप्रपुष्टे वै कालेनोष्ण्यादिपोषिते।
सप्राणे पुत्तले जीवो विशत्येव स्वकर्मतः ॥७३॥
सौक्ष्म्याद्व्यक्तभावाच्च जीवः सूक्ष्मशरीरवान्।
विशत्येवाऽऽन्तरक्लृप्ते कर्मणा तत्र सज्जते ॥७४॥
तत्र ब्रह्म महच्चास्ते बीजस्यापि प्ररक्षकम्।
बीजबीजं परब्रह्म निवसामि सहाऽप्यहम् ॥७५॥
कर्ता कारयिता पोष्टा धाताऽविता निभालकः।
साक्षी चाऽसंगवान् तस्य कर्मफलप्रदायकः ॥७६॥
सर्वेषां देहिनां चाहं बीजबीजः सनातनः।
आपूरकाणां तत्त्वानां प्रेरयिता वसामि च ॥७७॥
प्राणेन्द्रियादिजीवातुर्मया जीवन्ति जन्तवः।
स जीवः सर्वगात्राणि गर्भस्याऽऽविश्य वै तदा ॥७८॥
दधाति प्रज्ञया सद्यः प्राणाधारे व्यवस्थितः।
तेन स्पन्दयतेऽङ्गादि सजीवोऽयं निगद्यते ॥७९॥
यथा स्वर्णद्रवः स्वल्पः कृत्स्नां ताम्रस्य पुत्तलीम्।
करोति वै स्वर्णमयीं तथा जीवमयीं तनुम् ॥८०॥
करोति चेतनश्चाऽयमिदं जीवप्रवेशनम्।
यथा वह्निर्लोहपिण्डे प्रविश्य स्वस्वरूपयेत् ॥८१॥

तथा जडे प्रविश्याऽयं चैतन्येन निरूपयेत् ।
यथा गृहे प्रदीपोऽपि दीप्यमानः प्रकाशते ॥८२॥
एकस्थानस्थितश्चापि स्वं चान्यं प्रति काशते ।
एवं हृत्स्थोऽपि पुरुषस्त्रिदेहं प्रति काशते ॥८३॥
पूर्वकृतं गर्भयोग्यं तत्रोल्बे भुंक्त था नव ।
दशमे कर्मणां तत्र पूर्वस्य जन्मनस्तथा ॥८४॥
ज्ञानं प्रजायते चापि ततो बहिः प्रयाति सः ।
गर्भकर्म क्षयं प्राप्तं बाल्यकर्म समागतम् ॥८५॥
भोगार्थं तेन वशगो बालो भुंक्ते कृतं निजम् ।
अथ युवा जायमानो निसर्गविषयेच्छुकः ॥८६॥
प्रवर्ततेऽतिविषये पापं पुनः प्रजायते ।
निवर्तते विषयेभ्यः पुण्यमस्य प्रजायते ॥८७॥
दानं व्रतं ब्रह्मचर्यं सेवा ब्रह्मप्रधारणम् ।
दमः शान्तिर्दया तीर्थं व्रतं च संयमो यमः ॥८८॥
व्यलीकाऽनाचरणं च परस्वानां विवर्जनम् ।
मातापित्रोश्च शुश्रूषा देवताऽतिथिपूजनम् ॥८९॥
गुरुपूजाऽप्यहिंसा च शौचमिन्द्रियनिग्रहः ।
शुभानां चाचरणं च सतां वृत्तेन वर्तनम् ॥९०॥
एतानि यदि कुर्वीत धर्मः पुष्टः प्रजायते ।
धर्मः संरक्षितश्चैनं पाति वंशं तथा दिवम् ॥९१॥
सतां सेवां प्रकुर्वीत कुर्यात् सत्सु ध्रुवां स्थितिम् ।
आचारं पालयेत् सर्वं यत्र शान्तिर्निरन्तरा ॥९२॥
एनं धर्मं पालयेद् यो न स दुर्गतिमाप्नुयात् ।
उदयं लभते नित्यं धर्मस्य चेतनस्य च ॥९३॥
आचारा नियमा उक्ता अभ्युदयार्थमेव ह ।
एवं नियम्यते लोको गुरुभिः शास्त्रवेदिभिः ॥९४॥
नियमे वर्तमानश्च देही योगी भवेदिह ।
विषविद्याविदं नैव विषं स्पृशति वै तथा ॥९५॥
नियमे वर्तमानं संसारः स्पृशति नैव ह ।
योगे स्थितं न स्पृशति माया कर्म फलानि च ॥९६॥
योगी मुक्तो जीवन्मुक्तो भूत्वा देहात्प्रमुच्यते ।
सर्वलोकेषु योगस्थो मुक्तो देही विशिष्यते ॥९७॥
गुरुः स मोक्षदो लोके संगहीनो यतो हि सः ।
शुभं चेद् धर्ममार्गेण समर्जितं तु देहिना ॥९८॥
शुभभोगोत्तरं यद्वा कालेन महताऽथवा ।
संसारात्तरणं चास्य साधुयोगेन संभवेत् ॥९९॥
पापभोगोत्तरं यद्वा पशुपक्ष्यादिजन्मसु ।
सतां योगेन सहसा पापनाशः प्रजायते ॥१००॥
यानवाहनछायादौ पत्रपुष्पादियोगतः ।
सतां सेवाप्रसंगेन पुण्यमस्य प्रजायते ॥१०१॥
ततः सज्जन्मना प्राप्तिः स्वर्गस्य वा परस्य वा ।
ततश्चैश्वरलोकस्य ततो मोक्षं प्रयाति वा ॥१०२॥
एवं लक्ष्मि कृतं प्राप्तं भुक्त्वा कर्म प्रमुच्यते ।
पुरा सृष्टौ ममैवादेशतः पुमान् ह्यजायत ॥१०३॥
शरीरमात्मनः कृत्वा स त्रैलोक्यं समसृजत् ।
स्थावरं जंगमं चेति प्रकृतिं त्रिगुणात्मिकाम् ॥१०४॥
मम मायास्वरूपां च सृष्ट्वा पुंसे तदा ददौ ।
प्रकृतिः सा शरीराणां यया व्याप्तमिदं जगत् ॥१०५॥
मायाशबलः पुरुषः प्रधानं चासृजत् ततः ।
पुंयोगेन प्रधानाच्च तत्त्वानि विविधानि वै ॥१०६॥
हिरण्मयस्वरूपाणि ह्यजायन्त ततो विराट् ।
ततो ब्रह्मा ततो देवा मानवाद्या इमाः प्रजाः ॥१०७॥
मायामयमिदं सर्वं क्षरं तत्परमक्षरम् ।
अमृतं धाम च तदूर्ध्वं परंधाम मे स्थितम् ॥१०८॥
मयाऽऽदिष्टा ईश्वरास्तु सृष्टिमीश्वरकोटिकाम् ।
असृजन् तत्समीक्ष्याऽपि ब्रह्माऽसृजच्चतुर्विधान् ॥१०९॥
तेषां कालपरिमाणं विधाय च पितामहः ।
सर्जनं प्रलयं चाप्यकल्पयत् सुखहेतवे ॥११०॥
सुखं तु दुःखसम्मिश्रं कायममेध्यमित्यपि ।
देहाः सर्वे नाशमुखाः संसारो घोरकष्टदः ॥१११॥
जातिमरणयोगाढ्यो दुस्तरोऽतिविडम्बिभिः ।
असंगैः मुनयश्चापि सतां संगयुतैरपि ॥११२॥
निर्विद्यन्ते विवेकैश्च मार्गमाणाः परंपदम् ।
त एव प्राप्तमेतद्वै वर्ष्म त्यक्त्वा प्रयान्ति वै ॥११३॥
इत्येतत् कथितं लक्ष्मि तेऽत्र देहस्य मोक्षणम् ।
यथा च देहलब्धिश्च मोक्षप्राप्तिर्यथा च तत् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मुक्तिधर्मेषु देहक्षयकारणानि देहप्राप्तिकारणानि देहान्मुक्तिकारणानि चेत्यादिनिरूपणनामा एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि तथा मायालयो यथा प्रजायते ।
विद्यया तीर्यते जन्तुरविद्यां जयते यतः ॥ १ ॥
ब्रह्मविद्या पराविद्या चात्मविद्या हि या मता ।
परमात्मोपासनया ह्यविद्या सा विशीर्यते ॥ २ ॥

निर्णयः स्नेहसहितो मननं च तथाविधम् ।
माहात्म्यज्ञानसहितं चिन्तनं श्रीहरेस्तथा ॥ ३ ॥
स्वरूपवेदनं सम्पदभिमत्या युतं मुहुः ।
विद्यात्मकं परब्रह्मप्रापकं तन्निगद्यते ॥ ४ ॥
सा विद्या तु यया परब्रह्माऽधिगम्यते रमे ।
अविद्यां सा निरस्यैव परब्रह्म ददाति हि ॥ ५ ॥
सुवर्णस्य विशुद्धिर्वै चतुर्भिर्जायते यथा ।
शिलया छेदनैश्चापि तापनैश्चाभिघातनैः ॥ ६ ॥
आत्मनोऽपि तथा मायाविगमश्चतुरर्जनैः ।
सत्संगेन च ज्ञानेन वैराग्येण प्रभक्तिभिः ॥ ७ ॥
सत्संगेन गुणानां वै प्रवाहस्य निरोधनम् ।
विज्ञानेन संस्काराणां शनैः शनैर्विवर्तनम् ॥ ८ ॥
वैराग्येण वासनानां क्षयो हरौ प्रवर्तनम् ।
स्नेहभक्त्या हरौ सक्तिरसंगो मायया ततः ॥ ९ ॥
एवं मायाविगमः स्याल्लक्ष्मि कृपया सद्गुरोः ।
अनुग्रहेण कृष्णस्य मायालोपो द्रुतं भवेत् ॥१०॥
हरेर्वासेन मायाया निवृत्तिस्तु निजात्मनि ।
सिंहवासेन सर्वेषां मृगाणां विगमो यथा ॥११॥
नृपवासेन क्षुद्राणां देहिनां विगमो यथा ।
मृत्युवासेन देहस्थकरणानां गमो यथा ॥१२॥
बिलाद्वै सर्पवासेन मूषकाणां गमो यथा ।
भयवासेनोत्सवानां हृदयाद्विगमो यथा ॥१३॥
उद्वेगानां विगमश्च महोत्सवे यथा भवेत् ।
तथा हरेर्निवासेन मायाया विगमो भवेत् ॥१४॥
अहं यत्र वसाम्येव तत्र माया न तिष्ठति ।
मम भक्ते निवसामि माया तत्र न विद्यते ॥१५॥
यः स्यादेकायने कृष्णे लीनो ब्रह्म विचिन्तयन् ।
तूष्णीं सर्वविकारेभ्यो मदन्यन्नैव धारयन् ॥१६॥
पूर्वं पूर्वं परित्यजेत् स तरेद् भवबन्धनात् ।
अद्रोहश्च क्षमावाँश्च शान्तचित्तो जितेन्द्रियः ॥१७॥
दैन्यद्वेषविहीनश्च निर्भयो ब्रह्मणोऽर्जने ।
जितचित्तो जितभावो भक्तो मे मुच्यते रमे ॥१८॥
सर्वजीवेषु निजबन्धुबुद्धभावनया युतः ।
अनहंभावमानादिः सर्वतो मुक्त एव सः ॥१९॥
जीवने मरणे स्थैर्ये दुःखे सुखे च मूर्छने ।
लाभेऽलाभे प्रिये द्वेष्ये समो यः स हि मुच्यते ॥२०॥
न कस्यचित् स्पृहयति नाऽवजानाति कञ्चन ।
निर्द्वन्द्वो वीतरागादिः सर्वथा मुक्त एव सः ॥२१॥
अजातशत्रुर्निर्बन्धुरनपत्योऽप्यभार्यकः ।
त्यक्तधर्मार्थकामश्च निराकांक्षी प्रमुच्यते ॥२२॥
पुण्याऽपुण्याऽवरहितः प्रारब्धमात्रयापकः ।
देहारम्भकतत्त्वानां क्षयवान् शान्तचित्तकः ॥२३॥
अद्वैतश्रीहरौ जुष्टः प्रेमभावेन सेवया ।
आत्मवेदित्वमापन्नो मदात्मा स विमुच्यते ॥२४॥
आशाल्यो दिव्यदृष्टिर्जगत्पश्येदशाश्वतम् ।
अश्वत्थसदृशं जन्ममृत्युजरासमन्वितम् ॥२५॥
वैराग्यशान्तभावाद्यैरुपेतो दोषवर्जितः ।
आत्मबन्धं प्रजहाति मोक्षं यात्यचिरात् स वै ॥२६॥
दिव्यगन्धरसस्पर्शशब्दरूपप्रमोदिनम् ।
मायामूर्तिविहीनं मां दृष्ट्वा क्षिप्रं प्रमुच्यते ॥२७॥
अस्थूलं चाप्यसूक्ष्मं चाऽकारणं तत्परं प्रभुम् ।
अगुणं गुणभोक्तारं मां दृष्ट्वा द्राक् प्रमुच्यते ॥२८॥
विमुच्य सर्वकामाँश्च बुद्ध्या चान्तर्भवानपि ।
मम भावान्वितो भक्तः शनैर्निर्वाणमृच्छति ॥२९॥
बाह्याभ्यन्तरसंस्कारैर्मुक्तो द्वन्द्वविवर्जितः ।
निष्परिग्रह एवाऽयं निःसंगो मुक्त एव सः ॥३०॥
तापसो मम भावाढ्यश्चान्यसंस्कारवर्जितः ।
ब्रह्म सनातनं लब्ध्वा नित्यमक्षरमूर्ध्वगम् ॥३१॥
शान्तः सन् मां समभ्येति परब्रह्म परात्परम् ।
आत्मन्यात्मानं स मां वै पश्यन् याति परं पदम् ॥३२॥
सर्वेन्द्रियाणि संहृत्य वृत्तीर्मनसि धारयेत् ।
मनोऽहंभावने धृत्वाऽहं बुद्धौ धारयेत्ततः ॥३३॥
बुद्धिं नियम्य सततं स्मरणं च तथाविधम् ।
संस्कारेषु प्रधार्य संस्कारान् जुहुयादात्मनि ॥३४॥
आत्मानं जुहुयात् कृष्णेऽनादौ श्रीपुरुषोत्तमे ।
एवं मद्योगमापन्नो नित्यमुक्ताय कल्पते ॥३५॥
एतादृशः परः साधुरेकान्तशील एव सः ।
भवन् पश्यन्निजे रूपे मां मदानन्दमश्नुते ॥३६॥
अन्तश्चक्षुःसहितेन प्रकाशेनाऽनिवर्तिना ।
पश्यत्यात्मनि चात्मानं मां पतिं पुरुषोत्तमम् ॥३७॥
एवं लग्नो निजात्मनाऽऽत्मानं मां तत्र पश्यति ।
यथा हि पुरुषः स्वप्ने स्वं वै पश्यत्यसाविति ॥३८॥
तथाऽयं स्वे स्वरूपे मां साध्वात्मानं प्रपश्यति ।
देहे स्नातस्य तु यथा लग्नं जलपटं तु यत् ॥३९॥
निष्कृष्य कुशलः कश्चित् तत्पृथक् चेत् प्रदर्शयेत् ।
देहं चाऽपि तथाऽऽकृष्य सूक्ष्माद् भिन्नं प्रदर्शयेत् ॥४०॥

सूक्ष्मं कारणादाकृष्य पृथक्तथा प्रदर्शयेत् ।
कारणं चापि मायातः पृथक्कृत्वा प्रदर्शयेत् ॥४१॥
मायां जीवात् पृथक्कृत्वा तथा कश्चित् प्रदर्शयेत् ।
जीवं हरेः पृथक्कृत्य तथा योगी प्रदर्शयेत् ॥४२॥
आत्मानं वै पृथक्कृत्य यथा योगी प्रदर्शयेत् ।
तथा मां परमात्मानं पृथक्कृत्य प्रदर्शयेत् ॥४३॥
तथापि स न युक्तात्मा पृथग् भूम्नो भवेद्धि मत् ।
व्यापकोऽहं समस्तानां तस्याप्यैश्वर्यरोधकः ॥४४॥
तं मय्यन्तःप्रभाव्यैव नियामयामि सर्वथा ।
मामापन्नो मम मुक्तो ममैश्वर्याणि चाश्नुते ॥४५॥
मायाऽस्य विनिवृत्ता वै मां यातः सोऽक्षरे परे ।
तत्र माया विद्यते न यथा तत्र तथाऽत्र न ॥४६॥
यत्र क्वापि वर्तमानो मद्भक्तो ह्यस्त्यमायिकः ।
निर्गुणो दिव्यगुणवान् निर्वाणपदभाजनः ॥४७॥
यदा हि युक्तमात्मानं मया पश्यति देहभृत् ।
न तस्येहेश्वरः कश्चित् त्रैलोक्यस्यापि स प्रभुः ॥४८॥
एकधा भवति द्वेधा त्रेधा दशधा सहस्रधा ।
अन्याऽन्याश्च तनू रम्या यथेष्टं प्रतिपद्यते ॥४९॥
न तस्य रोगो न जरा न मृत्युः शोक इत्यपि ।
देवानामपि देवत्वं सोऽयं कारयते वशी ॥५०॥
परब्रह्म ह्यवाप्नोति हित्वा विदेहभावनाम् ।
ब्रह्मभावं गतस्याऽस्य नाशभयं न जायते ॥५१॥
क्लिश्यमानेषु नष्टेषु भूतेष्वस्य न वै भयम् ।
न क्लेशैर्दुःखशोकैश्च घोरैः संगादिकोद्भवैः ॥५२॥
विचाल्यते न युक्तात्मा निःस्पृहः शान्तिसंभृतः ।
नैनं मृत्युर्विध्यति वै नैनं कालो ग्रसत्यपि ॥५३॥
नातः सुखतरं किञ्चिल्लोकेऽस्यान्यद् विलोक्यते ।
सम्यग् युक्त्वा निजात्मानं मयि कृष्णे प्रतिष्ठते ॥५४॥
विनिवृत्ततृषादुःखः सुखं स्वपिति चात्मनि ।
रूपं यथेष्टमभ्येति हित्वेमां मानुषीं तनुम् ॥५५॥
ततो मुक्तेन निर्वेदः कर्तव्यो न विधीयते ।
आत्मद्रष्टा स्पृहयते नैव भोगान्महैश्वरान् ॥५६॥
आत्मनिष्ठो महामुक्तो जीवन्मुक्तो विदेहवान् ।
निषीदेन्नगरे चापि मनो बाह्यं न मुञ्चति ॥५७॥
नगराभ्यन्तरे तिष्ठन्निजावसथे संवसेत् ।
मनो नैवाऽवसथेऽपि बाह्यं मुक्तो विमुञ्चति ॥५८॥
यत्र कुड्यां वसेच्चापि पार्श्वे मनो न मुञ्चति ।
यत्र देहे वसत्येव तत्रापि स्वमनो बहिः ॥५९॥
देहात्मकेऽपि विषये क्षणं नैवापि मुञ्चति ।
इन्द्रियेषु गोलकेषु तन्मात्रेषु न मुञ्चति ॥६०॥
मूलाधारादिचक्रेषु मनः क्षणं न मुञ्चति ।
सूक्ष्मेऽपि चान्यतत्त्वेऽपि क्षणं मनो न मुञ्चति ॥६१॥
काये त्रिविधे सर्वत्र वासनावर्जितो यतः ।
अन्तरे बहिरेकात्मा मां हरिं परिपश्यति ॥६२॥
परिपूर्णं यतोऽस्याऽत्र सर्वं तेन स सद्दृशम् ।
परिपूर्णतमं मां वै लोकयत्येव नेतरत् ॥६३॥
सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमान् भूत्वैतादृशं मां प्रपश्यति ॥६४॥
धारयन्नपि देहं स्वं चष्टे वै ब्रह्म केवलम् ।
आत्मानं चाऽऽप्य विमानं प्रमोदसंभृतस्तदा ॥६५॥
विमानमाश्रयं कृत्वा मोक्षं याति ततो मयि ।
नैतदेतत्सुविज्ञेयं व्यामिश्रेणाऽन्तरात्मना ॥६६॥
क्रियावतां देवलोको ज्ञानिनां व्योम शाश्वतम् ।
सिद्धानां सत्यभवनं भक्तानां ब्रह्म शाश्वतम् ॥६७॥
परा हि सा गतिर्लक्ष्मि यत्तद् ब्रह्म सनातनम् ।
यत्राऽमृतत्वं कुशलं सुखं प्रमोदनं सदा ॥६८॥
इमं साधनमाश्रित्य पापाः स्त्रियोऽन्तिमस्थिताः ।
सर्वे यान्ति परां प्राप्तिं किं वै पुनर्बहुश्रुताः ॥६९॥
ये स्वधर्मनिरताः साधुभक्ताः परार्थिनः ।
ब्रह्मविदो नैष्ठिकाश्च नित्यं ब्रह्मपरायणाः ॥७०॥
मम लोकात्परं त्वन्यत् सुखं किञ्चिन्न विद्यते ।
ज्ञात्वा त्यक्त्वा च सम्मोहं परां गतिमवाप्नुयात् ॥७१॥
एतन्मायाविलयनं मोक्षणं ते प्रदर्शितम् ।
ममैव साध्यस्य योगाद् युज्यते परमे पदे ॥७२॥
नाऽस्य लक्ष्मि तृषा चास्ते मां विहायाऽन्यगोचरा ।
तत एव हि भक्तोऽसौ राजते मत्परे पदे ॥७३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मुक्तिधर्मे मायाविलयनसाधनं परब्रह्मधामप्रापणं चेत्यादिनिरूपण-नामा द्वासप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं दम्पत्योर्योगिनोः पुरा ।
सम्वादं कथयाम्यत्र श्रवणाऽर्हं गतिप्रदम् ॥ १ ॥
पुरा श्रुतिफलानाम्नी योगिनी योगिनं पतिम् ।
सद्विद्यायननामानं ज्ञानविज्ञानपारगम् ॥ २ ॥

पप्रच्छ संशयारूढा लोकशिक्षार्थमेव सा ।
देहत्रयसमाधिस्था वर्तेऽहं नाथ सर्वदा ॥ ३ ॥
पतिसेवापरा चापि वर्तेऽहं हरिसेविनी ।
देहधर्मपरा चापि वर्तेऽहं कामधर्मिणी ॥ ४ ॥
देवसेवापरा चापि वर्तेऽहं शुद्धभावना ।
मोक्षज्ञानपराऽसङ्गा वर्तेऽहं पतिबोधिता ॥ ५ ॥
अथापि मानसं कान्त देहविषयमार्गगम् ।
क्वचित् क्वचिद् धातुपुष्ट्या प्रवर्तते हि निम्नगम् ॥ ६ ॥
अधःस्रोतःस्वभावं तन्मानसं मां विकर्षति ।
ऊर्ध्वस्रोतोवती नाथ भविष्यामि कदा ततः ॥ ७ ॥
कदा मुक्तिं गमिष्यामि कदा वै शाश्वतं सुखम् ।
कं वा लोकं गमिष्यामि त्वां कान्तं तु समाश्रिता ॥ ८ ॥
भवानास्ते त्यक्तकर्मा योग्यपि कामवानपि ।
भार्या त्वनन्यगतिका भर्तारमन्तरा सदा ॥ ९ ॥
साऽहं योगं च कामं च पतियोगेन वै वृषम् ।
पालयामि तथाऽप्येषा कर्मबन्धनता मम ॥१०॥
न भोगयोगमापन्नः कश्चिन्मोक्षं प्रविन्दते ।
नाथ त्वं वेत्सि सर्वं तत् कथं कर्मणा मोक्षणम् ॥११॥
भार्याः पतिकृताँल्लोकानाप्नुवन्तीति नः श्रुतम् ।
पतिश्चेल्लोकहीनोऽत्र भार्यायास्तत्र का गतिः ॥१२॥
त्वादृशं पतिमासाद्य कां गमिष्यामि वै गतिम् ।
इतिपृष्टो मुनिश्रेष्ठः सद्विद्यायननामकः ॥१३॥
प्राह श्रुतिफलां पत्नीं शान्तात्मा तु हृदा हसन् ।
न मे कामो न मे बन्धो देहधर्मो न मे मतः ॥१४॥
नाऽयमात्मा भवेत् पत्नी नाऽयमात्मा पतिः स्मृतः ।
पुंसो देहः पतिश्चेति नारीदेहस्तु पत्निका ॥१५॥
एव लोके व्यवहारः कृतः सोऽयं भवः स्मृतः ।
संसारबन्धनं चापि दाम्पत्यं तु विशेषतः ॥१६॥
सापत्यकत्वं ततोऽपि बन्धनाय प्रकल्प्यते ।
कामो योगो वासनाद्या देहधर्मा न चात्मनः ॥१७॥
पश्य त्वं मां दिव्यदेहं नारायणस्वरूपिणम् ।
पतिर्ब्रह्मा पतिर्विष्णुः पतिर्देवो महेश्वरः ॥१८॥
पतिं मत्वा परब्रह्म सेवते सा प्रमुच्यते ।
गोप्यः कामात् प्रमुच्यन्ते प्रतिकल्पं मुहुर्मुहुः ॥१९॥
श्रीकृष्णस्य प्रयोगेण लक्ष्मीर्नारायणस्य च ।
एवं मां त्वं ब्रह्मरूपं मत्वा सेवय भामिनि ॥२०॥
तदा लोकं योगिनीनां सतीनां प्राप्स्यसे ध्रुवम् ।
नैर्गुण्यं वा समाश्रित्य भज मां परमेश्वरम् ॥२१॥
तदा त्वं ब्रह्मनिर्वाणं ह्यवाप्स्यसि न संशयः ।
इत्युक्त्वा निजदेहात् स योगी कामं सुरूपिणम् ॥२२॥
पृथक्कृत्वा ददावैव कामो भस्मनिभोऽभवत् ।
कामपिण्डं सुसम्पन्नं ददौ पत्न्यै तु निर्गुणम् ॥२३॥
तत्स्पर्शेनाऽभवद् दिव्यो मुक्तः सुमूर्त एव सः ।
कामो दिव्यस्वरूपोऽभूत् सद्विद्यायनवाञ्छया ॥२४॥
चमत्कारं परं दृष्ट्वा श्रुतिफलाऽऽह तं पतिम् ।
अहो नाथ जितामर्ष जितकाम जितेन्द्रिय ॥२५॥
जितसर्वस्व त्वयास्से दिव्यं जानामि साम्प्रतम् ।
शंका मे कामनाजन्या निवृत्ता दिव्यदर्शनात् ॥२६॥
पश्यामि त्वां कृष्णरूपं चतुर्भुजात्मकं प्रभुम् ।
क्रियाः सर्वाश्च ते दिव्याः प्रपश्यामि न संशयः ॥२७॥
चाञ्चल्यं मम विगतं स्त्रीबुद्धिश्चाऽद्य निर्गता ।
दिव्यां रतिं समासाद्य दिव्या भवामि ते बलात् ॥२८॥
वद मे तु यथायोग्या तथा ज्ञानं सुखावहम् ।
इत्युक्त्वा सा प्रणनाम कामोऽपि दिव्यमूर्तिमान् ॥२९॥
विवेश सहसा देहे सद्विद्यायनवाञ्छया ।
वीक्ष्य श्रुतिफला तत्र निःसंशयाऽभवत्ततः ॥३०॥
यथा कृष्णे तथा भक्ते दिव्यास्ते देहवर्तिनः ।
भवन्त्येव गुणाः सर्वे दुर्गुणा अपि सद्गुणाः ॥३१॥
कामः स्नेहः सुखं सेवा पोषणं रमणं शुभम् ।
योजिताः श्रीहरौ भक्ते दिव्या भवन्ति साधुषु ॥३२॥
ये संगाः स्त्रीपुत्रबन्धुपुत्रीकुटुम्बिषु कृताः ।
त एव साधुषु कृता मोक्षद्वारमपावृतम् ॥३३॥
योगी पतिर्मया प्राप्तो धन्याऽहं दिव्यतां गता ।
देहक्रिया न मे चास्ति दिव्याऽहं नास्मि भामिनी ॥३४॥
आत्माऽहं नैव योषिद्वै मुक्ताऽहं नित्यमोदिनी ।
देहो देहार्थसम्पन्नश्चात्माऽऽत्मार्थविभूषितः ॥३५॥
द्वयोः पन्था विभिन्नोऽस्ति का नैसर्गिकवेदना ।
एवं ब्रह्मस्वरूपा सा क्षणमात्रेण भामिनी ॥३६॥
ब्राह्मणी ब्रह्मवेत्त्री च सम्पन्ना संगवर्जिता ।
आहैवं ज्ञानमापन्नां पत्नीं विद्यायनस्ततः ॥३७॥
सुभगे ! देहसंलग्ना क्रिया सर्वा न चात्मनि ।
ग्राह्यं दृश्यं भवेत् कर्म कर्मज्ञानेन्द्रियैरिह ॥३८॥
देहात्मा कर्मकर्मेति व्यवस्यतीति बन्धनम् ।
मोहं तत्रापि चाप्नोति कर्मप्रधानभावतः ॥३९॥
ज्ञानहीनो जनः सर्वो देहबन्धनमोहवान् ।
नैष्कर्म्यं नाऽस्य जायेत यावद्देहाभिमानिता ॥४०॥

देहेन्द्रियैर्मानसाद्यैः शुभाशुभानि विन्दति ।
जन्मभोगजराव्याधिकराणि बन्धदानि च ॥४१॥
तत्त्वानां वै स्वभावोऽस्ति नैष्कर्म्ये न वसन्ति वै ।
तिष्ठन्ति कर्मयुक्तानि भूतेषु कर्म वर्तते ॥४२॥
देहभेदान् प्रापयन्ति कर्माणि सर्गजानि वै ।
अग्निहोत्रादिकं विप्रे वेदाऽध्ययनमित्यपि ॥३ ॥
शासनं क्षत्रिये वैश्ये वाणिज्यं कृषिरित्यपि ।
सेवा शूद्रे ब्रह्मशीले स्वाध्यायो हवनादिकम् ॥४४॥
सदारे सत्कृतिर्दानं चोपार्जनं प्रपोषणम् ।
वन्ये वने वन्यवृत्तिः साधौ भिक्षाटनादिकम् ॥४५॥
ब्रह्मशीलनमेवाऽपि नैष्कर्म्यं नैव विद्यते ।
नैसर्गिकी चञ्चलेयं प्रकृतिर्देहरूपिणी ॥४६॥
विकृतयश्चञ्चलाश्च मानसं चञ्चलं तथा ।
बुद्धिरिन्द्रियस्तवकश्चित्तं विषयचञ्चलम् ॥४७॥
संस्काराः कोशवल्लोला ज्ञानधाराऽपि चञ्चला ।
ज्ञानेच्छाकृतिभावाश्च द्वेषाद्या गोचराश्रिताः ॥४८॥
विषयाननुजीवन्ति चाञ्चल्यं धर्मणि स्थितम् ।
क्रियास्वभावं सर्वं वै तत्त्वजं मर्कटं त्विदम् ॥४९॥
कथं क्रियाविहीनं सत्तिष्ठेच्छान्तिप्रलब्धये ।
तस्मात्तत्परिवृत्त्यर्थं निश्चाञ्चल्यं समाश्रयेत् ॥५०॥
निश्चंचलप्रवेशेन निश्चञ्चलतां व्रजेत् ।
सर्वत्र परिपूर्णं तत्परब्रह्म तथाविधम् ॥५१॥
निश्चञ्चलं सदा सौम्ये सौम्यं तदर्थमाश्रयेत् ।
कर्मणा मनसा वाचा हृदाऽऽत्मना समस्तकैः ॥५२॥
एवं यथा निवातस्थः कुसूलस्थो निरोधितः ।
चञ्चलोऽपि प्रदीपो वै स्वयं मूर्च्छां हि तैलजः ॥५३॥
गच्छत्येव तथा स्याच्च चाञ्चल्यरहितः क्षणम् ।
लयं गच्छेच्च वा तत्राऽम्बरे निष्क्रियतां व्रजेत् ॥५४॥
एवं चाऽयं चञ्चलैश्चावृतोऽपि चेतनः स्वयम् ।
चिदम्बरे निरोधं तु सम्प्राप्य निष्क्रियो भवेत् ॥५५॥
स्थिरो भवेच्च मणिवन्मणिप्रदीपभासमः ।
नैसर्गिकप्रभायुक्तो मणिदीपो यथा स्थिरः ॥५६॥
वायुस्तैलं भवेद्वा न भवेत् तदपि भायुतः ।
वर्तते सर्वदा कान्तिप्रदस्तथाऽयमच्युतः ॥५७॥
वायुतुल्या हि विषयाः सौम्ये देहस्थिताः सदा ।
भुज्यन्ते वा न भुज्यन्ते मणिस्तु निरपेक्षकः ॥५८॥
देहधर्मास्तथा पत्नि भुज्यन्ते वा न वाऽपि च ।
आत्मा मणिस्तु ते मेऽपि निरपेक्षो न कर्मवान् ॥५९॥
परब्रह्म समासाद्य कथं लोकान् विशंकसे ।
क्व गमिष्यामीतिशंकां त्यज मुक्ते परेश्वरि ॥६०॥
अहं ब्रह्म सदा चास्मि यास्यामि च परं पदम् ।
ज्ञानोपासनभक्त्याद्यैस्त्वं मया सह यास्यसि ॥६१॥
गृहधर्मा हि धर्मास्ते नाऽधर्मा न हि नारकाः ।
ऋतुधर्मा मनोधर्मा मद्योगे दिव्यतां गताः ॥६२॥
ज्ञानयोगेन योगेन ब्रह्मणः परमात्मनः ।
दिव्योऽहं मम योगेन त्वं पत्नि दिव्यतां गता ॥६३॥
एतां गुप्तां तु परमां सरहस्यां निजां स्थितिम् ।
मोक्षदां बन्धनहीनां को भोक्ता चाभिधास्यति ॥६४॥
अभोक्तुः परमां श्रेष्ठां दशां भोक्ता न विन्दति ।
कुतः प्रामिकथयेद् या मया तेऽभिहिता प्रिये ॥६५॥
रक्षांसि सर्वविघ्नानि भवन्ति सर्वदेहिनाम् ।
ब्रह्ममार्गे स्वर्गमार्गे तानि त्यक्त्वा सुखी भवेत् ॥६६॥
आत्मस्थं परमात्मानं समाश्रित्य मया प्रिये ।
रक्षांसि कामरूपाणि वशे कृतानि सर्वथा ॥६७॥
भ्रुवोर्मध्ये गुरोर्ध्यानं लब्धं श्रीपरमात्मनः ।
यत्र तत्परमं ब्रह्माऽनादिकृष्णनरायणः ॥६८॥
सर्वदा दृश्यते भार्ये तं भजस्वाऽतिनिर्गुणा ।
इडा च पिङ्गला चापि सुषुम्णा सुतयस्त्विमाः ॥६९॥
यथा प्रियया संगम्य ब्रह्मादयोऽपि देवताः ।
यदक्षरपरं कृष्णमुपासते महर्षयः ॥७०॥
विद्वांसः सुव्रताः शान्ता जितार्था यमुपासते ।
तमुपास्स्व सदा सुभ्रु त्यज दैहिकचिन्तनम् ॥७१॥
घ्राणेन न तदाघ्रेय नाऽऽस्वाद्यं चापि जिह्वया ।
स्पर्शनेन तदस्पृश्यं चक्षुषा दृश्यमेव न ॥७२॥
श्रवणाच्च परं तद्वै परब्रह्म प्रसेवय ।
आत्मना मनसा साकं बुद्ध्या ब्रह्मगृहीतया ॥७३॥
प्राप्यते कृपया तस्य तत्परब्रह्म सेवय ।
अगन्धमरसस्पर्शमरूपं शब्दवर्जितम् ॥७४॥
यतः प्रवर्तते तन्त्रं यत्र पुनः प्रतिष्ठति ।
प्रवर्तन्ते च मरुतः प्राणाद्या यद्व्यपेक्षया ॥७५॥
तं सर्वसाक्षिणं कृष्णनारायणं परेश्वरम् ।
भजस्व भामिनि स्वाम्युत्तमं श्रीपतिमच्युतम् ॥७६॥
नाऽहं पतिर्न भार्या त्वं पतिः श्रीपुरुषोत्तमः ।
आवयोरात्मनोर्दिव्ये भज तं पुरुषोत्तमम् ॥७७॥
हृदि प्राणं गुदेऽपानं समानं नाभिसंस्थितम् ।
उदानं कण्ठदेशस्थं व्यानं सर्वशरीरगम् ॥७८॥

विजित्वा तेषु चाऽऽत्मानं परमेशं विभावय ।
सप्तधाऽग्निर्वैश्वानरः प्राणेषु देहचारिषु ॥७९॥
घ्राता घ्राणेन घ्रेयं वै गन्धं पृथ्व्यां समश्नुते ।
पाता रसनया पेयं रसं जले समश्नुते ॥८०॥
द्रष्टा नेत्रेण दृश्यं तु रूपं तेजसि चाऽश्नुते ।
स्प्रष्टा त्वचा स्पृश्यं स्पर्शं मारुते वै समश्नुते ॥८१॥
श्रोता कर्णेन श्रव्यं शब्दमाकाशे समश्नुते ।
मन्ता मनसा मन्तव्यं विषयं मनुते निजम् ॥८२॥
बोद्धा बुद्धया तु बोद्धव्यं विषयं बोधयत्यपि ।
आत्मा परात्मना सर्वं भुंक्ते भोक्तव्यमेव तत् ॥८३॥
परात्मना तु यद् भुक्तं दिव्यं तन्न तु लौकिकम् ।
लौकिकं स्याद् बन्धनाय दिव्यं मोक्षाय चार्पितम् ॥८४॥
अनेनैव प्रकारेण चरणाभ्यां गतिः क्रिया ।
हस्ताभ्यां चाप्युपादानं वाचा संवादशब्दनम् ॥८५॥
पायुनोत्सर्गं उपस्थेनाऽऽनन्दानुभवादिकम् ।
गन्ताऽऽदाता च वक्ता विसृष्टाऽऽनन्दयिता हि सः ॥८६॥
वैश्वानरोऽन्तरात्मा हि परमात्मा करोति तत् ।
नाहं कर्ता न त्वं कर्त्री ततो न कर्मबन्धनम् ॥८७॥
विज्ञातृत्वाभिमानं वै परात्मनि समर्पयेत् ।
भोक्तृत्वाभिमतिं चापि परात्मनि समर्पयेत् ॥८८॥
एवंभावे नरो नाहं नारी न त्वं कदापि वै ।
यश्चाऽहं स एव तु त्वं द्वावावां परमे स्थितौ ॥८९॥
परमात्माऽतिरिक्तत्वं नावयोरस्ति किञ्चन ।
आत्मा त्वं च तथाऽऽत्माऽहं परमात्मनि तिष्ठतः ॥९०॥
यत्र तिष्ठाव एतस्मिन् धार्यं सर्वं समर्पितम् ।
एवं सति कुतो मे ते कर्माऽपि चावशिष्यते ॥९१॥
निष्कर्मात्मनि देवेशे सर्वं परिसमर्प्यते ।
सत्येवं तस्य यो लोकः स लोकोऽप्यावयोः सदा ॥९२॥
परं पदं चिदाकाशोऽक्षरधाम हि शाश्वतम् ।
परब्रह्मण एवाऽस्ति तदस्ति चावयोरपि ॥९३॥
यत्राऽनादिकृष्णनारायणः श्रीपुरुषोत्तमः ।
तत्राऽहं चापि तत्र त्वं गमिष्यावो न संशयः ॥९४॥
भज त्वं तं परात्मानं पत्यात्मकं प्रभुं पतिम् ।
त्यज दैन्यं संशयं च भयं निम्नगतिप्रदम् ॥९५॥
गृह्ण ज्ञानं च वैराग्यं धर्मं भक्तिं निरामयाम् ।
निर्भयां परमस्यैव धाम्नो दात्रीं विधेहि वै ॥९६॥
इत्युक्ता सा निजपत्नी श्रुतिफलाऽतिवेदिनी ।
हर्षं तु परमं लेभे ब्रह्मबोधाभिमोदिनी ॥९७॥
ननाम पादयोः पत्युर्लक्ष्मि लक्ष्मीरिवाऽभवत् ।
दिव्या मदर्पणेनैव क्रियाणां सर्वथा ततः ॥९८॥
श्रुतिवद् वर्तते नित्यं भजते मां परेश्वरम् ।
लभते परमानन्दं ब्रह्मरसं समश्नुते ॥९९॥
गृहयुक्तापि सततं गृहाऽलुब्धा ततोऽभवत् ।
पतियुक्ताऽपि सततं कृष्णयुक्ता सदाऽभवत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने श्रुतिफलापत्न्याः सद्विद्यायनर्षिं पतिं प्रति कृतस्य कलोकगमानादिप्रश्नस्य नैष्कर्म्यसर्वसमर्पणविषया परब्रह्मलोकगतिरित्यादिप्रत्युत्तरमितिनिरूपणनामा त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं यथा देहं प्रपद्यते ।
केवलात्माऽपि कर्माढ्यः कथयामि यथातथम् ॥ १ ॥
आत्माऽम्बरे कर्मभिः स्वैः सूक्ष्मेण सह वर्तते ।
संकल्पाज्जायते हर्षस्तेन कामे प्रवर्तते ॥ २ ॥
शुक्रशोणितसंसृष्टस्ततः प्राणः प्रवर्तते ।
प्राणेन विधृते शुक्रे तत्राऽपानः प्रवर्तते ॥ ३ ॥
अपनात् प्रेर्यते शुक्रं रजश्चाकर्षयत्यपि ।
समानस्तेन मिश्रे च जायते बीजताधरः ॥ ४ ॥
उदानश्चोदरे गर्भे प्रति नयति मिश्रणम् ।
नालार्थे मिश्रणं स्थाने नाभौ योजयति ध्रुवम् ॥ ५ ॥
व्यानश्च मिश्रणे तत्र व्याप्नोति पाकहेतवे ।
पक्वं चापत्यरूपं वै पुष्टं नालेन योषितः ॥ ६ ॥
जन्म प्राप्य बहिर्याति षाट्कौशिकं हि तन्मतम् ।
मातृतो रोमलोहितमांसानि सन्ति तत्र ह ॥ ७ ॥
पितृतः स्नाय्वस्थिमज्जाः सन्ति तत्र बलान्विताः ।
एवंविधे भौतिकेऽत्र देहे माया निरुच्यते ॥ ८ ॥
देहो मायाऽऽत्मनः प्रोक्ता निर्देहोऽमायिकः स तु ।
मां याति नित्यदा चेन्द्रियाद्यैरात्मा प्रपुष्ट्ये ॥ ९ ॥
अहं देहः पोष्यधर्मो मायारूपोऽस्मि तेन वै ।
मम देहस्य सत्त्वेन जीवात्माऽस्ति समश्नुते ॥१०॥
तस्माद्देहः सदा माया सर्वविषयमोदिका ।
आत्मा स्वकर्मणा प्राणैर्देहबन्धं प्रपद्यते ॥११॥
चतुर्होत्रं वर्ष्म चैतद्धोता बन्धनमृच्छति ।
करणं कर्म कर्ता च मुक्त एतच्चतुष्टयम् ॥१२॥

चत्वार एते होतारः प्रत्येकं सप्त सप्त वै ।
घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं मन इत्यपि ॥१३॥
बुद्धिश्चेतिकरणानि सप्तैते गुणहेतवः ।
गन्धो रसश्च रूपं च स्पर्शः शब्दश्च वै तथा ॥१४॥
मन्तव्यं चापि बोद्धव्यं कर्मैते कर्महेतवः ।
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता तथा ह्यपि ॥१५॥
मन्ता बोद्धा च कर्तारः सप्तैते कर्तृहेतवः ।
एवंविधा निजान् भावान् भक्षयन्ति च जुह्वति ॥१६॥
सप्तस्वेतेष्वसंगो यः सप्तधा मुक्त एव ह ।
कारणादिविहीनोऽहं कर्माऽलिप्तो भवाम्यहम् ॥१७॥
कर्तृत्वं मे न चैवाऽस्ति तस्मान्मुक्तः सदाऽस्म्यहम् ।
अहंममत्वहीनोऽहं मुक्तभावं भजाम्यहम् ॥१८॥
अन्यथा तु चतुर्होत्रो मायाबद्धो भवाम्यहम् ।
अदन्नन्नानि चाऽविद्वान् ममत्वेन विहन्यते ॥१९॥
देहार्थे भक्षयन्नन्नं पोषयन् ममतान्वितः ।
अनात्मभक्षणं कुर्वन्मायायाऽयं विहन्यते ॥२०॥
माया तृष्णा तृषारूपा विषयाणां विवर्धते ।
अपेयपानं कुर्वंश्च मायायाऽयं विहन्यते ॥२१॥
अपेयं नाऽर्पितं देवे ह्यभक्ष्यं चाऽनिवेदितम् ।
यद्वाऽपेयं रस्यमेतद् दैह्यमैन्द्रियिकं जलम् ॥२२॥
अभक्ष्यं स्वादु चैतद्वै दैह्यं भौतिकमित्यपि ।
आत्मार्थे पाचयन्नाऽयं बध्यते न तु मुच्यते ॥२३॥
मनसा गम्यते सूक्ष्मं भक्ष्यं पेयं शुभाऽशुभम् ।
वाचा वा चक्षुषा चापि श्रोत्रेण च त्वचापि च ॥२४॥
जिह्वया गृह्यते यच्च घ्राणेन यत्तु गृह्यते ।
करेण पद्भ्यां लिंगेन पायुना यच्च गम्यते ॥२५॥
बुद्ध्या चित्तेन चाहंकारेण यद्वाह्यगोलकैः ।
गृह्यते भुज्यते व्यस्तैः समस्तैर्वाऽपि यद् यदा ॥२६॥
स्वप्ने जाग्रति चान्ते वा मध्ये चादौ च यद् यदा ।
सर्वं भक्ष्यं च पेयं च स्वार्थं मायामयं हि तत् ॥२७॥
पच्यमानं देहिनं वै हन्ति पाशकशादिभिः ।
तत्सर्वं त्यज्यते स्वार्थं विहाय परमात्मनि ॥२८॥
भक्ष्यं पेयं भवत्येव तदेव खलु निर्गुणम् ।
एवं निर्गुणयोगज्ञं ज्ञानवह्निः प्रवर्तते ॥२९॥
सर्वभस्मकरश्चापि मायाबन्धननाशकः ।
हरेर्योगमखश्चापि सर्वस्वत्यागदक्षिणः ॥३०॥
सत्सेवाऽवभृथस्नानो मोक्षनद्यवगाहनः ।
न तस्य विद्यते चाऽयं संसारो भक्ष्यपानजः ॥३१॥
सक्रियो वर्तमानोऽपि निष्क्रियः स तु पूरुषः ।
पुरुषोत्तमयोगेन कोटिमोक्षप्रदोऽत्र सः ॥३२॥
कामिन्या वर्तमानोऽपि कामनाऽस्य न मायिकी ।
पत्न्या च वर्तमानाया रतिर्नास्यास्तु मायिकी ॥३३॥
आत्मार्थं चापि कृष्णार्थं परब्रह्मार्थमेव ह ।
देहान्तरगमः स्वार्थः शुभाऽशुभप्रभोगकृत् ॥३४॥
कृष्णार्थः सर्वथा लक्ष्मि परब्रह्मालयप्रदः ।
स्वार्थे तृष्णामये जीवे सवासने सरागके ॥३५॥
कर्म तिष्ठति पूर्वार्ज्यं मदाश्रयेण नश्यति ।
मयि सर्वार्पणेनैव कर्मफलं विनश्यति ॥३६॥
साधूनां मम मूर्तेश्चाश्रयेण दिव्यता भवेत् ।
यथा यथा मम योगस्तथा तथा हि दिव्यता ॥३७॥
पुंयोगेन यथा पत्न्या दिव्यता लौकिकी शुभा ।
सूर्ययोगेनाऽम्बरस्य दिव्यता सुप्रभान्विता ॥३८॥
स्वर्णयोगेन ताम्राणां दिव्यता रमणीयता ।
गुणयोगेन लोकानां दिव्यता विद्यया कृता ॥३९॥
वेषयोगेन राज्ञां च दिव्यताऽलंकृतिकृता ।
स्वर्णयोगेन देवानां पुण्येन पितृवर्गिणाम् ॥४०॥
ऐश्वर्येण तु सिद्धानां तपोभिश्च तपस्विनाम् ।
शिष्याणां दासवर्गाणां दिव्यता सेवया कृता ॥४१॥
गन्धर्वाणां गीतिकाभिः साधूनां त्वच्युताऽर्पणात् ।
दिव्यता तु सतीनां वै सत्येन च व्रतेन च ॥४२॥
ब्रह्मव्रतेन सर्वत्र दिव्यता ब्रह्मचारिणाम् ।
ईश्वराणां पदप्राप्त्या मुक्तानां मम योगतः ॥४३॥
दिव्यता सर्वदा चास्ते लक्ष्मीनां तु ममांऽगतः ।
मम सा दिव्यता लक्ष्मि शाश्वती स्वनिसर्गगा ॥४४॥
एतादृशं तु मां प्राप्य भक्तो मे दिव्यतान्वितः ।
शाश्वतीं दिव्यतां प्राप्य मोदते मम धामनि ॥४५॥
मायेन्द्रियाऽन्तःकरणभूतमात्रादयोऽस्य च ।
मम योगेन दिव्यास्ते ततो नारायणो ह्यहम् ॥४६॥
मम योगेन वै जीवा अनन्ताः शिवतां गताः ।
मद्योगेन नरा भक्त्या नारायणास्त्वसंख्यकाः ॥४७॥
जाताश्चापि च जायन्ते वैकुण्ठवासिनो हि ते ।
गोलोकवासिनश्चापि परधामनिवासिनः ॥४८॥
अक्षरे वासकर्तारस्तथाऽन्यधामवासिनः ।
ईशलोकनिवासाश्च मायालोकनिवासिनः ॥४९॥
विष्णुरूपा विष्णवश्च जायन्तेऽसंख्यकोटयः ।
ब्रह्माणश्चापि जायन्ते वैराजाश्चाप्यसंख्यकाः ॥५०॥

प्रधानपुरुषाश्चापि जायन्तेऽनन्तसंख्यकाः ।
मुक्ताश्चापि प्रजायन्तेऽनन्तसंख्या हि धामगाः ॥५१॥
गायन्त्यपि प्रमोदन्ते नृत्यन्ति हर्षिता हरौ ।
का तत्र तु कथा लक्ष्मि मायायाः स्पर्शलेशिका ॥५२॥
मायाऽपि मोदते तत्र मामासाद्य महेश्वरी ।
आक्षरी परमा विद्या मायाऽपि परिवर्तते ॥५३॥
एवं दिव्यविधानं यो जानाति भक्तराड् यदि ।
अस्य योगः सदा दिव्यस्तत्र का परिदेवना ॥५४॥
एवं मम प्रतापेन योगात्मकेन दिव्यता ।
सर्वोत्कृष्टा भवत्येव नारायणपरायणा ॥५५॥
एकः शास्ता हृदयस्थः सोऽहं नारायणः परः ।
मया युक्तो मम भक्तो वहत्यथ करोति च ॥५६॥
एको गुरुर्हृदयस्थः सोऽहं कृष्णनरायणः ।
मयाऽनुशिक्षितो भक्तो वहत्यथ करोति च ॥५७॥
एको बन्धुर्हृदयस्थः श्रीपतिः पुरुषोत्तमः ।
तेन मयाऽनुशिष्टोऽयं वहत्यथ करोति च ॥५८॥
एकः स्वामी हृदयस्थोऽनादिकृष्णनरायणः ।
तेन मयाऽनुसंश्लिष्टो भक्तश्चानन्दमश्नुते ॥५९॥
एकश्चान्तर्नियन्ताऽहं परमात्मा हृदि स्थितः ।
मया संप्रेरितश्चाऽयं प्रवर्तते करोति च ॥६०॥
एकः श्रोता भक्षयिता बोद्धा मन्ताऽहमेव ह ।
घ्राता स्प्रष्टा तथा द्रष्टा रसयिताऽहमेव ह ॥६१॥
आनन्दयिता ग्रहिता गन्तोत्स्रष्टाऽहमेव च ।
मयाऽनुभुक्त एवाऽयं भुंक्ते वेत्ति प्रमोदते ॥६२॥
अहं गुरुः परब्रह्म मयि वासोऽस्य सर्वथा ।
गुर्वर्पणविधाताऽयं कर्मणा नहि लिप्यते ॥६३॥
एवमस्य भवेदत्र जीवतो जीवमुक्तता ।
देहान्ते मम धाम्न्येव स्यादस्य नित्यमुक्तता ॥६४॥
अहं ददाम्यखण्डं मे धामाऽक्षरं सुखाश्रयम् ।
नित्यं चाऽस्य भवेत् सर्वसौख्याढ्याऽक्षरवासिता ॥६५॥
मम ध्यानेन मुक्तोऽयं मत्सारूप्यं प्रपद्यते ।
मदैश्वर्याणि सर्वाणि लभते मदनुग्रहात् ॥६६॥
एषा ब्राह्मी महाविद्या लक्ष्मि तेऽत्र निवेदिता ।
यां प्राप्यैव नरो नारी ब्रह्मरूपः प्रजायते ॥६७॥
एतदर्थं मया पूर्वं मम विद्याऽत्र गोलके ।
ओमित्येकाक्षरं ब्रह्म दकाराख्या प्रवर्तिता ॥६८॥
श्रेयःप्रदां च तां प्राप्याऽसुरदेवर्षिभोगिनः ।
प्राप्य ते प्राद्रवन् सर्वे यथास्वभावमादरात् ॥६९॥

नानाव्यवसिताः सर्वे सर्पदेवर्षिदानवाः ।
दकारं विविधं मत्वा यथास्वभावमास्थिताः ॥७०॥
सर्पाणां तु दकारेण दंशने भाव उद्गतः ।
प्रवृत्तस्त्वसुराणां वै दम्भभावः स्वभावजः ॥७१॥
देवानां तु तदा दाने भावनाऽभूत् स्वभावजा ।
महर्षीणां स्वभावात्तु दमेऽभूद् भावना तदा ॥७२॥
सतां तदनु भावस्तु दयायां समजायत ।
मानवानां दक्षिणायां ततो भावो व्यजायत ॥७३॥
नारीणां दर्शने भावो दकारेण व्यजायत ।
शृंगारमाचरन्त्येव सर्वाङ्ग्यं ताः स्वभावजम् ॥७४॥
राज्ञां तु दोहने भावः पृथ्व्या राष्ट्रस्य चाप्यभूत् ।
रक्षसां चापि दैत्यानां दण्डे भावो व्यजायत ॥७५॥
गुरूणां तु दक्षभावे भावः स्वभावजोऽभवत् ।
कर्मिणां दैवभावे तु भाग्येऽभूद् व्यवसायिनाम् ॥७६॥
कृपणानां दैन्यभावो दकारेण स्वभावजः ।
ईश्वराणां दिव्यभावः स्वभावजस्ततोऽभवत् ॥७७॥
पिशाचानां तु दुर्गन्धे भावः स्वभावजोऽभवत् ।
कितवानां तु दुष्टत्वे भावः स्वभावजोऽभवत् ॥७८॥
आचार्याणां देशनायां भावः स्वभावजोऽभवत् ।
दानवानां दौर्बल्यत्वे दिग्जये भावनाऽभवत् ॥७९॥
गृहस्थानां दौर्हृदत्वे सुपुत्रे भावनाऽभवत् ।
पशूनां दन्तविषये भक्ष्ये सा भावनाऽभवत् ॥८०॥
पितॄणां दर्शपर्वादिश्राद्धे भावस्ततोऽभवत् ।
प्रजानां देशवसतौ भावना दोस्थिताऽभवत् ॥८१॥
एवं लक्ष्मि विविधा वै द्ब्रह्मभावनास्तदा ।
स्वभावजा हि सर्वेषामभवत् कर्मकारिणी ॥८२॥
केषामपि न त्वभूत्सा दिव्यमोक्षाभिगामिनी ।
ततो मया पुनर्ब्रह्म ह्युपदिष्टं 'स' इत्यपि ॥८३॥
सकारेण मुमुक्षूणां साधुसेवा स्वभावजा ।
गृहस्थानां साधुभावो मोक्षदश्चेत्यभूत्तदा ॥८४॥
सन्न्यासः सर्वकर्मादिधर्माणां च ततोऽभवत् ।
सत्यं व्रतं सत्यधर्मः सत्यलोकः सदात्मता ॥८५॥
सनातनत्वमेवाऽपि सच्चिदानन्दता तथा ।
सर्वात्मकत्वं साकारमूर्तित्वं सगुणत्वकम् ॥८६॥
सौभाग्यं सुमनस्कत्वं सतीत्वं समता तथा ।
समदर्शित्वमेवाऽपि सारग्राहित्वमित्यपि ॥८७॥
सिद्धिमत्त्वं स्वावशून्यब्रह्मचर्यव्रतं तथा ।
सुरेश्वरार्हणं सेवा श्रीहरेः सर्वदर्शिनः ॥८८॥

सोऽहं जपस्तथा सौरोपासना तु हिरण्मयी ।
सनातनार्षवृत्तिश्च सायुज्यं सार्ष्टिमित्यपि ॥८९॥
सालोक्यं चापि सारूप्यं सहभावोऽपि सर्वथा ।
स्वामिसेवकभावश्चेत्येवं धर्मान् सकारजान् ॥९०॥
जगृहुर्मानवा देवाः ऋषयः पितरोऽपि च ।
मुनयो भक्तजीवाश्च मोक्षमार्गे हि जगृहुः ॥९१॥
श्रवणं सेवनं सर्वार्पणं समर्पणं व्यधुः ।
एवं गुरुं परब्रह्म मोक्षदं प्राप्यते ततः ॥९२॥
निजात्मानं ब्रह्मभावापन्नं मत्वा तु भेजिरे ।
परमेशं निजस्थं च समनुभूय भेजिरे ॥९३॥

एवं लक्ष्मि जीवलोको यथास्वभावमात्मनः ।
गुरोः सकाशाल्लब्ध्वाऽपि सन्तमसन्तमश्नुते ॥९४॥
शुभेन विचरन् लोकः शुभचारी प्रजायते ।
ब्रह्मचारी सदैवैषो य इन्द्रियजये रतः ॥९५॥
पापेन विचरन् लोकः पापचारी भवत्युत ।
कामचारी तु कामेन य इन्द्रियसुखे रतः ॥९६॥
धर्मचारी तु धर्मेण यज्ञयागादिके रतः ।
पुण्यचारी तु तपसा यस्तु व्रतादरे रतः ॥९७॥
अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।
ब्रह्मरूपश्चरन् लोके ब्रह्मनिष्ठो भवत्यपि ॥९८॥
ब्रह्मचर्ये ब्रह्मरूपं ब्रह्मशीलः सदा सुखी ।
ब्रह्मैव समिधश्चास्य ब्रह्माग्निर्ब्रह्मसंभवः ॥९९॥
सर्वं ब्रह्म समवाप्य परब्रह्माऽधिगच्छति ।
आत्मा ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समस्थितः ॥१००॥
समाहितः परे तत्र ब्रह्मणि ब्रह्मशीलवान् ।
परब्रह्म ब्रह्मचर्ये तद्व्रतो मां प्रपद्यते ॥१०१॥
नरो वापि तथा नारी नपुं वा न मानवः ।
यः कोऽपि स्याज्जातिगन्ता जातिस्मरः प्रवित्तिमान् ॥१०२॥
परब्रह्म समवाप्य मोदते हि मया सह ।
अत्र वा तत्र वाऽप्यस्य क्रियाः सर्वा हि मोक्षदाः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मुक्तिधर्मे यथादेहप्राप्तिः शुभाशुभकर्मभोगो ब्रह्माऽवाप्तिः कर्मप्रतिष्ठानं फलार्पणं दिव्यतालाभो नित्यमुक्तताऽक्षरवासिता सारूप्यावगमश्चेत्यादिनिरूपणनामा चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

श्रीपुरुषोत्तम उवाच—

इत्येवं पद्मजे पत्नीं श्रुतिफलां पतिः स्वयम् ।
सद्विद्यायनसंज्ञो वै प्राह मुक्तिवृषान् बहून् ॥ १ ॥
प्राहैवं चापि संसारवारिधिं गाधतोज्झितम् ।
इन्द्रियझषसंजीवं तरंगान्तर्विलोलितम् ॥ २ ॥
भूतनौकाकृतमार्गं विषयाऽऽशानुसन्धितम् ।
तन्मात्राहारमत्स्याढ्यं शोकहर्षादिमारुतम् ॥ ३ ॥
कामक्रोधादिमकरं मोहभ्रमादिदिग्भ्रमम् ।
रागद्वेषादिकावर्त्तं वासनाजलशैत्यदम् ॥ ४ ॥

अपारं पुण्यपापादिकर्माख्यतरणान्वितम् ।
समतीत्य हरेर्योगात् प्रविष्टोऽस्म्यपरां स्थलीम् ॥ ५ ॥
दिव्यां दिव्यगुणोपेतां दिव्यगोमद्विराजिताम् ।
शाश्वतीं स्वर्णवर्णां वै निर्भयां निगमोचिताम् ॥ ६ ॥

सुखमय्यो यत्र नद्यो यत्राऽऽनन्दभृतो द्रुमाः ।
प्रमोदकल्पलतिका यत्र स्नेहरसालयाः ॥ ७ ॥
यत्रोत्सवाः स्वामिना वै सर्वसद्गुणशालिना ।
नित्ययौवनसौन्दर्यवात्सल्यप्रेमशालिना ॥ ८ ॥

नास्ति तस्मात् सुखदोऽन्यो नास्त्यन्यत्र सुखं त्विदम् ।
न तं सम्प्राप्य शोकोऽस्ति न दुःखं न भयं तथा ॥ ९ ॥
न तत्राऽनित्यबीजं वै न त्रिशाखोऽस्ति तत्र ह ।
न सप्ताप्युपशाखाश्च नाऽन्तशाखाश्च षोडश ॥१०॥
नाऽत्र जटिलाः ऋषयो मानसाह्वानयोगिनः ।
न वंशस्तम्बवाल्यश्च न गोत्रोच्छ्रयभूतलम् ॥११॥
न कण्टकास्तीक्ष्णधाराः कंकरा न च तत्र वै ।
नाऽतपः सौरमूलोत्थो न शैत्यं चन्द्रिकाकृतम् ॥१२॥
न धूमश्चापि वाह्नेयो न छायापि वितानजा ।
न मेघास्तत्र मेहाश्च पञ्चाग्नयो न सन्ति च ॥१३॥
न रंगाः संगमिश्रास्तथा न च श्रृंगारराशिनः ।
न तत्र पाशवं क्षेत्रं पाशास्तत्र न रोधिनः ॥१४॥
पद्मरागादिमणयो न च तत्र भवन्ति हि ।
पञ्चरंगाणि पुष्पाणि त्रिरसानि फलानि च ॥१५॥
न तत्र सन्ति वृक्षाश्च, पादपाः सन्ति तत्र ते ।

पद्मरागा मधुरसा हंसा वसन्ति तत्र ह ॥१६॥
मौक्तिकाहारतृप्तास्ते सोऽहं सोऽहं प्रवादिनः ।
अनावृताः प्रभास्तत्र भवन्ति सीमवर्जिताः ॥१७॥
भूरिश्रृंगास्तत्र गावो भवन्ति कामपूरिताः ।
नारायण्यो महासत्यो भवन्ति तापहारिकाः ॥१८॥
कृष्णदेवा अतिथयो भवन्ति व्योमवासिनः ।
दीक्षिताश्चेक्षिताश्चापि स्वामिना नित्यदर्शिना ॥१९॥
नित्योत्सवाः सखीनां वै तत्र भवन्ति शाश्वताः ।
इष्टपतिप्रयोगेषु विलासास्तृप्तिवर्जिताः ॥२०॥

अकम्पां चाऽविकारां चाऽक्षरीं स्थलीं परात्पराम् ।
प्रपन्नोऽस्मीति सद्विद्यायनः श्रुतिफलां जगौ ॥२१॥
हा३उ हा३उ प्रफुल्लितः स्मरन् शुभस्थलीम् ।
जगौ पुनःपुनः प्राह स्थलीं श्रुतिफलां स्मरन् ॥२२॥
ननर्त चापि तालेन वदन्नुपदिशन्नपि ।
आर्द्रभावं प्राप चापि श्रुतिफलान्तिके तदा ॥२३॥
स्वस्थो भूत्वा पुनः प्राह धन्या त्वं परमेश्वरी ।
योऽहं सा त्वं सोऽहं स त्वं ह्ययमात्मा परेश्वरः ॥२४॥
येऽधिगच्छन्ति सन्तस्तं तेषां नास्ति भयं क्वचित् ।
ऊर्ध्वं चाऽधश्च तिर्यक् च स्थल्या नान्तोऽधिगम्यते ॥२५॥
हरेः पादपारण्यानि सन्ति दिव्यानि तत्र वै ।
यत्र त्रिमुखी प्रमदा ह्यवाङ्मुखी न रोहति ॥२६॥
गिरयाः पर्वतानाश्च सन्तो वसन्ति तत्र ह ।
स्नान्ति ब्रह्मवहानद्यां संगमे पारमेश्वरे ॥२७॥
स्नानतृप्ताः कृशाङ्गाश्च सुव्रता देवभासुराः ।
आत्मन्यात्मानमाविश्य परात्मानमुपासते ॥२८॥
विहरन्ति रमन्तेऽत्र पादपारण्यवेदिनः ।
एतादृशं पदारण्यं ब्रह्मिष्ठा विविदुः परम् ॥२९॥
प्राप्तोऽहं मम योगेन त्वं प्राप्ता श्रुतिसत्फले ।
विद्यायनं परब्रह्म प्राप्तोऽस्मि निर्भयोऽस्मि च ॥३०॥
रूक्षं गन्धं न गृह्णामि रूक्षं रसं न वेद्मि च ।
रूक्षं रूपं न पश्यामि ब्रह्मानन्दपरिप्लुतः ॥३१॥
रूक्षं स्पर्शं न स्पृशामि रूक्षं शब्दं शृणोमि न ।
रूक्षं न संकल्पयामि ब्रह्मानन्दपरिप्लुतः ॥३२॥
कामये नाऽप्यनिष्टं च द्वेष्यं तत्र न विद्यते ।
ब्रह्मजाले निवसामि ब्रह्मानन्दपरिप्लुतः ॥३३॥
ब्रह्मयज्ञे जुहोम्येव परमेशे समस्तकम् ।
पार्थिवं वा जलीयं वा ब्रह्मानन्दपरिप्लुतः ॥३४॥
तैजसं वायवीयं वा गगनीयं गुणादिकम् ।
सौक्ष्म्यं वा चान्तरं वापि कर्म वा संविदं च वा ॥३५॥
स्वभावं वा कृत्रिमं वा जडं वा चेतनं च वा ।
चैतन्यं वा जुहोम्येव ब्रह्मानन्दपरिप्लुतः ॥३६॥
क्षरं स्वभावं हुत्वैवाऽक्षरभावेन चाऽच्युते ।
जुहोमि मां विमुक्तोऽस्मि ब्रह्मानन्दपरिप्लुतः ॥३७॥
समस्य सर्वभूतेषु निर्मायस्य जितात्मनः ।
समन्तात्परिमुक्तस्य भयं मे विद्यते न वै ॥३८॥
सद्भिरेव हि संवासो मुक्तैरेव समागमः ।
भक्तैस्तादात्म्यभावश्च श्रीहरौ चाऽप्यभिन्नता ॥३९॥

एवं लब्ध्वा परान् लाभान् प्रमोदमेमि सर्वथा ।
श्रुतिफले फलं मिष्टं स्वादे सद्विद्ययाऽऽप्लुतः ॥४०॥
एवं पत्नीं ब्रह्मरूपामुपदेशेन सर्वथा ।
लक्ष्मि चक्रे श्रुतिफलां सद्विद्यायन एव ह ॥४१॥
अथैकदाऽलर्कनामा महाभागवतो नृपः ।
मदालसायाः पुत्रो वै जित्वा वै सकलां महीम् ॥४२॥
वृक्षाऽधोभूतले स्थित्वा शान्त्यर्थं स मनो दधे ।
चिन्तयामास शान्त्यर्थं जिता वै सकला मही ॥४३॥
निषितैर्मार्गणैः शस्त्रैस्तथापि शान्तिरेव न ।
मनो वै चपलं दुष्टं तज्जित्वा शान्तिमुत्तमाम् ॥४४॥
प्राप्स्यामीति शरैस्तीक्ष्णैरेषः छिनद्मि मानसम् ।
इन्द्रियाणि करणानि छिनद्मि मार्गणैरिह ॥४५॥
विचार्येत्थं सूक्ष्मसूक्ष्मान् बाणान् धनुषि सन्दधे ।
मनः समूर्तं भूत्वाऽथ तदग्रे समुपस्थितम् ॥४६॥
बाणानामविषयं तत् प्राहाऽलर्कं तु पङ्कजे ।
नेमे बाणा हनिष्यन्ति मामलर्क निरावरम् ॥४७॥
निष्फलास्ते परावृत्य भेत्स्यन्ति त्वां मरिष्यसि ।
अन्यान् बाणान् प्रमुञ्चस्व यैरहं स्यां निषूदितम् ॥४८॥
श्रुत्वाऽलर्कः प्रत्युवाच मनस्त्वं प्राणसंयुतम् ।
बहून् गन्धान् प्रगृह्णासि तत्सहायं तु जीवसि ॥४९॥
ततः घ्राणं हनिष्यामि तीक्ष्णबाणैश्च ते मृतिः ।
घ्राणं श्रुत्वा तदाऽलर्कं प्रत्युवाच हि निर्भयम् ॥५०॥
नेमे बाणास्तव राजन् मां हनिष्यन्त्यगोचरम् ।
प्रत्यावृत्य तव मर्म भेत्स्यन्ति त्वं मरिष्यसि ॥५१॥
अन्यान् बाणान् प्रमुञ्चस्व यैस्त्वं मां सूदयिष्यसि ।
श्रुत्वाऽलर्कस्ततः प्राह जिह्वेयं हि सहायदा ॥५२॥
मनसः प्रियसत्कर्त्री रसदानेन सर्वदा ।
तथेयं त्वक् प्रियकर्त्री स्पर्शदानेन वै सदा ॥५३॥
तथेदं श्रवणं चास्मै शब्दार्जनसहायदम् ।
तथेदं नेत्रमेवाऽपि रूपार्जनसहायकृत् ॥५४॥
तथैवेमानि सर्वाणि लिंगादीन्यपराणि च ।
इन्द्रियाणि मनसो वै साहाय्यकानि सन्ति हि ॥५५॥
इयं बुद्धिर्मनो दत्तं गृह्णाति चौर्यकर्मिणी ।
अहंकारोऽपि तेष्वत्र मिलितोऽश्नाति गर्ववान् ॥५६॥
तानेतान् सर्वथा सूक्ष्मैर्हनिष्यामि प्रसायकैः ।
श्रुत्वैवं सर्वसहिता बुद्धिरलर्कमाह यत् ॥५७॥
नैते बाणास्तवाऽलर्क स्पृक्ष्यन्त्यपि च नः क्वचित् ।
स्थूला ह्येते वयं सूक्ष्मा न स्पर्शो न मृतेः कथा ॥५८॥

विफलाश्च विवृत्तास्ते त्वां हनिष्यन्ति रोषिणः ।
मुमोचाऽपि तदा बाणान् प्रत्यावृत्ताश्च तेऽफलाः ॥५९॥
अलर्कं तु प्रजघ्नुस्तेऽलर्को मूर्छां जगाम ह ।
सस्मार श्रीहरिं मां स दत्तात्रेयस्वरुपिणम् ॥६०॥
आविर्भूय मया तस्मै जीवनं दत्तमेव ह ।
बाणा निष्कासिता देहात् समुत्थितोऽभवद्धि सः ॥६१॥
ददौ बाणानहं तस्मै चैकाग्र्यबलरूपिणः ।
द्रष्टृदृश्याद्यनारक्तान् स्वरूपमात्रनिष्ठितान् ॥६२॥
योगबाणान्मम मन्त्रैर्युतान् ब्रह्मास्त्रयोजितान् ।
मुक्तास्त्रप्लावितान् सूक्ष्मानान्तरान् सोऽपि तान् शितान् ॥६३॥
प्राप्यात्मना मुमोचाऽऽशु सर्वेन्द्रियादिकान् प्रति ।
निजघ्नुस्ते द्रुतं सर्वान् केचित् पलायिता ह्यपि ॥६४॥
तान् पुनः पाशबद्धांश्च कृत्वा समाधिरश्मिभिः ।
ब्रह्महृदे निचिक्षेप ते च तत्र लयं ययुः ॥६५॥
अथ दिव्यानि भूत्वैवाऽलर्कं मुक्तं सिषेविरे ।
ततो दिव्यस्वरूपः सन् सिद्धिं परमिकां गतः ॥६६॥
मात्रा साकं भ्रातृभिश्च सह मोक्षं जगाम ह ।
वदन्नेवं ह्युपदेशं शृणु लक्ष्मि विवेकदम् ॥६७॥
अहो सर्वमध्रुवं वै बाह्यं बाणैर्विनिर्जितम् ।
दैह्यमनुष्ठितं सर्वमद्यावधि न चान्तरम् ॥६८॥
सद्गुरोः कृपया त्वद्य जितानि दोषवन्ति तु ।
इन्द्रियादीनि सर्वाणि गुणवन्ति तु वै पृथक् ॥६९॥
ब्रह्महृदे विनिक्षिप्य दिव्यतां प्रापितानि ह ।
तथा दिव्यस्वरूपोऽहं भूत्वा भजामि केशवम् ॥७०॥
सर्वार्पणं विना नास्ति चान्यत्र वै सुखं क्वचित् ।
कृष्णे स्वात्मार्पणं श्रेष्ठं शाश्वतं सुखमाप्यते ॥७१॥
शाश्वतो विजयश्चापि मायाकृते रणे भवेत् ।
अनादिश्रीकृष्णनारायणे योगनिषेवया ॥७२॥
एवं लक्ष्मि नृपोऽलर्कः शान्तिं जगाम शाश्वतीम् ।
श्रुतिफलाऽपि शान्तिं वै जगाम पतिसेवया ॥७३॥
शृणु लक्ष्मि त्रिशत्रून् वै त्रिगुणान् सर्वतः स्थितान् ।
सत्त्वं रजस्तमश्चेति मायाप्रेरितबन्धदान् ॥७४॥
त्रयस्ते रिपवो लोके त्रिरावृत्ता नवाऽपि ते ।
प्रहर्षः प्रीतिरानन्दस्त्रयस्ते सत्त्वबालकाः ॥७५॥
तृष्णा क्रोधो द्वेषवेशस्त्रयस्ते तु रजोद्भवाः ।
श्रमस्तन्द्रा च मोहश्च त्रयस्ते तु तमोभवाः ॥७६॥
नवैते शत्रवो देहे चेतनं रोधयन्ति हि ।
स्वस्वभावेषु नित्यं वै केवलं कुर्वते न तम् ॥७७॥
कैवल्यगोष्ठी पुरुषो यदा तान् जेतुमिच्छति ।
पुरं हातुमुत्सहते तदा तान् पर्येन्मयि ॥७८॥
त एव विजिता यावत्तावन्मुक्तः प्रजायते ।
लोभो नाम महान् दोषो यदि नैव जितो भवेत् ॥७९॥
अन्येषां विजये लक्ष्मि नैष्फल्यं तृष्णया भवेत् ।
यत्प्रयुक्तो जनः क्वापिवै तृष्ण्यं नैव विन्दति ॥८०॥
तृष्णार्त्त इह निम्नानि धावमानः पतत्यपि ।
बुध्यते नाऽप्यकार्यं हि निम्नान्निम्नं प्रसेवते ॥८१॥
ततश्चिन्ता भयदा च राजसी च गतिस्ततः ।
तामसी च ततो भूयो जायते कर्म चेहते ॥८२॥
जन्मकर्मक्षये मृत्युः पुनर्जन्म पुनर्मृतिः ।
लोभजये तु वैतृष्ण्यं महासुखं हि शाश्वतम् ॥८३॥
साम्राज्यं चात्मनस्तत्तु ब्रह्मानन्दप्रदं ततः ।
महाराज्यं दिव्यराजं परब्रह्मप्रियात्मकम् ॥८४॥
राजा परेश्वरः कृष्णस्तद्राज्यं मम राज्यकम् ।
मनुते तु यथावद्वै राजा वाऽऽत्मा भवन् स्वयम् ॥८५॥
यदि चेत्परमात्मानं सत्यं नृपं विहाय वै ।
जीवो राजा भवत्येवं निर्मूलो ह्यामको हि सः ॥८६॥
किमत्र राज्यं जीवस्य पितृपैतामहागतम् ।
पृथ्वी वा पार्थिवं वर्ष्म कर्म वा धर्म एव वा ॥८७॥
यद्योगस्तद्भवेद्राज्यं यत्सत्ता नृपतिः स वै ।
न राज्यं वै शरीरेऽस्ति न राज्यं मानसेऽपि च ॥८८॥
न राज्यं चेन्द्रियवर्गे न राज्यं विषयेष्वपि ।
सर्वाधीनो जीव एव जीवाधीना न ते मताः ॥८९॥
कुतो राज्यं हि जीवस्य राजत्वं वा नृषेऽपि च ।
नैकान्ततो ह्यधीनास्ते जीवस्य सन्ति कर्हिचित् ॥९०॥
ततो राज्यं त्वनवाप्य त्यक्त्वा च विषयं मृषा ।
राजानं परमात्मानं समाश्रित्य सुखी भवेत् ॥९१॥
अन्तवत्यः सदाऽवस्थाः कर्मजन्या हि देहजा ।
भौतिक्यश्चापि तादृश्यस्तत्र राज्यं न चात्मनः ॥९२॥
ममेदमिति मन्वानो मृषा तदवलम्बते ।
अपृष्ट्वा तं यदा याति नाशं तदाऽवबुद्ध्यते ॥९३॥
न मे राज्यं न मे किञ्चिन्न मे देहः कुतोऽपरम् ।
एवं मत्वा दिव्यराज्यं चिनुयाज्ज्ञानवाञ्जनः ॥९४॥
न स्वार्थे गन्धमश्नीयाद्भूमिः सा वशमागता ।
न स्वार्थे रसमाद्याद्यादापस्ता वशमागताः ॥९५॥
न स्वार्थे रूपमाद्यात्तेजस्तद् वशमागतम् ।
न स्वार्थे स्पर्शमाद्याद् वायुः स वशमागतः ॥९६॥

न स्वार्थे शब्दमादद्याद् व्योम तद् वशमागतम् ।
न स्वार्थे मननं कुर्वे मनो मे वशमागतम् ॥९७॥
न स्वार्थे मम यत्नोऽस्ति ह्यात्मा मे वशमागतः ।
देवार्थे चाप्यतिथ्यर्थे भूतार्थे च पित्रर्थकम् ॥९८॥
समारम्भा मम सर्वेऽर्पणं मोक्षार्थमित्यपि ।
ब्रह्मार्पणं मम सर्वे धर्मोऽपि मुक्तये मम ॥९९॥
एवं मत्वा जनो लक्ष्मि मुच्यते भवसागरात् ।
एवमुक्त्वा निजपत्न्यै सद्विद्यायननामकः ॥१००॥
पुनराह श्रुतिफले तथा वर्तामि सर्वदा ।
विप्रोऽस्मि चापि मुक्तोऽस्मि गृहस्थधर्मकोऽस्मि च ॥१०१॥
अनादिश्रीकृष्णनारायणपरायणोऽस्मि च ।
नाऽहमस्मि यथा मां त्वं पश्यसि कामनायुतम् ॥१०२॥
राज्यं श्रीकमलेशस्य सर्वे मयि त्वयि क्षितौ ।
तथाबुद्धिर्भवती च वेत्स्यतीदं न चान्यथा ॥१०३॥
धनं नारायणो मेऽस्ति तेनाऽहं धनवान् प्रिये ।
एकः पन्थाः परब्रह्म येन गच्छन्ति तद्विदः ॥१०४॥
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ।
तथाऽन्येषु निवासेषु राज्यं श्रीपरमात्मनः ॥१०५॥
तत्र स्थित्वा विदायं च लब्ध्वा गन्तव्यमुत्तरम् ।
दिव्यस्थलं दिव्यधाम मध्ये नान्यस्थलाद् भयम् ॥१०६॥
श्रुतिफले प्रिये भार्ये ब्रह्मिष्ठे ब्रह्मवादिनि ।
सद्विद्यायनयोगेन परलोकभयं न ते ॥१०७॥
मद्भावभावनिरता ममैवात्मानमेष्यसि ।
अहमात्मा परात्मानं सम्प्राप्तोऽस्मि न संशयः ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
मुक्तिधर्मे संसारवारिधितरणविज्ञानादिनिरूपणनामा
पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

श्रीपुरुषोत्तम उवाच—

श्रुतिफला पुनः श्रुत्वा पप्रच्छ स्वामिनं पुनः ।
कृतार्थाऽस्मि तथाऽप्येष गहनो ज्ञानमार्गणः ॥ १ ॥
नेदमल्पात्मना शक्यं वेदितुं वर्तितुं च वा ।
बहु चाल्पं च संक्षिप्तं मुक्तिधर्मं वदाऽत्र मे ॥ २ ॥
एवं लक्ष्मि सद्विद्यायनर्षिः श्रुत्वा प्रियावचः ।
सर्वासां योषितां चापि हितकृत्प्राह वै स्फुटम् ॥ ३ ॥
अरणिः स्त्रीबुद्धिरूपा गुरुः पतिः परोऽरणिः ।
तपःश्रतेऽभिमथ्नीतो ज्ञानाग्निर्जायते ततः ॥ ४ ॥
बुद्धिर्नारी नरश्चात्मा दम्पतीति निगद्यते ।
तयोरान्तरवासश्च परमात्मा परो गुरुः ॥ ५ ॥
सर्वक्रियाभिरात्मात्मा तोषणीयो जनार्दनः ।
नारीदेहस्थिताभ्यां नृस्थाभ्यां ताभ्यां तु वा सदा ॥ ६ ॥
एषा संक्षेपतो विद्या ब्रह्मविद्या मयोदिता ।
सा त्वं भवसि नित्यैव मुक्ता बुद्ध्या प्रवर्धिता ॥ ७ ॥
अहं भवामि मुक्तश्च बुद्ध्या संवर्धितः सदा ।
पतिश्चात्मा प्रिया बुद्धिस्ताभ्यां ब्रह्माऽभिगम्यते ॥ ८ ॥
श्रुतिफला भवेद् बुद्धिः सद्विद्यायनश्चेतनः ।
तयोरात्मा परब्रह्म लक्ष्म्यहं पुरुषोत्तमः ॥ ९ ॥
मामुपाश्रित्य विज्ञानं मुक्तं दिव्यं प्रजायते ।
सद्विद्यायनकश्चात्मा महामुक्तः प्रजायते ॥१०॥
शृणु लक्ष्मि कथयामि गुरुशिष्यकथां शुभाम् ।
मुक्तिस्तोतायनाख्यस्य गुरोः शिक्षां सुतं प्रति ॥११॥
सिद्धिवेशायनः शिष्यः पप्रच्छ स्वगुरुं प्रिये ।
किंस्विच्छ्रेयः परं प्रोक्तं परः कश्चाऽपरश्च कः ॥१२॥
कुतश्चाऽहं कुतस्त्वं च किं सत्यं परमं सुखम् ।
कुतो जातानि भूतानि केन जीवन्ति जन्तवः ॥१३॥
किं सत्यं च तपः किं च के गुणाः सद्भिरीरिताः ।
के पन्थानः शिवाः स्युश्च किं सुखं शाश्वतं मतम् ॥१४॥
एतत् सर्वं ब्रूहि विद्वन् येन मुक्तिः प्रजायते ।
संसारभीरवो लोका मोक्षकामा भवन्ति च ॥१५॥
गुरवस्तारकाः सन्ति मोक्षदा वै दयालवः ।
शरणागतसंरक्षाकर्तारः पावना यतः ॥१६॥
मुक्तिस्तोतायनः श्रुत्वा सिद्धिवेशायनस्य तत् ।
मुमुक्षान्वितकोशाय शिष्यायोपादिदेश ह ॥१७॥
शृणु सिद्धिवेश सर्वं कथयामि यथातथम् ।
परमेशोपासना वै परं श्रेयो मतं मम ॥१८॥
परः स एव भगवान् सर्वकारणकारणम् ।
परब्रह्म परमात्माऽनादिकृष्णनरायणः ॥१९॥
अनादिश्रीकृष्णनारायणः श्रीकृष्णमाधवः ।
मायाऽक्षरादिशास्ता चाऽवतारकारणं प्रभुः ॥२०॥
साधुस्वभावाः सन्न्यासाः स्वरूपाणि हरेस्तथा ।
साधवश्चावताराश्चेश्वरा व्यूहाश्च तेऽपराः ॥२१॥
अपरं चाक्षरं ब्रह्म मुक्ताश्चाप्यपरा हि ते ।
अपराश्चापि सर्वे ये मुमुक्षवस्ततोऽपि च ॥२२॥
आत्मानश्चापराः सर्वे बुभुक्षवः सतृष्णकाः ।
आत्मतत्त्वं परं प्रोक्तमनात्म त्वपरं सदा ॥२३॥

अहं जातो ह्यहंकारो महत्तत्त्वात् त्रिमायिकः ।
त्वंभावोऽपि ततो जातो भेददृष्ट्या ह्यनात्मनि ॥२४॥
अहं त्वं चेति निर्देशो मायिको न तु चात्मनः ।
जायमानं महत्तत्त्वमहंकारमवासृजत् ॥२५॥
अहंकाराद्भेदभावो भ्रान्तिरूपोऽस्ति सर्वथा ।
तस्यागेऽहन्त्वममतात्यागे निजात्मनः सुखम् ॥२६॥
परमात्मनाऽर्पितं मुक्ते चात्मा तत्परमं सुखम् ।
त्रिकालाऽबाध्यमेवैतच्छ्रीहरेर्योगतो हि तत् ॥२७॥
सत्यं सुखं हि तत्प्रोक्तं भगवद्योगजं सदा ।
न नाश्यं नापि हार्यं च न क्षय्यं न विशीर्यते ॥२८॥
एतादृशं महानन्दसन्दोहात्मकमेव तत् ।
तल्लब्ध्वाऽन्यन्निर्मनस्कं नीरसं जायतेऽत्र वै ॥२९॥
तद्दाता भगवान् साक्षाच्छ्रीहरिः परमेश्वरः ।
अनादिश्रीकृष्णनारायणः श्रीपतिरच्युतः ॥३०॥
ततोऽवतारा जायन्ते हीश्वरा अपि वै ततः ।
ईश्वर्यश्चापि तस्माद्वै माया ततः प्रजायते ॥३१॥
ऋषयश्च तथा देवा मानवाः स्थावरादयः ।
खनयश्चापि सर्वा वै सर्वभूतानि देहिनः ॥३२॥
जायन्ते श्रीहरेस्ते वै जीवन्ति तत्प्रवेशिताः ।
आपूरकेण तत्त्वेन मायया सन्निवेशिताः ॥३३॥
परात्मनाऽऽन्तरस्थात्ता जीवन्ति तु चिराच्चिरम् ।
जीवनं कर्मसंघातः पुण्यं पापं निजाऽर्जितम् ॥३४॥
यावद्भवन्ति कर्मोत्थाऽदृष्टानि तावदेव ते ।
जीवन्ति चाऽथ तन्नाशे म्रियन्ते देहिनः सदा ॥३५॥
सत्यं ब्रह्म तु परमं सत्या मुक्तिः सदा मता ।
सत्य आत्मा चिदानन्दः सत्या श्रीरनपायिनी ॥३६॥
सत्यो धर्मः सतां नित्यो मोक्षदो यो निगद्यते ।
तपः श्रेष्ठं हि साधुत्वं सन्न्यासस्तप उत्तमम् ॥३७॥
सामर्थ्ये सति सहनं परमं तप उच्यते ।
ज्ञानं विद्या तपः प्रोक्तं मोक्षदं तत् सदा भवेत् ॥३८॥
यो वेत्ति ब्रह्मसंवासं विवासं प्रकृतेस्तथा ।
तथा चिदचितोर्भेदं स याति परमां गतिम् ॥३९॥
यो न कामयते किञ्चिन्न किञ्चिदभिमन्यते ।
इह लोके स्थितश्चैष ब्रह्मभूयाय कल्पते ॥४०॥
चिदानन्दस्य परमे कृष्णनारायणे मयि ।
कृत्वा समर्पणं तिष्ठेन्मुच्यते नात्र संशयः ॥४१॥
पुरा ब्रह्मर्षिभिर्ब्रह्मा पृष्टो नैःश्रेयसे परे ।
कथं कर्म क्रियात् साधु कथं मुच्येत किल्बिषात् ॥४२॥
के पन्थानः शिवा नश्च कौ मार्गौ दक्षिणोत्तरौ ।
श्रुत्वा जगाद तान् ब्रह्मा गुरुसेवां सदा क्रियात् ॥४३॥
गुरवो मोक्षदातारः सन्तः साधुजनाः शुभाः ।
पापप्रक्षालकाः सर्वे पुण्यशेवधिदायिनः ॥४४॥
हिते चाऽप्रेरिता ये स्युस्ते सन्तो गुरवोऽमलाः ।
तैर्दत्ता ये चोपदेशा ग्राह्यास्ते ते गुणा मताः ॥४५॥
सत्त्वे चित्त्वे तथाऽऽनन्दे पुष्टिं यैश्चेतनो व्रजेत् ।
ते गुणा दिव्यरूपा वै तदन्ये दुर्गुणा इति ॥४६॥
गुणैः सम्प्रेरितश्चात्मा क्रियात् कर्म सुखावहम् ।
परलोकप्रदं यद्वा परधामप्रदं शुभम् ॥४७॥
परधामप्रदं कर्म साधु साधुत्तमं मतम् ।
परलोकप्रदं कर्म साधु साधुतरं मतम् ॥४८॥
इह धर्मयुतं कर्म सत्कर्म साधु कथ्यते ।
ब्रह्म सत्यं तपः सत्यं सत्यं च गुरुसेवनम् ॥४९॥
सत्यं साधु निजं कर्म तेन मुच्येत किल्बिषात् ।
तीर्थसेवा सतां सेवा पितृसेवा हि पावनी ॥५०॥
आत्मज्ञानं हरेर्ज्ञानं भक्तिः किल्बिषनाशिनी ।
मातृसेवा च गोसेवा सतीसेवा हि पावनी ॥५१॥
देवभक्तिर्गुरोर्भक्तिः समाधिः किल्बिषापहा ।
ब्रह्मचर्यं च सन्न्यासः सर्वकिल्बिषनाशकौ ॥५२॥
गार्हस्थ्यं स्वर्गदं चापि मय्यर्पितं तु मोक्षदम् ।
वानप्रस्थं विरागाणां मायावृत्तिविनाशकम् ॥५३॥
श्रद्धालक्षणमित्येवं धर्मं ज्ञात्वा चरन्ति तम् ।
दानं सेवा दक्षिणा च सत्यं पुण्यं च साधुता ॥५४॥
परोपकारस्तीर्थानि देवयाना भवन्ति ते ।
ज्ञानं विरागश्चैश्वर्यं ध्यानं समाधिरर्पणम् ॥५५॥
मन्त्रजपोऽतिसन्तोषः सिद्धयाना भवन्ति ते ।
उपासना परा भक्तिः प्रीतिश्चाराधना तथा ॥५६॥
प्रपत्तिः शरणे पातो मुक्तियाना भवन्ति ते ।
शिवाः सर्वे ते पन्थानो हरिः शिवतमः सदा ॥५७॥
तत्सुखं शाश्वतं दिव्यं गत्वा धीरः समश्नुते ।
नारायणमयो भूत्वा सर्वामृद्धिं समश्नुते ॥५८॥
उत्तरास्ते तु पन्थानः प्रोक्ताश्चाऽन्यौंस्तथाऽपरान् ।
दक्षिणान् गर्भदाँश्च कथयामि सुचक्रिणः ॥५९॥
मानवं पुण्यमादाय देवो भवति वै चिरम् ।
शेषमादाय चायाति मानवे दक्षिणे पथि ॥६०॥
पापमादाय याम्यं वै राज्यं याति निवृत्तये ।
शेषमादाय तिर्यक्षु ततो वा मानवे क्वचित् ॥६१॥

एवं वै दक्षिणे मार्गे चतुरशीतिलक्षके ।
आवर्तते चक्रवच्च दक्षिणो मार्ग एव सः ॥६२॥
तत्र तत्त्वानि तिष्ठन्ति दक्षिणे देहमार्गके ।
अव्यक्तं मूलमाया वै त्रिगुणात्मा प्रतिष्ठति ॥६३॥
साम्यावस्थं पूर्वभागं विषमावस्थमुत्तरम् ।
ध्रुवं चाऽऽपूरकं तत्त्वं स्थिरं प्रसवधर्मि च ॥६४॥
गुणेभ्यो विषमेभ्यस्तु महत्तत्त्वं प्रजायते ।
देहे बुद्धिस्वरूपं तत् स्त्रीरूपं वै चिदात्मनः ॥६५॥
ततोऽहंकारनामा वै पुत्रस्त्र्यवस्थवर्तनः ।
त्रिगुणो जायते सर्वदेहेष्वपि प्रवर्तते ॥६६॥
तस्मात् प्रजायते सूक्ष्मभूतानीन्द्रियकाणि च ।
मनोऽपि जायते तस्माद् व्योम प्राणस्ततोऽपि च ॥६७॥
ततो तेजो जलं तस्मात् ततः पृथ्वी प्रजायते ।
तानि सर्वाणि देहेऽत्र भवन्ति दक्षिणापथे ॥६८॥
उद्घाटितनवद्वारं नद्धद्वारद्वयं तथा ।
एकद्वाराऽधिकं यद्वा न्यूनद्वारादिकं च वा ॥६९॥
षाट्कौशिकं पञ्चरूक्षं सुसूक्ष्मैकोनविंशतिम् ।
सचेतनं चाष्टधर्मं बहुधर्मं सधर्मकम् ॥७०॥
असमानधर्मवच्च कल्मषं मलिनं सदा ।
त्रीणि स्रोतांसि वर्माणि चाभ्यान्ते पुनस्त्विदम् ॥७१॥
शुक्लकृष्णाऽशुक्लकृष्णात्मकानि संस्कृतानि च ।
संस्कारैस्तानि नित्यं वै नवोद्भवानि सन्ति हि ॥७२॥
सत्त्वं दीपो भवत्येव रजो गतिं ददाति हि ।
तमो निरोधं कुरुते ह्येवं सक्रियमेव तत् ॥७३॥
सत्त्वगुणे वर्तमाने प्रीतिरानन्द उत्सवः ।
सुखं प्रकाश उदयश्चौदार्यं निर्भयत्वकम् ॥७४॥
श्रद्धा क्षमा धृतिः सत्यं सन्तोष आर्जवं तथा ।
दया समता चाऽहिंसा शुद्धिर्दाक्ष्यं सुकर्मता ॥७५॥
व्रतं सेवा परिचर्या ह्यकामो ह्रीस्तितिक्षणम् ।
विश्वासश्चोपकारश्च त्यागस्तुष्टिः प्रमोदनम् ॥७६॥
साधुवृत्तित्वमनघं शान्तं कर्म शुभेक्षणम् ।
उपेक्षा ब्रह्मचर्यं च ममाऽहंकारवर्जिता ॥७७॥
दानं मखोऽध्ययनं चेत्येते गुणास्तु सात्त्विकाः ।
एभिर्गुणैर्धीरभावा जायन्ते साधुवृत्तयः ॥७८॥
विशोका धर्मबहुलाः स्वर्गं यान्ति सुराश्च ते ।
भूत्वेशित्वं वशित्वं च लघुत्वं लभते दिवि ॥७९॥
ऊर्ध्वस्रोतस इत्येते देवाः श्रेष्ठा मता हि ते ।
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च ॥८०॥

अथ राजसभावान् वै कथयामि समासतः ।
प्रवर्तनं व्यवहारश्चोत्साहो वेग उद्यमः ॥८१॥
सन्तापो रूपमायासो दुःखमातप ऊर्ध्वता ।
ऐश्वर्यं मेलनं हेतुवादो रतिर्बलं मदः ॥८२॥
शौर्यं रोषश्च कलहः पिशुनं पालनं रणः ।
ईर्ष्येप्सा बन्धनं घातो विक्रयश्च निकृन्तनम् ॥८३॥
परच्छिद्रावमर्षश्च चिन्ता च मत्सरो मृषा ।
निन्दा स्तुतिः प्रशंसा च विकल्पो घर्षणं तपः ॥८४॥
शुश्रूषा च परिचर्या भृत्यता च परिग्रहः ।
प्रमादः परिवादश्च नयो व्यूहो नमस्क्रिया ॥८५॥
आशीर्वादाः पौर्त्तकर्म स्वाहास्वधावषट्क्रियाः ।
विद्या च मंगलं स्नेहो ममेदमितिलालसा ॥८६॥
मानं माया जुगुप्सा च जागरः स्तैन्यमित्यपि ।
दंभो दर्पोऽथ रागोऽपि भक्तिर्मोदश्च कामना ॥८७॥
द्यूतं नृत्यं च गीतं चेत्येवमाद्यास्तु राजसाः ।
धर्मोऽर्थः सम्पदश्चेति राजस्यो वै भवन्ति हि ॥८८॥
तैर्गुणैः सहिता यान्ति धर्मार्थैश्वर्ययोजिताः ।
अत्रैव मानवे लोके मोदन्ते मानवास्तु ते ॥८९॥
परलोकं समीहन्ते तर्पयन्त्यपि जुह्वति ।
ददति प्रतिगृह्णन्ति जायन्ते च पुनः पुनः ॥९०॥
अथ ते तामसान् वच्मि गुणान् तमःसमुत्थितान् ।
मोहो भयं च लोभश्च स्वप्नः स्तम्भः प्रदूषणम् ॥९१॥
अत्यागश्चाप्यथाऽज्ञानं डोळनं स्मृतिविभ्रमः ।
नास्तिक्यं भेदवृत्तिश्चाऽन्धत्वं जाड्यं च सन्नता ॥९२॥
मृषामानं वैरभावो विकृतिर्मूढभावना ।
पापं परवशित्वं चालस्यं धूम्रनिभाज्ञता ॥९३॥
नाशो निरोधनं भंगो लयश्चेति तु तामसाः ।
सर्वकार्यें नियम्यन्ते प्रवृत्तयो हि तामसैः ॥९४॥
परिवादकथा मन्युरत्यागश्चाभिमानिता ।
अक्षमा मत्सरश्चेति तामसास्ते भवन्ति वै ॥९५॥
वृथारम्भा वृथादानं वृथाभक्षणमित्यपि ।
अश्रद्धा खण्डनं चेति तामसास्ते भवन्ति वै ॥९६॥
मनुष्या भिन्नमर्यादा दैत्याश्च राक्षसास्तथा ।
अवाङ्निरयमापन्नास्तिर्यङ्निरयगामिनः ॥९७॥
दानवाश्चासुराः प्रेता भूताः पिशाचकादयः ।
क्रूराश्च हिंसका मांसभक्षणाः संभवन्त्यपि ॥९८॥
स्थावरेषु जंगमेषु पशुष्वपि भवन्ति ते ।
वाहनेषु खरोष्ट्रेषु क्रव्यादेषु भवन्ति ते ॥९९॥

दंदशूकाः कृमयश्च कीटा विहंगमास्तथा ।
अण्डजा जन्तवश्चापि बहुपदाश्चतुष्पदाः ॥१००॥
उन्मत्ता बधिरा मूकाः पापरोगावृत्ताश्च ये ।
अर्वाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥१०१॥
एवमेते गुणवृत्ता भवन्ति देहिनः खलु ।
सतां योगेन लोकेऽस्मिन् यथाकथंचिदेव ह ॥१०२॥
पुण्यवतां प्रसंगेन समायान्त्यूर्ध्वमाश्रयात् ।
चण्डालाद्याः पापपूर्णा घातका हिंसकाश्च वा ॥१०३॥
जायन्ते तेऽपि च पुनर्धर्मयोगेन शोभनाम् ।
योनिमासाद्य पर्यायादूर्ध्वमायान्ति वै क्वचित् ॥१०४॥
विप्रर्षयः सुराः सन्तो मुनयः सुखिमानवाः ।
ततो यान्ति दिवं धर्मैः सत्त्वेनेश्वरवासिताम् ॥१०५॥
भक्त्या समर्पणेनापि सेवया कृपयाऽथवा ।
मोक्षपदं प्रयान्त्येव चिरेण शरणागताः ॥१०६॥
इत्येवं कथितं सर्वं लक्ष्मि देहादियोजनम् ।
सिद्धिवेशायनायैव मुक्तिस्रोतायनेन वै ॥१०७॥
लब्ध्वा विमलविज्ञानं शान्तिमवाप चोत्तमाम् ।
शिष्यो दिव्यतमां दृष्टिं चावाप पारमेश्वरीम् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने संक्षिप्तमुक्तिधर्माणां देहधर्माणां मायिकादीनां च निरूपणनामा षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

श्रीपुरुषोत्तम उवाच—

उक्तं मायोद्भवं सर्गं जानँल्लक्ष्मि न मुह्यति ।
सर्वतः पाणिपादो यः सर्वतोऽक्षिशिरोमुखः ॥ १ ॥
सर्वतः श्रुतिमान् यश्च तं जानन् वै प्रमुच्यते ।
महाप्रभावः पुरुषोत्तमः सर्वहृदि स्थितः ॥ २ ॥
सर्वेशानः सर्वज्योतिष्प्रदोऽच्युतः पुमुत्तमः ।
प्रसन्नः श्रीहरिश्चाऽहं मां ज्ञात्वा संप्रमुच्यते ॥ ३ ॥
विष्णुरेवाऽऽदिसर्गेऽहं स्वयंभूः शंकरोऽपि च ।
भवामिति च मां ज्ञात्वा मुच्यन्ते ब्रह्मभाविनः ॥ ४ ॥
अध्यात्मज्ञानतृप्तानां मुनीनां भावितात्मनाम् ।
स्वाध्यायक्रतुसिद्धानां मम लोकः सनातनः ॥ ५ ॥
मम स्मरणमन्तो ये धीरा ब्रह्मपरा जनाः ।
क्रियाकरणनिर्लेपास्तेषां लोकः सनातनः ॥ ६ ॥
इन्द्रियाणि वशे यस्य विषयो रागवर्जितः ।
विशुद्धं च मनो यस्य बुद्धिरव्यभिचारिणी ॥ ७ ॥
ज्ञानं भक्तिर्यस्य पार्श्वे सेवा यस्मिन् सदा स्थिता ।
स तद्ब्रह्म शुभं याति ततो भूयो न जायते ॥ ८ ॥
दह्यं ग्रामं जयेत् पूर्वं ततो ब्रह्म प्रकाशते ।
सर्वं मया कृतं चैवं विदित्वा सन्त्यजेत् ततः ॥ ९ ॥
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चापि पञ्चमी ।
पादौ पायुरुपस्थश्च हस्तौ वाग् दशमी तथा ॥१०॥
मन एकादशं चित्तमहं बुद्धिश्चतुर्दशी ।
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ॥११॥
अधिभूतं तत्र शब्दो दिशस्तत्राधिदैवतम् ।
पवनो द्वितीयभूतं त्वगध्यात्मं तु तत्र च ॥१२॥
स्प्रष्टव्यमधिभूतं च विद्युत् तत्राधिदैवतम् ।
तेजस्तृतीयं भूतं च चक्षुरध्यात्ममुच्यते ॥१३॥
रूपं तत्राऽधिभूतं च रविस्तत्राधिदैवतम् ।
जलं चतुर्थं भूतं च रसनाऽध्यात्ममुच्यते ॥१४॥
रसोऽधिभूतं तत्राऽथ चन्द्रमाश्चाधिदैवतम् ।
क्षितिर्भूतं पञ्चमं च घ्राणश्चाध्यात्ममुच्यते ॥१५॥
गन्धोऽधिभूतं तत्रैव वायुस्तत्राधिदैवतम् ।
पादावध्यात्ममित्येव गन्तव्यमधिभूतकम् ॥१६॥
अधिदैवतमेवात्र विष्णुरेव सनातनः ।
अवाग्गतिमदपानो पायुरध्यात्ममुच्यते ॥१७॥
विसर्गोऽधिभूतमेव मित्रस्तत्राऽधिदैवतम् ।
प्रजनः सर्वलोकानामुपस्थोऽध्यात्ममुच्यते ॥१८॥
शुक्रं रजोऽधिभूतं च दैवतं तु प्रजापतिः ।
हस्तावध्यात्ममेवाऽत्राऽधिभूतं कर्म चैव हि ॥१९॥
शक्रोऽधिदैवतं तत्र बोध्यमादानकारकम् ।
वैश्वदेवी च या पूर्वा वाक् साऽध्यात्ममिहोच्यते ॥२०॥
वक्तव्यमधिभूतं च वह्निस्तत्राऽधिदैवतम् ।
अध्यात्मं मन एवापि संकल्पश्चाधिभूतकम् ॥२१॥
चन्द्रमाश्चाधिदैवश्च मनोराज्यं हि तन्मतम् ।
अहंकारस्तथाऽध्यात्मं सर्वसंसारकारकः ॥२२॥
अभिमानोऽधिभूतं च रुद्रस्तत्राऽधिदैवतम् ।
चित्तमध्यात्ममित्येव वासुदेवोऽधिदैवतम् ॥२३॥
चिन्तनं चाधिभूतं च चिन्ता वै प्रलयंकरी ।
बुद्धिरध्यात्ममेवापि सर्वेषां महती प्रसूः ॥२४॥
अधिभूतं तु बोद्धव्यं ब्रह्मा तत्राऽधिदैवतम् ।
चतुर्थं दैवतानां च दैवतं परमेश्वरः ॥२५॥
सोऽहं सर्वनिवासोऽस्मि सर्वदेवाधिदैवतम् ।
एतज्ज्ञात्वा त्रयं त्यक्त्वा चतुर्थं तोषयेत् त्रिभिः ॥२६॥

चेतनस्तत्र फलभाङ् मुच्यते मत्प्रतोषणात् ।
गुणादिषु ह्यनासंगो ब्रह्मचर्या मदर्पणम् ॥२७॥
एतद् ब्रह्ममयं व्रतं चैकपदं सुखं परम् ।
तत्र स्थितश्चेतनोऽयं सर्वतो मुक्त एव सः ॥२८॥
कामानात्मनि संयम्य क्षीणतृष्णो मदर्पणः ।
सर्वभूतात्मदर्शी च ब्रह्मभूयाय कल्पते ॥२९॥
सर्वेन्द्रियनिरोधेन ह्यध्यात्माऽग्निः समिध्यते ।
प्रकाशते चिदात्मा च प्रसन्नात्मा प्रवर्धते ॥३०॥
स्वयंज्योतिः परंज्योतिः सर्वतेजांस्यतीत्य सः ।
मायाचक्रं कालचक्रं कर्मचक्रं व्यतीत्य च ॥३१॥
जगत् सर्वमतिक्रम्य त्यक्त्वा दुस्त्यजपूरुषम् ।
ब्रह्म व्योम चिदाकाशं प्राप्नोति स्थानमूर्ध्वगम् ॥३२॥
सर्वमायाविनिर्मुक्तस्ततो मुक्तेषु संस्थितः ।
ब्रह्महृदे कृतस्नानो दिव्यसजातिशोभनः ॥३३॥
सर्वज्ञ इव संशोभन् त्वेकधा बहुधा भवन् ।
मोदते चाक्षरे धाम्नि रमते स्वामिनि ध्रुवे ॥३४॥
तं मुक्ता विप्रसंघाश्चेश्वरा देवा महर्षयः ।
पितरो मानवा भूताः सदा स्तुवन्ति मुक्तये ॥३५॥
अहं ब्रह्मपरः स्वामी मतः परो न विद्यते ।
राजाधिराजः सर्वेषां मुक्तानां परमो हरिः ॥३६॥
साधवो रक्षिता येन मुक्ता भक्ताश्च रक्षिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते सुखं प्रेत्य च भुञ्जते ॥३७॥
सन्न्यासी ज्ञानिभक्तो वै प्राप्नोति परमां गतिम् ।
निर्द्वन्द्वो भक्तिमान् स्नेही मयि मामेव गच्छति ॥३८॥
विमुक्तः सर्वसंस्कारैः सर्वद्वन्द्वविवर्जितः ।
विमुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिम् ॥३९॥
चत्वार आश्रमाः सन्ति सर्वे गार्हस्थ्यजीविनः ।
गार्हस्थ्यान्तगमनं वै श्रेयस्तत्र प्रतिष्ठतः ॥४०॥
सपत्नीकस्य तु पञ्चमहायज्ञा विमुक्तये ।
देवताऽतिथिशिष्टाऽशी विघसाशी न लिप्यते ॥४१॥
वैष्णवीं धारयेन्मालां दीक्षां भिक्षां मतिं श्रियम् ।
अधीत्य मां स्वकर्माणि कुर्वन्नपि विमुच्यते ॥४२॥
गृहस्थो वा निवृत्तो वा य इच्छेन्मोक्षमात्मनः ।
अभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेत् ॥४३॥
सर्वभूतसुखो मैत्रः सर्वेन्द्रिययतो मुनिः ।
हर्यर्पितस्वव्यापारः प्रयाति परमां गतिम् ॥४४॥
लाभेन यो न वै हृष्येन्नाऽलाभे विमना भवेत् ।
अभिपूजितलाभाद् यो जुगुप्सां याति मानसे ॥४५॥
असंरोधेन भूतानां प्रवर्तेत निरन्तरम् ।
प्रतिश्रयार्थं सेवेत निर्विघ्नां पार्वतीं गुहाम् ॥४६॥
पूताभिर्बुद्धिभिः कृष्णं नैजं कुर्वीत मोक्षवित् ।
विश्वास्यः श्रीहरेश्चाऽयं जायेत मोक्षमर्जयेत् ॥४७॥
गृहधर्माश्रितश्चापि विज्ञानिचरितं चरेत् ।
अमूढो मूढरूपेण चरेद् भक्तिं ममोत्तमाम् ॥४८॥
य एवं व्रतसम्पन्नो मुच्यते सर्वबन्धनैः ।
ध्यायेन्मां कान्तमास्थाय मुच्यते नाऽत्र संशयः ॥४९॥
यो न कामयते किञ्चिन्न किञ्चिदवमन्यते ।
इह लोकस्थ एवापि ब्रह्मभूयाय कल्पते ॥५०॥
त्यक्त्वा गुणमयं सर्वं कर्म श्रीपरमात्मनि ।
स्नेहेन मयि संसक्तो मुच्यते नात्र संशयः ॥५१॥
उच्छ्वासमात्रमपि यो ह्यन्तकाले स्मरेद्धरिम् ।
स मां तदोपसंगम्य ह्यमृतत्वाय कल्पते ॥५२॥
निमेषमात्रमपि चेत् संयम्यात्मानमात्मनि ।
भजते मां मया दृष्टो ह्यमृतत्वाय कल्पते ॥५३॥
इह लोके जनाः केचिदिच्छन्ति धर्ममेव ह ।
केचिज्ज्ञानं च विज्ञानं केचिद्विरागमेव ह ॥५४॥
केचिद् देशं च वा कालं केचिद् दैवं वदन्त्यपि ।
केचित् स्नानं त्रिषवणं केचिदस्नानमित्यपि ॥५५॥
अन्ये त्वाहारमेवापि परे चानशनं तथा ।
कर्मण्येव रताश्चान्ये शान्तौ रतास्तथाऽपरे ॥५६॥
केचिन्मुक्तिं प्रशंसन्ति केचिद् भोगान् पृथग्विधान् ।
केचिदर्थान् स्वर्णरूप्यान् केचित्तु निष्परिग्रहम् ॥५७॥
उपासनं परे चापि केचिद् यज्ञपरायणाः ।
केचिद्धिंसामहिंसां वा पुण्यं व्रतं तथा परे ॥५८॥
तीर्थं चान्ये परे सेवामुपकारं तथेतरे ।
सद्भावं चापरे ध्यानं केचित्तपः प्रकुर्वते ॥५९॥
स्वाध्यायं पूजनं दानं चान्ये सत्यं वदन्त्यपि ।
सन्न्यासमपरे चापि भृगोः पातं तथाऽपरे ॥६०॥
त्यागं चान्ये विरक्तिं च गार्हस्थ्यं चाऽपरे तथा ।
अन्ये निर्द्वन्द्ववासं च तथाऽन्ये यावदर्पणम् ॥६१॥
सर्वे धर्मविशेषास्ते लक्ष्मि श्रेयःप्रदाः शुभाः ।
मम सम्बन्धयुक्ताश्चेन्मोक्षदाः सर्व एव ते ॥६२॥
मम योगेन हीनास्तु संसारकर्दमाऽर्पकाः ।
शुभं वाऽप्यशुभं मिश्रं यदर्ज्यते तु तैः कृतैः ॥६३॥
भोक्तव्यं चेह वाऽन्यत्र नाऽभुक्तं तद् विनश्यति ।
भोगार्थं देहसम्बन्धः संसारस्तेन वै ध्रुवः ॥६४॥

तेष्वेतेषु तु विज्ञानं निःश्रेय इति सर्वथा ।
भक्तिश्च मोक्षदा कृष्णे शाश्वती सुखकारिणी ॥६५॥
आशीर्युक्तानि कर्माणि चान्यानि कुर्वते तु ये ।
तेऽत्र लोके प्रमोदन्ते जायमानाः पुनः पुनः ॥६६॥
फलं त्यक्त्वा हरौ ये कुर्वते ते साधुदर्शिनः ।
उपभुंक्ते समस्तं सः किन्तु पुष्करपत्रवत् ॥६७॥
सर्वैर्भोगैः सुसम्पन्नो ह्यपि विद्वान्न लिप्यते ।
जलबिन्दुर्यथाऽसंगी पत्रस्थोऽपि न लिप्यते ॥६८॥
एवं चायं चिदात्माऽपि मय्यर्पितो न बध्यते ।
सर्वार्पणयुतो भक्तः प्रलिप्तोऽपि न लिप्यते ॥६९॥
सहस्रणापि दुर्मेधा न बोधमधिगच्छति ।
चतुर्थेनाप्यथांऽशेन बुद्धिमान् सुखमेधते ॥७०॥
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ।
यावद् रथपथस्तावद् गन्तव्यं रथवर्त्मणा ॥७१॥
क्षीणे रथपदे चाग्रे गन्तव्यं रथिनाऽऽत्मना ।
पदसृतौ च लीनायां गन्तव्यं हंसगामिना ॥७२॥
गरुडगामिना हस्तिगामिना व्योमगामिना ।
सर्वत्र गामिना चापि गन्तव्यं गुरुशार्ङ्गिणा ॥७३॥
यावज्जलं तु बाहुभ्यां नावा वाऽग्रे सरेद्ध्रदे ।
पारं प्राप्य ततो नावमुत्सृज्य यानतः सरेत् ॥७४॥
भूतलं सर्वमुल्लङ्घ्य विमानेनाऽग्रतः सरेत् ।
विमानस्याऽविषये तु विष्णुना सह सञ्चरेत् ॥७५॥
विष्णोरप्यविषये तु मुक्तैः सहाऽग्रतः सरेत् ।
मायामयं समुत्सृज्य मुक्तो गच्छेत्परां गतिम् ॥७६॥
तप औषधमुत्कृष्टं विद्या मात्रा तथोत्तमा ।
भक्तिरसः पुष्टिकृच्च तैः पुष्टो याति मत्पदम् ॥७७॥
यद्दूरापं च दुर्दर्शयं दुराधर्षं दुरन्वयम् ।
तत्सर्वं तपसा साध्यं सेवया कृपया च मे ॥७८॥
ध्यानयोगेन शुद्धेन भक्त्या प्रेमाढ्यया तथा ।
आप्नुवन्ति महात्मानो मदीयं लोकमुत्तमम् ॥७९॥
मम ध्यानं ध्रुवं कृत्वा प्रसन्नमतयो जनाः ।
शाश्वतानन्दसम्पूर्णं मां प्रयान्त्यात्मदर्शिनः ॥८०॥
कर्म वै मरणं प्रोक्तं नैष्कर्म्यममृतं मतम् ।
य एवममृतं नित्यं शाश्वतं चाऽक्षरं सुखम् ॥८१॥
वश्यमात्मस्थमास्वाद्य मां वेद न मृतो भवेत् ।
अमृताशनमासाद्याऽमृतो भवति मुक्तराट् ॥८२॥
व्यतीत्य सर्वसंस्कारान् संयम्यात्मानमात्मनि ।
परब्रह्म विदित्वाऽत्र परत्र तत्पदं व्रजेत् ॥८३॥
प्रसादे खलु सत्त्वस्य साधुसेवारतिर्भवेत् ।
प्रसादं प्राप्य साधूनां साधुपतिं लभेद्धरिम् ॥८४॥
विज्ञानपरिनिष्ठानां मुक्तानां गतिरीदृशी ।
विरक्तानां च भक्तानां गतिरेषा सनातनी ॥८५॥
भक्तिमतां गृहस्थानां सैव गतिः सनातनी ।
इत्येवं लक्ष्मि ऋषिराट् सद्विद्यायननामकः ॥८६॥
श्रुतिफलां बहुकथां कथयामास मुक्तये ।
श्रुतिफला तु पप्रच्छ कथं बन्धे प्रतिष्ठसे ॥८७॥
विद्यायनस्ततः प्राह धर्मो ह्येष युगार्थिनः ।
अपि कीटपतंगानां मृगाणां पक्षिणामपि ॥८८॥
सरीसृपाणां धर्मोऽयं पत्न्यास्तु भरणं प्रिये ।
स्त्रियो रक्ष्याश्च पोष्याश्च न त्याज्या ग्रहणोत्तरम् ॥८९॥
प्रपतेद् यशसो दीप्ताद्धर्मात् स्त्रीत्यागवान् प्रिये ।
धर्मकामार्थकार्याणि शुश्रूषा कुलसन्ततिः ॥९०॥
सर्वं पत्न्यधीनकं तद् गृहस्थस्य सदा प्रिये ।
अतोऽहं तव बन्धेऽस्मि विवाहिता यतो ह्यसि ॥९१॥
न वेत्ति भार्याधर्मं यः स्वधर्मं दम्पतीभवम् ।
अयशो महदाप्नोति नरकांश्चैव गच्छति ॥९२॥
एवमेव च नारीणां पतिर्धर्मः परो मतः ।
भर्तुः प्रसादान्नारीणां रतिपुत्रफलं सदा ॥९३॥
पालनाद्धि पतिः प्रोक्तो भर्ता च भरणादपि ।
पुत्रदानाद् वरदश्च पतिर्धर्मः परो मतः ॥९४॥
इत्येव सुकृतं मन्ये तस्माद् बन्धे भवाम्यहम् ।
भवती परिपाल्या मे सर्वदैव प्रयत्नतः ॥९५॥
सतां नित्यं कांक्षितं यन्नैजानां परिपालनम् ।
उत्पाद्य पुत्रं हि पिता कृतकृत्यो भवेत् सदा ॥९६॥
सा त्वं पुत्रवती भूत्वा ऋणान्मां परिमोचय ।
इत्युक्ता ज्ञाननिरता नैष्कर्म्यमपि बोधिता ॥९७॥
दिव्यतां प्रति गमिता कल्पयामास सत्सुतम् ।
मानसस्तत्र वै द्राक् च पुत्रस्तस्या व्यजायत ॥९८॥
निर्वाणाख्यः शाश्वतो वै दीक्षितः सहसा तया ।
पित्रा चाप्युपनीतश्च ववृधे बोधदायकः ॥९९॥
निर्मोहिनीं शुभां कन्यां वैखानससुतां शुभाम् ।
परिणेमे ततो लक्ष्मि श्रुतिफलायुतः पतिः ॥१००॥
सद्विद्यायनऋषिराट् कृत्वा समाधिमुत्तमम् ।
ययौ ब्रह्मपदं दिव्यं मम धाम परं सुखम् ॥१०१॥
पठनाच्छ्रवणाच्चास्य मननाद्धारणादपि ।
निर्बन्धो जीववान्मुक्तो भवत्येव न संशयः ॥१०२॥

सहस्रशो जनान्नारीः स्वकीयशरणागतान् ।
मुक्तान् कर्तुं समर्थः स्यान्मुक्तिधर्मादरो हि यः ॥१०३॥
भोगान् भुक्त्वापि सततं ज्ञानवैराग्यवान् भवेत् ।
मायाशिरसि चरणौ दत्वा यात्यक्षरं मम ॥१०४॥
इष्टलाभान् प्रलब्ध्वैव परं मोक्षप्रदं व्रजेत् ।
नार्यपि मुक्तिधर्माढ्या दिव्या नारायणी भवेत् ॥१०५॥
जीवन्मुक्ता भवेदत्र सर्वभोगवती ह्यपि ।
देहान्ते परमं धाम गन्त्री मे कृपया भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्तानेऽध्यात्माऽधिभूताऽधिदैवाधिदैवतादिनिरूपणनामा सतसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि कथयामि कथां भक्तस्य शोभनाम् ।
गृहस्थस्य सदा चात्मनिवेदिनः प्रमुक्तिदाम् ॥ १ ॥
आसीद् भक्तो भिक्षुको मे भिक्षायनो मुनीश्वरः ।
अयाचिताञ्जलिनाम्नी भार्या तस्याऽभवच्छुभा ॥ २ ॥
भिक्षायनस्त्रिषवणं स्नाति नित्यं सरोवरे ।
अश्वपट्टे च तत्पत्नी जलं चादाय मन्दिरे ॥ ३ ॥
करोति मम पूजां वै नित्यं त्रिषवणे स्थिता ।
एवं तयोर्हि दम्पत्योर्मन्दिरे मम सर्वदा ॥ ४ ॥
पूजयतोर्मम मूर्तिं वृत्तिस्तु जीविकात्मिका ।
निर्वहते भक्तलोकैर्दत्तैरन्नजलाम्बरैः ॥ ५ ॥
प्रातः प्रपूज्य तौ मां च मन्दिरस्य प्रसेवनम् ।
मार्जनं लेपनं धूपदानं दीपप्रकाशनम् ॥ ६ ॥
पुष्पाद्याहरणं चापि पाचनं पात्रमर्षणम् ।
आरार्त्रिकं तथा स्थालनिवेदनं जलार्पणम् ॥ ७ ॥
ताम्बूलदानकं चापि कुरुतोऽथ विसर्जनम् ।
नित्यमेवं चात्मनिवेदित्वं कुरुत आदरात् ॥ ८ ॥
अहमाभ्यां प्रत्यहं वै भिक्षायोगं करोमि च ।
कश्चिद् भक्तः समागत्य यात्रालुर्वा परोऽपि वा ॥ ९ ॥
अर्पयत्येव भोज्यादि प्रणिर्वहतस्तावुभौ ।
सन्तुष्टौ मम भक्तौ तौ यदृच्छालाभतोषिणौ ॥१०॥
गार्हस्थ्यधर्ममेवाऽपि समाचरत आदरात् ।
कामः क्रोधस्तथा लोभो मोहो नात्मार्थमेतयोः ॥११॥
मां हरिमुररीकृत्य मत्वा चाऽन्तःस्थितं सदा ।
कुरुतः सर्वकार्याणि देहजानीतराणि च ॥१२॥
भोजनं जलपानं च तैलाभ्यंगं शृंगारकम् ।
सद्वेषं चोत्सवं चापि प्रमोदं रमणं तथा ॥१३॥
सर्वं मामेव संस्मृत्य कुरुतो दिव्यदृष्टितः ।
आत्मार्पणं विना क्वापि नैवाचरत ऐच्छिकम् ॥१४॥
व्यवसायोऽपि सर्वो वै मदात्मकस्तयोरभूत् ।
यदा भिक्षां गृह्णतस्तौ कवले कवले हरिम् ॥१५॥
अनादिश्रीकृष्णनारायणं मां स्मरतश्च तौ ।
शय्यायां चापि दोलायां प्रयासे चेतरेऽपि च ॥१६॥
मां स्मृत्वैव प्रवर्तेते न मां विहाय कर्हिचित् ।
आतपे मम प्रीत्यर्थं जलकटादिबन्धनम् ॥१७॥
शीतवारिप्रदानादि मदर्थं कुरुतः सदा ।
शैत्ये चोष्णसलिलं च तथोष्णभोजनादिकम् ॥१८॥
मदर्थं तौ हि कुरुतश्चोर्णवस्त्रादिकार्पणम् ।
वर्षायां छत्रदानादि चैकादश्यां च जागरम् ॥१९॥
व्रतेषु फलपुष्पाणां मदर्थानयनं तथा ।
गीतं नृत्यं वाद्यशब्दं तालं च रञ्जनादिकम् ॥२०॥
मदर्थं कुरुतो नित्यं कथां च कुरुतो मम ।
एवं वै वर्तमानौ तौ कथां संशृणुतो मम ॥२१॥
कामो वै निरयो लोके वासनामूलको मतः ।
कामिनां नैव मोक्षोऽस्ति तस्मात् कामं परित्यजेत् ॥२२॥
अयाचिताऽञ्जलिः पत्नी श्रुत्वा पप्रच्छ तं मुनिम् ।
भूदेव ! भिक्षुकश्चासि पतिर्मे भवतारकः ॥२३॥
सन्देहं कथया जातं पृच्छामि तं निवर्तय ।
कामना नरकं प्रोक्तं कामिनां मुक्तिरेव न ॥२४॥
आवां गार्हस्थ्यधर्मस्थौ कामस्तत्र तु विद्यते ।
कथंकारं भवेन्मुक्तिस्त्याज्यस्तस्मान्मनोभवः ॥२५॥
भिक्षायनस्तु तच्छ्रुत्वोवाच पत्नीं निजां प्रियाम् ।
सत्यं भार्ये निरया वै लोकाः सर्वे तु मायिकाः ॥२६॥
हर्यर्पणमृते पत्नि हर्यर्पणे तु निर्गुणाः ।
कामः क्रोधश्च लोभश्च त्यक्तव्यो लोभ इत्यपि ॥२७॥
नारायणे परे तत्त्वे निर्गुणतां भजेद्धि सः ।
स्वात्मसुखार्थमेवाऽयं बन्धनो निरयप्रदः ॥२८॥
परात्मन्यर्पितो भार्ये परमात्मप्रसंगदः ।
हरेः प्रसंगतो भार्ये माया तत्र विनश्यति ॥२९॥
अमायिकाः क्रियाः सर्वा भवन्त्येव हि निर्गुणाः ।
यथा शाकादिकं सर्वं मिष्टान्नं सलिलं फलम् ॥३०॥
मायिकं भौतिकं चापि कृष्णार्पितं तु निर्गुणम् ।
तथा चक्षुः करो वक्षः पादौ कटिर्मनस्तथा ॥३१॥

हर्यर्पितं क्रियाद्यं च सर्वं भवति निर्गुणम् ।
आवाभ्यां श्रीहरेर्नित्यं पूजने सेवने प्रिये ॥३२॥
देहेन्द्रियस्वभावाद्या अर्प्यन्ते निर्गुणा हि ते ।
ततो नास्ति निरयो नः किन्तु धर्मः सनातनः ॥३३॥
तेन सेवादिधर्मेण पुण्यं हरेः प्रसंगतः ।
भिक्षुकोऽहं भिक्षुकी त्वं भिक्षा हरेः सदा हि नौ ॥३४॥
आवयोर्भिक्षुकः कृष्णो निर्गुणः परमेश्वरः ।
तद्योगेनाऽऽवयोश्चेष्टा कृष्णात्मिका तु निर्गुणा ॥३५॥
तस्मात् पत्नि सर्वकार्ये स्मर कृष्णं परेश्वरम् ।
न मां न त्वां किन्तु कृष्णं श्लेषे विश्लेषणेऽपि च ॥३६॥
एवं नैवाऽस्ति लोकेऽत्र देहे वा बन्धनं तव ।
ममापि बन्धनं नास्ति परार्थकर्मणोः प्रिये ॥३७॥
इत्येवं बोध्यमानाऽपि लक्ष्मि सा मुनिभिक्षुकी ।
साध्वी विश्वासमापन्ना मनागपि च वै ततः ॥३८॥
पुनः सञ्चिन्तयामास कामोऽयं कल्मषात्मकः ।
पापमेवाऽस्ति निरयप्रदो दुःखप्रदोऽपि च ॥३९॥
एवं चिन्तयते नित्यं भजते मां सती सदा ।
एकदाऽहं तयोः साक्षादभवं नेत्रगोचरः ॥४०॥
तस्याः शंकाविनाशार्थं चाऽस्पृशं स्वकरेण ताम् ।
सा मुमोह स्वरूपे मे सर्वश्रृंगारशोभिते ॥४१॥
समाश्लिषत्तूर्णमेव मां मुग्धा पतिसन्निधौ ।
मया तस्यै विना भोगं स्पर्शमात्रेण सर्वथा ॥४२॥
सर्वानन्दाः प्रदत्ता वै सुखिनी सा पराऽभवत् ।
दिव्याऽभवत्तत आरभ्यैव निष्कामभावना ॥४३॥
संकल्पः कामनाजन्यस्तस्या नष्टोऽन्तरात् सदा ।
निष्कामा सा मुक्तरूपा ब्रह्मव्रतोर्जिताऽभवत् ॥४४॥
भिक्षुकोऽपि तया स्पृष्टो निष्कामः सर्वथाऽभवत् ।
ब्रह्मशीलव्रतौ तौ तु तदारभ्याऽर्कभास्वरौ ॥४५॥
विलक्षणौ देवपूज्यौ लोकपूज्यौ बभूवतुः ।
एव नित्यं सेवया मे मया निष्कामिनौ कृतौ ॥४६॥
मम योगेन नार्योऽपि नराश्चापि ह्यकामिनः ।
भवन्त्येवेति ते सर्वे प्रयान्ति परमं पदम् ॥४७॥
कालेन निधनं प्राप्तौ दिव्यविमानसंस्थितौ ।
मुक्तरूपौ तु तौ भूत्वा ययतुर्धाम मेऽक्षरम् ॥४८॥
एवं लक्ष्मि चात्मनिवेदिनोः स्त्रीनरयोरिह ।
सर्वदोषान्नाशयामि गुणान् दिव्यान् करोमि च ॥४९॥
सर्वं कर्तुं समर्थस्य दयालोः परमात्मनः ।
भक्तार्थं त्वागमो लोके भक्तान् सन्तारयामि वै ॥५०॥

भिक्षा बहुविधा लक्ष्मि दातव्या पतये तु मे ।
सर्वा सा निर्गुणा तेन जायते मम योगतः ॥५१॥
समाकर्णय कमले विविधां कथयामि ते ।
यद्यदिष्टतमं स्वस्य सर्वं भिक्षात्मकं मतम् ॥५२॥
स्वप्ने जाग्रति सौषुप्ते तुर्ये मुक्तौ यदिष्टकम् ।
अनर्पितं न वै ग्राह्यं मह्यं दत्वा समालभेत् ॥५३॥
भोजनं रासनं सर्वं मिष्टं मिष्टं दिशेन्मयि ।
पानं स्वादु यदिष्टं च दद्यान्मह्यं ममाश्रयी ॥५४॥
वस्त्राणि यानि रम्याणि वेषाश्च भूषणादिकम् ।
स्वर्णरूप्यहीरकादि रत्नानि चार्पयेन्मयि ॥५५॥
अभ्यंगादि सुगन्धादि कज्जलादि दिशेन्मयि ।
मुकुटादि शयनादि गेन्दुकादि च मेऽर्पयेत् ॥५६॥
वितानादि चासनादि यानाद्यपि च मेऽर्पयेत् ।
मन्दिरादि वाहनादि विमानादि च मेऽर्पयेत् ॥५७॥
धूपदीपादि पुष्पादि चन्दनादीनि मेऽर्पयेत् ।
गजवाजिगवादीनि दासदासीश्च मेऽर्पयेत् ॥५८॥
रूपाणि सर्वरम्याणि शब्दान् श्राव्यांश्च मेऽर्पयेत् ।
स्पर्शान् सर्वविधांश्चापि ग्राह्यान् सर्वांश्च मेऽर्पयेत् ॥५९॥
गन्तव्यान् सुखभाजश्चाऽऽनन्दितव्यांश्च मेऽर्पयेत् ।
मिष्टान्नानि समग्राणि तुलसीमञ्जरीर्दिशेत् ॥६०॥
तैलसारान् कर्पूरादि दद्यान्मह्यं तु भिक्षवे ।
पुत्रं पुत्रीं पतिं पत्नीं सर्वस्वं मेऽर्पयेत् सदा ॥६१॥
मह्यं सर्वाण्यायुधानि सर्वयन्त्राणि मेऽर्पयेत् ।
यज्ञयागादिकार्याणि हवनादीनि मेऽर्पयेत् ॥६२॥
अर्पयेन्मेऽपि सस्यानि कणिशांश्च कणांस्तथा ।
मिष्टरसाढ्यौषधीश्च मध्वादीनि च मेऽर्पयेत् ॥६३॥
अष्टषष्टिकलाश्चापि नववस्तूनि मेऽर्पयेत् ।
प्रकाशं चाऽप्रकाशं च सर्वं मह्यं दिशेज्जनः ॥६४॥
आयश्चोत्पादनं सर्वं वृद्धिर्द्रव्यस्य वस्तुनः ।
हार्दिकं दैहिकं चाप्यैन्द्रियकं मे समर्पयेत् ॥६५॥
पत्रं पुष्पं फलं वारि मह्यं दत्वा सुयोजयेत् ।
विद्यां ज्ञानं विवेकं च कौशल्यं गुणशालिताम् ॥६६॥
न्यायं परोपकारं च सर्वं मह्यं समर्पयेत् ।
संकल्पा विफला ये च ये चान्ते फलदायिनः ॥६७॥
कृतयश्चापि यत्नाश्च तान्मे सर्वान् समर्पयेत् ।
ऐश्वर्याणि समस्तानि सर्वाण्यपि बलानि च ॥६८॥
अवस्थाश्चापि सर्वाश्च चमत्काराः समस्तकाः ।
सौन्दर्यगुणयोगाश्च तान्मे सर्वान् समर्पयेत् ॥६९॥

अहं परार्थो भवतां भिक्षुश्चानन्तसंख्यदः ।
गृहीत्वा प्रददाम्येव शाश्वतं भिक्षयाऽर्थितम् ॥७०॥
राज्यं स्वर्गं दिव्यलोकान् भोगाँश्च सम्पदो नवाः ।
सुखानि चोत्सवान्मोदान् हर्षान् प्रतिददाम्यहम् ॥७१॥
धनं धान्यं चाम्बराणि भवनान्युत्तमानि च ।
गोधनं दासदासीश्च पुत्रान् पुत्रीर्ददाम्यहम् ॥७२॥
धिष्ण्यं चापि च माहेन्द्रं वैष्णवं ब्राह्ममित्यपि ।
दिक्पालत्वं चैश्वरं वा वैराजं पदमुत्तमम् ॥७३॥
ऐशं वा लोकपालत्वं महर्षित्वं गुरोः पदम् ।
ध्रौव्यं वा सौरमेवाऽपि चान्द्रं राज्यं ददाम्यहम् ॥७४॥
वैकुण्ठं चामृतं चाव्याकृतं गोलोकमक्षरम् ।
श्रीपुरं ब्रह्मलोकं वा परंधाम ददाम्यहम् ॥७५॥
भिक्षयामि भवद्भ्योऽहं सर्वं मे रोचते सदा ।
दाने लभे भुनज्म्येतद् भुक्त्वा ददाम्यनन्तकम् ॥७६॥
पुण्यं पापं शुभं चाप्यशुभं संभिक्षयाम्यहम् ।
अनिष्टं जनतादत्तं लब्ध्वेष्टं प्रतिसन्ददे ॥७७॥
अलाभं प्राप्य लाभात्मं फलं प्रतिददाम्यहम् ।
स्वल्पं प्राप्य च बहुधा यथेष्टं प्रददाम्यहम् ॥७८॥
लक्ष्मीं ददामि विपुलां सम्पदश्चातिवर्त्तुलाः ।
शक्तीर्ददामि बहुधा जयं ददामि नित्यदा ॥७९॥
मदीयं यद्भवेत् सर्वं सर्वं तस्मै ददाम्यहम् ।
यो मह्यं प्राऽर्पयेत् सर्वं मम भूत्वा च वर्तते ॥८०॥
लक्ष्मीत्येवं समर्थोऽस्मि सर्वं दातुमनन्तकम् ।
भिक्षुकाश्चेन्मदर्थं वै भिक्षयन्त्यर्पयन्ति च ॥८१॥
ततश्च भुञ्जते तेभ्यः फलं ददाम्यनन्तकम् ।
बहवो नाम राजानो विप्राश्चर्षय इत्यमी ॥८२॥
तपसोऽन्ते तु भिक्षयामासुर्मामेव पुत्रकम् ।
पुत्रोऽभवं भिक्षुकाणां मुहुर्वै भिक्षितो मुधा ॥८३॥
गणेशोऽहं शंकरस्य हरिः कृष्णो वृषस्य च ।
अदितेर्वामनश्चापि कपिलः कर्दमस्य च ॥८४॥
वसुदेवस्य गोपालो नाभेः ऋषभ इत्यपि ।
कंभराया अनादिश्रीकृष्णनारायणोऽस्मि च ॥८५॥
दत्तोऽत्रेर्जमदग्नेश्च पर्शुरामस्तथाऽभवम् ।
रामः शतरथस्यापि कुमारो ब्रह्मणस्तथा ॥८६॥
एवमाद्यानि जन्मानि भिक्षारूपाणि तानि वै ।
भिक्षायां वर्तते सर्वं भिक्षायां चाहमित्यपि ॥८७॥
भिक्षुका मेऽतिवात्सल्यपात्राणि मम रूपिणः ।
भिक्षायां भृगुणा दत्ता भार्गवी त्वं परेश्वरी ॥८८॥
पद्माऽपि भिक्षया लब्धा नारायणी तथैव च ।
दुःखहाश्रीस्तथा लब्धा लक्ष्मीश्च माणिकी तथा ॥८९॥
प्रज्ञा पद्मावती लब्धा भिक्षायां कमला रमा ।
पठनाच्छ्रवणादस्य भोगवान् मोक्षवान् भवेत् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने भिक्षायनर्षेः अयाचिताञ्जलिनामभार्याया गार्हस्थ्येऽपि श्रीहर्यर्पणक्रियादिभिर्मुक्तिर्भिक्षामहिमा चेत्यादिनिरूपणनामा अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि भावुकाख्ये पुरे वैश्यो ह्यनाथकः ।
आबाल्यान्मृतजनको जननीपोषितो ह्यभूत् ॥ १ ॥
माता नित्याश्रयानाम्नी पुत्रं तु केशिनं सदा ।
पालयत्येकमेवेयं वंशवृद्धिप्रमूलकम् ॥ २ ॥
नित्यं सा विधवा कृष्णमन्दिरे विप्रसन्निधौ ।
कथां श्रोतुं प्रयात्येव यया दुःखं प्रणश्यति ॥ ३ ॥
कथाज्ञानेन सहसा धैर्यं प्रजायते शुभम् ।
तापा नश्यन्ति दुःखानि चिन्तालयो भवत्यति ॥ ४ ॥
सा संहितां प्रशुश्राव लक्ष्मीनारायणाभिधाम् ।
वर्षद्वयं प्रशुश्राव सर्वाख्यानानि भामिनी ॥ ५ ॥
कथास्ता विविधाः श्रुत्वा ब्रह्मरूपा व्यजायत ।
सती साध्वीधर्मयुक्ता वर्तते सा विदेहिनी ॥ ६ ॥
नित्याश्रयेति स्वनाम्नोऽर्थं विवेद ततो हि सा ।
नित्ये हरौ स्वामिदेवे त्वाश्रयो मम विद्यते ॥ ७ ॥
हरिः पतिः प्रभुः स्वामी पत्नी तस्य भवाम्यहम् ।
सेवनीयः सदाऽनादिकृष्णनारायणः प्रभुः ॥ ८ ॥
गोपालबालकः साक्षात् कम्भरानन्दनोऽव्ययः ।
कोट्यर्बुदाब्जलक्ष्मीनां पतिः श्रीपतिरीश्वरः ॥ ९ ॥
स एव निजभक्तानां सर्वकामप्रपूरकः ।
भुक्तिमुक्तिप्रदः स्वामी नारायणः प्रियः पतिः ॥१०॥
एवं ज्ञानं समापन्ना व्रतं तपसि संस्थिता ।
चक्रेऽनादिकृष्णनारायणमूर्तिप्रसेवनम् ॥११॥
तया वै ताम्रपत्रे मे कारिता प्रतिमा शुभा ।
तत्पूजा वै व्रतं नित्यं पालितं स्वार्पणात्मकम् ॥१२॥
शृणु लक्ष्मि यथासेवां कृतवती तु साऽभवत् ।
प्रातरुत्थाय पृथ्व्यां सा ओं श्रीकृष्णनरायण ॥१३॥
इतिनाम्नामष्टोत्तरशतं जपति मालया ।
ततो ध्यानं मम मूर्तेः करोति शयने स्थिता ॥१४॥

पादौ जंघे जानुनी च सक्थिनी जघनादिकम् ।
कटिं नाभिमुदरं च वक्षः पृष्ठं द्विपार्श्वकम् ॥१५॥
कण्ठं मुखं कपोलौ च गण्डौ भालं च चक्षुषी ।
कर्णौ शिखां ध्यायतीति ततः स्नानं करोति सा ॥१६॥
अनाथमाता भक्ता मेऽनादिकृष्णनरायण ।
नामजपं करोत्येव स्नाने वारिघटं तु सा ॥१७॥
सूर्याय पितृभ्यश्चापि ददाति मुनिवासिने ।
तुलसीपत्रपुष्पाणि स्तम्बेभ्यः स्वयमेव हि ॥१८॥
आचित्या चन्दनं घृष्ट्वा नीत्वा चायाति वै गृहम् ।
मूर्ति मे स्वासने न्यस्याऽऽवाहनं चासनादिकम् ॥१९॥
पाद्यमर्घ्यमाचमनीयकं जलं ददाति मे ।
जलेन चन्दनेनापि वारिणा कुसुमैस्तथा ॥२०॥
विना पञ्चामृतं पञ्चामृतनाम्नाऽर्चयत्यपि ।
वस्त्रं यज्ञोपवीतं चाऽमलकं भूषणार्थकम् ॥२१॥
तण्डुलान् सर्वशृंगारार्थं च कुंकुममुत्तमम् ।
अर्पयत्येव मे साध्वी धूपं चन्दनचूर्णजम् ॥२२॥
दीपं तैलेनाऽर्पयति नैवेद्यं चणकादिकम् ।
फलं वा तिलपात्रं वा गूडं वा प्रातरेव सा ॥२३॥
ददात्यपि यथालब्धं जलं तथाऽर्पयत्यपि ।
नीराजनं करोत्येव घण्टीनादप्रपूर्वकम् ॥२४॥
प्रदक्षिणां नमस्कारं स्तुतिं विसर्जनं शुभम् ।
पुष्पाञ्जलिप्रपूर्वं च करोत्येवं सदा प्रगे ॥२५॥
ततो वै गृहकार्यं सा करोति बाललालनम् ।
बालस्य रक्षणं स्तन्यदानं बालस्य भोजनम् ॥२६॥
भृत्यतालब्धसन्तुष्टा पोषणं सा करोति वै ।
अन्नवस्त्रादिसन्तुष्टा पतिं कृष्णं प्रसेवते ॥२७॥
ततो दासीस्वरूपा सा भृत्या भृत्यत्वकर्मणे ।
याति श्रेष्ठिगृहे पात्रमञ्जनादिविधित्सया ॥२८॥
भृत्याकार्यं विनिर्वर्त्य मध्याह्नेऽन्नफलादिकम् ।
प्राप्य ते श्रेष्ठिभार्यातस्तदादाय गृहं निजम् ॥२९॥
समायाति मद्भजनाऽनादिकृष्णनरायण ।
नित्यं श्रेष्ठिकुटुम्बं तच्छृणोति नामकीर्तनम् ॥३०॥
मद्भक्तं तदभूत् सर्वं श्रेष्ठी वृद्धोऽपि रूपशः ।
कालेन निधनं यातस्तदा नित्याश्रया गृहे ॥३१॥
अनादिश्रीकृष्णनारायणेति धुन्यमाचरत् ।
अहं तया समाकृष्टो ययौ वै श्रेष्ठिनोऽन्तिकम् ॥३२॥
साक्षादभवं तस्याऽग्रे तस्याश्चाग्रे स्त्रियास्तथा ।
दिव्यं मे मर्शनं दत्वा निन्ये धामाऽक्षरं हि तम् ॥३३॥
विमानेन सुदिव्येन कुटुम्बं तद् व्यलोकयम् ।
सर्वं मद्भक्तिमज्जातं तया ह्यनाथया रमे ॥३४॥
मध्याह्ने ह्येवमेवेयं नित्यं श्रेष्ठिगृहक्रियाम् ।
कृत्वाऽऽयाति गृहं नैजं भोजयित्वा निजं सुतम् ॥३५॥
दुग्धं संपाययित्वा च भुंक्ते कृष्णस्मृतिस्थिता ।
सायं निराजनं चापि करोति भजनं मम ॥३६॥
भोजनं सा ततो दत्वा मह्यं कृत्वा स्वयं ह्यपि ।
स्वपिति बालकं कृत्वा पार्श्वेऽपरे च मामपि ॥३७॥
एवं नित्यं भजते मां नित्याश्रया तु वैष्णवी ।
बालोऽपि मातृभक्तिं वै दृष्ट्वा भक्ततमोऽभवत् ॥३८॥
यथा माता तथा पुत्रः संस्कृतश्चात्मवेदनः ।
महाभागवतो बाल्ये रोमेऽर्हणादिखेलनैः ॥३९॥
कृत्रिमां मृत्तिकामूर्तिं संस्थाप्य बालुकासने ।
कर्दमादिचन्दनाद्यैः पुपूज प्रतिमां मम ॥४०॥
तृणपत्राणि भूस्थानि धृत्वाऽर्पयति भावतः ।
पुष्पाणीति प्रमत्वैव मातृवत् सलिलं तथा ॥४१॥
मृत्तिकाभग्नपात्रादौ समर्पयति सादरम् ।
भोजनं निम्बपक्वसत्फलं चान्यद् ददाति च ॥४२॥
प्रदक्षिणां दण्डवच्च करोति मालिकां तथा ।
क्षमां सम्प्रार्थयत्येव दयां प्रसन्नतां हरेः ॥४३॥
विसर्जयति सर्वं तत् ततो मित्रैः सहापि च ।
रमते तु गृहाग्रे वै भजन्नारायणं तु माम् ॥४४॥
एवं काले गते सोऽपि युवाऽभवत्प्रभक्तराट् ।
माताऽपि भजते मां च प्रसन्नोऽहं तयोस्तदा ॥४५॥
अभवं चागतस्तत्र विप्ररूपधरो हरिः ।
भिक्षां तत्राऽर्थयामास नित्याश्रया तु मां तदा ॥४६॥
ददौ वै रोटकं त्वेकं तक्रं ददौ प्रभुक्तये ।
अहं गृहांगणे तत्र निषद्य भुक्तवान् मनाक् ॥४७॥
अर्धं तु रोटकं तस्मै बालाय चार्पयं तथा ।
तक्रं प्रददौ स्वल्पं च दुग्धं तत्कृतवानहम् ॥४८॥
युवा पुत्रो विस्मितश्चोवाच स्वमातरं मुहुः ।
मातस्तक्रमिदं दुग्धं जातं विप्रप्रसादतः ॥४९॥
रोटकोऽयं मिष्टमिश्रो घृताक्तोऽपि व्यजायत ।
सोऽयमतश्चमत्कारी विद्यते ब्राह्मणोत्तमः ॥५०॥
माताऽऽश्चर्यं परं श्रुत्वा मुग्धा व्यलोकयत् प्रभुम् ।
दृष्ट्या दृष्टिं सम्प्रयोज्य तावच्चतुर्भुजोऽभवम् ॥५१॥
दिव्यो दिव्यावयवश्च दिव्यसर्वांगभूषणः ।
दिव्यचिह्नोऽभवं लक्ष्मीसहितः पुरुषोत्तमः ॥५२॥

तदा सा मां विलोक्यैव श्रीपतिं परमेश्वरम् ।
पपात पादयोर्मे च त्रायस्व व्याजहार च ॥५३॥
पुत्रः केशीसंज्ञकश्च ज्ञात्वा मां परमेश्वरम् ।
अनाथनाथं श्रीकृष्णं पपात पादयोर्मम ॥५४॥
तुष्टाव मां बालकश्च माता तुष्टाव विह्वला ।
कृष्ण कृष्णकृपासिन्धो ह्यनाथनाथ माधव ॥५५॥
तव स्वो भवसंसारात् तारय श्रीहरे पते ।
अनादिश्रीकृष्णनारायणश्रीकृष्णमत्प्रभो ॥५६॥
भवता विप्ररूपेण तारितौ मातृपुत्रकौ ।
अनाथानां भवान् नाथश्चेति सत्यं वचस्तव ॥५७॥
मया कथा हि बहुधा श्रुता ते परमेश्वर ।
विरागं परमं प्राप्य सेवितोऽसि जनार्दन ॥५८॥
ज्ञानं प्राप्य पतिं ज्ञात्वा त्वां भजामि च नित्यदा ।
बालोऽयं भवतो नाथ त्वं निभालय पुत्रकम् ॥५९॥
मां धामाऽक्षरसंज्ञं ते नय श्रीपुरुषोत्तम ।
स्वामिन् कान्त सुहृद् बन्धो रक्षक श्रीहरेऽव माम् ॥६०॥
इत्येवमुक्त्वा सा लक्ष्मि पुष्पाञ्जलिं ददौ मयि ।
पादौ जग्राह मे चापि रुरोद प्रेमविह्वला ॥६१॥
प्लावितौ मम पादौ तु तदश्रुभिस्तया रमे ।
पुत्रोऽपि चात्मनिर्वेदी प्रेमाश्रूणि मुमोच ह ॥६२॥
मुक्तिं देहि कृपासिन्धो परमेश श्रियः पते ।
इत्युवाच करौ धृत्वा वक्षो वक्षो नियुज्य च ॥६३॥
आश्लिष्टवान् यथा पुत्रः पितरं तत्तथा स माम् ।
मयाऽश्रूणि प्रमुक्तानि पुत्रं भक्ततमं प्रति ॥६४॥
स तैराप्लुत एवाऽभूद् दिव्यदृष्टिस्ततोऽभवत् ।
निभालिता च तन्माता कृपादृष्ट्या मया रमे ॥६५॥
साऽपि दिव्या दिव्यदृष्टिस्तदा तूर्णं व्यवर्तत ।
त्रिकालज्ञौ कृपया मे निर्बन्धौ सिद्धिसंश्रितौ ॥६६॥
लक्ष्मीवन्मुक्तवत् तौ तु जातौ दिव्यविहारिणौ ।
दिव्योपकरणैस्तत्र संकल्पितैः समाहृतैः ॥६७॥
पूजयामासतुर्मां च मुमुचतुर्न मां हि तौ ।
अत्र वासं कुरु कृष्णेत्याहतुस्तौ मुहुर्मुहुः ॥६८॥
यद्वा नय नौ सहैवेत्येवं जगदतुस्तदा ।
अहं रूपं सुसंकुच्य विप्ररूपः पुनस्तदा ॥६९॥
अभवं तौ सिषेवाते व्यजनेन करैस्तथा ।
अहं विचार्य मुक्तिं वै तयोर्दिव्यस्वरूपिणोः ॥७०॥
सहैव नीत्वा सूर्वाणि विमानं चाऽध्यरोहयम् ।
पुत्रं तु केशिनं प्रभुं निरवश्रयां मनाथिनीम् ॥७१॥
प्रापयामास तूर्णं मे धामाऽक्षरं परं पदम् ।
एवं लक्ष्मि ह्यनाथानां नाथोऽहं भवतारकः ॥७२॥
वल्लभोऽस्मि प्रभक्तानां मोक्षदः सुदयावशः ।
पठनाच्छ्रवणाच्चाऽस्य मुक्तिर्भुक्तिर्भवेच्छुभा ॥७३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने अनाथाया निरवश्रयायास्तत्पुत्रस्य केशिनश्च भागवतीं भक्तिं दृष्ट्वा भगवता दत्तं दर्शनं मोक्षणं चेत्यादिनिरूपणनामा नवमसप्तत्यधिकशततमोऽध्यायः ॥ १७९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि कथां चान्यां मम भक्तस्य शोभनाम् ।
मायाख्ये नगरे ह्यासीद् भक्तो मे व्याघ्रसंज्ञकः ॥ १ ॥
आबाल्याद् दैवभावश्च साधुषु स्नेहवान् शुचिः ।
यतयो ये समायान्ति वैष्णवा ब्रह्मचारिणोऽपि च ॥ २ ॥
दर्शनार्थं प्रयात्येव साधूनां शीघ्रमेव सः ।
पादसंवाहनं वारिसमानयनमित्यपि ॥ ३ ॥
करोति पात्रशुद्ध्यादि मार्जनं च सदाश्रमे ।
प्रसादं च समश्नाति सेवते च सतः सदा ॥ ४ ॥
एवं भक्तियुतो भक्तो महाशीर्वादमाप ह ।
चिरं जीव चिरं तिष्ठ सुखी भव समृद्धिमान् ॥ ५ ॥
अथाऽयं साधुसेवायां वर्तमानोऽपि चैकदा ।
बालभावेन लोभेन पतितां स्वर्णशृंखलाम् ॥ ६ ॥
जग्राह चौर्यरूपेण वासुदेवविभूषणम् ।
साधवस्तु गताश्चान्यग्रामं व्याघ्रस्तु शृंखलाम् ॥ ७ ॥
मार्जनादौ लब्धवाँश्चाऽप्रकाशेऽरक्षयद्धि ताम् ।
आनीय स्वगृहे स्वर्णशृंखलां निदधे पुटे ॥ ८ ॥
नैव जानाति कश्चिद्वै तथाऽयं समरक्षयत् ।
माता वै स्वस्य पेटायां नैव जानाति शृंखलाम् ॥ ९ ॥
पितापि चारणो नाम्ना कूटदेवो न शृंखलाम् ।
जानाति तद्विधां स्वर्णशृंखलां काष्ठपेटके ॥१०॥
धृतां स्वयं विजानाति चाऽप्रकाशे प्रपश्यति ।
पुनश्च तत्र पेटायां गुप्तां तां निदधाति च ॥११॥
अथ साधुः श्यामनामा विष्णुमूर्तेः प्रपूजकः ।
ग्रामान्तरे तु पूजायां यावदिच्छति शृंखलाम् ॥१२॥
अदृष्ट्वा पूजने कालेऽतर्कयत् पतिता भवेत् ।
पृच्छां चाऽकारयद् भक्तैर्मायापुरे मुहुः ॥१३॥

व्याघ्रं भक्ताः समपृच्छन् व्याघ्रो दृष्टा न चेति वै ।
प्रत्युत्तरं ददौ तेभ्यो लोभेन च भयेन च ॥१४॥
एवमसत्यभावस्य व्याघ्रस्य चौर्यपापतः ।
स्वर्णचौरस्य करयोर्द्वयोश्चाऽङ्गुलिकासु तु ॥१५॥
गलकुष्ठान्यभवँश्चाऽङ्गुष्ठयोरपि सर्वथा ।
शरीरे श्वेतकुष्ठाश्चाऽभवन् चौर्याघजं फलम् ॥१६॥
भजते भगवन्तं मां तथौषधं करोत्यपि ।
कुष्ठा नैव विलीयन्ते दुःखी चातीव सोऽभवत् ॥१७॥
साधुसेवाफलभाक् च स्वर्णचौर्याघभागपि ।
शुश्राव स कथां लक्ष्मीसंहितायाश्च तत्र ह ॥१८॥
श्रुतवान् स्वर्णचौर्यस्य फलं कुष्ठो भवेदिति ।
प्रायश्चित्तं तस्य चापि श्रुतवान् स्वर्णदानकम् ॥१९॥
ब्रह्मकृच्छ्रव्रतं चापि ब्रह्मकूर्चव्रतं तथा ।
सप्ताहिकं प्रकुर्याच्चेत् स्वर्णस्तेयी प्रमुच्यते ॥२०॥
अथाऽयं चाऽप्रकाशे वै छद्मनोदरपीडनम् ।
बहिः प्रकाशयित्वैव ब्रह्मकूर्चव्रतं ह्यधात् ॥२१॥
पपौ वारि दिने त्वाद्ये खदिरपत्रपाचितम् ।
द्वितीये तु पपौ वारि किंशुकपुष्पपाचितम् ॥२२॥
तृतीये तु पपौ वारि बिल्वपत्रप्रपाचितम् ।
चतुर्थे तु पपौ वारि पद्मफलप्रपाचितम् ॥२३॥
पञ्चमे तु पपौ वारि ह्युदुम्बरप्रपाचितम् ।
षष्ठे पपौ दर्भपत्रपाचितं च ततः परम् ॥२४॥
उपोषणं सप्तमे तु चकार मां भजन् मुहुः ।
आराधनां चकाराऽपि मूर्त्यग्रे मम चाघहाम् ॥२५॥
हरे स्वर्णं मया चाऽऽत्तं मार्जनं तत्र कुर्वता ।
तत्पापं कुष्ठरूपं वै लग्नं मे तत्क्षमापय ॥२६॥
स्वर्णमालां प्रदास्यामि तस्मै तु साधवे पुनः ।
ब्रह्मकूर्चव्रतेनापि प्रायश्चित्तं कृतं मया ॥२७॥
रोगोऽयं मे नाशमेतु भक्तार्थे त्वं कृपां कुरु ।
त्राहि पाहि जगन्नाथ श्रीहरे पुरुषोत्तम ॥२८॥
पाप्युद्धारप्रकर्तस्त्वं भक्तं मां परिरक्षय ।
एवं मां चाऽर्थयामासाऽत्यर्थमश्रूणि वाहयन् ॥२९॥
चिन्तयामास मरणं यदा कुष्ठो न नश्यति ।
सुष्वापैवं चिन्तयानः स्वप्नेऽहं तस्य सन्निधौ ॥३०॥
दर्शयामास रूपं मे शंखचक्रगदाधरम् ।
हसन्नहं जगादैनं भक्त शोचसि किं वद ॥३१॥
स आह मां कृपासिन्धो लोभात् स्वर्णस्य शृंखला ।
साधोर्विष्णोर्मया चाप्ता पतिता भूतले तु सा ॥३२॥
रक्षिता मे गृहे चास्ते फलं भुनज्मि कुष्ठकम् ।
श्रुत्वा कथां स्वर्णचौर्यप्रायश्चित्तं मया कृतम् ॥३३॥
ब्रह्मकूर्चव्रतं कृष्ण पापं नाशय मे प्रभो ।
इत्येवं प्रार्थयामास ततोऽहं तस्य सन्निधौ ॥३४॥
स्वप्नं विलुप्य सहसा जागरे तं समानयम् ।
सोऽपि तत्रोत्थितस्तूर्णं मां विलोक्य परेश्वरम् ॥३५॥
प्रेमगद्गदपूर्णोऽभूत् द्राव दण्डवत्तथा ।
ननर्त प्रेमपूर्णश्च ययाचे च क्षमां तथा ॥३६॥
ततोऽहं तस्य दोषस्य नुत्तये तं जगाद ह ।
स्वर्णस्य शृंखलां मह्यं देहि तेऽघं गतं खलु ॥३७॥
अथ व्याघ्रो ददौ मह्यं समुत्थाय तु शृंखलाम् ।
मया धृता स्वकण्ठे सा तावत् सा शृंखला तदा ॥३८॥
ते साधवो यत्र गता अभवँस्तत्र तत्स्थले ।
मूर्तिकण्ठे गता चासीत् साधुस्तु दृष्टवाँश्च ताम् ॥३९॥
जहर्ष तां स्वर्णमालां विलोक्य च मुहुर्मुहुः ।
कथयामास सर्वेभ्यश्चमत्कारं हरेः परम् ॥४०॥
भक्तार्थे भगवानेव योगं क्षेमं करोति हि ।
सम्पदि विपदि चापि चिन्तयत्येव भक्तकम् ॥४१॥
यो यस्य वै भवेद् भक्तस्तदर्थे भगवान् स्वयम् ।
भगवत्त्वं ददात्येव नैजैश्वर्यं समस्तकम् ॥४२॥
एवं लक्ष्मि परेशस्य कृपया व्याघ्रभक्तराट् ।
द्रागेव कुष्ठताहीनो तातः पापविवर्जितः ॥४३॥
सुभगो रूपवाँश्चापि यथापूर्वं व्यजायत ।
तस्मादहं स्वयं नारायणो रक्षामि चाश्रितम् ॥४४॥
पापिनं वा कल्मषाढ्यं मायादोषाभिसंप्लुतम् ।
वासनाशतकोट्याढ्यं धर्मकर्मादिवर्जितम् ॥४५॥
अपि मां शरणं प्राप्तं मदर्थंत्यक्तजीवितम् ।
मदर्थसर्वव्यापारं मदर्थध्यानपूजनम् ॥४६॥
मयि सर्वस्वार्पणं च रक्षामि सर्वथा जनम् ।
शृणु चान्यां कथां दिव्यां पापतापप्रणाशिनीम् ॥४७॥
धनग्रामेऽभवद् विप्रो ग्रामयाजक उत्तमः ।
उत्तमाख्यः सकुटुम्बः कर्मकाण्डप्रधानकः ॥४८॥
सर्ववर्णजनानां वै कर्मकाण्डप्रसाधकः ।
नृपस्यापि गुरुः सोऽपि नृपकार्यं करोति च ॥४९॥
नृपान्नं वै गुरु प्रोक्तं चौराणामन्नमित्यपि ।
अदातॄणां जनानां च पतितानां तथा गुरु ॥५०॥
भुक्तं न जीर्यति लक्ष्मि पीतं चापि न जीर्यति ।
वस्त्रपात्रादिकं दाने गृहीतं नापि जीर्यति ॥५१॥

शय्यागोस्वर्णदानादिः परिग्रहो न जीर्यति ।
ग्रामयाजकएवाऽसावुत्तमो नाम भूसुरः ॥५२॥
लोभेन सर्ववर्णानामग्राह्यद्धनादिकम् ।
भुंक्ते पिबति चाश्नाति रमते मोदते गृहे ॥५३॥
सम्पत्तिश्चास्य वै श्रेष्ठाऽभवन्नृपाधिका गृहे ।
रत्नहाराः स्वर्णमालाः स्वर्णपर्यंककासनम् ॥५४॥
भवनानि विचित्राणि दासा दास्यो ह्यनेकशः ।
गोमहिष्यादिकाश्चापि गजवाजिरथादयः ॥५५॥
सर्वमस्याऽभवद् ऋद्धं पुत्राः पुत्र्योऽपि सौख्यदाः ।
भार्याऽपि भक्तिसम्पन्ना धर्मयुता पतिव्रता ॥५६॥
अथाऽस्य दानभारेण पापिनां द्रव्यसञ्चयैः ।
पापिनामन्नपानाद्यैर्जलोदरं दरोऽभवत् ॥५७॥
उदरं पीड्यते तेन महोदरं हि लम्बते ।
पच्यते नहि भुक्तं वा पीतं जीर्यति नैव च ॥५८॥
सुखं नाऽस्य क्षणं चापि जायते ऋद्धिभिस्तदा ।
वैद्याश्रमान् ययौ रोगशान्त्यर्थं च तथाप्यपि ॥५९॥
औषधानां प्रयोगेषु बहुष्वपि जलोदरम् ।
नष्टं नैव हि प्रत्युत व्यवर्धत दिने दिने ॥६०॥
अथैकदा ययौ देवायनर्षिं प्रति भूसुरः ।
न्यवेदयन्निजं रोगं साधवे प्रप्रणम्य सः ॥६१॥
साधुर्ददौ हरेर्नाम मालां च तुलसीजनिम् ।
ओंहरे श्रीकृष्णनारायण मां निरुजं कुरु ॥६२॥
इति जापं भूसुरायोपादिदेश सहस्रकम् ।
नित्यमेवेति सोऽप्येवं जजाप प्रत्यहं मुदा ॥६३॥
भजते मां सदा सोऽयं रोगनाशार्थमेव ह ।
आर्तो भजते मां नित्यं वैभवी भजते न वै ॥६४॥
वैभव्यार्तो भजते मां स्वार्थार्थं सोऽभजद् यथा ।
एवं वर्षोत्तरे काले भक्तिं प्रकुर्वतः पुरः ॥६५॥
दययाऽहं दर्शनं स्वं ददौ रोगप्रशान्तये ।
साधूनां मण्डलं कृत्वा ययौ तस्य गृहं प्रति ॥६६॥
सोऽपि रोगप्रशान्त्यर्थं भोजनादि ददौ मुदा ।
स्वर्णरूप्याम्बराद्यं च साधुभ्यो विविधं ददौ ॥६७॥
प्रार्थयामास चात्यर्थं रोगशान्त्यर्थमित्यपि ।
अहं साधुगुरुर्भूत्वा हस्तं तस्योदरेऽदधम् ॥६८॥
चमत्कारो यथा स्याद्धि तथाऽस्योदरतस्तदा ।
जलोदरो महान् रोगो मूर्तिमान् समपासरत् ॥६९॥
कद्रूपः सभयश्चापि दुद्राव च दधाव च ।
गतो रोगो भूसुरश्च स्वस्थोऽभवत् क्षणान्तरे ॥७०॥
जलं शुष्कं तदा जातं जाठरश्चाऽभवच्छुभः ।
वयं सर्वे साधवस्तु शीघ्रमदृश्यतां गताः ॥७१॥
सोऽपि विज्ञाय मां नारायणं ततोऽभजन् मुहुः ।
एवं लक्ष्मि मया भक्तो निरामयस्तदा कृतः ॥७२॥
सोऽपि चान्ते ययौ धामाऽक्षरं मे परमात्मनः ।
पठनाच्छ्रवणाच्चाऽस्याऽऽरोग्यं भुक्तिश्च मोक्षणम् ॥७३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कुष्ठिनो व्याघ्राख्यस्य स्वर्णचौरस्य चारणभक्तस्य कुष्ठिता-नाशनम् उत्तमाख्यस्य ग्रामयाजकविप्रस्य भक्तस्य जलोदरनाशनं भगवद्दर्शनं मुक्तिश्चेत्यादिनिरूपण-नामा अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं विरालस्य कथां शुभाम् ।
विरालनामको भक्तो माञ्जुष्ठग्रामवासकृत् ॥ १ ॥
अभूत् कुटुम्बसहितो धनाढ्यो वैश्य एव सः ।
अन्नानां चाम्बराणां च पात्राणां विक्रयादिकृत् ॥ २ ॥
लक्षाऽधिद्रव्यवान् धर्मी साधुसेवापरायणः ।
येन निर्मापिता रम्या धर्मशालाऽतिशोभना ॥ ३ ॥
यत्राऽतिथयश्चागत्य विश्रान्तिं यान्ति साधवः ।
प्रवासिनो यतयश्च साध्व्यो यात्रालवस्तथा ॥ ४ ॥
येनाऽन्नसत्रं श्रेष्ठं च तत्र निर्मापितं शुभम् ।
यत्र मिष्टं रसयुक्तमन्नं दुग्धं तथौदनम् ॥ ५ ॥
पूरिकाः सूपशाकादि लभन्ते भिक्षवः सदा ।
भुञ्जते शतशो नित्यं ददात्याशीर्वचांसि च ॥ ६ ॥
नित्यं विरालवैश्योऽपि स्वहस्तेन तु दक्षिणाम् ।
दानं ददाति बालेभ्योऽनाथेभ्यः स्त्रीभ्य इत्यपि ॥ ७ ॥
कृष्णनारायण विष्णो कीर्तनं कारयत्यपि ।
पूजनं मे करोत्येवं कारयत्यपि प्रत्यहम् ॥ ८ ॥
पुत्रास्तस्याऽभवन् पञ्च पुत्र्यः सप्त स्त्रियावुभे ।
सर्वे ते मां पूजयन्ति श्रीपतिं पुरुषोत्तमम् ॥ ९ ॥
सायं मिलित्वा मेऽग्रे ते कीर्तनं विदधत्यपि ।
कथां कुर्वन्ति च रम्यां शृण्वन्ति च परस्परम् ॥१०॥
एवं वै पुण्ययुक्तस्य विरालस्य सुसम्पदः ।
अनतिप्राप्तवृद्धत्वे राजयक्ष्मा दरोऽभवत् ॥११॥
नित्यं विवर्धमानेन रोगेण शुष्कतां गतः ।
औषधानि बहून्येव कृतानि मानतास्तथा ॥१२॥

कृता बह्वयः साधवश्च तदर्थं सेविता ह्यति ।
रोगो नाशं न च याति श्रेष्ठी चिन्तापरोऽभवत् ॥१३॥
कुटुम्बं चिन्तया ग्रस्तं पिता पूज्यो मरिष्यति ।
किं कर्तव्यं क्व गन्तव्यं रक्षार्थं तु पितुः खलु ॥१४॥
एवं विचिन्तयतां तु कुंकुमवापिका शुभा ।
तीर्थं रोगहरं चाऽस्ते साक्षाद् यत्र श्रियः पतिः ॥१५॥
इत्येवं मानसं जातं ततस्ते जनकेन वै ।
सहिताः प्रययुस्तीर्थमश्वपट्टसरोवरम् ॥१६॥
कीर्तयन्तो मम नाम स्मरन्तो मां प्रभुं तथा ।
अनादिश्रीकृष्णनारायणं रोगहरं हरिम् ॥१७॥
अश्वपट्टसरस्तीरं समागत्य च ते ततः ।
निषेदुर्वटवृक्षाधो मां स्मरन्तो जलं पपुः ॥१८॥
अक्षय्यघाटमासाद्य सस्नुः सर्वे प्रभाविणः ।
दानानि स्वर्णरूप्याणि चाऽम्बराणि ददुस्तदा ॥१९॥
पात्राण्यन्नानि मिष्टानि कम्बलानि ददुस्तथा ।
अनादिश्रीकृष्णनारायणो नः प्रीयतामिति ॥२०॥
अथाऽहं भक्तिमालोक्य विप्ररूपधरो हरिः ।
अश्वपट्टसरस्तीरं जगाम तस्य सन्निधौ ॥२१॥
क्षयी विरालनामा स मत्वा तीर्थमूर्तिं तदा ।
सस्मार मां स्वहृदये नारायणः प्ररक्षतु ॥२२॥
मया गत्वा सन्निधौ वै पृष्टो विरालकस्तदा ।
कुतः कस्मात् कथं चात्र समायातोऽसि भो धनिन् ॥२३॥
कथं रोगः कियत्कालाद् वर्तते तव तीर्थकृत् ।
विरालकोऽतिकष्टेन मृत्युं स्मृत्वा रुरोद ह ॥२४॥
शुशोच बहुधा तत्र पप्रच्छ मां तु भूसुरम् ।
नमस्ते विप्र वृद्धोऽसि यदि जानासि दैवतम् ॥२५॥
वद मे बहुपुण्यस्य कथं रोगो व्यजायत ।
नाऽत्र जन्मनि भूदेव पातकं वै कृतं मया ॥२६॥
पुण्यदानानि बहुधा कृतानि विविधानि वै ।
आबाल्यात् साधुसेव्यस्मि श्रीहरेः पूजकोऽस्मि च ॥२७॥
कुटुम्बं मे भक्तियुतं परमेशे सदाऽस्ति वै ।
व्रतानि भक्तियुक्तानि करोमि सकुटुम्बकः ॥२८॥
तथापि क्षयरोगो मे कथं प्राप्तः प्रदर्शय ।
श्रुत्वाऽऽहं विप्ररूपस्तु विरालस्य समस्तकम् ॥२९॥
वृत्तान्तं पूर्वजन्मीयं समुवाच हि पद्मजे ।
शृणु श्रेष्ठिन् सुपुण्योऽसि सर्वथा चात्र जन्मनि ॥३०॥
पुरा कृतं तु यत्कर्म केनापि न वियुज्यते ।
पूर्वजन्मनि विप्रस्त्वं नाम्ना गंगेश्वरोऽभवः ॥३१॥
साभ्रमतीतटे पुण्ये विष्णोस्तु मन्दिरेऽभवः ।
पूजकस्तत्र वै पार्श्वे सस्यक्षेत्राणि वाटिकाः ॥३२॥
आसन् वैश्यस्य रम्याश्च वैश्यस्तु मृतिमाप्तवान् ।
तत्पत्नी मन्दिरे दासी भूत्वा सेवां ततोऽकरोत् ॥३३॥
गाश्च वृषाश्च सा तत्र मन्दिरे प्रददौ सती ।
क्षेत्राणि वाटिकाश्चापि मन्दिरे प्रददौ तथा ॥३४॥
अशक्ता सा कृषिं कर्तुं भूत्वा भृत्या तु मन्दिरे ।
अवसद्देवशरणे त्वदाधारा निराश्रया ॥३५॥
गोवृषाणां तृणाद्यैः सा सेवनं दोहनादिकम् ।
करोत्येव तथा वार्याहरणं मार्जनादिकम् ॥३६॥
गंगेश्वरस्य ते सेवां करोत्याज्ञानुवर्तिनी ।
धान्यशाकफलादीनि जायन्ते यानि भूमिषु ॥३७॥
तान्याहृत्य च प्रथमं ददाति भूसुराय ते ।
त्वं प्रपाच्य सुमिष्टान्नं नैवेद्यं विष्णवे सदा ॥३८॥
दत्त्वा तस्यै प्रसादं च ततो जग्रहिथाऽदनम् ।
पुष्पहारादिकं भृत्या कृत्वाऽर्पयति विष्णवे ॥३९॥
एवं सा सेवते नित्यं त्वां तथा विष्णुमीश्वरम् ।
निरछद्मा भक्तियुक्ता च सर्वार्पणा वृषान्विता ॥४०॥
अथ त्वं रसनालुब्धो मिष्टान्नं प्रकरोषि यत् ।
निवेद्य विष्णवे श्रेष्ठं प्रच्छन्नं मन्दिरान्तरे ॥४१॥
भुक्त्वा तृप्तिं समासाद्य ततो ददासि योषिते ।
भृत्यायै तदपि रूक्षमन्नं गोधूमपोलिकाः ॥४२॥
एवं त्वं कृतवान्नित्यं पक्षपातं तु दातरि ।
दात्रे देयं तु प्रथमं तत् त्वया न कृतं तदा ॥४३॥
पंक्तिभेदः कृतस्तत्र तत्पापं ते पुराऽभवत् ।
एकदा वृष्टिबाहुल्ये साभ्रमत्या महाजलम् ॥४४॥
क्षेत्रं च वटिकां चापि मन्दिरं व्याप्य चागतम् ।
उद्वेलं तु महावेगं व्यवर्धत द्रुतं हि तत् ॥४५॥
गावश्च वृषभा भृत्या मन्दिरस्योच्छ्रये स्थले ।
जगत्यां सुस्थले सर्वेऽध्यरोहन् सुभयार्दिताः ॥४६॥
भृत्या सा कर्षुकी भीता त्वां ववल्गे जलागते ।
आश्लिष्टा त्वां जीवनार्थं प्राणरक्षणलालसा ॥४७॥
त्वं तथा सा कर्षुकी वै रत्नमाला च धेनवः ।
वृषाश्चेति जीवनार्थं सस्मरुर्मां तु मूर्तिगाम् ॥४८॥
व्यचिन्तयं तदा चाऽहं रक्षार्थं भक्तयोगिनाम् ।
किन्तु श्रेष्ठिन् चान्तकाले समागतेऽपि देहिनः ॥४९॥
मनो मलिनं प्रबलं दुर्निग्राह्यं सवासनम् ।
नार्या देहस्य संस्पर्शे विकृतिं विन्दति द्रुतम् ॥५०॥

ततो मनस्तदा तत्र विकृतिं प्रजगाम ह।
वारिपूरे समाश्लेषे कामनाधर्षितो भवान् ॥५१॥
मया ज्ञात्वा परित्यक्तो भृत्याऽपि वर्जिता तदा।
रक्षार्थमागतेनापि रक्षा ते तत्र न कृता ॥५२॥
धर्मनाशं विलोक्याऽहं रक्षां न कृतवान् द्विज।
पूरवेगेन कर्षुक्या सह त्वं वाहितोऽभवः ॥५३॥
गावश्च वृषभाश्चापि पूरे तत्र प्रवाहिताः।
मृताः सर्वे पुण्ययुक्ता मनाक्पापसमन्विताः ॥५४॥
गंगेश्वरो भवान् विप्रः पंक्तिभेदकरस्तदा।
इदानीं त्वं हरेः सेवापुण्यवान् धनवान् किल ॥५५॥
क्षेत्रदेयं कर्षुकी च भृत्या ते गृहिणी किल।
द्वितीया तव पत्नीयं ब्राह्मणी या तव मृतेः ॥५६॥
अनन्तरं मृता शोकात् सेयं श्रेष्ठिन् विराजते।
पञ्च पुत्रा वृषास्ते वै ये मृताः पूरवारिषु ॥५७॥
सप्त पुत्र्य इमाः श्रेष्ठिन् गावो मृताश्च वारिषु।
मम पूजाफलेनैषा सम्पत् समृद्धिर्हि वर्तते ॥५८॥
रोगोऽयं पंक्तिभेदेन स्वार्थमिष्टान्नभोजिनः।
तवाऽद्य वर्तते श्रेष्ठिन् निरुच्छेद्योऽयं तु मोदते ॥५९॥
कर्षुकी क्षेत्रवास्त्वादिदानपुण्यं समश्नुते।
ब्राह्मणी धर्मपुण्यं तु पातिव्रत्यं समश्नुते ॥६०॥
देवधनं पशवश्च मानुष्यं भुञ्जते सुखम्।
पूजकस्त्वं धनधान्यरत्नस्त्रीवंशसंयुतः ॥६१॥
पंक्तिभेदस्य पापस्य क्षयरोगं फलं गतः।
अहं ते च कुटुम्बस्य भक्तियोगेन वै पुनः ॥६२॥
तीर्थागतस्य मोक्षार्थं समायातोऽस्मि माधवः।
वद विरालक त्वं मे मोक्षं वा तु नीरुग्णताम् ॥६३॥
किमिच्छसीति दास्येऽत्र विप्ररूपधरो हरिः।
पापं प्रच्छन्नभोज्यस्य क्षयं नेष्यामि सर्वथा ॥६४॥
निरामयो भव श्रेष्ठिन् मोक्षगो वा भवाऽत्र वै।
श्रुत्वैवं सहसा हृष्टः प्रणम्य पुरुषोत्तमम् ॥६५॥
मां पप्रच्छ स लोकेऽत्राऽऽयुष्यं मे वर्तते न वा।
सोऽहमाह न ते चायुर्विद्यतेऽतः परं मनाक् ॥६६॥
किन्तु भक्तोऽसि मद्वासे चागतोऽस्यपि तैर्थिकः।
रोगनाशेच्छया तस्मात् कृपया ते ददामि तत् ॥६७॥
आयुर्वा मोक्षणं वापि ह्यभयं चापि वाञ्छसि।
जन्ममृत्युजराव्याधीन् हरामि शरणार्थिनः ॥६८॥
इत्युक्तः श्रेष्ठिवर्योऽसौ विप्ररूपाय मे तदा।
दत्त्वाऽऽसनं तथाऽर्घ्यं च पाद्यं जलं फलानि च ॥६९॥
कस्तूरीं कुंकुमं चापि कर्पूरं केसरांस्तथा।
चन्दनं गन्धसारांश्च रत्नहारांस्तथोत्तमान् ॥७०॥
पुष्पहारान् कम्बलानि मुकुटं कटके तथा।
कुण्डले चोर्मिकाश्चापि शृंखलाः स्वर्णनिर्मिताः ॥७१॥
सुगन्धसारान् छत्रं च चामरे स्वर्णपादुके।
उपदा विविधाश्चापि पुत्रान् पुत्रीः स्त्रियावुभे ॥७२॥
सर्वं श्रेष्ठी तदा लक्ष्मि चार्पयामास मे धनम्।
पूजयामास विधिना तवाऽस्मीति जगाद ह ॥७३॥
त्राहि पाहि दयासिन्धो यथेष्टं कुरु तेऽस्मि वै।
इत्येवमुक्तवान् विरालकस्तदाऽहमच्युतः ॥७४॥
प्राह तं सर्वथा श्रेष्ठिन् नीरोगी भव सत्वरम्।
वर्षमात्रं भूतले त्वं तिष्ठ ततश्च मोक्षणम् ॥७५॥
यास्यस्येव न सन्देहस्तीर्थे कृत्वा गृहं व्रज।
'अनादिश्रीकृष्णनारायणः स्वामी पतिर्मम' ॥७६॥
मन्त्रमेनं जप नित्यं कृष्णं भजस्व वल्लभम्।
स्मर मां नित्यदा श्रेष्ठिन् पञ्चतीर्थीं विधेहि च ॥७७॥
नित्यं सतां च साधूनां साध्वीनां सेवनं कुरु।
देवयज्ञं पितृयज्ञं भूतयज्ञं तथा कुरु ॥७८॥
दानं च हवनं चापि नैवेद्यं मेऽर्हणं कुरु।
असारे चात्र संसारे सारं सेवा हरेः सदा ॥७९॥
सतां सेवा परं सारं सतां संगो हि भेषजम्।
मम सेवा मोक्षदा वै वासनाक्षयिणी सताम् ॥८०॥
सतां सेवाबलेनाऽत्र वासना लयमेति ह।
अनन्तजन्मपापानां नाशोपायः सदर्हणम् ॥८१॥
प्रारब्धानां दरिद्राणां नाशकृच्च सदर्हणम्।
विघ्नानां रोगजालानां नाशकृच्च सदर्हणम् ॥८२॥
सन्तश्चिन्तामणितुल्याः प्रयच्छन्ति सुचिन्तितम्।
सन्तः कल्पप्रतरवो ददत्यर्थितमुत्तमम् ॥८३॥
सन्तो वै कल्पवल्ल्यश्चाऽमृतं फलं ददत्यपि।
साधवः कामगावस्ते दुहन्ति शाश्वतं सुखम् ॥८४॥
सन्तः सिद्धिप्रदाश्चापि सम्पदां च प्रदा हि ते।
आशीर्वादैः स्वल्पभाग्यं बहुभाग्यं दधत्यपि ॥८५॥
दिव्यतां मम योगेन प्रापयन्त्यक्षरं पदम्।
याम्यदूतान् वारयन्ति सन्तस्ते हृदयं मम ॥८६॥
प्रज्वालयन्ति पापानि पुण्यानि वर्धयन्त्यपि।
सौभाग्यानि चार्पयन्ति हरन्ति चापदो हि ते ॥८७॥
तेषां सेवा सदा श्रेष्ठिन् कुरु प्रसाददायिनीम्।
पञ्चयज्ञान् सदा सौम्यान् विधेह्यपि च भावतः ॥८८॥

गोसेवां धर्मसेवां च कुरु स्वर्गप्रदायिनीम् ।
आत्मज्ञाने कथासेवां सदा प्राप्नुहि गङ्गक ॥८९॥
ममाऽऽराधनमेवापि सदा विधेहि भाववान् ।
अन्ते ते दर्शनं दत्वा नेष्ये धामाऽक्षरं मम ॥९०॥
ब्रह्महत्यासुरापानव्यवायाश्चौर्यमित्यपि ।
भ्रूणहत्येतिपापानां याम्ये निष्कृतिरित्यपि ॥९१॥
साधुसेवा कृता येन प्राप्ता प्रसन्नता तथा ।
आशीर्वचो येन लब्धं सर्वार्पणेन सत्सु यत् ॥९२॥
तेषां तेषां तु पापानां दग्धता जायते द्रुतम् ।
निष्कृतिः सर्वथा साधोः सेवातुल्या न चाऽपरा ॥९३॥
याम्यलोको नाऽस्य लक्ष्मि सेवामग्नस्य वै सताम् ।
अपि कीटपतंगाद्याः श्वपचा घातका अपि ॥९४॥
गणिका हारकाश्चापि सत्सेवाभिः समुद्धृताः ।
पशवः पक्षिणश्चापि वृक्षाश्च वल्लिका द्रुमाः ॥९५॥
साधुयोगेन कमले परं श्रेयः प्रभेजिरे ।
कृष्णभक्तेर्महामार्गः साधुष्वेव प्रवर्तते ॥९६॥
साधुभ्यः सर्वलोकेषु प्रवर्तते ततः परम् ।
लोकास्तरन्ति संसारं पारं प्रयान्ति तस्य च ॥९७॥
मम लोकं प्रयान्त्येव सतां सेवापरायणाः ।
भुक्त्वा स्वर्गान्यनन्तानि तथैश्वरपदान्यपि ॥९८॥
मोदन्ते चापि वैकुण्ठे गोलोकेऽक्षरधामनि ।
एवं मयोपदिष्टः स विरालकोऽहि भक्तराट् ॥९९॥
मदाशया ययौ नैजं गृहं सन्तोषवान् धनी ।
भेजे मां सर्वथा तत्र वर्षान्ते मृत्युमासवान् ॥१००॥
साधुसेवां परां कृत्वा ययौ धामाऽक्षरं मम ।
एवं लक्ष्मि व्रजेद्धाम श्रोता वक्ताऽस्य भाववान् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने विरालनामकस्य वैश्यस्य प्राग्जन्मकथा, कुंकुमवापिकाक्षेत्रे श्रीहरेः प्राप्तिः, तस्य राजयक्ष्मनाशः, मुक्तिश्रेत्यादिनिरूपणनामा एकाऽशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

**श्रीपुरुषोत्तम उवाच—**

आकर्णय कथां नारायणीश्रि त्वं तथाऽपराम् ।
आसीत् कर्णपुरे राजा पृथ्वीधराभिधः पुरा ॥ १ ॥
खण्डराज्यं पालयन् स प्रजां ररक्ष धर्मतः ।
प्रातर्यस्यांऽगणे नित्यं भिक्षुकास्तु शताधिकाः ॥ २ ॥
तृप्यन्ति त्वन्नलाभेन ह्यनाथा बालबालिकाः ।
ह्यनाथा विधवाश्चापि भुंजतेऽस्याऽन्नसत्रके ॥ ३ ॥
विष्णोस्तु मन्दिरे गत्वा राजा पृथ्वीधरः स्वयम् ।
नारायणस्य मूर्तेर्वै पूजनं तुलसीदलैः ॥ ४ ॥
सहस्रैकमितैर्नित्यं करोति विष्णवे नमः ।
वदन् ध्यायन् स्मरन् मां वै श्रीपतिं पुरुषोत्तमम् ॥ ५ ॥
धूपं दीपं च नैवेद्यं जलं ताम्बूलकं तथा ।
नीराजनं स्तुतिं प्रदक्षिणां कृत्वा च दण्डवत् ॥ ६ ॥
शतरूप्यकदानं चाम्बराणां शतकं तथा ।
एकां गां च ददात्येव दाने नित्यं ततः परम् ॥ ७ ॥
पुष्पाञ्जलिं श्रीहरये दत्वा याति निजालयम् ।
एवं मां भजते नित्यं मन्निवेदितभोजनः ॥ ८ ॥
वर्तते स्म सदा भक्तो हिंसाव्यवायवर्जितः ।
यस्य पुण्यं पुराजन्मकृतं तस्य तु भक्तता ॥ ९ ॥
धर्मे मतिश्च भवति सत्यपि राज्यवैभवे ।
एवं लक्ष्मि सदा पृथ्वीधरः कृत्वा शुभाह्निकम् ॥१०॥
याति न्यायालयं तत्र ददात्येव च निर्णयम् ।
अथ सायं नित्यमेव कथां शृणोति मामकीम् ॥११॥
लक्ष्मीनारायणसंहितायाः सतां सभागतः ।
सन्तोऽस्य साधवो धीराः छिन्दन्ति संशयान् बहून् ॥१२॥
सतां पादजलानां च पानं गृह्णाति भूपतिः ।
कथान्ते कीर्तनं वाद्यसहितं प्रकरोति सः ॥१३॥
सहस्रशो जना नार्यो नराः कुर्वन्ति कीर्तनम् ।
'हरे कृष्ण हरे कृष्ण बालकृष्ण हरे हरे ॥१४॥
हरे विष्णो हरे जिष्णोऽनादिकृष्ण हरे हरे' ।
एवंविधं भजनं ते सताद्यं प्रचक्रिरे ॥१५॥
अथ सन्तः प्रयान्त्येव मठेषु च नृपस्ततः ।
सायं देवार्चनं कृत्वा लब्ध्वा सद्भोजनं ततः ॥१६॥
ध्यानमग्नो भवत्येव मालामावर्तयन्मम ।
अनादिश्रीकृष्णनारायणेत्येवं जपन्मुहुः ॥१७॥
स्वपित्येवेति राजाऽपि साधुचर्यां प्रसेवते ।
अस्य राज्ञी मधुविन्दानाम्नी भक्ता तु वैष्णवी ॥१८॥
पातिव्रत्यान्विता यद्वत् साध्वी विप्रा सती यथा ।
भजते मां परात्मानं मत्वा संसारमुल्बणम् ॥१९॥
बन्धनं दुःखदोषाढ्यं वासनावासितं क्षयम् ।
नित्यं तु परमात्मानं मुक्तिं चात्मानमेव सा ॥२०॥
मनुते मोक्षदातॄंश्च सतो जनान् प्रसेवते ।
शान्तशीला नृपवत्सा भजते मां जनार्दनम् ॥२१॥

यथा राजा तथा लक्ष्मि प्रजा गुणवती भवेत् ।
अस्य पुत्रादयश्चापि भेजिरे मां श्रियः पतिम् ॥२२॥
प्रजाः सर्वाः सर्ववर्णा भजन्ते स्म च मां तथा ।
दानं कुर्वन्ति च जपं कुर्वन्ति स्म प्रसेवनम् ॥२३॥
सतां च साधुवासादौ मार्जनादि दधत्यपि ।
एवं वै वर्तमानानां वैष्णवानां निरन्तरम् ॥२४॥
प्रसन्नो भगवान्नास्ते पर्जन्यश्चापि वर्षति ।
सम्पदः सम्प्रमोदन्ते यथा लक्ष्म्यः सचेतनाः ॥२५॥
धेनवः कामवर्षिण्यो वृक्षाश्च फलदायिनः ।
सस्यानि कणदान्येव रसदा च रसाऽभवत् ॥२६॥
मम भक्तस्य तस्य श्रि रिपवो नाऽभवँस्तथा ।
ईतयो नाऽभवँश्चापि सुखाढ्यः सोऽभवन्नृपः ॥२७॥
तस्य पुत्रोऽभवत् काले जन्मान्धः प्रथमः सुतः ।
जन्मोत्सवाः कृतास्तेन यथाकालं सुतः स तु ॥२८॥
नेत्रे नोद्घाटयत्येव जन्मान्धो विदितोऽभवत् ।
राज्ञा विष्णोरनुष्ठानं कृतं वै वैष्णवे मखे ॥२९॥
चक्षुषोरुद्घाटनार्थं सूर्यचन्द्रप्रपूजनम् ।
घृतस्य दीपदानं चाऽखण्डितं देवमन्दिरे ॥३०॥
कृतं च वत्सरं तस्य गतं चान्ध्ये ततो नृपः ।
आशां विहाय सहसा तपस्येव मनोऽकरोत् ॥३१॥
राजसौधं विहायैवोद्याने वृक्षघटान्तरे ।
छायायां चासनं कृत्वा निषसाद तपस्ययम् ॥३२॥
मालामावर्तयत्येषो रटन् कृष्णनरायणम् ।
फलाहारोऽभवद् राजा त्वेकभुक्तो हि निर्जने ॥३३॥
शालग्रामं पुरो धृत्वा भजते मां स्मरत्यपि ।
वल्कलाम्बर एवापि मृगचर्मासनस्तथा ॥३४॥
सर्वभोगविहीनश्च पुत्रनेत्रसमीहनः ।
दिवारात्रौ भजते मां तत्राश्रमे द्रुमालये ॥३५॥
वर्षा शैत्यमातपं च सहते भजते च माम् ।
पूजां करोति भावेन शालग्रामस्य मे नृपः ॥३६॥
करोति त्रिषवणं च सूर्यं नमस्करोति च ।
पञ्चकेशी पितृपूजी सम्वत्सरं व्यवर्तत ॥३७॥
एवं वर्षोत्तरे राजा रात्रौ ध्यात्वा तु मां मुहुः ।
अस्तौत् कृष्ण तव नाम हरिः दुःखहरं हि तत् ॥३८॥
कथं भक्तस्य मे दुःखं नैव हरसि माधव ।
कर्तुमकर्तुमन्यथाकर्तुं शक्तोऽसि सर्वथा ॥३९॥
पुण्यं यत्तत्तव कृष्ण प्रसन्नता ह्यनुग्रहः ।
पापं यत्तत्तव कृष्ण प्रातिकूल्यं ह्युदासिता ॥४०॥
यदि भक्तं प्रति चैवमौदासीन्यं प्रदर्श्यसे ।
का गतिस्तर्हि भक्तस्य त्यक्तस्य रक्षकेन वै ॥४१॥
रक्षां कुरु सुतस्यापि चक्षुर्दानेन माधव ।
पापं विधूय तस्यैव सद्दृष्टिं तं विधापय ॥४२॥
इत्युक्त्वा दण्डवच्चक्रे श्रुत्वाहं प्रार्थनां द्रुतम् ।
तपो विलोक्य पुत्रस्य नेत्रार्थं त्वागतोऽभवम् ॥४३॥
जटिलो दण्डवान् साधुर्भस्माक्तो मृगचर्मवान् ।
कमण्डलुं करे धृत्वाऽदृश्ये वै वृक्षमण्डले ॥४४॥
हरे नारायण विष्णो वदन् सत्सन्निधौ ययौ ।
जयोऽस्तु योगिनः क्षितिपतेस्तापसवेषिणः ॥४५॥
इत्यहं शब्दमुच्चार्य कमण्डलुजलं शुभम् ।
ददौ तस्मै स राजाऽपि विस्मयं परमं गतः ॥४६॥
आकस्मिकः साधुवेषश्चातिथिः कुत आगतः ।
भवेद्वा मे मनःपूर्तिकरो दिव्योऽयमच्युतः ॥४७॥
अतिथिः पूजनीयो वै साधुस्तत्र विशेषतः ।
विचार्येत्थं समुत्थाय राजा पपात पादयोः ॥४८॥
आसनं प्रददौ चार्घ्यं मधुपर्कं ददौ तथा ।
पूजनं प्रचकारापि पुष्पगन्धफलादिभिः ॥४९॥
नमस्कारं विधायाऽथ पप्रच्छागमनं प्रति ।
धन्योऽहं कृतकृत्योऽहं साधुजनस्य दर्शनात् ॥५०॥
तीर्थरूपं परं वारि प्राप्तं यस्य कमण्डलोः ।
दर्शनं पावनं लब्धं सर्वेन्द्रियपवित्रकृत् ॥५१॥
स्पर्शनं पापहारं च लब्धं साधुपदस्य ह ।
सेवनं च प्रसादं च लप्स्येऽद्य भाग्यवैभवात् ॥५२॥
कृपया चापि च दिव्यानुग्रहात् पुण्यसञ्चयात् ।
इत्युक्त्वा मौनमास्थाय तस्थावग्रे कृताञ्जलिः ॥५३॥
अहं साधुस्वरूपश्चाऽवदं श्रेयोयुतो भव ।
कुशलं ते भूप किंवा ब्रूहि तपसि कारणम् ॥५४॥
राजोवाच हि साधूनां कृपया कुशलं मम ।
पुत्रवान् धनवानस्मि भक्तिमानस्मि साधुषु ॥५५॥
तथाप्यकुशलं चास्ते पुत्रः पश्यति नैव मे ।
जन्मान्धो विद्यते साधो वद किं कारणं भवेत् ॥५६॥
तस्य वै दृष्टिमत्त्वार्थं तपः करोमि माधवे ।
आराधनात्मकं नान्यकांक्षा मे वर्तते प्रभो ॥५७॥
पुत्रोऽचक्षुर्भवेद् यस्य राज्यमन्धं तु तस्य वै ।
अनन्धस्य गृहे चाऽऽन्ध्यं वंशे चान्ध्यं हि दुःखदम् ॥५८॥
आन्ध्यमेतत् कथं दूरं यायाज्जानासि दर्शय ।
कृतकृत्यो भवाम्येवं साधोस्तेऽत्र समागमात् ॥५९॥

साधूनां वचनं दिव्यं सत्यार्थं सिद्धिदं सदा ।
साधूनां हृदयं सौम्यं सर्वदुःखहरं खलु ॥६०॥
साधूनां दर्शनं पुण्यं सेवनं मोक्षदं तथा ।
सर्वाशापूरकः साधोरनुग्राहः समर्जितः ॥६१॥
इत्युक्त्वा विररामाऽसौ लक्ष्मि चाऽहं तदाऽवदम् ।
शृणु राजँस्तव पुत्रः पूर्वजन्मनि तापसः ॥६२॥
यथाऽहं तापसवेषस्तथा स तापसोऽभवत् ।
नाम्ना दुर्वोढको विप्रो दरिद्रो राज्यवाञ्छया ॥६३॥
अकरोत् स तपो रेवातटे तीर्थे तु शुक्लके ।
बहवो यत्र चायान्ति यान्ति तीर्थार्थिमानवाः ॥६४॥
नरा नार्यस्तत्र तीर्थे स्नान्ति प्रयान्ति पार्श्वतः ।
दुर्वोढकः प्रपश्यन् वै तपःस्थले प्रतिष्ठति ॥६५॥
बलवच्चेन्द्रियं लक्ष्मि मानसं बलवत्तथा ।
विषये पुरतो याते चागते चञ्चलं भवेत् ॥६६॥
तन्निरोधस्तापसेन कर्तव्यः सर्वदा रमे ।
इन्द्रियाणां मनसश्चाऽनिरोधे निष्फलं तपः ॥६७॥
प्रमाथि मानसं कस्मिन् क्षणे नेष्यति दुष्पथम् ।
निश्चयश्चापि विश्वासो नास्ति तन्मनसः सदा ॥६८॥
एकदा त्वं स्वयं राजा तीर्थार्थे सकुटुम्बकः ।
यथापेक्षितवस्त्वाढ्यः परिमेयपुरःसरः ॥६९॥
गतो रेवां प्रति शुक्लतीर्थे स्नातुं तु पर्वणि ।
यत्राऽयं तापसः साधुर्विप्रस्तपति तत्स्थले ॥७०॥
मनाग् दूरे चाम्रवणे त्वं निवासं तदाऽकरोः ।
ज्ञात्वा तपस्विनं साधुं जटिलं त्वं च तत्पुरः ॥७१॥
सपत्नीको नमस्कारमकरोः पूजनं तथा ।
फलादिकं चाऽऽर्पयश्च राज्ञी च भावपूरिता ॥७२॥
साधोश्चरणौ प्रक्षाल्य जलं पपौ तव प्रिया ।
रूपयौवनसौन्दर्यपुष्टिश्रृंगारशालिनीम् ॥७३॥
वीक्ष्य तां मोह उत्पन्नो विप्रस्याऽस्य तपस्विनः ।
सकामं चापि प्रच्छन्नं चक्षुर्द्वयं प्रयोजितम् ॥७४॥
तेन विप्रेण शिष्यायां राज्ञ्यां तदा तु तीर्थके ।
पुण्यायां सेविकायां च तथैव राजमातरि ॥७५॥
सकामस्तपसि दग्धो राज्यार्थे लालसान्वितः ।
अजितेन्द्रियचित्तश्च दृष्टिपापं तदा व्यधात् ॥७६॥
भवन्ति खलु जात्यन्धा जन्मान्धा रागिणस्तु ते ।
परस्त्रियां तु ये मुग्धा दुष्टचक्षुः प्रयुञ्जते ॥७७॥
एवमेतस्य विप्रस्य तापसस्य तदा खलु ।
रूपसौन्दर्यमुग्धस्य मोहपापं तदा ह्यभूत् ॥७८॥

तस्मान्मोहाऽनुद्भवार्थं रूपवत्यः स्त्रियः सदा ।
धर्मरक्षार्थमेवापि दर्शयन्ति मुखं नहि ॥७९॥
लज्जावस्त्रं प्रावरणं मुखोपरि प्रकाशने ।
सदा रक्षन्ति सन्नार्यः पातिव्रत्यादिगुप्तये ॥८०॥
दर्शनं मोहकृत्तस्माद्दर्शनं न ददत्यपि ।
असूर्यम्पश्यास्तिष्ठन्ति प्रावरणेन चावृताः ॥८१॥
अथ राजन् तापसः स कालेन निधनं गतः ।
तव पुत्रो ह्ययं जातो यस्यां मुग्धस्तद्गर्भजः ॥८२॥
तपःफलं राज्यमेतल्लब्धं तेन महात्मना ।
दुष्टचक्षुर्दृष्टिफलं जन्मान्ध्यं लब्धमेव च ॥८३॥
तपसा ते प्रभक्तस्य पूजादिभिः प्रतोषितः ।
समायातोऽस्मि भगवान् शालग्रामे तु यः स्थितः ॥८४॥
सोऽहं नारायणकृष्णो भवामि ते ह्यभीष्टदः ।
ब्रूहि राजन् ददाम्यत्र यत्ते मनसि रोचते ॥८५॥
भक्तार्थं त्वागतोऽस्म्यत्र यदिच्छसि ददामि ते ।
इत्युक्तः स तु राजर्षिः पृथ्वीधराभिधस्तदा ॥८६॥
ययाचे सुतदृष्टिं च भक्तिं मे पादयोस्तथा ।
अन्ते धामाऽक्षरं चापि वंशं च भक्तमेव ह ॥८७॥
श्रुत्वाऽहं प्रददौ तस्मै तथाऽस्त्वेवं भविष्यति ।
जलं कमण्डलोर्दत्वा तिरोभावं ततः स्थलात् ॥८८॥
राजा प्रसन्नचित्तस्तु तपः पूर्णं विधाय च ।
ययौ सवल्कलो नैजं ग्रामस्थं भवनं प्रति ॥८९॥
प्रजाभिः पूजितश्चापि लक्षितो वरपात्रकः ।
प्राप्तमनोरथश्चापि जयशब्दैः प्रवर्धितः ॥९०॥
ययौ स्वभवनं तावद् वाद्यानि चोत्तमानि वै ।
अवाद्यन्त समन्तात्तु राज्ञी प्रसन्नतां ह्यगात् ॥९१॥
राजा सुतं प्रति गत्वा मया दत्तं जलं द्रुतम् ।
पुत्रनेत्रे ददौ नेत्रं जलस्पर्शात् सदृष्टिकम् ॥९२॥
दक्षं ह्यभूत् ततो वामं जलस्पर्शात् सदृष्टिकम् ।
जातं महोत्सवश्चासीत्तपःफलं समर्जितम् ॥९३॥
अथ पुत्रो युवा जातो जातिस्मरो हि सर्वदा ।
दुष्टचक्षुःफलं नैजं स्मरत्येव सदा ततः ॥९४॥
महाभागवतः सोऽपि जातो धर्मसमन्वितः ।
नाम्ना चित्रध्वजो राजा साधुभक्तः प्रतापवान् ॥९५॥
भजते मां सदा लक्ष्मि राज्यं पित्रा समर्पितम् ।
सञ्चालयति नीत्या वै प्रजास्तोषयत्येव सः ॥९६॥
पिताऽस्य निधनं यातो विमानेन तदाऽप्यहम् ।
स्वधामाऽक्षरमेवैनं प्रापयामास वैष्णवम् ॥९७॥

एवं मया स्वभक्तस्य तपसा ह्येधितस्य च ।
इच्छापूर्तिः कृता पुत्रचक्षुर्दानेन विष्णुना ॥९८॥
भक्तानां सर्वथा लक्ष्मि चान्ध्यं बाह्यं च वाऽऽन्तरम् ।
नाशयामि प्रसन्नोऽहं भक्तिवश्यो भवन् भुवि ॥९९॥
आत्मप्रकाशं दिव्यं च ददामि ज्ञानशेवधिम् ।
येन मायातमस्तीर्त्वा प्रयान्ति परमं पदम् ॥१००॥
पठनाच्छ्रवणाच्चास्य स्मरणाद् भजनान्मम ।
भुक्तिमुक्तिर्भवेच्चापि सम्पत् सौख्यं प्रमोक्षणम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पृथ्वीधराभिधनृपतेर्जन्मान्धपुत्रस्य प्राग्जन्मवृत्तान्तं भगवता कृतसदृष्टिकत्वं चेत्यादिनिरूपणनामा द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

**पुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं शत्रुंजयानदीतटे ।
आसीद् भक्तः सागराख्यः शूद्रोऽरण्यप्रपालकः ॥ १ ॥
सपुत्रपरिवारोऽयं सशास्त्रोऽरण्यरक्षणम् ।
करोति पालिकाताने पालिकाराज्ययोजितः ॥ २ ॥
एकदाऽरण्यभागेषु पालिकातानजो नृपः ।
ययौ वै मृगयार्थं सः परिमेयसुभृत्ययुक् ॥ ३ ॥
अरण्यं तत्प्रविष्टोऽयं राजा च सागरं तु तम् ।
भृत्यं निन्ये सह तत्र मृगादिमार्गदर्शकम् ॥ ४ ॥
शूद्रोऽप्ययं हरेर्भक्तो हिंसां नैव करोति सः ।
अहिंसको हि राजानं हिंसापापभयात् खलु ॥ ५ ॥
उद्घाटं मृगशून्यं वै प्रदेशं प्रति नीतवान् ।
अत्र मृगाः समायान्ति प्रयान्ति च वसन्त्यपि ॥ ६ ॥
इत्युक्त्वा नीतवान् क्षमेशं वनपालाभिधं नृपम् ।
यत्र जलं वनं रम्यं प्रदेशाश्चापि सुन्दराः ॥ ७ ॥
क्वचित् क्वचिज्जनवासास्तं प्रदेशं तु नीतवान् ।
आसायं तु समारण्येऽटवीतोऽप्यटवीं भ्रमन् ॥ ८ ॥
अत्र मृगस्तत्र मृगश्चेत्येवं सम्प्रदर्शयन् ।
राजानं भ्रामयामास जपन् श्रीपुरुषोत्तमम् ॥ ९ ॥
आन्तरे प्रार्थयन् मां वै क्षमस्व भगवन्मम ।
अपराधं नृपेणात्र सार्धं वै मृगयोद्भवम् ॥१०॥
नाऽहमिच्छामि वनजान् मृगान् हन्तुं स्वयं क्वचित् ।
अन्यद्वारा तथा हिंसा कारयितुं क्वचित् प्रभो ॥११॥
अतो मया नृपश्चाऽयमुद्घाटेन प्रणीयते ।
यत्र मृगा न प्राप्यन्ते हिंसा मे न यथा भवेत् ॥१२॥
हिंसापापं नैव स्यात्तथा रक्ष हि माधव ।
कश्चिद्वन्यः पशुस्त्वत्र मार्गे नैव मिलेन्नृपम् ॥१३॥
अन्तर्यामिंस्तथा सर्वं विधेहि क्लतनं प्रभो ।
एवं मां प्रार्थयन् भक्तः शूद्रोऽपि धर्मवान् शुचिः ॥१४॥
यात्यग्रे तं नृपं कर्षन् मृगवासोऽत्र तत्र च ।
वर्णनं बहुधा कुर्वन् राजन् खड्गोऽत्र वै भवेत् ॥१५॥
अत्र चित्रमृगः स्याच्च शृंगी सृमरश्चात्र तु ।
गवयश्चात्र शशको गेण्डुको वा भवेदिह ॥१६॥
तरक्षुर्वा कृष्णमृगो वराहो वा भवेदिह ।
एवमाशां बन्धयँश्च यात्यग्रेऽग्रे समुत्सुकः ॥१७॥
जलं फलानि राज्ञेश्चार्पयत्यपि प्रसेवते ।
तथापि स तु राजा न तुष्टिमेति मृगान् विना ॥१८॥
एवं सायं समयो वै वनान्तरे व्यजायत ।
मृगाऽलब्धौ नृपश्चापि निराशोऽप्यभवत्तदा ॥१९॥
सर्वे तेऽस्तंगते चार्के विशश्रमुर्वनान्तरे ।
सरस्तटे वटाधो वै बुभुक्षिता निराशयाः ॥२०॥
अथात्र भाग्ययोगेन वनेचरस्तदा परः ।
अरण्यं स्वं भ्रमित्वैव स्वगृहं प्रतियाति यः ॥२१॥
स तत्र वटवृक्षाऽधः श्रुत्वा शब्दाँस्तु मानवान् ।
पार्श्वसृत्या निर्गतोऽपि वटाश्रयं समाययौ ॥२२॥
अपश्यत्तत्र राजानं परिमेयजनान्वितम् ।
ननाम भावतश्चैतान् तस्थौ पप्रच्छ तं नृपम् ॥२३॥
कथं राजन्नत्र रात्रौ विश्रामश्चाद्य विद्यते ।
दासवर्गस्य कार्यं चेत्तिष्ठामि सेवनाऽऽज्ञया ॥२४॥
दासोऽहं वनमार्गज्ञो वन्यज्ञो वनवासकृत् ।
वने सर्वं विजानामि नृपाज्ञां वितरामि च ॥२५॥
श्रुत्वा राजा तु वृत्तान्तं दिनचर्यां च निष्फलाम् ।
मृषामृगयाभ्रमणं सर्वं जगाद वै तदा ॥२६॥
अथ श्रुत्वा दक्षगर्वोऽपरो वनेचरो नृपम् ।
राजन्नैतद्वनं तादृङ् मृगाधिवासितं क्वचित् ॥२७॥
केनाऽयं दर्शितः पन्थाः केवलक्लेशदायकः ।
वनेऽत्र न मृगाः सन्ति काष्ठहारा भ्रमन्ति यत् ॥२८॥
मृगाणां तु वनं चान्यद् दक्षिणे सरितस्तटे ।
वर्तते तत्र मृगयासाफल्यं जायते सदा ॥२९॥
केनचिद् भ्रामितस्त्वं वै राजन्नत्र प्रवर्तसे ।
वृथाप्रयासो भवतो वनेऽत्र कष्टमेव ह ॥३०॥
एवमुक्तस्तदा राजा ज्ञातवान् स्वप्रतारणम् ।
सागरेण हि शूद्रेण कृतं वृथाऽटनं प्रति ॥३१॥

अहो विश्वासघाता वै मानवा नृपतिं क्वचित् ।
विमार्गे सम्प्रकृष्यैव नयन्ति मरणं प्रति ॥३२॥
विश्वासो नैव कर्तव्यो वने गृहे रणे तथा ।
अज्ञातानां क्वचिद् भूपैर्विश्वासे कष्टमाप्नुयात् ॥३३॥
सागरेण वयं चात्र प्रतारिता मृगार्थिनः ।
अमृगाढ्ये वने दूरं भ्रामिता निष्फलीकृताः ॥३४॥
सोऽयं दण्डस्य पात्रं वै विद्यते छद्मवृत्तवान् ।
त्यक्तव्यो दण्डदानेन शिक्षा देया मयाऽत्र ह ॥३५॥
एवं विचार्य नृपतिर्दक्षगर्वाभिधं परम् ।
वनेचरं तदा प्राह तिष्ठ वा याहि ते गृहम् ॥३६॥
प्रातश्चात्र समायाहि मृगयार्थं वने सह ।
दास्येऽहं चेप्सितं ते वै पारितोषिकमुत्तमम् ॥३७॥
मृगयाणां सुलाभे वै नान्यथा याहि तिष्ठ वा ।
दक्षगर्वो नमस्कृत्याऽऽवश्यकतां प्रदर्श्य च ॥३८॥
ययौ नैजं गृहं रात्रौ नाऽऽयात् प्रातश्च तत्स्थलम् ।
राजाऽपि क्रोधमापन्नः प्रातरेव तु सागरम् ॥३९॥
पप्रच्छ त्वं कथं त्वत्र वने मां नीतवान् वद ।
मृगया यत्र नैवास्ति वृथाऽरण्ये श्रमोऽभवत् ॥४०॥
दुःखं त्वया कृतं त्वेतत्तस्माद्दण्ड्योऽसि सर्वथा ।
मासिकं वेतनं त्वं वै प्राप्नोसि मम कोशतः ॥४१॥
अहं प्रतारितश्चात्र त्वया भृत्येन वै यतः ।
ततोऽहं प्रकरोम्यत्र दण्डं ते कपटार्थिनम् ॥४२॥
इत्युक्त्वा भूपतिश्चान्यान् भृत्यानाह द्रुतं वचः ।
पाषाणैरस्य दुष्टस्य प्रकोष्ठौ पादयोरिह ॥४३॥
चूर्णयन्तु निक्षिपन्तु वटोऽधो दुष्टमानवम् ।
इत्युक्तास्ते परे भृत्या भटा आसन् प्ररोषिणः ॥४४॥
ते धृत्वा प्रस्तरान् कष्टैश्चूर्णयामासुरुल्बणाः ।
पादयोर्घुटिके चोभे भङ्क्त्वा तं वटमूलके ॥४५॥
प्रक्षिप्य प्रययुः सर्वे सनृपास्ते ततः स्थलात् ।
मृगयार्थं चापरं वै वनं गर्वान्विताः खलाः ॥४६॥
अथाऽयं सागरस्तत्र मत्वा दैवात् समागतम् ।
कष्टं रुरोद बहुधा स्मृत्वा मां पुरुषोत्तमम् ॥४७॥
कथं हे भगवन्नत्र भक्तरक्षां करोषि न ।
पापिनां तु तथा नाशं कृष्ण कथं करोषि न ॥४८॥
हिंसायां तु महत्पापं विदित्वा मृगरक्षया ।
मया राजा तद्द्वारं वै प्रवर्तितो दयालुना ॥४९॥
त्वद्भक्तोऽहं दयासिन्धो दयावान् मृगबालकान् ।
मृगान् हन्तुं कथंकारं नयामि हिंसकं नृपम् ॥५०॥
अहिंसायाः फलं हिंसात्मकं प्राप्तं मयाऽद्य तत् ।
कष्टं कृष्ण त्वया चापि सह्यते स्वाश्रितस्य यत् ॥५१॥
आश्चर्यं परमं त्वेतद् भक्तरक्षां करोषि न ।
हरे कृष्ण हरे विष्णो हरे नारायण प्रभो ॥५२॥
अनादिश्रीकृष्णनारायण जिष्णोऽवनं कुरु ।
वने वटेऽत्र गहने यदि नायास्यसि द्रुतम् ॥५३॥
कश्चिज्जनोऽपि दिवसे तदा मे मृत्युरत्र वै ।
भवेच्चरणकष्टेन जलं कश्चिन्न दास्यति ॥५४॥
प्राणावने प्रयास्यन्ति गतिर्दुष्टा भविष्यति ।
कुटुम्बिनो मे नैवापि वेत्स्यन्ति मृत्युमत्र मे ॥५५॥
हरेनाथ हरेकृष्ण बालकृष्ण प्रभो हरे ।
हरे श्रीकम्भरापुत्र राधापते रमापते ॥५६॥
शीघ्रमायाहि कमलापते लक्ष्मीपते प्रभो ।
पद्मावतीपते प्रज्ञापते श्रीमाणिकीपते ॥५७॥
मुक्तपते ब्रह्मपते सृष्टिपते जगत्पते ।
भक्तपते दीनपते ब्रह्मप्रियापते हरे ॥५८॥
शीघ्रमायाहि भगवन् भक्तरक्षार्थदेहवान् ।
सौराष्ट्राधिपते श्रीमद्गोपालबालकप्रभो ॥५९॥
कथंकारमिदं कष्टं पादसन्धिप्रचूर्णजम् ।
सहे वै भगवन्नत्र प्राणा मूर्छां प्रयान्ति वै ॥६०॥
इत्युक्त्वा मां प्रणम्यैव मूर्छाभावमुपागतः ।
लक्ष्मि यावत् सागरो मे भक्तस्तावदहं द्रुतम् ॥६१॥
तत्पार्श्वे प्रययौ शीघ्रं वनेचरस्वरूपवान् ।
पत्राणि सन्धिनीवल्ल्या नीत्वा तद्रसमुत्तमम् ॥६२॥
निष्कास्याऽङ्गुलिभिस्तत्र ददौ भग्नप्रदेशयोः ।
तावत् प्रघुटिके चापि प्रकोष्ठौ सन्धितौ द्रुतम् ॥६३॥
अस्थिनी च यथापूर्वं जातौ स्वस्थौ नीरुग्णकौ ।
सशक्तौ चापि रक्ताढ्यौ मया स्पृष्टौ पुनः पुनः ॥६४॥
मूर्छाया वारणं चापि कृतं भक्तस्य वै मया ।
उत्थापितश्च कष्टं तद् दूरीकृतं समन्ततः ॥६५॥
भोजितः सुप्रसादं च जलं तदा प्रपायितः ।
स्नेहितः प्रेमदृष्ट्या च प्रापितश्च गृहं निजम् ॥६६॥
वनेचरस्वरूपं मां पुपूज बहुभावतः ।
गृहे रम्यासनं दत्वा परिचर्यां चकार मे ॥६७॥
तस्य पत्नी हीरुकाऽपि पुत्राः पुत्र्यश्च सेवनम् ।
चक्रुर्मे बहुधा लक्ष्मि मध्याह्ने भोजनादिभिः ॥६८॥
मया भुक्तं जलं पीतं सेवा चांगीकृता तथा ।
पादसम्मर्दनगात्रमर्दनादिस्वरूपिणी ॥६९॥

अथाऽयं सागरो भक्तः पप्रच्छ मां निजं प्रति ।
हरे नाथ कृपासिन्धो कष्टमेतत् कथं मम ॥७०॥
पादभञ्जनरूपं वै केन पापेन चागतम् ।
न हिंसिता मया जीवा न मांसमदिरादिकम् ॥७१॥
स्पृश्यतेऽपि हरेकृष्ण नाऽसत्यं क्रियते क्वचित् ।
न चौर्यं पारदार्यं वा क्रियते वै कदाचन ॥७२॥
प्राणिरक्षाकृते त्वेतत् प्रतारणं नृपस्य तु ।
कृतं मया प्रभो नाऽत्र पापं मया कृतं भवेत् ॥७३॥
कथं मे पादहननं कथं कष्टं जनस्य ते ।
वद नाथ यथार्थं मे कर्म वा तादृशं भवेत् ॥७४॥
अत्र जन्मनि नैवाऽहं कृतवान्न स्मराम्यपि ।
अज्ञातेन कृतं चेत् स्याद् वद मे संशयापहम् ॥७५॥
तदाऽहं कमले तस्मै न्यवेदयं पुराकृतम् ।
नाऽत्र जन्मनि तस्याऽभूत् कर्म क्रूरं हि तादृशम् ॥७६॥
ततोऽहं कथयामास शृणु सागर प्राक्कृतम् ।
त्वमासीर्वै हस्तिपको राज्ञो गजस्य रक्षकः ॥७७॥
अस्य राज्ञः पितुर्धर्मपालस्य गजरक्षकः ।
नाम्ना घरोदरस्त्वं वै शूद्रः कुटुम्बवानिह ॥७८॥
भृत्यतां विदधन् हस्तिपालने त्वेकदा भवान् ।
गजस्य तु मदप्राकट्ये युवानं गजं तदा ॥७९॥
उन्मादिनं वशं कर्तुं प्रयत्नं बहुधा व्यधात् ।
गोक्षुराद्यैर्लोहजैश्च न्यस्तैः पादतलेषु वै ॥८०॥
तथा लोहार्गलैश्चापि लोहशृंखलिकादिभिः ।
भल्लैश्चाग्रैश्च वंशैश्च दीर्घैश्च लोहजैः फलैः ॥८१॥
पादौ विभिद्य करिणः कृत्वा शक्तिविहीनकम् ।
गतिशून्यं गतं तत्र भवान् रुरोध सर्वथा ॥८२॥
अधिकं पादयोस्तस्य मृद्गमारममारयत् ।
भग्नमस्थि गजस्यापि पादस्यैकस्य वै तदा ॥८३॥
अथाप्युत्थातुकामं तं हस्तिनं तु भवान् पुनः ।
लोहदण्डैश्चाग्रपदे मारयामास निर्दयः ॥८४॥
अस्थि द्वितीयपादस्य चूर्णतां पार्श्वतोऽगमत् ।
एवं पादद्वयास्थिनी भग्ने ते क्रूरतावशात् ॥८५॥
हस्तिना त्वं तदा शप्तो रक्षको मारको भवान् ।
ममेव तु करेणैव भग्नपादो भविष्यसि ॥८६॥
स त्वं कालेन निधनं गतोऽसि सागरोऽद्य वै ।
हस्ती च निधनं प्राप्तो राजपुत्रोऽयमस्ति सः ॥८७॥
वनपालाभिधः सोऽयं भग्नपादः पुरा गजः ।
राजाऽद्य वर्तते त्वं चारण्यपालोऽद्य वर्तसे ॥८८॥
तव पादौ तेन भग्नौ पुराभग्नस्य तत्फलम् ।
मा शोकं कुरु भक्तोऽसि रक्षितोऽसि मयाऽद्य वै ॥८९॥
न कृतं तु पुरा कर्म कंचित् त्यजति देहिनम् ।
त्वया प्राप्तं कृतं कर्म फलरूपेण भक्तक ॥९०॥
किन्तु भक्त्या मया रक्षा कृता चाहिंसया तव ।
राज्ञोऽपराधः स्वल्पोऽपि निमित्तोऽत्र व्यजायत ॥९१॥
अरण्ये पादभंगे ते मा शोकं कर्तुमर्हसि ।
भज मां परमात्मानं पश्य मे रूपमैश्वरम् ॥९२॥
अहं नारायणः साक्षाच्चतुर्भुजोऽस्मि चागतः ।
याहि त्वद्यैव राजानं सायं गृहं समागतम् ॥९३॥
वद मे सर्ववृत्तान्तं रक्षाकरं सुखप्रदम् ।
सोऽपि श्रुत्वा नृपो मे संभजनं वै करिष्यति ॥९४॥
तव योगेन मुक्तिं वै करिष्यामि नृपस्य ह ।
मा भयं कुरु भक्तेन्द्र त्वया साकं भवाम्यहम् ॥९५॥
इत्युक्त्वा भगवाँस्तत्र तिरोदधे तु पद्मजे ।
भक्तो ययौ निशायां तु नृपगृहं स्मरन् हरिम् ॥९६॥
राज्ञे सर्वं तु वृत्तान्तं कथयामास शोभनम् ।
श्रुत्वा राजा विस्मितोऽभूद् ययाचे च क्षमां मुहुः ॥९७॥
भक्तरक्षाकरं मां च तुष्टाव शरणं गतः ।
विदित्वा प्राग्जन्म नैजं गजात्मकं मुहुर्मुहुः ॥९८॥
आश्चर्यं परमं प्राप्य मत्वा देहं तु गत्वरम् ।
भक्तो भूत्वा प्रभेजे मां कुटुम्बसहितो नृपः ॥९९॥
पिता च बान्धवाश्चापि भेजिरे मां ततः सदा ।
कृत्वा राज्यं सतां सेवां भक्तिं कृत्वा यथाक्षणम् ॥१००॥
प्रापुस्ते मां परमेशं श्रीधामाऽक्षरसत्पदम् ।
पठनाच्छ्रवणाच्चास्य लक्ष्मि मुक्तिश्च मोक्षणम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सागराख्यशूद्रस्य भग्नपादस्य भगवत्कृतनीरुजपादत्वं तत्पूर्वभववृत्तान्तं चेत्यादिनिरूपणनामा त्र्यशीत्य-धिकशततमोऽध्यायः ॥ १८३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं वृकणदेवस्य पावनीम् ।
भक्तस्य मे कथां पूर्वे जातां पापप्रणाशिनीम् ॥ १ ॥
भुवालये तु नगरे जात्या शूद्रोऽतिधर्मवान् ।
वृकणदेवाभिधानोऽभूद् भृत्यः सन्देशहारकः ॥ २ ॥
भावशूराभिधानस्य नृपतेर्नास्तिकस्य वै ।
वृकणदेवो मम भक्तो भावशूरस्तु नास्तिकः ॥ ३ ॥

द्वयोर्नित्यं मित्रयोस्तु विवादः परिजायते ।
वृक्णदेवः सदा वक्ति भज राजन् प्रभुं हरिम् ॥ ४ ॥
भावशूरः प्रतिवक्ति भज भाग्यं च कर्म च ।
वृक्णदेवो व्रते प्राप्ते महोत्सवे नृपं मुहुः ॥ ५ ॥
वक्ति दानं पूजनं च धर्मकार्यं विधेहि वै ।
राजा सर्वं मन्यते वै मृषा दानं च पूजनम् ॥ ६ ॥
न स्वर्गं नापि पुण्यं वा नास्ति धर्मादिकं तथा ।
स्वभावाज्जायते सर्वं यथाक्षेत्रं तथोद्भवः ॥ ७ ॥
येन केनापि बीजेन राज्ञ्या तु जनितः सुतः ।
राजा प्रजायते तद्वद् वंशानुकारिणी स्थितिः ॥ ८ ॥
राजबीजं दरिद्रायां जातं दीनः प्रजायते ।
स्वभावो वा निजं कर्म भाग्यं सर्वत्र तिष्ठति ॥ ९ ॥
अभाग्यस्य कृते नैव राज्यं समुपतिष्ठते ।
राज्यभाग्यस्य दारिद्र्यं नैव क्वाप्युपतिष्ठति ॥१०॥
सूर्यस्य किरणं वारौ प्रविष्टं शीततां व्रजेत् ।
शीतं जलं महावह्नेः प्रसंगादुष्णतां व्रजेत् ॥११॥
पृथ्वीजन्यं समस्तं वै पृथ्व्यां पृथ्वीत्वमेति हि ।
एवं खनिप्रभावेण निसर्गेण महान् लघुः ॥१२॥
जायते वै यथाक्लृप्तं भक्तेस्तत्र न गौरवम् ।
भाग्यस्य गौरवं यद्वा कर्मणश्चास्ति गौरवम् ॥१३॥
कर्म निसर्गजन्यं वै स्वभाववत् प्रवर्तते ।
द्विपदो द्वाभ्यां यात्येव चतुर्भिस्तु चतुष्पदः ॥१४॥
शतपादः शतैनैव तथा क्लृप्तिः गतिस्तथा ।
गजो भुंक्ते द्वयाननाभ्यां वृक्षः सहस्रमूलकैः ॥१५॥
षडाननैः कार्तिकस्तु ब्रह्माचतुर्मुखैस्तथा ।
यथा क्लृप्तिस्तथा प्राप्तो वाडवाग्नेस्तु सागरः ॥१६॥
देशे काले कृतं कर्म भाग्यरूपं प्रजायते ।
तेन राज्यं सुखं स्वर्गं पितृवंशागतं मिलेत् ॥१७॥
भक्तेस्तत्र न हेतुत्वं वृक्णदेव निबोध तत् ।
इत्येवं नृपतिर्नित्यं वृक्णदेवं निरस्यति ॥१८॥
अथैवं पुष्कले काले याते नृपतिरेकदा ।
पप्रच्छ वृक्णदेवं त्वं कथं वृक्णोऽसि मे वद ॥१९॥
यदि भक्तिः कारणं वै सुखे स्वष्टे तदा भवान् ।
कथं भक्तेः प्रतापेन वृक्णत्वं न जहाति वै ॥२०॥
वृक्णदेवस्ततः प्राह भावशूरं नृपं प्रति ।
वृक्णत्वं कर्मणा जातं भक्त्या मार्ष्टुं हि शक्यते ॥२१॥
राजन्नारायणो विष्णुर्भक्तेच्छापूरकोऽस्ति हि ।
भक्तश्चेच्छति साम्राज्यं ददात्येव हरिः प्रभुः ॥२२॥
भक्तश्चेच्छति चारोग्यं ददात्येव नरायणः ।
यान् यान् कामान् कामयते पूरयत्येव तान् हरिः ॥२३॥
सकामस्य तु कामानां पूरकः परमेश्वरः ।
अकामस्य महानन्दप्रदाता परमेश्वरः ॥२४॥
सत्यं वै वर्तते सर्वं भक्त्या तुष्यति माधवः ।
प्रतोषितो हरिः सर्वं ददात्येव न संशयः ॥२५॥
भावशूरस्तदा प्राह सर्वं मृषा प्रभाषसे ।
न वृक्णत्वं तिरोयाति स्वास्थ्यं नाऽङ्के प्रतिष्ठते ॥२६॥
भक्तौ मे नास्ति विश्वासो यथा कर्मणि वर्तते ।
तथापि वृक्णदेवाऽत्र पणं किञ्चित्करोमि वै ॥२७॥
अहं राजाऽस्म्यवृक्णस्त्वं भृत्यो वृक्णः प्रवर्तसे ।
कर्मणा नियतं त्वेतन्नैतद् विपरिवर्तते ॥२८॥
यदि भक्तिबलं हेतुर्भवेद् विपरिवर्तने ।
अवृक्णवृक्णभावस्याऽऽवयोर्विनिमयोऽस्त्विह ॥२९॥
तदा भक्तिबलं मत्वा करिष्ये भजनं हरेः ।
अन्यथा ते वचः सत्यं नैव मन्ये कथंचन ॥३०॥
इत्येवं नृपतेर्वाक्यं श्रुत्वा वृक्णोऽपि मां प्रभुम् ।
सस्मार परया भक्त्या सन्निधौ नृपतेस्तदा ॥३१॥
प्रकाशे सर्वलोकानां व्याजहार नृपो यथा ।
तथा भवतु सर्वात्मन्नेवं प्राह पुनः पुनः ॥३२॥
वृक्णदेवस्य भक्त्यैव स्नेहेन वशतां गतः ।
अहं लक्ष्मि तदा गुप्तस्तिष्ठँस्तत्रैव वृक्णताम् ॥३३॥
वृक्णदेवस्य चाकृष्य नृपहस्तद्वयेऽक्षिपम् ।
राजा तूर्णं तदा वृक्णोऽभवत् प्रकोष्ठयोस्तथा ॥३४॥
कफोणिकयोः कुब्जश्चाऽभवश्चाऽऽकृष्टनाडिकः ।
शुष्ककाष्ठायितं हस्तद्वयं तानायितं द्रुतम् ॥३५॥
सर्वेषां पश्यतां तत्र भूमिपतेर्व्यजायत ।
वृक्णदेवस्य हस्तौ तु वृक्णतावर्जितौ द्रुतम् ॥३६॥
अभवतां यथाकार्यकरौ निर्बन्धनाडिकौ ।
सुरक्ताढ्यौ पुष्टियुक्तौ यथेष्टकार्यकारिणौ ॥३७॥
एतादृशं महाश्चर्यं वीक्ष्य सिष्मियिरे जनाः ।
राजा मेनेऽतिवादस्य फलं नास्तिकतोद्भवम् ॥३८॥
भक्तिं मेने तथा सत्यां कर्मणां परिवर्तिनीम् ।
भक्तेर्बलं परं मेने नास्तिक्यं प्रमुमोच सः ॥३९॥
एवं वै वृक्णतारोगो जन्मजोऽस्य मया रमे ।
तदा भक्तेर्गौरवार्थं तद्द्वयोः परिवर्तितः ॥४०॥
अथ राजाऽभवद्भक्तस्त्यक्त्वा गर्वं तु कर्मणः ।
स्वभावस्य तथा गर्वं तत्याज वृक्णताबलात् ॥४१॥

अथ राज्ञी शीलधर्मानाम्नी शुशोच वै तदा ।
पुत्रपुत्र्यश्च भृत्याश्च प्रजाश्च शुशुचुर्ध्रुवमिति ॥४२॥
वृक्णदेवोऽपि नृपतिं वीक्ष्य वृक्णं शुशोच ह ।
प्रार्थयत् परमात्मानं राज्ञो रोगस्य नुत्तये ॥४३॥
राजापि वृक्णदेवान्मे मन्त्रं जग्राह वै तदा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥४४॥
जजाप मालिकामात्रमष्टोत्तरशतं तदा ।
तावदहं भक्तरक्षाकृत् प्रादुरभवं क्षणात् ॥४५॥

शंखचक्रगदापद्मवैजयन्तीधरः प्रभुः ।
श्रीलक्ष्मीसहितस्तूर्णं ब्रह्मतेजोऽन्तरेऽम्बरे ॥४६॥
राजा ददर्श मां दिव्यं वृक्णदेवो ददर्श माम् ।
प्रजाः सर्वास्तदा मां चालोकयामासुरीश्वरम् ॥४७॥
जयकारं जगदुश्च नेमुस्तुष्टुवुरच्युतम् ।
मेनिरे धन्यभाग्यं च दर्शनं यत्परात्मनः ॥४८॥

एकभक्तस्य योगेन बहूनां दर्शनं ह्यभूत् ।
मया दिव्यं तु मद्रूपं तिरोभाव्य शुभं वपुः ॥४९॥
कृत्वा राज्ञः सन्निधौ च गत्वा स्पृष्टो नृपस्तदा ।
नास्तिक्यं सहसा नष्टं राजा धर्मपरोऽभवत् ॥५०॥
यथा भक्तस्तथा राजा धार्मिको तौ बभूवतुः ।
राजा प्रजादयः सर्वे परं मोदं प्रपेदिरे ॥५१॥

आनन्दमुत्सवं चक्रुर्मम दर्शनलाभतः ।
नारायणं च मां सर्वे पूजयामासुरादरात् ॥५२॥
अथ भृत्यो वृक्णदेवः पप्रच्छ मां ततः प्रभुम् ।
कथं मे वृक्णता चासीत् कथं गता वदाऽत्र मे ॥५३॥
तदाऽहं कमले सर्वं वृत्तान्तं पूर्वजन्मजम् ।
श्रावयामास भक्तेभ्यो वृक्णतादायकं ह्यघम् ॥५४॥

पूर्वमासीद् भवान् कीशभिक्षुकः कीशरक्षकः ।
वानरान् खेलयित्वा च वसतौ च प्रजाजनात् ॥५५॥
ग्रामीणेभ्योऽन्नवस्त्राद्यैर्लब्धैर्वृत्तिं समाचरत् ।
भल्लुको द्वौ नकुलाश्च पञ्च सप्त तु वानराः ॥५६॥
द्वौ सर्पौ वृश्चिका अष्टौ वशे ते ह्यभवँस्तदा ।
तेषां खेलविशेषैस्त्वं कुटुम्बवृत्तिमाचरः ॥५७॥

कुटुम्बिनस्ते सर्वेऽपि तत्तज्जन्तुप्रशिक्षकाः ।
आसँस्तेऽपि च तान् जन्तून् खेलयित्वाऽम्बराऽन्नकम् ॥५८॥
उपार्जयँस्तदा वृत्तिं जीविकां चाभ्यवर्तयन् ।
एवं वै वर्तमानेषु ग्रामान्ते संस्थितेषु च ॥५९॥
रात्रौ सुप्तेषु सर्वेषु वृकोऽरण्यात् समागतः ।
तस्य गन्धं विदित्वैव वानरः प्रथमं द्रुतम् ॥६०॥

अप्लवत भयात्तस्याऽपतत्तव तु वक्षसि ।
हस्तौ कीशस्य ते भाले नेत्रयोः पतितौ तदा ॥६१॥
नखैश्चर्म ललाटस्य भिन्नाऽभवत्तदा तव ।
त्वं सहसा निद्रितोऽपि भयं मत्वा परं पशुम् ॥६२॥
अपश्यन् तं निजं कीशं लोहयष्ट्या ह्यताडयः ।
भग्नौ त्वग्रपदौ तस्य तावत्तु भल्लुकोऽपि च ॥६३॥
भयशब्दं सम्प्रचक्रे पशवोऽन्येऽपि चुक्रुशुः ।
त्वयोत्थाय भयं प्राप्य वीक्षितो भयकृद् वनी ॥६४॥

वृकः क्रूरो वानरादो नातिदूरे ह्युपस्थितः ।
आक्रोशं त्वं परं कृत्वा तीक्ष्णकुन्तेन तं वृकम् ॥६५॥
प्रधाव्य भेदयामासिथैव त्वं हृदये तदा ।
पपाताऽपि ममाराऽपि वृकस्त्वं निर्भयोऽभवः ॥६६॥
भल्लुकाद्याः प्राणिनस्ते निर्भयाश्च तदाऽभवन् ।
वानरस्य सदा नैजबन्धनस्थस्य वै तदा ॥६७॥

विना विचारं सहसा पादौ भग्नौ रुषा त्वया ।
वानरश्चाति वै कष्टं प्राप तत्र तवाऽऽश्रितः ॥६८॥
शरणस्थाऽऽश्रितश्चापि जीविकासाधनं तथा ।
पुत्रवत् पालितश्चापि लोहदण्डेन ताडितः ॥६९॥
हस्तयोर्भञ्जितस्तस्य कष्टाक्रोशनकारिणः ।
वस्त्रखण्डौषधाद्यैश्च पादप्रसेवनं कृतम् ॥७०॥

मासान्ते चाग्रपादौ तौ नीरुजौ समजायताम् ।
किन्तु भुग्नौ वृक्णरूपौ वक्रौ सदा ह्यतिष्ठताम् ॥७१॥
तत्फलं तु त्वया लब्धं चात्र जन्मनि वृक्णताम् ।
इदानीं यावदेवैतद् दुःखं ते तद् व्यजायत ॥७२॥
अथापि त्वं वानरस्य भल्लुकस्य च खेलने ।
पूर्वयुगोद्भवां गाथां जाम्बवतो हनूमतः ॥७३॥

अगायथा युद्धरूपां द्रोणाद्र्युद्धरणान्विताम् ।
मम सम्बन्धरूपां वै भक्तिभावसमन्विताम् ॥७४॥
तेन कीर्तनपुण्येन वृक्णोऽपि त्वं सुसम्पदा ।
युक्तो भवसि राज्ञोऽस्याश्रयेऽपि धनवानसि ॥७५॥
भक्तिमान् वर्तसे चात्र भक्तिं कारयसि ध्रुवाम् ।
भक्तिबलं तु ते जातं येनाऽहं ते वशेऽस्मि वै ॥७६॥

आगतस्तव रक्षार्थं वृक्णता वारिता तव ।
शृणु चायं नृपो योऽयं वृको मृतो व्यजायत ॥७७॥
सोऽयं साकं त्वया चास्ते राजा नास्तिकभाववान् ।
द्वेषवान् धर्मकार्यादौ वर्तते प्राक् स्वभावतः ॥७८॥
वृकस्यैव निमित्तेन कीशस्य करभग्नता ।
अभवत् तत्फलं चार्धं वृकस्यैव भवेदिति ॥७९॥

राज्ञोऽस्य वृकगता प्राप्ता तव पापं नृपे गतम् ।
शृणु चापि वृकश्चायं कथं वै नृपतां गतः ॥८०॥
तृतीये प्राग्भवे चायं क्रोधी विप्रोऽभवत्तदा ।
नाम्ना प्राणधरश्चापि लोकाः प्राणहरं जगुः ॥८१॥
उद्वेजनः क्लेशदश्च धर्मे कर्मणि चोत्सवे ।
विवाहे याचने दाने बलाद् गृह्णाति चाधिकम् ॥८२॥
अतृप्तश्चातिवादेन हठेन कलिनाऽपि च ।
धनं चान्नं वस्तुजातं प्रसह्याऽऽदत्त एव सः ॥८३॥
तपस्व्यपि तपस्तस्य क्रोधेन निष्फलं यथा ।
तथाऽभवत् सतृष्णस्य क्रोधितस्य वृथा तपः ॥८४॥
तथापि देवपूजाद्यैर्लेशेन तपसाऽपि च ।
तथैव पापपुञ्जेन मृतो यमालयं ययौ ॥८५॥
चित्रगुप्तः शुभं चास्याऽशुभं न्यवेदयत्तदा ।
पूर्वं किं ते प्रभोक्तव्यं यथेष्टं वद पारये ॥८६॥
इत्येवं यमराजस्य श्रुत्वा वचोतिरोषवान् ।
जगाद प्रथमं पापं भोक्तव्यं तु मया यम ॥८७॥
ततो याम्यानि दुःखानि भोक्तुं यमेन योजितः ।
भुक्त्वा निरयदुःखानि शेषेण वृकतां गतः ॥८८॥
तत्र तव करेणाऽस्य मरणं समजायत ।
पुण्यैः पूर्वकृतैरस्य राज्यं स्वल्पं हि वर्तते ॥८९॥
स्वभावाः प्राग्जन्मजातास्त्यज्यन्ते नैव केनचित् ।
पूर्वस्वभावदोषेण कलहश्चास्य रोचते ॥९०॥
तथापि वृकणदेव त्वं निबोधयसि प्रत्यहम् ।
भक्त्यर्थे शुभवाक्याद्यैस्तेनाऽस्य वर्धते शुभम् ॥९१॥
शनैः फलं द्रुमादौ वै शनैर्घृतं पयस्यपि ।
शनैः पुत्रफलं पत्न्यां शनैः संस्कारशोधनम् ॥९२॥
शनैर्ज्ञानं शनैर्विद्या शनैर्द्रव्यार्जनादिकम् ।
शनैः समागमै रंगो जायतेऽभ्यासवर्तिनाम् ॥९३॥
एवं राज्ञोऽस्य कालेन पुण्यं चापि प्रवर्तते ।
पापं वृकणत्वमात्रं च वर्ततेऽद्य मनागपि ॥९४॥
तथापि भक्तयोगेन भक्तियोगेन मे तथा ।
मम योगेन सर्वं तत्पापं विनाशमेष्यति ॥९५॥
श्वप्रातश्चास्य नृपतेर्वृकणभावो गमिष्यति ।
क्रौर्यं नास्तिकता चापि सर्वं नष्टं भविष्यति ॥९६॥
ऐकान्तिको मम भक्तो भविष्यति यथा भवान् ।
उभयोश्चापि मे धामवासोऽन्ते वै भविष्यति ॥९७॥
वानराद्या इमे पुत्रा वृकण ते क्रूरभावनाः ।
इदानीं मानवा जातास्तेऽपि यास्यन्ति मोक्षणम् ॥९८॥
इत्येवं वरदानं वै दत्वाऽहं च तिरोऽभवम् ।
श्वोजाते प्रातरेवाऽस्य राज्ञस्तु वृकणता गता ॥९९॥
भजनं मे चकाराति हरे कृष्णनरायण ।
कालेन मे धाम दिव्यं भावशूरो नृपो ययौ ॥१००॥
वृकणदेवादयश्चापि मुक्तिं कालेन ते ययुः ।
एवं लक्ष्मि प्रभक्तस्य रक्षां करोमि नित्यदा ॥१०१॥
भक्तयोगेन जीवानां कल्याणं जायते ध्रुवम् ।
भक्तयोगेन भक्तिः स्यान्मम योगस्तथा भवेत् ॥१०२॥
पापनाशो भवेच्चापि सत्संगः शेवधिर्नृणाम् ।
स्वल्पः कृतोऽपि फलति श्रोतुर्वक्तुश्च मोक्षदः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वृकण-देवाख्यभक्तस्य भक्त्या वृकणतानाशो भक्तयोगेन भाव-शूरनृपतेर्मोक्षणं प्राग्जन्मवृत्तान्तादि चेतिनिरूपणनामा चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कथां भक्तस्य शोभनाम् ।
नाम्ना मञ्जुलकेशस्य हलवाद्ग्रामवासिनः ॥ १ ॥
हलवानगरे लक्ष्मि विप्रो मञ्जुलकेशवान् ।
वर्तते स्माऽतिभक्तो मे धर्मेऽत्यन्तकृतश्रमः ॥ २ ॥
नित्यं त्रिषवणस्नायी त्रिसन्ध्यावन्दनाऽर्हणः ।
विष्णुं शिवं गणेशं च सतीमर्कं प्रगेऽर्चयन् ॥ ३ ॥
स्तोत्रपाठं प्रकुर्वंश्च नित्यमर्थयते हरिम् ।
हरेकृष्ण हरेविष्णो त्वद्भक्तिः सर्वदाऽस्तु मे ॥ ४ ॥
माहात्म्यं च तव श्रेष्ठमेकान्तिकी तु दासता ।
भक्तेषु ते तथा कृष्ण त्वयि दोषमतिर्न मे ॥ ५ ॥
त्वदेकान्तिकभक्तानां सतां संगोऽस्तु मे सदा ।
दर्शनं सर्वदा चास्तु मूर्तीनां ते सतामपि ॥ ६ ॥
धर्मे मतिर्दृढा मेऽस्तु व्यवसायो ममाऽस्तु मे ।
मद्यमांसादिकस्पर्शोऽपि मे माऽस्तु कदाचन ॥ ७ ॥
अभक्ष्याणां भक्षणं मे पलाण्डोर्लशुनस्य च ।
माऽस्तु माऽस्तु तथा चौर्ये मनो मे चञ्चलं क्वचित् ॥ ८ ॥
निन्दने तव भक्तानां प्रवृत्तिर्मे च माऽस्त्वपि ।
देवानां निन्दने चापि संकल्पोऽपि च माऽस्तु मे ॥ ९ ॥
आसुराणां नास्तिकानां संगो माऽस्त्वपि मे क्वचित् ।
रागोऽपि विषये माऽस्तु स्नेहस्त्वयि सदाऽस्तु मे ॥१०॥

आत्मनिवेदिता कृष्ण त्वयि चाऽस्तु सदा मम ।
पातिव्रत्यं कृष्णनारायण त्वयि सदाऽस्तु मे ॥११॥
एवं कुटुम्बसहितो नित्यमर्थयते हि मत् ।
अगालितं जलं नैव पिबत्यप्यनिवेदितम् ॥१२॥
अन्नं फलादिकं नैव भुनक्त्यप्यनिवेदितम् ।
वस्त्राम्बरविभूषादि न युंक्तेऽप्यनिवेदितम् ॥१३॥
यानं वाहनमेवापि न युंक्ते चाऽनिवेदितम् ।
शृंगारं चोपकरणं यत्तद् भोग्यं निवेद्य वै ॥१४॥
उपयुंक्ते निजार्थं वै महाभागवतो यथा ।
करोति पूजनं नित्यं मम नारायणस्य सः ॥१५॥
भिक्षार्थं च ततो याति नगरे प्राप्य भिक्षितम् ।
गृहमागत्य तत् पच्यं पाचयित्वा निवेद्य मे ॥१६॥
भुंक्ते कुटुम्बसहितस्तुलसीपत्रसंयुतम् ।
लक्ष्मीनारायणसंहिताकथां वाचयत्यपि ॥१७॥
प्रजाजनान् चागतांश्च श्रावयत्येव चाश्रमे ।
पत्नीयुतोऽयं भूदेवो लक्ष्मि पुत्रादिसंयुतः ॥१८॥
महाभागवतो धर्मं दृढं सम्पालयत्यथ ।
क्वचिज् ज्ञातिजना ज्ञातिभोजने चाह्वयन्त्यपि ॥१९॥
विप्रं तं किन्तु विप्रोऽसौ भुंक्ते न ज्ञातिभोजनम् ।
अगालितैर्जलैश्चाप्यसंस्कृतान्नादि रन्धितम् ॥२०॥
मत्वा भुंक्ते न तत्रापि पलाण्ड्वादिप्रदूषितम् ।
लशुनादिविमिश्रं वा भुंक्ते नैव कदाचन ॥२१॥
इतिहेतोर्ज्ञातिजना रोषं कुर्वन्ति तं प्रति ।
स च मञ्जुलकेशो वै सहते सर्वमेव ह ॥२२॥
अथैकदा स्वसम्बन्धिगृहे ययौ तु मञ्जुलः ।
सम्बन्धिनस्तु तं प्राहुर्भवदर्थं तु शुद्धिमत् ॥२३॥
पाचयित्वा भोजनं वै दास्यामो भुङ्क्ष्व तृप्तिदम् ।
विश्वासयित्वैव ततो रन्धितान्ने मनागपि ॥२४॥
सुरां ददुस्ते ज्ञात्वैव रुषान्विताः सुभोजने ।
मञ्जुलकेशो गन्धेन ज्ञात्वा पात्रस्थभोजने ॥२५॥
सुरासम्मिश्रणं स्वल्पं शर्कराकेसरान्वितम् ।
तत्याज भोजनं तद्वै जलं तत्याज तद्गृहे ॥२६॥
विश्वासघातरुष्टश्च शशाप मञ्जुलस्तदा ।
योऽयं सुरां ददौ मह्यं विश्वास्य भोजनेन वै ॥२७॥
सोऽयं विचित्तो भवतु प्रमत्तोन्मत्त एव च ।
एवमुक्ते तु सहसा जनानां सन्निधौ तदा ॥२८॥
मञ्जुलपुत्रश्वशुरो विचित्तोन्मत्ततां गतः ।
भ्रान्तचित्तोऽभवत्तूर्णं मर्यादां परिहाय च ॥२९॥
वाणीं दुष्टां तथा चेष्टां दुष्टां निरम्बरां व्यधात् ।
नाम्ना पाशुपतेशाख्यः श्वशुरः शापदण्डितः ॥३०॥
विमना भ्रष्टमानश्चोपद्रवं बहुधाऽकरोत् ।
जनानां सन्निधौ तिष्ठन् विवस्त्रश्च प्रमेहति ॥३१॥
रौति नृत्यति तालैश्च कूर्दत्यपि च धावति ।
आक्रोशति प्रहसति चाऽसम्बद्धं प्रगायति ॥३२॥
पात्रवस्त्राणि सम्प्राप्य विभिद्य स्फोटयत्यपि ।
अवाच्यवाच्यं वदति चेष्टां करोति पाशवीम् ॥३३॥
एवं वै शापदोषेण वैचित्र्यं सहसा गतः ।
उपद्रवान् बहुशस्तु करोत्यतर्कितानपि ॥३४॥
कुटुम्बं बहुधा तस्योद्विग्नं जातमुपद्रवात् ।
प्रार्थयामास विप्रं तं शापनिवृत्तये तदा ॥३५॥
आह मञ्जुलकेशोऽपि त्यजन्त्वभक्ष्यभक्षणम् ।
कुर्वन्तु शुद्धिमेवापि प्रायश्चित्तं व्रतं महत् ॥३६॥
ब्रह्मकूर्चाख्यमेवाऽतः शुद्ध्युत्तरं मखं शुभम् ।
वैष्णवं सम्प्रकुर्वन्तु गोदानानि ददत्वपि ॥३७॥
मन्त्रांश्च वैष्णवांस्तत्र कृष्णनारायणस्य ह ।
गृह्णन्तु भक्तिकार्यार्थं ततः स्वास्थ्यं भविष्यति ॥३८॥
एवं तु कथिताः पाशुपतेशस्य कुटुम्बिनः ।
अभक्ष्यभक्षणं तत्यजुश्चक्रुर्ब्रह्मकूर्चकम् ॥३९॥
वैष्णवं च मखं चक्रुर्ददुर्दानानि सद्व्रताम् ।
'ओमनादिकृष्णनारायणः स्वामी पतिश्च मे' ॥४०॥
इतिमन्त्रं तथा चान्यान् मन्त्रांश्च जगृहुस्तदा ।
वैष्णवास्ते च सञ्जाता हरेकृष्ण जपन्ति च ॥४१॥
सर्वमेतत् कृतं चापि वैचित्र्यं न निवर्तते ।
तदा मञ्जुलकेशोऽपि निराहारोऽतिभक्तिमान् ॥४२॥
सप्ताहं चासने तिष्ठन् बालकृष्णजपान् व्यधात् ।
प्रार्थयामास चात्यर्थं सम्बन्धिनः समेत्य च ॥४३॥
अथाऽहं भक्तरक्षार्थं भक्तेच्छापूरणाय वै ।
ययावदृश्यरूपश्च शुश्राव कीर्तनादिकम् ॥४४॥
सप्ताहे तु व्यपगतेऽष्टमे दिने प्रगेऽर्चने ।
आरार्त्रिकोत्तारणेऽहं शालग्रामे स्वरूपवान् ॥४५॥
दिव्यरूपं मम तेभ्योऽदर्शयं श्रीप्रसेवितम् ।
तेजोमण्डलमध्यस्थं स्वर्णहारालिराजितम् ॥४६॥
दिव्यवेषं भूषणाढ्यं किरीटवरशोभितम् ।
शंखचक्रगदापद्मधरं चाशीःप्रदं शुभम् ॥४७॥
प्रसन्नवदनं कान्तं रक्षार्थं समुपागतम् ।
एतादृशं तु ते मां संवीक्ष्य मोहमुपाययुः ॥४८॥

लग्नास्तेषां तु सर्वेषां श्रीकृष्णे चित्तवृत्तयः ।
इन्द्रियाणि समस्तानि लीनानि मयि भासुरे ॥४९॥
यथा समाधिमातास्ते तथा लग्नास्तदाऽभवन् ।
मूर्तेर्मे परमानन्दं प्रापुस्तेऽलैभ्यमुत्तमम् ॥५०॥
सुखिता मे सुखेनैव ब्रह्मानन्दयुजोऽभवन् ।
मदन्यस्मृतिशून्याश्च स्वरूपमात्रवेदिनः ॥५१॥
अभवँस्ते यथा मुक्ता धामस्थाः स्थिरचेतनाः ।
एवं क्षणं सुखं दत्वा कृत्वा तेजोलयं ततः ॥५२॥
साधुरूपोऽभवं तूर्णं काषायाम्बरधृङ्मुनिः ।
मालां करे दधन् कृष्णनारायणेति संजपन् ॥५३॥
श्रावयन् भगवन्नाम चेतयन् बहिरानयन् ।
ते सर्वे मत्स्वरं श्रुत्वोत्तस्थुः समाधिभावतः ॥५४॥
अग्रे विलोकयामासुः साधुरूपं हरिं तु माम् ।
प्रणेमुः प्रेमयुक्तास्ते विह्वला दिव्यमानसाः ॥५५॥
श्रीकृष्णकृष्णकृष्णेतिजपन्तो मामुपाययुः ।
चक्रिरे दण्डवत् सर्वे निपेतुः पादयोश्च मे ॥५६॥
सुखं समाधौ यद् दृष्टं तद् दृष्ट्वा साधुवेषिणः ।
औज्ज्वल्यं चापि तद् दृष्ट्वा दृष्ट्वा प्रसन्नतां च ताम् ॥५७॥
युवत्वं चापि तद् दृष्ट्वा निश्चिक्युः प्रभुरागतः ।
साधुरूपो रक्षणार्थं भक्तेच्छापूरणाय वै ॥५८॥
अर्घ्यं च मधुपर्कं च श्रेष्ठासनं जलं ददुः ।
फलं च भोजनं योग्यं हृदयानि च ते ददुः ॥५९॥
सर्वस्वमर्पणं चक्रुर्निपेतुः पादयोर्मुहुः ।
पादसंवाहनं चक्रुर्भुजाभ्यां मां समाश्लिषन् ॥६०॥
प्रक्षाल्य पयसा पादौ दुग्धं पपुश्च ते तदा ।
धन्याः स्म भक्तयोगेन भगवन्तमुपागताः ॥६१॥
धन्यो मञ्जुलकेशोऽयं भक्तः पुत्रीपतेः पिता ।
धन्योऽस्माकं च जामाता यत्पिता हरितत्परः ॥६२॥
धन्या पुत्री सती साध्वी कृष्णलीलाभिधानिका ।
यस्याः श्वशुरो भगवत्प्रसन्नतां समार्जयत् ॥६३॥
अहो भक्तप्रसंगेन शतानां तु कुटुम्बिनाम् ।
सम्बन्धिनां शतानां च मोक्षणं जायते ध्रुवम् ॥६४॥
यत्र भक्तो भागवतो ग्रामेऽपि वसति प्रभुः ।
ग्रामीणास्ते भक्तयोगान्मुक्तिं यान्ति न संशयः ॥६५॥
यत्र भक्तो भवेद् ग्रामे तत्र पापानि देहिनाम् ।
नैव तिष्ठन्ति कमले नश्यन्ति भक्तकीर्तनैः ॥६६॥
यत्र भक्तस्य सञ्चारो मार्गे वास्त्वां गृहान्तिके ।
तत्र विघ्नानि नश्यन्ति मांगल्यं तु पदे पदे ॥६७॥
यद्ग्रामे भक्तवसतिस्तस्य सीम्नोऽन्तरे स्थले ।
याम्यदूता भयं प्राप्ताः प्रविशन्ति न वै क्वचित् ॥६८॥
यत्र भक्तनिवासो वै भूतले वा जलेऽम्बरे ।
तत्तीर्थं सर्वथा पापिदेहिनां तारकं शुभम् ॥६९॥
यत्र भक्तस्तत्र देवाः समायान्ति समर्हिताः ।
मुक्ता नारायणो लक्ष्म्यः समायान्ति वसन्ति च ॥७०॥
सिद्धयश्चापि योगाश्चैश्वर्याणि विविधान्यपि ।
वसन्ति भक्तसार्थास्ते स्मृद्धयः कल्पपादपाः ॥७१॥
वसवः पार्षदाश्चापि भक्तगृहे वसन्ति च ।
जंगमं चेतनं तीर्थं भक्तो भवति सर्वथा ॥७२॥
जयस्तत्र श्रियस्तत्र रसास्तत्र महर्द्धयः ।
धर्मस्तत्र महामोक्षो यत्र भक्तो विराजते ॥७३॥
भक्तापराधकर्तारो भक्तस्य कृपया हि ते ।
पापा अपि सुपुण्याः स्युर्भक्ता दयालवो यतः ॥७४॥
अस्माकं पापभाग्यं वै पुण्यात्मकं व्यवर्तत ।
अद्य भक्तप्रसंगेन धन्यो भक्तसमागमः ॥७५॥
द्वेषिणामपि मुक्तिर्वै श्रीकृष्णेन विधीयते ।
तथा नो द्वेषिणां मुक्तिर्मञ्जुकेशेन कार्यते ॥७६॥
अद्य यज्ञोऽपि सफलो दानानि सफलानि च ।
ब्रह्मकूर्चव्रतं चापि सफलं सफलं जनुः ॥७७॥
सफलाः स्मृद्धयोऽस्माकं चक्षूंषि सफलान्यपि ।
येषां गेहे हरिः साक्षात् साधुरूपो विराजसे ॥७८॥
पापं क्षमस्व भगवन् मद्यपानादिजं तु नः ।
भक्तापराधं भगवन् क्षमस्व पुरुषोत्तम ॥७९॥
शापो मञ्जुलकेशेन दत्तः पाशुपतेशके ।
वृद्धे चोन्मत्ततारूपो निवर्त्यतां रमापते ॥८०॥
यथा स्वास्थ्यं भवेदस्य विलीयेत विचित्तता ।
तथा साधो हरेकृष्ण शीघ्रं कृपां विधेहि नः ॥८१॥
एवं ते चार्थयामासुर्मञ्जुकेशोऽपि मां तदा ।
पाशुपतेशवैचित्त्यनाशार्थमार्थयन्मुहुः ॥८२॥
श्रुत्वा भक्तस्य वाञ्छार्थे दत्वा कमण्डलोर्जलम् ।
पाययित्वा द्रुतं पाशुपतेशं विप्रमेव च ॥८३॥
वैचित्त्यं नाशयामास तदाऽहं कमले द्रुतम् ।
अथ स्वस्थोऽभवत् सोऽपि सहसा भानवान् शुचिः ॥८४॥
पादसंवाहनं चक्रे मे ततो दण्डवन्नमः ।
गद्गदाक्षरवाण्या च क्षमस्वेति जगाद ह ॥८५॥
मोक्षं देहि कृपापारावार कृष्णेति चाह माम् ।
मया धैर्यं प्रदत्तः स पुपूज परमादरात् ॥८६॥

साधुयोग्यं समस्तं वै ददौ हृद्यं तु भावनम् ।
एवं विचित्ततां तस्य भक्तयोगादपाहरम् ॥८७॥
भक्तिं प्रदत्तवाँश्चापि मन्त्रं च दत्तवाँस्तदा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८८॥
अगृह्णँस्ते मन्त्रमिमं जेपुश्च परमादरात् ।
ग्रामीणाश्च चमत्कारं साधुं श्रुत्वा समाययुः ॥८९॥
सहस्रशो जना लक्ष्मि विप्राद्या वीक्ष्य मां तथा ।
चमत्कारं शुभं साक्षाद् वीक्ष्य मा शरणं ययुः ॥९०॥
सर्वे मन्त्रेण च मया संस्कृतास्ते तु वैष्णवाः ।
भूत्वा मां भेजिरे लक्ष्मि मयाऽऽशीर्वादयोजिताः ॥९१॥
अथाऽहं सम्प्रदायैव मञ्जुकेशाय सद्वरम् ।
यथेच्छसि तथा सर्वं वचनात्ते भविष्यति ॥९२॥
अयं पाशुपतेशोऽपि कुटुम्बसहितः खलु ।
भक्त्या मे चान्तकाले वै मुक्तिमेष्यति चोत्तमाम् ॥९३॥
अत्र ग्रामे तु ये भक्ता भजिष्यन्ति परेश्वरम् ।
ते ते सिद्धीः सुसंसिद्धाः प्राप्स्यन्ति पारमार्थिकीम् ॥९४॥
अत्र याम्या न यास्यन्ति विघ्ना यास्यन्ति दूरतः ।
भक्तिश्चात्र प्रतापात्ते भक्त लोकेषु वत्स्यति ॥९५॥
इत्युक्त्वाऽहं साधुरूपं संजहार तिरोऽभवम् ।
भक्तास्ते भक्तिमापन्ना भजित्वा मां ततोऽन्तिमे ॥९६॥
समये च विमानेन पार्षदैः सह पार्षदाः ।
भूत्वा धामाऽक्षरं मे ते ययुर्लक्ष्मि सुवर्चुलाः ॥९७॥
मञ्जुकेशोऽपि भक्तो मे ययौ धामाऽक्षरं मम ।
तद्योगेन मनुष्याश्च परेऽपि पदवीं पराम् ॥९८॥
नारायणस्य शरणं वैकुण्ठादौ ययुस्तथा ।
एवं भक्तस्य कमले दुःखहा सर्वदाऽस्म्यहम् ॥९९॥
पठनाच्छ्रवणादस्य स्मरणान्मननादपि ।
भुक्तिर्मुक्तिर्भवेदेव श्रीहरेर्मे प्रतापतः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मञ्जुलकेशाख्यभक्तविप्रशापेनोन्मत्ततां प्राप्तस्य पाशुपतेशविप्रस्य भगवता शापमोक्षणं परममोक्षणं च कृतमित्यादिनिरूपणनामा पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कथां भक्तस्य पावनीम् ।
वैराव्यग्रामवासस्य नाम्ना बाणांगणस्य तु ॥ १ ॥
बाणांगणोऽभवच्छूद्रो ह्यसच्छूद्रो ध्वजीश्वरः ।
मद्यं करोति वृक्षाणां रसानां बहुधा स हि ॥ २ ॥
वंशपरम्पराप्राप्तं कुरुते कर्म नित्यदा ।
विक्रयं च क्रयं कृत्वा कुटुम्बं निर्वहत्यपि ॥ ३ ॥
अथैकदा ययौ सार्थसंघातं प्राप्य रैवतम् ।
तीर्थं कर्तुं तथा कर्तुं विक्रयं च प्रदक्षिणम् ॥ ४ ॥
सहस्रशो जना यान्ति कार्तिके रैवताचलम् ।
सौराष्ट्रे वामने तीर्थे नारायणह्रदे तथा ॥ ५ ॥
रेवतीकुण्डके चापि भवेश्वरे मृगीस्थले ।
दामोदरे नारसिंहे स्वयंभूपरमेष्ठिनि ॥ ६ ॥
राधालये स्वर्णरेखानद्यां श्रीहनुमत्स्थले ।
गंगायां चापि चाऽम्बायां दत्तपादे वने वने ॥ ७ ॥
सीतावने रामवने पूर्वजाम्बूवने तथा ।
बोरियाद्रोणिकास्थल्यां काष्ठहारिवने तथा ॥ ८ ॥
देवसरोवरे चाम्रवणे भवेश्वरे पुनः ।
कुमुदाचलमावृत्य प्रदक्षिणं दधत्यपि ॥ ९ ॥
बाणांगणोऽपि मद्यानि विक्रेतुं शकटान्वितः ।
अयुताऽयुतसंख्याकैर्मानवैः सह याति हि ॥१०॥
तामसा ये रुद्रभक्ताः शाक्ता वा भैरवाश्रिताः ।
मद्यं पिबन्ति बहुधा तीर्थे कुर्वन्ति कार्तिके ॥११॥
साध्व्यश्च साधवश्चापि गृहस्था यतिनोऽपि च ।
वैष्णवा अपि तीर्थार्थं यान्ति प्रदक्षिणं तदा ॥१२॥
ऋषयः साधवः सत्यः कथाश्च विविधाः शुभाः ।
लक्ष्म्या नारायणस्यापि सत्याश्च शंकरस्य च ॥१३॥
सरस्वत्या वेधसश्च गायत्र्या रैवतस्य च ।
रेवत्या वामनस्यापि सतीनां च सतामपि ॥१४॥
द्विजाश्च पण्डिताश्चापि कुर्वन्ति च स्थले स्थले ।
पण्डिताश्चापि विद्वांसो वृद्धाश्च योगिनस्तथा ॥१५॥
योगिन्यो मातरश्चापि गायन्ति कीर्तनानि च ।
बाणांगणो दिव्यदृष्ट्या भक्त्या पानं ददाति च ॥१६॥
ये त्वायान्ति निजाऽनसः समीपे भिक्षुका जनाः ।
तेभ्यो ददाति पानानि पुण्यदृष्ट्या च सेवया ॥१७॥
अथ रात्रौ तथा प्रातः शृणोति कीर्तनानि च ।
भजनानि विविधानि दिव्यानि मोक्षदानि च ॥१८॥
कथायां तत्र वैष्णव्यां शुश्राव विष्णुकीर्तिताम् ।
वाणीं धर्मात्मिकां लक्ष्मि भक्त्यन्वितां हितावहाम् ॥१९॥
तीर्थं सदा प्रकर्तव्यं संसारं तर्तुमिच्छुकैः ।
तीर्थं द्वेधा भवत्येव पृथ्व्यां द्वयं हि लभ्यते ॥२०॥
स्थावरं जङ्गमं चेति तीर्थद्वयं भुवि स्थितम् ।
स्थावरं जलतीर्थादि पर्वतादि च मन्दिरम् ॥२१॥

अर्चा वनान्यरण्यानि वृक्षाश्चैत्याश्च भूमिकाः ।
जन्मस्थानानि देवानां सतां जन्मादिभूमयः ॥२२॥
तपःस्थानानि विप्राणां रजांसि गोस्थलानि च ।
तीर्थान्येतानि सर्वाणि स्थावराणि भवन्ति हि ॥२३॥
तेषु गत्वा स्नानपानावगाहनविलोकनैः ।
तरन्ति मानवाः शुद्धभावाः स्थावरसेविनः ॥२४॥
स्थावरेभ्यः प्रथमं वै पापानि प्रज्वलन्ति हि ।
ततः पुण्योदयश्चापि ततो भक्तिरुदेति च ॥२५॥
भक्त्या च देवतातुष्टिस्तुष्ट्या देवादिदर्शनम् ।
साक्षाद् दिव्यं जायते वै दिव्यता च ततो भवेत् ॥२६॥
दिव्यभावनया भक्तो वैराग्यं लभतेऽभितः ।
स्नेहं लभते चोत्कृष्टं परां भक्तिं प्रविन्दति ॥२७॥
पराभक्त्या भवेन्मोक्षः शनैः कालान्तरेऽपि च ।
तीव्रसंवेगिनो मोक्षः शीघ्रं स्थावरतोऽपि वै ॥२८॥
भवेत् क्वचित् कस्यचित्तु सर्वेषां नतु मोक्षणम् ।
तस्मात् स्थावरतीर्थानि न शीघ्रमोक्षदानि हि ॥२९॥
मन्दमध्यादिवेगानां श्रद्धामान्द्ये तु मन्दता ।
मोक्षेऽपि जायते लक्ष्मि चिरपावनलब्धितः ॥३०॥
ततः स्थावरतीर्थेभ्यो जंगमान्युत्तमानि वै ।
माताऽत्र जंगमं तीर्थं पिता तीर्थं च जंगमम् ॥३१॥
पतिस्तीर्थं जंगमं च सतीतीर्थं च जंगमम् ।
ऋषितीर्थं जंगमं च साध्वीतीर्थं च जंगमम् ॥३२॥
साधुतीर्थं जंगमं च योगितीर्थं च जंगमम् ।
संघतीर्थं जंगमं च यात्रातीर्थं च जंगमम् ॥३३॥
भक्ततीर्थं जंगमं च तपस्वितीर्थमुत्तमम् ।
आत्मनिवेदिभक्तस्तु तीर्थं श्रेष्ठं हि जंगमम् ॥३४॥
हरेरंशा देवताश्च ब्रह्मविष्णुमहेश्वराः ।
सतीलक्ष्मीसरस्वत्यस्तीर्थानि जंगमानि हि ॥३५॥
योगिन्यः सांख्ययोगिन्यस्तीर्थानि जंगमानि च ।
कामदुघा धेनवश्च मानवा व्रतशीलिनः ॥३६॥
ब्रह्मचर्यपरा मांसमद्यदोषविवर्जिताः ।
धर्माढ्याश्च जना भक्तास्तीर्थानि जंगमानि वै ॥३७॥
पुनन्ति दर्शनादेते स्पर्शात्प्रसेवनात्तथा ।
येषु मद्यं तथा मांसं पापरूपं न विद्यते ॥३८॥
अहिंसाव्रतमास्थाय भजन्ते परमेश्वरम् ।
सत्यं व्रतं समास्थाय कुर्वन्ति कीर्तनं कथाः ॥३९॥
अस्तेयव्रतमास्थाय दानं कुर्वन्ति वस्तुनः ।
ह्मचर्यं प्रपाल्यैव सेवन्ते गुरुसत्तमान् ॥४०॥

दयां व्रतं समास्थायाऽनाथसेवां दधत्यपि ।
आचार्यसेवनं गुरोः सेवनं धर्मसंयुतम् ॥४१॥
सर्वार्पणात्मकं पुण्यं कुर्वन्ति धार्मिका जनाः ।
देहभावं विहायैव सेवन्ते ब्रह्मभावनाः ॥४२॥
आत्मभावेन सेवन्ते प्रभुभावेन वै तथा ।
मोक्षभावेन सेवन्ते मुक्तभावेन वै तथा ॥४३॥
एवं प्रसेवितं लक्ष्मि जंगमं तीर्थमुत्तमम् ।
आशु धुनोति पापानि मोक्षमाशु ददात्यपि ॥४४॥
दृष्टाः स्पृष्टा नताश्चापि पूजिता भोजितास्तथा ।
पायिता वाहिताश्चापि सम्मर्दिताश्च चर्चिताः ॥४५॥
प्रसादिताश्चाम्बरिताः शृंगारिताश्च साधवः ।
रमिताश्चानन्दिताश्च हासिताः कीर्तितास्तथा ॥४६॥
आर्पिता आर्दिताश्चापि संवाहिताश्च शायिताः ।
भूषिता वन्दिताश्चापि सेविता धारिता हृदि ॥४७॥
सम्बन्धिताः संसर्गिता आश्लिष्टा निजवक्षसि ।
नीराजिता हारिताश्च सुगन्धिता द्रवादिभिः ॥४८॥
स्नापिताः स्नेहिताश्चापि पुनन्त्याशु हि साधवः ।
वासिताः क्षमिताश्चापि स्मृता आचामिता ह्यपि ॥४९॥
धूपिता दीपिताश्चापि कुंकुमिताश्च चन्द्रिताः ।
प्रदक्षिणीकृताश्चापि दण्डवत्प्रणतास्तथा ॥५०॥
हृदये स्वे धृताश्चापि पुनन्त्याशु हि साधवः ।
साधुतीर्थं परं तीर्थं साक्षान्नारायणात्मकम् ॥५१॥
अग्नितीर्थं पावनं वै सूर्यतीर्थं तथाविधम् ।
साधुतीर्थं पावनानां पावनं पंक्तिपावनम् ॥५२॥
साधुप्रसादः पुण्याढ्यः सर्वपापविनाशकृत् ।
साधुस्पर्शो महादीक्षा सर्वपापप्रणाशिनी ॥५३॥
साधुदर्शनमेवापीन्द्रियपापप्रणाशकम् ।
साधूपदेशस्तीर्थं तु चात्मकल्मषनाशकम् ॥५४॥
साधुसंकल्प एवाऽऽस्ते हरेः संकल्प उत्तमः ।
साधूनां हृदये चाऽहं लक्ष्मि वसामि सर्वथा ॥५५॥
साधूनां चरणे सर्वतीर्थानि निवसन्ति वै ।
साधूनां जंघयोः सर्वपुण्यानि निवसन्ति च ॥५६॥
जान्वोस्तु वै सतां सर्वयज्ञा वसन्ति पुण्यदाः ।
साधुसक्थ्नोः सर्वदेवा वसन्ति देविकास्तथा ॥५७॥
साधुगुह्ये चास्ति शीलं व्रतानि च तपांसि च ।
साधुकट्यां सिद्धयश्च वसन्ति सर्वसम्पदः ॥५८॥
साधूदरे सर्वर्षयो वसन्ति जठरेऽनलाः ।
साधोर्नाभौ निवसन्ति योगैश्वर्याणि सर्वथा ॥५९॥

साधोर्वक्षसि पितरो निवसन्ति सुधार्मिकाः ।
पार्श्वयोश्च सतां सर्वदानानि निवसन्ति वै ॥६०॥
कुक्ष्योः सतां निवसन्ति सागराः सर्वं एव च ।
साधोर्नितम्बयोः सर्वधिष्ण्यानि निवसन्ति ह ॥६१॥
साधोः पृष्ठे मेरुशैलः सर्वाश्रयो वसत्यपि ।
साधोस्तु स्कन्धयोः सर्वबलानि निवसन्त्यपि ॥६२॥
साधोः कण्ठे ब्रह्मधाम वसत्यपि परात्परम् ।
बाह्वोः सतां महेन्द्राद्या दिक्पाला निवसन्ति वै ॥६३॥
साधोः कफोणिकयोस्तु व्यूहा वसन्ति नित्यशः ।
साधोस्तु करयोर्लक्ष्मि श्रियः सर्वा वसन्ति च ॥६४॥
साधोर्हस्ततलयोस्तु भुक्तिर्मुक्तिश्च वर्ततः ।
साधोरङ्गुलिकासङ्घे चन्द्रसूर्यादयो ग्रहाः ॥६५॥
साधोर्नाडीषु सर्वासु नद्यः सर्वा वसन्ति च ।
साधोः रोमसु सर्वेषु वसन्ति कल्पपादपाः ॥६६॥
साधोर्ग्रीवापृष्ठभागे महारुद्रो विराजते ।
साधार्मले महामाया साधोर्वीर्ये हिरण्मयः ॥६७॥
पुरुषो राजते लक्ष्मि मायापाशविवर्जितः ।
साधोस्तु कर्मणोर्लक्ष्मि चिदाकाशो विराजते ॥६८॥
साधोश्चिबुके कमला राजते स्मृद्धिदायिनी ।
साधोरोष्ठे दिव्यविभूतयो वसन्ति सर्वदा ॥६९॥
साधोर्मुखेऽहमस्म्येव सर्वकार्यप्रवर्तकः ।
जिह्वायां तु सतां सर्वे वेदा वसन्ति मद्गिरः ॥७०॥
नासिकायां सतां भूमा वैराजश्च विराजतः ।
कपोलयोः सतां वैकुण्ठश्च गोलोक इत्युभौ ॥७१॥
गण्डयोश्च सतां महापुरुषश्च सदाशिवः ।
भ्रूकुटौ तु महाकालः संकर्षणो विराजते ॥७२॥
नेत्रयोर्ब्रह्मविद्या च साक्षात्कारोऽपि वर्ततः ।
ललाटे ब्रह्मतेजश्च सर्वधामानि सन्ति च ॥७३॥
मस्तके त्वक्षरं ब्रह्म ब्रह्मरन्ध्रे परः पुमान् ।
केशेषु सर्वमुक्ताश्च साधूनां निवसन्ति हि ॥७४॥
इच्छायां शक्तयः सर्वा मानसे ईश्वराः सताम् ।
बुद्धावुपासना चास्ते चित्ते ब्रह्मप्रियाः सताम् ॥७५॥
साधौ श्रीभगवांश्चास्ते निर्वाणः साधुसंगतौ ।
साधोः प्रसन्नतायां वै सर्वस्वर्गाणि सन्ति हि ॥७६॥
साधोः शयने प्रलयाः प्रबोधने तु सृष्टयः ।
समाधयः सुषुप्तौ तु ध्याने ब्रह्मपदं सताम् ॥७७॥
विवेके चोपनिषदो मालिकायां सुदर्शनम् ।
ब्रह्मशास्त्रे तु विज्ञाने नारायणात्ममात्मनि ॥७८॥
सर्वाऽस्थिष्वमृतह्रदा विराजन्ते सतां सदा ।
साधोर्मूर्तौ दिव्यभावाः कल्पलतास्तु पत्तले ॥७९॥
वक्षोमध्ये धर्मवंशः पन्थानौ स्तनयोरुभौ ।
आसने तु सतां सर्वदेवतानां तु पीठिकाः ॥८०॥
क्रियायां सर्वदेव्यश्च वसन्ति हि सतां सदा ।
भजने च सतां तत्र हरेस्तोषो हि वर्तते ॥८१॥
इत्येवं वै कथां रम्यां शुश्राव स ध्वजीश्वरः ।
मद्यविक्रयपापं च ज्ञातवान् शास्त्रवाक्यतः ॥८२॥
सोऽयं शुशोच हृदये मद्यविक्रयणं मया ।
त्यक्तव्यं सर्वदा चान्योद्यमो ग्राह्यो विकल्मषः ॥८३॥
कुलालस्य यथा मद्यं तथा मृत्पात्रघट्टना ।
कार्ये संविद्यते तस्मात् त्याज्यं पापं तु मद्यकम् ॥८४॥
विचार्येत्थं सन्तदासं साधुं भक्तिपरायणम् ।
नारायणह्रदे स्नात्वा प्रार्थयामास मद्यपः ॥८५॥
साधो कुलालकर्माऽस्मि मद्यपो मद्यकारकः ।
अद्य श्रुत्वा कथां स्नात्वा नारायणह्रदे त्वहम् ॥८६॥
भवच्छरणमापन्नः शुद्धं कुरु धुनोत्वघम् ।
श्रुत्वैवं सन्तदासस्तु ददौ वै वैष्णवं जलम् ॥८७॥
प्रसादं प्रददौ चापि ब्रह्मकूर्चव्रतं ददौ ।
ददौ मन्त्रं वैष्णवं च मालां च तौलसीं ददौ ॥८८॥
सकुटुम्बस्य तु बाणांगणाय शरणार्थिने ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८९॥
'हरे कृष्ण हरे विष्णो बालकृष्ण नमोऽस्तु ते' ।
इतिकीर्तनमन्त्रं च ददौ चक्रे सुवैष्णवम् ॥९०॥
आशीर्वादं ददावस्मै गुरुर्हरिर्मिलिष्यति ।
आशीर्वादं परं प्राप्य बाणांगणो निजालयम् ॥९१॥
प्रययौ चापि तत्याज मद्यस्य व्यवसायकम् ।
मृत्तिकापात्रनिर्माणव्यवसायं चकार ह ॥९२॥
भेजे मां परमात्मानं नित्यं करोति कीर्तनम् ।
कुटुम्बसहितस्तस्य स्नेहिभक्तस्य वै मया ॥९३॥
भक्तिर्दृष्टा परा शुद्धिसहिता नित्यमेव हि ।
भजते मां मे निवेद्य भुंक्ते पाति युनक्ति च ॥९४॥
चातुर्मास्यव्रतं चक्रे सकुटुम्बः फलादिभुक् ।
कार्तिके पूजनं चोद्यापनं चक्रे यथाव्रतम् ॥९५॥
एकादश्यां च वै रात्रौ चक्रे जागरणं ततः ।
द्वादश्यां प्रातरेवाऽहं प्रसन्नोऽस्मै स्वदर्शनम् ॥९६॥
ददौ लक्ष्मि श्रिया युक्तः शंखचक्रगदाधरः ।
वीक्ष्य मां दण्डवच्चक्रे पुपूज परमादरात् ॥९७॥

कुटुम्बसहितो मे च शरणं पतितो मुहुः ।
प्रार्थयामास च तदा समुद्धर भवार्णवात् ॥९८॥
हरे कृष्ण बालकृष्ण समुद्धर भवार्णवात् ।
अथाऽहं मे चरणस्य वारि पाने ददौ तदा ॥९९॥
ययौ कुटुम्बसहितः पुण्यात्मा ह्यभवत्तदा ।
निवृत्तबन्धनस्तूर्णं मुक्त्यर्थं नद्धमानसः ॥१००॥
त्वरितोऽभूत्तदा लक्ष्मि देहमत्याजयं त्वहम् ।
विमानवरमेवैनमध्यारोह्यमाश्रितम् ॥१०१॥
अप्रेषयं मम धामाऽक्षरं तं पार्षदैः सह ।
अथाऽस्याऽपि कुटुम्बं वै यथाऽऽयुष्यक्षयागते ॥१०२॥
अनयं क्रमशो धामाऽक्षरं मे सद्वचःस्थितः ।
एवं भक्तस्य तस्यैव सतां योगेन कल्मषम् ॥१०३॥
प्रज्वाल्य सर्वमेवाऽस्मै ददौ धामाऽक्षरं मम ।
बाणांगणो ययौ मोक्षं कुटुम्बं चोत्तरोत्तरम् ॥१०४॥
मोक्षं ययौ वैष्णवं तद् भूत्वा पावनमक्षरम् ।
पठनाच्छ्रवणाच्चास्य स्मरणान्मोक्षणं भवेत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने बाणांगणाख्यस्य मद्यविक्रेतुः साधुसमागमेन भगवता मोक्षः कृतः साधोः मूर्तेर्विभूतयश्चे-त्यादिनिरूपणनामा षडशीत्यधिक-शततमोऽध्यायः ॥ १८६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं तथा चान्यकथां शुभाम् ।
बवलाख्ये पुरे त्वासीच्चर्मकारो मृतादनः ॥ १ ॥
ग्रामोपशल्यवासश्च मृतानां खुरिणां सदा ।
पशूनां ग्राममध्यात् स शवानामपहारकः ॥ २ ॥
चर्मशुद्धिकरश्चाप्यस्पृश्यो दूरे प्रतिष्ठति ।
मृतमांसादनश्चासीत् सकुटुम्बः सदा ह्यघी ॥ ३ ॥
क्वचिद् वसतिमासाद्य कृत्वा तु चर्मविक्रयम् ।
प्राप्तधनेन गोधूमाद्यन्नं शाकफलादिकम् ॥ ४ ॥
क्रीतं स्वगृहमानाय्य पाचयित्वा भुनक्त्यपि ।
क्वचिच्चारण्यमार्जारैः शृगालैः शशकैस्तथा ॥ ५ ॥
वाराहैश्च तरक्ष्वाद्यैः क्वचित् कच्छपमत्स्यकैः ।
विदधाति कुटुम्बस्य भोजनं पिशिताशनः ॥ ६ ॥
एवं जात्या कर्मणा च भोजनेनाऽतिकिल्बिषी ।
मृतादनाख्यश्चर्मकृद् दूरे त्याज्योऽवसत् सदा ॥ ७ ॥
अथैकदा तु वर्षायां पतितायामहर्निशम् ।
जलपूरं समायातं बहुवेगं समन्ततः ॥ ८ ॥
तत्रैके प्राणिनो जीवा उह्यन्ते वनिनस्तदा ।
मृताश्च जीविनश्चापि ग्राम्याश्च पशवोऽपि च ॥ ९ ॥
ये चरन्ति तृणक्षेत्रे गोचरे तेऽपि केचन ।
पूरवेगेन वर्षायां गृहं मन्तुं न शेकिरे ॥१०॥
एका गौः पूरवेगेन चोह्यमाना तु जीविता ।
चर्मकारस्य वासस्योच्छ्रायस्यैव समीपतः ॥११॥
जलैश्चाकृष्यमाणा सा निर्गता वीक्षिता तदा ।
चर्मकारेण दययोद्धर्तुं गां वै समीहितम् ॥१२॥
मृतादनः स्वयं पुष्टस्तर्तुं शक्तो बली दृढः ।
शतहस्तमितां रज्जुं कट्यां बध्वा जलेऽपतत् ॥१३॥
रज्जुप्रान्तं द्वितीयं तु दत्वा दोष्षु कुटुम्बिनाम् ।
अपरां च दृढां रज्जुं मुकुलितां गलेऽक्षिपत् ॥१४॥
पतित्वा सहसा वारिवेगे वहति यत्र गौः ।
तीर्त्वा वेगेन तस्यास्तु निम्नभागे पुरोऽभवत् ॥१५॥
पूरेण चोह्यते धेनुश्चर्मकारोऽपि चोह्यते ।
तीरस्था रज्जुकाश्च ये तेऽनुधावन्ति तं तटम् ॥१६॥
तरता चर्मकारेण हस्तस्य लाघवेन वै ।
मुकुलिताया रज्ज्वास्तु प्रान्तो धेनुगले कृतः ॥१७॥
ग्रन्थिः कृता च सहसा शृंगयोर्निहिता तु सा ।
रज्जुं कृत्वा लम्बमानां प्रान्तं कट्यां बबन्ध सः ॥१८॥
अथ कुटुम्बिनः प्राहाऽऽकर्षयन्तु बलादिति ।
कुटुम्बिभिश्च सा रज्जुराकृष्टा स्वकरधृता ॥१९॥
चर्मकारः पूरवेगात् तटमाकर्षितोऽभवत् ।
धेनुश्चापि कटिरज्जुबद्धा चाऽऽकर्षिताऽभवत् ॥२०॥
तीरं प्रति समाकृष्टा मिलित्वा तु कुटुम्बिभिः ।
चर्मकारेण सहिता सजीवा तीरमागमत् ॥२१॥
तदा गौः प्राणसंरक्षातुष्टाऽऽशीर्वादमाह तान् ।
भवतां सर्वपापानि नष्टानि मम रक्षणात् ॥२२॥
गोदाने यत्फलं गोजीवने यच्च फलं महत् ।
गोसेवायां फलं यच्च तत्सर्वं भवतां भवेत् ॥२३॥
प्रसूयमानाधेन्वाश्च दाने यत् फलमुच्यते ।
तत्फलं भवतामस्तु मम प्राणप्ररक्षणात् ॥२४॥
स्वर्णधेनुफलं यच्च कपिलाधेनुजं फलम् ।
गोमेधे च फलं यत् तदस्तु वो मम रक्षणात् ॥२५॥
पृथ्वीरक्षाफलं यच्च प्रजारक्षाफलं तु यत् ।
कन्यारक्षाफलं यत्तदस्तु वो मम रक्षणात् ॥२६॥

सतीरक्षाफलं यच्च बालरक्षाफलं च यत् ।
विप्ररक्षाफलं यत्तदस्तु वो मम रक्षणात् ॥२७॥
साधुरक्षाफलं यच्च देवरक्षाफलं च यत् ।
शरणागतरक्षोत्थं यत्तदस्तु ममाऽवनात् ॥२८॥
भीतरक्षाफलं यच्च प्राणरक्षाफलं च यत् ।
मोक्षदानफलं यत्तदस्तु वो मम रक्षणात् ॥२९॥
धर्मरक्षाफलं यच्च गर्भरक्षाफलं च यत् ।
मातृसेवाफलं यच्च वोऽस्तु तन्मम रक्षणात् ॥३०॥
देवपूजाफलं यच्च मृत्युत्राणफलं च यत् ।
गंगातीर्थफलं यत्तद् वोऽस्तु मम प्ररक्षणात् ॥३१॥
ब्रह्महत्यादिपापानि पशुहिंसोद्भवानि च ।
मांसभक्षणपापानि लीयन्तां मम रक्षणात् ॥३२॥
गवार्थे ब्राह्मणार्थे वा साध्वर्थे च सतीकृते ।
देवार्थे प्राणदातुस्तु सर्वपापविनाशनम् ॥३३॥
मदर्थे प्राणदा यूयं मदर्थे कृतजीवनाः ।
मम रक्षाकरा यूयं जीवन्तु ऋद्धिसेविताः ॥३४॥
भुक्तिं मुक्तिं महासमृद्धिं भुञ्जन्तु स्वर्गसदृशीम् ।
वंशो वोऽस्तु सदा भक्तो भक्तिमान् गवि गोपतौ ॥३५॥
गोपाले गोपिकाकान्ते गोविन्दे गोपबालके ।
गोपालबालके स्नेहो गोलोके वसतिश्च वः ॥३६॥
इत्येवं गौर्ददौ तेभ्यश्चाशीर्वादाँस्तदा शुभान् ।
कम्पनाना भयोद्विग्ना शीतार्त्ता क्षुधिता तथा ॥३७॥
अथ शनैश्च तां धेनुं सगर्भां चाश्रयेच्छुकीम् ।
निनाय चर्मकारः स स्वालये तां ररक्ष ह ॥३८॥
ददौ घासोत्तमग्रासान् सिषेवे तृणवारिभिः ।
नास्याः कश्चित् समायाति स्वामी नेतुं न विद्यते ॥३९॥
ततः सा चर्मकारस्य गृहे वासं व्यधाच्च गौः ।
तृणान्यत्त्वा पार्श्वभूमौ सायमागत्य तिष्ठति ॥४०॥
चर्मकारो निजां मत्वा सेवते तु यथाबलम् ।
दरिद्रोऽपि यतित्वाऽपि गोऽर्थे तृणं जलं मुहुः ॥४१॥
आनयत्येव क्षेत्राद्वा वनाद्वा दूरभूमितः ।
एवं प्रसेवमानस्य मृतादनस्य तस्य हि ॥४२॥
गोसेवायाः फलं धेनोराशीर्वादफलं तथा ।
प्राप्तं तेनैकदा प्रातः प्रेरितस्तु मृतादनः ॥४३॥
अद्य गृहं विलिम्पामि गौरमृदा च शकृता ।
विचार्येत्थं स्त्रिया साकं नीत्वा सीतां खनित्रिकाम् ॥४४॥
वंशपात्रद्वयं चापि मृदमाहर्तुमेव ह ।
नदीतीरं ययौ यत्र गौरमृद् लभ्यते शुभा ॥४५॥
सीतया च खनित्रेण गर्ते खनति मृत्तिकाम् ।
वितस्तिमात्रं खनितं तीरे पार्श्वगभूस्तरम् ॥४६॥
तावच्चरुस्ताम्रधातोः स्वर्णरूप्यकसंभृतः ।
निर्गतो भूतलमध्याच्छोभनो दैववाञ्छया ॥४७॥
मृतादनेन शीघ्रं वै तस्मात् स्वर्णस्य मुद्रिकाः ।
निष्कास्य वंशपात्रे मृत्तिकागुप्ताश्च वै गृहम् ॥४८॥
आनीता पञ्चपात्राणि न तु जानाति कश्चन ।
गृहान्तरे तु विवरे सर्वाः क्षिप्ताः सुगोपिताः ॥४९॥
गोसेवायाः फलं मत्वा सेवते गां सभार्यकः ।
ताम्रपात्रं तु गर्ते वै यथाऽऽसीत् तत्तथा पुनः ॥५०॥
रिक्तं निधाय संगोप्य मृद्भिर्गृहं गतो हि सः ।
यथापेक्षं नाणकेन भुंक्ते सुखानि सर्वथा ॥५१॥
भुंक्ते भोजनपानानि वस्त्राणि मोदकानि च ।
यथाऽन्ये नैव जानीयुस्तथा भुंक्तेऽर्जितं धनम् ॥५२॥
तेन पथा समायातानतिथीन् सेवतेऽपि च ।
गोष्ठे स्थितान् द्रुमच्छायाप्रदेशे सेवतेऽतिथीन् ॥५३॥
फलानि शर्कराश्चापि मधुपर्कं ददात्यपि ।
वस्त्रं जलं यथापेक्षं ददाति चणकादिकम् ॥५४॥
घृतपक्वं तैलपक्वं पक्वं च वह्निनाऽपि यत् ।
सूर्यपक्वमृतुपक्वमन्नं ददाति साधवे ॥५५॥
योग्यं ददाति नाऽयोग्यं सेवते साधुयोगिनः ।
कुटुम्बं सेवते साधून् शृणोति भजनानि च ॥५६॥
कथां शृणोति मे रम्यां साधूक्तां पावनीं पराम् ।
अहिंसा परमो धर्मो विघसाशी प्रमुच्यते ॥५७॥
मांसादनं महत्पापं याम्यपुरीप्रयोजकम् ।
मत्स्यादः सर्वमांसाशी कदापि नैव मुच्यते ॥५८॥
अभक्ष्यभक्षणाद् भ्रष्टो न याति मोक्षणं क्वचित् ।
याम्यदूताः पीडयन्ति रन्धयन्ति यमालये ॥५९॥
तं तु मांसादनं नित्यं पाचयन्ति महानले ।
निकृन्तन्ति मारयन्ति नरके पातयन्ति च ॥६०॥
मद्यं मांसं तथा चौर्यं व्यवायश्चेति कल्मषम् ।
भयंकरं महाघोरं कर्तव्यं नैव मानवैः ॥६१॥
जन्म चेदं मानवं वै मोक्षाय लभ्यते भुवि ।
मोक्षः साध्यो मानवैर्वै त्याज्या दोषा अघानि च ॥६२॥
बहुष्वपि तु देहेषु पक्षिषु च पशुष्वपि ।
मद्यमांसादयो भुक्तास्तत्पापान्तो न विद्यते ॥६३॥
अस्मिन् वै मानवे भावे पुण्यं कार्यं दिव्यप्रदम् ।
भक्तिः कार्या हरेश्चापि मोक्षो गम्यः परेऽक्षरे ॥६४॥

एवं कथां पावनीं च चर्मकारः शृणोति वै ।
ततोऽस्य जाता सहसा मुमुक्षा साधुसंगतः ॥६५॥
नियमान् जगृहे चाऽहिंसां च मांसादिवर्जनम् ।
अन्नभोजित्वमेवापि नित्यं श्रीहरिसेवनम् ॥६६॥
साधूनां सेवनं गवां सेवनं पापवर्जनम् ।
दानं यथार्हं पात्राय भगवत्कीर्तनं तथा ॥६७॥
व्रतोत्सवांश्च देवानां चातुर्मास्यव्रतानि च ।
एवंविधान् स नियमान् जग्राह मोक्षदान् सदा ॥६८॥
अथ साधुर्धर्मशालायनो नाम्नाऽटवीं भ्रमन् ।
निरम्बरः समायातश्चर्मकारगृहान्तिकम् ॥६९॥
ददर्शैनं चर्मकारो योगिनं योगमानसम् ।
स्मरन्तं परमात्मानं जपमालान्वितं शुभम् ॥७०॥
दिगम्बरं प्रशान्तं च निर्विकारं स्थिराशयम् ।
शीलव्रतं रागशून्यं सुरूपं जटिलं मुनिम् ॥७१॥
चर्मकारस्तु तं गत्वा प्रणाममकरोन्मुदा ।
स्वागतं ते महाभाग साधो जयोऽस्तु ते सदा ॥७२॥
आयाहि मम वासेऽत्र चर्मकारोऽस्मि जातितः ।
यदि त्वं मन्यसे साधो गृहं पावय मेऽनघ ॥७३॥
श्रुत्वा शालायनः प्राह कल्याणं सत्यवादिनः ।
तवाऽस्तु साधुभक्तस्य भक्तस्य भगवानपि ॥७४॥
वशीभवति दिव्यात्मा तत्र साधोस्तु का कथा ।
पावना भगवद्भक्ता अपि चाण्डालयोनयः ॥७५॥
चर्मकाराः प्रजाः सर्वाश्चर्मनद्धा भवन्ति हि ।
चर्मगर्भे चर्मयोनौ प्रजायन्ते हि चर्मतः ॥७६॥
चर्मस्नानं कारयन्ति चर्म शृंगारयन्ति च ।
चर्मण्येव च तैलाद्यैः कुर्वन्ति मर्दनादिकम् ॥७७॥
भूषाम्बराणि देहाय चर्मिणे चार्पयन्त्यपि ।
चर्ममयं जगत् सर्वं को नास्ति चर्मकारकः ॥७८॥
ब्रह्मा चर्मकारश्चास्ते तत्पुत्राश्चर्मकारकाः ।
भक्त त्वं चर्मकारोऽसि चर्मकारस्य वंशजः ॥७९॥
प्रजानां चर्मकारत्वे विशेषो नास्ति कश्चन ।
मुग्धा ये चर्मविषये चर्मकारा हि ते मताः ॥८०॥
अमुग्धाश्चर्मविषये ब्रह्माकारा हि ते मताः ।
साधवो ब्रह्मसदना ब्रह्माकारा बृहत्प्रियाः ॥८१॥
आत्माऽयं विद्यते यावद् देहे स चर्मकारकः ।
अदेहो जायते भक्त्या मोक्षो स ब्रह्मकारकः ॥८२॥
अहमात्मा साधुरूपो ब्रह्मरूपो भवामि ह ।
हरेर्भक्त्या स्नेहमय्या ब्रह्माकारो भवाम्यहम् ॥८३॥
भक्त त्वं साधुयोगेन ब्रह्माकारो भवस्यपि ।
साधुभक्ताः साधुरूपाः साधुकारिण एव ते ॥८४॥
साध्वर्थं यस्य सर्वस्वं ब्रह्मात्मा चोच्यते हि सः ।
स एव पापरहितः पुण्यात्मा पंक्तिपावनः ॥८५॥
इत्येवमुक्त्वा साधुः स ययौ तस्यालयं तदा ।
चर्मकारो भक्तराजश्चक्रेऽस्य स्वागतं शुभम् ॥८६॥
आसनं प्रददौ रम्यं पादप्रक्षालनं व्यधात् ।
पपौ पादामृतं सर्वं कुटुम्बसहितो हि सः ॥८७॥
पादसंवाहनं चक्रे देहसम्मर्दनं तथा ।
मधुपर्कं ददौ मिष्टं शर्करां सक्तुमित्यपि ॥८८॥
ददौ फलानि श्रेष्ठानि पक्वानि विविधानि च ।
जलं च शयनं चापि ददौ विश्रान्तिहेतवे ॥८९॥
पुत्राः पुत्र्यो दम्पती च सर्वे देहस्य मर्दनम् ।
भोजयित्वा प्रचक्रुर्वै मार्गश्रमनिवृत्तये ॥९०॥
साधुर्निद्रां परां लेभे सर्वे चक्रुश्च मर्दनम् ।
देहसंवाहनं चापि व्यजनेनाऽनिलाऽर्पणम् ॥९१॥
एवं सेवां प्रचक्रुस्ते धर्मशालायनस्य वै ।
धर्मशालायनो निद्रां कृत्वा च बुबुधे तदा ॥९२॥
जलं पीत्वा निषसादासने मालाजपान्वितः ।
मृतादनाद्याश्चाग्रेऽस्य निषेदुर्भक्तिभावतः ॥९३॥
साधुः प्राह सदा भक्तिः कर्तव्या परमात्मनः ।
गोसेवा साधुसेवा च कर्तव्या मुक्तये त्विह ॥९४॥
गृहाण मन्त्रं दिव्यं त्वं कुटुम्बेन युतो हि मत् ।
स्वर्गं दिव्यं ततो मोक्षं लप्स्यसे नाऽत्र संशयः ॥९५॥
इत्युक्तश्चर्मकारः स कुटुम्बसहितस्तदा ।
मन्त्रं जग्राह साधोश्च 'हरेकृष्णनरायण' ॥९६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
बालकृष्णं ततो भेजे साधूक्तपद्धतिं व्रजन् ॥९७॥
ततः स तीर्थयात्रायां साधुना सह वै ययौ ।
कुंकुमवापिकाक्षेत्रं चाश्वपट्टसरोवरम् ॥९८॥
सुवर्णं बहुधा तत्र दाने यज्ञे समार्पयत् ।
मन्दिरं कारयामास सरस्तटे तथा च सः ॥९९॥
आश्रमं रचयामास भजनार्थं निजं शुभम् ।
वंशेन सहितस्तत्र साधुना सह चाऽवसत् ॥१००॥
अथैकदाऽहं कमले प्रसन्नस्तत्र चाययौ ।
दर्शनं स्वं ददौ तस्मै चतुर्भुजं सुतैजसम् ॥१०१॥
कुटुम्बं पूजयामास श्रीकृष्णं मां सनातनम् ।
मृतादनो मम पादवारि प्रक्षाल्य संपपौ ॥१०२॥

विमानं तूर्णमायातं ब्रह्मधाम्नोऽतिभासुरम् ।
तत्र मृतादनश्चाध्यरोहन् मम निदेशतः ॥१०३॥
गवा साकं तया तत्राऽनयं तं मम धाम वै ।
अन्यत् सर्वं कुटुम्बं च स्वर्गं देवास्ततोऽभवन् ॥१०४॥
पुण्यं भुक्त्वा धेनुवृत्तं यास्यन्ति धाम मे परम् ।
साधुसेवाप्रपुण्यं च मम भक्तेः फलं तथा ॥१०५॥
मोक्ष्यन्ते रुचिरं लक्ष्मि शाश्वतानन्दपूरितम् ।
एवं गोसेवया मांसादनपापं विनाशितम् ॥१०६॥
पुण्योद्भवेन च साधुसमागमो धनागमः ।
तीर्थवासः परामुक्तिः सर्वं तस्य व्यवर्तत ॥१०७॥

पठनाच्छ्रवणादस्य स्मरणान्मननादपि ।
मुक्तिर्भुक्तिर्भवेच्चापि शाश्वतं पदमर्प्यते ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मृतादननामकचर्मकारस्य धेनोः प्राणरक्षणेन मांसादनादिपापनाशः पुण्यप्राप्तिः साधोः समागमः स्वर्गं मोक्षश्चेत्यादिनिरूपणनामा सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं स्तेनस्य मोक्षणं शुभम् ।
आसीत् शंकुधराख्यो वै स्तेनो मालव्यपत्तने ॥ १ ॥
स्तेनावासे कृतावासः स्तेनमण्डलपुष्टिकृत् ।
स्तैन्ययात्रापरश्चास्ते रात्रौ शस्त्रादिधारकः ॥ २ ॥
भिन्नवेषधरश्चापि भिन्नकर्मा भवत्यपि ।
भेदं ज्ञात्वा प्रवेशस्य यथा यत्नेन सर्वथा ॥ ३ ॥
रात्रौ कृत्वा च संकेतं धनचौर्यं करोति हि ।
क्वचिदश्वे क्वचिदुष्ट्रे क्वचित्तु दीर्घगर्दभे ॥ ४ ॥
धनभारं निधायैव दूरं याति द्रवन् हि सः ।
एवं देशान्तरे गत्वा चोरयित्वा धनानि वै ॥ ५ ॥
आनाय्य स्वगृहं चौरैर्विभज्य स्वं प्ररक्षति ।
उत्सवं कुरुते चापि भुंक्ते खादति मोदते ॥ ६ ॥
चौर्यं तु सर्वथा कार्यं चान्यत् कार्यं न विद्यते ।
स्तैन्योद्यमः स्तैन्यचिन्तः स्तैन्यध्यानपरोऽस्ति सः ॥ ७ ॥
स्तैन्योदरभरश्चास्ते कुटुम्बोदरपूरकः ।
कदाचिद् यत्र देवानामुत्सवो वा महान् भवेत् ॥ ८ ॥
पारेसहस्रं जनता मिलन्ति यत्र तीर्थके ।
चैत्ये वा मन्दिरे चाद्रौ ग्रामान्ते वा नदीतटे ॥ ९ ॥

देवालये च वा तत्र यात्ययं चौरमण्डलः ।
मार्गयत्येव सर्वत्र द्रव्याणि कुत्र सन्ति हि ॥१०॥
निर्जनं वा कदा कुत्र जायते धनिनो गृहम् ।
क्व मार्गो वा प्रवेशस्य निःसृतिर्वा क्व वा कथम् ॥११॥
कथं लब्धिः कथं स्वस्य रक्षा प्रच्छन्नता कथम् ।
एवं स्वध्याननिरतः ससार्थः शंकुधारकः ॥१२॥
अन्यान्यपत्तने चौर्यं कृत्वा चाहरते धनम् ।
एवंविधस्य तस्यैवैकदा स्वप्नं निशोत्तरे ॥१३॥
अभवत् स्वर्णरत्नानां लब्ध्यात्मकमसीमकम् ।
अरण्ये पूर्वमेवाऽऽसीद् राजधानीत्यलोकयत् ॥१४॥
स्वप्ने तत्र वने दूरे निर्जने कोषमुत्तमम् ।
सुवर्णरत्नखचितं पुरा राज्यप्ररक्षितम् ॥१५॥
गुप्तं कोषं न जानाति कश्चिदन्यो यथा तथा ।
प्रातरुत्थाय भुक्त्वाऽयं विहारव्याजतो ययौ ॥१६॥
स्वप्ने यथा ददर्शाऽयं वनं मार्गं पुराणकम् ।
वृक्षघटां च पाषाणान् पृथ्वीं प्राच्यस्तरान्विताम् ॥१७॥
प्राचीनवसतिं तत्र दर्शयित्रीं पुराऽङ्कनैः ।
तथा सर्वं ददर्शाऽयं स्तेनो विश्वासमासवान् ॥१८॥
पूर्वजन्मनि ये प्रोताः संस्काराश्चिरकालिनः ।
अंकुरयन्ति कमले जन्मान्तरे न संशयः ॥१९॥
चौरोऽयं पूर्वकाले तु सहस्रवर्षपूर्वगे ।
राज्ञः कोषाध्यक्ष आसीत् सुहोत्रस्य तु भूभृतः ॥२०॥
सुहोत्रस्य तदा तत्र नगरी पितृनामतः ।
कांचनेन जनकेन कृताऽऽसीत् काञ्चनी पुरी ॥२१॥
चन्द्रवंशीयराज्ञः सा कोषरक्षामयी ह्यभूत् ।
अथ कालान्तरे कोषा निष्कासिताः स्थलान्तरे ॥२२॥
नीताश्च निहिताः सर्वे तथापि कपटेन वै ।
अपजापकनाम्ना वै कोषाध्यक्षेण सर्वथा ॥२३॥
अन्ये यथा न जानीयुस्तथा कोषस्तु नै मनाक् ।
सुवर्णानां च रत्नानां पृथक्कृत्य निगर्तितः ॥२४॥
तत्रैव शेषितो नैजस्वार्थार्थं कपटेन ह ।
अथ कालान्तरे याते चिरं काले गतेऽपि वै ॥२५॥
अपजापो न वै नेतुं शशाक गुप्तकोषकम् ।
एवमेव मृतस्तत्र मालव्यपत्तने नवे ॥२६॥
चौर्यदोषेण याम्यां वै नगरीं प्रापितो यमैः ।
लोहदण्डैस्ताडितः स दुःखायितश्च कुण्डके ॥२७॥
पाशैश्च मुद्गरैर्दण्डैर्दण्डायितो मुहुर्मुहुः ।
पापभोगोत्तरं मुक्तो वने तत्र हि निर्जने ॥२८॥

प्रेतरूपोऽभवन्नान्यं गन्तुं ददाति तत्स्थलम् ।
अरण्ये रमते नित्यं कोषं पश्यति केवलम् ॥२९॥
भुंक्ते वन्यं समस्तं च कोषद्रुमे वसत्यपि ।
एवं त्वष्टशतान्यस्य वर्षाणां विगतानि वै ॥३०॥
प्रेतस्य निर्जने तत्र तदा प्राचीनभूतले ।
तपस्तप्तुं समायतो विप्रो नाम्ना सुमन्तुकः ॥३१॥
वने विज्ञाय रमणीं तपोयोग्यां शुभस्थलीम् ।
निर्विघ्नां वृक्षवल्ल्यादिस्तम्बाढ्यां सुजलापगाम् ॥३२॥
नातिदूरे वटवृक्षच्छायामाश्रित्य तापसः ।
तपश्चक्रे भजन् कृष्णं श्रीपतिं पुरुषोत्तमम् ॥३३॥
अथ सम्वत्सरे याते प्रेतोऽयं पुण्यशालिनम् ।
मत्वा चोद्धारकर्त्तारं निजस्येति तु तापसम् ॥३४॥
किरातरूपमास्थाय वटच्छायां तु तत्पुरः ।
ययौ नमन् प्रशंसँश्च तपस्तस्य महात्मनः ॥३५॥

सुमन्तुस्तपसा त्वेनं जानाति प्रेतरूपिणम् ।
तथापि तं स्वागतं वै चक्रे वटगृहागतम् ॥३६॥
वनिनं कृष्णवर्णं च कृशं च दुःखिनं तु तम् ।
पप्रच्छ मुनिराड् देहिन् कुशलं ते वनिन् त्विह ॥३७॥
प्रेतो जगाद कुशलं तापसस्य प्रतापतः ।
मुनिः पप्रच्छ वासं च ग्रामं धर्मं च कर्म च ॥३८॥
प्रेतो निष्कपटो भूत्वा वृत्तान्तमाह चादितः ।
पूर्वमासं त्विह कोषाध्यक्षः कपटपापवान् ॥३९॥

मृत्वा याम्यपुरीं गत्वा भुक्त्वा दुःखानि यातनाः ।
प्रतारणफलं किंचिदवशिष्टं प्रलभ्य च ॥४०॥
जातोऽस्म्यत्र वने प्रेतो दयया मां विमोचय ।
एवं स उक्तवाँस्तस्मै कोषं नाऽदर्शयत्तदा ॥४१॥
दयालुः स ऋषिस्तस्मै गायत्रीं प्रजपन् जलम् ।
ददौ प्रेतस्य मुक्त्यर्थं प्रेतता विगताऽस्य च ॥४२॥

किन्तु चौर्यस्वभावेन कापट्येन तु मानवे ।
मालव्यपत्तने चाऽयं चौरः शंकुधरोऽभवत् ॥४३॥
पूर्वसंस्कारसहितश्चौर्यनिष्णात एव सः ।
एवं स्तैन्यपरस्याऽस्य लक्ष्मि संस्कारसद्बलात् ॥४४॥
स्वप्नेऽस्य स्मरणं जातं कोषस्य पूर्वजन्मनः ।
तं कोषं वै ततो द्रष्टुं ययौ तु निर्जने वने ॥४५॥
सर्वं विलोकयामास सचिह्नं स्वप्नभालितम् ।
प्रसन्नोऽभूत्तदा चाऽसौ मानवो लोभपुष्कलः ॥४६॥

वटं ददर्श तत्रैव तापसस्य पुरा स्थलम् ।
तपस्वी तत्र नास्त्येव वटस्तु विद्यते शुभः ॥४७॥
सुमन्तुकस्तु तपसा दिव्यदेहो यतोऽभवत् ।
वटे तिरोभवन्नास्ते तपस्वी दिव्यविग्रहः ॥४८॥
शंकुधरस्ततो नैव ददर्श तं तपस्विनम् ।
वटमात्रं ददर्शैव नेमे वटं पुरा स्मरन् ॥४९॥
ययौ स्थलं तु कोषस्य तृप्तिं मत्वा सुवर्णजाम् ।
आययौ सुप्रसन्नश्च स्वगृहं सायमेव ह ॥५०॥

अथैकलः स्वहृदये चिन्तयामास वै मुहुः ।
कथंकारं धनं तस्मादानेयमत्र वै मया ॥५१॥
यथा चान्ये न जानीयुस्तथा चाहार्यमेव तत् ।
वने तत्र निवासं वै कृत्वा शनैः शनैरिह ॥५२॥
मया त्वेकाकिना चानेतव्यं वै छद्मना सदा ।
इत्येवं सम्विचार्यैव चौर्यमिषेण चैकलः ॥५३॥
उक्त्वा गृहजनान् शस्त्राण्यादाय तद्वनं ययौ ।
यावत् खनति चौर्येण शनैः शनैस्तमस्यपि ॥५४॥

आप्रातः खननं कृत्वा वटस्याऽधो ययौ क्षणम् ।
विश्रामार्थं पुनस्तत्राऽऽगत्याऽखनच्छनैः शनैः ॥५५॥
निर्भयो वनमध्ये वै ह्येकाकी चाऽविशंकितः ।
तावद्वटात्तत्र शब्दश्चायातो मानवो यथा ॥५६॥
श्रुत्वा पश्यत्यभितः स शंकितश्च द्रुतं तदा
नाऽपश्यन्मानवं कंचित् पुनः पुनः सुशंकितः ॥५७॥
खनयामास शनकैस्तावत्पाषाणभारिता ।
शिला तत्रागता त्वेका तामुत्थाप्य शिलातले ॥५८॥

व्यलोकयत्ताम्रपात्राण्यष्ट भृतानि सर्वथा ।
सुवर्णं रजतं भूषा मुद्रा रत्नानि हीरकान् ॥५९॥
स्वप्नदृष्टान् समस्तांश्च विशेषान् द्रव्यसंज्ञितान् ।
विलोक्य सर्वथा सर्वान् शान्तिं जगाम चोत्तमाम् ॥६०॥
अथैतानि तु पात्राणि पिधाय च यथायथम् ।
तृणपत्रादिपुञ्जं चोपरि न्यस्यत्ततः स च ॥६१॥

कण्टकद्रुमशाखाश्च चिक्षेप चोपरि द्रुतम् ।
अथ वटं पुनर्गत्वा विश्रान्तिमाप वै क्षणम् ॥६२॥
स्मरन् रात्रौ प्रकर्तव्यं द्रव्यस्य हरणं यथा ।
चिन्तयन् कलशनां सर्वो सुष्वाप क्षणमेव सः ॥६३॥
उत्थितः स घटिकान्ते तावत्तु पुरतोऽभवत् ।
योगिराट् मूर्तिमान् साक्षात् सुमन्तुको हसन् मुहुः ॥६४॥

स्तब्धो भूत्वा क्षणं मत्वा महर्षिं तापसं तु तम् ।
पुरा दृष्टं द्रुतं प्रत्यभिज्ञाय प्रणनाम तम् ॥६५॥
प्रसन्नवदनो भूत्वोद्धारकं तं मुनीश्वरम् ।
जातिस्मरो द्रुतं प्राह प्रेतोऽभवं गुरो पुरा ॥६६॥

अत्राऽहं भवता चाप्युद्धृतोऽहं मानवोऽस्मि च।
शंकुधराख्यश्चौरोऽहं चौर्यकर्मपरायणः ॥६७॥

चौर्येण कृतनिर्वाहो विचरामि तु पापवान्।
उद्धारं कुरु विप्रेन्द्र पूर्वगुरो दयानिधे ॥६८॥

यथा मे स्यादभ्युदयो मोक्षणं च तथा कुरु।
श्रुत्वैवं शरणस्थस्य पुराभक्तस्य वै मुनिः ॥६९॥

सुमन्तुर्दयया प्राह तदुद्धारं विचिन्तयन्।
करिष्ये तव परमं श्रेयो नास्त्यत्र संशयः ॥७०॥

प्रवदामि यथा शिष्य तथा विधेहि सादरम्।
श्रृणु स्वल्पमुपदेशं तव योग्यं वदामि ते ॥७१॥

चन्द्रवंशो भवानासीन्महाकोषपतिः पुरा।
ततो याम्यपुरे गत्वा भुक्त्वा च यातनास्ततः ॥७२॥

प्रेतो जातस्ततो मेऽपि कृपया मानवोऽसि वै।
तथापि चौरभावस्ते न नष्टोऽत्र वदामि ते ॥७३॥

त्वया यत् खनितं खातं द्रव्यं तत्र च यद् भवेत्।
तेन यज्ञं कुरु त्वत्र सुमन्तुहस्तकारितम् ॥७४॥

सुमन्तुश्चाहमेवात्र वटाऽधस्ताद् वसामि तु।
सर्वे जानन्ति लोका मां तापसं सिद्धयोगिनम् ॥७५॥

सुमन्तुना मखश्चापि क्रियते वद चेत्यपि।
प्रजासु त्वं समस्तासु विश्वासं सम्प्रदापय ॥७६॥

आगमिष्यन्ति ऋषयो मुनयो देवतास्तथा।
भूसुरा मानवाः सन्तः साध्व्यश्चात्र मखे ततः ॥७७॥

द्रव्यव्ययं करिष्येऽहं करिष्ये मखमुत्तमम्।
एवं कृते तव पुण्यं परं श्रेयो भविष्यति ॥७८॥

गृहाण मन्त्रं कृष्णस्य पावनं पंक्तिपावनम्।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥७९॥

'हरेकृष्ण हरेविष्णो बालकृष्ण श्रियःपते।
परमेश कृपासिन्धो लक्ष्मीपते रमापते' ॥८०॥

एवं संकीर्तनं चापि कुरु रात्रिन्दिवं सदा।
तव पापानि सर्वाणि नाशमेष्यन्ति सर्वथा ॥८१॥

यज्ञपुण्यं तवैव स्यान्ममाशीर्वादतः प्रिय।
आत्मशुद्धिस्तथा ते स्याद् भक्तिश्च श्रीहरौ मयि ॥८२॥

भविष्यतीति मे वाचः फलिष्यन्ति न संशयः।
भुक्तिर्मुक्तिश्च ते कुटुम्बिनां चापि भविष्यतः ॥८३॥

इत्युक्त्वा तन्मनो ज्ञात्वा ऋषिर्मन्त्रं ददौ ततः।
प्रेषयामास ऋषिराट् सुमन्तुकस्तमाश्रमान् ॥८४॥

विप्राश्रमान् मुन्याश्रमान् साधून् सतीः प्रति द्रुतम्।
विद्वांसः सुसमाकर्ण्य यज्ञं तत्र समाययुः ॥८५॥

लक्ष्मि सुमन्तुमुनिराट् तदा संकल्पमात्रतः।
चक्रे समग्रवस्तूनां सञ्चयान् पर्वतान् नदीः ॥८६॥

ब्रह्माद्या देवतास्तत्र प्रत्यक्षं त्वाययुस्तदा।
महर्षयः पितरश्च सन्तः साध्व्यः समाययुः ॥८७॥

विष्णुयागस्तु ऋषिणा सप्ताहेन कृतस्तदा।
सुमन्तोर्वाञ्छया विष्णुस्तत्र साक्षात् स्थितोऽभवत् ॥८८॥

अग्नयस्तु तदा साक्षाद् जगृहुर्हव्यभोजनम्।
पूर्णाहुतौ सुमन्तुकः सस्मार मां परेश्वरम् ॥८९॥

भक्तकल्याणकार्यार्थं तदाऽहं प्रगतोऽभवम्।
बुभुजे हव्यमेवापि सुमन्त्वाद्यैः सुसत्कृतः ॥९०॥

अथ खातजद्रव्याणां दानानि तु सुमन्तुकः।
अदापयच्छंकुधरहस्तेन स्वर्णकोटिकम् ॥९१॥

रूप्यकाणां कोटिकाश्च रत्नानां कोटिकास्तथा।
हीरकाणां कोटिकाश्च चमत्कारैरदापयत् ॥९२॥

धनं कस्मात् समायातं विविदुर्नैव केचन।
चमत्कारं हि मन्यन्ते सुमन्तोः सर्वमेव ते ॥९३॥

जयकारो महान् जातो दानैश्च दक्षिणादिभिः।
तृप्ता देवाश्च पितरो मानवाः ऋषयः परे ॥९४॥

देहिनोऽपि समस्ताश्च तृप्तास्तत्र महाध्वरे।
अवभृथे सुमन्तुश्च स्नापयामास शिष्यकम् ॥९५॥

प्रार्थयामास मां तत्र दातुं भक्तस्य दर्शनम्।
अहं शंकुधरायाऽपि कुटुम्बसहिताय वै ॥९६॥

शंखचक्रगदापद्मधरं स्वं दर्शनं ददौ।
पावयामास सर्वांस्तान् सुमन्तोर्वचनात् खलु ॥९७॥

सर्वपापानि भक्तस्य विधूय पुण्यशेवधिम्।
दत्वा तस्मै स्वर्गयाने चाधिरुह्य दिवि ध्रुवे ॥९८॥

तारके तु महत् स्वर्गं प्रददौ शंकुधारिणे।
सकुटुम्बः शंकुधरो ययौ वै पश्यतां सताम् ॥९९॥

दिव्यदेहः प्रभूत्वैव द्रुतं ध्रुवालयं ययौ।
वैष्णवस्य हि यागस्य फलं भुक्त्वा ध्रुवालये ॥१००॥

ततो यास्यति वैकुण्ठं कुटुम्बसहितो हि सः।
एवं लक्ष्मि सुमन्तोर्वै प्रतापेन तु भक्तराट् ॥१०१॥

चौरोऽपि स्तैन्यरहितो भूत्वा कृत्वा मखं शुभम्।
साधोस्तु कृपया मे च प्रसादेन सुरोत्तमः ॥१०२॥

सर्वलोकैर्वन्दितः सन् ख्यातो ध्रुवपदं ययौ।
एवं साधोः प्रसंगेन पापिनोऽपि खला अपि ॥१०३॥

पापहीनाः प्रजायन्ते यान्ति वै परमं पदम् ।
पठनाच्छ्रवणाच्चास्य भुक्तिं मुक्तिं व्रजेदपि ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने शंकुधरनाम्नश्चौरस्य सुमन्तुकर्षेर्योगेन पापनाशो यज्ञकरणं मोक्षश्चेत्यादिनिरूपणनामाऽष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं प्रसन्नता हरेः सताम् ।
अनुवृत्त्या भवेदेव नान्येन साधनेन वै ॥ १ ॥
साक्षात्कारो हरेश्चापि कृपया सेवयाऽथवा ।
ध्यानेन शाश्वतेनाऽपि भवेदेव न संशयः ॥ २ ॥
वृत्तिस्थैर्यं हरेर्मूर्तौ कठिनं देहधारिणाम् ।
अपि त्वभ्यासयोगेन सिद्ध्यत्येव न संशयः ॥ ३ ॥
मूर्तिश्चिन्तामणिर्मेऽस्ति लक्ष्मि चिन्तितसम्प्रदा ।
स्वर्गं स्मृद्धिं महानन्दं मोक्षं ददाति चिन्तितम् ॥ ४ ॥
आत्मसन्दर्शनं चेशदर्शनं ब्रह्मदर्शनम् ।
मुक्तानां दर्शनं दिव्यं ममापि दर्शनं ततः ॥ ५ ॥
चिन्तितं यत् समग्रं तत् प्राप्यते ध्यानमूर्तितः ।
अहन्ताममतामाया नश्यत्येव च चिन्तनात् ॥ ६ ॥
स्मृतयश्चापि नश्यन्ति मायिक्यो ध्यानकारिणः ।
त्रिगुणा गृहपुत्रस्त्रीरूपा मायाऽपि नश्यति ॥ ७ ॥
वासनाख्या तथा माया नश्यत्येव तु ध्यायिनः ।
तृष्णानाशो भवत्येव शान्तिलाभः प्रजायते ॥ ८ ॥
हरेर्ध्यानबलेनैव भक्तात्मा तन्मयो यदा ।
भवत्येव निरुत्थानस्तदा देहस्य पातनम् ॥ ९ ॥
भौतिकस्य विकाराणां वियोगश्च प्रजायते ।
सूक्ष्मदेहस्य वै नाशस्तथा ध्यानबलाद् भवेत् ॥१०॥
आत्मन्येव चितो धारा ध्यानवृत्तिः प्रवर्धते ।
चैतन्यं दिव्यमेवैतद् द्रव्यरूपं विवर्धते ॥११॥
तदेव ध्यानरूपं वै भूत्वा मूर्तौ सुयुज्यते ।
तद्योगेन तु जीवस्य चेतनस्य तदात्मनः ॥१२॥
धामोत्क्रमणकाले वै मूर्तिर्मूर्त्या समा हरेः ।
समभिनिष्पद्यतेऽसौ चेतनः स्वयमेव ह ॥१३॥
ब्रह्ममूर्तस्वरूपोऽयं दिव्याकारः प्रकाशते ।
आविर्भवति मूर्तात्मा ब्रह्मात्मा हरिसदृशः ॥१४॥
श्रीहरेरिच्छया लक्ष्मि मुक्तोत्तमोऽभिकाशते ।
स्नेहोऽधिको महानन्दे प्रयोजको हरौ मयि ॥१५॥
एवं स्निग्धाः सदात्मानो महात्मानश्च साधवः ।
पावनाः पावयन्त्येव पुनन्ति पापिनो जनान् ॥१६॥
कृपयैव यतस्तेषां कार्यं मुक्तिप्रदानकम् ।
पाप्युद्धारश्च तत्कार्यं निर्वहन्ति मदाज्ञया ॥१७॥
ततो मुक्तिं प्रयान्त्येव पापिनोऽपि सदाश्रिताः ।
सत्संगेन परां मुक्तिं प्राप्नुवन्त्येव देहिनः ॥१८॥
गणिका हिंसकाः स्तेना व्यवायिनश्च घातकाः ।
भ्रष्टा दुष्टा द्वेषिणोऽपि सत्संगेन तरन्ति ते ॥१९॥
यन्मानः क्रियते लोके चाऽसत्संगो मुहुर्जनैः ।
तारयत्येव तन्मानं सत्संगश्चेत् कुतो भवेत् ॥२०॥
गुणा ग्राह्याः सतां नित्यं दोषास्त्याज्याः सतां सदा ।
गुणग्राही तरत्येव दोषग्राही निमज्जति ॥२१॥
सतां सम्मानः कर्तव्यो निजस्य तु विमाननम् ।
सतां सम्मानकर्तारं तारयन्ति हि साधवः ॥२२॥
सतां तु ये ह्यवमानं कुर्वन्ति ते पतन्ति वै ।
दग्धपुण्यास्तु ते भूत्वा प्रयान्त्यधमयोनिकाम् ॥२३॥
साधोर्देहस्वभावं ये वीक्ष्याऽवस्थोद्भवं क्वचित् ।
गृह्णन्त्यवगुणान् साधोस्ते भवन्त्यपि निन्दकाः ॥२४॥
अवगुणाढ्या जायन्ते सदा वै दोषदृष्टयः ।
कल्पयन्ति च पापानि साधुजनेषु नित्यदा ॥२५॥
अवगुणान् प्रवदन्ति यशोहानिकरान् सदा ।
कामं क्रोधं च लोभं च मानं मोहं रतिं मदम् ।
मत्सरं चाऽदीर्घदृष्टिं तथा सत्कारशून्यताम् ॥२६॥
अनौदार्यमनाह्वानमौदासीन्यं सतृष्णताम् ।
अभिमानं चानियमाऽवलोकनं विदृष्टिताम् ॥२७॥
सपरिग्रहतां लोलुपतां च वासनां बहिः ।
बहिर्वृत्तिं राजसत्वं तामसत्वमबुद्धताम् ॥२८॥
रसनाधीनतां शिश्नोदरतृपत्वमित्यपि ।
अधर्मं राजयुक्तत्वं ममतां चाभिमानिताम् ॥२९॥
अज्ञानित्वं योग्यतावर्जनं निद्रां च फल्गुताम् ।
मृषाऽसत्यं च कपटं शाठ्यं छद्माऽतिभक्षणम् ॥३०॥
मौर्ख्यं स्तैन्यं महालस्यमेवमेतांस्तु दुर्गुणान् ।
कल्पयन्ति द्वेषिणस्ते निन्दका दुर्गुणान्विताः ॥३१॥
पापाः पापं कल्पयन्ति पापयुक्ता भवन्ति ते ।
मन्यन्ते ते यथा नैजं कर्म तथैव साधुषु ॥३२॥
यथा नैजा वासना च तथा तामपि साधुषु ।
यथा वै दुष्टता नैजा तथा तामपि साधुषु ॥३३॥

परेषु चाश्रितेष्वेते प्रवेशयन्ति दुर्गुणान् ।
अवगुणान् ग्राहयन्ति चाऽभावं च तिरस्कृतिम् ॥३४॥
अभावनां प्रेरयन्ति गुणान्निष्कासयन्ति च ।
सर्वाः क्रियाः सतां दुष्टाः सदोषाः संवदन्ति च ॥३५॥
वर्तनं सर्वथा दुष्टं वदन्त्याचरणं तथा ।
दुष्टं पापं चाछमयं दैत्या वा दानवा यथा ॥३६॥
आसुरा आसुरभावं कल्पयन्ति हि साधुषु ।
स्वेषु सर्वेषु सत्स्वेव दुर्गुणेष्वपि सद्गुणान् ॥३७॥
नेत्रैर्द्वेषं दर्शयन्ति गत्या द्वेषं दधत्यपि ।
नमने दर्शने द्वेषं वाण्यां द्वेषं वदन्त्यपि ॥३८॥
सतां कार्ये ह्यकार्यत्वं दुष्टकार्यत्वमित्यपि ।
दर्शयन्त्यपरेभ्यश्च कलिं कुर्वन्त्यहेतुकम् ॥३९॥
अनेन साधुना चेदं कृतं तद् योग्यमेव न ।
अयं साधुर्हि नैवाऽस्ति साधुता चात्र नास्ति च ॥४०॥
तस्य पादौ स्पृशेत् कस्तु को वन्देत तथाविधम् ।
को नमेत्तं कः सेवेत दृष्टा बहवस्तादृशाः ॥४१॥
भवादृशा विवलया मन्वते तादृशान् सतः ।
नाऽस्मादृशास्तु पश्यन्ति तेषां मुखान्यपि क्वचित् ॥४२॥
एवं निन्दां प्रकुर्वन्ति गृह्णन्त्यवगुणान् सदा ।
ग्राहयन्त्यवगुणकान् स्वेतरान् दुष्टवार्तया ॥४३॥
तथा नारायणीश्रि त्वं समाकर्णय चासुरीम् ।
रीतिं तथाऽसुराणां वै येषां स्नेहो न साधुषु ॥४४॥
येषां च कामनादोषः क्रोधश्चौर्यमसत्यता ।
कापट्यं चापि पैशुन्यं व्यवायो राजसी स्थितिः ॥४५॥
ते जना दोषवन्तो वै दोषाँस्त्यक्तुं तु निर्बलाः ।
प्रत्युत दोषमग्नास्ते विषयासक्तचेतसः ॥४६॥
अतस्तेषां हि दोषाणां खण्डनं साधवो यदा ।
त्याजयितुं प्रकुर्वन्ति तदा ते दुष्टमानसाः ॥४७॥
साधोर्निन्दां प्रकुर्वन्ति दोषखण्डनकारिणः ।
वाच्याऽवाच्याऽनभिज्ञोऽयं साधुर्वक्तुं न वेत्ति वै ॥४८॥
एकादेशिज्ञानवाँश्च विशालज्ञानवान्नहि ।
पण्डितंमन्यमानः स्वं वर्तते मानवर्जितः ॥४९॥
नाऽनुसरति मां क्वापि न गृह्णाति मयोदितम् ।
स्वोत्कोत्कर्षप्रमन्ताऽयं नश्च खण्डनकार्यसौ ॥५०॥
आश्रमं नैव जानाति न जानाति वृषांश्च नः ।
खण्डयत्येव भोगादीन् गार्हस्थ्योचितवैभवान् ॥५१॥
तस्माद् विवेकहीनोऽयं साधुर्मूर्खोऽयमस्ति वै ।
एवं निन्दन्ति साधुं वै हितोपदेशकारिणम् ॥५२॥

एवंविधानां नैव स्यात् स्नेहः साधुष्वपि क्वचित् ।
अस्नेहेन न विश्वासो साधुवाक्येषु जायते ॥५३॥
अविश्वासान्न वै श्रद्धा माहात्म्यज्ञानवर्धिनी ।
अश्रद्धया ह्यनभ्यासोऽनभ्यासाद् ध्यानमेव न ॥५४॥
न सेवा भावना नैव न च तादात्म्यवेदिता ।
आकर्षणं ततो नैव माहात्म्यं तु कुतस्तदा ॥५५॥
न कथाश्रवणे तस्य न वार्ताश्रवणेऽपि मुत् ।
नाऽऽज्ञाग्रहणे चोत्साहः प्रीतिर्गाढा कुतस्तदा ॥५६॥
शृणु लक्ष्मि यथा तेऽस्ति मयि स्वामित्वभावना ।
त्वयि दासीत्वमेवाऽस्ति तत्र भेदो न विद्यते ॥५७॥
ताडिता धर्षिताऽऽक्रुष्टा वन्दिता वा तिरस्कृता ।
तथापि त्वं कदाचिन्न विरुद्धा किन्तु सेविका ॥५८॥
मयि सर्वस्वभावेन चासक्ता मुदिता सदा ।
निसर्गगुणग्राहिणी भक्ता दासी प्रसेवसे ॥५९॥
न तत्र निम्नताभावो मयि ते स्वामिनि क्वचित् ।
तथा येषां साधुवर्गे निम्नभावो न वै क्वचित् ॥६०॥
साम्यभावोऽपि येषां न किन्तूत्कृष्टा हि भावना ।
माहात्म्यं दिव्यता येषां निर्गुणत्वं च साधुषु ॥६१॥
साधुक्रियासु सर्वासु कल्याणदत्वभावना ।
शुभाऽशुभायां प्रवृत्तौ पुण्यप्रदत्वभावना ॥६२॥
येषां वै वर्तते तेषां स्वामित्वं सत्सु वै सदा ।
भावितं दिव्यफलदं दिव्यमोक्षप्रदं भवेत् ॥६३॥
मायाकालादिकर्मादिबन्धच्छेदकरं भवेत् ।
यथा स्नेहो निजपत्न्यां यथा पुत्रे कुटुम्बिषु ॥६४॥
यथा पित्रोर्यथा पुत्र्यां यथा भृत्यासु सेवके ।
सेविकायां यथा स्नेहस्तथा कुर्याद्धि साधुषु ॥६५॥
लौकिकोऽपि स्नेहभावो दिव्यतां याति साधुषु ।
साधोः प्रसन्नतालब्ध्या सर्वं कार्यं प्रसिद्ध्यति ॥६६॥
यथा पत्न्या निजे कान्ते दृश्यन्ते दूषणानि न ।
कुचेष्टाः कुस्वभावाश्च दृश्यन्ते सद्गुणा यथा ॥६७॥
तथा साधुषु वै लक्ष्मि येषां दृष्टिस्तु निर्मला ।
दृश्यन्ते दुर्गुणाश्चापि सद्गुणा एव सर्वथा ॥६८॥
ते एव प्राप्य संयोगं प्रसन्नतां सतां शुभाम् ।
आशीर्वादान् समर्ज्याऽपि सेवालाभमवाप्य च ॥६९॥
स्नेहं लब्ध्वा तथा प्रीतिं लब्ध्वा चात्मनिवेदिताम् ।
आत्मरतिं परां प्राप्य तरन्ति भवसागरात् ॥७०॥
तेषां स्नेहो भवेदेव सत्सु स्त्रीपुत्रतोऽधिकः ।
स एव मायां तरति साधुस्नेहेन पावितः ॥७१॥

नरो वा स्त्री च वा षण्ढः साधौ स्नेहात् प्रमुच्यते ।
सत्यं सत्यं वदाम्येतत् साधुरूपो भवाम्यहम् ॥७२॥
मन्माहात्म्यं तु साधुभ्यो ज्ञायते नाऽन्यतः क्वचित् ।
साधवो हृदयं मह्यं साधौ वासः सदा मम ॥७३॥
साधुसन्तोषणे तृप्तिर्ममैव जायते रमे ।
साधवः पावनाः सन्ति नखशिखान्तमूर्तयः ॥७४॥
शृणु लक्ष्मि परे दुष्टा साधूनुद्वेजयन्ति वै ।
भोजने जलपाने चासने सत्कारकर्मसु ॥७५॥
आतिथ्ये शुश्रूषणे च श्रमयन्ति सतो जनान् ।
भृत्यत्वं कारयन्त्येव साधून् गुरून् महाजनान् ॥७६॥
धीहीनास्ते पापपुञ्जं त्वर्जयन्ति तथाक्रियाः ।
केचित् साधून्निजपत्नीसमान् मत्वा सुभोजने ॥७७॥
योजयन्ति स्वभोज्यार्थं पाचयन्ति च भोजनम् ।
केचिज्जलस्य पानार्थं पात्रं जलं च शीतलम् ॥७८॥
उभयं तद्धि याचन्ते यथा भृत्यात्तथा सतः ।
केजिदज्ञा गेन्दुकादि निजासनं तु सुप्तये ॥७९॥
कारयन्ति सारयन्ति यथा दास्यास्तथा सतः ।
केचिदज्ञा ऊष्णजलं तथोष्णं भोजनं नवम् ॥८०॥
कारयन्ति निजार्थं वै यथा भृत्यात्तथा सतः ।
केजिदज्ञा वाचयन्ति निजां पुष्टिं सभासु वै ॥८१॥
प्रशंसां कारयन्त्येव यथा दूतात्तथा सतः ।
यथा तु चारणात् तद्वत् सूताद्वा च तथा सतः ॥८२॥
केचिन्मदान्विता नैजां पेटिकां वस्तुगौरवाम् ।
वाहयन्ति सतां हस्तैर्मस्तकेनाऽभिमानिनः ॥८३॥
केचिद् दुष्टा दीनसाधून् नामयन्ति प्रसह्य वै ।
स्तवनं तु निजं दुष्टाः कारयन्ति मुहुर्मुहुः ॥८४॥
एतादृशास्तु पापा वै पापपर्वतसंभृताः ।
धनाऽन्नवर्जिताश्चात्र भ्रमन्तो विरमन्ति च ॥८५॥
साधुद्वारोपदेशेन साधयन्ति स्वमर्थकम् ।
स्वार्थपरास्ते कुशलाश्चान्ते यान्ति यमालयम् ॥८६॥
साधुषु निजसत्तां ये धारयन्ति च मानिनः ।
आहंकारिकवृत्तान्तास्तेऽपि यान्ति यमालयम् ॥८७॥
साध्वालये चाकस्मिकीं कुर्वन्ति मार्गणां तु ये ।
साधुषु च मृषा दोषं कलङ्कं च ददत्यपि ॥८८॥
कुख्यातिं च प्रकुर्वन्ति साधूनां ये तु निर्दयाः ।
द्वेष्टारः साधुवर्गस्य ते यान्ति वै यमालयम् ॥८९॥
शृणु लक्ष्मि तथा साधून् निन्दन्ति वेषधारणे ।
जीर्णवस्त्रमपि खण्डं नैव ददति ये क्वचित् ॥९०॥
निन्दन्ति तु परैर्दत्तं सूक्ष्मं सुमूल्यमम्बरम् ।
शुद्धं च रंगसंशोभं निन्दन्त्युक्त्वा तु राजसम् ॥९१॥
पात्रं यानं वाहनं च निन्दन्ति वै सतां तथा ।
साधोः शालां भवनं च, कुटीं निन्दति वै तथा ॥९२॥
औज्ज्वल्यं चापि निन्दन्ति निन्दन्ति दानमर्पितम् ।
द्रव्यार्पणं च निन्दन्ति गन्धसारं च मर्दनम् ॥९३॥
ओषधाद्यं च निन्दन्ति रक्षणं च यथाकृतम् ।
निन्दन्ति गोमहिष्यादिधनं साधुभिरर्जितम् ॥९४॥
परोपकारप्रभृति निन्दन्ति साधुसेवितम् ।
भिक्षाटनं तपश्चापि निन्दन्ति मत्सरान्विताः ॥९५॥
प्रज्वलन्ति समीक्ष्यैव सतो देवालयं सतीः ।
दिव्यसंस्था विलोक्यापि प्रोज्ज्वलन्त्यासुरा जनाः ॥९६॥
त एते कमले यान्ति देहान्ते पापसंसृतिम् ।
पीड्यन्ते याम्यलोकेषु दुःखियोनिषु वै मुहुः ॥९७॥
तस्मात् साधुं मम वेषधरं वै पूजयेत् सदा ।
मां विभाव्याऽभिसेवेत प्रसन्नयेत् शुभार्पणैः ॥९८॥
प्रसादयेदनुवृत्त्या सर्वस्वार्पणकैस्तथा ।
भक्तिं कृत्वा हरेश्चापि प्रसादयेत् सतो जनान् ॥९९॥
गुरुं प्रसेवयेन्नित्यं पितरौ सेवयेत् सदा ।
पतिं प्रसेवयेद्भक्त्या साध्वीं भक्त्याऽभिरञ्जयेत् ॥१००॥
प्रभुं भजेत भावैश्च श्रद्धया कीर्तयेद्धरिम् ।
देवार्पणं सदा कुर्यात् कुटुम्बं तु प्रपोषयेत् ॥१०१॥
एवं वै वर्तमानानां भुक्तिर्मुक्तिः करे स्थिता । ॥१०२॥
पठनाच्छ्रवणादस्य स्मरणाद्धारणादपि ।
साधुसेवाफलं स्याच्च भोगान्ते मोक्षणं भवेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने साधुसमागमेन भगवच्चिन्तामणिलब्ध्या सर्वकामनापूर्त्यादिनिरूपणनामा नवाशीत्यधिकशततमोऽध्यायः ॥ १८९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं चमत्कारमयीं कथाम् ।
महासौराष्ट्रदेशीया भक्ताः सङ्गगताः शतम् ॥ १ ॥
कुंकुमवापिकाक्षेत्रं सोमनाथं च रैवतम् ।
स्वर्णवर्तीं कृष्णभूमिं गोपनाथं च सुन्दरम् ॥ २ ॥

एवमादीनि तीर्थानि कर्तुं सौराष्ट्रमाययुः ।
मार्गे मही तथा वापीं तीर्त्वा नावा ततः परम् ॥ ३ ॥
साभ्रमतीं समुत्तीर्य गोपनाथं समाययुः ।
ततो गुप्तप्रयागं च कृत्वा सिंहवनं महत् ॥ ४ ॥
प्रविश्य यावदायान्ति सोमनाथं प्रति द्रुतम् ।
सिंहारण्ये तदा प्राप्ता लुण्टकाः शस्त्रधारिणः ॥ ५ ॥
लुण्टकाधिपतिस्तेषु नाम्ना सामान्तविक्रमः ।
अश्ववारैश्च सहितः शस्त्रादियुगभटान्वितः ॥ ६ ॥
यन्त्रनादानकरोद्वै सन्निधौ नाऽतिदूरगः ।
आक्रोशान् भयदाँश्चापि चक्रुस्तस्यानुगामिनः ॥ ७ ॥
लुण्टनार्थं द्रुतं संघस्याऽभितो बन्धनं व्यधुः ।
मध्ये चक्रुर्भयदानैः संघस्य शतमानवान् ॥ ८ ॥
स्त्रीणां भूषा नराणां च भूषाद्रव्याणि यानि च ।
उत्तारयित्वा त्वेकत्र कारयामासुरुल्बणाः ॥ ९ ॥
शुभाम्बराणि सर्वाणि जगृहुः संघवर्तिनाम् ।
संघाग्रगण्यवणिजो बबन्धू रज्जुभिस्तदा ॥१०॥
पद्मचन्द्रं शंखचन्द्रं श्रृंखलाचन्द्रमित्यपि ।
वनचन्द्रं वालिचन्द्रं बबन्धुस्ते हि लुण्टकाः ॥११॥
अन्यान् दण्डैस्ताडनादि प्रचक्रुर्भयहेतवे ।
भीतास्ते वणिजः सर्वे मौना बभूवुरर्दिताः ॥१२॥
ददुः सर्वस्वमेतेभ्यो लुण्टकेभ्योऽतिताडिताः ।
अथैतेषु मम भक्तो वैष्णवो वनचन्द्रकः ॥१३॥
तस्य पत्नी सुखादेवी मम भक्ताऽभवद् रमे ।
आबाल्यात्तौ मम भक्तौ भजतो मां निरन्तरम् ॥१४॥
साधोर्मे सायनायननाम्नो योगेन वैष्णवौ ।
वर्तेते तौ भक्तियुक्तौ कृष्णनारायणाश्रितौ ॥१५॥
आपत्काले तु तौ भक्तौ सस्मरतुस्तदा हि माम् ।
अन्येऽपि बालगोपाला रुरुदुः सस्मरुः प्रभुम् ॥१६॥
लुण्टकेभ्यो हरेकृष्ण प्ररक्षय हि तीर्थिनः ।
अनाथानां वने कृष्णनाथनारायणो भवान् ॥१७॥
त्राता मोचयिता दुःखाद् रक्षयिता पिता भवान् ।
माता गुरुर्हरिकृष्णो बालकृष्णः प्ररक्षतु ॥१८॥
यतो वयं कृतपापा लुण्ट्यन्तेऽतो वनान्तरे ।
तथापि निजभक्तानां रक्षां विधेहि माधव ॥१९॥
तव भक्तिं करिष्यामो दानं दास्याम एव ते ।
सर्वस्वं भगवन् विष्णो रक्ष कृष्णनरायण ॥२०॥
कंकुमवापिकातीर्थेऽर्पयिष्यामो धनादिकम् ।
यदि लुण्टकदुष्टेभ्यो रक्षां नरत्वं विधास्यसि ॥२१॥
विभूषणानि सर्वाणि श्रेष्ठाम्बराणि यानि च ।
रूप्यकाः स्वर्णमुद्राश्च दास्यामोऽक्षरोवरे ॥२२॥
व्रतं कार्तिकमासाद्य करिष्यामो फलादिभिः ।
नित्यं शतं मालिकाश्चाऽऽवर्तयिष्याम एव च ॥२३॥
सतां मठेषु वै मासं मासं स्थित्वा तु माघके ।
मासे सेवां करिष्यामः सतामाज्ञानुसारिणीम् ॥२४॥
इत्येवं वनचन्द्राद्या आर्त्ता लुण्टकधर्षिताः ।
मानता विविधाश्चक्रुर्लुण्टकेभ्यो विमुक्तये ॥२५॥
वनचन्द्रस्य भार्याऽपि सुखादेवी तथा स्त्रियः ।
या याः संघगताश्चासन् प्रार्थयामासुरेव माम् ॥२६॥
हे हरे हे वनवासिन् वृन्दावनविहारकृत् ।
गोपीसंघान्तरगुप्त कृष्ण रक्ष स्वदासिकाः ॥२७॥
अबलानां सबलोऽसि भक्तानां भगवानसि ।
दासीनां मोदकर्ताऽसि कृष्ण रक्षय दासिकाः ॥२८॥
वने गोपीविहारोऽसि राधासखोऽसि निर्जने ।
शयने कमलानन्द कृष्ण रक्षय दासिकाः ॥२९॥
प्रलये मुक्तसेव्योऽसि सृष्टौ भक्तिमतीपतिः ।
रासे सर्वानुरक्तोऽसि कृष्ण रक्षय दासिकाः ॥३०॥
विपत्तौ चार्त्तदीनेश शरणागतरक्षक ।
अरातिकष्टहर्तस्त्वं कृष्ण रक्षय दासिकाः ॥३१॥
गर्भे भ्रूणस्य पोष्टा त्वं बाल्ये निर्मलहृत्स्थितः ।
यौवने प्रेमपात्रं त्वं कृष्ण रक्षय दासिकाः ॥३२॥
वार्धक्ये शिष्टवर्यं त्वं युद्धे जयप्रदः पुमान् ।
निराश्रये त्वं चाधारः कृष्ण रक्षय दासिकाः ॥३३॥
रोहिणाण्डासुरः पूर्वमनादिद्युनरायणः ।
भूत्वा निषूदितः कृष्ण त्वया नः स प्ररक्षतु ॥३४॥
अनादिश्रीमेरुनारायणस्त्वं चाऽभवं पुरा ।
निम्नं तु पतमानस्य मेरोः रक्षा त्वया कृता ॥३५॥
सूर्याग्निना दह्यमानब्रह्माण्डस्य त्वया पुरा ।
रक्षा शान्तिः कृताऽनादिविष्णुनारायणात्मना ॥३६॥
धूम्रासुरविनाशश्च चन्द्ररक्षा त्वया पुरा ।
विहिता श्रीहरेऽनादिदेवनारायणात्मना ॥३७॥
त्वयाऽनादियज्ञनारायण यज्ञाः प्रवर्तिताः ।
रुद्रशास्ताऽनादिब्रह्मनारायणो ह्यभूः पुरा ॥३८॥
देवधिष्ण्यनियमायाऽनाद्याऽऽदित्यनरायणः ।
भवान् पुराऽऽभवत् कृष्ण कृष्ण रक्षय दासिकाः ॥३९॥
नागशास्ताऽनादिगरुत्मन्नारायगरूपवान् ।
ध्रुवस्थित्यै भवाननाद्यार्षनारायणोऽभवत् ॥४०॥

सुरानन्दादिदैत्यानां पराभूत्यर्थमेव ह ।
त्वमनादिप्राज्ञनारायणोऽभवः परेश्वरः ॥४१॥
त्वमनादिवीरनारायणोऽभवो वृषावनः ।
त्वमनादिभद्रनारायणो दग्धप्रमुक्तये ॥४२॥
तुंगभद्रासनापुत्रीपतिर्हरिनरायणः ।
अभवस्त्वं पुरा कृष्ण कृष्ण रक्षय दासिकाः ॥४३॥
नाशार्थं कोशस्तेनाख्यरक्षसस्त्वं पुराऽभवः ।
अनादिश्रीबीजनारायणो बीजस्य रक्षकः ॥४४॥
धर्मव्रतस्य पुत्राणां मोक्षार्थं त्वं पुराऽभवः ।
अनादिश्रीवरनारायणो ना कृष्ण रक्षतु ॥४५॥
सुदर्शनीमहासाध्वीशापेन स्त्रीमयं जगत् ।
रक्षार्थं त्वमनादिस्त्रीपुंनारायणतामगाः ॥४६॥
अनादिश्रीजलनारायणस्त्वं माकरासुरम् ।
हत्वा लोकानरक्षः श्रीकृष्ण रक्षय दासिकाः ॥४७॥
अनादिश्रीशीलनारायणस्त्वमभवः पुरा ।
साधुधर्मप्ररक्षार्थं कृष्ण रक्षय दासिकाः ॥४८॥
अनादिश्रीवार्धिनारायणस्त्वमभवः पुरा ।
व्याघ्रानलादिनाशार्थं कृष्ण रक्षय दासिकाः ॥४९॥
त्वमनादिचतुर्मुखनारायणोऽभवः पुरा ।
राधनिकापुण्यरातविप्रयोरिष्टदो भवान् ॥५०॥
अभवच्छ्रीश्रीपुरुषोत्तमनारायणः पुरा ।
तीर्थपूत्यर्थमनादितीर्थनारायणोऽभवः ॥५१॥
भक्त्यर्थं त्वमनादिश्रीजीवनारायणोऽभवः ।
यज्ञे त्वं श्रीमदर्धश्रीश्वरनारायणोऽभवः ॥५२॥
पित्रुद्धर्ताऽनाद्यर्धश्रीपितृनारायणोऽभवः ।
भक्त्या मोक्षोपदेशार्थं प्लक्षनारायणोऽभवः ॥५३॥
नरमेधे भक्तरक्षामनादिपुंनरायणः ।
भूत्वाऽकरोस्त्वं देवेश कृष्ण रक्षय दासिकाः ॥५४॥
सूर्यवर्चनृपद्वाराऽनादिश्यामनरायणः ।
अभवस्त्वं पुरा कृष्ण कृष्ण रक्षय दासिकाः ॥५५॥
अनादिश्रीराजनारायणस्त्वं चाऽभवः पुरा ।
मायूरकाऽसुरहन्ता कृष्ण रक्षय दासिकाः ॥५६॥
अनादिश्रीब्रह्मचारिनारायणोऽभवः पुरा ।
नैष्ठिकतारक्षणार्थं कृष्ण रक्षय दासिकाः ॥५७॥
हलकासुरनाशार्थं शिवोज्जीवार्थमित्यपि ।
अनादिश्रीशिवनारायणस्त्वं चाऽभवः पुरा ॥५८॥
अनादिश्रीस्वर्णनारायणस्त्वं चाऽभवः पुरा ।
कुबेरस्योज्जीवनार्थं कृष्ण रक्षय दासिकाः ॥५९॥
ज्वालारुणाऽचलवह्निरसदग्धप्रजाऽवनम् ।
अनादिश्रीस्वामिनारायणस्त्वं चाऽकरोः पुरा ॥६०॥
निर्वाणिकाऽऽराधितया लक्ष्म्या साकं भवान् पुरा ।
अनादिसाऽवननारायणोऽभवत् स रक्षतु ॥६१॥
अंशुक्रमथनृपतेर्भक्त्या त्वमभवः पुरा ।
अनादिश्रीसाधुनारायणः कृष्णः स रक्षतु ॥६२॥
शप्तस्य वर्णिशालस्य मनोरुज्जीवनाय वै ।
अनादिश्रीभक्तनारायणोऽभवः स पातु नः ॥६३॥
वर्मधरक्ष्मेशमोक्षार्थं त्वं पुरा स्वयं प्रभुः ।
अनादिश्रीमेधनारायणोऽभवः स पातु नः ॥६४॥
अनलादमहासुरविनाशार्थं भवान् पुरा ।
अनादिश्रीवह्निनारायणोऽभवत् स पातु नः ॥६५॥
इलोदरविनाशार्थं रसनारायणोऽभवः ।
स त्वं नारायणकृष्णकृष्ण रक्षय दासिकाः ॥६६॥
अनादिश्रीचक्रनारायणस्त्वं चाऽभवः पुरा ।
दैत्यनाशकरः कृष्णकृष्ण रक्षय दासिकाः ॥६७॥
कृतधर्मस्थापनायाऽनादिसत्यनरायणः ।
अद्रिस्थित्यर्थमनादिश्रीहिरण्यनरायणः ॥६८॥
भक्तार्थं त्वमनादिश्रीनैरञ्जनिनरायणः ।
अनादिश्रीपुण्यनारायणश्चाऽप्यभवः पुरा ॥६९॥
पुण्यवतीशापनिवर्तकः कृष्णः स पातु नः ।
अनादिश्रीबृहद्ब्रह्मनारायणोऽभवद् भवान् ॥७०॥
अप्सरसां मनःपूर्त्यै कृष्ण रक्षय दासिकाः ।
अनादिश्रीगुरुनारायणस्त्वं चाऽभवः पुरा ॥७१॥
ब्रह्मविद्याप्रदानार्थं कृष्ण रक्षय दासिकाः ।
बृहद्धर्मभूपयज्ञे साधुदीक्षाप्रदायकः ॥७२॥
अनादिश्रीमदाचार्यनारायणः स पातु नः ।
अनादिश्रीमहाविद्युन्नारायणोऽभवः पुरा ॥७३॥
विद्युत्तावदैत्यहन्ता कृष्ण रक्षय दासिकाः ।
अनादिश्रीमधुनारायणस्त्वं चाऽभवः पुरा ॥७४॥
मधुभक्षाऽसुरहन्ता कृष्ण रक्षय दासिकाः ।
अनादिश्रीनाथनारायणस्त्वं चाऽभवः पुरा ॥७५॥
तिष्ये दैत्यविनाशार्थं कृष्ण रक्षय दासिकाः ।
अनादिश्रीविभुनारायणस्त्वं चाऽभवः पुरा ॥७६॥
स्वर्णोत्सवे वेधसः स कृष्ण रक्षय दासिकाः ।
अनादिश्रीमोक्षनारायणस्त्वं चाऽभवः पुरा ॥७७॥
अनादिश्रीकृष्णनारायणस्त्वं कान्तकेशव ।
ब्रह्मप्रियादिस्वामिन्नो लुण्टकेभ्यः प्ररक्षय ॥७८॥

बालकृष्ण हरे कृष्ण वल्लभेश कृपां कुरु ।
लुण्टकेभ्योऽवनं शीघ्रं कुरु ते शरणं गताः ॥७९॥
इत्युक्त्वा ताः स्त्रियश्चापि लक्ष्मि ध्यानं व्यधुर्हरेः ।
अहं हरिः स्वयं तत्राऽऽगत्याऽदृश्योऽभवं क्षणम् ॥८०॥
शृण्वानः स्तुतिवाक्यानि मम प्राक्चरितानि वै ।
लुण्टकाश्च संचिन्वन्ति त्वेकत्र नाणकादिकम् ॥८१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने महासौराष्ट्रीयसंघस्य लुण्टकजनप्रधर्षितस्य स्तवनमिति-निरूपणनामा नवत्यधिकशततमोऽध्यायः ॥१९०॥

श्रीपुरुषोत्तम उवाच—

शृणु लक्ष्मि बालिकाश्च बालकाश्चापि विह्वलाः ।
अस्तुवन्मां स्वरक्षार्थं यदहं श्रुतवाँस्तदा ॥ १ ॥
दिवोदाससुतां दिव्यादेवीं भाग्यविहीनकाम् ।
कष्टाद्विमुच्य नैजां यश्चक्रेऽक्षरेऽनयच्च ताम् ॥ २ ॥
बालकृष्णः स भगवान् नः प्ररक्षतु सेविकाः ।
भिल्लीभिल्लौ तव साधोर्योगान्मोक्षं गतौ पुरा ॥ ३ ॥
सुबाहुनृपतिर्भार्यासहितः साधुसंश्रयात् ।
तव प्रतापतः कृष्ण मोक्षमार्गं ययौ पुरा ॥ ४ ॥
अशोकसुन्दरीं कन्यां सतीशंकरपुत्रिकाम् ।
त्वं ररक्ष पुरा कृष्ण नः प्ररक्षय सेविकाः ॥ ५ ॥
विहुण्डस्य विनाशार्थं नारीरूपोऽभवः पुरा ।
कामोदायाः पतिस्त्वं स नः प्ररक्षतु सेविकाः ॥ ६ ॥
शुकमोक्षप्रदस्त्वं नः प्ररक्ष निजबालिकाः ।
खशो नाम्ना विष्णुदासो रामणी चास्य भामिनी ॥ ७ ॥
लीलावती च तत्कन्या पुरोद्धृतास्त्वया प्रभो ।
गणिकानां पुरा कृष्ण पापानि तु त्वया विभो ॥ ८ ॥
कृत्वा पुण्यस्वरूपाणि पुण्यजनान् व्यधास्तदा ।
गणिका योगिनीश्चापि कृतवाँस्त्वं पुरा प्रभो ॥ ९ ॥
रक्षानाम्न्याः श्वपच्यास्त्वं सुमरस्य तु योषितः ।
मुक्तिदाताऽभवः कृष्ण नः स रक्षतु सेविकाः ॥१०॥
कौशिकं गरुडं चक्रे गायकं यः पुरा प्रभुः ।
मालवं नाम वैश्यं च तथाऽन्यान् गानकोविदान् ॥११॥
ब्रह्मलोकं ह्यनयद् यो नः स रक्षतु सेविकाः ।
हरिमिश्रं ब्राह्मणं यो ददौ मोक्षं स पातु नः ॥१२॥
चिदम्बरामहाराज्ञ्यै जिष्णुपत्न्यै पुरा भवान् ।
गदां समर्प्य रक्षां चाऽकरोद् भद्रकराक्षसात् ॥१३॥
प्रजाश्च जीविनास्तस्याः स नो रक्षतु सेविकाः ।
रणेश्वर्यः कृता नैजा ब्रह्मप्रिया गदासुताः ॥१४॥
येन नारायणेनापि कृष्णः स नः प्ररक्षतु ।
रणेश्वरास्तथा मुक्ताः कृता येन स रक्षतु ॥१५॥
बिन्दुमत्याः कृतो येन मोक्षो ययातियोषितः ।
स हरिर्लुण्टकेभ्यश्चाऽवनं करोतु माधवः ॥१६॥
परशुचन्द्रको येन नारायणेन तारितः ।
सोऽयं कान्तगुणः कृष्णो रक्षतु निजसेविकाः ॥१७॥
सुचन्द्रिकां गोपपत्नीं गोपालं तत्पतिं तथा ।
अनयद् योक्षरं धाम स कृष्णो नः प्ररक्षतु ॥१८॥
हरिप्रथमनोः पत्नी ब्रह्मपथाऽक्षरं प्रति ।
प्रापिता येन हरिणा स कृष्णो नः प्ररक्षतु ॥१९॥
गृध्राणां मोक्षणं येन कृतं पुरा परात्मना ।
बालकृष्णो हरिकृष्णः स कृष्णो नः प्ररक्षतु ॥२०॥
जीवचन्द्राय मुक्तिं यो ददौ कृष्णः स रक्षतु ।
शतानन्दविनोदिन्योः पुत्राणां मोक्षणं कृतम् ॥२१॥
येन श्रीहरिणा कृष्णः स एव नः प्ररक्षतु ।
काशीवारांगनाभ्यो यो मुक्तिदः स प्ररक्षतु ॥२२॥
वृषायनेन चटका यद्बलेन प्ररक्षिता ।
बालकृष्णोऽनादिकृष्णः स कृष्णो नः प्ररक्षतु ॥२३॥
चित्रकेतोश्च मालत्या राज्ञ्या मुक्तिः कृता पुरा ।
येन श्रीबालकृष्णेन कृष्णो नः स प्ररक्षतु ॥२४॥
श्रेष्ठा येन कृताः सन्तः स नः कृष्णः प्ररक्षतु ।
कृशांगकः कृतो येन कृशानुः स प्ररक्षतु ॥२५॥
भंगास्वनः कृतो येन नरो नारी मुहुर्मुहुः ।
स एव भगवान् कृष्णो रक्षत्वत्र स्वसेविकाः ॥२६॥
विपुलं च रुचिं देवशर्माणं यो ररक्ष ह ।
मोक्षदो भगवान् कृष्णो दुःखादस्मात् प्ररक्षतु ॥२७॥
गोकर्णाख्ये पुरा तीर्थे ऋषयो येन वासिताः ।
स एव भगवानस्मान् लुण्टकेभ्यः प्ररक्षतु ॥२८॥
कुवलाश्वं तथोत्तंकं सत्यव्रतं च गालवम् ।
श्रेयसे कल्पयामास यः स कृष्णः प्ररक्षतु ॥२९॥
यत्प्रतापेन च प्रणद्ब्रह्मसाधुः प्रतापवान् ।
समभवत् स कृष्णो नो लुण्टकेभ्यः प्ररक्षतु ॥३०॥
केशरिणीसुतश्चाऽऽम्रायनो मुक्तिमाप वै ।
यत्प्रतापेन कृष्णः स लुण्टकेभ्यः प्ररक्षतु ॥३१॥
गोकर्णस्थान् लक्षसाधून् निन्ये धामाक्षरं तु यः ।
बालकृष्णः प्रियः कान्तो नः प्ररक्षतु वल्लभाः ॥३२॥
शबरो राक्षसो येन मोचितो भवबन्धनात् ।
गृध्रश्च श्वपचश्चापि स कृष्णोऽवतु सेविकाः ॥३३॥

ख्यातिं शापपरां वीक्ष्य चकर्त यस्तु तच्छिरः ।
स नः कृष्णो लुण्टकेभ्यः प्ररक्षतु स्वसेविकाः ॥३४॥
भारुण्डः पुष्कसो येन तारितः स प्ररक्षतु ।
वृषादर्भिः कृतो येन मुक्तः कृष्णः स रक्षतु ॥३५॥
नरशायस्तस्करस्तु मोचितो येन चक्रिणा ।
धनिनो मोचिता येन स कृष्णोऽवतु सेविकाः ॥३६॥
कुन्दधर्मोऽविता येनाऽवितश्च जांबलामखः ।
बालकृष्णो दिव्यकान्तः कन्यका नः प्ररक्षतु ॥३७॥
येन शंभलवारोऽपि प्रजया सह मोचितः ।
बालःकृष्णो वल्लभोऽत्र प्ररक्षतु स्वसेविकाः ॥३८॥
देवानीकदिव्यवंशे बालकृष्णो व्यजायत ।
स एव भगवानत्र प्ररक्षतु स्वसेविकाः ॥३९॥
नमोऽनादिकृष्णनारायणाय स्वामिने नमः ।
नमः श्रीकम्भरालक्ष्मीगोपालजनुषे नमः ॥४०॥
दीर्घशीलौ विप्रवर्यौ मोचितौ यमपाशतः ।
येन श्रीहरिणा सोऽयं प्ररक्षतु स्वदासिकाः ॥४१॥
ब्रह्मसती ब्राह्मणी या मोचिता परमात्मना ।
सोऽयं नो भगवान्नाथः प्ररक्षतु स्वसेविकाः ॥४२॥
कालंधरा महाराज्ञी वैवर्त्तो नाम भूपतिः ।
मोचितौ येन कृष्णेन स कृष्णोऽवतु सेविकाः ॥४३॥
रोमपादस्य वै पुत्री वृषंगमोऽपि विष्णुना ।
मोचितो येन कृष्णेन स कृष्णोऽवतु सेविकाः ॥४४॥
नग्नभंगः पुरा चौरो मोचितो येन विष्णुना ।
बालकृष्णः कृष्णनारायणो नः स प्ररक्षतु ॥४५॥
भण्डासुरो हतो ललिताद्वारा येन चक्रिणा ।
स चास्मानत्र कृष्णश्रीकृष्णो रक्षतु सेविकाः ॥४६॥
ललितामानसीकन्याः कोटिशः स्वीकृताः पुरा ।
येन श्रीपरमेशेन स कृष्णोऽवतु सेविकाः ॥४७॥
लोहांगारस्य वैश्यस्य मोक्षकृत्तः प्ररक्षतु ।
पीवर्याद्या व्रते येन पूर्णकामा निरूपिताः ॥४८॥
सोऽयं कृष्णो लुण्टकेभ्यो नः प्ररक्षतु दासिकाः ।
वसिष्ठाऽगस्त्यकौ शापान्मोचितौ येन शार्ङ्गिणा ॥४९॥
अनादिश्रीकृष्णनारायणो नः स प्ररक्षतु ।
परुषो लुब्धको येन मोचितो भार्यया सह ॥५०॥
पुष्करवाहनस्यापि मोक्षकृत्तः प्ररक्षतु ।
सरोजिनी कुंभकर्त्री सतीश्वरीकृपान्विता ॥५१॥
पद्मिनी साऽभवद् यस्य कृपया कमलासमा ।
स श्रीकृष्णः प्रभुश्चास्मान् लुण्टकेभ्यः प्ररक्षतु ॥५२॥
धर्मतपसो विप्रस्य रक्षणं कृतवाँस्तु यः ।
सुरथस्य मनुत्वं च कृतवान् श्रीपतिस्तु यः ॥५३॥
धनवर्मा दिवं येन प्रेषितः परमात्मना ।
बलीश्वरस्तथा राज्ये स्थापितो मानवे द्विजः ॥५४॥
आनन्दवर्णी येनाऽपि स्थापितो मानवे तथा ।
राज्ये घृणेषिकः शूद्रः स्थापितो येन मानवे ॥५५॥
भूतिश्च तरितो येन कृष्ण रक्षतु सेविकाः ।
असुरो बालको येनोद्धृतोऽस्य मणयः कृताः ॥५६॥
बाष्कलिर्नाशितो येन विष्णुर्नः संप्रक्षतु ।
गजनारायणेनापि पुरुकुसरो घातितः ॥५७॥
प्रलम्बो नाशितो येन मत्स्यात्मकेन शार्ङ्गिणा ।
भीमरथो घातितश्च कूर्मरूपेण येन वै ॥५८॥
शान्तशत्रुर्घातितश्च हंसरूपेण येन हि ।
महाकालो नाशितश्च हयग्रीवेण येन तु ॥५९॥
हिरण्याक्षविहन्ता स कृष्णोऽवतु स्वसेविकाः ।
वामनोऽवतु कृष्णश्च कालकाक्षविनाशकृत् ॥६०॥
बलिशत्रवसुरहन्ता हरिर्दुःखं व्यपोहतु ।
दशग्रीवविहन्ता च नारीरूपोऽवतु प्रभुः ॥६१॥
तारकघ्नो हरिर्नपुंसकरूपोऽपि रक्षतु ।
टिट्टिभो विहतो येन मायूररूपिणा पुरा ॥६२॥
शुचिश्च घातितो येन चक्रिणा नः स रक्षतु ।
साधुभावायनर्षिश्च तथा श्रीमानसस्य च ॥६३॥
चिदानन्दस्यापि मोक्षकृत् कृष्णो नः प्ररक्षतु ।
सद्विद्यायनपत्नीं यः श्रुतिफलां ह्यमोक्षयत् ॥६४॥
अलर्कजननीमोक्षं कृतवान् स प्ररक्षतु ।
मुक्तिस्रोतायनश्चापि सिद्धिवेषायनस्तथा ॥६५॥
अयाचिताञ्जलिभार्या भिक्षायनऋषिः पतिः ।
मुक्ता यस्याऽऽश्रयेणैषः श्रीकृष्णो नः प्ररक्षतु ॥६६॥
माता नित्याश्रया पुत्रः केशी येन प्रमोचितौ ।
बालकृष्णो महाराजः स नरस्त्वत्र प्ररक्षतु ॥६७॥
माता तु चारणी पुत्रो व्याघ्रश्च येन तारितौ ।
कूटदेवः पिता साधुः श्यामश्च येन तारितौ ॥६८॥
उत्तमश्चापि भूदेवो देवायनऋषिस्तथा ।
कष्टात् प्रमोचितौ येन कृष्णो रक्षतु सेविकाः ॥६९॥
येन विरालको वैश्यः सकुटुम्बः समुद्धृतः ।
बालकृष्णः प्रियप्राणो लुण्टकेभ्यः प्ररक्षतु ॥७०॥
पृथ्वीधरो नृपो मधुविन्दा राज्ञी समुद्धृतौ ।
तथा दुर्वौढको दीनश्चोद्धृतो येन सोऽवतु ॥७१॥

सागरः शूद्रकश्चापि वनमालाभिधो नृपः ।
हीरुका शूद्रपत्नी च रक्षिता येन सोऽवतु ॥७२॥
वृक्णदेवो भावशूरः शीलधर्मासती तथा ।
मोचिता येन कृष्णेन सोऽयं रक्षतु सेविकाः ॥७३॥
मञ्जुलकेशो भूदेवः पाशुपतेशविप्रराट् ।
बाणांगणस्तथा शूद्री रक्षिता येन सोऽवतु ॥७४॥
मृतादनः सन्तदासो धर्मशालायनस्तथा ।
शंकुधरश्चोद्धृताश्च येन सोऽवतु सेविकाः ॥७५॥
लुण्टकाधिपतिश्चायं नाम्ना सामन्तविक्रमः ।
लुण्टयत्यतिसर्वस्वं कृष्ण हा कृष्ण रक्ष नः ॥७६॥
तव स्मोऽत्र तव स्मोऽत्र त्वत्सेविकाः प्ररक्षय ।
अन्तरात्मन् व्यापकात्मन् भूमन्नत्र प्ररक्षय ॥७७॥
बालकाश्चापि वै कृष्णस्तवनं चक्रिरे तथा ।
श्रुत्वाऽहं सहसा तत्र शतरूपोऽभवं रमे ॥७८॥
अश्ववारा उष्ट्रवाराः सशस्त्रा भूभृतो भटाः ।
पञ्चाशद्वेगतो दूरादागता रक्षणाय वै ॥७९॥
उच्चैराक्रोशमादध्युः सज्जाश्चौरा भवन्त्विति ।
मारयिष्याम एवाऽत्र जायन्तां मातृपुत्रकाः ॥८०॥
एवं नादान् श्रावयन्तो स्फोटयन्तो हि धूष्कृतीः ।
उष्ट्राऽश्वाद्यैः क्षणाद् दिक्षु दशस्वावृत्तयँश्च तान् ॥८१॥
वर्तुले चौरलोकाँस्तानावृत्य राजपार्षदाः ।
धर्षयितुं दण्डयितुं ताडयितुं सुसेऽममन् ॥८२॥
तावत्ते रोषमापन्ना जीवनाशां विहाय वै ।
दुद्रुवुर्मध्यदेशाच्च धूष्कृतीस्फोटकारिणः ॥८३॥
तदा मे पार्षदैर्लक्ष्मि धूष्कृतयः स्फोटिता द्रुतम् ।
युद्धं परस्परं जातं धूष्कृतीगोलिकामयम् ॥८४॥
मया ते गोलिकायन्त्रैर्विद्धाः सर्वेऽतिगर्विताः ।
मृतास्ते तत्र पश्चाद्यत्सर्वे गोल्यभिभेदिताः ॥८५॥
तान् सर्वाननयं स्वर्गं मम हस्तैर्मृतानतः ।
मोचितान् भक्तवणिजस्ततोऽहं समस्तान्स्वयम् ॥८६॥
ते सर्वे शरणं प्राप्ता नरा नार्यश्च बालिकाः ।
बालाश्च पेतुश्चरणे मम सैन्यस्वरूपिणः ॥८७॥
अथाऽहमददां तेषां सञ्चयात्म धनं तथा ।
भूषाम्बरादिसर्वस्वं यथा येषां तथाऽद्भुदाम् ॥८८॥
सर्वे ते सुखिनो जातास्ताडितांगेषु चाऽस्पृशम् ।
नीरुजस्तेऽभवँश्चापि नीर्भयाश्चाभवँश्च ते ॥८९॥
अथाऽहं सहसा लक्ष्मि वाज्युष्ट्रभटविग्रहान् ।
तिरोभाव्याऽभवँश्चैकश्चतुर्भुजो नरायणः ॥९०॥
वनचन्द्रं सुखादेवीं दर्शनं स्वमकारयम् ।
अन्येभ्यश्चापि सर्वेभ्यो दर्शनं स्वं ददौ तदा ॥९१॥
परमाश्चर्यमापन्ना निपेतुः पादयोश्च मे ।
सर्वे ते शरणं प्राप्ता भक्ता भक्तसमास्तथा ॥९२॥
अथाऽहमददां तेभ्यो मन्त्रं मेऽरण्यमण्डले ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९३॥
'हरेकृष्णबालकृष्णाऽनादिकृष्णनरायण ।
ब्रह्मप्रियापते राधालक्ष्मीपतेऽवनं कुरु' ॥९४॥
वैष्णवीं वै महादीक्षां दत्तवान् कमले तदा ।
सर्वानरण्यदेशाँश्चोल्लाङ्घयित्वा ततः परम् ॥९५॥
सर्वानापृच्छ्य कुशलं तीर्थमार्गं प्रदर्श्य च ।
तिरोऽभवं तत्र लक्ष्मि तेऽपि शनैः प्रभासकम् ॥९६॥
ययुस्ततो रैवतं च ततोऽश्वपट्टमाययुः ।
मानता याः कृताश्चासँस्तीर्थदानप्रतात्मिकाः ॥९७॥
सर्वस्वार्पणरूपाश्च ताः सर्वास्ते व्यधुस्तदा ।
मम पूजां प्रचक्रुश्च सतां सेवां व्यधुस्तथा ॥९८॥
स्वस्थाः सर्वे मम भक्तिं चक्रुस्तीर्थं समस्तकम् ।
अथ ते स्वर्णनगरीं चमत्कारपुरीं ययुः ॥९९॥
प्रापुर्देशं ततो नैजं भक्तिं चक्रुर्हि मे सदा ।
तारिता रक्षिताश्चापि देहान्ते मम धाम च ॥१००॥
प्रापितास्ते मया लक्ष्मि मम भक्तप्रसंगिनः ।
चौरास्ते लुण्टकाश्चापि मम स्वरूपवेदिनः ॥१०१॥
प्रापिता वै मया स्वर्गादन्ते वैकुण्ठधाम हि ।
एवं दयापरश्चाहं रक्षामि च नयामि च ॥१०२॥
मोचयामि भवपाशादुद्धरामि ममाश्रितान् ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेत्तथा ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने लुण्टकेभ्यो रक्षार्थं श्रीबालिकास्तुत्युत्तरं राजभटादिरूपधारिणा श्रीहरिणा लुण्टका हता भक्तास्तु रक्षिता इत्यादिनिरूपणनामा एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कथां भक्तस्य पावनीम् ।
पुरा धनिष्ठकोषाख्यो विप्रोऽभवद् धनादिमान् ॥ १ ॥
यज्ञयागकरश्चापि पञ्चायतनपूजकः ।
भक्तिपरोऽतिदानी च गोसहस्रधनस्तथा ॥ २ ॥
क्षेत्रवाव्यरण्यपतिर्व्यवसायोद्यमान्वितः ।
लक्षाणि स्वर्णरूप्याणां यत्कोषे सन्ति वै सदा ॥ ३ ॥

राजमान्योऽपि बहुधा युद्धपुरेशमानितः ।
राजा माल्वसिंहश्च नित्यं ताम्बूलकं शुभम् ॥ ४ ॥
ददात्यस्मै महासौधे सभायां गौरवोर्जितम् ।
राज्यातिदुर्वहे कार्येऽस्यैवाऽनुमतिमृच्छति ॥ ५ ॥
यथामुख्यप्रधानं वै तथा विप्रं समर्हति ।
उत्सवेषु समस्तेषु विहारेषु प्रपासने ॥ ६ ॥
समाजेषु शुभे सर्वविधेये मनुते द्विजम् ।
प्रजानामनुरागश्चाऽभवद्धनिष्ठकोषके ॥ ७ ॥
धनानां स प्रदानं वै साहाय्यार्थं प्रजासु ह ।
प्रकरोति विना लेखं वचोमूल्यं हि सत्यता ॥ ८ ॥
दीनानां च दरिद्राणामनाथानां च योषिताम् ।
साधूनां भिक्षुकाणां च वस्त्राऽन्नादिसहायकृत् ॥ ९ ॥
गृहदानानि बहूनि मन्दिराणि बहून्यपि ।
धर्मशालाः साधुमठानुद्दधार सुजीर्णितान् ॥१०॥
प्रपास्तथाऽन्नसत्राणि कारयामास राजवत् ।
राजाऽपि तेन सर्वत्र साहाय्यदोऽस्य वर्तते ॥११॥
धनिष्ठकोषो नित्यं मां भजते परमेश्वरम् ।
स्नात्वा सम्पूज्य मां भूपं मिलित्वाऽथ ततः परम् ॥१२॥
पञ्चदेवादिकान्नत्वा भुंक्ते नित्यं न चान्यथा ।
कुटुम्बं तस्य भक्तं मे सदा मां भजते रमे ॥१३॥
अथ राज्यमदो लक्ष्मि मदो धनस्य वै तथा ।
यौवनस्य मदश्चापि विपथं नयते जनम् ॥१४॥
इन्द्रियाणां प्रवेगश्च विषयाणामुपस्थितिः ।
मनसश्चापि चाञ्चल्यं भक्तं क्षिपति कल्मषे ॥१५॥
नित्यं नृत्यस्य योगे वा नित्यं वाद्यसमाजके ।
नित्यं शृंगारभावो वा रजोभावो विवर्धते ॥१६॥
नित्यं विषययोगाश्च नित्यं पदार्थयोगिता ।
हरते वेगवच्चित्तं निम्नगमनशालि यत् ॥१७॥
तथैवाऽस्य सुभक्तस्य राजसंसदि वर्तनम् ।
वारांगनादिनृत्येषु ह्युपस्थितिर्निशादिषु ॥१८॥
दासीनां सहवासाद्यैर्मनो विकारमासवत् ।
सुरूपा अपि लोभिन्यो धनवाञ्छाविमोहिकाः ॥१९॥
वारयोषा हावभावैः सेवनैः सहवासनैः ।
चिक्षिपुर्मम भक्तं तं मोहे धनिष्ठकोषकम् ॥२०॥
विषयेषु सुरम्येषु मग्नं चक्रुः शनैः शनैः ।
धनहार्यो धनं लब्ध्वा भोग्यास्तिष्ठन्ति तत्पुरः ॥२१॥
भक्तोऽपि मम भक्तिं च विहाय राजसंगतः ।
राजोद्याने सदाऽऽवासं प्रायशश्चाऽऽचरत्ततः ॥२२॥
कुटुम्बं स्वं क्वचिन्निभालयत्येव चिरेण सः ।
बहुधोद्यानवासं स राज्ञा समं करोति वत् ॥२३॥
राजापि बालमित्रं यत् सदा तं सेवते सह ।
पानभोजनखेलाद्यैर्नृत्यगायनरञ्जनैः ॥२४॥
एवं भक्तस्य संयोगे विषयैर्बाह्यवृत्तिभिः ।
पूजनं पठनं ध्यानं मम सर्वं शनैः शनैः ॥२५॥
क्षतिमाप्तं लयं प्राप्तं भक्तिर्मे खण्डिताऽभवत् ।
स्मरति मां कदाचित् स विशेषेण तु योषितः ॥२६॥
वारांगनाभिः सन्तुष्टो वर्तते स व्यवायकृत् ।
अथाऽस्य पुत्राः पुत्र्यश्च पत्नी साध्वी सधर्मिणी ॥२७॥
नाम्ना स्नेहलतादेवी शुशोच स्वपतिस्थितिम् ।
महाभागवती पत्नी भजते श्रीहरिं तु माम् ॥२८॥
प्रार्थयत्येव पूजायां पत्युर्धर्मस्य रक्षणम् ।
अधर्मस्य परित्यागं यशः कीर्तिं सुवंशजाम् ॥२९॥
बालकृष्णहरेकृष्ण पुरुषोत्तममाधव ।
तव भक्तस्य चित्ते यच्चाञ्चल्यं तत्प्रशामय ॥३०॥
अनादिश्रीकृष्णनारायणश्रीकान्तकेशव ।
मम पत्युर्व्यवायस्य व्यसनं त्वं प्रमोचय ॥३१॥
राजाऽपि तव भक्तः स्यात्तथा कृष्ण विधेहि च ।
गणिका अपि भक्ताः स्युर्यथा ते परमात्मनः ॥३२॥
प्रजाश्चापि च भक्ताः स्युस्तथा कृष्ण कृपां कुरु ।
व्रतं चाद्यदिनात् तेऽहं वर्षान्तं त्वेकभोजनम् ॥३३॥
करिष्ये च तथा साधुसतीसेवां समाहिता ।
प्रत्यहं पूजनं ते च करिष्ये घटिकावधिम् ॥३४॥
षोडशैरुपचारैश्च कारयिष्ये तु सूलके ।
प्रेंखां स्वर्णमयीं चापि मूर्तिं स्वर्णमयीं च ते ॥३५॥
कारयिष्ये श्रिया युक्तां राधया रमया युताम् ।
पद्मावत्या युतां युक्तां माणिक्यया च शोभनाम् ॥३६॥
लक्ष्म्या युक्तां तथा रम्यां विभूषाढ्यां सुयौवनाम् ।
शय्यापर्यंकमेवापि कारयिष्ये शुभोत्तमाम् ॥३७॥
स्वर्णराजतजन्यं च तवोपकरणान्यपि ।
व्यजने चामरे छत्रं पादुके भूषणानि च ॥३८॥
कारयिष्ये स्वर्णरत्नमयानि तव तुष्टये ।
नित्यं सुगन्धसारैश्च तैलसारैश्च मर्दनम् ॥३९॥
अभ्यञ्जनं द्रवैश्चापि पूजनं तुलसीदलैः ।
नैवेद्यं घृतमिष्टान्नैः कारयिष्येऽतितुष्टये ॥४०॥
तवोत्सवान् कारयिष्ये वार्षिकान् कान्त केशव ।
वणिजं मे पतिं वारांगनाव्यसनान्मोचय ॥४१॥

एषा ते शरणं प्राप्ता पतिता तव पादयोः ।
मम पत्युस्तु पापानि प्रज्वालय प्रियं कुरु ॥४२॥
इत्युक्त्वा स्नेहलतिका दीपोत्सवीदिने हरेः ।
कृत्वा मे पूजनं चाप्यासम्वत्सरं व्रतं व्यधात् ॥४३॥
उक्तान् सर्वान्नियमान् सा पालयामास भावुकी ।
पतिसंस्कारकं नाम व्रतं पूर्णं व्यधाद्धि सा ॥४४॥
उद्यापनं व्रतस्याऽपि चक्रेऽन्नकूटवद्दिने ।
प्रतिपद्येव कृष्णस्योत्सवं च व्रतपूर्तये ॥४५॥
मण्डपं कारयामास कदलीस्तम्भशोभितम् ।
तोरणादियुतं रम्यं कुण्डवेदीसमन्वितम् ॥४६॥
सिंहासनान्वितं विप्रदेवतादिविराजितम् ।
हव्यकव्यादिसामग्रीदानसामग्रिकायुतम् ॥४७॥
समिद्वह्नियज्ञकर्मवेदमन्त्रध्वनिश्रुतम् ।
साधुसाध्वीविष्णुभक्तकृतपाठादिघोषितम् ॥४८॥
वाद्यकीर्तनगीत्याद्यैर्घोषितं दानवर्धितम् ।
सत्यस्वरादिलोकानां वासिभिः समधिष्ठितम् ॥४९॥
तीर्थागमैर्दिव्यभावं कृष्णपार्षदराजितम् ।
ब्रह्मप्रियाविलसितं ध्वजपताकिकाऽन्वितम् ॥५०॥
सर्वतोभद्रनामार्थश्रेष्ठमण्डलशोभितम् ।
स्थालीकलशपात्राद्यैः शय्यादानादिभिर्युतम् ॥५१॥
पूजासामग्रिकाभिश्च पूज्यते यत्र माधवः ।
हूयते यत्र वह्नौ च हव्यं विविधजातिकम् ॥५२॥
उच्चार्यन्ते वेदघोषा मन्त्रा यत्र च भूसुरैः ।
दीयन्ते यत्र दानानि स्वर्णरूप्यमयानि च ॥५३॥
भुज्यन्ते भोजनानीष्टमिष्टान्नानि च भूसुरैः ।
दीयन्ते तृप्तचित्तैश्चाशीर्वादाः श्रेयसांप्रदाः ॥५४॥
पूर्णाहुतिर्घृतानां च धाराभिर्दीयते तदा ।
आययौ मण्डपे तत्र वृद्धो नारायणो नरः ॥५५॥
विप्ररूपोऽतितेजस्वी लक्ष्मि योऽहं स एव सः ।
स्वागतं चार्हणं चक्रुर्देवा मे ऋषयोऽपि च ॥५६॥
आसनं मे ददुः श्रेष्ठं वह्निर्मां चाप्यपूजयत् ।
उपाविवेश तत्राऽहं सर्वसम्मानितो द्विजः ॥५७॥
कस्य यज्ञ इत्यहं वै चापृच्छं वेधसं द्विजम् ।
सोमायनो द्विजः सोऽप्युवाच मां चांगुलिदृशा ॥५८॥
अस्याः स्नेहलतिकाया व्रतोद्यापनजोऽध्वरः ।
विद्यतेऽभीष्टसिद्ध्यर्थमस्या इष्टं भवत्विह ॥५९॥
भवत्विष्टमिति द्राक् चाऽवदं तत्राऽध्वरेऽप्यहम् ।
शृणु लक्ष्मि महाश्चर्यं तदोद्याने व्यजायत ॥६०॥
यत्र सौधे महान् श्रेष्ठी राजा भृत्या वसन्ति च ।
सौधः स कम्पितो जातो यथा भूकम्पकम्पितः ॥६१॥
उद्यानसहितः सौधो नान्यत् किञ्चित्तदा रमे ।
मदिच्छयैव जातः स कम्पो भयावहस्तदा ॥६२॥
सौधस्तु पतितस्तेन वारांगनाः प्रचूर्णिताः ।
राजा श्रेष्ठी सौधपाते मध्यावकाशके स्तरे ॥६३॥
पतितौ तत्र भग्नांगौ किन्तु प्रजीवितौ दरे ।
सहैव पतितौ मूर्छाविगमे भानसंयुतौ ॥६४॥
परस्परं चाह्वयतः का दशा ते धनिन् नृप ।
धनी प्राह मम पादौ भग्नौ जानुप्रदेशतः ॥६५॥
नृपः प्राह मम हस्तौ भग्नः कफोणिकास्थलात् ।
नान्यद् दुःखं वर्ततेऽत्र प्राणास्तिष्ठन्ति चावयोः ॥६६॥
मरणं नैव जातं वै परमेशकृता त्वियम् ।
आवाभ्यां श्रीहरेर्मार्गस्त्यक्त्वा वारांगनागतिः ॥६७॥
गृहीता पापदा तस्याः फलं त्विदं विनाशकृत् ।
तथापि पूर्वपुण्येन यद्वा सम्बन्धिपुण्यतः ॥६८॥
जीवावो दरमध्येऽत्र कृष्णदत्तावकाशके ।
अद्यप्रभृति वेश्यानां संगं त्यक्ष्याव एव ह ॥६९॥
परमेशं भजिष्यावो करिष्यावो व्रतानि च ।
यद्येतस्माद् दुर्गमाद्वै दुर्विभाव्यावकाशकात् ॥७०॥
निर्गमिष्याम एवाऽऽवां सप्राणौ भग्नमध्यतः ।
नारायणं भजावोऽत्र स नौ रक्षां करिष्यति ॥७१॥
एवं तौ निर्णयं कृत्वा हरेकृष्णेति जेपतुः ।
लक्ष्मि तौ स्नेहलतिकाध्वरपुण्येन रक्षितौ ॥७२॥
अथ युद्धपुरे तूर्णं यज्ञपूर्णाहुतेः परम् ।
राजप्रासादपतनं चाश्रूयत प्रजामुखात् ॥७३॥
नास्तिक्यस्तु प्रजाः प्राहुर्यज्ञे व्युत्क्रमजं फलम् ।
वास्तविकं न तत्तत्र व्युत्क्रमो नाऽभवन्मखे ॥७४॥
मदिच्छया हि तज्जातं पापेन श्रेष्ठिनोऽपि च ।
वारांगना मम भक्तपातनेन सकल्मषाः ॥७५॥
मृता एव स्वपापेन भक्तस्तु रक्षितो मया ।
राजाऽपि भक्तयोगेन भक्तयर्थं रक्षितो मया ॥७६॥
आस्तिकास्तु तदा प्राहुः पापा मृताः स्वपातकैः ।
अथापि यज्ञपुण्येन न मृतौ श्रेष्ठिभूभृतौ ॥७७॥
मनुष्याश्च द्रुतं गत्वा काष्टमालं समस्तकम् ।
शनैः कृत्वा दूरमेवोत्सार्य पाषाणमृत्तिकाः ॥७८॥
काष्ठाऽधोभागसंवासौ सजीवौ श्रेष्ठिभूभृतौ ।
शनैर्निस्सारयामासुर्भग्नांगौषधमाचरन् ॥७९॥

गणिकास्तु समस्तास्ताः शवात्मिकाः प्रकुञ्चिताः ।
मृता एवोपलब्धास्ता याम्यपुरं सिषेविरे ॥८०॥
वृद्धस्पृष्टौ वणिग् राजा स्वस्थपादकरौ द्रुतम् ।
सम्पन्नौ चाध्वरवार्तां श्रुत्वा प्रहर्षितौ ह्यति ॥८१॥
अनादिश्रीकृष्णनारायणो वृद्धस्वरूपधृक् ।
हस्ताभ्यां तौ सुपस्पर्श मूढमारो व्यलीयत ॥८२॥
पीडापि विगता सर्वा मण्डपे तौ समागतौ ।
दृष्टवन्तौ पुण्यकार्यं श्रुतवन्तौ स्त्रिया व्रतम् ॥८३॥
पतिदेवस्य शुद्ध्यर्थं राज्ञः शुद्ध्यर्थमित्यपि ।
प्रजायाश्चापि शुद्ध्यर्थं व्रतं ज्ञात्वा स्त्रियास्तदा ॥८४॥
प्रजा राजा धनी सर्वे प्रशशंसुः पतिव्रताम् ।
धन्या नारी हरेर्भक्ता मोक्षार्थिनी च पावनी ॥८५॥
श्रेयसोऽर्थे प्रजादीनां यया व्रतं चिरं धृतम् ।
यया द्रव्याणि नैजानि दैवकार्ये कृतानि च ॥८६॥
अस्याः पुण्येन भूपोऽयं श्रेष्ठी चेति प्ररक्षितौ ।
वयं सर्वे भजिष्यामो नारायणं श्रियः पतिम् ॥८७॥
राजाऽपि मण्डपे तत्र प्रकाशं व्याजहार तत् ।
श्रेष्ठी तथा प्रजाश्चापि व्याजहुर्मण्डपे यथा ॥८८॥
व्यसनानि समस्तानि त्यक्ष्यामः पापकानि च ।
भजिष्यामो हरिं कृष्णं बालकृष्णं सनातनम् ॥८९॥
प्रायश्चित्तं करिष्यामः कृतानां पापकर्मणाम् ।
भविष्यामो वैष्णवाश्च यास्यामोऽन्ते हरेर्गृहम् ॥९०॥
इत्येवं लक्षशस्तत्रायाता ये दर्शका अपि ।
यज्ञार्थं चाप्यकस्मातार्थं च तेऽपि नराः स्त्रियः ॥९१॥
राष्ट्रजा मानवाः सर्वे परिवर्तितमानसाः ।
वृद्धविप्रप्रतापेनाऽध्वसे वैष्णवदीक्षणम् ॥९२॥
जगृहुर्वृद्धविप्रात्ते व्यसनानि च तत्यजुः ।
दध्रुश्च तौलसीं कण्ठीं बालकृष्णेति नाम मे ॥९३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इतिमन्त्रं जगृहुश्चाऽभवँस्ते वैष्णवोत्तमाः ॥९४॥
व्रतं चक्रुः कार्तिकस्य शुक्लस्य सर्व एव ते ।
एकभुक्तत्वमेवापि प्रत्यहं पूजनं मम ॥९५॥
दानं नित्यं तथाऽन्नानां भजनं घटिकावधिम् ।
अथाऽहं मण्डपे तत्र दर्शनं स्वं ददौ शुभम् ॥९६॥
चतुर्भुजं दिव्यरूपं राधालक्ष्मीरमायुतम् ।
पद्मावतीमाणिकीश्रीसहितं सुमनोहरम् ॥९७॥
शंखचक्रगदापद्मकौस्तुभहारशोभितम् ।
दिव्यतेजोपरिध्याढ्यसुखं केयूरमण्डितम् ॥९८॥
दिव्यमुक्तैः पार्षदैश्च महर्षिभिः प्रसेवितम् ।
यज्ञानलैर्देवताभिर्देवैश्चाभिप्रपूजितम् ॥९९॥
स्नेहलतेष्टपूर्त्यर्थं चागतं परमेश्वरम् ।
वीक्ष्य मां पूजयाञ्चक्रुः पादजलं पपुश्च मे ॥१००॥
यज्ञप्रसादं जगृहुर्बुभुजुर्महीमानकाः ।
सर्वे समाप्ति यज्ञस्य चक्रुश्चावभृथं ततः ॥१०१॥
लुणीनद्यां प्रसस्नुश्च नृपस्य श्रेष्ठिनस्तथा ।
प्रजानां यानि पापानि प्रजज्वलुस्तदा रमे ॥१०२॥
अवभृथं महास्नानं सर्वपापविनाशकृत् ।
तत्र स्नाता हि शुद्ध्यन्ति महापापाऽपराधिनः ॥१०३॥
राजा श्रेष्ठी सस्मरतुर्मोक्षार्थे वारयोषिताम् ।
द्रागेव मद्बलात् तत्रावभृथस्नानपुण्यतः ॥१०४॥
राज्ञा च श्रेष्ठिना दत्तात् सर्वा याम्यालयाद् द्रुतम् ।
आययुर्मोचिता दूतैस्तत्र लुण्यास्तटे स्त्रियः ॥१०५॥
पपुर्वारि प्रसस्नुश्च मया च प्रोक्षिता जलैः ।
दिव्यदेहास्तूर्णमेव जातास्ता पापवर्जिताः ॥१०६॥
विमानैः प्रययुः सर्वाः स्वर्गे चिरं ततश्च ताः ।
प्रयास्यन्ति स्थिरं धाम वैकुण्ठं परमात्मनः ॥१०७॥
एवं ता मोक्षिताश्चापि प्रजाश्च वैष्णवीकृताः ।
राजा श्रेष्ठी निर्व्यसनौ कृतौ भक्तियुतौ स्त्रिया ॥१०८॥
ततोऽहं पूजनं प्राप्य तिरोभावं द्रुतं ततः ।
आयुष्यान्ते स्नेहलतां द्विजं सोमायनं तथा ॥१०९॥
धनिष्ठकोषं वणिजं मालवसिंहभूपतिम् ।
प्रजाश्च वैष्णवीः सर्वा यथाकालं ममाऽक्षरम् ॥११०॥
अनयं भक्तियुक्तांश्चेत्येवं वै पारदारिकम् ।
भक्तं शुद्धं विधायाऽहं लक्ष्मि मुक्तिं नयामि तम् ॥१११॥
पठनाच्छ्रवणादस्य स्मरणान्मननादपि ।
अपि पापसमाचारः शुद्धो यास्यति मत्पदम् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने युद्धपुराधिपेन सह धनिष्ठकोषस्य श्रेष्ठिनो वारांगनाव्यसनिनः स्वस्त्रीकृतभक्तिव्रताराधनादिना श्रीहरिणा मोक्षः कृत इत्यादिनिरूपणनामा द्वानवत्यधिकशततमोऽध्यायः ॥१९२॥

**पुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं ब्रह्मघ्नस्य प्रमोक्षणम् ।
आसीद् बाटासीनराख्ये ग्रामे राजीवभूपतिः ॥ १ ॥

राज्ञी तस्याऽभवत् साध्वी नाम्ना कुन्दनदेविका ।
पुत्री पुत्रवती धर्मपरायणा तपस्विनी ॥ २ ॥
भक्ता मे श्रीहरेश्चापि व्रतध्यानपरायणा ।
असूर्यम्पश्या चाऽस्पृश्या नरान्तरैः क्वचिद् रमे ॥ ३ ॥
पतिव्रत्यपरा देवपूजास्नानादितत्परा ।
चातुर्मास्यव्रतकर्त्री हर्युत्सवविधायिनी ॥ ४॥
दानधर्मपरा चापि परोपकारशालिनी ।
साधुसत्कारसेवार्थे कृतसर्वस्वमंगला ॥ ५ ॥
दीनानाथगवां सेवाविधात्री सूर्यपूजिका ।
कन्यकामानकर्त्री च ममाराधनतत्परा ॥ ६ ॥
अतिथ्यभ्यागतादिभ्यो भोजनाम्बरदायिनी ।
तीर्थकर्त्री स्वामिनश्च पादपूजापरा सदा ॥ ७ ॥
एवं संस्कारसम्पन्ना नित्यमालाप्रजापिनी ।
देवदर्शनरक्ता च नित्यं कथाश्रवान्विता ॥ ८ ॥
क्षेमं च कुशलं चापि वेत्ति या स्वप्रजासु वै ।
अहिंसाधर्मनिरता सत्यव्रतपरायणा ॥ ९ ॥
यस्याः पुण्येन राष्ट्रं वै शोभते मोदते बहु ।
प्रजाश्चास्या निरातंका निरामयाः सुसम्पदः ॥१०॥
अथ लक्ष्मि सुवर्णे वै सुगन्धो न कृतो यथा ।
तथा सुवर्णभार्यायामपि स्वामी त्वधोगतिः ॥११॥
राजाऽस्याः स्वपतिः क्रूरो न देवान् मनुते क्वचित् ।
धर्मकर्मादिकं व्यर्थं जानात्यैवाऽभिमानवान् ॥१२॥
न विप्रान्न च साधूँश्च गणयत्येव धार्मिकान् ।
अवमानं करोत्येव पूज्यानां त्वविवेकवान् ॥१३॥
न स्नानं नैव दानं च न पूजां नापि सद्व्रतम् ।
न तीर्थं नापि सत्कारं सत्कर्मापि करोति सः ॥१४॥
देवद्रव्यं विप्रधनं साधुधनं च धार्मिकम् ।
नाणकं परकीयं यल्लभ्यते बलतोऽपि वा ॥१५॥
आहरत्येव लुब्धात्मा नैव मुञ्चति कस्यचित् ।
स्तैन्याद् बलात् करात्लुञ्चायाश्च युद्धात् प्रपीडनात् ॥१६॥
कपटाच्छद्मतो लब्धं सर्वं न्याय्यं स वेत्ति वै ।
अन्यायं न्यायमेवाऽयं जानाति नृपकर्म तत् ॥१७॥
प्रजानां यद्धनं सर्वं क्षेत्रं भूमिर्गृहादिकम् ।
व्यापारा आयभागाश्च प्रजाश्च मे धनं हि तत् ॥१८॥
पुत्राः पुत्र्यो वेनवश्च वृषभा वाजिनो गजाः ।
यानवाहनपशवः सर्वे राज्ञश्च वेत्ति सः ॥१९॥
राज्यं राज्ञो न चान्यस्य जडं वा चेतनात्मकम् ।
पृथ्वीपतिर्यतो राजा पार्थिवाश्च नृपस्य वै ॥२०॥
पृथ्वीं भुंक्ते यतो राजा ततो भुंक्ते हि पार्थिवान् ।
सर्वांश्चापि विकारांश्चेत्येवं मनुते भूपतिः ॥२१॥
विशेषताऽस्य विप्रेषु द्वेषश्चासीत्तु जन्मतः ।
विप्रा वृथा नयन्त्येव लड्डुकान् दक्षिणास्तथा ॥२२॥
वृथा भिक्षाटनाश्चेति विप्राः प्रत्यक्षलुण्टकाः ।
मत्वैवं ब्राह्मणान् दृष्ट्वा निष्कासयति दूरतः ॥२३॥
दण्डयत्येव बहुधा भिक्षितं चाहरत्यपि ।
शृणु लक्ष्म्येकदा विप्रास्तीर्थकरास्तु विंशतिः ॥२४॥
बहुचराप्रभक्तास्ते वाटासीनरमाययुः ।
मार्गे विश्रान्तिलाभार्थं राज्ञ्या ते सत्कृतास्तदा ॥२५॥
भोजनाम्बरपानाद्यैर्दक्षिणादानवाहनैः ।
राज्ञा ज्ञातं धनं तेषामग्रेऽपि चास्ति वै तदा ॥२६॥
राज्ञ्या दत्तं च विपुलं तीर्थमिषेण तत्परम् ।
लोभेन नृपतिः श्रुत्वाऽऽह्वयद् विप्रान् स्वसन्निधौ ॥२७॥
लुलुण्ट तद्धनं सर्वं विप्राणां स ततोऽपि च ।
कारागारे रुषा सर्वान् न्यवासयच्च तद्दिने ॥२८॥
अथ विप्रास्तु संक्रुद्धाः शापं ददुस्तदोल्बणम् ।
राज्यं तव विनष्टं स्यात् कुटुम्बादिविवर्जितः ॥२९॥
आरण्यकः कापटी च भव क्षुद्रो हि भिक्षुकः ।
फलं विंशतिवर्षाणि भुक्त्वा च पाशवीं तनुम् ॥३०॥
प्राप्य दुःखानि सर्वाणि भुंक्ष्व नास्तिक निर्दय ।
शापो दत्तो दिने विप्रै रात्रौ बटोदराधिपः ॥३१॥
ससैन्यस्त्वाययौ युद्धेनोपाहरत् समस्तकम् ।
राज्ये निजं देशपालं नियोज्य निगडे स्थितान् ॥३२॥
विप्रान् विमोचयित्वा च राज्ञ्यै प्रादाय जीविकाम् ।
नृपतेश्च कुटुम्बं च संरक्ष्य तत्र वै ततः ॥३३॥
राजीवं धर्तुमेवाऽप्यन्वेषयामास यद्यपि ।
किन्तु स्वनगरं त्यक्त्वा गुप्तमार्गेण सत्वरम् ॥३४॥
निर्ययौ राजीवभूपो नर्मदावनभूस्थलीम् ।
विप्राणां शापदोषेण विंशतिवत्सराणि सः ॥३५॥
अरण्ये पाशवं दुःखं लब्धवान् क्षुद्रतान्वितम् ।
अथ राज्ञी भजते स्म सपुत्रपुत्रिका तु माम् ॥३६॥
कुन्दनदेवीतिनाम्ना ख्याता कृष्णपरायणा ।
अरण्यस्थोऽपि राजीवो दुःखितो हि स्वपापतः ॥३७॥
पापं बहुतरं चक्रे लुण्टनं पशुमारणम् ।
एवं वने प्रवसतश्चैको विप्रस्तु नर्मदाम् ॥३८॥
स्नातुं गच्छन् वने तत्र मिलितोऽस्य समीपगः ।
राजीवश्चापि विप्रं तं पप्रच्छ वद मेऽधुना ॥३९॥

क्व यासि किं तवाऽग्रेऽस्ति देहि सर्वं च मेऽत्र वै ।
विप्रः प्राह ममाऽग्रेऽस्ति पाथेयं च धनं मनाक् ॥४०॥
यात्रामात्रोपभोगार्थं न दास्ये ते वनेचर ।
एवं विवदतोस्तत्र तयोर्युद्धमजायत ॥४१॥
राजीवेन हतो विप्रो पाषाणैर्मर्दितो हृदि ।
विप्रोऽयं नर्मदातीरे प्रेतस्तत्र व्यजायत ॥४२॥
राजानं प्राणहन्तारं ववल्गे ब्रह्मघातिनम् ।
राजा शापेन दुर्भाग्योऽधिकोऽथ रक्षसाऽर्दितः ॥४३॥
विचित्तोन्मत्तजडवद् बभ्रामारण्यभूमिषु ।
अथापि कुन्दनदेवी ब्रह्मशीलपरायणा ॥४४॥
निद्रायामेकदाऽरण्ये ददर्श तं तु दुःखिनम् ।
क्षुधातृषातिसन्तप्तं राक्षसाविष्टयुन्मदम् ॥४५॥
पाशवीं वृत्तिमापन्नं राक्षसीं रीतिमास्थितम् ।
मृतं पशुं च वा पतत्रिणं खादन्तमित्यपि ॥४६॥
स्मरन्तं चोच्चरन्तं च कुन्दना कुन्दनेति च ।
कृष्णवर्णं रोमशं च रूक्षजटाधरं तथा ॥४७॥
अन्यमिव शायमानं विवृत्ताखिलतत्त्वकम् ।
शबरं वा पारधिं वा घातकं श्वपचं च वा ॥४८॥
तद्वद् विलोक्यमानं वै भयदं दर्शनादपि ।
अतिदुर्गन्धिशरीरं मलिनं बरठं यथा ॥४९॥
कुन्दना कुन्दना चेति व्याहरन्तं मुहुर्मुहुः ।
एतादृशं पापमूर्तिं वनेचरं प्रवीक्ष्य सा ॥५०॥
क्षणं विचारमकरोत् स्वप्ने कोऽयं भवेदिति ।
अथ सा भयमापन्ना प्राह कस्त्वं वनान्तरे ॥५१॥
स चाह राजीवनामा कुन्दनापतिरस्म्यहम् ।
पीडितः शापपापेन रक्षसाऽपि विशेषतः ॥५२॥
समुद्धरेत् कुन्दना मां तदा मे सद्गतिर्भवेत् ।
यावच्छृणोति निद्रायां कुन्दना नृपनोदितम् ॥५३॥
तावन्निद्रा गता राज्ञ्याः प्रातः सा प्रबुबोध ह ।
उत्थिता शोकमापन्ना पतिदुःखेन दुःखिता ॥५४॥
हस्तामलकवद् दृश्यं वीक्षमाणा त्वरान्विता ।
स्नात्वा पुपूज साध्वी मां श्रीपतिं कष्टहारिणीम् ॥५५॥
शोकातिशोकवदनोत्तप्तातितप्तमानसा ।
उच्चार्याश्रुकृताविलनेत्रा तुष्टाव मां सती ॥५६॥
नाथ त्वं पूर्णकामोऽसि नाऽऽप्तव्यं वै हि शिष्यते ।
तथाप्यत्र हि संसारे कथमायासि मे वद ॥५७॥
भक्तेच्छापूरणार्थं चेन्मम वाञ्छां प्रपूरय ।
यदि भक्ताऽस्मि ते शिष्या दासी वेति च मन्यसे ॥५८॥
मोक्षणीयोऽरण्यदुःखाद् राजीवो रक्षसा धृतः ।
यदि पापप्रभोगेण कर्मनाशोऽस्ति सर्वथा ॥५९॥
दयालो ते दयालुत्वं व्यर्थं व्यर्थस्तवाऽऽगमः ।
व्यर्था भक्तिश्च ते सर्वाऽर्थार्थिनोऽर्थाऽप्रपूरणात् ॥६०॥
नारी त्वर्थार्थिनी ह्यस्मि तथापि तव दासिका ।
अनादिश्रीकृष्णनारायणोद्धारं विधापय ॥६१॥
यदि पापिकृते कृष्ण कृपा ते नैव जायते ।
मम पुण्यं ददाम्यस्मै तेन त्वं तं समुद्धर ॥६२॥
यदि ब्रह्मप्रदण्डेन दग्धे दया न तेऽस्ति चेत् ।
मयि कृत्वा दयां कृष्ण मत्पतिं पातुमर्हसि ॥६३॥
यदि भूसुरहन्तुस्तु दण्डः पूर्णो विधीयते ।
तदा तद्दण्डमधुना मयि योक्तुं समर्थये ॥६४॥
तस्य त्वर्धाङ्गना चास्मि चार्धशुभाशुभार्थिनी ।
मम भक्तेर्जन्यपुण्यं त्वर्धं तस्य प्रतिष्ठतु ॥६५॥
तस्य पापं चार्धकर्म ममाऽत्रापि प्रतिष्ठतु ।
एवं नारायणविष्णो न्यायेन नियमेन च ॥६६॥
अपि योग्यविनिमयेनापि तं पातुमर्हसि ।
आसुराणां स्वयं हन्ता मुक्तिदोऽपि भवस्यतः ॥६७॥
राजीवस्यापि भगवन् सुखकृद् भव केशव ।
भक्ताया मम शान्त्यर्थं मदर्थितं विभावय ॥६८॥
भामाकृते यथा पारिजातोद्यमस्त्वयोह्यते ।
भामाऽहं तव दास्यस्मि मत्पारिजातमर्थये ॥६९॥
कल्पे कल्पे त्वया कृष्ण भामा तुष्टा विधीयते ।
पारिजातप्रदानेन भामां तुष्टां विधेहि माम् ॥७०॥
भक्त्या त्वां तोषयाम्यत्र त्वं दानेन प्रतोषय ।
सेवया स्त्री नरश्चार्थप्रदानेन परस्परम् ॥७१॥
प्रसादयतः सर्वत्र तथा त्वं कर्तुमर्हसि ।
सनाथाया अपि नाथ ह्यनाथां स्थितिमीक्षसे ।
कुन्दना कुन्दना चेति राजीवोऽरण्यके वदन् ॥७२॥
उद्धारं त्वर्थयत्येव समुद्धर कृपां कुरु ।
यावन्नोद्धारयसे त्वं चाऽनशने वसाम्यहम् ॥७३॥
इत्युक्त्वा कुन्दनादेवी लक्ष्मि चानशनं व्यधात् ।
एकासना निर्जला च निराहारा निराशया ॥७४॥
जितनिद्रा जिताहारा मरणे कृतनिश्चया ।
नेत्रे प्रमील्य हृदये ध्यानस्था सा बभूव ह ॥७५॥
आवर्तयति मालायां मां जपे त्वनिवर्तिनी ।
धारणाध्यानवृत्तिभ्यां मां बबन्ध हृदन्तरे ॥७६॥
न चचाल क्षणं क्वापि महावेगदृढीकृता ।
राजीवमोक्षणं कांक्षमाणा मत्परमाऽभवत् ॥७७॥

अहं तस्या मनो ज्ञात्वा पतिमोक्षार्थमेव तु ।
आन्तरस्थो बहिस्तूर्णमुपाययौ सुरूपवान् ॥७८॥
शंखचक्रगदापद्मधरो लक्ष्मीरमान्वितः ।
सर्वाऽऽभरणभूषाढ्यस्तथा पार्षसेवितः ॥७९॥
प्रसन्नवदनः शान्तो वरदानपरतत्परः ।
तेजःपरिधिसंव्याप्तविग्रहो दिव्यभूषणः ॥८०॥
एवंविधं तु मामग्रे स्थितं सा कुन्दनाऽऽन्तरात् ।
मया सम्बोधिता तूर्णं समाधेर्बहिरागता ॥८१॥
वीक्ष्य मां परमात्मानं समुत्थाय सती द्रुतम् ।
पपात पादयोर्मे द्राक् समाश्लिषच्च वक्षसि ॥८२॥
मम स्पर्शनमात्रेण दिव्यदृष्टिर्व्यजायत ।
व्यलोकयद्वने नैजं पतिं स्वप्ने विलोकितम् ॥८३॥
शीघ्रं मां लम्बहस्तेन व्यदर्शयत्पतिं निजम् ।
दुःखिनं रक्षसा ग्यातं मोक्षयितुं तदाऽऽर्थयत् ॥८४॥
अहं तत्रैव सहसा पत्युर्मोक्षार्थमेव ह ।
गरुडे संस्थितो भूत्वा नीत्वां साकं च कुन्दनाम् ॥८५॥
यत्राऽऽरण्ये वर्तते स राजीवस्तत्र पक्षिणा ।
आगच्छं चावतीर्याऽथाऽम्बरात् साकं तया रमे ॥८६॥
राजीवं तु भ्रमन्तं स्वकमण्डलुजलेन वै ।
अप्रोक्षयं ततस्तत्र रक्षो यो वल्गितोऽभवत् ॥८७॥
जलं पीत्वाऽथ तूर्णं वै दिव्यदेहो बभूव ह ।
मां स्तुत्वा मत्प्रतापेन विमानेन दिवं ययौ ॥८८॥
राजीवोऽपि तदा स्वस्थमनाः सुष्ठुप्रमानवान् ।
भूत्वा ज्ञात्वा निजां पत्नीं मां तथा परमेश्वरम् ॥८९॥
ननाम पादयोर्मे वै प्रणनाम च दण्डवत् ।
कुन्दनादेविका तस्मै सर्वं वृत्तं न्यवेदयत् ॥९०॥
ततो मया पुनर्वार्भिः प्रोक्षितः पावनोऽभवत् ।
पापानां नाशनं चक्रेऽपाययं वारि मत्करैः ॥९१॥
गरुडे तं समारोप्याऽऽनयं वाटासनं पुरम् ।
राज्ञ्या मन्त्रो दापितश्च राजा त्यक्त्वाऽभिमानकम् ॥९२॥
जग्राह मम मन्त्रं च कण्ठीं च तौलसीं तथा ।
वैष्णवो भगवद्भक्तोऽभवच्चास्तिकभावनः ॥९३॥
पुत्राः पुत्र्यस्तथा सर्वाः प्रजाः प्रसन्नतां गताः ।
अथ क्षेमं तथा तेषां कुशलं सम्विधाय च ॥९४॥
अन्ते ममाऽक्षरे लोके गमनार्थं वचो मम ।
दत्वा तिरोभवं शीघ्रं वटोदरनृपं प्रति ॥९५॥
अगच्छं ब्राह्मणो भूत्वा भिक्षामिषेण तत्र ह ।
याचितोऽथ स राजा वै भास्करविक्रमाभिधः ॥९६॥
वद विप्र प्रदास्ये ते यदिच्छाविषयं तव ।
जगाद मह्यं च ततोऽर्थयं राजीवरक्षणम् ॥९७॥
वाटासीनस्य राज्यं प्रत्यर्पयितुं पुनः पुनः ।
राजेश्वरस्तथोदारो नृपस्तथास्त्विति द्रुतम् ॥९८॥
उक्त्वा पत्रं प्राहिणोच्च प्रधानं प्रति तद्विधम् ।
राज्यं प्रदापयामास राजीवाय द्विजोऽप्यहम् ॥९९॥
पुना राज्ञ्यै नृपतये दत्वा मे दर्शनं तथा ।
तिरोभावं गतश्चाहं ततः कालान्तरे रमे ॥१००॥
राजीवं कुन्दनादेवीं तथा पुत्रान् सुपुत्रिकाः ।
वैष्णवं तत्कुटुम्बं च धामाऽक्षरं समानयम् ॥१०१॥
एवं मया पुरा भक्त्या पत्न्याश्चाराधनेन वै ।
पापोऽपि ब्रह्महाश्चापि राजीवो रक्षितो वनात् ॥१०२॥
राक्षसान्मोचितश्चापि राक्षसोऽपि प्रमोचितः ।
राजीवनृपतेः सर्वं कुटुम्बं मोचितं ह्यघात् ॥१०३॥
कुन्दनायाः प्रतापेन व्रतेनाऽनशनेन वै ।
ममाऽऽराधनभक्त्या च राज्यं स्वं प्रापितं पुनः ॥१०४॥
एवं लक्ष्मि मम भक्त्या भुक्तिर्मुक्तिर्भवेदिह ।
पठनाच्छ्रवणाच्चाऽस्य भुक्तिं मुक्तिं लभेत्तथा ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वाटासीनारनृपतेर्ब्रह्मघ्नस्य राक्षसाभिभूतस्य हृतराज्यस्य कुन्दनदेवीराज्ञ्याः परमभक्त्या भगवद्दर्शनं दुःखमोक्षणं चेत्यादिनिरूपणनामा त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्तासरोजिनीपतेः ।
चरित्रं प्रमदाघ्नस्य देवविश्रामनामिनः ॥ १ ॥
आसीच्चक्रधरो राजा विरामनगराधिपः ।
तस्याऽमात्योऽभवद् देवविश्रामाख्यः सुधार्मिकः ॥ २ ॥
राज्याभ्युन्नतिकर्ता स प्रजोदयाभिलाषुकः ।
राष्ट्ररक्षणयत्नस्थः सदा देवादिपूजकः ॥ ३ ॥
धर्ममार्गपरश्चापि सत्यधर्मपरायणः ।
साधुसाध्वीसतीसेवापरायणोऽतिसेवकः ॥ ४ ॥
ये केचिद् द्रव्यहीनास्ते याचन्ते देवविश्रमम् ।
सोऽपि ददात्यभीष्टं च तोषयत्येव भिक्षुकान् ॥ ५ ॥
अर्थिनोऽपि प्रतुष्टाश्च महाशीर्वादवादिनः ।
स्वर्गे राज्यं महाराज्यं तवाऽस्त्विति वदन्ति च ॥ ६ ॥

राजाऽपि धार्मिको नित्यं सेवते परमेश्वरम् ।
न चौरा नापि धूर्ताश्च न शठा न प्रतारकाः ॥ ७ ॥
रोचन्ते नृपतेः स्वस्य राज्ये नापि छलप्रियाः ।
यथा राजा तथाऽमात्यश्चौरादिदण्डकृत् सदा ॥८॥
अभिचारपरा ये च मन्त्रतन्त्रादिजीविनः ।
घातका मारका ये ते रोचन्ते नाऽस्य वै क्वचित् ॥९॥
अथैकदा बहुचरामातुस्तु सेविकाः स्त्रियः ।
योगिन्यो मन्त्रवेत्त्र्यश्च भिक्षार्थं निर्ययू रमे ॥१०॥
यत्र दानेश्वरा भूपा यत्र दानिजनास्तथा ।
श्रूयन्ते तत्र तत्रैता भिक्षन्ते वै धनं रमे ॥११॥
स्वर्णं रूप्यं चाम्बराणि यानानि वाहनान्यपि ।
हीरकान् माणिक्यवर्णान् रत्नानि विविधानि च ॥१२॥
विभूषाश्चापि भिक्षन्ते प्रापयन्ति च भिक्षितम् ।
बहुचरां महादेवीं समर्पयन्ति तास्तथा ॥१३॥
माता बहुचरा लक्षगुणं दास्यति दानिने ।
एवं वचः परं तूक्त्वा दानं गृह्णन्ति ताः स्त्रियः ॥१४॥
अथ येन ददत्याभ्यः श्रेष्ठिनो वा नृपा जनाः ।
तदा तेषां गोपुरेषु गृहद्वारेषु ताः स्त्रियः ॥१५॥
आसनानि स्थिरीकृत्य कीर्तयन्ति तु संघशः ।
व्रतं धृत्वा ह्यनशनं कलिं कुर्वन्ति तास्तपः ॥१६॥
"जय जय मातर्बहुचरे जय जय मातर्बहुचरे ।
दानिनस्त्वं धनंकरे जय जय मातर्बहुचरे" ॥१७॥
एवं तालीं वादयन्त्यः प्रगायन्ति गृहांगणे ।
पञ्च वा सप्त वाऽह्वानि तिष्ठन्ति न प्रयान्ति ताः ॥१८॥
गृहाधीशास्ततः प्राप्य पराजयं ददत्यपि ।
ताश्च गृह्णन्ति बहुधा स्वर्णं रूप्यं धनादिकम् ॥१९॥
अथ चेन्नैवाऽर्पयन्ति धनं द्रव्यं यथेप्सितम् ।
प्रसह्याऽनशनं कृत्वा यतन्ते कलहैरपि ॥२०॥
गृहीत्वैव प्रयान्त्येव नाऽन्यथा हठतः स्त्रियः ।
एवंविधास्ताः सर्वाश्च योगिन्यो दशसंख्यकाः ॥२१॥
हठं चक्रुर्धनार्थं वै तदाऽमात्यो ददौ धनम् ।
शतं सुवर्णमुद्राणां लब्ध्वापि तोषवर्जिताः ॥२२॥
ययाचिरे सहस्रं वै सुवर्णानां तथेतरत् ।
रत्नहीरकभूषादि नृपादपि पृथग् धनम् ॥२३॥
दशसहस्रमुद्राश्च मणिमौक्तिकमालिकाः ।
एवं हठेन युक्तास्ता ययाचिरे न निर्ययुः ॥२४॥
अथ याते तु सप्ताहे दीयमाने सहस्रके ।
सौवर्णात्मकमुद्राणां यदा तोषं गता न ताः ॥२५॥

तदाऽमात्यस्य नाशार्थं मन्त्रं चाप्यभिचारकम् ।
राज्ञश्चापि विनाशार्थं मन्त्रं मलिनं चक्रिरे ॥२६॥
अथाऽमात्यस्तु पतितो व्यग्रोऽभवत् सुमूर्च्छितः ।
घट्यन्तरे पुनः संज्ञां प्राप्य समुत्थितोऽभवत् ॥२७॥
राजाऽपि च तथाऽवस्थां प्राप्तो मूर्च्छां ततः पुनः ।
उत्थितश्चेति तत्सर्वं कर्तव्यं चाभिचारकम् ॥२८॥
अमात्यश्चाऽसहमानोऽसहमानो नृपोऽपि च ।
स्वभटैरग्रपूज्यायाः शिरश्छेदमकारयत् ॥२९॥
अथाऽन्या अबलाः क्रूरा मृत्युभयेन दुद्रुवुः ।
दत्तं धनं गृहीत्वैव त्यक्त्वा शवं मृतस्त्रियाः ॥३०॥
प्रधावनं प्रचक्रुस्ताः प्रययुर्नगरान्तरम् ।
लोके प्रजायां सर्वत्र स्त्रीहत्यां कृतवान्नृपः ॥३१॥
स्त्रीहत्यां कृतवाँश्चाऽस्याऽमात्योऽप्यीत्ययशोऽभवत् ।
अग्निदा गरदा शस्त्रोद्यता मन्त्राभिचारिका ॥३२॥
ता एता आततायिन्यः शापदा शत्रुदा तथा ।
तासां नाशे न वै दोषः प्राणहा हि वधार्हणा ॥३३॥
अतो लक्ष्मि तथारूपाविघाते नैव दूषणम् ।
तथापि लोकवादाश्च जायन्ते स्त्रीहननात्मकाः ॥३४॥
अयशोबोधकाः सर्वे लोकस्य चित्रिता गतिः ।
धिक्कुर्वन्ति प्रजाश्चाऽस्याऽमात्यस्य नृपतेरपि ॥३५॥
कारणं चाभिचारादि ह्यविदित्वैव वै मृषा ।
अयशः संप्रगायन्ति स्त्रीघ्नोऽमात्यो नृपस्त्विति ॥३६॥
अथ राजा चक्रधरोऽमात्यं प्राह शुभं वचः ।
देवविश्रामनामानं कलंकस्याऽपनुत्तये ॥३७॥
कथंकार्यं कुवदन्त्याः प्रक्षालनं महामते ।
यथा प्रजायां सन्तोषः प्रवादक्षालनं भवेत् ॥३८॥
पापं यद्यपि हनने नास्त्यभिचारयोषितः ।
तथापि कुवदन्त्या वै शान्तये व्रतमाचरेत् ॥३९॥
यथा विचार्य सुखदं ब्रूहि चामात्य शोभनम् ।
कर्तव्यं तद्यथायोग्यं धर्मकार्यं यथा भवेत् ॥४०॥
अमात्यः प्राह भूप त्वं सभामाहूय शोभनाम् ।
वृद्धप्रजाजनानां च तत्राऽऽवेदय मानसम् ॥४१॥
राजा श्रुत्वा तथा चक्रे सभां तत्र च मानवाः ।
प्रजावृद्धा आययुश्च नरा नार्यः सहस्रशः ॥४२॥
अथाऽमात्येन निर्दिष्टः पुरोहितोऽतिधार्मिकः ।
बहुश्रुतस्तथा शास्त्रसम्पन्नो वेदपारगः ॥४३॥
धर्मविद्देशकालज्ञः प्रेरितोऽमात्यवाक्यतः ।
राज्ञा चाज्ञाकृतो धर्मान् सभायां व्याजहार सः ॥४४॥

शृण्वन्तु पूज्यवर्गाश्च वृद्धा नार्यो नरास्तथा ।
धर्मस्य लक्षणं वच्मि यथाशास्त्रानुसारतः ॥४५॥
नोदनालक्षणो धर्मोऽर्थकृन्मोक्षप्रदोऽपि च ।
अनर्थकृद् विरुद्धार्थश्चाधोगतिप्रदोऽवृषः ॥४६॥
यमार्याः पाल्यमानं वै प्रशंसन्ति वृषो हि सः ।
यं तु निन्दन्ति लोकाः स त्वधर्मः परिकीर्तितः ॥४७॥
लोकानां धारणं येन पोषणं रक्षणं तथा ।
सुखं क्षेमं च कुशलं भवेद्धर्मः स उच्यते ॥४८॥
देशे काले च सत्पात्रे स्थितश्चाचार एव यः ।
सुखदः स्यात् स धर्मः स्याद् दुःखदः स्यादधर्मकः ॥४९॥
धर्मेण जायते कीर्तिः सुखं शान्तिः सदा तथा ।
उन्नतिश्चोदयश्चापि स्वर्गं मोक्षश्च शाश्वतः ॥५०॥
स एव धर्म उदितो येन राजा प्रजाः सुखाः ।
देवपूजा तथा दानं व्रतं दया च दक्षिणा ॥५१॥
परोपकारः सततं धर्मोऽयं सर्वदेहिनाम् ।
स्नानं जपो देवनमस्कारो देवार्पणं तथा ॥५२॥
वृद्धाभिपूजनं धर्मो नृपाभिपूजनं तथा ।
आचारः प्रथमो धर्मो ह्यधर्मस्तद्विपर्यये ॥५३॥
सतामाचार एवाऽस्ति धर्मो न त्वसतां तथा ।
अहिंसा सत्यमस्तेयं ब्रह्मव्रतं तपो दमः ॥५४॥
धर्म एव परः प्रोक्तो वृद्धसेवाऽपि दुर्लभा ।
साधुसेवा च सत्संगः परो धर्मः प्रकीर्तितः ॥५५॥
भूतानामुपकारश्च यथाशक्ति वृषो मतः ।
प्रसन्नीकरणं धर्मः प्रसन्नत्वं हि दुर्लभम् ॥५६॥
अप्रसादस्तथोद्वेगोऽनुपकारो ह्यसेवनम् ।
हिंसाऽनृतं प्रसह्याऽपहरणं दुष्टसंमिता ॥५७॥
अधर्म एव भवति त्याज्याश्चायं सदा जनैः ।
श्रद्धया दीयते दानं धर्म एव मतो हि सः ॥५८॥
प्रसह्य ह्रियते यत्तु स त्वधर्मो हि लुण्ठकृत् ।
अभिचारो भवेन्मन्त्रैः प्राणानां घातको यदि ॥५९॥
अधर्म एव राज्ञां वा प्राणनाशोऽप्यधर्मकः ।
प्रधानस्याभिचारेण मारणं चाप्यधर्मकः ॥६०॥
देशे काले च पात्रे च हिंसा दुष्टाशयस्तथा ।
आततायिक्रिया चापि ह्यधर्म एव कीर्तितः ॥६१॥
एतादृशो यदाऽधर्मो नरे नार्यां च बालके ।
बालायां वा प्रवर्तेत चाततायिस्वरूपधृक् ॥६२॥
हन्तव्य एव शस्त्राद्यैरधर्मोऽधर्मवाँस्तथा ।
आततायी प्रहन्तव्यः सर्वथा प्राणरक्षणे ॥६३॥

आततायी यदा नैव हन्यते येन सोऽपि वै ।
द्रुतं हतो भवेत्तस्माद्धन्तव्य आततायकृत् ॥६४॥
एतद्धर्मस्वरूपं वै मयोक्तं भवतां पुरः ।
बहुचराया भक्तानां स्त्रीणामत्र प्रपूजनम् ॥६५॥
कृतं सहस्रमुद्राभिः सुवर्णानां यथायथम् ।
तथापि च बलान्नार्यो हठान्नेतुं हढाशयाः ॥६६॥
अभिचारं प्रचक्रुस्ता नृपेऽमात्येऽतिमारकम् ।
अतस्ता आततायिन्यो मारिकाः पूतना यथा ॥६७॥
राक्षस्य एव ताः प्रोक्ता हिंसिकास्तामसात्मिकाः ।
मन्त्रवेत्र्यश्चाततायभिचारकार्ययोजिकाः ॥६८॥
हन्तव्या एव नास्त्यत्र दोषो धर्म इतिस्थितिः ।
वधार्हास्ताः समस्ता वै किन्त्वेका विहताऽऽसु तु ॥६९॥
दया कृता न क्रौर्यं तद्धर्म एव न चेतरः ।
धर्म एव हि तत्राऽस्ति दुष्टानां मारणं तु यत् ॥७०॥
प्राणहानां प्राणनाशो धर्म एव यतः प्रजाः ।
स्त्रीवधो दूषणं नास्ति पूतनावध एव सः ॥७१॥
कृत्यावधे न वै दोषो धर्मं तं वै निबोधत ।
सिंह्यां नाम्न्यां तथा व्याघ्र्यां वृश्चिक्यां न दयालुता ॥७२॥
प्राणघ्नायां तु राक्षस्यां तथा दया न सम्मता ।
अत एव न घातिन्यां दया कार्या क्वचिज्जनैः ॥७३॥
प्रवृत्तायां प्राणनाशे दया कार्या न सर्वथा ।
अप्राणनाशे प्रवृत्तावुपेक्षा तत्र युज्यते ॥७४॥
एवंधर्मो भवत्येव तस्मात् प्रजाग्रगामिनः ।
भवन्तो यद्भवन्त्वत्राऽभिचारिणीविनाशने ॥७५॥
पापं वा यदि वा पुण्यं नोभयं चोभयं च वा ।
श्रुत्वैवं ते सभापूज्या ऊचुश्चातीव धार्मिकम् ॥७६॥
आततायिवधे दोषो न घातिन्या वधेन च ।
अभिचारपरायाश्च वधे दोषो न विद्यते ॥७७॥
किन्तु नारीति प्रहतेत्येवंवादविशुद्धये ।
विष्णुयज्ञः प्रकर्तव्यः सर्वापवादशान्तिदः ॥७८॥
इत्यस्माकं मतं पुण्ये कार्ये राजा करोत्विदम् ।
प्रजाजनानां वचनं लक्ष्मि भूपेन मानितम् ॥७९॥
अमात्येन स्वीकृतं च सभायां सर्वशुद्धये ।
अथाऽऽदाय मुहूर्तं स शुभं मखमकारयत् ॥८०॥
मण्डपं कुण्डमुत्कृष्टं देवानां स्थापनानि च ।
पूजनानि च दानानि भोजनानि घृतानि च ॥८१॥
दक्षिणा विविधाश्चापि हव्यानि समिधस्तथा ।
विष्णवे पूजनादीनि कव्यानि ह्यम्बराणि च ॥८२॥

अन्नधनानि योग्यानि राजाऽमात्यप्रजा ददुः ।
पूर्णाहुतिं प्रचक्रुश्च तदा नारायणो ह्यहम् ॥८३॥
अगच्छं श्वपचो भूत्वा भोजनं चाऽर्थयं ततः ।
अमात्यः प्रददौ भोज्यं दूरान्मे तु तदा रमे ॥८४॥
तदा भुक्तं मया चान्नं पंक्तिपावनकारिणा ।
चुलुकं च कृतं हस्तप्रक्षालनं तथा कृतम् ॥८५॥
जलं प्रपीतं यावद्वै तावद् राज्ञस्तु देहतः ।
कृष्णवर्णो धूम्र एव निर्गत्याऽमात्यगोऽभवत् ॥८६॥
अमात्यदेहतः कृष्णा नारी पापा हि निर्गता ।
मृता सा योगिनी हत्यारूपा स्त्री ह्यभवद्धि सा ॥८७॥
आकृष्टा श्वपचेनैव श्वपचे सा तिरोहिता ।
अग्निदग्धा द्रुतं तस्य श्वपचस्य तु मस्तकात् ॥८८॥
विद्युद्रूपा प्रभुत्वैव शीघ्रं सा व्योमऽगाभवत् ।
अस्तौद् दिव्यस्वरूपा च श्रीपतिं मां रमापतिम् ॥८९॥
अभिचारिकनार्या मे मोक्षार्थं भगवान् भवान् ।
उपस्थितोऽस्ति यज्ञेऽत्र पूत्यर्थं नृपयज्ञयोः ॥९०॥
भक्तहस्तेन या हत्या साऽपि मोक्षाय जायते ।
पापाया मम हत्याऽपि त्वद्योगेन दिवंप्रदा ॥९१॥
मोक्षप्रदा भवत्येव पुण्यं मे जायतेऽधुना ।
हरेकृष्ण बालकृष्ण श्रीपते परमेश्वर ॥९२॥
बहुचराय।स्ते शक्तेः सेविकां मां समुद्धर ।
इत्युक्त्वा भगवद्दृष्ट्या तूर्णं सा स्वर्गतिं गता ॥९३॥
कालान्तरे हरेर्भक्त्या वैकुण्ठं सा ययौ सती ।
अथ राजा कुटुम्बं चाऽमात्योऽपि परमेश्वरम् ॥९४॥
मां विज्ञाय हरिं चाऽपि पुपूजुश्च प्रजाजनाः ।
तदऽहं द्राक् चतुर्बाहुर्भूत्वाऽध्वरे शुभासने ॥९५॥
निवेशितो निषसाद प्रसादं मे ददौ तदा ।
सर्वेभ्यः कणकारूपं चरूत्थं तेऽपि जगृहुः ॥९६॥
पावनास्ते समस्ता वै जाताः सर्वे ममाऽऽगमात् ।
एवं हत्याकलंकं वै मया विनाशितं तयोः ॥९७॥
काण्डिकानामिकाया वै योगिन्या मोक्षणं कृतम् ।
राजाऽमात्यौ वरदानैः स्वर्गार्थे मोक्षणाय च ॥९८॥
आशीर्वादैर्योजितौ च कुटुम्बे चापि वै तयोः ।
अथ कालान्तरे स्वर्गवासिनौ तौ मया कृतौ ॥९९॥
मोक्षभाजौ तथा तस्मात् कृतौ लक्ष्मि नृपाऽनुगौ ।
एवं यज्ञोत्तरं सर्वे कृपया कृतवानहम् ॥१००॥
तिरोऽभवं त्वध्वरे चाकर्षयन् तन्मनांस्यपि ।
सस्मरुर्थे नरा नार्योऽपि ते धामाऽक्षरं ययुः ॥१०१॥
एवं मया स्त्रीहत्यायाः पापं विनाशितं प्रिये ।
भुक्तिं मुक्तिं लभेतापि पाठकः श्रावकोऽस्य च ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने चक्रधरनृपाश्रया देवविश्रामाख्यामात्यस्य काण्डिका-योगिनीस्त्रीहत्यायाः पापस्य यज्ञे श्रीहरिणा निवृत्तिः कृतेत्यादिनिरूपणनामा चतुर्नवत्यधिकशततमोऽध्यायः ॥१९४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि ! त्वं कथां पापविनाशिनीम् ।
सौराष्ट्रे मायूरपुर्यां मत्स्यायाः सरितस्तटे ॥ १ ॥
महोद्याने तदुद्यानपालो माली कुटुम्बवान् ।
हर्षुलाख्यो हरेर्भक्तो धर्मकर्मपरायणः ॥ २ ॥
स्नानपूजनदानादितत्परोऽभूत् स्वशक्तितः ।
हर्षुलस्याऽभवत् पत्नी नाम्ना विद्रुमवल्लकी ॥ ३ ॥
साऽपि भक्ताऽभवत् किन्त्वनपत्या शोकशालिनी ।
ओषधीनां प्रयोगैश्च तथा मन्त्रादिभिः शुभैः ॥ ४ ॥
बहुधा मानताभिश्च नाऽभूत् सा गर्भशोभना ।
निराशा सा सन्निहितवार्धक्या तु यदाऽभवत् ॥ ५ ॥
तदा पतिस्तदाशां च विहायाऽन्यां स्त्रियं शुभाम् ।
अर्धावस्थगतां पत्नीं चाकरोद् विधिरीतितः ॥ ६ ॥
सा तु गर्भवती जाता नाम्ना तु चित्रपल्लवा ।
हर्षुलो हर्षमापन्नो भाविपुत्रस्य चिन्तनैः ॥ ७ ॥
दानं धर्मं व्रतं पुण्यं करोति पुत्रवाञ्छया ।
सतां प्रपूजनं चापि सत्कारं फलभोजनैः ॥ ८ ॥
करोति सर्वथा चाभ्यागतानामपि पूजनम् ।
आशीर्वादान् प्रगृह्णाति पुत्रार्थी श्रद्धयाऽन्वितः ॥ ९ ॥
फलादिकं निजोद्यानाद् देवालयाय नित्यदा ।
प्रापयत्येव भक्तात्मा सेवते मन्दिरादिकम् ॥१०॥
विद्रुमवल्लकी यावत् तथैव चित्रपल्लवा ।
पतिभक्तिमती चापि पापभीतियुताऽपि च ॥११॥
विद्रुमवल्लकी नित्यं स्वापमानं हि नित्यदा ।
मनुते ह्यनपत्यत्वाद् वार्धक्याच्च विशेषतः ॥१२॥
सगर्भा चित्रपल्ली तु मानमर्हति सर्वतः ।
सापत्न्यं हि महद्दुःखं विद्रुमाया उपस्थितम् ॥१३॥
तत्रापि पुत्रवत्याश्च सपत्न्या दुःखमुल्बणम् ।
मत्वा नित्यं चिन्तयति गर्भपातो भवेदिति ॥१४॥
कटुतीक्ष्णोष्णभावानि भोजनानि नवानि सा ।
कृत्वा स्वादयुतान्येव गर्भवत्यै ददाति हि ॥१५॥

तथापि गर्भपातो नाऽभवत्ततश्च सा पुनः ।
गर्भपातौषधं तस्यै भोजने प्रददात्यपि ॥१६॥
गर्भपातो न वै जातो मासाः पूर्णाः प्रसूतये ।
पुत्रजन्माऽभवन्माली हर्षुलो हर्षमाप्तवान् ॥१७॥
चित्रपल्ली प्रसन्नाऽभूच्छुष्का विद्रुमवल्लकी ।
हर्षुलोऽपि यथाशक्ति दानं ददौ द्विजातये ॥१८॥
फलपुष्पाम्बरायां च स्वर्णरूप्यकमूलिनाम् ।
गोदानं भोजनं चापि ददौ योग्याय साधवे ॥१९॥
जातकर्मादिकं चक्रे पुत्रवान् प्रेमविह्वलः ।
उद्याने तत आरभ्य चाऽभ्यागतस्य वै कुटीम् ॥२०॥
अकरोद्धर्षुलस्तत्रागतं चाभ्यागतं तु सः ।
अतिथिं वा सतीं साधुं सेवतेऽन्नफलादिभिः ॥२१॥
सत्संगं प्रकरोत्येव वार्धक्ये पुत्रलाभवान् ।
मोदते कीर्तनं नित्यं गायत्यपि हरेस्तथा ॥२२॥
मूर्तिं मे फलपुष्पाद्यैः पूजयत्येव भावतः ।
एवं पुत्रस्य वर्षे वै व्यतीतं सर्वथा शुभम् ॥२३॥
विद्रुमवल्लकी रुष्टा शोकातुराऽतिदाहतः ।
व्यचिन्तयद् विषदानं सुतस्येर्ष्याभिसंभृता ॥२४॥
विषमूलं खनित्वेयं कृत्वा रसं मनागपि ।
दुग्धपाने ददौ सा तु बालनाशाय पापिनी ॥२५॥
अथ श्रीभगवाँश्चाऽहं भक्तरक्षाकरो यतः ।
साधुरूपधरस्तस्या महीमानोऽभवं तदा ॥२६॥
हर्षुलस्य गृहे तत्रोद्यानेऽगच्छं यथाऽतिथिः ।
हर्षुलो मां मधुपर्कैस्तथा फलजलादिभिः ॥२७॥
मिष्टैः सत्कारयामास शुभान्नैश्चासनादिभिः ।
चित्रपल्ली प्रसन्ना च सिषेवे मां मुदान्विता ॥२८॥
विद्रुमवल्लिका त्वेका जानाति दुग्धपानके ।
विषमूलरसं दत्तं तेन बालो मरिष्यति ॥२९॥
साऽपि प्रसन्नमनसा साधुसेवापराऽभवत् ।
प्रतीक्षते कदा मृत्युर्भवेद् बालस्य पापिनी ॥३०॥
बालः सुप्तो दुग्धपानोत्तरं शान्त्या तु तत्प्रसूः ।
जानाति तेन साधोः सा सेवायां चिरमावसत् ॥३१॥
बालो विषप्रवेगेण विप्राणः समजायत ।
पर्यंके ह्यव नैवाऽन्ये जानन्ति हरिमन्तरा ॥३२॥
सर्वे वै साधुसेवायां तत्पराश्च यदाऽभवन् ।
नन्दा विद्रुमवल्ली सा ययौ शौचार्थमित्यपि ॥३३॥
तत्रैकां मृतगोधां सा गृहीत्वा कलशे तदा ।
पुत्रपर्यंकपार्श्वे त्वानाय्याऽक्षिपद्धि भूतले ॥३४॥
अथाऽन्ये नैव जानीयुस्तथाऽक्षिपद्धि सा शनैः ।
अथ दण्डं समगृह्याऽऽक्रोशं व्यधाद् बलादति ॥३५॥
धावन्तु चात्र धावन्तु गोधादष्टः सुतस्त्वयम् ।
गोधेयं दण्डघातैश्च ताड्यतेऽत्र मया पते ॥३६॥
भगिनि द्रुतमागच्छ पुत्रो दष्टोऽनया त्विह ।
एवं गोधां मृतां चापि यष्ट्या सा ताडयत्यपि ॥३७॥
विदधाति महाऽऽक्रोशं यथा शृण्वन्ति चाऽपरे ।
कोलाहलं परं श्रुत्वा मृषा तद्द्रोहनं ह्यपि ॥३८॥
साधुना सहिताः सर्वे धावमानाः सुतालयम् ।
ययुः प्राणवशा यद्वच्छ्रुत्वा दृष्ट्वा मृतं सुतम् ॥३९॥
रुरुदुश्चापि सर्वे ते माता तु कुररी यथा ।
विना पुत्रं यथा शोकवती ततोऽपि चाऽधिका ॥४०॥
प्राप्तपुत्रविनाशेन शोकमग्नाऽभवत् सती ।
पिताऽपि शोकमापन्नो रुरोद मुक्तकण्ठतः ॥४१॥
उद्याने पार्श्वतस्तत्र बहवः कर्षुकादयः ।
समाययुर्हि शोकार्त्ताः श्रुत्वा पुत्रस्य दंशनम् ॥४२॥
मृत्युं विलोक्य सहसा शोकसागरमज्जिताः ।
कपटे वर्तमानां च वेद्मि विद्रुमवल्लकीम् ॥४३॥
सापि भयं गता तत्र साधुश्चायं प्रतापवान् ।
यदि वेत्स्यति गरलं दत्तं विद्रुमवल्लया ॥४४॥
तदा मे प्राणनाशं वै पतिर्मे संकरिष्यति ।
इत्येवं भयमापन्ना साधोः पादौ प्रगृह्य सा ॥४५॥
शनैर्मर्दनसंज्ञां च करोत्यथापि संज्ञया ।
अंगुलीस्पार्शनभावैर्मम दोषोऽयमित्यपि ॥४६॥
विज्ञापयति रक्षार्थं मा प्रकाशं विधेहि च ।
मयाऽपि सा तदोक्ता वै साधुर्हितकरोऽस्म्यहम् ॥४७॥
सर्वेषां हितमेवाऽत्र करिष्ये पापवर्जितम् ।
मा शोकं पुत्रमृत्योश्च कुर्वन्तु साधुसेवकाः ॥४८॥
अहं शोकापनोदं वै कर्तुं शक्तोऽस्मि सर्वथा ।
बालं मृतं विद्यया च सञ्जीवन्या सजीवितम् ॥४९॥
कर्तुं शक्तोऽस्मि तस्माद्वै मा रुदन्तु सतांप्रियाः ।
गोधां चापि जीवयिष्ये लभन्तामत्र वै सुखम् ॥५०॥
इत्युक्त्वा सहसा चाऽहं कृत्वा मम करे जलम् ।
मन्त्रयित्वा मम नाम्ना मृतबालमुखेऽददाम् ॥५१॥
जलस्य स्पर्शमात्रेण प्राणयुक्तोऽभवद्धि सः ।
जीवितः सहसा बालो निर्विषः समजायत ॥५२॥
गोधाऽपि जलसंस्पर्शात् क्षिप्तात् सजीवनाऽभवत् ।
अथ सा मां नमस्कृत्य स्वर्गाद् विमानमागतम् ॥५३॥

समारुह्य ययौ गोधा देवी भूत्वा दिवं शुभम् ।
विलोक्यैतन्महाश्चर्यं हर्बुलाद्याः प्रभुं च माम् ॥५४॥
मत्वाऽऽश्रयं परं चक्रुर्भक्तिं मन्त्रं च जगृहुः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥५५॥
भेजुर्मां सर्वभावेन ह्ययाचन्त क्षमां तदा ।
उत्सवं परमं चक्रुः सर्वे ते साधुसन्निधौ ॥५६॥
अहोरात्रमहं साधुर्नाम्ना सञ्जीवनायनः ।
उवास तद्गृहे रम्ये महोद्याने प्रसेवितः ॥५७॥
हर्बुलः स सिषेवे मां पुत्रायुष्यविवृद्धये ।
मया लक्षप्रवर्षाणि जीवत्विति वचोऽर्पितम् ॥५८॥
लक्षवर्षाणि पुत्रोऽपि नाम्ना सञ्जीवनः कृतः ।
आयुष्यं प्राप्तवान्मत्तः कृपा भक्ते ह्यनन्तिका ॥५९॥
चित्रवल्ली च सन्तुष्टा सिषेवे मां पुनः पुनः ।
देहमर्दनसेवाभिः पुत्राऽऽयुष्याऽतिहर्षिणी ॥६०॥
दुष्टा विद्रुमवल्ली चाऽप्यर्धरात्रे गते तु माम् ।
आगत्योवाच रहसि मामुद्धर कृपां कुरु ॥६१॥
बालहत्या महत्पापं कृतं मया हि योषिता ।
ईर्ष्यया सापत्न्यभावैः क्षमस्व मा बहिः कुरु ॥६२॥
अप्रकाशं च मे पापं विनाशय जगत्पते ।
इत्युक्त्वा पादसंवाहं चक्रे सा देहमर्दनम् ॥६३॥
भक्तायाश्चापि पापस्य नाशार्थं वै दया कृता ।
मया दिव्यस्वरूपेण दिव्यदृष्ट्या विलोकिता ॥६४॥
स्पृष्टा दोर्भ्यां शरीरे सा तावत्तस्याः शरीरतः ।
बालहत्या मूर्तिमती निष्क्रान्ता वेपथुभृता ॥६५॥
मया सा जलदानेन शीघ्रं दग्धा लयंगता ।
विद्रुमवल्लिका तूर्णं निर्भया समजायत ॥६६॥
लक्षम्त्येवं मम भक्ता चित्रिका विद्रुमा तथा ।
हर्बुलस्तत्सुतश्चापि गोधा समुद्धृता ह्यघात् ॥६७॥
अविता रक्षिताश्चापि पोषिताश्च प्रतोषिताः ।
अथ प्रातः समुत्थाय लब्ध्वा सत्कारभोजनम् ॥६८॥
गन्तुमिच्छामि यावद्वै तावद्भक्तस्तु हर्बुलः ।
पप्रच्छ किं विधेयं त्वत्कृते कृष्णनरायण ॥६९॥
उपादिदेश तस्मै च नारीभ्यां चापि तत्र ह ।
सतां समागमः कार्यः सेवनीयो हरिस्तथा ॥७०॥
देशे काले विपरीते रक्षत्येव जनार्दनः ।
अनादिश्रीबालकृष्णः कृष्णनारायणोऽस्म्यहम् ॥७१॥
रक्षां करोमि भक्तानां क्षतौ धर्मस्य वै क्वचित् ।
सदोषस्यापि भक्तस्य दोषं ते गणयाम्यहम् ॥७२॥
सतां प्रसंगमात्रस्य मम माहात्म्यवेदिनः ।
सर्वथा सेवकस्यापि दोषं न गणयाम्यहम् ॥७३॥
सतां प्रसंगात् पुण्यं वै जायते पापनाशनम् ।
अतश्च सर्वदा कार्यः प्रसंगः श्रीहरेः सताम् ॥७४॥
अवतारा ममाऽप्येवं स्मर्तव्याः सर्वदा जनैः ।
तल्लीला जन्मभूभागाः स्मर्तव्याः पापनुत्तये ॥७५॥
देहान्तसमये यद्वा वैषम्ये देशकालयोः ।
स्मरणं तु सदादीनां पापहं मोक्षदं भवेत् ॥७६॥
ईर्ष्या नैव हि कर्तव्या परोत्कर्षाऽसहिष्णुना ।
हिंसा पापं भवेत् सर्वमीर्ष्यया निन्दनं मृतिः ॥७७॥
ततो याम्यप्रदेशानां यात्राऽपि दुःखदायिनी ।
तस्माद्भक्तैश्च भक्ताभिरीर्ष्या त्याज्या प्रयत्नतः ॥७८॥
कार्या प्रसन्नता नित्यं परोत्कर्षे सुखप्रदा ।
प्रसन्नोऽहं भवाम्येव परोपकारकर्तरि ॥७९॥
सापत्न्यं सुखदं नेयं नेतव्यं सुखदं तथा ।
पत्युः प्रियं प्रकर्तव्यं तेनाहं तुष्ट एव ह ॥८०॥
तस्माद्भक्तिमता भक्तिमत्या त्याज्यः स दुर्गुणः ।
ध्यातव्या मम मूर्तिश्च राधालक्ष्म्यादिसेविता ॥८१॥
ध्यायमाना न दृश्येत तथापि श्रद्धया मुहुः ।
ध्यातव्या हृदये नित्यं कृपां करोमि तं प्रति ॥८२॥
वश्यो भवामि तस्यैव यथेष्टं प्रददामि च ।
विवेकः स तु मन्तव्यो भक्तानां गुणदर्शनम् ॥८३॥
स्वस्मिन्नगुणवीक्षा च गुणग्राहित्वमित्यपि ।
साधुना हरिणा प्रोक्तं ग्रहीतव्यं हितं तु तत् ॥८४॥
एवमाशंकितो भक्तः प्रतिष्ठां महतीं लभेत् ।
श्रीहरेश्च सतां सेवापरा इन्द्रियवृत्तयः ॥८५॥
वर्तेरन् यस्य तस्याऽऽशु प्रसन्नता हरेर्भवेत् ।
तस्य तत्त्वानि सर्वाणि श्रीहरेः सम्प्रसंगतः ॥८६॥
पवित्राणि प्रजायन्ते नश्यन्त्यघादिकोटयः ।
मम भक्तिः पुष्टिमेति ततः प्राप्नोति वाञ्छितम् ॥८७॥
तस्माद् योज्यानीन्द्रियाणि श्रीकृष्णे मयि सत्सु च ।
साधुसंगः सदा कार्यः पावित्र्यमुक्तिसिद्धये ॥८८॥
कुसंगो नैव कर्तव्यो हिंसाद्रोहात्मकः क्वचित् ।
निन्दा नैव प्रकर्तव्या वीक्ष्य देहक्रियां सताम् ॥८९॥
तेन दृष्टिर्भवेद् दिव्या कृष्णे प्रीतिश्च वर्धते ।
सत्सु स्नेहो वर्धते च पुण्यं मोक्षं च विन्दति ॥९०॥
साक्षाज्जाते हरेर्योगे ह्यपूर्णतां न चिन्तयेत् ।
नराकृतौ दृढनिष्ठा मयि कार्या हि गोचरे ॥९१॥

मद्दर्शनादिनाऽऽत्मा वै मन्तव्यः पूर्णकामनः ।
मम प्रसंगः कर्तव्यः सर्वथा भक्तिवृद्धये ॥९२॥
एवंविधस्य भक्तस्य पूरयामि मनोरथान् ।
अलौकिकं निजैश्वर्यं बलाद्ददाम्यनिच्छते ॥९३॥
अतः प्रत्यक्षमासाद्य कृष्णं कान्तं पतिं प्रभुम् ।
सेवयित्वा पुरुषार्थाः साधनीयास्ततो हरेः ॥९४॥
रागद्वेषक्षयो यावन्न स्यान्नो वासनाक्षयः ।
तावदेकान्तभक्तत्वं न स्यान्मे परमात्मनः ॥९५॥
इन्द्रियाणां प्रवेगेण सुखेच्छा वर्तते तु या ।
सा सदा नाशयितव्या श्रीकृष्णे वै समर्पणात् ॥९६॥
कृत्वा प्रसंगं महतां हन्तव्या वासना खलु ।
कृष्णेतरपदार्थेच्छा नष्टा यदा प्रजायते ॥९७॥
ब्रह्मरूपः स वै भक्तस्तमहं संवृणोमि वै ।
ऐकान्तिकः स मे भक्तोऽसंख्यदेहिप्रमोक्षकृत् ॥९८॥
अन्तर्यामितया चाऽहं सर्वेच्छापूरकोऽस्मि च ।
सर्वकर्मफलादीनां दाताऽहं सम्पदामपि ॥९९॥
यस्माद्देहाद्यदुत्पत्तिर्यत्कर्मोत्थया तु निर्मिता ।
तं तु तस्माच्छरीराद्धि समुत्पाद्य च सञ्चितम् ॥१००॥
तस्यैव पूर्वतश्चाप्तं यथाकालं ददाम्यहम् ।
मत्सेवायाः फलं श्रेष्ठं ददामि चातिरेक्यपि ॥१०१॥
ततः श्रद्धायुक्तजनैः सेवा कार्या सदा मम ।
पूरयामि तदभीष्टं प्रारब्धवर्जितं ह्यपि ॥१०२॥
आपद्यपि सता सेवा कर्तव्या तु यथा मम ।
कल्पलतासमा साऽस्ति शुभा सर्वेष्टपूरिका ॥१०३॥
कलत्रपुत्रवित्तादेरधिकं सेवनं मम ।
पत्युः पत्न्यास्तथा पित्रोः सेवनं ह्यधिकं मम ॥१०४॥
सेवया मे सुखं सर्वं देहेऽत्र याति देहवान् ।
प्राप्नोति मम धामाऽपि देहान्ते चाऽक्षरं परम् ॥१०५॥
आजीवनं मतिर्यस्य यादृशी मयि जायते ।
गतिमाप्नोति चान्ते तां तथारूपां ददाम्यहम् ॥१०६॥
साक्षात्प्राप्तिर्मम यस्य सेवा साक्षात् कृता यया ।
तस्मै तस्यै ददाम्येव गतिं परां मदाश्रयाम् ॥१०७॥
सर्वथा रक्षणं तेषां यमादिभ्यः करोम्यहम् ।
नाऽमृत्युभयं तस्य कालकर्मभयं न वै ॥१०८॥
जगन्नियन्तुः कृष्णस्य मम भक्तो हि निर्भयः ।
तं नयामि प्रसन्नः सन् मम धामाऽक्षराऽभिधम् ॥१०९॥
देहान्ते मम भक्तो वै याति मे धाम सर्वथा ।
स्मृत्या वा मूर्छया वाऽपि पीडया वा प्रयात्यपि ॥११०॥
हरेः सतां तु सम्प्राप्त्या ज्ञातव्यं श्रेय एव ह ।
श्रेयस्तस्य परं स्याद्धि लोकेऽत्रापि परत्र च ॥१११॥
अतो भक्तिः प्रकर्तव्या ममैव च सतामपि ।
हित्वा स्नेहं मदन्यस्मिन् भक्तत्वं दुर्लभं यतः ॥११२॥
भक्तस्य लक्षणं दास्यं हित्वा चाप्यात्मनः प्रियम् ।
कर्तव्यं स्वामिनो नित्यं प्रियं रुच्यनुसारि च ॥११३॥
अनुवृत्तिः पालनीया भुक्तिमुक्तिप्रदायिनी ।
एवं भजन्तु मां भक्ता दास्ये सर्वं निजेप्सितम् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने हर्षुलाख्यभक्तस्य पूर्वया भार्यया द्वितीयपत्नीजन्यपुत्रस्य नाशे भगवता साधुरूपेण पुत्रोज्जीवनं बालहत्यापापनाशनं कृतमित्यादिनिरूपणनामा पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥

श्रीपुरुषोत्तम उवाच—

एवं नारायणीश्रि वै तदा मया शुभावहम् ।
उपदिष्टं मोक्षदं तत्स्त्रीभ्यां च हर्षुलाय च ॥ १ ॥
अथापि विद्रुमवल्ली वृद्धाऽपत्यादिवर्जिता ।
मां पप्रच्छ हरेकृष्ण यथा पुत्रवती त्वहम् ॥ २ ॥
भवाम्यपि तथा कान्त कृपां विधेहि वै मयि ।
अहं तस्यास्तु भक्ताया भाग्यं प्रार्थनया तथा ॥ ३ ॥
सेवया च नवं तत्राऽकरवं पुत्रदं शुभम् ।
तथाऽस्त्वेवं मयोक्ता सा प्रसन्ना समजायत ॥ ४ ॥
उपदेशो मया तेभ्यः पुनर्दत्तोऽतिशोधनः ।
भक्तिर्यस्य भवेत् कृष्णनारायणे मयि प्रभौ ॥ ५ ॥
प्रत्यक्षे तस्य वर्तेत कार्ये कृष्णवचोऽनिशम् ।
कृष्णभक्ता वदेयुर्यत् कार्यं तदपि सत्वरम् ॥ ६ ॥
एवंविधाऽभिलाषी च प्रतीक्षेत हरेर्वचः ।
तथामूर्तिं मम चित्ते धारयेद्वै निरन्तरम् ॥ ७ ॥
नित्यं नवनवश्रद्धो धारयेन्न समुत्सृजेत् ।
मन्येत पूर्णकामं च मम ध्यानपरायणः ॥ ८ ॥
चिरं ध्यायन्मय मूर्तिं ततो याति परां गतिम् ।
साधुसेवां प्रकुर्याद्वा तथा याति परं पदम् ॥ ९ ॥
साधूनां च गुणानेव गृह्णीयाद् दुर्गुणाँस्त्यजन् ।
त्राकृतौ परमेशे च साधौ चापि गुणान्नयेत् ॥१०॥
सतां प्रसन्नताहेतुं सदाचारं चरेत् सदा ।
आचारे वचने कार्ये सतां योगे प्रसेवने ॥११॥

संशयं नैव कुर्वीत कुसंगः संशयो ह्यतः ।
विश्वासेन प्रकुर्वीत सतां चेष्टं हरेस्तथा ॥१२॥
तदेव मुक्तिदं स्याद्वै निःसंशयो जयं व्रजेत् ।
अधमोद्धारकश्चाऽहमुद्धरामि मदाश्रितम् ॥१३॥
सोत्साहेन तु सेवायां वर्तितव्यं सतां हरेः ।
सोत्साहानां सेवकानां नैवाऽसाध्यं हि किञ्चन ॥१४॥
नानाविधपदार्थानां प्राप्तिर्मत्प्राप्तितो भवेत् ।
मत्सुखेन सदाऽऽनन्दवन्तो भवन्ति मच्छ्रिताः ॥१५॥
अन्तरा मां पदार्थानां त्यागं करोति सर्वथा ।
सर्वदा मां भजते यः स मुक्तः स च मे प्रियः ॥१६॥
निजेन्द्रियाणां व्यापारा अर्पणीया परात्मनि ।
तदा दिव्यक्रियाः सर्वा भवन्ति मत्परायणाः ॥१७॥
वर्तते तस्य तृप्तिश्च साक्षात् कृष्णस्य योगतः ।
साक्षाद्धरेस्तु संयोगस्तथा ब्रह्मदशा निजा ॥१८॥
यस्याऽस्ति तस्य कर्तव्यशेषो नास्ति प्रमुक्तये ।
ज्ञानेन्द्रियाणि सर्वाणि यद्गृह्णन्ति निजाऽदनम् ॥१९॥
अदनं तद्धरिः साक्षाद्धरेर्गुणाश्च शाश्वताः ।
एवं कर्मकराणां चेन्द्रियाणां विषयो हरिः ॥२०॥
भवेद् यस्य तु तस्याऽत्राऽऽनन्दो भवेद्धि शाश्वतः ।
दिव्यगुणादिसंप्राप्तौ सर्वं कृष्णमयं भवेत् ॥२१॥
एवमत्रैव कर्तव्यं भवितव्यं तथा सदा ।
रूपं सतां हरेश्चापि रसः सतां हरेस्तथा ॥२२॥
गन्धः सतां हरेश्चापि शब्दः सतां हरेस्तथा ।
स्पर्शः सतां हरेश्चापि शुद्धिकृन्मोक्षकृत् सदा ॥२३॥
सतां हरेर्दर्शनं च स्पर्शनं देहसेवनम् ।
पादसम्मर्दनं चापि पावनं शोधकं सदा ॥२४॥
सतां हरेर्गृहे वासस्तदाज्ञापालनं तथा ।
असंशयस्तदाचारे पावनो मोक्षदः सदा ॥२५॥
भोक्तव्यं भोग्यमेवाऽऽर्प्य श्रीकृष्णे नाऽन्यथा क्वचित् ।
कृष्णाय कृष्णमूर्त्यात्मसत्पुरुषाय वाऽर्पयेत् ॥२६॥
अर्पितं दिव्यतां याति तद्भोक्ता मोक्षगो भवेत् ।
हरेर्योगान्निर्गुणं तत्तद्भोक्ता निर्गुणो भवेत् ॥२७॥
सद्योऽन्तःकरणं शुद्धं करोति निर्गुणं हि तत् ।
बन्धनं नैव जायेत निर्गुणस्योपभोगतः ॥२८॥
एवं विज्ञाय पञ्चाऽपि तथाऽन्ये विषया अपि ।
सेव्याः शुद्धिकरा दिव्याः प्रसादरूपिणः सदा ॥२९॥
अनर्पिता न वै सेव्याः परिहार्या हि दूरतः ।
एवं वै वर्तमानानां विक्षेपो नैव जायते ॥३०॥
बन्धनं न भवेच्चापि पुण्या मुक्तिः करे स्थिता ।
शुद्ध्यन्ति सर्वकामाश्च सिद्ध्यन्ति कामिताः सदा ॥३१॥
मम वासः सदा तस्यान्तरे भवति सौख्यदः ।
एवं विविच्य कर्तव्यः सतां संगो हरेस्तथा ॥३२॥
सत्संगः सर्वदा कार्यो निःश्रेयसप्रदो हि सः ।
नास्ति तादृक् पदार्थो वा वस्तु यन्मम योगतः ॥३३॥
नोपेयाद् दिव्यभावं वा मोक्षदं न भवेदिति ।
सर्वं पवित्रं मद्योगाच्छ्रेष्ठं निकृष्टमित्यपि ॥३४॥
एवं ज्ञात्वाऽर्पणीयं मे सर्वं वर्ष्म च दैहिकम् ।
एवं शरणमाप्तस्याऽप्यहं तस्य भवामि हि ॥३५॥
ब्रह्मात्मनिष्ठायुक्तस्य गुरुधर्मयुतस्य च ।
रागशून्यस्य सर्वत्र स्नेहयुक्तस्य वै मयि ॥३६॥
मम माहात्म्यविज्ञस्य मम प्रसादशेवधेः ।
ममैश्वर्यं समस्तं वै धाम्नि तस्य भवत्यपि ॥३७॥
मम प्रसन्नतालभ्यमैश्वर्यं तेन चाऽर्ज्यते ।
सतां समागमान्नित्यं सिद्धधर्मे समालभेत् ॥३८॥
मुक्तिदः सिद्धधर्मो वै तमर्जयेत् सतां श्रयात् ।
साध्यधर्मो हरिश्चाऽहं प्राप्यो भवामि सिद्धतः ॥३९॥
यस्य साक्षाद्धरेः प्राप्तिः साक्षाद् योगः प्रसेवनम् ।
सर्वदा दर्शनं चास्ति तथापि मायिकं सुखम् ॥४०॥
यदि वाञ्छति तस्यात्मा न तृप्तो निरयाभिगः ।
स एव ज्ञानहीनो वै बोध्यो यो न तृषां त्यजेत् ॥४१॥
सदसद्बोधमासाद्य मायासुखं ततस्त्यजेत् ।
आत्मसुखं परित्यज्य मायासुखे प्रमोदते ॥४२॥
तस्य शाश्वतकार्याणि नैव सिद्ध्यन्ति कान्यपि ।
आत्मस्थस्य हरेर्मे च सुखं भुंक्ते तु यो जनः ॥४३॥
स एव विद्वान् मुक्तात्मा भक्तात्मा सर्वतोऽधिकः ।
उपासनाबलेनाऽयं जायते हि नरायणः ॥४४॥
नारी नारायणी स्याच्च राधा लक्ष्मीर्यथा रमा ।
सत्समागममाप्तस्य निजात्मपरमात्मनोः ॥४५॥
साक्षाद् वै दर्शनं दिव्यं जायते नाऽत्र संशयः ।
सत्संगो विद्यते यस्य तस्य चात्मप्रदर्शने ॥४६॥
परमात्मदर्शनेऽपि स्वातन्त्र्यं कृपया भवेत् ।
आत्मदर्शनयत्नोद्योगिनः सत्संगवर्तिनः ॥४७॥
मम प्रतापमालम्ब्य चान्तर्दृष्टिं विधाय च ।
वीक्षते स्वस्वरूपं चेद् भास्वद्भासुरमीक्षते ॥४८॥
आत्मप्रकाशे विमले साक्षान्मां परमेश्वरम् ।
वीक्षते बालकृष्णं वै शाश्वतानन्दवान् भवेत् ॥४९॥

भक्ता त्वैकान्तिकी या च नारी वाऽपि नरोऽपि वा ।
मदर्थकृतसर्वस्वा मां प्रयाति परे पदे ॥५०॥
क्रियासु क्रियमाणासु सर्वास्वपि हरिः स्वयम् ।
चिन्तनीयो धारणीयो यथादृष्टो यथाश्रुतः ॥५१॥
भोजनीयः सेवनीयो रञ्जनीयो हरिस्त्वहम् ।
तेन भक्ताः प्रयान्त्येव ब्रह्मधामाऽक्षरं परम् ॥५२॥
शान्तचित्ते वीक्षणीयः श्रीकृष्णोऽन्तर्दशा चिरम् ।
सर्वानन्दाः प्रापणीया मम मूर्तेस्तदात्मतः ॥५३॥
जीवोऽयं देहिनां देहे संसारेऽपारसागरे ।
चतुरशीतिलक्षेषु देहेषु खनियोगिषु ॥५४॥
उत्पन्नो बहुवारं वै स्त्री वा पुमान् पुनः पुनः ।
नरा मुक्तास्तथा नार्यो मुक्ताश्चाऽनेन वै मुहुः ॥५५॥
पीतानि सर्वदुग्धानि गर्भकुक्ष्यो विलोकिताः ।
मरणं जननं चापि दृष्टं पुनः पुनस्तथा ॥५६॥
अहन्ता ममता चापि देहे दैहिकवस्तुषु ।
कृताऽपि बहुधा यत्र देहे स्थितिमवाप्तवान् ॥५७॥
विस्मृतानि समस्तानि पूर्ववर्ष्माणि तानि वै ।
इद जन्मान्तरे प्राप्ते विस्मर्यते तथैव ह ॥५८॥
तदिदं चात्र देहे वै संगस्त्याज्यो यथोचितः ।
अहन्ता ममता त्याज्या ज्ञानेन पूर्वगे यथा ॥५९॥
विवेकेन विषयैश्चासक्तिं त्यक्त्वा हरौ मयि ।
सजेत देहवान् यः स मुक्तो भवति मच्छ्रयात् ॥६०॥
मुक्त्यर्थं च विवेकार्थं माहात्म्यार्थं ममापि च ।
सेव्याः सन्तः सदा पूताः पावना मत्स्वरूपिणः ॥६१॥
सेवया च ततः प्राप्यैकान्तिकत्वं च दिव्यताम् ।
धामाऽक्षरं परं प्राप्याऽक्षरसाधर्म्ययोगतः ॥६२॥
सेवन्ते कोटिशो मुक्ता यथा मां सेवते त्वयम् ।
तन्मुक्तपंक्तौ स्थातव्यमित्येवं मां प्रसेवयेत् ॥६३॥
सुखं चान्यत् समग्रं तु तुच्छं च क्षणिकं तथा ।
विचार्यैकान्तभक्तिं मे कुर्याद् रहस्यवेदिनीम् ॥६४॥
अलोभि स्वमनः कार्यं मायिके विषये त्विह ।
येनाऽत्र रम्यरूपादौ लोभो नैव प्रजायते ॥६५॥
तद्बलेन हरेर्धाम प्रतियानेऽपि मार्गगाः ।
आयान्ति सिद्धयस्तासु लोभश्चास्य न वै भवेत् ॥६६॥
परं पारं प्रकृतेः स प्रयात्येव ममाश्रितः ।
अनन्यचेता भूत्वैव भुंक्ते मत्सुखमूर्जितम् ॥६७॥
यस्य क्रियासु सर्वासु मम मूर्तिस्मृतिर्भवेत् ।
तस्यैव स्थिरता स्याद्वै सर्वथा स्वामिनी प्रभौ ॥६८॥

यद्यत्सुखेप्सा यस्य स्यात् तत्तत् सुखं मदग्रतः ।
ग्रहणीयं नाऽन्यतस्तु सर्वं ददामि तस्य वै ॥६९॥
मम राज्यं भक्तराज्यं भेदस्तत्र न विद्यते ।
तस्माद् राज्ञ्या सदा भाव्यं न भाव्यं वेश्यया क्वचित् ॥७०॥
इत्येवं तु मया लक्ष्मि ह्युपदिष्टं ततश्च ते ।
पुपूजुर्मां परमया भक्त्या स्नेहार्द्रमानसाः ॥७१॥
फलान्युत्तमजातीनि भोजयामासुरुत्सुकाः ।
अथापि साधुरूपं मां प्रसादयितुमुत्सुकाः ॥७२॥
सेवयितुं समुत्साहा उषितुं चक्रुराग्रहम् ।
अथाऽहं साधुरूपो वै तेषामाग्रहतस्तदा ॥७३॥
उषितुं च दिवारात्रमधिकं स्वीचकार ह ।
दिवसे तूष्णवार्भिस्ते स्नापयामासुरादरात् ॥७४॥
पुष्पाणां बहुभिर्हारैः पुष्पनिर्मितभूषणैः ।
पुष्पवस्त्रैः पुष्पशृंगारकैरर्हणमादधुः ॥७५॥
मुकुटः पीतपुष्पाणां कटके चांगदे तथा ।
विभूषाः पीतपुष्पाणां कृतास्तैश्च धृता मया ॥७६॥
अम्बराणि समस्तानि सप्तरूपसुमानि वै ।
सुगन्धीनि विचित्राणि धृतानि च मया तदा ॥७७॥
दोला कदम्बवृक्षस्य शाखायां रज्जुभिः कृता ।
बद्धा सुपल्लवपुष्पतोरणाद्यैर्विभूषिता ॥७८॥
निषाद्य मां तु दोलायां त्र्यस्ते भावगर्भिताः ।
आन्दोलयामासुरिष्टं स्वामिनं प्राणरक्षकम् ॥७९॥
पाययामासुरिक्षूणां रसं नारंगिणां तथा ।
नालीकेरजलं चापि मिष्टवारि सुगन्धि च ॥८०॥
रात्रौ वाद्यविशेषैश्च कीर्तनं चक्रुरुत्सुकाः ।
सहस्रशो जनास्तत्राऽऽययुर्दर्शनकांक्षिणः ॥८१॥
पावनास्ते ततो जाता दर्शनस्पर्शनादिभिः ।
प्रसादग्रहणैश्चापि ययुस्ते तु निजालयान् ॥८२॥
हर्षुलश्चापि तत्पत्न्यौ सिषेविरे च मां निशि ।
सर्वार्पणेन निर्दोषबुद्ध्या दिव्यप्रसेवनैः ॥८३॥
अथ या श्रेष्ठभार्या सा नाम्ना विद्रुमवल्लकी ।
सर्वसुप्त्युत्तरं चार्धरात्रोत्तरं रहः स्वयम् ॥८४॥
प्रच्छन्नैकाकिनी तत्राऽऽगत्य मां परमेश्वरम् ।
देहसम्मर्दनेनैव सिषेवे पुत्रकामिनी ॥८५॥
शनकैर्मम कर्णे सा कृत्वाऽऽननं च मौनवत् ।
अर्थयामास भगवन् पुत्रं मे देहि केशव ॥८६॥
प्रसन्नोऽहं सेवया च भक्तायाः सर्वथा हरिः ।
तथाऽस्त्विति मया स्पृष्टा पुत्रवती भवेति च ॥८७॥

समुद्घाटितभाग्या सा प्रसन्ना बहुधाऽभवत् ।
यथेष्टं सेवयामास मां ततोऽधिकभावना ॥८८॥
सुतोऽर्हं सा च पत्युश्च सेवायां प्रगता तदा ।
लब्धमनोरथा जाता सगर्भा शोभना तथा ॥८९॥
अथ प्राप्ते तु समये सुषुवे बालकं शुभम् ।
पुत्रं समुज्ज्वलं स्वेकं हर्षुलो हर्षमाप ह ॥९०॥
विद्रुमवल्लकी स्वेवं लब्ध्वा पुत्रं ततः परम् ।
मानपात्रं सदा जाता सर्वसौभाग्यसुन्दरी ॥९१॥
एवं लक्ष्मि मया भक्ता तारिता सेवया तदा ।
प्रसन्नेन मया साऽपि तारिता बालहत्यया ॥९२॥
बालश्चोज्जीवितश्चापि सेवाऽपि स्वीकृता तथा ।
एवमेव हि भक्तानां करोमि रक्षणं सदा ॥९३॥
जीवास्तु देहसंयुक्ता यावन्तः सन्ति तावता ।
सदोषा एव वर्तन्ते किन्तु भक्त्या तरन्ति ते ॥९४॥
भक्त्याऽहं तारयाम्येतान् पापौंश्चापि नरान् द्रुतम् ।
अथाऽहं गन्तुकामश्च पूजितो वन्दितश्च तैः ॥९५॥
साधुवेषेण सहसा चान्तर्हितोऽभवं क्षणात् ।
हर्षुलाद्या यथादृष्टं ध्याने स्मरुरन्वहम् ॥९६॥
भक्तिं चक्रुर्भावितस्ते साधुसेवां च चक्रिरे ।
भुक्त्वा भोगांश्च विपुलान् ययुस्ते स्वर्गमुत्तमम् ॥९७॥
स्वर्गात् स्वर्गोत्तरं प्राप्य मम धामाऽक्षरं ययुः ।
एवं निष्कामसेवाभिर्यान्ति ब्रह्म निरामयम् ॥९८॥
सेवया लभ्यते पुत्रः सेवया लभ्यते सुखम् ।
सेवया लभ्यते चाप्यभयं निष्पापता तथा ॥९९॥
सेवया भोगकोट्यश्च सेवया शाश्वतं सुखम् ।
सेवया श्रीहरिश्चाऽहं प्राप्यः पूर्णेष्टसम्प्रदः ॥१००॥
भक्त्या भक्तान् तारयामि गृह्णामि सेवया ततः ।
तादात्म्येनाऽऽनन्दयामि सर्वं ददामि तत्परम् ॥१०१॥
पठनाच्छ्रवणाच्चाऽस्य स्मरणात् सेवनात्तथा ।
भुक्तिर्मुक्तिर्भवेदेव समृद्धिश्च शाश्वतीर्भवेत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने हर्षुलाख्यभक्तस्योद्याने श्रीहरेरुपदेशो हर्षुलस्य ज्येष्ठपत्न्या अपि पुत्रलाभश्चेत्यादिनिरूपण-नामा षण्णवत्यधिकशततमोऽध्यायः ॥ ९६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं पितृहणः कथां तथा ।
सौराष्ट्रे कर्षुको भक्तो वृद्धोऽभवत् कुटुम्बवान् ॥ १ ॥
कोटिनारनगरस्याऽभ्याशे ग्रामे पटोलके ।
नाम्ना शाणधरश्रेति पञ्चपुत्रप्रपौत्रवान् ॥ २ ॥
सप्तपुत्रीपिता चापि वाटिकाक्षेत्रगोधनः ।
भजते श्रीहरिं मां च नित्यं कृषेश्च कर्मसु ॥ ३ ॥
यदुत्पन्नं भवेद् सर्वं मह्यं निवेद्य वै ततः ।
भुङ्क्ते कुटुम्बसहितो नवान्नादीनि यान्यपि ॥ ४ ॥
शाकपत्राणि सर्वाणि पक्वाऽपक्वकणाँस्तथा ।
कन्दमूलादि यद्योग्यं भाजीपल्लवसत्फलम् ॥ ५ ॥
भूषाम्बरादिकं दुग्धदधिगूडरसादिकम् ।
यद्यत् प्राप्नोति यत्नेन मह्य समर्प्य सर्वथा ॥ ६ ॥
भुंक्ते यानं वाहनं च तथोपकरणान्यपि ।
नित्यं निवेद्य मह्यं च जलान्नमपि सर्वथा ॥ ७ ॥
गृह्णा येवेति भक्तो मे श्रद्धाभक्तिपरायणः ।
मूलकृष्णपुरीतीर्थं प्राचीसारस्वतं तथा ॥ ८ ॥
सोमनाथमहातीर्थं गोपनाथादितीर्थकम् ।
स्वर्णरेखानदीतीर्थं तथा कुंकुमवापिकाम् ॥ ९ ॥
प्रयात्येव प्रगच्छन् वै भक्तिश्रद्धासमन्वितः ।
एवंविधस्य भक्तस्य पूर्वकर्मकृतं तु यत् ॥१०॥
जन्मान्तरे च तत्प्राप्तमेतजन्मनि चोल्बणम् ।
पूर्वमासीत् स गोपालो गोरक्षातत्परः सदा ॥११॥
तदा तु वृषदंशान् स प्रगृह्य गोवृषात् ततः ।
पक्षौ विच्छिद्य सर्वान् गोवृषदंशान् विपक्षकान् ॥१२॥
कृत्वा क्षिपति भूमौ वै दंशास्ते पक्षवर्जिताः ।
भूतले पतिताः सर्वे क्षुधातृषार्दितास्तथा ॥१३॥
म्रियन्ते चातिदुःखेन शापं दत्वा पुनः पुनः ।
हस्तहीनान् नः कुरुषे तथा त्वं भव दुःखितः ॥१४॥
दंशानां म्रियमाणानां प्रत्यहं शापकारणात् ।
अत्र जन्मनि तस्यापि शाणधरस्य हस्तयोः ॥१५॥
पादयोश्चापि सर्वांगुष्ठांगुलीषु गदो महान् ।
गलत्कुष्ठात्मको जातो दुर्गन्धस्रावबाहकृत् ॥१६॥
ओषधानि कृतान्येव वैद्यानां सुबहून्यपि ।
गलत्स्रावो न वै नष्टो रोगनाशो मनाङ् न च ॥१७॥
मानता अपि देवानां बहुधा च कृतास्तथा ।
दानपुण्यादिकं चापि कृतं तु बहुधा मुहुः ॥१८॥
गदस्तथापि ववृधे नखा नष्टाः शनैः शनैः ।
अंगुल्यग्राणि नष्टानि मध्यभागा गलन्ति च ॥१९॥
आमूलं गलिताः सर्वाङ्गुलिकांगुष्ठकास्ततः ।
पूर्वकर्मानुरोधेन परं दुःखमवाप सः ॥२०॥

पुत्राद्यैर्वाटिकाक्षेत्रे घासगृहं विधाय च ।
तत्र पिता सुखदूर्वायां रक्षितः सर्वदा रमे ॥२१॥
घृष्ट्वा घृष्ट्वा नितम्बौ स प्रयाति पार्श्वभूमिषु ।
मलं च कुरुते तत्र मूत्रं च कुरुतेऽभितः ॥२२॥
थूत्कारं चापि कुरुते पार्श्वे कश्चिन्न गच्छति ।
परितोऽतीव दुर्गन्धा भूमिर्जाता च तद्गृहम् ॥२३॥
दुर्गन्धमलयुक्तं च मक्षिकाकाकवासितम् ।
एवंविधाय वृद्धाय पुत्रास्तु भोजनं सदा ॥२४॥
दूरात् क्षिपन्ति सलिलं दूराद् ददत्यभाविताः ।
मक्षिकाणां पक्षहीनीकृतानां क्रमशः फलम् ॥२५॥
भुंक्ते शापधरो वृद्धो जीवो देहात् प्रयाति न ।
निरयं चेह देहेऽस्याऽऽगतं भोगाय दारुणम् ॥२६॥
माज्यते नैव केनापि चिकित्सितं तु वर्धते ।
हस्तपादफणाश्चापि गलत्कुष्ठेन खादिताः ॥२७॥
प्रकोष्ठप्रान्तमासश्च गदोऽपि वेगवानति ।
लक्ष्मि चाऽराजना लोके पक्षिजन्तुसरीसृपान् ॥२८॥
पशून् कीटान् मारयन्ति कुमृत्युना ह्यघं महत् ।
उन्दुरुं नकुलं गोधां चटकां मण्डुकं च वा ॥२९॥
तत्फलं कूर्मेवाऽत्र लभन्ते सर्वनाशकृत् ।
अपत्यानि च जन्तूनां मारयन्ति तथाऽबुधाः ॥३०॥
वृथा निरपराधान् वै शापस्तेषां प्रजायते ।
वाहनानामश्ववृषगजोष्ट्राणां वृथा ह्यपि ॥३१॥
प्रवृत्तानां स्वकार्येऽपि कुर्वन्ति ताडनं मुहुः ।
तेषां शापेन सर्वस्वं नश्यति स्वामिनः सुखम् ॥३२॥
नार्यस्त्वश्वैः प्रताडयन्ते बालैश्च श्वान इत्यपि ।
तेषां तासां प्रशापेन दग्धा भवन्ति ताडकाः ॥३३॥
रोगिणश्चापि दीनाश्च जलान्नवर्जिता अपि ।
दरिद्रा द्रव्यहीनाश्च गृहसम्पद्विहीनकाः ॥३४॥
कृतं कर्म चिरं वाऽथोपतिष्ठत्येव सर्वथा ।
एवमस्य कृतं कर्म समुपपन्नमुल्बणम् ॥३५॥
म्रियते नातिदुःखेऽपि पुत्राद्या भग्नमानसाः ।
कुटुम्बं भग्नवाञ्छं च हताशं समजायत ॥३६॥
भग्नश्रद्धास्ततः पुत्रा मन्त्रणां सम्प्रचक्रिरे ।
म्रियते न पिता रुग्णो वाटिका रोगवायुना ॥३७॥
रुग्णसस्थानरूपा च जाता रुग्णस्य वासतः ।
गलत्पिस्स्रावकुष्ठी म्रियेत चेच्छुभं भवेत् ॥३८॥
पूर्वेषां चाऽस्य पापानां बाहुल्यान्मरणं न वै ।
समायाति न रोगोऽपि शान्तो भवति वर्धते ॥३९॥

किं कर्तव्यं क्व गन्तव्यं ह्युपायो भासते न वै ।
अथापि हिंसनं कार्यं पितुः पुत्रैरशोभनम् ॥४०॥
मारयितव्य एवाऽत्र क्षेसव्योऽन्यत्र गर्तके ।
जले प्रवाहणीयो वा जीवन् पिवेति वैशसम् ॥४१॥
रक्षणं युज्यते नाऽत्र किं कार्यं दुःसहे व्रते ।
इत्येवं पञ्चपुत्राणां विचारः सम्प्रवर्तते ॥४२॥
कनीयाँस्तत्र सहसा धर्मस्नेहयुतो यतः ।
पितृसेवाफलं जानन् भ्रातृमध्ये ह्युवाच ह ॥४३॥
पिता नारायणः साक्षात् पिता ब्रह्मा तथाऽपरः ।
पितृतीर्थं परं प्रोक्तं पिता सेव्यो हि वंशजैः ॥४४॥
पुत्राणां पितृसेवायाः फलं स्वर्गं च मोक्षणम् ।
तस्मात् प्रसेवनीयश्च रुग्णो दुर्वृत्त इत्यपि ॥४५॥
द्वितीयोऽपि ततः प्राह श्रुत्वा कनीयसो वचः ।
योग्यं त्वयोक्तं शुभदं किन्तु स्वास्थ्ये सुवर्तिते ॥४६॥
मरणादधिकं चास्य दुःखमत्र विलोक्यते ।
तस्मात् सेवा दुःखदाऽस्य सर्वस्वरोगवर्धिनी ॥४७॥
योऽस्य सेवापरः स्याद्वै तस्य रोगो भवेदपि ।
सक्रमणादिजातीयो गदोऽयं परसंक्रमः ॥४८॥
तस्मात् सेवाऽस्य योग्याऽपि सर्वारोग्यविनाशिनी ।
दुष्टफला भवेत् तस्मात्तां सेवां नाऽनुमोदये ॥४९॥
तृतीयस्तु ततः प्राह सेवायां त्वपरं जनम् ।
भृत्यं वा भृत्यिकां नित्यं योजयामः सुवेतनाम् ॥५०॥
चतुर्थः प्राह योग्यं तत्तथापि प्रमदा नरः ।
कश्चिदपि न चाप्येत सेवाकृद् वेतनैरपि ॥५१॥
तदा कर्तव्यमेवाऽत्र किं भवेत्तद् विचार्यताम् ।
पञ्चमः प्राह वै श्रेष्ठस्तदा तु जीवनः पितुः ॥५२॥
प्रवाहणं तीर्थजले नद्यां वा सागरेऽपि वा ।
भृगुपाता विविधा वै शास्त्रेषु दर्शिता यथा ॥५३॥
पर्वतात् पतनं वह्नौ ज्वलनं वारिगाहनम् ।
भूमिगर्ते शयनं वाऽनशनं तीर्थभूमिषु ॥५४॥
असाध्यरोगिणां विरागिणां च न्यासिनां तथा ।
स्वर्गेच्छूनां भृगुपातास्तादृशा इष्टसिद्धिदाः ॥५५॥
अन्ततः खलु कर्तव्यं पितृभृगुप्रपातनम् ।
यदि भृत्यो मिलेन्नैव न च सेवेत वेतनैः ॥५६॥
एवं विचार्य पञ्चैते कनीयांसं न्ययोजयत् ।
सेवायां किन्तु घृणया विमनाः स व्यजायत ॥५७॥
वीतश्रद्धोऽभवच्चापि भृत्यं न्ययोजयत्ततः ।
भृत्याश्च बहवो जाता दिनं वा द्विदिनं च वा ॥५८॥

केचित् पञ्चदिनं भृत्याश्चान्येऽर्धदिनमात्रकम् ।
घृणान्विता न कुर्वन्ति सेवनं ते प्रयान्ति हि ॥५९॥
एवं भृत्याऽनभिलाभे पुत्रास्ते पञ्च सम्मताः ।
पर्वतात् पातनं त्वस्य रोचतेऽस्मै विधीयताम् ॥६०॥
पृष्टः पिताऽपि श्रुत्वैव नेत्युवाचाऽतिरागवान् ।
वह्नौ प्रज्वलनं पृष्टस्तथापि नेत्युवाच तान् ॥६१॥
गलपाशं प्रतिपृष्टस्तथापि नेत्युवाच तान् ।
देहाऽहंभावयुक्तोऽयं मरणं स्वीकरोति न ॥६२॥
भूगर्ते क्षेपणं पृष्टस्तथापि नेत्युवाच तान् ।
मरणं रोचते नाऽस्य सरित्प्रवाहणं न च ॥६३॥
जीवनं रोचते त्वस्य रुग्णदेहस्य वै पितुः ।
अतिनिकृष्टदेहेऽपि तस्य जीवात्मनस्त्विह ॥६४॥
नित्याश्रयत्वं स्नेहश्च तादात्म्यं वै पशोरिव ।
मनुष्यस्याऽपि देवस्य ज्ञानिनोऽपि प्रवर्तते ॥६५॥
अज्ञानिनां विशेषेण किमाश्चर्यं हि संसृतौ ।
एवं पिताऽपि रुग्णे स्वदेहे वृद्धे गलद्द्रवे ॥६६॥
तादात्म्यं समभिप्राप्तस्त्यक्तुं नोत्सहते स्म वै ।
प्राह पुत्रान् दीनवच्च नाऽहं मर्तुं समुत्सहे ॥६७॥
यथा मे दीयते त्वन्नं जलं च दूरतस्तथा ।
दीयतां वाटिकायां वा पार्श्वे वनेऽथवा तु मे ॥६८॥
आत्मघातो मया नैवेष्यते पुत्रा भयं महत् ।
दृश्यते जायते प्राणत्यागे प्रसह्य चाप्यधि ॥६९॥
स्मरिष्यामि परात्मानं दूरं क्षिपन्तु मामितः ।
कर्मफलं प्रभुक्त्वैव मर्तुमिच्छामि सर्वथा ॥७०॥
इत्युक्तास्ते सुताः प्राहुश्चान्तरे कपटान्विताः ।
एवमस्तु पितस्त्वां वै वने क्षिपाम एव ह ॥७१॥
दास्यामस्तत्र भक्ष्यादि वाटिकायां तु नैव हि ।
किन्तु वै प्रथमं तीर्थं कारणीयं यतः शुभम् ॥७२॥
पुण्यं भवेत् समस्तं च पापप्रक्षालनं भवेत् ।
मूलद्वारावतीतीर्थं समुद्रतीरगं तु यत् ॥७३॥
स्नापयित्वा पितस्तत्र नेष्यामो वाटिकान्तिकम् ।
वने संरक्षयिष्यामो रोगसंक्रमभीतितः ॥७४॥
इत्युक्त्वा ते सुताः सर्वे तीर्थच्छद्मधरा हि ते ।
शकट्यां पितरं धृत्वा ययुः समुद्रसन्निधिम् ॥७५॥
तटं गत्वा तु वेलायां स्नापयामासुरेव तम् ।
प्राहुः पितः स्मरणीयं स्मर नारायणं प्रभुम् ॥७६॥
द्रव्यादि भूतले न्यस्तं गर्ते वाऽन्यत्र चेद् यदि ।
दर्शनीयं कथनीयं प्रदर्शय निवेदय ॥७७॥
भृगुपातं समुद्रस्य जले निक्षेपणात्मकम् ।
कुर्मस्ते स्वर्गतिदं तन्मनः कृष्णे निवेशय ॥७८॥
इत्युक्तः स पिता प्राह प्रारब्धं मम तादृशम् ।
पुत्राश्चात्र न वो दोषो मरणं तादृशं मम ॥७९॥
बहूनि पूर्वपापानि यत्फलं चेदृशं त्विह ।
सत्सु पञ्चसु पुत्रेषु सत्यां पत्न्यां सुतासु च ॥८०॥
समुद्रे मरणं मे यद् रुग्णस्य विवशस्य च ।
अस्त्वेवं किन्तु सौवर्णं रूप्यक नाणकं बहु ॥८१॥
चुल्ल्या अधो मया पूर्वं निहितं तद् विदन्त्वपि ।
लक्षाधिकं भवत्येव बहुवर्षाऽर्जितं तु तत् ॥८२॥
अन्ये नैव प्रजानन्ति पञ्च जानन्तु मे धनम् ।
इत्युक्त्वा श्रीहरिं ध्यात्वा ह्येकबन्धुं प्ररक्षकम् ॥८३॥
सस्मार हृदये शीघ्रं सर्ववृत्तिभिरेकधा ।
एकतानेन मां कृष्णं बालकृष्णं परं प्रभुम् ॥८४॥
देहभानं तिरोभाव्येन्द्रियवृत्तीर्विकुच्य च ।
आन्तरं सर्वथा भानं जीवात्मनि समादधत् ॥८५॥
स्वे रूपे सच्चिदानन्दं बालकृष्णं श्रियः पतिम् ।
लक्ष्मीनारायणं कृष्णं रमेशं माणिकीपतिम् ॥८६॥
पद्मावतीश्वरं ब्रह्मप्रियानाथं सतां पतिम् ।
तुष्टाव स्वामिनं भक्त्या प्राणान्ते समुपस्थिते ॥८६॥
पुत्रास्तु तं समुत्तोल्य चिक्षिपुर्वार्धिवारिषु ।
वीक्षमाणा ह्यतिष्ठन्त तीरे सस्नुश्च तन्मिषात् ॥८७॥
पितृदेहो जले मग्नो जीवतस्तस्य वै तदा ।
मृतो वा जन्तुना ग्रस्त इत्यमन्यन्त चात्मजाः ॥८८॥
रुरुदुस्तत्र पुत्रास्ते स्नेहाधीनोत्थमायया ।
परमेशं हरिं मां च सस्मरुः पापनुत्तये ॥८९॥
क्षमां कुरु हरेकृष्ण पितृहत्या भयंकरी ।
पुण्यहन्त्री स्वर्गहन्त्री मोक्षहन्त्री क्षयंकरी ॥९०॥
सा कृताऽस्माभिरब्धौ वै तां क्षमस्व परेश्वर ।
विष्णुयज्ञं करिष्यामः पितृद्रव्येण भूरिणा ॥९१॥
पितुरुद्धरणं स्वर्गे मोक्षे वा संविधेहि वै ।
इत्येवं शरणं प्राप्ता मम चान्ते पितुर्मृतौ ॥९२॥
सप्त पुत्र्यस्तथा पत्नी चाऽनशनं गृहे व्यधुः ।
अबलास्ता निर्बलाश्चाऽशक्ता वक्तुं दुरन्तकम् ॥९३॥
बलं त्वनशनं चक्रुर्विदित्वा पितृघातनम् ।
पुपूजुर्मां गृहे ताश्च षोडशोपसुवस्तुभिः ॥९४॥
तुष्टुवुः पितृरक्षार्थं व्रतानां मानता व्यधुः ।
लक्षतुलसीपत्रैश्च पूजां मे चक्रिरे हि ताः ॥९५॥

अथाऽहं सहसा लक्ष्मि भक्तानां शुभकृत् प्रभुः ।
प्राविरासं समुद्रे द्राक् पितृदेहस्य सन्निधौ ॥९६॥

मूर्छां प्राप्तो जलमध्ये स्पृष्टो मया हि रोगवान् ।
रोगो नष्टस्तदा शीघ्रं सांगुलिहस्तपादवान् ॥९७॥

शाणधरोऽभवद् वृद्धः पुष्टो दिव्यवपुर्धरः ।
उत्तोलितो मया वार्धौ जलोपरि ततस्तटम् ॥९८॥

पुत्राणां सन्निधौ क्षिप्तः पूर्णांगो रोगवर्जितः ।
शंखचक्रगदापद्मधरं मां तत्सुताश्च सः ॥९९॥

पुपूजुरादरात् सर्वे तिरोभावं द्रुतं ततः ।
गृहे चाविर्भूय तत्राऽनशनार्थे स्थितास्तु याः ॥१००॥

स्त्रियस्ताभ्योऽवदं शाणधरश्चोज्जीवितो मया ।
अरुणश्चालयं पुत्रैः साकमायाति सत्वरम् ॥१०१॥

सोमनाथं ततस्तीर्थं कृत्वा चायान्ति तेऽत्र वै ।
इत्युक्तास्ताः पुपूजुर्मां श्रीकृष्णं वल्लभं प्रभुम् ॥१०२॥

प्रतीक्षन्ते स्म वार्तां स्वपितुश्चागमदैशिकम् ।
तिरोऽभवं ततश्चाऽहं दिनान्ते तु पिता गृहम् ॥१०३॥

आययौ पुत्रसहितश्चानन्दोत्सवयोगकृत् ।
कुटुम्बं सुप्रसन्नं वै जातं चान्ये जना अपि ॥१०४॥

मम माहात्म्यवेत्तारोऽभवँश्चाश्चर्यसंभृताः ।
भक्तिं ते कारणं प्राहुश्चारोग्ये प्राणरक्षणे ॥१०५॥

अथ पुत्रैः कृतो यज्ञो महान् वैष्णवसंज्ञकः ।
देवर्षिपितरश्चाऽहं तृप्तास्तत्राऽर्पिताऽन्नकैः ॥१०६॥

दक्षिणाभिर्दीनजना भोजनैर्देहधारिणः ।
भक्त्या चाहं श्रीहरिश्च प्रसन्ना ह्यभवन् मखे ॥१०७॥

एवं पितृघातकानां पितुश्च रक्षणं मया ।
कृतं लक्ष्मि प्रभक्तानां दयालुना महात्मना ॥१०८॥
अथाऽन्ते प्रापिता मोक्षं धामाऽक्षरं परं मम ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदपि ॥१०९॥
आरोग्यं जायते चापि सौभाग्यं चापि वर्धते ।
विघ्नानां च विनाशः स्याच्छत्रुनाशो भवेदपि ॥११०॥
क्षेमं च कुशलं चापि विन्देत मम भक्तिमान् ।
स्वर्गं स्मृद्धिं तथा स्वेष्टं जीवनं च लभेत वै ॥१११॥
भक्त्याऽहं सर्वथा तुष्टो ददामि सममीप्सितम् ।
ऐश्वर्यं च तथाऽऽयुष्यं धनं धान्यं सुतं सुताम् ॥११२॥
सर्वं ददामि भक्तायै भक्तायाऽपि समुद्रजे ।
इत्येवं भक्तिवशगो वर्ते संरक्षयामि च ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने शाणधराख्यकर्षुकस्य प्राग्जन्मकर्मभिर्जातगलत्कुष्ठरोगस्य भयेन पुत्रैः समुद्रे क्षिप्तस्य भगवता रोगनाशो रक्षणं पापनाशनं च कृतमित्यादिनिरूपणनामा सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं निम्बदेवो द्विजोत्तमः ।
सौराष्ट्रे त्वभवद् भक्तः सदालयाख्यखर्वटे ॥ १ ॥
नित्यं मां भजते भक्त्या धर्मज्ञानविरागवान् ।
परोपकारनिरतः सदा दानपरायणः ॥ २ ॥
अहिंसां परमं धर्मं सतां सेवां ततः परम् ।
हरेः सेवां ततोऽप्यूर्ध्वां मनुते चात्मविद्धि सः ॥ ३ ॥
गवां सेवां च कुरुते विप्रसेवां यथोचिताम् ।
प्रजासेवामतिथीनां सेवां करोति चादरात् ॥ ४ ॥
सत्यः साध्व्यः साधवश्चाऽभ्यागता यात्रिणस्तथा ।
ये चाऽऽयान्ति निजद्वारे सेवते तान् सुभावनः ॥ ५ ॥
अन्नसत्रं कृतं तेन दीनाऽन्धकृपणार्थकम् ।
पशुसत्रं कृतं तेन पङ्गुवृद्धपशूपकृत् ॥ ६ ॥
एवंविधो निम्बदेवो भजते मामहर्निशम् ।
मन्दिरे मम गत्वैव ध्यायति पुरुषोत्तमम् ॥ ७ ॥
मार्जनं दीपदानं च धूपदानं सुमार्पणम् ।
जलार्पणं च नैवेद्यार्पणं करोति मे सदा ॥ ८ ॥
'हरे कृष्ण हरे कृष्ण कृष्णनारायण प्रभो ।
अनादिश्रीकृष्णनारायण विष्णो हरे विभो' ॥ ९ ॥
एवं मां कीर्तयन् याति मन्दिरं प्रतियाति च ।
गृहं निजं श्रावयँश्च जनान् प्रपावयन् प्रजाः ॥१०॥
अथ ग्रामेऽभवत्तत्र वृषभो ग्रामपालितः ।
महाकायोऽतिबलवान् पुष्टः श्वेतः पदाङ्कितः ॥११॥
महाककुद्मी च महाशृंगी च सुरूपशोभितः ।
ग्रामोपशल्ये दिवसे पिप्पलीछायिते स्थले ॥१२॥
निषीदति क्वचिद् ग्रामे राजपथेऽप्यटत्यपि ।
रात्रौ चरति क्षेत्रेषु सस्यानि वाटिकास्वपि ॥१३॥
पुनः प्रातः समागत्य तिष्ठति ग्रामभूमिषु ।
एतादृशोऽयं वृषभो यदा यदा प्रपश्यति ॥१४॥

निम्बदेवं ग्राममध्ये मार्गे क्षेत्रे च चत्वरे ।
उपशल्ये वाटिकायां यत्र क्वापि प्रपश्यति ॥१५॥
तावद्द्रुतं चतुष्पादैः रौद्ररूपोऽभिधावति ।
मारयितुं निम्बदेवं मर्दयितुं विनाशितुम् ॥१६॥
पूर्ववैरं स्मरन् यद्वन्मराक्रोधेन धावति ।
वैरनिर्यापनार्थं किं वाऽस्य पूर्वस्य जन्मनः ॥१७॥
एवं जाते बहुवारे निम्बदेवो निजं द्रुतम् ।
रक्षत्येव च कौशल्यादापणे वा गृहे विशन् ॥१८॥
वेद्यामारुह्य च वृक्षं समारुह्योच्चसंस्तरे ।
रक्षत्येव निजं नित्यं रथ्यायां याति भीतवत् ॥१९॥
यत्र तिष्ठति वृषभस्तां रथ्यां स विहाय वै ।
अन्यया रथ्यया याति कार्यार्थे तु बहिर्गृहात् ॥२०॥
राजमार्गे चत्वरे वा क्षेत्रे वाप्यां च गोपुरे ।
उपशल्ये भूतलादौ तद्दृष्टयग्रे न याति वै ॥२१॥
एवं भीतमना नित्यं निम्बदेवः प्रवर्तते ।
वृषभोऽपि सदा निम्बदेवं सम्मार्गयत्यपि ॥२२॥
कदा मिलेन्मारयामि तथासद्ग्रहवत्स्थितः ।
एवं काले बहुगते ह्येकदा देवमन्दिरम् ॥२३॥
दर्शनार्थं निम्बदेवः प्रयाति यष्टिवर्जितः ।
निशामुखेऽथ भाग्येन दैवयोगात्तु सन्निधौ ॥२४॥
रथ्यायां मिलितश्चाऽयं वृषभस्तं निरायुधम् ।
अतिवेगेन दुद्राव रुषा स वृषभो बली ॥२५॥
मारयितुं निम्बदेवं कुर्वन् गोगर्जनां तदा ।
पश्चात्तु शकटं चायात्येव पश्चाद् द्वितीयकम् ॥२६॥
मार्गे संकुचिते पार्श्वयोश्चापि नावकाशकः ।
विद्यते धावितुं क्वापि वृषभोऽभिप्रधावति ॥२७॥
एवं चोभयतःपाशे मार्गे मृत्युप्रदायके ।
द्रागेव निम्बदेवस्तु हरिं सस्मार मां तदा ॥२८॥
ददर्श पतितं तत्र ग्रावाणं सुदृढं तथा ।
करतोल्यं सत्वरं तं चोद्धृत्य वै करे बलात् ॥२९॥
सर्ववेगेन हस्तेन वृषभस्य तु मस्तके ।
ताडयामास सहसा घातयामास सर्वथा ॥३०॥
भेदयामास शिरसो ललाटं वृषभस्तदा ।
ताडनेन द्रुतं मूर्छामवाप्य भ्रमणद्वयम् ॥३१॥
निपपात क्षितौ तत्र ममार च क्षणादिति ।
आततायिवधे दोषो नास्ति चेदं तथाऽभवत् ॥३२॥
दंष्ट्रिणां शृंगिणां क्वापि विश्वासः शस्त्रिणां तथा ।
विचित्तानां न कर्तव्यश्चौराणां क्षुत्तृषार्थिनाम् ॥३३॥
राज्ञां चापि च वेश्यानां शत्रूणां करिणां तथा ।
नखिनां तामसानां च कार्यो विश्वास एव न ॥३४॥
अग्नीनां च जलानां च ग्रहाणां स्वार्थिनां तथा ।
कुनारीणां कुसाधूनां कार्यो विश्वास एव न ॥३५॥
जीर्णानां चापि यन्त्राणां वाहनानां विनोदिनाम् ।
हिंस्राणां हास्यकर्तॄणां कार्यो विश्वास एव न ॥३६॥
यूनां च रोगिणां क्रोधाविष्टानां त्यागिनामपि ।
भिक्षुकाणां च मूर्खाणां कार्यो विश्वास एव न ॥३७॥
अपक्वशेमुषीणां चाऽलसानां धर्मघातिनाम् ।
नास्तिकानां रतिस्थानां कार्यो विश्वास एव न ॥३८॥
अपरिचितवर्गाणां शठानां लोभिनां तथा ।
अस्त्रीकाणां कामिनां च कार्यो विश्वास एव न ॥३९॥
मेघानां चातपानां च रजसां मरुतां तथा ।
तमसां तामसानां च कार्यो विश्वास एव न ॥४०॥
मोहवतां मदवतां बहुनम्रस्वभाविनाम् ।
अन्तःप्रवेशं दधतां कार्यो विश्वास एव न ॥४१॥
यान्त्रिणां क्षणसार्थानां महीमानादिदेहिनाम् ।
स्वतन्त्रयोषितां चापि कार्यो विश्वास एव न ॥४२॥
सपत्नीनां च दुष्टानामनवधानशालिनाम् ।
अनाज्ञावर्तमानानां कार्यो विश्वास एव न ॥४३॥
श्रद्धाशून्यजनानां च नटनर्तकयोगिनाम् ।
द्यूतस्थानां रणस्थानां कार्यो विश्वास एव न ॥४४॥
स्नेहशून्यहृदयानां विजातीयोपकारिणाम् ।
नापितानां मद्यपानां कार्यो विश्वास एव न ॥४५॥
छिद्रवीक्षास्वभावानामिर्ष्युकाणां प्रमादिनाम् ।
अनभ्यस्तनवीनानां कार्यो विश्वास एव न ॥४६॥
बहुमिष्टवचसां च नीतिमार्गविरोधिनाम् ।
अशास्त्रगामिनां चापि कार्यो विश्वास एव न ॥४७॥
अमनस्काङ्गीकर्तॄणां यशःकीर्तिविनाशिनाम् ।
विवादशालीमनसां कार्यो विश्वास एव न ॥४८॥
लुञ्चावृत्तिप्रजीवानामनृताऽन्यायवर्तिनाम् ।
सत्यरोधवतां चापि कार्यो विश्वास एव न ॥४९॥
गह्वराणां वनानां चारण्यानां सरसां तथा ।
श्रान्तेन्द्रियादिवृत्तीनां कार्यो विश्वास एव न ॥५०॥
अस्थिराणां च दीर्घाणां वामनानां विलम्बिनाम् ।
काणानां चापि खञ्जानां कार्यो विश्वास एव न ॥५१॥
संकुचितप्रणाडीनां त्यक्तकुटुम्बिनां तथा ।
त्यक्तदेशप्रजानां च कार्यो विश्वास एव न ॥५२॥

गणिकानां च भाण्डानां शरणागतयोषिताम् ।
राजसम्बन्धिनारीणां कार्यो विश्वास एव न ॥५३॥
अतिवृष्टिप्रदेशानां शाद्वलानां भुवां तथा ।
पर्वतानां कर्दमानां कार्यो विश्वास एव न ॥५४॥
अज्ञातवृत्तवैद्यानां श्मशानानां तरस्विनाम् ।
अज्ञातानामोषधीनां कार्यो विश्वास एव न ॥५५॥
शत्रुदापितभोज्यानां शत्रुदापितगन्धिनाम् ।
शत्रुप्रेषितलोकानां कार्यो विश्वास एव न ॥५६॥
शत्रुपोष्यशुकानां च शत्रुपालितपक्षिणाम् ।
शत्रुसम्बधिपत्राणां कार्यो विश्वास एव न ॥५७॥
अतिक्रोधितपत्नीनामतिक्रोधितस्वामिनाम् ।
अतिमुक्तजनानां च कार्यो विश्वास एव न ॥५८॥
अतिजीर्णालयानां च तथाऽतिजीर्णदेहिनाम् ।
अतिजीर्णौषधानां च कार्यो विश्वास एव न ॥५९॥
मन्त्रतन्त्रप्रसक्तानां रसायनप्रवेदिनाम् ।
आसुराणां रक्षसां च कार्यो विश्वास एव न ॥६०॥
अत्र मानं तत्र मानं चेति मानाभिलाषिणाम् ।
द्विजिह्वानां चैकलानां कार्यो विश्वास एव न ॥६१॥
विधुराणां विधवानां कूटनीनां च योषिताम् ।
विरागिणीनां भूतीनां कार्यो विश्वास एव न ॥६२॥
दिग्भ्रमाणां प्रेतभूताविष्टानां वायुरोगिणाम् ।
परचक्रगतानां च कार्यो विश्वास एव न ॥६३॥
सरीसृपाणां जलिनां यादसां वक्रगामिनाम् ।
बुभुक्षितानां लोकानां कार्यो विश्वास एव न ॥६४॥
चाराणां वनवासानां परराष्ट्रप्रवेशिनाम् ।
अस्निग्धानां चाश्रितानां कार्यो विश्वास एव न ॥६५॥
प्रतिष्ठापितदेवानां तामसानां तु सर्वथा ।
अपराधात्मके कार्ये कार्यो विश्वास एव न ॥६६॥
आपत्कालाभिभूतानां बालिशानां वचस्सु च ।
स्वार्थसाधकलोकानां कार्यो विश्वास एव न ॥६७॥
अनेकगृहभृत्यानां नैकनृपैः सुयोगिनाम् ।
सीम्नि कृतालयानां च कार्यो विश्वास एव न ॥६८॥
रात्रिचराणां प्रसह्य हाटकाणां च दुःखिनाम् ।
अविज्ञातचरित्राणां कार्यो विश्वास एव न ॥६९॥
उद्वेगिनां विरागाणां व्रतिनां हठधर्मिणाम् ।
बाह्यवृत्तिपराणां च कार्यो विश्वास एव न ॥७०॥
शैवालितक्षितीनां च भग्ननावां मनस्विनाम् ।
क्षणे रुष्टप्रतुष्टानां कार्यो विश्वास एव न ॥७१॥

देहेन्द्रियादिसक्तानां दैत्यानां परयोषिताम् ।
समाजे बहुलोकानां कार्यो विश्वास एव न ॥७२॥
उत्सवे चेर्ष्युकाणां चोपपत्युश्चोपयोषिताम् ।
तथैव चोपपुत्राणां कार्यो विश्वास एव न ॥७३॥
उपमातृणामन्धानां वणिजां च कुतर्किणाम् ।
मम भक्तिविहीनानां कार्यो विश्वास एव न ॥७४॥
रोगाणां च क्षतानां च फुल्लानां कम्पिनां तथा ।
बहुस्वप्नवतां चापि कार्यो विश्वास एव न ॥७५॥
अज्ञातानामश्रुतानामनभ्यस्तादिकर्मिणाम् ।
अनभ्यस्तपाचकानां कार्यो विश्वास एव न ॥७६॥
अर्धाभ्यासवतां निर्मूलानामपारवर्ष्मणाम् ।
आकाशालम्बनवतां कार्यो विश्वास एव न ॥७७॥
तत्र तत्र हि विश्वस्तो दुःखं क्षतिं तथाऽऽपदम् ।
मरणं वा प्रयात्येव लक्ष्मि नास्त्यत्र संशयः ॥७८॥
निम्बदेवस्तथा मत्वा जघान वृषभं तदा ।
गोहत्या साऽस्य संलग्ना निम्बदेवो विचित्तताम् ॥७९॥
उपागमद् द्रुतं चापि कृष्णतां कुष्ठरोगिताम् ।
यथाकथञ्चित् सहसा स्वालयं समुपाययौ ॥८०॥
विप्रानाहूय हत्यां तां न्यवेदयद्द्विजा अपि ।
ऊचुस्तं विष्णुयागार्थं प्रायश्चित्तं च वत्सरम् ॥८१॥
एकभुक्तत्वमेवापि सहस्रगोप्रदानकम् ।
सोऽपि सर्वं प्रचक्रे च यज्ञान्ते दक्षिणां ददौ ॥८२॥
तथापि श्यामवर्णोऽस्य विचित्तता न निर्गता ।
अथ खेदं जगामापि प्रसस्मार च मां हरिम् ॥८३॥
भक्तं ज्ञात्वा परं नारायणश्चाऽहं पुरोऽभवम् ।
प्रत्यक्षो दिव्यरूपश्च पस्पर्श तं स्वबाहुना ॥८४॥
द्रागेव भक्तः श्वेतोऽभूत् सुचित्तः स्वस्थ एव च ।
तस्मै दत्तो मया मन्त्रस्तं जग्राहाऽतिभावतः ॥८५॥
'बालकृष्णो हरिः साक्षान्मोक्षदो भगवान् मम' ।
सोऽपि मन्त्रमुवाचैवं सर्वदाऽथ ततः स तु ॥८६॥
प्राप्ते काले ययौ मुक्तिं भक्तो मे निम्बदेवकः ।
एवं हत्याघनाशो वै मयाऽध्वरेऽस्य वर्तितः ॥८७॥
नाऽशुभं मम भक्तानां तिष्ठत्येव हि मद्बलात् ।
शृणु लक्ष्मि निम्बदेवस्याऽऽसीद् भृत्यः स प्राग्भवे ॥८८॥
वेतनं परिपूर्णं च लब्ध्वाऽपि पूर्णकर्म सः ।
करोति नैवाऽलसः स प्रमादी क्रोधनोऽपि च ॥८९॥
ज्वरेण स मृतो भृत्यो बलीवर्दो बभूव ह ।
जातिस्मरोऽयं नित्यं वै यावत् पश्यति स्वामिनम् ॥९०॥

नित्यं कार्ये योजकं स्वं चाधिक्षेपिणमित्यपि ।
दृष्ट्वा दृष्ट्वा वैरभावं प्रकाशयति तत्र च ॥९१॥
धावत्येव स्वामिनं स्वं मारयितुं क्रुधा रुषा ।
एवंविधो हि वृषभः स्वामिहस्तेन वै मृतिम् ॥९२॥
प्राप्य ऋणं प्रदातुं च पुनस्तस्य सुतोऽभवत् ।
शोभनो ज्ञानवाँश्चापि बहुकार्यकरोऽपि च ॥९३॥
निम्बदेवस्तु वार्धक्ये सर्वं दत्वा सुताय ह ।
भजते मां प्रभुं नित्यं कुटुम्बेन युतो रमे ॥९४॥
सुतोऽपि मां भजते च नाम्ना गोकुलवर्धनः ।
अन्ते मुक्तिं ह्यवापापि भक्त्या मे स सुतोऽपि वै ॥९५॥
एवं लक्ष्मि कृता दोषा नश्यन्त्येव प्रतापतः ।
मम भक्तेस्तथा ध्यानात् कीर्तनाच्छरणागमात् ॥९६॥
सतां सेवाप्रसंगाच्च नश्यन्त्यघानि सर्वशः ।
भक्तानां योषितां चापि साध्वीनां सेवनादपि ॥९७॥
आशीर्वादाद् विनश्यन्ति सर्वाण्यघानि सर्वशः ।
सर्वविघ्नानि नश्यन्ति सर्वापन्नाशनं तथा ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने निम्बदेवाख्यभक्तस्य गोहत्यापापं भगवता निवारित-मित्यादिनिरूपणनामा अष्टनवत्यधिकशत-तमोऽध्यायः ॥ १९८ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं कारुण्यात् प्रवदामि यत् ।
सर्वैर्जनैः सदा कार्यं सच्छास्त्राणां प्रसेवनम् ॥ १ ॥
लक्ष्मीनारायणसंहितायाश्चास्याः प्रसेवनम् ।
नारीभिश्च नरैश्चापि कर्तव्यं सर्वदेहिभिः ॥ २ ॥
मम भक्तिप्रकाराश्च मोक्षस्य साधनान्यपि ।
स्वर्गस्य हेतवश्चापि सृष्टीनां वर्तनानि च ॥ ३ ॥
उक्तान्यत्र समस्तानि बहूनि कृपया मया ।
ऐकान्तिका मम भक्ता उदिता हि मया शुभाः ॥ ४ ॥
देहात्मबुद्धयश्चापि ब्रह्मात्मबुद्धयस्तथा ।
स्वार्थपरास्तथा चोक्ताः परार्था दिव्यधर्मिणः ॥ ५ ॥
दिव्यास्तु देहत्रितयाद् भिन्ने चात्मनि निष्ठिताः ।
आत्मन्यतिप्रकाशे ते साक्षान्मां समुपासते ॥ ६ ॥
ईक्षन्ते ते चातिप्रकाशाऽऽत्मरूपं सनातनम् ।
आत्मरूपे बालकृष्णमीक्षन्ते मां परेश्वरम् ॥ ७ ॥
अतितेजस्विनं साक्षाद् रमन्तं चात्मना सह ।
त एते दिव्यदृग्वन्तश्चात्र लोके स्थिता अपि ॥ ८ ॥
ब्रह्मपुरस्थिताः सन्ति यूयं ब्रह्मप्रिया यथा ।
ब्रह्मभावस्तु भक्ताभिः साधनीयोऽतिसौख्यदः ॥ ९ ॥
श्रीपतौ मयि यासां वा येषां मनुष्यभावना ।
तेषां तासां विघ्नभयं विरहो मे भवेदिति ॥१०॥
अप्राप्तिर्मम धाम्नश्च क्वचित् स्यान्मदभावतः ।
अतो लोके मम भक्ता नैव कुर्वन्ति वै मयि ॥११॥
मनुष्यभावनां क्वापि कुर्वन्ति दिव्यभावनाम् ।
यथा तु भावना दिव्या मयि तथा निजेऽपि च ॥१२॥
कर्तव्या भावना दिव्या न तु देहात्मभावना ।
देहात्मभावना विघ्नप्रदा भवति देहिनाम् ॥१३॥
ब्रह्मा मोहं गतो वीक्ष्य पार्वतीरूपमेव ह ।
स्खलितश्च ततो जाता बालखिल्या महर्षयः ॥१४॥
शंकरो मोहिनीं मां तु दृष्ट्वा मुग्धोऽभवत्तथा ।
नारदो देहभावेन विवाहं समियेष च ॥१५॥
एवमन्येऽपि बहवो मोहं मुक्ता गता अपि ।
मोहात्मकं महद्विघ्नं जायते देहभाविनाम् ॥१६॥
दिव्यभावयुतानां तु चात्मनिष्ठानिवासिनाम् ।
शुकवद् ब्रह्मभावो वै जायते सनकादिवत् ॥१७॥
सर्वा लीला मम दिव्या बोद्धव्या रतिरासजा ।
मुक्तिदा सा भवत्येव मयि स्नेहेन योगिनी ॥१८॥
स्नेहो गाढानुरागः श्रीकृष्णनारायणे मयि ।
प्रेमातिरेकः सततं निजात्मनि स्थिरस्तु यः ॥१९॥
स्नेहेनाऽऽनेन भक्तानां मायास्नेहो विलीयते ।
मायास्नेहं स्थितिं कर्तुं ददात्येव न चान्तरे ॥२०॥
ध्यानं स्नेहेन सततं कर्तव्यं मम नित्यदा ।
ध्यानवृत्तिः स्थिरा स्याच्च महासमाधिकारणम् ॥२१॥
वृत्तिस्थैर्ये भवेदेकान्तिकता मयि केशवे ।
शाश्वतानन्दसन्दोहे महासुखप्रदे प्रभौ ॥२२॥
सर्वक्रियासु सततं मयि स्थैर्यं विधापयेत् ।
एवमभ्यसने जाते चात्मा निरुद्धयते मयि ॥२३॥
सेन्द्रियाऽन्तःकरणः संप्रलग्नो जायते मयि ।
एवं चित्तनिरोधेन सर्वरोधे भवेन्मयि ॥२४॥
प्रेमाऽतिरेकस्तत्राऽस्ति कारणं नेतरद् रमे ।
भक्ताना मानसं स्नेहात् स्थिरं स्यान्मयि तत्तथा ॥२५॥
तेषामात्मसु सहसा वासो मे च भवेद् रमे ।
प्रेम्णा वासस्तु मूर्तेमें साक्षाद्वत् स्मारको भवेत् ॥२६॥
महात्म्यज्ञानमेवापि प्रेम्णा नित्यं प्रवर्धते ।
माहात्म्यज्ञानयुक्प्रेमा ब्रह्मात्मस्थितिमृच्छति ॥२७॥

न स मायां प्रपश्येत् संपश्येन्मां ब्रह्म शाश्वतम् ।
अक्षरं दिव्यरूपं च सच्चिदानन्दसंभृतम् ॥२८॥
तत्र निजात्मरूपे वै चाक्षरे ब्रह्मशाश्वते ।
सदैकरसचैतन्यप्रकाशे व्यापकेऽमितः ॥२९॥
अनादिश्रीकृष्णनारायणं मां परमेश्वरम् ।
दिव्यं कान्तं समीक्षेत नान्यमाकारमीक्षते ॥३०॥
एषा ब्राह्मी स्थितिर्दिव्या पराविद्यास्थितिस्तथा ।
दिव्यज्ञानस्थितिश्चापि ज्ञानप्रलयसंज्ञिका ॥३१॥
साक्षात्कृष्णे परे देवे शाश्वतस्थिरतात्मिका ।
अस्या नित्यं समारम्भं यः करोति तु देहभाक् ॥३२॥
स याति परमां श्रेष्ठां स्थितिं लक्ष्मि यथा तव ।
प्रत्यक्षस्य महिमा मे यावज्ज्ञातोऽस्ति येन वै ॥३३॥
तस्य तावान् प्रकाशोऽपि हृदये कृपया भवेत् ।
चिन्मयं तं प्रकाशं च वर्धमानवेक्षते ॥३४॥
महिमानं वर्धमानं यावन्तं विन्दते तथा ।
तावन्तं प्रणवं चापि तावद्रूपं च मे तथा ॥३५॥
वर्धमानं ब्रह्मरूपे विन्दते कृपया मम ।
क्रमात् सर्वत्र सम्पूर्णं प्रकाशं परिपश्यति ॥३६॥
श्रृणोति मम नाम्नां वै नादानां मधुरान् ध्वनीन् ।
ब्रह्मनादेषु मग्नस्य मग्नस्य स्वात्मनि ध्रुवे ॥३७॥
अमायिकस्य मुक्तस्य ब्रह्मीभूतत्वमेव तत् ।
मम माहात्म्यानुभवो यस्याऽऽधिक्येन यावता ॥३८॥
तावता ब्रह्मभावस्य परात्मनो ममेक्षणम् ।
परां काष्ठां प्रपन्नस्य मम माहात्म्यवेदिनः ॥३९॥
कालमायानियन्तृत्वाद्यैश्वर्यं समजायते ।
अनादिश्रीकृष्णनारायणोऽहं मत्समोऽपि सः ॥४०॥
सर्वावतारधर्ताऽहं कालमायानियामकः ।
गुणातीतो निर्विकारः सर्वेश्वरेश्वरेश्वरः ॥४१॥
श्रेयोऽर्थं देहिनामत्र स्वेच्छया भामि मर्त्यवत् ।
मर्त्यवच्च क्रियाः सर्वाः करोमि भक्तहेतवे ॥४२॥
तत्र विमूढमतयश्चाल्पज्ञाश्चर्मचक्षुषः ।
निजदृष्टान्तमासाद्य दोषान् प्रकल्पयन्ति ते ॥४३॥
निर्दोषोऽहं सदा लक्ष्मि चिन्तामणिसमः सदा ।
कल्पकेषु कल्प्यदोषाः प्रविशन्ति हि तेऽखिलाः ॥४४॥
मन्यन्ते कामिनं मां ये कामिनस्ते भवन्ति वै ।
क्रोधिनं मां कल्पयन्ति क्रोधिनस्ते भवन्ति च ॥४५॥
मन्यन्ते मां लम्पटं ये भवन्ति लम्पटास्तु ते ।
मायाविनं तु जानन्ति मायाविनो भवन्ति ते ॥४६॥

अदिव्यं मां विजानन्ति ह्यासुराः क्षुद्रबुद्धयः ।
दिव्यं चापि मनुष्यं मां दिव्यं जानन्ति ये तु वै ॥४७॥
ते तु भवन्ति दिव्याश्च ह्यदिव्या अपि देवताः ।
अपि त्वाकृतिमीशं मां निर्दोषं मां विदन्ति ये ॥४८॥
सदोषा अपि जायन्ते निर्दोषास्ते बलान्मम ।
वशे यस्य समस्तानीन्द्रियाणि चान्तराणि च ॥४९॥
संकल्पोऽपि वशे यस्य प्रत्यक्षकृष्णनिश्चयः ।
स एव पूर्णो धन्यश्च कृतार्थश्च मतः सदा ॥५०॥
यथा मुक्तस्तथा सोऽपि यथाऽक्षरे तथाऽत्र सः ।
यथा दिव्यस्तथा चात्र सर्वैश्वर्यान्वितो भवेत् ॥५१॥
मन्येत स निजं भाग्यं भाग्येन श्रीहरेः सह ।
मिश्रितं न पृथक् लक्ष्मि धन्यं मन्येत वै निजम् ॥५२॥
कामादिदावदग्धेऽत्र लोके धन्योऽस्मि यन्मम ।
अनादिश्रीकृष्णनारायणः साक्षान्मिमेल ह ॥५३॥
सन्तस्तस्य तु मिलिता मोक्षदा दोषनाशकाः ।
यत्प्रसादेन जेष्यामि कामादीनान्तरानरीन् ॥५४॥
ब्रह्मरूपेण च कृष्णोपासनां मोक्षदायिनीम् ।
करिष्यामि भाग्ययोगैः कृपया श्रीहरेस्तथा ॥५५॥
एतादृशा मम भक्ता भाग्यवन्तो रमे मताः ।
प्राप्तपूर्णगुणास्ते वै चिन्तामणिप्रयोगिणः ॥५६॥
नहि तेष्वस्त्यपूर्णत्वं परिपूर्णा ममाश्रयात् ।
प्रत्यक्षोऽहं यदेतेषां मिलितो राधिकापतिः ॥५७॥
पूर्वजन्मोत्थसुकृतं त्वेतेषां बहुलं यतः ।
सत्संगस्य महायोगो जातोऽस्य मोक्षदो यतः ॥५८॥
प्रपन्नस्य तु भक्तस्याऽपूर्णता चेद् भवेद् यदि ।
अपनेयाऽऽत्मनिष्ठाऽऽढ्यमाहात्म्यज्ञानतस्तु सा ॥५९॥
आत्मनिष्ठा निर्बला चेत् समाधावपि दुःखदा ।
श्रूयन्ते तु यदा नादा ब्रह्माण्डभेदका इव ॥६०॥
समाधौ तु तदा चात्मनिष्ठाहीनो बिभेति ह ।
आत्मसत्तो निर्भयो वै ब्रह्मतादात्म्यमेति च ॥६१॥
ब्रह्माण्डदाहकं तेजस्तत्रेक्षते समाधिमान् ।
तदा बिभेत्यसावात्मनिष्ठाहीनो विनाऽऽश्रयम् ॥६२॥
हरिर्वा तस्य तन्मार्गे सहायः प्रेमभावितः ।
आत्मविद्वा भयं नैति हरेः सहायवांश्च वा ॥६३॥
आत्मविदः प्रत्रुट्यन्ति सर्वा विषयवासनाः ।
निरोधं त्वेकवृत्तित्वाच्चित्तं कृष्णेऽस्य विन्दति ॥६४॥
सर्वेन्द्रियप्रवाहाणां कृष्णे मयि विसर्जनम् ।
कृत्वा स्थैर्यं मम भक्तैर्विघ्नं नाऽस्य प्रजायते ॥६५॥

एकबलं चैकवृत्ति चित्तं भक्तस्य सुस्थिरम् ।
मय्येव तु यदा जातं तदाक्रष्टुं न शक्यते ॥६६॥
रम्यैश्चापि पदार्थैर्वै यतो निर्वासनं हि तत् ।
निरुद्धं मम मूर्तौ तन्मदन्यचिन्तनोज्झितम् ॥६७॥
एवं सतां मानसं वै मयि रुद्धं प्रजायते ।
हित्वाऽन्यत् कृष्णपूर्णार्थाः कुर्वते मदुपासनम् ॥६८॥
एवं लक्ष्मि कृपासाध्यो भवामि पूर्णकामदः ।
महाभागवताः सन्तो भजन्ते नवधा हि माम् ॥६९॥
ब्रह्मनिष्ठा आत्मविदो मम माहात्म्यवेदिनः ।
भक्तिनिष्ठः सदा सेवानिष्ठस्तेषां प्रवर्धते ॥७०॥
तथा तादात्म्यनिष्ठश्च सम्पद्यते मया सह ।
सद्भिस्तथापि नोद्रिच्यं ह्युद्रेके दग्धबीजता ॥७१॥
हरेः कृपा तादृशाच निवर्तते हि निष्फला ।
तस्मान्मय्येव संस्थाप्यं सर्वं चाभ्युदयादिकम् ॥७२॥
बुद्धिर्मनोऽप्यहंकारश्चित्त चेन्द्रियवृत्तयः ।
देहो देहगुणाश्चापि स्थापनीया मयीश्वरे ॥७३॥
रसिकत्वं हरावेव बालकृष्णे मयि प्रभौ ।
समर्पणीयं सततं श्रीलक्ष्मीराधिकापतौ ॥७४॥
गायनस्य रसश्चापि समर्पणीय ईश्वरे ।
कीर्तनं हावभावाश्चार्पणीया परमे मयि ॥७५॥
मदर्पणं विना भावो रसोऽन्यत्र भवेद् यदि ।
तत्र स्याल्लग्नता तेन भ्रंशः स्याच्छ्रेयसां पथः ॥७६॥
एकान्तिकस्य भक्तस्य रसिकस्य न संभवेत् ।
रसः क्वापि मदन्येषु पदार्थेषु जगत्सु वै ॥७७॥
मम लीलागुणभाजि शब्दे यस्य रसो मतः ।
नाऽन्यत्र स एव मेऽस्ति शाब्दिको रसिकः प्रियः ॥७८॥
ममांगयोगिसंस्पर्शे यद् भक्तस्य रसो मतः ।
नाऽन्यत्र स्पार्शने क्वापि स्पर्शीयरसिकः स मे ॥७९॥
ममैवेक्षा मामकानामीक्षा यस्य रसान्विता ।
नान्या यस्याऽस्ति दिदृक्षा रूपीयरसिकः स मे ॥८०॥
मदर्पितान्नताम्बूलप्रभृतिस्वादसद्रसः ।
यस्याऽस्ति न त्वितरत्र रसीयरसिकः स मे ॥८१॥
मदर्पितसुगन्धादेर्घ्राणने यस्य सद्रसः ।
नान्यत्र सौरभादौ स गन्धीयरसिको मम ॥८२॥
ग्रहणं मम दिव्यानां पदार्थानां तु हस्तयोः ।
गमनं मन्दिराणां मे प्रदक्षिणं च पादयोः ॥८३॥
कथनं मत्कथादीनां वाचो यस्य रसात्मकम् ।
आनन्दाद्यं मम योगान्मद्रतौ यस्य सद्रसः ॥८४॥
एवमाद्यानि सर्वाणि मदर्थे रसभाञ्जि वै ।
मनो बुद्धिस्तथा चित्तमहंकारोऽपि मारुतः ॥८५॥
सर्वे मद्रसभावा वै यस्य भक्तस्य सन्ति हि ।
प्रमोदो यस्य मन्मूर्तौ मूर्तेश्च विषयेष्वपि ॥८६॥
भागवतेषु दिव्येषु रसोत्कर्षो हि सर्वथा ।
आत्यन्तिकी रुचिश्चापि मय्येव यस्य वर्तते ॥८७॥
जाग्रतः स्वपतो वापि मूर्छितस्यापि सर्वथा ।
तुर्यास्थितस्य मय्येव यस्य सर्वो रसो मतः ॥८८॥
तस्य भक्तस्य दिव्यस्य सत्या रसिकता मता ।
एवंविधस्य भक्तस्य रसिकस्य सदा हृदि ॥८९॥
भासेऽनादिकृष्णनारायणोऽहं दिव्यमूर्तिमान् ।
पश्यतो मम मूर्तिं च हृदये द्रागलौकिकीम् ॥९०॥
प्रकाशते ब्रह्मतेजो भासे तस्मिन्नहं प्रभुः ।
तस्माद् भक्तैः प्रधार्यं मे रूपं गायनकीर्तनैः ॥९१॥
मानसं च मम रूपे सात्म श्रद्धासमन्वितम् ।
यत्र क्वापि प्रवेष्टुं न शक्येताऽन्येन वस्तुना ॥९२॥
यतः समर्थो भगवान् मायिकानि समस्ततः ।
दूरीकरोति विघ्नानि सर्वेश्वरेश्वरो हि सः ॥९३॥
विधृता येन भूगोलास्तारा व्योम्नि तथा धृताः ।
सूर्याचन्द्रमसोर्येनोदयास्तमने वै कृते ॥९४॥
मेघाश्च निर्मिता येन वारिवाहा जलप्रदाः ।
ऋतवो निर्मिता येन वृक्षवल्लीफलप्रदाः ॥९५॥
अब्धयो निजवेला न जहत्यपि यदाज्ञया ।
धातुबिन्दोः प्रजायन्ते साकाराऽपत्यमूर्तयः ॥९६॥
जीवो येनेच्छया चात्मा ह्यगोचरः समर्थितः ।
सोऽहं श्रीमान् कृष्णनारायणो मनुष्यविग्रहः ॥९७॥
बहिश्च हृदये स्वामी धाम्नि चापि भवामि ह ।
मिलितश्चेह भक्तानां परनिःश्रेयसे प्रभुः ॥९८॥
एतादृशं मां विज्ञाय माहात्म्यज्ञानगोचरम् ।
मम भक्तेन भक्तिर्मे कार्या भीतिविवर्जिता ॥९९॥
एवंविधस्य विज्ञस्य ब्रह्मस्थितिर्भवेदिह ।
हृदि तस्य प्रवेशं न कुर्वन्ति मायिकानि वै ॥१००॥
दिव्या स्थितिर्भवत्येव सुखदुःखसमाऽस्य वै ।
पूजने ताडने हस्त्यारोहणे खरवाहने ॥१०१॥
शत्रौ मित्रे तथा स्वर्णे लौहे रूपे कुरूपके ।
अवमाने च माने च समताऽस्य हि वर्तते ॥१०२॥
एतादृशस्य हृदये वासो मे सर्वदाऽस्ति वै ।
अस्य प्रपूजनं देवा ईश्वरा विदधत्यपि ॥१०३॥

संसारिणां समुद्धर्ता भवत्ययं भवार्णवात् ।
आधारो जगतां चायं सामर्थ्यवान् भवत्यपि ॥१०४॥
असंख्यगुणकल्याणैर्युक्तो मोक्षं ददात्यपि ।
अस्य मूर्तौ मम मूर्तिर्वसत्येव सदा रमे ॥१०५॥
अस्येन्द्रियेषु सर्वाणीन्द्रियाणि मे वसन्त्यपि ।
अस्याऽन्तःकरणे सर्वं मदन्तःकरणं रमे ॥१०६॥
अतः स सर्वलोकानां नेत्रादीनां प्रकाशने ।
समर्थो वर्तते मद्वन्मम तादात्म्ययोगतः ॥१०७॥
तथापि साधुतास्थित्या सहते चावमानकम् ।
क्षुद्रजीवकृतं चापि क्षमाधर्मो हि साधुता ॥१०८॥
स एव तु महानात्मा क्षमा सामर्थ्यमुत्तमम् ।
एतादृशस्य मे साधोः संगमाद् यावदर्पणात् ॥१०९॥
सर्वाः सिद्ध्यन्ति वाञ्छाश्च स्वर्गं मोक्षं लभेत च ।
पठनाच्छ्रवणादस्य भुक्तिं मुक्तिं लभेद् रमे ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने श्रीहरिणा स्वैकान्तिकभक्तानां ब्रह्मनिष्ठतैश्वर्यादीनि कथितानीत्यादिनिरूपणनामा नवनवत्यधिकशततमोऽध्यायः ॥ १९९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भाण्डभक्तस्य वै कथाम् ।
भाण्डीयनगरे भाण्डोऽभवच्छूद्रो हि भक्तराट् ॥ १ ॥
गायने वादने शक्तो नाम्ना कालीन्दरः पुरा ।
कालीन्दरोऽतिकुशलश्चाबाल्याद् वाद्यरागवान् ॥ २ ॥
वाद्यकलां विजानाति गीतिगानानुसारिणीम् ।
भाण्डाश्च बहवस्तस्य शालामागत्य दूरतः ॥ ३ ॥
अभ्यासं विदधत्येव वाद्यानां तत्र वासिनः ।
नृत्यानां गालतालानां गलतालात्मकात्मनाम् ॥ ४ ॥
कण्ठतालीतालश्लिथकरतालात्मकात्मनाम् ।
नर्तक्यश्चापि बह्व्यश्चागत्याऽभ्यासं तथाविधम् ॥ ५ ॥
कुर्वन्ति तस्य शालायां वारांगनाश्च कन्यकाः ।
वर्षे वर्षे प्रकुर्वन्ति महोत्सवं च ते ततः ॥ ६ ॥
समाजे तत्र कुर्वन्ति शिक्षणस्य प्रदर्शनम् ।
एवं तत्रातिकुशला गायका नर्तकास्तथा ॥ ७ ॥
वादका हासकाश्चापि बहुरूपा नराः स्त्रियः ।
प्राप्नुवन्ति यथाविर्यं पारितोषिकमुत्तमम् ॥ ८ ॥
स्वर्णरूप्यमयं रत्नमयं भूषामयं च वा ।
वेषमयं वाद्यरूपं समाजेन समर्पितम् ॥ ९ ॥

एवं सम्वत्सरे लक्ष्मि जायते सुमहोत्सवः ।
प्रसिद्धस्तेन भाण्डः सः कालीन्दरो व्यजायत ॥१०॥
राजानः साधवः सत्यः श्रेष्ठिनश्चाधिकारिणः ।
समुत्सवे समायान्ति पारितोषिकसम्प्रदाः ॥११॥
तेषां करोति सत्कारं यथायोग्यं यथाधनम् ।
भाण्डीरनृपतिश्चापि नृपादीनां समर्हणम् ॥१२॥
स्वागतं चापि योग्यः सन् करोति च यथोचितम् ।
एवंविधे समाजेऽयं कालीन्दरोऽतिभक्तराट् ॥१३॥
मम मूर्तिं तु सौवर्णी सिंहासने सभागते ।
सर्वशृंगारशोभाढ्येऽवस्थापयति शोभनाम् ॥१४॥
लक्ष्मीराधायुतां रम्यां कृष्णनारायणाभिधाम् ।
मण्डपे तैजसे शोभायुक्ते स्वर्गसभासमे ॥१५॥
गायनादेः समारम्भात् पूर्वं प्रपूज्य मां ततः ।
नृपान् प्रपूज्य साधूँश्च सतीः प्रपूज्य चाग्रगान् ॥१६॥
वृद्धान् विप्रान् श्रेष्ठिवर्यान्नत्वा समाजमादरात् ।
गीतिं रम्यां प्रार्थनाढ्यां करोति प्राक् तदा मम ॥१७॥
जयति नारायणः सर्वकारणहरिः
श्रीपतिः सर्वलक्ष्मीश्वरोऽयम् ।
जयति नारायणो ब्रह्मपारायणो
राधिकाकान्त ईशेश्वरोऽयम् ॥१८॥
जयति कमलापतिर्ब्रह्मललनापति-
र्मुक्तमुक्तानिकाकान्त ईशः ।
जयति धामेश्वरश्चावतारेश्वरः
कंभराबालको बालकृष्णः ॥१९॥
जयति गोपालजो माणिकीनायक-
श्चाऽक्षराधीश्वरश्च प्रमेशः ।
सर्वलोकान्तरश्चान्तरात्मा प्रभु-
र्जयति कृष्णो हरिः पार्वतीशः ॥२०॥
जयति गोपीपतिर्जयति नैष्ठिक-
पतिर्जयति सर्वेशराजाधिराजः ।
जयति वै कृष्णनारायणो माधवः
स्वामिनां स्वामिनाथो विजयतु ॥२१॥
भक्तरक्षाकरो निजजनेष्टदायकः
श्रीहरिर्मां समुद्धरतु कृष्णः ।
भाण्डजातिं तथा नर्तकीयोषितो
गायिका उद्धरत्वीश्वरेशः ॥२२॥
भक्तजनभावनां पूरयत्वच्युतो यः
प्रभुर्दीनमित्रं विशेषात् ।
स्तौति कालीन्दरः कालमायापरं
भुक्तये मुक्तये शान्तये तम् ॥२३॥

एवं गीतिं नर्तकीभिः सहितस्य जनस्य मे ।
कालीन्दरस्य श्रुत्वाऽहं प्रसन्नश्चाऽभवं मुहुः ॥२४॥
लक्ष्मीराधादिसहितस्तेभ्यो दातुं स्वदर्शनम् ।
कृपामकरवं लक्ष्मि भक्ताधीनो नरायणः ॥२५॥
तेजःपुञ्जो मया तत्र प्रदर्शितोऽतिभासुरः ।
सभायां तु समाजे वै मण्डपे मम मूर्तिजः ॥२६॥
तत्र शनैर्मम रूपं शंखचक्रगदाब्जवत् ।
हारकेयूरमुकुटकटककौस्तुभादियुक् ॥२७॥
दिव्यश्रृंगारवेषाढ्यं प्रसन्नवदनं शुभम् ।
राधालक्ष्मीयुतं दिव्यैः पार्षदैश्च समन्वितम् ॥२८॥
अदर्शयं क्षणं तत्र मुग्धाः सर्वाः स्त्रियो नराः ।
अभवँस्तेजसां पुञ्जैः स्तंभनेत्राश्च वै क्षणम् ॥२९॥
तेजो विलीय सहसा नरनाट्यधरोऽभवम् ।
तैर्दृष्टो रूपवानस्मि तावत्तिरोऽभवं क्षणात् ॥३०॥
भक्तभक्त्या मनागेवं मया रूपं प्रदर्शितम् ।
सर्वः समाजो रूपं तद् द्रष्टुमियेष वै मुहुः ॥३१॥
कालीन्दरं महाभक्तं शिश्रियुस्ते ततः सदा ।
वैष्णवाः सर्व एवैते बभूवुर्मयि श्रद्धया ॥३२॥
सर्वे नित्यं भजन्ते मां प्रातः कुर्वन्ति कीर्तनम् ।
कथां मदीयां कुर्वन्ति पूजनं मम वस्तुभिः ॥३३॥
नैवेद्यं भुञ्जते सर्वे मम प्रसादरूपि तत् ।
सायं संकीर्तनं सर्वे कुर्वन्ति मिलितास्तथा ॥३४॥
भाण्डशालाऽभवल्लक्ष्मि भक्तशाला हि सा सदा ।
एकभक्तस्य योगेन कृपया मम दिव्यया ॥३५॥
नित्यं सुकीर्तनं तत्र जायते मम हर्षकृत् ।
साधवः साध्विकास्तत्र नित्यमायान्ति यान्ति च ॥३६॥
कालीन्दरस्तथा चान्ये भक्ता मम प्रपूजनम् ।
नित्यं कुर्वन्ति प्रातश्च मध्ये सायं सुशोभनम् ॥३७॥
नित्यभक्त्या पावनास्ते ह्यभवन् पंक्तिपावनाः ।
ह्येकदा भाण्डीरपुरं साधुस्तु कमलायनः ॥३८॥
मम भक्तो ययौ तीर्थयात्रां कुर्वन् निशामुखे ।
कालीन्दरो महान् भक्तः साधूनां सेवको द्रुतम् ॥३९॥
साधवे प्रददौ लक्ष्मि जलान्नं स्वागतं व्यधात् ।
मधुपर्कं ददौ वासं सेवां चकार भावतः ॥४०॥
सायंकालोत्तरं तत्र समाजो दर्शकोऽभवत् ।
तत्र कालीन्दरोऽपृच्छत् सते निःश्रेयसं निजम् ॥४१॥
आत्यन्तिकं सुकल्याणं वद साधो कथं भवेत् ।
कमलायनसाधुस्तं सभायां वक्तुमारभत् ॥४२॥
अनादिश्रीकृष्णनारायणः सर्वातिवल्लभः ।
हिताय देहिनां चात्र कृपया मानवे कुले ॥४३॥
नराकारः स्वयं भूत्वा विहरत्येव भूतले ।
तदाश्रिताः साधवश्च दयालवश्चरन्त्यपि ॥४४॥
लोकानां हितकर्तारश्चोपदिशन्ति तद्गुणान् ।
तद्गुणान् प्रसमाकर्ण्य भक्तिं कुर्वन्ति मानवाः ॥४५॥
भक्त्या श्रेयो भवत्येव जायते चाक्षरे गतिः ।
ये जनाः समगृह्णन्ति गुणान् साधोः परात्मनः ॥४६॥
सेवां कुर्वन्ति साधूनां तथा श्रीपरमात्मनः ।
भजन्ते तं प्रभुं साधून् ते तरन्ति भवार्णवम् ॥४७॥
ये तु दोषान् प्रगृह्णन्ति ते पतन्ति भवाम्बुधौ ।
वर्धन्ते वासनास्तस्य दोषग्रहणपापतः ॥४८॥
ये तु दिव्यदृशा साधोर्हरेर्गुणान् गतिप्रदान् ।
प्रशंसन्ति च गृह्णन्ति ते यान्ति परमां गतिम् ॥४९॥
तेषां हृदये नैर्मल्यं जायते साधुसेविनाम् ।
शतविप्रसमः साधुः शतसाधुसमो हरिः ॥५०॥
यथा यथा दिवारात्रौ साधुसंगं करोत्ययम् ।
तथा तथा दिव्यभावो हरौ साधौ च वर्धते ॥५१॥
तथा तथा च नैर्मल्यं सत्संगश्च प्रवर्धते ।
प्रवर्धते महापुण्यं परनिःश्रेयसांप्रदम् ॥५२॥
इन्द्रियाणां तु पापानि नश्यन्ति साधुसंगतः ।
अतः सर्वार्पणैः सेव्याः साधवः साधुभूषणाः ॥५३॥
साधोः सेवा हरेः सेवा तया याति परं पदम् ।
यत्र साधोर्निवासोऽस्ति तद्गृहं मोक्षदं सदा ॥५४॥
यत्र कृष्णनिवासोऽस्ति मन्दिरं तत् प्रमोक्षदम् ।
स देशो मोक्षदो यत्र साधुर्हरिर्विराजते ॥५५॥
सा खट्वा पावनी यत्र साधुः स्वपिति शान्तिमान् ।
यस्मिन् दिने हरेः साधोर्दर्शनं सेवनं भवेत् ॥५६॥
दिवसः स शुभः प्रोक्तो मोक्षदोऽघविनाशकः ।
सभा समाजः शुभकृद् यत्र साधोः समागमः ॥५७॥
भक्तानां संगमश्चापि पापघ्नो मोक्षदस्तथा ।
वैष्णवानां सतां संगः सतीनां सेवनं तथा ॥५८॥
मोक्षदं संभवत्येव सत्संगः शेवधिर्नृणाम् ।
दानं पुण्यं भोजनादि दातव्यं साधवे सदा ॥५९॥
श्रीकृष्णाय प्रदातव्यं सर्वस्वं मोक्षकृद्धि तत् ।
एवंविधाभिः सेवाभिर्मोक्षं सम्पादयेत् सुधीः ॥६०॥
असद्देशमसत्कालमसत्संगं विवर्जयेत् ।
सत्संगं सत्क्रियां कुर्यात्तेन मोक्षो भवेदिह ॥६१॥

असत्संगो भवेद्भक्तेर्नाशकस्तं परित्यजेत् ।
मोक्षस्य रोधकं चापि दुष्टसंगं विवर्जियेत् ॥६२॥
पूर्वसंस्कारयोगेन नैर्मल्यं हृदि जायते ।
पूर्वपुण्योदयेनापि नैर्मल्यं जायते हृदि ॥६३॥
कृपया श्रीहरेश्चापि नैर्मल्यं जायते हृदि ।
साधूनां कृपया चापि नैर्मल्यं जायते हृदि ॥६४॥
सेवाख्येन पौरुषेण साधूनां श्रीहरेस्तथा ।
नैर्मल्यं जायते श्रेष्ठं सर्वस्वार्पणकर्मणा ॥६५॥

निर्मलान्तःकरणो यः सज्जते सत्समागमे ।
साधुसेवां हरेः सेवां कृत्वा कृपां प्रसादनम् ॥६६॥
प्रसन्नतां हरेर्लब्ध्वा लब्ध्वा साधोः प्रसन्नताम् ।
वरदानं ततो लब्ध्वा हरेः सतां महात्मनाम् ॥६७॥

सद्बुद्ध्या श्रीहरिं प्राप्य नरनाट्यधरं प्रभुम् ।
साधून् मोक्षप्रदान् प्राप्य कृत्वा संगं हरेः सताम् ॥६८॥
तेभ्यः प्राप्य परं ज्ञानं तद्भक्त्याऽऽप्नोति दिव्यताम् ।
कृपया दिव्ययानेन भक्तो याति परं पदम् ॥६९॥

संकल्पानां वासनानां मायानां च निवर्तनम् ।
मोक्षाभिगमनं चेति हरेः सतां प्रसंगतः ॥७०॥
मनो लीनं हरौ कृष्णे जायते स्नेहयोगिनाम् ।
तथैकान्तिकभक्तानां स्यान्निष्कैतवसेवया ॥७१॥
सेवाभक्तिपरः श्रेष्ठो न निवृत्तिपरायणः ।
सेवकोऽसंख्यमोक्षार्थी निवृत्तस्त्वात्ममोक्षकृत् ॥७२॥
दास्येन भजमानस्य भक्तिः कृष्णेऽधिका यतः ।
भक्त्याधिक्यबलः श्रेष्ठः समर्थोऽसंख्यमोक्षणे ॥७३॥
निवृत्तो दुर्बलो हीनः कृष्णस्तद्भक्तसेवया ।
सेवकः सबलः कृष्णाज्ञायां दृढस्थितिर्मतः ॥७४॥
तत्र कश्चिद् भवेद् दोषो वाक्पारुष्यादिकोऽपि च ।
न ग्राह्यो दिव्य एवाऽसौ तद्दोषो गुण एव सः ॥७५॥
दोषदृष्टिस्तु पुरुषो दानवो वाऽसुरो हि सः ।
कृष्णे दोषग्राहकः स नूनाऽयमनुकुर्वति ॥७६॥
कल्याणदो हरिश्चात्र करोति भक्तवाञ्छितम् ।
नारीणां कामनापूरो नराणामिष्टदोऽपि च ॥७७॥

तत दैत्याः कल्पयन्ति स्वदृष्टान्तेन कर्मजान् ।
तच्चरित्रेषु दिव्येषु श्रुतिमात्राऽघहारिषु ॥७८॥
दोषान् कामक्रोधलोभान् तेन ते यान्त्यधोगतिम् ।
नैतावता हरेः साधोर्जगत्कल्याणकारिणः ॥७९॥
दोषगन्धोऽपि भवति दिव्यस्य परमात्मनः ।
दोषदर्शी त्वासुरः स्यात्तस्माद्दोषं न कल्पयेत् ॥८०॥

महत्स्वपि तु भक्तेषु स्वल्पेष्वपि च सर्वथा ।
हरौ यथा तथा दोषं स्वल्पं चापि न कल्पयेत् ॥८१॥
कृष्णो दिव्यः कृष्णलीला दिव्याः कल्याणदास्तु ताः ।
सन्तो दिव्याः सतां लीला दिव्यास्तद्वद्धि मोक्षदाः ॥८२॥
दिव्या श्रीबालकृष्णस्य चाज्ञा तत्र च वर्तते ।
यः स दिव्यो भवेदत्र महानेव मतो हि सः ॥८३॥
कृष्णनारायणश्चाऽक्षरेशः श्रीपुरुषोत्तमः ।
साक्षात्प्राप्तो नरनाट्यधरोऽत्राऽऽज्ञाप्रवर्तकः ॥८४॥

इतिनिश्चित्य भक्तास्तु वर्तन्ते तद्वचोऽन्विताः ।
तेषां प्रसेवया मुक्तिर्भवत्येवाऽऽज्ञया यथा ॥८५॥
भक्ता आज्ञांकिताः सन्ति मोक्षार्थां मोक्षगामिनः ।
संसारिणस्त्वभक्तास्ते भवन्ति विषयैषिणः ॥८६॥

भक्तानां विषयाः सन्ति नारायणपराश्रयाः ।
अभक्तानां तु विषयाः कामास्वादनतत्पराः ॥८७॥
ग्राम्यं गीतं रूपमिष्टं स्पर्शो गन्धश्च देहजः ।
अभक्ष्यभक्षणं चेति विषया विषयैषिणाम् ॥८८॥

कृष्णगीतं कृष्णरूपं कृष्णस्पर्शोऽतिसौरभः ।
कृष्णस्य गन्ध एवापि जलान्नफलभूषणम् ॥८९॥
कृष्णप्रसादि तुलसीदलं चाम्बरमित्यपि ।
वाद्यगायनशोभादि श्रृंगारहास्यगीतिकाः ॥९०॥
रमणं लासनं भावा भक्तानां भगवत्कृताः ।
ग्राम्यास्तिष्ठन्ति बाह्येषु भक्तास्तिष्ठन्ति केशवे ॥९१॥
ग्राम्या हातुं न वै शक्ता यथा ग्राम्यान् प्रभोगकान् ।
भक्ता हातुं न वै शक्तास्तथा कृष्णप्रभोगकान् ॥९२॥
समाधिस्था अपि भक्ताः कुर्वन्ति श्रीहरेः कथाम् ।
आकृष्यन्ते गुणे गाने कृष्णस्यैव न चेतरे ॥९३॥
सत्वस्थितौ हरेर्ध्यानं जायते शान्तिकृत् सुखम् ।
राजसे तामसे भावे कृष्णध्यानं तु दुर्वहम् ॥९४॥
ध्येयस्फुर्तिर्भवेन्नैव राजसे तामसे हृदि ।
बहिः कृष्णस्तदा दृश्यो दर्शनीयो नृनाट्यधृक् ॥९५॥
साधवो दर्शनीयाश्च तदानीं बहिरेव हि ।
सेवनीया बहिर्भावै राजसैः सुखसम्पदा ॥९६॥

यद्वा चात्मस्वरूपस्य कार्यं सुचिन्तनं तदा ।
ज्ञानेन लीयते भावस्तामसो राजसोऽपि च ॥९७॥
मनोऽपि कौशवन्नैसर्गिकं चलं निरुध्यते ।
अनिरोधे तु सततं कीर्तनीयो हरिर्बहिः ॥९८॥
सतालीवादनं कुर्यात् कृष्णकीर्तनमुत्तमम् ।
संकल्पास्तेन नश्यन्ति राजसास्तामसास्तथा ॥९९॥

सतां सेवा प्रकर्तव्या ग्राह्या वार्ता सतां मुखात् ।
साधयेच्छान्तिममृतप्रदां संकीर्तनेन वै ॥१००॥
आश्रयोऽतिदृढः कृष्णे प्रसादस्य प्रवर्तकः ।
आश्रयेण गुणवेगाः शाम्यन्ति भक्तयोगिनः ॥१०१॥
विश्वासेन प्रकर्तव्यश्चाश्रयः परमात्मनः ।
स्वार्थेन वा प्रकर्तव्यः स्नेहेन वा परात्मनः ॥१०२॥
ज्ञानेन वा प्रकर्तव्यश्चाश्रयः परमात्मनः ।
त्रयः पूर्वा निर्बला वै सबलो ज्ञानजाऽऽश्रयः ॥१०३॥
सतां वाक्येषु विश्वस्ता आश्रयन्ति हरिं जनाः ।
राज्यैश्वर्याऽऽरोग्यधनाद्याप्त्यै तु स्वार्थिका जनाः ॥१०४॥
रूपसौहार्दसम्बन्धस्नेहेन स्नेहिनो जनाः ।
स्निग्धा भूत्वाऽऽश्रयन्त्येव सहन्ते विरहं न ते ॥१०५॥
सत्संगबलतो ज्ञात्वा माहात्म्यं परमात्मनः ।
आश्रयन्ति हरिं ज्ञानिवर्यास्ते शाश्वताश्रयाः ॥१०६॥
ज्ञानिनस्तु प्रजानन्ति हरिं सर्वेश्वरेश्वरम् ।
सर्वगुणाऽगुणाधारं दिव्यमायाधिपं तथा ॥१०७॥
दोषाऽदोषाश्रयं न्यायाऽन्यायाश्रयं प्रभुं विभुम् ।
अणुं महान्तं दीर्घं च कामाऽकामाश्रयं तथा ॥१०८॥
ऐश्वर्याऽनैश्वर्ययुक्तं भयाऽभयसमन्वितम् ।
सदसत्सर्वकोशं च यावदाश्चर्यसंभृतम् ॥१०९॥
कर्माऽकर्माश्रयं चापि सर्वाश्रयं यथायथम् ।
असंभवो हरौ नास्ति यस्य कस्यापि सर्वथा ॥११०॥
असुष्ठोश्चापि सुष्ठोश्च महाश्रयो हरिर्हि सः ।
सर्वं घटते कृष्णे वै सर्वशरीरशायिनि ॥१११॥
अन्विते तत्र सर्वत्र घटते देहवत् क्रिया ।
व्यतिरेकेऽपि सर्वं वै घटते माययोज्झितम् ॥११२॥
समाये मायया तुल्यममाये निजतुल्यकम् ।
घटते च ततो नास्याश्रये विघ्नं प्रजायते ॥११३॥
एवं समाश्रितः कृष्णो ज्ञानेन चेत् परेश्वरः ।
सर्वकलानिधिः स्यात् स सर्वाधिश्रेयसां प्रदः ॥११४॥
आश्रयेण समस्तानि कृतानि साधनानि वै ।
भवन्त्येव न संदेहस्तं प्रसाध्य प्रमोक्षयेत् ॥११५॥
कालीन्दर ! सदा ज्ञात्वा कुर्वाश्रयं मुहुर्मुहुः ।
यास्यस्येव परंधाम भज नारायणं हरिम् ॥११६॥
इत्युक्त्वा प्रययौ साधुरन्यां दिशं यथोचिताम् ।
कालीन्दराद्या भेजुश्च लक्ष्मि ! मां तद्वचःस्थिताः ॥११७॥
अथाऽहं नीतवाँस्ताँश्चाऽक्षरं मे परमं पदम् ।
देहान्ते मे दृढमाश्रयं गतान् भक्तिभागिनः ॥११८॥
पठनाच्छ्रवणादस्य स्मरणाद् वर्तनात्तथा ।
भुक्तिर्मुक्तिर्भवत्येव कृपया मे रमे सदा ॥११९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने भाण्डीरग्रामस्थस्य कालीन्दरभाण्डस्य नर्तक्यादिसहितस्य परमभक्त्या मोक्षणं कमलायनमहर्षेरुपदेशश्चेत्यादिनिरूपणनामा द्विशततमोऽध्यायः ॥ २०० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्तस्य नर्तकस्य वै ।
नाम्ना रायणदेवस्य कथां भक्तिविधायिनीम् ॥ १ ॥
आखोटके महाग्रामे भक्तो रायणदेवकः ।
न्यवसत् सकुटुम्बो वै भजते स्म च मां सदा ॥ २ ॥
पूर्वजन्मकृतं पुण्यं सर्वत्रैवोपतिष्ठते ।
प्राग्जन्मनि मयूरोऽभूद् ग्रामगोपुरसन्निधौ ॥ ३ ॥
उपशाल्यतरौ नित्यनिवासश्चरतेऽभितः ।
साधवो ये समायान्ति तैर्थिका यात्रिकाश्च वै ॥ ४ ॥
विहारिणः पृथिव्यां ये ते वाटे ग्राममाप्य च ।
तरुषण्डेऽवतिष्ठन्त्यासते दिनद्वयं च वा ॥ ५ ॥
भजनं तत्र कुर्वन्ति पाचयन्ति च भुञ्जते ।
निवेदितं हरये ते जलं पिबन्ति सर्वथा ॥ ६ ॥
उच्छिष्टानि च पात्राणि पत्राणि च जलान्नकम् ।
क्षिपन्ति तरुषण्डेषु स्थितपक्ष्यर्थमित्यपि ॥ ७ ॥
उच्छिष्टान्नानि पानीयं पशवः पक्षिणस्तथा ।
कीटाद्या भक्षयन्त्यापः पिबन्ति च वियन्ति च ॥ ८ ॥
हरेः प्रसादाऽन्नवारि मयूरोऽत्ति पिबत्यपि ।
साधोः प्रासादिकं चापि सम्यक् पिबति चात्ति च ॥ ९ ॥
एवं प्रसादमात्तस्य तस्य सुपुण्यमूर्जितम् ।
पापं तु प्रलयं प्राप्तं मृतः कालेन सोऽभवत् ॥१०॥
हारीतकाख्यशूद्रस्य पत्न्यां कस्तूरिकास्त्रियाम् ।
गर्भे विवेश पुण्येन पक्षी मानवजन्मवान् ॥११॥
गर्भे वासोत्तरं तत्राऽष्टमे मासि सुभक्तिमान् ।
बोधायनो महर्षिश्च साधुधर्मा समाययौ ॥१२॥
विप्रो भिक्षाकृतेऽगाच्च हारीतकगृहं तदा ।
हारीतकः प्रार्थयच्च ज्ञात्वा दैवज्ञभूसुरम् ॥१३॥
गृह्ण भिक्षां पायसान्नं घृतं च शर्करास्तथा ।
स्थिरो भवाऽत्र दिवसे संशयान्मे निराकुरु ॥१४॥

इत्युक्त्वा प्रददौ भिक्षां मिष्टमन्नं घृतं पयः ।
पिष्टं फलानि मधूनि चासनं जलमुत्तमम् ॥१५॥
बोधायनः पाचयित्वा निवेद्य परमात्मने ।
बुभुजेऽथ प्रसादं च शेषं सर्वं ददौ तदा ॥१६॥
हारीतककुटुम्बाय बुभुजेऽपि कुटुम्बकम् ।
सायं स्वास्थ्ये स्थिरवृत्तौ पप्रच्छ तं महामुनिम् ॥१७॥
पत्न्या गर्भे बालको वा बाला वा किं भवेदिति ।
कथंगुणं मदपत्यं भविष्यतीति मे वद ॥१८॥
चिरायुर्वापि वै स्वल्पायुश्च भक्तो भवेन्न वा ।
कथं नारायणे देवे भक्तिः श्रद्धा भवेदपि ॥१९॥
कथं मोक्षो दिव्यता च कथं नारायणाश्रयः ।
कथं साधोः प्रसंगश्च सेवा धर्मावलम्बनम् ॥२०॥
कथं मुक्तिः कथं त्यागः कथं संसारनाशनम् ।
कथं चैश्वरता स्याच्च मुक्तता गृहमेधिनः ॥२१॥
इत्येतानि समस्तान्यमृतानि मे प्रपायय ।
इत्युक्तः साधुवर्यस्तु बोधायनो हि भक्तराट् ॥२२॥
प्रत्युवाच कुटुम्बस्य सन्निधौ यत्र गर्भिणी ।
वर्तते सा शृणोत्येव कथां परमपावनीम् ॥२३॥
शृणु हारीतक ! त्वं वै पत्नी ते च शृणोत्वपि ।
कुटुम्बं ते शृणोत्वत्र हितं वच्मि हितोत्तमम् ॥२४॥
बालकस्ते हि भविता पुत्रश्चोद्धारकृच्छुभः ।
साधुभक्तो हरेर्भक्तः पूर्वसंस्कारवानिह ॥२५॥
मयूरवत् समस्तानि नृत्यानि प्रकरिष्यति ।
साधुप्रसादभोक्ता च चिरायुर्भक्तिमान् सदा ॥२६॥
मुक्तिं तव कुटुम्बस्य भक्त्या स वै करिष्यति ।
लक्ष्मीप्रदस्ते सततं भाग्यशाली भविष्यति ॥२७॥
नारायणप्रदश्चापि वैष्णवः स भविष्यति ।
परात्परतरे कृष्णे महानन्दनिधौ प्रभौ ॥२८॥
लग्नवृत्तिर्हि भविता चाऽऽबाल्यात्तव बालकः ।
प्राग्जन्माऽस्य मयूरस्य ततो नृत्यकलाविदाम् ॥२९॥
मूर्धन्योऽयं तव पुत्रो भविष्यति प्रभक्तराट् ।
तस्य नृत्ये च ये नृत्यविदो जनास्तथाऽपरे ॥३०॥
नर्तक्यश्चापि सर्वाश्च मिलिष्यन्ति कलाविदः ।
सर्वे त्वत्पुत्रसंगेन भविष्यन्त्यपि वैष्णवाः ॥३१॥
मोक्षमार्गं श्रयिष्यन्ति यास्यन्ति परमं पदम् ।
अपि जीवा मायिका वै मायासृष्टे जगत्यपि ॥३२॥
वर्तन्ते बहवो नित्यं नृत्यगीतिविलासिनः ।
पूर्वं नारायणेनेदं सृष्टं जगद् यदा तदा ॥३३॥
जगत्प्रवाहसिद्ध्यर्थं स्नेहपाशोऽपि निर्मितः ।
स्नेहबद्धमिदं सर्वं कलया भ्रमते जगत् ॥३४॥
नराणां योषितां प्रीतिः साहजिकी तया भवेत् ।
स्नेहस्य कलया पुत्रे पत्यौ वित्ते गृहे स्त्रियाम् ॥३५॥
वात्स्यां क्षेत्रे पशौ लाभे कुटुम्बे जायते हि सा ।
प्रस्वां पितरि मायैव निहिता विश्ववर्द्धिनी ॥३६॥
तादृश्या मायया बद्धा जीवाः कलाविदोऽपि ये ।
तव पुत्रं मिलिष्यन्ति ते भविष्यन्ति वैष्णवाः ॥३७॥
तव पुत्रस्य योगेन भक्तिं मोक्षप्रदायिनीम् ।
करिष्यन्ति हरेर्योगं प्रलप्स्यन्ति च नर्तने ॥३८॥
मायापरो यो भगवान् जनानां श्रेयसे भुवि ।
आविर्भूय सदा चास्ते तं ते बालो भजिष्यति ॥३९॥
पूर्वपुण्ययुता लोका भजिष्यन्ति हरिं तदा ।
तरुषण्डे च ये पक्षिपशवश्च तरुमृगाः ॥४०॥
मृता ये तेऽमितश्चात्र साधुप्रसादभोजिनः ।
मानुष्यं प्राप्य वर्तन्ते पावनाः पुण्ययोगिनः ॥४१॥
सर्वे ते वै नर्तकाश्च गायका वादका अपि ।
ग्रामेऽत्र परग्रामे वा जातास्ते वैष्णवोत्तमाः ॥४२॥
प्राक्श्रीकृष्णतदीयेक्षाप्रसादादिप्रभोगिनः ।
संस्कारिणः प्रजातास्ते ग्रामेऽत्र बालकाः शुभाः ॥४३॥
तेषां सतां प्रसंगेन हरेर्वार्ताश्रवेण च ।
कृष्णभक्तिर्वर्तते च वर्तिष्यते दृढाऽधिका ॥४४॥
ते च सर्वे मिलित्वैव करिष्यन्ति सतां हरेः ।
सेवां भक्तिं भृत्यतां च परिचर्यां प्रमोक्षदाम् ॥४५॥
श्रद्धावन्तो भविष्यन्ति सर्वे ते कृपया सताम् ।
अतिप्रीतिं गमिष्यन्ति साधौ च परमेश्वरे ॥४६॥
समर्थाश्च भविष्यन्ति स्वीयस्निग्धान् परानपि ।
भवपाशान्मोचयितुं प्रीतिं कारयितुं हरौ ॥४७॥
तेन सङ्क्ष्यन्ति वै तुच्छसुखे सुसाधुयोगिनः ।
दृढाः सर्वे सतां संगे हरेः संगेऽतिनिष्ठिताः ॥४८॥
मायानाशकराः सर्वे भविष्यन्ति विरागिणः ।
भक्त्यन्तरायकृत्सर्वं त्यक्ष्यन्ति ब्रह्मनिष्ठिताः ॥४९॥
चिरेण मां प्रसाद्यैव फलमाप्स्यन्ति शाश्वतम् ।
अक्षरं ब्रह्म परमं दिव्यं दिव्यस्वरूपिणः ॥५०॥
सतां प्रसंगतो भक्तिर्वर्धते परमात्मनि ।
सतां प्रसंगतो ज्ञानं जायते परमात्मनः ॥५१॥
हरेर्माहात्म्यविज्ञानैः श्रद्धा नित्यं प्रवर्धते ।
विवेकेन हरौ नित्यं दिव्यता भासते न वा ॥५२॥

सत्सु प्रकाशते चापि दिव्यता भगवन्निभा ।
विवेकेन भवेत् कृष्णनारायणे दृढाश्रयः ॥५३॥
तस्याश्रयेणाश्रयिणामाश्रयो जायते सताम् ।
सदाचाररतस्यैव सत्सेवां कुर्वतो भवेत् ॥५४॥
महाभागवतधर्मालम्बनं सेवनादि च ।
सेवया सततं प्रवर्तते कृपा सतां हरेः ॥५५॥
कृपया मुक्तता त्यागः संसारविलयस्तथा ।
नारायणेन तादात्म्यं जायते ध्यानतो हरेः ॥५६॥

ऐकाग्र्यं च निरोधश्च समाधिर्जायते हरौ ।
सर्वानन्दमहानन्दभोगोऽस्य जायतेऽनिशम् ॥५७॥
तस्मात् सन्तो भोजनीयाः सेवनीया जलान्नकैः ।
कार्या च दासवत् सेवा दासीवद् भृत्यवत्तथा ॥५८॥
पत्नीवत् पुत्रवच्चापि सेवा कार्या सतां सदा ।
पितृवन्मातृवच्चापि माननीयाश्च राजवत् ॥५९॥
स्वामिवत् पतिवद् भ्रातृवच्च रक्षकवत्तथा ।
सेवनीयाः सदा सन्तो हरिप्रसंगयोगिनः ॥६०॥

प्रसादनीयाः सन्तोऽत्र वन्दनीया मुहुर्मुहुः ।
क्षमापनीयाः सततं तोषणीयास्तु देववत् ॥६१॥
पूजनीया हि सन्तोऽत्र रक्षणीयास्तु पुत्रवत् ।
सतां प्रसन्नतां प्राप्य भुक्तिर्मुक्तिर्भवेदिह ॥६२॥
सतामाज्ञां समालम्ब्य वर्तनीयं हि सत्पथे ।
सर्वतोऽपि समाकृष्येन्द्रियाऽन्तःकरणानि च ॥६३॥

निधातव्यानि कृष्णे वै व्रजेयुः कुपथं न यत् ।
कुपथं चेद् व्रजेयुश्च समाकृष्य द्रुतं तदा ॥६४॥
हठात् कृष्णे प्रयोज्यानि सुखदे परमेश्वरे ।
यादृङ्मानं न्यूनभावं माहात्म्यं श्रीहरेर्भवेत् ॥६५॥
तादृग्बलं तु विषये यात्यन्तःकरणं बहिः ।
न्यूनतापरिहारार्थं कार्यः संगः सतां सदा ॥६६॥
कृष्णे एव रुचिः साध्या हेयः संगस्तु चापरः ।
कुपथे व्रजतो भीतिः कृष्णपथे तु निर्भयम् ॥६७॥

कृष्णप्राप्तौ देहिनां तु प्राप्तव्यं नाऽवशिष्यते ।
कृष्णानन्दपरः कश्चिदानन्दो नावशिष्यते ॥६८॥
तं हरिं चेद् विहायाऽत्र तुच्छसौख्यस्य लब्धये ।
यतन्ते चेत्तदा बोध्या ते जनास्तु बुभुक्षवः ॥६९॥
संसारिणस्त एवोक्ता निरयार्थं प्रजन्मिनः ।
लुम्पन्ति भगवद्वाणीं सतामाज्ञां वहन्ति न ॥७०॥
ते प्राप्नुवन्ति सततं क्लेशं तुच्छार्थधाविनः ।
यद्यपि स्युर्बुद्धिमन्तो बहुश्रुताः प्रतर्किणः ॥७१॥

अथ यः स्वल्पधीश्चापि सेवते श्रीहरिं सतः ।
श्रेयोऽध्वानं श्रयतेऽत्र वर्तते सत्पुमर्थके ॥७२॥
सद्गुणान् गृह्णते नित्यं साधूनां भक्तियोगिनाम् ।
भागवतं महाध्वानं दिव्यं समधितिष्ठति ॥७३॥
स एव बुद्धिमान् प्रोक्तः स्वर्थमोक्षपरायणः ।
स एव साधुरेवोक्तो मोक्षार्थकृतनिश्चयः ॥७४॥
बहुबुद्धिस्तु निरयं गमिष्यति प्रभोगवान् ।
तुच्छार्थधावनपरः साधुमार्गविनिन्दकः ॥७५॥

हरेः सतां गुणानां स दूषको नास्तिकः खलः ।
धिया दूषितया प्राप्नोत्येव पापं यमालयम् ॥७६॥
क्षीरं शर्करया युक्तं विषाक्तं चेद् विनाशकृत् ।
तथा धीर्दूषिता श्रेयोविघातिनी महत्यपि ॥७७॥
तया युक्तः पतत्येव द्रोग्धा जन्मान्तरे भवेत् ।
सद्गतिर्न भवेत्तस्य तत्संगिनोऽपि नैव च ॥७८॥
न चायं भाषणयोग्यः पातयत्येव भाषणात् ।
अवगुणान् दर्शयित्वा मालिन्यं निदधात्यतः ॥७९॥

अल्पमतिर्भावयुक्तः सेवकः संगमोचितः ।
गृह्णन्नाशीर्वचांस्येव श्रेयोमार्गे स्थितो हि सः ॥८०॥
मानं कपटं क्रोधं च तथेर्ष्यां प्रजहाति यः ।
साधूनां दासभावेन सेवको वर्तते तु यः ॥८१॥
दिव्यभावं विदन् सत्सु सतां क्रियासु सर्वथा ।
स एवं साधुरत्रोक्तः सर्वथा सेवनोचितः ॥८२॥

स एकोऽनुग्रहपात्रं सतां हरेश्च सर्वथा ।
आश्रितानां समुद्धारकर्ता ह्यपि प्रतापवान् ॥८३॥
स एव मोक्षदः स्याद्वै यथा सन्तो हरिर्यथा ।
अन्यस्त्वासुरबुद्धिर्वै भूतः प्रेतो भवेदिह ॥८४॥
राक्षसो द्रोहकर्ता वा भवेद् दैत्यो हि पापकृत् ।
नैव मुक्तिर्भवेत्तस्य द्रोहिणो वै हरेः सताम् ॥८५॥
वैरभावेन कृष्णे स युज्यते च चिरेण वा ।
अनुग्रहेण कृष्णस्य क्वचिज्जहाति दैत्यताम् ॥८६॥

ततः कालान्तरे कृष्णकृपया वैति सद्गतिम् ।
तस्मात्तुच्छे पदार्थे तु प्रीतिः कार्या न सर्वथा ॥८७॥
हरौ सत्सु सदा कार्या प्रीतिः सेवाऽनुवृत्तिता ।
यस्य सर्वं जगत् स्वर्णं लोष्ठं समं दिवं च भूः ॥८८॥
सर्वं ब्रह्ममयं यस्य तं प्रसेवेत दासवत् ।
दासीवत् सम्प्रसेवेत साध्वी नारायणी भवेत् ॥८९॥
इत्येवमुपदिश्याऽथ लक्ष्मि बोधायनो मुनिः ।
ययौ देशान्तरं प्राप्य पूजां कालेन वै ततः ॥९०॥

कस्तूरिका सुतं दिव्यं सुषुवे भक्तयोगिनम् ।
बोधायनोक्तं विज्ञानं गर्भे यः श्रुतवान् परम् ॥९१॥
सर्वज्ञानेन सहितो जज्ञे पुत्रः प्रतापवान् ।
भक्तिं चक्रे हि बाल्यात् स नर्तनं गायनं तथा ॥९२॥
कथां चक्रे विवेकाढ्यां पूजां करोति नित्यदा ।
भजनं कीर्तनं चक्रे सर्वां कृष्णमयीं क्रियाम् ॥९३॥
अथ बोधायनो द्रष्टुं समायातः पुनस्त्विमम् ।
भक्तं विलोक्य शिष्यं तं नाम्ना रायणदेवकम् ॥९४॥
मुमुदे दीक्षयामास शतशिष्यैर्युतं च तम् ।
शतशिष्याभिरेवाऽपि सहितं रायणं मुनिः ॥९५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
दीक्षां भागवतीं मन्त्रं दत्वा मुनिर्ययौ वनम् ॥९६॥
सर्वे रायणदेवाद्या नर्तकाः साधवस्तथा ।
गायकाश्चापि साध्व्यश्च भेजुर्मां नृत्यकीर्तनैः ॥९७॥
सहस्रशो जनाश्चैषां शिष्याश्च पुरुषाः स्त्रियः ।
सञ्जाता वैष्णवा लक्ष्मि मम भक्तिपरायणाः ॥९८॥
समाजे त्वेकदा तेभ्यो दर्शनं परमं ददौ ।
अहं साकं श्रिया लक्ष्म्या नारायणश्चतुर्भुजः ॥९९॥
तैश्च सम्पूजितश्चाहं पाययामास पज्जलम् ।
तेभ्यो मुक्तिं दिव्यगतिं ददौ ब्रह्ममयीं पराम् ॥१००॥
तच्छिष्याश्च प्रशिष्याश्च वर्तन्ते भूतलेऽपरे ।
ते भजन्तेऽनादिकृष्णनारायणं प्रभुं च माम् ॥१०१॥
एवं मया साधुयोगान्नर्तकश्चोद्धृतो रमे ।
उद्धृताश्चापि नर्तक्यो मोक्षमार्गे प्रणोदिताः ॥१०२॥
एवं मम बलं भक्तेः साधोः सेवाबलं तथा ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदिह ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने रायणदेवस्य नर्तकस्य बोधायनोपदेशेन गर्भस्थस्य विज्ञानं भक्तिश्च हरिदर्शनं मोक्षश्चेत्यादिनिरूपण-नामा एकाधिकद्विशततमोऽध्यायः ॥२०१॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं गायकस्य महात्मनः ।
व्रतर्दिनः कथां रम्यां मम प्रसन्नतान्विताम् ॥ १ ॥
व्रतर्दी त्वभवद्भक्तो नाकिरालाख्यपत्तने ।
वैश्यो वीणामृदंगादियावद्वाद्यविशारदः ॥ २ ॥
यस्याग्रे बहवः शिष्याः शिष्यिकाश्च वसन्त्यपि ।
अभ्यासार्थं गानकलादीनां गायनशीलिनः ॥ ३ ॥
देशदेशान्तरेभ्यश्च समायान्ति व्रतर्दिनम् ।
गानविद्याधिपं श्रुत्वा शिक्षां प्राप्य प्रयान्ति च ॥ ४ ॥
अथ राजाऽभवन्निम्बटिकानगरीशासकः ।
पुण्ड्रवर्मा धर्मवांश्च भगवद्भक्तितत्परः ॥ ५ ॥
सौराष्ट्रे गायकश्रेष्ठं श्रुत्वा व्रतर्दिनं नृपः ।
आह्वयामास गीत्यर्थं राजधानीं निजां प्रति ॥ ६ ॥
दूतो गत्वाऽऽवेदयत्तं गायकं राजभाषितम् ।
एहि राजोत्सवे राजेत्याह्व त्वां गायकोत्तम ॥ ७ ॥
व्रतर्दी प्रत्युवाचेत्थं न राजोत्सवगायनम् ।
करिष्ये भगवद्भक्तो भवाम्यात्मनिवेदनः ॥ ८ ॥
विना हरिं न मे जिव्हा गास्यत्यन्यं कदाचन ।
विना हरिं न मे नेत्रं द्रक्ष्यत्यन्यं कदाचन ॥ ९ ॥
विना हरिं न मे चित्तं ध्यायत्यन्यं कदाचन ।
भगवतश्च भक्तानां भक्तोऽहं दास्यसंहितः ॥१०॥
सोऽहं कथं राजगुणान् गायामि मायिकानिह ।
वद त्वं भूभृते दूत नान्यं गास्यति गायकः ॥११॥
व्रतर्दी गायकः कृष्णगायको नान्यगायकः ।
मोक्षगायक एवाऽऽस्ते भक्तानामपि गायकः ॥१२॥
अभक्तानां गायको न व्रतर्दी भवति क्वचित् ।
इति प्रत्युक्तदूतश्च ययौ राज्ञे न्यवेदयत् ॥१३॥
राजा तुतोष सहसा धन्योऽहं भूपतिः सदा ।
मम राज्ये महाभागवतोऽस्ति कृष्णगायकः ॥१४॥
मया भागवतेनापि भवितव्यं प्रमुक्तये ।
वैष्णवेन भवितव्यं श्रोतव्यं कीर्तनं ततः ॥१५॥
व्रतर्दिना प्रगीतं च कृष्णकीर्तनमुत्तमम् ।
श्रोतव्यं सर्वथा पश्चाद् भूत्वा सत्पात्रभूभृता ॥१६॥
विचार्येत्थं प्राह दूतं भाव्यं भक्तिमता मया ।
तस्मादागच्छ गेहं मे मां प्रपावय भूभृतम् ॥१७॥
कृत्वा च वैष्णवं भक्तं ततः श्रावय कीर्तनम् ।
इत्येवं ब्रूहि भक्तेशं व्रतर्दिनं प्रयाहि च ॥१८॥
श्रुत्वा दूतो ययौ शीघ्रं राजोक्तं तु व्रतर्दिने ।
कथयामास सर्वं स श्रुत्वा तुतोष गायकः ॥१९॥
सज्जो भूत्वा ययौ भूपमन्दिरं गणमण्डितः ।
राजा तं मानयामास भक्तं व्रतर्दिनं मुहुः ॥२०॥
ययाचे तु ततो वैष्णवत्वं च दीक्षणं नृपः ।
व्रतर्दी तूर्णमाश्रुत्य धृत्वा दत्वा जलं करे ॥२१॥
नृपाय प्रददौ मन्त्रं श्रावयामास सत्वरम् ।
'ओमनादिकृष्णनारायणः स्वामी पतिश्च मे' ॥२२॥

'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा'।
राजा गृहीत्वा मन्त्रं च कण्ठीं दधार तौलसीम् ॥२३॥
मूर्तिं मे बालकृष्णस्य जगृहे गायकाऽर्पिताम्।
राज्ञी कन्याश्च पुत्राश्च राज्ञः कुटुम्बकं तथा ॥२४॥
सर्वे भृत्यास्तथा दास्योऽभवँस्तत्र हि वैष्णवाः।
हरये चार्पितं वारि फलं चान्नं च चन्दनम् ॥२५॥
व्रतर्दी प्रददौ राजकुटुम्बाय प्रसादकम्।
भुक्त्वा पीत्वा प्रसादं च सभां चक्रे ततो नृपः ॥२६॥
मध्यसिंहासने कृष्णमस्थापयत् सुशोभितम्।
राजा कृष्णस्य सेवायां धृत्वा छत्रमनुत्तमम् ॥२७॥
अतिष्ठत्तत्कुटुम्बं च चामरे व्यजने तथा।
वेत्रं च नक्तकं धूपपात्रं ध्वजं पताकिकाम् ॥२८॥
दर्पणं पानपात्रं च ताम्बूलपात्रकं तथा।
सुगन्धसारपात्रं च तैलसारं च चन्दनम् ॥२९॥
पूजापात्रं पुष्पहारान् धृत्वाऽतिष्ठद् यथायथम्।
पूजयित्वा बालकृष्णं व्रतर्दी गायनं व्यधात् ॥३०॥
"एहि कृष्ण एहि कृष्ण कान्त एहि एहि।
देहि कृष्ण देहि कृष्ण दर्शनं सुदेहिन् ॥३१॥
नवीनभक्तमण्डलं विधेहि दिव्यसत्कुलम्।
जहीहि जन्मवासनां प्रदेहि धामवासनम् ॥
एहि कृष्ण० ॥३२॥
त्वमेव मुक्तसत्पतिस्त्वमेव धामसद्गतिः।
त्वमेव चावतारधृक् त्वमेव सर्वसाक्षदृक् ॥
एहि कृष्ण० ॥३३॥
पुरा भवान् पुमुत्तमस्ततो भवान्नरोत्तमः।
ततो भवान् जनार्दनस्ततोऽस्ति सर्वमर्दनः ॥
एहि कृष्ण० ॥३४॥
प्रसन्नमानसो भवान् सुसम्पदां प्रदो भवान्।
निजाऽर्थ्यसौख्यदो भवान् निजात्मशान्तिदो भवान् ॥
एहि कृष्ण० ॥३५॥
राधारमापतिर्भवान् प्रभासतीपतिर्भवान्।
सतां श्रियाः पतिर्भवाँश्च माणिकीपतिर्भवान् ॥
एहि कृष्ण० ॥३६॥
ब्रह्मप्रियापतिर्भवान् हरिप्रियापतिर्भवान्।
अजाप्रजापतिर्भवान् व्रतर्दिनः पतिर्भवान् ॥
एहि कृष्ण० ॥३७॥
निधिश्च तेजसां भवान् निधिश्चमत्कृतां भवान्।
निधिः परामुदां भवान् निधिः पराविदां भवान् ॥
एहि कृष्ण० ॥३८॥
सुतो वृषस्य वै भवान् सुतश्च गोपजो भवान्।
सुतश्च काश्यपो भवाँश्च कम्भरासुतो भवान् ॥
एहि कृष्ण० ॥३९॥
सदैव चित्सु वर्तसेऽप्यचित्सु वर्तसे हरे।
प्रवर्तसे प्रवर्तसे स्वभक्तमण्डले हरे ॥
एहि कृष्ण एहि कृष्ण कान्त एहि एहि।
देहि कृष्ण देहि कृष्ण दर्शनं सुदेहिन्" ॥४०॥
इत्येवं मां प्रार्थयत् स लक्ष्मि गीतिप्रमंगलम्।
अकरोन्मां स्मरँस्तत्र व्रतर्दी प्रेमपूरितः ॥४१॥
गायिका गायकाश्चाप्यपूरयन् गीतिकास्वरान्।
श्रुत्वाऽहं प्रेमरशनाऽऽकृष्टो मूर्तेर्द्रुतं बहिः ॥४२॥
आविर्जातोऽतिसुभगो मनोहरः सुयौवनः।
रूपरूपानुरूपश्चाऽवयवैः पुष्ट उज्ज्वलः ॥४३॥
श्रिया च राधया युक्तो हारमुकुटशोभितः।
सर्वाऽऽभूषाभिरामश्च सर्वशृंगारशोभनः ॥४४॥
प्रसन्नहास्यवदनो दिव्यतेजोऽभिदीपितः।
सर्वसुगन्धवात्सल्यलावण्याऽऽनन्दसंभृतः ॥४५॥
सर्वकामप्रपूरश्च सभानन्दविवर्धनः।
निरोधयन् सभास्थानां चेतांसि मयि संस्थितः ॥४६॥
अक्षरे परमे व्योम्नि यत्सुखं परमात्मनः।
तत्समस्तं सभास्थेभ्यो ददौ क्षणं कृपावशः ॥४७॥
दिव्यतायास्तिरोभावं क्षणोत्तरं व्यधां रमे।
राधारमायुतं मां ते व्यलोकयन् नृपादयः ॥४८॥
मुमुहुर्मम रूपे ते हृत्सु न्यधुश्च मां हि ते।
पुपूजुः सर्वभावैश्च वरार्थं नोदिताश्च ते ॥४९॥
वव्रुर्मुक्तिं परां सेवामददां च तथाऽस्त्विति।
तिरोभावं द्रुतं चापि सभाऽऽश्चर्यपराऽभवत् ॥५०॥
व्रतर्दिनः प्रतापेन ह्यवापुः कृष्णदर्शनम्।
भेजुस्ते मां दिव्यभावैरनन्यभावनैः सदा ॥५१॥
पातिव्रत्येन मां भेजुर्नृपाद्या वैष्णवास्ततः।
परिहारोऽभवद् भक्तो मुमुदे दर्शनान्मम ॥५२॥
पारितोषिकमासाद्य ययौ समण्डलो निजम्।
आलयं स वितर्दी वै नृपो नृपालयं ययौ ॥५३॥
अथ काले ततः प्राप्ते नृपादीन् भक्तमण्डलम्।
निन्ये धामाऽक्षरं मे च व्रतर्दिमण्डलं तथा ॥५४॥
तथा ये ये वैष्णवाश्चाऽभवन् वै लक्षशो जनाः।
चमत्कारं स्मरन्तो मे भजन्तो मां निरन्तरम् ॥५५॥
निन्ये तान्मेऽऽक्षरं लोकं शाश्वतं धाम चोत्तमम्।
शृणु लक्ष्मि जना लोके भवन्ति त्यागवृत्तयः ॥५६॥

तीव्रत्यागविरागस्य स्नेहो मय्यतिशोभते ।
रागिणस्तु स्मृतिर्नित्यं विषयाणां प्रजायते ॥५७॥
तुच्छार्थस्नेहबद्धास्ते कृष्णस्नेहं न कुर्वते ।
कृष्णे स्नेहविहीनास्ते मोक्षं फलं न यन्ति वै ॥५८॥
तस्मात् स्नेहः सदा कार्यो मयि श्रीपरमात्मनि ।
ज्ञातव्यश्चान्त्यजः स्नेहो मम माहात्म्यवेदिना ॥५९॥
आत्मज्ञानेन च त्याज्यः स्नेहो मायिकवस्तुषु ।
आत्माऽयं सच्चिदानन्दो जडाद्भिन्नः शरीरतः ॥६०॥
नाऽस्य देहो न सौधश्च न कुटुम्बं न वाटिकाः ।
न जातिर्न कुलं योगो धनं नाऽस्य च सम्पदः ॥६१॥
मायाहीनो भवाम्येवेत्यात्मानं चिन्तयेत् सदा ।
एतादृशं निजं मत्वा दैहिकं नहि संस्मरेत् ॥६२॥
कुटुम्बिनो न स्मर्तव्याः पूर्वजाश्चाग्रजा अपि ।
भगवद्भक्तिहीना ये ये तु बन्धनकारिणः ॥६३॥
यत्स्मृत्या बन्धनं वै स्यात् स्मर्तव्या न तथा क्वचित् ।
श्राद्धकाले प्रस्मर्तव्यास्तृप्त्यर्थं मुक्तयेऽपि च ॥६४॥
यज्ञे दाने तीर्थकार्ये धर्मकार्ये व्रतादिषु ।
स्मर्तव्यास्तृप्तये तेषां मुक्तये मन्दिरे हरेः ॥६५॥
अन्यथा रागवशतः स्मर्तव्या न कदाचन ।
स्मर्तव्याः साधवो दिव्याः स्मर्तव्याः प्रतिमा मम ॥६६॥
ब्रह्मप्रियास्तथा साध्व्यः स्मर्तव्या मोक्षसिद्धये ।
ज्ञानिभिर्ज्ञानविज्ञानैर्विस्मर्तव्यास्तु बान्धवाः ॥६७॥
बन्धनस्य प्रदा नार्यो नराश्चापि कुटुम्बिनः ।
विषया मोक्षविघ्नाश्च विस्मर्तव्याः समस्ततः ॥६८॥
ब्रह्मदृष्ट्या येन सर्वे पुत्राद्या विस्मृताः खलु ।
तस्य प्रीतिर्हरौ स्याच्च मोक्षप्रदेषु सत्सु च ॥६९॥
सर्वे सन्तो भवन्त्येव दिव्या ब्रह्मनिवासिनः ।
यथा हरिस्तथा सन्तः स्मर्तव्या मोक्षदा हि ते ॥७०॥
आश्रयणीयाः सततं साधवश्च हरिस्तथा ।
भजनीयः स्वयं साक्षाद्धरिश्चाऽहं जनार्दनः ॥७१॥
एवंविधस्य भक्तस्य भीर्न कालस्य कर्मणाम् ।
मायाया यमराजस्य भीर्नापि बन्धनस्य च ॥७२॥
अनादिश्रीकृष्णनारायणेच्छा भक्तयोगिनः ।
प्रारब्धं खलु मन्तव्यं नेतरत् पापिजीववत् ॥७३॥
एतादृशः प्रवन्द्यो वै सर्वेषां पूज्य एव सः ।
गृहस्थो वा यतिर्वा स विशेषो नाऽत्र विद्यते ॥७४॥
एवंविधस्य भक्तस्य समलोष्ठादिकस्य च ।
पत्तलाब्जरजो मूर्ध्ना धारयन्ति सुरादयः ॥७५॥

सर्वदा च सुरैरस्य दर्शनं क्रियते प्रगे ।
मम प्रतापमालम्ब्य कुर्वन् भक्तिं स्थितो गृहे ॥७६॥
त्यागे वा प्रस्थितश्चाऽयं पारं यात्यञ्जसाऽम्बुधेः ।
एतादृशो मम भक्तो देहान्ते चिन्मयाकृतिः ॥७७॥
ब्रह्ममुक्तो दिव्यदेहः सेवायां धाम्नि मे भवेत् ।
तस्य वै दर्शनं मायापापकालादिनाशकृत् ॥७८॥
कर्मनाशकरं लक्ष्मि तुल्यं ममेक्षया मतम् ।
सर्वक्रिया मदर्थं वै यस्य तस्याऽहमच्युतः ॥७९॥
सर्वथा तु वशीभूतः प्रवर्ते तस्य गोचरः ।
यो भक्तो यद्दिनाल्लक्ष्मि सत्संगं प्रकरोति वै ॥८०॥
तत आरभ्य कुरुते विवेकं गुणदोषयोः ।
ईदृग्गुणान् लब्धवाँश्च त्यक्तवान् दुर्गुणानिमान् ॥८१॥
प्रतिवर्षं व्यतिरेकं विचिन्तयति लाभकृत् ।
सत्संगस्य प्रतापेन सतां हरेश्च सेवया ॥८२॥
गुणाः प्राप्ता इमे सर्वे दोषा गताश्च ते मम ।
शेषाणां खलु दोषाणां नाशने यत्नवान् भवेत् ॥८३॥
शेषाणां सद्गुणानां संग्रहणे यत्नवान् भवेत् ।
एवं प्रयत्नशीलस्य गुणाः स्युर्मम तुष्टिदाः ॥८४॥
दोषाणां प्रक्षयः स्याच्च दिव्यताऽत्र भवेत्तथा ।
कृष्णसुखं चोत्तमं च जायतेऽस्य हि शाश्वतम् ॥८५॥
मनो निर्वासनं स्याच्च निःसंकल्पं स्थिरं भवेत् ।
अनेकेषु चरित्रेषु कृष्णनारायणस्य मे ॥८६॥
मनश्चावर्तयेन्नित्यं रममाणं मयि क्रियात् ।
महाशान्तिमयं स्याद् यत् त्यागिनां गृहिणामपि ॥८७॥
देहयात्रामात्ररूपो व्यवहारस्तु बाह्यतः ।
कर्तव्यो नरवल्लक्ष्मि मनो धार्यं हरौ मयि ॥८८॥
चरित्राणि सतां नारायणस्य कृष्णयोषिताम् ।
भक्तानां श्रीहरेश्चापि चिन्तनीयानि सर्वदा ॥८९॥
मनो निर्वासनं तेन भवेन्मोक्षे यथा सुखम् ।
तेषां समागमः कार्यो मोक्षकृद् यत्फलं भवेत् ॥९०॥
व्रतर्दिनः प्रसंगेन गायकस्य नृपोत्तमः ।
पुण्ड्रवर्मा ययौ मुक्तिं तथाऽन्ये च सहस्रशः ॥९१॥
अतः सेव्या मम भक्ताः सत्याश्चोन्मूलिताशयाः ।
दिव्यक्रिया मम ध्यानपराश्चाश्रिततारकाः ॥९२॥
अन्तरायविहीनाश्च सर्वविघ्नविवर्जिताः ।
धर्मं भागवतं दिव्यं मम सेवां समाश्रिताः ॥९३॥
सतामाश्रयकरणात् प्रसन्नतासमर्जनात् ।
आज्ञानुवृत्तिकरणाद्धामाऽक्षरं करे भवेत् ॥९४॥

एवं लक्ष्मि भूतले वा स्वर्गे सत्ये विकुण्ठके ।
गोलोके चाऽक्षरे श्वेतद्वीपे श्रीपुरकेऽमृते ॥९५॥
अव्याकृते बदर्यां वा ये वर्तन्ते मदाश्रिताः ।
कृता मुक्तानिकाः सर्वे सर्वस्वाऽर्पणकृष्णकाः ॥९६॥
शाश्वतानन्दभोक्तारस्तथा व्रतर्दिगायकाः ।
सर्वे मुक्तिं मम प्राप्ताः शाश्वतानन्दसेविनः ॥९७॥
ये ये कलाविदो लोकेऽर्पयन्ति तत्कला मयि ।
ते ते यान्त्यक्षरं धाम कृपया मे न संशयः ॥९८॥
येषामग्रे च यो धर्मो गुणः कला क्रिया तथा ।
साधनं श्रीहरिं प्रसादयितुं वै स्वकं भवेत् ॥९९॥
तेन प्रसादनीयः श्रीकृष्णनारायणो हरिः ।
प्रसादनीयाः सन्तश्च नरैश्च योषितांगणैः ॥१००॥
तदा दिव्यो भवेद् भावो देहो मनस्तथाऽऽन्तरम् ।
गुणाः क्रिया वर्तनं च सेवा दिव्याः समस्ततः ॥१०१॥
हरेर्भूत्वा हरिं प्राप्य मोदते स समर्पकः ।
पठनाच्छ्रवणाल्लक्ष्मि तथैव मोदते मयि ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने व्रतर्दिनामकगायकभक्तस्य योगेन पुण्ड्रवर्मनृपस्य सप्रजस्य वैष्णवत्वं मोक्षणं चेत्यादिनिरूपणनामा द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं वायकस्य कथां शुभाम् ।
घुरिलाख्ये पुरे नाम्ना तूलवायीति वायकः ॥ १ ॥
न्यवसत् सकुटुम्बोऽयं राजप्रजादृतः सदा ।
सूक्ष्मतन्त्वादिवयने कुशलः सूत्रनिर्मितौ ॥ २ ॥
सूक्ष्मातिसूक्ष्मसूत्राणि निर्माति कलया नखैः ।
सूत्रयन्त्रेण च लूतातन्तुसमा हि तन्तवः ॥ ३ ॥
जायन्ते कलया तस्य सूक्ष्मातिसूक्ष्मपेशलाः ।
अम्बरे तस्य तन्तूनां निर्मितं धार्यतेऽम्बरम् ॥ ४ ॥
दृश्यते नैव किरणेष्वेवं तनु प्रजायते ।
स्वर्णोर्मिकायां शाटीं च प्रसारयितुं शक्यते ॥ ५ ॥
धोत्रं तथोत्तरीयं चोष्णीशं तादृक् प्रजायते ।
राज्ञीवेषार्हवस्त्राणि तत्तन्तुभ्यो भवन्ति वै ॥ ६ ॥
वायकोऽयं तुरीं वेमानं च संयोजिकां तथा ।
शलाकां चेति सूक्ष्माणि वयने संयुनक्ति हि ॥ ७ ॥
सूक्ष्मतमाः सूक्ष्मतराः सूक्ष्माश्च सूक्ष्मसदृशाः ।
स्थूलसूक्ष्मा मध्यस्थूलाः स्थूलाः स्थूलतरास्तथा ॥ ८ ॥
स्थूलतमा जाड्यगाश्चास्तन्तवः संभवन्ति वै ।
फालिका विविधा रम्याः कुकट्यः संभवन्ति च ॥ ९ ॥
पेटिकाश्चापि तन्तूनां शालायां तूलवायिनः ।
उत्पद्यन्ते करजैश्च यन्त्रतर्कटिकादिभिः ॥१०॥
रन्टकैर्भ्रमचक्रैश्च जायन्ते तन्तवः शुभाः ।
नार्यो नरा हि बहवो बह्वयश्च कर्मचारिकाः ॥११॥
उत्पादयन्ति सूत्राणि कार्पासान्यपराणि च ।
समनाडिकसूत्राणि यथार्थवलयानि च ॥१२॥
अन्यूनानतिरिक्तानि ग्रन्थित्रटीवियुञ्जि च ।
स्थूलसूक्ष्मादिदोषैश्च वर्जितानि शुभानि च ॥१३॥
एतेषामेव तन्तूनां प्रायो वस्त्राणि वै प्रजाः ।
राजानः श्रेष्ठिनश्चापि धारयन्तीति विश्रुतम् ॥१४॥
तूलवायिमहामुद्रा मुद्यते मानवर्धिनी ।
सूत्रेषु तज्जवस्त्रेषु श्रैष्ठ्यं प्रद्योतते सदा ॥१५॥
एवंविधस्तूलवायी विशालकार्यकारकः ।
तथापि सर्वकार्येषु मम भक्तिं चकार सः ॥१६॥
यन्त्रेषु श्रीकृष्णनाम साधनेष्वायसेष्वपि ।
श्रीकृष्णनाम सर्वत्र फालिकाकुकटीष्वपि ॥१७॥
वासे भित्तौ च शालायां मुद्रितं कृष्णनाम ह ।
कर्मचाराः समस्ताश्च कर्मचारिण्य इत्यपि ॥१८॥
अनादिश्रीकृष्णनारायणनाम गृणन्ति हि ।
तूलवायी स्वयं नित्यं भजते मां नरायणम् ॥१९॥
स्नात्वा प्रपूज्य मां पश्चादुद्यमे चानुरोहति ।
प्रसादं मम नैवेद्यं चान्नं जलं फलादिकम् ॥२०॥
भुंक्ते कुटुम्बसहितश्चात्मनिवेदिवत् सदा ।
वस्त्रपात्रासनाद्यानि निवेद्य मे युनक्ति च ॥२१॥
एवंविधो भक्तराण्मे भजते मां समाहितः ।
अथाऽयं वायको यन्त्रेऽनवधानतया द्रुतम् ॥२२॥
चक्रवेगे गतहस्तः पतितश्चूर्णितः करे ।
स्कन्धात् करः पृथग्जातो मूर्छितो मम भक्तराट् ॥२३॥
सस्मार मां द्रुतं सोऽपि हृदि रक्षामयाचत ।
कर्मचाराः समस्ताश्च ज्ञात्वा मे नामकीर्तनम् ॥२४॥
चक्रुः पार्श्वे समागत्य तत्राऽहं चौषधप्रदः ।
कुशलो वैद्यराड् भूत्वा चिकित्सकः समागतः ॥२५॥
सन्धिनीं रक्तरोधां च पोषिणीं स्थितिस्थापिकाम् ।
ओषधिं सह नीत्वैव तूर्णं चोपस्थितोऽभवम् ॥२६॥
करेण तु जलं दत्वाऽऽनने मूर्छां न्यवारयम् ।
सन्धिन्या स्कन्धमूलं च कबन्धे सन्न्ययोजयम् ॥२७॥

रक्तशोधनिकया च रक्तस्थैर्यं व्यधापयम् ।
पोषिण्या बाहुकरयोश्चांगुलीनां यथायथम् ॥२८॥
पुष्टिं विधाय च स्थितिस्थापिन्या सुकरं करम् ।
अकरवं तथा धैर्यं दत्वाऽऽसने स्थितोऽभवम् ॥२९॥
अथ ते दिव्यरूपं मां विलोक्य मुग्धमानसाः ।
विश्वासं परमं प्राप्ता मां श्रीकृष्णं हि मेनिरे ॥३०॥
तुष्टुवुस्ते ववन्दुश्च पुपूजुश्च ययाचिरे ।
क्षमामुद्धरणं चापि मायापाशविमोचनम् ॥३१॥
सतां समागमं कृष्णे भक्तिं ज्ञानं ययाचिरे ।
तथाऽस्त्वित्यवदं तेभ्यो ज्ञानं च मामकं परम् ॥३२॥
अददां लक्ष्मि सर्वेभ्यो दिव्यं च मम दर्शनम् ।
तथाऽस्त्वित्यददां तेभ्यो मुक्तिं भुक्तिं च सम्पदः ॥३३॥
तिरोभावं ततः स्थानादथ कालान्तरे पुनः ।
देहान्ते क्रमशस्तांश्च नीतवानक्षरं मम ॥३४॥
तूलवायी यदा वृद्धोऽभवन्नद्धश्च मुक्तये ।
पुनश्चाऽहं दर्शनं स्वं दत्तवान् तूलवायिने ॥३५॥
तूलवायी समपृच्छन्मां हितं जगतां कृते ।
कीदृशोऽस्ति भवान् धाम्नि कीदृश्यो मुक्तकोटयः ॥३६॥
कीदृशं ते गृहं धाम कीदृशा ईश्वरा अपि ।
कीदृश्यश्चावतारिण्य ईश्वर्यः सत्य इत्यपि ॥३७॥
कीदृशाः साधवस्ते च कीदृश्यो मुक्तयस्तव ।
कीदृश्यः सिद्धयस्तेऽपि कीदृशोऽहं तवाश्रितः ॥३८॥
कथंकारो निवत्स्ये ते धाम्नि मे वद माधव ।
अहं लक्ष्मि तूलवायिजिज्ञासां समशान्तयम् ॥३९॥
शृणु भक्तो भवाम्यत्र दिव्यस्ते नेत्रगोचरः ।
सोऽहं धाम्नि भवाम्येव सर्वथा दिव्यमूर्तिमान् ॥४०॥
अपारगुणसौन्दर्यलावण्यौज्ज्वल्यसागरः ।
साकारः सर्वमुक्तानां निभालनीयो माधवः ॥४१॥
द्विभुजः सर्वदा चास्मि रूपान्तराणि चेच्छया ।
धारयामि सहस्रादिभुजानि बहुरूपवान् ॥४२॥
सर्वरसः सर्वगन्धः सर्वरूपो भवाम्यहम् ।
सर्वस्पर्शः सर्वशब्दः सर्वानन्दो भवाम्यहम् ॥४३॥
किशोरोऽस्मि ब्रह्मप्रियाऽसंख्यमुक्तानिकापतिः ।
हरिप्रियाऽसंख्यमुक्तपतिः पुष्टशरीरवान् ॥४४॥
सेवायोग्यः सर्वकामप्रपूरोऽस्मि ममाऽक्षरे ।
अक्षरे धाम्नि तत्रैव वसन्ति मुक्तकोटयः ॥४५॥
सर्वे मत्परमा दिव्या मत्समानसुमूर्तयः ।
दिव्यसर्वगुणाढ्यास्ते साकाराः सुखवार्धयः ॥४६॥
एतादृशा मम मुक्ताः किशोराश्चातिसुन्दराः ।
तेजस्विनोऽतिरम्याश्च मनोहरा वसन्ति हि ॥४७॥
ममाऽक्षरं परं व्योम परंधाम परं गृहम् ।
सहस्रकोटिस्तम्भालीसंशोभत्स्वर्णनिर्मितम् ॥४८॥
सहस्रकोटिकलशं सर्वर्द्धिसिद्धिसंभृतम् ।
सहस्रकोटिकक्षाढ्यं वर्तते बहुविस्तरम् ॥४९॥
सर्वकामाः सर्वकल्पाः सुमूर्तास्तत्र सन्ति वै ।
सर्वभोगमयीशय्याः सर्वसिंहासनानि वै ॥५०॥
गजासनं महार्घ्यं च विद्यते मम मन्दिरे ।
एतादृशं परं धाम यत्र वसामि शक्तिभिः ॥५१॥
सहितश्चापि मुक्तैश्च सहितो दिव्यविग्रहः ।
मत्तः प्राविर्भवन्त्येवाऽवताराः कृष्णकोटयः ॥५२॥
नारायणा असंख्याता रामा नराश्च कोटयः ।
मुनयोऽसंख्यधामानो भवन्त्यवतरन्ति च ॥५३॥
वासुदेवादयश्चापि हिरण्यगर्भकोटयः ।
वैराजा ईश्वरा भूमानश्च ब्रह्माण इत्यपि ॥५४॥
रुद्राश्च विष्णुवर्याश्च भवन्तीश्वरकोटयः ।
मत्तः प्राप्य महैश्वर्याण्येवाऽवतारकोटयः ॥५५॥
भवन्ति चेश्वराः शुद्धसत्त्वप्रकर्षभोगिनः ।
तेषां च शक्तयः सर्वा मया वै प्रकटीकृताः ॥५६॥
ईश्वराण्यो भवन्त्येव संसारसारशक्तयः ।
आनन्दघनयस्ताश्च ततः सत्यो भवन्ति च ॥५७॥
साध्व्यस्ता ब्रह्मरूपिण्यो ब्रह्मचर्यपरायणाः ।
शीलव्रतार्थिदेहिन्यः सांख्ययोगिन्य इत्यपि ॥५८॥
अवतारिण्य एवाऽपि लक्ष्म्यस्ताः कमलाः श्रियः ।
रमास्ता राधिकास्ताश्च सम्पदस्ता भवन्ति च ॥५९॥
एवंविधानि मे धाम्नि चैश्वरे मण्डलानि वै ।
भवन्ति तादृशाल्लोकादिहाऽऽयान्ति तु पार्षदाः ॥६०॥
त्यागमात्रपरा भक्तास्ते दिव्या मूर्तयो मम ।
साधवस्ते भवन्त्येव सर्वकल्याणकारकाः ॥६१॥
मुक्तयः साधुसेवायां वर्तन्ते दिव्यविग्रहाः ।
सालोक्याः सार्ष्टयश्चापि सारूप्याश्च सयोगिकाः ॥६२॥
एतादृशा भवन्त्येव मुक्तयो दिव्यसौख्यदाः ।
सिद्धयः सर्वदर्शिन्यः सर्वश्रावणिकास्तथा ॥६३॥
सर्वप्राप्तिस्वरूपाश्च सत्यकामावसायिताः ।
सर्वकामदुघाश्चापि पूर्णानन्दभृताः सदा ॥६४॥
सुमूर्ताः सर्वपूर्णाश्च भवन्ति सेविका मम ।
मुक्तो भूत्वा भवाँस्तत्र तूलवायिन्! निवत्स्यति ॥६५॥

मम मूर्तिसमाकारो दिव्यैश्वर्ययुतोऽन्वहम् ।
पूर्णानन्दभृतो दिव्यः किशोरः संनिवत्स्यति ॥६६॥
तत्र वसतो भवतो निर्विकल्पा स्थितिः परा ।
भविष्यति यथा नान्यद् दृष्टिगतं च ते भवेत् ॥६७॥
ब्रह्मीभूतस्य ते तत्र मदन्यन्नैव गोचरम् ।
सर्वं खल्विदं ब्रह्म परं नान्यद् विलोकनम् ॥६८॥
मम तादात्म्यमाप्तस्य मुक्तास्तेऽपि न गोचराः ।
अक्षरं गोचरं तेन त्वं न तथापि गोचरः ॥६९॥
एतादृशीं परां ब्राह्मीं स्थितिं तत्र गमिष्यसि ।
साकारे मम रूपे त्वं सदा मग्नो भविष्यसि ॥७०॥
तव दृष्ट्यां न वै मुक्ता नाऽक्षरं कुत ईश्वराः ।
कुतो माया कुतो जीवाः सर्वं ब्रह्मात्मकं तव ॥७१॥
एवंस्थितिस्तव तूलवायिँस्तत्र भविष्यति ।
कृपया मे तव मुक्तिस्तादृशी संभविष्यति ॥७२॥
निर्विकल्पा विदेहा मत्तादात्म्या स स्थितिर्मता ।
अत्रत्या ये मम मुक्ताः सन्ति जीवनमुक्तयः ॥७३॥
ते तु मायां प्रपश्यन्ति जीवाँस्तत्त्वानि सर्वथा ।
ईश्वरान् सर्वधामानि सविकल्पसमाधयः ॥७४॥
वीक्षमाणा अपि मायाकालकर्मसु नैव ते ।
बध्यन्ते नापि हन्यन्ते सजन्ते नैव तेषु च ॥७५॥
निर्लेपास्ते प्रवर्तन्ते देहेन्द्रियादिभिस्त्विह ।
त एते मम भक्ता वै भवन्त्यात्मनिवेदिनः ॥७६॥
धर्मज्ञानविरागाढ्यां भक्तिं कुर्वन्ति मे सदा ।
सविकल्पा भक्तिमन्तो मुक्ता मे साधवस्त्विह ॥७७॥
तथा च गृहिणश्चापि यतयो न्यासवेदिनः ।
सन्न्यासिन्यो विरागिण्यो भवन्ति साध्विका अपि ॥७८॥
सविकल्पस्थितयस्ते ताश्च नवविधां मम ।
भक्तिं कुर्वन्ति सततं प्रेम्णा सर्वार्पणात्मना ॥७९॥
श्रवणं मे कथायाश्च मल्लीलानां प्रकीर्तनम् ।
स्मरणं मम मूर्तेश्च मम पादादिमर्दनम् ॥८०॥
साधूनां पादयोश्चापि देहस्यापि प्रमर्दनम् ।
अर्चनं चन्दनाद्यैर्मे वन्दनं वचनैर्मम ॥८१॥
दास्यं दत्वा समस्तं मे समीपे चासनं मम ।
सर्वाज्ञापालनं दास्यं चानुवृत्या हि वर्तनम् ॥८२॥
सख्यं सौहार्दभावश्च क्रियैक्यं च निरन्तरम् ।
आत्मनिवेदनं चाप्यात्मीयसर्वनिवेदनम् ॥८३॥
सर्वथा सहवासश्च पत्नीवद् भृत्यता तथा ।
एवंविधा मम भक्तिः सविकल्पस्य योगिनः ॥८४॥
सर्वथा मन्मयत्वेन भवत्येव सुखप्रदा ।
एवंविधया भक्त्या च स्नेहेन सेवया मम ॥८५॥
ज्ञानेनोत्कर्षभावेन सान्निध्यकरणं तु यत् ।
उपासना मता सा च सर्वदिव्यप्रकाशिनी ॥८६॥
सर्वविधानां ज्ञानानां प्रवाहाणां हरौ मयि ।
योजनं बहुधा चापि मुहुश्चोपासना हि सा ॥८७॥
मननं निश्चयश्चापि स्मरणं श्रीहरेर्मम ।
दिव्यः किशोरः कृष्णोऽहं कोटिमुक्तादिसेवितः ॥८८॥
अक्षरे सन्ति मे वंशा मुक्ता मुक्तानिकाः शुभाः ।
सर्वभूषान्वितश्चास्मि सर्वमनोहरो हरिः ॥८९॥
अनन्तैश्वर्यसम्पद्वाननन्तर्द्धिगुणाश्रयः ।
एवंविधस्य मे ज्ञानं वेदनं सा ह्युपासना ॥९०॥
भक्तिं स्नेहं तथा सेवामुपासनां वचःस्थितिम् ।
संसाधयति यो देही जीवन्मुक्तः स उच्यते ॥९१॥
सोऽयं भवति लोकेऽत्र सविकल्पसमाधिमान् ।
ततो ब्रह्मस्थितिं लब्ध्वा सज्जते मयि माधवे ॥९२॥
देहेन मनसा वाचा क्रिययेन्द्रियवृत्तिभिः ।
आत्मना भावनया च संस्कारैर्वेदनादिभिः ॥९३॥
ध्यानेनापि धारणयाऽर्पणेन रोधनेन च ।
तादात्म्येन द्रवीभावेनैक्येन यो विदेहवत् ॥९४॥
विदेही स भवेद् भक्तो निर्विकल्पसमाधिमान् ।
प्राप्यैवं परमां दिव्यां मुदं स मोदते मयि ॥९५॥
एवं ते कथितं सर्वं तूलवायिन् द्रुतं कुरु ।
याहि मे धाम परमं सर्वानन्दभृतं द्रुतम् ॥९६॥
इत्युक्तः स मया लक्ष्मि तूलवायी नमन् प्रभुम् ।
देहं विहाय दिव्यो वै जातो मुक्तशरीरवान् ॥९७॥
दिव्यं विमानमारुह्य ययौ धामाऽक्षरं मम ।
एवमन्येऽपि भक्ता मे तूलवायिसकर्मिणः ॥९८॥
मया कालेन सर्वे ते प्रापिता मेऽक्षरं पदम् ।
एवं भक्तो भवेल्लक्ष्मि भक्तिमान् मदुपासकः ॥९९॥
तस्मै दत्वा दर्शनं मे नयामि धाम मे परम् ।
भुक्तिं मुक्तिं ददाम्येव रक्षां करोमि सर्वथा ॥१००॥

पठनाच्छ्रवणादस्य स्मरणात् पालनात्तथा ।
भुक्तिं मुक्तिं लभेच्चापि सुखं मे परमं लभेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने तूलवायिनामकस्य सूत्रवायकस्य भक्त्या भगवाँस्तस्य तत्कर्मचाराणां च रक्षां कृत्वा दर्शनं दत्वा मोक्षं कृतवानित्यादिनिरूपणनामा त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

**श्रीपुरुषोत्तम उवाच—**

श्रृणु नारायणीश्रि त्वं काष्ठहारस्य वै कथाम् ।
नाम्ना जांगलदेवस्य मम भक्तस्य शोभनाम् ॥ १ ॥
निशारग्रामवास्तव्योऽभवद्भक्तः कुटुम्बवान् ।
शूद्रो जांगलदेवाख्यः काष्ठहारोऽतिभक्तिमान् ॥ २ ॥
नित्यमुत्थाय कल्येऽयं मुहूर्ते ब्राह्मसंज्ञके ।
कूपे स्नात्वा हरिं ध्यात्वा निवेद्य रोटकं च मे ॥ ३ ॥
आरनालेन साकं च जलं ततः प्रणम्य माम् ।
सुगन्धिकाष्ठगुन्द्रादिधूपं कृत्वा मदग्रतः ॥ ४ ॥
वन्यं फलं च पुष्पं च पत्रं च तुलसीजनिम् ।
समर्प्य मह्यं भक्तोऽयं पत्नीमापृच्छ्य बालकान् ॥ ५ ॥
रज्जुं नीत्वा कुठारं च यात्यरण्यं प्रगेऽन्वहम् ।
विविधानि च शुष्काणि काष्ठान्याच्छिद्य यत्नतः ॥ ६ ॥
भारं बद्ध्वा च मध्याह्ने वृक्षच्छायामये स्थले ।
सहनीतं रोटकं च स्मृत्वा मामत्ति मन्मनाः ॥ ७ ॥
विश्रामं प्राप्य वै पश्चात् तापमान्द्ये गृहं निजम् ।
प्रयात्येव हि काष्ठानां भारं धृत्वा स मस्तके ॥ ८ ॥
यदा वृक्षे शुष्ककाष्ठं शुष्कशाखां छिनत्ति सः ।
तदा तदा हरिं स्मृत्वा नत्वा वृक्षं छिनत्ति सः ॥ ९ ॥
पत्रं पुष्पं फलं चेत् प्राप्यते मह्यं ददाति सः ।
वृक्ष नारायणयोगं याहि चेति वदत्यपि ॥१०॥
हरेकृष्ण हरेविष्णो बालकृष्ण परेश्वर ।
अन्तर्यामिँस्तरोरस्य कल्याणं कुरु वक्ति च ॥११॥
एतादृशो हि मे भक्तो वृक्षश्रेयोविचारवान् ।
भजतेऽरण्यमध्येऽपि श्रीपतिं मां पुमुत्तमम् ॥१२॥
अन्ये च बहवः काष्ठहाराः स्वयोगमागताः ।
कृता भक्ता वैष्णवाश्च नामकीर्तनतत्पराः ॥१३॥
अरण्ये पिप्पलतरोरधस्ताद् वेदिकोपरि ।
मिलित्वा काष्ठहारैश्च मूर्तिर्मे तु शिलामयी ॥१४॥
दर्शनार्थं स्थापिता च तत्र पुण्ये क्षणे दिने ।
मिलन्ति चापि मध्याह्ने भजन्ते कीर्तयन्ति माम् ॥१५॥
पूजयन्ति हरिं मां च फलैर्जलैर्दलादिभिः ।
वन्यकन्दैस्ततः सर्वे भुञ्जते यान्ति विश्रमम् ॥१६॥
शुभे दिने प्रकुर्वन्ति महोत्सवं नवं नवम् ।
पत्रमण्डपशोभाभिस्तोरणैः पुष्पहारकैः ॥१७॥
प्रनृत्यन्ति कीर्तयन्ति मृदंगादिभिरादरात् ।
एवं कीर्तनभक्तानां नृत्यं च कीर्तनं मम ॥१८॥
प्रियं जातं ततो लक्ष्मि पूजाकाले च नर्तने ।
कीर्तने चाऽदृश्यरूपो भवाम्याकर्णयँस्तदा ॥१९॥
अथाऽहं साधुरूपो वै वनी भूत्वा ययौ तदा ।
मण्डले काष्ठहाराणां पिप्पले वेदिकास्थले ॥२०॥
सत्कृतस्तैः साधुरूपः स्वागतैः पूजितस्तथा ।
भोजितः फलकन्दाद्यैः पादोर्वाहितस्तथा ॥२१॥
देहे सम्मर्दितश्चापि वन्दितोऽहं तदा जनैः ।
स्थितस्तैश्चापि संपृष्टः कथं वै भगवान् प्रभुः ॥२२॥
निराकारो नेत्रलभ्यो भवेदत्र जनार्दनः ।
कथं मोक्षो भवेत् काष्ठहाराणां वनिनां त्विहि ॥२३॥
तदाऽहं कमले ज्ञानं प्रददौ तत्र चोत्तमम् ।
कृपया च प्रकाशं वै हृत्स्वकरवं वैष्णवम् ॥२४॥
काष्ठानां सञ्चये नारायणः स्मर्तव्य एव च ।
काष्ठानां हरणे चापि स्मर्तव्यः श्रीहरिः सदा ॥२५॥
भारस्य बन्धने चापि स्मर्तव्यः परमेश्वरः ।
विक्रयेऽपि प्रवक्तव्यं विक्रीणन्तु हरिं जनाः ॥२६॥
रामसमिधः केशवसमिधः कृष्णशाखिनः ।
विक्रीणन्तु जनाः कृष्णसमिधः कृष्णकाष्ठकम् ॥२७॥
इत्येवं रटनीयोऽयं नारायणः पदे पदे ।
अनादिश्रीकृष्णनारायणो मोक्षप्रदः प्रभुः ॥२८॥
स्मरणीयः सदा श्रीमद्बालकृष्णः श्रियाः पतिः ।
मोक्षदाता स एवाऽऽस्ते चान्तरात्मा दयानिधिः ॥२९॥
स्वर्गदः सुखदश्चापि सम्पदां च प्रदः प्रभुः ।
शाश्वतानन्ददश्चापि सृष्टिसागरतारकः ॥३०॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
प्रजपन्तु सदा मन्त्रं पावनं पारमेश्वरम् ॥३१॥
सर्वार्पणं प्रकुर्वन्तु काष्ठहारा मयीश्वरे ।
नैष्कर्म्यं पुण्यदं सर्वं भक्त्याख्यं संभविष्यति ॥३२॥
श्रीकृष्णो भगवानस्ति सर्वकारणकारणम् ।
प्रकाशकानां सर्वेषां प्रकाशखप्रदो हरिः ॥३३॥

यस्य भासा सर्वमिदं भासते च विभाति च ।
सृष्ट्यादौ चाऽक्षरे धाम्नि वर्तते परमेश्वरः ॥३४॥
राधालक्ष्मीपतिर्मुक्तपतिर्ब्रह्मप्रियापतिः ।
प्रकृतिः स्वेच्छया तेन व्यक्तिं नीता तथा पुमान् ॥३५॥
ताभ्यां सृष्टिः पुरा जाता नारायणप्रवेशिता ।
प्रधानपुरुषौ ताभ्या ताभ्यां हिरण्यपूरुषः ॥३६॥
ततो विराट् ततो ब्रह्मा ततो महर्षयः सुराः ।
मानवाश्च ततो जाताः पशवः पक्षिणो द्रुमाः ॥३७॥
एवं सर्वमिदं जातं कृतं श्रीपरमात्मना ।
भूतेन्द्रियार्थदेवाद्या वासिता परमात्मना ॥३८॥
यथापात्रं हरिस्तेषु वसते चान्तरेऽस्ति सः ।
प्रेरकः स हरिः कार्ये प्रकाशकश्च माधवः ॥३९॥
नित्यसखा हरिः कृष्णो जीवस्य पारलौकिकः ।
इह लोकेऽपि लोकानां सखा द्रष्टा हरिः स्वयम् ॥४०॥
जीवानां तु कृतं कर्म वीक्ष्य फलप्रदः प्रभुः ।
फलं ददाति जीवेभ्यो देहगेहादिसम्पदः ॥४१॥
स्वर्गं वा नरकं चापि यथाकर्म ददाति सः ।
एवं साक्षी सदा कृष्णो भवतीति निबोधत ॥४२॥
साकारो भगवानेवं सर्वान्तर्यामितां गतः ।
व्यापको वर्तते चापि वर्तते नेत्रगोचरः ॥४३॥
साधुरूपो वर्तते च साधुर्हरिः स्वयं प्रभुः ।
साधोः प्रपूजने कृष्णपूजा भवति शाश्वती ॥४४॥
साधुरूपो मिलत्येव हरिर्दयानिधिः परः ।
भक्तानां पावनः कृष्णः कृपया सत्सु वर्तते ॥४५॥
साधुसेवापरा भक्तास्तरन्ति सृष्टिवारिधिम् ।
साधवो ब्रह्मपरमा मोक्षका देहिनां सदा ॥४६॥
येषां सर्वमिदं ब्रह्मरूपं दृष्टौ प्रदीव्यति ।
निर्विकल्पकचित्तास्ते तारका पापिनामपि ॥४७॥
ये तु जीवेशमायादीन्नेक्षन्ते ब्रह्मदर्शिनः ।
सुखिनस्ते कृष्णसुखैः सुखयन्ति श्रितान् जनान् ॥४८॥
कामक्रोधादिरहिताः श्रीहरौ लग्नमानसाः ।
दिव्यदेहा अपि सन्तो विचरन्ति जना इव ॥४९॥
कारयन्ति हरेर्भक्तिं जनानुपदिशन्ति च ।
तारयन्ति जनान् सर्वान् नरान्नारीर्नपुंसकान् ॥५०॥
श्रावयन्ति कथां रम्यां पालयन्ति वृषोत्तमान् ।
मोक्षयन्ति बन्धनात्ते साधवः कृष्णरूपिणः ॥५१॥
जीवानां बहुयोनीनां स्वस्वकर्मफलानि वै ।
भुञ्जानानां प्रमोक्तारः साधवो भवसागरात् ॥५२॥
यत्र वसन्ति सन्तश्च तेषु नारायणः स्वयम् ।
मानुष्यविग्रहं धृत्वा वसत्येवाऽप्रकाशवान् ॥५३॥
सर्वप्रकाशयुक्तोऽपि नरनाट्यं समीहते ।
क्वचित् कृपावशाद्धत्ते ह्यतिमानवसत्क्रियाः ॥५४॥
मानवं भगवन्तं तं सन्तो जानन्ति नेतरे ।
इतरे तु सतां योगाज्जानन्ति माधवं ततः ॥५५॥
आश्रयन्ति प्रश्लिष्यन्ति रमन्ते परमात्मनि ।
ये ते वै संसृतेर्मुक्ता यान्त्यन्ते ब्रह्मधाम ह ॥५६॥
तस्मिन् कृष्णेऽनुरज्यन्ते दीव्यन्ति तत्र मोदिनः ।
आनन्दयन्ति तत्रैवाऽश्नुवते सुखसम्पदः ॥५७॥
जानन्नजानन्नपि यः कृष्णे श्लिष्येन्नराकृतौ ।
स भूत्वैव गुणातीतो यात्यन्ते ह्यक्षरं पदम् ॥५८॥
कृष्णस्य दिव्यरूपत्वात् तत्सम्बन्धात्तदाश्रिताः ।
दिव्या दिव्यस्वरूपाश्च भवन्ति ब्रह्मगामिनः ॥५९॥
मायेशस्य हरेर्मायारहितत्वाच्छ्रिता अपि ।
हरेर्बलेन मायां वै तरन्ति प्राकृता अपि ॥६०॥
कामभावेन या नार्यो व्रजाङ्गना हरौ सदा ।
स्निग्धास्ता अपि मुक्तिं वै गता निर्गुणविग्रहाः ॥६१॥
ब्रह्मप्रियाः समस्ताश्च बालकृष्णनरायणे ।
स्निग्धास्ता निर्गुणे कृष्णे निर्गुणत्वं प्रपेदिरे ॥६२॥
कामात् स्नेहाद् गुणात् स्वार्थाल्लज्जायाः परमात्मनि ।
जहुर्गुणमयान् देहान् सद्यस्ताः क्षीणबन्धनाः ॥६३॥
माधवो निर्गुणः कृष्णः सच्चिदानन्दविग्रहः ।
तस्य योगं ययुर्वै या निर्गुणा दिव्यतां गताः ॥६४॥
एवं हरौ सत्यरूपे स्नेहान्मोक्षो भवेद्ध्रुवः ।
साधौ स्नेहात्तथा मोक्षः सन्तः कृष्णस्य मूर्तयः ॥६५॥
सतां योगात् प्रयान्त्येव धामाऽक्षरं परं हरेः ।
हरेरेकान्तिका भक्ता वाञ्छन्ति सेवनं हरेः ॥६६॥
न स्वर्गं नाऽपवर्गं वा न लोकं परमात्मनः ।
नैश्वर्याण्यभिवाञ्छन्ति न वाञ्छन्ति सरूपताम् ॥६७॥
सामीप्यं नाभिवाञ्छन्ति नैकत्वं तु कदाचन ।
वाञ्छावन्तः सकामाः स्युर्निम्नकोटय एव ते ॥६८॥
सर्वार्पणात्मभक्तौ सा त्रुटीरेव निगद्यते ।
आत्मनिवेदितायां वै संकल्पस्यापि चार्पणम् ॥६९॥
कृतं यतः पुनर्नैव संकल्पयन्ति स्वार्थकम् ।
अत एव हि निष्कामाः सर्वथा ह्युत्तमोत्तमाः ॥७०॥
हरेः समाज्ञया सेवां वाञ्छन्ति स्वेच्छया तु न ।
सेवाफलं परं प्रोक्तं सर्वं तत्र समाप्यते ॥७१॥

प्रसन्नता फलं कृष्णसेवया समवाप्यते ।
नाऽस्मात् फलं परं त्वन्यन्निष्कामानां हृदि स्थितम् ॥७२॥
सेवया लभ्यते श्रेष्ठं किं सालोक्यादिभिस्ततः ।
एकत्वं तु सदा नैव वाञ्छन्ति दास्यहन्तृ यत् ॥७३॥
एकीभावे कथं सेवा कथं प्रसन्नता सुखम् ।
ततो निष्कामभक्ता वै प्रिया हरेर्भवन्ति हि ॥७४॥
भक्तान्निष्कामिनः कृष्णः स्वान्तिके संप्ररक्षति ।
प्रेम्णा कृतां च तत्सेवां प्रेम्णा चाङ्गीकरोति सः ॥७५॥
अनिच्छद्भ्योऽपि भक्तेभ्यः प्रसन्नो भगवान् हरिः ।
महैश्वर्याणि नैजानि ददाति त्वक्षरे प्रभुः ॥७६॥
एवं सन्तोषिणो भक्ताः कृष्णाभाः संभवन्ति ते ।
तत्कृपया सदा सर्वैः साकं रमते मापतिः ॥७७॥
आत्मवत् तत्प्रियास्ते च सन्तुष्टा ज्ञानिनः सुखाः ।
निष्कामा उत्तमास्ते वै भक्ता भवन्ति तत्प्रियाः ॥७८॥
भोजने शयने स्नाने गमने रमणे कृतौ ।
खेलने हेलने वाण्यां विनोदे हसने धृतौ ॥७९॥
निष्कामान् सहवासाँस्तान् रक्षत्येव जनार्दनः ।
असंशयाः सदा भक्ताः प्रिया भवन्ति शार्ङ्गिणः ॥८०॥
इत्येवं चोपदिष्टास्ते लक्ष्मि साधुसुवेषिणा ।
काष्ठहारा मया सर्वेऽभवँस्ते ज्ञानयोगिनः ॥८१॥
अथ मां परमं साधुं ज्ञात्वा नारायणात्मकम् ।
शिश्रियुस्ते मुमुदुश्चाऽर्थयामासुरतः परम् ॥८२॥
साधोर्गुरोर्योगतश्चेद् दर्शनं परमात्मनः ।
योग्या वयं ते शिष्याः स्मस्तदा कारय मुक्तिदम् ॥८३॥
अथाऽहं तानुवाचेदं ध्यानं कुर्वन्तु वै हृदि ।
द्रक्ष्यथोऽत्रैव श्रीनाथं परेशं माधवं हरिम् ॥८४॥
इत्युक्तास्ते नेत्रवृत्तीश्चित्ते निधाय केशवम् ।
दध्युस्तावत् साधुवेषं कृष्णं मां विलुलोकिरे ॥८५॥
साधोर्वेषाद् दिव्यरूपं चतुर्भुजं परेश्वरम् ।
श्रीकान्तं राधिकाकान्तं परेशं विलुलोकिरे ॥८६॥
काष्ठहाराः समस्तास्तेऽक्षरं धाम महोज्ज्वलम् ।
अपश्यन् श्रीहरेर्मुक्तैः कोट्यसंख्यैर्विराजितम् ॥८७॥
तत्र सिंहासनं रम्यं गजासनं महोत्तमम् ।
तत्र स्थितं हरिं मां श्रीबालकृष्णं श्रियाऽन्वितम् ॥८८॥
वीक्षयामासुरीशेशेश्वरं राधापतिं प्रभुम् ।
ब्रह्मप्रियापतिं कृष्णनारायणं पुमुत्तमम् ॥८९॥
सेवमानमनन्तैश्च मुक्तैरैकान्तिकैः सुखैः ।
एवं विलोक्य सहसा हृदये साधुरूपिणम् ॥९०॥
पुनस्ते ददृशुः सर्वे ततो बहिःस्थितं यतिम् ।
साधुं विलोकयामासुः सहसा स्नेहसंभृताः ॥९१॥
उत्थाय मां परात्मानं ज्ञात्वाऽरण्ये समागतम् ।
पुपूजुराश्लिषँश्चापि पपुः पादजलं ततः ॥९२॥
प्रसादं च मया दत्तं चखदुस्तेऽतिमोदिताः ।
दिव्यभावं गताः सर्वे दण्डवत् संप्रचक्रिरे ॥९३॥
उत्थायोत्थाय धन्यं च मन्यमानाः प्रमोदिनः ।
ननृतुस्तालिकातानैः कीर्तनं चक्रिरे तथा ॥९४॥
मम पादतले जिह्वाभिश्च चक्रुः सुलोहनम् ।
पादयोरन्तिके सर्वे लुलुठुर्धूलिकास्तरे ॥९५॥
अथ शान्तिं ययुश्चापि ववन्दुर्मां सनातनम् ।
सेवनं चाऽर्थयामासुर्धाम्नि दृष्टं यथा तथा ॥९६॥
तथाऽस्त्वेवं समुच्चार्य तिरोऽभवं द्रुतं त्वहम् ।
अथ ते निर्विकल्पा वै ममोपासनवेदिनः ॥९७॥
दिव्या भक्ता अभवँश्च कालेनापि तनुत्यजः ।
ययुर्मे धाम परमं यत्र साध्या वसन्ति वै ॥९८॥
एवं मया काष्ठहारा उद्धृता भक्तितत्पराः ।
लक्ष्मि जांगलदेवाद्याः सहस्रशोऽपि तत्पराः ॥९९॥
सकामास्तत्र ये त्वासन् प्रापितास्ते दिवं प्रति ।
निष्कामाः प्रापिता लक्ष्मि वैकुण्ठं चाक्षरं तथा ॥१००॥
केचित्तु प्रापिता धाम गोलोकं सुमहोज्ज्वलम् ।
केचिच्च प्रापिता लक्ष्मि श्रीपुरं ललितागृहम् ॥१०१॥
अन्ये श्रीबदरीधाम श्वेतद्वीपं तथाऽपरे ।
केचिदव्याकृतं धाम प्रापिताश्चामृतं परे ॥१०२॥
एवमेते मया लक्ष्मि चोद्धृताः काष्ठहारिणः ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेद्ध्रुवम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने जांगलदेवादिकाष्ठहाराणां भक्त्या साधुरूपेण श्रीहरेर्दर्शनं चान्ते मोक्षणं चेत्यादिनिरूपणनामा चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्तस्य पण्यकारिणः ।
नाम्ना वात्सल्यधीरस्य कथां परमपावनीम् ॥ १ ॥
नागशालायने ग्रामे भक्तो वैश्योऽभवन्मम ।
कुटुम्बधनवास्त्वादिधेनुक्षेत्रादिसम्पदा ॥ २ ॥
वर्धमानोऽतिमान्यश्च लोकानां च नृपस्य च ।
विप्राणां पूजकश्चातिध्यानवृत्तिर्हरौ मयि ॥ ३ ॥

पूजापाठपरो नित्यं भक्तिकीर्तनतत्परः ।
तीर्थसाधुसतीमन्ता गोसेवः सुरसेवकः ॥ ४ ॥
वृद्धाऽभिपूजकश्चान्नदानधर्मपरायणः ।
धनाढ्यः स धनं वर्षे वर्षे यज्ञार्थमुत्तमम् ॥ ५ ॥
ददात्येव तथा वृक्षारोपणार्थं ददात्यपि ।
वापीकूपतडागानां खातार्थं च ददात्यपि ॥ ६ ॥
जीर्णदेवालयादीनामुद्धारे वितरत्यपि ।
अनाथबालदीनानां सहायार्थं ददात्यपि ॥ ७ ॥
गोवृषश्वशुकानां च पारावातादिपक्षिणाम् ।
घासाऽन्नकणकान् श्रेष्ठी ददात्येव सुधर्मवान् ॥ ८ ॥
व्यधादन्नादिसत्राणि धर्मशालाः शुभाश्रयाः ।
प्रपापर्वाणि रम्याणि वेदिकाश्चत्वरादिषु ॥ ९ ॥
सीम्नि जलान्नसत्राणि कुटीश्चाश्रयदायिकाः ।
अकरोत् स च देवानां पूजाप्रवाहमुत्तमम् ॥१०॥
एवं नित्यं तस्य लक्ष्मि द्रव्यं दानेऽपि दीयते ।
अक्षय्यं वर्धते नित्यं वात्सल्यधीरनाणकम् ॥११॥
एतादृशः स भक्तो मे व्रते महोत्सवं परम् ।
करोति राजवच्छ्रेष्ठोपचारैर्बहुमूल्यकैः ॥१२॥
वाद्यगायनगीत्याद्यैः कीर्तनैर्भजनैरपि ।
नृत्योत्सवादिभिश्चापि कारयत्येव सूत्सवम् ॥१३॥
निवेदितान्नसलिलमिष्टान्नफलपायसैः ।
तर्पयत्येव सर्वान् स महोत्सवे समागतान् ॥१४॥
पूर्वं दत्तं ततश्चात्र लब्धं ततोऽपि दीयते ।
लप्स्यते चाऽक्षयं सर्वं नारायणाय दीयते ॥१५॥
एवं मत्वा ददात्येव दत्तं चाऽक्षयतां व्रजेत् ।
वृद्धिं यायान्न तु ह्रासं तस्माद् देयं विशेषतः ॥१६॥
पुण्यं फलं महच्चापि दानस्य स्वर्गमुत्तमम् ।
प्रसन्नता हरेश्चापि तृप्तिश्चात्मगता भवेत् ॥१७॥
सुखदं सर्वथा दानं रसाऽन्नधनसम्पदाम् ।
गृहक्षेत्रवाटिकानां धेनूनां पयसां तथा ॥१८॥
द्रव्याणामुपकरणानां च दानं तथाऽक्षयम् ।
दातव्यं सर्वथा सम्पद्युक्तैः सम्पन्मिलिष्यति ॥१९॥
अदत्तं लभ्यते नैव नारीधनगृहादिकम् ।
दत्तमेवाऽऽप्यते सर्वं सुखं चेन्द्रियदेहजम् ॥२०॥
लक्ष्मि वात्सल्यधीरस्तु सत्रे सत्रे स्थले स्थले ।
लिलेख कृष्णनामानि कपाटेषु प्रपासु च ॥२१॥
कुटीषु भित्तिषु पात्रेष्वपि वस्त्रेषु वस्तुषु ।
जपते श्रीकृष्णनारायणं श्रीवल्लभम् प्रभुम् ॥२२॥
एवंविधस्य भक्तस्य नित्यं प्रपूजकस्य मे ।
गृहं चाऽहं जगामैव भूत्वा तु जटिलो यतिः ॥२३॥
अहं चाकारितस्तेन भोजनार्थं तृणासने ।
मया चाभिहितो भक्तः पादप्रक्षालनाय मे ॥२४॥
सुवर्णकलशे भृत्वा जलं सुगन्धिमिश्रितम् ।
स्नेहेनाऽक्षालयत् पादौ पपौ वारि प्रसादजम् ॥२५॥
अथापि भक्तराट् तूर्णं मया पुनर्निवेदितः ।
देहसम्मर्दनार्थं वै तैलैः सुगन्धिसारकैः ॥२६॥
सोऽपि प्रसन्नमनसा मेऽङ्गान्यमर्दयत्तथा ।
मयोक्तः स ततश्चाऽप्युष्णाद्भिः स्नापयितुं तु माम् ॥२७॥
द्रागुष्णाद्भिः सह तत्रायया वुत्साहवान् स्वयम् ।
मया निराकृतः सोऽपि याचितस्तत्स्त्रियं प्रति ॥२८॥
तूर्णं सा सहसा मञ्जुलिकानाम्नी पतिव्रता ।
पत्याज्ञयोपतस्थे मां स्नापयितुं निःशङ्किनी ॥२९॥
प्रसन्नमानसा साध्वी ददौ स्वर्णासनं तु मे ।
अहं कौपीनमात्राढ्यो निषसाद शुभासने ॥३०॥
सा हस्ताभ्यां सती साध्वी भक्तानिका च मां मुहुः ।
सर्वांगेषु प्रसम्मृद्य स्नपयामास भावुकी ॥३१॥
मया तस्यै दर्शिता वै विकृतिर्जाम्रतात्मिका ।
तथापि सा विशंका मां स्नपयामास सादरम् ॥३२॥
स्पर्शं पुनः पुनः कृत्वा सर्वांगेषु पतिव्रता ।
प्रसन्नमानसा मञ्जुलिका न विकृतिं ययौ ॥३३॥
धीरा स्थिरा धर्मवती तुष्टाव च कृताञ्जलिः ।
प्रसन्नो भव मुक्तात्मन् यत्ते सेवां करोमि ते ॥३४॥
पत्युराज्ञा यथा स्यात्ते सेवां कुर्यां विसंशया ।
साधुर्नारायणः साक्षाद् दिव्यमूर्तिः स्वयं हरिः ॥३५॥
तस्य सेवा तु भाग्येन लभ्यते खलु योषिता ।
पत्याज्ञा चेत् तथाऽस्म्येव यतश्चास्मि पतिव्रता ॥३६॥
उक्तश्चैवं तथाऽहं च लक्ष्मि तत्पतिमाह्वयम् ।
पत्नी ते दीयतां मह्यं बाधते मानसं मम ॥३७॥
पतिः प्रपूज्य पादौ मे तदा तथाऽस्तु संददौ ।
साऽपि मत्परभावा च व्यजायताऽऽज्ञया रमे ॥३८॥
अस्पृष्ट्वा तां तदा तूर्णं दिव्यश्चतुर्भुजोऽभवम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥३९॥
साऽपि धन्यां मन्यमाना स्वां पपात च पादयोः ।
तस्याः पतिश्च वात्सल्यधीरोऽपि प्रेमविह्वलः ॥४०॥
साधुरूपं हरिं मां च ज्ञात्वा पपात पादयोः ।
भक्तान् समाह्वयामास सेवां चक्रे च तत्क्षणम् ॥४१॥

वस्त्रविभूषणैश्चापि चन्दनैः कुंकुमादिभिः ।
अर्पयामास सर्वे मे भोजनं च जलं फलम् ॥४२॥
मञ्चं स्वर्णासनं चापि शृंगारं च परार्हणम् ।
नीराजनं चकारापि शयनं मे ददौ ततः ॥४३॥
अथ साधुस्वरूपोऽहं सर्वैः सम्पूजितः प्रभुः ।
ययाचिरे च भक्ताश्च तथा वात्सल्यधीरकः ॥४४॥
मुक्तिर्लब्धा दिव्यगतिर्दीयतां परमेश्वर ।
ज्ञानं माहात्म्यसम्पन्नं दीयतां ते परात्परम् ॥४५॥
अहं लक्ष्मि ददौ तस्मै तेभ्यश्च ज्ञानमुत्तमम् ।
स्नेहः कार्यो भगवति मयि श्रीपरमेश्वरे ॥४६॥
सर्वार्पणं विधेयं च निःशंकं मयि माधवे ।
निःस्पृहत्वं विधेयं च सांसारिकेषु सर्वथा ॥४७॥
वैराग्यः सर्वथा रक्ष्यो बन्धनस्य विछित्तये ।
कृष्णे मय्यनुरागश्च प्रेम स्नेहोऽतिस्निग्धता ॥४८॥
कर्तव्याः सर्वथा नारीनरैर्मदर्पणाय वै ।
यतितव्यं नित्यशश्च प्राप्तो भवामि तेन ह ॥४९॥
स्नेहेन हृदयेऽखण्डं स्मरणं मे हरेर्भवेत् ।
मम मूर्तेः सदा स्फुर्तिर्वर्तेत तेन सौख्यदा ॥५०॥
अन्यभानास्तु संकल्पाश्चोदयं नेयुरेव ह ।
विलीना मायया सार्कं निर्बीजास्ते भवन्ति वै ॥५१॥
पूर्णप्रेमवतां पूर्णाः संकल्पा मम गोचराः ।
नान्यगोचरा जायन्ते सर्वदा भक्तियोगिनाम् ॥५२॥
विपरीते देशकालसंगादौ चेत् तु मायिकः ।
संकल्पो यद्युत्पद्येत तदा व्यथा भवेद्धृदि ॥५३॥
यथा नेत्रे तीक्ष्णसूचीक्षेपे व्यथा भवेत्तथा ।
यथा तीक्ष्णा शल्यधारा हृद्गता वै व्यथां क्रियात् ॥५४॥
तथोद्भूताऽन्यसंकल्पो व्यथां कुर्याज्जनं श्रितम् ।
एतादृशः परः स्नेहः कर्तव्यो मयि केशवे ॥५५॥
स्नेहस्तु मम माहात्म्यज्ञानाद् भवति वर्धितः ।
वरमालाग्रहणाच्च नैसर्गिको भवेदपि ॥५६॥
कण्ठी माला वरमाला मन्त्रो मे च वरः स्मृतः ।
तदादाने भवेत् स्नेहः कन्याया इव कान्तके ॥५७॥
अदृष्टेऽपि भवेत् स्नेहः सर्वाधारे हि रक्षके ।
तदर्पणात्मिका वृत्तिः सर्वा भक्तस्य जायते ॥५८॥
करग्रहेऽपि संस्पर्शे स्नेहश्चातीव वर्धते ।
सर्वात्मनाऽर्पणे स्नेहः निःसीमा सम्प्रवर्धते ॥५९॥
गुरोः प्रसंगतः स्नेहो गुरुः साधुजनो मतः ।
सतां प्रसंगमासाद्य माहात्म्यं चाप्नुयान्मम ॥६०॥
देहे दैहिकविषये सम्पत्स्वपि विवेकवान् ।
रागं हित्वा हरौ कृष्णे मयि स्नेहं विवर्धयेत् ॥६१॥
जडं देहं दैहिकं च न मन्तव्यं निजं क्वचित् ।
आत्माऽहं चेतनो दिव्यो भगवच्छरणागतः ॥६२॥
सच्चिदानन्दरूपोऽस्मि मुक्तोऽस्मि ब्रह्मसंस्थितः ।
माया मे नास्ति लोकेऽत्र विना हरिं न किञ्चन ॥६३॥
एवं विवेकवान् कृष्णे स्निग्धो भवति सर्वथा ।
अहन्ताममताहीनः सर्वरागादिवर्जितः ॥६४॥
न माता न पिता मेऽस्ति न स्त्री न द्रव्यमस्ति मे ।
न पुत्रो न सुता मेऽस्ति न गेहं मे न वाटिका ॥६५॥
पूर्वभवेषु बहवो जाता वै जनकादयः ।
अज्ञानेन मया चात्र विस्मृतास्तत्तथा त्विमे ॥६६॥
आत्मनो नहि माताऽस्ति कुतः पिता कुतो गृहम् ।
अहन्ताममतारागद्वेषाश्चापि कुतस्तराः ॥६७॥
एवं विवेकिनां सर्वा नश्यन्ति ममतादिकाः ।
मय्येव श्रीहरौ चाहंममत्वं तूपजायते ॥६८॥
सत्यं तन्मोक्षदं भक्तास्तरन्त्येतेन मज्जनाः ।
विवेकहीनाः संसारे बध्यन्ते न तरन्ति ते ॥६९॥
यथा नाट्यगृहे प्रौढाः किशोरा रंगभूकृते ।
नाट्यसम्पादनार्थं वै वेषान् वहन्ति चोचितान् ॥७०॥
वेषाणां कुशलास्तेषां धारयन्ति सुवेषकान् ।
सज्जयन्ति सुशोभाढ्यान् शृंगारयन्ति शोभनान् ॥७१॥
किशोरान् स्त्रीस्वरूपाँश्च वल्लसयन्ति सुरूपिणः ।
तत्र वेषधरो वेषसम्पादकान् जनान् यदि ॥७२॥
मन्येत पितरौ जन्मप्रदौ मौढ्यात्तदा तु सः ।
अज्ञ एव भवेत् सर्वविवेकादिविवर्जितः ॥७३॥
तथा देहोपि वेषोऽस्ति देहादौ पितरौ न तु ।
मन्तव्यौ चात्मना ब्रह्मरूपेण वर्तिना त्विह ॥७४॥
एवमेव यथा नानाजातिषु बहवो गताः ।
देहस्योत्पादकाश्चापि तथाऽस्य वर्ष्मणोऽपि तौ ॥७५॥
एवं विवेकं कृत्वैव स्त्रीपुत्रधनसम्पदि ।
स्नेहं त्यक्त्वा प्रकुर्याद्वै स्नेहं मयि परेश्वरे ॥७६॥
देहेऽहन्ता विनष्टा स्याद् दैहिके ममता ततः ।
आत्मनिष्ठाबलं नित्यं प्रवर्धेताऽक्षरप्रदम् ॥७७॥
वर्णाश्रमाभिमानश्च लयं यायाद् विवेकतः ।
मुक्तिं प्रत्येव वलयं निजात्मनः समुद्भवेत् ॥७८॥
तद् गृहीत्वा भुजायां वै कृष्णं कान्तं समाश्रयेत् ।
भुक्तिर्मुक्तिर्भवेदस्य करस्था नैव संशयः ॥७९॥

गृहस्थोऽपि भवेच्चापि मन्तव्यः साधुरेव सः ।
भजेत् कृष्णं तु यस्ताद्दृग्ज्ञाननिष्ठो विरागवान् ॥८०॥
यस्माद्धरिर्न वै दूरे दुर्लभः साधुरेव सः ।
तस्माद् बन्धा विनश्यन्ति सेव्यः साधुः स एव सः ॥८१॥
ब्रह्मात्मना वर्ततेऽसौ देहादिभाववर्जितः ।
सर्वार्पणात्मना लक्ष्मि तस्मात् किञ्चिन्न शिष्यते ॥८२॥
अपित्यागवतां त्यक्तगेहादीनामपि क्वचित् ।
अभिमानं भवेच्चेत्तदस्य योगाद् विलीयते ॥८३॥
एवं स पण्यकृच्छ्रेष्ठी लक्ष्मि मया निबोधितः ।
महासाधुसमो जातः पत्नीपुत्रादिसंयुतः ॥८४॥
व्यापारान् सर्वथा कृष्णेऽर्पितान् चक्रे कुटुम्बयुक् ।
विशेषतश्चात्मनिष्ठां माहात्म्यं मे विवेद सः ॥८५॥
अथ वैराग्यमापन्नः पत्न्या साकं स भक्तराट् ।
इयेष वैष्णवीं दीक्षां साधवीं साधुसम्मताम् ॥८६॥
ममाऽऽज्ञया स प्रददौ पुत्रेभ्यो धनसम्पदः ।
स्वयं वात्सल्यधीरः स मञ्जुलिकासतीयुतः ॥८७॥
दीक्षां जग्राह मन्त्रं च साधुर्यत्याश्रमोऽभवत् ।
साध्वी पत्नी च तस्याऽभूत् सांख्ययोगिन्यतः परम् ॥८८॥
वात्सल्यायननामाऽयं मया साधुस्तदा कृतः ।
वैराग्येण युतस्तीर्थयात्रार्थमुद्यमं व्यधात् ॥८९॥
तिरोऽभवं त्वहं द्राक् च साधुः प्रजां प्रणम्य च ।
पुत्रानापृच्छ्य तीर्थार्थं चाऽश्वपट्टसरो ययौ ॥९०॥
आक्षरं परमं क्षेत्रं प्राप कुंकुमवापिकाम् ।
अनादिश्रीकृष्णनारायणं मां प्राङ्मुनिमालितम् ॥९१॥
तीर्थं चक्रेऽभितस्तत्रोवास श्रीलोमशाश्रमे ।
मञ्जुलिका महासाध्वी ब्रह्मप्रियासु चाऽवसत् ॥९२॥
उभौ तौ साधुरूपौ मां भजेते चात्मवेदिनौ ।
वर्तमानाविमौ लक्ष्मि पश्य मञ्जुलिकां सतीम् ॥९३॥
तवेयं सेविका चास्ते पावनी भक्तिसंभृता ।
निःसंशयाऽभवद् या सा साधवे मे पुरा गृहे ॥९४॥
अर्पणार्थं स्थिता पत्युराज्ञयाऽत्र ततः स्थिता ।
दिव्या दिव्यस्वरूपाऽद्य वर्तते ब्रह्मयोगिनी ॥९५॥
वात्सल्यायनसाधुश्च वर्तते ब्रह्मरूपवान् ।
आत्मनिष्ठस्तथा सम्यग्ज्ञानी स्नेहपरं गतः ॥९६॥
मायां कालं च कर्माऽपि गणयत्येव नैव सः ।
मद्बलात् सर्वतत्त्वानामुच्छ्रये वर्तते ह्यसौ ॥९७॥
आकरोऽयं प्रयात्येव देहेनाऽनेन सर्वथा ।
समुद्रे पर्वतेऽरण्ये मेघे प्रयात्यनर्गलः ॥९८॥
वह्नौ चन्द्रे तथा सूर्ये लोकालोकाचले दिवि ।
मेरौ याति पुनर्याति स्वाश्रयं योगपारगः ॥९९॥
मम मूर्तिं सदा ध्यायति मत्कृपया साधुराट् ।
घटुं कर्तुं च संहर्तुं समर्थो विद्यतेऽधुना ॥१००॥
ममोपासनया लक्ष्मि सेवया चाप्यशंकया ।
मम योगेन दिव्यत्वं प्राप्तोऽयं मुक्तवत् सदा ॥१०१॥
एवं भक्तिं प्रकुर्वन्तो भवन्ति दिव्यविग्रहाः ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिस्तथा भवेत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पण्यकृतो वात्सल्यधीराख्यभक्तस्य तत्पत्न्या मञ्जुलिकादेव्या भक्त्या प्रसन्नो भगवान् दर्शनं ददौ, साधुभूतौ तौ च वर्तेते इत्यादिनिरूपणनामा पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं वनपालस्य वै कथाम् ।
नाम्ना तिलकरंगस्य शूद्रस्याऽरण्यवासिनः ॥ १ ॥
महाकालवने लक्ष्मि वनपालोऽतिभक्तिमान् ।
आसीत् तिलकरंगाख्यः शिवभक्तोऽतिभावनः ॥ २ ॥
सुरेशिकासरित्तीरे वृक्षषण्डे कृतालयः ।
अरण्यरक्षणं नित्यं भ्रमन् करोति सायुधः ॥ ३ ॥
वन्यकन्दफलाहारः क्वचिल्लब्धाऽन्नभोजनः ।
ऋतुपक्वकणाहारो वर्तते सकुटुम्बकः ॥ ४ ॥
वनेवासेऽपि सततं प्राणिहिंसाविवर्जितः ।
दयाधर्मपरो योग्ये काले शंकरपूजकः ॥ ५ ॥
प्रातः स्नात्वा वारिघटं भृत्वा श्रीशंकरालयम् ।
गत्वाऽभिषेकं चरति बिल्वपत्राणि चन्दनम् ॥ ६ ॥
कर्णिकायाः कनकानां पुष्पार्पणं करोति च ।
मध्यान्हेऽपि जलाधारीं दत्वा प्रपूज्य शंकरम् ॥ ७ ॥
ततो नैवेद्यं प्राप्यैव भुक्ते सायं तथैव च ।
धूपं दीपं सुनैवेद्यं नीराजनं प्रदिक्षणम् ॥ ८ ॥
आराधनं नमस्कारं कृत्वा करोति कीर्तनम् ।
स्वपित्येव ततस्तत्र वेद्यां शंकरसन्निधौ ॥ ९ ॥
प्रातरुत्थाय सम्मार्ज्य गाल्वादनपूर्वकम् ।
कृत्वा स्मरणं शंभोश्च ततः स्नातुं प्रयाति च ॥१०॥
अस्य पत्नी शिखादेवी तथैव शंकरार्हणम् ।
नित्यं करोति शक्त्या वै लिङ्गं संस्नापयत्यपि ॥११॥

मन्दिरे वसति तत्र दिवसे भक्तियोगिनी ।
वाटप्रवासिनः केचिन्नरा नार्योऽपि मार्गगाः ॥१२॥
यथायान्ति विश्राम्यन्ति तेभ्यो जलं फलं स्थलम् ।
ददाति सा शिखादेवी सत्करोति यथायथम् ॥१३॥
शंकरस्य गुणान् धर्मान् चमत्कारान् वदत्यपि ।
शंकरो वै भक्तभक्तिं विलोक्य च तुतोष ह ॥१४॥
एकदा वैष्णवो भूत्वा यात्रालुस्तत्र चागतः ।
कृतवैष्णवतिलकः स्कन्धे कृतसुपेटिकः ॥१५॥
कुक्षौ शालग्रामयुक्तो नारायणं रटन् मुहुः ।
शिखादेवी तु तं दृष्ट्वा वासं वेद्यां ददौ ततः ॥१६॥
निधाय पेटिकां तत्र स्नातुं सुकेशिकानदीम् ।
ययौ स्नात्वा स्नापयित्वा शालग्रामं प्रपूज्य च ॥१७॥
आययावासने वेद्यां निषसाद क्षणं स्थिरः ।
तावत् तिलकरंगोऽपि वनान्तरादुपागतः ॥१८॥
आनीय कन्दमूलानि निदधे वेदिकोपरि ।
यात्रालुं विष्णुयुक्तं च दृष्ट्वा ननाम पादयोः ॥१९॥
स्वागतादि पुनश्चक्रे फलमूलानि शंभवे ।
निवेद्य प्रददौ तस्मै पप्रच्छाऽऽगमनं कुतः ॥२०॥
क्व गम्यते महाराज यदीष्टं वस मद्गृहे ।
श्रुत्वैवं शंकरः प्राह भक्तार्थं त्वागमो मम ॥२१॥
गम्यते यत्र भक्तोऽस्ति तीर्थे मदिष्टं सर्वथा ।
यत्र भक्ता निवसन्ति तत्र वसामि साधुवत् ॥२२॥
त्वं भक्तोऽसि वने नित्यं सतामातिथ्यकारकः ।
त्वद्गृहं पावनीकृत्य यास्याम्यन्यत् सुतीर्थकम् ॥२३॥
श्रुत्वैतद् वनपालोऽपि पप्रच्छ पुनरेव तम् ।
क्व तीर्थं पावनं साधो विद्यते यत्र गम्यते ॥२४॥
जटी प्राह तदा भक्तं तीर्थं सतां समागमः ।
यत्र सत्संग उत्कृष्टस्तत्र वै गम्यते मया ॥२५॥
साधवो बहवः सन्ति संसारान्मोक्षकारिणः ।
विष्णोर्ध्यानपराश्चापि श्रीकृष्णार्पणकारिणः ॥२६॥
त्यागिनश्च तपोयुक्ता निग्रहे च यमे रताः ।
सेवाभक्तिपराश्चापि वनारण्यनिवासिनः ॥२७॥
यद्गृहे वर्तते विष्णुः शंभुर्वा श्रीनरायणः ।
वासुदेवो बालकृष्णस्तद्गृहं तीर्थमुत्तमम् ॥२८॥
यत्र हिरण्यवर्णश्च हिरण्यकेशवान् प्रभुः ।
सर्वः सुवर्णमूर्तिः श्रीहरिर्विराजते सदा ॥२९॥
तत्तीर्थं पावनं भक्त तत्र तीर्थे वसाम्यहम् ।
भूरितेजोदिव्यमूर्तिर्भगवान् यत्र राजते ॥३०॥
यत्र भक्ता हरेः सन्ति साध्व्यश्च साधवोऽपि च ।
तत्तीर्थं पावनं भक्त तत्र वै गम्यते मया ॥३१॥
सच्चिदानन्दरूपं यत् पूर्णं ब्रह्म प्रकाशकृत् ।
महातेजो यतः संप्रकाशतेऽत्र वसाम्यहम् ॥३२॥
तमेव पुण्डरीकाक्षं नारायणं पुमुत्तमम् ।
ध्यात्वा परात्परं दिव्यं परमेशमुपैम्यहम् ॥३३॥
तेनेदं च जगत् पूर्णं पूर्णेन पुरुषेण वै ।
तं श्यामसुन्दरं कृष्णं बालकृष्णमुपैम्यहम् ॥३४॥
कर्मफलप्रदातारं जीवानामीश्वरेश्वरम् ।
मुक्तेश्वरं दिव्यमूर्तिं लक्ष्मीपतिमुपैम्यहम् ॥३५॥
यस्य मूर्तेश्चाति तेजो महद् व्यापकमूर्ध्वगम् ।
सर्वस्थं ब्रह्मसंज्ञं च तं श्रीपतिमुपैम्यहम् ॥३६॥
यस्याऽन्वयेन सर्वत्र महः श्रेष्ठं प्रकाशते ।
मूर्तवत् फलदं चास्ते तं तेजस्विनमेम्यहम् ॥३७॥
ईश्वरा देवताः सिद्धा यत्प्रतापेन माधवाः ।
भवन्ति तं दिव्यमूर्तिं श्रीकृष्णं समुपैम्यहम् ॥३८॥
यस्य मूर्तौ समाधिं सम्प्राप्तस्य दिव्ययोगिनः ।
मायातत्कार्यतत्त्वानां लयोऽस्ति तमुपैम्यहम् ॥३९॥
चिदाकाशोऽतिसुखवान् महानन्दभृतः सदा ।
यन्मूर्तेः स्वच्छतात्माऽऽस्ते तं परेशमुपैम्यहम् ॥४०॥
यदक्षरं ब्रह्मधाम दिव्यं व्योम महः सुखम् ।
सर्वानन्दपदं यस्य तमुपैमि हरिं प्रभुम् ॥४१॥
यदक्षरं समस्तेषु मायायां मायिकेषु च ।
आत्मतत्त्वेषु चाप्यास्ते तं प्रभुं समुपैम्यहम् ॥४२॥
पुरुषे प्रकृतौ काले यदन्वयतया बलम् ।
समस्तकार्यकारित्वं तं कृष्णं समुपैम्यहम् ॥४३॥
सृष्टित्रयं च यस्माद्वै शोभते लयमेति च ।
सृष्टित्रये वर्तमानं तं हरिं समुपैम्यहम् ॥४४॥
यत्प्रसादाद् दिव्यदृष्टिर्मानवोऽपि सुरोऽपि वा ।
सर्वं ब्रह्मेक्षते तं माणिकीकान्तमुपैम्यहम् ॥४५॥
अनन्ताः शक्तयो यस्मादनन्तैश्वर्यकोटयः ।
प्रभवन्ति च रुद्राद्यास्तं परेशमुपैम्यहम् ॥४६॥
अष्टांगयोगिनः सन्तः साध्या देवाश्च यं प्रभुम् ।
समाधौ संप्रपश्यन्ति तं हरिं समुपैम्यहम् ॥४७॥
यन्मूर्तौ देहिनां नाडीप्राणाम्बराणि सर्वथा ।
संकुचितान्याकृष्टानि जायन्ते तमुपैम्यहम् ॥४८॥
ईश्वरा ब्रह्मरुद्राद्या मादृशाः साधवस्तथा ।
नारायणा ह्यसंख्याता यं श्रित्वैश्वर्यशालिनः ॥४९॥

भगवन्तो भवन्त्येव नारायण्यो भवन्त्यपि ।
अवताराऽवतारिण्यस्तमुपैमि परेश्वरम् ॥५०॥
भज त्वं सर्वथा तं च देवं श्रीपतिमीश्वरम् ।
सर्वेशं सर्वशक्तीनां धर्तारं राधिकापतिम् ॥५१॥
अहं भजामि तं देवं विष्णुं श्रीपरमेश्वरम् ।
अन्ये भजित्वा तं देवं परं पदं पुरा ययुः ॥५२॥
यान्ति यास्यन्ति चान्येऽपि भज तं परमेश्वरम् ।
इत्येवमुक्त्वा शान्तोऽभूद् रुद्रो वै भक्तवत्सलः ॥५३॥
ततो लक्ष्मि शिखादेवी तथा तिलकरंगकः ।
ज्ञात्वा साधुं ब्रह्मनिष्ठं रुद्रसमं ववन्दतुः ॥५४॥
अहो साधो धन्यभाग्यमस्माकं वै कुटुम्बिनाम् ।
ज्ञानमेतादृशं चाऽद्य लब्धवन्तो यतः सतः ॥५५॥
भवादृशस्य साधोर्वै दर्शनं दुर्लभं त्विह ।
वनपानां कथं साधुसंगमो मोक्षदो भवेत् ॥५६॥
विष्णोर्भक्तो भवानास्ते वयं भक्ता हरस्य च ।
हरस्य दर्शनं कस्माद् भवेत्तद्वद शोभनम् ॥५७॥
श्रुत्वा शंभुस्तदा प्राह शंभोस्तु दर्शनं तव ।
वृत्तीर्निरुद्धय चात्रैव भविष्यति न संशयः ॥५८॥
अन्तर्वृत्तीः समाधाय पश्यन्तु मां हृदन्तरे ।
साधुमूर्तौ दर्शनं ते भविष्यति हरस्य वै ॥५९॥
इत्युक्तास्ते तिलकाद्या वनपास्तत्र चाब्धिजे ।
अन्तर्वृत्तीस्तदा कृत्वा ध्यायन्ति हृत्सु यावता ॥६०॥
तावत् साधुः स्वयं रुद्रस्त्रिशूलधृग् व्यजायत ।
त्रिनेत्रो व्याघ्रचर्मधृक् सतीश्रीपार्वतीपतिः ॥६१॥
हरौ मग्नोऽतिसुखकृत् सौम्यरूपः समुज्ज्वलः ।
महायोगी गणेशाद्यैः सहितः समदृश्यत ॥६२॥
अथ तत्र हरेः रूपं चतुर्भुजस्य मे शुभम् ।
लक्ष्म्या समं महादिव्यं हरस्य हृदये परम् ॥६३॥
व्यदृश्यत महानन्दभृतं शंकरपूजितम् ।
शंभोस्तु हृदयात् तच्च निर्गतं शोभनं बहिः ॥६४॥
शंभुना पूज्यमानं च व्यदृश्यत सुखप्रदम् ।
एवं तु दर्शनं दत्वा साधुरूपस्तु शंकरः ॥६५॥
विष्णुरूपं निजरूपं तिरोभावयदेव सः ।
साधुरूपोऽभवच्छीघ्रं हृदये च ततः परम् ॥६६॥
सर्वान् तिलकरंगादीन् बहिर्वृत्तीनकारयत् ।
उत्थिता ददृशुः साधुं यथापूर्वं जटाधरम् ॥६७॥
ज्ञानवन्तश्च तं शंभुं स्वेष्टदेवं सतीपतिम् ।
निपेतुः पादयोः सर्वे शंभोः संवाहनं व्यधुः ॥६८॥
अपराधक्षमां ययाचिरे मुक्तिं ययाचिरे ।
शंभुः प्राह सदा चास्मि वैष्णवो भक्तवत्सलः ॥६९॥
भक्तानां श्रीहरौ भक्तिं कारयितुमिहागतः ।
नारायणं हृदयेऽहं रक्षामि सर्वदा प्रभुम् ॥७०॥
ध्यायामि तं परं ब्रह्म बालकृष्णं श्रियाः पतिम् ।
भवन्तो मम भक्ताश्च भजन्तु परमेश्वरम् ॥७१॥
इत्युक्त्वा प्रददौ लक्ष्मि मन्त्रं तेभ्यः स्वयं हरः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥७२॥
अथ नारायणपूजां भजनं चाऽऽदिदेश तान् ।
मुक्त्यर्थं वचनं दत्वा सहसा स तिरोऽभवत् ॥७३॥
ततस्तिलकरंगोऽपि भेजे शंभोः समाज्ञया ।
बालकृष्णं प्रभुं मां वै पत्नीकुटुम्बयुक् सदा ॥७४॥
वने वन्यान्मानवांश्च तत आरभ्य सर्वथा ।
नरान्नारीश्चाहूयित्वा कारयत्येव कीर्तनम् ॥७५॥
'हरेकृष्ण हरेकृष्ण बालकृष्ण रमापते ।
हरेविष्णो हरे जिष्णोऽनादिकृष्ण श्रियःपते' ॥७६॥
एवं संकीर्तनं नित्यं करोति कारयत्यपि ।
वने वेद्यां नित्यमेवाऽर्चयत्येव जनार्दनम् ॥७७॥
फलपुष्पादिभिः कृष्णं नारायणं हरिं तु माम् ।
तोषयत्येव च नीराजनं कृत्वा ततः परम् ॥७८॥
नृत्यत्येव सवाद्यं च प्रेम्णा सायं निशागमे ।
साधुष्वेव हरश्चास्ते हरे हरिर्विराजते ॥७९॥
मत्वैवं वनमध्येऽपि साधून् सदा प्रसेवते ।
कर्मणा मनसा वाचा देहेन च धनेन च ॥८०॥
पत्रपुष्पफलैस्तोयैश्चात्मार्पणेन सेवते ।
साध्वर्थं कृतसर्वस्वः प्रत्यक्षसाधुसेवनः ॥८१॥
प्रत्यक्षनिश्चयः सम्यक् समर्प्य सेवते सतः ।
भार्या सुखार्थिनी सर्वं त्यक्त्वा सुखं विरागिणी ॥८२॥
यथा तथा सतः साध्वीः सेवते परमार्थिनी ।
पुत्रपुत्र्यादिकाश्चास्य सेवन्ते साधुमीश्वरम् ॥८३॥
सर्वं वै वर्तते साधौ हरो हरिर्नारायणः ।
ब्रह्म मोक्षो महानन्दः साधुषु शाश्वतं सुखम् ॥८४॥
साधुरेव परंब्रह्म साधुर्देवो गुरुः परः ।
साधुजनो हरेर्मूर्तिः साधोः सेवा हि मुक्तिदा ॥८५॥
इत्येवं ते प्रसेवन्ते वनपा वन्यवस्तुभिः ।
अथैकदा कार्तिकस्य कृष्णाष्टमीदिने तु ते ॥८६॥
महोत्सवं प्रचक्रुर्वै वने कुञ्जे तु दारवे ।
वृक्षशाखानद्धदोलां वल्लीपल्लवपुष्पिताम् ॥८७॥

शोभितां संविधायैव मां कृष्णं ते न्यपादयन् ।
आन्दोलनं प्रचक्रुश्च कीर्तनं पूजनं मम ॥८८॥
जन्ममहोत्सवं चक्रुरनादेर्मे तदा त्वहम् ।
नृत्यगीतोत्सवं रात्रौ ब्रह्मप्रियासमन्वितः ॥८९॥
दिव्यकिशोररूपेण प्रत्यक्षस्त्वरितोऽभवम् ।
दिव्यदिव्यातिदिव्याढ्यरूपभूषाम्बरान्वितः ॥९०॥
प्राविरासं मुदोलायां तेजःपरिधिसत्प्रभः ।
प्रसन्नहास्यवदनः किशोरो माणिकीपतिः ॥९१॥
राधालक्ष्मीपतिप्रज्ञाप्रभाश्रीकमलापतिः ।
आश्चर्यं ते ययुः सर्वे क्षणं चक्रुश्च दर्शनम् ॥९२॥
अथ मूर्तिस्वरूपोऽहमभवं च द्रुतं ततः ।
प्रमोदमग्नास्ते सर्वे प्रार्थयामासुरुत्सुकाः ॥९३॥
हरेकृष्ण दयासिन्धो तारयाऽस्मान्निजाङ्गनान् ।
संसारसागरादस्मात्तव धाम प्रदेहि नः ॥९४॥
तथाऽस्त्वेवमहं तेभ्यो वरं ददौ तदा रमे ।
मूर्तेर्मुखाद् वरदानं दत्वा चात्त्वा तदर्पितम् ॥९५॥
अदृश्योऽहमभवँश्च ते चक्रुः परिहारकम् ।
अथ कालान्तरे प्राप्ते तिलकरंगयोगिनः ॥९६॥
शिखादेव्यास्तथा चान्यवनपानां कृपावशः ।
मुक्तिदाता विमानेन ह्युपस्थितोऽभवं वने ॥९७॥
दिव्यदेहान् विधायैतान् विमाने तान्न्यषादयम् ।
अगमं दिव्यधामोर्ध्वं चाक्षरं परमं मम ॥९८॥
एवं मुक्तिं दत्तवान् वै वनपेभ्यः परं पदम् ।
अन्येऽपि वनपास्तत्र भजन्ते मां हरिं प्रभुम् ॥९९॥
प्रयान्ति चाक्षरं धाम प्राप्ते चायुष्यसीमके ।
ये ये शंभोर्निदेशेन भजन्ते मां जनार्दनम् ॥१००॥
नयामि तान्मम धामाऽक्षरं लक्ष्मि परात्परम् ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदपि ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने तिलकरंगस्य वनपस्य शिवभक्तस्य साधुरूपशिवोक्तभक्त्या नारायणोपासनया परममुक्तिप्राप्तिरित्यादिनिरूपणनामा षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

**पुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं क्षेत्रपस्य कथां शुभाम् ।
नाम्ना नाङ्गकदेवस्य मम भक्तस्य तारणीम् ॥ १ ॥
नाङ्गभक्तोऽभवच्छूरः सीमक्षेत्रप्ररक्षकः ।
कुंकुमे लौमशे क्षेत्रे शस्त्रास्त्रविन्महाबलः ॥ २ ॥
सीम्नि वसति नित्यं स नगरे याति चोत्सवे ।
सस्यरक्षाकरो नाङ्गो वाटिकानां च रक्षकः ॥ ३ ॥
खलस्थाऽन्नकणगञ्जरक्षकश्च स एव सः ।
रात्रिन्दिवं भ्रमत्येषो रक्षार्थं परितः क्षितौ ॥ ४ ॥
चौरापहारकेभ्यश्च रक्षां करोति सर्वथा ।
कर्षुकाणां च धनिनां नागरिकादिसम्पदाम् ॥ ५ ॥
पत्रकाण्डादिकानां च सञ्चयानां तु सीमसु ।
नित्यं मां भजते नाम्ना श्रीकृष्णश्रीनरायण ॥ ६ ॥
मालामावर्तयत्येव मार्गेषु सीमभूमिषु ।
नाङ्गस्य नाम संश्रुत्वा चौरा नायान्ति तां दिशम् ॥ ७ ॥
भक्तो भक्तौ निपुणोऽति धर्मेऽपि पूजनेऽपि मे ।
भजने कीर्तने ध्याने यत्नवान् वर्तते सदा ॥ ८ ॥
साधूनां रक्षणे शूरो गवां च दीनयोषिताम् ।
साध्वीनां च सतीनां च वृद्धानां रक्षणे तथा ॥ ९ ॥
देवानां दैववृक्षाणां देवभुवां च रक्षणे ।
श्रद्धावान् सेवकश्चाऽयं निर्मानो दासवत् सदा ॥१०॥
एवंविधोऽयं भक्तो मे लक्ष्मि प्रातः सदा मम ।
पूजनं संविधायैव वीक्षार्थं चाऽटवीं प्रति ॥११॥
सर्वदिक्षु प्रयात्येव दुष्टानां शासनाय वै ।
एकदा पूर्वदिग्भागे प्रातः क्रोशद्वयं ययौ ॥१२॥
दूरेऽमरापुरतो वै मृदंगपुरसन्निधौ ।
तत्र शत्रुंजयादेशाल्लुण्टकाः समुपाययुः ॥१३॥
बहवोऽश्वसमारोहाः सशस्त्रा अन्नहारिणः ।
कर्षुकाणां खलभूमेरपहर्तुं खलेषु ते ॥१४॥
विविशुर्वाटिकाभागे कर्षुकास्तु भयं गताः ।
रक्षकं नैव चासाद्य ह्याक्रुश्य कणसञ्चयान् ॥१५॥
विहाय प्रययुर्दूरं तत्र नाङ्गः समाययौ ।
कथं विमनसो यूयं नाङ्गः पप्रच्छ कर्षुकान् ॥१६॥
कर्षुका जगदुस्तं च लुण्टका अन्नहारकाः ।
प्रसह्य खलभूमेश्च हरन्त्यन्नानि नोऽधुना ॥१७॥
रक्षां कुरु बलं ते चेल्लुण्टकेभ्यः प्ररक्षक ! ।
श्रुत्वा तूर्णं हरिकृष्णं स्मृत्वा मां पुरुषोत्तमम् ॥१८॥
अश्ववारः स्वयं शीघ्रं दुद्राव तत्स्थलीं प्रति ।
यत्र ते लुण्टकाश्चाऽन्नसञ्चयान् वै हरन्ति ह ॥१९॥
अश्वपृष्ठेषु चान्नानि निक्षिप्य ते वहन्ति वै ।
तान् दृष्ट्वा शूरभाषाभिर्गर्जनां नाङ्गको व्यधात् ॥२०॥
लुण्टका बलिनो यूयं मातृजाः पितृजाः ऋताः ।
मां विजित्य ततो यान्तु जितास्वानान्यथा त्विति ॥२१॥

श्रुत्वा बलोद्भवं शब्दं सन्मुखा युद्धवेदिनः ।
अभवन् शस्त्रयुक्तास्ते नाङ्गस्य विजयाय वै ॥२२॥
शस्त्राणां सहसा क्षेपः सान्निध्ये समजायत ।
प्रावर्तत तदा युद्धं बाणैः शस्त्रैश्च तोमरैः ॥२३॥
एको नाङ्गस्तु विंशत्या सह युद्धयति मध्यगः ।
शस्त्रक्षतोऽपि बहुधा मां स्मरन् बहु युद्धयति ॥२४॥
नाङ्गस्य भल्लकैर्विद्धा दश वक्षस्सु वै मृताः ।
चौरास्ततो हि चौराणां खड्गाघातैर्मुहुर्मुहुः ॥२५॥
नाङ्गो निपतितो भूमौ मूर्छायां मां स्मरन् मुहुः ।
तदाऽहं तत्स्थले शूरः खड्गभ्रः पार्श्वतो द्रुतम् ॥२६॥
आविरासं महादेहो वज्रांगो युद्धकोविदः ।
खड्गशस्तान् शेषचौरान् बिभेदाऽत्यविचारयन् ॥२७॥
सर्वे मृतिं गताश्चौरा विंशतिस्तत्र वै द्रुतम् ।
एकविंशस्त्वेकचौरो रामरामेतिसंवदन् ॥२८॥
मृत्यवे संययौ मूर्छामाप्तः शीघ्रं विसंज्ञकः ।
ततोऽहं दयया स्पृष्ट्वा रामनामपरायणम् ॥२९॥
उज्जीवयन् प्रभक्तं तं नीरुजं समकारयम् ।
उत्थितः स ततो भक्तो नाम्ना महामयाभिधः ॥३०॥
प्रार्थयन्मां तु नाङ्गस्योज्जीवनार्थं दयावशः ।
ततो नाङ्गं कराभ्यां संस्पृशन्नहं मुहुर्मुहुः ॥३१॥
मूर्छां तस्य व्यपनीयोत्थापयं तं सुखान्वितम् ।
अनादिश्रीकृष्णनारायणं दृष्ट्वा च तौ तदा ॥३२॥
तुष्टुवतुः सार्द्रभावौ मृतानां प्राणलब्धये ।
अहो नारायणस्त्वं वै रामो राक्षसमोक्षकृत् ॥३३॥
अहो नृसिंहो भगवान् भवान् दैत्यविनाशकृत् ।
अहो कृष्ण हरे राम त्वं गजोद्धारकारकः ॥३४॥
त्वमेवाऽऽसुरनाशार्थं वर्तसे भक्तवत्सलः ।
पापिनां पापनाशश्च जायते तव दर्शनात् ॥३५॥
स्पर्शनात् स्मरणाचापि पापिनोऽत्र तरन्ति हि ।
विश्वंभरो भवानास्ते पोषको रक्षकोऽपि च ॥३६॥
हन्ता संकर्षणो रुद्रः कालो भवान् प्रकाशते ।
रक्ष रक्ष कृपासिन्धो मृतानुज्जीवयाऽत्र वै ॥३७॥
चौरयोगेन भक्तोऽपि संगाच्चौरः प्रजायते ।
भक्तो महामयश्चाहं चौर्यकार्येऽभिसंहतः ॥३८॥
तथापि रामनाम्ना त्वं भक्तं रक्षितवानिह ।
नाङ्गं रक्षितवानत्र रक्षा तद्योगतो मम ॥३९॥
जाताऽत्र भगवन् कृष्ण भक्तेच्छासंप्रपूरक ।
भक्तयोगं गताश्चेमे रक्षणीया दयालुना ॥४०॥

मृताश्चेजीविताः स्युस्ते भजिष्यन्ति नरायणम् ।
अथवा ते रुचिस्तेषां मोक्षणे चेत्तथा कुरु ॥४१॥
इत्युक्तोऽहं तदा लक्ष्मि मृतानां मोक्षहेतवे ।
स्वर्गवासं प्रथमं वै कृपया समकल्पयम् ॥४२॥
पापान्येषां भक्तयोगान्मद्योगादविनाशयम् ।
याम्यदुःखानि सर्वाणि तच्छिरोभ्यो व्यनाशयम् ॥४३॥
स्मृत्वा देवविमानं च कृत्वा तान् देवविग्रहान् ।
अप्रेषयं दिवं तूर्णं विंशतिं समरे मृतान् ॥४४॥
महामयं तथा नाङ्गं भक्तं करेण वै मुहुः ।
स्पर्शं कृत्वा च नीरुजं यथापूर्वमकारयम् ॥४५॥
पुष्टौ विगतदुःखौ तौ बोधितौ च मया तदा ।
अनित्योऽयं हि संसारो देहोऽनित्यो गृहादयः ॥४६॥
अनित्याः सर्वमायोत्थाः पदार्थाः क्षयगोचराः ।
तथाप्यज्ञा जना नीतिं विहायोत्पथगामिनः ॥४७॥
हिंसायां सम्प्रवर्तन्तेऽपहारे नाशने मुहुः ।
सतां योगं न कुर्वन्ति भजन्ते न परेश्वरम् ॥४८॥
शास्त्रकथां न शृण्वन्ति पापं कुर्वन्त्यसंशयाः ।
तेन याम्यमहादुःखान्यनुभवन्ति दण्डिताः ॥४९॥
पशूनां पक्षिणां जन्मान्यपि गृह्णन्ति पापिनः ।
दुःखोत्तरं च दुःखं सम्प्राप्नुवन्ति विधर्मिणः ॥५०॥
परान्नहरणे जन्म मूषकाणां प्रजायते ।
घृतदुग्धादिहरणे मार्जारजन्मवान् भवेत् ॥५१॥
शाकमूलादिहरणे मायूरं जन्म चाप्यते ।
वस्त्रोपकरणाऽऽच्छेदे माहिषं जन्म जायते ॥५२॥
फलपत्रादिहरणे वानरत्वं प्रजायते ।
स्वर्णरत्नादिहरणे भल्लुकत्वं प्रजायते ॥५३॥
जलपानादिहरणे प्रेतता निर्जले वने ।
दारापुत्र्यादिहरणे षण्डत्वं गणिकाजनुः ॥५४॥
वाद्यवादित्रहरणे भाण्डत्वं नटता तथा ।
विश्वासघातकानां तु वृकता कृकलासता ॥५५॥
अपहारकृतां चाऽश्वजन्म वाहनजीविनाम् ।
ऋणिनां तु वृषभत्वं निन्दकानां तु मूकता ॥५६॥
षण्ढोक्षत्वं कामिनां च कामिनी तु पिशाचिनी ।
प्रतारको भिक्षुकश्च भवेद् दारिद्र्यदुःखवान् ॥५७॥
देवान्नधनभोक्ता च भवेच्छ्वा काक उन्दुरुः ।
कुलहन्ता नकुलः स्यान्नारीहन्ता तु राक्षसः ॥५८॥
धर्महन्ता भाग्यहीनो वाराहो जायते वने ।
भक्तिहन्ता नारकी स्यान्निर्वंशो यमदूतकः ॥५९॥

मद्यपो मूत्रकीटः स्याद् वृश्चिको विषभक्षकः ।
क्रुद्धः सर्पो भवेच्चापि नीलमर्कटिकस्तथा ॥६०॥
इत्येवं कर्मजन्मानि ज्ञात्वा तानि विवर्जयेत् ।
शुभं कुर्यान्मानवेन देहेन नाऽशुभं क्वचित् ॥६१॥
शुभं धर्मं शुभं ज्ञानं शुभं वैराग्यमित्यपि ।
शुभां भक्तिं प्रकुर्याच्च मोक्षदं सत्समागमम् ॥६२॥
निर्दंभं सत्परिचर्यां कुर्याद्धरेः सतां सदा ।
कृष्णमन्दिरवाटयादि कारयेल्लेपमार्जने ॥६३॥
पादसंवाहनं देहमर्दनं च सतां क्रियात् ।
नैवेद्यं भोजनं वारिपानं दद्यात्तु शार्ङ्गिणे ॥६४॥
सद्यो दद्याद् यथेष्टं च सेवेत गुरुमण्डलम् ।
कथां च शृणुयान्नित्यं नामकीर्तनमाचरेत् ॥६५॥
आत्मनिष्ठया वर्तेत ब्रह्मरूपेण चात्मना ।
जानीयान्मां हरिं दिव्यं सर्वदोषविवर्जितम् ॥६६॥
वार्तां मदीयां कुर्याच्च स्नेहं कुर्यात् सदा मयि ।
मायामायिककार्येषु रागहीनस्तथा भवेत् ॥६७॥
साधुसेवां च सत्संगं प्रकुर्वीत सदा शुभम् ।
विषयेषु प्रकुर्याच्चाऽरुचिं चान्तर्मतिर्भवेत् ॥६८॥
अनादिश्रीकृष्णनारायणे मतिं दृढां क्रियात् ।
अन्यत्र मानसं नैव धारयेत्तु कदाचन ॥६९॥
प्रेम्णैव कारयेत् कुर्यात् सेवां मेऽलंकृतिं तथा ।
मम मूर्तिं धारयेच्च मानुषीं दैवतीं च वा ॥७०॥
मम भक्तेषु वै प्रीतिं कुर्यान्नान्यत्र कुत्रचित् ।
स्त्रीपुत्रादौ बन्धनं तु स्नेहं सदा विवर्जयेत् ॥७१॥
कृष्णसम्बन्धिनीष्वेव क्रियासु व्यापृतो भवेत् ।
कृष्णसम्बन्धशून्याभ्यो निवर्तेत समाहितः ॥७२॥
नित्यं पूजा मम कुर्यात् प्रार्थयेच्च निजं हितम् ।
नारायण हरे कृष्ण विष्णो स्वामिन् परेश्वर ॥७३॥
अधर्ममार्गगाल्लोकात् पाहि मां नास्तिकात्तथा ।
समागमं ते भक्तानां देहि नित्यं शुभं कुरु ॥७४॥
असतां संगमो मा स्यात्तथा रक्षां सदा कुरु ।
चौराणां पापिनां संगं निन्दकानां न मेऽर्पय ॥७५॥
मद्यमांसाशनानां च संगं व्यवायिनां न मे ।
मूर्तिखण्डनकर्तॄणामुपासनाविनाशिनाम् ॥७६॥
संगं मे माऽर्पय कृष्ण शरणागतवत्सल ।
भक्तिं विना दिनं वन्ध्यं मा मे यातु तथा कुरु ॥७७॥
मनोवृत्तिः सदा कृष्णे तिष्ठेत्तथाविधापय ।
सांसारिकेषु चित्तं मे विरागं स्यात्तथा कुरु ॥७८॥
सतां समागमं कृष्ण तव मूर्तेः समागमम् ।
चिरं च दर्शनं ते च देहि हृद्वासमाचर ॥७९॥
बहिर्वा चान्तरे वा ते दर्शनं दिव्यमेव तत् ।
सर्वदा स्यात्तथा कृष्णाऽन्तर्दृष्टिं देहि मे शुभाम् ॥८०॥
अन्ते धामाऽक्षरं देहि तव मूर्त्या विराजितम् ।
अर्थयामि तथा कृष्ण मुक्तिं ते सेवनात्मिकाम् ॥८१॥
इत्येवमर्थयेन्नित्यं भगवन्तं हरिं तु माम् ।
भक्तौ युवां यतस्तस्मादहं दृष्टिपथं गतः ॥८२॥
कल्याणं भवतोरस्तु प्रयामि मम मन्दिरम् ।
इत्युक्त्वा कर्षुकान् धैर्यं दत्वा श्रीभगवाँस्ततः ॥८३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
दत्वा मन्त्रं कर्षुकेभ्यो भक्ताभ्यां च तिरोऽभवत् ॥८४॥
कर्षुकास्ते चमत्कारं वीक्ष्य चक्रुर्ममाश्रयम् ।
पूजनं भजनं चेति क्षेत्रपोऽपि विशेषतः ॥८५॥
महामयोऽपि सहसा नारायणसमागमात् ।
निरामयोऽभवल्लक्ष्मि ! नाङ्गोऽपि चाऽङ्गनोज्झितः ॥८६॥
ते सर्वे नित्यदा भेजुर्मां श्रीराधारमापतिम् ।
पूजनं भोजने ध्यानं रमणे स्मरणं मम ॥८७॥
चक्रुश्च कीर्तनं नित्यं देहान्ते च ततः परम् ।
विमानेनाऽऽययौ चाहं विष्णुविमानशोभनः ॥८८॥
पार्षदैः सहितश्चाऽश्वपट्टसीम्नि तदा द्रुतम् ।
कर्षुकान्निजलोकं च निन्ये दिव्यशरीरिणः ॥८९॥
नाङ्गं भक्तं पुनर्निन्ये निन्ये निरामयं ततः ।
एवं धामाऽक्षरं प्राप्ता भक्ता मे क्षेत्रपा अपि ॥९०॥
लक्ष्मि क्षेत्रोद्भवं धान्यं नूतनं मे समर्पयेत् ।
चिर्भटं मक्किकां चापि पत्रं पुष्पं समर्पयेत् ॥९१॥
कन्दं फलं च दण्डं च मिष्टं शाकं च मञ्जरीम् ।
स्तम्बं नालं च काण्डं च शाखां वा मे समर्पयेत् ॥९२॥
कणं च बदरं वापि मूदं वा पावनीमपि ।
अर्पयेन्मां तु यो भक्तयोद्धरामि तं समर्पकम् ॥९३॥
समिधस्तुलसीपत्रं चन्दनद्रुं फलद्रुमम् ।
तृणं दर्भं चांकुरं वाऽर्पयेन्मे मुक्तिभाक्तु सः ॥९४॥
कार्पासं पूलकं वापि शिम्बिं वा कोशमेव वा ।
गुच्छं वा डुण्डिकां वा मेऽर्पयेन्मोक्षगतो भवेत् ॥९५॥
तिलान् वा गोधुमकौंश्च चणकान् द्विदलांस्तथा ।
निवारान् वा सारिका वा खर्जुरं वा समर्पयेत् ॥९६॥
शर्करां वा हरिद्रां वा लवणं चार्द्रकं च वा ।
आरनालं च विविधं लविंगं पूगिकाफलम् ॥९७॥

एलां च केसरं वापि मेऽर्पयेन्मुक्तिभाग् भवेत् ।
आसनं वापि पात्रं वा लतां वा वेत्रमित्यपि ॥९८॥
यानं वस्त्रं चर्वणं च तैलं सुगन्धमुत्तमम् ।
शृंगारं चार्पयेन्मह्यं जायते मोक्षभाग्धि सः ॥९९॥
दुग्धं रसं च पक्वान्नं मिष्टपानं च शीतलम् ।
व्यजनं व्यञ्जनं चापि मेऽर्पयेन्मोक्षभाग् भवेत् ॥१००॥
आत्मार्पणेन सर्वे वै कमले यान्ति मत्पदम् ।
पठनाच्छ्रवणादस्य स्मरणादपि मोक्षभाग् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने क्षेत्रपस्य नाङ्गभक्तस्य महामयभक्तस्य कर्षुकाणां च चौरेभ्यो रक्षणं भगवता कृतमित्यादिनिरूपणनामा सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं भक्तं किरातजातिजम् ।
सागराख्यं महाशाटीनगरीवासिनं शुभम् ॥ १ ॥
कुटुम्बसहितश्चाऽयं महीनदीतटे वने ।
चरति देहयात्रार्थं कुरुते सञ्चयं गृहे ॥ २ ॥
वन्यानां कन्दमूलानां खादानां कणिनां तथा ।
शिम्बीनां च फलानां च बीजानां रसिनां तथा ॥ ३ ॥
क्वचिदन्नं फलं पत्रं क्वचित् कन्दं भुनक्ति सः ।
देहयात्रासु निर्वाहं करोति भजते च माम् ॥ ४ ॥
वाटगानां धनाढ्यानां भारवाही भवत्यपि ।
श्रेष्ठिनां भृत्यतां चापि क्वचित् करोति भीलकः ॥ ५ ॥
एवं कुर्वन् स निर्वाहं क्वचिन्नाप्नोति भोजनम् ।
तदोपवासे निरतो भजते मां मुदा युतः ॥ ६ ॥
मालिकाऽऽवर्तनं चापि करोति कृष्णकृष्ण च ।
व्रतं साहजिकं तद्वै मत्वा च जागरं निशि ॥ ७ ॥
करोति कीर्तनं रात्रौ क्षुधातृषान्वितः स वै ।
पत्नी पुत्रास्तथा पुत्र्यः सर्वे कुर्वन्ति वै व्रतम् ॥ ८ ॥
एकदा कमले तेषां श्रवणे शुक्लपक्षके ।
एकादशीदिने नैव मिलितं भोजनं मनाक् ॥ ९ ॥
व्रतं जातं सहजं चैकादशीजं सजागरम् ।
निर्जलं ते प्रचक्रुश्च पूजनं कीर्तनं च मे ॥१०॥
अथ प्रातस्तु ते सर्वे भाजीं निवेद्य मे रमे ।
जलं समर्प्य मह्यं च बुभुजुर्भाजीमेव ह ॥११॥
पपुर्जलं कृष्णकृष्णकृष्णनारायणप्रभो ।
गृणन्तश्च मुदा लक्ष्मि तदाऽहं करुणालयः ॥१२॥
तेषामग्रे गोधुमानां शकट्या सह संययौ ।
ते सर्वे मां विक्रयिणं मत्वा श्रेष्ठिनमुत्तमम् ॥१३॥
नेमुर्जलं ददुश्चापि विश्रान्त्यर्थं जगुः क्षणम् ।
अहं मत्वा च तद्वाक्यं शकटीं तद्गृहांगणे ॥१४॥
अवस्थाप्य वृषभौ च निर्बध्य तत्कृतासने ।
उपाविशं च ते सर्वे पादसंवाहनं मम ॥१५॥
व्यधुश्च कृष्ण कृष्णेति वदन्तो मग्नमानसाः ।
अथ पृष्टा मया सर्वे किंवृत्ताः किंप्रजीवनाः ॥१६॥
ते प्रोचुर्जीवनं कृष्णो ददाति जीव्यते तथा ।
अद्य भाज्या कृतं कृष्णपूजनं च जलेन च ॥१७॥
भुक्ता भाजी जलं पीतं शान्तिस्तत्र हि नः सदा ।
वर्तते सुखदा श्रेष्ठिन् किं लक्षैः कोटिभिर्धनैः ॥१८॥
भजामः श्रीहरिं नित्यं ददात्येव स भोजनम् ।
सर्वार्पणं प्रकुर्मश्च हरये निर्गुणायितम् ॥१९॥
भवान् श्रेष्ठी वर्ततेऽद्य महीमानो गृहेऽत्र नः ।
भवद्योग्यं महान्नं तु नास्ति स्वागतकारकम् ॥२०॥
ततो भाजीं प्रदद्युस्ते रोचते संगृहाण ताम् ।
इत्युक्तोऽहं तदा लक्ष्मि प्रेम्णा भाजीं चखाद ताम् ॥२१॥
जलपानं चकाराऽपि तृप्तिं जगाम भक्तिजाम् ।
अथाऽहं प्रददौ तेभ्यो गोधुमानां समस्तकम् ॥२२॥
धनं च प्रददौ तेभ्यो सहस्रं रूप्यमुद्रिकाः ।
ततस्ते मां पप्रच्छुश्च नाम ग्रामं कुटुम्बकम् ॥२३॥
अहमाह हरिकृष्णो बालकृष्णो भवाम्यहम् ।
ग्रामं धामाऽक्षरं मे च कुटुम्बं भक्तमण्डलम् ॥२४॥
तेषां गृहे मम यात्रा महीमानो भवाम्यहम् ।
भवद्भिर्यत् कृतं त्वेकादश्या व्रतं सजागरम् ॥२५॥
भाज्या चाद्भिस्तोषितोऽहं रक्षार्थं समुपाययौ ।
कृपया त्वागतोऽस्म्यत्र दातुं सर्वांश्च गोधुमान् ॥२६॥
अक्षयास्ते मम हस्तस्पृष्टा गोधुमका इमे ।
भविष्यन्ति कुसुले च निक्षिप्योपरि छादनम् ॥२७॥
कृत्वा छिद्रात् निष्कासनीया न चान्यथा ।
अक्षयास्ते भविष्यन्ति मम प्रतापतः खलु ॥२८॥
भवन्तु सुखिनो भक्ता वंशपरम्पराभवाः ।
यदा मे पूजनं नैव भविष्यति गृहेऽत्र वै ॥२९॥
तदा क्षयमवाप्स्यन्ति गोधुमास्ते मयाऽर्पिताः ।
इत्युक्त्वा प्रददौ सर्वान् दर्शनं दिव्यमित्यपि ॥३०॥
ददौ चतुर्भुजं मे च श्रिया युक्तं मनोहरम् ।
तुष्टुवुर्मां तु ते सर्वे निपेतुः पादयोर्मम ॥३१॥

मुमुचुः प्रेमभावेनाऽश्रूणि सर्वे तु विह्वलाः ।
वव्रिरे रक्षणं चापि मोक्षं त्वन्ते परं पदम् ॥३२॥
अहं धैर्यं वचो दत्वा शकटेन समं तथा ।
वृषभाभ्यां समं लक्ष्मि तूर्णं तत्र तिरोऽभवम् ॥३३॥
आजीवनं किरातो मे भक्तो गोधुमपोलिकाः ।
कारयित्वा निजपत्न्या भाज्या साकं न्यवेदयत् ॥३४॥
यतयः साधवश्चान्ये सत्यः साध्व्यश्च भिक्षुकाः ।
ये चाऽऽयान्ति लभन्ते ते भाजीं गोधुमपोलिकाः ॥३५॥
अन्नसत्रं सागरस्य प्रावर्तत निरन्तरम् ।
तीर्थयात्रालवोऽप्यस्य गृहे शान्ति प्रयान्ति हि ॥३६॥
सतां सेवां महालाभं लभते सागरः सदा ।
बहुपुण्ययुतो जातः सागरः सागरोपमः ॥३७॥
यद्गृहे मुनयो यान्ति देवप्रसादभोजिनः ।
देवताः साधुवेषाश्च भोक्तुं गोधुमपोलिकाः ॥३८॥
मत्वा प्रसादं दिव्यं च समायान्ति हि भिक्षुकाः ।
श्रीकृष्णदत्तगौधुम्यः पोलिकाः सुधया समाः ॥३९॥
भुज्यन्ते देवताभिश्च पितृभिर्भिक्षुकात्मकैः ।
सिद्धैश्च दिव्यदेहैश्च भुज्यन्ते पुण्यपोलिकाः ॥४०॥
प्रातरारभ्य चाऽऽसायं प्रवर्तन्ते हि पोलिकाः ।
अक्षया गोधुमाः सर्वे वर्धन्ते कुसुलोदरे ॥४१॥
सागरस्य गृहं तीर्थं जातं जगत्प्रसिद्धकम् ।
त्रैलोक्यां ख्यातमेवापि पावनं जायते तदा ॥४२॥
अथ श्रुत्वा तु दुर्वासा अक्षयं चान्नसत्रकम् ।
दशसाहस्रशिष्यैश्चाऽकस्मात् प्रातरुपाययौ ॥४३॥
सागरेण कृतमानः कृतस्वागत आदरात् ।
भोजनार्थं ततः पंक्तीः कृतवान् समकालिकीः ॥४४॥
सागरश्चिन्तयामास भीतः श्रीपतिमीश्वरम् ।
मां तदाऽहं श्रिया साकं प्राविरासं गृहोदरे ॥४५॥
सागरश्चातिमुमुदे दृष्ट्वा मां च श्रियं तथा ।
लक्ष्मीर्मया तदाऽऽज्ञप्ता पोलिकानिर्मितौ द्रुतम् ॥४६॥
सा निर्ममे तु पञ्चैव पोलिकाः सहसा रमा ।
चुल्याश्च वह्निना पक्वा मया धृता करेण सा ॥४७॥
अक्षयाः पञ्च चैताश्च न्यूना भवन्ति नैव ह ।
सागरेण करे धृत्वा स्थालीं ताः परिवेषिताः ॥४८॥
एकैकस्मै दशसंख्याः सहस्रेभ्यः समर्पिताः ।
एवं दशसहस्रेभ्यः पोलिकाः परिवेषिताः ॥४९॥
भाजाऽपि स्थालतो दत्ता सर्वेभ्यः परिवेषिता ।
मया स्पृष्टा स्वादवती भाजा च पोलिकास्तथा ॥५०॥

बुभुजुश्च समस्तास्ते दुर्वाससोऽनुयायिनः ।
तृप्तास्ते चुलुकं कृत्वा महाश्चर्यं हि मेनिरे ॥५१॥
अथ स्थाल्यां पोलिकाश्चावशिष्यन्ते तु पञ्च वै ।
एवं दृष्ट्वा महाश्चर्यं दुर्वासा गृहमाययौ ॥५२॥
परीक्षार्थं हरिश्चाहं लक्ष्म्या साकं तिरोऽभवम् ।
दुर्वासाः कुसुलं नत्वा नत्वा भक्तं च सागरम् ॥५३॥
तत्पत्नीं सारिकानाम्नीं दत्वाऽऽशीर्वादमुत्तमम् ।
अक्षयं ते धनं चाऽस्तु धान्यमक्षयमस्तु ते ॥५४॥
भाजा ते चाऽक्षयाऽप्यस्तु श्रद्धा तेऽस्तु तथाऽक्षया ।
अन्नसत्रं चाऽक्षयं ते पुण्यं ते चाऽक्षयं तथा ॥५५॥
मुक्तिस्ते त्वक्षया चास्तु भक्तिस्ते चाऽक्षयाऽपि च ।
दानधर्मश्चाऽक्षयस्ते भवत्वेवं प्रयाम्यहम् ॥५६॥
इत्युक्त्वा पूजितश्चातिप्रसन्नः प्रययौ वनम् ।
एवं लक्ष्मि मया तत्र सागरः परिरक्षितः ॥५७॥
अथ श्रुत्वा वालखिल्या ब्रह्मपुत्रा महर्षयः ।
अष्टाशीतिसहस्राणि वामनास्तत्र चाययुः ॥५८॥
प्रसादपोलिका भोक्तुममायां प्रातरेव ह ।
तेषां चक्रे सागरश्च सम्मानं स्वागतं तथा ॥५९॥
आमन्त्रणं भोजनार्थं पंक्तिशस्ते ततोऽभवन् ।
तदा नारायणं विष्णुं सस्मार मां च सागरः ॥६०॥
द्रागेव चागतस्तत्र लक्ष्म्या साकं जनार्दनः ।
ब्राह्मणश्चाऽभवं तत्र लक्ष्मीश्च ब्राह्मणी तथा ॥६१॥
कृत्वा हस्ततलमानाः पोलिकाः सहसा दश ।
अष्टाशीतिसहस्रेभ्यः प्रत्येकं दश वै दश ॥६२॥
भाजया सहिता अददां बुभुजुस्तेऽतिहर्षिताः ।
तृप्तास्ते वै ततो जाताः कृत्वा च चुलुकं ययुः ॥६३॥
प्रशंसन्तः सागरस्य भक्तिं प्रसन्नतां हरेः ।
एवं लक्ष्मि मया तत्र त्वया साकं स सागरः ॥६४॥
रक्षितः सुसहायेन भोजिताः ऋषयोऽखिलाः ।
अथ ज्ञात्वा शंकरस्तद्गृहं पावनमुत्तमम् ॥६५॥
दशलक्षगणैः साकं मध्याह्ने समुपाययौ ।
सर्वे साधुस्वरूपास्ते जटाचर्मधराः खलु ॥६६॥
अन्नसत्रं परं ज्ञात्वा चाऽक्षयं तद् ययाचिरे ।
भोजनं पोलिकानां च भाजानां कृष्णपावनम् ॥६७॥
सारिकासागरौ तत्र भीतौ सस्मरतुश्च माम् ।
लक्ष्म्या साकं तदा तूर्णमुपस्थितोऽभवं गृहे ॥६८॥
शतं च पोलिकाः कृत्वाऽददां प्रत्येकसाधवे ।
दशलक्षयतिभ्यो वै दत्तवानहमेव ह ॥६९॥

बहुरूपधरश्चाऽहं शतं त्वन्तेऽवशेषिताः ।
भुक्त्वा ते पोलिका भाजास्तृप्ताः प्रशंस्य सागरम् ॥७०॥
ययुर्निजं हि कैलासं शंकरो ध्यानमाचरत् ।
ददर्श कारणं विष्णुं बालकृष्णं श्रिया युतम् ॥७१॥
आश्चर्यं परमं प्राप भक्ताधीनं विलोक्य माम् ।
इत्येवं वै मया लक्ष्मि सागरश्चाऽवितस्तदा ॥७२॥
अथ श्रुत्वा स्वयं ब्रह्मा पोलिकार्थमुपाययौ ।
कोटिसिद्धैरुपेतो वै प्रसादलब्धये द्रुतम् ॥७३॥
ययाचे व्योममार्गेण प्रसादं पोलिकोद्भवम् ।
कोटिसिद्धप्रतृप्त्यर्थं सागरश्च पुनर्हरिम् ॥७४॥
सस्मार मां रक्षकं चोपस्थितोऽहं तदाऽभवम् ।
लक्ष्म्या साकं श्रिया साकं राधया साकमित्यपि ॥७५॥
साकं ललितया चापि माणिक्या रमया सह ।
पद्मावत्या सह ब्रह्मप्रियाभिः सह वै तदा ॥७६॥
कोट्यर्बुदाभिः पत्नीभिश्चाऽम्बरेऽवस्थितोऽभवम् ।
सहस्रं पोलिकाः कारयित्वा कोटिप्रियायुतः ॥७७॥
सिद्धेभ्यश्चाददां प्रत्येकाय सहस्रपोलिकाः ।
सहस्रं चाऽवशिष्टाश्चेत्याश्चर्यं विश्वसृड् ययौ ॥७८॥
अथैवं सागरश्चापि मत्वा भाग्यं महत्तमम् ।
कृष्णनारायणाधीनं सर्वं कृत्वा हि वर्तते ॥७९॥
महीमानस्वागतं च रात्रिंदिवं करोति सः ।
अक्षया कुसुला तस्य त्रैलोक्ये ख्यातिमाप ह ॥८०॥
आयान्ति च परायान्ति महीमानास्त्रिलोकतः ।
आयासं परमं प्रोह्य सागरः सेवते मुदा ॥८१॥
नाऽयाचत सहायार्थं चापरं बलमैश्वरम् ।
मामेव स्मरति भक्तो यदा भीतिं स गच्छति ॥८२॥
एवमात्मनिवेदस्य भक्तस्य वीक्ष्य भावनाम् ।
सेवां त्रिलोकिजीवानां प्रसन्नोऽहं ततोऽभवम् ॥८३॥
विशेषेण मया भक्तकृते तत्र विचिन्तितम् ।
देयमस्मै कल्पपात्रं यत्राऽसंख्यास्तु पोलिकाः ॥८४॥
आविर्भवेयुः सततं भाजापात्रं तथाऽपरम् ।
भाजा यत्राप्यनन्ताश्चाऽऽविर्भवेयुः सुपाचिताः ॥८५॥
विचार्येत्थं ददौ तस्मै पात्रद्वयं सुतैजसम् ।
प्रातरेव सुपक्त्वाऽत्र पोलिका भाजिकास्तथा ॥८६॥
नित्यं रक्षति चाच्छाद्य पात्रयोरुभयोरपि ।
मयोक्तः सागरस्तत्र त्वं वा ते स्त्री पतिव्रता ॥८७॥
पूर्णपात्राण्यनन्तानि यावदिष्टानि तानि वै ।
सकल्पयसि तावन्ति पूरितानि शुभानि च ॥८८॥
निस्सरिष्यन्ति रम्याणि चाऽऽभ्यां संकल्पमात्रतः ।
परिवेषणयत्नो वा पात्रदानक्रिया अपि ॥८९॥
कर्तव्या न भविष्यन्ति पंक्तौ यास्यन्ति वै स्वतः ।
एवमुक्त्वा पूजितोऽहं दत्वा जलस्य भाजनम् ॥९०॥
तादृशं चाऽक्षयं पूर्णं पूर्णकलशकारणम् ।
तिरोऽभवं ततः स्थानात् सागरो मुमुदे ह्यति ॥९१॥
अथ ज्ञात्वा महाश्चर्यं भाद्रामावास्यसद्दिने ।
कोट्यर्बुदाश्च पितरो महर्जनतपोभवाः ॥९२॥
आययुः सुप्रसादस्येच्छया तृप्त्यर्थमुत्सुकाः ।
शरीरिणः समस्तास्ते पंक्तिशोऽवस्थितास्तदा ॥९३॥
सारिका स्नानशुद्धा च कृत्वा भाजाश्च पोलिकाः ।
दुग्धपाकं श्राद्धयोग्यं न्यधात् तयोस्तु पात्रयोः ॥९४॥
आच्छाद्य विष्णवे प्रार्प्य यथोक्तं समकल्पयत् ।
सागरोऽपि कृतस्नानः पात्रान्तिकमुपाययौ ॥९५॥
अचिन्तयत् कोट्ययुताऽर्बुदपात्राणि वै तदा ।
पूरितानि ह्यसंख्यानि निर्ययुः पात्रयुग्मकात् ॥९६॥
प्रत्येकपितृदेवाय प्रत्येकं समुपस्थितम् ।
पात्रं पूर्णं पोलिकाभिः पायसान्नैस्तथा रमे ॥९७॥
भाजाभिश्च तथा वारिकलशश्चेति तृप्तिदः ।
कोट्यर्बुदाब्जपितरो भुक्त्वा तृप्तास्ततो ययुः ॥९८॥
रिक्तपात्राणि विलयं स्वभावात् समुपाययुः ।
एवं स सागरो भक्तो मया गोधुमसत्रके ॥९९॥
वर्धितोऽतिकृपया वै सर्वस्वागतकृद् यथा ।
किरातोऽप्यभवद् भक्त्या देवरातो हि सर्वथा ॥१००॥
अथ कालान्तरे चाऽहं दम्पती दिव्यपार्षदैः ।
सहितः सुविमानेनाऽनयं धामाऽक्षरं मम ॥१०१॥
महीशाटीनगरी च पश्चाद् गोधुमभाजिका ।
इतिनाम्नाऽभवल्लक्ष्मि तथा गोधुमसारिका ॥१०२॥
गोधुमरा ततश्चापि कथ्यते पावनी धरा ।
इत्येवं तन्महत्तीर्थं कृतं मया कृपालुना ॥१०३॥
दम्पत्योर्मोक्षणे पश्चाद् राज्ञा गोधरसूरिणा ।
कुसुला सा निजायत्ता कृता तावत्तु गोधुमाः ॥१०४॥
अदृश्यतां गताः पात्रत्रयं चाऽदृश्यतां गतम् ।
अन्नसत्रं समाप्तं च चमत्कारो लयं ययौ ॥१०५॥
इत्येवं गोधरसूरिर्वीक्ष्य दैवकृतं हि तत् ।
कुसुलं नित्यदा रिक्तं ह्यपूजयत स्मरन् हरिः ॥१०६॥

तथापि तु चमत्कारो गतो यस्तु गतो हि सः ।
पठनाच्छ्रवणादस्य लक्ष्मि दिव्यगतिं लभेत् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सागराख्यकिरातभक्तस्य भक्त्या प्रसन्नेन श्रीहरिणा श्रेष्ठिरूपेण गोधुमपुञ्जोऽर्पितः कुसुलस्थोऽक्षयश्च कृतस्तत्पोलिकाभाजाजलपात्राण्यक्षयाणि कृतानि मोक्षश्चकृत इत्यादिनिरूपण नामा अष्टाऽधिकद्विशततमोऽध्यायः ॥ २०८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं हूणभक्तस्य सत्कथाम् ।
नाम्ना सारंगसंज्ञस्य भूधरीग्रामवासिनः ॥ १ ॥
अरण्ये भूधरीग्रामे सौराष्ट्रे भक्तराण्मम ।
कुटुम्बसहितो हूणजातीयो वर्तते रमे ॥ २ ॥
करोति स्नानमाद्यं च प्रपूज्य मां ततः परम् ।
महिषीमण्डलं नीत्वा चारणार्थं तु शाद्वले ॥ ३ ॥
घासारण्ये प्रयात्येव सायं गृहं प्रयात्यपि ।
अरण्ये सन्ति सिंहाश्च व्याघ्राश्च भल्लुका अपि ॥ ४ ॥
वृकाश्च द्वीपकाश्चापि हिंस्रा वै प्राणिनोऽपरे ।
व्याघ्राः सिंहा धर्षयन्ति क्वचिद् गोमहिषीवृषान् ॥ ५ ॥
मारयित्वा भक्षयन्ति शसदा दुःखदा हिते ।
हूणः सारंगनामा च पञ्चाशन्महिषीधनः ॥ ६ ॥
घासेषूत्तममिष्टेषु महिषीश्चारयत्ययम् ।
अथ मध्याह्नसमये पार्श्वद्रुषण्डमध्यतः ॥ ७ ॥
कर्मद्यरण्यमार्गेण सिंहाः पञ्च समाययुः ।
महिषीणां घासचारवृत्तीनां मण्डलोपरि ॥ ८ ॥
निपेतुः सहसाऽकस्मात् सिंहाः पञ्चैव शब्दिताः ।
बलिनश्चातिपुष्टाश्चाऽप्रधृष्याः क्षुद्रुडन्विताः ॥ ९ ॥
अकस्मात्ता महिष्योऽपि पृष्ठबिन्दुं विधाय च ।
परितो मुखचक्रं संरक्ष्याऽपत्यानि मध्यके ॥१०॥
क्रुधा प्राणप्ररक्षार्थं भयेन मण्डलीकृताः ।
संभूय ग्रामरचनां विधाय चक्रिरेऽवनम् ॥११॥
सिंहा महिषीग्रामं वै दृष्ट्वा प्राप्य भयं द्रुतम् ।
पश्चाद् विवृत्य ते दूरे मुमुचुर्वै मुहुर्मुहुः ॥१२॥
कुगन्धिवातनिवहान् पशूनां भयहेतवे ।
येन स्वमण्डलाद् भूत्वा पृथक् चेद् विद्रवेत् तदा ॥१३॥
सिंहास्ता धर्षयेयुश्च मारयेयुः स्वभोजनम् ।
तथा चक्रुर्गर्जनाश्च दर्शयामासुरुग्रताम् ॥१४॥
तथापि ता महिष्यस्तु सार्थाद् बहिर्न निर्ययुः ।
एवमेव स्थितौ सिंहा गर्जन्त्येव भयंकरम् ॥१५॥
श्रुत्वा चान्ये दश सिंहाश्चाययुर्भक्ष्यहेतवे ।
चक्रकं परितश्चक्रुः सिंहास्ते दशपञ्च च ॥१६॥
महिष्यस्तु समग्रास्ताः प्रतिचक्रे यथास्थिताः ।
न द्रवन्ति निस्सरन्ति नाप्नुवन्ति न ताश्च ते ॥१७॥
एवमेवाऽभवत् सायं सिंहा दूरे भवन्ति न ।
अथ सारंगहूणश्च प्रजज्वाल तदाऽनलम् ॥१८॥
महिषीणां परितश्च समिधां सञ्चये पृथक् ।
वह्निभयेन सिंहाश्चेद् दूरे यान्तीति चिन्तया ॥१९॥
तथापि क्रूरकालास्ते दूरे याता न सर्वथा ।
परितस्ते भ्रमन्त्येव मारणार्थं द्रवन्ति च ॥२०॥
निशामुखं समापन्नं साहाय्यस्तत्र नास्ति च ।
रात्रौ सिंहबलं चाति जायते तमसि वृते ॥२१॥
महिषीणां विनाशः स्यात् किं कर्तव्यं विपद्भुवि ।
विना नारायणं कृष्णं सहायदो न विद्यते ॥२२॥
रक्षको भगवानेव महापत्काल आगते ।
मत्वैवं तेन वै लब्धं मन्त्रं जजाप तन्मयः ॥२३॥
लोमशाद् यो मन्त्रवरः प्राप्तोऽश्वपट्टतीर्थिना ।
तेन पुरा च तं मन्त्रं जजाप हूणभक्तराट् ॥२४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
अष्टोत्तरशतवारं जप्त्वा नेमेऽम्बरे हरिम् ॥२५॥
अनादिश्रीकृष्णनारायण विष्णो जगद्गुरो ।
बालकृष्ण हरेकृष्ण रक्ष रक्षय मामिह ॥२६॥
शरणागतसंत्रातः पाहि सिंहापदस्त्विह ।
अरण्ये त्वां विना कृष्ण रक्षकोऽन्यो न विद्यते ॥२७॥
हरेकृष्ण बालकृष्ण शीघ्रमायाहि रक्ष नः ।
अन्धकारे वर्धमाने मृत्युर्नः स्यान्न संशयः ॥२८॥
भक्तोऽस्मि चेत्तव कृष्णनरायण प्ररक्षय ।
प्राणिनां जायते मृत्युः क्वापि नैवाऽत्र संशयः ॥२९॥
किन्तु कृष्ण प्रसह्याऽत्र देहानां नखभेदनैः ।
महिषीणां त्वकालेऽत्र मृत्युर्योग्यो न मे मतः ॥३०॥
यासां दुग्धं हि भगवन् पीयते प्रत्यहं त्वया ।
प्रातर्वै पूजने कृष्ण नैवेद्ये दिवसे निशि ॥३१॥
यद्घृतेन प्रदीप्यंते कारयामि निशामुखे ।
तासां त्वं रक्षणं चेन्न करोषि निर्दयो नु किम् ॥३२॥

यासां सुमधुरं चापि पिच्छलं दधि चोत्तमम् ।
आस्वादयसि कृष्ण त्वं कथं नैव प्ररक्षसि ॥३३॥
शीघ्रमायाहि रक्षार्थे नो चेद् भक्तस्तवाऽस्मि यः ।
स एव प्रथमं प्राणाँस्त्यक्ष्यामि पशुहेतवे ॥३४॥
आश्रितानां रक्षणं वै कार्यं प्राक् स्वामिना सदा ।
स्वामिनाशे ततो नाशः स्वामिदोषाय नेष्यते ॥३५॥
इमा महिष्यो मां कृष्ण वीक्षन्ति रक्षकं प्रति ।
मयि कृष्ण हृदये त्वं स्थितः सन् किन्न पश्यसि ॥३६॥
पश्य पश्य हरे कृष्ण महापत्पतिता इमाः ।
भक्षको भक्षक एव मास्तु चास्त्वपि रक्षकः ॥३७॥
इत्युक्त्वाऽश्रूणि लक्ष्मि संमुमोच भक्तराण्मम ।
सारंगहूणो दीर्घं वै श्वासं मुमोच निस्पृहः ॥३८॥
मृत्युं गता वयं चेति मत्वा रुरोद वै क्षणम् ।
सिंहा बलं प्रकुर्वन्ति दूरे वह्निभयात् स्थिताः ॥३९॥
सारंगो वह्निबलवान् वह्निकाष्ठानि चाभितः ।
प्राज्वाल्याप्यभिप्राज्वाल्य निक्षिपति स्थले स्थले ॥४०॥
यावद्बुद्धिबलं यत्नः कर्तव्यः प्राणरक्षणे ।
मत्वैवं कुरुते यत्नं विष्णोरिच्छा बलीयसी ॥४१॥
हस्ते कृत्वा ज्वलत्काष्ठं भ्रमँश्च परितस्तदा ।
रक्षार्थं स्वमहिषीणां भजनं कुरुते ह्यति ॥४२॥
'हरे कृष्ण हरे कृष्ण बालकृष्ण श्रियः पते ।
हरे विष्णो हरे जिष्णो कृष्णकृष्ण रमापते' ॥४३॥
इत्येवं चोर्ध्वकण्ठेन चक्रे मे कीर्तनं रमे ।
अथाऽहं तस्य रक्षार्थं महिषीरक्षणाय च ॥४४॥
द्रागेव सिंहराजस्य रूपं केसरिणो महत् ।
सशुण्डं सन्दधारैव येन बिभ्यति वै द्रुतम् ॥४५॥
सिंहा व्याघ्रा गजाश्चापि शरभाः किमुत मृगाः ।
अतिक्रूरं विकरालं शुण्डादण्डधरं नवम् ॥४६॥
महाकेसरिराजस्य रूपं धृत्वा गतोऽभवम् ।
गर्जनां मेघवत् कृत्वाऽरण्यं पशूनकम्पयम् ॥४७॥
सिंहास्ते मां महासिंहं विद्युद्भाचक्षुषं नरम् ।
समस्तसिंहजातीनां राजानं च भयंकरम् ॥४८॥
शतोर्ध्वबलिनं श्रुत्वा भयं चापुर्महावने ।
अथाऽहं सहसाऽरण्यादुत्प्लुत्याऽऽकाशमेव तु ॥४९॥
शतहस्ताऽम्बरं विध्वा न्यपतं सिंहसन्निधौ ।
तावत् सिंहा महाभीतिनष्टधैर्या ममाऽग्रतः ॥५०॥
सहसा मृत्युरूपस्य मुखात्ते समुपाद्रवन् ।
अरण्ये विविशुः सर्वे मद्भयेन मृगाधिपाः ॥५१॥

सिंहाधिपोऽहं सहसा विद्राव्य तान् मृगाधिपान् ।
धृतमानववेषोऽहं तूर्णमभवं गोचरः ॥५२॥
प्रसन्नवदनः शान्तः शंखचक्रगदाब्जवान् ।
सान्त्वयन् भक्तमहिषीर्भक्तं च सान्त्वयन्नपि ॥५३॥
अन्तिकं प्रययौ सारंगोऽपि दृष्ट्वा हरिं च माम् ।
मुमुदे प्राप्तजीवश्च तुष्टाव परया मुदा ॥५४॥
पपात पादयोश्चापि महिषीर्निर्भयै रवैः ।
बोधयामास सर्वाश्च महिष्यो निर्भया अपि ॥५५॥
मुमुदुः सुखवत्यश्च जातास्तत्र नरद्वयात् ।
प्राप्तधैर्याः समभवन्नथ सारंगभक्तराट् ॥५६॥
लक्ष्मि दुग्धं प्रदुह्यैव पाययामास मे तदा ।
पपौ चाऽहं महिषीणां सर्वासां दुग्धमुत्तमम् ॥५७॥
ततः सारंगभक्तेन साकं महिषीभिस्तथा ।
शनैः शनैरगच्छं तद्घोषं भूधरीगोपुरे ॥५८॥
आप्रातस्तत्र मुदितो न्यवसं भक्तपूजितः ।
भक्तानिकया तत्पत्न्या सेवितोऽन्यैश्च हूणकैः ॥५९॥
नामसंकीर्तनाद्यैश्च पादसंवाहनादिभिः ।
जलार्पणैस्तथा चान्यमहोत्सवैः प्रतोषितः ॥६०॥
अथ प्रातः साधुरूपोऽभवं सूर्यप्रभागमे ।
सेवितस्तैः समस्तैश्च भोजनैः पुष्पगन्धिभिः ॥६१॥
पृष्टोऽहं हूणभक्तैश्च कल्याणाय तथा रमे ।
पापप्रणाशनार्थाय तेभ्यश्चोपादिदेश च ॥६२॥
शृण्वन्तु मम भक्ताः स्थ सर्वेऽपि स्थूलबुद्धयः ।
तथापि श्रेयसे यत्नं कुर्वन्तः सूक्ष्मबुद्धयः ॥६३॥
भवन्तः खलु विद्यन्ते मोक्षधीः सूक्ष्मधीर्हि सा ।
स्वश्रेयसे य उद्युक्तास्ते वै सुसूक्ष्मबुद्धयः ॥६४॥
लौकिकव्यवहारेषु निपुणाश्चेत् स्वश्रेयसे ।
सुप्ता यदि ते मूर्खा वै स्थूलधियो मताः सदा ॥६५॥
मायावृता जडा मूर्खाः कथ्यन्ते पशुसदृशाः ।
अपि राजा प्रधानो वा गुरुर्वा शिक्षकोऽपि वा ॥६६॥
अधीतविद्यो वा स्याच्चेद् यतते न स्वमुक्तये ।
स एव स्थूलबुद्धिर्वै मूर्खो याम्यं गमिष्यति ॥६७॥
मम भक्तौ वर्तमाना दिव्यास्ते मानवाः स्त्रियः ।
अभक्ता ये ते तु बोध्या निरयस्थाः पशुप्रभाः ॥६८॥
मम भक्ताः स्वनेत्राभ्यां लभन्ते दर्शनं मम ।
अप्राकृते हि तन्नेत्रे बाध्ये मद्योगतः सदा ॥६९॥
भक्तचित्ते हरिश्चाऽहं वसामि दिव्यमेव तत् ।
भक्तानां वर्ष्म दिव्यं चेन्द्रियाणि दिव्यकानि च ॥७०॥

अन्तःकरणं दिव्यं च क्रिया दिव्याः सदा तथा ।
अहमक्षरधामस्थो वसामि भूतले क्वचित् ॥७१॥
क्वचिदत्र समायातो भवामि भक्तसदृशः ।
तथापि दिव्य एवाऽस्मि भवन्तो दिव्यमूर्तयः ॥७२॥
दिव्याश्च महिष्यः सर्वा भक्ता दिव्या नराः स्त्रियः ।
सर्वात्मात्मा स्वतन्त्रोऽहं सर्वशक्तिपतिः प्रभुः ॥७३॥
परात्परतरश्चास्मि राधालक्ष्मीपतिर्हरिः ।
सर्वकारणरूपश्च व्यतिरिक्तश्च धामनि ॥७४॥
स एवाऽहं साधुरूपो भवाम्यत्र सुगोचरः ।
मम योगेन वल्लभ्यो हूण्यश्च दिव्यतां गताः ॥७५॥
वश्च बाह्यान्यान्तराणि करणान्यखिलान्यपि ।
तादात्म्यं प्राप्य मां साक्षात्पश्यन्ति दिव्यकानि तत् ॥७६॥
अमायिकेन दृश्योऽहं नान्यथा तु कदाचन ।
कृपया च स्वयं भक्ता ग्राह्योऽस्मि नेतरेण वै ॥७७॥
मायातत्त्वानि सर्वाणि दिव्यतां यान्ति मत्स्पृशेः ।
पञ्चविंशो हि जीवात्मा मुक्तो भवति मद्युजेः ॥७८॥
षड्विंशोऽहं च भगवान् पुरुषोत्तम एव यः ।
वशे भवामि भक्तस्य सर्वावतारकारणम् ॥७९॥
मायागुणरहितोऽस्मि दिव्यमद्गुणमण्डितः ।
ईश्वराद्यैः पूजितश्च भक्तमध्ये च तादृशः ॥८०॥
मां भजित्वा सेवयित्वा मत्वा दिव्यं नरायणम् ।
यान्ति धामाऽक्षरं भक्ता दिव्यपार्षदसेवितम् ॥८१॥
स्त्रियो मद्योगमापन्ना भवन्ति दिव्यविग्रहाः ।
गावो महिष्यो वृषभा मद्योगे दिव्यतां गताः ॥८२॥
कन्यका मम योगेन ऋषयः साधवस्तथा ।
कुमारा अपि गोपाला दिव्यतां मत्समां गताः ॥८३॥
अपि ब्रह्मप्रियाः पत्न्यो वृक्षाश्च वल्लिकास्तथा ।
मम योगेन दिव्यास्ता मत्समाः परिवर्तिताः ॥८४॥
मां भजन्तु ततो नित्यं पाययन्तु जलं पयः ।
फलं मूलं च कन्दं च मिष्टान्नं पत्रमित्यपि ॥८५॥
प्रातर्भक्तिं प्रकुर्वन्तु मध्याह्ने सायमित्यपि ।
रात्रौ दिवा च मां कृष्णं स्मरन्तु सर्वकर्मसु ॥८६॥
साधूनां सेवनं नित्यं कुर्वन्तु चान्नवारिभिः ।
भजनं कीर्तनं मे च कुर्वन्तु नित्यमुत्सुकाः ॥८७॥
मुक्तिमन्तेऽक्षरे लोके दास्ये गोपीपतिस्त्वहम् ।
स्वर्गभोगाँस्तु निपुणान् सकामेभ्यः सुखावहान् ॥८८॥
इत्युक्त्वा च महाशंखं दत्वा यद्घोषतः सदा ।
हिंसा दूरं प्रयास्यन्तीत्युक्त्वा लब्ध्वा प्रपूजनम् ॥८९॥
तिरोऽभवं वनाल्लक्ष्मि ते च सारंगहूणकाः ।
सुखिनश्चाऽभवँश्चान्ते धामाऽक्षरं प्रपेदिरे ॥९०॥
एवं ये वनवासा वा ग्रामवासाः पृथग्गृहाः ।
दीना वापि नरा नार्यो ये भजन्ते हरिं तु माम् ॥९१॥
तानुद्धरामि कष्टाद्वै स्मृतमात्रः प्रभुस्त्वहम् ।
भुक्तिं मुक्तिं ददाम्येवाऽऽनन्दितां शाश्वतीं स्थितिम् ॥९२॥
पठनाच्छ्रवणादस्य स्मरणादपि पापिनाम् ।
पापनाशो भवेन्मुक्तिर्भवेद् रक्षा च शाश्वती ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने सारंगनामकस्य हूणभक्तस्य महिषीपशुधनस्याऽरण्ये सिंहकृतापदः श्रीहरिणा रक्षणं कृतं मोक्षश्चेत्यादि-निरूपणनामा नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथां भक्तस्य चाऽपराम् ।
पुष्कसो नामतो यज्ञराधो विराधखेटगः ॥ १ ॥
आनर्तेष्वभवद्भक्तः समुद्रखाडिकातटे ।
नौकानां वस्तुपूर्णानामागमो विगमस्तथा ॥ २ ॥
यत्र प्रजायते नित्यं तत्र मार्जनकर्मणि ।
नियुक्तः स महानौकाध्यक्षेण जीविकाऽवितः ॥ ३ ॥
नौकानां तटभूमीनां कचराणां प्रमार्जनम् ।
करोति नित्यमेवाऽयं पत्न्या साकं स्थले स्थले ॥ ४ ॥
नौकाधीशास्तथा चान्ये श्रेष्ठिनः कर्मचारिणः ।
शेषान्नभोजनं चास्मै ददत्यपि कृपालवः ॥ ५ ॥
शाकं पत्रादिकं चापि रोटकं च पयोऽपि च ।
भर्जितान्नं च पक्वान्नं वस्त्रादिकं ददत्यपि ॥ ६ ॥
एवं प्रायेण भक्तोऽयं तथा सद्वेतनेन च ।
निर्वहत्येव नित्यं वै स्वकार्यकुशलः सदा ॥ ७ ॥
यद्यत् संप्राप्यते तत्र जलप्रोक्षणमुत्तमम् ।
कृत्वा धृत्वा च तुलसीदलं स्मृत्वा च मां तदा ॥ ८ ॥
समर्प्य मह्यं मनसा भुंक्ते पाति न चान्यथा ।
प्रातर्नित्यं पिप्पलस्य वृक्षमूले हरिं च माम् ॥ ९ ॥
पूजयत्येव संस्मृत्वा जलान्नफलपत्रकैः ।
मध्याह्नेऽपि तथा सायं मां स्मृत्वा स भुनक्ति ह ॥१०॥
रात्रौ कृत्वा मिलित्वैव कीर्तनं मां स्मरँस्तथा ।
मालामावर्तयन् भक्तो निद्राति स्त्री सुतः सुता ॥११॥
एवंविधस्य भक्तस्य नित्यं वै विघसाशिनः ।
दत्वा शुने गवे काकेभ्यश्च पुष्कसजातये ॥१२॥

पिपीलिकाभ्यो दत्वा च दत्वाऽम्बरे सुराय च ।
भुंक्तेऽयं विघसाशी वै दत्वा मत्स्येभ्य इत्यपि ॥१३॥
पश्यत्येव हरिं सर्वप्राणिषु पुष्कसोऽपि सः ।
सर्वंब्रह्मात्मविज्ञानो भक्तराज्ज्ञानवाँस्तथा ॥१४॥
पुष्कसं तु शरीरं वै सदा मलस्य भाजनम् ।
सर्वदेहास्तथा सन्ति मलपात्राणि सर्वथा ॥१५॥
यदि शुद्धा न मनसि समानाः पुष्कसा यतः ।
मनः शुद्धं यस्य तस्य पुष्कसत्वं विलीयते ॥१६॥

गर्भे बालो न शुद्धोऽस्ति चाऽशुद्धद्वारसेवनः ।
अशुद्धाश्च तथा जन्म जन्मोत्तरमशुद्धिमान् ॥१७॥
शौचहीनस्तथा नित्यमशुद्धः कल्मषान्वितः ।
मनोमालिन्ययुक्तश्च कामक्रोधादिकल्मषः ॥१८॥
स्वार्थकापट्यभावश्च वासनावासितो मली ।
अशुद्ध एव देहाढ्यो मानेर्ष्यामत्सरान्वितः ॥१९॥
अहन्ताममतायुक्तः प्रमादमोहकर्षितः ।
अशुद्ध एव स्त्रीपुत्रपरिवारनिबन्धनः ॥२०॥

अविद्यारागसंसक्त्यभिनिवेशादिकल्मषः ।
अस्मितादिभृतश्चापि भोगविलासपापवान् ॥२१॥
रोगव्याधिजरामृत्युमहाकष्टानुयोगवान् ।
देहोऽयं पुष्कसः प्रोक्तश्चिदात्माऽहं न पुष्कसः ॥२२॥
सर्वे देहाः पुष्कसा वै नाऽऽत्मा पुष्कसः कर्हिचित् ।
ब्रह्मात्मा निर्मलः शान्तः शुद्धो भक्तः समुज्ज्वलः ॥२३॥
परमेशप्रतापेन सच्चिदानन्दबोधवान् ।
मुक्तो बन्धनहीनश्च सदाऽहं मोक्षभागिह ॥२४॥

एवं लक्ष्मि प्रजानाति पुष्कसोऽपि निजं सदा ।
मुक्तवद् वर्तते नित्यं मम ध्यानपरायणः ॥२५॥
भगवन्निष्ठ एवाऽयं तथाऽऽत्मनिष्ठ उत्तमः ।
न स्वार्थोऽस्य न वै व्याधिर्मानसोऽपि मनागपि ॥२६॥
एतादृशस्य भक्तस्य वद लक्ष्मि कथं न वै ।
करोमि रक्षणं चित्ताह्लादनं चेष्टपूरणम् ॥२७॥
मम लक्ष्मि सदा तुल्या जीवा देवास्तथेश्वराः ।
सर्वे पुत्रा ममैवाऽत्र मायायां सन्ति देहिनः ॥२८॥

विप्रो नृपो दीनजनः पुष्कसः स्त्री नपुंसकः ।
पशुः पक्षी कीट आर्तो वृक्षो वल्ली च वै तृणम् ॥२९॥
सर्वं पुत्रात्मकं मेऽस्ति यादः पतंग इत्यपि ।
भजन्ते मां तु ये सेवामग्रास्तेषां विशेषतः ॥३०॥
पिताऽस्मि रक्षको धाता पाता नेता परं पदम् ।
अन्येषां तु कृतस्यैव फलदः साक्षिरूपवान् ॥३१॥

अथैकदा तु भक्तस्य संकल्पोऽपि व्यजायत ।
नारायणः कथं साक्षाद् भवेन्नेत्रस्य गोचरः ॥३२॥
श्रुतं तेन ततः साधोर्मुखात् साधौ हरिः स्वयम् ।
वर्तते सत्पुरुषस्य सेवया गोचरो भवेत् ॥३३॥
अथाऽयं यज्ञराधो वै मार्गयत्येव सेवनम् ।
यत्र साधुः श्रूयते च तत्स्थलं स प्रयाति वै ॥३४॥
चमत्कारपुरे श्रुत्वा साधुं नागमतीतटे ।
ययौ तीर्थस्य मिषवान् सस्नौ नद्यां तु भावतः ॥३५॥

नागनाथस्य तीर्थे वै साधुं ददर्श तापसम् ।
व्यवस्थापारगं दिव्यं ब्रह्मनिष्ठं हरिप्रियम् ॥३६॥
नाम्ना ब्रह्मायनं शान्तं महर्षिं त्यागिनं मुनिम् ।
आसने ध्यानमग्नं च ब्रह्मणि ध्यानिनं तदा ॥३७॥
गत्वा पुरो ननामाऽसौ दण्डवत् प्रचकार ह ।
घटीमात्रं पुरस्तस्थौ कृताञ्जलिश्च निश्चलः ॥३८॥
घटिकाऽन्ते साधुवर्यो ध्यानाद् बहिरुपाययौ ।
ददर्श पुरतो भक्तं पुष्कसं यज्ञराधकम् ॥३९॥

यज्ञराधः प्रणम्यैव तस्थौ कृताञ्जलिस्तथा ।
साधुना 'कुशलं तेऽस्तु' प्रोच्य निषद्य बोधितः ॥४०॥
सोऽपि भावेन बहुना निषसाद पुरः सतः ।
पप्रच्छ गुणवृद्ध्यर्थं सत्संगत्यर्थमित्यपि ॥४१॥
परमेशस्य लाभार्थं साक्षाद्वै साधनानि हि ।
ब्रह्मायनो मुनिः श्रुत्वा मुमोदात्मपरात्मवान् ॥४२॥
स्मृत्वा नारायणं मां च जगादोपादिदेश तम् ।
शृणु भक्त सतां गुणान् गृह्णन्ति ये जनास्त्विह ॥४३॥

गुणवन्तो भवन्त्येते सन्तो हि गुणसागराः ।
सतां दोषान् प्रगृह्णन्ति दुष्टास्ते तु भवन्ति वै ॥४४॥
सतां समागमे नित्यं गुणा आयान्ति भाविनः ।
सतां गुणानां ग्रहणे माहात्म्यवेदनेऽनिशम् ॥४५॥
वर्धन्ते स्वगुणा रम्याः सिद्धदशाप्रदाः शुभाः ।
नैव ग्राह्याः सतां देहदोषाः क्वाचित्कसंभवाः ॥४६॥
दोषाग्राहा भवन्त्येव गुणिनोऽपि तु दोषिणः ।
अचिरेण महापापाद् गुणा नश्यन्ति मूलतः ॥४७॥
अतः सतां सद्गुणा वै ग्राह्या न त्वगुणाः क्वचित् ।
स्वल्पदुर्गुणग्रहणे विनष्टिर्महती भवेत् ॥४८॥
सतां समागमेनैव वर्धन्ते गुणकोटयः ।
भागवतास्तथा धर्मा वर्धन्ते सत्समागमात् ॥४९॥
सतामेकान्तिकानां वै सेवनाद् दिव्यता भवेत् ।
सतां संगतिः स्नेहेन जायते देहिनामिह ॥५०॥

साधवो मोक्षदाः सन्ति सर्वपापविनाशकाः ।
इष्टदाः सन्ति सन्तश्चेत्यवगत्य सतां पुरः ॥५१॥
दासवद् वर्तते नित्यं तस्य सत्संगतिर्भवेत् ।
ऐकान्तिकाः सर्वधर्माः पुष्यन्ति सत्समागमात् ॥५२॥
वैराग्यं जायते चात्मपरात्मनोश्च वेदनम् ।
माहात्म्यज्ञानसहिता भक्तिर्हरौ भवेत्ततः ॥५३॥
आश्रयोऽपि दृढः स्याच्च कृष्णार्थाः सकलक्रियाः ।
बाह्यान्तःकरणानां च व्यापारा भगवन्मयाः ॥५४॥
भवन्त्येव हि भक्तस्य मोक्षद्वारमपावृतम् ।
जायते धामदं श्रेष्ठं महामार्गगतिप्रदम् ॥५५॥
स्त्रीधनादौ महासंगो देहिनो दुर्जरोऽस्ति यः ।
सत्सु तथैव च कृतो मोक्षं ददाति देहिने ॥५६॥
स्नेहः सत्सु सदा कार्यः स्त्रीपुत्राद्यधिकः खलु ।
स्नेहेन सत्सु लग्नानां मुक्तिर्भवति शाश्वती ॥५७॥
सत्सेवायां महाश्रद्धा कार्या नार्या नरेण च ।
सर्वात्मना कृता सेवा तारयत्येव मायिनम् ॥५८॥
सर्वार्पणकृता सेवा कृतार्थं कुरुते जनम् ।
सन्तः प्रसन्ना दद्युर्वै धामाऽक्षरं च दिव्यताम् ॥५९॥
देशः कालः शुभौ सेव्यौ संगः सेव्यः शुभस्तथा ।
क्रिया कार्या शुभा नित्यं मन्त्रो धार्यः शुभोत्तमः ॥६०॥
ध्यानं कार्यं हरेर्नित्यं सन्तो धार्याः सदा हृदि ।
दीक्षा ग्राह्या भागवती शरणं च हरेः सदा ॥६१॥
एवं वै वर्तमानस्य साक्षान्नारायणो भवेत् ।
असद्देशादिसंयोगे नष्टा भ्रष्टा मतिर्भवेत् ॥६२॥
सद्देशादिसमायोगे श्रेष्ठा शुद्धा मतिर्भवेत् ।
बलिष्ठपुण्ययोगेन सद्देशादि लभेज्जनः ॥६३॥
सत्संगो जायते तस्य दिव्यता जायते ततः ।
निर्मला यस्य बुद्धिर्न देशाद्या दोषिणस्तथा ॥६४॥
यस्य भवन्ति तस्याऽत्र पापं पूर्वकृतं महत् ।
उपस्थितं हि मन्तव्यं येन पापे प्रवर्तते ॥६५॥
यद्वाऽत्र महतां तेन सतां द्रोहः कृतोऽस्ति यत् ।
तत्फलं पापबुद्धिर्वै जाता पातकदायिनी ॥६६॥
तां विनाशयितुं सेवां कुर्यान्निश्छद्मभावतः ।
सतां प्रसन्नतां चापि प्राप्नुयात् सेवनं हरेः ॥६७॥
अथ यः पापवानस्ति स तु द्रोहं करोति हि ।
वदत्येव च नास्तिक्यभावेन निम्नगं वचः ॥६८॥
साधूनां किं भवेदत्र समागमेन वै भुवि ।
धूर्ता हि साधवः सन्ति मा कुर्वन्तु समागमम् ॥६९॥

एवं वदन्ति दुष्टा वै त्याज्यास्ते दूरतः सदा ।
तस्मात् संगः सतां कार्यः सतां संगो हि भेषजम् ॥७०॥
पापिसंगो न वै कार्यः पापिसंगो विषं परम् ।
दुःखी भजते श्रीनाथं दुःखहान्यर्थमेव तु ॥७१॥
अर्थार्थी त्वर्थसिद्ध्यर्थे ह्यैश्वर्यार्थी स वै भवेत् ।
आत्मनिष्ठोऽपि भजते कैवल्यार्थे हरिं सदा ॥७२॥
ज्ञानी तु भगवन्निष्ठः सेवते परमेश्वरम् ।
आत्मनिवेदी भगवन्निष्ठो हरेः प्रियो भवेत् ॥७३॥
साक्षात्कारो भवेत्तस्य हरिनिष्ठस्य भूतले ।
अस्य माहात्म्यविज्ञानं हरेर्भवति सर्वथा ॥७४॥
हरेः स्नेहोऽस्य बहुधा सर्वथा वर्ततेऽनिशम् ।
कृष्णेतराः समस्ता वासना नष्टा हि तस्य वै ॥७५॥
एकान्तिकानां सेवाभिर्नष्टाः समस्तवासनाः ।
भवन्त्येव ततो ज्ञानी भूत्वा सत्संगमाचरेत् ॥७६॥
अक्षराधिपतेः कृष्णनारायणस्य वेदनम् ।
माहात्म्यसहितं कुर्यात् सतां प्रसंगतः सदा ॥७७॥
मानं निर्मूलनीयं च सतां समागमात् सदा ।
मानिनो न प्रवर्धन्ते दिव्या गुणाः कदाचन ॥७८॥
मानी सेवां न कुरुते सतां वै निम्नकोटिगाम् ।
सदग्रे प्राञ्जलिर्न स्यान्न प्रशंसेद्गिरा सतः ॥७९॥
रंकवद्वर्तमानं च सन्तं न मानवान्नमेत् ।
मानो दोषो महानस्ति मानस्तम्भो हि नाशकृत् ॥८०॥
भक्तिज्ञानविरागाद्या वर्धन्ते नैव मानिनः ।
भक्तो गलितमानस्तु वर्धमानमहागुणः ॥८१॥
जायते तस्य हृदये साक्षान्नारायणो वसेत् ।
सतां हरेश्च नित्यं वै सेवया परिचर्यया ॥८२॥
मानो विलीयते तीव्रवैराग्याढ्यस्य वै द्रुतम् ।
ब्रह्मात्मभावनाभक्त्या हरिस्तस्मै प्रसीदति ॥८३॥
प्रसन्नस्य हरेर्मूर्तिः प्रसन्नाऽस्य हि दृश्यते ।
मधुरा हृदये मूर्तिर्बहिश्चापि हि दृश्यते ॥८४॥
निर्मानो भक्तराट् श्रेष्ठो भगवद्वल्लवान् मतः ।
भजते श्रीहरिं मानं हित्वाऽऽत्मब्रह्मनिष्ठितः ॥८५॥
आत्मनिष्ठा च भगवन्निष्ठा पक्वाऽस्ति यस्य वै ।
मायिकः सकलो व्याधिस्तस्याऽत्रैव विलीयते ॥८६॥
कथायाः श्रवणेनापि सतां प्रसेवया तथा ।
भक्त्या नारायणस्यापि तथोपासनया हरेः ॥८७॥
सिद्धदशामाप्नुवन्ति सार्वज्ञ्यं चेशतां तथा ।
उपासनाबलं स्वेष्टदेवस्य यस्य यादृशम् ॥८८॥

तादृशं जायते तस्य महद्दिव्यं सुखं परम् ।
मायिकं दुःखमत्यन्तं नाशमेति न संशयः ॥८९॥
व्रजांगनासमा प्रीतिर्येषां स्वामिनि माधवे ।
जायते सोऽमवर्ज्यैषां कर्तव्यं नाऽवशिष्यते ॥९०॥
सतां प्रसेवया कृष्णमाहात्म्यदृढता भवेत् ।
उपासनायाः सिद्धिश्च दृढा द्रागमितो भवेत् ॥९१॥
अक्षरे परमे धाम्नि योऽस्ति गोलोकधामनि ।
वैकुण्ठे श्रीपुरे चाऽव्याकृतेऽमृते च धामनि ॥९२॥
ब्रह्मपतिर्हरी राधापतिश्च कमलापतिः ।
ललिताश्रीपतिः रमापतिः श्रीपतिरीश्वरः ॥९३॥
अन्तर्यामी वल्लभश्च स एव भगवान् स्वयम् ।
समाधौ दृश्यते भक्त्या ततो बहिस्तु सेवया ॥९४॥
मिलत्येव हरिर्नारायणो मानवविग्रहः ।
प्राकृतेन जनेनापि समो भवति मानवे ॥९५॥
यत्तेजसाऽक्षरं ब्रह्म मुक्ता ईश्वरकोटयः ।
सूर्यचन्द्रादयस्तेजस्विनो भान्ति स एव सः ॥९६॥
धृतमानवरूपो वै प्रदीपेन विलोक्यते ।
सूर्यचन्द्रप्रभायां स दृश्यो भवति मानवैः ॥९७॥
देहान्तेऽपि महापापी यन्नामस्मरणाद् द्रुतम् ।
शुद्धो भवति निष्पापो मोक्षमार्गाय कल्पते ॥९८॥
स एव निरछद्मभक्तभक्त्या भवति गोचरः ।
भज तं परमात्मानं श्रीशं कृष्णनरायणम् ॥९९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जप मन्त्रं तथा ध्याहि हृदये बालकृष्णकम् ॥१००॥
जलं प्रासादिकं नित्यं पिब खाद निवेदितम् ।
स्मर ब्रह्मप्रियानाथं प्रभुं मोक्षमवाप्स्यसि ॥१०१॥
इत्युक्तः कमले तेन ब्रह्मायनेन पुष्कसः ।
ज्ञानं लब्ध्वा प्रपूज्यैनं गृहं निजं ययौ ततः ॥१०२॥
यथोक्तरीत्या भजते ध्यायति सेवते तथा ।
सतां सेवां करोत्येव पश्यति स्मरति प्रभुम् ॥१०३॥
यज्ञराधस्त्वेकदा तु पिप्पलस्य समीपतः ।
ददर्श साधुं रूपाढ्यं ब्रह्मायनसमं शुभम् ॥१०४॥
सहसा तं वीक्ष्य चक्रे दण्डवत् स्वागतादिकम् ।
कुशलं चापि पप्रच्छ साधुस्तं स्नेहमावहन् ॥१०५॥
भक्तः प्राह कुशलोऽस्मि साधुलाभाद् विशेषतः ।
आज्ञां कुरु यथा साधो सेवेऽहं सकुटुम्बकः ॥१०६॥
साधुः प्राह मया चाऽस्मात्स्थलाद् गन्तव्यमस्ति हि ।
अश्वपट्टसरस्तीर्थे यत्र कृष्णनरायणः ॥१०७॥
सहसार्थो भवान् भूत्वा समागच्छतु वै मया ।
तथाऽस्त्विति पुष्कसः स स्वीकृत्य निर्ययौ सह ॥१०८॥
कुटुम्बेन समस्तेन सहितोऽपत्यबालकैः ।
तावत्तूर्णं विमानं चागतं दिव्यं तदाम्बरात् ॥१०९॥
अहं लक्ष्मि स्वयं चाऽऽसं मोक्षदोऽस्मै कृपावशः ।
आदाय तान् विमाने वै दिव्यान् कृत्वा हि पार्षदान् ॥११०॥
भौतिकदेहान् त्याजयित्वाऽहं निन्ये निजाऽक्षरम् ।
शाश्वतं ते पदं प्राप्ता भक्ता मे दिव्यमूर्तयः ॥१११॥
इत्येवं कृतवाँस्तेषां कल्याणं सत्समागमात् ।
सर्वे जीवा भजन्ते मां ये ते भवन्ति तादृशाः ॥११२॥
पठनाच्छ्रवणादस्य स्मरणाच्छ्रावणादपि ।
भुक्तिर्मुक्तिर्भवत्येव दिव्यगतिश्च सम्पदः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने यज्ञराधनामकपुष्कसस्य सकुटुम्बस्य ब्रह्मायनर्षिसाधोः समागमेन श्रीहरिभक्त्या मोक्षप्राप्तिरित्यादिनिरूपणनामा दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं चाण्डालस्य कथामपि ।
रायणाग्रमवसतेर्नाम्ना कपिक्षयस्य वै ॥ १ ॥
कपिक्षयो हि चाण्डालो रैवताचलसन्निधौ ।
अभवत् सकुटुम्बः स रायणायां सुनीतिमान् ॥ २ ॥
प्रथमं जातिदोषेण हिंस्रोऽभवद् वने भ्रमन् ।
वानरान् वनजान् रक्तान् मारयित्वा स खादति ॥ ३ ॥
अतस्त्वन्यवनेवासैः कपिक्षयेतिबोधितः ।
वानरमारनाम्नैव प्रसिद्धिमगमद्वने ॥ ४ ॥
अथैकदा वने वृक्षषण्डे स्थितं तु मण्डलम् ।
वानराणां महद्वीक्ष्य तान् हन्तुं शरमादधे ॥ ५ ॥
यावन्मुक्तो न वै बाणस्तावद्वानरसत्तमः ।
दिव्यवाण्या जगादैनं शृणु त्वं श्वपचोत्तम ॥ ६ ॥
श्रुत्वा यथेष्टं यात्रार्थं समाचर निबोध मे ।
पुरा त्वं वृषलीगामी द्विजो वेश्यारतोऽभवः ॥ ७ ॥
नाम्ना प्राशेश्वरो विप्रो धर्मकर्मादितत्परः ।
शृंखलाग्रामवास्तव्यो यत्र हिंस्रा जना अपि ॥ ८ ॥
वसन्ति स्म च तत्संगात् तेषामन्नस्य योजनात् ।
दानमानसहवासान्मनस्ते हिंसकं ह्यभूत् ॥ ९ ॥
देशकालक्रियावाणीसहायानामसत्तया ।
असत्ते हृदयं जातं पापप्रियं शनैः शनैः ॥१०॥

ब्राह्मणस्य शुभो देहस्त्वया वेश्यासमागमात् ।
अधर्मे योजितश्चाप्यभक्ष्याऽपेयादिभिस्तथा ॥११॥
क्षुद्रक्रियापरो जातो मद्यमांसपरायणः ।
अथ कालेन मरणं तव जातं ततो भवान् ॥१२॥
ययौ याम्यपुरं तत्र भुक्तवान् यमयातनाः ।
अवशिष्टेन पापेन चाण्डालोऽत्र प्रवर्तते ॥१३॥
सा वेश्या वृषली तेऽत्र भार्याऽपि सहगाऽस्ति वै ।
सहमित्राणि पापानि ते तेऽत्र सुतबान्धवाः ॥१४॥
वर्तन्ते चाण्डालयोनौ पापाः पापनिबन्धनाः ।
पापानि त्वं पुरा कृत्वा चाण्डालत्वमुपेयिवान् ॥१५॥
ब्राह्मणत्वं त्वया. पूर्वं मलवन्मलिनीकृतम् ।
विनाशितं महत्पुण्यं स्वर्गं च मोक्षणं तदा ॥१६॥
इदानीं च पुनस्त्वं वै वर्तसे मांसभोजने ।
घातको वानराणां यन्नरघ्नो भवसि ध्रुवम् ॥१७॥
वानरा नरमानुष्यास्तत्पापं नरघातजम् ।
बालघातित्वमेवापि स्त्रीघातित्वमपि ध्रुवम् ॥१८॥
जायते तव चाण्डाल मानवे दुर्लभे पुनः ।
उदरार्थे कुटुम्बार्थे कुरुषे हिंसकर्म यत् ॥१९॥
पुनस्ते यातनाः सन्ति याम्याश्चाधोगतिः पुनः ।
यैः पूर्वं पातितस्त्वं वै तत्कृते यतसे पुनः ॥२०॥
कीदृशो मूर्खवर्योऽसि को लाभस्ते निपातिभिः ।
पश्य मूर्ख मनुष्यस्य सार्थक्यं धर्मकर्म वै ॥२१॥
तथा पश्य निजं मोक्षं पापानां नाशनं सुखम् ।
तीर्थे स्वर्णावतीनद्यां दामोदरं नरायणम् ॥२२॥
पश्य पुण्यं कुरु द्राक् च त्यज हिंसां सुखी भव ।
भवाऽत्र पावनो भक्तो भज कृष्णनरायणम् ॥२३॥
नारायणह्रदे स्नात्वा कुरु सर्वाघनाशनम् ।
संस्नात्वा रेवतीकुण्डे कुण्डे तथा च वामने ॥२४॥
कुंकुमवापिकाक्षेत्रे चाश्वपट्टसरोवरे ।
स्नात्वा श्रीसोमतीर्थे च सरस्वत्यां सुखी भव ॥२५॥
मूलद्वारवतीपुर्यां स्नाहि याहि दिवं ततः ।
गोपनाथं शुभं तीर्थं कृत्वा याहि गवायनम् ॥२६॥
रे मूढ भज गोविन्दं श्रीपतिं कृष्णवल्लभम् ।
दयां कृत्वा वृषं धृत्वा कृत्वा भक्तिं हरेस्तथा ॥२७॥
याहि ब्रह्मपरं लोकं सनातनं च शाश्वतम् ।
कुंकुमवापिकातीर्थे वर्तते परमेश्वरः ॥२८॥
दिव्यमानुषदेहो वै ब्रह्मप्रियापतिः कृतिः ।
स एव भगवान् जगत्स्रष्टा पाताऽन्तरस्थितः ॥२९॥
राधालक्ष्मीपतिः श्रीमद्बालकृष्णः परेश्वरः ।
सेवितो नरनारीभिर्वर्तते मानवो यथा ॥३०॥
देहान्तेऽपि महापापी तस्य स्मरणमात्रतः ।
सर्वपापविनिर्मुक्तो याति धामाऽक्षरं परम् ॥३१॥
तं गत्वा भज गोपालबालकं कम्भरासुतम् ।
आत्मवन्तं परेशं तं समाश्रय हृदि स्थितम् ॥३२॥
राधारमापतेस्तस्य माहात्म्यज्ञानमञ्जसा ।
साक्षात्कर्तव्यमेवाऽतो मुक्तिर्भवति शाश्वती ॥३३॥
गाढस्नेहाद् भगवति प्रसन्नत्वं प्रजायते ।
तेन मुक्तिः करगता भगवद्धामदायिनी ॥३४॥
स्नेहः कार्यः सर्वथा वै शृणु चाण्डाल वच्म्यहम् ।
नवोढाया यथा पत्यौ तथा चाद्ये सुते यथा ॥३५॥
यथा मातरि बालस्य लोभिनस्तु धने यथा ।
क्षुधितस्य यथाऽन्ने च भयभीतस्य रक्षके ॥३६॥
यादसां तु जले यद्वत् पतंगस्याऽनले यथा ।
तथा स्नेहः सदा कार्यः परमेशे सुखप्रदे ॥३७॥
त्वचा स्प्रष्टव्य ईशेशो भालनीयश्च चक्षुषा ।
श्रोतव्यश्चापि कर्णाभ्यामास्वाद्यश्चुम्बनादिभिः ॥३८॥
गन्धस्तस्यैव चाऽऽदेयो रूपं ग्राह्यं हरे सदा ।
आश्लेषणीयो भगवान् कीर्तनीयश्च माधवः ॥३९॥
आनन्दनीयः श्रीकृष्णः सर्वार्पणं हरौ तथा ।
कर्तव्यं च हरेर्गुणग्रहणं कार्यमन्वहम् ॥४०॥
माहात्म्यगुणवित्त्याद्यैः स्नेहः कृष्णे प्रजायते ।
यद्वा साहजिकः स्नेहो भक्तस्यैव प्रजायते ॥४१॥
यथा स्त्रीपुत्रवित्तादौ तथा कृष्णनरायणे ।
स्नेहं साहजिकं प्राप्तो ब्रह्मभूयाय कल्प्यते ॥४२॥
नैसर्गिकस्नेहवन्तो भवन्ति दिव्यबुद्धयः ।
दिव्यक्रियाश्च हर्यर्थे स्नेहस्तेषां प्रपुष्यति ॥४३॥
स्नेहस्य पोषणे विघ्नो मानं चेत्तत्र वर्तते ।
नाशनीयं सर्वथा तच्छ्रेयोऽध्वनि विघातकृत् ॥४४॥
दुःस्वभावाः समस्ता वै नाशनीयाः प्रयत्नतः ।
अतिशत्रुधिया ते वै नाशनीया मुमुक्षुणा ॥४५॥
मित्रवद् देहवासा ये दुःस्वभावास्तु ते यदि ।
मोक्षे विरोधिनः स्युश्छेत्तव्याः सत्समागमैः ॥४६॥
सत्संगः सर्वदा कार्यः सतां संगो महौषधम् ।
आत्माऽस्मि बलवान् कृष्णसहायवान् सुधर्मवान् ॥४७॥
यदिच्छति करोत्येव समर्थो मुक्तयेऽपि च ।
रजसां तमसां वेगानुन्मूलयेद्धरिश्रितः ॥४८॥

देहाध्यासः कुसंगश्च पूर्वकृत्कर्मसञ्चयः ।
मायामोहकराः सन्ति हन्तव्याः सत्समागमैः ॥४९॥
विवेकेन प्रहन्तव्यो देहाध्यासः सतां मुखात् ।
सत्संगेन कुसंगश्च हन्तव्यः सत्समागमात् ॥५०॥
पूर्वजन्मकृताः सर्वे संस्काराः पापकारिणः ।
हन्तव्यास्ते सतां नित्यप्रसक्त्या महतामिह ॥५१॥
अतिपापस्य पुंसस्तु पापफलं प्रपीडनम् ।
आपदश्च समायान्ति तदा तन्नाशहेतवे ॥५२॥
इतस्ततो धावति द्राक् समन्ताद्धनदो भवन् ।
तथापि विपदो यान्ति वृद्धिं दूरे न यान्ति च ॥५३॥
अथ भग्नमना भूत्वा याति दुःखतरं जनम् ।
श्रुत्वा साधुं च वा वृद्धं निवेदयति चापदः ॥५४॥
साधोस्तु वचनं प्राप्य करोति व्रतपूजनम् ।
सत्संगं भजनं चापि सेवां स्मरणं शार्ङ्गिणः ॥५५॥
एवं बीजबलेनाऽस्य लीयन्ते कल्मषाणि वै ।
अकल्मषं च हृदयं जायते निर्मलं ततः ॥५६॥
भक्तियोग्यं तत्र कृष्णः सतां वाण्या विराजते ।
प्रकाशते शनैश्चापि पुण्यः प्रजायते जनः ॥५७॥
एवं वै शुभतां यान्ति संस्कारा मलिना अपि ।
चाण्डालो विप्रतां याति दुष्टः सुजनतां तथा ॥५८॥
प्रसादेन सतां रंको राजतां लभते द्रुतम् ।
प्रसादेन सतां मूर्खः पाण्डित्यं लभते तथा ॥५९॥
प्रसादेन सतां पापी पुण्यं स्वर्गं प्रविन्दति ।
प्रसादेन सतां दुष्टो जायते पंक्तिपावनः ॥६०॥
अतिप्रसन्नताप्राप्त्यै साधूनामग्रतः सदा ।
निश्छद्म वर्तितव्यं वै यथाऽनुवृत्तिमेत्य तु ॥६१॥
यत्र यत्र रुचिस्तेषां तत्तत् साध्यं विशंकया ।
यत्र यत्राऽरुचिस्तेषां तत्तत् त्याज्यं द्रुतं सदा ॥६२॥
मानं च लोकलज्जां च गुणगर्वं विहाय वै ।
सतां दास्यं प्रकर्तव्यं धार्यं वचः सतां हृदि ॥६३॥
सतां प्रसादे विघ्ना ये भवन्ति सेवनेऽपि च ।
सर्वे ते दुर्गुणास्त्याज्या ग्राह्याः प्रसन्नताप्रदाः ॥६४॥
गुणा यैः स्युः प्रसन्ना वै सन्तस्ते तु गुणा मताः ।
धर्मः स एव प्रोक्तोऽस्ति येन प्रसन्नता भवेत् ॥६५॥
सतां चाऽप्रीतिहेतुर्यः स तु दुर्गुण एव वै ।
हेयः स एव भक्तेन कार्या प्रसन्नता सताम् ॥६६॥
अनुकूले दासभक्ते प्रसीदन्ति हि साधवः ।
सतां गुणानां ग्रहणैर्दोषा नश्यन्ति हृद्गताः ॥६७॥
सन्तो महान्त सेव्यास्ते दिव्यतासंविधायिनः ।
गुणानां ग्रहणे भक्तिर्वर्धते परमात्मनि ॥६८॥
सतां निष्कामित्वगुणग्रहे निष्कामितां व्रजेत् ।
सतां निःक्रोधतागुणग्रहे निःक्रोधतां व्रजेत् ॥६९॥
सतां निर्लोभतागुणग्रहे निर्लोभतां व्रजेत् ।
सतां निर्मोहतागुणग्रहे निर्मोहतां व्रजेत् ॥७०॥
सतां दिव्यरूपगुणग्रहे दिव्यसुरूपवान् ।
भवेत् सतां भगवत्त्वगुणग्रहे भवेत्तथा ॥७१॥
महैश्वर्यादिशाली वै भवेद् भक्त्या तथोत्तमः ।
अन्यत्राऽरुचिरस्याऽस्ति कृष्णे सत्सु रुचिः सदा ॥७२॥
भावः कृष्णे सत्पुरुषेऽन्यत्राऽभावोऽस्य वर्तते ।
एवंविधस्य वो दास्यं हरौ सत्सु प्रवर्धते ॥७३॥
वर्धमानं परं दास्यं निर्मलं प्रीतिहेतुकम् ।
विवर्तते वै स्वामित्वे स्वामिनः कृपया क्वचित् ॥७४॥
यथा शिष्ये सेवके वा स्वामित्वं कृपया भवेत् ।
तथा दासे दास्यभावः स्वामिभावत्वमाव्रजेत् ॥७५॥
हरेरग्रे सतामग्रेपक्षपातो न विद्यते ।
स्त्री शूद्रो वापि चाण्डालो भक्त्या याति परां गतिम् ॥७६॥
इत्येवं वानरेणापि लक्ष्मि कपिक्षयो वनी ।
प्रबोधितस्तदाऽऽश्चर्यं प्राप्तवान् बोधमाप्तवान् ॥७७॥
कृतकृत्यं निजात्मानं मेने वै पुण्यभागिनम् ।
येन वै वानराल्लब्धं ज्ञानं मोक्षप्रदं शुभम् ॥७८॥
अथाऽयं प्रतिपप्रच्छ वानरं को भवानिह ।
ज्ञानदो मोक्षदश्चापि हिंसादिदोषनाशकः ॥७९॥
मायादोषहरश्चापि सर्वाऽज्ञानविनाशकृत् ।
वने त्वं चरसि कोऽत्र वद मे तु यथातथम् ॥८०॥
धन्योऽहं कृतकृत्योऽहं जातोऽस्मि तव वाक्यतः ।
विशेषतो भविष्यामि विदित्वा त्वां च पावनः ॥८१॥
श्रुत्वैवं वानरः प्राह वयं चेमे वनेचराः ।
वानरा रक्तवर्णा ये ते सर्वे स्वर्गदेवताः ॥८२॥
भवामो दिव्यदेहाश्च सर्वे स्वर्गनिवासिनः ।
स्वर्गे पुण्यं प्रभुञ्जामः क्षयं पुण्यं प्रयाति च ॥८३॥
नूतनं नाऽर्ज्यते तत्र भोगभूमिर्यतो दिवम् ।
कर्मभूमिः पृथिवीयं पुण्यं चात्र कृतं मिलेत् ॥८४॥
पुण्यार्थं वानरैः रूपैः पर्वते रैवताचले ।
फलपत्रादिकं लब्ध्वा देवार्पणं प्रपूजनम् ॥८५॥
कृत्वा भुंक्ष्महः प्रसादं वै पावनं मोक्षदं शुभम् ।
जलं च स्वर्णरेखाया नारायणहृदात्तथा ॥८६॥

दामोदरह्रदात् पीत्वा वर्षयामः सुपुण्यकम् ।
तीर्थे स्नात्वा भाविमोक्षं चेच्छामो मोक्षकामिनः ॥८७॥
न वयं वानराः किन्तु देवा वानररूपिणः ।
स्वर्गान्ते मानवे लोके जन्म यथा न वै भवेत् ॥८८॥
मोक्षो भवेद् यथाऽस्माकं तथा कुर्मोऽत्र तीर्थकम् ।
भवानपि तथा तीर्थं करोतु वै फलादनः ॥८९॥
कुटुम्बेन सहितस्त्वं प्रयास्यसि परां गतिम् ।
लोमशं योगिनं गत्वा चाश्वपट्टसरोवरे ॥९०॥
मन्त्रं गृह्ण हरेस्तत्र पावनस्त्वं भविष्यसि ।
इत्युक्तः स प्रणम्यैव चाण्डालो देवतागणम् ॥९१॥
शीघ्रं नारायणकुण्डवारि पीत्वाऽश्वसारसम् ।
ययौ लोमशनिलयम् प्रणनाम जगाद च ॥९२॥
वृत्तान्तं सकलं पश्चादश्वपट्टसरोवरे ।
स्नात्वा च कृपया मन्त्रं जग्राह लोमशात् तु सः ॥९३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
कुटुम्बेन सहितोऽयं भक्तोऽभवद्धरेर्मम ॥९४॥
अश्वपट्टसरोयात्रां चक्रे जातश्च पावनः ।
पापं तस्य गतं नाशं भक्त्या मे लोमशाश्रयात् ॥९५॥
अथ कालान्तरे प्राप्ते काले तत्याज वर्ष्म सः ।
भार्याऽपत्यानि सर्वाणि वर्ष्माणि तत्यजुस्तदा ॥९६॥
'हरेकृष्ण बालकृष्ण लक्ष्मीकान्त रमापते' ।
वदन्तस्ते दिव्यदेहा अभवन् मुक्तियोगिनः ॥९७॥
विमानं चागतं तत्र मम पार्षदसेवितम् ।
तत्राऽऽरुह्य ययुः सर्वे धामाऽक्षरं मम प्रियम् ॥९८॥
एवं भक्तस्य कल्याणं कृतं कीशप्रसंगतः ।
मया लक्ष्मि कृपयैव चाण्डालस्य हि शाश्वतम् ॥९९॥
एवमन्येऽपि मे भक्त्या सतां भक्त्या च पावनाः ।
सेवन्ते मां सतश्चापि तेऽपि यान्ति परां गतिम् ॥१००॥
पठनाच्छ्रवणादस्य स्मरणाद् यान्ति मोक्षणम् ।
सकामाः सम्पदो यान्ति निष्कामा मत्पदं परम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने कपिक्षयात्मकस्य चाण्डालस्य वानररूपदेवोपदेशेन हरौ भक्त्या सकुटुम्बस्य मोक्षणमित्यादिनिरूपणनामैकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं लोहकारस्य वै कथाम् ।
मे पावनस्य भक्तस्य नाम्ना नालीकरस्य वै ॥ १ ॥
नालीकरो मम भक्तोऽवसद् वक्रनदाऽऽह्वये ।
नगरे लोहकारो वै कुटुम्बेन समन्वितः ॥ २ ॥
लोष्ठानां शृंखला दीर्घाः स्वल्पाश्च कीलकाँस्तथा ।
पट्टाँश्च कुण्डलाँश्चापि पट्टिका लोष्टपत्रिकाः ॥ ३ ॥
लोष्टपात्राणि बहूनि लोहोपकरणान्यपि ।
अनसां च ग्रहाणां च साधनानि करोत्यपि ॥ ४ ॥
भस्त्रायाश्चालने श्वासे प्रश्वासे श्रीनरायणम् ।
लोहघ्नोन्नयने तस्य पातने लोहपीटने ॥ ५ ॥
लोहसन्धानकार्यादौ स्मरते मां नरायणम् ।
भस्त्रां मत्वा रमादेवीं वह्निं मत्वा नरायणम् ॥ ६ ॥
मालां मत्वा चालदण्डं भजते मां हरिं सदा ।
लोहकुट्टीं पापपुञ्जकुट्टीं मायां विचिन्त्य च ॥ ७ ॥
लोष्ठानि मायिकान्येव मत्वा हन्ति विमुक्तये ।
लोहघातोत्थशब्दाँश्च प्रणवान् मनुते स च ॥ ८ ॥
एवं नालीकरो भक्तो ब्रह्मदृष्ट्याऽऽत्मबोधवान् ।
वर्तते भक्तियुक्तश्च मूर्तिं मे पूजयत्यपि ॥ ९ ॥
प्रातः स्नात्वा गृहे मूर्तिं नत्वा धूपं करोति च ।
दीपं कृत्वा पुष्पमालां चन्दनं मेऽर्पयत्यपि ॥१०॥
सुगन्धसारं दत्वा मे नैवेद्यं दुग्धशर्कराम् ।
पोलिकाश्च समर्प्यैव जलं ताम्बूलकं तथा ॥११॥
समर्प्य मे क्षमां याचित्वाऽथ भुंक्ते पिबत्यपि ।
एवमेव ततो लोहशालायामपि माधवम् ॥१२॥
स्मृत्वा गत्वा नमस्कृत्य धूपं कृत्वा च दीपकम् ।
पुष्पमालां शर्करां च तथाऽन्यत् फलमुत्तमम् ॥१३॥
यथाकालं समर्प्यैव ततः कार्यं करोति च ।
लोहकार्याणि मे भक्त्या करोति शुद्धमानसः ॥१४॥
एवंविधस्य भक्तस्यैकदाऽभवत् सुचिन्तनम् ।
रात्रौ नित्यं प्रकर्तव्यं भजनं बहुभिः सह ॥१५॥
सङ्घेन भजनं कार्यं बहूनां मोक्षसाधनम् ।
एवं शुभेन मनसा स्वग्रामजनबान्धवान् ॥१६॥
जगाद मण्डलं भक्तेर्विधातुं च तदापि ते ।
प्रहर्षेणाऽस्थापयँश्च भक्तमण्डलमुत्तमम् ॥१७॥
नरा नार्यो निशारंभे मिलित्वा घटिकाद्वयम् ।
नित्यमारेभिरे कृष्णनामसंकीर्तनं शुभम् ॥१८॥
सर्वे जना नगरस्थाः श्रुत्वा वीक्ष्य शुभक्रियाम् ।
सहकारं ददुस्तत्र युयुजुर्भक्तमण्डले ॥१९॥
सहस्रशो जना भक्तिं कुर्वन्त्युत्साहसंभृताः ।
उत्सवान् श्रीहरेः सर्वान् वाद्यनृत्यादिभिस्तथा ॥२०॥

शृंगारपूजनाद्यैश्च जागराद्यैः समुत्सुकाः ।
कुर्वन्ति च यथाकालं लक्ष्मि स्वश्रेयसे यताः ॥२१॥
तेषां भक्तिं विलोक्याऽहं भक्तिप्रवर्तकस्य मे ।
भक्तस्य लोहकारस्य प्रसन्नोऽहं तदाऽभवम् ॥२२॥
एकदा भक्तिवृद्ध्यर्थं तेजो मयाऽतिभास्वरम् ।
निर्यन्मत्प्रतिमाभालाद् दर्शितं तेभ्य उज्ज्वलम् ॥२३॥
शामितं च मया तूर्णं तेन ते भक्तिगौरवाः ।
विशेषतो मम भक्तिमकुर्वन् भावगर्भिताम् ॥२४॥
ज्ञातारश्चाऽभवन् मूर्तौ तिष्ठतो मम शार्ङ्गिणः ।
मन्दिरं कृतवन्तस्ते लक्ष्मीनारायणस्य ह ॥२५॥
तत्र पूजाप्रवाहादि चक्रिरे च यथाधनम् ।
अहं मूर्तौ निवसामि त्वया साकं समुद्रजे ॥२६॥
अपहरामि सर्वेषां दुःखानि विपदोऽन्वहम् ।
मानतास्ते प्रकुर्वन्ति रोगदुःखविनाशिनीः ॥२७॥
आध्यात्मिकाऽऽधिदैवाधिभौतिकाधिविनाशिनीः ।
सर्वाः पीडा नाशयामि स्वस्थास्ते च भवन्ति वै ॥२८॥
भजन्ते मां चातिभावैश्चमत्कारादिकीर्तनैः ।
अथैकदा सतीत्वं च जाता तापसीवेषिणी ॥२९॥
अहं च तापसो योगी भूत्वाऽगमं निशामुखे ।
भक्तमण्डलमालक्ष्य मन्दिरस्याऽन्तिके स्थले ॥३०॥
यथा दीनजनो रङ्कः कश्चिद् भिक्षुक उद्गतः ।
त्वं तथा दीनचित्ता च भिक्षुकी व्रतवर्जिता ॥३१॥
धर्मस्नानार्हणशून्या मलिना प्राकृती यथा ।
अहं तथैव मलिनो दर्शकानां तु चित्तहाः ॥३२॥
एकं तु बालकं स्वल्पं मलमूत्रादिसंभृतम् ।
गरुडं बालरूपं तं कृत्वा कुक्षौ पुरोऽभवम् ॥३३॥
एवं त्रिकं च ते वीक्ष्य याचमानं च दीनवत् ।
मन्दिराग्रे समायातं दयापरास्ततोऽभवन् ॥३४॥
आहूय वेदिकायां ते न्यषादयन् सुखेन च ।
अयच्छन् भोजनं लक्ष्मीनारायणप्रसादजम् ॥३५॥
अपत्याय पयश्चापि ददुस्ते भावनान्विताः ।
कृत्वा च भोजनं पानं वयं लक्ष्मि सुखस्थिताः ॥३६॥
वितर्दिकायामभवन् ते चक्रुर्नामकीर्तनम् ।
चत्वरे रासमारेभुस्तालवाद्यसुनर्तनैः ॥३७॥
नरा नार्योऽसंख्यजना भक्तिं चक्रुर्हि भावुकाः ।
कृत्वा तं कीर्तनं यावत् क्षणं विश्रान्तिमदधुः ॥३८॥
तदोत्थाय त्वया साकमहं तत्र हि चत्वरे ।
करतालैर्मञ्जिरैश्च सनृत्यं कीर्तनं व्यधाम् ॥३९॥
आश्चर्यं परमं प्राप्ता दृष्ट्वा मां त्वां च ते तदा ।
प्रसन्नास्ते च पप्रच्छुः शान्तं मां श्रेयसे मुहुः ॥४०॥
साधो कल्याणदं किञ्चिद् वदाऽत्र नः कृपां कुरु ।
श्रुत्वाऽहं च तदा लक्ष्मि ज्ञानं तेभ्यो ददौ मम ॥४१॥
प्रेम्णो हेतुं भगवति माहात्म्यं निजगाद वै ।
माहात्म्यज्ञानवत्प्रेम्णि विश्वासोऽपि च कारणम् ॥४२॥
मायापुरुषकालानां स्वभावगुणकर्मणाम् ।
जडचेतनतत्त्वानां नियन्तारं हरिं श्रयेत् ॥४३॥
सर्वस्वतन्त्रकर्तारं सर्वावतारकारणम् ।
सर्वशक्तिप्रदातारं नारायणं हरिं श्रयेत् ॥४४॥
प्रेम्णाश्रयेत् परात्मानं माहात्म्यज्ञानवान् जनः ।
प्रीत्या संसेव्य तं नाथं परधाम समर्जयेत् ॥४५॥
कुर्याद् वै वासनानाशं सर्वथा तु विवेकवान् ।
लौकिकेषु विषयेषु रुचिरिच्छाऽस्ति मे तु या ॥४६॥
कियतीति विविच्यैव ह्यपनेया तु सा ततः ।
कियती वा हरौ चास्ते रुचिरिच्छा तु पावनी ॥४७॥
मायायां च हरौ तुल्या न्यूना वा चाधिकाऽपि वा ।
विविच्येति हरौ वर्धनीया प्रयत्नतः सदा ॥४८॥
ह्रसनीया च मायायां निर्मूला यावती भवेत् ।
क्षयिष्णुत्वं दुःखदत्वं बन्धकृत्त्वं तु मायिके ॥४९॥
पदार्थजाते भवतीत्येवं ज्ञात्वा विवर्जयेत् ।
रुचिं त्यजेन्मायिकेषु मुक्तानामपि बन्धनीम् ॥५०॥
अरुचेर्वासनानाशो जायते द्रुतमेव ह ।
सत्संगात् कृष्णसम्बन्धात् कृष्णकीर्तनगायनात् ॥५१॥
कृष्णे रुचिर्भवत्येव साक्षाद् योगाद् विशेषतः ।
एवमभ्यासयोगेन कृष्णे प्रीतिर्विवर्धते ॥५२॥
मायिके मलतुल्ये च भोग्ये रम्ये तथेतरे ।
रुचेर्नाशो भवेत्तूर्णं भगवद्रसवेदिनः ॥५३॥
ब्रह्ममयं भासतेऽस्य दिव्यं नारायणात्मकम् ।
भगवन्निष्ठभक्तस्य ब्रह्मभावः परो वृषः ॥५४॥
स्थितिः सा परमा महाभागवती प्रमोदिनी ।
मायाभिमानरहिता भगवद्भावशोभिता ॥५५॥
वासनायाः प्रणाशार्थं प्रीत्यर्थं च हरेस्तथा ।
साधयेदात्मनिष्ठां च वैराग्यं श्रेष्ठमित्यपि ॥५६॥
कृष्णमाहात्म्यातिशयविज्ञानं स्वसमर्पणम् ।
साधयेद् भगवन्निष्ठां सतां समागमं चरेत् ॥५७॥
निर्वासनात्मनिष्ठानां सतां सेवां प्रसाधयेत् ।
प्रसन्नतां सतां लब्ध्वा जयेन्मायां परं व्रजेत् ॥५८॥

अतिधैर्यं लभेज्ज्ञानादाश्रयात्परमात्मनः ।
सतां सत्संगसाहाय्याद्धैर्यं दृढं हरौ भवेत् ॥५९॥
आत्मनिष्ठायुजा भक्त्या धैर्यस्थैर्यं तथा भवेत् ।
धीरस्य मुक्तभावस्य विघ्ना नैव भवन्ति च ॥६०॥
भक्त्यन्तरायरूपाश्च सिद्धयो नोपयान्त्यपि ।
रङ्कभक्तपरीक्षार्थं समायान्ति हि सिद्धयः ॥६१॥
श्रीहरेराज्ञया तास्तु लोभयन्ति मुहुः श्रितम् ।
तथापि ता न पश्येच्च जित्वा याति परं पदम् ॥६२॥
एवंविधस्य भक्तस्य कृष्णो वशे स्वयं भवेत् ।
मायाया वासनाशून्यो यश्च कृष्णार्पिताऽखिलः ॥६३॥
कृष्णार्थंकृतसर्वस्वस्तस्य प्रीतो हरिः सदा ।
कृष्णेऽतिप्रेमवद्भक्तहृदयाच्छ्रीहरिः क्वचित् ॥६४॥
प्रेमरज्ज्वा नद्धवर्मा गन्तुं शक्तो न जायते ।
तस्यैव भगवान् पाता स्वामी कान्तश्च मोक्षकृत् ॥६५॥
मायादुःखहरश्चास्ते हृदये सर्वथा सह ।
एतादृशस्य भक्तस्य गुणा दिव्या भवन्ति हि ॥६६॥
सत्यशौचादयो ये च सर्वे कृष्णसमाश्रयात् ।
कृष्णस्य दिव्यविज्ञानाज्जायन्ते भक्तिमत्यपि ॥६७॥
कालकर्मस्वभावानां मायायाः पुरुषस्य च ।
ईश्वराणां नियन्ता श्रीबालकृष्णोऽस्ति माधवः ॥६८॥
कर्ता पोष्टा च संहर्ता सृष्टीनां श्रीपतिः प्रभुः ।
अस्ति गोपालबालः स सर्वेषां हृदयेषु सः ॥६९॥
निर्लेपो वर्तते स्वामी राधारमाप्रधीपतिः ।
एवं ज्ञात्वा हरौ कृष्णे सम्बन्धं प्राप्तवान् दृढम् ॥७०॥
यस्तस्य श्रीहरेः सम्बन्धिनो दिव्यगुणा अपि ।
आविर्भवन्ति भक्ते वै सर्वैश्वर्याणि सर्वथा ॥७१॥
चक्षुर्दीपप्रसंगेन प्रभागुणं प्रविन्दति ।
यथा तथा हरेर्योगाद् भक्ते गुणा विशन्ति च ॥७२॥
स्वतन्त्रो जायते कृष्णतुल्यः कृष्णप्रसादतः ।
सर्वं कर्तुं सिद्धिमाँश्च नित्यसिद्धोऽपि जायते ॥७३॥
यथेन्द्र आययौ नारायणं नरं तपःक्षतिम् ।
कर्तुमप्सरसां व्रातैर्निरस्तश्चोर्वशीजनैः ॥७४॥
एवं सिद्ध्या सिद्धिमन्तो निरस्यन्ते सुसिद्धिना ।
भक्तेन मूलमायाऽपि निरस्यते हरेर्बलात् ॥७५॥
देवा भक्ता भवन्त्येव भगवद्गुणयोगिनः ।
आसुरा न प्रजायन्ते भगवद्गुणिनः क्वचित् ॥७६॥
महतां तु सतां कृपापारावारे प्रविश्य च ।
पापिनो भगवद्भक्त्या क्वचिद् गुणा विशन्ति हि ॥७७॥

प्रसन्नाः सेवया सन्तो नाशयन्ति हि दुर्गुणान् ।
आसुरत्वं नाशयन्ति कुर्वन्ति दैवभावुकम् ॥७८॥
यस्तु रङ्कजनान् गर्वादवजानाति भक्तकान् ।
सोऽपि तत्पापपुञ्जेन दैवोऽप्यासुरतां व्रजेत् ॥७९॥
शप्तो भवेद् ब्रह्मदग्धो गुणास्तत्र विशन्ति न ।
दीनाऽवमानं तस्मान्न कर्तव्यं क्वचिदेव ह ॥८०॥
दीनाग्रे दीनवत् स्थेयं तेन कृष्णः प्रतुष्यति ।
गर्ववत्सु कृपां नैव करोति भगवान् क्वचित् ॥८१॥
गुणास्तेषु शुभा नैव जायन्ते द्रोहिषु क्वचित् ।
मृदोर्भक्तस्य दीनस्य द्रोहेण पुण्यसंक्षयः ॥८२॥
जायते नाऽत्र सन्देहो नावमान्या हि दुर्बलाः ।
बाह्यतो मलिनाश्चापि हृदये शुद्धभावनाः ॥८३॥
भक्ता भगवतो मान्या मोक्षदाः साधवो हि ते ।
तेषां हृदये भगवानन्तर्यामी विराजते ॥८४॥
सहैव वर्तते दीननाथो ह्यनाथरक्षकः ।
भक्तानामवमानेन रुष्टो भवति माधवः ॥८५॥
अवमानयितुस्तूर्णं विनाशं कुरुते स्वयम् ।
कारयत्याशु चान्येन रङ्कभक्तवशंवदः ॥८६॥
नालीकर ! वयं दीना मलिना मक्षिकावृताः ।
सभयाश्चात्र भोज्यार्थं ह्यायाता दीनमानसाः ॥८७॥
तिरस्कारो भवद्भिर्न कृतः सत्कार आदृतः ।
अतः प्रसन्नहृदया भवामोऽत्र सुखान्विताः ॥८८॥
यूयं भक्ता भगवतः सत्या निर्मानिसेवकाः ।
वरदानं चार्थयन्तु रोचते यदि मानसे ॥८९॥
इत्युक्त्वाऽहं यदा लक्ष्मि मूर्तिं नत्वा च मामकीम् ।
गन्तुमियेष दूरं च तावद् बालो मलं व्यधात् ॥९०॥
नालीकरो जलं निन्ये ददौ वै तस्य योषिते ।
तत्स्त्री नाम्ना कुन्दनिका बालं लब्ध्वा करात्तव ॥९१॥
मलप्रक्षालनं चक्रे भावेन बालकस्य ते ।
तावन्मेऽपि विशेषेणाऽभवत् प्रसन्नता ह्यति ॥९२॥
भक्तेभ्यः प्रददौ नैजं दर्शनं दिव्यमद्भुतम् ।
शंखचक्रगदापद्मधरं श्रीश्यामसुन्दरम् ॥९३॥
तव रूपं सुन्दरं च लक्ष्मि व्यदर्शयँस्तथा ।
बालकस्य स्वरूपं च गारुडं समदर्शयम् ॥९४॥
अथ भक्ताः कृतकृत्या व्यजायन्त हृदन्तरे ।
ननृतुर्दर्शनं कृत्वा पूजयामासुरुत्सुकाः ॥९५॥
वव्रुस्ते वरदानं च मोक्षार्थं नेतरत्तदा ।
तथाऽस्त्विति वरं दत्वा तिरोभावं क्षणान्तरे ॥९६॥

लक्ष्मीनारायणमूर्तौ विवेशाऽहं त्वया सह ।
गरुडः पक्षिमूर्तौ च विवेश सहसा तदा ॥९७॥
एवं स्वं दर्शनं दत्वा सुखं तेभ्योऽददां परम् ।
अथ काले गते नालीकरस्य लोहकर्मभिः ॥९८॥
वक्षसि श्वासरोगोऽभूत् सर्वथा श्वासशङ्करः ।
दमाख्येन हि रोगेण पीडितो भक्तराण्निजम् ॥९९॥
कार्यं कर्तुमशक्तो मां प्रार्थयामास मूर्तिगम् ।
द्रागाविर्भूय हस्तेन मया दुग्धं प्रपायितम् ॥१००॥
हस्तेन तस्य हृदयं स्पृष्ट्वा रोगो विनाशितः ।
अथ तूर्णं तिरोभूत्वा मूर्तौ सदाऽवसं रमे ॥१०१॥
आयुष्यस्य क्षये नालीकरं तथा स्त्रियम् ।
कुन्दनिकां विमानेनाऽनयं धामाऽक्षरं परम् ॥१०२॥
एवमन्यानपि भक्ताननयं धाम चाक्षरम् ।
ये भजन्ति च मां भक्त्या गुणान् गृह्णन्ति मे तथा ॥१०३॥
सतां सेवां प्रकुर्वन्ति प्रेमभावेन सर्वथा ।
सतां प्रसन्नता प्राप्य ते प्रयास्यन्ति मत्पदम् ॥१०४॥
पठनाच्छ्रवणाच्चापि स्मरणात् सेवनादपि ।
मुक्तिर्भुक्तिर्भवत्येव यथेष्टा परमा गतिः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने नालीकरस्य लोहकारस्य भक्त्या श्रीलक्ष्मीनारायण-गरुडदत्तदर्शनं तन्मोक्षणं चेत्यादिनिरूपणनामा द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणुनारायणीश्रि त्वं चर्मकारस्य शोभनाम् ।
कथां नाम्ना मंगलस्य मम भक्तिसमन्विताम् ॥ १ ॥
भक्तो मंगलदेवाख्यश्चर्मकारोऽतिसेवकः ।
अभवद् द्रोणिकापुर्यां कुटुम्बी चर्मकार्यकृत् ॥ २ ॥
महिषीणां गवां सारंगाणां केसरिणां तथा ।
व्याघ्राणां करिणां चान्यजातीनां पशुवर्ष्मणाम् ॥ ३ ॥
मृतानां चर्मणां शुद्धिं संस्कारैः प्रकरोति सः ।
विक्रीणाति सुमूल्यैश्च चर्माणि संस्कृतानि वै ॥ ४ ॥
चर्मणां च पवित्राणामासनानि विधाय तु ।
मृगाणां च मृगेन्द्राणां साधुभ्यः स ददात्यपि ॥ ५ ॥
साधुसमागमं नित्यं गत्वा साधुमठेऽन्वहम् ।
करोति चत्वरादीनां मार्जनं गोपुरादिषु ॥ ६ ॥
सतां पादरजो धृत्वा मस्तके हृदये मुखे ।
देहे स्नात्वा रजोभिश्च धूलीष्वपि लुठत्यपि ॥ ७ ॥
अहो भाग्यं सतां पुण्यरजसा स्नामि चर्मकृत् ।
सतां प्रसन्नतां लब्ध्वा प्रयास्यामि परं पदम् ॥ ८ ॥
एवं वदन् महिमानं पादजलं पिबत्यपि ।
सतामुच्छिष्टमन्नं च भुंक्ते पत्रावलिस्थितम् ॥ ९ ॥
अशुद्धश्चर्मकृद्देहः शुद्धः प्रसादतः सताम् ।
सर्वपापानि नष्टानि चर्मकृत्त्वं गतं मम ॥१०॥
अहो सन्तः अहो कृष्णः अहो जन्म ममाऽत्र च ।
नीचजातावधिकोऽहं भाग्यवान् सेवयाऽस्मि वै ॥११॥
एवं जानन् महिमानं कृष्ण कृष्ण स्मरत्यपि ।
चर्मसु श्रीकृष्णनारायणनाम लिखत्यपि ॥१२॥
ददाति दाने साधुभ्यः श्रेयः स्वं चार्थयत्यपि ।
चर्मजन्योपकरणान्यन्यान्यपि विधाय च ॥१३॥
विक्रीणाति लिखित्वा श्रीकृष्णनारायणाभिधाम् ।
गृहांगणे तोरणे चालिखत् कृष्णनरायणम् ॥१४॥
सर्वं कृष्णमयं तस्य भक्तस्य वर्तते रमे ।
आपणोऽपि कृतस्तेन कृष्णनारायणापणः ॥१५॥
चित्रितश्चाभितो भित्तिद्वारतोरणभूमिषु ।
राधाकृष्ण हरे लक्ष्मीनारायण रमापते ॥१६॥
वल्लभ प्रभो कमलापते श्रीकंभराजने ।
गोपालबालक श्रीमन्नारायण परेश्वर ॥१७॥
भगवन्नघहन् पुण्यं चावहन् चान्तरे स्थित ।
एवं नामभिः सर्वत्र तथा च प्रतिमादिभिः ॥१८॥
चित्रितश्चापणः सर्वो गृहं च चित्रितं तथा ।
एतादृशोऽयं भक्तो मे स्नात्वा पूजां करोति मे ॥१९॥
समर्प्य धूपदीपादि नैवेद्यं फलमित्यपि ।
ताम्बूलं जलमित्यादि परिहारं करोति च ॥२०॥
भुक्त्वा प्रसादजं चान्नं तत उद्यममेति हि ।
कर्मचारास्तस्य भृत्याः सर्वेऽपि पूजनं मम ॥२१॥
कृत्वा कर्मसमारम्भं विदधत्यनिशं रमे ।
रात्रौ संभूय च कथां कीर्तनं रचयन्त्यपि ॥२२॥
गायन्ति मम गाथाश्च मोदन्ते च यदुत्सवैः ।
यदि व्रताहो भवति जाग्रत्याप्रातरेव च ॥२३॥
प्रातः कुर्वन्ति मिलिता उद्यापनं व्रतस्य ते ।
भोजयन्ति पूजयन्ति भक्तान् चर्मकरान् बहून् ॥२४॥
अन्यानपि समायातान् सत्कारयन्ति वस्तुभिः ।
साधवो ये तथायोग्या अन्ये वा नगरे निजे ॥२५॥
य आयान्ति च तेभ्यस्ते पादत्राणे ददत्यपि ।
एवं वै बहुधा सेवां कुर्वन्ति भक्तिसंविदः ॥२६॥

प्रसन्नाः साधवश्चैषां भवन्त्याशीःप्रदा यथा ।
भवन्तु सुखिनो भक्ता भक्तौ निर्विघ्नसत्फलाः ॥२७॥
चिरञ्जीवाः पावनाश्च सर्वविपद्विवर्जिताः ।
सतीनां च सतां सन्तु सेवकाः पुण्यशालिनः ॥२८॥
एवमाशीर्वादमाता भवन्ति कृपया सताम् ।
अथैकदा पूर्णिमायामाश्विनस्य निशाकरे ॥२९॥
सर्वकलाप्रपूर्णे चाम्बरं प्राप्ते महोत्सवम् ।
चक्रुस्ते चर्मकारा वै कौमुद्यां प्रतिमां हरेः ॥३०॥
अवस्थाप्यासने रम्ये ज्योत्स्नायां तां समर्चयन् ।
चन्दनै रम्यवस्त्रैश्चाऽलंकारैः शोभनैस्तथा ॥३१॥
नीराजनादिकं चक्रुर्नैवेद्यं शर्करायुतान् ।
दुग्धमग्नान् पृथुकांश्च समार्पयन् हि विष्णवे ३२॥
महास्थाले प्रसादं च निधाय तमनावृतम् ।
रासं भगवतश्चाग्रे खेलयामासुरुत्सुकाः ॥३३॥
हस्तपादादितालैस्ते कीर्तयामासुरच्युतम् ।
प्रेममग्ना अभवँश्च भ्रमन्तो वलयाकृतिम् ॥३४॥
चक्रयन्ति हरिं मां ते गायन्ति चोत्प्लवोत्सुकाः ।
आलापयन्ति तालैश्च कूर्दन्ति विविधक्रमैः ॥३५॥
निषद्योत्थाय च भ्रान्त्या विलुठ्योत्थाय यान्ति च ।
तालं गृह्णन्ति ददति सन्मुखाः प्रतिसन्मुखाः ॥३६॥
एवं प्रमोदमानन्दं भुञ्जते मम सेवकाः ।
लक्ष्मि यदा निशामध्ये चान्द्रीदुग्धायिते स्थले ॥३७॥
तदाऽहं भगवान् विष्णुर्लुब्धो भक्तिरसायने ।
रासैकाग्रमना भूत्वा पश्यामि संशृणोमि च ॥३८॥
मूर्ताविव यथा ते मां नैव पश्यन्ति तत्तथा ।
प्रसन्नोऽहमभवँ च प्रेमबद्धः प्रियः प्रभुः ॥३९॥
शृणु तत्राऽभवद् यद्वै गीतिलुब्धो भुजङ्गमः ।
पार्श्ववासः समागत्य गृहकोणे स्थिरोऽभवत् ॥४०॥
श्रुत्वा रासरसां गीतिं श्रुत्वा सतालकीर्तनम् ।
घ्रात्वा स्थालस्थपृथुकान् सदुग्धशर्करान् शुभान् ॥४१॥
दृष्ट्वा निर्जनसंस्थाँश्च गत्वा शनैः शनैश्च तान् ।
आस्वाद्य जिह्वया दुग्धं पीत्वा मिष्टं पुनः पुनः ॥४२॥
प्रसादपावितः शीघ्रं सभयः प्रययौ दरम् ।
अथ रासान्तविश्रान्तिं प्राप्य प्रसादलब्धये ॥४३॥
पंक्तिशश्चाऽभवन् सर्वे विषाक्तान् पृथुकान् जनाः ।
पर्यवेषयन् भक्तास्तान् पंक्तौ सहस्रदेहिनाम् ॥४४॥
पृथुकान् भुक्तवन्तस्ते माहात्म्यवेदिनो जनाः ।
आबालवृद्धाः सर्वे ते कृष्णसर्पविषान्वितान् ॥४५॥

सर्वे भुक्त्वा जलं पीत्वा सुप्ताः क्षणं तु चत्वरे ।
विषमूर्छामगमँस्ते बहवो मरणोन्मुखाः ॥४६॥
अभवन् विषदग्धास्ते देहभानविवर्जिताः ।
अथाऽन्ये न्यूनगरलस्पर्शा विविदुरुल्बणम् ॥४७॥
विषप्रकोपमन्येषां स्वेषां च मस्तकभ्रमम् ।
पिशङ्गनीलहरितरङ्गाऽऽभा नेत्ररश्मिषु ॥४८॥
ते परीक्षां प्रचक्रुर्वै शीघ्रं च विविदुर्विषम् ।
प्रकाशं जगदुः सर्वे पृथुका गरलान्विताः ॥४९॥
भक्षिता वै ततो मूर्छा मृत्युदा समुपस्थिता ।
सर्वे शीघ्रं घृतपानं चक्रुर्विषनिवृत्तये ॥५०॥
वमनं सविषं तेषां जातं विषनिवर्तनम् ।
अथापि बहवो भक्ता विषेण वै मृता इव ॥५१॥
अभवँस्तान् जीवयितुं प्रार्थयन् मां परे जनाः ।
रुरुदुर्बहवस्तत्र स्त्रीपुत्राः पतिबान्धवाः ॥५२॥
सस्मरुर्मां परमेशं प्राणदं चान्तरस्थितम् ।
तेषां विक्लवभावं च रोदनं भजनं व्रतम् ॥५३॥
भक्तिं वीक्ष्य प्रसन्नोऽहं तूर्णमाविर्बभूव ह ।
साधुरूपः कृतकुक्षिविषहौषधपेटिका ॥५४॥
अतिष्ठं शोककर्तॄणां सन्निधौ वृत्तसंश्रवः ।
तूर्णं वृत्तान्तमावेद्य जलमाधाय वै घटे ॥५५॥
तत्रौषधरसं क्षिप्त्वाऽददां चाचमनीयकम् ।
मूर्छितानां मृततुल्यावस्थानां सहसा मुखे ॥५६॥
तालौ जलस्य स्पर्शेन गतमूर्छास्तदाऽभवन् ।
अमृतास्तेऽभवँश्चापि लब्धाऽऽसुज्ञानसञ्चराः ॥५७॥
उत्तस्थुर्द्राक् समस्ता वै भजन्तो निद्रिता यथा ।
स्वस्थास्ते स्वप्नवत्तत्र ज्ञातवन्तो निजापदम् ॥५८॥
विषं चामृततां प्राप्तं साधोरौषधिवारिणा ।
अथ सर्वे मिलित्वा ते साधोर्ददुर्हि भोजनम् ॥५९॥
पानं रम्यं चासनं च विश्रान्त्यर्थं निशोत्तरे ।
पादसंवाहनं तस्य चक्रुस्ते जीविता जनाः ॥६०॥
सेवामग्ना जनास्ते तु पप्रच्छुः साधुमेव तम् ।
भगवन्निष्ठताऽऽस्मानां कथं विघ्नं प्रजायते ॥६१॥
तमुवाच तदा साधुर्विघ्नं कृष्णेच्छया खलु ।
परीक्षार्थं जायते वै न तु विघ्नं हि तन्मतम् ॥६२॥
कृष्णप्रसन्नतादार्ढ्यं भक्तिदार्ढ्यं भवेत्ततः ।
सर्वविघ्नविनाशं च साक्षादेत्य करोति सः ॥६३॥
आपत्काले तु भक्तानां स्मरणं श्रीहरेर्भवेत् ।
चमत्कारे दर्शिते तु भक्तिदार्ढ्यं भवेद् बहु ॥६४॥

अहोऽयं भगवानस्ति सर्वदुःखनिवारकः ।
तस्य सेवा प्रकर्तव्या मोक्षदा सुखदा शुभा ॥६५॥
एवं भवन्ति संकल्पा ऐश्वर्यवीक्षणे सदा ।
अथाऽनैश्वर्यवीक्षायां नृनाट्यमनुकुर्वति ॥६६॥
कृष्णे खेदो भवेदेव न चायं भगवानिति ।
बहुकालं मया सेवा कृता सा विफला त्विह ॥६७॥
यथाऽहं निर्बलश्चास्म्यसमर्थः पारतान्त्रिकः ।
तथाऽयं निर्बलश्चास्ते ह्यशक्तः पारतान्त्रिकः ॥६८॥
मयि कामस्तथा क्रोधो लोभो मोहो भयं यथा ।
तथा कृष्णे कामलोभक्रोधमोहभयानि वै ॥६९॥
सन्ति तस्मान्न वै चाऽयं भगवान् किन्तु मानवः ।
एवं प्राकृतमतिमान् कृष्णे प्राकृतमर्त्यधीः ॥७०॥
दोषान् स्ववत् कल्पयति सन्नष्टदिव्यभावनः ।
तस्माद्धरौ सदा भाव्यं दिव्यभावप्रभाविणा ॥७१॥
मन्तव्या पूर्णता स्वस्य न मे प्राप्यं हरिं विना ।
न मे साध्यं परं किञ्चिच्छिष्यते हरिसाधनम् ॥७२॥
अत्र वै मिलितः साक्षाद्धरिस्तत्रास्ति तत्पदम् ।
ब्रह्मधामापि तत्रास्ति मुक्तास्तत्र वसन्ति च ॥७३॥
अत्र हरौ विद्यमाने पृथ्व्यादि सर्वमुत्तमम् ।
दिव्यमेव सभा दिव्या भक्ता दिव्या नराः स्त्रियः ॥७४॥
तेषां योगे ममानन्दो वर्तते भगवन्मयः ।
धन्योऽहं कृतकृत्योऽहं यदत्र वर्तते हरिः ॥७५॥
साधुरूपो मूर्तिरूपो वर्तते भगवानिह ।
एवं भक्तस्य संकल्पा जायन्ते चात्मवेदिनः ॥७६॥
देवाश्चेशा अवतारा मुक्ता यत्सम्पदा सुखाः ।
स एव भगवानत्र राजते पुरुषोत्तमः ॥७७॥
यदक्षरं व्यापकं च ब्रह्मधाम परात्परम् ।
तत्परो भगवान् कृष्णनारायणस्त्विहाऽऽगतः ॥७८॥
मिलितोऽत्र महाराजो मद्भाग्यान्तो न विद्यते ।
तस्य कृष्णस्य योगेन जीवनं नः पुनः खलु ॥७९॥
दिव्ये नित्ये परे धाम्नि यः श्रीकृष्णो विराजते ।
निजतुल्यैर्महामुक्तैरसंख्यातैरुपासितः ॥८०॥
तेषां वै दिव्यमुक्तानां श्रीकृष्णस्य प्रतापतः ।
एकैकरोम्णि तेजोऽस्ति कोटिकोट्यर्कसदृशम् ॥८१॥
तादृशानामसंख्यानां मुक्तानां तेज उज्ज्वलम् ।
समस्तं लीयते त्वेकरोम्णि तादृक् तदक्षरम् ॥८२॥
ब्रह्मधामाऽस्ति दिव्यं वै सच्चिदानन्दलक्षणम् ।
तथाविधानि धामानि धाम्नां तेजांसि यान्यपि ॥८३॥
समस्तानि कृष्णनारायणैकरोम्णि लीनताम् ।
यान्तीति तादृशी भूतिर्वर्तते परमात्मनः ॥८४॥
तादृशो भगवान् कृष्णः समर्थोऽति महान् हरिः ।
कृपावशो देहिनां तु श्रेयसे सर्वशक्तियुक् ॥८५॥
धृतदिव्यनराकारो नरवन्नृषु जायते ।
तिरोधाय महैश्वर्याण्यपि नराकृतिरस्ति सः ॥८६॥
तस्य भक्त्या समस्तानि दुःखानि यान्ति लीनताम् ।
कालस्य कर्मणां मायायाश्च तस्य न बन्धनम् ॥८७॥
सेवया श्रीहरेस्तस्य रक्षणं जायते सदा ।
यथा मया सता रक्षा भवतां विहिताऽत्र वै ॥८८॥
तथा कृष्णः कारयति साधुद्वारा निजाऽवनम् ।
भक्ता जीवाश्चेतनाश्च माया तत्त्वानि यानि च ॥८९॥
सर्वमस्य शरीरं वै व्याप्यं चाधीनमित्यपि ।
वश्यं चापि भवत्येव सर्वमस्य महात्मनः ॥९०॥
तेषु सर्वेषु तत्त्वेषु मुक्ताऽक्षरेश्वरेष्वपि ।
व्यापको वर्तते कृष्णो मायाजीवादिकेष्वपि ॥९१॥
सर्वेषां प्रेरकः कृष्णः स्वतन्त्रश्च नियामकः ।
सर्वैश्वर्ययुतः सर्वशेषी कल्याणकृत्प्रभुः ॥९२॥
आविर्भूय क्षितौ चाभो नृनाट्यं विदधाति सः ।
सेवध्वं तं हरिं ये वै दिव्यभावा नराः स्त्रियः ॥९३॥
ते सर्वे श्रीहरेः सर्वमैश्वर्यं प्राप्नुवन्ति ह ।
ब्रह्मरूपा ब्रह्मभावाः सप्रेमसेविनो हरेः ॥९४॥
ब्रह्मलोकेऽपि तद्रूपाः सेवन्ते परमेश्वरम् ।
तस्मादत्र हरिः सेव्यः साधुरूपोऽतिरक्षकः ॥९५॥
साधौ नारायणश्चास्ते भक्तेच्छापूरकः स्वयम् ।
एवं मंगलदेवाद्या लक्ष्मि प्रोक्ता मया तदा ॥९६॥
विविदुस्ते मयि कृष्णं मां कृष्णं केचिदित्यथ ।
सिषेविरेऽतिभावेन साधुरूपं पुनः पुनः ॥९७॥
सती मंगलदेवस्य पत्नी नाम्ना विभावरी ।
सिषेवे मां पादसंवाहनाद्यैरतिभावुकी ॥९८॥
अथाऽहं प्रार्थितस्तैश्च मोक्षार्थं वै पुनः पुनः ।
तथाऽस्त्वेवाऽकथयं स्वां दिव्यामदर्शयं तनुम् ॥९९॥
वीणायुक्तं समुकुटं श्यामसुन्दरविग्रहम् ।
कोटिमन्मथरूपातिरूपं किशोरमुज्ज्वलम् ॥१००॥
राधादिभिर्वन्दितं च ब्रह्मप्रियाभिसेवितम् ।
कोटिमुक्तमहामुक्तानिकाजुष्टं श्रियः पतिम् ॥१०१॥
एतादृशं च मद्रूपं दर्शयित्वा क्षणान्तरे ।
मूर्तौ तिरोभवं ते तु महाश्चर्यपराः पुनः ॥१०२॥

ननृतुः कीर्तनं चक्रुः साक्षात् कृष्णस्य दर्शनात् ।
एवं नित्यं भेजिरे ते चातिभक्त्या तु नित्यशः ॥१०३॥
प्राप्ते काले तु तान् दिव्याक्षरं धाम परात्परम् ।
विमानेनाऽनयं चास्थापयं मुक्तेषु तत्र च ॥१०४॥
भक्तं मंगलदेवं च पत्नीं विभावरीं तथा ।
अरक्षयं मे सेवायां पादयोरक्षरे स्थले ॥१०५॥
एवं लक्ष्मि मया रक्षा कृता चर्मकृतां तदा ।
तेभ्यो मन्त्रं दत्तवाँश्च साधुरूपो दयावशः ॥१०६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जेपुर्भेजुः सस्मरुर्मां ययुर्मे परमं पदम् ॥१०७॥
पठनाच्छ्रवणादस्य स्मरणात् सेवनादपि ।
भजनाल्लभते भूतिं दिव्यां दिवं च मोक्षणम् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मंगलदेवाख्यचर्मकारभक्तस्य भक्त्या साक्षादागत्य भगवता विषचारणं कृतमित्यादिनिरूपणनामा त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं रथकारस्य शोभनम् ।
वृत्तान्तं मम भक्त्याढ्यं सुतारग्रामवासिनः ॥ १ ॥
रङ्कमयीसरित्तीरे रथकारोऽतिपावनः ।
सुतारपुर्यामभवन्मम भक्तः कुटुम्बवान् ॥ २ ॥
काष्ठयानानि सर्वाणि गन्त्रीश्च शकटानि च ।
अनश्वकाणि सर्वाणि काष्ठासनानि मंचकान् ॥ ३ ॥
बृसीः खट्वाश्च पर्यंकान् कपटान् प्रकरोति सः ।
काष्ठपात्राणि रम्याणि काष्ठपुत्तलपुत्तलीः ॥ ४ ॥
कारुवर्यः करोत्येव नौका गजाश्वगोवृषान् ।
विविधान्युपकरणान्यपि स्वकलया तथा ॥ ५ ॥
करोति पेटिकाश्चापि पेटकान् सुचतुष्किकाः ।
तत्र सर्वत्र कार्येषु हरेर्नाम लिखत्यपि ॥ ६ ॥
स्वनाम हरिदासेति लिखित्वा च ततः परम् ।
हरिश्चेति हि सर्वेषु वस्तुष्वयं लिखत्यपि ॥ ७ ॥
गृहे च काष्ठशालायां लिलेख श्रीहरे प्रभो ।
गृहजालान्तरे काष्ठप्रतिमां परमात्मनः ॥ ८ ॥
अनादिश्रीकृष्णनारायणस्याऽस्थापयद्धि सः ।
प्रातः सम्पूजयत्येनां प्रतिमां मम शोभनाम् ॥ ९ ॥
श्रिया साकं पुष्पपत्रचन्दनाऽक्षतकुंकुमैः ।
भूषावस्त्रद्रवधूपदीपनैवेद्यवारिभिः ॥१०॥

एवं सम्पूज्य नित्यं वै प्रसादं ग्रसते ततः ।
अन्येभ्यः सम्प्रदायाऽपि ततः कार्ये प्रवर्तते ॥११॥
उद्यमे स्मरति मां लक्ष्मीनारायणं प्रभुम् ।
हरिकृष्णं बालकृष्णं हरिदासः सुभक्तराट् ॥१२॥
अथैकदा विचारोऽस्याऽभवद् देवादिगोचरः ।
अन्योद्योगं विहायैव प्रतिमोद्योगमावहे ॥१३॥
यासां निर्माणकार्ये वै ध्यानं देवात्मकं भवेत् ।
स्मरणं चापि देवानां रूपरङ्गादिकर्मसु ॥१४॥
सततं स्यात् कीर्तनं चार्पणं मूर्तिमयं भवेत् ।
एवं विचार्य च हरिदासो हर्यर्थमुत्सुकः ॥१५॥
हरिमूर्तिमयोद्योगं समारभत भावतः ।
पुरुषोत्तममूर्तिं स व्यरचयत् सुशोभनाम् ॥१६॥
अनादिश्रीकृष्णनारायणमूर्तिं समाणिकीम् ।
राधाकृष्णयुगलं च लक्ष्मीनारायणोभयम् ॥१७॥
वासुदेवं श्रिया साकं विष्णुं च कमलायुतम् ।
नरं नारायणं चापि शेषशायिनरायणम् ॥१८॥
श्रीपतिं श्रीगरुडस्थं गजस्थं माणिकीस्थितम् ।
विमानस्थं रथस्थं चाऽरचयद् दिव्यशोभनम् ॥१९॥
दुःखहाश्रीसहितं च गोभिश्च सहितं प्रभुम् ।
मत्स्यं कूर्मं च वाराहं कपिलं च हरिं तथा ॥२०॥
वासुदेवं राजराजं पृथुं दत्तं नृसिंहकम् ।
हंसमृषभं परशुधरं यज्ञं च वामनम् ॥२१॥
रामं कुमारं व्यासं च हयग्रीवं च नारदम् ।
बालकृष्णं च बुद्धं च कल्किं नारायणीपतिम् ॥२२॥
हरं सतीं च ब्रह्माणं सावित्रीं च सरस्वतीम् ।
प्रज्ञां पारावतीं दुर्गां गंगां च कालिकां तथा ॥२३॥
सूर्यं वह्निं चन्द्रमसं गणेशं कालभैरवम् ।
नन्दं सुनन्दं लिङ्गं चाऽरचयत् प्रतिमाः शुभाः ॥२४॥
काष्ठानां सवनानां वै ससर्जानां सागशाखिनाम् ।
वटानां शिंशपानां च करोति प्रतिमाः शुभाः ॥२५॥
स्वल्पा मध्याश्चोत्तमाश्च विविधाः स करोति वै ।
रंगशृंगारयुक्ताश्च संस्कृताश्चित्रितत्वचः ॥२६॥
भजन् रटन् हरिं नाम निर्माति प्रतिमाः सदा ।
यासां रूपाणि हृदये भासन्ते न तदा तु सः ॥२७॥
रहो निषद्य मां स्मृत्वा रूपं धारयते मम ।
हृदये स्वे चैकतानो मन्मूर्तौ स प्रजायते ॥२८॥
समस्तेन्द्रियवृत्तीनां लयो भवति वै मयि ।
यथा तथा स यतते योगिवद् ध्यायति स्थिरः ॥२९॥

दिनार्धं वा दिनं याति समाधाविव तस्य वै।
तथापि प्रेममग्नोऽसौ न निर्याति समाधितः॥३०॥
मूर्तिश्चिन्तामणिकल्पा वर्तते माधवस्य यत्।
तस्याः सकाशात् संकल्पाः पूर्णा भवन्ति धारिताः॥३१॥
इतिनिश्चययुक्तस्य हरिदासस्य सर्वथा।
यावन्नोदेति रूपं वै कर्तव्यप्रतिमात्मकम्॥३२॥
तावत् समाधौ मन्मूर्तौ स्थिरस्तिष्ठति तन्मयः।
इच्छन् द्रष्टुं नूत्नरूपं रचनार्हं सुशोभनम्॥३३॥
अथ मे कृपया मूर्तेः रूपं यदाऽभिजायते।
कर्तव्यप्रतिमारूपं दृष्ट्वा धृत्वा पुनः पुनः॥३४॥
अभ्यस्य च ततो भक्तो बहिर्याति न चान्यथा।
यादृग् दृष्टं स्वरूपं वै साध्यमूर्तेस्तथाविधम्॥३५॥
काष्ठाच्छिल्पकलामिश्रं निष्कासयति शोभनम्।
सौम्यं सुहास्यवदनं सर्वयोग्यसुशास्त्रकम्॥३६॥
योग्यशृंगारभूषाढ्यं तथोत्करोति काष्ठजम्।
दारवं सुन्दरं रूपं यादृशं हृदि वीक्षितम्॥३७॥
तादृशं संविधायैव विक्रीणाति सुरंगितम्।
एवं समस्तदेवानां हनुमद्यतियोगिनाम्॥३८॥
साध्वीनां देवतानां च कृत्वा करोति विक्रयम्।
ध्यायति देवताः सर्वा विशेषतस्तु वल्लभम्॥३९॥
लक्ष्मीं नारायणं श्रीशं ध्यायति पुरुषोत्तमम्।
ततोऽहं मत्प्रतिमातस्तदिष्टं पूरयाम्यपि॥४०॥
ख्यातिस्तस्याऽभवल्लोके हरिदासो हरेस्तनुः।
राजानश्चापि तस्माद्वै कारयन्तीष्टदेवताः॥४१॥
हरिदासोऽपि कृत्वैव ददात्येव शुभोत्तमाः।
हरिदासेन नियमः कृतो नारायणं विना॥४२॥
नारायणांशं च विना मानवी प्रतिमा मया।
न वै कार्या क्वचिद् भक्तिविरोधिनी तु मायिकी॥४३॥
निम्नचिन्तनदा नैव कार्या मानुषपुत्तली।
अभक्तानां नैव कार्या तथा मानुषपुत्तली॥४४॥
भक्तानां तु शुभा कार्या तदिष्टदेवतायुता।
एवमात्मनिवेदीव ररक्ष नित्यदा हि सः॥४५॥
प्रसन्नोऽहं ततो लक्ष्मि परीक्षार्थमुपाययौ।
चक्रवर्तीश्वरो भूत्वा तीर्थव्याजेन मार्गगः॥४६॥
हस्त्यश्वरथवान् पारेसहस्रसैनिकान्वितः।
राज्ञीदासीदासवर्गसहस्रपरिसेवितः॥४७॥
रत्नहारकहाराद्यैर्भूषितश्छत्रशोभितः।
महाश्वेतगजपृष्ठे स्वर्णाम्बालिकयाऽन्विते॥४८॥
निषण्णश्चामरैर्युक्तो जयशब्दाभिपूजितः।
अस्त्रशस्त्रधरैश्चापि भटैः सम्परिवारितः॥४९॥
गुर्वमात्यप्रधानाद्यैर्वन्दितः सेवितस्तथा।
लक्ष्मि त्वं च मम पत्नी साम्राज्ञी शोभनोत्तमा॥५०॥
सहस्रशोभनादासीयुवतीगणमण्डिता।
मया प्रेरितभृत्याभिरक्षिता भृत्यपूजिता॥५१॥
महासौवर्णरत्नाढ्यनरयानस्थिता तथा।
उपाययिथ साकं वै मया पूर्वप्रप्रेषिता॥५२॥
एवंविधोऽहं सम्राड् वै रङ्गमयीनदीतटे।
तीर्थयात्रामिषेणाऽग्रे वृक्षषण्डे विनिर्ययौ॥५३॥
तीर्थतटं महाशालग्रामतीर्थाऽभिधं वरम्।
समाश्रित्य स्थिरतार्थमवातरं गजान्मम॥५४॥
ससैन्योऽहं न्यवसंश्च स्नानपूजादिमानसः।
अथाऽऽययुः सुताराख्यनगरस्थाः प्रजाजनाः॥५५॥
गुरवश्चापि विप्राश्च भिक्षुकाः सकुतूहलाः।
लिप्सया दक्षिणादेश्च विक्षणेच्छान्विता अपि॥५६॥
आययौ नगरं सर्वं द्रष्टुं राजानमित्यपि।
तथापि भक्तराजोऽसौ नाऽऽयाति मायिकं विदन्॥५७॥
अथाऽहं तीर्थविधिना कृत्वा तीर्थं ततः परम्।
दत्वा दानान्यनेकानि शुश्राव प्रतिमाः शुभाः॥५८॥
ददर्श प्रतिमाश्चापि तीर्थतटे स्थिरीकृताः।
पप्रच्छ मानवाँस्तत्रागतान् शिल्पिवरं प्रति॥५९॥
ते प्राहुरत्र नगरे वर्तते शिल्पिराण्नु।
आकारितो मया दूतैर्हरिदासोऽपि नाययौ॥६०॥
विना भागवतं सन्तं विना नारायणं हरिम्।
विना भक्तं हरेरन्यस्याऽन्तिकं नैमि सोऽवदत्॥६१॥
ततोऽहमुक्तवान्नाम मदीयं कृष्णदासवत्।
श्रीकृष्णदासवर्याऽहं कृष्णभक्तो भवामि ह॥६२॥
आयाहि शिल्पिवर्य त्वं प्रतिमार्थं मदिच्छया।
दूतैर्गत्वा तथैवोक्तः सोऽपि श्रुत्वा ह्युपाययौ॥६३॥
पुष्पहारान् गृहीत्वैव न्यधारयन्नृपोरसि।
राजानं कृष्णभक्तं वै ज्ञात्वा नेमेऽतिभावतः॥६४॥
राजाऽपि तस्य सम्मानं प्रचकार सुविज्ञवत्।
शिल्पी लक्ष्मि मया राज्ञा पृष्टो मूर्तिविधापने॥६५॥
क्रीणनार्थं च मूर्तीनां मूल्येऽपि पृष्ट एव सः।
सोऽपि कृष्णस्य मूर्तिं वै ददौ मे राधया युताम्॥६६॥
सहस्ररूप्यमुद्राभिस्तथा लक्ष्मीं नरायणम्।
लब्ध्वाऽहं मुद्रिका दत्वा स्वर्णशतं तथोत्तरम्॥६७॥

पारितोषिकमेवापि दत्वाऽकथयं मत्कृते ।
ममैकां मम राज्ञ्याश्च मूर्तिमेकां विधापय ॥६८॥
दास्ये यथेष्टं कनकं रत्नानि हीरकाँस्तथा ।
स प्राह राजन् भक्तोऽस्मि नारायणपरायणः ॥६९॥
नारायणविभूतीनां नारायणस्य वै तथा ।
देवानां देवतानां च करोमि प्रतिमाः सदा ॥७०॥
मानवीं न करोम्येव मायिकीं न करोमि च ।
यस्याः संक्लृप्तने वृत्तिर्नारायणं न चिन्तयेत् ॥७१॥
मायां च मायिकीं चापि पुत्तलीं न स्मरे क्वचित् ।
तव राजन्महिष्याश्च पुत्तल्याः करणे तु मे ॥७२॥
स्मरणं मानवं स्याद्धि भक्तौ क्षतिर्भवेन्मम ।
ततोऽहं न करिष्ये वै पुत्तलीं ते क्षमस्व माम् ॥७३॥
यद्यपि त्वं प्रभक्तोऽसि तथापि राजसोऽसि वै ।
राज्ञी चेयं महामाया मोहिनी वर्तते तव ॥७४॥
तत्स्मृतिं न करिष्येऽहं विना लक्ष्मीं नरायणम् ।
यदि लक्ष्म्या समं राज्ञी त्वं साकं माधवेन तु ॥७५॥
भक्ताविवोभौ तिष्ठन्तौ सेवायां स्तश्च रोचते ।
ते यदि तर्हि कुर्वेऽहं मूर्तिं श्रीपतिना सह ॥७६॥
केवलां नैव कुर्वेऽहं नेच्छामि पारितोषिकम् ।
नमस्ते च क्षमस्वाऽपि राजा मान्यः प्रजाजनैः ॥७७॥
इत्युक्त्वा भक्तराट् लक्ष्मि हरिदासो गृहं ययौ ।
राजाऽहं मम भक्तं सम्परीक्ष्यैवं तु पृष्ठगः ॥७८॥
पद्भ्यां तस्य गृहं प्राप्तो लोकाश्चाश्चर्यमाप्नुवन् ।
ददौ स भक्तराण्मह्यं काष्ठासनं विवेकतः ॥७९॥
अन्नं जलं श्रीहरयेऽर्पितं ददावदर्शयत् ।
प्रतिमा मे समस्ताश्च ध्यानार्थं स उपाविशत् ॥८०॥
अविगणय्य मे भीतिं धैर्यं धृत्वा हरेः शुभम् ।
समाधौ हृदये मग्नस्तदाऽहं हृदयेऽभवम् ॥८१॥
राजरूपस्तथा लक्ष्मी राज्ञीरूपा यथायथम् ।
लक्ष्मीं नारायणं मां च ज्ञात्वा शीघ्रं समुत्थितः ॥८२॥
स्वागतं दण्डवच्चापि चक्रे प्रदक्षिणं तु माम् ।
कीर्तनं सहसा चक्रे ननर्त मोदविह्वलः ॥८३॥
अथाऽन्ये तु जनास्तत्र दर्शका येऽभवँस्तदा ।
सर्वे दृष्ट्वा महाश्चर्यं श्रुत्वा भक्तोदितं तथा ॥८४॥
नारायणो हि सम्राण्मे भूत्वा गृहमुपागतः ।
लक्ष्मीर्भूत्वा महाराज्ञी चाययौ भाग्यवानहम् ॥८५॥
अहो भाग्यमहो भाग्यं सुतारग्रामवासिनाम् ।
अहो भाग्यं मम पत्न्याः श्रीमानव्याः शुभोत्तमम् ॥८६॥
कुटुम्बस्य च मे भाग्यं भृत्यानां भृत्ययोषिताम् ।
भाग्यं श्रेष्ठतमं त्वद्य यद्गृहे वल्लभोहरिः ॥८७॥
यद्गृहे श्रीः समायाता राज्ञीरूपा हरेः प्रिया ।
श्रीमानव्याः श्रेयसे च हरिदासस्य मुक्तये ॥८८॥
अहो प्रतिमानिर्मातुः फलं साक्षाद्धरिर्गृहे ।
आत्मनिवेदितालाभश्चाहो साक्षात्प्रभुर्गृहे ॥८९॥
कला मे सुकला जाता जीवनं मे सुजीवनम् ।
प्राप्तः साक्षान्मया कृष्णनारायणः श्रिया युतः ॥९०॥
श्रुत्वैवं जनताश्चापि पुपूजुः श्रीपतिं नृपम् ।
दण्डवत् ताः प्रचक्रुश्च भक्तः पपात पादयोः ॥९१॥
तावल्लक्ष्मि मया नैजं रूपं चतुर्भुजं परम् ।
प्रकाशितं त्वया लक्ष्म्या साकं दिव्यमनोहरम् ॥९२॥
नदीतटे तु यत् सैन्यं सर्वं तत्र क्षणान्तरे ।
तत्तिरोभावितं तत्र महाश्चर्यं ततोऽभवत् ॥९३॥
गृहेऽहं भगवान् साक्षाद् दत्वा मे दर्शनं ततः ।
लब्ध्वा पूजां वरदानं मोक्षार्थं सम्प्रदाय च ॥९४॥
प्रसन्नतां समर्प्यैव ततस्तूर्णं त्वया सह ।
क्षणं स्थित्वा जगादाऽहं भक्ताय चात्मवेदिने ॥९५॥
यो मामेवं हि भजते तत्कृते सर्वथा त्वहम् ।
कल्पलतासमश्चाऽस्मि पूरयामि मनोरथान् ॥९६॥
शिल्पिनो ये मम मूर्तिं मम ध्यानपरायणाः ।
लोभस्वार्थविहीनाश्च करिष्यन्ति शुभाशयाः ॥९७॥
तेषां मोक्षं करिष्यामि यथा ते भक्तराडिह ।
इत्युक्त्वा स्वस्वरूपं च कृष्णे लक्ष्म्यां गृहान्तरे ॥९८॥
पूजनार्थं स्थापिते च स्थापितायां तिरोभवम् ।
अथ भक्तोऽपि नित्यं मां ध्यायति स्मरते तथा ॥९९॥
काले प्राप्ते विमानेन तद्गृहं समुपस्थितः ।
श्रीमानवीं स्त्रियं तस्य हरिदासं च तं तथा ॥१००॥
आरोहयित्वा दिव्यौ तौ कृत्वाऽनयं ममाऽक्षरम् ।
अन्यान् कालेन तद्वच्चाऽनयं धामाऽक्षरं मम ॥१०१॥
एवं लक्ष्मि मया भक्तो रथकारो हि तारितः ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेद् ध्रुवा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने
हरिदासाख्यस्य रथकारस्य भक्त्या सकुटुम्बस्य
भगवता मोक्षः कृत इत्यादिनिरूपणनामा
चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

पुरुषोत्तम उवाच—

श्रृणु नारायणीश्रि त्वं शिलाहारकथां तथा।
नाम्ना दामशिलादौ वै पुरा सुदामपत्तने ॥ १ ॥
न्यवसत् सकुटुम्बोऽयं खन्यश्मविक्रयोद्यमः।
शतशो वै जना भृत्या यत्रोद्यमं प्रकुर्वते ॥ २ ॥
शिलास्तु महतीर्दीर्घा निष्कासयन्ति भूस्तरात्।
प्रेषयन्ति विदेशेषु देवराजालयार्थिकाः ॥ ३ ॥
शिखराणि विचित्राणि प्रासादा भिन्नजातयः।
श्वेतशिलामया दिव्याः शिल्पकलादिशोभिताः ॥ ४ ॥
जायन्ते शिल्पिवर्याणां कलाभिस्तच्छिलाकृताः।
पाषाणानां हि खननं दिवा तु खनिभूस्तरे ॥ ५ ॥
सततं तदभिज्ञैस्तु क्रियते दामनोदितैः।
द्रष्टा दामशिलादो वै प्रमाता मूल्यकृत्तथा ॥ ६ ॥
निरीक्षणं यथाकालं कुरुते खनिभूस्तरे।
कर्मचारा यतन्ते च निष्कासनेऽधिरोहणे ॥ ७ ॥
शकट्यां गन्त्रिकायां च बहुसाधनसम्पदः।
तत्र दामशिलादो वै क्रयार्थे चाऽऽगतार्थिने ॥ ८ ॥
शिला ददाति मूल्येन दाम्ना यथोचिताः शुभाः।
मूर्तियोग्या बहुमूल्याः सौधयोग्यास्तथाविधाः ॥ ९ ॥
गृहयोग्या भित्तियोग्याः स्तरयोग्यास्तथाऽपराः।
विभिन्नमूल्यभावैश्च ददाति तास्तदर्थिने ॥१०॥
भृत्या दामशिलादस्य गन्त्र्यामारोहयन्ति ताः।
वृषभैरुष्ट्रकैर्हस्तिवर्यैश्च गेण्डकैस्तथा ॥११॥
महिषैर्यन्त्रवर्यैश्चाऽऽकर्षयन्ति सुगन्त्रिकाः।
सर्वत्र रक्षणं नारायणो हि भगवान् स्वयम् ॥१२॥
करोत्यारोहणे चावरोहणे च प्रसारणे।
उत्थापनेऽपसरणे विवर्तने विदारणे ॥१३॥
शतभारास्तत्र काचित् काचित्ततोऽधिगुर्विणी।
तदर्धाश्च तदर्धाश्च खन्यन्ते नित्यमेव ताः ॥१४॥
क्वचिच्छिलातिभारेण शकटी भंगमेति हि।
शिलातले हि शकटी चूर्णिता कचरायते ॥१५॥
अकस्मादापदाद्यासु रक्षत्येव प्रभुर्हरिः।
विचार्येत्थं कर्मचारान् दामशिलाद उत्तमम् ॥१६॥
हरे नारायण स्वामिन् वल्लभ श्रीपते हरे।
इत्येवं भजनं संकीर्तनं च रटनं हरेः ॥१७॥
उपादिदेश सततं रक्षणं येन मोक्षणम्।
स्वयं करोति भजनं भृत्यान् प्रकारयत्यपि ॥१८॥
शिलासु कृष्णनामानि गुणवन्ति न्ययोजयत्।
कृष्णशिला रामशिला नारायणशिला तथा ॥१९॥
लक्ष्मीशिला रमोपला राधोपला हरोपला।
देवोपला मन्दिराऽश्मा मूर्त्युपला सतीशिला ॥२०॥
विष्णुशिला ब्रह्मशिला परमेशशिलेति च।
देवीशिला सूर्यशिला तीर्थशिला गुरूपला ॥२१॥
मोक्षशिला चात्मशिला मुक्तिशिलेति वै तथा।
अवतारशिला तद्वद् गोलोकप्रस्तरस्तथा ॥२२॥
वैकुण्ठशिला चक्राश्मा शालग्रामशिला तथा।
भगवत्प्रस्तरश्चापि जनार्दनशिलेति च ॥२३॥
योगाशिला ज्ञानशिला ध्यानशिलेति नामभिः।
शिलावर्गाः कृतास्तेन नारायणप्रसत्तये ॥२४॥
नारायणं रटिष्यामि शिलायोगेन मानवाः।
शुभनाम ग्रहीष्यन्ति पापनाशकमुत्तमम् ॥२५॥
इत्यभिप्रेत्य नामानि हरेः सुयोजितानि वै।
तेन दामशिलादेन शिलासु मोक्षदानि हि ॥२६॥
मानवा अपि गृह्णन्ति शिलाव्याजेन शार्ङ्गिणः।
नामानि भृत्यवर्गाश्च श्रेष्ठिनः पावनानि वै ॥२७॥
एवं भक्तेन सद्भक्तिः कारिता कीर्तनात्मिका।
पाविताश्च नरा नार्यः प्राकृता अपि नामभिः ॥२८॥
पुण्यं महत्तमं तस्य जातं प्रसन्नतात्मकम्।
ममाऽनुग्रहरूपं वै वर्धतेऽपि निरन्तरम् ॥२९॥
भक्तभक्तिं समाकर्ण्य तद्गृहं मानवा रमे।
सन्तो भक्ताः समायान्ति धार्मिका यात्रिभिक्षुकाः ॥३०॥
मिलित्वा ते प्रकुर्वन्ति भजनं मम कीर्तनम्।
शिलाजन्यां मम मूर्तिं सम्प्रतिष्ठाप्य वै गृहे ॥३१॥
पूजयन्ति सदा भावैर्महोत्सवैः सुवस्तुभिः।
गायनं नर्तनं गीतिं कुर्वन्ति रासमग्रतः ॥३२॥
धूपदीपादिकं चापि नैवेद्यं च जलं च मे।
समर्प्य मत्प्रसादं ते गृह्णन्ति च वियन्ति च ॥३३॥
एवं सत्संगसंघो वै दामशिलादमन्दिरे।
पुष्टिं प्राप्तस्तदा लक्ष्मि प्रसन्नोऽहं विशेषतः ॥३४॥
अभवं च प्रतिमायां वर्तमानो निरन्तरम्।
कृतां सेवां च गृह्णामि रक्षां करोमि सर्वथा ॥३५॥
अथैकदा गृहे भक्तश्चासीद् भृत्यास्तु वै खनौ।
क्रोशदूरेऽभवन् सर्वे शिलानिष्कासने रताः ॥३६॥
दीर्घा महोपला तैश्च निष्कासिता बहिः कृता।
आरोपिता शकट्यां च भग्ना सा शकटी द्रुतम् ॥३७॥

शकटीपार्श्वगा भृत्याः कर्मचारास्तु येऽभवन् ।
तेषु द्वित्राः शकट्यां वै कच्चरिताः शिलातले ॥३८॥
हाहा शोकस्तदा तत्र व्यजायत जनेषु वै ।
जलं कच्चरिताः पातुं प्रार्थयामासुरेव ते ॥३९॥
ददुर्वारि ततो मूर्छां प्रापुस्ते मरणोन्मुखाः ।
अथाऽन्ये सस्मरुर्नारायणं मां रक्षकं प्रभुम् ॥४०॥
प्रयत्न सहसा चक्रुर्भाराक्रान्तावनाय ते ।
शकटीं च शिलां चाप्युत्तोल्य सम्भूय मानवैः ॥४१॥

निष्कासिताः कच्चरिता द्विशास्ते कर्मचारिणः ।
अभाना गतभानास्ते मृत्यून्मुखाः सुदुःखिताः ॥४२॥
वर्तन्ते तावदेवाऽपि कर्मचारैर्निवेदितः ।
भक्तो दामशिलादो वै गृहे गत्वा तु सत्वरम् ॥४३॥
आययौ स खनिं यावत् स्मृत्वा नारायणं हि माम् ।
तावदहं साधुवेषोऽटवीतश्चाययौ खनिम् ॥४४॥
भोजनार्थं भिक्षुकः सन् जलार्थं भिक्षयन् जलम् ।
विलोक्य तान् कच्चरितानाश्चर्यपरमोऽभवम् ॥४५॥

स्तब्धोऽभवं क्षणं ते तु प्रार्थयामासुरच्युतम् ।
हरे कृष्ण दीनबन्धो समुज्जीवय दीननॄन् ॥४६॥
मनुष्यहत्या भक्तस्य यथा न स्यात् प्ररक्षय ।
रंकरक्षाविधाता त्वं भक्तेच्छापूरको भवान् ॥४७॥
सर्वदुःखप्रहाता त्वं प्ररक्षय निजाश्रनान् ।
नाऽत्रौषधं भवेच्छक्तमस्थिकच्चरचूर्णिते ॥४८॥
देहे रक्तातिरिक्तेऽत्र विना त्वां जीवनं नहि ।
चमत्कारं विना सिद्धिं विना नैषां हि जीवनम् ॥४९॥
मृतप्राया मृगाश्चेमे नान्यस्त्वां योगिनं विना ।
नवीकर्तुं समीकर्तुं सन्धिं कर्तुं क्षमोऽपरः ॥५०॥

इत्येवं वदमानानां शृण्वन् साधुर्जलं करे ।
समादाय ददौ तेभ्यो मुखे त्वाचमनीयकम् ॥५१॥
रक्षां निधाय कुक्षिस्थं भस्म धृत्वा करद्वये ।
मर्दयामास भग्नानां देहेष्वमित आदरात् ॥५२॥
तावत्ते स्वस्थतां प्राप्ताः सन्धिता नीरुजीकृताः ।
रक्तपूर्णा अभवँश्च यथापूर्वं तथैव ते ॥५३॥

उत्थिताः स्वप्नतो यद्वत् प्रणेमुः साधुयोगिनम् ।
जीवनं प्राप्य विश्रान्तिं लेभुः क्षणं सतः पुरः ॥५४॥
साधुर्भिक्षां जगृहे च जलान्नं बुभुजे ततः ।
तेऽपि सर्वे प्रसादं च सम्यग् बुभुजिरे मम ॥५५॥
अथ शान्त्या निषेदुस्ते सेवमानाः पदाम्बुजे ।
पप्रच्छुर्मां पापनाशकरं साधनमुत्तमम् ॥५६॥

नारायणस्य विज्ञानं मूर्तिरूपं तथोत्तमम् ।
अहं वै कथयामास सर्वं तेभ्यो यथातथम् ॥५७॥
सतां सेवा हरेर्भक्तिस्तीर्थानां सेवनं तथा ।
पापनाशकराण्येव भवन्ति भगवत्कृपा ॥५८॥
सतां समागमेनैव विज्ञानं श्रीहरेर्भवेत् ।
सच्छास्त्राणां शीलनेन कथायाः श्रवणेन च ॥५९॥
पूर्वसंस्कारबलतो विज्ञानं जायते हरेः ।
योगाभ्यासेन सहसा कल्मषाणां विनाशने ॥६०॥

योगिगत्या ब्रह्मगत्या कृष्णमूर्तिः प्रकाशते ।
पिण्डेऽस्ति घटना रम्या यादृशी तादृशी पुनः ॥६१॥
वैराजे वर्तते चापि सूक्ष्मा स्थूलेत्यभेदतः ।
देहे तु मानवे नाड्यो ब्रह्माण्डे नदिकास्तु ताः ॥६२॥
देहे तु कुक्षयः सन्ति ब्रह्माण्डे चाऽब्धयस्तु ते ।
पादमूलं तु पातालं मूर्धा सत्यं कटिर्हि भूः ॥६३॥
देहस्थेन्द्रियनाडीनां वैराजेन्द्रियनाडिकाः ।
कारणानि ततश्चैक्यभावा भवन्ति ता इमाः ॥६४॥

योगाभ्यासरता जिह्वाप्रान्तं यान्ति समाधिना ।
तदा वैराजजिह्वाया अन्तं पश्यन्ति योगिनः ॥६५॥
एवं सर्वेन्द्रियाणां तु प्रान्तं यान्ति समाधिना ।
तदा वैराजेन्द्रियाणामन्तं पश्यन्ति योगिनः ॥६६॥
सुषुम्णा वर्तते मध्ये देहेऽत्र नाभिमूर्ध्वगा ।
वामे चेडा पिंगला तु दक्षे स्थिता सदाऽस्ति वै ॥६७॥
सुषुम्णान्तं तु मूर्धानं गत्वा वैराजमीक्षते ।
सा तु दीर्घा ब्रह्मरन्ध्राद् वैराजं योगमृच्छति ॥६८॥
तेजःकिरणरूपा वै वैराजात्पुरुषावधिम् ।
महापुरुषरन्ध्रात् सा तेजःकिरणसंज्ञिता ॥६९॥

अक्षरेण च तादात्म्यं गता ततो हरौ हि सा ।
प्रभातादात्म्यमापन्ना विद्यते किरणात्मिका ।
अतः सुषुम्णामार्गेण योगी याति परं पदम् ॥७०॥
हरेः किरणं निर्यन् स्यात् सर्वावतारमन्तगम् ।
ईश्वरेषु च जीवेषु वर्तते व्यापकं हि तत् ।
तद्ब्रह्म तच्च विज्ञानं सत्त्वं प्रकाश एव तत् ॥७१॥

तस्य भासा सर्वमिदं विभाति ज्ञानदीप्तिमत् ।
स्नेहातिशयतश्चैवंविदः प्रभा विवर्धते ॥७२॥
जाग्रति वा स्वापके वा सुषुप्तौ वा यदा यदा ।
हरौ स्याल्लीनता यस्य स्नेहेन तत्र तं व्रजेत् ॥७३॥
संकल्पेन हरेश्चापि शक्त्या चापि हरेस्तथा ।
ज्ञानशक्त्या क्रियाशक्त्या चेच्छाशक्त्या हरेस्तथा ॥७४॥

जीवेशाः सम्प्रवर्तन्ते जानन्तः क्रिययाऽन्विताः ।
कर्मवशाः सर्वजीवाः स्वतन्त्रा नहि सन्ति वै ॥७५॥
हरेर्ज्ञानक्रियेच्छाभिः क्रियेच्छाज्ञानिनः खलु ।
फलप्रदाता भगवान् कर्मणामस्ति सर्वथा ॥७६॥
हरेस्ताः शक्तयो नृणां स्वस्वकर्मानुसारतः ।
ज्ञानादीन् प्रेरयन्त्येव तेन सृष्टिः प्रवर्तते ॥७७॥
सृष्टेर्जीवा हरौ ध्यानाभ्यासाद् दिव्या भवन्ति वै ।
दिव्यदृष्टय एवापि तदा ब्रह्मसुदर्शनम् ॥७८॥
मायागुणादिशून्यं तन्निर्गुणं ब्रह्म तैजसम् ।
निजैर्दिव्यगुणैर्युक्तं सगुणं ब्रह्म शाश्वतम् ॥७९॥
परेशं परमात्मानं परब्रह्म सनातनम् ।
प्राप्नुवन्ति महात्मानः सतां सत्संगसत्फलाः ॥८०॥
नराकारं दिव्यमूर्तिं श्रीपतिं तं सतां पतिम् ।
दिव्यमूर्तिं परात्मानं यान्ति तद्योगिनस्त्विमे ॥८१॥
दिव्यतां यान्ति बह्वस्तत्समा ब्रह्मरूपिणः ।
यथा ब्रह्मप्रिया दिव्या यथा मुक्ता ह्यसंख्यकाः ॥८२॥
यथा लक्ष्मीर्यथा राधा यथा सती सरस्वती ।
तथा दिव्या भवन्त्येव नरा नार्यः परात्मगाः ॥८३॥
तस्मान्नारायणः कृष्णो भजनीयो हि रक्षकः ।
मोक्षदः स्वर्गदश्चापि सुषुम्णामार्गलब्धिमान् ॥८४॥
खनौ नारायणो नित्यं स्मरणीयो जनार्दनः ।
सतां मूर्तौ हरिश्चास्ते सेवनीयः सतां गतिः ॥८५॥
इत्युक्त्वा निर्भयान् कृत्वा ददौ मन्त्रं तदा त्वहम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८६॥
अथ ते मां गुरुं मत्वा लक्ष्मि निजालयं प्रति ।
निन्युः साधुस्वरूपं मां चमत्कारिजनं गुरुम् ॥८७॥
भोजयामासुरत्यर्थं पाययामासुरिष्टकम् ।
पायसं शर्करायुक्तं सेवयामासुरादरात् ॥८८॥
पूजयामासुरेवाऽपि क्षमां ययाचिरे ततः ।
पादामृतजलं मे ते पपुर्मयाऽपि वै तदा ॥८९॥
आशीर्वादैर्योजिताश्च कृपया भक्तिगोचराः ।
भुक्तिर्मुक्तिर्भवतां वै यथेष्टा जायतां सदा ॥९०॥
अथाऽहमभवं लक्ष्मि जिगमिषुस्तदा तु ते ।
कृष्णप्रत्यक्षलाभार्थं कृष्णदर्शनलालसः ॥९१॥
ययाचिरे मया तथाऽस्त्विति तत्र नियोजिताः ।
अपश्यन् मां शंखचक्रगदाब्जधारिणं हरिम् ॥९२॥
आश्चर्यं परमं प्राप्ताः प्रत्यक्षयोगिनो यथा ।
दिव्या दिव्यस्वरूपास्ते व्यजायन्त तदा द्रुतम् ॥९३॥
ननृतुश्च जगुश्चापि मुमुदुश्चातिहर्षुलाः ।
पुपूजुर्मां परब्रह्म रक्षकं प्राणरक्षकम् ॥९४॥
अथाऽहं तत्र मूर्तौ मे तिरोऽभवं हि पश्यताम् ।
तेषां तदा समारभ्य तेऽपि मूर्तिनिषेविणः ॥९५॥
सर्वथाऽऽत्मनिवेदाश्चाऽभवन् भक्ताः सहस्रशः ।
अथ काले समायाते भक्तं दामशिलादकम् ॥९६॥
तस्य भृत्यान् बहून् भक्तान् तथा पत्नीं कलाभिधाम् ।
विमानेनाऽनयं धाम ऽक्षरं मे शाश्वतं परम् ॥९७॥
एवं लक्ष्मि मया रक्षा कृता भक्तिश्च कारिता ।
ज्ञानं दत्तं च सामर्थ्यं मुक्तिश्चापि कृता शुभा ॥९८॥
एवं मदीयभक्तानां प्रान्ते मोक्षं करोम्यहम् ।
ददामि दिव्यतां चापि भक्त्या साध्यो यतोऽस्म्यहम् ॥९९॥
पठनाच्छ्रवणादस्य स्मरणात् स्तवनादपि ।
भुक्तिर्मुक्तिर्भवत्येव तथेष्टा शुभदा गतिः ।
वल्लभः श्रीगुरुः स्वामी प्रभुः सर्वगतिस्त्वहम् ॥१००॥

इति श्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने शिलाहारस्य दामशिलादनामकभक्तस्य भृत्यानां रक्षणं दामशिलादादेश्चान्ते मोक्षणं च भगवता कृतमित्यादिनिरूपणनामा पञ्चदशाधिक-द्विशततमोऽध्यायः ॥ २१५ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं शिल्पकलाविदः कथाम् ।
नाम्ना सञ्जयदेवस्य मम भक्तस्य शोभनाम् ॥ १ ॥
कुतर्कपुरवासोऽभूद् भक्तो नारायणे मयि ।
कुटुम्बसहितो नित्यं भजते मां श्रियः पतिम् ॥ २ ॥
बहुधा शिल्पिनं वेत्ति काष्ठपाषाणधातुजम् ।
वृक्षवल्लीस्तबकादि देवर्षिमानवादि च ॥ ३ ॥
पशुपक्षिसर्पकीटादि च तत्त्वादिकं तथा ।
सर्वविधं कलया स विजानाति यथायथम् ॥ ४ ॥
सर्वविधे शिल्पने सञ्जयदेवो हरिं तु माम् ।
लिखत्येवाऽन्तरे सूक्ष्मं सूक्ष्ममूर्तिस्वरूपिणम् ॥ ५ ॥
यथाऽन्ये नैव जानीयुस्तथा वै नान्तरीयकम् ।
शिल्पे प्रान्तरशिल्पं च तदन्तरे तु मां शुभम् ॥ ६ ॥
विदधाति स्मरन् मां स सबीजं शिल्पिनं यतः ।
दिव्यं भवति श्रीकृष्णाऽर्पितं कृष्णसुयोगवत् ॥ ७ ॥
एवं कृष्णार्पणं भक्तः करोति मन्मयं सदा ।
सर्वं मदात्मकं शिल्पं सफलोद्यमशोभितम् ॥ ८ ॥

भक्तो निजान्तरे भक्तिं मनुते तत्कलात्मिकाम् ।
यत्र नारायणश्चाऽहं निर्मितः संभवामि ह ॥९॥
शिल्पकलासु सर्वासु मां च नारायणं हरिम् ।
चष्टे ध्यायति कुरुते नमति पूजयत्यपि ॥१०॥
प्रातर्नित्यं समुत्थाय ध्यात्वाऽर्हणं करोति मे ।
मूर्तेः पञ्चामृतस्नानं तीर्थस्नानं तथाऽर्घ्यकम् ॥११॥
भूषाश्रृंगाराऽम्बराणि समर्पयन्ति मे सदा ।
धूपं दीपं च नैवेद्यं ताम्बूलकं जलं तथा ॥१२॥
सुगन्धितैलसारं च महार्हासनमञ्चकम् ।
समर्पयति नत्वा मे कृत्वा च दण्डवत् स्तवम् ॥१३॥
नित्यमर्थयति श्रेयश्चैहिकं पारलौकिकम् ।
सतां समागमं कृष्णसेवां श्रीकृष्णकीर्तनम् ॥१४॥
करोति सञ्जयो नित्यं केशवत्या स्वयोषिता ।
पुत्रेण सुरदेवेन साकं गृहे निशामुखे ॥१५॥
नृत्यं च गायनं कृष्णचमत्कारकथाश्रवम् ।
करोति शुभनैवेद्यं प्रसादस्य प्रदानकम् ॥१६॥
भुक्त्वा प्रासादिकं पश्चादुद्योगे वर्तते सदा ।
एवं सञ्जयदेवो मे भक्तिनिष्ठो हि वर्तते ॥१७॥
तस्याऽऽज्ञायां शिल्पिनोऽन्ये वर्तन्ते कर्मचारिणः ।
तेऽपि सञ्जययोगेन भजन्ते परमेश्वरम् ॥१८॥
अथैकदा नृपो नाम्ना खड्गवर्मा विहारराट् ।
स्वस्य नूतनसौधस्य निर्मित्यै तं समाह्वयत् ॥१९॥
सप्तभौमस्य कक्षासु कोणे कोणे स्थले स्थले ।
यावत्प्रसिद्धजातीनां पुत्तलीस्थापनाय तु ॥२०॥
आज्ञां चकार नृपतिर्धनव्ययेऽप्युदारताम् ।
प्रदर्शयन् ददानश्च तोषयन् कर्मशिल्पिनः ॥२१॥
भक्तोऽयं नृपतेराज्ञां स्वीचकारातिमोदवान् ।
शुभेक्षणेक्षितिं योग्यविधिना संप्रपूज्य सः ॥२२॥
खनित्वा मंगलं तत्र नृपहस्तेन संव्यधात् ।
प्रासादः सप्तभौमो वै सम्पन्नश्चेन्द्रसौधवत् ॥२३॥
स्थले स्थले पुत्तलानि प्रातिष्ठिपन्महान्त्यपि ।
रम्याणि च विचित्राणि सौम्यमनोहराणि च ॥२४॥
नारायणस्य कृष्णस्य राधायाश्च श्रियास्तथा ।
सरस्वत्याश्च लक्ष्म्याश्च माणिक्या ब्रह्मयोषिताम् ॥२५॥
श्रीहरेरवताराणामीश्वराणां शुभान्यपि ।
ईश्वरीणां प्रतिमाश्च महर्षिसुरयोगिनाम् ॥२६॥
देवीनां देवतानां च मानवानां च पक्षिणाम् ।
पशूनां वन्यजातीनां ग्रामीणानां च देहिनाम् ॥२७॥
पावनानां मंगलानां ख्यातानां प्रतिमास्तथा ।
उद्भिज्जानां सुरम्याणां दृश्यानि सरितां तथा ॥२८॥
पर्वतानां ग्रहाणां च विद्युतां व्योमचारिणाम् ।
मेघानां च समुद्राणां दृश्यान्यपि व्यदर्शयत् ॥२९॥
एवंविधं महासौधं रचयित्वा स्थले स्थले ।
सूक्ष्मं नारायणं मां स समस्थापयदच्युतम् ॥३०॥
प्रसन्नमानसो भक्तो वास्तुं तस्य न्यवेदयत् ।
राजा विप्रान् समाहूय वास्तुपूजामकारयत् ॥३१॥
हवनानि भोजनानि पूजनानि ह्यकारयत् ।
दानानि दक्षिणाः पारितोषिकाणि ददौ नृपः ॥३२॥
शिल्पिने स्वर्णश्रृंगारैरलंकृतं गजं ददौ ।
ग्रामाणां पञ्चकं चापि दासान् दासीस्तथा ददौ ॥३३॥
शिल्पिभ्यश्च यथायोग्यधनादीनि नृपो ददौ ।
अथाऽलङ्कृतहस्तीन्द्रं समारुह्य गृहं निजम् ॥३४॥
यावत् सञ्जयदेवस्तु प्रयाति तावदेव तु ।
मार्गे गजः प्रमत्तोऽतिमदाविष्टोऽभवद् द्रुतम् ॥३५॥
अप्रधृष्यश्चातिबलो विच्छिन्नोन्मत्तसञ्चरः ।
अशासनीयोऽप्यभवन्महाविभ्रम उद्धतः ॥३६॥
हस्तिपकाऽनियम्यश्चाऽगम्यो भीतिकरस्तथा ।
महाबृंहणकर्ता च महावेगद्रवान्वितः ॥३७॥
धावमानोऽनियमितो दुद्रावोत्पथसञ्चरः ।
मानवा दुद्रुवुर्भीताः प्राणरक्षार्थमेव ह ॥३८॥
न केऽपि तत्र तिष्ठन्ति यत्र याति हि वारणः ।
अम्बालिका सकृथा च विवृता पतिता क्षितौ ॥३९॥
पतितः सञ्जयश्चापि हस्तिपकः पपात च ।
गजः सञ्जयदेवं मे भक्तं निगृह्य शुण्डया ॥४०॥
दूरे चिक्षेप सहसा भक्तः पपात खातके ।
खातमध्ये ह्यनिःसारे पातपीडातिमूर्छितः ॥४१॥
सस्मार मां हरिं तत्र हृदये भक्तरक्षकम् ।
गजो दूरं गतो यावत्ततः खातं तु मानवाः ॥४२॥
आययुस्तस्य वीक्षार्थं रक्षार्थं परितो जनाः ।
तत्पूर्वं तु तदा लक्ष्मि भक्तपार्श्वं गतोऽभवम् ॥४३॥
हस्ताभ्यां संस्पृशँस्तं च मूर्छां पीडामनाशयम् ।
दर्शनं मे ददौ तस्मै कृष्णनारायणात्मकम् ॥४४॥
हस्ते धृत्वा बहिस्तं चाऽनिष्कासयं तु गर्ततः ।
स्वस्थो भक्तो विरोगश्च बाधापीडाविवर्जितः ॥४५॥
भजन्यां च रहन् मां च मोहमानो हि मानवान् ।
जगाद भगवानत्राऽऽगतो मे रक्षणाय वै ॥४६॥

तत्काराभ्यां नीरुजोऽहं विपीडोऽत्र भवामि ह ।
एवं नारायणं सर्वे भजन्तां परमेश्वरम् ॥४७॥
इत्युक्त्वाऽदर्शयत् सर्वानङ्गुल्या मां पुरःस्थितम् ।
विप्ररूपधरं कृष्णं तेजोव्याप्तसुविग्रहम् ॥४८॥
प्रणेमुस्ते हरिं मां च दिव्यं मानवविग्रहम् ।
कल्याणं प्रार्थयाञ्चक्रुश्चोपादिदेश चाप्यहम् ॥४९॥
कल्याणं जायते कृष्णभक्त्या सतां प्रसेवया ।
सर्वमित्यर्थकर्तव्यं श्रीकृष्णप्रीतिहेतुकम् ॥५०॥

सतां प्रसन्नता लभ्या गुणा लभ्याः सतां तथा ।
देवाधिकाः सदा सन्तो मान्या मुमुक्षुभिः शुभाः ॥५१॥
विष्णुवच्चाऽर्चनीयास्ते सेवनीयाश्च विष्णुवत् ।
सतामाज्ञा पालनीया वचोधार्यं च मानसे ॥५२॥
वर्तितव्यं च निश्छद्म सतामग्रे तु दासवत् ।
कृष्णतुल्यान् सतो दृष्ट्वा नमनीयं तदग्रतः ॥५३॥
मन्तव्यं हृदये नैजे सन्तः श्रीकृष्णमूर्तयः ।
महान्तस्ते समर्थाश्च दिव्याः सर्वात्मना शुभाः ॥५४॥
पावनाः श्रीकृष्णरूपा विक्रियावर्जिताः पराः ।
मायापारगताः सन्ति मायायामहमस्मि च ॥५५॥

मम मायाविलोपो वै सत्सेवया भविष्यति ।
पामरस्य मम सर्वाण्यघान्येष्यन्ति संक्षयम् ॥५६॥
एवं सतां गुणग्राही गुणसिन्धुर्भवेदिह ।
ये तु लोके दुष्टजना निन्दन्ति साधुयोगिनः ॥५७॥
कथयन्ति मिथो निन्दां सतां चागुणवर्णनाम् ।
यथेमे साधवः सन्ति विवेकवर्जिताः खलु ॥५८॥
लोके स्थातुं न जानन्ति भोक्तुं पातुं च भाषितुम् ।
परिधातुं च वसनं दातुं जानन्ति नैव च ॥५९॥
कर्तुं चाभ्यागतस्य स्वागतं विदन्ति नैव च ।
महत्त्वं ख्यापयितुं स्वं यतन्ते चोपदेशदाः ॥६०॥
कामो लोभो रतिः क्रोधो विद्यन्तेऽस्य यथा मम ।
नाऽयं साधुर्मृषा साधुरेवं गृह्णन्ति दूषणम् ॥६१॥
एतादृशाश्चर्मनेत्रा निरयालयभोगिनः ।
दुःखिनोऽत्र प्रजायन्ते मृत्वा याम्याधिकारिणः ॥६२॥
कदापि ते न जायन्ते गुणिनो मोक्षसन्मुखाः ।
आसुरास्ते तु विज्ञेयाः सतां द्रोहकरास्त्विह ॥६३॥
यूयं शिल्पकलाज्ञा वै सज्जयोऽयं विशेषतः ।
यावत्कलासु मूर्तिं मे धारयत्येव सर्वथा ॥६४॥
तत्र सर्वत्र भक्तिर्मे भवत्यस्य च वस्तथा ।
तादृशीभक्तियोगेन विप्ररूपी जनार्दनः ॥६५॥

समायातोऽस्मि रक्षाकृत् प्रसन्नः सेवया मम ।
सतः संसेव्य च हरिं यान्तु मोक्षं परं पदम् ॥६६॥
कृष्णार्चा कृष्णवत् पूज्या मान्या सेव्या च कृष्णवत् ।
सन्तस्तथैव सम्पूज्याः मान्याः सेव्याश्च कृष्णवत् ॥६७॥
कृष्णो महान्तः सन्तश्च सर्वैश्वर्यादिसंभृताः ।
सर्वरक्षाकराः सन्ति सर्वगाः शक्तिशालिनः ॥६८॥
परकायं प्रविशन्ति रक्षन्त्यापद्विपत्तितः ।
कृष्णो मूर्तिं समाविश्य वर्तते रक्षणाय वै ॥६९॥

मूर्तौ निजेच्छया साक्षात् प्रविश्यैव विराजते ।
साक्षान्मे तु यथा तद्वन्मर्यादा सर्वथा सदा ॥७०॥
मूर्तेरग्रे सतामग्रे पालनीया हि गौरवात् ।
सतां हृदये साक्षाद्वै स्वयमाविश्य सर्वथा ॥७१॥
वर्तेऽहं वै ततो नित्यं सेवनीया हि साधवः ।
मर्यादा पालनीया वै सतां मूर्तेश्च मे समाम् ॥७२॥
ये तु मत्वा हि पाषाणं मूर्तिं सतस्तु मानवान् ।
प्राकृतान् साधुपुरुषान् मत्वा निन्दन्ति नास्तिकाः ॥७३॥
मम वचांसि साधूनां वचांसि मोक्षदान्यपि ।
मानयन्ति मृषा निरर्थकानि ते तु मायिकाः ॥७४॥

निन्दकाः पापिनो यास्यन्त्येव दुःखं तु नारकम् ।
तेषां चात्मपरात्मादिविज्ञानं नैव जायते ॥७५॥

कृष्णस्य निश्चयो नैव जायते मूर्तिगस्य मे ।
कल्याणं तादृशानां वै नैव भवति नैव हि ॥७६॥
दौर्मत्यं खलु तेषां तु मूर्ताविवेति नैव च ।
किन्तु सत्सु तथा तद्वत् स्वेष्टदेवेषु तादृशम् ॥७७॥
अनीशत्वादिनास्तिक्यं जायते बहुपापिनाम् ।
ईश्वरानवतारांश्च मन्वते नैव सर्वथा ॥७८॥
गोलोकं चापि वैकुण्ठं श्रीपुरं चाक्षरं पदम् ।
ब्रह्मपदं च विभवान् मन्वते नैव ते खलाः ॥७९॥
खलानां सम्प्रसंगेन जायते खलता तथा ।
पूर्वपापादियोगेन जायते खलता ध्रुवं ॥८०॥
नास्तिकानां वचोभिश्च कथाभिः संगतस्तथा ।
कामक्रोधाभिमानाद्यैर्दोषैश्च खलता भवेत् ॥८१॥
खलस्य हृदये भावो न तिष्ठते सतां हरेः ।
तस्मात् खरादितुल्यस्य खलस्य संगमः क्वचित् ॥८२॥
कर्तव्यो नैव लोकेऽत्र मुमुक्षुभिस्तु मानवैः ।
श्रोतव्या सुकथा दिव्या दिव्यबोधप्रदा हरेः ॥८३॥
सतां कथा दिव्यलीला श्रोतव्या सेवकैः सदा ।
कर्तव्यः संगमश्चापि सतां नारायणस्य च ॥८४॥

दिव्यता च सतां बोध्या बोध्या मूर्तौ स्थितिर्मम ।
विशेषं मम माहात्म्यं सतां बोध्यं च मादृशम् ॥८५॥
एवंविधस्य भक्तस्य रक्षां करोमि सर्वथा ।
यथा रक्षा कृता गर्त्ते सञ्जयस्य मया त्विह ॥८६॥
मूर्तौ स्थित्वा परां रक्षां करिष्ये मां भजन्त्विति ।
सर्वजीवेषु कृष्णोऽहं निवसामीत्यहिंसया ॥८७॥
सर्वथा वर्तितव्यं मे भक्तैर्दयापरैरिह ।
अद्रोहो बलवान् धर्मः प्रीणनं धर्म उत्तमः ॥८८॥
सर्वस्वार्पणभावैश्च प्रीणयेन्न तु हिंसयेत् ।
कायेन वाचा मनसा क्रियया सेवयाऽपि च ॥८९॥
प्रीणयेन्मां सतश्चापि स्वर्गं मोक्षं लभेत्ततः ।
क्रोधाऽहंकारमानाद्या दोषा वर्ज्या हि हिंसकाः ॥९०॥
शान्ततया सदा स्थैर्यं भजनीयो जनार्दनः ।
भजनीयाः साधवश्च भगवत्पादसद्रताः ॥९१॥
इत्युक्त्वा मम भक्तेभ्यो दत्वा मन्त्रं मदाश्रयम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९२॥
भक्तकृतां प्रपूजां सङ्गृह्य तिरोऽभवं द्रुतम् ।
गजस्तु राजपुरुषैर्धृतश्चातिप्रयत्नकैः ॥९३॥
शमितश्चोपचारैश्च सञ्जयाय ततो ददुः ।
अथ स्पृद्धं मम भक्तं पूर्णायुष्येऽहमच्युतः ॥९४॥
लक्ष्मि मोक्षप्रदानार्थं प्रत्यक्षस्तद्गृहेऽगमम् ।
हस्तियाने तु भक्तं तं समादाय तथाऽपरान् ॥९५॥
प्रदर्श्य दिव्यतां मे चाऽनयं पत्नीयुतं द्रुतम् ।
धामाऽक्षरं परं दिव्यं तथाऽपरान् सुशिल्पिनः ॥९६॥
अप्रापयं परं धाम नरान्नारीश्च भावुकीः ।
एवं रक्षा मया लक्ष्मि कृता गर्ते च हस्तितः ॥९७॥
मम मूर्तिं शिल्पविदः कुर्वन्ति पूजयन्ति माम् ।
दिव्यभावास्तु ते भक्त्या यान्ति मे परमं पदम् ॥९८॥
यादृशीषु तादृशीषु शालग्रामशिलास्वहम् ।
सत्सु सतीषु साध्वीषु योगिष्वपि वसाम्यहम् ॥९९॥
सर्वत्राऽवस्थितश्चाऽस्मि प्रतिष्ठापितमूर्तिषु ।
विशेषतः स्थितश्चाऽस्मि भक्तमानसपूरकः ॥१००॥
यत्र मम निवासोऽस्ति काष्ठे कुड्ये शिलातले ।
सर्वं दिव्यं भवत्येव दिव्यस्य मे प्रसंगतः ॥१०१॥
माया दिव्या मम योगान्नारी नरो द्रुमादयः ।
मम योगेन दिव्यास्ते जायन्ते मोक्षदाः सदा ॥१०२॥
दोषा गुणाः प्रजायन्ते जडानि चेतनानि वै ।
मम योगेन दिव्यानि जायन्ते यानि कान्यपि ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने शिल्पकारस्य सञ्जयदेवस्य भक्त्या भगवता गजतो रक्षणं कृतं मोक्षणं चेत्यादिनिरूपणनामा षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथां चित्रकृतः शुभाम् ।
नाम्ना संभरदेवस्य मम भक्तस्य पावनीम् ॥ १ ॥
निम्बकाले महाग्रामे सौराष्ट्रे सकुटुम्बकः ।
भक्तः संभरदेवाख्यश्चित्रकलाविशारदः ॥ २ ॥
अभवत् सर्वचित्राणां स्वतन्त्रो रूपधायकः ।
यथाभावो मानवस्य पशोर्वा पक्षिणेऽपि च ॥ ३ ॥
कीटानां वृक्षवल्लीनां तत्त्वानां भूजलादिजः ।
रूपं रङ्गः स्वभावश्च दृश्यता च क्रिया यथा ॥ ४ ॥
यथा प्रभा यथा हास्यं चेष्टाऽवस्था यथा तथा ।
सर्वं चित्रेषु सहसा लेखिन्या दर्शयत्यथ ॥ ५ ॥
पटेषु चापि कुड्येषु नाटकेषु च मूर्तिषु ।
प्रासादेषु मन्दिरेषु सौधकक्षासु सर्वथा ॥ ६ ॥
कागदेषु च काष्ठेषु पुत्तलेषु समस्ततः ।
प्राकृतान् गुणभावान् स प्रोद्भावयति चित्रकृत् ॥ ७ ॥
एवंविधकलायुक्तो भजते मां निरन्तरम् ।
सर्वचित्रेषु वै सूक्ष्मं मम रूपं करोति च ॥ ८ ॥
सूक्ष्मातिसूक्ष्मं कृत्वा स्वं कृतकृत्यं स वेत्ति वै ।
यत्र चित्रे हरिर्नास्ति तच्चित्रं निष्फलक्रियम् ॥ ९ ॥
यत्र चित्रे हरेर्मूर्तिश्चित्रं तत् सफलक्रियम् ।
एवं क्रियाऽपि तस्याऽभूत् सदा श्रीकृष्णमिश्रिता ॥१०॥
वृत्तिश्चित्रमयी कृष्णमयी तस्याऽभवत् सदा ।
स्वप्नेऽपि चित्रकरणे भासते श्रीपतिः प्रभुः ॥११॥
प्रातरुत्थाय मे नाम गृह्णाति हे नरायण ।
राधाकृष्ण हरिकृष्ण श्रीमत्कृष्णनरायण ॥१२॥
एवं स्मृत्वा रटित्वाऽथ स्नात्वा पूजयति प्रभुम् ।
सर्वलब्धोपचारैश्च धूपं दीपं ददाति च ॥१३॥
नैवेद्यं दण्डवद् वारि नीराजनं प्रदक्षिणम् ।
समर्प्य च क्षमां प्रार्थ्य भुक्त्वा प्रसादमुत्तमम् ॥१४॥

चित्रशालां प्रयात्येव करोति चित्रलेखनम् ।
अन्येऽपि बहवस्तत्र चित्रकृतो भवन्ति च ॥१५॥
कर्मचारास्त एवाऽपि भजन्ति भक्तसंगताः ।
मामेव परमात्मानं श्रीनाथं कम्भरात्मजम् ॥१६॥
गोपालबालकं ब्रह्मप्रियेशं माणिकीपतिम् ।
अवतारपतिं मुक्तपतिं दुःखविनाशकम् ॥१७॥
रात्रौ मिलित्वा सर्वे ते कीर्तयन्ति रमापतिम् ।
नृत्यन्ति पुरतो मूर्तेर्गायन्ति गीतिकास्तथा ॥१८॥
तदा संभरदेवोऽपि भक्तमण्डलनोदितः ।
करोति वर्णनं मूर्तेः श्रीकृष्णध्यानलब्धये ॥१९॥
शृण्वन्तु चित्रकारा मे भासते हृदये हरिः ।
यथादृष्टं वर्णयामि कृष्णनारायणं हरिम् ॥२०॥
अक्षरेशं ब्रह्मप्रियापतिं दिव्यनराकृतिम् ।
तेजःपरिधिसंव्याप्तं कोटिकोट्यर्कतेजसम् ॥२१॥
सुधास्राविसमस्तसत्करणैरभिकाशितम् ।
सपादपञ्चषट्यंगुलोर्ध्वं सुवर्णकेशिनम् ॥२२॥
हिरण्यश्मश्रुहिरण्यमूर्तिसर्वसुवर्णकम् ।
प्रसन्नहास्यवदनं लम्बगोलाननं प्रभुम् ॥२३॥
आकर्णायतनेत्रं च कोटिकामभ्रुशोभनम् ।
प्रेमसंभृतचक्षुष्कं दिव्याऽपरोक्षदर्शनम् ॥२४॥
विशालोन्नतभालं च मध्योपरितिलान्वितम् ।
दक्षललाटरोमोर्ध्वसीमस्थिततिलान्वितम् ॥२५॥
दक्षभालोर्ध्वकोणे च वामभालोर्ध्वकोणके ।
समकृष्णतिलशोभिललाटकोज्ज्वलम् ॥२६॥
वामभालोर्ध्वकेशान्तसीमसूक्ष्मतिलद्वयम् ।
वामनेत्रान्तनिम्नश्रीकपोले तिलधारिणम् ॥२७॥
दक्षकपोलके सूक्ष्मतिलचतुष्टयान्वितम् ।
द्वयोश्च कर्णयोरूर्ध्वे सूक्ष्मैकैकतिलान्वितम् ॥२८॥
तिलपुष्पसमनासं दिव्यनेत्रं मनोहरम् ।
लम्बशष्कुलिकातुल्यकर्णद्वयविराजितम् ॥२९॥
सूक्ष्मधवलकान्त्याढ्यकुन्दवद्दन्तशोभितम् ।
पक्वरक्तबिम्बफलभासौष्ठद्वयराजितम् ॥३०॥
पुष्टमुखं सुचिबुकं सूक्ष्मपिंगलकेशिनम् ।
भाले कैसरतिलकम् मध्यकुंकुमचन्द्रकम् ॥३१॥
उभप्रान्तान्तसंव्याप्तदीर्घरेखाढ्यभालकम् ।
अर्धचन्द्रसमरेखामध्यभालविराजितम् ॥३२॥
वामगले सूक्ष्मतिलो जत्रूपरि विराजते ।
कण्ठकूपे कृष्णतिलः सुभगः संविराजते ॥३३॥
जिह्वा रक्तस्थलपद्मनिभा सरस्वतीश्रिता ।
कण्ठकूपादधोभागेऽङ्गुलनिम्ने तिलोऽस्ति च ॥३४॥
दक्षस्कन्धे स्वल्पतिलस्तदधश्चाऽपरस्तिलः ।
तदधश्च भुजायां वै तिलस्तृतीय इत्यपि ॥३५॥
तदधश्च चतुर्थोऽपि वर्तते च शुभस्तिलः ।
भुजायां सन्निधौ चापि पञ्चमो वर्तते तिलः ।
कफोणिकोपरिभागे भुजायां षष्ठकस्तिलः ॥३६॥
कफोणिकायाः सन्धौ च सूक्ष्मसत्तिलपञ्चकम् ।
कफोणिकोपरि पृष्ठभागे तिलश्च वर्तते ।
करनाल्यां तिलः सूक्ष्मः करभे सुतिलोऽस्ति च ॥३७॥
लड्डुकषट्कगुच्छोऽस्ति करपृष्ठे तु शोभनः ।
करतलेमत्स्यधनुर्ध्वजशूलशरास्तथा ॥३८॥
स्वस्तिचक्ररेखिकाश्च सन्ति रक्ताः शशिप्रभे ।
अंगुल्यः कोमलाः सन्ति रक्तोन्नतनखान्विताः ॥३९॥
रोमावल्यः सुभगाश्च स्वर्णवर्णाः प्रभान्ति ताः ।
मध्यांगुल्यग्रे शंखोऽस्ति चक्राणि तु चतुस्वपि ॥४०॥
तर्जन्यां यवरेखाऽस्ति हस्तश्चन्द्रोज्ज्वलोऽस्ति च ।
वामस्कन्धे जत्रुमूले श्यामचिह्नं सुशोभते ॥४१॥
तदधो वर्तते सूक्ष्मतिलत्रयं भुजान्तिके ।
स्कन्धपृष्ठे तिलश्चास्ते रक्तवर्णः सुसूक्ष्मकः ॥४२॥
वामोदरे नलपार्श्वे तिलश्चैकः प्रशोभते ।
नाभिर्निम्ना गभीरा चोदरमुज्ज्वलमित्यपि ॥४३॥
नाभौ त्रिवल्ल्यो द्योतन्ते समोदरं प्रशोभते ।
उदरस्य दक्षपार्श्वे तिलत्रयं प्रशोभते ॥४४॥
दक्षपृष्ठे तिलैकश्च दक्षकुक्षौ तिलद्वयम् ।
स्तनचिह्ने श्यामवर्णे सरोम्णिशोभया युते ॥४५॥
श्रीवत्सचिह्नसहितं वक्षो विशालमुन्नतम् ।
वक्षोऽधो वर्तते सूक्ष्मतिलः समोदरोपरि ॥४६॥
वामभुजे कुक्षिपार्श्वे तिलो रम्यो हि वर्तते ।
वामभुजायां तिलकः सुशोभश्चापि वर्तते ॥४७॥
वामकफोणिकासन्धौ सूक्ष्मतिलद्वयं तथा ।
प्रकोष्ठे सुतिलश्चास्ते करांगुलिनखाः शुभाः ॥४८॥
मध्यांगुलौ शंखरेखा चक्राणि तु चतुस्स्वपि ।
स्थलपद्मनिभं रक्तं हस्ततलं नखास्तथा ॥४९॥
कान्तिमती समनिर्यत्प्रभाऽऽकृतिः सुमोहिका ।
धैर्यत्यागकरी स्त्रीणां कोटिकन्दर्पसुन्दरा ॥५०॥
भरयौवनपूर्णा च दिव्या मूर्तिर्विराजते ।
यज्ञोपवीतयुक्ता च कण्ठे कण्ठीविराजिता ॥५१॥

करे तु मालिकायुक्ता क्वचित्तु लेखिनीयुता ।
सचक्राद्यायुधा मूर्तिर्विराजते कथान्विता ॥५२॥
जघने बालकृष्णस्य लक्ष्मीमूर्तिर्विराजते ।
लिङ्गे मध्ये ह्युपर्यधस्तिलद्वयं विराजते ॥५३॥
दक्षे नितम्बे चास्ते च तिलद्वयं सुशोभनम् ।
दक्षसक्थ्नि ह्यधोभागे तिलद्वयं विराजते ॥५४॥
जानुद्वयं सुशोभं च वर्तुलं राजते तथा ।
जङ्घायां दक्षपादस्य जानोरधस्तिलोऽस्ति च ॥५५॥
तथा मध्येऽन्तःसुपार्श्वे कृष्णतिलः सुशोभते ।
वामसक्थिसन्धिभागे तिलः श्रेष्ठः सुशोभते ॥५६॥
तत्पार्श्वे सक्थिभागे तु महच्चिह्नं क्षतस्य वै ।
वर्ततेऽथ वामनितम्बके तिलः सुसूक्ष्मकः ॥५७॥
वामसक्थ्न उपर्यास्ते श्रीः पूर्णचन्द्रसन्निभा ।
अदृश्या ह्युज्ज्वला दिव्या सर्वकामप्रपूरिका ॥५८॥
हस्तिकरनिभे पुष्टे जंघे स्तः परमात्मनः ।
आजानुलम्बहस्तौ च वर्तेते श्रीरमापतेः ॥५९॥
वामपादप्रकोष्ठेऽधस्तिलश्चैको हि वर्तते ।
घूटिकायाः सन्निधौ वै पादफणान्तिके शुभः ॥६०॥
द्वितीयः सूक्ष्मतिलको रेखायां वर्तते शुभः ।
घूटीत्रयं च प्रत्येके पादे बाह्ये हि वर्तते ॥६१॥
कम्मानिकानिभे पादतले शिरीषकोमले ।
रक्ताभे चोपरि रोमावलिराजितपृष्ठके ॥६२॥
अंगुल्यंगुष्ठपर्वोर्ध्वे रोमाणि कानकानि वै ।
विद्योतन्ते तथा सर्वे नखाश्चन्द्रनिभोन्नताः ॥६३॥
पादयोस्तलयोः सन्ति दिव्यचिह्नानि शार्ङ्गिणः ।
मूर्तौ सूक्ष्माणि चिह्नानि समुद्रोक्तानि सन्ति च ॥६४॥
नवांगुलं फुल्ललिंगं वर्तते परमात्मनः ।
पादयोश्चोर्ध्वरेखे च वर्तेते ब्रह्मगे शुभे ॥६५॥
कण्ठस्वरस्तु मधुरोऽमृतस्रावी हरेः सदा ।
वर्तते बालकृष्णस्यौदार्यं सौन्दर्यमुत्तमम् ।
दयालुत्वं च लावण्यं कल्याणगुणयोगिता ॥६६॥
वर्तते श्रीकृष्णनारायणस्याऽव्ययवीर्यता ।
सर्वैश्वर्याणि सन्त्येव समस्तशक्तयस्तथा ॥६७॥
सर्वशृंगारशोभाश्च चमत्कारा भवन्ति च ।
सर्वाश्चर्याणि विद्यन्ते राजाधिराजसम्पदः ॥६८॥
सर्वा आकर्षणधर्मिण्यश्च श्रियोऽस्य सन्ति हि ।
सर्वमाधुर्यभावाश्च सर्वानन्दाब्धयोऽत्र वै ॥६९॥
सर्वोत्सवप्रमोदाश्च विद्यन्ते परमात्मनि ।
सर्वकामप्रपूर्णत्वं सर्वान्तर्यामिताऽस्य च ॥७०॥
सर्वकान्ताऽतिकान्तत्वं सर्वदत्वं हराविव ।
सर्वज्ञत्वं सर्वरूपधारकत्वं हरेः सदा ॥७१॥
पार्श्वस्थाः श्रीराधिकापद्मावतीमाणिकीरमाः ।
नारायणीसुखदालक्ष्मीसतीकमलादिकाः ॥७२॥
ब्रह्मप्रियाश्च मुक्तान्यः सांख्ययोगिन्य इत्यमुम् ।
प्रसेवन्ते कुमार्यश्च गोप्यश्चापि हरिप्रियाः ॥७३॥
मुक्ताश्च पार्षदाश्चापि वाहनानि च हेतयः ।
ऐश्वर्याणि प्रसेवन्ते विभूतयश्च तत्समाः ॥७४॥
मोक्षार्थं सर्वजीवानां वर्तते मानवे भवे ।
स एव दिव्यरूपोऽस्ति मानवो वाप्यमानवः ॥७५॥
साक्षात् स भगवानत्र नराकारोऽपि वर्तते ।
धाम्ना स्वेन तथा मुक्तैः पार्षदाद्यैः समन्वितः ॥७६॥
परिवारेण सर्वेण वर्तते जनगोचरः ।
नृत्वदिव्यत्वयोर्भेदो नैवाऽस्ति परमेश्वरे ॥७७॥
यत्र कृष्णस्तत्र धाम सन्ति मुक्ताश्च शक्तयः ।
सर्वे दिव्या मूर्तिमन्तः साकाराः कृष्णसदृशाः ॥७८॥
नरा नार्यो दिव्यरूपा दिव्यमुक्ता भवन्ति ते ।
भवन्तः सर्व एवापि दिव्याः श्रीकृष्णयोगिनः ॥७९॥
तमनादिकृष्णनारायणं श्रीकान्तवल्लभम् ।
गोपालकम्भरापुत्रं वंशीहस्तं भजन्त्विह ॥८०॥
रटन्तु श्रीपतिं नित्यं ध्यायन्तु कमलापतिम् ।
सेवन्तां माणिकीकान्तं प्राप्नुवन्तु परं सुखम् ॥८१॥
इत्येवं मम भक्तः स भक्तमण्डलमध्यगः ।
भक्तानुपदिशत्येव नित्यं कल्याणदं वचः ॥८२॥
भक्ताः संभरदेवं च चित्रकारं गुरुं निजम् ।
मन्यन्ते पूजयन्त्येव भक्तिं कुर्वन्ति सेवनम् ॥८३॥
अथैकदा प्रसन्नोऽहमाषाढपूर्णिमादिने ।
गुरोः पूजां देवपूजां तैः कृतां वीक्ष्य तद्गृहे ॥८४॥
द्रुतं संभरदेवस्य रूपमधार्यं शुभम् ।
गृहे संभरदेवोऽस्ति द्वितीयोऽहं तु चत्वरे ॥८५॥
तौ द्वौ संभरदेवौ संवीक्ष्य प्रपूजका जनाः ।
चित्रकृतः समस्ता वै भ्रान्तिमाश्चर्यमिश्रिताम् ॥८६॥
अवापुश्च मुहुर्गत्वा पश्यन्ति चत्वरे गृहे ।
कथं रूपद्वयं चास्ते गुरोः सत्यं पृथक् पृथक् ॥८७॥
अथ चक्रुः परीक्षां ते गृहे सत्योऽथ चत्वरे ।
आरार्त्रिकं प्रचक्रुस्ते समकाले तदोभयोः ॥८८॥
गृहस्थस्य शरीरान्तःप्रभा सावरणाऽभवत् ।
चत्वरस्थस्य दीपानां ज्योतिर्निरावरणकम् ॥८९॥

व्यपश्यँस्ते देहमध्ये निश्चिक्युश्चात्वरं हरिम् ।
गृहे तु गुरुरूपं तं प्राहुः श्रीगुरवे ततः ॥९०॥
गृहात् तूर्णं बहिर्वैद्यामाश्रयौ संभरो हरिम् ।
हरिस्तूर्णं संभरे वै लीनो बभूव पश्यताम् ॥९१॥
आश्चर्यं सुमहच्चैतन्मत्वा तुष्टुवुरुत्सुकाः ।
हरे कृष्ण हरे विष्णो नाथ नारायण प्रभो ॥९२॥
पुनस्ते दर्शनं साक्षाद् यथा स्यात् सत्कृपां कुरु ।
ननृतुस्ते गुरोरग्रे कीर्तनानि प्रचक्रिरे ॥९३॥
पूजनानि विविधानि गुरौ मूर्तौ च चक्रिरे ।
अथ मध्याह्नवेलायां नैवेद्यार्पणसत्क्षणे ॥९४॥
प्राविरासं पुनस्तत्र गुरुरूपः स्वयं रमे ।
अथ ते मां व्यपश्यँश्च दिव्यरूपं गुरुं हरिम् ॥९५॥
ततश्चक्रादिचिह्नाढ्यं चतुर्भुजं श्रियःपतिम् ।
उज्ज्वलं सकिरीटं च गुरुवर्णितचिह्नकम् ॥९६॥
हारकुण्डलकेयूरापीडोर्मिकादिशोभितम् ।
शृंखलामणिरत्नाढ्यभूषाऽम्बरविशेषितम् ॥९७॥
आहराद् भोजयामासुरारार्त्रिकं व्यधुस्तथा ।
जलं ताम्बूलकं श्रेष्ठसुगन्धं च ददुर्हि मे ॥९८॥
पादसंवाहनं चक्रुर्नरा नार्योऽपि सर्वशः ।
वव्रुश्चाशीर्वचनं मे मोक्षदं प्रददावहम् ॥९९॥
प्राप्य पूजां द्रुतं चित्रकृतो मूर्तौ तिरोभवम् ।
ते सर्वे हृष्टमनसो भेजुर्मां गुरुरूपिणम् ॥१००॥
अनादिश्रीकृष्णनारायणंश्रीवल्लभं हरिम् ।
अथ कालान्तरे प्राप्ते संभराऽऽयुःप्रसंक्षये ॥१०१॥
गजेन साकं चानेतुमाययौ दिव्यविग्रहः ।
पत्नीं संभरदेवस्य दर्शयामास मद्व्रजम् ॥१०२॥
ततो मम स्वरूपं च दर्शयामास चैश्वरम् ।
ततः संभरदेवाय प्रददौ दर्शनं मम ॥१०३॥
दिव्यदेहं विधायैव भक्तं तं संभरं तथा ।
तत्पत्नीं चित्रसरिताभिधां च दिव्यविग्रहाम् ॥१०४॥
विधायाऽऽदाय सौवर्णाऽम्बालिकायां गजोपरि ।
निन्ये धामाऽक्षरं श्रेष्ठं तथाऽन्यान् भक्तिपाकिनः ॥१०५॥
एवं लक्ष्मि मया चित्रकारः समुद्धृतोऽनुगः ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेद् ध्रुवा ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने संभरदेवाख्यचित्रकारस्य भक्त्या भगवता दत्तं दर्शनं मोक्षणं च कृतमित्यादिनिरूपणनामा सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथामंगारहारिणः ।
शरणाभूमिवासस्य भक्तस्य मौक्तिकेशिनः ॥ १ ॥
मौक्तिकेशी ममभक्तो पार्थकुलखातराट् ।
कुलसानां खनीनां वै खातोद्योतकरः सदा ॥ २ ॥
सहस्रशो जनास्तत्राऽगारकर्मकराः खनौ ।
खनयन्ति कुलसान् वै पार्थान् कृष्णान् दिवानिशम् ॥ ३ ॥
प्रातर्भक्तो भजित्वा मां ततो याति खनिं प्रति ।
क्षणं मे भजनं तत्र विधापयति भृत्यकैः ॥ ४ ॥
हरे कृष्ण हरे कृष्ण बालकृष्ण हरे हरे ।
अनादिश्रीकृष्णनारायण श्रीश हरे हरे ॥ ५ ॥
एवं कृत्वा कारयित्वा भजनं खनिगह्वरे ।
प्रवेशं च कर्मचारैः समं करोति सत्वरम् ॥ ६ ॥
कृष्णशिलांऽगारभेदान् निखनन्ति च गह्वरे ।
भजन्ते भगवन्तं मां श्रीपतिं श्रान्तिसत्क्षणे ॥ ७ ॥
मध्याह्ने भोजनं कृत्वा विश्राम्यन्ति तु कर्मिणः ।
तदा दिव्यं बोधयति मौक्तिकेशी जनान् यथा ॥ ८ ॥
विना कृष्णस्य भजनं संसारो गह्वरो महान् ।
तीर्यते नैव केनापि ह्यगाधो वासनामयः ॥ ९ ॥
जन्ममृत्युजराव्याधिस्तरा असंख्यकोटयः ।
कर्मस्तरास्तथा तत्र भिन्नव्यापारनोदकाः ॥१०॥
विना भक्तिं हरेनैव तदन्तं लभते जनः ।
असंगी साधुसंगी च वैराग्याल्लभतेऽन्तकम् ॥११॥
वर्तेते हृदये द्वौ तौ विरुद्धौ भिन्नगोचरौ ।
एको नयति मायायां द्वितीयः परमात्मनि ॥१२॥
एको वदति भुञ्जीय विषयान् मायिकानिति ।
द्वितीयो वदति नैव भुञ्जीय मायिकानिति ॥१३॥
तत्रैकं मन एवाऽस्ति मायिकं मायिकार्थगम् ।
द्वितीयो जीवनामाऽऽत्मा निषेधं कुरुते सदा ॥१४॥
विविच्यैवं विजानीयादात्मना परमेश्वरम् ।
सन्त्यजेद् विषयानन्यान् मोक्षरोधकरानिह ॥१५॥
वासना मनसा युक्ता प्रेरिका विषयेष्वपि ।
लोकविषयशब्दोत्था भुंक्ष्वेति सा वदत्यपि ॥१६॥
सतां कथाप्रसंगोत्था भावनात्मनिवासिनी ।
मा भुंक्ष्वेति निषेधं वै करोति मायिकेषु सा ॥१७॥
निष्कासनीया लोकोक्तिर्धार्या साधुकथासुधा ।
पिता माता सुहृद्बन्धुः स्वसा भ्राता च मातुलः ॥१८॥

पुत्रः पत्नी महिषी गौरश्वो वस्त्रं गृहं धनम् ।
ममेदं च तवेदं चेत्येवं लौकिकवासनाः ॥१९॥
अहन्ताममताहेतुभूताः क्षिपन्ति गह्वरे ।
भ्रमन्ति कर्मकाण्डैश्च जायन्ते च पुनः पुनः ॥२०॥
सतां कल्याणदातॄणां धृत्वा वाक्यानि वै हृदि ।
नेमे पिता सुहृद् बन्धुर्मा भ्राता मातुलः स्वसा ॥२१॥
पुत्रः पत्नी महिषी गौरश्वो वस्त्रं गृहं धनम् ।
नेदं मम तवेदं न किन्तु तत्परमात्मनः ॥२२॥
पिता माता सुहृद् बन्धुः पतिः कृष्णनरायणः ।
अहं तु श्रीहरेर्दासः शाश्वतिकोऽस्मि चेतनः ॥२३॥
मोक्षदो वै पिता माता तद्दासोऽहं सुभक्तिमान् ।
न मे बन्धो न मे माया न मेऽहन्ता न मामकम् ॥२४॥
नित्यशुद्धो हरेर्भक्तो मुक्तोऽस्मि सत्समागमात् ।
वासना खलु बन्धोऽस्ति मोक्षोऽस्ति वासनालयः ॥२५॥
संसारे दुःखबहुले सुखं कृष्णपदेऽस्ति वै ।
लोकशब्दाः सतां शब्दा युद्ध्यन्ति बोधकारिणः ॥२६॥
तज्जे ज्ञाने विवेकाख्ये युद्ध्यतो हृदयेऽनिशम् ।
येषां बलं महत् स्याद्वै तस्यैव विजयो भवेत् ॥२७॥
यत्र नारायणश्चास्ते यत्र सन्तश्च मोक्षदाः ।
तत्रैव विजयश्चास्ते मायाबलं तु निष्फलम् ॥२८॥
साधूनां हृदये कृष्णः साधूनां विजयः सदा ।
उपदेशस्वरूपा वै सन्तो येषां हृदि स्थिताः ॥२९॥
कथाद्वारा तथा कृष्णो येषां हृत्सु सदा स्थितः ।
तेषां बलं च विजयो जायते मोक्षलाभदः ॥३०॥
बाह्यानां तु सतां संगात् पुष्यन्ति सन्त आन्तराः ।
बाह्यानामसतां संगात् पुष्यन्त्यसन्त आन्तराः ॥३१॥
पुष्टानां वर्धते शक्तिरपुष्टानां क्षयो भवेत् ।
अतः सन्तः पोषणीया न त्वसन्तः कदाचन ॥३२॥
यथा यथा प्रसन्नाः स्युः सन्तो वृत्त्यं तथा तथा ।
सतां प्रसन्नता पुष्टिस्तया कृष्णप्रसन्नता ॥३३॥
एवं जाते विजयो वै जीवात्मनः प्रजायते ।
मोक्षराज्यं लभतेऽपि कृष्णदास्यं महत्सुखम् ॥३४॥
कृष्णार्थं यतमानस्य साधुसेवार्थमित्यपि ।
युद्ध्यमानस्य भक्तस्य द्रष्टाऽस्ति भगवान् स्वराट् ॥३५॥
युद्धे एव तु मरणे द्रष्टा प्रसीदति ध्रुवम् ।
युद्धे मृत्युर्विजयोऽस्ति स्वामी तस्मै प्रसीदति ॥३६॥
स्वामिप्रियेहया मृत्युं गतोऽयं चेति वेत्ति सः ।
पराङ्मुखो न वै जातस्ततो जयं समर्हति ॥३७॥
स्वामी तस्मै ददात्येव फलं जयाधिकं ह्यपि ।
तस्माद् बलिभिर्योद्धव्यं जये सन्मुखवक्षसा ॥३८॥
मर्तव्यं स्वामिप्रीत्यर्थं युद्धे सन्मुखवक्षसा ।
भक्त्या धर्मेण मर्तव्यं हृदि सन्मुखशार्ङ्गिणा ॥३९॥
सतां सेवया मर्तव्यं देहे चान्वितचक्रिणा ।
नराकृतेर्हरेर्भक्त्या गन्तव्यं गह्वरान्तके ॥४०॥
कुसंगः सर्वथा त्याज्यः सत्संगः कार्य एव ह ।
सतां कथा श्रवणीया धार्यः कृष्णः सदा हृदि ॥४१॥
सद्यो निःश्रेयसायैव गन्तव्यं शरणे हरेः ।
न वै शारीरसौख्यार्थं धनपुत्राप्तयेऽपि न ॥४२॥
न वा राज्यादिलोभेन गन्तव्यं शरणे हरेः ।
निष्कामभावयुक्तेन गन्तव्यं शरणे हरेः ॥४३॥
सकामभावना मोक्षरोधिनी जायते यतः ।
इच्छाघाते शरणं च त्यक्तव्यं स्यादतो न तत् ॥४४॥
सकामशरणं ग्राह्यं ग्राह्यं त्वकामपूर्वकम् ।
जायते तु ध्रुवा मुक्तिर्येन ग्राह्यं हि तत्तथा ॥४५॥
सकामाः कामसिद्धौ तु भजन्ते भावतो हरिम् ।
कामाऽसिद्धौ त्यजन्त्येव भावनामपि सर्वथा ॥४६॥
सतां बोधं त्यजन्त्येव भगवत्त्वस्य का कथा ।
नास्तिकत्वं निन्दनं च कुर्वन्ति प्रत्युतापि ते ॥४७॥
पतन्त्येव निरयेषु स्वार्थाऽनर्थप्रयोजिताः ।
ततो निष्कामभावेन प्रसेवेत प्रभुं हरिम् ॥४८॥
सकामानां हि संकल्पान् कृपया पूरयत्यपि ।
भक्तानां शरणस्थानां भक्तिशरणजं फलम् ॥४९॥
ददात्येवाऽनन्तगुणं कृतसापेक्षकः प्रभुः ।
महद् दुःखं तु भक्तस्य स्वल्पं करोति तद्वशः ॥५०॥
कर्मणां खलु मर्यादा बद्धास्तेनैव शार्ङ्गिणा ।
अन्तरस्थो हरिः प्रारब्धानुसारं फलं सदा ॥५१॥
समवृत्तिर्ददात्येव कृपया तु विशेषतः ।
स्वतन्त्रः सर्वकर्ताऽस्ति नियामकः परेश्वरः ॥५२॥
अतिदुष्कर्मिगश्चेन भजेयुर्यदि सत्प्रभुम् ।
कृपया श्रीहरिस्तेषां कर्माणि सुबहून्यपि ॥५३॥
दीर्घकालेन भोग्यानि दुष्टानि दुःखदान्यपि ।
करोति स्वल्पकालेन स्वल्पभोग्यानि तानि वै ॥५४॥
शूलव्यथां कण्टकेन निवारयति सर्वथा ।
अतिदारिद्र्यदुःखं निवारयत्यन्नवस्त्रदः ॥५५॥
भक्ता हरेः कृपां त्वेनां प्रजानन्ति न चापरे ।
अभक्तास्तु हरौ दोषान् कल्पयन्त्यगुणानपि ॥५६

अनीश्वरत्वं चाक्षिप्य जहत्यपि तदाश्रयम् ।
निन्दन्ति निजतुल्येषु वदन्त्यवाच्यजल्पकान् ॥५७॥
मया मत्वा प्रभुं द्रव्यव्ययो वै सर्वथा कृतः ।
अस्य सन्तः पूजिताश्च सर्वस्वार्पणकारिणा ॥५८॥
तथाप्यनेन दुःखं मे न हृतं किञ्चिदित्यपि ।
उपकारो न मे ज्ञातश्चाग्रे मे किं करिष्यति ॥५९॥
तस्मात् त्यक्तो मया चाऽयं नारायणपदार्थवान् ।
एवं त्यक्त्वा प्रयात्येव मायायां निरये ततः ॥६०॥
तस्मात् कृष्णस्य भक्तिर्वै कर्तव्या तु निरीहया ।
श्रेयसे त्वात्मनो लक्ष्मि न कामलब्धये क्वचित् ॥६१॥
सेवा सकामभक्तस्य नाङ्गीकरोति माधवः ।
सेवके कामनावत्त्वं दूषणं लालसात्मकम् ॥६२॥
तृष्णेच्छा लालसा त्वेका ह्यपराधस्य मूर्तयः ।
न कर्तव्या हरौ क्वापि लालसा भक्तिशालिना ॥६३॥
लालसाया अपूर्णत्वे द्रोहः स्यात्परमात्मनः ।
द्रोहश्चास्त्यपराधो वै महान्नारायणस्य ह ॥६४॥
द्रोहं दुःखं च निन्दां च दोषानुवर्णनं तथा ।
गुणानां खण्डनं मिथ्यारोपणं क्षमते न सः ॥६५॥
हरेर्वा हरिभक्तस्याऽपराधं स्वल्पमित्यपि ।
क्षमते न हरिस्तस्मान्न कार्यः सर्वथा हि सः ॥६६॥
अनादिश्रीकृष्णनारायणस्याऽऽकारखण्डनम् ।
सगुणस्य निरसनं सतां च खण्डनं तथा ॥६७॥
अपराधो महानेव महानरकसम्प्रदः ।
न कर्तव्यः क्वचित् ज्ञात्वाऽऽप्यज्ञात्वा संमर्गतः ॥६८॥
परमे दिव्यलोकेऽयं निजेऽक्षरे पदे प्रभुः ।
दिव्याकृतिः कृष्णनारायणोऽस्ति पुरुषोत्तमः ॥६९॥
दिव्याऽसंख्यब्रह्ममुक्तैः सेवितो माणिकीपतिः ।
कृपया स प्रभुश्चात्र वर्तते मानवात्मकः ॥७०॥
दिव्योऽपि दृश्यते चात्र मानवो भौतिको यथा ।
न त्वयं भौतिकश्चास्ते किन्तु दिव्यो यथाऽक्षरे ॥७१॥
अस्मच्चक्षुर्भौतिकं यत् तद्ग्राह्यो वर्तते स्ववत् ।
कृपयैव हरिश्चैवं दर्शयत्येव नरिष्विह ॥७२॥
यथा भक्तस्तथा तेन ग्राह्यः कृपावशोऽस्ति सः ।
स एव भक्तवर्गैस्तु बोद्धव्यो दिव्यविग्रहः ॥७३॥
तस्मात्परं न चैवाऽस्ति प्राप्तव्यं ज्ञेयमित्यपि ।
यदीच्छति स्वभक्तो वै द्रष्टुं धामानि सम्पदः ॥७४॥
तदा कृपालुर्भगवान् दर्शयत्येव सर्वथा ।
यद् दिव्यं चाक्षरं धाम तत्तु सद्बैव वर्तते ॥७५॥
वैभवा हरिणा साकमैश्वर्याण्यपि सन्ति च ।
अक्षरेण निजधाम्ना परिवारेण संयुतः ॥७६॥
वर्तते भूतले कृष्णो दृश्यते नरचक्षुषा ।
नरवच्चाक्षरं धाम भूवच्चेष्टासमा गुणाः ॥७७॥
मुक्ता मानवतुल्याश्च क्रियाश्च प्राकृता यथा ।
धामस्थानां च भूस्थानां मनाग् भेदो न विद्यते ॥७८॥
दिव्यसमाधिनेत्रास्तु विचक्षते सुदिव्यकान् ।
यत्र कृष्णस्तत्र धाम तत्र मुक्ताश्च शक्तयः ॥७९॥
ते सर्वे मानवैर्भक्तैरर्पिताऽन्नजलाम्बरम् ।
धनसम्पद्गृहाद्यं च गृह्णन्ति मानवा इव ॥८०॥
तथापि निस्पृहास्ते तु भक्तकल्याणहेतवे ।
गृह्णन्ति तानि दिव्यानि जायन्ते तत्प्रसंगतः ॥८१॥
दातारो दिव्यरूपं तल्लभन्ते त्वक्षरे पदे ।
कृष्णस्यैवं तथा तस्य भक्तानां च सतां सदा ॥८२॥
वेदनीयं हि माहात्म्यं चेत्थं दिव्यप्रमुक्तिदम् ।
कृष्णमाहात्म्ययुक्तस्य विपदो न भवन्ति वै ॥८३॥
कृष्णभक्तश्च रंकोऽपि नाऽवमान्यः कदाचन ।
रंकाऽवमन्तुर्नाशः स्यात् तत्स्थकृष्णस्य पीडनात् ॥८४॥
कृष्णक्रियाः समग्राश्च यथा दिव्यास्तथैव च ।
भक्तानामपि दिव्यास्ता मन्तव्या भक्तिवेदिना ॥८५॥
हरिर्भक्तमनःप्रीत्यै रमते भक्तमानवैः ।
कामेन रमते चापि हास्येन रमते तथा ॥८६॥
चेष्टया चापि सदृश्या रमते स्त्रीजनैः सह ।
तथापि तूर्ध्वरेतस्त्वं कोटिस्त्रीणां स्मयावहम् ॥८७॥
धरते श्रीहरिः कोटिरूपधृक् कामगर्वहाः ।
नराकृतिः स्वभक्तार्थं करोति नरवत् क्रियाः ॥८८॥
कामं क्रोधं भयं लोभं मोहं शोकं च मत्सरम् ।
दर्शयति क्वचित्तद्वै सर्वं मंगलकृत्परम् ॥८९॥
श्रुतं च कथितं दृष्टं ध्यातं चाप्यनुमोदितम् ।
चरितं श्रीहरेः सर्वं मानवानां हि मोक्षदम् ॥९०॥
नराकारः श्रीकृष्णो वै नृणां मनांसि पूरयेत् ।
नृणां साजात्यभावेन सेवाधर्मो हरौ भवेत् ॥९१॥
तेन निःश्रेयसं विन्देत् सेविताच्च प्रसादितात् ।
रंकोऽपि दास्यभावोऽपि दास्यपि नगुणाऽपि च ॥९२॥
दृढकृष्णाश्रयस्यैव प्रमोदनं सदा भवेत् ।
जातं मे परमं श्रेयो मोक्ष्यन्ते मम संगिनः ॥९३॥
कृतार्थोऽहं कृतार्थास्ते ये मे वचनवर्तिनः ।
सन्तः सन्ति ममाऽऽत्मानश्चात्मदर्शी सदाऽस्म्यहम् ॥९४॥

इरिं सतोऽन्यन्नैवाऽस्ति द्रष्टव्यं मम मायिकम् ।
एवं मम निवासोऽत्र भूतलेऽपि परेऽक्षरे ॥९५॥
वेद्यते नात्र सन्देहश्चैवं ज्ञात्वा भजन्तु तम् ।
क्षाकृद् भगवानत्र परत्रापि त्वविष्यति ॥९६॥
इत्युपादिश्य संश्रुत्वा ययुः खनौ तु कर्मणे ।
हरिस्तेषां परीक्षार्थं खनिभित्तौ जलागमम् ॥९७॥
महासरित्स्वरूपेण गर्तं कृत्वा समानयत् ।
जातेन भित्तिभंगाद्वै महासरित्प्रवाहवत् ॥९८॥
प्रवाहः सहसा तत्र गह्वरे समजायत ।
सर्वे ज्ञानेन तृप्तास्ते मृत्युभयविवर्जिताः ॥९९॥
अनादिश्रीकृष्णनारायणं मां सस्मरू रमे ।
जलं तु गह्वरे तत्र सरोवरसमं ह्यभूत् ॥१००॥
नग्ना निमग्ना भक्तास्ते भजन्तो मां रमापतिम् ।
आत्मनिष्ठा ज्ञानिनश्च दृढाश्रयास्तु ते हृदि ॥१०१॥
दध्युर्मां त्वन्तरात्मानं समाधाविव मोदिनः ।
मौक्तिकेशी मम भक्तो मां प्रसस्मार भूखनौ ॥१०२॥
भूगर्भे श्रीपतिं कृष्णं जलमग्नोऽतिभक्तिमान् ।
अथाऽहं दुःखहीनानां भजतां कर्मचारिणाम् ॥१०३॥
प्राविरासं खनौ तत्र जलमध्ये जलार्दनः ।
सुदर्शनेन चक्रेणाऽशोषयं वारि सर्वगम् ॥१०४॥
क्षणेनैव पलेनैव प्रवाहं चाऽप्यरोधयम् ।
स्वस्थास्ते मम भक्ता वै दृष्ट्वा चक्रं सुदर्शनम् ॥१०५॥
दृष्ट्वा मां ते निमग्ना वै क्षणं सुखे तु शाश्वते ।
अथ मां पूजयामासुः प्रार्थयामासुरक्षरम् ॥१०६॥
धाम मोक्षार्थमेवापि तथाऽस्त्वित्यवदं तु तान् ।
भक्तिदार्ढ्यं समादिश्य तूर्णं तिरोभवं ततः ॥१०७॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
एवं मन्त्रं ददौ तेभ्यो मौक्तिकेशो खनीश्वरः ॥१०८॥
सर्वे ते जापमात्रेण दिव्यज्ञाना प्रजज्ञिरे ।
अथ कालान्तरे मौक्तिकेशिनं चान्यमानवान् ॥१०९॥
विमानेनाऽनयं धामाऽक्षरं मे परमं पदम् ।
एवं माया कुलसानां खनिखाताः परीक्षिताः ॥११०॥
रक्षिता मोक्षिताश्चापि लक्ष्मि कृपानुकर्षिणा ।
पठनाच्छ्रवणादस्य मुक्तिर्मुक्तिर्भवेदपि ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने मौक्तिकेशिनाम्नो भक्तस्य शिलांगारखनीश्वरस्य भक्त्या परीक्षणं मोक्षणं चेत्यादिनिरूपणनामा अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥



श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं लुब्धकस्य तथा कथाम् ।
भक्तस्य पिङ्गलग्रामस्थितस्य साधुसेविनः ॥ १ ॥
नाम्ना चक्रधरश्चासील्लुब्धको हिंसने रतः ।
शूद्रवर्णः कुटुम्बस्य भरणे चौर्यकारकः ॥ २ ॥
पशूनां स्तेन एवापि सस्वामिनां महानपि ।
आरण्यानां पशूनां च शशादीनां च हिंसकः ॥ ३ ॥
करोति क्रूरतापूर्वं हिंसनं प्राणतृप्तये ।
अथैकदा वनेऽगच्छद्धरिणाशाप्रकर्षितः ॥ ४ ॥
वृक्षस्तम्बवंशषण्डेपश्यद्धरिणरूपिणम् ।
पौतिमाष्यं महर्षिं च तद्भार्यां हरिणीं तथा ॥ ५ ॥
नाम्ना सामकृषिं मृगवधूं मृगीस्वरूपिणीम् ।
पत्रपुष्पतृणभक्ष्यौ नवांकुरफलाशिनौ ॥ ६ ॥
सुरूपौ सुमृगौ वीक्ष्य लुब्धकः शरमादधे ।
तावद्दर्षिर्विलोक्यैनं तिरोऽभवन्मृगीयुतः ॥ ७ ॥
चक्रधरोऽपि सन्दिह्य वृक्षषण्डे गतौ हि तौ ।
मार्गयितुं तूर्णमेव क्रमाऽनुक्रमणं ययौ ॥ ८ ॥
तदाऽम्बरगिरा प्राह महर्षिस्तं तु लुब्धकम् ।
मा पापिन् पापवानत्र वृथा मनो निवेशय ॥ ९ ॥
नाऽहं मृगः पौतिमाष्यो महर्षिश्चास्मि वन्यभुक् ।
सभार्योऽत्र वने नित्यं विचरामि सुखस्थितः ॥१०॥
याह्यन्यत्र महापापिन् मोक्षात्पतित इत्यपि ।
मानवं देहमासाद्य मोक्षं कथं न वाञ्छसि ॥११॥
श्रुत्वा तु लुब्धकश्चाऽऽह नित्यं विषयवाञ्छया ।
मांसादनो भवाम्यत्र कामस्य पुष्टिलब्धये ॥१२॥
पौतिमाष्यस्ततः प्राह कामो निरयदस्तव ।
यत्र हिंसा ह्यधर्मोऽस्ति प्राणिनां घातभक्षणम् ॥१३॥
सदा ते नरके वासो भविष्यतीति मा तथा ।
संभवं मानवं कामे निक्षिप्य नरकं वह ॥१४॥
शृणु लुब्धक वार्तां मे रोचते यदि ते तदा ।
कथयामि हितार्थाय सतां संगो हि तारकः ॥१५॥
कामोऽयं देहजो दोषश्चान्नपानादिसंभवः ।
वीर्यरूपः स्थूलभागो जायते देहधातुकः ॥१६॥
देहे सर्वत्र वीर्यस्य कणा भवन्ति पुष्टिदाः ।
त एते कामदेवस्य स्थूलरूपं हि भौतिकम् ॥१७॥
अथाऽऽन्तरं मनश्चापि मनोवहास्थितं सदा ।
देहे क्षणे क्षणे कृत्वा भ्रमणं सर्वधातुषु ॥१८॥

वीर्यं संकल्पयथनैराकर्षयति कुक्षिषु ।
सिवनीनाडिकामूले चैकत्रितं प्रजायते ॥१९॥
मनसा सहितं तच्चाऽभेदमापन्नमित्यपि ।
भूत्वा मनसि सम्ब्याप्तं सूक्ष्मरूपमनोऽन्वितम् ॥२०॥
हेतुभिर्वासनावेगैः शिश्ने स्रवते कर्मणा ।
तस्मात् कामस्त्रिविधोऽस्ति त्रिदेहो वर्तते सदा ॥२१॥
कारणं वासनारूपः सूक्ष्मस्तु मानसात्मकः ।
स्थूलस्तु वीर्यरूपः स मायिको नात्मनस्तु सः ॥२२॥
आत्मा ब्रह्मस्वरूपोऽस्ति सर्वेन्द्रियनियामकः ।
रोमलोहितमांसाऽस्थिमज्जास्नायूविलक्षणः ॥२३॥
वीर्यं षट्कोषधर्मोऽस्ति सप्तमो भोगवाहकः ।
अशुद्धद्वारवासश्चाऽशुद्धद्वारविनिर्गमः ॥२४॥
अशुद्धदेहबन्धश्च पापयाम्यपुरप्रदः ।
कामाद्धिंसा क्रोधमोहौ वासनाऽशुद्धचिन्तनम् ॥२५॥
जन्म कर्म च मरणं दुःखमुद्वेजनं तथा ।
जायन्ते तं दुष्टकामं त्यक्त्वा धर्मेण वर्तय ॥२६॥
ऋतुदानं प्रदातव्यं धर्म एष सनातनः ।
नाधिको भोग आप्तव्यो मोक्षमार्गविरोधकृत् ॥२७॥
साधवो मुनयः सत्यो साङ्ख्यस्त्यागपरायणाः ।
आत्मानन्दनिमग्नास्ते कामं त्यजन्ति दूरतः ॥२८॥
योगाभ्यासेन देहोत्थं धातुं रक्षन्ति सर्वथा ।
मनो नियम्य सततं निर्मूलयन्ति वासनाः ॥२९॥
ऊर्ध्ववीर्याः प्रजायन्ते नैष्ठिका ब्रह्मचारिणः ।
प्रस्वेदस्रावशून्यास्ते स्वाप्नस्रावविवर्जिताः ॥३०॥
ब्रह्मात्मानन्दमग्नास्ते जायन्ते यतयोऽमलाः ।
ईशवत्ते समर्था वै विष्णुवत् सम्पदीश्वराः ॥३१॥
वेधोवत् सृष्टिधातारो जायन्ते पारमेश्वराः ।
ब्रह्मचर्यपराणां तु प्रत्युत्थायाऽनलानिलाः ॥३२॥
मूर्तिमन्तः स्वागतार्थं प्रयान्ति महिमाऽऽविदः ।
भोगान्ते ब्रह्मपरमं चाप्तव्यं मनुधर्मिणा ॥३३॥
भोगस्तृष्णान्तको नास्ति भोगे तृष्णा विवर्धते ।
तस्माद् भोगान् परित्यज्य भज नारायणं प्रभुम् ॥३४॥
चक्रधर हरिं चक्रधरं वै शरणं व्रज ।
मायाचक्रं विभिद्यैव ब्रह्मचक्रगतो भव ॥३५॥
इत्युक्तो मुनिना चक्रधरो लक्ष्मि शुभाशयः ।
उपदेशैरभवच्च विवृत्तमानसः खलु ॥३६॥
ऐच्छच्च दर्शनं तस्य पौतिमाष्यस्य वै गुरोः ।
प्रार्थयद् दर्शनार्थं च गुरुर्मानवरूपधृक् ॥३७॥
ददौ स्वदर्शनं तस्मै जलपानमकारयत् ।
पादजलं ददौ चापि पापानि समनाशयत् ॥३८॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
मन्त्रं दत्वा वैष्णवं तं वृन्दापत्रैर्व्यधापयत् ॥३९॥
लुब्धकोऽपि कृष्णनारायणं भेजे ततः परम् ।
गृहं गत्वा तीर्थपूतः पत्नीं पूतां व्यधापयत् ॥४०॥
हिंसां चौर्यं सदा त्यक्त्वाऽभजन्मां परमेश्वरम् ।
तुलसीपादपे कृष्णं सदा पूजयते स माम् ॥४१॥
वन्यफलार्पणैः प्रसादजैर्यात्रां वहत्यपि ।
सतां सेवां वन्यफलैस्तत आरभ्य नित्यदा ॥४२॥
करोति साधुरूपो वै जटाधरोऽभवत्ततः ।
पत्नी जटाधरी भस्मधरी तुलसीपूजिका ॥४३॥
अभवद्व्रतसम्पन्ना विघसाशित्वशालिनी ।
एवं विशुद्धमनसो भक्त्याऽहं मुनिवाञ्छया ॥४४॥
तस्य मोक्षं विधातुं तु कालागमे ह्युपस्थितः ।
दिव्यमूर्तिर्हरिश्चाऽहं तेन दृष्टश्च योषिता ॥४५॥
निपेततुश्च ते पादौ प्रणम्य रजसा प्लुतौ ।
मोक्षार्थं त्वरितौ कृत्वा स्वागतं मम विह्वलौ ॥४६॥
प्रेममग्नौ वन्यफलं मे समर्प्य द्रुतं गजे ।
देहौ त्यक्त्वाऽऽरुरुहतुस्तदानीं दिव्यविग्रहौ ॥४७॥
वैकुण्ठं जग्मतुस्तौ तु मया संप्रेषितौ रमे ।
एवं मुक्तिः कृता लुब्धकस्य सद्गुरुयोगतः ॥४८॥
तथैव तु सतां ये स्युर्भक्तास्तेषां तु वासनाः ।
विनश्यन्ति मनश्चापि निर्मलं जायते सदा ॥४९॥
कामक्रोधादयो दोषा नश्यन्त्यघानि यान्यपि ।
भूत्वा दिव्यस्वरूपास्ते कृपया मे सतां तथा ॥५०॥
प्रयान्ति ब्रह्म परमं लक्ष्मि शाश्वतसौख्यदम् ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेदपि ॥५१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने लुब्धकस्य चक्रधरस्य पौतिमाष्यर्षिसंगेन हिंसादिपापनाशे भक्त्युत्तरं मुक्तिरित्यादिनिरूपणनामा नवदशाधिकद्विशततमोऽध्यायः ॥ २१९ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं भक्तस्य पिशुनस्य वै ।
कथां संभलनगरे स्थितस्याऽऽत्मनिवेदिनः ॥ १ ॥
नाम्नाऽभवद् बाटधरो भक्तो नृपस्य सेवकः ।
सुतारसिंहनाम्नस्तु सेवकः पृथिवीपतेः ॥ २ ॥

कुशलो राजनीत्यां च चतुरो राजरञ्जने।
कृतश्रमो व्यवहारे शास्त्रे विनिमयादिषु ॥ ३ ॥
प्रसादभूतो राज्ञश्च राज्या मानस्य चाश्रयः।
राजकुटुम्बभक्तश्च खवासवर्णमूर्द्धगः ॥ ४ ॥
पश्यति तीक्ष्णया बुद्ध्या करोति मतिना तथा।
विचारयति ज्ञानेन प्रज्ञया मन्त्रयत्यपि ॥ ५ ॥
अर्थावधारिणी बुद्धिर्मतिरागामिगोचरा।
ज्ञानं विवेकवैशद्यं प्रज्ञा तु प्रतिभा नवा ॥ ६ ॥
एवं वाटधरे चास्ते विज्ञानं कोविदे यथा।
असाध्यस्य तु कार्यस्य वाटं मार्गयति ध्रुवम् ॥ ७ ॥
पारं करोति कार्यस्य प्रशस्तोऽतो नृपादिषु।
यथा वृद्धो यथा मन्त्री यथा न्यायी यथा गुरुः ॥ ८ ॥
एवंविधोऽयं वाटघ्नो यद्यपि श्रेष्ठनीतिमान्।
तथापि प्रकृतिवशः पैशुन्यं चरति क्वचित् ॥ ९ ॥
राज्ञ्या नृपाय नृपते राज्ञ्यै नृपस्य मन्त्रिणे।
मन्त्रिणस्तु प्रजाभ्यश्च राज्ञ्यै नृपाय वै क्वचित् ॥१०॥
अप्रकाशं यथा तत्स्यान्न जानीयुः परे तु तत्।
एक एव विजानीयाच्छ्रोता तथा वदत्यसौ ॥११॥
अथैकदा तु संक्रान्तौ दानं राज्ञी ददौ बहु।
विप्रेभ्यो दीनवर्गेभ्यः साधुभ्यो भोजनादिकम् ॥१२॥
प्रच्छन्नं मणिरत्नादि राजा जानाति नैव यत्।
निजहस्तगतं द्वैपीराज्ञी दानं ददौ धनम् ॥१३॥
वाटधरो विजानाति द्वैप्या दातुं नियोजितः।
दानोत्तरं भोजनं च राज्ञी सद्भ्यो ददौ शुभम् ॥१४॥
साधवो भुञ्जते भोज्यमिष्टान्नानि हरिश्रिताः।
तत्र विरक्तश्चैकोऽभूद् घट्यंयनाभिधो यतिः ॥१५॥
वसति घटिकामात्रमेकस्थले तु नाधिकम्।
तस्य वै भोजने तत्र जायमाने तु पंक्तिशः ॥१६॥
जातास्य घटिका पूर्णोत्थाय विहाय भोजनम्।
ययौ वृक्षान्तरं तत्र घटिकां तस्थिवान् पुनः ॥१७॥
जलं पीत्वा पुनस्तस्मादन्यस्थलं ययौ हि सः।
एवं स घटिकां स्थित्वा याति स्थलान्तरं मुहुः ॥१८॥
वाटधरो विलोक्यैनं त्यक्तभोज्यं च चञ्चलम्।
सार्धं सम्मृग्य यत्राऽऽस्ते तत्र तं प्रासवान् द्रुतम् ॥१९॥
गत्वा नत्वा फलं प्रार्प्य वन्दनं संविधाय च।
पप्रच्छ कारणं तत्र चाञ्चल्यस्य नमन् मुहुः ॥२०॥
घट्यंयनस्तु तं प्राह लक्ष्मि चाञ्चल्यकारणम्।
एकत्र घटिकोर्ध्वं त्वस्थायित्वं सद्गुणोऽस्ति सः ॥२१॥
बन्धनं न भवेत् क्वापि रागः क्वापि न जायते।
ममता जायते नैव वैराग्यः सर्वदा भवेत् ॥२२॥
अपरिग्रह एवापि व्रतं तेन तु रक्ष्यते।
चिरं वासस्तु बन्धाय चिरवासं न चाचरेत् ॥२३॥
जले स्थले पादपे वा चिरवासो भयावहः।
साधूनां गोदोहमात्रं घटीमात्रं स्थिरासनम् ॥२४॥
घट्यासनं तु मायायां श्रीकृष्णे शाश्वतासनम्।
विदित्वैवं विवेकेन चाञ्चल्यं नियमो मम ॥२५॥
संगात् सञ्जायते स्नेहः स्नेहाच्च ममता भवेत्।
तयाऽऽसक्तिस्तया तत्र वासना जायते मुहुः ॥२६॥
सहवासो बन्धनं वै वियोगो मोक्षणं परम्।
वासना सर्वथा त्याज्या संगस्त्याज्यो महात्मना ॥२७॥
निर्वासनत्वमात्मत्वं वैराग्येण विवेकिना।
भगवन्निष्ठायुक्तेन चात्मनिष्ठायुतेन च ॥२८॥
दुःखदोषानुदृष्ट्या च विनिर्वासनता भवेत्।
अहमात्मा हरेर्भक्तो न मायाया न कर्मणाम् ॥२९॥
सच्चिदानन्दरूपोऽहं भिन्नो नश्वरवर्ष्मणः।
अक्षरेशस्य कृष्णस्य दृढाश्रययुतोऽस्म्यहम् ॥३०॥
मायायां मे न वै रागो रसो नेन्द्रियगोचरे।
आन्तरे श्रीवासुदेवे वसाम्यानन्दयामि च ॥३१॥
एवं विवेकिनो नित्यं दृढवैराग्यशालिनः।
श्रेष्ठविषययोगेऽपि रागाङ्कुरो न जायते ॥३२॥
रमणीये दिव्यभोगे वर्तमानोऽपि चोन्मनाः।
असंग्युदासीन आस्ते स निर्वासनको मतः ॥३३॥
सतां गुणांश्च गृह्णीयुर्विजानीयुश्च दिव्यताम्।
तेऽपि दिव्यगुणाढ्याः स्युर्मायाविजयिनः सदा ॥३४॥
ये तु सतां प्रगृह्णन्ति दोषानवगुणांस्तथा।
कामादिकांस्तु ते कामाद्यावृत्ताः संभवन्ति वै ॥३५॥
कामाद्यैः पीड्यमानास्ते भ्रमन्ति चातिदुःखिनः।
न मोक्षं नापि सुस्वर्गमैहिकं वाऽऽप्नुवन्ति ते ॥३६॥
आप्नुवन्ति हि नरकान् निन्दकाः पापिनः खलाः।
नरा नार्यः सतां संगे मन्वते दिव्यतां तु ये ॥३७॥
ते यान्ति ब्रह्मपरमं दिव्यभावातिवर्धिताः।
तदिन्द्रियाणि मायायां कुण्ठितानि भवन्ति हि ॥३८॥
राजा वा स्याद् गृहस्थो वा समृद्धो भोगवानपि।
ज्ञानमीदृक् समालभ्य विषयोर्ध्वे स वर्तते ॥३९॥
प्रारब्धपुण्ययोगेन चास्ते विषयमध्यगः।
तथापि साधुवच्चास्ते योगीव लेपवर्जितः ॥४०॥

भुञ्जन्नपि ह्यभोक्तैव जलं सरोजनी यथा ।
अम्लदन्तश्चणकानां यथा करोति चर्वणम् ॥४१॥
तथा विषयग्रहणे शक्तो नैव प्रजायते ।
वासना लीयते तेन कुण्ठितस्य तु मायिकी ॥४२॥
मायारसं मनाग् वेत्ति यस्तस्य वासना नहि ।
अपसर्पति हृदयान्मायारसं त्यजेत्ततः ॥४३॥
प्रत्यक्षभगवन्मूर्तौ जानीयात् सर्वपूर्णताम् ।
तेनैव सर्वकार्याणि सिद्ध्यन्ति भक्तयोगिनः ॥४४॥
कृत्वा सत्संगमेवाऽत्र ज्ञातव्यं त्वेतदेव यत् ।
एवं ज्ञातुर्हरिः सर्वं साधयत्येव वाञ्छितम् ॥४५॥
हरौ मनोऽर्पयितुश्च नश्यन्ति वासनास्त्विह ।
येनाऽर्पितं मनः कृष्णे तस्य कृष्णं विना क्षणम् ॥४६॥
युगायते वियोगे वा दाहः स्याद्धृदये महान् ।
कृष्णेप्राप्ते भवेच्छान्तिर्दिदृक्षा वर्धतेऽन्वहम् ॥४७॥
कृष्णप्रतापश्रवणे प्रीतिर्भूरितरा भवेत् ।
कृष्णसम्बन्धिकार्येषु रुचिः श्रेष्ठतया भवेत् ॥४८॥
कृष्णादेशस्याऽऽचरणे सदा तत्परता भवेत् ।
एवंविधो दूरगोऽपि वर्तते माधवान्तिके ॥४९॥
आज्ञोल्लंघनकारी तु प्रेमहीनो ह्यनर्पितः ।
सहस्थितोऽपि दूरवद् बोध्यः स्वार्थी खलाऽधिपः ॥५०॥
तस्माद् यथा स्वहृदये वसति माधवः प्रभुः ।
तथाऽऽत्मना विधातव्यो वासोऽक्षरे पदेऽस्य वै ॥५१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
एवं मन्त्रं रट नित्यं पूजयाऽच्युतमीश्वरम् ॥५२॥
'हरे कृष्ण बालकृष्ण नारायण रमापते ।
अनादिश्रीकृष्णनारायण विष्णो जगत्पते' ॥५३॥
एवं नित्यं भजनं श्रीहरेः श्रावय संगिने ।
प्राज्ञे राज्ञै प्रजाभ्यश्च तेन श्रेयो भविष्यति ॥५४॥
इत्येवं लक्ष्म्युपदेशं ददौ वाटघराय सः ।
घव्यायनो हरेर्दासः साधुः सद्गुणभूषणः ॥५५॥
वाटघ्रोऽपि गृहं गत्वा भेजे यथानिवेदितम् ।
भजनं च तथा चक्रे हरे कृष्णेति नित्यशः ॥५६॥
घव्यायनस्तु प्रययौ ग्रामान्तरं हरिं स्मरन् ।
वाटघ्रस्तु महाभक्तो जातो मोक्षकरो यथा ॥५७॥
राज्ञे राज्ञ्यै प्रजाभ्यश्च ददौ मन्त्रं हि मोक्षदम् ।
भजनं कारयामास हरे कृष्णेति सर्वथा ॥५८॥
भक्तियुक्तस्य लोकेऽत्र सद्गुणाः संभवन्ति वै ।
तथापि दुर्गुणो जातिस्वभावो न निवर्तते ॥५९॥

यद्यपि स्यान्महाभक्तो यथा वै गरुडस्तथा ।
सर्पभक्षित्वमेतस्य जातिगुणो न नश्यति ॥६०॥
वानरा रामभक्ताश्च पशुधर्मान् त्यजन्ति न ।
सिंहो भक्तोऽपि पार्वत्या हिंसनं न जहाति सः ॥६१॥
क्षत्रियो विष्णुभक्तोऽपि संग्रामं न जहाति सः ।
किरातो विष्णुभक्तोऽपि वन्यरीतिं जहाति न ॥६२॥
गौः श्रीकृष्णस्य भक्ताश्च रम्भणं न जहत्यपि ।
खवासोऽयं विष्णुभक्तः पिशुनत्वं जहौ न च ॥६३॥
परगुप्तं शत्रवे वाऽन्यस्मै गुणाऽगुणात्मकम् ।
प्रच्छन्नमिव वक्तव्यं तद्धि पिशुनता मता ॥६४॥
यत्फलं जायते क्लेशो युद्धं कलह इत्यपि ।
वैमनस्यं समुद्वेगः क्रोधो वा नाशनं ह्यपि ॥६५॥
तस्मात् कार्यं न पैशुन्यं कस्यचिच्चापराय ह ।
गुणानां दर्शनं कार्यं न तु दोषप्रदर्शनम् ॥६६॥
गुणग्राही सुखं याति जायते पुण्यवानपि ।
दोषग्राही भवेद् दुःखी जायते पापवानपि ॥६७॥
हानिप्रदं हि पैशुन्यं शिक्षणं तु गुणप्रदम् ।
पैशुन्यं नैव कर्तव्यं कर्तव्यं शिक्षणं क्वचित् ॥६८॥
योग्यता चेद्भवेत्तर्हि नान्यथा शिक्षणं ह्यपि ।
पित्रे मात्रे तथा भ्रात्रे स्वस्रे ननान्द्रे योषिते ॥६९॥
पतये बन्धवे शिष्यायाऽपि पुत्र्यै सुताय वा ।
वध्वे वृद्धाय बालाय वक्तव्यं पिशुनं नहि ॥७०॥
राज्ञे राज्ञ्यै ह्यमात्याय राजपुत्राय सर्वथा ।
प्रजाभ्यो नैव वक्तव्यं पैशुन्यं नृपतेः क्वचित् ॥७१॥
खवासजातिदोषेण पैशुन्यमेकदाऽकरोत् ।
राज्ञे निवेदयामास राज्ञ्या दानं कृतं त्विति ॥७२॥
गुप्तं हीरकरत्नादि दत्तवती द्विजातये ।
साधुभ्यो भोजनं चापि भूषाश्च प्रददाविति ॥७३॥
अथ राजा गुप्तधनं दाने दत्तं विदित्य वै ।
राज्ञीमाहूय पप्रच्छ वद दत्तं धनादिकम् ॥७४॥
अनाज्ञया प्रदत्तं यच्चेष्टं कृतं हि तन्मम ।
प्रच्छन्नं ते धनं सर्वं तवार्थे रक्षितं सदा ॥७५॥
न दानार्थं भवेत्तद्धि दत्तं तन्नोचितं कृतम् ।
नार्या विहाय पत्याज्ञां न कर्तव्यं तु किञ्चन ॥७६॥
यातु ते पितरं राज्ञि प्रच्छन्ना न प्रिया प्रिया ।
प्रच्छन्नव्ययकर्त्री या सा क्वचित् सर्वनाशिनी ॥७७॥
प्रजायेत मया नैतादृशी रक्ष्या गृहे प्रिया ।
याहि स्वपितरं देवि वस तत्र चिरं सुखम् ॥७८॥

इत्युक्ता सा बहुशोकं प्राप्ता रुरोद भामिनी ।
अथ राजा खवासस्य द्वाररूपस्य दानके ॥७९॥
दण्डं व्यधाद्धि सर्वस्वहारकं निगडेऽकरोत् ।
कर्ता कारयिता चानुमोदयिता समोऽनये ॥८०॥
इति राजा ददौ दण्डं जहार गृहवाटिकाः ।
धनद्रव्यं जहाराऽपि भक्तस्य वाटधारिणः ॥८१॥
वाटभ्रोऽपि हरिं भेजे निगडस्थोऽतिदीनवत् ।
राज्ञी मानविहीना च स्वसौधेऽशनवर्जिता ॥८२॥
व्रतस्था ह्यभवत्तूर्णं मर्तुकामा तु वैष्णवी ।
दानधर्मे न वै दुःखं कथं दुःखमुपस्थितम् ॥८३॥
दुःखहरो हरिकृष्णो दुःखं मे व्यपकर्षतु ।
इत्येवं मम मूर्त्यग्रे कृताऽनशनिका स्थिता ॥८४॥
निगडस्थोऽपि वाटभ्रस्तथैवाऽनशने स्थितः ।
दानकार्ये न वै दण्डो भवेन्मत्वा हरिं प्रति ॥८५॥
निवेद्य दुःखमुत्पन्नं दध्यौ स्वहृदये प्रभुम् ।
प्रकाशेऽपि स वृत्तान्तः प्रससार प्रजादिषु ॥८६॥
प्रजासु विप्रवर्गेषु साधुषु प्रमदासु च ।
शोको विवेश सहसा राज्ञा योग्यं न तत्कृतम् ॥८७॥
एवं वार्ता तु सर्वत्र प्रासरद् दानशंसिनी ।
दानं धर्मो हि राज्ञां वै राज्ञ्या कृतं शुभं कृतम् ॥८८॥
राज्ञो द्रव्यस्य नास्त्येव न्यूनता राज्यभोगिनः ।
इत्येवं वै प्रजास्वेवाऽभवद् वार्ताऽतिशोभना ॥८९॥
राज्ञीदुःखविनाशार्थं वाटधारस्य शान्तये ।
प्रजाश्चापि हरिं स्मृत्वाऽऽशीर्वादान् सुखदान् ददुः ॥९०॥
विगतेऽनशने तत्र सप्ताहे निशि माधवः ।
अनादिश्रीकृष्णनारायणोऽहं निगडालये ॥९१॥
भक्तरक्षाकरोऽगच्छं राज्ञ्याश्च मन्दिरे तथा ।
शंखचक्रगदापद्मकिरीटहारशोभितः ॥९२॥
दत्वा स्वदर्शनं दुग्धपानं राज्ञ्यै ददावहम् ।
वाटभ्राय ददावेव दुग्धपानं ततः परम् ॥९३॥
आश्वासनं प्रदायैव राजसौधमुपाययौ ।
विप्ररूपोऽतितेजस्वी धर्मशास्त्रविदां वरः ॥९४॥
राजाऽऽसनं ददौ मे च मया पृष्टो निरामयम् ।
अक्लेशं च कुटुम्बस्य स चाह मां तु सामयम् ॥९५॥
वृत्तान्तं कथयामास क्लेशस्य कारणं नृपः ।
उपादिशं ततो राज्ञे स्त्रीधने स्त्री स्वतन्त्रिका ॥९६॥
तत्रापि दानरूपे तु योग्या सा पुण्यकारिणी ।
पतिस्तरति नार्या वै धर्मिण्या भक्तियोषिता ॥९७॥
गोदानं रत्नदानं च भूषादानं हि तारयेत् ।
पतिं नृपं महापापं श्रेष्ठदानं हि तारयेत् ॥९८॥
तस्माद् राजन् सतीं नारीं प्रमानय यथोचितम् ।
वाटभ्रं मानय चापि सत्कार्यकारिणं त्विह ॥९९॥
इत्युक्त्वा तैजसा व्यात्मदर्शयं स्वयं स्वकम् ।
रूपं राज्ञे मुमुदाऽसौ राजा पपात पादयोः ॥१००॥
ययाचे स क्षमां चापि मोक्षं नारायणालये ।
अदृश्योऽहमभवं च पूजामादाय तत्कृताम् ॥१०१॥
राजा राज्ञीं खवासं च मानयामास सत्कृतैः ।
उत्सवं कारयामास दानशंसां शुभां तथा ॥१०२॥
कलहं शान्तयामास स्नेहभाषणदानकैः ।
प्रत्यर्पणैस्तु वाटभ्रायाऽपि मानं व्यधात्तथा ॥१०३॥
एवं लक्ष्मि मया भक्ता राज्ञी तदा सुरक्षिता ।
मर्तुकामा मूर्छिता सा क्षुधया दुग्धपायिता ॥१०४॥
वाटधरोऽपि मे भक्तो रक्षितो राजदण्डतः ।
अथ काले समापन्ने राजानं भक्तिवेदिनम् ॥१०५॥
राज्ञीं वाटधरं चापि विमानेनाऽनयं निजम् ।
अक्षरं परमं धाम पैशुन्यवर्जितं ततः ॥१०६॥
पठनाच्छ्रवणादस्य स्मरणात् पापनाशनम् ।
भुक्तिं मुक्तिं लभेच्चापि स्वर्गं स्वेष्टं परं रमे ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वाटधरस्य पिशुनखवासस्य तथा द्वैपीराज्ञ्याश्च सुतारसिंहनृपतेर्दण्डाद् भगवता कृतं रक्षणं मोक्षणं चेत्यादिनिरूपणनामा विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं गृहकारस्य वै कथाम् ।
तक्षशिलायां पुर्यां वै नाम्ना शिवजयोऽभवत् ॥ १ ॥
भक्तः प्रासादकुशलो मन्दिरगृहकृत्कलः ।
नगरीरचनाविज्ञो देवालयादिकारकः ॥ २ ॥
शिल्पिवर्यः स्वबुद्धयैव कुरुते च कलोद्भवम् ।
राजप्रासादनिर्माताऽऽविष्कृतनवघट्टनः ॥ ३ ॥
नवाकृतिकरश्चापि नवकक्षादिगोचरः ।
असंख्यनाणकैः सौधान् निर्माति दैवसद्मान् ॥ ४ ॥
एकदा वृषपर्वाख्यः ऋषिस्तं समुपाययौ ।
महाभागवतो भक्तः साधुधर्मा सुसंयतः ॥ ५ ॥
उत्थाय सहसा शिवजयः स्वागतमाचरत् ।
अर्घं च मधुपर्कं च ददावृषये भाववान् ॥ ६ ॥

न्यषादयद् रम्यपूतासने जलं समार्पयत् ।
पादसंवाहनं चांगमर्दनं च व्यधाद्दृषेः ॥ ७ ॥
ऋषिस्तस्य तु कुशलं पप्रच्छ प्रीतमानसः ।
सोऽपि तवाऽऽगमादत्र कुशलं मे उवाच तम् ॥ ८ ॥
यत्र साधोश्चरणौ वै पूज्येते श्रद्धया गृहे ।
तद्गृहं दिव्यवेति श्मसानं तु तदन्यकम् ॥ ९ ॥
अद्य मे कुशलं सर्वं नष्टं त्वकुशलं मम ।
धन्योऽस्मि दैवपुरुषो राजते यद्गृहेऽद्य वै ॥१०॥
इत्युक्त्वा मौनमास्थाय वृषपर्वाणमाह सः ।
कुशलं परमं यच्चच्छाधि मां शरणागतम् ॥११॥
अथ लक्ष्मि वृषपर्वा स्मृत्वाऽनादिनरायणम् ।
उपादिदेश बहुधा शिवजयाय मुक्तये ॥१२॥
शिवजयाऽऽकर्णय त्वं स्नेहः कृष्णे तु मोक्षदः ।
अस्नेहश्चापि मायायां निकृष्टतादिबुद्धितः ॥१३॥
स्नेहः कृष्णे तु जायेत तदुत्कृष्टत्वबुद्धितः ।
तदुत्कर्षो यथा परब्रह्म श्रीभगवान् स्वयम् ॥१४॥
सर्वावतारधृक् सर्वधामाधिपः सतां पतिः ।
सर्वमुक्तपतिः सर्वैश्वर्यपतिः रमापतिः ॥१५॥
यावद्भगवतां कृष्णो भगवान् भगवत्तमः ।
सर्वोपरि चान्तरात्मा सर्वकर्मफलप्रदः ॥१६॥
अन्तर्यामी यमन्तरा किञ्चित् स्वतन्त्रमेव न ।
यदिच्छामन्तरा शुष्के पर्णेऽपि पवनो बली ॥१७॥
प्रवर्तते न वै चालनार्थं प्रेरक एव सः ।
स एव भगवानत्र पृथ्व्यां साधुस्वरूपवान् ॥१८॥
यथेष्टरूपवानास्ते भक्तमानसपूरकः ।
दिव्यो दिव्यचरित्रश्च सर्वथा दिव्यविग्रहः ॥१९॥
मोक्षदा हि क्रियास्तस्य सकला देहजा अपि ।
एवं यस्य हि माहात्म्यं विद्यते हृदये हरेः ॥२०॥
तस्य भक्तस्य वंशीयाः कुटुम्बिनश्च प्राक्पराः ।
दश दश स्वश्चेत्येकविंशतिरुद्धरन्ति वै ॥२१॥
गृहीयुस्ते गुणं तस्य भक्तस्य यदि सर्वथा ।
अहो चाऽस्मत्कुले कृष्णभक्तो जातो हि पावनः ॥२२॥
अस्मद्भाग्यं महत्तेन समुद्धारो भविष्यति ।
तत्कृतभक्तेः पुण्यं नो भविष्यति कुटुम्बिनः ॥२३॥
इत्येवं गुणमन्तारस्तरन्ति नात्र संशयः ।
अन्येऽपि गुणमन्तारः पुण्यभाजो भवन्ति च ॥२४॥
तटन्त्येव च संसारं धामाऽक्षरं प्रयन्ति ते ।
ये ये गुणप्रवक्तारो गुणग्राहिण एव ते ॥२५॥
धन्यवादग्रहितारो यान्ति कृष्णस्य धाम ते ।
भक्तकथा भक्तगुणगानं भक्तस्य वन्दनम् ॥२६॥
भक्तप्रशंसनं भक्तप्रसादो मोक्षदा इमे ।
भक्तस्य द्वेषकर्तारः सम्बन्धिनस्तथेतरे ॥२७॥
ये वा के वा प्रयान्त्येव निरयं याम्यनोदिताः ।
क्रोधनानिर्घृको मानी कपटी कामवानपि ॥२८॥
द्वेषी च निन्दकश्चैते प्रयान्ति निरयं ध्रुवम् ।
तान् दोषान् सम्परित्यज्य ये भजन्ति जनार्दनम् ॥२९॥
ते प्रयान्ति हरेर्धाम कृष्णस्नेहपरायणाः ।
भगवत्स्नेहसम्पूर्णा भगवत्सेवने रताः ॥३०॥
भगवद्गुणतुल्यैः सद्गुणैर्युक्ता भवन्ति हि ।
भगवद्गुणवान् भक्तो भवेदाश्रितमोक्षकृत् ॥३१॥
स्वधर्मं पालयन् रागाभावं सम्पादयँस्तथा ।
आत्मनिष्ठो हरिनिष्ठः स्नेही याति परं पदम् ॥३२॥
शुभे देशे समये वा जाग्रदादौ शुभाश्रये ।
अशुभे वा विपरीते भक्तस्तु देहमुत्सृजन् ॥३३॥
प्रयात्येव परं धाम कृष्णकृपानुमोदितः ।
अभक्तो वा हरेर्द्वेषी सतां द्वेषी विनिन्दकः ॥३४॥
धर्मादिशून्यको यो वै शुभे देशादिकेऽपि च ।
देहं त्यक्त्वापि यात्येव घोरं यमालयं सदा ॥३५॥
अभ्यस्ता या मतिश्चान्ते गतिर्जायेत तादृशी ।
शोभनोऽशोभनो मृत्युर्न हेतुः सदसद्गतौ ॥३६॥
भक्तस्योर्ध्वगतिश्चास्ति तद्भिन्नस्य तु दुर्गतिः ।
सर्वदर्शी गुरुः कृष्णनरायणः कृपाप्रभुः ॥३७॥
भक्तं निजं नयत्येव धामाऽक्षरं न संशयः ।
यद्वा भक्तो निजनारायणस्योपासनाबलात् ॥३८॥
भजन् कृष्णं स्वयं धामाऽक्षरं याति स्वतन्त्रकः ।
ईशवत् स समर्थोऽस्ति ब्रह्माण्डानां लयेऽलये ॥३९॥
किंमात्रमस्य देहस्य धारणं त्यजनं च वा ।
एतादृशस्तु भक्तोऽत्र भूतले खलु दुर्लभः ॥४०॥
भाव्यं तादृशभक्तेन न्यूनता यत्र नो भवेत् ।
भाव्यं तादृशविज्ञेन स्नेहोऽन्यत्र न वै भवेत् ॥४१॥
भाव्यं तादृशव्रतिना पातिव्रत्यं हरौ भवेत् ।
भाव्यं तादृशगुणिनाऽक्षरब्रह्मगतिर्भवेत् ॥४२॥
भाव्यं तादृशदिव्येन मायालोकोर्ध्वदृष्टिना ।
मुक्तकोटौ भवेद्वासः शाश्वतानन्दवर्षणः ॥४३॥
तदेव कुशलं शिवजयाऽन्यत् कुशलेतरत् ।
शृणु सर्वकुशलानि श्रुत्वा तानि समाचर ॥४४॥

समयो यस्य हर्यर्थः प्रातः सायं तथाऽपरः ।
पूजनं यत्र कृष्णस्य समयः कुशलो हि सः ॥४५॥
गृहे यस्य हरेर्मूर्तिश्चापणे मन्दिरे भुवि ।
क्षेत्रे वाप्यां समुद्योगे स देशः कुशलो मतः ॥४६॥
या क्रिया तु श्रीकृष्णार्था साध्वर्था च सुरार्थिका ।
आत्मार्था चापि मुक्त्यर्था सा क्रिया कुशला मता ॥४७॥
यः संगः खलु सत्संगो धर्मज्ञानसुखावहः ।
वासनानाशकृत् कृष्णे स्नेहकृत् कुशलो हि सः ॥४८॥
यो मन्त्रो मोहहा शान्तिप्रदः प्रकाशकृद्धृदि ।
कृष्णनामयुतो दिव्यः पापघ्नः कुशलो हि सः ॥४९॥
दीक्षा या ब्रह्मपददा पावनी पापनाशिनी ।
ज्ञानकरी कृष्णशान्तित्रत्यदा कुशला हि सा ॥५०॥
ध्यानं यच्छान्तिदं मायादुःखोद्वेगादिनाशकम् ।
शाश्वतानन्ददं दिव्यभावदं कुशलं तु तत् ॥५१॥
यो गुरुर्दिव्यताधायकस्तथा दोषनाशकृत् ।
तारकः क्षालको मोक्षे हितकृत् कुशलो हि सः ॥५२॥
या माता श्रीकृष्णदुग्धामृतपानप्रकारिणी ।
भक्तिपुष्टिकरी मोक्षदर्शिनी कुशला तु सा ॥५३॥
यः पिता धर्मकर्मादिपालनोद्योगशिक्षकः ।
ब्रह्मलोकमहामार्गपालकः कुशलो हि सः ॥५४॥
यो भ्राता मुक्तिदं कर्म बिभर्ति कारयत्यपि ।
ददाति भाजनं दिव्यं मोक्षदं कुशलोऽपि सः ॥५५॥
या स्वसा भोजनं भ्रात्रे ददाति ब्रह्मणेऽर्पितम् ।
ब्रह्ममुक्तिप्रदाऽऽशीर्वादप्रदा कुशला हि सा ॥५६॥
या पत्नी श्रीहरेर्योगप्रदायिनी तु सेविका ।
कृष्णबन्धनकर्त्री श्रीप्रदा सा कुशला मता ॥५७॥
यः पुत्रस्तारयेत् कृष्णभक्त्या स्वपितरं व्रतैः ।
प्रसन्नतामर्जयेच्च पितुः स कुशलो मतः ॥५८॥
यः पतिः सम्प्रदद्याद्वै ब्रह्मानन्दं सुभक्तिमान् ।
ब्रह्मरसं पाययेन्निर्वाणदं कुशलो हि सः ॥५९॥
कुटुम्बिनस्तु ये मायां कटवीं दुःखदायिनीम् ।
त्याजयेयुर्दापयेयुर्मुक्तिं ते कुशलाः सदा ॥६०॥
प्रजाराजादयस्तद्वन्मोक्षे ये तु सहायिनः ।
अमोक्षणात्तु व्यावृत्ताः सर्वे ते कुशला मताः ॥६१॥
गुणा ये सुखदाः साधुसेवाप्रदा हरिप्रदाः ।
अन्यानन्दप्रदा मोक्षकरास्ते कुशला मताः ॥६२॥
याः सम्पदो हर्यर्थाः साध्वर्थाः पुण्ययोगदाः ।
परोपकारलाभार्था मोक्षदाः कुशला मताः ॥६३॥
समृद्धयो यास्तु यज्ञार्था देवार्था दानधर्मदाः ।
भक्तार्थाश्चापि गुर्वर्था दिव्यास्ताः कुशलाः सदा ॥६४॥
गोमहिष्यो वृषभाश्वा गजा यानानि दासिकाः ।
कृष्णार्था यस्य साध्वर्था मोक्षदाः कुशलास्तु ताः ॥६५॥
यो देहश्च मनो वाणीन्द्रियाणि वैभवादयः ।
हर्यर्था यस्य साध्वर्था मोक्षदाः कुशला हि ते ॥६६॥
याः शय्याः सुमृद्धयश्चापि स्वर्णपात्राणि हीरकाः ।
रत्नरूप्यमणिर्द्रव्यं कृष्णार्थं कुशलं तु तत् ॥६७॥
यदानन्दाश्च संभोगा उत्सवाः सुप्रसंगकाः ।
हर्यर्था यस्य साध्वर्था मोक्षदाः कुशला हि ते ॥६८॥
येऽभ्यासाश्च कला विद्या विज्ञानं ज्ञातृतोत्तमा ।
आविष्काराश्च हर्यर्थाः साध्वर्थाः कुशलास्तु ते ॥६९॥
आयव्ययौ तु हर्यर्थौ साध्वर्थौ मोक्षमार्गिणौ ।
मायाबन्धक्षपणकौ दिव्यौ तौ कुशलौ मतौ ॥७०॥
दानं व्रतं च नियमा आचारो लोकसम्मतिः ।
आश्रमश्च पद्धतिश्च हर्यर्थाः कुशलास्तु ते ॥७१॥
धर्मार्थकाममोक्षाश्च हर्यर्पितास्तु ये सदा ।
यस्य पुमर्थरूपास्ते मोक्षदाः कुशलाः सदा ॥७२॥
शासनं दीनता दारिद्र्यं च वनेचरत्वकम् ।
महाप्रासादवसतिर्हर्यर्थाः कुशलास्तु ते ॥७३॥
व्यापारा यस्य कृष्णार्था जाग्रत्स्वप्नसुषुप्तिषु ।
तुर्यायां ब्रह्ममुक्तौ च मोक्षार्थाः कुशलास्तु ते ॥७४॥
अतिस्निग्धाः साधवश्च हरिश्च यस्य सन्ति वै ।
मोक्षार्थं च समारंभाः कुशलं तस्य सर्वथा ॥७५॥
भक्तिर्यस्य सदा गेहे हृदये च कुटुम्बिषु ।
हरौ साधौ मोक्षमार्गे कुशलं तस्य सर्वथा ॥७६॥
यस्य गेहे हरेः पूजा साधूनां स्वागतं तथा ।
देवानां च सतीनां च कुशलं तस्य सर्वथा ॥७७॥
यस्य गेहे हरेर्नित्यं प्रसादस्यैव भोजनम् ।
विघसाशित्वमुत्कृष्टं कुशलं तस्य सर्वथा ॥७८॥
हर्यर्थे कृतसर्वस्वं चात्मनिवेदितात्मकम् ।
निष्कामभक्तियोगश्च कुशलं तस्य सर्वथा ॥७९॥
मायादृष्टिर्न वै यस्य दिव्यदृष्टिः शुभा सदा ।
सर्वथा गुणग्राहित्वं कुशलं तस्य सर्वथा ॥८०॥
साधुवाक्ये हरेर्वाक्ये विश्वासस्तस्य पालनम् ।
मोक्षार्थं सर्वयत्नश्च कुशलं तस्य सर्वथा ॥८१॥
विश्वासो वरणं न्यासः कार्पण्यं स्थिरता हरौ ।
दास्यं रौच्यं भवेद् यस्य कुशलं तस्य सर्वथा ॥८२॥

वच्म्यथाऽकुशलान्यत्र यानि ह्यानिकराणि वै ।
नास्तिकत्वमधर्मित्वं भक्तिशून्यत्वमुद्धतम् ॥८३॥
निन्दनं द्रोहकरणं हिंसा चाऽकुशलानि वै ।
अभक्ष्यभक्षणपानं दिनवन्ध्यत्वयापनम् ॥८४॥
कुसंगपापिसंगश्च मोहाभिमानगर्वताः ।
परदुःखप्रदायित्वं सदैवाऽकुशलानि वै ॥८५॥
परस्त्रीलम्पटत्वं च परद्रव्याभिकांक्षिता ।
पैशुन्यं चापि कापट्यं सदैवाऽकुशलानि वै ॥८६॥
धर्मभक्तिविहीनत्वमात्मसाधनवर्जिता ।
अज्ञानं मायिको मोहः सदैवाऽकुशलानि वै ॥८७॥
तृष्णेर्ष्याभयलोभाश्च सत्क्रियात्वर्जनं तथा ।
कर्मानुबन्धिगमनं सदैवाऽकुशलानि वै ॥८८॥
एवं विदित्वा सततं विधेहि कुशलानि वै ।
त्यजाऽकुशलानि शिवजय यास्यसि मोक्षणम् ॥८९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जप मन्त्रं रट नाम हरेकृष्ण हरे हरे ॥९०॥
मायां तीर्त्वा ब्रह्मलोके परं पदं प्रयास्यसि ।
इत्युक्त्वा वृषपर्वा संगृह्य पूजां ययौ वनम् ॥९१॥
भेजे लक्ष्मि शिवजयोऽच्युतं मां पुरुषोत्तमम् ।
सर्वं व्यधात् कुशलं वै तत्याजाऽकुशलानि च ॥९२॥
महाभागवतो जातो ध्यानेऽर्पणे च पूजने ।
अन्ये शिल्पिवराश्चास्य गृहे भजन्ति माधवम् ॥९३॥
सत्संगं ते प्रकुर्वन्ति व्रतोत्सवान् महत्तमान् ।
अथैकदा तु द्वादश्यां प्रातर्व्रतोत्तरं तु ते ॥९४॥
चक्रुर्मे पूजनं रात्रौ जागरणोत्तरं तथा ।
उद्यापनं प्रचक्रुश्च कीर्तनं नर्तनं तथा ॥९५॥
तत्राऽहं प्रादुरभवं दिव्यतेजाश्चतुर्भुजः ।
श्रीकान्तं मां हरिं वीक्ष्य जहृषुः परितोऽपि ते ॥९६॥
पुपूजुर्मां हृदयोत्थैः प्रेमाक्तवस्तुभिस्तदा ।
मोक्षं ते चार्थयामासुस्तथैत्युक्त्वा तिरोभवम् ॥९७॥
अथ कालान्तरे शिवजयो भक्तसमन्वितः ।
देहं त्यक्त्वा ययौ धामाऽक्षरं मत्पार्षदाहृतः ॥९८॥
एवं लक्ष्मि मम भक्ता यान्ति धामाऽक्षरं मम ।
भजनात् पूजनादात्मनिवेदनात् समागमात् ॥९९॥
सतां योगात् प्रयान्त्येव दिव्या दिव्यं परं पदम् ।
सुश्रवाः पाठकाश्चापि प्रयान्ति श्रेयसं परम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने वृषपर्वनामर्षियोगेन प्रासादकारस्य शिवजयस्य मोक्षणमित्यादिनिरूपणनामैकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं जालकारकथां तथा ।
जालकारः कमलाख्यासरित्तीरे विहारकृत् ॥ १ ॥
विहारे चाऽभवन्मत्स्यपाशजालविधायकः ।
पक्षिणां बन्धनं पादे पशूनां शृंगपादयोः ॥ २ ॥
मत्स्यादीनां यथा देहे भवेत् तादृशजालिकाः ।
करोति सूत्ररज्जूनां विक्रीणाति समन्ततः ॥ ३ ॥
तदुत्पाद्यधनाद्यैश्च निर्वहत्येव भोजनम् ।
नाम्ना संगरयादस्को निर्मातृनगरे स्थितः ॥ ४ ॥
पाशवन्तः समक्रीत्वा जालान्यस्मात्तु संगरात् ।
बध्नन्ति जलजान् वृक्षवासान् वनजान् देहिनः ॥ ५ ॥
एकदा संगरयादः कृत्वा स्कन्धे तु जालकान् ।
क्रेतुं ययौ तु नगरे क्रीणन्तु जालकानिति ॥ ६ ॥
उच्चैर्वदति श्रावार्थं कुक्षौ पोटलिकां वहन् ।
अथाऽस्य समयो जातो मध्याह्नश्च क्षुधाऽभवत् ॥ ७ ॥
क्रीत्वा भक्ष्यं चापणाद्वै नगराद् बहिराययौ ।
कमलायास्तटे गत्वा प्रभुंजन् स जलं पपौ ॥ ८ ॥
तावद् दृष्ट्वा भिक्षुको वै भिक्षेच्छया ह्युपागतः ।
नाम्ना शुक्लायनः साधुर्दधन् मालां करे गले ॥ ९ ॥
रटन्नाम हरेकृष्ण मुखे कृष्णं हृदि स्मरन् ।
धारयन्नहिंसाधर्मं विवेकं तु विचिन्तयन् ॥१०॥
यात्रामात्रं वहमानो निर्द्वन्द्वस्तं ह्युपाययौ ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥११॥
अश्रावयत् पुरा पश्चान्निषसाद तदन्तिके ।
वाससा वर्ष्मणा चापि मलिनोऽपि हृदोज्ज्वलः ॥१२॥
आकर्षयन्मनस्तस्य सौम्यदृष्ट्या व्यलोकयत् ।
अनिच्छन्निव वाञ्छन् वै मौनं धृत्वा स्थिरोऽभवत् ॥१३॥
धैर्यभृतं सुविश्वास्यं वीक्ष्य विरक्तयोगिनम् ।
अप्रेरितोऽपि दैवेन प्रेरितः प्राह जालकृत् ॥१४॥
नमस्ते साधवे साधो कुतः कथं किमिच्छसि ।
साधुः प्राह नमश्चान्तर्यामिणे कुशलं तव ॥१५॥

इच्छामि भोजनं किञ्चिज्जलपानसहायदम् ।
जालकारः प्रसन्नात्मा ददौ भर्जिततन्दुलान् ॥१६॥
चणकान् भर्जितांश्चापि मनाक् लवणयोजितान् ।
शुभं ते स्यात्तथा नित्यं निरामयं सुखोदकम् ॥१७॥
सुखनिद्रा भवतात्ते मे तन्दुलचणार्पणात् ।
इत्युक्त्वा श्रीहरिं स्मृत्वा निवेद्य चान्तरात्मने ॥१८॥
बुभुजे तन्दुलादींश्च पीत्वा तृप्तिं ययौ ततः ।
पप्रच्छ व्यवसायं च जालकारस्य वै तदा ॥१९॥
जालकारोऽवदज्जालव्यवसायं यथातथम् ।
श्रुत्वा साधुः क्षणं कृष्णं ध्यात्वोपदेशमाचरत् ॥२०॥
शृणु संगरयादस्क हितं ते वच्मि सर्वथा ।
चतुरशीतिखनयो भवन्ति देहिनामिह ॥२१॥
तत्र मानुषदेहो वै मोक्षाय कल्पितः परः ।
बहूनां जन्मनामन्ते पुण्यपुञ्जैर्हि मानुषम् ॥२२॥
देहं लभते देहीति ततः पुण्येन वै दिवम् ।
भक्त्या मोक्षं स्वधर्मेण स्मृद्धिं सौख्यं विवेकतः ॥२३॥
धर्मार्थकाममोक्षांश्च साधयेन्मानवः सदा ।
पशुप्रायं जीवनं तु हिंसकं परिवर्जयेत् ॥२४॥
हिंसया लभ्यते याम्यं दुःखं च नरकालयः ।
पापं द्रोहोऽप्यनिष्टं च हिंसया जायते तथा ॥२५॥
सांकर्यं जायते चापि दारिद्र्यं जनसंक्षयः ।
हिंसकानां जायतेऽधोगतिर्निरयगामिता ॥२६॥
हिंसकानां पाशदस्य हिंसापापं प्रजायते ।
जालकृतोऽपि प्राणिनां हिंसापापं प्रजायते ॥२७॥
मारकः खादकश्चाऽप्यनुमोदकः सहायकः ।
शस्त्रदः पाशदश्चापि जालदः समभाग् भवेत् ॥२८॥
जालकृतस्त्ववश्यं ते हिंसापापं प्रजायते ।
जालबद्धा देहिनस्त्वां निःश्वसन्तीव जालकम् ॥२९॥
जालधरं जालकृतं शपन्ति सन्तु दुःखिनः ।
तस्मात् साधुरहं तेऽत्रोपदिशामि सुखाय ते ॥३०॥
प्राणत्राणफलं पुण्यं तत्फलं सुखमुत्तमम् ।
प्राणिहिंसाफलं पापं तत्फलं दुःखमुल्बणम् ॥३१॥
जालकार्यं जालकर्म त्यक्त्वा वस्त्राणि संकुरु ।
वस्त्रैश्चावरणयोग्यैः पापं नोद्भवति क्वचित् ॥३२॥
आत्मसाधनमासाद्य कुरु कल्याणमात्मनः ।
स्नानं ध्यानं हरेः पूजां परोपकृतिमर्पणम् ॥३३॥
साधूनां सेवनं कृत्वा लब्ध्वा पुण्यं दिवं व्रज ।
अनादिश्रीकृष्णनारायणं संपूज्य भावतः ॥३४॥
व्रतोत्सवांश्च दानानि कृत्वा स्वर्गं परं व्रज ।
मा हिंसाकारकं जालं संविरचय पापदम् ॥३५॥
मानुषजीवनं सार्थं कुरु मोक्षाद्युपार्जनात् ।
शास्त्रकथां सदा श्रुत्वा नारायणं समर्जय ॥३६॥
नारायणं विदित्वैव परं पदं प्रयाहि च ।
स्मर नारायणं कृष्णं श्रीपतिं कमलापतिम् ॥३७॥
अक्षरेशं माणिकीशं राधेशं पुरुषोत्तमम् ।
स एव भगवानत्र मानवे भूतलेऽपि च ॥३८॥
दिव्यधामेश्वरः साक्षाज्जायते मानवाकृतिः ।
तस्य सर्वचरित्राणि शुभाऽशुभानि यानि च ॥३९॥
दिव्यान्येव भवन्त्येव चिन्तनीयानि तानि वै ।
मोक्षदानि महाशान्तिप्रदानि शुभदानि च ॥४०॥
कामः क्रोधो भयं शोकः प्रीतिर्जयः पराजयः ।
क्षुधा तृषा कृतिर्निद्रा तत्सर्वं तस्य मंगलम् ॥४१॥
निन्द्यं वाच्यं निकृष्टं च नृशंस्यं तस्य कर्म यत् ।
सर्वं कल्याणदं बोध्यं न दोषो विद्यते हरौ ॥४२॥
हरेर्निर्गुणभावत्वाद् दिव्यत्वात्तस्य साधुषु ।
हरेः सम्बन्धमाप्तेषु निर्गुणत्वं च दिव्यता ॥४३॥
वर्तते चेति विज्ञाय सेवनीया हि साधवः ।
साधुषु स्नेहमासाद्य हरौ स्नेहं विधाय च ॥४४॥
अन्यरागं विहायैव स्थैर्यं लभेत् परेश्वरे ।
एवं नित्यं समभ्यासात् संस्कारो बलवान् भवेत् ॥४५॥
तेन स्नेहातिशयिता कृष्णे प्रजायते मुहुः ।
तथा सत्येव भक्तस्य जाग्रत्स्वप्नसुषुप्तिषु ॥४६॥
श्रीहरेर्दिव्यमूर्तेस्तु दर्शनं सम्प्रजायते ।
अतिस्नेहेन साध्वीनां तथा वीक्षा हरेर्भवेत् ॥४७॥
अतिकामेन पत्नीनां गोपीनां हरिवीक्षणम् ।
अतिद्वेषेण शत्रूणां दैत्यानां हरिवीक्षणम् ॥४८॥
अतिस्वार्थेन देवानां मुहुर्वै विष्णुदर्शनम् ।
अतितादात्म्ययोगेन योगिनां ब्रह्मदर्शनम् ॥४९॥
अतिज्ञानेन विदुषां सर्वथा ब्रह्मदर्शनम् ।
एवं दास्येन भवति सेवया कृष्णदर्शनम् ॥५०॥
अत्यनुवृत्तिधर्मेण हरेः प्रसन्नता भवेत् ।
कृपया जायते वीक्षा सर्वदा श्रीहरेस्तथा ॥५१॥
सतामाशीर्वचोभिश्च नैर्मल्ये सति सर्वथा ।
भक्तानां हृदये बाह्ये सर्वत्र हरिदर्शनम् ॥५२॥
हरौ च कृष्णभक्तेषु पक्षपातोऽस्ति यस्य वै ।
कुटुम्बिषु यथा तद्वत् तत्सत्संगो हि शाश्वतः ॥५३॥

एवंविधस्य भक्तस्य नश्यन्ति दोषकोटयः ।
वासनाश्च विनश्यन्ति प्रोद्भवन्ति सतां गुणाः ॥५४॥
विना स्नेहं हरौ सत्सु सत्संगो नष्टमूलकः ।
यस्तु स्वान्मानहीनश्च मुमुक्षुर्दिव्यदृष्टिमान् ॥५५॥
महिमानं विदन् हरेः साधूनां भक्तयोषिताम् ।
तस्य बोध्यस्तु सत्संगः सदैव दृढमूलकः ॥५६॥
एतादृशानां भक्तानां विरहं चाऽसहन् प्रभुः ।
अक्षरस्थोऽगोचरोऽपि श्रेयसे कृपया त्विह ॥५७॥
स्वेच्छयैव नराकारं गृह्णन् चरति भूस्तरे ।
तस्याऽनुवृत्तिमाश्रित्य वर्तितव्यं निरन्तरम् ॥५८॥
अनुवृत्तिरसन्देहा हरिप्रसादराधनम् ।
हरेः प्रसादो यस्याऽस्ति तस्य सतां प्रसन्नता ॥५९॥
प्रसन्नताया लब्ध्यर्थं नैष्ठव्यं वर्ष्मणः सुखम् ।
सत्संगो वपुषा तन्वा पोष्टव्यो मनसाऽपि च ॥६०॥
अयं साक्षात्प्रभुः कृष्णनारायणो जगद्गुरुः ।
अवतारी परब्रह्म श्रीमद्गोपालनन्दनः ॥६१॥
इमे सन्तो हरेर्भक्ता अक्षरव्योमवासिनः ।
मुक्ताः सर्वेऽत्र सन्त्येव योषितोऽपि रमासमाः ॥६२॥
इयं भूश्चाऽक्षरं धाम बालकृष्णस्य योगतः ।
वयं सर्वे दिव्यमुक्ता नारायणप्रसंगतः ॥६३॥
यत्र कृष्णस्तत्र धाम मुक्ता मुक्तानिकास्तथा ।
महद्भाग्यमिदं नश्च यद् दिव्यानां समागमः ॥६४॥
एभिः समं निवासो नः सर्वं दिव्यं यतो मम ।
सेवनीयो हरिश्चापि सेवनीया हि साधवः ॥६५॥
आज्ञास्तेषां पालनीयास्ततो दिव्यत्वमाप्यते ।
साधुगुणाः समायान्ति साध्वाज्ञा पालनात् खलु ॥६६॥
साधून् सेवेत सततं देववत् कृष्णवत्तथा ।
कृष्णध्यानं परं कार्यं कार्या भक्तिरनेकधा ॥६७॥
दुःस्वभावास्तथा पापं त्याज्यं सतां प्रसेवया ।
श्रेयःशक्तिर्वर्धनीया जेतव्याश्चान्तराऽरयः ॥६८॥
प्रत्यक्षे वा परोक्षे वा कृष्णो बोध्यो निजान्तिके ।
प्रत्यक्षद्रष्टा सर्वत्र व्यापको नैकरूपधृक् ॥६९॥
अन्तरात्मा परमात्मा लक्ष्मीश्रीमाणिकीपतिः ।
प्रत्यक्षं चेक्षते सर्वं सर्वत्राऽस्ति परः प्रभुः ॥७०॥
स्थावरे जंगमे चास्ति स्थूले सूक्ष्मे तथेतरे ।
न तद्वाञ्छां विना पत्रचालने सबलोऽनिलः ॥७१॥
सर्वकर्मफलदाता सर्वं धृत्वा स तिष्ठति ।
पृथ्व्यां धारणशक्तिर्वै तस्यैवाऽस्ति तथा जले ॥७२॥
तृतिशक्तिस्तस्य चास्ति गगने विधृतिस्तथा ।
चन्द्राऽर्काऽग्निप्रकाशानां दाता स परमेश्वरः ॥७३॥
एतादृशः समर्थोऽयं वर्तते मानवोऽत्र वै ।
दत्ते स्वदर्शनं कृष्णः कंभराश्रीसुतो हरिः ॥७४॥
एवं निरन्तरं चित्ते चिन्तनीयो हरिः प्रभुः ।
स एव स्वाश्रितानां तु दुःखान्यपाकरोति हि ॥७५॥
परित्राणे समर्थोऽस्ति वर्तते दिव्यभाववान् ।
क्वचिन्मानवभावैस्तु सहते कष्टमित्यपि ॥७६॥
भयमेति कामयते क्षमते रौति वै क्वचित् ।
सर्वाः क्रिया हरेरत्र कल्याणदा हि पाविकाः ॥७७॥
तस्य प्रभोः साधवोऽपि सन्ति स्वात्मेव तत्प्रियाः ।
अहोऽयं भगवान् भक्तवशोऽत्र वर्ततेऽपि च ॥७८॥
तत्प्रतापात्तस्य भक्ताः सन्ति कल्याणकारिणः ।
साधवो मोक्षदा नश्चेत्येवं माहात्म्यमर्जयेत् ॥७९॥
अलौकिकी यस्य बुद्धिर्हरौ सत्सु सदा यथा ।
सा वर्धनीया सततं न कुबुद्धिं प्रसंगजाम् ॥८०॥
स्वभावदोषं पश्येन्न दिव्यं परिचयं चरेत् ।
तेनाऽसद्वासनादोषो हृदयादपसर्पति ॥८१॥
भक्तिं विवर्धयेत् सत्सु देहेन्द्रियमनःकृताम् ।
सर्वस्वार्पणरूपां तां महामोक्षप्रदायिनीम् ॥८२॥
मोक्षस्य साधनं मुख्यं सतां दास्यं मतं पदम् ।
आपत्कालेऽपि सततं सेवनीया हि साधवः ॥८३॥
साधुकथां हरेर्वार्तां श्रृणुयात् पापनुत्तये ।
मोक्षाय चार्पयेत् सर्वं देहं गेहं धनादिकम् ॥८४॥
अनादिश्रीकृष्णनारायणं श्रीमाणिकीपतिम् ।
जानीयात् परमात्मानं श्रीपतिं राधिकापतिम् ॥८५॥
वासुदेवादयो व्यूहाः केशवाद्याश्च मूर्तयः ।
मत्स्याद्या अवताराश्च बालकृष्णस्य सन्ति वै ॥८६॥
एवं माहात्म्यमासाद्य सतीव संश्रयेत् पतिम् ।
भुक्तिं मुक्तिं लभेत् कृष्णात् पत्नीव शरणी जनः ॥८७॥
एवं संगरयादस्क ! त्यक्त्वा जालक्रियां भवान् ।
समाचरतु वस्त्राणां वयनं च कटादिकम् ॥८८॥
भज कृष्णं परब्रह्म लभ मुक्तिं परं पदम् ।
याहि धामाऽक्षरं दिव्यं शाश्वतं त्वं सुभक्तिमान् ॥८९॥
इति शुक्रायनः साधुरुपविश्य नदीतटे ।
आशीर्दत्वा च तं कृत्वा वैष्णवं भक्तिसेविनम् ॥९०॥
तिरोभवद्धि सहसा संगरो निजजालकम् ।
गृहे गत्वा विभिद्यैव रज्जनां दीर्घनाडकम् ॥९१॥

कृत्वा ररक्ष च गृहे तत्याज जालकारिताम् ।
भेजे मां सकुटुम्बः स बहुभक्तान् व्यधापयत् ॥९२॥
भजनं मे पूजनं च लक्ष्मि मोक्षप्रदं यथा ।
तदाऽऽरभ्याऽद्रोहधर्मं पालयामास सर्वथा ॥९३॥
मूर्तौ मां गोचरं चक्रे दास्यस्नेहादिभिः स च ।
अथ काले समायाते रथेन सह माधवः ॥९४॥
प्रययौ तद्गृहं चाऽहं नेतुं धामाऽक्षरं मम ।
रूपावतीं तु तत्पत्नीं संगरं च रथे त्वहम् ॥९५॥
निषाद्य दिव्यदेहं च कृत्वा धामाऽक्षरं ययौ ।
अन्येऽपि भक्तसंघा मे मया नीता ययुः परम् ॥९६॥
सर्वपापसमूहास्तु मया प्रज्वालिता रमे ।
भक्तानां साधुभक्तानां नैर्मल्यं कृपयाऽऽदधे ॥९७॥
अपि पापाः पापसंगा अज्ञा विषयिणोऽपि च ।
सतां योगेन जायन्ते पावना ब्रह्मभोगिनः ॥९८॥
स्त्रियो वा पशवश्चापि जडा वा मलिना अपि ।
आसाद्य साधुसेवां संजायन्ते पंक्तिपावनाः ॥९९॥
न विप्रा न सुरा गावो व्रतानि नियमा यमाः ।
न तीर्थानि तथा श्रेष्ठाः सन्तः श्रेष्ठतमा यथा ॥१००॥
सन्मूर्तिरानखशिखं सर्वा दिव्या हि पावनी ।
यथा नारायणः साक्षाल्लक्ष्मीर्नारायणी यथा ॥१०१॥
सतां प्रसादो दिव्योऽस्ति सतां स्पर्शस्तथोत्तमः ।
सतां सेवा हि सुखदा दुःखहन्त्री हरिप्रदा ॥१०२॥
पठनाच्छ्रवणादस्य स्मरणाच्चिन्तनादपि ।
पापनाशः पुण्यलाभो भुक्तिर्मुक्तिर्भवेत्तथा ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने संगरयादस्कभक्तस्य जालकार्यं त्याजयित्वा शुक्लायन-साधुना भगवत्प्राप्तिः कारितेत्यादिनिरूपणनामा द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वमजपालकथां तथा ।
चन्द्रप्रभायाः सरितो निकटे नन्दिपत्तने ॥ १ ॥
उद्यमश्रीसमाख्योऽभूद् भरवाटो ह्यजाधनः ।
पञ्चशतानि सन्त्यस्याऽजानां शतं गवां तथा ॥ २ ॥
उरणानां पञ्चशतं गर्दभानां शतं तथा ।
शुनां तु दशकं चापि महिषीणां तु विंशकम् ॥ ३ ॥
चाराणां भृत्यकार्याणां दशकं तस्य विद्यते ।
पत्नीषट्कं पुत्रपुत्रीसन्ततिश्चास्य विद्यते ॥ ४ ॥
सीम्नि नदीतटेऽरण्ये शाद्वले घाससम्पदि ।
निम्नौडौषधिसंशोभे पुष्कलतृणभूतले ॥ ५ ॥
वसति नन्दिपुरतो नातिदूरे सुवृत्तिके ।
यत्राऽन्यभरवाटानां वसतिः पशुरक्षिणी ॥ ६ ॥
घोषात्मिका विद्यते वै वन्यभक्ष्यादिकारिणी ।
उद्यमश्रीर्महानास्ते यशसा च तथाऽऽयुषा ॥ ७ ॥
पशुधनेन च कुटुम्बेनाऽतिथिप्रसेवया ।
यस्य वासे समायान्ति वनिनो बहवो मुहुः ॥ ८ ॥
स्वागतं सोऽपि सर्वेषां करोति पयआदिभिः ।
साधवो यतयः सिद्धाः समायान्ति च योगिनः ॥ ९ ॥
साध्व्यश्चापि समायान्ति सेवाभाविगृहे मुहुः ।
सत्कारयति सर्वान् सः प्रसन्नयति भोजनैः ॥१०॥
दानमानैः सुसन्मानैः पादसंवाहनादिभिः ।
स्त्रियः पुत्राश्च पुत्र्यश्च भरवाट्योऽपि नित्यदा ॥११॥
सेवन्ते साधुपुरुषान् साध्वीश्च बहुभावतः ।
सर्वस्वार्पणभावेन साधून्मत्वा प्रभुं हरिम् ॥१२॥
साधुष्वास्ते हरिः साक्षात् साध्वीष्वास्ते रमा स्वयम् ।
अभ्यागतेषु देवाश्चासते पूज्या यतो हि ते ॥१३॥
एवं सेवां कुर्वतस्तु भजमानस्य मां प्रभुम् ।
गृहे तस्याऽऽययुः साध्व्यो विंशतिः सांख्ययोगगाः ॥१४॥
यतिन्यस्ताश्च वैष्णव्यो वृद्धा भक्तिपरायणाः ।
तासां दुग्धादिभिश्चापि वन्यभोजनसम्प्रदैः ॥१५॥
सन्मानं स्वागतं चक्रे वासं काण्डगृहे ददौ ।
उषुस्ताः श्रीकृष्णनारायणभक्तानिकाः स्त्रियः ॥१६॥
दिव्या दिव्यगुणोपेताः स्नात्वा नद्यामपूजयन् ।
हरिकृष्णं प्राणपतिं श्रीमत्कृष्णनरायणम् ॥१७॥
ततस्ता भोजनं चक्रुर्निवेद्य परमात्मने ।
विश्रान्तिं च समालभ्य सायं संकीर्तनं व्यधुः ॥१८॥
आरात्रिकं चरित्राणां कथां चक्रुश्च वार्तिकाः ।
वल्लव्यो बालकाः कन्याः कथां श्रोतुं सहस्रशः ॥१९॥
आययुः परितो ज्ञात्वा साध्वीमण्डलमुत्तमम् ।
मातरस्ता हरेर्मूर्तौ विमग्नवृत्तयः सदा ॥२०॥
भजन्ते च रटन्त्येनं श्रीकृष्णं वल्लभं प्रभुम् ।
तासु गुरुपदं प्राप्ता सतीश्वरीतिनामिका ॥२१॥
साध्वी कथां हरेश्चक्रे शुश्रुवुर्गोपिकास्त्रियः ।
वल्लवाश्च तथा सर्वे श्रद्धया भक्तिभावया ॥२२॥
लक्ष्मीनारायणसंहितायाः कथां सुमोक्षदाम् ।
पापप्रज्वालिकां सतीश्वरी जगाद शोभनाम् ॥२३॥

मनः कृष्णे धृतं येन जितं तेन जगत् खलु ।
जितं भवेन्मनस्तद्वै यद् धृतं परमात्मनि ॥२४॥
इन्द्रियाणि विषयेषु प्रयान्ति मनसा सह ।
अजितं तु मनस्तद्वै विषयं प्रति यद्गतम् ॥२५॥
परावृत्त्य मनोवृत्तिमिन्द्रियवृत्तिका हरौ ।
धारयेत्तन्मनश्चेन्द्रियाणि जितानि तत्तदा ॥२६॥
रागनाशे विरागः स्यात्तेन मनो जितं भवेत् ।
हरौ प्रीत्या च नाऽन्यत्र गच्छेन्मनो जितं भवेत् ॥२७॥
ब्रह्मस्थित्या विनश्येद्वै रागश्च कामनादयः ।
भोगबुद्धिर्विनश्येच्च मनस्तेन जितं भवेत् ॥२८॥
श्रीहरेः श्रीपतेर्दिव्यसुखे यस्य तु मग्नता ।
माहात्म्यज्ञानयुक्तस्य तस्य मनो जितं भवेत् ॥२९॥
देहभावविनाशेन चिद्भावो यस्य वर्तते ।
मनस्तस्य जडं निरुत्साहं जितं भवेदपि ॥३०॥
नित्यतृप्तिर्हरेः कान्तान्मायिकात्तु निवर्तनम् ।
तस्य तृप्तं स्थिरं चित्तं मनो जितं सदा मतम् ॥३१॥
देहाभिमाननाशेन चात्मनिष्ठाबलेन च ।
रागवासनात्यागेन मनो जितं सदा भवेत् ॥३२॥
नारीरूपं मनः प्रोक्तं जीवात्मा नररूपधृक् ।
मनो भोगं जहात्येव मनो जितं भवेत् स्वतः ॥३३॥
आत्माऽहं चेतनो नारी परमात्मा नरो मम ।
पतिर्भोक्ता सुखदाता नान्यो मे भोगकृत्परः ॥३४॥
साक्षात्कृष्णो बालकृष्णो हरिः श्रीकान्तवल्लभः ।
पाता धाता विधाता सः प्रियः प्राणपतिः पतिः ॥३५॥
स्वामी धामी च निष्कामी सर्वानन्दपरिप्लुतः ।
ममाऽऽनन्दप्रदः कान्तश्चेत्ययं पुरुषोत्तमः ॥३६॥
ईश्वराणामवतारावतारिणीनां शासकः ।
गोलोकाधिपतिः सोऽयं वल्लवीस्वामितां गतः ॥३७॥
वैकुण्ठाधिपतिः सोऽयं पार्षदाणीपतिः प्रभुः ।
मुक्तानिकापतिः कृष्णोऽक्षरधामविराजितः ॥३८॥
श्रीपुरेऽव्याकृतेऽमृते श्रीलक्ष्मीकमलापतिः ।
ललितामाणिकीनाथः प्रभापद्मावतीपतिः ॥३९॥
ब्रह्मप्रियापतिश्चायं हरिप्रियापतिः स च ।
विशालाबदरीनाथः श्वेतद्वीपरमापतिः ॥४०॥
क्षिरोदशारदास्वामी सीतापतिः सतीपतिः ।
सर्वसाध्वीपतिः कृष्णः कुम्भकारीपतिः स हि ॥४१॥
सर्वमुक्तपतिः साधुपतिः सर्वसखीपतिः ।
सर्वदासीपतिः प्राणमात्रपतिः परः पुमान् ॥४२॥
एवं ज्ञात्वा हरिं कान्तं भजेत् सर्वसुखाश्रयम् ।
तस्य मनो भवेल्लग्नं कृष्णे तद्वै जितं मतम् ॥४३॥
स चायं भगवानास्ते हृदये मे मदात्मनि ।
सच्चिदानन्दरूपश्च साधुसाध्वीषु राजते ॥४४॥
श्रीमद्गोपालबालश्च राजतेऽक्षरक्षेत्रके ।
सर्वसुखनिधिः साक्षाद् वासुदेवः स एव सः ॥४५॥
मानवानां च देवानां पितॄणां सिद्धयोगिनाम् ।
ईश्वराणामवतारकोटीनां सुसुखानि वै ॥४६॥
मुक्तानां ब्रह्मधाम्नां च यानि यानि सुखानि वै ।
तानि सर्वाणि कृष्णस्य श्रीकम्भरात्मजस्य तु ॥४७॥
रोम्ण एकस्य तु प्रान्ते वर्तन्ते चेदृशः प्रभुः ।
सर्वसुखनिधिः स्वामी कृष्णो यो मिलितोऽस्ति नः ॥४८॥
तस्य धाम्नः सुखस्याऽग्रे धाम्नां सुखानि यानि वै ।
सर्वेषां लोकपालानां व्यूहानामीशधामिनाम् ॥४९॥
ग्रहाणां मरुतां विश्वेदेवानामश्विनोरपि ।
साध्यानां च वसूनां च रुद्राणां वसदामपि ॥५०॥
सूर्याणां ब्रह्मविष्णूनां तथाऽन्येषां परौकसाम् ।
स्थानानि निरयाण्येव धाम्नश्चास्य परात्मनः ॥५१॥
तमिमं श्रीपतिं कान्तं हित्वा तु निरयाभिधान् ।
कथमन्यान् सुखसंज्ञान् भजेऽहं परमेश्वरी ॥५२॥
एवं विज्ञाय माहात्म्यं दिव्यभावयुता सती ।
त्यजेन्मोहं निरयाणां जितं तस्या मनः सदा ॥५३॥
वासना विलयं यान्ति मायिक्यः सततं तदा ।
एतादृश्या देहवाञ्छा भोगवाञ्छा च मायिकी ॥५४॥
न जायते सदा दग्धा जाता निर्मूलिका हि सा ।
एतादृशं महिमानं या न वेत्ति हरेस्त्विह ॥५५॥
तस्या नरे भवेद् वृत्तिः प्राकृतेऽपि सकामना ।
पुत्रे मित्रे कलत्रादौ पत्यौ स्नेहोऽपि बन्धनम् ॥५६॥
मनसो वर्तते तस्याः स्वार्थवर्तनयोषितः ।
सा त्यजेत् परमात्मानं कुटुम्बस्नेहकर्षिता ॥५७॥
रोगादिपीडया वा च विषयाऽप्राप्तितस्त्यजेत् ।
केशवे तु मनस्तस्या विषयार्थे चरेत् सदा ॥५८॥
अलाभे विषयाणां तु पामरा सा भवेत्ततः ।
पतत्येव हरेर्भक्तेर्मोक्षमार्गे न विन्दति ॥५९॥
तस्मात् स्नेहो हरौ कार्यः स्वार्थशून्यो निसर्गजः ।
न वै रूपाच्च वै कामाच्च लोभाच्चैव लाभजः ॥६०॥
न स्वार्थाद्वा प्रकर्तव्यः स्नेहः किन्तु निसर्गजः ।
दिव्यगुणचमत्कारमाहात्म्यज्ञानसंभवः ॥६१॥

कर्तव्यो वै सदा स्नेहो यस्य नाशो न कर्हिचित् ।
गुणा दिव्या हरौ सन्ति सत्यशौचसुखादयः ॥६२॥
अपारं चापि वात्सल्यं माधुर्यं च सुशीलता ।
सौहार्दं च कृपा स्नेहो दया शान्तिः क्षमा रतिः ॥६३॥
प्रीतिर्हितकरत्वं च सहनं दिव्यता धृतिः ।
औदार्यं शाश्वतानन्दित्वं च शरणरक्षिता ॥६४॥
एते गुणाः समायान्ति भक्तेष्वपि प्रसेवनात् ।
सद्वार्ताश्रवणेनापि गुणाः प्राविर्भवन्ति हि ॥६५॥
एवंगुणिषु भक्तेषु स्नेहः कृष्णस्य जायते ।
वपुषा मनसा वाण्या दास्यं कार्यं हरेस्ततः ॥६६॥
हरेः रुच्यनुसारेण वर्तितव्यं तु वर्ष्मणा ।
तप आदि प्रकर्तव्यं हरेः रुच्यनुसारतः ॥६७॥
हरेः सतां योगिनां च साध्वीनां श्रद्धया सदा ।
शुश्रूषणं प्रकर्तव्यं कृष्णे स्नेहो दृढो भवेत् ॥६८॥
वचः कटु न वक्तव्यं सत्यं वाच्यं हितं तथा ।
महद्भिर्न विवादोऽपि कर्तव्यो न जयोऽपि च ॥६९॥
निर्मानं कोमलं वाच्यं प्रमाणं नम्रतान्वितम् ।
उत्कृष्टा वाक् प्रवक्तव्या मान्यं चाज्ञावचो हरेः ॥७०॥
आदरात् कठिनं चापि ग्राह्यं वचो हरेः सदा ।
क्रियानर्हमसंभाव्यं ग्राह्यमेव वचो हरेः ॥७१॥
एवं भवेद्धरेः स्नेहः सतां स्नेहस्तथा भवेत् ।
दर्शने श्रवणे ध्याने पूजने सेवने हरेः ॥७२॥
सन्निधौ श्रीहरेर्मूर्तावैकाग्र्यं चेष्टसिद्धिकृत् ।
मुहुर्नवं नवं यद्वद्दर्शनं चाप्यलौकिकम् ॥७३॥
स्थिरं चिरं प्रकुर्याच्च नान्यत् पश्येत्तदा खलु ।
एतादृशं दर्शनं वै हरेः स्नेहस्य कारणम् ॥७४॥
बहिर्वा चान्तरे वेदृग् दर्शनं स्नेहकारणम् ।
चलदृष्टिजने प्रीतिर्जायते नैव शार्ङ्गिणः ॥७५॥
सतां चापि भवेन्नैव प्रीतिश्चान्यविलोकिनि ।
नरे नार्यां पशौ चित्रे कपाटे चलदृष्टिके ॥७६॥
बहुधारेण मनसा दृष्टिः क्रियते चञ्चला ।
तया दृष्ट्याऽन्यत्र गन्तुर्न तत्प्रीतिः प्रजायते ॥७७॥
यथा कामी जनः पश्येत् कामुकीं त्वेकचेतसा ।
प्रेमैकतानभावेन तथा पश्येत् प्रभुं पतिम् ॥७८॥
अन्तरा त्वागतं किञ्चिन्नानुसन्धेयमण्वपि ।
आद्यक्षणे यथा पत्युर्वधूट्या दर्शनं नवम् ॥७९॥
दृढरूपधृतिप्राप्तिकरं स्फुरणदायकम् ।
तथा नित्यनवं तद्वै दर्शनं स्नेहकारणम् ॥८०॥
कथायाः श्रवणे त्वेवमैकाग्र्यं कार्यमेव यत् ।
स्फुरेच्चरित्रश्रवणाद् भगवान् भूतभावनः ॥८१॥
सर्वेन्द्रियेषु चक्षुर्वा कर्णौ वा मन इत्यपि ।
चञ्चलानि विशेषेण नियन्तव्यानि तानि वै ॥८२॥
कामेन्द्रियं तथा तेभ्योऽधिकं वै चञ्चलं यतः ।
मनो नियम्य कामोऽपि नियन्तव्यो मनोयुतः ॥८३॥
अन्यथा श्रीहरेर्ध्याने पूजने ग्राम्यमूर्तयः ।
विषयाः क्लेशदाश्चापि स्फुरेयुर्विघ्नकारिणः ॥८४॥
प्रबलं चेन्मनो लिङ्गं चक्षुः कर्णः प्रयाति वै ।
विषयेषु तु ग्राम्येषु तदा कार्यं विचारणम् ॥८५॥
हरिं त्यक्त्वाऽन्यविषये गमने लाभ एव न ।
विषया दुःखदाः सर्वे मायाबन्धकरा यतः ॥८६॥
आनन्दमूर्तिः श्रीकृष्णनारायणश्रीवल्लभः ।
तत्र स्थैर्यं शाश्वतस्याऽऽनन्दस्य परिलब्धये ॥८७॥
सिद्धदशा दिव्यदशा मोदप्रमोदशेवधिः ।
सर्वं कृष्णाद्भवत्येव तस्माल्लभ सुखं महत् ॥८८॥
अन्यत्र यतमानस्य किञ्चित् सुखं भवेदपि ।
सर्वं दुःखबहुलं तन्निरयस्य प्रदं तथा ॥८९॥
तस्माच्छृणु कथां पश्य कृष्णं चिन्तय सर्वथा ।
आनन्दं याहि तस्माद्वै कृष्णात् कान्ताच्च चेतरात् ॥९०॥
एवं कृष्णे कृतस्नेहाद् वाञ्छितां सिद्धिमाप्नुयात् ।
विभूतिं सम्पदो रूपं श्रीराधामाणिकीप्रभुम् ॥९१॥
विष्णुनारायणतुल्यं सर्वमाप्नोति तद्व्रतेः ।
सदेहे सर्वमाप्येत मृतौ वा धाम्नि सर्वथा ॥९२॥
तस्माद्धरौ सदा स्थैर्यं चक्षुषा मनसा गिरा ।
कर्णेन हृदयेनापि कामेन यावदात्मना ॥९३॥
एवं नित्यमनुवृत्त्या कृष्णे प्रीतिमतः खलु ।
प्रीतिमत्या योषितो वा स्यात् कृष्णप्रीतिपात्रता ॥९४॥
कृष्णवत् संस्थितिर्दिव्या लक्ष्मीवद्वा भवेत्ततः ।
न न्यूनं स्याद्धरेस्तस्य तस्याः श्रियोर्न निम्नता ॥९५॥
एवं लक्ष्मि महासाध्वी सतीश्वरी तु वल्लवीः ।
वल्लवान् भगवत्स्निग्धानुपादिदेश मुक्तये ॥९६॥
वल्लव्यो वल्लवाश्चापि भरवाटास्तथाऽपरे ।
उद्यमश्रीप्रभृतयो जगृहुर्भक्तिमुत्तमाम् ॥९७॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इतिमन्त्रं सतीश्वर्या जगृहुर्नाम चोत्तमम् ॥९८॥
बालकृष्ण हरे कान्त राधापते रमापते ।
मोक्षकृत् वल्लभ सर्वकामप्रद पुमुत्तम ॥९९॥

इतिनामानि जगृहुः कीर्तनं चक्रुरादरात् ।
साध्व्यस्तु भजनं कृत्वा प्रातर्भुक्त्वाऽन्यखेटकम् ॥१००॥
प्रययुर्भरवाटाश्च भरवाढ्यस्तथा मुहुः ।
भजनं पूजनं चक्रुर्बालकृष्णस्य सर्वदा ॥१०१॥
तासां भक्त्या हि भगवान् राधया रमया सह ।
प्रादुर्बभूव सहसा माणिक्या च श्रिया सह ॥१०२॥
चतुर्भुजस्वरूपं तं दृष्ट्वा महोत्सवे गृहे ।
मन्दिरे व्रतदिवसे द्वादश्यां प्रातरेव ह ॥१०३॥
आश्चर्यं परमं प्रापुः सहस्रशो जनास्तदा ।
दत्वा स्वदर्शनं चापि प्रसादं पायसं शुभम् ॥१०४॥
मोक्षार्थं वरदानं च दत्वा तिरोऽभवत् प्रभुः ।
सोऽहं लक्ष्मि ततः काले प्राप्ते उद्यमश्रीजनम् ॥१०५॥
भरवाटान् भक्तवर्यान् गोपीश्च प्रेमसंप्लुताः ।
निन्येऽहं मम धामैव गोलोकं नित्यमुत्तमम् ॥१०६॥
एवं साध्वीप्रसंगेन भरवाढ्यश्च वल्लवाः ।
तारिता मायिकाल्लोकात् स्नेहभक्त्या कृपालुना ॥१०७॥
एवं नार्यो नरा ये मां भजिष्यन्ति समर्पिताः ।
सर्वे यास्यन्ति परमं मत्पदं कान्तसेवनम् ॥१०८॥
पठनाच्छ्रवणादस्य स्मरणाच्चरणादपि ।
मुक्तिर्भुक्तिर्महासौख्यं भवेन्मया समर्पितम् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने उद्यमश्रीप्रभृतिगोपालकानां सतीश्वरीसाध्वीसेवया भक्तिर्मोक्षणं चेत्यादिनिरूपणनामा त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वमुष्ट्रपालो मरुद्भुवि ।
नाम्नाऽभवद् दीर्घरंभो ग्रामे चित्रोर्ध्वसंज्ञके ॥ १ ॥
उष्ट्रा यस्याऽभवन् पारेशतं शमीप्रभोजनाः ।
उष्ट्रायभूनिवासश्च क्रमेलकोर्णविक्रयी ॥ २ ॥
उष्ट्रविक्रयकर्ता च धान्यव्यापारकृत्तथा ।
एकदेशादन्यदेशे धान्यप्रापणकारकः ॥ ३ ॥
प्रायशो वै वने वासं कुर्वन्नुष्ट्राभिरक्षकः ।
वने रात्रौ निवसति दशोष्ट्रपालकैः सह ॥ ४ ॥
शमीवनेऽतितरले चरन्त्युष्ट्राः समन्ततः ।
दीर्घरंभादयः कृत्वा वह्निं तदभितस्तदा ॥ ५ ॥
निषद्य कम्बलैर्युक्ता गृणन्ति रामकीर्तनम् ।
देवानां च कथागीतिं कुर्वन्ति मिलितास्तथा ॥ ६ ॥
पिबन्त्युष्ट्रापयश्चापि निवेद्य प्रभवे हृदि ।
खादन्ति रोटकान् कृत्वा शमीशिम्ब्यारनालकैः ॥ ७ ॥
निर्गच्छन्ति वन्यमार्गे यदि केचित्प्रवासिनः ।
तेभ्यो ददति सत्कृत्य दुग्धं च रोटकादिकम् ॥ ८ ॥
परोपकारः कर्तव्यश्चान्नकम्बलदानकैः ।
मत्वैवं ते चार्पयन्ति कम्बलानपि चोत्तमान् ॥ ९ ॥
साधवो वा तीर्थयात्रालवो मिलन्ति तत्पथि ।
तेभ्योऽर्पयन्त्यन्नवारि कुर्वन्ति स्वागतादिकम् ॥१०॥
रामबुद्ध्यैव सततं पुण्यसत्कर्मवाञ्छया ।
यथेष्टं भक्तिभावेन सेवन्ते साधुमण्डलम् ॥११॥
अथैकदाऽर्बुदयात्राकरणाय त्रिपुष्करम् ।
प्रागच्छन्मण्डलं साधुसाध्वीनां पथि चागतम् ॥१२॥
कीर्तयद् वाद्यघोषैश्च रामकृष्णजनार्दन ।
नरसिंह हरे विष्णो कृष्णनारायणाऽच्युत ॥१३॥
दृष्ट्वा तांस्तु दीर्घरंभो गत्वा प्रतिप्रणम्य च ।
दुग्धं च रोटकान् तेभ्यो ददौ मध्याह्नके जलम् ॥१४॥
सायं ते साधवस्तत्र विश्रान्तिं प्रापुरुत्सुकाः ।
रात्रौ सर्वे तूष्ट्रपाला असेवन्त सतो जनान् ॥१५॥
नामसंकीर्तनं कथां रामस्य शुश्रुवुस्तथा ।
अथ साधुवरं रामायणाख्यं वैष्णवोत्तमम् ॥१६॥
पप्रच्छ स्वात्मकल्याणं कथं स्यादिति चानतः ।
रामायणः प्रत्युवाच तदा कल्याणसाधनम् ॥१७॥
साधूनां सेवनं चापि रामनाम्नां सुकीर्तनम् ।
भक्तिं विष्णोर्नवधां च कल्याणसाधनानि हि ॥१८॥
रामस्य वन्दनं नित्यमर्चनं बहुवस्तुभिः ।
मानसैरुपचारैश्चाप्यर्चनं हृदयेऽन्वहम् ॥१९॥
कल्याणसाधनं चेति ध्यानं रामस्य चिन्तनम् ।
प्रेम्णा पुलकितगात्रो गद्गदाऽक्षरवाक् तथा ॥२०॥
तत्स्वरूपैकचिन्तश्च भवेद्भक्तोऽर्चने हरेः ।
बाह्यपूजाकरो यद्वा चान्तरार्हणकारकः ॥२१॥
विशिष्यतेऽयं भक्तौ वै सर्वेभ्यो भक्तसम्मतः ।
ऐकाग्र्यरहितः स्नेहरहितस्तु न शस्यते ॥२२॥
पूजने सेवने यस्य श्रद्धा भवति भूयसी ।
कथायां कीर्तने यस्य श्रद्धादरौ विशेषतः ॥२३॥
माहात्म्यं यस्य चोत्कृष्टं भक्ते यस्य सुमित्रता ।
यस्य रामार्चनादौ वै भूरिकालो यथा क्षणः ॥२४॥
नवधाऽपि हरेः सेवा यस्य नूत्नाऽनुवासरम् ।
न गौणी यस्य जीर्णा न क्वचित् क्वापि भवेदियम् ॥२५॥

श्रद्धाभक्तिर्यस्य नित्यं नूतना नूतनोज्ज्वला ।
स मुक्तोऽत्र च मुक्ता सा नरो नारी हि भूतले ॥२६॥
दूरस्था अपि भक्ता ईदृशाः कृष्णान्तिकस्थिताः ।
यदि नैतादृशाः पार्श्वस्थितास्ते दूरवन्मताः ॥२७॥
तस्मात् प्रीत्युदयसिद्ध्यै यतितव्यं निरन्तरम् ।
श्रवणे मनने निदिध्यासने दिव्यदर्शने ॥२८॥
कृष्णे तादात्म्यमापन्नात् साधोर्मुखाद्धरेः कथा ।
श्रोतव्या श्रीहरेः स्मृत्या सहिताऽर्थस्य धारिणी ॥२९॥
श्रुतार्थस्य तु मननं पुनः पुनर्विचारणम् ।
सप्रेममूर्तिसहितं कर्तव्यं वासनापहम् ॥३०॥

ततः संस्कारजं शुद्धं स्मरणं निदिध्यासनम् ।
कर्तव्यं श्रद्धया प्रीत्या प्रसन्नस्तस्य माधवः ॥३१॥
भवेत्तेन हरेः स्फूर्तिः सहजा नित्यमान्तरे ।
साक्षात्कारो भवेत् स्फूर्तौ दिव्यमूर्तेर्हरेः सदा ॥३२॥
एवं प्रीतिर्हरौ कार्या तया प्रीतिर्हरेर्भवेत् ।
परस्परप्रीतिमतोस्तादात्म्यं जायते ततः ॥३३॥
ब्रह्मचर्यमात्मनिष्ठा वैराग्यं श्रवणादयः ।
कृष्णाश्रयश्च साक्षात्कारहेतवस्त ईरिताः ॥३४॥
मननं च निदिध्यासो भक्तेष्टसिद्धिदायकौ ।
केवलं श्रवणं नैव साक्षात्कारफलप्रदम् ॥३५॥

वासना नहि नश्यन्ति निदिध्यासनमन्तरा ।
हृद्ग्रन्थयो विनश्यन्ति कृष्णाऽखण्डविचिन्तनात् ॥३६॥
निदिध्यासनयुक्तस्य प्रत्यक्षद्रष्टुरेव ह ।
पूर्णकामताऽऽनन्दाश्च वर्तन्ते नेतरस्य तु ॥३७॥
बाह्यं कृष्णस्य द्रष्टुर्वै मन्तुश्च हृदये तथा ।
स्मर्तुः रूपं च सततं द्रुतं स्फुरति केशवः ॥३८॥
अनेवंवर्तमानस्याऽनेवंयत्नकृतोऽपि च ।
नैव स्फुरति विश्वात्मा दिव्यात्मा भगवान् हृदि ॥३९॥
तस्मात् कृष्णस्य हृदये साक्षात्कारस्य साधनम् ।
श्रवणं मननं निदिध्यासनं प्रीतिरुच्यते ॥४०॥

प्रीत्या सततसन्धात्र्या स्फुरति कान्तवद्धरिः ।
तस्माच्छ्रुतस्य दृष्टस्य हरेस्तु मननं तथा ॥४१॥
स्मरणं प्रेमसहितं श्रद्धान्वितं समाचरेत् ।
तस्योपरि हरेः प्रीतिर्जायते धामयोजिका ॥४२॥
देहे जीवस्य तादात्म्यं यावद्वै वर्तते च तत् ।
कृष्णे स्नेहे महाविघ्नं बोध्यं संसारजन्मकृत् ॥४३॥
तस्माद् देहादयमात्मा भिन्न इत्यवबोधनम् ।
गुरोः सतश्च शास्त्राच्च प्राप्तव्यं च विवेकिना ॥४४॥

भ्रमो नाशयितव्यश्च तादात्म्यस्य जडात्मनोः ।
स्वरूपाणि जडस्यापि चेतनस्यापि सर्वथा ॥४५॥
धर्माश्चापि प्रबोद्धव्या यैर्वैलक्षण्यमेतयोः ।
स्फुरेत्तेन तु तादात्म्यभ्रान्तिर्नश्येत् समूलिका ॥४६॥
जडो दुःखमयो रुग्णो नश्वरो विकृतः क्षयी ।
लालामूत्रमलव्याप्तो जन्ममृत्युजरान्वितः ॥४७॥
खण्डनद्धो बह्ववस्थो मायिको भौतिकश्चयी ।
पिण्डो ह्रासी नैकरूपो देहोऽयं वर्तते सदा ॥४८॥
इन्द्रियाणि समग्राणि सूक्ष्मदेहगुणानि वै ।
दुःखदोषोद्वेगचिन्ताकराणि तादृशानि च ॥४९॥

एतादृशो नाऽहमस्मि चिद्रूपः सुखवानहम् ।
अरोगी शाश्वतो निर्विकारः क्षयविवर्जितः ॥५०॥
सच्चिदानन्दरूपोऽस्मि जन्ममृत्युजराऽतिगः ।
अखण्डः स्थिर एकोऽहं दिव्यो मायाविवर्जितः ॥५१॥
अभौतिकश्चयशून्यः प्रकाशी ह्रासवर्जितः ।
एकरूपो निर्मलश्चाऽसंगी द्रष्टाऽमरोऽस्मि च ॥५२॥
शक्तयो मम दिव्याश्चेन्द्रियशक्तिप्रप्रेरिकाः ।
एतादृशो भवाम्येव चेतनो मोक्षधर्मवान् ॥५३॥
इत्यात्माऽनात्मनोः सम्यग् विवेकं समचिन्तयेत् ।
सतां मुखाच्छास्त्रतो वा ज्ञात्वा तं परिशीलयेत् ॥५४॥

पक्के ज्ञाने देहधर्मसांकर्यं नात्मधर्मसु ।
आत्मनिष्ठो भवेत्तेन भगवन्निष्ठ इत्यपि ॥५५॥
ब्रह्मरूपो भवेदेव मुक्तरूपोऽत्र मानवः ।
न तस्य वासना तिष्ठेन्न भ्रमो नापि यातनाः ॥५६॥
आत्माऽनात्मविवेकोऽयं यस्य नास्ति दृढीकृतः ।
स देहधर्मैर्दुःखाद्यैः पीड्यते भ्रमनोदितः ॥५७॥
यावदभ्यासशैथिल्यं तावद्देहात्मधीवशः ।
पशुवत् पाशवीं वृत्तिं चरत्यहंममत्मिकाम् ॥५८॥
देहेन्द्रियाद्यैक्यरूपां कामसंकल्पमोहिनीम् ।
स्त्रीपुंवित्तरसासक्तिदुःखतृष्णाऽवसंभृताम् ॥५९॥

मिष्टभोज्ये गरवत् सा दुःखदा चात्ममोदने ।
तया वृत्त्या निरयान् स प्रयात्येव तु मायिकान् ॥६०॥
निरयेषु गतिर्नैव यथा स्यात् प्रयतेत तत् ।
आत्मनिष्ठां साधयीत हरेः सतां प्रसेवया ॥६१॥
प्रेम्णा माहात्म्यवित्त्या च देहनिष्ठां परित्यजेत् ।
श्रद्धया सम्प्रसेवेत साधून् भक्त्या जनार्दनम् ॥६२॥
आशायां चाति तिष्ठेच्च हरेः साधोर्निरन्तरम् ।
शास्त्रधर्मान् पालयेच्च माहात्म्यज्ञानमर्जयेत् ॥६३॥

एवं निर्वासनत्वं स्यात् कृष्णे स्नेहात्तु तद् द्रुतम् ।
माहात्म्यज्ञानसहिता भक्तिः कृष्णे विवर्धते ॥६४॥
माहात्म्यज्ञानहीनस्य नश्यन्ति भक्तिदा गुणाः ।
माहात्म्यज्ञानयुक्तस्य गुणाः कल्याणकारिणः ॥६५॥
सर्वे त्वागत्य वर्तन्ते हृदये तु यथा सताम् ।
गुणानामागमे सर्वा नश्यन्ति वासना द्रुतम् ॥६६॥
भजमानस्य भक्तस्य वासनाशेषसंभवे ।
मृत्युश्चेज्जायते तस्य जन्म देवादिषूज्ज्वलम् ॥६७॥
सम्पद्भोगकरं स्याद्वै भक्तानां च गृहे ततः ।
वासनानाशमासाद्य ततो मुक्तिर्भवेद् ध्रुवा ॥६८॥
सवासनस्य भक्तस्य याम्यगतिर्न विद्यते ।
भक्तिफलं देवलोक ईशलोकोऽथवा मतः ॥६९॥
महाचक्रवर्तिराजा भक्तो भूत्वाऽक्षरं व्रजेत् ।
अपारकरुणः कृष्णो भक्तस्य परमा गतिः ॥७०॥
स तं निर्वासनं कृत्वा स्वभक्तं परिरक्षति ।
कृष्णधाम्नः सकाशात्तु मायिका वैभवा अपि ॥७१॥
भक्तानां निरया एव भासन्ते चात्मवेदिनाम् ।
भुक्त्वा त्यक्त्वा ततस्ते तान् प्रयान्ति चाक्षरं पदम् ॥७२॥
रामनाम जपन् कृष्णं स्पृशन् पश्यन् नरायणम् ।
दिव्यश्च निर्मलो ब्रह्मरूपो भूत्वा परं पदम् ॥७३॥
प्रयाति योगिनां स्थानं मुक्तानां पदमुत्तमम् ।
सतां मण्डलमध्यस्थोऽश्नुतेऽक्षरे महासुखम् ॥७४॥
भक्ता यद्वाऽप्यभक्ता वा साक्षाद्धरेस्तु दर्शनम् ।
स्पर्शनं सेवनं कुर्युस्ते दिव्याः संभवन्ति वै ॥७५॥
अभक्ताश्चेत् समनस्काः सेवन्ते प्रीतिसंभृताः ।
तदा ते वासनां त्यक्त्वा प्रयान्ति परमं पदम् ॥७६॥
अपि भक्ता निर्मनस्काः सेवन्ते श्रीपतिं प्रभुम् ।
तदा तेऽपि शनैर्जन्मान्तरे यास्यन्ति तत्पदम् ॥७७॥
तीव्रसंवेगभक्तानामासन्नतम ईश्वरः ।
मन्दसंवेगभक्तानां दूरतमो जनार्दनः ॥७८॥
निर्मनस्कं हरेर्नामकीर्तनं दर्शनं स्पृशिः ।
सेवनाद्यं तु नैव स्यात् सम्पूर्णफलदं क्वचित् ॥७९॥
निर्मनस्कं तु यद्ध्यानं स्फूर्तिहीनं तु तद्भवेत् ।
यत्र नारायणमूर्तिर्नैव भासेत कर्हिचित् ॥८०॥
तस्माद् भक्ता उभयथा बाह्ये वा चान्तरेऽर्हणे ।
सप्रेमैकाग्र्यवृत्त्याद्यैः शीलयेयुर्महाप्रभुम् ॥८१॥
ते श्रीकृष्णप्रतापेन देहान्ते सद्य एव ह ।
ययुः श्रीकान्तगोलोकं मुक्ताः स्युर्दिव्यविग्रहाः ॥८२॥
अन्ये तु पुण्यमासाद्य भक्त्यादीनां पुनर्जनुम् ।
समासाद्य समाप्यैव पुण्यं यास्यन्ति तत्पदम् ॥८३॥
गोपीनामिव सर्वस्वार्पणैर्येषां तु सेवनम् ।
स्पर्शमीक्षा कीर्तनं च व्यवस्थात्रिवपुःकृतम् ॥८४॥
ते प्रयान्ति द्रुतं कृष्णात्मकं दिव्यं प्रमोक्षणम् ।
स्मृतिं विना कृतं सर्वं निष्फलं मोक्षदं न तत् ॥८५॥
उष्ट्रपाला भवन्तो वै कुर्वन्तु तत् तथाविधम् ।
प्रेम्णा प्रीत्या मनसा च सर्वार्पणेन वै हृदा ॥८६॥
सेवनं कीर्तनं चापि स्पर्शनं श्रीहरेः सताम् ।
तीव्रस्नेहाढ्यभक्तानामाशु मुक्तिर्भविष्यति ॥८७॥
वनिनां कीर्तनं सेवा भक्तिश्च मुक्तिसाधनम् ।
विप्राणां कर्मषट्कं च भक्तिर्नवधा मुक्तये ॥८८॥
सतां स्नानं ध्यानमिष्टं पूजा प्रसेवनं तथा ।
वैराग्यं चात्मनिष्ठा च कृष्णनिष्ठा च मुक्तये ॥८९॥
नारीणां कान्तभावेन सेवनं स्नेहपूरितम् ।
सर्वार्पणं चानुवृत्तिर्दासीत्वं मुक्तये हरौ ॥९०॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जपन्तु परमं मन्त्रं बालकृष्णं रटन्त्वपि ॥९१॥
पूजनं मानसं ध्यात्वा कुर्वन्तु परमात्मनः ।
स्मरन्तु तच्चरित्राणि ततो मुक्तिं व्रजन्त्वपि ॥९२॥
इत्युक्त्वा साधवः सर्वे रामायणादयो रमे ।
विरेमुः पूजिताश्चापि भोजिताः प्रययुस्ततः ॥९३॥
दीर्घरंभादयः सर्वे भेजुः साधूक्तरीतितः ।
अनादिश्रीकृष्णनारायणंश्रीवल्लभंप्रभुम् ॥९४॥
हरेकृष्ण हरेराम हरेविष्णो हरेप्रभो ।
बालकृष्ण हरे सीतापते राधापते विभो ॥९५॥
एव ते भजनं चक्रुरुष्ट्रपाला वने गृहे ।
सम्भूय सततं स्नेहभक्त्या लक्ष्मि प्रभोर्मम ॥९६॥
अथ कालान्तरे याते दीर्घरम्भादिकानहम् ।
मुक्तिं नेतुमाययौ च दिव्यरूपश्चतुर्भुजः ॥९७॥
वैकुण्ठाधिपतिः रामः सीतया सह शोभनः ।
विमानेन तु दिव्येनाऽनयं तं चेतरानपि ॥९८॥
उष्ट्रदानानि साधुभ्यो दत्तानि यानि तान्यपि ।
दिव्यरूपधरानुष्ट्रानादाय समुपाययौ ॥९९॥
सर्वभूषाधरान् रम्यान् स्वर्णवर्णान् विहंगमान् ।
किंकिणीघुर्घुरशब्दान् नीत्वाऽहं समुपाययौ ॥१००॥
ये ये भक्ता उष्ट्रपालास्तांस्तान् दिव्यान् विधाय च ।
आरोहयित्वा चोष्ट्रेषु दिव्यधामाऽनयं मम ॥१०१॥

एवं मुक्ता उष्ट्रपालाः रामायनप्रसंगतः ।
मया सर्वे कृता दिव्या लक्ष्मि भक्त्या कृपालुना ॥१०२॥
पठनाच्छ्रवणादस्य स्मरणाच्चिन्तनादपि ।
भुक्तिर्मुक्तिर्भवेच्चापि तथेष्टर्द्धिश्च सम्पदः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने रामायनाख्यसाधुयोगेन दीर्घरवादीनामुष्ट्रपालानां मोक्षणमित्यादिनिरूपणनामाचतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं रत्नप्रभेतिनामिनः ।
खरपालस्य भक्तस्य कथां मोक्षप्रदां शुभाम् ॥ १ ॥
लूणीनदीतटे लूणीनगर्यां क्षत्रियोत्तमः ।
रत्नप्रभाभिधश्चासीत् सहस्रखरपालकः ॥ २ ॥
लम्बकर्णैः करोत्येव धान्यादीनां प्रणायनम् ।
देशाद् देशान्तरं ग्रामाद् ग्रामान्तरं पुनः पुनः ॥ ३ ॥
श्रेष्ठिनां च नृपादीनां व्यापारान् गर्दभैः स तु ।
करोत्यानयनं चापि नयनं श्रममूल्यतः ॥ ४ ॥
एवं धान्यानि बहूनि पात्राणि समिधस्तथा ।
अरण्यात् क्षेत्रखलतो नगरान्नगरान्तरात् ॥ ५ ॥
ग्रामान्तरं ग्राममध्यं प्रापयत्येव गर्दभैः ।
श्रममूल्यं गृहीत्वैव गृहयात्रां दधाति वै ॥ ६ ॥
अथैकदा स गोधूमान् सहस्रद्वयकोथलीः ।
खरपृष्ठेषु नीत्वैव लूणीग्रामाद् विनिर्ययौ ॥ ७ ॥
चत्वारिंशत्खरपालैर्भृत्यैर्युतश्च निर्भयः ।
युद्धपुरीं राजधानीं ययौ सूर्यातपे दिने ॥ ८ ॥
मार्गे तु गच्छतस्तस्य श्रमोऽभवत्तदातपे ।
गर्दभानां श्रमोऽप्येवं विदित्वा श्रान्तिमालभत् ॥ ९ ॥
तरुषण्डे जलनालीपार्श्वे घटीद्वयं हि सः ।
तत्र वै वसति साधुमण्डलं वन्यनिर्भरम् ॥१०॥
रत्नप्रभस्तथा चान्ये पाययित्वा जलं खरान् ।
रोटकाद्यशनं कृत्वा साधूनामग्रतो ययुः ॥११॥
नत्वा जयश्रीरामेति समुच्चार्य पुरः स्थिताः ।
साधवः स्वागतं चक्रुराशीर्वादान् ददुस्तदा ॥१२॥
गमनागमने ज्ञात्वा ज्ञात्वा व्यापारजं श्रमम् ।
हितार्थं दयया प्राहुर्नारायणाश्रयं शुभम् ॥१३॥
साधुवर्यो नरसिंहस्वामीति साधुसेवितः ।
उपादिदेश सर्वेभ्यो घटिकामात्रमच्युतम् ॥१४॥
अहो सर्वं कृतं लोके न कृतं कृष्णसेवनम् ।
तर्हि सर्वं निष्फलं वै गर्भस्येव हि देहिनः ॥१५॥
यथा चन्दनभाराढ्यः खरो भारं प्रवेत्ति वै ।
सुगन्धं नैव वेत्तीति तदानन्दविवर्जितः ॥१६॥
तथा श्रमपरो लोके कृष्णभक्तिविवर्जितः ।
भारवेत्ता न तु चात्मरसवेत्ता निगद्यते ॥१७॥
द्वयोः श्रमवहत्वेन खरमानवयोर्नहि ।
विशेषो दृश्यते तत्र मानवः खरवद्धि सः ॥१८॥
कुलालस्य वशं यान्ति रासभाः पशवो यथा ।
स्वकर्मणां वशं यान्ति कुलालाः पशवोऽपरे ॥१९॥
भक्तिहीना धर्महीनाः पुरुषार्थविवर्जिताः ।
दानपुण्यविहीनास्तु मानवा रासभा इव ॥२०॥
तीर्थसेवाविहीनाश्च स्नानपूजाविवर्जिताः ।
साधुसेवादिरहिता मानवा रासभा इव ॥२१॥
आत्मकल्याणहीनाश्च संसक्ता रासनादिषु ।
शिश्नोदरतृपा लोके मानवा रासभा इव ॥२२॥
कुटुम्बभारवोढारः श्रेयोमार्गविहीनकाः ।
विषयघासग्रासाश्च मानवा रासभा इव ॥२३॥
मर्यादाशून्यवर्त्मानः पितृसेवाविवर्जिताः ।
सर्वात्मबुद्धिहीनाश्च मानवा रासभा इव ॥२४॥
आहारमात्रयत्नाश्च तपोव्रतविवर्जिताः ।
भस्मावगुण्ठा निर्वस्त्रा मानवा रासभा इव ॥२५॥
उपासनालेशशून्याः पञ्चदेवेषु नास्तिकाः ।
गुरौ पूज्यत्वरहिता मानवा रासभा इव ॥२६॥
गृहिणोऽपि श्राद्धहीना यज्ञनैवेद्यवर्जिताः ।
व्यवायपरमा लुब्धा मानवा रासभा इव ॥२७॥
चतुष्पदा बालपुच्छा भोगस्थानाभिवृत्तयः ।
देवस्मरणहीनाश्च गृहिणो रासभा इव ॥२८॥
अश्लीलश्रवणे लम्बकर्णाः क्लेशे विराविणः ।
धावमाना विषयार्थे गृहिणो रासभा इव ॥२९॥
अशान्ता विषयैर्वातैश्चरन्तो मायिकच्चरान् ।
क्षपयन्ति वृथाऽऽयुष्यं गृहिणो रासभा इव ॥३०॥
साधुतीर्थे स्नानवन्तो ह्यपि शास्त्रजलप्लुताः ।
अमाहात्म्यविदश्चाज्ञा लुठन्ति पापभस्मसु ॥३१॥
सत्सु सत्सु पुत्रेषु गर्दभी भारवाहिनी ।
सत्सु सत्सु तारकेषु गृहिण्यो भारवाहिकाः ॥३२॥
सत्सु सत्सु पुत्रेष्वप्यस्य भारो न हीयते ।
सत्सु गृहिषु पुत्रेषु पितुर्भारो न हीयते ॥३३॥

उष्ट्रस्य जरठस्यापि शतक्रोशप्रधावनम् ।
वृद्धस्य मानवस्यापि शताऽऽक्रोशप्रधावनम् ॥३४॥
चरति रासभो ग्रामे चरति मानवो गृहे ।
चरति न हरौ क्वापि को भेदो गर्दभे नरे ॥३५॥
लम्बगलः सदोष्ट्रोऽस्ति खाद्ये लम्बगलो नरः ।
साम्याहारे नरे चोष्ट्रे को भेदो भक्तिवर्जिते ॥३६॥
ताडनं लकुटैर्नित्यमेकस्याऽन्यस्य वाचिकैः ।
अचिन्तकौ दुःखहानेः को भेदो मानवे खरे ॥३७॥
खरे खश्चेन्द्रियार्थश्च तानि रातीति वै खरः ।
नरे नो नारायणार्थस्तं रातीति नरः स्मृतः ॥३८॥
नारायणं नरस्त्यक्त्वा नरकं चेत् समृच्छति ।
खरे नरे च को भेदो नखशफादिदेहजः ॥३९॥
गतिश्चानर्गला यस्य खरस्य च नरस्य च ।
अमर्यादा कर्मणां च को भेदो वै खरे नरे ॥४०॥
स्नाति चेन्न नरः खरो नैव स्नाति कदाचन ।
गृणाति न हरेर्नाम नरः खरः स एव सः ॥४१॥
तस्मात् प्रातः समुत्थाय स्नात्वा रटेन्नरायणम् ।
पूजयेत्परमात्मानं भोजयेच्छ्रीपतिं प्रभुम् ॥४२॥
ततो भुञ्जीत पुण्यं तत्प्रसादं च जलं पिबेत् ।
सेवेत साधुपुरुषान् भजेत श्रीहरिं सदा ॥४३॥
अभ्यासं विदधीतापि नामसंकीर्तनस्य वै ।
स्वप्ने जाग्रति सुप्तौ च कृष्णमूर्तिं विभावयेत् ॥४४॥
इन्द्रियाणां बहिर्वृत्तिमत्त्वे जाग्रत् प्रकीर्तितम् ।
तदा बाह्ये हरेर्मूर्तिर्द्रष्टव्या साधवोऽपि च ॥४५॥
बाह्यैः सर्वप्रयत्नैश्च सेवनीया हि साधवः ।
विवेकेन सेवनीयाः सत्त्वप्रधानजाग्रति ॥४६॥
भ्रान्त्याऽपि ते सेवनीया रजःप्रधानजाग्रति ।
शोकश्रमादिना सेव्यास्तमःप्रधानजाग्रति ॥४७॥
इन्द्रियाणां वृत्तयस्तु हृदयं कण्ठमाश्रिताः ।
गोलकाऽनागताः सैषा स्वप्नावस्था हि निद्रिता ॥४८॥
विवेकेन तदा स्वप्ने सेवनीया हि साधवः ।
तदा हरिः सेवनीयः स्वप्ने सत्त्वप्रधानके ॥४९॥
भ्रान्त्या बुद्ध्या सेवनीयाः स्वप्ने रजःप्रधानके ।
शोकश्रमादिना सेव्याः स्वप्ने तमःप्रधानके ॥५०॥
वृत्तीनां हृदये मनाग् वासश्चार्धसुषुप्तिका ।
क्षणं समानसेवा वै कर्तव्याः सत्त्वसुप्तिके ॥५१॥
क्षणं विश्रान्तसेवा तु कार्या राजससुप्तिके ।
क्षणं लयार्पणसेवा कार्या तामससुप्तिके ॥५२॥
अर्धाल्लयोऽपि कृष्णे तत्सत्सु भ्रमणमित्यपि ।
मनाग् भानं हरौ सत्सु नान्यत्र मायिके तदा ॥५३॥
तत आत्मनि परमे सर्वलयः सुषुप्तिका ।
आत्मनः श्रीहरौ चैक्यं तुर्यपदं सुषुप्तिका ॥५४॥
तद्भोगस्तद्रतिस्तस्मिन् चेतनार्पणमित्यपि ।
आनन्दार्पणमेवापि जीवनार्पणमित्यपि ॥५५॥
प्राणार्पणं तथा सर्वसंस्कारार्पणमित्यपि ।
सर्वभोगार्पणं पूर्णसुषुप्तिः सा हरौ सदा ॥५६॥
कर्तव्या भगवद्भक्तैर्यत्र ब्रह्मसुखं महत् ।
अहन्ताममतानाशः कर्तृतावेत्तृतालयः ॥५७॥
हरौ नारायणे विष्णौ वासुदेवे निजात्मनः ।
तदा हरिः परब्रह्माऽन्तर्यामी कर्मदर्शकः ॥५८॥
द्रष्टा भवति चात्मस्थस्तुर्यपदं परं हि तत् ।
तत्रापि भगवान् सेव्यः समाधाविव तुर्यके ॥५९॥
सन्तस्तथा सेवनीया मूर्तौ लीना हि तुर्यके ।
धामदृष्ट्या धामशक्त्या धामेन्द्रियैश्च तेजसा ॥६०॥
धामक्रियाभिर्भगवान् सेवनीयो निजात्मना ।
ब्रह्मात्मना परब्रह्म सेवनीयः परे पदे ॥६१॥
दिव्यया चैकरसया तन्वा ब्राह्मया नरायणः ।
सेवनीयस्तदा तुर्यपदे निजात्मना प्रियः ॥६२॥
एषा मोक्षस्थितिश्चात्र धाम्नो मोक्षेण मिश्रिता ।
आनन्दनीया सा कृष्णेऽनादिश्रीकृष्णवल्लभे ॥६३॥
सर्वावस्था अर्पणीया नारायणे परेश्वरे ।
बाल्यं च यौवनं वार्धक्यं च देयं परात्मनि ॥६४॥
नारीत्वं च नरत्वं च देयं वै परमात्मनि ।
कन्यात्वं च कुमारत्वं दम्पतीत्वं वनित्वकम् ॥६५॥
यतित्वं मरणं चापि समर्पणीयं माधवे ।
विमर्शश्च तथा बिन्दुर्नादो ध्वनिः पदानि च ॥६६॥
परा ह्यपरा पश्यन्ती मध्या वैखरिकेति च ।
अर्पणीया हरौ सर्वा ब्रह्मजा ब्रह्ममूर्तयः ॥६७॥
परा वाणी समस्ता या ब्रह्मवर्णनरूपिणी ।
कृष्णस्य च सतां वार्ताकीर्तनगायनात्मिका ॥६८॥
हरेर्लीला चरित्राणां वर्णनं भक्तिवर्णनम् ।
वर्णनं चाऽवताराणां प्रशंसा तत्सतामपि ॥६९॥
भक्तानां वर्णनं चापि परा वाणी निगद्यते ।
मोक्षदा दिव्यशब्दा या सर्वा परा प्रकीर्तिता ॥७०॥
अर्पणीया हरौ सापि हरेः प्रीतिकरी सुखा ।
अथान्या लोकविषया व्यवहारनियोजिका ॥७१॥

यथार्था सत्यरूपा च ऋतफलाऽपि पुण्यदा ।
पश्यन्ती सा सदा वाणी चार्पणीया हरौ सदा ॥७२॥
ईश्वराणां च देवानामृषीणां सा सदा मता ।
सत्त्वप्रकाशसुखदा चार्पणीया परेश्वरे ॥७३॥
अथाऽन्याऽर्थपरा याऽपि निन्दाप्रशंसनात्मिका ।
लोकस्वार्थसाधना च भ्रान्तिविपर्ययांऽशजा ॥७४॥
मध्या सा भारती पुण्यापुण्यफलाऽफलप्रदा ।
अर्पणीया हरौ कृष्णे सर्वथा भक्तिशालिना ॥७५॥
अथेतराऽर्थशून्या वा दुष्टार्थोद्वेगकारिणी ।
निकृष्टा प्राकृती वाणी वितण्डा निष्फलेभया ॥७६॥
श्रोतुर्वक्तुः फलशून्या भंगमात्रपरायणा ।
क्लेशमात्रान्विता सा तु वैखरी चाधमा सदा ॥७७॥
सापि कृष्णे चार्पणीया देशकालोदिता यदि ।
अथाऽन्या निश्चितैकार्था बह्वर्था चापरा अपि ॥७८॥
अस्पष्टार्था च स्पष्टार्था चतुर्धापि सरस्वती ।
अर्पणीया सदा कृष्णे ततो दिव्या हि मुक्तिदा ॥७९॥
पदवाक्यप्रमाणानि देयानि परमात्मनि ।
न्यायसिद्धिस्वरूपाणि देयानि परमात्मनि ॥८०॥
भूतभौतिकतत्त्वानि देयानि परमात्मनि ।
ध्येयध्यानध्यातृवर्गा देयास्ते परमात्मनि ॥८१॥
भोग्यभोगभोक्तृवर्गा देयास्ते परमात्मनि ।
भगं भक्तिर्भजमानो देयाः श्रीपरमेश्वरे ॥८२॥
ऐन्द्यमिन्द्र इन्द्रियाणि चार्पणीयानि माधवे ।
नरता वा खरता वा निक्षेप्तव्या हरौ प्रभौ ॥८३॥
दिव्या सा तु तदा भूत्वा कुर्यान्नखरतां जने ।
नस्य नारायणस्यैव खं दिव्यं व्योम चाक्षरम् ॥८४॥
तत्र रतां प्रीतिमेव कुर्यान्नखरतामिति ।
एवं लक्ष्मि चोपदिष्टा रत्नप्रभादयस्तदा ॥८५॥
नरसिंहस्वामिना वै साधुना हरियोगिना ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८६॥
दत्वा मन्त्रं कृताः पूता वैष्णवा मम भक्तिगाः ।
अथ मत्वा गुरुं देवं नृसिंहस्वामिनं च ते ॥८७॥
पूजयामासुरत्यर्थं भोजयामासुरादरात् ।
आशीर्वादान् जगृहुश्च तेभ्यः कल्याणकारिणः ॥८८॥
साधून्नत्वा ययुर्ग्रामान्तरं रासभपालकाः ।
स्वीयालये ह्युक्तरीत्या हरिं भेजुर्हरे हरे ॥८९॥

भजनेन तथा भक्त्या ज्ञानेन गुरुसेवया ।
द्रुतं चाहं प्रसन्नश्चाऽभवं रासभपालिनाम् ॥९०॥
एकदा रासभं कृत्वा गरुडं रासभे स्थितः ।
मार्गे तान् यात एवाहमग्रतो मिलितः पुरः ॥९१॥
सश्मश्रुः क्षत्रियवेषो यात्रालुरिव शोभनः ।
तेभ्यो मया 'जय कृष्ण' 'जय राम' जनार्दन ॥९२॥
जय नारायण विष्णो 'जय कृष्णनारायण' ।
इत्येवं नामभिः संस्मारितः श्रीपुरुषोत्तमः ॥९३॥
नमनं च कृतं शीघ्रमवतीर्य तु रासभात् ।
तेऽपि श्रुत्वा हरेर्नाम प्रसन्ना मिमिलुर्हि माम् ॥९४॥
यथा प्रिया बान्धवा वा पुत्राश्च पितरोऽथवा ।
मां निरुद्ध्य निषाद्यापि कम्बलासनके द्रुतम् ॥९५॥
जलं फलं तथाऽन्नं च ददुर्मार्गेऽतिहर्षिताः ।
पृष्टवन्तो गृहं मे चागमनं कर्म चेत्यपि ॥९६॥
मया दिव्यं परं व्योम गृहं मे दर्शितं तदा ।
कर्म नारायणाख्यानं तीर्थार्थागमनं तथा ॥९७॥
श्रुत्वा चातिप्रसन्नास्ते लक्ष्मि नारायणं तु माम् ।
असेवन्त परं भक्तं ज्ञात्वा ह्यदांगमर्दनैः ॥९८॥
चक्रुस्ते दण्डवच्चापि मत्वा साधूत्तमं तु माम् ।
अथैतेभ्यो मया तूर्णं चतुर्भुजं तु दर्शनम् ॥९९॥
गरुडेन सहितं तु दत्तं तत्रैव सत्पथे ।
प्रसादं दत्तवाँस्तेभ्यो भक्षितं यत् फलादिकम् ॥१००॥
स्कन्धकम्बलवन्तस्ते हस्तयष्टिधरास्तथा ।
पादेषु चर्मोपानद्वन्तस्ते ननृतुरुत्सुकाः ॥१०१॥
मस्तके दीर्घपटका धृतकञ्चुकधोत्रकाः ।
ननृतुश्चातिहर्षेण चक्रुर्भूलोठनं मुहुः ॥१०२॥
मोक्षं देहि पदं देहि हरे रासभवाहन ।
दिव्यं धाम नः प्रदेहि कृष्ण गरुडवाहन ॥१०३॥
एवमुच्चार्य सहसा न्यधुः पादरजो मुखे ।
चक्रुर्मे दर्शनं त्वेकतानमुग्धाः समाधिवत् ॥१०४॥
तिरोऽभवं ततो लक्ष्मि ते च क्षणान्तरे प्रभाम् ।
आसाद्य वर्णयन्तो मां धन्यभाग्यानि मेनिरे ॥१०५॥
तत्र मार्गे प्रचक्रुस्ते नारायणस्य वेदिकाम् ।
नित्यं भक्तिं प्रचक्रुस्ते ह्युणीनदीतटे सदा ॥१०६॥
प्राप्ते काले गरुडेन सहस्रशोऽपि तानहम् ।
क्रमेण नीतवान् धामाऽक्षरं मोक्षपदं रमे ॥१०७॥

एवमुद्धारिता भक्ताः साधुयोगेन वै मया ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्ध्रुवा भवेत् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने भक्तस्य रासभपालस्य रत्नप्रभस्य नृसिंहस्वामिसाधुयोगेन भगवत्प्राप्तिर्मोक्षणं चेत्यादिनिरूपणनामा पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वम् आजीवनीनदीतटे ।
सौराष्ट्रे त्वभवद्वैद्यो नाम्ना गदार्दनेश्वरः ॥ १ ॥
जीरदुर्गेकृतावासश्चौषधितत्त्वमर्मवित् ।
विप्रः कुटुम्बसहितो जीरदुर्गे निजापणम् ॥ २ ॥
कृत्वा करोति रुग्णानां चिकित्सां चौषधं ततः ।
नामाऽभवद्धि विख्यातं रोगनाशकलाविदः ॥ ३ ॥
परितो ग्रामवर्गेषु देशलोकेषु चाप्यति ।
प्रजाजनाः समायान्ति तद्गृहं रोगनुत्तये ॥ ४ ॥
सोऽपि नारायणं कृष्णं स्मृत्वा ददाति चौषधम् ।
सुफलं तद्भवत्येव गुणकृद्रोगहारकम् ॥ ५ ॥
यज्ञभस्मान्वितं देवप्रसादशर्करान्वितम् ।
तुलसीपत्रचूर्णाढ्यं काष्ठौषधं च धातुजम् ॥ ६ ॥
भस्मादि च रसान् वह्निपक्वान् शरन्निवर्तकान् ।
कफनाशकरान् जीर्णज्वरघ्नानासवाँस्तथा ॥ ७ ॥
विरेचकान् गूटिकाँश्च पाचकान् वायुनाशकान् ।
शक्तिदान् धातुपुष्टिकृद्वृक्षबीजानि यानि च ॥ ८ ॥
जन्तुजान् चूर्णितान् रोगहराँस्तुषाँश्च मूलजान् ।
पत्रजान् पुष्पजाँश्चापि त्वचां चूर्णानि यान्यपि ॥ ९ ॥
ददाति रोगिणे रोगान्नाशयत्येव सर्वथा ।
विषं हरति शीघ्रं च सर्पादीनां रसोद्भवम् ॥१०॥
एवंविधस्य वैद्यस्य शालायां मानवा दश ।
कुर्वन्ति पेषणं चापि मर्दनं पाचनं तथा ॥११॥
सारनिःसारणं चूर्णनं च प्रज्वालनं सदा ।
औषधानि यथायोग्यं सम्पादयन्ति यत्नतः ॥१२॥
वर्षारंभे स्वयं गदार्दनः क्षेत्रे नदीतटे ।
याति काचादिपात्राणि नीत्वा जन्तुमये स्थले ॥१३॥
सरीसृपाँस्ताम्रकणशेन्द्रगोपान् पिपीलकान् ।
रक्तपुष्टिकरान् जन्तून् धृत्वा दधाति पात्रके ॥१४॥
सहस्रशः प्राणरौधैर्व्यसवस्ते भवन्ति हि ।
उत्तेजकानि तैलानि कर्तुं गर्तादिगोधिकाः ॥१५॥
धृत्वा काचे तु निक्षिप्य व्यसून् करोति वैद्यराट् ।
निर्दयो निजलाभार्थं परप्राणविघातकः ॥१६॥
विप्रोऽपि राक्षसधर्मा हिंसामार्गपरोऽभवत् ।
न णकाणां प्रलोभेन तृष्णया हिंसकोऽभवत् ॥१७॥
एवं गदार्दनः काले काले जन्तुविनाशकः ।
औषधार्थे कोटिजन्तुनाशकृद्धिंसकोऽभवत् ॥१८॥
जन्तवोऽपि मूर्छिता अर्दिताः शपन्ति तं द्विजम् ।
नः प्राणघ्नस्य ते प्राणान् हरिष्यन्त्यपि जन्तवः ॥१९॥
चतुरशीतिलक्षासु योनिष्वेव मुहुर्मुहुः ।
अस्मद्दुःखमासाद्य मृत्युं याहि पुनः पुनः ॥२०॥
शप्तश्चैवं बहुशापैस्तीव्रवेगैः स वैद्यकः ।
कर्मविपाककालेन ज्वराविष्टोऽभवच्छनैः ॥२१॥
ज्वरनाशाय सहसाऽयुजत् स गूटिकादिकम् ।
ज्वरः शान्तिं न चायाति प्रत्युत संप्रवर्धते ॥२२॥
प्रारब्धागतविघ्नं हि कोऽप्युपायैर्न नश्यति ।
शापागतं महादुःखं त्वन्योपायैर्न लीयते ॥२३॥
वैद्यस्य यमराजस्य देवस्य च नृपस्य च ।
ईश्वरस्य समर्थस्य मानवस्य तु का कथा ॥२४॥
लीयते शापदस्यैव प्रसादेन न चान्यथा ।
अत्र ते जन्तवो नष्टाः प्रसादः कुत आलभेत् ॥२५॥
जीर्णज्वरो हि वैद्यस्य बलवत्त्वमुपागमत् ।
नित्यं गदार्दनरक्तं शोषयत्येव भूतवत् ॥२६॥
अथाऽयं तन्निरासार्थं क्वाथान् पिबति नित्यशः ।
अप्रारब्धहताः क्वाथा विपरीता भवन्ति यत् ॥२७॥
रक्तनाशकराश्चाप्युष्णताविवर्धकास्तथा ।
नाडीषु मांसपिण्डेषु सूक्ष्मछिद्रकरा अपि ॥२८॥
व्यवर्तन्त समस्तास्ते क्वाथाः क्षतकरास्ततः ।
मूत्रे मले ष्ठीवनेऽस्य रक्तभागः स्रवत्यपि ॥२९॥
निर्वृत्तात्युपचारोऽपि वैद्यो रुग्णतरोऽभवत् ।
न बुद्धिर्न बलं द्रव्यं नोपचारा विभाग्यके ॥३०॥
महापापे प्रभवन्ति योजिताः कुशलैरपि ।
लक्ष्मि प्रसिद्धवैद्यस्य कृतश्रमस्य शान्तये ॥३१॥
अन्ये वैद्याश्चाययुश्च चिकित्सार्थं विदूरतः ।
कृत्वा मूलचिकित्सां ते प्रयोजयन्ति चौषधम् ॥३२॥
तथाऽप्यघहतस्याऽस्य लेशलाभो न दृश्यते ।
आशाहताश्च ते भूत्वा प्रयान्ति निजमन्दिरम् ॥३३॥
रक्तस्रावा हि वैद्यस्य न शान्तिं प्रगताः खलु ।
तत्रौषधैः कृतैर्लक्ष्मि प्रत्युताधिकतां गताः ॥३४॥

वर्षे त्वेवं गतं तस्य याम्यसदृशदुःखिनः ।
ततो मात्रा तु भस्मोत्था भक्षिता भिषजा स्वयम् ॥३५॥
साऽपि विकृतिमासाद्य विस्फोटान् परितो व्यधात् ।
पाचपूर्णं च दुर्गन्धं स्फुटितं वर्ष्म चाऽमितः ॥३६॥
पाचस्रावि क्लेदितं च नारकं कुण्डवद्ध्यभूत् ।
न पार्श्वे केऽपि गच्छन्ति वैद्यो रोदिति शूलितः ॥३७॥
उत्पन्नकीटजन्तुकृद्दंशैरर्दित इत्यधी ।
आक्रुश्यत्यतिदुःखेन जन्तुखादितमांसकः ॥३८॥
एतादृशमहादुःखं प्राप्तवान् वैद्यराड् रमे ।
दुःखी मां भजते नित्यं दुःखनाशाय केवलम् ॥३९॥
शापदुःखविनाशेऽहं समर्थो न भवामि वै ।
शापदस्य हृदयेऽहं स्थितस्तदा समर्दितः ॥४०॥
शापदस्त्वहमेवाऽस्मि कथं चाऽशापकृत् पुनः ।
विना तं शापदं जन्तुं प्रभवामि निवृत्तये ॥४१॥
एवं विघस्य वैद्यस्य भजमानस्य मामपि ।
दुःखं निवर्तते नैव मरणं नापि जायते ॥४२॥
भोजनं प्राणधारं चाऽऽदत्तेऽस्य जाठरो लघु ।
तेन प्राणा न प्रयान्ति शापभोगप्रबन्धिनः ॥४३॥
बहुदानानि पुण्यानि कृतवान् वैद्यराडपि ।
प्राणाः स्थानं न मुञ्चन्ति याम्यपुरीसमप्रभाः ॥४४॥
ओषधानां प्रयोगैश्च मनाक् स्वास्थ्यं प्रदृश्यते ।
मासं स्वास्थ्यं दृश्यते च मांसमज्जा विवर्धते ॥४५॥
पुनश्च जन्तवस्तत्र जायन्ते च सहस्रशः ।
कीटा दशन्ति बहुधा याम्यकुण्डो यथा त्विह ॥४६॥
एवं मुहुः शापवशादस्य वैद्यस्य वर्तते ।
दशवर्षाणि चैवं वै व्यतीतान्यस्य रोगिणः ॥४७॥
यावन्तो जन्तवस्तेन मारितास्तावदेव तत् ।
दुःखं साक्षादत्र जातं याम्यं तथापि शिष्यते ॥४८॥
मध्ये लक्ष्मि तथा तस्य पुत्राः षट् पापिसंगतः ।
अतिरिक्तातिसारैश्च शनैः क्रमान्मृतिं ययुः ॥४९॥
विध्वस्ता विधवा जाताः षडेवाऽपत्यवर्जिताः ।
गदार्दनस्य पुत्र्यश्च सप्त ताः संगदोषतः ॥५०॥
सर्वा अपि तु विधवा जाताः पितृप्रपापतः ।
आसनाच्छयनाद्ग्रासाद् भोजनात् सहकर्मणः ॥५१॥
उत्पादाद् दायभागाच्च पापं संक्रमते जने ।
जन्तूनां मारणे तेषां कुटुम्बिनां यथा भयम् ॥५२॥
दुःखं चाऽभूत्तथा शापादस्य कुटुम्बिनां तथा ।
सर्वमत्रैव सञ्जातं दुःखं तीव्रप्रवेगिनः ॥५३॥

एवं निर्वंशतां प्राप्ता पत्नी त्वेकाऽवशिष्यते ।
सापि चिन्तापरा भ्रातॄन् निजानाहूय सर्वथा ॥५४॥
द्रव्यं सर्वं ददौ तेभ्यो गृहं शून्यमिवाऽभवत् ।
पत्नी भ्रातर एवापि द्रव्यपाशेन पाशिताः ॥५५॥
रुग्णाः सर्वेऽभवँस्तूर्णं मृतास्ते द्रव्यभोगिनः ।
निर्वंशास्तेऽपि जाता वै पापद्रव्यप्रसंगतः ॥५६॥
वैद्यस्याऽन्नं न भोक्तव्यं प्रायश्चित्ती यतो भवेत् ।
लक्ष्मि शतघ्नो वैद्यो वै तदन्नं पापदं मतम् ॥५७॥
पश्य वैद्या निर्दया वै यमदूतसमाः सदा ।
छेदने घातने मृत्युदाने शवादिसेवने ॥५८॥
नग्नशवाऽस्थ्यसने च नग्नशवावलोकने ।
नग्नदुर्गन्धकीटाढ्यशवानां नित्यदर्शने ॥५९॥
रोगसंस्कारकरणे पाचक्लेदादिशीलने ।
यमदूतसमा वैद्या अशुद्धाः प्राणपारगाः ॥६०॥
अनुभूतिं विना ये ते पापिनः प्राणहारकाः ।
तेषामन्नं न भोक्तव्यं विनष्टिकृत् तदन्नकम् ॥६१॥
नहि सर्वे त्विह लोके धन्वन्तरिसमाः खलु ।
तत्त्वज्ञा यदि पुण्याः स्युरहिंसकास्तु पावनाः ॥६२॥
अश्विनीपुत्रसदृशाः पूज्यास्ते तु मताः सदा ।
लोककल्याणकर्तारो हिंसामार्गविवर्जिताः ॥६३॥
यथापेक्षौषधानां तु प्रयोगिणः सुभक्तयः ।
जन्तुहिंसाविहीनाश्च काष्ठधात्वादियोगिनः ॥६४॥
दुर्लभास्ते देववैद्यास्तेषां पूजा तु पुण्यदा ।
अथ लक्ष्मि गते काले पत्नी गदार्दनस्य सा ॥६५॥
क्षयरोगेण वै व्याप्ताऽभवन्नाम्ना मुकुन्दिनी ।
वैष्णवी पतिभक्ता च श्रद्धाभावगुणान्विता ॥६६॥
सा त्वाबाल्याद्धरेर्भक्ताऽभवत् स्नात्री प्रपूजिका ।
भक्तिमती धर्मवती पातिव्रत्यपरायणा ॥६७॥
व्रतदानतपःकर्त्री नित्यं साधुप्रसेविका ।
कृष्णकथायां रक्ता च शौचसन्तोषशोभना ॥६८॥
तन्वा मनसा वाण्या च कर्मभिः साधुसेविका ।
कृष्णसेवापरा नित्यं नवधाभक्तिसंयुता ॥६९॥
हारनैवेद्यधूपादिविधात्री विष्णुपूजिका ।
आत्मनिवेदिनी महाभागवती हरिप्रिया ॥७०॥
शीलसत्यपरा साध्वीधर्मयुक्ताऽऽत्मनैष्ठिकी ।
दिव्या दिव्यगुणोपेता भगवन्नैष्ठिकी सदा ॥७१॥
ध्यानपरा च सर्वस्वार्पणपरा हरौ मयि ।
लक्ष्मि त्वेतादृशी भक्ता किन्तु संगात् सुदुःखिता ॥७२॥

पत्युरर्धं समस्तं वै भुज्यते निजयोषिता ।
सैवं दुःखपरा रुग्णा वर्तते भजते तु माम् ॥७३॥
तस्या वर्षे गते क्षीणायास्तु पतिर्मृतोऽभवत् ।
पराधीना च विधवा रुरोद कुररीव सा ॥७४॥
पत्युरसद्गतिं वीक्ष्य स्मृत्वा पुत्रीसुतादिकान् ।
मृतान् भ्रातॄंश्च वै स्मृत्वा स्वस्या असद्गतिं तथा ॥७५॥
चुक्रोशाऽऽक्रन्दनैर्धैर्यवर्जिता क्षयरोगिणी ।
श्रुत्वा चाक्रोशनं देवाः क्षणं स्तब्धास्तदाऽभवन् ॥७६॥
ऋतवश्चापि तत्त्वानि क्षणं जडानि चाऽभवन् ।
अथाऽहं सहसा लक्ष्मि चान्तरात्मा निजानुगः ॥७७॥
मुकुन्दिन्या हृदयस्थो वत्सलो दुःखितोऽभवम् ।
धैर्यं ददौ चान्तरात्मा सद्विचारेण चाप्यहम् ॥७८॥
सापि विज्ञानमासाद्य धैर्यमालम्ब्य मां हरिम् ।
अस्मरद् बहुधा लक्ष्मि नाथ नाथ कृपां कुरु ॥७९॥
भक्तायां चापि दुःखायां विधवायां कृपां कुरु ।
सर्वस्वनाशयुक्तायां शेषायां वत्सलो भव ॥८०॥
दुःखानां नास्ति मे सीमासमुद्धर भवार्णवात् ।
प्रथमं मां मारयित्वा ततः पतिं प्रमारय ॥८१॥
सधवाया गतिर्मे स्याद् विधवाया गतिर्नहि ।
एषाऽहं वह्निमुत्पाद्य सजीवा प्रज्वलामि वै ॥८२॥
सतीत्वं सर्वथा योग्यं विधवात्वं भयावहम् ।
कृपा तेऽस्ति समायाहि जीवयैनं निरोगिणम् ॥८३॥
नैवं चेन्मरणं देहि युगपत्तूभयोरपि ।
इत्युक्त्वा सा मम भक्ता क्षणं दध्यौ तु मां हृदि ॥८४॥
तावन्मया पार्षदा मे प्रेषितास्तत्पतिं प्रति ।
याम्यदूतैर्नीयमानं दुःखिनं शरणैषिणम् ॥८५॥
पार्षदैर्मे द्रुतं गत्वा वियोजितो यमार्थिभिः ।
गृहीतश्चानीत एव देहं प्रवेशितः पुनः ॥८६॥
उत्थितः सहसा देहोऽकस्माद् बन्धनवन्धितः ।
शवार्थिनोऽभवन् स्तब्धा महाश्चर्यसमन्विताः ॥८७॥
केचिज्जगदुः पापानामपूर्णे पापभोगनम् ।
पुनः पापप्रभोगायाऽऽगतो याम्यैर्न रक्षितः ॥८८॥
अपरे तु तदा प्राहुः सत्याः पत्न्यास्तु भक्तितः ।
उत्थितश्चातिभक्त्या वै नीरोगोऽयं भविष्यति ॥८९॥
अन्ये प्राहुर्वासनिको वर्ततेऽयं हि पापवान् ।
न याति परलोकं स्वां पत्नीं विहाय चैकलः ॥९०॥
इतरे तु तदा प्राहुः कर्मरेखा हि दुर्गमा ।
इत्येवं ते विरेमुश्च निर्बन्धनं व्यधुश्च तम् ॥९१॥
अथ लक्ष्मि तदा चाऽहं पत्न्या भक्तेः प्रतापतः ।
पुरो दिव्यमभवँश्च मूर्तिमान् पार्षदैः सह ॥९२॥
चतुर्भुजो दिव्यदेहः कृष्णनारायणः प्रभुः ।
अवदं च मुकुन्दिन्यै वरं वृणु मदग्रतः ॥९३॥
साऽपि चोत्थाय सहसा पतिता पादयोर्मम ।
गदार्दनोऽपि मां वीक्ष्य नीरोग इव निद्रितः ॥९४॥
उत्थाय न्यपतच्छीघ्रं पादयोर्मम भूतले ।
वरदानाय च मया नियुक्तावूचतुश्च तौ ॥९५॥
मोक्षं देहि कृपासिन्धो परमेश रमापते ।
सर्वं कालेन नीतं नौ ह्यावां निर्वासनौ कृतौ ॥९६॥
वैद्यवैद्यो महाकालस्तद्वैद्यः परमेश्वरः ।
याम्यदूतौ द्रावितौ त्वत्पार्षदैरिह सर्वथा ॥९७॥
मोक्षं देहि यथेष्टं वा नियोजय परेश्वर ।
एवं प्रार्थ्यमानाभ्यां तथेत्युक्त्वा विमानके ॥९८॥
अध्यारोप्य दिवं श्रेष्ठं प्रेषयामास पार्षदैः ।
सतीभक्तिप्रतापेन सती मुकुन्दिनी तदा ॥९९॥
दिवं त्यक्त्वा सतीलोकं पत्या सह ययौ द्रुतम् ।
पार्षदा मे तु तां स्वामिसहितां वै मुकुन्दिनीम् ॥१००॥
अवस्थाप्य सतीलोकं प्रययुर्मम धाम ह ।
एवं कालान्तरे प्राप्ते तौ यास्यतः परं पदम् ॥१०१॥
लक्ष्मि भक्ताप्रतापेन वैद्यो याम्यं विहाय च ।
सतीलोकं ययौ यस्य पापपुञ्जोऽभवन्महान् ॥१०२॥
तथापि स्त्रीप्रतापेन कृपया मे लयं गतः ।
अर्धांगनाकृतं पुण्यमर्धं तु लभते पतिः ॥१०३॥
व्रतदानादिकं भक्तिः सर्वमर्धं प्रपद्यते ।
एवं सम्बन्धिनः पुत्राः स्त्रियो मित्राणि चापरे ॥१०४॥
कुर्वन्ति प्रेतनाम्नाऽपि पुण्यं प्रेते प्रपद्यते ।
तस्माच्छ्राद्धं मखं दानं कुर्वन्ति पृष्ठतो जनाः ॥१०५॥
भक्तितुल्यं मोक्षदं वै साधनं नेतरद् रमे ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिश्च वै भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने गदार्दनेश्वरनामकवैद्यस्य पापैर्दुःखानि तत्पत्न्या मुकुन्दिन्या भक्त्या च मोक्षणमित्यादिनिरूपणनामा षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथां भक्तस्य शोभनाम् ।
कीशानकुलपालस्य नाम्ना देश्यावनस्य वै ॥ १ ॥

देश्यावनोऽभवद् योगी चन्द्रावनस्य चात्मजः ।
गोमण्डल्याश्चापगायास्तटे गौवादिखेटगः ॥ २ ॥
पित्रा पुत्रः शिक्षितो वै कीशनकुलपालने ।
कीशयोर्नर्तने चापि नकुलयोस्तु योधने ॥ ३ ॥
वानरो भवति राजा वानरो घर्घरीयुता ।
शाटीधरा च लज्जायां वर्तते कीशसन्निधौ ॥ ४ ॥
राज्ञीव वर्तते चापि नृत्यस्यैव प्रशिक्षिता ।
नृत्यक्षतौ वानरस्तां ताडयत्येव रोषतः ॥ ५ ॥
वानरोऽपि ततः खातवंशयोर्मध्यरज्जुगः ।
नटवत् संप्रयात्येव स्थाल्या छत्रधरो नटः ॥ ६ ॥
वानरी डमरूवाद्यं वादयत्येव रंगगा ।
जनान् प्रदर्शयत्येषा यष्ट्या हस्तेन वानरम् ॥ ७ ॥
जना दृष्ट्वा मग्नचित्ता अर्पयन्ति धनाऽन्नकम् ।
अथाऽपि वानरश्चाऽधोऽवतीर्य शकटीं नवाम् ॥ ८ ॥
आयुक्त्वा तु शृगालौ द्वौ तत्राऽऽरोप्य तु वानरीम् ।
स्वयंभूत्वा सूतकर्मा चालयत्येव राजवत् ॥ ९ ॥
नकुलौ वानरीपार्श्वे पार्षदाविव तिष्ठतः ।
चामरे शोभिते धृत्वा वीक्षन्ते कौतुकं जनाः ॥१०॥
शृगालौ वहमानौ तौ कीशो यष्ट्या प्रताडनम् ।
यावत् करोति जम्बुकौ क्रुद्धौ प्रतिमुखौ धुरि ।११।
भूत्वा निर्गत्य धुरतश्चोत्प्लुत्याऽऽक्रुश्य रोषतः ।
वानरेण समं सम्यग् युध्यतः संप्रपश्यताम् ॥१२॥
जनानां तत्र कीशेन युद्ध्यत्येकस्तु जम्बुकः ।
द्वितीयो वानरीकर्णे धृत्वा नीत्वाऽलिगोऽभवत् ॥१३॥
देश्यावनस्तदा त्यक्त्वा रंगं दुद्राव वानरीम् ।
आनेतुं च शृंगालं तु तावत् कीशोऽपि धावति ॥१४॥
आनेतुं वानरीं तावज्जम्बुकोऽप्यनुधावति ।
नकुलौ पृष्ठतस्तत्र वंशयोरधिरोहतः ॥१५॥
प्रपश्यतो हि वानर्या हरणं क्रोष्टृणा कृतम् ।
युद्धं तत्र पुनस्तावद् देश्यावनकृतावनम् ॥१६॥
पुना रंगानयनं च शृंगालस्य क्षमार्थनम् ।
भिक्षां जनेभ्यः पुरिकानाम्नी तत्स्त्री प्रयाचते ॥१७॥
एवं देश्यावनो नित्यं नगरे खर्वटे पुरे ।
गत्वा गत्वा हास्यनाट्यं कारयत्येव पाशवम् ॥१८॥
तदुत्पन्नाऽन्नवस्त्राद्यैर्धनैः पिष्टादिभिः सदा ।
निर्वहत्येव सततं पत्न्या साकं प्रतिष्ठति ॥१९॥
पशूनां पोषणं चापि करोति दयया युतः ।
नैसर्गिको भक्तधर्मा देश्यावनः प्रगेऽन्वहम् ॥२०॥
स्नाति कृष्णं चित्रछविं नमति च प्रपश्यति ।
जलं फलं च धरति भोजनं पुरिकाकृतम् ॥२१॥
निवेद्य विष्णवे दत्वा पशुभ्यो निजयोषिते ।
ततो भुंक्ते नान्यथैव नारायणं तु मां स्मरन् ॥२२॥
लक्ष्मि सर्वत्र भक्ता मे संस्कृताश्चाप्यसंस्कृताः ।
येऽपि केऽपि भजन्ते मां यथा तथापि चेश्वरम् ॥२३॥
तेषां मनःप्रपूर्त्यर्थं प्रयते भक्तिकर्षितः ।
पुरिकाऽपि तु शूद्राणी स्नात्वा मां सेवतेऽन्वहम् ॥२४॥
शकट्यां मम मूर्तिं च रक्षत्येव छविं शुभाम् ।
नान्यधर्मं प्रजानाति जानाति शरणागतिम् ॥२५॥
छविस्थो भगवान् कृष्ण उद्धारं नः करिष्यति ।
तदर्पणं विना नैव भोक्तव्यं जलमित्यपि ॥२६॥
हरेर्भक्तिं विना वन्ध्यो नेतव्यो दिवसो न वै ।
अन्तरात्मा हरिश्चास्ते कीशे नकुले क्रोष्टरि ॥२७॥
नार्यां नरे च सर्वत्र वृक्षे जडे च चेतने ।
एवं तौ बुध्यतो लक्ष्मि कीशनकुलपालकौ ॥२८॥
अतस्तौ पावनौ स्निग्धौ भक्तौ मे मम सम्मतौ ।
दिने खेलं विरचय्योत्पाद्योपार्जनभोजने ॥२९॥
यथालब्धे सुसन्तुष्टौ रात्रौ कुरुतः कीर्तनम् ।
डमरूवाद्यसहितं कृष्ण राम रमापते ॥३०॥
एवं नित्यं हि कुरुतो भजनं वै निशामुखे ।
पूर्णिमायां तु मिष्टान्नं निवेदयतो मत्पुरः ॥३१॥
पशुभ्यः सम्प्रदायैव ततस्तौ मत्प्रसादजम् ।
भुञ्जाते प्रतिमासं तौ व्रतं त्वेतन्निरन्तरम् ॥३२॥
तुलसीमिश्रितं वारि पिबतस्तौ सदा रमे ।
नहि भक्तौ कारणं वै वनं स्थलं गृहं धनम् ॥३३॥
स्नेहस्तु कारणं तत्र हृदयं भक्तिकारणम् ।
श्रद्धा च कारणं तत्र पुण्यं च कारणं महत् ॥३४॥
एवं गोमण्डलीतीरे वसतोश्चोभयोरपि ।
एकदा साधुसंघो वै यात्रार्थी पार्श्वतोऽगमत् ॥३५॥
तावुभौ सहसा गत्वा नेमतुः साधुपादयोः ।
विश्रान्त्यर्थं घटिकां चार्थयामासतुरीश्वरान् ॥३६॥
साधवोऽपि नदीतीरं वृक्षछायां विलोक्य तु ।
क्षणं विश्रान्तिमापुस्ते पपुर्जलं तु शीतलम् ॥३७॥
पूर्णिमाऽऽसीद् भाग्ययोगान्मिष्टमासीत् कृतं तदा ।
संयावं श्रीहरये वै निवेदितं समस्तकम् ॥३८॥
साधुभ्यो ददतुर्भक्त्या भुक्तवन्तश्च साधवः ।
मम स्मृतियुता लक्ष्मि संयावो वृद्धिमाप्तवान् ॥३९॥

मयाऽन्तर्यामिणा ज्ञात्वा संयावो वर्धितो ह्यति ।
विंशतिः साधवः सर्वे तृप्तास्तावान् स चाऽभवत् ॥४०॥
संयावः पूर्यमानो वै न्यूनतां नाऽव्रजन्मनाक् ।
साधवोऽपि विविदुर्वै भक्तेः प्रतापमेव तम् ॥४१॥
तन्मध्ये मण्डलीशो यः साधुर्नाम्ना सुधाऽमरः ।
उपादिदेश वाक्यानि मत्वा भक्तं तु पात्रकम् ॥४२॥
शृणु भक्त ! सदा सेव्यो हरिश्च तस्य साधवः ।
नारायणः सत्सु चास्ते कामसंकल्पपूरकः ॥४३॥
न जातिर्न धनं राज्यं कृष्णप्रसादसाधनम् ।
स्नेहभक्तिः साधुसेवा कृष्णप्रसादसाधनम् ॥४४॥
साधवो भगवन्निष्ठा तथा श्रीभगवान् स्वयम् ।
क्षेत्रं वै नैमिषारण्यं कुण्ठितं यत्र मानसम् ॥४५॥
इन्द्रियाणि कुण्ठितानि निवृत्तानि स्थिराणि च ।
विषयेभ्यः परावृत्य जायन्ते शान्तिदानि च ॥४६॥
तत्र क्षेत्रे साधुरूपे तथा नारायणात्मके ।
सत्संगसलिले स्नात्वा पुण्ययज्ञान् समाचरेत् ॥४७॥
आशु सिद्धिर्भवेत्तत्र मोक्षधर्मस्य चोत्तमाम् ।
ध्यान सिद्धिस्तथा शीघ्रं मुमुक्षूणां प्रजायते ॥४८॥
वानरा इन्द्रियाण्येव त्वहंमनसी जम्बुकौ ।
पूर्वकर्माणि नकुलास्तान् वशान् सन्नयेत् सदा ॥४९॥
धर्मे ज्ञाने च वैराग्ये भक्तौ साधुप्रसेवने ।
हरेर्मूर्तौ च तिष्ठेयुस्तथा वशान् विधापयेत् ॥५०॥
परोत्कर्षाऽसहिष्ण्वाख्यामिर्ष्यां त्यजेत् सदा सुधीः ।
मानं त्याज्यं प्रयत्नेन सुधिया सर्वरोधकम् ॥५१॥
सत्त्वेन भाव्यं सततं धर्मे रुचिर्यतो भवेत् ।
सत्त्वं प्रोक्तं कृतयुगं यत्र ध्यानं भवेद्धरेः ॥५२॥
रजोवेगान् रोधयेद्वै काम्यकर्मप्रपेरकान् ।
रजस्त्रेतायुगो बोध्यः सेवा कार्याऽत्र दैहिकी ॥५३॥
रजस्तमोभ्यां युक्तात्मा द्वापरात्मा प्रकथ्यते ।
तत्र लोजाऽर्जनतृष्णां त्यजेत् सेवां चरेद्धरेः ॥५४॥
तमोमयः कलिर्बोध्यो यत्र मायाऽनृतादिकम् ।
तत्र समागमः कार्यः सतां च भजनं मुहुः ॥५५॥
उच्चैः संकीर्तनं विष्णोः कलेर्वेगो निवर्तते ।
पूर्वकर्मानुसारेण प्रवर्तन्ते युगा हृदि ॥५६॥
अतो ध्यानं चात्मनिष्ठा माहात्म्यबुद्धिरुत्तमा ।
साधनीया विशेषेण युगधर्मादिरोधिनी ॥५७॥
श्रीकृष्णं भजतो भीतिर्नास्त्येव कालकर्मजा ।
कृतार्थोऽस्मीति मत्वैव सेवेत साधुसत्तमान् ॥५८॥
भक्तिं कुर्यान्नवधाऽपि सर्वस्वार्पणभावनाम् ।
कृष्णसाध्वाश्रयेणैव कलिर्नश्यति वै हृदः ॥५९॥
यत्र कृष्णनिवासोऽस्ति तत्र कलिर्न विद्यते ।
यत्र सन्तः स्थिताः सन्ति तत्र माया न विद्यते ॥६०॥
महाभागवतो धर्मो महावैष्णवतात्मकः ।
सर्वनिवेदनात्मा स पालनीयः सदा शुभः ॥६१॥
चौर्यं पिशुनता दम्भः कर्तव्या नैव सर्वथा ।
सतां समागमः कार्यो विश्वासोऽपि सदा सताम् ॥६२॥
मर्यादा च सतां पाल्या यथा कृष्णस्य सा तथा ।
सेवा सतां सदा कार्या यथा कृष्णस्य सा तथा ॥६३॥
येषु हिंसा मदश्चौर्यमनृतं कपटं तथा ।
नास्तिकत्वं च माया च ते न विश्वासभूमयः ॥६४॥
ते तु रुचिं न कुर्वन्ति सत्संगे सत्सु वा हरौ ।
द्रुह्यन्त्येव ते सततं कलिप्रियास्तु पापिनः ॥६५॥
अतो मुमुक्षुणा सेव्याः सन्तो नैव तु नास्तिकाः ।
सतां योगेन सर्वेशं भजित्वा मुक्तिमर्जयेत् ॥६६॥
सत्संगे श्रद्धयाऽनन्यभावेन भजते तु यः ।
देहान्ते स व्रजत्येव धामाक्षरं हरेः परम् ॥६७॥
गोलोकं वापि वैकुण्ठं व्रजेन्नारायणाश्रमम् ।
श्वेतद्वीपं व्रजेद्वापि श्रीपुरं चाऽमृतं व्रजेत् ॥६८॥
दिव्यदृष्टिमतां तानि चान्तिके सन्ति सर्वथा ।
बाह्यदृष्टिमतां तानि धामानि सन्ति दूरतः ॥६९॥
देहे जीवो यथा तत्र जीवे श्रीपुरुषोत्तमः ।
वर्तते तन्मयीदृष्ट्या पश्येद्धामानि चान्तिके ॥७०॥
यत्र कृष्णोऽस्ति हृदये बहिर्वा तत्र सन्ति वै ।
सर्वधामानि कृष्णस्यैश्वर्याणि निखिलान्यपि ॥७१॥
एवंविज्ञास्तु ये भक्तास्ते श्रीकृष्णसमा मताः ।
तेषां दर्शनजं पुण्यं कृष्णदर्शनसदृशम् ॥७२॥
अन्यैः सर्वैरीदृशानां समागमेन मोक्षणम् ।
प्राप्यते दुर्लभं यद्वै सुलभं सत्प्रसादतः ॥७३॥
सत्सु स्नेहेन सन्तः स्वाश्रितान् नयन्ति चाऽक्षरम् ।
वासनाः क्षपयित्वैव नयन्ति परमं पदम् ॥७४॥
स्त्रीवर्गं नरवर्गं वा सकामं वापि देहिनम् ।
सन्तो विशोध्य दिव्यं तं कृत्वा नयन्ति चाऽक्षरम् ॥७५॥
शृणु देश्यावन ! त्वं वै स्मर नाट्ये प्रभुं हरिम् ।
वंशरज्ज्वा धाम दिव्यमक्षरं स्मर सर्वथा ॥७६॥
रज्जुस्थे वानरे विष्णुं स्मर छत्रे तु छत्रकम् ।
वंशे पूर्वे तु गोलोकं द्वितीये तु विकुण्ठकम् ॥७७॥

स्मर दिव्यं रथं तं तु यत्र सा वानरी स्थिता ।
ब्रह्मरथं स्मर तत्र मायां विष्णोस्तु वानरीम् ॥७८॥
क्रोष्टारं चाप्यहंकारं द्वितीयं मानसं स्मर ।
ताभ्यां सा सजते माया तां समर्प्य विष्णवे ॥७९॥
नकुलं तु गुरुं सर्वद्रष्टारं स्मर तत्र हि ।
रज्ज्वक्षरस्थितो दिव्यो गुरुस्त्वां तारयिष्यति ॥८०॥
डमरूत्थं महानादम् ओंनारायणमाधवम् ।
विधेहि सततं सर्वजीवानां श्रवणाय वै ॥८१॥
पश्य सेवात्मिकां भक्तिं रंगरक्षाकरीं नदीम् ।
पश्य भिक्षां मोक्षयात्रां नित्यद्रव्यमयीं तथा ॥८२॥
भिक्षाप्रदान् शरणे वै समायातान् शरीरिणः ।
पश्य साधोः संगमेन पावनान् दत्तचित्तकान् ॥८३॥
साधुं सुधामरं मां त्वं पश्याऽन्तर्यामिणं हरिम् ।
ज्ञानदं मोक्षदं कृष्णनारायणं हितार्थिनम् ॥८४॥
देश्यावनं निजात्मानं पश्य कीशादिपालकम् ।
स्वामिनं च नियन्तारं रंगखेलविधायिनम् ॥८५॥
रंगभूमिं पश्य जातिं देहं गेहं समस्तकम् ।
खेलान्तं पश्य मरणं विसर्जनं तु कर्मणाम् ॥८६॥
दर्शकानां मनोरञ्जनं तु पश्य शमादिकम् ।
एवं कृत्वा तव तृप्तिं जातां पश्य तु शाश्वतीम् ॥८७॥
इत्येवं नित्यमीक्षँस्त्वं परं पदं प्रयास्यसि ।
हृदये ब्राह्मीमुपनिषदं प्राप्य भयं नहि ॥८८॥
यावद्वै वासना चाऽस्ति तावत् खेलः प्रवर्तते ।
उपनिषन्निवासेन खेलः खेलो भवेत् सदा ॥८९॥
परा शान्तिः प्रवर्तेत देश्यावन तथाऽऽचर ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९०॥
हरे कृष्ण बालकृष्ण श्रीपते पुरुषोत्तम ।
भज नित्यं परमेशं त्वेवं समाहितो भव ॥९१॥
इत्युक्त्वा कमले साधुः समण्डलः सुपूजितः ।
प्रसन्नमानसो भूत्वा दत्वाऽऽशीर्वचनं ययौ ॥९२॥
अथाऽयं देश्यवचनो विलोक्य पात्रके घृतम् ।
प्रसादात्मकसंयावं सम्पूर्णं तु यथातथम् ॥९३॥
चमत्कारं महाश्चर्यं मेने कृपां हरेरपि ।
कुटुम्बयुग् बुभुजेऽपि प्रसादं तावदेव सः ॥९४॥
दिव्यदृष्टिरभवद्वै कुटुम्बसहितः खलु ।
अग्रे पार्श्वे पृष्ठतश्च हरिस्तस्याऽभितोऽभवत् ॥९५॥
यत्र पश्यति तत्रैव विश्वात्मानं प्रपश्यति ।
ऊर्ध्वेऽधो भूतले पात्रे वस्त्रे रथे च वानरे ॥९६॥
जम्बुके नकुले नट्यां परात्मानं प्रपश्यति ।
दिव्यभावोऽभवद्भक्तः कल्पितं लभते करे ॥९७॥
नारायणस्य मे मूर्तिः सर्वतो गोचराऽभवत् ।
कृपा सा मे गुरोः साधोश्चापि लक्ष्मि शुभा हि सा ॥९८॥
यया सर्वमस्य जातं ब्रह्मदर्शनमुत्तमम् ।
अथ वार्त्तिकमाज्ञाय जनाश्चायान्ति संघशः ॥९९॥
कृत्वा तु दर्शनं तस्य भवन्ति पावना अपि ।
मन्त्रं गृह्णन्ति मे तस्माद् भक्ताद् वियन्ति वै ततः ॥१००॥
कृतकृत्याः प्रजायन्ते महाभागवतेक्षणात् ।
अथ काले समायाते त्वाविर्भूतोऽभवं पुरः ॥१०१॥
विमानेन सहितश्च पार्षदैश्च समन्वितः ।
त्वया साकं तथा लक्ष्मि दिव्यदेहानकारयम् ॥१०२॥
कीशनकुलक्रोष्टुँश्च कीशपं कीशपां तथा ।
विमाने ताँश्चाधिरोहयित्वाऽनयं ममाऽक्षरम् ॥१०३॥
एवं लक्ष्मि ददौ मुक्तिं मुक्तमण्डलमध्यगाम् ।
मम प्रसादभोक्तृभ्यः सर्वेभ्यो भक्तियोगतः ॥१०४॥
पठनाच्छ्रवणादस्य मननाद्वर्तनात्तथा ।
भुक्तिं मुक्तिं लभेच्चापि दिव्यं स्वर्गं च शाश्वतम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने देश्यावनस्य कीशपालस्य सुधाऽमरसाधोः प्रसंगेन मोक्षणमित्यादिनिरूपणनामा सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथां चान्यां वदाम्यहम् ।
हर्षधर्माभिधो भक्तो नापितः पार्वतीपुरे ॥ १ ॥
न्यवसत् सकुटुम्बो वै राजभृत्यत्वकर्मवान् ।
राजा नाम्नाऽभवत्तत्र स्वर्णचन्द्रेतिशासकः ॥ २ ॥
तस्य सेवां करोत्येषो नापितः सकुटुम्बकः ।
नापितस्याऽभवद्भार्या नाम्ना निगमिका सती ॥ ३ ॥
पातिव्रत्यपरा विष्णुभक्तिपरा सुधार्मिकी ।
व्रतदानजपसेवापरा नारायणे रता ॥ ४ ॥
साधुसेवातत्परा च दिव्यभाववती सदा ।
पुत्राः पञ्चाऽभवँस्तस्याः पञ्चपुत्र्यश्च शोभनाः ॥ ५ ॥
सर्वे ते भगवद्भक्ता वैष्णवा भक्तिशालिनः ।
रटन्ति मां हरिकृष्णं गोपिपतिं श्रियः पतिम् ॥ ६ ॥
भजन्ते सततं चापि गृहेऽर्चननिबन्धनैः ।
षोडशोपचारकैश्च नित्यं मामर्चयन्ति ते ॥ ७ ॥

मूर्तौ स्थित्वा सदा तेषां पूजां गृह्णामि प्रीतिमान् ।
नापितोऽपि सदा स्नात्वा पूजां कृत्वा च मे ततः ॥ ८ ॥
नैवेद्यं मे समर्प्यैव भुक्त्वा याति नृपालयम् ।
नृपं संसेवते सर्वात्मना भृत्यो हि नापितः ॥ ९ ॥
नापितस्य तथा पुत्राः पुत्र्यो राजकुटुम्बिनः ।
सेवन्ते च यथायोग्यं कृत्वा मत्पूजनादिकम् ॥१०॥
प्रत्यहं नापितभार्या प्रातर्निगमिका तु सा ।
प्रथमं वै समुत्थाय स्नात्वा गृहादिशोधनम् ॥११॥
कृत्वा भृत्वा जलं चोष्णं कृत्वा संस्नाप्य केशवम् ।
शालग्रामं तु मां चापि प्रपूज्य सर्ववस्तुभिः ॥१२॥
फलं चान्नं च मिष्टान्नं रोटकं दधि दुग्धकम् ।
शुभं चोष्णं विधायैव पिच्छलं मेऽर्पयत्यपि ॥१३॥
ततो निराजनं कृत्वा परिहारं करोति च ।
पतिमुत्थाप्य संस्नाप्य पतिपादोदकं तथा ॥१४॥
कृष्णपादोदकं पीत्वा पतिं सम्पूजयत्यपि ।
समर्पयति पश्चाच्च पतीष्टं यदपेक्षितम् ॥१५॥
ततोऽतिथये साधुभ्योऽनाथेभ्योऽपि प्रयच्छति ।
अन्नं जलं यथायोग्यं समर्प्य च गवेऽपि च ॥१६॥
सूर्याय च जलं दत्वा विष्णवेऽर्घ्यं समर्प्य च ।
दत्वा पिष्टं पिपीलिकाकुलाय च ततः परम् ॥१७॥
पितृभ्यश्चापि दत्वैव यत्सर्वं शुद्धिमत् पुनः ।
पतये भोजनार्थं च जलं समर्प्य वै ततः ॥१८॥
पुत्र्यादिभ्यः समर्प्यैव भोजनं च जलं फलम् ।
स्वयं भुंक्ते निगमिका प्रसादं त्ववशेषितम् ॥१९॥
कवले कवले कृष्णनारायणाय चार्पये ।
इति स्मृत्वा प्रभुंक्ते सा जलं पिबति वै तथा ॥२०॥
मध्ये श्वा नकुलः कीशः शुकश्चटका गौर्वृषः ।
मार्जारिकाऽपि चागच्छेद् दत्वा तेभ्योऽत्ति नान्यथा ॥२१॥
एवंविधा तु भक्ता सा श्रीकृष्णस्यैव दासिका ।
गृहकार्याणि सम्पाद्य प्रातरेव सुवेगिनी ॥२२॥
राज्ञ्यालयं प्रयात्येव निगमिकाऽतिधार्मिकी ।
राज्ञीं नाम्ना पञ्चदेवीं सुप्तां शयनगां शनैः ॥२३॥
सम्मर्दयति चांगेषु संवाहयति पादयोः ।
राज्ञ्याः कृते जलं चोष्णं सम्पादयति सत्वरम् ॥२४॥
दन्तधावनचूर्णं च जलगण्डूषकादिकम् ।
शौचाद्यं निर्वर्तयति संस्नापयति वारिभिः ॥२५॥
सुगन्धमर्दनं चापि देहशोधनमित्यपि ।
केशसंस्करणं चापि केशवेषादिशोभनम् ॥२६॥
शृंगारवेषभूषादिधारणं कज्जलाञ्जनम् ।
अलक्तकप्रदानं च नखोष्ठादिप्ररञ्जनम् ॥२७॥
सर्वं यथावद् दत्वैव पूजयित्वा श्रियं यथा ।
व्यजनेन महाराज्ञीं प्रसन्नयति वायुदा ॥२८॥
गृहकार्यं समस्तं च निष्पादयति शोभनम् ।
माध्याह्निकं तथा सायंतनीयं सेवनादिकम् ॥२९॥
राज्ञ्यास्ताम्बूलदानान्तं सम्पादयति नापिती ।
शय्यां कुसुमगन्धाढ्यां समास्तृणाति नित्यशः ॥३०॥
राज्ञी स्वपिति सुखिनी सम्वाहयति नापिती ।
राज्ञी निद्रां करोत्येव गाढां प्रयाति नापिती ॥३१॥
गृहे गत्वा पतिसेवां पादसम्वाहनात्मिकाम् ।
करोत्यपि च नित्यं वै ततः स्वपिति नापिती ॥३२॥
कृतभूपसुसेवश्च पतिस्त्वर्धनिशाऽत्यये ।
नित्यं गृहं समायाति सेवते नापिती ततः ॥३३॥
धन्या श्रद्धा सेवकानां तत्रापि दाससेविनाम् ।
तत्रापि योषितां लक्ष्मि पातिव्रत्याऽन्वितात्मनाम् ॥३४॥
कर्मबन्धनलोकोऽयं कर्माधीनः करोति हि ।
निष्कामभाववशगः कश्चित् करोति भक्तराट् ॥३५॥
नापिती नापितश्चोभौ जानीतः कर्मबन्धनम् ।
राजसेवा कर्मबन्ध उद्यमोऽयं धनाप्तये ॥३६॥
उपार्जनं विना देहयात्रा नैव हि सिद्ध्यति ।
अन्नं धनं च वस्त्रं च लभ्यते राजसेवया ॥३७॥
तथापि भक्तिमन्तौ तौ मृषासेवाद्यपेक्षया ।
मम सेवां हि कुरुतः शाश्वतानन्दवाञ्छया ॥३८॥
देहेन्द्रियार्थं कर्तव्यं कर्मवशेन देहिना ।
आत्मार्थं तु प्रकर्तव्यं ज्ञानेन तु मुमुक्षुणा ॥३९॥
श्रीहर्यर्थं तु कर्तव्यं सर्वार्पणेन भाविना ।
एवं मत्वा तु कुरुतः सेवनं मम तौ सदा ॥४०॥
राजगृहेऽपि कुरुतो भजनं मम तौ सदा ।
कीर्तनं कुरुतो मेऽपि गोपीगीतं पुनः पुनः ॥४१॥
रासलीलां च वदतः कथां च कुरुतो मम ।
राज्ञी राजा तु तच्छ्रुत्वा निद्रितः कृष्णमानसौ ॥४२॥
एवं भजेते चान्यांश्च भक्तिं कारयतोऽपि च ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥४३॥
जपतो जापयतश्च कृष्ण कृष्ण मुहुर्मुहुः ।
एवं भक्तिमतोर्नित्यं नियमो राजसेवने ॥४४॥
वर्तते त्वेकदा सायं नापिते निर्गते गृहात् ।
राज्ञस्तस्यैव सेवायामुपस्थिते गृहे त्वनु ॥४५॥

नापितान्यास्तु वै निर्गमस्य क्षणे हि साधवः ।
साध्व्यश्चापि दशसंख्या महीमानाः समाययुः ॥४६॥
महाभाग्येन पुण्येन महताऽऽयान्ति साधवः ।
साधूनां स्वागतार्थं वै सर्वं कर्तव्यमादरात् ॥४७॥
शतकार्याणि सन्त्यज्य साधुसेवां समाचरेत् ।
आतिथेयः परो धर्मो गृहस्थानां सदा मतः ॥४८॥
तत्रापि च सतां साध्वीनां कृते चोत्तमो वृषः ।
सर्वं विहाय सेवायां वर्तितव्यमिति ध्रुवः ॥४९॥
मोक्षार्थं मानवो देहो मोक्षार्थं साधवो भुवि ।
तेषां योगे तु सर्वस्वं चार्पणीयं द्रुतं जनैः ॥५०॥
अन्यथा मानवे देहे को लाभः सेवनं विना ।
यद्गृहेऽतिथयो यान्ति तुष्यन्ति स्वागतादिभिः ॥५१॥
तद्गृहं पावनं लक्ष्मीनिवासार्हं सदा भवेत् ।
यद्गृहेऽतिथयो भग्नमानसा वै भवन्ति चेत् ॥५२॥
असत्कृता असन्तुष्टास्तद्गृहं दग्धवत् स्मृतम् ।
पुण्यहीनं भवत्येव लक्ष्मीसम्पद्विवर्जितम् ॥५३॥
यद्गृहं साधुसन्न्यासियतियोगिकृताश्रयम् ।
तद्गृहं देववसतिर्दिव्यं तीर्थोत्तमं सदा ॥५४॥
यद्गृहे साधवो नैव नैवातिथिप्रसेवनम् ।
श्मशानं तद्गृहं प्रोक्तं सूतकं तत्र वै सदा ॥५५॥
यद्गृहे साधवः सन्ति तद्गृहे सन्ति देवताः ।
विघ्नाः सर्वे निवर्तन्ते वसन्ति तत्र सिद्धयः ॥५६॥
तीर्थानि तत्र चायान्ति साधूनां पादवाञ्छया ।
अनादिश्रीकृष्णनारायणस्तत्र विराजते ॥५७॥
यत्र नारायणस्तत्र राधिका कमला रमा ।
मुक्तास्तत्र वसन्त्येव दिव्यदेहा हरिप्रियाः ॥५८॥
यत्कुटुम्बे कृपा साधोस्तत्कुटुम्बं विदेहवत् ।
मुक्ततां भजमानं वै दिव्यं पापहरं मतम् ॥५९॥
वैष्णवं च वरिष्ठं च मोक्षदं तत्कुटुम्बकम् ।
यद्गृहे साधवो धीरा भुञ्जते च पिबन्ति च ॥६०॥
स्वपन्ति कीर्तयन्तीशेश्वरनाम नरायणम् ।
पुत्राः पुत्र्यः स्त्रियश्चापि सेवन्ते यान्ति दिव्यताम् ॥६१॥
सर्वे मुक्ता भवन्त्येव साधुसत्संगलाभतः ।
साधुसेवा ह्यक्षयोऽस्ति कोशस्त्वन्यस्तु सक्षयः ॥६२॥
तस्मात् साधून् सेवयित्वा भोजयित्वा तथा पुनः ।
शाययित्वा तदाज्ञां संलब्ध्वा यास्यामि वै ततः ॥६३॥
राज्ञ्याः सेवार्थमेवाऽहं चेति निश्चित्य नापिती ।
चक्रे सतां स्वागतं च मधुपर्कं ददौ मुदा ॥६४॥
आसनानि ददौ चापि समिधश्च ददौ जलम् ।
फलं तथा च मिष्टान्नमुष्णं कृत्वा ददौ मुदा ॥६५॥
भोजयामास सर्वांश्च साधून् साध्वीस्ततश्च सा ।
देहसंवाहनं चापि साध्वीनां च सतामपि ॥६६॥
चक्रे धैर्येण निरता कीर्तयन्त्यपि साधवः ।
स्त्र्यः साध्व्यः कीर्तयन्ति रात्र्यर्धं विगतं ततः ॥६७॥
सर्वे सुप्ताः साधवश्च साध्व्यश्चाऽथ तु नापिती ।
चिन्तां चक्रे मनाग् राज्ञ्याः सेवां कर्तुं सुसत्वरा ॥६८॥
नत्वा चाज्ञां गृहीत्वा च ययौ राज्ञीं प्रति द्रुतम् ।
अथ राज्ञ्यपि समये विगतेऽपि तु नापिती ॥६९॥
नाऽऽगतेति महाक्रुद्धा दण्डं दातुं समिच्छति ।
श्वः सर्वस्वं हरेयं वै नापितान्या मयाऽर्पितम् ॥७०॥
निष्कासयिष्ये ग्रामाद्वा करिष्ये निगडे स्थिताम् ।
एवं क्रुद्धा ह्यभवत्सा जानातीदं स्वयं प्रभुः ॥७१॥
लक्ष्मि तदाऽहं भगवान् निशाद्यप्रहरे द्रुतम् ।
भक्ताया नापितान्या वै रूपं धृत्वा सुशोभनाम् ॥७२॥
क्रुद्धाराज्ञ्याः प्रशान्त्यर्थं सेवार्थं प्रमदाऽगमम् ।
विचार्येत्थं मम भक्ता साधून् साध्वीः प्रसेवते ॥७३॥
भक्ताया जीविकानाशं राज्ञी क्रुद्धा करिष्यति ।
तन्मा भून्मम भक्तायाः सेविकायाः सतां तथा ॥७४॥
मया रक्षयितव्येयं भक्ता मे धर्मशालिनी ।
कुटुम्बं च समस्तं तद् रक्षणीयं हि भक्तिमत् ॥७५॥
विचार्येत्थं भक्तरक्षाकरश्चाऽहं तु नापिती ।
भूत्वा निशाद्यप्रहरे ययौ राज्ञीगृहं द्रुतम् ॥७६॥
राज्ञ्याः समस्तसेवास्तु कुशलिन्या मया कृता ।
नारीरूपेण रात्र्यां वै शृंगारो भोजनादिकम् ॥७७॥
पात्राणां शुद्धिकरणं पानं भक्ष्यं सुगन्धि च ।
शय्याविधानं रम्यं च ताम्बुलाद्यर्पणं तथा ॥७८॥
राज्ञ्या देहस्य सम्यग् वै संवाहनं सुमर्दनम् ।
व्यजनेन पवनस्याऽर्पणं वार्ताप्रलापनम् ॥७९॥
उपदेशादिकं सर्वं कृतं मया तदा निशि ।
शृणु लक्ष्मि चोपदेशं कृतवानहमेव यम् ॥८०॥
शास्त्रकथा श्रवणीया गुरुः पूज्यो हि सर्वथा ।
दानं देयं तथा राज्ञ्या श्रद्धया धर्मयोषिता ॥८१॥
अनादिश्रीकृष्णनारायणः सेव्यः सदा धिया ।
अहन्ताममते त्याज्ये गर्वः कार्यो न सर्वथा ॥८२॥
दीनानां रक्षणं कार्यं क्रोधः कार्यो न भृत्यके ।
दासीषु च कृपा कार्या न हर्तव्यं क्षतावपि ॥८३॥

अन्नं धनं गृहं वापि सेवाक्षतावपि क्वचित् ।
भजनीयः परमात्मा राज्ञ्या तस्यां कृपा हरेः ॥८४॥
भवत्येव सदा तेन मोक्षोऽक्षरे प्रजायते ।
निरञ्जना महामुक्ता जायते कृष्णसदृशी ॥८५॥
न बद्ध्यते रमावत् सा कर्मभिश्च शुभाऽशुभैः ।
अतिस्नेहेन लक्ष्मीवत् प्राप्नोत्यैक्यं हरौ तु सा ॥८६॥
यद्वा प्रसेवते भक्त्या पत्नी भूत्वा पृथक् स्थिता ।
हरेः कृपया कार्येषु स्वतन्त्रा जायते सदा ॥८७॥
ब्रह्मनिष्ठा ब्रह्मशीला मुक्तिमाप्नोति चाऽक्षरे ।
या तु भोगपरा राज्ञी कृष्णसेवाविवर्जिता ॥८८॥
सा तु मृत्वा दिवं गत्वा भुक्त्वा मर्त्येऽत्र जायते ।
मानुष्येवं बहुजन्मसिद्धा भक्त्या तु मोक्ष्यते ॥८९॥
साधोर्गुरोः कृपया च यास्यत्यन्तेऽक्षरं पदम् ।
कृपया श्रीहरेरत्र क्षयं यान्ति हि वासनाः ॥९०॥
कृत्वा सत्संगमेवाऽत्र भजित्वा परमेश्वरम् ।
मानुष्यं सार्थकं कुर्यान्मोक्षात्मनित्यराज्यदम् ॥९१॥
आत्माऽयं ब्रह्मरूपोऽस्ति कृष्णं पश्येद्धि तत्र च ।
एवं लक्ष्मि तूपदिश्य तां राज्ञीं संप्रसेव्य च ॥९२॥
जाग्रद्वन्निद्रितां कृत्वा निरगमं तदालयात् ।
तावत्तत्र समायाता नापितानी निशार्धके ॥९३॥
सेवितुं तां महाराज्ञीं कम्पमाना भयान्विता ।
शय्यास्थले ह्युपस्थित्वा क्षमामयाचताऽऽनता ॥९४॥
महीमानप्रसंगेन कालो मे विगतो बहुः ।
महाराज्ञ्या क्षमा कार्या सेवायां नाहमागता ॥९५॥
श्रुत्वाऽऽश्चर्यं परं प्राप्ता राज्ञी सन्देहमागता ।
या सेवित्वा गता भृत्या सेयं पुनः कथं ननु ॥९६॥
समायाता याचते च क्षमां विनाऽपराधनम् ।
विचार्येत्थं जगादैनां नापिति त्वं कथं पुनः ॥९७॥
समायाता क्षमायाञ्चां कुरुषे च कथं वद ।
इदानीं त्वं समस्तं मे नैशिकं सेवनादिकम् ॥९८॥
कृत्वा यासि निजं गेहं कथं वै याचसे क्षमाम् ।
नापिती प्राह नाहं वै त्वागता सेवनेऽद्य वै ॥९९॥
अस्मिन् क्षणे समायामि किं भ्रान्ता वदसीव माम् ।
पूज्ये मा कुरु नर्मैवं नाहमत्र स्थिताऽभवम् ॥१००॥
अन्यया तु कयाचित्ते कृता सेवा हि सा भवेत् ।
श्रुत्वैवं भ्रान्तिमगमद् राज्ञी क्षणं ततः सुखम् ॥१०१॥
विसृज्य नापितीं निद्रां जगाम सा प्रजेश्वरी ।
अथ सा नापिती नैजं गेहं याति तु यावता ॥१०२॥
तावता स्वगृहे नारीं ददर्श बहुरूपिणीम् ।
रूपेण वयसा वेषेणापि स्वसदृशीं तदा ॥१०३॥
क्षणमाश्चर्यमापन्ना पप्रच्छ स्मेरशोभनाम् ।
का त्वं कथं कुतश्चात्र मद्गृहे कमलासमा ॥१०४॥
अहं लक्ष्मि तदा नैजं रूपं व्यावृत्त्य सुन्दरम् ।
अनादिश्रीकृष्णनारायणं विष्णुमदर्शयम् ॥१०५॥
तवार्थे नापितीरूपे भूत्वाऽहं तामसेवयम् ।
त्वया तु सेविताः सन्तो राज्ञी क्रुद्धाऽभवत्तदा ॥१०६॥
असेवया तव सर्वं हर्तव्यं निश्चिकाय सा ।
मया धृत्वा तव रूपं सेविता सा प्रजेश्वरी ॥१०७॥
भक्तेऽहं भगवानस्मि श्रेयोऽर्थः तव चागतः ।
त्वं पतिपुत्रपुत्र्याद्यैः सहिताऽसि सदा मम ॥१०८॥
नित्यं ध्यानं ममैवं त्वं समाचर हि गोचरम् ।
नेष्यामि मत्परं धाम कुटुम्बं तव गोचरम् ॥१०९॥
इत्युक्त्वाऽहं तया रुद्धः शय्यायामभवं क्षणम् ।
ममाऽऽनन्दं परं दत्वा तिरोऽभवं क्षणान्तरे ॥११०॥
स्वप्ने तु नापितः पुत्राः पुत्र्यश्च साधवोऽपि च ।
सर्वे मां ते व्यपश्यन् वै प्रातर्जजागरुश्च ते ॥१११॥
परस्परं हरेर्मूर्तेर्वर्णनं दर्शनात्मकम् ।
चक्रुस्ते मेनिरे भाग्यं श्रेष्ठं यद् ब्रह्मदर्शनम् ॥११२॥
अथ प्रातः पुनः स्नात्वा भुक्त्वा ते साधवो ययुः ।
ग्रामान्तरं च सा नापितानी दिव्यकुटुम्बिनी ॥११३॥
भजते मां नापितोऽपि भजते तत्कुटुम्बकम् ।
अथ कालान्तरे सर्वाननयं सद्विमानकैः ॥११४॥
धामाऽक्षरं परं मे वै लक्ष्मि कृपावशो हरिः ।
राजा राज्ञ्यादयश्चापि मेनिरे चरितं मम ॥११५॥
दिव्यं तदिति निश्चित्य भेजुर्मां सप्रजा हि तम् ।
तेऽपि कालान्तरे धामाऽक्षरं ययुर्ममोत्तमम् ॥११६॥
एवं लक्ष्मि मया भक्ता उद्धारिताः कृपालुना ।
साधोः कल्याणधाम्नाख्यस्यापि सेवामिषेण ह ॥११७॥
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेत्तथा ।
यथेष्टकामनापूर्तिर्भवेन्मे कृपया रमे ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने स्वर्णधन्वनृपतेः सेवकस्य हर्षधर्मनामकनापितस्य पत्न्या निगमिकानाम्न्या भक्त्या कल्याणधामादिसाधुसाध्वी-सेवायां स्थितायाः सेवया सम्प्रसन्नो भगवान् निगमिकारूपो भूत्वा राज्ञीसेवामकरोत्, नापितकुटुम्बस्य रक्षणं मोक्षणं चाऽकरो-दित्यादिनिरूपणनामाऽष्टाविंशत्यधिक-द्विशततमोऽध्यायः ॥ २२८ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं कथां भक्तानिकोद्भवाम् ।
आभीरी मम भक्ताऽऽसीदार्द्रश्रृंगपुरे स्थिता ॥ १ ॥
व्याघ्रारण्ये सिंहव्याघ्रहिंस्रप्राणिमये स्थले ।
नाम्ना रूटाणकीदेवी पूर्वसंस्कारपावनी ॥ २ ॥
शृणु लक्ष्मि महाश्चर्यं भक्तायाः प्रवदामि ते ।
पूर्वजन्मनि सा शूद्रा धीवरी सरितस्तटे ॥ ३ ॥
धीवरस्य तु नौकायां वर्तमानाऽभवत् सती ।
शत्रुंजयाऽब्धिसंगस्यभूमौ वासवती सदा ॥ ४ ॥
गोपनाथमहातीर्थगामिनः सा तु मानवान् ।
प्रतितीरं नयत्येव नौकया कृष्णमानसा ॥ ५ ॥
साधवो ये समायान्ति तान् वै भावेन सा सती ।
विना द्रव्यग्रहणं वै परं तीरं नयत्यपि ॥ ६ ॥
अन्यांस्तु द्रव्यमादाय परं तीरं नयत्यथ ।
एकदा श्रीहरिचैतन्याऽऽख्यः साधुस्तु योगिराट् ॥ ७ ॥
परं पारं प्रगन्तुं तु सरित्तीरमुपाययौ ।
सिद्धः स साधुवर्यो वै पादुकाभ्यां जलोपरि ॥ ८ ॥
याति स्वसिद्धतपसा क्वचिद् व्योम्ना प्रयात्यपि ।
तथापि स्वेच्छया भूमौ विहरन् सरितस्तटे ॥ ९ ॥
यदृच्छयाऽऽययौ तं च दृष्ट्वा तु धीवरी हि सा ।
नमस्कृत्य स्वनौकायामागन्तुमार्थयद् मुदा ॥१०॥
योगिवर्यस्तु धीवर्याः श्रेयसे नावि मां भजन् ।
आरुरोह तत्र चोपादिदेश भक्तितोषितः ॥११॥
भज कृष्णं भज नारायणं श्रीपुरुषोत्तमम् ।
भज साधून् सतीः साध्वीः सद्गतिं त्वं प्रयास्यसि ॥१२॥
देहस्ते धीवरीरूप आत्मा ते चित्स्वरूपवान् ।
देहोऽयं च वशे जीवात्मनः सदा हि वर्तते ॥१३॥
यथा नौका वशे तेऽस्ति तथा देहो वशे तव ।
यथा नौका दृश्यरूपा द्रष्ट्री त्वं प्रेरिकाऽसि च ॥१४॥
तथा देहो दृश्यरूपो द्रष्टाऽऽत्मा प्रेरकोऽस्ति च ।
देहो दुःखादिना व्याप्तो द्रष्टा दुःखादिवर्जितः ॥१५॥
तत्र द्रष्टरि सर्वज्ञः कश्चिदन्यो विराजते ।
यः सत्कार्ये प्रेरयति दुष्कार्ये निषेधति ॥१६॥
अन्तरात्मा साक्षिरूपः स एव भगवान् हरिः ।
अनादिश्रीकृष्णनारायणो वैकुण्ठवल्लभः ॥१७॥
तमेव भज योगीन्द्रसाधुसाध्वीप्रपूजितम् ।
भक्त्या ह्यनन्यया स्नेहमय्या तं संप्रसेवय ॥१८॥
हृदये तं प्रभुं कान्तं कृष्णं सदा निभालय ।
ध्यानं गोपीपतेर्नित्यं कुरु स्वरूपशालिनः ॥१९॥
बाह्यविषयान् सन्त्यज्य हृदये पश्य माधवम् ।
इन्द्रियाणि समस्तानि तस्मिन् कृष्णे समर्पय ॥२०॥
परावृत्त्येन्द्रियवृत्तीस्तस्मिन् कृष्णे नियोजय ।
सच्चिदानन्दसन्दोहान् महानन्दं समर्जय ॥२१॥
कृष्णानन्दस्य संभोक्त्री भव नित्यं रमासमा ।
कृष्णभोगस्य सम्प्राप्त्या भोगाश्चान्ये विषं यथा ॥२२॥
तथा ते वै भविष्यन्ति भुंक्ष्व कृष्णं पतिं प्रभुम् ।
श्रीकृष्णस्य चरित्राणि दिव्यानि मानुषाणि च ॥२३॥
संकीर्तय सदा भक्त्या स्वर्गमोक्षप्रदानि वै ।
अद्भुतानि समस्तानि चरित्राणि रमापतेः ॥२४॥
कामचेष्टाचरित्राणि युद्धायोजनकानि च ।
उत्सवाद्यानि सर्वाणि स्मर नित्यं श्रियः पतेः ॥२५॥
लौकिकाऽलौकिकान्येव निकृष्टान्युत्तमानि च ।
तानि सर्वाणि दिव्यानि चरित्राणि रमापतेः ॥२६॥
जडं कुर्याच्चेतनं तु चेतनं तु जडं हरिः ।
एवंविधसमर्थस्य हरेः संगं सदा कुरु ॥२७॥
प्रमादं च महालस्यं महामोहं मदं त्यज ।
अहन्तां ममतां त्यक्त्वा चात्मरूपा सदा भव ॥२८॥
संसारसागरं तर्तुं सत्सु नौषु स्थिरा भव ।
पतिव्रता हरौ भूत्वा हरिं पतिं सदा भज ॥२९॥
देहदशां विहायैव ब्रह्मदशां समाश्रय ।
भोगान् सर्वान् हरौ कृष्णे स्थूलान् सूक्ष्मान् समर्पय ॥३०॥
आत्माऽहं न तु देहोस्मीत्येवं वै मननं कुरु ।
दास्यसि श्रीपतेश्चाहमित्येवं दिव्यतां वह ॥३१॥
एवंविवेकमासाद्य निर्बन्धा कर्मभिर्भव ।
देहाभिमानजं पापं त्यज याम्यगतिं त्यज ॥३२॥
भजित्वा श्रीपतिं चान्ते दृष्ट्वा दिव्यं रमापतिम् ।
तेन साकं विमानेन दिव्याक्षरपदं व्रज ॥३३॥
धीवरीत्वं विहायैव बुद्धिवरीत्वमावह ।
मम साधोः प्रसंगेन वैष्णवी परमा भव ॥३४॥
अनेन जन्मना यद्वा द्वितीयेनाऽक्षरं व्रज ।
एवं लक्ष्मि तदा नावि तूपदिष्टा हि साधुना ॥३५॥
परं बोधं प्रासवती धीवरी धीमती ह्यभूत् ।
परतीरं समायातं चावतीर्य तु साधुराट् ॥३६॥
ययौ तीर्थं च धीवर्यै दत्वा ज्ञानमनुत्तमम् ।
अथ सा श्रीकृष्णनाम जपत्यहर्निशं ततः ॥३७॥

मत्स्यादा धीवरी भाग्यवशेन कालयोगतः ।
मृता सा मानवी जाता ह्याभीरी महिषीवती ॥३८॥
पुनरेव स्त्रीस्वरूपा महाभागवती सती ।
साधूनां सेविका बाल्याद् ब्रह्मचर्यपरायणा ॥३९॥
विवाहेच्छा यया नैव कृता दग्धा तु कामना ।
यौवने विद्यमानेऽपि वार्धक्ये इव संस्थिता ॥४०॥
पूर्वसंस्कारवशतो जातिस्मरा तु योगिनी ।
स्वभावतश्चात्मनिष्ठापरायणाऽभवद्धि सा ॥४१॥
नाम्ना रुटाणकीदेवी दिव्यज्ञानपरायणा ।
साधुसेवापरा साध्वी सांख्ययोगिनिका सदा ॥४२॥
आत्मनिवेदिनी त्यागवती वैराग्यशालिनी ।
मालाऽऽवर्तनमनिशं करोति कीर्तनं हरेः ॥४३॥
महिषाणां तु दुग्धानि साधून् मिष्टानि नित्यशः ।
कृत्वा पायसरूपाणि भोजयत्येव भक्तितः ॥४४॥
स्नात्वा प्रातर्हरिंकृष्णं प्रपूज्याऽर्घ्यं प्रदाय च ।
सूर्यायाऽर्घ्यं च पितृभ्यो दत्वा कृत्वा समर्पणम् ॥४५॥
श्राद्धं पायससिद्धान्नैः फलैर्जलैः प्रदाय च ।
ततः सा भोजनं साधून् कारयित्वा सतीस्तथा ॥४६॥
भुंक्ते प्रासादिकं नित्यं वर्तते पंक्तिपावनी ।
यथा लक्ष्मीर्यथा गंगा यथा देवी सरस्वती ॥४७॥
तथा सा ब्रह्मपरमा रुटाणकी हि दीव्यति ।
यस्य गृहे नित्यमेव समायान्ति हि साधवः ॥४८॥
साध्व्यश्चापि समायान्ति भक्तां ज्ञात्वा तु सेविकाम् ।
कीर्तनानि प्रकुर्वन्ति रासान् महोत्सवान् शुभान् ॥४९॥
एवं वै भजमानायाः सेविकाया गृहे क्वचित् ।
निशार्धे संव्यतीते वै सुप्तेषु सर्वदेहिषु ॥५०॥
दैत्योऽरण्यात् समायातः कश्चिदायसकुण्डलः ।
ताडवद्दीर्घदेहश्च कृष्णवर्णोऽतिरोमवान् ॥५१॥
युवा च बलवान् पुष्टो वटवृक्ष इवाऽपरः ।
स तां सुप्तां महासाध्वीं जगृहे त्वतिलाघवात् ॥५२॥
नीत्वा ययौ व्योममार्गे महारण्ये गतोऽभवत् ।
अवाततार निबिडे वृक्षषण्डेऽपि लाघवात् ॥५३॥
पृथ्व्यां निधाय तां रुटाणकीं सुरूपिणीं शनैः ।
प्रबोधयामास दैत्यः सापि बुबोध यावता ॥५४॥
ददर्श वनमध्ये स्वामानीतां वनवासिना ।
आयसकुण्डलनाम्ना दैत्येन स्ववशीकृताम् ॥५५॥
अथापि सा महाभक्ता धैर्यवती सतीश्वरी ।
महाभागवती दुर्गासमा देवी हि वैष्णवी ॥५६॥
कृष्णबलवती साध्वी भयं प्राप्ता न वै मनाक् ।
सस्मार हृदये कृष्णं कान्तं जगत्पतिं पतिम् ॥५७॥
यद्यहं तव भक्ताऽस्मि त्वया नैजा कृताऽस्मि च ।
तवैव पातिव्रत्येन वर्तेऽहं श्रीसमा यदि ॥५८॥
त्वयि चास्मि त्वात्मनिवेदिनी वै सांख्ययोगिनी ।
त्वया करो गृहीतोऽस्ति मम चेत् स्वामिना सदा ॥५९॥
तव सन्तश्च साध्व्यश्च सेविता वै मया यदि ।
त्वदर्थकृतसर्वस्वा यदि चास्मि तव प्रिया ॥६०॥
तदा त्वायाहि विष्णो त्वं कृष्ण शीघ्रं पुरो भव ।
साक्षादागत्य रक्षां मे कुरु दैत्याद्धि दारुणात् ॥६१॥
यदि तेऽहं न जाताऽस्मि भवामि भक्तिवर्जिता ।
तर्हि दैत्यो बलिः स्पर्शं करोतु यदि ते रुचिः ॥६२॥
यथेष्टं कुरु कान्त त्वं यथेष्टं निजनाणके ।
यत्नं विधेहि भगवन्नौदासीन्यं च वाऽऽचर ॥६३॥
इत्युक्त्वा हृदये मह्यं पूजां दत्तवती तदा ।
दैत्योऽपि तां तदा वाचा रञ्जयन् बहुभावतः ॥६४॥
वार्तां कर्तुं तु विविधां प्रेरयत्येव चोत्सुकः ।
तथापि मौनमापन्ना मच्चित्ता न वदत्यपि ॥६५॥
दैत्यो ननर्त पुरतो बहुहास्यकृतिर्मुहुः ।
तथापि कृष्णचित्ता सा बहिर्मनो न वै व्यधात् ॥६६॥
अथ गृहेऽपि निद्रायां सर्वेऽभवन् जडा यथा ।
साधवश्चापि साध्व्यश्च जडाश्च महीमानकाः ॥६७॥
रुटाणक्याः पिता नाम्ना दुर्वारणोऽपि निद्रितः ।
माता नाम्ना खटमिष्टादेवी त्वासीद्धि निद्रिता ॥६८॥
अन्ये ग्रामजनाः सर्वे आसँस्तदाऽतिनिद्रिताः ।
कैश्चिज्ज्ञातं न हरणं रुटाणक्यास्तमोमये ॥६९॥
अथ महिष्यः पशवो गन्धदृष्टय एव ताः ।
विविदुर्दैत्यगन्धं च जाग्रन्निद्राविनिद्रिताः ॥७०॥
बुबुधुस्ता महिष्यो वै दैत्यं समागतं तथा ।
नीत्वा रुटाणकीदेवीं यान्तं व्योम्नि तमोमये ॥७१॥
रणकारं रम्भणं च पश्चाक्रोशं प्रचक्रिरे ।
जजागरुः समस्तास्ते श्रुत्वा भयं समागतम् ॥७२॥
चक्रुः परितः काष्ठानां वह्नीन् शार्दूलशंकया ।
दीर्घशब्दान् महानादान् चक्रुस्ते परितः खलु ॥७३॥
सिंहशंकामयाः सर्वे दैत्यं न विविदुस्तदा ।
एवं घटिका विगता कृतेऽपि रक्षणेऽमितः ॥७४॥
महिष्यो नाऽभवन् शान्ता गर्जन्ति विह्वला यथा ।
एका तु महिषी रुटाणक्यासनं द्रुतं ययौ ॥७५॥

शृंगाभ्यामासनं नीत्वा भ्रमणं प्रचकार सा ।
आहूता तु तदा सर्वैः रूटाणकि रुटाणकि ॥७६॥
क्व गता त्वासनं चेयं महिषी नाशयत्यपि ।
समाहूता चापि यदा न प्रत्युवाच भामिनी ॥७७॥
न दृश्यते जनमध्ये गृहे साध्वीसतीष्वपि ।
तदा शंकास्पदा जाता नीता केनापि पुत्रिका ॥७८॥
अथ वै विह्वलाः सर्वे रुरुदुर्मार्गणाय च ।
परितो निर्ययुश्चापि सीम्नि क्वापि न ददृशुः ॥७९॥
प्रत्याययुर्गताशास्ते सस्मरुर्मां परेश्वरम् ।
साध्व्यश्च साधवः सर्वे नामसंकीर्तनं व्यधुः ॥८०॥
अनादिश्रीकृष्णनारायणार्यकृष्णमाधव ।
तदा ययावहं चक्रगरुडाभ्यां युतो वने ॥८१॥
नृत्यन्तं दैत्यराजं तं चकर्ताऽहं सुलाघवात् ।
तत्तेजो मयि त्वाकृष्य कृत्वा तां गरुडोपरि ॥८२॥
आनन्दयित्वा प्रीत्या तामनयं तद्गृहं द्रुतम् ।
सापि दिव्यतमा जाता साध्वी मत्स्पर्शमात्रतः ॥८३॥
दिव्यैश्वर्यवती लक्ष्मि यथा त्वं त्वादृशी हि सा ।
एवं तां व्योममार्गेण चाऽऽद्र्रशृंगपुरे गृहे ॥८४॥
अवस्थाप्य तथा सर्वभक्तेभ्यो दर्शनं मम ।
दत्वा तेजोमयं दिव्यं स्थित्वा च घटिकाऽधिकम् ॥८५॥
साधुसाध्वीकृतां सेवामंगीकृत्य च पायसम् ।
भोजनं पूजनं वारिपानं ताम्बूलकादिकम् ॥८६॥
भुक्त्वा गरुडवाहोऽहं गन्तुं सज्जोऽभवं यदा ।
तदा भक्ताः प्रेममग्नाः प्रार्थयामासुरुत्सुकाः ॥८७॥
सह त्वस्मान्नय कृष्ण यदि ते स्मोऽतिसेवकाः ।
रूटाणकी साधवश्च साध्व्यश्चापि तथाऽऽर्थयन् ॥८८॥
अहं लक्ष्मि तदा तेभ्यो मम मन्त्रं ददौ शुभम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥८९॥
पादजलं प्रसादान्नं पायसं च ददौ तदा ।
अपक्वान्मानवान् भक्तिं कर्तुमादिश्य तत्र च ॥९०॥
पक्वान् साध्वीः साधुजनान् रुटाणकीं तथा सतीम् ।
मातरं जनकं तस्यास्तथा तां महिषीमपि ॥९१॥
विधाय दिव्यदेहाँश्च मुक्तान् मुक्तानिकास्तथा ।
निधाय गारुडे पृष्ठेऽनयं धामाऽक्षरं मम ॥९२॥
अन्यानपक्वान् कालेनाऽनयं वैकुण्ठमुत्तमम् ।
एवं लक्ष्मि मया रक्षा कृताऽऽभीर्या हि योषितः ॥९३॥
सा तु मुक्तानिका जाता ब्रह्मप्रिया मदक्षरे ।
रूपेश्वरीतिनाम्नाऽद्य वर्तते तव मण्डले ॥९४॥
युवती मम पत्नीयं पश्यैनां मद्विवाहिताम् ।
अन्याः साध्व्यो युवत्योऽत्र सन्ति दश स्त्रियो मम ॥९५॥
मन्दारकलिकाद्यास्तास्तव सख्योऽत्र योषितः ।
कुंकुमवापिकाक्षेत्रे ब्रह्मप्रिया मम प्रियाः ॥९६॥
दिव्यचक्षुष एवैतां कथां विदन्ति नेतरे ।
चमत्कारो मम दिव्यस्ते रमे कथितो मया ॥९७॥
भक्तानां रक्षणं चैवं करोमि सर्वथा सदा ।
पक्वानां मोक्षणं चापि धामाऽक्षरप्रदानकम् ॥९८॥
ये मां भजेयुः सततं सर्वस्वार्पणभावनाः ।
तेषामहं च ते मेऽपि सम्बद्धाः संभवन्ति हि ॥९९॥
मदर्पितानामवनं करोमि सर्वथा सदा ।
कालाद् यमात् कर्मतश्चेन्द्रियादिभ्यश्च दोषतः ॥१००॥
पठनाच्छ्रवणादस्य चिन्तनात् कथनादपि ।
भुक्तिर्मुक्तिर्भवेदेव मम प्राप्तिः सुखप्रदा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पूर्वजन्मनि धीवर्या रूटाणक्या आभीरीभक्तायाः साध्वीनां च दैत्याद् रक्षणं मोक्षणं च श्रीहरिणा कृतमित्यादिनिरूपणनामा नवविंशत्यधिकद्विशततमोऽध्यायः ॥ २२९ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं मत्स्यपत्तनवासिनः ।
मत्स्यादस्य धीवरस्य तथापि भक्तिकारिणः ॥ १ ॥
कथामुद्धारकर्त्रीं वै साधुसमागमोद्भवाम् ।
पापिनां पावनीं मायामोहनाशकरीं तथा ॥ २ ॥
धीरपर्वाऽभिधश्चासीद् धीवरो मत्स्यपत्तने ।
शतनौकाधिपः कृष्णानद्यब्धिसंगमे सदा ॥ ३ ॥
यस्य नावो भृत्ययुक्ता मत्स्यान् गृह्णन्ति जालिकाः ।
ब्राह्ममुहूर्तादारभ्याऽऽसूर्योदयं तु नित्यशः ॥ ४ ॥
नित्यं वै लक्षमत्स्यानां जालग्रहः प्रजायते ।
सूक्ष्मस्थूलसुदीर्घाणां भिन्नगुणादिवर्ष्मणाम् ॥ ५ ॥
तेषां हिंसात्मकं पापं जायते धीरपर्वणः ।
लक्षवर्षायुष्यकोऽपि धीरपर्वाऽतिहिंसया ॥ ६ ॥
आयुषा हीयते नित्यं शताब्दप्रमितेन वै ।
वर्षद्वयान्तरे तस्य सहस्राणि तु सप्ततिः ॥ ७ ॥
वर्षाणि चायुषः पापैश्छिन्नानि मत्स्यशापतः ।
त्रिंशद्वर्षोत्तरं तेन मत्स्यव्यापार आदृतः ॥ ८ ॥

मिलित्वा लक्षवर्षाणि द्वात्रिंशे विगतानि ह ।
द्वात्रिंशे चान्तिमे मासे वर्षायां मेघवर्षणम् ॥ ९ ॥
सप्ताहं संततं जातं कृष्णादेशेषु सर्वशः ।
तुंगभद्राप्रदेशेषु तथैव मेघवर्षणम् ॥१०॥
अभवत् सततं लक्ष्मि मूशलधारसदृशम् ।
जलानि पूरवेगानि ममुर्न सरितोस्तदा ॥११॥
सरिन्मार्गं विहायैव भूमार्गान् विषयान् व्यधुः ।
बहवो मानवास्तत्राऽरण्यस्थाः साधवोऽपि च ॥१२॥
पशवः पक्षिणश्चापि जलपूरैः प्रवाहिताः ।
मृतास्तु बहवस्तेषु पूरेषु दूरकर्षिताः ॥१३॥
निराधारा मृताः सर्वे साऽधाराः काष्ठलम्बनाः ।
वृक्षाद्यालम्बनाश्चान्ये जीवन्तः पूरमध्यगाः ॥१४॥
आययुर्मत्स्यपट्टस्य कृष्णसागरसंगमे ।
देहिनो जीवतो वीक्ष्य महाजलेऽपि वै तदा ॥१५॥
धीरपर्वा निजभृत्यान् यन्त्रिनौकाभिरक्षिणः ।
सर्वानाज्ञापयामास शतनौकाधिनायकान् ॥१६॥
मा मत्स्यग्राहं कुर्वन्तु यावन्नद्या उपद्रवः ।
जीवन्मानवग्रहणं कुर्वन्तु पूरमध्यतः ॥१७॥
सर्वथा प्राणदानं वै प्राणमात्रं तु जीविनाम् ।
प्रवाहवाहितानां वै कर्तव्यं प्रलयेऽत्र तु ॥१८॥
भोजनं चापि शुष्कान्नं भर्जितं चणकादिकम् ।
दातव्यं कम्बलवस्त्राद्यं शीतहरणार्थकम् ॥१९॥
एवं वै रक्षणं तत्र विहितं धीरपर्वणा ।
धनाऽन्नाम्बरनौकादिप्रदानैर्भृत्यमानवैः ॥२०॥
नरा नार्यो बालकाश्च वृद्धा वा काष्ठसंगताः ।
वंशस्तम्बमहावृक्षलग्नाः शाखाविलम्बनाः ॥२१॥
घासपेटादिसंसक्ताश्चान्ये शवादिकाश्रयाः ।
तरद्वस्तुसमाधाराः सहस्रशो हि मानवाः ॥२२॥
यतयः साधवः साध्व्यो विरक्ता वैष्णवा अपि ।
भक्ता नारायणपरा जीवन्तो रक्षितास्तदा ॥२३॥
तेषामाशीर्वादलब्धमहापुण्यातिसागरः ।
जीवदानमहापुण्योदयश्चापि व्यजायत ॥२४॥
पुण्यं पापं विना भोगं क्षपयितुं न शक्यते ।
आयुःक्षयात्तसप्ताहे योगोऽयं समजायत ॥२५॥
पापैरायुः क्षीयते वै पुण्यैरायुर्विवर्धते ।
पूर्वस्य पूर्वभोगो वै पश्चिमस्य स पश्चिमः ॥२६॥
हिंसाघातादिकर्मोत्थं फलं तु मरणं मुहुः ।
घातेनैव भवेद्घातकिनस्तस्य यमालये ॥२७॥
तीव्रसंवेगितं कर्म मत्स्यमारोद्भवं बलि ।
पूर्वं भोगाय वै प्राप्तं कालपाशाऽभियोजितम् ॥२८॥
याम्यदूतैश्च संयुक्तं कोटिमत्स्यादिघातजम् ।
सप्ताहान्ते दिने वर्षावेगे तु न्यूनतां गते ॥२९॥
नौकायां यन्त्रयुक्तायां निषद्य भृत्यसेवितः ।
पत्नीपुत्रादिसहितो द्रष्टुं वेलां जले ययौ ॥३०॥
कृष्णासागरसंयोगे महाप्रवाहवेगिते ।
महाजले ययौ यावत् क्रोशदूरं तु सागरे ॥३१॥
तावन्नौकातले वृक्षशाखोच्छालनमद्भुतम् ।
अचिन्तितं समायातं वारिभ्रमो महोच्छ्रयः ॥३२॥
अचिन्तितः समुत्पन्नो महाविद्युदयोऽपि च ।
मिथो महाजलभित्तिद्वयताडनसंभवे ॥३३॥
महानौकाऽग्रतो भागे खे तूत्प्लुत्य सुवेगतः ।
अधोगलाऽग्रतो यावत्तावत् पृष्ठे महाजलैः ॥३४॥
उत्क्षिप्ता खे वेगतश्च ताडवत् सा ततोऽभवत् ।
नौकाग्रं जलभित्तिभ्यां नीतं चाऽधो जलान्तरे ॥३५॥
तावत्पार्श्वमहावेगिजलैर्व्यावर्तिता ह्यवाङ् ।
निमग्ना क्षणमात्रेण तत्र समुद्रवारिषु ॥३६॥
तलं गता भुवः सा तु निराश्रयाऽसहायिनी ।
धीरपर्वादयः सर्वे मृता वारिषु मूर्छिताः ॥३७॥
याम्यदूतैर्यमलोकं नीतास्ते पापिनो द्रुतम् ।
शवास्तु भक्षिता मत्स्यैर्धनानि भृत्यमानवैः ॥३८॥
नौकास्तु नाविकैर्नीताः प्राणास्तु यमपार्षदैः ।
पुण्यपापानि नीतानि मृतैस्तैस्तु कुटुम्बिभिः ॥३९॥
पाथेयानि यथा तानि चात्मभिः सह संययुः ।
यथाकालं च ते दूतैर्नीता यमालयं प्रति ॥४०॥
चित्रगुप्तेन पापानि श्रावितानि यमान्तिके ।
धर्मराजा तु तान् सर्वानदण्डयद् यथाकृतम् ॥४१॥
कालसूत्रे न्यक्षिपच्च बहुकालं ततः पुनः ।
गलपाशाख्यनरके न्यक्षिपन्मत्स्यघातिनः ॥४२॥
ततः क्षारकर्दमे च न्यक्षिपच्चिरमेव तान् ।
ततो विशसने कुण्डे न्यक्षिपत्तान् सशस्त्रके ॥४३॥
ततश्चासिपत्रवने न्यक्षिपत्तांश्चिरं ततः ।
न्यक्षिपत्तान् वह्निकुण्डे महाज्वालासमाकुले ॥४४॥
ततस्तान्न्यक्षिपज्जन्तुबहुले कुण्डकेऽत्र च ।
वृश्चिकाः कृकलासाद्या दंशन्ति विषपायिनः ॥४५॥
ततो लालामुखे तांश्च न्यक्षिपद् यमराजकः ।
ततो मत्स्यादिकुण्डे च क्षारसागरनामके ॥४६॥

न्यक्षिपत्तान् जालनौकायाम्यभटैः प्रपीडिते ।
मत्स्यास्ते त्वभवँस्तत्र महामत्स्यादिभोजनाः ॥४७॥
मत्स्यैरुत्कर्तिताश्चापि भक्षितास्ते पुनः पुनः ।
उज्जीविनः पुनश्चापि भूत्वा कष्टानि यान्ति ते ॥४८॥
ततो निष्कासिताः सर्वे दीर्घकालेन कुण्डतः ।
सर्वपापातिदण्डस्य प्रान्ते धर्माज्ञया च ते ॥४९॥
प्रेता अभवन् शुष्के वै महारण्ये तु दुःखिनः ।
सहस्रवत्सरान्ते ते भुक्त्वा ताः प्रेतयातनाः ॥५०॥
क्षारसमुद्रके जाता मत्स्याः कृष्णाऽब्धिसंगमे ।
धीवरैर्जालयन्त्रैश्च धृतास्ते भक्षितास्ततः ॥५१॥
एवं कृतानां पापानां भोगान्तं प्राप्नुवँश्च ते ।
ततः पुण्यस्तरः प्राप्तो मनुष्यप्राणदानजः ॥५२॥
सर्वे ते मत्स्यनगरे वैष्णवानां गृहेऽभवन् ।
विप्राणां क्षत्रियाणां च नौपतीनां सुबालकाः ॥५३॥
नौकाभिर्ये तु वस्तूनां व्यापारं बहुदेशिनाम् ।
कुर्वन्ति धनदं श्रेष्ठमुद्यमं न तु हिंसनम् ॥५४॥
एवंविधानां पुत्रास्तेऽभवन् भक्तियुताः शुभाः ।
धनधान्यर्द्धिमद्गेहे यत्र तत्र सुखान्विताः ॥५५॥
विप्रभक्ताः साधुभक्ताः अहिंसाधर्मतत्पराः ।
देवपूजापराश्चापि दानिनो विघसाशिनः ॥५६॥
गवां सेवापराश्चापि साधुसाध्वीप्रपूजकाः ।
देवालयादिसेवायां श्रद्धालवो नयान्विताः ॥५७॥
कारितं मन्दिरं तैश्च नारायणस्य तत्र वै ।
लक्ष्म्या साकं हरिस्तत्र विधिना स्थापितो द्विजैः ॥५८॥
अथ भक्तो द्विजो विप्रो नाम्ना निर्वाणनाविकः ।
गार्हस्थ्यं सम्परित्यज्य त्यागाश्रमं विवेश ह ॥५९॥
साधुर्भूत्वाऽवसत्तत्र मन्दिरे पूजकः सदा ।
निर्वाणायननामाऽसौ वैष्णवः परमो यतिः ॥६०॥
देवसेवां भक्तसेवां सतां सेवां करोति च ।
वैष्णवानुत्सवान् दिव्यान् करोति कारयत्यपि ॥६१॥
कथां करोति सायं च मानवाश्च नराः स्त्रियः ।
श्रवणार्थाः समायान्ति नगरं वैष्णवं ह्यभूत् ॥६२॥
एकदाऽहं तस्य भक्त्या समाकृष्टो दयावशः ।
साधुर्भूत्वा वैष्णवाग्र्यः कथां श्रोतुं ययौ तदा ॥६३॥
अभ्यागतं च मां वीक्ष्योपावेश्य मां शुभासने ।
स्वागतादि चकारापि मम साधुः स शोभनः ॥६४॥
लक्ष्मीनारायणसंहितायाः कथोत्तरं त्वहम् ।
उपादिदेश तत्रैव सभ्येभ्यो दयया हरिः ॥६५॥
कथायाः श्रवणे कृष्णनारायणः प्रसीदति ।
श्रूयते यत्कथा सोऽत्र कृष्णः साक्षात् प्रजायते ॥६६॥
कथाफलं हरौ स्नेहो माहात्म्यवेदनेन वै ।
आत्मनिष्ठा च भगवन्निष्ठा मोक्षश्च धामनि ॥६७॥
मायामोहविनाशश्च हरेः सेवाऽर्जनं सदा ।
दिव्यता सर्वदा शाश्वतानन्दसंभृता तथा ॥६८॥
कथाफलं तु तत्प्रोक्तं श्रव्यैवं चादरात् कथा ।
प्रेमिभक्तस्य घटिका कृष्णं विना न गच्छति ॥६९॥
कृष्णेक्षणं विना स्थातुं शक्नुयान्न कथंचन ।
ज्ञानवान् भक्तिमाँश्चापि वैराग्यवान् स वर्तते ॥७०॥
दृढा स्थितिर्हरौ तस्य जायते चानपायिनी ।
नार्या अपि श्रियः कान्ते प्रीतिः स्यादनपायिनी ॥७१॥
ऐकान्तिकी पूर्णभक्ता सदा मुग्धा हरौ भवेत् ।
स्वकार्यसाधने रक्ता कृष्णादेव तदर्थिका ॥७२॥
मनो नान्यत्र यात्येव वसत्येव हरौ सदा ।
स्वकार्यं कृष्णकार्यं च भक्त्या साधयति ध्रुवम् ॥७३॥
कृष्णकान्ता कृष्णभक्ता सदा रक्ता हरौ भवेत् ।
स्वार्थं विहाय कृष्णस्य कार्यं सर्वं प्रसाधयेत् ॥७४॥
सर्वस्वार्पणभावा स्यात् सदाऽर्पिता हरौ भवेत् ।
एवं नार्यो भवन्त्येव मुग्धा रक्ताः समर्पिताः ॥७५॥
त्रेधा तासां पतिः कृष्णः समुद्धर्ता महार्णवात् ।
तासां तु श्रेयसे कृष्णो मानवो जायते पतिः ॥७६॥
अनुग्रहाय राजा वै रमणो मोक्षदो हरिः ।
साधूनां तु श्रेयसे स तापसो जायते ऋषिः ॥७७॥
राजरूपं साधुरूपं पतिरूपं प्रभुं तु याः ।
आश्रयन्ति तु ता दिव्या भवन्ति मुक्तकोटिकाः ॥७८॥
दिव्यदृष्ट्या हरिकृष्णं विदन्ति परमेश्वरम् ।
अनादिश्रीकृष्णनारायणं मापतिवल्लभम् ॥७९॥
यथा मिष्टसमुद्रस्य जलं पिबन्ति देहिनः ।
यथादेहं यथाशक्ति तृप्यन्ति च यथाबलम् ॥८०॥
पिपीलिकादिकमहामत्स्यान्ताः सर्वदेहिनः ।
तथापि ते समुद्रस्य पारं न यान्ति वै क्वचित् ॥८१॥
यथाऽम्बरस्य मशकादयश्च गरुडादयः ।
यथाशक्ति सुखं प्राप्योड्डयनं रचयन्ति हि ॥८२॥
तथाप्यन्तं न यान्त्येव व्योमाऽपारं निगद्यते ।
तथा श्रीकृष्णचन्द्रस्य पारं यान्ति न केऽप्यपि ॥८३॥
यथा भूमिगतो देही चन्द्रं स्थालं प्रपश्यति ।
स एवाऽन्तिकतां प्राप्तो महान्तं तं प्रपश्यति ॥८४॥

चन्द्रगतो जनश्चन्द्रमपारं सम्प्रपश्यति ।
तथा भक्तः समीपस्थोऽपारं कृष्णं प्रविन्दति ॥८५॥
उपासनाबलं स्वल्पं दीपवत् कथ्यते हि तत् ।
ततोऽधिकं बलं दाववह्निवज्जायते खलु ॥८६॥
ततोऽधिकतरं तत्तु महाभूताऽनलादिवत् ।
ततोऽधिकतमं तत्तु ब्रह्मधामसमं मतम् ॥८७॥
ब्रह्मतेजोभिरापूर्णो भक्तो विन्दति माधवम् ।
अपारं चातिदिव्यं च कृष्णं कान्तं मनोहरम् ॥८८॥
ब्रह्मरूपो महामुक्तो निषेवते परात्परम् ।
अनादिश्रीकृष्णनारायणस्वामिरमापतिम् ॥८९॥
भक्त्यभ्यासवशा नारी प्राप्नोति माणिकीपतिम् ।
सतां पतिं मुक्तपतिं ब्रह्मपतिं महाप्रभुम् ॥९०॥
यथा स्नेहप्रकाशादेराधिक्यं जायते तथा ।
कृष्णसुखं महद्दिव्यमाप्नोति मुक्ततां गतः ॥९१॥
कृष्णात्मा कृष्णमूर्तिश्च कृष्णानन्दपरिप्लुतः ।
मुक्तोत्तमो जायते वा नरो नारी समर्पितः ॥९२॥
भक्त्यभ्यासप्रतापेन कृष्णैक्यं चापि जायते ।
लक्ष्मीवद् राधिकावच्च माणिकीवत् सुशाश्वतम् ॥९३॥
नित्यं कृष्णो भजनीयः कृष्णनारायणप्रभो ।
हरे श्रीबालकृष्णश्रीपतेऽक्षरपते विभो ॥९४॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
मन्त्रं जपन्तु नित्यं वै नारायणस्य सेवकाः ॥९५॥
आत्मनिवेदिनः सन्तु कृष्णार्थसर्वनिश्चयाः ।
इत्युक्त्वाऽहं कथान्ते वै चतुर्बाहुस्तदाऽभवम् ॥९६॥
शंखचक्रगदापद्ममणिकिरीटकुण्डलैः ।
तेजोभिः शोभितो लक्ष्मि सर्वैर्जयेतिशब्दितः ॥९७॥
पूजितो हृदयैश्चापि भक्त्या चन्दनवारिभिः ।
वन्दितो निजमोक्षार्थं तथाऽस्त्वित्यवदं च तान् ॥९८॥
मनांस्याकृष्य सहसा तिरोभावं चिदम्बरे ।
अथ प्राप्ते समये तान् अनयं धाम मेऽक्षरम् ॥९९॥
कांश्चित् स्वर्गं तथाऽन्यांश्च सत्यं वैराजकं पदम् ।
अपरान् श्रीपुरं चान्यानमृतं त्वनयं तथा ॥१००॥
वैकुण्ठं चापि गोलोकमव्याकृतं परं पदम् ।
प्रापयामास भक्तांस्तान्नाविकान् जीवरक्षकान् ॥१०१॥
साधुरक्षकरान् साध्वीरक्षकान् बालरक्षकान् ।
जीवदानप्रदातॄंश्च भक्तान् द्वितीयजन्मजान् ॥१०२॥
एवं लक्ष्मि महापापान् कदाचिद् भगवत्कृते ।
साध्वीसाधुकृते गवां कृतेऽपि पुण्यकारकान् ॥१०३॥
कालान्तरेऽपि पुण्यानामुदये साधुयोगिनः ।
कृत्वा नयामि धामोर्ध्वमक्षरं परमं पदम् ॥१०४॥
पठनाच्छ्रवणादस्य स्मरणाच्चिन्तनादपि ।
भुक्तिर्मुक्तिर्भवत्येव यथेष्टा च गतिर्भवेत् ॥१०५॥
पापिपापानि नश्यन्ति श्रीहरेः स्मरणादपि ।
भक्तानां च यशोगानैः शुद्ध्यन्त्यघानि सर्वशः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने पूर्वजन्मनि धीवराणां मत्स्यमाराणां धीरपर्वादीनां याम्ययातनोत्तरं पूर्वाल्पपुण्येन नौपतिजन्मानि तत्र भजनं मोक्षणं चेत्यादिनिरूपणनामा त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं शूलारोपणकारिणः ।
जल्लादस्य कथां नाम्ना तारकादर्शकस्य वै ॥ १ ॥
चम्बावत्यां नगर्यां वै रावीनद्यास्तटान्तिके ।
महाकारागारदुर्गे शूलीदण्डविधायिनि ॥ २ ॥
नियुक्तोऽभूत् तारकादर्शकः शूल्यधिरोपकः ।
राजदण्डेन ये दण्डिताः स्युर्महापराधिनः ॥ ३ ॥
स्त्रीघ्ना गोघ्नाश्च बालघ्ना नरघ्ना मूर्तिभञ्जकाः ।
देवालयविनेष्टारः सर्वे शूल्यर्हदण्डिनः ॥ ४ ॥
तेषां शूल्यग्राधिरोहं करोति तारकादर्शिः ।
चम्बापुर्या महाराजो नाम्ना वै सुपथानकः ॥ ५ ॥
तारकादर्शकं जल्लादकं ररक्ष शूलिनम् ।
दुर्गमध्ये शूलिकाऽऽस्ते यत्र वैहायसाः सदा ॥ ६ ॥
पतत्रिणो भ्रमन्त्येव पिशिताशनकांक्षिणः ।
यां स्मृत्वा रोमकम्पो वै जायते धैर्यशालिनः ॥ ७ ॥
दृष्ट्वा हृत्स्तब्धता चापि निर्बलस्य प्रजायते ।
दण्डं श्रुत्वा परमेशं स्मरन्ति सज्जना अपि ॥ ८ ॥
पापिनोऽपि प्रभुं स्मरन्तीशेश पाहि मामिति ।
यमालयो यथा तद्वद् भयानकं स्थलं तु तत् ॥ ९ ॥
तत्र जल्लादवासोऽभूद् दिवानिशं हि दुर्गके ।
वेतनं लभते राज्यात् प्राणयात्रां करोति च ॥१०॥
शूलीदण्डार्हदुष्टाय दण्डदानक्षणात् पुरः ।
श्रावयत्येव नामानि कृष्णनारायणेति सः ॥११॥
रक्ष माधव गोविन्द पुनः पापात् प्ररक्षय ।
एषोऽहं शूलिकारूपे कृष्णेऽर्पितो भवामि च ॥१२॥

मम पापफलं चेदं भुंजे नान्योऽत्र दोषभाग् ।
पुनर्नैवं करिष्येऽघं पापान्मुक्तो भवामि चेत् ॥१३॥
शृण्वन्तु मानवाः सर्वेऽधिरोहामि स्वकर्मणा ।
मा शोचन्तु मम नाशं शोचन्तु पापकर्म वै ॥१४॥
मा कुर्वन्त्वपि पापानि मा शूलीमधियन्तु च ।
बान्धवाः पितरो माता सम्बन्धी पुत्रपुत्रिकाः ॥१५॥
सुहृदश्च प्रजालोका ये तु पश्यन्ति मामिह ।
ते धर्मं संपालयन्तु मे वक्तव्यं न चेतरत् ॥१६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इति सर्वे तदोच्चारयित्वा तं दण्डशालिनम् ॥१७॥
नेत्रयोः पट्टबन्धं च कृत्वोत्तोल्य जनैः शनैः ।
शूल्यग्रे तीक्ष्णधारेऽवस्थाप्यते पृष्ठगे तले ॥१८॥
मध्यभागे पृष्ठवंशे समतोले शनैः शनैः ।
उत्तानं दोषिणं शूलं यथा विशति पृष्ठके ॥१९॥
तदा जल्लादको भक्तो गृणाति कृष्ण कृष्ण वै ।
कृष्णनारायणकृष्ण संश्रावयति दोषिणम् ॥२०॥
पापनाशस्तथा मोक्षो यदोदयः प्रजायते ।
यद्वा पुनः शुभं जन्म यथा स्याद्दोषिणस्तथा ॥२१॥
सलिलं तुलसीमिश्रं तस्मै ददाति दोषिणे ।
ओष्ठयोश्चान्तिमे प्राणयानकाले हरिं गृणन् ॥२२॥
वाद्यानि बहुधा तत्र वादयन्ति नृपानुगाः ।
दुःखशब्दाक्रोशनादि यथा श्रूयेत नैव ह ॥२३॥
अथ प्राणे गते शूलाच्छवं चोत्तार्य भूतले ।
वह्निगर्ते क्षिपत्येव यद्वा सम्बन्धिने तदा ॥२४॥
कुटुम्बिने ददात्येव राजाज्ञया यथातथम् ।
एवं स तारकादर्शो दोषिणं प्रेषयत्यपि ॥२५॥
यमलोकं च वा कृष्णनाम संश्राव्य वै दिवम् ।
अन्तरामा हरिकृष्णो जानाम्यहं रमे हि तत् ॥२६॥
भक्तो मे तारकादर्शो वर्तते नामकीर्तने ।
एवं कृत्वा दण्डकर्म ततः स्नात्वा च मालिकाम् ॥२७॥
करे धृत्वा कृष्णकृष्ण सहस्रं स जपत्यपि ।
प्रायश्चित्तं तथा सप्तोपवासान् स करोत्यपि ॥२८॥
क्षमां प्रयाचते कृष्णाच्छूलीपापं क्षमस्व मे ।
अथ तीर्थे शुभे रावीनद्या जम्बुप्रदेशके ॥२९॥
स्नात्वा दानं ददात्येव वेतनात्तद्दिनोद्भवम् ।
साधून् प्रसेवते नित्यं करोति स्मरणं हरेः ॥३०॥
नित्यं ध्यानं हरेश्चापि पूजनं भजनं तथा ।
नैवेद्यार्पणमेवाऽपि ताम्बूलसलिलार्पणम् ॥३१॥

धूपं दीपं नमस्कारं नीराजनं स्तवं तथा ।
क्षमायाचनमेवाऽपि कृत्वा विसर्जनं नमः ॥३२॥
करोत्येव ततो भुक्त्वा प्रसादं तु निवेदितम् ।
स्वभृत्यतानियुक्तौ वै नम्रः समुपतिष्ठति ॥३३॥
मालामावर्तयन् हस्ते नारायणं रटँश्च माम् ।
भक्तान् वीक्ष्य नमस्कारं करोति चान्तरात्मने ॥३४॥
सर्वं ब्रह्माधिवासं च मत्वा मग्नो हि वर्तते ।
एवंविधो मम भक्तो जल्लादस्तारकादर्शिः ॥३५॥
भक्तौ मे दृढतां प्राप्तः सायं तु स्वगृहांगणे ।
नरान्नारीः समाहूय कीर्तनं तु निशामुखे ॥३६॥
कृष्णनारायणविष्णो जिष्णो राधारमापते ।
गोविन्दमाधववासुदेवकृष्ण श्रियः पते ॥३७॥
एवं रटति घटिकाद्वयं संभूय मानवैः ।
कीर्तनान्ते मम पूजां करोत्यारार्त्रिकं तथा ॥३८॥
प्रसादं सर्वभक्तेभ्यो ददाति मन्निवेदितम् ।
रात्रौ निद्रां करोत्येव कण्ठे धृत्वा तु मालिकाम् ॥३९॥
रटन् मन्नाम वै बालकृष्णकृष्णनरायण ।
एवं भक्त्या प्रसन्नोऽहं सञ्जातस्तस्य वै पुरः ॥४०॥
अदृश्यो वै भवाम्येव शृणोमि कीर्तनादिकम् ।
पश्यामि पूजनं चापि गृह्णामि स्नेहतः सदा ॥४१॥
अथैकदा तु भक्तं मे तारयितुं व्यचिन्तयम् ।
अस्य देयं मया नित्यं भोजनं जलमम्बरम् ॥४२॥
अयं मोक्षयितव्यश्च शूलीकर्मविधानतः ।
भक्तो मे रागरहितः शूलीकर्मणि सर्वथा ॥४३॥
तथापि प्राणयात्रार्थं वेतनार्थी करोति तत् ।
हिंसनं पापमेवाऽस्ति निमित्तः शूलदोऽपि च ॥४४॥
तत्रोद्विजते भक्तो मे प्रायश्चित्तं करोति च ।
तस्मान्मोचयितव्योऽयं शूलीकर्माऽधिकारतः ॥४५॥
विचार्येत्थं तदा लक्ष्मि कारागाराऽधिपोऽभवम् ।
कारागाराधिपरूपं धृत्वाऽगच्छं नृपं प्रति ॥४६॥
न्यवेदयं च राज्ञेऽहं तारकादर्शचेष्टितम् ।
शृणु राजन् कथयामि ततो यद् रोचते कुरु ॥४७॥
तारकादर्शकश्चायं नियुक्तो वेतनेन वै ।
शूली दण्डप्रदानार्थं दुष्टानां भवता ह्यपि ॥४८॥
भक्तोऽयं दयया युक्तः प्रायश्चित्तं करोति सः ।
पापं तु मन्यते शूल्यारोपणं दण्ड्यदेहिनः ॥४९॥
कृष्णकृष्णेति जपति सप्ताहं न भुनक्ति च ।
मृदुहृत् सदयचित्तः क्वचिद् दयावशंवदः ॥५०॥

क्वचिदाज्ञोल्लंघनं वै करिष्यतीति भाति मे ।
नायं योग्यस्तत्र कार्ये मृदुस्वभाववान् यतः ॥५१॥
क्रूरस्तत्र सदा योग्यो नियोक्तव्योऽपरो जनः ।
यत्र कार्ये सुविश्वासो यस्य तस्माद् भयं न वै ॥५२॥
अस्मात्तु मे भयं भाति ततस्तं त्वपसारय ।
अरण्यरक्षणं तस्मै देहि यत्र न हिंसनम् ॥५३॥
यस्माद्भयं न भंगस्य स्वाज्ञायाश्च नयस्य च ।
एवमुक्त्वा तथैवाज्ञापत्रं तत्रैव तत्तथा ॥५४॥
लेखयित्वाऽरण्यरक्षाकरं कृत्वा तिरोऽभवम् ।
पत्रं राजाज्ञया दूतद्वारा प्राप्तं सुखास्पदम् ॥५५॥
तारकादर्शनेनापि प्रसादः स मतो हरेः ।
पापस्थलादपसारः कृष्णेच्छयाऽस्ति वै मम ॥५६॥
योग्यं करोति भगवान् भक्तरक्षाकरो हरिः ।
मत्वैवं भगवद्वाञ्छां त्यक्त्वा शूलीस्थलं द्रुतम् ॥५७॥
आरण्याऽधिकृतिं तूर्णं जग्राहाऽधिकवेतनैः ।
महासुखः स सम्पन्नो वसत्यरण्यमण्डले ॥५८॥
कुटुम्बसहितो नित्यं रावीनदीतटे शुभे ।
वन्यैः फलैश्च कन्दैश्च पत्रैः शिम्बीजबीजकैः ॥५९॥
कणैः शुभौषधैरन्नै रसैश्च मधुभिस्तथा ।
निर्वहत्येव नूत्नैः स प्राणयात्रां सुखोदयाम् ॥६०॥
विदित्वा मे महिमानं भजतेऽधिकमेव माम् ।
उष्ट्रमारुह्य रात्रौ स दिवा चापि भटैः सह ॥६१॥
निरीक्षते महारण्यं राजेव वर्तते सदा ।
आरण्यका जना दुग्धदधिमायसमिष्टकैः ॥६२॥
सम्मानं संप्रकुर्वन्ति मिष्टान्नशर्करादिभिः ।
नूत्नसस्योद्भवं भक्ष्यं चार्पयन्ति वनेचराः ॥६३॥
क्षेत्रवाटीश्वराश्चापि सीमरक्षाधिकारिणे ।
यथा कश्चिन्नरकाद्वा कारागाराद् विमुच्य वै ॥६४॥
राज्याभिषेकमाधत्ते तद्वत् सुखमवासवान् ।
एवं वै तारकादर्शोऽभवत् सुखी कृपावशात् ॥६५॥
भक्तौ वृद्धिमवापैव ध्याने च भजनेऽर्हणे ।
नित्यं मालावर्त्तनं तु सहस्रं प्रकरोत्ययम् ॥६६॥
परात्मना सुखं दत्तं कथं भजे न माधवम् ।
मत्वैवं क्षेमकुशले नारायणं विशेषतः ॥६७॥
भजते मम भक्तो मां बहुधा भक्तिकर्मभिः ।
निजाश्रमे कृता मूर्तिर्मृण्मयी तेन शोभना ॥६८॥
कृष्णाश्मरीगैशाश्च केशास्तत्र सुयोजिताः ।
नेत्रे द्वाभ्यां कपर्दीभ्यां योजिते कृष्णबिन्दुके ॥६९॥
पुष्पावतंसौ गुच्छौ च कर्णयोर्निहितौ तदा ।
पद्मबीजकृता माला गुंजामाला तथाऽर्पिते ॥७०॥
स्फटिका भुजबन्धे च प्रकोष्ठे योजिताः शुभाः ।
ऊर्मिकाश्च कृता दर्भपत्रैश्च मुञ्जशृंखलाः ॥७१॥
फलाहारा धारिताश्च वस्त्राणि वल्कलान्यपि ।
कम्बलो मृगचर्माऽपि पुष्पशृंगारकाणि च ॥७२॥
यथाकालोद्भवान्येव समर्पितानि शार्ङ्गिणे ।
चतुर्भुजं स्वरूपं तच्छंखचक्रगदाब्जधृक् ॥७३॥
तथा पार्श्वे शुभा लक्ष्मीर्युवती सुविभूषिता ।
सर्वाभरणयुक्ता च कृता वन्यसुवस्तुभिः ॥७४॥
कुंकुमाऽलक्तकाद्यैश्च यथास्थानं सुशोभिता ।
पात्राणि वन्यपत्राणि कुटी वंशादिसंभवा ॥७५॥
उपचाराणि वन्यानि कृतानि भक्तियोगिना ।
गावस्तेन सुदोग्ध्र्यश्च रक्षिता भगवत्कृते ॥७६॥
अरण्ये तृणघासादिबाहुल्येन सुपोषिताः ।
नित्यमेवं प्रगे स्नात्वा पूजयित्वा रमां प्रभुम् ॥७७॥
पुष्पहारादिभिः सम्यक् शृंगार्य चन्दनादिभिः ।
मधुभिर्मिष्टगुन्द्रैश्च वृक्षसारैः फलादिभिः ॥७८॥
मिष्टरसैर्मिष्टकन्दैर्नैवेद्यं च जलं तथा ।
ताम्बूलकं च दीपं च धूपं प्रदक्षिणं स्तुतिम् ॥७९॥
अपराधक्षमां नमो दण्डवत् कुसुमाञ्जलिम् ।
परिहारं विदधाति नित्यमेवं करोति सः ॥८०॥
मध्याह्ने भोजनं सायं पूजानीराजनाऽदनम् ।
समर्प्य धूपदीपादि करोति कीर्तनं सदा ॥८१॥
तस्य भार्या कृतशल्या प्रातरुत्थाय नित्यदा ।
स्नात्वा पुष्पाणि चानीय निर्माय मालिकादिकम् ॥८२॥
अर्पयत्येव कृष्णाय नमत्यपि शतं मुहुः ।
ततः क्षमार्थनां कृत्वा पतिं नत्वा गृहक्रियाम् ॥८३॥
करोति सतं चैवं मध्याह्ने भोजनार्पणम् ।
सायं तथैव नैवेद्यार्पणं करोति मिष्टकम् ॥८४॥
शृंगारभूषावेषादि चावतार्य श्रियं प्रभुम् ।
योग्यवेषं धारयित्वा निद्रापयति वै निशि ॥८५॥
प्रातर्वेषं सुशृंगारं धारयत्युत्तमं नवम् ।
यत्पक्वं पाचितं सर्वं निवेदयति शार्ङ्गिणे ॥८६॥
प्रसादान्नजलं शाकं तुलसीदलमिश्रितम् ।
भुंक्ते कुटुम्बकं नित्यं पुत्रपुत्र्यादिसंहितम् ॥८७॥
एवं वै वर्तमानस्य तारादर्शस्य चाल्यम् ।
अभ्यागतस्वरूपोऽहं जटी भूत्वा वनी ययौ ॥८८॥

सायंकाले कुटुम्बेन स्नेहेन स्वागतं मम ।
कृतं साधुं विदित्वैव जपन्तं श्रीनरायणम् ॥८९॥
भोजितोऽहं पूजितश्च पायितोऽङ्गेषु मर्दितः ।
स्वापितः शयने प्रातरुत्थापितो नमस्कृतः ॥९०॥
संस्नापितः पूजितश्च भोजितो दक्षिणाऽर्पितः ।
प्रसन्नतां प्रति सम्यगर्थितो मोक्षणं प्रति ॥९१॥
तथाऽस्त्वेवमुच्चरितः प्रस्थापितोऽतिभावुकैः ।
तदाऽहं दिव्यरूपेण संवर्तितश्चतुर्भुजः ॥९२॥
श्रीयुतो दिव्यतेजोभिर्व्याप्तः प्रसन्नतायुतः ।
भक्तभक्तिवशो दत्वाऽऽशीर्वादं मोक्षणं प्रति ॥९३॥
प्रसादं पुष्पहारांश्च दत्वा दशकुटुम्बिने ।
तिरोभवं द्रुतं तत्र प्रतिमायां हि पश्यताम् ॥९४॥
अत्याश्चर्यं च ते प्राप्ता दिव्यदृष्टिं प्रपेदिरे ।
तत आरभ्य मूर्तौ मां लक्ष्मीयुक्तं सुदर्शनम् ॥९५॥
नित्यं दिव्यं प्रपश्यन्ति साक्षाद्वै पितरौ यथा ।
कृतकृत्याश्च ते जाता दिव्या मेऽनुग्रहात् खलु ॥९६॥
अथ काले प्रसंप्राप्ते विमानेन सुतेजसा ।
अनयं तानक्षरं मे धाम लक्ष्मि परात्परम् ॥९७॥
एवं भक्तस्य मोक्षो वै मया कृतो दयालुना ।
मुमुक्षूणां हृदयेऽस्मिन् विशेषतोऽवनार्थकः ॥९८॥
पापाः पापसमाचाराः पापिसंगाश्च मानवाः ।
पापनाशेच्छया मां वाऽऽश्रयेयुः साधुसत्तमान् ॥९९॥
विधूय तेषां पापानि दत्वा पुण्यानि सर्वथा ।
पावनान् देहिनः कृत्वा दत्वा दिव्यतनूस्ततः ॥१००॥
नयामि वा दिवं सत्यं श्रीपुरं चामृतं च वा ।
अव्याकृतं वा वैकुण्ठं गोलोकं वाऽक्षरं पदम् ॥१०१॥
परं पदं प्रापयामि राजाधिराजशोभनम् ।
ददामि सेवनं तत्र पादयोर्मम सर्वदा ॥१०२॥
पठनाच्छ्रवणादस्य स्पर्शनाद् वर्तनादपि ।
भुक्तिर्मुक्तिर्दिव्यगतिर्जायते मोक्षणं रमे ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने शूलीप्रदस्य तारकादर्शस्य तत्पत्न्याः कृतशल्यायाश्च भक्त्याऽभ्युदयो मोक्षणं चेत्यादिनिरूपणनामैक-त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वमन्यदस्य कथामपि ।
ज्वालाप्रसादनामाऽभूच्छूद्रोऽरण्यप्रपालकः ॥ १ ॥
वृत्रप्रस्थवने कालिन्दीसरितस्तटे पुरा ।
कुटुम्बसहितस्तत्र वने वासं करोति सः ॥ २ ॥
वन्यमूलफलादश्च काष्ठव्यापारकृत्तथा ।
घासवल्लीतृणस्तम्बौषधिव्यापारकृत्तथा ॥ ३ ॥
अहिंसकविचारोऽपि प्राणयात्राभिवृत्तये ।
निरर्थकानां काष्ठानामंगारान् विदधाति सः ॥ ४ ॥
काष्ठानां सञ्चयान् कृत्वा वह्निं ददाति तत्र च ।
अंगाराः सम्प्रजायन्ते शान्ताऽनलाः सुमूल्यकाः ॥ ५ ॥
विक्रीणाति त्वर्धदग्धान् भट्टीस्थान् कुलसान् सदा ।
तैश्च द्रव्यैर्धनवान् स वर्तते दानपुण्यकृत् ॥ ६ ॥
जानात्यथं दारुदाहेऽसंख्यजन्तुप्रजातयः ।
दह्यन्ति सञ्चये तत्र पापं तस्य महन्मम ॥ ७ ॥
तच्छान्त्यर्थं विधातव्यं दानं विंशतिकांऽशजम् ।
धर्मकार्यं प्रकर्तव्यं साध्वीसाधुप्रसेवनम् ॥ ८ ॥
उत्सवाः श्रीहरेः कार्याः पूजनं व्रतमित्यपि ।
देवालये प्रदातव्यं देयमनाथदेहिने ॥ ९ ॥
निराश्रिताये दातव्यं दातव्यं तीर्थवासिने ।
परोपकाराय दातव्यं दातव्यं मखिने तथा ॥१०॥
तदा पापविशुद्धिर्वै जायते नान्यथा क्वचित् ।
मत्वैवं निजवस्तूनां स्वधनानां सुपात्रके ॥११॥
समर्पणं करोत्येव श्रद्धया धार्मिके जने ।
ये तीर्थार्थं समायान्ति तेभ्यो ददाति भोजनम् ॥१२॥
वस्त्रदानं तथाऽऽरण्यकोत्थौषध्यर्पणं तथा ।
करोति समिधां दानं साधुभ्योऽनलधूनये ॥१३॥
नित्यं भजते श्रीकृष्णं राधाकान्तं रमापतिम् ।
कमलेशं प्रभेशं श्रीमाणिकीस्वामिनं हरिम् ॥१४॥
यमुनायां सदा स्नाति सूर्यायाऽर्घं ददाति च ।
पितृभ्यश्च जलं श्राद्धं फलं चान्नं ददाति च ॥१५॥
ददात्यतिथये योग्यं वनिभ्योऽपि ददाति च ।
अथाऽयं कृतवान् काष्ठप्रतिमां श्रीहरेर्मम ॥१६॥
साकं श्रीमाणिकीदेव्या शोभमानां सुतैजसीम् ।
प्रसन्नवदनां शान्तां रंगशृंगारशोभिताम् ॥१७॥
सर्वावयवसम्पूर्णां दिव्याभूषणचित्रिताम् ।
प्रातश्चाऽयं सदोत्थाय स्नात्वा प्रसेवते हि ताम् ॥१८॥
काष्ठसिंहासने रम्ये स्थापितां पार्षदैर्युताम् ।
पाद्यमर्घ्यमाचमनं स्नानं तैलादिमर्षणम् ॥१९॥
गोदुग्धघृतदध्याढ्यशर्करामधुभिस्तथा ।
स्नपनं चाभिषेकं च पादांगुष्ठे करोति सः ॥२०॥

वस्त्रेण मार्जनं दन्तधावनं गण्डुषांस्तथा ।
कारयित्वा विभूषादि दिव्याम्बराणि यानि च ॥२१॥
शृंगाराणि समस्तानि गन्धचन्दनकुंकुमम् ।
पुष्पहारमुकुटादि पुष्पवेषान् ददाति मे ॥२२॥
धूपं दीपं च नैवेद्यं फलान्नमिष्टमुत्तमम् ।
जलं दुग्धं पायसान्नं दधि पक्वान्नमुत्तमम् ॥२३॥
मह्यं ददाति ताम्बूलं मुखवासं तथोत्तमम् ।
प्रदक्षिणं दण्डवच्चाऽऽरार्त्रिकं नमनं स्तवम् ॥२४॥
अपराधक्षमायाञ्चां करोत्यात्मसमर्पणम् ।
परिहारं च पूजायाः कृत्वा निवेदितान्नकम् ॥२५॥
भुंक्ते प्रसादमेवाऽयं तत्पत्नी च तथाविधा ।
नाम्ना प्रभावतीदेवी पुत्राः पुत्र्यस्तथाऽपरे ॥२६॥
भुञ्जते तत्प्रसादान्नं ततो यान्त्युद्यमाय ते ।
मध्याह्नेऽपि तथा रात्रौ पूजां मे विदधत्यपि ॥२७॥
नैवेद्यं जलपानं चाऽऽरार्त्रिकं स्तवनं तथा ।
कीर्तनं श्रीकृष्णविष्णो बालकृष्णरमापते ॥२८॥
राधेशमाणिकीस्वामिन् श्रीपते कमलापते ।
कृत्वा च परिहारं ते नयन्ति पुरतो मम ॥२९॥
गायन्ति गीतिका रम्याः स्वपन्ति च ततः परम् ।
एवं नित्यं भजमाना वर्तन्ते सर्व एव ते ॥३०॥
अथैकदा महायोगी नाम्ना नरायणायनः ।
साधुसाध्वीशतयुक्तश्चाययौ तस्य मन्दिरम् ॥३१॥
प्रभावती तथा ज्वालाप्रसादः स्वागतं सताम् ।
साध्वीनां साधुवर्यस्य व्यधातां सत्कृतिं तथा ॥३२॥
आसनानि जलं मिष्टं मिष्टान्नानि फलानि च ।
मधूनि च रसाँश्चापि कन्दान् शिम्बीश्च चिर्भटान् ॥३३॥
भर्जितान्नानि शुष्काणि सक्तूँश्च चणकाँस्तथा ।
शाकानि पत्रभाजाश्च ददतुश्चातिहर्षितौ ॥३४॥
साधुसाध्व्यः प्रसन्नाश्च तृप्ताश्चासँस्तदा सुखाः ।
सायं स्नानं भोजनादि दुग्धपानं च पूजनम् ॥३५॥
श्रीहरेः कीर्तनं चक्रुर्वाद्यगीतिसुतालकैः ।
तत्रोत्सवे जना रात्रौ बहवो वै समाययुः ॥३६॥
नरा नार्यः सहस्राणि साधुदर्शनलालसाः ।
वृत्रप्रस्थनगरस्य प्रजाश्चापि समाययुः ॥३७॥
अरण्ये यमुनातीरे स्वर्गवत् स्वभवजनैः ।
साधूनां दर्शनं कृत्वा तिष्ठन्ति मानवास्तदा ॥३८॥
निषीदन्ति सभायां च कथाश्रवणलालसाः ।
नारायणायनस्तत्रोपादिदेश हिताय वै ॥३९॥

स्नेहेन भक्तियोगेन कृष्णस्य तत्सतां च वा ।
सतीनां सेवया मूर्तिपूजनैर्देवतार्चनैः ॥४०॥
पवित्रता भवेच्चापि दिव्यता मोक्षणं तथा ।
परमेशस्य साक्षाद्वै प्राप्तिर्भवेच्च सेवया ॥४१॥
भक्त्या भवति सान्निध्यं स्नेहेन परमात्मनः ।
मायानाशो भवत्यत्र दिव्यदृग्जायते जनः ॥४२॥
साक्षात्पश्यति गोविन्दं चान्तरे च बहिस्तथा ।
मायाऽऽवरणरहितो जायते ईश्वरो यथा ॥४३॥
गोलोकं वीक्षते त्वत्र वैकुण्ठं चाऽक्षरं पदम् ।
सेवयाऽतस्तोषणीयाः सन्तः साध्व्यो हरिस्तथा ॥४४॥
प्रसन्नानां सतामाशीर्वादैः साक्षाद्भवेद्धरिः ।
सत्सु नारायणस्त्वास्ते स्वर्गमोक्षसुखप्रदः ॥४५॥
दिव्यानन्दस्य लाभार्थं सेव्याः सन्तस्तथा हरिः ।
श्रद्धया च विवेकेन सत्संगः कार्य उत्तमः ॥४६॥
धर्मो ज्ञानं विरागश्च सत्सेवा मोक्षदा इमे ।
कल्याणकारिणः सर्वे उपार्जनीयाः सद्गुणाः ॥४७॥
असत्सु नैव सहसा विश्वसितव्यमर्थिना ।
तथा सति विवर्धन्ते तृष्णाद्या दुर्गुणाः सदा ॥४८॥
क्षारभूमिसमो मर्त्यो योऽस्ति नास्तिक्यभाववान् ।
तत्र बीजं स्नेहभक्तिर्नोदेति दग्धतामियात् ॥४९॥
असज्जनप्रसंगो हि पतनस्यैव कारणम् ।
महान् पाप्मा समुदेति कुसंगिजनसंगतः ॥५०॥
सत्संगः सर्वपुण्यानां शेवधिः पापनाशकृत् ।
सत्संगमूल्याऽविज्ञास्तु मानुष्याऽर्थविरुद्धगाः ॥५१॥
कुर्वते च कुसंगं वै ततो यान्त्यधमां स्थितिम् ।
कलहेन विवादेन निद्रया पापकर्मभिः ॥५२॥
अकार्याचरणैश्चापि म्रियन्ते दोषपीडिताः ।
पुनर्जन्म च मरणं निरयं चाप्यधोगतिम् ॥५३॥
विन्दन्ति याम्यनगरीं यातनास्तत्र योजिताः ।
विवेकिनस्तु लोकेऽत्र विदित्वा जडवर्ष्म च ॥५४॥
इन्द्रियाणि मनो बुद्धिं ज्ञात्वा मायामयानि च ।
त्रिगुणान् प्रकृतिं चापि वासना विविधास्तथा ॥५५॥
जीवबन्धप्रदा ज्ञात्वा भवेयुः संगवर्जिताः ।
नित्याऽभ्यासपरस्यैव नश्यन्ति वासनादयः ॥५६॥
त्यागिनो न प्रजायन्ते संस्कारा मूलवर्जिताः ।
अनादिश्रीकृष्णनारायणोऽस्त्येषां हृदन्तरे ॥५७॥
प्रवेष्टुं न ददात्येषो दोषान् भक्तहृदन्तरे ।
देहाभिमानयुक्तस्य प्रभुर्हृदि न भासते ॥५८॥

अभासे हृदये तमोमये माया विवर्धते ।
अहन्ताममते पुष्टिं गच्छतस्तेन वासनाः ॥५९॥
प्रजायन्ते तु बहुधा तृष्णातन्तुर्विवर्धते ।
पुनः पापानि जायन्ते तृष्णया विषयेष्विति ॥६०॥
तस्मादात्मा चेतनोऽस्मि देहादीनां नियामकः ।
कृष्णभक्तो ब्रह्मधामा मत्वैवं तृष्णिकां त्यजेत् ॥६१॥
अप्रमत्तेन विज्ञेन सदा भाव्यं सुखार्थिना ।
हरेः सुखार्थं सततं यतितव्यं निजार्थिना ॥६२॥

दोषास्तं नार्दयेयुर्वै ते नश्यन्ति हरेर्बलात् ।
आत्मनिष्ठं जनं नाभिभवन्ति वासनादयः ॥६३॥
साधुसेवार्थिनं निष्कपटिनं भक्तमानतम् ।
साधुप्रसन्नताशीर्णा दोषाः पराभवन्ति न ॥६४॥
दुष्टस्वभावः सत्संगान्नश्यत्येव समूलतः ।
तेन दोषा विलीयेरन् सत्संगिनस्तु देहिनः ॥६५॥
आबाल्यादेव कर्तव्यः सत्संगः प्रीतिरच्युते ।
हरेर्भक्तेषु वै स्नेहः कर्तव्यो हरिदायकः ॥६६॥

तारुण्ये येन वै भक्तिः प्रवर्तेत दृढा हरौ ।
भक्तिबलेन कामाद्या नार्दयेयुर्हि देहिनम् ॥६७॥
साधून् शान्तान् प्रसेवेत विकारवर्जितान् सदा ।
विकारो विलयं गच्छेद् यौवनं तरितं भवेत् ॥६८॥
साधुजनेषु विकृतिं कल्पयेन्न कदाचन ।
दोषाणां कल्पके दोषा आविर्भवन्ति पापतः ॥६९॥
अविवेकेन दोषैर्वै कल्पितैः पीड्यते स्वयम् ।
तस्माद् दिव्यान् प्रपश्येद्वै साधून्नारायणात्मकान् ॥७०॥

यदि कश्चित्प्रतीयेत दोषः सत्सु तदा स्वयम् ।
दोषो नाऽयं गुणश्चास्ति दिव्य एव न संशयः ॥७१॥
एवं दिव्यः कल्पनीयः स्वस्य स्याद् दिव्यता तथा ।
दोषग्राही भवेद् दोषी गुणग्राही गुणी भवेत् ॥७२॥
देहत्रयं पृथङ्मत्वा शान्तं साधुं निषेवयेत् ।
शान्तिं व्रजेत् सेवया च शाश्वतीं पारमेश्वरीम् ॥७३॥
निश्छद्मोपासना कार्या हरेः सतां शुभावहा ।
हरेः प्रसन्नताप्राप्त्या हरित्वं जायतेऽनुगे ॥७४॥

ज्ञानदार्ढ्यं स्नेहदार्ढ्यं हरौ सत्सु प्रमुक्तिदम् ।
सेवा स्नेहेन भवति प्रित्या स्मृतिर्हि शाश्वती ॥७५॥
सत्येवं तन्मयत्वं स्यात् व्यवस्थासु हि दर्शनम् ।
साक्षात्कारे तु सञ्जाते कर्तव्यं नाऽवशिष्यते ॥७६॥
अनादिश्रीकृष्णनारायणे मानवरूपिणि ।
देहे प्राग्दर्शनं पश्चादिन्द्रियेषु हि दर्शनम् ॥७७॥

ततोऽन्तःकरणेष्वेव ततो जीवे हि दर्शनम् ।
एवं दिव्यो हि भगवानास्ते देहेन्द्रियात्मसु ॥७८॥
दैहिकीं प्रकृतिं दृष्ट्वा कृष्णस्य दिव्यतां तु यः ।
मानसीं प्रकृतिं ज्ञात्वा दिव्यतां मनुते च यः ॥७९॥
आत्मीयां भावनां भाव्य दिव्यतां चिन्तयेत्तथा ।
सर्वा दिव्याः कृष्णलीला मोक्षदाश्चेति कल्पयेत् ॥८०॥
एवं कृष्णस्य योगेन आन्तरं बाह्यमित्यपि ।
करणं वर्ष्म सर्वाणि दिव्यान्येव भवन्ति हि ॥८१॥

दिव्येन दिव्यभगवान् गृह्यते भक्तियोगिनः ।
नाऽदिव्येन हरिर्ग्राह्यो जायते मानवोऽपि सन् ॥८२॥
भक्ता दिव्यास्ततः सर्वे दिव्यकृष्णस्य योगिनः ।
व्यवस्था अपि दिव्याश्च दिव्याः कामादयोऽपि च ॥८३॥
दिव्यं भक्तस्य सर्वं वै यत् कृष्णार्थं प्रकल्पितम् ।
जीवानां श्रेयसे कृष्णः महत्या कृपया प्रभुः ॥८४॥
अक्षरात्परमाल्लोकादिह भूमौ प्रजायते ।
कल्याणाय जनान् नैजं सत्संगं कारयत्यपि ॥८५॥

नराकृतिश्च नरवत् कुरुते लौकिकीः क्रियाः ।
ता अपि तस्य लीला वै दिव्या विदन्तु मानवाः ॥८६॥
कल्याणदा समस्ता वै दिव्या भवन्तु दर्शकाः ।
एवं वै भगवान् स्वेच्छाकृतदिव्यान्निजाश्रितान् ॥८७॥
ददाति दर्शनं संगं स्वस्य भक्तस्य केवलम् ।
अतो भक्तेन्द्रियादीनि कृष्णभावं प्रयान्ति हि ॥८८॥
दिव्यकृष्णस्य सम्बन्धाद् दिव्यानि मायिकानि न ।
यथा कृष्णोऽस्ति दिव्यो वै तथा दिव्याश्च साधवः ॥८९॥

अदोषग्राहका भक्ता अपि दिव्या हि साधुवत् ।
नरा नार्यः सदा दिव्या अदोषग्राहिणस्तु ये ॥९०॥
सत्संगो दिव्य एवास्ति सन्तो दिव्या हरिस्तथा ।
निर्दोषा मोक्षदाः सर्वे मायाकार्यविवर्जिताः ॥९१॥
यस्य तेषु भवेद् दोषग्रहणं तस्य वै मतिः ।
पितृभ्यां शापिता पूर्वं साधुभिस्तु ततः परम् ॥९२॥
अतिक्रमेण साधूनां शापाद् बुद्धिः प्रदुष्यति ।
साधवो दिनवत् सन्ति दुर्बला भगवत्प्रियाः ॥९३॥

तेषामर्दनकाले वै हृदयस्थो हरिः स्वयम् ।
अर्दितो जायते तेन शप्तस्य धीः सुशापिता ॥९४॥
दग्धा भवति दुष्टा वै दोषग्राह्या न निर्मला ।
तां विनाशयितुं नित्यं यतेत सेवने सताम् ॥९५॥
तन्वा मनसा द्रव्यैश्चेन्द्रियैश्च सम्पदा सदा ।
साधोः प्रसादलब्ध्यर्थं सेवायां निरतो भवेत् ॥९६॥

सर्वस्वार्पणभावेन सेवते लभते स तु ।
नैर्मल्यं निःशापतां च दिव्यतां गुणग्राहिताम् ॥९७॥
शुद्धिं लभेत्ततः कृष्णं प्रसाद्याऽक्षरमाव्रजेत् ।
साधून् प्रसाद्य च दिव्यं नारायणाश्रमं लभेत् ॥९८॥
तस्मान्नित्यं साधुजनान् प्रसेवन्तु प्रमुक्तये ।
ज्ञानाग्निना प्रदाह्येदं ब्रह्माग्नौ जुह्वतु स्वकान् ॥९९॥
इत्येवं तूपदिश्यैव ददौ मन्त्रं हरेः रमे ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१००॥
पादवार्यमृतं तेभ्यो ददौ नारायणाय नः ।
लक्ष्मि रात्रौ प्रविश्रम्य प्रातः स्नात्वा च साधवः ॥१०१॥
प्रपूज्य पद्मात्मानं भुक्त्वा फलादिकं पयः ।
भक्तानाशीर्वचश्चोक्त्वा ययुस्तीर्थाय साधवः ॥१०२॥
भक्तास्ते श्रीकृष्णनारायणं मां कृष्णवल्लभम् ।
भेजुः स्नेहेन सततं ज्वालाप्रसादभाविताः ॥१०३॥
अथोत्सवं प्रचक्रुस्ते कार्तिके द्वादशीदिने ।
शुक्ले चैकादशीरात्रौ जागरणे प्रगे सति ॥१०४॥
नृत्यतां कीर्तयतां च प्राविरासं पुरःस्थले ।
चतुर्भुजो माणिकीश्रीसहितो दिव्यभूषितः ॥१०५॥
तैः कृतामर्हणां सर्वां प्राप्य तिरोऽभवं क्षणात् ।
मूर्तौ तत्रैव नित्यं च न्यवसं प्रेमपाशगः ॥१०६॥
प्राप्ते काले मम धामाऽनयं ज्वालाप्रसादकम् ।
प्रभावतीं च तत्पत्नीं तथा भक्तान् सहस्रशः ॥१०७॥
एवं लक्ष्मि मया भक्तस्तारितो भवसागरात् ।
पठनाच्छ्रवणादस्य भवतारणमाप्नुयात् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने ज्वालाप्रसादाख्यस्यांऽगाराग्निकृतो भक्तस्य भक्त्या नारायणायनसाधुसमागमेन तस्य तत्पत्न्याः सहस्रावधिदेहिनां च मोक्षणं भगवता कृतमित्यादिनिरूपणनामा द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं गरदस्यापि मोक्षणम् ।
काशमित्रे रम्यदेशे श्रीनगरे सुखावहे ॥ १ ॥
झिल्लिमासरितस्तीरेऽभवद्भक्तो लवादनः ।
कुटुम्बवान् विप्रवर्योऽधीतविद्यः सुधार्मिकः ॥ २ ॥
ख्यातवंशी महामानः श्रीपुराधिपमानितः ।
राजा श्रीनगरस्याऽऽसीन्नाम्ना श्रीमानवेश्वरः ॥ ३ ॥
तेन सम्मानितो नित्यं सभायां कृतशेखरः ।
न्यायालयेऽपि मूर्धन्यः प्रजायां चातिमानवान् ॥ ४ ॥
लवादनोऽपरो राजा राजेव वर्तते तदा ।
कृतराज्यसमस्ताऽभ्युदयः शिक्षाविभागके ॥ ५ ॥
सैन्यस्थानातिकुशलो व्यापारे निपुणस्तथा ।
बुद्धिमान् वर्तते चैवं राज्याऽप्यतीव मानितः ॥ ६ ॥
एवंविधः प्रधानोऽयं गुरुश्चापि नृपस्य वै ।
करोति राज्यकार्याणि राष्ट्रकार्याणि यान्यपि ॥ ७ ॥
नृपे प्रजायां सैन्ये वा राष्ट्रे क्षतिं प्रवीक्ष्य सः ।
निःसंशयः समानश्च बुद्ध्या वारयति क्षतिम् ॥ ८ ॥
नृपं प्रजाश्च सैन्यानि त्वापद्गतानि रक्षति ।
आस्तिको देववल्लोके मानपात्रं स वर्तते ॥ ९ ॥
नित्यं सूर्यं हरं विष्णुं चन्द्रमसं च वेधसम् ।
वह्निमिन्द्रं सुवर्णं च मायां जीवं सचार्हति ॥१०॥
दशायतनभक्तोऽयं दशधर्मान् करोत्यपि ।
जलदानं चर्मदानं लक्ष्मीदानं तु नैकधा ॥११॥
औषध्यर्पणमाभूषार्पणं घृतार्पणं तथा ।
धनुर्दानं स्वर्णदानं कन्यादानं कथार्पणम् ॥१२॥
एवं धर्मान् करोत्येव तथाऽन्यानपि चोचितान् ।
गृहक्षेत्रालयवाप्युद्यानार्पणं करोत्यपि ॥१३॥
राज्यलक्ष्मीव्ययाऽऽदानसमर्थो वर्तते महान् ।
एवंविधोऽयं भक्तश्च दशदेवान् प्रसेवते ॥१४॥
ज्ञानवानपि धर्मात्मा क्वचित्तामसभाववान् ।
करोति तामसं कार्यं दण्डे हिंसात्मकं महत् ॥१५॥
राजानं राजपुत्रं वा स्वपुत्रं वा परं प्रजाः ।
दण्डयं दण्डं करोत्येषो धर्मशास्त्रानुसारतः ॥१६॥
अथ काले गते राजा प्रौढो युवाऽतिराजसः ।
मृगयायां प्रवृत्तोऽभूद् व्यवाये च शनैः शनैः ॥१७॥
प्रजायां सव्यवायं वै प्रसह्य प्रकरोति हि ।
तेनाऽस्य मानवेशस्य प्रजासु निन्दन तथा ॥१८॥
त्रासः प्रजायते नित्यं प्रजाधर्षणकारणात् ।
पुत्रा नृपतेरभवन् पञ्च पुत्र्यश्च विंशतिः ॥१९॥
राज्यः सप्ताऽभवँश्चापि युवयश्च तथापि सः ।
कामनाबलसंकृष्टो व्यवाये वर्तते सदा ॥२०॥
मद्यासवपिशितादश्चातिपापपरोऽभवत् ।
अथाऽस्य निग्रहार्थं वै प्रजा लवादनाय ह ॥२१॥
मुहुः सम्प्रार्थयामासुर्धर्मदण्डप्रदानकम् ।
लवादनः शुद्धोऽपि राजद्रोही भवेत्तथा ॥२२॥

अदण्डे तु प्रजाद्रोहः कर्तव्यमत्र किं मया ।
एवं विचार्यमाणे च मार्गः शनैरबुध्यत ॥२३॥
युवराजाय दातव्यं राज्यं राजा निरर्थकः ।
शासनीयः स्वयमेव भविष्यत्यपसत्तया ॥२४॥
लवादनेनैकदा तु राज्ञे सत्त्वस्थिताय च ।
आवेदितं शुभं वाक्यं ज्ञानगोष्ठ्या हितावहम् ॥२५॥
असारः खलु संसारस्तत्र सारो हि मोक्षणम् ।
सेवया तु सतां यद्वा नारायणसमाश्रयात् ॥२६॥
पापनाशस्तथा मोक्षः प्रजायते हि देहिनाम् ।
राज्यं सम्पद् बान्धवाश्च प्राणयाने ह्युपागते ॥२७॥
न रक्षन्ति महाराज चक्रवर्तिनमित्यपि ।
रक्षत्येव कृतो धर्मो नाऽधर्मो रक्षति क्वचित् ॥२८॥
धर्म एव परे लोके सेवितः सेवते जनम् ।
अधर्मो बाधते त्वत्र परे लोकेऽपि शत्रुवत् ॥२९॥
निवृत्तिं प्राप्य भगवान् भजनीयो हितैषिणा ।
पुत्रे योग्ये धुरं दत्वा मोक्षः साध्यः सुखार्थिना ॥३०॥
कामानां नैव सीमाऽस्ति वर्धन्ते तृष्णया सह ।
पातयन्ति निरये तेऽर्दयन्ति ज्वालयन्ति च ॥३१॥
कामाँस्त्यक्त्वा हृदयस्थान् नारायणार्पणं चरेत् ।
व्यवहारस्य भक्तेश्च कामानां न सह स्थितिः ॥३२॥
भक्तिं कर्तुं व्यवहारं कामाँस्त्यजेत् वृषार्थवान् ।
तस्माद् राज्यं कुमाराय देयं शान्तेश्वराय ते ॥३३॥
ज्येष्ठपुत्राय योग्याय शोभनं तद् भविष्यति ।
श्रुत्वा राजाऽन्तरे वह्निज्वालयेव ह्यदह्यत ॥३४॥
सतृणस्य विषं सर्वं चामृतं ह्यपि पङ्कजे ।
हितवाक्यं त्यागवाक्यं विषायते न संशयः ॥३५॥
स तु नीत्वाऽवदत्तं स्वप्रधानं गुरुमुत्तमम् ।
लवादन गुरो योग्यं भवता मे निवेदितम् ॥३६॥
तथापि कस्यचित् कालस्याऽन्ते दास्यामि तत्तथा ।
पुत्रे तु योग्यता पक्वा तावद्राज्ये भविष्यति ॥३७॥
अभ्यासेन ततो राज्यं दास्ये शैघ्र्यं न विद्यते ।
इत्युत्तरितो गुरुराण् मौनमाप्याऽनमन्नृपम् ॥३८॥
राजाऽपि कैतवं नित्यमचिन्तयन्निजार्थकम् ।
गुरुश्चाऽयं राज्यगुरुः प्रधानश्च सभाधिपः ॥३९॥
उत्सादनीयः स्थानाद्वै स्थापनीयोऽपरो गुरुः ।
तदा मे भविता क्षेमं कुशलं सर्वदा तथा ॥४०॥
विचार्येत्थं त्रिमासान्ते स्थानाद् दूरीचकार तम् ।
लवादनोऽपि दैवेच्छां मत्वाऽत्यजन्निजं पदम् ॥४१॥

निवृत्तिं प्राप्य देवान् स ह्यभजद् दश तान् सदा ।
राजा व्यवर्धत चातिव्यवाये स्वप्रजासु वै ॥४२॥
प्रसह्य कन्यका नीत्वा प्रजायास्तु सुरूपिणीः ।
करोति कामनां तासु विमुञ्चति कृतार्थकः ॥४३॥
आक्रोशश्च प्रजास्वेव व्यवर्धतातिरोषतः ।
राजाऽयं नाशनीयो वै प्रधानस्य विवासकः ॥४४॥
एकशब्दः श्रूयते वै सर्वप्रजासु सर्वथा ।
प्रजाव्यवायव्यसनी नाशनीयः नृपोऽपि वै ॥४५॥
अन्यथा महती हानिर्भवेदेव प्रजासु वै ।
इतिनिश्चित्य च सर्वे प्रजाग्र्यास्तु लवादनम् ॥४६॥
मिमिलुर्नृपनाशाय दैवेन नोदिता हि ते ।
लवादनेन सहिता ययुः सेनापतिं प्रति ॥४७॥
सूर्यकान्ताभिधं चापि कथयामासुरुद्व्रतम् ।
राज्ञो विनाशनं स्याद्वै यदि धर्मं न याति सः ॥४८॥
भवान् प्रजानां शास्ताऽपि नीतिमाश्रयतु ध्रुवाम् ।
राजाऽयं राज्यपदतोऽवतार्य एव सर्वथा ॥४९॥
सूर्यकान्तो मर्मवाक्यं श्रुत्वा तथाऽस्तु चाऽवदत् ।
अथ सर्वे ययुः शान्तेश्वरं तु युवराजकम् ॥५०॥
राजाऽयं विपथे त्वास्ते पदयोग्यो न विद्यते ।
अवतार्यः पदात् त्वं च स्थाप्यः प्रजाभिरादरात् ॥५१॥
अन्यथा महती हानिर्भविष्यतीति विद्धि वः ।
कुमारोऽपि तथाऽस्त्वेवं प्राहाऽथ महिषीं प्रति ॥५२॥
श्रेष्ठोत्तमां प्रति सर्वेऽकथयन्निति निर्णयम् ।
सापि दैववशात्तथास्त्वेवं प्राह विवेकिनी ॥५३॥
अथ प्रजाभिर्महती सभा कृता निवृत्तये ।
तत्र राज्ञी तथा राज्ञ्यः कुमाराश्च प्रजोत्तमाः ॥५४॥
सेनापतिः प्रधानश्चाययुर्निर्णयहेतवे ।
प्रधानाय नवीनाय निर्णयं ते न्यवेदयन् ॥५५॥
गर्तमणिः प्रधानस्तु निर्णयं नाऽभ्यमोदयत् ।
उत्थाय प्रययौ भूपं न्यवेदयदनिष्टकम् ॥५६॥
राजा रोषेण सहसा गर्तमणिमुवाच ह ।
कारागारे प्रकरोतु सेनापतिं कुमारकम् ॥५७॥
राज्ञीं प्रजाः पूर्वप्रधानं च तथा विरोधिनः ।
श्रुत्वा गर्तमणिना वै राजभटा नृपाज्ञया ॥५८॥
प्रहिता निगडे कर्तुं राजविरोधिनो द्रुतम् ।
शतशोऽथ राजभटा दुद्रुवुः परितस्तदा ॥५९॥
विधृता बहवस्तत्र कृताश्च निगडेषु वै ।
अथ लवादनस्तत्र राज्ञीं राजकुमारकम् ॥६०॥

सेनापतिं प्रसंप्राप्य मन्त्रणां संविधाय सः ।
गरं तीव्रतमं नीत्वा राजानं शरणं ययौ ॥६१॥
पुष्पहारं सगरलं कण्ठे राज्ञो न्यधात्तदा ।
राजा सुगन्धमासाद्य शनैर्मूर्च्छामवाप ह ॥६२॥
मृतस्तूर्णं ततो गर्तमणिः संभ्रंशितः पदात् ।
लवादनः प्रधानस्य पदे प्रजाभिरादृतः ॥६३॥
कारागारस्थिताः सर्वे लवादनेन मोचिताः ।
शान्तेश्वरो युवराजो राजधिष्ण्येऽभिषेचितः ॥६४॥
मानवेशो मृतश्चेति घोषितं वै प्रजास्वपि ।
राज्ञ्यस्ताश्च कुमाराश्च नृपौर्ध्वदैहिकं व्यधुः ॥६५॥
यज्ञो नृपस्य शुद्ध्यर्थं कृतवान् स लवादनः ।
विप्रा अनाथाः सन्तश्च साध्व्यश्च कन्यकास्तथा ॥६६॥
प्रजाजना भोजिताश्च तोषिताः स्वर्णदानकैः ।
गोदानैर्गृहदानैश्च कन्यादानैः कुमारकाः ॥६७॥
धर्मकार्यैर्मखे राजा मृतः पुण्येन योजितः ।
यमपूर्यां च सूर्म्यादियातना बहुदुःखदाः ॥६८॥
भुक्त्वा स्वर्गं ययौ पश्चान्मखपुण्येन वै नृपः ।
युवराजोऽभवद् राजा राज्यं धर्म्यं व्यधाद्धि सः ॥६९॥
साधुभक्तोऽभवन्नित्यं नारायणपरायणः ।
सहस्रसाधवस्तस्य भुंजते नित्यमेव तु ॥७०॥
करोति राज्यं धर्म्यं च लवादनाऽनुमोदितः ।
अथ साधूत्तमो नाम्ना किंशुकायनसद्गुरुः ॥७१॥
आत्मनिष्ठो भगवन्निष्ठितो लवादनं गुरुम् ।
तथा शान्तेश्वरं भूपं सेनानीं सूर्यकान्तकम् ॥७२॥
प्रजाश्चाँश्चोपादिदेश हितं कल्याणदं तदा ।
कर्मभिर्देहिनो लोके जायन्ते च वियन्ति च ॥७३॥
धर्मो ज्ञानं विरागश्च भक्तिर्हरौ च साधुषु ।
कृतं यत् सेवनं पुण्यं दानं सह प्रयाति वै ॥७४॥
धर्मी नृपः पितृतुल्योऽधर्मी दण्ड्यस्तु शत्रुवत् ।
धर्मिणा भूभृता श्रेयः प्रजानां नित्यदा भवेत् ॥७५॥
साधुसेवाविधाता वै राजा प्रजासु राजते ।
बिडालबकवृत्तिस्तु प्रजाभिः परिभूयते ॥७६॥
यस्तु निर्मलहृत् कृष्णसेवापरो जितेन्द्रियः ।
प्रजारक्षाकरो भूपो वर्धतेऽनुग्रहैः सताम् ॥७७॥
बाल्ये कश्चित् साधुधर्मा यौवने विपरीतकृत् ।
बाल्ये दुष्टोऽपि कश्चित्तु यौवने धार्मिको भवेत् ॥७८॥
सतां समागमैर्देही त्वाबाल्याज्जीवनावधिम् ।
सत्पुमानेव जायेत श्रेयोमार्गस्थितः सदा ॥७९॥
असत्पुमानसत्संगादसन्नेवाऽभिवर्धते ।
सहवासव्यवहारखानपानापमानतः ॥८०॥
गुणा अगुणा दृश्यन्ते बाले युनि विशेषतः ।
बाल्ये पुण्यप्रतापेन धर्मी युन्यपि संभवेत् ॥८१॥
शमेन मनसः शान्तिर्दमेन बाह्यवाजिनाम् ।
ताभ्यां दोषाः प्रदातव्याः कामक्रोधादयोऽखिलाः ॥८२॥
उभावेतौ त्यागिनां च गृहिणां हितकारिणौ ।
साधुसेवापराणां तु दोषा नश्यन्ति मूलतः ॥८३॥
जीवो विवेकनिपुणो नाशयेद् दोषमण्डलम् ।
साक्षी कृष्णश्चान्तरात्मा प्रापयेद्धाम चोत्तमम् ॥८४॥
कल्याणमूर्तिर्भगवान् जीवानां श्रेयसे भुवि ।
प्राविर्भवति श्रीकान्तस्तं प्रसेव्य विमुच्यते ॥८५॥
यद्यपि श्रीहरिर्धाम्नि स्थित एव तु मुक्तिदः ।
समर्थोऽस्ति तथाप्यत्र प्रेमिभक्ता भवन्ति ये ॥८६॥
नार्यो नराः प्रेमिणो वै तेषां यो विरहो हरेः ।
असह्यः क्षणमात्रं तु तन्नाशाय यथा सुखम् ॥८७॥
तेभ्यो दातुं भक्तिवशो भक्तेच्छापूरणाय च ।
तदिहानुप्रमोदादिपूरं रूपं दधाति सः ॥८८॥
योगं दत्वा पूरयति भक्तसर्वमनोरथान् ।
सजातीयो हि भवति प्रेमवृद्ध्यर्थमेव ह ॥८९॥
कृपैव सा हरेर्बोध्या भक्तजातीयजन्मनि ।
असंख्यदिव्यसद्गुणैश्वर्यप्रतापतेजसा ॥९०॥
पूरयन्नरनारीणां मनांसि तद्वशे स्थितः ।
पुत्रत्वेन पतित्वेन सुहृत्त्वेन सखित्वतः ॥९१॥
पितृमातृसतीत्वेन साधुत्वेन प्रवर्तते ।
शिष्यत्वेन गुरुत्वेन नृपत्वेन च वर्तते ॥९२॥
सुखयित्वा यथेष्टं तान् धर्मस्थापनमुत्तमम् ।
आसुराणां विनाशं च कुर्वंस्तदानुषंगिकम् ॥९३॥
तिरोभवति भक्तानां तृप्त्युत्तरं निजेच्छया ।
अनादिश्रीकृष्णनारायणः श्रीकम्भरात्मजः ॥९४॥
गोपालबालः श्रीकृष्णो भक्त्या ग्राह्यः श्रियः पतिः ।
कामं क्रोधं छलं लोभं मानमिर्ष्यां च मत्सरम् ॥९५॥
त्यक्त्वा पापानि सन्दह्य भजेत्तं माणकीपतिम् ।
भक्त्या सतां सेवया च स प्रभुः सम्प्रसीदति ॥९६॥
अग्निदस्य गरदस्य नारीहत्योद्भवस्य च ।
पापं नश्यति कृष्णस्य सेवया तत्सतामपि ॥९७॥
बालघ्नस्य धेनुहत्योद्भवस्य नृपनाशिनः ।
मातृघ्नस्य तथा पापं लीयते कृष्णसेविनः ॥९८॥

'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा'।
जपन्तु सततं मन्त्रं पापशुद्धिर्भविष्यति ॥९९॥
इत्युक्त्वा कमले किंशुकायनः प्रददौ मनुम्।
लक्षप्रजाभ्यस्तत्रैव सर्वान् व्यधात् सुवैष्णवान् ॥१००॥
अनादिश्रीकृष्णनारायणं भेजुश्च मां हि ते।
लवादनो दशदेवैर्मां ततः पुरुषोत्तमम् ॥१०१॥
विशेषेणाऽभजत् सर्वे चान्ये राजप्रजादयः।
भेजुर्मां श्रीकृष्णनारायणं चात्मनिवेदिनः ॥१०२॥
साधवः प्रययुर्बद्रीनारायणं ततः खलु।
लवादनस्य वार्धक्ये सेवया तुष्टतां गतः ॥१०३॥
अहं लक्ष्मि पुरो दिव्यमूर्तिराविर्बभूव ह।
गरदस्य महत्पापं विधूय दिव्यवर्ष्मणा ॥१०४॥
दिव्यमुक्तं विधायैवाऽनयं धामाऽक्षरं मम।
राज्ञीः सर्वास्तथा सेनापतिं च नृपतिं नवम् ॥१०५॥
भक्त्या तुष्टोऽनयं सर्वानक्षरं क्रमशः पदम्।
प्रजाश्च भक्तिसम्पन्नाः पावनीश्चानयं पदम् ॥१०६॥
एवं मया समस्तास्ते साधुद्वारा विमोचिताः।
मायाबन्धनरहिताः कृता लक्ष्मि परेऽक्षरे ॥१०७॥
गरदानमहत्पापं सर्वं भक्त्या लयं गतम्।
एवं भक्त्या विलीयन्ते पापानि सर्वथा रमे ॥१०८॥
भुक्तिं मुक्तिं प्रयान्त्येव भजनस्य बलान्मम।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेत् सदा ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने लवादनाख्यप्रधानस्य राज्ञे गदरस्य भगवद्भक्त्या किंशुकायनसाधुसेवया च तस्य च राज्ञीनां च प्रजानां च मोक्षणमित्यादिनिरूपणनामा त्रयस्त्रिंशत्यधिकद्विशततमोऽध्यायः ॥ २३३ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं शस्त्रधरकथां तथा।
नाम्ना विखण्डलवर्मा शस्त्रधारी पुराऽभवत् ॥ १ ॥
क्षत्रियो नान्दले ग्रामे महीनदीतटे शुभे।
वनस्थानां किरातानां चौराणां शासको महान् ॥ २ ॥
लुण्टकानां शासकश्च धनुर्बाणधरस्तथा।
परिणीतयुगलानां मार्गे निर्भयरक्षकः ॥ ३ ॥
विवाहार्थं प्रयातानां वाहिनीनां च रक्षकः।
व्यापारिणामनसां च त्राता नामधरोऽमितः ॥ ४ ॥
श्रुत्वा तन्नाम चौराश्च प्रयान्ति दूरतः सदा।
एवं भीतिप्रदः शास्ता शासकानां तु शासकः ॥ ५ ॥
किन्तु भक्तो हि हृदये नीतिमार्गमुपाश्रितः।
रक्षणेन प्रदत्तं यच्छ्रेष्ठिभिः राजभिस्तथा ॥ ६ ॥
वेतनं तेन मात्रेण निर्वहत्येव नान्यथा।
याम्यदूतसमो वेषे दयायां धर्मवत् सदा ॥ ७ ॥
रक्षणे राजवच्चापि नीतिमार्गे तु शुक्रवत्।
बृहस्पतिसमो बोधे भक्तौ मे गरुडो यथा ॥ ८ ॥
सर्वस्वार्पणभावेन वर्तते चात्मवेदनः।
किन्त्वनीतिपरां व्यक्तिं प्राप्य दण्डं करोति सः ॥ ९॥
यथायोग्यं दण्डयति नरं दुष्टं शठं सदा।
शस्त्रघातेन वा चातिदुष्टं हन्ति बलेन वै ॥१०॥
एवं घातादिपापं च भवत्येवेति तद्धृदि।
संकल्पो जायते नित्यं पूजायां याचते क्षमाम् ॥११॥
प्रातः स्नात्वा मम मूर्तेः पूजां षोडशवस्तुभिः।
कृत्वा नीराजनं चान्नं मिष्टं दत्वा निवेदनम् ॥१२॥
जलं दत्वा मुखवासं ताम्बूलकं ततः परम्।
शस्त्रं मदग्रे निक्षिप्य क्षमां प्रयाचते यथा ॥१३॥
नाऽहं क्रूरो हिंसकश्च नाऽहं स्वार्थी न लम्पटः।
शस्त्रं मे मा भवेद् दुष्टं पतितं दोषवर्जिते ॥१४॥
नयाऽन्विते च भक्ते चाऽदण्ड्ये मा पतितं भवेत्।
अज्ञानेन न मे शस्त्रं दोषस्पृष्टं भवेत् प्रभो ॥१५॥
दुष्टानां शासने चैतन्मा पराजयमाप्नुयात्।
माऽहं पापेन लिप्येय नीतिबहिःप्रवर्तिना ॥१६॥
एवं सत्यपि मानुष्याज्ञानवेगेन कर्हिचित्।
चेदाक्रमेत पापं वै मयि दीनापराधतः ॥१७॥
दण्ड्योऽहं सर्वथा कृष्ण क्षम्यश्चेत् क्षम्यतां तदा।
इत्येवं मम भक्तोऽयं खड्गबाणादि मत्पुरः ॥१८॥
समर्प्य नित्यमावक्ति ततो भुक्त्वा प्रसादजम्।
पीत्वा पादामृतं याति रक्ष्यरक्षणहेतवे ॥१९॥
ग्रामे वने खले वाट्यां क्षेत्रे रक्षति सर्वथा।
रक्ष्यवस्तूनि सर्वाणि विखण्डलः प्रमोदवान् ॥२०॥
मध्याह्ने मे निवेद्याऽन्नं प्रसादं चाऽत्ति सर्वदा।
सायं सीम्नः समागत्य गृहे करोति पूजनम् ॥२१॥
पुष्पं धूपं च दीपं च नैवेद्यं जलमुत्तमम्।
नीराजनं स्तवनं च ताम्बूलकं सुगन्धि च ॥२२॥
मह्यं समर्प्य शस्त्राणि निक्षिप्यापि पुरो मम।
पुनः प्रार्थयते नित्यं क्षमस्वाऽज्ञानजं ह्यघम् ॥२३॥

तवाऽस्मि तव दासोऽस्मि तव भक्तोऽस्मि तामसः ।
तव तादात्म्यमापन्नस्तव शेषो भवाम्यहम् ॥२४॥
एवं लक्ष्मि सदा मह्यं शस्त्रं समर्प्य कर्म च ।
समर्प्यैव शयने वै निद्रां करोति मां स्मरन् ॥२५॥
तस्य भार्या हरसलीनाम्नी प्रसेवते च तम् ।
महाभक्ता बालकृष्णे मयि श्रीशनरायणे ॥२६॥
पत्यौ नारायणं मां च पश्यत्येव न चेतरत् ।
पतिमूर्तौ सर्वसेवां करोति मयि संस्थिते ॥२७॥
प्रतिमायां पृथक् सेवां करोति स्वामिनो मम ।
स्नानशृंगारभूषादि नीराजनं सुभोजनम् ॥२८॥
पानं ताम्बूलकं वायुदानं दोलाऽभिदोलनम् ।
गीतिकां मिष्टकण्ठोत्थां मम लीलाभरां तथा ॥२९॥
परिहारं च निद्रायाः कीर्तनं प्रकरोति च ।
ततो नैजं नित्यकार्यं निर्वर्तयति भामिनी ॥३०॥
एवं भक्ताऽतिसंस्निग्धा भजते मां निरन्तरम् ।
साधवश्चापि साध्व्यश्च तद्गृहं यान्ति पावनम् ॥३१॥
भुक्त्वा पीत्वा श्रमं त्यक्त्वा प्रयान्ति तीर्थमुत्तमम् ।
अथैकदा समायाच्च साधुर्निर्मोहनायनः ॥३२॥
पूजितो भोजितश्चापि रात्रौ संवाहितः पदोः ।
उपादिदेश ताभ्यां स मोक्षसाधनमुत्तमम् ॥३३॥
क्षमाशस्त्रं परं शस्त्रं सर्वशान्तिप्रदं शुभम् ।
क्षमा तेजस्विनां तेजः क्षमा तपस्तपस्विनाम् ॥३४॥
क्षमते सर्वतास्थानि स वै नारायणो मतः ।
क्षमा पृथ्व्यां सदा चास्ति मातरि सर्वदेहिनाम् ॥३५॥
क्षमा सत्सु सदा दिव्यगुणात्मिका प्रविद्यते ।
सा वै जयप्रदा लोके स्वर्गमोक्षसहायिनी ॥३६॥
आपत्तीनां समस्तानां क्षमा शस्त्रं निवर्हणम् ।
कामे क्रोधे मदे लोभे माने क्षमा हि शान्तिदा ॥३७॥
निर्बलस्य क्षमा शस्त्रं यद्वच्छस्त्रं विवेकिनाम् ।
साधूनां च क्षमा शस्त्रं शासकं तारकं ह्यपि ॥३८॥
क्षमिणां हृदये कृष्णश्चान्तरात्मा सदाऽस्ति च ।
स एव कृपया रक्षां करोत्यस्य विशेषतः ॥३९॥
शासकं कथ्यते त्रातृ शस्त्रं तद्धि मतं जनैः ।
मायाकालभयात् कर्मभयाच्छास्तृ ऋतं हि तत् ॥४०॥
देहस्य शासकं नैव ऋतं शस्त्रं यथार्थकम् ।
इन्द्रियाणां शासकं वा तथैवार्ति ऋतं न तत् ॥४१॥
देहेन्द्रियाणि मायायाः कार्याणि नश्वराणि च ।
रक्षणेऽयुतधा जातेऽप्यभिनश्यन्ति वै लये ॥४२॥
विनाशिनो रक्षणं वै विफलं तत्तदर्थकम् ।
शस्त्रं च विफलं त्वेवं यत्नो भारः फलोज्झितः ॥४३॥
अरण्यं नाशशीलं वै सीमाऽपि च तथैव ह ।
क्षेत्रवास्त्वादिसर्वं वै नाशशीलं प्रवर्तते ॥४४॥
चौरा मरणधर्माणः सस्यान्यपि तथैव च ।
शास्ता त्वं देहरूपस्तु तथैव नाशधर्मवान् ॥४५॥
मृतिधर्मा मृतिधर्मैः शिक्ष्यते तत् कुतूहलम् ।
वरं वै कर्दमाऽस्पर्शः पंकप्रक्षालनात्पुरा ॥४६॥
तस्माद् देहस्य शस्त्राणि मोक्षदानि न सन्ति हि ।
मोक्षदानि तु शस्त्राणि गोपनीयानि सर्वथा ॥४७॥
रक्षणीयानि धार्याणि योक्तव्यानि तु मुक्तये ।
विखण्डल दिव्यशस्त्राण्येतानि मे निबोध ह ॥४८॥
यौवनं शत्रुरूपं वै तच्छस्त्रं तु व्रतार्जनम् ।
कामः शत्रुर्महाँस्तत्र तच्छस्त्रं ब्रह्मचर्यकम् ॥४९॥
वासना शात्रवी माता तच्छस्त्रं चात्मसंस्थितिः ।
विवको भेदविज्ञानं भजनं श्रीहरेर्मुहुः ॥५०॥
त्यागो वैराग्यमेवाऽपि चौदासीन्यं बहिः सदा ।
एवं शस्त्राणि मायाया नाशकानि भवन्ति वै ॥५१॥
श्रीहरेः शरणं नित्यं साधुसेवासमागमः ।
श्रीहरेर्नवधा भक्तिर्भजनं चातिभावतः ॥५२॥
अमायिकानां साधूनां सर्वस्वार्पणसेवनम् ।
हृदये श्रीहरेर्ध्यानं देहेनात्मसमर्पणम् ॥५३॥
मनसा चिन्तनं नित्यं बुद्ध्या स्फूर्तिः सदा हरेः ।
आनन्दादिक्रियाणां तु सर्वेश्वरे समर्पणम् ॥५४॥
रसास्वादादिकं कृष्णप्रसादे एव नान्यथा ।
शब्दस्पर्शादयः सर्वे कृष्णस्यैव न चेतराः ॥५५॥
एभिः शस्त्रैर्भवेन्मायानाशः कर्मलयस्तथा ।
निष्कामकर्मणा शान्तिर्वितृष्णस्य प्रजायते ॥५६॥
कामसंकल्पहीनाश्च यस्याऽऽरंभा हि निर्गुणाः ।
नैर्गुण्यं चाप्यते तेन साधुसंगेन दैवतम् ॥५७॥
हरेः प्राप्त्या तु दिव्यत्वं साक्षाद्योगेन मोक्षणम् ।
माहात्म्यज्ञानयुक्तस्य हरौ स्नेहः प्रजायते ॥५८॥
हरौ स्नेहेन सक्तस्य हरेः स्फुरणमव्ययम् ।
प्रवर्तेत ततश्चेन्द्रियाणि तद्रूपकाण्यपि ॥५९॥
जायन्तेऽन्तःकरणानि कृष्णस्य मन्दिराणि वै ।
आत्मा सिंहासनं तस्य नारायणस्य जायते ॥६०॥
तेनाऽऽत्मा रमते शेतेऽश्नुते हर्षति मोदते ।
आनन्दयाति तादात्म्यभावैर्ब्रह्मदधामयः ॥६१॥

व्यवहारे वर्तमानः सर्वत्र ब्रह्मभावनः ।
कर्मबन्धननिर्मुक्तो ब्रह्मैव नात्र संशयः ॥६२॥
हरौ स्थिरमना दिव्यो ब्रह्मैव ब्रह्मतन्मयः ।
कृष्णदृढाश्रयः कृष्णे रमते नात्र संशयः ॥६३॥
अधमोद्धारकः कृष्णो गृह्णाति शरणेऽर्पितम् ।
पुनाति पतितं चापि दीव्यति स्नेहिना सह ॥६४॥
सतीं गतिं ददात्येव स्वस्मिन् रक्ताय माधवः ।
आत्यन्तिकं पदं श्रेय आप्नोति माधवार्पितम् ॥६५॥
प्रकृतेः सर्वकार्याणां लये चाक्षरधामनि ।
भक्तस्य सच्चिदानन्दमयं तेजः प्रकाशते ॥६६॥
तत्र तेजस्यनादिश्रीकृष्णनारायणः पतिः ।
विराजते चिदचितां नियामकोऽन्तराऽऽस्थितः ॥६७॥
दिव्यमूर्तिर्दिव्यवासा दिव्यभूषाविभूतिमान् ।
सेव्यमानो महाब्रह्मभूतमुक्तैरसंख्यकैः ॥६८॥
अनन्तशक्तिभिः राधारमामुक्तानिकादिभिः ।
कृतार्चनपादसंवाहनाऽऽनन्दप्रदायिभिः ॥६९॥
स एव स्वचरणयोः सेवां ददाति सेविने ।
स एव वर्तते भूमौ कृष्णो ब्रह्मप्रियापतिः ॥७०॥
निःश्रेयसाय लोकानां दिव्यगुणार्थविग्रहः ।
विचार्येत्थं परब्रह्म पुरुषोत्तममाश्रयेत् ॥७१॥
आश्रिताः पक्वनिष्ठाश्च साक्षात् पश्यन्ति तं ततः ।
सूक्ष्मदृशोऽन्तरात्मानं सूक्ष्मं पश्यन्ति चान्तरे ॥७२॥
स्थूलदृशः स्थूलरूपं स्थूले पश्यन्ति तं प्रभुम् ।
माया कायाऽनवच्छिन्ना लीना साम्या यदाऽक्षरे ॥७३॥
तदा सूक्ष्मा तदा कृष्णः सूक्ष्मरूपोऽत्र लोक्यते ।
चेतनाश्च यदा लीनास्तत्त्वान्तरविवर्जिताः ॥७४॥
तदा सूक्ष्मास्तत्र कृष्णः सूक्ष्मरूपो विलोक्यते ।
माया तु विषमावस्था चेतनाः कर्मिणस्तथा ॥७५॥
तदा स्थूलास्तेषु कृष्णः स्थूलरूपो विलोक्यते ।
दिव्यदृष्टिमतां कृष्णवीक्षणं दिव्यतान्वितम् ॥७६॥
अदिव्यदर्शिनां कृष्णवीक्षणं प्राकृतं यथा ।
ऐश्वर्याणि समस्तानि सूक्ष्मस्थूलानि वै हरेः ॥७७॥
सूक्ष्मस्थूलपदार्थेषु निहितानि तु शार्ङ्गिणा ।
ऐश्वर्यैः सकला माया चेतना वा परस्परम् ॥७८॥
पृथग् वा सम्प्रकाशन्ते सगुणा निर्गुणाश्च वा ।
सर्वास्ताः सम्पदोऽनादिकृष्णनारायणस्य ह ॥७९॥
भुंक्ते भक्तोऽर्पितसर्वस्वोऽतिभागवतोत्तमः ।
ऐश्वर्याणि समस्तानि प्राप्नोति पतिभक्तिमान् ॥८०॥

पतित्वमेकं देवेशे मुक्तेशे शिष्यते हरौ ।
अन्यत् सर्वं निजं तस्मै भक्तायाऽर्पयति प्रभुः ॥८१॥
स्नेहशस्त्रं स्वामिनोऽपि वशंकरं बृहत् सदा ।
तेनैव स्नेहशस्त्रेण शासनीयो हरिर्हृदि ॥८२॥
बन्धनीयः स्नेहपाशैर्हृदि दूरं न संचरेत् ।
एषैव चाऽऽक्षरी मुक्तिर्देहिनामिह दिव्यता ॥८३॥
दिव्यनाथप्रदभोगानन्दभोक्त्री स्थितिस्तु या ।
सा प्रत्यक्षे गुरौ कृष्णे प्राप्तव्येह क्षितौ पुरा ॥८४॥
ततो ब्रह्मपुरे सैव वर्तमाना प्रकाशते ।
मोहिनी सा हरेः प्रीतिर्महानन्दप्रदा सदा ॥८५॥
कोट्यब्जकामदेवानां सुखं यत्र हरौ सदा ।
तादात्म्यभावमापन्नो लभते स्वामिनि प्रभौ ॥८६॥
नेत्रसुखमनन्तं च स्पर्शसुखमनन्तकम् ।
चुम्बनानन्दमतुलं लभते स्वामिनि प्रभौ ॥८७॥
आलिङ्गनमहानन्दं लभते परमात्मनि ।
सर्वेन्द्रियरसं दिव्यं दिव्यमास्वादनं तथा ॥८८॥
लभते च तथा दिव्यप्रीतिप्रमोदमुत्सवम् ।
हर्षं दिव्यं तथा शान्तिं शैत्यं चामृतमिश्रितम् ॥८९॥
लभते श्रीहरौ कान्ते स्वामिनि श्रीपतौ प्रभौ ।
चतुर्विंशतितत्त्वानां ये चानन्दा भवन्ति वै ॥९०॥
सृष्टित्रयाणामानन्दा ये ये यत्र भवन्ति वै ।
तान् सर्वान् लभते मूर्तौ स्वामिनि श्रीपरात्मनि ॥९१॥
एवं लक्ष्मि चोपदेशं कृत्वा निर्मोहनायनः ।
रात्रिमुषित्वा प्रययौ तीर्थान्तरं सुपूजितः ॥९२॥
प्रातर्विखण्डलो भक्तिं चकार च यथोदिताम् ।
ज्ञानेन सहितां तस्य पत्न्यपि ब्रह्मरूपिणी ॥९३॥
विदधे तादृशीं भक्तिं स्नेहयुक्तां प्रवर्धिताम् ।
मूर्तेर्वै पूजनं सर्वं कुरुतस्तौ यथोचितम् ॥९४॥
तयोर्भक्त्या प्रसन्नोऽहं प्राविर्बभूव तत्पुरः ।
दिव्यचतुर्भुजः कृष्णनारायणोऽतिसुन्दरः ॥९५॥
प्रहसन् चार्पितान् सर्वोपचारान् चोत्तमोत्तमान् ।
आददेऽहं च नैवेद्यं भुक्त्वा ददे प्रसादिकम् ॥९६॥
तौ भुक्तवन्तौ प्रीत्या च पीतवन्तौ जलामृतम् ।
तावद् दिव्यस्वरूपौ चाऽजायेतां मत्समानकौ ॥९७॥
प्रार्थितवन्तौ मोक्षाय निर्मोहिनावुभावपि ।
अहं विमाने तौ धृत्वा दिव्यौ धामाऽक्षरं निजम् ॥९८॥
अनयं पार्षदैः सार्कं तयोः संकल्पपूरकः ।
मुक्तौ तौ चाऽक्षरे धाम्नि वर्तेते कमले सदा ॥९९॥

एवं साधुप्रसंगेन समुद्धृतौ निजानुगौ ।
पठनाच्छ्रवणादस्य लक्ष्मि मुक्तिमवाप्नुयात् ॥१००॥
स्वर्गं वा सत्यलोकं वा राज्यं वा चैश्वरं पदम् ।
भुक्तिं मुक्तिं यथेष्टां वा लभते भक्तिमान् मयि ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने निर्मोहनायनसाधुप्रसंगेन विखण्डलाख्यशस्त्रधरस्य तत्पत्न्या हरसत्याश्च भगवद्दर्शनं मोक्षणं चेत्यादिनिरूपणनामा चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥

**श्रीपुरुषोत्तम उवाच—**

शृणु नारायणीश्रि त्वं जीर्णोद्धवस्य सत्कथाम् ।
आरामनगरे वीणानदीतीरेऽतिविस्तरे ॥ १ ॥
जीर्णोद्धवाभिधश्चासीत् कर्षुकः कृषिमान्महान् ।
शतपुत्रः शतभृत्यो विंशतिस्त्रीपतिर्बली ॥ २ ॥
शतपुत्रीपिता पौत्रचतुःशताभिशोभनः ।
पौत्रीशतद्वयशोभन्महासौधनिवासकृत् ॥ ३ ॥
एवं विशालवंशाढ्यः कृषीवलोऽतिपावनः ।
धर्मदानरतो नित्यं गोसेवादिपरायणः ॥ ४ ॥
पञ्चशतं गोधनं तु महिषीद्विशतं तथा ।
अश्वशतं वर्ततेऽस्य वृषभाष्टशतानि च ॥ ५ ॥
क्षेत्राणि वाटिका महोद्यानानि सस्यभूमयः ।
घासबीडमरण्यं च भूम्युच्छ्रयोऽस्य सन्ति च ॥ ६ ॥
योजनं भूतलं वीणानदीतीरेऽस्य वर्तते ।
तत्र कृषिं करोत्येषो बीजाधानं यथर्तु च ॥ ७ ॥
धान्यानि विविधान्येव जायन्तेऽन्नानि सर्वशः ।
द्विदलाः कन्दमूलानि भवन्ति पुष्पपत्रिकाः ॥ ८ ॥
फलानि कणिशाः शिम्ब्यो भवन्ति वेषवाटकम् ।
ग्रन्थयो दण्डसस्यानि शाकानि भाजिकास्तथा ॥ ९ ॥
आरनालानि सर्वाणि तिक्तकटूनि यानि च ।
भवन्त्यस्य महावाट्यादिषु क्षेत्रेषु सर्वथा ॥१०॥
ओषधयोऽपि विविधाः प्रजायन्ते प्रसेचिताः ।
नरा नार्यः प्रयतन्ते कृष्युद्यमपरायणाः ॥११॥
उत्पादयन्ति बीजोप्त्या खाद्यान्नानि बहून्यपि ।
उत्पन्नेभ्यः समस्तेभ्यो विंशत्यंशं प्रपूर्णकम् ॥१२॥
धर्मार्थे स ददात्येव दानपूजादिकर्मसु ।
जीर्णोद्धवगृहे नित्यमनाथाः साधवो द्विजाः ॥१३॥
भिक्षुका यात्रिणः साध्व्यो दीना अदन्ति भोजनम् ।
दधीनि पिच्छलान्येव पयांसि मधुराणि च ॥१४॥
घृतानि पुष्टियुक्तानि शर्करा गूडकाँश्च वै ।
मधूनि मिष्टगरिष्टान्नानि श्रेष्ठानि भुंजते ॥१५॥
अर्पयन्ति हरये मे पक्वान्यन्नानि तेऽन्वहम् ।
एवं धर्मप्रसंगेन वर्धन्ते चास्य सम्पदः ॥१६॥
न हीयन्ते पुण्यवशाद् भुज्यमानाश्च साधुभिः ।
अथाऽस्य भाग्यमेवाऽपि बहुस्मृद्धं व्यजायत ॥१७॥
यद्गृहे वै मखाः पञ्च सम्पाद्यन्ते द्विजैः सदा ।
मखेऽस्याऽभ्यागतः साधुर्नाम्ना चैतन्यकाऽऽयनिः ॥१८॥
महाभागवतो भक्तोत्तमस्त्यागविरागवान् ।
आययौ स्वागतं तस्य जीर्णोद्धवश्चकार ह ॥१९॥
जलं शुभासनं मिष्टं मधुपर्कं ददौ नमन् ।
वासं च हरिशालायां ददौ सेवां चकार च ॥२०॥
रात्रौ देवार्चनं कृत्वा भुक्त्वा चैतन्यकायनिः ।
चक्रेऽनादिकृष्णनारायणलीलादिकीर्तनम् ॥२१॥
ब्रह्मणोऽस्य त्रिपञ्चाशद्वत्सरेषु हरेर्जनिम् ।
अकीर्तयत्तत्र तत्र कृता लीलाः प्रमोक्षदाः ॥२२॥
ततः स स्तवनं चक्रे शुश्रुवुः सर्वकर्षुकाः ।
यः परब्रह्म भगवान् श्रीकृष्णो वल्लभः प्रभुः ॥२३॥
अक्षरे परमे व्योम्नि राजते मुक्तसेवितः ।
यस्माद् भवन्ति सृष्टौ वै प्राविर्भावा अनेकशः ॥२४॥
सोऽयं श्रीकम्भरापुत्रश्चास्ते गोपालबालकः ।
सौराष्ट्रे कुंकुमवापीक्षेत्रेऽश्वपट्टसारसे ॥२५॥
यत्र श्रीलोमशश्चास्ते ब्रह्मप्रिया वसन्ति च ।
सर्वतीर्थानि देवाश्चेश्वरा विभूतयः श्रियः ॥२६॥
लक्ष्मीराधारमापद्मावतीश्रीमाणिकीप्रधीः ।
हरिप्रिया वसन्त्येताः श्रीकृष्णब्रह्मयोषितः ॥२७॥
असंख्याः साधवो यत्र स्वतःप्रकाशरूपिणः ।
दिव्या वसन्ति ऋषयः शरण्यं प्रभजन्ति च ॥२८॥
नमस्तस्मै नृनाख्याय सर्वान्तर्यामिणे नमः ।
आभ्यन्तरेभ्यः शत्रुभ्योऽवनं करोति यो हरिः ॥२९॥
नमस्तस्मै कृष्णनारायणाय परमात्मने ।
आध्यात्मिकेभ्यस्तापेभ्यश्चाधिदैविकतस्तथा ॥३०॥
आधिभूतादिकष्टेभ्यो रक्षकाय नमोनमः ।
सामन्तविक्रमात् क्रूराल्लुण्टकाद् वनचन्द्रकः ॥३१॥
सुखादेवी च तत्पत्नी वणिजो येन रक्षिताः ।
सायनायनसाधोस्तु समागमेन मोक्षिताः ॥३२॥

स कृष्णो वर्तते रक्षाकरस्तस्मै नमोनमः।
धनिष्ठकोषं विप्रं च वारांगनासु वर्तितम् ॥३३॥
स्नेहलतां च तत्पत्नीं गुरुं सोमायनं तथा।
नृपं मालवसिंहं च ररक्ष मोक्षणं ददौ ॥३४॥
नमस्तस्मै परेशाय श्रीकान्ताय तु शार्ङ्गिणे।
राजीवाख्यं नृपं राज्ञीं साध्वीं कुन्दनदेविकाम् ॥३५॥
अरक्षयत् तथाऽमोक्षयद् यस्तस्मै नमोनमः।
देवविश्रामस्य रक्षां काण्डिकायाश्च मोक्षणम् ॥३६॥
कृतं येन च तस्मै श्रीहरये वै नमोनमः।
हर्षुलमालिनं पत्नीं तस्य विद्रुमवल्लकीम् ॥३७॥
उद्धार हरिर्यः श्रीपतिस्तस्मै नमोनमः।
शाणधरं पितृहणं कर्षुकं च ररक्ष यः ॥३८॥
वृषहं निम्बदेवं च तस्मै कृष्णाय ते नमः।
भाण्डं कालीन्दरं साधुकमलायनयोगतः ॥३९॥
मोक्षणं चाप्रापयद् यस्तस्मै कृष्णाय ते नमः।
नर्तकं रायणदेवं बोधायनस्य योगतः ॥४०॥
गायकं नाकिरालाख्ये पत्तने तु व्रतर्दिनम्।
राजानं पुण्ड्रवर्माणं य उद्धार ते नमः ॥४१॥
वायकं तूलवायाख्यं समुद्धार यः प्रभुः।
काष्ठहारं तथा जंगलदेवं ते नमोनमः ॥४२॥
पण्यकृद्दासत्यधीरं पत्नीं मञ्जुलिकां तथा।
साधुं साध्वीं कृतवान् यस्तस्मै तुभ्यं नमोनमः ॥४३॥
तिलकरंगं वनपं शिखादेवीं च तत्प्रियाम्।
उद्धार हरिर्यः स हृदयस्थोऽपि रक्षतु ॥४४॥
क्षेत्रपं नाङ्कदेवं तथा स्तेनमहामयम्।
उद्धार हरिर्यश्च तस्मै कृष्णाय वै नमः ॥४५॥
किरातं सागराख्यं तत्पत्नीं च सारिकां तु यः।
उद्धार हरिर्यश्च तस्मै श्रीपतये नमः ॥४६॥
हूणं सारंगनामानं ररक्ष यश्च ते नमः।
यज्ञराधं पुष्कसं च ब्रह्मायनप्रसंगतः ॥४७॥
कुटुम्बयुक्तं यः कृष्णोऽमोक्षयत्ते नमो नमः।
कपिक्षयं तु चाण्डालं प्राशेश्वरं द्विजं तथा ॥४८॥
अमोक्षयद्धरिर्यश्च तस्मै कृष्णाय ते नमः।
नालीकरं लोहकारं पत्नीं कुन्दनिकां च यः ॥४९॥
अमोक्षयद् भवपाशात्तस्मै श्रीविष्णवे नमः।
चर्मकारं मंगलाख्यं पत्नीं विभावरीं च यः ॥५०॥
विषाद् ररक्ष भगवान् यस्तस्मै वै नमोनमः।
रथकारं हरिदासं पत्नीं श्रीमानवीं तु यः ॥५१॥
अमोक्षयत् प्रभवे ते वारं वारं नमोनमः।
शिलाहारं दामशिलादकं पत्नीं कलाभिधाम् ॥५२॥
तद्भृत्यांश्चाऽमोक्षयद् यस्तस्मै कृष्णाय ते नमः।
शिल्पिनं सञ्जयदेवं पत्नीं केशवतीं च यः ॥५३॥
राजानं खड्गवर्माणं तथाऽन्यान् शिल्पिनोऽपि च।
उद्धार हरिस्तस्मै बालकृष्णाय वै नमः ॥५४॥
चित्रकृत्संभरदेवं च चित्रसरितां प्रियाम्।
चित्रकारानपरान् योऽमोक्षयत्ते नमोनमः ॥५५॥
अंगारहारिणं मौक्तिकेशिनं तु निजाश्रितम्।
तथाऽपरान् कर्मचारान् यो ररक्ष च ते नमः ॥५६॥
चक्रधरं लुब्धकं यः पौतिमाष्योपदेशतः।
अमोक्षयद्धि संसारात्तस्मै कृष्णाय ते नमः ॥५७॥
वाटधरं पिशुनं यो नृपं सुतारसिंहकम्।
धव्ययनप्रसंगेनाऽमोक्षयत्ते नमोनमः ॥५८॥
वाटधरं सवासं च द्वैपीराज्ञीमरक्षयत्।
अमोक्षयच्च यः कृष्णस्तस्मै नित्यं नमोनमः ॥५९॥
गृहकारं शिवजयं वृषपर्वप्रसंगतः।
अमोक्षयत्तु यः कृष्णस्तस्मै श्रीहरये नमः ॥६०॥
यश्च संगरयादस्कं जालकारममोक्षयत्।
पत्नीं रूपावतीं शुक्लायनर्षिसेवया हरिः ॥६१॥
तथा जात्या भरवाटमुद्यमश्रीतिनामकम्।
सतीश्वरीं च तत्पत्नीं वल्लवीश्चोद्धार यः ॥६२॥
उष्ट्रपालं दीर्घरम्भं रामायनप्रसंगतः।
उद्धार हरिर्यस्तं वल्लभं प्रणमे प्रभुम् ॥६३॥
रत्नप्रभं खरपालं नृसिंहस्वामियोगतः।
उद्धार हरिर्नारायणस्तं प्रणमाम्यहम् ॥६४॥
गदार्दनेश्वरं वैद्यं तत्पत्नीं च मुकुन्दिनीम्।
अमोक्षयद्धि संसाराद् यस्तं नमामि माधवम् ॥६५॥
कीशानकुलपालस्य देश्यावनस्य मोक्षणम्।
तत्पत्न्याः पुरिकायाश्च चक्रे यस्तं नमामि वै ॥६६॥
नापितं हर्षधर्माख्यं पत्नीं निगमिकां च यः।
भूभृतं स्वर्णधन्वानं राज्ञीं च पञ्चदेविकाम् ॥६७॥
कल्याणधामसाधोस्तु समागमेन तान् प्रभुः।
उद्धार हरिर्नारायणस्तं प्रणमामि वै ॥६८॥
यश्च रूटाणकीदेवीमाभीरीं दैत्यधर्षिताम्।
अरक्षयद् ब्रह्मप्रियामध्ये रूपेश्वरीं तु ताम् ॥६९॥
मन्दारकलिकायाश्च तथाऽन्याश्च दिव्यरूपिणीः।
व्यधाच्छ्रीभगवान् पत्नीस्तं नमामि जनार्दनम् ॥७०॥

धीवरं धीरपर्वाणं निर्वाणायनयोगतः ।
कृत्वा तु पावनं कृष्णोऽमोक्षयत्तं नमाम्यहम् ॥७१॥
तारकादर्शकं शूलारोपकं चोद्धार यः ।
सुपथानकभूपं च कृतशल्यां शूलयंगनाम् ॥७२॥
उद्धार जटी भूत्वा हरिश्रीकृष्णनन्दनः ।
गोपालनन्दनं कृष्णवल्लभं तं नमाम्यहम् ॥७३॥
ज्वालाप्रसादनामानं चाग्निदं च प्रभावतीम् ।
नारायणायनयोगादमोक्षयन्नमामि तम् ॥७४॥
लवादनं तु गरदं नृपं श्रीमानवेश्वरम् ।
शान्तेश्वरं युवराजं सूर्यकान्तं तु सैन्यपम् ॥७५॥
किंशुकायनयोगेन समुद्धार यः प्रभुः ।
श्रीकृष्णंदेशिकंभक्तहृदयस्थंनमामि तम् ॥७६॥
विखण्डलं शस्त्रधरं भार्यां हरसतीं च यः ।
निर्मोहनायनयोगादमोक्षयच्च ते नमः ॥७७॥
एवं लक्ष्मि स्तवनं वै साधुश्चैतन्यकायनिः ।
चक्रे नेमे हरिं सर्वस्थितं च परितस्तदा ॥७८॥
श्रुत्वा दृष्ट्वा कर्षुकास्ते पराश्चर्यं प्रपेदिरे ।
जीर्णोद्भवः कर्षुकेशो नत्वा पप्रच्छ तं मुनिम् ॥७९॥
येषां रक्षा तथा मुक्तिः कृता श्रीपरमात्मना ।
किमत्र कारणं तन्मे ब्रूहि चैतन्यकायने ॥८०॥
श्रुत्वा मुनिस्तु तानाह मन्त्रं नारायणस्य मे ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८१॥
जप मन्त्रमिमं नित्यं जपन्त्वन्ये मुमुक्षवः ।
भुक्तिर्मुक्तिर्भवेदेव साक्षान्नारायणो भवेत् ॥८२॥
आपत्काले महारक्षां विदध्यात्परमेश्वरः ।
इत्युक्त्वा विररामाऽसौ निद्रां जग्राह मां स्मरन् ॥८३॥
कर्षुका निद्रिताश्चासन् जपन्तो मन्त्रमेव तम् ।
प्रातरुत्थाय साधुस्तु स्नात्वा प्रपूज्य मां ततः ॥८४॥
निवेदितान्नं भुक्त्वा च प्राप्य पूजां ययौ वनम् ।
कर्षुकास्ते नित्यमेव जपन्ति मन्त्रमुत्तमम् ॥८५॥
पूजयन्ति हरिं मां च कुर्वन्त्यपि महोत्सवान् ।
चातुर्मास्ये कृतवन्तो व्रतानि विविधानि मे ॥८६॥
अथाऽऽश्विने वाटिकासु क्षेत्रेषु वनभूमिषु ।
अरण्येषु च बीडेषु स्तम्बसस्यतृणानि च ॥८७॥
फलद्रूपाणि सर्वाणि कणिशान्यभवन् यदा ।
धान्यर्द्धिसंभृतान्येव पक्वप्रायाणि सर्वथा ॥८८॥
चतुर्योजनभूमौ वै क्षितिः सा सस्यशालिनी ।
पक्वपत्रौषधिभिश्च स्वर्णवर्णा प्रशोभते ॥८९॥
अथ वै दैवयोगेन वायुवेगेन सीमतः ।
उपरिस्थप्रदेशाद्वै वह्निः कर्षुकचुल्लिकाम् ॥९०॥
त्यक्त्वा च वायुनोत्क्षिप्तः सहसा सस्यभूमिषु ।
शुष्कतृणेषु चाऽव्याप्नोत् ततः सस्येषु सर्वतः ॥९१॥
ततः क्षेत्रेषु कणिशैः सस्ययुक्तेषु सर्वतः ।
दावाग्निवत् स चाऽव्याप्नोत् क्रोशार्धं प्रससार ह ॥९२॥
हाहाकारः कर्षुकस्य प्रजायाममभवत्तदा ।
दुद्रुवुः शान्तये वह्नेः सहस्रशो हि मानवाः ॥९३॥
किन्तु वायुप्रवेगेण चोड्डीयोड्डीय दूरगः ।
व्योम्ना भूत्वाऽन्यवाट्यां च परे क्षेत्रे ससार ह ॥९४॥
निरोद्धुं शक्यते नैव भयदः प्रससार वै ।
उत्पन्नकणनाशार्थः सर्वतृणादिदाहकः ॥९५॥
दुर्भिक्षापादकरूपः प्रससार समन्ततः ।
कृतयत्ना जनाः सर्वे निराशाश्चाभवँस्तदा ॥९६॥
चैतन्यायनतः प्राप्तं मन्त्रं जेपुः प्ररक्षकम् ।
एकैकां मालिकामावर्तयन् यावत्तु ते स्थिराः ॥९७॥
स्मरन्तो हृदये रक्षाकरं मां दुःखनाशनम् ।
तावन्मया हि रक्षार्थं चिन्तितं चाम्बरे द्रुतम् ॥९८॥
मेघमुद्भाव्य वृष्टिं वै विद्युद्गर्जनया युताम् ।
अकरवं घटिकान्ते सस्याग्निः प्रशशाम ह ॥९९॥
क्रोशमात्रे भस्मसाद्वै जातं यत्तत्र सर्वथा ।
विशेषतोऽकरवं वै वृष्टिं सस्यसमृद्धये ॥१००॥
पुनस्तत्र हि सस्यानि तृणानि कणिशानि वै ।
व्यजायन्त यथापूर्वं यथर्त्वनुसृतानि वै ॥१०१॥
एवं मया तदा लक्ष्मि वृष्ट्यऽग्निः शामितः खलु ।
ततश्च कर्षुकैः सर्वैरन्नकूटो नवः कृतः ॥१०२॥
नवे वर्षे सर्वमिष्टान्नानि शाकानि यानि च ।
ओदनानि द्विदलाश्च क्षारान्नानि पराणि च ॥१०३॥
मर्जितान्नानि रस्यानि स्वादूनि चोत्तमानि च ।
पक्वान्नानि सुधाक्तानि पायसान्युत्तमानि च ॥१०४॥
निवेदितानि सर्वाणि * मह्यं विशालमन्दिरे ।
तत्र मूर्तोऽहं लक्ष्म्या साकं प्रत्यक्षतां गतः ॥१०५॥
बुभुजे सर्वभक्ष्याणि भोज्यानि लेह्यकानि च ।
चोष्याण्यपि च पेयानि तथा ताम्बूलकानि च ॥१०६॥
चतुर्भुजः प्रभुः साक्षाद् भुक्त्वा दत्वा प्रसादजम् ।
नीराजनां तथा पूजां लब्ध्वा तूर्णं तिरोऽभवम् ॥१०७॥
आश्चर्यं लेभिरे सर्वे वैष्णवा मत्प्रसादजम् ।
बुभुजिरे च ते दिव्या व्यजायन्त च पावनाः ॥१०८॥

नित्यं चक्रुश्च मे भक्तिं सर्वे कुटुम्बिनस्तु ते।
अथ काले चागते च यथाक्रमं यथोचितम् ॥१०९॥
अनयं स्वं पदं दिव्यमक्षरं कर्षुकान् रमे।
शतं तु कन्यकाः सर्वाः स्वामिव्रतपरायणाः ॥११०॥
भजित्वा मां प्रजाता वै ब्रह्मप्रियास्तवाश्रिताः।
इमास्ता देवमणिकाप्रभृतयस्त्वदालये ॥१११॥
वर्तन्ते दिव्यदेहिन्यः सर्वथा कृष्णगोपिकाः।
अन्ये मुक्ता अभवँश्च ममाराधनया रमे ॥११२॥
एवं लक्ष्मि मया भक्ताः कर्षुका मोक्षितास्तदा।
पठनाच्छ्रवणादस्य स्मरणाद्वर्तनादपि ॥११३॥
जायन्ते मुक्तसदृशा ममाऽऽनन्दप्रभोगिणः।
सर्वकामप्रपूराश्च मदन्यूना मदात्मकाः ॥११४॥

श्रीनारायणीश्रीरुवाच—

हरे स्वामिन् पते सर्वसुखदे स्नेहपात्रिका।
भक्ता पत्नी तव तोषार्थं कथं स्यात् सुरूपिणी! ॥११५॥

श्रीपुरुषोत्तम उवाच—

सर्वांगसुन्दरीं नैजां भवितुं व्रतमुत्तमम्।
मम कुर्याज्जन्मजयन्त्याख्यमूर्जाऽसिताष्टमीम् ॥११६॥
उपावसेत्तु वा फलं पयो दध्यादि भक्षयेत्।
यथालब्धोपचारैर्मां श्रीयुक्तं पूजयेत् सती ॥११७॥
चन्द्रवन्मुखलाभार्थं स्वर्णचन्द्रं ददेत्तु मे।
नेत्रभ्रूभालशोभार्थं स्वर्णपत्रत्रयं ददेत् ॥११८॥
कपोलकर्णनासौष्ठसौष्ठवार्थं सुवर्णजम्।
स्वर्णपत्रशष्कुलीसत्पुष्पबिम्बानि वै ददेत् ॥११९॥
दन्तस्वरसुगन्धार्थं स्वर्णकुन्दप्रदा तथा।
शर्कराकेसरकैशरादिप्रदा भवेद् व्रते ॥१२०॥
सुस्तनार्थं दाडिमादिफले स्वर्णे ददेत् व्रते।
सुशोभितकरार्थं तु स्वर्णेक्षुदण्डमर्पयेत् ॥१२१॥
सुपार्श्वोदरवक्षोऽर्थं स्वर्णकलशपट्टिकाः।
स्वर्णरूप्यफलकानि दद्यात् सौन्दर्यदानि हि ॥१२२॥
रशनास्तनुकट्यर्थं श्रोण्यर्थं द्वौ घटौ ददेत्।
स्वर्णजौ योनिसौक्ष्म्यार्थं स्वर्णोर्मिकाश्च मौक्तिकान् ॥१२३॥
स्वर्णकपर्दिकां शंखलिकां शुक्तिं ददेत्तथा।
अलोमजघनार्थं तु ददेत् पात्रं सुवर्णजम् ॥१२४॥
योन्यारोग्यकृते दद्यात् कस्तूरीहीरकादिकम्।
चारुसक्थिकृते दद्याद् रूप्यकदलिकाद्वयम् ॥१२५॥
स्वेष्टलिङ्गपादजंघाचार्वर्थं कदलीफलम्।
वाहनं पादुके स्वर्णे रजोऽर्थं मौक्तिकान् ददेत् ॥१२६॥
लक्ष्मीं नारायणं साध्वी प्रसाद्य सर्वमाप्नुयात्।
व्रतोत्तरदिने साधून् भोजयेत् फलमाप्नुयात् ॥१२७॥
इति ते कथितं सर्वं सर्वकामप्रपूरकम्।
सर्वा नार्यो लभेरन् मे व्रते दानेन वाञ्छितम् ॥१२८॥
इत्येवं ते कथितानि चरित्राणि निजानि वै।
भक्तरक्षाकराण्येव षोडशे वत्सरे मम ॥१२९॥
त्वया श्रुतानि सर्वाणि मनोऽभिलषितानि वै।
साधुमाहात्म्ययुक्तानि महामोक्षप्रदानि च ॥१३०॥
कृपयैव मयोक्तानि श्रेयसे स्मरतां रमे।
ध्यायतां मुक्तये चापि वदतां पापनुत्तये ॥१३१॥
महानन्दप्रदान्येव तादाऽऽत्म्यभावयोगिनाम्।
सर्वस्वार्पितनारीणां ब्रह्मप्रियात्वदानि च ॥१३२॥
सर्वस्वार्पितपुंसां तु ब्रह्ममुक्तत्वदानि च।
सकामानां सर्वकामपूरकाणि सुखानि च ॥१३३॥
निष्कामानां कृपया मे मत्तुल्यताप्रदानि च।
लक्ष्मि लीला मम दिव्या दिव्या मद्योगिमानवाः ॥१३४॥
सर्वं दिव्यं मम क्षेत्रं परधामात्मकं भुवि।
षोडशं विगतं वर्षं महानन्दपरिप्लुतम् ॥१३५॥
सप्तदशं जन्मदिनं ममायाति द्रुतं खलु।
उत्सवोऽत्र महान् भावी लोमशाद्यैः प्रवर्तितः ॥१३६॥
विरमामि समस्तानां पत्नीनां श्रान्तयेऽपि च।
'ओंनमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१३७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने जीर्णोद्धवाऽभिधकृषीवलस्य चैतन्यकायनिसाधुयोगेन भगवद्दर्शनं मोक्षणं, स्त्रीसौन्दर्यादिप्रदव्रतदानवर्णनं चेत्यादिनिरूपणनामा पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

श्रीपुरुषोत्तम उवाच—

शृणु नारायणीश्रि त्वं सप्तदशमहोत्सवम्।
मम जन्मदिवसस्य चतुर्व्यूहः करिष्यति ॥ १ ॥
वासुदेवस्तथासंकर्षणोऽनिरुद्ध इत्यपि।
प्रद्युम्नश्चेति ते सर्वे तथेश्वरा महर्षयः ॥ २ ॥
कुंकुमवापिकाक्षेत्रेऽक्षरे दिव्ये मह्यायते।
आगत्य श्वो निवत्स्यन्ति सन्नद्धाः सन्तु सेविकाः ॥ ३ ॥

ऊर्जकृष्णस्य सप्तम्यां चान्द्रे मासे तु नोदिताः ।
लक्ष्म्यः सर्वा ब्रह्मपत्न्यः समारम्भं प्रचक्रिरे ॥ ४ ॥
सभादेव्यः सभास्थानं सभास्थानानि यानि च ।
प्रचक्रिरे हि सहसा येषु सृष्ट्यभिविम्बनम् ॥ ५ ॥
शृंगारदेविका दिव्यशृंगाराणि प्रचक्रिरे ।
धामदेव्यः प्रकाशानि वनदेव्यो वनानि च ॥ ६ ॥
उद्यानानि तरुदेव्यो माया दृश्यानि चक्रिरे ।
रसदेव्यो रसान् सर्वान् गन्धदेव्यः सुगन्धिनः ॥ ७ ॥
सरस्वत्यो गायनानि निशा स्वर्गं प्रचक्रिरे ।
अन्नपूर्णा गरिष्ठानि मिष्टान्नानि प्रचक्रिरे ॥ ८ ॥
कल्पलताः पुष्पपत्रदलानि संप्रचक्रिरे ।
कल्पमणयो भूषाश्च वह्निः स्वर्णं प्रचक्रिरे ॥ ९ ॥
भूदेवी रम्यशय्याश्च वायुर्वै वाहनानि च ।
रसशालाः कमलाद्याः पानशालाश्च वारुणी ॥१०॥
ललिताश्रीमहालक्ष्मीदीक्षिकाब्जाऽब्जमानयत् ।
विष्णुस्तु पार्षदान् मुक्तानानयन्निजसेवकान् ॥११॥
यज्ञनारायणो यज्ञमण्डपान् संव्यधाद् द्रुतम् ।
ओषधयः समिधश्चाऽऽनयन् सर्वविधा द्रुतम् ॥१२॥
गान्धर्वा गायकान् वाद्यसहितान् प्रसमानयन् ।
नर्तक्यश्चापि किन्नर्योऽप्सरसश्चाययुर्द्रुतम् ॥१३॥
मुक्तावतारा ईशेशा ईश्वराश्चाययुस्तदा ।
स्वागतार्थे महासेनापतयः शांकरादयः ॥१४॥
सोत्साहाश्च प्रतिजग्मुर्महर्षयः समाययुः ।
वासुदेवादयो व्यूहा नारायणास्तथाऽऽययुः ॥१५॥
रुद्रा अजाः सिद्धजना विष्णवस्तत्र चाययुः ।
ईश्वराण्यश्च मुक्तान्यः सर्वा रमाः समाययुः ॥१६॥
राधासख्यो रमासख्यो ब्राह्मीसख्यः समाययुः ।
वैराजाश्च हिरण्पुंसो मायातत्त्वानि चाययुः ॥१७॥
देवा देव्यः पितरश्च दिक्पाला लोकपालिनः ।
ऋषयो मानवा भक्ताः काश्यपाश्च समाययुः ॥१८॥
धार्मिकाः साधवः सत्यो ब्रह्मशीलाः समाययुः ।
ऋग्यजुःसामाऽथर्वाणस्तीर्थोत्तमानि चाययुः ॥१९॥
ईतिर्धृतिः शिवा शक्तिर्वेदपत्न्यः समाययुः ।
समुद्राः कृष्णपत्न्यश्च राधाद्याश्च समाययुः ॥२०॥
योगिन्यः शांकराः सर्वे गणाश्चापि समाययुः ।
नरनारायणाद्याश्च तापसास्तत्र चाययुः ॥२१॥
अरण्यानि वनान्येव भूगोलानि समाययुः ।
चैत्याश्च ऋतवः कालाः वत्सराद्याः समाययुः ॥२२॥
पुरुषोत्तममासोऽपि महाभेरीं निनादयन् ।
आययौ चाऽक्षरे क्षेत्रे सर्वकल्याणकृच्छुभः ॥२३॥
योगाः समाययुर्यज्ञा भक्तिपुत्राः समाययुः ।
विमानानां न पारोऽस्ति गजानां पक्षिणां तथा ॥२४॥
वाहनानां न पारोऽस्ति सूतमागधदेहिनाम् ।
बन्दीनां बहुरूपाणां मनोरञ्जनकारिणाम् ॥२५॥
ऊर्जसप्तमिकारात्रावाययुः सर्वदेहिनः ।
तेषां स्वागतमुत्कृष्टं देव्यो देवाः प्रचक्रिरे ॥२६॥
पार्षदाः साधवश्चापि ब्रह्मप्रियाः प्रचक्रिरे ।
पिता माता च भगिनी भ्रातरः संप्रचक्रिरे ॥२७॥
तथा समस्तशिष्याश्च स्वयमार्षाश्च ईश्वराः ।
लोमशाद्याः ऋषयश्च लालायनाद्याः साधवः ॥२८॥
स्वागतं भोजनं पानं प्रचक्रिरे ददुस्तथा ।
सर्वाः कामदुघा गावः पयांसि च ददुस्तदा ॥२९॥
सर्वा दास्योऽपि दासाश्च महीमानप्रसेवनम् ।
निशीथे चक्रिरे तत्र न्यूनं नाऽभूद्धि किंचन ॥३०॥
प्रातरुत्थाय च लक्ष्मि! चाऽहं कृष्णनरायणः ।
कृतस्नानः कृतशृंगारकः प्रियाभिरन्वितः ॥३१॥
मात्रा पित्रा वर्धितश्च समायामगमं द्रुतम् ।
तदा वाद्यान्यवाद्यन्त वासुदेवादयस्तथा ॥३२॥
अवतारा ईश्वराश्च हीश्वराण्यस्तु सर्वशः ।
मुक्ताश्च गोपिका गोपा आययुर्मम मण्डपम् ॥३३॥
दिव्यसिंहासनस्थस्य कृत्वा मे पूजनं च ते ।
आरार्त्रिकं व्यधुः सर्वेऽक्षतकुंकुमचन्द्रकान् ॥३४॥
चक्रुश्चाशीर्वचनानि जगुर्विप्रा महर्षयः ।
धामकोट्यश्चेशकोट्यो देवर्षिपितृकोटयः ॥३५॥
तत्पत्न्यश्चाक्षतपुष्पैर्वर्धयामासुरेव माम् ।
मानवाः सर्वतीर्थानि तत्त्वानि वेदवेदिकाः ॥३६॥
सरस्वत्यः शारदाश्च लक्ष्म्यः सर्वा ममाऽर्हणम् ।
चक्रुः सर्वोपदा मे च ददुर्दिव्याः सभास्थले ॥३७॥
एवं मध्याह्नपर्यन्तं पूजनं बहुशोभनम् ।
जातं मे तत्र चायातं सर्वं दाने ददावहम् ॥३८॥
भोजनानि महीमानेभ्यश्च दत्तानि वै ततः ।
परिहारः कृतश्चापि दक्षिणाः प्रापिताः शुभाः ॥३९॥
पारितोषिकरूपाणि दत्तानि योग्यता यथा ।
रात्रौ वाद्यमहागीतिनृत्यरञ्जनकादिकम् ॥४०॥
अभवत्त्वर्धरात्र्यन्तं विरामश्च ततोऽभवत् ।
नवम्यां च महीमानाः पूजिता भोजितास्तथा ॥४१॥

सम्मानिताश्च प्रहिता ययुर्निजालयान् प्रति ।
एवं सप्तदशे वर्षारम्भदिनेऽष्टमीतिथौ ॥४२॥
कृष्णे ह्योर्जे मम जन्मजयन्त्युत्सविता रमे ।
भवतीनां यशश्चेदं त्रिसृष्टौ सम्प्रकाशते ॥४३॥
षोडशस्य तु वर्षस्य चमत्कारा ममाऽत्र वै ।
तृतीये द्वापरसन्तानके संवर्णिता मम ॥४४॥
अनादिश्रीकृष्णनारायणश्चाऽहं परेश्वरः ।
चरित्राणां विधाता च कर्ता वक्ता प्रलेखकः ॥४५॥
एतत्तृतीयखण्डस्य पारायणं करोति यः ।
तस्य सम्पद् विविधा स्याद् वंशो विस्तारवान् भवेत् ॥४६॥
सौवर्णे गरुडे धृत्वा दद्याद् द्वापरपुस्तकम् ।
तेन वै पृथिवीदानं दत्तं भवेन्न संशयः ॥४७॥
अस्य कथाक्षणे यद्यत् समर्प्यतेऽल्पकं ह्यपि ।
अनन्तगुणितं तत्स्यान्महास्वर्गप्रदं भवेत् ॥४८॥
गोदानं वाटिकादानं स्वर्णरत्नप्रदानकम् ।
कन्यादानं गृहदानं गजदानं मखेऽर्पणम् ॥४९॥
सर्वदानफलं त्वस्य दानेन सम्प्रजायते ।
विमानदानं नगरीदानं वनार्पणं तथा ॥५०॥
सर्वस्वाऽर्पणमेवाऽस्य दानेन सम्प्रजायते ।
ब्रह्मदानं वेददानं मोक्षदानमथोत्तमम् ॥५१॥
आत्मसमर्पणमस्य दानेन सम्प्रजायते ।
तरन्ति पितरश्चापि भवन्ति धामवासिनः ॥५२॥
साम्राज्याऽर्पणमेवाऽस्य दानेन सम्प्रजायते ।
रोगा विघ्नाः प्रणश्यन्ति दुरितानि ह्रसन्ति च ॥५३॥
दुर्भाग्यानि विनश्यन्ति द्वापरखण्डदानतः ।
सप्ताहं पाक्षिकं वापि मासिकं वा प्रवाचयेत् ॥५४॥
साधून् विप्रान् भोजयेच्च श्रोतॄन् वक्तॄन् यथाधनम् ।
साध्वीः सतीर्भोजयेच्चाऽनाथान् दीनान् समस्ततः ॥५५॥
वाचकं वरयानेन भ्रामयेन्नगरे स्त्रियः ।
विप्राश्च भूभृतश्चापि श्रेष्ठिनश्च प्रजाजनाः ॥५६॥
कुमार्यः कलशैर्वारिभृतैश्च नारिकेलजैः ।
मौक्तिकैरासिनीभिश्च सुवेषैर्भ्रामयेत्तथा ॥५७॥
सुवासिन्यो गीतिकाभिरक्षतैः पुष्पकुंकुमैः ।
पूजयेद् वर्धयेच्चापि भ्रामयेन्नगरे तथा ॥५८॥
महादानानि दद्युश्च वाचकाय महात्मने ।
यथा साधुः प्रसन्नः स्यात्तद्दद्युर्हि साधवे ॥५९॥
भुक्तिर्मुक्तिर्भवेदस्य श्रवणेन च दिव्यता ।
वासनानां प्रणाशश्च कल्मषाणां लयो भवेत् ॥६०॥

तापत्रयविनाशश्च शान्तिस्तु शाश्वती भवेत् ।
पुत्रं पुत्रीं समीहाना द्वापरखण्डदानकम् ॥६१॥
नूत्नवेष्टनसहितं स्वर्णमुद्रान्वितं चरेत् ।
शत्रुभीस्तेन नश्येद्वै राजभयं न जायते ॥६२॥
कारागारविमुक्तः स्यादस्य दानेन भावतः ।
असाध्यं साध्यमेवाऽपि भवेदस्य श्रुतेरिह ॥६३॥
सार्वज्ञ्यं बहुधा त्वस्य श्रवणेन प्रजायते ।
वल्लभार्यःकृष्णनारायणः स्वामी महाप्रभुः ॥६४॥
राधालक्ष्मीपतिः पद्मावतीश्रीमाणिकीपतिः ।
प्रज्ञामुक्तापतिर्नित्यं स्फुरेत् स्वहृदये श्रवात् ॥६५॥
साक्षान्मिलेद्धि वर्षान्ते शृणुयान्नित्यमेव तम् ।
मिलेद् रहसि विश्वात्मा स्वप्ने मिलेन्न संशयः ॥६६॥
आपत्काले रक्षयेच्च द्वापरखण्डसंस्मृतेः ।
लक्ष्मीनारायणसंहितेयं मे प्रतिमाऽस्ति हि ॥६७॥
खण्डोऽयं द्वापरसन्तानो मेऽस्त्युदरमान्तरम् ।
स्पृष्ट्वा ध्यात्वा सेवयित्वा मन्मूर्तिं लभतेऽक्षरे ॥६८॥
येषां यासां भवेद् वाञ्छा साक्षाद् योग्यस्य मे हृदि ।
तैस्ताभिश्च कथा श्रव्या जप्तव्यश्च मनुर्मम ॥६९॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
आगत्याऽहं यथेष्टं वै सुखं दास्ये च दर्शनम् ॥७०॥
लक्षजपेन सिद्ध्येद्वै मन्त्रोऽयं मम नामवान् ।
दशांशहोमः कर्तव्यो भावनीयोऽमान्तरे ॥७१॥
कौस्तुभकिरीटयुक्तः सर्वभूषाविभूषितः ।
प्रसन्नवदनो लक्ष्मि कान्तः कन्दर्पसुन्दरः ॥७२॥
त्रैलोक्ये नास्ति तद्वस्तु यद्वस्तु न ददाम्यहम् ।
सृष्टित्रयेऽपि तन्नास्ति यन्न भक्ताय सन्ददे ॥७३॥
सिंहासनं तथाऽङ्कं च धामाऽक्षरं मदासनम् ।
ममैश्वर्याणि सर्वाणि ददामि मन्त्रजापिने ॥७४॥
एतल्लक्ष्मि हृदयं मे कृपा मेऽनुग्रहश्च मे ।
सर्वं यथेष्टं दास्ये वै तादात्म्यमन्त्रजापिने ॥७५॥
कल्पवृक्षाः कामदुघाः कल्पवल्ल्यश्च या मताः ।
कल्पस्तम्भास्तथा चिन्तामणयोऽक्षयपात्रिका ॥७६॥
पद्मचिह्नं चमत्काराः सिद्धयश्चापि सर्वशः ।
भवन्ति हृदये त्वस्य तादात्म्यमन्त्रजापिनः ॥७७॥
शृणोति द्वापरसन्तानकं जपति मन्मनुम् ।
शाश्वतं पुण्यमेवाऽस्य कल्पसिद्धिश्च शाश्वती ॥७८॥
अव्याहतगतिस्तस्य ह्यनावरणदर्शनम् ।
मन्त्रसिद्ध्या जायते वै मदिच्छया न संशयः ॥७९॥

देवत्वं वा मुनित्वं वा सिद्धत्वं चेशतां च वा ।
अवतारत्वमेवाऽपि द्वापरस्य श्रवाल्लभेत् ॥८०॥
भूमपदं शिवपदं हिरण्मयपदं तथा ।
महापुरुषधिष्ण्यं वा द्वापरस्य श्रवाल्लभेत् ॥८१॥
शृणुयाच्छ्रीकृष्णनारायणे कृत्वा मनःस्थिरम् ।
महोत्सवेन शृणुयाच्चतुःपुमर्थदं भवेत् ॥८२॥
नित्यं फलानि धान्यानि वस्त्राणि भूषणानि च ।
नित्योपयोगिवस्तूनि दद्यात् संशृणुयात् कथाम् ॥८३॥
निन्दकानां भयं त्यक्त्वा नास्तिकानां भयं तथा ।
विरुद्धानां भयं त्यक्त्वा शृणुयाद्वै ममाऽऽश्रये ॥८४॥
यत्राऽहं तत्र विजयो यत्राऽहं तत्र चोत्सवाः ।
यत्राऽहं रक्षणं तत्र मच्छून्ये भयमस्ति हि ॥८५॥
श्रुत्वा श्रुत्वा रेसवेत्र्यो भवन्तु बुद्धयो हि वः ।
अनादिश्रीकृष्णनारायणस्य मम गोचराः ॥८६॥
अध्यायं वाऽप्यैकपद्यं ये श्रोष्यन्ति समाहिताः ।
तेषां तासां तारकोऽहं कृष्णोऽस्मि भवसागरात् ॥८७॥
अपि पापा नीचदेहा नीचकर्माण एव वा ।
अनाचाराः सतां योगाद् यथा शुद्ध्यन्ति सर्वथा ॥८८॥
तथाऽस्य श्रवणात् पापाः प्रशुद्ध्यन्ति न संशयः ।
मद्योगान्निर्गुणाः सर्वे श्रोतारः संभवन्ति हि ॥८९॥
अत्र मानवरूपास्ते मुक्ता मुक्तानिका मताः ।
कथास्थानं त्वक्षरं मे धाम बोध्यं न मायिकम् ॥९०॥
वक्ताऽस्ति मम रूपोऽस्य वदाम्यहं न संशयः ।
श्लोके श्लोके मया लक्ष्मि कृपा प्रवर्षिता त्विह ॥९१॥
अपि मनाक् हरिं कान्तं प्रत्यभियान्ति भावतः ।
तान् प्रत्यहं शतगुणमभियामि प्रमोदितः ॥९२॥
कृतेषु सर्वयत्नेषु यद्यापन्न व्यपोहति ।
स्मरेन्मां मम तादात्म्यमन्त्रं जपेन्मुहुर्मुहुः ॥९३॥
सर्वापदो विनश्यन्ति प्रतिज्ञेयं मयोदिता ।
एतद्द्वापरसन्तानखण्डश्रवणमानताम् ॥९४॥
कुर्याद्वा विपदां नाशः संकल्पकरणाद् भवेत् ।
एकतस्तु कथाः सर्वा एकतस्तु मनुर्मम ॥९५॥
मनुर्विशिष्यते लक्ष्मि कथायुक्तस्तु किं पुनः ।
शं वोऽस्तु श्रीकृष्णनारायणस्य करुणालवात् ॥९६॥
आचार्यः कम्भरापुत्रोऽस्तु शं गोपालनन्दनः ।
सन्तुष्टाऽनुजसौम्यश्रीप्रज्ञासार्वज्ञ्यसंभृतः ॥९७॥
सर्वज्ञः सर्ववित् सर्वान्तरात्मा सर्वकारणम् ।
शं वोऽस्तु श्वेतव्यासादिर्यविद्ययासेश्वरोहरिः ॥९८॥
सर्वधर्माश्रयः सर्वाश्रमः सर्वार्थवर्णवान् ।
शं वोऽस्तु सर्वकक्षाढ्यः सर्वखनीश्वरोऽग्रगः ॥९९॥
यद्वासात् खलु सौराष्ट्रं सौराष्ट्रतां भजत्यति ।
सोऽहं सोऽयं साक्षपरोक्षकः शं वोऽस्तु शाश्वतम् ॥१००॥
आक्षरकुंकुमवापीक्षेत्रे लोमशसंश्रिते ।
देवदेवेश्वरः शं वो ब्रह्मेशोऽस्तु हरिः सदा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने-
ऽनादिश्रीकृष्णनारायणस्य सप्तदशजन्मदिनजयन्त्यु-
त्सवो द्वापरसन्तानकथाश्रवणदानमन्त्रजपमहिमा
चेत्यादिनिरूपणनामा षट्त्रिंशदधिकद्वि-
शततमोऽध्यायः ॥ २३६ ॥

श्रीनारायणीश्रीरुवाच—

हृदयस्य प्रियप्राणकान्तचानन्दवारिधे ।
कृपालो श्रीकृष्णनारायणाऽहं पावनीकृता ॥ १ ॥
दिव्यानां श्रीभवतः सत्कथानां श्रावणेन वै ।
इमा ब्रह्मप्रियाः सर्वा हरिप्रियास्तथाऽपराः ॥ २ ॥
परमं पावनं भावं प्राप्ता भवत्कथाश्रवात् ।
सर्वा मुक्तानिका गोप्यो रमा लक्ष्म्यः श्रियः स्त्रियः ॥ ३ ॥
ईश्वराण्यश्च सिद्धान्यो देव्यो मानव्य इत्यपि ।
काश्यप्यश्च तलिन्यश्च कृतकृत्या हरेऽभवन् ॥ ४ ॥
अहो भाग्यमहो भाग्यं दैत्यदानवरक्षसाम् ।
कन्यकानां कृष्णकान्तात्मिकानामिह नो यथा ॥ ५ ॥
अहो कृपा ह्यहो चानुग्रहः श्रीपरमात्मनः ।
श्रोत्र्यः पत्न्यः पतिर्वक्ता स्वयं श्रीपुरुषोत्तमः ॥ ६ ॥
यासां भाग्यानि छिन्नानि स्फुटितानि च वा प्रभो ।
तासां कृष्णमुखाम्भोजकथाश्रवक्षणो न वै ॥ ७ ॥
श्रोष्यन्ति बहुनार्यश्च नराश्चास्य कथामृतम् ।
संक्षेपाच्चाल्पबुद्धीनां कथास्मृतिं प्रकारय ॥ ८ ॥

पुरुषोत्तम उवाच—

स्वल्पक्षणाप्तश्रद्धानां स्मरणार्थं नरायणि ।
कथायाम्यस्य खण्डस्य कथाबीजानि संशृणु ॥ ९ ॥
अध्यायाश्चास्य खण्डकस्य षट्त्रिंशच्छतद्वयम् ।
श्लोकानां तु सहस्राणि पञ्चविंशतिरित्यपि ॥१०॥
सत्यत्रेताद्वापराणामध्याया वै षड्विंशतिः ।
तथा शतं सहस्रं च भवन्ति मोक्षदा रमे ॥११॥

श्लोकाः खण्डत्रयाणां तु लक्षं त्वेकं तथाऽधिकाः ।
ते द्वादशसहस्राणि शतं सन्ति भुङ्मुक्प्रदाः ॥१२॥
एषा संख्या मानवेऽत्र लोके बोध्या न चेतरे ।
संहितेयं विशालाऽस्ति प्रागेव कथितं तव ॥१३॥
अत्र द्वापरसन्ताने ह्यारंभे श्रीकृता स्तुतिः ।
सृष्टिकालस्य गणनोदिता ततस्तु वेधसः ॥१४॥
द्वापञ्चाशद्वत्सराख्याः कल्पाख्याः कथितास्ततः ।
रोहिणाऽसुरनाशार्थं श्रीद्युनारायणो हरिः ॥१५॥
मेरुधर्ता मेरुनारायणश्च कीर्तितस्ततः ।
रवेः शातनकृद्विष्णुनारायणश्च वर्णितः ॥१६॥
धूम्रासुरविनाशार्थं देवनारायणः प्रभुः ।
मखप्रवर्तको यज्ञनारायणश्च कीर्तितः ॥१७॥
रुद्रशास्ता ब्रह्मनारायणश्च कथितस्ततः ।
देवधिष्ण्यनियमार्थमादित्यन्नायणस्ततः ॥१८॥
नागशास्ता श्रीगरुत्मन्नारायणश्च वर्णितः ।
आर्षनारायणश्चापि ध्रुवस्थैर्यकरस्ततः ॥१९॥
धुरानन्दप्रशास्ता श्रीप्राज्ञनारायणस्ततः ।
कथितो नैष्ठिकवीरनारायणस्तु शीलवान् ॥२०॥
मोक्षदश्च ततो भद्रनारायणोऽपि वर्णितः ।
तुंगभद्रासनापुत्र्या लक्ष्म्या विवाहसूत्सवः ॥२१॥
अनादिश्रीहरिनारायणावतार ईरितः ।
बीजरक्षाकरो बीजनारायणस्ततः परम् ॥२२॥
धर्मव्रतगृहे जातो वरनारायणो हरिः ।
सुदर्शन्याः शापजातसमस्तस्त्रीस्वरूपिणाम् ॥२३॥
शापमोक्षकरः स्त्रीपुंनारायणश्च कीर्तितः ।
माकरासुरनाशार्थं जलनारायणस्ततः ॥२४॥
साधुधर्मस्थापनार्थं शीलनारायणस्ततः ।
व्याघ्रासुरविनाशार्थं वार्धिनारायणस्ततः ॥२५॥
ततश्चतुर्मुखः कृष्णः कथितः सृष्टिसद्दशः ।
राधनिकापुण्यव्रातगृहे श्रीपुरुषोत्तमः ॥२६॥
अवातरत् कथा चैषोदिता ततः परं रमे ।
तीर्थपावनकृत्तीर्थनारायणः प्रकीर्तितः ॥२७॥
भक्तिप्रवर्तक उक्तो जीवन्नारायणस्ततः ।
ततोऽर्धश्रीश्वरनारायणः संवर्णितो रमे ॥२८॥
ततश्चार्धपितृनारायणः प्लक्षनरायणः ।
नरमेधे पुंस्त्वनारायणस्ततः प्रकीर्तितः ॥२९॥
तत उक्तः श्यामनारायणो वटश्रिया सह ।
मायूरासुरनाशार्थं राजनारायणस्ततः ॥३०॥
कामभस्मोत्तरं ब्रह्मचारिनारायणस्ततः ।
शंभूजीवक उदितः शिवनारायणस्ततः ॥३१॥
कुबेरोज्जीवकः स्वर्णनारायणश्च वर्णितः ।
ज्वालादाहावनकर्ता स्वामिनारायणस्ततः ॥३२॥
निर्वाणिकागृहे श्रीसावननारायणस्ततः ।
साधुनारायणश्चापि साध्वीलक्ष्म्या सहोदितः ॥३३॥
वर्णिशालमनोरुजीवको भक्तनरायणः ।
अश्वीभूतवर्मधरनृपरक्षाकृते पुनः ॥३४॥
मेधनारायणो मेधालक्ष्म्या सहोदितः प्रभुः ।
अनलादविनाशार्थं वह्निनारायणस्ततः ॥३५॥
इलोदरविनाशार्थं रसनारायणस्ततः ।
दैत्यहा श्रीचक्रनारायणस्ततः प्रवर्णितः ॥३६॥
सत्यधर्मस्थापयिता सत्यनारायणस्ततः ।
स्थित्यर्थं पर्वतानां हिरण्यनारायणस्ततः ॥३७॥
नैष्किञ्चनीश्रिया साकं नैरञ्जनिनरायणः ।
पुण्यवतीशापशान्त्यै शापनारायणस्ततः ॥३८॥
अप्सरसां मनःपूर्त्यै ब्रह्मद्ब्रह्मनरायणः ।
ब्रह्मविद्याप्रकाशाय गुरुनारायणस्तः ॥३९॥
बृहद्धर्मनृपतये साधुदीक्षाप्रदः प्रभुः ।
आचार्याणीश्रिया साकमाचार्यन्नायणस्ततः ॥४०॥
विद्युत्स्रावादिनाशार्थं विद्युन्नारायणस्ततः ।
मधुमक्षादिनाशार्थं मधुनारायणस्ततः ॥४१॥
दैत्यहा श्रीनाथनारायणश्चापि प्रवर्णितः ।
साकं बिम्बीश्रिया स्वर्णोत्सवे विभुनरायणः ॥४२॥
मोक्षनारायणश्चापि मुक्तिश्रीसहितस्ततः ।
शिवराजीश्रिया युक्तः कृष्णनारायणस्ततः ॥४३॥
कोट्यर्बुदाऽब्जमहिषीकान्तः प्रभुः प्रवर्णितः ।
लक्ष्मीनारायण द्वन्द्वद्वादशोर्ध्वसहस्रकम् ॥४४॥
द्वन्द्वनामस्तवश्चोक्तः सर्वपापप्रणाशनः ।
नरनारायणे परब्रह्मरूपप्रदर्शनम् ॥४५॥
गृहस्त्रीणां विधेयानां कर्मणां वर्णनं ततः ।
वधूटीनां सदाचारा वधूपाल्या वृषास्तथा ॥४६॥
सतीसत्यबलं चोक्तं भक्तियोगश्च निर्गुणः ।
पुरुषोत्तमयोगश्च परब्रह्मण इत्यपि ॥४७॥
अक्षरातीततादात्म्यं लक्ष्मीनारायणव्रतम् ।
गुरोश्च महिमा दिव्यादेवीप्रमोक्षणं ततः ॥४८॥
अदत्तान्न जलदाने सुत्राहोर्नृपतेः कथा ।
नहुषस्य कथा कुञ्जलस्य शुकस्य वै कथा ॥४९॥

कामोदायाः कथा चोक्ता च्यवनस्य कथा ततः ।
गुरोः रहस्यकथनं सदाचारादिवर्णनम् ॥५०॥
ऋषिधर्मर्षियोगेन ब्रह्मप्रियात्वमुत्तमम् ।
लीलावतीसुशीलादिसखीनां तत्कथानकम् ॥५१॥
ततो रक्षाश्वपच्यास्तु मोक्षणस्य कथोदिता ।
गुरोर्हरिस्वरूपत्वं सर्वार्पणस्तवस्ततः ॥५२॥
वैष्णवोत्तमतायां तु कौशिकादिनिदर्शनम् ।
गानशिक्षार्जनं चोक्तं नारदस्य ततः परम् ॥५३॥
उलूकस्य गरुडत्वप्राप्तिरुक्ता ततः परम् ।
महा भागवतभक्तचिह्नान्युक्तानि वै ततः ॥५४॥
परीक्षणं चिदम्बराराज्ञ्या उक्तं ततः परम् ।
भगवद्दया राज्याः कृता रक्षा प्रवर्णिता ॥५५॥
विद्यामन्त्रगुरूणां च बलोत्कृष्टत्वमीरितम् ।
अनावरणसेवा च व्रतं दमनकं ततः ॥५६॥
भिन्नतिथौ भिन्नरूपहरेः पूजा प्रकीर्तिता ।
भक्तेर्माहात्म्यकथनं वधूभक्तिरहस्यकम् ॥५७॥
हरेः कृपायाः सर्वस्वं फलं प्रवर्णितं ततः ।
महामन्त्ररहस्यानि सार्थन्यासानि वै ततः ॥५८॥
गायत्री, चोर्ध्वपुण्ड्रादि, गूढार्थज्ञानमित्यपि ।
त्रिपाद्विभूतिश्चैकपाद्दिव्यतादि समीहितम् ॥५९॥
नामभक्त्या ययातेश्च प्रभावो वर्णितस्ततः ।
हरेः प्रसन्नतासाधनानां च वर्णनं ततः ॥६०॥
कदर्यस्य कथा, भिन्नफलं, साधुसमागमः ।
ब्रह्मिष्ठतासाधनानि पतिव्रतावृषास्तथा ॥६१॥
सुचन्द्रिकागोपिकाँयाश्चमत्कारकथोदिता ।
मनोः पत्न्याः कथा ब्रह्मप्रथायास्तूदिता ततः ॥६२॥
दीर्घायुसाधनं चोक्तं शतगृध्रप्रमोक्षणम् ।
विनोदिन्याः शतपुत्रत्यागिता चोदिता ततः ॥६३॥
वात्स्यायनप्रसंगेन गणिकानां तु मोक्षणम् ।
साधुत्वे हेतवश्चोक्ता मोक्षोपायाः प्रकीर्तिताः ॥६४॥
वृषायनेन चरकाऽविता श्येनादुदीरितम् ।
चित्रकेतोश्च मालत्याः सत्सेवाफलमीरितम् ॥६५॥
विप्रेभ्यः साधवः श्रेष्ठा उक्ता विष्णुनिदर्शनात् ।
दुर्गायाश्चापि दृष्टान्तं, सहधर्मा उदीरिताः ॥६६॥
प्रत्यक्षनिरयाः प्रोक्ताः कर्बुकस्य निदर्शनम् ।
स्वर्गगामिन उक्ताश्च प्रोक्ता घातकिनस्तथा ॥६७॥
साधवो जंगमं तीर्थं प्रोक्तं सर्वस्य पावनम् ।
द्विजापुत्रकुशांगस्य वृषलोत्पादितस्य तु ॥६८॥
ब्रह्मिष्ठत्वं कृशानुत्वं तपोभिश्चेन्द्रकृद्दरात् ।
निदर्शनानि बहूनि जातीनां परिवर्तने ॥६९॥
भंगास्वननृपस्यापि नारीत्वे च निदर्शनम् ।
निदर्शनं ब्रह्मयोगबले विपुलयोगिनः ॥७०॥
लोमकपर्दकरक्षोनाशो रुचेर्वृषावनम् ।
इन्द्रपराजयो गुरोः प्रसन्नता च वर्णिता ॥७१॥
अश्विमग्नस्य गोकर्णतीर्थस्योद्धरणं ततः ।
कुवलाश्वकथा त्रिशंकोश्च ततः कथोदिता ॥७२॥
प्रणद्ब्रह्मकथा कश्यपस्य तथा कथोदिता ।
मोक्षसाधनमानानि सतां समागमो बलम् ॥७३॥
आलम्बायनसाधोश्च संगाल्लक्षप्रमोक्षणम् ।
गृध्रश्वपच्योश्चापि शबरस्य च मोक्षणम् ॥७४॥
सत्सु लक्ष्मीनिवासश्च श्रीवासा उदितास्ततः ।
अवतारे भृगोः शापः स्वेच्छा हेतुस्तथोदितः ॥७५॥
गोदानं च गवाराधनाव्रतं कथितं तथा ।
भारुण्डोद्धरणं चापि प्रेतोद्धारस्य कारणम् ॥७६॥
वृषादर्भेश्च सूर्यस्य दानपात्रे निदर्शनम् ।
नरशायतरकरस्य श्रीचक्रभासराधुना ॥७७॥
मुक्तिः कृता च धनिनां ब्रह्मसत्रावबोधनम् ।
पत्नी विवाहिता सर्वधर्ममूलं प्रदर्शितम् ॥७८॥
अत्रार्थे जांघलामखनिदर्शनं प्रवर्णितम् ।
विविधास्तु सुताः पुत्र्यः पतयः पत्निकास्तथा ॥७९॥
शंभलवारसूतस्य साधुभक्तस्य मोक्षणम् ।
कल्याणभक्तसेवायाः परीक्षणं तथा ततः ॥८०॥
भूतले श्रीकृष्णनारायणप्राकट्यमीरितम् ।
श्रीपुरुषोत्तमसाम-सहस्रनामवर्णितम् ॥८१॥
पुरुषोत्तमसाम्नश्च फलं चाक्षरलंभनम् ।
भूदानादिफलं चान्नदानादिजं फलं तथा ॥८२॥
दीर्घशीलाभिधयोरास्तिकनास्तिकयोर्द्वयोः ।
यमद्वारा ह्युपदेशो मोक्षणं कथितं ततः ॥८३॥
ब्रह्मसत्यास्तु योगिन्या देहदाने निदर्शनम् ।
वैवर्तभूपतेः पत्न्यां देवरात् पुनरुद्भवः ॥८४॥
रोमपादपशुपस्य मोक्षणं कथितं ततः ।
नग्नभंगाख्यचौरस्य सत्संगाद् रक्षणं तथा ॥८५॥
भागवतायनसाधुकृतमुज्जीवनं पुनः ।
दावदग्धवनस्याऽपि चमत्कारस्तथोदितः ॥८६॥
कामदेवजभस्मोत्थभण्डासुरस्य नाशने ।
ललिताश्रीमहालक्ष्मीसैन्यानां चापि योवनम् ॥८७॥

भण्डासुरविनाशश्च ललिताश्रीस्तवस्ततः ।
पारितोषिकदानानि मन्दिराणि च षोडश ॥८८॥

चिन्तामणिगृहस्थाभिः सेविकाभिः प्रसेवनम् ।
काञ्चीपुर्यां महालक्ष्म्या द्वेधा स्वरूपतोदिता ॥८९॥

दीक्षाविधानकं देवत्रयवासस्तथोदितः ।
पञ्चत्रिंशदूर्ध्वशतनामानि ललिताश्रियाः ॥९०॥

पुत्रीप्राप्तिप्रदं दानं व्रतं चेति प्रकीर्तितम् ।
साधुसेवाव्रतं व्रतोत्तमं तत उदीरितम् ॥९१॥

तुलापुरुषदानं च हिरण्यगर्भदानकम् ।
ब्रह्माण्डदानकं कल्पवृक्षदानं च कीर्तितम् ॥९२॥

गोसहस्रमहादानं स्वर्णकामगवार्पणम् ।
हिरण्याश्वमहादानं हिरण्यरथदानकम् ॥९३॥

हेमहस्तिरथदानं पञ्चलांगलदानकम् ।
हेमधरामहादानं विश्वसुदर्शनार्पणम् ॥९४॥

मालाचक्रप्रदानं च भूषादानं प्रकीर्तितम् ।
महाकल्पलतादानं कल्पप्रियाप्रदानकम् ॥९५॥

कल्पकान्तप्रदानं च गुरुदेवादिदानकम् ।
मन्दिरार्पणमेवापि सप्तसागरदानकम् ॥९६॥

महाभूतप्रदानं च लक्ष्मीदानं प्रकीर्तितम् ।
ग्रहशान्तिप्रपूजादि लक्षकोटिजपादिकम् ॥९७॥

लोहांगारस्य वैश्यस्य ग्रहशान्तौ निदर्शनम् ।
महालक्ष्म्या द्वे शते च नामान्युक्तानि वै ततः ॥९८॥

महालक्ष्मीप्रतिमा च तथा तन्मण्डलं ततः ।
पितृकन्यानां निजेष्टफलाप्तिर्नामसंस्तवात् ॥९९॥

लक्ष्मीसौभाग्यशयनव्रतं च विधिरीरितः ।
घटलक्ष्मीव्रतं सर्वमंगलं च तथा व्रतम् ॥१००॥

सांख्ययोगव्रतं रसकल्याणललिताव्रतम् ।
आर्द्रानन्दरमानारायणव्रतं च कीर्तितम् ॥१०१॥

शारदेयव्रतं प्रोक्तं कल्याणीकमलाव्रतम् ।
विशोकललिताद्वादशीव्रतं च तथोदितम् ॥१०२॥

विभूतिललिताकृष्णलालनं व्रतमीरितम् ।
पुष्करवाहननाम्नो नृपस्य च निदर्शनम् ॥१०३॥

एकषष्टिव्रतानां च निर्देशोऽपि प्रकीर्तितः ।
पापिनां मोक्षकृत्तीर्थं कुंकुमवापिकात्मकम् ॥१०४॥

कालमृत्युबलशान्त्यै मन्त्रपूजादि चेरितम् ।
द्वापरीयमानवानां धर्मकर्मादि दर्शितम् ॥१०५॥

युगधर्मादिभिन्नत्वं चोत्पातशान्तिकर्म च ।
दुःस्वप्नशान्तिकर्माऽपि ग्रहयज्ञस्तथोदितः ॥१०६॥

शुभस्वप्नशकुनानि चाशुभे शान्तिकर्म च ।
हनूमतो मनुश्चापि प्रतिष्ठार्थं च वर्णितम् ॥१०७॥

महापापादिनाशार्थमुपायाः कीर्तितास्तथा ।
धर्माधर्मवंशयोश्च वर्णनं च ततः परम् ॥१०८॥

दुःसहस्य निवासादि तद्वंशोपद्रवादि च ।
कार्याकार्यविवेकश्च नक्षत्रादिषु कीर्तितः ॥१०९॥

सरोजिन्याः कुंभकन्यायाश्चतुर्वैधव्यमित्यपि ।
सतीश्वरीसेवया पद्मिनीत्वं च रमालकम् ॥११०॥

चतुर्दशमनूनां च जन्यादि च ततः परम् ।
रुचिप्रजापतेराख्यानकं चापि प्रकीर्तितम् ॥१११॥

अनादिश्रीकृष्णनारायणस्य तु हिमालये ।
ब्रह्मप्रियादियुक्तस्य विहारोऽपि निरूपितः ॥११२॥

हीरकादिसुरत्नानामुत्पत्तिर्बलराक्षसात् ।
बलस्य पार्षदस्याऽत्र शापेन पतनं ततः ॥११३॥

दैत्यत्वं तच्छरीराच्च रत्नोत्पत्तिः प्रकीर्तिता ।
सर्वजातिमणीनां च गुणाद्यपि निरूपितम् ॥११४॥

चतुर्दशावताराश्च हरेश्चापि मनुष्वपि ।
जीवच्छ्राद्धविधिश्चापि संसारस्य निवर्तनम् ॥११५॥

व्यपोहनं ततः स्तोत्रं यज्ञे कन्यादिदानकम् ।
मृत्युकारणनाशे वै भावायननिदर्शनम् ॥११६॥

श्रीमानसच्चिदानन्दयोगिनोश्च विचारणम् ।
मुक्तिधर्मे च देहास्तिक्षयहेतव ईरिताः ॥११७॥

मायालयस्य हेतुश्च परधामगतिस्तथा ।
सद्विद्यायनपत्न्याश्च नैष्कर्म्ये प्रश्न उत्तरम् ॥११८॥

शुभाशुभादिभोगश्च विज्ञानं च प्रकीर्तितम् ।
मुक्तिधर्मविवेकश्च ह्यध्यात्मादिविवेचनम् ॥११९॥

भिक्षायनमहर्षेश्च गार्हस्थ्ये निर्गुणात्मता ।
नित्याश्रयायाः पुत्रस्य भक्त्या मोक्षणमीरितम् ॥१२०॥

कुष्ठिनो व्याघ्रनाम्नश्च कुष्ठनाश उदाहृतः ।
उत्तमस्य ग्रामयाजिनश्च मुक्तिः समीरिता ॥१२१॥

विरालस्य राजयक्ष्मविनाशो मोक्षणं तथा ।
पृथ्वीधरस्य पुत्रस्याऽन्धस्य दृष्टिप्रदानकम् ॥१२२॥

सागरस्य तु शूद्रस्याऽरुग्णता भग्नपादयोः ।
वृक्णदेवस्य वृक्णत्वनाशो भावस्य मोक्षणम् ॥१२३॥

पाशुपतेशविप्रस्य शापमोक्षकथा ततः ।
बाणांगणो मद्यविक्रेता सत्संगात् प्रमोचितः ॥१२४॥

मृतादनश्चर्मकारो धेनुसेवः प्रमुक्तिगः ।
सुमन्तुकर्षेर्योगेन शंकुधरोऽपि मुक्तिगः ॥१२५॥

महासौराष्ट्रीयसंघो लुण्टकेभ्यः प्ररक्षितः ।
धनिष्ठकेशवणिजो व्यवायान्मोक्षणं कृतम् ॥१२६॥
ब्रह्मभस्य तु नृपतेर्भक्त्या राक्षसमोक्षणम् ।
देवविश्रामस्य काण्डिकास्त्रीहत्याविमोक्षणम् ॥१२७॥
हर्षुलभक्तपुत्रस्य मृतस्योज्जीवनं कृतम् ।
शाणधरस्य कुष्ठिनो रोगनाशः प्ररक्षणम् ॥१२८॥
निम्बदेवाख्यभक्तस्य वृषहत्यानिवारणम् ।
एकान्तिकानामैश्वर्यब्रह्मनिष्ठादि चेरितम् ॥१२९॥
कालीन्दरस्य भाण्डस्य भक्त्या मोक्षणमीरितम् ।
रायणदेवनृत्यज्ञे गर्भस्थे ज्ञानसञ्चयः ॥१३०॥
बोधायनोपदेशेन मोक्षश्चापि तथोदितः ।
व्रतर्द्विगायनज्ञस्य पुण्ड्रवर्मनृपस्य च ॥१३१॥
सप्रजस्य वैष्णवत्वे मोक्षणं तत ईरितम् ।
तूलवायिसूत्रवायकस्य मोक्षश्च वर्णितः ॥१३२॥
जंगलदेवप्रभृतिकाष्ठहारप्रमोक्षणम् ।
वात्सल्यधीरभक्तस्य साधुत्वं भार्यया सह ॥१३३॥
तिलकरंगवनपालस्य मुक्तिरुदाहृता ।
नाङ्गभक्तस्य च महामयभक्तस्य रक्षणम् ॥१३४॥
कर्षुकाणां रक्षणं च लुण्टकेभ्यः प्रकीर्तितम् ।
सागराख्यकिरातस्य कुसुलश्चाक्षयः कृतः ॥१३५॥
सारंगहूणभक्तस्य महिषीरक्षणं कृतम् ।
यज्ञराघपुष्कसस्य मोक्षप्राप्तिस्ततोऽपि च ॥१३६॥
कपिक्षयाख्यचाण्डालमोक्षणं कथितं ततः ।
नालीकरलोहकारभक्तमोक्षश्च वर्णितः ॥१३७॥
मंगलदेवचर्मकृद्विषवारणमीरितम् ।
हरिदासरथकारमोक्षस्ततश्च वर्णितः ॥१३८॥
शिलाहृद्दामशिलादभृत्यानां रक्षणं कृतम् ।
शिल्पिनः सञ्जयदेवस्याऽपि गजात्प्ररक्षणम् ॥१३९॥
संभरदेवचित्रकृन्मोक्षणं कथितं ततः ।
मौक्तिकेशिशिलांगारखनिस्वामिप्रमोक्षणम् ॥१४०॥
लुब्धकस्य चक्रधराख्यस्य पापादिनाशनम् ।
वाटधरस्य च पिशुनस्य खसस्य मोक्षणम् ॥१४१॥
द्वैपीराज्ञ्याः सुतारसिंहभूपदण्डान्मोक्षणम् ।
शिवजयस्य च प्रासादकारस्य प्रमोक्षणम् ॥१४२॥
जालकृत्संगरयादस्कस्य कृष्णस्य दर्शनम् ।
उद्यमश्रीभरवाटादीनां च मोक्षणं ततः ॥१४३॥
दीर्घरवोष्ट्रपालानां साधुयोगेन मोक्षणम् ।
रत्नप्रभस्यापि साधुयोगेनोक्तं प्रमोक्षणम् ॥१४४॥
गदार्दनेशवैद्यस्य मुकुन्दियाश्च मोक्षणम् ।
देश्यावनस्य कोशस्वामिनश्चापि प्रमोक्षणम् ॥१४५॥
निगमिकानापितान्या रूपं च धृतवान् हरिः ।
स्वर्णधन्वनृपतेश्च राज्ञ्याः सेवां व्यधादिति ॥१४६॥
तेषां प्रमोक्षणं चापि प्रकीर्तितं ततः परम् ।
पूर्वजन्मनि धीवर्या आभीर्या दैत्यतो हरिः ॥१४७॥
रुटाणकया रक्षणं मोक्षणं च कृतवानिति ।
मत्स्यमारधीरपर्वादीनां तु यमयातनाः ॥१४८॥
ततो नौपतिजन्मानि मोक्षणं कथितं ततः ।
शूलीप्रदतारकादर्शकस्य मोक्षणं ततः ॥१४९॥
ज्वालाप्रसादसंज्ञस्यांऽगारकस्य प्रमोक्षणम् ।
गरदस्य लवादनप्रधानस्य प्रमोक्षणम् ॥१५०॥
विखण्डलाख्यशस्त्रधृङ्मोक्षणं कथितं ततः ।
जीर्णोद्भवकृषीकृतः साधुयोगेन मोक्षणम् ॥१५१॥
अनादिश्रीकृष्णनारायणस्य मे तु जन्मतः ।
सप्तदशे वार्षिकाहे जयन्त्युत्सव ईरितः ॥१५२॥
अस्य द्वापरसन्तानखण्डस्य श्रवणस्य च ।
दानस्य च मन्त्रजपस्यापि माहात्म्यमीरितम् ॥१५३॥
ततो द्वापरसन्तानकथानां सार ईरितः ।
लक्ष्मि राधे रमे कृष्णे पद्मावति च माणिकि ॥१५४॥
नारायणि ब्रह्मप्रियाः कमले चाऽमृते रमे ।
हरिप्रियाः समस्ताश्च ममाऽऽत्मा आश्रिता मया ॥१५५॥
मदात्मिकाः कथाः सर्वा भवत्यस्तासु संस्थिताः ।
सन्तो नराश्चिदो नार्य आनन्दोऽहं तयोरपि ॥१५६॥
सच्चिदानन्दरूपाश्च कथा इमास्त्रिसंहिताः ।
ब्रह्म सन्तो ब्राह्मयः साध्यश्चित्यस्ता यूयमेव ह ॥१५७॥
तयोस्तु तत्त्वयोश्चाहमानन्दः परमेश्वरः ।
सन्त आत्मान एवैते चिच्छक्तिः प्रकृतिर्मम ॥१५८॥
मूला माया दिव्यराधा तदानन्दोऽहमेव च ।
सन्तः सर्वेऽवतारा मे चित्यस्तदंगना मम ॥१५९॥
तयोरानन्दकृच्छ्रीमत्पुरुषोत्तम इत्यहम् ।
सत् सत्यं कारणं सर्वं चित् चैत्यं कार्यमित्यपि ॥१६०॥
तयोरानन्ददाताऽहं सर्वेशः परमेश्वरः ।
सन् व्यतिरेकरूपोऽहं चिदन्वयी भवामि च ॥१६१॥
तयोरन्तरवासश्चानन्दी श्रीकृष्णरूपवान् ।
सोऽहं सर्वत्र सरलो दुर्लभोऽपि कृपावशः ॥१६२॥
भवामि भक्तभक्तानीगोचरः सर्वसृष्टिषु ।
ब्रह्माण्डेषु समस्तेषु ह्यसंख्यरूपधृक् स्वयम् ॥१६३॥

न रूपाणां स्वरूपाणां कार्याणां मम सर्वथा ।
अन्तः संख्या तथेयत्ता विद्यते चेति वा क्वचित् ॥१६४॥
मे भक्तानां गणना न चरित्राणां न चापि तु ।
न संख्याऽस्ति कथानां मे ब्रह्माण्डेषु कदाचन ॥१६५॥
अमृतानि समस्तानि पीयूषाणि च यान्यपि ।
यावत्यश्च सुधाः सन्ति खण्डेऽत्र सर्वमिष्टताः ॥१६६॥
यानि समस्तप्रेमाणि स्नेहा ये भक्तगोचराः ।
अनुग्रहा हरेः सर्वे खण्डेऽत्र निहिता रमे ॥१६७॥
साधनानि समस्तानि हेतवश्चाऽखिला अपि ।
कारणानि फल्यूञ्जि तद्गतार्थत्वमत्र वै ॥१६८॥
यानि फलानि यज्ञानां यानि फलानि जन्मनाम् ।
यानि फलानि भक्तेश्च तत्फलिताऽत्र सर्वथा ॥१६९॥
यन्नैर्मल्यं तु मुक्तानां यन्नैर्मल्यं तु योगिनाम् ।
यन्नैर्मल्यं स्वभक्तानां तदेवाऽस्य प्रसेविनाम् ॥१७०॥
पापिनां पापनाशे च यथा कृष्णस्य तीव्रता ।
तथैव द्वापरसन्तानस्यापि लक्ष्मि तीव्रता ॥१७१॥
भक्तास्तरन्ति भक्त्या वै स्निग्धाः स्नेहेन माधवे ।
पापास्तरन्ति योगेन कृपया साधुसेवया ॥१७२॥
दुष्टा असुरा दैत्यास्तु साक्षाच्छ्रीकृष्णयोगतः ।
अथ सर्वेऽपि ते द्वापरसन्तानस्य संश्रवात् ॥१७३॥
याश्च देवेषु दैत्येषु मन्त्रेषु सिद्धयोगिषु ।
सिद्धयस्ता भवन्त्यस्य श्रोतुर्वक्तुश्च मोदितुः ॥१७४॥
यानि मोक्षविमानानि गजाद्याश्चातिवाहकाः ।
सिद्धदेव्यस्तथा नेत्र्यस्तान्यायान्त्यस्य संश्रयात् ॥१७५॥
सत्यधर्मफलं सर्वं त्रेताधर्मफलं तथा ।
द्वापरस्यधर्मफलं सर्वमस्य तु संश्रवात् ॥१७६॥
नरा नारायणत्वं वै नारायणीत्वमंगनाः ।
अनुभये वेषभूषादित्वं यन्त्यस्य संश्रवात् ॥१७७॥
हरेः कृपा कृपा साधोर्लक्ष्म्याः कृपाऽतिनिश्चिता ।
जायते द्वापरसन्तानकाश्रयिणि देहिनि ॥१७८॥
ऊर्ध्वपुण्यानि सर्वाणि सर्वोर्ध्वधिष्ण्यकान्यपि ।
ऊर्ध्वोर्ध्वाऽऽनन्दसन्दोहाः श्रोतुश्चास्य भवन्ति हि ॥१७९॥
दुष्प्रापं दुर्गमं दुःस्थं यन्निराशं भवेदपि ।
सुप्रापं सुगमं सुस्थं साशं त्वस्य श्रवेण वै ॥१८०॥
नमोऽनादिकृष्णनारायणाय चावतारिणे ।
चिदचिदात्मवपुषे सर्वान्तर्यामिणे नमः ॥१८१॥

इत्येकश्लोकमात्रेण फलं द्वापरखण्डजम् ।
लभेत चाऽवशो देही म्रियमाणोऽपि वा क्वचित् ॥१८२॥
यस्य वा विद्यते नैव श्रवणस्य क्षणो वने ।
सोऽपि स्मरणमात्रेण मुच्यते किं श्रवात् पुनः ॥१८३॥
इत्येवं द्वापरसन्तानस्य माहात्म्यमुत्तमम् ।
कथितं ते मया लक्ष्मि सर्वाभ्यश्चापि सर्वथा ॥१८४॥
अथाऽऽययौ श्वेतपुमान् चतुर्मुखश्चतुर्भुजः ।
चतुष्पादो ननामाऽसौ प्रसन्नः पुरुषोत्तमम् ॥१८५॥
उवाचाऽहं सत्ययुगो मोक्षाऽर्होऽहं भवत्कृतः ।
कृतसन्तानयोगेन यास्यन्ति मोक्षणं जनाः ॥१८६॥
अथाऽऽययौ पीतपुमान् त्रिकन्धरस्त्रिबाहुमान् ।
त्रिचरणो ननामाऽसौ हसन् श्रीपुरुषोत्तमम् ॥१८७॥
जगादाऽहं युगस्त्रेता मोक्षाऽर्होऽहं भवत्कृतः ।
त्रेतासन्तानयोगेन मुक्तिं यास्यन्ति देहिनः ॥१८८॥
अथाऽऽययौ द्विचरणो द्विभुजो द्विमुखः पुमान् ।
रक्तवर्णः प्रमोदाढ्यो नेमे श्रीपुरुषोत्तमम् ॥१८९॥
अट्टहास्येन सहितो जगाद द्वापरोऽस्म्यहम् ।
भवता द्वापरसन्तानकेन मोक्षदः कृतः ॥१९०॥
यास्यन्ति देहिनो मुक्तिं मम सन्तानकेन वै ।
अथाऽऽययौ ततो लक्ष्मि विमना इव दुर्बलः ॥१९१॥
अफुल्लहृदयश्चापि सुखानन्दविवर्जितः ।
कृष्णवर्णः सशोकश्च दीन इव पुमान् परः ॥१९२॥
अश्रूणि सहसा मुञ्चन् चकार दण्डवन्मुहुः ।
अशुद्ध इव पापात्मा विवासितो यथा जनैः ॥१९३॥
ज्ञापयन् स्वं निजगाद कल्मषोऽहं कलिर्युगः ।
न मे स्थानं हि देवेषु महर्षिषु न वै तथा ॥१९४॥
सिद्धेषु सत्सु साध्वीषु न मे स्थानं कदाचन ।
दुःख्यहं चात्र सृष्टौ ते भगवन् मां समुद्धर ॥१९५॥
यथा त्रयाणां भ्रातॄणां योगेन यान्ति मोक्षणम् ।
तथा ममापि योगेन देहिनो यान्तु मोक्षणम् ॥१९६॥
स्वागतं मे च देवादौ कृपया तेऽस्तु माधव ।
येनाऽहं पापवानत्र भवद्योगेन पुण्यवान् ॥१९७॥
भवामीति नमाम्यत्र स्वामिने श्रीदयालवे ।
इत्युक्तोऽहं कृष्णनारायणः कृपावशोऽवदम् ॥१९८॥
तिष्यसन्तानकं खण्डं रचयित्वा तवापि च ।
भ्रातृत्रयसमानं त्वां करिष्ये मुदितो भव ॥१९९॥

श्रुत्वा नत्वा ययुर्लक्ष्मि चत्वारो भ्रातरो युगाः ।
अतश्चेतः परस्तिष्यसन्तानको भविष्यति ॥२००॥

यः श्रीपरब्रह्म बृहत्परः पुमान्,
　　सर्वावतारैश्च बृहत्प्रमुक्तकैः ।
ईशैश्च जीवैरभिवन्दितो हृदि,
　　बहिश्च सोऽव्यात्पुरुषोत्तमोऽत्र वः ॥२०१॥

यो बालकृष्णो भुवि कम्भरासुतो,
　　गोपालकृष्णात्मजसर्ववल्लभः ।
सर्वात्मसृष्ट्यादिधृतावतारकः,
　　सर्वावतारी सततं प्ररक्षतात् ॥२०२॥

पञ्चविंशतिसहस्राणि शतं षष्टिर्द्वयं तथा ।
श्लोका द्वापरसन्ताने भवन्ति श्वेतनिर्मिताः ॥२०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां तृतीये द्वापरसन्ताने द्वापरसन्तानस्य विषयकथोद्देशो द्वापरसन्तानविशेषमाहात्म्यं चतुर्युगसन्तानानां प्रत्यक्षागमः कलेर्मोक्षार्हत्वप्रार्थना तिष्यसन्तानप्रस्ताव आशीर्वादश्चेति निरूपणनामा सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥

**॥ इतिश्रीलक्ष्मीनारायणसंहितायां तृतीयो द्वापरसन्तानखण्डः समाप्तः ॥**

॥ ओं श्रीपरपुरुषोत्तमभगवदर्पणमस्तु ॥

मुद्रक—ज्योतिष प्रकाश प्रेस, कालभैरव मार्ग, वाराणसी ।

# श्रीलक्ष्मीनारायणसंहितायां द्वापरसन्तानस्य शुद्धिपत्रम्

| पृष्ठम् | श्लोकः | अशुद्धम् | शुद्धम् | पृष्ठम् | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| ९ | १९ | सान्ताणरीश्वर | सान्तारणीश्वर | १८० | ८ | चाङ्ग | चाऽनंग |
| २२ | ११ | भक्तिधर्मै | भक्तिर्धर्मै | १८१ | ४१ | गहेश्वरान् | गदेश्वरान् |
| २७ | ८७ | श्वेरयद् | चेतरद् | १८२ | ७६ | ऽऽनकु | ऽऽननकु |
| २९ | ५४ | शिवशंजिके | शिवराजिके | १९१ | ६४ | रुती | सती |
| ३० | ९७ | ह्याधवश्च | साधवश्च | १९३ | ८७ | रौत्र | रात्रौ |
| ३९ | ८ | मत्त्या | भक्त्या | १९७ | १०१ | गणाम् | गणान् |
| ३९ | २३ | शापनि | मया शापनि- | २०० | १० | वैवे | वैते |
| ३९ | ३७ | स्त्वैक्षरा | स्त्वक्षरा | २१० | ३३ | तोच्छया | तीच्छया |
| ३९ | १०० | तथा | तथा तथा | २१४ | ८३ | रुरुः | तुरुः |
| ४६ | ५२ | शेलाकारं | शैलाकारं | २१५ | १९ | ममः | यमः |
| ५२ | ३३ | यत्नश्च | भक्तिमार्गस्थाप- | २१५ | २० | मानयासु | मानयामासु |
| | | | नेन कोटीनां च | २१५ | ४२ | सदोरत्नं | सरोरत्नं |
| | | | भवेदिह ॥३३॥ | २२८ | ८९ | मुत्तम् | मुत्तमम् |
| | | | यत्नश्च | २२९ | १० | स्वर्गं | पश्य स्वर्गं |
| ५२ | ४६ | अधैर्य | अथैवं धैर्य | २३४ | ७९ | पुष्पैश्च | पुण्यैश्च |
| ५९ | १७ | सनित्थका | सनत्थिका | २३७ | १ | ऽभवत् | ऽभवम् |
| ६८ | ८ | राजस्य | राज्यस्य | २३७ | ५ | मुक्तिदो | भुक्तिदो |
| ७० | ८३ | देवादयाश्च | देवालयाश्च | २३९ | ५२ | भूयोऽपि | भूपोऽपि |
| ७३ | ८३ | नाराजन्यं | नाशजन्यं | २३९ | ५३ | ऽभवन् | ऽभवम् |
| ८८ | ५१ | कबम्ले | कम्बले | २४१ | ४२ | स्वसृपस्य | स्वरूपस्य |
| ८८ | ५३ | ष्माण्डा | कुष्माण्डा | २४३ | ९ | गोचरः | गोचराः |
| ९९ | ४३ | त्वरव्य | त्वरण्य | २४६ | १०१ | अयत्सु | असत्सु |
| १०६ | ५२ | पार्शनी | स्पार्शिनी | २४७ | ४२ | वनारणा | वनारण्य |
| १०७ | ७८ | इषणा | एषाण | २५२ | १० | किमिच्छवैःसु; | किमिच्छुकसु |
| १०९ | २७ | यञ्त्रयण | यज्ञत्रयण | २५५ | १० | समयद्वासान् | सममद्वासान् |
| ११३ | १९० | गौली | गौकुली | २६७ | ३७ | अनादिनः | अनादिनोऽनादयः |
| १२८ | १८ | ह्यमीतवत् | ह्यभीतवत् | २८२ | १२ | सद्धेनु | सद्धेतु |
| १३१ | ५० | नाम्नतोपमम् | नामृतोपमम् | २८७ | १ | यथोद्धरो | यथोद्धारो |
| १३८ | ७५ | सन्धार्तिकं | सन्ध्यार्तिकं | २९० | १० | मनुद्वेष्टा | मनुदेष्टा |
| १३९ | १०३ | हास्तयेत् | हासयेत् | २९१ | ३२ | देह | देव |
| १४४ | ८६ | रायनस्य | शयनस्य | २९३ | ९५ | राक्षाश्च | राक्षसाश्च |
| १४८ | १० | गुसर्ब्रं | गुरुर्ब्रं | २९५ | ६५ | पुषाहन्त | पुषादन्त |
| १६६ | २७ | दहदत्यपि | दहत्यपि | ३०३ | ९३ | स्वर्णम | स्वर्णक |
| १७७ | १७ | दह | अह | ३०३ | १०४ | पाद्यानि | पापानि |

| पृष्ठम् | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३०२ | ५८ | मैणीन् | मणीन् |
| ३०५ | ८३ | कीन | कीनां |
| ३१२ | ६ | आख्यात्मा | आख्यात्मात्मा |
| ३१५ | १५ | स्यो | स्वो |
| ३२३ | ४१ | स्फुर्तिमान् | स्फूर्तिमान् |
| ३२६ | ४६ | दुरीत | दुरित |
| ३२९ | ३९ | विरामणं | विरामणग्रामं |
| ३३० | ६९ | विनेश | विवेश |
| ,, | ७२ | न्यद्यानि | न्यवानि |
| ,, | ९० | नवेदना | निवेदना |
| ३४५ | ७० | सन्नाह्य | सन्नाहय |
| ३४६ | ९८ | श्रत | श्रुत |
| ३४९ | ९५ | कल्पस्त्रं | कल्यस्त्रं |
| ३५१ | ७४ | माधवश्चो | माधवश्रीश्चो |
| ३५४ | ४९ | लाटपा | पाटला |
| ३५६ | १९ | जानन्ते | जायन्ते |
| ३६० | ६ | बन्धातु | बन्धानु |
| ३६४ | २१ | क्रियार्थम् | क्रियार्थकम् |
| ३६८ | ९४ | महाभार्या | महामार्या |
| ४०१ | ६८ | जीरकानि | जीरकाणि |
| ४०७ | ५१ | आर्दानिन | आर्दानन्द |
| ४०९ | ४५ | कृष्णये | कृष्णाये |
| ४१० | ७२ | वेश्या | वेश्यया |
| ,, | ८४ | लवण्या | लावण्या |
| ४१२ | १४ | नारिकेल | नालिकेर |
| ,, | २६ | द्विजायते | द्विजातये |
| ४१३ | ५८ | ,, | ,, |
| ४१४ | ९६ | निन्या | निश्या |
| ४२१ | १०१ | नेकभक्ताः | मेकभक्ता |
| ,, | ५७ | सिद्धना | सिद्धाना |
| ४२४ | २५ | विभवश्च | भिक्षवश्च |
| ४२५ | ७८ | रूनकाः | ऊनकाः |
| ४२६ | २ | गतिः | गीतिः |
| ,, | १२ | दागयाक्षी | नागयाक्षी |
| ,, | ,, | सैकदशी | सैकादशी |
| ,, | १८ | पाक्षव्यः | पाशव्य |
| ४२७ | ५२ | रीतिः | रीतीः |

| पृष्ठम् | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४३० | ४२ | देवना | देवाना |
| ,, | ५४ | ध्वान्न | ध्वान्त |
| ४३१ | ८२ | त्वनम्रे | त्वनभ्रे |
| ४३५ | ११ | स्फुर्तिः | स्फूर्ति |
| ४४० | ११ | त्याश्वितं | त्याश्रितं |
| ४४७ | ६४ | छात्राणि | छात्त्राणि |
| ४४८ | १०५ | हापरिणी | पहारिणी |
| ४४९ | १३२ | त्वम्व | त्वम्ब |
| ४५४ | ७० | सूक्षमुखी | रूक्षमुखी |
| ,, | ८२ | मानसम्पदा | मानसमम्पदा |
| ४५६ | ८ | सृष्टिदानवा | सृष्टिरानवा |
| ४५७ | ६७ | रोगदा | रोगदा |
| ४५८ | ९० | निरस्तोऽघ | निरस्तोऽघ |
| ,, | ९५ | मायापि | मायावि |
| ,, | २ | भूपा | भूपा |
| ४५९ | ३५ | तटः | ततः |
| ४५९ | ४१ | योनश्च | योर्नश्च |
| ४६३ | ६३ | ऽपकला | ऽपफला |
| ४६४ | ४ | नातिपापं | नातितापं |
| ,, | ९ | साऽभवन् | सोऽभजन् |
| ४६६ | ७ | प्रवीक्ष्याम्मि | प्रवीक्ष्यापि |
| ४६९ | ६ | अपूनयत् | अपूजयत् |
| ४७८ | ६१ | श्रीरे | क्षीरे |
| ४८४ | ७२ | जीवपते | जीवपति |
| ४८९ | २१ | ये | मे |
| ४९७ | १ | वदश्रा | वदाऽत्र |
| ५१२ | ७५ | श्रपयस्ते | श्रयस्ते |
| ,, | ८० | वैतृणर्यं | वैतृण्यं |
| ५१६ | ४ | भवामिति | भवामीति |
| ५१९ | २४ | कथया | कथयाऽऽ |
| ५२० | ४२ | समाश्वि | समाश्लि |
| ५२२ | ३३ | मर्शनं | दर्शनं |
| ,, | ३९ | रोमे | रेमे |
| ५२४ | ३२ | साधाविष्णा | साधोविष्णा |
| ५३२ | ४९ | तूद्वारं | तूद्वारं |
| ५४० | ४० | ह्मचर्यं | ब्रह्मचर्यं |
| ५४१ | ६८ | कर्मणो | कर्णयो |
| ५४२ | १० | मन्तुं | गन्तुं |

| पृष्ठम् | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ५४३ | ३७ | कम्पनाना | कम्पमाना |
| ५४९ | ३६ | चाछमयं | चाऽघमयं |
| ५५२ | ४१ | घुरानन्द | धुरानन्द |
| ” | ४५ | ना | नः |
| ५५५ | ९७ | प्रता | व्रता |
| ५६३ | ७२ | नाम्यां तथा | च नागिन्यां |
| ५६७ | ९ | मय मूर्ति | मम मूर्ति |
| ५७३ | १२ | ककुभ्नी | ककुद्मी |
| ५८३ | ४८ | तेन | ते न |
| ५९१ | १०१ | लभेच्चापि | लसेच्चापि |
| ” | २१ | लभेत् | लसेत् |
| ” | ” | पादोर्वा | पादयोर्वा |
| ६०२ | १४ | शकरीं | शकटीं |
| ६०५ | १०७ | लभेत् | लसेत् |
| ६१४ | ४९ | हसनीया | ह्लसनीया |
| ६१९ | २५ | ससर्जानां | सर्जानां |
| ६२३ | ५० | मृगा | मृता |
| ६२५ | ४६ | रहन् | रटन् |
| ६२७ | ९० | लभेत्ततः | लभेत च |
| ६२८ | २६ | लालटो | लाटफलको |
| ६३४ | १९ | यथनै | मथनै |
| ६३८ | २५ | तटन्त्येव | तरन्त्येव |
| ६४१ | ४५ | लभेत् | लसेत् |
| ६४९ | ९ | आलभेत् | आलसेत् |
| ६५२ | २५ | चाराजना | चाऽराजना |
| ६५६ | ५४ | लोजाऽर्जन | लोभार्जन |
| ६५७ | १०५ | लभेच्चापि | लभेताऽपि |
| ६६१ | १० | हुदा | मुदा |
| ६६८ | ८४ | सतं | सततं |
| ६७२ | ९८ | लभेत् | लसेत् |
| ६७२ | २१ | पिशता | पिश्यिता |
| ६७८ | ९ | वाटकम् | वारकम् |
| ६८० | १०२ | वृष्टयऽग्निः | वृष्टयाऽग्निः |
| ६८४ | ८६ | रेस | रस |
| ६८८ | १४४ | आभीर्थां | आभीर्या |